SIDDHÂNTA KAUMUDI

OF

SRI BHATTOJI DEEKSHITA

WITH THE COMMENTARY

SRÎ BÂLAMANÔRAMÂ

OF

SRI VASUDEVA DEEKSHITA.

PÛRVÂRDHAM.

EDITED AND PUBLISHED

BY

S. CHANDRASEKHARA SASTRIGAL,

TEPPAKULAM.

Trichinopoly:

PRINTED BY BR. JOSEPH, S. J., SUPDT.,

ST. JOSEPH'S INDUSTRIAL SCHOOL PRESS.

1910

Registered according to Act XXV of 1867.

ALL RIGHTS RESERVED BY THE PUBLISHER.

॥ श्रीरस्तु ॥

॥ सिद्धान्तकौमुदी ॥

श्रीमद्भट्टोजिदीक्षितविरचिता

॥ पूर्वार्धम् ॥

श्रीमद्वासुदेवदीक्षितप्रणीतया

श्रीबालमनोरमाख्यया

व्याख्यया समुल्लासिता ।



त्रिशिरःपुरवास्तव्येन
आदनूर् शं. चन्द्रशेखरशास्त्रिणा
संशोध्य प्रकाशिता ।

१९१०.

[एतद्ग्रन्थस्य मुद्रणाधिकारस्सर्वोऽपि प्रकाशकेन स्वायत्तीकृतः ।]

त्रिशिरःपुरविराजमाने
सैण्ट् जोजप्स् इण्डस्ट्रियल् स्कूल् मुद्रालये मुद्रिता सती
विजयतेतमाम् ।

॥ कौमुदीपूर्वार्धगतविषयानुक्रमणिका ॥

विषयः	पार्श्वम्
१. संज्ञाप्रकरणम्	१
२. परिभाषाप्रकरणम्	२६
३. अच्सन्धिप्रकरणम्	३४
४. हल्सन्धिप्रकरणम्	७५
५. विसर्गसन्धिप्रकरणम्	९३
६. स्वादिसन्धिप्रकरणम्	९९
७. अजन्तपुल्लिङ्गाः	११०—१८४
१. अदन्तप्रकरणम्	११०
२. आदन्तप्रकरणम्	१४९
३. इदन्तप्रकरणम्	१५१
४. ईदन्तप्रकरणम्	१६३
५. उदन्तप्रकरणम्	१७२
६. ऊदन्तप्रकरणम्	१७५
७. ऋदन्तप्रकरणम्	१७८
८. ॠदन्तप्रकरणम्	१७९
९. ऌदन्तप्रकरणम्	१८०
१०. एदन्तप्रकरणम्	१८१
११. ओदन्तप्रकरणम्	१८२
१२. ऐदन्तप्रकरणम्	१८४
१३. औदन्तप्रकरणम्	१८४
८. अजन्तस्त्रीलिङ्गाः	१८५—२०६
१. आदन्तप्रकरणम्	१८५
२. इदन्तप्रकरणम्	१९३
३. ईदन्तप्रकरणम्	१९७
४. उदन्तप्रकरणम्	२०३
५. ऊदन्तप्रकरणम्	२०४
६. ऋदन्तप्रकरणम्	२०५
७. ओदन्तप्रकरणम्	२०६
८. ऐदन्तप्रकरणम्	२०६
९. औदन्तप्रकरणम्	२०६
९. अजन्ननपुंसकलिङ्गाः	२०७—२२०
१. अदन्तप्रकरणम्	२०७
२. आदन्तप्रकरणम्	२१२

विषयः	पार्श्वम्
३. इदन्तप्रकरणम्	२१३
४. ईदन्तप्रकरणम्	२१६
५. उदन्तप्रकरणम्	२१७
६. ऊदन्तप्रकरणम्	२१८
७. ऋदन्तप्रकरणम्	२१८
८. ओदन्तप्रकरणम्	२१९
९. ऐदन्तप्रकरणम्	२२०
१०. औदन्तप्रकरणम्	२२०
१०. हलन्तपुल्लिङ्गाः	२२१—३०३
१. हकारान्तप्रकरणम्	२२१
२. वकारान्तप्रकरणम्	२२८
३. रेफान्तप्रकरणम्	२२९
४. लकारान्तप्रकरणम्	२३१
५. मकारान्तप्रकरणम्	२३१
६. णकारान्तप्रकरणम	२३६
७. नकारान्तप्रकरणम	२३७
८. धकारान्तप्रकरणम	२५५
९. जकारान्तप्रकरणम्	२५५
१०. दकारान्तप्रकरणम्	२६०
११. थकारान्तप्रकरणम	२७९
१२. चकारान्तप्रकरणम्	२८०
१३. तकारान्तप्रकरणम्	२८६
१४. पकारान्तप्रकरणम्	२९०
१५. शकारान्तप्रकरणम्	२९०
१६. षकारान्तप्रकरणम्	२९२
१७. सकारान्तप्रकरणम्	२९७
११. हलन्तस्त्रीलिङ्गाः	३०४—३१०
१. हकारान्तप्रकरणम्	३०४
२. वकारान्तप्रकरणम्	३०५
३. रेफान्तप्रकरणम्	३०५
४. मकारान्तप्रकरणम्	३०६
५. जकारान्तप्रकरणम्	३०७
६. दकारान्तप्रकरणम्	३०७

विषयः	पार्श्वम्
७. चकारान्तप्रकरणम्	३०८
८. पकारान्तप्रकरणम्	३०८
९. शकारान्तप्रकरणम्	३०८
१०. षकारान्तप्रकरणम्	३०९
११. सकारान्तप्रकरणम्	३०९
१२. हलन्तनपुंसकलिङ्गाः	३११—३२६
१. हकारान्तप्रकरणम्	३११
२. वकारान्तप्रकरणम्	३११
३. रेफान्तप्रकरणम्	३१३
४. मकारान्तप्रकरणम्	३१३
५. नकारान्तप्रकरणम्	३१४
६. जकारान्तप्रकरणम्	३१६
७. दकारान्तप्रकरणम्	३१७
८. चकारान्तप्रकरणम्	३१८
९. तकारान्तप्रकरणम्	३२३
१०. पकारान्तप्रकरणम्	३२५
११. सकारान्तप्रकरणम्	३२६
१३. अव्ययप्रकरणम्	३२७
१४. स्त्रीप्रत्ययप्रकरणम्	३३५
१५. कारकादिविभक्तिप्रकरणम्	३९७—४६६
१. प्रथमाविभक्तिप्रकरणम्	३९७
२. द्वितीयाविभक्तिप्रकरणम्	४००
३. तृतीयाविभक्तिप्रकरणम्	४२१
४. चतुर्थीविभक्तिप्रकरणम्	४२६
५. पञ्चमीविभक्तिप्रकरणम्	४३५
६. षष्ठीविभक्तिप्रकरणम्	४४५
७. सप्तमीविभक्तिप्रकरणम्	४५९
१६. अव्ययीभावसमासप्रकरगम्	४६७
१७. तत्पुरुषाः	४८७—५५१
१. तत्पुरुषसमासप्रकरणम्	४८७
२. कर्मधारयसमासप्रकरणम्	५१७
३. नञ्तत्पुरुषसमासप्रकरणम्	५२२
४. गतिसमासप्रकरणम्	५२५

विषयः	पार्श्वम्
५. उपपदसमासप्रकरणम्	५३०
६. असाधारणसमासान्तप्रकरणम्	५३८
१८. बहुव्रीहिसमासप्रकरणम्	५५२
१९. द्वन्द्वसमासप्रकरणम्	५९१
२०. एकशेषसमासप्रकरणम्	६०७
२१. सर्वसमासशेषप्रकरणम्	६१३
२२. सर्वसमासान्तप्रकरणम्	६१६
२३. अलुक्समासप्रकरणम्	६२५
२४. समासाश्रयविधिप्रकरणम्	६३४
२५. तद्धिताः	६६३—९४५
१. अपत्यादिविकारान्तार्थसाधारणप्रत्ययाः	६६३
२. अपत्याधिकारप्रकरणम्	६६६
३. चातुरर्थिकप्रकरणम्	७०८
४. शैषिकप्रकरणम्	७४०
५. विकारार्थप्रकरणम्	७८४
६. ठगधिकारप्रकरणम्	७९२
७. प्राग्घितीयप्रकरणम्	८०७
८. आर्हीये छयट्ठिधिप्रकरणम्	८१३
९. आर्हीयप्रकरणम्	८१९
१०. ठञ्धिकारे कालाधिकारप्रकरणम्	८३६
११. ठञ्विधिप्रकरणम्	८४२
१२. नञ्स्नञधिकारप्रकरणम्	८४६
१३. पाञ्चमिकप्रकरणम्	८५४
१४. मत्वर्थीयप्रकरणम्	८६६
१५. प्राग्दिशीयप्रकरणम्	८९१
१६. प्राग्वीयप्रकरणम्	८९७
१७. स्वार्थिकप्रकरणम्	११९
२१. द्विरुक्तिप्रकरणम्	९४६
२७. सूत्रसूचिकाः	९५७
२८. वार्तिकसूचिकाः	९८९
२९. परिभाषासूचिकाः	९९८

॥ श्रीगुरुचरणारविन्दाभ्यां नमः ॥

सिद्धान्तकौमुदीसहिता

॥ बालमनोरमा ॥

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥ १ ॥
येन धौता गिरः पुंसां विमलैश्शब्दवारिभिः ।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥ २ ॥
वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारञ्च प्रणतोऽस्मि मुनित्रयम् ॥ ३ ॥
मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च ।
वैयाकरणसिद्धान्तकौमुदीयं विरच्यते ॥ ४ ॥

स जयति दिव्यनटेशो नृत्यति योऽसौ चिदम्बरसभायाम् ।
पाणिन्याद्या मुनयो यस्य च दयया मनोरथानभजन् ॥ १ ॥
अस्तु नमः पाणिनये भूयो मुनये तथास्तु वररुचये ।
किञ्चास्तु पतञ्जलये शब्दब्रह्मात्मने च धूर्जटये ॥ २ ॥
व्याख्याता बहुभिः प्रौढैरेषा सिद्धान्तकौमुदी ।
वासुदेवस्तु तद्व्याख्यां वष्टि बालमनोरमाम् ॥ ३ ॥

ओं मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते । वीरपुरुषाणि भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च वृद्धियुक्ता यथा स्युरिति वृद्धिसूत्रस्थभाष्यादिस्मृतिसिद्धकर्तव्यताकं ग्रन्थादौ कृतं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नन् प्राचीनग्रन्थैरगतार्थतां विषयप्रयोजनसम्बन्धाधिकारिणश्च सूचयन् चिकीर्षितं प्रतिजानीते । मुनित्रयमिति श्लोकेन । इयं वैयाकरणसिद्धान्तकौमुदी विरच्यत इत्यन्वयः । इयमिति ग्रन्थरूपा वाक्यावलिर्विवक्षिता ।

भाविन्या अपि तस्याः बुद्ध्या विषयीकरणादियमिति प्रत्यक्षवन्निर्देशः । व्याकरणमधीयते विदन्ति वा वैयाकरणाः तेषां सिद्धान्ताः एवमेते शब्दास्साधव इति निश्चितार्थाः तेषां कौमुदी चन्द्रिका अत्यन्तसादृश्यात्तादूप्यव्यपदेशः । चन्द्रिका हि तमो निरस्यति । भावान् मुखं प्रकाशयति । दिनकरकिरणसम्पर्कजनितसन्तापमपगमयति । एवमियमपि ग्रन्थरूपवाक्यावलिरज्ञानात्मकं तमो निरस्यति । मुनित्रयग्रन्थभावाननायासं प्रकाशयति । अतिविस्तृतदुरूहभाष्यकैयटादिमहाग्रन्थपरिशीलनजनितचित्तसन्तापं च शमयतीति अत्यन्तसादृश्याद्युज्यते चन्द्रिकातादात्म्याद्व्यवसायः । विरच्यते क्रियते । वर्तमानसामीप्याद्वर्तमानवदेशः । किं कृत्वेत्यत आह । **मुनित्रयं नमस्कृत्येति ॥** त्रयो अवयवा अस्य समुदायस्य त्रयं । त्रयवयवकसमुदायः । "संख्याया अवयवे तयप्" इति तयप् तद्धितः । "द्वित्रिभ्यां तयस्यायज्वा" इति तस्यायजादेशः । मुनीनां त्रयमिति षष्ठीसमासः । त्रयाणां मुनीनां समुदाय इति यावत् । यद्यपि मुनिशब्दस्य त्रिशब्दस्य चाभेदान्वये त्रिशब्दस्य मुनिशब्दसापेक्षत्वात् असामर्थ्यात्तद्धितानुपपत्तिः । तथापि त्रयोऽवयवा अस्य समुदायस्य त्रयं इति प्रथमं व्युत्पाद्यम् । अत्र त्रिशब्दस्य मुनिशब्दमनपेक्ष्यैव समुदायेऽन्वयान्नास्त्यसामर्थ्यं । ततो मुनीनां त्रयमिति मुनिशब्दः समुदायेऽन्वेति । तस्य प्रत्ययार्थतया प्रधानत्वात् । न तु मुनिशब्दस्य त्रयशब्दैकदेशभूतत्रिशब्देनाभेदान्वयः । पदार्थः पदार्थेनान्वेति न तु तदेकदेशेनेति न्यायात् । ततश्च मुनिशब्दत्रिशब्दयोः परस्परवार्तानभिज्ञयोरेव शब्दमर्यादया समुदायेऽन्वये सति पश्चात्संख्यायाः परिच्छेदकत्वस्वभावतया त्रित्वस्य परिच्छेद्यपर्यालोचनायां सन्निहितपदान्तरोपस्थितत्वान्मुनय एव परिच्छेद्यतया संबध्यन्ते । त्रयाणां मुनीनां समुदाय इति । सोऽयं पार्ष्ठिकान्वयः अरुणाधिकरणन्यायविदां सुगम इत्यलं विस्तरेण । मुनित्रयमिति कर्मणि द्वितीया । नमस्वस्तीति चतुर्थी तु न । कारकविभक्तेर्बलीयस्त्वस्य वक्ष्यमाणत्वात् । नमस्कृत्य अञ्जलिशिरस्संयोगादिव्यापारेण तोषयित्वेत्यर्थः । नमस्करोतेरञ्जलिशिरस्संयोगादिरूपव्यापारमात्रार्थकत्वे अकर्मकत्वापत्या द्वितीयानुपपत्तेः । ननु प्राचीनेषु प्रक्रियाकौमुद्यादिग्रन्थेषु वैयाकरणसिद्धान्तानां संग्रहात्तैरेव ग्रन्थैः चरितार्थत्वात्किमनेन ग्रन्थेनेत्यत आह । **तदुक्तीः परिभाव्येति ॥** तस्य मुनित्रयस्य उक्तयः तदुक्तयः सूत्रवार्तिकभाष्यात्मकग्रन्थरूपवाक्यावलयः ताः परिभाव्य च सम्यगालोच्य चेत्यर्थः । भूधातोस्स्वार्थिकणिजन्ताद्रूपम् । चुरादौ हि भुवोऽवकल्कने इत्यत्र ण्यन्तभूधातोश्चिन्तनार्थकत्वमपि वक्ष्यते मूलकृतैव । नच 'अनादरः परिभवः परीभावस्तिरस्क्रिये'ति कोशविरोधश्शङ्क्यः । कोशस्य अण्यन्तभूधातुविषयत्वात् । परौ भुवोऽवज्ञान इति सूत्रेण तिरस्कारार्थे वर्तमानादण्यन्तात्परिपूर्वकभूधातोर्भावे घञि परिभावशब्दस्य व्युत्पत्यवगमात् । एवञ्च तदुक्तीरिति तच्छब्दस्य बुद्धिस्थपरामर्शित्वात्प्राचां प्राक्रियाकौमुदीप्रसादादिकृतां उक्तीस्तिरस्कृत्येत्यर्थ इति व्याख्यानं क्लिष्टत्वादुपेक्षितम् । अनेन स्वग्रन्थस्य मुनित्रयग्रन्थानुयायित्वं प्राचीनप्राक्रियाकौमुद्यादिग्रन्थानां तद्विरुद्धत्वञ्च सूचितम् । तच्च प्रौढमनोरमायां स्वयमेव मूलकृता प्रपञ्चितमेव । वैयाकरणसिद्धान्तकौमुदीत्यन्वर्थसंज्ञया वैयाकरणसिद्धान्ताः प्रतिपाद्यत्वेन विषयाः । अनायासेन तदवगमः प्रयोजनम् । तस्य ग्रन्थस्य च जन्यजनकभावस्सम्बन्धः । वैयाकरणसिद्धान्ताजिज्ञासुरधिकारीति सूचितम् । अथ वैयाकरणसिद्धान्तान्निरूपयिष्यन् व्याकरणशास्त्रस्य मूलभू-

अथ संज्ञाप्रकरणम्।

अइउण्। ऋऌक्। एओङ्। ऐऔच्। हयवरट्। लण्। ञमङणनम्। झभञ्। घढधष्। जबगडदश्। खफछठथचटतव्। कपय्। शषसर्। हल्।

इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि । एषामन्त्याइतः । लण्सूत्रे अकारश्च । हकारादिष्वकार उच्चारणार्थः।

तानि चतुर्दशसूत्राणि पठति । **अइउणित्यादिना** ॥ नन्विमानि सूत्राणि मुनित्रयग्रन्थबहिर्भूतत्वादप्रमाणमित्यत आह । **इति माहेश्वराणि सूत्राणीति** ॥ महेश्वरादागतानि माहेश्वराणि । तत आगत इत्यण्। महेश्वरादधिगतानीति यावत्। तदुक्तं पाणिनिशिष्यप्रणीतशिक्षायाम्। येनाक्षरसमाम्नायमधिगम्य महेश्वरात्। कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः। इति। एतत् चतुर्दशसूत्रव्याख्यायां नन्दिकेश्वरकृतायां काशिकायामप्युक्तम्। नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्। उद्धर्तुकामस्सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्॥ इति। अत्र ननादेत्यन्तर्भावितण्यर्थो नद धातुः । ढक्कां नादयामासेत्यर्थः । नवपञ्चवारं चतुर्दशकृत्वः। एतच्छिवढक्कोत्थितं वर्णजालं शिवसूत्रजालतया विमर्शे जानामीत्यर्थः । आर्षस्तङ् एवञ्च माहेश्वरेण प्रोक्तानि माहेश्वराणीति निरस्तम्। एतेन माहेश्वरत्वादेतेषां सूत्राणां नाप्रामाण्यमित्युक्तं भवति । नन्वेवमपि अनर्थकवर्णराश्यात्मकानामेषां सूत्राणां वैयाकरणसिद्धान्तप्रकाशने प्रयोगाभावादिह तदुपन्यासो व्यर्थ इत्यत आह । **अणादिसंज्ञार्थानीति** ॥ अण् आदिः यासांताः अणादयः अणादयश्च तास्संज्ञाश्च अणादिसंज्ञाः ताः अर्थः प्रयोजनं येषां तानि अणादिसंज्ञार्थानि । अनर्थकवर्णराशित्वेऽपि एषां सूत्राणां व्याकरणशास्त्रगतव्यवहारोपयोग्यणादिसंज्ञासु उपयोगान्नानर्थक्यमिति भावः। कथमेषां सूत्राणामणादिसंज्ञार्थत्वमित्यत आह । **एषामंत्या इत इति** ॥ एषामुदाहृतसूत्राणां अंत्याः अन्तेभवाः णकारादिवर्णाः इत्संज्ञकाः प्रत्येतव्या इत्यर्थः । **लण्सूत्रे अकारश्चेति** ॥ इत इत्यनुषज्यते । तच्च एकवचनान्ततया विपरिणम्यते । लण्सूत्रे लकारात्परः अकारश्च इत्संज्ञकः प्रत्येतव्य इत्यर्थः । अनन्त्यत्वात्पृथक्प्रतिज्ञा । ननु लण्सूत्र एव अकारस्य इत्संज्ञकत्वे हयवरेत्यादौ पुनःपुनरकारोच्चारणस्य किं प्रयोजनमित्यत आह । **हकारादिष्वकार उच्चारणार्थ इति** ॥ हकारादीनां सुखोच्चारणार्थं पुनः पुनरकारपाठ इत्यर्थः । अन्यथा ह्यव्र् इत्येवं क्लिष्टोच्चारणापत्तेरिति भावः । अथवा अचं विना हलामुच्चारणाभावात् पुनः पुनरकारपाठो हकाराद्युच्चारणार्थ इत्येव व्याख्येयम्। अत एव उच्चैरुदात्त इति सूत्रे भाष्यम्। नान्तरेणाचं व्यञ्जनस्योच्चारणं भवतीति । अत्र च इदमेव अकारस्य पुनः पुनरुच्चारणं ज्ञापकम्। एवञ्च वर्णात् कार इति कारप्रत्यये सति ककार इत्यादि । वाक् इत्याद्यवसानेषु, वृक्ष इत्यादौ संयुक्तवर्णेषु च, पदान्ते चोः कुरित्यादिविधिबलात्, हलोऽनंतरास्सं-

१ । हलन्त्यम् । (१-३-३)

'हल्' (प्र सू १४) इति सूत्रेऽन्त्यमित्स्यात् ।

२ । आदिरन्त्येन सहेता । (१-१-७१)

अन्त्येनेता सहित आदिर्मद्ध्यगानां स्वस्य च संज्ञा स्यात् । इति

योग इत्यादिशास्त्रबलाच्च, नायं नियम इत्यलम् । ननु चतुर्दशसूत्रयां णकाराद्यन्तवर्णानां इत्संज्ञा प्रतिज्ञाता । एषामन्त्या इत इति । तदनुपपन्नम् । तेषां हि "हलन्त्यमिति" सूत्रेण इत्संज्ञा वक्तव्या । तच्च सूत्रं हल्पदार्थावगमोत्तरमेव प्रवृत्तिमर्हति । हल्संज्ञाच हलिति सूत्रे लकारस्य इत्संज्ञायां सत्यां आदिरन्त्येन सहेतेति सूत्रेण वाच्या । हलिति सूत्रे लकारस्य इत्संज्ञा च हलन्त्यमिति सूत्रेणैव वाच्या । एवञ्च हलिति सूत्रे लकारस्य इत्संज्ञायां सत्यां आदिरन्त्येनेति हल्संज्ञासिद्धौ हलन्त्यमिति सूत्रप्रवृत्तिः । हलन्त्यमिति सूत्रेण हल्सूत्रे लकारस्य इत्संज्ञायां आदिरंन्त्येन सहेतेति हल्संज्ञासिद्धिरित्येवं हलन्त्यमादिरन्त्येनेत्यनयोः परस्परसापेक्षत्वेन अन्योन्याश्रयत्वादबोधः । एवञ्च हल्संज्ञामनुपजीव्यैव हल्सूत्रे लकारस्य केनचित् सूत्रेण इत्संज्ञां अबोधयित्वा हलन्त्यमिति हलामित्संज्ञाबोधनं पाणिनेरयुक्तमित्याशंक्य हल्संज्ञामनुपजीव्यैव हल्सूत्रे लकारस्य इत्संज्ञां विधातुं हलन्त्यमिति सूत्रं द्विरावृत्य प्रथमसूत्रमुपक्षिपति । **हलन्त्यम्** ॥ एकपदं सूत्रं । हलि अन्त्यं हलन्त्यमिति विग्रहः । शौण्डादेराकृतिगणत्वात् सप्तमी शौण्डैरिति सप्तमीसमासः । सुप्सुपेति समासो वा । हल्पदमिह सूत्रपरं । उपदेशेऽजनुनासिक इदिति पूर्वसूत्रात् इदित्यनुवर्तते । तदाह । **हलिति सूत्र इत्यादिना । इत्स्यादिति** ॥ इत्संज्ञकः स्यादित्यर्थः । संज्ञाप्रस्तावात् । एवञ्च अनेन सूत्रेण हल्सूत्रे लकारस्य हल्संज्ञामनुपजीव्यैव इत्संज्ञासिद्धेति नान्योन्याश्रय इति भावः । नन्वस्तु हल्सूत्रे लकारस्य इत्संज्ञा । ततः किमित्यत आह । **आदिरन्त्येन सहेता** ॥ अन्तेभवः अन्त्यः । तेन इता सहोच्चार्यमाणः आदिः अण् अच् इत्यादिरूपः संज्ञेत्यर्थः । संज्ञाप्रस्तावात् । तत्र यस्मात्पूर्वं नास्ति परमस्ति स आदिः । यस्मात्परं नास्ति पूर्वमस्ति सोऽन्त इति आद्यन्तवत्सूत्रे भाष्यम् । तदिहाद्यन्तशब्दाभ्यां मद्ध्यगा आक्षिप्यन्ते । अतस्तेषां संज्ञेति लभ्यते । स्वं रूपमिति पूर्वसूत्रात्स्वमित्यनुवर्तते । तच्च षष्ठ्यन्ततया विपरिणम्यते । तदेतदाह । **अन्त्येनेतेत्यादि । स्वस्य चेति** ॥ अत्र च स्वशब्देन संज्ञाकोटिप्रविष्ट आदिरेव परामृश्यते । नत्वन्योऽपि । अन्त्येनेति तृतीयया "सह युक्तेऽप्रधान" इति विहितया तस्य अप्राधान्यावगमात् । सर्वनाम्नां चोत्सर्गतः प्रधानपरामर्शित्वात् । न च इक् उक् इच् यय् मथ् इत्यादिप्रत्याहाराः कथं स्युः । इकारादीनामादित्वाभावादिति वाच्यम् । न हि सूत्रापेक्षमिहादित्वम् । किन्तु आद्यन्तशब्दाक्षिप्तसमुदायापेक्षम् । ततश्च अइउणिति इकारमारभ्य ऋलृक् इति ककारपर्यन्तं वर्णसमुदायं बुद्ध्या परिकल्प्य तदादित्वं इकारस्य सम्भावनीयम् । एवमिजादिष्वपि । तथा अन्त्यत्वमपि बुद्धिकल्पितसमुदायापेक्षमेव । न तु सूत्रापेक्षम् । ततश्च रप्रत्याहारस्तुग्रहः । अन्यथा लण्सूत्रे अकारस्यान्त्यत्वाभावात् स न स्यात् । अत्र आद्यन्तशब्दयोरन्यतराभावे मद्ध्यगानामिति न लभ्येत । आदिरित्यभावे हि अन्त्येनेता सहोच्चार्यमाणो वर्णः अन्त्यात्प्राक्

हल्संज्ञायाम्। 'हलन्त्यम्' (सू १)। उपदेशेऽन्त्यं हलित्स्यात्। उपदेश आद्योच्चारणम्। ततः 'अण्' 'अच्' इत्यादिसंज्ञासिद्धौ।

३। उपदेशेऽजनुनासिक इत्। (१-३-२)

भाविनां वर्णानां संज्ञेत्येव लभ्येत। ततश्च हल्प्रत्याहारे अकारादीनामपि ग्रहणं स्यात्। अन्त्यलकारात्पूर्वभावित्वाविशेषात्। अन्त्येनेत्यभावे तु आदिरिता सहोच्चार्यमाण आदेः ऊर्ध्वभाविनां वर्णानां संज्ञेत्येव लभ्येत। ततश्च अच्प्रत्याहारे हकारादीनामपि ग्रहणापत्तिः। आदेरकारादूर्ध्वभावित्वाविशेषात्। उभयोपादाने तु मध्यगानामिति लभ्येत इत्यदोषः। परस्मिन् सति यस्मात्पूर्वो नास्ति स आदिः। पूर्वस्मिन् सति यस्मात्परो नास्ति सोऽन्त्य इति भाष्ये आद्यन्तशब्दार्थनिर्वचनेन आद्यन्तयोर्मध्यगाविनाभूतत्वेन ताभ्यां मध्यगानामाक्षेपात्। यद्यपि द्वयोरप्याद्यन्तशब्दौ सम्भवतः। उक्तनिर्वचनाविरोधात्। तथापि नेह द्वयोराद्यन्तशब्दौ भवतः। तथा सति हि अन्त्येनेता सह उच्चार्यमाण आदिः स्वस्य आदेः संज्ञेत्येव लभ्येत। उक्तरीत्या स्वशब्देन अन्त्यस्य परामर्शासम्भवात्। ततश्च उण् इत्युकारस्य संज्ञेति पर्यवस्येत्। तत्र एकस्य वर्णस्य वर्णद्वयात्मकसंज्ञाविधानं व्यर्थमापद्येत। गौरवात्। प्रत्याहाराणां व्यवहारलाघवार्थत्वात्। अतो मध्यमसत्व एवात्र, आद्यन्तशब्दाविति, ताभ्यां मध्यगानामिति, लभ्यते। इतेति। किं अम् प्रत्याहारः अमङणेति मकारेण माभूत्। नचैवमपि सुट् प्रत्याहारः टा इति टकारेण किं न स्यात्। टान्तसमुदायापेक्षया तस्य अन्त्यत्वादिति वाच्यम्। प्रथमातिक्रमणे कारणाभावेन सुट्प्रत्याहारस्य औटष्टकारेणैव ग्राह्यत्वात्। उक्तं च जैमिनिना। प्रथमं वा नियम्येत कारणस्यानतिक्रमात्। इति। विस्तरभयाद्विरम्यते। **इति हल्संज्ञायामिति॥** हल्सूत्रे लकारस्य हलन्त्यमित्यावृत्तप्रथमसूत्रेण इत्संज्ञायां सत्यामादिरन्त्येनेति हल्संज्ञासिद्धौ चतुर्दशसूत्र्यामन्त्यणकारादिवर्णानां हल्त्वं सिद्धमित्यर्थः। ततः किमित्यत आह। **हलन्त्यम्॥** आवृत्तयोर्द्वितीयं सूत्रमेतत्। हल् अन्त्यमिति च्छेदः। हल्शब्दो नपुंसकलिङ्गोऽप्यस्ति। अन्त्यमिति नपुंसकसामानाधिकरण्यात्। उपदेशेऽजनुनासिक इदिति पूर्वसूत्रादुपदेश इति इदिति चानुवर्तते। तदाह। **उपदेशेऽन्त्यमित्यादिना॥** धातुप्रातिपदिकनिपातप्रत्याहारसूत्रप्रत्ययादेशागमानामन्त्यमिति भाष्यम्। अथ कोऽयमुपदेशो नाम। तदाह। **उपदेश आद्योच्चारणमिति॥** उपशब्द आद्यर्थकः। दिशिरुच्चारणक्रियायाम्। भावे घञिति भावः। एतच्च आदेऽच उपदेशे इत्यादि सूत्रे भाष्ये स्पष्टम्। धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम्। आगमप्रत्ययादेशा उपदेशाः प्रकीर्तिताः। इति। प्राचीनकारिका तु प्रौढमनोरमायां बहुधा दूषिता। उपदेशे किम्। इदमस्थमुरिति थमुप्रत्यये उकारस्योच्चारणार्थस्य निवृत्तौ मकारस्य प्रत्ययान्तत्वेऽपि इत्संज्ञा माभूत्। तदेवं हलन्त्यमित्यावृत्तद्वितीयसूत्रेण चतुर्दशसूत्र्यामन्त्यणकारादिवर्णानां इत्संज्ञा सिद्धेति स्थितम्। ततः किमित्यत आह। **ततः अण् अच् इत्यादिसंज्ञासिद्धाविति॥** ततः णकारादीनामितसंज्ञासिद्ध्यनन्तरं आदिरन्त्येनेत्यणादिसंज्ञा सिद्धेत्यर्थः। लण्सूत्रे अकारश्रेति प्रतिज्ञातं। तस्य अकारस्य अनन्त्यत्वादहल्त्वाच्च हलन्त्यमिति इत्संज्ञायामप्राप्तायां तत्प्रापकं सूत्रमाह। **उपदेशे॥** संज्ञाप्रस्तावात्संज्ञेति

उपदेशेऽनुनासिकोऽजित्संज्ञः स्यात् । प्रतिज्ञानुनासिक्याः पाणिनीयाः । 'लण्' (प्र सू ६) सूत्रस्थेवर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा । प्रत्याहारेष्वितां न ग्रहणम् । 'अनुनासिकः' इत्यादिनिर्देशात् । न ह्यत्र ककारे परेऽच्कार्यं दृश्यते । 'आदिरन्त्येन–' (सू २) इत्येतत्सूत्रेण कृताः संज्ञाः प्रत्याहारशब्देन व्यवह्रियन्ते ।

लभ्यते । तदाह । **उपदेशे अनुनासिक इत्यादिना** ॥ सूत्रे अजिति कुत्वाभावः आर्षः । अजित्संज्ञः स्यादिति विवरणे कुत्वाभावः असन्देहार्थः । ननु मुखेन नासिकयाचोच्चार्यमाणो वर्णः अनुनासिकः इत्यनुपदमेव वक्ष्यते । शास्त्रकृता च एते कतिपयवर्णास्तथोच्चारिताः । इतरे तु केवलमुखेन उच्चारिता इति कथमिदानीन्तनैरवगन्तव्यमित्यत आह । **प्रतिज्ञानुनासिक्याः पाणिनीया इति** ॥ प्रतिज्ञायते अभ्युपगम्यत इति प्रतिज्ञा । नित्यस्त्रीलिङ्गोऽयम् । स्त्रियामित्यधिकारे आतश्चोपसर्ग इति कर्मण्यङ् । अनुनासिकस्य भावः आनुनासिक्यं । प्रतिज्ञा आनुनासिक्यं येषां ते प्रतिज्ञानुनासिक्याः पाणिनिशिष्या इत्यर्थः । शिष्यपरम्परया शास्त्रकृतां तथाविधमुच्चारणं इदानीन्तनानां सुगममिति यावत् । तदेवं लण्सूत्रे अकारस्य अनुनासिकत्वादितसंज्ञा सिद्धा । ततः किमित्यत आह । **लण् सूत्रस्थेति** ॥ लण्सूत्रे तिष्ठतीति लण्सूत्रस्थः सचासावर्णश्च लण्सूत्रस्थावर्णः तेन सहोच्चार्यमाणो रेफः र इत्येवं रूपः रेफलकारयोस्संज्ञेत्यर्थः । वस्तुतस्तु रप्रत्याहार एव नास्तीति शब्देन्दुशेखरे व्यक्तम् । ननु आदिरन्त्येनेति सूत्रे मध्यगानामादेश्च संज्ञेति स्थितम् । एवञ्च अजादिप्रत्याहारेषु संज्ञाकोटिप्रविष्टानामन्त्यानामितां ग्रहणाभावेऽपि णकारादीनामपि मध्यगत्वाविशेषात् ग्रहणं स्यात् । ततश्च रलयोस्संज्ञेति पूर्वग्रन्थे रलयोरिति न्यूनं टकारस्यापि मध्यगत्वेन ग्राह्यत्वादित्यत आह । **प्रत्याहारेष्वितान्न ग्रहणमिति** ॥ प्रत्याहारेषु अजादिसंज्ञासु मध्यवर्तिनामपि इतान्न ग्रहणमित्यर्थः । कुत इत्यत आह । **अनुनासिक इत्यादिनिर्देशात् इति** ॥ आदिना तृषि मृषि कृषेः काश्यपस्येत्यादि सङ्ग्रहः । कथमयं निर्देशः उक्तार्थे हेतुरित्यत आह । **नहीति** ॥ अत्र अनुनासिकशब्दे ककारे परे इकारस्य अच्प्रयुक्तं कार्यं इको यणचीति यणादेशः न दृश्यते हीति योजना । यदिहि अजादिप्रत्याहारेषु इतामपि ग्रहणं स्यात् तर्हि अच् प्रत्याहारे ऋलृक् इति ककारस्यापि प्रविष्टत्वेन अच्त्वात्तस्मिन् परे इकारस्य इको यणचि इति यणादेशे लोपो व्योर्वलीति लोपे अनुनास्क इति स्यात् । इकारो न श्रूयेत । श्रूयते च । अतः प्रत्याहारेष्वितान्न ग्रहणमिति विज्ञायत इति भावः । यत्तु ऋलृक् इति ककारस्य अच्प्रत्याहारप्रविष्टत्वेऽपि प्रत्ययस्थादित्यादिना इत्वविधिसामर्थ्यादेव यण्लोपश्च न भवति । अन्यथा लाघवाल्लोपमेव विदध्यात् । अतः प्रत्याहारेष्वितान्न ग्रहणमित्यत्र अनुनासिक इत्यादि निर्देशो न लिङ्गमित्याहुः । तन्न । प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुप इतीत्वविधौ वर्णाधिक्यप्रसङ्गात् । प्रत्याहारशब्दस्याप्रसिद्धार्थत्वादाह । **आदिरन्त्येनेत्यादिना** ॥ प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णा इति व्युत्पत्तेरिति भावः । नच अणुदित्सूत्रसिद्धासु अ इ उ इत्यादिसंज्ञास्वतिप्रसङ्गः शंक्यः । योगरूढ्याश्रयणात् वैयाकरणप्रसिद्धिवशाच्च तथा रूढिरिति भावः ।

४। ऊकालोऽज्झ्रस्वदीर्घप्लुतः। (१-२-२७)

उश्च ऊश्च ऊ३श्च वः। वां काल इव कालो यस्य सोऽच्क्रमाद्ध्रस्वदीर्घप्लुतसंज्ञः स्यात्। स प्रत्येकमुदात्तादिभेदेन त्रिधा।

५। उच्चैरुदात्तः। (१-२-२९)

तालवादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञः स्यात्। आ ये।

तत्र वर्णसमाम्नायसूत्रेषु पूर्वेण णकारेण एकः प्रत्याहारः। अण्। ककारेण त्रयः। अक् इक् उक्। ङकारेण एकः। एङ्। चकारेण चत्वारः। अच् इच् एच् ऐच्। टकारेण एकः। अट्। परेण णकारेण त्रयः। अण् इण् यण्। मकारेण चत्वारः। अम् यम् ञम् ङम्। ञकारेण एकः। यञ्। षकारेण द्वौ। झष् भष्। शकारेण षट्। अश् हश् वश् झश् जश् बश्। वकारेण एकः। छव्। यकारेण पञ्च। यय् मय् झय् खय् चय्। रेफेण पंच। यर् झर् खर् चर् शर्। लकारेण षट्। अल् हल् वल् रल् झल् शल्। अकारेण एको रप्रत्याहारः। इति वर्णसमाम्नायिकाः प्रत्याहाराश्चतुश्चत्वारिंशत्। एतेषामेव शास्त्रे उपयोगात्। इङ् इत्यादिप्रत्याहारास्तु प्रयोजनाभावान्न भवन्ति। शास्त्रे तद्व्यवहाराभावात्। अत्रास्मदीया सङ्ग्रहकारिका। स्यादेको ङञणवटैः षेण द्वौ त्रय इह कणाभ्याम्। चत्वारश्च चमाभ्यां पञ्च यराभ्यां शलाभ्यां षट्॥ तदेवमणादिसंज्ञासु सिद्धासु अचो ह्रस्वादिसंज्ञां विधत्ते। **ऊकालो**॥ ह्रस्वदीर्घप्लुत इति समाहारद्वन्द्वः। सौत्रं पुंस्त्वम्। इतरेतरयोगद्वन्द्वो वा। तथा सत्येकवचनमार्षं। उ ऊ ऊ३ इति त्रयाणां एकमात्राद्विमात्रात्रिमात्राणां द्वन्द्वसमासे सति सवर्णदीर्घेण ऊ इति प्रश्लिष्टनिर्देशः। तेषां कालः ऊकालः। कालशब्दो मात्रापर्यायः कालसदृशे लाक्षणिकः। ऊकालः कालो यस्येति विग्रहः। "सप्तम्युपमानपूर्वपदस्य बहुव्रीहिर्वाच्यो वाचोत्तरपदलोप इतिः" द्विपदो बहुव्रीहिः। ऊकालशब्दे पूर्वपदे उत्तरखण्डस्य कालशब्दस्य लोप इत्यभिप्रेत्य फलितमाह। **वां काल इवेत्यादिना**॥ वः इति ऊशब्दस्य प्रथमाबहुवचनं। वामिति षष्ठीबहुवचनं। वां काल इव कालो यस्येति फलितार्थकथनम्। उक्तरीत्या द्विपद एव बहुव्रीहिः। **क्रमादिति**॥ यथासंख्यसूत्रलभ्यमेतत्। इहैव तत्सूत्रमुपन्यासितुमुचितम्। नच उ ऊ ऊ३ इत्युवर्णानां कथं ह्रस्वदीर्घप्लुतसंज्ञाः। तेषां ऊकालसदृशकालत्वाभावात्। सादृश्यस्य भेदनिबन्धनत्वादिति वाच्यम्। ऊशब्दस्याच एकमात्राद्विमात्रत्रिमात्रकुक्कुटरुतानुकरणत्वात्। **स इति**॥ सः ह्रस्वो दीर्घः प्लुतश्च अच् प्रत्येकमुदात्तादिभेदेन उदात्तत्वेनानुदात्तत्वेन स्वरितत्वेन च धर्मविशेषेण त्रिधा त्रिभिः प्रकारैर्वर्तत इत्यर्थः। उदात्तसंज्ञामाह। **उच्चैरुदात्तः**॥ नादधर्मविशेषः उच्चैस्त्वं नेह विवक्षितम्। उपांशूच्चार्यमाणे अव्याप्तेः। किंतु उच्चैश्शब्दः अधिकरणशक्तिप्रधानः ऊर्ध्वभागे इत्यर्थे वर्तते। ऊर्ध्वावयवस्य चावयवव्यपेक्षायां तालुकण्ठादिवर्णाभिव्यक्तिस्थानानामित्यर्थो लभ्यते। ऊकालोऽजिति सूत्रादजित्यनुवर्तते। तदेतदाह। **तालवादिष्वित्यादिना। सभागेष्विति**॥ तालवादीनां सावयवत्वकथनं ऊर्ध्वभागे इत्यस्योपपादनार्थम्। तेषां अखण्डत्वे ऊर्ध्वभागे इत्यनुपपत्तेः। उदात्तमुदाहरति। **आ**

६ । नीचैरनुदात्तः । (१-२-३०)

स्पष्टम् । अर्वाङ् ।

७ । समाहारः स्वरितः । (१-२-३१)

उदात्तानुदात्तत्वे वर्णधर्मौ समाहियेते यस्मिन्सोऽच्स्वरितसंज्ञः स्यात् ।

८ । तस्यादित उदात्तमर्द्धह्रस्वम् । (१-२-३२)

ह्रस्वग्रहणमतन्त्रम् । स्वरितस्यादितोऽर्धमुदात्तं बोद्धव्यम् । उत्तरार्द्धं तु परिशेषादनुदात्तम् । तस्य चोदात्तस्वरितपरत्वे श्रवणं स्पष्टम् । अन्यत्र तूदात्त-

---

ये इति । आये मित्रा वरुणेत्यृचि आकार एकारश्च उदात्त इत्यर्थः । अनुदात्तसंज्ञामाह । **नीचैरनुदात्तः । स्पष्टमिति** ॥ उक्तरीत्या तालवादिषु अधोभागे निष्पन्नोऽच् अनुदात्तसंज्ञः स्यादिति स्पष्टार्थकमित्यर्थः । **अर्वाङ् इति** ॥ अर्वाङ् यज्ञस्संक्रामत्यृचि आद्यः अकारः अनुदात्त इत्यर्थः । अथ स्वरितसंज्ञामाह । **समाहार स्वरितः** ॥ पूर्वसूत्राभ्यां उदात्त इति अनुदात्त इति चानुवर्तते । ऊकालोऽजित्यस्मादजित्यनुवर्तते । ततश्च उदात्तः अनुदात्तश्च अच् समाहियमाणः स्वरित इत्यर्थः प्रतीयते । एवं सति वर्णद्वयस्य स्वरितसंज्ञा स्यात् । नत्वेकस्य अतो नैवमर्थः । किंतु उदात्तानुदात्तपदे अनुवृत्ते धर्मप्रधाने षष्ठ्यन्ततया च विपरिणम्येते । यत्र समाहरणं स समाहारः । अधिकरणे घञ् । ततश्च उदात्तत्वानुदात्तत्वयोर्धर्मयोर्यस्मिन्नचि मेलनं सोऽच् स्वरितसंज्ञक इत्यर्थः । फलितमाह । **उदात्तत्वानुदात्तत्व इत्यादिना** ॥ ननु उदात्तत्वानुदात्तत्वयोरेकस्मिन्नपि मेलने कस्मिन्भागे उदात्तत्वस्य समावेशः कस्मिन्भागे अनुदात्तत्वस्य समावेशः इत्यत आह । **तस्यादितः** ॥ तस्य स्वरितस्य आदितः पूर्वभागे अर्द्धह्रस्वमुदात्तं इत्यर्थः प्रतीयते । एवं सति दीर्घस्वरिते इयं व्यवस्था न स्यात् । अत आह । **ह्रस्वग्रहणमतन्त्रमिति** ॥ तन्त्रं प्रधानं । (तन्त्रं प्रधाने सिद्धान्ते) इति कोशः । न विद्यते तन्त्रं वाच्यार्थलक्षणं प्रधानं यस्य तत् अतन्त्रं अविवक्षितार्थकमित्यर्थः । ह्रस्वग्रहणं न कर्तव्यामिति यावत् । दीर्घस्वरितेऽप्युत्तरभागस्य वेदे अनुदात्तत्वदर्शनादिति भावः । ततश्च फलितमाह । **स्वरितस्यादावर्द्धमुदात्तं बोद्धव्यमिति** ॥ ननु अनुदात्तत्वस्य निवेशव्यवस्था कुतो नोक्तेत्यत आह । **उत्तरार्द्धन्त्विति** ॥ ननु एवं सति अग्निमीळ इत्यत्र ईकारे स्वरिते कथमुत्तरार्धमनुदात्तम् । नेत्यत आह । **तस्य चेति** ॥ चकारो वाक्यालङ्कारे । तस्य अनुदात्तभागस्य उदात्तस्वरितपरत्वे उदात्तस्वरितौ परौ यस्मात् सः उदात्तस्वरितपरः तस्य भावः उदात्तस्वरितपरत्वम् । उदात्तपरकत्वे स्वरितपरकत्वे वा सति श्रवणं स्पष्टं भवतीत्यर्थः । **अन्यत्रेति** ॥ उदात्तस्वरितपरकत्वाभावे अनुदात्तप्रचयपरकत्वे अनुदात्तभागस्य उदात्ततरत्वापरपर्याया उदात्तश्रुतिः ऋग्वेदप्रातिशाख्ये विहितेत्यर्थः । तत्र त्वेवमुक्तम् । अनुदात्तः परश्शेषः स उदात्तश्रुतिर्नेचेत् । उदात्तं वोच्यते किंचित्स्वरितं चाक्षरं परम् ॥ इति स्वरिते पूर्वभागस्य उदात्तत्वे सति परश्शेष

श्रुतिः प्रातिशाख्ये प्रसिद्धा । 'क १ वोऽश्वाः,' 'रथानां' न ये २ऽराः, शतचक्रं यो ३ऽह्यः' इत्यादिष्वनुदात्तश्रुतिः । 'अग्निमीळे' इत्यादावुदात्तश्रुतिः । स नवविधोऽपि प्रत्येकमनुनासिकाननुनासिकत्वाभ्यां द्विधा ।

९ । मुखनासिकावचनोऽनुनासिकः । (१-१-८)

मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात् । तदित्थम् । अ इ उ ऋ एषां वर्णानां प्रत्येकमष्टादश भेदाः । ऌवर्णस्य द्वादश । तस्य दी-

---

उत्तरभागः अनुदात्तः प्रत्येतव्यः । सः परशेषः उदात्तश्रुतिः क्वचिद्भवति । किं सर्वत्रैवं नेत्याह । न चेदित्यादिना । उदात्तं स्वरितं वा किञ्चिदक्षरं परं नोच्यते चेदिति योजना । तत्र अनुदात्तभागस्य स्पष्टं श्रवणमुदाहृत्य दर्शयति । **केत्यादिना ।इत्यादिष्वनुदात्त इत्यन्तेन ॥** तत्र क इति ह्रस्वस्वरितः । स तावत् वो इत्योकारात्मकोदात्तपरकः । येऽरा इत्येकारो दीर्घस्वरितः । सचऽरा इत्याकारात्मकोदात्तपरः । शतचक्रं यो इत्योकारः कम्पस्वरितः । स तु ह्य इत्यकारात्मकस्वरितपरकः । इत्येवमादिप्रदेशेषु अनुदात्तभागः स्पष्टं श्रूयत इत्यर्थः । अन्यत्र तूदात्तश्रुतिरित्येतदुदाहृत्य दर्शयति । **अग्निमीळे इत्यादावुदात्तश्रुति रिति ॥** पदकाले अग्निमिल्यन्तोदात्तम् । ईळ इति अनुदात्तम् । तत्र 'उदात्तादनुदात्तस्य स्वरित' इति संहितायां ईकारः स्वरितः । 'स्वरितात्संहितायामनुदात्तानाम्' इत्येकारः प्रचयः । ततश्च ईकारः स्वरितः उदात्तस्वरितपरको न भवतीति तदुत्तरभागस्य उदाहृतप्रातिशाख्यवचनेन उदात्ततरत्वात्मिका उदात्तश्रुतिरेव भवतीत्यर्थः । तदेवमुदात्तह्रस्वः अनुदात्तह्रस्वः स्वरितह्रस्व इति ह्रस्वस्त्रिविधः । एवं दीर्घोऽपि त्रिविधः । तथा प्लुतोऽपि । ततश्च एकैकः अच् नवविध इति स्थितः । **सनवविधोऽपीति ।** उक्तरीत्या नवविधोऽपि सः अच् अनुनासिकत्वेन अननुनासिकत्वेन च द्विधा द्वाभ्यां प्रकाराभ्यां वर्तत इत्यर्थः । तदेवमनुनासिकाः नव अचः, अननुनासिकाश्च नवेत्यष्टादशविधत्वमेकैकस्याच इति स्थितम् । अथानुनासिकसंज्ञामाह । **मुखनासिका ॥** मुखसहिता नासिका मुखनासिका शाकपार्थिवादित्वात् सहितपदस्य लोपः । उच्यते उच्चार्यते इति वचनः कर्मणि ल्युट् । मुखनासिकया वचन इति 'कर्तृकरणे कृता बहुलम्' इति तृतीयासमासः । तदेतदाह । **मुखसहितेत्यादिना ॥** मुखञ्च नासिकाचेति द्वन्द्वस्तु न । तथासति 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानां' इति समाहारद्वन्द्वनियमात् 'स नपुंसकम्' इति नपुंसकत्वे 'ह्रस्वोनपुंसके प्रातिपदिकस्य' इति ह्रस्वत्वे मुखनासिकवचन इत्यापत्तेः । ननु अष्टादश भेदाः किं सर्वेषामचामविशिष्टाः नेत्याह । **तदित्थमिति ॥** इयता प्रबन्धेन यत् अचां भेदप्रपञ्चनं तत् इत्थं वक्ष्यमाणप्रकारेण व्यवस्थितं वेदितव्यमित्यर्थः । **अष्टादशभेदा इति ॥** अष्टादशप्रकारा इत्यर्थः । **दीर्घाभावादिति ॥** तथाच उदात्तऌकारदीर्घः अनुदात्तऌकारदीर्घः स्वरितऌकारदीर्घः । ते च अनुनासिकास्त्रयः अननुनासिकास्त्रयः इति षड्भेदानामभावे सति ह्रस्वप्रपञ्चः प्लुतप्रपञ्चश्च षड्विध इति ऌकारस्य द्वादशविधत्वमेवेति

र्घाभावात्। एचामपि द्वादश। तेषां ह्रस्वाभावात्।

१०। तुल्यास्यप्रयत्नं सवर्णम्। (१-१-९)

ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात्। अकुहविसर्जनीयानां कण्ठः। इचुयशानां तालु। ऋटुरषाणां मूर्धा। लृतुलसानां दन्ताः। उपूपध्मानीयानामोष्ठौ। ञमङणनानां नासिका च। एदै-

---

भावः। लृकारस्य दीर्घाभावे होतृ लृकार इत्यत्र सवर्णदीर्घे कृते होतृकार इति ऋकारस्यैव तुल्यास्यसूत्रे अकस्सवर्ण इति सूत्रे च भाष्योदाहरणमेव प्रमाणम्। **ह्रस्वाभावादिति** ॥ यद्येचो ह्रस्वास्स्युस्तर्हि वर्णसमाम्नाये त एव लाघवात् अ इ उ इत्यादिवत् पञ्चेरन्। नतु दीर्घाः गौरवात्। अतः एचः ह्रस्वाः न सन्तीति विज्ञायते। एवं च ह्रस्वप्रपञ्चषड्भेदाभावात् द्वादशविधत्वमेवैचामिति भावः। अथ 'अणुदित्सवर्णस्यचाप्रत्ययः' इति अ इ उ इत्यादिसंज्ञां वक्ष्यन् सवर्णसंज्ञामाह। **तुल्यास्य** ॥ आस्यं मुखं तत्स्थानसाम्यस्य सवर्णेष्वविशिष्टत्वादव्यावर्तकत्वादास्यशब्दोऽत्र न मुखमात्रपरः। किंतु आस्ये मुखे भवमास्यं ताल्वादिस्थानं 'शरीरावयवाद्यत्' इति भवार्थे यत्प्रत्ययः। 'यस्येति च' इति प्रकृत्यन्तस्य अकारस्य लोपः। प्रकृष्टो यत्नः प्रयत्नः। आस्यं च प्रयत्नश्च आस्यप्रयत्नौ तुल्यौ आस्यप्रयत्नौ यस्य वर्णजालस्य तत्तुल्यास्यप्रयत्नं परस्परं सवर्णसंज्ञकं स्यादिति भावः। तदाह। **ताल्वादिस्थानमित्यादिना**। **मिथः इति** ॥ परस्परमित्यर्थः। कस्य किं स्थानमित्याकांक्षायां तद्व्यवस्थापकानि पाणिन्यादिशिक्षावचनान्यर्थतः संगृह्णाति। **अकुहेत्यादिना** ॥ अ इत्यष्टादश भेदा गृह्यन्ते। कु इति कादिपञ्चकात्मकः कवर्गः। नचाणुदित्सूत्रस्येदानीमप्रवृत्तेः कथमत्र अ इत्यष्टादशभेदानां ग्रहणमिति वाच्यम्। लौकिकप्रसिद्धिमाश्रित्यैव एतत्प्रवृत्तेः। एवमग्रेऽपि कथञ्चित्समाधानं बोद्धव्यम्। अश्च कुश्च हश्च विसर्जनीयश्चेति विग्रहः। विसर्जनीयशब्दोऽपि विसर्गपर्यायः। **इचु यशेति** ॥ इ इत्यष्टादश भेदाः। चु इति चवर्गः। इश्च चुश्च यश्च शश्चेति विग्रहः। तालु हनु। **ऋटुरषेति** ॥ ऋ इत्यष्टादश भेदाः। टु इति टवर्गः। आच टुश्च रश्च षश्चेति विग्रहः। ऋशब्दस्य आ इति प्रथमैकवचनान्तम्। धाता इतिवत्। **लृतुलसेति** ॥ लृ इत्यस्य द्वादश भेदाः। तु इति तवर्गः। आच तुश्च लश्च सश्चेति विग्रहः। लृशब्दस्यापि आ इत्येव प्रथमैकवचनान्तत्वम्। आ अलौ अलः। दन्तशब्देन दन्तमूलप्रदेशो विवक्षितः। अन्यथा भग्नदन्तस्य तदुच्चारणानुपपत्तेः। **उपूपेति** ॥ उ इत्यष्टादश भेदाः। पु इति पवर्गः। उश्च पुश्च उपध्मानीयश्चेति विग्रहः। उपध्मानीयशब्दमनुपदमेव स्वयं व्याख्यास्यति। **ञमङणनेति** ॥ ञश्च मश्च ङश्च णश्च नश्चेति विग्रहः। चकारेण स्वस्ववर्गीयस्थानसमुच्चयः। **एदैतोरिति** ॥ एच ऐच एदैतौ। तपरकरणमसन्देहार्थम्। नतु 'तपरस्तत्कालस्य' इति तत्कालमात्रग्रहणार्थम्। तेन प्लुतयोरपि सङ्ग्रहः।

तोः कण्ठतालु । ओदौतोः कण्ठोष्ठम् । वकारस्य दन्तोष्ठम् । जिह्वामूलीयस्य जिह्वामूलम् । नासिका अनुस्वारस्य । इति स्थानानि । प्रयत्नो द्विधा । आभ्यन्तरो बाह्यश्च । आद्यश्चतुर्धा । स्पृष्टेषत्स्पृष्टविवृतसंवृतभेदात् । तत्र स्पृष्टं प्रयतनं स्पर्शानाम् । ईषत्स्पृष्टमन्तःस्थानाम् । विवृतमूष्मणां स्वराणां च । ह्रस्वस्यावर्णस्य

कण्ठश्च तालु चेति प्राण्यङ्गत्वात् समाहारद्वन्द्वः । एकवत्त्वं नपुसकत्वं च । **ओदौतोरिति** ॥ ओच्च औच्च ओदौतौ । तपरकरणं पूर्ववदसंदेहार्थमेव । कण्ठश्च ओष्ठौ चेति प्राण्यङ्गत्वात्समाहारद्वन्द्वः एकवद्भावो नपुंसकत्वं च । **वकारस्येति** ॥ दन्ताश्च ओष्ठौ चेति समाहारद्वन्द्वः । एकवत्त्वं नपुंसकत्वञ्च । **जिह्वामूलीयस्येति** ॥ जिह्वामूलीयशब्दमग्रे व्याख्यास्याति । एवमनुस्वारशब्दमपि । **इति स्थानानीति** ॥ इति एवं प्रकारेण वर्णाभिव्यक्तिस्थानानि प्रपञ्चितानीत्यर्थः । ननु किमिह तुल्यास्यसूत्रे यत्किञ्चित् स्थानसाम्यं विवक्षितम्, उत यावत्स्थानसाम्यम् । न तावदाद्यः । तथा सति इकारस्य एकारस्य च तालुस्थानकतया सावर्ण्यापत्तौ भवत्येवेत्यत्र इकारादेकारे परे सवर्णदीर्घापत्तेः । न च एकारस्य वर्णसमाम्नाये पाठसामर्थ्यादिकारेण न सावर्ण्यमिति वाच्यम् । एकारपाठस्य अक् इक् उक् इति प्रत्याहारेषु एकारग्रहणनिवृत्त्यर्थत्वसम्भवात् । किञ्च वकारलकारयोर्दन्तस्थानसाम्येन सावर्ण्यापत्तौ 'तोर्लि' इत्यत्र लकारेण वकारस्यापि ग्रहणात् तद्वानित्यत्र दकारस्य परसवर्णापत्तिः । यवलपरे यवला वेत्यत्र लकारग्रहणन्तु यथासंख्यार्थं भविष्यति । न द्वितीयः । तथासति कङयोः कण्ठस्थानसाम्येऽपि ङकारस्य नासिकास्थानाधिक्येन सावर्ण्याभावापत्तौ 'चोः कुः' 'ङिन्प्रत्ययस्य' इत्यत्र ङकारस्य ग्रहणानापत्त्या प्राङ् इत्यादौ नुमो नकारस्य 'ङिन्प्रत्ययस्य' इति कुत्वेन ङकारानापत्तेः । तस्मात्स्थानसाम्यं दुर्निरूपमिति चेत् । अत्र ब्रूमः । यावत्स्थानसाम्यमेव सावर्ण्यप्रयोजकम् । एवञ्च इकारस्य एकारस्य च तालुस्थानसाम्येऽपि एकारस्य कण्ठस्थानाधिक्यान्नसावर्ण्यम् । वलयोश्च न सावर्ण्यम् । वकारस्य ओष्ठस्थानाधिक्यात् । एवञ्च 'तद्वानासां यजुष्येकेषाम्' इत्यादि निर्देशा उपपन्नाः । ङकारस्य नासिकास्थानाधिक्येऽपि ककारेण सावर्ण्यमस्त्येव । आस्यभवस्थानसाम्यस्यैव सावर्ण्यप्रयोजकत्वात् । नासिकायाश्च आस्यानन्तर्गतत्वात् । उक्तञ्च भाष्ये । किम्पुनरास्यं लौकिकं ओष्ठात्प्रभृति प्राक्काकलकादिति । काकलको नाम चुबुकस्याधस्तात् ग्रीवायामुन्नतप्रदेश इति कैयटः । तस्मादास्यभवयावत्स्थानसाम्यं सावर्ण्यप्रयोजकमिति शब्देन्दुशेखरे विस्तरः । ननु तुल्यास्यसूत्रे प्रयत्नशब्देन प्रशब्दबलादाभ्यन्तरयत्नो विवक्षित इति स्थितम् । तत्राभ्यन्तरत्वविशेषणं किमर्थम्, व्यावर्त्याभावादित्यत आह । **यत्नोद्विधेति** ॥ यत्नानामाभ्यन्तरत्वं बाह्यत्वञ्च वर्णोत्पत्तेः प्रागूर्ध्वभावित्वामिति पाणिन्यादिशिक्षासु स्पष्टम् । **आद्य इति** ॥ आभ्यन्तरयत्न इत्यर्थः । कथञ्चातुर्विध्यमित्यत आह । **स्पृष्टेति** ॥ कस्य कः प्रयत्न इत्याकाङ्क्षायां तद्व्यवस्थापकशिक्षावचनानि पठति । **तत्रेति** ॥ तेषु मध्य इत्यर्थः । **प्रयतनमिति** ॥ प्रयत्न इत्यर्थः । स्पर्शादिशब्दानग्रे व्याख्यास्याति । ह्रस्वस्यावर्णस्य संवृतमित्यन्वयः । एतावदेव शिक्षावचनं । नन्वेवं दण्ड आढकमित्यत्र अकारस्य आकारस्य च विवृतसंवृतप्रयत्नभेदेन सावर्ण्यं

प्रयोगे संवृतम्। प्रक्रियादशायां तु विवृतमेव। एतच्च सूत्रकारेण ज्ञापितम्। तथा हि।

११। अ अ। (८-४-६८)

विवृतमनूद्य संवृतोऽनेन विधीयते। अस्य चाष्टाद्ध्यायीं सम्पूर्णा प्रत्यसिद्धत्वाच्छास्त्रदृष्ट्या विवृतत्वमस्त्येव। तथा च सूत्रम्।

१२। पूर्वत्रासिद्धम्। (८-२-१)

भावात् सवर्णदीर्घो न स्यादित्यत आह। **प्रयोग इति** ॥ शास्त्रीयप्रक्रियाभिः परिनिष्ठितानां रामः कृष्णः इत्यादिशब्दानां प्रयोगे क्रियमाण एव ह्रस्वस्यावर्णस्य संवृतत्वमित्यर्थः। **प्रक्रियेति**। शास्त्रीयकार्यप्रवृत्तिसमये तु ह्रस्वस्याप्यवर्णस्य विवृतत्वमेवेत्यर्थः।शिक्षावचनसिद्धं स्वाभाविकं ह्रस्वावर्णस्य संवृतत्वं प्रच्याव्य शास्त्रमूलभूते वर्णसमाम्नाये तस्य विवृतत्वेनैवोपदिष्टतया कृत्स्नशास्त्रीयप्रक्रियासमये ह्रस्वस्याप्यवर्णस्य विवृतत्वेन दण्डाढकमित्यादौ सवर्णदीर्घादिकार्यनिर्बाधमिति अइउणिति सूत्रभाष्ये स्पष्टम्। एवञ्च ह्रस्वस्यावर्णस्य संवृतमिति शिक्षावचनं परिशेषात् परिनिष्ठितदशायामेव पर्यवस्यतीति न तदानर्थक्यमिति भावः। अयञ्च शिक्षावचनसंकोचस्सूत्रकारस्यापि सम्मत इत्याह। **एतच्चेति**। तदेवोपपादयितुं प्रतिजानीते। **तथाहीति**। यथा एतत् ज्ञापितं भवति तथा स्पष्टमुपपाद्यत इत्यर्थः। **अ अ**। व्याकरणशास्त्रस्येदमन्तिमं सूत्रं द्विपदम्। तत्र अ इति प्रथमं पदं विवृतपरं लुप्तषष्ठीकम्। द्वितीयन्तु संवृतपरं लुप्तप्रथमाकम्। ततश्च शिक्षावचनसिद्धं स्वाभाविकं संवृतत्वं प्रच्याव्य वर्णसमाम्नाये विवृतत्वेनोपदिष्टस्य अवर्णस्य संवृतः अवर्णो भवतीत्यर्थः। तदाह। **विवृतमनूद्येति। विधीयत इति**। प्रतिप्रसूयत इत्यर्थः। ननु प्रक्रियादशायामप्येतत्सूत्रं कुतो न प्रवर्तत इत्यत आह। **अस्यचेति**। अस्य अ अ इति सूत्रस्य, स्वप्राक्तनीं कृत्स्नां अष्टाध्यायीं प्रति असिद्धत्वात् अविद्यमानत्वात् प्रक्रियादशायां विवृतत्वमस्त्येवेत्यन्वयः। ननु प्रक्रियादशायां ह्रस्वावर्णस्य कथं स्वाभाविकात्संवृतत्वात् प्रच्यवः, कथं वा विवृतत्वम्, तस्य आकारादिधर्मत्वादित्यत आह। **शास्त्रदृष्ट्येति**। असिद्धत्वमिह न वास्तवाल्यन्तासत्वं विवक्षितम्। किं तर्हि अविद्यमानत्वारोपात्मकमेव। एतावता न स्वाभाविकस्य संवृतत्वस्यावर्णात् प्रच्यवः। नापि विवृतत्वम्। तस्य वास्तवं प्रक्रियार्थं विवृतत्वस्यारोपादिति भावः। ननु 'अअ' इति सूत्रस्य कृत्स्नामष्टाध्यायीं प्रत्यसिद्धत्वे किं प्रमाणमित्यत आह। **तथा च सूत्रमिति**। चोद्यार्थे। तथा तेन प्रकारेण बोधकं सूत्रमस्तिहीत्यर्थः। तथाविधं सूत्रमाह। **पूर्वत्रासिद्धम्** ॥ पाणिनिप्रणीता अष्टाध्यायी। तत्र अष्टमाध्याये द्वितीयपादस्येदमादिमं सूत्रम्। इतः प्राक्तनं कृत्स्नं सूत्रजालं सपादसप्ताध्यायीति व्यवह्रियते। उपरितनन्तु कृत्स्नं सूत्रजालं त्रिपादीति व्यवह्रियते इति स्थितिः। तत्र यदीदं सूत्रं स्वतन्त्रविधिस्स्यात् तदा इतः पूर्वस्मिन् शास्त्रे प्रवर्तमाने उपरितनं शास्त्रमसिद्धं स्यादित्यर्थो लभ्येत। ततश्च सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धेति पर्यवस्येत्। एवं सति त्रिपाद्यामपि पूर्वं शास्त्रं प्रति परं शास्त्रमसिद्धमिति अर्थो न लभ्येत। तथा-

अधिकारोऽयम्, तेन सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा। त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात्। बाह्यप्रयत्नस्त्वेकादशधा। विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति।

सति किमु उक्तं किम्वुक्तमित्यत्र मोऽनुस्वार इति शास्त्रं त्रैपादिकं प्रति 'मय उञो वो वा' इति वत्वशास्त्रं त्रैपादिकं प्रति नासिद्धं स्यादित्यत आह। **अधिकारोऽयमिति॥** अधिक्रियते उपरितनसूत्रजालशेषत्वेन पठ्यत इत्यधिकारः। कर्मणि घञ्। 'घञजबन्ताः पुंसि' इति पुंस्त्वम्। अयमिति तदपेक्षया पुल्लिङ्गनिर्देशः। इदं सूत्रमुपरितनसूत्रेष्वनुवृत्यर्थमेव। ननु स्वतन्त्रविधिरिति यावत्। 'मयउञो वोवा' इति सूत्रे पूर्वत्रासिद्धमित्यनुवर्तते। ततश्च मयः परस्य उञो वकारो वा स्यात्। इदं शास्त्रं पूर्वत्रासिद्धमिति तदेकवाक्यत्वं संपद्यते। तत्र च अनुवृत्तपूर्वशब्देन इतः प्राक्तनं त्रिपादीस्थं सपादसप्ताध्यायीस्थञ्च कृत्स्नं सूत्रजालं विवक्षितमिति मोऽनुस्वार इति त्रैपादिकं शास्त्रं प्रति 'मय उञो वोवा' इति शास्त्रस्यासिद्धत्वं निर्बाधमित्याह। **तेनेति॥** अधिकारत्वेनेत्यर्थः। **परं शास्त्रमसिद्धमिति॥** असिद्धत्वञ्चात्र नात्यन्तासत्वम्। किन्तु पूर्वशास्त्रदृष्ट्येत्यनुपदमेवोक्तम्। परंशास्त्रमित्यनेन प्रक्रियाकौमुद्यादिग्रन्थोक्तं कार्यासिद्धत्वमप्रामाणिकमिति ध्वनितम्*। कार्यासिद्धत्वं पूर्वपक्षयित्वा शास्त्रासिद्धत्वस्यैवाङ्गसूत्रे 'असिद्धवदत्राभात्' इति सूत्रे च भाष्ये सिद्धान्तितत्वात्। शास्त्रासिद्धत्वकार्यासिद्धत्वयोः फलभेदस्तु शब्देन्दुशेखरे व्यक्तः। अस्माभिश्च स्वादिसन्धौ मनोरथ इत्यत्र मूलव्याख्यावसरे हलन्तशब्दाधिकारे च अदश्शब्दप्रक्रियाव्याख्यावसरे प्रपञ्चयिष्यते। तदेवं 'अ अ' इति संवृतविधेः स्वप्राक्तनीं कृत्स्नां अष्टाध्यायीं प्रत्यसिद्धत्वात् प्रक्रियादशायामवर्णस्य ह्रस्वस्य विवृतत्वमेव। परिनिष्ठितदशायामेव संवृतत्वमिति स्थितम्। यद्यपि परिनिष्ठितदशायां संवृतविधिः क्वचिदप्यस्मिन् शास्त्रे नोपयुज्यते। तथापि परिनिष्ठिते संवृतविधिबलादेव संवृतत्वेन ज्ञाने सत्येव प्रयोगार्हतेति कल्प्यम्। विवृतसंवृतयोरुच्चारणभेदो वा कल्प्यमित्यलं बहुना। अथ बाह्यप्रयत्नान्प्रपञ्चयति। **बाह्यप्रयत्नस्त्विति॥** प्रशब्दोऽत्र

---

* अयं च पक्षः भाष्ये बहुत्र दूषितः। तत्र हेतुस्तु लक्ष्येषु समीहितरूपासिद्धिरेव। शब्देन्दुशेखरेऽपि अयं विषयो बहुधा प्रपञ्चितः। पूर्वत्रासिद्धमित्यनेन सिद्धे असिद्धत्वारोपः प्रतिपाद्यते। तत्र निरधिष्ठानारोपस्य असंभवात् मूलोदाहरणाय लक्ष्ये विप्रतिषेधे परं कार्यमित्यनेन परस्यैव कार्यस्य प्रवृत्तेरावश्यकतया प्रकृते मनोरथ इत्यत्र हशिचेतिसूत्रविधीयमानोत्वरूपकार्यापेक्षया परस्य रोरीति सूत्रेण विधीयमानलोपरूपस्यैव कार्यस्य प्रथमतः प्रवृत्तौ तस्मिन् लोपरूपे कार्ये पूर्वत्रासिद्धमित्यनेन अभावप्रतियोगित्वारोपेऽपि देवदत्तहन्तरि हते देवदत्तस्य नोन्मज्जनमिति न्यायेन प्रकृते रोरभावात् हशिचेत्युत्वस्य अप्रवृत्तौ इष्टरूपासिद्धिःस्पष्टैव। शास्त्रासिद्धत्वपक्षे तु यद्यच्छास्त्रं त्रैपादिकं प्रवृत्युन्मुखं तत्तच्छास्त्र एव असिद्धत्वारोपात् पूर्वशास्त्रप्रतिबन्धकस्य परशास्त्रस्य उच्छेदबुद्धौ सत्यां पूर्वशास्त्रप्रवृत्तिर्निरङ्कुशा। वस्तुतस्तु कार्यासिद्धत्वपक्षे मनोरथ इत्येतल्लक्ष्यासिद्धिकथनं न चारुतरम्। दर्शनाभावरूपे लोपे अभावारोपस्य दर्शनारोपरूपत्वेन रोस्सत्वात्। अभावाभावस्य प्रतियोगिरूपत्वात्। अमू अमी इत्यादि लक्ष्यासिद्धि × परं एतत्पक्षाभ्युपगमे दोष इत्यभियुक्ताः॥

खयां यमाः खयः ×क×पौ विसर्गः शर एव च ।
एते श्वासानुप्रदाना अघोषाश्च विवृण्वते ॥
कण्ठमन्ये तु घोषाः स्युः संवृता नादभागिनः ।
अयुग्मा वर्गयमगा यणश्चाल्पासवः स्मृताः ॥

वर्गेष्वाद्यानां चतुर्णां पञ्चमे परे मध्ये यमो नाम पूर्वसदृशो वर्णः प्रातिशाख्ये प्रसिद्धः । पलिक्क्नी, चख्ख्नतुः, अग्निः, घ्नन्तीत्यत्र क्रमेण कखगघेभ्यः परे तत्सदृशा एव यमाः । तत्र वर्गाणां प्रथमद्वितीयाः खयः, तथा तेषामेव यमाः, जिह्वामूलीयोपध्मानीयौ विसर्गः शषसाश्चेत्येतेषां विवारः श्वासोऽघोषश्च । अन्येषां तु संवारो नादो घोषश्च । वर्गाणां प्रथमतृतीयपञ्चमाः

चिन्त्यः । प्रशब्दबलेन आभ्यन्तरयत्नस्यैव प्रयत्नशब्दवाच्यतायाः तुल्यास्यसूत्रे उक्तत्वात् । यत्नो द्विधेत्युपक्रमाच्च । अविवक्षितार्थो वाऽत्र प्रशब्दः । उदात्तानुदात्तस्वरितशब्दाः धर्मपराः । कस्य को बाह्यप्रयत्न इत्याकांक्षायां तद्वयवस्थां श्लोकद्वयेन संगृह्णाति । **खयामिति** ॥ यमशब्दो व्याख्यास्यते । श्वासः अनुप्रदानः येषां ते श्वासानुप्रदानाः श्वासाख्यबाह्ययत्नवन्तः । **विवृण्वते कण्ठमिति** ॥ विवारः एषां यत्न इति भावः । संवृताः संवाराख्ययत्नवन्तः । नादभागिनः नादाख्ययत्नभाजः । **अयुग्मा वर्गयमगा इति** ॥ कादिपञ्चकं चादिपञ्चकं टादिपञ्चकं तादिपञ्चकं पादिपञ्चकमिति, पञ्च वर्गाः । वर्गगता यमगताश्च अयुग्माः प्रथमतृतीयपञ्चमवर्णा इत्यर्थः । अल्पासवः अल्पप्राणाः । अथ श्लोकद्वयं व्याख्यास्यन् यमशब्दं तावत् सामान्यतो व्याचष्टे । **वर्गेष्वित्यादिना** ॥ आद्यानां चतुर्णामिति निर्द्धारणे षष्ठी । एकैकस्मादित्यध्याहार्यम् । तेन 'अन्यारादितरर्ते' इति परशब्दयोगे पञ्चमी । प्रसङ्गात् आद्यानाञ्चतुर्णामिति निर्धारणषष्ठ्यनुपपन्नेति निरस्तम् । **यमोनामेति** ॥ नामशब्द इति पर्यायः । तदयमर्थः । कादि चादि टादि तादि पादि पञ्चकात्मकेषु वर्गेषु एकैकस्य वर्गस्य आद्यानां चतुर्णाम्मध्ये एकैकस्मात् पञ्चमे वर्णे परे मध्ये पूर्ववर्णसदृशो यम इति प्रातिशाख्ये प्रसिद्धेति । अथ यमानुदाहृत्य दर्शयति । **पलिक्क्नीत्यादिना** ॥ **तत्सदृशा एव यमा इत्यन्तेन** ॥ एवं वर्गान्तरयमानामप्युदाहरणं याच्च्वेत्यादि द्रष्टव्यम् । तदेवं यमशब्दं सामान्यतो व्याख्याय श्लोकद्वयं व्याचष्टे । **तत्रेत्यादिना** ॥ तत्र खय इत्यस्य व्याख्या वर्गाणां प्रथमद्वितीयाः खय इति । खयां यमा इत्यस्य विवरणं तथा तेषामेव यमा इति । ×क×पौ इत्यस्य विवरणं जिह्वामूलीयोपध्मानीयाविति । विसर्गशब्दः प्रसिद्धत्वात् स एवोपात्तः । शर इत्यस्य विवरणं शषसा इति । एते श्वासानुप्रदानाः अघोषाश्च विवृण्वते कण्ठमित्येतद्व्याचष्टे । **एतेषां विवारः श्वासः अघोषश्चेति** ॥ अन्ये तु घोषास्स्युस्संवृतानादभागिन इत्येतद्व्याचष्टे । **अन्येषान्तु संवारो नादो घोषश्चेति** ॥ अयुग्मा वर्गयमगा इत्येतद्व्याचष्टे । **वर्गाणां प्रथमतृतीयपञ्चमाः प्रथमतृतीययमाविति** ॥

प्रथमतृतीययमौ यरलवाश्चाल्पप्राणाः। अन्ये (द्वितीयचतुर्थौ शलश्च) महाप्राणा इत्यर्थः। बाह्यप्रयत्नाश्च यद्यपि सवर्णसंज्ञायामनुपयुक्ताः, तथाप्यान्तरतम्यपरीक्षायामुपयोक्ष्यन्त इति बोध्यम्। कादयो मावसानाः स्पर्शाः। यरलवा अन्तस्थाः। शषसहा ऊष्माणः। अचः स्वराः। ऽक ऽप इति कपाभ्यां प्रागर्धविसर्गसदृशौ जिह्वामूलीयोपध्मानीयौ। अं अः इत्यचः परावनुस्वारविसर्गौ। इति (स्थान) यत्नविवेकः। 'ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्' (वा १५०)।

पञ्चमानां यमाभावादिति भावः। यणश्चाल्पासवः स्मृता इत्येतद्व्याचष्टे। **यरलवाश्चाल्पप्राणा इति** ॥ ननु श्लोकद्वये महाप्राण एतेषामिति नोक्तम्। अतो न्यूनतेत्याशङ्क्य तदपि परिशेषादुक्तप्रायमित्याह। **अन्ये महाप्राणा इति** ॥ वर्गाणां द्वितीयचतुर्थाः द्वितीयचतुर्थयमाः शषसाश्च अन्यशब्देन विवक्षिताः। यमानां यत्नविशेषकथनं वस्तुस्थितिकथनमात्रम्। अत्र शास्त्रे तदुपयोगाभावात्। तदयमत्र मध्यसिद्धान्तकौमुद्यां वरदराजीयस्संङ्ग्रहः। खरो विवारश्वासाः अघोषाश्च। हशस्संवारनादाः घोषाश्च। वर्गाणां प्रथमतृतीयपञ्चमाः यणश्चाल्पप्राणाः। वर्गाणां द्वितीयचतुर्थाश्शलश्च महाप्राणा इति। नान्विह बाह्यप्रयत्नप्रपञ्चनं व्यर्थं, तुल्यास्यसूत्रे प्रयत्नशब्दस्य आभ्यन्तरप्रयत्नमात्रपरत्वादित्याशङ्कते। **बाह्यप्रयत्नाश्चेति। यद्यपीति** ॥ समुदायश्शङ्काद्योतकः। परिहरति। **तथापीति** ॥ सवर्णसंज्ञाप्रस्तावे बाह्यप्रयत्नानामुपयोगाभावेऽपि 'स्थानेन्तरतम' इति वक्ष्यमाणाऽन्तरतम्यविचारे तेषामुपयोगसत्वान्न वैयर्थ्यम्। इह तत्प्रपञ्चनं तुल्यास्यसूत्रे आभ्यन्तरत्वविशेषणव्यावर्त्यत्वेनोपस्थितत्वात्प्रासङ्गिकमिति भावः। उदात्तादियत्नत्रयस्य तु अज्धर्मत्वस्य प्रसिद्धत्वादिह न तद्व्यवस्थोक्ता। अथ स्पृष्टं प्रयतनं स्पर्शानामित्यादि सन्दर्भे उपन्यस्तान् स्पर्शादिशब्दान् व्याचष्टे। **कादय इत्यादिना** ॥ कः आदिः येषान्ते कादयः मः अवसाने येषान्ते मावसानाः। इदञ्च लोकप्रसिद्धपाठापेक्षम्। **इति स्थानयत्नविवेक इति** ॥ स्थानयत्नविवेचनं समाप्तमित्यर्थः। स्थानप्रयत्नेति प्रशब्दपाठस्तु चिन्त्यः अविवक्षितार्थो वा प्रशब्दः। ऋलृवर्णयोर्मूर्द्धदन्तात्मकभिन्नस्थानकत्वात् सवर्णसंज्ञायामप्राप्तायामृकारलृकारयोस्सवर्णविधिरिति तद्विधायकं वार्तिकं अर्थतस्सङ्गृह्य पठति। **ऋलृवर्णयोऽर्मिथः** ॥ आच आच रलौ ऋशब्दस्य लृशब्दस्य च आ इति प्रथमैकवचनम्। ऋ लृ औ इति स्थिते ऋकारस्य 'ऋतो ङिसर्वनामस्थानयोः' इति गुणः। अकारः "उरण्परः" इति लपरत्वं। ऋकारस्य यणादेशो रेफः रलौ च तौ वर्णौ च ऋलृवर्णौ। तयोर्मिथः परस्परं सावर्ण्यं सवर्णत्वं वक्तव्यम्। तुल्यास्यसूत्रेण तदलाभादिति सूत्रकारशिक्ष्यते। उक्तानुक्तदुरुक्तचिन्तनात्मकं हि वार्तिकम्। **अकारहकारयोरिति** ॥ उभयोः कण्ठस्थानविवृतप्रयत्नसाम्यात्सावर्ण्यं प्राप्तम्। अकारस्य कवर्गेण तु न सावर्ण्यप्रसक्तिः। कण्ठस्थानसाम्ये सत्यपि विवृतस्पृष्टप्रयत्नभेदात्। विसर्जनीयस्य तु अकारोपरि शर्षु च पाठस्योपसङ्ख्यातत्वेन विवृतत्वेऽपि तेन अकारस्य न सवर्णसंज्ञा। प्रयोजनाभावात्। ततश्च अकारस्य हकारेण सावर्ण्यं परिशिष्यत इति भावः। **इकारशकारयोरिति** ॥ तालुस्थानविवृतप्रयत्नसाम्यात् उभयोस्सावर्ण्यं प्राप्तम्। इकारस्य चवर्गेण यकारेण

अकारहकारयोरिकारशकारयोर्ऋकारषकारयोर्लृकारसकारयोश्च मिथः सावर्ण्ये प्राप्ते ।

१३ । नाऽऽज्झलौ । (१-१-१०)

आकारसहितोऽच् आच्, स च हल्चेत्येतौ मिथः सवर्णौ न स्तः। तेन दधीत्यस्य हरति शीतलं षष्ठं सान्द्रमित्येतेषु परेषु यणादिकं न । अन्यथा दीर्घादीनामिव हकारादीनामपि ग्रहणकशास्त्रबलादच्त्वं स्यात्। तथा हि ।

च न सावर्ण्यप्रसक्तिः । इकारस्य विवृततत्वाच्चवर्गस्य स्पृष्टत्वात् यकारस्य ईषत्स्पृष्टत्वाच्च । अत इकारस्य शकारेण सावर्ण्यं परिशिष्यत इति भावः। **ऋकारषकारयोरिति** ॥ मूर्धस्थानविवृतयत्नसाम्यात् उभयोस्सावर्ण्यं प्राप्तम् । ऋकारस्य टवर्गेण रेफेण च न सावर्ण्यप्रसक्तिः। ऋकारस्य विवृतत्वात् टवर्गस्य स्पृष्टत्वात् रेफस्य ईषत्स्पृष्टत्वाच्च। अतः ऋकारषकारयोस्सावर्ण्यं परिशिष्यत इति भावः। **लृकारसकारयोरिति** ॥ दन्तस्थानविवृतप्रयत्नसाम्यादुभयोस्सावर्ण्यं प्राप्तम्। लृकारस्य तवर्गेण लकारेणच न सावर्ण्यप्रसक्तिः। लृकारस्य विवृतत्वात्तवर्गस्य स्पृष्टत्वात् लकारस्य ईषत्स्पृष्टत्वाच्च । अतः लृकारस्य सकारेण सावर्ण्यं परिशिष्यते ॥ एवं प्राप्ते प्रतिषेधति । **नाऽऽज्झलौ** ॥ आ सहितः अच् आच्। शाकपार्थिवादित्वात्सहितशब्दस्य लोपः। सच हल्च आज्झलौ । तुल्यास्यसूत्रात्सवर्णमित्यनुवर्तते । तच्च पुल्लिङ्गद्विवचनान्ततया विपरिणम्यते । तदाह। **आकारसहितोऽजित्यादिना** ॥ ननु किमर्थोऽयं प्रतिषेध इत्यत आह। **तेनेत्यादि यणादिकं नेत्यन्तम्** ॥ तेन प्रतिषेधेन, आदिना सवर्णदीर्घसङ्ग्रहः। दधीति इकारस्य हकारे षकारे सकारे च परे "इकोयणचि" इति यणादेशः। शीतळमित्यत्र शकारे परे सवर्णदीर्घश्च नभवतीत्यर्थः। नन्वस्तु अकारहकारयोः इकारशकारयोः ऋकारषकारयोः लृकारसकारयोश्च सावर्ण्यम्। तथापि दधि षष्ठमित्यादौ यणादिकं न प्रसक्तम् । अच्परकत्वाभावादित्यत आह । **अन्यथेत्यादिना** ॥ अन्यथा तेषां सावर्ण्याभ्युपगमे दीर्घादीनामिव हकारादीनामप्यच्त्वं स्यादित्यन्वयः । ननु वर्णसमाम्नाये हकारादीनां अकारचकारमध्यगत्वाभावात् कथमच्त्वमित्यत आह । **ग्रहणकशास्त्रबलादिति** ॥ गृह्णन्त्यकारादयस्स्वसवर्णान् येन तत् ग्रहणं । करणेल्युट् स्वार्थे कः । अणुदित्सूत्रादित्यर्थः । यद्यप्यच्छब्दवाच्यत्वं वर्णसमाम्नायिकानामेव वर्णानाम्। तथापि इकोयणचीत्यादौ अच्छब्देन अकारादिषूपस्थितेषु तैः अणुदित्सूत्रबलेन स्वस्वसवर्णानामाकारादीनामुपस्थितिरस्ति । ततश्चात्राच्पदवाच्याकारादिवाच्यत्वादाकारादीनामपि लक्षणया अच्छब्देन ग्रहणं स्यादित्यर्थः । न च इकोयणचीत्यादौ शक्यार्थमादायैवोपपत्तेर्नलक्षणासंभवः। अणुदित्सूत्रन्तु अस्यच्वाविल्यादौ सावकाशमिति वाच्यम्। त्वादिभ्य इत्यादिनिर्देशबलेन प्रत्याहाराणां स्ववाच्यवाच्येषु लक्षणावश्यम्भावात् । तथाच अच्त्वं स्यादित्यस्य अच्पदबोध्यत्वं स्यादित्यर्थः। किन्तद्ग्रहणकशास्त्रमित्याकांक्षायान्तदुपपादनं प्रतिजानीते। **तथाहीति** ॥

१४ । अणुदित्सवर्णस्य चाप्रत्ययः । (१-१-६९)

प्रतीयते विधीयत इति प्रत्ययः, अविधीयमानोऽणुदिच्च सवर्णस्य संज्ञा स्यात् । अत्राण्परेण णकारेण । कु चु टु तु पु एते उदितः । तदेवम् । अ इत्यष्टादशानां संज्ञा । तथेकारोकारौ । ऋकारस्त्रिंशतः । एवं ऌकारोऽपि । एचो द्वादशानाम् । एदैतोरोदौतोश्च न मिथः सावर्ण्यम् । 'ऐऔच्' इति सूत्रारम्भसामर्थ्यात् । तेनैचश्चतुर्विंशतेः संज्ञाः स्युरिति नापादनीयम् । 'नाज्झलौ' (सू १३)

अणुदित्सवर्णस्य ॥ प्रत्ययशब्दस्य अणादिप्रत्ययपरत्वे 'ल्यादीनामः' 'इदमइश्' इत्यादीनां पर्युदासो न स्यादित्यतो व्याचष्टे । **प्रतीयत इति** ॥ उत् इत् यस्य सः उदित् कु चु टु तु पु इत्यादिः । चकारात्स्वरूपमित्यतः स्वमित्यनुवर्तते । तच्च षष्ठ्यन्ततया विपरिणम्यते । तदाह । **अविधीयमान इत्यादिना** ॥ अणिति पूर्वेण परेण वा प्रत्याहार इति संशये निर्धारयति । **अत्रेति** ॥ अस्मिन्नेव सूत्रे अण् परेण णकारेण । इतरत्र तु 'अणोऽप्रगृह्यस्य' इत्यादौ पूर्वेणैवेत्यर्थः । अत्र च आचार्यपारम्पर्योपदेशरूपं व्याख्यानमेव शरणम् । एवञ्चाणुदित्सूत्रेणानेन अकारादिभिश्चतुर्भिर्दीर्घप्लुतानामिव सवर्णभूतहकारादीनामपि ग्रहणादच्त्वात्तेषु परेषु इकारस्य यणादिकं स्यादिति नाज्झलाविति प्रतिषेध आवश्यक इति स्थितम् । अणुदित्सूत्रस्य फलमाह । **तदेवमिति** ॥ तत् अणुदित्सूत्रं एवं वक्ष्यमाणप्रकारेण फलतीत्यर्थः । **त्रिंशत इति** ॥ ऋ ऌ वर्णयोर्मिथस्सवर्णतया ऋकारेण स्वाष्टादशभेदानां ऌकारीयद्वादशभेदानां च ग्रहणादिति भावः । **एवं ऌकारोऽपीति** ॥ ऋकारस्यापि ऌकारसवर्णत्वादिति भावः । ननु एकारेण ऐकारप्रपञ्चोऽपि गृह्येत ऐकारेण एकारप्रपञ्चश्च । तथा ओकारेण औकारप्रपञ्चो गृह्येत । औकारेण ओकारप्रपञ्चश्च । ततश्च एचश्चतुर्विंशतेस्संज्ञास्युरित्येवं वक्तव्यम् । नतु द्वादशानामित्यत आह । **एदैतोरिति** ॥ कुतो न सावर्ण्यमित्यत आह । **ऐ औजिति** ॥ यदि ह्येदैतोः ओदौतोश्च परस्परं सावर्ण्यं स्यात्तर्हि एकारेण ऐकारप्रपञ्चस्य ओकारेण औकारप्रपञ्चस्य च अकारादिभिर्दीर्घप्लुतानामिव ग्रहणसम्भवात् 'ऐऔच्' इति सूत्रन्नारभ्येत । आरभ्यते च । अतः एदैतोरोदौतोश्च न परस्परं सावर्ण्यमिति विज्ञायत इत्यर्थः । अच् इच् एच् इत्यादि प्रत्याहारास्तु डकारेणैव निर्वाह्याः । न च 'एचोऽयवायावः' इत्यत्र यथासङ्ख्यार्थमैऔजिति सूत्रमस्त्विति वाच्यम् । तत्र 'स्थानेऽन्तरतम' इति सूत्रेणैव निर्वाहस्य वक्ष्यमाणत्वादिति भावः । वस्तुतस्तु, 'ऐ औच्' इति सूत्राभावे 'वृद्धिरादैच्' 'न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्' 'प्लुतावैच इदुतौ' इत्यादौ एङ्ग्रहणापत्तौ एदैतोरपि ग्रहणे प्रसक्ते तन्निवृत्यर्थमैच्प्रत्याहार आवश्यकइति तदर्थमैऔजित्यारम्भणीयमेव । अतः ऐऔजिति सूत्रारम्भस्य चरितार्थत्वात् एदैतोरोदौतोश्च मिथस्सावर्ण्याभावसाधकत्वकथनमनुपपन्नमेव । एदैतोरोदौतोश्च मिथस्सावर्ण्याभावस्तु वृद्धिरादैजित्यादौ क्वचिदैज्ग्रहणात् 'अदेङ्गुणः' इत्यादौ क्वचिदेङ्ग्रहणाच्च सुनिर्वाहः । अन्यथा सर्वत्र एङ्ग्रहणमेव ऐज्ग्रहणमवे वा कुर्यात् । तावतैव चतुर्णां ग्रहणसम्भवात् । अत एच् एङिति प्रत्याहारद्वयग्रहणसामर्थ्यादेदैतोरोदौतोश्चे न मिथस्सावर्ण्यम् । 'प्लुतावैच इदुतौ' 'एचोऽप्रगृह्यस्य' इति प्रत्याहारद्वयग्रहणवैयर्थ्याच्चेति शब्देन्दुशे-

इति सावर्ण्यनिषेधो यद्यप्याक्षरसमाम्नायिकानामेव, तथापि हकारस्याकारो न सवर्णः। तत्राकारस्यापि प्रश्लिष्टत्वात्। तेन 'विश्वपाभिः' इत्यत्र 'हो ढः'

खरे प्रपञ्चितम्। **तेनेति॥** एदैतोरोदौतोश्च मिथस्सावर्ण्याभावेनेत्यर्थः। **नापादनीयमिति॥** नाशङ्कनीयमित्यर्थः। एवञ्च एकारेण सह वर्तत इति सैः हेसैरित्यत्र 'एङ् ह्रस्वात्' इति संबुद्धिलोपो न। ग्लावं ग्लाव इत्यत्र 'औतोऽशसोः' इत्यात्वञ्च न। स्यादेतत्। हकारस्य आकारस्य च सवर्णसंज्ञा स्यात् स्थानप्रयत्नसाम्यात्। अज्झलामेव सावर्ण्यनिषेधात् वार्णसमाम्नायिकानामेव वर्णानां अज्झल्शब्दवाच्यत्वात्। आकारप्रश्लेषे च प्रमाणाभावात्। नचाकारस्याच्त्वात् तेन आकारस्यापि अणुदित्सूत्रेण ग्रहणादाकारहकारयोर्नसावर्ण्यमिति वाच्यम्। ग्रहणकसूत्रं हि लब्धात्मकमेव सत् 'अस्यच्वौ' इत्यादौ प्रवृत्तिमर्हति। नाज्झलाविति प्रवृत्तिदशायाञ्च ग्रहणकशास्त्रं नलब्धात्मकम्। तद्धि सवर्णपदघटितम्। सवर्णपदार्थावगमोत्तरमेव लब्धात्मकं सवर्णसंज्ञाविधायकञ्च तुल्यास्यसूत्रं सामान्यतः स्वार्थं बोधयदपि नाज्झलाविति अपवादविषयं परिहृत्य तदन्यत्रैव पर्यवसन्नं स्वकार्यक्षमम्। तदुक्तं 'प्रकल्प्यापवादविषयं उत्सर्गोऽभिनिविशत' इति। उक्तञ्च भाष्ये 'वर्णानामुपदेशस्तावत् उपदेशोत्तरकाला इत्संज्ञा। इत्संज्ञोत्तरकालः आदिरन्त्येनेति प्रत्याहारः। प्रत्याहारोत्तरकाला सवर्णसंज्ञा। तदुत्तरकालमणुदित्सूत्रम्। इत्येतेन समुदितेन वाक्येनान्यत्र सवर्णानां ग्रहणं भवति' इति। अन्यत्र 'अस्यच्वौ' इत्यादाविति। अत्र भाष्ये प्रत्याहारोत्तरकाला सवर्णसंज्ञेत्यनेन नाज्झलाविति निषेधसहितः सावर्ण्यविधिर्विवक्षितः। केवलसावर्ण्यविधेः प्रत्याहारानपेक्षत्वेन प्रत्याहारोत्तरकालिकत्वनियमासम्भवात्। तथाचाणुदित्सूत्रस्य नाज्झलाविति निषेधसहिततुल्यास्यसूत्रप्रवृत्तेः प्रागलब्धात्मकत्वात्। तेन नाज्झलाविति अज्ग्रहणेन सवर्णानां ग्रहणाभावात् सावर्ण्यविधिनिषेधाभावात् आकारहकारयोस्सावर्ण्यं स्यादिति शङ्कते। **नाज्झलाविति सावर्ण्येत्यादिना॥** यद्यपीति संभावनायाम्। अक्षरसमाम्नायश्चतुर्दशसूत्री। तत्र भवा आक्षरसमाम्नायिकाः। 'बह्वचोऽन्तोदात्तात्' इति ठञ्। न च नाज्झलाविति प्रवृत्तिदशायामणुदित्सूत्रप्रवृत्यभावेऽपि तत्र अजित्यनेन लक्षणया दीर्घप्लुतानां ग्रहणमस्तु। प्रत्याहाराणां स्ववाच्यवाच्येषु लक्षणाया अनुपदमेव प्रपञ्चितत्वादिति वाच्यम्। स्ववाच्यवाच्येषु हि प्रत्याहाराणां लक्षणा। न चात्राच्छब्दवाच्याकारादिवाच्यता दीर्घप्लुतानामस्ति। अणुदित्सूत्रस्येदानीमप्रवृत्तेरिति भावः। परिहरति। **तथापीति॥** वार्णसमाम्नायिकानामेव नाज्झलाविति निषेध इत्यभ्युपगमेऽपि हकारस्य आकारो न सवर्ण इत्यर्थः। कुत इत्यत आह। **तत्राकारस्यापीति॥** अपिशब्दो व्युत्क्रमः। तत्र नाज्झलाविति सूत्रे। आ सहितः अच् आच् इत्याकारस्यापि सवर्णदीर्घेण प्रश्लिष्टत्वादित्यर्थः। नन्वस्तु हकारस्य आकारस्य च सावर्ण्यं, किन्तत्प्रतिषेधार्थेन आकारप्रश्लेषेणेत्यत आह। **तेनेति॥** तेन हकारस्य आकारस्य च सावर्ण्यप्रतिषेधेन हकारेण आकारस्य ग्रहणाभावात्, विश्वपाभिरित्यत्र होढ इति हकारस्य विधीयमानं ढत्वं पकारादाकारस्य न भवति। आकारप्रश्लेषाभावे तु, तस्य हकारस्य च, सावर्ण्यसत्वात्, हकारेण आकारस्य च ग्रहणादिति, तस्य ढत्वं स्यादित्यर्थः। अत्र ढत्वस्यासिद्धत्वात् संयोगान्तलोप एवापादनीय इति नवीनाः। 'कालसमयवेलासु तुमुन्' इति सूत्रे वेलास्विति लकारादाकारस्य निर्देशः नाज्झलावित्यत्र आकारप्रश्लेषे प्रमाणम्।

(सू ३२४) इति ढत्वं न भवति। अनुनासिकाननुनासिकभेदेन यवला द्विधा। तेनाननुनासिकास्ते द्वयोर्द्वयोः संज्ञा।

१५। तपरस्तत्कालस्य। (१-१-७०)

तः परो यस्मात्स तात्परश्चोच्चार्यमाणसमकालस्यैव संज्ञा स्यात्। तेन 'अत्' 'इत्' इत्यादयः षण्णां षण्णां संज्ञा। 'ऋत्' इति द्वादशानाम्।

अन्यथा तत्र ढत्वस्य संयोगान्तलोपस्य वा आपत्तौ आकारो न श्रूयेतेत्यलम्। ननु ग्रहणकसूत्रे अञ्ग्रहणमेव क्रियताम्। अणुदित्सवर्णस्येति किमण्ग्रहणेन। हयवरलानां सवर्णाभावेन तेषु ग्रहणकशास्त्रस्य व्यर्थत्वादित्यत आह। **अनुनासिकेति। तेनेति॥** उक्तद्वैविध्येन सवर्णत्वात् अननुनासिकास्ते यवलाः प्रत्येकं द्वयोर्द्वयोस्संज्ञाः। अनुनासिकास्तु यवलाः अननुनासिकानामपि न संज्ञाः। भेदका गुणा इत्याश्रयणात्। वर्णसमाम्नाये अननुनासिकानामेव तेषां पाठाच्च। एवञ्च यवलसंग्रहार्थं ग्रहणकसूत्रे अञ्ग्रहणमपहाय अण्ग्रहणमिति भावः। ग्रहणकसूत्रे अण् सवर्णानां ग्राहक इति स्थितम्। एवं सति अत् इत् उत् इत्यादि तपराणामप्यणां स्वस्वसर्वसवर्णग्राहकत्वे प्राप्ते इदमारभ्यते। **तपरस्तत्कालस्य॥** तपर इत्यावर्तते। प्रथमस्तावत्तपरशब्दः तः परः यस्मादिति बहुव्रीहिः। द्वितीयस्तु तात् पर इति पञ्चमीसमासः। ग्रहणकसूत्रादणित्यनुवर्तते। तस्य तपरत्वेन उच्चार्यमाणवर्णस्य काल इव कालो यस्येति बहुव्रीहिः। ऊकालः, उष्ट्रमुख इत्यादिवत् समासः। एवञ्च अत्, इत्, इत्याद्यात्मकः अण् तपरत्वेन उच्चार्यमाणः स्वीयकालसदृशकालस्य संज्ञा स्यादित्यर्थः। तत्र, अत्, इत्, उत्, ऋत्, इत्येतेषां तपराणां ह्रस्वाकारादीनामणां कालास्तत्कालाः तत्तद्ह्रस्वप्रपञ्चाः। एत्, ऐत्, ओत्, औत्, इत्येतेषान्तु तपराणामेकारादीनां तत्तत्कालाः तत्तद्दीर्घप्रपञ्चाः। तत्र ह्रस्वाकारादीनां तपराणां तत्तद्ह्रस्वप्रपञ्चवाचकत्वस्य एकारादीनाञ्च दीर्घाणां तपराणां स्वस्वदीर्घप्रपञ्चवाचकत्वस्य लोकसिद्धत्वात् 'सिद्धेसत्यारम्भो नियमार्थः' इति न्यायेन सूत्रमिदं नियमार्थं संपद्यते। अण् तपरश्चेत् तत्कालस्यैव सवर्णस्य ग्राहकः। नत्वतत्कालस्येति। एवञ्च अतत्कालनिवृत्त्यात्मकपरिसङ्ख्यार्थमिदं सूत्रम्। वैयाकरणास्तु परिसङ्ख्याविधिमेव नियमविधिरिति व्यवहरन्ति। तदिदं सर्वमभिप्रेत्य व्याचष्टे। **तः परो यस्मादित्यादिना॥** नियमविधानस्य फलमाह। **तेनेत्यादिना॥** तेन नियमविधानेन। आदिना ऌत् इत्यादि सङ्ग्रहः। अत्, इत्, उत्, ऌत्, एत्, ऐत्, ओत्, औत्, इत्येते अष्टौ तपराः अणः स्वस्वसमानकालानां षण्णां षण्णामेव संज्ञाः। नत्वतत्कालानामित्यर्थः। **ऋदिति द्वादशानामिति॥** ऋऌवर्णयोरिति सावर्ण्यविधानादिति भावः। नन्वेवं ऌदित्यपि द्वादशानां ग्रहणं स्यात्। तथाच पुषादिद्युताद्यृलृदित इत्यादि विधयः ऋदित्स्वपि प्रवर्तेरन्निति चेन्न। ऋदित्यनेन ऌप्रपञ्चस्य ग्रहणेऽपि क्वचित् ऌदिद्ग्रहणबलेन ऌ इत्यनेन ऋप्रपञ्चस्य ग्रहणाभावात्। अन्यथा ऋतो ङीत्यादौ क्वचित् ऋग्रहणस्य पुषादिद्युताद्यृलृदित इत्यादौ क्वचित् ऌदिद्ग्रहणस्य च वैयर्थ्यापत्तेः। प्रथमातिक्रमणे कारणाभावेन सर्वत्र ऋदिद्ग्रहणस्यैव कर्तुं शक्यत्वात्। इदमेवाभिप्रेत्य ग्रहणकसूत्रे ऋदिति द्वादशानामित्येवोक्तम्। ननु ऌदपीति। अत्र चतः परो यस्मादिति बहुव्रीहेः अत्,

१६ । वृद्धिरादैच् । (१-१-१)

आदैच वृद्धिसंज्ञः स्यात् ।

१७ । अदेङ्गुणः । (१-१-२)

अदेङ् च गुणसंज्ञः स्यात् ।

१८ । भूवादयो धातवः । (१-३-१)

क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः ।

इत्, उत्, इत्यादुदाहरणम् । तात्पर इति पञ्चमीसमासस्य तु वृद्धिरादैजित्यैकार उदाहरणम् । आत्, ईत्, ऊत्, इत्यादि तु न तपरसूत्रस्योदाहरणम् । आकारादिषु हि तपरसूत्रमपूर्वविधानार्थम्, उत नियमार्थं? नाद्यः । तपरसूत्रे ग्रहणकसूत्रादणित्यनुवृत्तेः । तत्र अणित्यस्य उक्तरीत्या वर्णसमाम्नायपठितवर्णमात्रपरत्वात् । तपरसूत्रे अण्ग्रहणानुवृत्यभावेऽपि जातिपक्षे आकारादिभिः दीर्घैः स्वस्वसमानकालिकप्रपञ्चस्य वाच्यताया लोकत एव सिद्धत्वेन तेषु तपरसूत्रप्रवृत्तेर्व्यर्थत्वात् । न द्वितीयः । उक्तरीत्या ग्रहणकसूत्रस्य वार्णसमाम्नायिकवर्णमात्रविषयतया आकारादिषु तस्य प्रवृत्यसम्भवेन तपरसूत्रस्य तेष्वतत्कालव्यावृत्तिफलकतन्नियमनार्थत्वानुपपत्तेः । सिद्धे सत्यारम्भस्यैव नियमार्थत्वात् । एवञ्च आत्, ईत्, इत्यादि तपरकरणमसंदेहार्थमेवेत्यास्तां तावत् । तदेवं वृत्तः प्रत्याहारप्रपञ्चः ग्रहणकशास्त्रप्रपञ्चश्च । इदानीं संज्ञान्तराणि विधास्यन् वृद्धिसंज्ञान्तावदाह । **वृद्धिरादैच्** ॥ यद्यपि पाणिनीयाष्टाध्याय्यामिदमादिमं सूत्रम् । तथापि नेदमादावुपन्यस्तम् । अस्य सूत्रस्य तपरकरणे च प्रत्याहारगर्भितत्वेन ग्रहणकशास्त्रनियमार्थतपरसूत्रप्रत्याहारसूत्रप्रवृत्त्युत्तरप्रवृत्तिकतया प्रत्याहारशास्त्रग्रहणकशास्त्रप्रपञ्चनिरूपणात् प्रागुपन्यासानर्हत्वात् । नच सूत्रकृता अयमेव पाठक्रमः कुतो नाद्रियत इति वाच्यम् । स्वतन्त्रेच्छस्य महर्षेर्नियन्तुमशक्यत्वात् । आच्च ऐचेति समाहारद्वन्द्वः । 'द्वन्द्वाच्चुदषहान्तात्' इति समासान्तस्तु न। अत एव निर्देशेन समासान्तविधेरनित्यत्वात् । 'चोः कुः' इति पदान्ते विहितं कुत्वमपि न। 'अयस्मयादीनि छन्दसि' इति भत्वात्। 'वृद्धिरादैजदेङ्' इति संहितापाठपक्षे चकारस्य 'झलाञ्जशोऽन्ते' इति पदान्ते विहितजश्त्वन्तु भवत्येव । उभयसंज्ञान्यपि छन्दसि दृश्यन्ते, इति वचनात् । छन्दोवत् सूत्राणि भवन्तीति छान्दसविधीनां सूत्रेष्वपि प्रवृत्तेः । नचैवमपि पदत्वात् कुत्वं भत्वात् जश्त्वाभावश्च कुतो न स्यादिति वाच्यम् । 'छन्दसि दृष्टानुविधिः' इति वचनादित्यलं ॥ आच्च ऐचेतीतरेतरयोगद्वन्द्वो वा । तथासति सौत्रमेकवचनम् । आचार्यपारम्पर्योपदेशसिद्धसंज्ञाधिकारात् संज्ञेति लभ्यते । तदेतदाह । **आदैच्चेत्यादिना । अदेङ्गुणः** ॥ संज्ञाप्रस्तावात् संज्ञेति लभ्यते । अच्च एङ् चेति समाहारद्वन्द्वः । तदाह। **अदेङ्चेत्यादिना । भूवादयो धातवः** ॥ भूश्च वाश्च भूवौ । आदिश्च आदिश्च आदी । प्रथमः आदिशब्दः प्रभृतिवचनः । द्वितीयस्तु प्रकारवचनः । भूवौ आदी येषान्ते भूवादयः । भू प्रभृतयः वा सदृशाश्च ये, ते धातुसंज्ञका इत्यर्थः । वा धातुसादृश्यञ्च क्रियावाचकत्वेन । तदाह । **क्रियावाचिन इत्यादिना** ॥ क्रियावाचिनः किम् । धातुपाठे या इत्यस्य पाठात् याः पश्यन्तीत्यत्र टाबन्त

१९ । प्राग्रीश्वरान्निपाताः । (१-४-५६)

इत्यधिकृत्य ।

२० । चादयोऽसत्त्वे । (१-४-५७)

अद्रव्यार्थाश्चादयो निपातसंज्ञाः स्युः ।

२१ । प्रादयः । (१-४-५८)

अद्रव्यार्थाः प्रादयस्तथा ।

२२ । उपसर्गाः क्रियायोगे । (१-४-५९)

२३ । गतिश्च । (१-४-६०)

यच्छब्दस्य धातुत्वं माभूत् । धातुत्वे हि आतो धातोरित्यालोपः स्यात् । वस्तुतस्तु लक्षणप्रतिपदोक्तपरिभाषया टाबन्तयच्छब्दस्यात्र न ग्रहणप्रसक्तिः । क्रियावाचिन इति तु वाशब्दस्य विकल्पार्थस्य निपातस्य धातुत्वनिवृत्त्यर्थम् । धातुपाठे वा इत्यस्य पाठात् वा गतिगन्धनयोः या प्रापण इत्यर्थनिर्देशस्याधुनिकत्वात् । क्रियावाचिन इत्युक्तौ तु न दोषः । वार्थस्य विकल्पस्य, वा भविष्यति इति वा अभवदित्येवं भूतभविष्यत्कालसम्बन्धाभावेन क्रियात्त्वाभावादिति शब्देन्दुशेखरे स्थितम् । भ्वादयः किम् । वर्जनक्रियावाचिनो हिरुक् इत्यस्य धातुत्वं माभूत् । **प्राग्रीश्वरान्निपाताः** ॥ प्रथमस्य चतुर्थपादे 'तत्प्रयोजको हेतुश्च' इत्यनन्तरमिदं सूत्रम् । रीश्वरशब्दः । 'अधिरीश्वरे' इति सूत्रैकदेशस्य अनुकरणम् । अनुकरणत्त्वात् नापशब्दः । अत एव प्रत्यक्षोपजीव्यत्वादिति चिन्तामणिवाक्यस्य प्रत्यक्षेतीति प्रतीकग्रहणं तद्व्याख्याने दृश्यते । इतः प्रभृति अधिरीश्वर इत्येतत्पादीयोपरितनसूत्रे रीश्वरशब्दात् प्राक् निपातसंज्ञकाः प्रत्येतव्या इत्यर्थः । निपातपदमनुवर्तत इति यावत् । रेफविशिष्टग्रहणं किम् । 'ईश्वरे तोसुन् कसुनौ' इति तृतीयाध्यायस्थस्यावधित्वम्माभूत् । यदि तु प्रथमातिक्रमणे कारणाभावात् अधिरीश्वर इत्यस्यैवावधिः तदा सरेफग्रहणं स्पष्टार्थम् । **चादयोऽसत्त्वे** ॥ चः आदिः येषान्ते चादयः । गणपाठसिद्धाः । निपाता इत्यधिकृतम् । सत्वशब्देन द्रव्यमुच्यते 'द्रव्याऽसुव्यवसायेषु सत्वम्' इत्यमरः । लिङ्गसंख्याकारकान्वितं द्रव्यम् । चाद्यर्थास्समुच्चयादयः । यदा चादिभिर्गम्यन्ते तदा लिङ्गाद्यन्विता न भवन्ति । यदा समुच्चयादिशब्दगम्यास्तदा लिङ्गाद्यन्विताः । शब्दस्वाभाव्यात् । न सत्वं असत्वं अद्रव्यं तत्र वाचकतया विद्यमानाश्चादयः निपातसंज्ञकाः स्युरित्यर्थः । तदाह । **अद्रव्यार्था इति** ॥ असत्वे किम् । छागः पशुरिति चादौ पठितस्यापि पशुशब्दस्य अत्र द्रव्यवाचित्वान्न निपातत्वम् । इह तु स्यादेव । पुष्टं पशुं मन्यते । इह पशु इति सम्यगर्थे । **प्रादयः** ॥ असत्व इत्यनुवर्तते, निपाता इति च । तदाह । **अद्रव्येति । तथेति** ॥ निपातसंज्ञका इत्यर्थः । **उपसर्गाः । गतिश्च** ॥ सूत्रद्वयमिदं व्याख्यासौकर्यात् सहोपात्तम् । प्रादय इत्यनुवर्तते । गतिरिति

प्रादयः क्रियायोगे उपसर्गसंज्ञा गतिसंज्ञाश्च स्युः । प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप, एते प्रादयः ।

२४ । न वेति विभाषा । (१-१-४४)

निषेधविकल्पयोर्विभाषा संज्ञा स्यात् ।

बहुत्वे एकवचनमार्षम् । तदाह । **प्रादय इत्यादिना । क्रियायोग इति ॥** क्रियाया अन्वये सतीत्यर्थः । निपाता इत्यप्यत्रानुवर्तते । प्राग्रीश्वरात्तदधिकारात् । ततश्च प्रादयो निपातसंज्ञका एव सन्तो गत्युपसर्गसंज्ञकाभवन्ति । आकडारादिति च वाच्यते । गत्युपसर्गसंज्ञयोस्तु गतिश्चेति चकारादेव समावेशस्सिद्ध्यति । ततश्च प्रणेयमित्यादौ उपसर्गकार्यं 'उपसर्गादसमासेऽपि' इत्यादि सिद्ध्यति । गतिकारकेत्यादि कार्यञ्च निपातस्यानर्थकस्येत्यादि च । अथ प्रादीन् पठति । **प्रपरेत्यादि ॥** परा इत्याकारान्तं । अयधातौ 'उपसर्गस्यायतौ' इति निर्दुरोर्लत्वम् । निलयते दुलयते । निसो दुसश्च 'ससजुषोरुः' इति रुत्वस्यासिद्धत्वात् न लत्वम् । निरयते दुरयते । एतदर्थमेव निस् दुसोर्निर् दुरोश्च पृथक्पाठः । **नवेति विभाषा ॥** मेध्यः पशुरनड्वान्विभाषित इत्यादि याज्ञिकप्रयोगे विभाषाशब्दः केवलविकल्पे दृष्टः । इहतु शास्त्रे निषेधो विकल्पश्चेति द्वयं मिलितं विभाषाशब्दार्थ इति बोधयितुमिदमारभ्यते । इति शब्दाभावे स्वं रूपं शब्दस्येति न वा शब्दयोः स्वरूपपरत्वान्नवाशब्दयोर्विभाषासंज्ञेत्यर्थस्स्यात् । ततश्च "विभाषाश्वेः" इत्यादौ न वा शब्दावादेशौ स्यातां । इति करणे तु नायं दोषः । इतिर्हि प्रत्येकं सम्बध्यते । ततश्च नेति शब्देन योऽर्थो गम्यते निषेधः, वेति शब्देन योऽर्थो गम्यते विकल्पः, तदुभयस्य मिलितस्य विभाषा संज्ञा स्यादित्यर्थः फलति । एवञ्च नवाशब्दार्थयोरेव संज्ञित्वं लभ्यते , न तु नवाशब्दस्वरूपयोरिति नोक्तदोषः । तदाह । **निषेधविकल्पयोरित्यादि ॥** उभयत्र विभाषार्थमिदं सूत्रम् । तथाहि । प्राप्तविभाषा अप्राप्तविभाषा उभयत्र विभाषेति त्रिविधा विभाषा । प्राप्तविभाषा यथा । विभाषा जसीति वर्णाश्रमेतरे वर्णाश्रमेतरा इत्यत्र द्वन्द्वे चेति नित्यतया सर्वनामसंज्ञानिषेधे प्राप्ते विभाषेयं । अप्राप्तविभाषा यथा । तीयस्य ङित्सु विभाषेति । द्वितीयस्मै द्वितीयायेत्यादौ तीयप्रत्ययस्य सर्वादिगणे पाठाभावात् अप्राप्तायां सर्वनामसंज्ञायां विभाषेयम् । उभयत्र विभाषा यथा । विभाषा श्वेरिति श्वयतेर्लिटि यङि च सम्प्रसारणं विभाषेयम् । तत्र लिटि शुशाव, शिश्वाय, शुशुवतुः, शिश्वियतुः, इत्याद्युदाहरणम् । यङि तु शोशूयते इति । अत्र यङंशे अप्राप्तविभाषैवेयम् । लिटि तु द्विवचनबहुवचनेष्वपित्सु "वाचि स्वपि यजादीनां किति" इति नित्यतया सम्प्रसारणं प्राप्तम् । पित्सु त्वेकवचनेषु सम्प्रसारणं न प्राप्तमेव । 'असंयोगाल्लिट् कित्' इति कित्त्वस्य अपित्स्वेव प्रवृत्तेः । एवञ्च प्राप्तेऽप्राप्तेच आरम्भात् "विभाषा श्वेः" इत्युभयत्र विभाषेति स्थितिः । तत्र यदि 'नवेति विभाषा' इति सूत्रन्नारभ्येत । तर्हि 'अनड्वान्विभाषित' इत्यादि याज्ञिकप्रयोग इव विभाषा श्वेरित्यत्रापि केवलविकल्पः प्रतीयेत । भावः अभावश्चेति द्वयन्तावद्विकल्पः । ततश्च विभाषाश्रुतौ प्रवृत्तिस्तदभावश्चेति द्वयमपि विधेयमिति

२५। स्वं रूपं शब्दस्याशब्दसंज्ञा। (१-१-६८)

शब्दस्य स्वं रूपं संज्ञि शब्दशास्त्रे या संज्ञा तां विना।

लभ्यते। तत्र यदि "विभाषाश्वेः" इति विकल्पो विधिमुखः लिटि श्वयतेस्संप्रसाणं भवति न भवतीति पित्स्वेव विकल्पस्य प्रवृत्तिः स्यात्। तत्र हि सम्प्रसारणस्य। वचिस्वपीति किति विहितस्य अप्राप्तत्वेन प्रथमं भवनांशो विधेयः। तस्य पाक्षिकत्वाय न भवतीत्यपि विधेयम्। कित्सु तु प्रवृत्तिर्नस्यात्। तेषु हि वचिस्वपि यजादीनां कितीति प्राप्तत्वात्। प्रथमं भवनांशो न विधेयः। न भवतीत्यंश एव विधेयः। एवञ्च उभयांशविधेयत्वालाभात्तत्र विकल्पविधिरयं न प्रवर्तेत। तत्र नित्यमेव संप्रसारणं स्यात्। यदितु विकल्पो निषेधमुखः लिटि श्वयतेस्सम्प्रसारणन्नभवतीति, तर्हि कित्स्वेव प्रवृत्तिस्स्यात्। तत्र हि वचिस्वपीति प्राप्तत्वान्नभवतीति प्रथमं विधेयम्। अभवनस्य पाक्षिकत्वलाभाय भवतीत्यपि विधेयम्। पित्सु तु प्रवृत्तिर्नस्यात्। तत्र सम्प्रसारणस्य अप्राप्ततया न भवतीत्यंशस्य प्रथमं विध्यनर्हत्वात्। न च पित्सु विधिमुखः कित्सु निषेधमुखः इत्युभयथापि प्रवृत्तिरिति वाच्यम्। सकृच्छ्रुतस्य विभाषाशब्दस्य क्वचिद्विधिमुखविकल्पबोधने क्वचिन्निषेधमुखविकल्पबोधने च असामर्थ्यात्। आवृत्या तद्बोधनेतु स एव दोषः। नवेतिविभाषेत्यारम्भेतु श्रुतक्रमानुरोधेन बोधात्। नेत्यंशेन कित्सु पूर्वन्निषेधः प्रवर्तते। ततः किदकिद्रूपे सर्वस्मिन् लिटि निस्सम्प्रसारणतया ऐकरूप्यं प्रापिते सति भवति नभवतीत्येकरूपेण विधिमुख एव विकल्पः प्रवर्तते। तदेवमुभयत्र विभाषार्थमिदं सूत्रम्। प्राप्तविभाषायान्तु नास्योपयोगः। तत्र भवनांशस्य प्राप्तत्वेन विध्यनर्हत्वात्। अप्राप्तविभाषायामपि न तस्योपयोगः। तत्र अभवनांशस्य सिद्धत्वेन विध्यनर्हत्वात्। नचैवमपि 'उणादयोबहुलम्। हृक्रोरन्यतरस्याम्। छन्दस्युभयथा। अनुपसर्गाद्वा' इत्यादि विधिषु विभाषाशब्दाभावात्। केवलविकल्पविधौ वैरूप्यं दुर्वारमिति वाच्यम्। विभाषाशब्दस्यात्रसूत्रे विकल्पवाचकशब्दोपलक्षणत्वात्। एवञ्च लोके ये विकल्पपर्यायाश्शब्दाः ते सर्वे अस्मिन् शास्त्रे निषेधविकल्पयोः प्रत्यायका इति सूत्रार्थपर्यवसानं बोध्यम्। भाष्येतु विभाषादिशब्दानां लोकवदेव केवलविकल्पपरत्वेऽपि लक्ष्यानुरोधेनैव क्वचिद्विधिमुखेन क्वचिन्निषेधमुखेन विकल्पस्य प्रवृत्युपपत्तेः एतत्सूत्रं प्रत्याख्यातमित्यलं बहुना। 'अग्नेर्ढक्। वाय्वृतुपित्रुषसो यत्। राज्ञो यत्' इत्यादौ लौकिकव्युत्पत्त्या उपस्थितानां वह्निवातादीनां अर्थानां ढगादिप्रत्ययैः पौर्वापर्यसम्भवात् प्रातिपदिकादित्यनेनान्वयासम्भवाच्च तत्तदर्थकपर्यायशब्दानां ग्रहणापत्तौ तन्नियमार्थमिदं सूत्रमारभ्यते। **स्वं रूपम्॥** अग्नेर्ढगित्यादौ अग्न्यादिशब्दस्य यत् स्वरूपं श्रुतं तदेव अग्न्यादिशब्दैः प्रत्येतव्यम्। ननु तदन्यः तत्तत्पर्यायोऽपि। शब्दशास्त्रे सङ्केतिता वृद्धिगुणादिसंज्ञा शब्दसंज्ञा तत्र नायन्नियम इत्यर्थः। तदाह। **शब्दस्य स्वं रूपं संज्ञीति॥** बोध्यमित्यर्थः। न च वृद्धिः गुणः इत्यादि संज्ञाविधिबलादेव तत्र तदर्थग्रहणं भविष्यतीति किं शब्दसंज्ञेत्यनेनेति वाच्यम्। 'उपसर्गे घोः किः' इत्यत्र घु शब्द इति घु धातु निवृत्यर्थत्वात् 'दाधाघ्वदाप्' इति संज्ञाकरणस्य 'घुमास्थागापाजहातिसां हलि' इत्यादौ आवश्यकतया संज्ञाकरणस्य

२६ । येन विधिस्तदन्तस्य । (१-१-७२)

विशेषणं तदन्तस्य संज्ञा स्यात् स्वस्य च रूपस्य । समासप्रत्ययविधौ प्रतिषेधः । उगिद्वर्णग्रहणवर्जम् ।

२७ । विरामोऽवसानम् । (१-४-११०)

वर्णानामभावोऽवसानसंज्ञस्यात् ।

सामर्थ्योपक्षयादित्यन्यत्र विस्तरः । इदं सूत्रं भाष्ये प्रत्याख्यातम् । यत् शब्दस्य रूपं उपादाय यो विधिरारभ्यते सः तस्य तदन्तस्य च भवतीत्येतदुक्तुमाह । **येन विधिः** ॥ विधीयत इति विधिः 'उपसर्गे घोः किः' इति दधातेः भावे किप्रत्ययः । येनेति करणे तृतीया । शास्त्रकृत् विधाने कर्ता । धातोरित्यधिकृत्य एरजिति इकारेण विशेषणेन धातोरच्प्रत्ययं विधत्ते पाणिनिः । करणं च व्यापारवत् । एरजित्यत्र विशेषणस्येकारस्य पाणिनिकर्तृकविधानक्रियायां करणस्य इतरव्यावर्तनमेव व्यापारः । ततश्च विशेषणमेवात्र येनेति तृतीयान्तेनोच्यते । स्वं रूपमित्यतः स्वमित्यनुवर्तते । षष्ठ्यन्ततया च विपरिणम्यते । एवं च विशेषणसमर्पकशब्दः तदन्तस्य स्वस्य च प्रत्यायक इति फलति । तदाह । **विशेषणं तदन्तस्य संज्ञा स्यात् स्वस्य चेति** ॥ विशेषणसमर्पकशब्दस्तदन्तस्य शब्दस्य विशेषणसमर्पकशब्दस्य च बोधकस्स्यादिति यावत् । ततश्च एराजित्यत्र इकारान्ताद्धातोरच् प्रत्ययस्स्यात् इकाररूपाद्धातोश्चेति फलति । यथा । चयः, अयः । केचित्तु करणं कर्तृपरतन्त्रमिति तृतीयया पारतन्त्र्यं लक्ष्यते, तच्च शब्दानां विशेषणत्वेनेति विशेषणपरत्वं यच्छब्दस्य लभ्यत इत्याहुः । तत्तु शब्देन्दुशेखरे दूषितम् । **समासेति** ॥ वार्तिकमेतत् । समासविधौ प्रत्ययविधौ च तदन्तविधेः प्रतिषेधो वाच्य इत्यर्थः । तेन कृष्णं परमश्रित इत्यत्र द्वितीयाश्रितेति समासो न भवति । सूत्रनडस्य गोत्रापत्यं सौत्रनाडिः अत इञ्, अनुशतिकादीनां चेत्युभयपदवृद्धिः । अत्रनडादिभ्यः फक्, इति न भवति । नन्वेवं सति पचन्तमतिक्रान्ता अतिपचन्तीत्यत्र उगितश्चेति उगिदन्तात्प्रातिपदिकात् विहितो ङीप् न स्यात् । प्रत्ययविधौ तदन्तविधेः प्रतिषेधात् । तथा दाक्षिरित्यत्र अत इञ् इति इञ् न स्यात् । अस्यापत्यं इरित्यत्रैव इञ् स्यादित्यत आह । **उगिदिति** ॥ इदमपि वार्तिकम् । द्वितीयायां चेति वर्जयतेर्णमुल् । उगिद्ग्रहणं वर्णग्रहणं च वर्जयित्वा समासप्रत्ययविधाविति उक्तः प्रतिषेधो भवति । उगिद्वर्णग्रहणे तु येन विधिरिति तदन्तविधिरस्त्येव ततश्च अतिपचन्तीत्यत्र उगिदन्तप्रातिपदिकान्तात् उगितश्चेति ङीप् । दाक्षिरित्यत्र अवर्णान्तादिञ्च सिध्यति । **विरामोऽवसानम्** ॥ विरम्यते अस्मिन्निति विरामः सामीपिकेऽधिकरणे घञ् । विरमणं क्रियाया अभावः । स च शब्दशास्त्रप्रस्तावात् वर्णानामुच्चारणाभावात्मक इति लभ्यते । तथाच यस्मिन् वर्णे उच्चारिते सति अव्यवहितोत्तरकाले वर्णान्तराणामुच्चारणाभावः सः अन्त्यवर्णः अवसानसंज्ञक इत्यर्थः फलति । तदभिप्रेत्य व्याचष्टे । **वर्णानामित्यादिना** ॥ यस्मिन्नुच्चारिते सति वर्णान्तराणां उच्चारणाभावः सः अन्त्यवर्णः अवसानसंज्ञकः इत्यध्याहारेण विवरणं

२८ । परः सन्निकर्षः संहिता । (१-४-१०९)

वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात् ।

२९ । सुप्तिङन्तं पदम् । (१-४-१४)

सुबन्तं तिङन्तं च पदसंज्ञं स्यात् ।

३० । हलोऽनन्तराः संयोगः । (१-१-७)

अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः ।

३१ । ह्रस्वं लघु । (१-४-१०)

३२ । संयोगे गुरु । (१-४-११)

संयोगे परे ह्रस्वं गुरुसंज्ञं स्यात् ।

योज्यम् । यद्वा वर्णानामुच्चारणाभावः विरामः । भावे घञ् । स च किंचिद्वर्णोच्चारणोत्तरकालिक एव गृह्यते । व्याख्यानात् । अस्मिन् पक्षे किंचिद्वर्णोच्चारणोत्तरं वर्णान्तराणामुच्चारणाभावः अवसानमिति विवरणयोजना । तत्र प्रथमपक्षे खरवसानयोरित्यत्र खरि परतः रेफस्य विसर्गः । अवसाने तु रेफे स्थानिनीति योज्यम् । खरवसानयोरित्येकापि सप्तमी विषयभेदाद्भिद्यते । द्वितीयपक्षे तु अभावस्यापि बुद्धिकृतं परत्वं बोध्यम् । **परस्सन्निकर्षः** ॥ परः अतिशयितः "दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्" इत्यतः "दूरान्तिकाभ्यां तसिः" इत्यतः "अतिशायने तमबिष्ठनौ" इत्यतश्च "प्रकृत्यैकाच्" इत्यतः "अजादी गुणवचनादेव" इत्यतः "टेः" इत्यतः "प्रत्ययस्य" इत्यतः "आदेः परस्य" इत्यतः "अनेकाल्शित्सर्वस्य" इत्यतः "स्थानेऽन्तरतमः" इत्यतः "तस्य परमाम्रेडित" इत्यतः "डाचि बहोः पूगेषु" इत्यतः "अकच्प्रकरणे" इत्यतः "तदस्मिन्नधिकमिति दण्डादिभ्यो यः" इत्यतः "तत्र तस्येव" इत्यतः "प्रकारवचने थाल्" इत्यतः "इदमस्थमुः" इत्यतः "किमोऽत्" इत्यतः "सर्वादीनि सर्वनामानि" इत्यतः "जसः शी" इत्यतः "शी सर्वनामस्थानम्" इत्यतः "सुडनपुंसकस्य" इत्यतः "ह्रस्वो नपुंसके प्रातिपदिकस्य" इत्यतः "ह्रस्वस्य पिति कृति तुक्" इत्यतः "तुगागमनियमात्" इत्यतः "अव्ययसर्वनाम्नामकच्प्राक्टेः" इत्यतः "पञ्चम्याः परावध्यर्थे" इत्यतः "अपादाने चाहीयरुहोः" इत्यतः "ध्रुवमपायेऽपादानम्" इत्यतः "ध्रुवमपायेऽवधिमदवधिमच्च" इत्यतः "अवधेर्मर्यादाभिविध्योः" इत्यतः "अवधेरेव

३३ । दीर्घं च । (१-४-१२)

दीर्घं च गुरुसंज्ञं स्यात् ।

। इति संज्ञाप्रकरणम् ।

॥ अथ परिभाषाप्रकरणम् ॥

३४ । इको गुणवृद्धी । (१-१-३)

गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्र 'इकः' इति षष्ठ्यन्तं पदमुपतिष्ठते ।

३५ । अचश्च । (१-२-२८)

पर इत्यादिना ॥ दीर्घश्च ॥ संयोग इति नानुवर्तते । दीर्घमपि गुरुसंज्ञकमित्यर्थः । **इति संज्ञाप्रकरणमिति ॥** सन्धिकार्योपयोगिप्रथमाध्यायस्थसंज्ञानिरूपणं समाप्तमित्यर्थः । **इको गुणवृद्धी ॥** इक इति षष्ठ्यन्तशब्दः स्वरूपपरः नपुंसकलिङ्गः प्रथमैकवचनान्तः । सोर्लुका लुप्तत्वादत्वसन्तस्येति दीर्घो न । इक्स् शब्द इत्यर्थः । उपतिष्ठत इति शेषः 'वृद्धिरादैच्' 'अदेङ्गुण' इत्यतो वृद्धिरिति गुण इति चानुवर्तते । इति शब्दोऽध्याहार्यः । यत्र विधीयते तत्रेत्यप्यध्याहार्यम् । गुणो वृद्धिरित्युच्चार्य यत्र गुणवृद्धी विधीयेते तत्र इक इति, षष्ठ्यन्तं पदमुपतिष्ठत इति योजना । तदाह । **गुण वृद्धिशब्दाभ्यामित्यादिना । उपतिष्ठत इति ॥** सङ्गतं भवतीत्यर्थः । उपाद्देवपूजासङ्गतिकरणेत्यात्मनेपदम् । सोऽयं पदोपस्थितिपक्षो भाष्यादौ सिद्धान्ततः । 'सार्वधातुकार्धधातुकयोः' 'भिदेर्गुणः', इत्याद्युदाहरणम् । इक इत्यस्यान्वयप्रकारस्तु तत्र तत्र स्पष्टीभविष्यति । यत्र विधीयेते इत्युक्त्या वृद्धिर्यस्याचामित्याद्यनुवादे इक इति नोपतिष्ठते । अनुवादे परिभाषाणामनुपस्थितेः,* 'त्यदादीनामः', इत्यादावपि नेदमुपतिष्ठते । तत्र गुणवृद्धिशब्दयोरश्रवणात् । **अचश्च ॥** अच इत्यपि षष्ठ्यन्तशब्दः स्वरूपपरः । पूर्वसूत्रे इक इतिवत् । ऊकालोऽज्झ्रस्वदीर्घप्लुत इत्यनुवर्तते ।

---

*अत्रेदं तत्वम् । अनुवादे परिभाषा नोपतिष्ठते इत्यत्रानुवादपदं अनूद्यमानविशेषणपरम् । एवञ्च 'अनूद्यमानविशेषणेषु परिभाषा नोपतिष्ठते' इति, निष्कर्षः । 'वृद्धिर्यस्याचामादिस्तद्वृद्धम्' इति वृद्धसंज्ञाविधायकसूत्रे वृद्धिशब्दस्य अनूद्यमानविशेषणत्वेनोपात्तत्वात् तत्र 'इको गुणवृद्धी' इति परिभाषाया अनुपस्थानात् शालीयः, मालीयः, इत्यादि लक्ष्यं सिद्ध्यति । यदि तत्र इक्परिभाषा उपतिष्ठेत, तदा औपगवीयः इत्याद्येव सिद्ध्येत् । तत्रैव औकाररूपवृद्धेः उकाररूपेक्स्थानिकत्वात् । नतु शालीयः मालीयः इत्यादौ । तत्र आकाररूपाया वृद्धेरतथात्वात् । तथैव 'अतो गुणे' इत्यनुवाद्यविशेषणस्थलेपीक्परिभाषोपस्थितौ, एधे, पचे, यजे, इत्यादावेव पररूपं स्यात् । अत्र एकाररूपगुणानामिक्स्थानिकत्वात् । नतु पचतीत्यादौ । तत्र अकाररूपगुणस्य इक्स्थानिकत्वाभावादित्यपि बोध्यम् ।

ह्रस्वदीर्घप्लुतशब्दैर्यत्राज्विधीयते तत्र 'अचः' इति षष्ठ्यन्तं पदमुपतिष्ठते।

३६। आद्यन्तौ टकितौ। (१-१-४६)

टित्कितौ यस्योक्तौ तस्य क्रमादाद्यन्तावयवौ स्तः।

३७। मिदचोऽन्त्यात्परः। (१-१-४७)

'अचः' इति षष्ठ्यन्तम्। अचां मद्ध्ये योऽन्त्यस्तस्मात्परस्तस्यैवान्तावयवो मित्स्यात्।

इति यत्र विधीयत इत्यध्याहार्यम्। फलितमाह। **ह्रस्वेत्यादिना** ॥ 'दिव उत्' इत्यादौ तु नेदं प्रवर्तते। ह्रस्वादिशब्दानां अश्रवणात् 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इत्याद्युदाहरणं। श्रीपं। नेह सुपात् ब्राह्मणकुलम्। **आद्यन्तौ टकितौ** ॥ आदिश्च अन्तश्च आद्यन्तौ टश्च क् च टकौ। टकारादकार उच्चारणार्थः। टकौ इतौ ययोस्तौ टकितौ। अन्तशब्दः प्रत्येकं सम्बध्यते। टित्कितौ आद्यन्तावयवौ स्तः। कस्येत्याकांक्षायां यस्य तौ विहितौ तयोरित्यर्थाल्लभ्यते। तदाह। **टित्कितावित्यादिना** ॥ क्रमादिति यथासंख्यसूत्रलभ्यम्। टित् आद्यवयवः कित् अन्तावयव इत्यर्थः। नचैवं सति मिळितयोरेकत्रान्वयाभावात् कथमिह द्वन्द्व इति वाच्यम्। प्रथमतस्समुदायरूपेण परस्परयुगळयोरन्वयबोधमादाय द्वन्द्वप्रवृत्तौ सत्यां यथासङ्ख्यसूत्रपर्यालोचनया पुनः प्रत्येकान्वयोपपत्तेः। एचोऽयवायाव इत्यादावप्येषैव गतिः। लोके त्वेवंजातीयकप्रयोगः असाधुरेवेति भाष्यादिषु स्पष्टम्। अतैव यथासंख्यसूत्रोपन्यासो युक्तः। 'आर्धधातुकस्येड्वलादेः' भविता। 'ङ्णोः कुक् टुक् शरि' प्राङ्क्षष्टः इत्याद्युदाहरणम्। पुरस्तादपवादाः अनन्तरान् विधीन् बाधन्ते नोत्तरानिति षष्ठी स्थाने योगेत्यस्यानन्तरस्यैवायमपवादः। 'प्रत्ययः परश्च' इत्यनेन तु परत्वादिदं बाध्यते। तेन चरेष्टः, गापोष्टक्, इत्यादयः परा एव भवन्ति। **मिदचोन्त्यात्परः** ॥ मकारः इत् यस्य सः मित् अन्त्यादचः परो भवतीत्यर्थे 'शे मुचादीनाम्' इत्यादाविदन्नप्रवर्तेत। तत्रान्तस्याचोऽभावात्। अत आह। **अच इति षष्ठ्यन्तमिति** ॥ यतश्च निर्द्धारणमित्यनेनेति शेषः। अच इत्येकत्वमविवक्षितम्। तदाह। **अचाम्मद्ध्य इत्यादिना। अन्तावयव इति** ॥ एतच्च आद्यन्ताविवत्यतः अन्तग्रहणानुवृत्या लभ्यते। आद्यन्तशब्दैकदेशस्यान्तशब्दस्य तन्मात्रे स्वरितत्वप्रतिज्ञाबलेनानुवृत्तिसम्भवात्। आदिग्रहणमनुवृत्य परादित्वाभ्युपगमे तु वारीणीति बहुवचने 'सर्वनामस्थाने चासम्बुद्धौ' इति नान्ताङ्गस्य विहितो दीर्घो न सिद्ध्येत्। अभक्तत्वे तु वहंलिहः इत्यत्र 'वहाभ्रे लिह' इति खशि अरुर्द्विषदिति मुमि तस्य 'मोनुस्वार' इति मान्तस्य पदस्य विहितोऽनुस्वारो न स्यात्। वस्तुतस्तु, यस्य समुदायस्य मिद्विहितः तस्याचाम्मध्ये योऽन्त्यस्तस्मात्परः तस्य समुदायस्य अन्तावयव इति व्याख्येयम्। अत एव समुदायभक्तो मिदिति भाष्यं सङ्गच्छते। समासाश्रय-

३८ । षष्ठी स्थानेयोगा । (१-१-४९)

अनिर्धारितसंबन्धविशेषा षष्ठी स्थानेयोगा बोद्धव्या । स्थानञ्च प्रसङ्गः ।

३९ । स्थानेऽन्तरतमः । (१-१-५०)

विधौ मूलकारश्च वक्ष्यति । अङ्गस्य नुम्विधानात् तद्भक्तो हि नुम्, इति । **षष्ठी स्थानेयोगा ॥** स्थानं प्रसङ्ग इति वक्ष्यति । तस्मिन् वाचकतया योगो यस्यास्सा स्थानेयोगा, निपातनात् सप्तम्या अलुक् । स्थानेन योगो यस्या इति विग्रहः । निपातनादेत्वम् । इको यणचीत्यादौ षष्ठी स्थानरूपसम्बन्धार्थिकेत्यर्थः । लोके तावदेकशतं षष्ठ्यर्थाः आर्था यौनाः मौखाः स्त्रौवाश्च । शब्दस्य शब्देन त्रय एव सम्बन्धाः । आनन्तर्यं सामीप्यं प्रसङ्गश्चेति । तत्रान्यतमार्थनिर्द्धारणार्थमिदं सूत्रमिति भाष्यम् । ततश्च इको यणचीत्यादौ इक इति षष्ठ्या स्थानमुच्यते । तस्मिन् प्रकृत्यर्थः इक् निरूपकतयाऽन्वेति । अचि परतः इकः प्रसङ्गे यण् स्यादिति विवरणवाक्ये त्वस्मिन् इक इति षष्ठी निरूपकतायामिति न पुनरुक्तिशंक्या । यथा देवदत्तस्यावयवः पाणिरिति । 'ऊदुपधाया गोहः' इत्यत्र तु गोह इति षष्ठी न स्थानार्थिका । उपधापदसमभिव्याहारेणावयवषष्ठीत्वनिर्द्धारणात् । परिभाषाणाञ्च अनियमे नियमनार्थमेव प्रवृत्तेः । तदेतदाह । **अनिर्द्धारितेत्यादिना ॥** अनिर्द्धारितः सम्बन्धविशेषः यस्या इति विग्रहः । तदेवमुदाहृतप्रकृतभाष्यरीत्या इकोयणचीत्यादौ षष्ठी स्थानरूपसम्बन्धविशेषार्थिकेति स्थितम् । मतुप्सूत्रभाष्ये तु अनन्तरादयो न षष्ठ्यर्था इति स्थितम् । एवं सति स्थाने इति सप्तम्यन्तपदेन योगो यस्या इति विग्रहे स्थाने इति सप्तम्यन्तस्यानुकरणम् । षष्ठीश्रुतौ स्थाने इति सप्तम्यन्तं पदमुपतिष्ठत इति फलति । स्थानेनार्थेन योगो यस्या इति त्रितीयान्तविग्रहेतु अध्याहृतस्थानपदार्थनिरूपितसम्बन्धार्थिकेत्यर्थः । अस्तेर्भूर्भवतीति सन्देहस्थाने अनन्तरे समीपे इत्यादिप्रकृतसूत्रभाष्यस्य तु अस्तेरनन्तरे इत्यध्याहृतानन्तरादिपदार्थनिरूपितसम्बन्धा षष्ठीत्येवार्थः । अनन्तरादीनां षष्ठ्यर्थत्वन्तु नास्त्येवेति प्रौढमनोरमायां हलन्त्यमिति सूत्रे स्थितम् । तद्व्याख्याने च शब्दरत्ने शब्देन्दुशेखरे च बहुधा प्रपञ्चितम् । अनिर्द्धारितेति किम् । ऊदुपधाया इत्यत्र गोह इति षष्ठ्याः स्थानार्थकत्वम्माभूत् । सतितु तत्रापि स्थानार्थकत्वे गोहोऽन्त्यस्य उपधामात्रस्य च ऊत् स्यात् । ननु स्थानशब्द आधारवाची लोके प्रसिद्धः । यथा शिवस्थानं कैलासः विष्णुस्थानं वैकुण्ठ इत्यादौ । एवञ्च इको यणचीत्यादौ षष्ठ्याः स्थानार्थकत्वे प्रकृत्यर्थस्य तत्र निरूपकत्वेन अभेदेन वा अन्वये सति इकोऽधिकरणे यण् स्यात् इति इगधिकरणको यण् स्यादिति वा अर्थस्स्यात् । तत इको निवृत्तिर्नस्यादित्यत आह । **स्थानञ्च प्रसङ्ग इति ॥** क्वचिदाभिचारेष्टौ दर्भाणां स्थाने शरैः प्रस्तरितव्यमित्यत्र स्थानशब्दस्य प्रसङ्गे दर्शनादिति भावः । एवञ्च तत्र यथा शरैर्दर्भानिवर्तन्ते तद्वदिकोयणचीत्यादावपि यणादिभिरिगादयो निवर्तन्ते । तत्र च यः प्रसक्तो निवर्तते सः स्थानीति व्यवह्रियते । यो निवर्तयति स आदेश इति । **स्थानेऽन्तरतमः ॥** स्थानं प्रसङ्ग इत्युक्तं अन्तरशब्दोऽत्र सदृशपर्यायः अतिशयितोऽन्तरः अन्तरतमः

प्रसङ्गे सति सदृशतम आदेशः स्यात्। 'यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः' (प १४)।

४०। तस्मिन्निति निर्दिष्टे पूर्वस्य। (१-१-६६)

तदाह। **प्रसङ्गे सतीत्यादिना** ॥ एकस्य स्थानिनः अनेकादेशप्रसङ्गे सति यः स्थानार्थगुणप्रमाणतः स्थानिना सदृशतमः स एवादेशो भवतीत्यर्थः। अत्र स्थानशब्देन ताल्वादिस्थानं विवक्षितम्। गुणशब्देन प्रयत्नः। प्रमाणशब्देन एकद्विमात्रादिपरिमाणम्। तत्र स्थानतो यथा। दध्यत्र। तालुस्थानकस्य इकारस्य तालुस्थानको यकारः। अर्थतो यथा। तृज्वत् क्रोष्टुरिति. क्रोष्टुशब्दस्य उकारान्तस्य तृजन्त आदेशो भवन् अर्थसाम्यात् क्रोष्टुशब्द एव तृजन्त आदेशो भवति। गुणतो यथा वाघ्घरिः। अत्र हकारः स्थानी। घोषनादसंवारमहाप्राणप्रयत्नवान्। तस्य गकारसवर्णो भवन् चतुर्थो घकारो भवति। तस्य हकारेण स्थानिना घोषनादसंवारमहाप्राणप्रयत्नसाम्यात्। ककारस्तु न भवति। तस्य श्वासाघोषविवारालपप्राणप्रयत्नकत्वात्। तथा खकारोऽपि द्वितीयो न भवति। तस्य महाप्राणप्रयत्नसाम्येऽपि श्वासाघोषविवारप्रयत्नभेदात्। तथा तृतीयोऽपि गकारो न भवति। तस्य घोषनादसंवारप्रयत्नसाम्येऽपि अल्पप्राणप्रयत्नभेदात्। अत एव ङकारो न भवति। नन्वत्र हकारस्य खकारो द्वितीयः कुतो न स्यात्। तस्य स्थानिना हकारेण श्वासाघोषविवारप्रयत्नभेदे सत्यपि महाप्राणप्रयत्नसाम्यसत्वात्। तथा तृतीयो वा गकारः कुतो न स्यात्। तस्य स्थानिना हकारेण अल्पप्राणप्रयत्नभेदेऽपि घोषनादसंवारप्रयत्नसाम्यसत्वात्। अत एव ङकारो वा कुतो न स्यादिति चेन्न। तमप् ग्रहणेन उक्तातिप्रसङ्गनिरासात्। अतिशयितो ह्यन्तरः, अन्तरतमः, अतिशयितश्च प्रयत्नतस्सादृश्यं हकारेण घकारस्यैव। उभयोरपि घोषनादसंवारमहाप्राणात्मकप्रयत्नचतुष्टयसाम्येन सादृश्यातिशयसत्वात्। खकारस्य महाप्राणप्रयत्नसाम्येऽपि घोषनादसंवारप्रयत्नविरहात्। गङयोः घोषनादसंवारप्रयत्नसाम्येऽपि महाप्राणप्रयत्नविरहात्। प्रमाणतो यथा। 'अदसोऽसेर्दादुदोम' इति ह्रस्वस्य उकारः दीर्घस्य ऊकारः। नन्वेवमपि चेतास्तोतेत्यत्र इकारस्य उकारस्य च सार्वधातुकार्धधातुकयोरिति गुणो भवन् प्रमाणत आन्तर्यवानकारः कुतो न स्यादित्यत आह। **यत्रेति** ॥ तेन इकारस्य एकारः। उकारस्य ओकारश्च गुणो भवति। स्थानसाम्यात्। नत्वकारः। स्थानभेदात्। नच इकारेण एकारस्य उकारेण ओकारस्य च कथं स्थानसाम्यम्। एकारस्य ओकारस्य च कण्ठस्थानाधिक्यादिति वाच्यम्। यावत्स्थानसाम्यस्य सावर्ण्यप्रयोजकत्वेऽपि आन्तरतम्यपरीक्षायां कथञ्चित् स्थानसाम्यस्यैव प्रयोजकत्वात्। अत्र सूत्रे पूर्वसूत्रात् स्थानेग्रहणमनुवर्तते। एकदेशे स्वरितत्वप्रतिज्ञाबलात्। तृतीयान्तञ्च विपरिणम्यते। अनुवर्त्यमानश्चायं स्थानशब्दः पूर्वसूत्रे प्रसङ्गपरोऽप्यत्र ताल्वाद्यन्यतमस्थानपरः। शब्दाधिकाराश्रयणात्। अन्तरतम इत्यपि तेन सम्बद्ध्यते। ततश्च स्थानेनान्तरतम इति वाक्यान्तरं सम्पद्यते। सति सम्भवे ताल्वादिस्थानत एवान्तरतमो भवतीत्यर्थः। ततश्च यत्रानेकविधमान्तर्यं तत्र स्थानत एवान्तर्यं बलीय इति भवति। **तस्मिन्निति निर्दिष्टे** ॥ इको यणचीत्यत्र आचि इकः यण्

सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यम् ।

४१ । तस्मादित्युत्तरस्य । (१-१-६७)

पञ्चमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाव्यवहितस्य परस्य ज्ञेयम् ।

स्यादित्यवगतम् । तत्र अचो वर्णान्तराधिकरणत्वं न सम्भवतीति सति सप्तम्याश्रयणीया । अचि सति इको यण् स्यादिति । तत्र व्यवहिते अव्यवहिते च इको यण् प्राप्तः । ततश्च समिधमित्यत्र धकारस्य व्यवहिते अकारे सत्यपि मकारादिकारस्य यण् स्यात् । तथा अचि सति पूर्वस्य परस्य वा इको यण् प्राप्तः । ततश्च दद्ध्युदकमित्यत्र इकारे अचि सति उकारस्य परस्यापि इको यण् स्यात् । तत्र अव्यवहित एव अचि भवति पूर्वस्यैव भवति । न परस्येत्येतदर्थमिदमारभ्यते । तस्मिन्निति न तच्छब्दस्स्वरूपपरः । तथासति " तस्मिन्नणि च युष्माकास्माकौ " इत्यादावेव प्रवर्तेत । नत्विको यणचीत्यादौ । किन्तु इको यणचीत्यादिसूत्रगतस्य अचीत्यादिसप्तम्यन्तपदस्य तस्मिन्नित्यनुकरणमितीत्यनन्तरं गम्येऽर्थे इति शेषः । निरिति नैरन्तर्ये । दिशिरुच्चारणे । एवञ्च इको यणचि रायोहलीत्यादिसूत्रेषु अचि हलि इत्येवं सप्तम्यन्तपदगम्येऽर्थे अकारादौ दध्यत्र सुद्ध्युपास्य इत्यादिप्रयोगदशायां निर्दिष्टे अव्यवहितोच्चारिते सति पूर्वस्य कार्यं भवति । नतु व्यवहितोच्चारिते । नापि परस्येति फलितोऽर्थः । व्यवधानञ्च वर्णान्तरकृतमेव निषिध्यते । नतु कालकृतम् । इकोयणचीत्यादौ कालकृतव्यवधानस्य संहिताधिकारादेव निरासलाभात् । तत्र कालकृतव्यवधानस्याप्यनेनैव सूत्रेण निरासे संहिताधिकारस्य वैयर्थ्यापातात् । एवञ्च ये संहिताधिकारबहिर्भूताः 'आनङृतो द्वन्द्वे' 'देवताद्वन्द्वे च' इत्यादयः उत्तरपदे परतः आनङादिविधयः ते सर्वे अग्नाविष्णू इत्यग्नाविष्णू इत्याद्यवग्रहे कालव्यवधानेऽपि भवन्ति । एतत्सर्वमभिप्रेत्य पर्यवसन्नार्थमाह । **सप्तमीनिर्देशेनेत्यादिना** ॥ इति सूत्राक्षरानुयायी पन्थाः । 'अतिशायनेतमप्' इत्यत्र तु नेयं परिभाषा प्रवर्तते । सप्तम्यन्तातिशायनपदार्थस्य शब्दरूपत्वाभावेनाव्यवहितोच्चारितत्वनिर्दिष्टत्वाभावात् । नचैवमपि कर्तृकर्मणोः कृतीत्यत्रापि अस्याः परिभाषायाः प्रवृत्तौ कर्तृषष्ठी कर्मणिषष्ठी च कृष्णस्य कृतिः जगतः कर्ता कृष्ण इत्यत्रैव स्यात् । नतु कृतिः कृष्णस्य कर्ता जगत इत्यत्र इति वाच्यम् । लक्ष्यानुरोधेन क्वचिदेवज्ञातीयकेषु अस्याः परिभाषायाः अप्रवृत्तिरिति श्नान्नलोप इति सूत्रे भाष्ये प्रपञ्चितत्वात् । वस्तुतस्तु भाष्यानुसारेण अत्र सूत्रे निर्दिष्टग्रहणं संहिताधिकारसूत्रञ्च विफलमेवेति इको यणचीत्यत्र वक्ष्यते । **तस्मादित्युत्तरस्य** ॥ 'द्व्यन्तरुपसर्गेभ्योऽप ईत्' 'उदस्थास्तम्भ्वोः पूर्वस्य' इत्यादिसूत्रगतपञ्चम्यन्तस्यानुकरणं । तस्मादिति । इतिशब्दानन्तरं गम्यत इति शेषः । निरिति नैरन्तर्ये । दिशिरुच्चारणे । द्व्यन्तरित्यादिसूत्रेषु पञ्चम्यन्तगम्ये अर्थे द्व्यन्तरादिशब्दे निर्दिष्टे अव्यवहितोच्चारिते सत्येव ततः परस्यैव भवति । न तु व्यवहितोच्चारिते द्व्यादिशब्दे । नापि ततः पूर्वस्यैव भवतीति नियमार्थमिदम् । तदाह । **पञ्चमीनिर्देशेनेत्यादिना** ॥ उत्तरस्य किम् । 'तिङतिङः' इति निघात उत्तरस्यैव भवति । अग्निमीळे, नेह, ईळे अग्निम् । अव्यवहिते किम् । उत्

४२ । अलोऽन्त्यस्य । (१-१-५२)

षष्ठीनिर्दिष्टस्यान्त्यस्याल आदेशः स्यात् ।

४३ । ङिच्च । (१-१-५३)

अयमप्यन्त्यस्यैव स्यात् ।—'सर्वस्य' (सू ४५) इत्यस्यापवादः ।

४४ । आदेः परस्य । (१-१-५४)

परस्य यद्विहितं तत्तस्यादेर्बोद्धव्यम् । 'अलोऽन्त्यस्य' (सू ४२) इत्यस्यापवादः ।

प्रस्थानम् । इह उदस्स्थास्तम्भ्वोरिति पूर्वसवर्णो न भवति । **अलोऽन्त्यस्य** ॥ अलिति प्रत्याहारो वर्णपर्यायः । अल इति षष्ठ्यन्तम् । 'षष्ठी स्थाने योगा' इत्यतः षष्ठी स्थाने इत्यनुवर्तते । तच्च षष्ठीति प्रथमान्तं तृतीयान्ततया विपरिणम्यते । निर्दिष्टस्येति शेषः । स्थाने इत्यनन्तरं विधीयमान इति शेषः । स्थाने विधीयमान आदेशः षष्ठीनिर्दिष्टस्य यः अन्त्यः अल् तस्य स्यादित्यर्थः । तदाह । **षष्ठीत्यादिना** ॥ त्यादादीनामः । यः । सः । आदेश इति किम् । आर्द्धधातुकस्येट् तृचः ऋकारात् पूर्वो माभूत् । अल इति किम् । पदस्येत्यधिकृत्य विधीयमानं वसुस्रंस्विति दत्वं परमानडुह्भ्यामित्यत्र अन्त्यस्य कृत्स्नस्य पदस्य माभूत् । **ङिच्च** ॥ ङकारः इत् यस्य सः ङित् । अलोन्त्यस्येत्यनुवर्तते । तदाह । **अयमपीति** ॥ ङिदपीत्यर्थः । अवङ्, तातङ्, अनङ्, इत्यादिरादेश उदाहरणम् । नन्वलोऽन्त्यस्येति पूर्वसूत्रेणैव सिद्धे किमर्थमित्यत आह । **सर्वस्येति** ॥ 'अनेकाल् शित् सर्वस्य' इति वक्ष्यमाणस्य सर्वादेशत्वविधेरयं विधिरपवादः । अपोद्यते बाध्यते अनेनेति अपवादः । बाहुळकः । करणे घञ् । येनाप्राप्ते यो विधिरारभ्यते स तस्यापवाद इत्यपवादलक्षणम् । अप्राप्तेति भावे क्तः । येनेति कर्तरि तृतीया । द्वौ नञावावश्यकत्वं बोधयतः । यत्कर्तृकावश्यकप्राप्तौ सत्यां यो विधिरारभ्यते स आरभ्यमाणविधिः तस्य अवश्यप्राप्तस्य अपवादः बाधक इति तदर्थः । अयञ्च न्यायसिद्धः । अवङादयो हि ङित आदेशास्सर्वे अनेकाल एव । तेषु चानेकाल्विशेषेषु विधीयमानेन ङितामन्त्यादेशत्वेन स्वविषये अवश्यं प्राप्तं अनेकाल् सामान्येन विहितं सर्वादेशत्वं बाध्यते । विशेषविहितत्वान्निरवकाशत्वाच्च । विशेषशास्त्रं हि विशेषेषु झटिति प्रवर्तते । विशेषाणां स्वशब्देनोपात्तत्वात् । सामान्यशास्त्रन्तु सामान्यमुखेन विशेषेषु प्रवर्तत इति तस्य तेषु मन्दप्रवृत्तिः । अतो विशेषशास्त्रं प्रबलम् । उक्तञ्च भट्टवार्तिके 'अवश्यमेव सामान्यं विशेषं प्रति गच्छति । गतमात्रञ्च तत्तेन विशेषे स्थाप्यते ध्रुवम्' इति । किञ्च यदि ङिच्चेति शास्त्रं अनेकाल्विशेषेषु ङित्सु न प्रवर्तेत, तर्हि तदनर्थकमेव स्यात् । अनेकाल्शित् सर्वस्येत्यस्य तु ङित्सु अप्रवृत्तावपि नानर्थक्यम् । तस्थस्थमिपां तान्तन्तामः । अस्तेर्भूरित्यादिष्वनेकालसु अङित्सु तस्य सावकाशत्वात् । अतो विशेषशास्त्रं प्रबलमिति । **आदेः परस्य** ॥ **परस्येति** ॥ ध्यन्तरुपसर्गेभ्योऽपईदित्यादौ तस्मादित्युत्तरस्येति परिभाषया परस्य नियमितं कार्यं यत् तत्तस्यादेरेव भवति । नत्वलोऽन्त्यस्येति तदन्तस्येत्यर्थः । तदाह । **अलोन्त्यस्येत्यस्यापवाद इति** ॥ तत्र अल

४५ । अनेकाल्शित्सर्वस्य । (१-१-५५)

स्पष्टम् । 'अलोऽन्त्य' सूत्रापवादः । 'अष्टाभ्य औश्' (सू ३७२) इत्यादौ 'आदेः परस्य' (सू ४४) इत्येतदपि परत्वादनेन बाध्यते ।

४६ । स्वरितेनाधिकारः । (१-३-११)

स्वरितत्वयुक्तं शब्दस्वरूपमधिकृतं बोद्धव्यम् । 'परनित्यान्तरङ्गापवादानामुत्त-

---

इत्यप्यनुवर्तनीयम् तेन द्वीपमित्यत्र ईत्वं पान्तसमुदायस्य न भवति । **अनेकाल्शित् सर्वस्य** ॥ न एकः अनेकः, अनेकः अल् यस्य सः अनेकाल्, शकारः इत् यस्य सः शित्, अनेकाल्च शित् चेति समाहारद्वन्द्वः । **स्पष्टमिति** ॥ अनुवर्तनीयपदान्तराभावादिति भावः । अस्तेर्भूरित्याद्युदाहरणम् । ननु असधातोर्भूभवतीत्युक्ते कृत्स्नस्यैवादेशः प्राप्त इति किमर्थमिदं सूत्रमारभ्यत इत्यत आह । **अलोऽन्त्यसूत्रापवाद शति** ॥ अलोन्त्येति सूत्रैकदेशानुकरणम् । अनुकरणत्वादेव नापशब्दः । अधिरीश्वर इति सूत्रैकदेशस्य प्राग्रीश्वरान्निपाता इति ग्रहणलिङ्गात् । स्यादेतत् । अष्टन् शब्दाज्जसि शसि च अष्टन आ विभक्ताविति आत्वे अष्टा अस् इति स्थिते अष्टाभ्य औशिति कृताकारात् अष्टनः परयोर्जश्शसोर्विधीयमान औशादेशः अलोऽन्त्यस्येति बाधित्वा आदेः परस्येत्यादेरकारस्य प्राप्तः । अनेकाल्त्वाच्च सर्वादेशः प्राप्तः । एवञ्च 'अतो भिस ऐस्' इत्यादावपि । तत्र कतरच्छास्त्रं बाध्यं कतरच्च प्रवर्तत इत्यत्र किम् विनिगमकमित्यत आह । **अष्टाभ्य औशित्यादाविति** ॥ आदिना अतो भिस ऐसित्यादि सङ्ग्रहः । अष्टाभ्य औशित्यादौ आदेः परस्येत्येतदपि परत्वादनेन बाध्यत इत्यन्वयः । अस्तेर्भूरित्यादौ अनेकाल्शिदित्यनेन यथा अलोऽन्त्यस्येति बाध्यते तथा अष्टाभ्य औशित्यादौ आदेः परस्येत्येतदपि बाध्यत इत्यर्थः । ननु अस्तेर्भूरित्यादौ अलोऽन्त्यस्येति प्राप्ते सत्येवानेकाल्शिदित्यारम्भाद्येननाप्राप्तिन्यायेनापवादत्वात्तेन तत्रालोऽन्त्यस्येत्यस्य बाधो युज्यते । आदेः परस्येत्यस्य तु अनेकाल्शित् सर्वस्येति नापवादः । अस्तेर्भूरित्यादावादेः परस्येत्यप्राप्तावपि तत्प्रवृत्तेरित्यत आह । **परत्वादिति** ॥ विप्रतिषेधे परं कार्यमिति तुल्यबलविरोधे परप्राबल्यस्य वक्ष्यमाणत्वादिति भावः । आदेः परस्येत्यस्यावकाशः ब्यन्तरुपसर्गेभ्योऽप ईदित्यादिः । अनेकाल् शित् सर्वस्येत्यस्यावकाशः अस्तेर्भूः, इदम इश् इत्यादिः । अतस्तुल्यबलत्वमुभयोः । **स्वरितेनाधिकारः** ॥ अधिकारः व्यापृतिः । यथा लोके अधिकृतो ग्रामेऽसाविति व्यापृत इति गम्यते । शब्दस्य च उत्तरसूत्रेष्वनुवृत्तिरेव व्यापृतिः । स्वरितेन स्वरितविशेषेण अधिकारः उत्तरत्रानुवृत्तिरूपव्यापारः प्रत्येतव्यः । यत् पदं शास्त्रकृता स्वरिताख्यस्वरविशेषविशिष्टमुच्चारितं तदुत्तरसूत्रेष्वनुवर्तनीयमिति यावत् । फलितमाह । **स्वरितत्वयुक्तमित्यादिना** ॥ आनुनासिक्यवत् स्वरितोच्चारणमपि प्रातिज्ञागम्यम् । अनुवृत्तावुत्तरावधिस्तु व्याख्यानादेवावगन्तव्यः । यद्यपि निवृत्तिवदनुवृत्तिरपि व्याख्यानादेव भविष्यतीति किं सूत्रेण । तथाच भाष्ये तत् प्रयोजनं बहुधा प्रपञ्चितम् । **परनित्येति** ॥ परादीनाम्मध्ये पूर्वपूर्वापेक्षया उत्तरमुत्तरं शास्त्रं बलवत्तरमित्यर्थः । उत्तरोत्तरमित्यत्र आनुपूर्व्ये द्वे

रोत्तरं बलीयः' (प ३९)। 'असिद्धं बहिरङ्गमन्तरङ्गे' (प ५१)। 'अकृतव्यूहाः

वाच्ये इति द्वित्वम्। 'कर्मधारयवदुत्तरेषु' इति कर्मधारयवद्भावात् सुपो लुक्। बलवच्छब्दात् 'द्विवचनविभज्योपपदे तरबीयसुनौ' इति ईयसुन्। 'विन्मतोर्लुक्' इति मतुपो लुक्। परापेक्षया नित्यान्तरङ्गापवादाः। नित्यापेक्षयापि अन्तरङ्गापवादौ। अन्तरङ्गापेक्षयापि अपवादः। इत्येवं क्रमेण पूर्वपूर्वापेक्षया उत्तरोत्तरबलवत्वमिति फलितोऽर्थः। परं विप्रतिषेधसूत्रात् बलवत्। परान्नित्यं यथा। तुदति। अत्र 'तुदादिभ्यश्च' इति शप्रत्ययं बाधित्वा परत्वात् लघूपधगुणः प्राप्तः। स च शप्रत्यये प्रवृत्ते सति न प्रवृत्तिमर्हति। शप्रत्ययस्तु कृते अकृतेऽपि लघूपधगुणे प्रवृत्तिमर्हतीति स नित्यः। कृताकृतप्रसङ्गी यो विधिस्स नित्य इति हि तल्लक्षणम्। अतो नित्यश्शप्रत्ययः लघूपधगुणं बाधित्वा प्रथमं प्रवर्तते। ततः 'सार्वधातुकमपित्' इति शस्य ङित्वात् 'कृङितिच' इति निषेधान्नगुणः। अक्लृप्ताभावकस्य नित्यशास्त्रस्याभावकल्पनापेक्षया क्लृप्ताभावकस्य नित्यशास्त्रस्यैव तत्कल्पनं युज्यते इति नित्यस्य बलवत्त्वे बीजम्। परादन्तरङ्गं यथा। उभये देवमनुष्याः। अत्र प्रथमचरमेति परमपि विकल्पं बाधित्वा सर्वादीनीति नित्यैव सर्वनामसंज्ञा भवति। तस्याः विभक्तिनिरपेक्षत्वेन अन्तरङ्गत्वात्। अल्पापेक्षमन्तरङ्गमिति हि तल्लक्षणम्। तस्य बलवत्वे बीजमाह। **असिद्धं बहिरङ्गमन्तरङ्गे** ॥ अन्तरङ्गशास्त्रे प्रसक्ते बहिरङ्गशास्त्रमविद्यमानं प्रत्येतव्यमित्यर्थः। इयन्तु परिभाषा 'वाहऊठ्' सूत्रे भाष्ये स्थिता। परादपवादो यथा। दध्ना 'अस्थिदधि' इत्यनङ्। इह परमप्यनेकालिति सर्वादेशं बाधित्वा डित्त्वेत्यन्तादेशः। तस्य येन नाप्राप्तिन्यायेन तदपवादत्वात्। अपवादस्य बलवत्वे बीजन्तु अनुपदमेवोक्तम्। नित्यादन्तरङ्गं यथा। ग्रामणिनि कुले। इह नित्यमपि इकोऽचीति नुमं बाधित्वा 'ह्रस्वो नपुंसक' इति ह्रस्वः। प्रथमतः कृते नुमि अनजन्तत्वात् ह्रस्वो न स्यात्। अन्तरङ्गादपवादो यथा। दैत्यारिः। श्रीशः। परमपि सवर्णदीर्घं बाधित्वा अन्तरङ्गत्वात् आद्गुणे यणि च प्राप्ते अपवादत्वात् सवर्णदीर्घः। **अकृतव्यूहाः पाणिनीयाः*** ॥ न कृतः अकृतः व्यूहः प्रकृतिप्रत्ययविवेचनं येषा-

---

* पाणिनिना प्रोक्तमधीयते विदन्ति वा पाणिनीयाः पाणिनिशास्त्राध्येतारः तद्वेदितारो वा। विशिष्टः ऊहः व्यूहः शास्त्रप्रवृत्तिविषयो निश्चयः। न कृतः अकृतः अकृतः व्यूहः यैस्ते अकृतव्यूहाः। भाविनिमित्तविनाशे इत्यध्याहारः। बहिरङ्गेण शास्त्रेणान्तरङ्गशास्त्रनिमित्तविनाशे पश्चात् संभाविते अन्तरङ्गेति यावत्। एतत्परिभाषायां ज्ञापकन्तु 'समर्थानां प्रथमाद्वा' इति सूत्रे विद्यमानं समर्थानामिति। समर्थानामिति सूत्रे कैयटस्तु समर्थवचनेनेयम्परिभाषा ज्ञाप्यते। 'अकृतव्यूहाः पाणिनीयाः' इति। तेन पपुषः इत्यादौ अन्तरङ्गत्वात्पूर्वं कृतोऽपीडागमो निवर्तत इति वदन्, अकृतः व्यूहः विशिष्टस्तर्कः निमित्तकारणविनाशेऽपि कार्यस्थितिरूपो यैरित्यर्थमभिप्रैति। निमित्तापाये नैमित्तिकस्याप्यपाय इति यावत्। अस्याः परिभाषायाः उदाहरणं सेदुष इति। अत्र प्राक्रियाक्रमस्तु, 'भाषायां सदवसश्रुवः' इत्यनेन सदधातोः परस्य लिटः क्वस्वादेशे 'लिटिधातोः' इति सदेर्द्वित्वे 'अत एकहल्मध्ये अनादेशादेर्लिटि' इत्यनेन एत्वाभ्यासलोपे 'वस्वेकाजाद्धसाम्' इत्यनेन क्वसोर्वकारस्य वलादिलक्षणे इडागमे कर्तव्ये 'वसोस्सम्प्रसारणम्' इत्यनेन भविष्यता सम्प्रसारणेन वकारस्यापहारशङ्कासमुन्मेषात् तादृशविनंक्ष्यदवस्थापन्नं वकारं निमित्तीकृत्य प्रवृत्तियोग्यमेतदिडागमरूपं कार्यन्नभवति। कृतमपि वा निवर्तते इति।

पाणिनीयाः' (प ५७)। निमित्तं विनाशोन्मुखं दृष्ट्वा तत्प्रयुक्तं कार्यं न कुर्वन्तीत्यर्थः।

। इति परिभाषाप्रकरणम्।

अथाच्सन्धिप्रकरणम्।

४७। इको यणचि। (६-१-७७)

इकः स्थाने यण्स्यादचि संहितायां विषये। 'सुधी उपास्यः' इति स्थिते।

न्ते अकृतव्यूहाः पाणिनिशिष्याः इत्यक्षरार्थः। तर्हि सर्वस्य शास्त्रस्य वैयर्थ्यमित्यतोऽध्याहृत्य व्याचष्टे। **निमित्तमित्यादिना** ॥ सेदुष इत्याद्युदाहरणम्। तच्च शब्दाधिकारे सेदिवस् शब्द-निरूपणावसरे मूल एव स्पष्टीभविष्यति। इयं परिभाषा निर्मूला निष्फलाचेति परिभाषेन्दुशेखरे स्पष्टम्। **इकोयणाचि** ॥ इक इति षष्ठी। अतष्षष्ठी स्थानेयोगेति परिभाषया स्थान इति लभ्यते। स्थानं प्रसङ्ग इत्युक्तम्। वर्णानां वर्णान्तराधिकरणत्वासम्भवात् अचीति सतिसप्तमी। तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषया वर्णान्तराव्यवहितोच्चारितेऽचि सति पूर्वस्येति लभ्यते। एवञ्च अचि परत इत्यर्थलभ्यम्। संहितायामित्यधिकृतम्। ततश्चार्द्धमात्राधिककालव्यवधानाभावो लभ्यते। एवञ्च फलितमाह। **इकः स्थान इत्यादिना** ॥ इदञ्च सूत्राक्षरानुसारिप्राचीनमतानुसारेण। संहितायामिति सूत्रभाष्ये तु सामीपिकात्मकौपश्लेषिकाधिकरण अचीति सप्तमीं तस्मिन्नित्यनेनाश्रित्य संहिताधिकारः प्रत्याख्यातः। इत्थं हि तत्र भाष्यम्। अयं योगश्शक्यः अवक्तुं। कथम्? अधिकरणन्नाम त्रिप्रकारं, व्यापकमौपश्लेषिकं वैषयिकमिति। शब्दस्य तु शब्देन कोऽन्योभिसम्बन्धो भवितुमर्हति अन्यदत उपश्लेषात्। इकोयणचि अच्युपश्लिष्टस्येति। तत्रान्तरेण संहिताग्रहणं संहितायामेव भविष्यतीति। उप समीपे श्लेषः सम्बन्धः उपश्लेषः। तत्कृतमधिकरणमौपश्लेषिकं सामीपिकमिति यावत्। एवञ्च अच्समीपवर्तिनः इक इति फलति। सामीप्यञ्च कालतो वर्णतश्च व्यवधानाभावः। एवञ्च असंहितायामुक्तसामीप्याभावादेव यणभावसिद्धेः संहिताधिकारो न कर्तव्य इति भाष्यार्थः। एवञ्च तुल्यन्यायत्वात् तस्मिन्निति निर्दिष्टे पूर्वस्येत्यत्राप्यौपश्लेषिकाधिकरणे सप्तमी। ततश्च अचीत्यादि सप्तम्यन्तार्थे अकारादावुच्चारिते सामीप्यसंबन्धेन विद्यमानस्य पूर्वस्य कार्यं स्यादित्यर्थः फलति, नत्वव्यवहितोच्चारिते इति, अव्यवहितत्वविशेषणमुच्चारिते देयम्। सामीपिकाधिकरणसप्तम्यैव तल्लाभात्। सामीप्यस्य च तत्र कालतो वर्णतश्च व्यवधानाभावात्मकत्वात्। एवञ्च तत्र नैरन्तर्यार्थं निग्रहणन्न कर्तव्यम्। इदञ्च स्नुक्रमोरिति सूत्रे, तत्र च दीयते, इति सूत्रे च कैयटे च स्पष्टम्। अधिकरणत्रैविध्यन्तु कारकाधिकारे आधारोऽधिकरणमित्यत्र स्पष्टीकरिष्यते। **सुधी इति** ॥ ध्यै, चिन्तायामिति धातोः ध्यायतेस्संप्रसारणञ्चेति क्विपि यकारस्य संप्रसारणे इकारे पूर्वरूपे हलश्चेति दीर्घे च धीशब्दः। सुष्ठु ध्यायन्तीति सुधियः। सु शोभना धीर्येषामिति वा सुधियः। सुधीभिरुपास्य इति विग्रहः। 'कर्तृकरणे कृता बहुलम्' इति समासः। 'सुपोधातुप्रातिपदिकयोः' इति भिसो लुक्। सुधी उपास्य इति स्थिते ईकारस्य यकार

स्थानत आन्तर्यादीकारस्य यकारः। 'सुध्य्-उपास्यः' इति स्थिते।

४८। अनचि च। (८-४-४७)

अचः परस्य यरो द्वे वा स्तो न त्वचि। इति धकारस्य द्वित्वम्।

४९। स्थानिवदादेशोऽनल्विधौ। (१-१-५६)

इत्यन्वयः। प्रत्याहारेषु तद्वाच्यवाच्येषु लक्षणा नाञ्झलाविति सूत्रे प्रपञ्चिता। तत्स्फोरणाय ईकार उदाहृतः। ननु ईकारस्य वरला वा कुतो न स्युः। यण्त्वाविशेषादित्यत आह। **स्थानत आन्तर्यादिति** ॥ तालुस्थानकत्वसाम्यादीकारस्य स्थाने स्थानेऽन्तरतम इति यकार एव भवति। न तु वरलाः। भिन्नस्थानकत्वादित्यर्थः। अत एव 'यथासङ्ख्यमनुदेशस्समानाम्' इति सूत्रे भाष्यम्। किमिहोदाहरणम्। इकोयणचि। दध्यत्र। मध्वत्र। नैतदस्ति। स्थानेऽन्तरतमेनाप्येतत् सिद्धमिति स्थानेऽन्तरतम इति सूत्रभाष्ये तु किमिहोदाहरणम्। इकोयणचि। दध्यत्र। मध्वत्र। नैतदस्ति। सङ्ख्यातानुदेशेनाप्येतत् सिद्धमित्युक्तम्। यथासङ्ख्यसूत्रेणेत्यर्थः। नन्विह यण्शब्देन निरनुनासिका यवला रेफश्चेति चत्वारो गृह्यन्ते। यणो भाव्यमानतया तेन सवर्णानां ग्रहणाभावात्। गुणानां अभेदकत्वेऽपि यवलाष्षट् रेफश्चेति सप्त गृह्यन्ते। इक्शब्दे तु षट्षष्टिर्गृह्यत इति विषमसङ्ख्याकत्वात् कथमिह यथासङ्ख्यसूत्रप्रवृत्तिरिति चेन्न। इक्कयण्त्वादिना अनुगतीकृतानां समत्वात्। ननु ऋलृवर्णाभ्यां प्रत्येकं त्रिंशदुपस्थितौ लृवर्णानां रेफादेशस्य ऋवर्णानां लादेशस्य च प्रसङ्ग इति न यथासङ्ख्यसूत्रेण निर्वाह इति चेत्। शृणु। ऋत्वावच्छिन्नस्य रेफो भवति। लृत्वावच्छिन्नस्य लकारो भवतीति यथा सङ्ख्यसूत्रात्लभ्यते। ऋत्वजातिश्च न लृवर्णेषु। लृत्वजातिश्च न ऋवर्णेषु। ऋलृवर्णयोः सावर्ण्यविधिबलात्तु ऋत्वं लृकारे, लृत्वं ऋकारे च, आरोप्यते कार्यार्थम्। एवञ्च वास्तवं ऋत्वं लृत्वं च आदायात्र यथासङ्ख्यप्रवृत्तिर्निर्बाधेत्यास्तान्तावत्। सुध् य् इति स्थिते। धकारस्य द्वित्वमिति वक्ष्यमाणेनान्वयः। केनसूत्रेणेत्यत आह। **अनचि च** ॥ 'यरोऽनुनासिकेऽनुनासिकोवा' इत्यतः यर इति षष्ठ्यन्तं वेति चानुवर्तते। 'अचो रहाभ्यां द्वे' इत्यतः अच इति पञ्चम्यन्तं द्वे इति चानुवर्तते। न अच् अनच् तस्मिन् अनचीति न पर्युदासः। 'तथा सति नञिवयुक्तमन्यसदृशे तथाद्यर्थगतिः' इति न्यायेन अज्भिन्ने हलीत्यर्थस्स्यात्। तथासति लाघवाद्धलीत्येव वदेत्। रामात् इत्याद्यवसानेषु च द्वित्वं न स्यात्। अतः अचि न भवतीत्यसमर्थसमासमाश्रित्य प्रतिषेधपरं वाक्यान्तरम्। तदाह। **अचः परस्येत्यादिना। इति धकारस्येति** ॥ अनेन सूत्रेण धकारस्य द्वित्वारणमित्यर्थः। धकारस्य उकारादचः परत्वादच्परकत्वाभावाच्चेति भावः। ननु सुध् य् इत्यत्र ईकारस्थानिकस्य यकारस्य स्थानिवद्भावेनाच्त्वात् अ व्परकत्वात् कथं धकारस्य द्वित्वमिति शङ्कां हृदि निधाय तस्य स्थानिवद्भावप्रापकं सूत्रमाह। **स्थानिवदादेशः** ॥ गुरुस्थानापन्ने गुरुपुत्रादौ स्थानापत्त्या धर्मलाभो लोकतस्सिद्धः। कुशादिस्थानापन्नेषु शरादिषु च वैदिकन्यायसिद्धः। इह तु शास्त्रे स्वं रूपं शब्दस्येति वचनात् स्थानिधर्माः आदेशेषु न प्राप्नुयुरिति तत्प्राप्त्यर्थं

आदेशः स्थानिवत्स्यात् न तु स्थान्यलाश्रयविधौ । अनेनेह यकारस्य स्थानिवद्भावेनाच्त्वमाश्रित्य 'अनचि' (सू ४८) इति द्वित्वनिषेधो न शङ्क्यः 'अनल्विधौ' इति तन्निषेधात् ।

स्थानिवदादेश इत्यारब्धम् । स्थानं प्रसङ्ग इत्युक्तम् । यस्य स्थाने अन्यद्विधीयते तत् स्थानि । येन विधीयमानेन अन्यत् प्रसक्तन्निवर्तते स आदेशः । स्थानिना तुल्यः स्थानिवत् । तेन तुल्यमिति वतिप्रत्ययः । आदेशः स्थानिना तुल्यो भवति । स्थानिधर्मको भवतीति यावत् । अलिति वर्णपर्यायः । विधीयत इति विधिः कार्यं । अलाश्रयो विधिः अल्विधिः । न अल्विधिः अनल्विधिः । अलाश्रयभिन्ने कार्ये कर्तव्ये इति प्रतीयमानोऽर्थः । अलाश्रयकार्ये कर्तव्ये स्थानिवन्नभवतीति फलितम् । अलाश्रयेति सामान्यवचनात् अला विधिः, अलः परस्य विधिः, अलो विधिः, अलि विधिश्चेति, सर्वसङ्ग्रहः । अला विधौ यथा । व्यूढोरस्केन । अत्र विसर्जनीयस्य सः, इति विसर्गस्थानिकस्य सकारस्य विसर्गवत्वमाश्रित्य अङ्त्वाय इति णत्वं प्राप्तन्नभवति । अलः परस्य विधौ यथा । द्यौः । दिवऔदिति वकारस्थानिकस्य औकारस्य स्थानिवद्भावेन हल्त्वात् ततः परस्य सोर्हल्ङ्यादिलोपः प्राप्तो न भवति । अलो विधौ यथा । द्युकामः । दिव उदिति वकारस्थानिकस्य उकारस्य स्थानिवद्भावेन बकारत्वात् 'लोपो व्योर्वलि' इति लोपः प्राप्तो न भवति । अलि विधौ यथा । क इष्टः । यजेः क्तः । अत्र यकारस्थानिकसम्प्रसारणस्य इकारस्य स्थानिवद्भावेन हश्त्वात् 'हशिच' इत्युत्वं प्राप्तं न भवति । अल्चेह स्थानिभूतः, स्थान्यवयवश्च, गृह्यते । ततश्च आदेशस्य स्थानिभूतो योऽल् स्थान्यवयवश्च योऽल् तदाश्रयविधौ न स्थानिवदिति फलति । तत्र स्थानीभूताल्विधौ व्यूढोरस्केनेत्युदाहृतमेव । यथा वा । धिवि, प्रीणन इति धातोर्लटि प्रथमपुरुषस्य झेरन्तादेशे 'धिन्विकृण्व्योरच' इति विकरणस्य उकारस्य यणि वकारे सति तस्य स्थानिवद्भावेनार्धधातुकत्वात् स्वतो वलादित्वाच्च इडागमः प्राप्तो न भवति । वकारस्य स्थानिभूतो योऽल् उकारः तदादेशं वकारं आर्धधातुकत्वेनाश्रित्य प्रवर्तमानस्य इटः स्थान्यलाश्रयत्वात् । स्थान्यवयवालाश्रयविधौ यथा । प्रतिदीव्य । इह क्त्वादेशस्य य इत्यस्य वलाद्यार्धधातुकत्वात् इडागमः प्राप्तो न भवति । इडागमस्य वलाद्यार्धधातुकविषये स्थान्यवयवभूतवलाश्रयत्वात् । तदेतदाह । **आदेशः स्थानिवत्स्यान्नतु स्थान्यलाश्रयविधाविति ॥** स्थान्यलाश्रयेत्यत्र स्थानीति किं । रामाय । इह 'सुपि च' इतिदीर्घस्य यजादिसुबाश्रयस्य आदेशगतयकाररूपाश्रयत्वेपि तस्मिन् कर्तव्ये यादेशस्य स्थानिवद्भावेन सुप्त्वं भवत्येव । दीर्घस्य आदेशगतयकाररूपालाश्रयत्वेऽपि स्थान्यलाश्रयत्वाभावात् । न च नीञ्धातोर्ण्वुलि अकादेशे वृद्धौ नै अक इति स्थिते ऐकारस्य स्थानिवद्भावेन ईकारधर्मकत्वादायादेशो न स्यात् । ईकारस्य आयादेशाभावादिति वाच्यम् । इह हि स्थानिप्रयुक्तं यत् कार्यं शास्त्रीयं तदेवातिदिश्यते । ईकारस्य चैकाराभावो नशास्त्रविहित इति न तस्य ईकारस्थानिके ऐकारे अतिदेश इत्यास्तान्तावत् । **अनेनेति ॥** उदाहृतेन स्थानिवत्सूत्रेण इह सुध् य् इत्यत्र ईकारस्थानिकस्य यकारस्य स्थानिवद्भावेन अच्कार्यकारित्वमाश्रित्य अचि न द्वित्वमित्यर्थकेन अनचीत्यनेन धकारस्य द्वित्वनिषेधो न शङ्कनीय इत्यर्थः । कुत इत्यत आह । **अनल्विधाविति**

५० । अचः परस्मिन्पूर्वविधौ । (१-१-५७)

अंल्विद्धयर्थमिदम्। परनिमित्तोऽजादेशः स्थानिवत्स्यात् स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये । इति यणः स्थानिवद्भावे प्राप्ते ।

तन्निषेधादिति ॥ स्थानिवत्वनिषेधादित्यर्थः । यकारादेशस्थानीभूतो योऽल् ईकारः तद्गतमच्त्वं यकारे आश्रित्य प्रवर्तमानस्य यकारद्वित्वनिषेधस्य स्थान्यलाश्रयत्वादिति भावः। ननु सुध् य् इत्यत्र मास्तु स्थानिवदिति सूत्रेण स्थानिवद्भावः। तदुत्तरसूत्रेण तु स्थानिवत्त्वं स्यादेवेति शङ्कामुद्भावयिष्यन् तथाविधमुत्तरसूत्रमाह । **अचःपरस्मिन् ॥** स्थानिवत्सूत्रेणैव सिद्धे किमर्थमिदं सूत्रमित्यत आह । **अल्विद्धयर्थमिति ॥** अलाश्रयविधावपि स्थानिवद्भावार्थमित्यर्थः । तेन वव्रश्चेति सिद्ध्यति । ओ व्रश्चू, च्छेदने । लिटि तिपि णलि द्वित्वम् । लिव्यभ्यासस्येत्यभ्यासे रेफस्य सम्प्रसारणम् ऋकारः । पूर्वरूपम् । उरदत्वम् । रपरत्वम् । हलादिशेषः । तत्राभ्यासे वकारस्य पुनस्सम्प्रसारणन्न । ऋकारस्थानिकस्य उरदत्वस्य स्थानिवद्भावेन सम्प्रसारणतया 'न सम्प्रसारणे सम्प्रसारणम्' इति निषेधात् । पूर्वसूत्रेण त्वत्रस्थानिवद्भावो न सम्भवति । सम्प्रसारणनिषेधस्य स्थान्यलाश्रयत्वादिति भावः । पूर्वसूत्रादिह स्थानिवदादेश इत्यनुवर्तते । अच इत्येतदादेश इत्यनेनान्वेति अच आदेश इति । परस्मिन्निति सतिसप्तमी । ततश्च परनिमित्तक इति लभ्यते । तच्चादेशविशेषणम् । तदाह । **परनिमित्तोऽजादेशः स्थानिवत्स्यादिति ॥** विधीयत इति विधिः कार्यम् । पूर्वस्य विधिः पूर्वविधिः पूर्वत्वञ्च यद्यपि सावधिकम् । त्रयञ्चात्र सन्निहितम् । स्थानी आदेशः परनिमित्तञ्चेति । तत्र स्थानी तावन्नावधिर्भवितुमर्हति । तस्यादेशेनापहारात् । नाप्यादेशः । नापि परनिमित्तम् । वैयाकरण इत्यत्र इकारस्थानिकयणादेशात् तत्परनिमित्तादाकाराच्च पूर्वस्य नय्वाभ्यामित्यैकारस्य आयादेशे कर्तव्ये यणादेशस्य स्थानिवद्भावेनाच्त्वापत्तेः । तथापि स्थान्यवेक्षयैवात्र पूर्वत्वं विवक्षितम् । स्थानिन आदेशेनापहृतत्वेऽपि भूतपूर्वगत्या तत्पूर्वत्वस्य सम्भवात् । तदेतदाह । **स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्य इति ॥** तत्र स्थानिनि सति यद्भवति तदादेशेऽपि भवति यन्नभवति तदादेशेऽपि न भवतीत्येवमशास्त्रीयस्यापि कार्याभावस्य अतिदेशो भवति । तत्राद्ये वव्रश्चेत्युदाहृतमेव । तत्र न सम्प्रसारणे सम्प्रसारणमिति निषेधकार्यस्य शास्त्रीयत्वात् । द्वितीये तु गणयतीत्युदाहरणम् । गण, सङ्ख्यान इति चुरादौ अदन्तधातुः । तस्माण्णिच् । अतो लोपः । तिप् शप् णेर्गुणः अयादेशः गणयतीति रूपम् । अत्र णिचि परतः उपधाभूतस्य गकारादकारस्य 'अत उपधाया' इति न भवति । प्रकृतसूत्रेणाल्लोपस्य स्थानिवद्भावात् अकारे स्थानिनि सति गकारादकारस्य उपधात्वभङ्गादुपधावृद्धिर्नप्रवृत्तिमर्हति । वृद्ध्यभावस्यापि शास्त्रीयत्वेऽपि अल्लोपे अतिदेशात् । न चात्र गकारादकारस्य स्थान्यकारान्नपूर्वत्वम् । णकारेण व्यवधानादिति वाच्यम् । पूर्वत्वं ह्यत्र व्यवहिताव्यवहितसाधारणम् । उत्तरसूत्रे स्वरे निषेधाल्लिङ्गात् । तच्च तत्रैव स्पष्टीभविष्यतीत्यलम् । **इति यण इति ॥** अनेन सूत्रेण सुध् य् इत्यत्र

५१। न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु। (१-१-५८)

पदस्य चरमावयवे द्विर्वचनादौ च कर्तव्ये परानिमित्तोऽजादेशो न

धकारस्य द्वित्वनिषेधे कर्तव्ये ईकारस्थानिकस्य यकारस्य स्थानिवद्भावे प्राप्ते तत्प्रतिषेधसूत्रमारभ्यत इत्यर्थः । **नपदान्तद्विर्वचन ॥** स्थानिवदादेश इति अचः परस्मिन्निति चानुवर्तते । परनिमित्तकोऽजादेशो न स्थानिवदित्यन्वयः । पदान्तश्च द्विर्वचनञ्च वरे च यलोपश्च स्वरश्च सवर्णश्च अनुस्वारश्च दीर्घश्च जश्च चर्चेति द्वन्द्वः । तेषां विधयः विधानानि । कर्मणि षष्ठ्या समासः । ततश्च पदान्तादिषु विधेयेषु इति लभ्यते । वर इत्यनेन वरे योऽजादेशस्स विवक्षितः । आर्पो द्वन्द्वः । सप्तम्या अलुक्च । विधिशब्दः प्रत्येकमन्वेति । पदान्तविधौ द्विर्वचनविधावित्यादि । पदस्यान्तः चरमावयवः । पदान्तस्य विधाने पदान्तकर्मके विधाने पदस्य चरमावयवे कार्ये द्विर्वचनादौ च कार्ये इति यावत् । तदाह । **पदस्य चरमेत्यादिना ॥** पदान्तस्य स्थाने विधाविति तु न व्याख्यातम् । तथा सति एषो यन् हससीत्यसिद्धेः । तथाहि । एषः यन् इति छेदः । इण्धातोर्लटश्शतरि शपि लुकि इकारस्य इणो यणिति यण् । अत्र एतत्तदोरिति सुलोपो न भवति । तस्य हलि परतो विधानात् । इह च तस्मिन् कर्तव्ये इकारस्थानिकस्य यकारस्य स्थानिवद्भावेनाच्त्वात् । नच न पदान्तेति निषेधशङ्क्यः । यो विधीयमानः पदस्य चरमावयवः संपद्यते तत्रैव तन्निषेधात् । इह च विधेयस्य सुलोपस्य पदानवयवत्वात् । पदान्तस्य स्थाने विधाविति व्याख्याने तु इह यकारस्य स्थानिवद्भावो न सिध्येत् । सुलोपस्य पदान्तसकारस्य स्थाने विधानात् । अत्र हाशि चेत्युत्वे तु कर्तव्ये यकारो न स्थानिवद्भवति । इकारस्य विधीयमानस्य पदचरमावयवत्वात् । एवञ्च पदान्तविधावित्यस्य एषो यन् इत्येतदुत्वविषये उदाहरणम् । सुलोपविषये तु प्रत्युदाहरणं भाष्ये स्पष्टम् । भाष्यप्रदीपोद्योते स्पष्टतरमेतत् । पदान्तविधौ कानि सन्तीत्याद्युदाहरणमनुपदमेव मूले स्पष्टीभविष्यति । द्विर्वचने सुध् य् इत्युदाहरणम् । नचेह द्वित्वे कर्तव्ये यकारस्य स्थानिवद्भावविरहेऽपि तन्निषेधे स्थानिवद्भावस्स्यादेवेति वाच्यम् । अनचिचेति द्वित्वस्यानैमित्तिकतया तद्विषये यकारस्य स्थानिवद्भावस्यानपेक्षत्वेन तत्र तन्निषेधस्य वैयर्थ्यापत्त्या द्विर्वचनशब्देनात्र अचि नेति द्वित्वनिषेधस्यैव विवक्षितत्वादिति भावः । वरे यथा । यायावरः । 'यश्च यङः' इति या धातोर्यङन्ताद्वरच् । सन्यङोरिति द्वित्वम् । यायाय वरः इति स्थिते अतो लोप इति यङोऽकारस्य लोपः । लोपोव्योरिति यकारलोपः । अत्र अजाद्यार्द्धधातुकमाश्रित्य 'आतो लोप इटि च' इत्याकारलोपे कर्तव्ये अल्लोपो न स्थानिवत् । यलोपे यथा । यातिः । याधातोर्यङि द्वित्वं क्तिच् यायायति इति स्थिते, अतो लोपः, लोपोव्योरिति यलोपः अल्लोपस्य स्थानिवत्वादातो लोपः लोपोव्योरिति यलोपः यातिरिति रूपम् । अत्र अल्लोपो यलोपे कर्तव्ये न स्थानिवत् । न च वाव्योरित्यत्रापि लोपो व्योरिति यलोपे कर्तव्ये उकारादेशस्य वकारस्य स्थानिवत्त्वनिषेधस्स्यादिति वाच्यम् । स्वरदीर्घयलोपेषु लोप एवाजादेशो न स्थानिवदिति वार्तिके परिगणनात् । इह

च वकारस्य लोपरूपत्वाभावात्। स्वरविधौ यथा। चिकीर्षकः। चिक्रीर्ष इति सन्नन्तात् ण्वुल्। अकादेशः। सनोऽकारस्य अतो लोपः। अत्र ईकारस्य लितीत्युदात्तत्वे कर्तव्ये अल्लोपो न स्थानिवत्। यद्यपि ईकारः अल्लोपस्थानीभूतादकारान्नाव्यवहितपूर्व इति स्थानिवद्भावस्य प्राप्तिरिह नास्ति। तथाप्यस्मादेव ज्ञापकात् पूर्वसूत्रे पूर्वत्वं व्यवहिताव्यवहितसाधारणम्। तत्प्रयोजनन्तु पूर्वसूत्र एवोक्तम्। सवर्णविधौ यथा। शिण्ड्ढि। शिष् इति धातोः रौधादिकाल्लोण्मध्यमपुरुषैकवचनम्। सिप् श्नम्। शिनष् सि। हित्वं। धित्वं। ष्टुत्वं। षस्य जश्त्वं। डकारः शिनड्ढि श्नसोरल्लोपः नश्चापदान्तस्येत्यनुस्वारः अनुस्वारस्य ययीति तस्य परसवर्णः णकारः शिण्ड्ढि इति रूपम्। अत्र परसवर्णे कर्तव्ये अल्लोपो न स्थानिवत्। वस्तुतस्तु सवर्णविधौ नेदमुदाहरणम्। श्नमकारस्य लोपोऽत्र अजादेशः। तत्स्थानीभूतः श्नमकार एव। तस्मिन् सति नकारस्यानुस्वारप्रसक्तिरेव नास्ति। तथाचानुस्वारस्य स्थानीभूतादचः पूर्वत्वेन कदाप्यदृष्टत्वात्तस्य परसवर्णे कर्तव्ये अचः परस्मिन्नित्यल्लोपस्य स्थानिवत्त्वं न प्रसक्तमिति किन्तत्प्रतिषेधेन। यत्तु तत्त्वबोधिन्यां अनुस्वारस्य स्थानिभूतो नकारः श्नमकारात् पूर्वत्वेन दृष्ट इति तत्स्थानिकानुस्वारस्यापि तत्पूर्वत्वेन दृष्टत्वं स्थानिद्वाराऽपि पूर्वत्वाभ्युपगमादित्युक्तम्। एवं सति तितउमाचष्टे तितापयतीत्यत्र पुगागमो न स्यात्। 'तत्करोति तदाचष्टे' इति णिच्। इष्टवद्भावादुकारस्य टेरिति लोपः। अचोञ्णितीति तकारादकारस्य वृद्धिः आकारः पुगागमः। तितापीत्यस्मात् लट् तिप् शप् गुणः अयादेशः तितापयतीति रूपम्। अत्र अचोञ्णितीति वृद्ध्या लब्धस्य आकारस्य पुगागमे कर्तव्ये उकारलोपस्य स्थानिवद्भावे सति उकारेण व्यवधानेन णिपरकत्वाभावात् पुगागमो न स्यात्। आकारस्य लोपस्थानिभूतादुकारात् पूर्वत्वस्य स्वतः अभावेऽपि स्थानिद्वारा सत्वादिति सिद्धान्तरत्नाकरे दूषितम्। प्रौढमनोरमाव्याख्याने तु शब्दरत्ने पादमाचष्टे पादयति ततः क्विप् पात् हसतीत्यादौ 'झयोह' इति पूर्वसवर्णे कर्तव्ये पूर्वस्मात्परस्य विधिरिति पञ्चमीसमासः तत्प्राप्तस्थानिवद्भावनिषेधार्थमिह सूत्रे सवर्णग्रहणमिति प्रपञ्चितम्। अनुस्वारविधौ यथा। शिंषन्ति। शिष्, धातोर्लटि झिः झोऽन्तः। श्नसोरल्लोपः। नश्चापदान्तस्येत्यनुस्वारः। शिंषन्ति। इह तु न परसवर्णः। षकारस्य यय्त्वाभावात्। अत्र अनुस्वारे कर्तव्ये अल्लोपो न स्थानिवत्। अत्र दीर्घविधौ यथा। प्रतिदीव्ना। हलिचेति दकारादिकारस्य दीर्घे कर्तव्ये अल्लोपो न स्थानिवत्। जश्विधौ यथा। सग्धिश्चमे। अद भक्षणे क्विन्। वहुळं छन्दसीति घसल् आदेशः। 'घसिभसोर्हलि च' इत्युपधालोपः। झलोझलीति सलोपः। झषस्तथोरिति तकारस्य धत्वम्। 'झलाञ्जश् झशि' इति जश्त्वेन घकारस्य गकारः। समाना ग्धिः अदनं सग्धिः। समानस्य छन्दसीति सभावः। अत्र जश्त्वे कर्तव्ये उपधालोपो न स्थानिवत्। चर्विधौ यथा। जक्षतुः। घसेर्लिटि अतुस्। द्वित्वम् 'हलादिश्शेषः'। 'अभ्यासे चर्च' इति जश्त्वम्। 'कुहोश्चुः' इति जकारः। 'गमहन' इत्युपधालोपः। 'खरि च' इति चर्त्वम्। ककारः। 'शासिवसि इति' षः। अत्र चर्त्वे कार्ये उपधालोपो न स्थानिवत्। भाष्ये तु पूर्वत्रासिद्धे नस्थानिवदित्यवष्टभ्य द्विर्वचनसवर्णानुस्वारदीर्घजश्चरः प्रत्याख्याताः। किञ्च 'दीर्घादाचार्याणाम्' इत्युत्तरं 'अनुस्वारस्य ययि परसवर्णः' 'वापदान्तस्य' 'तोर्लि' 'उदस्थास्तम्भ्वोः पूर्वस्य' 'झयो होऽन्यतरस्यां' 'शश्छोढि'

स्थानिवत्'। इति स्थानिवद्भावनिषेधः ।

५२। झलां जश् झशि । (८-४-५३)

स्पष्टम् । इति धकारस्य दकारः ।

५३ । अदर्शनं लोपः । (१-१-६०)

प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात् ।

५४। संयोगान्तस्य लोपः । (८-२-२३)

संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात् । इति यलोपे प्राप्ते । 'यणः प्रतिषेधो वाच्यः' (वा ४८०६) । 'यणो मयो द्वे वाच्ये' (वा ५०१८)।

इति षट्सूत्रीपाठोत्तरं 'झलाञ्जश् झशि' 'अभ्यासेचर्च' 'खरिच' 'वावसाने' 'अणोऽप्रगृह्य-स्यानुनासिक' इति पञ्चसूत्रीपाठ इति 'हलोयमाम्यमि' इति सूत्रस्थभाष्यसम्मतः सूत्रक्रमः । एवञ्च शिण्ड्ढीत्यत्र न परसवर्णप्रसक्तिः । परसवर्णे कर्तव्ये षकारस्थानिकस्य जश्त्वस्यासिद्धत्वेन यय्परकत्वाभावादिति । तथापि सवर्णविधौ शिण्ड्ढीति नोदाहरणमित्यास्तान्तावत् । **इति स्थानीति** ॥ अनेन सूत्रेण सुध् य् इत्यत्र द्वित्वनिषेधे कर्तव्ये यकारस्य स्थानिवत्त्वनिषेध इत्यर्थः । एवञ्चाच्परकत्वाभावेन अनाचि चेति निषेधाभावात् धकारस्य द्वित्वन्निर्बाधमिति भावः । तथाच सुध् ध् य् इति स्थितम् । **झलाञ्जश् झशि** । **स्पष्टमिति** ॥ झलां स्थाने जश् स्यात् झशि परत इति स्पष्टार्थकम् । तत्र न किञ्चिद्व्याख्यातव्यमस्ति । पदान्तरस्यानुवृत्यभावादित्यर्थः । **इति धकारस्येति** ॥ प्रथमधकारस्येत्यर्थः । **दकार इति** ॥ स्थानत आन्तर्यादिति भावः । सुद् ध् य् इत्यत्र यकारस्य संयोगान्तलोपं शङ्कितुं लोपसंज्ञासूत्रमाह । **अदर्शनं लोपः** ॥ शब्दानुशासनप्रस्तावाच्छब्दविषयकं श्रवणमिह दर्शनं विवक्षितम् । दर्शनस्याभावः अदर्शनम् । अर्थाभावेऽव्ययीभावः । स्थानेऽन्तरतम इत्यतः स्थान इत्यनुवर्तते । स्थानं प्रसङ्ग इत्युक्तम् । शास्त्रतश्शब्दस्य कस्याचिच्छ्रवणप्रसङ्गे सति यदा श्रवणन्तत् लोपसंज्ञं भवतीत्यर्थः । तदाह । **प्रसक्तस्येति** ॥ तत्र श्रवणाभावात्मके लोपे विहिते श्रवणार्थमुच्चारणमपि नास्तीत्यर्थाल्लभ्यते । प्रसक्तस्यकिम् । दधि इत्यादौ क्विपः अश्रवणात्मकलोपस्य प्रत्ययलक्षणमाश्रित्य ह्रस्वस्य पिति कृति तुक् माभूत् । **संयोगान्तस्य लोपः** ॥ पदस्येत्यधिकृतम् । संयोगः अन्तो यस्येति विग्रहः । संयोगान्तस्य पदस्य लोप इत्यन्वयः । नच कृत्स्नपदस्य लोपः । किन्तु अलोन्त्यस्येति परिभाषया तदन्तस्यैव । तदाह । **संयोगान्तमित्यादिना** ॥ अत्र अन्तग्रहणं स्पष्टार्थमेव । संयोगस्य पदविशेषणतया येन विधिरित्येव तदन्तलाभात् । यत्तु संयोगावन्तौ यस्येति विग्रहलाभार्थमन्तग्रहणं । अन्यथा सुद्यत्प्रासाद इत्यत्र पकारात् पूर्वतकारस्य लोपः स्यादिति । तन्न । संयोगसंज्ञाया व्यासज्यवृत्तित्वात् प्रत्येकवृत्तित्वमभ्युपगम्य अन्तग्रहणप्रयोजनवर्णनस्य व्यर्थत्वादिति शब्दरत्ने विस्तर इति । **यलोपे इति** ॥ सुध् य् इति यकारस्य अनेन सूत्रेण लोपे प्राप्ते तत्प्रतिषेधः आरभ्यते । **यणः प्रतिषेधो वाच्यः** ॥ यणः संयोगान्तलोपप्रतिषेधो

'मय इति पञ्चमी यण इति षष्ठी' इति पक्षे यकारस्यापि द्वित्वम् । तदिह धकारयकारयोर्द्वित्वविकल्पाच्चत्वारि रूपाणि । एकधमेकयम् । द्विधं द्वियम् । द्विधमेकयम् । एकधं द्वियम् । सुद्ध्युपास्यः । मद्धरिः । धात्रंशः । लाकृतिः ।

वक्तव्य इत्यर्थः । अनेन वार्तिकेन यकारस्य संयोगान्तलोपो न भवतीति शेषः । इदं वार्तिकं आकरे प्रत्याख्यातम् । अथात्र यकारस्य अचः परत्वाभावादच्परकत्वाच्च अनाचिचेति द्वित्वाप्राप्तौ द्वित्वविधिमाह । **यणो मयो द्वे वाच्ये** ॥ अनेन वार्तिकेन यकारस्य द्वित्वमित्यन्वयः । ननु यदि यण इति पञ्चमी मय इति षष्ठी तर्हि यणः परस्य मयो द्वित्वमिति लभ्यते । प्रकृते च यकारो न यणः परः, नापि मय् । अतः कथमनेन वार्तिकेन तस्य द्वित्वमित्यत आह । **मय इतीति** ॥ पक्षे इत्यनेन उभयथा व्याख्यानमिष्टमिति सूचितम् । विनिगमनाविरहादिति भावः । अत्रापि वार्तिके यरोऽनुनासिक इत्यतो वाग्रहणमनुवर्तते । ततश्च फलितमाह । **तदिहेति** ॥ तदित्यव्ययम् । इयता सन्दर्भेण यत् प्रपञ्चितं तेन इह सुध् य् इत्यत्र यकारधकारयोः द्वित्वविकल्पाच्चत्वारि रूपाणि सम्पद्यन्ते इत्यर्थः । **एकधमेकयमिति** ॥ एकः धकारः यस्य तत् एकधम्, एवं एकयमित्यपि । धकारयकारयोरुभयोरपि द्वित्वाभावे एकधकारमेकयकारञ्च प्रथमं रूपमित्यर्थः । **द्विधं द्वियमिति** ॥ द्वौ धकारौ यस्य द्विधम् । एवं द्वियमित्यपि । धकारयकारयोरुभयोरपि द्वित्वे द्वियकारं द्विधकारञ्च द्वितीयं रूपमित्यर्थः । **द्विधमेकयमिति** ॥ धकारस्य द्वित्वे यकारस्य द्वित्वाभावे द्विधमेकयञ्च तृतीयं रूपमित्यर्थः । **एकधं द्वियमिति** ॥ धकारस्य द्वित्वाभावे च यकारस्य द्वित्वे एकधं द्वियञ्च चतुर्थं रूपमित्यर्थः । **सुद्ध्युपास्य इति** ॥ इह 'न भूसुधियोः' इति निषेधस्तु न भवति । तस्य अजादौ सुपि विधानात् । इकोऽसवर्ण इत्यपि न । 'न समास' इति तन्निषेधात् । **मद्धरिरिति** ॥ मधुर्नाम असुरविशेषः । तस्यारिश्शत्रुः मद्धरिः । हरिरित्यर्थः । अत्र धकारादुकारस्य स्थानत आन्तर्यात् यथासङ्ख्यपरिभाषया वा वकारः । न चात्र वकारस्य दन्तस्थानाधिक्यात् न स्थानसाम्यमिति वाच्यम् । यावत् स्थानसाम्यस्य सावर्ण्यप्रयोजकत्वेऽपि आन्तरतम्ये यत्किञ्चित्स्थानसाम्यस्यापि प्रयोजकत्वात् । अन्यथा चेता स्तोतेत्यादौ इकारादेः एकाराद्यनापत्तेः । **धात्रंश इति** ॥ अत्र तकारस्यैव द्वित्वम् । न तु रेफस्येत्यनुपदमेव वक्ष्यते अचोरहाभ्यामित्यत्र । **लाकृतिरिति** ॥ लृवर्णस्य आकृतिरिव आकृतिर्यस्येति विग्रहः । अत्र आकारे परे लृवर्णस्य दन्तस्थानसाम्यात् लकारः । न च दन्तस्थानसाम्यात् प्रथमातिक्रमे कारणाभावाच्च तस्य वकार एवास्तु । आन्तरतम्ये यत्किञ्चित्स्थानसाम्यस्य प्रयोजकतायाः मद्धरिरित्यत्रोक्तत्वादिति वाच्यम् । अत्र हि चत्वारो यणो यवरला विधेयाः । तत्र वकारविधिरुकारे ओष्ठस्थानसाम्यात् निस्सपत्नस्सावकाशः । तत्र लकारस्य दन्तरूपस्थानभेदादप्राप्तेः । लाकृतिरित्यत्र लृवर्णे तु वकारो लकारश्चेत्युभयमपि प्राप्तम् । अत्र शब्दपरविप्रतिषेधमाश्रित्य लकारविधिः परत्वात् अपवादत्वाच्च वकारविधिं बाधते । यदि हि प्रथमातिक्रमे कारणाभावादत्रापि वकार एव स्यात् तर्हि लकारविधिर्निरवकाश एव स्यात् । अतोऽत्र लृवर्णस्य

५५ । नादिन्याक्रोशे पुत्रस्य । (८-४-४८)

पुत्रशब्दस्य न द्वे स्त आदिनीशब्दे परे आक्रोशे गम्यमाने । पुत्रादिनी त्वमसि पापे । 'आक्रोशे' किम्। तत्वकथने द्विर्वचनं भवत्येव । पुत्त्रादिनी सर्पिणी । 'तत्परे च' (वा ५०२१) । पुत्रपुत्त्रादिनी त्वमसि पापे । 'वा हत-जग्धयोः' (वा ५०२२) । पुत्त्रहती—पुत्रहती । पुत्रजग्धी—पुत्रजग्धी ।

५६ । त्रिप्रभृतिषु शाकटायनस्य । (८-४-५०)

त्र्यादिषु वर्णेषु संयुक्तेषु वा द्वित्वम् । इन्न्द्रः—इन्द्रः । राष्ट्ट्रम्—रष्ट्रम् ।

लकार एवेत्यास्तान्तावत् । **नादिन्याक्रोशे** ॥ द्वे इत्यनुवर्तते । यर इति च । आक्रोशो निन्दा । आदिनीति ङ्यन्तं लुप्तसप्तमीकम् । आदिनीशब्दे परे पुत्रशब्दस्यावयवो यः यर् तकारः तस्य न द्वित्वम् । आक्रोशे गम्ये इत्यर्थः । तदाह । **पुत्त्रशब्दस्येत्यादिना** ॥ पुत्त्रशब्दावयवस्येत्यर्थः । **पुत्रादिनी त्वमसि पापे इति** ॥ पुत्रानत्ति शीलमस्याः पुत्रादिनी । 'सुप्यजातौ' इति णिनिः । ऋन्नेभ्य इति ङीप् । हे पापे! त्वं पुत्रादिनीत्यन्वयः । पुत्रघातिनीत्यर्थः । ईदृशाक्रोशस्य प्रायेण स्त्रीष्वेव सम्भवात् । सूत्रे आदिनीति ङ्यन्तमेव विवक्षितमिति हरदत्तः । माधवोऽप्येवम् । अत्र उकारात् परस्य तकारस्य अनचि चेति प्राप्तं द्वित्वं निषिध्यते। रेफस्य तु न क्वापि द्वित्वप्रसक्तिरित्यनुपदमेव वक्ष्यते । **आक्रोशे किमिति** ॥ आक्रोश इत्यस्य किं प्रयोजनमित्यर्थः । 'किं पृच्छायां जुगुप्सने' इत्यव्ययवर्गे अमरः । एवमुत्तरत्राप्येवज्जातीयकेषु द्रष्टव्यम् । **तत्वकथन इति** ॥ यस्याः पुत्राः स्वयमेव म्रियन्ते तां प्रति पुत्त्रादिनीति वस्तुस्थितिकथने तु न द्वित्वनिषेधः । तत्र निन्दायाः अप्रतीतेरित्यर्थः । **तत्परे च** ॥ वार्तिकमेतत् । सः आदिनीशब्दः परो यस्मात् सः तत्परः आदिनीशब्दपरके पुत्रशब्दे च परे पुत्रशब्दावयवस्य यरो न द्वित्वमित्यर्थः । **पुत्रपुत्त्रादिनी त्वमिति** ॥ पुत्रस्य पुत्रानत्तीति विग्रहः । अत्र पूर्वस्य पुत्रशब्दस्य आदिनीशब्दः परो न भवति । द्वितीयपुत्रशब्देन व्यवधानात् । अतः पूर्वसूत्रेण अप्राप्ते द्वित्वनिषेधे इदमारब्धम् । **वा हतजग्धयोः** ॥ हतशब्दे जग्धशब्दे च परे पुत्रशब्दावयवस्य यरो द्वित्वं वा स्यादित्यर्थः । **पुत्त्रहतीति** ॥ तकारद्वित्वे रूपम् । पुत्रो हतो ययेति विग्रहः । 'अस्वाङ्गपूर्वपदात्' इति ङीष् इति केचित् । वस्तुतस्तु । जातिपूर्वादित्यस्य तत्रानुवृत्तेः गौरादित्वात् ङीषिति युक्तम् । पुत्रघातसाहसस्य स्त्रीष्वेव सम्भवात् स्त्रीलिङ्गमेवोदाहृतम् । **पुत्रहतीति** ॥ द्वित्वाभावे रूपम् । एवं पुत्रजग्धी पुत्रजग्धीति अनचिचेति द्वित्वविकल्पे सिद्धे पुत्रशब्दस्य क्तान्ते चेत् हतजग्धयोरेव आक्रोश एवेति नियमार्थमिदं वार्तिकमित्याहुः । **त्रिप्रभृतिषु शाकटायनस्य च** ॥ त्रिचतुरादिषु हल्षु संयुक्तेषु आद्यस्य मध्ये अचः परस्य यरः द्वित्वं शाकटायनमते । मतान्तरे तु नेत्यर्थः । इन्द्र इति

५७ । सर्वत्र शाकल्यस्य । (८-४-५१)

द्वित्वं न । अर्कः । ब्रह्मा ।

५८ । दीर्घादाचार्याणाम् । (८-४-५२)

द्वित्वं न । दात्रम् । पात्रम् ।

५९ । अचो रहाभ्यां द्वे । (८-४-४६)

अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः । हर्य्यनुभवः । नह्यस्ति

६० । हलो यमां यमि लोपः । (८-४-६४)

हलः परस्य यमो लोपः स्याद्वा यमि । इति लोपपक्षे द्वित्वाभावपक्षे चैकयं

नकारस्य द्वित्वविकल्पः । राष्ट्रमित्यत्र षकारस्य द्वित्वविकल्पः । **सर्वत्र शाकल्यस्य** ॥ नेत्यनुवर्तते । यत्र यत्र द्वित्वं विहितं तत्र तत्र शाकल्यस्य ऋषेर्मते द्वित्वन्न भवतीत्यर्थः । **दीर्घादाचार्याणाम्** ॥ नेत्यनुवर्तते । दीर्घात् परस्य यरो द्वित्वं केषाञ्चिदाचार्याणाम्मते न भवति । मतान्तरे तु भवति । अनचिचेत्यत्र वाग्रहणमनुवर्तत इति नाज्झलाविति सूत्रे कैयटः । एवञ्च अनचिचेत्येव द्वित्वविकल्पसिद्धौ त्रिप्रभृतिष्वित्यादि सूत्रत्रयं नारम्भणीयमिति प्रौढमनोरमायां स्थितम् । एतत्सूत्रत्रयविरोधादनचिचेत्यत्र वाग्रहणन्नानुवर्त्यमिति युक्तं प्रतिभाति । **अचोरहाभ्यां द्वे** ॥ यरोऽनुनासिक इत्यतो यर इति षष्ठ्यन्तं वेतिचानुवर्तते । अच इति दिग्योगे पञ्चमी । पराभ्यामिति शेषः । रहाभ्यामित्यपि पञ्चमी । परस्येति शेषः । तदाह । **अचःपराभ्यामित्यादिना । हर्यनुभव इति** ॥ हरेरनुभव इति विग्रहः । हरि अनुभव इति स्थिते रेफादिकारस्य यण् । तस्य द्वित्वं । अथ हकारात् परस्योदाहरति । **नह्यस्तीति** ॥ नहि अस्तीति स्थिते हकारादिकारस्य यण् । तस्य द्वित्वं । इहोभयत्र यकारस्य अचः परत्वाभावादच्परकत्वात् यणः प्रतिषेध इति निषेधाच्च द्वित्वमप्राप्तं विधीयते । अत्र अनचिचेति रेफहकारयोर्द्वित्वन्न भवति । द्वित्वप्रकरणे रहाभ्यामिति रेफत्वेन हकारत्वेन च साक्षाच्छ्रुतेन निमित्तभावेन तयोः यरश्शब्दबोधितकार्यभाक्त्वबाधात् । श्रुतानुमितयोश्श्रुतं बलीय इति न्यायात् । हर् य् य् अनुभवः । नह् य् य् अस्ति इति स्थिते । उभयत्रापि प्रथमयकारस्य लोपविधिमाह । **हलो यमां यमि लोपः** ॥ झयो होऽन्यतरस्यामित्यतोऽन्यतरस्यामित्यनुवर्तते । तच्च विभक्तिप्रतिरूपकमव्ययं वार्थे वर्तते । यमामिति बहुत्वं प्रयोगबहुत्वापेक्षम् । एकैकस्मिन् प्रयोगे बहूनां यमामसम्भवात् । हलः इति दिग्योगे पञ्चमी । परस्येति शेषः । तदाह । **हलः परस्य यम इत्यादिना** ॥ अनेन सूत्रेण उदाहरणद्वयेऽपि प्रथमयकारस्य लोपे सति एकयकाररूपं सम्पद्यते । लोपाभावपक्षे तु द्वियकाररूपं सम्पद्यते । ननु हलो यमामिति सूत्रमेतदर्थं नारम्भणीयम् । अचोरहाभ्यामिति यकारद्वित्वस्य वैकल्पिकतया द्वित्वे सति द्वियकाररूपस्य द्वित्वाभावे एकयकाररूपस्य च सिद्धेरित्याशङ्क्य नास्य सूत्रस्यात्र प्रयोजनमित्याह । **इति लोपेति** ॥

रूपं तुल्यम्। लोपारम्भफलं तु 'आदित्यो देवता अस्येत्यादित्यं हविः' इत्यादौ। 'यमां यमि' इति यथासंख्यविज्ञानान्नेह। माहात्म्यम् तादात्म्यम्।

६१। एचोऽयवायावः। (७-१-७८)

एचः क्रमादय् अव् आय् आव् एते स्युरचि।

६२। तस्य लोपः। (१-३-९)

तस्येतो लोपः स्यात्। इति यवयोर्लोपो न। उच्चारणसामर्थ्यात्। एवं च इत्संज्ञापीह न भवति। हरये। विष्णवे। नायकः। पावकः।

यस्मिन् विधिस्तदादावल्ग्रहणे।

सप्तम्यन्ते अल्ग्रहणे विशेषणीभूते योविधिरारभ्यते स तदादौ ज्ञेयः। येनविधिरित्यस्यापवादः।

तर्हि किमस्य सूत्रस्य फलमित्यत आह। **लोपारम्भेति** ॥ 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः' इत्यादित्यशब्दात् शेषार्थण्यन्तात् देवतार्थे ण्यः। आदित्य य इति स्थिते। 'यस्येति च' इति यकारादकारस्य लोपे तकाराद्यकारस्य अनेन सूत्रेण लोपः। तस्मिन् सत्येव आदित्यमित्येकयकारं रूपं सिद्ध्यति। नान्यथा। अतः सूत्रारम्भो न विफल इति भावः। अत्र 'आपत्यस्य च तद्धितेऽनाति' इति लोपस्तु न। जाताद्यर्थकत्वेन आपत्यत्वाभावात्। अत्र त्वेतत् सूत्रं न्याय्यत्वादुपन्यस्तमिति भावः। नन्वेवमपि महात्मनो भाव इत्यर्थे 'गुणवचनब्राह्मणादिभ्यः' इति ष्यञि टिलोपे आदिवृद्धौ माहात्म्यमित्यत्रापि तकारान्मकारस्य लोपस्स्यात्। तस्य यम्त्वात् यकाररूपयम्परकत्वाच्चेत्यत आह। **यमामिति। यथासंख्यविज्ञानादिति** ॥ विज्ञायते अनेनेति विज्ञानं सूत्रम्। 'विज्ञानं शिल्पशास्त्रयोः' इत्यमरः। यथासंख्यसूत्रादित्यर्थः। तथाच मकारस्य मकारे परत एव लोपलाभात् यकारे परे न लोप इत्यर्थः। **एचोऽयवायावः** ॥ अय् च अव्च आय्च आव्चेति विग्रहः। इको यणचीत्यतोऽचीत्यनुवर्तते। यथासंख्यपरिभाषया एकारस्य अय्, ओकारस्य अव्, ऐकारस्य आय्, औकारस्य आव्, इति लभ्यते। तदाह। **एचः क्रमादिति** ॥ यथासंख्यसूत्रभाष्यरीत्या तु अन्तरतमपरिभाषयैवात्र व्यवस्था ज्ञेया। इह इचोऽचि यणयवायाव इत्येव सूत्रयितुमुचितम्। एतेष्वादेशेषु यकारवकारयोर्हल्त्वमिति इत्संज्ञायां लोपमाशङ्कितुमाह। **तस्यलोपः** ॥ इत्संज्ञाप्रकरणान्त इदं सूत्रम्। तत्र तच्छब्दस्सन्निहितम् इतं परामृशति। तदाह। **तस्येत इति** ॥ इत्यनेन सूत्रेण यवयोर्लोपो न शङ्कनीय इत्यर्थः। कुत इत्यत आह। **उच्चारणेति** ॥ यद्यत्र यवयोर्लोपस्स्यात्। तर्हि तयोस्सूत्रे अनुच्चारणमेव स्यात्। 'प्रक्षाळनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्' इति न्यायादिति भावः। तर्हि किमनयोरित्संज्ञेत्यत आह। **एवञ्चेति** ॥ उक्तप्रकारेण लोपाभावे सति इत्संज्ञापि इह यकारे वकारे च नभवति। फलाभावादित्यर्थः। क्रमेणोदाहरति। **हरय इत्यादिना** ॥

६३ । वान्तो यि प्रत्यये । (६-१-७९)

यकारादौ प्रत्यये परे ओदौतोरव् आव् एतौ स्तः गोर्विकारो गव्यम् । 'गोपयसोर्यत्' (सू १५३८) । नावा तार्यं नाव्यम् । 'नौवयोधर्म–' (सू १६४३) इत्यादिना यत् । 'गोर्यूतौ छन्दस्युपसंख्यानम्' (वा ३५४३) । 'अध्वपरिमाणे च' (वा ३५४४) । गव्यूतिः । 'ऊतियूति–' (सू ३२७४) इत्यादिना यूतिशब्दो

हरे ए विष्णो ए नै अकः पौ अक इति स्थितेषु एकारादीनां क्रमादयादयः । **वान्तो यि प्रत्यये** ॥ यि इति सप्तम्यन्तम् । तेन यकारादाविति लभ्यते । यस्मिन्विधिस्तदादावल्ग्रहण इति वार्तिकात् । तत्र यस्मिन्निति सप्तम्यन्तं विवक्षितम् । अलिति वर्णपर्यायः । सप्तम्यन्ते वर्णग्रहणे यो विधिः सः तद्वर्णादौ ज्ञेय इति तदर्थः । येनविधिरित्यस्यायमपवादः । वकारः अन्ते यस्य सः वान्तः । पूर्वसूत्रोपात्तः अवादेशः आवादेशश्च विवक्षितः । तौ च कयोर्भवत इत्याकांक्षायां ओदौतोरित्यर्थाल्लभ्यते । पूर्वसूत्रे तयोरेव तदुभयस्थानित्वेन क्लृप्तत्वात् । तदाह । **यकारादावित्यादिना । गव्यमिति** ॥ गो य इति स्थिते । ओकारस्य अच्परकत्वाभावात् एचोऽयवायाव इत्यप्राप्ते अवादेशोऽत्र विधीयते । अस्तिचात्र य इत्यस्य प्रत्ययत्वमित्याह । **गोपयसोर्यदिति** ॥ अनेन सूत्रेण गोशब्दात् विकारार्थे यत्प्रत्यय इति शेषः । **नाव्यमिति** ॥ नौ य इति स्थिते औकारस्य अच्परकत्वाभावात् एचोऽयवायाव इति अप्राप्ते वचनमिदम् । अस्तिचात्र य इत्यस्य प्रत्ययत्वमित्याह । **नौ वय इति** ॥ गव्यन्नाव्यमित्यत्र लोपश्शाकल्यस्येति 'हलि सर्वेषाम्' इति च वकारस्य लोपो न भवति । तयोः पदान्तविषयत्वात् । इह च भत्वेन पदत्वबाधात् । **गोर्यूतौ छन्दस्युपसङ्ख्यानम्** ॥ छन्दसि वेदे यूतिशब्दे परे गोशब्दावयवस्य ओकारस्य स्थाने अव् इति वान्तादेशो भवतीति उपसंख्यानं अधिकवचनं कर्तव्यमिति सूत्रकारश्शिक्ष्यते । 'आनोमित्रावरुणा घृतैर्गव्यूतिमुक्षतम्' इत्युदाहरणम् । गव्यूतिः । गोप्रचारभूमिः । गावो यूयन्ते मिश्र्यन्तेऽस्यामित्यधिकरणे यु धातोः क्तिनिति वेदभाष्ये भट्टभास्करः । अत्र यूतिशब्दस्य प्रत्ययत्वाभावात्तस्मिन् परतः 'वान्तो यिप्रत्यय' इत्यप्राप्तौ वचनमिदम् । **अध्वपरिमाणे च** ॥ मार्गपरिमाणविशेषे गम्येऽपि यूतिशब्दे परे गोशब्दावयवस्य ओकारस्य अव् इति वान्तादेशस्य उपसंख्यानं कर्तव्यमित्यर्थः । लोकेऽपि प्राप्त्यर्थमिदम् । यद्यपि पूर्ववार्तिकं वैदिकप्रक्रियायामेव उपन्यसनीयम् । तथाप्यत्र अनुवृत्तिबोधसौकर्यार्थमिह तदुपन्यासः । **गव्यूतिरिति** ॥ यावति गोशब्दः यूयते मिश्रयते श्रूयते तावानध्वा गव्यूतिः, क्रोशयुगं । 'गव्यूतिस्त्री क्रोशयुगम्' इत्यमरः । युधातोरधिकरणे क्तिन् । कथमिह युधातोर्दीर्घ इत्यत आह । **ऊतियूतीति** ॥ निपातनादेव दीर्घ इति भावः । सिद्धप्रक्रियस्य निर्देशो निपातनम् । ननु गव्यन्नाव्यमित्यत्र भत्वेन पदत्वबाधात् 'लोपश्शाकल्यस्य' इति 'हलिसर्वेषां'इति च वलोपाभावेऽपि गव्यूतिरित्यत्र लोपः स्यात् । अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वात् यूतिशब्दस्य यजादिस्वादिप्रत्ययत्वाभावेन तस्मिन् परतो भत्वाभावाच्चेत्यत आह । **वान्त इत्यत्रेत्यादि** ॥ वान्तो यिप्रत्यय इत्यत्र वकारात् गोर्यूतावित्यत्र छकाराद्वा पूर्वभागे वकारः प्रश्लिष्यत इत्यन्वयः । तर्हि

निपातितः। 'वान्तः इत्यत्र वकारात् 'गोर्यूतौ' इत्यत्र छकारादा पूर्वभागे 'लोपो व्योः—' (सू ८७३) इति लोपेन वकारः प्रश्लिष्यते। तेन श्रूयमाणवकारान्त आदेशः स्यात्। वकारो न लुप्यत इति यावत्।

६४। धातोस्तन्निमित्तस्यैव। (६-१-८०)

यादौ प्रत्यये परे धातोरेचश्चेद्वान्तादेशस्तर्हि तन्निमित्तस्यैव। लव्यम्।

व् वान्त इति, व् छन्दसीति च वकारः कुतो न श्रूयत इत्यत आह। **लोपो व्योरिति**। **लोपेनेति**॥ अन्तर्हित इति शेषः। ननु प्रश्लेषे सति किमायातमित्यत आह। **तेनेति**॥ वान्तोयीतिसूत्रे वकारात् प्राक् व् इति प्रश्लिष्यमाणं वान्तस्य विशेषणम्। विशेषणत्वाच्च तदन्तविधौ सति वकारान्त इति लभ्यते। तत्र वान्तस्य पुनर्वान्तवचनसामर्थ्यात् श्रूयमाणवकारवान् वान्त आदेशस्स्यादिति लभ्यते। गोर्यूताविल्यत्र च इदमेव वान्तग्रहणमनुवर्तत इति तत्रापि श्रूयमाणवकारवान् वान्तादेश इति लभ्यते। गोर्यूताविल्यत्र छकारात् प्राक् व् इति प्रश्लिष्यमाणमपि पूर्वसूत्रादनुवृत्तस्य वान्त इत्यस्य विशेणमिति तदन्तविधिना वान्तत्वलाभे वान्तस्य पुनर्वान्तत्ववचनसामर्थ्यात् श्रूयमाणवकारवान् वान्त इति लभ्यत इत्यर्थः। नन्वेतावता गव्यूतिरित्यत्र अवादेशे वकारस्य श्रूयमाणत्वलाभेऽपि लोपशङ्का न परिहृतेत्यत आह। **वकारो न लुप्यत इति। यावदिति**॥ वकारस्य श्रूयमाणत्ववचनं वकारो न लुप्यत इत्यर्थे पर्यवसन्नमित्यर्थः। अश्रवणस्यैव लोपशब्दार्थत्वादिति भावः। यद्यपि वान्तो यीति सूत्रे वकारप्रश्लेषस्य तदुदाहरणे गव्यन्नाव्यमित्यत्र प्रयोजनन्नास्ति। तत्र भत्वेन पदत्वस्य बाधेन उक्तलोपस्याप्राप्तेः। लव्यमित्यादौ स्वत एव पदत्वाभावाल्लोपस्याप्राप्तिः। गामिच्छति गव्यतीत्यत्र क्यजन्तेऽपि वकारस्य न लोपप्रसक्तिः। 'नः क्ये' इति नियमेन तत्र पदत्वाभावात्। तथाऽपि गोर्यूताविति वार्तिके तदनुवृत्तौ गव्यूतिरित्यत्र प्रयोजनमस्त्येव। एवञ्च वार्त्तिक एव तत्प्रश्लेष उचितः। एतस्मादेवास्वरसात् छकाराद्वेत्युक्तम्। वस्तुतस्तु। वकारप्रश्लेषोऽनुपपन्नः। तथा सति सूत्रे वार्तिके च प्रश्लिष्टस्य तस्य श्रवणप्रसङ्गात्। न च लोपोव्योरितिलोपात्तदश्रवणमिति वाच्यम्। वकारलोपस्य उदाहरणाभावाद्वकारग्रहणन्नकर्तव्यामिति लोपो व्योरिति सूत्रस्थभाष्यविरोधात्। अतोऽत्र प्रश्लिष्टवकारस्य छान्दस एव लोपो वर्णनीयः। प्रक्रियाप्रकाशे तु संज्ञापूर्वको विधिरनित्य इति वचनात्। गव्यूतिरित्यत्र न वकारलोप इत्युक्तम्। अन्येतु इको गुणवृद्धी इति सूत्रे अतो ल्रान्तस्येत्यत्र लुप्तनिर्दिष्टो वकार इति भाष्यप्रामाण्यात् क्वचिदस्ति वकारलोप इत्याहुः। ननु ओयते औयत इत्यत्रापि ओकारस्य औकारस्य च वान्तो यीति वान्तादेशस्स्यादित्याशङ्क्य वान्तो यीति सूत्रन्नियमयति। **धातोस्तन्निमित्तस्यैव**॥ एच इति, वान्तो यि प्रत्यय इति, चानुवर्तते। सः यादिप्रत्ययः निमित्तं यस्य सः तन्निमित्तः। यादिप्रत्यये परे धातोरेचो भवन् वान्तादेशः यादिप्रत्ययनिमित्तकस्यैव एचो भवति। नान्यस्येत्यर्थः। तदाह। **यादौ प्रत्यय इत्यादिना। लव्यमिति**॥ लूञ्। छेदने। अचो यत्, सार्वधातुकार्द्धधातुकयोरित्यूकारस्य गुणः ओकारः। तस्य धात्ववयवत्वात्

अवश्यलाव्यम् । 'तन्निमित्तस्यैव' इति किम् । ओयते । औयत ।

६५ । क्षय्यजय्यौ शक्यार्थे । (६-१-८१)

यान्तादेशनिपातनार्थमिदम् । क्षेतुं शक्यं क्षय्यम् । जेतुं शक्यं जय्यम् । 'शक्यार्थे' किम् । क्षेतुं जेतुं योग्यं क्षेयं पापं जेयं मनः ।

यादिप्रत्ययनिमित्तकत्वाच्च वान्तादेशः । **अवश्यलाव्यमिति** ॥ 'ओरावश्यक' इति लूञो ण्यत् । अचो ञ्णितीत्यूकारस्य वृद्धिः औकारः । अवश्यमित्यव्ययम् । मयूरव्यंसकादित्वात्समासः । 'लुम्पेदवश्यमः कृत्य' इति मलोपः । अत्र औकारस्य धात्ववयवत्वात् यादिप्रत्ययनिमित्तकत्वाच्च वान्तादेशः । ननु लव्यमवश्यलाव्यमित्यत्र वान्तो यीत्येव वान्तादेशसिद्धः । अतस्तन्निमित्तस्यैवेति नियमार्थमिदं सूत्रमिति स्थितिः । तन्नियमविधेः किं प्रयोजनमिति पृच्छति । तन्निमित्तस्यैवेति किमिति । नियमस्य किं प्रयोजनमित्यर्थः । **ओयते इति** ॥ वेञ् तन्तुसन्ताने कर्मणि लट् । भावकर्मणोरित्यात्मनेपदम् । यक् । वचिस्वपियजादीनामिति वकारस्य सम्प्रसारणम् । उकारः । पूर्वरूपम् । अकृत्सार्वधातुकयोरित्युकारस्य दीर्घः । आङा सह उकारस्य आद्गुण इति गुणः ओकारः । तस्य परादिवद्भावेन धात्ववयवत्वेऽपि यादिप्रत्ययनिमित्तकत्वाभावात् न वान्तादेशः । नन्वत्र न धातुलोपसूत्रस्थभाष्यरीत्या आद्गुण इति गुणस्य ओकारस्य पदद्वयापेक्षत्वेन बहिरङ्गतया वान्तादेशे कर्तव्ये असिद्धत्वादोकाराभावान्नवान्तादेशप्रसक्तिरित्यस्वरसादाह । **औयतेति** ॥ वेञः केवलात् कर्मणि लङ् । आत्मनेपदादि पूर्ववत् । आडजादीनामित्यात् । आटश्चेति वृद्धिः औकारः । तस्य परादिवद्भावेन धात्ववयवत्वेऽपि यादिप्रत्ययनिमित्तकत्वाभावान्नवान्तादेशः । नात्र वृद्धेर्बहिरङ्गत्वम् । पदद्वयापेक्षत्वाभावात् । 'सिद्धे सत्यारम्भो नियमार्थे' इति न्यायेन नियमविधिसिद्धेः । तन्निमित्तस्यैवेत्येवकारस्तु विपरीतनियमव्यावृत्त्यर्थः । एवकाराभावे हि यादिप्रत्ययनिमित्तकस्य चेदेचो वान्तादेशः तर्हि धातोरेवैच इत्यपि नियमः प्रतीयेत । तथा च बाभ्रव्य इत्यत्र वान्तादेशो न स्यात् । बभ्रोरपत्यं बाभ्रव्यः । मधुबभ्रोर्ब्राह्मणकौशिकयोरिति यञ् । ओर्गुण इत्युकारस्य गुणः ओकारः । तस्य यादिप्रत्ययनिमित्तकस्य धात्ववयवत्वाभावात् वान्तादेशो न स्यात् । अतः इष्टनियमावधारणार्थं तन्निमित्तस्यैवेत्येवकारः । **क्षय्यजय्यौ शक्यार्थे** ॥ शक्यार्थे क्षय्यजय्यशब्दौ वाचकतया वर्त्तेते इत्यर्थः । ननु किमपि कार्यं विधेयमत्र न दृश्यते इत्यत आह । **यान्तेति** ॥ प्रातिस्विकविधिं विना सिद्धप्रक्रियस्य शब्दस्वरूपस्य निर्देशो निपातनम् । ततश्च शक्यार्थके यादौ प्रत्यये परे । क्षि क्षये जि जये इति धात्वोरेचः अय् इति यान्तादेशस्स्यादिति विधानमत्र फलति । शक्यार्थे क्षिज्योर्यान्त इति प्रातिस्विकविधौ गौरवादेवन्निपातनमिति भावः । **क्षय्यमिति** ॥ कृत्या इत्यधिकारे क्षिधातोरचो यदिति यत् प्रत्ययः । स च 'शकि लिङ्च' इति शक्यार्थः । शक्यार्थे लिङ् स्यात् चात् कृत्या इति तदर्थः । सार्वधातुकार्द्धधातुकयोरिति इकारस्य गुणः एकारः । तस्याच्परकत्वाभावादप्राप्तः अयादेशः अत्र निपात्यते । जय्यमित्यपि पूर्ववत् । **शक्यार्थे किमिति** ॥ शक्यार्थ इत्यस्य किं प्रयोजनमिति प्रश्नः । क्षेतुमित्यादि क्षेतुं योग्यं क्षेयं पापम् । जेतुं योग्यं जेयम्मन इत्यन्वयः । अर्हे कृत्यतृचश्चेति यत्

६६। ~~क्रय्य~~ स्तदर्थे । (६-१-८२)

तस्मै प्रकृत्यर्थायेदं तदर्थम् । क्रेतारः क्रीणीयुरिति बुद्ध्या आपणे प्रसारितं क्रय्यम् । क्रेयमन्यत् । क्रयणार्हमित्यर्थः ।

६७ । लोपः शाकल्यस्य । (८-३-१९)

अवर्णपूर्वयोः पदान्तयोर्यवयोर्वा लोपोऽशि परे । 'पूर्वत्रासिद्धम् । (सू १२) इति लोपशास्त्रस्यासिद्धत्वान्न स्वरसन्धिः । हर एहि—हरयेहि । विष्ण

स च न शक्यार्थक इति नात्र यान्तादेश इत्यर्थः **क्रय्यस्तदर्थे** ॥ इदमपि यान्तादेशनिपातनार्थम् । तदर्थशब्दं व्याचष्टे । **तस्मा इति** ॥ क्रय्यशब्दे यः क्रीञ्धातुः यत्प्रत्ययप्रकृतिभूतः तस्य योऽर्थः अभिधेयः द्रव्यविनिमयरूपः क्रयः सः प्रकृत्यर्थः तच्छब्देन विवक्षितः । तस्मै इदं तदर्थं क्रयार्थं वस्तु । तथाच क्रयार्थे वस्तुनि गम्ये क्रीञ्धातोर्यादौ प्रत्यये परे इति फलति । यान्तः क्रीञस्तदर्थ इति विधौ गौरवान्निपातनमाश्रितम् । क्रियार्थत्वञ्चात्र फलोपाधानं विवक्षितमित्याह । **क्रेतार इत्यादि क्रय्यमित्यन्तम्** ॥ योग्यतामात्रग्रहणे तु क्रयार्थ इत्यव्यावर्तकः स्यादिति भावः । क्रीञः कर्मणि 'अचो यत्' इति यत् । सार्वधातुकेति गुणः एकारः । अत्र एकारस्य अच्परकत्वाभावादनेन अयादेशविधिः । **क्रेयमन्यदिति** ॥ गृहादौ भोजनाद्यर्थं संगृहीतं धान्यादीत्यर्थः । 'अर्हे कृत्यतृचश्च' इति यत् । अत्र अयादेशो न भवति । फलोपधानस्य क्रयार्थत्वस्य तत्राभावादित्यर्थः । हरे एहि, विष्णो इह, श्रियै उद्यतः, गुरौ उत्कः, इत्यत्र एचां क्रमेण अयवायावादेशेषु कृतेषु यकारवकारयोर्वैकल्पिकं लोपं विधत्ते । **लोपश्शाकल्यस्य** ॥ 'भो भगो' इत्यतः अपूर्वस्येति अशीति चानुवर्तते । व्योर्लघुप्रयत्नेत्यतः व्योरित्यनुवर्तते । वकारयकारयोरित्यर्थः । अपूर्वस्येति च व्योरित्यस्य विशेषणम् । अवर्णः पूर्वः यस्मात् सः अपूर्वः । अपूर्वस्य वस्य यस्य चेति प्रत्येकमन्वयाभिप्रायमेकवचनम् । पदस्येत्यधिकृतं अवर्णपूर्वकाभ्यां यकारवकाराभ्यां विशेष्यते । विशेषणत्वाच्च व्योरिति तदन्तता लभ्यते । ततश्च अवर्णपूर्वो यः वकारो यकारश्च तदन्तपदस्य लोपः स्यात् अशि परत इत्यर्थः । अलोऽन्त्यपरिभाषया तादृशपदान्तस्येति लभ्यते । शाकल्यग्रहणान्मतान्तरे न भवतीति गम्यते । ततश्च फलितमाह । **अवर्णपूर्वयोरित्यादिना** ॥ व्योरित्यनुवृत्तावपि वर्णसमाम्नाये यकारस्य प्राथम्याद्यवयोरित्युक्तम् । नच शाकल्यवंश्यानामेव पुरुषाणामेतल्लोपानुसरणं नान्येषामिति पुरुषभेदेन व्यवस्थार्थमेव शाकल्यग्रहणं कुतो न स्यादिति वाच्यम् । 'न वेति विभाषा' इति सूत्रभाष्ये आचार्यदेशशीलेन च तद्विषयतेति प्रस्तुत्य 'इको ह्रस्वो ङयो गालवस्य' प्राचामवृद्धादित्यादौ गालवाद्याचार्यग्रहणं प्राचामुदीचामित्यादिदेशविशेषग्रहणञ्च अविशेषेण विकल्पार्थमेव । ननु तत्तद्वंश्यतत्तद्देशभेदेन प्रयोगव्यवस्थार्थमिति सिद्धान्ततत्वात् । ननु हरे एहीत्यत्र अयादेशे यकारस्य लोपे सति 'ओमाङोश्च' इति पररूपं स्यात् । विष्णो इह, श्रियै उद्यतः, गुरौ उत्कः, इत्यत्र अवायावादेशेषु वकारयकारलोपे आद्गुण इति गुणस्स्यादित्यत आह । **पूर्वत्रेति** ॥ वकारयकारयोर्लोपस्यासिद्धत्वेन ताभ्यां

इह–विष्णविह । श्रियाउद्यतः–श्रियायुद्यतः । गुराउत्कः–गुरावुत्कः । 'कानि सन्ति' 'कौ स्तः' इत्यत्रास्तेरल्लोपस्य स्थानिवद्भावेन यणावादेशौ प्राप्तौ 'न पदान्त–' (सू ५१) इति सूत्रेण पदान्तविधौ तन्निषेधान्न स्तः ।

६८ । एकः पूर्वपरयोः । ६-१-८४ ।

इत्यधिकृत्य ।

६९ । आद्गुणः ६-१-८७ ।

अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात्संहितायाम् । उपेन्द्रः । रमेशः । गङ्गोदकम् ।

व्यवहिततया अच्परकत्वाभावादाशङ्कितः अच्सन्धिर्नभवतीत्यर्थः । तदेवमिक्सन्धिरेच्सन्धिश्च निरूपितः । तदुभयत्रातिप्रसङ्गमाशङ्क्य समाधत्ते । **कानीत्यादिना** ॥ यद्यपि तथापीत्यध्याहार्यम् । कानि सन्ति, कौ स्त, इत्यत्र यद्यपि यणावादेशौ प्राप्तौ । तथापि न भवत इत्यन्वयः । नन्वत्र इकारौकारयोस्सकारपरकत्वादच्परकत्वाभावात् कथं यणावोः प्राप्तिरित्यत आह । **अस्तेरल्लोपस्य स्थानिवद्भावेनेति** ॥ असधातोरादादिकाल्लटि प्रथमपुरुषबहुवचने सन्तीति रूपम् । प्रथमपुरुषद्विवचने तु स्तः इति रूपम् । उभयत्रापि 'श्नसोरल्लोप' इति धात्वादेरकारस्य लोपः इति स्थितिः । तत्र अल्लोपस्य स्थानिवत्त्वेनाच्त्वादिकारौकारयोरच्परकत्वाद्यणावादेशौ प्राप्नुत इत्यर्थः । नच स्थानिवदादेशोऽनल्विधाविति स्थानिवद्भावोऽत्र न सम्भवति । अल्लोपस्य स्थानिभूतो यः अकारः तं परनिमित्तत्वेनाश्रित्य प्रवर्तमानयोर्यणावादेशविध्योः स्थान्यलाश्रयत्वादिति वाच्यम् । 'अचः परस्मिन् पूर्वविधौ' इति स्थानिवद्भावोपपत्तेः । अल्लोपस्य किङिति परनिमित्ते विधीयमानस्य परनिमित्तकाजादेशतया तत्स्थानीभूतादकारात् पूर्वत्वेन दृष्टयोरिकारौकारयोर्यणावादेशविधौ अचः परस्मिन्निति प्रवृत्तेरिति भावः । तर्हि कुतोऽत्र यणावादेशौ न भवत इत्यत आह । **नपदान्तेति सूत्रेण पदान्तविधौ तन्निषेधादिति** ॥ पदान्तभूतेकारौकारयोस्स्थाने भवतोर्यणावादेशयोः पदचरमावयवतया तयोः कर्तव्ययोः परनिमित्तकस्याजादेशस्याल्लोपस्य स्थानिवत्त्वनिषेधादित्यर्थः । अथ एकादेशसन्धिं निरूपयितुमाह । **एकः पूर्वपरयोः । इत्यधिकृत्येति** ॥ पदद्वयात्मकमिदं सूत्रम् । उत्तरत्रानुवृत्त्यर्थं पठित्वा कतिपयसन्धयः विधास्यन्त इत्यर्थः । **आद्गुणः** ॥ आदिति पञ्चमी नतु तपरकरणम् । एकः पूर्वपरयोरित्यधिकृतम् । तदाह । **अवर्णादचीत्यादिना । उपेन्द्र इति** ॥ उप इन्द्र इति स्थिते पकारादकारस्य तस्मादिकारस्यच पूर्वपरयोः कण्ठतालुस्थानकयोः तथाविध एको गुणः एकारः । आन्तरतम्यात् । अथ प्रत्याहारेषु स्ववाच्यवाच्येषूक्तां लक्षणां स्मारयितुं दीर्घविषयोदाहरणमाह । **रमेश इति** ॥ रमा ईश इति स्थिते आकारस्य ईकारस्य च स्थाने पूर्ववदेको गुणः एकारः । **गङ्गोदकमिति** ॥ गङ्गा उदकमिति स्थिते आकारस्य उकारस्य च कण्ठोष्ठस्थानकयोः तथाविध एको गुणः ओकारः । कृष्णर्द्धिरित्यत्र कृष्ण ऋद्धिरिति स्थिते आद्गुण इति प्राप्तम् । अत्र

७० । उरण्परः । (१-१-५१) ।

'ऋ इति त्रिंशतः संज्ञा' इत्युक्तम्, तत्स्थाने योऽण् स रपरः सन्नेव प्रवर्तते । तत्रान्तरतम्यात् 'कृष्णर्द्धिः' इत्यत्र अर् । 'तवल्कारः' इत्यत्र अल् । अचो रहाभ्याम्—' (सू ५९) इति पक्षे द्वित्वम् ।

७१ । झरो झरि सवर्णे । (८-४-६५) ।

हलः परस्य झरो लोपो वा स्यात्सवर्णे झरि । द्वित्वाभावे लोपे सत्येकधम् । असति लोपे, द्वित्वलोपयोर्वा, द्विधम् । सति द्वित्वे लोपे चासति त्रिधम् ।

अकारः ऋकारश्चेति द्वौ स्थानिनौ। तयोः अकार एकार ओकारश्चेति त्रयोऽपि गुणाः प्रसक्ताः । अकारेण स्थानिना त्रयाणामपि कण्ठस्थानसाम्याविशेषात् । ऋकारेण स्थानिना तु न कस्यापि स्थानसाम्यम्। तस्य मूर्धस्थानकत्वात् । एतेषाञ्च तदभावात् । एवं तव ऌकार इति स्थिते त्रयो गुणाः प्रसक्ताः । अकारेण तेषां कण्ठस्थानसाम्याविशेषात् । ऌकारेण तु स्थानिना न कस्यापि स्थानसाम्यम् । तत्र कतमो गुणो भवतीत्याकांक्षायामिदमारभ्यते । **उरण्परः । इत्युक्तमिति ॥** अणुदित्सूत्र इति शेषः । उः इति ऋ इत्यस्य षष्ठ्येकवचनम् । 'षष्ठी स्थाने' इति परिभाषया स्थाने इति लभ्यते । अनुवादे तत्परिभाषानुपस्थितावपि स्थानेग्रहणं ततोऽनुवर्तते । तदाह। **तत्स्थाने योऽणिति ॥** स्थानेऽन्तरतम इत्यतोऽपि स्थानेग्रहणमनुवर्तते। स्थानं प्रसङ्गइत्युक्तम् । प्रसङ्गावस्थायामित्यर्थो विवक्षितः । तदाह । **रपरस्सन्नेव प्रवर्तत इति ॥** अत्र र इति प्रत्याहारो विवक्षितः । ततश्च रेफशिरस्को लकारशिरस्कश्च प्रवर्तत इति लभ्यते । तयोर्व्यवस्थां दर्शयति । **तत्रेति ॥** रेफलकारशिरस्कयोर्मध्ये कृष्णर्द्धिरित्यत्र अर् । तवल्कार इत्यत्र अलित्यन्वयः । कुत इयं व्यवस्थेत्यत आह । **आन्तरतम्यादिति ॥** त्रिषु गुणेषु प्रसज्यमानेषु अकारस्य अणो रेफलकारशिरस्कतया तस्य अर् अल् इत्येवमात्मकस्य, अकारांशे स्थानीभूतेन अकारेण, रेफांशे ऋकारेण, लकारांशे ऌकारेण च, स्थानसाम्यादकारऋकारयोस्स्थाने अरेव भवति । अकारऌकारयोः स्थाने अलेव भवति । एकारौकारौ तु गुणौ न भवत एव । तयोः ऋकारेण ऌकारेण च स्थानसाम्याभावादित्यर्थः । नच एकार ओकारश्च कथं रपरौ न स्यातामिति वाच्यम् । पूर्वेणैव णकारेण ह्यत्राण् गृह्यते । प्रशास्तॄणामित्यादिनिर्देशादित्यलम् । **पक्षे द्वित्वमिति ॥** ऋध धातोः क्तिनि झषस्तथोरिति तकारस्य धत्वे ऋद्धिरिति द्विधकारं रूपं स्वाभाविकम् । तत्र अरादेशे रेफात् परस्य धकारस्य अचो रहाभ्यामिति कदाचिद्द्वित्वमित्यर्थः । **झरो झरि सवर्णे ॥** झयो होऽन्यतरस्यामित्यतः अन्यतरस्यामित्यनुवर्तते । हलो यमामित्यतः हल इति, लोप इति, चानुवर्तते । तदाह । **हलः परस्येत्यादिना ॥** तदिह रूपत्रयं सम्पन्नमित्याह । **द्वित्वाभाव इत्यादिना ॥** रेफात् परस्य ऋध् इति धात्वन्तस्य धकारस्य अचो रहाभ्यामिति द्वित्वाभावे सति झरो झरीति लोपे च सति एकधकारं रूपमित्यर्थः । **असतीति ॥** द्वित्वाभावे इत्यनुकृष्यते । तस्यैव ऋधेर्धकारस्य द्वित्वाभावे

कृष्णर्धिः—कृष्णर्द्धिः—कृष्णर्द्धिः । 'यण इति पञ्चमी मय इति षष्ठी' इति पक्षे ककारस्य द्वित्वम्। लस्य तु 'अनचि च' (सू ४८) इति। तेन 'तवल्कारः' इत्यत्र रूपचतुष्टयम् ।

द्वित्वं लस्यैव कस्यैव नोभयोरुभयोरपि ।
तवल्कारादिषु बुधैर्बोद्धव्यं रूपचतुष्टयम् ॥

७२ । वृद्धिरेचि । (६-१-८८)

आदेचि परे वृद्धिरेकादेशः स्यात्। गुणापवादः। कृष्णैकत्वम् । गङ्गौघः । देवैश्वर्यम् । कृष्णौत्कण्ठ्यम् ।

७३ । एत्येधत्यूठ्सु । (६-१-८९) ।

लोपे च असति द्विधकारं रूपम् । तथा तस्यैव ऋधेर्धकारस्य द्वित्वे लोपे च सति द्विधकारमेव रूपमित्यर्थः । **सतीति** ॥ तस्यैव ऋधेर्धकारस्य द्वित्वे सति लोपे च असति त्रिधकारं रूपमित्यर्थः । यद्यपि द्विधपक्षे प्रथमधकारस्य त्रिधपक्षे मध्यमधकारस्य च 'झलां जश् झशि' इति जश्त्वेन दकारो भवति। तथापि प्रक्रियाभिप्रायेण भूतपूर्वगत्या वा द्विधत्वं त्रिधत्वञ्चेति न दोषः । अथ तवल्कार इत्यत्राह । **यण इति** ॥ यणः परस्य मयो द्वित्वमिति व्याख्याने ककारस्य द्वित्वं लकारस्य तु अनचि चेति द्वित्वमित्यर्थः । **तेनेति** ॥ लकारककारयोर्द्वित्वविकल्पेनेत्यर्थः । **द्वित्वं लस्यैवेति** ॥ लकारस्य द्वित्वे ककारस्य द्वित्वाभावे च सति द्विलकारमेककारञ्च प्रथमं रूपमित्यर्थः । **कस्यैवेति** ॥ ककारस्य द्वित्वे लकारस्य द्वित्वाभावे द्विककारमेकलकारञ्च द्वितीयं रूपमित्यर्थः । **नोभयोरिति** ॥ लकारककारयोरुभयोरपि द्वित्वाभावे एकलकारमेककारं तृतीयं रूपमित्यर्थः । **उभयोरपीति** ॥ लकारककारयोरुभयोरपि द्वित्वे द्विलकारं द्विककारञ्चतुर्थं रूपमित्यर्थः । **तवल्कारादिष्विति** ॥ आदिना ममल्कारादिसङ्ग्रहः । **वृद्धिरेचि** ॥ आद्गुण इत्यतः आदिति पञ्चम्यन्तमनुवर्तते । एकः पूर्वपरयोरित्यधिकृतम् । तदाह । **आदेचीत्यादिना । गुणापवाद इति** ॥आद्गुण इति प्राप्तावेतदारम्भ इति भावः । **कृष्णैकत्वमिति** ॥ कृष्णस्य एकत्वमिति षष्ठीसमासः । 'पूरणगुण' इति निषेधस्त्वनित्य इति तत्रैव मूले वक्ष्यते । कृष्णेति सम्बुद्ध्यन्तं पृथक्पदमित्यन्ये । अत्र अकारस्य एकारस्य च कण्ठतालुस्थानकस्य स्थाने तथाविध ऐकार एकादेशः । गङ्गा ओघ इति स्थिते आकारस्य ओकारस्य च कण्ठोष्ठस्थानकस्य स्थाने तथाविध औकारः । एवं देवैश्वर्यम् । कृष्णौत्कण्ठ्यमित्यत्रापि । वस्तुतस्तु सङ्ख्यादिशब्दा न गुणवचना इति तत्रैव वक्ष्यामः । **एत्येधत्यूठ्सु** ॥ एतिश्च एधतिश्च ऊठ् चेति विग्रहः एतीति एधतीति च 'इक्श्तिपौ धातुनिर्देशे' इति शितपा निर्देशः । इण् गताविति, एध वृद्धाविति च, धातु विवक्षितौ। एचीत्यनुवर्तते। 'यस्मिन्विधिः' इति तदादिग्रहणम्। एजादाविति लभ्यते तच्च एत्येधत्योरेव विशेषणम्। न तु ऊठः । असम्भवात्। एकः पूर्वपरयोरित्यधिकृतम्। आद्गुण इत्यतः आदिति पञ्चम्यन्तमनुवर्तते । तदाह ।

अवर्णादेजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात्। पररूपगुणापवादः। उपैति। उपैधते। प्रष्ठौहः। 'एजाद्योः' किम्। उपेतः। माभवान्प्रे-

---

अवर्णादित्यादिना। उपैतीति॥ इण् धातोर्लट्। तिप् शप् लुक् 'सार्वधातुक' इति इकारस्य गुणः एकारः। उप एतीति स्थिते अनेन वृद्धिः। **उपैधत इति॥** एधधातोर्लट् आत्मनेपदं तादेशः शप् 'टित आत्मनेपदानाम्' इत्येत्वम्। उप एधते इति स्थिते अनेन वृद्धिः। **प्रष्ठौह इति॥** प्रष्ठं वहतीति प्रष्ठवाट्। 'वहश्च' इति ण्विः। 'वेरपृक्तस्य' इति वलोपः। अत उपधाया इति वृद्धिः। ततश्शसि वसोस्सम्प्रसारणमित्यतस्सम्प्रसारणमित्यनुवृत्तौ 'वाह ऊठ्' इति सम्प्रसारणसंज्ञकस्य ऊठस्सम्प्रसारणाच्चेति पूर्वरूपम्। प्रष्ठ ऊह् इति स्थिते अनेन वृद्धिः औकारः। नन्वत्र एत्येधतिग्रहणं व्यर्थम्। उपैति उपैधत इत्यत्र वृद्धिरेचीत्यनेनैव वृद्धिसम्भवात्। ऊठ् ग्रहणमपि व्यर्थम्। वृद्धिरेचीत्येव सिद्धेः। वाह ऊठ् सूत्रे ऊठ् ग्रहणानर्थक्यम्। सम्प्रसारणेन कृतत्वात्। गुणस्तु प्रत्ययलोपलक्षणत्वात्। एजग्रहणाद्वृद्धिरिति वार्तिककृता तथैवोक्तत्वात्। वाह ऊठ् ग्रहणन्नकर्तव्यम्। वाहः इत्येव सूत्रमस्तु। भस्य वाहस्सम्प्रसारणं स्यादिति सम्प्रसारणमेव विधीयताम्। ततश्च वकारस्य उकारे सम्प्रसारणे पूर्वरूपे सति उह् इति स्थिते प्रत्ययलक्षणमाश्रित्य ण्विप्रत्यये परे उकारस्य लघूपधगुणे ओकारे कृते प्रष्ठ ओह इति स्थिते वृद्धिरेचीति वृद्धिरिति वार्तिकार्थः। तस्मादेत्येधत्यूठ्सु इति सूत्रं व्यर्थमित्यत आह। **पररूपगुणापवाद इति॥** एत्येधत्योरार्ड्धातुकयोरिति पररूपमित्यस्य, ऊठि आद्गुण इत्यस्यायमपवाद इत्यर्थः। यदि हि वाहस्सम्प्रसारणमेव विधीयेत न तु ऊठ्, तर्हि वंस्यं सम्प्रसारणेन उत्वे कृते पूर्वरूपे सति तस्य लघूपधगुणो न भवति। तस्मिन् कर्तव्ये बहिर्भूतशस्प्रत्ययापेक्षभसंज्ञापेक्षसम्प्रसारणाश्रितपूर्वरूपस्य बहिरङ्गतया अत्र असिद्धत्वात्। तथाच गुणाभावे प्रष्ठ उ आह् इति स्थिते पूर्वरूपे प्रष्ठ उह् इति स्थिते आद्गुण इति गुणे ओकारे प्रष्ठोह इति स्यात्। सम्प्रसारणसंज्ञकस्य ऊठो विधौ तु प्रष्ठ ऊ आह् इति स्थिते पूर्वरूपे लघूपधगुणस्याप्रसक्ततया ओकारस्याभावादूकारस्यैव सत्वात् वृद्धिरेचीत्यस्याप्रसक्तेराद्गुण इति प्राप्ते एत्येधत्यूठ्स्विति वृद्धौ प्रष्ठौह इति सिद्ध्यतीत्यूठ्ग्रहणमावश्यकमिति वाह ऊठ् सूत्रे समुदाहृतवार्तिकं भाष्ये दूषितमित्यास्तान्तावत्। **उपेत इति॥** इण्धातोर्लट् तस् शप् लुक् सार्वधातुकमपिदिति तस्य कित्त्वात् तस्मिन् परत इकारस्य न गुणः। अत्र इण् धातोरेजादित्वाभावात्तस्मिन् परतो न वृद्धिः। **माभवान्प्रेदिधदिति॥** एधधातोर्णिच्। लुङ् तिप् 'निल्यं ङितः' इति इकारलोपः। 'णिश्रिद्रुस्रुभ्य' इति चङ्। 'णौ चङ्युपधाया ह्रस्वः'। 'चङि' इत्यजादेर्द्वितीयस्य धिशब्दस्य द्वित्वम्। अभ्यासे चर्चेति जश्त्वम्। न माङ्योग इत्याडभावः। भवच्छब्दयोगात् प्रथमपुरुषः। तच्च तिङन्ताधिकारे स्पष्टीभविष्यति। प्र इदिधदिति स्थिते एत्येधतीति न वृद्धिः। एधधातोरेजादित्वाभावात्। तत्र एजादित्वविशेषणाभावे तु इहापि वृद्धिस्स्यात्। न च णौ चङीत्येकारस्य ह्रस्वेन इकारे सति नायमेधधातुरिति वाच्यम्। एकदेशविकृतस्यानन्यत्वात्। अत्र माङं विहाय प्रेदिधदिति न प्रत्युदाहृतम्। तथा सति आडजादीनामित्याडागमे आटश्चेति वृद्धौ प्र ऐदिधदिति स्यात्। तत्र एधतेरेजादित्वाद्वृद्धिरिष्टैव। भवच्छब्दस्तु चिन्त्यप्रयोजनः। ननु आ इहि आद्गुणः एहि अव एहीति स्थिते एकादेशस्य गुणस्य

दिधत्। पुरस्तादपवादन्यायेनेयं वृद्धिः 'एङि पररूपम्' (सू ७८) इत्यस्यैव बाधिका। न तु 'ओमाङोश्च (सू ८०) इत्यस्य। तेन 'अवैहि' इति वृद्धिरसाधुरेव। 'अक्षादूहिन्यामुपसंख्यानम्' (वा ३६०४)। अक्षौहिणी सेना। 'स्वादीरेरिणोः' (वा ३६०६)। स्वैरः। स्वेनेरितुं शीलमस्येति स्वैरी। स्वै-

---

एकारस्य अन्तादिवच्चेति परादिवद्भावेन, आद्यन्तवदेकस्मिन्निति व्यपदेशिवद्भावेन च, इण् धातोरेजादित्वात्तस्मिन् परे एङि पररूपमिति पररूपं बाधित्वा एत्येधत्यूठ्स्विति वृद्धौ अवैहीति स्यात्। अवेहीति इष्टं न स्यात्। न च ओमाङोश्चेति पररूपेण तन्निर्वाहश्शङ्क्यः। एत्येधतीति वृद्धिर्हि यथा एङि पररूपमित्यस्यापवादः तथा ओमाङित्यस्याप्यपवादः। येन नाप्राप्तिन्यायसाम्यात् इत्यत आह। **पुरस्तादिति॥** पुरस्तादपवादा अनन्तरान्विधीन् बाधन्ते नोत्तरानिति न्यायः। पूर्वपठिता अपवादाः अव्यवहितानेवोत्तरान्विधीन् बाधन्ते न तु व्यवहितानित्यर्थः। प्रकृते च एत्येधत्यूठ्सु इत्युत्तरं कानि चित् सूत्राणि पठित्वा एङि पररूपमिति पठित्वा पुनः कतिपयसूत्राणि पठित्वा ओमाङोश्चेति पठितम्। ततश्च उक्तन्यायेन एत्येधतीति वृद्ध्या एङि पररूपमित्येव बाध्यते। नत्वोमाङोश्चेति पररूपमपीति भावः। वस्तुतस्तु एत्येधतीति वृद्धिः ओमाङोश्चेत्यस्यापवाद एव न भवति। उपैति इत्यादौ अप्राप्तेऽपि तस्मिन् एत्येधतीति वृद्धेरारम्भात्। अतः पुरस्तादपवादा इति न्यायस्य नायं विषयः। ततश्च अव एहीत्यत्र एत्येधतीति बाधित्वा परत्वादोमाङोश्चेति पररूपं न्याय्यमित्येव वक्तुमुचितम्। अतएव भाष्ये "नाप्राप्ते पररूपे एत्येधतीति वृद्धिरारभ्यमाणा भवति तस्यापवादः। एङीति पररूपे तु प्राप्तेचाप्राप्ते च आरभ्यमाणा वृद्धिर्न तदपवादः" इति स्पष्टमेवोक्तम्। यत्तु भाष्ये पक्षान्तरमुक्तम्। "अथवा पुरस्तादपवादा अनन्तरान्विधीन् बाधन्त इत्येवमेत्येधतीति वृद्धिरेङिपररूपमेव बाधते। नत्वोमाङोश्चेति पररूपमपि" इति। तत्तु एत्येधतीतिवृद्धेरेङि पररूपमोमाङोश्चेति सूत्रद्वयापवादत्वाभ्युपगमवादमात्रमाश्रित्य बाध्यसामान्यचिन्तामाश्रित्य वेत्यलं बहुना। **अक्षादूहिन्यामुपसङ्ख्यानम्*॥** आदिति, अचीति, वृद्धिरिति चानुवर्तते। एकः पूर्वपरयोरिति च। ऊह वितर्के। ऊहनमूहः सोऽस्या अस्तीत्यूहिनी। अक्षशब्दादूहिनीशब्दे परे पूर्वपरयोरचोः वृद्धिरेकादेशस्स्यादित्यर्थः। अक्षौहिणीति मत्वर्थीय इनिः। नान्तत्वान्ङीप्। अक्षाणामूहिनीति विग्रहः। परिमाणविशेषविशिष्टा सेना अक्षौहिणी। 'पूर्वपदात् संज्ञायाम्' इति णत्वम्। अक्ष ऊहिनीति स्थिते गुणे प्राप्ते अनेन वार्तिकेन वृद्धिः। **स्वादीरेरिणोः॥** स्वशब्दादीरशब्दे ईरिन्शब्दे च परे पूर्वपरयोरचोर्वृद्धिरेका-

---

* अक्षौहिण्यस्सप्ततिरष्टशतान्येकविंशतिसहस्रम्।
द्विरदास्तथा रथाः तत्त्रिपञ्चगुणकास्तुरङ्गनराः॥

प्रक्रियाकौमुदीकारेण तु अक्षाणामूहः समूहः सोऽस्या अस्तीति विगृह्यतम्। तदपि ऊहिनीशब्देन षष्ठीतत्पुरुषः इत्येवं परतयैव कथञ्चिन्नेयम्। ऊहशब्देन समासे तत इनौ तु वृद्धिर्न स्यात्। अन्तरङ्गेण गुणेन बाधात्। अपवादभूताया अपि वृद्धेः ऊहिनीशब्देन विग्रहे चरितार्थत्वात्। अपवादोऽप्यन्यत्र चरितार्थश्चेत्परान्तरङ्गाभ्यां बाध्यत इति न्यायात्।

रिणी । 'प्रादूहोढोढ्येषैष्येषु' (वा ३६०५) । प्रौहः । प्रौढः । 'अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्' (प १५) । 'ब्रश्च–' (सू २९४) इति सूत्रे राजेः पृथग्भ्राजिग्रहणाज्ज्ञापकात् । तेनोढग्रहणेन क्तान्तमेव गृह्यते । न तु क्तवत्वन्तस्यैकदेशः । प्रोढवान् । प्रौढिः । 'इष् इच्छायां तुदादिः,' 'इष् गतौ दिवादिः,' 'इष् आभीक्ष्ण्ये ऋयादिः,' एषां घञि ण्यति च 'एषः' 'एष्यः' इति रूपे । तत्र पररूपे प्राप्ते अनेन वृद्धिः । प्रैषः । प्रैष्यः । यस्तु ईप् उञ्छे' यश्च 'ईष् गतिहिंसादर्शनेषु' तयोर्दीर्घोपधत्वात् ईषः, ईष्यः । तत्राद्गुणे प्रेषः । प्रेष्यः ।

देशस्स्यादित्यर्थः। **स्वैर इति** ॥ ईर गतौ । भावे घञ् । स्वेन च्छन्देन ईर इति विग्रहः । 'कर्तृकरणे-कृता बहुळम्' इति समासः । स्व ईर इति स्थिते गुणे प्राप्ते अनेन वार्तिकेन वृद्धिः । **स्वेनेरितुमिति** ॥ स्वेन छन्देन ईरितुं सञ्चरितुं शीलमस्येत्यर्थे सुप्यजाताविति णिनिः । स्वच्छन्दचारीत्यर्थः । उपपदसमासः । स्व ईरिन् इति स्थिते गुणे प्राप्ते अनेन वृद्धिः । **प्रादूहोढोढ्येषैष्येषु** ॥ प्र इत्युपसर्गात् ऊह, ऊढ, ऊढि, एष, एष्य, एतेषु परेषु पूर्वपरयोरचोर्वृद्धिरेकादेशस्स्यादित्यर्थः । **प्रौह इति** ॥ ऊह वितर्के । भावे घञ् । गतिसमासः । प्र ऊह इति स्थिते अनेन वार्तिकेन वृद्धिः **प्रौढ इति** ॥ वह प्रापणे क्तः । वचिस्वपीति सम्प्रसारणम् । पूर्वरूपम् । हो ढ इति ढत्वम् । झषस्तथोरिति धत्वम् । ष्टुत्वम् । ढो ढे लोपः । ढ्रलोप इति दीर्घः । प्र ऊढ इति स्थिते गुणे प्राप्ते अनेन वृद्धिः । ननु प्रोढवानित्यत्रापि वहधातोः क्तवतुप्रत्यये ढत्वधत्वष्टुत्वढलोपदीर्घेषु प्र ऊढवदिति स्थिते प्रादूहोढेति वृद्धिस्स्यात् । तत्रापि ऊढशब्दस्य परत्वेन श्रवणादित्यत आह । **अर्थवदिति** ॥ अर्थवतश्शब्दस्य ग्रहणसम्भवे अनर्थकस्य शब्दस्य ग्रहणन्नभवतीत्यर्थः । इयं परिभाषा स्वं रूपमित्यत्र रूपग्रहणात् सिद्धेति तत्रैव सूत्रे भाष्ये स्पष्टम् । **तेनेति** ॥ अर्थवत एव ग्रहणनियमेनेत्यर्थः । **क्तान्तमेवेति** ॥ क्तप्रत्ययस्तावदर्थवान् । भावकर्मणोस्तद्विधानात् । क्तवतुप्रत्ययस्तु कर्तरि विहितः । अतस्तदेकदेशस्य क्तस्यानर्थकत्वात् प्रादूहोढेत्यत्र ऊढग्रहणेन ग्रहणन्न भवति । अतस्तस्मिन् परे वृद्धिर्न भवति । किन्तु गुण एवेत्यर्थः । **प्रौढिरिति** ॥ वह धातोः क्तिन् । ढत्व धत्व ष्टुत्व ढलोप दीर्घाः । प्र ऊढि इति स्थिते । गुणं बाधित्वा अनेन वृद्धिः । इषु इच्छायामित्यादि गणत्रयेऽपि ह्रस्वोपधा एव एते धातवः । तेषामिति निर्धारणे षष्ठी । तेषाम्मध्ये अन्यतमात् घञि ण्यति च सति लघूपधगुणे कृते एष एष्य इति च रूपे सिद्धे । प्र एष प्र एष्य इति स्थिते एङि पररूपं वाधित्वा अनेन वृद्धिः । एतेन वृद्धिरेचीत्यनेन एषैष्यग्रहणयोर्गतार्थत्वं निरस्तम् । नन्वेवं सति प्रेष इति प्रेष्य इति च कथं प्रयोग इत्यत आह । **यस्त्विति** ॥ तयोर्दीर्घोपधत्वेन लघूपधगुणाभावे ईष ईष्य इति च सिध्यति । तयोस्तु एतद्वार्तिके ग्रहणाभावात् । तयोः परतो वृद्ध्यभावे आद्गुण इति गुणे प्रेषः प्रेष्य इत्यपि रूपद्वयमस्तीत्यर्थः । एषशब्दसाहचर्यात् एष्यशब्दोऽपि कृदन्त एव गृह्यते । तेन तिङन्ते ल्यबन्ते च न वृद्धिः । अग्नये प्रेष्य दूतं प्रेष्य गतः । **ऋते च तृतीयासमासे** ॥ तृतीयासमासे अकारात् ऋतशब्दे परे पूर्वपरयोरचोर्वृद्धिः स्यादित्यर्थः । सुखेन ऋत इति

'ऋते च तृतीयासमासे' (वा० ३६०७)। सुखेन ऋतः सुखार्तः। 'तृतीया' इति किम्। परमर्तः। 'प्रवत्सतरकम्बलवसनदशार्णानामृणे' (वा० ३६०८-९)। प्रार्णम्। वत्सतरार्णमित्यादि। ऋणस्यापनयनाय यदन्यदृणं क्रियते तदृणार्णम्। दशार्णो देशः। नदी च दशार्णा। ऋणशब्दो दुर्गभूमौ जले च।

७४। उपसर्गादृति धातौ। (६-१-११)

अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेशः स्यात्। उपार्च्छति। प्रार्च्छति।

७५। अन्तादिवच्च। (६-१-८५)

विग्रहप्रदर्शनम्। ऋ गतौ, गत्यर्थाकर्मकेति कर्तरि क्तः। प्रकृत्यादित्वात् तृतीया। सुप्सुपेति समासः। सुख ऋत इति स्थिते गुणे प्राप्ते अनेन वृद्धिः आकारः। रपरत्वे सुखार्त इति रूपम्। समासग्रहणस्य उदाहृतविग्रहवाक्यमेव प्रत्युदाहरणं दर्शितप्रायमिति तृतीयेत्यंशस्य प्रयोजनं पृच्छति। **तृतीयेति किमिति। परमर्त इति॥** परमश्चासौ ऋतश्चेति कर्मधारयः। आद्गुणः। **प्रवत्सतर॥** पञ्चम्यर्थे षष्ठी। प्र, वत्सतर, कम्बळ, वसन, दश, ऋण, एतेषां ऋणशब्दे परे पूर्वपरयोरचोर्वृद्धिरेकादेशस्स्यादित्यर्थः। **प्रार्णमिति॥** प्रगतमृणमिति विग्रहे, प्रादयो गताद्यर्थे प्रथमयेति गतिसमासः। प्र ऋणं इति स्थिते गुणं बाधित्वा अनेन वार्तिकेन वृद्धिः आकारः। रपरत्वम्। वत्सतरः शिशुवत्सः, तस्य ऋणमिति विग्रहः। वत्सतरमधिकृत्य वा तद्ग्रहणार्थं वा यदृणं गृह्यते तत् वत्सतरार्णम्। एवमग्रेपि द्रष्टव्यम्। आदिशब्देन कम्बळार्णं वसनार्णं दशार्णं ऋणार्णमिति च गृह्यते। सर्वत्र षष्ठीसमासः। ऋणशब्दस्य ऋणशब्दे परे कथमन्वय इत्यत आह। **ऋणस्येति॥** देशनदीविशेषयोः कथं दशार्णशब्दप्रवृत्तिरित्यत आह। **ऋणशब्द इति॥** तथाच दश ऋणानि दुर्गभूमयः यस्मिन् देशे स दशार्णः देशविशेषः। दशविधानि ऋणानि जलानि यस्यां नद्यां सा दशार्णेति विग्रहः। **उपसर्गादृति॥** आद्गुण इत्यतः आदिति पञ्चम्यन्तमनुवर्तते। तच्च उपसर्गविशेषणम्। अतस्तदन्तविधिः अकारान्तादिति लभ्यते। ऋतीति धातोर्विशेषणम्। यस्मिन्विधिरिति तदादिविधिः। ऋकारादाविति लभ्यते। वृद्धिरेचीत्यतो वृद्धिरिति चानुवर्तते। एकः पूर्वपरयोरित्यधिकृतम्। तदाह। **अवर्णान्तादित्यादिना। एकादेश इति॥** पूर्वपरयोरचोरिति शेषः। अन्यथा उपसर्गस्य धातोश्च सर्वादेशस्स्यात्। **उपार्च्छति। प्रार्च्छतीति॥** उप ऋच्छति प्र ऋच्छति इति स्थिते गुणे प्राप्ते अनेन वृद्धिः रपरत्वम्। अथ तस्य रेपस्य पदान्ते विहितं विसर्गमाशङ्क्य तं पदान्तत्वसाधनायाह। **अन्तादिवच्च॥** एकः पूर्वपरयोरिति सूत्रमनुवर्तते। यथासंख्यपरिभाषया आद्यन्तवदित्यस्य क्रमेणान्वयः। ततश्च पूर्वपरयोर्भवन् एकः आदेशः पूर्वस्यान्तवत् परस्यादिवदिति लभ्यते। यद्यपि एकादेशस्य द्वौ वर्णौ स्थानिनौ। पूर्वः परश्च। तयोश्च वर्णयोः प्रत्येकमेकत्वादखण्डत्वात्तदपेक्षया एकादेशस्य अन्तादिवत्त्वकथनमसङ्गतम्। तथापि पूर्वपरवर्णयोर्भवन्नेकादेशः

योऽयमेकादेशः स पूर्वस्यान्तवत्परस्यादिवत्स्यात् । इति रेफस्य पदान्तत्वे ।

७६ । खरवसानयोर्विसर्जनीयः । (८-३-१५)

खरि अवसाने च परे रेफस्य विसर्जनीयः स्यात्पदान्ते । इति विसर्गे प्राप्ते । अन्तवद्भावेन पदान्तरेफस्य न विसर्गः । 'उभयथर्क्षु' (सू ३६३०), 'कर्तरि

प्रथमस्थानिघटितसमुदायस्य पूर्वस्य यः अन्तः प्रथमस्थानी तत्कार्यकारी भवति । द्वितीयस्थानिघटितसमुदायस्य उत्तरस्य य आदिः द्वितीयस्थानी तत्कार्यकारी भवतीत्यर्थो विवक्षितः । तत्र पूर्वान्तवत्त्वे यथा । क्षीरपेण । क्षीरप इन इति स्थिते आद्गुण इत्येकादेश एकारः । तत्र पूर्वान्तवत्त्वेन प इत्युत्तरपदस्य एकाच्त्वादेकाजुत्तरपदे ण इति णत्वं भवति । अत्र एकादेशे स्थानिवत्सूत्रन्तु न प्रवर्तते । एकादेशस्थानीभूतं पकारादकारमालम्ब्य पे इत्यस्य एकाजुत्तरपदत्वाश्रयेण प्रवर्तमानस्य णत्वस्य स्थन्यलाश्रयत्वात् । यद्यपि एकाजुत्तरपदत्वमेव प्राधान्येन णत्वविधिराश्रयति । पकारादकारं स्थान्यलन्तु तद्विशेषणीभूताच्त्वेनाश्रयति । तथाप्यनल्विधाविति निषेधोऽत्र भवत्येव । यथाकथञ्चित् स्थान्यलाश्रयणस्यैव तत्र विवक्षितत्वात् । अन्यथा प्रतिदीव्येत्यत्र क्त्वादेशं ल्यपं स्थानिगतवलाद्यार्द्धधातुकत्वेनाश्रित्य इडागमे कर्तव्ये अनल्विधाविति निषेधानुपपत्तेः । तत्र वलः प्राधान्येनाश्रयणाभावात् । एतेन स्थानिवत्सूत्रेण गतार्थमिदं सूत्रमिति निरस्तम् । परादिवत्त्वे यथा । खट्वा । अत्र खट्वशब्दादजाद्यतष्टाप् । सवर्णदीर्घ आकारः । तस्य परादिवत्त्वेन टाप्त्वात्ततः परस्य सोर्हल्ङ्यादिलोपः। इदमपि स्थानिवद्भावेन अनिर्वाह्यम् । हल्ङ्यादिलोपस्यात्र स्थान्यलाश्रयताया मूलकृतैव वक्ष्यमाणत्वात् । नचैवं सति यजेर्लङि उत्तमपुरुषैकवचने इटि शपि आद्गुणे अडागमे अयज इन्द्रमित्यत्र गुणस्य एकादेशस्य परादिवत्त्वेन इकारत्वात्तत्र इकारे परे सवर्णदीर्घस्यादिति वाच्यम् । इह हि अल्समुदायधर्मा एव प्रातिपदिकत्वसुबन्तत्वप्रत्ययत्वादयः अतिदिश्यन्ते, नतु वर्णमात्रधर्मा अत्वह्रस्वत्वादयः । उक्तञ्च भाष्ये । न वा अताद्रूप्यातिदेशादिति । अन्तादिवर्णमात्रवृत्तिधर्मानतिदेशादयज इन्द्रमित्येवञ्जातीयकेषु सवर्णदीर्घादिकन्नभवतीत्यर्थः । इत्यलमतिविस्तरेण । **इति रेफस्येति** ॥ उपाच्छर्तीत्यत्र आर् इत्येकादेशस्य पूर्वान्तवत्त्वेन रेफस्य पदान्तत्वे सति विसर्गे प्राप्त इत्युत्तरेणान्वयः । कथं विसर्गप्राप्तिरित्यत आह । **खरवसानयोः** ॥ रोरीत्यतः र इति षष्ठ्यन्तमनुवर्तते । तच्च पदस्येत्यधिकृतस्य विशेषणम् । येन विधिरिति रेफान्तस्येति लभ्यते । खरि अवसाने च परतः रेफान्तस्य पदस्य विसर्जनीयस्यादित्यर्थः । अलोन्त्यस्येत्यन्त्यस्य भवति । अभावरूपस्य चावसानस्य बुद्धिकृतं परत्वम् । फलितमाह । **खरि अवसाने चेति । पदान्तइति** ॥ विद्यमानस्येति शेषः । यदि तु अन्त्यवर्णस्य अवसानसंज्ञा तदा अवसान इत्यत्र योजना विरामोऽवसानमित्यत्रोक्ता । **इति विसर्ग इति** ॥ उपाच्छर्तीत्यादौ अनेन विसर्गे प्राप्ते तत्परिहार उच्यत इत्यर्थः । **अन्तवदिति** ॥ अन्तवत्त्वेन पदान्तत्वं प्राप्तस्य रेफस्य विसर्गो न भवतीत्यर्थः । कुत इत्यत आह । **उभयथर्क्षिति** ॥ अन्यथा तत्रापि विसर्गनिर्देशस्स्यादिति भावः । नन्वत्र

चर्षिदेवतयोः' (सू ३१६७) इत्यादिनिर्देशात्। उपसर्गेणैव धातोराक्षेपे सिद्धे 'धातौ' इति योगविभागेन पुनर्वृद्धिविधानार्थम्। तेन 'ऋत्यकः' (सू ९२) इति पाक्षिकोऽपि प्रकृतिभावोऽत्र न भवति।

७७। वा सुप्यापिशलेः। (६-१-९२)

अवर्णान्तादुपसर्गादृकारादौ सुब्धातौ परे वृद्धिरेकादेशो वा स्यात्। आपिशलिग्रहणं पूजार्थम्। प्रार्षभीयति-प्रर्षभीयति। सावर्ण्यात् लवर्णस्य ग्रहणम्। उपाल्कारीयति-उपल्कारीयति। तपरत्वाद्हीर्घे न। उप ऋकारीयति-उपर्कारीयति।

धातावितिं व्यर्थम्। उपसर्गग्रहणादेव धातावित्यस्य सिद्धेः। क्रियायोगे सत्येव उपसर्गसंज्ञाविधानात्। नच उपगत ऋकारः उपर्कारः इत्यत्र क्रियायोगस्य सत्वादुपसर्गत्वाच्च वृद्धिप्राप्तौ तन्निवृत्त्यर्थमिह धातुग्रहणमिति वाच्यम्। यत्क्रियायुक्ताः प्रादयः तं प्रत्येव गत्युपसर्गसंज्ञा इति परिभाषया गम्यमानगमनक्रियां प्रत्येव उपसर्गत्वात्। प्रकृते च ऋकारादिनिमित्तकोपसर्गत्वस्यैव विवक्षितत्वादित्याशंक्याह। **उपसर्गेणैवेत्यादिना** ॥ उपसर्गग्रहणेनैव धातोः आक्षेपे अन्यथानुपपत्तिरूपार्थापत्तितो लाभे सति पुनः धातावितिं वचनं पुनर्विधानार्थमित्यन्वयः। कथं पुनर्विधानलाभ इत्यत आह। **योगविभागेनेति** ॥ योगशब्दस्सूत्रशब्दपर्यायः। उपसर्गादृतीति, धातावितिं च, सूत्रं विभज्यते। तत्र उपसर्गादृतीति पूर्वसूत्रे धातावित्यर्थाल्लभ्यमादाय उक्तार्थलाभः। धातावित्युत्तरसूत्रेऽपि उपसर्गादृतीति पूर्वसूत्रमनुवर्तते। तथाच पूर्वसूत्रसमानार्थकमेतत्सूत्रं सम्पद्यत इति पुनर्विधानलाभ इत्यर्थः। किमर्थमिदं पुनर्विधानमित्यत आह। **तेनेति** ॥ पुनर्विधानेनेत्यर्थः। **नभवतीति** ॥ परोऽपि प्रकृतिभावः पुनर्विधानसामर्थ्यात् बाध्यत इत्यर्थः। **वा सुपि** ॥ उपसर्गादृति धातावितिं पूर्वसूत्रमनुवर्तते। आद्गुण इत्यतः वृद्धिरेचीत्यतश्च आदिति वृद्धिरिति चानुवर्तते। आदित्यनेन उपसर्गादिति विशेष्यत इति तदन्तविधिः। प्रत्ययग्रहणपरिभाषया सुप्शब्देन सुबन्तप्रकृतिको धातुर्विवक्षितः। एकः पूर्वपरयोरिति चाधिकृतम्। तदाह। **अवर्णान्तादित्यादिना। सुब्धाताविति** ॥ सुबन्तप्रकृतिकधातौ परत इत्यर्थः। सुबन्तस्य धातोरसम्भवात्। **एकादेश इति** ॥ पूर्वपरयोरचोरिति शेषः। यद्यपि ऋच्छ गतावित्यादीनां क्विपि धातुत्वं सुबन्तत्वञ्च सम्भवति। तथापि तुल्यास्यसूत्रभाष्ये उपार्कारीयतीत्यादेरेतदुदाहरणत्वेन भाष्ये उक्तत्वात्। सुबन्तप्रकृतिके इत्येव व्याख्यानमुचितम्। ननु वाग्रहणादेव सिद्धे आपिशलिग्रहणं व्यर्थमित्यत आह। **आपिशलिग्रहणमिति** ॥ आपिशलेराचार्यस्याप्ययमर्थः सम्मत इत्यादरलाभार्थमित्यर्थः। **प्रार्षभीयतीति** ॥ ऋषभमात्मन इच्छतीत्यर्थे 'सुप आत्मनः क्यच्' 'सनाद्यन्ता' इति धातुत्वम्। 'सुपो धातुप्रातिपदिकयोः' इति सुपो लुक् 'क्यचि च' इति ईत्वम्, लट्, तिप्, शप्, पररूपम्। प्र ऋषभीयति इति स्थिते अनेन वृद्धिः आकारः रपरत्वम्। **प्रर्षभीयतीति** ॥ वृद्ध्यभावपक्षे आद्गुणः रपरत्वम्। **सावर्ण्यादिति** ॥ ऋ ऌ वर्णयोरिति सावर्ण्यादृतीत्यनेन ऌतोऽपि ग्रहणमित्यर्थः। **उपाल्कारीयतीति** ॥ ऌकारमात्मन इच्छतीत्यर्थे क्यजादि पूर्ववत्। लपरत्वं विशेषः। **उपल्कारीयतीति** ॥

७८ । एङि पररूपम् । (६-१-९४)

अवर्णान्तादुपसर्गादेङादौ धातौ परे पररूपमेकादेशस्स्यात्। प्रेजते। उपोषति। इह 'वा सुपि' इत्यनुवर्त्य वाक्यभेदेन व्याख्येयम्। तेनैङादौ सुब्धातौ वा। उपेडकीयति-उपैडकीयति। प्रोधीयति-प्रौधीयति। 'एवे चानियोगे' (वा ३६३१) नियोगोऽवधारणम्। केव भोक्ष्यसे। अनवक्लृप्तावेवशब्दः। 'अनियोगे किम्। तवैव।

७९ । अचोऽन्त्यादि टि । (१-१-६४)

वृद्ध्यभावपक्षे गुणः लपरत्वम्। **तपरत्वादिति** ॥ ऋतीति तपरकरणेन तत्कालस्यैव ग्रहणात्। दीर्घऋकारे परे वृद्धिविकल्पोऽयन्नभवति। किन्तु गुण एवेत्यर्थः। **ऋकारीयतीति** ॥ ऋकारमात्मन इच्छतीत्यर्थे क्यजादि पूर्ववत्। वृद्ध्यभावादत्र गुण एव। **एङि पररूपम्** ॥ उपसर्गादिति धाताविति चानुवर्तते। आदिरनुवृत्तमुपसर्गादित्यस्य विशेषणमिति तदन्तविधिः। यस्मिन् विधिरिति परिभाषया तदादिग्रहणम्। एकः पूर्वपरयोरिति चाधिकृतम्। तदाह। **अवर्णान्तादित्यादिना। एकादेश इति** ॥ पूर्वपरयोरिति शेषः। **प्रेजत इति** ॥ एजृ दीप्तौ। प्र एजते इति स्थिते वृद्धिरेचीति वृद्धिं बाधित्वा अनेन पररूपम् एकारः। एजृ कम्पन इति तु परस्मैपदी। **उपोषतीति** ॥ उष दाहे, लट्, तिप्, शप्, लघूपधगुणः। उप, ओषतीति स्थिते वृद्धिं बाधित्वा अनेन ओकारः। ननु एडको मेषः, तमात्मन इच्छति एडकीयति, उप एडकीयतीति स्थिते अनेन नित्यमेव पररूपं स्यात्। इष्यते तु वृद्धिरपि उपेडकीयति उपैडकीयतीति। तत्राह। **इहेति** ॥ एङि पररूपमित्यत्र वा सुपीत्यनुवर्तते। तच्च नैकवाक्यतया सम्बध्यते। तथा सति, अवर्णान्तादुपसर्गादेङादौ सुब्धातौ परे पररूपमेकादेशस्स्यादित्येवार्थस्स्यात्। एवं सति प्रेजते उपोषतीत्यत्र नित्यं पररूपं न स्यात्। अतो वाक्यभेदेन व्याख्येयम्। एङि पररूपमिति प्रथमं वाक्यम्। अवर्णान्तादुपसर्गादेङादौ धातौ परे पररूपमेकादेशस्स्यादिति तदर्थः। वा सुपीति द्वितीयं वाक्यम्। तत्र एङि पररूपमित्यनुवर्तते। धातौ उपसर्गादित्यादि च। ततश्च उक्तपररूपविषये सुब्धातौ परे पररूपं वा स्यादिति लभ्यते। तदाह। **तेनेति** ॥ उक्तरीत्या वाक्यभेदाश्रयणेन एङादौ सुब्धातौ पररूपं पाक्षिकं भवति तदितरधातौ तु नित्यमित्यर्थः। **एवे चानियोगे** ॥ नियोगशब्दं व्याचष्टे नियोगोऽवधारणमिति। अवधारणमन्ययोगव्यवच्छेदः। तदन्यस्मिन्नर्थे यः एवशब्दः तस्मिन्नकारात् परे पूर्वपरयोः पररूपमेकादेशस्स्यादित्यर्थः। **केव भोक्ष्यस इति** ॥ अत्रेति न निश्चिनुम इत्यर्थः। क एव इति स्थिते वृद्धिं बाधित्वा अनेन वार्तिकेन पररूपमेकारः। **अनव[illegible]रिति** ॥ अनवधारणमित्यर्थः। **तवैवेति** ॥ नान्यस्येत्यर्थः। अत्र एवशब्दस्य अवधारणार्थत्वात् न तस्मिन् परे पररूपम्। अथ क्वचित् टेः पररूपं विधातुं टिसंज्ञामाह। **अचोऽन्त्यादि टि** ॥ अच इति निर्द्धारणे षष्ठी। जातावेकवचनम्। अन्ते भवः अन्त्यः अचाम्मध्ये अन्त्यः आदिः यस्य तत् अन्त्यादीति विग्रहः।

अचां मध्ये योऽन्त्यः स आदिर्यस्य तदृसंज्ञं स्यात् । 'शकन्ध्वादिषु पररूपं वाच्यम्' (वा ३६३२)। तच्च टेः। शकन्धुः । कर्कन्धुः । कुलटा । 'सीमन्तः केशवेशे' (वा ३६३३) । सीमान्तोऽन्यः । मनीषा । हलीषा । लाङ्गलीषा । पतञ्जलिः । 'सारङ्गः पशुपक्षिणोः' (ग १३६) । साराङ्गोऽन्यः । आकृतिगणोऽयम् । मार्तण्डः । 'ओत्वोष्ठयोः समासे वा' (वा ३६३४) । स्थूलोतुः स्थूलौतुः । बिम्बोष्ठः-बिम्बौष्ठः । 'समासे' किम् । तवौष्ठः ।

फलितमाह । **अचाम्मध्य इत्यादिना । शकन्ध्वादिष्विति ॥** शकन्ध्वादिषु विषये तत्सिद्ध्यर्थं पूर्वपरयोः पररूपं वक्तव्यमित्यर्थः । ततश्च शकादिशब्दानां टेरचि परे टेश्च परस्याचस्स्थाने पररूपमेकादेश इत्यर्थाल्लभ्यते । आदित्यनुवृत्तौ शकन्ध्वादिगणे सीमन्त इत्यादि कतिपयरूपाणामसिद्धेः । तदाह । **तच्च टेरिति ॥** शकन्ध्वादिगणं पठति । **शकन्धुरित्यादिना ॥** शकानान्देशविशेषाणां अन्धुः कूप इति विग्रहः । शक अन्धु इति स्थिते सवर्णदीर्घे प्राप्ते अनेन पररूपम् । अत्र शकशब्दे द्वावचौ । तत्र अन्त्यः अच् ककारादकारः, तदादिः अकार एव। 'आद्यन्तवदेकस्मिन्' इति वचनात्। एवमग्रेऽपि द्रष्टव्यम् । **कर्कन्धुरिति ॥** कर्काणां राज्ञां अन्धुरिति विग्रहः । कर्क अन्धु इति स्थिते पररूपम् । **कुलटेति ॥** अट गतौ । पचाद्यच् । टाप् । कुलानां अटेति विग्रहः । भिक्षार्थं व्यभिचारार्थं वा या गृहानटति सा कुलटा । कुलान्यटतीति विग्रहे तु कमर्ण्यणि टिड्ढाणञिति ङीप् स्यात् । कुल अटेति स्थिते पररूपम् । **सीमन्तः केशवेशे इति ॥** गणान्तर्गतवार्तिकमेतत् । केशानां वेशस्सन्निवेशविशेषः तस्मिन् गम्ये सीमन्शब्दस्य टेरन् इत्यस्य अन्तशब्दस्थावर्णस्य च स्थाने पररूपमित्यर्थः । आदित्यनुवृत्तौ तु इदन्न सिध्येत् । **सीमान्तोऽन्य इति ॥** ग्रामान्तप्रदेश इत्यर्थः । **मनीषेति ॥** मनस ईषेति विग्रहः। अत्र अस् इति टेः ईकारस्य स्थाने पररूपमीकारः । ईष गतौ। 'गुरोश्च हल' इत्यप्रत्ययः। टाप् प्रत्ययः । "बुद्धिर्मनीषेत्यमरः" । **हलीषेति ॥** "ईषा लाङ्गलदण्डस्स्यादित्यमरः" । हलस्य ईषेति विग्रहः । करिकलभ इतिवत् पुनरुक्तिस्समाधेया । अत्र गुणे प्राप्ते पररूपम् । एवं लाङ्गलीषेत्यत्रापि । **पतञ्जलिरिति ॥** पतन् अञ्जलिर्यस्मिन्नमस्कार्यत्वादिति विग्रहः । अत्र अत् इति टेः अकारस्य च स्थाने पररूपमकारः । केचित्तु, गोनर्दाख्यदेशे कस्यचिदृषेस्सन्ध्योपासनसमये अञ्जलेर्निर्गत इत्यैतिह्यात् अञ्जलेः पतान्निति विगृह्णन्ति । मयूरव्यंसकादित्वात् समासः । **सारङ्गः पशुपक्षिणोरिति ॥** इदमपि गणान्तर्गतं वार्तिकम् । भाष्ये तु न दृश्यते । सारशब्द उत्कृष्टे 'सारो बले स्थिरांशे च न्याय्ये क्लीबेऽम्बरे त्रिष्वित्यमरः' । साराणि अङ्गानि यस्येति विग्रहः । सार अङ्ग इति स्थिते सवर्णदीर्घे प्राप्ते अनेन पररूपम् । "चातके हरिणे पुंसि सारङ्गश्शबले त्रिष्वित्यमरः" । **आकृतिगणोऽयमिति ॥** आकृत्या एवञ्जातीयकतया निर्णेतव्योऽयं गण इत्यर्थः । लोकप्रयोगानुसारेण एवञ्जातीयकाश्शब्दाः अस्मिन् गणे निवेशनीया इति यावत् । तत्फलमाह । **मार्तण्ड इति ॥** मृतं अण्डं यस्य सः मृतण्डः कश्चि-

८० । ओमाङोश्च । (६-१-९५)

ओमि आङि च आत्परे पररूपमेकादेशः स्यात्। शिवायों नमः। शिव एहि-शिवेहि

८१ । अव्यक्तानुकरणस्यात इतौ । (६-१-९८)

ध्वनेरनुकरणस्य योऽच्छब्दस्तस्मादितौ परे पररूपमेकादेशः स्यात्। पटत् इति पटिति। 'एकाचो न' (वा ३६३७) श्रदिति।

८२ । नाम्रेडितस्यान्त्यस्य तु वा । (६-१-९९)

दृषिः। मृत अण्ड इति स्थिते सवर्णदीर्घे बाधित्वा अनेन पररूपम्। ततः अपत्ये अणि मार्तण्डः "परामार्ताण्डमास्यत्" इति सवर्णदीर्घस्तु च्छान्दसः। **ओत्वोष्ठ्योः** ॥ अवर्णात् ओतुशब्दे ओष्ठशब्दे च परे पूर्वपरयोरचोः पररूपं वक्तव्यमित्यर्थः। **स्थूलोतुरिति** ॥ "ओतुर्विडालो-मार्जारः इत्यमरः" स्थूल ओतु इति स्थिते वृद्धिं बाधित्वा पाक्षिकं पररूपम्। **बिम्बोष्ठ इति** ॥ बिम्बफलवत् रक्तवर्णौ ओष्ठौ यस्येति विग्रहः। **ओमाङोश्च** ॥ ओं च आङ्चेति विग्रहः। आदिति पररूपमिति चानुवर्तते, एकः पूर्वपरयोरिति च। तदाह। **ओमीत्यादिना। शिवायोन्नम इति** ॥ अत्र वृद्धिं बाधित्वा पररूपम्। **शिवेहीति** ॥ आ इहीति स्थिते गुणे एहीति रूपम्। ततः शिव एहि इति स्थिते वृद्धिं बाधित्वा पररूपमेकारः। नच शिव आ इहीति स्थिते सवर्णदीर्घे कृते पश्चाद्गुणे शिवेहीति रूपसिद्धेराङ्ग्रहणं व्यर्थमिति वाच्यम्। 'धातूपसर्गयोः कार्यमन्तरङ्गम्' इति न्यायेन प्रथमं आद्गुण इति कृते शिव एहीति स्थिते वृद्धौ प्राप्तायां तन्निवृत्यर्थत्वात्। भाष्ये तु, आ ऋश्यात्, गुणः अर्श्यात्, अद्य अर्श्यात् अद्यर्श्यादित्यत्र सवर्णदीर्घनिवृत्यर्थं आङ्ग्रहणमिति स्थितम्। **अव्यक्तानुकरणस्य** ॥ पररूपमित्यनुवर्तते। अव्यक्तः अस्फुटवर्णविभागः वृक्षपतनादिजनितध्वनिः। तस्यानुकरणं तत्प्रतिपादकस्तत्सदृशः अपरिस्फुटवर्णविभागश्शब्दः तस्यावयवः यः अत्शब्दः तस्मात् इतिशब्दे परे अत्शब्दस्य इकारस्य च स्थाने पररूपं स्यादित्यर्थः। अत्र इतिशब्दे यः प्रथम इकारः तस्मिन्परे इति व्याख्येयम्। अन्यथा इतिशब्दस्य कृत्सादेशप्रसङ्गात्। तदाह। **ध्वनेरित्यादिना** ॥ अत्र अलोऽन्त्यस्येति न भवति। 'नानर्थकेऽलोऽन्त्यविधिः' इति निषेधात्। पटत् इतीति प्रक्रियावाक्यप्रदर्शनम्। न तु पररूपाभावपक्षे रूपमिति भ्रमितव्यं। अत्र पररूपस्य नित्यत्वात्। असंहितायां निर्देशो वा। **पटितीति** ॥ उदाहरणमेतत्। वृक्षः पतित इत्याद्यध्याहार्यम्। अत्र अनेकाज्ग्रहणं कर्तव्यमिति वार्तिकमर्थतस्सङ्गृह्णाति। **एकाचो नेति** ॥ एकः अच् यस्य सः एकाच् तथाभूतस्यानुकरणस्य उक्तं पररूपं नेत्यर्थः। **श्रदितीति** ॥ अत्र एकाच्त्वात् न पररूपम्। ननु पटत् पटत् इत्यत्र पटत्पटेति रूपमिष्यते। तत्राव्यक्तानुकरणस्येति पररूपे पटत् पटिति इत्येव स्यात्। तत्राह। **नाम्रेडितस्य** ॥ अव्यक्तानुकरणस्यात इतावितिपररूपमिति एकः पूर्वपरयोरिति चानुवर्तते। आम्रेडितस्य अव्यक्तानुकरणस्य अवयवः यः अत्शब्दः

आम्रेडितस्य प्रागुक्तं न स्यात्। अन्त्यस्य तु तकारमात्रस्य वा स्यात्। 'डाचि बहुलं द्वे भवतः' (वा ४६९७)। इति बहुलग्रहणात् द्वित्वम्।

८३। तस्य परमाम्रेडितम्। (८-१-२

द्विरुक्तस्य परं रूपमाम्रेडितसंज्ञं स्यात्। पटत्पटेति।

८४। झलां जशोऽन्ते। (८-२-३९)

पदान्ते झलां जशः स्युः। पटत्पटदिति।

८५। अकः सवर्णे दीर्घः। (६-१-१०१)

अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यात्। दैत्यारिः। श्रीशः। विष्णूदयः। 'अचि' किम्। कुमारी शेते। 'नाज्झलौ' (सू १३) इति सावर्ण्यनि-

---

तस्य इतिशब्दे परे पररूपं न स्यात्। अन्त्यस्य तु वा। तुरवधारणे। अतशब्दान्त्यस्य तकारस्यैव इकारस्य च पररूपं वा स्यात्। नत्वकारस्यापीत्यर्थः। तदाह। **आम्रेडितस्य प्रागुक्तमित्यादिना** ॥ ननु पटत् पटत् इत्यत्र कथं द्वित्वमित्यत आह। **डाचीति** ॥ 'डाचि बहुळं द्वे भवतः' इति द्वित्वमित्यन्वयः। ननु 'अव्यक्तानुकरणात् द्व्यजवरार्द्धादनितौ डाच्' इति डाचः कथमिह सम्भवः। इति शब्दे परतस्तत्पर्युदासस्स्यादित्यत आह। **बहुळग्रहणादिति** ॥ चेत्यनुक्ता बहुळग्रहणमधिकविधानार्थम्। बहूनर्थान् लाति गृह्णातीति तद्बुत्पत्तेरिति भावः। अभियुक्ताश्चाहुः "क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव। शिष्टप्रयोगाननुसृत्य लोके विज्ञेयमेतत् बहुळग्रहे तु" इति। ननु किमाम्रेडितन्नाम। तत्राह। **तस्यपरमाम्रेडितम्** ॥ सर्वस्य द्वे इत्यनन्तरमिदं सूत्रं पठ्यते। ततश्च तस्येत्यनेन द्विरुक्तस्येति लभ्यते। अवयववाचिपरशब्दयोगे अत एव ज्ञापकात् षष्ठी। तदाह। **द्विरुक्तस्येत्यादिना। पटत्पटेतीति** ॥ पटत् पटत् इति इति स्थिते तकारस्य इकारस्य च पररूपं इकारः। ततश्च आद्गुणः। अथपररूपाभावपक्षे पटत् पटत् इतीत्यत्र तकारस्य दकारं विधत्ते। **झलाञ्जशोऽन्ते** ॥ पदस्येत्यधिकृतम्। तदाह। **पदान्त इति। पटत् पटदितीति** ॥ स्थानसाम्यात् तकारस्य दकारो जशिति भावः। अत्र अतशब्दस्य पररूपनिषेधाभावे तकारमात्रस्य पररूपैकादेशविकल्पविधौ तस्य पररूपाभावपक्षे अतशब्दस्य पूर्वसूत्रेण पररूपापत्तौ पटत्पटितीति स्यादिति ध्येयम्। **अकस्सवर्णे** ॥ अक इति पञ्चमी। इको यणचीत्यतः अचीत्यनुवर्तते। एकः पूर्वपरयोरित्यधिकृतम्। तदाह। **अकस्सवर्णेऽचीत्यादिना। दैत्यारिरिति** ॥ दैत्य अरि इति स्थिते द्वयोरकारयोरेको दीर्घः आकारः, स्थानसाम्यात्। श्री ईश इति स्थिते ईकारयोरेकः ईकारः। विष्णु उदय इति स्थिते उकारयोरूकारः। अलाचीत्यनुवृत्तेः किं प्रयोजनमिति पृच्छति। **अचि किमिति। कुमारी शेत इति** ॥ अचीत्यननुवृत्तौ ईकारस्य शकारस्य च तालुस्थानविवृतप्रयत्नसाम्येन सवर्णतया तयोर्दीर्घः ईकार एकादेशस्स्यात्।

षेधस्तु न दीर्घशकारयोः । ग्रहणकशास्त्रस्य सावर्ण्यविधिनिषेधाभ्यां प्रागनिष्पत्तेः । 'अकः किम् । हरये । 'अकोऽकि दीर्घः' इत्येव सुवचम् । 'ऋति सवर्णे ऋ वा' (वा ३६४०) । होतृकारः-होतृकारः [होतृ ऋकारः-होतृ३कारः] 'ऌति सवर्णे ऌ वा' (वा ३६४१) होत्ऌकारः [—होतृ ऌकारः-होत्ऌ३कारः] पक्षे

तन्निवृत्त्यर्थमचीत्यनुवर्तनीयमिति भावः । ननु ईकारशकारयोः स्थानप्रयत्नसाम्येऽपि न सावर्ण्यम् । नाज्झलाविति निषेधात् । अतः कुमारी शेत इत्यत्र अकस्सवर्ण इत्यस्याप्रसक्तेः अचीत्यनुवृत्तिर्व्यर्थैवेत्यत आह । **नाज्झलाविति** ॥ नाज्झलाविति सावर्ण्यनिषेधो वार्णसमाम्नायिकानामेव । नतु दीर्घप्लुतानामपि । आदिरन्त्येन सहेतेत्यनेन वार्णसमाम्नायिकानामेव अच्शब्दवाच्यत्वावगमात् । अत ईकारशकारयोस्सावर्ण्यसत्वात् कुमारी शेत इत्यत्रातिप्रसङ्गस्यादित्यचीत्यनुवृत्तिरावश्यकीत्यर्थः । ननु वार्णसमाम्नायिकानामेव अच्शब्दवाच्यत्वेऽपि अच् शब्दोपस्थितैः अकारादिभिः ह्रस्वदीर्घप्लुतानामपि ग्रहणं भवति । अणुदित्सूत्रबलात् । अत ईकारशकारयोर्न सावर्ण्यप्रसक्तिरित्यजनुवृत्तिर्व्यर्थैवेत्यत आह । **ग्रहणकेति** ॥ अणुदित्सवर्णस्येति ग्रहणकसूत्रं हि लब्धात्मकमेव सत् 'अस्य च्वौ, इत्यादौ प्रवृत्तिमर्हति । नाज्झलाविति प्रवृत्तिदशायाञ्च ग्रहणकशास्त्रमिदं न लब्धात्मकम् । तद्धि सवर्णपदघटितत्वात् सवर्णपदार्थावगमोत्तरमेव लब्धात्मकम् । सवर्णसंज्ञाविधायकञ्च तुल्यास्यसूत्रं सामान्यतस्स्वार्थं बोधयदपि नाज्झलाविति अपवादविषयं परिहृत्य तदन्यत्रैव पर्यवसानं लब्ध्वा स्वकार्यक्षमतामनुते । उक्तञ्च 'प्रकल्प्यापवादविषयमुत्सर्गोऽभिनिविशत' इति । एवञ्च अणुदित्सूत्रस्य नाज्झलाविति निषेधसंहिननतुल्यास्य सूत्रप्रवृत्तेः प्रागलब्धात्मकतया नाज्झलावित्यत्र अज्ग्रहणेन दीर्घप्लुतानां ग्रहणाभावेन ईकारशकारयोस्सावर्ण्यनिषेधाभावेन सावर्ण्यसत्वात् कुमारी शेत इत्यत्र अकस्सवर्ण इति प्राप्तौ तन्निवृत्त्यर्थमचीत्यनुवृत्तिराश्रयणीयेत्यर्थः । तदेतत् नाज्झलाविति सावर्ण्यनिषेधो यद्यपीति ग्रन्थव्याख्यावसरे प्रपञ्चितम् । **अकोऽकि दीर्घ इत्येव सुवचमिति** ॥ एवञ्च सवर्णग्रहणन्न कर्तव्यमिति लाघवम् । दद्ध्यृकार इत्यत्र तु यथासङ्ख्याश्रयणान्नातिप्रसङ्गः । ततश्च अचीत्यनुवृत्तिरपि नाश्रयणीयेति भावः । ऋति ऋवा इति वार्तिकम् अकस्सवर्ण इत्यतोऽनुवृत्तसवर्णपदेन योजयित्वा पठति । **ऋति सवर्णे ऋवा** ॥ अक इत्यनुवर्तते । एकः पूर्वपरयोरिति च । अकस्सवर्णे ऋति परे पूर्वपरयोः ऋ इत्येकादेशस्स्यादित्यर्थः । **होतृकार इति** ॥ होतृ ऋकार इति स्थिते अनेन द्वयोः ऋकारयोः स्थाने ऋकारविलक्षणो नृसिंहवत् द्वयन्तरात्मा ऋकाररेफद्वयवान् कश्चिद्वर्णो भवति । एतदभावपक्षे रूपं दर्शयति । **होतृकार इति** ॥ अकस्सवर्ण इति दीर्घः । **ऌति सवर्णे ऌवा** ॥ अकस्सवर्णे ऌति परे पूर्वपरयोः ऌ इत्येकादेशो वा स्यादित्यर्थः । **होत्ऌकार इति** ॥ होतृ ऌकार इति स्थिते ऋकारस्य ऌकारस्य च स्थाने नृसिंहवत् द्व्यन्तरात्मा ऌकारः द्विलकारवान् कश्चिद्वर्णो भवति । **पक्ष इति** ॥ उक्तव्यत्यन्तरात्मकवर्णाभावपक्षे ऋकारस्य ऌकारस्य च स्थाने अकस्सवर्ण इति दीर्घो सवन् ऋऌवर्णयोरिति सावर्ण्यादृकार एव भवति । ऌकारस्य दीर्घाभावादिति भावः । अत एव होतृ ऌकार इत्यत्र सवर्णदीर्घपक्षे

ऋकारः सावर्ण्यात् । होतृकारः । 'ऋति ऋ वा' 'ऌति ऌ वा' इत्युभयत्रापि विधेयं वर्णद्वयं द्विमात्रम् । आद्यस्य मद्ध्ये द्वौ रेफौ तयोरेका मात्रा । अभितोऽज्भक्तेरपरा । द्वितीयस्य तु मध्ये द्वौ लकारौ शेषं प्राग्वत् । इहोभयत्रापि 'ऋत्यकः' (सू ९२) इति पाक्षिकः प्रकृतिभावो वक्ष्यते ।

८६ । एङः पदान्तादति । (६-१-१०९)

पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात् । हरेऽव । विष्णोऽव ।

८७ । सर्वत्र विभाषा गोः । (६-१-१२२)

लोके वेदे चैङन्तस्य गोरति वा प्रकृतिभावः स्यात्पदान्ते । गो अग्रम्—गोऽग्रम् । 'एङन्तस्य' किम् । चित्रग्वग्रम् । 'पदान्ते किम् । गोः ।

होतृकार इत्येवोदाहृतं भाष्ये । अथ ऋति ऋवा, ऌति ऌवेत्यत्र विधेयं वर्णरूपं विविनक्ति । **ऋति ऋ वा ऌति ऌवेत्युभयत्रापि विधेयं वर्णद्वयं द्विमात्रमिति ॥** तदेवोपपादयति । **आद्यस्य मद्ध्य इति । एका मात्रेति ॥** व्यञ्जनानामर्द्धमात्रतया एकैकस्य रेफस्य अर्द्धमात्रत्वादिति भावः । **अभितोऽज्भक्तेरिति ॥** अभित इत्यनन्तरं रेफाविति शेषः । अज्भक्तेरिति सामान्याभिप्रायमेकवचनम् । रेफद्वयस्य पुरस्तादुपरिष्टाच्च विद्यमानयोः ह्रस्वऋकारांशयोरन्या मात्रेत्यर्थः । **द्वितीयस्य त्विति ॥** विधेयस्येति शेषः । **शेषं प्राग्वदिति ॥** लकारयोरेका मात्रा तावभितो विद्यमानयोः ऌकारांशयोरन्या मात्रेत्यर्थः । एतच्च तुल्यास्यसूत्रे भाष्यकैयटयोः स्पष्टम् । एतेन दीर्घे प्राप्ते ह्रस्वः ऋकारः ऌकारश्चात्र विधीयत इति प्राचीनग्रन्थः परास्तः । **पाक्षिक इति ॥** वैकल्पिक इत्यर्थः । **प्रकृतिभाव इति ॥** निर्विकारस्वरूपेणावस्थानमित्यर्थः । सन्ध्यभाव इति यावत् । **एङः पदान्तादति ॥** अमि पूर्व इत्यतः पूर्व इत्यनुवर्तते एकः पूर्वपरयोरित्यधिकृतम् । तदाह । **पदान्तादित्यादिना ॥** हरे अव इति स्थिते अयादेशं बाधित्वा पूर्वरूपमेकारः । विष्णो अवेत्यत्र अवादेशं बाधित्वा पूर्वरूपमोकारः । **सर्वत्रविभाषा ॥** पदान्तादित्यनुवर्तते । प्रकृत्यान्तःपादमित्यतः प्रकृत्येत्यनुवर्तते । प्रकृत्या स्वभावेन निर्विकारस्वरूपेण अवतिष्ठत इत्यर्थः । यजुष्युर इत्यतो यजुषीति निवृत्तम् । तत्सूचनाय सर्वत्रेत्युपात्तम् । तेन लोके वेदेचेति लभ्यते । तदाह । **लोक इत्यादिना । प्रकृतिभाव इति ॥** स्वभावेनावस्थानमित्यर्थः । एवञ्च पूर्वरूपमवादेशश्च न । गो अग्रमिति प्रकृतिभावे रूपम् । पूर्वरूपे गोऽग्रमिति । अत्र एङ इत्यप्यनुवर्तते । ततश्च एकदेशविकृतमनन्यवद्भवतीति न्यायेन चित्रग्वग्रमित्यत्र नातिप्रसङ्गः । हे चित्रगोऽग्रमित्यत्रापि न प्रकृतिभावः । प्रतिपदोक्तस्यैव एङो ग्रहणात् । प्रकृते च ह्रस्वस्य गुण इत्योकारस्य लाक्षणिकत्वात् । **गोरिति ॥** गो अस् इति स्थिते गो इत्योकारस्य पदान्तत्वाभावान्न प्रकृतिभावः । नचैवमपदान्तत्वादेङः पदान्तादिति पूर्वरूपमपि दुर्लभमिति वाच्यम् । अङ

८८ । अवङ् स्फोटायनस्य । (६-१-१२३)

'अति' इति निवृत्तम् । अचि परे पदान्ते गोरवङ् वा स्यात् । गवाग्रम् । 'पदान्ते' किम् । गवि । व्यवस्थितविभाषया गवाक्षः ।

८९ । इन्द्रे च । (६-१-१२४)

गोरवङ् स्यादिन्द्रे गवेन्द्रः ।

अथ प्रकृतिभावः ।

९० । प्लुतप्रगृह्या अचि नित्यम् । (६-१-१२५)

प्लुताः प्रगृह्याश्च वक्ष्यन्ते, तेऽचि परे नित्यं प्रकृत्या स्युः । एहि कृष्ण३

एव ङसिङसोश्चेति तत्र पूर्वरूपारम्भात् । **अवङ् स्फोटायनस्य । अतीति निवृत्तमिति** ॥ एङः पदान्तादित्यत इति शेषः । व्याख्यानादिति भावः । पदान्तादिति गोरिति अचीति चानुवर्तते । स्फोटायनस्य ऋषेः मते अवङ् । अन्यस्य तु न । ततश्च विकल्पसिद्धः । तदाह । **अचि पर इत्यादिना** ॥ ङिच्चेत्यन्तादेशः । **गवाग्रमिति** ॥ गो अग्रमिति स्थिते गकारादोकारस्यावङ् । गव अग्र इति स्थिते सवर्णदीर्घः । न च अग्रशब्दे अकारमचं परत्वेनाश्रित्य प्रवृत्तः अवङ् कथन्तद्विघातकं सवर्णदीर्घं प्रवर्तयति । सन्निपातपरिभाषाविरोधादिति वाच्यम् । सन्निपातपरिभाषाया अनित्यत्वस्य रामायेत्यत्र वक्ष्यमाणत्वात् । **गवीति** ॥ गो इ इति स्थिते ओकारस्य पदान्तत्वविरहान्नावङ् । नापि पूर्वसूत्रात् प्रकृतिभावपररूपे । किन्तु यणादेशः । अतीत्यनुवृत्तौ तु गवेश इत्यादि न सिध्येत् । **व्यवस्थितेति** ॥ क्वचित् भवतीत्यंश एव प्रवर्तते, क्वचित्तु न भवतीत्यंश एव, क्वचिदुभयमित्येवं लक्ष्यानुसारेण व्यवस्थया प्रवृत्ता विभाषा व्यवस्थितविभाषा सर्वत्र विभाषा गोरित्यत्राश्रीयते । ततश्च गवाक्ष इत्यत्र नित्यमवङ् इत्यर्थः । इदञ्च "देवव्रातो गळो ग्राह इति योगे च सद्विधिः । मिथस्तेन विभाष्यन्ते गवाक्षस्संशितव्रतः" इति शाच्छोरिति सूत्रे भाष्ये स्पष्टम् । **गवाक्ष इति** ॥ गवां किरणानामक्षीवेति विग्रहः । अक्ष्णोऽदर्शनादित्यच् । पुंस्त्वं लोकात् । "वातायनं गवाक्षस्स्यादित्यमरः" । **इन्द्रे च** ॥ गोः अवङ् अचीत्यनुवर्तते । तदाह । **गोरिति** ॥ विकल्पनिवृत्त्यर्थः पुनरारम्भः । **गवेन्द्र इति** ॥ गो इन्द इति स्थिते अवङ् आद्गुणः । **अथ प्रकृतिभाव इति** ॥ निरूप्यत इति शेषः । **प्लुतप्रगृह्या । वक्ष्यन्त इति** ॥ दूराद्धूते चेत्यादिना ईदूदेदित्यादिना चेत्यर्थः । **प्रकृत्येति** ॥ प्रकृत्यान्तःपादमित्यतस्तदनुवृत्तेरिति भावः । प्रकृत्या स्वभावेनावस्थितास्स्युरित्यर्थः । **सन्धयो न भवन्तीति** यावत् । **एहि कृष्ण३ अत्रेति** ॥ दूराद्धूतेचेति णकारादकारः प्लुतः । तस्य अकारे न सवर्णदीर्घः । **हरी एताविति** । ईदूदेदिति रेफादीकारः प्रगृह्यः तस्य यणादेशो न

अत्र गौश्चरति। हरी एतौ। 'नित्यम्' इति किम्। 'हरी एतौ' इत्यादावयमेव प्रकृतिभावो यथा स्यात्, 'इकोऽसवर्णे–' (सू ९१) इति ह्रस्वसमुच्चितो मा भूत्।

९१। इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च। (६-१-१२७)

पदान्ता इकोऽसवर्णेऽचि परे प्रकृत्या स्युर्ह्रस्वश्च वा। अत्र 'ह्रस्वविधिसामर्थ्यादेव प्रकृतिभावे सिद्धे तदनुकर्षणार्थश्चकारो न कर्तव्यः' इति भाष्ये

भवति। ननु सर्वत्र विभाषेति पूर्वसूत्रे विभाषेत्यस्य अस्वरितत्वादेव निवृत्तिसिद्धेरिह नित्यग्रहणं किमर्थमिति पृच्छति। **नित्यमिति किमिति** ॥ उत्तरमाह। **हरी एताविति** ॥ नित्यग्रहणे सत्येव हरी एतावित्यादौ प्लुतप्रगृह्या अचीत्ययमेव केवलः प्रकृतिभावस्स्यादित्यर्थः। यथाशब्दो योग्यतायाम्। अयमेव प्रकृतिभावः प्राप्तुं योग्यः। स च नित्यग्रहणे सति प्राप्नुयादित्यर्थः। एवमग्रेऽप्येवञ्जातीयकेषु एवशब्दव्यवच्छेद्यं दर्शयति। **इक इति** ॥ 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' इति वक्ष्यमाणः ह्रस्वसमुच्चितः प्रकृतिभावः माभूत्। न भवेत् माङि लुङ् सर्वलकारापवादः। अकृते सति नित्यग्रहणे परत्वात् शाकलह्रस्वसहितप्रकृतिभावः प्रसज्येत। नित्यग्रहणे कृते तु तत्सामर्थ्यादेव परमपि शाकलं ह्रस्वसमुच्चितप्रकृतिभावं प्लुतप्रगृह्या इति केवलः प्रकृतिभावो बाधत इत्यर्थः। **इकोऽसवर्णे** ॥ इक इति षष्ठी। एङः पदान्तादित्यतः पदान्तादित्यनुवर्तते। तच्च षष्ठ्यन्ततया विपरिणम्यते। अचीति चावर्तते। ततश्च पदान्तस्येकः असवर्णेऽचि परे ह्रस्वस्स्यादित्येकं वाक्यम्। चकारात् प्रकृत्यान्तःपादं इत्यतः प्रकृत्येत्यनुकृष्यते। ह्रस्व इति तत्रापि सम्बध्यते। ततश्च उक्तो ह्रस्वः प्रकृत्या स्वभावेन अवतिष्ठत इति वाक्यान्तरं सम्पद्यते। फलितमाह। **पदान्ता इक इत्यादिना** ॥ यदि चकारो न क्रियेत, तर्हि पदान्तस्य इकः असवर्णेऽचि ह्रस्वस्स्यादित्येव लभ्येत। तस्य ह्रस्वस्य प्रकृतिभावो न लभ्येत। ततश्च चक्रि अत्रेति स्थिते ईकारस्य ह्रस्वे सति तस्य यणादेशे चक्रयत्रेत्येव स्यात्। चक्रि अत्रेति ह्रस्वसमुच्चितप्रकृतिभावविशिष्टं रूपं न स्यात्। इष्यते तदपि। अतः प्रकृत्येत्यनुकरणार्थश्चकार आवश्यकः इति सूत्रकारस्य हृदयम्। भाष्यकारमतमाह। **अत्र ह्रस्वेति** ॥ अत्र चकारो न कर्तव्यः। प्रकृत्येत्यनुकर्षस्य व्यर्थत्वात्। नच विहितस्य ह्रस्वस्य यण्निवृत्त्यर्थस्स इति वाच्यम्। ह्रस्वविधिसामर्थ्यादेव यणो निवृत्तिसिद्धेः। अन्यथा यणमेव विदध्यात्। अतः प्रकृत्येत्यनुकर्षणार्थश्चकारो न कर्तव्य इति भाष्ये स्थितमित्यर्थः। चक्रि अत्रेति ह्रस्वसमुच्चितप्रकृतिभावपक्षे रूपम्। तदभावपक्षे तु यणि चक्रयत्रेति रूपम्। नचात्र ककारस्य स्कोस्संयोगाद्योरिति लोपश्शङ्क्यः। अचः परस्मिन्निति यणस्स्थानिवत्त्वेन अच्त्वेन पदान्तसंयोगाभावात्। नच पूर्वत्रासिद्धे न स्थानिवदिति तन्निषेधश्शङ्क्यः। तस्य दोषस्संयोगादिलोपलत्वणत्वेष्विति वचनात्। **न समासे** ॥ वार्तिकमेतत्। समासे उक्तशाकलविधिर्नभवतीत्यर्थः। **वाप्यश्व इति** ॥

स्थितम्। चक्रि अत्र—चक्रत्र। 'पदान्ताः' इति किम्। गौर्यौ। 'न समासे' (वा ३६८४)। वाप्यश्वः। 'सिति च' (वा ३६८४)। पार्श्वम्।

९२। ऋत्यकः। (६-१-१२८)

ऋति परेऽकः प्राग्वत्। ब्रह्मऋषिः—ब्रह्मर्षिः। 'पदान्ताः' इत्येव। आर्च्छत्। समासेऽप्ययं प्रकृतिभावः। सप्त ऋषीणाम्—सप्तर्षीणाम्।

९३। वाक्यस्य टेः प्लुत उदात्तः। (८-२-८२)

वाप्यामश्व इति विग्रहः। शौण्डादेराकृतिगणत्वात् सुप्सुपेति समासः। **सिति च** ॥ सकारः इत् यस्य सः सित् तस्मिन् परे उक्तश्शाकलविधिर्नभवतीत्यर्थः। **पार्श्वमिति** ॥ पर्शु× पार्श्वास्थि। पर्शूनां समूहः पार्श्वं 'पर्श्वा णस् वक्तव्यः' इति णस्। आदिवृद्धिः। यणादेशः। अत्र पर्शु अ इति स्थिते उक्तश्शाकलो विधिर्नभवति। ओर्गुणस्तु न। भस्यैव तद्विधानात्। सिति चेति पदत्वेन भत्वबाधात् अचो ञ्णितीति वृद्धिरपि न भवति। आदिवृद्ध्या तद्बाधात्। तथाच मूलकारो वक्ष्यति। 'आदिवृद्धिरन्तोपधावृद्धी बाधते' इति। अत्र 'सिन्नित्यसमासयोश्शाकलप्रतिषेधः' इति वार्तिकम्। तदिह द्विधा विभज्य व्याख्यातम्। नचैवं सति वाप्यश्व इत्यत्र कथं शाकलप्रतिषेधः। तत्र समासस्य वैकल्पिकत्वादिति वाच्यम्। भाष्ये नित्यग्रहणस्य प्रत्याख्यातत्वात्। **ऋत्यकः** ॥ अक इति षष्ठी। शाकल्यस्य ह्रस्वश्चेत्यनुवर्तते। असवर्ण इति निवृत्तम्। अचीत्यनुवर्तते। एङः पदान्तादित्यतः पदान्तादित्यनुवर्तते। तच्च षष्ठ्यन्ततया विपरिणम्यते। ततः पदान्तस्य अकः ऋति ह्रस्वो वा स्यादित्येकं वाक्यं सम्पद्यते। चकारात् प्रकृत्येत्यनुकृष्यते। उक्तो ह्रस्वः प्रकृत्या अवतिष्ठत इति द्वितीयं वाक्यं सम्पद्यते। तदाह। **ऋति परे अकः प्राग्वदिति। ब्रह्म ऋषिरिति** ॥ ब्रह्मा ऋषिरिति स्थिते आकारस्य ह्रस्वः प्रकृतिभावश्च। ततश्च आद्गुण इति रपरः अकारो न भवति। अत्र आकारस्य इक्त्वाभावादिकोऽसवर्णे इत्यप्राप्ते इदं वचनम्। **ब्रह्मर्षिरिति** ॥ उक्तह्रस्वसमुच्चितप्रकृतिभावाभावपक्षे आद्गुण इति अकारः। रपरत्वम्। 'ऋत्यस्य' इत्येव तु न सूत्रितम्। होतृ ऋकार इत्यत्र प्रकृतिभावार्थमग्रहणस्यावश्यकत्वात्। **पदान्ता इत्येवेति** ॥ पदान्तग्रहणमत्राप्यनुवर्तनीयमेवेत्यर्थः। **आर्च्छदिति** ॥ ऋ गतौ। लङ् तिप् शप् पाघ्राध्मेति ऋच्छादेशः, इतश्चेति इकारलोपः, आडजादीनामित्याडागमः, आटश्चेति वृद्धिः, आ ऋच्छदिति स्थिते आकारस्य अकः पदान्तत्वाभावान्नोक्तः प्रकृतिभावः। न समास इति पूर्वसूत्रस्थं निषेधवार्तिकमिह न सम्बध्यत इत्यत आह। **समासेऽपीति। सप्त ऋषीणामिति** ॥ दिक्संख्ये संज्ञायामिति समासः। सप्त ऋषीणामिति प्रकृतिभावपक्षे रूपम्। तदभावपक्षे तु आद्गुण इति गुणे रपरत्वे सप्तर्षीणामिति भवति। अथ प्लुतप्रगृह्या इति सूत्राकांक्षितप्लुतप्रगृह्ययोर्मध्ये प्रथमोपात्तप्लुतप्रकरणमारभते। **वाक्यस्य टेः** ॥ पदस्येत्यधिकृतम्।

इत्यधिकृत्य ।

९४ । प्रत्यभिवादेऽशूद्रे । (८-२-८३)

वाक्यस्य टेः पदावयवस्य प्लुतो भवति, स च उदात्तो भवतीत्यर्थः । अत्र पदस्येत्यनुवृत्तिर्नेच्छव्यप्रशानित्यादुत्तरार्था । इहानुवृत्तिविच्छेदे उत्तरत्रानुवृत्तेरसम्भवात् वाक्यस्येत्यभावे पदस्य टेरित्युक्ते यावन्ति वाक्ये पदानि तावतां टेः प्लुतः प्रसज्येत । वाक्यस्येत्युक्ते तु वाक्यस्य टेरन्त्यस्यैव पदस्य सम्भवतीति न दोषः । टिग्रहणाभावे प्लुतश्रुत्या अचश्चेति परिभाषया अच इत्युपस्थितौ तस्य वाक्यविशेषणत्वात् तदन्तविधौ अजन्तस्य वाक्यस्येत्यर्थे सति अलोऽन्त्यपरिभाषया वाक्यान्तस्याचः प्लुत इति पर्यवसानात् ग्रामं गच्छाग्निचित्, इत्यादिहलन्तवाक्येषु प्लुतो न स्यात् । टि ग्रहणे तु तत्सामर्थ्यादेव टिना अचो विशेषणात् टेरवयवस्याचः प्लुत इत्यर्थो लभ्यत इति न दोष इति भाष्ये स्पष्टम् । **इत्यधिकृत्येति** ॥ प्लुतविधय आरभ्यन्त इति शेषः । **प्रत्यभिवादेऽशूद्रे** ॥ वाक्यस्य टेः प्लुत उदात्त इत्यधिकृतम् । अशूद्र इति च्छेदः । न शूद्रः अशूद्रः द्विजातिः तद्विषयः प्रत्यभिवादः विधिवत् अभिवादयमानं प्रति विधिवदाशीर्वचनम् । भावे घञ् । अस्मिन् प्रत्यभिवादे विषये यद्वाक्यं तस्य टेः प्लुतस्स्यात् । स चोदात्त इत्यर्थः । अभिवादविधिमाह । आपस्तम्बः । 'दक्षिणबाहुं श्रोत्रसमं प्रसार्य ब्राह्मणोऽभिवादयीत । उरस्समं राजन्यः, मध्यसमं वैश्यः, नीचैरशूद्रः, प्राञ्जलिः' इति । 'तिष्ठन् प्रातरभिवादमभिवादयीतासावहं भोः' इति च । असाविति स्वनामनिर्देशोऽभिमतः । देवदत्तोऽहं भोः इति ब्रुवन् अभिवादं आशीर्वचनं अभिवादयीत वक्तव्यत्वेन विज्ञापयेत् । ततश्च यथावर्णं दक्षिणं बाहुं प्रसार्य अभिवादये देवदत्तोऽहं भोः इति ब्रूयादित्यर्थः । अयमभिवादनप्रकारः । प्रत्यभिवादनप्रकारस्तु मनुना दर्शितः । "आयुष्मान् भव सौम्येति विप्रो वाच्योऽभिवादने । अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरः प्लुतः" इति । अत्र नाम्नोऽन्ते इतिवचनात् आयुष्मान् भव सौम्येत्यनन्तरमभिवादयमानस्य नाम सम्बुद्ध्यन्तं प्रयोक्तव्यमिति स्मृत्यन्तरसिद्धमनुगृहीतं भवति । अस्य नाम्नः अन्ते अकारश्च वाच्यः प्रयोज्यः । तस्मादकारात् पूर्वाक्षरः पूर्वः अच् प्लुतः प्रयोक्तव्य इत्यर्थः । एवञ्च आयुष्वान् भव सौम्य देवदत्त३ अ इति प्रत्यभिवादवाक्यं सम्पन्नमिति स्थितिः । अभिवादये देवदत्तोहमिति अभिवादवाक्यप्रदर्शनं भोः इत्यस्याप्युपलक्षणम् । आयुष्मान् भव देवदत्त ३ इति प्रत्यभिवादनवाक्यप्रदर्शनम् । अभिवादये इत्यस्य अभिवादनमाशीर्वचनं इति विज्ञापयामीत्यर्थः । भवेत्यनन्तरं सौम्यशब्दस्य देवदत्त इत्यनन्तरमकारस्याप्युपलक्षणम् । अत्र देवदत्तशब्दे तकारादकारस्य प्लुतः । आयुष्मत्त्वस्य विधेयत्वात् सम्बोधनविभक्त्यभावः । अत्र प्रत्यभिवादवाक्ये शर्मान्तं ब्राह्मणस्येत्यादि न भवति । एचोऽप्रगृह्यस्येति सूत्रे शर्मादिशब्दं विना केवलस्य नाम्नो भाष्ये उदाहरणात् उक्तमन्वादिस्मृतिविरोधाच्च । अशूद्र इति किम् । 'कुशल्यसि तुषजक' इति भाष्यम् । एवञ्च शूद्रविषये आयुष्मान् भवेति न प्रयोक्तव्यमिति गम्यते । 'अशूद्रस्त्रयसूयकेष्विति वक्तव्यम्' इति वार्तिकम् । शूद्रविषय एव प्लुतप्रतिषेधो न भवति । किन्तु शूद्रवत् स्त्रीविषये असूयकविषयेऽपि

अशूद्रविषये प्रत्यभिवादे यद्वाक्यं तस्य टेः प्लुतः स्यात् । स चोदात्तः । अभिवादये देवदत्तोऽहम् । आयुष्मान् भव देवदत्त ३ । 'स्त्रियां न' (वा ४८६४) । अभिवादये गार्ग्यहं । आयुष्मती भव गार्गि । नाम गोत्रं वा यत्र प्रत्यभिवादवाक्यान्ते प्रयुज्यते तत्रैव प्लुत इष्यते । नेह । आयुष्मानेधि । 'भोराजन्यविशां वेति वाच्यम्' (वा ४८६५) । आयुष्मानेधि भो ३: । आयुष्मानेधीन्द्रवर्म ३ न् । आयुष्मानेधीन्द्रपालित ३ ।

९५ । दूराद्धूते च । (८-२-८४)

दूरात्सम्बोधने यद्वाक्यं तस्य टेः प्लुतः स्यात् । सक्तून्पिब देवदत्त ३ ।

प्लुतप्रतिषेधो भवतीति वक्तव्यमित्यर्थः । ततश्शूद्रविषये उदाहृतम् । स्त्रीविषये वार्तिकं विभज्यार्थतस्सङ्गृह्णाति । **स्त्रियान्नेति** ॥ स्त्रीविषयकप्रत्यभिवादवाक्ये उक्तो विधिर्नभवतीत्यर्थः । अभिवादये गार्ग्यहमिति अभिवादनवाक्यप्रदर्शनम् । आयुष्मती भव गार्गीति प्रत्याभिवादवाक्यं, अत्र न प्लुतः । असूयके तु उदाहरणं भाष्ये स्फुटम् । यद्यपि गार्गीति नाम न भवति । किन्तु गोत्रमेव । तथापि भाष्ये गार्गीशब्दोदाहरणादेव अभिवादप्रत्यभिवादवाक्ययोर्नाम्नो गोत्रस्य च विकल्पः । तदाह । **नाम गोत्रं वेति** ॥ अत्र नामशब्देन द्व्यादेशेऽहनि पिता नाम कुर्यादिति विहितं नामैव गृह्यते । अत एव आयुष्मान् भव दाण्डिन्नित्यादौ प्लुतो नेति भाष्ये स्पष्टम् । नाम गोत्रं वेति परिगणनस्य प्रयोजनमाह । **नेहेति । आयुष्मानेधीति** ॥ अस्तेस्सिप् हिः ध्वसोरित्येत्वं हेर्द्धिः । श्नसोरल्लोपः । अत्र धकारादिकारस्य न प्लुतः । अनामत्वादगोत्रत्वाच्च । **भोराजन्यविशाम्** ॥ भोस् शब्दस्य राजन्यवैश्यवाचकनाम्नोश्च टेः प्लुतो वा स्यादिति वक्तव्यमित्यर्थः । भोस् शब्दस्य अप्राप्ते इतरयोस्तु नामत्वात् प्राप्ते विभाषेयम् । तत्र भोस् शब्दे यथा । 'आयुष्मानेधि भोः । आयुष्मानेधि देवदत्त भोः' इति भाष्यम् । अतएव प्रत्यभिवादवाक्यान्ते नाम्नोऽनन्तरं भोशब्दस्य भवशब्देन एधिशब्दस्य च प्रयोगविकल्पो गम्यते । राजन्ये यथा । आयुष्मानेधि इन्द्रवर्म ३ न्, इन्द्रवर्मन् । वैश्ये यथा । आयुष्मानेधि इन्द्रपालित ३ । इन्द्रपालित इति भाष्यम् । अतएव भाष्यात् प्रत्यभिवादवाक्ये शर्मान्तं ब्राह्मणस्य वर्मान्तं क्षत्रियस्य पालितान्तं वैश्यस्येति विधयोऽपि प्रवर्तन्त इति गम्यते । उक्तभाष्यमन्वादिस्मृतिविरोधाद्विकल्पः । अत्र भाष्ये अपर आहेत्युक्त्वा प्रत्यभिवादे सर्वस्यैव नाम्नो भोशब्द आदेशो वक्तव्य इति पठित्वा आयुष्मानेधि भोः इत्येतावदेव सर्वत्र प्रत्यभिवादवाक्यमित्युक्तम् । **दूराद्धूते च** ॥ यत्र प्रदेशे स्थितस्य प्रयत्नोच्चारितं शब्दं बोध्यमानो न शृणोति किं त्वधिकं प्रयत्नमपेक्षते तद्दूरं, हूतमाह्वानं भावे क्तः । सम्बोधनमिह विवक्षितं । वाक्यस्य टेः प्लुतः उदात्त इत्याधिक्यम् । तदाह । **दूरात्सम्बोधन इत्यादिना** ॥ यदि तु आह्वानमेवात्र विवक्षितं स्यात् तर्हि एहि देवदत्तेत्यादौ आह्वानवाचकपदे सत्येव स्यात् । सम्बोधन-

९६। है हे प्रयोगे हैहयोः। (८-२-८५)

एतयोः प्रयोगे दूराद्भूते यद्वाक्यं तत्र हैहयोरेव प्लुतः स्यात्। है ३ राम। राम हे ३।

९७। गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्। (८-२-८६)

दूराद्भूते यद्वाक्यं तस्य ऋद्भिन्नस्यानन्त्यस्यापि गुरोर्वा प्लुतः स्यात्। दे ३ वदत्त। देवद ३ त्त। देवदत्त ३। 'गुरोः' किम्। वकारात्परस्याकारस्य मा भूत्। 'अनृतः' किम्। कृष्ण ३। एकैकग्रहणं पर्यायार्थम्। इह 'प्राचाम्' इति योगो विभज्यते। तेन सर्वः प्लुतो विकल्प्यते।

९८। अप्लुतवदुपस्थिते। (६-१-१२९)

उपस्थितोऽनार्ष इतिशब्दः, तस्मिन्परे प्लुतोऽप्लुतवद्भवति। प्लुतकार्यं प्रकृतिभावं न करोति। सुश्लोक ३ इति—सुश्लोकेति। 'वत्' किम्। अप्लुत

परत्वे तु तदन्यत्रापि भवतीत्यभिप्रेत्योदाहरति। **सक्तूनिति** ॥ **हैहेप्रयोगे** ॥ है हे इत्यव्ययेसम्बोधनद्योतके। तयोः प्रयोगे हैहयोः प्लुतस्स्यादित्यर्थः। पूर्वसूत्रेण गुरोरनृत इत्यनेन च सिद्धे किमर्थमिदमित्याशङ्क्य नियमार्थ इति व्याचष्टे। **एतयोरेवेति** ॥ हैहयोरेवेति नियमार्थमिति भावः। पाहि है ३ राम, पाहि हे ३ रामेत्यत्र हैहयोरेव प्लुतः, न तु गुरोरनृत इत्यन्यस्यापीत्येतत् हैहयोरित्यनेन लभ्यत इति यावत्। तर्हि वाक्यस्य टेरित्यधिकारात् राम है ३ राम हे ३ इत्यत्रैव स्यात्। अतः प्रयोगग्रहणम्। ततश्च अनन्त्ययोरपि तयोरप्लुतो भवति। **गुरोरनृतोऽनन्त्यस्य** ॥ दूराद्भूतेचेत्यनुवर्तते। वाक्यस्य टेः प्लुत उदात्त इत्यधिकृतम्। दूरात् सम्बोधने यद्वाक्यं तत्र सम्बोध्यमानवाचकं यत् पदं तदवयवस्य ऋकारभिन्नस्य अनन्त्यस्य गुरोः प्लुतस्स्यात्। अन्त्यस्य तु टेरपि गुरोरगुरोश्च स्यादित्यर्थः। तदाह। **दूरादित्यादिना** ॥ देव ३ दत्तेत्यादिषु सर्वत्र एहीति शब्दः प्रागध्याहर्तव्यः। अन्यथा एकतिङ् वाक्यमिति वाक्यत्वानुपपत्तेः। **पर्यायार्थमिति** ॥ अन्यथा सर्वेषां गुरूणां युगपत् प्लुतस्स्यादिति भावः। **इह प्राचामिति** ॥ गुरोरनृतोऽनन्त्यस्याप्येकैकस्येत्येकं, प्राचामित्यन्यत्। तत्र प्लुत इत्येव अनुवर्तते। प्राचाम्मते प्लुतस्स्यात् नान्यमते इति फलति। ततः किमित्यत आह। **तेनेति** ॥ एवञ्च सर्वः प्लुतस्साहसमनिच्छता विभाषा वक्तव्य इति वार्तिकं न कर्तव्यमिति भावः। प्लुतशास्त्रत्यागात्मकं साहसमनिच्छतेत्यर्थः। प्लुतशास्त्रेषु श्रद्धाजाड्यं विहायेति यावत्। **अप्लुतवत्** ॥ किमिदमुपस्थितं नाम? अनार्षमितिकरणमिति भाष्यम्। अवैदिक इतिशब्द इत्यर्थः। प्लुत इत्यध्याहार्यम्। अवैदिके इतिशब्दे परे प्लुतः अप्लुतवत् स्यादिति फलति। तदाह। **उपस्थितोऽनार्ष इत्यादिना** ॥ अप्लुतवद्भावस्य प्रयोजनमाह। **प्लुतकार्यं प्रकृतिभावं न करोतीति** ॥ अप्लुतकार्यं यणादिकं करोतीति पाठान्तरम्। **सुश्लोक—३—इतीति** ॥

इत्युक्तेऽप्लुत एव विधीयेत प्लुतश्च निषिध्येत। तथाच प्रगृह्याश्रये प्रकृतिभावे प्लुतस्य श्रवणं न स्यात्। अग्नी ३ इति।

९९। ई ३ चाक्रवर्मणस्य। (६-१-१३०)

ईकारः प्लुतोऽचि परेऽप्लुतवद्वा स्यात्। चिनु हि ३ इति–चिनु हीति। चिनु हि ३ इदम्–चिनु हीदम्। उभयत्र विभाषेयम्।

१००। ईदूदेद्द्विवचनं प्रगृह्यम्। (१-१-११)

ईदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञं स्यात्। हरी एतौ। विष्णू इमौ। गङ्गे

तैत्तिरीये सुश्लोक–३–इति प्लुतान्तो मन्त्रः पठितः। पदकाले अवग्रहे तस्मात् परतः इतिशब्दं पदकाराः पठन्ति। तत्र सुश्लोक–३–इति इति स्थिते अप्लुतवद्भावेन प्रकृतिभावाभावे सति आद्गुणे सुश्लोकेतीति भवति। अत्र इतिशब्दः पदकारप्रक्षिप्तत्वादवैदिकः। तदेवं सुश्लोकेति इत्युदाहरणं भाष्ये स्थितम्। पदाकारास्तु सुश्लोक–३–इति सुश्लोक ३ इत्येव अवगृह्णन्ति। तदपि संहिताया अविवक्षितत्वान्निर्वाह्यम्। संहितायामेव यणादिसन्धिविधानात्। **वक्तिमिति**॥ अप्लुतवदित्यत्र वद्ग्रहणस्य किं प्रयोजनमिति प्रश्नः। उत्तरमाह। **अप्लुत इत्युक्त इत्यादिना**॥ वद्ग्रहणं विहाय अप्लुत उपस्थित इत्युक्ते प्लुतस्य स्थाने अप्लुत एव विधीयेत। अतः प्लुत एव निवर्तेत। प्रकृतिभावस्तु तस्य न निवर्तेत। ततश्च अग्नी–३–इति इत्यत्र सम्बोधनप्रथमाद्विवचनान्तस्यानुकरणे प्रगृह्य ईकारः त्रिमात्रो न श्रूयेत। वत्करणे तु प्लुतकार्यस्य प्रकृतिभावस्यैव निवृत्तिर्गम्यते। न तु प्लुतस्यापीति नोक्तदोष इत्यर्थः। **ई चाक्रवर्मणस्य**॥ ई–३–इति प्लुतस्य लुप्तप्रथमाविभक्तिको निर्देशः। उपस्थित इत्यस्वरितत्वान्निवृत्तम्। अप्लुतवदित्यनुवर्तते। इको यणचीत्यतः अचीत्यनुवर्तते। चाक्रवर्मणमुनेर्मते ईकारः अचि परे अप्लुतवद्भवति। नत्वन्यमते इत्यर्थः। तदाह। **प्लुतोऽचि परे अप्लुतवद्वेति। चिनु हि ३ इदमिति**॥ किम्मया कर्तव्यमिति पृष्टस्येदं प्रतिवचनम्। चिनु इति लोडन्तम्। उतश्च प्रत्ययादिति हेर्लुक्। हि इति त्वव्ययम्। 'विभाषा पृष्टप्रतिवचने हेः' इति तस्य प्लुतः। चिनु इत्यतः प्राक् देवदत्तेत्यध्याहार्यम्। इदमिति तु वाक्यान्तरस्थम्। ननु चिनु इत्येतेन एकवाक्यतामापन्नम्। अन्यथा वाक्यस्य टेरित्यधिकारात् हि शब्दे इकारस्य प्लुतो न स्यात्। **उभयत्रेति**॥ इति शब्दे परतो नित्यतया प्राप्ते तदन्यत्र अप्राप्ते चारम्भादुभयत्र विभाषेयमित्यर्थः। विभाषा शब्दस्तु अव्ययमिति न भ्रमितव्यम्। नवेति विभाषायामिति भाष्यप्रयोगात्। विभाष्यते विकल्प्यत इति विभाषा। गुरोश्च हल इत्यप्रत्ययः। टाप्। **ईदूदेद्द्विवचनम्**॥ ईच्च ऊच्च एचेति समाहारद्वन्द्वः। ईदूदेदिति द्विवचनविशेषणत्वात्तदन्तविधिः। द्विवचनमित्यनेन तु प्रत्ययत्वेऽपि न तदन्तं गृह्यते। संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणनास्तीति तन्निषेधात्। तदाह। **ईदूदेदन्तमित्यादिना। हरी एताविति**॥ अत्र ईकारस्य परादिवत्त्वाश्रयणात् द्विवचनत्वम्। प्रगृह्यत्वे सति प्लुतप्रगृह्या इति प्रकृतिभावान्न यण्। विष्णू इमावित्यत्राप्येवम्। गङ्गे अमू इत्यत्र तु अयादेशो न भवति। ईदूदे-

अमू । पचेते इमौ । 'मणी वोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम' इत्यत्र त्ववार्थे वशब्दो वाशब्दो वा बोध्यः ।

१०१ । अदसो मात् । (१-१-१२)

अस्मात्परावीदूतौ प्रगृह्यौ स्तः । अमी ईशाः । रामकृष्णावमू आसाते । 'मात्' किम् । अमुकेऽत्र । असति माद्ग्रहणे एकारोऽप्यनुवर्तेत ।

दन्तमिति तदन्तविधेः प्रयोजनन्दर्शयितुमाह । **पचेते इमाविति** ॥ तदन्तविध्यभावे ईदूदेदात्मकं द्विवचनं प्रगृह्यमिति लभ्येत । एवं सति पचेते इत्यत्र ते इति द्विवचनस्य एद्रूपत्वाभावात् प्रगृह्यत्वन्नस्यादिति भावः । ईदूदेदन्तं यद्द्विवचनान्तमिति व्याख्याने तु कुमार्योरगारं कुमार्यगारमित्यत्रातिप्रसङ्गस्स्यात् । ईदूदेदन्तं द्विवचनमिति व्याख्याने तु नातिप्रसङ्गः । ओसो द्विवचनस्य ईदूदेदन्तत्वाभावात् । ननु 'मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम' इति भारतश्लोके मणी इवेति ईकारस्य प्रगृह्यत्वे सति प्रकृतिभावे सवर्णदीर्घो न स्यादित्यत आह । **मणीवोष्ट्रस्येत्यादिना** ॥ 'वं प्रचेतसि जानीयादिवार्थे च तदव्ययम्' इति मेदिनी । 'व वा यथा तथैवैवं साम्य' इत्यमरः । **अदसो मात्** ॥ अदस इत्यवयवषष्ठी । अदश्शब्दावयवात्मकमकारादित्यर्थः । ईदूदिति प्रगृह्यमिति चानुवर्तते । मादिति दिग्योगे पञ्चमी । परशब्दोऽध्याहार्यः । तदाह । **अस्मात् परावि**ति ॥ अदश्शब्दावयवमकारात् परावित्यर्थः । एदिति नानुवर्तते । अदश्शब्दे मकारात् परस्य एकारस्यासम्भवात् । द्विवचनमित्यपि नानुवर्तते । अदश्शब्दे मकारात् परस्य ईकारस्य अमी इति बहुवचनत्वात् ऊकारस्य च मकारात्परस्य तत्र द्विवचनान्तेष्वेव सत्वेन व्यावर्त्याभावात् । **अमी ईशा इति** ॥ अदश्शब्दाज्जसि त्यदाद्यत्वं पररूपत्वं जसश्शी आद्गुणः अदे इति स्थिते एकारस्य एत ईदिति ईत्त्वं दस्य च मत्वं अमी इति रूपम् । अत्र ईकारस्य द्विवचनत्वाभावात् पूर्वसूत्रेण प्रगृह्यसंज्ञा न प्राप्तेत्यनेन सा विधीयते । रामकृष्णावमू इति पुल्लिङ्गाददश्शब्दात् प्रथमाद्विवचने औङि, त्यदाद्यत्वं, पररूपत्वं, वृद्धिरेचि, अदौ इति स्थिते, अदसोऽसेरित्यौकारस्य ऊत्वम् , अमू इति रूपम् । यद्यप्ययमूकारो द्विवचनं भवति । तथापि पूर्वसूत्रेण प्रगृह्यत्वे कर्तव्ये उत्वमत्वयोरसिद्धतया दकारादौकारस्यैव शास्त्रदृष्ट्या सत्वात् पूर्वसूत्रेण तस्य प्रगृह्यत्वन्नप्राप्तमित्यनेन विधीयते । अदसो मादिति सूत्रं प्रति तु उत्वमत्वे नासिद्धे । आरम्भसामर्थ्यात् । पूर्वसूत्रस्य तु तत्र न सामर्थ्यम् । हरी एतौ विष्णू इमावित्यादौ चरितार्थत्वात् । स्त्रियौ फले वा अमू आसाते इति स्त्रीलिङ्गो नपुंसकलिङ्गश्च अदश्शब्दो नात्रोदाहरणम् । तथाहि । स्त्रीलिङ्गाददश्शब्दात् औङि, त्यदाद्यत्वे, पररूपत्वे, टापि, औङ आप इति शीभावे, आद्गुणे, अदे इति स्थिते उत्वमत्वयोरमू इति रूपम् । तथा नपुंसकलिङ्गात्तस्मादौङि, त्यदाद्यत्वे, पररूपत्वे, नपुंसकाच्चेति शीभावे, आद्गुणे, उत्वमत्वयोरमू इत्येव रूपम् । अत्र पूर्वसूत्रेणैव प्रगृह्यत्वं सिद्धम् । उत्वमत्वयोरसिद्धत्वेऽप्येकारस्य द्विवचनस्य सत्वात् । अतः पुल्लिङ्ग एव अदश्शब्दः अत्रोदाहरणमिति प्रदर्शयितुं रामकृष्णाविति्युक्तम् । **मात्किमिति** ॥ अदस इत्येव सूत्रमस्तु । माद्ग्रहणस्य किं प्रयोजनमिति प्रश्नः । **अमुकेऽत्रेति** ॥

१०२ । शे । (१-१-१३)

अयं प्रगृह्यः स्यात् । अस्मे इन्द्राबृहस्पती ।

१०३ । निपात एकाजनाङ् । (१-१-१४)

एकोऽञ्निपात आङ्वर्जः प्रगृह्यः स्यात् । अ अवद्ये । इ विस्मये । इ इन्द्रः । उ वितर्के । उ उमेशः । 'अनाङ्' इत्युक्तेरङित्कारः प्रगृह्य एव । आ एवं नु मन्यसे । आ एवं किल तत् । ङित्तु न प्रगृह्यः । ईषदुष्णं ओष्णम् । 'वाक्यस्मरणयोरङित् । अन्यत्र ङित्' इति विवेकः ।

'अव्ययसर्वनाम्नामकच् प्राक्टेः' इत्यकचि अदकशब्दाज्जसि, त्यदाद्यत्वं, पररूपत्वम्, जसश्शी, आद्गुणः, उत्वमत्वे, अमुके इति रूपम् । अत्र एकारस्य प्रगृह्यत्वनिवृत्त्यर्थं माङ्ग्रहणम् । कृते च तस्मिन् एकारस्य मात्परत्वाभावान्न प्रगृह्यत्वमिति भावः । नन्वेवमपि माङ्ग्रहणं व्यर्थम् । एङ्ग्रहणमननुवर्त्य ईदूतोरेवात्र प्रगृह्यत्वविधानाभ्युपगमेन अमुके इत्यत्र प्रगृह्यत्वप्रसक्तेरभावादित्यत आह । **असतीति** ॥ अदसोमादित्यत्र ईदूदेतां एकसमासपदोपात्तानां मध्ये ईदूतोर्द्व्योरनुवृत्तौ एतोऽप्यनुवृत्तिप्रसक्तौ माङ्ग्रहणादेतोऽनुवृत्तिः प्रतिबद्धा । माङ्ग्रहणाभावे तु वाक्यकाभावादेतोऽप्यनुवृत्तिस्स्यात् । ततश्च अमुके इत्यत्रापि एकारस्य प्रगृह्यत्वप्रसक्तौ तन्निवृत्त्यर्थम्माङ्ग्रहणम् । कृते तु तस्मिन् एतोऽनुवृत्तिप्रतिबन्धादमुके इत्यत्र न प्रगृह्यत्वम् । तथाच एकारानननुवृत्तिफलकं माङ्ग्रहणमिति भावः । **शे** ॥ एकपदं सूत्रम् । प्रगृह्यमित्यनुवर्तते । छन्दसीत्यनुवृत्तौ 'सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः' इति विहितः शे इत्येकारान्त आदेशः प्रगृह्यस्स्यादित्यर्थः । तदाह । **अयमिति** ॥ शे आदेश इत्यर्थः । **अस्मे इति** ॥ अस्मभ्यमित्यर्थः । भ्यसश्शे आदेशः, लशकतद्धित इति शकार इत्, शेषे लोपः, अस्मे इति रूपम् । अद्विवचनत्वादप्राप्तौ वचनम् । यद्यपि छान्दसमिदं वैदिकप्रक्रियायामेव निबन्ध्यम् । तथापि अस्मे इति त्वे इति इत्याद्यवग्रहे लोकार्थत्वस्यापि सत्त्वादिह तन्निबन्धनम् । पदपाठस्याधुनिकत्वात् । **निपात एकाच्** ॥ प्रगृह्यमित्यनुवर्तते । पुल्लिङ्गतया च विपरिणम्यते । एकश्चासावच्चेति कर्मधारयः । तदाह । **एकोऽञ्जित्यादिना । इ विस्मये इति** ॥ इ इति चादित्वान्निपातः । स च आश्चर्ये वर्तते इत्यर्थः । इ इन्द्रः । उ उमेशः । इ इति उ इति निपातस्सम्बोधने । उभयोरपि एकाच्त्वान्निपातत्वाच्च प्रगृह्यत्वान्न सन्धिः । अनाङित्यत्र ङकारानुबन्धस्य प्रयोजनमाह । **अनाङित्युक्तेरिति** ॥ आ एवमिति पूर्वप्रक्रान्तवाक्यार्थस्य अन्यथात्वद्योतकोऽयमाकारः । पूर्वमित्थन्नामंस्थाः इदानींत्वेवम्मन्यसे इत्यर्थः । **आ एवमिति** । स्मरणद्योतकोऽयमाकारः । इहोभयत्रापि आकारस्य ङित्वाभावान्न पर्युदासः । **ङित्त्विति** ॥ ङित्तु आकारः प्रगृह्यो न भवति अनाङिति पर्युदासादित्यर्थः । **ओष्णमिति** ॥ आ उष्णमित्यत्र आकारस्य ङित्त्वात् प्रगृह्यत्वाभावे सति आद्गुणः । ननु प्रयोगदशायां ङकारस्याश्रवणाविशेषात् ङिदङिद्विवेकः कथमित्यत आह । **वाक्येति** ॥ प्रक्रान्तवाक्यार्थस्यान्यथात्वे स्मरणे

१०४। ओत्। (१-१-१५)

ओदन्तो निपातः प्रगृह्यः स्यात्। अहो ईशाः।

१०५। सम्बुद्धौ शाकल्यस्येतावनार्षे। (१-१-१६)

सम्बुद्धिनिमित्तक ओकारो वा प्रगृह्योऽवैदिक इतौ परे। विष्णो इति-विष्ण इति विष्णविति। 'अनार्षे' इति किम्। ब्रह्मबन्धवित्यब्रवीत्।

१०६। उञः। (१-१-१७)

उञ इतौ वा प्रागुक्तम्। उ इति-विति।

१०७। ऊँ। (१-१-१८)

उञ इतौ दीर्घोऽनुनासिकः प्रगृह्यश्च ऊँ इत्ययमादेशो वा स्यात्। ऊँ इति-विति।

च अङित्। अन्यत्र ईषदाद्यर्थे गम्ये, ङिदिति विवेकः भेदोऽवगन्तव्य इत्यर्थः। तथाच भाष्यम्। 'ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः। एतमातं ङितं विद्यात् वाक्यस्मरणयोरङित्' इति। एकः अच् यस्येति बहुव्रीहिस्तु नाश्रितः। तथासति प्रेदमित्यादावतिप्रसङ्गात्। **ओत्** ॥ निपात इत्यनुवर्तते। ओदिति तस्य विशेषणम्। अतस्तदन्तविधिः। प्रगृह्यमित्यनुवर्तते। पुल्लिङ्गतया च विपरिणम्यते। तदाह। **ओदन्त इत्यादिना। अहो ईशा इति** ॥ अनेकाच्त्वात् पूर्वसूत्रेण अप्राप्तौ वचनम्। **सम्बुद्धौ शाकल्यस्य** ॥ सम्बुद्धाविति निमित्तसप्तमी। ओदित्यनुवृत्तेन अन्वेति। प्रगृह्यमित्यनुवर्तते पुल्लिङ्गतया च विपरिणम्यते। ऋषिर्वेदः। तदुक्तमृषिणेत्यादौ तथा दर्शनात्। ऋषौ भवः आर्षः, न आर्षः अनार्षः, अवैदिके इतिशब्दे परत इत्यर्थः। शाकल्यग्रहणाद्विकल्पः। तदाह। **सम्बुद्धिनिमित्तक इत्यादिना। विष्णो इतीति** ॥ अत्र ओकारः ह्रस्वस्य गुण इति सम्बुद्धिनिमित्तकः। अत्र ओदन्तत्वेऽपि निपातत्वाभावादप्राप्ते विभाषेयम्। विष्णविति प्रगृह्यत्वाभावे रूपम्। **उञः** ॥ एकपदं सूत्रम्। शाकल्यस्य इतौ प्रगृह्यमिति चानुवर्तते। उ इति ञित्, उकारः निपातः, तस्य इतिशब्दे परे शाकल्यमते प्रगृह्यसंज्ञा स्यादित्यर्थः। तदाह। **उञ इतौ वा प्रागुक्तमिति** ॥ पूर्वोक्तं प्रगृह्यत्वमित्यर्थः। **उ इति वितीति** ॥ निपात एकाजिति नित्यं प्राप्ते विकल्पोऽयम्। प्रगृह्यत्वपक्षे प्रकृतिभावे प्रथमं रूपम्। तदभावपक्षे यणादेशे द्वितीयं रूपम्। **ऊँ** ॥ इदमप्येकपदं सूत्रम्। ऊँ इति दीर्घस्य अनुनासिकस्य ऊकारस्य लुप्तप्रथमाविभक्तिकस्य निर्देशः। उञ इत्यनुवर्तते इतौ शाकल्यस्य प्रगृह्यमिति च। तदाह। **उञ इतावित्यादिना। ऊँ इतीति** ॥ उक्तविधे उकारादेशे रूपम्। प्रगृह्यत्वात् प्रकृतिभावः। एतदादेशाभावपक्षे पूर्वसूत्रेण प्रगृह्यत्वे सति उ इतीति रूपम्। प्रगृह्यत्वस्याप्यभावे सति यणादेशे वितीति रूपमिति त्रीणि रूपाणि फलितानि। तदेवं उञ

१०८। मय उञो वो वा। (८-३-३३)

मयः परस्य उञो वो वा स्यादचि। किमु उक्तम्-किम्वुक्तम्। वस्यासिद्धत्वान्नानुस्वारः।

१०९। ईदूतौ च सप्तम्यर्थे। (१-१-१९)

सप्तम्यर्थे पर्यवसन्नमीदूदन्तं प्रगृह्यं स्यात्। सोमो गौरी अधिश्रितः। मामकी तनू इति। 'सुपां सुलुक्--' (सू ३५६१) इति सप्तम्या लुक्। अर्थग्रहणं किम्। वृत्तावर्थान्तरोपसंक्रान्ते मा भूत्। वाप्यामश्वो वाप्यश्वः।

ऊँ इत्येकमेव सूत्रं विभज्य व्याख्यातम्। एकसूत्रत्वे तु उञः इतौ परे ऊँ इत्ययं दीर्घोऽनुनासिकः प्रगृह्यश्चादेशश्शाकल्यमते स्यात्। तदभावपक्षे तु निपात एकाजिति नित्यं प्रगृह्यत्वमित्येतावल्लभ्येत। ततश्च ऊँ इति उ इतीति रूपद्वयमेव स्यात् वितीति रूपं न लभ्येत। अतो विभज्य व्याख्यातम्। **मय उञो वो वा** ॥ मय इति पञ्चमी उञ इति षष्ठी 'ङमो ह्रस्वादचि' इत्यतः अचीत्यनुवर्तते। तदाह। **मयः परस्येत्यादिना। किम्वुक्तमिति** ॥ किमु उक्तमिति स्थिते मकारादुकारस्य उञो 'निपात एकाच्' इति नित्यं प्रगृह्यत्वात् प्रकृतिभावात् यणभावे प्राप्ते वत्ववचनमिदम्। ननु तर्हि इको यणचीत्यनन्तरमेव मय उञो वेति पठितव्यम्। वग्रहणाभावेन लाघवात्। त्रिपाद्यां पाठे वग्रहणस्यापि कर्तव्यत्वेन गौरवादित्यत आह। **वत्वस्येति** ॥ यदि षष्ठस्य प्रथमे पादे इको यणचीत्यत्रैव मय उञो यणादेशविकल्पो विधीयेत। तर्हि किम्वुक्तमित्यत्र मोऽनुस्वार इति मकारस्य वकारे परे अनुस्वारस्स्यात्। त्रिपाद्यां वत्वविधौ तु तस्यासिद्धत्वान्नानुस्वारः। त्रिपाद्यामनुस्वारविध्यपेक्षया वत्वविधेः परत्वादिति भावः। **ईदूतौ च** ॥ प्रगृह्यमित्यनुवर्तते। तच्च द्विवचनान्ततया विपरिणम्यते। शब्दस्वरूपस्य विशेष्यत्वात्तदन्तविधिः। ईदूतौ च सप्तम्यावित्येव सिद्धे अर्थग्रहणाद्यत्र सप्तम्या लुकि 'यश्शिष्यते स लुप्यमानार्थाभिधायी' इति न्यायेन प्रकृतेरेव सप्तम्यर्थे पर्यवसानं तथाविधत्वमीदूदन्तयोर्गम्यते। तथाच सप्तम्यर्थे पर्यवसन्नावीदूदन्तौ शब्दौ प्रगृह्यौ स्तः। इत्यक्षरार्थः। फलितमाह। **सप्तम्यर्थ इत्यादिना। सोमो गौरी अधिश्रित इति** ॥ गौर्यामित्यर्थः। सुपां सुलुगिति सप्तम्या लुक्। प्रगृह्यत्वे प्रकृतिभावान्न यण्। वातप्रमीड्यादिसप्तम्यन्तन्तु नात्रोदाहरणम्। तत्र सप्तम्या लुप्तत्वाभावेन प्रकृतेस्सप्तम्यर्थे अप्रवृत्तेः। **मामकी तनू इति** ॥ मामक्यान्तन्वामित्यर्थः। सुपां सुलुगिति सप्तम्या लुक्। प्रगृह्येभ्यः परत इतिशब्दप्रयोगस्य पदकारैर्नियमितत्वात्। पदपाठे मामकी इति तनू इतीत्यत्र प्रगृह्यत्वं फलमत्र बोध्यम्। **नन्वीदूतौ च सप्तम्याः इत्येव सूत्रयताम्। षष्ठ्याच अर्थद्वारा सम्बन्धो विवक्ष्यताम्। ततश्च सप्तम्यर्थे विद्यमानमीदूदन्तमित्यर्थस्य अर्थग्रहणं विनैव लाभादर्थग्रहणं किमर्थमिति पृच्छति। अर्थग्रहणं किमिति** ॥ कस्मै प्रयोजनायेत्यर्थः। किमित्यव्ययम्। **वृत्ताविति** ॥ अर्थ-

११० । अणोऽप्रगृह्यस्यानुनासिकः । (८-४-५७)

अप्रगृह्यस्याणोऽवसानेऽनुनासिको वा स्यात् । दधिँ-दधि । 'अप्रगृह्यस्य' किम् । अग्नी ।

। इति अच्सन्धिप्रकरणम् ।

अथ हल्सन्धिप्रकरणम् ।

१११ । स्तोः श्चुना श्चुः । (८-४-४०)

सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः । हरिश्शेते । रामश्चिनोति । सच्चित् । शार्ङ्गिञ्जय ।

ग्रहणसामर्थ्यात् लुप्तसप्तम्यर्थमात्रे पर्यवसन्नमित्यर्थो विवक्षितः । ततश्च समासवृत्तौ लुप्तसप्तमीके ईदूदन्तपूर्वपदे सप्तम्यर्थमतिलङ्घ्य उत्तरपदार्थे प्रवृत्ते सति प्रगृह्यसंज्ञा न भवति । **मा भूदिति** ॥ माङि लुङ् सर्वलकारापवादः । **वाप्यामश्वो वाप्यश्व इति** ॥ वाप्यां अश्व इति विग्रहे सुप्सुपेति समासे वाप्यश्व इति रूपमित्यर्थः । अत्र वाप्यामिति सप्तम्या अधिकरणत्वमवगतम् । तच्चाधिकरणकारकं क्रियापेक्षम् । तत्र वाप्यामश्वो वर्तत इति क्रियाऽध्याहारे वर्तमानक्रियायां वाप्या अधिकरणत्वेन अश्वस्य कर्तृत्वेनान्वयात्तयोः परस्परमन्वयाभावादसामर्थ्यात् समासो नोपपद्यते । वाप्यां विद्यमानोऽश्व इति विद्यमानपदस्याऽध्याहारेऽपि अश्वपदेनासामर्थ्यात् समासो न सम्भवति । अतः वाप्यामित्यस्य वाप्यां विद्यमाने अश्वे लक्षणया प्रवृत्तिं पुरस्कृत्य समासो वक्तव्यः । एवञ्च समासे लुप्तसप्तमीकस्य वापीशब्दस्य सप्तम्यर्थमातिलङ्घ्य तत्संसृष्टे आधेयभूते अश्वेऽपि प्रवृत्तेस्सप्तम्यर्थमात्रविश्रान्त्यभावान्नप्रगृह्यत्वमिति भावः । **अणोऽप्रगृह्यस्य** ॥ वा अवसान इत्यनुवर्तते । तदाह । **अप्रगृह्येत्यादिना** ॥ अत्र अण् पूर्वेणैव णकारेण व्याख्यानात् । ततश्च कर्तृ इत्यत्र नानुनासिकः । **इत्यच्सन्धीति** ॥ अल्पाच्तरमिति सिद्धमनच्त्वादिति कथमनच्त्वमिति च सूत्रवार्तिकभाष्यप्रयोगादेवज्ञातीयस्थलेषु असन्देहार्थं सन्ध्यभावोऽभ्यनुज्ञातः । अतोऽत्र कुत्वचुत्वयोरभावेऽपि न दोषः । **स्तोश्चुना श्चुः** ॥ स्च् तुश्चेति समाहारद्वन्द्वः । पुंस्त्वमार्षम् । इतरेतरयोगद्वन्द्वो वा । तथासत्येकवचनमार्षम् । एवं श्चुना श्चुरित्यत्रापि श्चुनेति सहार्थे तृतीया । योगे इत्यध्याहार्यम् । ततश्च सहशब्दयोगाभावेऽपि तदर्थस्य गम्यत्वात्तृतीया युज्यते । अस्मादेव निर्देशात् । तदाह । **सकारतवर्गयोरित्यादिना** ॥ अत्र स्थान्यादेशानां यथासंख्य भवति । ततश्च सकारस्य शकारः तवर्गस्य चवर्गः । तत्रापि त थ द ध नानां क्रमेण च छ ज झ ञाः इति फलितम् । त थ द ध नेत्यादि क्रमस्याप्यनादिलोकसिद्धत्वात् । श्चुना योगे इत्यत्र न यथासंख्यमित्युत्तरसूत्रे वक्ष्यते । ततश्च सकारस्य तवर्गस्य शकारेण चवर्गेण च यथासम्भवं योगे श्चुत्वं भवति । **रामश्शेते इति** ॥ रामस् शेत इति स्थिते शकारेण योगात् सकारस्य शकारः । श्चुना योग इत्यत्र न यथासङ्ख्यमित्यस्य प्रयोजनं दर्शयितुं सकारस्य चकारयोगेऽप्युदाहरति । **रामश्चिनोतीति** ॥

११२ । शात् । (८-४-४४)

शात्परस्य तवर्गस्य चुत्वं न स्यात्। विश्नः प्रश्नः ।

११३ । ष्टुना ष्टुः । (८-४-४१)

स्तोः ष्टुना योगे ष्टुः स्यात्। रामष्षष्ठः । रामष्टीकते। पेष्टा। तट्टीका। चक्रिण्ढौकसे ।

११४ । न पदान्ताट्टोरनाम् । (८-४-४२)

'अनाम्' इति लुप्तषष्ठीकं पदम् । पदान्ताट्टवर्गात्परस्यानामः स्तोः ष्टुर्न स्यात् । षट् सन्तः । षट् ते । 'पदान्तात्' किम् । ईट्टे । 'टोः' किम् ।

रामस् चिनोतीति स्थिते चवर्गयोगात् सकारस्य शकारः । श्चुना योगे इत्यत्रापि यथासङ्ख्याश्रयणे तु इह सकारस्य शकारयोगाभावात् शकारो न स्यादिति भावः । **सच्चिदिति** ॥ सत् चित् इति स्थिते, श्चुत्वस्यासिद्धत्वात् जश्त्वेन तकारस्य दत्वे, तस्य श्चुत्वेन जकारे, खरि चेति चर्त्वेन तस्य चकारे च रूपम् । शार्ङ्गिन् जयेति स्थिते, चवर्गयोगात् नकारस्य श्चुत्वं ञकारः । **शात्** ॥ न पदान्तादिति पूर्वसूत्रात् नेत्यनुवर्तते । स्तोश्चुना श्चुरित्यतः तोरिति, चुरितिचानुवर्तते । नतु सकारशकारश्च । शादिति दिग्योगे पञ्चमी । परस्येत्यध्याहार्यम् । तदाह । **शात्परस्येत्यादिना** । **विश्न इति** ॥ विच्छ गतौ । 'यज याच यत विच्छ प्रच्छ रक्षो नङ्' इति नङ् । 'छ्वोश्शूट्' इति छस्य शः । डित्वान्न गुणः । अत्र शकारयोगात् तवर्गीयनकारस्य श्चुत्वेन ञकारे प्राप्ते निषेधः । पूर्वसूत्रे श्चुना योगे इत्यत्रापि यथासङ्ख्याश्रयणे तु इह तवर्गीयस्य नस्य चुना योगाभावेन चुत्वस्याप्रसक्ततया तन्निषेधो व्यर्थस्स्यात् । एवञ्च अस्मादेव निषेधात् पूर्वसूत्रे श्चुना योगे इत्यत्र न यथासङ्ख्याश्रयणमिति विज्ञायते । **प्रश्न इति** ॥ प्रच्छ ज्ञीप्सायाम् । पूर्ववत् नङादि । अत्र 'ग्रहिज्या' इति सम्प्रसारणम् । 'प्रश्नेचासन्नकाले' इत्यादिनिर्देशात् । अत्र वर्गपञ्चमानां नासिकास्थानाधिक्येऽपि तत्तद्वर्गीयैरस्ति सावर्ण्यमिति तुल्यास्यसूत्रे अवोचाम । **ष्टुनाष्टुः** ॥ स्तोरित्यनुवर्त्तते । तदाह । **स्तोरिति** ॥ अत्रापि स्थान्यादेशानां यथासङ्ख्यम् । नतु ष्टुयोगे इत्यत्र । **रामष्षष्ठ इति** ॥ रामस् षष्ठ इति स्थिते षकारयोगात् सस्य ष्टुत्वेन षः । अत्रापि ष्टुना योग इत्यत्र न यथासंङ्ख्यमित्यस्य प्रयोजनं दर्शयितुं सकारस्य टवर्गयोगेऽपि उदाहरति । **रामष्टीकत इति** ॥ टीक्ङ् गतौ । **तट्टीकेति** ॥ तस्य टीकेति विग्रहः । तद् टीका इति स्थिते ष्टुत्वेन दस्य ड्त्वे चर्त्वम् । **चक्रिण्ढौकस इति** ॥ ढौक्ङ् गतौ । चक्रिन् ढौकसे इति स्थिते टवर्गयोगात् नस्य ष्टुत्वेन णत्वम् । **न पदान्तात्** ॥ अनामिति तोरित्यस्य विशेषणम् । नतु भिन्नविभक्तिकमेतत् । कथं तद्विशेषणमित्यत आह । **अनामिति लुप्तषष्ठीकमिति** ॥ नामवयवभिन्नस्येत्यर्थः । स्तोष्टुरित्यनुवर्तते । तदाह । **पदान्तादित्यादिना** । **ईट्टे इति** ॥ 'ईड स्तुतौ' आत्मनेपदी । ईड् ते इति स्थिते, खरि चेति डस्य चर्त्वं, ततः परस्य

सर्पिष्टमम्। 'अनाम्नवतिनगरीणामिति वाच्यम्' (वा ५०१६)। षण्णाम्। षण्णवतिः। षण्णगर्यः।

११५। तोः षि। (८-४-४३)

तवर्गस्य षकारे परे न ष्टुत्वम्। सन्षष्टः। 'झलां जशोऽन्ते' (सू ८४)। वागीशः। चिद्रूपम्।

११६। यरोऽनुनासिकेऽनुनासिको वा। (८-४-४५)

यरः पदान्तस्यानुनासिके परेऽनुनासिको वा स्यात्। एतन्मुरारिः—एतद्मुरारिः। स्थानप्रयत्नाभ्यामन्तरतमे स्पर्शे चरितार्थो विधिरयं रेफे न प्रवर्तते।

तकारस्य ष्टुत्वम्। तस्य टवर्गात् परत्वेऽपि पदान्तात् परत्वाभावात् न ष्टुत्वनिषेधः। **सर्पिष्टममिति** ॥ सर्पिष् तमम् इति स्थिते स्वादिष्वसर्वनामस्थान इति, अन्तर्वर्त्तिनीं विभक्तिमाश्रित्य वा, पदत्वात् षकारस्य पदान्तत्वात्ततः परस्य तकारस्य ष्टुत्वनिषेधो न भवति। पदान्ताट्टवर्गात्परत्वाभावात्। नच षकारस्य 'झलाञ्जशोऽन्त' इति जश्त्वेन डकारे सति तकारस्य टोः परत्वात् ष्टुत्वनिषेधस्यादेवेति वाच्यम्। 'ह्रस्वात्तादौ तद्धित' इति षत्वस्यासिद्धत्वेन जश्त्वाभावात्, इह आदेशप्रत्यययोरिति षत्वन्तु न भवति। 'अपदान्तस्य मूर्द्धन्य' इत्यधिकारात्। **अनाम् नवति** ॥ ष्टुत्वप्रतिषेधे नाम एव पर्युदासो न भवति। किन्तु नवतिनगरीशब्दावयवनकारस्यापि पर्युदासो वक्तव्य इत्यर्थः। **षण्णामिति** ॥ षष् नामिति स्थिते 'स्वादिष्वसर्वनामस्थाने' इति पदान्तत्वात् षस्य जश्त्वेन डकारे 'प्रत्यये भाषायान्नित्यम्' इति तस्य णकारः। अत्र टवर्गयोगात् नकारस्य ष्टुत्वम्। नपदान्तादिति निषेधस्तु न। अनामिति पर्युदासात्। **षण्णवतिरिति** ॥ षडधिका नवतिरिति विग्रहः। अत्रापि नकारस्य न ष्टुत्वनिषेधः। नवतिशब्दस्यापि पर्युदासात्। **षण्णगर्य इति** ॥ पृथक्पदे। न तु कर्मधारयः। 'दिक्सङ्ख्ये संज्ञायाम्' इति नियमात्। अत्रापि नपदान्तादिति नगरीशब्दे नकारस्य ष्टुत्वनिषेधो न भवति। नगरीशब्दस्यापि पर्युदासात्। **तोष्षि** ॥ ष्टुरिति नेति चानुवर्तते। तदाह। **तवर्गस्येति सन्षष्ट इति** ॥ अत्र नकारस्य षकारयोगात् ष्टुत्वं प्राप्तं निषिध्यते। अस्मादेव ज्ञापकात् ष्टुना ष्टुरित्यत्र ष्टुना योगे इत्यत्र यथासङ्ख्यन्नेति विज्ञायते। झलाञ्जशोऽन्ते इत्यच्सन्धिनिरूपणे प्रसङ्गादुपन्यस्तम्। हल्सन्धिप्रस्तावे पुनस्तदुपन्यासः। **यरोऽनुनासिके** ॥ न पदान्ताट्टोरित्यतः पदान्तादित्यनुवर्तते। तच्च षष्ठ्यन्ततया विपरिणम्यते। तदाह। **यरः पदान्तस्येति** ॥ एतन्मुरारिति कर्मधारयः। एतद् मुरारिरिति स्थिते दस्य अनुनासिको नकारः दन्तस्थानसाम्यात् स्पृष्टप्रयत्नसाम्याच्च। ननु चतुर्मुख इत्यत्रापि रेफस्य अनुनासिको णकारस्स्यात्, रेफणकारयोः स्पृष्टेषत्स्पृष्टप्रयत्नभेदेऽपि मूर्धस्थानान्तर्यादित्यत आह। **स्थानेति** ॥ एतन्मुरारिरित्यादौ स्थानतः प्रयत्नतश्चान्तरतमे स्पर्शे चरितार्थः लब्धप्रयोजनोऽयमनुनासिकविधिः स्थानमात्रेण आन्तर्यमादाय रेफे न प्रवृत्तिमर्हतीत्यर्थः। 'यूनि लब्धे तु युवतिर्जरठे रमते कथम्' इति

चतुर्मुखः । 'प्रत्यये भषायां नित्यम्' (वा ५०१७) । तन्मात्रम् चिन्मयम् । कथं तर्हि 'मदोदग्राः ककुद्मन्तः' इति । यवादि (ग २५०) गणे दकारनिपातनात् ।

११७ । तोर्लि । (८-४-६०)

तवर्गस्य लकारे परे परसवर्णः स्यात् । तल्लयः । विद्वाँल्लिखति । नकारस्यानुनासिको लकारः ।

११८ । उदः स्थास्तम्भ्वोः पूर्वस्य । (८-१-६१)

उदः परयोः स्थास्तम्भ्वोः पूर्वसवर्णः स्यात् । 'आदेः परस्य' (सू ४४) उत्थानम् । उत्तम्भनम् । अत्राघोषस्य महाप्राणस्य सस्य तादृश एव थकारः ।

न्यायादिति भावः । **प्रत्यये भाषायाम्नित्यम्** ॥ वार्तिकमेतत् । भाषा लौकिकप्रयोगः । तत्र प्रत्यये विद्यमाने अनुनासिके परतः प्रागुक्तोऽनुनासिको नित्यं भवतीत्यर्थः । **तन्मात्रमिति** ॥ तत् प्रमाणं यस्य तत्तन्मात्रं 'प्रमाणे द्वयसज्दघ्नञ्मात्रचः' इति मात्रच्प्रत्ययः । **चिन्मयमिति** ॥ 'नित्यं वृद्धशरादिभ्यः' इत्यत्र नित्यमिति योगविभागात्तादूप्ये मयट् । **कथं तर्हीति** ॥ यदि प्रत्यये परे नित्यमनुनासिकस्स्यात् तदा मदोदग्राः ककुद्मन्त इति कालिदासप्रयोगः कथमित्याक्षेपः । मतुपः प्रत्ययत्वेन तस्मिन् परे दकारस्य अनुनासिकनकारावश्यम्भावादिति भावः । परिहरति । **यवादीति** ॥ यवादिगणे ककुद्मच्छब्दे दकारस्य निर्देशान्न तस्यानुनासिकः । यदि तत्र दकारस्य नकार एव इष्टस्स्यात् तर्हि नकारमेव लाघवान्निर्दिशेदिति भावः । **तोर्लि** ॥ अनुस्वारस्य यय्यात्यतः परसवर्ण इत्यनुवर्तते । तदाह । **तवर्गस्येत्यादिना । तल्लय इति** ॥ तस्य लय इति विग्रहः । तद् लय इति स्थिते दस्य परसवर्णः परनिमित्तभूतलकारसवर्णो भवति । स च लकार एव । अन्यस्य तत्सावर्ण्याभावात् । **अत्र नकारस्येति** ॥ विद्वान् लिखतीत्यत्र विद्वान् लिखतीति स्थिते नकारस्य स्थानिनः अनुनासिकस्य परसवर्णो लकारो भवन् आन्तर्यादनुनासिक एव लकारो भवतीत्यर्थः । **उदस्स्थास्तम्भ्वोः** ॥ 'अनुस्वारस्य ययि परसवर्णः' इत्यत्र समासनिर्दिष्टमपि सवर्णग्रहणमिह निष्कृष्य सम्बध्यते । एकदेशे स्वरितत्वप्रतिज्ञानात् । उद इति पञ्चमी । अतस्तस्मादित्युत्तरस्येति परिभाषया उदः परयोरिति लभ्यते । तदाह । **उदःपरयोरिति । पूर्वस्येति** ॥ पूर्वनिमित्तस्य उदो दकारस्य यस्सवर्णः स आदेशस्स्यादित्यर्थः । पूर्वसवर्णश्चायमलोऽन्त्यपरिभाषया स्थास्तम्भ्वोरन्तादेशो न भवतीत्याह । **आदेः परस्येति** ॥ अनया परिभाषया स्थास्तम्भ्वोराद्यवयवस्य सकारस्यैव भवतीत्यर्थः । **उत्थानमिति** ॥ ष्ठा गतिनिवृत्तौ । भावे ल्युट् । **उत्तम्भनमिति** ॥ 'ष्टभि प्रतिष्टम्भे' भावे ल्युट् । स्तम्भु रोधन इति श्नुविधौ निर्दिष्टस्सौत्रो वा धातुः । स्थास्तम्भ्वोरिति पवर्गीयोपधनिर्देशस्य उभयसाधारणत्वात् । ननु उद् स्थानमित्यत्र सकारस्य पूर्वसवर्णविधौ पूर्वनिमित्तं दकारः तत्सवर्णश्च त थ द

तस्य 'झरो झरि--' (सू ७१) इति पाक्षिको लोपः। लोपाभावपक्षे तु थकारस्यैव श्रवणम्। ननु 'खरि च' (सू १२१) इति चर्त्वम्। चर्त्वं प्रति थकारस्यासिद्धत्वात्।

११९। झयो होऽन्यतरस्याम्। (८-४-६२)

ध नाः पञ्चैव। दन्तस्थानसाम्यात् स्पृष्टप्रयत्नसाम्याच्च। ननु लकारः सकारश्च। तयोःस्थानसाम्येऽपि विवृतप्रयत्नत्वात्। नापि लकारः ईषत्स्पृष्टत्वात्। एतदतिरिक्ताश्च सर्वे वर्णाः भिन्नस्थानकत्वान्न दकारसवर्णाः। ततश्च पूर्वनिमित्तभूतदकारसवर्णाः त थ त ध नाः पञ्चापि सकारस्य प्राप्ताः। स्थानीभूतसकारेण दन्तस्थानत आन्तर्यस्य पञ्चस्वप्यविशिष्टत्वात्। आभ्यन्तरप्रयत्नत आन्तर्यस्य च पञ्चस्वप्यभावात्। स्थानीभूतसकारस्य विवृतप्रयत्नत्वात् एतेषां च पञ्चानां स्पृष्टप्रयत्नत्वात्। अतोऽत्र बाह्यप्रयत्नत एवान्तर्यमादाय पञ्चस्वन्यतमव्यवस्थामाह। **अत्राघोषस्य महाप्राणस्य सस्य तादृश एव थकार इति॥** अघोषस्येत्यनेन श्वासवतो विवारवतश्चेत्युक्तप्रायम्। समनियतत्वात्। स्थानीभूतस्तावत् सकारः अघोषश्वासविवारमहाप्राणात्मकयत्नचतुष्टयवान्। तस्य त थ द ध नेषु प्रथमतृतीयपञ्चमा न भवन्ति। तेषां अल्पप्राणत्वात्। नापि चतुर्थो भवति। तस्य घोषनादसंवारयत्नकत्वात्। द्वितीयस्तु थकारः अघोषश्वासविवारमहाप्राणात्मकयत्नचतुष्टयवान्। अतस्सएव थकारः पूर्वनिमित्तभूतदकारसवर्णः सकारस्य भवतीत्यर्थः। एवञ्च उद् स्थानमिति स्थिते दकारस्य 'खरिच' इति चर्त्वेन तकारे सकारस्य पूर्वसवर्णे थकारे उत्थ्थानमित्येकतकारं द्विथकारञ्च रूपं सिद्धं। एवं उत्थ् तम्भनमित्यत्रापि योज्यम्। तत्र द्वितकारमेकथकारञ्चेति विशेषः। **तस्येति॥** सकारादेशस्य थकारस्येत्यर्थः। एवञ्च प्रथमथकारस्य लोपपक्षे एकतकारमेकथकारञ्च रूपमिति भावः। ननु प्रथमथकारस्य लोपाभावपक्षे एकतकारं द्विथकारं च रूपमित्यनुपपन्नं। प्रथमथकारस्य खरिचेति चर्त्वे सति द्वितकारमेकथकारमित्यापत्तेरित्यत आह। **लोपाभावेति। असिद्धत्वादिति॥** खरिचेति सूत्रापेक्षया उदस्स्थादित्यस्य परत्वादिति भावः। उत् त् तम्भनमिति त्रितकारपाठस्तु प्रामादिकः। उक्तप्रक्रियाया उभयत्रापि साधारण्यात्। केचित्तु 'न मुने' इत्यत्र नेति योगविभागमभ्युपगम्य पूर्वसवर्णस्य थकारस्य चर्त्वं प्रत्यसिद्धत्वाभावाच्चर्त्वे उत्त्तम्भनमिति त्रितकाररूपं कथञ्चित् साधयामासुः। तत्तु मूलकृतो न सम्मतम्। मूले उभयसाधारण्येनैव प्रक्रियानिरूपणात्। वस्तुतस्तु 'दीर्घादाचार्याणाम्' इत्युत्तरं अनुस्वारस्य ययि परसवर्णः, वा पदान्तस्य, तोर्लि, उदस्स्थास्तम्भ्वोः पूर्वस्य, झयो होऽन्यतरस्याम्, शश्छोऽटीति षट्सूत्रीपाठोत्तरं झलाञ्जश् झशि, अभ्यासे चर्च, खरि च, वाऽवसाने, अणोऽप्रगृह्यस्यानुनासिकः, इति पञ्चसूत्रीपाठ इति हलो यमामिति सूत्रस्थभाष्यसम्मतस्सूत्रक्रमः। एवञ्च खरि चेति चर्त्वे कर्तव्ये उदस्स्थास्तम्भ्वोरिति पूर्वसवर्णस्य थकारस्य असिद्धत्वाभावाच्चर्त्वे उत्त्थानामिति द्वितकारमेकथकारञ्च रूपम्। उत्त्तम्भनमिति तु त्रितकारमेव रूपमिति शब्देन्दुशेखरे प्रपञ्चितम्। **झयो हः॥** झय इति पञ्चमी। परस्येत्यध्याहार्यम्। ह इति षष्ठी। उदस्स्थास्तम्भ्वोरित्यतः पूर्वस्येति अनुस्वारस्य ययीत्यतः सवर्ण इति चानु-

झयः परस्य हस्य पूर्वसवर्णो वा स्यात्। घोषवतो नादवतो महाप्राणस्य संवृतकण्ठस्य हस्य तादृशो वर्गचतुर्थ एवादेशः। वाग्घरिः--वाग्हरिः।

१२०। शश्छोऽटि। (८-४-६३)

पदान्ताज्झयः परस्य शस्य छो वा स्यादटि। दस्य चुत्वेन जकारे कृते।

१२१। खरि च। (८-४-५५)

खरि झलां चरः स्युः। इति जकारस्य चकारः। तच्छिवः--तच्शिवः। 'छत्वममीति वाच्यम्' (वा ५०२५)। तच्छ्लोकेन--तच्श्लोकेन। अमि किम्। वाक् श्च्योतति।

वर्तते। तदाह। **झयः परस्येत्यादिना** ॥ वाग्घरिरित्युदाहरणम्। वाच शब्दश्चकारान्तः, कुत्वं जश्त्वम्। वाग् हरिरिति स्थिते हकारस्य पूर्वसवर्णविधौ गकारः पूर्वनिमित्तम्। तत्सवर्णाः क, ख, ग, घ, ङाः पञ्च। तेषां हकारेण स्थानिना स्थानत आन्तर्यमविशिष्टम्। आभ्यन्तरप्रयत्नसाम्यन्तु पञ्चानामपि हकारेण स्थानिना न विद्यते। स्पृष्टविवृतप्रयत्नभेदात्। अतः बाह्यप्रयत्नतः आन्तर्यमादाय पञ्चस्वन्यतमव्यवस्थामाह। **घोषवत इत्यादिना** ॥ स्थानीभूतो हकारः घोषनादसंवारमहाप्राणाख्यप्रयत्नचतुष्टयवान्। तस्य क ख ग घ ङेषु प्रथमतृतीया न भवन्ति। तेषां अल्पप्राणत्वात्। द्वितीयः खकारो न भवति। तस्य अघोषश्वासविवारयत्नकत्वात्। चतुर्थस्तु घकारः घोषनादसंवारमहाप्राणवान्। अतस्सएव घकारो हकारस्य भवतीत्यर्थः। ततश्च वाग्घरिरिति भवति। पूर्वसवर्णाभावे तु वाग् हरिरिति। **शश्छोऽटि** ॥ झय इति पञ्चम्यन्तमनुवर्तते। श इति षष्ठ्येकवचनम्। तदाह। **झयः परस्य शस्येति** ॥ तद् शिव इति स्थिते दकारस्य चुत्वेन जकारे कृते जकारस्य चकार इत्यन्वयः। केनेत्यत आह। **खरि च** ॥ झलाञ्झशीत्यतो झलामिति, अभ्यासे चर्चेत्यतश्चरिति, चानुवर्तते। तदाह। **खरि पर इत्यादिना। इति जकारस्य चकार इति** ॥ स्थानत आन्तर्यादिति भावः। ततः छत्वम्। ननु प्रागित्यपि बोध्यम्। छत्वस्य चुत्वचर्त्वे प्रत्यसिद्धत्वात्। हलो यमामिति सूत्रस्थभाष्यसम्मतसूत्रक्रमे तु चुत्वेन जकारे कृते शस्य छत्वं ततो जकारस्य चर्त्वम्। ननु छत्वात् प्राक् चर्त्वं। चर्त्वं प्रति छत्वस्यासिद्धत्वात्। **तच् छिव इति** ॥ स चासौ शिवश्चेति तस्य शिव इति वा विग्रहः। चोः कुरिति कुत्वन्तु न। चुत्वस्यासिद्धत्वात्। **छत्वममीति वाच्यम्** ॥ शश्छोऽटीति सूत्रे अटीति विहाय अमीति वक्तव्यमित्यर्थः। शश्छोऽमीति सूत्रं पठनीयमिति यावत्। **तच् श्लोकेनेति** ॥ सचासौ श्लोकश्च, तस्य श्लोक इति वा, विग्रहः। लकारस्य अङ्गबहिर्भूतत्वात् तत्परकस्य शकारस्य सूत्रपाठतः छत्वे अप्राप्ते वार्तिकमिदम्। **वाक्श्च्योततीति** ॥ अत्र तु कुत्वं भवत्येव। चकारस्य स्वाभाविकतया चुत्वावयवत्वाभावेन असिद्धत्वाभावात्। अत्र

१२२ । मोऽनुस्वारः । (८-३-२३)

मान्तस्य पदस्यानुस्वारः स्याद्धलि । 'अलोऽन्त्यस्य' (सू ४२) । हरिं वन्दे । 'पदस्य' इति किम् । गम्यते ।

१२३ । नश्चापदान्तस्य झलि । (८-३-२४)

नस्य मस्य चापदान्तस्य झल्यनुस्वारः । यशांसि । आक्रंस्यते । 'झलि' किम् । मन्यते ।

१२४ । अनुस्वारस्य ययि परसवर्णः । (८-४-५८)

स्पष्टम् । अङ्कितः । अञ्चितः । कुण्ठितः । शान्तः । गुम्फितः ।

चकारस्य अम्बहिर्भूतत्वात् तत्परकशकारस्यात्र न छत्वम् । **मोऽनुस्वारः** ॥ पदस्येत्यधिकृतम् । म इति षष्ठ्यन्तं पदस्य विशेषणं, तदन्तविधिः, हलि सर्वेषामित्यतो हलीत्यनुवर्तते । तदाह । **मान्तस्येत्यादिना** ॥ अलोऽन्त्यस्येति उपतिष्ठत इति शेषः । ततश्च मान्तस्य पदस्य यः अन्त्यः अल् तस्येत्यर्थः । पदान्तस्य मस्येति फलितम् । **हरिं वन्द इति** ॥ हरिम् वन्द इति स्थिते मस्यानुस्वारः । **गम्यत इति** ॥ गम्लृ गतौ । कर्मणि लट्, 'भावकर्मणोः' इत्यात्मनेपदं यक् । अत्र मस्य पदान्तत्वाभावान्नानुस्वारः । **नश्चापदान्तस्य झलि** ॥ चकारान्मस्येत्यनुकृष्यते, अनुस्वार इति च । तदाह । **नस्येत्यादिना** । **यशांसीति** ॥ यशस्शब्दात् जस् । जश्शसोरिशिः । 'नपुंसकस्य झलच' इति नुम् । सान्तमहत इति दीर्घः । यशान् सि इति स्थिते, नकारस्य अनुस्वारः । **आक्रंस्यत इति** ॥ क्रमु पादविक्षेपे । आङ्पूर्वात् कर्तरि लृट् 'आङ उद्गमने' इति तङ् । स्यतासी लृलुटोरिति स्यः । स्नुक्रमोरिति नियमान्नेट् । आक्रम् स्य त इति स्थिते मस्य अपदान्तत्वात् पूर्वेणाप्राप्ते वचनम् । मन्यस इति कर्मणि लट् तङ् यक् । अत्र मस्य झल्परकत्वाभावान्नानेनानुस्वारः । अपदान्तत्वाच्च न पूर्वेण । **अनुस्वारस्य ययि । स्पष्टमिति** ॥ अनुवर्त्यपदान्तराभावादिति भावः । **अङ्कित इति** ॥ अङ्क पदे लक्षणेचेति चुरादौ नोपधः । नश्चापदान्तस्येति कृतानुस्वारस्य निर्देश इति केचित् । ण्यन्तात् क्तः इति निष्ठायां सेडिति णिलोपः, अनुस्वारस्यानेन परसवर्णः, परनिमित्तमत्र ककारः, तत्सवर्णः कवर्गः, सः अनुस्वारस्य भवन् नासिकास्थानसाम्यात् ङकार एव भवति । **अञ्चित इति** ॥ अञ्चु गतिपूजनयोः । नोपधः । तस्मात् क्तः । अञ्चेः पूजायामिति इट् । नाञ्चेः पूजायामिति निषेधात् अनिदितामिति नलोपो न । अत्र नश्चापदान्तस्येत्यनुस्वारस्य परसवर्णो ञकारः । **कुण्ठित इति** ॥ 'कुठि प्रतिघाते' इदित्वान्नुम् क्तः इट् । अत्र नश्चेत्यनुस्वारस्य परसवर्णो णकारः । **शान्त इति** ॥ शम उपशमे क्तः । वा दान्तशान्तेत्यादिनिपातनान्नेट् । अनुनासिकस्य क्वीति दीर्घः । नश्चेति मस्यानुस्वारः । तस्य परसवर्णः नकारः । **गुम्फित इति** ॥ गुम्फ ग्रन्थे द्वितीयान्तः चतुर्थान्तो वा नोपधः । क्तः इट । 'नोपधात्थफान्ताद्वा' इत्यकित्त्वपक्षे नलोपो न । अत्र नश्चेत्यनुस्वारस्य परसवर्णः

'कुर्वन्ति' इत्यत्र णत्वे प्राप्ते तस्यासिद्धत्वादनुस्वारे परसवर्णे च कृते तस्यासिद्धत्वान्न णत्वम् ।

१२५ । वा पदान्तस्य । (८-४-५९)

पदान्तस्यानुस्वारस्य ययि परे परसवर्णो वा स्यात् । त्वङ्करोषि—त्वं करोषि । सय्यँन्ता—संयन्ता । सव्वँत्सरः—संवत्सरः । यल्लोकम्—यं लोकम् । अत्रानुस्वारस्य पक्षेऽनुनासिका यवलाः ।

१२६ । मो राजि समः क्वौ । (८-३-२५)

क्विबन्ते राजतौ परे समो मस्य म एव स्यात् । सम्राट् ।

१२७ । हे मपरे वा । (८-३-२६)

मकारः । ननु कृञ्धातोर्लट्, झिः झोन्तः तनादिकृञ्भ्य उः, गुणः रपरत्वम् । 'अत उत् सार्वधातुके' उकारस्य यण् । न भकुर्छुरामिति निषेधात् वोरुपधाया इति दीर्घो न । कुर्वन्तीति रूपम् । अत्र नकारस्य नश्चापदान्तस्येत्यनुस्वारं बाधित्वा परत्वात् रषाभ्यामिति णत्वं स्यात् । नच त्रिपाद्यान्नश्चापदान्तस्येत्यपेक्षया रषाभ्यामित्यस्य परत्वात्पूर्वत्रासिद्धमित्यसिद्धत्वात् अनुस्वारे सति परसवर्णे च नकारस्यैव श्रवणमिति वाच्यम् । एवमपि परसवर्णविधिना प्राप्तस्य नकारस्य रषाभ्यामिति णत्वप्राप्तेर्दुर्वारत्वादित्यत आह । **कुर्वन्तीत्यादि** ॥ रषाभ्यामित्यपेक्षया परसवर्णस्य परतया णत्वे कर्तव्ये अनुस्वारस्थानिकपरसवर्णस्य नकारस्यासिद्धत्वान्न णत्वमिति भावः । **वा पदान्तस्य** ॥ अनुस्वारस्य यधि परसवर्ण इत्यनुवर्तते । तदाह । **पदान्तस्येत्यादिना । त्वङ्करोषीति** ॥ त्वम् करोषीति स्थिते मोऽनुस्वारः परसवर्णो ङकारः । तदभावपक्षे अनुस्वार एव श्रूयते । **अत्रेति** ॥ सम् यन्तेति स्थिते मोऽनुस्वारः । तस्य परनिमित्तभूतयकारसवर्णः अनुनासिक एव यकारो भवति । आन्तर्यात् । तथाच सय्यँन्तेति रूपम् । एवं संवत्सर इति स्थिते अनुस्वारस्य परसवर्णः अनुनासिको वकारः । सव्वँत्सर इति रूपम् । यं लोकमिति स्थिते, अनुस्वारस्य परसवर्णोऽनुनासिको लकारः । यल्लोँकमिति रूपम् । परसवर्णाभावपक्षे तु अनुस्वार एवेत्यर्थः । **मो राजि** ॥ म इति प्रथमान्तं मोऽनुस्वार इत्यतः म इति स्थानषष्ठ्यन्तमनुवर्तते । सम इत्यवयवषष्ठी । प्रत्ययग्रहणपरिभाषया क्विग्रहणेन क्विप्प्रत्ययान्तलाभः । तदाह । **क्विबन्त इत्यादिना । म एवेति** ॥ नत्वनुस्वार इत्यर्थः । मस्य मविधानमनुस्वारनिवृत्त्यर्थमिति भावः । **सम्राडिति** ॥ राजृ दीप्तौ । सम्पूर्वात् सत्सूद्विषद्रुहेत्यादिना क्विप् । व्रश्चेति षत्वम् । जश्त्वेन डत्वम् । चर्त्वम् । अत्र मोऽनुस्वारो न भवति । **हे मपरे वा** ॥ मोऽनुस्वार इत्यतः म इति षष्ठ्यन्तमनुवर्तते । मो राजीत्यतः म इति प्रथमान्तमनुवर्तते । मः परो यस्मादिति विग्रहः । तदाह । **मपरे इत्यादिना** ॥ **ह्रलयतीति**

मपरे हकारे परे मस्य म एव स्याद्वा । 'ह्वल्, ह्मल्, चलने' । किम् ह्मलयति—किं ह्मलयति । 'यवलपरे यवला वेति वक्तव्यम्' (वा ४९०२)

१२८ । यथासंख्यमनुदेशः समानाम् । (१-३-१०)

समसम्बन्धी विधिर्यथासंख्यं स्यात् । किय्ँ ह्यः—किं ह्यः । किव्ँ ह्वलयति—किं ह्वलयति । किल्ँ ह्लादयति—किं ह्लादयति ।

१२९ । नपरे नः । (८-३-२७)

नपरे हकारे परे मस्य नः स्याद्वा । किन् ह्नुते—किं ह्नुते ।

१३० । ङ्णोः कुक्टुक्शरि । (८-३-२८)

ङकारणकारयोः कुक्टुकावागमौ वा स्तः शरि । कुक्टुकोरसिद्धत्वा-

ण्यन्ताण्णिच् । 'ज्वल ह्वल ह्मल नमामनुपसर्गाद्वा' इति मित्वाण्णौ मितां ह्रस्वः । **यवलपरे** ॥ यवलाः पराः यस्मादिति विग्रहः । यवलपरके हकारे परे मस्य म एव वा स्यादित्यर्थः । **यथासङ्ख्यम्** ॥ साम्यमिह सङ्ख्यातो विवक्षितम् । अनुदेशः विधानम् । समानामिति यदि कर्मणि षष्ठी तर्हि स्थान्यादिभिस्समसङ्ख्यानां यत्र विधानम्, यथा एचोऽयवायाव इत्यादौ, तत्रैव यथासङ्ख्यं प्रवृत्तिस्स्यात् । 'समूलाकृतर्जावेषु हन कृञ् ग्रहः' इत्यत्र न स्यात् । तत्र विधेयस्य णमुल एकत्वात् । अतस्समानामिति सम्बन्धसामान्ये षष्ठी । एवञ्च समूलाद्युपपदानां हनादिधातूनाञ्च समसङ्ख्यानामुपादानेन एकस्य प्रत्ययस्य विधिरपि समसङ्ख्याकसम्बन्धी विधिरेवेति तत्रापि यथासङ्ख्यप्रवृत्तिर्निर्बाधा । तदाह । **समसम्बन्धी विधिरिति । यथासङ्ख्यमिति** ॥ सङ्ख्याशब्देनात्र प्रथमत्वद्वितीयत्वादिरूपास्सङ्ख्याघटितधर्माः विवक्षिताः । तान् अनतिक्रम्य यथासङ्ख्यम् । ततश्च एचोऽयवायाव इत्यादिषु प्रथमस्य स्थानिनः प्रथम आदेशः, द्वितीयस्य द्वितीय इत्येवंक्रमेण स्थान्यादेशतन्निमित्तादीनां समसङ्ख्याकानां क्रमेण अन्वयः प्रतिपत्तव्य इति फलितः । प्रकृते च यपरके हकारे परे मकारस्य यकारः, वपरके वः, लपरके लः, इति सिद्ध्यति । **किय्ँ ह्य इति** ॥ मस्य यत्वे रूपम् । ह्य इत्यव्ययम् । पूर्वेद्युरित्यर्थः । यत्वाभावे मोऽनुस्वारः । **किव् ह्वलयतीति** ॥ मस्य वत्वं, ह्वल चलने, णिच् । **किल्ँ ह्लादयतीति** ॥ मस्य लत्वं, ह्लादी सुखे च, णिच् । **नपरे नः** ॥ हे इति वेति म इति चानुवर्तते । नः परो यस्मादिति विग्रहः । तदाह । **नपरे हकार इत्यादिना । किन् ह्नुत इति** ॥ ह्नुङ् अपनयने, मस्य नत्वे रूपम् । तदभावे मोऽनुस्वारः । **ङ्णोः कुक्टुक्शरि** ॥ 'हे मपरे वा' इत्यतः वेत्यनुवर्तते । कुक्च टुक्चेति समाहारद्वन्द्वः । **आगमाविति** ॥ एतच्च आद्यन्तौ टकितावितिलभ्यम् । यथासङ्ख्यपरिभाषया ङकारस्य कुक्, णकारस्य टुक् । उभयत्र ककार इत्, उकार उच्चारणार्थः । प्राङ् षष्ठः, सुगण् षष्ठः, इति स्थिते, यथाक्रमं कुकि टुकि च तयोः पूर्वावयवत्वेन पदान्तत्वात् जश्त्वमाशङ्क्याह । **कुक्टुकोरिति । चयो द्वितीयाः** ॥

जश्त्वं न । 'चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्' (वा ५०२३) । प्राङ्ख्षष्ठः—प्राङ्क्षष्ठः—प्राङ् षष्ठः । सुगण्ठ्षष्ठः—सुगण्ट्षष्ठः—सुगण्षष्ठः ।

१३१ । डः सि धुट् । (८-३-२९)

डात्परस्य सस्य धुड्वा स्यात् । षट्त्सन्नः—षट्सन्तः ।

१३२ । नश्च । (८-३-३०)

नकारान्तात्सस्य धुड्वा स्यात् । सन्त्सः—सन्सः ।

१३३ । शि तुक् । (८-३-३१)

नस्य पदान्तस्य शे परे तुग्वा स्यात् । 'शश्छोऽटि' (सू १२०) इति

पौष्करसादिशब्दस्य चयो द्वितीया इत्यर्थभ्रमं वारयति । **पौष्करसादिराचार्य इति** ॥ तथाच विकल्पः फलतीति भावः । प्राङ्क् षष्ठ इति कुकि रूपम् । चयो द्वितीया इति पक्षे प्राङ् ख् षष्ठ इतिरूपम् । नचात्र खकारस्य खरि चेति चर्त्वम् । खकारारम्भविधिसामर्थ्यात् चयो द्वितीया इति, नादिन्याक्रोश इति सूत्रभाष्यपठितमिदम् । प्राङ् षष्ठ इति कुगभावे रूपम् । एवं ट्वय्यपि सुगण् ट् षष्ठ इत्यादि । **डस्सि धुट्** ॥ ड इति पञ्चमी । ततश्च तस्मादित्युत्तरस्येति परिभाषया सीति सप्तमी षष्ठी सम्पद्यते डात्परस्य सस्येति । हे मपरे वेत्यतो वेत्यनुवर्तते । तदाह । **डात्परस्येत्यादिना** ॥ तस्मिन्निति निर्दिष्ट इति नेह भवति । उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् परत्वादिति न्यायात् । धुट् इति चतुर्थधकारनिर्देशः । टकार इत् । उकार उच्चारणार्थः । धुट् इति द्वितीयविधौ तत्सामर्थ्याच्चर्त्वेन स्यात् । अन्यथा तकारमेव विदध्यात् । चतुर्थविधेस्तु न तत्सामर्थ्यम् । प्रथमविधौ तस्य चयो द्वितीया इत्यापत्तौ तन्निवृत्त्या चरितार्थत्वात् । **षट् सन्त इति** ॥ षप् इति पकारस्य जश्त्वेन डः, षद् सन्त इति स्थिते चर्त्वस्यासिद्धत्वात् डात् परत्वात् सस्य धुट् आद्यवयवः । तस्य चर्त्वेन तकारः । चयो द्वितीया इति तु न । चर्त्वस्यासिद्धत्वात् । ततो लक्ष्यभेदात् डस्य चर्त्वेन टः । **नश्च** ॥ सि धुट् इति, वेतिचानुवर्तते । न इति पञ्चमी । तस्मादित्युत्तरस्येति परिभाषया सीति षष्ठी सम्पद्यते । तदाह । **नकारान्तात् परस्येति । सन्त्सन्त इति** ॥ धुटि धस्य चर्त्वम् । **शि तुक्** ॥ पूर्वसूत्रात् न इति पञ्चम्यन्तमनुवृत्तमिह षष्ठ्यन्तमाश्रियते । शब्दाधिकाराश्रयणात् पदस्येत्यधिकृतम् अवयवषष्ठ्यन्तमाश्रीयते । हे मपरे वेत्यतो वेत्यनुवृत्तम् । तदाह । **पदान्तस्य नस्येत्यादिना** ॥ नान्तस्य पदस्येत्युचितम् । उकार उच्चारणार्थः । सन् शम्भुरिति स्थिते नकारस्यान्तावयवस्तुक् । ननु तुग्ग्रहणं व्यर्थम् । डस्सि धुडित्यतः **धुडेवानुवृत्य नकारात्** परस्य शस्य विधीयताम् । खरि चेति चर्त्वे सनूत्शम्भुरित्यस्य सिद्धेरित्यत आह । **शश्छोऽटीति छत्वविकल्प इति** ॥ शकारस्येति शेषः । धुटो विधौ तु तस्य परादित्वात्पदान्तत्वाभावात् छत्वन्न स्यात् । छत्वविधेः पदाधिकारस्थत्वेन पदान्तात् झयः परस्य तस्य तत्प्रवृत्ते-

छत्वविकल्पः। पक्षे 'झरो झरि–' (सू ७१) इति चलोपः। सञ्छम्भुः–सञ्च्छम्भुः–सञ्च्शम्भुः–सञ्शम्भुः।

अछौ अचछा अचशा अशाविति चतुष्टयम्।
रूपाणामिह तुक्छत्वचलोपानां विकल्पनात्॥

१३४। ङमो ह्रस्वादचि ङमुण्नित्यम्। (८-३-३२)

ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्परस्याचो नित्यं ङमुडागमः स्यात्। प्रत्यङ्ङात्मा। सुगण्णीशः। सन्नच्युतः।

र्भाष्ये सिद्धान्तितत्वात्। अन्यथा विस्पष्टो विरप्फशिन्नित्यादावपि शस्य छत्वापत्तेः। **पक्ष इति॥** कदा चित् झरो झरीति तुकस्तकारस्य श्चुत्वमापन्नस्य लोप इत्यर्थः। **सञ् छम्भुरिति॥** तकारस्य चुत्वमापन्नस्य लोपे सति नकारस्य श्चुत्वेन ञकारे रूपम्। **सञ्च् छम्भुरिति॥** चुत्वमापन्नस्य तकारस्य लोपाभावे नकारस्य च श्चुत्वे ञकारे रूपम्। तुको जश्त्वन्तु न। जश्त्वे तस्यासिद्धत्वात्। अत एव श्चुत्वोत्तरमपि जश्त्वन्न। **सञ् चे शम्भुरिति॥** शस्य छत्वाभावे तकारनकारयोश्चुत्वे च रूपम्। **सञ्शम्भुरिति॥** तुकः अभावे नकारस्य चुत्वे रूपम्। तदिदं रूपचतुष्टयं उक्तक्रमं श्लोकेन सङ्गृह्णाति। **अछाविति॥** तुक्छत्वचलोपानां विकल्पनात् अछौ अचछा अचशा अशाविति रूपाणाञ्चतुष्टयमित्यन्वयः। **ङमो ह्रस्वात्॥** ङम् प्रत्याहारः। ङम इति पञ्चम्यन्तम्। तद्विशेषणत्वात् पदस्येत्यधिकृतं पञ्चम्यन्ततया विपरिणम्यते। ङम इति च ह्रस्वादिति विशेषणसम्बन्धमनुभूय पदविशेषणत्वं भजत् तदन्तपरम्। ङम इति पञ्चमी-बलात् अचीति सप्तमी पञ्चम्यर्थे। तदाह। **ह्रस्वात्पर इत्यादिना। ङमुडागम इति॥** टकार इत्, उकार उच्चारणार्थः। संज्ञायां कृतं टित्वमानर्थक्यात् तदङ्गन्यायात् संज्ञिभि-स्सम्बध्यते। ततश्च डुट् णुट् नुट् इति त्रय आगमाः फलिताः। टित्वादच आद्यवयवाः यथासंख्यं प्रवर्तन्ते। हे मपरे वेति वाग्रहणानुवृत्तिशङ्काव्युदासार्थं नित्यग्रहणम्। **प्रत्यङ्ङात्मा इति॥** प्रत्यङ् आत्मेति स्थिते आकारात् प्राक् डुट्। **सुगण्णीश इति॥** गण सङ्ख्याने, चुरादिः। ण्यन्ताद्विचि णिलोपः। नतु क्विप्। अनुनासिकस्य क्वीनि दीर्घप्रसङ्गात्। ङमुटि कर्तव्ये णिलोपस्तु न स्थानिवत्। पूर्वत्रासिद्धे न स्थानिवदित्युक्तेः। सुगण् ईश इति स्थिते ईकारात् प्राक् णुट्। **सन्नच्युत इति॥** सन् अच्युत इति स्थिते अकारात् प्राक् नुट्। नच परमदण्डि-नाविल्यत्र परम दण्डिन् औ इति स्थिते प्रत्ययलक्षणेन अन्तर्वर्तिविभक्त्या पदत्वान्नुट् स्यादिति वाच्यम्। उत्तरपदत्वेचापदादिविधाविति प्रत्ययलक्षणप्रतिषेधात्। वस्तुतस्तु उत्तरपदत्वे चेति प्रत्ययलक्षणप्रतिषेधो यत्र उत्तरपदस्य कार्यित्वं तत्रैव प्रवर्तते। अन्यथा पदव्यवायेऽपीति निषेधो माधवापेनेल्यत्र न स्यात्। अतः परमदण्डिनेल्यत्र ङमुड्वारणाय उञि च पदे इल्यतः पदे इल्यनुवर्त्य अजादेः पदस्य ङमुडिति व्याख्येयमिति शब्देन्दुशेखरे प्रपञ्चितम्। **समस्तुटि॥**

१३५ । समः सुटि । (८-३-५)

समो रुः स्यात्सुटि । 'अलोऽन्त्यस्य' (सू ४२)

१३६ । अत्रानुनासिकः पूर्वस्य तु वा (८-३-२)

अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा स्यात् ।

१३७ । अनुनासिकात्परोऽनुस्वारः । (८-३-४)

अनुनासिकं विहाय रोः पूर्वस्मात्परोऽनुस्वारागमः स्यात् । 'खरवसानयोर्विसर्जनीयः' (सू ७६) ।

१३८ । विसर्जनीयस्य सः । (८-३-३४)

खरि विसर्जनीयस्य सः स्यात् । एतदपवादेन 'वा शरि' (सू १५१) इति पाक्षिके विसर्गे प्राप्ते । सम्पुङ्कानां सो वक्तव्यः' (वा ४८९२) । सँस्क-

---

सम इति षष्ठ्यन्तम् । 'मतुवसोरुसम्बुद्धौ' इत्यतः रुग्रहणमनुवर्तते । तदाह । **समो रुरुस्यात् सुटीति** ॥ रु इत्युकार इत् । अलोऽन्त्यस्येति उपतिष्ठत इति शेषः । सम्पूर्वात् करोतेस्तृचि 'सम्परिभ्यां करोतौ भूषणे' इति सुडागमे सम् स्कर्तेति स्थिते मस्य रुत्वम् । सर् स्कर्तेति स्थिते । **अत्रानुनासिकः** ॥ 'मतुवसो रुसम्बुद्धौ' इति रुत्वविध्यनन्तरमिदं पठितम् । अतः अत्रेत्यनेन रुप्रकरणे इत्यर्थो गम्यते । पूर्वत्वञ्च रु इत्यपेक्षया ज्ञेयम । प्रकृतत्वात् । तदाह । **अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा स्यादिति** ॥ उत्तरसूत्रे अनुनासिकाभावपक्षानुवादादेव सिद्धे वाग्रहणं स्पष्टार्थम् । परस्य नित्यं रुत्वम्, पूर्वस्य तु अनुनासिकविकल्प इति वैषम्यस्य सिद्धस्यैव द्योतनार्थस्तुशब्दोऽपि स्वरसार्थ एव । इदमेवाभिप्रेत्य मूले विवरणवाक्ये वाग्रहणन्तु व्यक्तमिति प्रौढमनोरमायां मूलकृतैव उक्तम् । अनेन सूत्रेण सर् इत्यत्र सकारादकारः । अनुनासिकः सँस्कर्ता । **अनुनासिकात्** ॥ अनुनासिकादिति ल्यब्लोपे पञ्चमी । विहायेति गम्यम् । पूर्वस्येत्यनुवर्तते । पञ्चम्यन्ततया विपरिणम्यते । पूर्वत्वञ्च रुत्वकृतरेफापेक्षया । परत्वञ्च रोर्यः पूर्ववर्णस्तदपेक्षया । तदाह । **अनुनासिकं विहायेति** ॥ अनुनासिकाभावपक्षे इत्यर्थः । आगमत्वं परशब्दलभ्यम् । ततश्च सकारादकारस्य अनुनासिकाभावपक्षे अकारात् परः अनुस्वारागमः । संर्स्कर्ता । अथ रेफस्य विसर्गविधिं स्मारयति । **खरवसानयोरिति । विसर्जनीयस्य सः** ॥ खरवसानयोरित्यतो मण्डूकप्लुत्या खरीत्यनुवर्तते । एकदेशे स्वरितत्वप्रतिज्ञानात् । केचित्तु विसर्गश्रवणात् खरीत्यर्थिकम् । अवसानस्य तु न सम्बन्धः । व्याख्यानादित्याहुः । तदाह । **खरीति** ॥ विसर्जनीयस्य स इति सिद्धे सम्पुङ्कानामिति पुनर्विधानं व्यर्थमित्यत आह । **एतदपवादेनेति** ॥ पुनर्विधानं वा शरीति पाक्षिकविसर्गबाधनार्थमिति भावः । **सम्पुङ्कानां-**

र्ता—संस्कर्ता। 'समो वा लोपमेके' इति भाष्यम्। लोपस्यापि रुप्रकरणस्थत्वादनुस्वारानुनासिकाभ्यामेकसकारं रूपद्वयम्। द्विसकारं तूक्तमेव। तत्र 'अनचि च' (सू ४८) इति सकारस्य द्वित्वपक्षे त्रिसकारमपि रूपद्वयम्। अनुस्वारविसर्गजिह्वामूलीयोपध्मानीययमानामकारोपरि शर्षु च पाठस्योपसङ्ख्यातत्वेनानुस्वारस्याप्यच्त्वात्। अनुनासिकवतां त्रयाणां 'शरः खयः' (वा ५०१९) इति कद्वित्वे षट्। अनुस्वारवतामनुस्वारस्यापि द्वित्वे द्वादश। एषामष्टाद-

---

मिति ॥ सम् पुम् कान् एतेषां विसर्गस्य सकारो वक्तव्य इत्यर्थः। अनेन वार्तिकेनात्र विसर्गस्य नित्यमेव सत्वमिति शेषः। **सँस्स्कर्तेति** ॥ अनुनासिकपक्षे रूपम्। **संस्स्कर्तेति** ॥ अनुस्वारपक्षे रूपम्। उभयत्रापि द्विसकारत्वमेव। **समोवेति** ॥ समो मस्य सुटि लोपे एके आचार्या इच्छन्तीत्यर्थः। एकशब्दोऽन्यपर्यायः। 'एके मुख्यान्यकेवला' इत्यमरः। लोपपक्षेऽपि अनुस्वारानुनासिकाभ्यामेकसकारं रूपद्वयमित्याह। **लोपस्यापीति** ॥ अत्रानुनासिकः पूर्वस्य तु वेत्यत्र रोः पूर्वस्येत्युपलक्षणं रुप्रकरणविधेयस्य लोपस्यापि। अन्यथा रुप्रकरण इत्यर्थकस्य अत्रेत्यस्य वैयर्थ्यात्। एवमनुनासिकात् परोऽनुस्वार इत्यत्र रोः पूर्वस्मादित्यपि। ततश्च समो मलोपस्यापि रुप्रकरणस्थतया लोपात्पूर्ववर्तिनः अकारस्य कदाचिदनुनासिकः तदभावपक्षे अकारात् परः अनुस्वारागमः इत्येवमनुस्वारानुनासिकाभ्यामेकसकारं रूपद्वयमित्यर्थः। **द्विसकारन्तु उक्तमेवेति** ॥ रुत्वपक्षे इति शेषः। ननु लोपपक्ष एव अनचि चेति सुट्सकारस्य द्वित्वेन द्विसकाररूपद्वयस्य सिद्धत्वात् समस्सुटीति रुत्वविधानं व्यर्थमित्यत आह। **तत्रेति** ॥ तत्र द्विसकाररूपयोः मध्ये रुत्वे सति तत्स्थानिकसकारस्य अनचि चेति द्वित्वपक्षे त्रिसकारमपि रूपद्वयमित्यर्थः। एतदर्थमेव रुत्वविधानमिति भावः। स्कोरिति लोपस्तु न। रुत्वस्यासिद्धत्वात्। नच लोपपक्ष एव सुट्सकारस्य अनचि चेति द्वित्वे प्रथमसकारस्य तेनैव सूत्रेण पुनर्द्वित्वे त्रिसकारमपि रूपद्वयं सिद्धमिति समो रुत्वविधिर्व्यर्थ एवेति वाच्यम्। लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिरिति न्यायात्। ननु वर्णसमाम्नाये अनुस्वारस्य पाठाभावात् अनच्त्वात् ततः परस्य सकारस्य कथमनुस्वारपक्षे द्वित्वमित्यत आह। **अनुस्वारविसर्गेति** ॥ एतच्च हयवरट्सूत्रे भाष्ये स्थितम्। **अकारोपरीति** ॥ इकाराद्युपरि पाठे पयःसु इत्यादौ इणः परस्य विहितमादेशप्रत्ययययोरिति षत्वं स्यादिति भावः। कश्चित्तु इणष्ष इति षत्वं स्यादिति वदन् बभ्राम। तत्र विसर्गस्यैव षत्वविधेः। एवञ्च अनुनासिकपक्षे एकसकारं द्विसकारं त्रिसकारमिति त्रीणि रूपाणि। एवमनुस्वारपक्षेऽपि त्रीणि रूपाणीति स्थितम्। **अनुनासिकवतामिति** ॥ अनुनासिकपक्षे एकद्वित्रिसकाराणां कद्वित्वे त्रीणि, तदभावे त्रीणीति षडित्यर्थः। ननु ककारस्य अचः परत्वाभावात् कथमनचि चेति द्वित्वमित्यत आह। **शरः खय इतीति**॥ शरः परस्य खयो द्वे वा स्त इति वार्तिकार्थः। एवञ्च अनुनासिकपक्षे द्विककाराणि त्रीणि रूपाणि एककाराणि त्रीणीति षड्रूपाणि स्थितानि। अनुस्वारपक्षे तु द्वादशरूपाणीत्याह। **अनुस्वारवतामिति** ॥ अनुस्वारस्यापीत्यपिना ककारसङ्ग्रहः।

शानां तकारस्य द्वित्वे वचनान्तरेण पुनर्द्वित्वे चैकतं द्वितं त्रितमिति चतुष्पञ्चाशत्। अणोऽनुनासिकत्वेऽष्टोत्तरं शतम्।

१३९। पुमः खय्यम्परे। (८-३-६)

अम्परे खयि पुमश्शब्दस्य रुः स्यात्। व्युत्पत्तिपक्षे 'अप्रत्ययस्य' (सू १५५) इति षत्वपर्युदासात्≥क≤ पयोः प्राप्तौ, अव्युत्पत्तिपक्षे तु षत्व-

---

अनुस्वारपक्षे एकद्वित्रिसकाराणां रूपाणामनुस्वारस्य शर्षु पाठस्योपसङ्ख्यानत्वेन शर्त्वात् द्वित्वविकल्पे सति द्वयनुस्वाराणि त्रीणि (३) एकानुस्वाराणि त्रीणि (३) इति षट् ॥ (६)॥ अथ षण्णामप्येषां शरः खय इति ककारस्य द्वित्वविकल्पे सति द्विककाराणि षट् (६) ॥ एककाराणि षट् (६) इत्यनुस्वारपक्षे द्वादश (१२) इत्यर्थः। एवञ्च अनुनासिकपक्षे षट् (६) अनुस्वारपक्षे द्वादश (१२) इत्यष्टादश रूपाणि। **एषामिति** ॥ उक्तानां अष्टादशानां रूपाणां तकारस्य अचो रहाभ्यामिति द्वित्वविकल्पे सति प्रथमस्य तकारस्य यणोमय इति पुनर्द्वित्वे एकैकस्य एकतं द्वितं त्रितमिति सङ्कलनया एकतान्यष्टादश (१८) द्वितान्यष्टादश (१८) त्रितान्यष्टादश (१८) इति सङ्कलनया चतुरधिकपञ्चाशद्रूपाणि (५४) सम्पद्यन्तेऽन्यर्थः। **अणोऽनुनासिकत्व इति** ॥ अणोऽप्रगृह्यस्यानुनासिक इति तकारादकारस्य अनुनासिकत्वविकल्पे सति आनुनासिक्ये चतुष्पञ्चाशत् (५४) तदभावे चतुष्पञ्चाशत् (५४) इति सङ्कलनया अष्टाधिकं शतं (१०८) रूपाणि सम्पद्यन्तेत्यर्थः। **पुमः** ॥ रुग्रहणमनुवर्तते। अम् परो यस्मादिति विग्रहः। तदाह। **अम्परे खयीति** ॥ पुमान् कोकिल इति कर्मधारये सुपो धातुप्रातिपदिकयोरिति सुब्लुकि संयोगान्तस्य लोप इति सकारलोपे पुम् कोकिल इति स्थिते मस्य रुत्वम् अनुनासिकानुस्वारविकल्पः विसर्गः सम्पुङ्कानामिति सः। ननु विसर्जनीयस्य स इत्येव सिद्धे सम्पुङ्कानामित्यत्र पुङ्ग्रहणं व्यर्थमित्यत आह। **व्युत्पत्तीत्यादि** ॥ कुप्वोः कः पौ च इति विधिं बाधितुं पुङ्ग्रहणमित्यर्थः। ननु 'इदुदुपधस्य चाप्रत्ययस्य' इति षत्वविधिः कुप्वोरित्यस्यापवादः। अतस्तं षत्वविधिं बाधितुं पुङ्ग्रहणमित्येव वक्तुमुचितमित्यत आह। **अप्रत्ययस्येति षत्वपर्युदासादिति** ॥ पूजो डुम्सुञित्यौणादिकप्रत्ययस्थमकारस्थानिकत्वात् विसर्गस्येति भावः। ननु उणादयः अव्युत्पन्नानि प्रातिपदिकानीति आयनेयीति सूत्रस्थभाष्यवार्त्तिकात्या औणादिकप्रत्ययान्तेषु प्रकृतिप्रत्ययविभागाभावात् कथमिहाप्रत्ययस्येति पर्युदास इत्यत आह। **व्युत्पत्तिपक्ष इति** ॥ औणादिकशब्देषु प्रकृतिप्रत्ययविभागव्युत्पादनमस्तिनास्तीति पक्षद्वयमादेशप्रत्यययोरिति सूत्रभाष्ये स्थितम्। तत्र व्युत्पत्तिपक्षे पुंसशब्दस्य डुम्सुन् प्रत्ययान्ततया तत्र मकारस्थानिकविसर्गस्य अप्रत्ययस्येति पर्युदासेन इदुदुपधस्यचाप्रत्ययस्येति षत्वस्य तत्र न प्रसक्तिः। अतः तत्र कुप्वोरिति विधिं बाधितुं सम्पुङ्कानामिति पुङ्ग्रहणमित्यर्थः। **अव्युत्पत्तीति** ॥ औणादिकशब्देषु प्रकृतिप्रत्ययविभागाभावपक्षे अप्रत्ययस्येति पर्युदासस्यात्राप्रसक्तेरिदुदुपधस्येति प्रसक्तं षत्वं बाधितुं सम्पुङ्कानामिति पुङ्ग्रहणमित्यर्थः। पुँस्कोकिल

प्राप्तौ । सम्पुङ्कानाम्–' (वा ४८९२) इति सः । पुँस्कोकिलः–पुंस्कोकिलः । पुँस्पुत्रः–पुंस्पुत्रः । 'अम्परे' किम् । पुंक्षीरम् । 'खयि' किम् । पुंदासः । 'ख्याञ्चादेशे न' (वा १५९१) । पुंख्यानम् ।

१४० । नश्छव्यप्रशान् । (८-३-७)

अम्परे छवि नकारान्तस्य पदस्य रुः स्यात् । न तु प्रशान्शब्दस्य । विसर्गः । सत्वम् । श्चुत्वम् । शार्ङ्गिँश्छिन्धि–शार्ङ्गिंश्छिन्धि । चक्रिँस्त्रायस्व–चक्रिंस्त्रायस्व । पदस्य किम् । हन्ति । 'अम्परे' किम् । सन्त्सरुः । त्सरुः खड्गमुष्टिः । 'अप्रशान्' किम् । प्रशान्तनोति ।

१४१ । नॄन्पे । (८-३-१०)

'नॄन्, इत्यस्य रुः स्याद्वा पकारे परे ।

इत्यनुनासिकपक्षे रूपम् । पुंस्कोकिल इत्यनुस्वारपक्षे रूपम् । ननु 'चक्षिङ् व्यक्तायां वाचि' अस्मात् ल्युट्, अनादेशः, चक्षिङः ख्याञ्, पुंसः ख्यानं पुङ्ख्यानमित्यत्रापि पुमो मस्य रुत्वं स्यादित्यत आह । **ख्याञ्चादेशे नेति** ॥ भाष्ये 'चक्षिङः ख्याञ्' इति पठित्वा पूर्वत्रासिद्धमित्यसिद्धकाण्डे रषाभ्यामिति णत्वविध्यनन्तरं 'ख्शाञ्चश्शस्य यो वा' इति पठितामिति वक्ष्यते । एवञ्च यत्वस्यासिद्धतया खकारस्य अम्परकत्वाभावात् 'पुमः खयि' इति रुत्वन्नेत्यर्थः । **पुंख्यानमिति** ॥ 'मोऽनुस्वारः' 'वा पदान्तस्य' इति परसवर्णविकल्पः । नच वर्जने प्रतिषेधः असनयो श्चेति अनादेशे परे प्रतिषेधात् कथमत्र ख्याञ्चादेश इति वाच्यम् । ख्यादेशप्रयोजनपरवार्तिके पुङ्ख्यानमित्यादिप्रयोगात्तदुपपत्तेः । **नश्छव्यप्रशान्** ॥ न इति षष्ठ्यन्तं पदस्येत्याधिकृतस्य विशेषणम् । तदन्तविधिः । अम्परे इत्यनुवर्तते, रु इति च । तदाह । **अम्पर इत्यादिना** ॥ अप्रशानिति षष्ठ्यर्थे प्रथमा । तदाह । **नत्विति । विसर्ग इति** ॥ शार्ङ्गिन् छिन्धि, चक्रिन् त्रायस्व, इति स्थिते नकारस्यानेन रुत्वं अनुनासिकानुस्वारविकल्पः । ततो विसर्गः सत्वं, सस्य श्चुत्वेन शकार इत्यर्थः । **शार्ङ्गिँश्छिन्धीति** ॥ अनुनासिकपक्षे रूपम् । **शार्ङ्गिंश्छिन्धीति** ॥ अनुस्वारपक्षे रूपम् । एवञ्चक्रिँस्त्रायस्वेत्यनुनासिकपक्षे । अनुस्वारपक्षे तु चक्रिंस्त्रायस्वेति । त्रैङ् पालने । ङित्त्वादात्मनेपदी । त्राहीति प्राचीनग्रन्थस्तु प्रामादिकः । त्रायत इति त्राः त्रा इवाचरति ला इत्याचारक्विबन्तात् लोट् परस्मैपदमिति वा कथञ्चित् समाधेयम् । **प्रशानिति** ॥ प्रपूर्वात् शाम्यतेः क्विप् । अनुनासिकस्य क्वीति दीर्घः । मो नो धातोरिति मस्य नः । तस्यासिद्धत्वान्नलोपो न । **नॄन्पे** ॥ नॄन् इति द्वितीयान्तं शब्दस्वरूपपरं षष्ठ्यन्तम् । षष्ठ्यास्सौत्रो लुक् । नलोपाभावोऽपि सौत्र एव । मतुवसोरु इत्यतः रु इत्यनुवर्तते । उभयथर्क्ष्वित्यतः उभयथेत्यनुवर्तते । कदाचित् भवति कदाचिन्नभवतीत्येवमुभयथा रुः प्रत्येतव्य इत्यर्थः । विकल्प इति यावत् । तदाह । **नॄनित्यस्येत्या-**

१४२ । कुप्वोः ×क×पौ च । (८-३-३७)

कवर्गे पवर्गे च परे विसर्जनीयस्य क्रमाज्जिह्वामूलीयोपध्मानीयौ स्तः । चाद्विसर्गः । येन नाप्राप्तन्यायेन 'विसर्जनीयस्य सः' (सू १३८) इत्यस्यापवादोऽयम् । न तु 'शर्परे विसर्जनीयः' (सू १५०) इत्यस्य । तेन वासः क्षौमम्' इत्यादौ विसर्ग एव । नॄँ×पाहि–नॄं×पाहि–नॄँः पाहि–नॄंः पाहि–नॄन्पाहि ।

१४३ । कानाम्रेडिते । (८-३-१२)

दिना ॥ अलोऽन्त्यस्य । नॄन् पाहीति स्थिते नस्य रुत्वम् । अनुनासिकानुस्वारविकल्पः । नस्वसानयोरिति रेफस्य नित्यं विसर्गे प्राप्ते । **कुप्वोः×क×पौ च** ॥ कुप्वोः इतिच्छेदः । ओःसम्मस्य रुत्वे तस्य खर्परत्वात् विसर्गः । जिह्वामूलीयस्य शर्पूर्वसङ्ख्यातत्वेन शर्त्वात् तस्य च विसर्गस्य खर्परे शरि वा विसर्गलोपो वक्तव्य इति लोपः । अतः सूत्रे कुप्वोरिति न विसर्गोऽनुवर्त्यते । विसर्जनीयस्य स इत्यतो विसर्जनीयस्येत्यनुवर्तते । तदाह । **कवर्गे इत्यादिना** ॥ क्रमादिति यथासङ्ख्यसूत्रलभ्यम् । **चाद्विसर्ग इति** ॥ 'शर्परे विसर्जनीयः' इत्यतो विसर्जनीय इत्यनुकृष्यत इत्यर्थः । चकारः पक्षे विसर्गसमुच्चयार्थ इति यावत् । अन्यथा जिह्वामूलीयोपध्मानीयाभ्यां विसर्गस्य बाध एव स्यादिति भावः । एवञ्च प्रकृते पकारे परे विसर्गस्य सत्वं बाधित्वा कदाचिदुपध्मानीयः कदाचिद्विसर्गः । तयोः उच्चारणे भेदः । इहादेशयोः कपावुच्चारणार्थौ, नतु विधेयकोटिप्रविष्टौ । ननु कुप्वोरिति जिह्वामूलीयोपध्मानीयविसर्गविधिना यथा विसर्जनीयस्य सत्वं बाध्यते, तथा शर्परे विसर्जनीय इति केवलविसर्गविधिरपि बाध्येत । तथाच वासः क्षौममित्यत्रापि कुप्वोरिति कदाचित् जिह्वामूलीयः कदाचिद्विसर्गश्च स्यातां । इष्यते तु केवलविसर्गः इत्यत आह । **येन नाप्राप्तेति** ॥ 'येन नाप्राप्ते यो विधिरारभ्यते स तस्यापवादः' । इति न्यायः । प्राप्तेति भावे क्तः । येनेति कर्तरि तृतीया । कर्तृकर्मणोरिति षष्ठी तु न भवति । नलोकेति निषेधात् । द्वौ नञावावश्यकत्वं द्योतयतः । यस्य विधेरवश्यं प्राप्तौ सत्यामित्यर्थः । अनेन न्यायेन कुप्वोरिति विधिः विसर्जनीयस्य स इत्यस्यैवापवादः । सत्वे प्राप्त एव तदारम्भात् । शर्परे विसर्जनीय इत्यस्य तु कुप्वोरिति नापवादः । कः करोतीत्यादौ शर्परे खरीत्यप्राप्तेऽपि कुप्वोरित्यस्यारम्भादित्यर्थः । **तेनेति** ॥ वासः क्षौममित्यादौ कुप्वोरिति विधिना शर्परे इत्यस्य बाधाभावेन शर्परे खरीति केवलविसर्ग एव भवतीत्यर्थः । नॄँ×पाहि, नॄं×पाहि, इत्युपध्मानीयपक्षे आनुनासिक्ये अनुस्वारे च सति रूपद्वयम् । नॄँः पाहि, नॄंः पाहि, इति विसर्गपक्षे अनुनासिकानुस्वाराभ्यां रूपद्वयम् । नॄन् पाहीति रुत्वाभावे रूपम् । तथाच पञ्च रूपाणि । सूत्रे पे इत्यकार उच्चारणार्थः । तथाच नॄन् पुनातीत्यादावपि पञ्च रूपाणि भवन्ति । **कानाम्रेडिते** ॥ कानिति द्वितीयान्तं स्वरूपपरं षष्ठ्यन्तम् । षष्ठ्यास्त्रौत्रो लुक् । नलोपाभावोऽपि सौत्र एव । अलोऽन्त्यपरिभाषया कान्शब्दान्तस्येति लभ्यते ।

कान्नकारस्य रुः स्यादाम्रेडिते परे। 'सम्पुङ्कानाम्' (वा ४८९२) इति सः। यद्वा।

१४४। कस्कादिषु च। (८-३-४८)

≍क≍पयोरपवादः। एष्विण उत्तरस्य विसर्गस्य षः स्यात्। अन्यस्य तु सः। काँस्कान्—कांस्कान्। कस्कः। कौतस्कुतः। सर्पिष्कुण्डिका। धनुष्कपालम्। आकृतिगणोऽयम्।

१४५। संहितायाम्। (६-१-७२)

इत्यधिकृत्य।

१४६। छे च। (६-१-७३)

रु इत्यनुवर्तते। तदाह। **कान्नकारस्येत्यादिना**। **सम्पुङ्कानामिति** ॥ कान् इत्यस्य वीप्सायां द्विर्वचने कान् कान् इति स्थिते प्रथमनकारस्य रुत्वे अनुनासिकानुस्वारविकल्पः। रेफस्य विसर्गः। तस्य विसर्जनीयस्य स इति सत्वं बाधित्वा कुप्वोरिति प्राप्तौ सम्पुङ्कानामिति सत्वमित्यर्थः। वस्तुतस्तु सम्पुङ्कानामिति वार्त्तिके कान् इति निष्फलमित्याह। **यद्वेति** ॥ **कस्कादिषु च** ॥ इण इत्यनुवर्तते। इण इति पञ्चम्यन्तम्। विसर्जनीयस्य स इत्यतो विसर्जनीयस्येत्यनुवर्तते। कस्कादिष्विति विषयसप्तमी। कस्कादिगणे इणः परस्य विसर्गस्य षस्यादित्यर्थः। सोऽपदादाविति तः स इति प्रथमान्तमनुवर्तते। कस्कादिषु अनिणः परस्य विसर्गस्य सत्वं स्यादित्यर्थः। तदेवं वाक्यद्वयं सम्पद्यते। कस्कादिषु तथाविधानामेव कृतषत्वसत्वानां निर्देशादयं विषयविभागः। **≍क≍पयोरपवाद इति** ॥ ≍क≍पयोरित्युपलक्षणं कुप्वोरिति विहितविसर्गस्यापि। **अन्यस्य तु स इति** ॥ प्रकृते विसर्गस्य इणः परत्वाभावात् न षत्वम्। किन्तु सत्वमित्यर्थः। काँस्कानिति अनुनासिकपक्षे रूपम्। कांस्कानिति अनुस्वारपक्षे रूपम्। अथ कस्कादिगणं पठति। **कस्क इत्यादिना** ॥ वीप्सायां द्वित्वे पूर्वखण्डे अकारात् परस्य विसर्गस्य सत्वम्। क≍ कोऽत्र भोः इति प्रयोगे तु संहिताविरहात् सत्वाभावः। कस्कादिषु चेत्यस्य 'तयोर्य्वावचि संहितायाम्' इति संहिताधिकारस्थत्वादित्याहुः। **कौतस्कुत इति** ॥ वीप्सायां द्विर्वचने कुतः कुत आगत इत्यर्थे तत आगत इत्यण्। अव्ययानां भमात्रे टिलोपः। अतएव निपातनादव्ययात्त्यबिति न। **सर्पिष्कुण्डिकेति** ॥ अत्र इणः परत्वात् षत्वम्। एवं धनुष्कपालं, चतुष्कपालमित्यत्रापि। ननु कस्कादिगणे कांस्कानित्यस्य पाठाभावात् कथं सत्वमित्यत आह। **आकृतिगणोऽयमिति** ॥ एवञ्च कस्कादित्वादेव कांस्कानित्यत्र सत्वसिद्धेस्सम्पुङ्कानामित्यत्र कान् ग्रहणं न कर्तव्यमिति भावः। **संहितायाम्। इत्यधिकृत्येति** ॥ छे चेत्यादि विधीयते इति शेषः। यद्यप्येतदिको यणचीत्यत्रैव वक्तव्यं, तथापि सूत्रक्रमानुरोधादिहोक्तम्। **छे च** ॥

ह्रस्वस्य छे परे तुगागमः स्यात्संहितायाम् । चुत्वस्यासिद्धत्वाज्जश्त्वेन दः । ततश्चर्त्वस्यासिद्धत्वात्पूर्वं चुत्वेन जः । तस्य चर्त्वेन चः । चुत्वस्यासिद्धत्वात् 'चोः कुः' (सू ३७८) इति कुत्वं न । स्वच्छाया । शिवच्छाया ।

१४७ । आङ्माङोश्च । (६-१-७४)

एतयोश्छे परे तुक्स्यात् । 'पदान्ताद्वा' (सू १४९) इति विकल्पापवादः । आच्छादयति । माच्छिदत् ।

१४८ । दीर्घात् । (६-१-७५)

दीर्घाच्छे परे तुक्स्यात् । । दीर्घस्यायं तुक्, न तु ह्रस्य । '—सेनामुराच्छाया—' (सू ८२८) इति ज्ञापकात् । चेच्छिद्यते ।

१४९ । पदान्ताद्वा । (६-१-७६)

ह्रस्वस्य पितीत्यतः ह्रस्वस्येति तुगिति चानुवर्तते । संहितायामित्यधिकृतम् । तदाह । **ह्रस्वस्येति** ॥ तुकः ककार इत् । उकार उच्चारणार्थः । किंचात ह्रस्वस्यान्तावयवः । स्वस्य छायेति षष्ठीसमासे सुब्लुकि वकारादकारस्य तुकि स्वत छायेति स्थिते वस्तुगत्या प्रक्रियाक्रमं दर्शयति । **चुत्वस्येत्यादिना चुत्वेन जः इत्यन्तेन** ॥ ननु स्वच्छायेति स्थिते तुको ह्रस्वावयवस्य पदान्तत्वात् तत्स्थानिकचकारस्य चोः कुरिति कुत्वं स्यादित्याशङ्क्याह । **चुत्वस्येति** । **आङ्माङोश्च** ॥ छे तुगित्यनुवर्तते । तदाह । **एतयोरिति** ॥ आङ्माङोरित्यर्थः । ननु दीर्घादित्येव सिद्धे किमर्थमिदमित्यत आह । **पदान्ताद्वेति विकल्पापवाद इति । आच्छादयति । माच्छिददिति** ॥ तुकि पूर्ववत प्रक्रिया । **दीर्घात्** ॥ छे तुगित्यनुवर्तते । तदाह । **दीर्घात् छे परे तुक् स्यादित्यादिना** ॥ 'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' इति छकारस्य तुक् अन्तावयवस्स्यात् । ततश्च छिंदिधातोर्यङि, द्वित्वे, हलादिशेषे, अभ्यासचर्त्वे, गुणो यङ्लुकोरिति अभ्यासगुणे, तङि, चे छिद्यते इति स्थिते, छकारस्यान्त्यावयवे तुकि, तस्य चुत्वेन चकारे सति, तत्पूर्वस्य छकारस्य खरि चेति चर्त्वेन चकारे सति, चेच्छिद्यत इति एकारात् द्विचकारमेव रूपं स्यात्, छकारो न श्रूयेतत्यत आह । **दीर्घस्यायं तुगिति** ॥ ततश्च छकारात् प्राक् दीर्घस्योपरि तुकि जश्त्वचुत्वचर्त्वेषु चेच्छिद्यत इति भवति । छकारस्य खर्परकत्वाभावाच्चर्त्वेनभवतीति चकारात् छकारश्रवणं निर्बाधम् । ननु दीर्घस्यायन्तुगिति कुत इत्यत आह । **सेनेति** ॥ उत्तरसूत्रे पदान्तदीर्घात् छे तुग्विकल्पविधानादिदं सूत्रमपदान्तविषयमभिप्रेत्य उदाहरति । **चेच्छिद्यत इति** ॥ **पदान्ताद्वा** ॥ तुक् छे, दीर्घात्, इत्यनुवर्तते । तदाह । **दीर्घात् पदान्त[illegible]** ॥ अयमपि

दीर्घात्पदान्ताच्छे परे तुग्वा स्यात्। लक्ष्मीच्छाया—लक्ष्मीछाया।

। इति हल्सन्धिप्रकरणम्।

॥ अथ विसर्गसन्धिप्रकरणम् ॥

'विसर्जनीयस्य सः' (सू १३८)। विष्णुस्त्राता।

१५० । शर्परे विसर्जनीयः । (८-३-३५)

शर्परे खरि विसर्जनीयस्य विसर्जनीयः। न त्वन्यत्। कः त्सरुः। 'घनाघनः क्षोभणः' इह यथायथं सत्वं जिह्वामूलीयश्च न।

१५१ । वा शरि (८-३-३६)

शरि परे विसर्जनीयस्य विसर्जनीय एव वा स्यात्। हरिः शेते—हरिश्शेते। 'खर्परे शरि वा विसर्गलोपो वक्तव्यः' (वा ४९०६)। राम स्थाता—रामः स्थाता। हरि स्फुरति—हरिः स्फुरति। पक्षे विसर्गे सत्वे च त्रैरूप्यम्।

तुक् दीर्घस्यैव ननु छस्य। उक्तज्ञापकात्। **इति हल्सन्धिः। विसर्जनीयस्य सः** ॥ हल्सन्धिनिरूपणे प्रसङ्गादिदं व्याख्यातमपि प्रकरणानुरोधात् पुनरुपन्यस्तं विसर्जनीयपदानुवृत्तिप्रदर्शनार्थम्। **विष्णुस्त्रातेति** ॥ विष्णुशब्दात् सुप्रत्यये तस्य रुत्वे विसर्गे सति विष्णुः त्रातेति स्थिते सत्वम्। **शर्परे विसर्जनीयः** ॥ विसर्जनीयस्येत्यनुवर्तते। खरवसानयोरित्यतः खर्ग्रहणं मण्डूकप्लुत्या अनुवर्तते। शर् परो यस्मादिति बहुव्रीहिः। खर् विशेष्यम्। तदाह। **शर्परे खरीति** ॥ विसर्गस्य विसर्गविधौ फलमाह। **नत्वन्यदिति** ॥ विसर्गस्य विसर्गविधानं तदितरपरिसङ्ख्यानार्थमिति भावः। किन्तदन्यदित्यत आह। **इह यथायथमिति** ॥ 'यथास्वे यथायथम्' इति निपातितम्। यथासम्भवमित्यर्थः। कः त्सरुरित्यत्र सत्वं, घनाघनः क्षोभण इत्यत्र कुप्वोरिति जिह्वामूलीयश्च न भवतीत्यर्थः। तथाच सत्वस्य कुप्वोरित्यस्य चायमपवाद इत्युक्तं भवति। **वा शरि** ॥ विसर्जनीयस्येति विसर्जनीय इति चानुवर्तते। विसर्गस्य विसर्गविधानञ्च तस्य सत्वपरिसङ्ख्यानार्थम्। वाग्रहणाच्च सत्वपरिसङ्ख्यानं पाक्षिकम्। तदाह। **शरि परे इत्यादिना। हरिः शेत इति** ॥ विसर्गस्य विसर्जनीयपक्षे सत्वपरिसङ्ख्याने रूपम्। **हरिश्शेत इति** ॥ विसर्गस्य विसर्गविद्यभावपक्षे सत्वे सति सस्य श्चुत्वेन शकारे रूपम्। **खर्परे शरि** ॥ खर् परो यस्मादिति बहुव्रीहिः। शर् विशेष्यम्। खर्परके शरि परे विसर्गस्य लोपविकल्पो वक्तव्य इत्यर्थः। लोपाभावपक्षे वा शरीति भवति। **रामस्थातेति** ॥ रामः स्थातेति स्थिते विसर्गलोपे अविसर्गमेकसकारं रूपम्। एवं हरिस्फुरतीत्यत्रापि। **पक्षे इति** ॥ विसर्गस्य लोपाभावपक्षे वा शरीति विसर्गे सति सविसर्गमेकसकारं रूपम्। तदुभयाभावे तु सत्वे सति द्विसकारं रूपामिति रूपद्वयम्। ततश्च लोपपक्षसिद्धौ विसर्गैकसकार

'कुप्वोः ×क×पौ च' (सू १४२)। क× करोति—कः करोति। क× खनति—कः खनति। क× पचति—कः पचति। क× फलति—कः फलति।

१५२। सोऽपदादौ। (८-३-३८)

विसर्जनीयस्य सः स्यादपदाद्योः कुप्वोः परयोः। 'पाशकल्पककाम्येष्विति वाच्यम्' (वा ५०३३)। पयस्पाशम्। यशस्कल्पम्। यशस्कम्। यशस्काम्यति। 'अनव्ययस्येति वाच्यम्' (वा ४९०१)। प्रातःकल्पम्। 'काम्ये रोरेवेति वाच्यम्'। (वा ४९०२)। नेह। गीःकाम्यति।

१५३। इणः षः। (८-३-३९)

इणः परस्य विसर्गस्य षकारः स्यात्पूर्वविषये। सर्पिष्पाशम्। सर्पिष्कल्पम्। सर्पिष्कम्। सर्पिष्काम्यति।

१५४। नमस्पुरसोर्गत्योः। (८-३-४०)

रूपसङ्कलनया त्रीणि रूपाणीत्यर्थः। **कुप्वोः×क×पौ च** ॥ हल्सन्धिनिरूपणे व्याख्यातमप्येतत् प्रकरणानुरोधात् पुनरुपन्यस्तम्। क× करोतीति जिह्वामूलीयपक्षे। कः करोतीति विसर्गपक्षे। एवमग्रेऽपि। **सोऽपदादौ** ॥ कुप्वोरित्यनुवर्तते। अपदादाविति तद्विशेषणम्। द्वित्वे एकवचनमार्षं प्रत्येकाभिप्रायं वा एकवचनम्। विसर्जनीयस्येत्यप्यनुवर्तते। तदाह। **विसर्जनीयस्येत्यादिना** ॥ कुप्वोरित्यस्यायमपवादः। **पाशकल्पक** ॥ एतद्वार्तिकं ग्रन्थकृता न पठितम्। **पयस्पाशमिति** ॥ याप्ये पाशप् कुत्सितं पय इत्यर्थः। **यशस्कल्पमिति** ॥ ईषदसमाप्तौ कल्पप्। ईषदसमाप्तं यश इत्यर्थः। **यशस्कमिति** ॥ अज्ञाते कुत्सिते इत्यादिना कः। **यशस्काम्यतीति** ॥ यश आत्मन इच्छतीत्यर्थे सुप आत्मन इत्यनुवृत्तौ काम्यचोति काम्यच्। सनाद्यन्ता इति धातुत्वाल्लडादयः। **अनव्ययस्य** ॥ सोऽपदादाविति विधिः अव्ययविसर्गस्य न भवतीत्यर्थः। **प्रातःकल्पमिति** ॥ ईषदसमाप्तौ कल्पप्। ईषदसमाप्तः प्रातःकाल इत्यर्थः। अधिकरणशक्तिप्रधानस्यापि प्रातश्शब्दस्य वृत्तिविषये शक्तिमत्प्रधानत्वन्नविरुध्यते। दोषाभूतमहः दिवाभूता रात्रिरिति वत्। **काम्ये रोः** ॥ काम्यप्रत्यये परतः रुस्थानिकस्यैव विसर्गस्य सोऽपदादाविति विधिर्भवतीत्यर्थः। **गीःकाम्यतीति** ॥ गिरमात्मनइच्छतीत्यर्थे काम्यजादि पूर्ववत्। गृ धातोः क्विपि 'ऋत इद्धातोः' इति इत्वे रपरत्वे रेफस्य विसर्गः। तस्य च रुस्थानिकत्वाभावान्नसत्वम्। किन्तु कुप्वोरित्येव भवतीत्यर्थः। **इणष्षः** ॥ इण इति पञ्चमी। परस्येत्यध्याहार्यम्। विसर्जनीयस्येत्यनुवर्तते। तदाह। **इणःपरस्येति। पूर्वविषये इति** ॥ अत्र कुप्वोरिति अपदादाविति अनव्ययस्येति काम्ये रोरेवेति च सम्बध्यत इति भावः। तेन उच्चैःकल्पं, दोःपाशं, गीः काम्यतीत्यादौ न षत्वमिति भावः। सर्पिष्पाशमित्यादौ पूर्ववत् पाशबादि। **नमस्पुरसोः** ॥ इत उत्तरमपदादाविति न सम्ब-

गतिसंज्ञयोरनयोर्विसर्गस्य सः कुप्वोः परयोः। नमस्करोति। साक्षात्प्रभृतित्वात्कृञो योगे विभाषा गतिसंज्ञा। तदभावे नमः करोति। 'पुरोऽव्ययम्' (सू ७६८) इति नित्यं गतिसंज्ञा। पुरस्करोति। अगतित्वान्नेह। पूः पुरौ पुरः प्रवेष्टव्याः।

१५५। इदुदुपधस्य चाप्रत्ययस्य। (८-३-४१)

इकारोकारोपधस्याप्रत्ययस्य विसर्गस्य षः स्यात्कुप्वोः। निष्प्रत्यूहम्। आविष्कृतम्। दुष्कृतम्। 'अप्रत्ययस्य' किम्। अग्निः करोति। वायुः करोति।

ज्यते। विसर्जनीयस्य स इति कुप्वोरिति चानुवर्तते। तदाह। **गतिसंज्ञयोरित्यादिना**॥ कुप्वोरित्यस्यायमपवादः। **नमस्करोतीति**॥ नमस् इति सकारस्य रुत्वे विसर्गे तस्य कुप्वोरिति विधिं बाधित्वा अनेन सत्वम्। ननु प्रादिषु पाठाभावात् कथन्नमश्शब्दस्य गतित्वमित्यत आह। **साक्षादिति। विभाषेति**॥ साक्षात् प्रभृतीनि चेत्यत्र विभाषा कृञीत्यतो विभाषेत्यनुवृत्तेरिति भावः। **तदभाव इति**॥ गतित्वाभावपक्षे कुप्वोरिति जिह्वामूलीये सति नमः करोतीति रूपमित्यर्थः। **पुरः प्रवेष्टव्या इति**॥ 'पॄ पालनपूरणयोः' भ्राजभासेत्यादिना क्विप्, उदोष्ठ्यपूर्वस्येत्युत्वं, रपरत्वं, ततो जसि अनव्ययत्वेन गतित्वाभावान्न सत्वम्। अनव्ययत्वसूचनार्थमेव पूः पुर इत्युक्तम्। **इदुदुपधस्य**॥ विसर्जनीयस्येत्यनुवर्तते। इदुदुपधस्येति तद्विशेषणम्। इदुतौ उपधे यस्येति बहुव्रीहिः। कुप्वोरिति चानुवर्तते। तदाह। **इकारोकारेति। अप्रत्ययस्येति**॥ प्रत्ययावयवभिन्नस्येत्यर्थः। प्रत्ययभिन्नस्य विसर्गस्येत्यर्थे तु कविभिः कृतमित्यत्रापि षत्वं स्यात्। तत्र पिसः प्रत्ययत्वेऽपि विसर्गमात्रस्य प्रत्ययत्वाभावात्। अत्र इदुद्भ्यामप्रत्ययस्येत्येतावतैव इदुद्भ्यामुत्तरस्य विसर्गस्येत्यर्थस्य सिद्धत्वादुपधाग्रहणं न कर्तव्यमिति हयवरट् सूत्रे भाष्ये स्थितम्। "उपधाग्रहणन्नकरिष्यते। इदुद्भ्यान्तु परं विसर्जनीयं विशेषयिष्यामः" इति। **निष्प्रत्यूहमिति**॥ प्रत्यूहो विघ्नः तस्याभावः निष्प्रत्यूहं। अर्थाभावे अव्ययीभावः। **आविष्कृतमिति**॥ 'प्रकाशे प्रादुराविस्स्यादित्यमरः'। **दुष्कृतमिति**॥ दुस् दुरिति प्रादौ पठितम्। तत्र प्रथमस्य सान्तस्य षत्वं निर्विवादम्। रेफान्तस्य तु इदुदुपधस्य सकारस्य यो विसर्जनीय इति हयवरट्सूत्रस्थभाष्यसम्मतपक्षान्तरे षत्वन्न भवति। तत्र विसर्जनीयस्य सकारस्थानिकत्वाभावात्। **अग्निः करोतीति**॥ विसर्गस्य व्यपदेशिवद्भावेन प्रत्ययावयवत्वादिति भावः। ननु मातृशब्दात् पञ्चम्येकवचनं ङसिः। ऋत उदिति ऋकारस्य अकारस्य च उकार एकादेशः। रपरत्वम्। मातुर् स् इति स्थिते रात् सस्येति सलोपः। मातुः कृपेत्यत्रापि षत्वं स्यात्। उर् इत्येकादेशस्य पूर्वान्तत्वेन अप्रत्ययतया तदवयवरेफस्थानिकविसर्गस्य प्रत्ययावयवत्वाभावात्। नच उ इत्यस्यैव एकादेशतया पूर्वान्तत्वेऽपि रेफस्य प्रत्ययावयवत्वमस्तीति वाच्यम्। उरणूपर इत्यत्र आद्यन्तौ टकितावित्यतः अन्तग्रहणानुवृत्तिमङ्गीकृत्य रेफस्य एकादेशान्तताया भाष्ये सिद्धान्ततत्वात्। अत एव च रदाभ्यामिति

'एकादेशशास्त्रनिमित्तकस्य न षत्वम् । कस्कादिषु भ्रातुष्पुत्रशब्दस्य पाठात्' (वा ४९१५) । तेनेह न । मातुः कृपा । 'मुहुसः प्रतिषेधः' (वा ४९११) । मुहुःकामा ।

१५६ । तिरसोऽन्यतरस्याम् । (८-३-४२)

तिरसो विसर्गस्य सो वा स्यात्कुप्वोः । तिरस्कर्ता—तिरःकर्ता ।

१५७ । द्विस्त्रिश्चतुरिति कृत्वोऽर्थे । (८-३-४३)

कृत्वोऽर्थे वर्तमानानामेषां विसर्गस्य षकारो वा स्यात्कुप्वोः । द्विष्करोति—द्विः करोति, इत्यादि । 'कृत्वोऽर्थे' किम् । चतुष्कपालः ।

सूत्रे 'थलि च सेटि' इति सूत्रे चं गुणो भवति वृद्धिर्भवतीति रेफशिरा गुणवृद्धिसंज्ञकोऽभिनिर्वर्तत इति भाष्यम् । उः स्थाने अण् प्रसज्यमान एव रपरो भवति । पूर्वभक्तश्च रेफः शिरा कैयटश्च सङ्गच्छते । नच उर् इत्यस्य परादित्वे प्रत्ययावयवत्वमस्तीति वाच्यम् । मातृ अस इत्यस्मादाशायां हि सकारसन्निधौ अकारस्य प्रत्ययत्वाभावेन तत्स्थाने भवन उर् इत्यादेशः प्रत्ययावयवत्वं भजते । प्रत्ययत्वस्य समुदायनिवेशित्वात् । यस्तु कृते उरादेशे अवशिष्टमकारः प्रत्ययसंज्ञकः स तु लुप्त एव । अस्तु वा परादित्वेन उर् इत्यस्य प्रत्ययत्वम् । तथापि तस्य पूर्वान्तत्वे अप्रत्ययत्वात् तद्विसर्गस्य षत्वमप्रत्यूहम् । नच अन्तवत्त्वे कर्तव्ये षत्वस्यासिद्धत्वान्न तत्रान्तवत्त्वप्रवृत्तिरिति वाच्यम् । पूर्वत्रासिद्धे न स्थानिवदित्युक्त्या तदितरातिदेशानां त्रिपाद्यामपि प्रवृत्त्यभ्युपगमात् । अतएव अमी क्षीरपेणेत्यत्र ईत्वणत्वे सिध्यतः । तत्र एकारे अदसश्चेदमन्वयिनष्टवस्य पे इत्यत्र एकाजुत्तरपदत्वस्य च अन्तवत्त्वाधीनत्वात् । तस्मात् उर् इत्यस्य पूर्वान्तत्वे मातुःकृपेत्यत्र षत्वं दुर्वारमित्यत आह । **एकादेशेति** ॥ एकादेशशास्त्रसम्पन्नेरफस्थानिकत्वेन विसर्गस्य एकादेशशास्त्रनिमित्तकत्वमिति भावः । **भ्रातुष्पुत्रेति** ॥ एकादेशशास्त्रनिमित्तकस्यापि विसर्गस्य षत्वप्रवृत्तौ भ्रातुष्पुत्रशब्दस्य पाठो व्यर्थस्स्यात् । कस्कादिषु चेति षत्वार्थो हि तत्र पाठः । षत्वस्य च अनेनैव सिद्धौ किन्तेनेति भावः । **मुहुसः** ॥ षत्वस्येति शेषः । अत्र 'पुम्मुहुर्गोः प्रतिषेधो वक्तव्यः' इति भाष्ये पठितम् । तत्र पुङ्ग्रहणमनुवादमात्रम् । सम्पुङ्कानां सो वक्तव्य इत्यनेन गतार्थत्वात् । **तिरसो** ॥ सोऽपदादावित्यतः स इत्यनुवर्तते, कुप्वोरिति, विसर्जनीयस्येति च । इणष्ष इति निवृत्तम् । असम्भवात् । तत्सन्नियोगात् ष इति च निवृत्तम् । तदाह । **तिरसो विसर्गस्येत्यादिना । तिरस्कर्तेति** ॥ कुप्वोरिति प्राप्ते सत्वं । तदभावे जिह्वामूलीयविसर्गौ । **द्विस्त्रिश्चतुरिति** ॥ इतिकरणानन्तरं शब्दानामिति शेषः । विसर्जनीयस्येति कुप्वोरिति अन्यतरस्यामिति इणष्ष इति चानुवर्तते । 'संङ्ख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' इति कृत्वसुचोऽर्थः कृत्वोऽर्थः । तत्र वर्तमानानां द्विः त्रिः चतुः इति शब्दानां विसर्गस्येत्यन्वयः । तदाह । **कृत्वोऽर्थ इत्यादिना । द्विः करोतीत्याद्यन्तेन** ॥ 'द्वित्रिचतुर्भ्यस्सुच्' इति कृत्वोऽर्थे सुच् । आदिना त्रिष्करोति चतुष्करोतीति गृह्यते । सर्वत्र विसर्गस्य अव्यवहितपरत्वादिदुपधस्येव

१५८। इसुसोः सामर्थ्ये। (८-३-४४)

इसुसोर्विसर्गस्य षः स्याद्वा कुप्वोः। सर्पिष्करोति—सर्पिः करोति। धनुष्करोति—धनुः करोति। सामर्थ्यमिह व्यपेक्षा। 'सामर्थ्ये' किम्। तिष्ठतु सर्पिः, पिब त्वमुदकम्।

प्राप्ते विभाषेयम्। षत्वाभावे कुप्वोरिति जिह्वामूलीयविसर्गौ। कृत्वोऽर्थे यो विसर्ग इति तु न व्याख्यातम्। तथा सति चतुरश्शब्दे अव्याप्तेः। चतुष्करोतीत्यत्र सुपो हल्ङ्यादिना लुप्तत्वेन विसर्गस्य तत्र प्रातिपदिकावयवत्वात्। **चतुष्कपाल इति**॥ चतुर्षु कपालेषु संस्कृतः पुरोडाश इत्यर्थे 'संस्कृतं भक्षा' इत्यणि विवक्षिते तद्धितार्थोत्तरपदेति समासः। 'द्विगोर्लुगनपत्ये' इत्यणो लुक्। अत्र चतुरश्शब्दस्य कृत्वोऽर्थे अवृत्तेर्न तद्विसर्गस्य षत्वविकल्पः, किन्तु इदुदुपधस्येति नित्यमेव षत्वम्। ननु तत्र प्रत्ययावयवभिन्नस्येति व्याख्याने 'चतेरुरन्' इत्यौणादिकप्रत्ययावयवत्वात् विसर्गस्य कथमिह इदुदुपधस्येति नित्यं षत्वम्। अतस्तत्र प्रत्ययभिन्नस्येत्येव व्याख्यानमुचितम्। एवञ्चात्र चतुर्शब्दविसर्गस्य प्रत्ययत्वाभावादिदुदुपधस्येति नित्यषत्वनिर्बाधं भविष्यतीति चेत्। नैष दोषः। कविभिः कृतमित्यादौ षत्ववारणाय प्रत्ययावयवभिन्नस्येत्येव व्याख्यातुमुचितत्वात्। चतुरश्शब्दस्तु अव्युत्पन्न एव। अतः प्रत्ययावयवभिन्नस्येति पर्युदासस्तत्र न भवति। 'चतुष्पाद्भ्यो ढञ्' इत्यादिनिर्देशबलेन चतुरश्शब्दे अव्युत्पत्तिपक्षस्यैवाङ्गीकार्यत्वात्। द्विनामा त्रिनामा च कश्चित्। द्विः करोति त्रिः करोति। अत्रापि न षत्वम्। कृत्वोऽर्थे अवृत्तेः। **इसुसोः**॥ इणष्ष इत्यतष्ष इति, कुप्वोरिति, विसर्जनीयस्येति, अन्यतरस्यामिति, चानुवर्तते। तदाह। **इसुसोर्विसर्गस्येति। सर्पिष्करोतीति**॥ व्युत्पत्तिपक्षे अत्र विसर्गस्य प्रत्ययावयवत्वादिदुदुपधस्येत्यप्राप्तौ विभाषावचनम्। षत्वाभावपक्षे कुप्वोरिति जिह्वामूलीयविसर्गौ। धनुष्करोतीत्यत्राप्येवम्। ननु एकार्थीभावलक्षणं सामर्थ्यं वृत्तावेव, नतु वाक्ये इति समर्थसूत्रे भाष्ये कैयटादिषु च स्पष्टम्। एवञ्च सर्पिष्करोति धनुष्करोतीति वाक्ये कथमयं षत्वविकल्प इत्यत आह। **सामर्थ्यमिह व्यपेक्षेति**॥ विशिष्टा अपेक्षा व्यपेक्षा, पदानामाकांक्षायोग्यतासन्निधिवशाद्यः परस्परान्वयः सा व्यपेक्षा। इदन्तु सामर्थ्यं वाक्येषु विद्यते। यथा राज्ञः पुरुषोऽश्वश्च, राज्ञो देवदत्तस्य च पुरुष इत्यादौ। एवञ्च सर्पिष्करोतीत्यादौ च एतादृशं व्यपेक्षालक्षणं सामर्थ्यमस्तीति भवत्युदाहरणम्। व्यपेक्षालक्षणमेवात्र सामर्थ्यमाश्रित्य सर्पिष्करोतीति भाष्ये उदाहृतत्वादिति भावः। नच पेचुः काष्ठैः, सख्युः कामः, कविभिः कृतमित्यादौ षत्वं शङ्क्यम्। अत्र प्रातिपदिकावयवयोरेव इसुसोर्ग्रहणात्। नित्यं समास इत्युत्तरसूत्रोदाहरणे तयोरेव सम्भवेनार्थाधिकाराश्रयणात्, साहचर्याच्च। **तिष्ठत्विति**॥ तिष्ठतु सर्पिरित्येकं वाक्यम्। पिब त्वमुदकमित्यन्यत्। तत्र सर्पिरित्यस्य पिबतु इत्यत्रान्वयाभावान्न सामर्थ्यम्। अतो नायमत्र षत्वविकल्पः। नापि इदुदुपधस्येति नित्यं षत्वम्। प्रत्ययावयवत्वात्। अतएव प्रत्ययभिन्नस्य विसर्गस्येति व्याख्यानन्नाश्रितम्। तथा सति तिष्ठतु सर्पिः, पिब त्वमुदकमित्यत्र विसर्गस्य प्रत्ययैकदेशस्य प्रत्ययभिन्नतया इदुदुपधस्येति

१५९। नित्यं समासेऽनुत्तरपदस्थस्य। (८-३-४५)

इसुसोर्विसर्गस्यानुत्तरपदस्थस्य समासे नित्यं षः स्यात्कुप्वोः परयोः। सर्पिष्कुण्डिका। 'अनुत्तरपदस्थस्य' इति किम्। परमसर्पिःकुण्डिका। कस्कादिषु सर्पिष्कुण्डिकाशब्दोऽसमासे व्यपेक्षाविरहेऽपि षत्वार्थो व्यपेक्षायां नित्यार्थश्च।

१६०। अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य। ८-३-४६

अकारादुत्तरस्यानव्ययस्य विसर्गस्य समासे नित्यं सकारादेशः स्यात्करोत्यादिषु परेषु। न तूत्तरपदस्थस्य। अयस्कारः। अयस्कामः। अयस्कंसः। अयस्कुम्भः। अयस्पात्रम्। अयस्सहिता कुशा। अयस्कुशा। अयस्कर्णी। 'अतः' किम्। गीःकारः। 'अनव्ययस्य' किम्। स्वःकामः। 'समासे' किम्। यशः करोति। 'अनुत्तरपदस्थस्य' किम्। परमयशःकारः।

१६१। अधश्शिरसी पदे। (८-३-४७)

षत्वापत्तेः। **नित्यं समासे** ॥ इसुसोरित्यनुवर्तते, कुप्वोरिति, विसर्जनीयस्येति, च। तदाह। **इसुसोरित्यादिना। सर्पिष्कुण्डिकेति** ॥ सर्पिषः कुण्डिकेति विग्रहः। समासे व्यपेक्षालक्षणसामर्थ्यस्यापि सत्वात् 'इसुसोस्सामर्थ्ये' इति पत्वविकल्पे प्राप्ते वचनमिदम्। **परमसर्पिःकुण्डिकेति** ॥ अत्र विसर्गस्य उत्तरपदस्थत्वान्न षत्वम्। दृदृपधस्येति षत्वन्तु न। विसर्गस्यात्र प्रत्ययावयवत्वात्। प्रत्ययभिन्नस्य विसर्गस्येति व्याख्याने तु अत्रापि दृदृपधस्येति षत्वं स्यात्। अत्र विसर्गस्य प्रत्ययैकदेशतया प्रत्ययभिन्नत्वात्। नन्वनेनैव सिद्धे कस्कादिषु सर्पिष्कुण्डिकाशब्दपाठो व्यर्थ इत्यत आह। **कस्कादिष्विति**। **व्यपेक्षाविरहेऽपीति** ॥ तिष्ठतु सर्पिः कुण्डिकां पश्येत्यादावित्यर्थः। अत्र चासमासत्वाभिप्रायं समास इति न भवति। सामर्थ्याभावाच्च इसुसोस्सामर्थ्य इति च न भवति। प्रत्ययावयवत्वादिदृदृपधस्येत्यपि न भवति। अतस्तत्र षत्वप्राप्त्यर्थं कस्कादिषु पाठ इति भावः। **व्यपेक्षायामिति** ॥ इदं सर्पिष्कुण्डिकाया इत्यत्रेत्यर्थः। तत्र इसुसोस्सामर्थ्य इति विकल्पप्राप्तौ नित्यषत्वार्थः कस्कादौ पाठ इति भावः। **अतः कृकमि** ॥ अत इति पञ्चमी। 'विसर्जनीयस्य' इति 'नित्यं समासेऽनुत्तरपदस्थस्य' इति चानुवर्तते। तदाह। **अकारादित्यादिना। अयस्कार इति** ॥ कुप्वोरिति बाधित्वा सत्वम्। एवमग्रेऽपि। **अयस्सहितेति** ॥ अयसो विकार इति तु नोक्तम्। जानपदेत्यादिना ङीष्प्रसङ्गात्। **अयस्कर्णीति** ॥ अय इव कर्णौ यस्या इति विग्रहः। नासिकोदरेति ङीष्। **अधश्शिरसी** ॥ अधश्शिरसी इति षष्ठ्यर्थे प्रथमा। विसर्जनीयस्येति, स इति, चानुवर्तते। तदाह। **एतयोरिति** ॥ कुप्वोरित्यस्यापवादः। **अधस्पद-**

एतयोर्विसर्गस्य सादेशः स्यात्पदशब्दे परे। अधस्पदम्। शिरस्पदम्। समास इत्येव। अधः पदम्। शिरः पदम्। अनुत्तरपदस्थस्येत्येव। परमशिरः-पदम्। कस्कादिषु च। भास्करः।

। इति विसर्गसन्धिप्रकरणम्।

॥ अथ स्वादिसन्धिप्रकरणम् ॥

'स्वौजसमौट्–' (सू १८३) इति सुप्रत्यये 'शिवस् अर्च्यः' इति स्थिते।

१६२। ससजुषो रुः। (८-२-६६)

पदान्तस्य सस्य 'सजुष्' शब्दस्य च रुः स्यात्। जश्त्वापवादः।

१६३। अतो रोरप्लुतादप्लुते। (६-१-११३)

अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति। 'भोभगोअघो–' (सू १६७) इति प्राप्तस्य यत्वस्यापवादः। उत्वं प्रति रुत्वस्यासिद्धत्वं तु न भवति। रुत्व-मनूद्योत्वविधेः सामर्थ्यात्।

मिति ॥ पदस्याधः इति विग्रहः। मयूरव्यंसकादित्वात् समासः। **शिरस्पदमिति** ॥ शिरसः पदमिति विग्रहः। सौत्रकममनुरुध्य पुनराह। **कस्कादिषु चेति। भास्कर इति** ॥ अत इति तपरकरणादतःकृकमीन्यस्य न प्राप्तिरिति सत्यप्राप्त्यर्थं कस्कादौ भास्करशब्दस्य पाठ इति भावः। **स्वौजसमौडिति। ससजुषो रुः** ॥ ससजुषोः रुः इति च्छेदः। 'रोरि' इति रेफलोपः। सश्च सजुश्च ससजुषौ तयोरिति विग्रहः। रुविधौ उकार इत्। तत्फलं त्वनुपदमेव वक्ष्यते। स इति सकारो विवक्षितः। अकार उच्चारणार्थः। पदस्येत्यधिकृतं सकारेण सजुष्शब्देन च विशेष्यते। अतस्तदन्तविधिः। सकारान्तं सजुष्शब्दान्तञ्च यत् पदं तस्य रुरस्यादिति। सच अलोऽन्त्यस्ये-त्यन्त्यस्य भवति। ततश्च फलितमाह। **पदान्तस्य सस्येति। सजुष्शब्दस्य चेति** ॥ सजुष्शब्दान्तं यत् पदं तदन्तस्य षकारस्येत्यर्थः। ततश्च सजुषौ सजुष इत्यत्र षकारस्य न रुत्वम्। पदान्तत्वाभावात्। सजुष्शब्दान्तं यत्पदमिति तदन्तविधिना परमसजूरित्यत्र नाव्याप्तिः। नच सजूरित्यत्राव्याप्तिरशङ्क्या। व्यपदेशिवद्भावेन तदन्तत्वात्। 'व्यपदेशिवद्भावोऽप्रातिपदिकेन' इति, 'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्न' इति च, परिभाषाद्वयं प्रत्ययग्रहणे यस्मादिति विषयं, नतु येनविधिरिति विषयमिति 'असमासे निष्कादिभ्यः' इति सूत्रे भाष्ये स्पष्टम्। ननु शिवस् इति सकारस्य 'झलाञ्जशोऽन्ते' इति जश्त्वेन दकारस्स्यात्। जश्त्वं प्रति रुत्वस्य परत्वेऽपि असिद्धत्वात्। इत्यत आह। **जश्त्वापवाद इति** ॥ तथा च रुत्वस्य निरवकाशत्वान्नासिद्धत्वमिति भावः। तदुक्तं भाष्ये। 'पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्य' इति, अपवादो वचनप्रामाण्यात्' इति

१६४। प्रथमयोः पूर्वसवर्णः। (६-१-१०२)

अकः प्रथमाद्वितीययोरचि परे पूर्वसवर्णदीर्घ एकादेशः स्यात्। इति प्राप्ते।

१६५। नादिचि। (६-१-१०४)

अवर्णादिचि परे न पूर्वसवर्णदीर्घः। 'आद्गुणः' (सू ६५)। 'एङः पदान्तादति' (सू ८६) शिवोऽर्च्यः। 'अतः' इति तपरः किम्। देवा अत्र। 'अति' इति तपरः किम्। श्व आगन्ता। 'अप्लुतात्' किम्। एहि सुस्रोतः३:

च। शिवर् अर्च्य इति स्थिते। **अतो रोः**॥ ऋत उदित्यतः उदित्यनुवर्तते। अत इति पञ्चमी। एङः पदान्तादतीत्यतः अतीत्यनुवर्तते। तदाह। **अप्लुतादित्यादिना**॥ नन्वत्र उत्वं बाधित्वा 'भो भगो अघो अपूर्वस्य योऽशि' इति यत्वं परत्वात् स्यात्। नच यत्वस्यासिद्धत्वान्न उत्वं निर्बाधमिति वाच्यम्। कृतेऽपि यत्वे तस्य स्थानिवत्त्वेन रुत्वाद्यभावस्य दुर्निवारत्वात्। अत आह। **यत्वस्यापवाद इति**॥ यद्यपि भो भगो अघो इत्यंशे उत्वस्यापवादः, तथाप्यपूर्वस्येत्यंशे उत्वमपवादः प्राप्त एव। अपूर्वकस्य रोर्यत्वे अतो रोरित्यस्यारम्भादिति भावः। ननु उत्वं प्रति रोरसिद्धत्वात् कथमुत्वं तस्येत्यत आह। **उत्वं प्रतीति**॥ शिव उ अर्च्य इति स्थिते। **प्रथमयोः**॥ 'अकस्सवर्णे' इत्यतः अक इति, इकोयणर्चीत्यतः अर्चीति चानुवर्तते। एकः पूर्वपरयोरित्यधिकृतम्। प्रथमयोरित्यवयवषष्ठी। प्रथमाद्वितीये सुप्तिभक्ती विवक्षिते। तदाह। **अकः प्रथमेत्यादिना। इति प्राप्त इति**॥ शिव उ इत्यत्र अकारस्य उकारस्य च स्थाने पूर्वसवर्णे अकारे प्राप्त इत्यर्थः। **नादिचि**॥ न आदिति छेदः। आदिति पञ्चमी। पूर्वसवर्ण इत्यनुवर्तते। तदाह। **अवर्णादिति**॥ अनेन शिव उ इत्यत्र पूर्वसवर्णदीर्घनिषेधः। **आद्गुण इति**॥ शिव उ इति स्थिते आद्गुण इति गुणं बाधित्वा पूर्वसवर्णदीर्घे प्राप्ते तस्मिन्निषिद्धे सति बाधके निवृत्ते गुणः पुनरुन्मिषति 'देवदत्तस्य हन्तरि हते देवदत्तस्य न पुनरुन्मज्जनम्' इति न्यायस्तु नात्र प्रवर्तते। देवदत्ते हते सति तद्धन्तुर्हनने देवदत्तस्य न पुनरुन्मेष इति हि तदर्थः। देवदत्तं हन्तुमुद्युक्तस्य हनने तु देवदत्तस्य उन्मेषोऽस्त्येव। प्रकृते च पूर्वसवर्णदीर्घेण गुणो न हतः। किन्तु हननोद्यमसजातीयं प्रसक्तिमात्रं पूर्वसवर्णदीर्घप्रसक्त्या स्थितम्। प्रसक्ते च तस्मिन्निषिद्धे गुणोन्मेषो निर्बाध एवेति स्वादिष्विति सूत्रे कैयटे स्पष्टम्। 'अपवादे निषिद्धे उत्सर्गस्य स्थितिः' इति न्यायश्च एतन्मूलक एव। 'तौ सत्, भिषोऽयौ नदे' इत्यादिनिर्देशाश्चात्रानुकूला इत्यलम्। **एङः पदान्तादतीति**॥ शिवो अर्च्य इति स्थिते ओकारस्य अकारस्य च स्थाने पूर्वरूपं ओकारः। **देवा अत्रेति**॥ देवास् अत्रेति स्थिते सस्य रुः। तस्य दीर्घादाकारात् परत्वादतः परत्वाभावादुत्वन्न। किन्तु भो भगो इति यत्वे लोपश्शाकल्यस्येति लोपः। **श्व आगन्तेति**॥ श्वस् आगन्तेति स्थिते, सस्य रुः, तस्य हूस्वाकारपरकत्वाभावादुत्वन्न। किन्तु यत्वं लोपश्च। **एहीति**॥ सुस्रोतस् शब्दः कस्य चित् संज्ञा। सम्बुद्धेर्हल्ङ्यादिलोपः, दूराद्धूते चेति टेः प्लुतः, सस्य रुः। सुस्रोतर् अत्रेति स्थिते

अत्र स्नाहि। प्लुतस्यासिद्धत्वादतः परोऽयम्। 'अप्लुतात्' इति विशेषणे तु तत्सामर्थ्यान्नासिद्धत्वम्। तपरकरणस्य तु न सामर्थ्यम्। दीर्घनिवृत्त्या चरितार्थत्वात्। 'अप्लुते' इति किम्। तिष्ठतु पय अ३ग्निदत्त 'गुरोरनृतः—' (सू ९७) इति प्लुतः।

१६६। हशि च। (६-१-११४)

अप्लुतादतः परस्य रोरुः स्याद्धशि। शिवो वन्द्यः। 'रोरित्युकारानुबन्धग्रहणान्नेह। प्रातरत्र। धातर्गच्छ। 'देवास् इह' इति स्थिते। रुत्वम्।

प्लुतात् परस्य रोः उत्वनिवृत्तये अप्लुतादिति पदमित्यर्थः। नन्वत्र रोः अतः परत्वाभावादेव उत्वनिवृत्तिसिद्धेरप्लुतादिति व्यर्थमेवेत्यत आह। **प्लुतस्यासिद्धत्वादतः परोऽयमिति॥** उत्वे कर्तव्ये प्लुतस्यासिद्धत्वादतः परोऽयं रुः। अतस्तस्य उत्वे प्राप्ते तन्निवृत्त्यर्थमप्लुतादित्यावश्यकमित्यर्थः। नन्वप्लुतादित्युक्तेऽपि रोरुत्वमत्र दुर्वारम्। उत्वे कर्तव्ये प्लुतस्यासिद्धतया अप्लुतात् परत्वस्यापि सत्वादित्यत आह। **अप्लुतादिति विशेषणे तु तत्सामर्थ्यान्नासिद्धत्वमिति॥** यदि उत्वे कर्तव्ये प्लुतस्यासिद्धत्वं, तर्हि अप्लुतादिति विशेषणं व्यर्थमेव स्यात्। दत्तेऽपि विशेषणे प्लुतस्यासिद्धतया अप्लुतात् परत्वस्यापि सत्त्वेन उत्वप्राप्तिदोषतादवस्थ्यात्। अतः अप्लुतादिति विशेषणसामर्थ्यात्, प्लुतस्य नासिद्धत्वमिति विज्ञायते इत्यर्थः। नन्वेवमपि अप्लुतादिति व्यर्थम्। प्लुतात् परस्य रोः अत इति तपरकरणादेव उत्वनिवृत्तिसिद्धेः। नच उत्वे कर्तव्ये प्लुतस्यासिद्धत्वादतः परत्वस्यापि सत्त्वादुत्वं स्यादिति वाच्यम्। तपरकरणसामर्थ्यादेव प्लुतस्यासिद्धत्वाभावविज्ञानेन अतः परत्वाभावेनैव उत्वनिवृत्तेस्सम्भवादित्यत आह। **तपरकरणस्य तु न सामर्थ्यमिति॥** प्लुतस्यासिद्धत्वाभावसाधने इति शेषः। कुत इत्यत आह। **दीर्घनिवृत्त्येति॥** देवा अत्रेत्यादौ दीर्घव्यावृत्त्या लब्धप्रयोजनकत्वादित्यर्थः। येन विना यदनुपपन्नं तत्तस्य गमकम्। यथा दिवा अभुञ्जानस्य पीनत्वं रात्रिभोजनं विना अनुपपद्यमानं रात्रिभोजनस्य गमकम्। प्रकृते तु प्लुतस्यासिद्धत्वेऽपि अत इति तपरकरणं देवा अत्रेत्यादौ दीर्घव्यावृत्तिरूपं प्रयोजनं लब्ध्वा उपपद्यमानं कथं प्लुतस्यासिद्धत्वाभावं गमयितुं शक्नुयादिति भावः। **तिष्ठतु पय अ३ग्निदत्तेति॥** अत्र पयस् इति स्थिते सस्य रुः, तस्य प्लुतपरकत्वादुत्वन्न। ननु दूराद्भूते चेति वाक्यस्य टेः प्लुतविधानात् कथमिह अग्निदत्तशब्दे आद्यवर्णस्य प्लुत इत्यत आह। **गुरोरिति। हशि च॥** अतो रोरप्लुतादिति पदत्रयमनुवर्तते। ऋत उदित्यतः उदिति च। तदाह। **अप्लुतादित्यादिना। शिवो वन्द्य इति॥** शिवस् वन्द्य इति स्थिते सस्य रुः। तस्य अत्परकत्वाभावात् पूर्वसूत्रेण उत्वं न प्राप्तमिति वचनमिदम्। ननु प्रातरत्र धातर्गच्छेत्यत्र रेफस्य अतो रोरिति हशि चेति च उत्वं कुतो न स्यादित्यत आह। **रोरित्युकारेति॥** उकारः अनुबन्धः इत् यस्य सः उकारानुबन्धः। तस्यैव उत्वविधौ ग्रहणात् प्रातरत्र धातर्गच्छेत्यत्र रेफस्य उत्वन्न भवति।

१६७। भोभगोअघोअपूर्वस्य योऽशि। (८-३-१७)

एतत्पूर्वकस्य रोर्यादेशः स्यादशि परे। असन्धिः सौत्रः। 'लोपश्शाकल्यस्य' (सू ६७)। देवा इह—देवायिह। 'अशि' किम्। देवास्सन्ति। यद्यपीह यत्वस्यासिद्धत्वाद्विसर्गो लभ्यते, तथापि विसर्गस्य स्थानिवद्भावेन रुत्वाद्यत्वं स्यात्। न ह्ययमल्विधिः। रोरिति समुदायरूपाश्रयणात्। भोस्, भगोस्, अघोस्, इति सकारान्ता निपाताः। तेषां रोर्यत्वे कृते।

प्रातर् इति हि रेफान्तमव्ययम्। न तत्र रेफः उकारानुबन्धवान्। धातुशब्दात् सम्बुद्धिः सुः 'ऋतो ङि सर्वनामस्थानयोः' इति ऋकारस्य गुणः अकारो रपरः, हल्ङ्यादिना सुलोपः। अत्रापि न रेफः उकारानुबन्धवान्। अत उभयत्रापि रेफस्य उत्वन्न भवतीत्यर्थः। अथ देवा इहेति रूपन्दर्शयितुमाह। **देवास् इह इति स्थिते रुत्वमिति। भो भगो॥** सोस्सुपीत्यतो रोरित्यनुवर्तते। भो भगो अघो अ इत्येषां द्वन्द्वः। एते पूर्वे यस्मादिति बहुव्रीहिः। पूर्वशब्दश्च प्रत्येकं सम्बध्यते। भोपूर्वकस्य भगोपूर्वकस्य अघोपूर्वकस्य अकारपूर्वकस्य च रोरिति। तदाह। **एतत्पूर्वकस्येति॥** अत्र सूत्रे भगो अघो इत्यत्र अघोअपूर्वस्येत्यत्र च षष्ठ्यन्तादतीति पूर्वरूपमाशङ्क्याह। **असन्धिरिति॥** सन्ध्यभावसूत्रप्रयुक्त इत्यर्थः। 'कृतलब्ध' इत्यण्। देवास् इह इति स्थिते यलोपं स्मारयति। **लोपश्शाकल्यस्येति॥** देवा इहेति यलोपपक्षे रूपम्। तदभावे देवायिहेति। **देवास्सन्तीति॥** देवास् सन्तीति स्थिते सस्य रुः। तस्य अशपरकत्वाभावाद्यत्वन्न। किन्तु विसर्गः। विसर्जनीयस्य सः। नन्विह अशग्रहणं व्यर्थम्। न च देवार् सन्तीति स्थिते रेफस्य यत्वव्यावृत्त्यर्थन्तदिति वाच्यम्। यत्वस्यासिद्धतया विसर्गे सति सत्वे देवास्सन्तीति सिद्धेरिति शङ्कते। **यद्यपीति॥** परिहरति। **तथापीति॥** अस्तु यत्वस्यासिद्धत्वात् रेफस्य विसर्गः। तथापि तस्य स्थानिवद्भावेन रुत्वाद्यत्वं दुर्वारम्। अतः अशग्रहणमावश्यकमिति भावः। ननु यत्वविधौ विसर्गस्य स्थानिवद्भावेन कथं रुत्वम्। अनल्विधाविति निषेधात् विसर्गस्थानिभूतं रेफमाश्रित्य प्रवर्तमानस्य यत्वविधेः स्थान्यलाश्रयत्वादित्यत आह। **नह्ययमल्विधिरिति॥** कुत इत्यत आह। **रोरिति समुदायरूपाश्रयणादिति॥** यद्यपि यत्वविधिः विसर्गस्थानिभूतं रेफमाश्रयति, तथापि नाल्विधिः। ह्रस्वत्वादिरूपवर्णमात्रवृत्तिधर्मपुरस्कारेण स्थान्यलाश्रयत्वस्य तत्र विवक्षितत्वात्। प्रकृते च यत्वविधिः रुत्वेनैव रेफमाश्रयति नतु रेफत्वेन। तथा सति प्रातरत्रेत्यादावतिव्याप्तेः। रुत्वञ्च रेफोकारसमुदायधर्मः। नतु रेफमात्रवृत्तिः। अतो यत्वविधिः विसर्गस्थानिभूतं रेफं न वर्णमात्रवृत्तिधर्मपुरस्कारेणाश्रयतीति नाल्विधिः। अतः यत्वे कर्तव्ये विसर्गस्य स्थानिवद्भावेन रुत्वाद्यत्वं स्यात्। अतः अशीति परनिमित्तमाश्रितमिति भावः। **निपाता इति॥** चादेराकृतिगणत्वादिति भावः। **रोर्यत्वे कृत इति॥** भो भगो अघो इत्यनेनेति शेषः। भोय् अच्युत इति स्थिते लोपश्शाकल्यस्येति

१६८। व्योर्लघुप्रयत्नतरः शाकटायनस्य। (८-३-१८)

पदान्तयोर्वकारयकारयोर्लघूच्चारणौ वयौ वा स्तोऽशि परे। यस्योच्चारणे जिह्वाग्रोपाग्रमध्यमूलानां शैथिल्यं जायते स लघूच्चारणः।

१६९। ओतो गार्ग्यस्य। (८-३-२०)

ओकारात्परस्य पदान्तस्यालघुप्रयत्नस्य यकारस्य नित्यं लोपः स्यात्। गार्ग्यग्रहणं पूजार्थम्। भो अच्युत। लघुप्रयत्नपक्षे, भोयच्युत। 'पदान्तस्य' किम्। तोयम्।

१७०। उञि च पदे। (८-३-२१)

अवर्णपूर्वयोः पदान्तयोर्यवयोर्लोप उञि परे। स उ एकाग्निः। 'पदे'

न भवति। यकारस्य अपूर्वकत्वाभावात्। **व्योर्लघु** ॥ वृच यृच व्यौ तयोरिति विग्रहः। पदस्येत्यधिकृतम्। तच्च वकारयकाराभ्यां विशेष्यते। तदन्तविधिः। वान्तस्य यान्तस्य च पदस्येति लभ्यते। अलोऽन्त्यस्येत्यन्तस्य भवति। तथाच पदान्तयोर्यवयोरिति फलितम्। लघुः प्रयत्नो यस्योच्चारणे सः लघुप्रयत्नः। अतिशयितः लघुप्रयत्नः लघुप्रयत्नतरः। अन्यपदार्थस्य च वृत्तिपदार्थप्रकर्षापेक्षः प्रकर्षः। लघुतरप्रयत्नक इत्यर्थः। प्रत्येकाभिप्रायमेकवचनम्। आन्तर्यात् यस्य यः वस्य वः। अर्शआद्यनुवर्तते। शाकटायनमुनिग्रहणाद्विकल्पः। तदाह। **पदान्तयोरित्यादिना** ॥ उच्चारणप्रयत्ने लघुतरत्वं विशदयति। **यस्येति** ॥ ततश्च भोय् अच्युतेत्यत्र यकारस्य पाक्षिको लघुप्रयत्नो यकारः। वकारोदाहरणन्तु 'असावादित्य इति वृत्तिः' इति शब्देन्दुशेखरे। **ओतो गार्ग्यस्य** ॥ ओत इति पञ्चमी। व्योरित्यतो यग्रहणमनुवर्तते। ननु वकारोऽपि। ओतः परस्य तस्यासम्भवात्। पदस्येत्यधिकृतं यकारेण विशेष्यते। तदन्तविधिः। ओकारात् परो यः यकारस्तदन्तस्य पदस्येति लभ्यते। अलोऽन्त्यपरिभाषया पदान्तस्य यकारस्येति फलितम्। भो भगो इत्यतः अर्शआद्यनुवर्तते। लोपश्शाकल्यस्येत्यतो लोप इत्यनुवर्तते। सच पूर्वविहितलघुप्रयत्नस्य न भवति। विधानसामर्थ्यात्। तदाह। **ओकारादित्यादिना** ॥ ननु लोपस्य कथन्नित्यत्वम्। गार्ग्यग्रहणादित्यत आह। **गार्ग्यग्रहणं पूजार्थमिति** ॥ व्याख्यानादिति भावः। **भो अच्युतेति** ॥ अलघुप्रयत्नपक्षे यकारस्य नित्यं लोपः। लघुप्रयत्नपक्षे भोयच्युतेति। अत्र लघुप्रयत्नस्य विधिसामर्थ्यान्न लोपः। **तोयमिति** ॥ अत्र यकारस्य पदान्तत्वाभावादोतोगार्ग्यस्येति न भवति। अनेन अत्र भो भगो इति नानुवर्तत इति सूचितम्। **उञि च पदे** ॥ अपूर्वस्येति पदस्येति व्योरिति लोप इति चानुवर्तते। तदाह। **अवर्णेति। स उ एकाग्निरिति** ॥ उ इति निपातः। सस् उ इति स्थिते, सस्य रुः, भो भगो इत्यपूर्वत्वात् यत्वम्। लोपश्शाकल्यस्येति विकल्पनिवृत्त्यर्थमिदम्। वकारोदाहरणन्तु असा उ एकाग्निरिति वृत्तिः। **पदे किमिति** ॥ उञः पदत्वाभ्यभि-

किम्। तन्त्रयुतम्। वेञः सम्प्रसारणे रूपम्। यदि तु प्रतिपदोक्तो निपात उञिति ग्रहीष्यते, तर्ह्युत्तरार्थं पदग्रहणम्।

१७१। हलि सर्वेषाम्। (८-३-२२)

भोभगोअघोअपूर्वस्य लघ्वलघूच्चारणस्य यकारस्य लोपः स्याद्धलि सर्वेषां मतेन। भो देवाः। भो लक्ष्मीः। भो विद्वद्बन्द। भगो नमस्ते। अघो याहि। देवा नम्याः। देवा यान्ति। 'हलि' किम्। देवायिह—देवा इह।

चारात् पदे इति तद्विशेषणस्य किं प्रयोजनमिति प्रश्नः। **तन्त्रयुतमिति** ॥ तन्त्रे उतमिति विग्रहः। अयादेशः। अत्र यकारस्य लोपनिवृत्त्यर्थं पदग्रहणमिति भावः। नन्वत्र उञ्-परकत्वाभावादेव लोपनिवृत्तिसम्भवात् पदग्रहणं व्यर्थमेवेत्यत आह। **वेञ इति** ॥ 'वेञ् तन्तुसन्ताने' इत्यतः क्तप्रत्यये, 'वचिस्वपियजादीनाम्' इति वकारस्य सम्प्रसारणे, उकारे, पूर्वरूपे, उतमिति रूपम्। अत्र उञ्परकत्वेऽपि तस्य उञः पदत्वाभावान्नास्मिन् परे यस्य लोपो न भवतीत्यर्थः। ननु स उ एकाग्निरित्यत्र उञ् प्रतिपदोक्तः। चादौ पठितत्वात्। उतमित्यत्र तु उञ् लाक्षणिकः। सम्प्रसारणादिविधिनिष्पन्नत्वात्। ततश्च 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' इति परिभाषया चादिपठितस्यैव उञोऽत्र ग्रहणं भविष्यति। नतु उतमित्यत्र उञोऽपि। अतः पदग्रहणं व्यर्थमेवेत्यत आह। **यदीति। उत्तरार्थमिति** ॥ ङमो ह्रस्वादचीत्यर्थमित्यर्थः। एतच्चात्रैव भाष्ये स्पष्टम्। **हलि सर्वेषाम्** ॥ भो भगो अघो अपूर्वस्येत्यनुवर्तते। व्योर्लघुप्रयत्नेत्यतः यकारग्रहणमनुवर्तते। तदाह। **भोभगो इत्यादिना। लघ्वलघूच्चारणस्येति** ॥ ओकारात् परस्य यस्य लघुप्रयत्नतरस्यैवानेन लोपः। अलघुप्रयत्नतरस्य त्वोकारात् परस्य यस्य ओतो गार्ग्यस्येत्येव सिद्धम्। अपूर्वकस्य तु यस्य लघ्वलघूच्चारणस्येति विवेकः। **यकारस्येति** ॥ वकारस्त्वत्र नानुवर्तते। भो भगो अघो अपूर्वस्य यकारस्याभावादिति वृत्तिः। अव्यपर इति निर्देशादिति तदाशयः। वृक्षं वार्तीति वृक्षवाः, तमाचष्टे वृक्षव्, ण्यन्तात्, क्विप्, इष्ठवद्भावाट्टिलोपः, णेरनिटीति णिलोपः, वृक्षव् करोतीत्यत्र अपूर्वकस्य वस्य सम्भवेऽपि नात्र लोपप्रसक्तिः। अशीत्यनुवर्त्य अशात्मके हलीति भाष्ये व्याख्यातत्वात्। वृक्षव् हसतीति तु अस्मादेव भाष्यादसाधुरित्याहुः। **सर्वेषाम्मतेनेति** ॥ सर्वाचार्यसम्मतत्वादयं लोपो नित्य इति फलितम्। अत्र यदि 'विभाषा भवद्भगवदघवतामोत्वावस्य' इति वार्तिकेन 'मतुवसोरुसम्बुद्धौ' इत्यत्र पठितेन एषामन्त्यस्य सम्बुद्धौ रुत्वं वा स्यात्। अव इत्यंशस्य ओकारश्चेत्यर्थकेन निष्पन्नाः भोरादिशब्दा एव गृह्येरन्, तर्हि पुंल्लिङ्गैकवचनमात्रे भो हरे इत्यादिसिद्धावपि तदन्यत्र द्विवचनादौ स्त्रीनपुंसकयोश्च भो हरिहरौ, भो देवाः, भो लक्ष्मीः, भोविद्वद्बृन्द, इत्यादौ लोपो न सिद्ध्येत्। अतः भोस् इत्यादि निपातानामप्यत्र ग्रहणमित्यभिप्रेत्योदाहरति। **भो देवा इत्यादि। देवा नम्या इति** ॥ नचात्र यकारस्य लोपोभोरित्येव

१७२। रोऽसुपि। (८-२-६९)

अह्नो रेफादेशः स्यान्न तु सुपि। रोरपवादः। अहरहः। अहर्गणः। 'असुपि' किम्। अहोभ्याम्। अत्र 'अहन्' (सू ४४३) इति रुत्वम्। 'रूपरात्रिरथन्तरेषु रुत्वं वाच्यम्' (वा ४८४७)। अहोरूपम्। गतमहोरात्रिरेषा। एकदेशविकृतस्यानन्यत्वादहोरात्रः। अहोरथन्तरम्। 'अहरादीनां पत्यादिषु वा रेफः (वा ४८५१)। विसर्गापवादः। अहर्पतिः। गीर्पतिः। धूर्पतिः। पक्षे विसर्गोपध्मानीयौ।

१७३। रो रि। (८-३-१४)

रेफस्य रेफे परे लोपः स्यात्।

लोपस्सिद्ध इति वाच्यम्। लोपोव्योरिति लोपं प्रति यत्वस्यासिद्धत्वात्। **रोऽसुपि** ॥ रः असुपीति छेदः। 'अहन्' इति सूत्रमनुवर्तते। तच्च लुप्तषष्ठीकं पदम्। तदाह। **अह्न इत्यादि। ननु सुपीति** ॥ पर्युदासाश्रयणे तु नञिवयुक्तन्यायेन सुब्भिन्ने प्रत्यये परे इत्यर्थस्स्यात्। ततश्च अहर्वानित्यादावेव स्यात्। नत्वहर्भातीत्यादावपि। अतः प्रसज्यप्रतिषेध आश्रितः। ननु अहन् इत्यस्य रुस्स्यात् पदान्ते, इत्यर्थकेन अहन्निनिसूत्रेणैव सिद्धत्वात् किमर्थमिदमित्यत आह। **रोरपवाद इति। अहरहरिति** ॥ नित्यवीप्सयोरिति द्विर्वचनम्। अहन् अहन इति स्थिते रत्वम्। 'न लुमता' इति निषेधात् सुप्परकत्वाभावः। अहन्निति रुत्वे तु अतोरोरप्लुतादित्युत्वं स्यात्। **अहर्गण इति** ॥ अह्नां गण इति विग्रहः। अहन्निति रुत्वे तु हशि चेत्युत्वं स्यात्। **अहोभ्यामिति** ॥ अहन् भ्यां इति स्थिते नकारस्य सुप्परकत्वान्न रेफः। **अत्रेति** ॥ अहन्निति रुत्वे हशिचेत्युत्वे आद्गुणः। **रूपरात्रि** ॥ अहनशब्दस्येति शेषः। रोऽसुपीति रत्वस्यापवादः। **अहोरूपमिति** ॥ अह्नो रूपमिति विग्रहः। अहन् रूपमिति स्थिते नकारस्य रुत्वम्, उत्वम्, आद्गुणः। रत्वे तु हशिचेत्युत्वन्न स्यात्। **गतमहोरात्रिरेषेति** ॥ अहन् रात्रिरिति स्थिते, रुत्वम्, उत्वम्, आद्गुणः। रत्वे तु उत्वन्न स्यात्। ननु अहश्च रात्रिश्चेति द्वन्द्वे, अहस्सर्वैकदेशेत्यादिना समासान्ते अचि, यस्येति चेति लोपे, अहन् रात्र इति स्थिते, नकारस्य रुत्वे, उत्वे, आद्गुणे, 'रात्राह्नाहाः पुंसि' इति पुंस्त्वे, अहोरात्र इति रूपम्। अत्र नकारस्य रात्रिशब्दपरकत्वाभावात् कथं रुत्वम्। ततश्च रोऽसुपीति रत्वे उत्वन्नस्यादित्यत आह। **एकदेशेति। अहोरथन्तरमिति** ॥ अहश्च रथन्तरञ्चेति द्वन्द्वः। रथन्तरं सामविशेषः। **अहरादीनाम्** ॥ ननु अहरादीनामिति रेफविशिष्टस्य उपादानात् रेफस्य रेफविधानं व्यर्थमित्यत आह। **विसर्गापवाद इति। अह्न पतिरिति** ॥ अह्नां पतिरिति विग्रहः। **गीर्पतिरिति** ॥ गिरां पतिरिति विग्रहः। **धूर्पतिरिति** ॥ धुरां पतिरिति विग्रहः। उभयत्रापि 'वोरुपधाया' इति दीर्घः। **पक्ष इति** ॥ रत्वाभावपक्षे विसर्गस्य कुप्वोरिति उपध्मानीयविसर्गौ। इदुदुपधस्येति तु तपरकरणान्न। **रो रि** ॥ रः इति षष्ठी। 'ढो ढे लोप' इत्यतो लोप इत्यनुवर्तते। तदाह। **रेफस्येति** ॥ पुनर्रमते इति

१७४। ढ्रलोपे पूर्वस्य दीर्घोऽणः। (६-३-१११)

ढरेफौ लोपयतीति तथा, तस्मिन्वर्णेऽर्थाद्ढकाररेफात्मके परे पूर्वस्याणो दीर्घः स्यात्। पुनारमते। हरीरम्यः। शम्भूराजते। 'अणः' किम्। तृढः। वृढः। 'तृहू हिंसायाम्'। 'वृहू उद्यमने' पूर्वग्रहणमनुत्तरपदेऽपि पूर्व-

---

स्थिते प्रथमरेफस्य लोपः। **ढ्रलोपे** ॥ ढ्रश्च रेफश्च ढ्रौ, तौ लोपयतीति ढ्रलोपः। ण्यन्तात्कर्मण्युपपदे अण्, उपपदसमासः। ढलोपनिमित्तं रेफलोपनिमित्तञ्च विवक्षितम्। तच्च ढकाररेफात्मकमेव। ढो ढे लोपः, रोरीति, तयोरेव ढ्रलोपनिमित्तत्वात्। तथाच ढलोपनिमित्ते ढकारे रेफलोपनिमित्ते रेफे च परतः पूर्वस्याणो दीर्घ इति फलति। तदाह। **ढरेफावित्यादिना** ॥ ढलोपे रेफलोपे च पूर्वस्याणो दीर्घ इति तु न व्याख्यातम्। तथा सति चयर्नायमित्यनायर्प्रत्ययान्ते, तस्य लोप इति रेफलोपे, यकारादकारस्य, चकार, चचोरित्यादौ अभ्यासे अकारस्य च, हलादिशेषेण रेफलोपे दीर्घापत्तेः। **पुनारमत इति** ॥ पुनर् रमत इति स्थिते रोरीति रेफलोपः। तन्निमित्ते रेफे परे नकारादकारस्य दीर्घः। **हरीरम्य इति** ॥ हरिस् रम्य इति स्थिते रुत्वे रेफलोपे अनेन दीर्घः। **शम्भूराजत इति** ॥ शम्भुस् राजत इति स्थिते रुत्वे रेफलोपे अनेन दीर्घः। त्रयाणामुदाहरणात् पूर्वेणैव णकारेणात्राण् गृह्यत इति सूचितम्। **तृढः, वृढ इति** ॥ अत्र ऋकारस्य दीर्घनिवृत्त्यर्थमण्ग्रहणम्। ऋकारश्चात्र अण्ग्रहणेन न गृह्यते। पूर्वेणैव णकारेण प्रत्याहाराश्रयणात्। अन्यथा दीर्घश्रुत्या अच इत्युपस्थितौ किमण्ग्रहणेनेति भावः। ननु तृढो वृढ इत्यत्र ढ्रलोपस्यैवाभावात् दीर्घाप्रसक्तेरण्ग्रहणं व्यर्थमित्याशङ्क्य तत्र ढलोपं दर्शयितुमाह। **तृहू हिंसायाम्। वृहू उद्यमन इति** ॥ आभ्यां क्तप्रत्यये 'हो ढः' इति ढत्वे 'झषस्तथोः' इति तकारस्य धत्वे, तस्य ष्टुत्वेन ढकारे, ढो ढे लोप इति पूर्वस्य ढकारस्य लोपे, तृढो वृढ इति रूपे। अत्र ढलोपनिमित्ते ढकारे परे ऋकारस्य दीर्घनिवृत्त्यर्थमण्ग्रहणमिति भावः। ननु 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इत्येव सिद्धौ पूर्वस्येति किमर्थमित्यत आह। **पूर्वग्रहणमिति** ॥ ढ्रलोप इति सूत्रस्य 'अलुगुत्तरपदे' इत्युत्तरपदाधिकारस्थत्वादुत्तरपदस्थयोरेव ढ्रलोपनिमित्तभूतढरेफयोः परतः पूर्वपदस्याणो दीर्घ इत्यर्थस्स्यात्। ततश्च 'लिह आस्वादने' 'गुहू संवरणे' आभ्यां क्तप्रत्यये ढत्वधत्वष्टुत्वढलोपेषु इकारस्य उकारस्य च दीर्घो न स्यात्। तत्र ढलोपनिमित्तस्य ढस्य उत्तरपदस्थत्वाभावात्। इकारस्य उकारस्य च पूर्वपदस्थत्वाभावाच्च। इष्यते च लीढो गूढ इति। अतः पूर्वग्रहणम्। कृते तु पूर्वग्रहणे तत्सामर्थ्यादनुत्तरपदस्थयोरपि ढरेफयोः परतः अपूर्वपदस्थस्यापि पूर्वस्याणो दीर्घस्सिद्ध्यतीत्यर्थः। तथा उत्तरपद इत्यस्यानुवृत्तौ अजघाः इत्यत्रापि दीर्घो न स्यात्। गृधु अभिकांक्षायाम्। यङ्लुक्, द्वित्वम्, हलादिशेषः, अभ्यासस्य रुक्, कुहोश्चुः, जश्त्वम्, लङ्, सिप्, शप्, लुक्, लघूपधगुणः, रपरत्वम्, इतश्चेति इकारलोपः, हल्ङ्यादिना सुलोपः, जर् गर् ध् इति स्थिते, 'एकाचो बश' इति गकारस्य भष्भावः घकारः, जश्त्वं दकारः, दश्चेति रुः, अडागमः, अजघर् र् इति स्थिते रोरीतिरेफलोपः, ढ्रलोप इति दीर्घः, विसर्गः, अजघाः इति

मात्रस्यैव दीर्घार्थम्। अजर्घाः। लीढः। 'मनस् रथः' इत्यत्र रुत्वे कृते 'हशि च' (सू ९६६) इत्युत्वे 'रो रि' (सू १७३) इति रेफलोपे च प्राप्ते।

१७५। विप्रतिषेधे परं कार्यम्। (१-४-२)

तुल्यबलविरोधे सति परं कार्यं स्यात्। इति रेफलोपे प्राप्ते। 'पूर्वत्रासिद्धम्'। (सू १२) इति 'रो रि' (सू १७३) इत्यस्यासिद्धत्वादुत्वमेव। मनोरथः।

रूपम्। अत्रापि रेफलोपनिमित्तरेफस्य उत्तरपदस्थत्वाभावात् तस्मिन् परतः अकारस्य दीर्घो न स्यात्। अत उत्तरपदानुवृत्तिनिवृत्तये पूर्वग्रहणम्। यद्यपि ढ्रलोपे इत्यत्र ढलोपनिमित्त ढकारविषये उत्तरपद इत्यस्यानुवृत्तिः असम्भवादेव न सम्भवति। तथापि अजर्घा इत्यत्र रेफलोपनिमित्तरेफविषये उत्तरपद इत्यस्यानुवृत्तिनिवृत्तये पूर्वग्रहणम्। तदनुवृत्तौ हि नीरक्तम्, दूरक्तमित्यादावेव स्यात्। अजर्घा इत्यत्र न स्यात्। पुनारमत इत्यादौ असमासेऽपि न स्यात्। उत्तरपदशब्दस्य समासचरमावयव एव रूढत्वादित्यलम्। ननु मनोरथ इत्यत्र मनस् रथ इति स्थिते, सस्य रुत्वे, तस्य रेफस्य हशि चेत्युत्वं, रोरीति लोपश्चेत्युभयं प्रसक्तम्। तत्र कतरत् बाध्यमित्यत्र निर्द्धारयति। **मनस् रथः इत्यत्रेत्यादिना** ॥ मनस् रथ इत्यत्र रुत्वे कृते, हशिचेत्युत्वे, रोरीति रेफलोपे च प्राप्ते, उत्वमेवेत्यन्वयः। ननु परत्वात् रेफलोप एव स्यादिति शङ्कितुमाह। **विप्रतिषेधे** ॥ विप्रतिपूर्वात् सेधतेर्घञि उपसर्गवशात् परस्परविरोधे विप्रतिषेधशब्दः। विरोधश्च तुल्यबलयोरेव लोकसिद्धः। नहि मशकसिंहयोर्विरोध इत्यस्ति। तदाह। **तुल्यबलेति** ॥ द्वयोश्शास्त्रयोः क्वचिल्लब्धावकाशयोरेकत्र लक्ष्ये युगपत्सम्भवस्तुल्यबलविरोधः। कार्यस्य परत्वं परशास्त्रविहितत्वम्। **इति रेफलोपे प्राप्त इति** ॥ हशिचेत्यस्यावकाशः शिवो वन्द्य इति। रेफलोपस्यावकाशः पुनारमत इति। तत्र हि रोरित्युकारानुबन्धग्रहणात् हशिचेत्यप्रसक्तम्। ततश्च तयोस्तुल्यबलयोरुत्वरेफलोपयोः मनोरथ इत्यत्र युगपत् सम्भवादन्यतरस्मिन् बाधनीये सति परत्वादुत्वं बाधित्वा रेफलोपे प्राप्ते इत्यर्थः। तामिमां रेफलोपशङ्कां परिहरति। **पूर्वत्रेति** ॥ अत्र रेफलोपस्यासिद्धत्वादित्यनुक्त्वा रोरीत्यस्यासिद्धत्वादिति ब्रुवन् पूर्वत्रासिद्धमित्यत्र शास्त्रासिद्धत्वमेवाभ्युपैति। ननु कार्यासिद्धत्वम्। तथा सति हि अतिदेशस्यारोपरूपत्वात् असिद्धत्वारोपान्निरधिष्ठानारोपासम्भवेन सूत्रोदाहरणसम्पत्त्यै परत्वाल्लक्ष्ये कार्यप्रवृत्तेरावश्यकतया परत्वात् त्रैपादिके कार्ये जाते तत्राभावप्रतियोगित्वारोपेऽपि देवदत्तस्य न पुनरुन्मज्जनमिति न्यायेन स्थानीभूतरोरभावात् हशिचेत्यस्य प्राप्तिर्न स्यात्। शास्त्रासिद्धत्वे तु यद्यत् त्रैपादिकं शास्त्रं प्रवृत्त्युन्मुखं तत्तच्छास्त्र एवासिद्धत्वारोपात् पूर्वशास्त्रप्रतिबन्धकस्य परशास्त्रस्य उच्छेदबुद्धौ सत्यां 'विप्रतिषेधे परं कार्यम्' इति न प्रवर्तते। तदुक्तं 'पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्य' इति। ततश्च स्थानिनो निवृत्त्यभावात् पूर्वशास्त्रप्रवृत्तिर्निर्बाधा। एतच्च पूर्वत्रासिद्धमित्यत्र, अचः परस्मिन्नित्यत्र, षत्वतुकोरसिद्ध इत्यत्र, च भाष्ये स्पष्टम्। न च तौसदित्यादिनिर्देशात् देवदत्तहन्तृन्यायो न सार्वत्रिक इति वाच्यम्।

१७६ । एतत्तदोः सु लोपोऽकोरनञ्समासे हलि । (६-१-१३२)

अककारयोरेतत्तदोर्यः सुस्तस्य लोपः स्याद्धलि न तु नञ्समासे । एष विष्णुः । स शम्भुः । 'अकोः' किम् । एषको रुद्रः । 'अनञ्समासे' किम् । असश्शिवः । 'हलि' किम् । एषोऽत्र ।

हते सति देवदत्ते तद्घन्तरि हतेऽपि देवदत्तस्य न पुनरुन्मेषः । हन्तृहन्तरि हतत्वारोपे तु सुतरान्नोन्मेषः । देवदत्तं हन्तुमुद्युक्तस्य हनने तु देवदत्तस्य जीवनमस्त्येवेति न्यायशरीरम् । ताविल्यादौ च वृद्धिहन्तुः पूर्वसवर्णदीर्घस्य हननोद्यमसजातीयं प्रसङ्गमात्रम् । न तु हनन-स्थानीया लक्ष्ये प्रवृत्तिः । अतस्ताविल्यादौ नास्य न्यायस्य प्रवृत्तिरिति तौसदित्यादिनिर्देशः कथमेतस्य न्यायस्यानित्यतां बोधयितुमीष्टे । स्पष्टञ्चैतत् स्वादिष्विति सूत्रे वक्ष्यते । प्रकृते तु निरधिष्ठानारोपासम्भवात् हननसजातीया लक्ष्ये कार्यप्रवृत्तिरावश्यकी । ततश्च प्रवृत्तस्य रेफलोपस्यासिद्धत्वेऽपि देवदत्तहन्तृहतन्यायेन रोरुन्मेषाभावादुत्वं भवतीति शब्दरत्ने प्रपञ्चितम् । न च उत्वकार्यासिद्धत्वपक्षेऽपि मनोरथसिद्धिरस्त्येव । दर्शनाभावरूपरेफलोपस्याभावरूपासिद्धत्वे सति रोरुन्मेषावश्यकत्वात् । अभावाभावस्य प्रतियोगिरूपत्वादिति वाच्यम् । एवमपि कार्या-सिद्धत्वे अमू अमी इत्यायसिद्धेः । यथाचैतत्तथा अदस् शब्दनिरूपणावसरे प्रपञ्चयिष्यते । **एतत्तदोः** ॥ एतत्तदोरित्यत्र त्यदादीनामित्थस्सहोक्तौ यत्परन्तच्छिष्यत इत्येकशेषस्य त्यदाद्यत्वस्य चाभाव आर्षः । सु इति लुप्तषष्ठीकं पदम् एतत्तदोरित्यनेनान्वेति । एत-त्तदोस्सकारस्येति । अत एव सोर्लोपस्सुलोप इति न षष्ठीसमासः । असामर्थ्यात् । अविद्यमानः ककारः ययोस्तौ अकौ तयोः अकोरिति बहुव्रीहिः । तदाह । **अककारयो-रित्यादिना** ॥ अनञ् समासे इति न पर्युदासः । तथा सति नञिवयुक्तन्यायात् नञ्समास-सदृशे समास एव स्यात्, नतु एष विष्णुरित्यादिवाक्येषु इत्यभिप्रेत्याह । **न तु नञ् समास इति । एषविष्णुः, सशम्भुरिति** ॥ एषस् विष्णुः, सस् शम्भुरिति स्थिते सकारस्य लोपः । **एषको रुद्र इति** ॥ 'अव्ययसर्वनाम्नामकच्प्राक्टेः' इति अकच् । अत्र एतच्छब्दस्य सककारत्वान्न सुलोपः । तच्छब्दे अकचि सको रुद्र इत्यपि प्रत्युदाहारणम् । न च अकचि सति शब्दान्तर-त्वात् प्राप्तिरेव नेति वाच्यम् । 'तन्मध्यपतितस्तद्ग्रहणेन गृह्यत' इति परिभाषया साकच्कस्य अशब्दान्तरत्वात् । परिभाषायान्तु इदमेव ज्ञापकम् । **असश्शिव इति** ॥ न सः अस इति विग्रहः । विसर्जनीयस्य स इति सत्वे श्चुत्वेन शकारः । नञ्समासत्वान्न सुलोपः । अनेष-श्शिव इत्यपि प्रत्युदाहरणम् । **एषोऽत्रेति** ॥ एषस् अत्रेति स्थिते, सस्य रुत्वम्, उत्वम्, आद्गुणः, हल्परकत्वाभावान्न लोपः । अत्र एतत्तदोरवयवस्य सोरिति न व्याख्यातम् । असम्भवात् । सोः परत्वेन विहितस्य प्रातिपदिकावयवत्वाभावात् । एतत्तद्भ्यां परस्य सोरि-त्यपि न भवति । एतत्तदोरिति षष्ठीविरोधात् । एतत्तद्भ्यां विहितस्येति व्याख्याने तु परमैष ददाति, परमस ददातीत्यत्र अव्याप्तिः । तत्र सोस्समासाद्विहितत्वेन एतत्तद्भ्यां विहितत्वाभावात् । अनञ् समास इति प्रतिषेधवैयर्थ्याच्च । अतः एतत्तदर्थगतसंख्याभिधायिनस्सोरिति व्याख्येयम् ।

१७७। सोऽचि लोपे चेत्पादपूरणम्। (६-१-१३४)

'सस्' इत्येतस्य सोर्लोपः स्यादचि पादश्चेल्लोपे सत्येव पूर्येत। 'सेमामविड्ढि प्रभृतिम्'। इह 'ऋक्पाद एव गृह्यते' इति वामनः। 'अविशेषाच्छ्लोकपादोऽपि' इत्यपरे। 'सैष दाशरथीरामः'। 'लोपे चेत्' इति किम्। 'स इत्क्षेति,। स एवमुक्त्वा'। 'सत्येव' इत्यवधारणं तु 'स्यश्छन्दसि बहुलम्।' (सू ३५२६) इति पूर्वसूत्राद्बहुलग्रहणानुवृत्त्या लभ्यते। तेनेह न। 'सोऽहमाजन्मशुद्धानाम्'

। इति स्वादिसन्धिप्रकरणम्।

सोऽचि लोपे ॥ स इति प्रथमैकवचनान्तं स्वरूपपरम्। ततष्षष्ठ्या लुक, सस् शब्दस्येति लभ्यते। सुलोप इत्यनुवर्तते। तदाह। **सस् इत्यादिना** ॥ **इति स्वादिसन्धिः** ॥

॥ इति सन्धित्रयं समाप्तम् ॥



॥ श्रीरस्तु ॥

॥ अथ शब्दाधिकारः ॥

॥ अजन्तपुल्लिङ्गप्रकरणम् ॥

१७८ । अर्थवदधातुरप्रत्ययः प्रातिपदिकम् । (१-२-४५)

धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वार्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात् ।

अथ स्त्रौजसमौडित्यादिना स्वादिप्रत्ययान्वक्ष्यति । तत्र इयाप्प्रातिपदिकादित्यधिकृतम् । किन्तत् प्रातिपदिकमिति जिज्ञासायामाह । **अर्थवदधातुः** ॥ अर्थोऽस्यास्तीत्यर्थवत्, नपुंसकलिङ्गानुसारात् शब्दस्वरूपमिति विशेष्यमध्याहार्यम् । अधातुरिति, अप्रत्यय इति, च तद्विशेषणम् । न धातुरधातुरिति नञ् तत्पुरुषः । 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' इति पुंस्त्वम् । अप्रत्यय इत्यावर्तते । प्रत्ययभिन्नं प्रत्ययान्तभिन्नञ्च विवक्षितम् । पूर्ववत्पुंस्त्वम् । संज्ञाविधाविति निषेधस्तु प्रत्ययस्य यत्र संज्ञा तद्विषय इति भावः । तदाह । **धातुं प्रत्ययमित्यादिना** ॥ अव्युत्पन्ना डित्थादिशब्दा इहोदाहरणानि । अर्थवदिति किम् । धनं वनमित्यादौ प्रतिवर्णं प्रातिपदिकसंज्ञा माभूत् । सत्यां हि प्रातिपदिकसंज्ञायां प्रतिवर्णं सुबुत्पत्तिस्स्यात् । संख्याकारकाभावेऽपि प्रथमैकवचनस्य सोर्दुर्वारत्वात् । प्रथमाविभक्तेः कारकानपेक्षत्वात्, तदेकवचनस्य संख्यानवगमेऽपि प्रवृत्तेर्भाष्ये सिद्धान्ततत्वाच्च । नच हल्ङ्यादिना सुलोपात् प्रतिवर्णं सोरुत्पत्तावपि न क्षतिरिति वाच्यम् । एवमपि नलोपस्य दुर्वारत्वात् । अकारात् सोः रुत्वविसर्गापत्तेश्चेत्यलम् । अधातुरिति किम् । हनधातोर्लङि, तिप्, शप्, लुक्, इतश्चेतीकारलोपः, अडागमः, हल्ङ्यादिलोपः, अहन्निति रूपम् । अत्र धातोः प्रातिपदिकसंज्ञायां सुबपवादे तिङि उत्पन्ने लुप्ते तस्मिन् प्रातिपदिकसंज्ञायाः प्रागुत्पन्नाया अनपगमात् नलोपस्स्यात् । नच प्रत्ययलक्षणमाश्रित्य प्रत्ययान्तपर्युदासादेव न प्रातिपदिकत्वमिति वाच्यम् । एवमपि प्राक्प्रवृत्तप्रातिपदिकत्वस्यानपगमात् । नचैवमपि कार्यकालपक्षे नलोपार्थं प्रातिपदिकसंज्ञायां क्रियमाणायां प्रत्ययलक्षणेन प्रत्ययान्तस्य प्रातिपदिकसंज्ञा न स्यादिति वाच्यम् । तर्हि हे राजन्नित्यत्रापि प्रत्ययलक्षणेन प्रत्ययान्तत्वात् प्रातिपदिकत्वाभावे सति नलोपस्याप्रसक्तौ 'न डिसम्बुद्ध्योः' इति तन्निषेधवैयर्थ्यप्रसङ्गात् । नच राजन्शब्दस्यौणादिककनिन्प्रत्ययान्तस्य कृत्तद्धितेति प्रातिपदिकत्वान्नलोपप्रसक्तौ 'न डिसम्बुद्ध्योः' इति निषेधोऽर्थवानिति वाच्यम् । उणादीनामव्युत्पत्तिपक्षे कृत्तद्धितेत्यस्याप्रवृत्तेः । एवञ्चास्मादेव निषेधात् प्रत्ययलक्षणमाश्रित्याप्रत्ययान्त इति पर्युदासो न प्रवर्तत इति विज्ञायते । एवञ्च अहन्नित्यत्राप्यप्रत्ययान्तत्वात् प्रातिपदिकत्वप्राप्तौ तन्निवृत्त्यर्थमधातुग्रहणम् । अप्रत्यय इति किम् । हरिषु करोषि इत्यत्र सुप्सिपोरर्थवत्त्वात् अप्रत्ययान्तत्वाच्च प्रातिपदिकत्वे प्राप्ते तन्निवृत्त्यर्थमप्रत्यय इति प्रत्ययपर्युदासः । नचात्र सुप्सिपोर्व्यपदेशिवद्भावेन

१७९। कृत्तद्धितसमासाश्च। (१-२-४६)

कृत्तद्धितान्तौ समासाश्च प्रातिपदिकसंज्ञाः स्युः। पूर्वसूत्रेण सिद्धे समासग्रहणं नियमार्थम्। यत्र सङ्घाते पूर्वो भागः पदं तस्य चेद्भवति तर्हि समासस्यैव। तेन वाक्यस्य न।

प्रत्ययान्तत्वात् प्रत्ययान्तपर्युदासेनैव प्रातिपदिकत्वनिवृत्तिसम्भवात् किं प्रत्ययपर्युदासेनेति वाच्यम्। प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणमिति परिभाषया प्रकृतिप्रत्ययसमुदायस्यैव प्रत्ययान्ततया केवलप्रत्ययस्य सुप्तिपोः पर्युदासालाभात्। अप्रत्ययान्त इति किम्। हरिषु करोषि। अत्र प्रकृतिप्रत्ययसमुदाययोः प्रत्ययभिन्नत्वादर्थवत्त्वाच्च प्रातिपदिकत्वं माभूत्॥ **कृत्तद्धित॥** कृच्च तद्धितश्च समासश्चेति विग्रहः। पूर्वसूत्रात् प्रातिपदिकमित्यनुवर्तते। बहुवचनान्ततया विपरिणम्यते। प्रत्ययग्रहणपरिभाषया कृत्तद्धितेति तदन्तग्रहणम्। तदाह। **कृत्तद्धितान्तावित्यादिना॥** कृत्तद्धितान्तयोः प्रत्ययान्तत्वात् पूर्वसूत्रेणाप्राप्तौ कृत्तद्धितग्रहणम्। अस्मादेव पूर्वसूत्रे संज्ञाविधावपि प्रत्ययग्रहणपरिभाषया तदन्तलाभात् प्रत्ययान्तपर्युदासः। केचित्तु अर्थवदित्यनुवर्त्य तत्सामर्थ्यात् तदन्तविधिमाहुः। कृदन्ते यथा—कर्ता भर्ता इत्यादि। तद्धिते यथा—औपगव इत्यादि। समासे यथा—राजपुरुष इत्यादि। ननु समासग्रहणं व्यर्थम्। समासे राजपुरुष इत्यादिशब्दानां पूर्वसूत्रेणैव प्रातिपदिकत्वस्य सिद्धत्वात्। नच उत्तरपदोत्तरलुप्तप्रत्ययं प्रत्ययलक्षणेनाश्रित्य प्रत्ययान्तपर्युदासश्शङ्क्यः। उत्तरपदमात्रस्य प्रत्ययान्तत्वेऽपि समुदायस्याप्रत्ययान्तत्वात्, प्रत्ययग्रहणे यस्मात्सविहितस्तदादेरेव ग्रहणात्, प्रत्ययलक्षणमाश्रित्य प्रत्ययान्तपर्युदासो न प्रवर्तत इति 'न ङिसम्बुद्ध्योः' इति निषेधेन ज्ञाप्यत इति पूर्वसूत्रे प्रपञ्चितत्वाच्चेत्यत आह। **पूर्वसूत्रेणेत्यादिना॥** नियमशरीरं दर्शयति। **यत्रेति॥** पूर्वो भागः पदमित्युपलक्षणम्। उत्तरभागस्तु प्रत्ययो नेत्यपि द्रष्टव्यम्। अन्यथा जन्मवानित्यादौ प्रातिपदिकत्वं न स्यात्। स्वादिष्वसर्वनामस्थान इति पूर्वभागस्य पदत्वात्। नचात्र कृत्तद्धितेति तद्धितग्रहणसामर्थ्यादेव प्रातिपदिकत्वं सम्भवतीति वाच्यम्। दाक्षिरित्यादौ तद्धितग्रहणस्य चरितार्थत्वात्। तत्र हि प्रकृतिभागो न पदम्। भत्वेन तद्घाघात्। पूर्वोभागः पदमित्यनुक्तौ बहुपटव इत्यत्र प्रातिपदिकसंज्ञा न स्यात्। ईषदसमाप्तावित्यनुवृत्तौ 'विभाषा सुपो बहुच्पुरस्तात्तु' इति सूत्रेण पटव इति प्रथमाबहुवचनान्तात् पूर्वतः बहुच्प्रत्यये कृते अर्थवदिति प्रातिपदिकत्वात् तदवयवजसो लुकि "चितस्सप्रकृतेर्बह्वकजर्थम्" इति टकारादुकारस्य उदात्तत्वे चित्स्वरे कृते पुनर्जसि बहुपटव इति रूपम्। अत्र टकारादकार उदात्त इति स्थितिः। जसन्तात् पूर्वतो बहुच्प्रत्यये बहुपटव इति समुदायस्य प्रातिपदिकत्वाभावे तु ततो जसन्तरं नोत्पद्येत। नचेष्टापत्तिः। तथासति बहुच्प्रकृतिभूतजसन्ते जसः प्रातिपदिकावयवत्वाभावेन 'सुपो धातुप्रातिपदिकयोः' इति लुगभावाद्बहुपटव इति जसन्तस्यैव बहुच्प्रकृतितया चितस्सप्रकृतेर्विधीयमानश्चित्स्वरः जस एवाकारस्य स्यात्। इष्यते तु टकारादुत्तरस्य बहुपवट

१८० । प्रत्ययः । (३-१-१)

आ पञ्चमपरिसमाप्तेरधिकारोऽयम् ।

१८१ । परश्च । (३-१-२)

अयमपि तथा ।

१८२ । ङ्याप्प्रातिपदिकात् । (४-१-१)

ङ्यन्तादाबन्तात्प्रातिपदिकाच्चेत्यापञ्चमपरिसमाप्तेरधिकारः । 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' (प ७२) इत्येव सिद्धे ङ्याब्ग्रहणं ङ्याबन्तात्तद्धितोत्पत्तिर्यथा स्यान्ङ्याब्भ्यां प्राङ्माभूदित्येवमर्थम् ।

इति समुदायस्य प्रातिपदिकत्वे तु प्रातिपदिकावयवत्वात् जसो लुकि पटुशब्दस्यैव बहुच्प्रकृतितया टकारादुत्तरस्य चित्स्वरे सति पुनर्जसि बहुपटव इति रूपमुक्तं निर्बाधमिति भावः । नियमस्य फलमाह । **तेनेति** ॥ उक्तनियमेनेत्यर्थः । अन्यथा 'देवदत्त गामभ्याज शुक्लां दण्डेन' इत्यादिवाक्यस्यापि प्रातिपदिकत्वापत्तौ सुब्लुक् स्यात् । न च वाक्यस्य प्रत्ययान्तत्वादेव न प्रातिपदिकत्वमिति वाच्यम् । प्रत्ययग्रहणे यस्मात् स विहितस्तदादेरेव ग्रहणादिति भावः । कृत्तद्धितसमासाश्चेति चकारः अनुक्तसमुच्चयार्थः । तेन 'निपातस्यानर्थकस्य प्रातिपदिकसंज्ञा वक्तव्या' इति वार्तिकं गतार्थम् । **प्रत्ययः** ॥ तृतीयाध्यायस्यादिमं सूत्रमिदम् । इत ऊर्ध्वमापञ्चमाध्यायपरिसमाप्तेः प्रत्ययशब्दस्संज्ञात्वेनाधिक्रियेत इत्यर्थः । हनश्चवधः, ईच खनः, नडादीनां कुक्च, इत्यादीनामादेशागमानान्तु न प्रत्ययसंज्ञा । महासंज्ञाकरणात् । **परश्च** ॥ तृतीयाध्यायस्य द्वितीयसूत्रमेतत् । **अयमपि तथेति** ॥ अयमपि योगः आपञ्चमपरिसमाप्तेरधिकार इत्यर्थः । अवधिनियमे तु व्याख्यानमेव शरणम् । **ङ्याप्प्रातिपदिकात्** ॥ चतुर्थाध्यायस्यादिमं सूत्रमिदम् । ङीच, आप्च, प्रातिपदिकञ्चेति, समाहारद्वन्द्वः । 'ङी इति, ङीप्, ङीष्, ङीनां, सामान्येन ग्रहणम्' । आबिति, टाप्, डाप्, चापां, ग्रहणम् । प्रत्ययग्रहणपरिभाषया तदन्तग्रहणम् । तदाह । **ङ्यन्तादित्यादिना** ॥ आपञ्चमेत्यवधिनियमे तु व्याख्यानमेव शरणम् । ननु प्रातिपदिकादित्येव सूत्रयताम् । ङ्याब्ग्रहणम्मास्तु । प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति परिभाषया, ऊङ्प्रत्ययान्तात् श्वश्रूशब्दादिव, दण्डिनी, अजा, खट्वा, इत्यादिभ्योऽपि ङ्याबन्तेभ्यस्सुबादिप्रत्ययसम्भवादित्यत आह । **प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापीति** ॥ स्त्रीलिङ्गबोधकङीबादिप्रत्ययविशिष्टस्येत्यर्थः । **यथा स्यादिति** ॥ यथेति योग्यतायाम् । ङ्याबन्तादेव तद्धितः प्राप्तुं योग्यः । स च ङ्याब्ग्रहणे सत्येव स्यादित्यर्थः । व्यवच्छेद्यन्दर्शयति । **ङ्याब्भ्यां प्राङ्माभूदिति** ॥ ततश्च लोहिनिका आर्यका च सिध्यति । तथाहि । लोहितशब्दस्तावत् 'वर्णान्तान्तणातिनितान्तानाम्' इति फिट्सूत्रेणाद्युदात्तः । ततश्च ओकार उदात्तः । 'अनुदात्तं पदमेकवर्जम्'

१८३। स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्। (४-१-२)

ङ्यन्ताबन्तात्प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः। सुङस्योरुकारेकारौ जशटङपाश्चेतः।

इति परिशिष्टौ इकारोकारावनुदात्तौ। तथाच 'वर्णादनुदात्तात्तोपधात्तो न' इति मणौ विद्यमानाल्लोहितशब्दात् स्त्रीत्वविवक्षायां ङीप्, तत्सन्नियोगेन तकारस्य नकारादेशश्च प्राप्तः। 'लोहितान्मणौ' इति स्वार्थिकः कनपि प्राप्तः। तत्र स्वार्थिकत्वादन्तरङ्गः परश्च कन् नत्वसन्नियोगशिष्टं ङीपं बाधित्वा प्रवर्तेत। ततश्च ङीपो न प्रसक्तिः। कोपधत्वेन तोपधत्वाभावात्। ततश्च लोहितकशब्दात् 'अजाद्यतः' इति टापि प्रत्ययस्थादित्यादिना इत्वे, लोहितिकेत्येव स्यात्, न तु लोहिनिकेति। इष्यते तु रूपद्वयमपि। ङ्याप्प्रातिपदिकादित्यत्र ङीब्ग्रहणे तु तत्सामर्थ्यात् अन्तरङ्गं परमपि कनं बाधित्वा नत्वसन्नियोगशिष्टे ङीपि कृते, लोहिनीशब्दात् कनि, 'केऽण' इति ह्रस्वे, लोहिनिकेति, रूपम्। वर्णादनुदात्तादित्यस्य वैकल्पिकतया नत्वसन्नियोगशिष्टङीबभावे तु लोहितशब्दात् कनि, ह्रस्वे, पुनः कान्तात् टापि, प्रत्ययस्थादितीत्वे लोहितिकेत्यपि सिध्यति। तथा आर्यशब्दात् स्वार्थिके कनि, समुदायोत्तरटापैव, स्त्रीत्वबोधनसम्भवादेकाज्द्विर्वचनन्यायेन कनन्तादेव टापि, कनः पूर्वं टाबभावात्, आतस्स्थानिकस्य अतोऽभावात्, उदीचामातस्स्थाने, इति इत्वविकल्पस्याप्रवृत्तौ, प्रत्ययस्थादिति नित्यमित्वे, आर्यिकेत्येव स्यात्, आर्यकेति न स्यात्। इष्यतेतूभयमपि। ङ्याप्प्रातिपदिकादित्यत्र आब्ग्रहणे तु तत्सामर्थ्यात् स्वार्थिकं कनं बाधित्वा टापि, ततः कनि, केऽण इति ह्रस्वे, पुनः कनन्ताट्टापि, उदीचामातस्स्थाने इतीत्वविकल्पे, रूपद्वयं सिध्यति। वस्तुतस्तु ङ्यापोर्ग्रहणम्मास्तु। सुबन्तादेव तद्धितोत्पत्तिः। सुपः प्रागेव च ङ्यापौ प्रवर्तेते। स्वार्थद्रव्यलिङ्गसंख्याकारककृत्सादिप्रयुक्तकार्याणां क्रमिकत्वात्। तथाहि। स्वार्थः प्रवृत्तिनिमित्तं जात्यादि। तज्ज्ञानं पूर्वं भवति। विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात्। ततस्तदाश्रयज्ञानम्। धर्मित्वेन प्रधानत्वात् लिङ्गादिभिराकांक्षितत्वाच्च। ततस्स्वमात्रापेक्षत्वात् लिङ्गस्य ज्ञानम्। ततो विजातीयक्रियापेक्षकारकापेक्षया सजातीयपदार्थापेक्षसङ्ख्याज्ञानम्। ततः कारकरूपविभक्त्यर्थापेक्षा भवति। तन्निवृत्तौ कुत्सादिज्ञानमिति कुत्सित इति सूत्रभाष्ये स्थितम्। शब्दरत्ने च परिष्कृतमेतत्। **स्वौजसमौट्॥** सु-औ-जस्, अं-औट्-शस्, टा-भ्यां-भिस्, ङे-भ्यां-भ्यस्, ङसि-भ्यां-भ्यस्, ङस्-ओस्-आम्, ङि-ओस्-सुप्, इत्येकविंशतिस्स्वादयः। समाहारद्वन्द्वः, इतरेतरयोगद्वन्द्वो वा। तथा सति सौत्रमेकवचनम्। ङ्याप्प्रातिपदिकादित्यधिकृतं, प्रत्ययः, परश्चेति च यथायथञ्च विपरिणम्यते। तदाह। **ङ्यन्तादित्यादिना। सुङस्योरिति॥** सु-ङसि-इत्यनयोरुकारेकारौ, जस्-शस्-इत्यनयोर्जकारशकारौ, औट्-टा-इत्यनयोष्टकारः, ङे-ङसि-ङस्-ङि-इत्येतेषां ङकारः, सुप्, इत्यस्य पकारः, इत्येते इत्सञ्ज्ञकाः प्रत्येतव्या इत्यर्थः। 'उपदेशेऽजनुनासिक इत्, चुटू, लशकृतद्धिते, हलन्त्यम्' इति

१८४ । विभक्तिश्च । (१-४-१०४)

सुप्तिङौ विभक्तिसंज्ञौ स्तः । तत्र 'सु' 'औ' 'जस्' इत्यादीनां सप्तानां त्रिकाणां प्रथमादयः सप्तम्यन्ताः प्राचां संज्ञाः । ताभिरिहापि व्यवहारः ।

१८५ । सुपः । (१-४-१०३)

सुपस्त्रीणि त्रीणि वचनान्येकश एकवचनद्विवचनबहुवचनसंज्ञानि स्युः ।

१८६ । द्येकयोर्द्विवचनैकवचने । (१-४-२२)

द्वित्वैकत्वयोरेतौ स्तः ।

१८७ । बहुषु बहुवचनम् । (१-४-२१)

बहुत्वे एतत्स्यात् । रुत्वविसर्गौ । रामः ।

सूत्रैरिति शेषः । इत्संज्ञायाश्च लोपः । तदुच्चारणफलन्तु तत्र तत्र वक्ष्यते । अथ 'न विभक्तौ-तुस्माः' इत्याद्युपयोगिनीं विभक्तिसंज्ञामाह । **विभक्तिश्च** ॥ सुप इति पूर्वसूत्रात् सुब्ग्रहणं, तिङस्त्रीणीत्यतस्त्रिङ्ग्रहणञ्चानुवर्तते । एकदेशे स्वरितत्वप्रतिज्ञाबलात् । तदाह । **सुप्तिङा-विति** ॥ चकारः पुरुषवचनसंज्ञाभिस्समावेशार्थः । तेन एकसंज्ञाधिकारस्थत्वेऽपि न पर्या-यत्वम् । अन्यथा 'रामेभ्यः, भवामः' इत्यादौ विभक्तिसंज्ञाविरहेण न विभक्ताविति निषेधो न स्यात् । ननु 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा, कर्मणि द्वितीया, कर्तृकरणयोस्तृतीया, चतुर्थी सम्प्रदाने, अपादाने पञ्चमी, षष्ठी शेषे, सप्तम्यधिकरणे च' इत्यादौ कथं प्रथमादिव्यवहारः । सूत्रकृता पाणिनिना प्रथमादिसंज्ञानामनुक्तत्वादित्यत आह । **तत्रेति** ॥ तेषु स्वादि-प्रत्ययेषु मध्य इत्यर्थः । **इत्यादीनामिति** ॥ आदिना अम्-औट्-शस्-इत्यादीनां ग्रहणम् । **प्राचामिति** ॥ पाणिनेः पूर्वेषां स्फोटायनाद्याचार्याणां शास्त्रे प्रथमाद्यास्सप्तम्यन्तास्संज्ञाः स्थिता इत्यन्वयः । किं तत इत्यत आह । **ताभिरिति** ॥ ताभिः प्रथमादिसंज्ञाभिः इहापि पाणिनीय-शास्त्रेऽपि व्यवहारस्सम्भवतीत्यर्थः । **सुपः** ॥ सुप् प्रत्याहारः षष्ठ्येकवचनम् । 'तान्येकवचनद्वि-वचनबहुवचनान्येकशः' इति सूत्रं तानीतिवर्जमनुवर्तते । **एकश इति** ॥ एकैकमित्यर्थः । "संख्यैकवचनाच्च वीप्सायाम्" इति शस् । शसैव वीप्साया अभिधानात् 'नित्यवीप्सयोः' इति द्वित्वन्न । तच्च संख्यैकवचनाच्चेति सूत्रव्याख्यावसरे प्रपञ्चयिष्यते । तिङस्त्रीणित्रीणीत्यतः त्रीणि-त्रीणीत्यनुवर्तते । तदाह । **सुपस्त्रीणीत्यादिना । द्येकयोः** ॥ द्व्येकयोरिति भावप्रधानो निर्देशः । अन्यथा द्व्येकेष्विति स्यादित्याभिप्रेत्य व्याचष्टे । **द्वित्वैकत्वयोरिति । बहुषु** ॥ पूर्वसूत्रावैरूप्याय इहापि बहुशब्दो बहुत्वपर इत्याह । **बहुत्व इति** ॥ नचात्र सूत्रे बहुशब्दस्य बहुत्वपरत्वेऽपि बहुत्वस्य एकत्वात् बहुष्विति बहुवचनं कथमिति शङ्क्यम् । बहुत्वसङ्ख्याधा-रद्रव्यगतबहुत्वस्य बहुत्वगुणे आरोपेण तदुपपत्तेः । बहुत्वञ्च त्रित्वचतुष्ट्वादिपरार्धसङ्ख्याव्याप-कीभूतधर्मविशेषः । ननु त्रित्वाद्यन्यतममित्येकदेशस्य प्रथमाबहुवचनेन सर्वप्राप्तेर्विकल्पस्स्यादिति

१८८। सरूपाणामेकशेष एकविभक्तौ। (१-२-६४)

एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते। 'प्रथमयोः पूर्वसवर्णः' (सू १६४)। 'नादिचि' (सू १६५)। 'वृद्धिरेचि' (सू ७२)। रामौ।

कपिञ्जलाधिकरणे तद्भाष्यवार्तिकयोः स्थितम्। प्रपञ्चितञ्चास्माभिरध्वरमीमांसाकुतूहलवृत्तौ। एवञ्च बहुरोदन इति वैपुल्यवाचिनो बहुशब्दात् न बहुवचनम्। द्व्येकयोरित्यादि प्राय पाठबलेन सङ्ख्या नियतस्यैव। तथाविधबहुत्वस्यात्र विवक्षितत्वात्। एकस्यामेव स्त्र्यादिव्यक्तौ दारा इत्यादिप्रयोगे त्ववयवबहुत्वस्यावयविन्यारोपाद्बहुवचनं कोशवृद्धव्यवहारबलादित्यलम्। **रुत्वविसर्गाविति** ॥ रामशब्दात् प्रथमाविभक्तौ, एकवचने सति, उकारस्य इत्त्वेन लोपे, ससजुषोरिति रुत्वे, खरवसानयोरिति विसर्ग इत्यर्थः। सु इत्युकारस्तु अर्वणस्त्रसावित्यादौ विशेषणार्थः। असीत्युक्ते हि असकारादावित्यर्थस्स्यात्। ततश्च वाजमर्वत्सु इत्यत्र अर्वणस्तृविधिर्नप्रवर्तेत। नचात्र रोरसुप्त्वात् तदन्तस्य पदत्वाभावात् रेफस्य पदान्तत्वाभावात् कथमिह विसर्ग इति वाच्यम्। स्थानिवद्भावेन रोस्सुप्त्वात्। नच स्थानिवद्भावे कर्तव्ये त्रैपादिकस्य रोरसिद्धत्वं शङ्क्यम्। 'इदुदुपधस्य चाप्रत्ययस्य' इति अप्रत्ययग्रहणेन स्थानिवत्त्वातिदेशे रोरसिद्धत्वाभावज्ञापनात्। तत्र ह्यप्रत्ययग्रहणम् अग्निꣳ करोति, कविभिꣳ कृतमित्यादौ विसर्गपर्युदासार्थम्। स्थानिवत्त्वे कर्तव्ये रोरसिद्धत्वे तु तत्र विसर्गस्यैवाभावात् तद्वैयर्थ्यं स्पष्टमेवेत्यलम्। **राम इति** ॥ 'रमन्ते योगिनोऽनन्ते सत्यानन्दे चिदात्मनि।' इति रामपदेनासौ परं ब्रह्माभिधीयत इति श्रुतिः। 'करणाधिकरणयोश्च' इत्यधिकारे 'हलश्च' इत्यधिकरणे घञ्। कृत्तद्धितेति प्रातिपदिकत्वम्। अव्युत्पन्नस्संज्ञाशब्दो वा। तथा सति अर्थवदिति प्रातिपदिकत्वम्। अथ प्रातिपदिकार्थगतद्वित्वादिविवक्षायां प्रातिपदिकस्य द्वित्र्यादिप्रयोगप्राप्ताविदमारभ्यते। **सरूपाणाम्** ॥ एकविभक्ताविति सरूपाणामित्यत्रान्वेति। समानं रूपं येषान्तानि सरूपाणि। ज्योतिर्जनपदेत्यादिना समानस्य सभावः। निर्द्धारणषष्ठी। वृद्धो यूनेत्युत्तरसूत्रादेवेत्यपकृष्यते। शिष्यत इति शेषः। कर्मणि घञ्। एकश्चासौ शेषश्चेति पूर्वकालैकेति समासः। एकस्यां विभक्तौ परतः सरूपाणामेव दृष्टानाम्मध्ये एकशिष्यत इति फलति। तदाह। **एकविभक्ताविति** ॥ एवेति किम्। मातृशब्दस्तावज्जननीवाची, परिच्छेत्तृवाची च। तत्र मातृभ्यामिति भ्यामादौ क्वचित्सारूप्ये सत्यपि औजसादिषु, मातरौ मातारावितिवैरूप्यदर्शनान्नैकशेषः। यद्यपि कतिपयविभक्तौ उक्तयोर्मातृशब्दयोस्सारूप्येणैव दर्शनमस्ति। तथापि एकस्यामपि विभक्तौ परतः विरूपाणि न दृष्टानीत्यर्थो विवक्षितः। एतद्द्योतनायैव एकविभक्तावित्यत्र एकग्रहणम्। एवकारापकर्षसिद्धार्थकथनपरम् एकग्रहणं स्पष्टार्थमेवेति केचित्। एकशेष इत्येकपदोपादानन्तु द्विबहूनामपि शेषो मा भूदित्येतदर्थम्। शेषपदानुपादाने तु सरूपाणां स्थाने एक आदेशस्स्यात्। ततश्च अश्वश्च अश्वश्चेति द्व्युदात्तवतस्स्थाने द्व्युदात्तवानादेशस्स्यात्। तन्निवृत्त्यर्थं शेषग्रहणम्। एकविभक्ताविति सारूप्ये उपलक्षणम्। न तु एकविभक्तौ परतः एकशेषो

१८९ । चुटू । (१-३-७)

प्रत्ययाद्यौ चुटू इतौ स्तः । इति जस्येत्संज्ञायाम् ।

१९० । न विभक्तौ तुस्माः । (१-३-४)

विभक्तिस्थास्तवर्गसकारमकारा इतो न स्युः । इति सकारस्य नेत्त्वम् ।

१९१ । अतो गुणे । (६-१-९७)

अपदान्तादकाराद्गुणे परतः पररूपमेकादेशः स्यात्' इति प्राप्ते । परत्वा-

---

भवतीति व्याख्यानमुचितम् । जननीपरिच्छेत्तृवाचिनोरेकशेषापत्तेरित्यादि प्रपञ्चितं प्रौढमनोरमायाम् । अत्र 'तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे' इति पूर्वसूत्रात् द्वन्द्व इत्यनुवृत्य द्वन्द्वे प्रसक्त इति व्याख्येयम् । ततश्च देवदेवः राजराज इत्यादौ नैकशेषः । द्वन्द्वापवाद एकशेष इति फलितम् । यद्यप्यनैमित्तिकत्वादन्तरङ्गोऽयमेकशेषस्सुबुत्पत्तेः प्रागेव प्रवर्तते । तथापि द्वन्द्वापवाद एवायम् । असति ह्येकशेषे सुबुत्पत्तिः, पक्षे द्वन्द्वश्च स्यात् । सति तु अनेकसुबन्तविरहात् द्वन्द्वस्याप्राप्तिः फलिता । घटश्च घटश्च घटश्च तेषां समाहारद्वन्द्वविषये तु नास्य प्रवृत्तिः । अनभिधानात् । द्वन्द्वे कृते एकशेष इति तु न व्याख्येयम् । पन्थान इत्यादौ ऋक्पूरित्यादिसमासान्तापत्तेः । करावित्यादौ 'द्वन्द्वश्च प्राणितूर्य' इत्याद्यापत्तेः । उत्तरसूत्रादिह द्वन्द्वग्रहणापकर्षे 'इदितो नुम् धातोः' इत्यत्र इदित इति निर्देशो लिङ्गम् । इत् इकारः इत्सञ्ज्ञको यस्य सः इदित्, अत्र इच्छब्दयोरेकविभक्तौ सारूप्येऽपि द्वन्द्वविषयत्वाभावान्नैकशेषः । अन्यथा तत्राप्येकशेषस्स्यादित्यलम् । राम औ इति स्थिते, प्रक्रियां दर्शयति । **प्रथमयोरित्यादिना** ॥ वृद्धिं बाधित्वा पूर्वसवर्णदीर्घे प्राप्ते आह । **नादिचीति** ॥ तस्मिन् प्रतिषिद्धे सति वृद्धेः प्रवृत्तौ रामौ इति रूपमित्यर्थः । देवदत्तहन्तृहतन्यायस्तु नात्र प्रवर्तत इति स्वादिसन्धौ मनोरथ इत्यत्र प्रपञ्चितम् । राम जस् इति स्थिते । **चुटू** ॥ 'उपदेशेऽजनुनासिक इत्' इत्यतः इदित्यनुवर्तते । तच्च द्विवचनान्ततया विपरिणम्यते । 'आदिर्ञिटुडवः' इत्यत आदिग्रहणमनुवर्त्य द्विवचनान्ततया विपरिणम्यते । षऽ प्रत्ययस्येत्यतः प्रत्ययस्येत्यनुवर्तते । तदाह । **प्रत्ययाद्यावित्यादिना । इति जस्येति** ॥ इत्संज्ञायां तस्य लोप इति लोपः । जकारस्तु जसश्शीत्यादौ शसो निवृत्त्यर्थः । अथ जसस्सकारस्य हलन्त्यमितीत्संज्ञायां लोपमाशङ्क्याह । **न विभक्तौ** ॥ तु स् म् एतेषां द्वन्द्वः । इदित्यनुवृत्तं बहुवचनान्ततया विपरिणम्यते । तदाह । **विभक्तिस्था इत्यादिना** ॥ अथ राम अस् इति स्थिते अकस्सवर्णे दीर्घ इति सवर्णदीर्घस्यापवादं पररूपमाशङ्क्याह । **अतो गुणे** ॥ एङि पररूपमित्यतः पररूपमित्यनुवर्तते । उस्यपदान्तादित्यतः अपदान्तादित्यनुवर्तते । एकः पूर्वपरयोरित्यधिकृतम् । अत इति पञ्चमी । तदाह । **अपदान्तादित्यादिना । इति प्राप्त इति** ॥ नच परत्वादकस्सवर्णे दीर्घ इति कुतो न स्यादिति वाच्यम् । अकस्सवर्णे दीर्घ इति प्राप्ते एवमारभ्यमाणपररूपस्य तदपवादत्वात् । परादपवादस्य बलीयस्त्वादिति भावः । **परत्वादिति** ॥ 'अतो गुणे' इत्यपेक्षया 'प्रथमयोः पूर्वसवर्णः' इत्यस्य परत्वादित्यर्थः ।

त्पूर्वसवर्णदीर्घः। 'अतो गुणे' (सू १९१) इति हि 'पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरान्' (प ६०) इति न्यायेन 'अकः सवर्णे दीर्घः' (सू ८५) इत्यस्यैवापवादः। न तु प्रथमयोः—' (सू १६४) इत्यस्यापि। रामाः।

१९२। एकवचनं सम्बुद्धिः। (२-३-४९)

सम्बोधने प्रथमाया एकवचनं सम्बुद्धिसंज्ञं स्यात्।

१९३। एङ्ह्रस्वात्सम्बुद्धेः। (६-१-६९)

एङन्ताद्ध्रस्वान्ताच्चाङ्गाद्धल्लुप्यते सम्बुद्धेश्चेत्। सम्बुद्ध्याक्षिप्तस्याङ्गस्यैङ्ह्रस्वाभ्यां विशेषणान्नेह। हे कतरत्कुलेति। हे राम। हे रामौ। हे रामाः। 'एङ्'

ननु पररूपमिदं अपवादत्वात् सवर्णदीर्घमिव पूर्वसवर्णदीर्घमपि कुतो न बाधत इत्यत आह। **अतो गुण इतीत्यादि** ॥ अनन्तरानव्यवहितानित्यर्थः। **उत्तरानिति** ॥ व्यवहितानित्यर्थः। अतो गुण इत्युत्तरं अव्यक्तानुकरणस्येत्यादि पठित्वा, अकस्सवर्णे दीर्घः, प्रथमयोः पूर्वसवर्णः, इति पठितम्। ततश्च पररूपमिदं सवर्णदीर्घमेव बाधते, ननु तद्व्यवहितं पूर्वसवर्णदीर्घमपीति भावः। वस्तुतस्तु पुरस्तादपवादन्यायस्य नायं विषयः। नहि पररूपमिदं पूर्वसवर्णदीर्घस्यापवादः। भवतीत्यादौ अप्राप्तेऽपि पूर्वसवर्णदीर्घे एतस्य पररूपस्यारम्भादित्यलम्। रुत्वविसर्गौ सिद्धवत्कृत्याह। **रामाः इति** ॥ हे राम स् इति स्थिते, 'एङ् ह्रस्वात्सम्बुद्धेः' इति विधास्यन् सम्बुद्धिसंज्ञामाह। **एकवचनम्** ॥ प्रातिपदिकार्थलिङ्गेत्यतः प्रथमेत्यनुवृत्तं षष्ठ्या विपरिणम्यते। सम्बोधने चेत्यतस्सम्बोधन इत्यनुवर्तते। तदाह। **सम्बोधन इत्यादिना** ॥ सुस्सम्बुद्धिरित्येव सुवचम्। प्रथमाग्रहणानुवृत्तेस्सप्तमीबहुवचनस्य सुपो न ग्रहणम्। नचात्र प्रत्ययग्रहणपरिभाषया तदन्तग्रहणं शङ्क्यम्। 'ह्रस्वस्य गुण' इति सम्बुद्धौ, परतोऽङ्गस्य गुणविधिबलात्, संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिनिषेधाच्च। एतेन संज्ञानिवृत्यर्थमेकवचनग्रहणमित्यपास्तम्। **एङ्ह्रस्वात्** ॥ एङ्ह्रस्वादित्यङ्गविशेषणम्। तदन्तविधिः, सुतिस्यपृक्तंहलित्यतो हलिति प्रथमान्तमनुवर्तते। तच्चाङ्गादित्यत्रान्वेति अङ्गात् परं हलिति। लोपो व्योरित्यतो लोप इत्यनुवर्तते। तच्च हलित्यनेन सामानाधिकरण्येनान्वेति। लुप्यत इति लोपः। कर्मणि घञ्। सम्बुद्धेरित्यवयवषष्ठी हलित्यत्रान्वेति। ततश्च एङन्ताद्ध्रस्वान्ताच्चाङ्गात् परं यत् हल् सम्बुद्ध्यवयवभूतं तल्लुप्यत इति फलति तदाह। **एङन्तादित्यादिना** ॥ ननु एङ् ह्रस्वादित्यस्याङ्गाधिकारस्थत्वाभावात् कथमङ्गस्य विशेष्यत्वलाभः। तस्य वा किं प्रयोजनम्। एङो ह्रस्वाच्च परं सम्बुद्ध्यवयवभूतं हल्लुप्यत इत्येवास्तु। तत्राह। **सम्बुद्ध्याक्षिप्तस्येत्यादि** ॥ सम्बुद्धेः प्रत्ययत्वात् तत्प्रकृतेरङ्गत्वमर्थाल्लब्धम्। तस्य च एङा ह्रस्वेन च विशेषितत्वात् तदन्तविधौ एङन्ताद्ध्रस्वान्ताच्चाङ्गात् परं हल्लुप्यत इत्यर्थलाभात् इह लोपो नेत्यर्थः। इहेत्यस्य विशेष्यमाह। **हे**

ग्रहणं किम्। हे हरे। हे विष्णो। अत्र हि परत्वान्नित्यत्वाच्च सम्बुद्धिगुणे कृते ह्रस्वात्परत्वं नास्ति।

१९४। अमि पूर्वः। (६-१-१०७)

अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्। रामम्। रामौ।

१९५। लशकतद्धिते। (१-३-८)

कतरत् कुलेतीति ॥ कतरशब्दस्य नपुंसकत्वस्फोरणाय कुलशब्दः। कतरशब्दान्नपुंसकलिङ्गात् सम्बुद्धिः सुः। 'अड्डतरादिभ्यः पञ्चभ्य' इति तस्य अद्ड् आदेशः। डकार इत्। डित्त्वसामर्थ्यादभत्वेऽपि टेरिति रेफादकारस्य लोपः। 'वावसाने' इति चर्त्वम्। कतरत् इति रूपम्। यदि एङ् ह्रस्वादित्यत्राङ्गस्य विशेष्यत्वं न स्यात्, तदा कतरदित्यत्र तकारस्य हलो ह्रस्वादकारात् परत्वात् सम्बुद्ध्यवयवत्वाच्च लोपः प्रसज्येत। अङ्गस्य विशेष्यत्वे तु न दोषः। अत्र हि टिलोपानन्तरं कतर् इति रेफान्तमङ्गम्। तत्तु न ह्रस्वान्तम्। यत्तु ह्रस्वान्तं तन्नाङ्गम्। रेफादकारस्य सुस्थानिकाद्ड्रादेशावयवत्वेन प्रत्ययावयवतया प्रकृतिभागानन्तर्भावात्। नन्विह हल्ग्रहणानुवृत्तिर्व्यर्था। एङन्तात् हस्वान्ताच्चाङ्गात् परस्य सम्बुद्धेर्लोपस्स्यादित्येव व्याख्यायताम्। अस्तु वा हलनुवृत्तिः। तथापि एङन्ताद्ह्रस्वान्ताच्चाङ्गात् परा या सम्बुद्धिः तदवयवो हल्लुप्यते इति कुतो न व्याख्यायत इति चेत्। एवं सति हे ज्ञानेति न सिध्येत्। तदिदमजन्तनपुंसकलिङ्गाधिकारे ज्ञानशब्दप्रक्रियावसरे मूल एव स्पष्टीभविष्यति। **हे हरे, हे विष्णो इति** ॥ हरिशब्दाद्विष्णुशब्दाच्च सम्बुद्धिस्सुः। ह्रस्वस्य गुण इति गुणः। हे हरे स्, हे विष्णो स्, इति स्थिते, ह्रस्वात् परत्वाभावात् सुलोपो न स्यात्। अत एङ्ग्रहणमित्यर्थः। ननु गुणात्पूर्वं, हे हरि स्, हे विष्णु स्, इत्यस्यामेव दशायां ह्रस्वात्परत्वादेव सुलोपसम्भवात् एङ्ग्रहणं व्यर्थमित्यत आह। **अत्रेति** ॥ सम्बुद्धिलोपापेक्षया अयं गुणः परः नित्यश्च। अकृतेऽपि सम्बुद्धिलोपे तत्प्रवृत्तेः। कृतेऽपि सम्बुद्धिलोपे प्रत्ययलक्षणमाश्रित्य तत्प्रवृत्तेः। अतस्सम्बुद्धिलोपात् प्रागेव ह्रस्वस्य गुणे कृते सति ह्रस्वात्परत्वाभावात् सोर्लोपो न स्यात्। अतः एङ्ग्रहणमित्यर्थः। अथ द्वितीया विभक्तिः। राम अम् इति स्थिते, न विभक्तौ तुस्मा इति मकारस्य नेत्त्वम्। अकस्सवर्ण इति दीर्घं बाधित्वा अतो गुण इति पररूपं प्राप्तम्। तद्बाधित्वा प्रथमयोरिति पूर्वसवर्णदीर्घे प्राप्ते। **अमि पूर्वः** ॥ अकस्सवर्णे दीर्घ इत्यतः अक इति पञ्चम्यन्तमनुवर्तते। एकः पूर्वपरयोरित्यधिकृतम्। इको यणचीत्यतः अचीत्यनुवर्तते। तदाह। **अकोऽम्यचीति** ॥ अमि विद्यमानो योऽच् तस्मिन् परे इत्यर्थः। रामामिति मकारादकारस्य अमवयवाकारस्य च पूर्वरूपमकार एको भवति। अचीत्यनुवृत्तौ अकः अमि परे पूर्वपरयोः पूर्वरूपमेकादेशस्स्यादिति लभ्येत। तथा सति अमो मकारसहितस्य पूर्वरूपं स्यात्। तन्माभूदित्यजनुवृत्तिः। **रामाविति** ॥ राम औट् इति स्थिते हलन्त्यमिति टकारस्य इत्संज्ञायां लोपः। औटष्टकारस्सुडिति प्रत्याहारार्थः। राम शस् इति स्थिते, न विभक्तौ तुस्मा इति सकारस्य नेत्त्वम्। तत्र शकारस्य अनन्त्यत्वाद्धलन्त्यमित्यप्राप्तावाह। **लशकतद्धिते** ॥ ल, श, कु, इति प्रत्याहारद्वन्द्वः। उपदेशेऽजनुनासिक इत्,

तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः। इति शसः शस्येत्संज्ञा।

१९६। तस्माच्छसो नः पुंसि। (६-१-१०३)

कृत पूर्वसवर्णदीर्घात्परो यः शसः सकारस्तस्य नः स्यात्पुंसि।

१९७। अट्कुप्वाङ्नुम्व्यवायेऽपि। (८-४-२)

अट् कवर्गः पवर्गः आङ् नुम् चैतैर्व्यस्तैर्यथासम्भवं मिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः स्यात्समानपदे। 'पदव्यवायेऽपि' (सू १०५७)

आदिर्ञिटुडवः, षः प्रत्ययस्य' इत्यतः इदिति, आदिरिति, प्रत्ययस्येति, चानुवर्तते। अतद्धित इति षष्ठ्यर्थे सप्तमी। तद्धितभिन्नस्य प्रत्ययस्य आदिभूतं लकारशकारकवर्गं इत्संज्ञं भवतीत्यर्थः। तदाह। **तद्धितवर्जेत्यादिना** ॥ अतद्धित इति किम्। 'कर्णललाटात्कनलङ्कारे'। कर्णिका। अत्र ककारस्य तद्धितावयवत्वान्नेत्त्वम्। सति तस्मिन् 'किति च' इत्यादिवृद्धिस्स्यात्। एतेन प्रयोजनाभावादेव लशादितद्धितेषु नेत्त्वमित्यतद्धितग्रहणं व्यर्थमिति निरस्तम्। **इति शस इति** ॥ शकारस्य इत्संज्ञायां तस्य लोप इति लोपः। शकारोच्चारणन्तु जसश्शी, तस्माच्छसोनः, इत्यादौ विषयविभागार्थम्। राम अस् इति स्थिते, अकस्सवर्णे दीर्घ इति बाधित्वा, अतो गुण इति प्राप्ते, प्रथमयोरिति पूर्वसवर्णदीर्घे, रामास् इति स्थिते। **तस्माच्छसो** ॥ प्रथमयोः पूर्वसवर्ण इति पूर्वसूत्रकृतः सन्निहितः पूर्वसवर्णदीर्घः तस्मादित्यनेन परामृश्यते। दिक्शब्दयोगे पञ्चम्येषा। परस्येत्यध्याहार्यम्। शस इत्यवयवषष्ठी। स चावयवः परत्वेन विशेष्यते। स चावयवः अर्थात् सकार एव। अन्यस्यासम्भवात्। तदाह। **कृतपूर्वेत्यादिना** ॥ कृतपूर्वेति किम्। दीर्घात् परस्य शसवयवस्येत्युक्तौ, एतान् गाः पश्येत्यत्र गोशब्दात् शसस्सस्यापि नत्वप्रसङ्गः। अतः कृतपूर्वसवर्णदीर्घादिति। गा इत्यत्र च, औतोऽम्शसोरित्याकार एकादेशः। न तु पूर्वसवर्णदीर्घ इति, ततः परस्य न नत्वम्। शसः किम्। रामाः। प्रकृते च नत्वे रामान् इति रूपम्। अत्र नकारस्य णत्वप्राप्तिमाशङ्कितुमाह। **अट्कुप्वाङ्** ॥ रषाभ्यान्नोणस्समानपद इति पूर्वसूत्रमनुवर्तते। तत्र न इति षष्ठ्यन्तम्। तेन च सूत्रेण रषाभ्यामव्यवहितपरस्य णत्वं विहितम्। रामेणेत्यादौ अडादिव्यवधानेऽपि प्राप्तयर्थमिदमारब्धम्। अट् प्रत्याहारः, कुः कवर्गः, पुः पवर्गः, अट्च, कुश्च, पुश्च, आङ्च, नुम्च, तैर्व्यवधानम्। तस्मिन् सत्यपि रषाभ्यां परस्य नस्य णत्वं स्यादित्यर्थः। तत्र अडादिभिस्समस्तैर्व्यवधानं रामेणेत्यादिलक्ष्ये क्वाप्यसम्भावितम्। एकैकव्यवायेऽपीति व्याख्याने तु रामेणेत्यादावव्याप्तिः। यथा सम्भवम्मिलितैर्व्यवायेऽपीति व्याख्याने तु, नराणामित्यादावेकमात्रव्यवधाने णत्वं न स्यात्। अतः अडादिभिर्व्यस्तैर्यथासम्भवं मिलितैश्च व्यवायेऽपीति व्याख्येयम्। एवञ्च क्षुभ्नादिषु चेति णत्वनिषेधसूत्रे क्षुभ्नशब्दपाठोऽर्थवान्। सरूपाणामित्यादिनिर्देशाश्च उपपन्ना भवन्ति। तदाह। **अट्कुप्वाङ्नुम्व्यवायेऽपीत्यादिना** ॥ विवरणावसरे अट्कवर्गइत्याद्यविभक्तिकनिर्देशाः न दूष्यन्ते। भाष्ये तथा बहुळमुपलम्भात्। **समानपद इति** ॥ एकपद इत्यर्थः। अखण्डमेव पदमिह विवक्षितम्।

इति निषेधं बाधितुमाङ्ग्रहणम् । नुम्ग्रहणमनुस्वारोपलक्षणार्थम् । तच्चाकर्तुं शक्यम् । अयोगवाहानामट्सूपदेशस्योक्तत्वात् । इति णत्वे प्राप्ते ।

१९८ । पदान्तस्य । (८-४-३७)

पदान्तस्य नस्य णत्वं न स्यात् । रामान् ।

१९९ । यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् । (२-४-१३)

यः प्रत्ययो यस्मात्क्रियते तदादि शब्दस्वरूपं तस्मिन्प्रत्यये परेऽङ्गसंज्ञं स्यात् । 'भवामि' 'भविष्यामि' इत्यादौ विकरणविशिष्टस्याङ्गसंज्ञार्थं तदा-

---

तेन रामनामेत्यादौ नातिप्रसङ्गः । मातृभोगीण इत्यादौ तु तृद्धिताधिकारे वक्ष्यते । आङा व्यवाये पर्याणद्धमित्युदाहरणम् । इह आङ्ग्रहणाभावे तु उपसर्गादसमासेऽपीत्यत्र तदनुवृत्त्या णत्वन्न स्यात् । नन्वङ्व्यवाय इत्येवात्र णत्वं भविष्यति । किमाङ्ग्रहणेनेत्यत आह । **पदव्यवायेऽपीति** ॥ ननु 'इवि प्रीणने' ल्युट्, अनादेशः, इदित्त्वान्नुम्, प्रेन्वनम् । अत्र कुमति चेति नुमा व्यवधानेऽपि णत्वं स्यात् । किञ्च 'बृहि वृद्धौ' ल्युट्, इदित्वान्नुम्, नश्चापदान्तस्येत्यनुस्वारः बृंहणम् । 'तृंह् हिंसायाम्' । ल्युट्, स्वाभाविकोऽयमनुस्वारः, तृंहणम् । इहोभयत्रापि णत्वन्नस्यात् । अनुस्वारस्य अडाद्यनन्तर्भावात् । अतआह । **नुम्ग्रहणमिति** ॥ नुम्ग्रहणेन अनुस्वारो लक्ष्यते । प्रयोगानुसारादित्यर्थः । एवञ्च नुम्ग्रहणं प्रत्याख्येयमित्याह । **तच्चेति** ॥ ननु नुम्ग्रहणाभावे तल्लक्षितानुस्वारस्य कथं लाभ इत्यत आह । **अयोगवाहानामिति** ॥ न विद्यते योगो येषां वर्णसमाम्नाये ते अयोगाः, अनुपदिष्टाः उपदिष्टैरगृहीताश्चेत्यर्थः । वाहयन्ति प्रयोगान्निर्वाहयन्तीति वाहाः अयोगाश्च ते वाहाश्च अयोगवाहाः अनुस्वारविसर्गादयः । अट्सूपदेशस्य पाठस्य हल्सन्धिनिरूपणावसरे उक्तत्वादित्यर्थः । स्पष्टञ्चैतत् हयवरट्सूत्रभाष्यवार्तिकयोः । उक्तञ्चात्रैव सूत्रे भाष्ये । नार्थो नुम्ग्रहणेन । अनुस्वारे कृते अङ्व्यवाय इत्येवात्र णत्वं सिद्धमिति । **इति णत्वम् इति** ॥ शसवयवस्य नकारस्य णकारे प्राप्ते इत्यर्थः । **पदान्तस्य** ॥ रषाभ्यान्नोण इत्यनुवर्तते । न भाभूपूइत्यतो नेति च । तदाह । **पदान्तस्य नस्येत्यादि-ना** ॥ अथ तृतीया विभक्तिः । तत्र टा इति टकारस्य चुट्ट इति इत्संज्ञायां लोपः । टकारोच्चारणन्तु टाङसिङसां द्वितीयाटौस्त्वित्यादौ विशेषणार्थम् । राम आ इति स्थिते अङ्गकार्ये विधास्यन्नङ्गसंज्ञामाह । **यस्मात्प्रत्ययविधिः** ॥ यस्मादिति प्रकृतिभूतादित्यर्थः । **यः प्रत्यय इति** ॥ यच्छब्दान्ताद्याहारस्तु प्रत्यासत्तिलभ्यः । सच यस्माद्यस्य प्रत्ययस्य विधिः तस्मिन् प्रत्यये तदादेरङ्गसंज्ञेत्यर्थलाभाय । तत्प्रकृतिरूपं आदिर्यस्य तत् तदादि । नपुंसकवशाच्छब्दरूपमित्यध्याहार्यम् । तदाह । **तदादिशब्दस्वरूपामिति** ॥ प्रकृते च रामशब्दस्य प्रकृतिमात्रस्य तदादित्वं व्यपदेशिवद्भावात् बोध्यम् । ननु यस्मात् प्रत्ययविधिस्तदङ्गमित्येवास्तु । किमादिग्रहणेनेत्यत आह । **भवामीति** ॥ भूधातोर्लट् मिप् कर्तरि शबिति विकरणसंज्ञश्शप् । गुणावादेशौ अतो दीर्घो यञीति भव इत्यङ्गस्य दीर्घः । भवामीति रूपम् । तथा भूधातोर्लट् मिप् ।

दिग्रहणम्। 'विधिः' इति किम्। स्त्री इयती। 'प्रत्यये' किम्। प्रत्ययविशिष्टस्य ततोऽप्यधिकस्य वा मा भूत।

२०० । अङ्गस्य । (६-४-१)

इत्यधिकृत्य।

२०१ । टाङसिङसामिनात्स्याः। (७-१-१२)

'स्यतासी लृलुटोः' इति विकरणसंज्ञः स्यः। इट्। गुणावादेशौ। षत्वम्। अतो दीर्घो यञीति भविष्य इत्यङ्गस्य दीर्घः। भविष्यामीति रूपम्। अत्र आदिग्रहणाभावे मिप्प्रत्यये परतः भू इति प्रकृतिमात्रस्य अङ्गसंज्ञा स्यात्। भूशब्दादेव मिप्प्रत्ययविधेः। ननु भव इत्यस्य भविष्य इत्यस्य च विकरणविशिष्टस्य ततो मिप्प्रत्ययविधेरभावात्। ततश्च अतो दीर्घो यञीति मिप्प्रत्यये परतो दीर्घो न स्यात्। अतः आदिग्रहणमित्यर्थः। **विधिरिति किमिति** ॥ यस्माद्यः प्रत्ययः परत्वेन श्रूयते तदादिशब्दरूप तस्मिन प्रत्यये अङ्गसंज्ञमित्येतावतैव सिद्धे विधिग्रहणं किमर्थमिति प्रश्नः। **स्त्री इयतीति** ॥ इदं परिमाणमस्या इत्यर्थे इदं शब्दात् 'किमिदम्भ्यां वो घः' इति वतुप। वस्य घश्च। तस्य इयादेशः। 'इदं किमोः' इति इदम ईश्। शित्त्वात् सर्वादेशः। ई इयत् इति स्थिते 'यस्येति च' इतीकारलोपः। इयत् इति प्रत्ययमात्रमवशिष्यते। उगितश्चेति ङीपि इयतीति रूपम्। अत्र विधिग्रहणाभावे स्त्री इयतीत्यत्र रेफादिकारस्य 'स्त्रियाः' इत्यङ्गकार्यमियङ् स्यात्। स्त्रीशब्दावयवत्वेन इयदिति प्रत्ययस्य श्रूयमाणत्वात्। नच यस्येति लोपस्याभीयत्वेनासिद्धत्वादजादिप्रत्ययपरकत्वाभावान्नात्र इयङः प्राप्तिरिति वाच्यम्। अन्यूनानतिरिक्तसमानाश्रये कार्ये कर्तव्य एव आभीयासिद्धत्वस्य प्रवृत्तेः। अस्ति च यस्येतिचेति शास्त्रापेक्षया स्त्रियां इति सूत्रे अधिकस्य स्त्रीशब्दस्यापेक्षा। कृते तु विधिग्रहणे इयङत्र न भवति। वतुप इदम एवात्र विहितत्वेन तस्मिन परे, स्त्रीशब्दस्याङ्गत्वाभावात्। नच यस्येति लोपस्य इयङि कर्तव्ये अचःपरस्मिन्निति स्थानिवद्भावश्शङ्क्यः। पदान्तविधौ तन्निषेधात् स्त्रीशब्दस्य सुनिरूपिताङ्गत्वेऽपि नेयङ्। प्रत्यासत्त्या अजादिप्रत्ययनिरूपिताङ्गत्वे तत्प्रवृत्तेः। **प्रत्यये किमिति** ॥ यस्मात् प्रत्ययविधिस्तदाद्यङ्गमित्येतावदेवास्त्वित्यर्थः। **प्रत्ययविशिष्टस्य ततोऽप्यधिकस्य वा मा भूदिति** ॥ तदादिशब्दरूपं कियदित्यपेक्षायामविशेषात् प्रत्ययविशिष्टं वा ततोऽप्यधिकं वा निरवधिकमङ्गं स्यात्। नच यस्मात्प्रत्ययेति प्रत्ययस्य श्रुतत्वात् प्रत्ययावयव्येवाङ्गत्वं भविष्यतीति वाच्यम्। यस्मात् प्रत्ययविधिस्तदादित्यर्थसमर्पणेन तस्य प्रत्ययग्रहणस्य चरितार्थत्वात्। ततश्च प्रत्ययविशिष्टस्याङ्गत्वे च वन्नश्चेत्यत्र प्रत्ययविशिष्टस्याङ्गत्वेन उरदित्यादेशस्य परनिमित्तत्वालाभादचःपरस्मिन्निति स्थानिवत्त्वाप्रवृत्त्या न सम्प्रसारण इति सम्प्रसारणनिषेधो न स्यात्। अधिकस्याङ्गत्वे च देवदत्त ओदनमपाक्षीदित्यादौ देवदत्तादिशब्दोत्तरं सुपनिमित्तीकृत्य लुङ्पर्यन्तमङ्गत्वात्तस्य लुङ्परत्वेन देवदत्तादिशब्दात्पूर्वमप्यडापत्तिः। अङ्गसंज्ञायाः प्रत्ययनिमित्तत्वाभावेन लुडादिनिरूपिताङ्गस्येत्यर्थस्य दुर्लभत्वात्। प्रत्यये इत्युक्तौ तु न कोऽपि दोषः इत्यलम्। **टाङसि-**

अकारान्तादङ्गाट्टादीनां क्रमादिनादय आदेशाः स्युः । णत्वम् । रामेण ।

२०२ । सुपि च । ७-३-१०२)

यञादौ सुपि परे अतोऽङ्गस्य दीर्घः स्यात् । रामाभ्याम् ।

२०३ । अतो भिस ऐस् । (७-१-९)

अकारान्तादङ्गाद्भिस ऐस् स्यात् । अनेकाल्त्वात्सर्वादेशः । रामैः ।

२०४ । ङेर्यः । (७-१-१३)

अतोऽङ्गात्परस्य 'ङे' इत्यस्य यादेशः स्यात् । रामाय । इह स्थानिवद्भावेन यादेशस्य सुत्वात् 'सुपि च' (सू २०२) इति दीर्घः । 'सन्निपात-

---

ङसाम् ॥ अतो भिस इत्यस्मात् अत इति पञ्चम्यन्तमनुवृत्तम् । अङ्गस्येत्यधिकृतं पञ्चम्या विपरिणतमङ्गस्य विशेषणम् । तदन्तविधिः । तदाह । **अकारान्तादङ्गादिति** ॥ परेषामिति शेषः । क्रमादिति यथासङ्ख्यसूत्रलब्धम् । **टादीनामिति** ॥ टा-ङसि-ङसामित्यर्थः । **इनादय इति** ॥ इन-आत्-स्य, एते इत्यर्थः । राम-इन इति स्थिते आद्गुणः । **णत्वमिति** ॥ अट्कुप्वाङिति नकारस्य णकार इत्यर्थः । राम-भ्यां इति स्थिते न विभक्ताविति मस्य नेत्त्वम् । **सुपि च** ॥ अतो दीर्घो यञीत्यनुवर्तते । यञीत्यनेन सुपीति विशेष्यते । यस्मिन् विधिरिति तदादिविधिरित्याह । **यञादाविति । अतोऽङ्गस्येति** ॥ अदन्तस्याङ्गस्येत्यर्थः । राम-भिस् इति स्थिते, न विभक्ताविति सस्य नेत्त्वम् । **अतो भिस ऐस्** ॥ अत इति पञ्चमी । अङ्गस्येत्यधिकृतं पञ्चम्या विपरिणम्यते । अत इति तस्य विशेषणम् । विशेषणत्वात्तदन्तविधिः । तदाह । **अकारान्तादिति** ॥ रुत्वविसर्गौ सिद्धवत्कृत्याह । **रामैरिति** ॥ यद्यपि एसि विहितेऽपि वृद्धौ रामैरित्यादि सिद्धम् । नच अतो गुण इति पररूपं शङ्क्यम् । एकारोच्चारणसामर्थ्यादेव तदसम्भवात् । अन्यथा इसमेव विदध्यात् । तथापि एदैतोर्द्विमात्रत्वाविशेषात् प्रक्रियालाघवाच्च ऐसो विधिः । अलोऽन्त्यस्येत्यन्तादेशमाशङ्क्याह । **अनेकाल्त्वादिति** ॥ अथ चतुर्थी विभक्तिः । तत्र ङे इति ङकारस्य लशक्वेतीत्संज्ञायां लोपः । तदुच्चारणन्तु घेर्ङितीत्यार्थम् । राम-ए-इति स्थिते । **ङेर्यः** ॥ ङेरित्येकारान्तात् षष्ठ्येकवचनम् । नतु ङि इति सप्तम्येकवचनम् । व्याख्यानात् । अतो भिस इत्यतः अत इति पञ्चम्यन्तमनुवर्तते । तेन च अङ्गस्येत्यधिकृतं पञ्चम्या विपरिणतं विशेष्यते । तदाह । **अतोऽङ्गादिति** ॥ अदन्तादङ्गादित्यर्थः । सुपि चेति दीर्घम्मत्वा आह । **रामायेति** ॥ नतु यादेशस्य सुप्त्वाभावात्तस्मिन् परतः कथं सुपि चेति दीर्घ इत्यत आह । **इहेति** ॥ नन्वत्र दीर्घो यञादित्वेन, सुप्त्वेन च यादेशं परनिमित्तीकृत्य प्रवर्तते । सच यञ्शे अलाश्रयः । तस्मिन् कर्तव्ये यादेशस्य कथमिह स्थानिवद्भावः । अनल्विधाविति तन्निषेधादिति चेत् । सत्यम् । इह दीर्घस्य यञादिसुबाश्रयतया आदेशगतयकाररूपालाश्रयत्वेऽपि तस्मिन् कर्तव्ये

लक्षणो विधिरनिमित्तं तद्विघातस्य' (प ८६) इति परिभाषा तु नेह प्रवर्तते। 'कष्टाय क्रमणे' (सू २६७०) इत्यादिनिर्देशेन तस्या अनित्यत्वज्ञापनात्। रामाभ्याम्।

२०५। बहुवचने झल्येत्। (७-३-१०३)

झलादौ बहुवचने सुपि परे अतोऽङ्गस्यैकारः स्यात्। रामेभ्यः। 'बहुवचने' किम्। रामः। रामस्य। 'झलि' किम्। रामाणाम्। 'सुपि' किम्। पचध्वम्। जश्त्वम्।

यादेशस्य स्थानिवद्भावेन सुप्त्वं भवत्येव। दीर्घस्य आदेशगतयकाररूपालाश्रयत्वेऽपि स्थान्यलाश्रयत्वाभावात्। "अकृत्सार्वधातुकयोर्दीर्घ" इति तु परमप्यत्र नोपन्यस्तम्। अकृत्सार्वधातुकयोरिति पर्युदासबलेन तस्य असुप्येव प्रवृत्तेरित्याहुः। स्यादेतत्। सन्निपातलक्षणो विधिरनिमित्तन्तद्विघातस्येत्यस्मिन् परिभाषा। सन्निपातः संश्लेषः, लक्षणन्निमित्तं, यस्य सः सन्निपातलक्षणः। विधिः कार्यम्। तद्विघातस्य तं सन्निपातं विहन्तीति तद्विघातः कर्मण्यण्। कर्मण्युपपदे कर्तर्यण्। हनस्तोऽचिण्णलोरिति तकारः। होहन्तेरिति कुत्त्वम्। सन्निपातविघातकस्य न निमित्तमित्यर्थः। उपजीवकमुपजीव्यस्य विघातकन्नभवतीति यावत्। प्रकृते च अदन्तसम्बन्धमाश्रित्य प्रवृत्तोऽयादेशः अदन्तसम्बन्धविघातकस्य दीर्घस्य कथं निमित्तं स्यात् इत्याशङ्क्य परिहरति। **सन्निपातलक्षण इत्यादिना**॥ तृतीयाद्विवचनवत् दीर्घे सिद्धवत्कृत्याह। **रामाभ्यामिति**॥ भ्यसि न विभक्ताविति सस्य नेत्त्वम्। सुपि चेति दीर्घे प्राप्ते। **बहुवचने झल्येत्**॥ अतो दीर्घो यञ्जालित्यतः सुपि चेत्यतश्च अत इति सुपीति चानुवर्तते। झलीत्यनेन सुपीति विशेष्यते। यस्मिन् विधिरिति तदादिविधिः। तदाह। **झलादाविति। अतोऽङ्गस्येति**॥ अदन्तस्याङ्गस्येत्यर्थः। एत्वे सति रुत्वविसर्गौ सिद्धवत्कृत्याह। **रामेभ्य इति। राम इति**॥ अयोगवाहानामकारोपरि शर्पुंचोपसङ्ख्यानत्वेन विसर्गस्य झल्त्वात् स्थानिवद्भावेन सुप्त्वाच्च तस्मिन् परत एत्वं प्राप्तम्। रुत्वविसर्गयोरसिद्धत्वेऽपि राम स् इति दशायां झलादिसुप्परत्वात्। अतो बहुवचनग्रहणमित्यर्थः। **रामस्येति**॥ बहुवचनग्रहणस्यप्रयोजनान्तरम्। षष्ठ्येकवचनस्य ङसस्स्यादेशे तस्य स्थानिवद्भावेन सुप्त्वात् स्वतो झलादित्वाच्च तस्मिन् परत एत्वे प्राप्ते तन्निवृत्त्यर्थं बहुवचनग्रहणमित्यर्थः। सन्निपातपरिभाषा तु सर्वेषामिति निर्देशादेत्वविधौ न प्रवर्तत इत्याहुः। **झलि किमिति**॥ 'उतो वृद्धिर्लुकि हलि' इत्यतो हलीत्यनुवृत्त्य हलादौ बहुवचने सुपि एत्वमित्येव व्याख्यातुं शक्यते। तावतैव रामा इत्याद्यजादिबहुवचने एत्वनिरासादिति प्रश्नः। **रामाणामिति**॥ हलादौ बहुवचने सुपि एत्वमित्युक्तौ रामाणामित्यत्राप्येत्वं स्यात्। तन्निवृत्त्यर्थं झल्ग्रहणमित्यर्थः। यद्यप्यत्र सन्निपातपरिभाषया ह्रस्वान्ताङ्गसन्निपातमुपजीव्य प्रवृत्तस्य नुटस्तद्विघातकमेत्वं प्रति निमित्तत्वासम्भवादेव एत्वन्न भविष्यति। तथापि झल्ग्रहणमेत्वे सन्निपातपरिभाषाया अप्रवृत्तिज्ञापनार्थम्।

२०६ । वाऽवसाने । (८-४-५६)

अवसाने झलां चरो वा स्युः । रामात्–रामाद् । द्वित्वे रूपचतुष्टयम् । रामाभ्याम् । रामेभ्यः । रामस्य । सस्य द्वित्वपक्षे 'खरि च' (सू १२१) इति चर्त्वेऽप्यान्तरतम्यात्स एव । न तु तकारः । अल्पप्राणतया प्रयत्नभेदात् । अत एव 'सः सि–' (सू २३४२) इति तादेश आरभ्यते ।

२०७ । ओसि च । (७-३-१०४)

ओसि परे अतोऽङ्गस्यैकारः स्यात् । रामयोः ।

तेन 'हलि सर्वेषाम्' इति निर्देशात् सर्वशब्दे एत्वसिद्धावपि विश्वेषामित्यादावप्येत्वं भवति । **पचध्वमिति** ॥ ध्वमो झलादिबहुवचनत्वेऽपि सुप्त्वाभावान्न तस्मिन् परत एत्वमित्यर्थः । नच 'बहुवचने झल्येत्' इत्येवास्तु । कित्त्वादन्तावयवे आद्गुणे च रामेभ्य इत्यादिसिद्धेरिति वाच्यम् । एवं सति ओसि चेत्युत्तरसूत्रेऽपि इगागमविधौ ज्ञानयोरित्यत्र इकोऽचि विभक्ताविति नुमापत्तेः । अथ पञ्चमीविभक्तिः । तत्र उपदेशेऽजनुनासिक इत् इति ङसेः इकार इत् । तस्य लोपः । ङकारस्तु लशक्वेति इत् । तस्य लोपः । तदुभयोच्चारणन्तु ङसिङ्योः 'घेर्ङिति' इत्यात्यर्थम् । 'टाङसिङसाम्' इति आत् सवर्णदीर्घः । **जश्त्वमिति** ॥ 'झलां जशोऽन्ते' इति नित्यतया जश्त्वं प्राप्तम् । तदपवादश्चर्त्वविकल्प आरभ्यत इत्यर्थः । **वाऽवसाने** ॥ 'झलां जश्झशि' इत्यतो झलामिति 'अभ्यासे चर्च' इत्यतश्चरिति चानुवर्तते । तदाह । **अवसान इत्यादिना । द्वित्वे रूपेति** ॥ तकारदकारयोरनचि चेति द्वित्वे तदभावे च रूपचतुष्टयमित्यर्थः । तत्र चर्त्वपक्षे द्वितकारमेकतकारञ्च रूपम् । जश्त्वपक्षे द्विदकारमेकदकारञ्च । रामाभ्याम , रामेभ्यः, इति चतुर्थीवत् प्रक्रिया सुगमेति भावः । अथ षष्ठीविभक्तिः । ङसो ङकारस्य लशक्वतद्धित इति इत्त्वं लोपः । ङकारोच्चारणन्तु ङिति ह्रस्वश्चेत्यर्थम् । टा ङसि ङसामिति स्यादेशं सिद्धवत्कृत्याह । **रामस्येति** ॥ नन्विह सकारस्यानाचिचेति द्वित्वे पूर्वसकारस्य खरि चेति चर्त्वेन दन्तस्थानतोऽन्तरतमे तकारे सति रामत्स्येति स्यादित्यत आह । **सस्य द्वित्वेति । स एवेति** ॥ सकार एवेत्यर्थः । एवकारव्यावर्त्यमाह । **ननु तकार इति** ॥ ननु दन्तस्थानतः श्वासाघोषविवारात्मकबाह्यप्रयत्नतश्चान्तर्यन्तकारेऽप्यविशिष्टमित्यत आह । **अल्पप्राणतयेति** ॥ सकारस्थानी महाप्राणः । तकारस्तु अल्पप्राणः । अतो बाह्यप्रयत्नभेदात् तकारो न भवति । इदमुपलक्षणम् । आभ्यन्तरप्रयत्नभेदादपि सकारस्य तकारो न भवतीति द्रष्टव्यम् । 'वस निवासे' इत्यादि धातोर्वत्स्यतीत्यादौ सकारस्य सकारे परे तकारो विधीयते । यदि तु तत्र खरि चेति सकारस्य तकारस्स्यात्तर्हि तद्विधानमनर्थकं स्यादित्यर्थः । 'राम ओस्' इति स्थिते वृद्धौ प्राप्तायां । **ओसि च** ॥ अतो दीर्घो यञीत्यतोऽत इत्यनुवर्तते । अङ्गस्येत्यधिकृतम् । बहुवचने झल्येदित्यत एदित्यनुवर्तते । तदाह । **ओसि परे इति । अतोऽङ्गस्येति** ॥ अदन्ताङ्गस्येत्यर्थः । 'रामे–ओस्' इति स्थिते अयादेशं, रुत्वविसर्गौ च, सिद्धवत्कृत्याह । **रामयोरिति** ॥ 'राम–आम्' इति

२०८। ह्रस्वनद्यापो नुट्। (७-१-५४)

ह्रस्वान्तान्नद्यन्तादावन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्।

२०९। नामि। (६-४-३)

नामि परेऽजन्तस्याङ्गस्य दीर्घः स्यात्। रामाणां 'सुपि च' (सू २०२) इति दीर्घो यद्यपि परस्तथापीह न प्रवर्तते। सन्निपातपरिभाषाविरोधात् 'नामि'

स्थिते सवर्णदीर्घे प्राप्ते। **ह्रस्वनद्या** ॥ ह्रस्वश्च नदीच आप्चेति समाहारद्वन्द्वाद्विग्योगे पञ्चमी। 'परस्य' इत्यध्याहार्यम्। 'अङ्गस्य' इत्यधिकृतं पञ्चम्या विपरिणम्य ह्रस्वादिभिर्विशेष्यते। अतस्तदन्तविधिः। 'आमि सर्वनाम्नः' इत्यत 'आमि' इत्यनुवर्तते। तच्च 'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' इति न्यायात् 'तस्मादित्युत्तरस्य' इति पञ्चम्यन्तं सम्पद्यते। तदाह। **ह्रस्वान्तादित्यादिना** ॥ आमत्र षष्ठीबहुवचनमेव। ननु 'ङेरामित्यादिविहितम्' इति भाष्ये स्पष्टम्। नुटि टकार इत्। उकार उच्चारणार्थः। टित्त्वादाद्यवयवः। 'राम–नाम्' इति स्थिते। **नामि** ॥ 'ह्रलोप' इत्यतो दीर्घ इत्यनुवर्तते। दीर्घश्रुत्या च 'अच' इत्युपस्थितं तेन चाङ्गं विशेष्यते। अतस्तदन्तविधिः। तदाह। **अजन्तस्येति** ॥ 'नुटि' इति न सूत्रितम्। 'भूतग्रकिन्नुट्च' इत्यौणादिकगन्प्रत्ययान्ते भङ्गशब्दे ऋकारस्य दीर्घापत्तेः। 'अङ्गनां पामनामित्यादौ तु न दीर्घः। अर्थवद्ग्रहणपरिभाषया अर्थवत एव नाम्नो ग्रहणात्। पामादिलक्षणे नप्रत्यये टापि द्वितीयैकवचने अमि कृते त्रयाणामपि प्रत्ययानां प्रत्येकमर्थवत्त्वेऽपि समुदायस्यानर्थकत्वात्। ननु 'नामीति सनकारग्रहणमस्तु 'आमि' इत्येव सूत्रयताम्। नच 'राम आम्' इत्यस्यान्दशायां दीर्घे सति ह्रस्वान्तत्वाभावात् 'ह्रस्वनद्याप' इति नुट् न स्यादिति वाच्यम्। 'ह्रस्वान्तान्नुट्' इति वचनसामर्थ्यात् कृतेऽपि दीर्घे भूतपूर्वगत्याश्रयणेन नुडुपपत्तेरिति चेन्न। सनकारनिर्देशस्य नोपधाया इत्युत्तरार्थत्वात्। यदि हि आर्मात्येवोच्येत तर्हि 'नोपधाया' इत्युत्तरसूत्रेऽपि आर्मात्येवानुवर्तेत। ततश्च नान्तस्योपधाया दीर्घस्स्यादार्मात्येव लभ्येत। एवं सति चर्मणां वर्मणामित्यादावपि दीर्घस्स्यात्। अतो नार्मीति सनकारनिर्देश इति भाष्ये स्पष्टमित्यलम्। 'अट्कुप्वाङ्' इति णत्वं सिद्धवत्कृत्याह। **रामाणामिति** ॥ नन्वत्र परत्वात् 'सुपि च' इति दीर्घ एवोपन्यसनीयः न तु 'नामि' इति दीर्घः। फलविशेषाभावेऽपि न्यायानुरोधेनैव शास्त्रप्रवृत्तेः 'इको झल्' इतिसूत्रे भाष्ये प्रपञ्चितत्वात् इति शङ्कते। **सुपि चेति दीर्घो यद्यपि पर इति** ॥ परिहरति। **तथापीति। सन्निपातेति** ॥ ह्रस्वान्तसन्निपातमुपर्जीव्य प्रवृत्तस्य नुटः ह्रस्वविघातकं 'सुपि च' इति दीर्घं प्रति निमित्तत्वासम्भवादिति भावः। नन्विह 'नामि' इति दीर्घप्रवृत्तावपि सन्निपातपरिभाषाविरोधस्तुल्य इत्यत आह। **नामीत्यनेनेत्यिति** ॥ यद्यत्र नामीति दीर्घो न स्यात्तर्हि तदारम्भो व्यर्थस्स्यात्। ततश्च निरवकाशत्वाद्रामाणामित्यादौ नामीति दीर्घस्सन्निपातपरिभाषां बाधित्वा प्रवर्तते। सुपि चेति दीर्घस्तु रामाभ्यामित्यादौ सावकाशत्वाद्रामाणामित्यादौ नामि परे सन्निपातपरिभाषान्नबाधितुमर्हति। तस्माद्रामाणामित्यादौ नामि

(सू २०९) इत्यनेन त्वारम्भसामर्थ्यात्परिभाषा बाध्यते। रामे। रामयोः। सुप्येत्वे कृते।

२१०। अपदान्तस्य मूर्धन्यः। (८-३-५५)

आ पादपरिसमाप्तेरधिकारोऽयम्।

२११। इण्कोः। (८-३-५७)

इत्यधिकृत्य।

२१२। आदेशप्रत्यययोः। (८-३-५९)

'सहेः साडः सः' (सू ३३५) इति सूत्रात् 'सः' इति षष्ठ्यन्तं पदमनुवर्तते। इण्कवर्गाभ्यां परस्यापदान्तस्यादेशः प्रत्ययावयवश्च यः सका-

---

परे दीर्घप्रवृत्तौ सन्निपातपरिभाषां बाधितुं नामीति दीर्घारम्भः। ननु, नामीति दीर्घो निरवकाशत्वात्सन्निपातपरिभाषां बाधत इत्ययुक्तम्। यत्र ह्रस्वान्तसन्निपातमनुपजीव्यैव नुटः प्रवृत्तिस्तत्र सन्निपातपरिभाषानुपमर्देनैव नामीति दीर्घप्रवृत्तेस्सावकाशत्वात्। यथा कर्तानामित्यत्र। तत्र हि 'षट्चतुर्भ्य' इति नुट् षट्संज्ञकेभ्यश्चतुरश्च परस्याऽमो नुट् स्यादिति हि तदर्थः। एवं हि सति सुपि चेतिवत् कर्तर्नामीत्येव सूत्रयेत। अजन्तस्याङ्गस्य नामि दीर्घ इत्येवं परं नामीति सामान्यसूत्रन्नारभ्येत। उक्तं हि भाष्ये। 'नह्येकमुदाहरणं योगारम्भं प्रयोजयति' इति। एकस्य शब्दस्य साधनाय सामान्यसूत्रं नारम्भणीयमित्यर्थः। अन्यथा मुद्गदणित्यनुपपत्तेरिति कैयटः। नचैवं सति कतिगब्दस्याधिकस्य प्रवेशे गौरवमिति वाच्यम्। 'न तिसृचतसृ' इति नामि दीर्घनिषेधाकरणेन लाघवात्। एवञ्च कर्तर्नामीत्यनुक्त्वा नामीति सामान्यसूत्रारम्भसामर्थ्याद्रामाणामित्यादावपि नामीति दीर्घस्सन्निपातपरिभाषां बाधित्वा निविशत इति युक्तम्। एवञ्च आरम्भसामर्थ्यादिति मूलमपि कर्तर्नामीत्यनुक्त्वा नामीति सामान्यसूत्रारम्भसामर्थ्यादिति व्याख्येयमित्यलं विस्तरेण। अथ सप्तमी विभक्तिः। ङेर्ङकार इत्। 'राम–इ–इति स्थिते' आद्गुण इति मत्वाह। **रामे इति**। **रामयोरिति** ॥ षष्ठीद्विवचनवत्। **सुप्येत्वे कृत इति** ॥ पकारस्येत्त्वे, लोपे, 'बहुवचने झल्येत्' इत्येत्वे कृत इत्यर्थः। 'रामे–सु' इति स्थिते। आदेशप्रत्यययोरिति षत्वं विधास्यन्नाह। **अपदान्तस्य** ॥ मूर्द्धन्यः–मूर्द्धस्थानकः, अष्टाध्यायस्य तृतीयपादे मध्यत इदं सूत्रं पठितम्। इत आरभ्येतत्पादसमाप्तिपर्यन्तमिदमधिक्रियत इत्यर्थः। **इण्कोः इत्यधिकृत्येति** ॥ उत्तरत्र विधिष्वनुवर्तत इति शेषः। इण्च कुश्चेति समाहारद्वन्द्वः। पुंस्त्वमार्षम्। इतरेतरयोगद्वन्द्वैत्वेकवचनमार्षम्। इणिति परणकारेण प्रत्याहारः। कुः कवर्गः। अथ षत्वविधायकं सूत्रमाह। **आदेश। षष्ठ्यन्तामिति** ॥ 'सहेस्साडस्स' इति सूत्रे स् इत्यस्मात् षष्ठ्येकवचने सति सः इति निर्दिष्टमिति भावः। तच्चेह द्विवचनान्ततया विपरिणम्य आदेशप्रत्यययोरित्यत्र सम्बध्यते। ततश्च इण्कवर्गाभ्यां परयोरपदा-

रस्तस्य मूर्धन्यादेशः स्यात्। विवृताघोषस्य सस्य तादृश एव षः। रामेषु। 'इण्कोः' किम्। रामस्य। 'आदेशप्रत्यययोः' किम्। सुपीः। सुपिसौ। सुपिसः। 'अपदान्तस्य' किम्। हरिस्तत्र। एवं कृष्णमुकुन्दादयः।

२१३। सर्वादीनि सर्वनामानि। (१-१-२७)

न्तयोरादेशात्मकप्रत्ययावयवात्मकयोस्सकारयोर्मूर्धन्यस्स्यादित्यर्थः। फलितमाह। **इण्कवर्गाभ्यामित्यदिना॥** प्रौढमनोरमायान्तु आदेशप्रत्यययोरित्येकापि षष्ठी प्रत्ययविषये अवयवार्थिका। तथाच आदेशस्य प्रत्ययावयवस्य च सकारस्येति लभ्यत इति प्रत्ययशब्दस्य लक्षणां विनोक्तम्। सहविवक्षाभावेऽपि सौत्रो द्वन्द्व इति च स्वीकृतम्। यदि तु आदेशविषयेऽपि अवयवषष्ठी स्यात्, आदेशावयवस्य सस्य ष इति लभ्येत, तर्हि तिसृणां चतसृणामित्यादौ दोषः। नच त्रिचतुरोस्त्रियामित्यत्रादेशे सकारोच्चारणसामर्थ्यान्न तव षत्वमिति वाच्यम्। तिसृ इत्यत्र 'न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम्' इति षत्वनिषेधेन चरितार्थत्वात्। बिसम्बिसमित्यादौ सकारस्य आदेशावयवतया षत्वापत्तेश्च। नित्यवीप्सयोरित्याष्टमिकद्विर्वचनस्यादेशरूपतया वक्ष्यमाणत्वात्। प्रत्ययो यस्सकारस्तस्येति व्याख्याने तु जिर्गापुरित्यादावेव स्यात्। रामेषु इत्यादौ न स्यात्। अतः आदेशः प्रत्ययावयवश्च यस्सकारस्तस्येति व्याख्यातम्। प्रत्ययावयवलक्षणायाञ्च हलि सर्वेषामिति निर्देशो लिङ्गम्। **विवृताघोषस्येति॥** मूर्धन्यत्वं ऋटुरषेष्वविशिष्टम्। विवृतत्वरूपाभ्यन्तरप्रयत्नवतः अघोषरूपबाह्यप्रयत्नवतश्च सकारस्य तदुभयात्मकषष्यकार एव भवतीत्यर्थः। अकारानिवारणायाद्यं विशेषणम्। ऋकारवारणाय द्वितीयम्। **रामेष्विति॥** नच सु इत्यस्य व्यपदेशिवद्भावेन सुबन्तत्वेन पदत्वात् सात्पदाद्योरिति षत्वनिषेधस्स्यादिति चेन्न। प्रत्ययग्रहणे यस्मात्सविहितस्तदादेरेव ग्रहणादित्यलम्। **सुपिसाविति॥** पिस गतौ क्विप् धातुसकारोऽयं नत्वादेशः नापिप्रत्ययावयव इति भावः। अथ सर्वादिशब्देषु सर्वनामकार्यं विधास्यन् सर्वनामसंज्ञामाह। **सर्वादीनि॥** सर्वः आदिः प्रथमावयवः येषान्तानि सर्वादीनि। सर्वशब्दः स्वरूपपरः। नपुंसकवशात् शब्दरूपाणीति विशेष्यमध्याहार्यम्। तदाह। **सर्वादीनि शब्देत्यादिना॥** ननु बहुव्रीहेरन्यपदार्थप्रधानत्वात् सर्वशब्दस्य च समासवृत्तिपदार्थत्वादन्यपदार्थत्वाभावाद्विश्वादिशब्दानामेव सर्वादिशब्देन बहुव्रीहिणावगमात् सर्वनामसंज्ञा स्यात्, न तु सर्वशब्दस्यापीति चेत्। उच्यते। सर्वः आदिर्यस्य समुदायस्येति विग्रहः। सर्वशब्दघटितस्समुदायस्समासार्थः। समुदाये च प्रवर्तमाना सर्वनामसंज्ञा क्वचिदपि अप्रयुज्यमाने तस्मिन् वैयर्थ्यादानर्थक्यात्तदङ्गेष्विति न्यायेनावयवेष्ववतरन्तीत्याविशेषात् सर्वशब्देऽपि भवति। एवञ्चात्र सर्वशब्दस्य स्वरूपेण वर्तिपदार्थता समुदायरूपेणत्वन्यपदार्थप्रवेशः। नच समुदायस्यान्यपदार्थत्वे सर्वादीनीति बहुवचनानुपपत्तिरशङ्क्या। सर्वशब्दघटितस्य विवक्षितावयवसङ्ख्यस्य समूहस्यान्यपदार्थत्वात्। उद्भूतावयवभेदः समुदायस्समासार्थ इति कैयटोक्तेरप्ययमेवार्थः। अतो न बहुवचनस्यानुपपत्तिः। तदेवं व्याख्याने हलिसर्वेषामित्यादिनिर्देशः प्रमाणम्। सर्वशब्दस्य सर्वनामत्वाभावे तु सर्वेषामित्यादौ सर्वनामकार्याणि सुडादीनि न स्युः। तथाच सर्वादीनीति तद्गुणसंविज्ञानो

सर्वादीनि शब्दस्वरूपाणि सर्वनामसंज्ञानि स्युः । 'तदन्तस्यापीयं संज्ञा' । 'द्वन्द्वे च' (सू २२४) इति ज्ञापकात् । तेन 'परमसर्वत्र इति त्रल्' 'परमभवकान्' इत्यत्राकच सिद्ध्यति ।

२१४ । जसः शी । (७-१-१७)

अदन्तात्सर्वनाम्नः परस्य जसः शी स्यात् । अनेकाल्त्वात्सर्वादेशः ।

बहुव्रीहिः । तस्यान्यपदार्थस्य गुणाः विशेषणानि वर्तिपदार्थरूपाणि तेषां संविज्ञानं क्रियान्वयितया विज्ञानं यत्र सः तद्गुणसंविज्ञान इति व्युत्पत्तिः । यत्र संयोगसमवायान्यतरसम्बन्धेनान्यपदार्थे वर्तिपदार्थान्वयः तत्र प्रायेण तद्गुणसंविज्ञानो बहुव्रीहिः । यथा द्विवासा देवदत्तो भुङ्क्ते, लम्बकर्णं भोजयेत्यादौ । तत्रहि वाससोः कर्णयोश्च भुजिक्रियाभावेऽपि सन्निहितत्वमात्रेण तद्गुणसंविज्ञानत्वम् । प्रकृते च समुदाये अन्यपदार्थे सर्वशब्दस्य समवायान्तर्गतावयवावयविभावसम्बन्धसत्त्वात्तद्गुणसंविज्ञानत्वम् । स्वस्वामिभावादिसम्बन्धेनान्यपदार्थे वर्तिपदार्थान्वये त्वतद्गुणसंविज्ञानो बहुव्रीहिः । यथा चित्रगुमानयेत्यादाविति लम् । ननु सर्व विश्व इत्येवं सर्वादिशब्दानां केवलानामेव सर्वादिगणे पाठात् परमसर्वादिशब्दानां कथं सर्वनामतेत्यत आह । **तदन्तस्यापीति । द्वन्द्वे चेतीति ॥** द्वन्द्वेचेत्यनेन सर्वादिशब्दान्तद्वन्द्वस्य सर्वनामसंज्ञा प्रतिषिध्यते वर्णाश्रमेतराणामित्यादौ । यदि केवलानामेव सर्वादिगणपठितानां सर्वनामता, ननु तदन्तानामपि, तर्हि तत्प्रतिषेधो व्यर्थस्यात् । अतस्तदन्तस्यापीयं सञ्ज्ञेति विज्ञायत इत्यर्थः । ननु परमसर्वादिशब्देषु गणपठितानां केवलानामेव सर्वादिशब्दानामस्तु सर्वनामता, मास्तु तदन्तानामपि । 'सर्वनाम्नस्स्मै' इत्यादिसर्वनामकार्याणामङ्गाधिकारस्थत्वेन, पदाङ्गाधिकारे तस्य तदन्तस्य चेति परिभाषया परमसर्वस्मै इत्यादिषु सिद्धेरित्यत आह । **तनेति ॥** तदन्तस्यापि संज्ञाबलेनेत्यर्थः । **सिद्ध्यतीति ॥** सप्तम्यास्त्रलिति सप्तम्यन्तात् सर्वनाम्नो विधीयमानस्त्रल् 'अव्ययसर्वनाम्नामकच् प्राक्टेः' इत्यज्ञातार्थेषु विधीयमानोऽकच सिध्यतीत्यर्थः । चकारात् पञ्चम्यास्तासिलिति तसिल् च । नचावयवगतसर्वनामत्वेन तत्सिद्धिरिति वाच्यम् । कुत्सित इति सूत्रस्थभाष्यरीत्या सङ्ख्याकारकाभ्यां पूर्वार्थस्य इतरान्वयेन सुबन्तादेव तद्धितोत्पत्त्यवगमेन सर्वनामप्रकृतिकसुबन्तार्थगतकुत्सादिविवक्षायां सर्वनामावयवटेः प्रागकजित्यर्थपर्यवसानात्तदन्तसंज्ञाभावे तदसिद्धेरिति भावः । सर्वशब्दात् जसि पूर्वसवर्णदीर्घे प्राप्ते । **जसश्शी ॥** अतो भिस इत्यस्मादत इत्यनुवर्तते । सर्वनाम्नस्स्मै इत्यतस्सर्वनाम्न इत्यनुवर्तते । तदाह । **अदन्तादित्यादिना ॥** शी इति दीर्घोच्चारणं नपुंसकाच्चेत्युत्तरार्थम् । तेन वारिणी इति सिध्यति । **अनेकाल्त्वादिति ॥** ननु शित्त्वप्रयुक्तं सर्वादेशत्वमत्रेति भावः । ननु 'नानुबन्धकृतमनेकाल्त्वम्' इत्यस्ति परिभाषा । अनुबन्धः इत् तत्प्रयुक्तमनेकाल्त्वं सर्वादेशनिमित्तन्न भवतीत्यर्थः । ततश्च शी इत्यत्र शकारस्य लशकृताद्धित इति इत्संज्ञकत्वात् कथन्तत्प्रयुक्तमनेकाल्त्वम् । अतएव 'अर्वणस्त्रसावनञः' इत्यत्र ऋकारमितमादाय तृ इत्यादेशस्य नानेकाल्त्वम् । अन्यथा तस्यापि सर्वादेशत्वापत्तेः । अताश्शित्त्वप्रयुक्तमेवात्र सर्वादेशत्वमाश्रयितुं युक्तमित्याशङ्क्य

न च 'अर्वणस्तृ–' (सू ३६४) इत्यादाविव 'नानुबन्धकृतमनेकाल्त्वम्' (प ६) इति वाच्यम्। सर्वादेशत्वात्प्रागित्संज्ञाया एवाभावात्। सर्वे।

२१५। सर्वनाम्नः स्मै। (७-१-१४)

अतस्सर्वनाम्नो 'ङे' इत्यस्य 'स्मै' स्यात्। सर्वस्मै।

२१६। ङसिङ्योः स्मात्स्मिनौ। (७-१-१५)

अतस्सर्वनाम्न एतयोरेतौ स्तः। सर्वस्मात्।

२१७। आमि सर्वनाम्नः सुट्। (७-१-५२)

अवर्णान्तात्परस्य सर्वनाम्नो विहितस्यामः सुडागमः स्यात्। ण्त्वषत्वे।

निराकरोति। **नचेत्यादिना** ॥ अर्वणस्तृ इत्यादाविव अनुबन्धकृतमनेकाल्त्वमिति नेत्यन्वयः। शी इति शकारस्य 'लशक्वतद्धिते' इति इत्संज्ञा वक्तव्या। तेन च सूत्रेण प्रत्ययादिभूतानां लशकवर्गाणामित्संज्ञा विहिता। प्रकृते च शी इत्यस्य प्रत्ययाधिकारस्थत्वाभावान्न स्वतः प्रत्ययत्वं, किन्तु जस्मादेशत्वेन स्थानिवद्भावात् प्रत्ययत्वं वक्तव्यम्। स्थानिवद्भावश्च आदेशभावमापन्नस्य शी इत्यस्य भवति। एवञ्चादेशत्वसिद्धेः प्रागादेशभावदशायां शी इति शकारस्य इत्संज्ञाया असिद्धेरनेकाल्त्वमप्रतिहतम्। अत एव शित्त्वात् सर्वादेश इत्यपि निरस्तम्। तृ इत्यत्र तु आदेशभावात् प्रागेव ऋकारस्य इत्संज्ञकत्वान्न तत्प्रयुक्तमनेकाल्त्वमिति वैषम्यमित्यभिप्रेत्य परिहरति। **सर्वादेशत्वात्प्रागिति** ॥ शीभावे सति 'सर्व ई' इति स्थिते आद्गुणं सिद्धवत्कृत्याह। **सर्वे इति** ॥ सर्वशब्दात् चतुर्थ्येकवचने 'ङेर्य' इति प्राप्ते। **सर्वनाम्नः स्मै** ॥ अतो भिस इत्यस्मादत इत्यनुवर्तते। ङेर्य इत्यतो ङेरिति च। तदाह–**अतस्सर्वेत्यादिना** ॥ सर्वशब्दात् पञ्चम्येकवचने टाङसिङसामिति प्राप्ते। **ङसिङ्योः** ॥ ङसिश्च ङिश्चेति द्वन्द्वः। अतो भिस इत्यस्मादत इति, सर्वनाम्नः स्मै इत्यतस्सर्वनाम्न इति चानुवर्तते। तदाह। **अतस्सर्वेति। एतयोरिति** ॥ ङसिङ्योरित्यर्थः। **एताविति** ॥ स्मात्स्मिनावित्यर्थः। स्मादादेशस्य स्थानिवद्भावेन विभक्तित्वान्नविभक्ताविति तकारस्य नेत्त्वमिति मत्वाह। **सर्वस्मादिति** ॥ 'सर्व आम्' इति स्थिते 'ह्रस्वनद्यापः' इति नुटि प्राप्ते। **आमि सर्वनाम्नः** ॥ 'आज्जसेरसुक्' इत्यतोऽनुवृत्तेन आदिति पञ्चम्यन्तेन अङ्गस्येत्यधिकृतं पञ्चम्या विपरिणतं विशेष्यते, तदन्तविधिः, परस्येत्यध्याहार्यम्। 'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' इति न्यायेन 'तस्मादित्युत्तरस्य' इति परिभाषया आमीति सप्तमी आम इति षष्ठ्यन्ततामापद्यते। सर्वनाम्न इति तु विहितविशेषणम्। ततश्च अवर्णान्तादङ्गात् परस्य सर्वनाम्नो विहितस्यामस्सुडागमस्यादित्यर्थस्सम्पद्यते। तदाह। **अवर्णान्तादित्यादिना** ॥ अवर्णान्तादित्यनन्तरं अङ्गादिति शेषः। अवर्णान्तात्सर्वनाम्नो विहितस्याम इति व्याख्याने तु येषान्तेषामित्यादौ सुडागमो न स्यात्। तत्र आमो दकारान्ताद्विहितत्वात्। **सर्वनाम्नः परस्येति तु न व्याख्यातम्**। तथा सति वर्णाश्रमेतराणामित्यसिद्धेरित्यग्रे मूल एव स्पष्टीभविष्यति। **ण्त्वषत्वे इति** ॥ बहुवचने झल्येदित्येत्वम्। सन्नि-

सर्वेषाम्। सर्वस्मिन्। शेषं रामवत्। एवं विश्वादयोऽप्यदन्ताः। सर्वादयश्च पञ्चत्रिंशत्। सर्व विश्व उभ उभय डतर डतम अन्य अन्यतर इतर त्वत् त्व नेम सम सिम। 'पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्' (ग सू १) 'स्वमज्ञातिधनाख्यायाम्' (ग सू २)। 'अन्तरं बहिर्योगोपसंव्यानयोः' (ग सू ३)। त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवतु किम् इति। तत्र उभशब्दो द्वित्वविशिष्टस्य वाचकः। अत एव नित्यं द्विवचनान्तः। तस्येह पाठस्तु 'उभकौ' इत्यकजर्थः। न च कप्रत्ययेनेष्टसिद्धिः।

पातपरिभाषात्वत्र न प्रवर्तते इति बहुवचने झल्येदित्यत्रोक्तम्। 'आदेशप्रत्यययोः' इति षत्वं सुटोऽपि। 'तदागमास्तद्ग्रहणेन गृह्यन्ते' इति प्रत्ययावयवत्वादिति भावः। **सर्वेषामिति** ॥ नन्वामीति सप्तमीनिर्देशसामर्थ्यात्तस्मादित्युत्तरस्येति न प्रवर्तते। ततश्च आमि परे प्रकृतेरेव सुडागमो युक्त इति चेन्न। सप्तमीनिर्देशस्य 'त्रेस्त्रय' इत्युत्तरार्थमावश्यकत्वादिति भावः। सप्तम्येकवचनस्य ङसिङ्योरिति स्मिन्नादेशं सिद्धवत्कृत्याह। **सर्वस्मिन्निति। शेषमिति** ॥ शिष्यत इति शेषं कर्मणि घञ्। 'घञजबन्ताः पुंसि' इति तु प्रायिकमिति भावः। **एवमिति** ॥ सर्वशब्दवदित्यर्थः। नच सर्वशब्दस्य बहुत्वव्यापकसर्वत्वात्मकधर्मविशेषप्रवृत्तिनिमित्तकत्वात् बहुवचनमेव न्याय्यमिति वाच्यम्। सर्वशब्दो हि बह्ववयवारब्धसमुदाये वर्तते। तत्र यदा अनुद्भूतावयवस्समुदायो विवक्षितः तदा भवत्येकवचनम्। यथा—सर्वो लोक इति। अनुद्भूतत्वम् अविवक्षितसङ्ख्याकत्वम्। यदा तु अनुद्भूतावयवसमुदायौ तदा द्विवचनम्। यथा—सर्वौ व्यूहाविति। यदा तु उद्भूतावयवसमुदायः तदा बहुवचनम्। यथा—सर्वे जना इति। अथ के ते सर्वादयश्शब्दाः? कति च ते? इत्यत्राह। **सर्वादयश्च पञ्चत्रिंशदिति** ॥ पञ्च च त्रिंशच्चेति द्वन्द्वः। पञ्चाधिका त्रिंशदिति शाकपार्थिवादित्वात् तत्पुरुषो वा। सङ्ख्यायास्तत्पुरुषस्योपसङ्ख्यानमिति ङ्चतु समासान्तो न भवति। अन्यत्राधिकलोपादित्युक्तेः। **पूर्वपरावरेति** ॥ गणान्तर्गतं सूत्रम्। व्यवस्थायामसंज्ञायाञ्च पूर्वादीनि सप्त सर्वादिगणप्रविष्टानि वेदितव्यानीत्यर्थः। सर्वनामसंज्ञा तु 'सर्वादीनि सर्वनामानि' इत्येव सिध्यति। स्वमज्ञातीति, अन्तरं बहिरिति च गणसूत्रद्वयमेव योज्यम्। व्यवस्थादिशब्दाः अग्रे मूल एव व्याख्यास्यन्ते। इतिशब्दस्सर्वादिगणसमाप्तिद्योतनार्थः। तत्र विश्वशब्दोऽपि सर्वशब्दवदेव। उभशब्दे तु विशेषमाह। **तत्रेति** ॥ सर्वादिषु मध्य इत्यर्थः। **अत एवेति** ॥ द्वित्वविशिष्टवाचकत्वादेवेत्यर्थः। **नित्यमिति** ॥ सर्वदा द्विवचनान्त इत्यर्थः। द्विवचनान्त एव नत्वेकवचनबहुवचने इति यावत्। तेन टाबादि न निवार्यते। नन्वेवं सति 'जसश्शी' 'सर्वनाम्नस्स्मै' 'ङसिङ्योस्स्मात्स्मिनौ'। 'आमि सर्वनाम्नस्सुट्' इत्युक्तानां सर्वनामकार्याणां द्विवचने अभावादुभशब्दस्य सर्वादिगणे पाठो व्यर्थ इत्यत आह। **तस्येहेति** ॥ तस्य उभशब्दस्य इह सर्वादिगणे पाठस्तु उभकावित्यत्र 'अव्ययसर्वनाम्नामकच्प्राक्टेः इत्यकच्प्रत्ययार्थ इत्यर्थः। ननु मास्तु उभशब्दस्य सर्वादिगणे पाठः। मास्तु च सर्वनामता। मास्तु च तत्प्रयुक्तः अकच्। उभशब्दात् स्वार्थिके कप्रत्यये सत्यपि उभकाविति

द्विवचनपरत्वाभावेन 'उभयतः' 'उभयत्र' इत्यादाविवायच्प्रसङ्गात्। तदुक्तम् 'उभयोऽन्यत्र' (वा २३२) अन्यत्रेति द्विवचनपरत्वाभावे। उभयशब्दस्य द्विवचनं नास्ति इति कैयटः। 'अस्ति' इति हरदत्तः। तस्माज्जस्ययजा-

---

रूपसिद्धेः। नच काकचोः स्वरभेदश्शङ्क्यः। 'तद्धितस्य' इति प्रत्ययस्वरेण वा, 'चितस्सप्रकृतेः' इति चित्स्वरेण वा, अन्तोदात्तत्वे विशेषाभावात्। उक्तञ्च भाष्ये, काकचोः को विशेषः? इति। तदाहं। **नचेति** ॥ कप्रत्ययेन उभकावितीष्टरूपसिद्धिर्नचेत्यन्वयः। कुत इत्यत आह। **द्विवचनेति** ॥ द्विवचनपरत्वाभावे उभशब्दादयच् विहितः। अकार्चि तु सति 'तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' इति न्यायेन उभशब्देन उभकशब्दोऽपि गृह्यते। तस्य च उभक औ इत्यस्यां दशायां द्विवचनपरत्वादयच्प्रत्ययो न भवति। कप्रत्यये तु सति तस्य उभशब्दात् परतो विहितत्वेन तन्मध्यपतितन्यायाप्रवृत्त्या उभकशब्दस्य उभशब्देन ग्रहणाभावात् उभशब्दस्य कप्रत्ययव्यवधानेन द्विवचनपरकत्वाभावात् अयचि उभयकौ इति स्यात्। यथा उभयतः उभयत्रेत्यत्र द्विवचनपरकत्वाभावादयच्प्रत्ययोऽस्ति तद्वदित्यर्थः। द्विवचने सति अयच्प्रत्ययो नेत्यत्र किं प्रमाणमित्यत आह। **तदुक्तमिति** ॥ वार्तिककृतेति शेषः। द्विवचने सति अयच्प्रत्ययो नेति यदभिहितं तत् 'उभयोऽन्यत्र' इति वदता वार्तिककृता उक्तमित्यर्थः। अन्यत्रेत्येतद्व्याचष्टे। **अन्यत्रेति द्विवचनपरत्वाभावे इति** ॥ उदाहृतवार्तिके अन्यत्रेत्यनेन द्विवचनादन्यस्मिन् परे इत्यर्थो विवक्षितः। 'अन्याभावो द्विवचनटाब्विषयत्वात्' इति पूर्ववार्तिके द्विवचनस्यैव प्रस्तुतत्वादिति भावः। टाब्ग्रहणन्तु तत्राविवक्षितमिति कैयटादिषु स्पष्टम्। ततश्च सर्वनामतानिमित्तकाकजर्थः उभशब्दस्य सर्वादिषु पाठ इति स्थितम्। अत्र यद्वृत्तव्यन्तत्तद्धितप्रक्रियायां 'उभादुदात्तो नित्यम्' इत्यत्र वक्ष्यते। अथोभयशब्दे विशेषमाह। **उभयशब्दस्येति** ॥ उभौ अवयवौ यस्यावयविनस्स उभयः मणिः। 'उभादुदात्त' इत्ययच्। अवयववृत्तेस्सङ्ख्यावाचिनः उभशब्दादवयविन्यर्थे अयच्प्रत्ययस्स्यादिति तदर्थः। द्व्यवयवारब्धो मणिरित्यर्थः। मणेरवयविन एकत्वादुभयः इत्येकवचनम्। उभयश्च उभयश्च उभयश्चेत्येव द्व्यवयवारब्धत्र्यादिमणिविवक्षायान्तु बहुवचनं उभये मणय इति। उभयश्च उभयश्चेति द्व्यवयवारब्धद्विमणिविवक्षायामुभयौ मणी इति द्विवचनन्तु न भवति। उभयोऽन्यत्रेत्युदाहृतवार्तिके उभयशब्दस्य द्विवचनादन्यत्रैव प्रयोगविज्ञ्यवगमात्। नच तत्र वार्तिके स्वार्थिकायजन्तस्यैवोभयशब्दस्य ग्रहणम्। स्वार्थिकायजन्तोभयशब्दोपक्रमेणैव तद्वार्तिकप्रवृत्तेरिति वाच्यम्। एतद्वार्तिकव्याख्यावसरे उभयो मणिः, उभये देवमनुष्याः, इति भाष्ये उदाहृतत्वेन तयप्समानार्थकायजन्तस्यापि तत्र ग्रहणावगमात्। एतदेवाभिप्रेत्य 'तद्धितश्चासर्वविभक्तिः' इत्यव्ययत्वमुभयशब्दस्य द्विवचनाभावेनासर्वविभक्तित्वेऽपि न भवति। तसिलादयः प्राक्पाशपः, शस्प्रभृतयः प्राक् समासान्तेभ्यः, अम्, आम्, कृत्वोऽर्थाः, तसिवती, नानाञौ, इति परिगणितत्वादिति कैयटेनोक्तम्। तदाह। **कैयट इति** ॥ एवञ्च उभयः, उभये। उभयं, उभयान्। उभयेन, उभयैः। उभयस्मै, उभयेभ्यः। उभयस्मात्, उभयेभ्यः। उभयस्य, उभयेषाम्। उभयस्मिन्, उभयेषु। इत्येव

देशस्य स्थानिवद्भावेन तयप्प्रत्ययान्ततया 'प्रथमचरम–' (सू २२६) इति विकल्पे प्राप्ते विभक्तिनिरपेक्षत्वेनान्तरङ्गत्वान्नित्यैव संज्ञा भवति। उभये। डतरडतमौ प्रत्ययौ। प्रत्ययग्रहणे तदन्ता ग्राह्याः' (प २४) यद्यपि 'संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति' (प २८) 'सुप्तिङन्तम्' (सू २९) इति ज्ञाप-

---

रूपाणि। नतूभयाविल्यादिद्विवचनान्तप्रयोग इति सिद्धं भवति। हरदत्त इत्यस्वरसोद्भावनम्। तद्वीजन्तु उभयोऽन्यत्रेति प्रागुक्तवार्तिकभाष्यविरोध एवेत्यन्यत्र विस्तरः। उभयशब्दात् जसि सर्वादीनीति नित्यां सर्वनामसंज्ञां बाधित्वा परत्वात् 'प्रथमचरमतयाल्पार्धकतिपयनेमाश्च' इति सर्वनामसंज्ञाविकल्पप्राप्तिमाशङ्क्य परिहरति। **तस्मादित्यादिना** ॥ तस्मात् उभयशब्दात् जसि सति प्रथमचरमेति विकल्पे प्राप्ते नित्यैव संज्ञा भवतीत्यर्थः। सर्वादीनीत्यनेनेति शेषः। ननु प्रथमचरमादिष्वनन्तर्भावात् कथमुभयशब्दस्य प्रथमचरमेति विकल्पप्राप्तिरित्यत आह। **तयप्प्रत्ययान्ततयेति** ॥ ननु तयपः अश्रवणात् कथमुभयशब्दस्य तयप्प्रत्ययान्तत्वमित्यत आह। अयजादेशस्य स्थानिवद्भावेनेति। उभादुदात्त इति सूत्रे 'सङ्ख्याया अवयवे तयप्' इति उभशब्दाद्विहितस्य तयपोऽयजादेशः, तयब्ग्रहणमननुवर्त्य अयच् स्वतन्त्रः प्रत्ययो वा, इति पक्षद्वयं भाष्ये स्थितम्। तत्र प्रथमपक्षाभिप्रायेणात्र सर्वनामसंज्ञाविकल्पशङ्का बोध्या। ननु प्रथमचरमेति विकल्पस्य परत्वात् कथमिह सर्वादीनीति नित्यैव संज्ञेत्यत आह। **अन्तरङ्गत्वादिति** ॥ तदेवोपपादयति विभक्तिनिरपेक्षत्वेनेति। प्रथमचरमेति जसि विकल्पविधिः जसपेक्षत्वेन विभक्त्यपेक्षत्वात् बहिरङ्गः। सर्वादीनीति नित्यसंज्ञाविधिस्तु तदनपेक्षत्वात् अन्तरङ्गः। अल्पापेक्षमन्तरङ्गमिति न्यायात्। अतोऽत्र परमपि प्रथमचरमेति विकल्पं बाधित्वा सर्वादीनीति नित्यैव संज्ञा भवति। परादन्तरङ्गस्य बलीयस्त्वादिति भावः। तथा च शीभावो नित्य इत्याह। **उभये इति** ॥ ननु डतरडतमशब्दयोः क्वापि प्रयोगादर्शनात् किमर्थस्तयोः पाठ इत्यत आह। **डतरडतमौ प्रत्ययाविति** ॥ 'किंयत्तदोर्निर्द्धारणे द्वयोरेकस्य डतरच्'। 'वा बहूनां जातिपरिप्रश्ने डतमच्'। 'एकाच्च प्राचाम्' इति तद्धिताधिकारविहितौ डतरडतमौ प्रत्ययौ। 'प्रत्ययः' इत्यधिकृत्य तद्विधेः। अतः प्रत्ययग्रहणपरिभाषया डतरग्रहणेन कतरादिशब्दानां, डतमग्रहणेन कतमादिशब्दानाञ्च ग्रहणमिति भावः। शङ्कते। **यद्यपीति। सुप्तिङन्तमिति** ॥ यदि संज्ञाविधावपि प्रत्ययग्रहणपरिभाषा प्रवर्तेत, तर्हि सुप्तिङ्पदमित्येव सूत्रयेत। प्रत्ययग्रहणपरिभाषयैव सुप्तिङन्तमित्यर्थलाभात्। अतस्संज्ञाविधौ प्रत्ययग्रहणपरिभाषा न प्रवर्तत इति विज्ञायते। एवञ्च प्रकृते सर्वनामसंज्ञाविधौ डतरडतमग्रहणे प्रत्ययग्रहणपरिभाषानुपस्थानात् कथं तदन्तग्रहणमित्याक्षेपः। परिहरति। **तथापीति** ॥ अन्यत्र संज्ञाविधौ प्रत्ययग्रहणेन तदन्तग्रहणाभावेऽपि इह सर्वनामसंज्ञाविधौ डतरडतमग्रहणे तदन्तग्रहणमस्त्येवेत्यर्थः। कुत इत्यत आह। **केवलयोरिति** ॥ 'न केवला प्रकृतिः प्रयोक्तव्या, नापि प्रत्ययः' इति न्यायेन केवलप्रत्ययययोर्डतरडतमयोः प्रयोगानर्हत्वेन तयोस्सर्वनामसंज्ञायां फलाभावादित्यर्थः। तस्मात् डतरडतमग्रहणेनात्र

कात्। तथापीह तदन्तग्रहणम्। केवलयोः संज्ञायाः प्रयोजनाभावात्। अन्यतरान्यतमशब्दावव्युत्पन्नौ स्वभावाद्द्विबहुविषये निर्धारणे वर्तेते। तत्रान्यतमशब्दस्य गणे पाठाभावान्न संज्ञा। 'त्व' 'त्व' इति द्वावप्यदन्तावन्यपर्यायौ। 'एक उदात्तोऽपरोऽनुदात्तः' इत्येके। 'एकस्तान्तः' इत्यपरे। 'नेमः' इत्यर्धे। समः सर्वपर्यायः। तुल्यपर्यायस्तु नेह गृह्यते, 'यथासङ्ख्यमनुदेशः समानाम्' । (सू १२८) इति ज्ञापकात्। 'अन्तरं बहिर्योगोप—'(ग सू ३) इति गणसूत्रे 'अपुरि' इति वक्तव्यम्' (वा २४०)। अन्तरायां पुरि।

कतरकतमादिशब्दानां ग्रहणमिति स्थितम्। ननु डतरग्रहणेनैव सिद्धे सर्वादिगणे अन्यतरशब्दपाठो व्यर्थः। अन्यतमशब्दस्यापि डतमप्रत्ययान्तत्वात् सर्वनामत्वापत्तिश्चेत्यत आह। **अन्यतरान्यतमशब्दावव्युत्पन्नाविति** ॥ डितथादिशब्दवत् प्रकृतिप्रत्ययविभागविहीनावित्यर्थः। किंयत्तदेकेभ्य एव डतर डतम विधानादिति भावः। नन्वेवं सत्यन्यतरान्यतमशब्दाभ्यां द्विबहुनिर्द्धारणावगमः कथमित्यत आह। **स्वभावादिति** ॥ एवञ्चान्यतमशब्दस्य न सर्वनामत्वमित्याह। **तत्रेति** ॥ एतयोर्मध्ये इत्यर्थः। अन्यतरशब्दस्य तु डतरप्रत्ययान्तत्वाभावेऽपि सर्वादिगणे पाठादेव सर्वनामत्वमित्युक्तप्रायम्। अथ त्वन्वेत्येकप्रातिपदिकभ्रमं वारयन् अप्रसिद्धार्थत्वाद्वयाचष्टे। **त्व त्व इति द्वावप्यदन्तावन्यपर्यायाविति** ॥ अन्यशब्दसमानार्थकावित्यर्थः। द्वयोरप्यदन्तत्वे अन्यतरपाठवैयर्थ्यं परिहरति। **एक इति** ॥ **इत्येके इति** ॥ इति कतिपये वृत्तिकृदादयः मन्यन्त इत्यर्थः। 'एतं त्वं मन्ये' इत्युदात्तत्वस्य 'उतत्वः पश्यन्' इत्यादावनुदात्तत्वस्यच ऋग्वेदे दर्शनादिति भावः। **एकस्तान्त इति** ॥ संहितापाठे त्वत् त्व इति छेदमाश्रित्य प्रथमस्तकारान्तः द्वितीयः अदन्त इत्यपरे मन्यन्त इत्यर्थः। अन्यथा एकश्रुत्या वा स्वरविनिर्मुक्तं वा सकृदेव पठेत, तावतैव द्वयोरपि लाभात्। 'त्वत्त्वसमसिमेत्यनुवानि' इति फिट्सूत्राच्च। स्तरीरुत्वद्भवति सूत उन्वन् इत्यत्र गणव्याख्यावसरे वेदभाष्ये 'त्वदिति सर्वादिपठितः अनुदात्तोऽयं अन्यपर्यायः' इत्युक्तत्वाच्च। 'त्वदधरमधुरमधूनि पिबन्तम्' इति जयदेवप्रयोगाच्च। तत्र हि त्वच्छब्दोऽन्यपर्यायः। त्वतः अधर इति विग्रहः। अन्यस्या अधर इत्यर्थः। ननु तवाधर इति विवक्षितं, 'पश्यति दिशि दिशि रहसि भवन्तम्' इति पूर्ववाक्येनान्वयानुपपत्तेः। **नेम इत्यर्धे इति** ॥ वर्तते इति शेषः। प्रनेमस्मिन् दद्दशे सोमो अन्तः' इत्यृचि तथा दर्शनादिति भावः। **सम इति** ॥ सर्वशब्दसमानार्थक एव समशब्दः सर्वादिगणे पठित इत्यर्थः। **तुल्यपर्याय इति** ॥ तुल्यशब्दसमानार्थक इत्यर्थः। **ज्ञापकादिति** ॥ अन्यथा तत्र समेषामिति निर्दिशेदिति भावः। ननु अष्टाध्यायीपाठेते 'अन्तरं बहिर्योगोपसंव्यानयोः' इति जसि सर्वनामसंज्ञाविकल्पविधायके सूत्रे 'अपुरीतिवक्तव्यम्' इति वार्तिकपाठो भाष्ये दृश्यते। एवञ्चान्तराः पुर्यः इत्यत्र जसि सर्वनामसंज्ञानिषेधेऽपि, अन्तरायां पुरीत्यत्र तन्निषेधाभावात् अन्तरस्यामिति स्यादित्यत आह। **गणसूत्र इति** ॥ यद्यपीदं वार्तिक जसि विकल्पविधिप्रकरणे पठितं, तथाप्यन्तरं बहिरिति गणसूत्रस्यैवायं शेषः। नत्वष्टाध्यायीपठितस्य अन्तरं बहिरिति

२१८ । पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् । (१-१-३४)

एतेषां व्यवस्थायामसंज्ञायां सर्वनामसंज्ञा गणपाठात्सर्वत्र या प्राप्ता सा जसि वा स्यात् । पूर्वे—पूर्वाः । स्वाभिधेयापेक्षावधिनियमो व्यवस्था । 'व्यवस्थायां' किम् । दक्षिणा गाथकाः । कुशला इत्यर्थः । 'असंज्ञायां' किम् । उत्तराः कुरवः ।

२१९ । स्वमज्ञातिधनाख्यायाम् । (१-१-३५)

जसि विधायकस्य शेषः । जसश्शी इत्यत्र अत इत्यनुवृत्त्या टाबन्तात्तत्प्राप्तिविरहात् । ततश्च पुर्यो विशेष्यभूतायां अन्तरशब्दः सर्वादिगणे पाठं न लभते इत्येतद्वार्तिकार्थः पर्यवस्यति । एवञ्च जसोऽन्यत्रापि अन्तरशब्दस्य पुर्यो विशेष्यभूतायां सर्वनामत्वं नेति लभ्यते । अतः अन्तरायां पुरीत्यादौ सर्वनामकार्यं स्याडादि नभवतीत्यभिप्रेत्योदाहरति । **अन्तरायां पुरीति** ॥ यद्यप्यन्तरशब्द एव सर्वादिगणे पठितः, नतु टाबन्तः । तथापि लिङ्गविशिष्टपरिभाषया वा एकादेशस्य पूर्वान्तत्वेन ग्रहणाद्वा सर्वनामत्वप्राप्तिर्बोध्या । सिमशब्दस्तु 'सिमः कृत्स्ने च शक्ते च स्यान्मर्यादावबद्धयोः' इति कोशे प्रसिद्धः । अथ सर्वादिगणान्तर्गतत्रिसूत्रीसमानाकारामष्टाध्यायीपठितां पूर्वपरेत्यादित्रिसूत्रीं पुनरुक्तिशङ्कां व्युदस्यन् व्याचष्टे । **पूर्वपर** ॥ सर्वनामानीति विभाषाजसीति चानुवर्तते । तदाह । **एतेषामिति** ॥ पूर्वादिसप्तानामित्यर्थः । **गण इति** ॥ सर्वादिगण इत्यर्थः । **या प्राप्तेति** ॥ सर्वादीनीत्यनेन नित्या संज्ञा या प्राप्तेत्यर्थः । अनेन पूर्वपरेति सूत्रं गणपठितं जसोऽन्यत्र नित्यतया सर्वनामसंज्ञार्थम् । अष्टाध्यायीपठितन्तु जसि तद्विकल्पार्थमिति न पौनरुक्त्यमिति सूचितम् । **स्वाभिधेयेति** ॥ अपेक्ष्यत इत्यपेक्षः कर्मणि घञ् । स्वस्य पूर्वादिशब्दस्याभिधेयं वाच्यं तेन अपेक्षः अपेक्ष्यमाणः अवधेर्नियमः व्यवस्थाशब्देन विवक्षित इत्यर्थः । ततश्च नियमेनावधिसापेक्षार्थे वर्तमानानां पूर्वादिशब्दानां जसि सर्वनामसंज्ञाविकल्प इति फलति । **व्यवस्थायां किमिति** ॥ पूर्वादिशब्दानां नियमेनावधिसापेक्ष एवार्थे विद्यमानत्वमिति प्रश्नः । **दक्षिणा गाथका इति** ॥ अत्र दक्षिणशब्दो नावध्यपेक्ष इति भावः । दक्षिणपार्श्ववर्तिनो गाथका इत्यत्र कस्मादित्यवध्यपेक्षा अस्त्येवेत्यत आह । **कुशला इत्यर्थ इति** ॥ यद्यपि प्रावीण्यमपि कस्मादित्यवध्यपेक्षमेव । तथापि उत्तरे प्रत्युत्तरे च शक्त इत्यादि प्रत्युदाहरणं बोध्यमित्याहुः । **असंज्ञायां किमिति** ॥ 'संज्ञोपसर्जनीभूतास्तु न सर्वादयः' इति वक्ष्यमाणतया संज्ञायां सर्वनामत्वस्याप्रसक्तेरिति प्रश्नः । **उत्तराः कुरव इति** ॥ कुरुशब्दो देशविशेषे नित्यं बहुवचनान्तः । सुमेरुमवधीकृत्य तत्रोत्तरशब्दो वर्तत इत्यस्तीह व्यवस्था । किन्तु संज्ञाशब्दत्वान्नास्य सर्वनामता । पूर्वादिशब्दानान्तु दिक्कालेषु अनादिस्सङ्केत इति न ते संज्ञाशब्दाः । कुरुषु तूत्तरशब्दस्याधुनिकस्सङ्केत इति भवत्ययं संज्ञाशब्द इति मन्यते । केचित्त्वसंज्ञायामित्यभावे संज्ञायामेव पूर्वादिशब्दानामप्राप्तविभाषा स्यादित्याहुः । **स्वमज्ञा-**

ज्ञातिधनान्यवाचिनः स्वशब्दस्य या प्राप्ता संज्ञा सा जसि वा स्यात्। स्वे—स्वाः। आत्मीया इत्यर्थः। आत्मान इति वा। ज्ञातिधनवाचिनस्तु स्वाः, ज्ञातयोऽर्था वा।

२२०। अन्तरं बहिर्योगोपसंव्यानयोः। (१-१-३६)

बाह्ये परिधानीये चार्थेऽन्तरशब्दस्य या प्राप्ता संज्ञा सा जसि वा स्यात्। अन्तरे—अन्तरा वा गृहाः। बाह्या इत्यर्थः। अन्तरे—अन्तरा वा शाटकाः। परिधानीया इत्यर्थः।

२२१। पूर्वादिभ्यो नवभ्यो वा। (७-१-१६)

एभ्यो नवभ्यो ङसिङ्योः स्मात्स्मिनौ वा स्तः। पूर्वस्मात्—पूर्वात्। पूर्वस्मिन्—पूर्वे। एवं परादीनामपि। शेषं सर्ववत्। एकशब्दः सङ्ख्यायां नित्यैकवचनान्तः।

तीति ॥ अत्रापि सर्वनामानीति विभाषा जसीति चानुवर्तते। ज्ञातिश्च धनञ्च ज्ञातिधने तयोराख्या ज्ञातिधनाख्या न ज्ञातिधनाख्या अज्ञातिधनाख्या तस्यां अज्ञातिधनाख्यायाम्। स्वामिति शब्दस्वरूपापेक्षया नपुंसकत्वम्। तदाह। **ज्ञातिधनान्येति। स्वे—स्वाः, इति** ॥ सर्वनामत्वे शीभावः, 'तदभावे तदभाव इति भावः। आत्मा आत्मीयं ज्ञातिः धनञ्चेति स्वशब्दस्य चत्वारोऽर्थाः। (नि) 'स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने' इत्यमरः। अत्र स्वो ज्ञातावात्मनीत्येकं वाक्यम्। ज्ञातावात्मनि च स्वशब्दः पुल्लिङ्ग इत्यर्थः। स्वं त्रिष्वात्मीये इति द्वितीयं वाक्यम्। आत्मीये स्वशब्दो विशेष्यनिघ्न इत्यर्थः। स्वोऽस्त्रियां धन इति तृतीयं वाक्यम्। धने स्वशब्दः पुन्नपुंसक इत्यर्थः। 'स्वस्स्यात् पुंस्यात्मनि ज्ञातौ त्रिष्वात्मीयेऽस्त्रियां धने' इति मेदिनीकोशः। तत्र ज्ञातिधनयोः पर्युदासात् आत्मनि आत्मीये च सर्वनामत्वं जसि विकल्प्यत इत्यभिप्रेत्य व्याचष्टे। **आत्मीया इत्यर्थ इति। आत्मान इति वेति** ॥ ज्ञातिधनपर्युदासस्य प्रयोजनमाह। **ज्ञातिधनवाचिनस्त्विति** ॥ ज्ञातिवाचिनः धनवाचिनश्च सर्वनामत्वपर्युदासात् जसि स्वा इत्येव रूपमित्यर्थः। नच ज्ञातिधनयोरप्यात्मीयत्वपुरस्कारे सर्वनामत्वं न स्यादिति वाच्यम्। आख्याग्रहणबलेन ज्ञातित्वधनत्वपुरस्कार एव पर्युदासप्रवृत्तेः। **अन्तरम्** ॥ अत्रापि सर्वनामानीति विभाषा जसीति चानुवर्तते। बहिः अनावृतप्रदेशः तेन योगस्सम्बन्धः यस्य सः बहिर्योगः बहिर्विद्यमानोऽर्थ इति यावत्। उपसंवीयते परिधीयत इति उपसंव्यानं अन्तरीयं वस्त्रं तदाह। **बाह्य इत्यादिना। पूर्वादिभ्यो** ॥ ङसिङ्योस्स्मात्स्मिनावित्यनुवर्तते। इत्याह। **एभ्य इति** ॥ पूर्वपरेत्यादिसूत्रनिर्दिष्टाः पूर्वादय इह विवक्षिताः। त्यदादयो हलन्ताधिकारे व्याख्यास्यन्ते। **एकशब्दस्संख्यायामिति** ॥ अर्थान्तरे तु द्विबहुवचने अपि स्तः। 'एकोऽन्यार्थे प्रधाने च प्रथमे केवले

२२२ । न बहुव्रीहौ । (१-१-२९)

बहुव्रीहौ चिकीर्षिते सर्वनामसंज्ञा न स्यात्। त्वकं पिता यस्य सः त्वत्कपितृकः । अहकं पिता यस्य सः मत्कपितृकः । इह समासात्प्रागेव प्रक्रियावाक्ये सर्वनामसंज्ञा निषिद्ध्यते । अन्यथा लौकिकविग्रहवाक्य इव तत्राप्यकच्प्रवर्तेत । स च समासेऽपि श्रूयेत । 'अतिक्रान्तो भवकन्तम्, अतिभवकान्'

तथा । साधारणे समानेऽल्पे सङ्कचायाश्च प्रयुज्यते' इति कोशः । स्यादेतत् । त्वत्कपितृकः मत्कपितृक इति बहुव्रीहिः । त्वकं पिता यस्य, अहकं पिता यस्येति लौकिकविग्रहवाक्यम् । लौकिकत्वं प्रयोगार्हत्वम् । युष्मदस्मदोरङ्गातावर्थे अव्ययसर्वनाम्नामित्यकचि युष्मकद् स , अस्मकद् स् इति स्थिते, 'ङे प्रथमयोः' इत्यमि 'त्वाहौ सौ' इति त्वादेशे अहादेशे च सति 'शेषे लोपः' इति लोपे, अतो गुणे, अमि पूर्वे च त्वकम् अहकम् इति रूपम्। युष्मद् स्, पितृ स्, अस्मद् स्, पितृ स्, इत्यलौकिकं विग्रहवाक्यम्। प्रयोगानर्हत्वम् अलौकिकत्वम् इति स्थितिः। तत्र त्वत्कपितृको मत्कपितृक इति बहुव्रीहिदशायां कप्रत्ययो न सम्भवति । युष्मदस्मदोस्सर्वनामत्वेनाकच्प्रसङ्गात् । **न बहुव्रीहौ** ॥ सर्वादीनि सर्वनामानीत्यनुवर्तते । बहुव्रीहौ सर्वादीनि सर्वनामानि न स्युरित्यर्थः प्रतीयते । एवं सति सूत्रमिदं व्यर्थम् । प्रियसर्वायेत्यादीनां बहुव्रीहिवर्तिनां सर्वादीनां स्वार्थोपसङ्क्रान्तार्थान्तरप्रधानकतया उपसर्जनत्वादेव सर्वनामत्वनिषेधसिद्धेः । 'संज्ञोपसर्जनीभूतास्तु न सर्वादयः' इति वक्ष्यमाणत्वात् । अतो व्याचष्टे । **बहुव्रीहौ चिकीर्षित इति** ॥ बहुव्रीहाविति विषयसप्तम्याश्रयणात् अयमर्थो लभ्यते । तथाच बहुव्रीहौ प्रसक्ते सति ततः प्रागेव विग्रहवाक्येऽस्य निषेधोऽर्थवान् । एकार्थीभावात्मकसामर्थ्यस्य समासदशायामेव सत्त्वेन विग्रहवाक्ये तदभावेन तदानीमुक्तोपसर्जनत्वस्याभावादिति भावः । अथ लौकिकविग्रहवाक्यन्दर्शयन् लक्ष्यभूतं बहुव्रीहिं दर्शयति । **त्वकम्पितेत्यादिना** ॥ सर्वनामत्वाभावात् कप्रत्यये 'प्रत्ययोत्तरपदयोश्च' इति त्वमादेशे त्वत्कः मत्कः इति च रूपम् । ननु बहुव्रीहिप्रवृत्तेः प्राक् अलौकिकविग्रहवाक्ये सर्वनामत्वनिषेधात् त्वकं पितेति कथं लौकिकविग्रहवाक्यप्रदर्शनमित्यत आह । **इहेति** ॥ न बहुव्रीहावित्यस्मिन् सूत्र इत्यर्थः । **प्रक्रियावाक्य इति** ॥ युष्मद् स्, पितृ स्, अस्मद् स्, पितृ स्, इत्यलौकिकविग्रहवाक्य एवेत्यर्थः । लौकिकविग्रहवाक्ये तु नायं निषेधः । बहुव्रीहिवृत्तस्य स्वार्थे परिनिष्ठितत्वेन स्वतन्त्रप्रयोगार्हतया बहुव्रीहेस्तत्र चिकीर्षितत्वाभावात् अलौकिकविग्रहात्मके प्राक्रियावाक्य एव तस्य चिकीर्षितत्वात् । यथाचैतत्तथा समासनिरूपणे वक्ष्यते । ननु लौकिकविग्रहवाक्ये मास्तु सर्वनामतानिषेधः । तत्राह । **अन्यथेति** ॥ न बहुव्रीहावित्यलौकिकविग्रहवाक्ये निषेधाभावे सतीत्यर्थः । **तत्रापीति** ॥ अलौकिकविग्रहवाक्येऽपीत्यर्थः । नन्वलौकिकविग्रहवाक्ये भवत्वकच् । सत्यप्यकचि तस्य प्रयोगानर्हत्वेन बाधकाभावादित्यत आह । **सचेति** ॥ अलौकिकविग्रहवाक्ये श्रुतस्य लौकिकविग्रहवाक्ये समासे च श्रवणनियमादिति भावः । उभयत्रापि तन्नियमे दृष्टान्तद्वयमाह। **अतिक्रान्तो भवकन्तम्, अतिभवकानिति-**

इतिवत्। भाष्यकारस्तु 'त्वकत्पितृकः' 'मकत्पितृकः' इति रूपे इष्टापत्तिं कृत्वैतत्सूत्रं प्रत्याचख्यौ। अधिकदर्शित्वात्। यथोत्तरं मुनीनां प्रामाण्यम्। 'संज्ञोपस-

---

वदिति ॥ भवच्छब्दस्य सर्वादिगणे पाठात् सर्वनामत्वादलौकिकविग्रहदशायामकच्। ततश्च भवकत् अं अति इत्यलौकिकविग्रहवाक्यं सम्पद्यते। तत्र "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" इति समासे सति "सुपो धातुप्रातिपदिकयोः" इति सुब्लुकि अतिभवकच्छब्दात् प्रथमैकवचने अतिभवकानिति रूपम्। समासाभावपक्षे तु भवकन्तमतिक्रान्त इति लौकिकविग्रहवाक्यं भवति। तत्र समासदशायां भवच्छब्दार्थस्य स्वोपक्रान्तार्थान्तरप्रधानतया उपसर्जनत्वेऽपि अलौकिकविग्रहदशायां भवच्छब्दस्यानुपसर्जनत्वात् सर्वनामत्वे सति प्रवृत्तः अकच् अतिक्रान्तो भवकन्तमिति लौकिकविग्रहवाक्ये अतिभवकानिति समासेऽप्यनुवर्तते। लौकिकविग्रहदशायां भवच्छब्दस्य उक्तरीत्या अनुपसर्जनत्वात्। समासे तस्योपसर्जनत्वेऽपि योनिभूतालौकिकविग्रहदशायां प्रवृत्तस्याकचो निवृत्त्यभावात्। नच भवत् अम् इत्यलौकिकविग्रहदशायां सतोऽप्यनुपसर्जनत्वस्य समासदशायां विनाशं प्राप्स्यमानतया विनाशोन्मुखत्वात् अकृतव्यूहपरिभाषया अलौकिकविग्रहवाक्येऽपि सर्वनामत्वाभावात् अकज्दुर्लभः। ततश्च अतिक्रान्तो भवकन्तमिति लौकिकविग्रहवाक्ये अतिभवकानिति समासे च कथमकच्प्रसक्त इति दृष्टान्तासिद्धिरिति वाच्यम्। एवञ्जातीयकालौकिकविग्रहवाक्ये सर्वनामत्वप्रवृत्तौ अकृतव्यूहपरिभाषाया अनित्यत्वेन अप्रवृत्तेः। तदनित्यत्वे च न बहुव्रीहाविति सूत्रमेव ज्ञापकम्। तथा हि—यद्यकृतव्यूहपरिभाषा सार्वत्रिकी स्यात्, तर्हि बहुव्रीहिविषयेऽपि युष्मद् स् पितृ स् इत्याद्यलौकिकविग्रहवाक्ये अनुपसर्जनत्वस्य बहुव्रीहिकालिकविनाशोन्मुखतया सर्वनामत्वस्याप्रसक्तत्वात् न बहुव्रीहाविति नारभ्येत। अकृतव्यूहपरिभाषायास्तत्राप्रवृत्तेः। भविष्यद्बहुव्रीहिकालिकविनाशोन्मुखमनुपसर्जनत्वं पुरस्कृत्य तदलौकिकविग्रहवाक्ये सर्वनामत्वस्याप्रसक्तत्वात् न निषेधाय न बहुव्रीहावित्यर्थवत्। नच उदाहृतबहुव्रीहिविषयालौकिकविग्रहवाक्ये अकृतव्यूहपरिभाषामाश्रित्यैव सर्वनामत्वाभाव आश्रीयताम्। किं न बहुव्रीहाविति सूत्रेणेति वाच्यम्। एवं सत्यतिक्रान्तो भवकन्तमतिभवकन्तमतिभवकानित्यादि न सिध्येत्। अकृतव्यूहपरिभाषया तदलौकिकविग्रहवाक्येऽपि सर्वनामत्वाभावेनाकचः प्रवृत्त्यभावे तस्यातिक्रान्तो भवकन्तमित्यादिलौकिकविग्रहवाक्ये अतिभवकानिति समासेऽपि श्रवणं न स्यात्। एवञ्च बहुव्रीहिविषये अलौकिकविग्रहवाक्ये अकृतव्यूहपरिभाषाया अप्रवृत्तिं सिद्धवत्कृत्य सर्वनामत्वनिषेधात्तदितरसमासविषयेऽप्यलौकिकविग्रहवाक्ये अकृतव्यूहपरिभाषाया अप्रवृत्या सर्वनामत्वं विज्ञायते। एतदर्थमेव न बहुव्रीहाविति सूत्रमित्यन्यत्र विस्तरः। **प्रत्याचख्याविति** ॥ निराकृतवानित्यर्थः। सूत्रभाष्ययोरुभयोरपि स्मृतित्वाविशेषेऽपि उत्तरग्रन्थस्य प्रामाण्यं पूर्वपूर्वस्याप्रामाण्यमिति भावः। **अधिकदर्शित्वादिति** ॥ वैयाकरणसमय इति भावः। न चाकृतव्यूहपरिभाषाया उक्तरीत्या अनित्यत्वज्ञापनार्थमेतत्सूत्रमिति वाच्यम्। अकृतव्यूहपरिभाषाया निर्मूलत्वस्य निष्फलत्वस्य च हलन्ताधिकारे सेदिवस्शब्दनिरूपणे 'समर्थानां प्रथमाद्वा' इत्यत्र च वक्ष्यमाणत्वात्। **यथोत्तरमिति** ॥ सूत्रकाराद्वार्तिककारस्य उभाभ्यामपि भाष्यकृत इत्येवं मुनीनामुत्तरोत्तरस्य।

र्जनीभूतास्तु न सर्वादयः' (वा २२५) महासंज्ञाकरणेन तदनुगुणानामेव गणे सन्निवेशात् । अतः संज्ञाकार्यमन्तर्गणकार्यं च तेषां न भवति । सर्वो नाम कश्चित्तस्मै सर्वाय देहि । अतिक्रान्तः सर्वमतिसर्वस्तस्मा अतिसर्वाय देहि । अतिकतरं कुलम् । अतितत् ।

२२३ । तृतीयासमासे । (१-१-३०)

इह सर्वनामता न स्यात् । मासपूर्वाय । तृतीयासमासार्थवाक्येऽपि न । मासेन पूर्वाय ।

२२४ । द्वन्द्वे च । (१-१-३१)

द्वन्द्वे उक्तसंज्ञा न । वर्णाश्रमेतराणाम् । समुदायस्यैवायं निषेधः ।

संज्ञोपसर्जनीभूता इति ॥ आधुनिकसङ्केतस्संज्ञा । अन्यविशेषणत्वेनोपस्थापकमुपसर्जनम् । **न सर्वादय इति** ॥ सर्वादिगणे पठिता न भवन्तीत्यर्थः । विकल्पमाशङ्क्याह । **महासंज्ञेति** ॥ टिघुभादिवदेकाक्षरसंज्ञामकृत्वा सर्वेषां नामानीत्यन्वर्थसंज्ञाकरणबलेन प्राधान्येनोपस्थितस्वीयसर्वार्थवाचकत्वस्य सर्वनामशब्दप्रवृत्तिनिमित्तत्वमित्यवगततया तथाविधानामेव सर्वादिगणे पाठानुमानादित्यर्थः । प्राधान्येनोपस्थितेत्यनेन उपसर्जनव्यावृत्तिः । प्राधान्येनोपस्थितसर्वार्थवाचकत्वमित्युक्ते पूर्वादिशब्देष्वव्याप्तिः । अतस्स्वीयेति सर्वार्थेत्यनेन संज्ञाशब्दव्यावृत्तिः । संज्ञाशब्दानामेकैकव्यक्तिविषयकत्वात् । **संज्ञाकार्यमिति** ॥ सर्वनामसंज्ञाकार्यं शीस्मायादिकमित्यर्थः । **अन्तर्गणेति** ॥ सर्वादिगणे अन्तर्गतो गणः अन्तर्गणः तदीयं कार्यम् 'अड्डतरादिभ्यः' 'त्यदादीनामः' इत्यादिकमित्यर्थः । **सर्वाय देहीति** ॥ संज्ञाशब्दत्वात् स्मायादेशो न । **अतिकतरमिति** ॥ कतरमतिक्रान्तं कुलम् अतिकतरमित्यत्र कतरशब्दस्य उपसर्जनत्वान्नाद्डादेशः । **अतितदिति** ॥ तमतिक्रान्तं कुलम्, अतितदित्यत्र, त्यदाद्यत्वं 'तदोस्सः सौ' इति च न भवति । **तृतीया समासे** ॥ सर्वादीनीत्यतस्सर्वनामग्रहणं, न बहुव्रीहावित्यतो नेति चानुवर्तत इत्याभिप्रेत्याह । **इहेति । मासपूर्वायेति** ॥ मासेन पूर्वः इति विग्रहः । हेतौ तृतीया । पूर्वसदृशेति तृतीयातत्पुरुषसमासः । मासात् पूर्वभावीत्यर्थः । 'विभाषा दिक्समासे बहुव्रीहौ' इत्यतः समासग्रहणे अनुवर्तमाने पुनस्समासग्रहणं तृतीयासमासीयलौकिकविग्रहवाक्यरूपगौणसमासस्यापि परिग्रहार्थम्। ततश्च फलितमाह। **तृतीयासमासार्थेति । द्वन्द्वे च** ॥ सर्वादीनीत्यतस्सर्वनामग्रहणं, न बहुव्रीहाविव्यतो नेति चानुवर्तते । तदाह—**द्वन्द्वे उक्तसंज्ञा नेति** ॥ सर्वनामसंज्ञा नेत्यर्थः । **वर्णाश्रमेतराणामिति** ॥ "वर्णाश्रमेतराणान्तु ब्रूहि धर्मान्नरोत्तम" इति याज्ञवल्क्यस्मृतिः । वर्णाश्च आश्रमाश्च इतरे चेति द्वन्द्वः । अत्र सर्वनामत्वाभावादामि सर्वनाम्न इति न सुट् । **समुदायस्यैवेति** ॥ द्वन्द्वे विद्यमानानि यानि सर्वादीनि तानि सर्वनामानि न स्युरिति नार्थः । विधेयक्रियाध्याहारे गौरवात् । किन्तु द्वन्द्वे सर्वनामसंज्ञा

न त्ववयवानाम्। नचैवं तदन्तविधिना सुट्प्रसङ्गः। सर्वनाम्नो विहितस्यामः सुडिति व्याख्यातत्वात्।

२२५। विभाषा जसि। (१-१-३२)

जसाधारं यत्कार्यं शीभावाख्यं तत्र कर्तव्ये द्वन्द्वे उक्ता संज्ञा वा स्यात्। वर्णाश्रमेतरे—वर्णाश्रमेतराः। शीभावं प्रत्येव विभाषेत्युक्तम्। अतो नाकच्, किन्तु कप्रत्यय एव। वर्णाश्रमेतरकाः।

न भवतीति प्रधानभूतया निषेध्यभवनक्रिययैव द्वन्द्वस्याधारतयान्वयः। द्वन्द्वाधारा सर्वनामसंज्ञा न भवतीत्यक्षरार्थः। द्वन्द्वस्य सर्वनामसंज्ञा नेति फलितम्। वर्णाश्रमेत्यादिसमुदायस्यैव द्वन्द्वता। नतु तदवयवानाम्। एवञ्च वर्णाश्रमेतरेत्यादिसमुदायस्यैव सर्वनामत्वनिषेधः नतु तदवयवानामिति वस्तुस्थितिकथनम्। ननु द्वन्द्वावयवानां सर्वनामत्वनिषेधाभावे वर्णाश्रमेतरशब्दे इतरशब्दस्य सर्वनामतया ततः परस्यामस्सुटि वर्णाश्रमेतरेषामिति स्यात्। नच अवर्णान्तात् सर्वनाम्नोऽङ्गात् परस्यामस्सुट्विधानादिह चामि परे इतरशब्दस्य सर्वनामत्वेऽप्यङ्गत्वाभावान्न ततः परस्यामस्सुट्प्रसक्तिरिति वाच्यम्। सुट्विधिर्ह्ययमङ्गाधिकारस्थः। ततश्च 'पदाङ्गाधिकारे तस्य च तदन्तस्य च' इति परिभाषया सर्वनामान्तादददन्तादङ्गात् परस्यामस्सुट्विधीयते। ततश्च वर्णाश्रमेतरशब्दस्य समुदायस्य द्वन्द्वतया सर्वनामत्वनिषेधेऽपि तदवयवस्य इतरशब्दस्य सर्वनामतया तदन्ताङ्गात् परत्वादामस्सुट् स्यात्। नचैवं सति द्वन्द्वस्य तन्निषेधो व्यर्थस्स्यादित्याशङ्क्यम्। पदाङ्गाधिकारादन्यत्र तसिल्त्रलादिविधौ तन्निषेधस्यार्थवत्त्वादित्याशङ्क्य परिहरति। **नचैवमित्यादिना** ॥ एवमित्यनन्तरं सतीति शेषः। एवं सति समुदायस्यैव निषेधे सति तदन्तविधिना सुट्प्रसङ्गो नेत्यन्वयः। कुत इत्यत आह। **सर्वनाम्नो विहितस्येति** ॥ अवर्णान्तादङ्गात् परस्य सर्वनाम्नो विहितस्यामस्सुडिति व्याख्यानादित्यर्थः। प्रकृते च वर्णाश्रमेतरशब्दात् समुदायादाम्विहितः। न तु समुदायस्सर्वनामसंज्ञकः। द्वन्द्वस्य तन्निषेधात्। इतरशब्दस्तु सर्वनामसंज्ञकः आमस्समुदायादेव विधानात्। अतो न सुडिति भावः। अवर्णान्तादङ्गात् सर्वनाम्नो विहितस्यामस्सुडिति व्याख्याने तु येषां तेषामित्यलाव्याप्तिः। अतः अवर्णान्तादङ्गात् परस्य सर्वनाम्नो विहितस्यामस्सुडित्येव व्याख्येयम्। **विभाषा जसि** ॥ सर्वनामग्रहणमनुवर्तते, द्वन्द्व इति च। जसि इत्यविभक्तिको निर्देशः। जसः इः जसिः। आर्षस्सप्तम्या लुक्। इशब्दो इवर्णपरस्सन् शी इतीकारमाचष्टे। ततश्च जसादेशे शीभावे कर्तव्ये इति फलितम्। तदाह। **जसाधारमिति** ॥ जस् आधारो यस्येति बहुव्रीहिः। जस् स्थानिकमित्यर्थः। ननु जसि परतो द्वन्द्वे सर्वनामसंज्ञा वा स्यादित्येव कुतो न व्याख्यायत इत्यत आह। **शीभावं प्रत्येवेत्यादिना** ॥ यदि तु अकच् स्यात्, तर्हि तस्याव्यवधायकत्वाच्छीभावविकल्पः प्रसज्येत। कप्रत्यये तु सति तेन व्यवधानान्नोक्तदोष इत्याह। **वर्णाश्रमेतरका इति** ॥ नचाकचि कर्तव्ये विकल्पाभावेऽपि सर्वादीनीति नित्या सर्वनामसंज्ञा कुतोऽत्र न स्यादिति वाच्यम्। 'द्वन्द्वे च' इति तस्याः नित्यनिषेधात्। नच द्वन्द्वे

२२६ । प्रथमचरमतयाल्पार्धकतिपयनेमाश्च । (१-१-३३)

एते जसः कार्यं प्रत्युक्तसंज्ञा वा स्युः । प्रथमे–प्रथमाः । शेषं रामवत् । तयप् प्रत्ययस्ततस्तदन्ता ग्राह्याः । द्वितये-द्वितयाः । शेषं रामवत् । नेमे–नेमाः । शेषं सर्ववत् । 'विभाषाप्रकरणे तीयस्य ङित्सूपसङ्ख्यानम्' (वा २४२) । द्वितीयस्मै-द्वितीयायेत्यादि । एवं तृतीयः । अर्थवद्ग्रहणान्नेह । पटुजातीयाय । निर्जरः ।

चेति निषेधस्य उक्तरीत्या अवयवेषु प्रवृत्त्यभावाद्वर्णाश्रमेतरशब्दे समुदाये इतरशब्दस्यावयवस्य सर्वनामत्वानपायादकज्दुर्वार इति वाच्यम् । द्वन्द्वावयवमात्रे सुन्दरादिविशेषणवत् कुत्सादिविवक्षाया अभावात् । समुदाये तद्विवक्षायां समुदायोत्तरप्रत्ययेन अवयवगतकुत्सादेरपि बोधेनोक्तार्थत्वादवयवेभ्यः पृथक् तदनुत्पत्तेः । अन्यथा अवयवेभ्यः प्रत्येकं कप्रत्ययापत्तेः । एतदेवाभिप्रेत्योक्तं भाष्ये । 'वर्णाश्रमेतरशब्दे अकच् न भवति' इति । एवञ्च यदा इतरशब्देन द्वन्द्वं कृत्वा कुत्सितवर्णाश्रमेतरा इति कुत्सायोगः क्रियते तदा कप्रत्यये सति वर्णाश्रमेतरका इत्येव रूपम् । यदा तु कुत्सितः इतरक इति अकचं कृत्वा वर्णाश्च आश्रमाश्च इतरकश्चेति द्वन्द्वः क्रियते, तदा शीभावविकल्पस्यादेव । **प्रथमचरमतया ॥** विभाषा जसीत्यनुवर्तते, सर्वनामानीति च । तदाह । **एत इति ॥** प्रथमादय इत्यर्थः । **उक्तसंज्ञा इति ॥** सर्वनामसंज्ञका इत्यर्थः । तत्र नेमशब्दस्य जसि सर्वनामसंज्ञा गणे पाठान्नित्या प्राप्ता । तद्विकल्पोऽत्र विधीयते । नेमशब्दव्यतिरिक्तानां प्रथमादिशब्दानान्तु गणे पाठाभावादप्राप्तैव सर्वनामसंज्ञा जसि विकल्पेन विधीयते । अतः नेमशब्दव्यतिरिक्तानां प्रथमादिशब्दानां जसोऽन्यत्र न सर्वनामकार्यमित्याह । **शेषं रामवदिति ॥** तयशब्दो न प्रातिपदिकमित्याह । **तयप् प्रत्यय इति ॥** 'सङ्ख्याया अवयवे तयप्' इति विहित इति विशेषः । **तत इति ॥** तस्मात् प्रत्ययत्वाद्धेतोः प्रत्ययग्रहणपरिभाषया तदन्ताः तयबन्ताः ग्राह्या इत्यर्थः । **द्वितये द्वितया इति ॥** द्वावेवयवावस्येत्यर्थे तयप् । यद्यप्यवयवसमुदायः अवयवी तयबर्थः, तस्य च एकत्वादेकवचनमेव युक्तम् । तथापि यदा उद्भूतावयवभेदः समुदायस्तयबर्थः, उद्भूतत्वञ्च विवक्षितसङ्ख्याकत्वं, तदा अवयवबहुत्वाभिप्रायं, अवयविनो अवयवाभेदाभिप्रायं वा बहुवचनमिति न दोषः । अत्र च तयब्ग्रहणमेव प्रमाणम् । अन्यथा तयबन्ताज्जस एवाभावात् किन्तेन । चरमे चरमाः, अल्पे अल्पाः, अर्धे अर्धाः, कतिपये कतिपयाः, इत्यपि प्रथमशब्दवदुदाहार्यम् । अर्धशब्दस्त्वेकदेशवाची पुल्लिङ्गः । समांशवाची तु नपुंसकलिङ्गः । 'वा पुंस्यर्धोऽर्धं समेंशके' इति कोशात् । **शेषं सर्ववदिति ॥** नेमशब्दस्य सर्वादिगणे पाठादिति भावः । **विभाषाप्रकरण इति ॥** विभाषा जसीत्यधिकारे तीयान्तस्य ङे–ङसि–ङस्–ङि–इत्येतेषु ङित्सु परेषु सर्वनामसंज्ञावचनं कर्तव्यमित्यर्थः । **द्वितीयस्मै द्वितीयायेति ॥** द्वयोः पूरणो द्वितीयः । द्वेस्तीय इति पूरणे तीयप्रत्ययः । **इत्यादीति ॥** द्वितीयस्मात् द्वितीयात् द्वितीयस्मिन् द्वितीये इत्यादिशब्दार्थः ।

२२७। जराया जरसन्यतरस्याम्। (७-२-१०१)

जरा शब्दस्य 'जरस्' वा स्यादजादौ विभक्तौ। 'पदाङ्गाधिकारे तस्य च तदन्तस्य च' (प. ३०)। अनेकाल्त्वात्सर्वादेशे प्राप्ते निर्दिश्यमानस्यादेशा भवन्ति' (प. १३)। एकदेशविकृतस्यानन्यत्वात् जरशब्दस्य 'जरस्'। निर्जरसौ। निर्जरसः। इनादीन्बाधित्वा परत्वाज्जरस्। निर्जरसा।

एवं तृतीय इति ॥ ङित्सूदाहार्य इति शेषः। 'त्रेस्सम्प्रसारणञ्च' इति पूरणे तीयप्रत्ययः। रेफस्य सम्प्रसारणम् ऋकारः। 'सम्प्रसारणाच्च' इति पूर्वरूपम्। ननु 'प्रकारवचने जातीयर्' इति पटुशब्दात् जातीयरि पटुजातीयशब्दः। तस्यापि तीयान्तत्वात् ङित्सु सर्वनामत्वविकल्पस्यादित्यत आह। **अर्थवदिति** ॥ 'अर्थवद्ग्रहणे नानर्थकस्य' इति परिभाषया अर्थवानेव तीयोऽत्र गृह्यते। जातीयरि तु समुदायस्यैवार्थवत्त्वं न तु तदेकदेशस्येति भावः। निष्क्रान्तो जरायाः निर्जरः। 'निरादयः क्रान्ताद्यर्थे' इति समासः। 'गोस्त्रियोः' इति ह्रस्वत्वम्। निर्गता जरा यस्मादिति बहुव्रीहिर्वा। अस्य निर्जरशब्दस्य विशेषं दर्शयितुमाह। **जराया** ॥ 'अष्टन आ विभक्तौ' इत्यतो विभक्तावित्यनुवृत्तम् 'अचि र ऋतः' इत्यतोऽनुवृत्तेन अचीत्यनेन विशेष्यते। 'यस्मिन् विधिः' इति तदादिविधिः। तदाह। **जराशब्दस्येत्यादिना** ॥ ननु जराशब्दस्य विधीयमानो जरसादेशः कथं निर्जरशब्दस्य भवेदित्यत आह। **पदेति** ॥ पदाधिकारे अङ्गाधिकारे च यस्य यद्धितं तत् तस्य तदन्तस्य च भवतीत्यर्थः। जरसादेशश्चायमङ्गाधिकारस्थत्वात् जराशब्दस्य तदन्तस्य च भवति। जरसादिस्यादौ तु व्यपदेशिवद्भावेन तदन्तत्वं बोध्यम्। यद्यपि जराया इत्यस्य अङ्गविशेषणत्वादेव तदन्तविधिसिद्धः। तथापि येन विधिरित्यस्य प्रपञ्चभूतेयं परिभाषेत्यदोषः। अतएव 'पदमङ्गञ्च विशेष्यं विशेषणेन च तदन्तविधिः' इति प्रौढमनोरमायामुक्तम्। ननु जराशब्दान्तस्य विधीयमानो जरसादेशः निर्जरशब्दस्य कृत्स्नस्य स्यात्। अनेकाल्त्वादित्याक्षिप्य समाधत्ते। **अनेकाल्त्वादिति। निर्दिश्यमानस्यादेशा भवन्तीति** ॥ प्रत्यक्षनिर्दिश्यमानस्येत्यर्थः। अनया परिभाषया जराशब्दस्यैव जरस्। जराशब्द एव ह्यत्र स्थानी प्रत्यक्षनिर्दिष्टः। जराशब्दान्तस्य तु निर्देशरतदन्तविधिलभ्यत्वात् आनुमानिक इति भावः। इयञ्च परिभाषा 'षष्ठी स्थानेयोगा' इति सूत्रसिद्धार्थकथनपरेति तत्रैव भाष्ये स्पष्टम्। ननु निर्जरशब्दस्य जराशब्दान्तत्वाभावात् कथमिह जरसादेश इत्यत आह। **एकदेशेति** ॥ 'छिन्नेऽपि पुच्छे श्वा श्वैव न चाश्वो नच गर्दभः' इति न्यायादिति भावः। **निर्जरसौ। निर्जरस इति** ॥ प्रथमाद्वितीययोः द्विवचने बहुवचने च रूपम्। अमि निर्जरसमित्युदाहार्यम्। ननु तृतीयैकवचने पञ्चम्येकवचने च, निर्जर आ, निर्जर अस्, इति स्थिते जरसादेशे निर्जरसिन निर्जरसादिति प्राप्तम्। तथा चतुर्थ्येकवचने षष्ठ्येकवचने च, निर्जर ए, निर्जर अस्, इति स्थिते, यादेशे, स्यादेशे च सति अजादिविभक्त्यभावात् जरसादेशाभावे, निर्जराय निर्जरस्येति प्राप्तम्। तत्राह। **इनादीनिति** ॥ इन-य-आत्-स्य इत्यादेशान् तुटञ्च परत्वात् बाधित्वा जरसादेशः। ततश्च अदन्तत्वाभावात् इनादयो न भवन्तीत्यर्थः। **निर्जरसेति** ॥ तृतीयैकवचनम्। **निर्जरसे**

निर्जरसे। निर्जरसः। पक्षे हलादौ च रामवत्। वृत्तिकृता तु "पूर्वविप्रतिषेधेनेनातोः कृतयोः सन्निपातपरिभाषाया अनित्यत्वमाश्रित्य जरसि कृते 'निर्जरसिन' 'निर्जरसात्' इति रूपे। न तु 'निर्जरसा' 'निर्जरसः' इति केचित्" इत्युक्तम्। तथा भिसि 'निर्जरसैः' इति रूपान्तरमुक्तम्। तदनुसारिभिश्च षष्ठ्येकवचने 'निर्जरस्य' इत्येव रूपमिति स्वीकृतम्। एतच्च भाष्यविरुद्धम्।

इति ॥ चतुर्थ्येकवचनम्। **निर्जरसः इति** ॥ पञ्चम्येकवचने षष्ठ्येकवचने च रूपम्। निर्जरसोः निर्जरसां निर्जरसीत्यप्युदाहार्यम्। **पक्ष इति** ॥ जरसादेशाभावपक्ष इत्यर्थः। **हलादौ चेति** ॥ भिस ऐसादेशे निर्जरैरित्येव रूपम्। न तु जरसादेशे निर्जरसैरिति। अदन्तमङ्गमाश्रित्य प्रवृत्तस्य ऐसस्सन्निपातपरिभाषया तद्विघातकजरसादेशनिमित्तत्वायोगात्। अथ वृत्तिकृदुत्प्रेक्षितं मतान्तरं दूषयितुम् अनुवदति। **वृत्तिकृता त्वित्यादिना** ॥ पूर्वविप्रतिषेधेनेत्यादि केचिदित्यन्तो वृत्तिग्रन्थः। वृत्तिकृता तु इनातोः कृतयोः जरसि कृते निर्जरसिन निर्जरसादिति रूपं, नतु निर्जरसा निर्जरस इति केचिदित्युक्तमित्यन्वयः। ननु इनादेशमादादेशश्च परत्वात् बाधित्वा जरसि कृते, अदन्तत्वाभावात् कथमिनातौ स्यातामित्यत आह। **पूर्वविप्रतिषेधेनेति** ॥ विप्रतिषेधे पूर्वस्य प्रवृत्तिर्यत्र बोध्यते तत् पूर्वविप्रतिषेधं, 'विप्रतिषेधे परङ्कार्यम्' इति सूत्रं तेनेत्यर्थः। तत्र परशब्दस्येष्टवाचित्वमाश्रित्य विप्रतिषेधे क्वचित् पूर्वस्य कार्यस्य प्रवृत्त्यभ्युपगमेनेति यावत्। ननु इनातोः कृतयोः कथं जरसादेशः। सन्निपातपरिभाषाविरोधादित्यत आह। **सन्निपातपरिभाषाया अनित्यत्वमाश्रित्येति। तथेति** ॥ भिस ऐसादेशे जरसादेशाभावपक्षे निर्जरैरिति रूपम्। सन्निपातपरिभाषाया अनित्यत्वात्। जरसि कृते तु निर्जरसैरिति रूपान्तरमुक्तमित्यर्थः। **तदनुसारीति** ॥ निर्जरसिनेत्यादि रूपं यैरुक्तन्तदनुसारिभिरित्यर्थः। **निर्जरस्येत्येवेति** ॥ पूर्वविप्रतिषेधेन स्यादेशे कृते अजादिविभक्त्यभावान्न जरस्। इनातोः पूर्वविप्रतिषेधे आश्रिते सति एकसूत्रोपात्तत्वात् स्यादेशविषयेऽपि पूर्वविप्रतिषेधः आश्रयितुमुचितः। अतः निर्जरस्येत्येकमेव रूपं, नतु निर्जरस इत्यर्थादिति भावः। **एतच्चेति** ॥ वृत्तिकृदुत्प्रेक्षितं केषाञ्चिन्मतं तदनुसारिमतञ्चेत्यर्थः। **भाष्यविरुद्धमिति** ॥ 'टाङसिङसामिनात्स्याः' इत्यत्र नादेश एव विधेयः। इकारोच्चारणम्मास्तु। तथा अदादेश एवविधेयः, नतु दीर्घ आदिति। रामेणेत्यत्र एकारस्तु योगविभागात् भवति। तथाहि 'बहुवचने झल्येत्' 'ओसिच' 'आङि चापः' 'सम्बुद्धौ च' इति सूत्रक्रमः। तत्र आङीति योगविभागः क्रियते। अतः एकारस्स्यात् आङि। रामेण। आपस्सम्बुद्धौ चेत्यन्यो योगः। आप एकारस्स्यात् सम्बुद्धौ आङि ओसि च। हे रमे रमया रमयोः। ङसेरदादेशे अकारोच्चारणसामर्थ्यात् 'अतो गुणे' इति न पररूपमित्यादि टाङसिङसामिति सूत्रे भाष्ये स्थितम्। निर्जरसिन निर्जरसादिति रूपसत्त्वे एतद्भाष्यासङ्गतिः स्पष्टैव। अत्र इकारस्य आकारस्य च श्रवणाय इनादेशे इकारोच्चारणावश्यकत्वात्। किञ्च गोनर्दीयस्त्वाह-अतिजरैरित्येव भवितव्यं सन्निपातपरिभाषया इति 'जराया जरसन्यतरस्याम्' इति सूत्रे भाष्ये स्थितम्। निर्जरसैरिति रूपाभ्युपगमे एतदसङ्गतिस्स्पष्टैव।

२२८। पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छक-न्नुदन्नासञ्छस्प्रभृतिषु। (६-१-६३)

पाद दन्त नासिका मास हृदय निशा असृज् यूष दोष् यकृत् शकृत् उदक आस्य एषां पदादय आदेशाः स्युः शसादौ वा। यत्तु 'आसनशब्दस्यासन्नादेशः' इति काशिकायामुक्तं तत्प्रामादिकम्। पादः। पादौ। पादाः। पादम्। पादौ। पदः—पादान्। पदा—पादेनेत्यादि।

२२९। सुडनपुंसकस्य। (१-१-४३)

सुडिति प्रत्याहारः। स्वादिपञ्चवचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीबस्य।

२३०। स्वादिष्वसर्वनामस्थाने। (१-४-१७)

कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्।

अतः पूर्वविप्रतिषेधेनेत्यादिमतान्तरमशुद्धमित्यर्थः। अथ पादशब्दस्य शसादौ विशेषं दर्शयितुमाह। **पद्दन्नो**॥ पद्-दत्-नस्-मास्-हृद्-निश्-असन्-यूषन्-दोषन्-यकन्-शकन्-उदन्-आसन् इत्येषां समाहारद्वन्द्वः। शस्-द्वितीयाबहुवचनं प्रभृतिः आदिः येषामिति तद्गुणसंविज्ञानो बहुव्रीहिः। 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' इत्यतः अन्यतरस्यामित्यनुवर्तते। शसादिषु परेषु पदादय आदेशा वा स्युरित्यर्थः। पदाद्यादेशश्च स्वानुरूपाः स्थानिन आक्षिप्यन्ते। तदाह। **पाददन्तेत्यादिना**॥ यथासङ्ख्यपरिभाषया पादादीनां क्रमेण पदादय आदेशाः प्रत्येतव्याः। **तत् प्रामादिकमिति**॥ भ्रममूलकमित्यर्थः। 'हव्या जुह्वान आसनि' इति मन्त्रे 'आसन्यं प्राणमूचुः' इत्यादौ च, आस्यार्थकत्वस्यैव दर्शनादिति भावः। दन्तशब्दस्य सुटि रामवत्। शसि पद्दन्निति दत् आदेशः। दत् अस् इति स्थिते तकारस्य 'झलाञ्जशोऽन्ते' इति पदान्ते विधीयमानजश्त्वमाशङ्क्य तत्संज्ञाविधायकं सूत्रं वक्ष्यति स्वादिष्वसर्वनामस्थान इति। तत्र किं सर्वनामस्थानमित्यत आह। **सुडनपुंसकस्य**॥ 'शि सर्वनामस्थानम्' इत्यतः सर्वनामस्थानमित्यनुवर्तते। अक्लीबं नपुंसकभिन्नप्रातिपदिकं, तस्य सुट् सर्वनामस्थानसंज्ञं स्यादित्यर्थः। तत्र सुट्शब्दमप्रसिद्धार्थत्वाद्व्याचष्टे। **सुडिति प्रत्याहार इति**॥ सु इत्यारभ्य औटष्टकारेणेति शेषः। नतु टाटकारेण। प्रथमातिक्रमणे कारणाभावात्। तदेतदाह। **स्वादिपञ्चवचनानीति। स्वादिष्वसर्वनामस्थाने**॥ असर्वनामस्थान इति बहुत्वेऽप्येकवचनमार्षम्। **कप्रत्ययावधिष्विति**॥ पञ्चमाद्यायान्ते विधीयमानकप्रत्ययोत्तरावधिकेष्वित्यर्थः। तत्र च व्याख्यानमेव शरणम्। एवञ्च दत् अस् इत्यत्र दत्शब्दस्य सुबन्तत्वाभावेन पदत्वाभावेऽपि अनेन सूत्रेण पदत्वात् 'झलाञ्जशोऽन्ते' इति तकारस्य जश्त्वं स्यादित्याक्षेपस्सूचितः। असंज्ञया पदसंज्ञाबाधात् न जश्त्वमिति

२३१ । यचि भम् । (१-४-१८)

यकारादिष्वजादिषु च कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं भसंज्ञं स्यात् ।

२३२ । आ कडारादेका संज्ञा । (१-४-१)

इत ऊर्ध्वं 'कडाराः कर्मधारये' (सू ७५१) इत्यतः प्रागेकस्यैकैव संज्ञा ज्ञेया । या परा अनवकाशा च । तेन शसादावचि भसंज्ञैव । न पदत्वम् । अतो जश्त्वं न । दतः । दता । जश्त्वम् । दद्भ्यामित्यादि । मासः । मासा । भ्यामि रुत्वे यत्वे च यलोपः । माभ्याम् । माभिरित्यादि ।

समाधातुं भसंज्ञासूत्रमाह । **यचि भम्** ॥ यूच अचेति समाहारद्वन्द्वः । स्वादिष्वसर्वनामस्थान इत्यनुवृत्तं यचीत्यनेन विशेष्यते । यस्मिन् विधिरिति तदादिविधिः । तदाह । **यकारादिष्वित्यादिना** ॥ एवञ्च दत् अस् इत्यत्र दत् इत्यस्य भसंज्ञया पदसंज्ञाबाधान्न जश्त्वमिति भावः । ननु पदभसंज्ञयोरिह समावेशः कुतो न स्यात् । नच विप्रतिषेधे परं कार्यमिति परैव भसंज्ञा भवतीति वाच्यम् । विरोधो हि विप्रतिषेधः । नान्यत्र द्वयोरपि संज्ञयोस्समावेशे विरोधोऽस्ति तव्यत्तव्यानीयरादौ कृत्कृत्यप्रत्ययादिसंज्ञासमावेशदर्शनादित्यत आह । **आ कडारा** ॥ आङ्मर्यादायामित्याह । **कडाराः कर्मधारय इत्यतः प्रागिति** ॥ आङ्हि नाभिविधौ । कडारशब्दस्यापि प्रवेशे प्रयोजनाभावात् । प्राक्कडारादिति कडारशब्दस्तु नोत्तरावधिः । 'कडाराः कर्मधारये, इति कडारशब्दस्य उत्तरावधित्वे अधिकलाभात् । प्राक्कडारादित्युत्तरं तत्पुरुषः द्विगुश्चेति चकाराच्च । संज्ञाद्वयसमावेशार्थो हि चकारः । तत्रैकसंज्ञाया नियमाप्रवृत्तौ किं तेन । नन्वस्त्विह एकैव संज्ञा । तथापि विनिगमनाविरहात् भसंज्ञैवेति कुतो लाभः । तत्राह । **या परा अनवकाशा चेति** ॥ विरोधाभावेन विप्रतिषेधसूत्रस्य सामान्याद्विशेषबलीयस्त्वस्य चाप्रवृत्तावपि परत्वनिरवकाशत्वयोः अन्यत्र बलवत्त्वेन दृष्टत्वादिहापि ताभ्यां व्यवस्था युज्यत इति भावः । द्वयोस्सावकाशयोः परा संज्ञा बलवती । अन्यतरस्याः निरवकाशत्वे तु सैवेति बोद्धव्यम् । तत्र परा यथा–धनुषा शरैर्विध्यतीत्यत्र शराणां विश्लेष प्रत्यवधिभूतस्यैव धनुषो व्यधनं प्रति साधकतमत्वादपादानत्वे करणत्वे च प्राप्ते, परा करणसंज्ञैव भवति । अनवकाशा यथा अततक्षादिति । अत्र तकारादकारस्य 'संयोगे गुरु' इति गुरुसंज्ञैव अनवकाशत्वात् भवति, नतु लघुसंज्ञा । तस्याः असंयोगे परे चरितार्थत्वात् । अतस्सन्वल्लघुनीति तत्र न प्रवर्तते । **तेनेति** ॥ अनवकाशत्वेनेत्यर्थः । **अत इति** ॥ पदत्वाभावात् जश्त्वमेत्यर्थः । **जश्त्वमिति** ॥ दद्भ्यामिति स्थिते स्वादिष्वसर्वनामस्थान इति पदान्तत्वात् 'झलां जशोऽन्ते' इति जश्त्वमित्यर्थः । **इत्यादीति** ॥ दद्भिः दद्भ्य इत्यादिरादिशब्दार्थः । 'खरि च' इति चर्त्वे दत्सु । पक्षे रामवत् । **मास इति** ॥ मासशब्दस्य शसि पदत्व इति मास् इत्यादेशे रूपम् । मासेति तृतीयैकवचनम् । **रुत्व इति** ॥ मास्

२३३। भस्य। (६-४-१२९)। इत्यधिकृत्य।

२३४। अल्लोपोऽनः। (६-४-१३४)

अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरः योऽन् तस्याकारस्य लोपः स्यात्।

२३५। रषाभ्यां नो णः समानपदे। (८-४-१)

एकपदस्थाभ्यां रेफषकाराभ्यां परस्य नस्य णः स्यात्। यूष्णः।

भ्याम् इति स्थिते स्वादिष्विति पदत्वात् 'ससजुषोः' इति रुः। 'भोभगो' इति तस्य यकारे 'हलि सर्वेषाम्' इति तस्य लोपे माभ्यां माभिरिति रूपमित्यर्थः। **इत्यादीति** ॥ माभ्यः इत्यादिरादिशब्दार्थः। मास् सु इति स्थिते रुत्वे 'खरवसानयोः' इति विसर्गे 'वा शरि' इति सत्त्वविकल्पः। मास्सु–मासु। **भस्य** ॥ इत्यधिकृतं स्पष्टमेव। यूषशब्दो मण्डवाची। 'मुद्गमलकयूषस्तु भेरीदीपनपाचकः' इत्यादि वैद्यशास्त्रे प्रसिद्धम्। तस्य शसि 'पदन्नः' इति यूषन्नादेशे यूषन् अस् इति स्थिते ॥ **अल्लोपोऽनः** ॥ अत् इति लुप्तषष्ठ्यंकं भिन्नं पदम्। अन इत्यवयवषष्ठ्यन्तम् अतो विशेषणम्। अनोऽवयवो योऽकारः तस्य लोप इति। अङ्गस्येत्यधिकृतम् इहावयवषष्ठ्यन्तमाश्रीयते। तच्चान इत्यत्रान्वेति। अङ्गावयवः यः अन् तदवयवस्य अकारस्य लोप इति। भस्येत्यधिकृतम् अन इत्यनेनान्वेति। ततश्चानः असर्वनामस्थानयजादिस्वादिपरत्वं लभ्यते। तदाह। **अङ्गावयवः इत्यादिना** ॥ अन्नन्तस्य भस्याङ्गस्याकारस्य लोपस्स्यादिति प्राचां व्याख्याने तु तक्ष्णेत्यत्र तकारादकारस्यापि लोपप्रसङ्गः। भस्याङ्गस्यानोऽकारस्य लोप इति व्याख्याने तु अनसा मनसेत्यत्रातिव्याप्तिः। अन इत्यावर्त्य अन्नन्तस्य भस्याङ्गस्यानोऽकारस्य लोप इति व्याख्याने तु अनस्तक्ष्णेत्यत्रातिव्याप्तिरेव। तस्मादुक्तैव व्याख्येत्यन्यत्र विस्तरः। यूषन् अस् इत्यत्र षकारादकारस्य लोपे यूष् न् अस् इति स्थिते। **रषाभ्याम्** ॥ रषाभ्यामिति दिग्योगे पञ्चमी। परस्येत्यध्याहार्यम्। समानशब्द एकपर्यायः। यथा। समानग्रामा वयमिति। आधारसप्तमीबलात् विद्यमानाभ्यामिति लभ्यते। नः इति षष्ठी। तदाह। **एकपदस्थाभ्यामिति** ॥ एकत्वञ्चेहाखण्डत्वं विवक्षितम्। पदे इत्येतावतैव सिद्धे समानग्रहणसामर्थ्यात्। अन्यथा रामनामेत्यादौ 'अट् कुप्वाङ्' इति णत्वापत्तिः। एतस्यैव समानपदशब्दस्य तत्राप्यनुवृत्तेः। मातृभोगीणः इत्यत्र णत्वन्तु तद्धिताधिकारे वक्ष्यते। **यूष्णः इति** ॥ शसि रूपम्। **यूष्णेति** ॥ तृतीयैकवचनम्। नचाल्लोपस्य स्थानिवद्भावात् नकारस्य षात् परत्वं नेति शङ्क्यम्। 'रषाभ्याम्' इति षात्परस्य हि नस्य णत्वे कर्तव्ये अल्लोपस्य स्थानिवद्भावो नापेक्षितः। किंतु णत्वाभावे तदपेक्षा। णत्वाभावश्चाशास्त्रीयत्वान्नातिदेश्यः। स्थानिनि सति यत्कार्यं भवति तदेव हि स्थानिवत्सूत्रेणातिदिश्यते। स्थानिनि सति यन्न भवति तदादेशेऽपि न भवतीत्येवं कार्याभावस्त्वशास्त्रीयत्वान्नातिदिश्यते इति स्थानिवत्सूत्रे अवोचाम। यद्यपि 'अचः परस्मिन्' इत्यत्र अशास्त्रीयः कार्याभावोऽप्यतिदिश्यत इत्यभ्यधायि। तथापि नेह तस्यापि सूत्रस्य प्रवृत्तिरस्ति। स्थानीभूतादचः पूर्वत्वेन दृष्टस्यैव विधौ तत्प्रवृत्तेः। इह चाल्लोपस्थानीभूतादकारात् परस्यैव णत्वविधानादिति भावः। नन्वु 'अचः परस्मिन्' इति सूत्रे स्थानीभूतादचः पूर्वस्मात् परस्य

यूष्णा । 'पूर्वस्मादपि विधौ स्थानिवद्भावः' इति पक्षे तु 'अड्व्यवाये' इत्येवात्र णत्वम् । 'पूर्वत्रासिद्धे न स्थानिवत्' (वा ४३३) इति त्विह नास्ति । 'तस्य दोषः संयोगादिलोपलत्वणत्वेषु' (वा ४४०) इति निषेधात् ।

२३६ । न लोपः प्रातिपदिकान्तस्य । (८-२-७)

विधावजादेशस्स्थानिवदिति पक्षोऽपि भाष्ये स्थितः । एवञ्चात्र लोपादेशस्थानीभूतादकारात् पूर्वो यः षकारः तस्मात्परस्य नकारस्य णत्वविधौ लोपस्य स्थानिवद्भावे सति अक्.रेण व्यवधानात् षात्परत्वाभावात् कथं णत्वमित्यत आह । **पूर्वस्मादिति** ॥ पक्षे त्विल्यादिना अस्य पक्षस्यानित्यत्वं सूचितम् । अत एव प्राविगण्य्येति भाष्ये प्रयुक्तं सङ्गच्छते । चुरादौ 'गण सङ्ख्याने' इत्यदन्तो धातुः । णिच् । अतो लोपः । अल्लोपस्य स्थानिवद्भावात् 'अत उपधायाः' इति वृद्धिर्न । ण्यन्तात् क्त्वो ल्यपि णिलोपं बाधित्वा 'ल्यपि लघुपूर्वात्' इति णेरयादेशः । पूर्वस्मात् परस्य विधौ स्थानिवद्भावस्य नित्यत्वे इह 'ल्यपि लघुपूर्वात्' इति णेरयादेशो न स्यात् । लोपस्थानीभूतादतः पूर्वस्मात् परस्य णेरयादेशविधावल्लोपस्य स्थानिवद्भावे सति अता व्यवहितत्वेन णेर्लघुपूर्वात् णकारात् परत्वाभावात् । तस्मात् 'अचः परस्मिन्' इत्यत्र पूर्वस्मात् परस्य विधौ स्थानिवद्भावस्यानित्यत्वं विज्ञायते । एवञ्च गोशब्दात् सम्बुद्धौ ओतो णित्त्वे वृद्धौ गौरिति सिध्यति । अन्यथा औकारस्य स्थानीभूतादोकारात् पूर्वो यो गकारः तस्मात् परस्यास्सम्बुद्धेर्लोपविधौ स्थानिवद्भावे ओकारादेशः परत्वात् सम्बुद्धिलोपस्स्यादिति शब्देन्दुशेखरे स्पष्टम् । **अड्व्यवाये इत्येवेति** ॥ 'अट् कुप्वाङ्' इति सूत्रेणैवेत्यर्थः । षादव्यवहितपरस्य नस्य णत्वविधावुदाहरणन्तु पुष्णातीत्यादि बोध्यम् । वस्तुतस्तु "तत्रापि ष्टुत्वेनैव सिद्धे षग्रहणम् उत्तरार्थम्" इति स्पष्टमाकरे । नन्वल्लोपस्य णत्वे कर्तव्ये कथं स्थानिवद्भावः । पूर्वत्रासिद्धे न स्थानिवदिति निषेधात् । णत्वस्य पूर्वत्रासिद्धीयत्वादित्यत आह । **पूर्वत्रेति** ॥ संयोगादिलोपे लत्वे णत्वे च कर्तव्ये तस्य, पूर्वत्रासिद्धे न स्थानिवदित्यस्य, दोषः बाधः, अप्रवृत्तिरिति यावत् । संयोगादिलोपे यथा । चक्रथत्र । इह 'अचः परस्मिन्' इति यणादेशस्य स्थानिवद्भावात् 'स्कोस्संयोगाद्योः' इति ककारलोपो न । लत्वे यथा । निगाल्यते । अत्र णिलोपस्य स्थानिवत्त्वात् 'अचि विभाषा' इति लत्वम् । णत्वे यथा । माषवपनी । वपतेर्ल्युट्, अनादेशः, उगित्त्वात् ङीप्, 'यस्येति च' इति नकारात् अकारस्य लोपः । इह अकारलोपस्य स्थानिवत्त्वेन नकारस्य प्रातिपदिकान्तत्वाभावात् 'प्रातिपदिकान्तनुम्विभक्तिषु च' इति णत्वन्न । यूषन् भ्यामिति स्थिते । **न लोपः** ॥ न इति स्थानषष्ठ्यन्तं पृथक्पदम् । आर्षः षष्ठ्याः लुक् । नकारस्य लोपः स्यादित्यर्थः । अन्तस्येति नकारस्य विशेषणम् । अत एव च नस्य विशेषणसापेक्षत्वात् लोपशब्देन समासो न भवति । असामर्थ्यात् । कस्यान्ते इत्यपेक्षायां पदस्येत्यधिकृतम् अवयवषष्ठ्यन्तमन्वेति । पदस्य योऽयमन्तावयवः, तस्य नकारस्य लोप इति । कीदृशं पदमित्यपेक्षायां प्रातिपदिकान्तस्येति षष्ठ्यन्तमन्वेति । प्रातिपदिकसंज्ञकं यत् पदं तस्य योऽयमन्तावयवो नकारः तस्य लोपः स्यादिति । अत एव प्रातिपदिकान्तस्येति न समस्तमेकं पदम् ।

नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे। प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात्। नलोपस्यासिद्धत्वादीर्घत्वमेत्त्वमैस्त्वं च न। यूषभ्याम्। यूषभिः। यूषभ्यः इत्यादि।

२३७। विभाषा ङिश्योः। (६-४-२३६)

अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याकारस्य लोपो वा स्यात् ङिश्योः परयोः। यूष्णि—यूषणि। पक्षे रामवत्। 'पद्दन्नो—' (सू २२८) इति सूत्रे प्रभृतिग्रहणं प्रकारार्थम्। तथा च। औडः श्यामपि दोषन्नादेशः। अत एव भाष्ये 'ककुद्दोषणी' इत्युदाहृतः। तेन 'पदङ्घ्रिश्वरणोऽस्त्रियाम्' 'स्वान्तं हृन्मानसं मनः' इत्यादि च सङ्गच्छते। आसन्यं प्राणमूचुः, इति च। आस्ये भवः आसन्यः। 'दोष्' शब्दस्य नपुंसकत्वमत एव

तस्य पदशब्देनान्वितत्वं, नान्तशब्देन। असामर्थ्यात्। तदाह। **नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे इति ॥ तदन्तस्येति ॥** तस्य पदस्य अन्तावयवो यो नकारः तस्येत्यर्थः। प्रातिपदिकग्रहणं किम्। अहन्। तिङन्तस्य न भवति। पदग्रहणं किम्। राजानौ। ननु नलोपे सति यूषभ्यामित्यत्र 'सुपि च' इति दीर्घस्स्यात्। यूषभिरित्यत्र 'अतो भिस ऐस्' इति ऐसादेशस्स्यात्। यूषभ्य इत्यत्र 'बहुवचने झल्येत्' इति एत्त्वं स्यादित्यत आह। **नलोपस्यासिद्धत्वादिति ॥ इत्यादीति ॥** यूष्णे—यूष्णः—यूष्णोः—यूष्णाम् इति आदिशब्दार्थः। यूषन् ङि इति स्थिते 'अल्लोपोऽनः' इति नित्ये अल्लोपे प्राप्ते। **विभाषा ङिश्योः ॥** अल्लोपोऽन इत्यनुवर्तते। अङ्गस्येति भस्येति चाधिकृतम्। भत्वेन च असर्वनामस्थानयजादिस्वादिपरत्वं पूर्ववदनो लभ्यते। तदाह। **अङ्गावयवः इति ॥ ङिश्योरिति ॥** ङिश्च शी चेति विग्रहः। 'नपुंसकाच्च' इति विहित एवात्र शी गृह्यते। ननु जश्शसोश्शिः। तस्मिन् परे भत्वासम्भवात्। **पक्षे इति ॥** यूषन्नादेशाभावपक्षे इत्यर्थः। अथ क्वचित् शसादिभ्योऽन्यत्रापि पदाद्यादेशं साधयितुमाह। **पद्दन्निति सूत्रे इति ॥ प्रकारेति ॥** प्रकारस्सादृश्यम्। तच्च प्रत्ययत्वेन बोध्यम्। प्रभृतिग्रहणस्य प्रकारार्थत्वे प्रमाणं दर्शयति। **अत एवेति ॥** प्रभृतिग्रहणस्य प्रकारार्थकत्वादेवेत्यर्थः। 'ककुद्दोषणी याचते महादेवः' इत्येवं भाष्ये। औडादेशभूतशीभावे परतः उदाहृतो दोषन्नादेशः अतएव सङ्गच्छते इत्यन्वयः। **तेनेति ॥** प्रकारार्थकप्रभृतिग्रहणेनेत्यर्थः। पदंघ्रिरित्यत्र पदिति प्रथमैकवचनम्। स्वान्तं हृदित्यत्र हृदिति च सङ्गच्छत इत्यर्थः। आदिना निशादिसङ्ग्रहः। **आसन्यं प्राणमिति ॥** आसन्यं प्राणमूचुरिति च अत एव सङ्गच्छते इत्यत्रान्वयः। आसनशब्दस्य आसन्नादेश इति भ्रमं वारयति। **आस्ये भवः इति ॥** प्राणशब्दसमभिव्याहारादियमेव व्युत्पत्तिरिति भावः। 'शरीरावयवाच्च' इत्यास्यशब्दात् भवार्थे यत्प्रत्ययेआसन्नादेशः। 'ये चाभावकर्मणोः' इति प्रकृति-

भाष्यात् । तेन 'दक्षिणं दोर्निशाचरः' इति सङ्गच्छते । 'भुजबाहू प्रवेष्टो दोः' इति साहचर्यात्पुंस्त्वमपि । 'दोषं तस्य तथाविधस्य भजतः' इति । द्वयोरह्नोर्भवो व्यह्नः ।

२३८। संख्याविसायपूर्वस्याह्नस्याह्नन्यतरस्यां ङौ । (६-३-११०)

संख्यादिपूर्वस्याह्नस्याहन्नादेशो वा स्यात् ङौ । व्यह्नि—व्यहनि—व्यह्ने । विगतमहर्व्यह्नः । व्यह्नि—व्यहनि—व्यह्ने । अह्नः सायः सायाह्नः । सायाह्नि—सायाहनि—सायाह्ने ।

इत्यदन्ताः ।

भावात् 'नस्तद्धिते' इति टिलोपो न । प्रभृतिग्रहणस्य प्रकारार्थत्वाभावे तु इह आसन्नादेशो न स्यात् । यत्प्रत्ययस्य शसादिषु सुप्सु अनन्तर्भावादिति भावः । ननु दोषर्णा इति भाष्ये नपुंसकप्रयोगोऽनुपपन्नः। 'दोषं तस्य तथाविधस्य' इत्यादौ पुंस्त्वस्यैव प्रयोगदर्शनादित्यत आह। **दोष्शब्दस्येति ॥ अत एवेति ॥** ककुद्दोषणीति भाष्यादेव ज्ञेयमित्यर्थः । **तेन दक्षिणमिति ॥** 'तमुपाद्रवदुद्यम्य दक्षिणं दोर्निशाचरः' इति रघुवंशे । दक्षिणं दोरुद्यम्य तमुपाद्रवदित्यन्वयः । दोष्शब्दस्य द्वितीयैकवचनं दोः इति । पुंस्त्वे दोषमिति स्यादिति भावः । ननु भाष्यानुसारात् दोष्शब्दस्य नपुंसकत्वमेव स्यादित्यत आह । **भुजेति ॥** 'भुजबाहू प्रवेष्टो दोः' इति कोशात् पुंस्त्वमपीत्यर्थः । नन्वयं कोशः दोष्शब्दस्य नपुंसकत्वेऽप्युपपन्नः इत्यत आह । **साहचर्यादिति ॥** पुल्लिङ्गभुजादिशब्दसाहचर्यादित्यर्थः । "साहचर्याच्च कुत्र चित्" इति कोशे परिभाषितत्वादिति भावः । दोष्शब्दस्य पुंस्त्वसाधने फलं दर्शयति । **दोषं तस्येति ॥** "दोषं तस्य तथाविधस्य भजतश्चापस्य गृह्णन् गुणम्" इति श्रीहर्षः। दोषं हस्तं दूषणञ्च भजतश्चापस्य गुणं मौर्वीं अतिशयञ्च गृह्णन्नित्यन्वयः । अत्र दोषमिति दोष्शब्दस्य पुल्लिङ्गद्वितीयैकवचनम् । अत्र सुप्रभृतिष्विति वाच्ये शस्प्रभृतिष्विति वचनात् सुपि क्वचिदेव पदाद्यादेशा इति गम्यते। **द्वयोरह्नोरिति ॥** तद्धितार्थेति समासः। 'कालाट्ठञ्' इति ठञ्। 'द्विगोर्लुगनपत्ये' इति लुक्। 'राजाहस्सखिभ्यष्टच्' इति टच्। 'अह्नोऽह्न एतेभ्यः' इत्यह्नादेशः । रामशब्दवद्रूपाणि । ङौ विशेषमाह । **सङ्ख्याविसाय ॥** सङ्ख्या च विश्च सायश्च सङ्ख्याविसायाः ते पूर्वे यस्मादिति विग्रहः इत्यभिप्रेत्य आह । **सङ्ख्येत्यादिना ॥** सङ्ख्यापूर्वमुदाहरति । **व्यह्नि—व्यहनीति ॥** अल्लोपे तदभावे च रूपम् । **व्यह्ने इति ॥** अहन्नादेशाभावे रूपम् । एवं विपूर्वमुदाहरति । **विगतमिति ॥** 'प्रादयो गताद्यर्थे प्रथमया' इति समासः । पूर्ववदह्नादेशः । सायपूर्वमुदाहरति । **अह्नस्सायः इत्यादिना ॥** अत एव ज्ञापकादेकदेशिसमासः ॥

इत्यदन्तप्रकरणम् ।

॥ अथ आदन्तप्रकरणम् ॥

विश्वपाः ।

२३९ । दीर्घाज्जसि च । (६-१-१०५)

दीर्घाज्जसि इचि च परे पूर्वसवर्णदीर्घो न स्यात् । वृद्धिः विश्वपौ । सवर्णदीर्घः विश्वपाः । यद्यपीह औङि 'नादिचि' (सू २६५) इत्येव सिद्धम् । जसि तु सत्यपि पूर्वसवर्णदीर्घे क्षतिर्नास्ति । तथापि 'गौर्यौ' 'गौर्यः' इत्याद्यर्थं सूत्रमिहापि न्याय्यत्वादुपन्यस्तम् ।

२४० । आतो धातोः । (६-४-१४०)

अथ आकारान्ताः निरूप्यन्ते । **विश्वपाः इति** ॥ आवन्तत्वाभावात् न सुलोपः । एतदर्थमेव हल्ङ्यादिसूत्रे सत्यपि दीर्घग्रहणे आब्ग्रहणमिति भावः । विश्वं पाति रक्षतीत्यर्थे 'आतोऽनुपसर्गे कः' इति प्राप्ते वाऽसरूपन्यायेन 'आतो मनिन्क्वनिब्वनिपश्च' इति चकाराद्विच् । यद्यपि तत्र 'विजुपश्छन्दसि' इत्यतः छन्दसीत्यनुवर्तते । तथापि वेदे अनेन विच् । लोके तु 'अन्येभ्योऽपि दृश्यते' इति विच् । अन्ये तु 'क्विप्च' इति सूत्रेण क्विपमाहुः । 'घुमास्था' इतीत्त्वन्तु न । 'वकारे ईत्त्वप्रतिषेधः' इति वार्तिकात् । क्वनिपि पावान इत्येतदर्थं तस्यावश्यकत्वात् । भाष्ये "क्विपस्त्वादन्तेभ्यो भाष्याद्यनुक्तक्विब्भ्योऽनभिधानमेव" इति शब्देन्दुशेखरे स्पष्टम् । एवं पावानः इत्यत्र वनिपा रूपसिद्धिमाश्रित्य 'ईत्त्वमवकारादाविति वक्तव्यम्' इति वार्तिकं प्रत्याख्यातम् । ततश्च विश्वपाः इत्येव । विश्वपा औ इति स्थिते 'प्रथमयोः पूर्वसवर्णः' इति प्राप्ते । **दीर्घाज्जसि च** ॥ 'प्रथमयोः' इत्यतः पूर्वसवर्णः इति 'नादिचि' इत्यतः नेति इचीति च अनुवर्तते । तदाह । **दीर्घादित्यादिना** ॥ नन्विदं सूत्रं व्यर्थम् । 'नादिचि' इत्येव सिद्धेरिति शङ्कते । **यद्यपीह औङि नादिचीत्येव सिद्धमिति** ॥ ननु जसि विश्वपा अस् इति स्थिते पूर्वसवर्णदीर्घनिषेधार्थमिदं सूत्रमावश्यकम् । तत्र 'नादिचि' इत्यस्याप्रवृत्तेरित्यत आह । **जसि त्विति** ॥ मास्तु पूर्वसवर्णदीर्घनिषेधः । पूर्वसवर्णदीर्घे सत्यपि जसि विश्वपाः इति सिध्यति । तन्निषेधे सत्यपि 'अकस्सवर्णे दीर्घः' इति कृतेऽपि विश्वपाः इत्येव रूपं सिध्यति । अतः किं तन्निषेधेनेत्यर्थः । परिहरति । **तथापीति** ॥ **इत्यादीति** ॥ आदिना लक्ष्म्यावित्यादिसङ्ग्रहः । तत्र 'नादिचि' इत्यस्य प्रसक्त्या तन्निषेध आवश्यक इति भावः । ननु 'दीर्घाज्जसि च' इति सूत्रं यदि गौर्यौ इत्याद्यर्थमेव, तर्हि ईदन्ताधिकारे गौरीशब्दनिरूपणावसर एव तदुपन्यासो युक्त इत्यत आह । **इहापि न्याय्यत्वादिति** ॥ विश्वपावित्यत्र 'नादिचि' इत्यस्य 'दीर्घाज्जसि च' इत्यस्य च प्राप्तौ परत्वेन 'दीर्घाज्जसि च' इत्यस्यैव उपन्यासौचित्यादित्यर्थः । 'अमि पूर्वः' विश्वपाम् । औटि विश्वपौ । शसि विश्वपा अस् इति स्थिते पूर्वसवर्णदीर्घे प्राप्ते । **आतो धातोः** ॥ अङ्गस्येति भस्येति चाधिकृतम् । धातोरित्यात

आकारान्तो यो धातुस्तदन्तस्य भस्याङ्गस्य लोपः स्यात् । 'अलोऽन्त्यस्य' (सू ४२) । विश्वपः । विश्वपा । विश्वपाभ्यामित्यादि । एवं शङ्खध्मादयः । 'धातोः' किम्। हाहान् । टा सवर्णदीर्घः। हाहा । ङे वृद्धिः। हाहै । ङसिङसोर्दीर्घः । हाहाः । ओसि वृद्धिः। हाहौः । ङौ आद्गुणः। हाहे । शेषं विश्वपावत्। 'आतः' इति योगविभागादधातोरप्याकारलोपः क्वचित् । क्त्वः । श्नः ।

इत्यादन्ताः ।

इति षष्ठ्यन्तेन विशेष्यते । तदन्तविधिः । 'अल्लोपोऽनः' इत्यतो लोप इत्यनुवर्तते । तदाह । **आकारान्तो यः इति** ॥ 'अलोऽन्त्यस्य' इत्यन्त्यस्याकारस्य लोप इति शेषः । **विश्वपाभ्यामिति** ॥ अभत्वादाल्लोपो नेति भावः । **इत्यादीति** ॥ विश्वपाभिः । विश्वपे । विश्वपः । विश्वपोः । विश्वपाम्। विश्वपि । विश्वपोः । विश्वपासु । **एवं शङ्खध्मादयः इति** ॥ शङ्खेन शङ्खं वा धमतीति शङ्खध्माः । 'ध्मा शब्दाग्निसंयोगयोः' पूर्ववत् विच् क्विब्वा । आदिना सोमपादिसङ्ग्रहः । सोमं पिबतीति सोमपाः । कीलालं पिबतीति कीलालपाः । वारिपर्यायेषु 'पयः कीलालममृतम्' इत्यमरः । मधु पिबतीति मधुपाः इत्यादि । **धातोः किमिति** ॥ आतो नापः, इत्येव सूत्र्यताम् । तावतैव रमा इत्याद्याबन्तेषु लोपव्यावृत्तेरिति प्रश्नः । **हाहानिति** ॥ पूर्वसवर्णदीर्घे 'तस्माच्छसः' इति नत्वम् । **हाहा इति** ॥ गन्धर्वविशेषवाचकमव्युत्पन्नं प्रातिपदिकमेतत् । "हाहा हूहूश्चैवमाद्या गन्धर्वास्त्रिदिवौकसः" इत्यमरः । सुटि विश्वपावत् । शसि हाहा अस् इत्यत्रापि 'आतो नापः' इत्याल्लोपस्स्यात् । अतो धातुग्रहणमित्यर्थः । **टा सवर्णदीर्घः इति** ॥ टा इत्यविभक्तिकनिर्देशः प्रक्रियादशायां न दुष्यति । तृतीयैकवचने सवर्णदीर्घ इत्यर्थः । एवमग्रेऽपि योज्यम् । **ङे वृद्धिरिति** ॥ हाहा ए इति स्थिते 'वृद्धिरेचि' इति वृद्धिरित्यर्थः । **ङसिङसोरिति** ॥ हाहा अस् इत्यत्र सवर्णदीर्घ इत्यर्थः । **ओसि वृद्धिरिति** ॥ हाहा ओस् इत्यत्र 'वृद्धिरेचि' इति वृद्धिरित्यर्थः । **ङौ आद्गुणः इति** ॥ हाहा इ इत्यत्र आद्गुण इति गुणः एकार इत्यर्थः । क्ना, श्ना, इति प्रत्ययौ आकारान्तौ विश्वपावत् । नन्वधातुत्वात् कथमिह आल्लोप इत्यत आह । **आत इति योगेति** ॥ 'आतो धातोः' इत्यत्र आत इति विभज्यते । आकारान्तस्य भस्याङ्गस्य लोपस्स्यादित्यर्थः । तेन क्नः श्नः इति शसि रूपं सिद्ध्यति । धातोरिति योगान्तरम् । आकारान्तो यो धातुस्तदन्तस्य भस्याङ्गस्य लोपः स्यादित्यर्थः । आबन्तव्यावृत्त्यर्थं हाहादिव्यावृत्त्यर्थञ्चेदम् । आत इति योगविभागस्तु क्नः श्नः इत्यादौ क्वचिदाल्लोपार्थः । ननु मालेवाचरति मालाः । आचारक्विबन्तात् कर्तरि क्विप् । सुबुत्पत्तिः । अत्र कृतेऽपि धातुग्रहणे शसादावाल्लोपो दुर्वारः । 'सनाद्यन्ताः' इति धातुत्वात् आदन्तत्वाच्च । नच 'अनाप इति वक्तव्यम्' इति वार्तिकादाबन्तेषु नाल्लोप इति उक्त्वा योगविभागमभ्युपगम्य अनाप इति वार्तिकस्य भाष्ये प्रत्याख्यातत्वादिति चेन्मैवम् । एतद्वार्तिकभाष्यप्रामाण्यादेव आबन्तेभ्यः आचारक्विबभावबोधनादिति शब्देन्दुशेखरे प्रपञ्चितम् ॥

इत्यादन्तप्रकरणम् ।

। श्रीरस्तु ।

॥ अथ इदन्तप्रकरणम् ॥

हरिः । 'प्रथमयोः पूर्वसवर्णः' (सू १६४) । हरी ।

२४१ । जसि च । (७-३-१०९)

ह्रस्वान्तस्याङ्गस्य गुणः स्याज्जसि परे । हरयः ।

२४२ । ह्रस्वस्य गुणः । (७-३-१०८)

ह्रस्वस्य गुणः स्यात्सम्बुद्धौ । 'ङ्ङ्ह्रस्वात्—' (सू ११३) इति सम्बुद्धिलोपः । हे हरे । हरिम् । हरी । हरीन् ।

२४३ । शेषो घ्यसखि । (१-४-७)

अनदीसंज्ञौ ह्रस्वौ याविवर्णोवर्णौ तदन्तं सखिवर्जं घिसंज्ञं स्यात् ।

अथ इकारान्ताः निरूप्यन्ते । **हरिरिति** ॥ हरिशब्दात् सुः रुत्वविसर्गौ । नच विसर्जनीयस्य अकारादुपरि उपसङ्ख्यानेनाचत्वात् तस्मिन् परतः रेफादिकारस्य यणादेशश्शङ्क्यः । यणादेशे कर्तव्ये विसर्जनीयस्यासिद्धत्वात् । **प्रथमयोः पूर्वसवर्णः इति** ॥ हरि, औ, इति स्थिते अनेन पूर्वसवर्णदीर्घे सति हरी इति रूपमित्यर्थः । जसि हरि अस् इति स्थिते पूर्वसवर्णदीर्घे प्राप्ते । **जसि च** ॥ 'ह्रस्वस्य गुणः' इत्यनुवर्तते । अङ्गस्येत्यधिकृतं ह्रस्वेन विशेष्यते । तदन्तविधिः । तदाह । **ह्रस्वान्तस्येत्यादिना** ॥ **हरयः इति** ॥ अलोऽन्त्यपरिभाषया अन्त्यस्य गुणः । इकारस्य तालुस्थानसाम्यादेकारः । अयादेशः । रुत्वविसर्गाविति भावः । हे हरि सु इति स्थिते । **ह्रस्वस्य गुणः** ॥ 'सम्बुद्धौ च' इत्यतस्सम्बुद्धावित्यनुवर्तते । तदाह । **ह्रस्वस्येत्यादिना** ॥ अनेन रेफादिकारस्य गुणः एकारः । **सम्बुद्धिलोपः इति** ॥ एङः परत्वादिति भावः । नत्वत्र ह्रस्वात् परत्वमस्ति । परत्वान्नित्यत्वाच्च सम्बुद्धिगुणे कृते ह्रस्वात् परत्वाभावात् । **हरिमिति** ॥ अमि पूर्वरूपे रूपम् । **हरीनिति** ॥ पूर्वसवर्णदीर्घे 'तस्माच्छसः' इति नत्वम् । तृतीयैकवचने हरि आ इति स्थिते घिकार्यं वक्ष्यन् घिसंज्ञामाह । **शेषो** ॥ 'यू स्त्र्याख्यौ' इत्यतो यू इत्यनुवर्तते । इश्च, उश्च, यू इवर्णश्च उवर्णश्च । 'ङिति ह्रस्वश्च' इत्यतो ह्रस्व इत्यनुवर्तते । तच्च यूभ्यां प्रत्येकमन्वेति । उक्तात् नदीसंज्ञकात् अन्यश्शेषः । स च यूभ्यां प्रत्येकमन्वेति । शब्दस्वरूपमित्यध्याहार्यं यूभ्यां विशेष्यते । तदन्तविधिः । तदाह । **अनदी-**

'शेषः' किम्। मत्यै। एकसंज्ञाधिकारात्सिद्धे शेषग्रहणं स्पष्टार्थम्। 'ह्रस्वौ' किम्। वातप्रम्ये। 'यू' किम्। मात्रे।

२४४। आङो नाऽस्त्रियाम्। (७-३-१२०)

घेः परस्याङो ना स्यादस्त्रियाम्। आङिति टासंज्ञा प्राचाम्। हरिणा। 'अस्त्रियाम्' किम्। मत्या।

२४५। घेर्ङिति। (७-३-१११)

घिसंज्ञकस्य ङिति सुपि गुणः स्यात्। हरये। 'घेः' किम्। सख्ये। 'ङिति' किम्। हरिभ्याम्। 'सुपि' किम्। पट्वी। 'घोर्ङिति' (सू २४५) इति गुणे जाते।

संज्ञावित्यादिना ॥ **शेषः किमिति** ॥ अनदीसंज्ञकत्वविशेषणं किमर्थमिति प्रश्नः। **मत्यै इति** ॥ शेषग्रहणाभावे 'ङिति ह्रस्वश्च' इति नदीत्वपक्षेऽपि पदसंज्ञा स्यात्। ततश्च 'आण्-द्याः' इत्याङागमे प्राप्ते 'घेर्ङिति' इति गुणे अयादेशे मतये इति स्यादिति भावः। शेषग्रहणाभावेऽपि मत्यै इत्यत्र घिसंज्ञा न भवति। 'आकडारादेका संज्ञा' इत्यनवकाशया नदीसंज्ञया बाधादित्यत आह। **एकसंज्ञेति** ॥ **वातप्रम्ये इति** ॥ ह्रस्वग्रहणाभावे वातप्रमी ए इति स्थिते ईकारा-न्तस्यापि घिसंज्ञा स्यात्। ततश्च 'घेर्ङिति' इति गुणे अयादेशे च वातप्रमये इति स्यात्। अतो ह्रस्वग्रहणमिति भावः। **मात्रे इति** ॥ यू इत्यभावे मातृ ए इति स्थिते ऋकारान्त-स्यापि घिसंज्ञायां 'घेर्ङिति' इति गुणे अकारे रपरत्वे मातरे इति स्यात्। अतः इदुताविति भावः। वस्तुतस्तु इदुताविति व्यर्थमेव। मात्रे इत्यत्र ऋकारान्तस्य घित्वेऽपि 'घेर्ङिति' इति गुणो न भवति। 'ऋतो ङि सर्वनामस्थानयोः' इत्यत्र ङिग्रहणात् ज्ञापकात्। तद्धि मातरि इत्यादौ सप्तम्ये-कवचने गुणार्थम्। ऋकारस्यापि घित्वे तु 'घेर्ङिति' इत्येव गुणसिद्धौ किं तेन। **आङो नाऽस्त्रि-याम्** ॥ **घेः परस्येति** ॥ 'अच घेः' इत्यतो घिग्रहणानुवृत्तेरिति भावः। **हरिणेति** ॥ नादेशे 'अट्कुप्वाङ्' इति णत्वम्। ननु आङो विहितो नाभावः कथं टा इत्यस्य स्यादित्यत आह। **आङितीति** ॥ प्राचामाचार्याणां शास्त्रे संज्ञितेत्यर्थः। **मत्येति** ॥ 'स्त्रियां क्तिन्' इति क्तिन्नन्तमतिशब्दस्य स्त्रीलिङ्गत्वान्नाभावो नेति भावः। हरिभिः। हरिभ्याम्। हरि ए इति स्थिते। **घेर्ङिति** ॥ 'सुपि च' इत्यतस्सुपीति 'ह्रस्वस्य' इत्यतो गुण इति चानुवर्तते। तदाह। **घिसंज्ञकस्येत्यादिना** ॥ यणोऽपवादः। **हरये इति** ॥ गुणे अयादेशः। **सुपि किम्। पट्वीति** ॥ 'वोतो गुणवचनात्' इति ङीष्। तस्य ङित्त्वेऽपि सुप्त्वाभावात् तस्मिन् परतो न गुण इत्यर्थः। नच 'घेर्ङिति' इत्येव सूत्रयताम्। इह्रहणं न कर्तव्यम्। 'यस्मिन् विधिः' इति परिभाषया ङकारादौ सुपीत्यर्थलाभादिति वाच्यम्। एवं सति 'आण्णद्याः' इत्यत्रापि ङीत्येवानुवृत्तौ ङका-रादेरामः आङ्विधीयेत। ततश्च मत्यामित्यत्र आण्ण स्यात्। आमो ङादित्वाभावात्। नच स्थानि-

२४६। ङसिङसोश्च। (६-१-११०)

एङो ङसिङसोरति परे पूर्वरूपमेकादेशः स्यात्। हरेः। हरेः। हर्योः। हरीणाम्।

२४७। अच्च घेः। (७-३-११९)

इदुद्भ्यामुत्तरस्य ङेरौत्स्याद्धेरन्तादेशश्चाकारः। वृद्धिः हरौ। हर्योः। हरिषु। एवं श्रीपत्यग्निरविकव्यादयः।

२४८। अनङ् सौ। (७-१-९३)

वद्भावेन ङादित्त्वं शङ्क्यम्। अल्विधित्वात्। स्थानिनो ङेर्ङकारत्वेनाश्रयणात्। इह्रहणे तु स्थानिवद्भावस्सम्भवति। अनुबन्धकार्ये कर्तव्ये अनल्विधाविति निषेधाभावात्। आमादेशदशायां ङेर्ङकारस्य इत्संज्ञालोपाभ्यामपहृतत्वेन आस्थान्यत्वाभावात्। अनुबन्धानामनेकान्तत्वात्। एकान्तत्वपक्षेऽपि अल्ग्रहणेन अनुबन्धस्य ग्रहणं न भवति। 'अनेकाल्शित्सर्वस्य' इत्यत्र शिद्ग्रहणात् ज्ञापकात्। अन्यथा 'इदम इश्' इत्यादिशितां शकारेणानुबन्धेन सहानेकाल्त्वादेव सिद्धे किं तेन। अतएव तिबाद्यादेशेषु पित्त्वादिस्सिध्यति। अत एव 'सेर्ह्यपिच्च' इत्यत्र अपिदित्यर्थवत्। अन्यथा पित्कार्यस्याल्विधित्वात्तत्र स्थानिवद्भावस्यैवाप्रसक्त्या हेः पित्त्वस्यैवाप्रसक्तौ किं तन्निषेधेन। तदिदं स्थानिवत्सूत्रे शब्देन्दुशेखरे प्रपञ्चितम्। **गुणे कृते इति॥** ङसिङसोरिति शेषः। हरे अस् इति स्थिते अपदान्तत्वात् 'एङः पदान्तात्' इति पूर्वरूपे अप्राप्ते अयादेशे प्राप्ते। **ङसिङसोश्च॥** 'एङः पदान्तात्' इत्यतः एङ इति, अतीति, चानुवर्तते। 'अमि पूर्वः' इत्यतः पूर्व इत्यनुवर्तते। 'एकः पूर्वपरयोः' इत्यधिकृतम्। तदाह। **एङो ङसिङसोरित्यादिना॥ हरेः इति॥** पूर्वरूपे रुत्वविसर्गौ। पञ्चम्येकवचनस्य षष्ठ्येकवचनस्य च रूपमेतत्। यद्यपि ङसिङसौ द्वौ। एङौ च द्वौ। तथापि न यथासङ्ख्यमिष्यते। 'यथासङ्ख्यमनुदेशस्समानां, स्वरितेन' इति सूत्रच्छेदमभ्युपगम्य यत्र स्वरितत्वं प्रतिज्ञातं तत्रैव यथासङ्ख्यविज्ञानादिति यथासङ्ख्यसूत्रभाष्ये स्पष्टम्। 'अच्च घेः' 'उपसर्गे घोः किः' इत्यादिनिर्देशाच्च। **हर्योरिति॥** षष्ठीद्विवचने यणादेशे रूपम्। **हरीणामिति॥** 'ह्रस्वनद्यापः' इति नुट्। 'नामि' इति दीर्घः। 'अट्कुप्वाङ्' इति णत्वम्। हरि इ इति स्थिते 'घेर्ङिति' इति गुणे प्राप्ते। **अच्च घेः॥** 'ङेराम्' इत्यतो ङेरित्यनुवर्तते। 'इदुद्भ्याम्' इति 'औत्' इति च सूत्रमनुवर्तते। तदाह। **इदुद्भ्यामित्यादिना॥ अन्तादेशः इति॥** अलोऽन्त्यपरिभाषालभ्यमेतत्। **वृद्धिरिति॥** हरि औ इति स्थिते 'वृद्धिरेचि' इति वृद्धौ, हरौ इति रूपमित्यर्थः। **हरिष्विति॥** 'आदेशप्रत्यययोः' इति षत्वम्। अथ सखिशब्दात् सुः। सखि स् इति स्थिते। **अनङ् सौ॥** 'सख्युरसम्बुद्धौ' इत्यनुवर्तते। 'अङ्गस्य' इत्यधिकृतम्। तदाह।

सख्युरङ्गस्यानङादेशः स्यादसम्बुद्धौ सौ परे 'ङिच्च' (सू ४३) इत्यन्तादेशः ।

२४९ । अलोऽन्त्यात्पूर्व उपधा । (१-१-६५)

अन्त्यादलः पूर्वो वर्णः उपधासंज्ञः स्यात् ।

२५० । सर्वनामस्थाने चासम्बुद्धौ । (६-४-८)

नान्तस्योपधायाः दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे ।

२५१ । अपृक्त एकाल्प्रत्ययः । (१-२-४१)

एकाल्प्रत्ययो यः सोऽपृक्तसंज्ञः स्यात् ।

२५२ । हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् । (६-१-६८)

सख्युरङ्गस्येत्यादिना ॥ सौ इति प्रथमैकवचनम्, नतु सप्तमीबहुवचनम् । असम्बुद्धाविति पर्युदासात् । अनङि ङकार इत्, नकारादकार उच्चारणार्थः । अनेकाल्त्वात् सर्वादेशमाशङ्क्य आह । **ङिच्चेति** ॥ सखन् स् इति स्थिते उपधाकार्यं वक्ष्यन् उपधासंज्ञामाह । **अलोऽन्त्यात्** ॥ अल इति पञ्चमी । अन्त्यादिति सामानाधिकरण्यात् । अल्प्रत्याहारः वर्णपर्यायः । पूर्वोऽप्यलेव गृह्यते । साजात्यादित्याह । **अन्त्यादलः इत्यादिना** ॥ अलः किम् । शिष्ट इत्यत्र शासुधातौ आस् इति सङ्घातात् पूर्वशकारस्य उपधात्वं न भवति । अन्यथा 'शास इदङ्हलोः' इति शकारस्य इकारप्रसङ्गः । वर्णग्रहणं किम् । शास्धातौ शा इति समुदायस्य उपधात्वं न भवति । अन्यथा शा इति समुदायस्य इकारस्स्यात् । न चालोन्त्यपरिभाषया आकारस्यैव इकारो भवतीति वाच्यम् । 'नानर्थकेऽलोन्त्यविधिः' इति तन्निषेधात् । **सर्वनामस्थाने** ॥ 'नोपधायाः' इति सूत्रमनुवर्तते । न इति लुप्तषष्ठीकं पदम् । तेनाङ्गस्येत्यवयवषष्ठ्यन्तं विशेष्यते । तदन्तविधिः । 'ढ्रलोपे' इत्यतो दीर्घ इत्यनुवर्तते । तदाह । **नान्तस्येत्यादिना** ॥ सखान् स् इति स्थिते अपृक्तकार्यं वक्ष्यन् अपृक्तसंज्ञामाह । **अपृक्तः** ॥ एकालिति कर्मधारयः । अत्रैकशब्दोऽसहायवाची । "एके मुख्यान्यकेवलाः" इत्यमरः । स् इत्यस्यापृक्तसंज्ञायाम् । **हल्ङ्याब्भ्यो** ॥ हल् च, ङी च, आप् च, इति द्वन्द्वः । दिग्योगे पञ्चमी । परमित्यध्याहार्यम् । समासैकदेशयोरपि ङ्याप्योरेव दीर्घादिति विशेषणम्, न तु हलः । असम्भवात् । एवञ्च दीर्घादिति द्वित्वे एकवचनमार्षम् । हल्ङ्याब्भ्य इत्यस्य सुतिस्याक्षिप्तप्रकृतिविशेषणतया प्रत्ययग्रहणपरिभाषया च तदन्तविधिः । ततश्च हलन्ताच्च दीर्घङ्याबन्ताच्च परमिति लब्धम् । सु ति सि इति समाहारद्वन्द्वः । अपृक्तमिति हलिति च सामानाधिकरण्येनान्वेति । उकारे इकारे च लुप्ते परिशिष्टस्सकारस्तकारश्च सु ति सि इत्यनेन विवक्षितः । ततश्च हलित्यनेन सामानाधिकरण्यं न विरुध्यते । 'लोपो व्योः' इत्यतो लोप इत्यनुवर्तते । तच्च इह

हलन्तात्परं दीर्घौ यौ ङ्याप्पौ तदन्ताच्च परं सु ति सि इत्येतदपृक्तं हल् लुप्यते। 'हल्ङ्याब्भ्यः' किम्। ग्रामणीः। 'दीर्घात्' किम्। निष्कौशाम्बिः। अतिखट्वः। 'सुतिसि' इति किम्। अभैत्सीत्। तिपा सहचरितस्य सिपो ग्रहणात्सिचो ग्रहणं नास्ति। 'अपृक्तम्' इति किम्। बिभर्ति। 'हल्' किम्। बिभेद। 'प्रथमहल्' किम्। राजा। नलोपादिर्न स्यात्। संयोगान्तलोपस्यासिद्धत्वात्। सखा। हे सखे।

कर्मसाधनमाश्रीयते। लुप्यत इति लोपः। कर्मणि घञ्। तदाह। **हलन्तात्परमित्यादिना॥ हल्ङ्याब्भ्यः किमिति॥** राम इत्यादावदीर्घान्तत्वान्न दोष इति प्रश्नः। **ग्रामणीरिति॥** ग्रामं नयतीति विग्रहः। 'णीञ् प्रापणे, सत्सूद्विष' इत्यादिना क्विप्। 'अग्रग्रामाभ्यां नयतेर्णौ वाच्यः' इति णत्वम्। हल्ङ्याबन्तत्वाभावान्न सुलोपः। **दीर्घात् किमिति॥** ङ्यापोर्दीर्घत्वाव्यभिचारात् किमर्थं दीर्घत्वविशेषणमिति प्रश्नः। **निष्कौशाम्बिः। अतिखट्वः इति॥** निष्क्रान्तः कौशाम्ब्याः, खट्वामतिक्रान्तः, इति विग्रहे 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति समासः। 'गोस्त्रियोः' इति ह्रस्वत्वम्। अत्र ङ्यापोर्ह्रस्वत्वान्न सुलोपः। **सुतिसि इति किमिति॥ अभैत्सीदिति॥** भिदेर्लुङि सिच्। अत्र तकारात् सकारस्य लोपो न। सुतिस्यन्यतमत्वाभावादित्यर्थः। **ननु** सिचस्सिरेवायमित्यत आह। **तिपेति॥** तिपा सहचरितस्य विभक्तिरूपस्यैव ग्रहणात् सिचो ग्रहणं नेत्यर्थः। **अपृक्तमिति किम्। बिभर्तीति॥** अत्र ति इति समुदायस्य न हल्त्वम्। तकारस्तु यद्यपि तेरवयवः। तथापि तस्य नापृक्तत्वम्। वस्तुतस्तु उकारे इकारे च लुप्ते परिशिष्टस्सकारस्तकारश्च सु ति सि इत्यनेन गृह्यते। हल्शब्दसामानाधिकरण्यादित्युक्तम्। नात्र इकारलोपोऽस्ति। अतो हल्ग्रहणेनैव बिभर्तीत्यत्र लोपाभावसिद्धेः। अपृक्तग्रहणस्य नेदं प्रत्युदाहरणम्। द्वितीयहल्ग्रहणस्य प्रयोजनं पृच्छति। **हल् किमिति॥ बिभेदेति॥** भिदेर्लिट् तिप्। णलः अकारस्य हल्त्वाभावान्न लोपः। **प्रथमहल् किमिति॥** राजन् स् इति स्थिते उपधादीर्घे संयोगान्तलोपेनैव राजेत्यादिसिद्धेरिति प्रश्नः। नन्विदं राजेति कथं प्रत्युदाहरणम्। संयोगान्तलोपेनैव अन्यथासिद्धत्वादित्यत आह। **नलोपादिर्न स्यादिति॥** संयोगान्तलोपे सति नलोपो न स्यादिति भावः। अभिनोऽत्रेत्यत्र उत्त्वमादिशब्दार्थः। भिदेर्लङि सिप्। 'इतश्च' इति इकारलोपः। 'सिपि धातो रुर्वा' इति रुत्वम्। सलोपः। अत्र 'अतो रोरप्लुतात्' इत्युत्त्वं न स्यात्। कुत इत्यत आह। **संयोगान्तलोपस्यासिद्धत्वादिति॥** हल्ङ्यादिलोपस्तु नासिद्धः। षष्ठप्रथमपादस्थत्वादिति भावः। अत्र क्वचित् पुस्तकेषु 'दीर्घात् किमित्यारभ्य संयोगान्तलोपस्यासिद्धत्वात्' इत्यन्तस्सन्दर्भो न दृश्यते। युक्तश्चैतत्। मूलकृतैव प्रौढमनोरमायामस्य सन्दर्भस्य प्रदर्शितत्वादिति शब्देन्दुशेखरे व्यक्तम्। **सखेति॥** सुलोपे सति 'न लोपः' इति नकारलोपः। नचेह सुपमाश्रित्य अनङि कृते तन्नकारमाश्रित्य सोर्लोपो न सम्भवति। सन्निपातपरिभाषाविरोधादिति वाच्यम्। 'स्वतन्त्रः

२५३ । सख्युरसम्बुद्धौ । (७-१-९२)

सख्युरङ्गात्परं सम्बुद्धिवर्जं सर्वनामस्थानं णिद्वत्स्यात् ।

२५४ । अचो ञ्णिति । (७-२-११५)

ञिति णिति च परेऽजन्ताङ्गस्य वृद्धिः स्यात् । सखायौ । सखायः । सखायम् । सखायौ । घिसंज्ञाभावान्न तत्कार्यम् । सख्या । सख्ये ।

२५५ । ख्यत्यात्परस्य । (६-१-११२)

खितिशब्दाभ्यां खीतीशब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोरत उत्स्यात् । सख्युः ।

कर्ता' इत्यादिनिर्देशेन अनङो नकारमाश्रित्य सुलोपे कर्तव्ये सन्निपातपरिभाषाया अप्रवृत्तेरित्याहुः । **हे सखे इति** ॥ 'अनङ् सौ' इत्यत्र असम्बुद्धावित्यनुवृत्तेरनङभावे ह्रस्वस्य गुणे 'एङ् ह्रस्वात्' इति सुलोपे रूपम् । सखि औ इति स्थिते णित्कार्यं वृद्धिं वक्ष्यन् णिद्वद्भावं दर्शयति । **सख्युरसम्बुद्धौ** ॥ सख्युरिति दिग्योगे पञ्चमी । 'अङ्गस्य' इत्यधिकृतं पञ्चम्या विपरिणम्यते । परमित्यध्याहार्यम् । 'इतोऽत् सर्वनामस्थाने' इत्यतस्सर्वनामस्थाने इत्यनुवर्तते । असम्बुद्धावित्यभेदेनान्वेति । 'गोतो णित्' इत्यतो णिदिति प्रथमान्तमनुवृत्तम् । तत्सामानाधिकरण्यात् सप्तमी प्रथमा कल्प्यते । तदाह । **सख्युरङ्गादित्यादिना** ॥ **णिद्वदिति** ॥ णित्कार्यकृत् स्यादित्यर्थः । णिच्छब्दस्तत्कार्यातिदेशार्थ इति भावः । **अचो ञ्णिति** ॥ ञ् च ण् च ञ्णौ तौ इतौ यस्य तत् ञ्णित् 'मृजेः' इत्यतो वृद्धिरित्यनुवर्तते । अङ्गस्येत्यधिकृतमचा विशेष्यते । तदन्तविधिः । तदाह । **अजन्तस्येत्यादिना** ॥ स्थानसाम्यादिकारस्य वृद्धिरैकारः । तस्य आयादेशः इत्यभिप्रेत्य आह । **सखायाविति** ॥ एवं सखायः, सखायं, सखायौ, सखीन्, इति शसि हरिवद्रूपम् । असर्वनामस्थानत्वाण्णित्त्वाभावात् न वृद्धिः । **घिसंज्ञाभावादिति** ॥ 'शेषो घ्यसखि' इत्यत्र असखीति पर्युदासादिति भावः । **न तत्कार्यमिति** ॥ घिप्रयुक्तकार्यं नेत्यर्थः । **सख्येति** ॥ सखि आ इति स्थिते घित्वाभावात् 'आङो नाऽस्त्रियाम्' इति नाभावाभावे यणि रूपम् । **सख्ये इति**॥ सखि ए इति स्थिते घित्वाभावात् 'घेर्ङिति' इति गुणाभावे यणि रूपम् । ङसिङसोः सखि अस् इति स्थिते घित्वाभावात् 'घेर्ङिति' इति गुणाभावे यणि सख्यस् इति स्थिते । **ख्यत्यात् परस्य** ॥ खिखी इत्यनयोः तिती इत्यनयोश्च कृतयणादेशयोः ख्यत्य इति निर्देशः । यकारादकार उच्चारणार्थः । 'एङः पदान्तात्' इत्यतः अतीत्यनुवर्तते । तच्च परस्येति सामानाधिकरण्यात् षष्ठ्यन्तं विपरिणम्यते । 'ङसिङसोश्च' इत्यतः ङसिङसोरित्यनुवर्तते । अवयवषष्ठ्येषा । ततश्च ङसिङसोरवयवस्य अत इति लभ्यते । 'ऋत उत्' इत्यतः उदित्यनुवर्तते । 'एकः पूर्वपरयोः' इति तु निवृत्तम् । परग्रहणसामर्थ्यात् । अन्यथा ख्यत्यादिति पञ्चमीनिर्देशादेव सिद्धे किं तेन । तदाह । **खितिशब्दाभ्यामित्यादिना** ॥ **सख्युरिति** । सख्यस् इति स्थिते यकारा-

२५६। औत्। (७-३-११८)

इदुद्भ्यां परस्य डेरौत्स्यात्। उकारानुवृत्तिरुत्तरार्था। **सख्यौ**। शेषं हरिवत्। शोभनः सखा **सुसखा**। **सुसखायौ**। **सुसखायः**। अनङ्णिद्वद्भावयोराङ्गत्वात्तदन्तेऽपि प्रवृत्तिः। समुदायस्य सखिरूपत्वाभावात् 'असखि (सू २४३) इति निषेधाप्रवृत्तेर्घिसंज्ञा। **सुसखिना**। **सुसखये**। ङसिङसोर्गुणे कृते कृतयणादेशत्वाभावात् 'ख्यत्यात्—' (सू २५५) इत्युत्त्वं न। **सुसखेः**। **सुसखावित्यादि**। एवमतिशयितः सखा अतिसखा। 'परमः सखा यस्य'

दकारस्य उकारे रुत्वविसर्गौ। ङौ सखि इ इति स्थिते घित्वाभावात् 'अच्च घेः' इत्यस्याप्रवृत्त्या सवर्णदीर्घे प्राप्ते। **औत्**॥ 'इदुद्भ्याम्' इति सूत्रमनुवर्तते। 'डेराम्' इत्यतो डेरिति च। तदाह। **इदुद्भ्यामित्यादिना**॥ ननु घिसंज्ञकेषु हरिकव्यादिषु 'अच्च घेः' इति प्रवर्तते। नदीसंज्ञकेषु तु 'इदुद्भ्याम्' इति पूर्वसूत्रं प्रवर्तते। अतस्सूत्रद्वयविषयादन्यस्सखिशब्द एवास्य सूत्रस्य विषय इति व्यक्तम्। एवञ्च उकारानुवृत्तिर्व्यर्थेत्यत आह। **उकारेति**॥ उकारानुवृत्तिः 'अच्च घेः' इत्युत्तरसूत्रेऽनुवृत्त्यर्थेत्यर्थः। **सख्यौ इति**॥ डेरौत्त्वे याणि रूपमिति भावः। **सुसखेति**॥ प्रादिसमासः। 'राजाहस्सखिभ्यष्टच्' इति टच् तु न भवति। 'न पूजनात्' इति निषेधात्। अनङ् सौ, उपधादीर्घः, हल्ङ्यादिलोपः, 'नलोपः' इति नकारलोपः इति भावः। **सुसखायौ। सुसखायः इति**॥ णिद्वद्भावः वृद्धिः आयादेश इति भावः। नन्वनङ्णिद्वत्त्वे सखिशब्दस्य विधीयमाने कथं सुसखिशब्दे स्यातामित्यत आह। **अनङ् इत्यादि**॥ अङ्गाधिकारस्थतया 'पदाङ्गाधिकारे' इति परिभाषया सखिशब्दान्तेऽपि प्रवृत्तिरित्यर्थः। नन्वेवं सति सुसखिशब्दे असखि इति पर्युदासात् घित्वाभावे नात्वादि न स्यादित्यत आह। **समुदायस्येति**॥ नच सुसखिशब्दस्य सखिशब्दरूपत्वाभावेऽपि सखिशब्दान्तत्वादसखीति पर्युदासोऽपि दुर्निवार इति वाच्यम्। 'शेषो घ्यसखि' इत्यस्य पदाङ्गाधिकारस्थत्वाभावादिति भावः। **सुसखिनेति**॥ घित्वान्नात्वे रूपम्। **सुसखये इति**॥ 'घेर्ङिति' इति गुणे अयादेशः। **ङसीति**॥ ङसिङसोः घेर्ङिति इति गुणे कृते 'ख्यत्यात्' इत्युत्त्वं नेत्यन्वयः। कुत इत्यत आह। **कृतयणादेशत्वाभावादिति**॥ 'ख्यत्यात्' इत्यत्र कृतयणादेशनिर्देशेन यत्र यणादेशप्रवृत्तिस्तत्रैवोत्त्वप्रवृत्तेरिति भावः। **सुसखेरिति**॥ ङसिङसोरेतद्रूपम्। **सुसखाविति**॥ 'अच्च घेः' इत्यौत्त्वम्। **एवमिति**॥ सुसखिशब्दवदित्यर्थः। **अतिसखेति**॥ प्रादिसमासः 'न पूजनात्' इति न टच्। वस्तुतस्तु उदाहृते सुसखिशब्दे अतिसखिशब्दे च घिसंज्ञा न भवत्येव। 'शेषो घ्यसखि' इत्यत्र हि असखीति शेषविशेषणम्। तदन्ताविधिः। सखिशब्दान्ताभिन्नश्शेषो घिसंज्ञक इति लभ्यते। अत एव 'यस्येति च' इति सूत्रे "ईकारे परतः इकारलोपे किमुदाहरणम्। सखीत्यत्र 'सख्यशिश्वीति भाषायाम्' इति ङीषि इकारलोपः। नच सवर्णदीर्घेण निर्वाहदशङ्क्यः। सखीमतिक्रान्तः अतिसखिः। प्रादिसमासः। 'गोस्त्रियोः'

इति विग्रहे परमसखा। परमसखायौ। इत्यादि। गौणत्वेऽप्यनङ्णित्त्वे प्रवर्तेते। सखीमतिक्रान्तोऽतिसखिः। लिङ्गविशिष्टपरिभाषाया अनित्यत्वान्न टच्। हरिवत्। इहानङ्णित्त्वे न भवतः। 'गोस्त्रियोः—' (सू ६५६) इति ह्रस्वत्वेन सखिशब्दस्य लाक्षणिकत्वात्। 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणात्' (प १११४)।

२५७। पतिः समास एव। (१-४-८)

पतिशब्दः समास एव घिसंज्ञः स्यात्। पत्या। पत्ये। पत्युः। पत्युः।

इति ह्रस्वः। अतिसखेरागच्छति इत्यत्र इकारलोपाभावात् सवर्णदीर्घे तस्य एकादेशस्य पूर्वान्ततया सखिग्रहणेन ग्रहणात् असखीति पर्युदासे घिसंज्ञाप्रतिषेधापत्तेः। इकारलोपे तु सति ङीषो ह्रस्वत्वे कृते नायं सखिशब्दः। ङीषस्तदवयवत्वाभावात्" इति भाष्यं सङ्गच्छते इति, शब्देन्दुशेखरे प्रपञ्चितम्। **परमसखेति** ॥ बहुव्रीहित्वात्तत्पुरुषत्वाभावान्न टच्। ननु बहुव्रीहौ सखिशब्दस्य गौणत्वात् कथमनङ्णित्त्वे। गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः, इति न्यायात् इत्यत आह। **गौणत्वेऽपीति** ॥ 'मिदचोऽन्त्यात्' इति सूत्रे 'तृज्वत् क्रोष्टुः, स्त्रियाञ्च' इति भाष्यकैयटयोः तथा दृष्टत्वादिति भावः। **अतिसखिरिति** ॥ 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति समासः। 'गोस्त्रियोः' इति ह्रस्वः। 'राजाहस्सखिभ्यष्टच्' इति टच् तु न भवति। तस्मिन् कर्तव्ये ह्रस्वस्य बह्वपेक्षतया बहिरङ्गतया चासिद्धत्वेन ईकारान्तत्वात्। नन्वेवमपि 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति परिभाषया सखीशब्दान्तादपि टच् स्यादित्याशङ्क्य आह। **लिङ्गविशिष्टेति** ॥ 'शक्तिलाङ्गलाङ्कुश' इति वार्तिके घटघटीग्रहणात्तस्याः अनित्यत्वामिति भावः। ननु हरिवदिति कथम्। अनङ्णिद्वद्भावयोः प्रवृत्तौ रूपभेदादित्यत आह। **इहेति** ॥ कुतो न भवत इत्यत आह। **गोस्त्रियोरिति** ॥ **लाक्षणिकत्वादिति** ॥ लक्षणं शास्त्रं तत्र भवः इत्यर्थे 'बह्वचोऽन्तोदात्तात्' इति वा अञ्ज्यात्मादित्वाद्वा ठक्। सखिशब्दस्वरूपस्य सामान्यतश्शास्त्रादुन्नेयत्वादिति यावत्। सखिशब्दस्तु नैवम्। समानं ख्यायते जनैरित्यर्थे इणिति डिच्चेति यलोप इति चानुवर्तमाने 'समाने ख्यः स चोदात्तः' इति ख्याधातोरिणश्च विशिष्योपादानेन व्युत्पादितत्वेन तस्य प्रतिपदोक्तत्वादिति भावः। ननु लाक्षणिकस्यापि ग्रहणं कुतो नेत्यत आह। **लक्षणेति** ॥ लक्षणशब्देन लाक्षणिकं विवक्षितम्। विशिष्य प्रत्यक्षोपपादितं प्रतिपदोक्तमित्युच्यते। तयोर्मध्ये प्रतिपदोक्तस्यैव ग्रहणमिति परिभाषितत्वादित्यर्थः। प्रतिपदोक्तं झटित्युपस्थितिकम्। लाक्षणिकन्तु लक्षणानुसन्धानाद्विलम्बितोपस्थितिकम्। प्रतिपदोक्तमादाय शास्त्रस्य चरितार्थत्वान्न लाक्षणिके प्रवृत्तिरिति न्यायसिद्धा चेयं परिभाषा। अथ पतिशब्दे विशेषं दर्शयति। **पतिस्समास एव** ॥ 'शेषो घ्यसखि' इत्यतो घीत्यनुवर्तते। तदाह। **पतिशब्दः इत्यादिना** ॥ **पत्या। पत्ये इति** ॥ घित्वा-

पतीनाम्। पत्यौ। शेषं हरिवत्। समासे तु भूपतये। कतिशब्दो नित्यं बहुवचनान्तः।

२५८। बहुगणवतुडति सङ्ख्या। (१-१-२८)

एते सङ्ख्यासंज्ञाः स्युः।

२५९। डति च। (१-१-२५)

डत्यन्ता सङ्ख्या षट्संज्ञा स्यात्।

२६०। प्रत्ययस्य लुक्श्लुलुपः। (१-१-६१)

भावान्नात्वगुणाभावे यणि रूपम्। **पत्युरिति**॥ 'ख्यत्यात्' इत्युत्त्वम्। **पत्याविति**॥ घित्वाभावात् 'अच्च घेः' इत्यभावे 'औत्' इति ङेरौत्त्वे यणि रूपम्। आरम्भसामर्थ्यादेव नियमार्थत्वे सिद्धे एवकारस्तु पतिरेव समासे घिरिति विपरीतनियमव्यावृत्त्यर्थः। तेन हरिणेत्यादि सिध्यति। **समासे तु भूपतये इति**॥ भूपतिनेत्याद्युपलक्षणम्। "सीतायाः पतये नमः" इत्यादि त्वार्षम्। अथ कतिशब्दे विशेषं दर्शयति। **कतिशब्दो नित्यं बहुवचनान्तः इति**॥ 'किमस्सङ्ख्यापरिमाणे' इत्यनेन किंशब्दात् बहुत्वसङ्ख्याविच्छिन्नसङ्ख्येयविषयप्रश्न एव कति, इति भाष्ये स्पष्टत्वादिति भावः। अथ षट्संज्ञाकार्यं वक्ष्यन् षट्संज्ञोपयोगिनीं सङ्ख्यासंज्ञामाह। **बहुगण**॥ बहुश्च, गणश्च, वतुश्च, डतिश्च, इति समाहारद्वन्द्वः। एतत् सङ्ख्यासंज्ञं स्यादित्यर्थः। फलितमाह। **एते इति**॥ बह्वादय इत्यर्थः। बहुगणशब्दाविह त्रित्वादिपरार्धान्तसङ्ख्याव्यापकधर्मविशेषवाचिनौ गृह्येते। न तु बैपुल्यसङ्ख्यावाचिनौ। सङ्ख्यायतेऽनयेति अन्वर्थसंज्ञाविज्ञानात्। वतुडती प्रत्ययौ। संज्ञाविधावपि इह तदन्तग्रहणम्। केवलयोः प्रयोगानर्हत्वात्। वतुरिह 'यत्तदेतेभ्यः परिमाणे वतुप्' इति तद्धितप्रत्ययो गृह्यते। न तु 'तेन तुल्यं क्रिया चेद्वतिः' इति वतिरपि। उकारानुबन्धात्। डतिरपि 'किमस्सङ्ख्यापरिमाणे डति च' इति विहितः तद्धित एव गृह्यते। वतुना साहचर्यात्। न तु भातेर्डवतुरिति विहितः कृदपि। ननु 'सङ्ख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' इत्यादिसङ्ख्याप्रदेशेषु बह्वादीनामेव चतुर्णां ग्रहणं स्यात्। न तु लोकप्रसिद्धसङ्ख्यावाचकानामपि। 'कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः' इति न्यायात्। ततश्च पञ्चकृत्वः इत्यादि न स्यादिति चेन्न। 'सङ्ख्याया अतिशदन्तायाः कन्' इत्यत्र तिशदन्तपर्युदासबलेन सङ्ख्याप्रदेशेषु कृत्रिमाकृत्रिमन्यायाप्रवृत्तिज्ञापनात्। नहि विंशतित्रिंशदादिशब्दानां कृत्रिमा सङ्ख्यासंज्ञाऽस्ति। नचैवं सति बहुगणग्रहणवैयर्थ्यं शङ्क्यम्। तयोर्नियतविषयपरिच्छेदकत्वाभावेन लोकसिद्धसङ्ख्यात्वाभावात्। अत एव भाष्ये "एतत्सूत्रमतिदेशार्थं यदयमसङ्ख्यां सङ्ख्येत्याह" इत्युक्तं सङ्गच्छते इत्यास्तां तावत्। **डति च**॥ डतीत्यविभक्तिको निर्देशः। प्रत्ययत्वात्तदन्तग्रहणम्। पूर्वसूत्रात् सङ्ख्येत्यनुवर्तते। 'ष्णान्ता षट्' इत्यतष्षडिति च। तदाह। **डत्यन्तेति**॥ सङ्ख्येति किम्। पतिः। अथ षट्संज्ञाकार्यं लुकं वक्ष्यन्नाह। **प्रत्ययस्य लुक्**॥ 'अदर्शनं लोपः' इत्यतोऽदर्शनमित्यनुवर्तते। प्रत्ययस्यादर्शनं लुक्श्लुलुप्संज्ञकं स्यादित्यर्थः

लुक्श्लुलुप्शब्दैः कृतं प्रत्ययादर्शनं क्रमात्तत्तत्संज्ञं स्यात् ।

२६१ । षड्भ्यो लुक् । (७-१-२२)

षड्भ्यः परयोर्जश्शसोर्लुक् स्यात् ।

२६२ । प्रत्ययलोपे प्रत्ययलक्षणम् । (१-१-६२)

प्रत्यये लुप्तेऽपि तदाश्रितं कार्यं स्यात् । इति 'जसि च' (सू २४१) इति गुणे प्राप्ते ।

२६३ । न लुमताङ्गस्य । (१-१-६३)

लुक् श्लु लुप् एते लुमन्तः । लुमता शब्देन लुप्ते तन्निमित्तमङ्ग-कार्यं न स्यात् । कति । कति । कतिभिः । कतिभ्यः । कतिभ्यः ।

प्रतीयते । एवं सति एकस्यैव प्रत्ययादर्शनस्य तिस्रोऽपि संज्ञास्स्युः । ततश्च हन्तीत्यत्र शब्लुकि 'श्लौ' इति द्वित्वं स्यात् । जुहोतीत्यत्र श्लौ सति 'उतो वृद्धिर्लुकि हलि' इति वृद्धिस्स्यात् । अतो नैवमर्थः । किन्तु लुक्श्लुलुप् इत्यनुवर्तते । ततश्च लुक् श्लु लुप् इत्युच्चार्य विहितं प्रत्यय-स्यादर्शनं यथासंख्यपरिभाषया क्रमात् लुगादिसंज्ञं स्यादिति लभ्यते । अतो नोक्तसङ्कर इत्याभि-प्रेत्य आह । **लुक्श्लुलुप्शब्दैरित्यादिना** ॥ 'फले लुक्, जुहोत्यादिभ्यः श्लुः, जनपदे लुप्' इत्यादिविधिप्रदेशेषु 'अस्य सूत्रस्य शाटकं वय' इतिवद्भाविसंज्ञाविज्ञानात् नान्योन्याश्रयः । तदेवं कतिशब्दस्य षट्संज्ञायाम् । **षड्भ्यो लुक्** ॥ जश्शसोरित्यनुवर्तते । तदाह । **षड्भ्यः पर-योरित्यादिना** ॥ जसि लुप्तेऽपि 'जसि च' इति गुणमाशङ्क्यितुमाह । **प्रत्ययलोपे प्रत्यय-लक्षणम्** ॥ प्रत्ययः लक्षणं निमित्तं यस्य तत् प्रत्ययलक्षणम् । प्रत्ययस्य लोपे सति प्रत्ययनिमित्तकं कार्यं स्यादित्यर्थः । फलितमाह । **प्रत्यये लुप्तेऽपीत्यादिना** ॥ स्थानि-वद्भावादेव सिद्धे अल्विध्यर्थमिदं सूत्रम् । यत्र प्रत्ययस्यासाधारणं रूपं प्रयोजकं तदेव कार्यं प्रत्ययलोपे सति भवतीति नियमार्थश्चेति भाष्यादिषु स्पष्टम् । **इति जसि चेतीति** ॥ अनेन सूत्रेण लुप्तं प्रत्ययमाश्रित्य 'जसि च' इति गुणे प्राप्ते इत्यर्थः । **न लुमताङ्गस्य** ॥ प्रत्ययलोपे प्रत्ययलक्षणमित्यनुवर्तते । लु इत्येकदेशोऽस्यास्तीति लुमान् । लुक्शब्दः श्लुशब्दः लुप्शब्दश्च । तेन शब्देन प्रत्ययलोपे विहिते सति प्रत्ययनिमित्तकमङ्गकार्यं न स्यादित्यर्थः । तदाह । **लुक्श्लु इत्यादिना** ॥ अङ्गस्य इत्यनुक्तौ पञ्च सप्त इत्यादौ 'सुप्तिङन्तम्' इति पद-संज्ञा न स्यात् । जश्शसोर्लुका लुप्तत्वात् । ततश्च 'न लोपः प्रातिपदिकान्तस्य' इति नलोपो न स्यात् । अतोऽङ्गस्येत्युक्तम् । एवञ्च जसि लुका लुप्ते प्रत्ययलक्षणाभावात् 'जसि च' इति गुणो न भवति इत्यभिप्रेत्योदाहरति । **कतीति** ॥ प्रसङ्गादाह । **अस्मदिति** ॥ **त्रिष्विति** ॥ पुंस्त्रीनपुंसकेष्वित्यर्थः । **सरूपाः इति** ॥ समानानि रूपाणि येषामिति विग्रहः ।

कतिषु। अस्मद्युष्मद्षट्संज्ञकास्त्रिषु सरूपाः। त्रिशब्दो नित्यं बहुवचनान्तः। त्रयः। त्रीन्। त्रिभिः। त्रिभ्यः। त्रिभ्यः।

२६४। त्रेस्त्रयः। (७-१-५३)

त्रिशब्दस्य त्रयादेशः स्यादामि। त्रयाणाम्। परमत्रयाणाम्। गौणत्वे तु नेति केचित्। प्रियत्रीणाम्। वस्तुतस्तु प्रियत्रयाणाम्। त्रिषु। द्विशब्दो नित्यं द्विवचनान्तः।

२६५। त्यदादीनामः। (७-२-१०२)

एषामकारोऽन्तादेशः स्याद्विभक्तौ। 'द्विपर्यन्तानामेवेष्टिः' (वा ४४६८)

लिङ्गविशेषबोधकटाबाद्यभावादिति भावः। नचैवं सति 'अलिङ्गे युष्मदस्मदी' इति 'साम आकम्' इति सूत्रस्थभाष्यविरोध इति वाच्यम्। पदान्तरसन्निधानं विना लिङ्गविशेषो युष्मदस्मच्छब्दाभ्यां न प्रतीयते इति हि तदर्थः। अत एव 'न षट्स्वस्रादिभ्यः' इति पञ्चन्नादिषट्संज्ञकेभ्यः टाङ्ङी-ब्निषेधस्सङ्गच्छते। अन्यथा स्त्रीत्वाभावादेव तदभावे सिद्धे किं तेन। अत एव च 'ङे प्रथमयोः' इति सूत्रे भाष्ये युष्मानित्यत्र 'तस्माच्छसो नः पुंसि' इत्युपन्यासस्सङ्गच्छते। अत एव च 'नेतराच्छन्दसि' इति सूत्रे शिशीनुमादिभिर्युष्मदस्मादाद्यादेशानां विप्रतिषेधपरं वार्तिकं तद्भाष्यञ्च सङ्गच्छते इति दिक्। त्रिशब्दे विशेषमाह। **त्रिशब्दः इति**॥ त्रि आम् इति स्थिते नुटि दीर्घे णत्वे त्रीणामिति प्राप्ते। **त्रेस्त्रयः**॥ 'आमि सर्वनाम्नः' इत्यतः आमीत्यनुवर्तते। तदाह। **त्रिशब्दस्येत्यादिना**॥ अनेकाल्त्वात् सर्वादेशः। नुट् दीर्घश्च। तदाह। **त्रयाणामिति**॥ 'त्रेरयङ्' इति तु नोक्तम्। अयङ् अनङ् इत्यादिवत् ङकारात्पूर्वस्य अकारस्य उच्चारणार्थत्वशङ्काप्रसङ्गात्। अङ्गाधिकारस्थत्वात् 'पदाङ्गाधिकारे' इति परिभाषया त्रेरिति तदन्तग्रहणमित्यभिप्रेत्योदाहरति। **परमत्रयाणामिति**॥ परमाश्च ते त्रयश्चेति विग्रहः। प्रियाः त्रयो यस्य इति प्रियत्रिशब्दो बहुव्रीहिः। तस्यान्यपदार्थप्रधानत्वादेकद्विबहुवचनानि सन्ति। अतो हरिवत्तस्य रूपाणि। तत्र त्रयादेशमाशङ्क्य आह। **गौणत्वे त्विति**॥ त्रिशब्दस्य उपसर्जनत्वे 'त्रेस्त्रयः' इति न भवतीति केचिदाहुरित्यर्थः। 'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः' इति न्यायात् इति भावः। **वस्तुतस्त्विति**॥ प्रियत्रयाणामित्येव रूपं वस्तुत्वेन ज्ञेयमित्यर्थः। प्रामाणिकमिति यावत्। गौणमुख्यन्यायस्तत्र न प्रवर्तते। तस्य पदकार्य एव प्रवृत्तेः। अत एव उपसर्जनानां सर्वनामत्वप्रतिषेध आरब्धो वार्तिककृता। अत एव च प्रियतिस्रेत्यादौ तिस्रादयः भाष्ये उदाहृतास्सङ्गच्छन्ते इत्यन्यत्र विस्तरः। अथ द्विशब्दे विशेषमाह। **द्विशब्दः इति**॥ तस्य द्वित्वनियतत्वादिति भावः। द्वि औ इति स्थिते। **त्यदादीनामः**॥ 'अष्टन आ विभक्तौ' इत्यतो विभक्तावित्यनुवर्तते। **एषामिति**॥ त्यदादीनामित्यर्थः। त्यद् आदिर्येषामिति विग्रहः। अन्तादेश इत्यलोऽन्त्यपरिभाषालभ्यः। विभक्तौ किम्। तत्फलं 'स्वमोर्नपुंसकात्' इति लुकि अत्वत्र। **द्विपर्यन्तानामिति**॥ सर्वादिगणे ये त्यदादयः पठिताः तेषामिह

द्वौ। द्वौ। द्वाभ्याम्। द्वाभ्याम्। द्वाभ्याम्। द्वयोः। द्वयोः। 'द्विपर्यन्तानाम्' इति किम्। भवान्। भवन्तौ। भवन्तः। संज्ञायामुपसर्जनत्वे च नात्वम्। सर्वाद्यन्तर्गणकार्यत्वात्। द्विर्नाम कश्चित्। द्विः। द्वी। द्वयः। द्वावतिक्रान्तोऽतिद्विः। हरिवत्। प्राधान्ये तु परमद्वावित्यादि। औडुलोमिः। औडुलोमी। उडुलोमाः। 'लोम्नोऽपत्येषु बहुष्वकारो वक्तव्यः' (वा २५६०)। बाह्वादीञोऽपवादः। औडुलोमिम्। औडुलोमी। उडुलोमान्।

इति इदन्ताः।

द्विपर्यन्तानामेव ग्रहणे भाष्यकारस्य इच्छेत्यर्थः। द्विशब्दस्य द्विवचनेषु परतोऽत्वे कृते रामशब्दवद्रूपाणीत्याह। **द्वावित्यादि॥ द्विपर्यन्तानामिति किमिति॥** युष्मदस्मदोरात्वयत्वयलोपैर्बाधात् किमःकादेशविधानाच्च तेषां त्यदादिष्वन्तर्भावेऽपि न दोष इति प्रश्नः। **भवान्। भवन्ताविति॥** भवत् स् इति स्थिते 'उगिदचाम्' इति नुमि हल्ङ्यादिलोपे संयोगान्तलोपे 'सर्वनामस्थाने च' इति दीर्घे भवानिति रूपम्। द्विपर्यन्तानामित्यभावे तु भवत् स् इति स्थिते तकारस्य अत्वे कृते 'अतो गुणे' इति पररूपे 'उगिदचाम्' इति नुमि 'सर्वनामस्थाने' इति दीर्घे सुलोपे नलोपे भवा इति स्यात्। तथा भवत् औ इति स्थिते पूर्ववत्तकारस्य अत्वे पररूपे नुमि दीर्घे च भवानाविति स्यादिति भावः। अथ यदुक्तं 'सञ्ज्ञोपसर्जनीभूतानां सर्वादिगणकार्यमन्तर्गणकार्यञ्च न भवति' इति तत् स्मारयति। **संज्ञायामित्यादिना॥ द्विर्नामेति॥** नामेत्यव्ययं प्रसिद्धौ। द्विरिति प्रसिद्धः कश्चित् इत्यर्थः। अत्र च संज्ञाभूतस्य द्विशब्दस्य एकद्विबहुवचनानि सन्ति। एकद्वित्रयादिष्वपि द्विसंज्ञकत्वासम्भवादित्यभिप्रेत्य आह। **द्विः, द्वी, द्वयः, इति। अतिद्विरिति॥** 'अत्यादयः' इति समासः। **परमद्वाविति॥** कर्मधारयोऽयम्। संज्ञोपसर्जनत्वाभावादिह अत्वं भवत्येव। आङ्गत्वेन पदाङ्गाधिकारपरिभाषया तदन्तग्रहणादिति भावः। उडूनि नक्षत्राणीव लोमानि यस्य सः उडुलोमा। तस्यापत्यमौडुलोमिः 'बाह्वादिभ्यश्च' इति इञ्। 'नस्तद्धिते' इति टिलोपः। आदिवृद्धिः। अस्य एकवचनद्विवचनयोः सर्वत्र हरिवद्रूपम्। तदाह। **औडुलोमिः। औडुलोमी, इति॥** बहुवचने तु उडुलोमाः इति कथम्। बाह्वादिगणस्थत्वेन इञः प्रसङ्गादित्यत आह। **लोम्नोऽपत्येषु बहुष्वकारो वक्तव्यः॥** लोमन्शब्दात् बहुष्वपत्येषु विवक्षितेषु अकारः प्रत्ययो वक्तव्य इत्यर्थः। **बाह्वादीञः इति॥** बाह्वादिगणाद्विहितस्य इञोऽपवाद इत्यर्थः। उडुलोमाः इत्यत्र उडुलोमन् अस् इति स्थिते 'नस्तद्धिते' इति टिलोपः। ञित्त्वाभावात् कित्त्वाभावाच्च नादिवृद्धिरिति भावः। उडुलोमशब्दः अकारान्तः। तस्य सर्वत्र बहुवचनेषु रामवद्रूपमिति भावः॥

इति इदन्तप्रकरणम्।

॥ अथ ईदन्तप्रकरणम् ॥

'वातप्रमीः' (उ ४४१) इत्युणादिसूत्रेण माङ ईप्रत्ययः। स च कित्। वातं प्रमिमीते इति वातप्रमीः। 'दीर्घाज्जसि च' (सू २३९)। वातप्रम्यौ। वातप्रम्यः। हे वातप्रमीः। 'अमि पूर्वः' (सू १९४)। वातप्रमीम्। वातप्रम्यौ। वातप्रमीन्। वातप्रम्या। वातप्रमीभ्याम्। वातप्रम्ये। वातप्रमीभ्याम्। वातप्रम्यः। वातप्रमीभ्याम्। वातप्रम्यः। वातप्रम्योः। वातप्रम्याम्। दीर्घत्वान्न नुट्। ङौ तु सवर्णदीर्घः। वातप्रमी। वातप्रम्योः। वातप्रमीषु। एवं यथीपप्यादयः। यान्त्यनेनेति यथीमार्गः। पाति लोकमिति पपीः सूर्यः। 'यापोः किद्वे च' (उ ४३९) इति ईप्रत्ययः। किबन्तवातप्रमीशब्दस्य

अथेदानीमीकारान्ताः निरूप्यन्ते। तत्र वातप्रमीशब्दो द्विधा। 'माङ् माने' इति धातोरीप्रत्ययान्तः क्विबन्तश्च। तत्र प्रथमं व्युत्पादयति। **वातप्रमीरित्यादिना** ॥ किदित्यनन्तरं निपात्यते इति शेषः। **वातमिति** ॥ वातमिन्युपपदे कर्तरि माङ्धातोरीप्रत्यये कित्त्वात् 'आतो लोप इटि च' इत्याकारलोपे 'उपपदमतिङ्' इति समासे तस्मात् सुबुत्पत्तौ वातप्रमीरिति प्रथमैकवचनम्। अङ्यन्तत्वान्न सुलोपः। एतदर्थमेव हल्ङ्यादिसूत्रे सत्यपि दीर्घग्रहणे ङीब्ग्रहणमिति भावः। **दीर्घादिति** ॥ वातप्रमी औ इति स्थिते 'दीर्घाज्जसि च' इति पूर्वसवर्णदीर्घे निषिद्धे 'इको यणचि' इति यणि वातप्रम्याविति रूपमित्यर्थः। **हे वातप्रमीरिति** ॥ दीर्घान्तत्वात् 'ह्रस्वस्य गुणः' इति न। **अमीति** ॥ वातप्रमी अम् इति स्थिते 'अमि पूर्वः' इति पूर्वरूपे वातप्रमीमिति रूपमित्यर्थः। 'एरनेकाचः' इति यण्तु न। ईप्रत्ययान्तस्य धातुत्वाभावात्। **वातप्रमीनिति** ॥ पूर्वसवर्णदीर्घे 'तस्माच्छसः' इति नत्वम्। **वातप्रम्येति** ॥ अधित्वात् 'आङो नाऽस्त्रियाम्' इति नाभावस्याभावे यण्। **वातप्रम्ये इति** ॥ अधित्वात् ङेङसिङस्सु 'घेर्ङिति' इति गुणो न। **वातप्रम्यामिति** ॥ आमि यणादेशे रूपम्। दीर्घत्वान्न नुडिति भावः। 'ह्रस्वनद्यापः' इति ह्रस्वग्रहणादिति भावः। **ङौ त्विति** ॥ वातप्रमी ई इति स्थिते परत्वाद्यणादेशं बाधित्वा सवर्णदीर्घे वातप्रमी इति रूपम्। अधित्वादिदुदन्तत्वाभावाच्च 'अच्च घेः' इति, 'औत्' इति च, न भवति "वस्तुतस्तु 'ईदूतौ च सप्तम्यर्थे' इति सूत्रे सप्तम्यन्तमीदूदन्तं लोके नास्ति। 'अतस्सोमो गौरी अधिश्रितः, मामकी तनूः' इति वेद एव तदुदाहरणम्" इतिभाष्यविरोधाद्वातप्रमी इति सप्तम्यन्तस्य लोके प्रयोगो नेत्यनुमीयते, इति शब्देन्दुशेखरे स्पष्टम्। **यापोरिति** ॥ 'यापोः किद्वे च' इति औणादिकसूत्रम्। याधातोः, पाधातोश्च ईप्रत्ययस्स्यात् स कित्। प्रकृतिभूतयोस्तयोर्द्वित्वञ्चेत्यर्थः। कित्त्वात् 'आतो लोप इटि च' इत्याकारलोपः। अभ्यासह्रस्वः। **किबन्तवातेति** ॥ 'माङ् माने' इत्यस्मात् कर्तरि क्विपि

त्वमि शसि ङौ च विशेषः । वातप्रम्यम् । वातप्रम्यः । वातप्रम्यि । 'एरनेकाचः—' (सू २७२) इति वक्ष्यमाणो यण् । प्रधीवत् । बह्वयः श्रेयस्यो यस्य सः बहुश्रेयसी । दीर्घङ्यन्तत्वात् 'हल्ङ्याप्' (सू २५२) इति सुलोपः ।

२६६ । यू स्त्र्याख्यौ नदी । (१-४-३)

ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः । 'प्रथमालिङ्गग्रहणं च' (वा १०३६) पूर्वं स्त्र्याख्यस्योपसर्जनत्वेऽपि इदानीं नदीत्वं वक्तव्यमित्यर्थः ।

'घुमास्था' इति ईत्त्वे वातप्रमीशब्द इति केचित् । तन्न । 'ईत्त्वमवकारादौ' इति वार्तिकविरोधात् 'मीञ् हिंसायाम्' इति मीधातोः क्विपि तु वातप्रमीशब्दो निर्बाधः । **वक्ष्यमाणो यणिति** ॥ अमि पूर्वरूपं, शसि पूर्वसवर्णदीर्घं, ङौ सवर्णदीर्घं, च बाधित्वा परत्वात् 'एरनेकाचः' इति यण् । ईकारान्तधातुत्वादिति भावः । **प्रधीवदिति** ॥ प्रकृष्टं ध्यायतीति प्रधीः । 'ध्यायतेस्सम्प्रसारणञ्च' इति क्विपि यकारस्य सम्प्रसारणमिकारः । 'सम्प्रसारणाच्च' इति पूर्वरूपम् । 'हलः' इति दीर्घः । अस्य च ईकारान्तधातुत्वात् अमि शसि ङौ च 'एरनेकाचः' इति यणादेशः । **बह्वयः इति** ॥ 'बह्वादिभ्यश्च' इति ङीप् । **श्रेयस्यः इति** ॥ अतिप्रशस्ताः इत्यर्थः । 'द्विवचनविभज्योपपदे' इति ईयसुन् । 'प्रशस्यस्य श्रः' इति श्रः । 'उगितश्च' इति ङीप् । **बहुश्रेयसीति** ॥ 'स्त्रियाः पुंवत्' इति पुंवत्त्वम् । 'गोस्त्रियोः' इति ह्रस्वस्तु न । 'ईयसो बहुव्रीहेर्नेति वाच्यम्' इति तन्निषेधात् । बहुश्रेयसी स् इति स्थिते प्रक्रियां दर्शयति । **दीर्घङ्यन्तत्वादिति** ॥ ननु श्रेयसीशब्द एव ङ्यन्तः । प्रत्ययग्रहणे यस्मात् स विहितस्तदादेरेव ग्रहणात् । नच 'स्त्रीप्रत्यये न तदादिनियमः' इति निषेधान्नेह तदादिनियम इति वाच्यम् । अनुपसर्जन एव स्त्रीप्रत्यये हि न तदादिनियमः इति प्रतिषेधः । इहतूपसर्जनत्वात्तदादिनियमोऽस्त्येवेति चेदस्तु श्रेयसीशब्दस्यैव ङ्यन्तत्वं, नतु बहुश्रेयसीशब्दस्य । तथाच हल्ङ्यादिलोपोऽत्र निर्बाधः । सोः ङ्यन्तात् श्रेयसीशब्दात्परत्वस्य अनपायात् । नहि हल्ङ्याब्भ्य इति विहितविशेषणम् । प्रमाणाभावात् । या सा का इत्यादावव्याप्तेश्च । तत्र सोष्टाबन्ताद्विहितत्वाभावात् । यत्तत्किमिति हलन्तेभ्यस्सुबुत्पत्तौ त्यदाद्यत्वे सत्येव टापः प्रवृत्तेः । नच तत्र हलन्ताद्विहितत्वेन निर्वाहइशङ्क्यः । यः सः कः इत्यादावतिव्याप्तेश्च । कर्ता सखा इत्यादावव्याप्तेश्चेत्यास्तां तावत् । 'दीर्घाज्जसि च' इति पूर्वसवर्णदीर्घनिषेधे यणि बहुश्रेयस्यौ । बहुश्रेयस्यः । हे बहुश्रेयसी स् इति स्थिते नदीकार्ये वक्ष्यन् नदीसंज्ञामाह । **यूस्त्र्याख्यौ नदी** ॥ ईश्च ऊश्च यू । पूर्वसवर्णदीर्घः । 'दीर्घाज्जसि च' इति निषेधाभावश्छान्दसः । व्याख्यानाद्दीर्घयोरेव ग्रहणम् । स्त्रियमाचक्षाते स्त्र्याख्यौ । शब्दावित्यर्थाल्लभ्यते । यू इति तद्विशेषणम् । तदन्तविधिः । स्त्रियामित्येव सिद्धे आख्याग्रहणं नित्यस्त्रीलिङ्गलाभार्थम् । द्वित्वे नदीत्येकवचनं छान्दसम् । तदाह । **ईदूदन्तावित्यादिना** ॥ यू किम् । मात्रे । 'आण्नद्याः' इति न भवति । स्त्रीलिङ्गाविति

२६७। अम्बार्थनद्योर्ह्रस्वः। (७-३-१०७)

अम्बार्थानां नद्यन्तानां च ह्रस्वः स्यात्सम्बुद्धौ। हे बहुश्रेयसि। शसि बहुश्रेयसीन्।

२६८। आण्नद्याः। (७-३-११२)

नद्यन्तात्परेषां ङितामाडागमः स्यात्।

२६९। आटश्च। (६-१-९०)

आटोऽचि परे वृद्धिरेकादेशः स्यात्। बहुश्रेयस्यै। बहुश्रेयस्याः। बहुश्रेयस्याः। नद्यन्तात्परत्वान्नुट्। बहुश्रेयसीनाम्।

किम्। वातप्रम्ये। निन्येति किम्। ग्रामण्ये। ननु प्रकृते बहुश्रेयसीशब्दस्य पुल्लिङ्गत्वात् कथं नदीसंज्ञेत्यत आह। 'प्रथमलिङ्गग्रहणञ्च' वार्तिकमेतत्। प्रथमस्य समासादिवृत्तिप्रवृत्तेः पूर्वं प्रवृत्तस्य स्त्रीलिङ्गस्य 'यू स्त्र्याख्यौ' इत्यत्र ग्रहणं कर्तव्यमित्यर्थः। नन्वेवं सति समासादिवृत्त्यभावे गौर्यादिशब्दानां नदीत्वं न स्यादित्याशङ्क्य अपिशब्दमध्याहृत्य व्याचष्टे। **पूर्वमित्यादिना**॥ समासादिवृत्तिप्रवृत्तेः पूर्वं स्त्रीलिङ्गस्य सतः वृत्तिदशायामुपसर्जनतया स्त्रीलिङ्गत्वाभावेऽपि नदीत्वं वक्तव्यमिति वार्तिकार्थ इति भावः। **अम्बार्थनद्योर्ह्रस्वः**॥ **अम्बार्थानामिति**॥ अम्बापर्यायाणामित्यर्थः। **नद्यन्तानामिति**॥ अङ्गाधिकारस्थत्वात्तदन्तविधिः। तुल्यन्यायत्वादम्बार्थानामित्यत्रापि तदन्तविधिर्बोध्यः। **सम्बुद्धाविति**॥ 'सम्बुद्धौ च' इत्यतस्तदनुवृत्तेरिति भावः। अम्बागौर्यादिशब्देषु नदीत्वन्तु व्यपदेशिवद्भावेन तदन्तत्वात ज्ञेयम्। **हे बहुश्रेयसि इति**॥ ह्रस्वे सति 'एङ् ह्रस्वात्' इति सम्बुद्धिलोपः। ह्रस्वे गुणस्तु न। प्रक्रियालाघवाय 'अम्बार्थनद्योर्ह्रस्वः' इत्यनुक्त्वा, अम्बार्थनद्योर्गुणः, इति वाच्ये ह्रस्वविधिसामर्थ्यादिति स्पष्टं भाष्ये। बहुश्रेयस्यौ। बहुश्रेयस्यः 'दीर्घाज्जसि च' इति पूर्वसवर्णदीर्घनिषेधे यण्। अमि पूर्वः। बहुश्रेयसीम्। बहुश्रेयस्यौ। **बहुश्रेयसीन् इति**॥ पूर्वसवर्णदीर्घे सति 'तस्माच्छसः' इति नत्वमिति भावः। बहुश्रेयस्या। अधित्वान्नाभावो न, किन्तु यणादेशः। बहुश्रेयसीभ्याम्। बहुश्रेयसीभिः। बहुश्रेसी ए इति स्थिते घित्वाभावान्न तत्कार्यम्। याणि बहुश्रेयस्ये इति प्राप्ते। **आण्नद्याः**॥ अङ्गस्येत्यधिकृतं पञ्चम्या विपरिणम्यते। नद्या इति पञ्चम्यन्तेन विशेष्यते। तदन्तविधिः। 'घेर्ङिति' इत्यतः ङितीत्यनुवृत्तं षष्ठ्या विपरिणम्यते। तदाह। **नद्यन्तादित्यादिना**॥ ङित्वादाद्यवयवः। बहुश्रेयसी आ ए इति स्थिते। **आटश्च**॥ 'इको यणचि' इत्यतः अचीति 'वृद्धिरेचि' इत्यतः वृद्धिरिति चानुवर्तते। 'एकः पूर्वपरयोः' इति चाधिकृतम्। तदाह। **आटोऽचीत्यादिना। बहुश्रेयस्यै इति**॥ बहुश्रेयसी आ ए इति स्थिते 'आटश्च' इति वृद्धौ यणादेशे च रूपमिति भावः। यद्यपि 'वृद्धिरेचि' इत्येव सिद्धम्। तथापि ऐक्षत इत्यार्थम् 'आटश्च' इति सूत्रम्। इहापि न्याय्यत्वादुपन्यस्तम्। **बहुश्रेयस्याः इति**॥

२७०। ङेराम्नद्याम्नीभ्यः। (७-३-११६)

नद्यन्तादाबन्तान्नीशब्दाच्च ङेराम् स्यात्। इह परत्वादाटा नुट् बाध्यते। बहुश्रेयस्याम्। शेषमीप्रत्ययान्तवातप्रमीवत्। अङन्यन्तत्वान्न सुलोपः। अतिलक्ष्मीः। शेषं बहुश्रेयसीवत्। कुमारीमिच्छन्कुमारीवाचरन्वा ब्राह्मणः कुमारी। क्यजन्तादाचारकिबन्ताद्वा कर्तरि क्विप्। 'हल्ङ्याप्—' (सू २५२) इति सुलोपः।

ङसिङसोर्बहुश्रेयसी आ अस् इति स्थिते 'आटश्च' इति वृद्धौ आकारे यणि रूपमिति भावः। अत्रापि सवर्णदीर्घेण सिद्धम्। न्याय्यत्वात् 'आटश्च' इति वृद्धिः। **नद्यन्तात्परत्वादिति॥** श्रेयसीशब्दस्य ईकारान्तनित्यस्त्रीलिङ्गतया नदीत्वेन बहुश्रेयसीशब्दस्य नद्यन्तत्वादिति भावः। बहुश्रेयसी इ इति स्थिते 'अच्च घेः' इति 'इदुद्भ्याम्' इति च न भवति। अधित्वात् सवर्णदीर्घे प्राप्ते। **ङेराम्नद्याम्नीभ्यः॥** आङ्गत्वात् प्रत्ययग्रहणपरिभाषया च तदन्तविधिं अभिप्रेत्य आह। **नद्यन्तादित्यादिना॥** ङेरिति सप्तम्येकवचनम्। व्याख्यानात्। नन्वामि कृते 'ह्रस्वनद्यापः' इति नुटि 'यदागमाः' इति न्यायेन नामोऽप्याम्ग्रहणेन ग्रहणात् 'आण्नद्याः' इति आडागमस्स्यादित्याशङ्क्य आह। **इह परत्वादिति॥** न च कृतेऽप्याडागमे नुट् किन्न स्यादिति वाच्यम्। 'विप्रतिषेधेन यद्बाधितं तद्बाधितमेव' इति न्यायादिति भावः। **शेषमीप्रत्ययान्तेति॥** वातप्रमीशब्दस्यापि ईवर्णान्तधातुत्वाभावेन अमि शसि ङौ च 'एरनेकाचः' इति यणः प्राप्त्यभावादिति भावः। 'लक्षेर्मुट् च' इति लक्षधातोरीप्रत्यये तस्य मुटि च लक्ष्मीशब्दः। लक्ष्मीमतिक्रान्त इति विग्रहे 'अत्यादयः क्रान्ताद्यर्थे' इति समास इति भावः। अस्त्रीप्रत्ययान्तत्वान्नोपसर्जनह्रस्वः। **अङन्यन्तत्वादिति॥** औणादिकप्रत्ययान्तत्वादिति भावः। **शेषं बहुश्रेयसीवदिति॥** 'प्रथमलिङ्गग्रहणञ्च' इति नदीत्वादिति भावः। अथ धातुत्वमापन्ने कुमारीशब्दे पुल्लिङ्गे बहुश्रेयसीशब्दाद्वैलक्षण्यं दर्शयितुमाह। **कुमारीमिच्छन्नित्यादिना। क्यजन्तादिति॥** कुमारीमात्मनः इच्छतीत्यर्थे 'सुप आत्मनः क्यच्' इति क्यच्। कचाविति। 'सनाद्यन्ताः' इति क्यजन्तस्य धातुत्वात् तदवयवसुपः अमः 'सुपो धातुप्रातिपदिकयोः' इति लुक्। ततः 'क्विप् च' इति कर्तरि क्विप्। कपाविति। इकार उच्चारणार्थः। अतो लोपः, 'लोपो व्योः' इति यलोपः। 'वेरपृक्तस्य' इति वलोपः। कुमारी इति रूपम्। **आचारकिबन्तादिति॥** कुमारीवाचरतीत्यर्थे 'सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः' इति क्विप्। कपाविति। 'वेरपृक्तस्य' इति वलोपः। 'सनाद्यन्ताः' इति धातुत्वात् कर्तरि क्विप्। तस्य च पूर्ववत् कृत्त्वलोपः। कुमारीति रूपम्। नच क्विबर्थे प्रति कुमारीशब्दस्य उपसर्जनत्वात् 'गोस्त्रियोः' इति ह्रस्वशङ्क्यः। 'गोस्त्रियोः' इत्यत्र शास्त्रीयोपसर्जनस्यैव ग्रहणात्। 'कृत्रिमाकृत्रिमयोः कृत्रिमस्यैव ग्रहणात्'। **हल्ङ्यांबिति सुलोपः इति॥** नच क्यजन्ते कथं सोर्लोपः। पूर्वस्माद्विधावल्लोपस्य स्थानिवद्भावादिति वाच्यम्। 'क्वौ लुप्तन्न स्थानिवत्' इति निषेधादिति भावः। कुमारी

२७१। अचि श्नुधातुभ्रुवां य्वोरियङुवङौ। (६-४-७७)

श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तस्य धातोः 'भ्रू' इत्यस्य चाङ्गस्येयङुवङौ स्तोऽजादौ प्रत्यये परे। 'ङिच्च' (सू ४३) इत्यन्तादेशः। आन्तरतम्यादेरियङ्। ओरुवङ्। इतीयङि प्राप्ते।

२७२। एरनेकाचोऽसंयोगपूर्वस्य। (६-४-८२)

धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ प्रत्यये परे। इति यण्। कुमार्यौ। कुमार्यः।

औ इति स्थिते 'इको यणचि' इति यणपवादमियङमाशङ्कितुमाह। **अचि श्नु॥** इश्च उश्च यू तयोः य्वोः इवर्णोवर्णयोरित्यर्थः। श्नुश्च धातुश्च भ्रूश्चेति द्वन्द्वः। प्रत्ययग्रहणपरिभाषया श्नुप्रत्ययान्तं विवक्षितम्। य्वोरिति धातोरेव विशेषणम्। तदन्तविधिः। श्नुभ्रुवोस्तु नित्यमुवर्णान्तत्वान्न तद्विशेषणम्। इवर्णान्तत्वन्तु असंभवान्न तद्विशेषणम्। 'सम्भवव्यभिचाराभ्यां स्याद्विशेषणमर्थवत्' इति न्यायात्। अङ्गस्येत्यधिकृतम्। ततश्च प्रत्यये परत इति लभ्यते। अर्चीति तद्विशेषणम्। तदादिविधिः। तदाह। **श्नुप्रत्ययान्तस्येत्यादिना॥** य्वोः किम्। चक्रतुः। अर्चीति किम्। आप्नुयात्। इयङुवङ् इत्यनयोरनेकाल्त्वात् सर्वादेशत्वमाशङ्क्य आह। **ङिच्चेत्यन्तादेशः इति॥** नच 'श्नुधातुभ्रुवां इवर्णोवर्णयोः' इत्येव व्याख्यायतां, ङित्त्वञ्च न क्रियतामिति वाच्यम्। एवं सति क्षिपति इत्यादावतिव्याप्तेः। नच अजादिप्रत्यये परत इत्यनेन तन्निरासः शङ्क्यः। अङ्गाक्षिप्तप्रत्ययपरकत्वस्याङ्गविशेषणताया एवोचितत्वादित्यलम्। **आन्तरतम्यादिति॥** तालुस्थानिकस्य इवर्णस्य तादृश एव इयङ्। ओष्ठ्यस्थानिकस्य उवर्णस्य तादृश एवोवङित्यर्थः। **इतीयङि प्राप्ते इति॥** कुमारी औ इत्यादाविति शेषः। **एरनेकाचः॥** 'इणो यण्' इत्यतः यणित्यनुवर्तते। एरिति षष्ठ्यन्तम्। इवर्णस्येत्यर्थः। पूर्वसूत्रे श्नुधातुभ्रुवाम्, इति द्वन्द्वनिर्देशेऽपि धातोरिति पृथक्कृत्य षष्ठ्यन्तमनुवर्तते। न तु श्नुभ्रुवावपि। तत्र इवर्णाभावात्। धातोरित्यनुवृत्तञ्चावर्तते। एकमवयवषष्ठ्यन्तम्। अन्यत् स्थानषष्ठ्यन्तम्। एरिति च धातोरिति षष्ठ्यन्तस्य विशेषणम्। तदन्तविधिः। इवर्णान्तधातोरित्यर्थः। अवयवषष्ठ्यन्तकृतधातोरित्येतत् असंयोगपूर्वस्येत्यत्र संयोगांशे अन्वेति। धात्ववयवसंयोगः पूर्वो यस्मात् स धात्ववयवसंयोगपूर्वः तद्भिन्नः असंयोगपूर्वः तस्येति इवर्णविशेषणम्। अङ्गस्येत्यधिकृतं स्थानषष्ठ्यन्तधातुना विशेष्यते। तदन्तविधिः। अनेकः अच् यस्य तस्य 'अनेकाचः' इति अङ्गान्वयि। 'अचि श्नुधातुभ्रुवाम्' इत्यतोऽचीत्यनुवर्तते। तच्चाङ्गाक्षिप्तस्य प्रत्ययस्य विशेषणम्। तदादिविधिः। तदाह। **धात्ववयवेत्यादिना॥** हरिं, हरीन्, इत्यादौ यञ्निवृत्त्यर्थं धातोरित्यङ्गविशेषणम्। अन्यथा प्रध्यमित्यादाविव पूर्वरूपादीन् बाधित्वा

हे कुमारि । अमि शसि च कुमार्यम् । कुमार्यः । कुमार्यै । कुमार्याः । कुमार्याः । कुमारीणाम् । कुमार्याम् । कुमार्योः । प्रधीः । प्रध्यौ । प्रध्यः । प्रध्यम् । प्रध्यः । उन्नयतीत्युन्नीः । धातुना संयोगस्य विशेषणादिह स्यादेव यण् । उन्न्यौ । उन्न्यः । हे उन्नीः । उन्न्यम् । ङेराम् उन्न्याम् । एवं ग्रामणीः । 'अनेकाचः' किम् । नीः । नियौ । नियः । अमि शसि च

यण् स्यात् । धात्ववयवेति संयोगविशेषणस्य तु प्रयोजनम् । उन्नीशब्दनिरूपणावसरे मूल एव स्फुटीभविष्यति । अनेकाचोऽसंयोगादित्येव सुवचम् । य्वोरित्यनुवर्तते । धात्ववयवसंयोगात् परौ न भवतः यौ इवर्णोवर्णौ तदन्तस्येत्यर्थलाभः । 'ओस्सुपि' इति तु नियमार्थः । उवर्णस्य सुप्येव यणिति । ततश्च लुलुवतुरित्यादौ त्वतिप्रसङ्गाभाव इत्यलम् । **इति यणिति** ॥ कुमार्यौ, कुमार्यः, इत्यत्र 'एरनेकाचः' इति यडपवादो यणित्यर्थः । नन्वन्तर्वर्तिसुपा अमा क्यजन्तस्य कुमारीशब्दस्य पदत्वात् 'इकोऽसवर्णे' इति प्रकृतिभावस्स्यात् । अल्लोपस्य स्थानिवद्भावेऽपि तमाश्रित्यैव स दुर्वार इति चेन्मैवम् । 'नः क्ये' इति क्यचि नान्तस्यैव पदत्वनियमात् । **अमि शसि चेति** ॥ अमि पूर्वरूपं शसि पूर्वसवर्णदीर्घश्च बाधित्वा इयङि प्राप्ते तदपवादे 'एरनेकाचः' इति यणि अमि कुमार्यम्, शसि कुमार्यः, इति रूपम् । 'तस्माच्छसः' इति नत्वन्तु न । कृतपूर्वसवर्णदीर्घात् परत्वाभावात् । तथाच बहुश्रेयसीशब्दापेक्षया अमशसोरेव रूपविशेष इति भावः । **प्रधीरिति** ॥ प्रध्यायतीति प्रधीः । 'ध्यायतेस्सम्प्रसारणञ्च' इति क्विप् । यकारस्य सम्प्रसारणमिकारः । 'सम्प्रसारणाच्च' इति पूर्वरूपम् । 'हलः' इति दीर्घः । कृदन्तत्वेन प्रातिपदिकत्वात् सुबुत्पत्तिः । अङ्यन्तत्वान्न सुलोपः । अजादौ सर्वत्र 'एरनेकाचः' इति यणेव । अस्त्रीत्वान्नदीकार्यं न । हे प्रधीः–प्रध्यौ–प्रध्यः । प्रध्यं–प्रध्यः । प्रध्या । प्रध्ये । प्रध्योः । प्रधि । प्रकृष्टा धीर्यस्य सः इति विग्रहे तु, धीशब्दस्य नित्यस्त्रीत्वात् 'प्रथमलिङ्गग्रहणं च' इति नदीत्वान्नदीकार्यम् । अङ्यन्तत्वान्न सुलोपः । प्रधीः । शेषमुदाहृताक्विबन्तकुमारीशब्दवत् । हे प्रधीः–प्रध्यौ–प्रध्यः । प्रध्यम्–प्रध्यौ–प्रध्यः । प्रध्या । प्रद्ध्यै । प्रद्ध्योः । प्रधीनाम् । प्रध्याम् । **उन्नीरिति** ॥ 'सत्सूद्विष' इत्यादिना उत्पूर्वान्नीधातोः क्विप् । सुबुत्पत्तिः । अङ्यन्तत्वान्न सुलोपः । अजादौ तु प्रत्यये परे 'एरनेकाचः' इति यण् । नन्वत्र इवर्णस्य संयोगपूर्वकत्वात् कथमत्र यणित्यत आह । **धातुनेति** ॥ धात्ववयवसंयोगपूर्वस्यैव यण् पर्युदस्यते । नचात्र संयोगो धात्ववयव इति भावः । **हे उन्नीरिति** ॥ अस्त्रीत्वादनदीत्वात् 'अम्बार्थ' इत्यादिना नदीकार्यं नेति भावः । **उन्न्यमिति** ॥ पूर्वरूपापवादो यणिति भावः । शसादौ उन्न्यः । उन्न्या । उन्न्ये । उन्न्यः । उन्न्योः । **ङेरामिति** ॥ नदीत्वाभावेऽपि 'ङेराम्' इति सूत्रे नीशब्दस्य पृथक्करणादाम् । आङ्त्वेन नीशब्दान्तादपि भवतीति भावः । **एवं ग्रामणीरिति** ॥ ग्रामं नयति नियच्छतीति ग्रामणीः । 'अग्रग्रामाभ्यां नयतेर्णो वाच्यः' इति णत्वम् । **अनेकाचः किमिति** ॥ 'एरनेकाचः' इत्यतेति शेषः । **नीरिति** ॥ नीधातोः केवलात् पूर्ववत् क्विप् । अनेकाच्त्वाभावान्न यण् । किन्तु 'अचि श्नुधातु' इति इयङ् । एतावदेव उन्नी-

परत्वादियङ्। नियम्। नियः। ङेराम्। नियाम्। 'असंयोगपूर्वस्य' किम्। सुश्रियौ। यवक्रियौ। 'गतिकारकेतरपूर्वपदस्य यण् नेष्यते' (वा ५०३४)। शुद्धधियौ। परमधियौ। कथं तर्हि 'दुर्धियः' 'वृश्चिकभियः' इत्यादि। उच्यते। 'दुःस्थिता धीर्येषाम्' इति विग्रहे 'दुर्' इत्यस्य धीशब्दं प्रति गतित्वमेव नास्ति। यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञाः। वृश्चिकशब्दस्य बुद्धिकृतमपादानत्वं नेह विवक्षितम्। वृश्चिकसम्बन्धिनी भीर्वृश्चिकभीरित्युत्तरपदलोपो वा।

शब्दादस्य वैलक्षण्यमिति भावः। **सुश्रियाविति**॥ 'श्रिञ् सेवायाम्'। 'क्विब्वचि' इत्यादिना क्विप् प्रकृतेर्दीर्घश्च। सु श्रयतीति शोभना श्रीरस्येति वा सुश्रीः। ततः अजादिप्रत्यये यण् न भवति। इवर्णस्य धात्ववयवसंयोगपूर्वकत्वादिति भावः। **यवक्रियाविति**॥ यवान् क्रीणातीति यवक्रीः। क्रीञ्धातोः क्विपि रूपम्। अत्रापि धात्ववयवसंयोगपूर्वकत्वान्न यणिति भावः। 'एरनेकाचः' इतिसूत्रे 'गतिकारकपूर्वस्यैवेष्यते' इति वार्तिकं पठितम्। तत्तात्पर्यतः संगृह्णाति। **गतिकारकेतरेति**॥ यथाश्रुते तु उदाहृतक्विबन्तकुमारीशब्दे यण् न स्यात्। **शुद्धधियाविति**॥ शुद्धा धीर्यस्येति विग्रहः। अत्र शुद्धशब्दस्य गतिकारकेतरत्वात् तत्पूर्वकस्य न यणिति भावः। शुद्धं ब्रह्म ध्यायतीति विग्रहे तु स्यादेव यण्। शुद्धध्यौ, इत्यादि। **कथं तर्हीति**॥ यदि गतिकारकेतरपूर्वस्यैव यण् पर्युदस्यते, गतिकारकपूर्वस्य तु अवश्यं यण्, तदा दुर्धियः, वृश्चिकभियः, इत्यादि कथमित्यन्वयः। आदिना दुर्धियौ, वृश्चिकभियौ, इत्यादिसङ्ग्रहः। दुस्थिता धीर्येषामिति विग्रहः। 'प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः' इति बहुव्रीहिः। पूर्वपदे उत्तरखण्डस्य लोपश्च। वृश्चिकात् भीरिति विग्रहः। अत्र दुरो गतित्वात् वृश्चिकस्यापादानत्वाच्च गतिकारकपूर्वत्वात् पर्युदासाभावे सति इयङ्वादोऽत्र यण् दुर्धीः इत्याक्षेपः। **उच्यते इति**॥ परिहार इति शेषः। **गतित्वमेव नास्तीति**॥ 'उपसर्गाः क्रियायोगे, गतिश्च' इति प्रादीनां क्रियान्वये गत्युपसर्गसंज्ञे विहिते। धीशब्दश्च बुद्धिगुणवाची, न तु क्रियावाची। अतो न तं प्रति दुरो गतित्वमिति गतिपूर्वकत्वाभावात् नात्र यण्। किन्तु इयङ्वेत्यर्थः। ननु लुप्तस्य स्थिताशब्दस्य क्रियानिमित्तकत्वात् तं प्रति दुरो गतित्वमस्त्येवेत्यत आह। **यत्क्रियेति**॥ यया क्रियया युक्ताः प्रादयः तं प्रत्येव तद्वाचकशब्दं प्रत्येव गत्युपसर्गसंज्ञका इत्यर्थः। नचैवमप्यत्र स्थिताशब्दं लुप्तं प्रति प्रवृत्तं दुरो गतित्वमादाय दुर्धीशब्दस्य गतिपूर्वकत्वमस्त्येवेति वाच्यम्। 'यत्क्रियायुक्ताः प्रादयः तत्क्रियावाचकं प्रत्येव गत्युपसर्गत्वम्।' तथाविधक्रियावाचकस्यैव च गत्युपसर्गकार्यमित्यर्थस्य विवक्षितत्वात् 'यत्क्रियायुक्ताः' इति च प्रत्यासत्तिन्यायलभ्यम्। **वृश्चिकेति**॥ वृश्चिकशब्दस्यापादानत्वं नेह विवक्षितमित्यन्वयः। कुत इत्यत आह। **बुद्धिकृतमिति**॥ आरोपितमित्यर्थः। अपादानत्वं हि विश्लेषावधि-

---

१. इदं च 'गतिकारकपूर्वस्यैवेष्यते' इति भाष्यफलितार्थकथनम्।

२७३ । न भूसुधियोः । (६-४-८५)

एतयोर्यण् न स्यादचि सुपि । सुधियौ । सुधियः इत्यादि । सखायमिच्छति सखीयति । ततः किप् । अल्लोपयलोपौ । अल्लोपस्य स्थानिवत्त्वाद्यणि प्राप्ते 'कौ लुप्तं न स्थानिवत्' (वा ४३१) । एकदेशविकृतस्यानन्यतयानङ्-

---

त्वम् । नह्यत्र वृक्षात् पर्ण पततीत्यत्र पर्णविश्लेषे वृक्षस्येव भयविश्लेषे वृश्चिकस्य अवधित्वमस्ति । वृक्षे पर्णवत् वृश्चिके संश्लेषाभावात् । विश्लेषस्य संश्लेषपूर्वकत्वात् । उक्तञ्च भाष्ये "विवक्षातः कारकाणि भवन्ति" इति । प्रकृते च वृश्चिके अपादानत्वारोपस्य वक्तृधीनत्वात् इह च तदनारोपात् सम्बन्धमात्रविवक्षया षष्ठीमाश्रित्य वृश्चिकस्य भीरिति षष्ठीसमासे वृश्चिकभीशब्दस्य व्युत्पत्तिराश्रीयते । ततश्च कारकेतरपूर्वकत्वात् नात्र यणिति भावः । नच वृश्चिकाद्भीरित्यादौ बुद्धिकृतमेवापादानत्वमादाय पञ्चम्युपपत्तेः 'भीत्रार्थानाम्' इति व्यर्थमिति वाच्यम् । तस्य सूत्रस्य भाष्ये प्रत्याख्यातत्वेन इष्टापत्तेरित्यलम् । परिहारान्तरमाह । **वृश्चिकसम्बन्धिनीति ॥ उत्तरपदेति ॥** वृश्चिकसम्बन्धिनीति पूर्वपदे उत्तरखण्डस्य सम्बन्धिनीशब्दस्य लोपः । शाकपार्थिवादित्वादित्यर्थः । सुष्ठु ध्यायतीति सु शोभना धीर्यस्येति वा विग्रहे सुधीशब्दः । अत्र अजादौ परे 'एरनेकाचः' इति प्राप्ते । **न भूसुधियोः** ॥ 'इणो यण्' इत्यतः यणिति 'ओः सुपि' इत्यतस्सुपीति 'इको यणचि' इत्यतः अचीति चानुवर्तते । तदाह । **एतयोरित्यादिना** ॥ एतयोरिति सूत्रोक्तभूसुधियोः परामर्शः । **अचीति** ॥ अजादावित्यर्थः । यणि प्रतिषिद्धे इयङमभिप्रेत्य आह । **सुधियाविति** ॥ आदिना अजादिसर्वसङ्ग्रहः । प्रधीवद्रूपाणि । इयङेव विशेषः । अचीति वस्तुस्थितिः । अनजादौ यणः प्रसक्त्यभावात् । सुपीति किम् । सुधीभिरुपास्यः सुद्युपास्यः । 'इको यणचि' इति तु भवत्येव । "अनन्तरस्य" इति न्यायेन 'एरनेकाचः, ओः सुपि' इति च विहितयण एव प्रतिषेधात् । वस्तुतस्तु सुपीति चानुवर्तनीयम् । 'एरनेकाचः' इति यणो ह्यत्र न प्रसक्तिः । तस्य अजादिप्रत्यये विधानात् । उपास्यशब्दस्य प्रत्ययत्वाभावात् । सुधिया उपास्यः सुद्युपास्यः, इत्यत्र तु अन्तर्वर्तिनीं विभक्तिमाश्रित्य 'एरनेकाचः' इति यणो 'न भूसुधियोः' इति प्रतिषेधेऽपि उपास्यः इत्यचमाश्रित्य 'इको यणचि' इति भवत्येव । 'अनन्तरस्य' इति न्यायेन तस्यात्र प्रतिषेधाभावादित्यलम् । **सखीयतीति** ॥ 'सुप आत्मनः' इति सखीशब्दात् क्यचि कृते 'अकृत्सार्वधातुकयोः' इति दीर्घे सखीयतीति रूपम् । **ततः किबिति** ॥ तस्मात् सखीशब्दात् 'सनाद्यन्ताः' इति धातुसंज्ञकात् 'क्विप्च' इतिसूत्रेण किबित्यर्थः । **अल्लोपयलोपाविति** ॥ 'अतो लोपः' इति यकारादकारस्य लोपः 'लोपो व्योः' इति यलोप इत्यर्थः । यलोपे कर्तव्ये अल्लोपस्तु न स्थानिवत् । 'न पदान्त' इति यलोपे स्थानिवत्त्वनिषेधात् । **स्थानिवत्त्वादिति** ॥ 'अचः परस्मिन्' इत्यनेनेति शेषः । **यणि प्राप्ते इति** ॥ खकारादीकारस्य 'इको यणचि' इत्यनेनेति शेषः । नचान्तर्वर्तिविभक्तिसुपा पदान्तत्वात् 'न पदान्त' इति निषेधशङ्क्यः । 'नः क्ये' इति क्यचि नान्तस्यैव हि पदत्वात् । **कौ लुप्तमिति** ॥ न पदान्तसूत्रे 'किलुगुपधात्वचङ्परनिर्ह्रस्वकुत्वेष्वपसङ्ख्यानम्' इति

णित्त्वे। सखा। सखायौ। सखायः। हे सखीः। अमि पूर्वरूपात्परत्वाद्यणि प्राप्ते। ततोऽपि परत्वात् 'सख्युरसंबुद्धौ' (सू २५३) इति प्रवर्तते। सखायम्। सखायौ। शसि यण्। सख्यः। सह खेन वर्तत इति सखः। तमिच्छतीति सखीः। सुखमिच्छतीति सुखीः। सुतमिच्छतीति सुतीः। सख्यौ। सुख्यौ। सुत्यौ। 'ख्यत्यात्' २५५ इति दीर्घस्यापि ग्रहणादुकारः। सख्युः। सुख्युः। सुत्युः। लूनमिच्छतीति लूनीः। क्षाममिच्छतीति क्षामीः। प्रस्तीममिच्छतीति प्रस्तीमीः। एषां ङसिङसोर्यण्। नत्वमत्वयोरसिद्धत्वात् 'ख्यत्यात्—' (सू २५५) इत्युत्त्वम्। लून्युः। क्षाम्युः। प्रस्तीम्युः।

वार्तिके क्किलुगित्यंशस्यायमनुवादः। तत्र लुगिति लोपो विवक्षित इति तत्रैव भाष्ये स्पष्टम्। लुप्तमिति भावे क्तः। क्किप्प्रत्ययपरको लोपः न स्थानिवदित्यर्थः। ततश्च खकारादीकारस्याच्परकत्वाभावात् न यणिति भावः। यद्यपि 'न पदान्त' इतिसूत्रे क्वौ लुप्तं न स्थानिवदिति निराकृत्य, क्वौ विधिं प्रति न स्थानिवदित्येव स्वीकृतम्। तथापि गोमत्यतेः क्किपि गोमानिति भाष्यात् क्वौ लुप्तन्न स्थानिवदित्यपि क्वचिदस्तीति शब्देन्दुशेखरे स्थितम्। ततश्च सखायमिच्छतीत्यर्थे सखी इति ईदन्तं रूपं स्थितम्। ततस्सुबुत्पत्तिः। **अनङ्णित्त्वे इति** ॥ 'अनङ् सौ, सख्युरसम्बुद्धौ' इत्युभाभ्यामिति शेषः। इदन्तसखिशब्दस्य विधीयमाने अनङ्णित्त्वे कथं सखीशब्दस्य ईदन्तस्य भवेतामित्यत आह। **एकदेशेति** ॥ **हे सखीरिति** ॥ अङ्यन्तत्वान्न सुलोपः। स्त्रीत्वाभावान्नदीत्वाभावात् नदीकार्यं न भवति। **यणि प्राप्ते इति** ॥ 'एरनेकाचः' इत्यनेनेति शेषः। **शसि यणिति** ॥ पूर्वसवर्णदीर्घापवादो यण्। कृतपूर्वसवर्णदीर्घत्वाभावान्नत्वं नेति भावः। सख्या। सख्ये। सख्युः। सख्योः। सख्यौ। **सह खेनेति** ॥ खमाकाशं खकारो वा। 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः। 'वोपसर्जनस्य' इति सभावः। **तमिच्छतीति** ॥ सखमात्मनः इच्छति इत्यर्थे 'सुप आत्मनः' इति क्यच्। 'क्यचि च' इतीत्त्वम्। 'सनाद्यन्ताः' इति धातुत्वात् क्किपि अल्लोपयलोपयोः सखीशब्दः। एवं सुखीशब्दः, सुतीशब्दश्च। **सखीरिति** ॥ अङ्यन्तत्वान्न सुलोपः। **सख्यावित्यादि** ॥ अजादौ 'एरनेकाचः' इति यणिति भावः। सख्यम्। सख्यः। सख्या। सख्ये। **दीर्घस्यापीति** ॥ एतदर्थमेव तत्र कृतयणा निर्देश इति भावः। सख्याम्। सख्यि। सुखीसुतीशब्दयोरप्येवम्। **लूनीरिति** ॥ 'लूञ् छेदने' क्तः। 'ल्वादिभ्यः' इति नत्वम्। क्यचि ईत्त्वम्। अङ्यन्तत्वान्न सुलोपः। 'क्षै क्षये' क्तः। 'आदेच उपदेशेऽशिति' इत्यात्त्वम्। 'क्षायो मः' इति मत्वम्। क्यजादि पूर्ववत्। **प्रस्तीमीरिति** ॥ 'स्त्यै, ष्ट्यै, शब्दसङ्घातयोः' क्तः। 'आदेचः' इत्यात्त्वम्। 'प्रस्त्योऽन्यतरस्याम्' इति मः। 'स्त्यः प्रपूर्वस्य' इति सम्प्रसारणम्। 'सम्प्रसारणाच्च' इति पूर्वरूपम्। 'हलः' इति दीर्घः। क्यजादि पूर्ववत्। सखी, सुतीत्यादिवद्रूपाणि। **ङसिङसोर्यणिति** ॥ 'एरनेकाचः' इत्यनेनेति शेषः। असिद्धत्वादित्यनन्तरं त्यात् परत्वादिति शेषः। **शुष्कीरिति** ॥ 'इक्दितौ धातुनिर्देशे, इति इतिचा निर्देशोऽयम्। शुष्कमात्मन इच्छतीत्यर्थे क्यजन्तात् शुष्कीयधातोः

शुष्कीयतेः क्विप् । शुष्कीः । पक्कीः । इयङ् । शुष्किय्यौ । शुष्कियः । ङसिङसोः शुष्कियः, इत्यादि ।

इति ईदन्ताः ।

॥ अथ उदन्तप्रकरणम् ॥

शम्भुर्हरिवत् । एवं विष्णुवायुभान्वादयः ।

२७४ । तृज्वत्क्रोष्टुः । (७-१-९५)

क्रोष्टुस्तृजन्तेन तुल्यं वर्तते, असम्बुद्धौ सर्वनामस्थाने परे । क्रोष्टुशब्दस्य स्थाने क्रोष्टृशब्दः प्रयोक्तव्य इत्यर्थः ।

क्विपि शुष्कीरिति रूपमित्यर्थः । अङ्यन्तत्वान्न सुलोपः। शुषधातोः क्तः शुष्कः । 'शुषः कः' इति कत्वम् । सखीसुतीत्यादिशब्दवत् शुष्कीशब्दः । शुष्कियावित्यादि । संयोगपूर्वत्वान्न यण् । किन्तु इयङिति विशेष इति भावः । **ङसिङसोः शुष्कियः इति** ॥ न च कत्वस्यासिद्धत्वात् ख्यत्यात् परत्वादुत्त्वं शङ्क्यम् । इयङादेशे सति कृतयणादेशत्वाभावात् इति भावः ॥

इति ईदन्तप्रकरणम् ।

अथ उदन्ताः निरूप्यन्ते । **शम्भुर्हरिवदिति** ॥ तत्र पूर्वसवर्णदीर्घः ऊकारः । गुणस्तु ओकारः । अव् इत्यादयोऽपि विशेषास्त्वान्तरतम्यात् सङ्गता इति भावः । 'क्रुश आह्वाने, रोदने च' इति धातोः "सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्" इति तुन्प्रत्यये 'त्रश्च' इति शस्य षकारे ष्टुत्वेन टकारे च क्रोष्टुशब्दः । क्रुशधातोः कर्तरि तृचि तु क्रोष्टृशब्दः। द्वावपि सृगालवाचिनौ । तयोरविशेषेण सर्वत्र प्रयोगे प्राप्ते विशेषं दर्शयितुमाह । **तृज्वत्क्रोष्टुः** ॥ प्रत्ययग्रहणपरिभाषया तृच् इति तृजन्तं गृह्यते । 'तेन तुल्यम्' इति तृतीयान्ताद्वतिः । 'इतोऽत् सर्वनामस्थाने' इत्यतस्सर्वनामस्थाने इति 'सख्युरसम्बुद्धौ' इत्यतोऽसम्बुद्धाविति चानुवर्तते । तदाह । **क्रोष्टुस्तृजन्तेनेत्यादिना** ॥ "कार्यरूपनिमित्तार्थशास्त्रतादात्म्यशब्दिताः । व्यपदेशश्च सप्तैतानतिदेशान् प्रचक्षते ॥" इति । तत्र प्राधान्यादिह तृजन्तरूपमेव अतिदिश्यते । तच्च न कर्तृ भर्तृ इत्यादितृजन्तरूपम् । किन्तु क्रोष्टृ इत्येव तृजन्तरूपं अतिदिश्यते । क्रुशधातोरुपस्थितत्वात्, अर्थत आन्तर्याच्च, इत्यभिप्रेत्य फलितमाह । **क्रोष्टुशब्दस्य स्थाने इति** ॥ निमित्तादीनामुदाहरणानि तु तत्र तत्र प्रदर्शयिष्यामः । क्रोष्टृ स् इति स्थिते

२७५। ऋतो ङिसर्वनामस्थानयोः। (७-३-११०)

ङौ सर्वनामस्थाने च परे ऋदन्ताङ्गस्य गुणः स्यात्, इति प्राप्ते।

२७६। ऋदुशनस्पुरुदंसोऽनेहसां च। (७-१-९४)

ऋदन्तानामुशनसादीनां चानङ्स्यादसम्बुद्धौ सौ परे।

२७७। अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहो-तृपोतृप्रशास्तॄणाम्। (६-४-११)

अबादीनामुपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे। नप्त्रादिग्रहणं व्युत्पत्तिपक्षे नियमार्थम्। उणादिनिष्पन्नानां तृन्तृजन्तानां चेद्भवति तर्हि नप्त्रादीनामेव। तेन पितृभ्रातृप्रभृतीनां न। उद्गातृशब्दस्य तु भवत्येव।

ऋतो ङि॥ 'ह्रस्वस्य गुणः' इत्यतो गुण इत्यनुवर्तते। अङ्गस्येत्यधिकृतम् ऋत इत्यनेन विशेष्यते। तदन्तविधिः। तदाह। **ङौ सर्वेत्यादिना॥ ऋदुशनस्॥** 'सख्युरसम्बुद्धौ' इत्यतः असम्बुद्धाविति 'अनङ् सौ' इत्यतः अनङिति चानुवर्तते। अङ्गस्येत्यधिकृतम् ऋदादिभिर्विशेष्यते। तदाह। **ऋदन्तानामित्यादिना॥** उशनसादिष्वपि तदन्तविधिर्बोध्यः। अनङि ङकार इत्, नकारादकार उच्चारणार्थः। 'ङिच्च' इत्यन्तादेशः। कोष्टन् स् इति स्थिते। **अप्तृन्॥** 'नोपधायाः' इत्यतः उपधाया इत्यनुवर्तते। 'सर्वनामस्थाने चासम्बुद्धौ' इति चकारवर्जमनुवर्तते। तदाह। **अबादीनामिति॥** अत्र अष्टाध्याय्यां तावत् 'तृन्' इतिसूत्रेण 'ण्वुल्तृचौ' इतिसूत्रेण च कर्तरि तृन्तृचौ विहितौ। तथा उणादिषु "शंसिक्षदादिभ्यस्संज्ञायाञ्चानिटौ" "बहुळमन्यत्रापि" इति सूत्राभ्यां तृन्तृचौ विधाय 'नप्तृ, नेष्टृ, त्वष्टृ, होतृ, पोतृ, भ्रातृ, जामातृ, पितृ, दुहितृ' इतिसूत्रेण नप्त्रादयो निपातिताः। ततश्च संज्ञाशब्दाः तृन्तृजन्ताः औणादिका इति स्थितिः। तत्र तृजन्तत्वादेव सिद्धे नप्त्रादिग्रहणं व्यर्थमित्यत आह। **नप्त्रादिग्रहणमिति॥** नियमशरीरमाह। **उणादीति॥ तेनेति॥** औणादिकेषु नप्त्रादिसप्तानामेव तृन्तृजन्तानां दीर्घ इति नियमेन तदितरेषां पितृभ्रात्रादीनां न दीर्घ इति भावः। नच प्रशास्तृशब्द औणादिको न भवतीति भ्रमितव्यम्। तस्यापि संज्ञाशब्दस्य शंसिक्षदादिगणप्रविष्टत्वेन औणादिकत्वात्। अत्र मूले व्युत्पत्तिपक्षे इत्युक्त्या अव्युत्पत्तिपक्षे नप्त्रादिसप्तानां तृन्तृजन्तत्वाभावादप्राप्तौ नप्त्रादिग्रहणमर्थवत्। तदितरपितृमात्रादिशब्दानां तु औणादिकानामव्युत्पन्नतया तृन्तृजन्तत्वाभावादेव न दीर्घ इति सूचितम्। **नन्वेवं सति** उद्गातृशब्दस्यापि संज्ञाशब्दस्य शंसिक्षदादित्वेन औणादिकत्वात् तस्य च नप्त्रादिसप्तस्वनन्तर्भावात् कथं दीर्घ इत्यत आह। **उद्गातृशब्दस्येति॥** 'ण्वुल्तृचौ' इतिसूत्रस्थभाष्ये तु अप्तृ इत्येवास्तु, तृन्तृचोर्ग्रहणम्मास्त्विति प्रपञ्चितम्। तृन्निति भाष्ये तु तृन्विधौ 'ऋत्विक्षु

'समर्थ—' (सू ६४७) सूत्रे 'उद्गातारः' इति भाष्यप्रयोगात् । क्रोष्टा । क्रोष्टारौ । क्रोष्टारः । क्रोष्टारम् । क्रोष्टारौ । क्रोष्टून् ।

२७८ । विभाषा तृतीयादिष्वचि । (७-१-९७)

अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत् । क्रोष्ट्रा । क्रोष्ट्रे ।

२७९ । ऋत उत् । (६-१-१११)

ऋदन्तान्ङसिङसोरति परे उकार एकादेशः स्यात् । रपरत्वम् ।

चानुपसर्गस्य' इति वक्तव्यम् । होता । पोता । अनुपसर्गस्य किम् । प्रशास्ता । प्रतिहर्ता । औणादिकतृजन्त एवायम् । नयतेस्तृन् वक्तव्यः षुक्च । नेष्टा । त्विषेर्देवतायां तृन् वक्तव्यः । अकारश्चोपधायाः । अनिट्त्वञ्च । त्वष्टा । 'क्षतश्च तृन् वक्तव्यः' । क्षत्ता । इत्येवं होतृ, पोतृ, नेष्टृ, त्वष्टृ, क्षत्तृ शब्दाः तृन्नन्ता व्युत्पादिताः । तन्मते तु तेषां पञ्चानामिह ग्रहणं प्रपञ्चार्थम् । नप्तृशास्तृग्रहणमेव उक्तनियमार्थमित्यन्यत्र विस्तरः । **क्रोष्टेति** ॥ क्रोष्टन् स् इति स्थिते एकदेशविकृतस्यानन्यतया तृजन्तत्वाद्दीर्घः । हल्ङ्यादिना सुलोपः । नलोपः । यद्यपि 'सर्वनामस्थाने च' इत्येवात्र दीर्घस्सिद्ध्यति । तथापि परत्वादप्तृन्नित्येव दीर्घो न्याय्यः । **क्रोष्टाराविति** ॥ क्रोष्टु औ इति स्थिते । तृज्वद्भावे 'ऋतो ङि' इति गुणे अकारे रपरत्वे एकदेशविकृतस्यानन्यतया तृजन्तत्वाद्दीर्घे रूपम् । एवं क्रोष्टारः । क्रोष्टारम् । क्रोष्टारौ । हे क्रोष्टो । असंबुद्धावित्यनुवृत्तेर्न तृज्वद्भावः । शसि शंभुवद्रूपम् । **क्रोष्टूनिति** ॥ 'सर्वनामस्थाने' इत्यनुवृत्तेः न तृज्वद्भावः । क्रोष्टु आ इति स्थिते । **विभाषा तृतीयादिष्वचि** ॥ तृज्वत्क्रोष्टुरित्यनुवर्तते । अचीति तृतीयादिविभक्तिविशेषणम् । तदादिविधिः । तदाह । **अजादिष्विति । क्रोष्ट्रेति** ॥ तृज्वद्भावे कोष्ट्र आ इति स्थिते । ऋकारस्य यण् रेफः । एवं क्रोष्ट्रे इति । तृज्वद्भावाभावपक्षे क्रोष्टुना । क्रोष्टवे । शम्भुवत् । 'ङसिङसोस्तृज्वत्त्वे क्रोष्ट्र अस् इति स्थिते । **ऋत उत्** ॥ 'एङः पदान्तादति' 'ङसिङसोश्च' इत्यतः अतीति ङसिङसोरिति चानुवर्तते । ङसिङसोरित्यवयवषष्ठी अतीत्यत्रान्वेति । अङ्गस्येत्यधिकृतम् ऋत इत्यनेन विशेष्यते । तदन्तविधिः । तदाह । **ऋदन्तादित्यादिना** ॥ **रपरत्वमिति** ॥ ऋकारस्य अकारस्य च स्थाने प्राप्नुवतः उकारस्य ऋकारस्थानिकत्वानपायादिति भावः । उदिति तपरकरणं द्विमात्रनिवृत्त्यर्थम् । 'नच भाव्यमानोऽण् सवर्णान् गृह्णाति' इत्येव तन्निवृत्तिसिद्ध्यतीति वाच्यम् । तस्यानित्यत्वादिह द्विमात्रप्राप्तौ तन्निवृत्त्यर्थत्वात् । तदनित्यत्वन्तु अनेनैव तपरकरणेन ज्ञाप्यते । ततश्च 'यवलपरे यवला वा' इति मकारस्य अनुनासिका एव भवन्तीति 'च्छ्वोः' इतिसूत्रे कैयटः । यत्तु तपरत्वं 'ढ्रलोपः' इति दीर्घनिवृत्त्यर्थमिति । तन्न । 'उरण्रपरः' इतिसूत्रे 'ऊ रपरः' इति भाष्यप्रयोगविरोधात् । "सुपत्त्रवाहिता बाणा ज्वलिता इव पन्नगाः । नैर्ऋतोरस्यभाव्यन्त सवितू रश्मयो यथा ॥" इति रामायणप्रयोग-

२८०। रात्सस्य। (८-२-२४)

रेफात्संयोगान्तस्य सस्यैव लोपः, नान्यस्य, इति रेफस्य विसर्गः। क्रोष्टुः। आमि परत्वात्तृज्वद्भावे प्राप्ते 'नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन' (वा ४३७४)। क्रोष्टूनाम्। क्रोष्टरि। क्रोष्ट्रोः। पक्षे हलादौ च शम्भुवत्।

इत्युदन्ताः।

॥ अथ ऊदन्तप्रकरणम् ॥

हूहूः। हूह्वौ। हूह्वः। हूहूम्। हूह्वौ। हूहून् इत्यादि। अतिचमूशब्दे तु

विरोधाच्चेत्यलम्। क्रोष्टुर् स् इति स्थिते। **रात्सस्य** ॥ 'संयोगान्तस्य लोपः' इत्येव सिद्धे नियमार्थमिदमित्याह। **सस्यैवेति** ॥ तेन ऊर्क् इत्यादौ न संयोगान्तलोपः। **रेफस्य विसर्गः इति** ॥ 'खरवसानयोः' इति विसर्ग इत्यर्थः। **परत्वादिति** ॥ परत्वान्नुटं बाधित्वा तृज्वत्त्वे कृते ततो नुटि 'नामि' इति दीर्घे णत्वे कृते क्रोष्टृणामिति स्यादित्यर्थः। न च नुट् नित्य इति वाच्यम्। तृज्वत्त्वे कृते सन्निपातपरिभाषया नुटो दुर्लभत्वात्। **नुमचिरेति** ॥ अचिरेत्यनुकरणम्। अचिर इति विहितो रेफो विवक्षितः। प्रकृतिवदनुकरणं भवतीति त्वनित्यम्। ततश्च अचिरेत्यस्य समासप्रवेशेऽपि न लुक्। **क्रोष्टूनामिति** ॥ तृज्वत्त्वं बाधित्वा नुटि कृते 'नामि' इति दीर्घे रूपम्। **क्रोष्टरीति** ॥ तृज्वत्त्वे क्रोष्टृ इ इति स्थिते 'ऋतो ङि' इति गुणे रपरत्वे रूपम्। **क्रोष्ट्रोरिति** ॥ तृज्वत्त्वे ऋकारस्य यण् रेफः। **पक्षे इति** ॥ तृतीयादिष्वजादिषु तृज्वत्त्वाभावपक्षे इत्यर्थः। ननु 'तृज्वत्क्रोष्टुः, स्त्रियाञ्च, विभाषा तृतीयादिष्वचि' इति त्रिसूत्री व्यर्था। सृगालवाचिनोः क्रोष्टृक्रोष्टुशब्दयोस्स्वतन्त्रयोस्सत्त्वादिति चेत्। शृणु। सर्वनामस्थाने स्त्रियाञ्च ऋदन्तस्यैव क्रोष्टृशब्दस्य प्रयोगः। तृतीयादिष्वजादिषु तु उभयस्य, शसि हलादिषु, च ऋदन्तस्यैवेति नियमार्था त्रिसूत्रीति ॥

इति उदन्ताः।

अथ ऊदन्ताः निरूप्यन्ते। **हूहूरिति** ॥ गन्धर्वविशेषवाचि अव्युत्पन्नं प्रातिपदिकमेतत्। हूह्वौ। हूह्वः, इत्यादि। 'दीर्घाज्जसि च' इति पूर्वसवर्णदीर्घनिषेधः। 'इको यणचि' इति यणि रूपम्। हे हूहूः। हूहूम्। हूह्वौ। हूहून्। हूह्वा। हूह्वे। हूह्वः। हूह्वे। हूह्वाम्। हूह्वि। **अतिचमूशब्दे त्विति** ॥ चमूमतिक्रान्तः अतिचमूः।' अत्या-

नदीकार्यं विशेषः । हे अतिचमु । अतिचम्वै । अतिचम्वाः । अतिचम्वाः । अतिचमूनाम् । अतिचम्वाम् । खलपूः ।

२८१ । ओः सुपि । (६-४-८३)

धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ सुपि । 'गतिकारकेतरपूर्वपदस्य यण् नेष्यते' (वा ५०३४) । खलप्वौ । खलप्वः, इत्यादि । एवं सुल्वादयः । 'अनेकाचः' किम् । लूः । लुवौ । लुवः । 'धात्ववयव—' इति किम् । उल्लूः । उल्लवौ । उल्लवः । 'असंयोगपूर्वस्य' किम् । कटप्रूः । कटप्रुवौ । कटप्रुवः । 'गति—' इत्यादि किम् । परमलुवौ । 'सुपि' किम् । लुलुवतुः । स्वभूः । 'न भूसुधियोः' (सू २७३) स्वभुवौ । स्वभुवः । एवं स्वयम्भूः ।

२८२ । वर्षाभ्वश्च । (६-४-८४)

दयः क्रान्ताद्यर्थे' इति समासः । स्त्रीप्रत्ययान्तत्वाभावात् 'गोस्त्रियोः' इति ह्रस्वो न भवति । **नदीकार्यमिति** ॥ 'प्रथमलिङ्गग्रहणञ्च' इति वचनादिति भावः । **खलपूरिति** ॥ खलं पुनातीति क्विप् । खलपू औ, अस्, इति स्थिते । 'अचि श्नुधातु' इति उवङि प्राप्ते । **ओः सुपि** ॥ 'एरनेकाचः' इति सूत्रं एरिति वर्जमनुवर्तते । 'अचि श्नुधातु' इत्यतः अचीत्यनुवृत्तम् । तेन सुपीति विशेष्यते । तदादिविधिः । 'इणो यण्' इत्यतः यणित्यनुवर्तते । तदाह । **धात्ववयवेत्यादिना । गतिकारकेति** ॥ इदमपि वार्तिकम् । अत्र अनुवर्तते इति भावः । **खलप्वौ, खलप्वः, इति** ॥ कारकपूर्वकत्वादिह यणिति भावः । हे खलपूः । खलप्वम् । खलप्वौ । खलप्वः । खलत्वा । खलप्वे । खलप्वः । खलप्वः । खलप्वोः । खलप्वि । इह अजादौ 'एरनेकाचः' इति यणः असम्भवात् उवङि प्राप्ते अनेन सूत्रेण यणि हूहूवद्रूपम् । उवङोऽपवादः इति फलितम् । इयङुवङौ 'एरनेकाचः' इति 'ओः सुपि' इति यण् च सर्वत्र पूर्वरूपसवर्णदीर्घापवादाः । **एवं सुल्वादयः इति** ॥ सुष्ठु लुनातीति सुल्वः । गतिपूर्वकत्वादिहापि यण् । आदिना केदारल्लूरित्यादिसङ्ग्रहः । **कटप्रूरिति** ॥ 'प्रु गतौ' 'क्विब्वचि' इत्यादिना क्विप् । उकारस्य दीर्घश्च । **परमलुवाविति** ॥ परमश्चासौ लूश्चेति विग्रहः । गतिकारकेतरपूर्वकत्वान्न यण् । **लुलुवतुरिति** ॥ अतुसि लुलू इत्यस्य अनेकाच्त्वेऽपि सुप्परकत्वाभावान्न यणिति भावः । **स्वभूरिति** ॥ स्वस्मात् भवतीति क्विप् । कारकपूर्वकत्वाद्यणि प्राप्ते आह । **न भूसुधियोरिति** ॥ वर्षासु भवति वर्षाभूः । वर्षर्तावुत्पन्न इत्यर्थः । वर्षाशब्दो नित्यस्त्रीलिङ्गबहुवचनान्तः । 'अप्सुमनस्समासिकतावर्षाणां बहुत्वञ्च' इति लिङ्गानुशासने स्वयधिकारे सूत्रकृतोक्तेः । वर्षाभूर्दर्दुरे पुमान्' इति यादवः । 'न भूसुधियोः' इति निषेधे प्राप्ते । **वर्षाभ्वश्च** ॥ 'ओः सुपि' इत्यनुवर्तते । 'अचि श्नुधातु' इत्यतः अचीति च

अस्योवर्णस्य यण् स्यादचि सुपि। वर्षाभ्वौ। वर्षाभ्वः। दृभतीति दृम्भूः। 'अन्दूदृम्भूजम्बूकफेलूकर्कन्धूदिधिषूः' (उ ९३) इत्युणादिसूत्रेण निपातितः। दृम्भ्वौ। दृम्भ्वः। दृम्भूम्। दृम्भ्वौ। दृम्भून्। शेषं हूहूवत्। 'दृन्' इति नान्ते हिंसार्थेऽव्यये भुवः क्विप्। दृन्भूः। 'दृन्करपुनःपूर्वस्य भुवो यण् वक्तव्यः' (वा ४११८) दृन्भ्वम्। दृन्भ्वः इत्यादि। खलपूवत्। करभूः। करभ्वम्—करभ्वः। दीर्घपाठे तु 'करः' एव 'कारः' स्वार्थिकः प्रज्ञाद्यण्। कारभ्वम्। कारभ्वः। पुनर्भूर्यौगिकः पुंसि। पुनर्भ्वौ। इत्यादि। 'दृग्भू—काराभू' शब्दौ स्वयम्भूवत्। इत्यूदन्ताः।

'इणो यण्' इत्यतः यणिति चानुवर्तते। तदाह। **अस्येति** ॥ वर्षाभूशब्दस्येत्यर्थः। **दृभतीति** ॥ 'दृभी ग्रन्थे'। तुदादिः। शविकरणस्य 'सार्वधातुकमपित्' इति ङित्त्वान्न गुणः। **निपातितः इति** ॥ कूप्रत्ययो नुम् चेह निपात्यत इत्यर्थः। 'नश्चापदान्तस्य' इत्यनुस्वारः, 'अनुस्वारस्य ययि' इति तस्य परसवर्णो मकारः। अत्र च ऊकारो न धात्ववयवः। अतः उवङ्, 'ओः सुपि' इति यण्च न। किन्तु 'इको यणचि' इत्येव यण्। स च 'अमि पूर्वः' इत्यनेन बाध्यते, इत्याशयेन आह। **दृम्भूमिति** ॥ शसि 'दीर्घाज्जसि च' इति निषेधाप्रवृत्त्या पूर्वसवर्णदीर्घेण 'इको यणचि' इति यण् बाध्यते इत्यभिप्रेत्य आह। **दृम्भूनिति** ॥ दृम्भ्वा। दृम्भ्वे। दृम्भ्वः। दृम्भ्वः। दृम्भ्वोः। दृम्भ्वाम्। इह तु 'दृन्कर' इति यण् न भवति। भूशब्दस्यार्थवत एव तत्र ग्रहणात्। इह च भूशब्दस्य अनर्थकत्वात्। दृनिति नान्तमव्ययं हिंसायां वर्तते। तस्मिन्नुपपदे भूधातोः क्विबित्यर्थः। दृन् हिंसां भवते प्राप्नोतीति विग्रहः। **दृन्भूरिति** ॥ तरुविशेषः। सर्पविशेष इत्यन्ये। स्वाभाविक एवात्र नकारः। तस्य पदान्तत्वात् 'नश्चापदान्तस्य' इति नानुस्वारः। अत एव न परसवर्णः। 'न भूसुधियोः' इति निषेधे प्राप्ते। 'दृन्करपुनःपूर्वस्य भुवो यण् वक्तव्यः'। **दृन्भ्वमिति** ॥ यणा पूर्वरूपं बाध्यत इति भावः। **दृन्भ्वः इति** ॥ शसि यणा पूर्वसवर्णदीर्घो बाध्यत इति भावः। करात् करे वा भवतीति करभूः। दृन्भूवदित्यभिप्रेत्य आह। **करभ्वम्। करभ्वः, इति** ॥ 'दृन्कर' इत्युदाहृतवार्तिके दीर्घमध्यकारशब्दपाठ इति मतान्तरम्। तत्राह। **दीर्घेति** ॥ **स्वार्थिकः इति** ॥ स्वस्याः प्रकृतेरर्थस्स्वार्थः, तत्र भवः स्वार्थिकः। अध्यात्मादित्वाट्ठञ्। **प्रज्ञाद्यणिति** ॥ 'प्रज्ञादिभ्योऽण्' इति प्रज्ञादिभ्यस्स्वार्थे अण्विधानादिति भावः। दीर्घपाठे करपूर्वस्य उवङेव। ह्रस्वपाठे करपूर्वस्य यणेवेति विवेकः। पुनर्भवतीति पुनर्भूः। ननु "पुनर्भूर्दिधिषूरूढा" इति कोशात् पुनर्भूशब्दस्य स्त्रीलिङ्गत्वात् स्त्रीलिङ्गाधिकार एव तन्निरूपणं युक्तमित्यत आह। **पुनर्भूर्यौगिकः पुंसीति** ॥ पुनः भवतीति क्रियानिमित्तस्य पुनर्भूशब्दस्य पुल्लिङ्गत्वमप्यस्तीत्यर्थः। **दृग्भू इति** ॥ दृशो भवतीति दृग्भूः। कारायां भवतीति काराभूः। कारा बन्धनालयः। **स्वयम्भूवदिति** ॥ तत्र 'न भूसुधियोः' इति यणः प्रतिषेधात् प्रतिप्रसवाभावाच्चेति भावः।

इत्यूदन्ताः।

॥ अथ ऋदन्तप्रकरणम् ॥

धाता । हे धातः । धातारौ । धातारः । 'ऋवर्णान्नस्य णत्वं वाच्यम्' (वा ४९६९) । धातृणामित्यादि । एवं नप्त्रादयः । उद्गातारौ । पिता । व्युत्पत्तिपक्षे नप्त्रादिग्रहणस्य नियमार्थत्वान्न दीर्घः । पितरौ । पितरः । पितरम् । पितरौ । शेषं धातृवत् । एवं जामातृभ्रात्रादयः । ना । नरौ । नरः । हे नरः ।

अथ ऋदन्ताः निरूप्यन्ते । **धातेति** ॥ 'डुधाञ् धारणपोषणयोः' । तत्र तृन् तृज्वा स्याताम् । क्ङिति च' इति गुणनिषेधः । हे **धातरिति** ॥ 'ऋदुशनस्' इत्यत्रासम्बुद्धाविल्यनुवृत्तेर्नानङ् । 'ऋतो ङि' इति गुणः अकारः, रपरत्वं, हल्ङ्यादिलोपः, विसर्गः । 'अप्तृन्' इति दीर्घस्तु न । असम्बुद्धाविल्यनुवृत्तेः । **धातारावि**ति ॥ ङिसर्वनामस्थानयोः 'ऋतो ङि' इति गुणः अकारः, रपरत्वम्, 'अप्तृन्' इति दीर्घश्च । धातारः । धातारम् । धातारौ । शसि पूर्वसवर्णदीर्घः ऋकारः, नत्वम् । धातॄन् । टा यण् । धात्रा । ङे यण् । धात्रे । ङसिङसोः 'ऋत उत्', रपरत्वम्, सलोपः, विसर्गः । धातुः । धातुः । धात्रोः । धात्रोः । आमि 'ह्रस्वनद्यापः' इति नुट् । 'नामि' इति दीर्घः । नकारस्य रेफषकाराभ्यां परत्वाभावादप्राप्ते णत्वे । **ऋवर्णान्नस्य णत्वं वाच्यम्** ॥ ऋवर्णात् परस्येत्यर्थः । इदन्तु वार्तिकं णत्वविधायकसूत्राणां सर्वेषां शेषभूतम् । ङौ 'ऋतो ङि' इति गुणः अकारः, रपरत्वम् । धातरि । धातृषु । नच धातृशब्दस्य हिरण्यगर्भसंज्ञाशब्दत्वात् औणादिकशंसिक्षदादितॄन्तृजन्तत्वादिह कथम् 'अप्तृन्' इति दीर्घः । औणादिकतृन्तृजन्तेषु नप्त्रादिसप्तानामेव दीर्घ इति नियमादिति वाच्यम् । धाञ्धातोः शंसिक्षदादित्वकल्पनायां प्रमाणाभावेन धातृशब्दस्य औणादिकत्वाभावादिति भावः । **एवं नप्त्रादयः, इति** ॥ नप्तृ, नेष्टृ, त्वष्टृ, क्षत्तृ, होतृ, पोतृ, प्रशास्तृ, शब्दाः धातृशब्दवदित्यर्थः । उद्गातृशब्दस्य औणादिकतृन्तृजन्तस्य नप्त्रादिष्वनन्तर्भावेऽपि समर्थसूत्रे उद्गातार इति भाष्यप्रयोगादेव दीर्घ इत्युक्तं प्राक् । तदेतत् स्मारयति । **उद्गातारावि**ति ॥ **पितेति** ॥ धातृवदनङादि । सर्वनामस्थाने तु 'ऋतो ङि' इति गुणः अकारः, रपरत्वम् । 'अप्तृन्' इति दीर्घस्तु नेत्याह । **व्युत्पत्ती**ति ॥ पातीति पिता । तृच्प्रत्ययः, इट्, आकारलोपश्चेति व्युत्पत्तिर्बोध्या । अव्युत्पत्तिपक्षे तु अप्तृन्तृजादिष्वनन्तर्भावात् दीर्घशङ्कैव नास्तीति भावः । पितरौ–पितरः । पितरम्–पितरौ–पितॄन्, इत्यादि धातृवत् । **एवं जामातृभ्रात्रादयः इति** ॥ उणादिषु 'नप्तृ, नेष्टृ, त्वष्टृ, होतृ, पोतृ, भ्रातृ, जामातृ, मातृ, पितृ, दुहितृ' इतिसूत्रे पितृजामातृभ्रातृशब्दाः व्युत्पादिताः। तत्र पितृशब्दस्य व्युत्पत्तिरुक्ता। भ्राजेस्तृनि, तृचि, वा जलोपः । भ्राता । जायां मातीति जामाता । तृन्प्रत्ययः तृज्वा यालोपश्च । अनयोरप्यौणादिकयोर्नप्त्रादिष्वनन्तर्भावात् न दीर्घ इत्यर्थः । आदिना मन्तृ, हन्तृ इत्यनयोः ग्रहणम् ।

२८३। नृ च। (६-४-६)

'नृ' इत्येतस्य नामि वा दीर्घः स्यात्। नृणाम्—नॄणाम्।

इत्यृदन्ताः।

॥ अथ ऋदन्तप्रकरणम् ॥

'कृ' 'तृ' अनयोरनुकरणे 'प्रकृतिवदनुकरणम्—' (प ३७) इति

तयोरुणादिषु 'तृन्तृचौ शंसिक्षदादिभ्यः' इति प्रकरणे बहुलमन्यत्रापि इत्यत्र उदाहृतत्वात्। **नेति** ॥ नृशब्दो मनुष्यवाची। तस्मात् सुः। 'ऋदुशनस्' इत्यनङ्। 'अप्तृन्' इतिसूत्रे अनन्तर्भावात् 'सर्वनामस्थाने च' इति नान्तत्वप्रयुक्तो दीर्घः। हल्ङ्यादिलोपः। नलोपः। ना इति रूपम्। **नरौ। नरः, इति** ॥ 'ऋतो ङि' इति गुणो रपरः। अप्तृन्नाद्यनन्तर्भावात् नान्तत्वाभावाच्च न दीर्घः। **हे नरः इति** ॥ 'ऋतो ङि' इति गुणो रपरः। हल्ङ्यादिलोपो विसर्गश्च। नरम्—नरौ। शसि पूर्वसवर्णदीर्घौ ऋकारः, नत्वम्, नॄन्। टादावचि यणि रेफः। त्रा। त्रे। ङसिङसोः, ऋत उत्, रपरः, सलोपः, विसर्गश्च। नुः। नुः। त्रोः। आमि नुट्। 'नामि' इति नित्यं दीर्घे प्राप्ते। **नृ च** ॥ नृ इति लुप्तषष्ठीकम्। 'नामि' इति सूत्रमनुवर्तते। 'ढ्रलोपे' इत्यतो दीर्घ इत्यनुवर्तते। 'छन्दस्युभयथा' इत्यतः उभयथेत्यनुवर्तते। तदाह। **नृ इत्येतस्येत्यादिना** ॥ **नृणाम्। नॄणाम्, इति** ॥ 'ऋवर्णान्नस्य' इति णत्वम्। ङौ 'ऋतो ङि' इति गुणः रपरत्वम्। नरि। त्रोः। नृषु ॥

इत्यृदन्ताः।

अथ ऋदन्ताः निरूप्यन्ते। **कृ इत्यादिना** ॥ कृ, तृ इत्यनयोरनुकरणे इत्त्वे रपरत्वे इत्यन्वयः। 'कृ विक्षेपे।' 'तॄ प्लवनतरणयोः'। कृ, तृ इत्याभ्यां शब्दाभ्यां अनुकरणे क्रियमाणे अनुकरणभूताभ्यां ताभ्यां धातुपाठपठितौ कृ, तृ, इत्येतौ विवक्षितौ। अत एवानुकरणस्य अनुकार्यमर्थः। अनुकार्यञ्च अनुकरणात् भिन्नमिति 'मतौ छः' इतिसूत्रभाष्ये स्थितम्। आनुपूर्वीव्यत्ययेऽपि वाचकसादृश्यात् अर्थोपस्थापकत्वमिति कैयटे, 'प्रागदीव्यतोऽण्' इत्यत्र भाष्ये च स्पष्टमेतत्। ततश्च अनुकार्याभ्यां कृ, तृ इत्याभ्यां अनुकरणभूतयोः कृ, तृ इत्यनयोरर्थवत्त्वेन प्रातिपदिकत्वात् सुबुत्पत्तिः। ननु अनुकरणभूतयोरनयोरनुकार्यशब्दस्वरूपवाचकत्वात् क्रियावाचकत्वाभावेन धातुत्वाभावात् 'ऋत इद्धातोः' इति कथमित्त्वम्। न च 'प्रकृतिवदनुकरणम्' इति वचनात् अनुकरणभूतयोः धातुत्वमिति वाच्यम्। एवं सति अधातुरिति धातुपर्युदासात् प्रातिपदिकत्वानुपपत्तेरित्यत आह। **प्रकृतिवदनुकरणमिति [illegible]तिदेशादिति** ॥ 'वत्तदेतेभ्यः परिमाणे वतुप्' इत्यत्र त्यदाद्यत्वनिर्देशात् 'त्यदादीनि सर्वैर्नित्यम्' इत्येकशेषाकरणात्

वैकल्पिकातिदेशादित्त्वे रपरत्वे, कीः । किरौ । किरः । तीः । तिरौ । तिरः, इत्यादि गीर्वत् । इत्त्वाभावपक्षे तु 'ऋदुशनस्—' (सू २७६) इति 'ऋतो ङि—' (सू २७५) इति च तपरकरणादनङ्गुणौ न । कृः । क्रौ । क्रः । कृम् । क्रौ । कृन् । क्रा । क्रे इत्यादि ।

इत्यृदन्ताः ।

॥ अथ ऌदन्तप्रकरणम् ॥

'गम्ऌ' 'शक्ऌ' अनयोरनुकरणे अनङ् । गमा । शका । गुणविषये तु लपरत्वम् । गमलौ । गमलः । गमलम् । गंमलौ । गमॄन् । गम्ला । गम्ले ।

'ओ यङि, क्षियो दीर्घात्' इत्यादौ धात्वनुकरणे विभक्तिनिर्देशाच्च, प्रकृतिवदनुकरणमिति पाक्षिकम्। ततश्चात्रातिदेशमात्रमादाय धातुत्वात् 'ऋत इद्धातोः' इतीत्त्वम्। अतिदेशाभावमादाय धातुत्वाभावात् प्रातिपदिकत्वात् सुबुत्पत्तिश्च न विरुध्यत इति भावः । **कीरिति** ॥ कृधातुरित्यर्थः । ऋकारस्य इत्त्वे रपरत्वे 'र्वोरुपधायाः' इति दीर्घः । सोर्हल्ङ्यादिलोपः, विसर्गश्च । **किराविति** ॥ अपदान्तत्वात् 'र्वोः' इति न दीर्घः । **तीरिति** ॥ तॄधातुरित्यर्थः । **गीर्वेदिति** ॥ गीर्शब्दवद्रूपाणीत्यर्थः । किरम्–किरौ–किरः । किरा–कीर्भ्याम्–कीर्भिः । किरे । किरः । किरोः । कीर्षु । भ्यामादौ 'स्वादिष्वसर्वनामस्थाने' इति पदत्वात् दीर्घः । **इत्त्वाभावेति** ॥ प्रकृतिवदनुकरणमित्यस्यानित्यत्वात् अनुकरणस्य धातुत्वाभावात् 'ऋत इद्धातोः' इति इत्त्वाभावे सतीत्यर्थः । **अनङ्गुणौ नेति** ॥ 'ऋत उत्' इत्युत्त्वमपि तपरकरणान्नेति द्रष्टव्यम् । अत एव 'ओ यङि' इत्यादिनिर्देशास्सङ्गच्छन्ते । **कॄरिति** ॥ कृधातुरित्यर्थः । क्रौ । क्रः, इत्यादौ यण् । **इत्यादीति** ॥ क्रः । क्रोः । क्रोः । क्राम् । क्रि ।

इत्यृदन्ताः ।

अथ ऌदन्ताः निरूप्यन्ते। **गम्ऌ शक्ऌ इति** ॥ 'गम्ऌ गतौ' 'शक्ऌ शक्तौ।' अजन्तौ धातू। **अनङिति** ॥ 'ऋदुशनस्' इत्यनेनेति शेषः। ऋलवर्णयोस्सावर्ण्यादिति भावः। **गुणविषये त्विति** ॥ ङौ सर्वनामस्थाने च 'ऋतो ङि' इति गुणः अकारः, लपर इत्यर्थः । 'उरण्परः' इत्यत स्प्रत्याहारग्रहणादिति भावः । **गमॄनिति** ॥ ऌवर्णस्य दीर्घाभावात् ऋवर्ण एव ।

ङसिङ्सोस्तु 'ऋत उत्' (सू २७९) इत्युत्वे लपरत्वे 'संयोगान्तस्य लोपः' (सू ५४)। गमुल्। शकुल्, इत्यादि।

इति लृदन्ताः।

॥ अथ एदन्तप्रकरणम् ॥

इना सह वर्तते इति सेः। सयौ। सयः। स्मृतेः। स्मृतयौ। स्मृतयः।

इत्येदन्ताः।

पूर्वसवर्णदीर्घे नत्वमिति भावः। **ङसिङ्सोस्त्विति** ॥ गम्ल् अस् इति स्थिते 'ऋत उत्' लपरः। गमुल्स् इति स्थिते 'संयोगान्तस्य लोपः' गमुल् इति रूपम्। **इत्यादीति** ॥ गम्लृभ्याम्। गम्लृभिः। गम्लृभ्यः। गम्लृभ्यः। आमि तु गमॄणाम्। गमलि। गम्लोः। गम्लृषु। वस्तुतस्तु 'उरण्परः' इत्यत्र अजिति वक्तव्ये अण्ग्रहणसामर्थ्यात् अण् पूर्वेणैवेत्युक्तं भाष्ये। यदि लृकारस्य यण् लकारः स्यात्, तर्हि लपरत्वार्थं परेणाण्ग्रहणस्यावश्यकत्वात् तदसंगतिस्स्पष्टैव। तस्मादेवन्नार्तीयकानां प्रयोगो न भाष्यसम्मत इत्याहुः ॥

इति लृदन्ताः।

अथ एदन्ताः निरूप्यन्ते। **इनेति** ॥ अः विष्णुः तस्यापत्यम् इः। 'अत इञ्।' 'यस्येति च' इत्यकारलोपः। इना सहेत्यर्थे 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः। 'बोपसर्जनस्य' इति सत्त्वम्। 'आद्गुणः' से इति रूपम्। ततस्सुः, रुत्वविसर्गौ। सेः। एवं स्मृतेः। स्मृतः इः येनेति विग्रहे 'अनेकमन्यपदार्थे' इति बहुव्रीहिः। नच एकादेशस्य पूर्वान्तत्वात् से इत्यस्य अव्ययत्वात् 'अव्ययादाप्सुपः' इति लुक् शङ्क्यः। अव्ययमिति महासंज्ञया लिङ्गाद्यनन्वितार्थस्यैव अव्ययत्वात्। अजादौ अयादेशं मत्वा आह। **सयौ। सयः, इति** ॥ 'एङ् ह्रस्वात्' इति सम्बुद्धिलोपः। हे से। नन्वेवं सति हे हरे इत्यत्र सम्बुद्धिलोपो न स्यात्। सम्बुद्धिं परनिमित्तमाश्रित्य प्रवृत्तस्य गुणस्य सम्बुद्धिविघातकं सुलोपं प्रति सन्निपातपरिभाषया निमित्तत्वायोगात्। नचैवसत्येङ्ग्रहणवैयर्थ्यं शङ्क्यम्। हे से, इत्यत्र चरितार्थत्वादिति चेत्। शृणु। हे हरे, इत्यत्र सम्बुद्धिलोपस्य स्वोपजीव्यगुणविघातकत्वमेव नास्ति। सत्यपि तल्लोपे प्रत्ययलक्षणमाश्रित्य गुणस्य निर्बाधत्वात्। केचित्तु गुणात् सम्बुद्धेः, इत्यनुक्ता 'एङ् ह्रस्वात्' इत्युक्तेः सन्निपातपरिभाषां बाधित्वापि सम्बुद्धिलोपः प्रवर्तत इत्याहुः। नच जसि सयः इति कथम्। अन्तर्वर्तिविभक्त्या से इत्यस्य पदत्वेनायादेशं बाधित्वा 'एङः पदान्तात्' इति पूर्वरूपापत्तेरिति वाच्यम् 'उत्तरपदत्वे चापदादिविधौ' इति प्रतिषेधात्। उत्तरपदस्य तद्घटितस्य वा पदत्वे कर्तव्ये अन्तर्वर्तिविभक्तेः प्रत्ययलक्षणं नास्तीति हि तदर्थः। सेनासेवकादिशब्दगतस्य से इत्यस्य अनुकरणं वा अस्तु। तत्र जसि अयादेशस्य निर्बाधत्वात् ॥

इत्येदन्ताः।

॥ अथ ओदन्तप्रकरणम् ॥

२८४ । गोतो णित् । (७-१-९०)

गोशब्दात्परं सर्वनामस्थानं णिद्वत्स्यात् । गौः । गावौ । गावः ।

२८५ । औतोऽम्शसोः । (६-१-९३)

'आ ओतः' इति च्छेदः । ओकारादम्शसोरचि परे आकार एकादेशः स्यात् । शसा साहचर्यात्सुबेव अम् गृह्यते । नेह । अचिनवम् । असुनवम् । गाम् । गावौ । गाः । गवा । गवे । गोः, इत्यादि । 'औतो णिदिति वाच्यम्' (वा

अथ ओदन्ताः निरूप्यन्ते । गो स् इति स्थिते । **गोतो णित्** ॥ गोत इति तपरकरणम् । 'इतोऽत् सर्वनामस्थाने' इत्यतस्सर्वनामस्थाने इत्यनुवृत्तं प्रथमया विपरिणम्यते । तदाह । **गोशब्दादित्यादिना** ॥ **णिद्वत्स्यादिति** ॥ णिति परे यत् कार्यं तत्कार्यकारीत्यर्थः । **गौरिति** ॥ णिद्वत्त्वे 'अचो ञ्णिति' इति वृद्धिः, औकारः । रुत्वविसर्गाविति भावः । **गावौ । गावः, इति** ॥ णिद्वत्त्वे वृद्धिः आवादेशश्चेति भावः । हे गौः । वृद्धौ एङः परत्वाभावात् न सम्बुद्धिलोपः । अमि गो अम् इति स्थिते णिद्वत्त्वात् वृद्धौ प्राप्तायाम् । **औतोऽम्शसोः** ॥ **छेदः इति** ॥ आ ओत इति च्छेदः, व्याख्यानादिति भावः । ओत इति तपरकरणम् । ओकारादित्यर्थः । अम् च शम् च अम्शसौ, तयोरिति विग्रहः । अवयवषष्ठ्यन्तमेतत् । 'इको यणचि' इत्यतः अचीत्यनुवर्तते । 'एकः पूर्वपरयोः' इत्यधिकृतम् । तदाह । **ओकारादित्यादिना** ॥ शस् इह सुबेव गृह्यते । नतु 'बहुल्पार्थात्' इति तद्धितः शस् । अचीत्यनुवृत्तेः । तद्धितस्य च शसः अजादित्वासम्भवात् । 'लशक्वतद्धिते' इत्यत्र तद्धितपर्युदासात् । ननु 'चिञ् चयने' लङ्, अडागमः, उत्तमपुरुषो मिप् । 'तस्थस्थमिपाम्' इति तस्य अमादेशः । श्नुविकरणः । 'सार्वधातुकार्धधातुकयोः' इति गुणः, ओकारः । अचिनो अम् इति स्थिते अवादेशे अचिनवमिति रूपम् । तत्र अचिनो अम् इति स्थिते । अवादेशं बाधित्वा 'औतोऽम्शसोः' इत्यात्वे 'अचिनाम्' इति स्यादित्यत आह । **शसेति** ॥ **गामिति** ॥ परापि 'अचो ञ्णिति' इति वृद्धिरिह न भवति । आत्वस्य निरवकाशतया तदपवादत्वादिति भाष्यम् । नहि वृद्धिविषयादन्यत्र आत्वस्य प्रवृत्तिरस्तीति तदाशयः । नच द्योशब्दादमि आत्वं सावकाशम् । 'गोतो णित्' इति णित्त्वस्य तत्राभावे वृद्धेरप्रसक्तेरिति वाच्यम् । अस्मादेव भाष्यात् 'ओतो णित्' इति णित्त्वस्य वक्ष्यमाणत्वेन तस्यापि वृद्धिविषयत्वादिति भावः । **गाः इति** ॥ असर्वनामस्थानत्वान्न णिद्वत्त्वम् । नापि वृद्धिः । 'औतोऽ-

---

१. इदं च (३६१९) वार्तिकव्याख्यायाम् 'ओतो णित्' इतिसूत्रं पठितव्यम् इति कैयटेन सूत्रप्रतिनिधित्वेनोक्तम् 'अनवकाशमात्वं वृद्धिं बाधिष्यते' इति भाष्ये ध्वनितम् ।

५०३५) । विहितविशेषणं च । तेन । सुद्यौः । सुद्यावौ । सुद्यावः । सुद्यामित्यादि । 'ओकारान्ताद्विहितं सर्वनामस्थानम्' इति व्याख्यानान्नेह । हे भानो । हे भानवः । उः शम्भुः स्मृतो येन सः स्मृतौः । स्मृतावौ । स्मृतावः । स्मृताम् । स्मृतावौ । स्मृताः इत्यादि ।

इत्योदन्ताः ।

म्शसोः' इत्यात्वमिति भावः । टादावाचि अवादेशं मत्वा आह । **गवा । गवे, इति ॥ गोरिति ॥** 'डसिङसोश्च' इति पूर्वरूपमिति भावः । **इत्यादीति ॥** गवोः । गवाम् । गवि, इत्यादिशब्दार्थः । द्योशब्दः ओकारान्तस्त्रीलिङ्गः । "सुरलोको द्योदिवौ द्वे स्त्रियाम्" इत्यमरः । सु शोभना द्यौः यस्येति बहुव्रीहौ पुल्लिङ्गः । सुद्योम् इत्यादिसर्वनामस्थाने 'गोतो णित्' इत्यप्राप्ते । **ओतो णिदिति वाच्यम् ॥** गोत इति गकारमपनीय 'ओतो णित्' इति वाच्यमित्यर्थः । तत्र प्रमाणमनुपदमेवोक्तम् । नन्विदं वार्तिकम् । तत्र ओत इति तपरकरणम् । ओकारात् सर्वनामस्थानं णिदिति लभ्यते । **विहितेति ॥** ओकाराद्विहितं सर्वनामस्थानमित्येवमोत इत्येतद्विहितविशेषणमाश्रयणीयमित्यर्थः । **तेनेति ॥** गोतः इति गकारमपनीय ओत इतिवचनेनेत्यर्थः । **सुद्यामित्यादीति ॥** गोशब्दवद्रूपाणीति भावः । **हे भानो इति ॥** ओकारात् परं सर्वनामस्थानं णिदिति व्याख्याने तु भानुशब्दात् सम्बुद्धौ 'ह्रस्वस्य गुणः' इति गुणे ओकारे सति सोः ओकारात् परत्वात् णिद्वत्त्वे वृद्धौ औकारे एङः परत्वाभावात् सुलोपाभावे रुत्वविसर्गयोः हे भानौः इति स्यात् । अतो विहितविशेषणमित्यर्थः । ननु 'एङ्ह्रस्वात् सम्बुद्धेः' इत्यत्र एङ्ग्रहणसामर्थ्यादेव हे भानो, इत्यत्र णित्त्वं तत्प्रयुक्तवृद्धिश्च न भवति । अन्यथा 'एङ्ह्रस्वात्' इत्येव ब्रूयात् । अतो विहितविशेषणमित्यर्थस्यास्वारस्यादित्यत आह । **हे भानवः इति ॥** तत्र 'जसि च' इति गुणे भानो अस् इति स्थिते ओतः परत्वाण्णिद्वत्त्वे वृद्धौ आवादेशे भानावः इति स्यात् । अतो विहितविशेषणमिति भावः । वस्तुतस्तु लक्षणप्रतिपदोक्तपरिभाषया हे भानो, हे भानवः, इत्यत्र णिद्वत्त्वाभावोपपत्तेः विहितविशेषणत्वाश्रयणं व्यर्थमेव । **उः शम्भुरिति ॥** उः इत्यस्य विवरणं शम्भुरिति । उः स्मृतो येनेति विग्रहे बहुव्रीहिः । 'निष्ठा' इति स्मृतशब्दस्य पूर्वनिपातः । आद्गुणः । स्मृतो इति रूपम् । ततस्सुबुत्पत्तौ गोशब्दवद्रूपाणि । वस्तुतस्तु 'गोतो णित्' इति सूत्रशेषतया 'द्योश्च वृद्धिर्वक्तव्या' इत्येव वार्तिकं भाष्ये दृश्यते । 'औतोऽम्शसोः' इत्यत्र ओतो णिदिति तु न दृश्यते । अतोऽन्यदोकारान्तं प्रातिपदिकं नास्तीत्याहुः ॥

इत्योदन्ताः ।

॥ अथ ऐदन्तप्रकरणम् ॥

२८६ । रायो हलि । (७-२-८५)

रैशब्दस्य आकारोऽन्तादेशः स्याद्धलि विभक्तौ । राः । अच्यायादेशः । रायौ । रायः । रायम् । रायौ । रायः । राया । राभ्यामित्यादि ।

इत्यैदन्ताः ।

॥ अथ औदन्तप्रकरणम् ॥

ग्लौः । ग्लावौ । ग्लावः । ग्लावम् । ग्लावौ । ग्लावः, इत्यादि । 'औतोऽम्शसोः' (सू २८५) इतीह न प्रवर्तते । 'ऐऔच्' (प सू ४) इति सूत्रेण ओदौतोः सावर्ण्याभावज्ञापनात् ।

इत्यौदन्ताः ।

इत्यजन्तपुल्लिङ्गप्रकरणम् ।

अथैदन्ताः निरूप्यन्ते ॥ रैशब्दो धनवाची । "अर्थैरविभवा अपि" इत्यमरः । तस्य हलादिविभक्तिषु विशेषं दर्शयति । **रायो हलि ॥** राय इति रैशब्दस्य षष्ठ्यन्तम् । 'अष्टन आ विभक्तौ' इत्यतः आ इति विभक्ताविति चानुवर्तते । हलीत्यनेन विभक्ताविति विशेष्यते । तदादिविधिः । तदाह । **रैशब्दस्येत्यादिना ॥** हल्ग्रहणादचि आत्वं न, किन्तु आयादेश एवेत्यत आह । **अचीति ॥** राः । आत्वे रुत्वविसर्गौ । अचि आयादेशमुदाहरति । **रायौ । रायः, इति ॥ इत्यादीति ॥** राभिः । राये । राभ्याम् । राभ्यः । रायः । राभ्याम् । राभ्यः । रायः । रायोः । रायाम् । रायि । रायोः । रासु । रैशब्दश्छान्दस इति भाष्यम् । क्यजन्त एव छान्दस इति पक्षान्तरम् ॥

इत्यैदन्ताः ।

अथ औदन्ताः निरूप्यन्ते ॥ ग्लौशब्दश्चन्द्रवाची । "ग्लौर्मृगाङ्कः कलानिधिः" इत्यमरः । तस्य हलादौ न कश्चिद्विकारः । अचि तु आवादेश इति मत्वा आह । **ग्लौः । ग्लावौ । ग्लावः, इति ॥** ग्लावम्–ग्लावौ–ग्लावः । ग्लावा–ग्लौभ्याम्–ग्लौभिः । ग्लावे–ग्लौभ्याम्–ग्लौभ्यः । ग्लावः–ग्लौभ्याम्–ग्लौभ्यः । ग्लावः–ग्लावोः–ग्लावाम् । ग्लावि । ग्लावोः । ग्लौषु । ननु 'औतोऽम्शसोः' इत्यत्र ओत्ग्रहणेन सावर्ण्यादौकारस्यापि ग्रहणात् अंशसोर्ग्लौशब्दस्य आत्वं कुतो न स्यादित्यत आह । **औतोऽम्शसोरितीह नप्रवर्तते इति ॥** ऐऔजित्यादिग्रन्थस्तु संज्ञाप्रकरणे व्याख्यातः । एवं जनानवतीति जनौः । क्विप् । ज्वरत्वरेत्यूठ् । एलेधतीति वृद्धिः । जनावौ । जनावः इत्यादि ॥

इत्यौदन्ताः ।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायां अजन्तपुल्लिङ्गनिरूपणं समाप्तम् ।

। श्रीरस्तु ।

॥ अथ अजन्तस्त्रीलिङ्गे आदन्तप्रकरणम् ॥

रमा ।

२८७ । औङ आपः । (७-१-१८)

आबन्तादङ्गात्परस्यौङः शी स्यात् । औङ् इत्यौकारविभक्तेः संज्ञा । रमे । रमाः ।

२८८ । सम्बुद्धौ च । (७-३-१०६)

आप एकारः स्यात्सम्बुद्धौ । 'एङ्ह्रस्वात्—' (सू १९३) इति सम्बुद्धिलोपः । हे रमे । हे रमे । हे रमाः । रमाम् । रमे । रमाः । स्त्रीत्वान्न-त्वाभावः ।

अथ अजन्तस्त्रीलिङ्गाः निरूप्यन्ते । **रमेति** ॥ रमते इति रमा । 'रमु क्रीडायाम्' पचाद्यचि 'अजाद्यतष्टाप्' । प्रत्ययान्तत्वादप्रातिपदिकत्वेऽपि 'ङ्याप् प्रातिपदिकात्' इति ङ्यापोः पृथग्ग्रहणात्, लिङ्गविशिष्टपरिभाषया वा स्वादयः । 'हल्ङ्याप्' इति सुलोपः । अथ रमा औ इति स्थिते । **औङ आपः** ॥ आप इति पञ्चम्या । प्रत्ययग्रहणपरिभाषया आबन्तं विवक्षितम् । अङ्गस्येत्यधिकृतं पञ्चम्या विपरिणम्यते । औङः इति षष्ठी । 'जसश्शी' इत्यतश्शीत्यनुवर्तते । तदाह । **आबन्तादित्यादिना** ॥ औङ्शब्दस्याप्रसिद्धार्थत्वादाह । **औङितीति** ॥ **संज्ञेति** ॥ प्राचां शास्त्रे स्थितेति शेषः । **रमे इति** ॥ रमा औ इति स्थिते शीभावे तस्य स्थानिवत्त्वेन प्रत्ययत्वात् 'लशक्वतद्धिते' इति शस्येत्संज्ञायां लोपे 'आद्गुणः' इति एकारः । 'यस्येति च' इति लोपस्तु न । अभत्वात् । जसि सवर्णदीर्घम्मत्वा आह । **रमाः इति** ॥ पूर्वसवर्णदीर्घस्तु न भवति । 'दीर्घाज्जसि च' इति निषेधात् । हे रमा स् इति स्थिते । **सम्बुद्धौ च** ॥ 'बहुवचने झल्येत्' इत्यतः एदिति 'आङि चापः' इत्यतः आप इति चानुवर्तते । तदाह । **आपः इत्यादिना** ॥ आबन्तस्येत्यर्थः । 'अलोऽन्त्यस्य' । हे रमे स् इति स्थिते प्रक्रियां दर्शयति । **एङ् ह्रस्वादिति** ॥ हल्ङ्यादिलोपस्तु न । परत्वात् प्रतिपदोक्तत्वाच्च एत्त्वे कृते हल्ङ्यादिलोपस्याप्राप्तौ 'एङ् ह्रस्वात्' इति लोपस्यैव हि परत्वेन न्याय्यत्वादिति भावः । **रमामिति** ॥ 'अमि पूर्वः' इति पूर्वरूपम् । औङश्शी-भावे आद्गुणं मत्वा आह । **रमे इति** ॥ **स्त्रीत्वादिति** ॥ शसि रमा अस् इति स्थिते

२८९ । आङि चापः । (७-३-१०५)

आङि ओसि च परे आबन्तस्याङ्गस्यैकारः स्यात् । रमया । रमाभ्याम् । रमाभिः ।

२९० । याडापः । (७-३-११३)

आपः परस्य ङिद्वचनस्य याडागमः स्यात् । 'वृद्धिरेचि' (सू ७२) । रमायै । सवर्णदीर्घः । रमायाः । रमायाः । रमयोः । रमाणाम् । रमायाम् । रमयोः । रमासु । एवं दुर्गादयः ।

२९१ । सर्वनाम्नः स्याड्ढ्रस्वश्च । (७-३-११४)

आबन्तात्सर्वनाम्नः परस्य ङितः स्याट् स्यादापश्च ह्रस्वः । याटोऽपवादः । सर्वस्यै । सर्वस्याः । सर्वस्याः । एकादेशस्य पूर्वान्तत्वेन ग्रहणात्

पूर्वसवर्णदीर्घे सति कृतपूर्वसवर्णदीर्घात् परत्वेऽपि 'तस्माच्छसः' इति नत्वं स्त्रीलिङ्गत्वान्न भवतीत्यर्थः । रमा आ इति स्थिते । **आङि चापः** ॥ 'ओसि च' इत्यनुवर्तते । आप इति षष्ठी । अङ्गस्येत्यधिकृतम् । तदन्तविधिः । 'बहुवचने झल्येत्' इत्यतः एदित्यनुवर्तते । तदाह । **आङि ओसि चेत्यादिना** ॥ आङिति टासंज्ञा प्राचामित्युक्तम् । अलोऽन्त्यस्य एत्त्वे अयादेश इत्याह । **रमयेति । रमाभिरिति** ॥ 'अतो भिसः' इति तपरकरणादैस् न । रमा ए इति स्थिते । **याडापः** ॥ आप इति पञ्चमी । 'घेर्ङिति' इत्यतः ङितीत्यनुवृत्तं षष्ठ्या विपरिणम्यते । तदाह । **आपः परस्येत्यादिना** ॥ टित्त्वादाद्यवयवः । **वृद्धिरेचीति** ॥ या ए इति स्थिते आकारस्य एकारस्य च स्थाने ऐकार एकादेश इति भावः । **सवर्णेति** ॥ ङसिङसोः रमा अस् इति स्थिते याडागमे 'अकस्सवर्णे दीर्घः' इति सवर्णदीर्घ इति भावः । यङित्येव सुवचम् । 'अतो गुणे' इति पररूपन्तु न । अकारोच्चारणसामर्थ्यात् । **रमयोरिति** ॥ 'आङि चापः' इत्येत्त्वे अयादेश इति भावः । **रमाणामिति** ॥ 'ह्रस्वनद्यापः' इत्यत्राब्ग्रहणान्नुटि पर्जन्यवल्लक्षणप्रवृत्त्या 'नामि' इति दीर्घे 'अट् कुप्वाङ्' इति णत्वमिति भावः । **रमायामिति** ॥ रमा इ इति स्थिते 'ङेराम्नद्यामीभ्यः' इत्यामादेशे याडागमे सवर्णदीर्घ इति भावः । 'न विभक्तौ' इति मस्य नेत्त्वम् । सर्वशब्दाद्यपि सर्वाशब्दः । सोऽपि प्रायेण रमावत् । ङित्सु 'याडापः' इति प्राप्ते । **सर्वनाम्नस्स्याड्ढ्रस्वश्च** ॥ 'याडापः' इत्यतः आप इति पञ्चम्यन्तमनुवृत्तम् । तेन सर्वनाम्न इत्येतद्विशेष्यते । तदन्तविधिः । 'घेर्ङिति' इत्यतः ङितीत्यनुवृत्तं षष्ठ्या विपरिणम्यते । 'ह्रस्वनद्यापः' इत्यतः आप इत्यनुवृत्तं षष्ठ्यन्तं ह्रस्व इत्यत्रान्वेति । टित्त्वादाद्यवयवः । **याटोऽपवादः इति** ॥ येन नाप्राप्तिन्यायादिति भावः । **सर्वस्यै इति** ॥ सर्वा ए इति स्थिते स्याट् । वकारादाकारस्य ह्रस्वः, वृद्धिरिति भावः । **सर्वस्याः इति** ॥ ङसिङसोः सर्वा अस् इति स्थिते स्याट्,

'आमि सर्वनाम्नः—' (सू २१७) इति सुट्। सर्वासाम्। सर्वस्याम्। सर्वयोः। सर्वासु। एवं विश्वादयोऽप्याबन्ताः।

२९२। विभाषा दिक्समासे बहुव्रीहौ। (१-१-२८)

अत्र सर्वनामता वा स्यात्।। उत्तरपूर्वस्यै—उत्तरपूर्वायै। 'दिङ्नामान्यन्तराले' (सू ८४५) इति प्रतिपदोक्तस्य दिक्समासस्य ग्रहणान्नेह। योत्तरा सा पूर्वा यस्याः उन्मुग्धायास्तस्यै उत्तरपूर्वायै। बहुव्रीहिग्रहणं स्पष्टार्थम्।

आपो ह्रस्वः, सवर्णदीर्घ इति भावः। ननु आबन्तस्य सर्वाशब्दस्य सर्वादिगणे पाठाभावात् कथं सर्वनामत्वमित्यत आह। **एकादेशस्येति**॥ वकारादकारस्य आपश्च योऽयमेकादेशस्सवर्णदीर्घः तस्येत्यर्थः। ननु एकादेशनिष्पन्नस्य आकारस्य पूर्वान्तत्वे आप्त्वव्याघातात् आबन्तत्वं व्याहतम्। न च परादिवत्त्वेन आबन्तत्वमपीति वाच्यम्। 'उभयत आश्रयणे नान्तादिवत्' इति निषेधादिति चेत्। सत्यम्। लिङ्गविशिष्टपरिभाषया आबन्तस्य सर्वनामत्वम्। आबन्तत्वन्तु परादिवद्भावेनेत्याहुः। **सर्वस्यामिति**॥ ङौ सर्वा इ इति स्थिते सुटं बाधित्वा परत्वात् 'ङेराम्' इत्याम्, स्याट्, ह्रस्वश्च। सकृद्गतिन्यायान्न पुनस्सुट्। **एवमिति**॥ सर्वादिगणपठितविश्वादयः आबन्तत्वं प्राप्तास्सर्वाशब्दवदित्यर्थः। उत्तरस्याश्च पूर्वस्याश्च दिशोर्यदन्तराळम् उत्तरपूर्वा। 'दिङ्नामान्यन्तराळे' इति बहुव्रीहिविशेषोऽयम्। तत्र विशेषं दर्शयितुमाह। **विभाषा दिक्समासे**॥ 'सर्वादीनि' इत्यतस्सर्वनामग्रहणमनुवर्तते। तदाह। **अत्रेति**॥ दिक्समासे इत्यर्थः। 'न बहुव्रीहौ' इत्यलौकिकविग्रहवाक्ये नित्यनिषेधे प्राप्ते विकल्पार्थमिति केचित्। गौणत्वात्प्राप्ते विभाषेयमित्यन्ये। सर्वनामत्वपक्षे उदाहरति। **उत्तरपूर्वस्यै इति**॥ स्याड्ह्रस्वौ। **उत्तरपूर्वायै इति**॥ सर्वनामत्वाभावपक्षे याट्। उत्तरपूर्वस्याः-उत्तरपूर्वायाः। उत्तरपूर्वासाम्-उत्तरपूर्वाणाम्। उत्तरपूर्वस्याम्-उत्तरपूर्वायाम्। 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' इति मात्रग्रहणात् सम्प्रति असर्वनामत्वेऽपि पूर्वपदस्य पुंवत्त्वम्। ननु उत्तरा दिगिति गत्वा मोहवशात् पूर्वा दिक् यस्यास्सा उत्तरपूर्वा 'अनेकमन्यपदार्थे' इति बहुव्रीहिः। अत्रापि दिक्शब्दघटितसमासत्वात् सर्वनामताविकल्पे उत्तरपूर्वस्यै-उत्तरपूर्वायै इति रूपद्वयं स्यात्। स्याडागमस्तु नेष्यते। तत्राह। **दिङ्नामानीति**॥ 'दिङ्नामान्यन्तराळे' इति बहुव्रीहिः प्रतिपदोक्तो दिक्समासः। दिक्शब्दमुच्चार्य विहितत्वात्। ननु 'अनेकमन्यपदार्थे' इति बहुव्रीहिरपि। ततश्च लक्षणप्रतिपदोक्तपरिभाषया न तस्य ग्रहणमित्यर्थः। **योत्तरेति**॥ उत्तराशब्दस्य पूर्वाशब्दस्य च सामानाधिकरण्यं द्योतयितुं यत्तच्छब्दौ। सामानाधिकरण्याभावे 'अनेकमन्यपदार्थे' इति बहुव्रीहेरसम्भवात्। 'बहुव्रीहिः समानाधिकरणानां वक्तव्यः' इति वचनात्। **उन्मुग्धायाः इति**॥ तेन पूर्वोत्तरयोर्विरोधात् कथं सामानाधिकरण्यमिति शङ्का निरस्ता। ननु 'विभाषा दिक्समासे' इत्येवास्तु। बहुव्रीहिग्रहणं न कर्तव्यम्। प्रतिपदोक्तत्वेन 'दिङ्नामानि' इति बहुव्रीहेरेव ग्रहणसिद्धेरित्यत आह। **बहुव्रीहिग्रहणं स्पष्टार्थमिति**॥

अन्तरस्यै शालायै। बाह्यायै इत्यर्थः। 'अपुरि' इत्युक्तेर्नेह। अन्तरायै नगर्यै।

२९३। विभाषा द्वितीयातृतीयाभ्याम्। (७-३-११५)

आभ्यां ङितः स्याट् स्यादापश्च ह्रस्वः। इदं सूत्रं त्यक्तुं शक्यम्। तीयस्य ङित्सूपसङ्ख्यानात्। द्वितीयस्यै—द्वितीयायै। द्वितीयस्याः—द्वितीयायाः। द्वितीयस्याः—द्वितीयायाः। द्वितीयस्याम्—द्वितीयायाम्। शेषं रमावत्। एवं तृतीया। 'अम्बार्थनद्योर्ह्रस्वः' (सू २६७)। हे अम्ब। हे अक्क। हे अल्ल। 'असंयुक्ताः ये डलकास्तद्वतां ह्रस्वो न' (वा ४५९२)। हे अम्बाडे। हे अम्बाले। हे अम्बिके। जरा। जरसौ। शीभावात्परत्वाज्जरस्। आमि नुटः

बाह्यायै इत्यर्थः इति ॥ "अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये। छिद्रात्मीयविना बहिरवसरमध्येऽन्तरात्मनि च" इति कोशात्। अर्थान्तरपरत्वे तु सर्वनामत्वाभावात् न स्यादिति भावः। **अपुरीत्युक्तेरिति** ॥ 'अन्तरं बहिर्योगे' इति गणसूत्रे इति शेषः। **विभाषा** ॥ 'घेर्ङिति' इत्यतः ङितीत्यनुवृत्तं षष्ठ्या विपरिणम्यते। 'याडापः' इत्यतः आप इति, 'सर्वनाम्नस्स्याट्' इत्यतस्स्याडिति, ह्रस्व इति, चानुवर्तते। तदाह। **आभ्यामित्यादिना** ॥ **इदमिति** ॥ 'विभाषा द्वितीयातृतीयाभ्याम्' इति सूत्रं न कर्तव्यमित्यर्थः। कुत इत्यत आह। **तीयस्येति** ॥ विभाषाप्रकरणे तीयप्रत्ययान्तस्य ङित्सु सर्वनामत्वोपसङ्ख्यानादित्यर्थः। नच तीयस्य ङित्सूपसङ्ख्यानमेव त्यज्यतामिति वाच्यम्। पुन्नपुंसकत्वार्थं तस्यावश्यकत्वात्। **अम्बार्थेति** ॥ व्याख्यातामिदं पुंसीदन्ताधिकारे। तत्र नदीविषये उदाहृतम्। अम्बार्थानुदाहरति। **हे अम्बेत्यादि** ॥ शेषं रमावत्। अत्र भाष्ये डलकवतीनां प्रतिषेधो वक्तव्यः। हे अम्बाडे। हे अम्बाले। हे अम्बिके। तदिदं वार्तिकं न कर्तव्यमित्युक्त्वा द्व्यच्कस्यैवाम्बार्थस्य ह्रस्व इति स्थितम्। यथाश्रुतवार्तिके तु हे अल्ल, इत्यत्राव्याप्तिस्स्यादिति तदाशयः। तदत्र फलितमाह। **असंयुक्ताः इति** ॥ द्व्यच्कानामम्बार्थानां ह्रस्वः इत्यस्याङ्गत्वात्तदन्तविधिः। अतः जगदम्ब इत्यत्र द्व्यच्काम्बान्तत्वात् भवति ह्रस्वः। **जरेति** ॥ 'जॄष् वयोहानौ'। 'षिद्भिदादिभ्यः' इत्यङ्। 'ऋदशोऽङि' इति गुणः, रपरत्वम्। अदन्तत्वात् टाप्, सुः, हल्ङ्यादिना सुलोप इति भावः। **जरसाविति** ॥ 'जराया जरसन्यतरस्याम्' इति अजादौ जरसादेश इति भावः। ननु शीभावे कृते सति आबन्तसन्निपातमुपजीव्य प्रवृत्तस्य सन्निपातपरिभाषया आबन्तत्वविघातकजरसादेशनिमित्तत्वासम्भवेन जरसादेशाभावे आद्गुणे जरे इत्येव स्यादित्यत आह। **शीभावादिति** ॥ जरसि कृते तु आबन्तत्वान्न शीभाव इति भावः। जरसः। जरसम्—जरसौ—जरसः। टा जरसा। नचात्र जरा आ इति स्थिते जरसादेशं बाधित्वा परत्वात् 'आङि चापः' इत्येत्त्वे अयादेशे जरयेत्येव युक्तमिति वाच्यम्। एकदेशविकृतन्यायेन कृते-

---

१ असंयुक्ता इति तु 'अम्बाले, अम्बाले, अम्बिके, इति भाष्योदाहरणाल्लभ्यते।

परत्वात् जरस्। जरसामित्यादि। पक्षे हलादौ च रमावत्। इह पूर्वविप्रतिषेधेन शीभावं कृत्वा सन्निपातपरिभाषायाः अनित्यतां चाश्रित्य 'जरसी' इति केचिदाहुः। तन्निर्मूलम्। यद्यपि जरसादेशस्य स्थानिवद्भावेनाबन्ततामाश्रित्य 'औङ आपः' (सू २८७) 'आङि चापः' (सू २८९) 'याडापः' (सू २९०) 'ह्रस्वनद्यापः—' (सू २०८) 'ङेराम्—' (सू २७०) इति च पञ्चापि विधयः प्राप्ताः। एवं नस्निश्पृत्सु। तथाप्यनल्विधावित्युक्तेर्ने भवन्ति।

ऽप्येत्त्वे प्रवृत्तस्य जरसादेशस्य नित्यतया तस्यैव प्रवृत्तेः। परान्नित्यस्य बलवत्त्वात्। कृते तु जरसि आबभावादेत्त्वन्न। ङे जरसे। नचात्र जरा ए इति स्थिते जरसादेशं बाधित्वा परत्वात् याटि वृद्धौ जरायै इत्येव युक्तमिति वाच्यम्। अन्तरङ्गत्वेन जरसादेशस्यैव प्रवृत्तेः। परादन्तरङ्गस्य बलवत्त्वात्। आपः परस्य ङितस्सुपो विहितस्य याटो बह्वाश्रयत्वेन बहिरङ्गत्वात्। ङसिङसोः जरसः। अत्रापि पूर्ववद्याट् न। जरसोः। एत्त्वं बाधित्वा नित्यत्वात् जरस्। आमि जरसाम्। नन्वामि नुटि कृते अजादिविभक्त्यभावात् कथं जरसादेश इत्यत आह। **आमि नुटः इति**॥ ङौ जरसि। परमपि ङेरामं याटञ्च नित्यत्वादन्तरङ्गत्वाच्च क्रमेण बाधित्वा जरस्। **पक्षे हलादौ च रमावदिति**॥ जरसादेशाभावपक्षे हलादावपि रमावदित्यर्थः। मतान्तरं दूषयितुमनुवदति। **इह पूर्वेत्यादिना**॥ इह जराशब्दे जरा औ इति स्थिते शीभावमाश्रित्य जरसीति के चिदाहुरित्यन्वयः। आश्रित्येत्यनन्तरं जरसादेशे कृते इति शेषः। ननु शीभावं बाधित्वा परत्वात् जरसादेश एव युक्त इत्यत आह। **पूर्वविप्रतिषेधेनेति**॥ विप्रतिषेधे परमित्यत्र परशब्दस्य इष्टवाचितामाश्रित्य क्वचित् पूर्वस्य प्रवृत्त्याश्रयणेनेत्यर्थः। ननु आबन्तसन्निपातमुपजीव्य प्रवृत्तस्य शीभावस्य सन्निपातपरिभाषया आबन्तसन्निपातविघातकजरसादेशनिमित्तत्वन्न सम्भवतीत्यत आह। **सन्निपातपरिभाषाया अनित्यताञ्चेति॥ तन्निर्मूलमिति**॥ पूर्वविप्रतिषेधाश्रयणस्य भाष्यपरिगणितेष्वप्रवृत्तेस्सन्निपातपरिभाषायास्सर्वत्रानित्यत्वाश्रयणे प्रमाणाभावाच्चेति भावः। स्यादेतत्। जरसौ, जरसामित्यत्र 'औङ आपः, ह्रस्वनद्यापो नुट्' इत्यपेक्षया परत्वादस्तु जरसादेशः। अस्तु च ङेङसिङस्सु जरसे, जरसः, इत्यत्र याटमन्तरङ्गत्वात् बाधित्वा जरसादेशः। अस्तु च ङौ जरसि इत्यत्र नित्यत्वादामं अन्तरङ्गत्वाद्याटञ्च बाधित्वा जरसादेशः। तथापि तस्य जरसादेशस्य स्थानिवत्त्वेन आबन्तत्वात् तमाश्रित्य एत्त्वशीभावयाट्नुडागमाः कुतो न स्युः। किञ्च अनेनैव न्यायेन नासिकाशब्दस्य निशाशब्दस्य पूतनाशब्दस्य च एत्त्वशीभावयाट्नुडागमान् बाधित्वा 'पद्नो' इत्यादिना नस् निश् पूत् इत्यादेशेषु क्रमेण कृतेषु तेषां स्थानिवद्भावेन आबन्तत्वमाश्रित्य एत्त्वशीभावयाट्नुडागमाः प्रथमं प्रसज्येरन्निति शङ्कते। **यद्यपीत्यादिना**॥ परिहरति। **तथापीति**॥ स्थानीभूताबन्ताश्रयविधय एते एत्त्वादिविधयः। अतस्तेषु कर्तव्येषु जरसाद्यादेशानां स्थानिवत्त्वं न सम्भवति। **अनल्विधाविति** तन्निषेधात्। ततश्च जरसाद्यादेशानामाबन्तत्वाभावात् एत्त्वादिविधयो न भवन्तीत्यर्थः। ननु अल्वस्याप्यकारादिधर्मभूर-

'आ आप्' इति प्रश्लिष्याकाररूपस्यैवापः सर्वत्र ग्रहणात् । एवं हल्ङ्याप्—' (सू २५५) इति सूत्रेऽपि 'आ आप्' 'ङी ई' इति प्रश्लेषात्, 'अतिखट्वः' 'निष्कौशाम्बिः' इत्यादिसिद्धेर्दीर्घग्रहणं प्रत्याख्येयम् । न चैवमपि 'अति-

---

स्कारेण स्थान्यलमाश्रित्य प्रवर्तमानो विधिरल्विधिः । ननु यथाकथञ्चित् अलाश्रयविधिरपि । रामायेत्यत्र 'सुपि च' इति दीर्घाभावप्रसङ्गात् । तत्र हि दीर्घो यत्रादिसुपि परतो विधीयते । यादेशस्य च सुप्त्वं स्थानिवत्त्वलभ्यम् । यादेशस्य च एकारः अल् स्थानी । ततश्च दीर्घस्य स्वनिमित्तभूतसुप्त्वांशे तदाश्रयत्वादनल्विधाविति निषेधात् दीर्घे कर्तव्ये यादेशस्य स्थानिवत्त्वाभावेन सुप्त्वाभावात् तस्मिन् परतो दीर्घो न स्यात् । अल्त्वव्याप्याकारत्वादिधर्म-पुरस्कारेण स्थान्यलमाश्रित्य प्रवर्तमानो विधिरल्विधिरित्याश्रयणे तु न दोषः । दीर्घो हि यादशस्थानिभूतं एकारमेकारत्वेन नाश्रयति । किन्तु सुप्त्वेनैव । सुप्त्वञ्चाल्त्वव्याप्यन्न भवति । भ्यामादावपि सत्त्वात् । ततश्च दीर्घस्यानल्विधित्वात् तस्मिन् कर्तव्ये यादेशस्य स्थानिवत्त्वेन सुप्त्वसम्भवात् दीर्घो निर्बाधः । प्रकृते च एत्त्वादिविधयः जरसादेशस्थानीभूतावन्तत्व-पुरस्कारेण सम्भवत्प्रवृत्तिकाः । आप्त्वञ्च समुदायधर्मः । नत्वाकारमात्रस्य । ततश्च एत्त्वा-दिविधीनामनल्विधित्वात्तेषु कर्तव्येषु जरसादेशस्य स्थानिवत्त्वेनावन्तत्वं दुर्वारमित्याशङ्क्य आह । **आ आबित्यादिना** ॥ 'आङि चापः' इत्यादिषु सवर्णदीर्घेण आ आप् इति प्रश्लिष्य आकाररूपावन्ताश्रयणेन एत्त्वादयो विधीयन्ते । ततश्च ते आकाररूपेणाप्यापमाश्रयन्तीति तेषामल्विधित्वात् तेषु कर्तव्येषु जरसादेशस्य स्थानिवत्त्वादावन्तत्वं न सम्भवति । ततश्च एत्त्वादिविधयोऽत्र न भवन्तीत्यर्थः । प्रसङ्गादाह । **एवमिति** ॥ यथा 'आङि चापः' इत्यादिषु आ आबिति प्रश्लेषः । एवं हल्ङ्याब्भ्यः इत्यत्र ङी, ई, आ, आबिति सवर्णदीर्घेण प्रश्लेषात् दीर्घग्रहणं प्रत्याख्येयमित्यन्वयः । ननु तत्र दीर्घग्रहणाभावे अतिखट्वः निष्कौशाम्बि-रित्यत्रापि सुलोपस्स्यात्। तथाहि । खट्वाशब्दष्टाबन्तः । खट्वामतिक्रान्तः अतिखट्वः । 'अल्पादयः क्रान्ताद्यर्थे' इति समासः। कुशाम्बेन निर्वृत्ता नगरी कौशाम्बी । 'तेन निर्वृत्तम्' इत्यण् । 'टिड्ढा-णञ्' इति ङीप् । निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः । 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' इति समासः । उभयत्रापि 'गोस्त्रियोः' इति आपो ङीपश्च ह्रस्वः, ततस्सुबुत्पत्तिरिति स्थितिः । अत्र स्थानिवत्त्वेनाकाररूपावन्तत्वस्य ईकाररूपङ्यन्तत्वस्य चानपायात् सोर्हल्ङ्या-दिलोपे प्राप्ते तन्निवृत्त्यर्थं दीर्घग्रहणं आवश्यकमेवेत्यत आह । **अतिखट्वः, निष्कौशाम्बि-रित्यादिसिद्धेरिति** ॥ अयमाशयः । ङी, ई, आ, आबिति प्रश्लेषे सति आत्वरूपेण ईत्व-रूपेण च ङ्यापावाश्रित्य सुलोपप्रवृत्तिर्वक्तव्या । ईत्त्वात्वयोश्च अल्त्वव्याप्यधर्मत्वात् तत्पुरस्कारेण प्रवर्तमानलोपविधेरल्विधित्वान्न स्थानिवत्त्वेन ङ्याबन्तत्वमस्तीति न सुलोप इति फलितम् । एवञ्च दीर्घग्रहणप्रयोजनस्य प्रश्लेषेणैव सिद्धत्वात् हल्ङ्यादिसूत्रे दीर्घग्रहणं न कर्तव्यमित्यन्यत्र विस्तरः । स्यादेतत् । 'याडापः' इत्यत्र आ आबिति प्रश्लेषे सत्यपि अतिखट्वायेत्यत्र याड् दु-र्वारः । खट्वामतिक्रान्तः अतिखट्वः । 'अल्पादयः' इति समासे 'गोस्त्रियोः' इति ह्रस्वत्वे रूपम् । ततो ङेर्यादेशे 'सुपि च' इति दीर्घे अतिखट्वायेति रूपम् । तत्र 'याडापः' इति याट् स्यात् ।

खट्वाय' इत्यत्र स्वाश्रयमाकारत्वं स्थानिवद्भावेनाप्त्वं चाश्रित्य याट् स्यादिति वाच्यम्। आबन्तं यदङ्गं ततः परस्य याड्विधानात्। 'उपसर्जनस्त्रीप्रत्यये तदादिनियमात्'। 'पद्दन्नो—' (सू २२८) इति नासिकाया नस्। नसः। नसा। नोभ्यामित्यादि। पक्षे सुटि च रमावत्। निशाया निश्। निशः। निशा।

दीर्घे सति स्थानिवत्त्वेनाकाररूपाप्त्वस्य सत्वात्। नचाकारत्वस्य अल्त्वव्याप्यधर्मत्वात् तत्पुरस्कारेण प्रवर्तमानयाड्विधेरल्विधित्वात् न दीर्घस्य स्थानिवत्त्वेनाकारत्वावच्छिन्नाप्त्वमिति वाच्यम्। याड्विधिर्हि आकाररूपावाश्रयः। तत्र आकाररूपत्वं दीर्घस्य स्वत एव सिद्धमिति न तत् स्थानिवत्त्वलभ्यम्। किन्तु आप्त्वमेव स्थानिवत्त्वलभ्यम्। आप्त्वञ्च समुदायधर्म एव। नत्वल्त्वव्याप्यधर्मः। तेन रूपेण स्थान्यलाश्रयत्वेऽपि अल्विधित्वाभावाद्याड्विधौ स्थानिवत्त्वं दुर्वारमिति शङ्कामुद्भाव्य परिहरति। **न चेति**॥ **एवमपीति**॥ 'याडापः' इत्यत्र आकारप्रश्लेषे सत्यपीत्यर्थः। **स्वाश्रयमिति**॥ स्वः आकारः आश्रयो यस्याकारत्वस्य तत्स्वाश्रयम्। स्वतस्सिद्धमिति यावत्। एवमर्थात्यारभ्य याट् स्यादित्यन्तस्सन्दर्भः शङ्कापरः। इति च न वाच्यमित्यन्वयः। कुत इत्यत आह। **आबन्तं यदङ्गमिति**॥ 'याडापः' इत्यत्र हि आब्ग्रहणेन प्रत्ययग्रहणपरिभाषया आबन्तं गृह्यते। अङ्गस्येति तद्विशेषणं भवति। ततश्चाबन्तादङ्गात् परस्य ङितो याड्विधीयते। यस्मात् शब्दात् यः प्रत्ययो विहितः तादृशप्रकृतिभूतशब्दरूपावयवकस्य तत्प्रत्ययरूपान्तावयवकस्य समुदायस्य ग्रहणमिति परिभाषार्थः। प्रत्ययग्रहणे प्रकृतिप्रत्ययसमुदायस्य ग्रहणमिति पर्यवसन्नार्थः। प्रकृते चातिखट्वायेत्यत्र खट्वशब्दादन्तात् टाब्विधानात् खट्वा इत्येव टाबन्तम्। तत्तु ङितं विभक्तिं प्रति नाङ्गम्। अतिखट्वशब्दादेव ङितो विधानात्। यत्वङ्गमतिखट्वेति न तट्टाबन्तम्। अतः स्थानिवत्त्वेन आप्त्वे सत्यपि न याडिति भावः। ननु 'ष्यङस्संप्रसारणम्' इत्यत्र भाष्ये स्त्रीप्रत्यये वाचनिकस्तदादिनियमप्रतिषेधः पठितः। तत् कथमस्य तत्प्राप्तिरित्यत आह। **उपसर्जनेति**॥ तत्र भाष्ये 'स्त्रीप्रत्यये चानुपसर्जनेन' इति उपसर्जनादन्यत्रैव तदादिनियमनिषेधस्य उक्तत्या प्रकृते स्त्रीप्रत्यये उपसर्जने तदादिनियमस्य निर्बाधत्वादिति भावः। नन्वेवमप्याब्ग्रहणेन प्रत्ययग्रहणपरिभाषया तदन्ते गृहीते तेनाङ्गस्य विशेषणात् आबन्तात्तं यदङ्गमित्यर्थात् अतिखट्वायेत्यत्र स दोषस्तदवस्थ इति वाच्यम्। अङ्गस्य विशेषणत्वाश्रयणात्। अत एव आब्ग्रहणे अदीर्घ आदेशो न स्थानिवदिति वार्तिकेन ह्रस्वे स्थानिवत्त्वनिषेधात् कथं तत्स्थानिके दीर्घे तल्लाभ इति वार्तिककारमतं भाष्यकारेण दूषितम्। अङ्गस्य विशेषणत्वाश्रयणात्। अथ नासिकाशब्दे विशेषमाह। **पद्दन्निति**॥ शसि नसः। टा नसा। **नोभ्यामित्यादीति**॥ नस् भ्यामित्यत्र 'स्वादिषु' इति पदत्वे 'ससजुषो रुः' इति रुत्वे 'हशि च' इत्युत्त्वे गुणे नोभ्याम्। नोभिः, इत्यादि रूपमित्यर्थः। नस्सु। **पक्षे इति**॥ शसादौ नसादेशाभावपक्षे इत्यर्थः। अथ निशाशब्दे विशेषं दर्शयति। **निशाया निशिति**॥ शसादौ 'पद्दन्नो' इत्यनेनेति शेषः।

२९४ । व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः । (८-२-३६)

व्रश्चादीनां सप्तानां छशान्तयोश्च षकारोऽन्तादेशः स्याज्झलि पदान्ते च । षस्य जश्त्वेन डः । निड्भ्याम् । निड्भिः । सुपि 'डः सि धुट्' (सू १३१) इति पक्षे धुट् । चर्त्वम् । तस्यासिद्धत्वात् 'चयो द्वितीयाः—' (वा ५०२३) इति टतयोष्ठथौ न । 'न पदान्ताट्टोः—' (सू ११४) इति ष्टुत्वं न । निट्त्सु–निट्सु ।

२९५ । षढोः कस्सि । (८-२-४१)

षस्य ढस्य च कः स्यात्सकारे परे । इति तु न भवति । जश्त्वं प्रत्यसिद्धत्वात् । केचित्तु व्रश्चादिसूत्रे 'दादेर्धातोः—' (सू ३२५) इति सूत्रात् 'धातोः' इत्यनुवर्तयन्ति । तन्मते जश्त्वेन जकारे निज्भ्याम् ।

निश् भ्यामिति स्थिते । **व्रश्चभ्रस्ज** ॥ व्रश्चादयस्सप्त धातवः । छशौ वर्णौ, ताभ्यां शब्दरूपविशेष्यमादाय तदन्तविधिः । 'झलो झलि' इत्यतो झलीत्यनुवर्तते । पदस्येत्यधिकृतम् । 'स्कोस्संयोगाद्योरन्ते च' इत्यतः अन्ते इत्यनुवर्तते । तदाह । **व्रश्चादीनामिति** ॥ अन्तादेश इत्यलोऽन्त्यसूत्रलभ्यम् । **षस्य जश्त्वेन डः इति** ॥ प्रकृतसूत्रेण शस्य षत्वे तस्य षकारस्य 'स्वादिषु' इति पदत्वात् 'झलाञ्जशोऽन्ते' इति जश्त्वेन स्थानसाम्याद्डकारे निड्भ्यामित्यादि रूपमित्यर्थः । **सुपीति** ॥ निश् सु इति स्थिते 'व्रश्च' इति षत्वे तस्य जश्त्वेन डकारे 'डस्सि धुट्' इति कदाचित् धुडागमः । **चर्त्वमिति** ॥ 'धयोः' इति शेषः । स्थानसाम्यात् डस्य टः धस्य तः । **तस्येति** ॥ चर्त्वस्येत्यर्थः । **ठथौ नेति** ॥ धुडभावपक्षे टस्य ठो न । धुट्पक्षे तस्य थो नेत्यर्थः । 'नादिन्याक्रोशे' इति सूत्रस्थभाष्ये 'चयो द्वितीयाः' इत्यस्य पाठदर्शनात् तदपेक्षया परत्वम् । अथ तकारस्य ष्टुत्वेन टकारमाशङ्क्य आह । **न पदान्तादिति** ॥ 'स्वादिषु' इति पदत्वं बोध्यम् । **निट्त्सु इति** ॥ धुट्पक्षे रूपम् । तदभावपक्षे तु निट्सु । तत्र धुडभावपक्षे निश् सु इति स्थिते 'व्रश्च' इति षत्वे तस्य षकारस्य जश्त्वात् प्राक् ककारमाशङ्क्यितुमाह । **षढोः कस्सि** ॥ षश्च ढश्चेति द्वन्द्वः । सि इति सप्तमी । तदाह । **षस्येत्यादिना** ॥ **इति तु न भवतीति** ॥ षकारस्य ककारो न भवतीत्यर्थः । **जश्त्वं प्रत्यसिद्धत्वादिति** ॥ 'झलाञ्जशोऽन्ते' इत्यपेक्षया 'षढोः कस्सि' इत्यस्य परत्वादिति भावः । शसि निशादेशाभावपक्षे सुटि च रमावत् । व्रश्चादिसूत्रे मतान्तरमाह । **केचित्त्विति** ॥ 'एकाचो बशः' इत्युत्तरसूत्रे धातोरित्यस्यानुवृत्त्या मध्येऽपि तदनुवृत्तेरौचित्यादिति भावः । अनुवृत्तञ्च धातोरित्येतत् छशयोरेव विशेषणम् । व्रश्चादिषु धातुत्वाव्यभिचारात् । **जश्त्वेनेति** ॥ निश् भ्यामित्यादौ निश् इत्यस्य धातुत्वाभावात् षत्वाभावे 'झलाञ्जशोऽन्ते' इति जश्त्वेन शकारस्य स्थानसाम्यात् जकार इत्यर्थः । निज् भ्यामित्यत्र कुत्वमाश-

निज्भिः। 'चोः कुः' (सू ३७८) इति कुत्वं तु न भवति। जश्त्वस्यासिद्धत्वात्। जश्त्वम्। श्चुत्वम्। चर्त्वम्। निच्शु। निच्छु। 'मांसपूतनासानूनां मांस्पूत्स्नवो वाच्याः शसादौ वा' (वा ३४९६)। पूतः। पूता। पूद्भ्याम्। पक्षे सुटि च रमावत्। गोपा विश्वपावत्।

इत्यादन्ताः।

॥ अथ अजन्तस्त्रीलिङ्गे इदन्तप्रकरणम् ॥

मतिशब्दः प्रायेण हरिवत्। स्त्रीत्वान्नत्वाभावः। मतीः। नात्वं न। मत्या।

२९६। ङिति ह्रस्वश्च। (१-४-६)

ङ्च आह। **कुत्वन्तु नेति** ॥ **जश्त्वस्यासिद्धत्वादिति** ॥ कुत्वं प्रतीति शेषः। **निच्शु इति** ॥ निश् सु इति स्थिते, शस्य जश्त्वेन जः, सस्य श्चुत्वेन शः, जस्य चर्त्वेन चः, शस्य छत्वविकल्पः। **मांसपूतना** ॥ मांस, पूतना, सानु, इत्येतेषां मांस्, पूत्, स्नु, इत्यादेशा वाच्या इत्यर्थः। 'पद्दन्नो' इति सूत्रे वार्तिकमेतत्। अत एवाह। **शसादौ वेति** ॥ पद्दन्नितिसूत्रस्य शसादौ विकल्पेन प्रवृत्तेरिति भावः। मांससानुशब्दयोरस्त्रीलिङ्गत्वात् पूतनाशब्दस्यैव शसादौ पूदादेशमुदाहरति। **पूतः इति** ॥ **पक्षे इति** ॥ पूदादेशाभावपक्षे इत्यर्थः। **गोपा विश्वपावदिति** ॥ आबन्तत्वाभावात् न सुलोपः इत्यर्थः ॥

इत्यादन्ताः।

अथ इदन्ताः निरूप्यन्ते। **मतिशब्दः प्रायेण हरिवदिति** ॥ प्रायशब्दो बहुलपर्यायः। "प्रायो भूम्नि" इत्यमरः। इह तु ईषदूनत्वे वर्तते। प्रकृत्यादित्वात्तृतीया। मतिशब्दः ईषदूनहरिशब्दवत् प्रत्येतव्यः इत्यर्थः। शसि विशेषमाह। **स्त्रीत्वान्नत्वाभावः इति** ॥ 'तस्माच्छसो नः पुंसि' इति नत्वस्य पुंस्त्वे विधानादिति भावः। तृतीयैकवचने घित्वान्नाभावमाशङ्क्य आह। **नात्वन्नेति** ॥ 'आङो नाऽस्त्रियाम्' इति नात्वविधौ अस्त्रियामिति पर्युदासादिति भावः। इदन्तत्वात् यू स्त्र्याख्याविति नदीत्वे अप्राप्ते ङित्सु तद्विकल्पं दर्शयितुमाह। **ङिति ह्रस्वश्च** ॥ अत्र चकाराद्वाक्यद्वयमिदम्। तथा हि। 'यू स्त्र्याख्यौ नदी' इत्यनुवर्तते। **ईश्च ऊश्च यू 'दीर्घाज्जसि च' इति पूर्वसवर्णदीर्घाभावश्छान्दसः। स्त्रियमेवाचक्षाते स्त्र्याख्यौ**

इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ ह्रस्वौ चेवर्णोवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति परे। 'आण्नद्याः' (सू २६८)। मत्यै—मतये। मत्याः—मतेः। मत्याः—मतेः। नदीत्वपक्षे 'औत्' (सू २५६) इति ङेरौत्त्वे प्राप्ते।

२९७। इदुद्भ्याम्। (७-३-११७)

नदीसंज्ञकाभ्यामिदुद्भ्यां परस्य ङेराम् स्यात्। पक्षे 'अच्च घेः' (सू २४७) मत्याम्—मतौ। एवं श्रुत्यादयः।

२९८। त्रिचतुरोः स्त्रियां तिसृचतसृ। (७-२-९९)

स्त्रीलिङ्गयोरेतयोरेतावादेशौ स्तो विभक्तौ परतः।

नित्यस्त्रीलिङ्गाविति यावत्। 'नेयङुवङ्स्थानावस्त्री' इति सूत्रं नञ्वर्जमनुवर्तते। इयङुवङोः स्थानं स्थितिर्ययोस्ताविति विग्रहः। इयङुवङ्प्राप्तियोग्यावित्यर्थः। 'वामि' इत्यतो वेत्यनुवर्तते। ततश्च इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ नदीसंज्ञौ वा स्तो ङिति परे, इति वाक्यमेकं सम्पद्यते। पुनरपि यू इत्यनुवर्तते। इश्च उश्च यू। ह्रस्व इति तत्र प्रत्येकमन्वेति। स्त्र्याख्याविति चानुवर्तते। स्त्रीलिङ्गावित्येतावदेव विवक्षितम्। नतु नित्यस्त्रीलिङ्गाविति। व्याख्यानात्। 'वामि' इत्यतो वेति चानुवर्तते। ततश्च स्त्रीलिङ्गौ ह्रस्वौ चेवर्णोवर्णौ नदीसंज्ञौ वा स्तो ङिति परे इति वाक्यान्तरं सम्पद्यते। तदाह। **इयङुवङ्स्थानावित्यादिना**॥ द्वितीयवाक्येऽपि स्त्रीलिङ्गे नित्यत्वविशेषणे तु इ्वशन्यरणिप्रभृतीनामुभयलिङ्गानां पटुमृदुप्रभृतीनां त्रिलिङ्गानाञ्च ङिति नदीत्वविकल्पो न स्यादिति बोध्यम्। तत्र ह्रस्वयोरप्राप्ते दीर्घयोस्तु 'नेयङुवङ्स्थानौ' इति निषेधादप्राप्ते नदीत्वे विभाषेयम्। नदीत्वपक्षे आह। **आण्नद्याः इति**॥ मति ए इति स्थिते। आटि वृद्धौ यणि च सिद्धं रूपमाह। **मत्यै इति**॥ **मतये इति**॥ नदीत्वाभावपक्षे 'शेषो घ्यसखि' इति घित्वात् घेर्ङितीति गुणे अयादेशे हरिशब्दवद्रूपम्। नदीत्वपक्षे ङसिङसोरादि वृद्धिराकारः, यण्। मत्याः। नदीत्वाभावे मतेः। आमि नदीत्वाभावेऽपि ह्रस्वान्तत्वान्नुटि दीर्घः। मतीनाम्। ङौ विशेषमाह। **नदीत्वपक्षे इति**॥ नदीत्वपक्षे घित्वाभावात् 'अच्च घेः' इति अत्त्वसन्नियोगशिष्टमौत्त्वं न भवति। किन्तु ङेरामिति प्राप्तं, तत् बाधित्वा औदिति केवलमौत्त्वे परत्वात् प्राप्ते सतीत्यर्थः। **इदुद्भ्याम्**॥ 'ङेराम्' इति सूत्रान्नदीग्रहणं 'औत्' इति सूत्रं चानुवर्तते। तदाह। **नदीसंज्ञकाभ्यामित्यादिना॥ पक्षे इति**॥ नदीत्वाभावपक्षे 'अच्च घेः' इत्यत्त्वसन्नियोगशिष्टमौत्त्वमित्यर्थः। **मत्याम्—मताविति**॥ नदीत्वे तदभावे च रूपम्। मत्यामित्यत्र सन्निपातपरिभाषया अनित्यत्वाद्यण्। **एवं श्रुत्यादयः इति**॥ आदिना स्त्र्यादिसङ्ग्रहः। **त्रिचतुरोः**॥ **एतयोरेतावि**॥ त्रिचतुरोः तिसृ चतसृ इत्येतावित्यर्थः। **विभक्तौ**॥ 'अङ्ग

२९९। अचि र ऋतः। (७-२-१००)

तिसृ चतसृ एतयोर्ऋकारस्य रेफादेशः स्यादचि। गुणदीर्घोत्त्वानामपवादः। तिस्रः। तिस्रः। तिसृभिः। तिसृभ्यः। तिसृभ्यः। आमि 'नुमचिर–' (वा ४३७४) इति नुट्।

३००। न तिसृचतसृ। (६-४-४)

तिसृ चतसृ एतयोर्नामि दीर्घो न स्यात्। तिसृणाम्। तिसृषु। 'स्त्रियाम्' इति त्रिचतुरोर्विशेषणान्नेह। प्रियास्त्रयस्त्रीणि वा यस्याः सा प्रियत्रिः। मतिशब्दवत्। आमि तु 'प्रियत्रयाणाम्' इति विशेषः। 'प्रियास्तिस्रो यस्य सः' इति

आ विभक्तौ' इत्यतस्तदनुवृत्तेरिति भावः। जश्शसोः तिसृ अस् इति स्थिते। **अचि र ऋतः**॥ पूर्वसूत्रात् तिसृचतसृ इत्यनुवर्तते। तच्चेह लुप्तषष्ठीकमाश्रीयते। तदाह। **तिसृ इत्यादिना**॥ ननु 'इको यणचि' इत्येव सिद्धमित्यत आह। **गुणदीर्घोत्त्वानामपवादः इति**॥ 'ऋतो ङि' इति गुणस्य 'प्रथमयोः' इति पूर्वसवर्णदीर्घस्य 'ऋत उत्' इत्युत्त्वस्य च रत्वमपवाद इत्यर्थः। **तिस्रः इति**॥ जश्शसोः रूपम्। तत्र जसि 'ऋतो ङि' इति गुणस्य रत्वमपवादः। शसि तु 'प्रथमयोः' इति पूर्वसवर्णदीर्घस्य रत्वमपवादः। **आमीति**॥ तिसृ आम् इति स्थिते नुटं बाधित्वा 'अचि र ऋतः' इति रत्वे तिस्राम्इति प्राप्ते 'नुमचिरतृज्वद्भावगुणेभ्यो नुट् पूर्वविप्रतिषेधेन' इति रत्वं बाधित्वा नुडित्यर्थः। तिसृ नामिति स्थिते 'नामि' इति दीर्घे प्राप्ते। **न तिसृचतसृ**॥ तिसृचतसृ इति लुप्तषष्ठीकं पदम्। 'ढ्रलोपे' इत्यतो दीर्घ इत्यनुवर्तते। 'नामि' इति सूत्रञ्चानुवर्तते। तदाह। **तिसृ इत्यादिना**॥ **तिसृणामिति**॥ 'ऋवर्णान्नस्य' इति णत्वम्। ननु 'अचि र' इति रत्वं 'ऋत उत्' इति उत्त्वस्य कथमपवादस्स्यात्। उत्त्वस्य ङसिङसोरेव प्राप्तेः। त्रिचतुर्शब्दयोश्च नित्यं बहुवचनान्तत्वेन ङसिङसोरभावादिति चेन्न। प्रियतिस्रः इत्यादिबहुव्रीहौ तत्सत्त्वात्। तच्चानुपदमेव वक्ष्यते। ननु प्रियाः त्रयः त्रीणि वा यस्यास्सा प्रियत्रिः इति बहुव्रीहावपि तिस्रादेक्षः कुतो न स्यादित्यत आह। **स्त्रियामित्यादि**॥ प्रियत्रिशब्दो हि स्त्रीलिङ्गः। ननु त्रिशब्दः। स्त्रियामिति त्रिचतुरोर्विशेषणम्, ननु तदन्तयोः। प्रमाणाभावात्। न चाङ्गत्वात्तदन्तलाभ इति वाच्यम्। एवमपि त्रिचतुरोरेव प्रत्यक्षश्रुतत्वेन स्त्रियामित्यस्य तद्विशेषणताया एवोचितत्वादिति भावः। 'ङिति ह्रस्वश्च' इति नदीत्वविकल्पं मत्वा आह। **मतिशब्दवदिति**॥ **आमि त्विति**॥ षष्ठीबहुवचने 'त्रेस्त्रयः' इति त्रयादेशस्य आङ्गत्वेन तदन्तेऽपि प्रवृत्तेरिति भावः। एवञ्च स्त्रियामित्यस्य त्रिचतुरन्ताङ्गविशेषणत्वे प्रियत्रिशब्दे पुन्नपुंसकलिङ्गत्रिशब्दगर्भबहुव्रीहौ अतिव्याप्तिस्स्यादिति त्रिचतुरोरेव स्त्रियामिति विशेषणमिति स्थितम्। अथ स्त्रीलिङ्गत्रिशब्दगर्भबहुव्रीहौ अव्याप्तिनिरासार्थमपि स्त्रियामिति त्रिचतुरोरेव विशेषणम्, न तु तदन्तयोरिति मत्वा आह। **प्रियास्तिस्रः इत्यादि**॥ **प्रियत्रिसंज्ञे इति**॥ समासे इति अन्तर्वर्तिविभक्तेर्लुक्त्वात् तिस्रादेशनिवृत्तौ प्रियत्रिशब्दात्

विग्रहे तु प्रियतिस्रौ। प्रियतिस्रः। प्रियतिस्रमित्यादि। प्रियास्तिस्रो यस्य तत्कुलं प्रियत्रि। स्वमोर्लुका लुप्तत्वेन प्रत्ययलक्षणाभावान्न तिस्रादेशः। 'न लुमता—' (सू २६३) इति निषेधस्यानित्यत्वात्पक्षे प्रियतिसृ। रत्वात्पूर्वविप्रतिषेधेन नुम् (वा ५०३६)। प्रियतिसृणी। प्रियतिसृणि। तृतीयादिषु

सुः। अत्र प्रियत्रिशब्दस्य पुल्लिङ्गत्वेऽपि त्रिशब्दस्य स्त्रीलिङ्गत्वात्तिस्रादेशः। 'ऋदुशनस्' इत्यनङ्। 'सर्वनामस्थाने च' इति दीर्घः। नलोपः। स्त्रियामित्यस्य त्रिचतुरन्ताङ्गविशेषणत्वे त्वन्नाव्याप्तिस्स्यादिति भावः। ननु त्रिचतुरन्ताङ्गविशेषणत्वेऽपि नात्राव्याप्तिः। प्रियास्तिस्रो यस्येति विग्रहवाक्ये प्रवृत्तस्य तिस्रादेशस्य समासेऽप्यनुवृत्तिसम्भवात् इति चेन्मैवम्। लौकिकवाक्यं हि परिनिष्ठितत्वात् समासस्य न प्रकृतिः किन्तु अलौकिकमेव प्रक्रियावाक्यम्। ततश्च प्रिया अस् त्रि अस् इत्यलौकिकप्रक्रियावाक्ये समासप्रवृत्तौ 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते' इति परिभाषया तिस्रादेशं बाधित्वा विभक्तिलुकि प्रियात्रिशब्दात् समासात् सुबुत्पत्तौ त्रिचतुरोरित्यस्याङ्गत्वात् तदन्तविधावपि 'निर्दिश्यमानस्यादेशा भवन्ति' इति परिभाषया त्रिशब्दस्य तिस्रादेशः। सच स्त्रियामित्यस्य 'त्रिचतुरोः' इत्यङ्गविशेषणत्वे सति न स्यात्। प्रियत्रिशब्दस्याङ्गस्य पुल्लिङ्गत्वात्। सति चात्र तिस्रादेशे 'नयूतश्च' इति कप् तु न। सहि समासान्तत्वात् समासवदलौकिकविग्रहवाक्ये प्रवृत्तिमर्हति। तदानीञ्च उत्तरपदस्य त्रिशब्दस्य ऋदन्तत्वाभावान्न कप्। अन्तर्वर्तिविभक्तेर्लुका लुप्तत्वेन प्रत्ययलक्षणाभावाच्च। नचाकृते समासान्ते कपि प्रियत्रिशब्दात् सुबुत्पत्तौ तिस्रादेशे सति कप् शङ्क्यः। अकृते कपि समासान्ते समासत्वस्यैवानिष्पत्त्या ततस्सुबुत्पत्तेरसम्भवात् इत्यास्तां तावत्। **प्रियतिस्राविति** ॥ गुणं बाधित्वा रत्वम्। **प्रियतिस्रः इति** ॥ जसि पूर्वसवर्णदीर्घं बाधित्वा रत्वम्। **प्रियतिस्रमिति** ॥ अमि पूर्वरूपं गुणं च बाधित्वा रत्वम्। 'गुणदीर्घोत्त्वानामपवादः' इति पूर्वरूपस्याप्युपलक्षणम्। **इत्यादीति** ॥ प्रियतिस्रौ। प्रियतिस्रः। प्रियतिस्रा। प्रियतिस्रे। ङसिङसोः प्रियतिस्रः इत्येव 'ऋत उत्' इत्युत्त्वं बाधित्वा रत्वम्। प्रियतिस्रोः। आमि त्रयादेशं बाधित्वा परत्वात्तिस्रादेशे सति रत्वं बाधित्वा 'नुमचिर' इति नुट्। प्रियतिसृणाम्। प्रियतिस्रि। 'ऋतो ङि' इति गुणापवादो रत्वम्। प्रियतिस्रोः। ननु प्रियास्तिस्रो यस्य तत् कुलं प्रियत्रि इति कथम्। त्रिशब्दस्य स्त्रीलिङ्गत्वेन तिसृभावप्राप्तेः इत्यत आह। **स्वमोर्लुकेति** ॥ 'स्वमोर्नपुंसकात्' इति स्वमोर्लुका लुप्तत्वेन 'न लुमता' इति प्रत्ययलक्षणाभावात् विभक्तिपरकत्वाभावान्न तिसृभाव इत्यर्थः। **अनित्यत्वादिति** ॥ 'न लुमता' इत्यस्यानित्यत्वम् 'इकोऽचि विभक्तौ' इत्यज्ग्रहणात् इति नपुंसकाधिकारे वक्ष्यते। अजादिविभक्तौ 'नपुंसकस्य झलचः' इति नुमपेक्षया परत्वात् 'अचि र ऋतः' इति रत्वमाशङ्क्य आह। **रत्वादिति** ॥ ल्यब्लोपे पञ्चमी। पूर्वविप्रतिषेधेन रत्वं बाधित्वा नुमित्यर्थः। **प्रियतिसृणी इति** ॥ रत्वं बाधित्वा नुमि णत्वम्। **प्रियतिसृणीति** ॥ जश्शसोरिशिः। रत्वं बाधित्वा नुम्। शेस्सर्वनामस्थानत्वा-

१. इह 'प्रियतिसृणी, प्रियतिसृणि' इति 'प्रत्ययोत्तरपदयोश्च' (सू १३७३) इति सूत्रभाष्योदाहरणं मानम्।

वक्ष्यमाणपुंवद्भावविकल्पात्पर्यायेण नुम्रत्वभावौ। प्रियतिसृणा। प्रियतिस्रा इत्यादि। द्वेरत्वे सत्याप्। द्वे। द्वे। द्वाभ्याम्। द्वाभ्याम्। द्वाभ्याम्। द्वयोः। द्वयोः।

इति इदन्ताः।

॥ अथ अजन्तस्त्रीलिङ्गे ईदन्तप्रकरणम् ॥

गौरी। गौर्यौ। गौर्यः। नदीकार्यम्, हे गौरि। गौर्यै, इत्यादि। एवं वाणीनद्यादयः। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणादनङ्णिद्वद्भावे च प्राप्ते 'विभक्तौ लिङ्गविशिष्टाग्रहणम्' (वा ४२३८)। सखी। सख्यौ।

न्तलक्षणदीर्घः, णत्वम्। 'प्रत्ययोत्तरपदयोश्च' इति सूत्रे प्रियतिसृणा, प्रियतिसृणि इति भाष्योदाहरणात् पूर्वविप्रतिषेधमाश्रित्य नुमा रत्वबाध इति बोध्यम्। **प्रियतिसृणेति** ॥ टायां पुंवत्त्वाभावपक्षे नुमि रूपम्। **प्रियतिस्रेति** ॥ पुंवत्त्वे नुमभावात् रत्वम्। **इत्यादीति** ॥ आदिना प्रियतिस्रे, प्रियतिसृणे इत्यादि बोध्यम्। **द्वेरत्वे इति** ॥ द्विशब्दाद्विभक्तौ सत्यां ल्यदाद्यत्वे 'अजाद्यतः' इति टाबित्यर्थः। **द्वे इत्यादि** ॥ टापि सति सवर्णदीर्घे द्वाशब्दस्य रमावद्रूपाणीति भावः ॥

इति इदन्ताः।

अथ ईदन्ताः निरूप्यन्ते। **गौरीति** ॥ गौरशब्दात् गौरादिलक्षणङीषि। 'यस्येति च' इत्यकारलोपे गौरीशब्दः। तस्मात् सुः, हल्ङ्यादिलोप इति भावः। **गौर्याविति** ॥ 'दीर्घाज्जसि च' इति पूर्वसवर्णदीर्घनिषेधे यणिति भावः। **गौर्यः इति** ॥ 'दीर्घाज्जसि च' इति पूर्वसवर्णदीर्घनिषेधे यणिति भावः। **नदीकार्यमिति** ॥ 'अम्बार्थनद्योर्ह्रस्वः'। 'आण्नद्याः' ह्रस्वनद्यापो नुट्। 'ङेराम्नद्याम्नीभ्यः' इति विहितमित्यर्थः। 'यू स्त्र्याख्यौ' इति नदीत्वम्। बहुश्रेयसीवत्। **एवं वाणीनद्यादयः इति** ॥ 'वण शब्दे' वण्यते शब्द्यते इति वाणी। 'इञ् वपादिभ्यः' इति इञ्। 'कृदिकारादक्तिनः' इति ङीष्। 'नदट्' इति पचादौ पठितात् टित्त्वात् ङीप्। आदिना कर्त्री दण्डिनी इत्यादिसङ्ग्रहः। 'सख्यशिश्वीति-भाषायाम्' इति सखिशब्दात् ङीषि 'यस्येति च' इति इकारलोपे सखीशब्दः। तस्य 'अनङ् सौ' इत्यनङ्। 'सख्युरसम्बुद्धौ' इति णिद्वत्त्वञ्चाशङ्कते। **प्रातिपदिकेति** ॥ विभक्तौ लिङ्गविशिष्टाग्रहणम्। 'युवोरनाकौ' इत्यत्र 'ङ्याप्प्रातिपदिकात्' इत्यत्र च भाष्ये इयं परिभाषा पठिता। विभक्तिनिमित्तके कार्ये कर्तव्ये प्रातिपदिकग्रहणे लिङ्गविशिष्टस्य ग्रहणं नास्तीत्यर्थः। तथा च अनङ्, णिद्वत्त्वञ्च न भवतीति भावः। **सखीति** ॥ ङ्यन्तत्वात् सुलोपः।

सख्यः, इत्यादि। गौरीवत्। अङन्तत्वान्न सुलोपः। लक्ष्मीः। शेषं गौरीवत्। एवं तरीतन्त्रीशब्दाः। स्त्री। हे स्त्रि।

३०१। स्त्रियाः। (६-४-७९)

स्त्रीशब्दस्येयङ् स्यादजादौ प्रत्यये परे। स्त्रियौ। स्त्रियः।

३०२। वाऽम्शसोः। (६-४-८०)

अमि शसि च स्त्रिया इयङ् वा स्यात्। स्त्रियम्—स्त्रीम्। स्त्रियौ। स्त्रियः—स्त्रीः। स्त्रिया। स्त्रियै। स्त्रियाः। स्त्रियाः। स्त्रियोः। परत्वान्नुट्। स्त्रीणाम्। स्त्रियाम्। स्त्रियोः। स्त्रीषु। स्त्रियमतिक्रान्तोऽतिस्त्रिः। अतिस्त्रियौ।

सख्यः इत्यादीति ॥ गौरीवदेव रूपाणीत्यर्थः। 'लक्षेर्मुट् च' इति लक्षधातोरीप्रत्यये मुडागमे लक्ष्मीशब्दः। तस्य विशेषमाह। **अङन्तत्वादिति** ॥ 'कृदिकारादक्तिनः' इति ङीषि तु सुलोपो भवत्येव। **शेषं गौरीवदिति** ॥ अम्बार्थेत्यादिकार्यमित्यर्थः। **एवं तरीतन्त्र्यादयः इति** ॥ 'अवितॄस्तृतन्त्रिभ्य ईः' इति ईप्रत्यये तरीः, स्तरीः, तन्त्रीः, इत्यादि। अत्राप्यङन्तत्वान्न सुलोपः। 'कृदिकारात्' इति ङीषि तु सुलोपः। शेषं गौरीवत्। **स्त्री इति** ॥ स्त्यै शब्दसङ्घातयोः। स्त्यायतः सङ्गते भवतः अस्यां शुक्रशोणिते इति स्त्री। स्त्यायतेः ड्रट्। डटाविती। डित्त्वसामर्थ्यादभस्यापि टेर्लोपः। लोपो व्योरिति यलोपः। टित्त्वात् ङीप्। हल्ङ्यादिलोप इति भावः। **हे स्त्रि इति** ॥ अम्बार्थेति ह्रस्वः। स्त्री औ इति स्थिते अधात्विकारत्वात् 'अचि श्नुधातु' इति इयङ्यप्राप्ते। **स्त्रियाः** ॥ अचि श्नुधात्विल्यतः अचीति इयङिति चानुवर्तते। तदाह। **स्त्रीशब्दस्येत्यादिना** ॥ **स्त्रियौ, स्त्रियः इति** ॥ औजसोः रूपम्। अमि शसि च, स्त्रियं, स्त्रियः इति नित्यमियङि प्राप्ते। **वाऽम्शसोः** ॥ वा अम्शसोः इति च्छेदः। स्त्रिया इति इयङिति चानुवर्तते। तदाह। **अमि शसि चेत्यादिना। स्त्रियमिति** ॥ इयङि रूपम्। **स्त्रीमिति** ॥ इयङभावे अमि पूर्वः। **स्त्रियाविति** ॥ औटि रूपम्। **स्त्रियः—स्त्रीः इति** ॥ शसि 'वाम्शसोः' इति इयङि तदभावे च रूपम्। **स्त्रियेति** ॥ इयङ्। **स्त्रियै इति** ॥ आण्नद्या इत्यात्, वृद्धिः, इयङ्। **स्त्रियाः इति** ॥ ङसिङसोराट्, वृद्धिः। इयङ्। **स्त्रियोरिति** ॥ ओसि इयङ्। **परत्वान्नुडिति** ॥ आमि 'स्त्रियाः' इति इयङम्बाधित्वा परत्वान्नुट्। **स्त्रीणामिति** ॥ कृते नुटि अजादिविभक्त्यभावान्नेयङ्। **स्त्रियामिति** ॥ ङेराम्। इयङ्। अथ प्रसङ्गात् पुंसि नपुंसके च स्त्रीशब्दस्य विशेषं दर्शयति। **स्त्रियमतिक्रान्तोऽतिस्त्रिरिति** ॥ 'अल्पादयः क्रान्ताद्यर्थे' इति समासः। गोस्त्रियोरिति ह्रस्वत्वम्। दीर्घङ्यन्तत्वाभावात् ईकाररूपङ्यन्तत्वाभावाद्वा हल्ङ्यादिलोपो न भवति। **अतिस्त्रियाविति** ॥ स्त्रियाः इत्यस्याङ्गत्वात्तदन्तेऽपि एकदेशविकृतन्यायेन प्रवृत्तेरियङिति भावः। अथ जस्, डा, ङे, ङसि, ङस्, आम्, ङि, इत्येषु अतिस्त्रीशब्दस्य इयङ्नेत्येतद् श्लोकेन

"गुणनाभावौत्त्वनुड्भिः परत्वात्पुंसि बाध्यते।
क्लीबे नुमा च स्त्रीशब्दस्येयङित्यवधार्यताम्॥"

'जसि च' (सू २४१)। अतिस्रयः। हे अतिस्त्रे। हे अतिस्त्रियौ। हे अतिस्त्रयः। 'वाम्शसोः' (सू ३०२)। अतिस्त्रियम्—अतिस्त्रिम्। अतिस्त्रियौ। अतिस्त्रियः—अतिस्त्रीन्। अतिस्त्रिणा। 'घेर्ङिति' (सू २४५)। अतिस्त्रये। अतिस्त्रेः। अतिस्त्रेः। अतिस्त्रियोः। अतिस्त्रीणाम्। 'अच्च घेः' (सू २४७) अतिस्त्रौ। अतिस्त्रियोः।

"ओस्यौकारे च नित्यं स्यादम्शसोस्तु विभाषया।
इयादेशोऽचि नान्यत्र स्त्रियाः पुंस्युपसर्जने॥"

क्लीबे तु नुम्। अतिस्त्रि। अतिस्त्रिणी। अतिस्त्रीणि। अतिस्त्रिणा। अतिस्त्रिणे। ङेप्रभृतावजादौ वक्ष्यमाणपुंवद्भावात्पक्षे प्राग्वद्रूपम्। अतिस्त्रये—अतिस्त्रिणे।

सङ्गृह्णाति। **गुणनाभावेत्यादिना**॥ पुंसि गुणनाभावौत्त्वनुड्भिः, क्लीबे नुमा च परत्वात् स्त्रीशब्दस्य इयङ् बाध्यते, इत्यवधार्यतामित्यन्वयः। **जसि चेति**॥ घेर्ङितीति गुणः। 'आङो नाऽस्त्रियाम्' इति नात्वम्, 'अच्च घेः' इत्यौत्त्वम्, 'ह्रस्वनद्यापः' इति नुट्, 'इकोऽचि विभक्तौ' इति नुम्, एतेषामियङपेक्षया परत्वादित्यर्थः। 'जसि च' इत्यनन्तरम् इति गुण इति शेषः। **अतिस्त्रयः इति**॥ इयङ बाधित्वा गुणे अयादेशे रूपम्। **हे अतिस्त्रे इति**॥ 'ह्रस्वस्य गुणः' इति गुणे 'एङ् ह्रस्वात्' इति सम्बुद्धिलोपः। 'वाम्शसोः' इत्यनन्तरं इयङ्विकल्प इति शेषः। **अतिस्त्रियमिति**॥ अमि इयङ्पक्षे रूपम्। **अतिस्त्रिमिति**॥ इयङभावपक्षे 'अमि पूर्वः'। **अतिस्त्रियः इति**॥ 'वाम्शसोः' इति इयङ्। **अतिस्त्रीनिति**॥ इयङभावे पूर्वसवर्णदीर्घे 'तस्माच्छसः' इति नत्वम्। टा अतिस्त्रिणा। इयङं बाधित्वा परत्वात् 'आङो नाऽस्त्रियाम्' इति नात्वम्। भ्यामादिष्वविकृतम्। ङे अतिस्त्रये। इयङं बाधित्वा परत्वात् 'घेर्ङिति' इति गुणे अयादेशः। ङसिङसोः अतिस्त्रेः। परत्वात् 'घेर्ङिति' इति गुणे 'ङसिङसोश्च' इति पूर्वरूपम्। अतिस्त्रियोः इयङ्। आमि इयङं बाधित्वा परत्वान्नुटि नामीति दीर्घे णत्वम्। अतिस्त्रीणाम्। इयङं बाधित्वा परत्वात् 'अच्च घेः' अतिस्त्रौ। अतिस्त्रियोः। अतिस्त्रिषु। अथ पुंसि पूर्वश्लोकसिद्धमेवार्थं बालबोधाय लघुतरोपायेन संगृह्णाति। **ओस्यौकारे चेत्यादिना**॥ उपसर्जनत्वदशायां पुंसि विद्यमानस्य स्त्रीशब्दस्य अचि यः इयादेशः स्त्रियाः इति सूत्रविहितः सः ओसि षष्ठीसप्तमीद्विवचने, औकारे च प्रथमाद्वितीयाद्विवचने च नित्यं स्यात्। अम्शसोस्तु विभाषया विकल्पेन स्यात्। उक्तचतुर्भ्योऽन्यत्र तु अचि सर्वत्र इयादेशो न स्यादिति योजना। **क्लीबे तु नुमिति**॥ इयङं बाधते इति शेषः। **अतिस्त्रि इति**॥ स्त्रियमतिक्रान्तं कुलम् अतिस्त्रि। 'स्वमोर्नपुंसकात्' इति सुलुक्। **अतिस्त्रिणी इति**॥ अतिस्त्रि औ इति स्थिते 'नपुंसकाच्च' इत्यौदश्तीभावः। इयङं बाधित्वा परत्वात्

अतिस्त्रेः–अतिस्त्रिणः । अतिस्त्रेः–अतिस्त्रिणः । अतिस्त्रियोः–अतिस्त्रिणोः । इत्यादि । स्त्रियां तु प्रायेण पुंवत् । शसि अतिस्त्रीः । अतिस्त्रिया । 'ङिति ह्रस्वश्च' (सू २९६) इति ह्रस्वान्तत्वप्रयुक्तो विकल्पः । 'अस्त्री' इति तु इयङुवङ्स्थानावित्यस्यैव पर्युदासः, तत्संबद्धस्यैवानुवृत्तेः दीर्घस्यायं निषेधः, न तु ह्रस्वस्य । अतिस्त्रियै–अतिस्त्रये । अतिस्त्रियाः–अतिस्त्रेः ।

'इकोऽचि विभक्तौ' इति नुम् । असर्वनामस्थानत्वान्न दीर्घः । णत्वम् । **अतिस्त्रीणीति** ॥ 'जश्शसोरिशिः' इति इयङ 'जसि च' इति गुणश्च बाधित्वा नुम् । 'शि सर्वनामस्थानम्' इति सर्वनामस्थानत्वात् दीर्घः । णत्वम् । टा अतिस्त्रिणा । इयङ नुम च बाधित्वा नाभावः । **ङे-प्रभृतावजादाविति** ॥ ङे, ङसि, ङस्, आम्, ङि, ओस् इत्येतेषु 'तृतीयादिषु भाषित' इति पुंवद्भावस्य वक्ष्यमाणत्वात् पुंवद्भावपक्षे पुल्लिङ्गातिस्त्रिशब्दवद्रूपम् । पुंवत्त्वाभावपक्षे नुमि वारिवद्रूपमित्यर्थः । टायां तु पुंवत्त्वे तदभावे च नात्वनुम्भ्यां रूपे विशेषाभावात् ङेप्रभृतावित्युक्तम् । **अतिस्त्रये इति** ॥ पुंवत्त्वे 'घेर्ङिति' इति गुणः । अयादेशः । **अतिस्त्रिणे इति** ॥ पुंवत्त्वाभावे नुमि रूपम् । इहोभयत्रापि गुणेन नुमा च इयङ् बाध्यते । **अतिस्त्रेरिति** ॥ ङसिङसोः पुंवत्त्वपक्षे 'घेर्ङिति' इति गुणे 'ङसिङसोश्च' इति पूर्वरूपम् । **अतिस्त्रिणः इति** ॥ ङसिङसोः पुंवत्त्वाभावपक्षे नुमि रूपम् । इहाप्युभयत्र गुण-नुम्भ्यामियङ् बाध्यते । **अतिस्त्रियोः–अतिस्त्रिणोः इति** ॥ पुंवत्त्वाभावे नुम् । पुंवत्त्वे इयङ् । **इत्यादीति** ॥ आमि पुंवत्त्वे तदभावे च इयङ बाधित्वा नुडेव, नतु नुम् । 'नुमचिर' इति वचनात् 'नामि' इति दीर्घः । अतिस्त्रीणाम् । अतिस्त्रौ । अतिस्त्रिणि । अतिस्त्रियोः । अतिस्त्रिणोः । तदेवमुपसर्जनस्त्रीशब्दस्य पुन्नपुंसकविषये रूपाणि प्रदर्श्य प्रकृतमनुसरति । **स्त्रियान्त्विति** ॥ स्त्रियमतिक्रान्तेति विग्रहे 'अत्यादयः' इति समासे 'गोस्त्रियोः' इति ह्रस्वत्वे सति अतिस्त्रिशब्दः । तस्य प्रायेण उदाहृतपुल्लिङ्गातिस्त्रिशब्द-वद्रूपाणीत्यर्थः । **शसि अतिस्त्रीरिति** ॥ 'वाम्शसोः' इति इयङभावे पूर्वसवर्णदीर्घे सत्यपि स्त्रीलिङ्गत्वात् 'तस्माच्छसः' इति नत्वं नेति भावः । **अतिस्त्रियेति** ॥ स्त्रीलिङ्गत्वान्नात्वाभावे इयङ् । **ह्रस्वान्तत्वेति** ॥ 'ङिति ह्रस्वश्च' इत्यत्र इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ नदीसंज्ञौ वा स्तः, इति प्रथमं वाक्यम् । ह्रस्वाविवर्णोवर्णौ स्त्रियां नदीसंज्ञौ वा स्तः, इति द्वितीयं वाक्यम् । तत्र द्वितीयवाक्यात् अतिस्त्रिशब्दस्य ङित्सु नदीत्वविकल्प इत्यर्थः । ननु 'नेयङुवङ्स्थानावस्त्री' इत्यतः अस्त्रीत्यस्यानुवृत्तेः कथमिह नदीत्वविकल्प इत्यत आह । **अस्त्री इति त्विति** ॥ इयङुवङ्स्थानावित्यादिप्रथमवाक्यविहितनदीत्वस्यैवा-स्त्रीति पर्युदासः, नतु ह्रस्वावित्यादिद्वितीयवाक्यविहितनदीत्वस्यापीत्यर्थः । कुत इत्यत आह । **तत्सम्बद्धस्यैवानुवृत्तेरिति** ॥ नेयङुवङ्स्थानावित्यतः अस्त्रीत्यस्यानुवृत्तिर्वक्तव्या । ततश्च इयङुवङ्स्थानाविति यत्रान्वेति, तत्रैव तत्सम्बद्धस्य अस्त्रीत्यस्यानुवृत्तिरुचिता । एवञ्च ह्रस्वादिवाक्ये इयङुवङ्स्थानावित्यस्य अनुवृत्त्यभावात् अस्त्रीत्यस्यापि तत्र नानुवृत्तिरिति भावः । **अतिस्त्रियै इति** ॥ नदीत्वपक्षे आट् वृद्धिः । **अतिस्त्रये इति** ॥ नदीत्वाभावे

अतिस्त्रियाः--अतिस्त्रेः । अतिस्त्रीणाम् । अतिस्त्रियाम्--अतिस्त्रौ । श्रीः । श्रियौ । श्रियः ।

३०३ । नेयङुवङ्स्थानावस्त्री । (१-४-४)

इयङुवङोः स्थितिर्ययोस्तावीदूतौ नदीसंज्ञौ न स्तः, न तु स्त्री । हे श्रीः । श्रियम्, श्रियौ, श्रियः । श्रियै--श्रिये । श्रियाः--श्रियः ।

३०४ । वामि । (१-४-५)

इयङुवङ्स्थानौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ स्तः, न तु स्त्री । श्रीणाम्--श्रियाम् । श्रियाम्--श्रियि । 'प्रधी' शब्दस्य तु वृत्तिकारादीनां मते,

---

धित्वात् 'घेर्ङिति' इति गुणे अयादेशः । **अतिस्त्रियाः--अतिस्त्रेरिति** ॥ नदीत्वे आट् । तदभावे गुणः । 'ङसिङसोश्च' इति पूर्वरूपम् । **अतिस्त्रियामिति** ॥ नदीत्वपक्षे ङेराम्, आट् । **अतिस्त्राविति** ॥ नदीत्वाभावपक्षे 'अच घेः' । **श्रीरिति** ॥ श्रयन्त्येतामिति श्रीः । 'क्विब्वचिप्रच्छयातस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणञ्च' इति क्विप्, प्रकृतेर्दीर्घश्च । श्रीशब्दात् सुः । अङ्यन्तत्वान्न सुलोपः । **श्रियौ, श्रियः इति** ॥ 'दीर्घाज्जसि च' इति पूर्वसवर्णदीर्घनिषेधे 'इको यणचि' इति यणि प्राप्ते धात्ववयवेवर्णान्तत्वात् 'अचि श्नुधातु' इतीयङ् । एकाच्त्वात् संयोगपूर्वकत्वाच्च यण् न । 'यू स्त्र्याख्यौ' इति नदीत्वात् 'अम्बार्थ' इति ह्रस्वे प्राप्ते । **नेयङुवङ्** ॥ 'यू स्त्र्याख्यौ नदी' इत्यतो यू नदीत्यनुवर्तते । स्थानशब्दो भावे ल्युडन्तः । इयङुवङोः स्थानं स्थितिर्ययोरिति बहुव्रीहिः । इयङुवङोर्योग्याविति यावत् । तदाह । **इयङुवङोरित्यादिना** ॥ **हे श्रीरिति** ॥ अजादावियङोर्योग्यत्वात् नदीत्वनिषेधात् 'अम्बार्थनद्योः' इति ह्रस्वो नेति भावः । **श्रियामिति** ॥ आमि पूर्वरूपं बाधित्वा इयङ् । **श्रियौ, श्रियः इति** ॥ औट्शसोः पूर्ववत् । टा श्रिया । **श्रियै इति** ॥ 'ङिति ह्रस्वश्च' इति ङिति नदीत्वपक्षे आट्, वृद्धिः । **श्रिये इति** ॥ नदीत्वाभावे इयङ् । **श्रियाः इति** ॥ ङसिङसोः नदीत्वे आट्, वृद्धिः । **श्रियः इति** ॥ नदीत्वाभावपक्षे इयङेव । ङित्त्वाभावात् आमि 'ङिति ह्रस्वश्च' इति अप्राप्ते । **वामि** ॥ यू स्त्र्याख्यौ नदीत्यनुवर्तते । 'नेयङुवङ्स्थानावस्त्री' इति नञ्वर्जमनुवर्तते । वा आमीति छेदः । आमि नदीकार्याभावात् । तदाह । **इयङुवङ्स्थानावित्यादिना । श्रीणामिति** ॥ नदीत्वपक्षे 'ह्रस्वनद्यापः' इति नुट् । **श्रियामिति** ॥ नदीत्वाभावे इयङ् । **श्रियाम्--श्रियीति** ॥ नदीत्वे ङेराम्, आट्, इयङ्, नुट् तु न । आटा नुड् बाध्यते इत्युक्तत्वात् । नदीत्वाभावे तु इयङेव । श्रियोः । श्रीषु । **प्रधीशब्दस्य त्विति** ॥ प्रध्यायतीत्यर्थे 'ध्यायतेस्सम्प्रसारणं च' इते क्विपि यकारस्य सम्प्रसारणे इकारे 'सम्प्रसारणाच्च' इति पूर्वरूपे 'हलः' इति दीर्घे निष्पन्नस्य प्रधीशब्दस्य वृत्तिकारहरदत्तादिमते लक्ष्मीवद्रूपाणि। तत्र 'एरनेकाचः' इति यणा इयङो बाधितत्वेन इयङ्स्थानत्वाभावात् 'नेयङुवङ्स्थानौ'

लक्ष्मीवद्रूपम्। 'पदान्तरं विनापि स्त्रियां वर्तमानत्वं नित्यस्त्रीत्वम्' इति स्वीकारात्। 'लिङ्गान्तरानभिधायकत्वं तत्' इति कैयटमते तु पुंवद्रूपम्: 'प्रकृष्टा धीः' इति विग्रहे तु 'लक्ष्मी' वत्। अमि शसि च 'प्रध्यम्' 'प्रध्यः' इति विशेषः। सुष्ठु धीर्यस्याः, सुष्ठु ध्यायति वेति विग्रहे तु वृत्तिकारमते सुधीः 'श्री' वत्। मतान्तरे तु पुंवत्। 'सुष्ठु धीः' इति विग्रहे तु 'श्री' वदेव।

इति नदीत्वनिषेधाभावात् 'यू स्त्र्याख्यौ' इति नित्यनदीत्वे सति 'अम्बार्थ' इत्यादिनदीकार्यप्रवृत्तेरिति भावः। तत्र अमि शसि च पूर्वरूपं पूर्वसवर्णदीर्घश्च बाधित्वा यणेवेति विशेषः। ननु प्रध्यायतेः क्विपि निष्पन्नस्य प्रधीशब्दस्य प्रकर्षेण ध्यातृत्वप्रवृत्तिनिमित्तकस्य लिङ्गत्रयसाधारणत्वात् नित्यस्त्रीलिङ्गत्वाभावात् नदीत्वाभावात् कथं नदीकार्याणीत्यत आह। **पदान्तरं विनापीति** ॥ पदान्तरसमभिव्याहाराभावेऽपि यश्शब्दः स्त्रीलिङ्गत्वबोधकः सः नित्यस्त्रीलिङ्गः इति विवक्षितः। अत एव ब्राह्मण्यां आधीशब्दस्य आध्यै इति रूपमास्थितं भाष्ये। स्त्रियामेव यो वर्तते स एव नित्यस्त्रीलिङ्गः इत्यभ्युपगमे तु तदसङ्गतिः स्पष्टैव। प्रधीशब्दस्य क्रियाशब्दतया त्रिलिङ्गत्वात्। अतः पदान्तरं विनापि स्त्रियां वर्तमानत्वमेव नित्यस्त्रीत्वम्। इदं तु प्रधीशब्दस्य सम्भवत्येव। प्रकर्षेण ध्यातृत्वं निमित्तीकृत्य स्त्रियां वृत्तिसम्भवात्। परन्तु प्रधीरित्युक्ते पुंसः स्त्रियाश्च प्रतीतिप्रसक्तौ अन्यतरव्यवच्छेदाय, ब्राह्मणः, ब्राह्मणी, इत्यादिपदान्तरसमभिव्याहारापेक्षा। नैतावतास्य पदान्तरसमभिव्याहाराभावे स्त्रियां वृत्तिरपैति। अतः प्रधीशब्दस्य नित्यस्त्रीलिङ्गत्वात् नदीकार्यनिर्बाधामिति भावः। **लिङ्गान्तरेति** ॥ "स्त्रीलिङ्गान्यलिङ्गानभिधायकत्वमेव नित्यस्त्रीत्वम्" इति कैयटमतम्। "स्त्रीविषयावेव यौ यू तयोरेव नदीसंज्ञा" इति 'यू स्त्र्याख्यौ' इत्यत्र भाष्यादिति तदाशयः। **पुंवद्रूपमिति** ॥ उदाहृतप्रधीशब्दस्य त्रिलिङ्गतया नित्यस्त्रीत्वाभावात् पुंसीव स्त्रियामपि अनदीत्वादिति भावः। **प्रकृष्टेति** ॥ प्रकृष्टा धीरिति विग्रहे प्रादिसमासे प्रधीशब्दस्य मतद्वयरीत्यापि नित्यस्त्रीलिङ्गत्वात् लक्ष्मीवद्रूपमित्यर्थः। **अमि शसि चेति** ॥ प्रध्यायतीति, प्रकृष्टा धीरिति च विग्रहे प्रधीशब्दात् अमि शसि च पूर्वरूपं पूर्वसवर्णदीर्घश्च बाधित्वा 'एरनेकाचः' इति यण् इत्येतावान् विशेषो लक्ष्मीशब्दापेक्षयेत्यर्थः। कैयटमते ब्राह्मण्यां 'आध्यै' इति भाष्यप्रयोगस्तु बहुव्रीह्यभिप्रायेण नेयः। अत एव भाष्यात् 'नवृतश्च' इति कप् नेत्याहुः। सुष्ठु धीर्यस्या इति सुष्ठु धीरिति उभयविधविग्रहेऽपि पदान्तरं विना स्त्रियां वर्तमानत्वं नित्यस्त्रीत्वमिति वृत्तिकारादिमते सुधीशब्दस्य नित्यस्त्रीलिङ्गत्वेन 'नेयङुवङ्स्थानावस्त्री' इति नदीत्वनिषेधात् 'ङिति ह्रस्वश्च' इति 'वामि' इति च श्रीशब्दवद्रूपाणि प्रत्येतव्यानि। 'न भूसुधियोः' इति याण्निषेधे इयङ एव प्रवृत्तेरिति भावः। **मतान्तरे तु पुंवदिति** ॥ लिङ्गान्तरानभिधायकत्वं नित्यस्त्रीत्वमिति कैयटमते तु त्रिलिङ्गतया नदीत्वाभावात् पुंवदेव रूपमित्यर्थः। ननु सुधीशब्दे बहुव्रीहिप्रवृत्तेः प्राक् धीशब्दस्य नित्यस्त्रीलिङ्गत्वात् 'प्रथमलिङ्गग्रहणं च' इति नदीत्वं दुर्वारमिति चेत्, सत्यम्। यस्य वृत्तेः प्राक् नदीत्वं दृष्टं तस्य उपसर्जनत्वेऽपि नदीत्वमतिदिश्यते। इह च वृत्तेः प्राक् धीशब्दस्य केवलस्य एकाच्त्वाद्यणभावे इयङ्योग्यतया 'नेयङुवङ्स्थानौ' इति नदीत्व-

'ग्रामणीः' पुंवत्। ग्रामनयनस्योत्सर्गतः पुंधर्मतया पदान्तरं विनापि स्त्रियामप्रवृत्तेः। एवं खलपवनादेरपि पुंधर्मत्वमौत्सर्गिकं बोध्यम्।

इति ईदन्ताः।

॥ अथ अजन्तस्त्रीलिङ्गे उदन्तप्रकरणम् ॥

'धेनुः' 'मति' वत्।

३०५। स्त्रियां च। (७-१-९६)

स्त्रीवाची क्रोष्टुशब्दस्तृजन्तवद्रूपं लभते।

३०६। ऋन्नेभ्यो ङीप्। (४-१-५)

ऋदन्तेभ्यो नान्तेभ्यश्च स्तियां ङीप् स्यात्। क्रोष्टी। क्रोष्ट्र्यौ। क्रोष्ट्र्यः।

इत्युदन्ताः।

निषेधात् वृत्तावपि न तदतिदेश इत्यास्तां तावत्। **सुष्ठु श्रीरिति विग्रहे तु श्रीवदेवेति** ॥ मतद्वयेऽपि नित्यस्त्रीलिङ्गत्वादिति भावः। **ग्रामणीः पुंवदिति** ॥ स्त्रियामिति शेषः। ननु ग्रामं नयति नियमयतीति ग्रामणीशब्दस्य प्रधीशब्दवत् पदान्तरं विनापि स्त्रियां वर्तमानत्वात् नित्यस्त्रीलिङ्गत्वान्नदीकार्यसत्त्वात् पुंवदिति कथमित्यत आह। **ग्रामनयनस्येति** ॥ ग्रामनयनस्य लोके उत्सर्गतः सामान्यतः पुंधर्मतया पुरुषकर्तव्यतया ब्राह्मणीत्यादिपदान्तरसमभिव्याहारं विना स्त्रीलिङ्गाप्रतीतेः वृत्तिकारादिमतेऽपि नित्यस्त्रीलिङ्गत्वाभावान्नदीत्वं नेत्यर्थः। **एवमिति** ॥ खलपवनकटप्रवणादिक्रियाणामपि पुरुषकर्तव्यत्वं औत्सर्गिकं सामान्यतस्सिद्धम्। अतः खलपूः कटप्रूः इत्यादिशब्दानामपि स्त्रियां वृत्तिकारादिमतेऽपि नित्यस्त्रीत्वं न। अतः पुंवदेव रूपमित्यर्थः।

इति ईदन्ताः।

अथ उदन्ताः निरूप्यन्ते ॥ **धेनुर्मतिवदिति** ॥ उकारस्य ओकारो गुणः अवादेश इत्यादिविशेषस्तु सुगम इति भावः। अथ क्रोष्टुशब्दस्य स्त्रियां विशेषमाह। **स्त्रियाञ्च** ॥ 'तृज्वत्क्रोष्टुः' इत्यनुवर्तते। रूपातिदेशोऽयमित्युक्तम्। तदाह। **स्त्रीवाचीत्यादिना** ॥ तथाच स्त्रियामुदन्तः क्रोष्टुशब्दो नास्त्येव। किन्तु क्रोष्टृ इति ऋदन्त एवेति फलितम्। **ऋन्नेभ्यो ङीप्** ॥ ऋतश्च नाश्चेति द्वन्द्वः। स्त्रियामित्यधिकृतम्। 'ङ्याप्प्रातिपदिकात्' इत्यतः प्रातिपदिकग्रहणमनुवृत्तम् ऋन्नकारैर्विशेष्यते। तदन्तविधिः। तदाह। **ऋदन्तेभ्य इत्यादिना** ॥ ङाविति। क्रोष्टृ ई इति स्थिते यणि क्रोष्ट्रीशब्दात् सुबुत्पत्तिः। गौरीवद्रूपाणीत्याह। **क्रोष्ट्री इत्यादि** ॥

इत्युदन्ताः।

॥ अथ अजन्तस्त्रीलिङ्गे ऊदन्तप्रकरणम् ॥

'वधूः' 'गौरीवत्'। 'भ्रूः' 'श्री' वत्। हे सुभ्रूः। कथं तर्हि 'हापितः कासि हे सुभ्रु' इति भट्टिः। प्रमाद एवायमिति बहवः। 'खलपूः' पुंवत्। पुनर्भूः। 'दृन्कर—' (वा ४११८) इति यणा उवङो बाधनात् 'नेयङुवङ्—' (सू ३०३) इति निषेधो न। हे पुनर्भु। पुनर्भ्वम्। पुनर्भ्वौ। पुनर्भ्वः।

३०७। एकाजुत्तरपदे णः। (८-४-१२)

एकाजुत्तरपदं यस्य तस्मिन्समासे पूर्वपदस्थान्निमित्तात्परस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्य नित्यं णत्वं स्यात्। आरम्भसामर्थ्यान्नित्यत्वे सिद्धे

अथ ऊदन्ताः निरूप्यन्ते ॥ **वधूगौरीवदिति** ॥ 'वहो धश्च' इत्यूप्रत्ययः। हस्य धश्च। धात्ववयवोवर्णाभावात् नोवङ्, ऊकारस्य यण् वकार इत्यादिविशेषस्तु सुगम इति भावः। **भ्रूः श्रीवदिति** ॥ 'भ्रमेश्च ङूः' इति ङूप्रत्ययान्तोऽयम्। 'अचि श्नुधातुभ्रुवाम्' इत्युवङ् इत्यादिविशेषस्तु सुगम इति भावः। सु शोभना भ्रूर्यस्यास्सा सुभ्रूः। अस्त्रीप्रत्ययान्तत्वात् 'गोस्त्रियोः' इति ह्रस्वो न भवति। 'नेयङुवङ्स्थानावस्त्री' इति भ्रूशब्दस्य तदन्तस्य च निषेधात् नदीत्वन्न। ततश्च 'अम्बार्थ' इत्यादि नदीकार्यं नेत्यभिप्रेत्य आह। **हे सुभ्रूरिति। कथं तर्हीति** ॥ यदि सुभ्रूशब्दे नदीकार्यं न स्यात् तर्हि तदा "हापितः क्वासि हे सुभ्रु" इति कथं भट्टिराहेत्यर्थः। रावणेन सीतापहारोत्तरं रामविलापोऽयम्। हे सुभ्रु त्वया अहं हापितोऽस्मि विधिनेत्यर्थः। हापित इत्यस्य ह्याजित इत्यर्थः। **प्रमादः इति** ॥ 'अम्बार्थ' इति ह्रस्वस्य करणादिति भावः। **बहवः इति** ॥ कतिपये सामान्ये नपुंसकत्वमाश्रित्य कथञ्चित् समादधुः। **खलपूः पुंवदिति** ॥ खलपवनस्य उत्सर्गतः पुंधर्मतया पदान्तरं विना स्त्रियां वर्तमानत्वाभावेन नित्यस्त्रीत्वाभावात् नदीत्वं नेति भावः। **पुनर्भूरिति** ॥ "पुनर्भूर्दिधिषूरूढा" इत्यमरः। तस्य 'नेयङुवङ्' इति निषेधमाशङ्क्य आह। **दृन्करेतीति** ॥ अम्शसोः पूर्वरूपं पूर्वसवर्णदीर्घश्च बाधित्वा 'दृन्कर' इति यणिति मत्वा आह। **पुनर्भ्वम्, पुनर्भ्वाविति** ॥ पुनर्भ्वै। पुनर्भ्वाः। नद्यन्तत्वात् नुटि दीर्घे पुनर्भू नामिति स्थिते रेफान्नकारस्य भिन्नपदस्थत्वात् 'अट्कुप्वाङ्' इत्यप्राप्ते। **एकाजुत्तरपदे णः** ॥ समासस्य चरमावयवे रूढेन उत्तरपदशब्देन समास इति लभ्यते। एकः अच् यस्मिन् तत् एकाच्, तत् उत्तरपदं यस्य सः एकाजुत्तरपदः। तस्मिन् समासे इति बहुव्रीहिगर्भो बहुव्रीहिः। 'रषाभ्यां नो णः' इत्यनुवर्तते। 'पूर्वपदात् संज्ञायाम्' इत्यतः पूर्वपदादित्यनुवर्तते। पूर्वं पदं यस्य तत् पूर्वपदम्। एकत्वमविवक्षितम्। पूर्वपदस्थाभ्यामिति लभ्यते। 'प्रातिपदिकान्तनुम्विभक्तिषु च' इत्यनुवर्तते। विद्यमानस्येति शेषः। तदाह। **एकाजुत्तरपदमित्यादिना** ॥ नन्विह णकारग्रहणं व्यर्थम्। 'रषाभ्यां नो

पुनर्णग्रहणं स्पष्टार्थम्। यणं बाधित्वा परत्वान्नुट्। पूनर्भूणाम्। वर्षाभूः। भेकजातौ नित्यस्त्रीत्वाभावात् हे वर्षाभूः कैयटमते। मतान्तरे तु हे वर्षाभु। 'भेक्यां पुनर्नवायां स्त्री वर्षाभूर्दर्दुरे पुमान्' इति यादवः। 'वर्षाभ्वश्च' (सू २८२)। वर्षाभ्वौ। वर्षाभ्वः। 'स्वयम्भूः' पुंवत्।

इत्यूदन्ताः।

॥ अथ अजन्तस्त्रीलिङ्गे ऋदन्तप्रकरणम् ॥

३०८। न षट्स्वस्रादिभ्यः। (४-१-१०)

षट्संज्ञकेभ्यः स्वस्रादिभ्यश्च ङीष्टापौ न स्तः।

णः' इत्यत एव तदनुवृत्तिसिद्धेः। नच 'प्रातिपदिकान्तनुम्विभक्तिषु च' इति विकल्पनिवृत्त्यर्थं पुनर्णग्रहणमिति वाच्यम्। आरम्भसामर्थ्यादेव नित्यत्वसिद्धेरित्यत आह। **आरम्भेति**॥ **यणमिति**॥ 'इन्कर' इति यणमित्यर्थः। **पुनर्भूणामिति**॥ रेफस्य 'हशि च' इत्युत्वन्तु न। रोरेव तद्विधानात्। डेराम्, पुनर्भ्वाम्। वर्षाभूशब्दे विशेषमाह। **भेकेति**॥ 'वह्वादिभ्यश्च' इति ङीषो वैकल्पिकत्वात् ङीषभावे वर्षाभूशब्दः। स च भेकजातौ द्विलिङ्गः। "भेक्यां पुनर्नवायां स्त्री वर्षाभूर्दर्दुरे पुमान्" इति यादवः। दर्दुरो भेकः। एवञ्च 'लिङ्गान्तरानभिधायकत्वम्' इति कैयटमते नित्यस्त्रीलिङ्गत्वाभावात् नदीत्वाभावे सति 'अम्बार्थ' इति ह्रस्वाभावे सति हे वर्षाभूरिति रूपमित्यर्थः। **मतान्तरे त्विति**॥ 'पदान्तरं विनापि स्त्रियां वर्तमानत्वम्' इति वृत्तिकारादीनाम्मते तु वर्षाभूशब्दस्य जातिशब्दतया पदान्तरं विनापि स्त्रियां वर्तमानतया नित्यस्त्रीलिङ्गत्वान्नदीत्वे 'अम्बार्थ' इति ह्रस्वे सति हे वर्षाभु, इति रूपमित्यर्थः। ननु 'शिली गण्डूपदी भेकी वर्षाभ्वी कमठी डुलिः" इत्यमरकोशे वर्षाभूशब्दस्य भेकजातौ स्त्रीलिङ्गमात्रावगमात् कैयटमतेऽपि नित्यस्त्रीत्वं कुतो न स्यादित्यत आह। **भेक्यामिति**॥ यादवकोशानुसारात् अमरकोशे स्त्रीग्रहणमुपलक्षणमिति भावः। यद्वा अमरमतरीत्या कैयटमतेऽपि नित्यस्त्रीत्वमस्तु। अजादौ 'एरनेकाचः' इति यणः 'न भूसुधियोः' इति निषेधे प्राप्ते 'वर्षाभ्वश्च' इति यण् प्रतिप्रसव उक्तः। तं स्मारयति। **वर्षाभ्वश्चेति**॥ **स्वयम्भूः पुंवदिति**॥ स्वयम्भूशब्दस्य चतुरानने रूढत्वात् तस्य यौगिकस्य पदान्तरं विना स्त्रियामवृत्तेः न वृत्तिमते नित्यस्त्रीत्वम्। कैयटमते तु अनेकलिङ्गत्वात् न नित्यस्त्रीत्वमिति भावः॥

इत्यूदन्ताः।

अथ ऋदन्ताः निरूप्यन्ते। 'सावसेर्ऋन्' इति सौ उपपदे अस्यधातोः ऋन्प्रत्यये स्वसृशब्दः। भगिनीवाची। 'ऋन्नेभ्यः' इति ङीपि प्राप्ते। **न षट्**॥ षट् इत्यनेन षट्संज्ञका गृह्यन्ते इत्याह। **षट्संज्ञकेभ्य इति**॥ **ङीष्टापाविति**॥ 'ऋन्नेभ्यः' इत्यतो ङीबिति,

"स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा ।
याता मातेति सप्तैते स्वस्रादय उदाहृताः ॥"

'अप्तृन्—' (सू २७७) इति दीर्घः । स्वसा । स्वसारौ । स्वसारः । माता पितृवत् । शसि मातॄः । इत्यृदन्ताः ।

॥ अथ अजन्तस्त्रीलिङ्गे ओदन्तप्रकरणम् ॥

'द्यौः' 'गौ' वत् । इत्योदन्ताः ।

॥ अथ अजन्तस्त्रीलिङ्गे ऐदन्तप्रकरणम् ॥

'रायः' पुंवत् । इत्यैदन्ताः ।

॥ अथ अजन्तस्त्रीलिङ्गे औदन्तप्रकरणम् ॥

'नौः' 'ग्लौ' वत् । इत्यौदन्ताः ।

'टाबृचि' इत्यतष्टाबित्यस्य चानुवृत्तेरिति भावः । स्वस्रादीन् पठति । **स्वसा तिस्रः इत्यादिना** ॥ अत्र तिसृ, चतसृ, इत्यनयोः पाठो न कर्तव्यः । 'न तिसृचतसृ' इति नामि दीर्घनिषेधादेव लिङ्गात् ङीबभावसिद्धेरिति 'कृन्मेजन्तः' इति सूत्रे कैयटः । न नन्दतीति ननान्दा । 'नञ्चि च नन्देः' इति ऋन्, वृद्धिश्च । "ननान्दा तु स्वसा पत्युः" इत्यमरः । दोग्धीति दुहिता । 'नप्तृ, नेष्टृ, त्वष्टृ, होतृ, पोतृ, भ्रातृ, जामातृ, मातृ, पितृ, दुहितृ' इति दुहेस्तृच् । इट् गुणाभावश्च निपातितः । मान्यते पूज्यते इति माता । मान पूजायाम् । तृचि नलोपश्च । यतते इति याता । 'यतेर्वृद्धिश्च' इति ऋन्, उपधावृद्धिश्च, "भार्यास्तु भ्रातृवर्गस्य यातरस्स्युः परस्परम्" इत्यमरः । **अप्तृन्नितीति** ॥ स्वसृशब्दात् सुः, 'ऋदुशनस्' इत्यनङ्, तृप्रत्ययान्तत्वाभावेऽपि 'अप्तृन्' इति सूत्रे स्वसृग्रहणात् दीर्घ इति भावः । **माता पितृवदिति** ॥ 'अप्तृन्' इति सूत्रे औणादिकतृन्तृजन्तेषु नप्त्रादीनामेव दीर्घनियमनादिति भावः ॥

इत्यृदन्ताः ।

अथ ओदन्ताः निरूप्यन्ते । **द्यौर्गौवदिति** ॥ 'ओतो णित्' इति णिद्वत्त्वातिदेशात् 'अचो ञ्णिति' इति वृद्धिः । "द्योदिवौ द्वे स्त्रियामभ्रम्" इत्यमरः ॥

इत्योदन्ताः ।

अथ ऐदन्ताः निरूप्यन्ते । **रायः पुंवदिति** ॥ 'रायो हलि' इत्यात्वम् । 'रा स्त्रीत्येके' इति क्षीरस्वाम्युक्तेः स्त्रीलिङ्गोऽप्ययमिति भावः ॥

इत्यैदन्ताः ।

अथ औदन्ताः निरूप्यन्ते । **नौर्ग्लौवदिति** ॥ "स्त्रियां नौस्तरणिस्तरिः" इत्यमरः ।

इत्यौदन्ताः ।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायां अजन्तस्त्रीलिङ्गनिरूपणं समाप्तम् ॥

। श्रीरस्तु ।

॥ अथ अजन्तनपुंसकलिङ्गे अदन्तप्रकरणम् ॥

३०९ । अतोऽम् । (७-१-२४)

अतोऽङ्गात्क्लीबात्स्वमोरम्स्यात् । अमि पूर्वः' (सू १९४) । **ज्ञानम्** । **'एङ्ह्रस्वात्—'** (सू १९३) इति हल्मात्रलोपः । **हे ज्ञान** ।

अथाजन्तनपुंसकलिङ्गाः निरूप्यन्ते । ज्ञानशब्दात् सुः 'स्वमोर्नपुंसकात्' इति तस्य लुकि प्राप्ते । **अतोऽम्** ॥ अत इति पञ्चमी । अङ्गस्येत्यधिकृतं पञ्चम्या विपरिणम्यते । अतः इत्यनेन विशेष्यते । तदन्तविधिः । 'स्वमोर्नपुंसकात्' इत्यनुवर्तते । तदाह । **अतोऽङ्गादिति** ॥ अदन्तादङ्गादित्यर्थः । **ज्ञानमिति** ॥ सोरमि कृते अमि पूर्वरूपम् इति भावः । अमोऽम्विधानन्तु 'स्वमोर्नपुंसकात्' इति लुङ्निवृत्त्यर्थम् । ननु अतः म् इत्येव छेदोऽस्तु । सोर्मकारादेशे ज्ञानमिति सिद्धेः । अमि च 'आदेः परस्य' इति अकारस्य मकारे अन्त्यस्य मकारस्य संयोगान्तलोपेनैव ज्ञानमिति सिद्धेरिति चेन्मैवम् । एवं सति ज्ञानमित्यत्र 'सुपि च' इति दीर्घापत्तेः । न च अदन्तसन्निपातमाश्रित्य प्रवृत्तस्य मादेशस्य तद्विघातकदीर्घनिमित्तत्वं न सम्भवति । सन्निपातपरिभाषाविरोधादिति वाच्यम् । 'सुपि च' इति दीर्घे कर्तव्ये सन्निपातपरिभाषाया अप्रवृत्तेरित्युक्तत्वादित्यलम् । **हे ज्ञानेति** ॥ हे ज्ञान स् इति स्थिते सोरमि कृते पूर्वरूपे 'एङ्ह्रस्वात्' इति मकारलोपे हे ज्ञानेति रूपम् । ननु एङ्ह्रस्वादित्यत्र सम्बुद्ध्याक्षिप्तस्य सम्बुद्धेवान्वय उचितः । ततश्च एङन्ताद्ध्रस्वान्ताच्चाङ्गात् परा या सम्बुद्धिः तदवयवस्य हलो लोप इति लभ्यते । ततश्च प्रकृते पूर्वरूपे कृते तस्य पूर्वान्तत्वाश्रयेण ज्ञान इत्यदन्तमङ्गम् । ततः परा सम्बुद्धिर्नास्ति । मकारमात्रस्यासम्बुद्धित्वात् । सुस्थानिकस्याम एव सम्बुद्धित्वात् । अर्धविकारेण एकदेशविकृतन्यायानवताराच्च । न च पूर्वरूपात् प्राक् 'एङ्ह्रस्वात्' इत्यस्य प्रवृत्तिः किन्न स्यादिति वाच्यम् । परत्वात् पूर्वरूपस्यैव पूर्वं प्रवृत्तेः । न च पूर्वान्तत्वात् पूर्वरूपस्याङ्गान्तर्भावात् ज्ञान इत्यदन्तमङ्गम् । परादित्वाच्च अम् इत्यस्य सम्बुद्धित्वं चेत्याश्रित्य तदवयवहलो मकारमात्रस्य 'एङ्ह्रस्वात्' इति लोपो निर्बाध इति वाच्यम् । 'उभयत आश्रयणे नान्तादिवत्' इति निषेधादित्यत आह । **एङ्ह्रस्वादिति हल्मात्रलोपः इति** ॥ पूर्वरूपे कृते सम्बुद्धेर्मकारमात्रं यत् परिशिष्टं तस्य 'एङ्ह्रस्वात्' इति लोप इत्यर्थः । लक्ष्यानुरोधात् सम्बुध्याक्षिप्तमङ्गं सम्बुद्धौ नान्वेति । किन्तु सम्बुद्ध्यवयवहल्येवान्वेति । ततश्च एङन्तात् ह्रस्वान्ताच्चाङ्गात् परो यः सम्बुद्ध्यवयवहल् तस्य लोप इति लभ्यते । प्रकृते च पूर्वरूपे कृतेऽपि ह्रस्वान्तादङ्गात् परत्वं सम्बुद्ध्यवयवस्य मकारमात्रस्य अस्त्येवेति तस्य 'एङ्ह्र-

३१० । नपुंसकाच्च । (७-१-१९)

क्लीबात्परस्यौङः शी स्यात् भसंज्ञायाम् ।

३११ । यस्येति च । (६-४-१४८)

भस्येवर्णावर्णयोर्लोपः स्यादीकारे तद्धिते च परे । इत्यकारलोपे प्राप्ते । 'औङः श्यां प्रतिषेधो वाच्यः' (वा ४१८९) । ज्ञाने ।

३१२ । जश्शसोः शिः । (७-१-२०)

क्लीबादनयोः शिः स्यात् ।

३१३ । शि सर्वनामस्थानम् । (१-१-४२)

'शि' इत्येतदुक्तसंज्ञं स्यात् ।

३१४ । नपुंसकस्य झलचः । (७-१-७२)

झलन्तस्याजन्तस्य च क्लीबस्य नुमागमः स्यात्सर्वनामस्थाने परे । उपधादीर्घः । ज्ञानानि । पुनस्तद्वत् । शेषं रामवत् । एवं धनवनफलादयः ।

स्वात्' इति लोपो निर्बाध इत्यन्यत्र विस्तरः। **नपुंसकाच्च** ॥ 'जसश्शी' इत्यतश्शीति 'औङ आपः' इत्यतः औङ इति चानुवर्तते । तदाह । **क्लीबादिति** ॥ औङित्यौकारविभक्तेस्संज्ञेत्युक्तम् । ज्ञान ई इति स्थिते । **यस्येति च** ॥ यस्य ईतीति छेदः । इश्च अश्च तयोस्समाहारः यं तस्य इवर्णस्य अवर्णस्य चेत्यर्थः । भस्येत्यधिकृतम् । 'लशक्वतद्धिते' इत्यतः तद्धित इत्यनुवर्तते । तदाह । **भस्येत्यादिना** ॥ **इत्यकारलोपे प्राप्ते इति** ॥ 'सुडनपुंसकस्य' इति पर्युदासेन शीभावस्यासर्वनामस्थानतया तस्मिन् परतो भत्वादिति भावः । **औङश्श्यामिति** ॥ औङः यश्शी आदेशः तस्मिन् परतः 'यस्येति च' इति लोपस्य प्रतिषेधो वक्तव्य इत्यर्थः । श्यामिति निर्देशादेव नित्यस्त्रीत्वं बोध्यम् । औङ इति तु व्यर्थमेव । सर्वे इत्यादौ 'जसश्शी' इत्यस्य भाधिकारेणैव व्यावृत्तिसिद्धेः । **ज्ञाने इति** ॥ ज्ञान ई इति स्थिते आद्गुण इति भावः । **जश्शसोः शिः** ॥ 'स्वमोर्नपुंसकात्' इत्यतो नपुंसकादित्यनुवर्तते । तदाह । **क्लीबादिति** ॥ ज्ञान शि इति स्थिते स्थानिवत्त्वेन प्रत्ययत्वात् 'लशक्वतद्धिते' इति शकार इत् । **शि सर्वनामस्थानम् । उक्तसंज्ञमिति** ॥ सर्वनामस्थानसंज्ञकमित्यर्थः । अनपुंसकस्येति पर्युदासात् शि इत्यस्य सर्वनामस्थानत्वे अप्राप्ते वचनम् । **नपुंसकस्य झलचः** ॥ झल्च अच्चेति समाहारद्वन्द्वः । तेन च अङ्गस्येत्यधिकृतं विशेष्यते । तदन्तविधिः । 'इदितो नुम्धातोः' इत्यतः नुमित्यनुवर्तते । 'उगिदचाम्' इत्यतस्सर्वनामस्थाने इत्यनुवर्तते । तदाह । **झलन्तस्येत्यादिना** ॥ मित्त्वादन्त्यादचः परः । **उपधादीर्घः इति** ॥ ज्ञान न् इ इति स्थिते 'सर्वनामस्थाने च' इति दीर्घ इत्यर्थः । **पुनस्तद्वदिति** ॥ अम्औट्शस्सु ज्ञानम् । ज्ञाने । ज्ञानानि । इति क्रमेण रूपाणीत्यर्थः ।

३१५। अद्ड्डतरादिभ्यः पञ्चभ्यः। (७-१-२५)

एभ्यः क्लीबेभ्यः स्वमोरद्ड्डादेशः स्यात्।

३१६। टेः। (६-४-१४३)

डिति परे भस्य टेर्लोपः स्यात्। 'वाऽवसाने' (सू २०६)। कतरत्–कतरद्। कतरे। कतराणि। 'भस्य' इति किम्। पञ्चमः। टेर्लुप्तत्वात् 'प्रथमयोः—' (सू १६४) इति पूर्वसवर्णदीर्घः 'एङ्ह्रस्वात्—' (सू १९३) इति सम्बुद्धिलोपश्च न भवति। हे कतरत्। पुनस्तद्वत्। शेषं पुंवत्। कतमत्। इतरत्। अन्यत्। अन्यतरत्। अन्यतमशब्दस्य तु अन्यतममित्येव। 'एकतरात्प्रतिषेधो वक्तव्यः' (वा ४२८७)। एकतरम्।

शेषं रामवदिति॥ शिष्यत इति शेषम्। कर्मणि घञ्। 'घञजबन्ताः पुंसि' इति तु प्रायिकमिति भावः। **अद्ड्डतरादिभ्यः**॥ अद्ड् डतरादिभ्य इति छेदः। दस्य ष्टुत्वेन डकारः डस्य संयोगान्तलोपश्च आदेशस्वरूपावगतये न कृत इति कैयटः। डतर, डतम, अन्य, अन्यतर, इतर, इति डतरादयस्सर्वादिगणपठिताः। अत्र डतरडतमौ प्रत्ययौ। अतस्तदन्तग्रहणम्। 'स्वमोर्नपुंसकात्' इति सूत्रमनुवर्तते। तदाह। **एभ्यः इत्यादिना**॥ डकारः इत्। कतर अद् इति स्थिते। **टेः**॥ अल्लोपोऽन इत्यस्माल्लोप इति 'ति विंशतेर्डिति' इत्यतः डितीति चानुवर्तते। भस्येत्यधिकृतम्। तदाह। **डितीत्यादिना**॥ कतर अद् इत्यत्र रेफादकारस्य लोपः। चर्त्वविकल्पं स्मारयति। **वावसाने इति**॥ ननु पररूपेण कतरदिति सिद्धेः अद्ड डित्करणस्य किं प्रयोजनमित्यत आह। **टेर्लुप्तत्वादिति**॥ टेर्लुप्तत्वात् पूर्वसवर्णदीर्घौ न भवतीत्यन्वयः। डित्त्वाभावे 'टेः' इति लोपस्याप्राप्तया पररूपं बाधित्वा पूर्वसवर्णदीर्घः प्रसज्येत इति भावः। ननु पूर्वसवर्णदीर्घाभावाय दकार एवादेशः क्रियताभित्यत आह। **एङ्ह्रस्वादित्यादि**॥ सोर्दकारादेशे सति तस्य स्थानिवत्त्वेन सम्बुद्धित्वात् ह्रस्वान्तादङ्गात् परत्वाच्च लोपः प्रसज्येत। अद्ड्डादेशे तु टिलोपे सति कतर् इत्यङ्गम्। न तद्ध्रस्वान्तम्। यत्तु ह्रस्वान्तं कतर इति न तदङ्गम्। रेफादकारस्य प्रत्ययावयवत्वेन तदन्तस्य प्रत्ययपरकत्वाभावेन अङ्गत्वाभावात्। अतष्टिलोपप्रवृत्तये अद्ड्डादेशविधिरिति भावः। **पुनस्तद्वदिति**॥ प्रथमावत् द्वितीयेत्यर्थः। **शेषं पुंवदिति**॥ सर्ववदित्यर्थः। **अन्यतमशब्दस्य त्विति**॥ तस्याव्युत्पन्नप्रातिपदिकत्वेन डतमप्रत्ययान्तत्वाभावेन तत्राद्ड्डादेशो नेत्यर्थः। 'एकाच्च प्राचाम्' इति डतरजन्तादेकतरशब्दात् स्वमोरद्ड्डादेशे प्राप्ते आह। **एकतरादिति**॥ एकतरशब्दात् परयोः स्वमोरद्ड्डादेशप्रतिषेधो वक्तव्य इत्यर्थः। अविद्यमाना जरा यस्य कुलस्येति विग्रहे 'नञोऽस्त्यर्थानाम्' इति बहुव्रीहौ विद्यमानपदलोपे 'गोस्त्रियोः' इति

सोरमादेशे कृते सन्निपातपरिभाषया न जरस्। अजरम्। अजरसी—अजरे परत्वाज्जरसि कृते झलन्तत्वान्नुम्।

३१७। सान्त महतः संयोगस्य। (६-४-१०)

सान्तसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे। अजरांसि—अजराणि। अमि लुकोऽपवादमम्भावं बाधित्वा परत्वाज्जरस्। ततः सन्निपातपरिभाषया न लुक्। अजरसम्—अजरम्।

ह्रस्वत्वे अजरशब्दः। तस्य प्रक्रियां दर्शयति। **सोरिति**॥ सोरमादेशे कृते अजरमित्यन्वयः। जरसादेशमाशङ्क्य आह। **सन्निपातेति**॥ अदन्तसन्निपताश्रयस्य अमः अदन्तत्वविघातकजरसादेशं प्रति निमित्तत्वायोगादिति भावः। **अजरसी इति**॥ 'नपुंसकाच्च' इति शीभावे जरसादेशे रूपम्। **अजरे इति**॥ जरसादेशाभावे रूपम्। जसि रूपं दर्शयितुमाह। **परत्वादिति**॥ अजर अस् इति स्थिते 'जश्शसोरिशिः' इति शिभावात् परत्वाज्जरसि कृते तताश्शिभावे झलन्तत्वान्नुमित्यर्थ इति केचित्। तदेतत् 'जराया जरस्' इति सूत्रे अजरांसीत्यत्र "नुम्जरसोः प्राप्तयोः विप्रतिषेधेन जरस्" इति भाष्यविरुद्धत्वादुपेक्ष्यम्। शिभावात् पूर्वमेव परत्वात् जरसः प्रवृत्तौ हि तदा जसस्सर्वनामस्थानत्वाभावेन नुम एवाप्रसक्तेः तदसङ्गतिः स्पष्टैव। पूर्वविप्रतिषेधमाश्रित्य जरसः पूर्वमेव शिभावे तु तद्भाष्यं सङ्गच्छते। एवञ्च जरसः पूर्वमेव शिभावे कृते तस्य सर्वनामस्थानत्वात् तस्मिन् परे नुम्जरसोः प्राप्तयोः नुमपेक्षया परत्वात् जरस्। ततो झलन्तलक्षणो नुमित्येव व्याख्येयम्। यदि हि जरसादेशात् प्रागेव अजन्तलक्षणो नुम् स्यात्। तदा अजरन् ई इति स्थिते 'निर्दिश्यमानस्यादेशा भवन्ति' इति न्यायेन जर इत्यस्य जरसि कृते अजरस् न् इति स्थिते सान्तसंयोगाभावात् 'सान्त महतः' इति वक्ष्यमाणदीर्घो न स्यादित्यादि शब्देन्दुशेखरे निर्जरशब्दनिरूपणे अत्र च प्रपञ्चितम्। उभयथापि अजरन् स् इ इति स्थिते नान्तत्वाभावात् 'सर्वनामस्थाने च' इति दीर्घे अप्राप्ते। **सान्त महतः**॥ 'सर्वनामस्थाने चासम्बुद्धौ' इति नोपधायाः इति चानुवर्तते। नेति लुप्तषष्ठीकं पदम्। 'ढ्रलोपे पूर्वस्य' इत्यतो दीर्घ इत्यनुवर्तते। नकारस्य उपधायाः दीर्घ इति लभ्यते। संयोगस्येत्यवयवषष्ठ्यन्तं नकारे अन्वेति। सान्तेति षष्ठ्यन्तं पृथक्पदम्। आर्षष्षष्ठ्याः लुक्। सान्तस्येति लभ्यते। तच्च संयोगे अभेदेनान्वेति। सान्तो यस्संयोग इति। अत एव सामर्थ्यान्महच्छब्देन तस्य न समासः। महत इत्यप्यवयवषष्ठ्यन्तम्। तच्च नकारे अन्वेति। तदाह। **सान्तसंयोगस्येत्यादिना॥ अजरांसीति**॥ दीर्घे सति 'नश्चापदान्तस्य' इत्यनुस्वारः। अत्र उपधाया इति पूर्वत्वमात्रोपलक्षणम्। पारिभाषिकोपधात्वस्यासम्भवात्। अथ द्वितीयैकवचने रूपं दर्शयितुमाह। **अमि लुकः इति**॥ अजर अम् इति स्थिते 'स्वमोर्नपुंसकात्' इति लुक् प्राप्तः, तं बाधित्वा तदपवादः 'अतोऽम्' इत्यम्भावः प्राप्तः, तं बाधित्वा 'विप्रतिषेधे परम्' इति परत्वाज्जरस्। **अजरसमिति**॥ वस्तुस्थितिकथनमेतत्। ननु लुगपवादस्याम्भावस्य जरसादेशेन बाधितत्वात् 'अपवादे निषिद्धे पुनरुत्सर्गस्य स्थितिः' इति न्यायेन अमो लुक् कुतो न स्यादित्यत आह। **ततः इति**॥ अतो न लुगित्यन्वयः। जरसा-

अजरसी–अजरे। अजरांसि–अजराणि। शेषं पुंवत्। 'पदन्न—' (सू २२८) इति हृदयोदकास्यानां हृद् उदन् आसन्। हृन्दि। हृदा। हृद्भ्यामित्यादि। उदानि। उद्ना। उदभ्यामित्यादि। आसानि। आस्ना। आसभ्यामित्यादि। मांसि। मांसा। मान्भ्यामित्यादि। वस्तुतस्तु प्रभृतिग्रहणं प्रकारार्थमित्युक्तम्। अत एव भाष्ये 'मांस्पचन्या उखायाः' इत्युदाहृतम्। अयस्मयादित्वेन

देशानन्तरं असौ लुड् न भवतीत्यर्थः। कुत इत्यत आह। **सन्निपातेति** ॥ अस्सन्निपातमाश्रित्य प्रवृत्तस्य जरसः तल्लुकि निमित्तत्वाभावादिति भावः। शेषं पुंवत्। अजरसा–अजरेण अजरसे–अजराय। अजरसः–अजरात्। अजरसः–अजरस्य। अजरसोः–अजरयोः। अजरसि–अजरे। हृदयोदकास्यशब्दाः सुटि ज्ञानवत्। शसादौ विशेषमाह। **पदन्नेति** ॥ **हृन्दीति** ॥ हृदयशब्दात् शसश्शिभावे हृदादेशे 'नपुंसकस्य झलचः' इति ऋकारात् परतो नुमि 'नश्चापदान्तस्य' इत्यनुस्वारे तस्य परसवर्णे नकारे रूपम्। **इत्यादीनि** ॥ हृदे। हृदः। हृदः। हृदोः। हृदोः। हृदाम्। हृदि। हृत्सु। हृदभावपक्षे ज्ञानवत्। उदकशब्दस्सुटि ज्ञानवत्। शसादौ विशेषमाह। **उदानीति** ॥ शसश्शिभावे उदन्नादेशे 'सर्वनामस्थाने च' इति दीर्घः। 'अल्लोपोऽनः' इति तु न। शेस्सर्वनामस्थानत्वात्। **उदनेति** ॥ उदक आ इति स्थिते उदन्नादेशे अल्लोपः। **उदभ्यामिति** ॥ उदन्नादेशे 'न लोपः प्रातिपदिकान्तस्य' इति नलोपः। 'स्वादिष्वसर्वनामस्थाने' इति पदत्वात्। **इत्यादीनि** ॥ उद्ने। उद्नः। उद्नः। उद्नोः। उद्नोः। उदनि–उद्नि। उदन्नभावपक्षे ज्ञानवत्। आस्यशब्दस्सुटि ज्ञानवत्। शसादौ विशेषमाह। **आसानीत्यादि** ॥ उदन्नादेशवद्रूपाणि। **इत्यादीति** ॥ आस्ने। आस्नः। आस्नः। आस्नोः। आस्नोः। आस्नि–आसनि। आस्सु। आसन्नभावपक्षे ज्ञानवत्। मांसशब्दोऽपि सुटि ज्ञानवत्। 'मांसघृतनासानूनाम्' इति शसादौ मांस् आदेशः। अत्र नकारस्य 'नश्चापदान्तस्य' इति कृतानुस्वारस्य निर्देशः। अत एवाह। **मान्भ्यामिति** ॥ मांस् आदेशे सकारस्य संयोगान्तलोपे सति निमित्तापायात् अनुस्वारनिवृत्तौ रूपम्। संयोगान्तलोपस्यासिद्धत्वान्नलोपो न। अथ सुट्यपि हृदाद्यादेशं साधयितुमाह। **वस्तुतस्त्विति** ॥ **इत्युक्तमिति** ॥ "ककुद्दोषणी" इति भाष्यप्रयोगात् प्रभृतिग्रहणस्य प्रकारार्थत्वं अजन्तपुंल्लिङ्गाधिकारे स्वयमुक्तमित्यर्थः। ननु प्रभृतिग्रहणस्य प्रकारार्थत्वेऽपि प्रत्ययत्वेन सादृश्यविवक्षायां प्रथमैकवचने हृत् इति प्रयोगोऽनुपपन्नः। सोर्लुका लुप्तत्वेन प्रत्ययलक्षणस्याप्यभावात् तदनित्यत्वाश्रयणे च मानाभावादित्यत आह। **अत एवेति। मांस्पचन्याः इति** ॥ पच्यते अस्यामुखायामिति पचनी। अधिकरणे ल्युट्, अनादेशः। टित्त्वात् ङीप्। मांसस्य पचनीति षष्ठीसमासः। अत्र ङसो लुका लुप्तत्वात् प्रत्ययलक्षणाभावे प्रत्ययपरत्वाभावात् मांस् आदेशो न स्यात्। अतो हृदाद्यादेशविधौ 'न लुमता' इति निषेधस्यानित्यत्वमाश्रीयते इत्यर्थः। ननु मांस्पचन्या इत्यत्र अन्तर्वर्तिनं ङसं लुप्तमाश्रित्य मांस् इत्यस्यास्ति पदत्वम्। 'सुप्तिङन्तम्' इति पदसंज्ञायाः प्रकृतिप्रत्ययधर्मत्वेन केवलाङ्गधर्मत्वाभावेन अत्र 'न लुमता' इति निषेधस्याप्रवृत्तेः। अन्यथा राजसूय इत्यत्र कथमयादेशः। ततश्च सकारस्य संयोगान्तलोपो दुर्वार इत्यत आह।

भत्वात्संयोगान्तलोपो न । 'पदन्न—' (सू २२८) इत्यत्र हि 'छन्दसि' इत्यनुवर्तितं वृत्तौ । तथापि 'अपो भि' (सू ४४२) इत्यत्र 'मासश्छन्दसि' (वा ४६३४) इति वार्तिके 'छन्दोग्रहणसामर्थ्याल्लोकेऽपि क्वचित्' इति कैयटोक्तरीत्या प्रयोगमनुसृत्य पदादयः प्रयोक्तव्या इति बोध्यम् ।

इत्यदन्तप्रकरणम् ।

॥ अथ अजन्तनपुंसकलिङ्गे आदन्तप्रकरणम् ॥

श्रियं पाति श्रीपाः ।

३१८ । ह्रस्वो नपुंसके प्रातिपदिकस्य । (१-२-४७)

क्लीबे प्रातिपदिकस्याजन्तस्य ह्रस्वः स्यात् । 'श्रीपं' 'ज्ञान'वत् ।

भत्वात् संयोगान्तलोपो नेति ॥ ननु यजादिस्वादिप्रत्यये परे विधीयमानायाः भसंज्ञायाः केवलाङ्गधर्मत्वात् तत्र लुका लुप्ते प्रत्ययलक्षणनिषेधात् कथमिह भसंज्ञेत्यत आह । **अयस्मयादित्वेनेति** ॥ मांस् आदेशस्य अयस्मयादिगणपठितत्वात् 'अयस्मयादीनि छन्दसि' इति भत्वमित्यर्थः । शङ्कते । **पदन्नित्यत्रेति** ॥ 'पदन्' इति सूत्रे 'शिर्षन् छन्दसि' इत्यतः छन्दसीत्यनुवृत्तिः वृत्तिग्रन्थे प्रदर्शितेत्यर्थः । ततश्च वैदिकप्रक्रियायामेव तदुपन्यासो युज्यत इत्याक्षेपः । परिहरति । **तथापीति** ॥ 'पदन्नो' इति सूत्रे छन्दोग्रहणानुवृत्तावपि लोकेऽपि क्वचिदित्यन्वयः । कुतो लोकेऽपि प्रयोग इत्यत आह । **अपो भीत्यादीति** ॥ 'अपो भि' इति सूत्रं अपस्तकारस्स्यात् भादौ प्रत्यये परे इत्यर्थः । तत्रास्ति वार्तिकम् । 'मासश्छन्दसि' इति मास् इत्यस्य तकारस्स्यात भादिप्रत्यये परे छन्दसि इति तदर्थः । ऋग्वेदे मा॒द्भिरश्नाद्भिरित्यादिमन्त्रमुदाहरणम् । यदि 'पदन्' इति छन्दोमात्रविषयं स्यात् तदा मास् इत्यादेशस्य छन्दोमात्रविषयत्वादलौकिकत्वाच्च मासश्छन्दसीति सस्य तकारविधौ छन्दोग्रहणं व्यर्थं स्यात् । अतो लोकेऽपि क्वचिदिति कैयटोक्तरीत्या 'पदन्' इत्यस्य लोकेऽपि प्रवृत्तिमनुसृत्य पदाद्यादेशाः प्रयोक्तुं योग्या इत्यर्थः ॥

इत्यदन्ताः ।

अथ आदन्ताः निरूप्यन्ते । **श्रियं पातीति** ॥ श्रीपाशब्दो विश्वपाशब्दवत् । घञन्तः क्विबन्तो वा । तस्य नपुंसकत्वे ह्रस्वविधानमाह । **ह्रस्वो नपुंसके** ॥ ह्रस्वश्रुत्या उपस्थितेन अच इत्यनेन प्रातिपदिकस्य विशेषणात् तदन्तविधिरित्याह । **क्लीबे इत्यादिना** ॥ नच कुले इति द्विवचने एकादेशस्य पूर्वान्तत्वेन ग्रहणात् अजन्तप्रातिपदिकत्वाद्ध्रस्वस्स्यादिति

श्रीपाय। अत्र सन्निपातपरिभाषया 'आतो धातोः' (सू २४०) इत्याकारलोपो न।

इत्यादन्ताः।

॥ अथ अजन्तनपुंसकलिङ्गे इदन्तप्रकरणम् ॥

३१९। स्वमोर्नपुंसकात्। (७-१-२३)

क्लीबादङ्गात्परयोः स्वमोर्लुक् स्यात्। वारि।

वाच्यम्। 'अर्थवदधातुः' इत्यतः प्रातिपदिकग्रहणानुवृत्तौ पुनः प्रातिपदिकग्रहणेन अन्तवद्भावतः प्रातिपदिकत्वे ह्रस्वाभावबोधनात्। **ज्ञापकादिति** ॥ ह्रस्वविधानात् दीर्घान्तत्वप्रयुक्तो न कश्चिद्विशेष इति भावः। जश्शसोरिशः श्रीपार्णीति रूपम्। भिन्नपदस्थत्वेऽपि 'एकाजुत्तरपदेणः' इति णत्वप्रवृत्तेः। श्रीपेण इनादेशे गुणे तस्य पूर्वान्तत्वादुत्तरपदस्य एकाच्त्वात् स्यादेव णत्वम्। **श्रीपायेति** ॥ श्रीपाशब्दस्य 'ह्रस्वो नपुंसके' इति ह्रस्वत्वे ङेर्यादेशे 'सुपि च' इति दीर्घे रूपम्। सन्निपातपरिभाषा तु कष्टायेति निर्देशात् न प्रवर्तते इति प्रागुक्तम्। **नन्वत्र** ह्रस्वत्वे कृतेऽपि प इत्यस्य एकदेशविकृतन्यायेन धातुत्वानपायात् दीर्घे कृते आकारान्तत्वाच्च 'आतो धातोः' इत्याल्लोपस्स्यात्। यादेशस्य स्वतो यकारादितया स्थानिवत्त्वेन स्वादिप्रत्ययतया च तस्मिन् परे भत्वस्यापि सत्वादित्यत आह। **अत्र सन्निपातेति** ॥ ननु उपजीव्यविघातकं प्रति उपजीवकनिमित्तं न भवतीति सन्निपातपरिभाषया लभ्यते। प्रकृते च अदन्तमुपजीव्य प्रवृत्तस्य यादेशस्य आल्लोपं प्रति कथंनिमित्तत्वम्। यादेशस्य आकारमुपजीव्य प्रवृत्तत्वाभावेन आकारलोपं प्रति निमित्तत्वे बाधकाभावादिति चेन्मैवम्। यादेशस्तावत् ह्रस्वमवर्णमुपजीव्य प्रवर्तते। तद्विधावतः इत्यनुवृत्तेः। ततश्च ह्रस्वत्वमवर्णत्वञ्च समुदितं यादेशस्य उपजीव्यम्। तत्र कष्टायेति निर्देशात् सन्निपातपरिभाषां बाधित्वा कृतेऽपि दीर्घे ह्रस्वत्वांश एव निवृत्तः। अवर्णत्वांशस्त्वनुवर्त्तित एव। तस्याप्याल्लोपेन निवृत्तौ उपजीव्यविघातस्स्यादेवेति भवेदेव सन्निपातपरिभाषाविरोधः। अतो न भवत्याल्लोपः इति कौस्तुभे समाहितम् 'इको गुणवृद्धी' इत्यत्र। वस्तुतस्तु 'आतो धातोः' इत्यत्र लक्षणप्रतिपदोक्तपरिभाषया प्रातिपदोक्त एवाकारान्तधातुर्गृह्यते। इह तु पाधातोर्ह्रस्वत्वे तु पुनर्दीर्घे सति अवगम्यमानं पास्वरूपं लाक्षणिकमेवेति न तस्यात्र ग्रहणमित्यास्तान्तावत् ॥

इत्यादन्ताः।

अथ इदन्ताः निरूप्यन्ते ॥ अथ वारिशब्दप्रक्रियां दर्शयितुमाह। **स्वमोर्नपुंसकात्** ॥ 'षड्भ्यो लुक्' इत्यतो लुगित्यनुवर्तते इत्याह। **क्लीबादित्यादिना**॥ **वारीति** ॥

३२० । इकोऽचि विभक्तौ । (७-१-७३)

इगन्तस्य क्लीबस्य नुमागमः स्यादचि विभक्तौ । वारिणी । वारीणि । 'न लुमता—' (सू २६३) इति निषेधस्यानित्यत्वात्पक्षे सम्बुद्धिनिमित्तो गुणः । हे वारे–हे वारि । 'आङो ना—' (सू २४४) । वारिणा । 'घेर्ङिति' (सू २४५) इति गुणे प्राप्ते 'वृद्ध्यौत्त्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन' (वा ४३७३) वारिणे । वारिणः । वारिणोः 'नुमचिर—' (वा ४३७४)

सोरमश्च लुकि रूपम् । नच 'आदेः परस्य' इति अमः अकारस्यैव लुक् स्यात् । नतु मकारस्यापीति शङ्क्यम् । प्रत्ययस्य लोप एव हि लुगित्युच्यते । अम् इति समुदाय एवेह प्रत्ययः । नतु तदेकदेशभूतमकारमात्रम् । अतो लुगमस्सर्वादेश एव भवति । **इकोऽचि** ॥ 'इदितो नुम् धातोः' इत्यतो नुमित्यनुवर्तते । 'नपुंसकस्य झलचः' इत्यतो नपुंसकस्येत्यनुवर्तते । अङ्गस्येत्यधिकृतम् इका विशेष्यते तदन्तविधिः । तदाह । **इगन्तस्येत्यादिना** ॥ **अचि विभक्ताविति** ॥ अजादौ विभक्तावित्यर्थः । 'इकोऽचि सुपि' इत्येव सुवचम् । विभक्तौ किम् । मधु मद्यं तस्येदं माधवम् । अणि परे नुमि लोपे माधुनमिति न भवति । **वारिणी इति** ॥ वारि औ इति स्थिते शीभावे नुमि 'अट्कुप्वाङ्' इति णत्वे रूपम् । **वारीणि इति** ॥ जश्शसोः शिभावे नुमि 'सर्वनामस्थाने च' इति दीर्घे णत्वे रूपम् । हे वारि सु इत्यत्र सोर्लुकि प्रक्रियां दर्शयति । **पक्षे इति** ॥ 'ह्रस्वस्य गुणः' इति सम्बुद्धिनिमित्तको गुणः कदाचिद्भवतीत्यर्थः । नन्विह सम्बुद्धेर्लुका लुप्तत्वात् 'न लुमता' इति प्रत्ययलक्षणनिषेधात् कथं गुण इत्यत आह । **न लुमतेति निषेधस्यानित्यत्वादिति** ॥ अत्र च 'इकोऽचि विभक्तौ' इत्यत्राञ्ग्रहणं ज्ञापकम् । हलादिषु भ्यामादिषु सत्यपि नुमि 'न लोपः प्रातिपदिकान्तस्य' इति तस्य लोपसम्भवादचीति व्यर्थम् । न च सम्बुद्धिव्यावृत्त्यर्थं अञ्ग्रहणम् । तत्र नुमि सति 'न ङिसम्बुद्ध्योः' इति निषेधे सति नकारश्रवणप्रसङ्गादिति वाच्यम् । सम्बुद्धेर्लुका लुप्ततया प्रत्ययलक्षणाभावेन तत्र नुमः प्राप्तेरेवाभावात् । 'न लुमता' इति निषेधस्यानित्यत्वे तु सम्बुद्धौ प्रत्ययलक्षणेन प्राप्तं नुमं वारयितुमञ्ग्रहणम् अर्थवदिति भवत्यञ्ग्रहणं 'न लुमता' इत्यस्यानित्यत्वे लिङ्गमित्याहुः । अत एव 'इकोऽचि' इति सूत्रे हे वपो इति 'एङ्ह्रस्वात्' इति सूत्रे हे त्रपु इति च भाष्यं सङ्गच्छते । **आङो नेति** ॥ रूपे विशेषाभावेऽपि नुमपेक्षया परत्वेन नाभावस्यैव न्याय्यत्वादिति भावः । ङसिङसोः विशेषमाह । **घेरिति** ॥ नुमं बाधित्वा परत्वात् गुणे प्राप्ते इत्यर्थः । **वृद्ध्यौत्त्वेति** ॥ वार्तिकम् । वृद्ध्यादीनां क्रमेण गावौ हरौ क्रोष्ट्रा हरये इत्यवकाशः । नुमोऽवकाशः वारीणि इति । अतिसखीनि इत्यत्र जश्शसोः 'सख्युरसम्बुद्धौ' इति णित्त्वाद्वृद्धिः परत्वात् नुमं बाधित्वा प्राप्ता । वारिणि इत्यत्र ङौ तु 'अच्च घेः' इत्यौत्त्वं प्राप्तम् । प्रियक्रोष्टूनि इत्यत्र जश्शसोः तृज्वत्त्वं प्राप्तम् । वारिशब्दात् ङ्यादौ गुणः प्राप्तः । अत्र पूर्वविप्रतिषेधान्नुमेवेत्यर्थः । **वारिणे इति** ॥ ङयि गुणं बाधित्वा नुमि णत्वे रूपम् । **वारिणः इति** ॥ ङसिङसोः गुणं बाधित्वा नुमि णत्वे

इति नुट्। 'नामि' (सू २०९) इति दीर्घः। वारीणाम्। वारिणि। वारिणोः। हलादौ हरिवत्।

३२१। तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य। (७-१-७४)

प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कमिगन्तं क्लीबं पुंवद्वा स्याट्टादावचि। अनादये--अनादिने, इत्यादि। शेषं वारिवत्। पीलुर्वृक्षस्तत्फलं पीलु, तस्मै पीलुने। अत्र न पुंवत्। प्रवृत्तिनिमित्तभेदात्।

रूपम्। **वारिणोरिति** ॥ ओसि यणं बाधित्वा नुमि णत्वे रूपम्। वारि आमित्यत्र परत्वान्नुटं बाधित्वा नुमि प्राप्ते आह। **नुमचिरेति** ॥ **नुडिति** ॥ नुम्नुटोः को विशेष इत्यत आह। **नामीति दीर्घः इति** ॥ नुमि तु सति तस्यान्नभक्तत्वात् 'नामि' इति दीर्घो न स्यादिति भावः। **वारिणीति** ॥ ङौ 'अच्च घेः' इत्यौत्त्वं परमपि बाधित्वा 'वृद्धौत्त्वे' इति पूर्वविप्रतिषेधान्नुम्। न विद्यते आदिः उत्पत्तिः यस्य सः अनादिः ईश्वरः। अनादिः अविद्या। अनादि ब्रह्म। त्रिलिङ्गोऽयं विशेष्यनिघ्नः। तस्य नपुंसकत्वे प्रथमाद्वितीययोर्वारिवद्रूपाणि। टादिषु अचि विशेषमाह। **तृतीयादिषु** ॥ भाषितः पुमान् येन प्रवृत्तिनिमित्तेन तत् भाषितपुंस्कं प्रवृत्तिनिमित्तं तदस्यास्तीति 'अर्श आद्यच्' शब्दस्वरूपं विशेष्यम्। पुंस्त्वे नपुंसकत्वे च एकप्रवृत्तिनिमित्तामिति यावत्। 'इकोऽचि विभक्तौ' इत्यतः इकोऽचीति 'नपुंसकस्य झलचः' इत्यतो नपुंसकस्येति चानुवर्तते। षष्ठी च प्रथमया विपरिणम्यते। तदाह। **प्रवृत्तिनिमित्तैक्ये इत्यादिना** ॥ **पुंवद्वेति** ॥ गालवग्रहणादिति भावः। **अचीति** ॥ अजादावित्यर्थः। पुंवत्त्वे ह्रस्वनुमोरभावः फलति। घटपटादिशब्दास्तावत् घटत्वपटत्वादिरूपेणैव तत्तद्व्यक्तिं प्रत्याययन्ति, नतु द्रव्यत्वपृथिवीत्वादिरूपेणेति निर्विवादम्। ततश्च यद्विशेषणं पुरस्कृत्य घटादिशब्दाः तत्तद्व्यक्तिषु प्रयुज्यन्ते तद्विशेषणं प्रवृत्तिनिमित्तमित्युच्यते। वाच्यतावच्छेदकमिति यावत्। एवञ्च नपुंसकत्वे लिङ्गान्तरे च यस्य एकमेव वाच्यतावच्छेदकं तत् शब्दस्वरूपं भाषितपुंस्कशब्देन विवक्षितम्। अनादिशब्दश्च उत्पत्त्यभावात्मकमनादित्वं पुरस्कृत्य स्त्रीपुन्नपुंसकतत्तद्व्यक्तिप्रत्यायक इति भवति तस्य प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कता। अतस्तस्य टादावचि पुंवत्त्वविकल्प इत्यभिप्रेत्योदाहरति। **अनादये--अनादिने इति** ॥ पुंवत्त्वे नुमः अप्रवृत्तेः 'घेर्ङिति' इति गुणः। पुंवत्त्वाभावे तु नुमिति भावः। **इत्यादीति** ॥ अनादेः--अनादिनः। अनाद्योः--अनादिनोः। अनादीनामित्येव। **शेषं वारिवदिति** ॥ प्रथमाद्वितीययोः भ्यामादौ हलि च वारिवदित्यर्थः। प्रवृत्तिनिमित्तैक्ये इत्यस्य प्रयोजनं दर्शयितुमाह। **पीलुर्वृक्ष इत्यादि** ॥ यदा वृक्षविशेषः पीलुशब्दवाच्यः। तदा पुल्लिङ्गः पीलुशब्दः। यदा पीलुजन्यफलं पीलुशब्दवाच्यं तदा नपुंसकलिङ्गः। 'फले लुक्' इत्यणो लुक्। अत्र फले वाच्ये पुंवत्त्वं नेत्यर्थः। कुत इत्यत आह। **प्रवृत्तिनिमित्तभेदादिति** ॥ वृक्षत्वव्याप्य[illegible]यक पीलुत्वं वृक्षविशेषवाच्ये प्रवृत्तिनिमित्तम्।

३२२ । अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः । (७-१-७५)

एषामनङ् स्याट्टादावचि, स चोदात्तः । 'अल्लोपोऽनः' (सू २३४) । दध्ना । दध्ने । दध्नः । दध्नः । दध्नोः । दध्नाम् । दध्नि--दधनि । दध्नोः । शेषं वारिवत् । एवमस्थिसक्थ्यक्ष्णीनि । तदन्तस्याप्यनङ् । अतिदध्ना ।

इति इदन्तप्रकरणम् ।

॥ अथ अजन्तनपुंसकलिङ्गे ईदन्तप्रकरणम् ॥

सुधि । सुधिनी । सुधीनि । हे सुधे--हे सुधि । सुधिया--सुधिना । सुधियाम्--सुधीनाम् । प्रध्या--प्रधिना ।

इति ईदन्तप्रकरणम् ।

फलविशेषे तु वाच्ये फलत्वव्याप्यजातिविशेषात्मकं पीलुत्वं प्रवृत्तिनिमित्तमिति प्रवृत्तिनिमित्तभेदादित्यर्थः । तदुक्तं "पीलुर्वृक्षः फलं पीलु पीलुने नतु पीलुवे । वृक्षे निमित्तं पीलुत्वं तज्जत्वं तत्फले पुनः" इति । अस्थि, दधि, सक्थि, अक्षि, एतेषां प्रथमाद्वितीययोर्वारिवद्रूपाणि । टादावचि विशेषमाह । **अस्थिदधि** ॥ तृतीयादिष्विति अचीति चानुवर्तते । तदाह । **एषामित्यादिना** ॥ नुमोऽपवादः । अनङि ङकार इत्, अकार उच्चारणार्थः । ङित्त्वादन्तादेशः । दधनि-दध्नि । 'विभाषा ङिश्योः' इत्यल्लोपविकल्पः इति भावः । **तदन्तस्यापीति** ॥ आङ्गत्वादिति भावः । **अतिदध्नेति** ॥ दधि अतिक्रान्तं कुलमतिदधि । अत्रापि नपुंसकस्येति सम्बध्यते । ततश्च धात्रः 'आदृगमहनः' इति किप्रत्यये दधिशब्दस्य पुंस्त्वे दधिनेत्येव । नपुंसकस्येति श्रूयमाणमस्थ्यादिभिरेवान्वेति । तेनातिदध्ना ब्राह्मणेनेत्यादि सिद्धम् ॥

इति इदन्ताः ।

अथ ईदन्ताः निरूप्यन्ते ॥ सुध्यायतीति सु शोभना धीर्यस्येति वा विग्रहे सुधीशब्दस्य 'ह्रस्वो नपुंसके' इति ह्रस्वत्वे वारिवद्रूपाणीत्याह । **सुधि, सुधिनी, इत्यादि** ॥ परत्वान्नुमा इयङ् बाध्यते इति भावः । **सुधिया सुधिनेति** ॥ सुध्यातृत्वस्य शोभनज्ञानवत्त्वस्य वा प्रवृत्तिनिमित्तस्य पुंसि नपुंसके च एकत्वात् पुंवत्त्वविकल्पः । एवं प्रधीशब्दः । तत्र 'न भूसुधियोः' इति निषेधाभावात् 'एरनेकाचः' इति यण् ॥

इति ईदन्ताः ।

॥ अथ अजन्तनपुंसकलिङ्गे उदन्तप्रकरणम् ॥

मधु, मधुनी। मधूनि। हे मधो—हे मधु। एवमम्बादयः। 'सानु'शब्दस्य 'स्नुः' वा। स्नूनि—सानूनि। प्रियक्रोष्टु। प्रियक्रोष्टुनी। तृज्वद्भावात्पूर्वविप्रतिषेधेन नुम्। प्रियक्रोष्टूनि। टादौ पुंवत्पक्षे प्रियक्रोष्ट्रा—प्रियक्रोष्टुना। प्रियक्रोष्ट्रे—प्रियक्रोष्टवे। अन्यत्र तृज्वद्भावात्पूर्वविप्रतिषेधेन नुमेव। प्रियक्रोष्टुना। प्रियक्रोष्टुने। 'नुमचिर—' (वा ४३७४) इति नुट्। प्रियक्रोष्टूनाम्।

इत्युदन्ताः।

अथ उदन्ताः निरूप्यन्ते। **मध्विति** ॥ "मधु मद्ये पुष्परसे, मधुर्वसन्ते चैत्रे च" इति कोशान्मधुशब्दस्य पुन्नपुंसकयोः मद्यत्ववसन्तत्वादिरूपप्रवृत्तिनिमित्तभेदात् न पुंवत्त्वविकल्पः। मृद्विकारवाचिनो मधुशब्दस्य तु नित्यनपुंसकत्वान्न पुंवत्त्वमिति विवेकः। **सानुशब्दस्य स्नुः वेति** ॥ 'पदन्' इति सूत्रे 'मांसप्रसृतनासानां मांस्प्रस्नवो वाच्यः' इति वार्तिकादिति शेषः। **स्नूनि, सानूनीति** ॥ शसि रूपम्। शसादावेव स्नुविधेः। प्रवृत्तिग्रहणस्य प्रकारार्थत्वे सुट्यपि स्नुर्भवति। अस्य च "स्नुः प्रस्थस्यानुरस्त्रियाम्" इति पुन्नपुंसकत्वात् भाषितपुंस्कत्वादस्त्येव पुंवत्त्वविकल्पः। **प्रियक्रोष्टु, प्रियक्रोष्टुनी इति** ॥ प्रियः क्रोष्टा यस्येति विग्रहः। असर्वनामस्थानत्वान्न तृज्वत्त्वम्। अथ जश्शसोरिशभावे सति सर्वनामस्थानत्वात् नुमं बाधित्वा परत्वात् तृज्वत्त्वे प्राप्ते आह। **तृज्वद्भावादिति** ॥ 'वृद्धात्त्व' इति वार्तिकादिति भावः। **प्रियक्रोष्टूनीति** ॥ जश्शसोरिशभावे नुमि 'सर्वनामस्थाने च' इति दीर्घे रूपम्। नच नित्यत्वादेव नुम्सिद्धेः किं पूर्वविप्रतिषेधेनेति वाच्यम्। नित्यत्वान्नुमि कृतेऽपि 'तदागमाः' इति न्यायेन 'तृज्वत्क्रोष्टुः' इत्यस्य नुम्विशिष्टस्य ग्रहणापत्तौ पुनस्तृज्वत्त्वापत्तेः। पूर्वविप्रतिषेधमाश्रित्य तृज्वत्त्वं बाधित्वा नुमि कृते तु न पुनस्तृज्वत्त्वम्। 'विप्रतिषेधे यद्बाधितं तद्बाधितमेव' इति न्यायादित्यलम्। **पुंवत्पक्षे इति** ॥ तत्रापि तृज्वत्त्वपक्षे इत्यर्थः। **प्रियक्रोष्ट्रेति** ॥ पुंवत्त्वे तृज्वत्त्वे च सति रूपम्। अनपुंसकत्वान्न नुम्। **प्रियक्रोष्टुनेति** ॥ पुंवत्त्वे, तदभावे च तृज्वत्त्वाभावे रूपम्। पुंवत्त्वाभावपक्षेऽपि नुमं बाधित्वा परत्वान्नात्वमेव। **प्रियक्रोष्टे इति** ॥ पुंवत्त्वे तृज्वत्त्वे ङेर्णत्वम्। अनपुंसकत्वान्न नुम्। **प्रियक्रोष्टवे इति** ॥ पुंवत्त्वे तृज्वत्त्वाभावे रूपम्। **अन्यत्रेति** ॥ पुंवत्त्वाभावपक्षे इत्यर्थः। **प्रियक्रोष्टुनेति** ॥ पुंवत्त्वतृज्वत्त्वयोरभावे रूपम्। तथा ङे त्रीणि रूपाणि। एवं ङसिङसोः। प्रियक्रोष्टुः—प्रियक्रोष्टोः—प्रियक्रोष्टुनः। प्रियक्रोष्ट्रोः—प्रियक्रोष्ट्रोः—प्रियक्रोष्टुनोः। आमि विशेषमाह। **नुमचिरेति नुडिति** ॥ तृज्वत्त्वं नुमञ्च बाधित्वेति शेषः। पुंवत्त्वे तृज्वत्त्वं बाधित्वा नुट्। पुंवत्त्वाभावे तु तृज्वत्त्वं बाधित्वा नुम्। तदपि बाधित्वा नुडिति विवेकः। प्रियक्रोष्टरि—प्रियक्रोष्टौ—प्रियक्रोष्टुनि। भ्यामादौ हलि मधुवत् ॥

इत्युदन्ताः।

॥ अथ अजन्तनपुंसकलिङ्गे ऊदन्तप्रकरणम् ॥

सुलु, सुलुनी, सुलूनि । पुनस्तद्वत् । सुल्वा--सुलुना ।

इत्यूदन्ताः ।

॥ अथ अजन्तनपुंसकलिङ्गे ऋदन्तप्रकरणम् ॥

धातृ, धातृणी, धातॄणि । हे धातः--हे धातृ । धात्रा--धातृणा । एवं ज्ञातृकर्त्रादयः ।

इत्यृदन्ताः ।

अथ ऊदन्ताः निरूप्यन्ते ॥ **सुल्विति** ॥ सुष्ठु लुनातीति क्विप् । 'हृस्वो नपुंसके' इति हृस्वः । **सुलुनी इति** ॥ 'ओस्सुपि' इति यणं बाधित्वा परत्वान्नुम् । **सुल्वेति** ॥ शोभनलवनकर्तृत्वं प्रवृत्तिनिमित्तैक्यमिति पुंवत्त्वविकल्पः । पुंवत्त्वे हृस्वाभावेनाधित्वात् नाभावो न । नुमभावश्च । 'ओस्सुपि' इति यण् । पुंवत्त्वाभावपक्षे तु यणं बाधित्वा नुम् । डेप्रभृतिषु तु पुंवत्त्वाभावे 'वृद्धौत्त्व' इति पूर्वविप्रतिषेधेन नुमि सुलुने, पुंवत्त्वे तु सुल्वे इत्यादि रूपद्वयम् ॥

इत्यूदन्ताः ।

अथ ऋदन्ताः निरूप्यन्ते । **धातृ इति** ॥ दधातीति धातृ । 'न लुमता' इते निषेधादङ्ङ् न । **धातृणी इति** ॥ 'इकोऽचि' इति नुमि 'ऋवर्णान्नस्य' इति णत्वम् । **धातृणि इति** ॥ जश्शसोरिशभावे नुमि 'सर्वनामस्थाने च' इति दीर्घे णत्वम् । 'न लुमता' इति निषेधस्यानित्यत्वात् सम्बुद्धिनिमित्तको हृस्वस्य पक्षे गुण इत्यत आह । **हे धातः-हे धातृ, इति** ॥ धारणकर्तृत्वरूपप्रवृत्तिनिमित्तैक्यात् टादावचि पुंवत्त्वविकल्प इत्याह । **धात्रा-धातृणा इति** ॥ धात्रे-धातृणे । धातुः-धातृणः । धात्रोः-धातृणोः । 'नुमचिर' इति नुट् । धातॄणाम् । धातरि-धातृणि ॥

इत्यृदन्ताः ।

॥ अथ अजन्तनपुंसकलिङ्गे ओदन्तप्रकरणम् ॥

३२३। एच इग्घ्रस्वादेशे। (१-१-४८)

आदिश्यमानेषु ह्रस्वेषु एचः इगेव स्यात्। प्रद्यु। प्रद्युनी। प्रद्यूनि। प्रद्युनेत्यादि। इह न पुंवत्। यदिगन्तं 'प्रद्यु' इति, तस्य भाषितपुंस्कत्वाभावात्। एवमग्रेऽपि।

इत्योदन्ताः।

अथ ओदन्ताः निरूप्यन्ते। प्रकृष्टा द्यौः यस्येति बहुव्रीहौ प्रद्योशब्दस्य 'ह्रस्वो नपुंसके' इति ह्रस्वः प्राप्नुवन् एचां ह्रस्वाभावात् तेषां द्विस्थानत्वेन अ, इ, उ, ऋ, ऌ इत्येतेषां ह्रस्वानामन्तरतमत्वाभावात् अन्यतरस्थानसाम्याश्रयणे अवर्णादिषु यस्य कस्य चिदनियमेन पर्यायेण वा प्राप्तविदमारभ्यते। **एच इक्** ॥ आदिश्यते इत्यादेशः। कर्मणि घञ्। तस्य ह्रस्वपदेन सह कर्मधारयः। विशेष्यस्यार्षः पूर्वनिपातः। आदेश इति निर्धारणसप्तमी। सौत्रमेकवचनम्। तदाह। **आदिश्यमानेष्वित्यादिना** ॥ मध्ये इत्यपपाठः। तद्योगे षष्ठ्या एवौचित्यात्। **इगेवेति** ॥ तेन अकारव्यावृत्तिः फलतीति भावः। यद्यपीकश्चत्वारः एचोऽप्येवम्। तथापि स्थान्यादेशानां यथासङ्ख्यन्न भवति। न ह्ययमपूर्वविधिः किन्तु नियमविधिः। यथाप्राप्तमेव नियम्यते। एचां हि पूर्वभागः अवर्णसदृशः। उत्तरभागस्तु इवर्णोवर्णसदृशः। तत्र पूर्वभागसादृश्यमवर्णस्यास्ति। तस्य च इग्ग्रहणेन निवृत्तौ इवर्णसादृश्यमात्रमादाय एकारस्य ऐकारस्य च इवर्णः, उवर्णसादृश्यात् ओकारस्य औकारस्य च उवर्णः, इति व्यवस्था न्यायप्राप्ता यथाप्राप्तमेव च नियम्यते इति न यथासङ्ख्यम्। ततश्च प्रद्योशब्दे ओकारस्य उकारः ह्रस्व इत्यभिप्रेत्योदाहरति। **प्रद्यु इत्यादि** ॥ ननु पुन्नपुंसकयोः प्रकृष्टस्वर्गवत्त्वमेकमेव प्रवृत्तिनिमित्तमिति टादौ पुंवत्त्वविकल्पः कुतो नेत्यत आह। **इह न पुंवदिति** ॥ कुत इत्यत आह। **यदिगन्तमिति** ॥ प्रद्योशब्दः ओदन्तः पुंसि। प्रद्युशब्दस्तु उदन्तो नपुंसके। तथाच पुंसि प्रद्योशब्दस्य भाषितपुंस्कत्वेऽपि नपुंसके प्रद्युशब्दस्य तदपेक्षया भिन्नत्वेन भाषितपुंस्कत्वाभावान्न पुंवत्त्वमित्यर्थः। केचित्तु पुंसि यः प्रद्योशब्दः ओदन्तः स एवेदानीं नपुंसकः। तस्य ह्रस्वान्तत्वेऽपि एकदेशविकृतस्यानन्यत्वात्। अतः पुंवत्त्वविकल्पोऽस्त्येवेत्याहुः। **एवमग्रेऽपीति** ॥ प्ररि, सुनु इत्यादावपीत्यर्थः ॥

इत्योदन्ताः।

॥ अथ अजन्तनपुंसकलिङ्गे ऐदन्तप्रकरणम् ॥

प्ररि, प्ररिणी, प्ररीणि । प्ररिणा । एकदेशविकृतस्यानन्यत्वात् 'रायो हलि' (सू २८६) इत्यात्वम् । प्राभ्याम्, प्राभिः । 'नुमचिर—' (वा ४६७४) इति नुट्यात्वे 'प्राणाम्' इति माधवः । वस्तुतस्तु सन्निपातपरिभाषया नुट्यात्वं न । 'नामि' (सू २०९) इति दीर्घस्त्वारम्भसामर्थ्यात्सन्निपातपरिभाषां बाधते इत्युक्तम् । प्रीणाम् ।

इत्यैदन्ताः ।

॥ अथ अजन्तनपुंसकलिङ्गे औदन्तप्रकरणम् ॥

सुनु, सुनुनी, सुनूनि । सुनुना । सुनुने, इत्यादि ।

इत्यौदन्ताः ।

इत्यजन्तनपुंसकलिङ्गप्रकरणम् ।

अथ ऐदन्ताः निरूप्यन्ते ॥ एकारान्तस्योदाहरणन्तु स्मृतः इः येन रः स्मृतेः । सु शोभनः स्मृतेर्यस्य तत् सुस्मृति इत्यादि बोध्यम् । **प्रीति** ॥ प्रकृष्टः रा: धनं यस्य इति बहुव्रीहौ प्रैरशब्दः । तस्य नपुंसकह्रस्वत्वेन इकारः । सुटि वारिवत् । सौलुमत्वात् 'रायो हलि' इत्यात्वन्न । टादावचि पुंवत्त्वविकल्पः प्रयुशब्दवत् । भ्यामादौ हलि विशेषमाह । **रायो हलीत्यात्वमिति** ॥ ननु रैशब्दस्य ऐदन्तस्य विहितमात्वं कथमिदन्तस्येत्यत आह । **एकदेशविकृतस्यानन्यत्वादिति** ॥ आमि विशेषमाह । **नुमचिरेति** ॥ नुटि 'रायो हलि' इत्यात्वे प्राणामित्यन्वयः । ननु प्ररि आमिति स्थिते नुटं बाधित्वा परत्वान्नुमि तस्याङ्गभक्तत्वात् हलादिविभक्त्यभावात् कथमात्वमित्यत आह । **नुमचिरेति** ॥ पूर्वविप्रतिषेधान्नुमं बाधित्वा नुट्यात्वनिर्बाधमिति भावः । **सन्निपातेति** ॥ ह्रस्वान्तत्वमुपजीव्य प्रवृत्तस्य नुटस्तद्विघातकमात्वं प्रति निमित्तत्वासम्भवात् इति भावः । ननु तर्हि ह्रस्वान्तत्वमुपजीव्य प्रवृत्तस्य नुटः तद्विघातकं 'नामि' इति दीर्घं प्रति कथन्निमित्तत्वमित्यत आह । **नामीति दीर्घस्त्विति** ॥ **इत्युक्तमिति** ॥ रामशब्दाधिकारे इति शेषः ॥

इत्यैदन्ताः ।

सु शोभना नौर्यस्येति विग्रहे बहुव्रीहौ 'ह्रस्वो नपुंसके' इति ह्रस्वः उकार इति मत्वा आह । **सुनु इति** ॥ इत्यौदन्ताः ।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायां अजन्तनपुंसकलिङ्गनिरूपणं समाप्तम् ।

श्रीरस्तु ।

॥ अथ हलन्तपुल्लिङ्गे हकारान्तप्रकरणम् ॥

३२४ । हो ढः । (८-२-३१)

हस्य ढः स्याज्झलि पदान्ते च । 'हलङ्याप्—' (सू २५२) इति सुलोपः । पदान्तत्वाद्धस्य ढः । जश्त्वचर्त्वे । लिट्–लिड्, लिहौ, लिहः । लिहम्, लिहौ, लिहः । लिहा, लिड्भ्याम इत्यादि । लिट्त्सु--लिट्सु ।

३२५ । दादेर्धातोर्घः । (८-२-३२)

अथ हकारान्ताः निरूप्यन्ते । तत्र वर्णसमाम्नायक्रममनुसृत्य हकारान्तमादौ निरूपयितुमाह । **हो ढः** ॥ ह इति षष्ठ्यन्तम् । 'झलो झलि' इत्यतो झलीत्यनुवर्तते । पदस्येत्यधिकृतम् । 'स्कोस्संयोगाद्योरन्ते च' इत्यतोऽन्ते इत्यनुवर्तते । तदाह । **हस्येति** ॥ **झलीति** ॥ झलि परतः पूर्वस्य हकारस्य पदान्ते विद्यमानस्य हकारस्य चेत्यर्थः । नच डकार एव कुतो न विहित इति वाच्यम् । 'वा द्रुह' इत्यत्र वक्ष्यमाणत्वात् । **पदान्तत्वादिति** ॥ सुलोपे सति प्रत्ययलक्षणमाश्रित्य झल्परत्वाच्चेत्यपि बोध्यम् । **लिडिति** ॥ 'लिह आस्वादने' क्विप् । हलङ्यादिना सुलोपः । हस्य ढत्वे 'वावसाने' इति चर्त्वविकल्प इति भावः । **लिड्भ्यामिति** ॥ 'स्वादिष्वसर्वनामस्थाने' इति पदत्वात् 'झलाञ्जशोऽन्ते' इति जश्त्वमिति भावः । **इत्यादीति** ॥ लिड्भिः । लिड्भ्यः । लिहे । लिहः । लिहः । लिहोः । लिहोः । लिहाम् । **लिट्त्सु इति** ॥ लिह सु इति स्थिते हस्य ढः । तस्य जश्त्वेन डः । 'खरि च' इति चर्त्वस्यासिद्धत्वात्ततः प्रागेव 'डस्सि' इति धुट् । ततो डस्य चर्त्वेन टः । धुटश्चर्त्वसम्पन्नस्य तकारस्यासिद्धत्वात् 'चयो द्वितीयाः' इति न भवति । 'न पदान्तात्' इति तकारस्य ष्टुत्वन्न । **लिट्सु इति** ॥ धुडभावे रूपम् । हस्य ढः । तस्य जश्त्वेन डः । तस्य चर्त्वेन टः । तस्यासिद्धत्वात् 'चयो द्वितीयाः' इति न 'न पदान्तात्' इति सस्य न ष्टुत्वमिति भावः । दुहधातोः क्विबन्तात्सुलोपे दुह् इत्यत्र ढत्वं क्वचिदपवदति । **दादेर्धातोः** ॥ 'हो ढः' इत्यतः ह इति षष्ठ्यन्तमनुवर्तते । झलि इति पदस्येति अन्ते इति च पूर्ववदनुवर्तते । धातोरित्यावर्तते । एकं धातुग्रहणमवयवषष्ठ्यन्तं हकारेऽन्वेति धातोरवयवस्य हस्येति । दादेरित्येतत्तु धातोरित्यत्र सामानाधिकरण्येनान्वेति । दः आदिर्यस्येति बहुव्रीहिः । धातोरिति

उपदेशे दादेर्धातोर्हस्य घः स्याज्झलि पदान्ते च । 'उपदेशे' किम् । 'अधोक्' इत्यत्र यथा स्यात् । दामलिहमात्मनः इच्छति दामलिह्यति । ततः क्विपि दामलिट् । अत्र मा भूत् ।

३२६ । एकाचो बशो भष् झषन्तस्य स्ध्वोः । (८-२-३७)

धातोरवयवो य एकाच् झषन्तस्तदवयवस्य बशः स्थाने भष् स्यात्सकारे ध्वशब्दे पदान्ते च । 'एकाचो धातोः' इति सामानाधिकरण्येनान्वये त्विह न स्यात् । गर्दभमाचष्टे गर्दभयति । ततः क्विप्, णिलोपः । गर्धप् ।

द्वितीयं धातुग्रहणन्तु धातोरुपदेशकालं लक्षयति । ततश्च फलितमाह । **उपदेशे इत्यादिना** ॥ धातूपदेशकाले यो दकारादिर्धातुः तदवयवस्य हस्येत्यर्थः । आवृत्तधातुग्रहणलब्धोपदेशग्रहणस्य फलं पृच्छति । **उपदेशे किमिति** ॥ **अधोगिति** ॥ 'दुह प्रपूरणे' लङ्, अडागमः, तिप्, शप्, तस्य लुक्, लघूपधगुणः, हल्ङ्यादिना तिपो लोपः, 'दादेः' इति हस्य घः, 'एकाचो बशः' इति भष्भावेन दकारस्य धकारः । 'वावसाने' इति चर्त्वजश्त्वे इति भावः । **यथा स्यादिति** ॥ यथेति प्राप्तियोग्यतायाम् । घत्वमत्र प्राप्तियोग्यम् । तत्र उपदेशग्रहणे सत्येव स्यादित्यर्थः । घत्वप्रवृत्तिवेळायां दुहधातोर्दकारादित्वं नास्ति । कृते अडागमे 'तदागमास्तद्ग्रहणेन गृह्यन्ते' इत्यकारादित्वात् । अतोऽत्र घत्वं न स्यादित्यव्याप्तिस्स्यात् । उपदेशग्रहणे तु नायं दोषः । घत्वप्रवृत्तिवेळायां दुहेरत्र दकारादित्वाभावेऽपि धातूपदेशकाले दादित्वादिति भावः । तदेवमव्याप्तिपरिहारफलमुक्त्वा अतिव्याप्तिपरिहारफलमाह । **दामेति** ॥ ग्रीवासु गवादिपशुबन्धनार्थरज्जुपर्यायो दामशब्दः । 'लिह आस्वादने' दाम लेढीति दामलिट् । तमात्मनः इच्छतीत्यर्थे 'सुप आत्मनः क्यच्' इति क्यचि 'सनाद्यन्ताः' इति धातुत्वात् तिपि शपि दामलिह्यतीति रूपम् । **ततः क्विपीति** ॥ क्यजन्तात् कर्तरि क्विपि अल्लोपे यलोपे च दामलिह्शब्दात् सोर्लोपे 'हो ढः' इति ढत्वे 'वावसाने' इति चर्त्वविकल्पे दामलिट्–दामलिड् इति रूपमित्यर्थः । **अत्र मा भूदिति** ॥ माङि लुङ् । सर्वलकारापवादः । अत्र घत्वं न भवेदित्येतदर्थमप्युपदेशग्रहणम् । कृते तु तस्मिन् घत्वमत्र न भवति । धातूपदेशे दामलिह् इति सुध्धातोः पाठाभावादिति भावः । तथाच प्रकृतोदाहरणे सौ दुघ् इति स्थिते । **एकाज्नो बशो** ॥ स् च ध्व् च स्ध्वौ तयोरिति विग्रहः । बश इति स्थानषष्ठी । एकाच इत्यवयवषष्ठी । एकः अच् यस्येति विग्रहः । झषन्तस्येत्यस्य शब्दस्येति विशेष्यम् । एकाच्कस्य झषन्तशब्दस्यावयवो यो बश् तस्य भष् स्यादित्यन्वयः । 'दादेर्धातोः' इत्यतो धातोरित्यवयवषष्ठ्यन्तमनुवर्तते । तच्च झषन्तशब्देन अन्वेति । पदस्येत्यधिकृतम् । 'स्कोस्संयोगाद्योः' इत्यतः अन्ते चेत्यनुवर्तते । तदाह । **धातोरवयवः इत्यादिना** ॥ ननु 'सम्भवति सामानाधिकरण्ये वैयधिकरण्याश्रयणस्यान्याय्यत्वात्' एकाच् झषन्तो यो धातुः तदवयवस्य बश इत्येवान्वय उचित इत्यत आह । **एकाचो धातोरित्यादि** ॥ **गर्दभयतीति** ॥ 'तत्करोति तदाचष्टे' इति णिजन्तस्य 'सना-

'झलि' इति निवृत्तम्। स्ध्वोर्ग्रहणसामर्थ्यात्। तेनेह न। दुग्धम्। दोग्धा। व्यपदेशिवद्भावेन धात्ववयवत्वाद्धष्भावः। जश्त्वचर्त्वे। धुक्–धुग्। दुहौ, दुहः। षत्वचर्त्वे। धुक्षु।

३२७। वा दुहमुहष्णुहष्णिहाम्। (८-२-३३)

एषां हस्य वा घः स्याज्झलि पदान्ते च। पक्षे ढः। ध्रुक्--ध्रुग्--ध्रुट्--ध्रुड्।

वन्ताः' इति धातुत्वात्तिबादि। **ततः क्विबिति**॥ गर्दभि इति ण्यन्तात् कर्तरि क्विबित्यर्थः। कपावितौ। वेर्लोपः। **णिलोपः इति**॥ 'णेरनिटि' इत्यनेनेति शेषः। **गर्धप् इति**॥ गर्दभ् इत्यस्मात् सुः हल्ङ्यादिलोपः। 'एकाचो बशः' इति दस्य धः। 'वावसाने' इति चर्त्वम्। एकाचो धातोः झषन्तस्येत्यन्वये गर्दभ् इत्यस्य सुब्धातोरनेकाच्त्वात् दकारस्य भष्भावो न स्यात्। धात्ववयवस्य झषन्तस्येत्यन्वये तु दभ् इति एकाचो झषन्तस्य धात्ववयवत्वात् तदवयवस्य दस्य भष्भावो निर्बाध इति भावः। अत्र प्राचीनैः झलीत्यनुवर्तितम्। तदयुक्तमित्याह। **झलीति निवृत्तमिति**॥ **सामर्थ्यादिति**॥ झलीत्यनुवृत्तौ तद्वैयर्थ्यादिति भावः। ननु झलीत्यस्यानुवृत्तिरेवास्तु। स्कोरित्येव न क्रियतामित्यत आह। **तेनेति**॥ झलीत्यननुवर्तनेनेत्यर्थः। **दुग्धमिति**॥ दुहेः क्तः। कित्त्वात् न लघूपधगुणः। 'दादेः' इति हस्य घः। 'झषस्तथोऽधोऽधः' इति तकारस्य धः। 'झलाञ्जश् झशि' इति घस्य गः। दुग्धमिति रूपम्। **दोग्धेति**॥ दुहेस्तृच्। लघूपधगुणः। 'दादेः' इति हस्य घः। 'झषस्तथोः' इति तकारस्य धः। 'ऋदुशनस्' इत्यनङ्। 'सर्वनामस्थाने च' इति दीर्घः। हल्ङ्यादिलोपः। 'न लोपः' इति नकारलोपः। दोग्धा इति रूपम्। झलीत्यनुवृत्तौ इहोभयत्रापि घत्वे कृते भष्भावस्स्यादिति भावः। ननु दुहेः क्विबन्तात् सोर्लोपे 'दादेः' इति घत्वे कृते दुघ् इति झषन्तमेकाच्कम्। तस्य धातुत्वात् धात्ववयवत्वाभावात् कथमिह दकारस्य भष्भावेन धकारस्स्यादित्यत आह। **व्यपदेशिवद्भावेनेति**॥ विशिष्टः अपदेशः व्यपदेशः मुख्यव्यवहारः, सोऽस्यास्तीति व्यपदेशी, तेन तुल्यं व्यपदेशिवत्। धातावेव धात्ववयवत्वव्यवहारो गौणः। राहोश्शिरः इत्यादिवदिति भावः। इदञ्च 'आद्यन्तवदेकस्मिन्' इति सूत्रे भाष्ये स्पष्टम्। **धुक्–धुगिति**॥ क्विपः प्राक् प्रवृत्तायाः धातुसंज्ञायाः अनपायात् 'दादेः' इति घत्वे कृते झषन्तत्वात् भष्भावे चर्त्वविकल्प इति भावः। दुहौ, दुहः। दुहम्, दुहौ, दुहः। दुहा। भ्यामादौ 'दादेः' इति घत्वे कृते स्वादिष्विति पदत्वात् पदान्तत्वप्रयुक्तो भष्भावः। 'झलाञ्जशोऽन्ते' इति जश्त्वम्। धुग्भिः। दुहे, धुग्भ्याम्, धुग्भ्यः। दुहः। दुहः, दुहोः, दुहाम्। दुह् सु इति स्थिते प्रक्रियां दर्शयति। **षत्वेति**॥ घत्वे कृते भष्भावे 'झलाञ्जशोऽन्ते' इति जश्त्वेन गकारः। तस्य 'खरि च' इति चर्त्वस्यासिद्धत्वात् 'आदेशप्रत्यययोः' इति षत्वे कृते चर्त्वे धुक्षु इति रूपमिति भावः। 'दुह जिघांसायाम्, मुह वैचित्त्ये, ष्णुह उद्गिरणे, ष्णिह प्रीतौ' एभ्यः क्विबन्तेभ्यः सोर्लोपे हुहेर्दादित्वात् ढत्वं बाधित्वा नित्यं घत्वे प्राप्ते इतरेषामतदादित्वात् अप्राप्ते घत्वे इदमारभ्यते। **वा दुह**॥ 'दादेः' इतो घ इत्यनुवर्तते। झलीति पदस्येति अन्ते इति पूर्ववदनुवर्तते।

दुहौ, दुहः। धुग्भ्याम्--धुड्भ्याम्। धुक्षु--धुट्त्सु--धुट्सु। एवं मुहष्णुहष्णिहाम्।

३२८। इग्यणः सम्प्रसारणम्। (१-१-४५)

यणः स्थाने प्रयुज्यमानो य इक् स सम्प्रसारणसंज्ञः स्यात्।

३२९। वाह ऊठ्। (६-४-१३२)

भस्य वाहः सम्प्रसारणमूठ् स्यात्।

३३०। सम्प्रसारणाच्च। (६-१-१०८)

तदाह। **एषामिति** ॥ दुहादीनां चतुर्णामित्यर्थः। धुक्-धुगिति ॥ षत्वपक्षे भष्भावे चर्त्वविकल्प इति भावः। धुट्-धुडिति ॥ षत्वाभावपक्षे 'हो ढः' इति ढत्वे भष्भावे चर्त्वविकल्पः। अत्र भष्भावार्थमेव 'हो ढः' इति सूत्रे ढ एव विहितः। नतु दः। तथा सति झषन्तत्वाभावात् भष्भावो न स्यात्। अचि सुपि दुहम्, इत्यादि। धुग्भ्यामिति ॥ षत्वपक्षे भष्भावः। धुड्भ्यामिति ॥ षत्वाभावपक्षे ढत्वे जश्त्वे रूपम्। एवं भिसि भ्यसि च रूपद्वयम्। दुहः। दुहः, दुहोः, दुहाम्। धुक्षिवति ॥ षत्वे भष्भावे 'आदेशप्रत्यययोः' इति षत्वे 'खरि च' इति चर्त्वम्। धुट्त्स्विति ॥ षत्वाभावपक्षे ढत्वे भष्भावे ढस्य जश्त्वे धुटि चर्त्वे षत्वम्। चर्त्वस्यासिद्धत्वात् 'चयो द्वितीयाः' इति तकारस्य थो न भवति। 'न पदान्तात्' इति ष्टुत्वन्न। धुड्भ्स्विति ॥ धुडभावे रूपम्। हस्य ढः, भष्भावः, ढस्य जश्त्वेन डः, तस्य चर्त्वेन टः। **एवमिति** ॥ भष्भाववर्जमिति शेषः। विश्वं वहतीत्यर्थे 'भजो ण्विः' इत्यतो ण्विरित्यनुवृत्तौ 'वहश्च' इति ण्विः। णकार इत्। वेर्लोपः। 'अत उपधायाः' इति वृद्धिः। उपपदसमासः। विश्ववाह् इति रूपम्। ततस्सोर्हल्ङ्याविति लोपे 'हो ढः' इति ढत्वे 'वावसाने' इति चर्त्वविकल्पे विश्ववाट्-विश्ववाड्, विश्ववाहौ, विश्ववाहः। विश्ववाहम्, विश्ववाहौ, इति सुटि रूपाणि सुगमत्वादुपेक्ष्य शसादौ अचि सम्प्रसारणकार्यं वक्ष्यन् सम्प्रसारणसंज्ञां दर्शयति। **इग्यणस्सम्प्रसारणम्** ॥ यणस्स्थाने इति व्याख्यानात् स्थानार्थलाभः। 'षष्ठी स्थानेयोगा' इति तु नह भवति। अनुवादे परिभाषाणामनुपस्थितेः। षष्ठीश्रुतौ सर्वत्र व्याख्यानादेव स्थानार्थलाभसम्भवात् 'षष्ठी स्थानेयोगा' इत्येतत् 'निर्दिश्यमानस्यादेशा भवन्ति' इत्येतदर्थमिति भाष्ये सिद्धान्तितत्वाच्च। **सम्प्रसारणसंज्ञः इति** ॥ ततश्च 'वसोस्सम्प्रसारणम्, वचिस्वपियजादीनाम्' इत्यादौ सम्प्रसारणश्रुतौ यण्स्थानिक इगुपस्थितो भवति। तत्रान्तरतम्याद्यस्य इकारः वकारस्य उकारः रेफस्य ऋकारः लस्य ऌकारः इति ज्ञेयम्। **वाह ऊठ्** ॥ 'भस्य' इत्यधिकृतम्। 'वसोस्सम्प्रसारणम्' इत्यतस्सम्प्रसारणमित्यनुवर्तते। तच्च ऊठ् इत्यनेनान्वेति। तदाह। **भस्येत्यादिना** ॥ **सम्प्रसारणमिति** ॥ तेन वाहो यो यण् वकारस्तस्य ऊठ् इति लभ्यते। सम्प्रसारणमित्यननुवृत्तौ 'अलोऽन्त्यस्य' इति हकारस्य स्यात्। तदनुवृत्तौ तु ऊठो यण्स्थानिकत्वलाभात् नालोऽन्त्यस्य इति भवति। विश्व ऊ आह् अस् इति स्थिते। **सम्प्रसारणाच्च** ॥ 'इको यणचि'

सम्प्रसारणादचि पूर्वरूपमेकादेशः स्यात्। 'एत्येधत्यूठ्सु' (सू ७३)। विश्वौहः। विश्वौहेत्यादि। 'छन्दस्येव ण्विः' इति पक्षे णिजन्ताद्विच्।

३३१। चतुरनडुहोरामुदात्तः। (७-१-९८)

अनयोराम् स्यात्सर्वनामस्थाने परे। स चोदात्तः।

३३२। सावनडुहः। (७-१-८२)

अस्य नुम् स्यात्सौ परे। 'आन्' इत्यधिकारादवर्णात्परोऽयं नुम्। अतो

इत्यतः अचीति 'अमि पूर्वः' इत्यतः पूर्व इति चानुवर्तते। 'एकः पूर्वपरयोः' इत्यधिकृतम्। तदाह। **सम्प्रसारणादित्यादिना** ॥ विश्व ऊह् अस् इति स्थिते आद्गुणमाशङ्क्य आह। **एत्येधत्यूठ्स्विति** ॥ अनेन गुणापवादो वृद्धिरिति शेषः। विश्वौहः। विश्वौहा। **इत्यादीति** ॥ विश्ववाड्भ्याम्, विश्ववाड्भिः। विश्ववाड्भ्यः। विश्वौहे। विश्वौहः। विश्वौहः। विश्वौहाम्। विश्वौहोः। विश्ववाट्त्सु-विश्ववाट्सु। ननु वहश्चेति ण्विविधौ 'छन्दसि सहः' इत्यतश्छन्दसीति केचिदनुवर्तयन्ति। तन्मते विश्ववाह्शब्दस्य लोके कथं प्रयोगः इत्यत आह। **छन्दस्येव ण्विरिति पक्षे णिजन्ताद्विजिति** ॥ विश्वं वाहयतीत्यर्थे वाह् इति ण्यन्तात् 'अन्येभ्योऽपि दृश्यते' इति विचि 'नेड्वशि कृति' इति इडभावे णिलोपे अपृक्तलोपे उपपदसमासे विश्ववाह्शब्दो लोके प्रयोगार्हः। किन्तु तस्य ऊठ् न भवतीति 'अचः परस्मिन्' इति णिलोपस्य स्थानिवत्त्वेन शसि तस्य भत्वाभावात् वाहयतेः क्विपि विश्ववाह्शब्दस्य तु ऊठ् निर्बाध एव। 'क्वौ लुप्तम्' इति णिलोपस्य स्थानिवत्त्वाभावेन तस्य भत्वानपायात्। अत एव 'विभाषा पूर्वाह्णापराह्णाभ्याम्' इति सूत्रे प्रष्ठौहः आगतं प्रष्ठवाड्रूप्यमिति लौकिकविग्रहवाक्ये प्रष्ठौहः इति प्रयोगस्सङ्गच्छते। क्वचित् पुस्तके 'छन्दस्येव ण्विः' इति प्रामाणिकाः, इति पठ्यते। 'कव्यपुरीष' इत्यादुत्तरसूत्रे तदनुवृत्तेरावश्यकत्वादिति तदाशयः। अनः शकटं वहतीत्यर्थे अनसि वहेः क्विप् 'अनसो डश्च' इति क्विप्। सस्य डश्च। 'वचिस्वपियजादीनां किति' इति यजादित्वात् वकारस्य सम्प्रसारणम् उकारः। 'सम्प्रसारणाच्च' इति पूर्वरूपम्। अनडुह् इति रूपम्। ततस्सुबुत्पत्तिः। अनडुह् स् इति स्थिते। **चतुरनडुहोः** ॥ **अनयोरिति** ॥ चतुरनडुहोरित्यर्थः। **सर्वनामस्थाने इति** ॥ 'इतोऽत्सर्वनामस्थाने' इत्यतः सर्वनामस्थाने इत्यनुवृत्तेरिति भावः। आमि मकार इत्। मित्त्वादन्त्यादचः परः। उकारस्य यण् वकारः। अनड्वाह् स् इति स्थिते। **सावनडुहः** ॥ **अस्येति** ॥ अनडुह्शब्दस्येत्यर्थः। **नुम् स्यादिति** ॥ 'आच्छीनद्योर्नुम्' इत्यतो नुमित्यनुवृत्तेरिति भावः। नुमि मकार इत्। उकार उच्चारणार्थः। मित्त्वादन्त्यादचः परः। अनड्वान् ह् स् इति स्थितम्। ननु आम्नुमौ एतौ मित्त्वादन्त्यादचः उकारात् परौ प्राप्तौ। तत्र 'चतुरनडुहोः' इत्याम् सर्वनामस्थाननिमित्तकस्सामान्यविहितः। 'सावनडुहः' इति नुम् तु सर्वनामस्थानविशेषे सौ विहितत्वाद्विशेषविहितः। सच निरवकाशत्वात् सामान्यविहितमामं बाधेत। सोरन्यत्राम्विधेश्च

विशेषविहितोऽपि नुमा आम् न बाध्यते। अमा च नुम् न बाध्यते। सोर्लोपः। नुम्विधिसामर्थ्यात् 'वसुस्रंसु—' (सू ३३४) इति दत्वं न। संयोगान्तलोपस्यासिद्धत्वान्नलोपो न। अनड्वान्।

रितार्थत्वात्। तथाच अनड्वन् इति स्यात्। अनड्वान् इति न स्यात्। किञ्च सम्बुद्धौ हे अनड्वह् स् इति स्थिते 'अम् सम्बुद्धौ' इत्यमागमः आमपवादोऽनुपदमेव वक्ष्यते। तत्र 'सावनड्वहः' इति नुमपि प्राप्तः। सच सम्बुद्धावसम्बुद्धौ च विहितत्वात् सामान्यविहितः। 'अम् सम्बुद्धौ' इत्यम् तु सम्बुद्धावेव विहितत्वात् विशेषविहितः। सच निरवकाशत्वात् सामान्यविहितन्नुमं बाधेत। असम्बुद्धौ सौ नुम्विधेश्चरितार्थत्वात्। ततश्च हे अनड्वन्निति न स्यात्। 'हो ढः' इति ढत्वे हे अनड्वट् इति स्यात् इत्याशङ्क्य आह। **आदित्यधिकारादित्यादि नुम् न बाध्यते इत्यन्तम्॥** 'सावनड्वहः' इति नुम्विधौ तावत् 'आच्छीनद्योः' इत्यतः आदिति पञ्चम्यन्तमनुवर्तते। अतः अनड्वहः अवर्णात् परो नुमिति लाभात् विशेषविहितेनापि 'सावनड्वहः' इति नुमा 'चतुरनड्वहोः' इति सामान्यविहितः आम् न बाध्यते। अवर्णात् परत्वेन विधीयमानं नुमं प्रति आम उपजीव्यत्वात्। उपजीव्योपजीवकयोर्विरोधाभावेन बाध्यबाधकभावविरहात्। प्रत्युत आमभावे नुमः प्रवृत्त्यसम्भवात्। तथा 'अम् सम्बुद्धौ' इत्यमा च विशेषविहितेन 'सावनड्वहः' इति नुम् न बाध्यते। नुम उपजीवकत्वेन विरोधाभावात्। प्रत्युत अमभावे नुमः प्रवृत्त्यसम्भवात् इत्यर्थः। ननु 'सावनड्वहः' इति नुम्विधौ आदित्यनुवर्तनान्नाम। तथापि आमुपजीवकत्वन्नुमो न लभ्यते। अनड्वहि नुमो नकाराकारात् परत्वेऽपि आदित्यनुवृत्तेरविरोधादिति चेन्मैवम्। 'सावनड्वहः' इति नुम्विधौ मित्त्वादन्त्यादच इत्युपस्थितम्। तत्र च आदित्यनुवृत्तमन्वेति। ततश्चानड्वहि यः अन्त्यरूपः अवर्णः तस्मात् परो नुमिति लभ्यते। नकाराकारस्तु नैवंविध इत्यामुपजीवकत्वन्नुमो निर्बाधमेव। एवं सम्बुद्धौ अमुपजीवकत्वमपि ज्ञेयम्। क्वचित्पुस्तके आमा च नुम् न बाध्यते इति पठ्यते। तत्रेयं योजना। ननु बह्वनड्वांहि कुलानीत्यत्र 'नपुंसकस्य झलचः' इति नुमपेक्षया परत्वात् आम् स्यात्। कृते त्वामि पुनर्नुम् न भवति। 'विप्रतिषेधेन यद्बाधितं तद्बाधितमेव' इति न्यायात् इत्यत आह। **आमा च नुम् न बाध्यते इति॥** 'पुनः प्रसङ्गविज्ञानात् सिद्धम्' इति क्वचिद्विप्रतिषेधेन बाधितस्य पुनरुन्मेषात् आमि कृतेऽपि 'नपुंसकस्य झलचः' इति नुम् निर्बाध इति भावः। **सोर्लोपः इति॥** अनड्वान् ह् स् इत्यत्र हल्ङ्यादिनेति शेषः। ननु कृते सुलोपे हकारस्य संयोगान्तलोपे नुमो नकारस्य पदान्तत्वात् 'वसुस्रंसुध्वंस्वनड्वहां दः' इति दत्वं कुतो न स्यादित्यत आह। **नुम्विधीति॥** यदि ह्यत्र नुमो नस्य दत्वं स्यात्, तर्हि अनड्वाह् इत्यत्र नुमभावेऽपि हस्य दत्वेनैव अनड्वाद् इति सिद्धेः नुम्विधिरनर्थकस्स्यात्। अतो नुमो नस्य दत्वन्नेति विज्ञायते इति भावः। ननु अनड्वान् ह् स् इत्यत्र सुलोपे संयोगान्तलोपे च कृते नकारस्य प्रातिपदिकान्तत्वात् पदान्तत्वाच्च 'न लोपः प्रातिपदिकान्तस्य' इति नलोपः किन्न स्यात्। नच नुम्विधिसामर्थ्यान्नात्र नलोप इति वाच्यम्। नलोपाभावस्थले सम्बुद्धौ 'हे अनड्वन्' इत्यत्र नुम्विधेश्चरितार्थत्वात्। तत्र 'न डिसम्बुद्ध्योः' इति नलोपप्रतिषेधादित्यत आह। **संयोगान्तेति॥** हकारलोप-

३३३। अम् सम्बुद्धौ। (७-१-९९)

चतुरनडुहोरम् स्यात्सम्बुद्धौ। आमोऽपवादः। हे अनड्वन्। अनड्वाहौ। अनड्वाहः। अनडुहः। अनडुहा।

३३४। वसुस्रंसुध्वंस्वनडुहां दः। (८-२-७२)

सान्तवस्वन्तस्य स्रंस्वादेश्च दः स्यात्पदान्ते। अनडुद्भ्यामित्यादि। 'सान्त—' इति किम्। विद्वान्। 'पदान्ते' इति किम्। स्रस्तम्। ध्वस्तम्।

३३५। सहेः साडः सः। (८-३-५६)

साड्रूपस्य सहेः सस्य मूर्धन्यादेशः स्यात्। तुराषाट्—तुराषाड्।

स्यासिद्धत्वे सति नकारस्य प्रातिपदिकान्तत्वाभावात् पदान्तत्वाभावाच्च नलोपो नेत्यर्थः। **अनड्वानिति** ॥ अनडुह् सु इति स्थिते आम्, यण्, नुम्, सुलोपः, संयोगान्तलोपश्च। अथ सम्बुद्धौ हे अनडुह् स् इति स्थिते 'चतुरनडुहोः' इत्यामागमे प्राप्ते। **अम् सम्बुद्धौ** ॥ 'चतुरनडुहोः' इत्यनुवर्तते। तदाह। **चतुरनडुहोरिति** ॥ अमो मकार इत्। मित्त्वादन्त्यादचः परः। **हे अनड्वन्निति** ॥ अम्, यण्, नुम्, सुलोपः, संयोगान्तलोपश्च। **अनड्वाहाविति** ॥ सर्वनामस्थानत्वादाम्। नुम् तु न। तस्य सावेव विधानात्। **अनडुहः इति** ॥ शसादावचि अविकृत एवानडुह्शब्द इति भावः। भ्यामादौ हलि विशेषमाह। **वसुस्रंसु** ॥ वसुः प्रत्ययः तेन तदन्तं गृह्यते। 'स्रंसु, ध्वंसु, अवस्रंसने' इति धातू। 'ससजुषो रुः' इत्यतः स इति लुप्तषष्ठ्यन्तमनुवृत्तम्। तेन च वसुर्विशेष्यते। तदन्तविधिः। सान्तत्वं स्रंसुध्वंस्वोर्न विशेषणम्। अव्यभिचारात्। नाप्यनडुहः। असम्भवात्। पदस्येत्यधिकृतं बहुवचनेन विपरिणम्यते। 'अलोऽन्त्यस्य' इति तदन्तस्य भवति। फलितमाह। **सान्तेत्यादिना** ॥ यथासम्भवं रुत्वदत्वयोरपवादः। **अनडुद्भ्यामिति** ॥ 'स्वादिष्वसर्वनामस्थाने' इति पदत्वादिति भावः। **इत्यादीति** ॥ अनडुद्भिः। अनडुद्भ्यः। अनडुहे। अनडुहः। अनडुहः। अनडुहोः। अनडुहाम्। दत्वे 'खरि च' इति चर्त्वम्। अनडुत्सु। **सान्तेति किमिति** ॥ वसोरपि सान्तत्वाव्यभिचारात् प्रश्नः। **विद्वानिति** ॥ विद्वस् स् इति स्थिते 'अत्वसन्तस्य' इति दीर्घे 'उगिदचाम्' इति नुमि सुलोपे संयोगान्तलोपे च रूपम्। अत्र वसोस्सकारान्तत्वाभावात् न दत्वमिति भावः। **स्रस्तं ध्वस्तमिति** ॥ क्तप्रत्ययान्तम्। अत्र पदान्तत्वाभावान्न दत्वम्। विद्वांसौ, अनड्वाहावित्याद्यपि प्रत्युदाहार्यम्। **अथ तुराषाहशब्दात्** सोर्हल्ङ्यादिलोपे हस्य ढत्वे कृते विशेषमाह। **सहेः साडः सः** ॥ 'इकूदितपौ धातुनिर्देशे' इति 'षह मर्षणे' इति धातोरिकप्रत्यये 'धात्वादेष्षस्सः' इति षस्य सत्वे सहिशब्दः। षह्धातोरित्यर्थः। साड इति कृतढत्वडत्ववृद्धेः अनुकरणम्। तदाह। **साड्रूपस्येति** ॥

॥ अथ अजन्तनपुंसकलिङ्गे ऊदन्तप्रकरणम् ॥

सुलु, सुलुनी, सुलूनि । पुनस्तद्वत् । सुल्वा--सुलुना ।

इत्यूदन्ताः ।

॥ अथ अजन्तनपुंसकलिङ्गे ऋदन्तप्रकरणम् ॥

धातृ, धातृणी, धातॄणि । हे धातः--हे धातृ । धात्रा--धातृणा । एवं ज्ञातृकर्त्रादयः ।

इत्यृदन्ताः ।

अथ ऊदन्ताः निरूप्यन्ते ॥ **सुल्विति** ॥ सुष्ठु लुनातीति क्विप् । 'ह्रस्वो नपुंसके' इति ह्रस्वः । **सुलुनी इति** ॥ 'ओस्सुपि' इति यणं बाधित्वा परत्वान्नुम् । **सुल्वेति** ॥ शोभनलवनकर्तृत्वं प्रवृत्तिनिमित्तैक्यमिति पुंवत्त्वविकल्पः । पुंवत्त्वे ह्रस्वाभावेनाधित्वात् नाभावो न । नुमभावश्च । 'ओस्सुपि' इति यण् । पुंवत्त्वाभावपक्षे तु यणं बाधित्वा नुम् । ङेप्रभृतिषु तु पुंवत्त्वाभावे 'वृज्रौत्त्व' इति पूर्वविप्रतिषेधेन नुमि सुलुने, पुवत्त्वे तु सुल्वे इत्यादि रूपद्वयम् ॥

इत्यूदन्ताः ।

अथ ऋदन्ताः निरूप्यन्ते । **धातृ इति** ॥ दधातीति धातृ । 'न लुमता' इति निषेधादङ्गे न । **धातृणी इति** ॥ 'इकोऽचि' इति नुमि 'ऋवर्णान्नस्य' इति णत्वम् । **धातॄणि इति** ॥ जश्शसोरिशभावे नुमि 'सर्वनामस्थाने च' इति दीर्घे णत्वम् । 'न लुमता' इति निषेधस्यानित्यत्वात् सम्बुद्धिनिमित्तको ह्रस्वस्य पक्षे गुण इत्यत आह । **हे धातः-हे धातृ, इति** ॥ धारणकर्तृत्वरूपप्रवृत्तिनिमित्तैक्यात् टादावचि पुंवत्त्वविकल्प इत्याह । **धात्रा-धातृणा इति** ॥ धात्रे-धातृणे । धातुः-धातृणः । धात्रोः-धातृणोः । 'नुमचिर' इति नुट् । धातॄणाम् । धातरि-धातृणि ॥

इत्यृदन्ताः ।

॥ अथ अजन्तनपुंसकलिङ्गे ओदन्तप्रकरणम् ॥

३२३। एच इग्घ्रस्वादेशे। (१-१-४८)

आदिश्यमानेषु ह्रस्वेषु एचः इगेव स्यात्। प्रद्यु। प्रद्युनी। प्रद्यूनि। प्रद्युनेत्यादि। इह न पुंवत्। यदिगन्तं 'प्रद्यु' इति, तस्य भाषितपुंस्कत्वाभावात्। एवमग्रेऽपि।

इत्योदन्ताः।

अथ ओदन्ताः निरूप्यन्ते। प्रकृष्टा द्यौः यस्येति बहुव्रीहौ प्रद्योशब्दस्य 'ह्रस्वो नपुंसके' इति ह्रस्वः प्राप्नुवन् एचां ह्रस्वाभावात् तेषां द्विस्थानत्वेन अ, इ, उ, ऋ, ऌ इत्येतेषां ह्रस्वानामन्तरतमत्वाभावात् अन्यतरस्थानसाम्याश्रयणे अवर्णादिषु यस्य कस्य चिदनियमेन पर्यायेण वा प्राप्तावेदमारभ्यते। **एच इक्** ॥ आदिश्यते इत्यादेशः। कर्मणि घञ्। तस्य ह्रस्वपदेन सह कर्मधारयः। विशेष्यस्यार्षः पूर्वनिपातः। आदेश इति निर्धारणसप्तमी। सौत्रमेकवचनम्। तदाह। **आदिश्यमानेष्वित्यादिना** ॥ मध्ये इत्यपपाठः। तद्योगे षष्ठ्या एवौचित्यात्। **इगेवेति** ॥ तेन अकारव्यावृत्तिः फलतीति भावः। यद्यपीकश्चत्वारः एचोऽप्येवम्। तथापि स्थान्यादेशानां यथासङ्ख्यन्न भवति। न ह्ययमपूर्वविधिः किन्तु नियमविधिः। यथाप्राप्तमेव नियम्यते। एचां हि पूर्वभागः अवर्णसदृशः। उत्तरभागस्तु इवर्णोवर्णसदृशः। तत्र पूर्वभागसादृश्यमवर्णस्यास्ति। तस्य च इग्ग्रहणेन निवृत्तौ इवर्णसादृश्यमात्रमादाय एकारस्य ऐकारस्य च इवर्णः, उवर्णसादृश्यात् ओकारस्य औकारस्य च उवर्णः, इति व्यवस्था न्यायप्राप्ता यथाप्राप्तमेव च नियम्यते इति न यथासङ्ख्यम्। ततश्च प्रद्योशब्दे ओकारस्य उकारः ह्रस्व इत्यभिप्रेत्योदाहरति। **प्रद्यु इत्यादि** ॥ ननु पुन्नपुंसकयोः प्रकृष्टस्वर्गवत्त्वमेकमेव प्रवृत्तिनिमित्तमिति टादौ पुंवत्त्वविकल्पः कुतो नेत्यत आह। **इह न पुंवदिति** ॥ कुत इत्यत आह। **यदिगन्तमिति** ॥ प्रद्योशब्दः ओदन्तः पुंसि। प्रद्युशब्दस्तु उदन्तो नपुंसके। तथाच पुंसि प्रद्योशब्दस्य भाषितपुंस्कत्वेऽपि नपुंसके प्रद्युशब्दस्य तदपेक्षया भिन्नत्वेन भाषितपुंस्कत्वाभावान्न पुंवत्त्वमित्यर्थः। केचित्तु पुंसि यः प्रद्याशब्दः ओदन्तः स एवेदानीं नपुंसकः। तस्य ह्रस्वान्तत्वेऽपि एकदेशविकृतस्यानन्यत्वात्। अतः पुंवत्त्वविकल्पोऽस्त्येवेत्याहुः। **एवमग्रेऽपीति** ॥ प्ररि, सुनु इत्यादावपीत्यर्थः ॥

इत्योदन्ताः।

षट्संज्ञकेभ्यश्चतुरश्च परस्यामो नुडागमः स्यात्। णत्वम्, द्वित्वम्। चतुर्ण्णाम्।

३३९। रोः सुपि। (८-३-१६)

सप्तमीबहुवचने रेरेव विसर्जनीयो नान्यरेफस्य। षत्वम्। षस्य द्वित्वे प्राप्ते।

३४०। शरोऽचि। (८-४-४९)

अचि परे शरो न द्वे स्तः। चतुर्षु। प्रियचत्वाः। हे प्रियचत्वः, प्रियचत्वारौ। प्रियचत्वारः। गौणत्वे तु नुट् नेष्यते। प्रियचतुराम्। प्राधान्ये तु स्यादेव। परमचतुर्णाम्।

इति रेफान्ताः।

इति पञ्चमी। 'आमि सर्वनाम्नः' इत्यतः आमित्यनुवृत्तं षष्ठ्या विपरिणम्यते। षडिति षट्संज्ञकं गृह्यते। नतु षट्शब्दः। 'कृत्रिमाकृत्रिमयोः' इति न्यायात्। तदाह। **षट्संज्ञकेभ्यः इत्यादिना**॥ नुटि टकार इत्, उकारः उच्चारणार्थः। टित्त्वादाद्यवयवः। **णत्वमिति**॥ 'रषाभ्याम्' इत्यनेनेति शेषः। **द्वित्वमिति**॥ 'अचो रहाभ्याम्' इति णकारस्येति शेषः। द्वित्वस्यासिद्धत्वात् पूर्वं णत्वे कृते ततो णस्य द्वित्वम्। नच 'पूर्वत्रासिद्धमद्विर्वचने' इति निषेधश्शङ्क्यः। द्वित्वे कर्तव्ये अन्यदसिद्धं नेति हि तदर्थः। न तु द्वित्वस्याप्यसिद्धत्वन्नेति तदर्थ इति णत्वोत्तरमेव द्वित्वमिति भावः। चतुर् सु इति स्थिते रेफस्य विसर्गे प्राप्ते। **रोः सुपि**॥ 'खरवसानयोर्विसर्जनीयः' इत्यतो विसर्जनीय इत्यनुवर्तते। **षत्वमिति**॥ 'आदेशप्रत्यययोः' इत्यनेनेति शेषः। रेफस्य इण्त्वेन ततः परत्वादिति भावः। **षस्य द्वित्वे इति**॥ 'अचो रहाभ्याम्' इत्यनेनेति शेषः। **शरोऽचि**॥ 'अचो रहाभ्याम्' इत्यतो द्वे इति 'नादिन्याक्रोशे' इत्यतो नेति चानुवर्तते। तदाह। **अचि परे इत्यादिना**॥ तथाच चतुर्षु इत्येकषकारमेव रूपम्। नच सत्यपि द्वित्वे 'झरो झरि सवर्णे' इति लोपादेव एकषकाररूपसिद्धेरिदं व्यर्थमिति वाच्यम्। लोपस्य वैकल्पिकत्वादिति भावः। प्रियाः चत्वारो यस्येति बहुव्रीहौ प्रियचतुर्शब्दो विशेष्यनिघ्नः एकद्विबहुवचनान्तः। तस्य सौ रूपमाह। **प्रियचत्वाः इति**॥ प्रियचतुर् स् इति स्थिते 'चतुरनडुहोः' इत्युकारादाम्। तस्याङ्गत्वेन तदन्तेऽपि प्रवृत्तेः। तत उकारस्य यण्। हल्ङ्यादिलोपश्चेति भावः। **हे प्रियचत्वः इति**॥ 'अम् सम्बुद्धौ' इत्यमिति भावः। **प्रियचत्वाराविति**॥ सुटि सर्वनामस्थानत्वादाम्। प्रियचत्वारः। प्रियचत्वारम्, प्रियचत्वारौ। शसादावाम् न। प्रियचतुरः। प्रियचतुरा, प्रियचतुर्भ्याम्, प्रियचतुर्भिः। प्रियचतुरे। प्रियचतुर्भ्यः। प्रियचतुरः। प्रियचतुरः, प्रियचतुरोः। आमि 'षट्चतुर्भ्यश्च' इति नुटमाशङ्क्य आह। **गौणत्वे त्विति**॥ 'षट्चतुर्भ्यश्च' इति बहुवचननिर्देशात् तदर्थप्राधान्य एव नुडिति भावः। प्रियचतुरि। प्रियचतुर्षु। परमचतुर्णामिति कर्मधारयः। आङ्गत्वात्तदन्तादपि नुडिति भावः॥

इति रान्ताः।

॥ अथ हलन्तपुल्लिङ्गे लकारान्तप्रकरणम् ॥

कमलं कमलां वा आचक्षाणः कमल्, कमलौ, कमलः। षत्वम्। कमल्षु।

इति लान्ताः।

॥ अथ हलन्तपुल्लिङ्गे मकारान्तप्रकरणम् ॥

३४१। मो नो धातोः। (८-२-६४)

मान्तस्य धातोर्नः स्यात्पदान्ते। नत्वस्यासिद्धत्वान्नलोपो न। प्रशान्यतीति प्रशान्, प्रशामौ, प्रशामः। प्रशान्भ्यामित्यादि।

अथ लकारान्ताः निरूप्यन्ते। **कमलमिति** ॥ कमलं पद्मम्। कमला लक्ष्मीः। कमलमाचष्टे इत्यर्थे कमलशब्दात् कमलामाचष्टे इत्यर्थे कमलाशब्दात् 'तत्करोति तदाचष्टे' इति णिचि 'सनाद्यन्ताः' इति धातुत्वात् तदवयवस्य सुपो लुकि 'णाविष्ठवत् प्रातिपदिकस्य' इति इष्ठवत्त्वाट्टिलोपे कमल् इत्यतः कर्तरि क्विपि 'णेरनिटि' इति णिलोपे अपृक्तलोपे कमल् इति रूपम्। ननस्सोर्हल्ङ्यादिलोपे कमल् इति रूपम्। **कमलाविति** ॥ औजसादिषु न कोऽपि विकार इति भावः। कमलम्, कमलौ, कमलः। कमला, कमलभ्याम्, कमलभिः। कमले। कमलभ्यः। कमलः। कमलः, कमलोः, कमलाम्। सुपि विशेषमाह। **षत्वं कमल्ष्विति** ॥ लकारस्य इण्वादिति भावः। तोयमाचष्टे तोय् इत्यादियकारान्तास्तु न सन्त्येव। क्विपि 'लोपो व्योः' इति यलोपस्य दुर्वारत्वात्। णिलोपस्य स्थानिवत्त्वन्तु न भवति। यलोपे तन्निषेधात्। वस्तुतस्तु 'न पदान्ता हलो यणस्सन्ति' इति लण्सूत्रस्थभाष्यात् अनभिधानमेवज्ञार्तीयकानामिति हरदत्तः। 'भोभगो' इति सूत्रे वृक्षव् करोतीति भाष्यन्तु एकदेश्युक्तिरिति तदाशय इत्यलम् ॥

इति लान्ताः।

अथ मकारान्ताः निरूप्यन्ते। अथ प्रपूर्वात् शमुधातोः क्विपि 'अनुनासिकस्य क्विझलोः क्ङिति' इति दीर्घे सति निष्पन्ने प्रशाम्शब्दे विशेषमाह। **मो नो धातोः** ॥ म इति षष्ठ्यन्तं धातोरित्यस्य विशेषणम्। तदन्तविधिः। पदस्येत्यधिकृतम्। 'स्कोस्संयोगाद्योः' इत्यतो अन्ते इत्यनुवर्तते। तदाह। **मान्तस्य धातोरित्यादिना** ॥ 'अलोऽन्त्य-

३४२ । किमः कः । (७-२-१०३)

किमः कः स्याद्विभक्तौ । अकच्सहितस्याप्ययमादेशः । कः, कौ, के । कम्, कौ, कान्, इत्यादि सर्ववत् ।

३४३ । इदमो मः । (७-२-१०८)

इदमो मस्य मः स्यात्सौ परे । त्यदाद्यत्वापवादः ।

स्य' इति मकारस्य भवति । तत्र सोर्हल्ङ्यादिलोपे सति नकारस्य प्रातिपदिकान्तत्वात् पदान्तत्वाच्च 'न लोपः प्रातिपदिकान्तस्य' इति नलोपमाशङ्क्य आह । **नत्वस्येति** ॥ **प्रशानिति** ॥ स्वरादिपाठेऽप्यस्य नाव्ययत्वम् । सत्त्ववाचित्वात् । असत्त्ववाचित्वे तु स्वरादिपाठादव्ययत्वमेवेति भावः । **प्रशान्भ्यामिति** ॥ भ्यामादौ हलि 'स्वादिष्वसर्वनामस्थाने' इति पदत्वान्नत्वमिति भावः । **इत्यादीति** ॥ प्रशान्भिः । प्रशामे । प्रशान्भ्यः । प्रशामः । प्रशामः, प्रशामोः, प्रशामाम् । प्रशामि, प्रशान्त्सु-प्रशान्सु । 'नश्च' इति धुट्किल्पः । अथ कायतेर्डिमिरिति निष्पन्नः किंशब्दः प्रष्टव्ये वर्तते । तस्य विशेषमाह । **किमः कः** ॥ **विभक्ताविति** ॥ 'अष्टन आ विभक्तौ' इत्यतस्तदनुवृत्तेरिति भावः । ननु 'इमः' इत्येव सूत्रयताम् । त्यदादीनामित्यनुवृत्तौ वचनविपरिणामेन त्यदादेः इमः अकारस्यादित्यर्थलाभात् । द्विपर्यन्तानामिति तु न सम्बध्यते । द्विपर्यन्तेषु त्यदादिषु इमोऽसम्भवात् । एवञ्च किंशब्दे इम इत्यस्य स्थाने अकारे सति क इत्यदन्तत्वं सिद्ध्यति । नच 'अलोऽन्त्यस्य' इति किंशब्दे इमो मकारस्यैव अकारस्यात् । ततश्च इकारस्य यणि क्य इति स्यादिति वाच्यम् । 'नानर्थकेऽलोऽन्त्यविधिः' इति निषेधेन अलोऽन्त्यपरिभाषाया अप्रवृत्तौ इमः कृत्स्नस्य स्थाने अकारे सति क इत्यस्य सिद्धेरित्यत आह । **अकच्सहितस्येति** ॥ त्यदादेरिमः अकारविधौ 'अव्ययसर्वनाम्नाम्' इति किंशब्दस्य अकचि कृते ककिम् इति स्थिते इमः अकारे कृते कक इति रूपं स्यात् । 'किमः कः' इत्युक्तौ तु साकच्कस्यापि किंशब्दस्य 'तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' इति न्यायेन किंशब्दत्वात्तस्य कादेशे सति क इत्येव रूपं सिद्ध्यतीति भावः । अत्र त्यदादीनामित्यनुवृत्य वचनविपरिणामेन त्यदादेः किमः क इति व्याख्येयम् । अतस्सर्वाद्यन्तर्गणकार्यत्वादुपसर्जनत्वे कादेशो न भवति । एवञ्च विभक्त्युत्पत्तौ कादेशे सर्वशब्दवद्रूपाणीत्याह । **कः, कावित्यादि** ॥ "मारुते वेधसि ब्रघ्ने पुंसि कः कं शिरोऽम्बुनोः" इत्यमरः । तत्र कशब्दस्य किंशब्दत्वाभावात् न सर्वनामत्वम् । वेधसि तु किंशब्दोऽप्यस्ति । तस्य सर्वनामत्वमस्ति नास्तीति पक्षद्वयम् 'कस्येत्' इति सूत्रे भाष्ये स्थितम् । कायं हविरित्यत्र यदि किमः कादेशः, यदि वा शब्दान्तरम् उभयथापि कस्मा अनुब्रूहीति भवितव्यम् । सर्वस्य सर्वनामसंज्ञा । सर्वश्च प्रजापतिः । प्रजापतिश्च कः । अपर आह । उभयथापि कायानुब्रूहीत्येव सञ्ज्ञैषा तत्रभवत इति । अथ इदंशब्दे विशेषमाह । **इदमो मः** ॥ **साविति** ॥ 'तदोस्सस्सौ' इत्यतस्तदनुवृत्तेरिति भावः । 'अलोऽन्त्यस्य' इत्यन्त्यस्य मस्य मः । ननु मस्य माविधिर्व्यर्थ इत्यत आह । **त्यदाद्यत्वापवादः ।**

३४४। इदोऽय् पुंसि। (७-२-१११)

इदम इदोऽय् स्यात्सौ पुंसि। सोर्लोपः। अयम्। त्यदाद्यत्वं पररूपत्वञ्च।

३४५। दश्च। (७-२-१०९)

इदमो दस्य मः स्याद्विभक्तौ। इमौ, इमे। 'त्यदादेः सम्बोधनं नास्ति' इत्युत्सर्गः।

३४६। अनाप्यकः। (७-२-११२)

अककारस्येदम इदोऽन् स्यादापि विभक्तौ। 'आप्' इति 'टा' इत्यारभ्य सुपः पकारेण प्रत्याहारः। अनेन।

३४७। हलि लोपः। (७-२-११३)

इति ॥ इदम् सु इति स्थिते। **इदोऽय् पुंसि** ॥ इद इति स्थानषष्ठी। इदम इत्यनुवर्तते। अवयवषष्ठ्येषा। 'यस्सौ' इत्यतः सावित्यनुवर्तते। तदाह। **इदमः इति** ॥ इदम्शब्दस्यावयवो यः इद् तस्येत्यर्थः। अयम् सु इति स्थिते। **सोर्लोपः इति** ॥ हल्ङ्यादिनेति शेषः। **अयमिति** ॥ सुलोपे प्रत्ययलक्षणमाश्रित्य मकारस्यानुस्वारस्तु न। मकारविधिसामर्थ्यात्। अन्यथा अनुस्वारमेव विदध्यात्। 'वर्णाश्रये नास्ति प्रत्ययलक्षणम्' इति निषेधाच्च। अथ औजसादिषु विशेषमाह। **त्यदाद्यत्वमिति** ॥ इदम् औ इत्यादिस्थिते 'त्यदादीनाम्' इति मस्य अकार इत्यर्थः। **पररूपत्वमिति** ॥ इद अ, औ इति स्थिते 'अतो गुणे' इति अकारयोरेकं पररूपम् अकार इत्यर्थः। इद औ इत्यादिस्थिते। **दश्च** ॥ 'इदमो मः' इत्यनुवर्तते। द इति षष्ठी। इदमो दकारस्य इति लभ्यते। 'अष्टन आ विभक्तौ' इत्यतः अतिव्यवहितमपि विभक्तावित्येतत् मण्डूकप्लुत्या अनुवर्तते। 'तदोस्सस्सौ' इत्यतः सावितिं तु सन्निहितमपि नानुवर्तते। सौ इदमो दस्याभावात्। 'यस्सौ' इत्युत्तरसूत्रे सौग्रहणाच्च। तदाह। **इदमो दस्येत्यादिना** ॥ तथाच इम औ इत्यादिस्थिते रामवद्रूपाणीत्याह। **इमावित्यादि** ॥ **त्यदादेस्सम्बोधनं नास्तीति** ॥ प्रचुरप्रयोगादर्शनादिति भावः। नन्वेवं सति 'तदोस्सस्सौ' इति सूत्रे हे स, इति भाष्यविरोध इत्यत आह। **उत्सर्गः इति** ॥ प्रायिकमित्यर्थः। टादावचि विशेषमाह। **अनाप्यकः** ॥ अन्, आपि, अकः, इति छेदः। न विद्यते क् यस्य सः अक्, तस्य अकः ककाररहितस्येत्यर्थः। 'इदमो मः' इत्यतः इदम इति 'इदोऽय् पुंसि' इत्यतः इद इति चानुवर्तते। 'अष्टन आ विभक्तौ' इत्यतो विभक्ताविति। तदाह। **अककारस्येत्यादिना** ॥ आपीत्यनेन टाप्डाप्चापां ग्रहणन्नेत्याह। **आवित्यादिना** ॥ टा इत्याकारमारभ्येत्यर्थः। विभक्तावित्यनुवृत्तिसामर्थ्यात् न टाबादिग्रहणमिति भावः। **अनेनेति** ॥ इदम् आ इति स्थिते त्यदाद्यत्वं पररूपत्वम्। इदः अनादेशः। अन आ इति स्थिते इनादेशे गुण इति भावः। भ्यामादौ त्यदाद्यत्वे पररूपे च कृते 'अनाप्यकः' इति प्राप्ते। **हलि लोपः** ॥ आप्यकः इति पूर्वसूत्रादनुवर्तते। 'इदमो मः' इत्यतः इदमः इति 'इदोऽय् पुंसि' इत्यतः इद इति

अककारस्येदम इदो लोपः स्यादापि हलादौ । 'नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे' (वा ४९०) ।

३४८ । आद्यन्तवदेकस्मिन् । (१-१-२१)

एकस्मिन्क्रियमाणं कार्यमादाविवान्त इव च स्यात् । आभ्याम् ।

३४९ । नेदमदसोरकोः । (७-१-११)

अककारयोरिदमदसोर्भिस ऐस् न स्यात् । एत्त्वम् । एभिः । अत्वम् । नित्यत्वात् ङेः स्मै, पश्चाद्धलि लोपः । अस्मै, आभ्याम्, एभ्यः । अस्मात्,

---

'अष्टनः' इत्यतो विभक्ताविति चानुवर्तते । हलीति विभक्तिविशेषणम् । तदादिविधिः । तदाह । **अककारस्येत्यादिना** ॥ अलोऽन्त्यपरिभाषया इदो दकारस्य लोपमाशङ्क्य आह । **नानर्थके इति** ॥ परिभाषेयमुपधासंज्ञासूत्रे भाष्ये स्थिता । इदम्शब्दे इद् इत्यस्यानर्थकत्वात् तदन्तस्येति लभ्यते । ततश्च इद् इत्यस्य कृत्स्नस्यैव लोप इति भावः । अनभ्यासविकार इत्यनुक्तौ बिभर्तीत्यादौ 'भृञामित्, अर्तिपिपर्त्योश्च' इतीत्त्वं कृत्स्नस्याभ्यासस्य स्यात् । द्वित्वे सति समुदायस्यैवार्थवत्त्वात् । 'हलि लोपः' इत्यत्र लोपग्रहणमपनीय 'हल्यश्' इत्येव सूत्रयितुमुचितम् । शित्त्वात् इदः कृत्स्नस्याकारे पररूपे 'सुपि च' इति दीर्घे आभ्यामित्यादिसिद्धेः । ननु इदम् भ्याम् इति स्थिते त्यदाद्यत्वे पररूपे इदो लोपे च कृते अ भ्याम् इति स्थिते अङ्गस्याकारात्मकत्वात् अदन्तत्वाभावात् कथं 'सुपि च' इति दीर्घ इत्यत आह । **आद्यन्तवदेकस्मिन्** ॥ आदित्वान्तत्वयोर्निमित्तमन्यसापेक्षत्वादेकस्मिन् तत्प्रयुक्तकार्याणामप्राप्तौ तत्प्राप्त्यर्थमिदमारभ्यते । एकशब्दः असहायवाची । 'एके मुख्यान्यकेवलाः' इत्यमरः । सप्तम्यन्तात् 'तत्र तस्येव' इति वतिः । एकस्मिन्नित्युपमेये सप्तमीदर्शनात् । वतिश्च द्वन्द्वान्ते श्रूयमाणत्वात् प्रत्येकं सम्बध्यते । तदाह । **एकस्मिन् क्रियमाणमादाविवान्त इव च स्यादिति** ॥ तदादितदन्तयोः क्रियमाणं कार्यं तदादौ तदन्ते इव च असहायेऽपि स्यादित्यर्थः । एकस्मिन्निति किम् । दरिद्रातेरेरजिति न । आदिवत्त्वफलम् औपगवः इत्यादौ अण्प्रत्ययाद्युदात्तत्वम् । आभ्यामित्यादौ अन्तवत्त्वात् दीर्घादिर्भवति। भाष्ये तु एकस्मिन्नित्यपनीय "व्यपदेशिवदेकस्मिन्" इति सूत्रपाठः शिक्षितः । तेन इयायेत्यादौ 'एकाचो द्वे प्रथमस्य' इति द्विर्भावः । धुक् इत्यत्र व्यपदेशिवत्त्वेन धात्ववयवत्वात् भष्भावश्च सिद्ध्यति । विशिष्टः अपदेशः व्यपदेशः व्यवहारः सोऽस्यास्तीति व्यपदेशी मुख्य इति यावत् । एकस्मिन् तदादितदन्तत्वतदवयवत्वादिप्रयुक्तकार्यं स्यादिति फलितम् । इदम् भिस् इति स्थिते त्यदाद्यत्वे पररूपे 'हलि लोपः' इति इदो लोपे अ भिस् इति स्थिते 'अतो भिस ऐस्' इति प्राप्ते । **नेदमदसोरकोः** ॥ 'अतो भिस ऐस्' इत्यतो भिस ऐसित्यनुवर्तते । अकोरिति षष्ठी । न विद्यते ककारो ययोरिति बहुव्रीहिः । तदाह । **अककारयोरित्यादिना** ॥ **एत्त्वमिति** ॥ 'बहुवचने झलि' इत्यनेनेति शेषः । ङयि विशेषमाह । **अत्वमित्यादि** ॥ अत्वं ङेः स्मै इत्यन्वयः । इदम् ए इति स्थिते त्यदाद्यत्वे पररूपे इद ए इति स्थिते ङेर्यादेशं बाधित्वा सर्वनाम्नः स्मै' इति स्मैभावः इत्यर्थः ।

आभ्याम्, एभ्यः । अस्य, अनयोः, एषाम् । अस्मिन्, अनयोः, एषु । ककारयोगे तु अयकम्, इमकौ, इमके । इमकम्, इमकौ, इमकान् । इमकेन, इमकाभ्याम्, इत्यादि ।

३५०. । इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ । (२-४-३२)

अन्वादेशविषयस्येदमोऽनुदात्तोऽशादेशः स्यात्तृतीयादौ । अश्वचनं साकच्कार्थम् ।

ननु इद ए इति स्थिते स्मैभावात् परत्वादनादेशे 'विप्रतिषेधे यद्बाधितं तद्बाधितमेव' इति न्यायेन पुनः स्मैभावो न स्यादित्यत आह । **नित्यत्वादिति** ॥ कृते अकृतेऽपि अनादेशे प्रवृत्तियोग्यतया स्मैभावस्य नित्यत्वात् अनादेशात् प्रागेव स्मैभावे कृते अनादेशस्य हलि लोपेन बाध इति भावः । **आभ्यामिति** ॥ पूर्ववत् । **एभ्यः इति** ॥ त्यदाद्यत्वं पररूपत्वं हलि लोपः 'बहुवचने झल्येत्' इति एत्त्वञ्चेति भावः । **अस्मादिति** ॥ त्यदाद्यत्वं, पररूपत्वं, हलि लोपः, 'ङसिङ्योः' इति स्मादिति भावः । **अस्येति** ॥ त्यदाद्यत्वं, पररूपत्वं, स्यादेशः, हलि लोपश्चेति भावः । **अनयोरिति** ॥ त्यदाद्यत्वं, पररूपत्वम्, अनाप्यकः, 'ओसि च' इत्येत्त्वम्, अयादेशश्चेति, भावः । **एषामिति** ॥ आमि त्यदाद्यत्वं, पररूपत्वं, सुट्, हलि लोपः, एत्त्वषत्वे । **अस्मिन्निति** ॥ अत्वं, पररूपत्वं, स्मिन्, हलि लोपश्चेति भावः । **एष्विति** ॥ अत्वं, पररूपत्वं, हलि लोपः, एत्त्वषत्वे इति भावः । **ककारयोगे त्विति** ॥ 'अव्ययसर्वनाम्नामकच् प्राक् टेः' इत्यनेन इदम्शब्दस्य अकचि सतीत्यर्थः । **अयकमिति** ॥ अकचि सति निष्पन्नस्य इदकम्शब्दस्य तन्मध्यपतितन्यायेन 'इदमो मः' इत्यादाविदङ्ग्रहणेन ग्रहणान्मत्वादिकमिति भावः । 'अनाप्यकः' इति, 'हलि लोपः' इति, 'नेदमदसोरकोः' इति, च नेह प्रवर्तते । ककारयोगे तन्निषेधादित्याशयेन आह । **इमकेन, इमकाभ्यामिति** ॥ **इत्यादीति** ॥ इमकैः । इमकस्मै । इमकेभ्यः । इमकस्मात् । इमकस्य । इमकयोः । इमकेषाम् । इमकस्मिन् । इमकेषु । **इदमोऽन्वादेशे** ॥ अन्वादेशे अश् इति च्छेदः । अन्वादेशे इदमः अश् स्यात् तृतीयादिविभक्तौ, स चानुदात्तः इति स्पष्टोऽर्थः । "आशास्ते यं यजमानोऽसौ । आयुराशास्ते" इति प्रस्तुत्य "तदस्मै देवा राधन्ताम्" इत्युदाहरणम् । तत् आयुरादि अस्मै यजमानाय देवाः साधयन्त्वित्यर्थः । अत्र अस्मै इत्युदाहरणम् । इद अस्मै इति स्थिते प्रकृतेरशादेशे अनुदात्ते सति 'अनुदात्तौ सुप्पितौ' इति स्मै इत्यैकारः अनुदात्तः । तथाच स्मै इति सर्वानुदात्तः । एवमाभ्यामित्यादावपि हलादावुदाहरणम् । द्वितीयादावचि टौसोरेनादेशस्य विशिष्य विधानात् । ननु अनुदात्तत्वमेवात्र विधीयताम् । न त्वशादेशोऽपि । त्यदाद्यत्वे हलि लोपे च अस्मै, आभ्याम् इत्यादिरूपस्यान्वादेशेऽपि सिद्धेः । अत आह । **अश्वचनं साकच्कार्थमिति** ॥ "इमकाभ्यां रात्रीरधीता, आभ्यामहरधीतम्" इति अत्रान्वादेशे इमकाभ्याम् इति न भवति । अत्र अ अ इति प्रश्लिष्टनिर्देशात् अनेकाल्त्वात् सर्वादेशत्वसिद्धेः शित्करणं न कर्तव्यम्"

३५१ । द्वितीयाटौस्स्वेनः । (२-४-३४)

द्वितीयायां टौसोश्च परतः इदमेतदोरेनादेशः स्यादन्वादेशे । 'किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः' । यथा 'अनेन व्याकरणमधीतम्' 'एनं छन्दोऽध्यापय' इति । 'अनयोः पवित्रं कुलम्' 'एनयोः प्रभूतं स्वम्' इति । एनम्, एनौ, एनान् । एनेन, एनयोः ।

इति मान्ताः ।

॥ अथ हलन्तपुल्लिङ्गे णकारान्तप्रकरणम् ॥

गणयतेर्विच् । सुगण्, सुगणौ, सुगणः । सुगण्ट्सु–सुगण्ठ्सु–सुगण्सु । क्विप् । 'अनुनासिकस्य क्विझलोः—' (सू २६६६) इति दीर्घः । सुगाण्, सुगाणौ, सुगाणः । सुगाण्ट्सु–सुगाण्ठ्सु–सुगाण्सु ।

इति णान्ताः ।

इति भाष्ये स्पष्टम् । **द्वितीयाटौस्स्वेनः** ॥ द्वितीया च टाश्च ओश्च द्वितीयाटौसः, तेष्विति द्वन्द्वः । 'इदमोऽन्वादेशे' इत्यतः इदम इति, अन्वादेश इति चानुवर्तते । 'एतदस्त्रतसोः' इत्यतः एतद इति च । तदाह । **द्वितीयायामित्यादिना** ॥ अन्वादेशशब्दं व्याचष्टे । **किञ्चिदिति** ॥ **विधातुमिति** ॥ अपूर्वं बोधयितुमित्यर्थः । अन्वादेशमुदाहृत्य दर्शयति । **यथेति** ॥ उदाहरणप्रदर्शने यथाशब्दः । "ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः । एतमातं ङितं विद्याद्वाक्यस्मरणयोराङित्" इत्यत्र तु एनादेशो न । पूर्वार्धस्य यच्छब्दयोगे अनुवादत्वात् । 'किञ्चित् कार्यं विधातुमुपात्तस्य' इत्यत्र च पूर्ववाक्ये यथाकथञ्चित्तदुपादानं विवक्षितम्, न त्विदमेवेत्याग्रह इति भाष्ये स्पष्टम् ॥

इति मान्ताः ।

अथ णकारान्ताः निरूप्यन्ते । **गणयतेर्विजिति** ॥ 'गण संख्याने' इति चुरादिः, अदन्तः । ततः सुपूर्वात् स्वार्थे णिच् । अल्लोपस्य स्थानिवत्त्वात् नोपधावृद्धिः । तस्माद्विच् । 'अन्येभ्योऽपि दृश्यते' इति वचनात् णिलोपः, अपृक्तलोपः, ततस्सुत्पत्तिः, हल्ङ्यादिना सुलोपः । सुगण् इति रूपम् । सुगणौ, सुगुणः, इत्याद्यविकृतमेव । सुपि 'ड्णोः कुक्टुक्शरि' इति टुग्विकल्पः । 'चयो द्वितीयाः' इति टस्य ठः इत्यभिप्रेत्य आह । **सुगण्ट्सु इति** ॥ द्वितीयाभावे रूपमाह । **सुगण्ट्सु इति** ॥ टुगभावे रूपमाह । **सुगण्सु इति । क्विपि सुगाणिति** ॥ गणधातोरदन्तात् णिच्, अल्लोपः । तस्य स्थानि-

॥ अथ हलन्तपुल्लिङ्गे नकारान्तप्रकरणम् ॥

परत्वादुपधादीर्घः, हल्ङ्यादिलोपः, ततो नलोपः। राजा।

३५२। न डिसम्बुद्ध्योः। (८-२-८)

नस्य लोपो न स्यात् डौ सम्बुद्धौ च। हे राजन्। डौ तु छन्दस्युदाहरणम्। 'सुपां सुलुक्—' (सू ३५६१) इति डेर्लुक्। निषेधसामर्थ्यात्प्रत्ययलक्षणम्। 'परमे व्योमन'। ङावुत्तरपदे प्रतिषेधो वक्तव्यः' (वा

वत्त्वात् नोपधावृद्धिः। तस्मात् क्विप्, णिलोपः, अपृक्तलोपः। 'अनुनासिकस्य क्विझलोः' इति दीर्घः। सुगाण् इति रूपम्। सुगाणौ, सुगाणः, इत्यादि। नच दीर्घे कर्तव्ये णिलोपाल्लोपयोः स्थानिवत्त्वं शङ्क्यम्। दीर्घविधौ तन्निषेधात्। ङौ विधि प्रति तन्निषेधाच्च ॥

इति णान्ताः।

अथ नकारान्ताः निरूप्यन्ते। अथ राजन्शब्दे विशेषमाह। **परत्वादिति** ॥ हल्ङ्यादिलोपापेक्षया परत्वात् पूर्वमेव 'सर्वनामस्थाने चासम्बुद्धौ' इति दीर्घः। ततो हल्ङ्यादिलोप इत्यर्थः। नच 'विप्रतिषेधे यद्बाधितं तद्बाधितमेव' इति न्यायात् कथमिह हल्ङ्यादिलोप इति वाच्यम्। 'पुनः प्रसङ्गविज्ञानात् सिद्धम्' इति 'विप्रतिषेधे यद्बाधितम्' इत्यस्य असार्वत्रिकत्वादिति भावः। **नलोपः इति** ॥ 'न लोपः प्रातिपदिकान्तस्य' इति नकारस्य लोप इत्यर्थः। हे राजन् स् इति स्थिते हल्ङ्यादिना सुलोपे सति नकारस्य पदान्तत्वात् प्रातिपदिकान्तत्वाच्च लोपे प्राप्ते। **न डिसम्बुद्ध्योः** ॥ 'न लोपः प्रातिपदिकान्तस्य' इत्यतः न लोप इत्यनुवर्तते। तत्र नेति लुप्तषष्ठीकम्। तदाह। **नस्येत्यादिना**॥ **हे राजन्निति** ॥ 'सर्वनामस्थाने च' इति दीर्घस्तु न। असम्बुद्धावित्युक्तेः। नन्वत्र डिग्रहणं व्यर्थम्। राजन्शब्दस्य भत्वात् पदत्वाभावान्नलोपस्याप्रसक्तेरित्यत आह। **ङौ तु छन्दसीति** ॥ छन्दस्येवेत्यर्थः। ननु छन्दस्यपि ङौ परतो भत्वात् पदत्वाभावात् कथं नकारस्य लोपप्रसङ्गः। येन तन्निषेधोऽर्थवान् स्यादित्यत आह। **सुपामिति** ॥ ननु "परमे व्योमन्" इत्यादौ डेर्लुका लुप्तत्वात् प्रत्ययलक्षणाभावात् कथं तत्र 'न डिसम्बुद्ध्योः' इत्यस्य प्रवृत्तिरित्यत आह। **निषेधसामर्थ्यादिति** ॥ छन्दस्यपि डिलुकि प्रत्ययलक्षणाभावे सति 'न डिसम्बुद्ध्योः' इत्यप्रवृत्तौ तद्वैयर्थ्यादिति भावः। ननु यदि छन्दसि "परमे व्योमन्" इत्यादौ डेर्लुका लुप्तत्वेऽपि प्रत्ययलक्षणमाश्रित्य 'न डिसम्बुद्ध्योः' इत्यस्य प्रवृत्तिरभ्युपगम्यते, तर्हि चर्मणि तिला अस्य चर्मतिलः, ब्रह्मणि निष्ठा अस्य ब्रह्मनिष्ठः, इत्यत्रापि समासे डिलुकः प्रत्ययलक्षणमाश्रित्य 'न डिसम्बुद्ध्योः' इति नकारस्य लोपनिषेधस्स्यादित्यत आह। **ङावुत्तरपदे प्रतिषेधो वक्तव्यः इति** ॥ उत्तरपदे परतो यः ङिः तस्मिन् परे

४७८५)। ङौ विषये उत्तरपदे परे 'न ङिसम्बुद्ध्योः' (सू ६५२) इत्यस्य निषेधो वाच्य इत्यर्थः । चर्मणि तिला अस्य चर्मतिलः । ब्रह्मनिष्ठः । राजानौ, राजानः । राजानम्, राजानौ । 'अल्लोपोऽनः' (सू २३४) श्चुत्वम् । न चाल्लोपः स्थानिवत् । पूर्वत्रासिद्धे तन्निषेधात् । नापि बहिरङ्गतयासिद्धः । यथोद्देशपक्षे षाष्ठीं परिभाषां प्रति श्चुत्वस्यासिद्धतयान्तरङ्गाभावे परिभाषाया अप्रवृत्तेः। जञ्योर्ज्ञः । राज्ञः । राज्ञा ।

'न ङिसम्बुद्ध्योः' इति निषेधस्य प्रतिषेधो वक्तव्य इत्यर्थः । एवञ्च चर्मतिलः इत्यत्र उत्तरपदे परतः 'न ङिसम्बुद्ध्योः' इति प्रतिषेधाभावात् नकारस्य लोपो निर्बाध इति भावः । भाष्ये तु "छन्दसि "परमे व्योमन्" इत्यत्र 'अयस्मयादीनि छन्दसि' इति भत्वात् पदत्वाभावान्नकारलोपस्याप्रसक्तेर्ङौ प्रतिषेधो न कर्तव्यः" इति ङिग्रहणं प्रत्याख्यातम् । नच राजन्यतीत्यत्र लोके राजनीवाचरतीत्यर्थे 'अधिकरणाच्च' इति क्यचि 'सनाद्यन्ताः' इति धात्ववयवत्वात् 'सुपो धातुप्रातिपदिकयोः' इति ङेर्लुकि राजन्य इत्यस्मात् तिपि राजन्यतीत्यत्रापि अन्तर्वर्तिविभक्त्या पदत्वमाश्रित्य नकारस्य लोपप्राप्तौ तन्निषेधार्थं ङिग्रहणस्यावश्यकत्वात्तत्प्रत्याख्यानभाष्यमनुपपन्नमिति वाच्यम् । एतद्भाष्यप्रामाण्यादेव राजनीवाचरतीत्यर्थे 'अधिकरणाच्च' इति क्यचोऽनभिधानाभ्युपगमादित्यलम् । राजानमित्यादौ सुटि 'सर्वनामस्थाने च' इति दीर्घः । शसि विशेषमाह । **अल्लोपोऽनः इति** ॥ अनेन सूत्रेण जकारादकारस्य लोप इत्यर्थः । राजन् अस् इति स्थिते । **श्चुत्वमिति** ॥ ततश्च नकारस्य ञकारे राञ्ज इति सिद्धम् । ननु 'अचः परस्मिन्' इत्यल्लोपस्य पूर्वस्मादपि विधौ स्थानिवत्त्वात् कथमिह श्चुत्वमित्यत आह । **न चाल्लोपः स्थानिवदिति** ॥ कुत इत्यत आह । **पूर्वत्रेति** ॥ 'पूर्वत्रासिद्धे' इति श्चुत्वे कर्तव्ये स्थानिवत्त्वनिषेधादित्यर्थः । ननु अल्लोपो भसंज्ञापेक्षो बहिर्भूतस्वादिप्रत्ययापेक्षः बहिरङ्गः । श्चुत्वन्तु श्चुयोगमात्रापेक्षत्वात् अन्तरङ्गम् । ततश्च 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषया श्चुत्वे कर्तव्ये बहिरङ्गस्याल्लोपस्यासिद्धत्वादकारेण व्यवधानात् कथमिह श्चुत्वमित्यत आह । **नापीति ॥ यथोद्देशेति** ॥ यथोद्देशं संज्ञापरिभाषामित्येकः पक्षः । उद्देशाः उत्पत्तिप्रदेशाः तानतिक्रम्य यथोद्देशम् । यत्र प्रदेशे संज्ञापरिभाषयोरुत्पत्तिः तत्रैव ते स्थिते प्रतिविधिं व्याप्रियेते इत्यर्थः । **असिद्धं बहिरङ्गमन्तरङ्गे इति** ॥ परिभाषेयं षष्ठाध्याये 'वाह ऊठ्' इति सूत्रे ज्ञापितेति तत्रैव भाष्ये स्पष्टम् । ततश्च इयं षाष्ठी परिभाषा त्रैपादिकश्चुत्वे कर्तव्ये अन्तरङ्गेऽपि न प्रवर्तते । तां प्रति श्चुत्वस्य अन्तरङ्गस्यासिद्धतया तदृष्ट्या श्चुत्वस्यैवाभावेन तद्विषये तस्याः परिभाषायाः प्रवृत्त्यसम्भवात् । तथा च श्चुत्वे कर्तव्ये बहिरङ्गस्याप्यल्लोपस्यासिद्धत्वाभावादिह श्चुत्वनिर्बाधमिति भावः। 'कार्यकालं संज्ञापरिभाषम्' इत्यप्यस्ति पक्षान्तरम् । प्रतिविधिप्रदेशं प्राप्य संज्ञापरिभाषे व्याप्रियेते इत्यर्थः । अस्मिन् वक्षे यद्यपि श्चुत्वमन्तरङ्गं पुरस्कृत्य 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषात्र प्रवृत्तिमर्हति । तथापि लक्ष्यानुरोधात् कार्यकालपक्षो नेहाश्रीयते इत्यलम् । **जञ्योर्ज्ञः इति** ॥ जञ्योगे तादृशश्चनेर्लो-

३५३। नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति। (८-२-२)

सुब्विधौ स्वरविधौ संज्ञाविधौ कृतितुग्विधौ च नलोपोऽसिद्धः, नान्यत्र 'राजाश्वः' इत्यादौ। इत्यसिद्धत्वादात्वमेत्त्वमैस्त्वं च न। राजभिः। राज्ञे,

---

कवेदसिद्धत्वादिति भावः। नत्विदं वर्णान्तरम्। शिक्षादावदर्शनात्। अत एतज्ज्ञानमिति श्चुत्वसिद्धिरित्याहुः। **राज्ञः, राज्ञेति** ॥ शसादावचि भत्वादलोपे नकारस्य श्चुत्वेन ञकार इति भावः। ननु राजन् भ्यामिति स्थिते 'स्वादिषु' इति पदत्वात् कृते नलोपे 'सुपि च' इति दीर्घः' प्राप्नोति। तथा राजन् भिस् इति स्थिते, नलोपे, 'अतो भिसः' इत्यैस् प्राप्नोति। तथा राजन् भ्यस् इति स्थिते नलोपे 'बहुवचने झल्येत्' इत्येत्त्वं प्राप्नोति। नच नलोपस्यासिद्धत्वादिह दीर्घः ऐस् एत्त्वञ्च नेति वाच्यम्। नलोपविषये 'पूर्वत्रासिद्धम्' इत्यस्य प्रवृत्तौ राजाश्वो दण्डश्च इत्यादावपि नलोपस्यासिद्धत्वान् सवर्णदीर्घयणाद्यनापत्तेरित्यत आह। **नलोपः सुप्** ॥ नस्य लोपो नलोपः। विधिशब्दो भावसाधनः। विधानं विधिः। सुप्च स्वरश्च संज्ञा च तुक्च तेषां विधय इति सम्बन्धसामान्यषष्ठ्या समासः। कृतीति तु तुकैव सम्बध्यते। अन्यत्रासम्भवात्। तदाह। **सुब्विधावित्यादिना** ॥ सुपो विधिः सुब्विधिः। सम्बन्धसामान्यं विवक्षितम्। सुबाश्रयविधाविति यावत्। स्वरस्य विधिः। कर्मणश्शेषत्वविवक्षया षष्ठी। स्वरे विधेये इति यावत्। एवं संज्ञाविधाविल्यपि कर्मणश्शेषत्वविवक्षया षष्ठी। संज्ञायां विधेयायामिति यावत्। कृति परतो यस्तुक् तस्य विधिः कृतितुग्विधिः। इहापि कर्मणश्शेषत्वविवक्षया षष्ठी। कृति परे यस्तुक् तस्मिन् विधेये इति यावत्। 'पूर्वत्रासिद्धम्' इत्येव सिद्धे अन्यनिवृत्तिफलकनियमार्थमेतदित्याह। **नान्यत्रेति** ॥ अन्यत्रेत्येतदुदाहृत्य दर्शयति। **राजाश्व इत्यादाविति** ॥ आदिना दण्डयश्च इत्यादिसङ्ग्रहः। अत्र सवर्णदीर्घयणादिविधीनां सुब्विध्याद्यनन्तर्भावात् तेषु कर्तव्येषु नलोपस्यासिद्धत्वाभावे सति, नकारलोपस्य सत्त्वात् सवर्णदीर्घादिकं निर्बाधमिति भावः। राजभ्याम्, राजभिः, राजभ्यः, इत्यत्र दीर्घादि न भवत्येवेत्यत आह। **इत्यसिद्धत्वादिति** ॥ सुपि परतो दीर्घविधिः। भिसः ऐस्विधिः, भ्यसि एत्त्वविधिश्च, सुबाश्रयविधय इति, तेषु कर्तव्येषु परिसङ्ख्याविधिलभ्यासिद्धत्वनिषेधाभावे सति 'पूर्वत्रासिद्धम्' इति नलोपस्यासिद्धत्वान्न दीर्घादिकमित्यर्थः। वस्तुतस्तु अन्यनिवृत्तिफलकसिद्धविषयकविधित्वमेव नियमविधित्वम्। अत एव "पञ्च पञ्च नखा भक्ष्याः" इत्यत्र पञ्चानां पञ्चनखप्राणिनां भक्षणनियमे तदितरेषां पञ्चनखानां भक्षणप्रतिषेधो गम्यते" इति पस्पशाह्निकभाष्ये प्रपञ्चितम्। तदाह। **इत्यसिद्धत्वादिति** ॥ ननु दण्डिष्वित्यत्र नलोपे कृते इणः परत्वात् सस्य षत्वामिति स्थितिः। तत्र षत्वविधेस्सुबाश्रयविधित्वात् तत्र कर्तव्ये नलोपस्यासिद्धत्वात् कथं षत्वमिति चेन्मैवम्। न हि षत्वविधिस्सुब्विधिः। सुप्वन्तद्याप्यधर्मं वा पुरस्कृत्य प्रवर्तमानो विधिर्हि सुब्विधिरिह विवक्षितः। नच षत्वविधिस्तथा। अतस्तत्र नलोपस्य सिद्धत्वमस्त्येवेति षत्वं निर्बाधम्। अस्तु वा षत्वविधिरपि सुब्विधिः। तथापि तस्मिन् कर्तव्ये नलोपस्यासिद्धत्वन्न भवत्येव। तदसिद्धत्वं

राजभ्याम्, राजभ्यः। राज्ञः, राज्ञोः, राज्ञाम्। राज्ञि, राजनि। प्रतिदीव्यतीति प्रतिदिवा, प्रतिदिवानौ, प्रतिदिवानः। अस्य भविषयेऽलोपे कृते।

३५४। हलि च। (८-२-७७)

रेफवान्तस्य धातोरुपधाया इको दीर्घः स्याद्धलि।

हि किं 'पूर्वत्रासिद्धम्' इत्यनेन आपाद्यते, उत 'नलोपस्सुप्स्वर' इत्यनेनैव। न तावदाद्यः। नलोपविधेष्वत्वविध्यपेक्षया पूर्वत्वेन तस्य षत्वे कर्तव्ये असिद्धत्वासम्भवात्। न द्वितीयः। 'नलोपस्सुप्स्वर' इत्यनेन हि राजभ्यामित्यादौ नलोपस्यासिद्धत्वमपूर्वन्न विधीयते। किन्तु 'पूर्वत्रासिद्धम्' इत्यनेन प्राप्तमेव नियमार्थं पुनर्विधीयते। राजाश्च इत्यादौ सुप्स्वरसंज्ञातुग्विधिभिन्नसवर्णदीर्घादिविधिसिद्धये दण्डिष्वित्यत्र तु नलोपस्यासिद्धत्वं 'पूर्वत्रासिद्धम्' इत्यनेन प्राप्तं न भवतीति तस्य 'नलोपस्सुप्स्वर' इति सूत्रविषयत्वं न सम्भवति। अन्यथा सुब्विधावित्यनेन दण्डिष्वित्यादौ षत्वे कर्तव्ये नलोपासिद्धत्वमपूर्वं विधीयेत। राजभ्यामित्यादौ तु दीर्घादौ कर्तव्ये सिद्धमेव नियमार्थं विधीयते इति विधिवैरूप्यमापद्येत। तस्माद्दण्डिष्वित्यादौ षत्वे कर्तव्ये नलोपस्यासिद्धत्वाभावात् नलोपस्य सत्त्वादिणः परत्वानपायात् षत्वं निर्बाधमिति शब्देन्दुशेखरे प्रपञ्चितम्। प्रकृतमनुसरामः। स्वरविधौ यथा। पञ्चार्मम्। अत्र नलोपस्यासिद्धत्वात् अकारान्तत्वाभावात् 'अर्मे चावर्णे द्व्यच्त्र्यच्' इति पूर्वपदाद्युदात्तत्वन्न भवति। संज्ञाविधौ यथा। दण्डिदत्तौ, दत्तदण्डिनौ। अत्र 'द्वन्द्वे धि' इति पूर्वनिपातनियमो न भवति। धिसंज्ञाविधौ नलोपस्यासिद्धत्वेन इदन्तत्वविरहात्। कृतितुग्विधौ यथा। वृत्रहभ्याम्, वृत्रहभिः। अत्र 'ब्रह्मभ्रूणवृत्रेषु क्विप्' इति विहितं क्विपमाश्रित्य 'हूस्वस्य पिति कृतितुक्' इति न तुक्। नलोपस्यासिद्धत्वेन हूस्वस्य नकारव्यवहितत्वात्। कृतीति विशेषणात् 'छे च' इति तुग्विधौ नलोपस्य नासिद्धत्वम्। ततश्च वृत्रहच्छत्रम्। इह स्यादेव 'छे च' इति तुक्। भाष्ये तु वृत्रहभ्यामित्यादौ नलोपस्य सत्त्वेऽपि सन्निपातपरिभाषया 'हूस्वस्य पिति' इति तुक् न भविष्यतीति तुग्विधिग्रहणं प्रत्याख्यातम्। 'स्वादिषु' इति पदत्वद्वारा भ्यामूसन्निपातनिमित्तको नलोपस्तद्विघातकं न प्रवर्तयतीत्याशयः। ननु वृत्रहधनामित्यत्र तुग्व्यावृत्त्यर्थं तुग्विधिग्रहणमावश्यकम्। तत्र नलोपस्यान्तवर्तिनीं विभक्तिमाश्रित्य प्रवृत्तं पदत्वमादाय प्रवृत्तस्य नलोपस्य भ्यामूसन्निपातनिमित्तकत्वाभावादिति चेन्न। तुग्विधिग्रहणप्रत्याख्यानपरभाष्यप्रामाण्येन तादृशसन्निपातानिमित्तकनलोपविषयाणां वृत्रहधनमित्यादीनां अनभिधानकल्पनात् इत्यास्तान्तावत्। **राज्ञि, राजनीति॥** 'विभाषा ङिश्योः' इत्यलोपविकल्प इति भावः। **प्रतिदिवेति॥** 'दिवु क्रीडादौ' तस्मात् 'कनिन्युवृषितक्षि' इत्युणादिसूत्रेण कनिन्प्रत्ययः। कनाविती। इकार उच्चारणार्थः। प्रतिदिवन्शब्दात् सुबुत्पत्तिः। 'सर्वनामस्थाने च' इति दीर्घः। हल्ङ्यादिना सुलोपे प्रतिदिवा इति रूपम्। सुटि राजवत्। **अस्येति॥** प्रतिदिवन्शब्दस्य शसादावचि अलोपोऽनः इत्यलोपे सतीत्यर्थः। **हलि च॥** 'वोरुपधाया दीर्घ इकः' इत्यनुवर्तते। 'सिपि धातोः' इत्यतो धातोरिति च। 'तच्च वोः' इत्यनेन विशेष्यते। तदन्तविधिः।

न चाल्लोपस्य स्थानिवत्त्वम्। दीर्घविधौ तन्निषेधात्। बहिरङ्गपरिभाषा तूक्तन्यायेन न प्रवर्तते। प्रतिदीन्नः। प्रतिदीन्ना इत्यादि। यज्वा, यज्वानौ, यज्वानः।

३५५। न संयोगाद्वमन्तात्। (६-४-१३७)

वकारमकारान्तसंयोगात्परस्यानोऽकारस्य लोपो न स्यात्। यज्वनः। यज्वना, यज्वभ्याम् इत्यादि। ब्रह्मणः। ब्रह्मणा, ब्रह्मभ्याम् इत्यादि।

३५६। इन्हन्पूषार्यम्णां शौ। (६-४-१२)

एषां शावेवोपधाया दीर्घः, नान्यत्र। इति निषेधे प्राप्ते।

तदाह। **रेफवान्तस्येत्यादिना** ॥ रेफान्तस्य गीर्यतीत्युदाहरणम्। अपदान्तत्वात् 'वोरुपधायाः' इत्यप्राप्ते विधिः। प्रकृते च प्रतिदिव् न् अस् इति स्थिते नकारे हलि परे वान्तस्य दिव्धातोरुपधाया इकारस्य दीर्घ इति भावः। ननु 'अचः परस्मिन्' इत्यल्लोपस्य स्थानिवत्त्वादकारेण व्यवधानात् हल्परत्वाभावात् कथमिह दीर्घ इत्याशङ्क्य परिहरति। **न चाल्लोपस्य स्थानिवत्त्वमिति** ॥ कुत इत्यत आह। **दीर्घविधौ तन्निषेधादिति** ॥ 'न पदान्त' इति सूत्रेण दीर्घविधौ स्थानिवत्त्वनिषेधादित्यर्थः। नन्वेवमपि भसंज्ञापेक्षस्याल्लोपस्य बहिर्भूतप्रत्ययापेक्षत्वेन बहिरङ्गतया तस्यान्तरङ्गे दीर्घे कर्तव्ये असिद्धत्वादकारेण व्यवधानात् हल्परत्वाभावात् कथमिह दीर्घ इत्यत आह। **बहिरङ्गेति** ॥ "यथोद्देशपक्षे षाष्ठीं परिभाषां प्रति श्चुत्वस्यासिद्धतया अन्तरङ्गपरिभाषाया अप्रवृत्तेः" इति राजन्शब्दोक्तन्यायेन दीर्घस्यासिद्धतया तद्विषये 'असिद्धं बहिरङ्गम्' इति परिभाषा न प्रवर्तत इति भावः। **प्रतिदीव्नः इति** ॥ 'न भकुर्छुराम्' इति निषेधस्तु वान्तस्याभत्वान्नेति भावः। **इत्यादीति** ॥ प्रतिदीन्ने। प्रतिदीन्नः, प्रतिदीन्नोः। भ्यामादौ हलि राजवदित्यर्थः। यज्वन्शब्दः सुटि राजवदित्याह। **यज्वेति** ॥ शसि अल्लोपे प्राप्ते। **न संयोगाद्वमन्तात्** ॥ वश्च म्च वमौ अन्तौ यस्येति विग्रहः। 'अल्लोपोऽनः' इत्यनुवर्तते। तदाह। **वकारेत्यादिना** ॥ अन्तग्रहणं स्पष्टार्थम्। वमयोस्संयोगविशेषणत्वादेव तदन्तलाभात्। **इत्यादीति** ॥ यज्वने। यज्वनः, यज्वनोः। भ्यामादौ हलि राजवदित्यर्थः। मान्तसंयोगस्य उदाहरणमाह। **ब्रह्मणः इति** ॥ शसादावचि नाल्लोपः। शेषं राजवदिति भावः। "वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः" इत्यमरः। वृत्रो नाम असुरः, तं हतवानित्यर्थे 'ब्रह्मभ्रूणवृत्रेषु क्विप्' इति क्विप्। कपावितौ। अपृक्तलोपः। उपपदसमासः। 'सुपो धातु' इत्यमो लुक्, वृत्रहन्शब्दः, तस्मात् सुबुत्पत्तिः। सौ विशेषमाह। **इन्हन्** ॥ 'ढ्रलोपे' इत्यतो दीर्घ इत्यनुवर्तते। 'नोपधायाः' इत्यत उपधाया इति। तदाह। **एषामिति** ॥ इन्, हन्, पूषन्, अर्यमन्, इत्यन्तानामित्यर्थः। अङ्गविशेषणत्वेन तदन्तविधिः 'सर्वनामस्थाने च' इति सिद्धे नियमार्थमित्याह। **शावेवेति** ॥ **नान्यत्रेति** ॥ शेरन्य-

३५७ । सौ च । (६-४-१३)

इन्नादीनामुपधाया दीर्घः स्यादसम्बुद्धौ सौ परे । वृत्रहा । हे वृत्रहन् । 'एकाजुत्तरपदे—' (सू ३०७) इति णत्वम् । वृत्रहणौ, वृत्रहणः । वृत्रहणम्, वृत्रहणौ ।

३५८ । हो हन्तेर्ञ्णिन्नेषु । (७-३-५४)

ञिति णिति च प्रत्यये, नकारे च, परे हन्तेर्हकारस्य कुत्वं स्यात् ।

३५९ । हन्तेः—

उपसर्गस्थान्निमित्तात्परस्य हन्तेर्नस्य णत्वं स्यात् । प्रहण्यात् ।

—अत्पूर्वस्य । (८-४-२२)

हन्तेरत्पूर्वस्यैव नस्य णत्वम्, नान्यस्य । प्रघ्नन्ति । योगविभागसाम-

---

त्रेत्यर्थः । **इति निषेधे प्राप्ते इति** ॥ वृत्रहन्शब्दे हन् इत्यस्यापि शावेव दीर्घ इति नियमात् सौ परतः 'सर्वनामस्थाने' इति दीर्घे अप्राप्ते सतीत्यर्थः । **सौ च** ॥ पूर्वसूत्रमनुवर्तते । तत्र यदनुवृत्तं तच्च । तदाह। **इन्नादीनामिति** ॥ **असम्बुद्धाविति** ॥ 'सर्वनामस्थाने च' इत्यतः तदनुवृत्तेरिति भावः । 'इन्हन्पूष' इत्यस्यायमपवादः । **हे वृत्रहन्निति** ॥ असम्बुद्धावित्यनुवृत्तेर्न दीर्घः । भिन्नपदत्वादाह । **एकाजिति** ॥ **वृत्रहणावित्यादि** ॥ शावेवेति नियमान्न दीर्घः । शसादावचि अल्लोपे कृते । **हो हन्तेः** ॥ हः इति स्थानषष्ठी, हन्तेरित्यवयवषष्ठी । ञ्च, ण्च ञ्णौ, इतौ, ययोस्तौ, ञ्णितौ । इच्छब्दः प्रत्येकं सम्बध्यते । ञ्णितौच नश्च ञ्णिन्नाः तेष्विति विग्रहः । अङ्गाधिकारात् प्रत्ययत्वं ञ्णितोर्लभ्यते । 'चजोः कु घिण्ण्यतोः' इत्यतः कुग्रहणमनुवर्तते । तदाह । **ञितीत्यादिना** ॥ हन्तेरिति ङितपा निर्देशः । हन्धातोरित्यर्थः । प्रकृते हकारस्य नकारपरत्वात् कुत्वम् । तत्र घोषवतो नादवतो महाप्राणस्य संवृतकण्ठस्य हस्य तादृशवर्गचतुर्थो घकारः । वृत्रघ्नः, वृत्रघ्ना, इत्यादि सिद्धम् । नन्विह कथन्न णत्वम् । भिन्नपदस्थत्वेऽपि 'एकाजुत्तरपदे णः' इति णत्वस्य दुर्वारत्वात् । कृतेऽप्यल्लोपे तस्य पूर्वस्माद्विधौ स्थानिवत्त्वादुत्तरपदस्य एकाच्त्वात् स्थानिवत्त्वाभावेऽपि 'प्रातिपदिकान्तनुम्विभक्तिषु च' इत्यस्य 'कुमति च' इत्यस्य वा दुर्वारत्वादिति प्राप्ते तद्वारणार्थं 'हन्तेरत्पूर्वस्य' इति सूत्रं विभज्य व्याचष्टे । **हन्तेः**— 'रषाभ्यां नो णः' इत्यनुवर्तते । 'उपसर्गादसमासेऽपि' इत्यतः उपसर्गादित्यनुवर्तते । तात्स्थ्यात्तच्छब्दम् । उपसर्गस्थादिति लभ्यते । तच्च रषयोः प्रत्येकमन्वेति । तदाह । **उपसर्गस्थान्निमित्तादित्यादिना** ॥ निमित्तशब्देन रेफः षकारश्च विवक्षितः । **प्रहण्यादिति** ॥ अत्र भिन्नपदस्थत्वात् अप्राप्ते णत्वे वचनम् । प्रकृतोपयुक्तमाह । **—अत्पूर्वस्य** हन्तेरित्यनुवर्तते । 'रषाभ्यान्नो णः' इति च । उपसर्गादिति तु निवृत्तम् । हन्तेरत्पूर्वस्य नस्य णः स्यादिति लभ्यते । सिद्धे सत्यारम्भो नियमार्थः । तदाह । **हन्ते-**

र्थात् 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' (प ६२) इति न्यायं बाधित्वा 'एकाजुत्तरपदे—' (सू ३०७) इति णत्वमपि निवर्तते। नकारे परे कुत्वविधिसामर्थ्यादल्लोपो न स्थानिवत्। वृत्रघ्नः। वृत्रघ्ना इत्यादि। यत्तु 'वृत्रघ्नः' इत्यादौ वैकल्पिकं णत्वं माधवेनोक्तं, तद्भाष्यवार्तिकविरुद्धम्। एवं शार्ङ्गिन्, यशस्विन्, अर्यमन्, पूषन्। यशस्विन्निति विन्प्रत्यये इनोऽनर्थकत्वेऽपि 'इन्हन्—' (सू ३५६) इत्यत्र ग्रहणं भवत्येव। 'अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च

रत्पूर्वस्यैवेत्यादिना ॥ **प्रघ्नन्तीति** ॥ हन्तेर्लट्, झिः, झोऽन्तः, शप्, लुक्। 'गमहन' इत्युपधालोपः। 'हो हन्तेः' इति कुत्वम्। प्रघ्नन्तीति रूपम्। अत्र उपसर्गस्थरेफात् परत्वात् 'हन्तेः' इत्यनेन प्राप्तं णत्वम् 'अत्पूर्वस्य' इति नियमात्र भवति। वृत्रघ्नः इत्यत्र 'प्रातिपदिकान्त' इत्यादिणत्वं निवर्तते। ननु 'प्रातिपदिकान्तनुम्विभक्तिषु च, एकाजुत्तरपदे णः, कुमति च, हन्तेरत्पूर्वस्य' इति सूत्रपाठक्रमः। ततश्च 'अनन्तरस्य विधिः' इति न्यायेन 'अत्पूर्वस्य' इति नियमेन प्रघ्नन्तीत्यत्र हन्तेरित्यव्यवहितणत्वमेव निवर्तेत। नत्वन्यदित्यत आह। **योगेति** ॥ यदि 'अत्पूर्वस्य' इत्यनेन 'हन्तेः' इति णत्वमेव व्यावर्त्येत, तर्हि 'हन्तेरत्पूर्वस्य' इत्येकमेव सूत्रं स्यात्। उपसर्गस्थान्निमित्तात् परस्य हन्तेरत्पूर्वस्य नस्य णत्वम् इत्येतावतैव प्रघ्नन्तीत्यत्र णत्वनिवृत्तिसम्भवात्। अतो योगविभागसामर्थ्यात् णत्वमात्रस्यायं नियम इति विज्ञायते इत्यर्थः। **एकाजुत्तरेति** ॥ 'कुमति च' इत्यस्य 'प्रातिपदिकान्त' इत्यस्य च उपलक्षणम्। अल्लोपस्य पूर्वस्मादपि विधौ स्थानिवत्त्वात् एकाच्त्वमुत्तरपदस्य बोध्यम्। नच 'पूर्वत्रासिद्धे न स्थानिवत्' इति वाच्यम्। 'तस्य दोषः संयोगादिलोपलत्वणत्वेषु' इत्युक्तेः। ननु वृत्रघ्नः इत्यत्र 'हो हन्तेः' इति कथं कुत्वम्। पूर्वस्य विधावल्लोपस्य स्थानिवत्त्वादित्यत आह। **नकारे परे इति** ॥ माधवमतं दूषयितुमनुवदति। **यत्विति** ॥ तुः पूर्ववैषम्ये। **वैकल्पिकमिति** ॥ 'प्रातिपदिकान्त' इति विहितमित्यर्थः। **तद्भाष्येति** ॥ "कुव्यवाये हादेशेषु प्रतिषेधो वक्तव्यः"। किं प्रयोजनम्। वृत्रघ्नः। स्रुघ्नः। प्राघ्नानि। 'हन्तेरत्पूर्वस्य' इति सूत्रे "अत्पूर्वग्रहणन्न कर्तव्यम्" इति 'अट्कुप्वाङ्' इति सूत्रे भाष्यम्। अत्र णत्वप्रकरणे हादेशकुव्यवाये प्रतिषेधविज्ञानात् 'प्रातिपदिकान्त' इति णत्वमपि आदेशकुव्यवाये न भवतीति विज्ञायते। तद्विरोधात् माधवमतमुपेक्ष्यमित्यर्थः। **एवमिति** ॥ वृत्रहन्शब्दवदित्यर्थः। 'इन्हन्पूषार्यम्णां शौ, सौ च' इति दीर्घनियममात्रे दृष्टान्तः। ननु कुत्वादौ, असम्भवात्। शार्ङ्गमस्यास्तीत्यर्थे 'अत इनिठनौ' इति मत्वर्थीय इनिः। यशोऽस्यास्तीत्यर्थे 'अस्मायामेधास्रजः' इति विनिः। 'तसौ मत्वर्थे' इति भत्वान्न रुत्वम्। नन्वर्थवत्परिभाषया 'इन्हन्' इत्यत्रार्थवत एव इनो ग्रहणम्। ततश्च विन्प्रत्यये इनोऽनर्थकत्वात् तस्य कथं ग्रहणमित्याशङ्क्य परिहरति। **यशस्विन्नित्यादिना** ॥ **अनिनस्मन्निति** ॥ एतच्च 'येन विधिः' इति सूत्रे भाष्ये स्थितम्। राज्ञः इत्यत्र अन् अर्थवान्। दाम्नः इत्यत्र तु अनर्थकः। शार्ङ्गी इत्यत्र इन् अर्थवान्। यशस्वी इत्यत्र तु अनर्थकः। सुपया इत्यत्रास् अर्थवान्

तदन्तविधिं प्रयोजयन्ति' (प १७) इति वचनात् । अर्यम्णि—अर्यमणि । पूष्णि—पूषणि ।

३६० । मघवा बहुळम् । (६-४-१२८)

'मघवन्' शब्दस्य वा 'तृ' इत्यन्तादेशः स्यात् । ऋ इत् ।

३६१ । उगिदचां सर्वनामस्थानेऽधातोः । (७-१-७०)

अधातोरुगितो, नलोपिनोऽञ्चतेश्च, नुमागमः स्यात्सर्वनामस्थाने परे । उपधादीर्घः । मघवान् । इह दीर्घे कर्तव्ये संयोगान्तलोपस्यासिद्धत्वं न भवति। बहुलग्रहणात् । तथा च 'श्वन्नुक्षन्—' (उ २५७) इति निपातनान्मघश-

---

सुस्रोता इत्यत्र तु अनर्थकः । असन्तत्वादीर्घः । सुशर्मेत्यत्र मन् अर्थवान् सुप्रथिमा इत्यत्र तु अनर्थकः । 'मनः' इति न ङीप् । अर्यमन्शब्दे पूषन्शब्दे च अल्लोपे विशेषः इत्याह । **अर्यम्णि इत्यादि** ॥ 'विभाषा ङिश्योः' इत्यल्लोपविकल्पः । शसादावचि तु नित्यमल्लोपः उक्तप्राय इति भावः । मह्यते पूज्यते इत्यर्थे कनिप्रत्ययः । इकार उच्चारणार्थः । ककार इत् । अन् इति प्रत्ययविशेष्यते । धातोरवुगागमः । तत्र ककार इत् । उकारः उच्चारणार्थः । कित्त्वादन्तावयवः । महधातोर्हस्य घश्च इति त्रयन्निपात्यते । 'श्वन्, उक्षन्, पूषन्, छीहन्, स्नेहन्, मज्जन्, अर्यमन्, विश्वप्सन्, परिज्वन्, मातरिश्वन्, मघवन्, इत्युणादिसूत्रेण निष्पन्ने तस्मिन् मघवन्शब्दे विशेषमाह । **मघवा बहुळम्** ॥ 'अर्वणस्त्रसौ' इत्यतः तृ इत्यनुवर्तते । लुप्तप्रथमाकम् । मघवेति तु षष्ठ्यर्थे प्रथमा । तदाह । **मघवन्शब्दस्येत्यादिना** ॥ **ऋ इदिति** ॥ 'उपदेशेऽजनुनासिक इत्' इति ऋकार इत्संज्ञक इत्यर्थः । ऋ इत्यविभक्तिको निर्देशः प्रक्रियासमये न दुष्यति । 'अलोऽन्त्यस्य' इति नकारस्य तकारः । सर्वादेशस्तु न । 'नानुबन्धकृतमनेकाल्त्वम्' इति वचनात् । मघवत् स् इति स्थिते । **उगिदचाम्** ॥ अधातोरिति छेदः । उक् इत्, येषान्ते उगितः । अच् इति लुप्तनकारस्य 'अञ्चु गतिपूजनयोः' इति धातोर्ग्रहणम् । अधातोरित्युगिद्विशेषणम् । नत्वञ्चतेः । असम्भवात् । 'इदितो नुम् धातोः' इत्यतो नुमित्यनुवर्तते । तदाह । **अधातोरुगितः इत्यादिना** ॥ नुमि मकार इत् । उकार उच्चारणार्थः । मित्त्वादन्त्यादचः परः । आजिति अच्प्रत्याहारो न गृह्यते, व्याख्यानात्, 'नपुंसकस्य झलचः' इत्यज्ग्रहणाच्च । अन्यथा 'उगिदचाम्' इत्येव सिद्धे तद्वैयर्थ्यात् वृद्धिः गुणः इत्यादिनिर्देशाच्च । अधातोरित्येतत्तु अग्रे गोमच्छब्दनिरूपणावसरे मूल एव व्याख्यास्यते । तत्प्रयोजनञ्च तत्रैव वक्ष्यते । **उपधादीर्घः इति** ॥ मघवन् त् स् इति स्थिते हल्ङ्यादिना सुलोपे संयोगान्तलोपे च सति 'सर्वनामस्थाने च' इति दीर्घ इत्यर्थः । नन्विह दीर्घे कर्तव्ये संयोगान्तलोपस्यासिद्धत्वात् नान्तत्वाभावात् पचन्नित्यादाविव दीर्घो न सम्भवतीत्यत आह । **दीर्घे कर्तव्ये इति** ॥ **बहुळग्रहणादिति** ॥ "क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्व-

व्दान्मतुपा च भाषायामपि शब्दद्वयसिद्धिमाश्रित्यैतत्सूत्रं प्रत्याख्यातमाकरे। 'हविर्जक्षिति निःशङ्को मखेषु मघवानसौ' इति भट्टिः। मघवन्तौ, मघवन्तः। हे मघवन्। मघवन्तम्, मघवन्तौ, मघवतः। मघवता, मघवद्भ्याम् इत्यादि। तृत्वाभावे मघवा। 'छन्दसीवनिपौ च' इति वनिबन्तं मध्योदात्तं छन्दस्येव। अन्तोदात्तं तु लोकेऽपीति विशेषः। मघवानौ, मघवानः। सुटि राजवत्।

द्विभाषा क्वचिदन्यदेव। शिष्टप्रयोगाननुसृत्य लोके विज्ञेयमेतद्बहुळग्रहे तु॥" इति स्थितिः। अत्र दीर्घे कर्तव्ये संयोगान्तलोपस्य नासिद्धत्वम्। पचन्नित्यादौ तु असिद्धत्वमेवेति बहुळग्रहणाल्लभ्यते इत्यर्थः। ननु त्रादेशपक्षे मघवन्नित्येवास्तु। बहुळग्रहणेन संयोगान्तलोपस्यासिद्धत्वाभावकल्पनायाः प्रमाणाभावात्। वेदे तु यज्ञेन मघवानित्यादौ दीर्घश्छान्दसो भविष्यतीत्यत आह। **तथा चेति**॥ त्रादेशपक्षे संयोगान्तलोपस्यासिद्धत्वाभावमभ्युपगम्यैवेत्यर्थः। **निपातनादिति**॥ क्वनिप्रत्ययस्य, अवुगागमस्य, घत्वस्य, इति त्रयाणां निपातनादित्यर्थः। तथा च नान्तो मघवन्शब्दः सिध्यतीति भावः। **मघशब्दादिति**॥ धनपर्यायादित्यर्थः। मघः धनमस्यास्तीत्यर्थे मतुपि 'मादुपधायाश्च' इति वत्वे तान्तो मघवच्छब्दस्सिद्ध इति भावः। **भाषायामपीति**॥ लोके छन्दसि च इत्यर्थः। **शब्दद्वयेति**॥ मघवन्शब्दो मघवच्छब्दश्चेति शब्दद्वयं 'मघवा बहुळम्' इत्यस्य फलम्। तस्य सिद्धिमाश्रित्येत्यर्थः। **आकरे इति**॥ 'केशाद्वा' इति सूत्रे कैयटग्रन्थे इत्यर्थः। तत्र त्वेवमुक्तम्। "'मघवा बहुळम्' इत्येतन्न कर्तव्यम्। 'श्वन्नुक्षन्' इति निपातनान् मघशब्दान्मतुपा च भाषायामपि शब्दद्वयस्य सिद्धत्वात्" इति। त्रादेशपक्षे संयोगान्तलोपस्यासिद्धत्वान् दीर्घाभावाश्रयणे मघवन्निति रूपम्। मतुपि तु 'अत्वसन्तस्य' इति दीर्घे मघवानिति रूपभेदापत्त्या तदसङ्गतिः स्पष्टैवेति भावः। वस्तुतस्तु कन्यन्तस्य प्रत्ययस्वरेणान्तोदात्तत्वम्, मतुपि तु 'हृस्वनुड्भ्यामतुप्' इति मतुबुदात्तत्वप्रतिषेधे सति पित्त्वादनुदात्तत्वे धकारादकारस्य फिट्स्वरेण उदात्तत्वमिति फलभेदात् कैयटग्रन्थश्चिन्त्य एव। मघवानिति दीर्घाश्शिष्टसम्मतश्चेत्याह। **हविरिति**॥ मखेषु यज्ञेषु निश्शङ्कः असौ मघवान् हविर्जक्षिति। भक्षयतीत्यर्थः। **मघवन्तावित्यादि**॥ सुटि त्रादेशो नुम्चेति भावः। शसादौ लादेशः नतु नुम्, असर्वनामस्थानत्वादित्यभिप्रेत्य आह। **मघवतः इति**॥ **मघवद्भ्यामित्यादि**॥ लादेशे। 'स्वादिषु' इति पदत्वाज्जश्त्वम्। सुपि त्रादेशे जश्त्वे चर्त्वे मघवत्सु। तृत्वाभावे मघवेति नान्तात् सौ राजवद्रूपमिति भावः। ननु 'मघवा बहुळम्' इति सूत्रे "अर्वणस्तृमघोनश्च न शिष्यं छान्दसं हि तत्" इति वार्तिकभाष्यकैयटेषु मघवन्शब्दस्य छन्दोमात्रविषयत्वावगमात् कथन्तस्य लोके प्रयोग इत्यत आह। **छन्दसीवनिपावित्यादि**॥ 'तदस्यास्त्यस्मिन्निति मतुप्' इत्यधिकारे 'केशाद्वोऽन्यतरस्याम्' इति सूत्रे 'छन्दसीवनिपौ च' इति वार्तिकम्। छन्दसि ईवनिपौ च वक्तव्यौ वश्च वतुप्च। "रथीरभून्मुद्गलानि गविष्टौ, सुमङ्गलीरियं वधूः, ऋतवानमीहते" इति तत्र भाष्यम्। तत्र वनिप्प्रत्ययान्ते मघवन्शब्दे प्रत्ययस्वरेण वकारादकार उदात्तः। मघशब्दः फिट्स्वरेणान्तोदात्तः। 'अनुदात्तं पदमेकव-

३६२ । श्वयुवमघोनामतद्धिते । (६-४-१३३)

अन्नन्तानां भसंज्ञकानामेषामतद्धिते परे सम्प्रसारणं स्यात् । सम्प्रसारणाच्च' (सू ३३०) । 'आद्गुणः' (सू ६९) । मघोनः । 'अन्नन्तानाम्' किम् । मघवतः । मघवता । स्त्रियां मघवती । 'अतद्धिते' किम् । माघवनम् ।

र्जम्' इति शिष्टस्वरेण मकारादकारः वकारादकारश्चानुदात्तः । 'उदात्तादनुदात्तस्य स्वरितः' इति वकारादकारस्स्वरितः । तथाच मघवान्निति रूपं मध्योदात्तं सम्पद्यते । एतादृशमघवन्शब्दविषयकं छान्दसत्वाभिधानम् । कन्यन्ते तु मघवन्शब्दे वकारादकारः प्रत्ययस्वरेणोदात्तः । शिष्टस्वरेण मकारादकारः घकारादकारश्च अनुदात्तौ । तथाच मघवान्निति रूपम् अन्तोदात्तमिति स्थितिः । एतादृशमघवन्शब्दस्तु लोकवेदसाधारणः । तस्य छन्दोमात्रविषयत्वे प्रमाणाभावात् । किञ्च 'वनो र च' इति सूत्रे भाष्यम् । मघवन्शब्दः अव्युत्पन्नप्रातिपदिकमिति । अयमपि मघवन्शब्दः फिट्स्वरेणान्तोदात्तः लोकवेदसाधारण एव । छन्दोमात्रविषयत्वे प्रमाणाभावादिति भावः । शब्दरत्ने तु "न शिष्यं छान्दसं हि तत्' इत्युदाहृतभाष्यवार्तिकयोस्सामान्यप्रवृत्तयोः मध्योदात्तमात्रविषयसङ्कोचे प्रमाणन्न किञ्चिदस्ति । कविप्रयोगाणान्तु 'तं तस्थिवांसं नगरोपकण्ठे' इत्यादिविषये बहुशः प्रमाददर्शनात् तेषामपि नार्षवच्चनसङ्कोचकता । अतो मघवन्शब्दस्य सर्वस्यापि लोके असाधुत्वमेवेति प्रपञ्चितम् । **सुटि राजवदिति** ॥ तृत्वाभावपक्षे नान्तत्वादीर्घ इति भावः । शसादावचि मघवन् अस् इत्यादिस्थिते 'अल्लोपोऽनः' इति प्राप्ते । **श्वयुवमघोनामतद्धिते** ॥ श्वा च, युवा च, मघवा च इति द्वन्द्वः । 'वसोस्सम्प्रसारणम्' इत्यतः सम्प्रसारणमित्यनुवर्तते । 'भस्य' इत्यधिकृतम् । 'अल्लोपोऽनः' इत्यतः अन इत्यपकृष्यते । तच्च श्वयुवमघोनाम् प्रत्येकं विशेषणं, तदन्तविधिः । फलितमाह । **अन्नन्तानामित्यादि** ॥ 'इग्यणस्सम्प्रसारणम्' इति वकारस्य सम्प्रसारणमुकारः । मघ उ अन् इति स्थिते पूर्वरूपमुक्तं स्मारयति । **सम्प्रसारणाच्चेति** ॥ मघ उ न् इति स्थिते गुणं स्मारयति । **आद्गुणः इति** ॥ **अन्नन्तानां किमिति** ॥ श्वयुवमघोनामन्नन्तत्वाव्यभिचारात् किमर्थमन्नन्तत्वविशेषणम् । मघवन्शब्दे नकारस्य त्रादेशपक्षेऽपि एकदेशविकृतस्यानन्यतया अन्नन्तत्वसत्त्वादिति प्रश्नः । **मघवतः इति** ॥ त्रादेशपक्षे मघवन्शब्दे सम्प्रसारणनिवृत्त्यर्थम् अन्नन्तत्वविशेषणम् । यद्यप्येकदेशविकृतस्यानन्यतया अन्नन्तमस्त्येव । तथापि विशेषणसामर्थ्यात् श्रूयमाणनकारान्तस्यैव सम्प्रसारणमित्याहुः । **स्त्रियां मघवतीति** ॥ मघवतः स्त्री मघवती 'पुंयोगादाख्यायाम्' इति ङीष् । अत्राप्यन्नन्तत्वविशेषणात् न सम्प्रसारणमिति भावः । अत्र 'उगिदचाम्' इति नुम् तु न । ङीषा व्यवधानेन तान्तस्य उगितः सर्वनामस्थानपरकत्वाभावात् । लिङ्गविशिष्टपरिभाषा तु नेह प्रवर्तते । विभक्तौ लिङ्गविशिष्टाग्रहणमित्युक्तेरिति भावः । **माघवनमिति** ॥ 'सास्य देवता' इति मघवन्शब्दात् अणि आदिवृद्धिः । अत्राणस्तद्धितत्वात् तस्मिन् परे न सम्प्र-

मघोनः। मघवभ्याम् इत्यादि। शुनः, शुना, श्वभ्यामित्यादि। 'युवन्' शब्दे वस्योत्वे कृते।

३६३। न सम्प्रसारणे सम्प्रसारणम्। (६-२-३७)

सम्प्रसारणे परतः पूर्वस्य यणः सम्प्रसारणं न स्यात्। इति यकारस्य नेत्त्वम्। अत एव ज्ञापकादन्त्यस्य यणः पूर्वं सम्प्रसारणम्। यूनः, यूना, युवभ्यामित्यादि। अर्वा। हे अर्वन्।

सारणमिति भावः। **मघवभ्यामिति** ॥ भ्यामादौ हलि नलोप इति भावः। **इत्यादीति** ॥ मघोने। मघोनः, मघोनोः, मघोनाम्। मघोनि। श्वन्शब्दः प्रायेण राजवत्। शसादावचि 'श्वयुव' इति सम्प्रसारणं वकारस्य उकारः। शु अन् इति स्थिते 'सम्प्रसारणाच्च' इति पूर्वरूपमिति मत्वा आह। **शुनः। शुनेति** ॥ **इत्यादीति** ॥ शुने। शुनः, शुनोः, शुनाम्। शुनि। युवन्शब्दोऽपि प्रायेण राजवत्। शसादावचि विशेषमाह। **युवन्शब्दे इति** ॥ युवन् अस् इत्यादिस्थिते 'श्वयुव' इति वकारस्य सम्प्रसारणे उकारे यु उ अन् इति स्थिते 'सम्प्रसारणाच्च' इति पूर्वरूपे यु उ न् इति स्थिते सवर्णदीर्घे यून इत्यादिरूपेषु सिद्धेषु यकारस्यापि सम्प्रसारणे प्राप्ते इत्यर्थः। "लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिः" इत्यस्य तु नायं विषयः। कार्याश्रयवर्णभेदेन लक्ष्यभेदात्। अन्यथा संस्कर्तेत्यादौ 'अनचि च' इत्यादेरसकृत्प्रवृत्त्यनुपपत्तेरिति भावः। **न सम्प्रसारणे** ॥ **इति यकारस्येति** ॥ सवर्णदीर्घनिष्पन्नस्य उकारस्य 'अचः परस्मिन्' इति स्थानिवत्त्वेन सम्प्रसारणतया यकारस्य सम्प्रसारणपरकत्वात् न सम्प्रसारणमिकार इत्यर्थः। ननु उकारद्वयस्थानिकस्य ऊकारस्य स्थानिवत्त्वे सति तस्य उकारद्वयात्मकतया प्रथमेन उकारेण व्यवधानात् सम्प्रसारणपरत्वाभावात् कथमिह निषेधः। 'येन नाव्यवधानम्' इति न्यायस्य तु नायं विषयः। विव्याथेत्यादौ 'व्यथो लिटि' इति वकारस्याव्यवहितसम्प्रसारणपरत्वे निषेधस्य चरितार्थत्वात् इति चेन्मैवम्। एवं हि सति 'न सम्प्रसारणे सम्प्रसारणम्' इति निषेधस्य 'व्यथो लिटि' इति सम्प्रसारणमात्रविषयकत्वमापद्येत। एवञ्च सति 'व्यथो लिटि' इति यकारग्रहणेनैव सिद्धे 'न सम्प्रसारणे सम्प्रसारणम्' इति सूत्रमनर्थकमेव स्यात्। अतः 'श्वयुव' इति सम्प्रसारणनिषेधकत्वमस्यावश्यकमिति व्यवहितेऽपि सम्प्रसारणे परे यून इत्यादौ निषेधो निर्बाधः। 'यूनस्तिः' इत्यादिनिर्देशाच्चेत्यलम्। ननु सकृत् प्रवृत्त्यैव युवन्शब्दे यवयोस्सम्प्रसारणे जाते निषेधो व्यर्थः। निमित्तत्वानुपपत्तिश्च। यद्वा प्रथमं यकारस्य सम्प्रसारणमस्तु। तदानीं सम्प्रसारणपरत्वाभावेन निषेधाप्रवृत्तेः। अनन्तरन्तु वकारस्यापि सम्प्रसारणमस्तु। तत्राह। **अत एव ज्ञापकादिति** ॥ अन्यथा एतन्निषेधारम्भवैयर्थ्यापातादिति भावः। **इत्यादीति** ॥ यूने। यूनः, यूनोः। यूनि। 'आतो मनिन्क्वनिब्वनिपश्च, अन्येभ्योऽपि दृश्यते' इति ऋधातोः वनिपि गुणे रपरत्वे अर्वन्शब्दः अश्वे योगरूढः। तस्य सौ राजवद्रूपं मत्वा आह। **अर्वा।**

३६४ । अर्वणस्त्रसावनञः । (६-४-१२७)

नञा रहितस्यार्वन्नित्यस्याङ्गस्य 'तृ' इत्यन्तादेशः स्यात्, न तु सौ । उगित्त्वान्नुम् । अर्वन्तौ, अर्वन्तः, अर्वन्तम् । अर्वन्तौ, अर्वतः । अर्वता, अर्वद्भ्याम् इत्यादि । 'अनञः' किम् । 'अनर्वा' 'यज्व' वत् ।

३६५ । पथिमथ्यृभुक्षामात् । (७-१-८५)

एषामाकारोऽन्तादेशः स्यात्सौ परे । 'आ आत्' इति प्रश्लेषेण शुद्धाया एव व्यक्तेर्विधानान्नानुनासिकः ।

हे अर्वन्निति ॥ अर्वणस्त्रसावनञः ॥ तृ असौ इति छेदः । न विद्यते नञ् यस्येति बहुव्रीहिः । अङ्गस्य इत्यधिकृतम् अर्वणा विशेष्यते । तदाह । **नञा रहितस्येत्यादिना ॥** ऋकार इत् । 'अलोऽन्त्यस्य' इति नस्य तः । **उगित्त्वान्नुमिति ॥** 'उगिदचाम्' इत्यनेनेति शेषः । **अर्वन्ताविति ॥** नुमो नस्य 'नश्चापदान्तस्य' इति अनुस्वारः, परसवर्ण इति भावः । शसादावचि असर्वनामस्थानत्वान्नुम्नेति मत्वा आह । **अर्वतः इति ॥ अर्वद्भ्यामिति ॥** 'स्वादिषु' इति पदत्वाज्जश्त्वमिति भावः । **इत्यादीति ॥** अर्वद्भिः, अर्वते, अर्वद्भ्यः । अर्वतः, अर्वतोः, अर्वताम् । अर्वति, अर्वत्सु । **अनञः किमिति ॥** अनञः इत्यस्य किं प्रयोजनमित्यर्थः । **अनर्वा यज्ववदिति ॥** अनर्वन्शब्दो यज्ववदित्यर्थः । शसादावचि 'न संयोगाद्वमन्तात्' इत्यलोपो नेति भावः । पथिन्, मथिन्, ऋभुक्षिन्, एते नकारान्ताः । तेषु विशेषमाह । **पथिमथ्यृभुक्षामात् ॥** पन्थाश्च, मन्थाश्च, ऋभुक्षाश्च, पथिमथ्यृभुक्षाणः तेषामिति विग्रहः । 'सावनडुहः' इत्यतस्सावित्यनुवर्तते । आदिति तपरकरणम् । अकार एव विधेयः । तदाह । **एषामित्यादिना ॥** 'अलोऽन्त्यस्य' इति नकारस्य आकारः । ननु नकारस्य आन्तरतम्यात् अनुनासिक एव आकारः प्राप्नोति । नच निरनुनासिकस्यैवाकारस्योच्चारणात् शुद्ध एव आकार इति वाच्यम् । गुणानामभेदकत्वात् । भेदकत्वेऽपि तपरकरणेन अनुनासिकस्याप्याकारस्य ग्रहणात् । व्यक्तिपक्षे तपरसूत्रस्य अप्सु दीर्घप्लुतेषु विध्यर्थत्वात् । नच ग्रहणकसूत्रे वार्णसमाम्नायिकत्वेन निश्चितस्याण्ग्रहणस्य अप्रत्यय इत्यस्य च तपरसूत्रे अनुवृत्तेराकारस्येहानण्त्वात् विधीयमानत्वाच्च न तत्काल इति वाच्यम् । तपरसूत्रे अण्ग्रहणस्य अप्रत्ययग्रहणस्य चानुवृत्तौ मानाभावादित्यत आह । **आ आदिति ॥** सवर्णदीर्घेणाकारान्तरं श्लिष्यते । तत्श्चाननुनासिकरूप आकारो भवतीति लभ्यते । नच सर्वादेशत्वं शङ्क्यम् । नह्यत्र वर्णद्वयं विधीयते । विशेषणविशेष्यभावेनान्वयाभ्युपगमेन अननुनासिकाकारस्यैकस्यैव विधानादिति भावः । भाष्ये तु अनुनासिकविधेस्सम्मतत्वे प्रतिपत्तिलाघवाय अनुनासिकस्यैव 'उञः, ऊँ' इत्यत्रैव उच्चार्यविधानसम्भवात्तदनुच्चारणाच्छुद्ध एव आकार इह विधेय इत्युक्तम् । तपरकरणन्तु उच्चारणार्थमेव । वस्तुतस्तु 'भाव्यमानेन सवर्णानां ग्रहणम्' इति परिभाषयैव अनुनासिकाकारनिरासस्सम्भवादाकारप्रश्लेषक्लेशो व्यर्थः । 'भाव्यमानोऽण् सवर्णान्न गृह्णाति' इति पाठस्तु प्रामादिकः ।

३६६। इतोऽत्सर्वनामस्थाने। (७-१-८६)

पथ्यादेरिकारस्याकारः स्यात्सर्वनामस्थाने परे।

३६७। थो न्थः। (७-१-८७)

पथिमथोस्थस्य न्थादेशः स्यात्सर्वनामस्थाने परे। पन्थाः, पन्थानौ, पन्थानः। पन्थानम्, पन्थानौ।

३६८। भस्य टेर्लोपः। (७-१-८८)

भसंज्ञकस्य पथ्यादेष्टेर्लोपः स्यात्। पथः। पथा, पथिभ्यामित्यादि। एवं मन्थाः। ऋभुक्षाः। स्त्रियां नान्तलक्षणे ङीपि भत्वाट्टिलोपः। सुपथी

'ज्यादादीयसः' इति सूत्रे आदिति तपरनिर्देशेन इयं परिभाषा ज्ञाप्यते। 'भाव्यमानेन सवर्णानां ग्रहणम्' इत्येव भाष्ये पाठात्। अणुदित्सूत्रभाष्येऽप्यणग्रहणरहितायाः एवास्याः परिभाषायाः पाठदर्शनाच्चेत्यास्तान्तावत्। नकारस्य आत्त्वे पथि आ स् इति स्थिते। **इतोऽत्**॥ पथिमथ्यृभुक्षाम् इत्यनुवर्तते। इत इति तपरकरणं स्पष्टार्थम्। पथ्यादिषु त्रिषु दीर्घप्लुतयोरसम्भवात्। भाव्यमानत्वादेव सवर्णाग्राहकत्वे सिद्धे अदिति तपरकरणमपि स्पष्टार्थमेव। तदाह। **पथ्यादेरित्यादिना**॥ पथ आ स् इति स्थिते। **थो न्थः**॥ थः, न्थः, इति छेदः। थः इति षष्ठी। आदेशे अकार उच्चारणार्थः। पथिमथिग्रहणमनुवर्तते। ऋभुक्षिग्रहणन्निवृत्तम्। तत्र थकाराभावात् 'इतोऽत्सर्वनामस्थाने' इत्यतस्सर्वनामस्थानग्रहणमनुवर्तते। तदाह। **पथिमथोरित्यादिना**॥ **पन्थाः इति**॥ नकारस्य आत्त्वे थकारस्य न्थादेशे पन्थ आ स् इति स्थिते सवर्णदीर्घे रुत्वविसर्गाविति भावः। **पन्थानाविति**॥ पथिन् औ इति स्थिते सावित्युक्तेर्नात्त्वम्। 'इतोऽत्' इति इकारस्यात्त्वे थकारस्य न्थादेशे 'सर्वनामस्थाने च' इति दीर्घे रूपमिति भावः। एवं पन्थानः। पन्थानम्, पन्थानौ। शसादावचि विशेषमाह। **भस्य टेर्लोपः**॥ **पथ्यादेरिति**॥ पथिमथ्यृभुक्षाम् इत्यनुवर्तते इति भावः। **पथः। पथेति**॥ पथिन् अस् पथिन् आ इति स्थिते इनो लोपे रूपद्वयमिति भावः। **पथिभ्यामिति**॥ नलोपे रूपम्। **इत्यादीति**॥ पथिभिः। पथे। पथिभ्यः। पथः, पथोः, पथाम्। पथि, पथोः, पथिषु। **एवं मन्थाः, ऋभुक्षाः इति**॥ मन्थदण्डवाची मथिन्शब्दः। तस्य आत्त्वम्, अत्त्वं, न्थादेशः, टिलोपश्च। मन्थाः, मन्थानौ, मन्थानः। मन्थानम्, मन्थानौ, मथः। मथा, मथिभ्याम्। मथे। मथः। मथोः। मथाम्। मथि। मथिषु। ऋभुक्षिन्शब्दस्तु इन्द्रवाची। तत्र 'थो न्थः' इति वर्जमात्त्वादि भवति। षात्परत्वाण्णत्वञ्च। ऋभुक्षाः, ऋभुक्षाणौ इत्यादि। यत्तु अत्र पन्थानमात्मनः इच्छति पथीयति 'सुप आत्मनः क्यच्, नः क्ये' इति पदत्वात् नलोपः। 'अकृत्सार्वधातुकयोः' इति दीर्घः। 'सनाद्यन्ताः' इति धातुत्वम्। ततः क्विप्। अल्लोपयलोपौ। एकदेशविकृतस्यानन्यत्वात् 'पथिमथि' इत्यात्त्वं, 'थो न्थः। इतोऽत्' इत्यत्त्वन्तु तपरकरणान्न

नगरी। अनृभुक्षी सेना। आत्त्वं नपुंसके न भवति 'न लुमता—' (सू २६३) इति प्रत्ययलक्षणनिषेधात्। सुपथि वनम्। 'सम्बुद्धौ नपुंसकानां नलोपो वा वाच्यः' (वा ४७८६)। हे सुपथिन्—हे सुपथि। 'नलोपः सुप्स्वर—' (सू ३५३) इति नलोपस्यासिद्धत्वाद्ध्रस्वस्य गुणो न। द्विवचने भत्वाट्टिलोपः। सुपथी। शौ सर्वनामस्थानत्वात्सुपन्थानि। पुनरपि सुपथि, सुपथी, सुपन्थानि। सुपथा। सुपथे। सुपथिभ्यामित्यादि।

३६९। ष्णान्ता षट्। (१-१-२४)

भवति। पन्थाः। 'एरनेकाचः' इति यण बाधित्वा परत्वान्नित्यत्वाच्च 'थो न्थः'। ततस्संयोगपूर्वत्वान्न यण्। किन्त्वियङेव। पन्थियौ। 'भस्य टेर्लोपः' पथः इत्यादिप्रौढमनोरमातत्त्वबोधिन्यादावुक्तम्। तदेतदनुनासिकविधौ सति प्रतिपत्तिलाघवायानुनासिकस्यैव उच्चारणे कार्ये तदनुच्चारणाच्छुद्धस्यैव विधानमिति भाष्यविरोधादुपेक्ष्यम्। पथीयतेः क्विपि हि नकारस्य शुद्धाकारार्थं अनुनासिकानुच्चारणस्यावश्यकत्वे तदसङ्गतिः स्पष्टैव। तस्मात् पथीयतेः क्विपः अनभिधानमेवोचितमिति शब्देन्दुशेखरे स्पष्टम्। प्रसङ्गादाह। **स्त्रियामिति** ॥ सु शोभनः पन्थाः अस्या इति बहुव्रीहिः। 'ऋन्नेभ्यः' इति ङीप्। 'भस्य टेर्लोपः' इति इनो लोपः। सुपथीति रूपम्। 'ऋक्पूः' इत्यप्तु न। 'न पूजनात्' इति निषेधात्। नचैवमपि 'न पूजनात्' इति निषेधस्य षचः प्रागेव प्रवृत्तेर्वक्ष्यमाणत्वात् 'इनस्त्रियाम्' इति कप् दुर्वार एवेति वाच्यम्। 'युवोरनाकौ' इत्यत्र सुपथीति भाष्यप्रयोगेण तस्या अनित्यत्वज्ञापनात्। नच लिङ्गविशिष्टपरिभाषया 'पथिमथि' इत्यात्त्वं, थो न्थश्च कुतो नेति वाच्यम्। विभक्तौ लिङ्गविशिष्टाग्रहणात्। **सुपथी इति** ॥ सु शोभनो पन्थाः यस्या इति विग्रहः। ङीबादि पूर्ववत्। **अनृभुक्षी सेनेति** ॥ अविद्यमानः ऋभुक्षाः यस्या इति विग्रहः। 'नञोऽस्त्यर्थानाम्' इति समासः। अथ सु शोभनः पन्थाः अस्य वनस्येति बहुव्रीहौ सुपथिन्शब्दान्नपुंसकात् 'स्वमोर्नपुंसकात्' इति सोर्लुकि प्रत्ययलक्षणमाश्रित्य सुप्परत्वसत्वात् 'पथिमथि' इत्यात्त्वमाशङ्क्य आह। **आत्त्वन्नपुंसके इति** ॥ **सम्बुद्धाविति** ॥ यद्यपि भाष्ये नपुंसकानामित्येव पठितम्। तथापि हे चर्मन् हे चर्मेति भाष्ये सम्बुद्धावेव उदाहृतत्वात् तन्मात्रविषयत्वमस्येति भावः। सम्बुद्धेर्लुका लुप्तत्वात् सम्बुद्धिपरत्वाभावात् 'न ङिसम्बुद्ध्योः' इति निषेधाप्रवृत्तेः नित्यनलोपप्राप्तौ विकल्पार्थोऽयमारम्भः। ननु नलोपपक्षे 'ह्रस्वस्य गुणः' इति सम्बुद्धौ परतः गुणे कर्तव्ये 'न लुमता' इति निषेधस्यानित्यत्वात् हे वारे—हे वारि इतिवत् गुणविकल्पस्यादित्यत आह। **नलोपः सुबिति** ॥ **द्विवचने इति** ॥ सुपथिन्शब्दात् औङः शीभावे सति असर्वनामस्थानत्वेन भत्वात् 'भस्य टेर्लोपः' इति इनो लोपे सुपथी इति रूपमित्यर्थः। **शाविति** ॥ सुपथिन्शब्दात् जश्शसोरिशभावे सति तस्य सर्वनामस्थानत्वात् 'इतोऽत्' इत्यत्त्वे, 'थो न्थः' इति थस्य न्थादेशे नान्तत्वात् दीर्घे सुपन्थानि इति रूपमित्यर्थः। पञ्चन्शब्दो नित्यं बहुवचनान्तः। तस्य षट्संज्ञाकार्यं लुकं विधास्यन् षट्संज्ञामाह। **ष्णान्ता षट्** ॥ ष्च नश्च

षान्ता नान्ता च सङ्ख्या षट्संज्ञा स्यात्। 'षड्भ्यो लुक्' (सू २६१)' पञ्च। पञ्च। 'सङ्ख्या' किम्। विप्रुषः। पामानः। 'शतानि' 'सहस्राणि। इत्यत्र सन्निपातपरिभाषया न लुक्। सर्वनामस्थानसन्निपातेन कृतस्य नुमस्तदविघातकत्वात्। पञ्चभिः। पञ्चभ्यः। पञ्चभ्यः। 'षट्चतुर्भ्यश्च' (सू ३३८) इति नुट्।

३७०। नोपधायाः। (६-४-७)

नान्तस्योपधाया दीर्घः स्यान्नामि परे। नलोपः। पञ्चानाम्। पञ्चसु परमपञ्च। परमपञ्चानाम्। गौणत्वे तु न लुग्नुटौ। प्रियपञ्चा। प्रियपञ्चानौ। प्रियपञ्चानः। प्रियपञ्चानाम्। एवं सप्तन् नवन् दशन्।

ष्णौ ष्टुत्वेन णः। ष्णौ अन्तौ यस्यास्सा ष्णान्ता। 'बहुगणवतुडति सङ्ख्या' इत्यतः सङ्ख्येत्यनुवर्तते। तत्र पूर्वसूत्रे बहुगणवतुडतिपरमपि शब्दाधिकारादिह पञ्चषडित्यादिप्रसिद्धसङ्ख्याबोधकशब्दपरमाश्रीयते। बहुगणवतुडतिषु ष्णान्तत्वासम्भवात्। तदाह। **षान्तेत्यादिना॥ षड्भ्यो लुक् इति॥** अनेन जश्शसोर्लुगिति शेषः। **पञ्च। पञ्चेति॥** जश्शसोर्लुकि नलोप इति भावः। **सङ्ख्या किमिति॥** सङ्ख्याग्रहणानुवृत्तेः किं फलमिति प्रश्नः। **विप्रुषः। पामानः इति॥** विप्रुष्शब्दस्य पामन्शब्दस्य च ष्णान्तत्वेऽपि सङ्ख्यावाचकत्वाभावेन षट्संज्ञाविरहात् ततः परस्य जसो न लुगिति भावः। ननु शतशब्दात् जश्शसोरशिभावे 'नपुंसकस्य झलचः' इति नुमि 'सर्वनामस्थाने च' इति दीर्घे शतानीति रूपम्। एवं सहस्राणीत्यपि रूपम्। तत्र 'अट्कुप्वाङ्' इति णत्वं विशेषः। इह 'तदागमाः' इति न्यायेन नुमः अङ्गभक्तत्वात् शतन्शब्दसहस्रन्शब्दयोः नान्तसङ्ख्याशब्दत्वात् षट्संज्ञायां सत्यां 'षड्भ्यो लुक्' इति जश्शसोर्लुक् स्यादत आह। **शतानीत्यादि॥ सर्वनामेति॥** सर्वनामस्थानं परत्वेन उपजीव्य प्रवृत्तस्यामः सन्निपातपरिभाषया सर्वनामस्थानभूतजश्शसोर्लुकं प्रति निमित्तत्वाभावादित्यर्थः। **पञ्चभिः। पञ्चभ्यः इति॥** नलोपे रूपम्। पञ्चन् आम् इति स्थिते। 'षट्चतुर्भ्यश्च' इति नुटि नलोपे तस्यासिद्धत्वात् 'नामि' इति दीर्घे अप्राप्ते आह। **नोपधायाः॥** नेति लुप्तषष्ठीकम् अङ्गस्येत्यधिकृतस्य विशेषणम्। तदन्तविधिः। 'ढ्रलोपे' इत्यतो दीर्घ इत्यप्यनुवर्तते। 'नामि' इति सूत्रञ्च। तदाह। **नान्तस्येत्यादिना॥ नलोपः इति॥** नलोपस्यासिद्धत्वात् प्रथमं दीर्घे ततो नलोप इत्यर्थः। **परमेति॥** परमाश्च ते पञ्च चेति विग्रहः। 'षड्भ्यो लुक्' इत्यस्य 'षट्चतुर्भ्यश्च' इत्यस्य चाङ्गत्वात् तदन्तेऽपि प्रवृत्तिरिति भावः। प्रियाः पञ्च यस्येति बहुव्रीहौ प्रियपञ्चन्शब्दो विशेष्यनिघ्नः त्रिलिङ्गः। तस्य पुंस्त्वे विशेषमाह। **गौणत्वे त्विति॥** 'षड्भ्यो लुक्' इति 'षट्चतुर्भ्यश्च' इति च बहुवचननिर्देशेन षट्चतुरर्थप्राधान्यावगमादिति भावः। **प्रियपञ्चेति॥** सुटि हलादौ च राजवत्। शसादावचि तु 'अल्लोपोऽनः' इत्यकारलोपे नुटश्चुत्वेन ञकारः। चकारे तु परे अनुस्वारस्य परसवर्णे ञकारः

३७१ । अष्टन आ विभक्तौ । (७-२-८४)

अष्टन आत्वं स्याद्धलादौ विभक्तौ ।

३७२ । अष्टाभ्य औश् । (७-१-२१)

कृताकारादष्टनः परयोर्जश्शसोरौश् स्यात् । 'अष्टभ्यः' इति वक्तव्ये कृतात्वनिर्देशो जश्शसोर्विषये आत्वं ज्ञापयति । 'वैकल्पिकं चेदमष्टन आत्वम्' । 'अष्टनो दीर्घात्' (सू ३७१८) इति सूत्रे दीर्घग्रहणाज्ज्ञापकात् । अष्टौ । अष्टौ । परमाष्टौ । अष्टाभिः । अष्टाभ्यः । अष्टाभ्यः ।

स्थित एव । तथाच अकारद्वयमध्ये चकारः । अष्टन्शब्दो नित्यं बहुवचनान्तः । तस्य विशेषमाह । **अष्टन आ विभक्तौ** ॥ 'रायो हलि' इत्यतः हलि इत्यपकृष्यते । तच्च विभक्तेर्विशेषणम् । तदादिविधिः । तदाह । **अष्टन आत्वमित्यादिना** ॥ ग्रहणकसूत्रे अण्ग्रहणेन वार्णसमाम्नायिकानामेव ग्रहणादाकारस्यानण्त्वात् भाव्यमानत्वाच्च शुद्ध एव नकारस्य अकारः । **अष्टाभ्य औश्** ॥ 'जश्शसोशिः' इत्यतः जश्शसोरित्यनुवर्तते । अष्टाभ्य इति पञ्चमी । तस्मादित्युत्तरस्येत्युपतिष्ठते । अष्टा इत्याकारान्तशब्दो विवक्षितः । तदाह । **कृताकारादित्यादिना** ॥ नकारस्यात्वे कृते सति यः अष्टाशब्दः तस्मादित्यर्थः । शित्त्वात् सर्वादेशः । 'आदेः परस्य' इति तु नात्र प्रवर्तते । 'अनेकाल्शित्' इति परणे तस्य बाधात् । औशादेशोऽयं 'षड्भ्यो लुक्' इत्यस्यापवादः । ननु जश्शसोः परतः अष्टन्शब्दस्यात्वन्नास्त्येव । 'अष्टन आ विभक्तौ' इति आत्वविधौ हलीत्यपकर्षस्य उक्तत्वात् । ततश्च जश्शसोरौश्विधौ कृताकारात् अष्टन इत्यनुपपन्नम् । तत्राह । **अष्टभ्यः इति वक्तव्ये इत्यादि** ॥ भ्यसि अष्टाभ्यः-अष्टभ्यः इति रूपद्वये सत्यपि औश्विधौ लाघवादष्टभ्य इत्येव निर्देश उचितः । आकारनिर्देशात्तु जश्शसोरचि परतोऽप्यात्वं विज्ञायत इत्यर्थः । ननु 'अष्टन आ विभक्तौ' इति हलादिविभक्तौ अष्टनो नित्यमात्वविधानात् अष्टाभ्य इत्येव निर्देष्टव्यम् । प्रामाणिकगौरवस्यादोषत्वात् । ततश्च औश्विधौ अष्टाभ्य इति निर्देशः जश्शसोरष्टनः कथमात्वं ज्ञापयेदित्यत आह । **वैकल्पिकञ्चेदमिति** ॥ **ज्ञापकादिति** ॥ 'अष्टनो दीर्घात्' इति सूत्रम् । दीर्घान्तादष्टन्शब्दात् परा असर्वनामस्थानविभक्तिरुदात्ता स्यादिति तदर्थः । अष्टाभिर्विकर्षतीत्यत्र भकारादिकार उदात्तः । 'अनुदात्तं पदमेकवर्जम्' इति शिष्टमनुदात्तम् । दीर्घादिति विशेषणात् अष्टभिरित्यत्र आत्वाभावस्थले भिस उदात्तत्वन्न भवति । किन्तु मध्योदात्तत्वमेव । झल्युपोत्तममित्यस्यानुवृत्तेः । षट्चतुर्भ्यो या झलादिविभक्तिः तदन्ते पदे विद्यमानमुपोत्तममुदात्तं स्यादिति तदर्थः । यदि तु अष्टन आत्वं नित्यं स्यात् तर्हि अष्टभिरिति ह्रस्वान्तव्यावृत्तये क्रियमाणदीर्घग्रहणमनर्थकं स्यात् । व्यावर्त्याभावात् । आत्वस्य विकल्पितत्वे तु तदभावपक्षे अष्टभिरिति व्यावर्त्यस्य सत्त्वात् दीर्घग्रहणमर्थवत् । अतो दीर्घग्रहणमष्टन आत्वस्य वैकल्पिकत्वे ज्ञापकमित्यर्थः । **अष्टाविति** ॥ अष्टन्शब्दात् जश्शसोरौश् । शित्त्वात् सर्वादेशः । अष्टाभ्य इति निर्देशात्

अष्टानाम्। अष्टासु। आत्वाभावे। अष्ट। अष्ट। इत्यादि पञ्चवत्। गौणत्वे त्वात्वाभावे राजवत्। शसि प्रियाष्ट्नः। इह पूर्वस्मादपि विधावल्लोपस्य स्थानिवद्भावान्न ष्टुत्वम्। कार्यकालपक्षे बहिरङ्गस्याल्लोपस्यासिद्धत्वाद्वा।

नकारस्यात्वं, सवर्णदीर्घः, वृद्धिरिति भावः। **परमाष्टाविति**॥ 'अष्टाभ्य औश्' इत्यस्य आङ्गत्वात्तदन्तेऽपि प्रवृत्तिरित्यर्थः। **अष्टभिरिति**॥ भिसादौ आत्वे सवर्णदीर्घः। **अष्टानामिति**॥ आदौ नुटि कृते सति हलादित्वादात्वम्। नच नान्तत्वप्रयुक्तषट्संज्ञकशब्दसन्निपातमुपजीव्य प्रवृत्तस्य नुटः तद्विघातकमात्वं प्रति कथन्निमित्तत्वमिति वाच्यम्। नँहि षट्सन्निपातेन जातस्य नुटः आत्वविघातकत्वम्। 'शमामष्टानां दीर्घश्यनि' इत्यादिनिर्देशेन अत्र सन्निपातपरिभाषायाः अनित्यत्वाश्रयणादिति भावः। **आत्वाभावे इति**॥ 'अष्टनो दीर्घात्' इति दीर्घग्रहणेनात्वविकल्पस्य ज्ञापितत्वादिति भावः। यद्यपि 'अष्टनो दीर्घात्' इति सूत्रे शसादिविभक्तिषु परतः स्वरविधायके दीर्घग्रहणं शसादिष्वेवात्वविकल्पं ज्ञापयितुं शक्नोति। ननु जसि। तथापि ज्ञापकस्य सामान्यापेक्षत्वाज्जस्यप्यात्वविकल्प इति भावः। प्रियाः अष्टौ यस्येति बहुव्रीहौ प्रियाष्ट्नशब्दो विशेष्यनिघ्नः एकद्विबहुवचनान्तः। तत्र विशेषमाह। **गौणत्वे त्विति**॥ अष्टन्शब्दार्थस्याप्राधान्ये सतीत्यर्थः। **आत्वाभावे इति**॥ 'अष्टनो दीर्घात्' इति दीर्घग्रहणेनात्वस्य वैकल्पिकत्वज्ञापनादिति भावः। **राजवदिति**॥ प्रायेणेति शेषः। प्रियाष्टा, प्रियाष्टानौ, प्रियाष्टानः। प्रियाष्टानम्, प्रियाष्टानौ। **शसि प्रियाष्ट्नः इति**॥ 'अल्लोपोऽनः' इत्यकारलोपः। ननु कृते अल्लोपे नकारस्य ष्टुत्वेन णत्वं कुतो न स्यादित्यत आह। **इहेति**॥ इहाल्लोपस्य स्थानिवद्भावान्न ष्टुत्वमित्यन्वयः। अल्लोपस्य स्थानिवत्त्वे सति अकारव्यवहितत्वान्न ष्टुत्वमिति भावः। ननु "स्थानिनि सति यत्कार्यं तदेवादेशेऽतिदिश्यते। स्थानिनि सति यत्कार्यं न भवति तदादेशे न भवति" इत्येवं कार्याभावस्तु नातिदिश्यते। अन्यथा नायक इत्यादौ आयाद्यभावप्रसङ्गादिति स्थानिवत्सूत्रे स्थितम्। तस्मादल्लोपस्य स्थानिवत्त्वात् न ष्टुत्वमित्यनुपपन्नम्। 'अचः परस्मिन्' इति सूत्रन्तु यद्यपि स्थानिनि सति यत्कार्यन्न भवति तदादेशेऽपि न भवतीत्येवं कार्याभावस्यातिदेशिकम्। तथापि न तस्यात्र प्रवृत्तिरस्ति। स्थानिभूतादचः पूर्वस्यैव विधौ तत्प्रवृत्तेः। इह च स्थानिभूतादचः परस्यैव ष्टुत्वप्रवृत्तेरित्यत आह। **पूर्वस्मादपि विधाविति**॥ स्थानिभूतादचः पूर्वस्मात् परस्यापि विधौ स्थानिवत्त्वाभ्युपगमादित्यर्थः। 'नच पूर्वत्रासिद्धीये न स्थानिवत्' इति निषेधशङ्क्यः। 'तस्य दोषस्संयोगादिलोपलत्वणत्वेषु' इति तन्निषेधात्। 'अट्कुप्वाङ्' इति णत्वन्तु न शङ्क्यम्। टकारेण व्यवधानात्। शब्दकौस्तुभे तावत् 'तस्य दोष' इत्यत्र णत्वग्रहणम्मास्त्वित्युक्तम्। तद्रीत्या आह। **बहिरङ्गस्याल्लोपस्यासिद्धत्वाद्वेति**॥ अल्लोपः अङ्गसञ्ज्ञाभसंज्ञापेक्षत्वाद्बहिरङ्गः। ष्टुत्वन्तु तदनपेक्षत्वात् अल्पापेक्षत्वादन्तरङ्गः। तस्मिन् कर्तव्ये बहिरङ्गस्याल्लोपस्यासिद्धत्वादकारव्यवहितत्वात् न ष्टुत्वमित्यर्थः। यथोद्देशपक्षे 'असिद्धं बहिरङ्गम्' इति षाष्ठीं परिभाषां प्रति श्चुत्वस्यासिद्धतया अन्तरङ्गाभावेन परिभाषाया अप्रवृत्तेः कथमिहाल्लोपस्यासिद्धत्वमित्यत आह। **कार्यकालपक्षे इति**॥ लक्ष्यानुरोधादिह यथोद्देश-

प्रियाष्ट्ना इत्यादि । जश्शसोरनुमीयमानमात्वं प्राधान्य एव । न तु गौणतायाम् । तेन प्रियष्ट्नो हलादावेव वैकल्पिकमात्वम् । प्रियाष्टाः । प्रियाष्टाभ्याम् । प्रियाष्टाभिः । प्रियाष्टाभ्यः । प्रियाष्टाभ्यः । प्रियाष्टासु ।

"प्रियाष्ट्नो राजवत्सर्वं हाहावच्चापरं हलि ।"

इति नान्ताः ।

पक्षो नाश्रीयते इत्यन्यत्र विस्तरः । अथ प्रियाष्टन्शब्दस्यात्वपक्षे विशेषमाह । **जश्शसोरिति** ॥ 'अष्टाभ्य औश्' इति जश्शसोरौशादेशविधौ कृतात्वनिर्देशात् ज्ञाप्यमानमात्वमष्टन्शब्दस्य प्राधान्ये सत्येव भवति । न तूपसर्जनत्वेऽपि । अष्टाभ्य इति बहुवचननिर्देशात् । "अन्यथा हाह इति पञ्चम्यन्तवत् 'अष्ट औश्' इति निर्दिशेत्" इति 'ष्णान्ता षट्' इति सूत्रे भाष्ये स्पष्टम् । ततः किमित्यत आह । **तेनेति** ॥ अष्टन्शब्दस्य गौणतायां जश्शसोर्विषये आत्वाभावेनेत्यर्थः । **हलादावेवेति** ॥ 'अष्टन आ विभक्तौ' इत्यत्र अष्टन इत्येकवचननिर्देशेन अष्टन्शब्दार्थस्य प्राधान्याश्रयणे मानाभावादिति भावः । 'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः' इत्यपि नात्र प्रवर्तते । तथा सति 'अष्टाभ्य औश्' इत्यत्र बहुवचनवैयर्थ्यादिति बोध्यम् । हलादावेवेत्येवकारेण जश्शसोरप्यात्वस्य पक्षेऽपि व्यावृत्तिरुक्तैवानूद्यते । औङादौ तु हलादित्वाभावादेव आत्वस्य न प्रसक्तिः । **प्रियाष्टाः इति** ॥ सौ हलि 'अष्टन आ विभक्तौ' इत्यात्वे रुत्वविसर्गौ इति भावः । 'षड्भ्यो लुक्' इति, 'षट्चतुर्भ्यः' इति च, गौणतायां न प्रवर्तत इति च प्रागुक्तं न विस्मर्तव्यम् । तथा च अजादौ सर्वत्र राजवदेव रूपाणि । हलादिषु पक्षे आत्वमिति स्थितम् । तदेतत्सङ्गृह्णाति । **प्रियाष्ट्नो राजवदिति** ॥ प्रियाष्टन्शब्दस्याजादिषु विभक्तिषु राजवदेव सर्वं रूपम् । हलादिषु विभक्तिषु तु हाहाशब्दवदन्यच्च रूपम् । चकाराद्राजवदपि । तदित्थमत्र रूपाणि । प्रियाष्टाः । प्रियाष्टा, प्रियाष्टानौ, प्रियाष्टानः । प्रियाष्टानम्, प्रियाष्टानौ । प्रियाष्ट्ना । प्रियाष्टाभ्याम्–प्रियाष्टभ्याम् । प्रियाष्टाभिः–प्रियाष्टभिः । प्रियाष्ट्ने । प्रियाष्टाभ्याम्–प्रियाष्टभ्याम् । प्रियाष्टाभ्यः–प्रियाष्टभ्यः । प्रियाष्ट्नः, प्रियाष्टाभ्याम्–प्रियाष्टभ्याम् । प्रियाष्टाभ्यः–प्रियाष्टभ्यः । प्रियाष्ट्नः । प्रियाष्ट्नोः । प्रियाष्ट्नाम् । प्रियाष्ट्नि–प्रियाष्टनि । प्रियाष्ट्नोः । प्रियाष्टासु–प्रियाष्टसु । वस्तुतस्तु 'ष्णान्ता षट्' इति सूत्रे भाष्ये 'अष्टन आ विभक्तौ' इत्यत्र हलीत्यपकर्षमुक्त्वा "प्रियाष्टौ, प्रियाष्टा इति न सिध्यति । प्रियाष्टानौ, प्रियाष्टान इत्येव प्राप्नोति" इति शङ्कित्वा "यथालक्षणमप्रयुक्ते" इति समाहितम् । "नैव वा लक्षणमप्रयुक्ते प्रवर्तते । प्रयुक्तानामेवान्वाख्यानात्" इति कैयटः । एवञ्च एषामनभिधानमेवोचितम् । अत एव 'अष्टाभ्य औश्' इति सूत्रे भाष्ये "अष्टन आत्वं इह वैकल्पिकम् । यदयमात्वभूतस्य ग्रहणं करोति अष्टाभ्य इति । अन्यथा अष्टन इत्येव ब्रूयात्" इत्युक्तम् । प्रियाष्टन्शब्दस्य लोके प्रयोगसत्वे तु तत्र गौणे औशादेशप्रवृत्त्यभावाय बहुवचननिर्देशस्यावश्यकत्वात् तदसङ्गतिः स्पष्टैव । तस्मात् "प्रियाष्टन्शब्दप्रयोगविचारस्सर्वोऽपि अभित्तिचित्रायितः" इति शब्देन्दुशेखरे प्रपञ्चितम् ॥

इति नान्ताः ।

॥ अथ हलन्तपुल्लिङ्गे धकारान्तप्रकरणम् ॥

भष्भावः। जश्त्वचर्त्वे। भुत्–भुद्, बुधौ, बुधः। बुधा। भुद्भ्याम्। भुत्सु।

इति धान्ताः।

॥ अथ हलन्तपुल्लिङ्गे जकारान्तप्रकरणम् ॥

३७३। ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च। (३-२-५९)

एभ्यः क्विन् स्यात्। अलाक्षणिकमपि किञ्चित्कार्यं निपातनाल्लभ्यते। निरुपपदाद्युजेः क्विन्। कनाविताौ।

अथ धकारान्ताः निरूप्यन्ते॥ 'बुध अवगमने' कर्तरि क्विप्। बुध् इति धकारान्तशब्दः। ततस्सुबुत्पत्तिः। सौ विशेषमाह। **भष्भावः इति**॥ हल्ङ्यादिना सुलोपे सति प्रत्ययलक्षणमाश्रित्य सकारपरकत्वाद्वा पदान्तत्वाद्वा 'एकाचो बशः' इति बकारस्य भष्भकार इत्यर्थः। **जश्त्वचर्त्वे इति**॥ 'वाऽवसाने' इति चर्त्वविकल्प इति भावः। भ्यामादौ 'स्वादिषु' इति पदत्वात् भष् जश्त्वम्। भुद्भ्याम्। भुद्भिः। भुद्भ्यः। भुत्सु॥

इति धान्ताः।

अथ जकारान्ताः निरूप्यन्ते। अथ यज्शब्दस्य व्युत्पत्तिन्दर्शयितुमाह। **ऋत्विग्दधृक्**॥ धातोरित्यधिकृतं स्पृशोऽनुदके क्विन्नित्यनुवर्तते। पञ्चम्यर्थे षष्ठी। तदाह। **एभ्यः इति**॥ ऋतौ उपपदे यज्धातोः, धृष्धातोः, सृज्धातोः, दिश्धातोः, ष्णिह्धातोः, अञ्चुधातोः, युज्धातोः, क्रुञ्च्धातोश्चेत्यर्थः। ननु ऋत्विक्, दधृक्, इत्यादौ कुत्वाद्वित्वादि कुत इत्यत आह। **अलाक्षणिकमपीति**॥ लक्षणानि सूत्राणि, तद्विहितं कार्यं लाक्षणिकम्। सूत्रतः प्रत्यक्षानुपदिष्टमपि कार्यं निपातनात् सिद्धरूपनिर्देशात् लभ्यत इत्यर्थः। तत्र ऋतावुपपदे यजेः क्विन्। तस्य कित्त्वात् 'वचिस्वपियजादीनाम्' इति सम्प्रसारणं 'व्रश्च' इति षत्वापवादः कुत्वञ्च। धृषेः क्विनि द्वित्वमन्तोदात्तत्वञ्च। सृजेः कर्मणि क्विन्। अमागमाश्च। दिशेः कर्मणि क्विन्। उत्पूर्वात् स्निहेः क्विन्, उदो दलोपष्षत्वञ्च। अञ्चेस्सुप्युपपदे क्विन्। युजेः केवलात् क्विन् नलोपाभावश्च निपात्यते। यद्यपि अञ्चेः केवलस्यैवोपादानम्। तथाप्युष्णिक्शब्दसाहचर्यात् सोपपदस्यैवाञ्चेर्ग्रहणमित्याहुः। निरुपपदात् क्विन्। विधिफलं हि नुमो नस्य कुत्वमेव नुम् च असमास एव वक्ष्यते। समासे तु सुयुगित्यादौ जस्य 'चोः कुः' इति कुत्वेनैव सिद्धतया क्विनि क्विपि च विशेषाभावादिति भावः। **कनावितावि ति**॥ लशक्वतद्धित इति हलन्त्यमिति

३७४ । कृदतिङ् । (३-१-९३)

सन्निहिते धात्वधिकारे तिङ्भिन्नः प्रत्ययः कृत्संज्ञः स्यात् ।

३७५ । वेरपृक्तस्य । (३-१-६७)

अपृक्तस्य वस्य लोपः स्यात् । 'कृत्तद्धित—' (सू १७९) इति प्रातिपदिकत्वात्स्वादयः ।

३७६ । युजेरसमासे । (७-१-७१)

युजेस्सर्वनामस्थाने नुम्स्यादसमासे । सुलोपः 'संयोगान्तलोपः' (सू ५४) ।

३७७ । किन्प्रत्ययस्य कुः । (८-२-६२)

किन्प्रत्ययो यस्मात्तस्य कवर्गोऽन्तादेशः स्यात्पदान्ते । नस्य कुत्वेनानु-

---

च सूत्राभ्यामिति शेषः । वकारादिकारस्तु उच्चारणार्थः । अथ किन्नन्तस्य 'कृत्तद्धितं' इति प्रातिपदिकत्वं वक्तुं किनः कृत्संज्ञां दर्शयति । **कृतिङ्** ॥ धातोरित्यधिकृतम् । प्रत्यय इति च विहितः प्रत्यय इति लभ्यते । तदाह । **सन्निहिते धात्वधिकारे इति** ॥ धातोरिति विहितविशेषणम् । धातोरित्यधिकृत्य विहित इति यावत् । तेन णिजादिनिरासः । युज् व् इति स्थिते । **वेरपृक्तस्य** ॥ 'लोपो व्योः' इत्यतः लोप इत्यनुवर्तते । उत्सृष्टानुबन्धास्सर्वे किबादयो वेरित्यनेन गृह्यन्ते । उकार उच्चारणार्थः । अपृक्तग्रहणात् । तदाह । **अपृक्तस्य वस्येति** ॥ अपृक्तस्येति किम् । जाग्रविः । किनः । कृत्संज्ञायाः प्रयोजनमाह । **कृत्तद्धितेति** ॥ **युजेरसमासे** ॥ उगिदचामित्यतः सर्वनामस्थान इत्यनुवर्तते । 'इदितो नुम् धातोः' इत्यतो नुमिति च । तदाह । **नुम्स्यादित्यादिना** ॥ युन् ज् इति स्थिते प्रक्रियां दर्शयति । **सुलोपः इति** ॥ परत्वात्पूर्वं नुमिततो हल्ङ्यादिलोप इति भावः । **संयोगान्तलोप इति** ॥ जकारस्येति शेषः । **किन्प्रत्ययस्य कुः** ॥ पदस्य इत्यधिकृतम् । 'झलाञ्जशोऽन्ते' इत्यतः अन्त इत्यनुवर्तते । किन् प्रत्ययो यस्मात् सः किन्प्रत्ययः तस्येति बहुव्रीहिः । किन्नन्तस्येति तु नार्थः । तथासति किनः कुरित्येव ब्रूयात् । प्रत्ययग्रहणपरिभाषया किन्नन्तस्येत्यर्थलाभात् । तदाह । **किन्प्रत्ययो यस्मादित्यादिना** ॥ बहुव्रीहेः प्रयोजनन्तु घृतस्पृशब्दनिरूपणे मूल एव वक्ष्यते । कुरिति कवर्गो गृह्यते । उदित्त्वात् अणुदित्सूत्रे अप्रत्यय इत्येतत् अणैव सम्बध्यते । नतु उदिता । उदित्करणसामर्थ्यात् । तेन कुरिति विधीयमानोपि सवर्णग्राहकः । ननु नकारस्य कुत्वे कखगघङाः पञ्चापि पर्यायेण प्राप्नुयुः । स्थानत आन्तर्यस्य पञ्चस्वप्यभावात् । स्पृष्टप्रयत्नत आन्तर्यस्य पञ्चस्वप्यविशिष्टत्वात् घोषसम्वारनादवता अल्पप्राणवताच्च । नकारेण गकारस्यापि आन्तर्यसत्वात् । अत आह । **नस्येति** ॥ नासिकास्थानत

नासिको ङकारः। युङ्। 'नश्चापदान्तस्य—' (सू १२३) इति नुमोऽनुस्वारः, परसवर्णः। तस्यासिद्धत्वात 'चोः कुः' (सू ३७८) इति कुत्वं न। युञ्जौ, युञ्जः। युञ्जम्, युञ्जौ, युजः। युजा। युग्भ्याम इत्यादि। 'असमासे' किम्।

३७८। चोः कुः। (८-२-३०)

चवर्गस्य कवर्गः स्याज्झलि पदान्ते च। इति कुत्वम्। किन्प्रत्ययस्य—' (सू ३७७) इति कुत्वस्यासिद्धत्वात। सुयुक्–सुयुग्, सुयुजौ, सुयुजः। 'युजेः' इति धातुपाठपठितेकारविशिष्टस्यानुकरणम्, न त्विका नि-

---

आन्तर्यादिति भावः। **युङिति** ॥ युजिर्योगे। रुधादिः। युनक्तीति युङ्। नुमि कृते तदीयनकारस्य 'चोः कुः' इति कुत्वं न प्राप्नोतीति किन्प्रत्ययस्येत्यारम्भः। अथ औजसादिषु विशेषमाह। **नश्चेति** ॥ **नुमः इति** ॥ 'युजेरसमासे' इति विहितस्येति शेषः। **परसवर्णः इति** ॥ 'अनुस्वारस्य ययि' इति परसवर्णो ञकारः। नासिकास्थानत आन्तर्यादिति भावः। तेन युञ्जाविल्यादि सिद्धम्। नन्विह ञकारस्य झलि जकारे परे 'चोः कुः' इति कुत्वं कुतो न स्यादित्यत आह। **तस्येति** ॥ परसवर्णस्येत्यर्थः। **युग्भ्यामिति** ॥ 'स्वादिषु' इति पदत्वाज्जकारस्य गकार इति भावः। युक्षु। असमास इत्यस्य व्यावर्त्यं सुयुज्शब्दं कथयिष्यन् तत्र विशेषमाह। **चोः कुः** ॥ 'झलो झलि' इत्यतो झलीत्यनुवर्तते। पदस्येत्यधिकृतम्। 'स्कोस्संयोगाद्योः' इत्यतोऽन्ते इत्यनुवर्तते। तदाह। **चवर्गस्येति** ॥ ननु 'चोः' इत्यत्र उकारस्य उपदेशाभावात् इत्त्वाभावेन उदित्त्वाभावात् कथमिह सवर्णग्रहणमिति चेत्, चोः इत्युकारान्तग्रहणसामर्थ्यादेव तत्र उकारस्य इत्त्वाभ्यनुज्ञानात्। अन्यथा 'चः कुः' इत्येव ब्रूयात् इति। **कुत्वमिति** ॥ सुयुज्शब्दे जकारस्य कुत्वं गकारः। घोषसंवारनादाल्पप्राणसाम्यात् यथासङ्ख्यसूत्राच्चेति भावः। नन्विह 'क्विन्प्रत्ययस्य' इत्येव कुत्वं कुतो न स्यात्। यद्यपि सुपूर्वाद्युजेः 'सत्सूद्विष' इत्यादिना क्विपि उपपदसमासे सुयुज्शब्दः न क्विन्नन्तोऽयम्। निरुपपदाद्युजेः क्विन्निति अनुपदमेवोक्तत्वात्। तथापि क्विन् प्रत्ययो यस्मात् इति बहुव्रीह्याश्रयणात् सम्प्रति क्विबन्तत्वेऽपि अनेनैव कुत्वमित्यत आह। **क्विन्प्रत्ययस्येति कुत्वस्यासिद्धत्वादिति** ॥ तथाचात्र 'चोः कुः' इत्येव न्याय्यमिति भावः। **सुयुक्–सुयुगिति** ॥ 'वावसाने' इति चर्त्वविकल्पः। ननु युक् इत्यपि रूपमिष्टं कथं सिध्येत्। क्विनि नुमि युङ्त्वेवापत्तेः। नच 'ऋत्विक्' इत्यादिसूत्रे 'युजेरसमासे' इति सूत्रे च युजीति इकारविशिष्टस्यैव निर्देशात् 'युज समाधौ' इति दैवादिकस्य अकारान्तस्याग्रहणात् ततः क्विप् च, इति क्विपि नुमभावे कुत्वे युक् इति सिध्यतीति वाच्यम्। 'इक्श्तपौ धातुनिर्देशे' इति इक्प्रत्ययान्तस्य उभयत्रापि सम्भवेन उभाभ्यां क्विनि नुमि युङ्त्वेवापत्तेरित्यत आह। **युजेरिति** ॥ उपलक्षणमेतत्। 'युजेरसमासे' इति सूत्रे युजीति ऋत्विगादिसूत्रे युजीति च धातुपाठे 'युजिर् योगे' इति इकारविशिष्टः यः पठितः तस्यैव रेफशि-

र्देशः। तेनेह न। युज्यते समाधत्ते इति युक्। 'युज समाधौ' दैवादिक आत्मनेपदी। संयोगान्तलोपः। खन्, खञ्जौ, खञ्जः, इत्यादि। 'व्रश्च—' (सू २९४) इति षत्वम्। जश्त्वचर्त्वे राट्–राड्, राजौ, राजः। राट्त्सु–राट्सु। एवं विभ्राट्। देवेट्, देवेजौ, देवेजः। विश्वसृट्–विश्वसृड्, विश्वसृजौ, विश्वसृजः। इह सृजियज्योः कुत्वं नेति क्विबे वक्ष्यते। परिमृट्। षत्वविधौ राजिसाहचर्यात् 'टु भ्राजृ दीप्तौ' इति फणादिरेव गृह्यते। यस्तु 'एजृ भ्रेजृ भ्राजृ दीप्तौ' इति तस्य कुत्वमेव। विभ्राक्–विभ्राग्। विभ्राग्भ्याम् इत्यादि। 'परौ व्रजेः षः पदान्ते' (उ २१७)। परावुपपदे व्रजेः क्विप्स्यादीर्घश्च पदान्तविषये षत्वं च। परित्यज्य सर्वं व्रजतीति परिव्राट्, परिव्राजौ, परिव्राजः।

रस्कतया ग्रहणम्। नत्विका निर्देशः। व्याख्यानादित्यर्थः। ततः किमित्यत आह। **तेनेति**॥ 'खजि गतिवैक्लव्ये'। क्विप्, इदित्त्वान्नुम्। 'नश्चापदान्तस्य' इत्यनुस्वारः, परसवर्णो ञकारः। खञ्जशब्दः। तस्य विशेषमाह। **संयोगान्तेति**॥ हल्ङ्यादिना सुलोपे जकारस्य संयोगान्तलोपः। ततो निमित्तापायात् अनुस्वारपरसवर्णयोर्निवृत्तिः। खन् इति रूपमित्यर्थः। 'अनिदिताम्' इति नलोपस्तु न। इदित्त्वात्। 'राजृ दीप्तौ' इत्यस्मात् क्विपि राज्शब्दः। तस्य विशेषमाह। **व्रश्चेति**॥ हल्ङ्यादिना सुलोपे 'व्रश्च' इति षत्वम्। जश्त्वेन डकारः। 'वावसाने' इति चर्त्वविकल्पः। भ्यामादौ 'स्वादिषु' इति पदान्तत्वात् षत्वं जश्त्वञ्च। राड्भ्यामित्यादि। 'डस्सि धुट्' इति विकल्पमत्वा आह। **राट्त्सु–राट्स्विति॥ एवं विभ्राडिति॥** राज्शब्दवत् षत्वादीत्यर्थः। 'टु भ्राजृ दीप्तौ' क्विप्। विशिष्य भ्राजत इति विभ्राट्। देवान् यजत इति विग्रहे क्विपि यजादित्वात् 'वचिस्वपि' इति सम्प्रसारणम्। आद्गुणः। **विश्वसृडिति**॥ 'सृज विसर्गे' क्विपि 'व्रश्च' इति षत्वादि। ननु क्विबन्तेऽपि देवेज्शब्दे विश्वसृज्शब्दे च क्विन् प्रत्ययो यस्मादिति बहुव्रीह्याश्रयणाद्वत्विक्शब्दवत् कुत्वं कुतो न स्यादित्यत आह। **इहेति**॥ 'सृजिदृशोः' इति सूत्रे काम्यच्सूत्रे च विश्वसृड्भ्यामिति उपयट्काम्यतीति च भाष्यप्रयोगात् 'क्विन्प्रत्ययस्य' इति कुत्वनेत्यर्थः। **परिमृडिति**॥ 'मृजूशुद्धौ' क्विप्। 'क्ङिति च' इति निषेधात् 'मृजेर्वृद्धिः' इति न भवति। 'व्रश्च' इति षत्वम्। परिमार्ष्टीति परिमृट्। अथ विभ्रागिति कुत्वं साधयितुमाह। **षत्वविधाविति**॥ व्रश्चादिसूत्रे इत्यर्थः। अथ परिव्राज्शब्दं व्युत्पादयति। **परौ व्रजेः**॥ औणादिकसूत्रमेतत्। 'क्विब्वचिप्रच्छि' इत्यादिपूर्वसूत्रात् क्विबिति दीर्घ इति चानुवर्तते। पदान्त इति ष इत्यनेनैव सम्बध्यते। ननु क्विब्दीर्घाभ्यामपि, व्याख्यानात्। तदाह। **परावुपपदे इत्यादिना॥ षत्वञ्चेति॥** 'चोः कुः' इत्यस्यापवाद इति भावः। विश्वस्मिन् राजते इत्यर्थे 'सत्सूद्विष' इत्यादिना क्विपि उपपदसमासे विश्वराज्शब्दः।

३७९। विश्वस्य वसुराटोः। (६-३-१२८)

विश्वशब्दस्य दीर्घोऽन्तादेशः स्याद्वसौ राट्शब्दे च परे। विश्वं वसु यस्य स विश्वावसुः। राडिति पदान्तोपलक्षणार्थम्। चर्त्वमविवक्षितम्। विश्वाराट्–विश्वाराड्, विश्वराजौ, विश्वराजः। विश्वाराड्भ्याम् इत्यादि।

३८०। स्कोः संयोगाद्योरन्ते च। (८-२-२९)

पदान्ते झलि च परे यः संयोगस्तदाद्योः सकारककारयोर्लोपः स्यात्। भृट्–भृड्। सस्य श्चुत्वेन शः। तस्य जश्त्वेन जः। भृज्जौ, भृज्जः।

तस्य विशेषमाह। **विश्वस्य वसुराटोः**॥ 'ढ्रलोपे' इत्यतो दीर्घ इत्यनुवर्तते। तदाह। **विश्वशब्दस्येति**॥ **विश्वं वस्विति**॥ "वसुर्ग्रहेऽग्नौ योक्तेऽशौ वसु तोये धने मणौ" इति कोशः। विश्वावसुरित्युदाहरणं प्रासङ्गिकम्। "आदित्यविश्ववसवः" इत्यमरप्रयोगे तु न दीर्घः। 'नरे संज्ञायाम्' इत्यतस्संज्ञाग्रहणापकर्षात्। ननु राट्शब्दस्य कृतचर्त्वस्य निर्देशात् जश्त्वे सति दीर्घो न स्यादित्यत आह। **राडिति**॥ **अविवक्षितमिति**॥ व्याख्यानादिति भावः। **विश्वाराट्–विश्वाराडिति**॥ 'व्रश्च' इति षत्वम्। जश्त्वचर्त्वे। चर्त्वनिर्देशस्य पदान्तोपलक्षणत्वात् जश्त्वपक्षेऽपि दीर्घः। यद्यपि क्वेपादिकं 'व्रश्च' इति षत्वं 'चोः कुः' इति कुत्वात्परम्। तथापि चवर्गान्तव्रश्चादिविषये षत्वमपवादत्वान्नासिद्धम्। 'अपवादो वचनप्रामाण्यात्' इति। **विश्वराजाविति**॥ अपदान्तत्वान्न दीर्घ इति भावः। 'भ्रस्ज पाके' क्विप्। 'ग्रहिज्या' इति सम्प्रसारणम्। रेफस्य ऋकारः। 'सम्प्रसारणाच्च' इति पूर्वरूपम्। भ्रस्ज्शब्दः। ततस्सुबुत्पत्तिः। तत्र विशेषमाह। **स्कोः संयोग**॥ पदस्येत्यधिकृतम्। चकारात् 'झलो झलि' इत्यतो झलीत्यनुवर्तते। पदस्यान्ते इति झलीति च संयोगेत्यनेन सम्बध्यते। संयोगेति लुप्तषष्ठीकं पृथक्पदम्। स् च क् च स्कौ, तयोरिति विग्रहः। 'संयोगान्तस्य लोपः' इत्यतो लोप इत्यनुवर्तते। तदाह। **पदान्ते इत्यादिना**॥ अत्र काष्ठशक् स्थातेत्यत्र झल्परसंयोगादित्वात् ककारस्य लोपप्राप्तौ तन्निवृत्त्यर्थं वार्तिकं पठितम्। झलीत्यपहाय सडीति वक्तव्यमिति। सनस्सकारमारभ्य महिङो ङकारेण प्रत्याहारः। तदिदं वार्तिकं भाष्ये प्रत्याख्यातम् "काष्ठशगेव नास्ति कुतः काष्ठशक् स्थाता" इति। ककारान्तेभ्यो नास्ति क्विप्। अनभिधानादित्याशयः। नच पृथक्स्थातेत्यत्र ककारस्य लोपनिवृत्तये 'सडि' इति वार्तिकमावश्यकमिति वाच्यम्। "तत्प्रत्याख्यानपरभाष्यप्रामाण्यादेवज्ञातीयकसंयोगादिलोपप्राप्तियोग्योदाहरणानामप्रयोगावगमात्" इति शब्देन्दुशेखरे स्पष्टम्। **भृट्–भृडिति**॥ भ्रस्ज् स् इति स्थिते हल्ङ्यादिलोपे 'स्कोः' इति सकारलोपे जकारस्य व्रश्चादिना षत्वे जश्त्वचर्त्वे इति भावः। यद्यपि जकारस्य संयोगान्तलोपेऽपि सकारस्य 'व्रश्च' इति षत्वे जश्त्वचर्त्वयोः भृट्–भृड् इति सिध्यति। तथापि न्याय्यत्वादिह संयोगादिलोप एव भवति। **सस्येति**॥ भ्रस्ज् औ

'ऋत्विग्—' (सू ३७३) इत्यादिना ऋतावुपपदे यजेः क्विन् । क्विन्नन्तत्वात्कुत्वम् । ऋत्विक्—ऋत्विग्, ऋत्विजौ, ऋत्विजः । 'रात्सस्य' (सू २८०) इति नियमान्न संयोगान्तलोपः । ऊर्क्—ऊर्ग्, ऊर्जौ, ऊर्जः ।

इति जान्ताः ।

॥ अथ हलन्तपुल्लिङ्गे दकारान्तप्रकरणम् ॥

त्यदाद्यत्वं पररूपत्वं च ।

३८१ । तदोः सः सावनन्त्ययोः । (७-२-१०६)

इत्यादावचि पदान्तझल्परसंयोगादित्वाभावान्न संयोगादिलोपः । 'झलाञ्जश् झशि' इति जश्त्वस्यासिद्धत्वात् सकारस्य श्चुत्वमिति भावः । **तस्येति** ॥ शकारस्येत्यर्थः । तालुस्थानकत्वात् शकारस्य जकारः । नच जश्त्वस्यासिद्धत्वात् शकारस्य व्रश्चेति षत्वं शङ्क्यम् । षत्वं प्रति श्चुत्वस्यासिद्धत्वात् । भ्यामादौ तु 'स्वादिषु' इति पदान्तत्वात् संयोगादिलोपः । व्रश्चेति षत्वं जश्त्वञ्च । भ्यड्भ्यामित्यादि । **ऋत्विगित्यादिनेति** ॥ 'ऋ गतौ' औणादिकस्तुः । ऋतुः गमनं प्राप्तिः, दक्षिणाद्रव्यलाभो विवक्षितः । तस्मिन्निमित्ते यजन्ति यज्ञियव्यापारं कुर्वन्तीत्यर्थे ऋतावुपपदे यजधातोः क्विन् 'वचिस्वपि' इति यकारस्य सम्प्रसारणमिकारः । पूर्वरूपम् । यणादेशश्च । ऋत्विज् इति रूपम् । ततस्सोर्हल्ङ्यादिलोपः । एतावत् सिद्धवत्कृत्य आह । **क्विन्नन्तत्वात्कुत्वमिति** ॥ क्विन्प्रत्ययस्येत्यनेनेति शेषः । एतदर्थमेव क्विन्विधानमिति भावः । नच क्विपि 'चोः कुः' इति कुत्वेनैवैतत् सिध्यतीति वाच्यम् । 'चोः कुः' इति कुत्वं हि 'व्रश्च' इति षत्वेन अपवादत्वात् बाध्येत । क्विन्प्रत्ययस्येति कुत्वन्तु क्विन्विधिसामर्थ्यादेव न बाध्यते । यष्टेरित्यादौ षविधेश्चरितार्थत्वादिति भावः । **ऊर्क्-ऊर्ग् इति** ॥ 'ऊर्ज बलप्राणनयोः' चुरादिण्यन्तात् 'भ्राजभास' इत्यादिना क्विप्, णिलोपः । ऊर्ज् इति रूपम् । ततस्सोर्हल्ङ्यादिलोपः । 'चोः कुः' इति जस्य कुत्वं गकारः । 'वावसाने' इति चर्त्वविकल्पः । नच कुत्वे कर्तव्ये णिलोपस्य स्थानिवत्त्वं शङ्क्यम् । पदान्तविधौ तन्निषेधात् । 'पूर्वत्रासिद्धीये न स्थानिवत्' इति वचनाच्च ॥

इति जान्ताः ।

अथ दकारान्ताः निरूप्यन्ते । त्यद्शब्दस्तद्शब्दपर्यायः । तस्य विशेषमाह । **त्यदाद्यत्वं पररूपत्वमिति** ॥ सर्वत्र विभक्तावुत्पन्नायां 'त्यदादीनाम्' इति दकारस्यान्त्यस्य अकारः 'अतो गुणे' इति पररूपञ्चेत्यर्थः । ततश्च अदन्तवद्रूपाणीति भावः । त्य सू इति स्थिते । **तदोः सः सावनन्त्ययोः** ॥ **त्यदादीनामिति** ॥ 'त्यदादीनामः' इत्यतस्तदनुवृत्तेरिति

त्यदादीनां तकारदकारयोरनन्त्ययोः सः स्यात्सौ परे। स्यः। त्यौ। त्ये। त्यम्, त्यौ, त्यान्। सः, तौ, ते। परमसः, परमतौ, परमते। द्विपर्यन्तानामित्येव। नेह। त्वम्। न च तकारोच्चारणसामर्थ्यान्नेति वाच्यम्। अतित्वमिति गौणे चरितार्थत्वात्। संज्ञायां गौणत्वे चात्वसत्वे न। त्यद्, त्यदौ, त्यदः। अतित्यद्, अतित्यदौ, अतित्यदः। यः, यौ, ये। एषः, एतौ, एते। अन्वादेशे तु एनम्, एनौ, एनान्। एनेन। एनयोः। एनयोः।

३८२। ङे प्रथमयोरम्। (७-१-२८)

युष्मदस्मद्भ्यां परस्य ङे इत्येतस्य प्रथमाद्वितीययोश्चामादेशः स्यात्।

भावः। **तकारदकारयोरिति**॥ मृत्रे तश्च द् चेति विग्रहः। तकारादकार उच्चारणार्थ इति भावः। **सः स्यादिति**॥ आदेशेऽपि अकार उच्चारणार्थः। **त्यौ इति**॥ सावित्युक्तेर्न सत्वमिति भावः। **त्ये इति**॥ सर्वनामत्वात् जसश्शीभाव इति भावः। स्मायादीनामप्युपलक्षणम्। त्यम्, त्यौ, त्यान्। त्येन, त्याभ्याम्, त्येभ्यः। त्यस्मै, त्याभ्याम्, त्येभ्यः। त्यस्मात्। त्यस्य, त्ययोः, त्येषाम्। त्यस्मिन्, त्येषु। एवं तद्शब्दः। **परमसः इति**॥ अत्वादीनामाङ्गत्वात्तदन्तेऽपि प्रवृत्तेरिति भावः। ननु युष्मच्छब्दस्यापि त्यदादित्वात्तस्यापि प्रथमैकवचने त्वमित्यत्र 'तदोस्सः सौ' इति सत्वं कुतो न स्यादित्यत आह। **द्विपर्यन्तेति**॥ 'त्यदादीनामः' इत्यत्र पठितं 'द्विपर्यन्तानामेवेष्यते' इति वार्तिकं 'तदोःसःसौ' इत्यत्राप्यनुवर्तत एवेत्यर्थः। ततः किमित्यत आह। **नेहेति**॥ इहशब्दोविवक्षितमाह। **त्वमिति**॥ युष्मच्छब्दस्य द्विशब्दादुपर्येव सर्वादिगणे पाठादिति भावः। ननु 'त्वाहौ सौ' इति तकारोच्चारणसामर्थ्यादेव त्वमित्यत्र सत्वन्न भवति। अन्यथा स्वाहौ सौ, इत्येव ब्रूयात्। अतो द्विपर्यन्तानामित्यनुवृत्तिरिह व्यर्थेत्याशङ्क्य निराकरोति। **न चेति**॥ तकारोच्चारणसामर्थ्यादिह सत्वन्नेति न वाच्यमित्यन्वयः। **अतित्वमिति**॥ द्विपर्यन्तानामित्यननुवृत्तौ त्वमित्यत्रापि सत्वं स्यात्। नच 'त्वाहौ सौ' इति तकारोच्चारणानर्थक्यम्। त्वामतिक्रान्तः अतित्वमिति गौणे युष्मच्छब्दस्य त्वादेशे त्वाहाविति तकारोच्चारणस्य लब्धप्रयोजनत्वादित्यर्थः। न च अतित्वमित्यत्रापि सत्वप्रवृत्तेर्दुर्वारत्वात् त्वाहाविति तकारेणोच्चारणानर्थक्यं दुर्वारमिति वाच्यम्। सत्वस्य सर्वादन्तर्गणकार्यत्वेन गौणे तस्याऽप्रवृत्तेः। अत एवाह। **संज्ञायामिति**॥ **त्यदिति**॥ कस्यचिन्नामेदम्। **अतित्यदिति**॥ त्यमतिक्रान्त इति विग्रहः। **यः इति**॥ यद्शब्दस्य त्यदाद्यत्वे पररूपत्वे सर्वशब्दवद्रूपाणि। तकाराभावान्न सत्वम्। **एषः इति**॥ एतद्शब्दस्य त्यदाद्यत्वे पररूपत्वे सर्ववदेव रूपाणि। सौ तु तकारस्य सत्वमिति विशेषः। **अन्वादेशे त्विति**॥ 'द्वितीयाटौस्वेनः' इत्यस्य एतद्शब्देऽपि प्रवृत्तेरिति भावः। अथ युष्मदस्मद्शब्दयोः प्रक्रियां दर्शयति। **ङे प्रथमयोरम्**॥ 'युष्मदस्मद्भ्यां ङसोऽश्' इत्यतो युष्मदस्मद्भ्यामित्यनुवर्तते। परशब्दोऽध्याहर्तव्यः। ङे इति लुप्तषष्ठीकं पृथक्पदम्। प्रथमयोरिति

३८३ । मपर्यन्तस्य । (७-२-९१)

इत्यधिकृत्य ।

३८४ । त्वाहौ सौ । (७-२-९४)

युष्मदस्मदोर्मपर्यन्तस्य त्व अह इत्येतावादेशौ स्तः सौ परे ।

३८५ । शेषे लोपः । (७-२-९०)

आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरन्त्यस्य लोपः स्यात् । 'अतो गुणे' (सू १९१) । 'अमि पूर्वः' (सू १९४) त्वम् । अहम् । ननु 'त्वम् स्त्री' 'अहम् स्त्री' इत्यत्र 'त्व अम्' 'अह अम्' इति स्थिते अमि पूर्वरूपं परमपि बाधित्वान्तरङ्गत्वाट्टाप् प्राप्नोति । सत्यम् । अलिङ्गे युष्मदस्मदी । तेन स्त्रीत्वाभावान्न टाप् । यद्वा शेष इति सप्तमी स्थानिन्यधिकर-

---

प्रथमाद्वितीयाविभक्त्योर्लाक्षणिकामिति भाष्यम् । तदाह । **युष्मदस्मद्भ्यामित्यादिना** ॥ सोरमादेशे कृते 'न विभक्तौ' इति मस्य नेत्त्वम् । युष्मद् अम् अस्मद् अम् इति स्थितम् । **अधिकृत्येति** ॥ कार्याणि वक्ष्यन्ते इति शेषः । **त्वाहौ सौ** ॥ त्वश्च अहश्च त्वाहौ । मपर्यन्तस्येत्यधिकृतम् । 'युष्मदस्मदोरनादेशे' इत्यतो युष्मदस्मदोरित्यनुवर्तते । तदाह । **युष्मदस्मदोरित्यादिना** ॥ त्व अद् अम् अह अद् अम् इति स्थितम् । यद्यप्यत्र 'त्वमावेकवचने' इत्येव युष्मद्शब्दस्य त्वादेशसिद्धः । तथापि युष्मानतिक्रान्तः अतित्वमित्यत्र त्वादेशार्थमिह युष्मदस्मद्विधानम् । नहि तत्र 'त्वमावेकवचने' इत्यस्य प्रवृत्तिरस्ति । अत्र युष्मद्शब्दस्य बहुत्वविशिष्टे वृत्तेः । एकवचनशब्दो हि तत्र एकत्वविशिष्टवृत्तिवाची । ननु एकवचनसंज्ञकप्रत्ययवाचीत्यनुपदमेव वक्ष्यते । **शेषे लोपः** ॥ 'अष्टन आ विभक्तौ' इत्यतः आ इत्यनुवर्तते । विभक्तावित्यनुवृत्तं शेष इत्यनेनान्वेति । 'युष्मदस्मदोरनादेशे, द्वितीयायाश्च, प्रथमायाश्च द्विवचने भाषायां, 'योऽचि' इत्यात्वयत्वयोः प्रागुक्तत्वात्तद्विषयातिरिक्तविभक्तिरिह शेषशब्दार्थः । युष्मदस्मदोरिति चानुवृत्तम् । तदाह । **आत्वयत्वेति** ॥ अन्त्यस्येत्यलोऽन्त्यपरिभाषालभ्यम् । शेषग्रहणमिह विभक्तिविशेषणं स्पष्टार्थमेव । "विशेषविहिताभ्यामात्वयत्वाभ्यां स्वविषये बाधसम्भवात्" इति प्रकृतसूत्रे 'युष्मदस्मद्भ्यां ङसोऽश्' इति सूत्रे च भाष्यकैयटयोः स्पष्टम् । **अतो गुणे इति** ॥ पूर्वयोरकारयोः पररूपमिति भावः । त्व अम्, अह अम्, इत्यत्र पूर्वसवर्णदीर्घमाशङ्क्य आह । **अमि पूर्वः इति** ॥ अत्र शङ्कते । **नन्विति** ॥ "ननु चस्याद्विरोधोक्तौ" इत्यमरः । शङ्कायामिति यावत् । **अन्तरङ्गत्वादिति** ॥ 'अजाद्यतः' इति टापः परनिमित्तानपेक्षतया पररूपादन्तरङ्गत्वं बोध्यम् । अर्धाङ्गीकारेण परिहरति । **सत्यमिति** ॥ पररूपादन्तरङ्गष्टाबित्यङ्गीक्रियते । इह प्रवृत्तिस्तु तस्य नाङ्गीक्रियत इत्यर्थः । **अलिङ्गे युष्मदस्मदी इति** ॥ 'साम आकम्' इति सूत्रे भाष्ये पठितमेतत् । युष्मदस्मदी

णत्वविवक्षया। तेन मपर्यन्ताच्छेषस्य 'अद्' इत्यस्य लोपः स्यात्। स च परोऽप्यन्तरङ्गे अतो गुणे कृते प्रवर्तते। अदन्तत्वाभावान्न टाप्। परमत्वम्। परमाहम्। अतित्वम्। अत्यहम्।

३८६। युवावौ द्विवचने। (७-२-९२)

इति शब्दस्वरूपपरत्वान्नपुंसके। शब्दस्वरूपपरत्वादेव च 'त्यदादीनि सर्वैर्नित्यम्' इत्येकशेषोऽपि न। अत एव भाष्यप्रयोगात्। **तेनेति** ॥ अलिङ्गत्वेनेत्यर्थः। ननु 'ङे प्रथमयोः' इति सूत्रे भाष्ये पुंसि युष्मानस्मानित्यत्र 'तस्माच्छसो नः पुंसि' इति नत्वस्य सिद्धत्वात् 'शसो न' इति नत्वविधिवैयर्थ्यमाशङ्क्य स्त्रियान्नपुंसके च युष्मान् ब्राह्मणीः पश्य, अस्मान् ब्राह्मणीः पश्य, युष्मान् ब्राह्मणकुलानि पश्य, अस्मान् ब्राह्मणकुलानि पश्य, इत्यत्र नत्वार्थं 'शसो न' इति नत्वविधानमित्यादि स्थितम्। किञ्च स्वमोर्नपुंसकादित्यधिकारे 'नेतराच्छन्दसि' इति सूत्रे "नपुंसकादेशेभ्यो युष्मदस्मदोर्विभक्त्यादेशा विप्रतिषेधेन" इति वार्तिकतद्भाष्ययोः शिशीलुङ्नुम्भिर्नपुंसकविहितैस्त्वाहादियुष्मदस्मदादेशानां विप्रतिषेधः उपन्यस्तः। अतः युष्मदस्मदोरलिङ्गत्वमनुपपन्नम्। 'सामाकम्' इति सूत्रे "अलिङ्गे युष्मदस्मदी" इति भाष्यन्तु "पुंस्त्रीनपुंसकलिङ्गपदान्तरसमभिव्याहारं विना लिङ्गविशेषो युष्मदस्मच्छब्दाभ्यान्न प्रतीयते इत्येवम्परम्" इति तत्रैव भाष्ये स्पष्टम्। एवञ्च युष्मदस्मदोस्त्रीलिङ्गसत्वात् टाप् दुर्वार इत्यस्वरसादाह। **यद्वेति॥ अधिकरणत्वविवक्षयेति॥** 'विवक्षातः कारकाणि भवन्ति' इति वक्ष्यमाणत्वादिति भावः। यदि हि शेषे इति विभक्तिविशेषणं स्यात् तर्हि व्यर्थमेव स्यात्। आत्वयत्वाभ्यां विशेषविहिताभ्यां स्वविषये लोपस्य बाधसम्भवात्। अतः शेषस्येत्यर्थ आस्थेयः। ततः किमित्यत आह। **तेनेति** ॥ शेषस्य स्थाने इत्यर्थाश्रयणेनेत्यर्थः। **मपर्यन्तादिति** ॥ मपर्यन्तस्येत्यपकृष्टं पञ्चम्यन्ततया विपरिणम्यत इति भावः। एतच्च 'त्यदादीनामः' इति सूत्रे 'टिलोपष्टाबभावार्थः कर्तव्य इति स स्मृतः। अथवा शेषसप्तम्या शेषे लोपो विधीयत' इति वार्तिकतद्भाष्ययोः स्पष्टम्। नच मपर्यन्तस्य त्व इति अह इति चादेशे कृते शिष्टस्य अद् इत्यस्य मपर्यन्तात्परत्वन्नास्तीति वाच्यम्। त्वाहादेशयोः कृतयोः अदो लोपप्रवृत्तिवेळायां मपर्यन्ताच्छेषत्वाभावेऽपि त्वाहादेशप्रवृत्तेः पूर्वकालिकपर्यन्तत्वमादाय तदुपपत्तेः। नन्वस्तु मपर्यन्ताच्छेषस्य अदशब्दस्य लोपः। तथापि त्व अद्, अम् अह अद् अम् इति स्थिते पररूपापेक्षया परवाददो लोपे अदन्तत्वात् टाप् दुर्वार इत्यत आह। **स चेति** ॥ शेषे लोप इत्यर्थः। **अन्तरङ्गे इति** ॥ 'अतो गुणे' इत्यस्य बहिर्भूतविभक्त्यपेक्षलोपापेक्षया अन्तरङ्गत्वं बोध्यम्। **अदन्तत्वाभावादिति** ॥ त्व अद् अह अद् इत्यत्र पररूपे सति त्वद् अहद् इति स्थिते अदो लोपे त्व् अह् इत्यनयोरदन्तत्वाभावान्न टाबित्यर्थः। **परमत्वमिति** ॥ 'ङे प्रथमयोः' इत्यादीनामाङ्गत्वात् तदन्तविधिरिति भावः। **अतित्वमिति** ॥ 'ङे प्रथमयोः' इत्यादीनां गौणे अप्रवृत्तौ मानाभावादिति भावः। युष्मद् औ अस्मद् औ इति स्थिते 'ङे प्रथमयोः' इत्यमि कृते युष्मद् अम् अस्मद् अम् इति स्थिते। **युवावौ द्विवचने** ॥ 'युष्मदस्मदोरनादेशे' इत्यतो

द्वयोरुक्तौ युष्मदस्मदोर्मपर्यन्तस्य युवावौ स्तो विभक्तौ ।

३८७ । प्रथमायाश्च द्विवचने भाषायाम् । (७-२-८८)

इह युष्मदस्मदोराकारोऽन्तादेशः स्यात् । युवाम् । आवाम् । 'औङि' इत्येव सुवचम् । 'भाषायाम्' किम् । युवं वस्त्राणि । मपर्यन्तस्य (सू ३८३) किम् । साकच्कस्य मा भूत् । युवकाम् । आवकाम् । 'त्वया' 'मया' इत्यत्र 'त्व्या' 'म्या' इति मा भूत् । 'युवकाभ्याम्' 'आवकाभ्याम्' इति च न सिध्येत् ।

युष्मदस्मदोरित्यनुवर्तते । मपर्यन्तस्येत्यधिकृतम् । उक्तिर्वचनम् । द्वयोः वचनं द्विवचनम् । तत्र समर्थयोरित्यर्थः । द्वित्वविशिष्टार्थवाचिनोरिति यावत् । ननु द्विवचनसंज्ञके प्रत्यये परे इत्यर्थः । वचनग्रहणसामर्थ्यात् । अन्यथा द्वित्वे इत्येव ब्रूयात् । 'अष्टन आ विभक्तौ' इत्यतो विभक्तावित्यनुवृत्तौ सत्यां द्वित्वे या विभक्तिस्तस्यां परतः इत्यर्थलाभात् । तदाह । **द्वयोरुक्तावित्यादिना** ॥ द्वयोरुक्तावित्याश्रयणस्य फलमग्रे मूल एव स्पष्टीभविष्यति । युव अद् आव अद् इति स्थिते 'शेषे लोपः' इति प्राप्ते । **प्रथमायाश्च द्विवचने भाषायाम्** ॥ 'अष्टन आ विभक्तौ' इत्यतः आग्रहणमनुवर्तते । 'युष्मदस्मदोरनादेशे' इत्यतो युष्मदस्मदोः इति च । तदाह । **इहेति** ॥ भाषायां प्रथमाद्विवचने परे इत्यर्थः । भाषायामित्यस्य तु लौकिकव्यवहारे इत्यर्थः । **युवाम् । आवामिति** ॥ युव अद्, अम् आव अद् अम् इत्यत्र दकारस्य आत्वे पूर्वयोरकारयोः पररूपे ततस्सवर्णदीर्घे 'अमि पूर्वः' इति भावः । **औङीत्येव सुवचमिति** ॥ द्वितीयाद्विवचनेऽप्यात्वस्य इष्टत्वादिति भावः । **युवं वस्त्राणीति** ॥ युष्मद् औ, इति स्थिते मपर्यन्तस्य युवादेशे सति शेषलोपे रूपम् । **मपर्यन्तस्य किमिति** ॥ युष्मदस्मदोस्समस्तयोरेव युवावादेशयोः कृतयोरपि आत्वे पूर्वरूपे च युवाम् आवामिति सिद्धेरिति प्रश्नः । **साकच्कस्येति** ॥ 'अव्ययसर्वनाम्नाम्' इति टेः प्रागकचि युष्मकद् औ अस्मकद् औ इति स्थिते 'ङे प्रथमयोः' इत्यमि 'युवावौ द्विवचने' इति समस्तयोस्साकच्कयोस्तन्मध्यपतितन्यायेन युवावादेशयोः 'प्रथमायाश्च' इति दकारस्य आत्वे अमि पूर्वे च युवाम् आवाम् इत्येव स्यात् । ककारो न श्रूयेत । अतो मपर्यन्तस्येति वचनमित्यर्थः । ननु समुदायादेशत्वेऽपि 'ओकारसकारभकारादौ सुपि सर्वनाम्नष्टेः प्रागकच्, अन्यत्र सुबन्तस्य टेः प्राक्' इति व्यवस्थाया वक्ष्यमाणत्वाद्युवामावामिति परिनिष्ठितसुबन्तयोष्टेः प्रागकचि युवकाम् आवकामिति सिद्ध्यत्येव । अत्र साकच्कयोर्युवावादेशाप्रसक्तेरित्यस्वरसादाह । **त्वया, मयेति** ॥ यदि मपर्यन्तस्येति न स्यात् तदा 'त्वमावेकवचने' इति त्वमादेशौ समस्तयोस्स्याताम् । ततश्च तृतीयैकवचने युष्मद् आ, अस्मद् आ इति स्थिते समस्तयोः स्थाने त्वमादेशयोः त्व आ म आ इति स्थिते 'योऽचि' इति अकारस्य यत्वे त्व्या म्या इति स्यात् । अतो 'मपर्यन्तस्य' इति वचनम् । सति तस्मिन् मपर्यन्तस्य त्वमादेशयोः कृतयोः त्व अद् आ म अद् आ इति स्थिते अकारयोः पररूपे दकारस्य यत्वे च त्वया मया इति सिद्ध्यतीत्यर्थः ।

३८८ यूयवयौ जसि। (७-२-९३)

स्पष्टम्। यूयम्। वयम्। परमयूयम्। परमवयम्। अतियूयम्। अतिवयम्। इह शेषे लोपोऽन्त्यलोप इति पक्षे जसः शी प्राप्तः। 'अङ्गकार्ये कृते पुनर्नाङ्गकार्यम्' (प ९३) इति न भवति। 'ङे प्रथमयोः—' (सू ३८२) इत्यत्र मकारान्तरं प्रश्लिष्य 'अम् मान्त एवावशिष्यते, न तु विक्रियते' इति व्याख्यानाद्वा।

ननु 'योऽचि' इति सूत्रस्थाने 'अच्ये' इति सूत्रमस्तु। अजादिविभक्तौ युष्मदस्मदोरन्त्यस्य एकारः स्यादिति तदर्थः। तथाच त्वमयोस्समस्तादेशत्वेऽपि तदन्त्यस्य अकारस्य एत्त्वे अयादेशे च कृते त्वया मयेति सिध्यतीत्यस्वरसादाह। **युवकाभ्याम्, आवकाभ्याम् इति च न सिध्येदिति॥** असति मपर्यन्तवचने इति शेषः। "ओकारसकार" इत्यादिवचनेन भ्यामिटेः प्रागकचि तन्मध्यपतितन्यायेन साकच्कयोः स्थाने युवावादेशयोः युवाभ्यामावाभ्यामित्येव स्यात्। ककारो न श्रूयेत। युष्मकद् अस्मकद् इत्यत्र मपर्यन्तस्यैव युवावादेशयोस्तु 'युष्मदस्मदोरनादेशे' इत्यात्वे युवकाभ्याम् आवकाभ्यामिति निर्बाधमित्यर्थः। 'ङे प्रथमयोः' इति जसः अमि कृते विशेषमाह। **यूयवयौ जसि॥ स्पष्टमिति॥** युष्मदस्मदोर्मपर्यन्तस्य यूय वय इत्यादेशौ स्तो जसि परतः इति सुगममित्यर्थः। यूय अद् अम्, वय अद् अम् इति स्थिते पररूपे 'शेषे लोपः' इति मपर्यन्तान्छेषस्य अदो लोपे परिनिष्ठितं रूपमाह। **यूयम्। वयमिति॥ परमयूयमिति॥** यूयवयविधेराङ्गत्वात्तदन्तविधिरिति भावः। **अतियूयमिति॥** गौणत्वेऽपि तदप्रवृत्तौ मानाभावादिति भावः। अत्र शीभावमाशङ्क्य परिहरति। **इहेति॥** इह 'शेषे लोपः' इत्यन्त्यलोप इति पक्षे दकारस्य लोपे सति अवर्णान्तात् सर्वनाम्नः परत्वात् जसः शीभावः प्राप्तो न भवतीत्यन्वयः। कुत इत्यत आह। **अङ्गकार्ये इति॥** अङ्गाधिकारविहिते कार्ये कृते सति पुनः अङ्गाधिकारविहितं कार्यं न भवतीत्यर्थः। तेन त्वमित्यत्र पररूपे कृते 'अमि पूर्वः' इत्यस्य नानुपपत्तिः। 'ज्यादादीयसः' इति सूत्रे 'ज्ञाजनोर्जा' इति सूत्रे च 'अङ्गवृत्ते पुनर्वृत्तावविधिः' इति परिभाषा स्थिता। सा चात्र अर्थतः उपनिबद्धा। नच द्वाभ्यामित्यत्र त्यदाद्यत्वे कृते 'सुपि च' इति दीर्घो न स्यादिति वाच्यम्। द्वयोरेकस्येत्यादिनिर्देशेन तदनित्यत्वज्ञापनात्। प्रकृते च शेषलोपस्य आङ्गस्य प्रवृत्तत्वादाङ्गश्शीभावो न भवतीति भावः। ननु 'अङ्गकार्ये' इति परिभाषा नात्र प्रवर्तते। शीभावस्य अङ्गाधिकारविहितत्वेऽपि अङ्गाधिकरणकत्वाभावात्। 'अङ्गवृत्ते पुनर्वृत्तावविधिः' इति परिभाषास्वारस्येन तथैव प्रतीतेः। अतोऽत्र शीभावो दुर्वार इत्यस्वरसादाह। **ङे प्रथमयोरिति॥** 'ङे प्रथमयोरम्' इत्यत्र अम् म् इति मकारान्तरं प्रश्लिष्यते। अम् च म् चेति द्वन्द्वः। अन्त्यो मकारस्संयोगान्तलोपेन लुप्तः। प्रश्लिष्टश्च मकारः अमो विशेषणम्, तदन्तविधिः। मकारान्तः अम् स्यादिति लभ्यते। मकारान्तस्य अमः पुनर्मान्तत्वविधानात् अम् मान्त एव भवति। ननु तस्य विकारो भवतीति लभ्यते। अतो न शीभाव इत्यर्थः। वस्तुतस्तु मकारान्तरप्रश्लेषो

३८९ । त्वमावेकवचने । (७-२-९७)

एकस्योक्तौ युस्मदस्मदोर्मपर्यन्तस्य त्वमौ स्तो विभक्तौ ।

३९० । द्वितीयायाञ्च । (७-२-८७)

युष्मदस्मदोराकारः स्यात् । त्वाम् । माम् । युवाम् । आवाम् ।

३९१ । शसो न । (७-१-२९)

नेत्यविभक्तिकं पदम् । युष्मदस्मद्भ्यां परस्य शसो नकारः स्यात् । अमोऽपवादः । 'आदेः परस्य' (सू ४४) । 'संयोगान्तस्य लोपः' (सू ५४) । युष्मान् । अस्मान् ।

भाष्ये अदर्शनादुपेक्ष्यः । सन्निपातपरिभाषयैवात्र शीभावो न भवति । दकारस्य शेषलोपो हि आत्वयत्वेतरनिमित्तात्मकशेषविभक्त्यात्मकस्य अमः युष्मदस्मदोश्च सन्निपातमाश्रित्य प्रवृत्तः । ततश्शीभावे तु आद्गुणे यूये वये इति स्यात् । तत्र एकादेशस्य पूर्वान्तत्वे प्रकृत्यनुप्रवेशात् प्रत्ययसन्निपातभङ्गः । परादित्वे तु युष्मदस्मत्सन्निपातविरोधः इत्यलम् । अथ द्वितीयैकवचनस्य अमः 'ङे प्रथमयोः' इत्यमि कृते युष्मद् अम्, अस्मद् अम् इति स्थिते । **त्वमावेकवचने** ॥ 'युष्मदस्मदोरनादेशे' इत्यतो युष्मदस्मदोरित्यनुवर्तते । 'मपर्यन्तस्य' इत्यधिकृतम् । एकवचनशब्दो यौगिक एव । वचनग्रहणसामर्थ्यात् । तदाह । **एकस्येत्यादिना** ॥ त्व अद् अम्, म अद् अम् इति स्थिते । **द्वितीयायाञ्च** ॥ शेषपूरणेन सूत्रं व्याचष्टे । **युष्मदस्मदोरिति** ॥ 'युष्मदस्मदोरनादेशे' इत्यतः तदनुवृत्तेरिति भावः । **आकारः इति** ॥ 'अष्टन आ विभक्तौ' इत्यतस्तदनुवृत्तेरिति भावः । तथाच द्वितीयाविभक्तौ परतः युष्मदस्मदोराकारः स्यादिति फलति । 'अलोऽन्त्यस्य' इति दकारस्य भवति । त्व अ आ अम्, म अ आ अम् इति स्थिते पररूपे सवर्णदीर्घे अमि पूर्वरूपे च परिनिष्ठितं रूपमाह । **त्वाम् । मामिति** ॥ **युवाम् । आवामिति** ॥ पूर्ववत् 'द्वितीयायाञ्च' इत्यात्वमिति विशेषः । 'प्रथमायाश्च' इत्यस्य अत्राप्रवृत्तेः । अथ शसि विशेषमाह । **शसो न** ॥ 'ङे प्रथमयोः' इत्यतः अमित्यनुवर्तते । युष्मदस्मद्भ्यामिति च । युष्मदस्मद्भ्यां परस्य शसो अम् न स्यादिति लभ्यते । तथाच अमभावे 'द्वितीयायाञ्च' इत्यात्वे पूर्वसवर्णदीर्घे 'तस्माच्छसो नः पुंसि' इति नत्वे युष्मानिति यद्यपि पुंसि रूपं सिद्ध्यति । तथापि युष्मान् ब्राह्मणीः पश्य, अस्मान् ब्राह्मणीः पश्य, युष्मान् ब्राह्मणकुलानि पश्य, अस्मान् ब्राह्मणकुलानि पश्य, इति स्त्रीनपुंसकयोर्न सिद्ध्येत् । अतो नेदं सूत्रं शसः अमूनिषेधपरम् । किन्तु शसो नकारोऽत्र विधीयते इत्यभिप्रेत्य तर्हि शसो नः इति प्रथमा न श्रूयते इत्याशङ्क्य आह । **नेत्यविभक्तिकं पदमिति** ॥ लुप्तप्रथमाविभक्तिकमित्यर्थः । ततश्च फलितमाह । **युष्मदस्मद्भ्यामित्यादिना** ॥ **अमोऽपवादः इति** ॥ 'ङे प्रथमयोः' इति प्राप्ते एव नत्वविधेस्तदपवादता । युष्मद् अस्, अस्मद् अस् इति स्थिते 'द्वितीयायाञ्च' इत्यात्वे अनेन शसो नकारः । स च 'अलोऽन्त्यस्य' इति नान्त्यस्ये-

३९२। योऽचि। (७-२-८९)

अनयोर्यकारादेशः स्यादनादेशेऽजादौ परतः। त्वया। मया।

३९३। युष्मदस्मदोरनादेशे। (७-२-८६)

अनयोराकारः स्यादनादेशे हलादौ परे। युवाभ्याम्। आवाभ्याम्। युष्माभिः। अस्माभिः।

३९४। तुभ्यमह्यौ ङयि। (७-२-९५)

अनयोर्मपर्यन्तस्य तुभ्यमह्यौ स्तो ङयि। अमादेशः 'शेषे लोपः' (सू ३८५)। तुभ्यम्। मह्यम्। परमतुभ्यम्। परममह्यम्। अतितुभ्यम्। अतिमह्यम्। युवाभ्याम्। आवाभ्याम्।

त्याह। **आदेः परस्येति॥ संयोगान्तस्येति॥** अकारस्य नकारे कृते सकारस्य लोप इति भावः। यद्यपि शसः अमि कृतेऽपि अकारस्य नकारे मकारस्य संयोगान्तलोपे युष्मान् अस्मानिति सिध्यति। तथापि 'सत्यपि सम्भवे बाधनं भवति' इति न्यायान्नत्वस्य अमपवादत्वमाश्रितम्। किञ्च अमि कृते 'ङे प्रथमयोः' इत्यत्र मकारान्तरप्रश्लेषपक्षे अकारस्य नकारे मकारस्य प्रथमस्य संयोगान्तलोपो न स्यादित्यलम्। अथ तृतीया विभक्तिः। युष्मद् आ अस्मद् आ इति स्थिते। **योऽचि॥** 'अष्टन आ विभक्तौ' इत्यतः आ इति विभक्ताविति चानुवर्तते। अचीति विभक्तिविशेषणम्। तदादिविधिः। 'युष्मदस्मदोरनादेशे' इत्यनुवर्तते। तदाह। **अनयोरिति॥** युष्मदस्मदोरन्त्यस्येत्यर्थः। अचि किम्। युवाभ्याम्। **अनादेशे** किम्। त्वत्, मत्। 'पञ्चम्या अत्' इत्यादादेशे सति न यत्वम्। युष्मद् आ, अस्मद् आ इत्यत्र 'त्वमावेकवचने' इति मपर्यन्तस्य त्वमादेशयोः दकारस्य यत्वे पररूपे च रूपमिति भावः। **युष्मदस्मदोरनादेशे॥** 'अष्टन आ विभक्तौ' इत्यतः आ इति विभक्ताविति चानुवर्तते। 'रायो हलि' इत्यतो हलीत्यनुवृत्तं विभक्तिविशेषणम्। तदादिविधिः। तदाह। **अनयोरिति॥** युष्मदस्मदोरन्त्यस्येत्यर्थः। वस्तुतस्तु हलीति नानुवर्तनीयम्। 'योऽचि' इत्यजादौ यत्वविधानेन परिशेषादेव तत्सिद्धेः। **युवाभ्याम्। आवाभ्यामिति॥** युष्मद् भ्याम्, अस्मद् भ्याम् इति स्थिते, युवावादेशयोः दकारस्य आत्वे पररूपे सवर्णदीर्घ इति भावः। अत्र हलीत्यनुवृत्तौ 'योऽचि' इत्यज्ग्रहणम्मास्तु। हलादावात्वस्य विशेषविहितत्वादेव यत्वनिवृत्तिसिद्धेरिति भाष्ये स्पष्टम्। **युष्माभिः। अस्माभिरिति॥** 'युष्मदस्मदोरनादेशे' इत्यात्वे सवर्णदीर्घ इति भावः। अथ चतुर्थी विभक्तिः। युष्मद् ए, अस्मद् ए इति स्थिते 'त्वमावेकवचने' इति प्राप्ते। **तुभ्यमह्यौ ङयि॥** ङे इत्यस्य सप्तम्येकवचनं ङयीति 'युष्मदस्मदोरनादेशे' इत्यतः युष्मदस्मदोरित्यनुवर्तते। मपर्यन्तस्येत्यधिकृतम्। तदाह। **अनयोरिति॥** युष्मदस्मदोरित्यर्थः। **अमादेशः इति॥** 'ङे प्रथमयोः' इत्यनेनेति शेषः। 'शेषे लोपः' इति अदो दस्य वा लोप इत्यर्थः। 'अमि पूर्वः' इति मत्वाह। **तुभ्यम्। मह्यमिति॥ परमतुभ्यमिति॥** तुभ्यमह्यविध्योराङ्गत्वात्तद-

३९५ । भ्यसो भ्यम् । (७-१-३०)

भ्यसो भ्यम् अभ्यम् वा आदेशः स्यात्। आद्यः शेषे लोपस्यान्त्यलोपत्व एव। तत्राङ्गवृत्तपरिभाषया एत्त्वं न। अभ्यम् तु पक्षद्वयेऽपि साधुः युष्मभ्यम्। अस्मभ्यम्।

३९६ । एकवचनस्य च । (७-१-३१)

आभ्यां पञ्चम्येकवचनस्य अत् स्यात्। त्वत्। मत्। 'ङसेश्च' इति सुवचम्। युवाभ्याम्। आवाभ्याम्।

३९७ । पञ्चम्या अत् । (७-१-३२)

आभ्यां पञ्चम्याः भ्यसोऽत्स्यात्। युष्मत्। अस्मत्।

न्तेऽपि प्रवृत्तिरिति भावः। **अतितुभ्यमिति** ॥ गौणत्वे तदप्रवृत्तौ मानाभावादिति भावः। **युवाभ्याम्। आवाभ्यामिति** ॥ तृतीयाद्विवचनवदिति भावः। **भ्यसो भ्यम्** ॥ भ्यम् अभ्यमिति वा छेदः। तदाह। **भ्यसः इति** ॥ युष्मदस्मद्भ्यां परस्येति शेषः। 'युष्मदस्मद्भ्यां ङसोऽश्' इत्यतस्तदनुवृत्तेः। ननु भ्यमादेशपक्षे 'शेषे लोपः' इत्यदो लोपे युष्मभ्यमस्मभ्यमिति मकारादकारो न श्रूयेतेत्यत आह। **आद्यः इति** ॥ लक्ष्यानुरोधादिह अन्त्यलोपपक्ष एवाश्रयणीयः। नन्वन्त्यलोपपक्षे दकारस्य लोपे सति 'बहुवचने झल्येत्' इत्येत्त्वं स्यादित्यत आह। **तत्राङ्गवृत्तेति** ॥ 'अङ्गवृत्ते पुनर्वृत्तावविधिः' इति परिभाषयेत्यर्थः। अङ्गे वृत्तं वर्तनं यस्य तत् अङ्गवृत्तं, तस्मिन् कार्ये प्रवृत्ते सति अन्यस्य अङ्गकार्यस्य वृत्तौ प्रवृत्तिविषये अविधिः विधिर्नास्तीत्यर्थः। प्रकृते च शेषलोपे अङ्गकार्ये प्रवृत्ते सति, अन्यत् अङ्गकार्यमेत्त्वन्न भवतीति भावः। **अभ्यम् त्विति** ॥ अभ्यमादेशस्तु टिलोपपक्षे अन्त्यलोपपक्षे च अनुकूल इत्यर्थः। तत्र अन्त्यलोपपक्षे अभ्यमो झलादित्वाभावात्तस्मिन् परे एत्त्वन्न। किन्तु पररूपे सति युष्मभ्यम् अस्मभ्यम् इति सिध्यति। टिलोपपक्षे तु अङ्गस्य अदन्तत्वाभावादपि एत्त्वन्न। अथ पञ्चमी विभक्तिः। **एकवचनस्य च** ॥ 'युष्मदस्मद्भ्यां ङसोऽश्' इत्यतो युष्मदस्मद्भ्यामित्यनुवर्तते। 'पञ्चम्या अत्' इत्यतः अदिति च। तदाह। **आभ्यामिति** ॥ युष्मदस्मद्भ्यामित्यर्थः। अनेकाल्त्वात् सर्वादेशः। 'न विभक्तौ' इति तस्य नेत्त्वम्। **त्वत्। मत् इति** ॥ युष्मद् अस्, अस्मद् अस् इति स्थिते त्वमादेशयोः कृतयोः ङसेः अदादेशे सति पररूपे 'शेषे लोपः' इति टिलोपः। अन्त्यलोपपक्षे दकारलोपे सति त्रयाणामकाराणां पररूपमिति भावः। **सुवचमिति** ॥ लाघवादिति भावः। **पञ्चम्या अत्** ॥ 'युष्मदस्मद्भ्यां ङसोऽश्' इत्यतो युष्मदस्मद्भ्यामित्यनुवर्तते। 'भ्यसो भ्यम्' इत्यतो भ्यस इति। 'पञ्चम्या अत्' इति च सूत्रम्। तदाह। **आभ्यामिति** ॥ युष्मदस्मद्भ्यामित्यर्थः। **युष्मत्। अस्मदिति** ॥ युष्मद् भ्यस्, अस्मद् भ्यस्, इति स्थिते भ्यसः भ्यमादेशः शेषलोपश्च। अथ षष्ठी विभक्तिः।

३९८। तवममौ ङसि। (७-२-९६)

अनयोर्मपर्यन्तस्य तवममौ स्तो ङसि।

३९९। युष्मदस्मद्भ्यां ङसोऽश्। (७-१-२७)

स्पष्टम्। तव। मम। युवयोः। आवयोः।

४००। साम आकम्। (७-१-३३)

आभ्यां परस्य साम आकम् स्यात्। भाविनः सुटो निवृत्त्यर्थ ससुट्कनिर्देशः। युष्माकम्। अस्माकम्। त्वयि। मयि। युवयोः। आवयोः। युष्मासु। अस्मासु।

तवममौ ङसि॥ 'युष्मदस्मदोरनादेशे' इत्यतो युष्मदस्मदोरित्यनुवर्तते। मपर्यन्तस्येत्यधिकृतम्। तदाह। **अनयोरिति**॥ युष्मदस्मदोरित्यर्थः। 'त्वमावेकवचने' इत्यस्यापवादः। **युष्मदस्मद्भ्यां ङसोऽश्**॥ **स्पष्टमिति**॥ युष्मदस्मद्भ्यां परस्य ङसः अश् स्यादिति सुगममित्यर्थः। शित्त्वात् सर्वादेशः। **तव। ममेति**॥ युष्मद् अस्, अस्मद् अस्, इति स्थिते मपर्यन्तस्य तवममादेशयोः कृतयोः अशादेशे दकारात् पूर्वयोरकारयोः परूपे अदो लोपः। अन्त्यलोपपक्षे दकारलोपः। त्रयाणामकाराणां पररूपमिति भावः। **युवयोः। आवयोरिति**॥ युष्मद् ओस्, अस्मद् ओस् इति स्थिते मपर्यन्तस्य युवावादेशयोः 'योऽचि' इति दस्य यत्वे पररूपमिति भावः। **साम आकम्॥ आभ्यामिति॥** 'युष्मदस्मद्भ्यां ङसोऽश्' इत्यतस्तदनुवृत्तेरिति भावः। **सामः इति**॥ सकारेण सह वर्तत इति साम् तस्येत्यर्थः। ससुट्कस्य आम इति यावत्। ननु युष्मद् आम्, अस्मद् आम्, इति स्थिते अवर्णात् परत्वाभावात् सुटो न प्रसक्तिः। नच 'शेषे लोपः' इति दस्य लोपे कृते अवर्णात् परत्वमस्तीति वाच्यम्। आकमादेशात् प्राक् अनादेशतया शेषलोपस्यैवात्राप्रसक्तेः ससुट्कनिर्देशोऽनुपपन्नः व्यर्थश्चेत्यत आह। **भाविनः इति**॥ भविष्यत इत्यर्थः। यदि तु आम आकम् इत्येवोच्येत, तर्हि आमः आकमादेशे कृते दकारस्य शेषलोपे सति स्थानिवत्त्वेन आकमादेशस्य आम्त्वात् तस्य च अवर्णात्परत्वात् सुडागमः स्यात्। तत एत्वषत्वयोर्युष्मेषाकम्, अस्मेषाकमिति स्यात्। अतस्ससुट्कनिर्देशः। यद्यपि आकमादेशप्रवृत्तिकाले सुटो न प्रसक्तिः। तथापि आकमादेशोत्तरं दकारलोपे कृते स्थानिवत्त्वेन यस्सुट् भविष्यति तस्यापि स्थानषष्ठ्या स्वीकरणान्निवृत्तिर्भवति। अन्यथा ससुट्कनिर्देशवैय्यर्थ्यादिति भावः। यदि तु शेषस्य लोप एवाश्रीयते, तदा कृतेऽप्याकमादेशे अदो लोपे अवर्णात् परत्वाभावादेव सुटः प्रसक्त्यभावात् ससुट्कनिर्देशो मास्तु। **युष्माकम्। अस्माकमिति**॥ आकमादेशे कृते अदो लोपे रूपम्। दकारलोपे तु सवर्णदीर्घः। एतदर्थमेव दीर्घोच्चारणम्। अन्यथा पररूपापत्तेः। न चाकारोच्चारणसामर्थ्यादेव पररूपनिरास इति वाच्यम्। 'बहुवचने झल्येत्' इत्येत्त्वनिवृत्त्या चरितार्थत्वादित्यलम्। **त्वयि। मयीति**॥ युष्मद् इ, अस्मद् इ इति स्थिते मपर्य-

"समस्यमाने द्येकत्ववाचिनी युष्मदस्मदी ।
समासार्थोऽन्यसङ्ख्यश्चेत्स्तो युवावौ त्वमावपि ॥
सुजस्ङेङस्सु परत आदेशाः स्युः सदैव ते ।
त्वाहौ यूयवयौ तुभ्यमह्यौ तवममावपि ॥
एते परत्वाद्बाधन्ते युवावौ विषये स्वके ।
त्वमावपि प्रबाधन्ते पूर्वविप्रतिषेधतः ॥

न्तस्य त्वमादेशयोः 'योऽचि' इति दस्य यत्वे पररूपे रूपमिति भावः। **युवयोः आवयोरिति** ॥ प्राग्वत्। **युष्मासु । अस्मास्विति** ॥ 'युष्मदस्मदोरनादेशे' इति दकारस्य आत्वे सवर्णदीर्घ इति भावः। 'त्वमावेकवचने' इत्यत्र 'युवावौ द्विवचने' इत्यत्र च एकवचनद्विवचनशब्दौ यौगिकौ, नतु प्रत्ययपराविति स्थितम् । तत्फलं श्लोकचतुष्टयेन सङ्गृह्णाति । **समस्यमाने इति** ॥ तत्र प्रथमश्लोके चेदित्यनन्तरम् अपीत्यध्याहार्यम्। यदि समस्यमाने युष्मदस्मदी एकत्ववाचिनी तदा समासार्थः अन्यसङ्ख्यश्चेदपि युवावौ त्वमावपि स्तः इत्यन्वयः । त्वाम् मां वा अतिक्रान्तः, अतिक्रान्तौ, अतिक्रान्ताः इति, युवामावां वा अतिक्रान्तः, अतिक्रान्तौ, अतिक्रान्ताः इति च विग्रहे 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति समासं लभमाने युष्मदस्मदी द्वित्वैकत्वान्यतराविशिष्टार्थवाचिनी यदा, तदा समासार्थः मुख्यविशेष्यभूतः अन्यसङ्ख्यश्चेदपि युष्मदस्मदर्थगतसंख्यापेक्षया अन्यसङ्ख्याकश्चेदपि युष्मदस्मदर्थगतद्वित्वे युवावौ तदर्थगतैकत्वे त्वमौ च द्विवचनैकवचनप्रत्ययपरत्वाभावेऽपि भवतः। युवावादेशविधौ द्विवचनशब्दस्य त्वमादेशविधौ एकवचनशब्दस्य च यौगिकत्वाश्रयणात्। एकवचने प्रत्यये परतस्त्वमादेशौ द्विवचने प्रत्यये परतो युवावावादेशौ इत्यर्थाश्रयणे तु त्वाम् मां वा अतिक्रान्तौ, अतिक्रान्ताः इति विग्रहे अतियुष्मदशब्दे अत्यस्मदशब्दे च युष्मदस्मदोर्द्विवचने बहुवचने च प्रत्यये परे त्वमौ न स्याताम् । तथा युवामावां वा अतिक्रान्तः, अतिक्रान्तौ, अतिक्रान्ताः इति विग्रहे युष्मदस्मदोरेकवचने बहुवचने च प्रत्यये परे युवावौ न स्यातामित्यव्याप्तिस्स्यादित्यर्थः। ननु युष्मदस्मदोर्ह्यर्थकत्वे युवावौ एकार्थकत्वे तु त्वमौ इति किं सार्वत्रिकम्। नेत्याह। **सुजस्ङेङस्सु इति** ॥ द्वितीयश्लोकेऽस्मिन् उत्तरार्धे त्वाहावित्यादितत्तत्सूत्रप्रतीकग्रहणम् । इतीत्यनन्तरं ये इत्यध्याहार्यम् । 'त्वाहौ सौ, यूयवयौ जसि, तुभ्यमह्यौ ङयि, तवममौ ङसि' इति सुजस्ङेङस्सु ये आदेशाः विहिताः ते अतियुष्मदत्यस्मच्छब्दाभ्याम् एकद्विबहर्थवृत्तित्वेऽपि स्युरित्यर्थः । ननु तत्रापि व्यर्थकत्वे युवावौ एकार्थकत्वे त्वमौ कुतो नेत्यत आह । **एते इति** ॥ तृतीयश्लोके पूर्वार्धमेकं वाक्यम्। एते त्वाहादयः, स्वके स्वीये विषये सुजसादौ, युवावौ बाधन्ते । कुतः, परत्वात् । युवावापेक्षया एतेषां परत्वादित्यर्थः। नन्वस्त्वेवं त्वाहादिभिर्युवावयोर्बाधः । त्वमौ तु तेभ्यः परौ कथं तैर्बाध्येतामित्यत आह । **त्वमावपीति** ॥ **पूर्वेति** ॥ विप्रतिषेधे सति पूर्वः पूर्वविप्रतिषेधः। 'सुप्सुपा' इति समासः । तृतीयान्तात्तसिः । विप्रतिषेधसूत्रे परशब्दस्य इष्टवाचितया क्वचिद्विप्रतिषेधे पूर्वकार्यस्य प्रवृत्त्याश्रयणादिति भावः । 'प्रत्ययोत्तरपदयोश्च'

द्व्येकसङ्ख्यः समासार्थो बह्वर्थे युष्मदस्मदी।
तयोरद्व्येकतार्थत्वान्न युवावौ त्वमौ न च॥"

त्वाम् मां वा अतिक्रान्त इति विग्रहे अतित्वम्। अत्यहम्। अतित्वाम्। अतिमाम्। अतियूयम्। अतिवयम्। अतित्वाम्। अतिमाम्। अतित्वाम्। अतिमाम्। अतित्वान्। अतिमान्। अतित्वया। अतिमया। अतित्वाभ्याम्। अतिमाभ्याम्। अतित्वाभिः। अतिमाभिः। अतितुभ्यम्। अतिमह्यम्। अतित्वाभ्याम्। अतिमाभ्याम्। अतित्वभ्यम्। अतिमभ्यम्। ङसिभ्यसोः। अतित्वत्। अतित्वत्। अतिमत्। अतिमत्। भ्यामि प्राग्वत्। अतितव। अतिमम। अतित्वयोः। अतिमयोः। अतित्वाकम्। अतिमाकम्। अतित्वयि। अतिमयि।

इति सूत्रभाष्ये तु 'त्वमावेकवचने' इति सूत्रे शेष इत्यनुवर्त्य "सुजस्ङेङस्भिन्नविभक्तिषु" इति व्याख्यातम्। तदेवं 'त्वमावेकवचने, युवावौ द्विवचने' इत्यत्र एकवचनद्विवचनशब्दयोर्यौगिकत्वाश्रयणस्य अव्याप्तिपरिहारार्थत्वमुक्त्वा अतिव्याप्तिपरिहारार्थत्वमाह। **द्व्येकसङ्ख्यः इति॥** चतुर्थश्लोकेऽस्मिन् यदा तदेत्यध्याहार्यम्। यदा युष्मान् अस्मान् वा अतिक्रान्तौ इति विग्रहे समासे सति द्वित्वैकत्वविशिष्टस्समासार्थः समासस्य मुख्यविशेष्यभूतः युष्मदस्मदी तु बह्वर्थके तदा युवावौ न स्तः। तयोः युष्मदस्मदोः द्वित्वैकत्वविशिष्टार्थकत्वाभावात् युवावविधौ त्वमविधौ च युष्मदस्मदोर्द्वित्वैकत्वविशिष्टवाचित्वे सत्येव प्रवृत्तेराश्रयणात्। द्विवचने एकवचने च प्रत्यये परतः इत्यर्थाश्रयणे तत्रातिव्याप्तिस्स्यादित्यर्थः। अत्र 'प्रत्ययोत्तरपदयोश्च' इति सूत्रे भाष्ये 'त्रिचतुर्युष्मदस्मद्ग्रहणेष्वर्थग्रहणम्' इति वार्तिकव्याख्यावसरे 'युवावौ द्विवचने' 'त्वमावेकवचने' इत्यत्र द्विवचनैकवचनशब्दयोर्यौगिकत्वाश्रयणमुपक्षिप्य युवाम् आवां वा अतिक्रान्तः, अतिक्रान्तौ, अतिक्रान्ताः इति विग्रहान् प्रदर्श्य, त्वाम् मां वा अतिक्रान्तः, अतिक्रान्तौ, अतिक्रान्ताः इति च विग्रहान् प्रदर्श्य अतियुष्मदत्यस्मच्छब्दयोस्सुजस्ङेङस्भ्योऽन्यत्र सर्वासु विभक्तिषु एकद्विबहुवचनेषु सर्वत्र युवावादेशौ त्वमादेशौ च उदाहृत्य प्रदर्शितौ। सुजस्ङेङस्सु तु 'त्वाहौ, यूयवयौ, तुभ्यमह्यौ, तवममौ' इत्येत एवादेशाः उदाहृताः। तदिदं श्लोकचतुष्टयेन सङ्गृहीतम्। तदिदानीं तत्प्रपञ्चनपरभाष्यानुसारेणोदाहृत्य प्रदर्शयति। **त्वाम् मां वा अतिक्रान्तः इत्यादिना॥** अतिक्रान्तौ, अतिक्रान्ताः इति च विग्रहयोरुपलक्षणमिदम्। विग्रहे इत्यनन्तरं रूपाणि वक्ष्यन्त इति शेषः। सुजस्ङेङस्भ्योऽन्यत्र सर्वासु विभक्तिषु एकद्विबहुवचनेषु मपर्यन्तस्य त्वमावेव भवतः। अवशिष्टप्रक्रियास्तु केवलयुष्मदस्मद्वज्ज्ञेयाः। सुजस्ङेङस्सु तु त्वाहौ, यूयवयौ, तुभ्यमह्यौ, तवममौ इत्येते एवादेशाः पूर्वविप्रतिषेधात् त्वमौ बाधित्वा भवन्ति। ततश्च सुजस्ङेङस्सु केवलयुष्मदस्मद्वदेव रूपाणीति निष्कर्षः। **अतित्वाकम्। अतिमाकमिति॥** ननु 'साम आकम्' इति ससुट्कनिर्देशाद्यत्र आमस्सुट्सम्भवः तत्रैवाकम्, नचात्र सुट् सम्भाव्यते। इह युष्मदस्मदोरुपसर्जनत्वेन सर्वनामत्वाभावात्। सुट

अतित्वयोः । अतिमयोः । अतित्वासु । अतिमासु । युवाम् आवां वा अतिक्रान्त इति विग्रहे सुजस्ङेङस्सु प्राग्वत् । औअम्औट्सु अतियुवाम् । अतियुवाम् । अतियुवाम् । अत्यावाम् । अत्यावाम् । अत्यावाम् । अतियुवान् । अत्यावान् । अतियुवया । अत्यावया । अतियुवाभ्याम् । अत्यावाभ्याम् । अतियुवाभिः । अत्यावाभिः । भ्यसि, अतियुवभ्यम् । अत्यावभ्यम् । ङसिभ्यसोः अतियुवत् । अतियुवत् । अत्यावत् । अत्यावत् । ओसि, अतियुवयोः । अतियुवयोः । अत्यावयोः । अत्यावयोः । अतियुवाकम् । अत्यावाकम् । अतियुवयि । अत्यावयि । अतियुवासु । अत्यावासु । युष्मानस्मान्वा अतिक्रान्त इति विग्रहे सुजस्ङेङस्सु प्राग्वत् । औअम्औट्सु अतियुष्माम् । अतियुष्माम् । अतियुष्माम् । अत्यस्माम् । अत्यस्माम् । अत्यस्माम् । अतियुष्मान् । अत्यस्मान् । अतियुष्मया । अत्यस्मया । अतियुष्माभ्याम् । अत्यस्माभ्याम् । अतियुष्माभिः अत्यस्माभिः । भ्यसि अतियुष्मभ्यम् । अत्यस्मभ्यम् । ङसिभ्यसोः । अतियुष्मत् । अत्यस्मत् । ओसि अतियुष्मयोः । अतियुष्मयोः । अत्यस्मयोः । अत्यस्मयोः । अतियुष्माकम् । अत्यस्माकम् । अतियुष्मयि । अत्यस्मयि । अतियुष्मासु । अत्यस्मासु ।

स्सर्वनाम्नः परस्यामो विहितत्वादिति चेत् । मैवम् । ससुट्कत्वस्य सम्भावनामात्रविषयत्वात् । एवञ्च सुट् यत्र सम्भविष्यति तत्र सुटो निवृत्त्यर्थं ससुट्कनिर्देशः । यत्र तु सुट् न सम्भवति तत्र केवलस्य आमस्सुट् । अत्र च 'प्रत्ययोत्तरपदयोश्च' इति सूत्रे अतित्वाकमतिमाकमिति भाष्ये तदुदाहरणं प्रमाणमित्यास्तां तावत् । तदेवमुपसर्जनयोः युष्मदस्मदोरेकार्थवाचित्वे उदाहरणान्युक्त्वा द्व्यर्थवाचित्वे उदाहरति। **युवाम् आवां वा अतिक्रान्तः इति ॥** अतिक्रान्तौ, अतिक्रान्ताः इति विग्रहयोरुपलक्षणम् । अत्र युष्मदस्मदोर्द्व्यर्थवृत्तित्वात् सुजस्ङेङस्भ्योऽन्यत्र सर्वासु विभक्तिषु एकद्विबहुवचनेषु मपर्यन्तस्य युवावावेव भवतः । अवशिष्टास्तु प्रक्रियाः केवलयुष्मदस्मद्वत् ज्ञेयाः । सुजस्ङेङस्सु तु त्वाहौ, यूयवयौ, तुभ्यमह्यौ, तवममौ, इत्येते एवादेशाः परत्वाद्युवावादेशौ बाधित्वा प्रवर्तन्ते । सुजस्ङेङस्सु केवलयुष्मदस्मद्वदेव रूपाणीति निष्कर्षः। अथ युष्मदस्मदोरुपसर्जनयोर्बह्वर्थवाचित्वे उदाहरणान्याह । **युष्मान्। अस्मान्वेति ॥** युष्मानस्मान्वा अतिक्रान्तः, अतिक्रान्तौ, अतिक्रान्ताः इति विग्रहेष्वित्यर्थः । 'द्व्येकसङ्ख्यस्समासार्थः' इति चतुर्थश्लोकस्थोदाहरणान्येताति । अत्र युष्मदस्मदोरेकद्व्यर्थवाचित्वाभावात् सुजस्ङेङस्भ्योऽन्यत्र मपर्यन्तस्य क्वापि न त्वमौ नापि युवावौ । 'ङे प्रथमयोः' इत्याद्यास्तु भवन्त्येव । सुजस्ङेङस्सु तु त्वाहौ, यूयवयौ, तुभ्यमह्यौ, तवममौ इत्येते भवन्त्येव । तेषामेकद्व्यर्थ-

४०१। पदस्य। (८-१-१६)

४०२। पदात्। (८-१-१७)

४०३। अनुदात्तं सर्वमपादादौ। (८-१-१८)

इत्यधिकृत्य।

४०४। युष्मदस्मदोः षष्ठीचतुर्थी-द्वितीयास्थयोर्वांनावौ। (८-१-२०)

पदात्परयोरपादादौ स्थितयोरनयोः षष्ठ्यादिविशिष्टयोर्वां नौ इत्यादेशौ स्तः। तौ चानुदात्तौ।

४०५। बहुवचनस्य वस्नसौ। (८-१-२१)

उक्तविधयोरनयोः षष्ठ्यादिबहुवचनान्तयोर्वस्नसौ स्तः। वान्नावोरपवादः।

४०६। तेमयावेकवचनस्य। (८-१-२२)

उक्तविधयोरनयोः षष्ठीचतुर्थ्येकवचनान्तयोस्ते मे एतौ स्तः।

४०७। त्वामौ द्वितीयायाः। (८-१-२३)

विशेषनिबन्धनत्वाभावात्। **प्राग्वदिति** ॥ केवलयुष्मदस्मद्वदित्यर्थः। **पदस्य** ॥ **पदात्** ॥ **अनुदात्तं सर्वमपादादौ** ॥ **इत्यधिकृत्येति** ॥ विधयो वक्ष्यन्ते इति शेषः। अष्टमस्य प्रथमे पादे इमानि सूत्राणि पठितानि। तत्र 'पदस्य' इत्येतत् 'अपदान्तस्य मूर्धन्यः' इत्यतः प्रागधिक्रियते। 'पदात्' इत्येतत्तु 'कुत्सने च सुप्यगोत्रादौ' इत्यतः प्रागधिक्रियते। 'अनुदात्तं सर्वमपादादौ' इति पदत्रयन्तु 'आपादसमाप्तेः अधिक्रियते' इति भाष्यादिषु स्पष्टम्। **युष्मदस्मदोः षष्ठी** ॥ **षष्ठ्यादिविशिष्टयोरिति** ॥ षष्ठीचतुर्थीद्वितीयाभिस्सह तिष्ठतः इति षष्ठीचतुर्थीद्वितीयास्थौ, तयोरिति विग्रहः। षष्ठ्यादिविशिष्टयोरिति यावत्। षष्ठीचतुर्थीद्वितीयासु परतस्तिष्ठतः इति विग्रहस्तु न भवति। 'पदस्य' इत्यधिकारविरोधात्। पदस्येत्यनुवृत्तं हि द्वि. वचनेन विपरिणतं षष्ठीचतुर्थीद्वितीयास्थयोरित्यस्य विशेषणम्। न हि षष्ठ्यादिविभक्तिषु परतः पदत्वमस्ति। भ्यामादौ तत्सत्वेऽपि तदितरत्र द्वितीयादौ तदभावात्। स्थग्रहणस्य तु प्रयोजनं मूल एव वक्ष्यते। **बहुवचनस्य वस्नसौ** ॥ **उक्तविधयोरिति** ॥ षष्ठ्यादिविशिष्टयोर्युष्मदस्मदोरित्यर्थः। **तेमयावेकवचनस्य** ॥ **षष्ठीचतुर्थ्येकवचनान्तयोरिति** ॥ अत्र द्वितीयाग्रहणन्नानुवर्तते। तत्र त्वामादेशयोर्वक्ष्यमाणत्वात्। 'तेमयौ' इति सूत्रे तेश्च मेश्च तेमयाविति विग्रह इति भावः। अयमपि वान्नावोरपवादः। **त्वामौ द्वितीयायाः** ॥ त्वाश्च माश्चेति विग्रहः।

द्वितीयैकवचनान्तयोस्त्वा मा एतौ स्तः ।

श्रीशस्त्वावतु मापीह दत्तात्ते मेऽपि शर्म सः ।
स्वामी ते मेऽपि स हरिः पातु वामपि नौ विभुः ॥
सुखं वां नौ ददात्वीशः पतिर्वामपि नौ हरिः ।
सोऽव्याद्वो नः शिवं वो नो दद्यात्सेव्योऽत्र वः स नः ॥

'पदात्परयोः' किम् । वाक्यादौ मा भूत् । त्वां पातु, मां पातु । 'अपादादौ' किम् । 'वेदैरशेषैः संवेद्योऽस्मान्कृष्णः सर्वदाऽवतु' । स्थग्रहणा-

---

एकवचनस्येत्यनुवर्तते । तदाह । **द्वितीयेत्यादिना** ॥ अथ विभक्तिक्रमक्लृप्तद्वितीयाचतुर्थीषष्ठी-क्रमेण एकद्विबहुवचनक्रमेण चोदाहरति । **श्रीशः इत्यादिश्लोकद्वयेन** ॥ तत्र "श्रीशस्त्वावतु मापीह" इति प्रथमः पादः । श्रियाः ईशः पतिः विष्णुः त्वा मा अपि पातु इत्यन्वयः । अत्र त्वाम्, माम् इति द्वितीयैकवचनान्तयोः त्वा मा इत्यादेशौ । **दत्तात्ते मेऽपि शर्म सः इति** ॥ सः श्रीशः ते मेऽपि शर्म सुखं दत्तादित्यन्वयः । 'डु दाञ् दाने' आशिषि लेटि दत्तादिति रूपम् । दद्या-दिति क्वचित् पाठः । अत्र तुभ्यम्, मह्यम् इति चतुर्थ्येकवचनान्तयोः ते मे इत्यादेशौ । **स्वामी ते मेऽपि स हरिरिति** ॥ अत्र तव मम इति षष्ठ्येकवचनान्तयोः ते मे आदेशौ । **पातु वामपि नौ विभुरिति** ॥ विभुः सर्वव्यापकः वां नौ अपि पातु इत्यन्वयः । अत्र युवाम् आवाम् इति द्वितीयाद्विवचनयोः वां नौ इत्यादेशौ । **सुखं वां नौ ददात्वीशः इति** ॥ नौ इत्यनन्तरमपिशब्दोऽध्याहार्यः । अत्र युवाभ्याम्, आवाभ्याम् इति चतुर्थीद्विवचनान्तयोः वा-नावौ । **पतिर्वामपि नौ हरिरिति** ॥ अत्र युवयोः आवयोरिति षष्ठीद्विवचनान्तयोः वा-नावौ । **सोऽव्याद्वो नः इति** ॥ सः हरिः वः नः अपि अव्यात्, रक्षतात् इत्यर्थः । अत्र युष्मान्, अस्मान् इति द्वितीयाबहुवचनान्तयोः वस्नसौ । **शिवं वो नो दद्यादिति** ॥ शिवमिति शुभमुच्यते । नः इत्यनन्तरम् अपीत्यध्याहार्यम् । अत्र युष्मभ्यम्, अस्मभ्यम् इति चतुर्थीबहुवचनान्तयोः वस्नसौ । **सेव्योऽत्र वः स नः इति** ॥ स हरिः वां नौ अपि सेव्यः, भजनीयः इत्यर्थः । 'कृत्यानां कर्तरि वा' इति षष्ठी । अत्र युष्माकम्, अस्माकम् इति षष्ठी-बहुवचनान्तयोः वस्नसौ । **त्वां पातु, मां पात्विति** ॥ अत्र युष्मदस्मदोः पदात् परत्वा-भावात् 'त्वामौ द्वितीयायाः' इति न भवतीत्यर्थः । यद्यप्यत्र अस्मच्छब्दस्य पात्वितिपदात् परत्वमस्ति । तथापि भिन्नकालं वाक्यद्वयमिह विवक्षितमित्यदोषः । **संवेद्योऽस्मानिति** ॥ अत्रास्मच्छब्दस्य पादादौ स्थितत्वान्नादेशः । यद्यप्यनुष्टुप्छन्दस्कोऽयं श्लोकः । तत्र एकैकः पादः अष्टाक्षरः इति स्थितिः । तत्र सन्ध्यभावे 'अस्मान् कृष्णस्सर्वदाऽवतु' इत्यस्य नवाक्षर-त्वान्न पादत्वम् । कृते तु सन्धौ ओकारस्य परादित्वे सति अष्टाक्षरत्वव्याघातः । संवेद्य इत्यस्य पदत्वाभावात् अस्मदः पदात् परत्वाभावश्च । पूर्वान्तत्वे तु स्मानित्यस्य पादादिस्थितस्य नास्मच्छब्द-रूपता । तथापि संवेद्यो इत्येकादेशविशिष्टस्य पूर्वान्तत्वात् पदत्वम् । स्मानित्यस्य तु एकदेश-

च्छ्रूयमाणविभक्तिकयोरेव। नेह। इति युष्मत्पुत्रो ब्रवीति। इत्यस्मत्पुत्रो ब्रवीति। 'समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः' (वा ४७१४)। 'एकतिङ् वाक्यम्' (११९९)। तेनेह न। ओदनं पच, तव भविष्यति। इह तु स्यादेव। 'शालीनां ते ओदनं दास्यामि' इति। 'एते वांनावादय आदेशा अनन्वादेशे वा वक्तव्याः' (वा ४७१७)। अन्वादेशे तु नित्यं स्युः। धाता ते भक्तोऽस्ति, धाता तव भक्तोऽस्तीति वा। तस्मै ते नम इत्येव।

४०८। न चवाहाहैवयुक्ते। (८-१-२४)

विकृतन्यायेन द्वितीयान्ताऽस्मच्छब्दरूपत्वम्। वस्तुतस्तु ओकारस्य पूर्वान्तत्वात् संवेद्यो इत्यस्य पदत्वम्, स्मानित्यादेरष्टाक्षरत्वञ्च। परादित्वाच्चास्मच्छब्दरूपता। 'उभयत आश्रयणे नान्तादिवत्' इति तु नास्तीति इण्धातौ निरूपयिष्यामः। केचित्तु अपादादौ किं, युष्मान्नक्षतु गोविन्दोऽस्मान् कृष्णस्सर्वदाऽवतु इति प्रत्युदाहरन्ति। तन्न। युष्मानित्यस्य पदात् परत्वाभावादेवाप्राप्तेः। अस्मानित्यस्य तु पदात् परत्वेऽपि समानवाक्यस्थपदात् परत्वाभावात्। ननु 'युष्मदस्मदोष्षष्ठीचतुर्थीद्वितीयान्तयोः' इत्येव सूत्रयताम्, किं स्थग्रहणेन। स्थग्रहणेऽपि कथञ्चित्तस्यैवार्थस्य लाभादित्यत आह। **स्थग्रहणादिति**॥ स्थाधातुः अहानौ वर्तते। "समये तिष्ठ सुग्रीव" इति यथा। समये मर्यादायां विषये अनुवृत्तिं मा हासीरिति गम्यते। ततश्च षष्ठीचतुर्थीद्वितीयाः तिष्ठतः न परित्यजतः इति व्युत्पत्तिर्विवक्षिता। षष्ठ्यादिविभक्तीरपरित्यजतोरित्यर्थः। अलुप्तषष्ठ्यादिविभक्तिविशिष्टयोरिति फलतीति भावः। **इति युष्मत्पुत्रः इति**॥ पदात् परत्वं सम्पादयितुम् इतिशब्दः। युवयोर्युष्माकं वा पुत्रः, आवयोरस्माकं वा पुत्र इति विग्रहः। अत्र विभक्तेर्लुका लुप्तत्वात् श्रूयमाणविभक्तिकत्वाभावान्नादेशप्रवृत्तिः। तव पुत्रो मम पुत्र इति विग्रहस्तु न। 'प्रत्ययोत्तरपदयोश्च' इति तत्र त्वमादेशयोर्वक्ष्यमाणत्वात्। **समानवाक्ये इति**॥ निमित्तनिमित्तिनोरेकवाक्यस्थत्वे इत्यर्थः। निघातशब्दः अनुदात्तवाची। **एकतिङिति**॥ तिङित्यनेन तिङन्तं विवक्षितम्। एकः तिङ् यस्येति विग्रहः। इदञ्च वाक्यलक्षणमेतच्छास्त्रोपयोग्येव। तेन 'पश्य मृगो धावति' इत्यादौ नाव्याप्तिरिति समर्थसूत्रे भाष्ये स्पष्टम्। **ओदनमिति**॥ ओदनं पचेत्येकं वाक्यम्। तव भविष्यतीत्यपरं वाक्यम्। ततश्च तवेतियुष्मच्छब्दस्य भिन्नवाक्यस्थात् पदात् परत्वान्नादेश इति भावः। **शालीनामिति**॥ व्रीहीणामित्यर्थः। प्रकृतिविकारभावे षष्ठी। **एते वांनावादयः इति**॥ इदञ्च 'सपूर्वायाः' इति सूत्रे भाष्ये स्थितम्। **धातेति**॥ महादेवं प्रति वचनमेतत्। अन्वादेशे तु नित्यमित्यस्योदाहरणमाह। **तस्मै ते नम इत्येवेति**॥ अत्र "योऽग्निर्हव्यवाट्। य इन्द्रो वज्रबाहुः" इत्यादि पूर्ववाक्यं द्रष्टव्यम्। एवञ्च किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं बोधयितुं पुनरुपादानादन्वादेशोऽयमिति तत्र नित्य एवादेश इति भावः। **न चवाहा**॥ च इत्यव्ययं समुच्चये, वा इति विकल्पे, हा इत्यद्भुते, अह इति खेदे, एव इत्यवधारणे,

चादिपञ्चकयोगे नैते आदेशाः स्युः । हरिस्त्वां मां च रक्षतु । कथं त्वां मां वा न रक्षेदित्यादि । युक्तग्रहणात्साक्षाद्योगेऽयं निषेधः । परम्परासम्बन्धे त्वादेशः स्यादेव । हरो हरिश्च मे स्वामी ।

४०९ । पश्यार्थैश्चानालोचने । (८-१-२५)

अचाक्षुषज्ञानार्थैर्धातुभिर्योगे एते आदेशा न स्युः । चेतसा त्वां समीक्षते। परम्परासम्बन्धेऽप्ययं निषेधः । भक्तस्तव रूपं ध्यायति । आलोचने तु भक्तस्त्वा पश्यति चक्षुषा ।

४१० । सपूर्वायाः प्रथमाया विभाषा । (८-१-२६)

विद्यमानपूर्वात्प्रथमान्तात्परयोरनयोरन्वादेशेऽप्येते आदेशा वा स्युः । भक्तस्त्वमप्यहं तेन हरिस्त्वां त्रायते स माम् । त्वा मा इति वा ।

एतेषां द्वन्द्वः । युक्त इति भावे क्तः । तदाह । **चादिपञ्चकयोगे इति** ॥ पञ्चानामन्यतमेन योगे इत्यर्थः । **एते इति** ॥ वां नावादय इत्यर्थः । 'युष्मदस्मदोष्षष्ठी' इत्यादिसूत्रेभ्यस्तदनुवृत्तेरिति भावः । **इत्यादीति** ॥ कृष्णो मम हा प्रसीदति । अद्भुतमिदमित्यर्थः । कृष्णो ममाह न प्रसीदति । अहेति खेदे । कृष्णो ममैव सेव्यः । ननु 'न चवाहाहैवैः' इत्येवास्तु, मास्तु युक्तग्रहणम् । 'वृद्धो यूना' इत्यादिवत् तृतीययैव तल्लाभादित्यत आह । **युक्तग्रहणादिति** ॥ यत्र चाद्यर्थे समुच्चयादिभिर्युष्मदस्मदर्थयोस्साक्षादन्वयः तत्रैवायन्निषेध इत्यर्थः । **हरो हरिश्चेति** ॥ अत्र चशब्दस्य हरिहरयोस्साक्षादन्वयः । समुचितयोर्हरिहरयोः स्वामीत्यत्रान्वयः । स्वामीत्यस्य मे इत्यनेनान्वयः । ततश्च चशब्दस्य अस्मच्छब्देन साक्षादन्वयाभावात् मेआदेशस्य निषेधो नेति भावः । **पश्यार्थैश्चानालोचने** ॥ दर्शनं पश्यः । 'दृशिर् प्रेक्षणे' इत्यस्मादत एव निपातनात् भावे शप्रत्ययः । 'पाघ्रा' इति पश्यादेशः । पश्यः दर्शनम् अर्थो येषान्ते पश्यार्थाः, तैरिति विग्रहः। आलोचनं चाक्षुषं ज्ञानं, तद्भिन्नमनालोचनम्, तत्र विद्यमानैः दर्शनार्थकैरित्यर्थः । पश्येति दृशिना ज्ञानसामान्यं विवक्षितम् । अनालोचने इति चाक्षुषपर्युदासात् । तदाह । **अचाक्षुषेत्यादिना** ॥ **चेतसेति** ॥ देवेत्यध्याहार्यम् । हे देव मनसा त्वां चिन्तयतीत्यर्थः । **परम्परेति** ॥ 'न चवाहा' इत्यत्र युक्तग्रहणसामर्थ्यात् साक्षात्सम्बन्धविवक्षा युक्ता । इह तु तद्विवक्षायां मानाभावात् परम्परान्वयेऽपि स्यादेव निषेध इत्यर्थः । **भक्तस्तवेति** ॥ देवेत्यध्याहार्यम् । इह तवेत्यस्य रूपेणान्वयः, न तु साक्षात् ध्यायतीनेति भावः । अनालोचने इत्यस्य प्रयोजनमाह । **आलोचने त्विति** ॥ **सपूर्वायाः** ॥ वांनावाद्यादेशाः अनन्वादेशे पाक्षिकाः, अन्वादेशे तु नित्या इत्युक्तम् । अन्वादेशेऽपि क्वचिद्विकल्पार्थमिदम् । सहशब्दोऽत्र सलोमक इत्यादिवत् विद्यमानवाची । विद्यमानं पूर्वं यस्या इति विग्रहः 'तेन सहेति तुल्ययोगे' इति वा विग्रहः । तुल्ययोगवचनं प्रायिकम् इति वक्ष्यमाणत्वात् । प्रथमेत्यनेन तदन्तं गृह्यते । तदाह । **विद्यमानेत्यादिना** ॥ परयोरित्यनन्तरं युष्मदस्मदोरिति शेषः ।

४११। सामन्त्रितम्। (२-३-४८)

सम्बोधने या प्रथमा तदन्तमामन्त्रितसंज्ञं स्यात्।

४१२। आमन्त्रितं पूर्वमविद्यमानवत्। (८-१-७२)

स्पष्टम्। अग्ने तव। देवास्मान्पाहि। अग्ने नय। अग्न इन्द्र वरुण। इह युष्मदस्मदोरादेशस्तिङन्तनिघातः आमन्त्रितनिघातश्च न। 'सर्वदा रक्ष देव नः' इत्यत्र तु देवेत्यस्याविद्यमानवद्भावेऽपि ततः प्राचीनं रक्षेत्येतदाश्रि-

---

भक्तस्त्वमिति ॥ देवदत्तेत्यध्याहार्यम्। हे देवदत्त त्वमहमपि भक्तः इत्यन्वयः। **तेनेति** ॥ भक्तत्वेनेत्यर्थः। **त्रायते इति** ॥ पालयतीत्यर्थः। अत्र पूर्ववाक्योपात्तयुष्मदस्मदर्थयोरिह पुनरुपादानादन्वादेशोऽयम्। अत्र तेनेत्येतत् पूर्वं विद्यमानं पदं, ततः परं हरिरिति प्रथमान्तं, ततः परस्य युष्मच्छब्दस्यान्वादेशोऽपि त्वादेशविकल्पः। तथा त्रायत इत्येतत् पूर्वं विद्यमानं पदम्, ततः परं सः इति प्रथमान्तम्, ततः परस्यास्मच्छब्दस्यान्वादेशोऽपि मादेशविकल्पः। त्रायत इत्येतत् मध्यमणिन्यायेन उभयत्र सम्बध्यते। तेन निमित्तनिमित्तिनोः समानवाक्यस्थत्वं सः इत्यस्य विद्यमानपूर्वत्वं च बोध्यम्। **सामन्त्रितम्** ॥ प्रातिपदिकार्थसूत्रोपात्ता प्रथमा सा इत्यनेन परामृश्यते। 'सम्बोधने च' इत्यतस्सम्बोधने इत्यनुवर्तते। तदाह। **सम्बोधने इत्यादिना** ॥ तदन्तामिति प्रत्ययग्रहणपरिभाषालभ्यम्। महासंज्ञाकरणात् संज्ञाविधावपि तदन्तग्रहणम्, अत एव हेहैभो इत्यादीनामपि संज्ञा सिद्धा। **आमन्त्रितं पूर्वमविद्यमानवत्** ॥ **स्पष्टमिति** ॥ अनुवर्तनीयपदान्तराभावादिति भावः। **अग्ने तवेति** ॥ "अग्ने तव श्रवो वयः" इत्यृचि अग्ने इत्यविद्यमानवत्। देवास्मानित्यत्र देवशब्दः अविद्यमानवत्। "अग्ने नय" इत्यृचि अग्ने इत्यविद्यमानवत्। "अग्न इन्द्र वरुण" इत्यृचि अग्ने इत्यविद्यमानवदिति भावः। ततः किमित्यत आह। **इहेति** ॥ अग्ने तवेत्यत्र देवास्मानित्यत्र च युष्मदस्मदोः तेनसादेशौ न भवतः। तव अस्मानित्यनयोः पदात् परत्वाभावात् पादादौ स्थितत्वाच्च। 'अग्ने नय' इत्यत्र नयेति तिङन्तस्य 'तिङ्ङतिङः' इत्यनुदात्तत्वं न भवति। अतिङन्तात् पदात् परं तिङन्तं निहन्यते, इति हि तदर्थः। इह च अग्ने इत्यतिङन्तस्य अविद्यमानवत्त्वादतिङन्तात् परत्वाभावात् नानुदात्तत्वम्। अग्न इन्द्र वरुणेत्यत्र तु 'आमन्त्रितस्य च' इति सर्वानुदात्तत्वन्न भवति। पदात् परमामन्त्रितन्निहन्यते इति हि तदर्थः। इह च अग्नेशब्दस्याविद्यमानवत्त्वेन पदात् परत्वाभावात् इन्द्रशब्दस्य नानुदात्तत्वम्। एवं वरुणशब्दस्यापि नानुदात्तत्त्वम्। ततः प्राचीनयोः अग्ने इन्द्र इत्यनयोरविद्यमानवत्त्वात्। ननु सर्वदा रक्ष देव नः, इत्यत्र कथन्नसादेशः। देवेत्यस्याविद्यमानवत्त्वादित्यत आह। **सर्वदेति** ॥ "लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि। प्रतापरुद्र ते ख्यातिः" इत्यादौ तु ते इति विभक्तिप्रतिरूपकमव्ययम्। तत्र आमन्त्रितस्याविद्यमानवत्त्वात् युष्मद्शब्दस्य पादादिस्थत्वात्। **एवमिति** ॥ इमम्मे गङ्गे यमुने इति मन्त्रे सर्वेषान्निघात इत्यन्वयः। 'आम-

त्यादेशः । एवम् 'इमं मे गङ्गे यमुने' इति मन्त्रे यमुन इत्यादिभ्यः प्राचीनानामामन्त्रितानामविद्यमानवद्भावेऽपि मेशब्दमेवाश्रित्य सर्वेषां निघातः ।

४१३ । नामन्त्रिते समानाधिकरणे सामान्यवचनम् । (८-१-७३)

विशेष्यं समानाधिकरणे विशेषणे आमन्त्रिते परे नाविद्यमानवत्स्यात् । हरे दयाळो नः पाहि । अग्ने तेजस्विन् । 'विभाषितं विशेषवचने' (सू ३६५५)। अत्र भाष्यम् 'बहुवचनमिति वक्ष्यामि' इति। बहुवचनान्तं विशेष्यं समानाधिकरणे आमन्त्रिते विशेषणे परे अविद्यमानवद्वा । यूयं प्रभवः देवाः शरण्याः, युष्मान्भजे, वो भजे इति वा । इहान्वादेशेऽपि वैकल्पिका आदेशाः । सुपात्—सुपाद् । सुपादौ । सुपादः । सुपादम् । सुपादौ ।

न्त्रितस्य च' इत्यनुदात्तत्वमित्यर्थः। सर्वशब्दं विशिनष्टि । **यमुन इत्यादिभ्यः प्राचीनानामिति** ॥ इति आदिर्येषामिति विग्रहः । आदिना सरस्वतीशुतुद्रीत्यनयोर्ग्रहणम् । तद्गुणसंविज्ञानो बहुव्रीहिः । यमुने, सरस्वति, शुतुद्रि, इत्येतेभ्यः एकैकस्मात्प्राचीनानां गङ्गे, यमुने, सरस्वति इत्येषां सर्वेषान्निघात इत्यर्थः । शुतुद्रिशब्दस्य तु अनुदात्तत्वनेत्यविवादम् । तस्य द्वितीयपादादिस्थत्वात् । 'आमन्त्रितस्य च' इत्यत्र 'पदस्य, पदात्, अनुदात्तं सर्वमपादादौ' इत्यनुवृत्तेः । "इमम्मे" इत्यृचो जगतीच्छन्दस्कतया सरस्वतीत्यन्ते प्रथमपादस्य द्वादशाक्षरस्य समाप्तेः । ननु गङ्गे इत्यस्यानुदात्तत्वमुचितम्, तस्य मे इति पदात् परत्वात् । यमुने, सरस्वति, इत्यनयोस्तु नानुदात्तत्वसम्भवः । ततः प्राचीनयोः गङ्गे, यमुने, इत्यनयोरविद्यमानवत्त्वेन पदात् परत्वाभावादित्यत आह । **आमन्त्रितानामविद्यमानवद्भावेऽपि मेशब्दमेवाश्रित्येति** ॥ आमन्त्रितानां मध्ये गङ्गे, यमुने, इत्यनयोरविद्यमानवद्भावेऽपीति योजनीयम् । एंवञ्च इत्यादिभ्य इति सर्वेषामिति च बहुवचनमनुपपन्नमित्यपास्तम् । क्वचित् पुस्तकेषु यमुन इत्यादिप्राचीनामन्त्रितावियमानवद्भावेऽपीति पाठो दृश्यते । तत्र आदिना सरस्वतीत्येतदुच्यते । यमुने, सरस्वतीत्याभ्यां प्राचीनयोरामन्त्रितयोरविद्यमानवद्भावेऽपीति सुगममेव । अयञ्च निघातः पदकाले स्पष्टं श्रूयते । **नामन्त्रिते** ॥ आमन्त्रितम् अविद्यमानवदित्यनुवर्तते । सामान्यवचनमित्यनेन विशेष्यसमर्पकशब्दो विवक्षितः । विशेष्यस्य विशेषणापेक्षया सामान्यरूपत्वात् । तेन च विशेषणमाक्षिप्यते । समानाधिकरणे इति तत्रान्वेति । समानम् अधिकरणं यस्येति विग्रहः । समानशब्द एकत्वपरः । विशेष्यबोधकशब्देन अभेदसंसर्गेण एकार्थवृत्तित्वं विवक्षितमित्याशयेनाह । **विशेष्यमित्यादिना** ॥ **हरे दयाळो इति** ॥ अत्र दयाळो इति समानाधिकरणविशेषणे परे हरिशब्दो नाविद्यमानवत् । ततश्च दयाळो इत्यस्याविद्यमानवत्त्वेऽपि हरेइतिपदात् परत्वान्नसादेश इति भावः । **अग्ने तेजस्विन्निति** ॥ इह तेजस्विन्निति विशेषणे परे अग्ने इत्यस्य अविद्यमानवत्त्वाभावात् पदात् परत्वा-

४१४। पादः पत्। (६-४-१३०)

पाच्छब्दान्तं यदङ्गं भं तदवयवस्य पाच्छब्दस्य पदादेशः स्यात्। सुपदः। सुपदा। सुपाद्भ्यामित्यादि।

इति दान्ताः।

॥ अथ हलन्तपुल्लिङ्गे थकारान्तप्रकरणम् ॥

अग्निं मन्थतीत्यग्निमन्—अग्निमद्। अग्निमथौ। अग्निमथः। अग्निमद्भ्यामित्यादि।

इति थान्ताः।

तेजस्विन्नित्यस्य निघात इति भावः। सु शोभनौ पादौ यस्येति बहुव्रीहौ 'सङ्ख्या सुपूर्वस्य' इति पादशब्दान्त्यलोपे सुपाद्शब्दः। तस्य सुटि रूपाण्याह। **सुपादित्यादिना** ॥ शसि विशेषमाह। **पादः पत्** ॥ भस्य अङ्गस्येति चाधिकृतं पाद इत्यनेन विशेष्यते। तदन्तविधिः। तदाह। **पाच्छब्दान्तमिति** ॥ **पाच्छब्दस्येति** ॥ पाच्छब्दान्तस्य विधीयमानोऽपि पदादेशः 'निर्दिश्यमानस्यादेशा भवन्ति' इति पाद्शब्दस्यैव सर्वादेशो भवति, नतु तदन्तस्येति भावः। **इत्यादीति** ॥ सुपदे। सुपदः। सुपदः। सुपदोः। सुपदि ॥

इति दान्ताः।

अथ थकारान्ताः निरूप्यन्ते। **अग्निमदिति** ॥ 'मन्थ हिंसासंक्लेशनयोः' इति भ्वादौ। 'मन्थ विलोडने' इति क्रयादौ। उभाभ्यामपि क्विपि 'अनिदिताम्' इति नलोपे अग्निमथ् इति रूपम्। ततस्सुबुत्पत्तिः। सौ जश्त्वचर्त्वे इति भावः। भ्यामादौ जश्त्वेन थस्य दः। अग्निमद्भ्यामित्यादि। सुपि 'खरि च' इति चर्त्वम्, अग्निमत्सु। 'मथे विलोडने' इत्यस्याप्येतदेव रूपम्। 'मथि हिंसासंक्लेशनयोः' इति इदितस्तु नलोपाभावात् अग्निमन्थावित्यादि ॥

इति थान्ताः।

॥ अथ हलन्तपुल्लिँङ्गे चकारान्तप्रकरणम् ॥

'ऋत्विग्—' (सू ३७३) इत्यादिसूत्रेणाञ्चेः सुप्युपपदे क्विन् ।

४१५ । अनिदितां हल उपधायाः क्ङिति । (६-४-२४)

हलन्तानामनिदितामङ्गानामुपधायाः नस्य लोपः स्यात्क्किति ङिति च । 'उगिदचाम्—' (सू ३६१) इति नुम् । संयोगान्तस्य लोपः' (सू १४) नुमो नकारस्य 'किन्प्रत्ययस्य कुः (सू ३७७) इति' कुत्वेन ङकारः । प्राङ् । अनुस्वारपरसवर्णौ । प्राञ्चौ, प्राञ्चः । प्राञ्चम्, प्राञ्चौ ।

४१६ । अचः । (६-४-१३८)

लुप्तनकारस्याञ्चतेर्भस्याकारस्य लोपः स्यात् ।

४१७ । चौ । (६-३-१३८)

अथ चकारान्ताः निरूप्यन्ते । **ऋत्विगित्यादिसूत्रेणेति** ॥ प्र अञ्चतीत्यर्थे 'अञ्चु गतिपूजनयोः' इति गत्यर्थकाद्धातोः नोपधात् क्विन्नित्यर्थः । पूजार्थस्य त्वग्रे वक्ष्यते । क्विनि 'हलन्त्यम्' इति नकार इत् । इकार उच्चारणार्थः । 'लशकतद्धिते' इति ककार इत् । 'वेरपृक्तस्य' इति वकारलोपः । प्र अञ्च् इति स्थिते । **अनिदिताम्** ॥ अङ्गस्येत्यधिकृतं बहुवचनेन विपरिणम्यते । हल इति तद्विशेषणम्, तदन्ताविधिः । 'अनिदिताम्' इत्यपि तद्विशेषणम् । इत् ह्रस्व इकारः इत्संज्ञकः येषां तानि इदिन्ति, न इदिन्ति अनिदिन्ति, तेषामिति विग्रहः । अवयवषष्ठ्यन्तमेतत् उपधाया इत्यत्रान्वेति । उपधाया इत्यप्यवयवषष्ठ्यन्तम् । तच्च 'श्नान्न लोपः' इत्यतो नेत्यनुवृत्ते लुप्तषष्ठीके अन्वेति । क् च ङ् च क्ङौ इतौ यस्येति विग्रहः । तदाह । **हलन्तानामित्यादिना** ॥ इति चकारात्पूर्वस्य नकारस्य लोपः । प्र अच् इति स्थितम् । तस्मात् सुबुत्पत्तिः । सुटि विशेषमाह । **उगिदचामिति नुमिति** ॥ सौ विशेषमाह । **संयोगान्तस्य लोपः इति** ॥ हल्ङ्यादिना सुलोपे सतीति शेषः । **कुत्वेन ङकारः इति** ॥ नासिकास्थानसाम्यादिति भावः । **अनुस्वारपरसवर्णाविति** ॥ प्राच् औ इति स्थिते नुमि 'नश्चापदान्तस्य' इति नकारस्यानुस्वारः । 'अनुस्वारस्य ययि' इति तस्य परसवर्णः ञकारः । नस्य श्चुत्वन्तु न भवति । अनुस्वारं प्रति तस्यासिद्धत्वादित्यर्थः । शसादावचि नुमभावात् प्र अच् अस् इति स्थिते । **अचः** ॥ अच इत्यञ्चुधातोः 'अनिदिताम्' इति लुप्तनकारस्य षष्ठ्यन्तम् । भस्येत्यधिकृतम् । 'अल्लोपोऽनः' इत्यतः अल्लोप इत्यनुवर्तते । तदाह । **लुप्तेति** ॥ इत्यकारलोपे प्रच् अस् इति स्थिते । **चौ** ॥ अञ्चुधातोरुकारान्तस्य लुप्तनकाराकारस्य चाविति सप्तम्यन्तम् ।

लुप्ताकारनकारेऽञ्चतौ परे पूर्वस्याणो दीर्घः स्यात्। प्राचः। प्राचा, प्राग्भ्यामित्यादि। प्रत्यङ्, प्रत्यञ्चौ, प्रत्यञ्चः। प्रत्यञ्चम्, प्रत्यञ्चौ। 'अचः' (सू ४१६) इति लोपस्य विषयेऽन्तरङ्गेऽपि यण् न प्रवर्तते। 'असिद्धवदत्राभात्' (प ५७) इति परिभाषया। प्रतीचः। प्रतीचा। 'अमुमञ्चति' इति विग्रहे 'अदस् अञ्च्' इति स्थिते।

४१८। विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये। (६-३-९२)

अनयोः सर्वनाम्नश्च टेरद्र्यादेशः स्यादप्रत्ययान्ते अञ्चतौ परे। 'अद्रि अञ्च्' इति स्थिते, यण्।

'ढ्रलोपे' इत्यतः दीर्घोऽणः इत्यनुवर्तते। तदाह। **लुप्तेति॥ प्राचः इति॥** यद्यपि 'अचः' इत्यलोपस्य 'चौ' इति दीर्घस्य चाभावेऽपि सवर्णदीर्घेण प्राचः इति सिद्ध्यति। तथापि प्रतीचः इत्याद्यर्थं सूत्रम्। **प्राग्भ्यामिति॥** प्राच् भ्याम् इति स्थिते 'चोः कुः' इति कुत्वम्। 'क्विन्प्रत्ययस्य कुः' इति कुत्वस्यासिद्धत्वात्। **इत्यादीति॥** प्राग्भिः। प्राचे। प्राचः, प्राचोः, प्राक्षु। **प्रत्यङ् इति॥** प्रतिपूर्वादञ्चेः क्विन्, यण्, 'अनिदिताम्' इति नलोपः, सुबुत्पत्तिः। 'उगिदचाम्' इति नुम्, हल्ङ्यादिना सुलोपः, चकारस्य संयोगान्तलोपः, नुमो नकारस्य 'क्विन्प्रत्ययस्य' इति कुत्वेन ङकारः इति भावः। **प्रत्यञ्चाविति॥** प्रत्यच् औ इति स्थिते 'उगिदचाम्' इति नुमि तन्नकारस्य श्चुत्वेन ञकार इति भावः। एवं प्रत्यञ्चः। प्रत्यञ्चम्, प्रत्यञ्चौ। ननु प्रति अञ्च् इति स्थिते अन्तरङ्गत्वाद्यणि कृते 'अनिदिताम्' इति नलोपे प्रत्यच् इत्यस्मात् शसि असर्वनामस्थानत्वात् 'उगिदचाम्' इति नुमभावे 'अचः' इत्यकारलोपे 'चौ' इति दीर्घो न भवति। पूर्वस्याणोऽभावात्। ततश्च प्रत्यचः इति स्यादित्यत आह। **अचः इति लोपस्येत्यादि॥** 'अचः' इति लोपेन यण्निमित्तस्याकारस्य विनाशोन्मुखत्वादिह यण्न भवति। ततश्च प्रति अच् अस् इति स्थिते 'अचः' इत्यकारलोपे सति 'चौ' इति इकारस्य दीर्घे प्रतीच इति रूपं निर्बाधम्। एतदर्थमेव 'अचः' इति 'चौ' इति चारब्धम्। प्राचः पश्येत्यत्र अलोपदीर्घयोरभावेऽपि सवर्णदीर्घेणैव रूपसिद्धेः। भाष्ये तु 'चौ' इत्यारम्भसामर्थ्यादेवात्र यण् नेति समाहितम्। न च प्राचः पश्येत्यादौ सावकाशत्वमिति वाच्यम्। सवर्णदीर्घेणैव निर्वाहात् 'वार्णादाङ्गं बलीयः' इति परिभाषया 'अचः' इत्यलोपे सति सवर्णदीर्घासिद्धेरित्यन्यत्र विस्तरः। **अदस् अञ्च् इति स्थिते इति॥** क्विनि उपपदसमासे सुब्लुकि च सति अदस् अञ्च् इति स्थिते 'अनिदिताम्' इति नलोपे कृते अदस् अच् इति स्थिते सतीत्यर्थः। **विष्वग्देवयोश्च॥** अद्रि इति लुप्तप्रथमाकम्। **अनयोरिति॥** विष्वग्देवशब्दयोरित्यर्थः। **सर्वनाम्नः इति॥** चकारेण 'आ सर्वनाम्नः' इत्यतस्तदनुकर्षादिति भावः। **अप्रत्ययान्ते इति॥** सूत्रे अप्रत्यय इत्यत्र नित्यम् अश्रूयमाणत्वादविद्यमानः प्रत्ययः

४१९। अदसोऽसेर्दादु दो मः। (८-२-८०)

अदसोऽसान्तस्य दात्परस्य उदूतौ स्तो दस्य मश्च। उ इति ह्रस्वदीर्घयोः समाहारद्वन्द्वः। आन्तरतम्याद्ह्रस्वव्यञ्जनयोर्ह्रस्वो दीर्घस्य दीर्घः। अमुमुयङ्, अमुमुयञ्चौ, अमुमुयञ्चः। अमुमुयञ्चम्, अमुमुयञ्चौ, अमुमुईचः। अमुमुईचा, अमुमुयग्भ्यामित्यादि। मुत्वस्यासिद्धत्वान्न यण्। 'अन्त्यबाधेऽन्त्यसदेशस्य' (प १०४) इति परिभाषामाश्रित्य परस्यैव मुत्वं

क्विबादिर्यस्मादिति बहुव्रीह्याश्रयणादिति भावः। प्रकृते अदसष्टेरद्यादेशमुदाहृत्य दर्शयति। **अदद्रि अञ्च् इति स्थिते इति** ॥ अद्यादेशोऽयम् 'अनिदिताम्' इति नलोपे कृते प्रवर्तते। नलोपस्य परत्वादिति बोध्यम्। **यणिति** ॥ रेफादिकारस्येति शेषः। अदद्यच् इत्यतस्सुबुत्पत्तिः। **अदसो** ॥ अदसः असेः दात् उ दः मः इति च्छेदः। अदस, इत्यवयवषष्ठ्यन्तम्। असेरिति तद्विशेषणम्। न विद्यते सिः यस्य सः असिः तस्येति विग्रहः। इकार उच्चारणार्थः। दादिति दिग्योगे पञ्चमी। परस्येत्यध्याहार्यम्। तदाह। **अदसोऽसान्तस्येति** ॥ असेः किम्। अदस्यति। दात् किम्। अमुया। अत्र 'अलोऽन्त्यस्य' इति यकारस्य न भवति। ननु उदूताविति कथम्, उ इत्यस्यैव श्रवणादित्यत आह। **उ इतीति** ॥ उश्च ऊश्च तयोस्समाहारः इति विग्रहे, द्वन्द्वे सति, सुब्लुकि, सवर्णदीर्घे 'सनपुंसकम्' इति नपुंसकत्वे, 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वत्वे, समाहारस्यैकत्वादेकवचनस्य सोः 'स्वमोर्नपुंसकात्' इति लुकि, उ इति रूपमित्यर्थः। **आन्तरतम्यादिति** ॥ अर्धमात्रस्य व्यञ्जनस्य ईषत्सदृशो मात्रिको ह्रस्वः उकारः। ह्रस्वस्य तु मात्रिकस्य मात्रिकत्वसादृश्यादुकारो ह्रस्वः। दीर्घस्य तु द्विमात्रत्वसादृश्यात् द्विमात्र ऊकार इत्यर्थः। **अमुमुयङिति** ॥ अदद्यच् स् इति स्थिते 'उगिदचाम्' इति नुमि, हल्ङ्यादिलोपे, चकारस्य संयोगान्तलोपे, नुमो नकारस्य 'क्विन्प्रत्ययस्य कुः' इति कुत्वे, अदद्यङ् इति स्थिते, प्रथमदकारस्य मत्वे, तदुत्तरस्याकारस्य उत्वे, द्वितीयदकारस्य मत्वे, तदुत्तरस्य रेफस्य उत्वे च कृते, अमुमुयङिति रूपमिति भावः। प्रक्रियाक्रमस्तु सूत्रपौर्वापर्यज्ञानवतां सुगमम्। **अमुमुयञ्चाविति** ॥ प्राञ्चाविति विग्रहः। उत्वमत्वे पूर्ववत्। अमुमु इ अच् औ इति स्थिते यणिति विशेषः। **अमुमुईचः इति** ॥ अमुमु इ अच् इति स्थिते अन्तरङ्गोऽपि यण् 'अचः' इति लोपविषये न प्रवर्तते इत्युक्तरीत्या अकृते यणि 'अचः' इत्यकारलोपे 'चौ' इति इकारस्य दीर्घ इति भावः। **अमुमुयग्भ्यामिति** ॥ 'चोः कुः' इति कुत्वमिति विशेषः। इकारे परे मकारादुकारस्य यणमाशङ्क्य आह। **मुत्वस्यासिद्धत्वादिति** ॥ अमुमुईचे। अमुमुईचः। अमुमुईचोः। अमुमुयक्षु। मतान्तरमाह। **अन्त्यबाधे इति** ॥ अलोऽन्त्यपरिभाषाया अप्रवृत्त्या अन्त्यस्य कार्याभावे सति अन्त्यसमीपवर्तिनः कार्यं भवतीत्यर्थः। प्रकृते च अदस इति नावयवषष्ठी। किन्तु स्थानषष्ठी। ततश्च 'अलोऽन्त्यस्य' इत्युपतिष्ठते। असान्तस्य अदसः अन्त्यस्य दात्परस्य उत्वं दस्य च म इति फलितम्। अदसश्चान्त्यवर्णस्सकारः

वदतां मते 'अदमुयङ्'। 'अः सेः सकारस्य स्थाने यस्य सः असिः तस्य असेः' इति व्याख्यानात् 'त्यदाद्यत्वविषय एव मुत्वं नान्यत्र' इति पक्षे 'अदद्यङ्'। उक्तं च (भाष्ये)।

"अदसोऽद्रेः पृथङ्मुत्वं केचिदिच्छन्ति लत्ववत्।
केचिदन्त्यसदेशस्य नेत्येकेऽसोर्हि दृश्यते॥" इति।

'विष्वग्देवयोः' किम्। अश्वाची। 'अञ्चतौ' किम्। विष्वग्युक्। 'अप्रत्यये' किम्। विष्वगञ्चनम्। अप्रत्ययग्रहणं ज्ञापयति 'अन्यत्र

दात्परो न भवति। अद्यादेशे कृते तु इकारः अन्तः सोऽपि दात्परो न भवति। ततश्च अलोऽन्त्यपरिभाषाया अप्रवृत्त्या अन्त्यस्य आदेशबाधे सति अन्तसमीपवर्तिन एव दात्परस्य उत्वम्, दस्य च मः, नतु ततः प्राचीनयोरपि दकारतदुत्तरवर्णयोर्मुत्वमित्यर्थः। नन्वेवं सति 'णो नः' इति धात्वादेर्णकारस्य विहितं नत्वं नेता इत्यत्रैव स्यात्। नमतीत्यत्र न स्यादिति चेत्, मैवम्। अलोऽन्त्यपरिभाषाया अप्रवृत्त्या अन्त्यसदेशानन्त्यसदेशयोर्युगपत्प्राप्तौ अन्त्यसदेशस्यैव भवतीति परिभाषार्थ इति 'घ्यडस्सम्प्रसारणम्' इति सूत्रे भाष्ये स्पष्टं प्रपञ्चितत्वात्। यद्यपि 'घ्यडस्सम्प्रसारणम्' इति सूत्रे प्रकृतसूत्रे च 'अनन्त्यऽविकारे अन्त्यसदेशस्य' इति परिभाषा पठिता। तथापि सैवात्रार्थतस्सङ्गृहीता। अन्त्यस्य विकारः आदेशः अन्त्यविकारः। अन्त्यविकारस्याभावः अनन्त्यविकारः अर्थाभावेऽव्ययीभावेन सह नञ्तत्पुरुषो विकल्प्यते इति वक्ष्यमाणत्वात्तत्पुरुषः। अव्ययीभावपक्षे तु 'तृतीयासप्तम्योर्बहुलम्' इत्यम्भावाभावः। अलोऽन्त्यपरिभाषाया अप्रवृत्त्या अन्त्यस्य आदेशाभावे सतीति यावत्। **अदमुयङिति॥** अत्र पूर्वस्य दकारस्य तदुत्तराकारस्य च न मुत्वमिति विशेषः। मतान्तरमाह। **अः सेः सकारस्येति॥** सेरित्यस्य विवरणं सकारस्येति। असेरिति नायन्नञ्तत्पुरुषः, किन्तु अः सेः यस्य सः असिः, तस्य असेरिति विग्रहः। सेरिति स्थानषष्ठी, इकार उच्चारणार्थः, सकारस्थानकाकारवत इत्यर्थः। अदस्शब्दस्य त्यदाद्यत्वे कृते सकारस्थानकाकारवत्त्वम्। अतः त्यदाद्यत्ववत एवादस्शब्दस्य मुत्वं नान्यस्य इति फलितम्। अतः अद्यादेशे सति सकारस्थानकाकारवत्त्वाभावान्न मुत्वमित्यर्थः। तदिदं पक्षत्रयमपि भाष्यसम्मतमित्याह। **उक्तञ्चेति॥** अदसः टेः अद्रेर्विधौ सति अदद्यच् इत्यत्र प्रथमद्वितीययोः दकारयोः पृथङ्मत्वं तदुत्तरयोः अवर्णरेफयोरुत्वञ्च युगपदेव। लत्ववत्। चलीकॢप्यते इत्यत्र चरीकृप्यते इति स्थिते रेफऋकारयोर्यथा 'कृपो रो लः' इति लत्वं, तथा केचिदिच्छन्ति। अन्त्यसदेशस्यैव केचित् लत्वमिच्छन्ति। अद्यादेशे सति प्रथमयोर्द्वितीययोश्च मुत्वं नैव केचिदिच्छन्ति। हि यतः असेः सकारस्थानकाकारवत एव मुत्वं दृश्यते। अः सेः यस्येति बहुव्रीहिणा प्रतीयत इति योजना। **विष्वग्देवयोः किमिति॥** विष्वग्देवयोश्चेति किमर्थमित्यर्थः। **अश्वाचीति॥** अत्र विष्वग्देवयोस्सर्वनाम्नश्चाभावान्नाद्यादेश इति भावः। **अप्रत्यये किम्। विष्वगञ्चनमिति॥** अत्र अन इति ल्युडादेशस्य श्रूयमाणतया अञ्चेरप्रत्यया-

धातुग्रहणे तदादिविधिः' इति। तेनायस्कारः। 'अतः कृकमि—' (सू १६०) इति सः। उदङ्, उदञ्चौ, उदञ्चः। शसादावचि।

४२०। उद ईत्। (६-४-१३९)

उच्छब्दात्परस्य लुप्तनकारस्याञ्चतेर्भस्याकारस्य ईत्स्यात्। उदीचः। उदीचा। उदग्भ्यामित्यादि।

४२१। समः समि। (६-३-९३)

अप्रत्ययान्तेऽञ्चतौ परे समः समिरादेशः स्यात्। सम्यङ्, सम्यञ्चौ, सम्यञ्चः। समीचः। समीचा।

४२२। सहस्य सध्रिः। (६-३-९५)

अप्रत्ययान्तेऽञ्चतौ परे। सध्र्यङ्।

४२३। तिरसस्तिर्यलोपे। (६-३-९४)

अलुप्ताकारेऽञ्चतावप्रत्ययान्ते परे तिरसस्तिर्यादेशः स्यात्। तिर्यङ्, तिर्यञ्चौ, तिर्यञ्चः। तिर्यञ्चम्, तिर्यञ्चौ, तिरश्चः। तिरश्चा, तिर्यग्भ्यामित्यादि।

न्तत्वन्नेति भावः। ननु उत्तरपदाधिकारादञ्चुरूपे उत्तरपदे इत्यर्थाद्विष्वगञ्चनमित्यत्र अद्यादेशस्याप्रसक्तेः किमप्रत्ययग्रहणेनेत्यत आह। **अप्रत्ययग्रहणमिति** ॥ **तेनेति** ॥ अन्यथा 'अतः कृकमि' इत्यत्र 'नित्यं समासे' इत्यतोऽनुवृत्तसमासग्रहणेन उत्तरपदाक्षेपात् कृधातुरूपे उत्तरपदे इत्यर्थलाभादयस्कृदित्यत्रैव सत्वं स्यात्, अयस्कार इत्यत्र न स्यादित्यर्थः। **उदङिति** ॥ उत् अञ्चतीति विग्रहे क्विन्नादिरिति भावः। शसादौ 'अचः' इति लोपे प्राप्ते। **उद ईत्** ॥ 'अचः' इति सूत्रमनुवर्तते, अल्लोप इति च। भस्येत्यधिकृतम्। तदाह। **उच्छब्दादित्यादिना** ॥ उत् अञ्चतीति विग्रहे क्विन्नादि। **समः समि** ॥ समीति लुप्तप्रथमाकम्। अञ्चतावप्रत्यय इत्यनुवर्तते। तदभिप्रेत्य शेषपूरणेन सूत्रं व्याचष्टे। **अप्रत्ययेति** ॥ **समीचः इति** ॥ 'अचः' इति लोपे 'चौ' इति दीर्घः। **सहस्य सध्रिः** ॥ सहस्य सध्रिरस्यादप्रत्ययान्ते अञ्चतौ पर इति व्याख्यानं सुगमत्वादुपेक्षितम्। **सध्र्यङिति** ॥ सह अञ्चतीति विग्रहे क्विन्नादि पूर्ववत्। सहस्य सध्र्यादेशे यण्। **तिरसस्तिर्यलोपे** ॥ तिरि इति लुप्तप्रथमाकम्। अञ्चतावप्रत्यये इत्यनुवर्तते। न विद्यते 'अचः' इत्यल्लोपो यस्य सः अलोपः, तस्मिन्निति विग्रहः। तदाह। **अलुप्तेत्यादिना। तिर्यङिति** ॥ तिरः अञ्चतीति विग्रहे क्विन्नादि। तिरसस्तिर्यादेशे यण्। **तिरश्चः इति** ॥ शसादावचि 'अचः' इत्यल्लोपसत्वान्न तिर्यादेशः। सस्य श्चुत्वेन शः इति भावः। पुजार्थादञ्चुधातोः क्विनि 'अनिदिताम्' इति नलोपे

४२४। नाञ्चेः पूजायाम्। (६-४-३०)

पूजार्थस्याञ्चतेपरुधाया नस्य लोपो न स्यात्। अलुप्तनकारत्वान्न नुम्। प्राङ्, प्राञ्चौ, प्राञ्चः। नलोपाभावादकारलोपो न। प्राञ्चः। प्राञ्चा, प्राङ्भ्याम् इत्यादि। प्राङ्क्षु--प्राङ्क्षु--प्राङ्षु। एवं पूजार्थे प्रत्यङ्ङादयः। 'कुञ्च कौटिल्याल्पीभावयोः'। अस्य 'ऋत्विग्—' (३७३) आदिना नलोपाभावोऽपि निपात्यते। क्रुङ्, क्रुञ्चौ, क्रुञ्चः। क्रुङ्भ्यामित्यादि। 'चोः कुः'

प्राप्ते। **नाञ्चेः**॥ 'अनिदिताम्' इति सूत्रात् उपधायाः क्ङितीत्यनुवर्तते। 'श्नान्न लोपः' इत्यतो नलोप इत्यनुवर्तते। तत्र नेति लुप्तषष्ठीकम्। तदाह। **पूजार्थस्येत्यादिना**॥ पूजाया गम्यत्वे सतीत्यर्थः। न त्वञ्चुधातोः पूजार्थत्वमेव इह विवक्षितम्। अत एव अञ्चितं गच्छति इत्यत्र नलोपो न। अञ्चतेरत्र समाधानमर्थः। समाहितो भूत्वा गच्छतीति गम्यते। समाधानञ्च अव्याकुलत्वम्, अव्याकुलं गच्छतीत्यर्थः। अव्याकुलगमने च पूजा गम्यते। न त्वञ्चतेरेव सोऽर्थ इति 'अञ्चोऽनपादाने' इति सूत्रे भाष्यकैयटयोः स्पष्टम्। **प्राङ्क्ति**॥ प्रपूर्वादञ्चतेः क्विन्। प्रकर्षेण पूजनमञ्चेरर्थः। नलोपाभावे प्राञ्च् इत्यतस्सुवुत्पत्तिः। हल्ङ्यादिलोपः, संयोगान्तलोपः, ततः अनुस्वारपरसवर्णनिवृत्तौ नकारस्य 'क्विन्प्रत्ययस्य कुः' इति कुत्वेन ङकार इति भावः। **प्राञ्चाविति**॥ स्वाभाविकनकारस्य अनुस्वारपरसवर्णाविति भावः। **अलुप्तेति**॥ 'उगिदचाम्' इत्यत्र नलोपिनोऽञ्चतेरेव ग्रहणान्नुम् न। ततश्च नकारद्वयश्रवणं न शङ्क्यमिति भावः। **नलोपाभावादिति**॥ शसादावचि 'अचः' इति लोपो न भवति। लुप्तनकारस्यैवाञ्चतेस्तत्र ग्रहणादिति भावः। **प्राञ्चः इति**॥ प्र अञ्च् अस् इति स्थिते सवर्णदीर्घे रूपमिति भावः। 'नाञ्चेः पूजायाम्' इत्यनारम्भे सुटि नुमैव रूपसिद्धावपि शसादावचि नकारश्रवणं न स्यात्। 'अनिदिताम्' इति लोपप्रसङ्गात्। असर्वनामस्थानतया 'उगिदचाम्' इति नुमश्चाप्रसक्तेरिति बोध्यम्। **प्राङ्भ्यामिति**॥ 'स्वादिषु' इति पदत्वात् चकारस्य संयोगान्तलोपे अनुस्वारपरसवर्णनिवृत्तौ नकारस्य 'क्विन्प्रत्ययस्य' इति कुत्वेन ङकारः इति भावः। **इत्यादीति**॥ प्राङ्भिः। प्राञ्चे, प्राङ्भ्याम्, प्राङ्भ्यः। प्राञ्चः, प्राञ्चोः, प्राञ्चाम्। प्राञ्चि, प्राञ्चोः। **प्राङ्क्ष्यति**॥ 'ङ्णोः कुक्टुक्' इति वा कुक्। 'चयो द्वितीयाः' इति पक्षे खश्च बोध्यः। **एवमिति**॥ सुटि पूर्ववदेव रूपाणि। शसादावचि प्रत्यञ्चः, प्रत्यञ्चा, प्रत्यङ्भ्याम्। अमुमुयञ्चः। अमुमुयङ्भ्याम्। उदञ्चः। उदङ्भ्यामित्यादि ज्ञेयम्। **क्रुञ्च कौटिल्येति॥ नलोपाभावोऽपीति**॥ 'अनिदिताम्' इति नलोपाभावः, निरुपपदात् क्विन्नपि निपात्यत इत्यर्थः। सति तु नलोपे नकारो न श्रूयेत। 'उगिदचाम्' इति नुमस्सर्वनामस्थानेऽप्यप्रवृत्तेः। वस्तुतस्तु स्वभाविकञोपधस्यैव धातुपाठे निर्देशात् नलोपस्यात्र प्रसक्तिरेव नास्ति। अत एव 'परेश्च घाङ्योः' इति सूत्रे भाष्ये क्रुञ्चेत्यत्र चकारे परे 'चोः कुः' इति कुत्वमाशङ्क्य ऋत्विगादिसूत्रे क्रुञ्चेति निपातनात् कुत्वन्नेत्युक्तं सङ्गच्छते। यदि तु तस्यानुस्वारपरसवर्णाभ्यां ञकारो निर्दिश्येत, तर्हि तस्य 'चोः कुः' इति कुत्वप्रसक्तिरेव नास्तीति तदसङ्गतिः

(सू ३७८) पयोमुक्–पयोमुग्, पयोमुचौ, पयोमुचः। 'व्रश्च—' (२९४) इति षत्वम्। 'स्कोः—' (सू ३८०) इति सलोपः। जश्त्वचर्त्वे। सुवृट्–सुवृड्, सुवृश्चौ, सुवृश्चः। सुवृट्त्सु–सुवृट्सु।

इति चान्ताः।

॥ अथ हलन्तपुल्लिँङ्गे तकारान्तप्रकरणम् ॥

'वर्तमाने पृषन्महद्बृहज्जगच्छतृवच्च' (उ २४१) एते निपात्यन्ते, शतृवच्चैषां कार्यं स्यात्। उगित्त्वान्नुम्। 'सान्तमहतः—' (सू ३१७) इति दीर्घः। मह्यते पूज्यत इति महान्, महान्तौ, महान्तः। हे महन्। महतः। महता, महद्भ्यामित्यादि।

स्यात्। कुत्वे कर्तव्ये परसवर्णस्यासिद्धत्वादित्यास्तां तावत्। नोपधत्वमभ्युपेत्य आह। **क्रुङ्भिति**॥ हल्ङ्यादिलोपे संयोगान्तलोपे जकारस्य 'चोः कुः' इति कुत्वम्। 'क्विन्प्रत्ययस्य' इत्यस्यासिद्धत्वात्। **क्रुञ्भ्यामिति** ॥ संयोगान्तलोपे जकारस्य 'चोः कुः' इति कुत्वं ञकारः। अत्र प्रथमैकवचने भ्यामादावपि कुत्वं निपातनादेव न भवति। चवर्गपञ्चमञकार एव सर्वत्रेति 'परेश्च घाङ्कयोः' इति सूत्रे भाष्यकैयटस्वरसः। **पयोमुगिति** ॥ 'मुच्लृ मोक्षणे' क्विप्। सुपूर्वात् 'ओ व्रश्चू छेदने' इति धातोः क्विपि 'ग्रहिज्या' इति सम्प्रसारणे सुवृश्चूशब्दः। तस्य विशेषमाह। **व्रश्चेति षत्वमिति** ॥ हल्ङ्यादिना सुलोपे कृते चकारस्य षत्वमित्यर्थः। **सलोपः इति** ॥ धातुपाठे व्रश्चू इति सस्य श्चुत्वे कृते व्रश्चू इति निर्देशः। तत्र श्चुत्वस्यासिद्धत्वात् 'स्कोः' इति सकारस्य लोप इत्यर्थः। 'वावसाने' इति चर्त्वे षस्य टः। तदभावे जश्त्वेन ड इत्यर्थः। **सुवृट्त्स्विति** ॥ चर्त्वस्यासिद्धत्वात् पूर्वं 'डः सि' इति वा धुट्। ततश्चर्त्वमिति भावः॥

इति चान्ताः।

अथ तकारान्ताः निरूप्यन्ते। अथ महच्छब्दे विशेषं वक्तुमाह। **वर्तमाने** ॥ उणादिसूत्रमेतत्। **निपात्यन्ते इति** ॥ तत्र 'पृष सेचने' 'बृहि वृद्धौ' अनयोर्गुणाभावः, महेः कर्मणि अतिप्रत्ययः, गमेर्जगादेशश्चेति विशेषः। **शतृवदिति** ॥ शतृप्रत्ययान्तवदित्यर्थः। **उगित्त्वादिति** ॥ शतृवद्भावेन सुटि उगित्त्वान्नुमित्यर्थः। **सान्तेति** ॥ सुटि महन्त्स् इत्यादिस्थिते नकारात् पूर्वस्य अकारस्य दीर्घ इत्यर्थः। **मह्यते इति** ॥ 'कर्तरि कृत्' इति कर्त्रर्थे बाधित्वा निपातनात् 'मह पूजायाम्' इति धातोः कर्मणि अतिप्रत्यय इति

४२५ । अत्वसन्तस्य चाधातोः । (६-४-१४)

अत्वन्तस्योपधाया दीर्घः स्याद्धातुभिन्नासन्तस्य चासम्बुद्धौ सौ परे । परं नित्यं च नुमं बाधित्वा वचनसामर्थ्यादादौ दीर्घः । ततो नुम् । धीमान्, धीमन्तौ, धीमन्तः । हे धीमन् । शसादौ महद्वत् । धातोरप्यत्वन्तस्य दीर्घः । गोमन्तमिच्छति, गोमानिवाचरतीति वा क्यजन्तादाचारकिबन्ताद्वा कर्तरि

भावः । **महानिति** ॥ नुमि दीर्घे सुलोपे संयोगान्तलोप इति भावः । **महान्ताविति** ॥ नुमि दीर्घे अनुस्वारपरसवर्णाविति भावः । **हे महन्निति** ॥ असम्बुद्धावित्यनुवृत्तेः 'सान्तमहतः' इति दीर्घो नेति भावः । **महतः इति** ॥ असर्वनामस्थानत्वाच्छसादौ न दीर्घः । धीःअस्यास्तीत्यर्थे धीशब्दान्मतुप्, पकार इत्, उकार उच्चारणार्थः । तद्धितान्तत्वेन प्रातिपदिकत्वात् सुबुत्पत्तिः । धीमत् स् इति स्थिते । **अत्वसन्तस्य** ॥ अतु इति लुप्तषष्ठीकं पृथक्पदम् । अङ्गविशेषणत्वात्तदन्तविधिः । अधातोरित्यसन्तविशेषणम् । 'नोपधायाः' इत्यतः उपधाया इत्यनुवर्तते । अत्वन्तस्य धातुभिन्नासन्तस्य चेति लभ्यते । 'सर्वनामस्थाने चासम्बुद्धौ' इत्यत असम्बुद्धाविति । 'सौ च' इत्यतस्साविति 'ढ्रलोपे' इत्यतो दीर्घ इति च । तदाह । **अत्वन्तस्येत्यादिना** ॥ ननु कृते अकृते च दीर्घे प्रवृत्त्यर्हस्य नुमो नित्यत्वात् परत्वाच्च मकाराकारात् नुमि कृते अत्वन्तत्वाभावात् कथमिह दीर्घ इत्यत आह । **पर-मिति । वचनसामर्थ्यादिति** ॥ अन्यथा निरवकाशत्वापत्तिरिति भावः । **ततो नु-मिति** ॥ दीर्घे कृते नुमित्यर्थः । 'विप्रतिषेधे यद्बाधितन्तद्बाधितम्' इति त्वनित्यम् । 'पुनः प्रसङ्गविज्ञानात् सिद्धम्' इत्युक्तेरिति भावः । **धीमानिति** ॥ दीर्घे नुमि हल्ङ्यादिलोपे संयोगान्तलोपे रूपमिति भावः । **हे धीमन्निति** ॥ असम्बुद्धौ इत्युक्तेः न दीर्घ इति भावः । **महद्वदिति** ॥ असर्वनामस्थानतया शसादौ नुमभावादिति भावः । अत्वसोरिति वक्तव्ये अन्तग्रहणन्तु अन्तमात्रग्रहणार्थम् । अन्यथा उपदेशे ये अत्वन्तास्त एव गृह्येरन्, न तु मतुबादयः । नह्येते उपदेशे अत्वन्ता इत्याहुः । नन्वधातोरित्येतत् असन्तस्येव अत्वन्तस्यापि विशेषणं कुतो नेत्यत आह । **धातोरपीति** ॥ अत्वन्तधातुत्वेऽपि दीर्घार्थम् अधातोरित्येतस्य अत्वन्तविशेषणत्वन्नाश्रितमित्यर्थः । ननु धातुपाठे अत्वन्तधातुरप्रसिद्ध इत्यत आह । **गोमन्त-मिति** ॥ आचरति वेत्यनन्तरम् इत्यर्थे इति शेषः । गोमन्तमिच्छतीत्यर्थे 'सुप आत्मनः क्यच्' इति क्यचि 'नः क्ये' इति नियमात् पदत्वाभावाज्झत्वाभावे गोमत्यशब्दात् 'सनाद्यन्ताः' इति धातुत्वात् कर्तरि क्विपि अतो लोपः । 'यस्य हलः' इत्यल्लोपयलोपयोः गोमत्शब्दात् सुबुत्पत्तिः । गोमानिवाचरतीत्यर्थे तु 'सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः' इति क्विपि 'सनाद्यन्ताः' इति धातुत्वात् कर्तरि क्विपि सुबुत्पत्तिरिति भावः । एवंविधात् गोमत्शब्दात् सौ 'अत्वसन्तस्य' इति दीर्घे सति 'उगिदचाम्' इति नुमि हल्ङ्यादिलोपे गोमानिति रूपं वक्ष्यति । तत्र गोमच्छब्दस्य क्यजन्तस्य आचारकिबन्तस्य च 'सनाद्यन्ताः' इति धातुत्वात् कथमस्य 'उगिदचाम्' इति नुमागमः । अधातोरेव उगितो नुम्विधानादित्याशङ्क्य आह ।

क्विप्। उगिदचाम्—' (सू ३६१) इति सूत्रेऽञ्ग्रहणं नियमार्थम्। 'धातोश्चेदुगित्कार्यं तर्ह्यञ्चतेरेव' इति। तेन 'स्रत्' 'ध्वत्' इत्यादौ न। 'अधातोः' इति त्वधातुभूतपूर्वस्यापि नुमर्थम्। गोमान्, गोमन्तौ, गोमन्तः इत्यादि। 'भातेर्डवतुः' (उ ६३)। भवान्, भवन्तौ, भवन्तः। शत्रन्तस्य त्वत्वन्तत्वाभावान्न दीर्घः। भवतीति भवन्।

४२६। उभे अभ्यस्तम्। (६-१-५)

उगिदचामिति सूत्रे इति ॥ उगितस्सर्वनामस्थाने इत्येतावदेव सूत्रमस्तु। अञ्चतेरुगित्त्वादेव सिद्धेः। अतोऽञ्ग्रहणमतिरिच्यमानन्नियमार्थमित्यर्थः। नियमशरीरमाह। **धातोश्चेदिति** ॥ धातोश्चेदुगितः कार्यं स्यात् तर्हि अञ्चतेरेव नतु धात्वन्तरस्येति नियमार्थम्, इति पूर्वेणान्वयः। नियमस्य फलमाह। **तेनेति** ॥ 'सन्सु ध्वन्सु गतौ' इत्युगितौ धातू। ताभ्यां क्विपि 'अनिदितां हल उपधायाः' इति नलोपे सुबुत्पत्तौ सोर्हल्ङ्यादिलोपे 'वसुस्रंसुध्वंस्वनडुहां दः' इति दत्वे स्रत्, ध्वत् इति रूपमिष्टम्। उगितस्सर्वनामस्थाने इत्युक्ते तु अत्रापि नुम् स्यात्। कृते त्वञ्ग्रहणे उक्तनियमलाभादत्र नुम् न भवतीत्यर्थः। तर्ह्येतावतैव सिद्धे अधातोरिति किमर्थमित्यत आह। **अधातोरिति त्विति** ॥ अधातुः पूर्वं भूतः अधातुभूतपूर्वः, पूर्वं अधातुभूतस्यापि नुमर्थमधातोरित्येतदित्यर्थः। ततश्च उगिदचां सर्वनामस्थाने, इत्येकं वाक्यम्। तत्र अधातोरित्यभावेऽपि अञ्ग्रहणादधातोरुगित इति लाभादधातोरुगितो नलोपिनोऽञ्चतेश्च नुमागमस्स्यादित्यर्थः। अधातोरित्यपरं वाक्यम्। उक्तो नुमागमः अधातुभूतपूर्वस्यापि भवतीत्यर्थः। प्रकृते च क्यजाचारक्विबुत्पत्त्यनन्तरं धातुत्वे सत्यपि क्यजाद्युत्पत्तेः पूर्वं अधातुत्वसत्त्वान्नुम् निर्बाध इत्यर्थः। एतत् सर्वं 'उगिदचाम्' इति सूत्रे भाष्ये स्पष्टम्। अत्र क्यच्पक्षे दीर्घे नुमि च कर्तव्ये अल्लोपो न स्थानिवत्। दीर्घविधौ तन्निषेधात् क्वौ लुप्तं न स्थानिवदित्युक्तेश्च। अथ भवच्छब्दे विशेषमाह। **भातेर्डवतुरिति** ॥ उणादिसूत्रमेतत्। भाधातोर्डवतुस्स्यादित्यर्थः। डकार इत्। उकार उच्चारणार्थः। डित्त्वसामर्थ्यादभस्यापि टेर्लोपः। भवत् इति रूपम्। **भवानिति** ॥ भवच्छब्दात् सुः। 'अत्वसन्तस्य' इति दीर्घः, 'उगिदचाम्' इति नुम्, हल्ङ्यादिलोपः, संयोगान्तलोपश्च इति भावः। **शत्रन्तस्य त्विति** ॥ 'लटश्शतृशानचौ' इति भूधातोर्लटः शतृ आदेशः। शकार इत्। ऋकार इत्, शप्, गुणः, अवादेशश्च, पररूपम्, भवत् इति रूपम्। तस्य तु अत्वन्तत्वाभावादत्वसन्तस्येति दीर्घो न भवति। तत्र उकारानुबन्धग्रहणादित्यर्थः। **भवन्निति** ॥ सौ नुमि हल्ङ्यादिलोपे संयोगान्तलोपः। भवन्ताविल्यादि तु पूर्ववदेवेति भावः। दाञ्धातोः लटश्शतृादेशे शप्। 'जुहोत्यादिभ्यः श्लुः। 'श्लौ' इति द्वित्वत्, अभ्यासह्रस्वः, 'श्नाभ्यस्तयोरातः' इत्यात्लोपः। ददत् इति रूपम्। ततस्सुबुत्पत्तिः। 'उगिदचाम्' इति नुमि प्राप्ते 'नाभ्यस्तात्' इति तन्निषेधं वक्ष्यन् अभ्यस्तसंज्ञामाह। **उभे अभ्यस्तम्** ॥ 'एकाचो

षाष्ठद्वित्वप्रकरणे ये द्वे विहिते ते उभे समुदिते अभ्यस्तसंज्ञे स्तः।

४२७। नाभ्यस्ताच्छतुः। (७-१-७८)

अभ्यस्तात्परस्य शतुर्नुम् न स्यात्। ददत्—ददद्, ददतौ, ददतः।

४२८। जक्षित्यादयः षट्। (६-१-६)

षड् धातवोऽन्ये जक्षितिश्च सप्तमः एतेऽभ्यस्तसंज्ञाः स्युः। जक्षत्—जक्षद्, जक्षतौ, जक्षतः। एवं जाग्रत्, दरिद्रत्, शासत्, चकासत्। दीधीवेव्योर्ङित्त्वेऽपि छान्दसत्वाद्व्यत्ययेन परस्मैपदम्। दीध्यत्। वेव्यत्।

इति तान्ताः।

द्वे प्रथमस्य' इत्यतो द्वे इत्यनुवर्तते। उभेग्रहणं समुदायप्रतिपत्त्यर्थम्। द्वे इत्यनेन च षष्ठाध्यायविहितमेव द्वित्वं विवक्षितम्। 'अनन्तरस्य विधिर्वा प्रतिषेधो वा' इति न्यायात्। तदाह। **षाष्ठेत्यादिना** ॥ समुदिते किम्, नेनिजतीत्यत्र प्रत्येकमभ्यस्तसंज्ञायाम् 'अभ्यस्तानामादिः' इत्युदात्तः प्रत्येकं स्यात्। **नाभ्यस्ताच्छतुः** ॥ 'इदितो नुम् धातोः' इत्यतो नुमित्यनुवर्तते। तदाह। **अभ्यस्तादित्यादिना** ॥ **दददिति** ॥ ददत्शब्दात् सुः। हल्ङ्यादिलोपः। 'नाभ्यस्तात्' इति निषेधात् 'उगिदचाम्' इति नुम् न। अत्वन्तत्वाभावाच्च न दीर्घ इति भावः। 'जक्ष भक्षणहसनयोः, जागृ निद्राक्षये, दरिद्रा दुर्गतौ, चकासृ दीप्तौ, शासु अनुशिष्टौ, दीधीङ् दीप्तिदेवनयोः, वेवीङ् वेतिना तुल्ये' इति सप्त धातवः अदादौ पठिता लुग्विकरणाः। तेभ्यो लटश्शत्रादेशे शप्लुकि सुबुत्पत्तौ 'नाभ्यस्ताच्छतुः' इति निषेध इष्यते। अभ्यस्तसंज्ञायाश्च द्वित्वनिबन्धनत्वादिहाप्राप्ताविदमारभ्यते। **जक्षित्यादयः षट्** ॥ अभ्यस्तमित्यनुवृत्तं बहुवचनान्ततया विपरिणम्यते। तत्र जक्षितिः आदिर्येषामिति तद्गुणसंविज्ञानबहुव्रीहौ सति जक्षधातुमारभ्य षण्णामेव स्यात्, वेवीङो न स्यात्। अतद्गुणसंविज्ञानबहुव्रीहौ तु जागृ इत्यारभ्य षण्णां ग्रहणं स्यात्, नतु जक्षेः। अतो व्याचष्टे। **षड् धातवोऽन्ये जक्षितिश्च सप्तमः इति** ॥ अत्र विवरणवाक्ये जक्षितिरिति झिपा निर्देशः, जक्षधातुरित्यर्थः। 'रुदादिभ्यः सार्वधातुके' इति इडागमे रूपम्। सूत्रे जक्ष् इति पृथक्पदम्। इतिना जक्षिः परामृश्यते। इति आदिः येषामित्यतद्गुणसंविज्ञानबहुव्रीहिः। ततश्च इत्यादयष्षट् इत्यनेन जक्षधातोः अन्ये जागृ इत्यारभ्य षड् धातवो विवक्षिताः। चशब्दः अध्याहार्यः। एवञ्च जक्षधातुश्च जागृधातुमारभ्य षड् धातवश्चेत्येवं सप्त धातवः अभ्यस्तसंज्ञकाः स्युरिति फलतीत्यर्थः। तदिदं भाष्ये स्पष्टम्। **जक्षदिति** ॥ अभ्यस्तत्वान्नुम्निषेध इति भावः। ननु दीधीवेव्योर्ङित्त्वात् 'अनुदात्तङित आत्मनेपदम्' इति, आत्मनेपदसंज्ञक एव लटश्शानजादेशस्स्यात्, न तु शत्रादेशः इत्यत आह। **दीधीवेव्योरिति** ॥ दीधीवेव्योः छन्दोमात्रविषयत्वं तिङन्ताधिकारे वक्ष्यते। ततश्च 'व्यत्ययो बहुळम्' इति छान्दसं परस्मैपदम्। अतश्शानजसम्भवात् शत्रादेश एवेत्यर्थः। **दीध्यत्। वेव्यदिति** ॥ दीधी, वेवी, इत्याभ्यां लटश्शत्रादेशे कृते शप्लुकि यणादेशः। अभ्यस्तत्वाच्च नुम् नेति भावः ॥ इति तान्ताः।

॥ अथ हलन्तपुल्लिँङ्गे पकारान्तप्रकरणम् ॥

गुप्–गुब्, गुपौ, गुपः । गुब्भ्यामित्यादि ।

इति पान्ताः ।

॥ अथ हलन्तपुल्लिँङ्गे शकारान्तप्रकरणम् ॥

४२९ । त्यदादिषु दृशोऽनालोचने कञ्च । (३-२-६०)

त्यदादिषूपपदेष्वज्ञानार्थाद्दृशेर्धातोः कञ् स्यात्, चात् किन् ।

४३० । आ सर्वनाम्नः । (६-३-९१)

सर्वनाम्नः आकारोऽन्तादेशः स्याद्दृग्दृशवतुषु । कुत्वस्यासिद्धत्वात् 'व्रश्च–' (सू २९४) इति षः । तस्य जश्त्वेन डः । तस्य कुत्वेन गः । तस्य चर्त्वेन पक्षे कः । तादृक्–तादृग्, तादृशौ, तादृशः । 'षत्वापवादत्वात्कुत्वेन खकारः'

अथ पकारान्ताः निरूप्यन्ते । **गुबिति** ॥ 'गुपू रक्षणे' क्विप् । 'आयादय आर्धधातुके वा' इति वैकल्पिकत्वादायप्रत्ययो नेति भावः । **गुब्भ्यामिति** ॥ 'स्वादिषु' इति पदत्वात् भ्यामादौ जश्त्वमिति भावः ॥

इति पान्ताः ।

अथ शकारान्ताः निरूप्यन्ते । तादृक्शब्दं व्युत्पादयितुमाह । **त्यदादिषु** ॥ चकारात् 'स्पृशोऽनुदके क्विन्' इत्यतः क्विन् अनुकृष्यते । आलोचनमिह ज्ञानसामान्यं विवक्षितम् । तदाह । **त्यदादिष्वित्यादिना** ॥ अनालोचने किम् । तं पश्यति तद्दृशः । 'कर्मण्यण् ।' कञि तु कित्त्वात् गुणो न स्यात् । तद्दृशब्दे उपपदे क्विनि उपपदसमासे सुब्लुकि तद् दृश् इति स्थिते । **आ सर्वनाम्नः** ॥ आ इत्यविभक्तिकनिर्देशः । 'दृग्दृशवतुषु' इति सूत्रमनुवर्तते । तदाह । **सर्वनाम्नः इति** ॥ **अन्तादेशः इति** ॥ अलोऽन्त्यपरिभाषालभ्यम् । दकारस्य आत्वे सवर्णदीर्घः । तादृश् इति रूपम् । ततस्सुबुत्पत्तिः । **कुत्वस्येति** ॥ तादृश् स् इति स्थिते हल्ङ्यादिलोपे 'क्विन्प्रत्ययस्य कुः' इति कुत्वस्यासिद्धत्वात् 'व्रश्च' इति ष इत्यर्थः । **तस्येति** ॥ 'व्रश्च' इति सम्पन्नस्य षकारस्येत्यर्थः । **तस्य कुत्वेनेति** ॥ ङकारस्य 'क्विन्प्रत्ययस्य कुः' इति कुत्वेन गकार इत्यर्थः । **तस्य चर्त्वेनेति** ॥ गकारस्य 'वावसाने' इति चर्त्वविकल्प इत्यर्थः । **तादृगिति** ॥ स इव दृश्यत इति न विग्रहः । 'कर्तरि कृत्' इति कर्तर्येव क्विन्वि-

इति कैयटहरदत्तादिमते तु चर्त्वाभावपक्षे ख एव श्रूयते, न तु गः, जश्त्वं प्रति कुत्वस्यासिद्धत्वात् । 'दिगादिभ्यो यत्' (सू १४२९) इति निर्देशान्नासिद्धत्वमिति वा बोध्यम् । 'व्रश्च—' (सू २९४) इति षत्वम्, जश्त्वचर्त्वे । विट्–विड्, विशौ, विशः । विशम् ।

४३१ । नशेर्वा । (८-२-६३)

नशेः कवर्गोऽन्तादेशो वा स्यात्पदान्ते । नक्–नग् । नट्–नड्, नशौ, नशः, । नग्भ्याम्–नड्भ्यामित्यादि ।

धानात् । किन्तु कर्मकर्तरि क्विन् । स इवायं पश्यति, ज्ञानविषयो भवतीत्यर्थः । "दृशेरत्र ज्ञानविषयत्वापत्तिमात्रवृत्तित्वादज्ञानार्थता" इति 'त्यदादिषु दृशः' इति सूत्रे भाष्ये स्पष्टम् । रूढशब्द एवायमित्यन्ये । अथात्र कैयटादिमतं दूषयति । **षत्वापवादत्वादिति** ॥ यद्यपि दृभृगञ्चुयुजिक्रुञ्चुषु अप्राप्तेऽपि व्रश्चादिषत्वे 'क्विन्प्रत्ययस्य कुः' इति कुत्वमारभ्यते । तथापि क्विपैव सिद्धे 'स्पृशोऽनुदके क्विन्, त्यदादिषु दृशोऽनालोचने कञ् च' इति क्विन्विधानं 'क्विन्प्रत्ययस्य कुः' इति कुत्वार्थं क्रियमाणं घृतस्पृक्, तादृक्, इत्यादिषु अप्रवृत्तौ निरवकाशमेव स्यात् । अतस्तद्विषये कुत्वस्य फलतष्षत्वापवादत्वमिति भावः । "क्विन्विधानं 'क्विन्प्रत्ययस्य कुः' इति कुत्वार्थमेव" इति 'स्पृशोऽनुदके' इति सूत्रे भाष्ये स्पष्टम् । अनवकाशत्वादेव च शकारविषये कुत्वस्य नासिद्धत्वमपि । अन्यथा 'स्पृशोऽनुदके क्विन्' इत्यादिना स्पृशादेः क्विन्विधिवैयर्थ्यात् । उक्तञ्च । 'पूर्वत्रासिद्धम्' इत्यत्र भाष्ये "अपवादो वचनप्रामाण्यात्" इति । **खकारः इतीति** ॥ अघोषमहाप्राणसाम्यादिति भावः । **ख एवेति** ॥ तादृक्, तादृग्, इति रूपद्वयमिष्टम् । शकारस्य कुत्वेन खकारे सति तस्य 'वावसाने' इति चर्त्वपक्षे तादृक् इति रूपसिद्धावपि चर्त्वाभावपक्षे तादृख् इत्येव स्यात्, तादृग् इति गकारो न श्रूयेतेत्यर्थः । नन्वस्तु शकारस्य खकारः । अथापि तस्य चर्त्वाभावपक्षे जश्त्वेन गकारो निर्बाध इत्यत आह । **जश्त्वं प्रतीति** ॥ जश्त्वेन गकारे कर्तव्ये शकारस्थानकस्य कुत्वसम्पन्नखकारस्यासिद्धतया झलोऽभावेन जश्त्वासम्भवादित्यर्थः । अथ कैयटादिमते उक्तदोषं निरस्यति । **दिगादिभ्यो यदितीति** ॥ 'विश प्रवेशने' क्विप्, विश् इति रूपम् । तस्य विशेषमाह । **व्रश्चेति षत्वमिति** ॥ विश् स् इति स्थिते हल्ङ्यादिलोपे 'व्रश्च' इति शकारस्य षकार इत्यर्थः । **जश्त्वचर्त्वे इति** ॥ षस्य जश्त्वेन डः । 'वादसाने' इति तस्य चर्त्वेन पक्षे टः इत्यर्थः । विड्भ्याम् । विट्सु–विट्सु । 'णश अदर्शने' क्विप् । नश् इति रूपम् । ततस्सुबुत्पत्तिः । सोर्हल्ङ्यादिलोपे व्रश्चादिना नित्यं षत्वे प्राप्ते । **नशेर्वा** ॥ 'क्विन्प्रत्ययस्य कुः' इत्यतः कुरित्यनुवर्तते, 'स्कोस्संयोगाद्योः' इत्यतः अन्ते इति च । 'पदस्य' इत्यधिकृतम् । तदाह । **नशेः कवर्गः इत्यादिना** ॥ अन्तादेश इत्यलोऽन्त्यसूत्रलभ्यम् । पक्षे 'व्रश्च' इति षत्वम् । **नक्–नगिति** ॥ कुत्वपक्षे जश्त्वचर्त्वाभ्यां रूपे । **नट्–नडिति** ॥ षत्वपक्षे जश्त्वचर्त्वाभ्यां रूपे ।

४३२ । स्पृशोऽनुदके क्विन् । (३-२-५८)

अनुदके सुप्युपपदे स्पृशेः क्विन्स्यात् । घृतस्पृक्--घृतस्पृग्, घृतस्पृशौ, घृतस्पृशः । क्विन् प्रत्ययो यस्मादिति बहुव्रीह्याश्रयणात्क्विप्यपि कुत्वम् । स्पृक् । षडगकाः प्राग्वत् ।

इति शान्ताः ।

॥ अथ हलन्तपुल्लिँङ्गे षकारान्तप्रकरणम् ॥

'ञि धृषा प्रागल्भ्ये' । अस्मात् 'ऋत्विग्—' (सू ३७३) आदिना क्विन् । द्वित्वमन्तोदात्तत्वं च निपात्यते । कुत्वात्पूर्वं जश्त्वेन डः गः कः । धृष्णोतीति दधृक्–दधृग्, दधृषौ, दधृषः । दधृग्भ्यामित्यादि । रत्नानि

नग्भ्याम्–नड्भ्यामिति ॥ कुत्वपक्षे जश्त्वेन गकारः । षत्वपक्षे तु जश्त्वेन डकारः । 'मस्जिनशोर्झलि' इति नुम् तु न । धातोर्विहिते प्रत्यये एव तत्प्रवृत्तेर्वक्ष्यमाणत्वात् । **स्पृशोऽनुदके** ॥ **अनुदके सुपीति** ॥ उदकशब्दभिन्ने सुबन्ते इत्यर्थः । 'सुपि स्थः' इत्यतः सुपीत्यनुवर्तते इति भावः । **घृतस्पृक्–घृतस्पृगिति** ॥ घृतं स्पृशतीति विग्रहे क्विन् उपपदसमासः । सुब्लुक् । घृतस्पृश्शब्दात् सुबुत्पत्तिः । सोर्हल्ङ्यादिलोपः । 'क्विन्प्रत्ययस्य' इति कुत्वस्यासिद्धत्वात् पूर्वं 'व्रश्च' इति षः । तस्य जश्त्वेन डः । तस्य कुत्वेन गः । तस्य चर्त्वविकल्प इति भावः । घृतस्पृग्भ्याम् । घृतस्पृक्षु । अथ 'क्विन्प्रत्ययस्य कुः' इत्यत्र 'क्विनः कुः' इत्येतावतैव क्विन्नन्तस्येति लब्धे प्रत्ययग्रहणं 'क्विन् प्रत्ययो यस्मादिति बहुव्रीहिलाभायेत्युक्तं युक्तशब्दनिरूपणावसरे । तस्य प्रयोजनमाह । **क्विन् प्रत्ययो यस्मादिति बहुव्रीह्याश्रयणात् क्विप्यपीति** ॥ सति कुत्वं भवतीति शेषः । अनुदके सुप्युपपदे तावत् स्पृशेः क्विन् विहितः । अतो निरुपसर्गात् स्पृशेः क्विबेव । तस्य सम्प्रति क्विन्नन्तत्वाभावेऽपि कुत्वं भवत्येव । बहुव्रीह्याश्रयणेन कदा चित् क्विन्नन्तत्वमात्रेणापि क्विन्प्रत्ययान्तत्वयोग्यतालाभादिति भावः । **षडगकाः प्राग्वदिति** ॥ षत्वजश्त्वकुत्वचर्त्वैरिति भावः ॥

इति शान्ताः ।

अथ षकारान्ताः निरूप्यन्ते । दधृष्शब्दस्य व्युत्पत्तिं दर्शयति । **ञि धृषेति** ॥ 'आदिर्ञिटुडवः' इति ञिः इत् । आकारस्तु 'उपदेशेऽजनुनासिकः' इति इत् । **ऋत्विगादिनेति** ॥ क्विन्नादित्रयं निपात्यते । क्विनि लुप्ते धृष् इत्यस्य द्वित्वम् । 'उरत्' रपरत्वम् । हलादिशेषः । कित्त्वान्न लघूपधगुणः, दधृष् इति रूपम् । 'ञ्णित्यादिर्नित्यम्' इत्याद्युदात्तनिवृत्त्यर्थमन्तोदात्तनिपातनम् । **कुत्वात्पूर्वमिति** ॥ जश्त्वं प्रति कुत्वस्यासिद्धत्वात् प्रथमं जश्त्वेन षस्य डकार इत्यर्थः । **गः कः इति** ॥ 'क्विन्प्रत्ययस्य' इति डस्य कुत्वेन गकारः,

मुष्णातीति रत्नमुट्–रत्नमुड्, रत्नमुषौ, रत्नमुषौ। 'षड्भ्यो लुक्' (सू २६१) षट्–षड्, षड्भिः। षड्भ्यः। षड्भ्यः। 'षट्चतुर्भ्यश्च' (सू ३३८) इति नुट्। 'अनाम्' इति पर्युदासान्न ष्टुत्वनिषेधः। 'यरोऽनुनासिके—' (सू ११६) इति विकल्पं बाधित्वा 'प्रत्यये भाषायां नित्यम्' (वा ५०१७) इति वचनान्नित्यमनुनासिकः। षण्णाम्। षट्सु–षट्सु। तदन्तविधिः। परमषट्। परमषण्णाम्। गौणत्वे तु प्रियषषः। प्रियषषाम्। रुत्वं प्रति षत्वस्यासिद्धत्वात् 'ससजुषो रुः' (सू १६२) इति रुत्वम्।

४३३। वोरुपधाया दीर्घ इकः। (८-२-७६)

रेफवान्तस्य धातोरुपधायाः इको दीर्घः स्यात्पदान्ते। पिपठीः, पिपठिषौ, पिपठिषः। पिपठीभ्याम्। 'वा शरि' (सू १५१) इति वा विसर्जनीयः।

तस्य चर्त्वेन ककार इत्यर्थः। **रत्नमुडिति** ॥ 'मुष स्तेये' क्विप्, उपपदसमासः, सुब्लुक्, हल्ङ्यादिलोपः, जश्त्वचर्त्वे, इति भावः। षष्शब्दो नित्यं बहुवचनान्तः। तस्य बहुवचनेष्वेव रूपाणि दर्शयति। **षड्भ्यो लुगिति** ॥ अनेन जश्शसोः लुकि जश्त्वचर्त्वे इति शेषः। **तदन्तविधिरिति** ॥ 'षड्भ्यो लुक्, षट्चतुर्भ्यश्च' इत्यनयोराङ्गत्वादिति भावः। प्रियाः षट् यस्येति बहुव्रीहौ प्रियषष्शब्दस्य एकद्विबहुवचनानि सन्ति। प्रियषट्–प्रियषड्, प्रियषषौ, प्रियषषः, इत्यादि रत्नमुषशब्दवत्। तत्र 'षड्भ्यो लुक्' इति 'षट्चतुर्भ्यश्च' इति च लुड्नुटावाशङ्क्य आह। **गौणत्वे त्विति** ॥ षड्भ्यः इति, षट्चतुर्भ्यः इति च बहुवचननिर्देशबलेन तदर्थप्राधान्य एव लुड्नुटोः प्रवृत्तेरिति भावः। पठितुमिच्छतीत्यर्थे 'पठ व्यक्तायां वाचि' इति धातोः 'धातोः कर्मणस्समानकर्तृकादिच्छायां वा' इति सन्प्रत्यये 'सन्यङोः' इति द्वित्वे हलादिशेषे 'सन्यतः' इत्यभ्यासस्य इत्त्वं, सन इट्, षत्वं, 'सनाद्यन्ताः' इति धातुत्वम्। पिपठिष इत्यस्मात् क्विप्, 'अतो लोपः', पिपठिष्, इति षकारान्तम्। कृदन्तत्वात् प्रातिपदिकत्वं, ततस्सुः, तत्र विशेषं दर्शयति। **रुत्वं प्रतीति** ॥ 'क्वौ लुप्तं न स्थानिवत्' इति निषेधाद्धल्ङ्यादिलोपे कृते 'ससजुषो रुः' इति रुत्वम्। न च सकाराभावश्शङ्क्यः। रुत्वं प्रति षत्वस्यासिद्धत्वादित्यर्थः। **वोरुपधायाः** ॥ र् च, व् च, वौ तयोरिति विग्रहः। 'सिपि धातो रुर्वा' इत्यतो धातोरित्यनुवर्तते। वोरिति तद्विशेषणम्। तदन्तविधिः। 'पदस्य' इत्यधिकृतम्। 'स्कोस्संयोगाद्योः' इत्यतः अन्ते इत्यनुवर्तते। तदाह। **रेफेत्यादिना** ॥ **पिपठीरिति** ॥ ठकारादिकारस्य दीर्घे रेफस्य विसर्ग इति भावः। **पिपठीभ्यामिति** ॥ 'स्वादिषु' इति पदत्वात् 'वोरुपधायाः' इति भ्यामादौ पदान्तत्वलक्षणो दीर्घ इति भावः। सुपि विशेषमाह। **वा शरीति** ॥ पिपठिष् सु इति स्थिते षत्वस्यासिद्धत्वाद्रुत्वे, दीर्घे, विसर्जनीये, तस्य सत्वं बाधित्वा 'वा शरि' इति विकल्पेन विसर्जनीयः। तदभावपक्षे विसर्जनीयस्य सत्वमित्यर्थः। तत्र विसर्जनीयपक्षे पिपठीः सु इति स्थिते, इण्कवर्गाभ्यां परत्वाभावात् 'आदेशप्रत्यययोः'

४३४। नुम्विसर्जनीयशर्व्यवायेऽपि । (८-३-५८)

एतैः प्रत्येकं व्यवधानेऽपि इण्कुभ्यां परस्य सस्य मूर्धन्यादेशः स्यात् । ष्टुत्वन पूर्वस्य षत्वम् । पिपठीष्षु--पिपठीःषु । 'प्रत्येकम्' इति व्याख्यानादनेक-व्यवधाने षत्वं न । निंस्त्व । निंस्से । नुम्ग्रहणं नुम्स्थानिकानुस्वारोपलक्षणार्थं, व्याख्यानात् । तेनेह न । सुहिन्सु । पुंसु । अत एव न शर्ग्रहणेन गतार्थता । 'रात्सस्य' (सू २८०) इति सलोपे विसर्गः । चिकीः, चिकीर्षौ, चिकीर्षः ।

इति षत्वे अप्राप्ते । **नुम्विसर्जनीय** ॥ इण्कोः इति, मूर्धन्यः इति चानुवर्तते । तदाह । **एतैः प्रत्येकमित्यादिना** ॥ अत्र प्रत्येकमेव नुमादिभिर्व्यवधानं विवक्षितम् । न तु 'अट्कु-प्वाङ्' इतिवत् यथासम्भवं व्यवधानमिति भाष्ये स्पष्टम् । ततश्च प्रकृते विसर्जनीयपक्षे तेन व्यवधानेऽपि षत्वमिति भावः । विसर्जनीयस्य सत्वपक्षे आह । **ष्टुत्वेनेति** ॥ पिपठीस् सु इति स्थिते प्रथमसकारेण शरा व्यवायमाश्रित्य ईकारादिणः परत्वात् द्वितीयसकारस्य षत्वे सति पूर्वस्य सकारस्य ष्टुत्वेन षकारः, नतु 'आदेशप्रत्यययोः' इति षः । तत्र अपदान्तस्य इत्यनुवृत्तेरिति भावः । एवञ्च 'नुम्शर्व्यवायेऽपि' इत्येव सिद्धे विसर्जनीयग्रहणं व्यर्थमित्याहुः । अयोगवाहानां शर्ष्वपि पाठादिह विसर्जनीयग्रहणं भाष्ये प्रत्याख्यातम् । **निंस्त्वेति** ॥ 'णिसि चुम्बने' लुग्विकरणः । 'णो नः' इति णस्य नः, इदित्त्वान्नुम् । अनुदात्तेत्त्वादात्मनेपदम् । लोण्मध्यमपुरुषैकवचनं थास्, थासः से 'सवाभ्यां वामौ' इत्येकारस्य वत्वम् । निन्स्त्व इति स्थिते 'नश्चापदान्तस्य' इत्यनुस्वारे निंस्त्वेति रूपम् । अत्र यथासम्भवं व्यवधाना-श्रयणे तु नुम्स्थानिकानुस्वारेण सकारेण च व्यवहितस्य द्वितीयसकारस्य षत्वं स्यात् । अतः प्रत्येकं व्यवधानमाश्रितमिति भावः । **निंस्से इति** ॥ उक्तधातोर्लण्मध्यमपुरुषैकवचनं थास् । तस्य 'थासः से' इति सेआदेशः । निंस्से इत्यत्रापि द्वितीयसकारस्य षत्वं न भवति । प्रत्येकमेव व्यवधानाश्रयणादिति भावः । 'हिंसि हिंसायाम्' सुपूर्वादस्मात् क्विप्, इदित्त्वान्नुम्, ततस्सप्तमीबहुवचने सुहिन्स्सु इति स्थिते प्रथमसकारस्य संयोगान्तलोपे सुहिन्सु इति रूपम् । 'स्वादिषु' इति पदान्तत्वात् 'नश्चापदान्तस्य' इत्यनुस्वारो न । किञ्च पुम्शब्दात् सप्तमीबहुवचने पुंस्सु इति स्थिते प्रथमसकारस्य संयोगान्तलोपे पुंसु इति रूपम् । तत्र सुहिन्सु इत्यत्र नुमा व्यवधानात् षत्वं स्यात् । नुम्ग्रहणस्यानुस्वारोपलक्षणार्थत्वे तु पुंसु इत्यत्र षत्वं स्यादित्यत आह । **नुम्ग्रहणमिति** ॥ **व्याख्यानादिति** ॥ प्रकृतसूत्रे 'हयवरट्' सूत्रे च भाष्ये तथा व्याख्यानादित्यर्थः । नुम्ग्रहणं नुम्स्थानिकानुस्वारोपलक्षणार्थमित्येतत् सूत्राक्षरा-नुगतमित्याह । **अत एव न शर्ग्रहणेन गतार्थतेति** ॥ नुम्ग्रहणस्य नुम्स्थानिकानुस्वारो-पलक्षणार्थत्वादेव शर्ग्रहणेन नुम्ग्रहणस्य गतार्थता लब्धप्रयोजनता नेत्यर्थः । नुम्ग्रहणस्य केवला-नुस्वारोपलक्षणार्थत्वे तु शर्ग्रहणेनैव सिद्धत्वात् तद्ग्रहणमनर्थकं स्यात् । अनुस्वारस्य शर्ष्वपि पाठादिति भावः । **चिकीरिति** ॥ कृधातोस्सनि 'इको झल्' इति सनः कित्त्वादृकारस्य गुणाभावे 'अज्झनगमां सनि' इति दीर्घः । ततः 'ऋत इद्धातोः' इति इत्त्वम्, 'हलि च'

'रोः सुपि' (सू ३३९) इति नियमान्न विसर्गः। चिकीर्षु। 'दमेर्डोस्' (उ २२७)। डित्त्वसामर्थ्यादिलोपः। षत्वस्यासिद्धत्वादुत्वविसर्गौ। दोः, दोषौ, दोषः। 'पदन्नो—' (सू २२८) इति वा दोषन्। दोष्णः। दोष्णा दोषः। दोषा। 'विश प्रवेशने'। सन्नन्तात्क्विप्। कत्वस्यासिद्धत्वात्संयोगान्तलोपः 'ब्रश्च—' (सू २९४) इति षः। जश्त्वचर्त्वे। विविट्—विविड्, विविक्षौ, विविक्षः। 'स्कोः—' (सू ३८०) इति कलोपः। तट्—तड्, तक्षौ, तक्षः। गोरट्—गोरड्, गोरक्षौ, गोरक्षः। तक्षिरक्षिभ्यां ण्यन्ताभ्यां

इति दीर्घः। ततः 'सन्यङोः' इति द्वित्वम्। हलादिशेषः, ह्रस्वः, 'कुहोश्चुः' इत्यभ्यासककारस्य चुत्वं, सस्य षत्वम्। चिकीर्ष इति रूपम् 'सनाद्यन्ताः' इति धातुत्वात्ततः क्विप्। 'अतो लोपः' चिकीर्ष् इत्यस्मात् षकारान्तात् सुबुत्पत्तौ सोर्हल्ङ्यादिलोपे चिकीर्ष् इति स्थितम्। एतावत् सिद्धवत्कृत्य 'रात्सस्य' इति नियमात् षकारस्य संयोगान्तलोपाभावमाशङ्क्य आह। **रात्सस्येति** ॥ षत्वस्यासिद्धत्वादिति भावः। एवञ्चिकीर्भ्यामित्यादूह्यम्। विसर्गमाशङ्क्य आह। **रोः सुपीति** ॥ प्रकृते रपरत्वसम्पन्नस्य रस्य रुत्वाभावादिति भावः। **दमेर्डोसिति** ॥ औणादिकमेतत्सूत्रम्। 'दमु उपशमे' इत्येतस्माद्धातोर्डोस्प्रत्ययस्यादित्यर्थः। डकार इत्। **डित्त्वसामर्थ्यादिति** ॥ 'टेः' इति भस्य विहितष्टिलोप इह भत्वाभावेऽपि डित्त्वसामर्थ्यात् भवतीत्यर्थः। सकारस्य प्रत्ययावयवत्वात् षत्वं, दोष् इति षकारान्तं रूपम्। ततस्सोर्हल्ङ्यादिलोपः। एतावत् सिद्धवत्कृत्य आह। **षत्वस्यासिद्धत्वादुत्वविसर्गाविति** ॥ षत्वस्यासिद्धत्वादुत्वे सति विसर्गः। **वा दोषन्निति** ॥ शसादाविति शेषः। **दोष्णः इति** ॥ शसि दोषन्नादेशे 'अल्लोपोऽनः' इत्यकारलोपे 'रषाभ्याम्' इति णत्वमिति भावः। दोःसु—दोष्षु। विवक्ष्शब्दं व्युत्पादयति। **विशेति** ॥ **सन्नन्तादिति** ॥ वेष्टुमिच्छतीति विप्रहे विशेस्सन् 'हलन्ताच्च' इति सनः कित्त्वान्न लघूपधगुणः। 'सन्यङोः' इति द्वित्वम्। हलादिशेषः। शकारस्य झल्परकत्वात् 'ब्रश्च' इति षः। 'षढोः कः सि' इति षस्य कः। प्रत्ययावयवत्वात् सस्य षत्वम्। 'सनाद्यन्ताः' इति धातुत्वात् क्विप्। 'अतो लोपः' विवक्ष् इति षकारान्तं रूपमित्यर्थः। **कत्वस्येति** ॥ विविक्ष् इत्यस्मात् सोर्हल्ङ्यादिलोपे षकारस्य संयोगान्तलोपः। 'स्कोः' इति ककारलोपस्तु न शङ्क्यः। संयोगादिलोपे कर्तव्ये 'षढोः कः सि' इति कत्वस्यासिद्धत्वादित्यर्थः। **ब्रश्चेति षः इति** ॥ संयोगान्तलोपे सति सकारस्य निमित्तस्य निवृत्त्या कत्वस्यापि निवृत्तौ, झल्परत्वनिवृत्त्या पूर्वप्रवृत्तषत्वस्यापि निवृत्तौ, पदान्तत्वात् 'ब्रश्च' इति शस्य ष इत्यर्थः। **जश्त्वचर्त्वे इति** ॥ षस्य जश्त्वेन डः, तस्य चर्त्वविकल्प इत्यर्थः। **स्कोरिति** ॥ 'तक्ष तनूकरणे' अस्मात् क्विप् ततस्सोर्हल्ङ्यादिलोपे 'स्कोः' इति कलोपे षस्य जश्त्वेन डः, तस्य चर्त्वविकल्प इत्यर्थः। तड्भ्याम्। तट्सु—तट्सु। **गोरडिति** ॥

---

१. षत्वस्येति बहुषु पुस्तकेषु पाठः उपलभ्यते।

क्विपि तु 'स्कोः—' (सू ३८०) इति न प्रवर्तते। णिलोपस्य स्थानिवद्भावात्। 'पूर्वत्रासिद्धे न स्थानिवत्' (वा ४३३) इति त्विह नास्ति। 'तस्य दोषः संयोगादिलोपलत्वणत्वेषु' (वा ४४०) इति निषेधात्। तस्मात्संयोगान्तलोप एव। तक्-तग्। गोरक्-गोरग्। 'स्कोः—' (सू ३८०) इति कलोपं प्रति कुत्वस्यासिद्धत्वात्संयोगान्तलोपः। पिपक्—पिपग्। एवं विवक्। दिधक्।

इति षान्ताः।

'रक्ष पालने' इत्यस्मात् कर्मण्युपपदे अणि प्राप्ते, वाऽसरूपन्यायेन क्विपि सुबुत्पत्तौ तक्ष्शब्दवद्रूपम्। **तक्षिरक्षिभ्यामिति** ॥ इकारनिर्देशोऽयम्। तक्ष् रक्ष् इति धातुभ्यां 'हेतुमति च' इति णिच्। चकार इत्। 'चुटू' इति णकार इत्। ततः 'सनाद्यन्ताः' इति धातुत्वात् क्विपि 'णेरनिटि' इति णिलोपे, क्विपि लुप्ते, तक्ष्, रक्ष्, इति षकारान्ते रूपे। ततस्सुलोपे सति संयोगान्तलोपापवादः 'स्कोः संयोगाद्योः' इति ककारस्य लोपो न प्रवर्तते इत्यर्थः। **णिलोपस्येति** ॥ 'णेरनिटि' इति णिलोपस्य 'अचः परस्मिन्' इति स्थानिवत्त्वादित्यर्थः। **तस्य दोषः इति ॥ तस्मादिति** ॥ 'स्कोः' इत्यस्याप्रवृत्तेरित्यर्थः। सति च षकारस्य संयोगान्तलोपे ककारस्य जश्त्वचर्त्वे इत्यभिप्रेत्य आह। **तक्-तग्। गोरक्-गोरगिति** ॥ 'डु पचष् पाके' अस्मात् सनि 'सन्यङोः' इति द्वित्वम्, हलादिशेषः। 'सन्यतः' इत्यभ्यासाकारस्य इत्त्वम्। 'चोः कुः' इति चकारस्य कुत्वम्। प्रत्ययावयवत्वात् सस्य षः। पिपक्ष् इति रूपम्। ततस्सोर्लोपे 'स्कोः' इति ककारस्य लोपमाशङ्क्य आह। **कुत्वस्यासिद्धत्वादिति** ॥ चकारस्थानिकस्येति शेषः। सति च षकारस्य संयोगान्तलोपे झल्परत्वनिवृत्त्या पूर्वप्रवृत्तककारस्य निवृत्तौ पदान्तत्वात् कुत्वे जश्त्वचर्त्वे इत्यभिप्रेत्य आह। **पिपक्-पिपगिति** ॥ पिपक्षौ, पिपक्षः, इत्यादि। **एवं विवगिति** ॥ वक्तुमिच्छतीति विग्रहे 'वच परिभाषणे' इत्यस्मात् विवक्षूशब्दः पिपक्षूशब्दवदित्यर्थः। **दिधगिति** ॥ दग्धुमिच्छतीत्यर्थे 'दह भस्मीकरणे' इत्यस्मात्सनि, द्वित्वे, हलादिशेषे, अभ्यासेत्त्वे, दिदह्स इति स्थिते 'दादेर्धातोर्घः' इति हस्य घत्वे 'एकाचो बशः' इति दकारस्य धत्वे, दिधघ्स इति घकारस्य चर्त्वेन ककारे प्रत्ययावयवत्वात् सस्य षत्वे ततः क्विपि अतो लोपे दिधक्ष् इति रूपम्। तस्मात् सुबुत्पत्तौ सोर्लोपे कुत्वस्यासिद्धत्वात् 'स्कोः' इत्यभावे षकारस्य संयोगान्तलोपे खर्परत्वाभावात् पूर्वप्रवृत्तककारस्य व्यावृत्तौ पदान्तत्वात् जश्त्वचर्त्वे इति भावः। दिधक्षौ-दिधक्षः, इत्यादि ॥

इति षान्ताः।

॥ अथ हलन्तपुल्लिङ्गे सकारान्तप्रकरणम् ॥

'पिस गतौ' सुष्ठु पेसतीति सुपीः, सुपिसौ, सुपिसः। सुपिसा, सुपीर्भ्याम्। सुपीःषु–सुपीष्षु। एवं सुतूः। 'तुस खण्डने'। विद्वान्, विद्वांसौ, विद्वांसः। हे विद्वन्। विद्वांसम्, विद्वांसौ।

४३५। वसोः सम्प्रसारणम्। (६-४-१३१)

वस्वन्तस्य भस्य सम्प्रसारणं स्यात्। पूर्वरूपं, षत्वम्। विदुषः। विदुषा। 'वसुस्रंसु–' (सू ३३४) इति दत्वम्। विद्वद्भ्याम्, इत्यादि। सेदिवान्, सेदिवांसौ, सेदिवांसः। सेदिवांसम्। अन्तरङ्गोऽपीडागमः सम्प्र-

---

अथ सकारान्ताः निरूप्यन्ते॥ **सुपीरिति**॥ 'वोरुपधायाः' इति दीर्घः। **एवं सुतूरिति। विद्वानिति**॥ 'विद ज्ञाने' अदादिः, लटश्शत्रादेशे 'विदेश्शतुर्वसुः' शित्त्वात् सार्वधातुकत्वात् शप्, लुक्। 'सार्वधातुकमपित्' इति ङित्त्वान्न लघूपधगुणः। कृदन्तत्वात् प्रातिपदिकत्वं, विद्वस्शब्दः, तस्मात् सुः, उगित्त्वान्नुम्, 'सान्तमहतः' इति दीर्घः, सुलोपः, सस्य संयोगान्तलोपः, तस्यासिद्धत्वान्नलोपो नेति भावः। सान्तत्वाभावात् 'वसुस्रंसु' इति दत्वन्न। **विद्वांसाविति**॥ सुटि नुमि कृते 'सान्तमहतः' इति दीर्घः, 'नश्च' इत्यनुस्वारः इति भावः। शसादावचि विशेषमाह। **वसोः सम्प्रसारणम्**॥ प्रत्ययग्रहणपरिभाषया वसोरिति तदन्तग्रहणम्। भस्येत्यधिकृतम्। तदाह। **वस्वन्तस्येति**॥ **पूर्वेति**॥ शसि वकारस्य उत्वे विदु अस् इति स्थिते, 'सम्प्रसारणाच्च' इति पूर्वरूपे, विदुस् इति स्थिते, प्रत्ययावयवत्वात् सस्य षत्वमित्यर्थः। 'षत्वतुकोरसिद्धः' इति पूर्वरूपस्यासिद्धत्वन्न शङ्क्यम्। पदान्तपदाद्योरेकादेश एव तत्प्रवृत्तेः। सुपि दत्वे चर्त्वम्। विद्वत्सु। **सेदिवानिति**॥ 'षद्लृ विशरणगत्यवसादनेषु' धात्वादेः षः सः, भाषायां सदवसश्रुवः' इति लिटः क्वसुः, उकावितौ, 'लिटि धातोः' इति द्वित्वम्, हलादिशेषः, 'अत एकहल्मध्ये' इत्येत्त्वाभ्यासलोपौ, 'वस्वेकाजाद्धसाम्' इति इट्। सेदिवस्शब्दः। ततस्सुः, उगित्त्वान्नुम्, 'सान्तमहतः' इति दीर्घः, सुलोपः, सस्य संयोगान्तलोपः, तस्यासिद्धत्वान्नलोपो न। सान्तवस्वन्तत्वाभावान्न दत्वमिति भावः। **सेदिवांसाविति**॥ नुमि 'सान्तमहतः' इति दीर्घः। ननु उक्तरीत्या निष्पन्नात् सेदिवस्शब्दात् शसि 'वसोः सम्प्रसारणम्' इति वकारस्य उत्वे पूर्वरूपे इकारस्य यणि सेद्युषः इति स्यात्। ततश्च सेदुषः इति वक्ष्यमाणं रूपमयुक्तम्। नच शसि भविष्यति। भविष्यत्सम्प्रसारणरूपकार्यं पर्यालोच्य पूर्वमेव इट् न प्रवर्तते। पदावधिकान्वाख्यानाभ्युपगमादिति वाच्यम्। एवमपि बहिर्भूतयजादिसर्वनामस्थानस्वादिप्रत्ययनिमित्तकभसंज्ञापेक्षतया सम्प्रसारणस्याङ्गस्य बहिरङ्गत्वेन यणादेशस्यैवान्तरङ्गत्वात् प्रथमं प्रवृत्तेः। परादन्तरङ्गस्य बलवत्त्वादित्यत आह। **अन्तरङ्गोऽपीति**॥

सारणविषये न प्रवर्तते । 'अकृतव्यूहाः—' (प ५७) इति परिभाषया । सेदुषः । सेदुषा, सेदिवद्भ्याम्, इत्यादि । 'सान्तमहतः—' (सू ३१७) इत्यत्र सान्तसंयोगोऽपि प्रातिपदिकस्यैव गृह्यते, न तु धातोः । महच्छब्दसाहचर्यात् । सुष्ठु हिनस्तीति सुहिन्, सुहिंसौ, सुहिंसः । सुहिन्भ्याम् इत्यादि । सुहिन्त्सु—सुहिन्सु । ध्वत्—ध्वद्, ध्वसौ, ध्वसः । ध्वद्भ्याम् । एवं स्रत् ।

४३६ । पुंसोऽसुङ् । (७-१-८९)

सर्वनामस्थाने विवक्षिते पुंसोऽसुङ् स्यात् । असुङ उकार उच्चारणार्थः ।

अकृतेति ॥ भविष्यता सम्प्रसारणेन वलादित्वस्य विनाशोन्मुखत्वादिति भावः । वस्तुतस्तु प्रथममपि सेदिवस्शब्दादेव सुबुत्पत्तिरस्तु । तथापि वकारस्य सम्प्रसारणे, उत्वे कृते, यणि सत्यपि सम्प्रसारणस्य बहिरङ्गत्वेनासिद्धत्वात् 'लोपो व्योः' इति लोपे, सेदुषः इति रूपं सिद्धम् । नच 'नाजानन्तर्ये बहिष्ट्वप्रक्लप्तिः' इति निषेधश्शङ्क्यः । उत्तरकालप्रवृत्तिके अजानन्तर्य एव तत्प्रवृत्तेरभ्युपगमात् । इह च उत्तरकालप्रवृत्तिके वलि लोपे तदभावात् । किञ्च कृते इटि सम्प्रसारणप्रवृत्तावपि वलादित्वरूपनिमित्तनिवृत्त्या इटो निवृत्तौ सेदुषः इति निर्बाधम् । 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति न्यायात् । किञ्च पदावधिकान्वाख्यानेऽपि सेद्वस् अस् इति स्थिते इट्सम्प्रसारणयोः प्राप्तौ प्रतिपदविधित्वेन शीघ्रोपस्थितिकत्वात् प्रथमं सम्प्रसारणे वलादित्वाभावादिटः प्राप्तिरेव नास्तीति सेदुषः इति निर्बाधमित्याहुः । **सेदुषा, सेदिवद्भ्यामित्यादीति** ॥ सेदिवत्सु । 'हिसि हिंसायाम्' इदित्त्वान्नुम्, सुपूर्वात्क्विप्, इदित्त्वान्नलोपो न, 'नश्च' इत्यनुस्वारः, सुहिंस्शब्दात्सोर्लोपः, सकारस्य संयोगान्तलोपः, तस्यासिद्धत्वान्नलोपो न । नापि 'सर्वनामस्थाने च' इति दीर्घः । निमित्तापायादनुस्वारनिवृत्तिः । सुहिन् इति सौ रूपं वक्ष्यति । तत्र 'सान्तमहतः' इति दीर्घमाशङ्क्य आह । **सान्तेति** ॥ **सुहिन्भ्यामिति** ॥ 'स्वादिषु' इति पदान्तत्वात् सस्य संयोगान्तलोपे निमित्तापायादनुस्वारनिवृत्तिरिति भावः । **सुहिन्स्विति** ॥ संयोगान्तलोपे अनुस्वारनिवृत्तिः । सुपस्सकारमाश्रित्य पुनरनुस्वारस्तु न, पदान्तत्वात् । **ध्वदिति** ॥ 'ध्वंसु अवस्रंसने' कृतानुस्वारनिर्देशः । अनुस्वारस्यासिद्धत्वात् 'अनिदिताम्' इति नलोपः । क्विप्, सोर्लोपः । 'वसुस्रंसु' इति दत्वम् । 'वाऽवसाने' इति चर्त्वविकल्प इति भावः । **एवमिति** ॥ 'स्रंसु अवस्रंसने' क्विबादि पूर्ववदिति भावः । 'पूञ् पवने' अस्मात् 'पूञो डुंसुन्' इति उणादिसूत्रेण डुंसुन् प्रत्ययः । डकारो नकार उकारश्च इत् । डित्त्वसामर्थ्यादभस्यापि टेर्लोपः । पुंस्शब्दात् सुबुत्पत्तिः । तत्र सुटि विशेषमाह । **पुंसोऽसुङ्** ॥ 'इतोऽत् सर्वनामस्थाने' इत्यतः सर्वनामस्थाने इत्यनुवृत्तिमभिप्रेत्य शेषपूरणेन सूत्रं व्याचष्टे । **सर्वनामस्थाने इति** ॥ पुंसः असुङ् स्यात् सर्वनामस्थाने इति फलितम् । ननु तत्पुरुषात् परमपुंस्शब्दात् सुटि असुङादेशात् प्रागेव 'समासस्य' इत्यन्तोदात्तत्वं पकारादुकारस्य स्यात् । सर्वनामस्थानोत्पत्तेः प्रागेव समास-

'बहुपुंसी' इत्यत्र 'उगितश्च' (सू ४५५) इति ङीबर्थं कृतेन 'पूञो ङुंसुन्' ('पातेर्ङुसुन्') इति प्रत्ययस्योगित्त्वेनैव नुम्सिद्धेः। पुमान्। हे पुमन्, पुमांसौ, पुमांसः। पुंसः। पुंसा, पुम्भ्याम्, पुम्भिः। इत्यादि। पुंसि। पुंसु।

स्वरस्य अन्तरङ्गत्वात् प्राप्तेः। इष्यते तु असुङि कृते परमपुमस् इत्यत्र मकारादकारस्य। अत आह। **विवक्षिते इति**॥ 'पुंसोऽसुङ्' इत्यत्र सर्वनामस्थान इति न परसप्तमी, किन्तु विवक्षिते इत्यध्याहृत्य सर्वनामस्थाने प्रयोक्तुमिष्टे सति ततः प्रागेव असुडित्यर्थः आश्रीयते। एवञ्च सर्वनामस्थानोत्पत्तेः प्रागेव असुङि कृते 'समासस्य' इत्यन्तोदात्तत्वं, परमपुमस् इत्यत्र मकारादकारस्य भवतीति न दोष इति भावः। नच परसप्तमीपक्षेऽपि सर्वनामस्थानोत्पत्तेः प्रागन्तरङ्गोऽपि समासस्वरः पकारादुकारस्य अकृतव्यूहपरिभाषया न भवति। असुङि कृते पकारादुकारस्य समासान्तताया: प्रनङ्क्ष्यत्वादिति वाच्यम्। विवक्षित इत्यर्थाश्रयणेनैव सिद्धे अकृतव्यूहपरिभाषाया अस्वीकार्यत्वादिति भावः। अत्र असुङि उकार इत् उदित्कार्यार्थः इति प्राचीनमतं दूषयितुमाह। **असुङ उकार उच्चारणार्थः इति**॥ न त्वितसंज्ञकः। प्रयोजनाभावादिति भावः। ननु उदित्कार्यमस्तिप्रयोजनमित्यत आह। **पूञो ङुंसुन्निति प्रत्ययस्य उगित्त्वेनैव नुम्सिद्धेरिति**॥ ननु विनिगमनाविरह इत्यत आह। **बहुपुंसीत्यत्र उगितश्च इति ङीबर्थं कृतेनेति**॥ बहवः पुमांसो यस्या इति बहुव्रीहौ सुब्लुकि निमित्तापायादसुङो निवृत्तौ बहुपुंस्शब्दादुगित्त्वात् ङीपि बहुपुंसीशब्दः। अत्र ङीपः असर्वनामस्थानत्वात्तस्मिन् विवक्षिते असुङः प्राप्तिरेव नास्ति। ङुंसुनः उगित्त्वादेव ङीप् वक्तव्या। तदर्थं ङुंसुनः उगित्त्वमावश्यकम्। तेनैव नुमोऽपि सिद्धत्वात् असुङ उकार उच्चारणार्थ इति भावः। यद्यप्युणादिषु 'पातेर्ङुसुन्' इति वक्ष्यते। तथापि पाठान्तरमिदं द्रष्टव्यम्। 'स्त्रियाम्' इति सूत्रभाष्यकैयटयोस्तु सूतेः सस्य पः, ऊकारस्य ह्रस्वः, ङुंसुन् प्रत्ययः इत्युक्तम्। **पुमानिति**॥ ङुंसुन् इति कृतानुस्वारनिर्देशः। ततश्च पुंस्शब्दात् सौ विवक्षिते असुङ्। ङकार इत्, उकार उच्चारणार्थः, 'ङिच्च' इत्यन्तादेशः। निमित्तापायादनुस्वारनिवृत्तौ पुमस्शब्दात् सुः, उगित्त्वान्नुम्, 'सान्तमहतः' इति दीर्घः, सोर्लोपः, सस्य संयोगान्तलोपः, तस्यासिद्धत्वान्नलोपो नेति भावः। **हे पुमन्निति**॥ 'सान्तमहतः' इत्यत्र 'असम्बुद्धौ' इत्यनुवृत्तेः न दीर्घ इति भावः। **पुमांसाविति**॥ असुङि पुमस् औ इति स्थिते नुमि 'सान्त' इति दीर्घः। 'नश्च' इति नुमोऽनुस्वारः इति भावः। **पुंसः। पुंसेति**॥ शसादावसर्वनामस्थानत्वादसुङभावे रूपम्। यय्परत्वाभावान्न परसवर्ण इति भावः। **पुम्भ्यामिति**॥ सस्य संयोगान्तलोपे निमित्तापायादनुस्वारनिवृत्तौ भकारमाश्रित्य पुनरनुस्वारे परसवर्णे रूपमिति भावः। **इत्यादीति**॥ पुंसे। पुंसः, पुंसोः। **पुंसीति**॥ अत्र यय्परत्वाभावान्न परसवर्णः। नुम्स्थानिकानुस्वारस्यैवोपलक्षणात् 'नुंम्विसर्जनीय' इति षत्वनेति भावः। 'वश कान्तौ' अस्मात् 'वशेः कनसिः' इति कनसिप्रत्ययः। ककार इत्। इकार उच्चारणार्थः। 'ग्रहिज्या' इति सम्प्रसारणम्। उशनस्शब्दः, तस्य सौ विशेषमाह। **ऋदुशनेस्यनङिति**॥ ङकार इत्, अकार उच्चार-

'ऋदुशन–' (सू २७६) इत्यनङ्। उशना, उशनसौ, उशनसः। 'अस्य सम्बुद्धौ वाऽनङ् नलोपश्च वा वाच्यः' (वा ५०३७)। हे उशनन्–हे उशन–हे उशनः। उशनोभ्यामित्यादि। अनेहा, अनेहसौ, अनेहसः। हे अनेहः। अनेहोभ्यामित्यादि। वेधाः, वेधसौ, वेधसः। हे वेधः। वेधोभ्यामित्यादि। अधातोरित्युक्तेर्न दीर्घः। सुष्ठु वस्ते सुवः, सुवसौ, सुवसः। पिण्डं ग्रसते पिण्डग्रः, पिण्डग्लः। 'ग्रसु ग्लसु अदने'।

४३७। अदस औ सुलोपश्च। (७-२-१०७)

अदस औकारोऽन्तादेशः स्यात्सौ परे सुलोपश्च। 'तदोः सः सौ—'

णार्थः, ङित्त्वादन्तादेशः। उशनन् स् इति स्थिते उपधादीर्घः, हल्ङ्यादिना सुलोपः, नलोपः। उशनाः इति रूपमिति भावः। यद्यपि वशधातुश्छान्दस इति लुग्विकरणे वक्ष्यते। तथापि तत् प्रायिकम्। 'वष्टि वागुरिः' इत्यादिनिर्देशात्, "उशना भार्गवः कविः" इति कोशाच्च। **अस्य सम्बुद्धाविति** ॥ एतच्च वृत्तौ पठितम्। वशधातौ माधवस्तु संबोधने तूशनसशब्दरूपम्। 'सान्तन्तथा नान्तमथाप्यदन्तम्–' इति श्लोकवार्तिकमित्याह। भाष्यादृष्टत्वादिदमप्रामाणिकमेवेति प्रामाणिकाः। **हे उशनन् इति** ॥ अनङि नलोपाभावे रूपम्। **हे उशनेति** ॥ अनङि नलोपे रूपम्। **हे उशनः इति** ॥ अनङभावे रूपम्। **उशनोभ्यामिति** ॥ सस्य रुत्वे 'हशि च' इत्युत्त्वे 'आद्गुणः' उशनःसु–उशनस्सु। **अनेहेति** ॥ नञि 'हन एह च' इति नञि उपपदे हनधातोरसुन्, प्रकृतेरेहादेशश्च, उपपदसमासः, 'नलोपो नञः', 'तस्मान्नुडचि' अनेहस्शब्दः। ततस्सुः, 'अत्वसन्तस्य' इति दीर्घः, सुलोपः, रुत्वविसर्गौ इति भावः। हे अनेहः। अनेहोभ्यामित्यादि। **वेधाः इति** ॥ 'विधाञो वेध च' विपूर्वात् धाञ्धातोरसुन् प्रकृतेर्वेधादेशश्च। उभयत्रापि असुनि उकार उच्चारणार्थः। उगित्त्वाभावान्न नुम्, ततस्सुः, असन्तत्वाद्दीर्घः, सुलोपः, रुत्वविसर्गाविति भावः। 'वस आच्छादने' लुग्विकरणः। सुपूर्वादस्मात् क्विप्, सुवस्शब्दः, ततस्सुः, हल्ङ्यादिलोपः, रुत्वविसर्गौ, सुवः इति रूपं वक्ष्यति। अत्र 'अत्वसन्तस्य' इति दीर्घमाशङ्क्य आह। **अधातोरित्युक्तेर्न दीर्घः इति** ॥ नच सुवस्शब्दस्य असन्तत्वादधातुत्वाच्च दीर्घः दुर्वार इति वाच्यम्। धात्ववयवभिन्नः यः अस् तदन्तस्य दीर्घ इत्याश्रणात्। सुवोभ्यामित्यादि 'वस निवासे' इति भौवादिकस्य तु नेदं रूपम्। तस्य यजादित्वेन सम्प्रसारणप्रसङ्गात्। पिण्डग्रस्शब्दः सुवस्शब्दवत्। अदस्शब्दात् सौ त्यदाद्यत्वे प्राप्ते। **अदस औ** ॥ अदस इति षष्ठी। औ इत्यविभक्तिकनिर्देशः। 'तदोः सः सौ' इत्यतस्सावित्यनुवर्तते। तदाह। **अदस औकारः इति** ॥ अन्तादेशः इत्यलोऽन्त्य-

---

१. 'भाष्यानुक्तत्वादिदमप्रमाणमेव' इति 'प्रामाणिकाः' इति शेखरः। 'सोर्डा' इत्येव सिद्धे अनङ्विधानस्यात्रानङि प्रमाणत्वेऽपि नलोपविकल्पो निर्मूलः, इति रत्नाकरः।

(सू ३८१) इति दस्य सः। असौ। 'औत्त्वप्रतिषेधः साकच्कस्य वा वक्तव्यः सादुत्वं च' (वा ४४८२)। प्रतिषेधसन्नियोगशिष्टमुत्वं तदभावे न प्रवर्तते। असकौ–असुकः। त्यदाद्यत्वं, पररूपम्, वृद्धिः। 'अदसोऽसेः—' (सू ४१९) इति मत्वोत्त्वे। अमू। 'जसः शी' (सू २१४)। 'आद्गुणः' (सू ६९)।

४३८। एत ईद्बहुवचने। (८-२-८१)

अदसो दात्परस्य एत ईत्स्याद्दस्य च मो बह्वर्थोक्तौ। अमी। 'पूर्वत्रासिद्धम्' (सू १२) इति विभक्तिकार्यं प्राक्, पश्चादुत्वमत्वे। अमुम्, अमू, अमून्। मुत्वे कृते धिसंज्ञायां नाभावः।

परिभाषालभ्यम्। सकारस्य औत्त्वे कृते हलः परत्वाभावात् हल्ङ्यादिलोपे अप्राप्ते सुलोपविधिः। **दस्य सः इति** ॥ मुत्वापवाद इति भावः। **असौ इति** ॥ अदस् स् इति स्थिते सकारस्य औत्त्वे, सुलोपे, दस्य सत्वे च रूपम्। अथ 'अव्ययसर्वनाम्नाम्' इत्यकचि अदकस्शब्दात् सौ विशेषमाह। **औत्त्वप्रतिषेधः इति** ॥ 'अदस औ सुलोपश्च' इत्यत्र अदश्शब्देन तन्मध्यपतितन्यायेन अदकस्शब्दस्यापि ग्रहणादौत्त्वे प्राप्ते विकल्पेन तत्प्रतिषेधो वक्तव्यः। 'तदोः सः सौ' इति दकारस्य सकारे कृते तस्मात् सकारात् परस्य अकारस्य उकारश्च वा वक्तव्य इत्यर्थः। ततश्च अदकस् स् इति स्थिते, औत्त्वाभावे, दस्य सत्वे सति, सकारात् परस्य अकारस्य उत्वे सति, त्यदाद्यत्वे, पररूपे, रुत्वे, विसर्गे, असुकः इति रूपम्। औत्त्वप्रतिषेधाभावपक्षे अदकस् स् इति स्थिते, सकारस्य औत्त्वे, सुलोपे, दस्य सत्वे, असकौ इति रूपं वक्ष्यति। तत्र औत्त्वप्रतिषेधाभावपक्षे औत्त्वे कृते सकारादकारस्य उत्त्वविकल्पः कुतो न स्यादित्यत आह। **प्रतिषेधेति** ॥ 'सन्नियोगशिष्टानां सह वा प्रवृत्तिस्सह वा निवृत्तिः' इति न्यायादिति भावः। अमुकः अमुकशर्मा इत्यादि त्वसाध्वेवेत्याहुः। केचित्तु अदस्शब्दपर्यायः अमुकशब्दः अव्युत्पन्न इत्याहुः। अदस् औ इति स्थिते प्रक्रियां दर्शयति। **त्यदाद्यत्वमिति** ॥ पररूपमपि बोध्यम्। **मत्वोत्त्वे इति** ॥ अदौ इत्यत्र दात् परस्य औकारस्य दीर्घ ऊकारः दस्य मत्वञ्चेत्यर्थः। जसि त्यदाद्यत्वं पररूपञ्च सिद्धवत्कृत्य आह। **जसश्शीति** ॥ आद्गुणे अदे इति स्थितम्। तत्र दकारादेकारस्य ऊत्वे प्राप्ते। **एत ईद्बहुवचने** ॥ 'अदसोऽसेर्दादु दो मः' इत्यस्मात् अदसो दादिति दो मः इति चानुवर्तते। तदाह। **अदसः इत्यादिना** ॥ **बह्वर्थोक्ताविति** ॥ सूत्रे बहुवचनशब्दो यौगिकः। पारिभाषिकस्य ग्रहणे तु अमीभिरित्यादिसिद्धावपि अमी इति न सिध्येत्। अदे इत्येकारस्य बहुवचनतया तत्परकत्वाभावादिति भावः। ननु औजसादिषु त्यदाद्यत्वे पररूपे च उत्वमत्वयोः कृतयोः अमुऔ अमुअः इत्यादि स्यात्। मुत्वस्यासिद्धत्वान्न यणित्याशङ्क्य आह। **पूर्वत्रेति**। **विभक्तिकार्यमिति** ॥ त्यदाद्यत्वादिकमित्यर्थः। यदि तु 'पूर्वत्रासिद्धम्' इत्यत्र कार्यासिद्धत्वमिष्येत, तर्हि अमू अमी इत्यादि न सिध्येत्। तथा हि 'पूर्वत्रासिद्धम्' इति सिद्धे असिद्ध-

४३९ । न मु ने । (८-२-३)

नाभावे कर्तव्ये कृते च मुभावो नासिद्धः स्यात् । अमुना, अमूभ्याम्, अमूभ्याम् । अमूभ्याम् । अमीभिः । अमुष्मै । अमीभ्यः । अमुष्मात् । अमुष्य, अमुयोः, अमीषाम् । अमुष्मिन्, अमुयोः, अमीषु ।

इति सान्ताः ।

इति हलन्तपुल्लिँङ्गप्रकरणम् ।

त्वारोपः उच्यते । निरधिष्ठानश्चासिद्धत्वारोपो न सम्भवति । ततश्च कार्यासिद्धत्वपक्षे सूत्रोदाहरणसम्पत्त्यै परत्वाल्लक्ष्ये कार्यप्रवृत्तेरावश्यकतया परत्वात् त्रैपादिके मुत्वे कृते सति, तेन उत्वस्थानिनः अकारस्यापहारे सति, पश्चात् मुत्वे अभावप्रतियोगित्वारोपेऽपि, 'देवदत्तस्य हन्तरिहते सति देवदत्तस्य न पुनरुन्मज्जनम्' इति न्यायेन स्थानिभूतस्य दकारादकारस्याभावात् वृद्धिगुणादि न स्यात् । शास्त्रासिद्धत्वपक्षे तु यद्यत् त्रैपादिकं शास्त्रं प्रवृत्त्युन्मुखं तत्तच्छास्त्र एवाऽभावारोपसम्भवात् पूर्वशास्त्रप्रतिबन्धकस्य परशास्त्रस्य उच्छेदबुद्धौ सत्यां 'विप्रतिषेधे परं कार्यम्' इति न प्रवर्तते । तदुक्तं 'पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्य' इति । ततश्च स्थानिनः अकारस्य निवृत्त्यभावात् वृद्धिगुणादिप्रवृत्तिः निर्बाधा । एतच्च 'पूर्वत्रासिद्धम्' इत्यत्र 'अचः परस्मिन्' इत्यत्र 'षत्वतुकोरसिद्धः' इत्यत्र च भाष्ये स्पष्टम् । प्रपञ्चितञ्च शब्देन्दुशेखरे शब्दरत्ने च इत्यास्तान्तावत् । **अमुमिति** ॥ अदस् अम् इति स्थिते त्यदाद्यत्वं, पररूपं, अमि पूर्वः, उत्वमत्वे, इति भावः । **अमू इति** ॥ द्वितीयाद्विवचनं प्रथमाद्विवचनवत् । **अमूनिति** ॥ शसि त्यदाद्यत्वं, पररूपं, पूर्वसवर्णदीर्घः, नत्वं, उत्वमत्वे इति भावः । तृतीयैकवचने अदस् आ इति स्थिते त्यदाद्यत्वं, पररूपं, उत्वमत्वे च सिद्धवत्कृत्य आह । **मुत्वे कृते घिसंज्ञायान्नाभावः इति** ॥ 'शेषोध्यसखि' इति घिसंज्ञायाम् 'आङो नाऽस्त्रियाम्' इति नाभाव इत्यर्थः । ननु 'पूर्वत्रासिद्धम्' इति विभक्तिकार्यं प्राक् पश्चात् उत्वमत्वे इति प्रागुक्तम् । सम्प्रति तु मुत्वे कृते घिसंज्ञायान्नाभाव इत्युच्यते । तदिदं पूर्वापरविरुद्धमिति चेत्, सत्यम् । यद्विभक्तिकार्यं प्रति मुत्वन्निमित्तं तदेव विभक्तिकार्यं प्राक् भवति, न त्वन्यदिति विवक्षितम् । इह च नाभावं प्रति मुत्वन्निमित्तमिति प्रथमं मुत्वप्रवृत्तेरविरोधः । 'न मु ने' इत्यारम्भसामर्थ्यादित्यलम् । ननु कृतेऽपि प्रथमं मुत्वे नाभावो न सम्भवति । तस्मिन् कर्तव्ये मुत्वस्य असिद्धतया घेः परत्वाभावादित्यत आह । **न मु ने** ॥ असिद्धमित्यनुवर्तते । म् च उश्चेति समाहारद्वन्द्वः । ने इति न इत्यस्य सप्तम्येकवचनम् । विषयसप्तमी सति सप्तमी च एषा । तथाच नाभावे कर्तव्ये कृते च इति लभ्यते । तदाह । **नाभावे इत्यादिना** ॥ प्रकृते च नाभावे कर्तव्ये मुत्वस्याऽसिद्धत्वाभावात् घेः परत्वान्नाभावो निर्बाधः । यदि तु नाभावे कर्तव्ये मुभावो नासिद्ध इत्येवाश्रीयते । तर्हि प्रकृते नाभावे 'सुपि च' इति दीर्घः प्रसज्येत । दीर्घे कर्तव्ये मुत्वस्याऽसि-

द्धतया अकारसत्वात्। अतः कृतेऽपीत्याश्रितम्। ततश्च प्रकृते नाभावे कृतेऽपि दीर्घे कर्तव्ये मुत्वस्यासिद्धत्वाभावादकाराभावात् न दीर्घः इति भावः। **अमूभ्यामिति** ॥ त्यदाद्यत्वे, पररूपे, 'सुपि च' इति दीर्घे, दस्य मत्वं आकारस्य ऊत्वम् इति भावः। **अमीभिरिति** ॥ त्यदाद्यत्वं पररूपं 'नेदमदसोरकोः' इति ऐसनिषेधः, 'बहुवचने झल्येत्' इत्येत्त्वं, 'एत ईद्बहुवचने' इति ईत्त्वमत्वे इति भावः। **अमुष्मै इति** ॥ त्यदाद्यत्वं, पररूपं, ङेः स्मै, उत्वमत्वे, षत्वमिति भावः। **अमीभ्यः इति** ॥ त्यदाद्यत्वं, पररूपं 'बहुवचने झल्येत्' इत्येत्त्वम्, ईत्त्वमत्वे इति भावः। **अमुष्मादिति** ॥ त्यदाद्यत्वं, पररूपं, ङसेः स्मात् उत्वमत्वे, षत्वमिति भावः। **अमुष्येति** ॥ त्यदाद्यत्वं, पररूपं, ङसः स्यादेशः, उत्वमत्वे, षत्वमिति भावः। **अमुयोरिति** ॥ ओसि त्यदाद्यत्वं, पररूपम्, 'ओसि च' इत्येत्त्वम्, अयादेशः, उत्वमत्वे, इति भावः। **अमीषामिति** ॥ आमि त्यदाद्यत्वं, पररूपम् 'आमि सर्वनाम्नः' इति सुट्, एत्त्वं, ईत्वं, मत्वं, षत्वमिति भावः। **अमुष्मिन्निति** ॥ ङौ त्यदाद्यत्वं, पररूपं, ङेः स्मिन्नादेशः, उत्वमत्वे, इति भावः। **अमीष्विति** ॥ सुपि त्यदाद्यत्वं, पररूपम्, एत्त्वम्, ईत्त्वमत्वे, षत्वमिति भावः ॥

इति सान्ताः।

इति श्रीमद्वासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां
बालमनोरमाख्यायां हलन्तपुल्लिङ्गः समाप्तः।



श्रीरस्तु ।

॥ अथ हलन्तस्त्रीलिङ्गे हकारान्तप्रकरणम् ॥

४४० । नहो धः । (८-२-३४)

नहो हस्य धः स्याज्झलि पदान्ते च । उपानत्–उपानद्, उपानहौ, उपानहः । उपानद्भ्याम् । उपानत्सु । उत्पूर्वात् 'ष्णिह प्रीतौ' (धा १२०१) इत्यस्मात् 'ऋत्विग्—' (सू ३७३) आदिना क्विन्, निपातनाद्लोपषत्वे । क्विन्नन्तत्वात्कुत्वेन हस्य धः, जश्त्वचर्त्वे । उष्णिक्–उष्णिग्, उष्णिहौ, उष्णिहः । उष्णिग्भ्याम् । उष्णिक्षु ।

इति हान्ताः ।

अथ हलन्तस्त्रीलिङ्गे हकारान्ताः निरूप्यन्ते ॥ 'णह बन्धने' 'णो नः' उपनह्यते इति विग्रहे उपपूर्वात् सम्पदादित्वात् कर्मणि क्विप् 'नहिवृति' इत्यादिना पूर्वपदस्य दीर्घः । उपानह्शब्दः स्त्रीलिङ्गः, पादुका । 'पादूरुपानत्स्त्री' इत्यमरः । **नहो धः** ॥ 'हो ढः' इत्यतो हः इत्यनुवर्तते । पदस्य इत्यधिकृतम् । 'स्कोः संयोग' इत्यतः अन्ते इत्यनुवर्तते । 'झलो झलि' इत्यतः झलि इत्यनुवर्तते । तदाह । **नहो हस्येत्यादिना** ॥ 'हो ढः' इति ढत्वापवादः । **उपानदिति** ॥ उपानह्शब्दात् सोः हल्ङ्यादिलोपः, हस्य धः, जश्त्वचर्त्वे इति भावः । अत्र दकार एव तु न विहितः । तथा सति नद्धमित्यत्र 'रदाभ्याम्' इति नत्वप्रसङ्गादित्यलम् । **उपानद्भ्यामिति** ॥ हस्य धत्वे जश्त्वमिति भावः । **उपानत्स्विति** ॥ धत्वे 'खरि च' इति चर्त्वमिति भावः । उष्णिह्शब्दः छन्दोविशेषवाची स्त्रीलिङ्गः । तं व्युत्पादयितुमाह । **ष्णिह प्रीतावित्यादिना** ॥ **दलोपषत्वे इति** ॥ उदो दकारस्य लोपः सस्य षत्वञ्च निपात्यत इत्यर्थः । न च 'धात्वादेः षस्सः' इति कृतसकारस्य 'आदेशप्रत्यययोः' इत्येव षत्वसिद्धेः किन्तन्निपातनेन इति वाच्यम् । 'सात्पदाद्योः' इति निषेधबाधनार्थं षत्वनिपातनस्यावश्यकत्वात् । न च उष्णिह्शब्दात् सुबुत्पत्तेः पूर्वं समासात् स्निह् इत्येतत् न पदम् । नितरां सकारस्य पदादित्वमिति वाच्यम् । पदादादिरिति पक्षे षत्वनिषेधप्रसक्तेः इत्याहुः । **हस्य धः इति** ॥ घोषनादसंवारमहाप्राणसाम्यादिति भावः । नच 'क्विन्प्रत्ययस्य' इति कुत्वस्याऽसिद्धत्वात् 'हो ढः' इति ढत्वमेवोचितमिति वाच्यम् । षत्वापवादः कुत्वमिति कैयटादिमते तुल्यन्यायतया **षत्वस्येव** ढत्वस्यापि कुत्वेन बाधात् । **जश्त्वचर्त्वे इति** ॥ नच जश्त्वे कर्तव्ये

॥ अथ हलन्तस्त्रीलिङ्गे वकारान्तप्रकरणम् ॥

द्यौः, दिवौ, दिवः। द्युभ्याम्। द्युषु।

इति वान्ताः।

॥ अथ हलन्तस्त्रीलिङ्गे रेफान्तप्रकरणम् ॥

गीः, गिरौ, गिरः। एवं पूः। चतुरश्चतसृादेशः। चतसृः। चतसृः। चतसृणाम्।

इति रेफान्ताः।

'क्विन्प्रत्ययस्य कुः' इति कुत्वस्यासिद्धत्वं शङ्क्यम्। उष्णिगञ्चु, इति निर्देशेन जश्त्वे कर्तव्ये कुत्वस्यासिद्धत्वाभावज्ञापनात्। वस्तुतस्तु 'क्विन्प्रत्ययस्य कुः' इति कुत्वं षत्वापवादो न भवति, इति मूलकारमते तुल्यन्यायात् ढत्वस्यापि नापवादः। ततश्च तद्रीत्या ढगका इति बोध्यम्॥

इति हान्ताः।

अथ वकारान्ताः निरूप्यन्ते॥ **द्यौरिति**॥ दिव्शब्दः स्त्रीलिङ्गः। 'द्योदिवौ द्वे स्त्रियाम्' इत्यमरः। तस्मात् सुः, 'दिव औत्' इति वकारस्य औकारः, इकारस्य यण्, रुत्वविसर्गौ, सुलोपस्य औत्त्वस्थानिभूतवकाराश्रयत्वेनाल्विधित्वात् स्थानिवत्त्वाभावात् न हल्ङ्यादिलोप इति भावः। **द्युभ्यामिति**॥ भ्यामादौ हलि 'दिव उत्' इत्युत्त्वमिति भावः॥

इति वान्ताः।

अथ रेफान्ताः निरूप्यन्ते। **गीरिति**॥ 'गृ निगरणे' क्विप्, 'ऋत इद्धातोः' इति इत्त्वं, रपरत्वं, गिर्शब्दात् सुबुत्पत्तिः, सोर्लोपः, 'र्वोरुपधायाः' इति दीर्घः, रेफस्य विसर्ग इति भावः। भ्यामादौ तु हलि 'र्वोः' इति दीर्घः, गीर्भ्यामित्यादि। गीष्षु—गीःषु। **एवं पूरिति**॥ गीर्वदित्यर्थः। 'पॄ पालनपूरणयोः' क्विप्, 'उदोष्ठ्यपूर्वस्य' इत्युत्त्वं रपरत्वम्। पुर्शब्दात् सोर्लोपः, 'र्वोः' इति दीर्घः, रेफस्य विसर्ग इति भावः। **चतुरश्चतसृादेशः इति**॥ जश्शसोः स्त्रीलिङ्गस्य चतुर्शब्दस्य 'त्रिचतुरोः स्त्रियाम्' इत्यनेनेति शेषः। **चतसृः इति**॥ परत्वात् 'चतुरनडुहोः' इत्यामं बाधित्वा चतसृभावे यण्। चतसृभावे कृते आम् तु न। 'विप्रतिषेधे यद्बाधितं तद्बाधितमेव' इति न्यायादिति स्थानिवत्सूत्रे भाष्ये स्पष्टम्। **चतसृणामिति**॥ 'न तिसृचतसृ' इति दीर्घनिषेधः॥

इति रेफान्ताः।

॥ अथ हलन्तस्त्रीलिङ्गे मकारान्तप्रकरणम् ॥

किमः कादेशे टाप् । का, के, काः । सर्ववत् ।

४४१ । यः सौ । (७-२-११०)

इदमो दस्य यः स्यात्सौ । 'इदमो मः' (सू ३४३) । इयम् । त्यदाद्यत्वं, टाप् । 'दश्च' (सू ३४५) इति मः । इमे, इमाः । इमाम्, इमे, इमाः, । अनया । 'हलि लोपः' (सू ३४७) । आभ्याम् । आभ्याम् । आभ्याम् । आभिः । अस्यै । अस्याः, अनयोः, आसाम् । अस्याम्, अनयोः, आसु । अन्वादेशे तु । एनाम्, एने, एनाः । एनया । एनयोः । एनयोः ।

इति मान्ताः ।

अथ मकारान्ताः निरूप्यन्ते । **किमः इति** ॥ किमूशब्दात् स्त्रीलिङ्गाद्विभक्तौ 'किमः कः' इति प्रकृतेः कादेशे कृते अदन्तत्वात् टाबित्यर्थः । **सर्ववदिति** ॥ सर्वशब्दवदित्यर्थः । 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' इति न । शब्दस्वरूपपरस्य गौणतया कदाऽपि सर्वनामत्वाभावादिति भावः । अथ इदम्शब्दस्य स्त्रीत्वे विशेषमाह । **यः सौ** ॥ 'इदमो मः' इत्यतः इदमः इत्यनुवर्तते, 'दश्च' इत्यतः दः इति च षष्ठ्यन्तमनुवर्तते । तदाह । **इदमो दस्येति** ॥ पुंसि तु नेदं प्रवर्तते । 'इदोऽय् पुंसि' इति विशिष्य विधेः । नापि क्लीबे । तस्य सोः लुका लुप्तत्वात् । ततश्च परिशेषात् स्त्रियामेवेदम् । **इयमिति** ॥ इदम् स् इति स्थिते, दकारस्य यत्वे, इयम् स् इति स्थिते, त्यदाद्यत्वं बाधित्वा 'इदमो मः' इति मकारस्य मकारे कृते, हल्ङ्यादिना सुलोप इति भावः । इदम् औ इति स्थिते प्रक्रियां दर्शयति । **त्यदाद्यत्वमिति** ॥ त्यदाद्यत्वे सति, पररूपे, अदन्तत्वात् टापि, 'दश्च' इति दकारस्य मत्वे, इमा औ इति स्थिते, 'औङ आपः' इति शीभावे, आद्गुणे इमे इति रूपम् । **इमाः इति** ॥ जसि त्यदाद्यत्वं, पररूपम्, टाप्, 'दश्च' इति मः, पूर्वसवर्णदीर्घः इति भावः । अत्र विभक्तौ सत्यां त्यदाद्यत्वं, पररूपं, टाप् च सर्वत्र विभक्तौ भवन्तीति बोध्यम् । इमाः इत्यत्र इमा अस् इति स्थिते पूर्वसवर्णदीर्घः । 'जसः शी' इति तु न । टापि कृते अदन्तात् परत्वाभावात् । **इमामिति** ॥ अत्वपररूपटाब्मत्वेषु कृतेषु 'अमि पूर्वः' इति भावः । **इमे इति** ॥ औटि औवत् । **इमाः इति** ॥ अत्वपररूपटाब्मत्वेषु पूर्वसवर्णदीर्घः । स्त्रीत्वान्नत्वाभाव इति भावः । **अनयेति** ॥ इदम् आ इति स्थिते, अत्वं, पररूपम्, 'अनाप्यकः' इति इद् इत्यस्य अन् आदेशः । अन् आ इति स्थिते, 'आङि चापः' इत्येत्त्वे, अयादेशः इति भावः । टा प्रभृत्यजादौ सर्वत्र अन् आदेश इति बोध्यम् । **हलि लोपः इति** ॥ भ्यामादौ हलि इद् इत्यस्य लोप इत्यर्थः । **आभ्यामिति** ॥ इदम् भ्याम् इति स्थिते, इदो लोपे, अत्वे, पररूपे, टापि च रूपमिति भावः ।

॥ अथ हलन्तस्त्रीलिङ्गे जकारान्तप्रकरणम् ॥

'ऋत्विग्—' (सू ३७३) आदिना सृजेः किन् अमागमश्च निपातितः। स्रक्-स्रग्, स्रजौ, स्रजः। स्रग्भ्याम्। स्रक्षु।

इति जान्ताः।

॥ अथ हलन्तस्त्रीलिङ्गे दकारान्तप्रकरणम् ॥

त्यदाद्यत्वं टाप्। स्या, त्ये, त्याः। एवं तद्, यद्, एतद्।

इति दान्ताः।

आभिरित्यप्येवम्। **अस्यै इति**॥ इदम् ए इति स्थिते, अत्वपररूपटापूसु, स्याडागमे, ह्रस्वत्वे, इदो लोप इति भावः। अस्याः इत्यप्येवम्। **अनयोरिति**॥ इदम् ओस् इति स्थिते, इदमः इदः अनादेशे, अत्वपररूपटापूसु, 'आङि चापः' इत्येत्त्वे, अयादेश इति भावः। **आसामिति**॥ इदम् आम् इति स्थिते, अत्वपररूपटाप्सु, सुटि, इदो लोप इति भावः। **अस्यामिति**॥ इदम् इ इति स्थिते, अत्वपररूपटाप्सु, ङेरामि, स्याडागमे, ह्रस्वत्वे, इदो लोपः इति भावः। **आस्विति**॥ इदम् सु इति स्थिते, अत्वपररूपटाप्सु, इदो लोप इति भावः। **अन्वादेशे त्विति**॥ 'द्वितीयाटौस्वेनः' इत्येनादेशे, टापि रमावद्रूपाणि इति भावः॥

इति मान्ताः।

अथ जकारान्ताः निरूप्यन्ते॥ स्रज्शब्दं व्युत्पादयति। **ऋत्विगिति**॥ 'सृज विसर्गे' अस्मात् किन्, ऋकारात् परः अमागमः, मकारः इत्, ऋकारस्य यण् रेफः, स्रज्-शब्दः स्त्रीलिङ्गः। "माल्यं माला स्रजो मूर्ध्नि" इत्यमरः। **स्रक्-स्रगिति**॥ 'किन्प्रत्ययस्य कुः' इति कुत्वं जश्त्वचर्त्वे इति भावः॥

इति जान्ताः।

अथ दकारान्ताः निरूप्यन्ते॥ त्यद्शब्दस्य प्रक्रियां दर्शयति। **त्यदाद्यत्वमिति**॥ विभक्तौ, अत्वे, पररूपे, टापि, त्या इति रूपम्। सर्वत्र ततः सर्वावद्रूपाणि। सौ तु 'तदोः सः सौ' इति तकारस्य सः इति विशेषः। **एवमिति**॥ तद् यद् एतद् एतेभ्यः विभक्तौ अत्वपररूपटाप्सु सर्वावत् रूपाणि। तच्छब्दस्य तु तकारस्य सत्वम्। एतच्छब्दस्य तु तकारस्य सत्वे 'आदेशप्रत्यययोः' इति षत्वमिति विशेषः॥

इति दान्ताः।

॥ अथ हलन्तस्त्रीलिङ्गे चकारान्तप्रकरणम् ॥

वाक्–वाग्, वाचौ, वाचः । वाग्भ्याम् । वाक्षु ।

इति चान्ताः ।

॥ अथ हलन्तस्त्रीलिङ्गे पकारान्तप्रकरणम् ॥

अप्शब्दो नित्यं बहुवचनान्तः । 'अप्तृन्—' (सू २७७) इति दीर्घः । आपः । अपः ।

४४२ । अपो भि । (७-४-४८)

अपस्तकारः स्याद्भादौ प्रत्यये परे । अद्भिः । अद्भ्यः । अद्भ्यः । अपाम् । अप्सु ।

इति पान्ताः ।

॥ अथ हलन्तस्त्रीलिङ्गे शकारान्तप्रकरणम् ॥

दिक्–दिग्, दिशौ, दिशः । दिग्भ्याम् । दिक्षु । 'त्यदादिषु—'

अथ चकारान्ताः निरूप्यन्ते ॥ **वागिति** ॥ वचेः 'क्विब्वचि' इत्यादिना क्विप्, दीर्घश्च, 'वचिस्वपि' इति सम्प्रसारणाभावश्च, वाच् इति रूपम् । सुलोपः, चोः कुः, जश्त्वचर्त्वे इति भावः । इति चान्ताः ।

अथ पकारान्ताः निरूप्यन्ते ॥ **अप्शब्दः इति** ॥ 'अप्सुमनस्समासिकतावर्षाणां बहुत्वञ्च' इति स्त्र्यधिकारे लिङ्गानुशासनसूत्रात् नित्यं बहुवचनान्तत्वं स्त्रीत्वञ्चेत्यर्थः । **दीर्घः इति** ॥ जसीति शेषः । **अपः इति** ॥ 'अप्तृन्' इत्यत्र 'सर्वनामस्थाने चासम्बुद्धौ' इत्यनुवृत्तेः शसि न दीर्घ इति भावः । **अपो भि** ॥ 'अच उपसर्गात्तः' इत्यस्मात् तः इत्यनुवर्तते । अङ्गाधिकारस्थमिदम् । ततश्च अङ्गाक्षिप्तप्रत्ययः भि इति सप्तम्यन्तेन विशेष्यते, तदादिविधिः । तदाह । **अपस्तकारः इत्यादिना** ॥ प्रत्यये किम्, अब्भक्षः । **अद्भिरिति** ॥ पकारस्य तकारे जश्त्वमिति भावः ॥

इति पान्ताः ।

(सू ४२९) इति दृशेः क्विन्विधानादन्यत्रापि कुत्वम्। दृक्--दृग्, दृशौ, दृशः।

इति शान्ताः।

॥ अथ हलन्तस्त्रीलिङ्गे षकारान्तप्रकरणम् ॥

त्विट्--त्विड्, त्विषौ, त्विषः। त्विड्भ्याम्। त्विट्त्सु--त्विट्सु। सह जुषत इति सजूः, सजुषौ, सजुषः। सजूर्भ्याम्। सजूष्षु--सजूःषु। षत्वस्यासिद्धत्वादुत्वम्। आशीः, आशिषौ, आशिषः। आशीर्भ्याम्। आशीर्भिः।

इति षान्ताः।

॥ अथ हलन्तस्त्रीलिङ्गे सकारान्तप्रकरणम् ॥

असौ। त्यदाद्यत्वं, टाप्। औङः शी। उत्वमत्वे। अमू, अमूः। अमूम्,

---

अथ शकारान्ताः निरूप्यन्ते ॥ **दिगिति** ॥ 'दिश अतिसर्जने' ऋत्विगादिना क्विन्, सुलोपः, 'व्रश्च' इति षः, तस्य जश्त्वेन डः, तस्य 'क्विन्प्रत्ययस्य कुः' इति कुत्वेन गः, तस्य चर्त्वविकल्प इति भावः। दृश्यन्ते अर्थाः अनयेति विग्रहे सम्पदादित्वात् दृशेः क्विप्, ततस्सुलोपे, 'व्रश्च' इति षत्वमाशङ्क्य आह। **त्यदादिष्विति** ॥ **अन्यत्रापीति** ॥ त्यदाद्युपपदाभावेऽपीत्यर्थः। क्विन् प्रत्ययः यस्माद्विहित इति बहुव्रीह्याश्रयणादिति भावः। **दृगिति** ॥ षडगकाः प्राग्वत् ॥

इति शान्ताः।

अथ षकारान्ताः निरूप्यन्ते ॥ **त्विडिति** ॥ 'त्विष दीप्तौ' क्विप्, सुलोपः, जश्त्वचर्त्वे इति भावः। **सजूरिति** ॥ 'जुषी प्रीतिसेवनयोः' क्विप्, 'सहस्य सः संज्ञायाम्' इति वा 'ससजुषोः' इति निपातनाद्वा सहस्य सभावः, सोर्लोपः, 'ससजुषो रुः' इति षस्य रुत्वं, 'वोरुपधायाः' इति दीर्घः। 'आङश्शासु इच्छायाम्' क्विप्, 'आशासः क्वावुपसङ्ख्यानम्' इत्युपधाया इत्वं, 'शासिवसिघसीनाञ्च' इति सस्य षः, आशिष्शब्दात् सोर्लोपः, एतावत् सिद्धवत्कृत्य आह॥ **षत्वस्येति** ॥ **आशीरिति** ॥ षस्य रुत्वे कृते 'वोरुपधायाः' इति दीर्घ इति भावः ॥

इति षान्ताः।

अथ सकारान्ताः निरूप्यन्ते ॥ **असाविति** ॥ अदश्शब्दस्य स्त्रियामपि पुंवदेव सौ रूपमित्यर्थः। अदस् औ इति स्थिते प्रक्रियां दर्शयति। **त्यदाद्यत्वमित्यादिना** ॥ अत्वे,

अमू, अमूः । अमुया, अमूभ्याम्, अमूभिः । अमुष्यै, अमूभ्याम्, अमूभ्यः । अमुष्याः । अमुष्याः, अमुयोः, अमूषाम् । अमुष्याम्, अमुयोः, अमूषु ।

इति सान्ताः ।

इति हलन्तस्त्रीलिङ्गप्रकरणम् ।

पररूपे, टापि, औङः शीभावे, आद्गुणे, अदे, इति स्थिते, एकारस्य दीर्घत्वादूत्वं दस्य मत्वञ्चेत्यर्थः । विभक्तौ सत्याम् अत्वं, पररूपं, टाबित्येतत् सर्वत्र ज्ञेयम् । **अमूरिति** ॥ जसि, अत्वपररूपटाप्सु, पूर्वसवर्णदीर्घे, ऊत्वमत्वे, टापि सति, अदन्तत्वाभावात् जसश्शीभावो न । एकाराभावान्नेत्त्वम् । **अमूमिति** ॥ पुंवत्, ऊत्वन्तु विशेषः । **अमू इति** ॥ औटि औवत् । **अमूरिति** ॥ शसि जसीव रूपम् । स्त्रीत्वान्नत्वाभावः । **अमुयेति** ॥ अदस् आ इति स्थिते, अत्वपररूपटाप्सु, 'आङि चापः' इत्येत्त्वे, अयादेशे, उत्वमत्वे इति भावः । **अमूभ्यामिति** ॥ अत्वपररूपटाप्सु, ऊत्वमत्वे इति भावः । एवममूभिरिति । **अमुष्यै इति** ॥ अदस् ए इति स्थिते, अत्वपररूपटाप्सु, स्याड्ढ्रस्वौ, उत्वमत्वे, षत्वमिति भावः । अमूभ्यः इत्यपि भ्यांवत् । टापि अदन्तत्वाभावादेत्त्वन्न । **अमुष्याः इति** ॥ ङसो ङेवत्, रुत्वविसर्गौ तु विशेषः । **अमुयोरिति** ॥ ओसि अत्वपररूपटाप्सु, 'आङि चापः' इत्येत्त्वे, अयादेशे, मुत्वमिति भावः । **अमूषामिति** ॥ आमि, अत्वपररूपटाप्सु, सुटि, ऊत्वमत्वे, सस्य षत्वमिति भावः । **अमुष्यामिति** ॥ अदस् इ इति स्थिते, अत्वपररूपटाप्सु, ङेरामि, स्याड्ढ्रस्वौ, मुत्वमिति भावः । **अमूष्विति** ॥ सुपि, अत्वपररूपटाप्सु, ऊत्वमत्वे, षत्वमिति भावः ॥

इति सान्ताः ।

इति श्रीमद्वासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां हलन्तस्त्रीलिङ्गप्रकरणं समाप्तम् ।



श्रीरस्तु ।

॥ अथ हलन्तनपुंसकलिङ्गे हकारान्तप्रकरणम् ॥

स्वमोर्लुक् । दत्वम् । स्वनड्डुत्–स्वनड्डुद्, स्वनड्डुही । 'चतुरनड्डुहोः—' (सू ३३१) इत्याम् । स्वनड्वांहि । पुनस्तद्वत् । शेषं पुंवत् ।

इति हान्ताः ।

॥ अथ हलन्तनपुंसकलिङ्गे वकारान्तप्रकरणम् ॥

'दिव उत्' (सू ३३७) । अहर्विमलद्यु । अन्तर्वर्तिनीं विभक्तिमाश्रित्य पूर्वपदस्येवोत्तरखण्डस्यापि पदसंज्ञायां प्राप्तायाम् 'उत्तरपदत्वे चापदा-

---

अथ हलन्तनपुंसकलिङ्गे हकारान्ताः निरूप्यन्ते ॥ सु शोभनाः अनड्वाहः यस्य कुलस्येति बहुव्रीहौ स्वनड्डुद्शब्दात् नपुंसकलिङ्गात् सुबुत्पत्तिः । ननु तत्र सौ परतः 'चतुरनड्डुहोः' इत्याम्, 'अम् सम्बुद्धौ' इत्यम्, 'सावनड्डुहः' इति नुम् च स्यात् । हल्ङ्यादिना सुलोपेऽपि प्रत्ययलक्षणसत्वादित्यत आह । **स्वमोर्लुगिति** ॥ परत्वात् हल्ङ्यादिलोपं बाधित्वा 'स्वमोर्नपुंसकात्' इति लुक् । ततश्च लुका लुप्तत्वेन प्रत्ययलक्षणाभावादामादि न भवतीति भावः । **दत्वमिति** ॥ 'वसुस्रंसु' इत्यनेनेति शेषः । दत्वविधेः पदाधिकारस्थत्वेन तदन्तेऽपि प्रवृत्तेरिति भावः । नच तत्रापि 'न लुमता' इति निषेधशङ्क्यः । दत्वस्य सुबन्तत्वरूपपदत्वनिमित्तकतया अङ्गकार्यत्वाभावादित्याहुः । **स्वनड्डुदिति** ॥ दत्वे चर्त्वविकल्पः । 'उरःप्रभृतिभ्यः कप्' इति तु न शङ्क्यम् । तत्र गणे अनड्वानित्येकवचनस्यैव पाठादिति बहुव्रीह्यधिकारे मूल एव वक्ष्यते । **स्वनड्डुही इति** ॥ 'नपुंसकाच्च' इत्यौङश्शीभावः । **स्वनड्वांहीति** ॥ 'जश्शसोः शिः' इति शिभावे, तस्य सर्वनामस्थानत्वात् 'चतुरनड्डुहोः' इत्यामि, 'नपुंसकस्य झलचः' इति नुमि, 'नश्च' इत्यनुस्वार इति भावः । अत्र यद्वक्तव्यं तत्पुल्लिँङ्गनिरूपणे उक्तम् ॥

इति हान्ताः ।

अथ वकारान्ताः निरूप्यन्ते ॥ विमला द्यौः आकाशः यस्य अहः इति बहुव्रीहौ, सुब्लुकि, विमलदिव्शब्दात् सोर्लुक् । एतावत् सिद्धवत्कृत्य आह । **दिव उदिति** ॥ **अहर्वि-**

दिविधौ प्रतिषेधः' (वा ४८०) इति प्रत्ययलक्षणं न । विमलदिवी, विमलदिवि । 'अपदादिविधौ' किम् । दधिसेचौ । इह षत्वनिषेधे कर्तव्ये पदत्वमस्त्येव । चकारस्य कुत्वे तु न । इति वान्ताः ।

मलद्वियति ॥ वस्य उत्वे इकारस्य यणिति भावः । अहर्ग्रहणं नपुंसकत्वसूचनार्थम् । ननु विमलदिव् औ इति स्थिते 'नपुंसकाच्च' इति शीभावे विमलदिवी इति रूपं वक्ष्यति । तदयुक्तम् । 'दिव उत्' इत्युत्त्वप्रसङ्गात् । नच विमलदिवी इति ससुदायस्यैव सुबन्ततया पदत्वान्न वकारस्य दिव्शब्दरूपपदान्तत्वमिति वाच्यम् । 'सुपो धातु' इति लुप्तां दिव्शब्दोत्तरां विभक्तिं प्रत्ययलक्षणेनाश्रित्य दिव् इत्यस्य पदत्वात् । नच लुका लुप्तत्वात् न प्रत्ययलक्षणमिति वाच्यम् । पदसंज्ञायास्सुबन्तधर्मतया अङ्गधर्मत्वाभावेन तत्र 'न लुमता' इति निषेधाप्रवृत्तेः । अन्यथा राज्ञः पुरुषः राजपुरुषः इत्यादौ पूर्वभागे नलोपादिकं न स्यादित्याशङ्क्य आह । **अन्तर्वर्तिनीमित्यादि** ॥ **उत्तरपदत्वे चेति** ॥ समासे उत्तरखण्डस्य पदसंज्ञायां कर्तव्यायाम् 'अन्तर्वर्तिविभक्तिलोपे प्रत्ययलक्षणप्रतिषेधो वक्तव्यः पदादिविधिं वर्जयित्वा' इति वार्तिकमेतत् । **विमलदिवी इति** ॥ औङि रूपम् । **विमलदिवि इति** ॥ शसि सति 'जश्शसोः शिः' इति शिभावे रूपसिद्धिः । अझलन्तत्वान्न नुम् । **दधिसेचाविति** ॥ सिञ्चतेः क्विप् । दध्नः सेचौ दधिसेचौ समासे पूर्वोत्तरपदावयवसुपोर्लुकि समासात् पुनः सुबुत्पत्तिरिति स्थितिः । तत्र उत्तरखण्डादुत्तरां विभक्तिं लुप्तां प्रत्ययलक्षणेनाश्रित्य सेच् इत्यस्य पदत्वेन तत्सकारस्य पदादितया 'सात्पदाद्योः' इति षत्वनिषेध इष्टः । 'उत्तरपदत्वे प्रत्ययलक्षणप्रतिषेधः' इत्येतावत्येवोक्ते तु सेच् इत्युत्तरखण्डस्य पदसंज्ञायां कर्तव्यायां प्रत्ययलक्षणप्रतिषेधः स्यात् । तथाच सेच् इत्यस्य सुबन्तत्वाभावेन अपदतया तत्सकारस्य पदादित्वाभावेन षत्वनिषेधो न स्यात् । अतः अपदादिविधावित्युक्तम् । षत्वनिषेधस्य पदादिविधितया तस्मिन् कर्तव्ये प्रत्ययलक्षणप्रतिषेधाभावेन प्रत्ययलक्षणमाश्रित्य सेच् इत्यस्य पदान्तत्वात् तत्सकारस्य 'सात्पदाद्योः' इति षत्वनिषेधो निर्बाधः । ननु सेच् इत्युत्तरखण्डस्य पदत्वे चकारस्य कुत्वं स्यादित्यत आह । **चकारस्य कुत्वे तु नेति** ॥ कुत्वे कर्तव्ये तु सेच् इत्यस्य पदत्वन्नास्त्येव । कुत्वस्य पदान्तविधित्वेन पदादिविधिभिन्नतया तस्मिन् कर्तव्ये प्रत्ययलक्षणप्रतिषेधसत्वेन पदत्वाभावादिति भावः । ननु दधि सिञ्चत इति सोपपदाद्विचि उपपदसमासे षत्वं दुर्वारम् । 'गतिकारकोपपदानां कृद्भिस्सहसमासवचनस्य प्राक् सुबुत्पत्तेः' इति वक्ष्यमाणत्वेन सेच् इत्यस्य अन्तर्वर्तिसुबभावेन अपदान्ततया 'सात्पदाद्योः' इति निषेधस्य तत्राप्रवृत्तेरिति चेत्, अत्र सोपपदात् सिचेः विचः अनभिधानादिति भाव इति कैयटस्समाहितवान् । पदात् आदिः पदादिरिति पक्षे तु उपपदसमासेऽपि षत्वं सुपरिहरम् । नचैवमपि परमश्चासौ दण्डी च परमदण्डी सः प्रियः यस्य सः परमदण्डिप्रियः इत्यत्र अवान्तरतत्पुरुषस्य उत्तरखण्डे नलोपानुपपत्तिः । 'उत्तरपदत्वे च' इति प्रत्ययलक्षणप्रतिषेधेन तस्य पदत्वाभावादिति वाच्यम् । मध्यपदत्वानाक्रान्तस्यैव उत्तरखण्डस्य विवक्षितत्वादित्यास्तान्तावत् ॥

इति वान्ताः ।

॥ अथ हलन्तनपुंसकलिङ्गे रेफान्तप्रकरणम् ॥

वाः, वारी । अझलन्तत्वान्न नुम् । वारि । चत्वारि ।

इति रेफान्ताः ।

॥ अथ हलन्तनपुंसकलिङ्गे मकारान्तप्रकरणम् ॥

'न लुमता—' (सू २६३) इति कादेशो न । किम्, के, कानि । इदम्, इमे, इमानि । 'अन्वादेशे नपुंसके एनद्वक्तव्यः' (वा १५६९) । एनत्, एने, एनानि । एनेन । एनयोः । एनयोः ।

इति मान्ताः ।

अथ रेफान्ताः निरूप्यन्ते । **वारिति** ॥ वार्शब्दो रेफान्तो नपुंसकलिङ्गः । "आपस्त्री भूम्नि वार् वारि" इत्यमरः । वार्शब्दात् स्वमोर्लुक्, रेफस्य विसर्गः, इति भावः । **चत्वारीति** ॥ चतुर्शब्दो नित्यं बहुवचनान्तः, तस्य जश्शसोरिशः, तस्य सर्वनामस्थानत्वात् 'चतुरनडुहोः' इति प्रकृतेः आम् । स च मित्त्वादन्त्यादचः उकारात् परः, उकारस्य यण्, अझलन्तत्वान्न नुम् इति भावः ॥ इति रेफान्ताः ।

अथ मकारान्ताः निरूप्यन्ते । किम्शब्दात् स्वमोर्लुकि प्रत्ययलक्षणमाश्रित्य विभक्तिपरकत्वात् कादेशमाशङ्क्य आह । **न लुमतेति** ॥ सोरमश्चान्यत्र कादेशे सर्वशब्दवद्रूपाणीत्याह । **के, कानीति ॥ इदमिति** ॥ स्वमोर्लुकि रूपम् । 'इदमो मः, दश्च' इत्यादिविधयो न भवन्ति । 'न लुमता' इति निषेधादिति भावः । **इमे इति** ॥ औङि अत्वं, पररूपम्, 'दश्च' इति दस्य मः, 'नपुंसकाच्च' इति शीभावः, गुण इति भावः । **इमानीति** ॥ जश्शसोरिशः, अत्वं, पररूपं, 'दश्च' इति मः, 'नपुंसकस्य झलचः' इति नुम्, 'सर्वनामस्थाने च' इति दीर्घ इति भावः । **अन्वादेशे नपुंसके एनद्वक्तव्यः इति** ॥ 'इदमेतदोः' इति शेषः । इदश्च अम्येव भवति । तथाच भाष्ये "एनदिति नपुंसकैकवचने वक्तव्यम्" इति पठित्वा "कुण्डमानय प्रक्षालयैनत्" इत्युदाहृतम् । औट्शसोः टश्च ओसोश्च 'द्वितीयाटौस्स्वेनः' इत्येनादेश एव इति मत्वा आह । **एने इत्यादि** ॥ वस्तुतस्तु 'द्वितीयाटौस्स्वेनत्' इत्येव सूत्रयताम् । नपुंसके अमो लुकि एनदिति सिद्ध्यति । एनम्, एनौ, एनान् । एनेन, एनयोः, इति तु त्यदाद्यत्वेन सिद्धमिति भाष्ये स्थितम् । परमार्थतस्तु नपुंसकैकवचने अमि एनदादेशः । एनम्, एनौ, इत्याद्यर्थं 'द्वितीयाटौस्स्वेनः' इत्यत्र एनादेशो विधातव्यः । येन नाप्राप्तिन्यायेन एनदादेशस्य त्यदाद्यत्वापवादत्वेन त्यदाद्यत्वासम्भवादिति शब्देन्दुशेखरे स्थितं भाष्यप्रदीपोद्योते प्रपञ्चितञ्च ॥

इति मान्ताः ।

॥ अथ हलन्तनपुंसकलिङ्गे नकारान्तप्रकरणम् ॥

ब्रह्म, ब्रह्मणी, ब्रह्माणि । 'सम्बुद्धौ नपुंसकानां नलोपो वा वाच्यः' हे ब्रह्मन्–हे ब्रह्म । 'रोऽसुपि' (सू १७२) । अहर्भाति । 'विभाषा ङिश्योः' (सू २३७) । अह्नी–अहनी, अहानि ।

४४३ । अहन् । (८-२-६८)

'अहन्' इत्यस्य रुः स्यात्पदान्ते । अहोभ्याम्, अहोभिः । इह 'अहः' 'अहोभ्याम्' इत्यादौ रत्वरुत्वयोरसिद्धत्वान्नलोपे प्राप्ते 'अहन्' इत्यावर्त्य एकेन नलोपाभावं निपात्य द्वितीयेन रुर्विधेयः । तदन्तस्यापि रत्वरुत्वे । दीर्घाण्यह्नानि यस्मिन् स दीर्घाह्नो निदाघः । इह हल्ङ्यादिलोपे प्रत्ययलक्षणेन 'असुपि'

अथ नकारान्ताः निरूप्यन्ते । **ब्रह्मेति** ॥ वेदादौ वाच्ये ब्रह्मन्शब्दः नपुंसकलिङ्गः । 'वेदस्तत्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः' इत्यमरः । स्वमोर्लुकि नलोप इति भावः । **ब्रह्मणी इति** ॥ औङः शी' 'अट्कुप्वाङ्' इति णत्वम् । 'विभाषा ङिश्योः' इत्यल्लोपस्तु न । 'न संयोगाद्वमन्तात्' इति निषेधादिति भावः । **ब्रह्माणीति** ॥ जश्शसोः शिः, तस्य सर्वनामस्थानत्वात् नान्तलक्षणो दीर्घः । **हे ब्रह्मन्निति** ॥ 'सम्बुद्धौ नपुंसकानाम्' इति नलोपविकल्प इति भावः । अथ अहन्शब्दात् स्वमोर्लुकि 'अहन्' इति रुत्वे प्राप्ते आह । **रोऽसुपीति** ॥ लुका लुप्तत्वेन प्रत्ययलक्षणाभावादिति भावः । **अहर्भातीति** ॥ अत्र रुत्वे तु 'हशि च' इत्युत्त्वे गुणे अहो भातीति स्यात् । रेफविधौ तस्य उत्त्वन्न, रोरित्युकारानुबन्धग्रहणादिति भावः । **अहानीति** ॥ जश्शसोः शिः, सर्वनामस्थानत्वात् उपधादीर्घः, अल्लोपस्तु न, सर्वनामस्थानत्वादिति भावः । टादावचि अल्लोपः, अह्ना, अह्ने, इत्यादि । भ्यामादौ हलि विशेषमाह । **अहन्** ॥ 'ससजुषो रुः' इत्यतः रुरित्यनुवर्तते । 'स्कोस्संयोगाद्योः' इत्यतः अन्त इति च, पदस्येत्यधिकृतम्, अहन् इति लुप्तषष्ठीकम् । तदाह । **अहन्नित्यस्येत्यादिना** ॥ **अहोभ्यामिति** ॥ नकारस्य रुत्वे, 'हशि च' इत्युत्त्वे, गुण इति भावः । ननु अहः, अहोभ्यामित्यत्र रत्वरुत्वयोरसिद्धत्वात् नलोपस्स्यात् । नच रत्वरुत्वे नलोपापवादाविति वाच्यम् । 'न ङिसम्बुद्ध्योः' इति नलोपनिषेधस्थले हे अहरित्यत्र दीर्घाणि अहानि यस्मिन् स दीर्घाहाः, हे दीर्घाहो निदाघ इत्यत्र च, नलोपे असत्यपि रत्वरुत्वयोरारम्भात् इत्याशङ्क्य निराकरोति । **इहेति** ॥ **एकेनेति** ॥ आवृत्तयोः प्रथमेन 'अहन्' इति सूत्रेण पदान्ते अहन्नित्येव स्यात्, न तु नलोप इत्यर्थकेनेत्यर्थः । **द्वितीयेनेति** ॥ अहन्नित्यस्य रुः स्यात् पदान्ते इत्यर्थकेनेत्यर्थः । एवञ्च 'अह्नो नलोपप्रतिषेधः' इति वार्तिकन्न कर्तव्यमिति भावः । **तदन्तस्यापीति** ॥ अहन्शब्दान्तस्यापि रत्वरुत्वे भवतः, पदाधिकारस्थत्वादिति भावः । "ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति' इति निषेधस्तु प्रत्ययविधिमात्रविषयः" इति 'असमासे निष्कादिभ्यः' इति सूत्रे भाष्यकैयटयोस्स्पष्टम् । तदन्ते रुत्वप्रवृत्तिं दर्शयति । **दीर्घाह्नो निदाघः इति** ॥

इति निषेधाद्रत्वाभावे रुः, तस्यासिद्धत्वान्नान्तलक्षण उपधादीर्घः। सम्बुद्धौ तु हे दीर्घाहो निदाघ, दीर्घाहाणौ, दीर्घाहाणः। दीर्घाह्ना। दीर्घाहोभ्याम्। दण्डि, दण्डिनी, दण्डीनि। स्रग्वि, स्रग्विणी, स्रग्वीणि। वाग्मि, वाग्मिनी, वाग्मीनि। बहुवृत्रह, बहुवृत्रघ्नी—बहुवृत्रहणी, बहुवृत्रहाणि। बहुपूष, बहुपूष्णी—बहुपूषणी, बहुपूषाणि,। बह्वर्यम, बह्वर्यम्णी—बह्वर्यमणी, बह्वर्यमाणि।

इति नान्ताः।

दीर्घाहन्शब्दात् पुल्लिँङ्गात् सौ परत्वादुपधादीर्घे कृते हल्ङ्यादिना सुलोपः। 'अहन्' इति रुत्वे, 'भोभगो' इत्यपूर्वत्वाद्यत्वे, 'हलि सर्वेषाम्' इति यलोपे, रूपमिति भावः। ननु सुलोपे कृते 'रोऽसुपि' इति रत्वे तस्य यत्वन्न भवति। यत्वविधौ रोः इत्युकारानुबन्धग्रहणात्। तथाच दीर्घाहर्निदाघः इत्येव युक्तमित्यत आह। **इह हल्ङ्यादीत्यादि**॥ ननु नान्तलक्षणदीर्घस्य परत्वेऽपि अकृतव्यूहपरिभाषया हल्ङ्यादिलोपात् प्राक् प्रवृत्तिर्न सम्भवति। रुत्वेन नकारस्य विनाशोन्मुखत्वादित्यत आह। **तस्यासिद्धत्वादिति**॥ प्रवृत्तस्य रुत्वस्यासिद्धत्वान्नान्तलक्षणो दीर्घो निर्बाध इति भावः। वस्तुतस्तु अकृतव्यूहपरिभाषायाः निर्मूलत्वादिह हल्ङ्यादिलोपात् पूर्वमेव परत्वादुपधादीर्घः इत्येवोचितमित्यलम्। **सम्बुद्धौ त्विति**॥ सोरत्र हल्ङ्यादिलोपात् प्रत्ययलक्षणमाश्रित्य 'असम्बुद्धौ' इति प्रवृत्तेः उपधादीर्घाभावे रुत्वे, 'हशि च' इत्युत्वे, आद्गुणे, हे दीर्घाहो निदाघ इति रूपमित्यर्थः। अत्र 'रोऽसुपि' इति रत्वविधेस्तदन्तेऽपि प्रवृत्तौ फलन्तु नपुंसके दीर्घाहर्निदाघजालमित्यादि बोध्यम्। **दण्डीति**॥ दण्डोऽस्यास्तीत्यर्थे 'अत इनिठनौ' इति इनिः, दण्डिन्शब्दात् स्वमोर्लुक्, नस्य लोप इति भावः। **दण्डिनी इति**॥ ऊङश्शी। असर्वनामस्थानत्वात् 'इन्हन्' इति नियमाच्च न दीर्घ इति भावः। **दण्डीनीति**॥ जश्शसोः शिः 'इन्हन्' इति दीर्घ इति भावः। **स्रग्वीति**॥ 'अस्मायामेधास्रजो विनिः' इति स्रज्शब्दात् मत्वर्थीयो विनिः। स्रज् इत्यस्य अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वात् जस्य कुत्वं, स्रग्विन्शब्दात् सुबुत्पत्तिः। दण्डिवद्रूपाणि। अत्र इनः अनर्थकत्वेऽपि 'इन्हन्' इत्यत्र ग्रहणं भवत्येव। 'अनिनस्मन्' इति वचनादिति बोध्यम्। **वाग्मीति**॥ 'वाचो ग्मिनिः' इति ग्मिनिः। तद्धितत्वान्न गकार इत्, चकारस्य जश्त्वम्, कुत्वम्, वाग्मिन्शब्दात् सुबुत्पत्तिः, स्रग्विवद्रूपाणि। बहवः वृत्रहणः यस्मिन् मन्वन्तरे इति बहुव्रीहौ बहुवृत्रहन्शब्दात् स्वमोर्लुकि, नलोपे, बहुवृत्रहेति रूपम्। औङश्शयाम्, अल्लोपे, 'हो हन्तेः' इति कुत्वे, वृत्रघ्नी इति रूपम्। 'अत्पूर्वस्य' इति नियमान्न णत्वम्। एतावत्सिद्धवत्कृत्य जश्शसोराह। **बहुवृत्रहाणीति**॥ शेः सर्वनामस्थानत्वेन तस्मिन् परे अल्लोपाभावात् 'इन्हन्' इत्युपधादीर्घे 'एकाजुत्तरपदे णः' इति णत्वमिति भावः। **बहुपूषाणीति**॥ बहवः पूषणः यस्मिन्निति बहुव्रीहिः। बहुपूष, बहुपूष्णी 'रषाभ्याम्' इति णत्वम्। जश्शसोस्तु शिः, 'शौ' इति दीर्घः, 'अट्कुप्वाङ्' इति णत्वम्। **बह्वर्यमाणीति**॥ बहवः अर्यमणो यस्मिन्निति बहुव्रीहिः बहुपूषवद्रूपाणि॥

इति नान्ताः।

॥ अथ हलन्तनपुंसकलिङ्गे जकारान्तप्रकरणम् ॥

असृजः पदान्ते कुत्वम्, सृजेः क्विनो विधानात्। विश्वसृडादौ तु न। 'सृजिदृशोः—' (सू २४०५) इति सूत्रे 'रज्जुसृड्भ्याम्' इति भाष्यप्रयोगात्*। यद्वा 'व्रश्च—'(सू २९४) आदिसूत्रे सृजियज्योः पदान्ते षत्वं कुत्वापवादः। स्रग्वृत्विक्छब्दयोस्तु निपातनादेव कुत्वम्। असृक्छब्दस्तु अस्यतेरौ-

---

अथ जकारान्ताः निरूप्यन्ते। शरीरं यदा उत्पद्यते तदैव सृज्यते न दन्तादिवन्मध्ये इत्यर्थे सृजधातोः नञ्पूर्वात् सम्पदादित्वात् क्विप्, उपपदसमासे, 'नलोपो नञः' इति नकारलोपे, असृज्शब्दः रक्तपर्यायः नपुंसकलिङ्गः। "रुधिरासृग्लोहितास्ररक्तक्षतजशोणितम्" इत्यमरः। तस्य स्वमोर्लुकि विशेषमाह। **असृजः पदान्ते कुत्वमिति** ॥ 'क्विन्प्रत्ययस्य' इति कुत्वस्यासिद्धत्वात् 'चोः कुः' इति प्राप्तं कुत्वं बाधित्वा तदपवादे व्रश्चादिषत्वे कृते, तस्य 'क्विन्प्रत्ययस्य' इति कुत्वेन खकारः, अघोषश्वासविवारमहाप्राणत्वसाम्यादित्यर्थः। नच षत्वस्य निरवकाशत्वं शङ्क्यम्। सृष्टमित्यादौ अपदान्ते 'क्विन्प्रत्ययस्य कुः' इति कुत्वाभावस्थले षत्वस्य चरितार्थत्वात्। ननु क्विन्नन्तत्वाभावादिह 'क्विन्प्रत्ययस्य' इति कुत्वं कुत इत्यत आह। **सृजेः क्विनो विधानादिति** ॥ ऋत्विगादिसूत्रेण इति शेषः। तथाच क्विन्प्रत्ययो यस्मादिति बहुव्रीह्याश्रयणादिहापि कुत्वं निर्बाधमिति भावः। **भाष्यप्रयोगादिति** ॥ नच 'रज्जुसृड्भ्याम्' इति भाष्यप्रयोगात् विश्वसृडादौ कथं कुत्वाभावः इति वाच्यम्। ज्ञापकस्य सामान्यापेक्षत्वात्। नचैवं सति असृज्शब्देऽपि कुत्वं न स्यादिति वाच्यम्। अनव्ययपूर्वपदस्य सृजेरेव भाष्यप्रयोगतः कुत्वाभावबोधनादिति भावः। ननु उदाहृतभाष्यप्रयोगात् विश्वसृड्ज्जुसृडादौ षत्वसिद्धावपि देवान् यजतीति देवेट् इत्यादौ 'चोः कुः' इति कुत्वस्यासिद्धत्वात् व्रश्चादिना षत्वे, तस्य 'क्विन्प्रत्ययस्य कुः' इति कुत्वं दुर्वारमित्यस्वरसादाह। **यद्वेति** ॥ **षत्वं कुत्वापवादः इति** ॥ यद्यपि सृष्टमित्यादौ अपदान्ते षत्वं सावकाशम्। तथापि यजिसृज्योः पूर्वोत्तरसाहचर्येण पदान्तेऽपि विशिष्यविहितत्वान्निरवकाशत्वाच्च पदान्तविषये षत्वं कुत्वापवादः। तथाच विश्वसृडादौ देवेडादौ च षत्वनिर्बाधम्। अत एव 'सृजिदृशोः' इति सूत्रे रज्जुसृड्भ्यामिति काम्यज्विधिसूत्रे उपयट्काम्यतीति च भाष्यप्रयोगस्सङ्गच्छत इति भावः। नन्वेवं सति स्रग्वृत्विक्छब्दयोरपि 'क्विन्प्रत्ययस्य' इति कुत्वं बाधित्वा व्रश्चादिना षत्वं स्यादित्यत आह। **स्रग्वृत्विक्छब्दयोरिति** ॥ ऋत्विगादिसूत्रे ऋत्विक् स्रक् इति निपातनादेव कुत्वमित्यर्थः। नच स्रष्टा यष्टा इत्यादौ अपदान्ते निपातनात् कुत्वापत्तिरिति वाच्यम्। निपातनेन ह्यनयोः अपवादभूतषत्वस्य अप्रवृत्तिमात्रं बोध्यते। कुत्वन्तु स्वशास्त्रेणैव यथायथं भवतीति न दोषः। ननु तर्ह्यसृक्छब्देऽपि कुत्वापवादष्षत्व स्यात्। ऋत्विगादिसूत्रे स्रक्छब्दस्यैव कुत्वनिपातनात् इत्यत आह। **असृक्छब्दस्त्विति** ॥ 'असु क्षेपणे' इत्यस्मात् औणादिके ऋजिप्रत्यये सति निष्पन्नस्य असृक्छब्दस्य 'व्रश्च' इति षत्वाविषयत्वात् 'चोः कुः' इति कुत्वे

---

* अनव्ययपूर्वपदे कुत्वाभावः अव्ययपूर्वपदे कुत्वम्।

णादिके ऋज्प्रत्यये बाध्यैः। असृक्–असृग्, असृजी, असृञ्जि। 'पदन्—' (सू २२८) इति वा। असन्, असानि। असृजा–असृग्भ्याम्–असृग्भ्यामित्यादि। ऊर्क्–ऊर्ग्, ऊर्जी, ऊर्ञ्जि। नरजानां संयोगः। 'बहूर्जि नुम्प्रतिषेधः' (वा ४३३१)। 'अन्त्यात्पूर्वो वा नुम्' (वा ४३३२)। बहूर्जि–बहूर्ञ्जि वा कुलानि।

इति जान्ताः।

॥ अथ हलन्तनपुंसकलिङ्गे दकारान्तप्रकरणम् ॥

त्यत्–त्यद्, त्ये, त्यानि। तत्–तद्, ते, तानि। यत्–यद्, ये, यानि। एतत्–एतद्, एते, एतानि। अन्वादेशे तु एनत्। वेभिद्यतेः क्विप्। वेभित्–

सति असृक्छब्दो बोध्य इत्यर्थः। **असृञ्जीति** ॥ जश्शसोः शिः, झलन्तत्वान्नुम्, 'नश्च' इत्यनुस्वारः, तस्य परसवर्णो ञकारः इति भावः। **असानीति** ॥ शसश्शिः, नान्तत्वाद्दीर्घ इति भावः। **अस्नेति** ॥ तृतीयैकवचने असन्नादेशे अल्लोपः। **असृग्भ्यामिति** ॥ असन्नादेशाभावे कुत्वे जश्त्वमिति भावः। **असभ्यामिति** ॥ भ्यामादौ असन्नादेशे नलोप इति भावः। **ऊर्गिति** ॥ 'ऊर्ज बलप्राणनयोः' क्विप्, स्वमोर्लुक्, कुत्वेन गः, तस्य चर्त्वविकल्पः इति भावः। **ऊर्ञ्जीति** ॥ जश्शसोः शिः, झलन्तत्वान्नुम्, स च मित्वादन्त्यादचः ऊकारात् परो भवति। तदाह। **नरजानां संयोगः इति** ॥ बहूर्क्छब्दोऽपि प्रायेण ऊर्वदेव। जश्शसोः शिभावे कृते, झलन्तलक्षणनुमि ऊकारादुपरि प्राप्ते, 'बहूर्जि प्रतिषेधो वक्तव्यः' 'अन्त्यात् पूर्वं नुममेक इच्छन्ति' इति च वार्तिकं प्रवृत्तम्। तदेतदर्थतस्सङ्गृह्णाति। **बहूर्जीति** ॥ बहूर्ज्शब्दे अन्त्यादच ऊकारात् उपरि नुमः प्रतिषेधो वक्तव्यः, किन्तु अन्त्याद्वर्णात् पूर्वो नुम् वा स्यादित्यर्थः। **बहूर्जीति** ॥ जश्शसोर्नुमभावे रूपम्। **बहूर्ञ्जीति** ॥ जकारात् पूर्वं रेफादुपरि नुमि कृते, श्चुत्वस्यासिद्धत्वात् 'नश्च' इति तस्यानुस्वारे, तस्य परसवर्णे, ञकारे रूपं बोध्यम्। अत्र बहूर्जिप्रतिषेध इति प्रथमवार्तिकं न कर्तव्यम्। 'नपुंसकस्य झलचः' इति सूत्रस्थ अचः परो यो झल् तदन्तस्य क्लीबस्य नुम् स्यादिति व्याख्याने सति नुम एवाल्लाप्रसक्तेः। न चैवं सति वनानीत्यादावव्याप्तिरशङ्क्या। 'इकोऽचि विभक्तौ' इत्यतः अचीत्यनुवर्त्य अजन्तस्य क्लीबस्य सर्वनामस्थाने परे नुम् स्यादिति वाक्यान्तराश्रयणादिति भाष्ये स्थितम्। एवञ्च ऊर्क्छब्दे शौ 'नरजानां संयोगः' इति मूलं भाष्यविरुद्धत्वादुपेक्ष्यमेव। तत्र अचः परस्य झलः अभावेन नुमः अप्रसक्तेः ॥

इति जान्ताः।

अथ दकारान्ताः निरूप्यन्ते। **त्यदिति** ॥ त्यद्, तद्, यद्, एतद् एषां स्वमोर्लुका लुप्तत्वात् त्यदाद्यत्वं, पररूपं, 'तदोः सः सौ' इति सत्वञ्च, न भवति। इतरत्र तु सर्वत्र त्यदाद्यत्वे पररूपे च अदन्तवद्रूपाणि, सर्वनामकार्यञ्च, इति बोध्यम्। **अन्वादेशे त्वेनदिति** ॥

बेभिद्, बेभिदी। शावल्लोपस्य स्थानिवत्त्वादझलन्तत्वान्न नुम्। अजन्तलक्षणस्तु नुम् न। स्वविधौ स्थानिवत्त्वाभावात्। बेभिदि ब्राह्मणकुलानि। चेच्छिदि।

इति दान्ताः।

॥ अथ हलन्तनपुंसकलिङ्गे चकारान्तप्रकरणम् ॥

"गवाक्छब्दस्य रूपाणि क्लीबेऽर्चागतिभेदतः।
असन्ध्यवङ्पूर्वरूपैर्नवाधिकशतम्मतम् ॥

अन्वादेशे नपुंसकैकवचने एनद्विधानादिति भावः। औङि जश्शसोश्च एने, एनानि। **बेभिद्यतेरिति** ॥ इतपा निर्देशोऽयम्। बेभिद्य इति यङन्ताद्धातोरित्यर्थः। 'भिदिर् विदारणे'। अस्मात् यङि 'सन्यङोः' इति द्वित्वे, हलादिशेषे, 'अभ्यासे चर्च' इत्यभ्यासभकारस्य जश्त्वेन बकारे, 'गुणो यङ्लुकोः' इति गुणे, बेभिद्य इति रूपम्। तस्मात् 'सनाद्यन्ताः' इति धातुत्वात् क्विप्, अतो लोपः, 'यस्य हलः' इति यलोपः। बेभिद्शब्दात् स्वमोर्लुक्, जश्त्वचर्त्वे बेभिद्-बेभित् इति रूपमिति भावः। **बेभिदी इति** ॥ औङः श्यां रूपम्। जश्शसोरशौ झलन्तलक्षणनुममाशङ्क्य आह। **शाविति** ॥ **स्थानिवत्त्वादिति** ॥ 'अचः परस्मिन्' इत्यनेनेति शेषः। न चात्र अल्लोपस्थानिभूताद्दचः पूर्वः दकार एव, न त्विकारः, तस्य दकारेण व्यवधानात्। तथाच तस्य नुम्विधिः स्थानिभूताद्दचः पूर्वस्य विधिर्नेति वाच्यम्। 'अचः परस्मिन्' इत्यत्र व्यवहितपूर्वस्यापि ग्रहणस्योक्तत्वात्। 'क्ङौ लुप्तं न स्थानिवत्' इति तु न सार्वत्रिकमिति 'दीधीवेवीटाम्' इत्यत्र कैयटे स्पष्टम्। नन्वल्लोपस्य स्थानिवत्त्वात् झलन्तलक्षणनुमोऽभावेऽपि अजन्तलक्षणो नुम् दुर्वारः इत्यत आह। **अजन्तलक्षणस्तु नुम् नेति** ॥ कुत इत्यत आह। **स्वविधौ स्थानिवत्त्वाभावादिति** ॥ अल्लोपस्य स्थानिवत्त्वमाश्रित्य मित्वादन्त्यादचः परः प्रवर्तमानो हि नुम् दकारोपरितनस्य अकारोपलक्षितदेशस्योपरि प्रवृत्तिमर्हति। तथाच लोपस्थानिभूतस्य स्वस्यैवात्र नुम्विधिः। तस्मिन् कर्तव्ये अल्लोपस्य स्थानिवत्त्वं न सम्भवति। स्थान्यपेक्षया पूर्वस्यैव विधौ 'अचः परस्मिन्' इत्यस्य प्रवृत्तेः। स्थानिवत्सूत्रमपि स्थानिभूतस्य स्वस्य कार्यविधौ न प्रवर्तते। अनाल्विधाविति निषेधादित्यर्थः। 'अचः परस्मिन्' इति सूत्रे 'पूर्वविधाविति अपनीय अपरविधाविति वक्तव्यं, स्वविधौ स्थानिवत्त्वार्थम्' इति वार्तिकन्तु भाष्ये प्रत्याख्यातमित्यदोषः ॥

इति दकारान्ताः।

अथ चकारान्ताः निरूप्यन्ते ॥ "जायन्ते नव सौ तथामि च नव भ्यांभिस्भ्यसां सङ्गमे षट्सङ्ख्यानि नवैव सुप्यथ जसि त्रीण्येव तद्वच्छसि। चत्वार्यन्यवचस्सु कस्य विबुधाश्शब्दस्य रूपाणि तज्जानन्तु प्रतिभास्ति चेन्निगदितुं षाण्मासिकोऽब्दावधिः॥" इति प्राचीनस्य कस्यचित् प्रश्नस्य श्लोकद्वयेन तदुत्तरमाह। **गवाक्छब्दस्येति** ॥ **अर्चागतिभेदतः**

स्वम्सुप्सु नव षड् भादौ षट्के स्युस्त्रीणि जश्शसोः।
चत्वारि शेषे दशके रूपाणीति विभावय॥"

तथाहि। गामश्नुतीति विग्रहे 'ऋत्विग्—' (सू ३७३) आदिना क्विन्। गतौ नलोपः। 'अवङ् स्फोटायनस्य' (सू ८८) इत्यवङ्। गवाक्--गवाग्। 'सर्वत्र विभाषा—' (सू ८७) इति प्रकृतिभावे, गोअक्--गोअग्। पूर्वरूपे, गोऽक्--गोऽग्। पूजायां, नस्य कुत्वेन ङः। गवाङ्--गोअङ्--गोऽङ्। अम्यप्येतान्येव नव। औङः शी, भत्वात् 'अचः' (सू ४१६) इत्यलोपः। गोची।

इति॥ 'अनिदिताम्' इत्यङ्धेर्गतौ नकारस्य लोपः। पूजायान्तु 'नाञ्धेः पूजायाम्' इति निषेधान्नस्य लोपो नेत्येवं गतिपूजात्मकार्थभेदनिबन्धननलोपतदभावाभ्यामिति यावत्। **असन्धीति**॥ प्रकृतिभावो विवक्षितः। असन्ध्यवङ्पूर्वरूपैरित्यनन्तरं चशब्दोऽध्याहर्तव्यः। शतमित्यनन्तरमितिशब्दश्च। तथाच गत्यर्थपूजार्थभेदनिबन्धननलोपतदभावाभ्याम् असन्ध्यवङ्पूर्वरूपैश्च गवाक्छब्दस्य रूपाणि नवाधिकशतमिति मतं सम्मतमित्यर्थः। एतेन 'विंशत्याद्यास्सदैकत्वे सङ्ख्याः सङ्ख्येयसङ्ख्ययोः' इति कोशात् शतशब्दस्य सङ्ख्यापरत्वे गवाक्छब्दस्य रूपाणामिति भाव्यम्। सङ्ख्येयपरत्वे तु मतमित्येकवचनानुपपत्तिरिति निरस्तम्। सङ्ख्येयपरत्वमाश्रित्य इतिशब्दमध्याहृत्य नवाधिकशतं रूपाणीत्यर्थाश्रयणात्। यद्वा शतशब्दस्य सङ्ख्येयपरत्वेऽपि शतमित्येकत्वाभिप्रायम्मतमित्येकवचनमित्यदोषः। नवाधिकशतमित्येतत् प्रपञ्चयति। **स्वम्सुप्सु नवेति**॥ प्रत्येकमिति शेषः। रूपाणीति सर्वत्रान्वेति। **षड् भादौ षट्के स्युरिति**॥ भिसि, भ्यान्त्रये, भ्यस्ङये, च प्रत्येकं षडित्यर्थः। **त्रीणि जश्शसोरिति**॥ प्रत्येकमिति शेषः। **चत्वारि शेषे दशके इति**॥ प्रत्येकमिति शेषः। स्वम्सुप्सु नवेत्येतदुपपादयति। **तथा हीति**॥ **गामश्नुतीति**॥ गां गच्छति पूजयति वेत्यर्थः। क्विनि उपपदसमासे सुब्लुकि गो अञ्च् इति स्थिते प्रक्रियां दर्शयति। **गतौ नलोपः इति**॥ गत्यर्थकत्वे 'अनिदिताम्' इति नस्य लोप इत्यर्थः। **गवाक्–गवागिति**॥ गो अच् स् गो अच् अम् इति स्थिते, स्वमोर्लुकि, अक्लीबस्येति पर्युदासात् सर्वनामस्थानत्वाभावेन 'उगिदचाम्' इति नुमभावे, ओकारस्य अवङादेशे, सवर्णदीर्घः, जश्त्वचर्त्वे इति भावः। **सर्वत्रेति**॥ अवङादेशस्य वैकल्पिकत्वात्तदभावपक्षे 'सर्वत्र विभाषा' इति प्रकृतिभावात् 'एङः पदान्तादति' इति पूर्वरूपस्याप्यभावे सतीत्यर्थः। **पूर्वरूपे इति**॥ अवङः प्रकृतिभावस्य चाभावे 'एङः पदान्तात्' इति पूर्वरूपे सतीत्यर्थः। तदेवं गत्यर्थकत्वे षड्रूपाणि। **पूजायामिति**॥ 'नाञ्धेः पूजायाम्' इति नलोपाभावात् गो अञ्च् इत्यस्मात् स्वमोर्लुकि, चकारस्य संयोगान्तलोपे, नकारस्य 'क्विन्प्रत्ययस्य कुः' इति कुत्वेन ङकारः। ततः अवङि, प्रकृतिभावे, पूर्वरूपे च, त्रीणि रूपाणीति भावः। पूर्वोदाहृतषड्रूपसङ्कलनया सौ नव रूपाणि। **औङः शीति**॥ गत्यर्थकत्वे नलोपे औङश्शीभावे च सति अक्लीबस्येति पर्युदासादसर्वनामस्थानतया भत्वात् 'अचः' इत्यलोपे गोची इत्येकमेव रूपम्। अकारस्य लुप्तत्वेन अवङाद्यसम्भवात्। **पूजायां त्विति**॥ अलुप्तनकारत्वात् 'अचः' इत्यलोपो नेति भावः।

पूजायान्तु, गवाञ्ची–गोअञ्ची–गोऽञ्ची। 'जश्शसोः शिः' (सू ३१२) शेस्सर्वनामस्थानत्वान्नुम्, गवाञ्चि–गोअञ्चि–गोऽञ्चि। गतिपूजनयोस्त्रीण्येव। गोचा–गवाञ्चा–गोअञ्चा–गोऽञ्चा। गवाग्भ्याम्–गोअग्भ्याम्–गोऽग्भ्याम्–गवाङ्भ्याम्–गोअङ्भ्याम्–गोऽङ्भ्याम् इत्यादि। सुपि तु ङान्तानां, पक्षे 'ङ्णोः कुक्–' (सू १३०) इति कुक्। गवाङ्क्षु–गोअङ्क्षु–गोऽङ्क्षु–गवाङ्षु*–गोअङ्षु*–गोऽङ्षु*–गवाक्षु–गोअक्षु–गोऽक्षु। न चेह 'चयो द्वितीयाः' (वा ५०२३) इति पक्षे ककारस्य खकारेण षण्णामाधिक्यं शङ्क्यम्। चर्त्वस्यासिद्धत्वात्। कुक्पक्षे तु तस्यासिद्धत्वाज्जश्त्वाभावः। पक्षे चयो द्वितीयादेशात्त्रीणि रूपाणि वर्धन्त एव।

तथाच औङि त्रीणि रूपाणि। पूर्वोदाहृतैकरूपसङ्कलनया प्रत्येकं चत्वारि रूपाणि। **शेस्सर्वनामेति** ॥ गत्यर्थकत्वे नलोपे सति, शौ 'उगिदचाम्' इति नुमि, तस्य 'नश्च' इत्यनुस्वारः, परसवर्ण इति भावः। पूजार्थकत्वे तु अलुप्तनकारत्वान्नुम् न। किन्तु स्वाभाविकनकारस्य अनुस्वारः परसवर्ण इति भावः। गतिपूजनयोः शौ अविकृतान्येव त्रीणि रूपाणीत्याह। **गतिपूजनयोस्त्रीण्येवेति ॥ गोचेति** ॥ गत्यर्थकत्वे लुप्तनकारत्वात् 'अचः' इत्यलोपे एकमेव रूपमिति भावः। पूजार्थत्वे तु अलुप्तनकारत्वात् 'अचः' इत्यलोपाभावे, अवङि, प्रकृतिभावे, पूर्वरूपे च, त्रीणि रूपाणीत्याह। **गवाञ्चा–गोअञ्चा–गोञ्चेति** ॥ भ्यामि गत्यर्थकत्वे नलोपे सति चस्य जश्त्वे कुत्वे अवङसन्धिपूर्वरूपैः त्रीणि रूपाणि। पूजार्थत्वे तु नलोपाभावात् चकारस्य संयोगान्तलोपे नकारस्य 'क्किन्प्रत्ययस्य' इति कुत्वेन ङकारे अवङसन्धिपूर्वरूपैः त्रीणि रूपाणीत्यभिप्रेत्य आह। **गवाग्भ्यामित्यादिना ॥ इत्यादीति** ॥ गवाग्भिः–गोअग्भिः–गोऽग्भिः–गवाङ्भिः–गोअङ्भिः–गोऽङ्भिः। गोचे–गवाञ्चे–गोअञ्चे–गोऽञ्चे। भ्यामि, भ्यसि च, प्राग्वत् षड्रूपाणि। ङसौ, गोचः–गवाञ्चः–गोअञ्चः–गोऽञ्चः। भ्यामि, भ्यसि च, प्राग्वत्। गोचः–गवाञ्चः–गोअञ्चः गोऽञ्चः। ङसि, गोचोः–गवाञ्चोः–गोअञ्चोः–गोऽञ्चोः। गोचाम्–गवाञ्चाम्–गोअञ्चाम्–गोऽञ्चाम्। गोचि–गवाञ्चि–गोअञ्चि–गोऽञ्चि। ओसि प्राग्वत्। **सुपि त्विति** ॥ पूजार्थकत्वे नलोपनिषेधात् चकारस्य संयोगान्तलोपे नकारस्य 'क्किन्प्रत्ययस्य' इति कुत्वेन ङकारः। ततश्च अवङसन्धिपूर्वरूपैः त्रयाणां रूपाणां ङकारान्तानां कुगागम इत्यर्थः। कुगभावे तु गवाङ्षु–गोअङ्षु–गोऽङ्ष्विति त्रीणि रूपाणि सुगमत्वान्नोक्तानि। गतौ तु नलोपे सति चस्य कुत्वेन ककारे अवङसन्धिपूर्वरूपैः त्रीणि रूपाणि दर्शयति। **गवाक्षु–गोअक्षु–गोऽक्ष्विति** ॥ तथाच सुपि नव रूपाणि। नन्वेषाम्मध्ये ककारवत्सु षड्रूपेषु 'चयो द्वितीयाः' इति ककारस्य खकारपक्षे षड्रूपाणि सखकाराण्यधिकानि स्युरित्याशङ्क्य निराकरोति। **नचेहेति ॥ चर्त्वस्येति** ॥ गतौ नलोपे सति, चकारस्य कुत्वे, तस्य जश्त्वेन गकारे, तस्य

---

* यद्यप्येतेषां त्रयाणां शब्दस्वरूपाणाम्मूले निवेशनं व्याख्यातुरनभिमतमिति प्रतीयते, तद्वचनभङ्ग्या। तथापि पठनपाठनपथवर्तिषु बहुषु पुस्तकेषूपलम्भात् अत्रापि मूले तदादरणमिति मन्तव्यं वाचकमहाशयैः।

"ऊह्यमेषां द्विर्वचनानुनासिकविकल्पनात्।
रूपाण्यश्वाक्षिभूतानि (५२७) भवन्तीति मनीषिभिः॥"

'खरि च' इति चर्त्वेन ककारे, गवाक्षु—गोअक्षु—गोऽक्ष्विति त्रीणि रूपाणीति स्थितिः। तत्र 'चयो द्वितीयाः' इति शास्त्रदृष्ट्या चर्त्वशास्त्रस्यासिद्धत्वात् ककारो नास्त्येव। किन्तु गकार एवास्ति, तस्य चय्त्वाभावात् 'चयो द्वितीयाः' इति न भवतीत्यर्थः। तथाच गतौ त्रयाणामाधिक्यन्निरस्तम्। पूजायान्तु कुक्पक्षे गवाङ्क्षु—गोअङ्क्षु—गोऽङ्क्षु इति त्रिषु ककारस्य द्वितीये सति खकारवतां त्रयाणामाधिक्यमिष्टमेवेत्याह। **कुक्पक्षे त्विति**॥ नचैवं सति नवाधिकशतमिति विरोधशङ्क्यः। नवाधिकशतमिति सूत्रकारस्य मतमित्यर्थात्। **ऊह्यमेषामिति**॥ प्रदर्शितानां द्वादशाधिकशतरूपाणामित्यर्थः। **अश्वाक्षिभूतानीति**॥ सप्तविंशत्यधिकपञ्चशतानीत्यर्थः। अश्वशब्दो हि सप्तत्वसङ्ख्यावच्छिन्नलक्षकः। 'सप्ताश्वा हरितस्सूर्यस्य' इति दर्शनात्। अक्षिशब्दस्तु द्वित्वसङ्ख्यावच्छिन्नलक्षकः। मनुष्यादिषु प्रायेणाक्ष्णोः द्वित्वात्। भूतशब्दस्तु पञ्चत्वसङ्ख्यावच्छिन्नलक्षकः। पृथिव्यप्तेजोवाय्वाकाशानां भूतशब्दवाच्यानां पञ्चत्वात्। तत्राश्वशब्देन प्रथमनिर्दिष्टेन सप्तत्वसङ्ख्यैव विवक्षिता। अक्षिशब्देन तु द्वितीयनिर्दिष्टेन सूचितया द्वित्वसङ्ख्यया दशकद्वयात्मिका विंशतिसङ्ख्या विवक्षिता। भूतशब्देन तु तृतीयनिर्दिष्टेन सूचितया पञ्चत्वसङ्ख्यया पञ्चशतं लक्ष्यते। उक्तञ्च ज्यौतिषेण "एकदशशतसहस्रायुतलक्षप्रयुतकोट्यः क्रमशः। अर्बुदमब्जं खर्वनिखर्वमहापद्मशङ्कवस्तस्मात्॥ जलधिश्चान्त्यं मध्यं परार्धमिति दशगुणोत्तरास्संज्ञाः।" इति। अत्र अश्वशब्दसूचितां सप्तत्वसङ्ख्यामादौ लिखित्वा तदुत्तरतः अक्षिशब्दसूचिता द्वित्वसङ्ख्या लेख्या। तदुत्तरतस्तु भूतशब्दसूचिता पञ्चत्वसङ्ख्या लेख्या। अङ्कानां वामतो गतिरिति वचनात् इत्यादिगणकसम्प्रदायप्रवर्तकलीलावत्यादिग्रन्थतो ज्ञेयम्। तथाच सप्त च विंशतिश्च पञ्चशतानि च रूपाणि भवन्तीति मनीषिभिरूह्यमित्यर्थः। तथाहि, सौ नवानां रूपाणामन्त्यवर्णस्य 'अनचि च' इति द्वित्वे तदभावे च अष्टादश रूपाणि। प्रथमाद्विवचने चतुर्णाम्मध्ये पूजार्थानां त्रयाणां अकारस्य 'अनचि च' इति द्वित्वे तदभावे च षड्रूपाणि, 'अणोऽप्रगृह्यस्य' इति तु न, प्रगृह्यत्वात्। गतौ त्वेकमेव, सङ्कलनया सप्त। जसि तु त्रयाणां अकारस्य द्वित्वे तदभावे च षड्रूपाणि। षण्णामेषामन्त्यस्य इकारस्य 'अणोऽप्रगृह्यस्य' इत्यनुनासिकपक्षे षट्, अननुनासिकत्वाभावपक्षे तु षट् स्थितान्येव, सङ्कलनया जसि द्वादश। तथाच प्रथमायां विभक्तौ सप्तत्रिंशत्। एवं द्वितीयायां विभक्तावपि सप्तत्रिंशत्। तृतीयैकवचने तु चतुर्णां मध्ये पूजार्थानां त्रयाणां अकारद्वित्वे तदभावे च षड्रूपाणि, गतौ त्वेकमेव। सङ्कलनया सप्त। एषां सप्तानामन्त्यस्य आकारस्य अनुनासिकत्वपक्षे सप्त, तदभावे तु सप्त स्थितान्येव, सङ्कलनया चतुर्दश। भ्यामि तु षण्णां मध्ये गतौ गकारस्य, पूजायां ङकारस्य च द्वित्वे षट्, तदभावे षट् स्थितान्येव, सङ्कलनया द्वादश। एषु यकारस्य 'यणो मयः' इति द्वित्वे द्वादश। मय इति पञ्चमी यण इति षष्ठीत्याश्रयणात्। यकारद्वित्वाभावे तु द्वादश स्थितान्येव, सङ्कलनया चतुर्विंशतिः, एषु मकारस्य द्वित्वे चतुर्विंशतिः, तदभावे चतुर्विंशतिः स्थितान्येव, सङ्कलनया भ्यामि अष्टाचत्वारिंशत्। भिसि तु षण्णाम्मध्ये गतौ

गकारस्य पूजायां ङकारस्य च द्वित्वे षट्, तदभावे षट् स्थितान्येव, सङ्कलनया द्वादश। एषु विसर्गस्य द्वित्वे द्वादश। अयोगवाहानाम् अट्सु शर्षु चोपसंख्यातत्वेन विसर्गस्य यत्वात्। तस्य तु द्वित्वाभावे द्वादश स्थितान्येव, सङ्कलनया भिसि चतुर्विंशतिः। तथाच तृतीयाविभक्तौ षडशीतिः। चतुर्थ्येकवचने चतुर्णाम्मध्ये पूजार्थानां त्रयाणां ञकारद्वित्वे तदभावे च षट्, गतौ त्वेकमेव, सङ्कलनया ङयि सप्त, एकारस्य अनण्त्वान्नानुनासिकः। भ्यामि तु प्राग्वदेव अष्टाचत्वारिंशत् भ्यसि तु षण्णाम्मध्ये गतिपूजनयोः प्रत्येकं त्रयाणां गञ्योर्द्वित्वे षट्, तदभावे तु षट् स्थितान्येव, सङ्कलनया द्वादश। एषु यकारस्य 'यणो मयः' इति द्वित्वे द्वादश, तदभावे तु द्वादश स्थितान्येव, सङ्कलनया चतुर्विंशतिः। एषु विसर्गस्य द्वित्वे चतुर्विंशतिः, तदभावे तु चतुर्विंशतिः स्थितान्येव, सङ्कलनया भ्यसि अष्टाचत्वारिंशत्। तथा च चतुर्थ्या विभक्तौ त्रयधिकं शतम्। ङसौ तु पूजायां त्रयाणां रूपाणां ञकारद्वित्वे तदभावे च षट्, गतौ त्वेकं स्थितमेव, सङ्कलनया सप्त। एषु विसर्गद्वित्वे सप्त, तदभावे तु सप्त स्थितान्येव, सङ्कलनया ङसौ चतुर्दश। भ्यामि भ्यसि च प्राग्वत् प्रत्येकं अष्टचत्वारिंशत्। तथाच पञ्चम्यां विभक्तौ दशाधिकं शतम्। ङसि तु ङसिवच्चतुर्दश। ओसि तु चतुर्णाम्मध्ये पूजायां त्रयाणां ञकारस्य द्वित्वे तदभावे च षट्, गतौ त्वेकं, सङ्कलनया सप्त। एषु विसर्गस्य द्वित्वे तदभावे च चतुर्दश। आमि तु चतुर्णाम्मध्ये पूजायां त्रयाणां त्रिषु ञकारस्य द्वित्वे षट्, गतौ त्वेकं, सङ्कलनया सप्त। एषु मकारस्य द्वित्वे तदभावे च चतुर्दश, तथाच षष्ठ्यां द्विचत्वारिंशत्। ङौ पूजायां त्रयाणां ञकारस्य द्वित्वे तदभावे षट्, गतावेकं, सङ्कलनया सप्त, एषु अन्त्यस्य इकारस्य अनुनासिकत्वे तदभावे च चतुर्दश। ओसि प्राग्वच्चतुर्दश। सुपि तु द्वादशानाम्मध्ये पूजायां कुगभावपक्षे ङकारस्य द्वित्वे त्रीणि, तदभावे तु त्रीणि स्थितान्येव, सङ्कलनया षट्। कुक्पक्षे तु 'चयो द्वितीयाः' इति द्वितीयादेशे खकारवन्ति त्रीणि, तदभावे तु ककारवन्ति त्रीणि, सङ्कलनया षट्, षण्णामेषां ङकारद्वित्वे षट्, तदभावे तु षट् स्थितान्येव, सङ्कलनया द्वादश। एषां द्वादशानां 'खयश्शरः' इति षकारद्वित्वे द्वादश, तदभावे तु द्वादश स्थितान्येव, सङ्कलनया चतुर्विंशतिः। 'शरोऽचि' इति निषेधस्तु न, तस्य सौत्रद्वित्वमात्रविषयत्वात्। तथा च कुक्पक्षे चतुर्विंशतिः, कुगभावे तु षट् स्थितान्येव, सङ्कलनया पूजायां त्रिंशत्। गतौ तु त्रयाणां ककारस्य द्वित्वे त्रीणि, तदभावे तु त्रीणि स्थितान्येव, षण्णामेषां 'खयश्शरः' इति षकारद्वित्वे षट्, तदभावे तु षट् स्थितान्येव, सङ्कलनया द्वादश। तथाच सङ्कलनया गतौ पूजायाञ्च द्विचत्वारिंशत्। एषामन्त्यस्यानुनासिकत्वे तदभावे च सुपि चतुरशीतिः। एवञ्च सु अष्टादश (१८), औ सप्त (७), जस् द्वादश (१२), आहत्य प्रथमायां सप्तत्रिंशत् (३७), अम् अष्टादश (१८), औट् सप्त (७), शस् द्वादश (१२), आहत्य द्वितीयायां सप्तत्रिंशत् (३७), टा चतुर्दश (१४), भ्याम् अष्टाचत्वारिंशत् (४८), भिस् चतुर्विंशतिः (२४), आहत्य तृतीयायां षडशीतिः (८६)। ङे सप्त (७), भ्याम् अष्टाचत्वारिंशत् (४८), भ्यस् अष्टाचत्वारिंशत् (४८), आहत्य चतुर्थ्यां त्रयधिकं शतं (१०३), ङसि चतुर्दश (१४), भ्याम् अष्टाचत्वारिंशत् (४८), भ्यस् अष्टाचत्वारिंशत् (४८), आहत्य पञ्चम्यां दशाधिकं शतम् (११०)। ङस् चतुर्दश (१४), ओस् चतुर्दश (१४), आम् चतुर्दश (१४) आहत्य षष्ठ्यां

तिर्यक्, तिरश्ची, तिर्यञ्चि। पूजायां तु, तिर्यङ्, तिर्यञ्ची, तिर्यञ्चि।

इति चान्ताः।

॥ अथ हलन्तनपुंसकलिङ्गे तकारान्तप्रकरणम् ॥

यकृत्, यकृती, यकृन्ति। 'पदन्—' (सू २२८) इति वा यकन्। यकानि। यक्ना-यकृता। शकृत्, शकृती, शकृन्ति। शकानि। शक्ना-शकृता। ददत्, ददती।

द्वाचत्वारिंशत् (४२)। ङि चतुर्दश (१४), ओस् चतुर्दश (१४), सुप् चतुरशीतिः (८४), आहत्य सप्तम्यां द्वादशाधिकं शतम् (११२)। ततश्च सङ्कलनया पञ्चशतानि (५००) च विंशतिः (२०) च, सप्त (७) च रूपाणि। इति गवाक्छब्दप्रक्रिया। **तिर्यगिति** ॥ तिरः अञ्चति इति विग्रहे 'ऋत्विक्' आदिना क्विन्। गतौ 'अनिदिताम्' इति नलोपः। तिरस् अच् इत्यस्मात् सुबुत्पत्तिः, स्वमोर्लुक्, प्रत्ययलक्षणविरहात् असर्वनामस्थानत्वाच्च न नुम्। अभत्वात् 'अचः' इत्यलोपो न, तिरसस्तिर्यादेशः, यण्, 'क्विन्प्रत्ययस्य' इति कुत्वस्यासिद्धत्वात् चकारस्य 'चोः कुः' इति कुत्वम्, जश्त्वचर्त्वे इति भावः। **तिरश्ची इति** ॥ तिरस् अच् औ इति स्थिते औङश्शसोः भत्वात् 'अचः' इत्यलोपः। 'अलोपे' इत्युक्तेर्न तिर्यादेशः। सस्य श्चुत्वेन शः इति भावः। **तिर्यञ्चीति** ॥ तिरस् अच् इत्यस्माज्जसि जश्शसोः शिः, सर्वनामस्थानत्वान्नुम्, अनुस्वारपरसवर्णौ, तिरसस्तिरिः, यण्, अभत्वात्, 'अचः' इत्यलोपो नेति भावः। **पूजायान्तु तिर्यङ्ङिति** ॥ स्वमोर्लुकि अभत्वात् अलुप्तनकारत्वात् 'अचः' इत्यलोपाभावात्तिर्यादेशः, चकारस्य संयोगान्तलोपः, नस्य कुत्वेन ङकार इति भावः। **तिर्यञ्ची इति** ॥ औङः श्यां रूपम्। अलुप्तनकारत्वादचः इत्यलोपाभावात्तिरिः। **तिर्यञ्चि इति** ॥ जश्शसोः शिः। शेषं पुंवत् ॥

इति चान्ताः।

अथ तकारान्ताः निरूप्यन्ते। **यकृदिति** ॥ मांसपिण्डविशेषो यकृन्नाम याज्ञिकप्रसिद्धः। स्वमोर्लुक्, जश्त्वचर्त्वे, इति भावः। **यकृती इति** ॥ औङश्शी। **यकृन्तीति** ॥ जश्शसोः शिः, झलन्तत्वान्नुम्, अनुस्वारपरसवर्णाविति भावः। शसादौ विशेषमाह। **पद्दन्निति वा यकन्निति** ॥ **यकानीति** ॥ शसश्शिः, यकन्नादेशः, सर्वनामस्थानत्वात् नान्तलक्षण उपधादीर्घ इति भावः। **यक्नेति** ॥ टायां यकन्नादेशे अलोपः। यक्ने। यक्नः। यक्नोः। यक्नि-यकनि। यकसु। यकन्नभावे यकृच्यामित्यादि। **शकृदिति** ॥ शकृच्छब्दः विष्ठावाची। यकृद्वत्। **ददत्, ददती इति** ॥ शतृप्रत्ययान्तोऽयं ददच्छब्दः पुल्लिङ्गनिरूपणे व्युत्पादितः। तस्य स्वमोर्लुक्, औङश्शी, नुम् तु न, असर्वनामस्थानत्वात् 'नाभ्यस्ताच्छतुः' इति निषेधाच्च।

४४४ । वा नपुंसकस्य । (७-१-७९)

अभ्यस्तात्परो यः शता तदन्तस्य क्लीबस्य नुम् वा स्यात्सर्वनामस्थाने । ददन्ति--ददति । तुदत् ।

४४५ । आच्छीनद्योर्नुम् । (७-१-८०)

अवर्णान्तादङ्गात्परो यः शतुरवयवस्तदन्तस्याङ्गस्य नुम् वा स्याच्छीनद्योः परतः । तुदन्ती--तुदती, तुदन्ति । भात्, भान्ती--भाती, भान्ति । पचत् ।

४४६ । शप्श्यनोर्नित्यम् । (७-१-८१)

शौ 'नाभ्यस्ताच्छतुः' इति नित्यं नुम्निषेधे प्राप्ते । **वा नपुंसकस्य** ॥ 'नाभ्यस्ताच्छतुः' इति सूत्रं नञ्वर्जमनुवर्तते । नपुंसकस्येति व्यत्ययेन पञ्चम्यर्थे षष्ठी । 'इदितो नुम् धातोः' इत्यतो नुमिति 'उगिदचाम्' इत्यतः सर्वनामस्थाने इति च अनुवर्तते । तदाह । **अभ्यस्तादित्यादिना** ॥ **ददन्तीति** ॥ नुमि अनुस्वारपरसवर्णौ । **तुदादिति** ॥ 'तुद व्यथने' अस्माच्छतृप्रत्यये 'तुदादिभ्यश्शः' इति शः, शपोऽपवादः । 'अतो गुणे' इति शतुरकारेण पररूपे तुदच्छब्दः, तस्मात् स्वमोर्लुक्, प्रत्ययलक्षणविरहात् असर्वनामस्थानत्वाच्च न नुम्, जश्त्वचर्त्वे इति भावः । तुदच्छब्दादौङः श्याम्, असर्वनामस्थानत्वान्नुमि अप्राप्ते । **आच्छीनद्योर्नुम्** ॥ 'वा नपुंसकस्य' इत्यतः वेत्यनुवर्तते । आदिति पञ्चमी । अङ्गस्य इत्यधिकृतं पञ्चम्या विपरिणम्यते, तच्च आदित्यनेन विशेष्यते, तदन्तविधिः, परस्य इत्यञ्याह्रियते, शतुरित्यनन्तरमवयवस्येत्यञ्याह्रियते, तेन च अङ्गस्येति षष्ठ्यन्तं विशेष्यते, तदन्तविधिः, अङ्गस्येत्यस्य आवृत्तिः बोध्या । तदाह । **अवर्णान्तादित्यादिना** ॥ 'इदितो नुम्' इत्यतः अनुवृत्त्यैव सिद्धे नुम्ग्रहणं स्पष्टार्थम् । **तुदन्ती-तुदती इति** ॥ औङश्शसोः नुमि, तदभावे च, रूपम् । शविकरणे कृते शतुरकारेण पररूपे एकादेशे सति तुद इत्यवर्णान्तमङ्गम्, तदादिग्रहणेन विकरणविशिष्टस्याप्यङ्गत्वात् । ततश्च तुदत् इत्यन्त्यस्तकारः शतुरवयवः तुद इत्यवर्णान्तादङ्गात् परश्चेति नुमिति भावः । अवर्णान्तादङ्गात् परो यश्शतृप्रत्ययः इत्याश्रयणे तु अत्र नुम् न स्यात् । शविकरणाकारस्य शतुरकारस्य च एकादेशे कृते तस्य पूर्वान्तत्वे शतुरवर्णान्तादङ्गात् परत्वाभावात्, परादित्वे अवर्णान्ताङ्गाभावात्, उभयत आश्रयेण च अन्तादिवत्त्व निषेधादित्यलम् । **तुदन्तीति** ॥ जश्शसोश्शिः, सर्वनामस्थानत्वान्नुमिति भावः । **भादिति** ॥ 'भा दीप्तौ' लुग्विकरणः लटश्शतरि कृते सवर्णदीर्घे भात् इति रूपम् । तस्मात् स्वमोर्लुक्, जश्त्वचर्त्वे इति भावः । **भान्ती-भाती इति** ॥ औङः शी' 'आच्छीनद्योः' इति नुम्विकल्पः इति भावः । **भान्तीति** ॥ जश्शसोः शिः, सर्वनामस्थानत्वान्नुमिति भावः । **पचदिति** ॥ पचधातोः लटश्शतरि, शप्, 'अतो गुणे' इति पररूपम् । पचत् इत्यस्मात् स्वमोर्लुगिति भावः । औङः श्याम् 'आच्छीनद्योः' इति विकल्पे प्राप्ते । **शप्श्यनोर्नित्यम्** ॥ 'आच्छीनद्योर्नुम्'

शप्श्यनोरात्परो यः शतुरवयवस्तदन्तस्य नित्यं नुम् स्याच्छीनद्योः परतः। पचन्ती, पचन्ति। दीव्यत्, दीव्यन्ती, दीव्यन्ति।

इति तान्ताः।

॥ अथ हलन्तनपुंसकलिङ्गे पकारान्तप्रकरणम् ॥

स्वप्--स्वब्, स्वपी। नित्यात्परादपि नुमः प्राक् 'अप्तृन्—' (सू २७७) इति दीर्घः, प्रतिपदोक्तत्वात् नुम्, स्वाम्पि। 'निरवकाशत्वं प्रतिपदोक्तत्वम्' इति पक्षे तु प्रकृते तद्विरहान्नुमेव। स्वम्पि। स्वपा। 'अपो भि' (सू ४४२)। स्वद्भ्याम्। स्वद्भिः।

इति पान्ताः।

इत्यनुवर्तते, 'नाभ्यस्ताच्छतुः' इत्यतः शतुरित्यनुवर्तते। अवयव इति चाध्याहृत्य। तदाह। **शप्श्यनोरादित्यादिना ॥ पचन्ती इति ॥** औङः श्यां नुमि रूपम्। **पचन्तीति ॥** जश्शसोश्शौ सर्वनामस्थानत्वान्नुमि रूपम्। **दीव्यदिति ॥** दिवुधातोः लटश्शतरि, श्यन्, 'हलि च' इति दीर्घः, दीव्यच्छब्दात् स्वमोर्लुगिति भावः। **दीव्यन्ती इति ॥** औङः श्यान्नुमि रूपम्। 'शप्श्यनोः' इति नित्यं नुमिति भावः। **दीव्यन्तीति ॥** जश्शसोः सर्वनामस्थानत्वात् नुमिति भावः ॥

इति तान्ताः।

अथ पकारान्ताः निरूप्यन्ते ॥ **स्वविति ॥** सु शोभनाः आपो यस्मिन् सरसीति बहुव्रीहिः। 'ऋक्पूरब्धूः' इति समासान्तस्तु न भवति। 'न पूजनात्' इति निषेधात्। 'ब्यन्तरुपसर्गेभ्योऽप ईत्' इति न भवति। तत्र अप इति कृतसमासान्तग्रहणात्। स्वप्शब्दात् स्वमोर्लुगिति भावः। **स्वपी इति ॥** औङः श्यां रूपम्। असर्वनामस्थानत्वात् न नुमिति भावः। जश्शसोः शौ स्वप् इ इति स्थिते 'अप्तृन्' इति दीर्घे, झलन्तलक्षणनुमि, अनुस्वारे, परसवर्णे, स्वाम्पि इति वक्ष्यति। तत्र 'अप्तृन्' इति दीर्घं बाधित्वा परत्वान्नित्यत्वाच्च नुमि कृते अकारस्य उपधात्वाभावात् कथं दीर्घ इत्यत आह। **नित्यादित्यादि ॥ प्रतिपदोक्तत्वादिति ॥** 'अप्तृन्' इति दीर्घस्य अप्शब्दमुच्चार्य विहितत्वादित्यर्थः। ननु निरवकाशत्वं प्रतिपदोक्तत्वमिति 'छदिरुपधिवलेर्ढञ्' इति सूत्रे 'शेषाद्विभाषा' इति सूत्रे च भाष्ये स्थितम्। 'अप्तृन्' इति दीर्घस्तु न निरवकाशः, आपः इत्यत्र सावकाशत्वात्। अतोऽत्र नित्यत्वात् परत्वाच्च पूर्वं नुमागमे कथं दीर्घ इत्याशङ्क्य इष्टापत्त्या परिहरति। **निरवकाशत्वमित्यादि ॥ स्वम्पीति ॥** दीर्घं बाधित्वा नुमि अनुस्वारपरसवर्णाविति भावः। केचित्तु 'अप्तृन्' इति दीर्घस्य निरवकाशत्वरूपप्रतिपदोक्तत्वाभावेऽपि प्रतिपदविधित्वेन शीघ्रोपस्थितिकतया प्रथमं प्रवृत्तौ स्वाम्पि, इत्येव युक्तमित्याहुः ॥

इति पान्ताः।

॥ अथ हलन्तनपुंसकलिङ्गे सकारान्तप्रकरणम् ॥

'अर्तिपृवपि—' (उ २७४) इत्यादिना धनेरुस् । षत्वस्यासिद्धत्वाद्रुत्वम् । धनुः, धनुषी । 'सान्त—' (सू ३१७) इति दीर्घः । 'नुम्विसर्जनीय—' (सू ४३४) इति षत्वम् । धनूंषि । धनुषा, धनुर्भ्याम् । एवं चक्षुर्हविरादयः । पिपठिषतेः क्विप् 'वोः—' (सू ४३३) इति दीर्घः । पिपठीः, पिपठिषी । अल्लोपस्य स्थानिवत्त्वाज्झलन्तलक्षणो नुम् न । स्वविधौ स्थानिवत्त्वाभावादजन्तलक्षणोऽपि नुम् न । पिपठिषि । पिपठीर्भ्यामित्यादि पुंवत् । पयः, पयसी, पयांसि । पयसा, पयोभ्याम् इत्यादि । सुपुम्, सुपुंसी । सुपुमांसि । अदः । विभक्तिकार्यम्, उत्वमत्वे । अमू, अमूनि । शेषं पुंवत् ।

इति सान्ताः ।

अथ सकारान्ताः निरूप्यन्ते । धनुश्शब्दं व्युत्पादयति । **धनेरिति** ॥ 'जनेरुसिः' इत्यतः उसिरित्यनुवर्तमाने 'अर्तिपृवपियजितनिधनितपिभ्योऽनित्' इत्यौणादिकसूत्रेण 'धन धान्ये' इत्यस्माद्धातोः उस्प्रत्यय इत्यर्थः । प्रत्ययावयवत्वात् सस्य षत्वे धनुष्शब्दः, तस्मात् स्वमोर्लुक्, तत्र षकारस्य कथं रुत्वमित्यत आह । **षत्वस्येति** ॥ **धनुरिति** ॥ 'वोरुपधायाः' इति दीर्घस्तु न । रेफान्तस्य अधातुत्वात् । **धनूंषीति** ॥ 'नश्च' इत्यनुस्वारः । **एवं चक्षुर्हविरादयः इति** ॥ 'चक्षेरिशच्च' इत्युसिः । शित्त्वेन सार्वधातुकत्वात् ख्शाआदेशो न । 'अर्चिशुचिहुसृपि' इत्यादिना हुधातोरिस्, 'सार्वधातुकार्धधातुकयोः' इति गुणः, अवादेशः आदिना सर्पिरादयो ग्राह्याः । **पिपठिषतेः क्विबिति** ॥ 'पठ व्यक्तायां वाचि' सन्, इट्, द्वित्वं, हलादिशेषः, अभ्यासाकारस्य इत्त्वं, प्रत्ययावयवत्वात् षत्वं, 'सनाद्यन्ताः' इति धातुत्वं, पिपठिष इत्यस्मात् क्विप्, अतो लोपः, पिपठिष् इत्यस्मात् स्वमोर्लुक्, षत्वस्यासिद्धत्वाद्रुत्वम् । एतावत्सिद्धवत्कृत्य आह । **वोरिति दीर्घः इति** ॥ **पिपठिषी इति** ॥ औङश्शां रूपम् । शौ विशेषमाह । **अल्लोपस्येति** ॥ वेभिद्शब्दनिरूपणे व्याख्यातमेतदनुपदमेव प्राक् । **पयः इति** ॥ 'पयः क्षीरं पयोऽम्बु च' इत्यमरः । **पयांसीति** ॥ शौ नुम् । 'सान्त' इति दीर्घः, अनुस्वारः, इति भावः । **पयोभ्यामिति** ॥ रुत्वे, 'हशि च' इत्युत्त्वे, गुणः इति भावः । **सुपुमिति** ॥ सु शोभनः पुमान् यस्य गृहस्य इति बहुव्रीहौ, सुपुंस्शब्दात् स्वमोर्लुक्, संयोगान्तलोपः । **सुपुंसी इति** ॥ औङश्शां रूपम् । **सुमुमांसीति** ॥ शेः सर्वनामस्थानत्वात् 'पुंसोऽसुङ्' इत्यसुङ् । सुपुंस् इ इति स्थिते, झलन्तलक्षणनुमि, 'सान्तमहतः' इति दीर्घः, 'नश्च' इत्यनुस्वारश्चेति भावः । **अदः इति** ॥ अदस्शब्दात् स्वमोर्लुक्, रुत्वविसर्गौ, सान्तत्वात् न मुत्वम्, लुका लुप्तत्वात् त्यदाद्यत्वमेति भावः । आङादावाह । **विभक्तिकार्यमिति** ॥ त्यदाद्यत्वादिकमित्यर्थः । **उत्वमत्वे इति** ॥ 'पूर्वत्रासिद्धम्' इति विभक्तिकार्योत्तरं उत्वमत्वे इत्यर्थः । **अमू इति** ॥ औङश्शी, त्यदाद्यत्वं, पररूपं, गुणः, ऊत्वमत्वे इति भावः । **अमूनीति** ॥ जश्शसोश्शिः, त्यदाद्यत्वं, पररूपं, अजन्तत्वात् नुम्, उपधादीर्घः, ऊत्वमत्वे इति भावः ॥ इति सान्ताः ।

इति श्रीमद्वासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां हलन्तनपुंसकलिङ्गप्रकरणं समाप्तम् ।

श्रीरस्तु ।

॥ अथाव्ययप्रकरणम् ॥

४४७ । स्वरादिनिपातमव्ययम् । (१-१-३७)

स्वरादयो निपाताश्चाव्ययसंज्ञाः स्युः । स्वर् । अन्तर् । प्रातर् । पुनर् । सनुतर् । उच्चैस् । नीचैस् । शनैस् । ऋधक् । ऋते । युगपत् । आरात् । पृथक् । ह्यस् । श्वस् । दिवा । रात्रौ । सायम् । चिरम् । मनाक् । ईषत् । जोषम् । तूष्णीम् । बहिस् । अवस् । समया । निकषा । स्वयम् । वृथा । नक्तम् । नञ् । हेतौ । इद्धा । अद्धा । सामि । 'वत्' (ग ४) । ब्राह्मणवत् । क्षत्रियवत् । सना । सनत् । सनात् । उपधा । तिरस् ।

अथ अव्ययानि निरूप्यन्ते । **स्वरादिनिपातमव्ययम्** ॥ स्वर् आदिः येषान्ते स्वरादयः, ते च निपाताश्चेति समाहारद्वन्द्वः । फलितमाह । **स्वरादयः इति** ॥ स्वरादीन् पठति । **स्वरित्यादिना** ॥ स्वरादीनां चादीनां पृथक् पाठस्तु 'निपाता आद्युदात्ताः' इति स्वरभेदार्थः । चादीनामसत्त्ववाचिनामेवाऽव्ययत्वम् । स्वरादीनान्तु सत्त्ववाचिनामसत्त्ववाचिनाञ्च तदिति व्यवस्थार्थञ्च । **स्वर्** स्वर्गे पारत्रिकसुखविशेषे, परलोके च । **अन्तर्** मध्ये । **प्रातर्** प्रत्यूषे । **पुनर्** अप्रथमे विशेषे च । **सनुतर्** अन्तर्द्धाने । स्वराद्याः पञ्च रेफान्ताः । तेन स्वर्याति प्रातरत्रेत्यादौ 'हशि च' इत्युत्त्वन्न । तत्र 'रोः' इत्युकारानुबन्धग्रहणात् । **उच्चैस्** महति । **नीचैस्** अल्पे । **शनैस्** क्रियामान्द्ये । **ऋधक्** सत्ये, वियोगशीघ्रसामीप्यलाघवेष्वित्यन्ये । **ऋते** वर्जने । **युगपत्** एककाले । **आरात्** दूरसमीपयोः । **पृथक्** भिन्ने । **ह्यस्** अतीतेऽह्नि । **श्वस्** अनागतेऽह्नि । **दिवा** दिवसे । **रात्रौ** निशि । **सायम्** निशामुखे । **चिरम्** बहुकाले । **मनाक्, ईषत्** इदं द्वयमल्पे । **जोषम्** सुखे, मौने च । **तूष्णीम्** मौने । **बहिस्, अवस्** इदं द्वयं बाह्ये । **समया** समीपे, मध्ये च । **निकषा** अन्तिके । **स्वयम्** आत्मनेत्यर्थे । **वृथा** व्यर्थे । **नक्तम्** रात्रौ । **नञ्** निषेधे । (श्लो) "तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्थाष्षट् प्रकीर्तिताः ॥" इत्यन्ये । **हेतौ** निमित्ते । **इद्धा** प्राकाश्ये । **अद्धा** स्फुटावधारणयोः, तत्त्वातिशययोरित्यन्ये । **सामि** अर्द्धे, जुगुप्सिते च । **वत्** इत्यनेन 'तेन तुल्यं क्रिया चेद्वतिः' 'तत्र तस्येव' 'तदर्हम्' इति वतिप्रत्ययो गृह्यते । 'उपसर्गाच्छन्दसि धात्वर्थे' इति वतिस्तु न गृह्यते । 'परावतो निवत उद्वतश्च' इत्यत्राव्ययत्वाभावात् । वस्तुतस्तु 'ताद्धितश्चासर्वविभक्तिः' इत्येव सिद्धे वतिग्रहणमिह व्यर्थमेव । **ब्राह्मणवत्, क्षत्रियवत्** इति वतिप्रत्ययान्तस्योदाहरणम् । केवलप्रत्ययस्य अव्ययत्वे

अन्तरा । अन्तरेण । ज्योक् । कम् । शम् । सहसा । विना । नाना । स्वस्ति । स्वधा । अलम् । वषट् । श्रौषट् । वौषट् । अन्यत् । अस्ति । उपांशु । क्षमा । विहायसा । दोषा । मृषा । मिथ्या । मुधा । पुरा । मिथो । मिथस् । प्रायस् । मुहुस् । प्रबाहुकम् । (प्रवाहिका) । आर्यहलम् । अभीक्ष्णम् । साकम् । सार्धम् । नमस् । हिरुक् । धिक् । अथ । अम् । आम् । प्रताम् । प्रशाम् । प्रतान् । मा । माङ् । आकृतिगणोऽयम् ।

प्रयोजनाभावात् । **सना, सनत्, सनात्**, एतत्त्रयं नित्ये । **उपधा** भेदे । **तिरस्** अन्तर्द्धौ, तिर्यगर्थे, पराभवे च । **अन्तरा** मध्ये, विनार्थे च । **अन्तरेण** वर्जने । वस्तुतस्तु 'अन्तराऽन्तरेण युक्ते' इति सूत्रे भाष्ये अन्तरा, अन्तरेण इत्यनयोः निपातत्वोक्तेरनयोः स्वरादिषु पाठः प्रक्षिप्त इति बोध्यम् । **ज्योक्** कालभूयस्त्वे, प्रश्ने, शीघ्रार्थे, सम्प्रति इत्यर्थे च । **कम्** वारिमूर्धनिन्दासुखेषु । **शम्** सुखे । **सहसा** आकस्मिकाविमर्शयोः । **विना** वर्जने । **नाना** अनेकविनार्थयोः । **स्वस्ति** मङ्गले । **स्वधा** पितृहविर्दाने । **अलम्** भूषणपर्याप्तिशक्तिवारणनिषेधेषु । **वषट्, वौषट्, श्रौषट्**, एतत्त्रयं देवहविर्दाने । **अन्यत्** अन्यार्थे । **अस्ति** सत्तायाम् । उपसर्गविभक्तिस्वरप्रतिरूपकाश्च, इति चाद्यन्तर्गणसूत्रादेव अस्तिशब्दस्य विभक्तिप्रतिरूपकस्य अव्ययत्वसिद्धेरिह स्वरादिगणे तस्य पाठो व्यर्थ इति मनुष्यसूत्रे भाष्यकैयटयोः स्थितम् । **उपांशु** अप्रकाशोच्चारणे, रहस्ये च । **क्षमा** क्षान्तौ । **विहायसा** आकाशे । **दोषा** रात्रौ । **मृषा, मिथ्या** इदं द्वयं वितथे । **मुधा** व्यर्थे । **पुरा** अविरते, चिरातीते, भविष्यदासन्ने च । **मिथो, मिथस्** इदं द्वयं रहसि, सहार्थे च । **प्रायस्** बाहुल्ये । **मुहुस्** पुनरर्थे । **प्रबाहुकम्** समकाले, ऊर्ध्वार्थे च । **प्रवाहिका** इति पाठान्तरम् । **आर्यहलम्** बलात्कारे । शाकटायनस्तु आर्येति प्रतिबन्धे, हलमिति निषेधानुवादयोरित्याह । **अभीक्ष्णम्** पौनःपुन्ये । **साकम्, सार्धम्** इदं द्वयं सहार्थे । **नमस्** नतौ । **हिरुक्** वर्जने । **धिक्** निन्दाभर्त्सनयोः । **अम्** शैघ्र्ये, अल्पे च । **आम्** अङ्गीकारे । **प्रताम्** ग्लानौ । **पशाम्** समानार्थे । **प्रतान्** विस्तारे । अत्र प्रतान् इति नान्तस्य पुनः पाठसामर्थ्यात् **प्रताम्, प्रशाम्** इति पूर्वयोः 'मो नो धातोः' इति नत्वम् । **प्रशान्** इति नान्तपाठस्तु साम्प्रदायिकः । 'कृन्मेजन्तः' इति सूत्रे भाष्यस्वरसोऽप्येवमिति शब्देन्दुशेखरे स्थितम् । **मा, माङ्** एतौ निषेधे । **आकृतिगणोऽयमिति** । ततश्च अन्येऽप्येवजातीयकाः स्वरादिगणे ज्ञेयाः । तथाहि, **कामम्** स्वाच्छन्द्ये । **प्रकामम्** अतिशये । **भूयस्** पुनरर्थे । **साम्प्रतम्** न्याय्ये । **परम्** किंत्वर्थे । **साक्षात्** प्रत्यक्षे । **साचि** तिर्यगर्थे । **सत्यम्** अर्धाङ्गीकारे । **मङ्क्षु, आशु** इदं द्वयं शैघ्र्ये । **संवत्** वर्षे । **अवश्यम्** निश्चये । **सपदि** शैघ्र्ये । **बलवत्** अतिशये । **प्रादुस्, आविस्** इदं द्वयं प्रकाशे । **अनिशम्, नित्यम्, सदा, अजस्रम्, सन्ततम्** एतत्पञ्चकं सातत्ये । **उषा** रात्रौ । **रोदसी** द्यावापृथिव्यर्थे । **ओम्** अङ्गीकारे, ब्रह्मणि च । अत्र अश्च उश्च म् चेति समाहारद्वन्द्वे, ब्रह्मवाची ओम्शब्दः ब्रह्मविष्णुशिवात्मक ब्रह्मवाची । 'अवतेष्टिलोपश्च' इत्युणादिव्युत्पन्नस्तु ब्रह्मण्यङ्गीकारे चेति विवेकः । 'अवतेष्टिलोपश्च'

च। वा। ह। अह। एव। एवम्। नूनम्। शश्वत्। युगपत्। भूयस्। कूपत्। सूपत्। कुवित्। नेत्। चेत्। चण्। कच्चित्। किच्चित्। यत्र। नह। हन्त। माकिः। माकिम्। नकिः। आकिम्। नकिम्। माङ्। नञ्। यावत्। तावत्। त्वै। द्वै। न्वै। रै। श्रौषट्। वौषट्। स्वाहा। स्वधा। वषट्। ओम्। तुम्।

इत्यस्यायमर्थः, अवधातोर्मन् स्यात् प्रत्ययस्य टिलोपश्चेति। अव् म् इति स्थिते 'ज्वरत्वर' इति वकारस्य उपधाभूतस्याकारस्य च ऊठ्, ऊकारद्वयस्य सवर्णदीर्घः, 'सार्वधातुक' इति तस्य गुणः, ओमिति रूपम्। उभयोरपि स्वरादित्वम्। नचौणादिकस्य 'कृन्मेजन्तः' इत्येव सिद्धमिति वाच्यम्। उणादौ हि 'च्विरव्ययम्' इति पठ्यते। च्व्यन्तानां निपातत्वादेव सिद्धे नियमार्थमिदम्। उणादिपठितानाञ्चादिस्वरादिपठितानाञ्चेदव्ययत्वं, तर्हि च्विरेवाव्ययं नेतरदिति। ततश्च ओमित्यस्य औणादिकस्याप्राप्ते अव्ययत्वे स्वरादिपाठ इत्यलम्। **भूः** पृथिव्याम्। **भुवर्** अन्तरिक्षे। **झटिति, द्राक्, तरसा** त्रयमिदं शैघ्र्ये। **सुष्ठु** प्रशंसायाम्। **दुष्ठु** निकृष्टे। **सु** पूजायाम्। **आः** आश्चर्ये। **कु** कुत्सिते, ईषदर्थे च। **अञ्जसा** तत्वे, शीघ्रार्थे च। **मिथु** द्वावित्यर्थे। **अस्तम्** विनाशे। **स्थाने** युक्तार्थे। **ताजक्** शैघ्र्ये। **चिराय, चिररात्राय, चिरस्य, चिरम्, चिरेण, चिरात्** इति षट्कं चिरार्थकम्। **वरम्** ईषदुत्कर्षे। **आनुषक्** आनुपूर्व्ये। **अनुषक्** अनुमाने। **अमेनः** शीघ्रसाम्प्रतिकयोः। **सुदि** शुक्लपक्षे। **वदि** कृष्णपक्षे। इत्यादि॥

इति स्वरादयः।

अथ चादीनाह। **च वा** इत्यादिना। **च** समुच्चयान्वाचयेतरेतरयोगसमाहारेषु। **वा** विकल्पादिषु। वा स्याद्विकल्पोपमयोरिवार्थेऽपि समुच्चये। **ह** प्रसिद्धौ। **अह** अद्भुते, खेदे च। **एव** अवधारणे, अनवक्लृप्तौ च। **एवम्** उक्तपरामर्शे। **नूनम्** निश्चये, तर्के च। **शश्वत्** पौनःपुन्ये, नित्ये, सहार्थे च। **युगपत्** एककाले। **भूयस्** पुनरर्थे, आधिक्ये च। **कूपत्** प्रश्ने, प्रशंसायां च। **कुवित्** भूर्यर्थे, प्रशंसायां च। **नेत्** शङ्कायां, प्रतिषेधविचारसमुच्चयेषु च। **चेत्** यद्यर्थे। **चण्** अयं चेदर्थे णित्, समुच्चयादिष्वननुबन्धकः, स्वरे भेदः फलम्। **कच्चित्** इष्टप्रश्ने। **यत्र** अनवक्लृप्तयमर्षगर्हाश्चर्येषु। नावकल्पयामि, नमर्षये, गर्हे, आश्चर्ये वा 'यत्र भवान् वृषळं याजयेत्।' **नह** प्रत्यारम्भे। **हन्त** हर्षे, विषादे, अनुकम्पायां, वाक्यारम्भे च। **माकिः, माकिम्, नकिः**, इदं त्रयं वर्जने। **माङ्नञौ** स्वरादिषूक्तौ। अन्यतरत्र पाठ इति युक्तम्। उभयत्र पाठस्तु व्यर्थ एव। नच निपातस्वरार्थः इह पाठ इति वाच्यम्। 'फिषोऽन्त उदात्तः' इत्येव तत्सिद्धेः। नच सत्ववचनत्वेऽप्यव्ययत्वार्थं स्वरादिपाठ इति वाच्यम्। तथा सति लक्ष्मीवाचकस्यापि माशब्दस्याव्ययत्वापत्तेः। तस्माच्चादिष्वेव माङ्नञौ पाठ्यावित्याहुः। **यावत्, तावत्** इदं द्वयं साकल्यावधिमानावधारणेषु। **त्वै** विशेषवितर्कयोः। **द्वै** वितर्के। **न्वै** इति पाठान्तरम्। **रै** दाने, अनादरे च। **श्रौषट्, वौषट्,**

तथाहि। **खलु**। **किल**। **अथो**। **अथ**। **सुष्ठु**। **स्म**। **आदह**। **'उपसर्गविभक्तिस्वरप्रतिरूपकाश्च'** (ग १६)। **अवदत्तम्**। **अहंयुः**। **अस्तिक्षीरा**। **अ**। **आ**। **इ**। **ई**। **उ**। **ऊ**। **ए**। **ऐ**। **ओ**। **औ**। **पशु**। **शुकम्**। **यथाकथाच**। **पाट्**। **प्याट्**। **अङ्ग**। **है**। **हे**। **भोः**। **अये**। **द्य**। **विषु**। **एकपदे**। **युत्**। **आतः**। **चादिरप्याकृतिगणः**॥

इति चादयः।

स्वाहा इदं त्रयं देवहविर्दाने। **स्वधा** पितृदाने। श्रौषडादीनामनेकाचां त्रयाणां स्वरभेदार्थ उभयत्र पाठः। **तुम्** तुङ्कारे। **तथाहि** निदर्शने। **खलु** निषेधवाक्यालङ्कारनिश्चयेषु। **किल** इति इवार्थे, वार्तायाम्, अळीके च। **अथ** अयं मङ्गळानन्तरारम्भप्रश्नकात्स्न्यधिकारप्रतिज्ञासमुच्चयेषु। अयं स्वरादावपि। तेन मङ्गळवाचकस्य सत्वार्थकत्वेऽप्यव्ययत्वम्। तथाच श्रीहर्षः। (श्लो) "यथा कुलाचारमथावनीन्द्रजां पुरन्ध्रिवर्गस्स्नपयाम्बभूव ताम्।" इति अथ स्नपयाम्बभूव इत्यस्य मङ्गळस्नानं कारयामासेत्यर्थः। निपातश्चाथशब्दः मृदङ्गादिध्वनिवत् मङ्गळम्। **सुष्ठु** स्वरभेदार्थः पुनः पाठः। **स्म** अतीते, पादपूरणे च। **आदह** उपक्रमहिंसाकुत्सनेषु। **उपसर्गविभक्तिस्वरप्रतिरूपकाश्च**॥ चादिगणसूत्रमेतत्। उपसर्गप्रतिरूपकाः विभक्त्यन्तप्रतिरूपकाः अव्प्रतिरूपकाश्च चादिगणे पाठ्या इत्यर्थः। तत्रोपसर्गप्रतिरूपकमुदाहरति। **अवदत्तम् इति**॥ अत्र अवेत्युपसर्गप्रतिरूपकं, नतूपसर्गः। ततश्च 'अच उपसर्गात्तः' इति तो न भवति। तादेशे तु अवत्तमिति स्यात्। **अहंयुरिति**॥ अहमिति सुबन्तप्रतिरूपकम्, अहङ्कारे। 'अहंशुभमोर्युस्' इति मत्वर्थीयो युस्। अत्र अहमिति न युष्मच्छब्दस्य प्रथमैकवचनम्। तथा सति 'प्रत्ययोत्तरपदयोश्च' इति मपर्यन्तस्य मदादेशे मय्युरित्यापत्तेः। **अस्तिक्षीरेति**॥ अस्ति क्षीरं यस्याः इति बहुव्रीहिः, अत्र अस्तीति तिङन्तप्रतिरूपकमव्ययं, नतु तिङन्तम्। तथा सति बहुव्रीह्यनुपपत्तेः। 'अनेकमन्यपदार्थे' इति बहुव्रीहिविधौ सुवित्यनुवृत्तेः। एवञ्च "बहुव्रीहिविधौ 'अस्तिक्षीरेत्युपसङ्ख्यानम्' इति वार्तिकन्न कर्तव्यम्" इति 'अनेकमन्यपदार्थे' इति सूत्रे भाष्ये स्पष्टम्। स्वरप्रतिरूपकानुदाहरति। **अ** इत्यादिना। **अ** सम्बोधने। **आ** वाक्यस्मरणयोः। **इ** सम्बोधनजुगुप्साविस्मयेषु। **ई, उ, ऊ, ए, ऐ, ओ, औ** इति सप्तकं सम्बोधने। **पशु** सम्यगर्थे। **शुकम्** शैघ्र्ये। **यथाकथाच** सङ्गतोऽयमनादरे। **पाट्, प्याट्, अङ्ग, है, हे, भोः, अये** एते सप्त सम्बोधने। **द्य** हिंसाप्रातिलोम्यपादपूरणेषु। **विषु** नानार्थे। **एकपदे** अकस्मादित्यर्थे। **युत्** कुत्सायाम्। **आतः** इतोऽर्थे। **चादिरप्याकृतिगणः इति। यत्, तत्** द्वयं हेतौ। **आहोस्वित्** विकल्पे। **सम्** सर्वतोभावे। **कम्** पादपूरणे। **सुकम्** अतिशये। **अनु** वितर्के। **शम्बत्** अन्तःकरणे, आभिमुख्ये च। **व** पादपूरणे, इवार्थे च। **चटु, चाटु** द्वयं प्रियवाक्ये। **हुम्** भर्त्सने। **इव** सादृश्ये। **अद्यत्वे** इदानीमित्यर्थे। इत्यादि। अत्र स्वरादिचाद्योराकृतिगणत्वेऽपि येषां निपातस्वरः इष्टः ते चादिषु, अन्ये तु स्वरादिषु। स्वरद्वयभाजस्तु उभयत्र बोध्याः॥

इति चादयः।

४४८। तद्धितश्चासर्वविभक्तिः। (१-१-३८)

यस्मात्सर्वा विभक्तिर्नोत्पद्यते स तद्धितान्तोऽव्ययं स्यात्। परिगणनं कर्तव्यम्। तसिलादयः प्राक्पाशपः। शस्प्रभृतयः प्राक्समासान्तेभ्यः। अम्। आम्। 'कृत्वोऽर्थाः'। तसिवती। नानाञाविति। तेनेह न। पचतिकल्पम्। पचतिरूपम्।

अथ स्वरादिचादिभिन्नान्यव्ययान्याह। **तद्धितश्चासर्वविभक्तिः** ॥ असर्वविभक्तिरिति बहुव्रीहिः। तत्र सर्वाः विभक्तयः यस्मान्न भवन्तीति बहुवचनान्तविग्रहो न सम्भवति। अव्ययेभ्यः सप्तानां विभक्तीनां उत्पत्त्यभ्युपगमात्। तथाहि 'तद्धितश्च' इति प्रकृतसूत्रे भाष्ये तावत् 'द्वेकयोर्द्विवचनैकवचने' 'बहुषु बहुवचनम्' इति सूत्रविन्यासं भङ्क्त्वा 'एकवचनम्, द्वयोर्द्विवचनम्, बहुषु बहुवचनम्' इति सूत्रन्यासं कृत्वा एकवचनमुत्सर्गतः करिष्यते, द्विबह्वोरर्थयोः, तस्य द्विवचनबहुवचने बाधके, इत्यादि स्थितम्। ततश्च एकवचनमित्यनेन ङ्याप्प्रातिपदिकात् एकवचनम्भवतीति सामान्यविधिना द्वित्वबहुत्वाभावे एकवचनमिति लभ्यते। एवञ्च द्विबहुत्वाभावे, सति एकत्वे तदभावे च एकवचनमिति फलति। तत्र द्वित्वबहुत्वयोः द्विवचनबहुवचनोक्त्यैव ततोऽन्यत्र एकवचनस्य सिद्धत्वात् 'एकवचनम्' इति सूत्रं कर्मत्वाद्यभावेऽपि प्रापणार्थं सम्पद्यते। तथाच अलिङ्गसंख्येभ्योऽव्ययेभ्यः एकवचनं प्रवर्तमानं विनिगमनाविरहात् सर्वविभक्त्यैकवचनं भवति। अत एव 'अव्ययादाप्सुपः' इत्यत्र प्रत्याहारग्रहणमर्थवत्। तस्मात्सर्वा विभक्तयः यस्मादिति न विग्रहः, किन्तु सर्वशब्दोऽत्र सर्वः पटो दग्ध इतिवत् अवयवकात्स्न्यें वर्तते। एवञ्च सर्वा वचनत्रयात्मिका विभक्तिः यस्मान्नोत्पद्यते, किन्त्वेकवचनान्येवोत्पद्यन्ते, स तद्धितान्तोऽव्ययसंज्ञस्स्यादिति फलतीत्यभिप्रेत्य आह। **यस्मादिति। सर्वेति** ॥ वचनत्रयात्मिकेत्यर्थः। **नोत्पद्यते इति** ॥ किन्त्वेकवचनान्येवोत्पद्यन्ते इति शेषः। स्यादेतत्, तिङश्चेत्यनुवृत्तौ 'प्रशंसायां रूपप्' इति रूपप्प्रत्यये 'ईषदसमाप्तौ कल्पप्' इति कल्पप्प्रत्यये च पचतिरूपं पचतिकल्पमिति रूपम्। प्रशस्तं पचति ईषत् पचतीत्यर्थः। अत्राप्यव्ययत्वं स्यात्, असर्वविभक्तितद्धितान्तत्वात्। किञ्च उभयशब्दे अतिव्याप्तिः, तस्याप्यसर्वविभक्तितद्धितान्तत्वादित्यत आह। **परिगणनमिति** ॥ वार्तिकमेतत्। **तसिलादयः इति** ॥ 'पञ्चम्यास्तसिल्' इत्यारभ्य 'द्वित्रिभ्यां धमुञ्' इत्यन्ता इत्यर्थः। **शस्प्रभृतयः इति** ॥ 'बह्वल्पार्थात्' इत्यारभ्य 'अव्यक्तानुकरणात्' इति डाजन्ता इत्यर्थः। **अम्, आमिति** ॥ 'अमु च च्छन्दसि' इत्यम् 'किमेत्तिङव्यय' इत्याम् च गृह्यते। **कृत्वोऽर्थाः इति** ॥ 'सङ्ख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्, द्वित्रिचतुर्भ्यस्सुच्, विभाषा बहोर्धा' इति त्रय इत्यर्थः। **तसिवती इति** ॥ 'तेनैकदिक्, तसिश्च' इति तसिः 'तेन तुल्यम्' इत्यादिविहितो वतिश्च गृह्यते 'प्रतियोगे पञ्चम्यास्तसिः' इत्यस्य तु शस्प्रभृतित्वादेव सिद्धम्। एवञ्च स्वरादिषु वदित्यस्य प्रयोजनं चिन्त्यम्। **नानाञाविति** ॥ 'विनञ्भ्यान्नानाञौ न सह' इति परिगणनं कर्तव्यमित्यन्वयः। परिगणनेनैव सिद्धेः 'तद्धितश्च'

४४९ । कृन्मेजन्तः । (१-१-३९)

कृद्यो मान्त एजन्तश्च तदन्तमव्ययं स्यात् । स्मारंस्मारम् । जीवसे । पिबद्धै ।

४५० । क्त्वातोसुन्कसुनः । (१-१-४०)

एतदन्तमव्ययं स्यात् । कृत्वा । उदेतोः । विसृपः ।

४५१ । अव्ययीभावश्च । (१-१-४१)

अधिहरि ।

४५२ । अव्ययादाप्सुपः । (२-४-८२)

अव्ययाद्विहितस्यापः सुपश्च लुक् स्यात् । तत्र शालायाम् । अथ विहितविशेषणान्नेह । अत्युच्चैसौ । अव्ययसंज्ञायां यद्यपि तदन्तविधिरस्ति, तथापि न गौणे । 'आबग्रहणं व्यर्थमलिङ्गत्वात्' (वा १६३३) ।

इति सूत्रं न कर्तव्यमिति भावः । **कृन्मेजन्तः** ॥ कृत् मेजन्त इति छेदः । म् च एच मेचौ तौ अन्ते यस्येति बहुव्रीहिः । तदाह । **कृद्यो मान्तः इति** ॥ **तदन्तमिति** ॥ केवलस्य कृतः प्रयोगानर्हत्वात् संज्ञाविधावपि तदन्तविधिरिति भावः । **स्मारं स्मारमिति** ॥ 'आभीक्ष्ण्ये णमुल् च' इति स्मृधातोर्णमुल् 'अचो ञ्णिति' इति वृद्धिः, रपरत्वम्, 'नित्यवीप्सयोः' इति द्वित्व, मान्तकृदन्तत्वादव्ययत्वम् । **जीवसे इति** ॥ 'तुमर्थे सेसेनसे' इत्यादिना असेप्रत्ययः । **पिबद्धै इति** ॥ 'तुमर्थे से' इत्यादिना शध्यैप्रत्ययः । शित्त्वात् सार्वधातुकत्वम् । 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदाम्' इति पिबादेश इति भावः, शप् तु न, कर्त्रर्थे सार्वधातुके तद्विधेः 'अव्ययकृतो भावे' इति सिद्धान्तादित्याहुः । **क्त्वातोसुन्कसुनः** ॥ **कृत्वेति** ॥ 'समानकर्तृकयोः' इति क्त्वा । **उदेतोरिति** ॥ उत्पूर्वादिणः भावलक्षणे इत्यादिना तोसुन् । **विसृपः इति** ॥ सृपितृदोः कसुन् । **अव्ययीभावश्च** ॥ अव्ययसंज्ञस्स्यादिति शेषः । **अधिहरीति** ॥ विभक्त्यर्थेऽव्ययीभावः, हरावित्यर्थः । 'अव्ययादाप्सुपः' आप् च सुप् च आप्सुप् तस्य आप्सुपः, समाहारद्वन्द्वात् षष्ठी । 'प्यक्षत्रियार्षे' इत्यतो लुगित्यनुवर्तते । तदाह । **अव्ययाद्विहितस्येति** ॥ **तत्र शालायामिति** ॥ तत्रेत्यस्याव्ययत्वात् आपो लुक् । स्त्रीत्वबोधनाय शालायामिति । **अथेति** ॥ अत्र सुपो लुक् । **विहितेति** ॥ अव्ययात्परस्येत्यनुक्ता अव्ययाद्विहितस्येति व्याख्यानादिति भावः । **अत्युच्चैसाविति** ॥ उच्चैरतिक्रान्त इति विग्रहे 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति समासः । अधिकरणशक्तिप्रधानान्यव्ययानि वृत्तिविषये शक्तिमत्प्रधानानि भवन्ति । यथा दोषामन्यमहः, दिवाभूता रात्रिरिति । अतो द्वितीयासम्भवात् 'अत्यादयः' इति द्वितीयासमासस्याविरोधः । अत्र समासाद्विहितस्य सुपः अव्ययभूतादुच्चैश्शब्दात् परत्वेऽपि ततो विहितत्वाभावात् न लुक् । अत्युच्चैरिति समुदायस्य तु नाव्ययत्वम्, स्वरादिगणे

"सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥"

इति [भाष्योक्ता] श्रुतिर्लिङ्गकारकसंख्याभावपरा।

"वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः।
आपं चैव हलन्तानां यथा वाचा निशा दिशा॥"

उच्चैश्शब्दस्य केवलस्य पाठादिति भावः। ननु स्वरादिगणे केवलोच्चैश्शब्दस्य पाठेऽपि 'स्वरादिनिपातमव्ययम्' इति अव्ययसंज्ञा भवत्येव 'प्रयोजनं सर्वनामाव्ययसंज्ञायाम्' इति वचनादित्याशङ्क्य परिहरति। **अव्ययसंज्ञायां यद्यपि तदन्तविधिरस्तीति** ॥ परिहरति। **तथापि न गौणे इति** ॥ सर्वनामसंज्ञायामुपसर्जनस्य नेति प्रकृतः प्रतिषेधः अव्ययसंज्ञाविधावनुवर्तत इति 'तद्धितश्चासर्वविभक्तिः' इति सूत्रे भाष्ये स्पष्टमिति भावः। **आब्ग्रहणं व्यर्थमिति** ॥ "अव्ययादाप्सुपः" इति सूत्रे इति शेषः। **अलिङ्गत्वादिति** ॥ अव्ययानां लिङ्गाभावादित्यर्थः। तथाच वार्तिकम्, 'अव्ययादाब्लुग्वचनानर्थक्यं लिङ्गाभावात्' इति, तथा 'तद्धितश्चासर्वविभक्तिः' इति सूत्रे भाष्येऽप्युक्तम्। स्त्रीपुन्नपुंसकत्वानि सत्वगुणाः एकत्वद्वित्वबहुत्वानि च एतानर्थान् ये न वियन्ति तदव्ययमिति। ननु अव्ययानां लिङ्गाभावे 'सदृशं त्रिषु लिङ्गेषु' इत्यथर्वणश्रुतिविरोध इत्याशङ्क्य परिहरति। **सदृशमिति** ॥ त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु सर्वेषु वचनेषु च यत् न व्येति विकारं न प्राप्नोति, किन्तु सदृशं एकप्रकारमेव भवति तदव्ययमिति अथर्वणश्रुतियोजना। अत्र विभक्तिवचनशब्दौ कारकसङ्ख्यापरौ, नतु प्रत्ययपरौ, अन्यतरग्रहणवैयर्थ्यात्। **लिङ्गकारकेति** ॥ लिङ्गकारकसङ्ख्याभावः तात्पर्यविषयभूतः यस्या इति विग्रहः। लिङ्गेष्वित्यादिषु सप्तमी हि 'षष्ठीचानादरे' इति विहिता। तथाच लिङ्गकारकसङ्ख्याः अनादृत्य यन्न व्येति विकारं न प्राप्नोति, किन्तु सदृशम् एकप्रकारमेव भवति, तदव्ययमित्युदाहृतश्रुतेरर्थः। 'तद्धितश्चासर्वविभक्तिः' इति सूत्रभाष्ये स्त्रीपुन्नपुंसकत्वानि सत्वगुणाः एकत्वद्वित्वबहुत्वानि च एतानर्थान् ये न वियन्ति तदव्ययमित्युपक्षिप्य तत्र प्रमाणतया अस्याः श्रुतेरुदाहृतत्वादिति भावः। अयं च लिङ्गकारकसङ्ख्याभावनियमः निपातानामेव, स्वरादीनान्तु कतिपयानां लिङ्गकारकसङ्ख्यान्वयोऽस्त्येव 'स्वरादिनिपातमव्ययम्' इति सूत्रे भाष्ये चादीनामसत्त्ववचनानामेव संज्ञा। स्वरादीनान्तु सत्त्ववचनानामसत्त्ववचनानाञ्च इत्युक्तत्वात्। 'स्वस्ति वाचयति, स्वस्ति वाच्य इति, क्षीणे पुण्ये स्वः पतति, प्रातर्यजते' इत्यादौ कर्मकारकयोगदर्शनाच्च। अथ प्रसङ्गादाह। **वष्टीति** ॥ अव, अपि इत्युपसर्गयोः अकारस्य लोपं हलन्तानाम् आपञ्च भागुरिनामक आचार्यः वष्टि, इच्छतीत्यर्थः। एवशब्दस्तु पादपूरणः। अवेत्युपसर्गे। आदेरेवाकारस्य लोपः नान्त्यस्य, अपिना साहचर्यात्। भागुरिशब्दं दन्त्योष्ठ्यादिं केचित्पठन्ति। तत्त्वबोधिन्यान्तु पवर्गचतुर्थादिः पठितः, शब्देन्दुशेखरेऽप्येवम्। **यथा वाचेति** ॥ परिगणनमिति केचित्। उदाहरणमात्रमित्यन्ये। यद्यपि 'वश कान्तौ' इत्यस्य छन्दोमात्रविषयत्वं वक्ष्यते। तथापि अस्मादेव लिङ्गाल्लोकेऽपीत्याह। वस्तुतस्तु वष्टि भागुरिरिति श्लोको भाष्ये न दृश्यते।

वगाहः—अवगाहः । पिधानम्—अपिधानम् ।

इत्यव्ययप्रकरणम् ।

प्रत्युत 'ङ्याप्प्रातिपदिकात्' इति सूत्रस्थभाष्यपर्यालोचनया नास्तीत्येव युक्तम् । तत्र ह्येवमुक्तं "आब्ग्रहणन्न कार्यं, खट्वा मालेत्यादौ अन्तवत्त्वेन प्रातिपदिकत्वादेव सिद्धम्" इत्युक्त्वा, कुञ्चा उष्णिहा देवविशेति हलन्तात् टापः स्वाद्यर्थमाब्ग्रहणमस्त्विति आक्षिप्य 'कुञ्चानालभेत उष्णिहककुभौ देवविशञ्च' इति अकारान्तादेव तत्रापि टाबित्युक्त्वा 'डाबुभाभ्यामन्यतरस्याम्' इति बहुराजा, बहुराजे, बहुराजाः इत्यर्थम् आब्ग्रहणमिति समाहितम् । 'आपश्चैव हलन्तानाम्' इत्याश्रित्य वाचा निशा दिशेत्युक्तम् । अत्र निश्दिशोरिगुपधलक्षणे के अदन्तत्वाद्वापि निशा इत्यादिरूपसम्भवेऽपि वाचाशब्दः असाधुरेवेति शब्देन्दुशेखरे स्थितम् ॥

इति श्रीमद्वासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां
बालमनोरमाख्यायाम् अव्ययनिरूपणं समाप्तम् ।

श्रीरस्तु ।

॥ अथ स्त्रीप्रत्ययप्रकरणम् ॥

४५३ । स्त्रियाम् । (४-१-३)

अधिकारोऽयम् । समर्थानामिति यावत् ।

अथ स्त्रीप्रत्ययाः निरूप्यन्ते ॥ तदेवं 'ङ्याप्प्रातिपदिकात्' इत्यधिकृत्य 'स्वौजस-मौट्' इति सूत्रं सप्रपञ्चनिरूप्य तदुत्तरमनुक्रान्तान् स्त्रीप्रत्ययान्निरूपयितुमाह । **स्त्रियाम्** ॥ **अधिकारोऽयमिति** ॥ 'अजाद्यतष्टाप्' इत्याद्युत्तरसूत्रेष्वनुवृत्त्यर्थमिदं सूत्रं, नतु स्वतन्त्र-विधिरित्यर्थः । कियत्पर्यन्तमयमधिकारः इत्यत आह । **समर्थेति** ॥ यावदित्यवधौ । 'सम-र्थानां प्रथमात्' इत्यतः प्रागित्यर्थः । अत्रेदमवधेयम् । "स्तनकेशवती स्त्री स्याल्लोमशः पुरुष-स्मृतः । उभयोरन्तरं यच्च तदभावे नपुंसकम् ॥" इति लक्षणलक्षितम् अवयवसंस्थानविशेषा-त्मकं लौकिकं स्त्रीपुंसयोर्लिङ्गं, तदभावे तयोरुभयोरभावे सति यदुभयोरन्तरं सदृशं तन्नपुंसक-मित्यर्थः । तदिदं लौकिकं लिङ्गमस्मिन् शास्त्रे नोपयुज्यते । तस्य अचेतने खट्वा मालादौ बाधात् स्त्रीप्रत्ययानापत्तेः । दारानित्यादौ 'तस्माच्छसो नः पुंसि' इति नत्वानापत्तेश्च । किन्तु सत्त्वरजस्तमसां प्राकृतगुणानां वृद्धिः पुंस्त्वम्, अपचयः स्त्रीत्वम्, स्थितिमात्रन्नपुंसकत्वम् । अत एव उत्कर्षापकर्षसत्त्वेऽपि स्थितिमात्रमादाय 'सामान्ये नपुंसकम्' इति प्रवादः । उत्क-र्षापकर्षसाम्यात्मकावस्थात्रयसाधारणस्थितिमात्रविवक्षायां नपुंसकं भवतीति तदर्थः । ईदृश-मवस्थात्रयं केवलान्वयि । अयं पदार्थः, इयं व्यक्तिः, इदं वस्तु, इति व्यवहारस्य सार्वत्रिकत्वात् । तच्चेदं लिङ्गमर्थनिष्ठमेव । तदुक्तं भाष्ये "एकार्थे शब्दान्यत्वात् दृष्टं लिङ्गान्यत्वमवयवान्यत्वाच्च" इति । एकस्मिन्नेवार्थे पुष्यस्तारका तारकं नक्षत्रम् इति शब्दनानात्वदर्शनात्, कुटी कुटीरादौ रेफाद्यवयवोपजनने लिङ्गभेददर्शनाच्च स्तनकेशाद्यतिरिक्तमेव लिङ्गमित्यर्थ इति कैयटः । पुल्लिङ्ग-शब्द इत्यादिव्यवहारस्तु वाच्यवाचकयोरभेदोपचाराद्बोध्यः । नच उपचयादिधर्माणां विरुद्ध-त्वादेकत्र समावेशायोगादेकस्य द्वित्रिलिङ्गताऽनापत्तिरिति वाच्यम् । एकैकस्मिन् वस्तुनि क्षण-भेदेन त्रयाणां धर्माणामपि समावेशोपपत्तेः । उक्तञ्च भाष्ये "कश्चिदपि सत्त्वादिधर्मः क्वचिन्मुहू-र्तमपि नावतिष्ठते यावदनेन वर्धितव्यमपायेन वा युज्यते" इति । नचैवं सति युगपत् द्वित्रि-लिङ्गत्वानापत्तिरिति वाच्यम् । नहि व्यवहारे स्वसमकालिकपदार्थसत्ता प्रयोजिका । तथा सति भूतभविष्यद्व्यवहारोच्छेदापातात् । तत्र कश्चिच्छब्दः एकलिङ्गविशिष्ट एवार्थे प्रयोज्यः, कश्चित्तु द्विलिङ्गे, कश्चित्तु त्रिलिङ्गे, इतीत्थंतत्तु लिङ्गानुशासनशास्त्रादवगन्तव्यम् । एषां पुंस्त्री-नपुंसकशब्दानां वृद्ध्यादिशब्दवदस्मिन् शास्त्रे सङ्केतश्च लिङ्गानुशासनत एव ज्ञेयः । उक्तञ्च

४५४ । अजाद्यतष्टाप् । (४-१-४)

अजादीनामकारान्तस्य च वाच्यं यत्स्त्रीत्वं तत्र द्योत्ये टाप् स्यात् ।

भाष्ये "अवश्यन्तावत् कश्चित् स्वकृतान्त आस्थेयः" इति, वैयाकरणसिद्धान्त इत्यर्थः । "कृतान्तौ यमसिद्धान्तौ" इत्यमरः । तत्र टिघुभादिसंज्ञावल्लघुसंज्ञामकृत्वा महासंज्ञाकरणसामर्थ्यात् सति सम्भवे स्तनकेशवतीत्यादिलौकिकं लिङ्गमप्यत्राश्रीयते । अन्यथा 'पशुना यजेत' इत्यत्र स्त्रीव्यक्तावपि सत्त्वाद्युपचारात्मकपुंस्त्वाद्यनपायात् 'आङो नाऽस्त्रियाम्' इति नाभावस्याविरोधात् स्त्रीपशुरप्यालभ्येत । तदेतच्चतुर्थस्य प्रथमपादे 'तथालिङ्गम्' इत्यधिकरणे अध्वरमीमांसाकुतूहलवृत्ताववोचाम । त्रिविधमपि एतल्लिङ्गं जातिव्यक्तिवत् प्रातिपदिकार्थ एव । प्रत्ययार्थत्वे प्राधान्यापत्तौ अजा, खट्वा, इत्यादौ स्त्रीत्वविशिष्टतादात्म्यावच्छिन्नानादिबोधोऽनुभवसिद्धो विरुध्येत । किञ्च मातृदुहितृस्वसृगवादिशब्देषु विनापि टाबादिप्रत्ययं स्त्रीत्वविशिष्टार्थस्य बोधात् प्रातिपदिकस्य तत्र शक्त्यावश्यकत्वे टाबादीनामपि शक्तिकल्पने गौरवम् । 'ऋकारान्ता मातृदुहितृस्वसृयातृननान्दरः, प्रावृड्विप्रुड्दुक्त्विषः' इत्यादिलिङ्गानुशासनसूत्राण्यपि प्रकृतिविषयाण्येव दृश्यन्ते । अत एव च 'कृदिकारादक्तिनः' इत्यत्र अक्तिन इत्येतदर्थवत् । अन्यथा अक्तिनैव स्त्रीत्वस्योक्तत्वात् ङीपोऽप्राप्तेः तद्विधर्थं स्पष्टमेव । नचैवमपि प्रकृत्यैव स्त्रीत्वस्योक्तत्वात् कथं टाबादय इति वाच्यम् । द्वाविंशादिवत् प्रकृत्युक्तस्याव्यावर्तकत्वात् । अन्यथा टाबादिविधिवैयर्थ्यात् । तथाच स्त्रीत्वमिह प्रातिपदिकस्यैव वाच्यम् । टाबादयस्तु तद्द्योतकाः । तथाच टाबादिषु सत्सु अवश्यं स्त्रीत्वबोधः इति नियमः, नतु टाबादिषु सत्स्वेवेति नियम इति । **अजाद्यतष्टाप्** ॥ अजः आदिर्येषान्ते अजादयः ते च अचेति समाहारद्वन्द्वात् षष्ठी 'ङ्याप्प्रातिपदिकात्' इत्यतः प्रातिपदिकादित्यनुवृत्तं षष्ठ्या विपरिणतम् अजादिभिः अता च विशेष्यते, तदन्तविधिः । तत्राद्विषये 'समासप्रत्ययविधौ तदन्तविधेः प्रतिषेधो वक्तव्यः' इति निषेधो न, 'उगिद्वर्णग्रहणवर्जम्' इत्युक्तेः । ङ्याब्ग्रहणन्तु नानुवर्तते 'स्त्रियाम्' इत्यधिकारे तयोर्विधेयत्वात् । नच अजादिभिः प्रातिपदिकस्य विशेषणेऽपि तदन्तविधिर्नास्ति 'समासप्रत्ययविधौ' इति निषेधात् 'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्न' इति च निषेधादिति वाच्यम् । 'शूद्रा चामहत्पूर्वा जातिः' इत्यत्र अमहत्पूर्वेति वचनेनात्र तदन्तविधिज्ञापनात् । किञ्च स्त्रियां व्यक्तौ गम्यमानायामिति नार्थः । तर्हि अजा खट्वेत्यादौ अजत्वाद्याकारेण वस्तुतः स्त्रीव्यक्तौ गम्यमानायां टाबादिप्रत्ययाः स्युः । ततश्च टाबादिप्रत्ययेषु प्रयुज्यमानेषु स्त्रीत्वस्य भानन्न नियतं स्यात् । अतः स्त्रियामिति भावप्रधानो निर्देशः । स्त्रीत्वे इति यावत् । तदाह । **अजादीनामित्यादिना** ॥ अजाद्यन्तानामित्यर्थः । **द्योत्ये इति** ॥ उक्तरीत्या स्त्रीत्वस्य प्रातिपदिकार्थत्वादिति भावः । उक्तं च भाष्ये "स्त्रियां यत् प्रातिपदिकं वर्तते तस्माट्टाबादयो भवन्ति स्वार्थे" इति । **टाप् स्यादिति** ॥ 'प्रत्ययः, परश्च' इत्यधिकृतम् । कस्मात् परो भवतीत्याकांक्षायां सन्निधानात् अजादिभ्यः अदन्ताच्चेति बोध्यम् । ननु अजादिगणे अज, अश्व, इत्याद्यदन्तपाठो व्यर्थः, अदन्तत्वादेव सिद्धेरित्यत आह । **अजाद्युक्तिरिति** ॥ 'वयसि प्रथमे, जातेरस्त्रीविषयात्' इत्यादिवक्ष्यमाणस्य ङीपो ङीषश्च अदन्तटाबपवादस्य बाधनार्थमजादिग्रहणमित्यर्थः । एवञ्च अदन्तटाबपवादौ ङीप्ङीषौ तयो-

अजाद्युक्तिर्ङीषो ङीपश्च बाधनाय। अजा। अतः, खट्वा। अजादिभिः स्त्रीत्वस्य विशेषणान्नेह। पञ्चाजी। 'द्विगोः' (सू ४७९) इति ङीप्। अत्र हि समासार्थसमाहारनिष्ठं स्त्रीत्वम्। अजा। एडका। अश्वा। चटका। मूषिका। एषु जातिलक्षणो ङीष् प्राप्तः। बाला। वत्सा। होढा। मन्दा। विलाता। एषु 'वयसि प्रथमे' (सू ४७८) इति ङीप् प्राप्तः। 'सम्भस्त्राजिनशणपिण्डेभ्यः फलात्' (वा २४९७)। सम्फला। भस्त्रफला। 'ङ्यापोः—' (सू १००१) इति ह्रस्वः।

प्यजादिटाबपवाद इति फलति। अजशब्दः छागजातौ वर्तते। 'अजा छागी तुभच्छागबस्तच्छगलकाः अजे' इत्यमरः। अजशब्दात् टाप् टपावितौ, सवर्णदीर्घः, व्यपदेशिवत्त्वात् अजान्तत्वम्। **अतः इति** ॥ उदाहरणं वक्ष्यत इति शेषः। **खट्वेति** ॥ 'खट कांक्षायाम्' अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन्' खट्वशब्दः अदन्तः तस्मात् टापि सवर्णदीर्घः। 'शयनम्मञ्चपर्यङ्कपल्यङ्काः खट्वया समाः' इत्यमरः। ननु 'प्रत्ययः, परश्च' इत्यनुवृत्तौ दिग्योगपञ्चम्या युक्तत्वात् अजादिभ्यः अतश्च टाप् स्यात् स्त्रीत्वे द्योत्ये इत्यर्थ एव युक्तः। तथाच 'अजाद्यतः' इति षष्ठ्याश्रयणमयुक्तमित्यत आह। **अजादिभिरिति** ॥ अजाद्यत इति षष्ठीमाश्रित्य अजादीनाम् अदन्तस्य च वाच्ये स्त्रीत्वे टाबित्येवम् अजादिभिः स्त्रीत्वस्य विशेषणादित्यर्थः। **पञ्चाजीति** ॥ पञ्चानामजानां समाहारः इति विग्रहे 'तद्धितार्थ' इत्यादिना द्विगुः। 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः' इति स्त्रीत्वम्। 'द्विगोः' इति ङीप्। 'यस्येति च' इत्यकारलोपः। नन्वत्र समासे अजशब्दसत्त्वात्तद्वाच्यमेव स्त्रीत्वमित्यत आह। **अत्रेति** ॥ हि यतः अत्र पञ्चाजशब्दे समासार्थभूतो यः समाहारः तन्निष्ठं स्त्रीत्वं पञ्चाजेति समुदायस्य वाच्यं नत्वजशब्दस्य, अतोऽत्र न टाबित्यर्थः। नन्वोक्तरीत्या तदन्तविधिसत्त्वादजशब्दान्तस्य पञ्चाजेति समासस्य ग्रहणात् तद्वाच्यत्वं स्त्रीत्वस्येति वाच्यम्। सत्यपि तदन्तविधौ अजादीनां श्रुतत्वेन स्त्रीत्वस्य तद्विशेषणताया एव न्याय्यत्वात्। 'अजादिभ्यष्टाप् स्त्रीत्वे द्योत्ये' इति व्याख्याने तु स्त्रीत्वस्य अजादिशब्दवाच्यत्वालाभात् समाहारनिष्ठमपि स्त्रीत्वमादाय टाप् स्यादिति भावः। अथाजादीनुदाहरति। **अजेत्यादिना॥ एडकेति** ॥ 'मेण्डोरभ्रोरणोर्णायुमेषवृष्णय एडके' इत्यमरः। अस्य स्त्रीत्वे कोशान्तरम्मृग्यम्। **अश्वेति** ॥ 'वाम्यश्वाबडबा' इत्यमरः। **चटकेति** ॥ चटकः पक्षिजातिविशेषः। अस्य जातिशब्दस्य स्त्रीत्वं मृग्यम्। अमरस्तु 'चटकः कलविङ्कस्स्यात्तस्य स्त्री चटका' इत्याह। **मूषिकेति** ॥ 'चुचुन्दरी गन्धमूषी दीर्घदेही तु मूषिका' इत्यमरः। **एषु जातीति** ॥ अजादिपञ्चसु 'जातेरस्त्री' इति ङीष् प्राप्तः। सः अजादिटापा बाध्यते इत्यर्थः। बालादयः प्रथमवयोवचनाः, तत्र होढादित्रयस्य प्रथमवयोवाचित्वे कोशो मृग्यः। **एष्विति** ॥ बालादिपञ्चसु 'वयसि प्रथमे' इति ङीप् प्राप्तः। सः अजादिटापा बाध्यते इत्यर्थः। **सम्भस्त्रेति** ॥ 'पाककर्ण' इति सूत्रभाष्ये पठितमिदं वार्तिकमर्थतस्सङ्गृहीतम्। सम्भस्त्रा, अजिन, शण, पिण्ड, एतेभ्यः परो यः फलशब्दः तस्मादपि 'पाककर्ण' इति ङीष् न भवति, किन्तु टाबेवेत्यर्थः। **सम्फलेति** ॥ समृद्धानि फलानि यस्या इति विग्रहः।

'सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात्*' (वा १४९६)। सत्पुष्पा। प्राक्पुष्पा। प्रत्यक्पुष्पा। 'शूद्रा चामहत्पूर्वा जातिः' (वा २४००–२४०१) पुंयोगे तु शूद्री। 'अमहत्पूर्वा' किम्। महाशूद्री। क्रुञ्चा। उष्णिहा। देवविशा। ज्येष्ठा। कनिष्ठा। मध्यमेति पुंयोगेऽपि। कोकिला जातावपि। 'मूलान्नञः' (वा २५००)। अमूला। 'ऋन्नेभ्यो ङीप्' (सू ३०६)। कर्त्री। दण्डिनी।

भस्त्रफलेति ॥ भस्त्रेव फलानि यस्या इति विग्रहः। 'भस्त्राचर्मप्रसेविका' इत्यमरः। ननु भस्त्राशब्दस्य नित्यस्त्रीत्वात् भाषितपुंस्कत्वाभावात् 'स्त्रियाः पुंवत्' इति पुंवत्त्वस्याप्रसक्तेः कथं ह्रस्व इत्यत आह। **ङ्याप्पोरिति** ॥ 'ङ्याप्पोस्संज्ञाच्छन्दसोर्बहुलम्' इति ह्रस्व इत्यर्थः। अजिनफला, शणफला, पिण्डफला, ओषधिविशेषसंज्ञाः। **सदच्काण्ड** ॥ अयमपि 'पाककर्ण' इति सूत्रपठितवार्तिकार्थसङ्ग्रहः। सत्, अच्, काण्ड, प्रान्त, शत, एक, एतेभ्यः परो यः पुष्पशब्दः तस्मादपि 'पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च' इति ङीष् न भवति, किन्तु टाबेवेत्यर्थः। **सत्पुष्पेति** ॥ सन्ति पुष्पाणि यस्या इति विग्रहः। अच् इति लुप्तनकारः अञ्चुधातुः गृह्यते इत्यभिप्रेत्य उदाहरति। **प्राक्पुष्पेति** ॥ प्राञ्चि पुष्पाणि यस्या इति विग्रहः। **प्रत्यक्पुष्पेति** ॥ प्रत्यञ्चि पुष्पाणि यस्या इति विग्रहः। काण्डपुष्पा। प्रान्तपुष्पा। शतपुष्पा। एकपुष्पा। **शूद्रा चामहत्पूर्वा जातिः** ॥ 'अजाद्यतः' इति प्रकृतसूत्रे पठितं वार्तिकमेतत्। शूद्रजातिः वाच्या चेत् अमहत्पूर्वः शूद्रशब्दः स्त्रियां टापं लभते। जातिलक्षणङीषोऽपवादः। शूद्रात् स्वभार्यायां विधिना ऊढायामुत्पन्ना स्त्री शूद्रा। जातिरित्यस्य प्रयोजनमाह। **पुंयोगे त्विति** ॥ शूद्रस्य स्त्री इत्येव पुंयोगात् स्त्रियां व्यक्तौ जातिवाचित्वाभावान्न टाप्। किन्तु 'पुंयोगादाख्यायाम्' इति ङीषेवेत्यर्थः। **महाशूद्रीति** ॥ महती च सा शूद्रा च इति विग्रहः। कर्मधारयः। 'पुंवत् कर्मधारय' इति पुवत्त्वम्। अत्र महत्पूर्वत्वान्न टाप्, किन्तु जातिलक्षणङीषेव। 'आभीरी तु महाशूद्री जातिपुंयोगयोस्समे' इत्यमरः। नृपाच्छूद्रायामुत्पन्ना उग्रा, तस्यां ब्राह्मणादुत्पन्नः आभीरः, स्त्री चेदाभीरी। अत्र जातिग्रहणस्य अमहत्पूर्वग्रहणस्य च प्रयोजनविचारः शब्देन्दुशेखरे भाष्यप्रदीपोद्द्योते च स्फुटः। **क्रुञ्चेति** ॥ क्रुञ्चूशब्दः चकारान्तः 'ऋत्विक्' इत्यादिना क्विन्नन्तः। पक्षिजातिविशेषे वर्तते। "यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्" इति रामायणे। उष्णिहशब्दः हकारान्तः छन्दोविशेषे 'ऋत्विक्' इत्यादिना क्विन्नन्त एव। देवविशशब्दः शकारान्तः, गणविशेषात्मकमरुत्सु वर्तते। "मरुतो वै देवानां विशः" इति श्रुतेः। एतेषामदन्तत्वाभावादग्रहणे टापि तद्विधानार्थमजादिषु पाठः। 'ङ्याप्प्रातिपदिकात्' इति सूत्रभाष्ये त्वेषां त्रयाणामदन्तत्वम् आस्थितमिति 'वष्टि भागुरिरल्लोपम्' इति श्लोकव्याख्यावसरे प्रपञ्चितमनुपदमेव। **ज्येष्ठेति** ॥ यदा ज्येष्ठादिशब्दाः प्रथमोत्पन्नादौ वर्तन्ते तदा अदन्तत्वादेव टाप् सिद्धः। यदा तु ज्येष्ठस्य स्त्रीत्वादिविवक्षा तदापि पुंयोगलक्षणं ङीषं बाधित्वा टाबर्थमिह पाठ इत्यर्थः। **कोकिलेति** ॥ कोकिलशब्दस्य जातावपि जातिलक्षणङीषं बाधित्वा टाबर्थमिह पाठः इत्यर्थः। **मूलान्नञः इति** ॥ 'पाककर्ण' इति सूत्रे पठितं

---

* ('पाककर्ण—' इति प्राप्तस्य ङीषः) 'प्रतिषेधः' इति वार्तिकशेषः।

४५५। उगितश्च। (४-१-६)

उगिदन्तात्प्रातिपदिकात्स्त्रियां ङीप्स्यात्। भवन्ती। पचन्ती। 'शप्श्यनोः—' (सू ४४६) इति नुम्। 'उगिदचाम्—' (सू ३६१) इति सूत्रेऽञ्ग्रहणेन 'धातोश्चेदुगित्कार्यं तर्ह्यञ्चतेरेव' इति नियम्यते। तेनेह न।

वार्तिकमेतत्। नञः परो यः मूलशब्दः तस्मात् 'पाककर्ण' इति ङीष् न भवति, किन्तु टाबेवेत्यर्थः। **अमूलेति** ॥ अविद्यमानं मूलं यस्या इति विग्रहे 'नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः' इति बहुव्रीहिः। 'अत्र सम्भस्त्रेति, सदच्काण्डेति, मूलान्नञः' इति च वार्तिकत्रयं 'पाककर्ण' इति सूत्रभाष्यपठितमपि फले विशेषाभावादजादिगणे मूले प्रपञ्चितम्। नचैतान्यजाद्यन्तर्गणसूत्राणीति भ्रमितव्यम्। अजादिराकृतिगणः। तेन 'न मुने' इति सूत्रभाष्ये टायामादेश इति भाष्यप्रयोगस्सिद्धः। अत एव च पूर्वमीमांसायां द्वितीयस्य प्रथमपादे स्तुतशस्त्रयोस्तु संस्कारो याज्यावदेवताभिधानत्वादिति स्तुतशस्त्राधिकरणे 'वशाद्वा गुणार्थं स्यात्' इति गुणसूत्रव्याख्यावसरे शाबरभाष्यभट्टवार्तिकयोः "छागस्य वपाया मेदस" इति प्राकृतमन्त्रस्य "वायव्यामजां वशामालभेत" इत्यत्र छागाया वपाया इत्यूहानुक्रमणं सङ्गच्छते। अत एव च ब्रह्ममीमांसायां प्रथमस्य चतुर्थपादे "चमसवदविशेषात्" इत्यधिकरणे शाङ्करभाष्यवाचस्पत्ययोः अजायां छागेति टाबन्तः प्रयोग उपपन्नः। अन्यथा जातिलक्षणङीष्प्रसङ्गादित्यास्तां तावत्। 'ऋन्नेभ्यः' इति सूत्रमजन्तस्त्रीलिङ्गाधिकारे प्रसङ्गात् व्याख्यातम्, इह तु सूत्रक्रमात् पुनस्तदुपन्यासः। **उगितश्च** ॥ उक् प्रत्याहारः, उक् इत् यस्य सः उगित्, उगित इति पञ्चम्यन्तम्, तेन प्रातिपदिकादित्येतत् विशेष्यते, तदन्तविधिः, 'उगिद्वर्णग्रहणवर्जम्' इत्युक्तेः 'समासप्रत्ययविधौ' इति प्रतिषेधो न। पूर्वसूत्रात् ङीबित्यनुवर्तते। तदाह। **उगिदन्तादिति** ॥ उगित् द्विविधं प्रातिपदिकं प्रत्ययश्च। तत्र प्रातिपदिकमुदाहरति। **भवन्तीति** ॥ सर्वादिगणे भवतु इति अव्युत्पन्नं प्रातिपदिकं पठितं, तस्य व्यवदेशिवत्त्वेन उगिदन्तत्वात् ङीप्, ङपावितौ, 'आच्छीनद्योः' इति नुम्। 'शप्श्यनोर्नित्यम्' इति नुम् न, शत्रन्तत्वाभावात्। 'उगिदचाम्' इत्यपि न सर्वनामस्थानत्वाभावात्। अथ द्वितीयमुगितमुदाहरति। **पचन्तीति** ॥ पचेर्लटश्शतरि शपि परस्मैपदे पचच्छब्दः। तत्र शतृप्रत्ययः उगित् तदन्तं पचत् इति प्रातिपदिकमिति तस्मात् ङीपि 'शप्श्यनोर्नित्यम्' इति नुमिति भावः। यदि तु सर्वादिगणे पठितं भवतु इत्येतत् 'भातेर्डवतुः' इति व्युत्पाद्यते, तदा उगित्प्रत्ययान्तस्यैवोदाहरणं बोध्यम्। भूधातोश्शतरि शपि, ऊकारस्य गुणे, अवादेशे, भवच्छब्दात् ङीपि तु, 'शप्श्यनोर्नित्यम्' इति नुमि भवन्तीति रूपम्। नच भवच्छब्दस्य अव्युत्पन्नत्वे तस्य कथं व्यपदेशिवत्त्वेन उगिदन्तत्वं 'व्यपदेशिवद्भावोऽप्रातिपदिकेन' इति वचनादिति वाच्यम्। प्रातिपदिकस्य तत्तत्स्वरूपेण ग्रहण एव तत्प्रवृत्तेः। उगिदचाम् इति सूत्र इत्यादिग्रन्थः हलन्ताधिकारे गोमच्छब्दनिरूपणे व्याख्यातः। **तेनेति** ॥ अञ्चुव्यतिरिक्तधातोरुगित्कार्याभावलाभेनेत्यर्थः। **उखेति** ॥ उखा कुण्डी, उखायास्संसते, पर्णात् ध्वंसते इति विग्रहः 'पिठरं स्थाल्युखा कुण्डम्' इत्यमरः। 'स्रंसु ध्वंसु

उखास्रत् । क्विप् । अनिदिताम्—' (सू ४१५) इति नलोपः । पर्णध्वत् । अञ्चतेस्तु स्यादेव । प्राची । प्रतीची ।

४५६ । वनो र च । (४-१-७)

वन्नन्तात्तदन्ताच्च प्रातिपदिकात्स्त्रियां ङीप्स्यात् । रश्चान्तादेशः । वन्निति ङ्वनिप्कनिब्वनिपां सामान्यग्रहणम् । 'प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम्' (प २४) । तेन प्रातिपदिकविशेषणात्तदन्तान्तमपि लभ्यते । सुत्वानमतिक्रान्ता, अतिसुत्वरी । अतिधीवरी । शर्वरी । 'वनो न हशः इति

अवस्रंसने' सुपीत्यनुवृत्तौ 'क्विप् च' इति क्विप्, उपपदसमासः, सुब्लुक्, 'अनिदिताम्' इति नलोपः, हल्ङ्यादिना सोर्लोपः, 'वसुस्रंसु' इति दत्वमिति भावः । **स्यादेवेति** ॥ ङीविति शेषः । **प्राचीति** ॥ प्रपूर्वात् अञ्चतेः 'ऋत्विक्' इत्यादिना क्विन्, 'अनिदिताम्' इति नलोपः, उगित्त्वात् ङीप्, 'अचः' इत्यकारलोपः, 'चौ' इति दीर्घः । एवं प्रतीची । **वनो र च** ॥ वनः र च इति छेदः । र इति लुप्तप्रथमाकम्, अकार उच्चारणार्थः, चकारात् ङीप् समुच्चीयते, वन इति पञ्चम्यन्तं, तेन वन्प्रत्ययान्तं तदन्तञ्च विवक्षितम् । प्रातिपदिकादित्यधिकृतम् । तदाह । **वन्नन्तादित्यादिना** ॥ **अन्तादेशः इति** ॥ प्रकृतेरिति शेषः । नान्तत्वादेव ङीप् प्राप्तः, तत्सन्नियोगेन रेफमात्रमिह विधेयम् । **सामान्येति** ॥ अनुबन्धविनिर्मुक्तवन्ग्रहणस्य त्रिष्वपि साधारणत्वादिति भावः । ननु वन्ग्रहणेन वन्प्रत्ययान्तं तदन्तं च कथं लभ्यत इत्यत आह । **प्रत्ययग्रहणे इति** ॥ यस्मात् प्रकृतिभूतात् शब्दात् यः प्रत्ययो विहितः तदादेः सः प्रकृतिभूतशब्दः आदिर्यस्य तस्य, तदन्तस्य सः प्रत्ययः अन्तो यस्य समुदायस्य, तस्य च ग्रहणम् । प्रकृतिप्रत्ययसमुदायस्य तन्मध्यवर्तिनश्च ग्रहणमित्यर्थः । 'तिङ्ङतिङः' इत्यत्र तिङ्ग्रहणेन शवादिविकरणस्यापि ग्रहणार्थं तदादिग्रहणम् । 'यस्मात् प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम्' इति सूत्रे इयं परिभाषा भाष्ये स्थिता । **तेनेति** ॥ वन्नन्तेन प्रातिपदिकादित्यधिकृतस्य विशेषणात् पुनस्तदन्तविधिलाभादिति भावः । नचैवं सति वन्नन्तस्य कथं लाभ इति वाच्यम् । 'येन विधिस्तदन्तस्य' इत्यत्र 'स्वं रूपं शब्दस्याशब्दसंज्ञा' इत्यतः स्वमित्यनुवर्त्य विभक्तिविपरिणामेन स्वस्य चेति व्याख्यानादिति भावः । तदेतदपिशब्देन सूचितम् । वन्नन्तमेव व्यपदेशिवत्त्वेन वन्नन्तान्तामिति केचित् । 'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति' इति तु 'स्त्रियाम्' इत्यस्मिन् अधिकारे न प्रवर्तते । 'शूद्रा चामहत्पूर्वा जातिः' इत्यत्र अमहत्पूर्वेति लिङ्गात् । अथ वन्नन्तान्तमुदाहरति । **सुत्वानमिति** ॥ 'षुञ् अभिषवे' सुयजोर्ङ्वनिप् 'ह्रस्यस्य पितिकृति' इति तुक् । सुत्वन्शब्दः । सुत्वानमतिक्रान्ता इति विग्रहे 'अत्यादयः' इति समासः । सुब्लुकि, ङीप्, नकारस्य रत्वम्, अतिसुत्वरीति रूपम् । **अतिधीवरीति** ॥ 'डुधाञ् धारणपोषणयोः' 'आतो मनिन्क्वनिब्वनिपश्च' अन्येभ्योऽपि दृश्यते' इति भाषायामपि क्वनिप् 'घुमास्था' इति ईत्त्वम् । धीवानमतिक्रान्ता इति विग्रहे 'अत्यादयः' इति समासः । ङीप् रश्च, अतिधीवरीति रूपम् । भाष्ये तु ध्यायतेः क्वनिपि सम्प्रसारणे 'हलः'

वक्तव्यम्' (वा २४०५)। हशन्ताद्धातोर्विहितो यो वन् तदन्तात्तदन्तान्ताच्च प्रातिपदिकान्ङीब्रश्च नेत्यर्थः 'ओणृ अपनयने' वनिप् 'विड्वनोः—' (सू २९८२) इत्यात्त्वम्। अवावा ब्राह्मणी। राजयुध्वा। 'बहुव्रीहौ वा' (वा २४०७)। बहुधीवरी। बहुधीवा। पक्षे डाब्वक्ष्यते।

४५७। पादोऽन्यतरस्याम्। (४-१-८)

पाच्छब्दः कृतसमासान्तस्तदन्तात्प्रातिपदिकान्ङीब्वा स्यात्। द्विपदी—द्विपाद्।

इति दीर्घ इति स्थितम्। **शर्वरीति** ॥ 'शॄ हिंसायाम्' 'आतो मनिन्क्वनिब्वनिपश्च' 'अन्येभ्योऽपि दृश्यते' इति भाषायामपि वनिप् 'सार्वधातुकार्धधातुकयोः' इति गुणः, 'वनो र च' इति ङीप् रश्च। वन्नन्तस्योदाहरणमेतत्। अतिशर्वरीति पाठे तु इदमपि वन्नन्तान्तस्योदाहरणम्। सुत्वरी, धीवरी, शर्वरी, इति वन्नन्तस्योदाहरणानि। **वनो नेति** ॥ पूर्ववत् वन्नन्तं वन्नन्तान्तञ्च गृह्यते। हश इति पञ्चमी, तेन च धातोरित्यधिकृत्य विहितेन वना आक्षिप्तं धातोरित्येतत् विशेष्यते, तदन्तविधिः, ङीबिति रश्चेति चानुवर्तते। तदाह। **हशन्तादित्यादिना** ॥ विहितविशेषणस्य प्रयोजनन्दर्शयन् वन्नन्तोदाहरणं दर्शयितुमाह। **ओणृ इत्यादिना** ॥ **वनिविति** ॥ 'अन्येभ्योऽपि दृश्यते' इत्यनेनेति शेषः। **अवावेति** ॥ ओणृ इत्यस्मात् वनिपि 'विड्वनोरनुनासिकस्यात्' इति णकारस्य आत्त्वे ओकारस्यावादेशे अवावन्शब्दः। स्त्रीत्वस्फोरणाय ब्राह्मणीति विशेष्यम्। अत्र ओणृ इति धातोः हशन्तात् वन् विहितः, तदन्तत्वात् न ङीब्रत्वे, किन्तु राजवद्रूपम्। हशन्तात् धातोः परो यो वन् इति व्याख्याने तु आत्वे सति वनो हशः परत्वाभावात् निषेधो न स्यादिति भावः। वन्नन्तान्तमुदाहरति। **राजयुध्वेति** ॥ राजानं योधितवतीत्यर्थः। भूते कर्मणि क्विबित्यनुवर्तमाने 'राजनि युधिकृञः' इति क्कनिप्, कर्मभूते राजनि उपपदे युधेः कृञश्च क्कनिबिति तदर्थः। उपपदसमासे सुब्लुक् राजयुध्वन्शब्दः। अत्र हशो विहितो वन्, तदन्तो युध्वन्शब्दः, तदन्तो राजयुध्वन्शब्दः, अतो न ङीब्रादेशाविति भावः। **बहुव्रीहौ** ॥ इदं वार्तिकम्। 'वनो र च' इति विधिः बहुव्रीहौ वा स्यादित्यर्थः। 'अनो बहुव्रीहेः' इति निषेधस्यापवादः। **बहुधीवरीति** ॥ बहवो धीवानो यस्या इति विग्रहः। **बहुधीवेति** ॥ ङीब्रत्वयोरभावे राजवद्रूपम्। नच बहूनि पर्वाणि यस्यास्सा बहुपर्वेत्यत्रापि ङीब्रत्वविकल्पस्स्यादिति वाच्यम्। 'अल्लोपोऽनः' इति उपधालोपयोग्यस्थले एव एतद्वार्तिकस्य प्रवृत्तेः भाष्ये उक्तत्वात्। बहुपर्वन्शब्दे च 'न संयोगाद्वमन्तात्' इति अल्लोपनिषेधात्। **पक्षे इति** ॥ ङीब्रत्वाभावपक्षे 'डाबुभाभ्याम्' इति डाप् वक्ष्यत इत्यर्थः। डपावितौ। बहुधीवन् आ इति स्थिते 'टेः' इति टिलोपे बहुधीवाशब्दात् सोर्हल्ङ्यादिलोपे बहुधीवा इति रमावद्रूपम्। ङीब्रत्वयोः डापश्चाभावे सौ बहुधीवेत्येव रूपम्। ङीब्रत्वयोः बहुधीवरीति। औजसादिषु तु बहुधीवयौ—बहुधीवे—बहुधीवानौ, इत्यादि रूपत्रयमिति भावः। **पादो॥ कृतसमासान्तः इति** ॥ अन्तलोपात्मके

४५८ । टाबृचि । (४-१-९)

ऋचि वाच्यायां पादन्ताट्टाप् स्यात् । द्विपदा ऋक् । एकपदा । 'न षट्स्वस्रादिभ्यः' (सू ३०८) । पञ्च । चतस्रः । 'पञ्च' इत्यत्र नलोपे कृतेऽपि 'ष्णान्ता षट्' (सू ३६९) इति षट्संज्ञां प्रति 'नलोपः सुप्स्वर—' (सू ३५३) इति नलोपस्यासिद्धत्वात् 'न षट्स्वस्रादिभ्यः' (सू ३०८) इति न टाप् ।

४५९ । मनः । (४-१-११)

समासान्ते कृते परिशिष्टः पादशब्दः इह गृह्यत इत्यर्थः । **तदन्तादिति** ॥ पाच्छब्दान्तादित्यर्थः । पाद इति पञ्चम्यन्तेन 'प्रातिपदिकात्' इत्यधिकृतस्य विशेषणादिति भावः । **ङीब्वा स्यादिति** ॥ 'ऋन्नेभ्यः' इत्यतः तदनुवृत्तेरिति भावः । **द्विपदीति** ॥ द्वौ पादौ यस्या इति बहुव्रीहिः । 'सङ्ख्यासुपूर्वस्य' इति पादशब्दान्तस्याकारस्य लोपः । ङीपि भत्वात् पादः पत्, द्विपदीति रूपम् । ङीबभावे तु । **द्विपादिति** ॥ **टाबृचि** ॥ **पादन्तादिति** ॥ प्रातिपदिकादिति शेषः । 'पादोऽन्यतरस्याम्' इत्यतः अनुवृत्तेन पाच्छब्देन प्रातिपदिकादित्यधिकृतस्य विशेषणादिति भावः । 'पादोऽन्यतरस्याम्' इति ङीपोऽपवादोऽयम् ॥ **द्विपदा ऋगिति** ॥ द्वौ पादौ यस्या इति विग्रहः । **एकपदेति** ॥ एकः पादो यस्या इति विग्रहः । उभयत्रापि टापि, पादः पत् । 'ङ्याप्प्रातिपदिकात्' इति सूत्रभाष्ये तु पादशब्दसमानार्थकं पदशब्दमवष्टभ्य प्रत्याख्यातमेतत् । नच ऋचि वाच्यायां द्विपदी द्विपादिति प्रयोगव्यावृत्तये एतत्सूत्रमिति वाच्यम् । एतद्भाष्यप्रामाण्येन तथाविधप्रयोगस्यापीष्टत्वादित्यलम् । **न षट्स्वस्रादिभ्यः इति** ॥ इदमजन्ताधिकारे ऋकारान्तनिरूपणे व्याख्यातम् । **पञ्चेति** ॥ इहान्तरङ्गत्वात् नान्तलक्षणङीपि प्राप्ते षट्त्वान्निषिद्धे 'षड्भ्यो लुक्' इति जश्शसोर्लुकि नलोप इति भावः । **चतस्रः इति** ॥ चतसृभावे सति ऋदन्तलक्षणङीब् न, स्वस्रादित्वात् । ननु 'न षट्स्वस्रादिभ्यः' इति ङीबेव प्रतिषिध्यताम्, किं टावनुवृत्त्या । नान्तत्वात् टापः प्रसक्तेरभावेन तन्निषेधवैयर्थ्यादित्यत आह । **पञ्चेत्यत्रेति** ॥ पञ्चेत्यत्र 'न षट्स्वस्रादिभ्यः' इति न टाबित्यन्वयः । अदन्तलक्षणष्टाबिति शेषः । नान्तलक्षणङीपि प्रतिषिद्धे सति जश्शसोर्लुकि नलोपे कृते अदन्तत्वात् प्राप्तस्य टापः प्रतिषेधार्थमिह टाबनुवृत्तिरावश्यकीति यावत् । नच नलोपस्यासिद्धत्वात् टापः प्रसक्तिरेव नेति वाच्यम् । सुपूस्वरसंज्ञातुग्विधिषु टाङिबधेरनन्तर्भावेन तस्मिन् कर्तव्ये नलोपस्यासिद्धत्वाभावात् । ननु 'न षट्स्वस्रादिभ्यः' इत्यत्र सत्यामपि टाबनुवृत्तौ कथमिह षट्संज्ञानिबन्धनस्तन्निषेधः, नलोपे कृते षट्संज्ञाविरहात् । नच टाङिनषेधे कर्तव्ये नलोपस्यासिद्धत्वं शङ्क्यम् । टाङिनषेधस्य सुपूस्वरसंज्ञातुग्विधिषु अनन्तर्भावादित्यत आह । **नलोपे कृतेऽपीत्यादि असिद्धत्वादित्यन्तम्** ॥ टाङिनषेधविधिरयं षट्संज्ञामपि विधत्ते । कार्यकालपक्षाश्रयणात् । ततश्च तस्मिन् कर्तव्ये नलोपस्यासिद्धत्वेन षट्संज्ञाया निर्बाधतया षट्संज्ञानिबन्धनष्टाप्प्रतिषेधोऽत्र निर्बाध इति भावः । वस्तुतस्तु नलोपस्यासिद्धत्वेऽपि भूतपूर्वषट्संज्ञामाश्रित्य टाङिनषेध उपपद्यते । अत एव

मन्नन्तान्न ङीप्। सीमा—सीमानौ।

४६०। अनो बहुव्रीहेः। (४-१-१२)

अन्नन्ताद्बहुव्रीहेर्न ङीप्। बहुयज्वा—बहुयज्वानौ।

४६१। डाबुभाभ्यामन्यतरस्याम्। (४-१-१३)

सूत्रद्वयोपात्ताभ्यां डाब्वा स्यात्। सीमा, सीमे—सीमानौ। दामा, दामे—दामानौ। 'न पुंसि दाम' इत्यमरः। बहुयज्वा, बहुयज्वे—बहुयज्वानौ।

"षट्संज्ञायां नलोपासिद्धत्वस्य न फलम्" इति 'नलोपस्सुप्स्वर' इति सूत्रभाष्ये उक्तमित्याहुः। **मनः**॥ 'न षट्स्वस्रादिभ्यः' इत्यतः नेति 'ऋन्नेभ्यः' इत्यतः ङीबिति चानुवर्तते। मन इति प्रत्ययग्रहणपरिभाषया तदन्तं गृह्यते। तदाह। **मन्नन्तान्न ङीबिति**॥ **सीमेति**॥ 'षिञ् बन्धने' औणादिको मनिन् प्रकृतेर्दीर्घश्च। सीमन्शब्दात् ङीपि निषिद्धे राजवद्रूपम्। ङीपि सति तु अल्लोपे सीम्नीति स्यादिति भावः। ननु वक्ष्यमाणडापि सीमेति सौ रूपसिद्धेः किं ङीब्निषेधेन इत्यत आह। **सीमानाविति**॥ डापि तु सति सीमे इत्येव स्यादिति भावः। **अनो बहुव्रीहेः**॥ अन इति बहुव्रीहेरित्यस्य विशेषणम्, तदन्तविधिः। नेति ङीबिति च पूर्ववदनुवर्तते। तदाह। **अन्नन्तादिति**॥ **बहुयज्वा, बहुयज्वानाविति**॥ बहवो यज्वानो यस्या इति विग्रहः। नान्तलक्षणङीपः प्रतिषेधे राजवद्रूपाणि। 'न संयोगात्' इति निषेधान्नायमुपधालोपी। अतोऽत्र 'अन उपधालोपिनः' इति विकल्पो न प्रवर्तितुमर्हति। **डाबुभाभ्याम्**॥ उभाभ्यामित्येतद्व्याचष्टे। **सूत्रद्वयोपात्ताभ्यामिति**॥ मन इति 'अनो बहुव्रीहेः' इति च सूत्रद्वयोपात्तात् मन्नन्तात् अन्नन्तबहुव्रीहेश्च इत्यर्थः। नन्विहान्यतरस्यांग्रहणं व्यर्थम्। नच तदभावे डाब्नित्यस्स्यादिति वाच्यम्। डापो नित्यत्वे तेनैव ङीपो निवृत्तिसम्भवेन ङीब्निषेधवैयर्थ्यात्। एवञ्च ङीपूनिषेधडापोर्वचनसामर्थ्यादेव विकल्पसिद्धेः अन्यतरस्यां ग्रहणं व्यर्थमिति चेत्, स्पष्टार्थमिति केचित्। भाष्ये तु 'अन्यतरस्याम्' इति योगविभागमाश्रित्य 'बहुव्रीहौ वा' इति वार्तिकं प्रत्याख्यातम्। **सीमेति**॥ सीमन्शब्दात् डापि टिलोपे सीमाशब्दात् सोर्हल्ङ्यादिलोपः। डाबभावपक्षेऽपि 'मनः' इति ङीब्निषेधे सौ सीमेलेव राजवद्रूपम्। तर्हि डाब्विधेः किं फलमित्यत आह। **सीमे, सीमानाविति**॥ मन्नन्तविषये उदाहरणान्तरमाह। **दामेति**॥ दाधातोरौणादिको मनिन् 'हिरण्मयन्दाम दक्षिणा' इत्यादौ दामन्शब्दस्य नपुंसकत्वदर्शनादाह। **न पुंसीति**॥ दामन्शब्दः पुंसि न, किन्तु स्त्रीनपुंसकयोरित्यर्थः। 'निषिद्धलिङ्गं शेषार्थम्' इति परिभाषितत्वात्। अन्नन्तबहुव्रीहेरुदाहरति। **बहुयज्वेति**॥ बहवो यज्वानो यस्या इति विग्रहः। डापि टिलोपे बहुयज्वाशब्दात् सोर्हल्ङ्यादिलोपः। ङीब्निषेधे सौ एतदेव राजवद्रूपम्। डापः फलमाह। **बहुयज्वे, बहुयज्वानाविति**॥ शसि बहुयज्वनः। अत्र अल्लोपस्तु न भवति। 'न संयोगाद्वमन्तात्' इति निषेधात्। अत एव 'अन उपधालोपिनः' इत्यस्य नायं विषयः। अथ बहवो राजानो यस्या इति बहुव्रीहौ बहुराजन्शब्दात् 'अनो बहुव्रीहेः' इति ङीब्निषेधे 'डाबुभाभ्याम्' इति डापि च नान्तत्वमाका-

४६२ । अन उपधालोपिनोऽन्यतरस्याम् । (४-१-२८)

अन्नन्ताद्बहुव्रीहेरुपधालोपिनो वा ङीप्स्यात् । पक्षे डाब्ङीब्निषेधौ । बहुराज्ञी–बहुराजा । बहुराज्ञ्यौ–बहुराजे–बहुराजानौ ।

४६३ । प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः । (७-३-४४)

प्रत्ययस्थात्ककारात्पूर्वस्याकारस्येकारः स्यादापि परे, स आप्सुपः परो न चेत् । सर्विका । कारिका । 'अतः' किम् । नौका । 'प्रत्ययस्थात्'

रान्तत्वञ्च प्राप्तम्, ङीबन्तत्वमपीष्यते, तदर्थमिदमारभ्यते । **अन उपधा** ॥ इदं सूत्रं नात्र प्रकरणे पठितम् । किन्तु 'दामहायनान्ताच्च' इत्युत्तरं पठितं प्रसङ्गादलोपन्यस्तम् । 'बहुव्रीहेरूधसो ङीष्' इत्यतो बहुव्रीहेरिति अनुवर्तते, सङ्ख्याव्ययादेर्ङीप्' इत्यतो ङीबिति च । प्रादिपदिकादित्यधिकृतम् अन इत्यनेन विशेष्यते, तदन्ताधिः । तदाह । **अन्नन्तादित्यादिना** ॥ **पक्षे डाब्ङीब्निषेधाविति** ॥ कदा चित् ङीब्निषेधः डाप् चेत्यर्थः । अन्यतरस्यांग्रहणस्य प्रयोजनमिदम् । अकृते त्वन्यतरस्यांग्रहणे बहुयज्वादिशब्दे अनुपधालोपिनि सावकाशस्य 'अनो बहुव्रीहेः' इति ङीप्प्रतिषेधस्य 'डाबुभाभ्याम्' इति डापश्च बहुराजन्शब्दादावुपधालोपिनि अनवकाशेन ङीपा बाधस्स्यात् । **बहुराज्ञीति** ॥ ङीपि अल्लोपे सोर्हल्ङ्यादिलोपः इति भावः । **बहुराजेति** ॥ डापि ङीब्निषेधे च सौ रूपम् । **बहुराज्ञ्याविति** ॥ ङीप्पक्षे औङि यण् । **बहुराजे इति** ॥ डाप्पक्षे औङि रूपम् । **बहुराजानाविति** ॥ ङीब्निषेधे औङि रूपम् । **प्रत्ययस्थात्॥ ककारादिति** ॥ क इति वर्णादित्यर्थः । अकार उच्चारणार्थः । 'वर्णात्कारः' इत्युक्तेः । एवञ्च सूत्रे कादित्यत्र अकार उच्चारणार्थ इति सूचितम् । **स आविति** ॥ इत्त्वविधौ यः परनिमित्तत्वेनोपात्तः स आबित्यर्थः । **सुपः परो न चेदिति** ॥ सूत्रे असुपः इति पञ्चम्यन्तम्, असमर्थसमासः । आपि सुपः परस्मिन् सति इत्त्वं न भवतीत्यर्थो विवक्षित इति भावः । **सर्विकेति** ॥ सर्वशब्दाट्टापि सवर्णदीर्घे सर्वाशब्दः । एकादेशस्य पूर्वान्तत्वेन ग्रहणात् सर्वनामकार्यम् । ततश्च 'अव्ययसर्वनाम्नाम्' इति टेः प्रागकच् । तत्र ककारादकार उच्चारणार्थः । चकारः इत् । अक् इति ककारान्तः प्रत्ययः टेः प्राग्भवति । सर्वकाशब्देऽस्मिन् ककारात्पूर्वस्य अत इत्त्वे सर्विकेति रूपम् । ननु ककारात्पूर्वस्य अकारस्य कथमित्त्वम् । ककारेण व्यवहिततया आप्परकत्वाभावादिति चेन्न । 'येन नाव्यवधानम्' इति न्यायेन तद्व्यवधानस्य अबाधकत्वात् । **कारिकेति** ॥ कृञो ण्वुल्, अकादेशः, 'अचो ञ्णिति' इति ऋकारस्य वृद्धिः, रपरत्वं, कारकशब्दात् टाप्, सवर्णदीर्घः, कात्पूर्वस्य रेफादकारस्य इत्त्वम् कादिति सङ्घातग्रहणे तु एतिका इति न सिध्यति । एतच्छब्दे टेः प्रागकचि एतकद्शब्दात् जसि, ल्यादाद्यत्वे, पररूपे, अदन्तत्वाट्टापि, कात्पूर्वस्य इत्त्वे, एतिका इति रूपम् । अत्राकचि अकारस्य उच्चारणार्थतया प्रत्ययस्थकशब्दाभावात् इत्त्वन्न स्यात् । ककारादुत्तरावर्णस्याकजनवयवत्वात् । नचाकचि अकारस्य नोच्चारणार्थत्वमिति शङ्क्यम् । एवं सति निरिल्व्यये अकचि नकिर् इति न स्यात् । अतः कादिल्यनेन ककारादित्येव विवक्षितम् । यका सकेल्यत्र 'न यासयोः' इति इत्त्वनिषेधाल्लिङ्गाच्च । अन्यथा

किम्। शक्नोतीति, शका। 'असुपः' किम्। बहुपरिव्राजका नगरी। 'कात्' किम्, नन्दना। 'पूर्वस्य' किम्। परस्य मा भूत्। कटुका। अत इति 'तपरः' किम्। राका। 'आपि' किम्। कारकः। 'मामकनरकयोरुपसङ्ख्यानम्' (वा ४५२४)। मामिका। नरान्कायतीति, नरिका। 'त्यक्त्यपोश्च' (वा ४५२५) दाक्षिणात्यिका। इहत्यिका।

तत्र प्रत्ययस्थककाराभावेन इत्त्वस्याप्राप्तेः किन्तन्निषेधेनेत्यलम्। **नौकेति** ॥ नौशब्दात् स्वार्थिकः कः, टाप्। अत्र ककारात् पूर्वस्य औकारस्य इत्त्वनिवृत्त्यर्थमत इति वचनम्। **शकेति** ॥ 'शक्ल शक्तौ' पचाद्यच्, टाप्। अत्र ककारस्य धात्ववयवस्य प्रत्ययस्थत्वाभावान्न ततः पूर्वस्य इत्त्वम्। **बहुपरिव्राजकेति** ॥ परिपूर्वाद्व्रजेः ण्वुल्। बहवः परिव्राजकाः यस्यामिति बहुव्रीहिः। सुपो लुकि बहुपरिव्राजकशब्दात् टाप्। अत्राकारस्य कात्पूर्वस्य इत्त्वन्न। प्रत्ययलक्षणेन आपः सुबपेक्षया परत्वात्। 'न लुमता' इति निषेधस्तु न। तस्य लुमता लुप्ते प्रत्यये यदङ्गं तस्य कार्यएव प्रवृत्तेः। इत्त्वन्तु टाप्यनाङ्गकार्यमिति नात्र तन्निषेधः। यदि तु 'असुपः' इति पर्युदास आश्रीयेत, तर्हि बहुपरिव्राजक इति समुदायस्य सुबभिन्नत्वादापः ततः परत्वादित्त्वं दुर्वारं स्यादिति भावः। **पूर्वस्य किमिति** ॥ एकादेशे कृते परस्य ह्रस्वस्याभावात् पूर्वस्येत्यर्थसिद्धमिति प्रश्नः। **कटुकेति** ॥ कटुशब्दात् स्वार्थे कः, टाप्, सवर्णदीर्घः। पूर्वस्येत्यनुक्तौ अत्र सवर्णदीर्घात् पूर्वं वार्णादाङ्गस्य बलीयस्त्वादपवादत्वाच्च द्वितीयककारादुत्तरस्य अकारस्य आपि परे इत्त्वं स्यादिति भावः। **अत इति तपरः किम्। राका इति** ॥ 'कृदाधारार्चिकलिभ्यः कः' इति राधातोः औणादिकः कप्रत्ययः 'उणादयो बहुलम्' इति बहुलग्रहणात् 'केऽणः' इति ह्रस्वो न। ककारस्य च नेत्त्वं, टाप्, स्त्रीत्वं लोकात्। 'कलाहीने सानुमतिः पूर्णे राका निशाकरे' इत्यमरः। अत्र ककारात् पूर्वस्य दीर्घाकारत्वान्नेत्त्वमिति भावः। **मामकेति** ॥ मामकनरकशब्दयोः कात्पूर्वस्य इत्त्वं वक्तव्यमित्यर्थः। **मामिकेति** ॥ ममेयमिति विग्रहे 'युष्मदस्मदोरन्यतरस्यां खञ् च' इत्याणि, 'तवकममकावेकवचने' इति ममकादेशे, आदिवृद्धिः, टाप्, 'टिड्ढाणञ्' इत्यादिना ङीप्तु न 'केवलमामक' इत्यादिना संज्ञाच्छन्दसोरेव मामकशब्दात् ङीन्नियमात्। ततश्चात्र ककारस्य प्रत्ययस्थत्वाभावात् 'प्रत्ययस्थात्' इत्यप्राप्तौ वचनमिदम्। **नरानिति** ॥ कैशब्दे 'आदेच उपदेशे' इत्यात्त्वे, 'आतोऽनुपसर्गे कः' इति कप्रत्यये 'आतो लोप इटि च' इति आलोपः, उपपदसमासः, सुपो लुक्, टाप्। अत्रापि ककारस्य प्रत्ययस्थत्वाभावात् 'प्रत्ययस्थात्' इत्यप्राप्तौ वचनम्। **त्यक्त्यपोश्चेति** ॥ त्यगन्ते त्यबन्ते च प्रत्ययस्थात्कात्पूर्वस्याकारस्य इत्त्वं वक्तव्यमित्यर्थः। 'उदीचामातस्स्थाने' इति विकल्पस्यापवादः। **दाक्षिणात्यिकेति** ॥ दक्षिणस्यान्दिशि अदूरे इति विग्रहे 'दाक्षिणादाच्' इत्याच्, 'तद्धितश्चासर्वविभक्तिः' इत्यव्ययत्वम्। दक्षिणाशब्दात् भवार्थे 'दक्षिणापश्चात्पुरसस्त्यक्' इति त्यक्, 'किति च' इत्यादिवृद्धिः, दाक्षिणात्यशब्दात् टाप्। ततः स्वार्थिकः कः, 'केऽणः' इति टापो ह्रस्वः, पुनष्टाप्, इत्त्वमिति भावः। "दक्षिणस्यां दिशि भवेति विग्रहे दक्षिणाशब्दात् टाबन्तादेव त्यकन्" इति तु प्रौढमनोरमायां दूषितम्। **इहत्यिकेति** ॥ 'अव्ययात्त्यप्' इति त्यप्, टाप, स्वार्थिकः कः, 'केऽणः' इति ह्रस्वः, पुनः

४६४ । न यासयोः । (७-३-४५)

यत्तदोरस्येन्न स्यात् । यका । सका । यकाम् । तकाम् । 'त्यकनश्च निषेधः' (वा ४५२६) । उपत्यका । अधित्यका । 'आशिषि वुनश्च न' (वा ४५२८) । जीवका । भवका । 'उत्तरपदलोपे न' (वा ४५२९) । देवदत्तिका–देवका । 'क्षिपकादीनां च न' (वा ४५३०) । क्षिपका । ध्रुवका । कन्यका । चटका । 'तारका ज्योतिषि' (वा ४५३१) । अन्यत्र तारिका ।

टाप् । **न यासयोः** ॥ नाल्प कृतटापोः प्रथमान्तयोर्निर्देशः । यत्तदोरित्येव विवक्षितमिति भाष्ये स्पष्टम् । 'प्रत्ययस्थात्' इत्यतः अत इति, इदिति चानुवर्तते । तदाह । **यत्तदोरिति** ॥ **यका । सका इति** ॥ 'अव्ययसर्वनाम्नाम्' इति यत्तच्छब्दयोष्टेः प्रागकचि सौ त्यदाद्यत्वं, पररूपं, टाप्, हल्ङ्यादिना सुलोपः, तच्छब्दे 'तदोस्तस्सौ' इति तकारस्य सकारः । उभयत्रापि 'प्रत्ययस्थात्' इति प्राप्तमित्त्वमत्र सूत्रे निषिध्यते । अथ 'न यासयोः' इत्यस्य प्रथमान्तानुकरणत्वे किं बाधकमित्यत आह । **यकाम् । तकामिति** ॥ **त्यकनश्च निषेधः इति** ॥ त्यकन्प्रत्ययान्तस्यापि 'प्रत्ययस्थात्' इति इत्त्वप्रतिषेधो वक्तव्य इत्यर्थः । **उपत्यका । अधित्यकेति** ॥ 'उपाधिभ्यां त्यकन्नासन्नारूढयोः' इति त्यकन्, टाप्, सोर्हल्ङ्यादिलोपः । 'उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका' इत्यमरः । ननु त्यकन्विधौ अकारस्य उच्चारणसामर्थ्यादेव इत्त्वन्न भवति । अन्यथा त्यिकनमेव विदध्यात्, अतः किं तन्निषेधेनेति चेत्, मैवम् । पञ्चोपत्यको ग्राम इत्यत्र अकारश्रवणार्थत्वादित्यलम् । **आशिषीति** ॥ आशिषि यो वुन् तस्य योऽयमकादेशः तदकारस्य 'प्रत्ययस्थात्' इति इत्त्वन्नेति वक्तव्यमित्यर्थः । **जीवका । भवकेति** ॥ जीवतात् भवतादित्यर्थे जीवधातोः भूधातोश्च 'आशिषि च' इति वुन्, 'युवोरनाकौ' इति तस्य अकादेशः, 'सार्वधातुकार्धधातुकयोः' इति भूधातोरूकारस्य गुणः अवादेशश्च । **उत्तरपदेति** ॥ उत्तरपदलोपेऽपि इत्त्वन्नेति वक्तव्यमित्यर्थः । **देवकेति** ॥ देवदत्तशब्दात् स्वार्थे कः ठाजादावूर्ध्वं द्वितीयादचः 'अनजादौ च विभाषा लोपो वक्तव्यः' इति दत्तशब्दलोपः । देवकशब्दात् टाप् । देवदत्तिकेति तु दत्तपदस्य लोपाभिव्यक्तये उपन्यस्तम् । **क्षिपकादीनाञ्चेति** ॥ क्षिपकादिशब्दानामित्त्वन्नेति वक्तव्यमित्यर्थः । क्षिपकादिगणं पठति । **क्षिपकेति** ॥ 'क्षिप प्रेरणे' 'इगुपधज्ञाप्रीकिरः कः' कित्त्वान्न लघूपधगुणः, क्षिपाशब्दात् स्वार्थे कः, 'केऽणः' इति ह्रस्वः, पुनष्टाप् । **ध्रुवकेति** ॥ 'ध्रुव स्थैर्ये' कुटादिः, क्षिपकेतिवद्रूपम् । यद्वा 'ध्रु स्थैर्ये' पचाद्यच् 'गाङ्कुटादिभ्यः' इति ङित्त्वान्न गुणः, उवङ्, ध्रुवशब्दात् टाप्, ततः स्वार्थिकः कः, 'केऽणः' इति ह्रस्वः, पुनष्टाप् । **कन्यकेति** ॥ कन्याशब्दात् कः, 'केऽणः' इति ह्रस्वः, पुनष्टाप् । **चटकेति** ॥ 'चट भेदने' पचाद्यच्, स्वार्थे कः, 'केऽणः' इति ह्रस्वः, पुनष्टाप् । क्षिपकादिराकृतिगणः । तेन अळका इष्टका इत्यादि । **तारका ज्योतिषीति** ॥ वार्तिकमिदम् । ज्योतिषिवाच्ये तारकेति भवति इत्त्वन्न भवतीति यावत् 'तॄ प्लवनतरणयोः' ण्वुल्, अकादेशः, ऋकारस्य वृद्धिः, रपरत्वं, टाप् । ज्योतिरित्यनेन नक्षत्रम् अक्ष्णः कनीनिका च विवक्षितम् । "नक्षत्र-

'वर्णका तान्तवे' (४५३२)। अन्यत्र वर्णिका। 'वर्तका शकुनौ प्राचाम्' (वा ४५३३)। उदीचां तु वर्तिका। 'अष्टका पितृदेवत्ये' (वा ४५३४)। अष्टिकान्या। 'सूतकापुत्रिकाबृन्दारकाणां वेति वक्तव्यम्' (वा ४५३५)। इह वा अ इति छेदः। कात्पूर्वस्याकारादेशो वेत्यर्थः। तेन पुत्रिकाशब्दे ङीनः

मृक्षम्मन्तारं तारकापि" "तारकाक्ष्णः कनीनिका" इति चामरः। **अन्यत्रेति** ॥ ज्योतिषोऽन्यत्र वाच्ये तारिकेत्येव भवतीत्यर्थः। **वर्णका तान्तव इति** ॥ इदमपि वार्तिकम्। तान्तवे गम्ये वर्णकेति भवति, इत्त्वन्नेत्यर्थः। तन्तूनां विकारस्तान्तवम्। 'ओरञ्' वर्णकेति प्रावारविशेषः। 'वर्ण वर्णक्रियाविस्तारगुणवचनेषु' चुरादिः। ण्यन्तात् ण्वुल्, अकादेशः, णिलोपः, टाप्। **अन्यत्रेति** ॥ तान्तवादन्यत्र वर्णिकेति इत्त्वमित्यर्थः। वर्णिका स्तोत्रीत्यर्थः। वर्णिकेति ग्रन्थविशेषस्य संज्ञा वा। **वर्तका शकुनौ प्राचामिति** ॥ इदमपि वार्तिकम्। शकुनिः पक्षी, तत्र गम्ये प्राचाम्मते वर्तकेति भवति, इत्त्वं न भवतीत्यर्थः। प्राचांग्रहणस्य प्रयोजनमाह। **उदीचां त्विति** ॥ उदीचाम्मते तु शकुनौ गम्ये वर्तिकेति इत्त्वं भवतीत्यर्थः। वर्तयतेर्ण्वुल्, अकादेशः, णिलोपः, स्वार्थे कः, टाप्। 'कोयष्टिकष्टिट्टिभको वर्तको वर्तिकादयः' इत्यमरः। शकुनेरन्यत्र तु नित्यमेवेत्त्वम्। **अष्टका पितृदेवत्ये इति** ॥ इदमपि वार्तिकम्। पितरश्च ता देवताश्च पितृदेवताः तदर्थं, पितृदेवत्यम् 'देवतान्तात् तादर्थ्ये यत्' इति यत्। पित्रर्थे कर्मणि वाच्ये अष्टकेति भवति 'प्रत्ययस्थात्' इति इत्त्वन्नेत्यर्थः। अश्नन्ति पित्रर्थे ब्राह्मणाः यस्यामिति विग्रहे 'अश भोजने' इत्यस्मात् 'इष्यशिभ्यान्तकन्' इति तकन् प्रत्ययः, 'व्रश्च' आदिना शस्य षः, तकारस्य ष्टुत्वेन टः, अष्टकशब्दात् टाप्। **अष्टिकान्येति** ॥ अष्टौ अञ्ज्यायाः परिमाणमस्या अष्टिका पाणिनीयाष्टाध्यायी, 'सङ्ख्यायाः अतिशदन्तायाः कन्' इति सूत्रेण अष्टौ इति सुबन्तात् कन्प्रत्ययः। सुबन्तात्तद्धितोत्पत्तेः सिद्धान्तयिष्यमाणत्वात्। ततस्तद्धितान्तत्वेन प्रातिपदिकत्वात् 'सुपो धातुप्रातिपदिकयोः' इति जसो लुकि निमित्तापायात् अष्टन आत्वनिवृत्तौ, अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वान्नकारलोपे, अष्टकशब्दात्, टापि 'प्रत्ययस्थात्' इति इत्त्वं भवत्येव। नचान्तर्वर्तिसुपः परत्वं टापश्शङ्क्यम्। अकारेण व्यवधानात्। असुपः इत्यस्य बहुपरिव्राजका नगरी इत्यत्र अव्यवहिते सुपः परे टापि चरितार्थत्वात्। अत एव 'क्षिपकादीनान्न' इति निषेधोऽर्थवान्। अन्यथा क्षिपाशब्दात् सुबन्तात् स्वार्थिके कप्रत्यये सुपो लुकि अन्तर्वर्तिनीं विभक्तिमाश्रित्य टापस्सुबपेक्षया परत्वादसुपः इति निषेधसिद्धेः किं तेनेत्यलम्। 'वा सूतकापुत्रिकाबृन्दारकाणाम्' इति वार्तिकमर्थतः पठति। **सूतकेति** ॥ अत्र पुत्रिकाशब्दः इकारमध्यः नत्वकारमध्यः। स्त्रियां पुत्रशब्दस्य शार्ङ्गरवादित्वेन ङीनन्तत्वादिति कैयटः। अत्रेत्त्वविकल्पभ्रमं वारयति। **इह वा अ इति** ॥ सवर्णदीर्घे सति वा इति निर्देश इति भावः। अत्र अ इति लुप्तप्रथमाकं कात्पूर्वस्येत्यनुवर्तते, अत इति निवृत्तम्, पुत्रिकाशब्दे अतोऽभावात्। तदाह। **कात्पूर्वस्येति** ॥ नन्वत्र इत्त्वविकल्प एव कुतो न विधीयत इत्यत आह। **तेनेति** ॥ अत्त्वविधानेनेत्यर्थः। पुत्रशब्दात् शार्ङ्गरवादित्वात् ङीनि स्वार्थिके कप्रत्यये 'केऽणः' इति ह्रस्वे, टापि, पुत्रिकाशब्दः। अत्र इकारस्य इत्त्वविकल्पविधौ पुत्रिका–पुत्रीकेति

इवर्णस्य पक्षेऽकारः। अन्यत्रेत्त्वबाधनार्थमकारस्यैव पक्षेऽकारः। सूतिका—सूतका इत्यादि।

४६५। उदीचामातः स्थाने यकपूर्वायाः। (७-३-४६)

यकपूर्वस्य स्त्रीप्रत्ययाकारस्य स्थाने योऽकारस्तस्य कात्पूर्वस्येद्वा स्यादापि परे। 'केऽणः' (सू ८३४) इति ह्रस्वः। आर्यका—आर्यिका। चटकका—चटकिका। 'आतः' किम्। साङ्काश्ये भवा साङ्काश्यिका। 'यक—'

इन्मध्यः ईन्मध्यश्च स्यात्। अत्त्वविधौ तु पुत्रका पुत्रिकेति अकारमध्यः इकारमध्यश्च फलतीति। ननु सूतकाशब्दे वृन्दारकाशब्दे च कात्पूर्वस्याकारस्य अकारविधिः किमर्थमित्यत आह। **अन्यत्रेति** ॥ सूतकाशब्दे वृन्दारकाशब्दे च 'प्रत्ययस्थात्' इति नित्यमित्त्वे प्राप्ते तद्विकल्पार्थमित्यर्थः। 'षूङ् प्राणिगर्भविमोचने' धात्वर्थेनोपसङ्ग्रहादकर्मकः। 'गत्यर्थाकर्मक' इत्यादिना कर्तरि क्तः, टाप्, स्वार्थिकः कः, 'केऽणः' इति ह्रस्वः, पुनष्टाप्। अत्राकारस्य अत्त्वाभावपक्षे 'प्रत्ययस्थात्' इति इत्त्वम्। वृन्दमस्यास्तीति मत्वर्थे 'शृङ्गवृन्दाभ्यामारकन्' इति आरकन्प्रत्ययः। अमरेण तावत् देवतावाची वृन्दारकशब्दः 'अमरा निर्जरा देवाः' इत्यादिना पुल्लिङ्गेष्वनुक्तान्तः। रूपिवाची मुख्यवाची च लिलिङ्गः "त्रिषूत्तरे" इत्युपक्रम्य "वृन्दारकौ रूपिमुख्यौ" इत्यमरः। स्त्रियां टाप्। अत्राप्यकारस्य अत्त्वाभावपक्षे इत्त्वम्। **उदीचामातः** ॥ 'प्रत्ययस्थात्' इति सूत्रमनुवर्तते। यश्च कश्च यकौ तौ पूर्वौ यस्या इति विग्रहः। यकेति वर्णग्रहणम्, अकारावुच्चारणार्थौ, यकपूर्वाया इत्येतत् आत इत्यस्य विशेषणम्। तेन आकारस्य स्त्रीवाचकत्वं लभ्यते। तदाह। **यकपूर्वस्येत्यादिना** ॥ "उदीचांग्रहणं विकल्पार्थमेव। ननु देशतो व्यवस्थार्थम्" इति 'न वेति विभाषा' इति सूत्रे भाष्ये स्पष्टम्। नच 'षष्ठी स्थानेयोगा' इत्येव सिद्धेरिह स्थानेग्रहणं व्यर्थमिति वाच्यम्। अनुवादे परिभाषाणामनुपस्थितेः। तत्र च इदमेव स्थानेग्रहणं ज्ञापकम्। अत एव 'वृद्धिर्यस्याचामादिस्तद्वृद्धम्' इत्यत्र यस्यादिः वृद्धिरित्यनुवादे इक्परिभाषा न प्रवर्तते। तत्प्रवृत्तौ तु शालाशब्दस्य वृद्धसंज्ञा न स्यात्, शकारादाकारस्य इक्स्थानिकत्वाभावात्। ततश्च शालीय इति 'वृद्धाच्छः' इति छः न स्यात्, औपगवीयः इत्यादावेव स्यादित्यलम्। **केऽणः इति ह्रस्वः इति** ॥ आर्याशब्दात् स्वार्थिके कप्रत्यये यकारादाकारस्य 'केऽणः' इति ह्रस्व इत्यर्थः। पुनष्टापि आर्यकाशब्दः। तत्र यकारादकारस्य आकारस्थानिकत्वादित्त्वविकल्पः। 'प्रत्ययस्थात्' इति नित्यस्य इत्त्वस्यापवादः। तदाह। **आर्यका-आर्यिकेति** ॥ यकारपूर्वस्य उदाहरणमिदम्। अथ ककारपूर्वस्य उदाहरति। **चटकका-चटकिकेति** ॥ चटकाशब्दात् स्वार्थे कः, 'केऽणः' इति ह्रस्वः, पुनष्टाप्, इत्त्वविकल्प इति भावः। **साङ्काश्यिकेति** ॥ सङ्काशेन निर्वृत्तं नगरं साङ्काश्यम्। 'वुञ्छण्कठञ्' इत्यादिना सङ्काशादिभ्यो ण्यः, आदिवृद्धिः, 'यस्येति च' इत्यकारलोपः। साङ्काश्यशब्दात् भवार्थे 'धन्वयोपधाद्वुञ्' अकादेशः, 'यस्येति च' इत्यकारलोपः, टाप्, 'प्रत्ययस्थात्' इति नित्यमित्त्वम्। इह यकारादकारस्य आकारस्थानिकत्वाभावादित्त्व-

इति किम्। अश्विका। 'स्त्रीप्रत्यय–' इति किम्। शुभं यातीति शुभंयाः। अज्ञाता शुभंयाः शुभंयिका। 'धात्वन्तयकोस्तु नित्यम्' (वा ४५३६)। सुनयिका। सुपाकिका।

४६६। भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि। (७-३-४७)

स्वेत्यन्तं लुप्तषष्ठीकं पदम्। एषामत इद्वा स्यात्। तदन्तविधिनैव सिद्धे नञ्पूर्वाणामपीति स्पष्टार्थम्। भस्त्राग्रहणमुपसर्जनार्थम्। अन्यस्य तूत्तर-

---

विकल्पो न भवतीति भावः। ननु स्त्रीप्रत्ययस्य अत इद्वा स्यादित्येवास्तु, 'आतः स्थाने' इति मास्तु। साङ्काश्यकाशब्दे यकारादकारस्य वुआदेशावयवत्वेन स्त्रीबोधकत्वाभावादिति चेत्। तर्ह्यातः स्थाने इति स्पष्टार्थमित्याहुः। **अश्विकेति** ॥ अश्वाशब्दात् कः, 'केऽणः' इति ह्रस्वः, पुनष्टाप्, अश्वकाशब्दः। अत्र अकारस्य आकारस्थानिकत्वेऽपि यकपूर्वकत्वाभावादित्त्वविकल्पो न, किन्तु 'प्रत्ययस्थात्' इति नित्यमित्त्वमिति भावः। **स्त्रीप्रत्यय इति किमिति** ॥ यकपूर्वाया इति स्त्रीलिङ्गनिर्देशलब्धं स्त्रीप्रत्ययस्येति किमर्थमिति प्रश्नः। **शुभंयिकेति** ॥ शुभमिति मान्तमव्ययम्। तस्मिन्नुपपदे 'या प्रापणे' इति धातोः अन्येभ्योऽपि दृश्यते इति विच्। शुभंयाशब्दात् स्वार्थे कः। 'केऽणः' इति ह्रस्वः, टाप्, शुभंयकाशब्दः। अत्र यकारादकारस्य धात्ववयवस्य स्त्रीवाचकत्वाभावादित्त्वविकल्पो न, किन्तु 'प्रत्ययस्थात्' इति नित्यमेवेत्त्वमिति भावः। 'यकपूर्वे धात्वन्तप्रतिषेधः' इति वार्तिकमर्थतस्सङ्गृह्णाति। **धात्वन्तयकोस्तु नित्यमिति** ॥ यश्च कश्चेति विग्रहः। धात्वन्तयकारककारयोरुपरि विद्यमानस्य अकारस्य नित्यमित्त्वम्, न तु विकल्प इत्यर्थः। **सुनयिकेति** ॥ णीञ्धातोः पचाद्यच्। 'सार्वधातुकार्धधातुकयोः' इति गुणे अयादेशे नयशब्दः। सु शोभनः नयः यस्यास्सा सुनया, ततः स्वार्थे कः, 'केऽणः' इति ह्रस्वः, पुनष्टाप्, सुनयकाशब्दः, अत्र यकारस्य धात्वन्तत्वान्न ततः परस्याकारस्य इत्त्वविकल्पः, किन्तु 'प्रत्ययस्थात्' इति नित्यमित्त्वमिति भावः। **सुपाकिकेति** ॥ पचधातोर्घञि 'चजोः कु घिण्ण्यतोः' इति चकारस्य कुत्वे उपधावृद्धौ पाकशब्दः। सु शोभनः पाको यस्यास्सा सुपाका। स्वार्थे कः, 'केऽणः' इति ह्रस्वः, पुनष्टाप्, सुपाककाशब्दः। अत्र ककारस्य धात्वन्तत्वात् ततः परस्याकारस्य नेत्त्वविकल्पः। किन्तु 'प्रत्ययस्थात्' इति नित्यमित्त्वमिति भावः। **भस्त्रैषा** ॥ यकपूर्वत्वाभावात् 'उदीचाम्' इत्यप्राप्तौ वचनमिदम्। **स्वेत्यन्तमिति** ॥ भस्त्रा, एषा, अजा, ज्ञा, द्वा, स्वा, एषां षण्णां द्वन्द्वः। ततः षष्ठ्या आर्षो लुक्। भस्त्रैषाजाज्ञाद्वास्वानामिति विवक्षितमिति भावः। **एषामिति** ॥ भस्त्रादीनामित्यर्थः। **अत इद्वेति** ॥ पूर्वसूत्रादुदीचांग्रहणस्य 'प्रत्ययस्थात्' इति सूत्रात् इदित्यस्य चानुवृत्तेरिति भावः। नन्वाङ्गत्वात्तदन्तविधौ भस्त्रादिशब्दान्तानामिति लभ्यते व्यपदेशिवत्त्वेन केवलानामपि लभ्यते। एवञ्च नञ्पूर्वाणान्तद्विन्नपूर्वाणां केवलानाञ्च सिद्धे नञ्पूर्वाणामपीति व्यर्थमित्यत आह। **तदन्तविधिनैवेति** ॥ ननु तदन्तविधिना भस्त्रादिशब्दानां नञ्पूर्वाणामनञ्पूर्वाणाञ्च प्राप्तौ, नञ्पूर्वाणामेवेति नियमार्थं नञ्पूर्वग्रहणम्।

सूत्रेण सिद्धम्। एषा द्वा एतयोस्तु सपूर्वयोर्नेत्त्वम्। अन्तर्वर्तिनीं विभक्तिमाश्रित्य 'असुपः' इति प्रतिषेधात्। अनेषका। परमैषका। अद्वके। परमद्वके।

तथा सति केवलानां भस्त्रादिशब्दानां ग्रहणव्यावृत्तिस्स्यादित्यपिशब्द इति व्याख्यातुमुचितमिति चेन्न। एवं सति निर्भस्त्रिकेत्याद्यसिद्धेः। तस्मात् "नञ्पूर्वाणामिति स्पष्टार्थमेव" इति भाष्ये स्पष्टम्। ननु भस्त्राशब्दस्य नित्यस्त्रीलिङ्गतया 'अभाषितपुंस्काच्च' इत्युत्तरसूत्रेणैव इत्त्वविकल्पसिद्धेरिह भस्त्राग्रहणं व्यर्थमित्यत आह। **भस्त्राग्रहणमुपसर्जनार्थमिति** ॥ निर्भस्त्रिका इत्युपसर्जनत्वे त्रिलिङ्गतया भाषितपुंस्कत्वेन तत्र 'अभाषितपुंस्काच्च' इत्यस्य अप्रवृत्तेरिति भावः। **अन्यस्य त्विति** ॥ उपसर्जनादन्यस्य भस्त्राशब्दस्य तु परमभस्त्रका–परमभस्त्रिकेत्यत्र नित्यस्त्रीलिङ्गतया 'अभाषितपुंस्काच्च' इत्युत्तरसूत्रेणैव पाक्षिकमित्त्वं सिद्धम्। अतः 'भस्त्वैषा' इत्यत्र भस्त्राग्रहणं तदर्थन्न भवतीत्यर्थः। ननु अनेषका, परमैषका, अद्वके, परमद्वके, इत्यत्रापि पाक्षिकमेतदित्त्वं स्यादित्यत आह। **एषा द्वेति** ॥ एषा द्वा एतयोस्तु पूर्वपदसहितयोरिदं पाक्षिकमित्त्वन्नेत्यर्थः। कुत इत्यत आह। **अन्तर्वर्तिनीमिति** ॥ अनाप्यसुपः इत्यनुवर्तते। इह तु टाप् सुपः पर इति भावः। ननु टाबत्र सुपः परो न भवति। तथाहि एतच्छब्दस्य टेः प्राक् 'अव्ययसर्वनाम्नाम्' इति अकचि, एतकद्शब्दात् सौ 'तदोस्सस्सौ' इति तकारस्य सत्वे, 'आदेशप्रत्यययोः' इति षत्वे, त्यदाद्यत्वे, पररूपे, स्त्रियामदन्तत्वात् टापि, सवर्णदीर्घे, हल्ङ्यादिलोपे, एषकेति रूपम्। ततः न एषकेति विग्रहे नञ्तत्पुरुषे कृते, 'नलोपो नञः' इति नञो नकारस्य लोपे, 'तस्मान्नुडचि' इति नुटि, अनेषकेति रूपम्। तथा परमा एषकेति कर्मधारये, परमैषकेति रूपम्। अत्र सौ परे, प्रवृत्तत्यदाद्यत्वसिद्धमदन्तत्वमाश्रित्य प्रवृत्तष्टाप् कथं सुपः परस्स्यात्। नच नञ्तत्पुरुषे सोस्सामासिके लुकि सति, सत्वत्यदाद्यत्वटाप्निवृत्तौ, समासात् पुनस्सौ, सत्वत्यदाद्यत्वटाप्सु कृतेषु, हल्ङ्यादिलोपे, अनेषकेत्यत्र समासात् प्राक् प्रवृत्तात् सुपः पर एव टाबिति वाच्यम्। सामासिकलुगपेक्षया हल्ङ्यादिलोपस्यैवान्तरङ्गत्वात् प्रवृत्तेः। ततश्च लुप्तेऽपि सौ प्रत्ययलक्षणसत्त्वेन निमित्तानपायात् पूर्वप्रवृत्तसत्वत्यदाद्यत्वटापां निवृत्तिर्नास्ति। सच टाप् न सुपः परः इति चेत्, अत्र ब्रूमः। 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुक् बाधते' इति परिभाषया 'सुपो धातुप्रातिपदिकयोः' इति सुब्लुग्विषये अन्तरङ्गोऽपि हल्ङ्यादिलोपो न प्रवर्तते। अतः राजकुमारीत्यादौ श्रूयमाणे एव सुपि समासः प्रवर्तते। एवञ्च गोमान् प्रियो यस्य सः गोमत्प्रियः इत्यत्र गोमच्छब्दात् सोर्लुका लुप्तत्वात् 'उगिदचाम्' इति नुमुपधादीर्घादिकं न इति 'प्रत्ययोत्तरपदयोश्च' इति सूत्रभाष्ये स्थितम्। 'कृत्तद्धित' इति सूत्रे प्रौढमनोरमायां परिष्कृतमेतत्। एवञ्च नञ् सु, एतकद् सु, इति स्थिते, नञ्तत्पुरुषे कृते, 'अन्तरङ्गानपि' इति न्यायेन त्यदाद्यत्वप्रवृत्तेः प्रागेव सामासिकलुकि, अनेतकद्शब्दात् समासात्पुनस्सौ, सत्वे, त्यदाद्यत्वे, पररूपे, टापि, सवर्णदीर्घे, सोर्हल्ङ्यादिलोपे, अनेषकेति भवति। अत्र सवर्णदीर्घप्रवृत्तेः प्राक्समासात्पूर्वोत्पन्नसुपः पर एव टाप् भवतीत्यास्तान्तावत्। **अद्वके इति** ॥ न सु, द्वकि औ, इति स्थिते, नञ्तत्पुरुषे 'अन्तरङ्गानपि' इति न्यायेन त्यदाद्यत्वप्रवृत्तेः प्रागेव समासे, औङो लुकि कृते, अद्वकिशब्दात् समासा-

स्वशब्दग्रहणं संज्ञोपसर्जनार्थम्। इह हि 'आतः स्थाने' इत्यनुवृत्तं स्वशब्दस्यातो विशेषणम्। न तु द्वैषयोरसम्भवात्। नाप्यन्येषामव्यभिचारात्। स्वशब्दस्त्वनुपसर्जनमात्मीयवाची अकजर्हः। अर्थान्तरे तु न स्त्री। संज्ञोपसर्ज-

---

त्पुनरौङि, त्यदाद्यत्वे, पररूपे, टापि औङश्शीभावे, आद्गुणे, अद्वके इति भवति। अत्रापि समासात्पूर्वोत्पन्नादौङस्सुपः पर एव टाबिति भावः। एवं परमद्वके इत्यत्रापि। स्यादेतत्। आत्मात्मीयज्ञातिधनवाची स्वशब्दः। तत्र ज्ञातावात्मनि च पुल्लिङ्ग एव। आत्मीये तु विशेष्यनिघ्नस्त्रिलिङ्गः। धने तु पुन्नपुंसकलिङ्गः। "स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने" इति कोशात्। यदा तु स्त्रीव्यक्तिविशेषस्य स्वशब्दस्संज्ञा तदापि स्त्रीलिङ्गः। तत्र 'स्वमज्ञातिधनाख्यायाम्' इत्युक्तेः ज्ञातिधनवाचित्वे सर्वनामत्वन्नास्ति। आत्मात्मीयवाचिन एव सर्वनामता, साप्यनुपसर्जनस्यैव भवति। 'संज्ञोपसर्जनीभूतास्तु न सर्वादयः' इत्युक्तेरिति स्थितिः। तत्रात्मीयायां वाच्यायां सर्वनामत्वात् अकचि, टापि, 'प्रत्ययस्थात्' इति नित्यमित्त्वे, स्विकेत्येवेष्यते। तत्तु न युज्यते। 'भस्त्रैषा' इत्यादिना इत्त्वविकल्पस्य दुर्वारत्वात्। नचात्र अकजकारस्य आतःस्थानिकत्वाभावान्नायमित्त्वविकल्प इति वाच्यम्। एषामत इद्वा स्यादिति विवरणवाक्ये आतःस्थानिकस्येत्यनुवृत्तेरित्यत आह। **स्वशब्दग्रहणं संज्ञोपसर्जनार्थमिति** ॥ स्वशब्दस्य संज्ञाभूतस्य सर्वनामत्वाभावादकजभावे, स्त्रियां टापि, सौ कृते, स्वार्थिककप्रत्यये, उक्तरीत्या 'अन्तरङ्गानपि विधीन् बाहिरङ्गो लुक् बाधते' इति परिभाषया हल्ङ्यादिलोपं बाधित्वा प्रातिपदिकावयवत्वात् सोर्लुकि, 'केऽणः' इति ह्रस्वे, कप्रत्ययान्तात् पुनष्टापि, स्वकाशब्दः। निर्गता स्वस्या इति विग्रहे 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' इति समासे सुब्लुकि, 'गोस्त्रियोः' इति ह्रस्वे, टापि, सुपि, स्वार्थिके कप्रत्यये, 'केऽणः' इति ह्रस्वे, पुनष्टापि, निस्स्वकाशब्दः। एतद्वयमेव 'भस्त्रैषा' इति स्वशब्दस्य उदाहरणम्। आत्मीयायान्तु स्वशब्दो न संज्ञाभूतः, नाप्युपसर्जनीभूत इति नोदाहरणमित्यर्थः। कुत इत्यत आह। **इह हीति** ॥ इह 'भस्त्रैषा' इति सूत्रे 'उदीचाम्' इति पूर्वसूत्रात् आतःस्थाने इत्यनुवृत्तम्, तच्च स्वशब्दस्यैव अतो विशेषणम्। एवञ्च स्वशब्दस्य आतःस्थानिकस्य अत इद्वा स्यादिति लभ्यते। एतद्विशेषविवक्षयैव एषामत इद्वा स्यादिति विवरणवाक्ये आतःस्थाने इत्यस्यानुवृत्तिर्न प्रदर्शितेति भावः। **ननु द्वैषयोरिति** ॥ द्वा एषा इत्येतयोस्तु विषये आतःस्थान इति न सम्बध्यत इत्यर्थः। कुत इत्यत आह। **असम्भवादिति** ॥ एषा द्वेति सर्वाद्यन्तर्गणत्यदादित्वप्रयुक्तसत्वात्वनिर्देशेन सर्वनामत्वावश्यकत्वादकच्। तदकारस्य आतःस्थानिकत्वस्याप्रसक्तेरित्यर्थः। **नाप्यन्येषामिति** ॥ भस्त्राजाज्ञाशब्दानामपि आतःस्थान इति विशेषणं नेत्यर्थः। कुत इत्यत आह। **अव्यभिचारादिति** ॥ भस्त्राजाज्ञाशब्दानां सर्वनामत्वाभावेनाकजनर्हतया कप्रत्ययान्ततया तेषु 'केऽणः' इति ह्रस्वसम्पन्नस्य अतः आतःस्थानिकत्वनियमेन तद्विशेषणवैयर्थ्यादित्यर्थः। ननु आतःस्थाने इत्यनुवृत्तम्, स्वशब्दस्य अतो विशेषणमस्तु, तावता आत्मीयायां स्विका इत्यत्र इत्त्वविकल्पशङ्कायाः किमायातमित्यत आह। **स्वशब्दस्त्विति** ॥ अनुपसर्जनात्मीयवाची स्वशब्दस्तु सर्वनामत्वादकजर्हः।

नीभूतस्तु कप्रत्ययान्तत्वाद्भवत्युदाहरणम्। एवं चात्मीयायां स्विका। परमस्विकेति नित्यमेवेत्त्वम्। निर्भस्त्रका–निर्भस्त्रिका। एषका–एषिका। कृतषत्वनिर्देशान्नेह विकल्पः, एतिके–एतिकाः। अजका–अजिका। ज्ञका–ज्ञिका। द्वके–द्विके। निःस्वका–निःस्विका।

अतस्तदकारस्य आतःस्थानिकत्वाभावान्न प्रकृतसूत्रेणेत्त्वविकल्पशङ्का, किन्तु 'प्रत्ययस्थात्' इति नित्यमेव इत्त्वमित्यर्थः। ननु स्वशब्दस्य आत्मात्मीयज्ञातिधनवाचिनः आत्मीयायामुदाहरणत्वाभावेऽपि आत्मज्ञातिधनवाचिनस्तस्य उदाहरणत्वसम्भवात् स्वशब्दग्रहणं संज्ञोपसर्जनार्थमित्यनुपपन्नमित्यत आह। **अर्थान्तरे तु न स्त्री इति** ॥ आत्मज्ञातिधनेषु स्वशब्दो न स्त्रीलिङ्गः। उदाहृतकोशरीत्या आत्मज्ञातिवाचिनस्स्वशब्दस्य नित्यपुल्लिङ्गत्वात् धनवाचिनस्तस्य पुन्नपुंसकलिङ्गत्वाच्चेत्यर्थः। तथाच टापि परे इत्त्वस्याभावान्नोदाहरणत्वप्रसक्तिः। 'प्रत्ययस्थात्' इत्यतः आबित्यनुवृत्तेरिति भावः। इदमुपलक्षणम्। आत्मनि वाच्ये स्वशब्दस्य सर्वनामत्वेन अकजर्हतया तदकारस्य आत्स्थानिकत्वाभावाच्चेत्यपि द्रष्टव्यम्। ननु संज्ञोपसर्जनीभूतस्यापि स्वशब्दस्य कथमुदाहरणत्वं, तस्याप्यकचि तदकारस्य आत्स्थानिकत्वाभावादित्यत आह। **संज्ञोपसर्जनीभूतस्त्विति** ॥ संज्ञोपसर्जनीभूतस्य स्वशब्दस्य असर्वनामतया अकजनर्हत्वेन स्वाशब्दात् सुबन्तात् स्वार्थिके कप्रत्यये, सुब्लुकि, पुनष्टापि, 'केऽणः' इति ह्रस्वापन्नस्य अतः आत्स्थानिकतया भवत्युदाहरणत्वमित्यर्थः। नचान्तर्वर्तिसुपः परष्टाबिति शङ्क्यम्, केन व्यवधानादिति भावः। तदेवं 'भस्त्रैषा' इत्यत्र आतः स्थाने इत्यनुवृत्तस्य स्वशब्देऽन्वयलाभात् स्वशब्दावयवस्य आत्स्थानिकस्य अत इद्वा स्यादिति लब्धम्, तस्य प्रयोजनमाह। **एवञ्चेति** ॥ उक्तरीत्या स्वशब्दे आत्स्थानिकस्यैव अतः इत्त्वविकल्पलाभादात्मीयायां स्वशब्दस्य सर्वनामत्वादकचि, तदकारस्य आत्स्थानिकत्वाभावादित्त्वविकल्पाप्रवृत्तौ, 'प्रत्ययस्थात्' इति नित्यमेवेत्त्वमित्यर्थः। तदेवं प्रत्युदाहरणान्युक्त्वा उदाहरणान्याह। **निर्भस्त्रकेत्यादि** ॥ भस्त्राया निष्क्रान्तेति विग्रहे 'निरादयः क्रान्ताद्यर्थे' इति समासे, 'गोस्त्रियोः' इति ह्रस्वत्वे, पुनष्टापि, समासात् सौ, कप्रत्यये, 'केऽणः' इति ह्रस्वे, निर्भस्त्रकशब्दात् पुनष्टापि, सवर्णदीर्घे, निर्भस्त्रकाशब्दः। तत्र 'प्रत्ययस्थात्' इति नित्यमित्त्वे प्राप्ते अनेन इत्त्वविकल्पे निर्भस्त्रिका निर्भस्त्रकेति रूपद्वयम्। केन व्यवधानान्न सुपः परष्टाबिति भावः। **एषका। एषिकेति** ॥ अकचि एतकद्शब्दात् सुः। 'तदोस्सस्सौ' इति सत्वम्, षत्वम्, त्यदाद्यत्वम्, पररूपम्, टाप्, 'प्रत्ययस्थात्' इति नित्यमित्त्वं बाधित्वा इत्त्वविकल्प इति भावः। ननु अकाचि एतकद्शब्दात् स्त्रियामौजसादिषु एतिके एतिकाः इत्यादौ नित्यमित्त्वमिष्यते। तद्बाधित्वा अनेन इत्त्वविकल्पस्स्यादित्यत आह। **कृतषत्वेति** ॥ 'भस्त्रैतज्ज्ञास्वा' इति वक्तव्ये एषेति कृतषत्वनिर्देशात् औजसादिषु षत्वाभावान्नेत्त्वविकल्प इत्यर्थः। **अजका–अजिकेति** ॥ अजाशब्दात् कः, ह्रस्वः, पुनष्टाप्, सवर्णदीर्घः, इत्त्वविकल्पः। **ज्ञका–ज्ञिकेति** ॥ ज्ञाधातोः 'इगुपधज्ञाप्रीकिरः कः' इति कः 'आतो लोप इटि च' इत्याल्लोपः। स्त्रियामदन्तत्वाट्टाप्, सवर्णदीर्घः। ज्ञाशब्दात् सुबन्तात् कः, सुब्लुक्, 'केऽणः' इति ह्रस्वः, पुनष्टाप्, सवर्णदीर्घः,

४६७। अभाषितपुंस्काच्च। (७-३-४८)

एतस्माद्विहितस्य आतः स्थाने अत इद्वा स्यात्। गङ्गका—गङ्गिका। बहुव्रीहेर्भाषितपुंस्कत्वात्ततो विहितस्य नित्यम्। अज्ञाता खट्वा अखट्विका। शैषिके कपि तु विकल्प एव।

४६८। आदाचार्याणाम्। (७-३-४९)

पूर्वसूत्रविषये आद्वा स्यात्। गङ्गाका। उक्तपुंस्कात्तु शुभ्रिका।

४६९। अनुपसर्जनात्। (४-१-१४)

इत्त्वविकल्पः इति भावः। **द्रुके–द्रिके इति** ॥ अकचि द्रुकिशब्दात् स्त्रियामौङि, ल्यदाद्यत्वम्, पररूपम्, टाप्, इत्त्वविकल्पः, औङश्शी, आद्गुणः। **निःस्वका–निःस्विकेति** ॥ स्वस्याः निष्क्रान्तेति विग्रहः। 'निरादयः' इति समासः, उपसर्जनह्रस्वः, टाप्, सुपि कः, सुब्लुक्, कप्रत्ययान्तात् पुनष्टापि सवर्णदीर्घः, इत्त्वविकल्प इति भावः। **अभाषितपुंस्काच्च** ॥ 'उदीचामातस्थाने' इत्यनुवर्तते, अत इदिति च। अभाषितः पुमान् येनेति विग्रहः। विहितस्येत्यध्याहार्यम्। तदाह। **एतस्मादिति** ॥ अभाषितपुंस्कादित्यर्थः। अयकपूर्वार्थं वचनम्। **गङ्गका–गङ्गिकेति** ॥ गङ्गाशब्दात् कः। 'केऽणः' इति ह्रस्वः, इत्त्वविकल्पः। विहितविशेषणस्य फलमाह। **बहुव्रीहेरिति** ॥ अविद्यमाना खट्वा यस्या इति विग्रहे 'नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः' इति बहुव्रीहौ कृते, विद्यमानपदलोपे नञो नलोपे 'शेषाद्विभाषा' इति कबभावपक्षे, 'गोस्त्रियोः' इति ह्रस्वे अखट्वशब्दात् टापि, सुपि, अज्ञातादौ के, सुब्लुकि, 'केऽणः' इति ह्रस्वे, पुनष्टापि अभाषितपुंस्काद्विहितस्य आतस्स्थाने अतः अभावान्नेत्त्वविकल्पः। किंतु 'प्रत्ययस्थात्' इति नित्यमित्त्वमित्यर्थः। अभाषितपुंस्कात् परस्येति व्याख्याने तु तादृशखट्वशब्दात् परस्य आतस्स्थाने अतस्सत्त्वादित्त्वविकल्पस्स्यादिति भावः। **शैषिके कपि त्विति** ॥ न सु खट्वा सु इत्यवस्थायां कपि, सुब्लुक्। प्रत्ययलक्षणेन भागद्वयस्य सुबन्तत्वात् 'नञोऽस्त्यर्थानाम्' इति बहुव्रीहिसमासः। समासान्तः इत्यन्वर्थसंज्ञाबलात् कबन्तस्यैव समासत्वम्। ततश्च अखट्वाकशब्दे अखट्वा इत्यंशस्य उपसर्जनस्त्रीप्रत्ययान्तसमासरूपप्रातिपदिकत्वाभावात् 'गोस्त्रियोः' इति ह्रस्वो न भवति। नापि 'केऽणः' इति ह्रस्वः। 'न कपि' इति निषेधात्। किन्तु 'आपोऽन्यतरस्याम्' इति ह्रस्वविकल्पः। तत्र खट्वाशब्दात् विहितस्य कपः प्राग्वर्तिनः टापः अभाषितपुंस्काद्विहितत्वेन तत्स्थानिकह्रस्वाकारस्य अयम् इत्त्वविकल्पो भवत्येवेत्यर्थः। 'आपोऽन्यतरस्याम्' इति ह्रस्वाभावपक्षे तु अखट्वाकेत्येव बोध्यम्। **आदाचार्याणाम्** ॥ **पूर्वसूत्रविषय इति** ॥ अभाषितपुंस्काद्विहितस्यातस्स्थाने अत इत्यर्थः। **शुभ्रिकेति** ॥ शुभ्रशब्दो विशेष्यनिघ्नः अनियतलिङ्गः, ततः स्त्रियां टापि, शुभ्राशब्दात् कः। 'केऽणः' इति ह्रस्वः, पुनष्टाप्। अत्र कात्पूर्ववर्तिनष्टापः अभाषितपुंस्काद्विहितत्वाभावात् तत्स्थानिकस्यातो नेत्त्वविकल्पः। किन्तु 'प्रत्ययस्थात्' इति नित्यमित्त्वमित्यर्थः। अनुपसर्जनादित्यधिकारस्य

अधिकारोऽयम् । 'यूनस्तिः' (सू ५३१) इत्यभिव्याप्य । अयमेव स्त्री-प्रत्ययेषु तदन्तविधिं ज्ञापयति ।

४७०। टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः। (४-१-१५)

अनुपसर्जनं यट्टिदादि तदन्तं यददन्तं प्रातिपदिकं ततः स्त्रियां ङीप् स्यात् । कुरुचरी । नदट्—नदी । उपसर्जनत्वान्नेह । बहुकुरुचरा । वक्ष्यमाणेत्यत्र

उत्तरावधिमाह । **यूनस्तिरित्यभिव्याप्येति** ॥ 'यूनस्तिः' इत्यत्राप्ययमधिकारः, नतु ततः प्रागित्यर्थः । अत्र च व्याख्यानमेव शरणम् । अत्र यद्वक्तव्यन्तत् 'यूनस्तिः' इत्यत्र वक्ष्यते । ननु बहवः कुरुचराः यस्यां सा बहुकुरुचरा, नदमतिक्रान्ता अतिनदा, इत्यादिषु उपसर्जनेषु कुरुचर-नदादिशब्देभ्यः 'टिड्ढाणञ्' इत्यादिना विधीयमानानां ङीबादिप्रत्ययानां प्रसक्तिरेव नास्ति । समासप्रत्ययविधौ तदन्तविधिप्रतिषेधात् । तस्मादनुपसर्जनाधिकारो व्यर्थ इत्यत आह । **अय-मेवेति** ॥ अनुपसर्जनादित्यधिकार एवायं स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयतीत्यर्थः । एतच्च भाष्ये स्पष्टम् । तत्फलन्तु 'वनो र च' इत्यत्र वन्नन्तान्तलाभ इत्यादि ज्ञेयम् । ननु स्त्रीप्रत्ययेषु तदन्तविध्यभावेऽपि नद इवाचरति नदा स्त्री इत्यादिषु आचारक्विबन्तप्रकृतिककर्तृक्विबन्तेषु ङीबादिनिवृत्तये अनुपसर्जनाधिकारस्यावश्यकत्वात् कथन्तस्य स्त्रीप्रत्ययविधिषु तदन्तविधिज्ञाप-कतेति चेन्न । अनुपसर्जनाधिकारस्य स्त्रीप्रत्ययविधिषु तदन्तविधिज्ञापनार्थत्वपरभाष्यप्रामाण्येन स्त्रियामाचारक्विबन्तप्रकृतिककर्तृक्विबन्तानामनभिधानोन्नयनादित्यलम् । **टिड्ढाणञ्** ॥ टित्, ढ, अण्, अञ्, द्वयसच्, दघ्नच्, मात्रच्, तयप्, ठक्, ठञ्, कञ्, क्वरप्, एषां द्वा-दशानां समाहारद्वन्द्वात् पञ्चम्येकवचनम् । ढादयः एकादश प्रत्ययाः । प्रत्ययग्रहणपरिभाषया तदन्तग्रहणम् । टित्तु प्रत्ययः अप्रत्ययश्च । टिदादिभिश्च प्रातिपदिकादित्यधिकृतं विशेष्यते, विशेषणत्वात् तदन्तविधिः । ततश्च टिदन्तात् ढाणादिप्रत्ययान्ताच्च प्रातिपदिकादिति लभ्यते । 'अजाद्यतष्टाप्' इत्यस्मादतः इत्यनुवृत्तम्, तेनापि प्रातिपदिकं विशेष्यते । तदन्त-विधिः, 'अनुपसर्जनात्' इत्येतत् श्रुतेषु टिदादिष्वेवान्वेति, नतु तदन्तेषु । स्त्रियामित्यधि-कृतम् । तदाह । **अनुपसर्जनं यट्टिदादीत्यादिना** ॥ **तदन्तमिति** ॥ टिदन्तं ढादि-प्रत्ययान्तान्तञ्चेत्यर्थः । टित् त्रिविधः । प्रत्ययः, प्रातिपदिकम्, धातुश्च । तत्राद्यमुदाहरति । **कुरुचरीति** ॥ कुरुषु चरतीति अधिकरणे उपपदे 'चरेष्टः' इति कर्तरि टः । टकार इत्, उपपदसमासः । नच प्रत्ययस्यैवात्र टित्त्वात् प्रत्ययग्रहणपरिभाषया चरेत्येव टिदन्तम्, नतु कुरुचरशब्दः, तदादिनियमादिति वाच्यम् । नदट् देवट् इत्यादेरप्रत्ययस्यापि टितस्सत्त्वेन तत्र प्रत्ययग्रहणपरिभाषायाः अप्रवृत्तौ 'येन विधिः' इति टिदन्तत्वस्य कुरुचरशब्दे सत्त्वात् । अथ द्वितीयं टितमुदाहरति । **नदडिति** ॥ पचादिगणे पठितं प्रातिपदिकमेतत् । तृतीयन्तु कृदन्ते स्तनन्धयीत्युदाहरिष्यते । अनुपसर्जनत्वविशेषणस्य प्रयोजनमाह । **उपसर्जनत्वा-न्नेहेति** ॥ **बहुकुरुचरेति** ॥ बहवः कुरुचराः यस्यामिति विग्रहः । बहुव्रीहिरयमन्यपदार्थ-प्रधानः । ततश्च टितः टप्रत्ययस्य उपसर्जनत्वान्न ङीप् । अनुपसर्जनत्वस्य प्रातिपदिकविशेषणत्वे

टित्त्वाद्ङीप्प्राप्तः। यासुटो ङित्त्वेन 'लाश्रयमनुबन्धकार्यं नादेशानाम्' (प ७०) इति ज्ञापनान्न भवति। श्नः शानचः शित्त्वेन क्वचिदनु-

---

तु ङीबत्र दुर्वारः। अत एव च आपिशलिना प्रोक्तमधीते आपिशला ब्राह्मणीत्यत्रापि न ङीप्। तत्र हि आपिशालिना प्रोक्तमित्यर्थे 'तेन प्रोक्तम्' इत्यणि आपिशलशब्दः। आपिशलमधीते इत्यर्थे 'तदधीते तद्वेद' इत्यणि 'प्रोक्ताल्लुक्' इति लुप्ते स्त्रियामदन्तत्वाट्टापि आपिशलेति रूपम्। अनुपसर्जनादित्यस्य प्रातिपदिकविशेषणत्वे प्रोक्ताणन्तस्यानुपसर्जनत्वात् स्त्रियां वर्तमानत्वाच्च अणन्तत्वनिबन्धनो ङीप् दुर्वारस्स्यात्। तस्य च श्रुतटिदाद्यन्वये तु प्रोक्ताणः उपसर्जनत्वान्न दोषः। अध्येत्रणं तु लुप्तः। अणो योऽकारः इति व्याख्यानेन वर्णाश्रयतया प्रत्ययलक्षणाभावात्। नच 'स्त्रियाम्' इत्यस्य श्रुतटिदादिविशेषणत्वात् प्रोक्ताणश्च स्त्रियामवर्तनादेव न ङीपः प्रसक्तिरिति वाच्यम्। ज्ञापिते तदन्तविधौ प्राधान्यात् 'स्त्रियाम्' इत्यस्य ङीप्प्रकृतिविशेणताया एव उचितत्वात्। अन्यथा अनुपसर्जनाधिकारवैयर्थ्याच्च अत एव धीवानमतिक्रान्ता अतिधीवरीत्यादि सिद्धमित्यलम्। स्यादेतत्। 'वच परिभाषणे'। अस्मात् कर्मणि लृट् 'लृटस्सद्वा' इति तस्य शानजादेशः 'स्यतासी लृलुटोः' इति स्यः, कुत्वषत्वे, आने मुक्, णत्वम्, टाप्, वक्ष्यमाणेति रूपम्। अत्र लृडादेशस्य स्थानिवत्त्वेन टित्त्वाद्गित्त्वाच्च। 'टिड्ढाणञ्' इति 'उगितश्च' इति च ङीप् प्राप्नोति। नच स्थानिनो लृटष्टकारस्य ऋकारस्य च इत्वाश्रयणात् ङीब्विधेरल्विधित्वादनल्विधाविति निषेधः शङ्क्यः। 'घुमास्थागापाजहातिसां हलि' इति किङिति विहितस्य ईत्त्वस्य 'न ल्यपि' इति निषेधेन लिङ्गेन अनुबन्धकार्ये अनल्विधाविति निषेधाभावज्ञापनात्। अनुबन्धकार्येऽप्यनल्विधाविति निषेधप्रवृत्तौ हि क्त्वादेशस्य ल्यपः कित्त्वाप्रसक्तेस्तस्मिन् परतः ईत्त्वस्याप्रसक्त्या तन्निषेधवैयर्थ्यं स्पष्टमेव। अतो वक्ष्यमाणेत्यत्र स्थानिवत्त्वेन शानचष्टित्त्वाद्गित्त्वाच्च ङीप् दुर्वार इत्याशङ्क्य परिहरति। **वक्ष्यमाणेत्यादिना**॥ वक्ष्यमाणेत्यत्र टित्त्वाद्गित्त्वाच्च ङीप् प्राप्तो न भवतीत्यन्वयः। कुतो नेत्यत आह। **यासुट इत्यादि ज्ञापनादित्यन्तम्**॥ 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति लिङादेशानां तिप्, तस्, झि, इत्यादिपरस्मैपदानां यासुडागमस्य ङित्त्वं विहितम्। 'यदागमाः' इति न्यायेन यासुडागमो लिङादेशावयवः। ततश्च स्थानिवत्त्वेनैव ङित्त्वसिद्धेर्यासुट-स्तद्विधिवैयर्थ्यं स्यात्। अतः 'लाश्रयमनुबन्धकार्यमादेशानान्न' इति विज्ञायते। ततश्च वक्ष्यमाणेत्यत्र लृडादेशस्य शानचः टिदुगित्कार्ये ङीपि कर्तव्ये स्थानिवत्त्वाभावान्न ङीबित्यर्थः। ननु 'लाश्रयमनुबन्धकार्यमादेशानान्न' इति ज्ञापनेऽपि ब्रूतादित्यत्र 'ब्रुव ईट्' इति पिति तिपि परतो विधीयमान ईडागमो दुर्वारः। तस्य तिबाश्रयत्वेऽपि लाश्रयत्वाभावेन तस्मिन् कर्तव्ये तातङः स्थानिवत्त्वेन पित्त्वस्य निर्बाधत्वादित्यस्वरसादाह। **श्नः शानचः इति**॥ श्ना इत्यस्मात् षष्ठ्येकवचने आल्लोपे श्न इति रूपम्। 'आतो धातोः' इत्यत्र आत इति योगविभागमाश्रित्य अधातोरपि क्वचिदाल्लोपाभ्युपगमात्। 'हलश्श्नश्शानज्झौ' इति श्नाप्रत्ययस्य शानजादेशो विधीयते। तत्र स्थानिवत्त्वेनैव सिद्धत्वात् शानचश्शित्त्वं व्यर्थम्। नचानल्विधाविति

बन्धकार्येऽप्यनल्विधाविति निषेधज्ञापनाद्वा । सौपर्णेयी । ऐन्द्री । औत्सी । ऊरुद्वयसी–ऊरुदघ्नी–ऊरुमात्री । पञ्चतयी । आक्षिकी । लावणिकी । यादृशी । इत्वरी । 'ताच्छीलिके णेऽपि' (प ६८) । चौरी । 'नञ्स्नञीकक्ख्युं-

---

निषेधश्शङ्क्यः । 'न ल्यपि' इति लिङ्गेन अनुबन्धकार्ये अनल्विधाविति निषेधाभावस्यानुपदमेवोक्तत्वात् । एवञ्च क्वचिदनुबन्धकार्येऽपि अनल्विधाविति निषेधप्रवृत्तिर्विज्ञायते । तथाच वक्ष्यमाणेल्यत्र टिदुगित्कार्ये 'अनल्विधौ' इति निषेधप्रवृत्त्या स्थानिवत्त्वाभावेन टित्त्वोगित्त्वयोरभावात् न ङीबित्यर्थः । वस्तुतस्तु 'लाश्रयमनुबन्धकार्यन्नादेशानाम्' इत्यत्र यासुटो ङित्त्वं न ज्ञापकम् । तस्य तिप्सिब्मिबर्थत्वात् । नहि लिङादेशत्वेऽपि तिप्सिब्मिपां ङित्त्वं स्थानिवत्त्वलभ्यम् । 'हलः श्नश्शानज्झौ' इति सूत्रे भाष्ये 'ङिच्च पिन्न, पिच्च ङिन्न' इति प्रपञ्चितत्वात् । तथा श्नश्शानचश्शित्त्वमपि न लिङ्गम् । तत्र शित्त्वस्य भाष्ये प्रत्याख्यातत्वात् । प्रत्युत शित्त्वस्य ज्ञापकत्वे 'सर्ह्यपिच्च' इति हेरपित्त्वस्य तातङो ङित्त्वस्य च वैयर्थ्यमिति भाष्ये दूषणाभिधानाच्च । तस्मात् वक्ष्यमाणेल्यत्र ङीबेव युक्तः, टापू त्वसाधुरेव । अजादित्वाट्टाबिति वा कथञ्चित् समाधेयमित्यास्तान्तावत् । **सौपर्णेयीति** ॥ सुपर्ण्याः अपत्यं स्त्री इत्यर्थे 'स्त्रीभ्यो ढक्' इति ढकि 'आयनेयू' इत्येयादेशः । 'यस्येति च' इतीकारलोपः, 'किति च' इत्यादिवृद्धिः । सौपर्णेयशब्दात् ङीप्, 'यस्येति च' इत्यकारलोपः, सौपर्णेयीति रूपम् । नच 'निरनुबन्धकग्रहणे न सानुबन्धकस्य' इति परिभाषया 'शिलाया ढः', 'ढश्छन्दसि' इत्यनयोरेव ग्रहणमिति वाच्यम् । तयोः स्त्रियामप्रवृत्तेरगत्या सानुबन्धकस्य ढस्य ग्रहणादिति भाष्ये स्पष्टम् । **ऐन्द्रीति** ॥ इन्द्रो देवता अस्या आमिक्षाया इति विग्रहः, 'सास्य देवता' इत्यणि, 'यस्येति च' इत्यकारलोपः, आदिवृद्धिः, ऐन्द्रशब्दात् ङीप्, 'यस्येति च' इत्यकारलोपः । इन्द्रस्येयमिति वा विग्रहः, 'तस्येदम्' इत्यण् । **औत्सीति** ॥ "उत्सः प्रस्रवणं वारि" इत्यमरः । ऋषिविशेषो वा उत्सः । उत्सस्येयमिति विग्रहः । 'उत्सादिभ्योऽञ्' 'यस्येति च' ङीप् । उत्सस्यापत्यं स्त्री औत्सी इति तु नोदाहरणम् । जातेरित्यनुवृत्तौ 'शार्ङ्गरवाद्यञो ङीन्' इत्येव सिद्धेः । "गोत्रञ्च चरणैस्सह" इत्यपत्यप्रत्ययान्तस्य जातित्वादित्यलम् । **ऊरुद्वयसी–ऊरुदघ्नी–ऊरुमात्रीति** ॥ ऊरू प्रमाणमस्या इति विग्रहः । 'प्रमाणे द्वयसच्दघ्नञ्मात्रचः' ङीप् । **पञ्चतयीति** ॥ पञ्च अवयवा यस्या इति विग्रहः । 'सङ्ख्याया अवयवे तयप्' ङीप् । **आक्षिकीति** ॥ अक्षैर्दीव्यतीति विग्रहः । 'तेन दीव्यति खनति जयति जितम्' इति ठक्, आदिवृद्धिः, 'ठस्येकः', 'यस्येति च' इत्यकारलोपः । आक्षिकशब्दात् ङीप्, 'यस्येति च' । **लावणिकीति** ॥ लवणं पण्यमस्या इति विग्रहः । 'लवणाट्ठञ्', 'ठस्येकः' आदिवृद्धिः, 'यस्येति च', लावणिकशब्दात् ङीप्, 'यस्येति च' ठेत्येव सिद्धे ठक्ठञोः पृथग्ग्रहणन्तु ठनो ञिठस्य च व्यावृत्त्यर्थम् । दण्डोऽस्त्यस्याः दण्डिका । 'अत इनिठनौ' काश्यां भवा काशिका 'काश्यादिभ्यष्ठञ्ञिठौ' इति ञिठः । **यादृशीति** ॥ 'त्यदादिषु दृशः' इति यच्छब्दे उपपदे कञ्, 'आ सर्वनाम्नः' इति यच्छब्दस्याकारः, ङीप्, 'यस्येति च' । **इत्वरीति** ॥ 'इण् गतौ' 'इण्नशिजिसर्तिभ्यः क्वरप्' 'ह्रस्वस्य

स्तरुणतलुनानामुपसङ्ख्यानम्' (वा २४२५)। स्त्रैणी। पौंस्नी। शाक्तीकी। आढ्यङ्करणी। तरुणी--तलुनी।

४७१। यञश्च। (४-१-१६)

यञन्तात्स्त्रियां ङीप्स्यात्। अकारलोपे कृते।

पिति कृति' इति तुक्, इत्वरशब्दात् ङीप्, 'यस्येति च', 'स्थेशभास' इति वरचो व्यावृत्तये ककारानुबन्धग्रहणम्। "विन्यस्तमङ्गळमहौषधिरीश्वरायाः" इति भारविः। "सैनमीश्वराप्रदह" इति वेदे क्वरपि, अन्यतरानुबन्धेनैव वरचो व्यावृत्तिसिद्धेः अनुबन्धद्वयोपादानं स्पष्टार्थम्। ईश्वरी इति तु ईश्वरशब्दात् ईश्वरस्य स्त्रीति पुंयोगे ङीष्। अथवा 'अश्नोतेराशुकर्मणि वरट् च' इति वरडन्तात् टित्त्वात् ङीप्। यद्वा 'आतो मनिन्क्वनिब्वनिपश्च' 'अन्येभ्योऽपि दृश्यते' इति क्वनिपि वनिपि च 'वनो र च' इति ङीब्रौ। **ताच्छीलिके णेऽपीति** ॥ तच्छीले भवस्ताच्छीलिकः। तच्छीलार्थक इति यावत्। तस्मिन् णप्रत्यये सति तदन्तादपि ङीप् भवतीत्यर्थः। ज्ञापकसिद्धमेतत्। तथाहि। शीलमित्यनुवृत्तौ 'छत्रादिभ्यो णः' इति विहिते णप्रत्यये अण्कार्ये भवति। 'कार्मस्ताच्छील्ये' इति ज्ञापकात्। कर्म शीलमस्येति विग्रहे छत्रादित्वात् णप्रत्यये 'नस्तद्धिते' इति टिलोपे कार्म इति भवति। नतु 'अन्' इति सूत्रेण अण्यन् प्रकृत्या स्यादित्यर्थकेन प्रकृतिभाव इति तदर्थः। अत्र अणि विहितस्य प्रकृतिभावस्य णप्रत्यये परतः प्रतिषेधात् ताच्छीलिके णप्रत्यये अण्कार्यं विज्ञायते। अतस्ताच्छीलिकणप्रत्ययान्तादण्कार्ये ङीप् भवतीति भावः। **चौरीति** ॥ चुरा शीलमस्या इति विग्रहः। छत्रादित्वात् णः, आदिवृद्धिः, 'यस्येति च' चौरशब्दात् ङीपि, 'यस्येति च'। **नञ्स्नञ्** ॥ नञ्, स्नञ्, ईकक्, ख्युन्, तरुण, तलुन, एतेषामपि ङीब्विधौ वचनं कर्तव्यमित्यर्थः। नञादयश्चत्वारः प्रत्ययाः। अतस्तदन्तविधिः। **स्त्रैणी, पौंस्नीति** ॥ 'स्त्रीपुंसाभ्याम्' इति नञ्स्नञौ। तत्र स्त्रीशब्दान्नञि, आदिवृद्धिः, णत्वम्, ङीप्, 'यस्येति च' पुंस्शब्दात् स्नञि, आदिवृद्धिः, ङीप्, 'यस्येति च'। **शाक्तीकीति** ॥ शक्तिः आयुधविशेषः प्रहरणम् अस्या इति विग्रहः। 'शक्तियष्ट्योरीकक्', आदिवृद्धिः, ङीप्, यस्येति च। **आढ्यङ्करणीति** ॥ अनाढ्यः आढ्यः क्रियते अनयेति विग्रहः। 'आढ्यसुभग' इत्यादिना ख्युन्। 'युवोः' इत्यनादेशः। 'अरुर्द्विषत्' इति मुम्। णत्वं, ङीप्, 'यस्येति च'। **तरुणी-तलुनीति** ॥ यद्यप्यनयोः 'वयसि प्रथमे' इत्येव ङीप् सिद्धः। तथापि गौरादिषु पाठात् ङीषि प्राप्ते इदं वचनम्। गौरादिपाठात् ङीषि स्वरे विशेष इति भावः। **यञश्च** ॥ यञ इति प्रत्ययत्वात्तदन्तग्रहणम्। 'ऋन्नेभ्यः' इत्यतो ङीबित्यनुवर्तते। स्त्रियामित्यधिकृतम्। तदाह। **यञन्तादिति** ॥ यद्यपि 'टिड्ढाणञ्' इति पूर्वसूत्र एव यञ्ग्रहणं कर्तुमुचितम्। तथापि 'प्राचां ष्फ तद्धितः' इत्युत्तरसूत्रे, यञ एवानुवृत्तये पृथक्सूत्रमिति भावः। **अकारलोपे कृते इति** ॥ गार्गीत्युदाहरणं वक्ष्यति। गर्गस्यापत्यं स्त्री इत्यर्थे 'गर्गादिभ्यो यञ्' इति यञ्, आदिवृद्धिः, 'यस्येति च' इति गकारादकारस्य लोपः

४७२ । हलस्तद्धितस्य । (६-४-१५०)

हलः परस्य तद्धितयकारस्योपधाभूतस्य लोपः स्यादीति परे । गार्गी । 'अनपत्याधिकारस्थान्न ङीप्' (वा २४२६) । द्वीपे भवा द्वैप्या । अधिकारग्रहणान्नेह । देवस्यापत्यं दैव्या । 'देवाद्यञञौ' इति हि यञ्प्राग्दीव्यतीयः, न त्वपत्याधिकारपठितः ।

४७३ । प्राचां ष्फ तद्धितः । (४-१-१७)

यञन्तात्ष्फो वा स्यात्स्त्रियाम्, स च तद्धितः ।

४७४ । षः प्रत्ययस्य । (१-३-६)

गार्ग्यशब्दात् ङीपि 'हलस्तद्धितस्य, इति यकारलोपात् परत्वात् 'यस्येति च' इति यकारादकारस्य लोपे कृते सति प्रक्रिया वक्ष्यत इत्यर्थः । **हलस्तद्धितस्य** ॥ हल इति दिग्योगे पञ्चमी । परस्येत्यध्याहार्यम् । 'यस्येति च' इति सूत्रात् ईतीत्यनुवर्तते । 'सूर्यतिष्यागस्त्य' इत्यतः उपधाया इति, य इति षष्ठ्यन्तं च, 'ढे लोपोऽकद्राः' इत्यतः लोप इति च । तदाह । **हलः परस्येत्यादिना** ॥ अकारलोपात् प्रागेव यकारलोपो न सम्भवति । अकारे सति यकारस्य ईकारपरकत्वाभावात् । ननु कृते अकारलोपे कथं यकारस्य उपधात्वम् । नच अल्लोपस्य स्थानिवत्त्वं शङ्क्यम् । यलोपविधौ तन्निषेधादिति चेन्न । यलोपे कर्तव्ये अल्लोपस्याभीयत्वेनासिद्धतया यकारस्य उपधात्वसम्भवात् । उपधाग्रहणाननुवृत्तौ तु अल्लोपस्यासिद्धत्वाद्यकारस्य ईकारपरकत्वाभावात् लोपो न स्यात् । यदा तु सूत्रारम्भसामर्थ्यादेवाकारव्यवधानेऽपि यकारस्य लोपस्सम्भवतीत्युच्यते, तदा उपधाग्रहणानुवृत्तिर्मास्तु । **गार्गीति** ॥ इह "गोत्रञ्च चरणैस्सह" इति जातित्वेऽपि 'जातेरस्त्रीविषयात्' इति न ङीष् । योपधत्वात् । **अनपत्याधिकारेति** ॥ 'तस्यापत्यम्' इत्यपत्याधिकारविहितभिन्नयञन्तान्न ङीबिति वक्तव्यमित्यर्थः । **द्वैप्येति** ॥ द्वीपे भवेति विग्रहे 'द्वीपादनुसमुद्रं यञ्' इति यञ् । आदिवृद्धिः । 'यस्येति च' टापि सवर्णदीर्घः । अस्य यञः अपत्याधिकारविहितत्वाभावान्न ङीबिति भावः । नन्वनपत्यान्न ङीबित्येतावतैव द्वैप्येत्यत्रातिप्रसङ्गनिरासात् अधिकारग्रहणं किमर्थमित्यत आह । **अधिकारग्रहणादिति** ॥ इह नेति शेषः । देवस्यापत्यमिति विग्रहे 'देवाद्यञञौ' इति यञ्, आदिवृद्धिः 'यस्येति च' दैव्यशब्दात् टाप्, सवर्णदीर्घः, दैव्येति रूपम् । अनपत्यान्न ङीबित्युक्तेः अस्य यञः आपत्यत्वात् ङीन्निषेधो न स्यात् । अधिकारग्रहणे तु अत्रापि निषेधस्स्यादेव । अस्य यञः आपत्यत्वेऽपि 'तस्यापत्यम्' इत्यधिकारबहिर्भूतत्वात् । तदेतदुपपादयति । **देवादिति** ॥ 'देवाद्यञञौ' इति तु 'तस्यापत्यम्' इत्यधिकारात् प्रागेव 'प्राग्दीव्यतोऽण्' इत्यधिकारपठितः सन्नापत्यादिविकारान्तार्थेषु साधारणत्वात् अपत्यार्थकोऽपि भवति । न त्वपत्याधिकारपठित इत्यर्थः । यद्यपि 'यञश्च' इति सूत्रे 'आपत्यग्रहणं कर्तव्यम्' इत्येव भाष्ये दृश्यते । तथापि तत्र आपत्यपदम् अपत्याधिकारविहितपरामिति मनोरमायां शब्दरत्ने च प्रपञ्चितम् । **प्राचां ष्फ**

प्रत्ययस्यादिः षः इत्स्यात्।

४७५। आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्। (७-१-२)

प्रत्ययादिभूतानां फादीनां क्रमादायन्नादय आदेशाः स्युः। तद्धितान्तत्वात्प्रातिपदिकत्वम्। षित्त्वसामर्थ्यात्ष्फेणोक्तेऽपि स्त्रीत्वे 'षिद्गौरा—' (सू ४९८) इति वक्ष्यमाणो ङीष्। गार्ग्यायणी।

४७६। सर्वत्र लोहितादिकतन्तेभ्यः। (४-१-१८)

लोहितादिभ्यः कतशब्दान्तेभ्यो यञन्तेभ्यो नित्यं ष्फः स्यात्। लौहित्यायनी। कात्यायनी।

तद्धितः ॥ यञ इत्यनुवर्तते, स्त्रियामित्यधिकृतम्। ष्फेति लुप्तप्रथमाकम्। तदाह। **यञन्तादिति** ॥ **षः प्रत्ययस्य** ॥ 'आदिर्ञिटुडवः' इत्यतः आदिरित्यनुवर्तते। 'उपदेशेऽजनुनासिक इत्' इत्यतः इदिति च। तदाह। **प्रत्ययस्यादिरिति** ॥ षकारस्य इत्संज्ञायां तस्य लोपः। **आयनेयीनीयियः** ॥ आयन्, एय्, ईन्, ईय्, इय्, एषां द्वन्द्वात् प्रथमाबहुवचनम्। फ, ढ, ख, छ, घ, एषां द्वन्द्वात् षष्ठीबहुवचनम्। फादिष्वकार उच्चारणार्थः। यथासङ्ख्यपरिभाषया क्रमेणान्वयः। तदाह। **प्रत्ययादिभूतानामित्यादिना** ॥ आयनो नस्य इत्त्वे नित्स्वरोपयोगेऽपि नेत्त्वम्। फिनो नित्करणात् ज्ञापकात्। तत्साहचर्यादीनोऽपि नस्य नेत्त्वम्। एयादिषु च यस्य नेत्त्वम्। प्रयोजनाभावात्। ननु ष्फस्य तद्धितसंज्ञा किमर्थेत्यत आह। **तद्धितान्तत्वादिति** ॥ ष्फान्तस्य प्रातिपदिकत्वे प्रयोजनमाह। **षिद्गौरेति वक्ष्यमाणो ङीषिति** ॥ 'षिद्गौरादिभ्यश्च' इत्यत्र प्रातिपदिकादित्यनुवृत्तम्, ततश्च ष्फान्तस्य प्रातिपदिकत्वाभावे ङीष् न स्यादिति भावः। ननु ष्फप्रत्ययेनैव स्त्रीत्वस्य द्योतितत्वात् 'उक्तार्थानामप्रयोगः' इति न्यायादत्र कथं ङीषित्यत आह। **षित्त्वसामर्थ्यादिति** ॥ ष्फेण द्योतितेऽपि स्त्रीत्वे षित्करणसामर्थ्यात् ङीषित्यर्थः। **गार्ग्यायणीति** ॥ गर्गस्यापत्यं स्त्री इति विग्रहः। गर्गादियञन्तात् गार्ग्यशब्दात् ष्फः, षकारः इत्, फकारस्य आयन्नादेशः, 'यस्येति च' इति यकारादकारस्य लोपः, 'हलन्तद्धितस्य' इति तु न भवति। ईतीत्यनुवृत्तेः। 'आपत्यस्य च' इत्यपि न। अनातीति निषेधात्। षित्त्वात् ङीष्, णत्वमिति भावः। **सर्वत्र** ॥ लोहितादिः गर्गाद्यन्तर्गणः। लोहितः आदिः येषामिति, कतः अन्तो येषामिति च विग्रहः। कतन्तेत्यत्र शकंध्वादित्वात् पररूपम्। यञ इत्यनुवृत्तं बहुवचनान्ततया विपरिणम्यते। 'प्राचां ष्फ तद्धितः' इति सूत्रं प्राचांवर्जमनुवर्तते। सर्वत्रेति सर्वेषु मतेष्वित्यर्थः। नित्यमिति यावत्। तदाह। **लोहितादिभ्य इत्यादिना** ॥ **लौहित्यायनीति** ॥ लोहितस्यापत्यं स्त्री इति विग्रहः। लोहितशब्दात् गर्गादियञन्तात् ष्फः, ष इत्, फकारस्यायन् 'यस्येति च' इति यकारादकारस्य लोपः, तद्धित इत्यप्यनुवृत्तेः।

४७७ । कौरव्यमाण्डूकाभ्यां च । (४-१-१९)

आभ्यां ष्फः स्यात् । क्रमेण टाब्ङीषोरपवादः । 'कुर्वादिभ्यो ण्यः' (सू ११७५) । कौरव्यायणी । 'ढक्च मण्डूकात्' (सू ११२२) इत्यण् । माण्डूकायनी । 'आसुरेरुपसङ्ख्यानम्' (वा २४३३) आसुरायणी ।

४७८ । वयसि प्रथमे । (४-१-२०)

प्रथमवयोवाचिनोऽदन्तात्स्त्रियां ङीप्स्यात् । कुमारी । 'वयस्यचरम इति वाच्यम्' (वा २४३५) । वधूटी । चिरण्टी । वधूटचिरण्टशब्दौ

षित्त्वात् ङीषिति भावः । **कात्यायनीति** ॥ पूर्ववत् प्रक्रिया बोध्या । **कौरव्यमाण्डूकाभ्याञ्च** ॥ **आभ्यामिति** ॥ कौरव्यमाण्डूकाभ्यामित्यर्थः । **क्रमेणेति** ॥ कौरव्यशब्दात् टापः माण्डूकशब्दात् ङीषश्चापवाद इत्यर्थः । कौरव्यशब्दस्य यञन्तत्वात् माण्डूकशब्दस्य अणन्तत्वाच्च । ङीपोऽपवाद इत्युचितमिति भ्रमं वारयितुमाह । **कुर्वादिभ्य इत्यादिना** ॥ **कौरव्यायणीति** ॥ कुरोरपत्यं स्त्री इति विग्रहः । 'कुर्वादिभ्यो ण्यः' इति ण्यः । णकार इत्, 'ओर्गुणः' आदिवृद्धिः, 'गोत्रञ्च चरणैस्सह' इति जातित्वेऽपि योपधत्वात् 'जातेरस्त्रीविषयात्' इति ङीषभावे टाप् प्राप्तः । तं बाधित्वा ष्फः, ष इत्, आयन् 'यस्येति च' इत्यकारलोपः । षित्त्वात् ङीष् । 'यस्येति च' इति भावः । **माण्डूकायनीति** ॥ मण्डूको नाम ऋषिः तस्यापत्यं स्त्री इति विग्रहः 'ढक् च मण्डूकात्' इत्यण्, आदिवृद्धिः 'यस्येति च' 'गोत्रञ्च चरणैस्सह' इति जातित्वात् ङीष् प्राप्तः, तं बाधित्वा ष्फः, ष इत्, आयन्, 'यस्येति च' षित्त्वात् ङीष्, 'यस्येति च' इति भावः । टाब्ङीषोरपवाद इति पाठस्तु प्रामादिकः । **आसुरेरुपसङ्ख्यानमिति** ॥ ष्फस्येति शेषः । **आसुरायणीति** ॥ असुरस्यापत्यं स्त्री इति विग्रहः 'अत इञ्' आदिवृद्धिः । ष्फः, ष इत्, आयन् 'यस्येति च' षित्त्वात् ङीष् 'यस्येति च' णत्वमिति भावः । **वयसि प्रथमे** ॥ प्राणिनां कालकृतावस्थाविशेषो वयः । तच्च कौमारं यौवनं वार्द्धकञ्चेति त्रिधा । "पिता रक्षति कौमारे भर्ता रक्षति यौवने । पुत्रस्तु स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति ॥" इति दर्शनात् । चतुर्विधं वय इत्यन्ये । "आद्ये वयसि नाधीतं द्वितीये नार्जितं धनम् । तृतीये न तपस्तप्तं चतुर्थे किं करिष्यति ॥" इति दर्शनात् । प्रथमे वयसीत्यनन्तरं विद्यमानादिति विशेषः । 'अजाद्यतष्टाप्' इत्यतः अत इत्यनुवृत्तेन प्रातिपदिकादित्यधिकृतं विशेष्यते । तदन्तविधिः । स्त्रियामित्यधिकृतम् । 'ऋन्नेभ्यः' इत्यतो ङीबित्यनुवर्तते । तदाह । **प्रथमवयोवाचिन इत्यादिना** ॥ **कुमारीति** ॥ अप्रादुर्भूतयौवनेत्यर्थः । वृद्धा कौमारीति तु वृद्धायामेव कुमारीत्वारोपात् बोध्यः । **वयस्यचरम इति** ॥ चरमम् अन्त्यं वयः तद्भिन्नम् अचरमं, प्रथमे इत्यपनीय अचरमे इति वक्तव्यमित्यर्थः । किमर्थमित्यत आह । **वधूटी, चिरण्टीति** ॥ अनयोर्द्वितीयवयोवाचित्वादप्राप्तिरिति भावः । अनयोर्द्वितीयवयसि अप्रसिद्धत्वादाह । **वधूटचिरण्टशब्दौ यौवनवाचिनाविति** ॥ भाष्यप्रामाण्यादिति

यौवनवाचिनौ। 'अतः' किम्, शिशुः। 'कन्याया न'। 'कन्यायाः कनीन च' (सू १११९) इति निर्देशात्।

४७९। द्विगोः। (४-१-२१)

अदन्ताद्विगोर्ङीप्स्यात्। त्रिलोकी। अजादित्वात्त्रिफला। त्र्यनीका सेना।

४८०। अपरिमाणबिस्ताचितकम्बळ्येभ्यो न तद्धितलुकि। (४-१-२२)

अपरिमाणान्ताद्विस्ताद्यन्ताच्च द्विगोर्ङीन्न स्यात्तद्धितलुकि सति। पञ्चभिरश्वैः क्रीता पञ्चाश्वा। आर्हीयष्ठक्। 'अध्यर्ध—' (सू १६९३) इति

भावः। **शिशुरिति** ॥ शिशुशब्दस्य प्रथमवयोवाचित्वेऽपि अदन्तत्वाभावात् न ङीबिति भावः। **कन्याया नेति** ॥ ङीबिति शेषः। कुत इत्यत आह। **कन्यायाः कनीन चेति** ॥ नच द्विवर्षा स्त्री इत्यादावपि ङीप् शङ्क्यः। शालादावपि प्रयोगसत्त्वेन द्विवर्षेत्यादेः प्रथमवयोवाचित्वाभावात्। पदान्तरसमभिव्याहारप्रकरणाद्यनपेक्ष्य यः वयोवाची तस्यैव विवक्षितत्वात्। **द्विगोः** ॥ स्त्रियामिति अत इति ङीबिति चानुवर्तते। तदाह। **अदन्तादिति** ॥ **त्रिलोकीति** ॥ त्रयाणां लोकानां समाहार इति विग्रहः। 'तद्धितार्थोत्तरपदसमाहारे च' इति द्विगुसमासः। 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः' इति स्त्रीत्वम्। त्रिलोकशब्दात् टाबपवादो ङीप्। 'यस्येति च' इति भावः। ननु त्रिफला त्र्यनीका इत्यत्रापि ङीप् प्राप्नोतीत्यत आह। **अजादित्वात् त्रिफला, त्र्यनीकेति** ॥ भवतीति शेषः। त्रयाणां फलानां समाहार इति, त्रयाणामनीकानामिति च विग्रहे 'तद्धितार्थ' इति द्विगुः। 'अकारान्तोत्तरपदः' इति स्त्रीत्वम्, 'द्विगोः' इति ङीपं बाधित्वा अजादित्वाट्टाबिति भावः। अनीकशब्दः ऐन्द्रवायवाग्रत्वे शुक्राग्रत्वे आग्रयणाग्रत्वे च वर्तते इति त्र्यनीकाधिकरणे मीमांसकाः। **अपरिमाण** ॥ 'द्विगोः' इति ङीबिति चानुवर्तते। प्रातिपदिकादित्यधिकृतमपरिमाणादिभिर्विशेष्यते। तदन्तविधिः। तदाह। **अपरिमाणान्तादित्यादिना** ॥ अपरिमाणान्तमुदाहरति। **पञ्चभिरिति** ॥ तद्धितलुकं दर्शयति। **आर्हीयष्ठक्। अध्यर्धेति लुगिति** ॥ पञ्चभिरश्वैः क्रीतेति विग्रहे 'तद्धितार्थ' इति द्विगुः। 'आर्हादगोपुच्छसङ्ख्यापरिमाणाट्ठक्' इत्यधिकारे 'तेन क्रीतम्' इति ठक्। 'अध्यर्धपूर्वाद्विगोर्लुगसंज्ञायाम्' इति तस्य लुक्। अत्र 'द्विगोः' इति ङीप् न भवति, अपरिमाणान्तद्विगुत्वात्। नन्वत्र 'द्विगोः' इति प्राप्तङीन्निषेधेऽपि 'टिड्ढाणञ्' इति ठन्निमित्तको ङीप् दुर्वारः। द्वाभ्यां शताभ्यां क्रीता द्विशतेत्यत्र 'सङ्ख्याया अतिशदन्तायाः' इति कनः 'अध्यर्ध' इति लुकि 'अपरिमाण' इति निषेधस्य चरितार्थत्वात् इति चेत्। सत्यम्। 'टिड्ढाणञ्' इत्यत्र प्रत्यासत्त्या टिड्ढाणञादीनां यः अकारः तदन्तमिति विवक्षितम्। पञ्चाश्वशब्दश्चायं ठगवयवाकारान्तो न भवतीति न दोषः।

लुक्। द्वौ बिस्तौ पचति द्विबिस्ता। द्व्याचिता। द्विकम्बल्या। परिमाणान्तात्तु द्व्याढकी। 'तद्धितलुकि' किम्। समाहारे पञ्चाश्वी।

४८१। काण्डान्तात्क्षेत्रे। (४-१-२३)

क्षेत्रे यः काण्डान्तो द्विगुस्ततो न ङीप् तद्धितलुकि। द्वे काण्डे प्रमाणमस्या द्विकाण्डा क्षेत्रभक्तिः। 'प्रमाणे द्वयसच्—' (सू १८३८) इति

नच प्रत्ययलक्षणेन ठगवयवाकारान्तत्वं शङ्क्यम्। वर्णाश्रये प्रत्ययलक्षणाभावात्। बिस्तादिशब्दानान्तु परिमाणविशेषवाचित्वात् 'अपरिमाण' इत्यनेन अप्राप्तेः पृथगुपादानम्। **द्वौ बिस्ताविति॥** "सुवर्णबिस्तौ हेम्नोऽक्षे" इत्यमरः। "गुञ्जाः पञ्चाद्यमाषकाः। ते षोडशाक्षः" इति च। गुञ्जापञ्चक माषपरिमाणम्। माषषोडशकम् अक्षपरिमाणम्, तच्च अशीतिगुञ्जात्मकम्। तस्मिन् हेमविषये अक्षपरिमाणे सुवर्णविस्तशब्दाविल्यर्थः। द्वौ बिस्तौ पचतीति विग्रहे 'तद्धितार्थ' इति द्विगुः। 'सम्भवत्यवहरतिपचति' इति ठक्, तस्य 'अर्ध्य' इति लुक्। 'द्विगोः' इति ङीपि अनेन प्रतिषिद्धे सति टापि द्विबिस्ता मूषा। द्विबिस्तपरिमाणकहिरण्यं द्रावयतीत्यर्थः। पचिरिह द्रावणे द्रष्टव्यः। **द्व्याचितेति॥** "आचितो दश भाराः" इत्यमरः। "तुला स्त्रियां फलशतं भारस्स्याद्विंशतिः पुमान्" इति च। द्वावाचितौ वहतीत्यर्थे 'आढकाचितपात्रात् खोऽन्यतरस्याम्, द्विगोष्ठंश्च' इति खठनोरभावे प्राग्वतीयष्ठञ्। 'अर्ध्य' इति तस्य लुक्। अनेन 'द्विगोः' इति ङीपि निषिद्धे टापि द्व्याचिता शकटी। **द्विकम्बळ्येति॥** कम्बलस्य प्रकृतिभूतं द्रव्यं कम्बल्यम् ऊर्णापलशतम्। 'तदर्थं विकृतेः प्रकृतौ' इत्यर्थे 'कम्बलाच्च संज्ञायाम्' इति यन्। द्वाभ्यां कम्बल्याभ्यां क्रीतेति विग्रहे 'तेन क्रीतम्' इति ठनः। 'अर्ध्य' इति लुक्। 'द्विगोः' इति ङीपि अनेन प्रतिषिद्धे टाप्। नन्वत्र न तद्धितलुकि इत्येवास्तु। तावतैव पञ्चभिरश्वैः क्रीता पञ्चाश्वेति सिद्धेः 'अपरिमाण' इति मास्तु। एवञ्च द्विबिस्ता द्व्याचिता द्विकम्बल्येत्यपि सिद्धेर्बिस्तादिग्रहणमपि मास्त्वित्यत आह। **परिमाणान्तात्त्विति॥** "गुञ्जाः पञ्च तु माषस्स्यात्ते सुवर्णस्तु षोडश। पलं सुवर्णाश्चत्वारः पञ्च वापि प्रकीर्तितम्॥ पलद्वयन्तु प्रसृतं द्विगुणं कुडवं मतम्। चतुर्भिः कुडवैः प्रस्थः प्रस्थाश्चत्वार आढकः।" इति स्मृतिः। द्वावाढकौ पचतीति विग्रहे 'आढकाचितपात्रात् खोऽन्यतरस्याम्, द्विगोष्ठंश्च' इति खठनोरभावे प्राग्वतीयष्ठञ्। 'अर्ध्य' इति लुक्। 'द्विगोः' इति ङीप्। द्व्याढकीति रूपम्। 'न तद्धितलुकि' इत्येतावत्येवोक्ते अत्रापि ङीपो निषेधस्स्यात्। अतः अपरिमाणान्त तद्धितलुकीति वक्तव्यम्। तावत्युक्ते द्विबिस्तेत्यादौ परिमाणत्वात् ङीन्निषेधो न स्यात्। अतो बिस्तादिग्रहणमपीति भावः। **काण्डान्तात् क्षेत्रे॥** 'द्विगोः' इति, न तद्धितलुकीति, चानुवर्तते। तदाह। **क्षेत्रे य इत्यादि। द्वे काण्डे इति॥** षोडशारत्न्यायामो दण्डः काण्डमिति स्मृतिः। द्वे काण्डे प्रमाणमस्याः इति विग्रहे 'तद्धितार्थ' इति द्विगुसमासे द्विकाण्डशब्दस्य क्षेत्रवर्तित्वे नपुंसकत्वशङ्काव्युदासाय क्षेत्रभक्तिरिति विशेष्योपादानम्। तद्धितलुकं

विहितस्य मात्रचः 'प्रमाणे लः, द्विगोर्नित्यम्' इति लुक्। 'क्षेत्रे' किम्। द्विकाण्डी रज्जुः।

४८२। पुरुषात्प्रमाणेऽन्यतरस्याम्। (४-१-२४)

प्रमाणे यः पुरुषस्तदन्ताद्विगोर्ङीब्वा स्यात्तद्धितलुकि। द्वौ पुरुषौ प्रमाणमस्याः सा द्विपुरुषी—द्विपुरुषा वा परिखा।

दर्शयितुमाह। **प्रमाणे द्व्यसजिति** ॥ नच काण्डादित्यस्य प्रातिपदिकविशेषणतया तदन्तलाभादन्तग्रहणं व्यर्थमिति शङ्क्यम्। असति ह्यन्तग्रहणे क्षेत्र इत्येतत् काण्डस्यैव विशेषणं स्यात्। श्रुतत्वात्। क्षेत्रे यः काण्डशब्दः तदन्तादिति लभ्येत। एवञ्च द्विकाण्डा क्षेत्रभक्तिरित्यत्र द्विकाण्डशब्दस्यैव क्षेत्रवर्तित्वात् काण्डशब्दस्य प्रमाणवाचित्वात् ङीन्निषेधो न स्यात्। द्वाभ्यां काण्डाभ्यां काण्डप्रमितक्षेत्राभ्यां क्रीता द्विकाण्डी बडबेत्यत्रैव ङीन्निषेधः स्यात्। अतः अन्तग्रहणम्। **द्विकाण्डी रज्जुरिति** ॥ पूर्ववत् मात्रचो लुकि 'द्विगोः' इति ङीप्। क्षेत्रवृत्तित्वाभावात् न तन्निषेध इति भावः। ननु 'अपरिमाण' इति पूर्वसूत्रे परिमाणशब्देन किं परिच्छेदकमात्रं विवक्षितम्, उत "ऊर्ध्वमानं किलोन्मानं परिमाणन्तु सर्वतः। आयामस्तु प्रमाणं स्यात्" इति वार्तिकानुसारेण परितः सर्वतः आरोहतः परिणाहतश्च येन मीयते तत् परिमाणमित्याढककुडबाद्येव आयामव्यावृत्तं विवक्षितम्। नाद्यः। तथा सति द्वौ हस्तौ प्रमाणमस्या इति विग्रहे द्विहस्ता भित्तिरित्यत्र पूर्ववन्मात्रचो लुकि ङीन्निषेधो न स्यात्। न द्वितीयः। तथा सति काण्डशब्दस्यायामप्रमाणपरतया उक्तपरिमाणपरत्वाभावेन 'अपरिमाण' इत्यनेनैव द्विकाण्डा क्षेत्रभक्तिः इत्यत्रापि ङीन्निषेधसम्भवेन 'काण्डान्तात् क्षेत्रे' इति सूत्रारम्भवैयर्थ्यादित्युभयतःपाशा रज्जुरिति चेत्। सत्यम्। 'अपरिमाण' इति पूर्वसूत्रे पारिभाषिकमेव परिमाणं विवक्षितं, न त्वायामोऽपि। ततश्च द्विहस्ता भित्तिरित्यत्र 'अपरिमाण' इति ङीन्निषेधो निर्बाधः। काण्डान्तादिति सूत्रन्तु काण्डान्तात् क्षेत्र एव ङीन्निषेधः नान्यत्र द्विकाण्डी रज्जुरित्यादाविति नियमार्थमित्यन्यत्र विस्तरः। **पुरुषात्** ॥ द्विगोरिति तद्धितलुकीति ङीबिति चानुवर्तते। तदाह। **प्रमाणे य इत्यादिना** ॥ प्रमाणमायामः "आयामस्तु प्रमाणं स्यात्" इति वचनात्। **द्वौ पुरुषाविति** ॥ पञ्चहस्तायामः पुरुषः इत्युच्यते। "पञ्चारत्निः पुरुषः" इति शुल्बसूत्रात्। द्वौ पुरुषौ प्रमाणमस्या इति विग्रहे 'तद्धितार्थ' इति द्विगुसमासः। 'प्रमाणे द्व्यसज्दघ्नञ्मात्रचः' इति विहितस्य मात्रचः 'प्रमाणे लः, द्विगोर्नित्यम्' इति लुक्। अत्र उक्तरीत्या पुरुषप्रमाणस्य आयामात्मकस्य 'अपरिमाण' इति नित्यं ङीन्निषेधे प्राप्ते विकल्पार्थमिदं वचनम्। अन्ये तु 'तदस्य परिमाणम्' इति ठक्ठञौ वा। 'अध्यर्ध' इति लुक्। तत्र हि उत्तरसूत्रानुरोधात् परिमाणशब्देन परिच्छेदकमात्रं गृह्यते इत्याहुः, इत्यास्तान्तावत्। **द्विपुरुषी द्विपुरुषा वा परिखेति** ॥ तिर्यक् द्विपुरुषायतेत्यर्थः। दुर्गं परितः तत्संरक्षणार्थो जलाशयः परिखा। अथ कुण्डमिव ऊर्ध्वो यस्या इति बहुव्रीहौ

४८३ । ऊधसोऽनङ् । (५-४-१३१)

ऊधोऽन्तस्य बहुव्रीहेरनङादेशः स्यात्स्त्रियाम् । इत्यनङि कृते ङाब्ङीन्निषेधेषु प्राप्तेषु ।

४८४ । बहुव्रीहेरूधसो ङीष् । (४-१-२५)

ऊधोऽन्ताद्बहुव्रीहेर्ङीष् स्यात्स्त्रियाम् । कुण्डोध्नी । 'स्त्रियाम्' किम् । कुण्डोधो धैनुकम् । इहानङ्ऊपि न । तद्विधौ 'स्त्रियाम्' (वा ३३६७) इत्युपसंख्यानात् ।

४८५ । सङ्ख्याव्ययादेर्ङीप् । (४-१-२६)

ङीषोऽपवादः । द्व्यूध्नी । अत्यूध्नी । बहुव्रीहेरित्येव । ऊधोऽतिक्रान्ता अत्यूधाः ।

कुण्डोधस्शब्दः । तत्र विशेषमाह । **ऊधसोऽनङ्** ॥ 'बहुव्रीहौ सक्थ्यक्ष्णोः' इत्यतो बहुव्रीहावित्यनुवृत्तं षष्ठ्या विपरिणम्यते, ऊधसः इत्यनेन विशेष्यते, तदन्तविधिः । तदाह । **ऊधोऽन्तस्येति** ॥ समासान्तप्रकरणस्थत्वेऽपि ङित्त्वादस्यादेशत्वं बोध्यम् । **इत्यनङि कृते इति** ॥ अनङि ङकार इत्, अकार उच्चारणार्थः, 'ङिच्च' इत्यन्त्यस्य सकारस्य अन् . पररूपम्, कुण्डोधन् इति स्थिते सतीत्यर्थः । **ङाब्ङीन्निषेधेष्विति** ॥ 'ङाबुभाभ्याम्' इति वैकल्पिके ङापि 'अन उपधालोपिनः' इति वैकल्पिके ङीपि तदुभयाभावे 'ऋन्नेभ्यः' इति प्राप्तस्य ङीपः 'अनो बहुव्रीहेः' इति निषेधे प्राप्ते इत्यर्थः । **बहुव्रीहेः** ॥ ऊधस इति बहुव्रीहेर्विशेषणम्, तदन्तविधिः, स्त्रियामित्यधिकृतम् । तदाह । **ऊधोऽन्तादिति** ॥ **कुण्डोध्नीति** ॥ अनङि कृते ङीषि 'अल्लोपोऽनः' इति भावः । "ऊधस्तु क्लीबमापीनम्" इत्यमरः । **स्त्रियां किमिति** ॥ ङीष्विधौ स्त्रियामित्यनुवृत्तिः किमर्थेति प्रश्नः । **कुण्डोधो धैनुकमिति** ॥ कुण्डमिव ऊधो यस्येति विग्रहः । नपुंसकत्वस्फोरणाय धैनुकमिति विशेष्यम् । धेनूनां समूह इत्यर्थः । 'अचित्तहस्तिधेनोष्ठक्' 'इसुसुक्तान्तात्कः' आदिवृद्धिः, क्लीबत्वं लोकात् । ङीन्निषेधस्यतु स्वरे विशेषः फलम् । अत्र स्त्रीत्वाभावान्न ङीषित्यर्थः । ननु मास्तु ङीष्, अनङ्तु कुतो न स्यात् । समासान्तप्रकरणस्थे ऊधसोऽनङ्विधौ 'स्त्रियाम्' इत्यभावादित्यत आह । **तद्विधाविति** ॥ ऊधसोऽनङ्विधौ 'स्त्रियाम्' इत्युपसङ्ख्यानादित्यर्थः । बहुव्रीहेः किम् । ऊधः प्राप्तेति विग्रहे 'प्राप्तापन्ने च द्वितीयया' इति समासे प्राप्तोधाः । **सङ्ख्याव्ययादेर्ङीप्** ॥ सङ्ख्याव्ययादेरूधोऽन्तात् स्त्रियां ङीप् स्यादित्यर्थः । **ङीषोऽपवादः इति** ॥ 'बहुव्रीहेरूधसो ङीष्' इत्यस्यापवाद इत्यर्थः । स्वरे विशेषः । सङ्ख्यादेरुदाहरति । **द्व्यूध्नीति** ॥ द्वे ऊधसी यस्याः इति विग्रहः । अनङि ङीपि अल्लोप इति भावः । अव्ययादेरुदाहरति । **अत्यूध्नीति** ॥ अतिशयितमूधो यस्याः इति विग्रहः । **बहुव्रीहेरित्येवेति** ॥ बहुव्रीहेरित्यनुवर्तत एवेत्यर्थः । **ऊधोऽतिक्रान्तेति** ॥ 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति समासस्य अबहुव्रीहित्वान्न ङीप् ।

४८६। दामहायनान्ताच्च। (४-१-२७)

संख्यादेर्बहुव्रीहेर्दामान्ताद्धायनान्ताच्च ङीप्स्यात्। दामान्ते ङाप्प्रतिषेधयोः प्राप्तयोर्हायनान्ते टापि प्राप्ते वचनम्। द्विदाम्नी। अव्ययग्रहणाननुवृत्तेरुदामा बडबेत्यत्र ङाम्निषेधावपि पक्षे स्तः। द्विहायनी बाला। त्रिचतुर्भ्यां हायनस्य णत्वं वाच्यम्' (वा ५०३८)। 'वयोवाचकस्यैव हायनस्य ङीब्णत्वं चेष्यते' (वा २४४१)। त्रिहायणी। चतुर्हायणी। वयसोऽन्यत्र द्विहायना, त्रिहायना, चतुर्हायना, शाला।

४८७। नित्यं संज्ञाछन्दसोः। (४-१-२९)

अन्नन्ताद्बहुव्रीहेरुपधालोपिनो ङीप्स्यात्संज्ञाछन्दसोः। सुराज्ञी नाम नगरी। अन्यत्र पूर्वेण विकल्प एव। वेदे तु शतमूर्ध्नी।

४८८। केवलमामकभागधेयपापापरसमानार्य-कृतसुमङ्गलभेषजाच्च। (४-१-३०)

एभ्यो नवभ्यो नित्यं ङीप्स्यात्संज्ञाछन्दसोः। 'अथो त इन्द्रः केवलीर्विशः' मामकी तनूः। भागधेयी। पापी। अपरी। समानी। आर्यकृती।

अत एव नानङ्, नापि ङीष्। **दामहायनान्ताच्च** ॥ सङ्ख्यादेः ङीप् इति चानुवर्तते। तदाह। **सङ्ख्यादेरिति** ॥ अव्ययग्रहणन्तु नानुवर्तते। अस्वरितत्वादिति भावः। बहुव्रीहिविशेषणत्वादेव सिद्धे अन्तग्रहणं स्पष्टार्थम्। **दामान्ते इति** ॥ द्विदामन्शब्दे दामान्ते 'डाबुभाभ्याम्' इति ङाप 'अन उपधालोपिनः' इति ङीपि, 'अनो बहुव्रीहेः' इति ङीप्प्रतिषेधे च प्राप्ते, द्विहायनीत्यत्र हायनान्ते अदन्तत्वाट्टापि प्राप्ते 'दामहायनान्ताच्च' इति वचनमित्यर्थः। **द्विदाम्नीति** ॥ द्वे दामनी यस्याः इति विग्रहः। ङीपि 'अल्लोपोऽनः' इति भावः। ननु अव्ययग्रहणानुवृत्तौ किं बाधकमित्यत आह। **अव्ययग्रहणेति** ॥ **उद्दामेति** ॥ उत्क्रान्तं दाम यस्या इति विग्रहः। **डाम्निषेधावपीति** ॥ अपिना 'अन उपधा' इति ङीप् गृह्यते। अन्यग्रहणे अनर्थकस्यापि ग्रहणात्। अथ हायनान्तस्य उदाहरति। **द्विहायनी बालेति** ॥ द्वौ हायनौ यस्या इति विग्रहः। अथ त्रिहायणीत्यत्र भिन्नपदत्वात् णत्वाप्राप्तावाह। **त्रिचतुर्भ्यामिति** ॥ नन्वेवमपि द्विहायना शाला इत्यत्रापि ङीप् स्यात्, त्रिहायणी शालेत्यत्र तु ङीप् णत्वञ्च स्यातामित्यत आह। **वयोवाचकस्येति** ॥ **इष्यते इति** ॥ भाष्यकृतेति शेषः। **केवलमामक** ॥ 'नित्यं संज्ञाच्छन्दसोः' इति पूर्वसूत्रमनुवर्तते। एवञ्च 'अन उपधालोपिनोऽन्यतरस्याम्' इति अन्यतरस्याङ्ग्रहणं निवृत्तम्। 'सङ्ख्याव्ययादेर्ङीप्' इत्यतो ङीबित्यनुवर्तते। तदाह। **एभ्य इति** ॥ केवल, मामक, भागधेय, पाप, अपर, समान, आर्यकृत, सुमङ्गल, भेषज, इत्येतेभ्यो नवभ्यः इत्यर्थः। छन्दस्युदाहरति।

सुमङ्गली । भेषजी । अन्यत्र केवला इत्यादि । मामकग्रहणं नियमार्थम् । अण्णन्तत्वादेव सिद्धेः । तेन लोकेऽसंज्ञायां मामिका ।

४८९ । अन्तर्वत्पतिवतोर्नुक् । (४-१-३२)

एतयोः स्त्रियां नुक्स्यात् । 'ऋन्नेभ्यो ङीप्' (सू ३०६) । गर्भिण्यां जीवद्भर्तृकायां च प्रकृतिभागौ निपात्येते । तत्रान्तरस्त्यस्यां गर्भ इति विग्रहे अन्तश्शब्दस्याधिकरणशक्तिप्रधानतयास्तिसामानाधिकरण्याभावादप्राप्तो मतुन्निपात्यते । 'पतिवत्नी' इत्यत्र तु वत्त्वं निपात्यते । अन्तर्वत्नी । पतिवत्नी । प्रत्युदाहरणं तु अन्तरस्त्यस्यां शालायां घटः । पतिमती पृथिवी ।

अथोत इन्द्रः केवलीरिति ॥ मामकी तनू इति ॥ मदीयायामित्यर्थः । 'युष्मदस्मदोरन्यतरस्यां खञ् च' इत्यणि 'तवकममकावेकवचने' इति प्रकृतेर्ममकादेशः, ङीप्, 'सुपां सुलुक्' इति सप्तम्या लुक् । "मित्रावरुणयोर्भागधेयी स्थ" । 'भागरूपनामभ्यो धेयः' इति स्वार्थिको धेयप्रत्ययः । भागशब्दस्य पुल्लिङ्गत्वेऽपि 'स्वार्थिकाः प्रकृतेः क्वचिल्लिङ्गवचनान्यतिवर्तन्ते' इति स्त्रीत्वम्, ङीप् । "तन्वस्सन्तु पापीः ।" पापमस्यास्तीत्यर्थे अर्श आद्यजन्तात् स्त्रीत्वे ङीप् । "उत वा परीभ्यो मघवा विजिग्ये" । अपरशब्दः पवर्गमध्यः । "समानीव आकूतिः ।" आर्यकृतीति क्वचित् वेदे अन्वेषणीयम् । एवं सुमङ्गलीति च । "सुमङ्गलीरियं वधूः" इत्यत्र 'छन्दसीवनिपौ च' इति मत्वर्थे ईप्रत्ययः । "शिवा रुद्रस्य भेषजी" । भेषजशब्दः रोगनिवर्तके औषधे प्रसिद्धः । अत एव सूत्रात स्त्रीत्वमपि । यद्वा भिषजः इयमित्यर्थे अणि इकारस्य एकारः, अत एव निपातनात् संज्ञायामप्येवमेव सर्वत्र ङीबुदाहार्यः । संज्ञाच्छन्दोभ्यामन्यत्र तु केवला मामिका इत्यादि । नन्वणन्तत्वादेव 'टिड्ढाणञ्' इति ङीपि सिद्धे मामकग्रहणं व्यर्थमित्यत आह । **मामकग्रहणमिति ॥** लोके असंज्ञायाञ्च ङीन्निवृत्त्यर्थमिति भावः । एवं भेषजशब्दस्य अणन्तत्वेऽपि ज्ञेयम् । एतदर्थमेव वैदिकप्रक्रियायाम् इदं नोपन्यस्तम् । **अन्तर्वत्पतिवतोर्नुक् ॥ एतयोः स्त्रियां नुगिति ॥** कित्त्वसामर्थ्यात् अयमागमः, नतु प्रत्यय इति भावः । कित्त्वादन्ताक्यवः, अन्तर्वत् न्, पतिवत् न् इति स्थिते आह । **ऋन्नेभ्यो ङीबिति ॥ गर्भिण्यामिति ॥** गर्भिण्याजीवद्भर्तृकायाञ्च स्त्रियाम् अन्तर्वत् पतिवत् इति प्रकृतिभागौ नुक्सन्नियोगेन निपात्येते इति । वार्तिकमेतत् । कतरस्मिन् किन्निपात्यते इत्यत आह । **तत्रेति ॥** तयोर्मध्ये इत्यर्थः । अन्तरस्त्यस्यां गर्भः इति विग्रहे अप्राप्तो मतुप् निपात्यते इत्यन्वयः । कथमप्राप्तिर्मतुप इत्यत आह । **अन्तश्शब्दस्येत्यादि अभावादित्यन्तम् ॥** 'तदस्यास्त्यस्मिन्निति मतुप्' इति सूत्रेण अस्तिसमानाधिकरणात् कर्तृकारकप्रधानप्रथमान्तात् मतुप्प्रत्ययो विहितः । यथा गौरस्यास्तीति गोमानित्यादौ । प्रकृते तु प्रथमान्तः कर्तृकारकप्रधानो गर्भशब्द एवास्तिसमानाधिकरणः, नतु अन्तश्शब्दः । तस्याधिकरणकारकप्रधानतया अस्तिसामानाधिकरण्यासम्भवात् । अतोऽत्र अप्राप्तो मतुन्निपात्यत इत्यर्थः । ततश्च 'मादुपधायाश्च मतोर्वो' इति मकारस्य वत्वे अन्तर्वत्

४९०। पत्युर्नो यज्ञसंयोगे। (४-१-३३)

पतिशब्दस्य नकारादेशः स्याद्यज्ञेन सम्बन्धे। वसिष्ठस्य पत्नी। तत्कर्तृकस्य यज्ञस्य फलभोक्त्रीत्यर्थः। दम्पत्योः सहाधिकारात्।

४९१। विभाषा सपूर्वस्य। (४-१-३४)

पतिशब्दान्तस्य सपूर्वस्य प्रातिपदिकस्य नो वा स्यात्। गृहस्य पतिः गृहपतिः—गृहपत्नी। 'अनुपसर्जनस्य' इतीहोत्तरार्थमनुवृत्तमपि न पत्युर्विशेषणं, किं तु तदन्तस्य। तेन बहुव्रीहावपि। दृढपत्नी—दृढपतिः। वृषलपत्नी—

इति प्रकृतिभावः सम्पद्यत इति भावः। **वत्त्वमिति** ॥ पतिरस्याः अस्तीति विग्रहे 'तदस्यास्यस्मिन्' इति मतुपो मकारस्य मादुपधात् परत्वाभावेन 'मादुपधायाः' इति वत्त्वमप्राप्तन्निपात्यते इत्यर्थः। **प्रत्युदाहरणं त्विति** ॥ गर्भिण्यामेव मतुन्निपातनादन्तरस्त्यस्यां शालायां घट इति विग्रहवाक्यमेव, नतु मतुबित्यर्थः। **पतिमती पृथिवीति** ॥ जीवद्भर्तृकायामेव वत्त्वनिपातनादिह वत्त्वाभाव इति भावः। **पत्युर्नो** ॥ पत्युरिति षष्ठी। न इत्यकार उच्चारणार्थः, स्त्रियामित्यधिकृतम्। तदाह। **पतिशब्दस्येति** ॥ **यज्ञेनेति** ॥ यज्ञसम्बन्धः यज्ञेन सह स्वामितया सम्बन्धः, यज्ञफलभोक्तृत्वमिति यावत्। तदाह। **तत्कर्तृकस्येति** ॥ वसिष्ठकर्तृकस्येत्यर्थः। ननु वसिष्ठकर्तृकयज्ञस्य वसिष्ठ एव फलभोक्तेत्युचितं, नतु तत्स्त्रयपि, स्वर्गकामः इत्यादिपुल्लिङ्गशब्दैः पुंस एवाधिकारावगमात् इत्यत आह। **दम्पत्योस्सहाधिकारादिति** ॥ एतच्च प्रकृतसूत्रे भाष्ये स्पष्टम्। अत एव पूर्वमीमांसायां षष्ठस्य प्रथमपादे "लिङ्गविशेषनिर्देशात् पुंयुक्तमैतिशायन" इत्यधिकरणे "स्वपतेस्तु वचनादैककर्म्ये स्यात्" इत्यधिकरणे च दम्पत्योस्सहाधिकारस्सिद्धान्तितः। प्रपञ्चितश्चैतदस्माभिरध्वरमीमांसाकुतूहलवृत्तौ। **विभाषा सपूर्वस्य** ॥ पत्युर्नः इत्यनुवर्तते। प्रातिपदिकादित्यनुवृत्तं षष्ठ्या विपरिणतं पत्युरित्यनेन विशेष्यते, तदन्तविधिः, सपूर्वस्येत्येतत् पतिशब्दान्तप्रातिपदिके अन्वेति। पूर्वावयवसहितस्येत्यर्थः। तदाह। **पतिशब्दान्तस्येत्यादिना** ॥ यज्ञसंयोगाभावेऽपि अप्राप्तविभाषेयम्। **गृहपतिः—गृहपत्नीति** ॥ नत्वपक्षे 'ऋन्न' इति ङीप्। अत्र गृहपतिशब्दः पतिशब्दान्तः गृहशब्दात्मकपूर्वावयवसहितश्चेति भावः। नच 'प्रहणवता प्रातिपदिकेन' इति निषेधश्शङ्क्यः। 'शूद्रा चामहत्पूर्वा' इति लिङ्गेन तस्य स्त्रियामित्यधिकारे अप्रवृत्तेरुक्तत्वात्। ननु दृढः पतिः यस्या इति बहुव्रीहौ दृढपतिः—दृढपत्नीति नत्वविकल्प इष्यते, स तु न सम्भवति। अनुपसर्जनादित्यधिकारात् पतिशब्दस्यात्रोपसर्जनत्वात्। नच 'अनुपसर्जनात्' इति नात्र सम्बध्यते इति वाच्यम्। उत्तरत्रानुवृत्तये इहापि तदनुवृत्तेरावश्यकत्वात् इत्यत आह। **अनुपसर्जनस्येत्यादि** ॥ **किन्तु तदन्तस्येति** ॥ सपूर्वस्येति षष्ठ्यन्तस्य श्रुतत्वेन तद्विशेषणताया एव न्याय्यत्वात् अवान्तरवाक्यार्थबोधोत्तरमेव अनुपसर्जनत्वविशेषणप्रवृत्त्या तत्काले सपूर्वस्य श्रुतत्वेन तेनैव सम्बन्धे जाते सति पश्चात्

वृषलपतिः । अथ 'वृषलस्य पत्नी' इति व्यस्ते कथमिति चेन्न । पत्नीव पत्नीत्युपचारात् । यद्वा । आचारक्विबन्तात्कर्तरि किप् । अस्मिंश्च पक्षे, पत्नियौ । पत्नियः इतीयङ्विषये विशेषः । 'सपूर्वस्य' किम्। गवां पतिः स्त्री।

४९२ । नित्यं सपत्न्यादिषु । (४-१-३५)

पूर्वविकल्पापवादः । समानस्य सभावोऽपि निपात्यते । समानः पतिर्यस्याः सा सपत्नी । एकपत्नी । वीरपत्नी ।

पतिशब्देऽपि पुनर्व्यापारे मानाभावादिति भावः । **तेनेति** ॥ अनुपसर्जनत्वस्य पत्यन्तविशेषणत्वेनेत्यर्थः । यज्ञसंयोगग्रहणमनुवर्त्य प्राप्तविभाषा कुतो न स्यादित्यत आह । **वृषळपत्नीति** ॥ पाति रक्षतीति पतिः वृषळस्य पतिः स्त्री इति विग्रहः । अपशूद्राधिकरणे शूद्राणां यज्ञाधिकारनिराकरणादिह यज्ञसंयोगाभावादप्राप्तमेव नत्वं विभाष्यत इति भावः । आक्षिपति । **अथेति** ॥ आक्षेपारम्भद्योतकोऽथशब्दः, प्रश्नद्योतको वा । "मङ्गळानन्तरारम्भप्रश्नकात्स्न्र्येष्वथो अथ" इत्यमरः । **व्यस्ते इति** ॥ विग्रहवाक्ये इत्यर्थः । ततश्च सपूर्वत्वाभावात् न प्रकृतसूत्रेण नत्वविकल्पः । यज्ञसंयोगाभावाच्च न पूर्वसूत्रेण । अतो वृषळस्य पत्नीत्यनुपपन्नमित्याक्षेपः । **इति चेन्नेति** ॥ इत्याक्षिपसि चेत् नैतद्युक्तमित्यर्थः । **पत्नीवेति** ॥ यज्ञसंयुक्तायां द्विजभार्यायां यः पत्नीशब्दो व्युत्पादितः तस्यैव शूद्रस्त्रियामपि यज्ञसंयुक्तायां पाणिग्रहणादिधर्मपुरस्कारेण गौण्या वृत्त्या प्रयोगः । यथा गङ्गायामिति स्त्रीलिङ्गस्य तीरे प्रयोगः । उक्तञ्च भाष्ये । "तुषजकस्य पत्नीत्युपमानात्सिद्धम्" इति । **यद्वेति** ॥ प्रौढिवादमात्रमिदम् । स्त्रियामाचारक्विबन्तप्रकृतिकक्विबन्तशब्दाः न सन्तीति 'अनुपसर्जनात्' इत्यत्रोक्तत्वात् । **सपूर्वस्येति किमिति** ॥ प्रातिपदिकविशेषणतया पतिशब्दस्य तदन्तलाभे सति पतिशब्दान्तस्य सपूर्वत्वाव्यभिचारात् सपूर्वस्येति किमर्थमिति प्रश्नः । **गवां पतिः स्त्रीति** ॥ स्वामिनी रक्षित्री वेत्यर्थः । असमस्तत्वात् गवामित्यस्य न पूर्वावयवत्वमिति भावः । यद्यपि 'यत्र सङ्घाते पूर्वो भागः पदं तत्र चेत् प्रातिपदिकसंज्ञा भवति तर्हि समासस्यैव, इति नियमेन गवांपतिः इति समुदायस्य पत्यन्तत्वेऽपि प्रातिपदिकत्वाभावादेवात्र नत्वविकल्पो न भवति । तथापि गवां पतिरित्यत्र पतिशब्दस्यैव व्यपदेशिवत्त्वेन तदन्ततया नत्वविकल्पप्राप्तौ तन्निवृत्त्यर्थं सपूर्वस्येति वचनमिति भावः । वस्तुतस्तु 'व्यपदेशिवद्भावोऽप्रातिपदिकेन' इति निषेधादिह केवलपतिशब्दस्य पतिशब्दान्तत्वाभावादेव नत्वविकल्पनिवृत्तिसिद्धेः सपूर्वस्येति स्पष्टार्थमित्याहुः । **नित्यं सपत्न्यादिषु** ॥ विषयसप्तम्येषा । सपत्न्यादिविषये तात्सिद्ध्यर्थं नित्यं नत्वमित्यर्थः । **पूर्वविकल्पेति** ॥ 'विभाषा सपूर्वस्य' इति विकल्पस्यापवाद इत्यर्थः । आरम्भसामर्थ्यादेव सिद्धे नित्यग्रहणं स्पष्टार्थम् । ननु समानः पतिर्यस्यास्सा सपत्नीति वक्ष्यति । तत्र समानशब्दस्य सभावोऽनुपपन्नः, अतः सदृशपर्यायेण सहशब्देनैव बहुव्रीहिराश्रयणीयः । एवञ्च 'वोपसर्जनस्य' इति वैकल्पिकस्सभाव इत्यत आह । **समानस्येति** ॥ इह गणे समान, एक, वीर, भ्रातृ, पुत्र, इति समानादयः पठिताः । अतस्समानशब्देनैव बहुव्रीहिरुचितः, तस्य च निपातनादेव

४९३। पूतक्रतोरै च। (४-१-३६)

अस्य स्त्रियामै आदेशो ङीप्च। 'इयं त्रिसूत्री पुंयोग एवेष्यते' (वा २४४९)। पूतक्रतोः स्त्री पूतक्रतायी। 'यया तु क्रतवः पूताः स्यात्पूतक्रतुरेव सा'।

४९४। वृषाकप्यग्निकुसितकुसिदानामुदात्तः। (४-१-३७)

एषामुदात्त ऐ आदेशः स्यान्ङीप्च। वृषाकपेः स्त्री वृषाकपायी। "हरविष्णू वृषाकपी" इत्यमरः। 'वृषाकपायी श्रीगौर्योः' इति च। अग्नायी। कुसितायी-कुसिदायी। कुसिदशब्दो ह्रस्वमध्यो न तु दीर्घमध्यः।

४९५। मनो रौ वा। (४-१-३८)

नित्यं सभाव इति भावः। **समानः पतिरिति**॥ अत्र समानशब्द एकपर्यायः, पतिशब्दस्तु विवाहनिबन्धनभर्तृशब्दपर्यायः। **वीरपत्नीति**॥ वीरः पतिर्यस्याः इति विग्रहः। सपत्नयादित्वान्नत्वम्। **पूतक्रतोरै च**॥ ऐ इति लुप्तप्रथमाकम्। पूतक्रतुशब्दात् स्त्रियां ङीप्स्यात्, प्रकृतेरैकारोऽन्तादेशश्चेत्यर्थः। **इयं त्रिसूत्रीति**॥ वार्तिकमिदम्। पूतक्रतोरित्यादिसूत्रत्रयं पुंयोगात् स्त्रियां वृत्तावेवेत्यर्थः। **पूतक्रतायीति**॥ पूतः क्रतुः येन सः पूतक्रतुः, तस्य स्त्रीत्यर्थे ङीप्, तकारादुकारस्य ऐकारः, तस्य आयादेश इति भावः। पुंयोगः इत्यस्य प्रयोजनमाह। **ययेति**॥ **वृषाकप्यग्नि**॥ ऐ चेत्यनुवर्तते। तदाह। **एषामिति**॥ **वृषाकपायीति**॥ ङीप् प्रकृतेरुदात्तः ऐकारोऽन्तादेशः, तस्य आयादेशः, तस्य ऐकारस्यानिकत्वात् तदाकारोऽप्युदात्तः। 'अनुदात्तं पदमेकवर्जम्' इति अवशिष्टानामचामनुदात्तत्वम्। उदात्त इति किम्। 'लघावन्ते द्वयोश्च बह्वृषो गुरुः' इति वृषाकपिशब्दो मध्योदात्तः। 'नाहमिन्द्राणि-रारणसख्युर्वृषाकपेः' इति यथा। अन्ते एकस्मिन् लघौ सति द्वयोर्वा लघ्वोस्ततोः पूर्वः बह्वच्कस्य गुरुः उदात्तस्स्यादिति तदर्थः। ततश्च षकारादाकारस्य उदात्तत्वे 'अनुदात्तं पदमेकवर्जम्' इत्यवशिष्टानामचामनुदात्तत्वमिति स्थितिः। तथा च पकारादिकारस्यानुदात्तत्वात् तत्स्थाने ऐकारः अनुदात्तस्स्यात्। ततश्च तदादेशभूतायादेशाकारस्याप्यनुदात्तत्वं स्यात्। अतोऽत्र उदात्तत्वविधिः। **अग्नायीति**॥ 'अग्निर्मूर्धा' इत्यादौ अग्निशब्दः अन्तोदात्तः, ततो ङीप्, प्रकृतेरैकारोऽन्तादेशः, स च भवन्नान्तर्यादुदात्त एव भवति। अतस्तदादेशायादेशाकारस्य उदात्तत्वसिद्धेरुदात्त इत्येतदग्निशब्दे अन्वयं न लभते, प्रयोजनाभावात्। **कुसितायी-कुसिदायीति**॥ कुसितकुसिदे अव्युत्पन्नप्रातिपदिके देवताविशेषस्य नामधेये, फिट्स्वरेणान्तोदात्ते, ततो ङीप् ऐकारश्चान्तादेशः, सच भवन्नान्तर्यादुदात्त एवेति, कुसितकुसिदशब्दयोरपि उदात्त इत्यस्य नान्वय इति वृत्त्यादिग्रन्थेषु स्थितम्। अत एवाह। **कुसिदशब्दो ह्रस्वमध्यो न तु दीर्घमध्यः इति**॥ ह्रस्वमध्यत्वे हि 'लघावन्ते' इति मध्योदात्ततया शिष्टस्वरेण दकारादकारस्यानुदात्ततया तत्स्थाने ऐकारस्यानुदात्ततया तत्स्थाने आकारस्यानुदात्तत्वापत्त्या तन्निवृत्त्यर्थं तत्राप्युदात्तग्रहणस्यावश्यकत्वादुदाहृतवृत्त्यादिग्रन्थविरोधः स्पष्ट एवेति भावः। **मनो रौ वा**॥

मनुशब्दस्यौकारादेशः स्यादुदात्तैकारश्च वा। ताभ्यां सन्नियोगशिष्टो ङीप्च। मनोः स्त्री मनायी–मनावी–मनुः।

४९६। वर्णादनुदात्तात्तोपधात्तो नः। (४-१-३९)

वर्णवाची योऽनुदात्तान्तस्तोपधस्तदन्तादनुपसर्जनात्प्रातिपदिकाद्वा ङीप्स्यात् तकारस्य नकारादेशश्च। एनी–एता। रोहिणी–रोहिता। 'वर्णानां तणतिनितान्तानाम्' (फि ३३) इति फिट्सूत्रेणाद्युदात्तः। 'त्र्येण्या शलल्या'

ए चेति, उदात्त इति, ङीबिति, चानुवर्तते। तदाह। **मनुशब्दस्येति ॥ उदात्त ऐकारश्च वेति ॥** औकार ऐकारश्च वा स्यादित्यर्थः। उदात्तैकार इति समाननिर्देशादुदात्त इत्यौकारेण न सम्बध्यत इति सूचितम्। तच्च वृत्तिपदमञ्जर्योः स्पष्टम्। चकारात् ङीप् ऐकारौकाराभ्यां समुच्चीयते। तदाह। **ताभ्यामिति ॥** ऐकारौकाराभ्यां समुच्चयेनैव विहित इत्यर्थः। ततश्च तदुभयाभावपक्षे ङीबपि नेति लभ्यते। 'सन्नियोगशिष्टानां सह वा प्रवृत्तिस्सह वा निवृत्तिः' इति परिभाषावशादिति भावः। इयन्तु परिभाषा 'पूतक्रतोरै च' इतिसूत्रभाष्ये स्थिता। **मनायीति ॥** 'यद्वै किञ्च मनुरवदत्' इत्यादौ मनुशब्दो 'ञ्नित्यादिर्नित्यम्' इति आद्युदात्तः। 'धान्ये नित्' इत्यतो निदित्यनुवृत्तौ 'शृस्वृस्निहि' इत्यादिना मनेरुप्रत्ययविधेः। ततश्च शिष्टस्वरेण नकारादकारः अनुदात्तः, तस्य स्थाने उदात्त ऐकारः, तस्यायादेशः ङीप् चेति भावः। **मनावीति ॥** अत्रौकारोऽनुदात्त एव। **मनुरिति ॥** ऐकारस्य औकारस्य चाभावे तत्सन्नियोगशिष्टो ङीबपि नेत्युक्तमेव। **वर्णादनु ॥** वेति ङीबिति चानुवर्तते। अनुदात्तादिति वर्णादित्यस्य विशेषणम्, तदन्तविधिः, तोपधादित्यपि वर्णादित्यत्रान्वेति, तकारः उपधा यस्येति विग्रहः। तकारादकार उच्चारणार्थः। वर्णादित्यस्य 'स्वं रूपं शब्दस्य' इति वर्णशब्दादिति नार्थः, तोपधत्वासम्भवात्। किन्तु वर्णवाचिनश्शब्दादित्यर्थो विवक्षितः। वर्णादित्येतत्प्रातिपदिकादित्यस्य विशेषणम्, तदन्तविधिः, त इति षष्ठी। तकारस्येत्यर्थः। न इत्यत्र नकारादकार उच्चारणार्थः, नकार इत्यर्थः। तदाह। **वर्णवाचीत्यादिना ॥ तदन्तादनुपसर्जनादिति ॥** अनुपसर्जनादित्यनुवृत्तं वर्णान्ते अन्वेति, नतु वर्णादित्यत्रेति भावः। **एनी–एतेति ॥** श्वेतेत्यर्थः। एतशब्दात् ङीप्, तकारस्य नकारश्च, ङीबभावे टाबेव, नत्वन्तु न भवति, ङीपा सन्नियोगशिष्टत्वात्। एतशब्दश्श्वेतपर्याय इति कल्पसूत्रव्याख्यातारो धूर्तस्वामिभवस्वामिरुद्रदत्तप्रभृतयो याज्ञिकाः। **रोहिणी–रोहितेति ॥** रोहितशब्दो रक्तवर्णपर्यायः। ङीपि णत्वे रोहिणीति, तदभावे टाप्। अनुदात्तान्तत्वं गमयितुमाह। **वर्णानामिति ॥** तान्तेत्यत्र तकारादकार उच्चारणार्थः। त, ण, ति, नि, त् इत्यन्तानां आदिरुदात्त इत्यर्थः। एतः शाणः, शितिः, पृश्निः, पृषत् इति क्रमेणोदाहरणानि। प्रकृते एतशब्दे एकारस्य रोहितशब्दे ओकारस्य चोदात्तत्वे 'अनुदात्तं पदमेकवर्जम्' इति शिष्टस्वरेण अवशिष्टानामनुदात्तत्वादन्तानुदात्तत्वमित्यर्थः। ननु 'अनुपसर्जनात्' इत्यनुवृत्तस्य श्रुतवर्णविशेषणत्वमेव युक्तम्, नतु तदन्तविधिलभ्यवर्णान्तविशेषणत्वमित्यत आह। **त्र्येण्येति ॥** त्रीणि एतानि श्वेतानि

इति गृह्यम् । त्रीण्येतान्यस्या इति बहुव्रीहिः । 'अनुदात्तात्' किम् । श्वेता । 'धृतादीनां च' (फि २१) इत्यन्तोदात्तोऽयम् । अत इत्येव । शितिः स्त्री । 'पिशङ्गादुपसंख्यानम्' (वा २४५५) । पिशङ्गी–पिशङ्गा । 'असितपलितयोर्न' (वा २४५३) । असिता । पलिता । 'छन्दसि क्रमेके' (वा २४५४) असिक्री । पलिक्री । अवदातशब्दस्तु न वर्णवाची, किं तु विशुद्धवाची । तेन अवदाता इत्येव ।

४९७ । अन्यतो ङीष् । (४-१-४०)

अवयवसंस्थानानि यस्या इति बहुव्रीहौ त्रयेतशब्दः । तत्र एतशब्दस्य वर्णवाचिनः उपसर्जनत्वात् 'ङीन्नत्वे न स्याताम् । अनुपसर्जनादित्यस्य वर्णान्तविशेषणत्वे तु त्रयेतशब्दस्यानुपसर्जनत्वान्न दोष इति भावः । **शलल्येति** ॥ शल्यकाख्यमृगविशेषस्य अङ्गरुहा सूची शललीति याज्ञिकप्रसिद्धिः । **गृह्यमिति** ॥ गृह्यन्ते सङ्गृह्यन्ते औपासनाग्निसाध्यकर्माण्यत्रेति व्युत्पत्त्या आपस्तम्बाश्वलायनादिप्रणीतकल्पसूत्रविशेष उच्यते । त्रयेण्येति णत्वमार्षम् । यजुर्वेदे तु 'त्रि एण्या शलल्या निवर्तयेत' इति पठितम् । तत्र त्रीणि एतानि श्वेतानि यस्या इति विग्रहः । यणभावो णत्वञ्च आर्षमिति वेदभाष्ये भट्टभास्करः । ननु 'वर्णानान्तणति' इति श्वेतशब्दस्याद्युदात्तत्वात् शिष्टस्वरेणानुदात्तान्तत्वमेवेत्यत आह । **धृतादीनामिति** ॥ **अत इत्येवेति** ॥ 'अजाद्यतष्टाप्' इत्यस्मात् अत इत्यनुवर्तत एवेत्यर्थः । **शितिः स्त्रीति** ॥ "शिती धवळमेचकौ" इत्यमरः । **पिशङ्गीति** ॥ 'लघावन्ते' इति पिशङ्गशब्दस्य मध्योदात्ततया शिष्टस्वरेणानुदात्तान्तत्वेऽपि तोपधत्वाभावात् अप्राप्तो ङीबुपसङ्ख्यायते । 'अन्यतो ङीष्' इति वक्ष्यमाणङीषोऽपवादः । स्वरे विशेषः । **असितेति** ॥ वार्तिकमेतत् । असितशब्दस्य कृष्णवाचकतया पलितशब्दस्य श्वेतवाचकतया च 'वर्णादनुदात्तात्' इति प्राप्ते ङीन्नत्वे निषिध्येते । **छन्दसि क्रमेके इति** ॥ इदमपि वार्तिकम् । असितपलितयोस्तकारस्य ङीप्सन्नियोगेन क्रादेशम् अन्ये आचार्याः इच्छन्तीत्यर्थः । **असिक्रीति** ॥ असितशब्दात् ङीप्तकारस्य क्रादेशे पररूपे 'यस्येति च' इत्यकारलोपः । क्र इति नकारान्त एवादेश इत्यन्ये । एवं पलिक्रीत्यपि । "पलितं जरसा शौक्ल्यम्" इत्यमरः । ननु "अवदातः सितो गौरः" इति कोशादवदातशब्दस्य वर्णवाचित्वात् 'लघावन्ते' इति मध्योदात्ततया अनुदात्तान्तत्वात्तोपधत्वाच्च 'वर्णादनुदात्तात्' इति ङीन्नत्वे स्यातामित्यत आह । **अवदातशब्दस्त्विति** ॥ "अवदातस्सिते पीते शुद्धे" इति कोशात् । 'दैप् शोधने' इत्यस्मात् तप्रत्यये अवदातशब्दस्य व्युत्पत्तेश्चेति भावः । एतच्च 'पुंयोगादाख्यायाम्' इति सूत्रे भाष्ये स्पष्टम् । "अवदातस्सितो गौरः" इति कोशस्तु शुद्धत्वसाधर्म्यात् बोध्यः । **अन्यतो ङीष्** ॥ पञ्चम्यास्तसिः । वर्णादिति, अनुदात्तादिति, तोपधादिति, चानुवर्तते । तत्र कस्मादन्यतः इत्यपेक्षायां तोपधादिति प्रतियोगित्वेनान्वेति । तोपधापेक्षया अन्यत इति । तदाह । **तोपधभिन्नादिति** ॥ **कल्माषीति** ॥ चित्रवर्णेत्यर्थः । 'चित्रकिम्मीरकल्माषशबळैताश्च

तोपधभिन्नाद्वर्णवाचिनोऽनुदात्तान्तात्प्रातिपदिकात्स्त्रियां ङीष्स्यात् । कल्माषी । सारङ्गी । लघावन्ते द्व्योश्च बह्वषो गुरुः' (फि ४२) इति मध्योदात्तावेतौ । 'अनुदात्तान्तात्' किम् । कृष्णा । कपिला ।

४९८ । षिद्गौरादिभ्यश्च । (४-१-४१)

षिद्भ्यो गौरादिभ्यश्च ङीष्स्यात् । नर्तकी । गौरी । अनडुहः स्त्रियां आम् वा' (वा ४३७८) । अनडुही--अनड्वाही । पिप्पल्यादयश्च' (ग ४७) । आकृतिगणोऽयम् ।

४९९ । सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः । (६-४-१४९)

अङ्गस्योपधायाः यस्य लोपः स्यात्स चेद्यः सूर्याद्यवयवः । 'मत्स्यस्य ङ्याम्' (४१९८) । 'सूर्यागस्त्ययोश्छे च ङ्यां च' (वा ४१९९) ।

कर्बुरे" इत्यमरः । **सारङ्गीति** ॥ "सारङ्गश्शबले त्रिषु" इत्यमरः ॥ 'फिषोऽन्त उदात्तः' इत्यन्तोदात्तत्वशङ्कां व्युदस्यति । **लघाविति** ॥ एतत्सूत्रं वृषाकपीति व्याख्यावसरे व्याख्यातम् । **कृष्णा । कपिलेति** ॥ फिट्स्वरेणान्तोदात्ताविमाविति भावः । **षिद्गौरादिभ्यश्च** ॥ ष् इत् येषान्ते षितः, गौरः आदिः येषान्ते गौरादयः, षितश्च गौरादयश्चेति द्वन्द्वः । **नर्तकीति** ॥ 'नृती गात्रविक्षेपे' 'शिल्पिनि ष्वुन्' 'षः प्रत्ययस्य' इति षकार इत्, 'हलन्त्यम्' इति नकारश्च इत्, 'युवोरनाकौ' इति अकादेशः, लघूपधगुणः, रपरत्वम्, नर्तकशब्दात् ङीष्, टापोऽपवादः, 'यस्येति च' इत्यकारलोपः इति भावः । **गौरीति** ॥ श्वेतेत्यर्थः । फिट्स्वरेण अन्तोदात्तत्वात् 'अन्यतो ङीष्' इत्यप्राप्तेरिह विधिरिति भावः । संज्ञाशब्दो वायम् । "उमा कात्यायनी गौरी" इत्यमरः । 'दशवर्षा भवेद्गौरी' इति स्मृतिः । **अनडुही-अनड्वाहीति** ॥ अनडुहः स्त्रीत्यर्थः । अनो वहतीति यौगिको वा । गौरादिगणे निपातनादेव ङीषि आम्विकल्पः । एवञ्च 'अनुडुहः स्त्रियाम् आम् वेति वक्तव्यम्' इति वार्तिकन्न कर्तव्यमिति भावः । **पिप्पल्यादयश्चेति** ॥ अत्र गौर, मत्स्य, मनुष्य, शृङ्ग, गवय, हय, मुकय, गौतम, अनड्वाही, अनडुही, तरुण, तलुन, श्वन्, इति पठित्वा 'पिप्पल्यादयश्च' इत्युक्ता पिप्पली, हरीतकी, कोशातकी, पृथिवी, मातामही, इत्यादि पठितम् । तत्र पिप्पलीशब्दस्य जातिवाचित्वेऽपि नियतस्त्रीलिङ्गत्वात् ङीषोऽप्राप्तेरिह पाठः । श्वन्शब्दस्य तु 'ऋन्नेभ्यः' इति ङीपि प्राप्ते ङीषर्थः इह पाठः । स्वरे विशेषः । **आकृतिगणोऽयमिति** ॥ गौरादिरित्यर्थः । पिप्पल्यादेरवान्तरगणत्वे प्रयोजनं चिन्त्यम् । मत्स्यशब्दात् गौरादित्वात् ङीषि विशेषनन्दर्शयितुमाह । **सूर्यतिष्यागस्त्य** ॥ 'ढे लोपोऽकद्र्वाः' इत्यतो लोप इत्यनुवर्तते । य इति षष्ठी, अङ्गस्येत्यधिकृतमवयवषष्ठ्यन्तम्, तच्च उपधायामन्वेति । अङ्गस्य उपधाभूतो यो यकारः तस्य लोपस्स्यादिति लभ्यते । सूर्यतिष्यागस्त्यमत्स्यानामित्यप्यवयवषष्ठ्यन्तं यकारेऽन्वेति, न त्वङ्गविशेषणम् । तदाह । **अङ्गस्येत्यादिना** ॥ **मत्स्यस्य ङ्यामिति** ॥

'तिष्यपुष्ययोर्नक्षत्राणि यलोप इति वाच्यम्' (वा ४२००)। मत्सी। 'मातरि षिच्च' (वा २७१०) इति षित्त्वादेव सिद्धे गौरादिषु मातामहीशब्दपाठादनित्यः षितां ङीष्। दंष्ट्रा।

५००। जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु। (४-१-४२)

एकादशभ्यः प्रातिपदिकेभ्यः क्रमाद्वृत्त्यादिष्वर्थेषु ङीष्स्यात्। जानपदी वृत्तिश्चेत्, अन्या तु जानपदी। उत्सादित्वादञन्तत्वेन 'टिड्ढा-' (सू ४७०) इति ङीप्याद्युदात्तः। कुण्डी अमत्रं चेत्, कुण्डान्या। 'कुडि दाहे'।

तेनेह न, मत्स्यस्येदं मात्स्यम्। **सूर्यागस्त्ययोश्छे च ड्याश्चेति** ॥ सूरीयः। सूरी। अगस्तीयः। अगस्ती। नेह, सौर्यम्। आगस्त्यम्। **तिष्येति** ॥ 'नक्षत्रेण युक्तः कालः, सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्' इति च विहिते नक्षत्रसम्बन्धिनि अणि परतः तिष्यपुष्ययोर्यलोपः इत्यर्थः। तत्र तिष्यस्य यलोपो नियम्यते। पुष्यस्य त्वप्राप्तो विधीयते। तिष्येण युक्तः पूर्णमासः, तिष्ये भवो वा तैषः। एवं पौषः। नेह। तिष्यस्य पुष्यस्य वाऽयं तैष्यः, पौष्यः। **मत्सीति** ॥ मत्स्यशब्दात् गौरादिङीषि यलोपः, 'यस्येति च' इत्यकारलोपः। ननु 'पितृव्यमातुलमातामहपितामहाः' इति सूत्रे मातुः पिता पितुः पितेति विग्रहे मातृपितृभ्यां डामहचि टिलोपे मातामहपितामहशब्दौ निपातितौ। तत्र मातुर्माता पितुर्मातेति विग्रहे डामहचोषित्वं विहितं 'मातरि षिच्च' इति। ततश्च षित्त्वविधानादेव ङीष् सिद्धेः गौरादिषु मातामहीशब्दपाठो न कर्तव्यः। नच 'मातरि षिच्च' इति न क्रियतामिति वाच्यम्। पितामहीत्यत्र ङीषर्थं तस्यावश्यकत्वादित्यत आह। **मातरीति** ॥ **दंष्ट्रेति** ॥ दंशेः 'दान्शीशस' इति करणे ष्ट्रन्। अत्र षित्त्वे सत्यपि न ङीषिति भावः। सूर्यादीनामङ्गानामुपधाभूतस्य यकारस्य लोप इति तु न व्याख्यातम्। तथा सति सौरी बलाकेति न सिद्ध्येत्। सूर्येणैकदिक् इत्यर्थे 'तेनैकदिक्' इत्यणि तदन्तात् ङीपि अणन्तमङ्गम्, ननु सूर्यशब्द इति तदसिद्धिः। वचनन्तु सूरी कुन्तीत्यत्र चरितार्थमित्यन्यत्र विस्तरः। **जानपद** ॥ जानपदेत्यादि कबरादित्यन्तमेकपदम्। समाहारद्वन्द्वात् पञ्चमी। **जानपदीति** ॥ जनपदे भवेत्यर्थः। **वृत्तिश्चेदिति** ॥ जीविका गम्या चेदित्यर्थः। ननु 'उत्सादित्वादञ्' इति ङीपैव सिद्धे ङीष्विधिर्व्यर्थ इत्यत आह। **उत्सादित्वादिति** ॥ 'अनुदात्तौ सुप्पितौ' इति ङीप्याद्युदात्तत्वम्। ङीषि तु प्रत्ययस्वरेणान्तोदात्तत्वमिति भेद इत्यर्थः। **कुण्डीति** ॥ 'पिठरं स्थाल्युखा कुण्डम्' इत्यमरः। 'पात्रामत्रे च भोजनम्' इति च। कुण्डशब्दस्य स्त्रीत्वमपि ङीष्विधिसामर्थ्यात्। 'पिठरे तु न ना कुण्डम्' इति विश्वः। **कुण्डान्येति** ॥ दहनीयेत्यर्थः। तदेव विशदयति।

'गुरोश्च हलः' (सू ३२८०) इत्यप्रत्ययः। यस्तु 'अमृते जारजः कुण्डः' इति मनुष्यजातिवचनस्ततो जातिलक्षणो ङीष् भवत्येव। अमत्रे हि स्त्रीविषयत्वादप्राप्तो ङीष् विधीयते, न तु नियम्यते। गोणी आवपनं चेत्, गोणान्या। स्थली अकृत्रिमा चेत्, स्थलान्या। भाजी श्राणा चेत्, भाजान्या। नागी स्थूला चेत्, नागान्या। गजवाची नागशब्दः स्थौल्यगुणयोगादन्यत्र प्रयुक्त उदाहरणम्। सर्पवाची तु दैर्घ्यगुणयोगादन्यत्र प्रयुक्तः प्रत्युदाहरणम्। काली वर्णश्चेत्, कालान्या। नीली अनाच्छादनं चेत्, नीलान्या। नील्या रक्ता शाटीत्यर्थः। 'नील्या अन्वक्तव्यः' (वा २६८०) इत्यन्। अनाच्छादनेऽपि

कुडि दाहे इति॥ **गुरोश्चेति**॥ गुरुमतो हलन्ताद्धातोः अप्रत्ययस्स्यात् भावकर्मणोः स्त्रियामिति तदर्थः। ननु 'अमृते जारजः कुण्डो मृते भर्तरि गोलकः' इति मनुष्यजातिविशेषवाची कुण्डशब्दोऽपि प्रत्युदाहरणं किन्न स्यादित्यत आह। **यस्त्विति**॥ **जातिलक्षणः इति**॥ 'जातेरस्त्रीविषयात्' इति जातिनिमित्तक इत्यर्थः। ननु अमत्रेऽपि वाच्ये कुण्डशब्दात् जातिलक्षणङीषि सिद्धे तद्वचनं व्यर्थम्। नच अमत्र एव ङीषिति नियमार्थं तदिति वाच्यम्। एवं सति मनुष्यजातिविशेषवाचित्वे ङीषोऽनुपपत्तेरित्यत आह। **अमत्रे हि स्त्रीविषयत्वादिति**॥ 'जातेरस्त्रीविषयात्' इत्यनित्यस्त्रीलिङ्गात् ङीष् विहितः। अमत्रे कुण्डशब्दो नित्यस्त्रीलिङ्गः, 'पदान्तरं विना स्त्रियां वर्तमानत्वं नित्यस्त्रीत्वम्' इति स्वीकारात्। 'कुण्डी कमण्डलौ जारात् पतिवत्नीसुते पुमान्' इति मेदिनीकोशाच्च। तथाच कुण्डशब्दात् जातिलक्षणङीषप्राप्त एव विधीयते, नतु नियम्यते। अतो मनुष्यजातिवाचित्वेऽपि ङीष् निर्बाध इति भावः। **आवपनश्चेदिति**॥ ओप्यते निक्षिप्यते अस्मिन्नित्यर्थे आङ्पूर्वाद्वपेर्ल्युट्। **गोणान्येति**॥ कस्याश्चिदिदन्नाम। **अकृत्रिमा चेदिति**॥ इदानीन्तनपुरुषपरिष्कृता भूमिः कृत्रिमा, तद्भिन्नेत्यर्थः। **स्थलान्येति**॥ कृत्रिमेत्यर्थः। "स्थलयोदकं परिगृह्णन्ति" इति यजुर्वेदे। **भाजीति**॥ भज्यते सेव्यते इति कर्मणि घञ्। 'घञजबन्ताः पुंसि' इति प्रायिकम्। **श्राणा चेदिति**॥ "यवागूरुष्णिका श्राणा' इत्यमरः। **भाजान्येति**॥ अश्राणेत्यर्थः। 'श्रा पाके' क्तः। संयोगादेरातो धातोर्यण्वतः' इति निष्ठानत्वम्, णत्वञ्च, पक्वेत्यर्थः। नागशब्दस्य स्थौल्ये काप्यप्रसिद्धेराह। **गजवाचीति**॥ **वर्णश्चेदिति**॥ वर्णः प्रवृत्तिनिमित्तश्चेदित्यर्थः। वर्णविशिष्टा चेति यावत्। अन्यथा कालशब्दस्य "गुणे शुक्लादयः पुंसि" इति पुंस्त्वापातात्। सूत्रे वर्णा इति च्छेदः। अर्शआद्यजन्ताट्टाप्। **कालान्येति**॥ कौर्ययुक्तेत्यर्थः। संज्ञाशब्दो वा। **अनाच्छादनश्चेदिति**॥ वस्त्राभिन्नं गवादिकमित्यर्थः। **नीलान्येति**॥ नन्वस्त्राच्छादनस्य विशेष्यत्वे स्त्रीत्वानुपपत्तिः। पटीत्यस्य विशेष्यत्वेऽपि नीलवर्णवती पटीत्यर्थे ङीषः अप्रसक्तिरेव। 'नीलादोषधौ, प्राणिनि च' इति नियमस्य वक्ष्यमाणत्वादित्यत आह। **नील्या रक्तेति**॥ नील्या ओषध्या रागविशेषं प्राप्तेत्यर्थः। ननु कथमयमर्थो लभ्यत इत्यत आह। **नील्या अनिति**॥ 'तेन रक्तं रागात्, इत्यत्र इदं वार्तिकम्। नीलीशब्दादन्प्रत्यये

न सर्वत्र। किन्तु 'नीलादोषधौ' (वा २४५६)। नीली। 'प्राणिनि च' (वा २४५८)। नीली गौः। 'संज्ञायां वा' (वा २४५७)। नीली—नीला। कुशी अयोविकारश्चेत्, कुशान्या। कामुकी मैथुनेच्छा चेत्, कामुकान्या। कबरी केशानां सन्निवेशश्चेत्, कबरान्या। चित्रेत्यर्थः।

५०१। शोणात्प्राचाम्। (४-१-४३)

शोणी—शोणा।

५०२। वोतो गुणवचनात्। (४-१-४४)

उदन्ताद्गुणवाचिनो वा ङीष्स्यात्। मृद्वी—मृदुः। 'उतः' किम्।

सति 'यस्येति च' इति लोपे नीलशब्दः, तस्य नीलीरक्तवाचकस्य विशेषणांशे ओषधिवाचकत्वसत्त्वात् 'नीलादोषधौ प्राणिनि च' इति नियमे सत्यपि ङीषः प्राप्तेस्तन्निवृत्त्यर्थमनाच्छादनग्रहणमिति भावः। ननु नीला कुण्डीत्यत्रापि अनाच्छादनत्वात् ङीष् स्यादित्याशङ्क्य आह। **अनाच्छादनेऽपीति**॥ 'नीलादोषधौ, प्राणिनि च' इति वार्तिकमेतत्। नीलात् अनाच्छादनेऽपि भवन् ङीष् ओषधौ प्राणिनि चैव स्यात्, न त्वन्यत्रेत्यर्थः। एवञ्च नीला कुण्डीत्यादौ न ङीषिति भावः। 'संज्ञायां वा' इत्यपि वार्तिकम्। संज्ञायामुक्तविषये तदन्यत्रापि ङीष् वा स्यादित्यर्थः। **अयोविकारश्चेदिति**॥ फाला इति प्रसिद्धः। **कुशान्येति**॥ छन्दोगसूत्रे 'प्रस्तोता तु कुशाः कार्येष्वङ्गियस्य वृक्षस्य खदिरस्य दीर्घसत्वेष्वेके प्रादेशमात्रीः कुशपृष्ठास्त्वक्तस्समामञ्जते' इति प्रसिद्धाः। **कामुकीति**॥ कामयितुं शीलमस्या इति विग्रहे। 'लषपत' इत्यादिना कमेरुकञ्। मैथुनेच्छावती चेदित्यर्थः। अर्शआद्यजन्ताट्टाप्। **कामुकान्येति**॥ धनादीच्छावतीत्यर्थः। **शोणात् प्राचाम्**॥ 'रोहितो लोहितो रक्तश्शोणः कोकनदच्छविः' इत्यमरः। 'वर्णानान्तणतिनितान्तानाम्' इति शोणशब्दः आद्युदात्तः अनुदात्तान्तः। 'अन्यतो ङीष्' इति नित्यं ङीषि प्राप्ते विकल्पार्थमिदम्। **वोतो गुणवचनात्**॥ प्रातिपदिकादित्यनुवृत्तम्, वा उत इति च्छेदः। उतः गुणवचनस्य प्रातिपदिकस्य विशेषणात् तदन्तविधिः। तदाह। **उदन्तादिति**॥ **वा ङीषिति**॥ ङीबिति नात्रानुवर्तते। 'गुणवचनात् ङीषाद्युदात्तार्थः' इति वार्तिकादिति भावः। **मृद्वीति**॥ मृदुशब्दात् ङीषि यण्। अत्र "सत्त्वे निविशतेऽपैति पृथक्जातिषु दृश्यते। आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः॥" इति भाष्ये गुणलक्षणमुक्तम्। सत्त्वं द्रव्यं समवायिकारणं, तत्रैव निविशते समवैति यः स गुण इत्यन्वयः। द्रव्यमात्रसमवेत इति यावत्। मात्रपदात् सत्ताजातिर्व्यवच्छिद्यते। तस्याः द्रव्यगुणक्रियावृत्तित्वात्। अथ द्रव्यत्वे अतिव्याप्तिवारणाय आह। अपैतीति। कतिपयद्रव्यादपगच्छतीत्यर्थः। द्रव्यत्वस्य सर्वद्रव्यवृत्तित्वान्नातिव्याप्तिरिति भावः। एवमपि गोत्वे अतिव्याप्तिवारणाय आह। पृथग्जातिषु दृश्यते इति। पृथक् भिन्नाः जातयः येषां ते पृथग्जातयः, भिन्नजातीयद्रव्यवृत्तिरिति यावत्। गोत्वस्य गोजातीयेष्वेव सत्त्वात् भिन्नजाती-

शुचिः । 'गुणः–' इति किम् । आखुः । 'खरुसंयोगोपधान्न' (वा २४६०) । 'खरुः, पतिंवरा कन्या' । पाण्डुः ।

५०३ । बह्वादिभ्यश्च । (४-१-४५)

येषु अश्वादिष्वसत्त्वान्नातिव्याप्तिरिति भावः । एवमपि क्रियायामतिव्याप्तिवारणाय आह । आधयश्चाक्रियाजश्चेति । आधीयते उत्पाद्यते इत्याधेयः उत्पाद्यः अक्रियाजः अनुत्पाद्यः । उत्पाद्यत्वानुत्पाद्यत्वाभ्यां द्विविध इति यावत् । गुणो नित्यानित्यभेदेन द्विविधो भवति । नित्यगतानां गुणानां नित्यत्वात्, अनित्यगतानामनित्यत्वात् । क्रियायास्तु सर्वस्या अप्युत्पाद्यत्वान्नातिव्याप्तिरिति भावः । एवमपि द्रव्ये अतिव्याप्तिः । तस्य अवयवद्रव्यसमवेतत्वात् विजातीयपार्थिवाद्यवयवेषु सत्त्वात् नित्यानित्यभेदसत्त्वाच्च । अत आह । असत्त्वप्रकृतिरिति । अद्रव्यस्वभाव इत्यर्थः । द्रव्यभिन्न इति यावत् । अत्र मात्रपदेन सत्ताजातेः, अपैतीत्यनेन द्रव्यत्वस्य, पृथग्जातिषु दृश्यते इत्यनेन गोत्वादिजातेश्च निरासात् तद्भिन्नत्वमिति लब्धम् । 'आधेयश्चाक्रियाजश्च' इत्यनेन क्रियानिरासात् क्रियाभिन्नत्वं लब्धम् । असत्त्वप्रकृतिः इत्यनेन द्रव्यस्य निरासात् द्रव्यभिन्नत्वं लब्धम् । तथाच जातिभिन्नत्वे सति क्रियाभिन्नत्वे सति समवेतत्वं गुणलक्षणं निष्कृष्टं वेदितव्यम् । समवेतत्वाभावादभावनिरासः । अत्र "नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव" इति तार्किकाभिमतविशेषपदार्थाङ्गीकारे तद्भिन्नत्वमपि निवेश्यम् । 'आकडारादेका संज्ञा' इति सूत्रभाष्ये तु "समासकृदन्ततद्धितान्तसर्वनामजातिसङ्ख्यासंज्ञाशब्दव्यतिरिक्तमर्थवच्छब्दरूपं गुणवचनसंज्ञं भवति" इत्युक्तम् । तदिदं प्रकृतसूत्रभाष्यस्थलक्षणस्यास्योक्तस्य प्रपञ्चनपरं वेदितव्यम् । परन्तु आकडारसूत्रभाष्ये संख्याशब्दभिन्नत्वमप्युपात्तम् । तदप्युक्तलक्षणे निवेश्यम् । न चैवमपि मृदुपटुादिशब्दानां गुणविशिष्टद्रव्यवाचित्वात् गुणवचनत्वाभाव इति वाच्यम् । गुणवचनेत्यन्वर्थसंज्ञया गुणोपसर्जनद्रव्यवाचित्वस्यैव विवक्षितत्वात् । एवञ्च रूपशब्दस्य न गुणवचनता, तस्य प्राधान्येन रूपवाचितया रूपवति प्रयोगाभावात् । रूपादिशब्दस्यापि गुणवचनशब्देन ग्रहणे "गुणवचनेभ्यो मतुपो लुगिष्टः" इत्यत्रापि रूपादिशब्दानां ग्रहणापत्तौ रूपो घटः इत्यादिप्रयोगापत्तेः । प्रपञ्चितञ्चैतदरुणाधिकरणेऽस्माभिरध्वरमीमांसाकुतूहलवृत्तौ । **शुचिरिति** ॥ शुक्लेत्यर्थः । "शुक्लशुभ्रशुचिश्वेतविशदश्वेतपाण्डुराः" इत्यमरः । नच शुचिधातोः 'इगुपधात् कित्' इत्यौणादिके इप्रत्यये उत्पन्नस्य शुचिशब्दस्य आकडारसूत्रे भाष्ये कृदन्तस्य गुणवचनत्वपर्युदासादेवात्र ङीष् न भविष्यतीति वाच्यम् । उणादीनाम् अव्युत्पत्तिपक्षाश्रयणात् । **आखुरिति** ॥ मूषिकेत्यर्थः । आखोस्तु जातिविशिष्टद्रव्यवचनत्वादुक्तगुणवचनत्वाभावान्न ङीप् । 'खरुसंयोगोपधान्न' इति वार्तिकम् । खरुश्च संयोगोपधश्चेति समाहारद्वन्द्वः । खरुशब्दात् संयोगोपधाच्च 'वोतो गुणवचनात्' इति ङीप् नेत्यर्थः । खरुशब्दमप्रसिद्धत्वात् व्याचष्टे । **पतिंवरा कन्येति** ॥ पतिलाभोत्कण्ठावतीत्यर्थः । औत्कण्ठ्यलक्षणगुणोपसर्जनद्रव्यवाचितया गुणवाचित्वात् प्राप्तिः । **पाण्डुरिति** ॥ श्वेतेत्यर्थः । संयोगोपधत्वात् न ङीप् । **बह्वादिभ्यश्च** ॥ गुणवचनत्वादेव

एभ्यो वा ङीष्स्यात्। बह्वी—बहुः। 'कृदिकारादक्तिनः' (ग ५०)। रात्रिः—रात्री। 'सर्वतोऽक्तिन्नर्थादित्येके' (ग ५१)। शकटिः—शकटी। 'अक्तिन्नर्थात्' किम्। अजननिः। क्तिन्नन्तत्वादप्राप्ते विध्यर्थं पद्धतिशब्दो गणे पठ्यते। 'हिमकाषिहतिषु च' (सू ९९२) इति पद्भावः। पद्धतिः—पद्धती।

५०४। पुंयोगादाख्यायाम्। (४-१-४८)

या पुमाख्या पुंयोगात्स्त्रियां वर्तते ततो ङीष्स्यात्। गोपस्य स्त्री गोपी। 'पालकान्तान्न (वा २४६१)। गोपालिका। अश्वपालिका। 'सूर्यादेवतायां

सिद्धे बहुग्रहणं व्यर्थमेवेति प्राञ्चः। वस्तुतस्तु अनुपदोदाहृताकडारसूत्रभाष्यरीत्या सङ्ख्यासंज्ञकशब्दानां गुणवचनत्वाभावात् अप्राप्तस्य ङीषो विधानार्थं बहुग्रहणमित्याहुः। **बह्वी—बहुरिति॥** वैपुल्यवाची बहुशब्दोऽयम्। त्रित्वादिसमनियतसङ्ख्याविशेषवाचित्वे तु एकवचनानुपपत्तेः। वैपुल्यवाचित्वेऽपि 'बहुगणवतुडति सङ्ख्या' इति सङ्ख्याशब्दत्वात् न गुणवचनत्वमिति न वैयर्थ्यमिति भावः। 'कृदिकारादक्तिनः' इति बह्वाद्यन्तर्गणसूत्रम्। कृतो य इकारस्तदन्तात् प्रातिपदिकात् ङीष् वा स्यात्, न तु क्तिन्नन्तादित्यर्थः। **रात्रिः—रात्रीति॥** 'राशदिभ्यां त्रिप्' इति राधातोरौणादिकस्त्रिप्। गुणवचनत्वाभावात् उदन्तत्वाभावाच्चाप्राप्ते वचनम्। 'सर्वतोऽक्तिन्नर्थादित्येके' इत्यपि बह्वाद्यन्तर्गणसूत्रमेव। कृदिकारान्तादकृदिकारान्तादपि ङीष् वा स्यात्। ननु क्तिन्नर्थकप्रत्ययान्तादित्यर्थः। **शकटिः—शकटीति॥** शकटिशब्दस्य अव्युत्पन्नप्रातिपदिकत्वात् कृदन्तत्वाभावात् सर्वत इति वचनम्। अव्युत्पत्तिपक्षे रात्रिशब्दोऽप्युदाहरणं बोध्यम्। **अजननिरिति॥** स्त्रियां क्तिन्' इत्यधिकारे 'आक्रोशे नञ्यनिः' इति नञि उपपदे जनेरनिप्रत्ययः, अक्तिन इत्युक्तौ अत्र निषेधो न स्यात्। अतः अक्तिन्नर्थादित्युक्तिरिति भावः। ननु हनधातोः स्त्रियां कर्मणि क्तिनि 'अनुदात्तोपदेश' इत्यादिना नलोपे हतिशब्दः, तस्य क्तिन्नन्तत्वात् कथं पद्धतिशब्दात् ङीषित्यत आह। **क्तिन्नन्तत्वादिति॥ गणे इति॥** बह्वादिगण इत्यर्थः। ननु पादाभ्यां हतिरिति विग्रहे 'कर्तृकरणे कृता बहुळम्' इति तृतीयासमासे सुब्लुकि पाद हति इति स्थिते कथं पदादेशः, 'पादः पत्' इत्यत्र कृतसमासान्तलोपस्यैव पादशब्दस्य ग्रहणात् भत्वाभावाच्च 'पादस्य पदाज्यातिगोपहतेषु' इत्यपि न सम्भवति। तस्य आज्यादिष्वेव परेषु प्रवृत्तेरित्यत आह। **हिमकाषीति॥** हिमादिषु परेषु पादशब्दस्य पदादेशस्स्यादिति तदर्थः। **पुंयोगात्॥** पुंयोगादिति हेतौ पञ्चमी। आख्यायामिति पञ्चम्यास्तसम्प्यादेशः। 'सुपां स्थाने सुपो भवन्तीति वक्तव्यम्' इत्युक्तेः। आख्येत्यनेन वाचकशब्दो विवक्षितः, कस्य वाचकः इत्यपेक्षायां पुंयोगादित्युपस्थितत्वात् पुंस इति लभ्यते। तथाच आख्यायामित्यनेन पुंसि प्रसिद्धात् शब्दादिति लभ्यते। पुंयोगादिति स्त्रियामित्यत्रान्वेति। तथाच पुंयोगमाश्रित्य लक्षणया स्त्रियां वर्तमानादिति लभ्यते। तदाह। **या पुमाख्येत्यादिना॥ ङीषिति॥** 'अन्यतो ङीष्' इत्यतस्तदनुवृत्तेरिति भावः। 'वोतो गुणवचनात्'

चाब्वाच्यः' (वा २४७१)। सूर्यस्य स्त्री देवता सूर्या। 'देवतायाम्' किम्। सूरी कुन्ती। मानुषीयम्।

इति पूर्वसूत्रे तु 'गुणवचनात् ङीषाद्युदात्तार्थम्' इति वार्तिकात् ङीष् लब्ध इति न तत्रास्यानुवृत्तिः। **गोपस्य स्त्रीति** ॥ गाः पातीति गोपः, 'आतोऽनुपसर्गे कः' तज्जायायान्तु गोरक्षणाभावेऽपि तद्भार्यात्वात् तद्व्यपदेशः। ततश्च पुंयोगमाश्रित्य लक्षणया स्त्रियां वर्तमानत्वात् ङीषि 'यस्येति च' इत्यकारलोपः इति भावः। हरेः स्त्री, शम्भोः स्त्री, इत्यादौ न ङीष्। स्त्रीप्रत्ययविधिप्रकरणे अतः इत्यनुवृत्तेः। या तु स्वयमेव गाः पाति, नतु गोपस्य स्त्री, सा तु गोपा। तत्र गोपशब्दस्य स्वत एव स्त्रियां वृत्त्या पुंयोगादवृत्तेः। नच गोपस्य माता श्वश्रूः मातुलानी वा गोपीति स्यादिति वाच्यम्। अकुर्वती पापं भर्तृकृतान् वधबन्धादीन् यथा लभते एवं तच्छब्दमपीति भाष्यस्वारस्येन जायापत्यात्मकस्यैव पुंयोगस्य विवक्षितत्वात्। दुहितरि केकयी, देवकी, इत्यादयस्तु गौरादौ पाठ्या इति शब्देन्दुशेखरे स्थितम्। आख्याग्रहणं किम्। प्रसूता। अयं हिशब्दो जातप्रसवामाह। स च प्रसवः पुंयोगानिमित्तकः, तन्निमित्ता चास्य स्त्रियां वृत्तिः, न त्वयं पुंसि प्रसिद्धः, अतो न ङीष्, अत्र 'गोपालकादीनां प्रतिषेधः' इति वार्तिकम्। अत्र आदिपदेन अश्वपालिकेत्यादयः पालकान्ता एव गृह्यन्ते। भाष्ये तेषामेवोदाहरणात्। तदाह। **पालकान्तान्नेति** ॥ पुंयोगलक्षणङीषिति शेषः। **गोपालिकेति** ॥ गोपालकस्य स्त्रीत्यर्थः। ननु पालयतीति पालकः, कर्तरि ण्वुल्, 'युवोरनाकौ' इत्यकादेशः। 'णेरनिटि' इति णिलोपः। गवां पालकः इति विग्रहे षष्ठीसमासे सुपो लुकि गोपालकशब्दः। तत्र किं शेषषष्ठी उत 'कर्तृकर्मणोः कृति' इति कर्मणि षष्ठी। न तावदाद्यः। प्रत्ययलक्षणमाश्रित्य टापस्समासावयवात् पालकशब्दात् उत्पन्नसुपः परत्वेन असुप इति निषेधात् 'प्रत्ययस्थात्' इति इत्त्वानुपपत्तेः। नचास्तु कर्मणि षष्ठीति द्वितीयः पक्षः। 'गतिकारकोपपदानां कृद्भिस्सह समासवचनं प्राक्सुबुत्पत्तेः' इति वचनेन सुबुत्पत्तेः प्रागेव पालकशब्देन प्रातिपदिकेन गवामिति षष्ठ्यास्समासे सति समासात् उत्पन्नस्य टापस्सुपः परत्वाभावेन इत्त्वस्य निर्बाधत्वादिति वाच्यम्। 'तृजकाभ्यां कर्तरि' इति 'कृद्योगलक्षणा षष्ठी न समस्यते' इति कारकषष्ठ्यास्समासनिषेधात् इति चेत्। मैवम्। गाः पालयतीति गोपालः। कर्मण्यण्। उपपदसमासः। गोपाल एव गोपालकः, स्वार्थिकः कः। तद्धितावयवत्वात् सुब्लुक्। गोपालकस्य स्त्री गोपालिकेति व्युत्पत्त्याश्रयणात्। नह्यत्र टाप् सुपः परः, केन व्यवधानात्। अस्तु वा शेषषष्ठ्या समासः। एवमपि न टाप् सुपः परः, शेषत्वविवक्षायामपि वस्तुतः कारकतया सुबुत्पत्तेः प्रागेव शेषषष्ठ्यास्समासप्रवृत्तेः। अत एव प्रकृतसूत्रे 'उपपदमतिङ्' इति सूत्रे च भाष्ये "कुम्भकारपदे सुबुत्पत्तेः प्रागेव कुम्भस्येति शेषषष्ठ्यास्समासः उपन्यस्तस्सङ्गच्छते" इति शब्देन्दुशेखरे प्रपञ्चितम्। **सूर्यादेवतायामिति** ॥ देवताभूतायां स्त्रियां पुंयोगाद्वर्तमानात् सूर्यशब्दात् चाप् वक्तव्यः इत्यर्थः। 'पुंयोगात्' इति ङीषोऽपवादः। चपावितौ। **सूर्येति** ॥ चापि सवर्णदीर्घः। **देवतायां किमिति** ॥ सूर्यस्त्रियां देवतात्वाव्यभिचारात् प्रश्नः। **सूरी कुन्तीति** ॥ ङीषि 'सूर्यतिष्य' इति यकारलोपः, 'यस्येति च' इत्यकारलोपः। **मानुषीयमिति** ॥ इयं कुन्ती मानुषी,

५०५। इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययव-यवनमातुलाचार्याणामानुक्। (४-१-४९)

एषामानुगागमः स्यान्ङीष्च। इन्द्रादीनां षण्णां मातुलाचार्ययोश्च पुंयोग एवेष्यते। तत्र ङीषि सिद्धे आनुगागममात्रं विधीयते। इतरेषां चतुर्णामुभयम्। इन्द्राणी। 'हिमारण्ययोर्महत्त्वे' (वा २४७२)। महद्धिमं हिमानी। अरण्यानी। 'यवाद्दोषे' (वा २४७३)। दुष्टो यवो यवानी। 'यवनालिप्याम्' (वा २४७४)। यवनानां लिपिर्यवनानी। मातुलोपाध्याययोरानुग्वा। मातुलानी—मातुली। उपाध्यायानी—उपाध्यायी। या तु स्वयमेवाध्या-

---

न तु देवतेत्यर्थः। तच्च महाभारतादौ स्पष्टम्। नच "सूर्यादेवतायान्न" इत्येवोच्यताम्, ङीषि निषिद्धे टापैव सूर्येति सिद्धेरिति वाच्यम्, टापि हि सति पित्त्वादनुदात्तत्वम्। 'अनुदात्तौ सुप्पितौ' इत्युक्तेः। चापि तु 'चितः' इत्यन्तोदात्तत्वमिति भेदः। **इन्द्रवरुण**॥ **आनुगागम इति**॥ कित्त्वादागमलिङ्गादिति भावः। **ङीष् चेति**॥ 'अन्यतो ङीष्' इत्यतस्तदनुवृत्तेरिति भावः। **पुंयोग एवेष्यते इति**॥ पुंयोगादित्यनुवृत्तेः तेषां स्त्रीत्वे पुंयोगं विना अप्रवृत्तेश्चेति भावः। नन्वेवं पुंयोगादित्येव सिद्धे ङीष्विधिर्व्यर्थ इत्यत आह। **तत्रेति**॥ तत्र इन्द्रादिषट्सु मातुलाचार्ययोश्च पुंयोगादित्येव ङीषि सिद्धे तत्सन्नियोगेन आनुगागममात्रं विधीयते इत्यर्थः। **इतरेषामिति**॥ हिमारण्ययवयवनानान्तु आनुक् ङीष् चेत्युभयं विधीयते। तत्र पुंयोगस्यासम्भवादिति भावः। **इन्द्राणीति**॥ आनुकि ककार इत्, उकार उच्चारणार्थः, कित्त्वादन्तावयवः, सवर्णदीर्घः, णत्वमिति भावः। वरुणानी, भवानी, शर्वाणी, रुद्राणी, मृडानी, इत्युदाहरणानि सुगमत्वात् उपेक्षितानि। दीर्घोच्चारणं विना अनुग्विधौ तु पररूपापत्तिः। अकारोच्चारणस्य अल्लोपनिवृत्त्या चरितार्थत्वात्। नुग्विधौ तु अल्लोपापत्तिरित्यन्यत्र विस्तरः। **हिमारण्ययोर्महत्त्वे** इति वार्तिकम्। महत्त्वविशिष्टे हिमे अरण्ये च वर्तमानयोरानुङ्ङीषावित्यर्थः। **महद्धिमं हिमानीति**॥ महत्त्वयोगे स्त्रीत्वमत एव ज्ञेयम्। **अरण्यानीति**॥ महदरण्यमित्यर्थः। 'यवाद्दोषे' इति वार्तिकम्। आनुङ्ङीषाविति शेषः। दुष्टयवे वृत्तौ स्त्रीत्वमत एव ज्ञेयम्। **यवनालिप्याम्** इत्यपि वार्तिकम्। लिपिरक्षरविन्यासः। तत्र लक्षणया वृत्तौ आनुङ्ङीषावित्यर्थः। **मातुलोपाध्याययोरानुग्वेति**॥ इदमपि वार्तिकम्। अत्र पुंयोगादिति सम्बध्यते। हिमादिष्विवात्र असम्भवाभावात्। अत्र आनुगेव तु विकल्प्यते, आनुगभावेऽपि पक्षे ङीष् भवत्येव। मातुलान्नित्यं प्राप्ते उपाध्यायादप्राप्ते विभाषेयम्। **मातुलानी—मातुलीति**॥ मातुलस्य स्त्रीत्यर्थः। **उपाध्यायानी—उपाध्यायीति**॥ उपाध्यायस्य स्त्रीत्यर्थः। **या तु स्वयमेवेति**॥ इदन्तु वार्तिकं तृतीयस्य तृतीये 'इङश्च' इति सूत्रे पठितम्। या स्वयमेव अध्यापयति न तूपाध्यायस्य स्त्री, तत्र पुंयोगाभावेऽपि केवलङीष्विकल्पो वाच्य इत्यर्थः। युगान्तरे ब्रह्मवादिन्यः स्त्रियस्सन्ति, तद्विषय-

पिका तत्र वा ङीष् वाच्यः । उपाद्ध्यायी–उपाद्ध्याया । 'आचार्योदणत्वं च' (वा २४७७) । आचार्यस्य स्त्री आचार्यानी । पुंयोग इत्येव । आचार्या, स्वयं व्याख्यात्री । 'अर्यक्षत्रियाभ्यां वा' (वा २४७८) । अर्याणी–अर्या । स्वामिनी वैश्या वेत्यर्थः । क्षत्रियाणी–क्षत्रिया । पुंयोगे तु, अर्यी । क्षत्रियी । कथं 'ब्रह्माणी' इति । ब्रह्माणमानयति जीवयतीति । 'कर्मण्यण्' (सू २९१३) ।

५०६ । क्रीतात्करणपूर्वात् । (४-१-५०)

क्रीतान्ताददन्तात्करणादेः स्त्रियां ङीष्स्यात् 'वस्त्रक्रीती । 'क्वचिन्न' धनक्रीता ।

मिदम् । "पुरा युगेषु नारीणां मौञ्जीबन्धनमिष्यते । अध्यापनञ्च वेदानां सावित्रीवचनन्तथा ॥" इति स्मरणात् । **आचार्योदणत्वञ्च** इत्यपि वार्तिकम् । चकारः आनुङ्ङीषोस्समुच्चयार्थः । **आचार्यानीति** ॥ आचार्यस्य स्त्रीत्यर्थः । 'अट्कुप्वाङ्' इति णत्वं न भवति । "उपनीय तु यश्शिष्यं वेदमध्यापयेत्तु यः । सकल्पं सरहस्यञ्च तमाचार्यं प्रचक्षते ॥" 'एकदेशमुपाध्यायम्' इति स्मृतिः । **पुंयोग इत्येवेति** ॥ पुंयोगग्रहणमनुवर्तत एवेत्यर्थः । तत्प्रयोजनमाह । **आचार्येति** ॥ अत्र पुंयोगाभावं विशदयति । **स्वयं व्याख्यात्रीति** ॥ धर्मोपदेष्ट्रीत्यर्थः । 'यस्माद्धर्मानाचिनोति स आचार्यः' इति स्मरणादिति भावः । **अर्यक्षत्रियाभ्यां वा** इति वार्तिकम् । आनुङ्ङीषाविति शेषः । स्वार्थ इति व्याख्यानलभ्यम्, तेन पुंयोगनिरासः, अत एव भाष्ये 'अर्याणी–अर्या' इत्येवोक्तम् । पुंयोग एव प्रवृत्तौ तु उपाध्यायीतिवत् अर्यीति ङीषमेवोदाहरेत् । अर्यशब्दं व्याचष्टे । **स्वामिनी, वैश्या वेत्यर्थ इति** ॥ 'अर्यः स्वामिवैश्ययोः' इति निपातनादिति भावः । **क्षत्रियाणी–क्षत्रियेति** ॥ क्षत्रियात् क्षत्रियायां भार्यायामुत्पन्नेत्यर्थः । 'सवर्णेभ्यस्सवर्णासु जायन्ते हि सजातयः' इत्युपक्रम्य 'विन्नास्वेष्वधिस्मृतः' इति स्मरणात् । विन्नास्वित्यस्य ऊढास्वित्यर्थः । **पुंयोगे तु अर्यी क्षत्रियीति** ॥ अर्यस्य स्त्री अर्यी, क्षत्रियस्य स्त्री क्षत्रियी, वैश्या शूद्रा वेत्यर्थः । **कथमिति** ॥ 'इन्द्रवरुण' इत्यादिसूत्रे ब्रह्मन्शब्दस्य अग्रहणात् ब्रह्मणः स्त्रीत्यर्थे ब्रह्माणीत्यानुङ्ङीषौ कथमिति प्रश्नः । उत्तरमाह । **ब्रह्माणमिति** ॥ आनयतीत्यस्य व्याख्यानं जीवयतीति । अन प्राणने, प्राणनं जीवनम्, अस्माद्धातोर्हेतुमण्णिचि उपधावृद्धौ तिपि शपि गुणायादेशयोः आनयतीति रूपम् । भर्तृजीवनस्य जायासौमङ्गल्यायत्तत्वात् । ततश्च ब्रह्माणमानयतीति विग्रहे आनि इति ण्यन्तात् 'कर्मण्यण्' इति अणि 'णेरनिटि' इति णिलोपे आनशब्देन ब्रह्माणमित्यस्य उपपदसमासे सुब्लुकि सवर्णदीर्घे ब्रह्मानशब्दात् 'टिड्ढाणञ्' इति ङीपि 'यस्येति च' इत्यकारलोपे 'पूर्वपदात् संज्ञायाम्' इति णत्वे ब्रह्माणीति रूपमिति भावः । 'एकाजुत्तरपदे' इति तु न । आणि सति प्रातिपदिकस्य ह्रच्कत्वात् । छुप्तेऽप्यणि लोपस्य स्थानिवत्त्वात् । पूर्वत्रासिद्धीये न स्थानिवत्' इति तु न । 'तस्य दोषः' इत्युक्तेः । **क्रीतात्करणपूर्वात्** ॥ प्रातिपदिकादित्यनुवृत्तम् अत इत्यनुवृत्तेन क्रीतादित्यनेन च विशेष्यते, तदन्तविधिः । तदाह । **क्रीतान्ता-**

५०७। क्तादल्पाख्यायाम्। (४-१-५१)

करणादेः क्तान्ताददन्तात्स्त्रियां ङीष्स्यादल्पत्वे द्योत्ये। अभ्रलिह्नी द्यौः। 'अल्पाख्यायाम्' किम्। चन्दनलिप्ता अङ्गना।

५०८। बहुव्रीहेश्चान्तोदात्तात्। (४-१-५२)

बहुव्रीहेः क्तान्तादन्तोदात्ताददन्तात्स्त्रियां ङीष्स्यात्। 'जातिपूर्वादिति वक्तव्यम्' (वा २४८४)। तेन 'बहुनञ्सुकालसुखादिपूर्वान्न' ऊरुभिन्नी।

दित्यादिना ॥ करणमादिर्यस्येति विग्रहः। प्रातिपदिकशब्दो विशेष्यम्, तेन करणादेरिति पुंस्त्वमुपपन्नम्। **वस्त्रक्रीतीति** ॥ ननु वस्त्रेण क्रीतेति टाबन्तेन विग्रहे 'कर्तृकरणे कृता बहुलम्' इति समासात्मकं प्रातिपदिकम् आदन्तमेव, न त्वदन्तमिति कथमत्र ङीषिति चेत्, सत्यम्। समासस्य तावदलौकिकविग्रहवाक्यं प्रकृतिः। वस्त्र भिस् क्रीत इति स्थिते 'गतिकारकोपपदानां कृद्भिस्सह समासवचनं प्राक् सुबुत्पत्तेः' इति परिभाषया सुबुत्पत्तेः प्रागेव क्रीतशब्देन समासे 'सुपो धातु' इति सुब्लुकि वस्त्रक्रीतेति प्रातिपदिकस्य अदन्तत्वन्निर्बाधमिति भावः। एतच्च 'पुंयोगादाख्यायाम्' इति सूत्रे भाष्ये स्पष्टम्। तर्हि धनक्रीतेत्यत्रापि ङीष् स्यादित्यत आह। **क्व चिन्नेति** ॥ 'कर्तृकरणे कृता बहुलम्' इति बहुलग्रहणेन 'गतिकारकोपपदानाम्' इत्यस्य क्वचिदप्रवृत्त्यवगमादिह सुबन्तेन समासः। तत्र च सुपः प्रागेवान्तरङ्गत्वात् टापि सति ततस्सुपि टाबन्तप्रकृतिकसुबन्तेन समासे सुब्लुकि धनक्रीताशब्दस्य अदन्तत्वाभावान्न ङीषित्यर्थः। एवञ्च अत इत्यनुवृत्तेरेतत्प्रयोजनमित्युक्तं भवति। एतच्च 'उपपदमतिङ्' इत्यत्र कैयटे स्पष्टम्। करणपूर्वात् किम्। सुक्रीता। नचैवमपि वस्त्रेण क्रीतेति वाक्यात् ङीष्प्रसङ्गः। क्रीतेति प्रातिपदिकस्य करणपूर्वत्वात् अदन्तत्वाच्चेति वाच्यम्। करणपूर्वादिति हि क्रीतान्तस्य प्रातिपदिकस्य विशेषणम्, नतु क्रीतशब्दस्य। करणं पूर्वं यस्मिन् इति बहुव्रीहिः। करणशब्दात्मकपूर्वावयवात् क्रीतान्तसमासप्रातिपदिकादित्यर्थः। एतदर्थमेव पूर्वग्रहणम्। अन्यथा क्रीतात्करणादित्येवावक्ष्यदित्यलम्। **क्तादल्पाख्यायाम्** ॥ **करणादेरिति** ॥ करणपूर्वादित्यनुवृत्तेरिति भावः। **क्तान्तादिति** ॥ क्तान्तान्तादित्यर्थः। प्रत्ययग्रहणपरिभाषालब्धक्तान्तेन प्रातिपदिकस्य विशेषणात्। **अदन्तादिति** ॥ अत इत्यनुवृत्तेरिति भावः। **अल्पत्वे द्योत्ये इति** ॥ अल्पाख्यायामिति समुदायोपाधिः। अल्पत्वं करणगतं क्रियागतं वा। **अभ्रलिह्नी द्यौरिति** ॥ अभ्रैरल्पैराच्छन्नेत्यर्थः। अभ्रैरीषदाच्छन्नेति वा। **बहुव्रीहेश्च** ॥ क्तादिति अत इति चानुवर्तते। तदाह। **बहुव्रीहेरिति** ॥ **क्तान्तादिति** ॥ क्तान्तान्तादित्यर्थः। **तेनेति** ॥ जातिपूर्वादिति विशेषणेन बह्वादिपूर्वान्न ङीष् इत्यर्थः। 'सुखादिभ्यः कर्तृवेदनायाम्' इत्यत्र सुखादिगणः पठितः। "जातिकालसुखादिभ्योऽनाच्छादनात् क्तो कृतमितप्रतिपन्नाः" इति 'नञ्सुभ्याम्' इति, बहोर्नञ्वदुत्तरपदभूम्नि' इति च, क्तान्तबहुव्रीहावन्तोदात्तविधायकानि। अत्र जातिपूर्वादित्युक्तेर्बह्वादिपूर्वस्यान्तोदात्तत्वेऽप्यर्थात् पर्युदास इति भावः। **ऊरुभिन्नीति** ॥ ऊरू भिन्नौ असंयुक्तौ

नेह बहुकृता। 'जातान्तान्न' (वा २४७९)। दन्तजाता। 'पाणिगृहीती भार्यायाम्' (वा २४८०)। पाणिगृहीता अन्या।

५०९। अस्वाङ्गपूर्वपदाद्वा। (४-१-५३)

पूर्वेण नित्ये प्राप्ते विकल्पोऽयम्। सुरापीती–सुरापीता। 'अन्तोदात्तात्' किम्। वस्त्रच्छन्ना। 'अनाच्छादनात्' इत्युदात्तनिषेधः। अत एव पूर्वेणापि न ङीष्।

५१०। स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्। (४-१-५४)

यस्या इति विग्रहः। 'निष्ठा' इति भिन्नशब्दस्य पूर्वनिपातस्तु न भवति। जातिकालसुखादिभ्यः परा निष्ठा वाच्या' इति वार्तिकात्। 'जातिकालसुखादिभ्यः' इत्यादिसूत्रेणान्तोदात्तमिदम्। जातिलक्षणन्तु 'जातेरस्त्रीविषयात्' इत्यत्र वक्ष्यते। **बहुकृतीति**॥ बहवः कृताः ययेति विग्रहः। अकृता, मासयाता, सुखयाता, दुःखयाता, इति च भाष्ये प्रत्युदाहृतम्। **जातान्तान्न** इति वार्तिकम्। 'बहुव्रीहेश्च' इत्युक्तो ङीष् नेत्यर्थः। **दन्तजातेति**॥ दन्ताः जाताः यस्या इति विग्रहः। ऊरुभिन्नीतिवत् परनिपातः। **पाणिगृहीती भार्यायामिति**॥ इदमपि वार्तिकम्। विधिवदूढा भार्या, तस्यां विद्यमानादेव पाणिगृहीतशब्दात् ङीषित्यर्थः। विवाहकाले विधिवत् पाणिः गृहीतो यस्या इति विग्रहः। **पाणिगृहीतान्येति**॥ दास्यादिरित्यर्थः। **अस्वाङ्गपूर्वपदाद्वा**॥ स्वाङ्गलक्षणमुत्तरसूत्रे वक्ष्यते। अस्वाङ्गं यत् पूर्वपदं तस्मात् परं यत् क्तान्तं तदन्तात् बहुव्रीहेर्ङीष् वा स्यात् इति सूत्रार्थः। यद्यपि अस्वाङ्गं पूर्वपदं यस्य तस्मात् क्तान्तबहुव्रीहेरित्यपि व्याख्यातुं शक्यम्। तथापि उत्तरसूत्रे अस्वाङ्गपूर्वपदादित्यनुवृत्तस्य कर्मधारयसमासाश्रयणात् इहापि तथा व्याख्यानमुचितम्। ननु बहुकृता अकृता इत्यादावपि अस्वाङ्गपूर्वपदक्तान्तबहुव्रीहित्वात् ङीष्विकल्पस्यादित्याशङ्क्य आह। **पूर्वेणेति**॥ 'बहुव्रीहेश्चान्तोदात्तात्' इति पूर्वसूत्रेण नित्यं ङीषि प्राप्ते तद्विकल्पोऽत्र विधीयते इत्यर्थः। एवञ्च जातिपूर्वादित्यस्य अन्तोदात्तादित्यस्य च इहापि सम्बन्धात् बहुकृता इत्यादौ नातिप्रसङ्ग इति भावः। **सुरापीती–सुरापीतेति**॥ सुरा पीता ययेति विग्रहः। ऊरुभिन्नीतिवत् पूर्वनिपातः। **अन्तोदात्तात् किमिति**॥ 'बहुव्रीहेश्च' इत्यत्र श्रुतं 'अस्वाङ्गपूर्वपदाद्वा' इत्यत्रानुवृत्तमपि अन्तोदात्तादिलेतत् किमर्थमिति प्रश्नः। **वस्त्रच्छन्नेति**॥ ऊरुभिन्नीतिवत् पूर्वनिपातः। अथ वस्त्रच्छन्नेत्यत्र 'जातिकालसुखादिभ्यः' इत्यन्तोदात्तत्वमाशङ्क्य निरस्यति। **अनाच्छादनादिति**॥ तथाच बहुव्रीहित्वात् पूर्वपदप्रकृतिस्वरे शेषनिघातेन अनुदात्तान्तमेतादिति भावः। **अत एवेति**॥ 'अस्वाङ्गपूर्वपदात्' इत्यनेन 'बहुव्रीहेश्च' इति पूर्वसूत्रेण च वस्त्रच्छन्नेत्यत्र वैकल्पिको नित्यश्च ङीष् नेत्यर्थः। अन्तोदात्तत्व एवोभयोः प्रवृत्तिरिति भावः। **स्वाङ्गाच्च**॥ उपसर्जनादिति असंयोगोपधादिति च स्वाङ्गादित्यत्रान्वेति। स्वाङ्गादित्येतत् अत इत्यनुवृत्तञ्च प्रातिपदिकादित्यनुवृत्तस्य

असंयोगोपधमुपसर्जनं यत्स्वाङ्गं तदन्तादद्न्तात्प्रातिपदिकाद्वा ङीष्। केशानतिक्रान्ता अतिकेशी--अतिकेशा। चन्द्रमुखी--चन्द्रमुखा। संयोगोपधात्तु सुगुल्फा। 'उपसर्जनात्' किम्। शिखा। स्वाङ्गं त्रिधा।

अद्रवं मूर्तिमत्स्वाङ्गं प्राणिस्थमविकारजम्।

सुस्वेदा, द्रवत्वात्। सुज्ञाना, अमूर्तत्वात्। सुमुखा शाला, अप्राणिस्थत्वात्। सुशोफा, विकारजत्वात्।

विशेषणम्, तदन्तविधिः। तदाह। **असंयोगोपधमित्यादिना ॥ वा ङीषिति ॥** 'अस्वाङ्गपूर्वपदाद्वा' इत्यतः वेति 'अन्यतो ङीष्' इत्यतः ङीषित्यस्य चानुवृत्तेरिति भावः। बहुव्रीहेरित्यनुवर्तमाने उपसर्जनग्रहणं किमर्थमित्याशङ्क्य परिहरति। **केशानतिक्रान्तेति ॥** 'अत्यादयः क्रान्ताद्यर्थे' इति समासस्तत्पुरुषः। अत्र बहुव्रीहित्वाभावेऽपि प्राप्त्यर्थमुपसर्जनग्रहणमिति भावः। 'एकविभक्ति चापूर्वनिपाते' इति केशशब्दस्य उपसर्जनत्वम्। **चन्द्रमुखी--चन्द्रमुखेति ॥** चन्द्र इव मुखं यस्या इति विग्रहः। **सुगुल्फेति ॥** सु शोभनौ गुल्फौ यस्या इति विग्रहः। 'पदंघ्रिश्वरणोऽस्त्रियाम्'। 'तद्ग्रन्थी घुटिके गुल्फौ' इत्यमरः। **उपसर्जनात् किमिति ॥** केवलकेशादिशब्दानां अनुपसर्जनानां स्त्रीत्वविरहादेवाप्राप्तेः प्रश्नः। **शिखेति ॥** अत्र स्वाङ्गान्तत्वात् केवलशिखाशब्दात् ङीष्निवृत्त्यर्थमुपसर्जनग्रहणमित्युक्तम्। अन्यथा टापं बाधित्वा पक्षे ङीष् स्यादिति भावः। शोभना शिखा सुशिखेति क्वचित् पुस्तकेषु दृष्टम्, तत् प्रक्षिप्तं वेदितव्यम्। टाबन्तेन समासे अनदन्तत्वादेव प्राप्तिविरहात्। ननु स्वस्य अवयवीभूतस्य अङ्गं स्वाङ्गम्। तथा च सुमुखा शालेत्यादावतिव्याप्तिः, तत्र मुखशब्दार्थस्य प्रथमभागस्य अवयवीभूतशालाङ्गत्वात्। किञ्च सुकेशी रथ्येत्यत्राव्याप्तिः। तत्र केशानां रथ्याङ्गत्वाभावादित्यत आह। **स्वाङ्गं त्रिधेति ॥** "अद्रवम्मूर्तिमत् स्वाङ्गं प्राणिस्थमविकारजम्। अतत्स्थं तत्र दृष्टञ्च तेन चेत्तत्तथा युतम्" इति भाष्ये त्रिधा निरुक्तं पारिभाषिकं स्वाङ्गमिह विवक्षितमित्यर्थः। तत्र प्रथमार्धं प्रथमं स्वाङ्गलक्षणमित्यभिप्रेत्य विच्छिद्य पठति। **अद्रवमिति ॥** न विद्यते द्रवः यस्य तत् अद्रवम्। मूर्तिः अवयवसंयोगः अस्यास्तीति मूर्तिमत्, अवयवसंयोगासमवायिकारणं द्रव्यमिति यावत्। प्राणिनि प्राणवति जन्तौ विद्यमानं प्राणिस्थम्। अविकारजं रोगादिविकाराजन्यञ्च यत् तत् प्रथमं स्वाङ्गमित्यर्थः। अद्रवमित्यस्य प्रयोजनमाह। **सुस्वेदेति ॥** सु शोभनः स्वेदः घर्मजः उदकप्रस्रवः यस्याः इति विग्रहः। स्वेदस्य शोभनत्वन्तु दुर्गन्धाभावः। **द्रवत्वादिति ॥** न स्वाङ्गत्वमिति शेषः। अतो न ङीषित्यर्थः। मूर्तिमदित्यस्य प्रयोजनमाह। **सुज्ञानेति ॥** सु शोभनं ज्ञानं यस्या इति विग्रहः। **अमूर्तत्वादिति ॥** न स्वाङ्गत्वमिति शेषः। प्राणिस्थमित्यस्य प्रयोजनमाह। **सुमुखा शालेति ॥** सु शोभनं मुखं प्रथमभागः यस्या इति विग्रहः। **अप्राणिस्थत्वादिति ॥** न स्वाङ्गत्वमिति शेषः। अविकारजमित्यस्य प्रयोजनमाह। **सुशोफेति ॥** सु अधिकः शोफः श्वयथुः यस्या इति

---

१. भाष्योक्तमिदम्।

अतत्स्थं तत्र दृष्टं च—

सुकेशी—सुकेशा वा रथ्या । अप्राणिस्थस्यापि प्राणिनि दृष्टत्वात् ।

—तेन चेत्तत्तथायुतम्' ॥

सुस्तनी—सुस्तना वा प्रतिमा । प्राणिवत्प्राणिसदृशे स्थितत्वात् ।

५११ । नासिकोदरोष्ठजङ्घादन्तकर्णशृङ्गाच्च । (४-१-५५)

एभ्यो वा ङीष्स्यात्, आद्ययोर्बह्वज्लक्षणो निषेधो बाध्यते, पुरस्तादपवादन्यायात् । ओष्ठादीनां पञ्चानां तु 'असंयोगोपधात्' इति पर्युदासे प्राप्ते

विग्रहः । "शोफस्तु श्वयथुः" इत्यमरः । **विकारजत्वादिति** ॥ रोगजत्वादित्यर्थः । न स्वाङ्गत्वमिति शेषः । **अतत्स्थं तत्र दृष्टञ्चेति** ॥ द्वितीयं स्वाङ्गलक्षणम् । तच्छब्देन प्राणी परामृश्यते । अतत्स्थं अप्राणिस्थं तत्र प्राणिनि दृष्टं यत् तदपि स्वाङ्गमित्यर्थः । **रथ्येति** ॥ रथ्यास्थानां केशानां प्राणिस्थत्वाभावात् पूर्वलक्षणेन स्वाङ्गत्वासिद्धेर्लक्षणान्तरमिति भावः । उक्तलक्षणमुदाहरणे योजयति । **अप्राणिस्थस्यापीति** ॥ इदानीं प्राणिस्थत्वाभावेऽपि कदा चित् प्राणिस्थत्वादपि स्वाङ्गत्वमित्यर्थः । **तेन चेत्तत्तथा युतमिति** ॥ तृतीयं स्वाङ्गलक्षणम् । अत्र भाष्ये 'स्वाङ्गमप्राणिनोऽपि' इति शेषः पूरितः । चेदिति यद्यर्थे । तेन प्राणिस्थेन स्तनाद्यङ्गाकृतिकावयवविशेषेण तत् अप्राणिद्रव्यं प्रतिमादि तथा प्राणिद्रव्यवत् युतं सम्बद्धं यदि तदा तत् स्तनाद्याकृतिकं अप्राणिनोऽपि स्वाङ्गमित्यर्थः । **सुस्तनी सुस्तना वा प्रतिमेति** ॥ सु शोभनौ स्तनौ स्तनाकृती अवयवौ यस्या इति विग्रहः । प्रतिमागतयोः स्तनाकृतिकावयवयोः कदा चिदपि प्राणिस्थत्वाभावात् प्राण्यन्तरे अदृष्टत्वाच्च पूर्वलक्षणद्वयस्याप्यप्रवृत्तेर्लक्षणान्तरमिदम् । अथोदाहरणे लक्षणं योजयति । **प्राणिवदिति** ॥ सप्तम्यन्ताद्वतिः । प्राणिवत् प्राणिसदृशे प्रतिमादिद्रव्ये स्थितत्वात् स्वाङ्गमित्यर्थः । नच कल्याणपाणिपादेति बहुव्रीहावपि ङीष् स्यादिति वाच्यम् । 'अस्वाङ्गपूर्वपदाद्वा' इत्यनुवृत्तेः । अत्र हि पाणिपादेति समुदायो न स्वाङ्गम्, किन्तु स्वाङ्गसमुदाय एव । यत्तु स्वाङ्गं पादेति ननु तत् स्वाङ्गात् पूर्वपदात् परम्, पाणिपदेन व्यवधानात् । तथाच स्वाङ्गस्य पादस्य अस्वाङ्गात् पूर्वपदात् कल्याणशब्दात् परत्वाभावान्न ङीषिति भाष्ये स्पष्टम् । **नासिकोदरोष्ठजङ्घादन्तकर्णशृङ्गाच्च** ॥ 'अस्वाङ्गपूर्वपदाद्वा' इत्यतो वेति 'अन्यतो ङीष्' इत्यतो ङीषिति चानुवर्तते । तदाह । **एभ्य इति** ॥ उपसर्जनभूतनासिकादिशब्दान्तेभ्य इत्यर्थः । पूर्वसूत्रादुपसर्जनादित्यनुवृत्तेः । ननु 'स्वाङ्गाच्च' इति पूर्वसूत्रेणैव सिद्धे किमर्थमिदमित्यत आह । **आद्ययोरिति** ॥ नासिकोदरशब्दयोर्विषये 'न क्रोडादिबह्वचः' इति निषेधः प्राप्तः, सः अनेन ङीष्विकल्पविधिना बाध्यते इत्यर्थः । बह्वज्लक्षणनिषेधस्तु सुजघनेत्यादौ सावकाश इति भावः । ननु सहनासिका, अनासिका, सहोदरा, अनुदरा, इत्यत्र 'सहनञ्विद्यमानपूर्वाच्च' इति निषेधोऽपि अनेन बाध्यताम् । 'सहनञ्' इत्यस्य सकेशा अकेशा इत्यादौ सावकाशत्वादित्यत आह । **पुरस्ता-**

१-२. भाष्योक्तमिदम् ।

वचनं मध्येऽपवादन्यायात्। सहनञ्लक्षणस्तु प्रतिषेधः परत्वादस्य बाधकः। तुङ्गनासिकी–तुङ्गनासिकेत्यादि। नेह। सहनासिका। अनासिका। अत्र वृत्तिः। 'अङ्गगात्रकण्ठेभ्यो वक्तव्यम्'। स्वङ्गी–स्वङ्गेत्यादि। एतच्चानुक्तसमुच्चयार्थेन चकारेण संग्राह्यमिति केचित्। 'भाष्याद्यनुक्तत्वादप्रमाणम्' इति प्रामाणिकाः। अत्र वार्तिकानि। 'पुच्छाच्च' (वा २४८९)। सुपुच्छी–सुपुच्छा। 'कबरमणिविषशरेभ्यो नित्यम्' (वा २४९०)। कबरं चित्रं पुच्छं यस्याः सा कबरपुच्छी मयूरीत्यादि। 'उपमानात्पक्षाच्च पुच्छाच्च' (वा २४९१)। नित्यमित्येव। उलूकपक्षी शाला। उलूकपुच्छी सेना।

दिति॥ 'पुरस्तादपवादाः अनन्तरान्विधीन् बाधन्ते नोत्तरान्' इति न्यायात् इत्यर्थः। ततश्च 'सहनञ्' इति निषेधो न क्रोडादिसूत्रेण व्यवहितत्वात् 'नासिकोदर' इत्यनेन बाधं नार्हतीत्यर्थः। ओष्ठादिपञ्चकस्य प्रयोजनमाह। **ओष्ठादीनामिति**॥ सुगुल्फेत्यादौ असंयोगोपधादित्यस्य सावकाशत्वादिति भावः। ननु सहोष्ठा, अनोष्ठा, इत्यादौ 'सहनञ्' इति निषेधोऽप्यनेन बाध्यतामित्यत आह। **मध्येऽपवादेति**॥ 'मध्येऽपवादाः पूर्वान्विधीन् बाधन्ते नोत्तरान्' इति न्यायादित्यर्थः। ननु 'नासिकोदर' इति ङीष्विकल्पस्तु तुङ्गनासिकी इत्यादौ सावकाशः। 'सहनञ्' इति निषेधस्तु सहकेशेत्यादौ सावकाशः, सहनासिकेत्यादौ तु उभयप्राप्तौ कतरस्य बाध इत्यत आह। **सहनञ्लक्षणस्त्विति**॥ **अस्येति**॥ 'नासिकोदर' इति ङीष्विकल्पविधेरित्यर्थः। **तुङ्गनासिकी–तुङ्गनासिकेति**॥ 'न क्रोडादिबह्वचः' इति बह्वज्लक्षणङीष्निषेधं बाधित्वा 'नासिकोदर' इति विकल्पः। **इत्यादीति**॥ कुम्भोदरी–कुम्भोदरा। अत्र बह्वज्लक्षणनिषेधं बाधित्वा ङीष्विकल्पः। बिम्बोष्टी–बिम्बोष्ठा। सुजङ्घी–सुजङ्घा। शुभ्रदन्ती–शुभ्रदन्ता। सुकर्णी–सुकर्णा। सुश्रृङ्गी–सुश्रृङ्गा। ओष्ठादिषु संयोगोपधत्वेऽपि ङीष्विकल्पः। **नेह सहनासिकेति**॥ सहशब्दो विद्यमानवचनः, सह नासिका यस्या इति विग्रहः। अविद्यमाना नासिका यस्या इति च विग्रहः। इह उभयत्रापि 'सहनञ्विद्यमान' इति ङीष्निषेधः, नतु 'नासिकोदर' इति ङीष्विकल्प इत्यर्थः। **वक्तव्यमिति**॥ वा ङीषिति शेषः। संयोगोपधत्वाद्वचनम्। **स्वङ्गीति**॥ सु शोभनानि अङ्गानि यस्या इति विग्रहः। सुगात्री–सुगात्रा। सुकण्ठी–सुकण्ठा। वृत्तिग्रन्थस्य मूलं दर्शयति। **एतच्चेति**॥ **प्रामाणिकाः इति**॥ एवञ्च तन्वङ्गी, सुगात्री, कळकण्ठी, इत्यपभ्रंशा एवेति भावः। **पुच्छाच्चेति**॥ संयोगोपधत्वेऽपि पुच्छशब्दान्तात् ङीष्वेति वक्तव्यमित्यर्थः। **कबरमणीति**॥ कबरादिभ्यः परो यः पुच्छशब्दः तदन्तात् नित्यं ङीषिति वक्तव्यमित्यर्थः। पुच्छाच्चेत्युक्तविकल्पापवादः। कबरमित्यस्य व्याख्यानं चित्रमिति। **इत्यादीति**॥ मणिपुच्छी वृश्चिकी, विषपुच्छी, शरपुच्छी पक्षिजातिविशेषः। **उपमानादिति**॥ उपमानात् परौ यौ पक्षपुच्छशब्दौ तदन्तादपि ङीषित्यर्थः। **नित्यमित्येवेति**॥ नित्यमित्यनुवर्तत एवेत्यर्थः। विकल्पापवादः। **उलूकपक्षी शालेति**॥ उलूकः पक्षिविशेषः, उलूकपक्षाविव पक्षौ पार्श्वे यस्या

५१२ । न क्रोडादिबह्वचः । (४-१-५६)

क्रोडादेर्बह्वचश्च स्वाङ्गान्न ङीष् । कल्याणक्रोडा । अश्वानामुरः क्रोडा । आकृतिगणोऽयम् । सुजघना ।

५१३ । सहनञ्विद्यमानपूर्वाच्च । (४-१-५७)

सहेत्यादित्रिकपूर्वान्न ङीष् । सकेशा । अकेशा । विद्यमाननासिका ।

५१४ । नखमुखात्संज्ञायाम् । (४-१-५८)

ङीष्न स्यात् । शूर्पणखा । गौरमुखा । 'संज्ञायाम्' किम् । ताम्रमुखी कन्या ।

इति विग्रहः । 'सप्तम्युपमानपूर्वपदस्य बहुव्रीहिर्वाच्यः उत्तरपदलोपश्च' इति समासः । संयोगोपधत्वादप्राप्ते विधिः । **उलूकपुच्छी सेनेति** ॥ उलूकपुच्छमिव पुच्छं पश्चिमान्तः यस्या इति विग्रहः । पूर्ववदेव बहुव्रीहिः । 'पुच्छाच्च' इति विकल्पस्यापवादः । **न क्रोडादिबह्वचः** ॥ क्रोडा आदिर्यस्येति बहवः अचः यस्येति च विग्रहः । क्रोडादिश्च बह्वच् च इति समाहारद्वन्द्वः । **क्रोडादेरिति** ॥ क्रोडादिर्गणः बह्वच् च यत् स्वाङ्गं तदन्तात् ङीष् नेत्यर्थः । **कल्याणक्रोडेति** ॥ कल्याणी क्रोडा यस्या इति विग्रहः । 'स्त्रियाः पुंवत्' इति कल्याणशब्दस्य पुंवत्त्वम् । **अश्वानामिति** ॥ हरदत्तादिमते क्रोडाशब्दो नित्यस्त्रीलिङ्गः । उपसर्जनह्रस्वत्वे अदन्ततया 'स्वाङ्गाच्चोपसर्जनात्' इति प्राप्तो ङीष् निषिध्यते । अमरस्तु "न ना क्रोडं भुजान्तरम्" इति स्त्रीत्वन्नपुंसकत्वञ्च आह । क्वचित् कोशे पुंस्त्वमपि दृश्यते । क्रोडादिगणे क्रोडेति प्रातिपदिकं पठ्यते । एवञ्च लिङ्गत्रयेऽपि उदाहरणं निर्बाधम् । **आकृतिगणोऽयमिति** ॥ क्रोडादिरिति शेषः । **सुजघनेति** ॥ बह्वच उदाहरणम् । सु शोभनं जघनं यस्या इति विग्रहः । **सहनञ्** ॥ **त्रिकपूर्वादिति** ॥ स्वाङ्गादिति शेषः । **सकेशेति** ॥ सह केशाः यस्या इति बहुव्रीहिः । सहशब्दो विद्यमानवचनः । 'वोपसर्जनस्य' इति सभावविकल्पः । 'स्वाङ्गाच्च' इति प्राप्तस्य निषेधः । 'नासिकोदर' इति ङीष्विकल्पोऽनेन बाध्यते इत्युक्तं स्मारयितुमुदाहरति । **विद्यमाननासिकेति** ॥ विद्यमाना नासिका यस्याः इति बहुव्रीहिः । **नखमुखात् संज्ञायाम्** ॥ नखमुखादिति समाहारद्वन्द्वः । शेषपूरणेन सूत्रं व्याचष्टे । **ङीष् नेति** ॥ 'स्वाङ्गाच्च' इति प्राप्तस्य निषेधोऽयम् । **शूर्पणखेति** ॥ राक्षसीविशेषस्य नाम । शूर्पाणीव करुहाः यस्या इत्यस्वपदविग्रहः । संज्ञात्वेन नित्यसमासत्वात् । 'पूर्वपदात् संज्ञायाम्' इति णत्वम् । केवलयौगिकत्वे तु ङीष् भवत्येव । णत्वन्तु न । **गौरमुखेति** ॥ कस्याश्चिन्नाम । श्वेतं मुखं यस्या इत्यस्वपदविग्रहः । **ताम्रमुखीति** ॥ यौगिकोऽयम् । ताम्रं मुखं यस्या इति विग्रहः । **दिक्पूर्वपदान्ङीप्** ॥ दिक् पूर्वपदं यस्येति विग्रहः । स्वाङ्गादित्यनुवर्तते । प्रातिपदिकादिति च 'अन्यतो ङीष्' इत्यतो ङीषित्यनुवृत्तं षष्ठ्या विपरिणम्यते ।

५१५। दिक्पूर्वपदान्ङीप्। (४-१-६०)

दिक्पूर्वपदात्स्वाङ्गान्तात्प्रातिपदिकात्परस्य ङीषो ङीबादेशः स्यात्। प्राङ्मुखी। आद्युदात्तं पदम्।

५१६। वाहः। (४-१-६१)

वाहन्तात्प्रातिपदिकान्ङीष्स्यात्। ङीषेवानुवर्तते न ङीप्। 'दित्यवाट् च मे दित्यौही च मे'।

५१७। सख्यशिश्वीति भाषायाम्। (४-१-६२)

इतिशब्दः प्रकारे 'भाषायाम्' इत्यस्यानन्तरं द्रष्टव्यः। तेन छन्दस्यपि क्वचित्। सखी। अशिश्वी। 'आधेनवो धुनयन्तामशिश्वीः'।

तदाह। **दिक्पूर्वत्यादिना** ॥ **प्राङ्मुखीति** ॥ प्राक् मुखं यस्या इति विग्रहः। ङीषो ङीब्विधेः फलमाह। **आद्युदात्तं पदमिति** ॥ ङीपः पित्त्वादनुदात्तत्वे बहुव्रीहिप्रकृतिस्वरेणाद्युदात्तत्त्वम्। ङीषि तु प्रत्ययस्वरेणान्तोदात्तत्वं स्यादित्यर्थः। नच स्वतन्त्रो ङीबेव विधीयतामिति वाच्यम्। तथा सति प्राग्गुल्फेत्यादावपि 'असंयोगोपधात्' इति निषेधं बाधित्वा ङीष्प्रसङ्गात्। ङीषो ङीबादेशविधौ तु 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' इति विहितङीषो ङीब्विधानान्न दोषः। 'असंयोगोपधात्' इत्यस्यानुवृत्त्यङ्गीकारे तु प्रतिपत्तिगौरवमिति भावः। **वाहः** ॥ वाह इति पञ्चम्यन्तं प्रातिपदिकादित्यनुवृत्तस्य विशेषणम्, तदन्तविधिः। तदाह। **वाहन्तादिति** ॥ **ङीषेवानुवर्तते इति** ॥ 'अन्यतो ङीष्' इत्यत इति शेषः। **न ङीबिति** ॥ 'दिक्पूर्वपदात्' इति पूर्वसूत्रे सन्निहितमपि ङीब्ग्रहणमिह नानुवर्तते, अवरितत्वादित्यर्थः। स्वरे विशेषः। **दित्यौहीति** ॥ गवान्तावत् षण्मासात्मकमेकैकं वयः। "गर्भाश्च मे वत्साश्च मे" इत्यनुवाके अनुकान्तानि वयांसि। "तत्र तृतीयं वयो दित्यशब्देनोच्यते" इति यजुर्वेदभाष्ये भवस्वामिधूर्तस्वाम्यादिकृतकल्पभाष्येषु च स्पष्टम्। दित्यं वहतीति विग्रहे 'च्छन्दसि सहः, वहश्च' इति ण्विः, उपधावृद्धिः, उपपदसमासः, दित्यवाह्शब्दात् ङीष्, 'वाह ऊठ्, एत्येधत्यूठ्सु' इति वृद्धिः। दित्यौहीति रूपम्। ण्विप्रत्ययस्य छन्दोमात्रविषयत्वाद्वेदवाक्यमुदाहृतम्। लोके तु वाहयतेः क्विपि, वाह्शब्दात् ङीषि, दित्यौहीति रूपमस्ति। वैदिकप्रक्रियायामुपन्यसनीयमप्येतत् सूत्रमेतदर्थमिहोपन्यस्तम्। **सख्यशिश्वी** ॥ सखिशब्दात् अशिशुशब्दाच्च स्त्रियां ङीष् निपात्यते भाषायाम्। लौकिकप्रयोगो भाषा। तर्हि वेदे नैव स्यादित्यत आह। **इतिशब्दः इति** ॥ प्रकारे इत्यनन्तरं वर्तते इति शेषः। प्रकारस्सजातीयता। **भाषायामित्यस्येति** ॥ सच इतिशब्दः भाषायामित्यस्यानन्तरं सन्निवेश्यते इत्यर्थः। ततश्च भाषायां वेदे चेति फलितम्। नन्वेवं सति भाषायामिति व्यर्थमित्यत आह। **तेनेति** ॥ भाषाग्रहणेन भाषायां सर्वत्र भवति, वेदे तु क्वचिदिति लभ्यते इत्यर्थः। **सखीति** ॥ सखिशब्दात् ङीषि 'यस्येति च' इति खकारादिकारस्य लोपः। भाषायां किम्। "सखा

५१८ । जातेरस्त्रीविषयादयोपधात् । (४-१-६३)

जातिवाचि यन्न च स्त्रियां नियतमयोपधं ततः स्त्रियां ङीष्स्यात् ।

'आकृतिग्रहणा जातिः—

अनुगतसंस्थानव्यङ्ग्येत्यर्थः । तटी ।

—लिङ्गानाञ्च न सर्वभाक् ।

सकृदाख्यातनिर्ग्राह्या—

सप्तपदा भव" । **अशिश्वीति** ॥ न विद्यते शिशुर्यस्या इति विग्रहः । अशिशुशब्दात् ङीषि इकारस्य यण् "अशिश्वी शिशुना विना" इत्यमरः । छन्दस्यपि क्वचिदित्यस्योदाहरणमाह । **आ धेनवो धुनयन्तामशिश्वीरिति** ॥ अशिश्वीशब्दात् जसि 'दीर्घाज्जसि च' इति पूर्वसवर्णदीर्घनिषेधाभावश्छान्दसः । **जातेरस्त्री** ॥ अर्थे कार्यासम्भवाच्छब्दे कार्यं विज्ञायते इत्याह । **जातिवाचीति** ॥ **न च स्त्रियान्नियतमिति** ॥ स्त्रीविषयः नियमेन वाच्या यस्याः इति बहुव्रीहिणा स्त्रीविषयशब्दो नियतस्त्रीलिङ्गपरः, तथाच अस्त्रीविषयादित्यनेन अनियतस्त्रीलिङ्गादिति विवक्षितम्, नैयत्यलाभायैव विषयग्रहणम् । अन्यथा अस्त्रिया इत्येवावक्ष्यदिति भावः । ननु यदि 'नित्यमेकमनेकानुगतं सामान्यम्' इति तार्किकोक्ता जातिः, तर्हि शुक्लादिगुणस्य नित्यत्वैकत्वपक्षे शुक्लेत्यादावतिव्याप्तिः, औपगवी कठी इत्यादावतिव्याप्तिश्च । सवर्णेभ्यस्सवर्णासु जायन्ते हि सजातयः' इत्यादिस्मृत्या जननेन यत् प्राप्यते ब्राह्मणत्वादि सा जातिश्चेद्युवत्वादावव्याप्तिः । तथा च युवतितरेत्यत्र 'जातेश्च' इति पुंवत्त्वनिषेधो न स्यात् इति चेन्न । "आकृतिग्रहणा जातिः लिङ्गानाञ्च न सर्वभाक् । सकृदाख्यातनिर्ग्राह्या गोत्रञ्च चरणैस्सह" इति भाष्योक्तत्रिविधजातेर्विवक्षितत्वात् इत्यभिप्रेत्य भाष्योक्तत्रैविध्यं प्रपञ्चयति । **आकृतिग्रहणा जातिरिति** ॥ प्रथमेति शेषः । आकृतिः अवयवसन्निवेशविशेषः गृह्यते अनेनेति ग्रहणं व्यञ्जकम्, करणे ल्युट्, सामान्ये नपुंसकम्, आकृतिः ग्रहणं यस्या इति विग्रहः । उपसर्जनत्वात् 'टिड्ढाणञ्' इति ङीन्न । फलितमाह । **अनुगतेति** ॥ सर्वासु घटादितत्तद्व्यक्तिषु एकरूपतत्तदाकारव्यङ्ग्येति यावत् । गृह्यत इति कर्मणि ल्युट् । आकृत्या ग्रहणा आकृतिग्रहणेति तु न व्याख्येयम् । 'टिड्ढाणञ्' इति ङीप्प्रसङ्गात् । **तटीति** ॥ "तटं त्रिषु" इत्यमरः । जलसमीपप्रदेशः आकृतिविशेषविशिष्टस्तटः, अतस्तटत्वमाकृतिव्यङ्ग्यत्वाज्जातिः, अतस्तटशब्दस्य जातिवाचित्वादनियतस्त्रीलिङ्गत्वादयोपधत्वाच्च ङीषिति भावः । युवत्वादिकमप्याकृतिव्यङ्ग्यत्वात् जातिरेव । अनेन प्रथमलक्षणेन अनुगताकारप्रत्ययसिद्धा तटत्वादिजातिरुक्ता । नन्वेवं सति वृषळत्वादीनां जातित्वं न स्यात् । तदवयवसन्निवेशस्य ब्राह्मणादिसाधारणत्वेन वृषळत्वादीनां तद्व्यङ्ग्यत्वाभावादित्याशङ्क्य आह । **लिङ्गानाञ्च न सर्वभाक् । सकृदाख्यातनिर्ग्राह्येति** ॥ अन्या जातिरिति शेषः । लिङ्गानामिति कर्मणि षष्ठी । सर्वाणि लिङ्गानि न भजते इत्यर्थः । असमर्थसमास आर्षः । सकृदित्यतः पूर्वं एकस्यां

१–२ भाष्योक्तमिदम् ।

'असर्वलिङ्गत्वे सत्येकस्यां व्यक्तौ कथनाव्यक्त्यन्तरे कथनं विनापि सुग्रहा जातिः' इति लक्षणान्तरम्। वृषळी। 'सत्यन्तम्' किम्। शुक्ला। 'सकृत्—' इत्यादि किम्। देवदत्ता।

—गोत्रं च चरणैः सह ॥'

अपत्यप्रत्ययान्तः शाखाद्ध्येतृवाची च शब्दो जातिकार्यं लभत इत्यर्थः। औपगवी। कठी। कलापी। बह्वृची। ब्राह्मणीत्यत्र तु शार्ङ्गरवादिपाठान्ङीना

व्यक्ताविति शेषः। आख्यातेति भावे क्तः, उपदेश इत्यर्थः। निर्ग्राह्येत्यस्य व्यक्त्यन्तरे उपदेशं विनापि सुगमेत्यर्थः। निरित्युपसर्गवशात्। निर्ग्राह्येत्यनन्तरमन्या जातिरिति शेषः। फलितमाह। **असर्वेति ॥ एकस्यामिति ॥** एकस्यां व्यक्तौ वृषळ इत्युपदेशात् व्यक्त्यन्तरे तदुपदेशं विनापि सुगमेति यावत्। **लक्षणान्तरमिति ॥** जात्यन्तरमित्यर्थः। अन्यथा उक्ततटत्वादिजातेरेव 'आकृतिग्रहणा जातिः' इत्युक्तलक्षणादन्यदिदं लक्षणमिति स्यात्, नहीदं युज्यते। तटस्य सर्वलिङ्गत्वात्। **वृषळीति ॥** वृषळत्वं ह्यसर्वलिङ्गम्, नपुंसकत्वाभावात् एकस्यां व्यक्तौ वृषळत्वे उपदिष्टे सति तदपत्यसहोदरादिषु तदुपदेशं विना तस्य सुग्रहत्वात् सकृदाख्यातनिर्ग्राह्यत्वेति भावः। ब्राह्मणत्वन्तु पुत्रपौत्रादौ यद्यपि न सुगमम्, ब्राह्मणात् क्षत्रियायामुत्पन्नस्य ब्राह्मणत्वाभावात्। तथापि पित्रादौ सुगममेव। एवं क्षत्रियत्वं वैश्यत्वं च तत्पित्रादावेव सुग्रहम्। **सत्यन्तं किमिति ॥** असर्वलिङ्गत्वे सतीति किमर्थमित्यर्थः। **शुक्लेति ॥** बलाकेति शेषः। 'गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति' इति विशेष्यनिघ्नतया त्रिलिङ्गत्वादसर्वलिङ्गत्वाभावात् शुक्लत्वन्न जातिः। अवयवसंस्थानव्यङ्ग्यत्वाभावान्न पूर्वलक्षणमपि। **देवदत्तेति ॥** संज्ञात्वेन नपुंसकलिङ्गहीनतया असर्वलिङ्गत्वेऽपि न सकृदाख्यातनिर्ग्राह्यत्वमिति भावः। अनेन द्वितीयलक्षणेन जननिमित्तकब्राह्मणत्वादिजातिसङ्ग्रहः। नन्वेवमपि औपगवी कठीत्याद्यसङ्ग्रहः, औपगवत्वादेरनुगतसंस्थानव्यङ्ग्यत्वाभावात् सर्वलिङ्गत्वाच्चेत्यत आह। **गोत्रञ्च चरणैस्सहेति ॥** जातिरित्यनुषज्यते। गोत्रशब्देन अपत्यं विवक्षितम्, नतु पौत्रप्रभृतीति पारिभाषिकम्। व्याख्यानात्। अत एवानन्तरापत्यप्रत्ययान्ते अवन्तीत्यत्र जातिप्रयुक्तो ङीषिति 'अनुपसर्जनात्' इति सूत्रस्थभाष्यं सङ्गच्छते। शब्देन्दुशेखरे तु पारिभाषिकमेव गोत्रमिह विवक्षितमिति प्रपञ्चितम्। चरणशब्दस्तु शाखाध्येतरि प्रसिद्धः। चरणैस्सह गोत्रं जातिरिति लभ्यते। गोत्रञ्चरणाश्च जातिरिति यावत्। यद्यपि अनुगताकारप्रत्ययवेद्या जननविशेषप्रयुक्ता चेति द्विविधैव जातिर्लोके प्रसिद्धा। तत्र गोत्रचरणाः नान्तर्भवन्ति। तथापि अतस्मिन् तच्छब्दस्तद्वाचिषु शब्देषु तत्कार्यार्थं इत्यभिप्रेत्य व्याचष्टे। **अपत्यप्रत्ययान्तः इत्यादिना ॥** गोत्रमुदाहरति। **औपगवीति ॥** उपगोरपत्यं स्त्री इत्यर्थे 'तस्यापत्यम्' इत्यणि 'टिड्ढाणञ्' इति ङीपम्बाधित्वा परत्वादनेन ङीष्। स्वरे भेदः। चरणमुदाहरति। **कठीति ॥** कठेन प्रोक्तमधीयानेत्यर्थः। **कलापीति ॥** वैशम्पायनान्तेवासित्वनिबन्धनो णिनिः। 'कठचरकाल्लुक्' इति तस्य लुक्। ततः 'तदधीते' इत्यणः 'प्रोक्ताल्लुक्' इति लुक्, ततो ङीष्, चरणविषये उदा-

ङीष्बाध्यते । 'जातेः' किम् । मुण्डा । 'अस्त्रीविषयात्' किम् । बलाका । 'अयोपधात्' किम् । क्षत्रिया । योपधप्रतिषेधे 'हयगवयमुकयमनुष्य-मत्स्यानामप्रतिषेधः' (वा २४९५) । हयी । गवयी । मुकयी । 'हलस्तद्धितस्य' (सू ४७२) इति लोपः । 'मनोर्जातावञ्यतौ षुक्च' मनुषी । 'मत्स्यस्य ङ्याम्' (वा ४११८) । मत्सी ।

हरणान्तरमाह । **बह्वृचीति** ॥ बहवः ऋचः अध्येयाः यस्या इति विग्रहः । "ऋक्पूरब्धूः पथामानक्षे' 'अनृचबह्वृचावध्येतर्येव' इत्यच्समासान्तः, ततो ङीष् । 'पुरा कल्पे तु नारीणां मौञ्जीबन्धनमिष्यते । अध्यापनञ्च वेदानां सावित्रीवचनन्तथा ॥" इति यमादिस्मृतिः । ननु 'लिङ्गानाञ्च न सर्वभाक्' इति 'गोत्रञ्च चरणैस्सह' इति च जातिलक्षणे ब्राह्मणीति परित्यज्य वृषळी औपगवी इत्येवं कुत उदाहृतमित्यत आह । **ब्राह्मणीत्यत्रेति** ॥ ब्रह्मणः अपत्यमित्यर्थे 'तस्यापत्यम्' इत्यणि 'ब्राह्मोऽजातौ' इति टिलोपाभावे आदिवृद्धौ ब्राह्मणशब्दः । स्त्रियान्तु जातिलक्षणं ङीषं बाधित्वा 'शार्ङ्गरवाद्यञो ङीन्' इति ङीन् । शार्ङ्गरवादिगणे तत्पाठस्य निरवकाशत्वादिति भावः । तदेवं जातिस्वरूपमुक्त्वा ङीष्विधौ तद्ग्रहणस्य प्रयोजनं पृच्छति । **जातेः किमिति । मुण्डेति** ॥ मुण्डत्वन्नाम विलुप्तसर्वकेशत्वम्, तत्तु नाकृतिव्यङ्ग्यम्, केशदशायामपि तदाकृतेस्सत्त्वात् । 'नापि लिङ्गानाञ्च' इति लक्षणलक्षितम्, सर्वलिङ्गत्वात् । नापि गोत्रचरणान्तर्भूतम्, अतो न जातिरिति भावः । **अस्त्रीविषयात् किमिति** ॥ विषयग्रहणलभ्यं नियतत्वं प्रवेश्य अनियतस्त्रीलिङ्गादिति किमर्थमित्यर्थः । **बलाकेति** ॥ पक्षिवर्गे 'बलाका बिसकण्ठिका' इत्यमरः । बलाकात्वस्य आकृतिव्यङ्ग्यतया जातित्वेऽपि नियतस्त्रीलिङ्गत्वान्न ङीषित्यर्थः । यद्यपि बलां कायतीति यौगिकत्वे त्रिलिङ्गत्वमस्ति, तथापि प्रवृत्तिनिमित्तैक्ये स्त्रीलिङ्गान्यलिङ्गरहितभिन्नादित्यर्थो विवक्षित इति न दोषः । जातिविशेषे नियतस्त्रीलिङ्गत्वात् । भाष्ये तु अनियतस्त्रीलिङ्गत्वमङ्गीकृत्य अजादित्वाट्टाबिति समाहितम् । **क्षत्रियेति** ॥ 'लिङ्गानाञ्च न सर्वभाक्' इति जातिलक्षणसत्त्वेऽपि योपधत्वान्न ङीषिति भावः । **योपधनिषेधे हयगवयेति** ॥ वार्तिकमिदम् । हयादीनां योपधत्वेऽपि ङीष् वाच्य इत्यर्थः । **हयीति** ॥ अश्वा प्रसिद्धा । **गवयीति** ॥ गोसदृशश्चतुष्पाज्जातिविशेषः । **मुकयीति** ॥ चतुष्पाज्जातिविशेषः । **हलः इति** ॥ मनुष्यशब्दात् स्त्रियां ङीषि मनुष्य ई इति स्थिते 'हलस्तद्धितस्य' इति यकारस्य लोपे 'यस्येति च' इत्यकारलोपे मनुषीति रूपमित्यर्थः । 'हलस्तद्धितस्य' इति लोपप्रवृत्तये यकारस्य तद्धितावयवत्वं दर्शयितुमाह । **मनोर्जातावितिं** ॥ तद्धिताधिकारे अपत्याधिकारस्थमिदं सूत्रम् । मनुशब्दादपत्ये अञ्यतौ प्रत्ययौ स्तः प्रकृतेः षुक्च, प्रकृतिप्रत्ययसमुदायेन जातौ गम्यायामिति तदर्थः । मत्स्यशब्दात् ङीषि यकारस्य तद्धितावयवत्वाभावादप्राप्ते लोपे आह । **मत्स्यस्य ङ्यामिति** ॥ 'सूर्यतिष्य' इति सूत्रे वार्तिकमिदम् । मत्स्यस्यावयवस्य यकारस्य लोपस्स्यात् ङ्यामेवेति नियमार्थमिदम् । **मत्सीति** ॥ ङीषि यकारलोपे 'यस्येति च' इति लोप इति भावः । ङ्यां किम् । मात्स्योऽव-

५१९। पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च। (४-१-६४)

पाकाद्युत्तरपदाज्जातिवाचिनः स्त्रीविषयादपि ङीष्स्यात्। ओदनपाकी। शङ्कुकर्णी। शालपर्णी। शङ्खपुष्पी। दासीफली। दर्भमूली। गोवाली। ओषधिविशेषे रूढा एते।

५२०। इतो मनुष्यजातेः। (४-१-६५)

ङीष्स्यात्। दाक्षी। योपधादपि। उदमेयस्यापत्यं स्त्री औदमेयी। 'मनुष्य–' इति किम्। तित्तिरिः।

५२१। ऊङुतः। (४-१-६६)

उकारान्तादयोपधान्मनुष्यजातिवाचिनः स्त्रियामूङ् स्यात्। कुरूः। 'कुरुनादिभ्यो ण्यः' (सू ११९०)। तस्य 'स्त्रियामवन्ति–' (सू ११९५) इत्यादिना लुक्। 'अयोपधात्' किम्। अध्वर्युः। 'अप्राणिजातेश्चारज्ज्वादी-

---

तारः। **पाककर्ण** ॥ 'जातेरस्त्रीविषयात्' इति पूर्वसूत्रेणैव सिद्धे किमर्थमित्यत आह ॥ **स्त्रीविषयादपीति** ॥ नियतस्त्रीलिङ्गादपीत्यर्थः। नियतस्त्रीलिङ्गत्वात् जातिवाचित्वन्दर्शयितुमाह। **ओषधिविशेषे रूढाः इति** ॥ अवयवव्युत्पत्तिरहिता इत्यर्थः। **इतो मनुष्यजातेः** ॥ शेषपूरणेन सूत्रं व्याचष्टे। **ङीष् स्यादिति** ॥ इदन्तान्मनुष्यजातिवाचिनः स्त्रियां ङीष्स्यादित्यर्थः। स्त्रीप्रत्ययविधिषु अत इत्यनुवृत्तेरिदन्तात् 'जातेरस्त्रीविषयात्' इत्यप्राप्तौ वचनम्। **दाक्षीति** ॥ दक्षस्यापत्यं स्त्री इत्यर्थे अत इञि अञ्लोपः, आदिवृद्धिः, ङीष्, 'यस्येति च' इति इकारलोपः। 'गोत्रञ्च चरणैस्सह' इति जातिवाचित्वम्, दक्षः प्रजापतिविशेषः। **योपधादपीति** ॥ अयं ङीषिति शेषः। पुनर्जातिग्रहणेन योपधग्रहणस्य अनुवृत्त्यभावबोधनादिति भावः। **औदमेयीति** ॥ उदमेयो नाम कश्चित्, तस्यापत्यं स्त्री इत्यर्थे अत इञ्। 'यस्येति च' इत्यल्लोपः। आदिवृद्धिः। औदमेयिशब्दात् ङीष्, 'यस्येति च' इति इकारलोपः। **तित्तिरिरिति** ॥ तित्तिरिः पक्षिजातिविशेषः। स्त्रियां ङीष् न। अमनुष्यजातिवाचित्वादिति भावः। 'स्त्रीपुंसयोरपत्यान्तः द्विचतुष्षट्पदा अपि' इत्यमरकोशादयं स्त्रियामपि भवति, द्विपात्त्वात्। **ऊङुतः** ॥ अयोपधादिति मनुष्यजातेरिति चानुवर्तते, उत इति तद्विशेषणम्, तदन्तविधिः। तदाह। **उकारान्तादित्यादिना** ॥ **कुरूरिति** ॥ कुरुक्षेत्रस्य राजा कुरुः, तस्यापत्यं स्त्रीत्यर्थः। 'गोत्रञ्च चरणैस्सह' इति जातित्वम्। कुरुशब्दात् ऊङि सवर्णदीर्घः। ऊङि दीर्घोच्चारणस्य प्रयोजनं भाष्ये स्पष्टम्। 'तस्यापत्यम्' इत्यणमाशङ्क्य आह। **कुरुनादिभ्यो ण्यः इति** ॥ अपत्याधिकारस्थमिदं सूत्रम्। अनेन सूत्रेण अणपवादो ण्यप्रत्यय इत्यर्थः। तर्हि स श्रूयेतेत्यत आह। **तस्येति** ॥ **अध्वर्युरिति** ॥ अध्वर्युशाखाध्यायिनीत्यर्थः। चरणत्वात् जातित्वम्। "पुरा युगेषु नारीणां मौञ्जीबन्धनमिष्यते। अध्यापनञ्च वेदानां सावित्रीवचनं तथा ॥" इति यमादिस्मृतिः। **अप्राणिजातेश्चेति** ॥

नामुपसङ्ख्यानम्' (वा २५०२) । रज्ज्वादिपर्युदासादुवर्णान्तेभ्य एव । अलाब्वा । कर्कन्ध्वा । अनयोर्दीर्घान्तत्वेऽपि 'नोङ्धात्वोः' (सू ३७२१) इति विभक्त्युदात्तत्वप्रतिषेध ऊङः फलम् । प्राणिजातेस्तु कुकवाकुः । रज्ज्वा-देस्तु रज्जुः । हनुः ।

५२२ । बाह्वन्तात्संज्ञायाम् । (४-१-६७)

स्त्रियामूङ् स्यात् । भद्रबाहूः । 'संज्ञायाम्' किम् । वृत्तबाहुः ।

५२३ । पङ्गोश्च । (४-१-६८)

पङ्गूः । '[1]श्वशुरस्योकाराकारलोपश्च' (वा ५०३९) । चादूङ् ।

वाचकानामिति शेषः । रज्ज्वादिभिन्नानामप्राणिजातिवाचकानामपि ङीष् उपसङ्ख्यानमित्यर्थः । नन्वत्र उत इति सम्बध्यते वा न वा, नाद्यः, अलाबूरिति भाष्योदाहरणविरोधात् । अलाबू-शब्दस्य ऊदन्तत्वात् । न द्वितीयः, अदन्तादपि अप्राणिजातिवाचिनः ऊङापत्तेरित्यत आह । **रज्ज्वादिपर्युदासादिति** ॥ उत इति न सम्बध्यते । अदन्तेषु नातिप्रसङ्गः 'नञिवयुक्त-मन्यसदृशाधिकरणे तथाह्यर्थगतिः' इति न्यायेन रज्ज्वादिसदृशानामुवर्णान्तानामेव ग्रहणादिति भावः । **अलाब्वेति** ॥ अलाबूशब्दादूङि सवर्णदीर्घे अलाबूशब्दात् ऊङन्तात् सुबुत्पत्तिः । ङयि यणादेशे अलाब्वै इति रूपम् । एवं कर्कन्धूशब्दादूङन्तात् ङयि कर्कन्ध्वै इति रूपम् । "कर्कन्धूर्बदरी" इत्यमरः । "तुम्ब्यलाबूरुभे समे" इति च । ननु ऊदन्तत्वादनयोरूङ्विधि-र्व्यर्थ इत्यत आह । **अनयोरिति** ॥ **कुकवाकुरिति** ॥ पक्षिजातिविशेषः । अत्र मनुष्य-जातित्वाभावात् पूर्वेणापि न ङीष् । **बाह्वन्तात्संज्ञायाम्** ॥ ऊङुत इत्यतः ऊङित्यनुवर्तते, स्त्रियामित्यधिकृतम्, प्रातिपदिकादिति च । तदाह । **स्त्रियामूङ् स्यादिति** ॥ **भद्रबाहू-रिति** ॥ कस्याश्चित्संज्ञा । **संज्ञायां किमिति** ॥ संज्ञायामित्येतत् किमर्थमिति प्रश्नः । **वृत्तबाहुरिति** ॥ वृत्तौ बाहू यस्याः इति विग्रहः । स्त्रियामपि नोङ् । **पङ्गोश्च** ॥ ऊङिति सूत्रशेषः । भग्नपादत्वं पङ्गुत्वं न जातिः । आसीने शयाने च आकृत्या दुर्ग्रहत्वात् एकस्यां व्यक्तौ विकलपादोऽयं पङ्गुरिति पङ्गुत्वस्योपदेशेऽपि व्यक्त्यन्तरेषु आसनशयनाद्यवस्थेषु तस्य दुर्ग्रहत्वात्, गोत्रचरणानन्तर्भावाच्च । ततश्च 'ऊङुतः' इत्यप्राप्तौ वचनमिदम् । **श्वशु-रस्येति** ॥ वृत्त्यादौ पठितमिदम् । चकारात् ऊङनुकृष्यते । श्वशुरस्य स्त्री इत्यर्थे पुंयोगलक्षणे ङीषि प्राप्ते तदपवादः ऊङ्, तत्सन्नियोगेन रेफादकारस्य उकारस्य लोपश्चेत्यर्थः । नच वकारा-दकारस्य लोपश्शङ्क्यः । अन्त्यबाधेऽन्त्यसदेशस्य' इति वचनात् । 'यस्येति च' इति तु

---

१ इदं च 'श्वशुरः श्वश्रा' (१-२-७१) इति निर्देशासिद्धमिति भावः । 'ङ्याप्—' (४-१-१) इति सूत्रस्थस्य 'उवर्णान्तादूङ् विधीयते । तत्रैकादेशः । एकादेशे कृतेऽन्तादि-वद्भावात्प्रातिपदिकसंज्ञा भविष्यति' इति भाष्यस्य स्वरसस्तु 'जत्वादित्वान्निष्पन्नादूङ् दीर्घो-कारान्त एव वा कर्तव्यः' इत्येव लभ्यते ।

पुंयोगलक्षणस्य ङीषोऽपवादः। लिङ्गविशिष्टपरिभाषया स्वादयः। श्वश्रूः।

५२४। ऊरूत्तरपदादौपम्ये। (४-१-६९)

उपमानवाचि पूर्वपदमूरूत्तरपदं यत्प्रातिपदिकं तस्मादूङ् स्यात्। करभोरूः।

५२५। संहितशफलक्षणवामादेश्च। (४-१-७०)

अनौपम्यार्थं सूत्रम्। संहितोरूः। सैव शफोरूः। शफौ खुरौ ताविव संश्लिष्टत्वादुपचारात्। लक्षणशब्दादर्शआद्यच्। लक्षणोरूः। वामोरूः।

नात्र सम्बध्यते। ईकारे तद्धिते च तद्विधानात्। ननु श्वश्रूरित्यत्र कथं स्वादयः। 'ङ्याप्प्रातिपदिकात्' इत्यधिकृत्य तद्विधेः। अस्य च ङ्याबन्तत्वाभावात्। ऊङन्तस्य च प्रत्ययान्तत्वेन प्रातिपदिकत्वाभावादित्यत आह। **लिङ्गविशिष्टेति**॥ 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति परिभाषयेत्यर्थः। वस्तुतस्तु श्वशुरस्येति वचनममूलकमेव। भाष्ये अदृष्टत्वात् 'ङ्याप्प्रातिपदिकात्' इति सूत्रस्थभाष्यविरोधाच्च। तत्र हि 'ङ्याप्प्रातिपदिकात्' इत्यत्र ऊङोऽपि ग्रहणं कर्तव्यमित्याक्षिप्य उवर्णान्तादूङ् विधीयते। तत्र सवर्णदीर्घे एकादेशे कृते पूर्वान्तत्वेन प्रातिपदिकत्वलाभादेव सिद्धमित्युक्तम्। यदि त्युक्तरीत्या श्वश्रूशब्दो व्युत्पाद्यते तर्हि रेफादकारस्य लुप्तत्वेन एकादेशाप्रसक्तेस्तदसङ्गतिः स्पष्टैव। तथाच श्वश्रूरित्यव्युत्पन्नं प्रातिपदिकमिति शब्देन्दुशेखरे स्पष्टम्। **ऊरूत्तर**॥ ऊरुः उत्तरपदं यस्येति बहुव्रीहिः। प्रातिपदिकादित्यनुवर्तते। उत्तरपदेत्यनेन पूर्वपदमाक्षिप्तम्, औपम्ये इति तत्रान्वेति, उपमीयते अनयेत्युपमा उपमानम्, उपमैव औपम्यं स्वार्थे ष्यञ्। तदाह। **उपमानवाचीति**॥ **करभोरूरिति**॥ करभाविव ऊरू यस्या इति विग्रहः। 'मणिबन्धादाकनिष्ठं करस्य करभो बहिः' इत्यमरः। करभोरुत्वस्याजातित्वात् अप्राप्तौ वचनम्। ऊर्वाकृतेः करभसदृशपुरुषोरुसाधारणत्वेन करभसादृश्यघटितकरभोरुत्वस्य आकृतिग्राह्यत्वाभावात् असर्वलिङ्गत्वाद्यभावाच्च। उपमानवाचीति किम्। वृत्तोरुः, करभोपमोरुरित्यादौ नोङ्। करभशब्दस्य करभसदृशे अवृत्त्या उपमानवाचित्वाभावात्। **संहितशफ**॥ संहित शफ लक्षण वाम एतत्पूर्वपदादप्यूरूत्तरपदादूङ् स्यादित्यर्थः। पूर्वेणैव सिद्धे किमर्थमित्यत आह। **अनौपम्यार्थमिति**॥ **संहितोरूरिति**॥ संहितौ संश्लिष्टौ ऊरू यस्या इति विग्रहः। **सैव शफोरूरिति**॥ संहितोरूरेव शफोरूरित्यनेनोच्यत इत्यर्थः। शफशब्दं विवृणोति। **शफौ खुराविति**॥ यद्यपि 'शफं क्लीबे खुरः पुमान्' इत्यमरः। तथापि 'शफः खुरे गवादीनाम्' इति चन्द्रकोशात् पुंस्त्वमिति भावः। ननु शफत्वमूर्वोः प्रत्यक्षविरुद्धमित्यत आह। **ताविवेति**॥ यतः शफाविव, अत ऊरू शफशब्देनोच्येते इत्यर्थः। कुतस्तत्सादृश्यमित्यत आह। **संश्लिष्टत्वादिति**॥ तर्ह्युपमानवाचिपूर्वपदत्वादेव सिद्धमित्यत आह। **उपचारादिति**॥ शफवत् वास्तवं संश्लिष्टत्वमवलम्ब्य शफत्वस्य आरोपादित्यर्थः। एवञ्च शफशब्दस्य तत्सादृश्याप्रतीतेर्नोक्तदोष इति भावः। **लक्षणोरूरिति**॥ लक्षणौ ऊरू यस्या इति विग्रहः। ननु मार्दवादिगुणपर्यायस्य

'सहितसहाभ्यां चेति वक्तव्यम्' (वा २५०३) । हितेन सह सहितौ ऊरू यस्याः सा सहितोरूः । सहेते इति सहौ ऊरू यस्याः सा सहोरूः । यद्वा । विद्यमानवचनस्य सहशब्दस्य ऊर्वतिशयप्रतिपादनाय प्रयोगः ।

५२६ । संज्ञायाम् । (४-१-७२)

कद्रुकमण्डल्वोः संज्ञायां स्त्रियामूङ् स्यात् । कद्रूः । कमण्डलूः । 'संज्ञायाम्' किम् । कद्रुः । कमण्डलुः । अच्छन्दोऽर्थं वचनम् ।

५२७ । शार्ङ्गरवाद्यञो ङीन् । (४-१-७३)

शार्ङ्गरवादेरञो योऽकारस्तदन्ताच्च जातिवाचिनो ङीन्स्यात्। शार्ङ्गरवी ।

लक्षणशब्दस्य कथमूरुशब्दसामानाधिकरण्यमित्यत आह । **लक्षणशब्दादिति** ॥ लक्षणमनयोरस्तीति विग्रहे लक्षणशब्दात् 'अर्शआदिभ्योऽच्' इत्यच्प्रत्यय इत्यर्थः । तथाच लक्षणयुक्तौ इत्यर्थलाभादिह नोक्तदोष इति भावः । **वामोरूरिति** ॥ वामौ सुन्दरौ ऊरू यस्या इति विग्रहः। "वामौ वल्गुप्रतीपौ द्वौ" इत्यमरः। **सहितेति** ॥ सहित सह आभ्यां परः यः ऊरुशब्दः तस्मादपि ऊङ् स्यादिति वक्तव्यमित्यर्थः । ननु संहितग्रहणेनैव एकदेशविकृतन्यायेन सिद्धे पुनस्सहितग्रहणं व्यर्थमित्यत आह । **हितेनेति** ॥ हितेन सहेति विग्रहे 'तेन सह' इति बहुव्रीहौ 'वोपसर्जनस्य' इति सभावे सहितशब्द इत्यर्थः। ननु सहशब्दस्य विद्यमानवचनत्वे सहोरूरित्यत्र सहशब्दप्रयोगो व्यर्थ इत्यत आह । **सहेते इति** ॥ रतिकालिकमर्दनमिति शेषः । विद्यमानवचनत्वेऽपि सहशब्दस्य न वैयर्थ्यमित्याह । **यद्वेति** ॥ अतिशयेन विद्यमानत्वं विवक्षितमिति न वैयर्थ्यमिति भावः । **संज्ञायाम्** ॥ कद्रुकमण्डल्वोः ऊङिति चानुवर्तते, स्त्रियामित्यधिकृतम् । तदाह । **कद्रुकमण्डल्वोः संज्ञायां स्त्रियामूङ् स्यादिति** ॥ **अच्छन्दोऽर्थमिति** ॥ पूर्वसूत्रे छन्दसीत्युक्तत्वात् लोके संज्ञायामप्राप्तौ अयमारम्भः। कद्रूरिति नागानां मातुस्संज्ञा । एतच्च महाभारतादौ स्पष्टम् । कमण्डलूरिति कस्यचिन्मृगस्य संज्ञा । अत एव 'चतुष्पाच्छो ढञ्' इत्यत्र कामण्डलेय इत्युदाहरिष्यते । पात्रपर्यायस्तु नोदाहरणम् । तस्य स्त्रीलिङ्गत्वाभावात् । **शार्ङ्गरवाद्यञो ङीन्** ॥ शार्ङ्गरवादीति लुप्तपञ्चमीकम् । अञ इति षष्ठी, अत इत्यनुवृत्तं पञ्चम्यन्ते अन्वेति । जातेरित्यनुवृत्तं अता विशेष्यते । तदन्तविधिः । तदाह । **शार्ङ्गरवादेरित्यादिना** ॥ **शार्ङ्गरवीति** ॥ शृङ्गरोरपत्यं स्त्रीत्यर्थे अण्, आदिवृद्धिः, रपरत्वम्, ओर्गुणः, 'गोत्रञ्च चरणैस्सह' इति जातित्वात् ङीषि प्राप्ते ङीन् । स्वरे विशेषः । **बैदीति** ॥ बिदस्यापत्यं स्त्रीत्यर्थः । 'अनृष्यानन्तर्ये बिदादिभ्योऽञ्' । गोत्रत्वेन जातित्वात् ङीषि प्राप्ते ङीन् । अञा अकारस्य विशेषणान्नेह । शूरसेनी । 'जनपदशब्दात्' इत्यपत्ये अञ् । 'अतश्च' इति तस्य लुक् । अत्र जातिलक्षणङीषेव न तु ङीन् । अञो लुप्तत्वेन नकारादकारस्य अञोऽवयवत्वाभावात् । **नृनरयोर्वृद्धिश्चेति** ॥

वैदी। 'जातेः' इत्यनुवृत्तेः पुंयोगे ङीषेव 'नृनरयोर्वृद्धिश्च' (ग ५४) इति गणसूत्रम्। नारी।

५२८। यङश्चाप्। ४-१-७४)

यङन्तात्स्त्रियां चाप्स्यात्। ञ्यङ्ष्यङोः सामान्यग्रहणम्। आम्बष्ठ्या। कारीषगन्ध्या। 'षाद्यञश्चाञ्वाच्यः' (वा २५०५)। शार्कराक्ष्या। पौतिमाष्या।

चकारात् ङीन्। **नारीति** ॥ नृनरशब्दयोरुदाहरणम्। तत्र नृशब्दात् 'ऋन्नेभ्यः' इति ङीपि प्राप्ते ङीन्, ऋकारस्य वृद्धिः, रपरत्वम्। जातिलक्षणङीषस्तु नृशब्दान्न प्रसक्तिः, तत्र अत इत्यनुवृत्तेः। नरशब्दात्तु ङीनि नकारादकारस्य वृद्धिः। ननु परमपि 'यस्येति च' इति लोपं बाधित्वा अन्तरङ्गत्वादलोऽन्त्यपरिभाषया रेफादकारस्य वृद्धिस्स्यात्। न च कृतायामपि वृद्धौ 'यस्येति च' इत्यकारलोपस्स्यादिति वाच्यम्। वृद्धिविधिसामर्थ्यादेव तस्य लोपाभावसिद्धेरिति चेदुच्यते। नृनरयोरित्यत्र नर इति रेफान्तस्य लुप्ताकारस्यानुकरणम्। नरः अः नरः, ना च नरश्च नृनरौ, तयोरिति विग्रहः। नचैवमपि वानरीशब्दे अतिप्रसङ्ग इति वाच्यम्। अर्थवत एव ग्रहणात्। न च नृशब्दात् ङीनि वृद्धौ नारीति सिद्धेर्नरग्रहणं व्यर्थमिति वाच्यम्। नरत्वजातिवाचिनः नरशब्दात् स्त्रियां जातिलक्षणङीषि नरीति व्यावृत्त्यर्थत्वात्। वस्तुतस्तु 'नृनरयोर्वृद्धिश्च' इति गणसूत्रं नारब्ध्व्यमेव। 'तदस्य धर्म्यम्' इत्यनुवृत्तौ 'ऋतोऽञ्' इति सूत्रेण 'नरस्य चेति वक्तव्यम्' इति वार्तिकेन च नुर्धर्म्या नरस्य धर्म्येत्यर्थे नृशब्दान्नरशब्दाच्च अञि ततः 'टिड्ढाणञ्' इति ङीपि नारीति सिद्धेः। 'ञ्नित्यादिर्नित्यम्' इति प्रकृतेराद्युदात्तत्वे ङीपः पित्त्वादनुदात्तत्वम्। ङीन्यपि नित्स्वरेण प्रकृतेरुदात्तत्वमिति स्वरे विशेषाभावात्। नचैवं सति मनुष्यधर्म्यत्वेनैव बोधस्स्यात्, न तु नरत्वेनेति वाच्यम्। योग्यतया हि तद्धर्म्या नरत्वजातिविशिष्टैव बुद्ध्यते। अत एव वास्तुनि भवो वास्तव्य इति रूपस्य 'दिगादिभ्यो यत्' इति भवार्थकतया सिद्धत्वात् 'वसेस्तव्यत्कर्तरि णिच्च' इति वचनं न कर्तव्यमिति भाष्यं सङ्गच्छते। रूढानां यथाकथञ्चिदन्वाख्यानमिति कैयटः' इति शब्देन्दुशेखरे स्थितम्। **यङश्चाप्** ॥ पकारो 'हलङ्याब्भ्यः' इत्यत्र ग्रहणार्थः। चकारः 'चितः' इत्यन्तोदात्तार्थः। **सामान्येति** ॥ यङ्रूपस्य उभयत्रापि सत्त्वादिति भावः। ञ्यङमुदाहरति। **आम्बष्ठ्येति** ॥ आम्बष्ठस्यापत्यं स्त्री इत्यर्थः। 'वृद्धेत्कोसल' इति ञ्यङ्। आम्बष्ठ्यशब्दाच्चाप्। गोत्रत्वेन जातित्वात् ङीषि प्राप्ते चाप्। ष्यङमुदाहरति। **कारीषगन्ध्येति** ॥ करीषं गवादिपशुपुरीषं, तस्येव गन्धो यस्य सः करीषगन्धिः। 'उपमानाच्च' इति गन्धस्य इकारोऽन्तादेशः। करीषगन्धेः गोत्रापत्यं स्त्री इत्यर्थे अण्प्रत्ययः। 'अणिञोरनार्षयोः' इति तस्य ष्यङादेशः। कारीषगन्ध्यशब्दात् गोत्रत्वेन जातित्वात् ङीषि प्राप्ते चाप्। **षाद्यञः इति** ॥ षकारात् परो यो यञ् तदन्तादपि चाबित्यर्थः। **शार्कराक्ष्येति** ॥ शर्कराक्षस्यापत्यं स्त्रीत्यर्थः। **पौतिमाष्येति** ॥ पूतिमाष-

५२९ । आवट्याच्च । (४-१-७५)

अस्माच्चाप्स्यात् । 'यञश्च' (सू ४७१) इति ङीपोऽपवादः । अवट-शब्दो गर्गादिः । आवट्या ।

५३० । तद्धिताः । (४-१-७६)

आपश्चमसमाप्तेरधिकारोऽयम् ।

५३१ । यूनस्तिः । (४-१-७७)

युवन्शब्दात्तिप्रत्ययः स्यात्, स च तद्धितः । लिङ्गविशिष्टपरिभाषया सिद्धे तद्धिताधिकार उत्तरार्थः । युवतिः । अनुपसर्जनादित्येव । बहवो युवानो यस्यां सा बहुयुवा । युवतीति तु यौतेः शत्रन्तान्ङीपि बोध्यम् ।

इति स्त्रीप्रत्ययप्रकरणम् ।

स्यापत्यं स्त्रीत्यर्थः । 'गर्गादिभ्यो यञ्' इत्युभयत्र यञ् । **आवट्याच्च** ॥ ननु कथमवट-शब्दस्य यञन्तत्वमित्यत आह । **अवटशब्दः इति** ॥ **आवट्येति** ॥ अवटस्यापत्यं स्त्रीत्यर्थः । गर्गादियञि 'यस्येति च' इत्यकारलोपे आदिवृद्धौ आवट्यशब्दात् चाप् । **तद्धि-ताः** ॥ वक्ष्यमाणाः प्रत्ययाः तद्धितसंज्ञकाः प्रत्येतव्या इत्यर्थः । अधिकारसूत्रमेतत् । उत्तरा-वधिमाह । **आपश्चमेति** ॥ **यूनस्तिः** ॥ तद्धिताः इत्यनुवृत्तमेकवचनेन विपरिणम्यते । तदाह । **युवन्शब्दात् तिप्रत्ययस्स्यात् स च तद्धितः इति** ॥ स्त्रियामिति शेषः । 'समर्थानाम्' इत्यतः प्राक् तदधिकारस्योक्तत्वादिति भावः । नान्तलक्षणङीपोऽपवादः । नन्वत्र तद्धितग्रहणानुवृत्तिर्व्यर्था । नच 'कृत्तद्धित' इति प्रातिपदिकत्वार्थं तदनुवृत्तिरिति वाच्यम् । प्रातिपदिकत्वाभावेऽपि लिङ्गविशिष्टपरिभाषया तिप्रत्ययान्तात् सुबुत्पत्तिसिद्धेरित्यत आह । **लिङ्गविशिष्टेति** ॥ **युवतिरिति** ॥ स्वादिष्विति पदत्वात् 'न लोप इति नकारलोपः । **अनु-पसर्जनादित्येवेति** ॥ अनुवर्तत एवेत्यर्थः । **बहुयुवेति** ॥ उपसर्जनत्वात्तिप्रत्ययाभावे नान्तलक्षणङीपः 'अनो बहुव्रीहेः' इति निषेधे 'डावुभाभ्याम्' इति डापि च रूपम् । ननु युवतीभिः परिवृतः इत्यादौ कथं युवतीशब्द ईकारान्तः इत्यत आह । **युवतीति त्विति** ॥ 'यु मिश्रणे' इत्यस्माल्लटश्शतरि, शपो लुकि, उवङि, उगित्त्वान्ङीपि युवतीशब्दो व्युत्पन्नो बोद्धव्यः इत्यर्थः । पतिं सुखेन मिश्रयन्ती योषिदुच्यते । अन्ये तु युधातोरौणादिके बाहुलकात्तिप्रत्यये कित्त्वात् गुणाभावे उवङि उगित्त्वात् ङीपि युवतीशब्दः सिद्ध्यतीत्याहुः ॥

इति श्रीमद्वासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां स्त्रीप्रत्ययनिरूपणं समाप्तम् ।

श्रीरस्तु ।

॥ अथ कारकप्रकरणम् ॥

अथ प्रथमा विभक्तिः ।

५३२ । प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा । (२-३-४६)

नियतोपस्थितिकः प्रातिपदिकार्थः । मात्रशब्दस्य प्रत्येकं योगः । प्रातिपदिकार्थमात्रे लिङ्गमात्राद्याधिक्ये संख्यामात्रे च प्रथमा स्यात् । उच्चैः ।

अथ कारकप्रकरणप्रारम्भः । तदेवं 'ङ्याप्प्रातिपदिकात्' इत्यधिकृत्य विहिताः स्वादिप्रत्ययास्सप्रपञ्चन्निरूपिताः । तत्र प्रथमादिसप्तम्यन्तसप्तविभक्तीनामर्थविशेषव्यवस्थान्दर्शयितुमुपक्रमते । **प्रातिपदिकार्थेति** ॥ ननु प्रवृत्तिनिमित्तं व्यक्तिश्चेति द्विकं प्रातिपदिकार्थः, प्रवृत्तिनिमित्तं व्यक्तिः लिङ्गं सङ्ख्या चेति चतुष्कं प्रातिपदिकार्थः, प्रवृत्तिनिमित्तं व्यक्तिः लिङ्गं सङ्ख्या कारकञ्चेति पञ्चकं प्रातिपदिकार्थः, इत्येते पक्षाः 'सरूपाणामेकशेष एकविभक्तौ, स्त्रियाम्' इत्यादिसूत्रेषु भाष्ये स्थिताः मञ्जूषायां प्रपञ्चिताश्च । तत्र त्रिकादिपक्षेषु लिङ्गस्यापि प्रातिपदिकार्थत्वात् पृथग्ग्रहणं व्यर्थमित्यत आह । **नियतेति** ॥ नियता उपस्थितिर्यस्येति विग्रहः । यस्मिन् प्रातिपदिके उच्चारिते यस्यार्थस्य नियमेनोपस्थितिः स तदर्थ इत्यर्थः । एवञ्च तटः तटी तटम् इत्याद्यनियतलिङ्गेषु नियमेन कस्यापि लिङ्गस्योपस्थित्यभावात् प्रातिपदिकार्थशब्देनाग्रहणात् पृथक् लिङ्गग्रहणमावश्यकमिति भावः । मात्रशब्दस्य वचनशब्देनैवान्वयभ्रमं वारयति । **मात्रशब्दस्येति** ॥ प्रातिपदिकार्थश्च लिङ्गञ्च परिमाणञ्च वचनञ्चेति द्वन्द्वः । प्रातिपदिकार्थलिङ्गपरिमाणवचनान्येव प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रमित्यस्वपदविग्रहः । मात्रशब्दोऽवधारणे । "मात्रं कात्स्न्र्येऽवधारणे" इत्यमरः । 'मयूरव्यंसकादयश्च' इति नित्यसमासः । मात्रशब्दस्य द्वन्द्वान्ते श्रूयमाणत्वात् प्रातिपदिकार्थे, लिङ्गे, परिमाणे, वचने च, प्रत्येकमन्वय इत्यर्थः । वचनं सङ्ख्येति वक्ष्यति । ननु प्रातिपदिकार्थमात्रे लिङ्गमात्रे परिमाणमात्रे सङ्ख्यामात्रे च प्रथमेत्यनुपपन्नम् । लिङ्गादीनां केवलानां प्रातिपदिकार्थं विना क्वाप्यनुपस्थितेरित्याशङ्क्य अत एव बाधकात् लिङ्गमात्रे अधिके इति विवक्षितमित्यभिप्रेत्य व्याचष्टे । **लिङ्गमात्राद्याधिक्ये इति** ॥ लिङ्गमात्राधिक्ये परिमाणमात्राधिक्ये चेत्यर्थः । प्रातिपदिकार्थमात्रे इत्यस्योदाहरति । **उच्चैरित्यादि** ॥ नन्वव्ययेषु 'सामान्ये नपुंसकम्' इति नपुंसकत्वस्य च कृष्णशब्दे पुंस्त्वस्य च श्रीशब्दे स्त्रीत्वस्य च ज्ञानशब्दे नपुंसकत्वस्य च

नीचैः । कृष्णः । श्रीः । ज्ञानम् । अलिङ्गा नियतलिङ्गाश्च प्रातिपदिकार्थमात्रे इत्यस्योदाहरणम् । अनियतलिङ्गास्तु लिङ्गमात्राद्याधिक्यस्य । तटः–तटी–तटम् । परिमाणमात्रे द्रोणो व्रीहिः । द्रोणरूपं यत्परिमाणं तत्परिच्छिन्नो व्रीहिरित्यर्थः । प्रत्ययार्थे परिमाणे प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणम्,

---

भानात् कथं प्रातिपदिकार्थस्योदाहरणान्येतानीत्यत आह । **अलिङ्गा इत्यादि** ॥ 'अव्ययादाप् सुपः' इति सूत्रे 'आब्ग्रहणं व्यर्थमलिङ्गत्वात्' इति भाष्योक्तरीत्या अव्यये कस्यापि लिङ्गस्यानुपस्थितिरिति प्रातिपदिकार्थमात्रे इत्यस्य भवत्यव्ययमुदाहरणम् । कृष्णशब्दे पुंस्त्वस्य श्रीशब्दे स्त्रीत्वस्य ज्ञानशब्दे नपुंसकत्वस्य च नियमेन भानमस्ति। तेषां नियतलिङ्गत्वात्। अतस्तेषु लिङ्गानामपि प्रातिपदिकार्थान्तर्भावात् तेषामपि प्रातिपदिकार्थमात्रे इत्युदाहरणत्वं निर्बाधमिति भावः । यद्यपि कृष्णः पटः, कृष्णा पटी, कृष्णं वस्त्रम्' इत्यादौ कृष्णशब्दस्त्रिलिङ्गः । तथापि भगवत्पर एवात्र कृष्णशब्दो विवक्षित इति भावः । नच प्रातिपदिकोक्तार्थे किं प्रथमयेति वाच्यम् । एकत्वादिसङ्ख्याबोधार्थत्वात् । नचाव्ययात् प्रथमोत्पत्तेः फलाभावः । 'अव्ययादाप् सुपः' इति लुकोऽवश्यं प्रवृत्तेरिति वाच्यम् । पदत्वार्थं सुबुत्पत्तेरावश्यकत्वात् । तेन उच्चैरित्यादौ रुत्वविसर्गौ 'उच्चैस्ते सम्यगुच्चारणम्' इत्यादौ तेमयादिसिद्धिश्च भवति । **अनियतेति** ॥ अनियतलिङ्गास्तु तटादिशब्दाः लिङ्गमात्राधिक्यस्योदाहरणम् । तत्र लिङ्गानामनियतोपस्थितिकतया प्रातिपदिकार्थानन्तर्भावादित्यर्थः । **तटः तटी तटमिति** ॥ "तटं त्रिषु" इत्यमरः । **परिमाणमात्रे इति** ॥ उदाहरणं वक्ष्यते इत्यर्थः । **द्रोणो व्रीहिरिति** ॥ द्रोणः परिमाणविशेषः । "जालसूर्यमरीचिस्थं त्रसरेणुरिति स्मृतम् । तेऽष्टौ लिक्षा तु तास्तिस्रो राजसर्षप उच्यते ॥ गौरस्तु ते त्रयष्षट् ते यवो मध्यस्तु ते त्रयः। कृष्णलः पञ्च ते माषः ते सुवर्णस्तु षोडश ॥ पलं सुवर्णाश्चत्वारः पञ्च वापि प्रकीर्तितम् । पलद्वयन्तु प्रसृतं द्विगुण कुडबं मतम् ॥ चतुर्भिः कुडबैः प्रस्थः प्रस्थाश्चत्वार आढकः । आढकैस्तैश्चतुर्भिस्तु द्रोण इत्यभिधीयते ॥ कुम्भो द्रोणद्वयं शूर्पः खारी द्रोणास्तु षोडश ।" इति स्मरणात्। **व्रीहिरिति** ॥ जातावेकवचनम् । 'जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्' इति वचनात् । व्रीहिराशिरिति यावत् । नह्येकस्याः व्रीहिव्यक्तेः द्रोणपरिमाणं सम्भवति । ननु द्रोणाख्यपरिमाणविशेषस्य व्रीहिव्यक्तेश्च कथमभेदान्वयः । धर्मधर्मिणोर्भेदादित्यत आह । **द्रोणरूपमिति** ॥ तथाचाभेदान्वयस्य बाधादेव द्रोणपरिमाणस्य व्रीहिव्यक्तेश्च परिच्छेद्यपरिच्छेदकभावेनान्वयाभ्युपगमान्नोक्तदोष इति भावः । ननु द्रोणशब्दस्य परिमाणविशेषवाचिनो नियतपुल्लिँङ्गत्वे प्रातिपदिकार्थमात्रे इत्येव सिद्धम् । यदि तु 'अस्त्रियामाढकद्रोणौ' इति द्विलिङ्गता, तर्हि लिङ्गमात्राद्याधिक्ये इत्येव सिद्धम्, तत् किं परिमाणग्रहणेनेति चेत्तत्राह । **प्रत्ययार्थे परिमाणे इति** ॥ न हि द्रोणत्वेन रूपेण परिमाणविशेषवाचिद्रोणशब्दात् स्वार्थे प्रथमा विभक्तिरिष्यते, येन प्रातिपदिकार्थमात्रे इत्यनेन गतार्थता स्यात्। किन्तु द्रोणत्वेन परिमाणवाचिनो द्रोणशब्दात् परिमाणत्वसामान्यरूपेण द्रोणपरिमाणे विवक्षिते प्रथमा विभक्तिर्विधी-

प्रत्ययार्थस्तु परिच्छेद्यपरिच्छेदकभावेन व्रीह्यौ विशेषणमिति विवेकः। वचनं संख्या। एकः। द्वौ। बहवः। इहोक्तार्थत्वाद्विभक्तेरप्राप्तौ वचनम्।

५३३। सम्बोधने च। (२-३-४७)

इह प्रथमा स्यात्। हे राम।

इति प्रथमा विभक्तिः।

यते। ततश्च प्रत्ययार्थे परिमाणसामान्ये द्रोणशब्दार्थात्मकप्रकृत्यर्थः परिमाणविशेषः सामान्यविशेषात्मकाभेदसंसर्गेणान्वेति। परिमाणसामान्यात्मकप्रत्ययार्थस्तु परिच्छेद्यपरिच्छेदकभावेन व्रीहावन्वेति। तथाच द्रोणाख्यपरिमाणविशेषात्मकं यत् परिमाणं तत्परिच्छिन्नो व्रीहिरिति बोधः फलति। अन्यथा द्रोणाख्यपरिमाणविशेषपरिच्छिन्नो व्रीहिरित्येव बोधस्स्यात्। परिमाणत्वसामान्यं न प्रतीयेत। तदर्थमिह परिमाणग्रहणमित्यर्थः। **वचनं सङ्ख्येति** ॥ पूर्वाचार्यैस्तथा संज्ञाकरणादिति भावः। तथाच सङ्ख्यामात्रे प्रथमेति लभ्यते। नच लिङ्गमात्राद्याधिक्ये परिमाणमात्राधिक्ये इतिवत् सङ्ख्यामात्राधिक्ये इति कुतो न व्याख्यातमिति वाच्यम्। केवललिङ्गपरिमाणयोः क्वाप्युपस्थित्यभावेन तथा व्याख्यानेऽपि एकद्विबहुशब्देष्वेकत्वद्वित्वबहुत्वानां केवलानान्नियतोपस्थितिसत्त्वेन सङ्ख्यामात्रे इत्येव व्याख्यातुमुचितत्वात्। अत एव भाष्ये वचनग्रहणस्य एकः द्वौ बहवः इत्युदाहृतम्। ननु एकः द्वौ बहवः इत्यत्र एकत्वद्वित्वबहुत्वानां नियमेनोपस्थित्या 'प्रातिपदिकार्थे' इत्येव सिद्धे वचनग्रहणं व्यर्थमित्यत आह। **इहेति** ॥ प्रकृतिभिरेवैकत्वादीनामुक्तत्वात् 'उक्तार्थानामप्रयोगः' इति न्यायेन प्रथमाविभक्तेरप्राप्तौ तदर्थं वचनग्रहणमित्यर्थः। तथाच विभक्तिरिहानुवादशब्दसाधुत्वार्थं प्रयोज्या। 'न केवला प्रकृतिः प्रयोक्तव्या नापि प्रत्ययः' इति अनभिहितसूत्रभाष्यसिद्धन्यायादिति भावः। इदमेवाभिप्रेत्योक्तं भाष्ये। 'उक्तेष्वप्येकत्वादिषु प्रथमा' इति। मात्रग्रहणात् कारकाद्याधिक्ये प्रथमा न भवति। अत्र "अर्थे प्रथमा, इत्येव सूत्रयितुमुचितम्" इति प्रौढमनोरमादौ प्रपञ्चितम्। **सम्बोधने च ॥ इहेति** ॥ सम्बोधने अधिके गम्येऽपि प्रथमा स्यादित्यर्थः। सम्बोधनमभिमुखीकृत्य ज्ञापनम्। **हे रामेति** ॥ मां पाहीति शेषः। इह रामं प्रति मद्रक्षणं ज्ञाप्यम्। नच 'हे राजन् सार्वभौमो भव' इत्यत्र सार्वभौमशब्दादपि प्रथमा स्यादिति वाच्यम्। सम्यक् बोधनमेव हि सम्बोधनम्। समित्युपसर्गबलात् श्रोतरि विशिष्य राजत्वादिना ज्ञाते सत्येव तं प्रति कश्चिदर्थो ज्ञापयितुं शक्यः, नान्यथा। ततश्च सम्बोधनविभक्तिरियमनुवाद्यविषयैवेति लभ्यते। न तु विधेयविषया। तथाच सार्वभौमत्वस्य विधेयस्य इदानीमसिद्धत्वेन अनुवाद्यत्वाभावान्न सार्वभौमशब्दात् सम्बोधनविभक्तिरिति मञ्जूषायां विस्तरः ॥

इति प्रथमा विभक्तिः।

अथ द्वितीया विभक्तिः ।

५३४ । कारके । (१-४-२६)

इत्यधिकृत्य ।

५३५ । कर्तुरीप्सिततमं कर्म । (१-४-४९)

कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात् । 'कर्तुः' किम् । माषेष्वश्वं बध्नाति । कर्मण ईप्सिता माषाः, न तु कर्तुः । तमब्ग्रहणं किम् । पयसा ओदनं भुङ्क्ते । 'कर्म' इत्यनुवृत्तौ पुनः कर्मग्रहणमाधारनिवृत्त्यर्थम् । अन्यथा गेहं प्रविशतीत्यत्रैव स्यात् ।

अथ द्वितीया विभक्तिः–**कारके** ॥ **इत्यधिकृत्येति** ॥ संज्ञाः वक्ष्यन्ते इति शेषः । क्रियाजनकं कारकम् । करोति क्रियानिर्वर्तयतीति भाष्ये व्युत्पत्तिदर्शनात् । ब्राह्मणस्य पुत्रं पश्यतीत्यत्र ब्राह्मणस्यान्यथासिद्धत्वान्न कारकत्वम् । **कर्तुरीप्सित** ॥ कारके इत्यनुवर्तते । प्रथमया विपरिणम्यते । आप्तुमिष्यमाणमीप्सितम् । आप्लृ व्याप्तौ, अस्मात् सन्नन्तात् 'मतिबुद्धिपूजार्थेभ्यश्च' इति वर्तमाने क्तः । मतिरिच्छा, बुद्धेः पृथग्ग्रहणात् । 'क्तस्य च वर्तमाने' इति कर्तरि षष्ठी । अतिशयेनेप्सितमीप्सिततमम् । धातूपात्तव्यापाराश्रयः कर्ता । केनाप्तुमित्याकाङ्क्षायां कर्तृविशेषणीभूतव्यापारेणेत्यर्थाल्लभ्यते । फलितमाह । **कर्तुः क्रिययेत्यादिना** ॥ क्तप्रत्ययोपात्तं वर्तमानत्वन्तु न विवक्षितम् । तेन कटं करोति, कृतवान्, इत्यादौ नाव्याप्तिः । आप्तिस्सम्बन्धः । एवञ्च कर्ता स्वनिष्ठव्यापारप्रयोज्यफलेन सम्बद्धुमिष्यमाणमित्यर्थः । यथा तण्डुलान् पचति इत्यत्र विक्लित्त्यनुकूलव्यापारः पचेरर्थः । तण्डोदकप्रस्वेदनकृतप्रशिथिलावयवकत्वात्मकं मृदुविशदत्वं विक्लित्तिः, तदनुकूलव्यापारः अधिश्रयणोदकासेचनैधोपकर्षणप्रज्वलनादिरूप इति कारके इत्यादिसूत्रभाष्ये स्पष्टम् । अत एव 'फलव्यापारयोर्धातुः' इति सिद्धान्तः । तथाच तण्डुलानधिश्रयणादिव्यापारेण विक्लेदयतीत्यर्थः । अधिश्रयणादिरूपकर्तृव्यापारप्रयोज्यविक्लित्तिरूपफलाश्रयत्वात् तण्डुलानां कर्मत्वम् । ननु कर्तृग्रहणं व्यर्थम् । नच व्यापारलाभाय तदिति वाच्यम् । केनाप्तुमित्याकाङ्क्षायां कारकाधिकारादेव तल्लाभादिति पृच्छति । **कर्तुः किमिति** ॥ **माषेष्वश्वं बध्नातीति** ॥ माषेषु भक्षणाय प्रवृत्त्युन्मुखमुदरव्यधाभयात्तद्भक्षणान्निवर्तयितुमन्यत्र बध्नातीत्यर्थः । अत्र माषाणां कर्मत्वनिवृत्त्यर्थं कर्तृग्रहणमिति भावः । ननु कर्तृग्रहणे कृते कथं नोक्तदोष इत्याह । **कर्मणः ईप्सिताः माषाः, न तु कर्तुरिति** ॥ बन्धनकर्मीभूतस्याश्वस्यैवात्र माषाः ईप्सिताः, नतु बन्धनकर्तुः । अश्वरक्षणस्यैव तदपेक्षितत्वादित्यर्थः । **तमब्ग्रहणं किमिति** ॥ तमबन्तमीप्सिततममित्येतत् किमर्थं 'कर्तुरुद्देश्यं कर्म' इत्येवास्तु इति प्रश्नः । **पयसा ओदनं भुङ्क्ते इति** ॥ पयसा मिश्रमित्यर्थः । यद्यप्यत्र भोक्तुरोदन एव पयसा मिश्रः उद्देश्यः, नतु केवलं पयः, नापि केवल ओदनः । नह्यसौ केवलपयःपानेन तुष्यति,

५३६। अनभिहिते। (२-६-१)

इत्यधिकृत्य।

५३७। कर्मणि द्वितीया। (२-३-२)

अनुक्ते कर्मणि द्वितीया स्यात्। हरिं भजति। अभिहिते तु कर्मणि 'प्रातिपदिकार्थमात्रे' इति प्रथमैव। अभिधानं च प्रायेण तिङ्कृत्तद्धितसमासैः। तिङ्, हरिः सेव्यते। कृत्, लक्ष्म्या सेवितः। तद्धित, शतेन क्रीतः शत्यः।

नापि केवलौदनेन। तथापि यदा भुक्त्वानेन पयोलिप्सया पुनरोदनभोजने प्रवर्तते तदेदं प्रत्युदाहरणम्। तत्र यद्यपि पय एव उद्देश्यं भुजिक्रियां प्रति, तथापि भुजिक्रियाकर्मीभूतमोदनं प्रति मिश्रणसाधनतया गुणत्वेनैव तदुद्देश्यं, ननु भोज्यत्वेन। अतस्तत्र पयसो गुणत्वेन ओदनस्य तत्संस्कार्यतया उद्देश्यत्वादोदनस्यैव ईप्सिततमत्वम्, ननु पयसोऽपि। तस्याप्योदन एव ईप्सिततमः, गुणेष्वस्य नानुरोध इति भावः। ननु तमब्ग्रहणं किमर्थम्। 'कर्तुरीप्सितं कर्म' इत्येवास्त्विति वाच्यम्। 'अन्नेर्माणवकं वारयति' इत्यत्र माणवकस्य 'वारणार्थानामीप्सितः' इत्यपादानत्वनिवृत्त्यर्थत्वादिति प्रकृतसूत्रभाष्ये स्थितम्। तदेतद्वारणार्थानामिति सूत्रव्याख्यावसरे स्फुटीभविष्यति। प्राचीनैस्तु कैश्चित् तमब्ग्रहणं किम्, 'पयसा ओदनं भुङ्क्ते' इति ग्रन्थः केवलतमब्ग्रहणप्रयोजनपरतया व्याख्यातः। ते भाष्यविरुद्धत्वादुपेक्ष्याः। ननु 'अधिशीङ्स्थासां कर्म' इत्यतोऽनुवृत्तेरिह कर्मग्रहणं व्यर्थमित्यत आह। **कर्मग्रहणमाधारेति॥** अधिशीङित्यत्र हि आधारः इत्यनुवर्तते। इहापि तदनुवृत्तिर्माभूदिति कर्मग्रहणमित्यर्थः। ननु हरिं भजतीत्यादावसम्भवादेव तदनुवृत्तिर्न भविष्यतीत्यत आह। **अन्यथा गेहं प्रविशतीत्यत्रैव स्यादिति॥** हरिं भजतीत्यादौ न स्यादित्येवकारार्थः। **अनभिहिते॥ इत्यधिकृत्येति॥** द्वितीयादि वक्ष्यते इत्यर्थः। **कर्मणि द्वितीया॥** 'अनभिहिते' इत्यनुवृत्तं व्याचष्टे। **अनुक्ते इति। हरिं भजतीति॥** तुष्ट्यनुकूलपरिचरणात्मकव्यापारः भजेरर्थः, पूजादिव्यापारेण हरिं तोषयतीत्यर्थः। कर्तृनिष्ठपूजनादिव्यापारप्रयोज्यतुष्टिरूपफलाश्रयत्वाद्धरिः कर्म। हरिनिष्ठतुष्ट्यनुकूलः एकदेवदत्तनिष्ठो वर्तमानो व्यापार इति बोधः। 'भावप्रधानमाख्यातम्' इति निरुक्तकारयास्कवचनात् क्रियाप्रधानन्तिङन्तमिति तदर्थः। एवञ्च हरिनिष्ठतुष्ट्यनुकूलव्यापाराश्रयो देवदत्त इति प्रथमान्तविशेष्यकबोधस्तार्किकसम्मतो नादर्तव्य इति मञ्जूषादौ प्रपञ्चितम्। **अभिहिते त्विति॥** हरिस्सेव्यते इत्यादाविति शेषः। **प्रथमैवेति॥** तद्विधावनभिहिताधिकाराभावात् 'अभिहिते प्रथमा' इति वार्तिकाच्चेति भावः। अत्र भाष्ये कटं करोति भीष्ममुदारं दर्शनीयं शोभनमित्यत्र कटशब्दादुत्पाद्यमानया द्वितीयया कर्मणोऽभिहितत्वात् भीष्मादिभ्यो द्वितीया न प्राप्नोतीत्याशङ्क्य 'तिङ्कृत्तद्धितसमासैरभिधानम्' इति परिगणितम्। तत्र प्रायेणेत्युच्याहृत्य आह। **अभिधानञ्चेति॥** समासैरित्यनन्तरं विवक्षितमिति शेषः। **तिङ्भिति॥** अविभक्तिकनिर्देशोऽयं तिङभिधानप्रदर्शनाय। **हरिः सेव्यते इति॥** 'लः कर्मणि' इति कर्मणि लकारः। 'भावकर्मणोः' इत्यात्मनेपदम्।

समास, प्राप्तः आनन्दो यं स प्राप्तानन्दः । क्वचिन्निपातेनाभिधानम् । यथा। 'विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम् । सांप्रतमित्यस्य हि युज्यत इत्यर्थः ।

तिङन्तेन अभिहितत्वाद्धरेः कर्मणो न द्वितीयेति भावः । हरिं भजतीति वाक्यार्थः । कर्तृकर्मलकारयोरेकरूप एव वाक्यार्थबोध इति वैयाकरणसमयः । **कृदिति** ॥ तिङितिवदयमप्यविभक्तिकनिर्देशस्तदुदाहरणसूचनाय । **लक्ष्म्या सेवितः इति** ॥ हरिरिति शेषः । भूते कर्मणि क्तः, कर्तरि तृतीया । लक्ष्मीनिष्ठपरिचरणजनिततुष्ट्याश्रयो हरिरिति बोधः । 'सत्त्वप्रधानानि नामानि' इति यास्कस्मृतिमनुरुध्य प्रातिपदिकेषु प्रथमान्तोपात्तविशेष्यकबोधस्यैव सर्वसम्मतत्वात् । अत्र सेवितहरेः कर्मणः कृता अभिहितत्वान्न द्वितीया । **तद्धितेति** ॥ अयमप्यविभक्तिकनिर्देशस्तदुदाहरणसूचनाय । **शतेन क्रीतः शत्यः इति** ॥ पठादिरिति शेषः । 'शताच्च ठन्यतावशते' इति यत्प्रत्ययस्तद्धितः । अत्र कर्मणस्तद्धितेनोक्तत्वान्न द्वितीया । **समासेति** ॥ अयमप्यविभक्तिकनिर्देशस्तदुदाहरणसूचनाय । **प्राप्तानन्दः इति** ॥ देवदत्तादिरिति शेषः । 'गत्यर्थाकर्मक' इत्यादिना प्राप्तेति कर्तरि क्तः । अन्यपदार्थस्य कर्मणः बहुव्रीहिसमासेनाभिहितत्वान्न द्वितीयेति भावः । आनन्दकर्तृकप्राप्तिकर्मीभूत इति बोधः । प्रायेणेत्यस्य फलन्दर्शयति । **क्वचिदिति** ॥ **विषवृक्षोऽपीति** ॥ असाम्प्रतमित्यत्रान्वेति । संवर्ध्येत्यत्र छेत्तुमित्यत्र चान्वये द्वितीयापत्तेः । तत्र त्वर्थाद्विषवृक्षमिति गम्यते । न साम्प्रतमिति विग्रहे नञ्तत्पुरुषः । **युज्यत इत्यर्थः इति** ॥ युजिर्योगे कर्मणि लकारः । औचित्या न युज्यते । औचित्ययुक्तो न भवतीति यावत् । "युक्ते द्वे साम्प्रतं स्थाने" इत्यमरः । अत्र वृक्षस्य कर्मणो निपातेनाभिहितत्वान्न द्वितीयेति भावः । वस्तुतस्तु छेत्तुमिति तुमुन्नत्र दुर्लभः । कृष्णं द्रष्टुं यातीत्यत्रेव क्रियार्थक्रियोपपदत्वाभावेन 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इत्यस्याप्रवृत्तेः । 'शकधृष' इत्यादिनापि तुमुन्न, शकादियोगाभावात् । किन्तु 'इच्छार्थेषु' इत्यनुवृत्तौ 'समानकर्तृकेषु तुमुन्' इति तुमुन् । अक्रियार्थोपपदत्वेऽपि तस्य प्रवृत्तेः । यथा इच्छति भोक्तुमित्यादि । एवञ्च तुमुनस्साधुत्वाय इष्यते इत्यध्याहार्यम् । विषवृक्षोऽपि संवर्ध्य छेत्तुम् इष्यते इति यत् तदसाम्प्रतम् अयुक्तमित्यर्थः । "एवञ्चात्रापि तिङाभिहितत्वादेव द्वितीयानिवारणात् कृत्तद्धितसमासैरभिधानम् इति परिगणनवार्तिके प्रायेणेत्यध्याहारो विफलः" इति शब्देन्दुशेखरे स्थितम् । पक्वमोदनं भुङ्क्ते इत्यत्र तु पचिभुजिक्रियानिरूपिते द्वे कर्मत्वशक्ती । तत्र गुणभूतपचिनिरूपितकर्मत्वशक्तेः क्तप्रत्ययाभिहितत्वेऽपि प्रधानभूतभुजिक्रियानिरूपितामनभिहितां कर्मत्वशक्तिमादाय द्वितीया निर्बाधेति भाष्ये स्पष्टम् । ननु यथा बहुपटुरित्यादौ तद्धितेन बहुच्प्रत्ययेन उक्तत्वात् कल्पबादयो नभवन्ति, तथा क्रियते कटः इत्यादावपि तिङादिभिरुक्तत्वात् द्वितीयादयो न भविष्यन्ति । 'उक्तार्थानामप्रयोगः' इति न्यायात् । किञ्च कटं करोतीत्यादौ सावकाशाद्वितीया कृतः कटः इत्यादौ न भवत्येव । अनवकाशया प्रथमया बाधात् । नच वृक्षः प्लक्षः इत्यादिः प्रथमायाः अवकाश इति वाच्यम् । तत्र गम्यामस्तिक्रियां प्रति कर्तृत्वे तृतीयाप्रसङ्गात् । अस्तु वा तत्र प्रथमाया अवकाशः । तथाप्युभयोस्सावकाशत्वे परत्वात् प्रथमैव

५३८। तथायुक्तं चानीप्सितम्। (१-४-५०)

ईप्सिततमवत्क्रियया युक्तमनीप्सितमपि कारकं कर्मसंज्ञं स्यात्। ग्रामं गच्छंस्तृणं स्पृशति। ओदनं भुञ्जानो विषं भुङ्क्ते।

५३९। अकथितं च। (१-४-५१)

अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्।

स्यात्। एवञ्चानभिहिताधिकारो व्यर्थ इति चेन्मैवम्। 'कर्मणि द्वितीया' इत्यादीनां 'द्वेकयोर्द्विवचनैकवचने' 'बहुषु बहुवचनम्' इत्यनयोश्च एकवाक्यतया कर्मणि यदेकत्वं द्वित्वं बहुत्वं वा तत्र एकद्विबहुवचनानीति लभ्यते। तत्र 'अनभिहिते' इत्यारम्भे अनभिहिते कर्मणि यदेकत्वं तत्र द्वितीयेत्येवमर्थस्स्यात्। 'अनभिहिते' इत्यभावे तु कर्मणि यदेकत्वन्तत्र द्वितीयैकवचनमित्येव पर्यवस्येत्। तथा सति कृतः कट इत्यादौ क्तेन कर्ममात्रोक्तावपि तदेकत्वस्यानुक्ततया द्वितीयैकवचनन्दुर्वारं स्यात्। नच प्रथमाया निरवकाशत्वं शङ्क्यम्। नीलमिदन्तु रक्तमित्यादौ विशेषणान्तरनिवृत्तितात्पर्यके अस्तिक्रियायाः अनावश्यकत्वेन तत्र प्रथमायास्सावकाशत्वात्। नापि तत्र परत्वात् प्रथमैव भविष्यतीति वाच्यम्। कर्तव्यः कट इत्यादौ ततोऽपि परत्वेन कृद्योगलक्षणषष्ठीप्रसङ्गात्। एवञ्च सङ्ख्या विभक्त्यर्थ इति पक्षे 'अनभिहिते' इत्यारब्धव्यम्। यदि तु पञ्चकं प्रातिपदिकार्थः इत्यनाश्रित्य कारकं विभक्त्यर्थ इत्याश्रीयते तदा कारकस्य क्तप्रत्ययादिनोक्तत्वान्न द्वितीयादिविभक्तिप्रसक्तिः। एकत्वादिसङ्ख्याबोधश्च प्रातिपदिकार्थमात्रे प्रवृत्तया प्रथमयैव सम्भवति। अतः 'अनभिहिते' इति नारब्धव्यमिति भाष्यकैयटकौस्तुभादिषु स्पष्टम्। अतिविस्तरस्तु मञ्जूषायामनुसन्धेयः। **तथायुक्तञ्चानीप्सितम्॥** तथाशब्दस्य सादृश्यवाचकस्य प्रतियोगिसापेक्षत्वादाह। **ईप्सिततमवदिति॥** पूर्वसूत्रे सन्निहितत्वादीप्सिततममेव सादृश्यप्रतियोगीति भावः। **क्रियेति॥** क्रियाजन्यफलयुक्तमित्यर्थः। पूर्वसूत्रे ईप्सिततमस्य कर्मत्वमुक्तम्। द्वेष्योपेक्ष्यसङ्ग्रहार्थमिदं वचनम्। तत्र उपेक्ष्यमुदाहरति। **ग्रामं गच्छंस्तृणं स्पृशतीति॥** संयोगानुकूलव्यापारः स्पृशेरर्थः। अत्र स्पृश्यमानस्य तृणस्य ईप्सिततमत्वाभावेऽपि गङ्गां स्पृशतीत्यादौ स्पृश्यमानस्येप्सिततमस्य गङ्गादेरिव क्रियाजन्यसंयोगात्मकफलाश्रयत्वात्कर्मत्वमिति भावः। द्वेष्यमुदाहरति। **विषं भुङ्क्ते इति॥** यदा कश्चिद्बलवता वैरिणा निगृह्यमाणो विषं भुङ्क्ते तदेदमुदाहरणम्। भुजेर्हि मुखे प्रक्षिप्तस्य गळविवरप्रवेशानुकूलः हनुचलनादिव्यापारोऽर्थः। विषस्य द्वेष्यतया ईप्सिततमत्वाभावेऽपि ओदनं भुङ्क्ते इत्यादौ भुज्यमानस्य ईप्सिततमस्य ओदनादेरिव क्रियाजन्यगळविवरप्रवेशात्मकफलाश्रयत्वात् कर्मत्वमिति भावः। नच 'धातूपस्थाप्यफलशालि कर्म' इत्येवास्तु, किमीप्सितानीप्सितयोः पृथक् ग्रहणेनेति वाच्यम्। अग्नेर्माणवकं वारयतीत्यत्र हि 'वारणार्थानामीप्सितः' इति माणवकस्यापादानत्वं प्राप्तं तन्निवृत्त्यर्थं 'कर्तुरीप्सिततमम्' इति वक्तव्यमेव। एवञ्च द्वेष्योदासीनसङ्ग्रहार्थं 'तथायुक्तञ्च' इति सूत्रमावश्यकमित्यास्तान्तावत्। **अकथितञ्च॥** अकथितशब्दं व्याचष्टे। **अपादानादिविशेषैरिति॥** अपादानं सम्प्रदानम् अधि-

दुहाच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम् ।
कर्मयुक्स्यादकथितं तथा स्यान्नीहृकृष्वहाम् ।

'दुहादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णां कर्मणा यद्युज्यते तदेवाकथितं कर्म' इति परिगणनं कर्तव्यमित्यर्थः । गां दोग्धि पयः । बलिं याचते

करणं कर्म करणं कर्ता हेतुः इति कारकसप्तकम् । तदेतद्यदा अपादानत्वादिविशेषात्मना न विवक्षितं किन्तु सम्बन्धसामान्यात्मनैव तदा तत्कर्मसंज्ञकमित्यर्थः । ननु 'नटस्य शृणोति गाथाम्' इत्यत्र गाथाकर्मकं नटसम्बन्धि श्रवणमित्यर्थकेन नटस्यापि कर्मत्वं स्यात् । तस्य क्रियान्वयित्वेन कारकत्वात् । वस्तुतः अपादानस्य सम्बन्धत्वेन विवक्षितत्वाच्चेत्याशङ्क्य परिगणयति । **दुह्याजिति** ॥ वार्तिकार्थसङ्ग्रहश्लोकोऽयम् । अतो व्याचष्टे । **दुहादीनामिति** ॥ दुह प्रपूरणे, टु याचृ याच्ञायाम्, डु पचष् पाके, दण्ड दण्डनिपातने । चुरादिः निग्रह इत्यर्थः । इह ग्रहणार्थकः । रुधिर् आवरणे, प्रच्छ ज्ञीप्सायाम् । श्लोके प्रच्छीत्यत्रेकार उच्चारणार्थः । इका निर्देशे तु 'ग्रहिज्या' इति सम्प्रसारणप्रसङ्गात् । चिञ् चयने, ब्रूञ् व्यक्तायां वाचि, शासु अनुशिष्टौ, जि अभिभवे, मन्थ विलोडने, मुष स्तेये, इति द्वादशानामित्यर्थः । **चतुर्णामिति** ॥ णीञ् प्रापणे, हृञ् हरणे, कृष विलेखने, वह प्रापणे, इति चतुर्णामित्यर्थः । **कर्मणा यद्युज्यते इति** ॥ कर्मयुगित्यस्य व्याख्यानमिदम् । करणे उपपदे कर्मणि वाच्ये 'सत्सूद्विष' इत्यादिना क्विबिति भावः । यद्यपि "दुहियाचिरुधिप्रच्छिभिक्षिचित्रामुपयोगनिमित्ततमपूर्वविधौ । ब्रुविशासिगुणेन च यत् स च ते तदकीर्तितमाचरितं कविना" इति प्रकृतसूत्रस्थश्लोकवार्तिके पचिमथिमुष्यादयो न पठिताः । तथापि चकारेण तेऽपि सङ्ग्राह्या इति कैयटः । **गां दोग्धि पयः इति** ॥ क्षरणानुकूलव्यापारः क्षारणपर्यायो दुहेरर्थः । क्षारणात्मकव्यापारप्रयोज्यक्षरणात्मकफलाश्रयत्वात्पयः कर्म । गौस्तु क्षरणे अपादानम् । तदपादानत्वमुपेक्ष्य सम्बन्धत्वात्मना गोर्विवक्षायां कर्मत्वमनेन भवति । ततश्च शेषषष्ठीनिरासे द्वितीया भवति । तादिदमुक्तं प्रौढमनोरमायाम् । गोसम्बन्धि पयःकर्मकन्दोहनमर्थ इति । तथाच न माषाणामश्नीयादित्यत्रेव शेषत्वविवक्षायां प्राप्तां षष्ठीं बाधितुमिदं सूत्रम् । गोरपादानत्वविवक्षायान्तु पञ्चम्येव, गोः पयो दोग्धीति । गोसकाशात् पयः क्षारयतीत्यर्थः । यदि तु गौः पयोविशेषणं तदा षष्ठ्येव । गोसम्बन्धि यत्पयः तत् क्षारयतीत्यर्थः । एवमग्रेऽप्यूह्यमिति प्राचीनमतानुसारी पन्थाः । वस्तुतस्तु अपादानत्वादिविशेषरूपेणाविवक्षितं किन्तु कर्मत्वेनैव विवक्षितम् अकथितम् । तादृशमपादानादि कर्मसंज्ञकं स्यादित्यर्थः । कारकत्वव्याप्यसंज्ञानां स्वबोध्ये कर्मत्वादिशक्तिमत्त्वबोधकत्वात् बोधोऽपि तथैव । एवञ्च गान्दोग्धि पयः इत्यत्र गोकर्मकं पयःकर्मकञ्च दोहनमित्येव बोधः । अवधेस्सकाशाद्भवद्द्रव्यविभागो हि क्षरणम् । तच्च गोपनिष्ठव्यापारप्रयोज्यम् । एवञ्च कर्तृव्यापारप्रयोज्यक्षरणात्मकविभागविशेषाश्रयत्वात् गोः पयसश्च पूर्वसूत्राभ्यां कर्मत्वमस्त्येव । अतः उभयकर्मकबोध एव युक्तः, नतु सम्बन्धत्वेन गोर्बोधः । अत एव प्रकृतसूत्रभाष्ये

---

१ इदं च १०९०, ११०० वार्तिकादिसिद्धम् ।

वसुधाम्। अविनीतं विनयं याचते। तण्डुलानोदनं पचति। गर्गाञ्छतं दण्डयति। व्रजमवरुणद्धि गाम्। माणवकं पन्थानं पृच्छति। वृक्षमपचिनोति

'अकथितम्' इत्यनेनैव सिद्धत्वात् पूर्वसूत्रद्वयस्य वैयर्थ्यमाशङ्क्य ईप्सितमात्रस्याप्येनेन कर्मसंज्ञायां 'वारणार्थानाम्' इत्यस्यानवकाशतया अग्नेर्माणवकं वारयतीत्यत्र माणवकस्यापादानसंज्ञायां प्राप्तायां 'कर्तुरीप्सिततमं कर्म' इत्यारब्धव्यम्। ततश्च द्वेष्योपेक्ष्यसङ्ग्रहाय 'तथायुक्तञ्चानीप्सितम्' इत्यारब्धव्यमिति समाहितम्। एतेन कर्मसंज्ञा सर्वा सिद्धा भवति। अकथितेन तत्रेप्सितस्य किं स्यात् प्रयोजनं कर्मसंज्ञायाः। यत्त्वकथितं पुरस्तादीप्सितयुक्तञ्च तस्य सिद्ध्यर्थम्। ईप्सितमेव तु यत्स्यात्तस्य भविष्यत्यकथितेनेति श्लोकद्वयेनेति शब्देन्दुशेखरे स्थितम्। एतेन कर्मेत्यादिभाष्यार्थस्तु कैयटे भाष्यप्रदीपोद्द्योते च स्पष्ट इत्यास्तान्तावत्। **बलिं याचते वसुधामिति॥** हरिरिति शेषः। बलिर्नामासुरविशेषः। मह्यन्देहीति प्रार्थना याचेरर्थः। दानानुकूलो मह्यन्देहीति शब्दप्रयोगरूपव्यापार इति यावत्। बलिकर्तृकं वसुधाकर्मकं दानं प्रार्थयते इत्यर्थः। कर्तुः कर्मत्वविवक्षायां द्वितीयेति नव्याः। प्रार्थनारूपव्यापारजन्यदाने जनकतया आश्रयत्वात्। बलिसम्बन्धि यद्वसुधाकर्मक दानं तत् प्रार्थयत इत्यर्थ इति तु प्राचीनाः। **अविनीतं विनयं याचते इति॥** अभ्युपगमप्रार्थना याचेरर्थः। यदा कश्चिद्बलवान् अविनीतः दुर्बलं कञ्चिद्बाधते तदा दुर्बलमधिकृत्येदं वाक्यं प्रवृत्तम्। अविनीतकर्तृकं विनयकर्मकमभ्युपगमं प्रार्थयत इत्यर्थः। कर्तुः कर्मत्वविवक्षायां द्वितीयेति नवीनाः। अविनीतसम्बन्धिकमिति तु प्राचीनाः। **तण्डुलानोदनं पचतीति॥** विक्लित्त्यनुकूलव्यापारः पचेरर्थः। तण्डुलोदकप्रस्वेदनजनितप्रशिथिलावयवकत्वात्मकं मृदुविशदत्वं विक्लित्तिः। तया ओदनाख्यद्रव्यान्तरं प्रकृतिभूतेषु तण्डुलेषु समवेतं निष्पद्यते इति स्थितिः। तत्र शिथिलावयवसंयोगविशेषात्मिका विक्लित्तिस्समवायसम्बन्धेन तण्डुलेषु वर्तते। ओदने तु जन्यजनकभावेन वर्तते। तण्डुलैः प्रकृतिभूतैः ओदनं करोतीत्यर्थः। तण्डुलसमवायिकारणिकान्तत्समवेतौदनजनिकां विक्लित्तिं निर्वर्तयतीत्यर्थः। तत्र व्यापारफलं विक्लित्तिं प्रति जन्यतया आश्रयत्वात् ओदनः प्रधानं कर्म। तादृशौदनजनिकां विक्लित्तिं प्रति समवायित्वेनाधारत्वात् तण्डुलानां गुणकर्मत्वमिति तद्विवक्षायां द्वितीया। तण्डुलसम्बन्धिनीमोदनजनिकां विक्लित्तिं निर्वर्तयतीति तु प्राचीनाः। **गर्गान् शतं दण्डयतीति॥** दण्डधातुः ग्रहणानुकूलव्यापारार्थकः। ताडनादिना गर्गेभ्यस्सुवर्णशतं गृह्णातीत्यर्थः। ताडनादिव्यापारप्रयोज्यग्रहणविषयत्वात् शतं प्रधानकर्म। गर्गाणान्तु तद्ग्रहणावधिकत्वात् गुणकर्मत्वम्। ग्रहणं हि परकीयद्रव्यस्य परस्वत्वनिवृत्तिपूर्वकं स्वीकरणम्। तत्र स्वत्वविश्लेषे गर्गाणामवधित्वात् अपादानत्वम्। ग्रहणघटकतादृशविश्लेषप्रतियोगिभूतस्वत्वाश्रयत्वात् कर्मत्वञ्च। तत्रापादानत्वमनादृत्य कर्मत्वविवक्षायां द्वितीया। गर्गसम्बन्धिकमिति तु प्राञ्चः। **व्रजमवरुणद्धि गामिति॥** निर्गमप्रतिबन्धपूर्वकयात्किञ्चिदधिकरणकचिरस्थित्यनुकूलबन्धनद्वारपिधानादिव्यापारो रुधेरर्थः। गान्निर्गमप्रतिबन्धपूर्वकं व्रजे चिरस्थितिकां करोतीत्यर्थः। अत्र चिरस्थितिं प्रति व्रजस्याधिकरणत्वमुपेक्ष्य गोद्वारा तत्स्थित्याश्रयतया कर्मत्वविवक्षायां द्वितीया। व्रजसम्बन्धिनं गोकर्मकं चिरस्थित्यनुकूलव्यापारं करोतीत्यर्थ इति

फलानि । माणवकं धर्मं ब्रूते–शास्ति वा । शतं जयति देवदत्तम् । सुधां क्षीरनिधिं मथ्नाति । देवदत्तं शतं मुष्णाति । ग्राममजां नयति–हरति–कर्षति–

प्राचीनाः । **माणवकं पन्थानं पृच्छतीति** ॥ जिज्ञासितव्यार्थज्ञानानुकूलः केन पथा गन्तव्यमित्यभिलापादिरूपव्यापारः प्रच्छेरर्थः । तत्र विषयतया ज्ञानरूपफलाश्रयत्वात् पन्थाः प्रधानकर्म । तद्ज्ञानं प्रति जनकतया आश्रयत्वात् माणवको गुणकर्म । माणवकेन पन्थानं ज्ञातुमिच्छतीत्यर्थः । अत्र माणवके करणत्वमुपेक्ष्य कर्मत्वविवक्षायां द्वितीया । पथिविषयकं माणवकसम्बन्धिज्ञानमिच्छतीत्यर्थ इति प्राञ्चः । **वृक्षमपचिनोति फलानीति** ॥ वृक्षात् प्रच्याव्य फलान्यादत्त इत्यर्थः । प्रच्याव्यादानानुकूलव्यापारो लोष्टप्रहारादिरूपः अपपूर्वकचिञ्धातोरर्थः । तत्र प्रच्याव्यादानाविषयत्वात् फलानि प्रधानकर्म । प्रच्यवावधित्वाद्वृक्षः अपादानम् । तस्यापादानत्वमुपेक्ष्य कर्मत्वविवक्षायां द्वितीया । वृक्षस्य फलप्रच्यवाश्रयत्वेन कर्मत्वात् प्रच्यवस्य विभागस्य द्विनिष्ठत्वात् वृक्षसम्बन्धि यत् प्रच्युतफलादानं तत् करोतीत्यर्थः इति प्राचीनाः । **माणवकं धर्मं ब्रूते शास्ति वेति** ॥ बोधनानुकूलव्यापारः चोदनालक्षणोऽर्थो धर्मः इत्यादिशब्दप्रयोगात्मको ब्रूञोऽर्थः । माणवकाय धर्मं बोधयतीत्यर्थः । व्यापारप्रयोज्यबोधविषयत्वाद्धर्मः प्रधानकर्म । बोधविषयेण कर्मणाऽभिप्रेयमाणत्वान्माणवकस्सम्प्रदानम् । तस्य सम्प्रदानत्वमुपेक्ष्य बोधधर्मद्वारा बोधाश्रयत्वात् कर्मत्वविवक्षायां द्वितीया । धर्मविषयकं माणवकसंबन्धिनं बोधञ्जनयतीत्यर्थ इति तु प्राञ्चः । शासेस्तु धर्मं कुर्वित्यादिविधिघटितशब्दप्रयोगरूपो बोधनानुकूलः अर्थः । इतरत् प्राग्वत् । **शतञ्जयति देवदत्तमिति** ॥ जि अभिभवे । ग्रहणानुकूलताडनादिव्यापारो जयतेरर्थः । गर्गान् शतं दण्डयतीतिवद्व्याख्येयम् । **सुधां क्षीरनिधिं मथ्नातीति** ॥ मन्थ विलोडने । द्रवद्रव्यगतसारोद्भावनानुकूलः मन्थानदण्डभ्रमजनितसंक्षोभात्मकास्फालनपर्यायो व्यापारो मन्थेरर्थः । क्षीरोदधेस्सकाशात् सुधाम्मन्थानदण्डभ्रमणेनोद्भावयतीत्यर्थः । व्यापारप्रयोज्योद्भवाश्रयत्वात् सुधा प्रधानकर्म । क्षीरोदधिस्तु उद्भवं प्रत्यपादानम् । तस्यापादानत्वमुपेक्ष्य सुधाद्वारा उद्भवाश्रयत्वात् कर्मत्वविवक्षायां द्वितीया । सुधाश्रयं क्षीरोदधिसम्बन्धिनम् उद्भवं करोतीत्यर्थ इति तु प्राचीनाः । **देवदत्तं शतं मुष्णातीति** ॥ अपश्यति देवदत्ते तदीयं सुवर्णशतं तस्मादपनीयादत्ते इत्यर्थः । परस्वामिकद्रव्यस्य स्वामिनस्सकाशादपनीयादानानुकूलः स्वाम्यज्ञातो निःशासञ्चारभित्तिच्छिद्रकरणादिरूपव्यापारो मुषेरर्थः । व्यापारप्रयोज्यापनयनपूर्वकादानाश्रयत्वाच्छतं प्रधानकर्म । अपनयनावधित्वाद्देवदत्तोऽपादानम् । अपादानत्वमनादृत्यापनीयादेयद्रव्यस्वामितया देवदत्तस्यापनीयादानाश्रयत्वात् कर्मत्वविवक्षायां द्वितीया । शतकर्मकं देवदत्तसम्बन्धि अपनीयादानं करोतीत्यर्थ इति तु प्राञ्चः । **ग्राममजां नयतीति** ॥ ग्रामे अजां प्रापयतीत्यर्थः । णीञ् प्रापणे । देशान्तरसंयोगानुकूलश्चलनगमनपर्यायो व्यापारः प्राप्तिः । नतु देशान्तरसंयोगमात्रम् । ग्रामं प्रति चलनदशायामेव प्राप्नोति गच्छतीति प्रयोगदर्शनात् चलनेन संयोगे जाते तदनुवृत्तिदशायान्तदर्शनात् । अजा ग्रामं गता प्राप्तेत्येव दर्शनात् तादृशप्राप्त्यनुकूलो दण्डोद्यमनमार्गान्तरगतिप्रतिबन्धपूर्वकयोग्यमार्गसंयोजनादिरूपव्यापारो नीधातोरर्थः ।

वहति वा। अर्थनिबन्धनेयं संज्ञा। बलिं भिक्षते वसुधाम्। माणवकं धर्मं भाषते–अभिधत्ते–वक्तीत्यादि। 'कारकम्' किम्। माणवकस्य पितरं पन्थानं पृच्छति। 'अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्' (वा ११०३–११०४)। कुरून् स्वपिति। मासमास्ते। गोदोहमास्ते। क्रोशमास्ते।

एतादृशव्यापारप्रयोज्यग्रामसंयोगतदनुकूलगमनोभयाश्रयत्वात् अजा प्रधानकर्म। तादृशाजाधारत्वात् ग्रामोऽधिकरणम्। अधिकरणत्वमनादृत्य ग्रामस्यापि तथाविधसंयोगाश्रयत्वात् कर्मत्वविवक्षायां द्वितीया। अजाकर्मकं ग्रामसम्बन्धि नयनमित्यर्थः इति तु प्राचीनाः। एवमेव ग्रामं अजां हरति कर्षति वहतीत्यपि व्याख्येयम्। तत्र देशान्तरसंयोगानुकूलम् अजाचलनं वाहकद्वारकं तादृशचलनानुकूलव्यापारस्कन्धग्रहणादिरूपो हरतेरर्थः। रज्जुबन्धनादिना बलाच्चालनं कृषेरर्थः। शकटाद्यारोपणादिरूपदेशान्तरसंयोगानुकूलप्राप्त्यनुकूलो वहेरर्थ इति विशेषः। **अर्थनिबन्धनेयं संज्ञेति** ॥ कैयटादिभिस्तथा व्याख्यातत्वादिति भावः। तथाच एतदर्थकधात्वन्तरसंयोगेऽपि द्विकर्मकत्वं लभ्यते। वस्तुतस्तु भाष्ये याचिरुधीत्याद्युदाहृतश्लोकद्वयपरिगणिताः दुहियाचिरुधिप्रच्छिभिक्षिचिब्रूञ्शासयः इत्यष्टावेव धातवो द्विकर्मकाः। न तु पचिदण्डिजिप्रभृतयस्तद्बहिर्भूता अपि। अर्थनिबन्धनेयं संज्ञेत्यपि न युक्तम्। भाष्ये अदर्शनात्। भाष्ये याचिग्रहणेनैव सिद्धे भिक्षिग्रहणवैयर्थ्याच्च। नन्वेवं सति अहमपीदमचोद्यं चोद्ये इति 'तद्राजस्य बहुषु' इतिसूत्रस्थभाष्यविरोधः। तत्र हि चुदधातुः चौरादिकः प्रच्छिपर्यायः, कर्मणि लट्, उत्तमपुरुषैकवचनम्, अपृष्टव्यमहं पृच्छ्ये इत्यर्थः। अत्र चुदेर्द्विकर्मकत्वदर्शनात् अर्थनिबन्धनेयं संज्ञेति विज्ञायत इति चेन्न। चुदश्शङ्कार्थकत्वे सति तावता चुदधातोरपि द्विकर्मकत्वलाभेऽपि तदन्येषां द्विकर्मकत्वे मानाभावात्। अत एव 'कर्तुरीप्सिततमम्' इति सूत्रभाष्ये 'व्यर्थः पचिस्तण्डुलानोदनं पचतीति तण्डुलान्विक्लेदयन्नोदनं निर्वर्तयतीति गम्यते। तण्डुलानोदनं पचतीति तण्डुलविकारमोदनं निर्वर्तयतीति गम्यते। ओदनं पचतीति ओदनार्थान् तण्डुलान् विक्लेदयतीति गम्यते इत्युदाहृतम्। कर्तुरीप्सिततममित्येव तण्डुलानामपि कर्मत्वमिति पचेरेतदुदाहरणत्वमनुपपन्नमेव। तस्माद्भाष्यपरिगणितबहिर्भूतधातूनामन्तर्भावितण्यर्थकत्व एव द्विकर्मकत्वमिति शब्देन्दुशेखरे स्थितम्। ननु कुरुषु स्वपिति देवदत्तः, मासमास्ते, इत्यादौ कुर्वादेरनुद्देश्यत्वात् 'कर्तुरीप्सिततमम्' इति कर्मत्वं न सम्भवति। कर्तुरेव स्वापादिक्रियाश्रयत्वात्। 'तथायुक्तम्' इत्यपि न कर्मत्वमित्यत आह। **अकर्मकधातुभिरिति** ॥ ग्रामसमूहात्मकः कुरुपञ्चालावन्त्यादिपरोऽत्र देशशब्दः, नतु ग्रामादिरपि। तेन ग्रामे स्वपितीत्यत्र न द्वितीया। अत्र च 'अधिशीङ्स्थासां कर्म' इति लिङ्गम्। अन्यथा अधिशेते अधितिष्ठति अध्यास्ते वा वैकुण्ठं हरिः इत्यत्राप्यनेनैव कर्मत्वसिद्धेस्तद्वैयर्थ्यं स्पष्टमेवेत्यभिप्रेत्योदाहरति। **कुरून् स्वपितीति** ॥ देवदत्त इति शेषः। कुरुषु निद्रां करोतीत्यर्थः। देवदत्तात्तु न द्वितीया। तिङा अभिहितत्वादिति भावः। कुर्वादिशब्दाः

५४०। गतिबुद्धिप्रत्यवसानार्थशब्दकर्मा-कर्मकाणामणिकर्ता स णौ। (१-४-५२)

गत्याद्यर्थानां शब्दकर्मणामकर्मकाणां चाणौ यः कर्ता स णौ कर्म स्यात्।

शत्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत्।
आशयच्चामृतं देवान्वेदमध्यापयद्विधिम्॥

जनपदविशेषेषु स्वभावान्नित्यबहुवचनान्ताः। **मासमास्ते इति॥** मासस्याधिकरणसंज्ञां बाधित्वा कर्मत्वम्। **गोदोहमिति॥** दोहनन्दोहः। भावे घञ्। भावो धात्वर्थः। गोदोहनकालोऽत्र विवक्षितः। नचेह कालत्वादेव सिद्धिरशङ्क्या। अहोरात्रसमूहस्य मासादेरेव तत्र ग्रहणात्। गन्तव्यत्वेनाध्वनो विशेषितत्वात् नियतपरिमाणः क्रोशादिरेव गृह्यत इत्यभिप्रेत्योदाहरति। **क्रोशमास्ते इति॥** गन्तव्यत्वविशेषणादध्वन्यास्ते इत्यत्र न भवति। अनत्यन्तसंयोगार्थमिदं वार्तिकम्। अत्यन्तसंयोगे तु 'कालाध्वनोरत्यन्तसंयोगे' इत्येव सिद्धमिति प्राचीनानुसारी पन्थाः। वस्तुतस्तु 'अकर्मकधातुभिर्योगे' इत्यादिवचनं भाष्ये न दृश्यते। किन्तु अकर्मकधातूनां कथं द्विकर्मकत्वमित्याशङ्क्यायां 'कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्। देशश्च' इत्युक्तम्। हिशब्दघटितत्वादिदं न विधायकम्, किन्तु अनुवादकमेव। तथाहि 'कुरून् स्वपिति' इत्यादौ स्वापादिक्रियया कुर्वादीन् व्याप्नोतीत्यर्थः। धातूनामनेकार्थतया कदाचित् तेषां स्वापादिकरणकव्यापनेऽपि वृत्तेः। ततश्च 'कर्तुरीप्सिततमम्' इत्येव सिद्धम्। यदा तु स्वपादिधातूनां स्वापादावेव वृत्तिः, नतु व्याप्तिपर्यन्ते, तदा कुरुषु स्वपिति, मासे आस्ते इत्यधिकरणत्वमेव। एतच्च 'अकथितञ्च' इत्यत्र 'कालाध्वनोरत्यन्तसंयोगे' इत्यत्र च भाष्ये स्पष्टम्। अत एव 'समां समां विजायते' इति सूत्रे समायां समायां विजायते इति विग्रहकथनं भाष्ये सङ्गच्छते। अन्यथा द्वितीयाप्रसङ्गात्। अत एव च लकारार्थप्रक्रियायाम् 'अत्यन्तापह्नवे लिङ्वक्तव्यः' इत्यत्र 'कळिङ्गेष्ववात्सीः' 'नाहं कळिङ्गान् जगाम' इति मूलकृदुदाहृते वाक्ये कळिङ्गेष्विति सप्तमी सङ्गच्छते। उक्तञ्च हरिणा 'कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः। सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते' इति शब्देन्दुशेखरे प्रपञ्चितम्। **गतिबुद्धि॥** गतिश्च बुद्धिश्च प्रत्यवसानञ्च तानीति द्वन्द्वः। प्रत्यवसानं भक्षणम्। गतिबुद्धिप्रत्यवसानानि अर्थो येषामिति विग्रहः। शब्दः कर्म येषान्ते शब्दकर्माणः, तेषामिति बहुव्रीहिः। अविद्यमानं कर्म येषान्ते अकर्मकाः। उभयत्रापि कर्मशब्दः कारकपरः। गतिबुद्धिप्रत्यवसानार्थाश्च शब्दकर्माणश्च अकर्मकाश्च तेषामिति द्वन्द्वः। अणौ कर्ता अणिकर्ता यच्छब्दोऽध्याहार्यः। तदाह। **गत्याद्यर्थानामित्यादिना॥** णौ अनुत्पन्ने सति शुद्धधातुवाच्यां क्रियां प्रति यः कर्ता सः ण्यन्तधातुवाच्यां प्रयोजकव्यापारात्मिकां क्रियां प्रति कर्मसंज्ञकस्यादित्यर्थः। क्रमेणोदाहरति। **शत्रूनिति॥** 'शत्रूनगमयत् स्वर्गम्' इति गत्यर्थकस्योदाहरणम्। शत्रवः युद्धे मृताः स्वर्गमगच्छन्, तान् यश्शस्त्रघातेनागमयत् स्वर्गं, स श्रीहरिर्मे गतिरित्यत्रान्वयः। अत्र गमेरण्य-

आसयत्सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः।

'गति—' इत्यादि किम्। पाचयत्योदनं देवदत्तेन। 'अण्यन्तानाम्' किम्। गमयति देवदत्तो यज्ञदत्तं, तमपरः प्रयुङ्क्ते, गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्रः। 'नीवह्योर्ने' (वा ११०९)। नाययति, वाहयति वा भारं भृत्येन। 'नियन्तृकर्तृकस्य वहेरनिषेधः' (वा १११०)। वाहयति रथं वाहान्सूतः।

न्तावस्थायां शत्रवो गमनक्रियां प्रति कर्तारः। स्वर्गस्तु कर्म। ण्यन्तावस्थायान्तु णिज्वाच्यां प्रयोजकव्यापारात्मिकां शत्रुघातक्रियां प्रति घातयिता हरिः कर्ता, शत्रवस्तु कर्म। शत्रुघातजन्या या क्रिया स्वर्गप्राप्तिस्तदाश्रयत्वात्। एवञ्च हरिः प्रयोजककर्ता, शत्रवस्तु प्रयोज्यकर्तारः, प्रयोजककर्तुर्हरेः शाब्दं प्राधान्यम्, अन्यानधीनत्वलक्षणञ्चार्थप्राधान्यमस्ति। शत्रूणान्तु अन्याधीनस्वर्गप्राप्तिकर्तृत्वं प्रयोजकाधीनत्वात् गुणभूतमेव। शेषित्वलक्षणमार्थप्राधान्यन्तु प्रयोज्यशत्रुगतकर्तृत्वस्यैव। प्रयोजकव्यापारस्य प्रयोज्यस्वर्गप्राप्त्यर्थत्वादिति स्थितिः। तत्रान्यानधीनत्वलक्षणस्यार्थप्राधान्यस्य शाब्दप्राधान्यस्य च प्रयोजकव्यापारे सत्त्वात्। तदनुरोधि शत्रुगतं कर्मत्वं 'कर्तुरीप्सिततमम्' इत्येव सिद्धम्। अतो नियमार्थमिदं सूत्रम्। णिजर्थेनाप्यमानस्य प्रयोज्यकर्तुर्यदि कर्मत्वं भवति तर्हि गत्यर्थादीनामेवेति। तेन पाचयति देवदत्तेन इत्यादौ प्रयोज्यकर्तुर्न कर्मत्वम्, किन्तु कर्तृत्वमेव। तदेतत् 'हेतुमति च' इति सूत्रे भाष्यकैयटयोः स्पष्टम्। उक्तञ्च हरिणा। "गुणक्रियायां स्वातन्त्र्यात् प्रेषणे कर्मतां गतः। नियमात् कर्मसंज्ञायाः स्वधर्मेणाभिधीयते॥" इति। स्वधर्मेणेति तृतीययेत्यर्थः। एवञ्च स्वर्गकर्मकं शत्रुनिष्ठं यद्गमनं तदनुकूलो यन्निष्ठो व्यापारः स श्रीहरिर्मे गतिरिति वाक्यार्थः। एवमग्रेऽप्यूह्यम्। **वेदार्थं स्वानवेदयदिति**॥ बुध्यर्थधातोरुदाहरणम्। स्वशब्दः आत्मीयपरः, स्वे स्वकीयाः विधिप्रमुखाः वेदार्थमविदुः, तान् हरिः वेदार्थमवेदयदित्यर्थः। अत्र स्वेषां प्रयोज्यकर्तृणां कर्मत्वम्। **आशयच्चामृतन्देवानिति**॥ प्रत्यवसानार्थस्य उदाहरणम्। देवा अमृतमाश्नन्, तान् हरिराशयदित्यर्थः। **वेदमज्यापयद्विधिमिति**॥ शब्दकर्मणः उदाहरणमेतत्। विधिः ब्रह्मा वेदमधीतवान्, तं हरिः अज्यापयदित्यर्थः। अत्र प्रयोज्यकर्तुर्विधेः कर्मत्वम्। **आसयत्सलिले पृथ्वीमिति**॥ अकर्मकस्योदाहरणम्। सलिले पृथ्वी आस्त, तां हरिरासयदित्यर्थः। अत्र पृथिव्याः प्रयोज्यकर्त्र्याः कर्मत्वम्। यः स मे श्रीहरिर्गतिरिति प्रतिवाक्यमन्वयः। **नीवह्योर्नेति**॥ णीञ् प्रापणे, वह प्रापणे, इत्यनयोः, ण्यन्तयोः प्रयोज्यकर्तुः 'गतिबुद्धि' इत्युक्तं नेति वक्तव्यमित्यर्थः। **नाययति वाहयति वेति**॥ भृत्यो भारं नयति वहति वा, तं प्रेरयतीत्यर्थः। अत्र प्रयोज्यकर्तुर्भृत्यस्य णिच्प्रकृत्यर्थनयनं वहनञ्च प्रति कर्तुः प्रयोजकव्यापारं प्रति कर्मत्वे निवृत्ते णिच्प्रकृत्यर्थं प्रति कर्तृत्वस्यैव निरपवादत्वेनावस्थानात् तृतीया बोध्या। यद्यपि नीवह्योः प्रापणमर्थः, तथापि गत्यनुकूलव्यापारार्थके प्रापणे गतेर्विशेषणत्वेन प्रविष्टतया गत्यर्थत्वात् प्राप्तिरिति भावः। **नियन्तृकर्तृकस्य वहेरनिषेधः इति**॥ एवञ्च तत्र प्रयोज्यकर्तुरुक्तस्य 'नीवह्योर्ने' इति प्रतिषेधस्याभावे सति प्रयोज्यस्य कर्मत्वं वक्तव्यमिति फलितम्। **वाहयतीति**॥ वाहाः अश्वाः वहन्ति,

'आदिखाद्योर्ने' (वा ११०९)। आदयति, खादयति वा अन्नं वटुना। 'भक्षेरहिंसार्थस्य न' (वा १११९) भक्षयत्यन्नं वटुना। 'अहिंसार्थस्य' किम्। भक्षयति बलीवर्दान्सस्यम्। 'जल्पतिप्रभृतीनामुपसङ्ख्यानम्' (वा ११०७)। जल्पयति भाषयति वा धर्मं पुत्रं देवदत्तः। 'दृशेश्च' (वा ११०८)। दर्शयति हरिं भक्तान्। सूत्रे ज्ञानसामान्यार्थानामेव ग्रहणं, न तु तद्विशेषार्थानामित्यनेन ज्ञाप्यते। तेन 'स्मरति' 'जिघ्रति' इत्यादीनां न।

तान् सूतः प्रेरयतीत्यर्थः। "नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः" इत्यमरः। "वहन्ति बलीवर्दाः यवान्, वाहयति बलीवर्दान् देवदत्तः" इति भाष्योदाहरणात्। नियन्ता पशुप्रेरक एव विवक्षितः। **आदिखाद्योर्नेति** ॥ अद भक्षणे, खाद भक्षणे, अनयोः प्रयोज्यकर्तुः कर्मत्वं नेति वक्तव्यमित्यर्थः। प्रत्यवसानार्थकत्वात् प्राप्तिः। **आदयति खादयति वेति** ॥ अत्ति खादति वा अन्नं वटुः, तं प्रेरयतीत्यर्थः। **भक्षेरिति** ॥ अहिंसार्थकस्य भक्षधातोः प्रयोज्यकर्तुः कर्मत्वनेति वक्तव्यमित्यर्थः। ननु 'गतिबुद्धि' इति सूत्रे अणौ कर्तुः णौ कर्मत्वमुक्तम्। भक्षधातुस्तु चुरादित्वात् नित्यं स्वार्थिकण्यन्तः। तस्याणिकर्ता नास्त्येव। अतस्तस्य कर्मत्वनिषेधोऽनुपपन्नः, अप्रसक्तत्वादिति चेन्न। अत एव निषेधाल्लिङ्गात् 'गतिबुद्धि' इति सूत्रे णिग्रहणेन हेतुमत एव विवक्षितत्वात्। एवञ्च हेतुमण्णिचि अनुत्पन्ने सति अण्यन्तभिक्षिधातुवाच्यां क्रियां प्रति कर्तुः हेतुमण्ण्यन्तवाच्यां क्रियां प्रति कर्मत्वमित्यर्थः पर्यवस्यतीति न दोषः। **भक्षयत्यन्नं वटुनेति** ॥ चुरादिण्यन्तात् भक्षधातोर्हेतुमण्णिचि पूर्वणेर्लोपे हेतुमण्ण्यन्तात्तिबादौ सति भक्षयतीति रूपम्। एवञ्च भक्षयत्यन्नं वटुः, खादतीत्यर्थः। तं प्रेरयतीति ण्यन्तस्यार्थः। **भक्षयति बलीवर्दान् सस्यमिति** ॥ क्षेत्रे प्ररूढमलूनं सस्यमिह विवक्षितम्। तस्य तदानीमन्तःप्रज्ञजीवत्वात् तद्भक्षणं हिंसैवेति भावः। **जल्पतिप्रभृतीनामिति** ॥ एतेषामणौ यः कर्ता सः णौ कर्म स्यादिति वक्तव्यमित्यर्थः। **जल्पयति भाषयति वेति** ॥ धर्ममिति शेषः। पुत्रो धर्मं जल्पति भाषते वा, तं देवदत्तः प्रेरयतीत्यर्थः। गत्यर्थादिष्वनन्तर्भावाद्वचनम्। नच शब्दनक्रियार्थत्वादेव सिद्धे वचनमिदं व्यर्थमिति वाच्यम्। अत एव शब्दकर्माकर्मकाणामित्यस्य शब्दः कर्म कारकं येषामित्यर्थात्। अन्यथा वेदमध्यापयद्विधिमित्यसिद्धेः। वार्तिके आदिना व्याहरतिवदत्यादीनां सङ्ग्रहः। भाष्ये तु 'के पुनर्जल्पतिप्रभृतयः, जल्पति विलपति आभाषते' इत्येवोक्तम्। परिगणनमित्येके, उदाहरणमात्रप्रदर्शनमित्यन्ये। **दृशेश्चेति** ॥ 'दृशिर् प्रेक्षणे' अस्याप्यणौ यः कर्ता सः णौ कर्म स्यादिति वक्तव्यमित्यर्थः। **दर्शयतीति** ॥ हरिं भक्ताः पश्यन्ति, तान् गुरुः प्रेरयतीत्यर्थः। ननु दृशेर्बुद्धिविशेषात्मकत्वादेव सिद्धे किमर्थमिदं वचनमित्यत आह। **सूत्रे इति** ॥ 'गतिबुद्धि' इति सूत्रे बुद्धिग्रहणेन ज्ञानसामान्यवाचिनां 'विद ज्ञाने, ज्ञा अवबोधने' इत्यादीनामेव ग्रहणम्, नतु ज्ञानविशेषवाचिनामित्येतत् 'दृशेश्च' इत्यनेन विज्ञायते। अन्यथा 'दृशेश्च' इत्यस्य वैयर्थ्यप्रसङ्गात्। **तेनेति** ॥ ज्ञापनेनेत्यर्थः। **स्मरतिजिघ्रतीत्यादीनामिति** ॥

स्मारयति ग्रापयति देवदत्तेन। 'शब्दायतेर्ने' (वा ११०५)। शब्दाययति देवदत्तेन। धात्वर्थसङ्गृहीतकर्मत्वेनाकर्मकत्वात्प्राप्तिः। येषां देशकालादिभिन्नं कर्म न सम्भवति तेऽत्राकर्मकाः। न त्वविवक्षितकर्माणोऽपि। तेन 'मासमासयति देवदत्तम्' इत्यादौ कर्मत्वं भवति। 'देवदत्तेन पाचयति' इत्यादौ तु न।

५४१। हृक्रोरन्यतरस्याम्। (२-४-५३)

हृक्रोरणौ यः कर्ता स णौ वा कर्मसंज्ञः स्यात्। हारयति कारयति वा भृत्यं–भृत्येन वा कटम्। 'अभिवादिदृशोरात्मनेपदे वेति वाच्यम्' (वा ११११४)। अभिवादयते दर्शयते देवं भक्तं--भक्तेन वा।

आदिना प्रेक्षत्यादीनां सङ्ग्रहः। **स्मारयतीति** ॥ स्मरति प्रियां देवदत्तः, जिघ्रति चन्दनं देवदत्तः, तं यज्ञदत्तः प्रेरयतीत्यर्थः। **शब्दायतेर्नेति** ॥ शब्दं करोतीत्यर्थे 'शब्दवैर' इत्यादिना क्यङि, 'अकृत्सार्वधातुकयोः' इति दीर्घे, 'सनाद्यन्ताः' इति धातुत्वे श्तिपा निर्देशोऽयम्। शब्दायेति क्यङन्तधातोः अणौ कर्ता णौ कर्म नेति वक्तव्यमित्यर्थः। **शब्दाययति देवदत्तेनेति** ॥ शब्दायते देवदत्तः, तं यज्ञदत्तः प्रेरयतीत्यर्थः। देवदत्तस्य कर्मत्वाभावात् प्रयोज्यकर्तृत्वमादाय तृतीयैव। अत्र शब्दकर्मकत्वात् प्राप्तिरिति भ्रमं निरस्यति। **धात्वर्थेति** ॥ शब्दकर्मकमुत्पादनं शब्दायेति क्यङन्तस्य धातोरर्थः। एवञ्च शब्दात्मकं कर्म धात्वर्थे अन्तर्भूतम्। अतश्शब्दायेति क्यङन्तधातुरकर्मकः। 'धात्वर्थबहिर्भूतकर्मकत्वमेव सकर्मकत्वम्' इति 'सुप आत्मनः' इति सूत्रे भाष्ये प्रपञ्चितत्वात्। तस्मादकर्मकत्वादेवात्र प्राप्तिरित्यर्थः। एवञ्च 'शब्दाययति सैनिकै रिपून्' इति कर्म प्रयुञ्जानाः परास्ताः। ननु मासमास्ते देवदत्तः, तं प्रेरयति मासमासयति देवदत्तं यज्ञदत्त इत्यत्र देवदत्तस्य प्रयोज्यकर्तुः कर्मत्वन्न स्यात्। आसधातोर्गत्यादिष्वनन्तर्भावात्। नचाकर्मकत्वात्तदन्तर्भाव इति वाच्यम्। 'अकर्मकधातुभिर्योगे' इति मासस्य कर्मतया आसेरकर्मकत्वासम्भवात्। किञ्च ओदनादिकर्मणः अविवक्षायां देवदत्तः पचति, पाचयति देवदत्तेन यज्ञदत्तः, इत्यत्र प्रयोज्यकर्तुर्देवदत्तस्य कर्मत्वन्न स्यात्। तदानीं पचेरकर्मकत्वेन गत्यादिष्वन्तर्भावादित्यत आह। **येषामिति** ॥ इदञ्च प्रकृतसूत्रे भाष्यकैयटयोः स्पष्टम्। **हृक्रो** ॥ हा च का च हृकरौ तयोरिति विग्रहः। **हारयति कारयति वेति** ॥ हरति करोति वा कटं भृत्यः, तं प्रेरयतीत्यर्थः। अत्र प्रयोज्यकर्तुर्भृत्यस्य कर्मत्वविकल्पः। हृक्रोर्गत्यर्थादिष्वनन्तर्भावादप्राप्ते विभाषेयम्। हृक्रोरर्थान्तरे तु प्राप्तविभाषा। अभ्यवहारयति सैन्धवान् सैन्धवैर्वा, विकारयति सैन्धवान् सैन्धवैर्वा। अत्र अभ्यवहरतेर्भक्षणार्थत्वात् विकारयतेरकर्मकत्वाच्च प्राप्तिः। **अभिवादीति** ॥ हेतुमण्ण्यन्तस्याभिपूर्वकवदधातोर्दृशिप्रकृतिकण्यन्तस्य चात्मनेपदिनोऽणौ कर्ता णौ कर्म वेत्यर्थः। **अभिवादयते इति** ॥ अभिवदति नमस्करोति देवं भक्तः, तं गुरुः प्रेरयतीत्यर्थः। कर्तृगामिनि फले 'णिचश्च' इत्यात्मनेपदम्। अत्र भक्तस्य प्रयोज्यकर्तुः कर्मत्वविकल्पः। अप्राप्तविभाषेयम्। परस्मैपदे तु अभिवादयति देवं भक्तेनेत्येव। पश्यति देवं भक्तः, तं गुरुः प्रेरयति। दर्शयते देवं भक्तं भक्तेन वा।

५४२ । अधिशीङ्स्थासां कर्म । (१-४-४६)

अधिपूर्वाणामेषामाधारः कर्म स्यात् । अधिशेते—अधितिष्ठति—अध्यास्ते वा वैकुण्ठं हरिः ।

५४३ । अभिनिविशश्च । (१-४-४७)

अभिनीत्येतत्सङ्गातपूर्वस्य विशतेराधारः कर्म स्यात् । अभिनिविशते सन्मार्गम् । 'परिक्रयणे सम्प्रदानम्—' (सू ५८०) इति सूत्रादिह मण्डूकप्लुत्या अन्यतरस्यांग्रहणमनुवर्त्य व्यवस्थितविभाषाश्रयणात्क्वचिन्न । पापेऽभिनिवेशः ।

५४४ । उपान्वध्याङ्वसः । (१-४-४८)

उपादिपूर्वस्य वसतेराधारः कर्म स्यात् । उपवसति—अनुवसति—अधिवसति—आवसति वा वैकुण्ठं हरिः । 'अभुक्त्यर्थस्य न' (वा १०८७) । वने उपवसति ।

'गतिबुद्धि' इत्यत्र बुद्धिग्रहणेन ज्ञानसामान्यवाचिन एव ग्रहणमित्युक्तम् । तथापि 'दृशेश्च' इति नित्यं प्राप्ते विकल्पः । **अधिशीङ्स्थासां कर्म** ॥ शीङ्, स्था, आस्, एषां द्वन्द्वः । अधिपूर्वाश्शीङ्स्थासः इति विग्रहे शाकपार्थिवादित्वात् उत्तरपदलोपः । तदाह । **अधिपूर्वाणामिति** ॥ अधिकरणसंज्ञापवादोऽयम् । **अधिशेते इति** ॥ अधिशेते वैकुण्ठं हरिः, अधितिष्ठति वैकुण्ठं हरिः, अध्यास्ते वैकुण्ठं हरिरित्यन्वयः । अधिस्तु सप्तम्यर्थस्याधारस्य द्योतकः । वैकुण्ठे शेते तिष्ठत्यास्ते वेत्यर्थः । **अभिनिविशश्च** ॥ आधारे इति कर्मेति चानुवर्तते । अभिनीति सङ्गातग्रहणम् । तदाह । **अभिनीत्येतत्सङ्गातपूर्वस्येति** ॥ **अभिनिविशते सन्मार्गमिति** ॥ आग्रहवानित्यर्थः । अप्रतिहतप्रवृत्तिमानिति यावत् । नन्वेवं सति पापेऽभिनिवेशः इत्यत्रापि कर्मत्वात् द्वितीया स्यादित्यत आह । **परिक्रयणे इति** ॥ 'परिक्रयणे' इति सूत्रादन्यतरस्याङ्ग्रहणमनुवर्त्य विभाषाश्रयणात् क्वचिन्नेत्यन्वयः । तर्हि अभिनिविशते सन्मार्गमित्यत्रापि विकल्पस्स्यादित्यत आह । **व्यवस्थितेति** ॥ ननु 'परिक्रयणे सम्प्रदानमन्यतरस्याम्, आधारोऽधिकरणम्, अधिशीङ्स्थासां कर्म, अभिनिविशश्च' इति सूत्रक्रमः । तत्र 'अभिनिविशश्च' इत्यत्र कथमन्यतरस्याङ्ग्रहणानुवृत्तिः । 'आधारोऽधिकरणम्' 'अधिशीङ्स्थासां कर्म' इत्यत्र च तदनुवृत्तेरभावादित्यत आह । **मण्डूकप्लुत्येति** ॥ तुल्यमिति शेषः । मण्डूकाः यथा मध्ये पदानि सन्ततमप्रक्षिपन्त एव उत्प्लुत्य गच्छन्ति तद्वदनुवर्त्येत्यर्थः । 'एष्वर्थेष्वभिनिविष्टानाम्' इति समर्थसूत्रे भाष्यप्रयोगोऽत्र मानम् । **उपान्वध्याङ्वसः** ॥ उप अनु अधि आङ् इत्येतेषां द्वन्द्वः । उपान्वध्याङ्पूर्वो वस् इति विग्रहे शाकपार्थिवादित्वात् समासस्तदाह । **उपादिपूर्वस्येति** ॥ **उपवसतीत्यादि** ॥ वैकुण्ठे वसतीत्यर्थः । उपसर्गाः

"उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु।
द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते॥" (वा १४४४)

उभयतः कृष्णं गोपाः। सर्वतः कृष्णम्। धिक् कृष्णाभक्तम्। उपर्युपरि लोकं हरिः। अध्यधि लोकम्। अधोऽधो लोकम्। अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि' (वा १४४२–१४४३)। अभितः कृष्णम्। परितः कृष्णम्। ग्रामं समया। निकषा लङ्काम्। हा कृष्णाभक्तम्। तस्य शोच्यता इत्यर्थः। 'बुभुक्षितं न प्रतिभाति किञ्चित्'।

आधारत्वद्योतकाः। अत्र 'वसेरश्यर्थस्य प्रतिषेधः' इति वार्तिकम्। तत्रार्थशब्दो निवृत्तिवचनः। "अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु" इत्यमरः। भोजनस्यार्थः निवृत्तिर्यस्मात् प्रतीयते सः अश्यर्थः, भोजननिवृत्तिवाचकस्य अशेराधारस्य कर्मत्वप्रतिषेध इति यावत्। तदेतदर्थतस्सङ्गृह्णाति। **अभुक्त्यर्थस्य नेति**॥ अथोपपदविभक्तयः। **उभसर्वतसोः इति**॥ वार्तिकम्। उभशब्दसर्वशब्दप्रकृतिकतसन्तयोः प्रयोगे सति द्वितीया कार्येत्यर्थः। **धिगिति**॥ धिक्शब्दस्य प्रयोगे सति द्वितीया कार्या। 'प्रकृतिवदनुकरणम्' इत्यव्ययत्वात्सुपो लुक्। उपर्यादिष्विल्लनेन 'उपर्यध्यधसस्सामीप्ये' इति सूत्रोपात्तान्यव्ययानि गृह्यन्ते। द्विरुक्तस्य परमाम्रेडितम्। तदन्तेषु द्विर्वचनेष्विति यावत्। तथाच कृतद्विर्वचनेषु उपर्यादिषु त्रिषु प्रयुज्यमानेषु द्वितीयेत्यर्थः। **ततः इति**॥ उक्तप्रदेशेभ्योऽन्यत्रापि द्वितीया दृश्यते इत्यर्थः। **उभयतः कृष्णं गोपाः इति**॥ कृष्णस्य पार्श्वद्वयेऽपीत्यर्थः। आद्यादित्वात् तसिः। 'उभयोऽन्यत्र' इत्ययच्। षष्ठ्यर्थे द्वितीया। **सर्वतः कृष्णमिति**॥ कृष्णस्य सर्वेषु पार्श्वेषु गोपा इत्यर्थः। **धिक् कृष्णाभक्तमिति**॥ धिक् निन्दायाम्। कृष्णाभक्तस्य निन्देत्यर्थः। केचित्तु कृष्णाभक्तो निन्द्य इत्यर्थः, प्रथमार्थे द्वितीयेत्याहुः। धिङ्मूर्खेत्यत्र तु निषिद्धाचरणमित्यध्याहार्यम्। **उपर्युपरीति**॥ 'उपर्यध्यधसस्सामीप्ये' इति द्विर्वचनम्। लोकस्य समीपे उपरि हरिरस्तीत्यर्थः। **अध्यधीति**॥ लोकस्य समीपदेशे हरिरस्तीत्यर्थः। **अधोऽधः इति**॥ लोकस्य समीपे अधो हरिरस्तीत्यर्थः। **अभितःपरितः इति**॥ 'ततोऽन्यत्रापि दृश्यते' इत्यस्य प्रपञ्चोऽयम्। योगेऽपीत्यनन्तरं द्वितीयेति शेषः। **अभितः कृष्णमिति**॥ गोपा इति शेषः। कृष्णस्य पार्श्वद्वयेऽपीत्यर्थः। **परितः कृष्णमिति**॥ कृष्णस्य सर्वेषु पार्श्वेषु गोपा इत्यर्थः। 'पर्यभिभ्याञ्च' इति तसिल्। **ग्रामं समया, निकषेति**॥ 'समया निकषा' इति च आकारान्ते अव्यये। ग्राममित्यस्य प्रत्येकमन्वयः। ग्रामस्य समीपे इत्यर्थः। "निकषान्तिके, समयान्तिकमभ्ययोः" इति चामरः। "विलङ्घ्य लङ्कां निकषा हनिष्यति" इति माघः। **हा कृष्णाभक्तमिति**॥ हा इत्याकारान्तमव्ययं खेदे। "हा विषादशुगार्तिषु" इत्यमरः। तदाह। **तस्य शोच्यतेत्यर्थ इति**॥ कृष्णाभक्तश्शोच्य इत्यर्थ इत्यन्ये। प्रतियोगमुदाहरति। **बुभुक्षितमिति**॥ क्षुधार्तस्य किञ्चिदपि न स्फुरतीत्यर्थः। 'भा दीप्तौ।' इह तु उपसर्गबलात् स्फुरणे वर्तते। ततो लक्षणादावृत्तेः प्रतेर्न कर्मप्रवचनीयत्वम्। एवञ्च

५४५ । अन्तरान्तरेणयुक्ते । (२-३-४)

आभ्यां योगे द्वितीया स्यात् । अन्तरा त्वां मां हरिः । अन्तरेण हरिं न सुखम् ।

५४६ । कर्मप्रवचनीयाः । (१-४-८३)

इत्यधिकृत्य ।

५४७ । अनुर्लक्षणे । (१-४-८४)

लक्षणे द्योत्येऽनुरुक्तसंज्ञः स्यात् । गत्युपसर्गसंज्ञापवादः ।

५४८ । कर्मप्रवचनीययुक्ते द्वितीया । (२-३-८)

एतेन योगे द्वितीया स्यात् । पर्जन्यो जपमनुप्रावर्षत् । हेतुभूतजपोपलक्षितं

'कर्मप्रवचनीययुक्ते द्वितीया' इत्यनेन गतार्थत्वन्न भवति । **अन्तरान्तरेणयुक्ते** ॥ "अन्तरा इत्याकारान्तमव्ययं, नतु टाबन्तम् । अन्तरेणेत्यप्यव्ययमेव, नतु तृतीयान्तम्" इति भाष्ये स्थितम् । **अन्तरा त्वां मां हरिरिति** ॥ तव च मम च मध्ये हरिरित्यर्थः । 'अन्तरा मध्ये' इत्यमरः । **अन्तरेण हरिमिति** ॥ हरेर्वर्जने सुखन्नास्तीत्यर्थः । "पृथग्विनान्तरेणर्ते हिरुङ्नाना च वर्जने" इत्यमरः । किमनयोरन्तरेण गतेनेत्यत्र तु अन्तरशब्दो विशेषवाची । अनयोर्विशेषेण ज्ञातेनेत्यर्थः । अत्र अन्तरेणेत्यस्य तृतीयान्तत्वादव्ययत्वाभावान्न तद्योगे द्वितीया । नन्वेवं सति 'हलोऽनन्तरास्संयोगः' इत्यत्र 'द्वयोश्चैवान्तरा कश्चित्' इति भाष्यप्रयोगः कथमिति शङ्क्यम् । मध्यत्वनिमित्तमवधित्वं हि ययोर्निर्णीतं तत्र द्वितीया । ययोस्तु न तन्निर्णयस्तत्र सम्बन्धसामान्ये षष्ठ्येव भवति । युक्तग्रहणादिति कैयटः । **कर्मप्रवचनीयाः** ॥ **इत्यधिकृत्येति** ॥ 'प्राग्रीश्वरान्निपाताः' इति पर्यन्तमिति बोध्यम् । **अनुर्लक्षणे** ॥ **लक्षणे द्योत्ये इति** ॥ लक्ष्यलक्षणभावसम्बन्धे द्योत्ये इत्यर्थः । **उक्तसंज्ञः इति** ॥ कर्मप्रवचनीयसंज्ञ इत्यर्थः । लक्ष्यते ज्ञायतेऽनेनेति लक्षणम्, तच्च हेतुभूतं विवक्षितम्, नतु वृक्षं प्रति विद्योतते विद्युदितिवत् चिह्नमात्रम्, तथा सति 'लक्षणेत्थम्' इत्येव सिद्धेरिति वक्ष्यते । **गत्युपसर्गसंज्ञापवादः इति** ॥ अनेन क्रियायोग एव कर्मप्रवचनीयसंज्ञेति सूचितम् । 'कर्मप्रवचनीयाः' इति महासंज्ञाकरणसामर्थ्यात् अन्वर्थत्वम् । कर्मेति क्रियोच्यते, तां प्रोक्तवन्तः कर्मप्रवचनीयाः, भूते कर्तरि बाहुलकादनीयर्प्रत्ययः । ततश्च क्रियामेव न द्योतयन्ति किन्तु क्रियानिरूपितसम्बन्धविशेषं द्योतयन्ति । एवञ्च अनुप्रत्यादिषु क्रियानिरूपितसम्बन्धस्य द्योत्यत्वेन अन्वयात् तत्र गत्युपसर्गसंज्ञयोः प्राप्तिर्बोध्या । **कर्मप्रवचनीय** ॥ युक्ते इति भावे क्तः । तदाह । **एतेन योगे इति** ॥ **पर्जन्यो जपमन्विति** ॥ कदा पर्जन्योऽवर्षदिति प्रश्ने उत्तरमिदम् । अत्र वृष्टिकाल उपदेश्यः, सच दुर्ज्ञानत्वात् शाखाग्रं प्रति द्विकलश्चन्द्र इतिवत् प्रज्ञानं किञ्चिदवलम्ब्यैव ज्ञाप्यः । जपोऽत्र प्रज्ञानम्, तत्र जपकाले पर्जन्यः प्रावर्षदिति सम्भवति । हेतुभूतजपो ह्यत्र लक्षणम्, हेतुत्वञ्च पूर्वकालवृत्तित्वघटितम् । एवञ्च वर्षहेतुभूतवरुणजपोत्तरकाले

वर्षणमित्यर्थः। परापि हेतौ तृतीया अनेन बाध्यते। 'लक्षणेत्थम्भूत—' (सू ५५२) इत्यादिना सिद्धे पुनः संज्ञाविधानसामर्थ्यात्।

५४९। तृतीयार्थे। (१-४-८५)

अस्मिन्द्योत्येऽनुरुक्तसंज्ञः स्यात्। नदीमन्ववसिता सेना। नद्या सह सम्बद्धेत्यर्थः। 'षिञ् बन्धने' क्तः।

५५०। हीने। (१-४-८६)

हीने द्योत्येऽनुः प्राग्वत्। अनु हरिं सुराः। हरेर्हीना इत्यर्थः।

पर्जन्यः प्रावर्षदित्युत्तरं पर्यवस्यति। तत्र लक्षणत्वं हेतुत्वञ्चेति द्वयं तृतीयार्थः, तदुभयमनुना द्योत्यते। लक्षणत्वञ्च ज्ञानजनकज्ञानविषयत्वम्, जपज्ञानेन तदुत्तरकालविशिष्टा वृष्टिर्ज्ञाप्यते। ततश्च जपात्मकहेतुज्ञानजन्यज्ञानविषयो वर्षणमिति बोधः। तदाह। **हेतुभूतेति**॥ अनभिहिताधिकारान्न पर्जन्यात् द्वितीया। तस्य तिङा अभिहितत्वात्। ननु हेतुत्वांशस्य कथमिह लाभः, 'अनुर्लक्षणे' इत्यत्र तदनुपादानात्। एवञ्च हेतुत्वाविवक्षायां वृक्षमनु विद्योतते विद्युदित्यत्र 'अनुर्लक्षणे' इति सावकाशम्। 'हेतौ' इति तृतीया तु धनेन कुलमित्यादौ सावकाशा। पर्जन्यो जपमनु प्रावर्षदित्यत्र तु तदुभयमपि प्रसक्तम्। तत्र परत्वात् हेतुतृतीयैव स्यादित्यत आह। **परापीति**॥ 'अनुर्लक्षणे' इति कर्मप्रवचनीयत्वप्रयुक्तद्वितीयाविधिनेत्यर्थः। **पुनस्संज्ञेति**॥ वृक्षमनु विद्योतते विद्युत् इत्यत्र हि 'अनुर्लक्षणे' इत्यस्य न प्रयोजनम्। 'लक्षणेत्थम्' इत्येव सिद्धेः। ततश्च 'अनुर्लक्षणे' इत्यारम्भसामर्थ्यात् हेतुभूते लक्षणे अनोः कर्मप्रवचनीयत्वलब्धया द्वितीयया हेतौ तृतीया बाध्यत इति विज्ञायते इत्यर्थः। ततश्च हेतुत्वमपि शाब्दबोधे विषय इति फलति। **तृतीयार्थे**॥ अनुरित्यनुवर्तते। कर्मप्रवचनीयाः इत्यधिकृतम्। **अस्मिन् द्योत्ये इति**॥ 'सहयुक्तेऽप्रधाने' इति तृतीया। साहित्ये द्योत्ये इत्यर्थः। अत्र 'तृतीयार्थे' इत्यनेन कर्तृकरणे न गृह्येते। रामेण शरेणानुहतो वालीत्यत्र 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति न्यायेन तृतीयाया एव प्रवृत्त्या अस्यास्संज्ञायाः फलाभावात्, नापि 'येनाङ्गविकारः' इति तृतीयार्थोऽत्र विवक्षितः, 'अनन्तरस्य' इति न्यायेन 'कर्मप्रवचनीययुक्ते द्वितीया' इत्यस्य 'सहयुक्तेऽप्रधाने' इत्यस्यैव बाधकत्वात्। तदाह। **नद्या सह सम्बद्धेति**॥ साहित्यं द्वितीयार्थः, अनुस्तद्द्योतक इति भावः। ननु अवसितशब्दस्य अवपूर्वात् 'षो अन्तकर्मणि' इति धातोरुत्पन्नत्वात्कथमुक्तार्थलाभ इत्यत आह। **षिञ् बन्धने क्तः इति**॥ उपसर्गबलेन सम्बन्धवृत्तेरस्मात् क्तप्रत्यय इत्यर्थः। अत्र यदवश्यं पुनःपुनर्लक्ष्यस्य ज्ञापकं तदेव न लक्षणम्। किन्तु सकृत् ज्ञापकमपि। यथा यं कमण्डलुना भवान् अद्राक्षीत्, स छात्र इति। सकृदेव हि कमण्डलुपाणिर्दृष्टः, तस्य कमण्डलुर्लक्षणमिति 'अनुर्लक्षणे' इत्यत्र भाष्ये स्पष्टम्। तेन व्याप्यत्वात्मकलिङ्गमेवात्र लक्षणमिति न भ्रमितव्यम्। **हीने**॥ **हीने द्योत्ये इति**॥

५५१ । उपोऽधिके च । (१-४-८७)

अधिके हीने च द्योत्ये उपेत्यव्ययं प्राक्संज्ञं स्यात् । अधिके, सप्तमी वक्ष्यते । हीने, उप हरिं सुराः ।

५५२ । लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः । (१-४-९०)

एष्वर्थेषु विषयभूतेषु प्रत्यादय उक्तसंज्ञाः स्युः । लक्षणे, वृक्षं प्रति–परि–अनु वा विद्योतते विद्युत् । इत्थम्भूताख्याने, भक्तो विष्णुं प्रति–परि–अनु वा । भागे, लक्ष्मीर्हरिं प्रति–परि–अनु वा । हरेर्भाग इत्यर्थः ।

निकर्षे द्योत्ये इत्यर्थः । हीन इति भावे क्तः । 'ओ हाक् त्यागे' इति धातोरोदित्त्वात् 'ओदितश्च' इति निष्ठानत्वम् । **अनुः प्राग्वदिति** ॥ कर्मप्रवचनीयसंज्ञ इत्यर्थः । **अनु हरिं सुराः इति** ॥ अत्र निकृष्टभावोऽनुद्योत्यो द्वितीयार्थः । तदाह । **हरेर्हीना इत्यर्थः इति** ॥ हरेरिति षष्ठी प्रतियोगितायाम्, हरिप्रतियोगिकनिकर्षवन्त इत्यर्थः । **उपोऽधिके च** ॥ चकारात् हीने इति समुच्चीयते । तदाह । **अधिके हीने चेति** ॥ आधिक्ये निकर्षे चेत्यर्थः । **प्राक्संज्ञमिति** ॥ प्रागुक्तकर्मप्रवचनीयसंज्ञकमित्यर्थः । अधिके संज्ञाविधातं न द्वितीयार्थमित्याह । **अधिके सप्तमी वक्ष्यते इति** ॥ 'यस्मादधिकम्' इत्यनेन कर्मप्रवचनीयसंज्ञाकार्ये सप्तमी वक्ष्यत इत्यर्थः । **हीने इति** ॥ उदाहरणं वक्ष्यते इति शेषः । **उपहरिं सुराः इति** ॥ हरेर्हीना इत्यर्थः । **लक्षणेत्थंभूत** ॥ लक्षणं ज्ञापकम्, अयं प्रकारः इत्थं, तं प्राप्तः इत्थंभूतः, तस्याख्यानमुपपादकमित्थंभूताख्यानम्, भागः स्वीकार्योऽशः, तत्स्वामी विवक्षितः, व्याप्तुं कात्स्न्र्येन सम्बद्धुमिच्छा वीप्सा, लक्षणञ्च इत्थंभूताख्यानञ्च भागश्च वीप्सा चेति द्वन्द्वाद्विषयसप्तमी । तदाह । **एष्विति** ॥ एष्वर्थेषु द्योत्येष्विति तु नाश्रितम् । व्याप्तुमिच्छायास्तद्द्योत्यार्थत्वाभावादिति भावः । **लक्षणे इति** ॥ उदाहरणं वक्ष्यते इति शेषः । **वृक्षं प्रतीति** ॥ लक्ष्यलक्षणभावसम्बन्धो द्वितीयार्थः । स च प्रत्यादिद्योत्यः । वृक्षेण लक्ष्यमाणा विद्युत् विद्योतते इत्यर्थः । उत्पन्नविनष्टा विद्युत्, तदुत्पादितो वृक्षप्रकाशोऽपि उत्पन्नविनष्ट एव । तथाच वृक्षप्रकाशोत्तरं विद्युतोऽसत्त्वेन प्रत्यक्षाभावादनुमेया सा । ततश्च प्रकाशितेन वृक्षेण विद्युद्ज्ञानात् वृक्षो लक्षणम् । **इत्थम्भूताख्याने इति** ॥ उदाहरणं वक्ष्यत इति शेषः । **भक्तो विष्णुं प्रतीति** ॥ भज सेवायाम् । भक्तिरस्त्यस्येति भक्तः, मत्वर्थीयोऽर्श आद्यच्, विषयतासम्बन्धः प्रत्यादिद्योत्यो द्वितीयार्थः, तस्य भक्तावेकदेशेऽन्वयः, विष्णुविषयकभक्तिमानित्यर्थः । अत्र भक्तः भक्तिरूपं प्रकारविशेषं प्राप्तत्वात् इत्थम्भूतः, तस्य विष्णुविषयकतया उपपाद्यत्वाद्विषयतासम्बन्धस्तदुपपादकः प्रतिद्योत्य इति ज्ञेयम् । **भागे इति** ॥ उदाहरणं वक्ष्यत इति शेषः । **लक्ष्मीर्हरिं प्रतीति** ॥ स्वामित्वं द्वितीयार्थः प्रत्यादिद्योत्यः । तदाह । **हरेर्भाग इत्यर्थः इति** ॥ हरेः स्वभूतेति

वीप्सायाम्, वृक्षं वृक्षं प्रति—परि—अनु वा, सिञ्चति। अत्रोपसर्गत्वाभावान्न षत्वम्। 'एषु' किम्। परिषिञ्चति।

५५३। अभिरभागे। (१-४-९१)

भागवर्जे लक्षणादावभिरुक्तसंज्ञः स्यात्। हरिमभि वर्तते। भक्तो हरिमभि। देवं देवमभि सिञ्चति। 'अभागे' किम्। यदत्र ममाभिष्यात्तदीयताम्।

५५४। अधिपरी अनर्थकौ। (१-४-९३)

यावत्। **वीप्सायामिति**॥ उदाहरणं वक्ष्यत इति शेषः। **वृक्षं वृक्षं प्रतीति**॥ 'नित्यवीप्सयोः' इति द्विर्वचनम्। अत्र सन्वाच्या इच्छास्वरूपा सती व्याप्तिरेव तु विवक्षिता, सा च कात्स्न्र्येन सम्बन्धात्मिका। तथाच प्रकृत्यर्थगतकात्स्न्र्यमेव व्याप्तिः, सा यद्यपि द्विर्वचनद्योत्या, तथापि प्रतिपर्यनुयोगे तद्द्योत्यत्वमपि। तथाच कृत्स्नं वृक्षं सिञ्चतीत्यर्थः। व्यक्तिकात्स्न्र्यमिह विवक्षितम्, नत्ववयवकात्स्न्र्यमिति 'नित्यवीप्सयोः' इत्यत्र भाष्ये स्पष्टम्। ननु सेचने वृक्षस्य कर्मत्वादेव द्वितीयासिद्धेः किमिह कर्मप्रवचनीयसंज्ञयेत्यत आह। **अत्रेति**॥ गत्युपसर्गसंज्ञापवादः कर्मप्रवचनीयसंज्ञेत्युक्तम्, अतोऽत्र प्रतेः कर्मप्रवचनीयसंज्ञया उपसर्गसंज्ञाया बाधात् 'उपसर्गात् सुनोति' इति षत्वन्न भवति। कर्मप्रवचनीयत्वाभावे तु प्रतेरुपसर्गत्वात्ततः परस्य सिञ्चतेस्सस्य षत्वं स्यादित्यर्थः। भाष्ये तु "किमर्थमिदमुच्यते, कर्मत्वादेव द्वितीया सिध्यति, उपसर्गसंज्ञानिवृत्तिस्तु न प्रयोजनम्। क्रियायोगाभावेन तदप्रसक्तेरित्याक्षिप्य द्वितीयार्थमेवैतत् कर्मप्रवचनीयसंज्ञाविधानम्" इत्युक्तम्। "वृक्षस्य सेचने कर्मत्वेऽपि तदविवक्षायां सम्बन्धविवक्षायां षष्ठीं बाधितुमिदं कर्मप्रवचनीयत्वविधानम्। किञ्च वृक्षस्य सेचने कर्मत्वेऽपि प्रथमतः प्रतिद्योत्यसम्बन्धे अन्वयेन अन्तरङ्गत्वात्तन्निमित्तषष्ठीबाधनार्थमिदम्। वृक्षं वृक्षं प्रति पक्षिण आसते इत्यादौ अकर्मकधातुयोगे अधिकरणादिसंज्ञानिरासार्थञ्चेदमिति भाष्याशयः" इति शब्देन्दुशेखरे मञ्जूषायाञ्च स्पष्टम्। **एषु किमिति**॥ 'लक्षणेत्थम्भूताख्यानभागवीप्सासु' इति किमर्थमित्यर्थः। **परिषिञ्चतीति**॥ अग्निमित्यादि शेषः। अत्र लक्षणाद्यभावात् कर्मप्रवचनीयत्वाभावे 'उपसर्गात्सुनोति' इति षत्वमिति भावः। **अभिरभागे**॥ **लक्षणादाविति**॥ आदिना इत्थंभूताख्यानवीप्सयोस्सङ्ग्रहः। लक्षणे उदाहरति। **हरिमभि वर्तत इति**॥ जयः क्रेति प्रश्ने इदमुत्तरम्। लक्ष्यभावः अभिद्योत्यो द्वितीयार्थः। हरिलक्ष्यो जय इत्यर्थः। **भक्तो हरिमभीति**॥ इत्थम्भूताख्याने उदाहरणमिदम्। विषयतासम्बन्धः अभिद्योत्यो द्वितीयार्थः। हरिविषयकभक्तिमानित्यर्थः। वीप्सायामुदाहरति। **देवं देवमभि सिञ्चतीति**॥ कात्स्न्र्यसम्बन्धात्मिका व्याप्तिर्द्वितीयार्थः, अभिद्योत्यश्च। कृत्स्नं देवमभि सिञ्चतीत्यर्थः। षत्वाभावादि पूर्ववत्। **यदत्रेति**॥ बहूनां द्रव्यं तण्डुलादि यत्र संसृष्टं तत्रेदं वाक्यम्। स्वस्वामिभावः षष्ठ्यर्थः। अभिस्तद्द्योतकः। अत्र संसृष्टद्रव्ये यत् वस्तु मम स्वभूतं स्यात्, तत् मह्यं दीयतामित्यर्थः। स्यादित्यस्तेर्लिङि रूपम्। अत्र मम भाग इत्यर्थतः पर्यवसानादभाग इति कर्मप्रवचनीयत्वपर्युदासाभावे उपसर्गत्वस्य निर्बाधत्वात् 'उपसर्गप्रादुर्भ्यामस्तिर्यच्परः' इति षत्वम्। **अधिपरी अनर्थकौ**॥

उक्तसंज्ञौ स्तः । कुतोऽध्यागच्छति । कुतः पर्यागच्छति । गतिसंज्ञाबाधात् 'गतिर्गतौ' (सू ३९७७) इति निघातो न ।

५५५ । सुः पूजायाम् । (१-४-९४)

सु सिक्तम्, सु स्तुतम् । अनुपसर्गत्वान्न षः । 'पूजायाम्' किम् । सुषिक्तं किं स्यात् तवात्र । क्षेपोऽयम् ।

५५६ । अतिरतिक्रमणे च । (१-४-९५)

अतिक्रमणे पूजायां च अतिः कर्मप्रवचनीयसंज्ञः स्यात् । अति देवान्कृष्णः ।

५५७ । अपिः पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेषु । (१-४-९६)

एषु द्योत्येष्वपिरुक्तसंज्ञः स्यात् । सर्पिषोऽपि स्यात् । अनुपसर्गत्वान्न षः ।

उक्तसंज्ञौ स्त इति ॥ कर्मप्रवचनीयसंज्ञकावित्यर्थः । **कुतोऽध्यागच्छति, कुतः पर्यागच्छतीति** ॥ अत्र कुत इत्यपादानपञ्चम्यास्तसिल् । कस्मात् प्रदेशादागच्छतीत्यर्थः । नन्वत्र अधिपर्योरनर्थकतया सम्बन्धस्य तद्द्योत्यत्वाभावेन द्योत्यसम्बन्धप्रतियोगित्वरूपकर्मप्रवचनीययुक्तत्वस्याभावान्न द्वितीयाप्रसक्तिरित्यत आह । **गतिसंज्ञाबाधादिति** ॥ अत्र 'गतिर्गतौ' इत्यत्र पदादित्यधिकारात् पदात्परत्वसम्पत्तये कुत इत्युपात्तमिति भावः । अत्र प्रभवति पराभवति अनुभवतीत्यादौ प्रादेरिवार्थान्तरद्योतकत्वाभावेऽपि धात्वर्थद्योतकत्वमस्त्येव। अर्थान्तरद्योतकत्वाभावेन अनर्थकत्वव्यवहारः । उक्तञ्च भाष्ये—"अर्थान्तरवाचिनौ धातुनोक्तक्रियामेवाहतुः" इति । एवञ्च क्रियायोगाभावात् गतित्वस्यापि न प्रसक्तिरिति शङ्का निरस्ता। **सुः पूजायाम्** ॥ कर्मप्रवचनीय इति शेषः । **सु सिक्तं, सु स्तुतमिति** ॥ अत्र सोः कर्मप्रवचनीयत्वे प्रयोजनमाह । **अनुपसर्गत्वान्न षः इति** ॥ 'उपसर्गात् सुनोति' इत्यनेनेति शेषः । **पूजायां किमिति** ॥ सुना पूजायाः नित्यं प्रतीतेः प्रश्नः । **सुषिक्तं किं स्यात् तवात्रेति** ॥ त्वया सम्यक् सिक्तं किन्तु अत्रास्मिन् सुसेके कृते सति सेक्तुस्तव किं, न किञ्चिदपीत्यर्थः । **क्षेपोऽयमिति** ॥ निन्दात्र गम्यत इत्यर्थः । सेककियाकर्तुः पूज्यत्वे गम्य एवात्र कर्मप्रवचनीयत्वम् । तदभावात् 'उपसर्गात् सुनोति' इति षत्वमिति भावः । **अतिरतिक्रमणे च** ॥ चकारात् पूजायामिति समुच्चीयत इत्याह । **पूजायाञ्चेति** ॥ अतिक्रमणमुचितादाधिक्यम् । **अति देवान् कृष्णः इति** ॥ प्रपञ्चसंरक्षणविषये देवेभ्योऽधिकः कृष्ण इत्यर्थः । देवानां पूज्य इति वा । आद्येऽर्थे 'कुगतिप्रादयः' इति समासो न । 'स्वती पूजायाम्' इति नियमात् । द्वितीये त्वनभिधानान्नेत्याहुः । **अपिः पदार्थ** ॥ पदार्थश्च सम्भावनञ्च अन्ववसर्गश्च गर्हा च समुच्चयश्चेति द्वन्द्वः । एषु द्योतकतया विद्यमानः अपिः कर्मप्रवचनीय इत्यर्थः । तदाह । **एष्विति** ॥ अप्रयुज्यमानस्य पदान्तरस्यार्थः पदार्थः,

सम्भावनायां लिङ्। तस्या एव विषयभूते भवने कर्तृदौर्लभ्यप्रयुक्तं दौर्लभ्यं द्योतयन्नपिशब्दः स्यादित्यनेन सम्बध्यते। 'सर्पिषः' इति षष्ठी त्वपिशब्दबलेन गम्यमानस्य बिन्दोरवयवावयविभावसम्बन्धे। इयमेव ह्यपि-शब्दस्य पदार्थद्योतकता नाम। द्वितीया तु नेह प्रवर्तते। सर्पिषो बिन्दुना योगो न त्वपिनेत्युक्तत्वात्। अपि स्तुयाद्विष्णुम्, सम्भावनं शक्त्युत्कर्षमा-

---

तद्द्योतकमपिमुदाहरति। **सर्पिषोऽपि स्यादिति॥** यत्नातिदौर्लभ्यादल्पमाज्यं भुञ्जानेभ्यो दीयते तदुपहासार्थमिदं वाक्यम्। अत्रापेः कर्मप्रवचनीयत्वे प्रयोजनमाह। **अनुपसर्गत्वान्न षः इति॥** 'उपसर्गप्रादुर्भ्याम्' इत्यनेनेति शेषः। अपिद्योत्यं पदार्थं विशदयितुमाह। **सम्भावनायां लिङिति॥** 'उपसंवादाशङ्कयोश्च' इति सूत्रे 'उपसंवादाशङ्कयोर्लिङ्' इति पठितवचनेनेति शेषः। तत्र आशङ्का उत्कटान्यतरकोटिका शङ्का। सम्भावनैवेति भावः। सा च प्रकृत्यर्थगता भवति, 'प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः। असधातोश्च भवनमर्थः। 'अस भुवि' इत्युक्तेः। भवनञ्च सत्ता। 'भू सत्तायाम्' इत्युक्तेः। ततश्च सम्भावनाविषयीभूतभवनार्थकादसधातोः कर्तरि लिङि श्नसोरल्लोपे यासुडागमादौ स्यादिति रूपम्। तेन च सम्भावनाविषयभवनाश्रयः कर्ता अवगतः, सच कर्ता क इत्याकाङ्क्षायां प्रकरणात् औचित्यात् सर्पिष इत्यवयवषष्ठीबलाच्च बिन्दु-रिति गम्यते, तमेवापिशब्दो द्योतयति, सच बिन्दुरपिशब्दद्योत्यः कर्ता प्रकृत्यर्थे सम्भावना-विषये भवने स्वस्य बिन्दोर्दौर्लभ्यात् तदेव दौर्लभ्यं पुरस्कृत्यान्वेति। सम्भावनाविषयत्वबोधे दौर्लभ्यस्यापि सम्भावनाविषयतया अनुभवसिद्धत्वात्, तदिदं दौर्लभ्यमपिशब्दो द्योतयति। एवञ्च बिन्दोः कर्तृविशेषरूपेण स्वद्योत्योक्तदौर्लभ्यसम्बन्धेन स्यादित्यंत्रान्वयः। तदाह। **तस्या एवेति॥** सम्भावनाया एवेत्यर्थः। कर्तुर्बिन्दोर्दौर्लभ्यात् भवनक्रियायां यत् दौर्लभ्यं तद्द्योतयन् अपिशब्दः स्यादित्यनेन सम्बध्यत इत्यर्थः। ननु सर्पिरेव कर्तृत्वेनान्वेतु इत्यत आह। **सर्पिषः इति॥** सम्बन्ध इत्यनन्तरं वर्तत इति शेषः। एवञ्च सर्पिरवयवबिन्दुर्दौर्ल-भ्यप्रयुक्तदौर्लभ्यवती बिन्दुकर्तृका सम्भावनाविषयीभूता सत्तेति बोधः। **इयमेवेति॥** बिन्दु-दौर्लभ्यप्रयुक्तदौर्लभ्यद्योतकतैवेत्यर्थः। ननु कर्मप्रवचनीयेनापिना अन्वयसत्त्वात् सर्पिषो द्वितीया स्यादित्यत आह। **द्वितीया तु नेति॥** कुत इत्यत आह। **सर्पिष इति॥** सर्पिषः बिन्दु-नैव योगः, न त्वपिनेत्येवं सर्पिष इति षष्ठी त्विल्यादिसन्दर्भेण उक्तत्वादित्यर्थः। कर्मप्रवचनीय-द्योत्यसम्बन्धप्रतियोगित्वमेव कर्मप्रवचनीययुक्तत्वम्, प्रकृते च अपिद्योत्यस्य सर्पिषः उक्तसम्ब-न्धस्य बिन्दुरेव प्रतियोगी, नतु सर्पिरिति भावः। तदेवं पदार्थद्योतकमपिमुदाहृत्य सम्भावना-द्योतकमपिमुदाहरति। **अपि स्तुयाद्विष्णुमिति॥** 'सम्भावनेऽलमिति चेत् सिद्धाप्रयोगे' इति लिङ्। सम्भावनपदं व्याचष्टे। **सम्भावनमित्यादिना॥** अवाङ्मनसगोचरं विष्णु-मपि स्तुयात्। स्तोतुं शक्त इत्यर्थः। अत्युक्तिरियम्। अवाङ्मनसगोचरस्य विष्णोः केनापि स्तोतुमशक्यत्वात्। तत्र कर्मप्रवचनीयत्वेन उपसर्गत्वबाधात् 'उपसर्गात् सुनोति' इति षत्वन्न।

विष्कर्तुमत्युक्तिः । अपि स्तुहि, अन्ववसर्गः कामचारानुज्ञा । धिग्देवदत्तम् अपि स्तुयाद्वृषळम्, गर्हा । अपि सिञ्च, अपि स्तुहि, समुच्चये ।

५५८ । कालाध्वनोरत्यन्तसंयोगे । (२-३-५)

इह द्वितीया स्यात् । मासं कल्याणी । मासमधीते । मासं गुडधानाः । क्रोशं कुटिला नदी । क्रोशमधीते । क्रोशं गिरिः । 'अत्यन्तसंयोगे' किम् । मासस्य द्विरधीते । क्रोशस्यैकदेशे पर्वतः ।

इति द्वितीया विभक्तिः ।

अन्ववसर्गद्योतकमपिमुदाहरति । **अपि स्तुहीति** ॥ स्तुहि वा न वा यथेष्टं कुर्वित्यर्थः । अन्ववसर्गपदं व्याचष्टे । **अन्ववसर्गः कामचारानुज्ञेति** ॥ 'प्रैषातिसर्ग' इति लोट् । गर्हाद्योतकमपिमुदाहरति । **अपि स्तुयाद्वृषळमिति** ॥ 'गर्हायां लङपिजात्वोः' इति लटं बाधित्वा परत्वादन्तरङ्गत्वाच्च सम्भावनायां लिङ् । अत्र वृषळस्य निन्द्यत्वात् तत्स्तुतेर्निन्द्यत्वं गम्यमानमपिशब्दो द्योतयति । धिग्देवदत्तमिति तदनुवादः । समुच्चयद्योतकमपिमुदाहरति । **अपि सिञ्च, अपि स्तुहीति** ॥ अपिद्वयेन मिळितेन समुच्चयद्योतनात् प्रत्येकं कर्मप्रवचनीयत्वादुभयत्रापि षत्वाभावः । सिञ्च, स्तुहि चेत्यर्थः । **कालाध्वनोः** ॥ **इहेति** ॥ कालाध्वनोरत्यन्तसंयोगे इत्यर्थः । निरन्तरसंयोगः अत्यन्तसंयोगः । अन्तः विच्छेदः तमतिक्रान्तः अत्यन्तः स चासौ संयोगश्चेति विग्रहः । गुणक्रियाद्रव्यैरित्यौचित्यात् गम्यते । गुणक्रियाद्रव्यैः कालाध्वनोरविच्छिन्नसंयोगे गम्ये द्वितीया स्यादित्यर्थः । सा च कालाध्वभ्यामेव भवति, श्रुतत्वात् । तत्र गुणात्यन्तसंयोगे उदाहरति । **मासं कल्याणीति** ॥ भवतीति शेषः । त्रिंशद्दिनात्मको मासः । तस्मिन्नविच्छिन्नमङ्गळवानित्यर्थः । क्रियात्यन्तसंयोगे उदाहरति । **मासमधीते इति** ॥ त्रिंशद्दिनात्मके प्रतिदिनमुचितकाले निरन्तरमधीत इत्यर्थः । द्रव्यात्यन्तसंयोगे उदाहरति । **मासं गुडधानाः इति** ॥ मासे प्रतिदिनं निरन्तरं गुडधानास्सन्तीत्यर्थः । कालात्यन्तसंयोगमुदाहृत्य अध्वात्यन्तसंयोगे उदाहरति । **क्रोशं कुटिला नदीत्यादि** ॥ **मासस्य द्विरिति** ॥ मासे त्रिंशद्दिनात्मके द्वयोर्दिनयोः प्रतिदिनमेकवारमित्येवं द्विरधीत इत्यर्थः । 'द्वित्रिचतुर्भ्यस्सुच्' इति द्विशब्दात् कृत्वोऽर्थे सुच् । 'कृत्वोऽर्थप्रयोगे कालेऽधिकरणे' इति षष्ठी । शेषषष्ठीति केचित् । 'शिवरात्रौ जागृयात्' इत्यत्र तु अधिकरणत्वस्य विवक्षितत्वात् सप्तमीत्याहुः । उपपदविभक्तीनां शेषत्वविवक्षायामेव प्रवृत्तेरिति तदाशयः ॥

इति द्वितीया विभक्तिः ।

अथ तृतीया विभक्तिः।

५५९। स्वतन्त्रः कर्ता। (१-४-५४)

क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात्।

५६०। साधकतमं करणम्। (१-४-४२)

क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञं स्यात्। तमब्ग्रहणं किम्। गङ्गायां घोषः।

५६१। कर्तृकरणयोस्तृतीया। (२-३-१८)

अनभिहिते कर्तरि करणे च तृतीया स्यात्। रामेण बाणेन हतो वाली। 'प्रकृत्यादिभ्य उपसंख्यानम्' (वा १४६६)। प्रकृत्या चारुः।

अथ तृतीया विभक्तिः–**स्वतन्त्रः कर्ता** ॥ कारकाधिकारात् क्रियाजनने स्वातन्त्र्यमिह विवक्षितमित्याह। **क्रियायामिति** ॥ स्वातन्त्र्यमिह प्राधान्यमिति भाष्ये स्पष्टम्। ननु स्थाली पचतीत्यादौ कथं स्थाल्यादीनां कर्तृत्वं, स्वातन्त्र्याभावादित्यत आह। **विवक्षितोऽर्थ इति** ॥ 'विवक्षातः कारकाणि भवन्ति' इति भाष्यादिति भावः। स्वातन्त्र्यञ्च धात्वर्थव्यापाराश्रयत्वम्। फलानुकूलव्यापारो धात्वर्थः। तत्र पचतीत्यत्र विक्लित्तिरूपफलाश्रये तण्डुलेऽतिव्याप्तिवारणाय व्यापारेति। उक्तञ्च हरिणा—"धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते" इति। धातूपात्तव्यापारवतीत्यर्थः। **साधकतमं करणम्** ॥ **क्रियासिद्धाविति** ॥ क्रियोत्पत्तावित्यर्थः। कारकाधिकारलभ्यमिदम्। **प्रकृष्टोपकारकमिति** ॥ कर्त्रा क्रियायां जनयितव्यायां यत् सहायभूतं तदुपकारकमित्युच्यते। साधकतममित्यस्य व्याख्यानमेतत्। साधकशब्दात् 'अतिशायने तमप्' इति तमप्। अतिशयितं साधकं साधकतममिति भावः। व्यापारानन्तरं क्रियानिष्पत्तिः तत् प्रकृष्टम्। कर्तृव्यापाराधीनयव्यापाराव्यवहिता क्रियानिष्पत्तिः तत्तस्यां करणमिति यावत्। **तमब्ग्रहणं किमिति** ॥ साधकमित्येवोच्यताम्। कारकाधिकारादेव सिद्धे पुनस्साधकग्रहणादेव प्रकृष्टं साधकमिति विज्ञायत इति प्रश्नः। **गङ्गायां घोषः इति** ॥ अयमाशयः। कारकप्रकरणे गौणमुख्यन्यायः एतत्सूत्रादन्यत्र न प्रवर्तते इति ज्ञापनार्थं तमब्ग्रहणम्। अन्यथा 'आधारोऽधिकरणम्' इत्यत्र अन्वर्थमहासंज्ञाबलादेवाधारलाभे पुनस्तद्ग्रहणसामर्थ्यात् सर्वावयवव्याप्त्या य आधारस्सोऽधिकरणमित्यर्थस्स्यात्। एवञ्च तिलेषु तैलं, दध्नि सर्पिरित्यादावेव स्यात्। गङ्गायां घोषः, कूपे गर्गकुलमित्यादौ न स्यात्। अतस्तमब्ग्रहणमिति भाष्ये स्पष्टम्। अत्र यद्वक्तव्यं तत् 'आधारोऽधिकरणम्' 'सप्तम्यधिकरणे च' इत्यत्र वक्ष्यते। **कर्तृकरणयोस्तृतीया** ॥ 'अनभिहिते' इत्यधिकारादाह। **अनभिहित इति** ॥ **रामेणेति** ॥ रामकर्तृकबाणकरणकहिंसाक्रियाविषयो वालीत्यर्थः। **प्रकृत्यादिभ्य उपसङ्ख्यानमिति** ॥

प्रायेण याज्ञिकः । गोत्रेण गार्ग्यः । समेनैति । विषमेणैति । द्विद्रोणेन धान्यं क्रीणाति । सुखेन दुःखेन वा यातीत्यादि ।

५६२ । दिवः कर्म च । (१-४-४३)

दिवः साधकतमं कारकं कर्मसंज्ञं स्याच्चात्करणसंज्ञम् । अक्षैरक्षान्वा दीव्यति ।

५६३ । अपवर्गे तृतीया । (२-३-६)

अपवर्गः फलप्राप्तिः, तस्यां द्योत्यायां कालाध्वनोरत्यन्तसंयोगे तृतीया स्यात् । अह्ना क्रोशेन वा अनुवाकोऽधीतः । अपवर्गे किम् । मासमधीतो नायातः ।

तृतीयाया इति शेषः । उपपदविभक्तिरियम् । यथायोगं सर्वविभक्त्यपवादः । **प्रकृत्या चारुरिति** ॥ सम्बन्धस्तृतीयार्थः । प्रकृतिः स्वभावः, तत्सम्बन्धिचारुत्ववानित्यर्थः । यदा तु स्वभावेनैवायमभिरूपः न त्वलङ्कारादिनेति करणान्तरव्युदासाय प्रकृतेः करणत्वं विवक्ष्यते तदा 'कर्तृकरणयोः' इत्येव सिद्धमिति भाष्यम् । **प्रायेण याज्ञिक इति** ॥ प्रायशब्दो बहुळवाची । बहुळाचारसम्बन्धियाज्ञिकत्ववानित्यर्थः । सम्बन्धश्च ज्ञाप्यज्ञापकभावः । बहुळेन आचारेण हेतुना ज्ञाप्ययाज्ञिकत्ववानित्यर्थे तु 'इत्थम्भूतलक्षणे' इत्येव सिद्धम् । बहुळेन आचारेण सम्पन्नयाज्ञिकत्ववानित्यर्थे तु करणत्वादेव सिद्धमिति भाष्यम् । **गोत्रेण गार्ग्य इति** ॥ गोत्रमस्य गार्ग्य इत्यर्थः । अत्र प्रथमा प्राप्ता । "गोत्रेण हेतुना ज्ञाप्यगार्ग्यत्ववानित्यर्थे तु 'इत्थम्भूतलक्षणे' इत्येव सिद्धम्" इति भाष्यम् । **समेनैति, विषमेणैतीति** ॥ क्रियाविशेषणमेतत् । समं विषमञ्च गमनं करोतीत्यर्थः । कर्मणि द्वितीया प्राप्ता । "समेन विषमेण वा पथा एतीत्यर्थे तु करणत्वादेव सिद्धम्" इति भाष्यम् । **द्विद्रोणेन धान्यं क्रीणातीति** ॥ द्वयोर्द्रोणयोस्समाहारः द्विद्रोणम् । पात्रादित्वान्न स्त्रीत्वम् । द्विद्रोणसम्बन्धि धान्यमित्यर्थः । षष्ठी प्राप्ता । "यदा तु द्विद्रोणपरिमितधान्यमूल्यं हिरण्यं द्विद्रोणं, तेन क्रीणातीत्यर्थे तु करणत्वादेव सिद्धम्" इति भाष्यम् । **सुखेनेति** ॥ सुखजनकं यानं करोतीत्यर्थः । क्रियाविशेषणम् । द्वितीया प्राप्ता । **इत्यादीति** ॥ नाम्ना सुतीक्ष्णः नामसम्बन्धिसुतीक्ष्णत्ववानित्यर्थः । नामज्ञाप्यसुतीक्ष्णत्ववानित्यर्थे तु 'इत्थम्भूतलक्षणे' इत्येव सिद्धम् । धान्येन धनवानित्यत्र तु अभेदस्तृतीयार्थः । धान्याभिन्नधनवानित्यर्थः । वह्नित्वेन वह्निं जानामीत्यत्र तु प्रकारत्वं तृतीयार्थः । वह्नित्वप्रकारकवह्निज्ञानवानस्मीत्यर्थः । इत्यादूह्यम् । **दिवः कर्म च** ॥ साधकतममित्यनुवर्तते । तदाह । **दिवस्साधकतममिति** ॥ दिवुधात्वर्थं प्रति साधकतममित्यर्थः । **चादिति** ॥ चकारात् करणसंज्ञकमित्यपि लभ्यत इत्यर्थः । **अपवर्गे तृतीया** ॥ अपवर्गस्समाप्तिः । 'कर्मापवर्गे लौकिका अग्नयः' इत्यादौ दर्शनात् । इह तु फलप्राप्तिर्विवक्षिता । फलप्राप्तिपर्यन्तत्वात् प्रायेण क्रियायाः । तदाह । **अपवर्गः फलप्राप्तिरिति** ॥ **कालाध्वनोः इति** ॥ अनेन 'कालाध्वनोः' इति द्वितीयाया अयमपवाद इति सूचितम् । **अह्नेति** ॥ अह्नि क्रोशे वा निरन्तरम्

५६४। सहयुक्तेऽप्रधाने। (२-३-१९)

सहार्थेन युक्तेऽप्रधाने तृतीया स्यात्। पुत्रेण सहागतः पिता। एवं साकंसार्धसमंयोगेऽपि। विनापि तद्योगं तृतीया। 'वृद्धो यूना—' (सू ९३१) इत्यादिनिर्देशात्।

५६५। येनाङ्गविकारः। (२-३-२०)

येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते ततस्तृतीया स्यात्। अक्ष्णा काणः। अक्षिसम्बन्धिकाणत्वविशिष्ट इत्यर्थः। अङ्गविकारः किम्। अक्षि काणमस्य।

५६६। इत्थम्भूतलक्षणे। (२-३-२१)

कञ्चित्प्रकारं प्राप्तस्य लक्षणे तृतीया स्यात्। जटाभिस्तापसः। जटाज्ञाप्यस्तापसत्वविशिष्ट इत्यर्थः।

अनुवाकोऽध्ययनेन गृहीत इत्यर्थः। **नायात इति** ॥ न गृहीत इत्यर्थः। **सहयुक्ते** ॥ 'पृथग्विनानानाभिः' इतिवत् सहेनेत्येव सिद्धे युक्तग्रहणं सहार्थकशब्दानां साकमित्यादीनामपि ग्रहणार्थमित्याह। **सहार्थेनेति** ॥ **पुत्रेणेति** ॥ पितुरत्रागमनक्रियासम्बन्धश्शाब्दः। पुत्रस्य तु तत्साहित्यगम्य आर्थिक इति तस्याप्राधान्यम्। ''यद्यप्यागमनक्रियाकर्तृत्वादेव पुत्रात् तृतीया सिद्धा। तथापि पुत्रेण सह स्थूल इत्यादेवास्य मुख्योदाहरणम्'' इति भाष्ये स्पष्टम्। अर्थग्रहणस्य प्रयोजनमाह। **एवं साकमिति** ॥ ननु 'पुत्रेणागतः पिता' इत्यत्र सहादिशब्दाभावात् कथं तृतीयेत्यत आह। **विनापीति** ॥ 'वृद्धो यूना तल्लक्षणश्चेत्' इति सूत्रे सहादिशब्दाभावेऽपि तदर्थावगमेऽपि तृतीयानिर्देशदर्शनादित्यर्थः। **येनाङ्गविकारः** ॥ अङ्गान्यस्य सन्तीत्यङ्गं शरीरम्। अर्श आद्यच्। तस्य विकार इति विग्रहः। येनेत्यनेन प्रकृत्यर्थभूतमङ्गं परामृश्यते। नह्यविकृतेन अङ्गेनं आङ्गिनो विकारस्सम्भवति। तदाह। **येनाङ्गेनेत्यादिना** ॥ **अक्ष्णा काणः इति** ॥ काणशब्दः काणत्ववति वर्तते। सम्बन्धस्तृतीयार्थः। स च काणत्वेऽन्वेति। तदाह। **अक्षिसम्बन्धीति** ॥ सम्बन्धश्च विकारप्रयुक्तत्वरूपः। अक्षिविकारप्रयुक्तकाणत्ववानिति यावत्। यद्यपि एकमक्षि विकलं काणमित्युच्यते। तथाप्यवयविधर्मस्य शरीरे तदवच्छिन्नात्मनि व्यवहारो निरूढः। द्वौ विप्रावितिवत् अक्ष्णेति पदस्य प्रयोगस्समर्थः। **इत्थम्भूतलक्षणे** ॥ अयं प्रकारः इत्थं, तं भूतः प्राप्तः इत्थम्भूतः, 'भू प्राप्तौ' इति चौरादिकात् 'आधृषाद्वा' इति णिजभावे 'गत्यर्थाकर्मक' इत्यादिना कर्तरि क्तः। लक्षणं ज्ञापकं प्रकारविशेषं प्राप्तस्य ज्ञापके सम्बन्धे द्योत्ये इत्यर्थः। तदाह। **कञ्चित्प्रकारमिति** ॥ **जटाभिस्तापस इति** ॥ तपः अस्यास्तीति तापसः। 'तपस्सहस्राभ्यां विनीनी' 'अण्च' इति मत्वर्थीय अण्प्रत्ययः तापसत्ववति वर्तते। लक्ष्यलक्षणभावस्तृतीयार्थः। तदाह। **जटाज्ञाप्येति** ॥ नच ज्ञापने करणत्वा-

५६७ । संज्ञोऽन्यतरस्यां कर्मणि । (२-३-२२)

सम्पूर्वस्य जानातेः कर्मणि तृतीया वा स्यात् । पित्रा पितरं वा सञ्जानीते ।

५६८ । हेतौ । (२-३-२३)

हेत्वर्थे तृतीया स्यात् । द्रव्यादिसाधारणं निर्व्यापारसाधारणं च हेतुत्वम् । करणत्वं तु क्रियामात्रविषयं व्यापारनियतं च । दण्डेन घटः । पुण्येन दृष्टो हरिः । फलमपीह हेतुः । अध्ययनेन वसति । 'गम्यमानापि

देव तृतीया सिद्धेति वाच्यम् । करणत्वाविवक्षायां लक्ष्यलक्षणभावस्य सम्बन्धत्वेन विवक्षायां तृतीयार्थत्वात् । **संज्ञोऽन्यतरस्यां कर्मणि** ॥ सम्पूर्वस्य ज्ञाधातोरनुकरणात् षष्ठ्येकवचनं संज्ञ इति । तदाह । **सम्पूर्वस्य जानातेरिति** ॥ द्वितीयापवादोऽयं तृतीयाविकल्पः । **सञ्जानीते इति** ॥ सम्यक् जानीते इत्यर्थः । 'सम्प्रतिभ्यामनाध्याने' इत्यात्मनेपदम् । **हेतौ** ॥ **हेत्वर्थे इति** ॥ हेतुरिह कारणपर्यायो लौकिक एव विवक्षितः, नतु 'तत्प्रयोजको हेतुश्च' इति कृत्रिमः । तस्य चकारेण कर्तृसंज्ञाया अपि सत्त्वेन कर्तृतृतीययैव सिद्धेः । ननु हेतोरपि करणत्वादेव तृतीयासिद्धेत्याशङ्क्य हेतुत्वकरणत्वयोर्भेदमाह । **द्रव्यादिसाधारणमिति** ॥ आदिना गुणक्रियासङ्ग्रहः । द्रव्यं गुणं क्रियाञ्च प्रति यज्जनकं तत्र सर्वत्र विद्यमानमित्यर्थः । **निर्व्यापारसाधारणञ्चेति** ॥ द्वारीभूतव्यापारवति तद्रहिते च विद्यमानञ्चेत्यर्थः । एवञ्च द्रव्यगुणक्रियात्मककार्यत्रयनिरूपितं निर्व्यापारसव्यापारवृत्ति च यत् तद्धेतुत्वमिति फलति । **करणत्वम्त्विति** ॥ क्रियाजनकमात्रवृत्ति व्यापारवृत्ति च यत् तदेव करणत्वमित्यर्थः । एवञ्च हेतुत्वकरणत्वयोः भेदादन्यतरेण अन्यतरस्य नान्यथासिद्धिरिति भावः । तत्र द्रव्यं प्रति हेतुमुदाहरति । **दण्डेन घटः इति** ॥ दण्डहेतुको घट इत्यर्थः । दण्डे व्यापारसत्त्वेऽपि क्रियाजनकत्वाभावान्न करणत्वमिति भावः । क्रियां प्रति हेतुमुदाहरति । **पुण्येन दृष्टो हरिरिति** ॥ यागादिना स्वर्गादिफले जननीये यदवान्तरव्यापारभूतमपूर्वं तत् पुण्यमित्युच्यते । तस्य हरिदर्शनजनकत्वेऽपि निर्व्यापारत्वान्न करणत्वमिति भावः । गुणं प्रति हेतुत्वे तु पुण्येन ब्रह्मवर्चसमित्याद्युदाहार्यम् । ननु अध्ययनेन वसतीत्यत्र कथं तृतीया । अध्ययनस्य गुरुकुलवासं प्रति हेतुत्वाभावात् । प्रत्युत अध्ययनस्य वाससाध्यत्वादित्यत आह । **फलमपीह हेतुरिति** ॥ अध्ययनं यद्यपि वासफलं, तथापि वासं प्रति हेतुरपि भवति । इष्टसाधनताज्ञानस्य प्रवृत्तिहेतुतया अध्ययनस्य फलस्य स्वज्ञानद्वारा वासजनकत्वात् । यदा त्वध्ययने फले एतादृशं हेतुमविवक्षित्वा अध्ययनार्थमेव वासो विवक्ष्यते, तदा चतुर्थ्येव भवति, अध्ययनाय वसतीति । एतच्च प्रकृतसूत्रे कैयटे स्पष्टम् । ननु अलं श्रमेण इत्यत्र कार्यस्य कस्यचिदप्यश्रवणात् करणत्वहेतुत्वयोरसम्भवात् कथं तृतीयेत्यत आह । **गम्यमानापीति** ॥ न केवलं श्रूयमाणैव क्रिया विभक्तौ प्रयोजिका, किन्तु गम्यमानापीत्यर्थः । करणतृतीयैवेयमित्यभिप्रेत्याह ।

क्रिया कारकविभक्तौ प्रयोजिका'। अलं श्रमेण। श्रमेण साध्यं नास्तीत्यर्थः। इह साधनक्रियां प्रति श्रमः करणम्। शतेन शतेन वत्सान् पाययति पयः। शतेन परिच्छिद्येत्यर्थः। '[1]अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया' (वा ५०४०)। दास्या संयच्छते कामुकः। धर्म्ये तु भार्यायै संयच्छति॥

इति तृतीया विभक्तिः।

अलं श्रमेणेति॥ ऊषरक्षेत्रं परिष्कुर्वाणं प्रति इदं वाक्यं प्रवृत्तम्। अत्र अलमिति नञर्थे निषेधे वर्तते। 'अलं भूषणपर्याप्तिशक्तिवारणवाचकम्' इत्यमरः। साध्यमित्यध्याहारलभ्यम्। तदाह। **श्रमेण साध्यं नास्तीत्यर्थ इति**॥ सद्यः खेदाधायकत्वात् साधने व्यापृतिरेव श्रम इत्युपचर्यते। नन्वेवमपि साधनीयस्य व्रीह्यादिफलस्य क्रियारूपत्वाभावात् कथं श्रमस्य तत्र करणत्वमित्यत आह। **इहेति**॥ साध्यमित्यत्र प्रकृतिभूतो यो धात्वर्थः साधनक्रिया उत्पत्त्यात्मिका तां प्रतीत्यर्थः। एतेन श्रमस्य साधनक्रियायाश्चाभेद इति निरस्तम्। श्रमशब्देन व्रीह्याद्युत्पत्त्यनुकूलकर्षणादिव्यापारस्य साधनक्रियां प्रतीत्यनेन व्रीह्याद्युत्पत्तेश्च विवक्षितत्वात्। 'गम्यमानापि क्रिया विभक्तौ प्रयोजिका' इत्यत्र उदाहरणान्तरमाह। **शतेनेति**॥ वीप्सायां द्विर्वचनम्। एकैकेन शतेन सङ्ख्यया वत्सान् पाययतीति प्रतीयमानार्थः। तत्र वत्सनिष्ठ-शतसङ्ख्यायाः पायने करणत्वाभावात् परिच्छिद्येति गम्यते। एकैकशतसङ्ख्यया वत्सान् परिच्छिद्य तदधिकवत्सेभ्यो व्यावर्त्य पाययतीत्यर्थः। तथाच शतसङ्ख्याया. परिच्छेदं प्रति करणत्वमिति भावः। **अशिष्टेति**॥ इदञ्च 'दाणश्च सा चेच्चतुर्थ्यर्थे' इत्यनेन ज्ञाप्यत इति पदव्यवस्थायां वक्ष्यते। वैदिकमार्गानुयायिनश्शिष्टाः, वेदमार्गादपेताः अशिष्टाः, तेषां व्यवहारः आचारः, तस्मिन् विषये दाण्धातोः प्रयोगे सति चतुर्थ्यर्थे सम्प्रदाने तृतीया वाच्येत्यर्थः। **दास्या संयच्छते कामुक इति**॥ दास्यै कामुकः प्रयच्छतीत्यर्थः। कामुक इत्यनेन रत्यर्थमिति गम्यते। दास्यां रतिः धर्मशास्त्रनिषिद्धत्वात् अशिष्टव्यवहार इति भावः। अशिष्टपदप्रयोजनमाह। **धर्म्ये त्विति**॥ धर्मादनपेत इत्यर्थः। न तृतीयेति शेषः। 'धर्मपथ्यर्थन्यायादनपेते' इति यदिति रत्नकारः। धर्मे त्विति पाठस्तु सुगम एव॥

इति तृतीया विभक्तिः।

---

१ इदं च 'दाणश्च सा चेच्चतुर्थ्यर्थे' (१-३-५४) इति सूत्रज्ञापितम्। तत्र 'अशिष्टव्यवहारे' इत्यंशो भाष्यकृतो वाचनिकः।

अथ चतुर्थी विभक्तिः ।

५६९ । कर्मणा यमभिप्रैति स सम्प्रदानम् । (१-४-३२)

दानस्य कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञः स्यात् ।

५७० । चतुर्थी सम्प्रदाने । (२-३-१३)

विप्राय गां ददाति । अनभिहित इत्येव । दीयतेऽस्मै दानीयो विप्रः । 'क्रियया यमभिप्रैति सोऽपि सम्प्रदानम्' (वा १०८५) । पत्ये शेते । 'कर्मणः करणसंज्ञा सम्प्रदानस्य च कर्मसंज्ञा' (वा १०८६) । पशुना रुद्रं यजते । पशुं रुद्राय ददातीत्यर्थः ।

५७१ । रुच्यर्थानां प्रीयमाणः । (१-४-३३)

रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणोऽर्थः सम्प्रदानं स्यात् । हरये

अथ चतुर्थी विभक्तिः—**कर्मणा यमभि** ॥ कर्मसंज्ञकेन गवादिद्रव्येण यमभिप्रैति शेषित्वेनाङ्गीकरोति स सम्प्रदानमित्यर्थः । शेषित्वं भोक्तृत्वम् । सम्प्रदीयते यस्मै तत् सम्प्रदानमित्यन्वर्थसंज्ञैषा । ततश्च कस्याः क्रियायाः कर्मणेत्याकांक्षायां दानस्येति गम्यते । तदाह । **दानस्येत्यादिना** ॥ देयद्रव्योद्देश्यं सम्प्रदानमिति फलितम् । दानस्येति किम् । पयो नयति देवदत्तस्य । अत्र देवदत्तस्य पयोनयनोद्देश्यत्वेऽपि न सम्प्रदानत्वम् । पयसो दानकर्मत्वाभावात् । **चतुर्थी सम्प्रदाने** ॥ **विप्रायेति** ॥ विप्रमुद्दिश्य गां ददातीत्यर्थः । **अनभिहित इत्येवेति** ॥ अनुवर्तत एवेत्यर्थः । **दानीयो विप्र इति** ॥ दानोद्देश्य इत्यर्थः । 'कृत्यल्युटो बहुलम्' इति बहुलग्रहणात् सम्प्रदाने अनीयर् । तेन कृता सम्प्रदानस्य विप्रस्याभिहितत्वान्न चतुर्थीति भावः । ननु दानक्रियाकर्मोद्देश्यस्यैव सम्प्रदानत्वे पत्ये शेते इत्यत्र अकर्मकशयनक्रियोद्देश्यस्य पत्युः कथं सम्प्रदानत्वमित्याशङ्कायां 'क्रियाग्रहणमपि कर्तव्यम्' इति वार्तिकं प्रवृत्तम् । तदेतदर्थतस्सङ्गृह्णाति । **क्रियया यमिति** ॥ क्रियोद्देश्यमपि सम्प्रदानमिति यावत् । **पत्ये शेते इति** ॥ पतिमुद्दिश्य शेते इत्यर्थः । नन्वेवमपि ओदनं पचतीत्यादावपि सम्प्रदानत्वप्रसङ्गः । न च कर्मसंज्ञाविधिवैयर्थ्यं शङ्क्यम् । अत एव तत्र कर्तृत्वसम्प्रदानत्वयोर्विकल्पोपपत्तेरिति चेन्न । पत्ये शेते इत्यकर्मकस्थले सावकाशायाः सम्प्रदानसंज्ञायाः सकर्मकस्थले कर्मसंज्ञया बाधात् । तथाच अकर्मकक्रियोद्देश्यमपि सम्प्रदानमिति फलतीति भावः । **कर्मणः करणसंज्ञा सम्प्रदानस्य च कर्मसंज्ञा इति** ॥ वार्तिकम् । एकस्मिन् वाक्ये कर्मणस्सम्प्रदानस्य च समवाये सतीति शेषः । यजधातुविषयमेवेदमित्यभिप्रेत्य उदाहरति । **पशुना रुद्रं यजते इति** ॥ अत्र यजधातुर्दानार्थक इत्यभिप्रेत्य आह । **पशुं रुद्राय ददातीत्यर्थ इति** ॥ इदं वार्तिकं छान्दसमेवेति कैयटः । **रुच्यर्थानाम्** ॥ **रुच्यर्थानां धातूनामिति** ॥

रोचते भक्तिः। अन्यकर्तृकोऽभिलाषो रुचिः। हरिनिष्ठप्रीतेर्भक्तिः कर्त्री। 'प्रीयमाणः' किम्। देवदत्ताय रोचते मोदकः पथि।

५७२। श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः। (१-४-३४)

एषां प्रयोगे बोधयितुमिष्टः सम्प्रदानं स्यात्। गोपी स्मरात्कृष्णाय श्लाघते ह्नुते तिष्ठते शपते वा। 'ज्ञीप्स्यमानः' किम्। देवदत्ताय श्लाघते पथि।

५७३। धारेरुत्तमर्णः। (१-४-३५)

'रुच दीप्तावभिप्रीतौ च' दीप्तिरिह न रुच्यर्थः। प्रीयमाण इति विरोधात्। तथाच प्रीतिजननार्थानामित्यर्थः। **प्रीयमाण इति** ॥ समवायेन प्रीत्याश्रय इत्यर्थः। **हरये रोचते भक्तिरिति** ॥ भक्तिः स्वविषयां प्रीतिं हरौ जनयतीत्यर्थः। भक्तिगतव्यापारप्रयोज्यप्रीत्याश्रयत्वाद्धरेः कर्मत्वं प्राप्तम्, तदपवादोऽयम्। नन्वेवं सति हरिर्भक्तिमभिलषतीत्यत्रापि भक्तेः प्रीतिविषयत्वात् सम्प्रदानत्वं स्यादित्यत आह। **अन्यकर्तृकोऽभिलाषो रुचिरिति** ॥ समवायेन प्रीत्याश्रयापेक्षया यदन्यत् तत्कर्तृकाभिलाषः रुचधात्वर्थः। प्रीत्याश्रयकर्तृकः किञ्चिद्विषयक इच्छाविशेषोऽभिलाषः। तथाच अभिलषतेः रुच्यर्थकत्वाभावान्न तद्योगे सम्प्रदानत्वम्। प्रकृते च प्रीत्याश्रयो हरिः, तदपेक्षया यत् अन्यत् भक्तिः, तत्कर्तृकैव प्रीतिरिति रुच्यर्थयोगः। नन्विह भक्तेस्सम्प्रदानत्वं कुतो न स्यात्। विषयतासम्बन्धेन भक्तेरपि प्रीत्याश्रयत्वादित्यत आह। **हरिनिष्ठप्रीतेर्भक्तिः कर्त्रीति** ॥ हरेरेव समवायसम्बन्धेन प्रीत्याश्रयतया प्रीयमाणत्वात् भक्तेः कत्र्यां उक्तरीत्या प्रीयमाणत्वाभावाच्च न सम्प्रदानत्वमिति भावः। भक्तिर्हरिं प्रीणाति प्रीणयतीत्यादौ तु न भक्तेस्सम्प्रदानत्वप्रसक्तिः। तिङा अभिहितत्वात् समवायेन प्रीत्याश्रयत्वाभावाच्च। नापि हरेः। प्रीयमाण इति कर्मणि शानच्प्रयोगबलेन प्रीधातुयोगे रुच्यर्थानामित्यस्याप्रसक्तेर्विज्ञानात्। अन्यथा प्रीधातुकर्मणः सम्प्रदानत्वे कर्मणि शानचो दौर्लभ्यात्। **मोदकः पथीति** ॥ अत्र पथः प्रीयमाणत्वाभावान्न सम्प्रदानत्वमिति भावः। **श्लाघह्नुङ्** ॥ 'श्लाघृ कत्थने, ह्नुङ् अपनयने, ष्ठा गतिनिवृत्तौ, शप उपालम्भे' एषां द्वन्द्वः। शपामित्यनन्तरं प्रयोगे इत्यध्याहार्यम्। श्लाघादीनां स्तुत्यादिना बोधनमर्थः। ज्ञीप्स्यमान इति लिङ्गात् ज्ञापनवाचिनो ज्ञपेस्सन्नन्तात् कर्मणि शानच्। तदाह। **एषां प्रयोगे इत्यादिना** ॥ **गोपी स्मरादिति** ॥ मन्मथपीडावशात् गोपी आत्मस्तुत्या विरहवेदनां कृष्णं बोधयतीत्यर्थः। कृष्णस्यैव स्तुत्यत्वे तु द्वितीयैवेत्याहुः। **ह्नुते इति** ॥ सपत्न्यपनयनेन स्वाशयं कृष्णं बोधयतीत्यर्थः। **तिष्ठते इति** ॥ गन्तव्यमित्युक्तेऽपि स्थित्या स्वाशयं कृष्णं बोधयतीत्यर्थः। 'प्रकाशनस्थेयाख्ययोश्च' इत्यात्मनेपदम्। **शपते इति** ॥ उपालम्भेन स्वाशयं कृष्णं बोधयतीत्यर्थः। **धारेरुत्तमर्णः** ॥ धारेरित्यनन्तरं प्रयोगे इत्यध्याहार्यम्। 'धृङ् अवस्थाने' इत्यस्य हेतुमण्ण्यन्तस्य धारेरिति निर्देशः। तदाह। **धारयतेरित्यादिना** ॥ अन्यस्वामिकं द्रव्यं नियतकाले पुनरर्पणबुद्ध्या गृहीतम् ऋणमित्युच्यते। तत्र ऋणस्य ग्रहीता अधमर्णः, ऋण-

धारयतेः प्रयोगे उत्तमर्ण उक्तसंज्ञः स्यात् । भक्ताय धारयति मोक्षं हरिः । 'उत्तमर्णः' किम् । देवदत्ताय शतं धारयति ग्रामे ।

५७४ । स्पृहेरीप्सितः । (१-४-३६)

स्पृहयतेः प्रयोगे इष्टः सम्प्रदानं स्यात् । पुष्पेभ्यः स्पृहयति । 'ईप्सितः' किम् । पुष्पेभ्यो वने स्पृहयति । ईप्सितमात्रे इयं संज्ञा । प्रकर्षविवक्षायां तु परत्वात्कर्मसंज्ञा । पुष्पाणि स्पृहयति ।

५७५ । क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः । (१-४-३७)

क्रुधाद्यर्थानां प्रयोगे यं प्रति कोपः स उक्तसंज्ञः स्यात् । हरये क्रुध्यति, द्रुह्यति, ईर्ष्यति, असूयति वा । 'यं प्रति कोपः' किम् । भार्यामीर्ष्यति ।

स्यार्पयिता धनस्वामी उत्तमर्णः । प्रतिमासमशीतिभागादिवृद्ध्या उत्तमम् अधिकतां प्राप्तम् ऋणं यस्येति विग्रहः । **भक्तायेति** ॥ भक्तसम्बन्धी यो मोक्षः अपरिमितनित्यसुखविशेषः तं धारयतीत्यर्थः । धरते मोक्षः, अवतिष्ठते इत्यर्थः । तं प्रेरयति धारयति, अवस्थापयतीति यावत् । पूजयन् हि भक्तः तुळसीदळादिद्रव्यं प्रयच्छति, तच्च गृह्णन् तुष्टो हरिः तत्प्रदत्तद्रव्यं मोक्षदानेन निष्क्रीणाति । तदाहुः पौराणिकाः—"तोयं वा पत्रं वा यद्वा किञ्चित् समर्पितं भक्त्या । तदृणं मत्वा देवो निश्श्रेयसमेव निष्क्रियम्मनुते ॥" इत्यादि । तथाचात्र भक्तस्य ऋणदातृत्वेन उत्तमर्णत्वात् सम्प्रदानत्वं सम्बन्धषष्ठ्यपवादः । **स्पृहेरीप्सितः** ॥ 'स्पृह ईप्सायाम्' चुरादावदन्तः । ततः स्वार्थे णिचि अल्लोपस्य स्थानिवत्त्वात् लघूपधगुणाभावे स्पृहिशब्दात् षष्ठ्येकवचनम् । प्रयोग इत्यध्याहार्यम् । तदाह । **स्पृहयतेरित्यादिना** ॥ ननु पुष्पेभ्यः स्पृहयतीत्येव स्यात्, ननु पुष्पाणि स्पृहयतीत्यपि । उभयं त्विष्यते । तत्राह । **ईप्सितमात्र इति** ॥ यदा त्वीप्सितत्वस्यापि न विवक्षा, किन्तु विषयतामात्रविवक्षा, तदा पुष्पाणां स्पृहयतीति साधु । 'कुमार्य इव कान्तस्य त्वस्यन्ति स्पृहयन्ति च' इत्यादिदर्शनात् । वाक्यपदीये तु स्पृहयतियोगे कर्मसंज्ञायाश्शेषषष्ठ्याश्चायमपवाद इति स्थितम् । हेलाराजोऽप्येवम् । तन्मते पुष्पाणि स्पृहयति पुष्पाणां स्पृहयतीत्याद्यसाध्वेवेत्यन्यत्र विस्तरः । **क्रुधद्रुह** ॥ **क्रुधाद्यर्थानामिति** ॥ 'क्रुध क्रोधे, द्रुह द्रोहे' इत्यन्विकरणौ । 'ईर्ष्य ईर्ष्यायां' शब्विकरणः । 'असूञ् उपतापे' कण्ड्वादिः । एषामर्था एवार्था येषामिति विग्रहः । **हरये क्रुध्यतीति** ॥ रावणादिरिति शेषः । हरिविषयकं कोप करोतीत्यर्थः । घातेच्छासमनियताश्चित्तवृत्तिविशेषः कोपः । अकर्मकत्वात् षष्ठी प्राप्ता । **द्रुह्यतीति** ॥ कोपात् हरिविषयकमपकारं करोतीत्यर्थः । अकर्मकत्वात् षष्ठी प्राप्ता । अपकारो दुःखजनिका क्रिया । धात्वर्थोपसङ्ग्रहादकर्मकः । **ईर्ष्यतीति** ॥ ईर्ष्या असहनम् । हरिं कोपान्न सहत इत्यर्थः । कर्मणि द्वितीया प्राप्ता । **असूयति वेति** ॥ असूया गुणेषु दोषारोपः । यथाविहितकर्माचारे दम्भादिकृतकत्वारोपणम् । इह कोपात् हरिं दुर्गुणं मन्यत-

मैनामन्यो द्राक्षीदिति। क्रोधोऽमर्षः। द्रोहोऽपकारः। ईर्ष्या अक्षमा। असूया गुणेषु दोषाविष्करणम्। द्रोहादयोऽपि कोपप्रभवा एव गृह्यन्ते। अतो विशेषणं सामान्येन 'यं प्रति कोपः' इति।

५७६। क्रुधद्रुहोरुपसृष्टयोः कर्म। (१-४-३८)

सोपसर्गयोरनयोर्योगे यं प्रति कोपस्तत्कारकं कर्मसंज्ञं स्यात्। क्रूरमभिक्रुध्यति—अभिद्रुह्यति।

५७७। राधीक्ष्योर्यस्य विप्रश्नः। (१-४-३९)

एतयोः कारकं सम्प्रदानं स्यात्। यदीयो विविधः प्रश्नः क्रियते। कृष्णाय राध्यति—ईक्षते वा। पृष्टो गर्गः शुभाशुभं पर्यालोचयतीत्यर्थः।

५७८। प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता। (१-४-४०)

आभ्यां परस्य शृणोतेर्योगे पूर्वस्य प्रवर्तनारूपस्य व्यापारस्य कर्ता सम्प्र-

---

दानमित्यर्थः। **मैनामिति**॥ एनां भार्यामन्यो न पश्येत् इत्येतदर्थं भार्यागुणेषु दोषारोपणं करोतीत्यर्थः। नात्र भार्यां प्रति कोपः, किन्तु परेण दृश्यमानां तां न सहत इत्येव विवक्षितमिति। एवञ्च क्रोधद्रोहेर्ष्यासूयानां कोपमूलकत्व एवेदमिति भाष्ये स्थितम्। तथाच कुप्यति कस्मै चिदित्याद्यसाध्वेव। कोपस्य कोपमूलकत्वाभावात् कुधार्थकत्वाभावाच्च। प्ररूढकोप एव हि क्रोधः, 'नह्यकुपितः कुध्यति' इति भाष्यात्। **क्रुधद्रुहोः**॥ उपसृष्टयोरित्येतत् व्याचष्टे। **सोपसर्गयोरिति**॥ पूर्वसूत्रापवादोऽयम्। हरेः क्रोधद्रोहोद्देश्यत्वाभावात् 'क्रियया यमभिप्रैति' इति सम्प्रदानत्वस्य न प्रसक्तिः। नापि तादर्थ्यचतुर्थ्याः। क्रुधद्रुहोरकर्मकत्वात् न हरेः कर्मत्वम्। अतः शेषषष्ठ्यां प्राप्तायां वाचनिकं कर्मत्वम्। **राधीक्ष्योः**॥ **यदीय इति**॥ यद्विषयक इत्यर्थः। विप्रश्न इत्येतद्व्याचष्टे। **विविधः प्रश्न इति**॥ **कृष्णाय राध्यति ईक्षते वा, पृष्टो गर्ग इति**॥ गर्गो नाम ज्योतिश्शास्त्रवित् ऋषिविशेषः, सः कृष्णाय राध्यति ईक्षते वेत्यन्वयः। 'राध संसिद्धौ, ईक्ष दर्शने'। इह तु प्रश्नविषयशुभाशुभपर्यालोचनमर्थः। यस्य विप्रश्न इति लिङ्गात्। तदाह। **शुभाशुभं पर्यालोचयतीत्यर्थः इति**॥ अत्र शुभाशुभस्य च प्रश्नविषयस्य धात्वर्थोपसङ्ग्रहादकर्मकावेतौ। अत एव राध्यतीति श्यन्नुपपद्यते। अन्यथा 'राधोऽकर्मात्' इति नियमात् श्यन् न स्यात्। एवञ्च किं कृष्णस्य शुभमशुभं वेति पृष्टो गर्गः कृष्णविषयकं शुभाशुभं पर्यालोचयतीत्यर्थः। कृष्णस्य सम्प्रदानत्वं षष्ठ्यपवादः। **प्रत्याङ्भ्याम्**॥ प्रत्याङ्भ्यामिति दिग्योगे पञ्चमी। परस्येत्यध्याहार्यम्। श्रुव इत्यस्य विशेषणम्। 'श्रु श्रवणे'। इह तु प्रेरणापूर्वकाभ्युपगमे वर्तते। पूर्वशब्दः प्रेरणात्मकव्यापारं परामृशति। तदाह। **आभ्यामित्यादिना**॥ पूर्वस्येत्यस्य व्याख्यानम्।

दानं स्यात् । विप्राय गां प्रतिश्रृणोति—आश्रृणोति वा । विप्रेण मह्यं देहीति प्रवर्तितस्तत्प्रतिजानीते इत्यर्थः ।

५७९ । अनुप्रतिगृणश्च । (१-४-४१)

आभ्यां गृणातेः कारकं पूर्वव्यापारस्य कर्तृभूतमुक्तसंज्ञं स्यात् । होत्रेऽनुगृणाति—प्रतिगृणाति वा । होता प्रथमं शंसति, तमध्वर्युः प्रोत्साहयतीत्यर्थः ।

५८० । परिक्रयणे सम्प्रदानमन्यतरस्याम् । (१-४-४४)

नियतकालं भृत्या स्वीकरणं परिक्रयणम्, तस्मिन्साधकतमं कारकं सम्प्रदानसंज्ञं वा स्यात् । शतेन—शताय वा परिक्रीतः । 'तादर्थ्ये चतुर्थी वाच्या' (वा १४५८) । मुक्तये हरिं भजति । 'क्लृपि सम्पद्यमाने च'

प्रवर्तनारूपस्येति ॥ प्रेरणारूपस्येत्यर्थः । प्रत्याङ्भ्यामित्यनेन समुदिताभ्यां परस्येति नार्थो विवक्षितः । किन्तु प्रत्येकमेव तयोर्निमित्तत्वम्, अन्यथा 'अभिनिविशश्च' इतिवत् 'प्रत्याङ्श्रुवः' इत्येव ब्रूयादित्यभिप्रेत्य उदाहरति । **विप्राय गां प्रतिश्रृणोति आश्रृणोति वेति** ॥ अत्र प्रतिपूर्वकः आङ्पूर्वकश्च श्रुधातुः प्रेरणापूर्वकाभ्युपगमे वर्तते, ततश्च प्रवर्तितः प्रतिजानीते इति लभ्यते । केन प्रवर्तित इत्याकाङ्क्षायां विप्रः कर्तृत्वेनान्वेति । तत्र विप्रस्य प्रेरणाकर्तृत्वात् सम्प्रदानत्वं कर्तृतृतीयापवाद इत्यभिप्रेत्य आह । **विप्रेणेति** ॥ मह्यं गवादिद्रव्यं देहीति विप्रेण पृष्टस्सन् देवदत्तः तुभ्यं ददामीत्यभ्युपगच्छतीति योजना । **अनुप्रतिगृणश्च** ॥ पूर्वस्य कर्तेत्यनुवर्तते । 'गॄ शब्दे' इत्यस्य श्नान्तस्य अनुकरणशब्दात् गृण इति षष्ठी । अत्र गृधातुः शंसितृकर्मके शंसनविषयकप्रोत्साहने वर्तते । तत्र पूर्वव्यापारस्य शंसनस्य कर्ता सम्प्रदानमित्यर्थः । तदाह । **आभ्यामिति** ॥ पूर्वसूत्रे प्रत्याङ्भ्यामिति द्विवचननिर्देशबलात् प्रत्येकमेव धातुसम्बन्धावधारणात् तत्साहचर्यात् इहापि प्रत्येकमेव धातुसम्बन्ध इत्यभिप्रेत्य उदाहरति । **होत्रे अनुगृणाति प्रतिगृणाति वेति** ॥ **होता प्रथममिति** । शंसितारं होतारं उत्तरोत्तरशंसनविषये प्रोत्साहयतीति यावत् । "ओऽथ मोदै व" इति प्रतिगरमन्त्रः । ओ इति सम्बोधने, मोदै इति लोडुत्तमपुरुषैकवचनम् । व इत्येवकारार्थे, हे होतः अथ त्वदीयशंसनानन्तरं तुष्याम्येवेति तदर्थः । प्रोत्साहने होतुः कर्मत्वं प्राप्तम्, पूर्वव्यापारं शंसनं प्रति कर्तृत्वाद्धोतुस्सम्प्रदानत्वम् । **परिक्रयणे** ॥ **नियतकालमिति** ॥ तुभ्यमेतावद्धेतनं दीयते, तत् गृह्णन् एतावन्तं कालं त्वं मम कर्मकरो भव इत्येवं परिमितकालं भृत्या स्वीकरणं परिक्रयणमित्यर्थः । साधकतममित्यनुवर्तते । तदाह । **तस्मिन् साधकतममिति** ॥ सम्प्रदानत्वाभावे करणसंज्ञा । **शतेनेति** ॥ सुवर्णादियत्किञ्चिद्द्रव्यशतेनेत्यर्थः । **तादर्थ्ये चतुर्थी वाच्येति** ॥ 'चतुर्थी सम्प्रदाने' इति सूत्रभाष्ये पठितमेतत् । तस्मै इदं तदर्थम् । अर्थेन नित्यसमासः । तदर्थस्य भावः तादर्थ्यम् । ब्राह्मणादित्वात् ष्यञ् । तेन च उपकार्योपकारकभावसम्बन्धो विवक्षितः । तत्र उपकार्यादेव चतुर्थी । भाष्ये यूपाय

(वा १४५९)। भक्तिर्ज्ञानाय कल्पते--सम्पद्यते--जायते इत्यादि। 'उत्पातेन ज्ञापिते च' (वा १४६०)। वाताय कपिला विद्युत्। 'हितयोगे च' (वा १४६१)। ब्राह्मणाय हितम्।

५८१। क्रियार्थोपपदस्य कर्मणि स्थानिनः। (२-३-१४)

क्रियार्था क्रिया उपपदं यस्य तस्य स्थानिनोऽप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी स्यात्। फलेभ्यो याति। फलान्याहर्तुं यातीत्यर्थः। नमस्कुर्मो नृसिंहाय। नृसिंहमनुकूलयितुमित्यर्थः। एवं 'स्वयम्भुवे नमस्कृत्य' इत्यादावपि।

दारु, कुण्डलाय हिरण्यम्, इत्युदाहृतत्वादित्यभिप्रेत्योदाहरति। **मुक्तये इति** ॥ मुक्त्यर्थमित्यर्थः। उपकार्यत्वञ्च बहुविधं जन्यत्वादि। यथा मुक्तये हरिं भजतीति मुक्तिर्जन्येति गम्यते, प्राप्यत्वं वा। ब्राह्मणाय दधीति ब्राह्मणस्योपकार्यत्वं गम्यते। इत्यादि। नचैवमपि अनेनैव सिद्धे 'चतुर्थी सम्प्रदाने' इति सूत्रे सम्प्रदानसंज्ञाविधानञ्च व्यर्थमिति वाच्यम्। 'हरये रोचते भक्तिः' इत्यादौ 'रुच्यर्थानां प्रीयमाणः' इत्यार्थे तदावश्यकत्वात्, इति भाष्ये स्पष्टम्। **कल्पि सम्पद्यमाने चेति** ॥ क्लृपीति सप्तमी, सम्पत्तिः विकारात्मना उत्पत्तिः, परिणाम इति यावत्। क्लृपिधातौ प्रयुज्यमाने सति सम्पद्यमानेऽर्थे वर्तमानात् चतुर्थी वाच्येत्यर्थः। **भक्तिरिति** ॥ ज्ञानात्मना परिणमते इत्यर्थः। क्लृपीत्यर्थग्रहणमित्यभिप्रेत्योदाहरति। **सम्पद्यते, जायते इत्यादीति** ॥ आदिना परिणमते इत्यादिसङ्ग्रहः। परिणामत्वप्रकारकबोधार्थमिदं वचनम्। अन्यथा तादर्थ्यचतुर्थ्यैव सिद्धमित्याहुः। **उत्पातेन ज्ञापिते चेति** ॥ अशुभसूचकः आकस्मिकः भूतविकारः उत्पातः, तेन सूचितेऽर्थे विद्यमानात् चतुर्थी वाच्येत्यर्थः। **वातायेति** ॥ महावातस्य सूचिकेत्यर्थः। **हितयोगे चेति** ॥ चतुर्थी वाच्येति शेषः। **ब्राह्मणाय हितमिति** ॥ ब्राह्मणस्य सुखकृदित्यर्थः। याजनादिरिति शेषः। **क्रियार्थ** ॥ क्रिया अर्थः प्रयोजनं यस्यास्सा क्रियार्था। क्रियेति विशेष्यमध्याहार्यम्, क्रियाफलकक्रियावाचकमिति यावत्। क्रियार्था क्रिया उपपदं यस्येति विग्रहः। तुमुनो विशेषणमेतत्। उपोच्चारितं पदम् उपपदम्। स्थानिन इत्यपि तद्विशेषणम्। स्थानं प्रसक्तिरस्यास्तीति स्थानी, तस्येति विग्रहः। अप्रयुज्यमानस्येति यावत्। तादृशस्य तुमुन्नन्तस्य कर्मणि चतुर्थीति फलितम्। 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इति तुमुन्विधिमहिम्ना क्रियाफलकमुपपदं क्रियावाच्येव लभ्यते। तदाह। **क्रियार्था क्रियेति** ॥ स्थानिन इत्यस्य व्याख्यानम्। **अप्रयुज्यमानस्येति** ॥ फलेभ्यो यातीत्यत्र कस्य तुमुन्नन्तस्य प्रसक्तिरित्यत आह। **फलान्याहर्तुमिति** ॥ इह फलाहरणक्रियार्था यानक्रिया, तद्वाचके उपपदे आहर्तुमित्यध्याहारलभ्यतुमुन्नन्तार्थाहरणक्रियां प्रति फलानां कर्मत्वात् सम्प्रदानत्वम्। द्वितीयापवादः। नच तादर्थ्यचतुर्थ्या गतार्थता शङ्क्या। नहि यानक्रिया फलार्था, किन्तु फलकर्मकाहरणक्रियार्थैव, अतो न फलेभ्यस्तादर्थ्यचतुर्थीप्रसक्तिः। एवञ्च फलकर्मकाहरणक्रियार्था यानक्रियेति बोधः। उदाहरणान्तरमाह। **नमस्कुर्म इति** ॥ तुमुन्नन्तार्थाध्याहारन्दर्शयति।

५८२ । तुमर्थाच्च भाववचनात् । (२-३-१५)

'भाववचनाश्च' (सू ३१८०) इति सूत्रेण यो विहितस्तदन्ताच्चतुर्थी स्यात् । यागाय याति । यष्टुं यातीत्यर्थः ।

५८३ । नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च । (२-३-१६)

एभिर्योगे चतुर्थी स्यात् । हरये नमः । 'उपपदविभक्तेः कारकविभक्ति-

---

नृसिंहमनुकूलयितुमिति ॥ नचात्र 'नमःस्वस्ति' इत्येव चतुर्थी सिद्धेति वाच्यम् । 'उपपदविभक्तेः' कारकविभक्तिर्बलीयसी' इति द्वितीयापत्तेः । एतत्सूचनार्थमेवेदमुदाहरणान्तरं दर्शितम् । **तुमर्थाच्च** ॥ 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इति सूत्रम् । क्रियार्थायां क्रियायामुपपदभूतायां भविष्यति काले तुमुन्ण्वुलौ स्तः । भोक्तुं व्रजति, भोजको व्रजति, भविष्यद्भुजिक्रियार्थो व्रजतिरत्रोपपदम्, अस्य तुमुनः अर्थ इवार्थो यस्य तस्मादिति विग्रहः । भावः, क्रिया उच्यते अनेनेति वचनः, भावस्य वचनः भाववचनः, तस्मादिति विग्रहः । क्रियावाचिन इति यावत् । प्रत्ययादिति शेषः । तत्र 'अव्ययकृतो भावे' इति तुमुनो भाव एव विहितत्वेन तुमर्थकस्य प्रत्ययस्य भाववचनत्वे सिद्धे पुनर्भाववचनग्रहणं सूत्रविशेषपरिग्रहणार्थमित्याह । **भाववचनाश्चेति** ॥ भावे इत्यधिकृत्य ये घञादिप्रत्यया विहिताः ते क्रियार्थक्रियायामुपपदभूतायां भविष्यति स्युरिति तदर्थः । यागाय यातीत्याद्युदाहरणम् । एवञ्च क्रियार्थत्वलाभार्थं तुमर्थादिति विशेषणम् । अत्र तादर्थ्यस्य तुमुनैव, घञा द्योतितत्वात् 'उक्तार्थानामप्रयोगः' इति न्यायेन तादर्थ्यचतुर्थ्या अप्राप्तौ प्रथमायाः प्राप्ताविदं वचनम् । तुमर्थादिति किम् । पाकः त्यागः इत्यादौ 'घञो भावे' इत्यधिकारस्थत्वेऽपि न चतुर्थी । क्रियार्थक्रियोपपदत्वाभावेन तुमर्थकत्वाभावात् । भाववचनादिति किम् । पाचको व्रजति । पक्तुं व्रजतीत्यर्थः । 'तुमुन्ण्वुलौ' इति ण्वुल् । तस्य तुमर्थकत्वेऽपि 'भावे' इत्यधिकारे विद्यमानत्वान्न चतुर्थी । तादर्थ्यस्य ण्वुलैवोक्तत्वान्न तादर्थ्यचतुर्थी, किन्तु प्रथमैव । **नमःस्वास्ति** ॥ युज्यत इति योगः, कर्मणि घञ् । नमस् इत्यादिभिर्युक्तादित्यर्थः । फलितमाह । **एभिर्योगे इति** ॥ न च तादर्थ्यचतुर्थ्या गतार्थत्वं शङ्क्यम् । तादर्थ्यस्य शेषत्वविवक्षायां षष्ठीनिवारणार्थत्वात् । तादर्थ्यं हि उपकार्योपकारकभावः, तस्य यदा सम्बन्धत्वेन भानन्तदा षष्ठी । यथा 'गुरोरिदं गुर्वर्थम्' इति भाष्ये स्पष्टम् । एवञ्च नमःस्वस्त्यादियोगे तादर्थ्यस्य शेषत्वविवक्षायामपि चतुर्थ्यैवेत्येतदर्थमिदं सूत्रम् । ननु नमस्करोति देवानित्यत्रापि चतुर्थी स्यादित्यत आह । **उपपदविभक्तेरिति** ॥ पदान्तरयोगनिमित्तिका विभक्तिः उपपदविभक्तिः, तदपेक्षया कारकविभक्तिर्बलीयसीत्यर्थः । 'अन्तरान्तरेण' इति सूत्रे भाष्ये पठितमिदं वचनम्, तच्च न्यायसिद्धम् । क्रियाकारकयोर्हि सम्बन्धः अन्तरङ्गः । उपपदार्थेन तु यत्किञ्चित्क्रियाकारकभावमूलकः सम्बन्ध इति तन्निमित्ता विभक्तिर्बहिरङ्गेति कैयटः । अन्ये तु उपपदविभक्त्या सम्बन्धसामान्यमवगम्यते, विशेषावगमस्तु प्रकरणादिपर्यालोचनया लभ्यः । कारकविभक्त्या तु कर्मत्वादिसम्बन्धविशेषः ।

बलीयसी' (प १०३)। नमस्करोति देवान्। प्रजाभ्यः स्वस्ति। अग्नये स्वाहा। पितृभ्यः स्वधा। अलमिति पर्याप्त्यर्थग्रहणम्। तेन दैत्येभ्यो हरिरलं-प्रभुः-समर्थः-शक्त इत्यादि। प्रभ्वादियोगे षष्ठ्यपि साधुः। 'तस्मै प्रभवति-' (सू १७६५) 'स एषां ग्रामणीः' (सू १८७८) इति निर्देशात्। तेन 'प्रभुर्बुभूषुर्भुवनत्रयस्य' इति सिद्धम्। वषडिन्द्राय। चकारः पुनर्विधानार्थः। तेनाशीर्विवक्षायां परामपि 'चतुर्थी चाशिषि-' (सू ६३१) इति षष्ठीं बाधित्वा चतुर्थ्येव भवति। स्वस्ति गोभ्यो भूयात्।

५८४। मन्यकर्मण्यनादरे विभाषाऽप्राणिषु। (२-३-१७)

प्राणिवर्जे मन्यतेः कर्मणि चतुर्थी वा स्यात्तिरस्कारे। न त्वां तृणं मन्ये तृणाय वा। श्यना निर्देशात्तानादिकयोगे न। न त्वां तृणं मन्वे।

झटित्येवावगम्यत इति सा बलीयसीत्याहुः। **नमस्करोति देवानिति**॥ करशिरस्संयोगादिना तोषयतीत्यर्थः। करशिरस्संयोगादिमात्रार्थत्वे अकर्मकत्वापातात्। **प्रजाभ्यः स्वस्तीति**॥ प्रजासम्बन्धि कुशलमित्यर्थः। **अग्नये स्वाहेति**॥ अग्न्युद्देश्यकं द्रव्यदानमित्यर्थः। **पितृभ्यः स्वधेति**॥ पित्रुद्देश्यकं द्रव्यदानमित्यर्थः। 'स्वं रूपं शब्दस्य' इति अलंशब्दस्यैव ग्रहणे कुमारीणामलङ्कारः इत्यत्रातिव्याप्तिः। किञ्च दैत्येभ्यो हरिरलमित्यत्रैव स्यात्, दैत्येभ्यो हरिः प्रभुरित्यादौ न स्यादित्यत आह। **अलमितीति**॥ वार्तिकमेतत्। अलमित्यनेन पर्याप्त्यर्थकशब्दानां ग्रहणमित्यर्थः। **तेनेति**॥ पर्याप्त्यर्थग्रहणेनेत्यर्थः। **इत्यादीति**॥ आदिना कुमारीणामलङ्कार इत्यत्रातिव्याप्तिनिराससङ्ग्रहः। ननु 'प्रभुर्बुभूषुर्भुवनत्रयस्य' इत्यादौ कथं षष्ठीत्यत आह। **प्रभ्वादियोगे षष्ठ्यपि साधुरिति**॥ कुत इत्यत आह। **स एषां ग्रामणीरिति निर्देशादिति**॥ नन्वेवं सति दैत्येभ्यः प्रभुरिति चतुर्थी न स्यात्। अलंशब्दस्तु पर्याप्तीतरार्थक एव भविष्यतीत्यत आह। **तस्मै प्रभवतीति॥ वषडिन्द्रायेति**॥ इन्द्रोद्देश्यकं हविर्दानमित्यर्थः। ननु स्वस्ति गोभ्यो भूयात् इत्याशीर्वाक्ये चतुर्थ्येवेष्यते। तत्र 'चतुर्थीचाशिष्यायुष्य' इत्यादिना परत्वात् पक्षे षष्ठीप्रसङ्ग इत्यत आह। **चकारः पुनर्विधानार्थः इति॥ तेनेति**॥ पुनर्विधानसामर्थ्येनेत्यर्थः। **मन्यकर्मणि**॥ अप्राणिष्विति च्छेदः। 'मन ज्ञाने' दिवादिः श्यन्विकरणः, 'मनु अवबोधने' तनादिरुविकरणः। तत्र मन्येति श्यना निर्देशात् दैवादिकस्य ग्रहणमित्याह। **मन्यतेरिति॥ कर्मणीति**॥ अतो द्वितीयां बाधित्वा पक्षे चतुर्थीति सूचितम्। **तिरस्कारे इति**॥ अनादर इत्यस्य व्याख्यानमेतत्। "अनादरः परिभवः परीभावस्तिरस्क्रिया" इत्यमरः। **न त्वां तृणमिति**॥ हे देवदत्त त्वां तृणत्वेनापि न मन्ये इत्यर्थः। नन्वुपादानादयमर्थो लभ्यते। तृणादप्यधमत्वप्रतीतेस्तिरस्कारातिशयः फलितः। तृणं त्वां मन्ये तृणाय वेत्युक्तौ तु तृणसाम्यमेव प्रतीयेत। न तु ततोऽप्यपकृष्टत्वम्। एतदेवाभिप्रेत्य भाष्येऽपि नन्वुपात्तः। न च मन्यकर्मत्वाविशेषात् त्वामिति युष्मच्छब्दादपि चतुर्थी

'अप्राणिष्वित्यपनीय नौकाकान्नशुकसृगालवर्जेष्विति वाच्यम्' (वा १४६४)। तेन 'न त्वां नावं मन्ये' इत्यत्राऽप्राणित्वेऽपि चतुर्थी न। 'न त्वां शुने मन्ये' इत्यत्र प्राणित्वेऽपि भवत्येव।

५८५। गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि। (२-३-१२)

अध्वभिन्ने गत्यर्थानां कर्मण्येते स्तश्चेष्टायाम्। ग्रामं ग्रामाय वा गच्छति। 'चेष्टायाम्' किम्। मनसा हरिं व्रजति। 'अनध्वनि' इति किम्। पन्थानं गच्छति। गन्त्राऽधिष्ठितेऽध्वन्येवायं निषेधः। यदा तूत्पथात्पन्था एवाक्रमितुमिष्यते तदा चतुर्थी भवत्येव। उत्पथेन पथे गच्छति॥

इति चतुर्थी विभक्तिः।

शङ्क्या। अनादरद्योतके कर्मणि इत्यर्थस्य विवक्षितत्वात्। तृणमेव ह्यत्रानादरद्योतकम्, न तु युष्मदर्थः। **श्यनेति**॥ तानादिकमनुधातुकर्मणि द्वितीयैव, नतु पक्षे चतुर्थीति भावः। **न त्वां तृणं मन्वे इति**॥ मनुधातोरुविकरणस्य लङुत्तमपुरुषैकवचनम्। ननु 'न त्वान्नावमन्नं मन्ये' इत्यत्रापि चतुर्थीविकल्पः स्यादित्यतिव्याप्तिः। न त्वां शुने मन्ये इत्यादौ तु प्राणित्वात् चतुर्थीविकल्पो न स्यादित्यव्याप्तिः। कर्मणः प्राणित्वादित्यत आह। **अप्राणिष्वित्यपनीयेति**॥ **न त्वान्नावम्मन्ये इति**॥ जीर्णान्नावं प्रति वाक्यमेतत्। न त्वामन्नम्मन्ये इत्यप्युदाहार्यम्। कुत्सितमन्नं प्रति वाक्यमेतत्। उभयत्राप्यप्राणित्वेऽपि न चतुर्थीविकल्पः, किन्तु द्वितीयैवेति भावः। **न त्वां शुने मन्ये इति**॥ हे देवदत्त त्वां श्वत्वेनापि न मन्ये इत्यर्थः। न त्वां काकम्मन्ये, न त्वां शुकम्मन्ये, न त्वां सृगालम्मन्ये, इत्यप्युदाहार्यम्। एषु प्राणित्वेऽपि न चतुर्थीविकल्प इति भावः। **गत्यर्थ**॥ शारीरपरिस्पन्दश्चेष्टा। **मनसेति**॥ अत्र शारीरचेष्टायाः अभावान्न द्वितीयाचतुर्थ्यौ, किन्तु द्वितीयैवेति भावः। 'आस्थितप्रतिषेधोऽयं वक्तव्यः' इति वार्तिकमर्थतस्संगृह्यते। **गन्त्राऽधिष्ठिते इति**॥ गन्त्राक्रान्ते अध्वन्येव अनध्वनीत्ययन्निषेध इत्यर्थः। यथा पन्थानं गच्छतीति। पन्थानं प्राप्नोतीत्यर्थः। अत्र पथः प्राप्त्याश्रयत्वेन गन्त्राधिष्ठितत्वान्निषेधः। अस्य वार्तिकस्य प्रयोजनमाह। **यदा त्विति**॥ **उत्पथादिति**॥ अमार्गादित्यर्थः। ल्यब्लोपे पञ्चमी। उज्जयिनीं प्राप्तुं प्रस्थितः मोहात्तन्मार्गात् प्रच्युतः मार्गान्तरं प्रविष्टः, तं परित्यज्य पुनरुज्जयिनीमार्गः आक्रमितुमिष्यते, तदा अनध्वनीति निषेधाभावाच्चतुर्थ्यपि भवत्येवेत्यर्थः। तादृशं लक्ष्यन्दर्शयति। **उत्पथेन पथे गच्छतीति**॥ उत्पथेनेत्यनन्तरं गन्तुमशक्त इति शेषः। उत्पथेन उज्जयिनीं प्राप्तुमशक्तः उत्पथं परित्यज्य उज्जयिनीमार्गं प्रवेष्टुं तदीयम्मार्गमनुसरतीत्यर्थः। अत्र उज्जयिनीमार्गस्य गन्त्राधिष्ठितत्वाभावात् अनध्वनीति निषेधो न भवति, अतश्चतुर्थी भवति, पक्षे द्वितीया चेति भावः॥

इति चतुर्थी विभक्तिः।

अथ पञ्चमी विभक्तिः।

५८६। ध्रुवमपायेऽपादानम्। (१-४-२४)

अपायो विश्लेषः, तस्मिन्साध्ये ध्रुवमवधिभूतं कारकमपादानं स्यात्।

५८७। अपादाने पञ्चमी। (२-३-२८)

ग्रामादायाति। धावतोऽश्वात्पतति। 'कारकम्' किम्। वृक्षस्य पर्ण पतति। 'जुगुप्साविरामप्रमादार्थानामुपसङ्ख्यानम्' (वा १०७९)। पापाज्जुगुप्सते, विरमति। धर्मात्प्रमाद्यति।

५८८। भीत्रार्थानां भयहेतुः। (१-४-२५)

भयार्थानां त्राणार्थानां च प्रयोगे भयहेतुरपादानं स्यात्। चोराद्बिभेति। चोरात्त्रायते। 'भयहेतुः' किम्। अरण्ये बिभेति, त्रायते वा।

५८९। पराजेरसोढः। (१-४-२६)

अथ पञ्चमी विभक्तिः—**ध्रुवमपाये** ॥ अपायपदं व्याचष्टे। **अपायो विश्लेष इति** ॥ वियोग इत्यर्थः। ध्रुवपदं व्याचष्टे। **अवधिभूतमिति** ॥ द्वयोस्संयुक्तयोरन्यतरस्य चलनाद्विश्लेष इति स्थितिः। तत्र तादृशचलनानाश्रयभूतं ध्रुवम्। तच्चेहार्थादवधिभूतं विवक्षितमिति भावः। **अपादाने पञ्चमी** ॥ स्पष्टत्वान्न व्याख्यातम्। **ग्रामादायातीति** ॥ आगच्छतीत्यर्थः। कस्मादित्याकाङ्क्षाविषयत्वात् ग्रामोऽवधिरिति अपादानत्वात् पञ्चमी। माधुराः पाटलीपुत्रेभ्यः आढ्यतराः' इत्यादौ बुद्धिकल्पितविश्लेषावधित्वमादाय अपादानत्वमिति भाष्ये स्पष्टम्। ननु विश्लेषानुकूलचलनानाश्रयभूतं यत् तदेव ध्रुवमिति व्याख्यायताम्। किमवधित्वविवक्षयेत्यत आह। **धावतोऽश्वात् पततीति** ॥ अश्वस्य चलनाश्रयत्वेऽपि पतनक्रियां प्रति कस्मादित्याकाङ्क्षाविषयत्वलक्षणमवधित्वं न विरुद्धमिति भावः। **जुगुप्सेति** ॥ जुगुत्साद्यर्थकधातुभिर्योगे जुगुप्सादिविषयस्यापादानत्वमित्यर्थः। **पापाज्जुगुप्सते इति** ॥ पापविषये कुत्सितत्वबुद्ध्या न रमते इत्यर्थः। **विरमतीति** ॥ पापादित्यनुषज्यते। पापविषये न प्रवर्तत इत्यर्थः। **धर्मात् प्रमाद्यतीति** ॥ धर्मविषये मुह्यतीत्यर्थः। वास्तवसंयोगविश्लेषयोरभावात् वचनमिदम्। यदा तु जुगुप्सते इत्यादेर्निवर्तत इत्यर्थः आश्रीयते, तदा बुद्धिकृतविश्लेषावधित्वमादाय अपादानत्वादेव सिद्धमिति वार्तिकमिदं भाष्ये प्रत्याख्यातम्। **भीत्रा** ॥ **चोराद्बिभेतीति** ॥ चोरेण हेतुनेत्यर्थः। हेतुतृतीया प्राप्ता। **चोरात्त्रायते इति** ॥ चोरेण हेतुना आत्मानं तत्कृतवधबन्धनादिनिवृत्त्यै रक्षतीत्यर्थः। यदा तु चोरात् बिभेति भीत्या निवर्तते, चोरात्त्रायते आत्मानं त्रातुं निवर्तयतीत्यर्थः आश्रीयते, तदा बुद्धिकल्पितविश्लेषावधित्वमादायापादानत्वं सिद्धमिति इदं सूत्रं भाष्ये प्रत्याख्यातम्। **पराजेरसोढः** ॥ सहधातोः क्तप्रत्यये

पराजेः प्रयोगेऽसह्योऽर्थोऽपादानं स्यात् । अध्ययनात्पराजयते । ग्लायतीत्यर्थः । 'असोढः' किम् । शत्रून्पराजयते । अभिभवतीत्यर्थः ।

५९० । वारणार्थानामीप्सितः । (१-४-२७)

प्रवृत्तिविघातो वारणम्, वारणार्थानां धातूनां प्रयोगे ईप्सितोऽर्थोऽपादानं स्यात् । यवेभ्यो गां वारयति । 'ईप्सितः' किम् । यवेभ्यो गां वारयति क्षेत्रे ।

'सहिवहोरोदवर्णस्य' इत्योत्त्वे यत्वढत्वष्टुत्वढलोपेषु कृतेषु सोढ इति रूपम् । तत्र क्त्यार्थो भूतकालो न विवक्षितः । तदाह । **असह्योऽर्थ इति** ॥ सोढुमशक्य इत्यर्थः । हेतुतृतीयापवादोऽयम् । **ग्लायतीत्यर्थ इति** ॥ असहनादिति शेषः । यदा तु असहनान्निवर्तत इत्यर्थ आश्रीयते, तदा ध्रुवमित्यपादानत्वादेव सिद्धमिति भाष्यम् । **अभिभवतीति** ॥ तिरस्करोतीत्यर्थः । अत्र शत्रूणामभिभवनीयतया असह्यत्वाभावान्नापादानता । **वारणार्थानामीप्सितः** ॥ प्रवृत्तिविमुखीकरणं वारणम् । **यवेभ्य इति** ॥ यवेषु प्रवर्तितुकामां गां प्रवृत्तिविमुखीकरोतीत्यर्थः । संयोगपूर्वकविश्लेषाभावात् 'ध्रुवमपाये' इत्यप्राप्ताविदं वचनम् । तत्र यवानां स्वकीयतया संरक्षणीयत्वेन ईप्सितत्वादपादानत्वं, नतु गोः, तस्याः परकीयत्वेनानीप्सितत्वात् वारणीयतया ईप्सितत्वव्याघाताच्च । तथाच 'तथायुक्तञ्च' इति गोः कर्मत्वात् द्वितीया । यदा तु यवाः परकीयाः गौस्तु स्वकीया तदा वारणमसम्भावितमेव । वस्तुतस्तु यवानां परकीयत्वेऽपि तद्विनाशादधर्मस्स्यात् । यवस्वामी गामपहृत्य बध्नीयात् । गोस्वामिनश्च यवस्वामी दण्डयेत् । अतो यवानां रक्षितुमिष्टत्वात् ईप्सिततमत्वादपादानत्वमस्त्येव । गोस्तु स्वकीयत्वेऽपि बाधकनिवृत्त्यै वारयितुमिष्टतमत्वात् कर्मत्वम् । नच गोरीप्सिततमत्वेऽपि ईप्सिततमत्वस्यापि सत्त्वादपादानत्वं किन्न स्यादिति वाच्यम् । ईप्सिततमत्वे 'वारणार्थानाम्' इत्यपादानत्वम् बाधित्वा 'कर्तुरीप्सिततमम्' इति कर्मत्वस्यैव परत्वात् प्राप्तेः । नच 'वारणार्थानामीप्सितः' इत्यपादानत्वस्य 'कर्तुरीप्सिततमम्' इति कर्मत्वापवादत्वं शङ्क्यम् । 'कर्तुरीप्सिततमम्' इति कर्मत्वं हि ईप्सिततममात्रविषयम् । वारणार्थानामित्यपादानत्वन्तु ईप्सितविषयम्, तस्य प्रकृते ईप्सितेषु यवेषु परकीयेषु सावकाशत्वात् न 'कर्तुरीप्सिततमम्' इति कर्मत्वापवादत्वम् । अतः परत्वात् गोः स्वकीयायाः परकीययवापेक्षया ईप्सिततमत्वात् कर्मत्वमेव । नच अग्नेर्माणवकं वारयतीत्यत्र अग्नेरीप्सितत्वाभावात् कथमपादानत्वमिति वाच्यम् । इष्टत्वभ्रमादग्नौ विषये स्पर्शनफलकप्रवृत्त्यभिमुखं माणवकं प्रवृत्तिविमुखीकरोतीति हि तदर्थः । तत्राग्निस्पर्शे माणवकस्य दाहप्रसङ्गात् तद्विषयप्रवृत्तिविमुखीकरणात्मकवारणक्रियया आप्तुमिष्टतमत्वेन वारयितुमीप्सिततमत्वात् माणवकस्य कर्मत्वम्। अग्नेस्तु वारणक्रियेप्सिततममाणवकीयस्पर्शक्रियया आप्तुमिष्टतमत्वेऽपि वारयितुरीप्सितत्वात् अपादानत्वम्। एतेन कर्तुर्व्यापारजन्यफलाश्रयः कर्मेत्येवास्तु, 'कर्तुरीप्सिततमं कर्म, तथायुक्तञ्चानीप्सितम्' इति किमीप्सिततमानीप्सि-

५९१। अन्तर्धौ येनादर्शनमिच्छति। (१-४-२८)

व्यवधाने सति यत्कर्तृकस्यात्मनो दर्शनस्याभावमिच्छति तदपादानं स्यात्। मातुर्निलीयते कृष्णः। 'अन्तर्धौ' किम्, चौरान्न दिदृक्षते। 'इच्छति' ग्रहणं किम्। अदर्शनेच्छायां सत्यां सत्यपि दर्शने यथा स्यात्। देवदत्ताद्यज्ञदत्तो निलीयते।

५९२। आख्यातोपयोगे। (१-४-२९)

नियमपूर्वकविद्यास्वीकारे वक्ता प्राक्संज्ञः स्यात्। उपाध्यायादधीते। 'उपयोगे' किम्। नटस्य गाथां शृणोति।

तयोः पृथग्ग्रहणेन। एतावतैव हरिं भजति, ग्रामं गच्छन् तृणं स्पृशति, विषं भुङ्क्ते, इत्यादिसर्वलक्ष्यसङ्ग्रहादिति निरस्तम्। कर्तृव्यापारजन्यफलाश्रयः कर्म इत्युक्तौ हि 'वारणार्थानाम्' इति सूत्रमस्यापवादः स्यात्, विशेषविहितत्वात्। तथाच माणवकस्य कर्मत्वन्न स्यात्। नचाप्तौ 'वारणार्थानाम्' इति सावकाशमिति वाच्यम्। वारयतेर्ह्यत्र स्पर्शफलकप्रवृत्तिविघटनमर्थः। तच्चान्यतो नयनादिरूपः तादृशव्यापारप्रयोज्यफलं माणवककर्तृकस्पर्शफलकप्रवृत्तिविरहः। तत्र स्पर्शांशोऽग्निष्ठः माणवकनिष्ठश्च। संयोगरूपस्य स्पर्शस्य द्विनिष्ठत्वात्। प्रवृत्तिविरहश्च विषयतया अग्निनिष्ठः समवायेन माणवकनिष्ठश्च। तथाच कर्तृव्यापारप्रयोज्यफलाश्रयत्वलक्षणकर्मत्वस्य परत्वादुभयत्रापि प्राप्तौ 'वारणार्थानाम्' इत्यपादानत्वं निरवकाशत्वादपवादस्स्यादिति माणवकादपि पञ्चमी स्यात्, तद्बाधनार्थं 'कर्तुरीप्सिततमं कर्म' इत्यारब्धव्यम्। एवञ्च ईप्सितमात्रे अग्नौ सावकाशस्यापादानत्वस्य परत्वादीप्सिततमे माणवके बाधस्सिद्ध्यति। कर्तुरीप्सिततममित्यारब्धे च द्वेष्योदासीनसङ्ग्रहार्थं 'तथायुक्तम्' इत्यप्यारब्धव्यमित्यास्तान्तावत्। भाष्ये तु बुद्धिकल्पितसंयोगविश्लेषकृतमपादानत्वमाश्रित्य प्रत्याख्यातमिदं सूत्रम्। **अन्तर्धौ** ॥ अन्तर्धावित्येतत् व्याचष्टे। **व्यवधाने सतीति** ॥ व्यवधानेनेति यावत्। **यत्कर्तृकस्येति** ॥ येनेति कर्तृतृतीयेति भावः। **आत्मनो दर्शनस्येति** ॥ आत्मन इति दर्शनशब्दयोगे कर्मणि षष्ठी। आत्मन इत्यध्याहारलभ्यम्। अत एव येनेति कर्तरि तृतीया सङ्गच्छते। अन्यथा कृद्योगषष्ठीप्रसङ्गात्। आत्मन इत्यध्याहारे तु उभयप्राप्तौ कर्मण्येवेति नियमान्न कृद्योगषष्ठी। आत्मशब्देन इच्छतिकर्ता विवक्षितः। व्यवधानेन स्वविषये यत्कर्तृकदर्शनस्य अभावमिच्छतीति यावत्। **मातुर्निलीयते कृष्ण इति** ॥ 'लीङ् श्लेषणे' श्यन्विकरणः। इह तूपसर्गवशात् व्यवधानेन परकर्तृकस्वविषयकदर्शनविरहानुकूलव्यापारे वर्तते। ततश्च कृष्णः मातृकर्तृकस्वविषयकदर्शनविरहाय कुड्यादिना प्रच्छन्नो भवतीत्यर्थः। अत्र व्यवधानमाश्रित्य मातृकर्तृकस्वविषयकदर्शनविरहस्य कृष्णेनेष्यमाणतया मातुरपादानत्वात् पञ्चमी। कर्तृतृतीयापवादोऽयं षष्ठ्यपवादो वा। भाष्ये तु बुद्धिकृतमपादानत्वमाश्रित्य इदमपि प्रत्याख्यातम्। **आख्यातोपयोगे** ॥ आख्याता उपयोगे इति छेदः। आख्यातेति तृजन्तात् प्रथमैकवचनम्। उपयोग-

५९३ । जनिकर्तुः प्रकृतिः । (१-४-३०)

जायमानस्य हेतुरपादानं स्यात् । ब्रह्मणः प्रजाः प्रजायन्ते ।

५९४ । भुवः प्रभवः । (१-४-३१)

भवनं भूः । भूकर्तुः प्रभवस्तथा । हिमवतो गङ्गा प्रभवति । तत्र प्रकाशते इत्यर्थः । 'ल्यब्लोपे कर्मण्यधिकरणे च' (वा १४७४–१४७५) । प्रासादात्प्रेक्षते, आसनात्प्रेक्षते । प्रासादमारुह्य, आसने उपविश्य, प्रेक्षते

पदं व्याचष्टे । **नियमपूर्वकेति** ॥ भाष्ये तथोक्तेरिति भावः । आख्यातेति तृजन्तं व्याचष्टे। **वक्तेति** ॥ अध्यापयितेत्यर्थः । **उपाध्यायादधीते इति** ॥ नियमविशेषपूर्वकं उपाध्याय-स्योच्चारणम् अनूच्चारयतीत्यर्थः । षष्ठ्यपवादोऽयम् । भाष्ये तु उपाध्यायान्निर्गतं वेदं गृह्णाती-त्यर्थमाश्रित्य प्रत्याख्यातम् । **जनिकर्तुः प्रकृतिः** ॥ जनिर्जननमुत्पत्तिः । 'जनी प्रादुर्भावे' दैवादिकोऽकर्मकः । 'इणजादिभ्यः' इति भावे इण् । 'जनीवध्योश्च' इति निषेधान्नोपधावृद्धिः । जनेः कर्तेति विग्रहः । शेषषष्ठ्या समासः । 'तृजकाभ्यां कर्तरि' इति निषेधस्तु कारकषष्ठ्या एवेति वक्ष्यते । **जायमानस्येति** ॥ जनधातोः कर्तरि लटश्शानच्, श्यन्, 'ज्ञाजनोर्जा' 'आने मुक्' उत्पत्त्याश्रयस्येत्यर्थः । प्रकृतिशब्दं व्याचष्टे । **हेतुरिति** ॥ **ब्रह्मणः इति** ॥ हिरण्यगर्भादित्यर्थः । घटादिषु कुलालादिवत् तस्य प्रजोत्पत्तौ निमित्तकारणत्वमिति भावः । वृत्तिकृन्मतमेतदयुक्तम् । संयोगविश्लेषसत्त्वेन 'ध्रुवमपाये' इत्येव सिद्धत्वात् । अतोऽत्र मूले हेतुशब्दः उपादानकारणपर एव । अत एव भाष्यकैयटयोः "गोमयाद्वृश्चिका जायन्ते गोलोमाविलोमभ्यो दूर्वा जायन्ते" इत्युदाहृत्य परिणामेषु प्रकृतिद्रव्यावयवानुस्यूतिसत्त्वेऽपि बुद्धिकृतविश्लेषसत्त्वात् 'ध्रुवमपाये' इत्येव सिद्धमिति प्रत्याख्यानं सङ्गच्छते । एवञ्च 'ब्रह्मणः प्रजाः प्रजायन्ते' इत्यत्र ब्रह्मशब्देन मायोपहितमीश्वरचैतन्यमेव विवक्षितम् । तद्धि सर्वकार्यो-पादानमिति वेदान्तसिद्धान्तः । **भुवः प्रभवः** ॥ पूर्वसूत्रे समासनिर्दिष्टमपि कर्तृग्रहणमेक-देशे स्वरितत्वप्रतिज्ञाबलादिहानुवर्तते । तदाह । **भूकर्तुरिति** ॥ भवनं भूः सम्पदादि-त्वात् क्विप् । भुवः कर्ता भूकर्ता तस्येत्यर्थः । **प्रभवः इति** ॥ प्रभवति प्रथमं प्रकाशते-ऽस्मिन्निति प्रभवः । प्रथमप्रकाशस्थानमित्यर्थः । प्रभवतीत्यस्य उत्पद्यते इत्यर्थे तु असङ्गतिः । गङ्गायास्तत्रानुत्पत्तेः । तदाह । **प्रकाशते इत्यर्थः इति** ॥ प्रथमं प्रकाशते इति यावत् । अत एव हिमवति प्रकाशते इत्यत्र न भवति । एतेन जनिकर्तुरित्यनेन 'ध्रुवमपाये' इत्यनेन च गतार्थत्वं निरस्तम् । भाष्ये तु अपक्रामतीत्यर्थमाश्रित्य 'ध्रुवमपाये' इत्यनेनैव सिद्धमिति स्थितम् । अथोपपदविभक्तयः । **ल्यब्लोपे इति** ॥ ल्यबन्तस्य लोपे अदर्शने अप्रयोगे सति गम्यमानतदर्थे प्रति कर्मणि अधिकरणे च पञ्चमी वाच्येत्यर्थः । **जिह्रेतीति** ॥ लज्जते इत्यर्थः । नन्वत्र ल्यबन्तस्य प्रयोगाभावात् कथं तदर्थे प्रति कर्माद्यवगतिरित्यत आह ।

इत्यर्थः। श्वशुराज्जिह्रेति। श्वशुरं वीक्ष्येत्यर्थः। 'गम्यमानापि क्रिया कारक-विभक्तीनां निमित्तम्' (वा ५०४१)। कस्मात्त्वम्, नद्याः। 'यतश्चाध्व-कालनिमानं तत्र पञ्चमी' (वा १४७७)। 'तद्युक्तादध्वनः प्रथमासप्तम्यौ' (वा १४७९)। 'कालात्सप्तमी च वक्तव्या' (वा १४७८)। वनाद्ग्रामो योजनं—योजने वा। कार्तिक्याः आग्रहायणी मासे।

५९५। अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते। (२-३-२९)

एतैर्योगे पञ्चमी स्यात्। 'अन्य—' इत्यर्थग्रहणम्। 'इतर' ग्रहणं प्रपञ्चार्थम्। अन्यो भिन्न इतरो वा कृष्णात्। आराद्वनात्। ऋते कृष्णात्।

गम्यमानापीति ॥ प्रकरणादिनेत्यर्थः। गम्यमानापीत्यस्य प्रयोजनान्तरमाह। **कस्मात्त्वमिति** ॥ आगतोऽसीति गम्यमानक्रियापेक्षमपादानत्वमिति भावः। नद्या इत्युत्तरम्। आगतोऽस्मीति गम्यमानक्रियापेक्षमपादानत्वमिति भावः। **यतश्चेति** ॥ यत इति तृतीयार्थे तसिः। येनावधिना अध्वनः कालस्य वा निमानं परिच्छेदः इयत्ता गम्यते, ततः पञ्चमी वाच्येत्येकं वाक्यम्। तत्र पञ्चमीति पाठेऽप्ययमेवार्थः। **तद्युक्तादिति** ॥ तेन पञ्चम्यन्तेन युक्तादन्वितात् अध्ववाचिनः प्रथमासप्तम्यौ वाच्ये इति द्वितीयं वाक्यम्। 'कालात्सप्तमी च वक्तव्या' इति वाक्यान्तरम्। तद्युक्तादित्यनुषज्यते। तेन पञ्चम्यन्तेन अन्विताद् कालवाचि-नस्सप्तमी वक्तव्येत्यर्थः। **वनादिति** ॥ अत्र योजनात्मकमध्वपरिमाणं वनेन पूर्वावधिना परिच्छिद्यते। कस्मादारभ्य योजनमित्याकाङ्क्षोत्थानात्। योजने योजनमिति प्रथमासप्तम्योरपि स्वोत्तराव्यवहितदेशवृत्तित्वमर्थः। वनात्मकपूर्वावधिकयोजनोत्तरदेशे ग्राम इत्यर्थः। अवधि-त्वसत्त्वेऽपि विश्लेषाप्रतीतेर्ध्रुवमित्यपादानत्वाभावाद्वचनम्। **कार्तिक्याः इति** ॥ कार्तिक्याः मासे आग्रहायणीत्यन्वयः। अत्र मासात्मकं कालपरिमाणं कार्तिक्या पूर्वावधिना परि-च्छिद्यते। कस्मादारभ्य मास इत्याकाङ्क्षोत्थानात्। मास इति सप्तम्यास्तु स्वोत्तराव्यवहित-कालवृत्तित्वमर्थः। कार्तिकपौर्णमास्यात्मकपूर्वावधिकमासोत्तरकाले मार्गशीर्षपौर्णमासीत्यर्थः। **अन्यारात्** ॥ युक्त इति भावे क्त इत्याह। **एभिर्योगे इति** ॥ अन्य, आरात्, इतर, ऋते, दिक्शब्द, अञ्चूत्तरपद, आच्, आहि, एतैरष्टभिर्योगे सतीत्यर्थः। भिन्नादिशब्दयोगे पञ्चमीं साधयितुमाह। **अन्य इत्यर्थग्रहणमिति** ॥ व्याख्यानादिति भावः। अन्यार्थकशब्दयोगे पञ्चमीति फलितम्। तर्हीतरग्रहणं व्यर्थमन्यार्थकत्वादेव सिद्धेरित्यत आह। **इतरग्रहणं प्रपञ्चार्थमिति** ॥ 'पचि विस्तारे' अन्यशब्दस्य अन्यार्थकशब्दग्रहणोपलक्षणार्थत्वकथनस्य प्रयोजनकथनार्थमिति यावत्। **अन्यो भिन्न इतरो वेति** ॥ भेदवान् विलक्षण इत्यादुप-लक्षणमिदम्। कृष्णप्रतियोगिकभेदवानित्यर्थः। षष्ठ्यपवादोऽयम्। अन्यादिशब्दानामवधिनि-यमसत्त्वेऽपि संयोगविश्लेषाभावादपादानत्वस्य न प्रसक्तिः। एवमग्रेऽपि। **आराद्वनादिति** ॥

---

१. भाष्ये तु 'प्रश्नाख्यानयोश्च' (वा १४७८) इति वार्तिकमेतदर्थं वर्तते।

पूर्वो ग्रामात्। दिशि दृष्टः शब्दो दिक्शब्दः। तेन सम्प्रति देशकालवृत्तिना योगेऽपि भवति। चैत्रात्पूर्वः फाल्गुनः। अवयववाचियोगे तु न। 'तस्य परमाम्रेडितम्' (सू ८३) इति निर्देशात्। पूर्वं कायस्य। अञ्चूत्तरपदस्य तु दिक्शब्दत्वेऽपि 'षष्ठ्यतसर्थ—' (सू ६०९) इति षष्ठीं बाधितुं पृथग्ग्रहणम्। प्राक्—प्रत्यग्वा ग्रामात्। आच्, दक्षिणा ग्रामात्। आहि, दक्षिणाहि ग्रामात्। 'अपादाने पञ्चमी' (सू ५८७) इति सूत्रे 'कार्तिक्याः प्रभृति' इति भाष्यप्रयोगात्प्रभृत्यर्थयोगे पञ्चमी। भवात्प्रभृति—आरभ्य वा सेव्यो

वनस्य दूरं समीपं वेत्यर्थः। 'आराद्दूरसमीपयोः' इत्यमरः। **ऋते कृष्णादिति** ॥ ऋते इत्यकारान्तमव्ययम्। "ऋते वर्जने" इत्यमरः। कृष्णस्य वर्जने सुखन्नास्तीत्यर्थः। 'क्व कर्मप्रध्वंसः फलति पुरुषाराधनमृते' इति शिवरहस्यान्तर्गतस्तुतिगतः प्रयोगस्त्वार्षः। 'ततोऽन्यत्रापि दृश्यते' इति वा द्वितीया। 'ऋते द्वितीया च' इति चान्द्रं सूत्रम्। अथ दिक्छब्दयोगे उदाहरति। **पूर्वो ग्रामादिति** ॥ ग्रामावधिकपूर्वदिग्वर्ती ग्राम इत्यर्थः। ननु चैत्रात् पूर्वः फाल्गुन इत्यत्र पूर्वशब्दस्य कालवाचकतया दिग्वाचकत्वाभावात् कथन्तद्योगे पञ्चमीत्यत आह। **दिशि दृष्ट इति** ॥ रूढ्या दिग्विशेषवाचकाः पूर्वादय एव गृह्यन्ते। नत्वैन्द्रीककुबादयः। **सम्प्रतीति** ॥ कदाचिद्दिग्वाचकानामिदानीं कालवाचकानामपि योगे पञ्चमी भवतीत्यर्थः। नन्वेवं सति पूर्वं कायस्येत्यत्रापि स्यादित्यत आह। **अवयववाचीति** ॥ **तस्य परमिति** ॥ तस्येति हि प्रकृतं द्विरुक्तं परामृशति। द्विरुक्तस्य परावयवं परभूतमाम्रेडितमिति तदर्थः। **पूर्वं कायस्येति** ॥ शरीरस्य पूर्वावयव इत्यर्थः। अञ्चुधातुः उत्तरपदं यस्य सः अञ्चूत्तरपदः प्रागादिदिक्छब्दः। ननु सध्र्यङ् इत्यादिशब्दोऽपि। दिक्शब्दसाहचर्यात्। तेन सध्र्यङ् देवदत्तेनेत्यत्र न पञ्चमी। ननु दिक्शब्दत्वादेव सिद्धे अञ्चूत्तरपदग्रहणं व्यर्थमित्यत आह। **अञ्चूत्तरपदस्येति** ॥ षष्ठ्यतसर्थेत्यनन्तरं परत्वात् प्राप्तमिति शेषः। **प्राक् प्रत्यग्वा ग्रामादिति** ॥ ग्रामावधिक इत्यर्थः। **आ जेति** ॥ आच्प्रत्ययान्तयोगे उदाहरणं वक्ष्यत इति सूचनमिदम्। **दक्षिणा ग्रामादिति** ॥ ग्रामावधिकायां दक्षिणस्यां दिशीत्यर्थः। **आहीति** ॥ आहिप्रत्ययान्तयोगे उदाहरणसूचनमिदम्। **दक्षिणाहि ग्रामादिति** ॥ ग्रामावधिकायां दक्षिणस्यां दिशि दूर इत्यर्थः। 'आहि च दूरे' इत्याहिप्रत्ययः। आजाहिप्रत्ययान्तयोर्दिक्शब्दत्वेऽपि 'षष्ठ्यतसर्थ' इति षष्ठीं बाधितुं पृथक् ग्रहणम्। नन्वेवमपि 'भवात्प्रभृत्यारभ्य वा सेव्यो हरिः' इत्यादौ कथं पञ्चमी। अन्यादिशब्दयोगाभावादित्यत आह। **अपादाने इति** ॥ **प्रभृतियोगे इति** ॥ प्रभृत्यर्थकशब्दयोगे इत्यर्थः। तथा हि। 'अपादाने पञ्चमी' इति सूत्रे भाष्ये "यतश्चाध्वकालनिमानम्' इति वार्तिकं पठित्वा कार्तिक्याः आग्रहायणी मासे इत्युदाहृत्य 'इदं न वक्तव्यम्' इति तद्वार्तिकप्रत्याख्यानमुपक्षिप्य 'इदमत्र प्रयोक्तव्यं सत्र प्रयुज्यते, कार्तिक्याः प्रभृत्याग्रहायणी मासे" इत्युक्तम्। प्रभृतिशब्दाभावेऽपि तदर्थसत्तया पञ्चमी सिद्धेत्यर्थः। एवं वदता भाष्यकृता प्रभृत्यर्थकशब्दयोगे पञ्चमीति वचनं ज्ञाप्यते। अन्यथा प्रभृतिपदाभावे पञ्च-

हरिः। 'अपपरिबहिः—' (सू ६६६) इति समासविधानात् ज्ञापकाद्बहिर्योगे पञ्चमी। ग्रामाद्बहिः।

५९६। अपपरी वर्जने। (१-४-८८)

एतौ वर्जने कर्मप्रवचनीयौ स्तः।

५९७। आङ्मर्यादावचने। (१-४-८९)

आङ् मर्यादायामुक्तसंज्ञः स्यात्। वचनग्रहणादभिविधावपि।

५९८। पञ्चम्यपाङ्परिभिः। (२-३-१०)

एतैः कर्मप्रवचनीयैर्योगे पञ्चमी स्यात्। अप हरेः, परिहरेः, संसारः। परिरत्र वर्जने। लक्षणादौ तु हरिं परि। आमुक्तेः संसारः। आसकलाद्ब्रह्म।

म्यर्थं वार्तिकस्यावश्यकत्वात्तदसङ्गतिः स्पष्टैव। एवञ्च प्रभृतिशब्दपर्यायशब्दयोगेऽपि पञ्चमी भवति। अत एव च 'कार्तिक्याः प्रभृति' इति भाष्यव्याख्यावसरे तत आरभ्येत्यर्थः इति कैयट आह। तत्र हि। तत इति पञ्चम्यास्तसिः। एतत् सर्वमभिप्रेत्योदाहरति। **भवात् प्रभृति, आरभ्य वेति॥** भवः उत्पत्तिः, आरभ्येत्यस्यावधिं परिगृह्येत्यर्थः। प्रभृतीत्यव्ययमप्येतदर्थकमेव। भवमवधिं परिगृह्य हरिस्सेव्य इत्यर्थः। उत्पत्तिक्षणात्मकपूर्वावधिकोत्तरकाले सर्वदा आमरणं हरिस्सेव्य इति यावत्। अत्रारभ्येति क्रियापेक्षया कर्मत्वविवक्षायां द्वितीयैव। 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इत्युक्तेः। यथा 'सूर्योदयमारभ्य आस्तमयात् जपति' इत्यादौ। शेषत्वविवक्षायान्तु षष्ठीं बाधित्वा भवशब्दात् पञ्चमी। प्रभृतिशब्दयोगे तु आरभ्येत्यर्थे कदापि न द्वितीया। प्रभृतिशब्दार्थस्यावधिं परिगृह्येत्यस्यावध्यादिघटितत्वेन क्रियात्वाभावात्। **अपपरीति॥** बहिरशब्दयोगे पञ्चमीं सिद्धवत्कृत्य 'अपपरिबहिरञ्चवः पञ्चम्या' इति समासविधानात् बहिरशब्दयोगे पञ्चमी विज्ञायते इत्यर्थः। इदञ्च 'अपपरि' इति सूत्रे भाष्ये स्पष्टम्। 'करस्य करभो बहिः' इति त्वसाध्वेव। 'ज्ञापकसिद्धन्न सर्वत्र' इति वा कथञ्चित्समाधेयम्। **अपपरी वर्जने॥ कर्मप्रवचनीयौ स्त इति॥** कर्मप्रवचनीयाः इत्यधिकृतस्य द्विवचनेन विपरिणाम इति भावः। वर्जने किम्। परिषिञ्चति। सर्वतस्सिञ्चतीत्यर्थः। अत्रोपसर्गत्वात् 'उपसर्गात्सुनोति' इति षत्वम्। **आङ्मर्यादावचने॥ उक्तसंज्ञः इति॥** कर्मप्रवचनीयसंज्ञक इत्यर्थः। ननु 'आङ्मर्यादायाम्' इत्येव सिद्धे वचनग्रहणं व्यर्थमित्यत आह। **वचनग्रहणादिति॥** तेन विनेति मर्यादा, तेन सहेत्यभिविधिः। मर्यादाशब्दो यत्रोच्यते तन्मर्यादावचनम् 'आङ्मर्यादाभिविध्योः' इति सूत्रम्। तत्र य आङ् दृष्टः स कर्मप्रवचनीयसंज्ञकस्स्यादित्यर्थः। तथाच मर्यादाभिविध्योराङ् कर्मप्रवचनीय इति फलतीति भावः। **पञ्चम्यपाङ्परिभिः॥ एतैरिति॥** अप आङ् परि

५९९ । प्रतिः प्रतिनिधिप्रतिदानयोः । (१-४-९२)

एतयोरर्थयोः प्रतिरुक्तसंज्ञः स्यात् ।

६०० । प्रतिनिधिप्रतिदाने च यस्मात् । (२-३-११)

अत्र कर्मप्रवचनीयैर्योगे पञ्चमी स्यात् । प्रद्युम्नः कृष्णात्प्रति । तिलेभ्यः प्रतियच्छति माषान् ।

६०१ । अकर्तर्यृणे पञ्चमी । (२-३-२४)

कर्तृवर्जितं यदृणं हेतुभूतं ततः पञ्चमी स्यात् । शताद्बद्धः । 'अकर्तरि' किम् । शतेन बन्धितः ।

इत्येतैरित्यर्थः । **कर्मप्रवचनीयैरिति** ॥ कर्मप्रवचनीया इत्यतस्तदनुवृत्तेरिति भावः । **अप हरेः, परिहरेः, संसारः इति** ॥ अपहरेस्संसारः परिहरेस्संसार इत्यन्वयः । हरिं वर्जयित्वा जनिमृतिचक्रात्मकं संसरणमित्यर्थः । ननु 'वृक्षं प्रति विद्योतते, भक्तो हरिं प्रति' इत्यादौ 'लक्षणेत्थम्भूत' इति कर्मप्रवचनीयत्वात् 'कर्मप्रवचनीययुक्ते द्वितीया' इति द्वितीयां परत्वात् अपवादत्वाच्च बाधित्वा 'पञ्चम्यपाङ्परिभिः' इति पञ्चमी स्यादित्यत आह । **परिरत्रेति** ॥ 'पञ्चम्यपाङ्परिभिः' इत्यत्र वर्जनार्थकेनापेन साहचर्यात् परिरपि वर्जनार्थक एव गृह्यते इत्यर्थः । **आ मुक्तेरिति** ॥ मुक्तेः प्रागिति यावत् । **आ सकलादिति** ॥ ब्रह्म सकलमभिव्याप्य वर्तत इत्यर्थः । **प्रतिः प्रतिनिधि** ॥ सदृशः प्रतिनिधिः, दत्तस्य प्रतिनिर्यातनं प्रतिदानम् । **उक्तसंज्ञः इति** ॥ कर्मप्रवचनीयसंज्ञक इत्यर्थः । **प्रतिनिधि** ॥ **अत्रेति** ॥ सूत्रोक्तविषये इत्यर्थः । सूत्रे यस्मादिति षष्ठ्यर्थे पञ्चमी अस्मादेव निर्देशात् । 'कृष्णस्य प्रतिनिधिः' इति तु 'ज्ञापकसिद्धन्न सर्वत्र' इति समाधेयम् । तथाच यत्सम्बन्धिनी प्रतिनिधिप्रतिदाने तस्मात् कर्मप्रवचनीययुक्तात्पञ्चमीत्यर्थः फलति । **प्रद्युम्नः कृष्णात्प्रतीति** ॥ युद्धादौ प्रद्युम्नः कृष्णनिरूपितसादृश्यवानित्यर्थः । पञ्चम्यर्थस्सादृश्यम् । प्रतिस्तु तद्द्योतकः । **तिलेभ्यः इति** ॥ ऋणत्वेन गृहीतान् तिलान् स्वरूपेण मूल्याद्यात्मना वा प्रत्यर्पयतीत्यर्थः । कर्मणि पञ्चमी । **अकर्तर्यृणे** ॥ 'हेतौ' इति सूत्रमनुवर्तते । अकर्तरि हेतुभूते ऋणे विद्यमानादित्यर्थः । फलितमाह । **कर्तृवर्जितमिति** ॥ कर्तृसंज्ञारहितमित्यर्थः । **शताद्बद्धः इति** ॥ नियमितकाले प्रत्यर्पणाभावे सति सुवर्णादिशतेन ऋणेन हेतुना अधमर्णो बद्ध इत्यर्थः । हेतुतृतीयापवादः । **शतेन बन्धितः इति** ॥ अधमर्णः उत्तमर्णेनेति शेषः । बन्धेर्हेतुमण्ण्यन्तात्कर्मणि क्तः । अधमर्णः उत्तमर्णेन बद्ध इत्यण्यन्तस्यार्थः । शतेन ऋणेन प्रयोजककर्त्रा उत्तमर्णेन प्रयोज्यकर्त्रा बन्धनं कारितः अधमर्ण इति ण्यन्तस्यार्थः । अत्र शतमृणं प्रयोजकत्वात् कर्तृसंज्ञं हेतुसंज्ञञ्च । 'तत्प्रयोजको हेतुश्च' इत्यत्र चकारेण कर्तृसंज्ञाया अपि विधानात् । ततश्च शतशब्दात् कर्तरि तृतीयां बाधित्वा अपवादत्वात् 'पञ्चमी स्यात्' अतः अकर्तरीत्युक्तमिति

६०२। विभाषा गुणेऽस्त्रियाम्। (२-३-२५)

गुणे हेतावस्त्रीलिङ्गे पञ्चमी वा स्यात्। जाड्यात्—जाड्येन वा बद्धः। 'गुणे' किम्। धनेन कुलम्। 'अस्त्रियाम्' किम्। बुद्ध्या मुक्तः। 'विभाषा' इति योगविभागादगुणे स्त्रियां च क्वचित्। धूमादग्निमान्। नास्ति घटोऽनुपलब्धेः।

६०३। पृथग्विनानानाभिस्तृतीयान्यतरस्याम्। (२-३-३२)

एभिर्योगे तृतीया स्यात्पञ्चमीद्वितीये च। अन्यतरस्यांग्रहणं समुच्चयार्थम्, पञ्चमीद्वितीये चानुवर्तेते। पृथग्रामेण—रामात्—रामं वा। एवं विना, नाना।

भावः। शतस्य हेतुत्वेऽपि कर्तृत्वान्न ततः पञ्चमीति भावः। **विभाषा** ॥ हेतावित्यनुवर्तते। तदाह। **गुणे हेतावस्त्रीलिङ्गे इति** ॥ विद्यमानादिति शेषः। **जाड्यादिति** ॥ जडस्य भावो जाड्यम्। 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' इति ष्यञ्। ननु धूमादग्निमानित्यादौ कथं पञ्चमी। धूमादेरगुणत्वादित्यत आह। **योगविभागादिति** ॥ 'विभाषा' इति योगो विभज्यते। हेतावित्यनुवर्तते, पञ्चमीति च। हेतौ पञ्चमी वा स्यादित्यर्थः। ततश्च धूमादग्निमानित्यादि सिद्धम्। ततः गुणे स्त्रियामिति। तत्र विभाषेत्यनुवर्तते, पञ्चमीति च। गुणे हेतावस्त्रीलिङ्गे पञ्चमी वा स्यादित्युक्तोऽर्थः। ततश्च जाड्याद्बद्ध इत्यादि सिद्धम्। ननु विभाषेत्येव सिद्धे गुणे स्त्रियामिति व्यर्थमित्यत आह। **अगुणे स्त्रियाञ्च क्वचिदिति** ॥ योगविभागस्य इष्टसिद्ध्यर्थत्वादिति भावः। अत्रागुणे उदाहरति। **धूमादिति** ॥ अग्निमानित्यनन्तरं ज्ञायत इति शेषः। धूमस्य अग्निहेतुत्वात्। अत्र धूमस्य अगुणत्वेऽपि हेतुत्वात् ततः पञ्चमीति भावः। स्त्रियामुदाहरति। **नास्ति घटः इति** ॥ घट इत्यनन्तरं ज्ञायत इति शेषः। **अनुपलब्धेरिति** ॥ उपलब्धिः ज्ञानम्, तस्या अभावः अनुपलब्धिः। नञ्तत्पुरुषः। न चार्थाभावेऽव्ययीभावश्शङ्क्यः। अर्थाभावे तयोर्विकल्पस्य वक्ष्यमाणत्वात्। **पृथग्विना** ॥ **पञ्चमीद्वितीये चेति** ॥ तृतीयाभावपक्षे इति शेषः। 'अपादाने पञ्चमी, षष्ठ्यतसर्थप्रत्ययेन, एनपा द्वितीया, पृथग्विना' इति सूत्रक्रमः। तत्र षष्ठीत्यस्वरितत्वान्नानुवर्तते, पञ्चमी द्वितीयेति चानुवर्तते। तथाच तृतीयाभावपक्षे पञ्चमी द्वितीया चेति भावः। ननु तृतीयाभावपक्षे द्वितीयैव सन्निहितत्वात् स्यात्, ननु पञ्चम्यपि, षष्ठ्यतसर्थेनेत्यत्र तदनुवृत्तेरभावात्। अतोऽत्र पञ्चम्यास्समावेशोऽनुपपन्न इत्यत आह। **अन्यतरस्यांग्रहणमिति** ॥ तृतीया चेत्येतावतैव सन्निहितद्वितीयासमुच्चयसिद्धेरन्यतरस्याङ्ग्रुयत्नकरणं व्यवहिताया अपि पञ्चम्यास्समुच्चयार्थम्। अव्ययानामनेकार्थकत्वादिति भावः। ननु पञ्चम्याः 'षष्ठ्यतसर्थ' इत्यत्रानुवृत्ताया इहानुवृत्तेरसम्भवात् कथमिह तदुपस्थितिरित्यत आह। **पञ्चमीद्वितीये चानुवर्तेते इति** ॥ मण्डूकप्लुत्येति शेषः। **पृथग्रामेणेति** ॥ रामप्रतियोगिकभेदवानित्यर्थः। **एवं विना नानेति** ॥

६०४ । करणे च स्तोकाल्पकृच्छ्रकतिपयस्या-सत्त्ववचनस्य । (२-३-३३)

एभ्योऽद्रव्यवचनेभ्यः करणे तृतीयापञ्चम्यौ स्तः । स्तोकेन स्तोकाद्वा मुक्तः । द्रव्ये तु स्तोकेन विषेण हतः ।

६०५ । दूरान्तिकार्थैभ्यो द्वितीया च । (२-३-३५)

एभ्यो द्वितीया स्याच्चात्पञ्चमीतृतीये च। प्रातिपदिकार्थमात्रे विधिरयम्। ग्रामस्य दूरम्–दूरात्–दूरेण वा, अन्तिकम्–अन्तिकात्–अन्तिकेन वा । 'असत्त्ववचनस्य' इत्यनुवृत्तेर्नेह । दूरः पन्थाः ॥

इति पञ्चमी विभक्तिः ।

विना रामेण, रामात्, रामम् । नाना रामेण, रामात्, रामम्, वा । पृथग्विनानानाभिस्त्रयोऽपि भेदार्थका इति केचित् । "पृथग्विनान्तरेणतें हिरुङ् नाना च वर्जने" इत्यमरः । रामस्य वर्जने सुखं नास्तीत्यर्थः। **करणे च ॥ एभ्य इति ॥** स्तोक अल्प कृच्छ्र कतिपय एभ्यश्चतुर्भ्यः इत्यर्थः । असत्त्वपदं व्याचष्टे । **अद्रव्येति ॥** अन्यतरस्यामित्यनुवर्तते, पञ्चमीति च । ततश्च करणे पञ्चमी वेति लभ्यते । तदभावे तु तृतीया सिद्धैव । तदाह । **तृतीयापञ्चम्याविति ॥ स्तोकेन स्तोकाद्वा मुक्तः इति ॥** लघुना अनायासेन मुक्त इत्यर्थः । आयासो न द्रव्यमिति भावः । **द्रव्ये त्विति ॥** द्रव्ये वृत्तौ स्तोकेन विषेण हत इति तृतीयैवेत्यर्थः । अल्पेनाल्पाद्वा मुक्तः, कृच्छ्रेण कृच्छ्राद्वा मुक्तः । कष्टेनेत्यर्थः । कतिपयेन कतिपयाद्वा मुक्तः । अकृत्स्नेन साधनेनेत्यर्थः । **दूरान्तिक ॥ एभ्य इति ॥** दूरार्थकेभ्यः अन्तिकार्थकेभ्यश्चेत्यर्थः । चकारः व्यवहितयोरपि पञ्चमीतृतीययोस्समुच्चयार्थः, नतु दूरान्तिकार्थैष्षष्ठ्यन्यतरस्याम्' इति सन्निहितषष्ठ्या अपि । व्याख्यानात् । तदाह । **चात्पञ्चमीतृतीये चेति ॥ प्रातिपदिकार्थमात्रे विधिरयमिति ॥** व्याख्यानादिति भावः । तथाच प्रथमापवाद इति फलितम् । 'दूरादावसथान्मूत्रन्दूरात्पादावनेजनम्' इति भाष्यप्रयोगात् सप्तम्यर्थेऽधिकरणेऽप्ययं विधिः । ननु दूरः पन्थाः इत्यत्र कथं न पञ्चमीत्यत आह । **असत्त्ववचनस्येति ॥** दूरः पन्था इत्यत्र पन्थाः द्रव्यम् । तद्विशेषणं दूरशब्दस्सत्त्ववचन इति भावः ॥

इति पञ्चमी विभक्तिः ।

अथ षष्ठी विभक्तिः।

६०६। षष्ठी शेषे। (२-३-५०)

कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः, तत्र षष्ठी स्यात्। राज्ञः पुरुषः। कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव। सतां गतम्। सर्पिषो जानीते। मातुः स्मरति। एधो दकस्योपस्कुरुते। भजे शम्भोश्चरणयोः। फलानां तृप्तः।

अथ षष्ठी विभक्तिः। **षष्ठी शेषे** ॥ उक्तादन्यश्शेषः। 'कर्मणि द्वितीया' इत्यादिसूत्रेषु द्वितीयादिविधिषु हि कर्मकर्तृकरणसम्प्रदानापादानाधिकरणकारकाण्यनुक्रान्तानि। प्रथमाविधौ प्रातिपदिकार्थोऽनुक्रान्तः। एतेभ्यः अन्यः स्वस्वामिभावादिसम्बन्धः शेषपदार्थ इत्यर्थः। तत्रासति बाधके सम्बन्धो विशेषरूपेण सामान्यरूपेण च भासते। न हि 'निर्विशेषं सामान्यम्' इति न्यायात्। सति तु बाधके मातुः स्मरतीत्यादौ सम्बन्धत्वेनैव भानम्। कर्मत्वादिविशेषरूपेणापि भाने द्वितीयादिप्रसङ्गादिति स्थितिः। राज्ञः पुरुष इत्यत्र स्वस्वामिभावरूपविशेषात्मना सम्बन्धत्वरूपसामान्यात्मना च सम्बन्धषष्ठ्यर्थः। राजाश्रितस्वामित्वनिरूपितस्वत्वात्मकसम्बन्धाश्रयः पुरुष इति बोधः। आश्रयत्वादि तु संसर्गमर्यादया भासते। तत्र पुरुषो मुख्यं विशेष्यम्। सम्बन्धस्त्वाधेयतया पुरुषविशेषणम्। राजा तु आश्रयतया सम्बन्धविशेषणम्। सम्बन्धस्त्वाधेयतया राजानं प्रति विशेष्यम्। 'प्रधानप्रत्ययार्थवचनम्' इति वचनेन प्रत्ययार्थस्य प्रकृत्यर्थं प्रति प्राधान्यावगमात्। अत एव पुरुषशब्दादपि न षष्ठी। राजनिरूपितसम्बन्धाश्रयःपुरुष इति बोधे सम्बन्धस्य प्रकृत्यर्थपुरुषं प्रति विशेषणत्वेन विशेष्यत्वेन भानानुपपत्तेः। यदा तु पुरुषगतस्वत्वनिरूपितस्वामित्वरूपसम्बन्धाश्रयो राजेति बोधः, तदा पुरुषस्य राजेति पुरुषशब्दात् षष्ठी भवत्येवेत्यन्यत्र विस्तरः। सतां गतमित्यादौ कर्तृतृतीयादिकमाशङ्क्य आह। **कर्मादीनामपीति** ॥ कर्मत्वकर्तृत्वादीनामपि सम्बन्धत्वसामान्यात्मना विवक्षायां षष्ठ्येव, नतु कारकविभक्तय इत्यर्थः। तथाच 'क्तस्य च वर्तमाने' इति सूत्रे भाष्यम्। 'कर्मत्वादीनामविवक्षा शेषः' इति। **सतां गतमिति** ॥ भावे क्तः। सत्सम्बन्धिगमनमित्यर्थः। कर्तृत्वविवक्षायान्तु सद्भिर्गतमिति तृतीया भवत्येव। कृद्योगलक्षणा षष्ठी तु न भवति। 'न लोक' इति निषेधात्। **सर्पिषो जानीते इति** ॥ करणत्वविवक्षायां सर्पिषा उपायेन प्रवर्तते इत्यर्थः। करणत्वस्य सम्बन्धत्वविवक्षायान्तु षष्ठी। कर्त्राश्रिता सर्पिस्सम्बन्धिनी प्रवृत्तिरिति बोधः। **मातुः स्मरतीति** ॥ कर्मत्वविवक्षायां मातरं स्मरतीत्यर्थः। कर्मत्वस्य शेषत्वविवक्षायान्तु देवदत्तकर्तृकमातृसम्बन्धि स्मरणमित्यर्थः। **एधोदकस्योपस्कुरुते इति** ॥ एधशब्दः अकारान्तः पुल्लिङ्गः 'कारके' इति सूत्रे "एधाः पक्ष्यन्ते" इति भाष्यप्रयोगात्। एधाश्च उदकानि चेति द्वन्द्वात् षष्ठी। 'जातिरप्राणिनाम्' इत्येकवद्भावः। कर्मत्वविवक्षायां एधोदकं शोषणगन्धद्रव्याधानादिना परिष्कुरुते इत्यर्थः। कर्मत्वस्य शेषत्वविवक्षायान्तु एधोदकसम्बन्धि परिष्करणमिति

६०७ । षष्ठी हेतुप्रयोगे । (२-३-२६)

हेतुशब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात् । अन्नस्य हेतोर्वसति ।

६०८ । सर्वनाम्नस्तृतीया च । (२-३-१७)

सर्वनाम्नो हेतुशब्दस्य च प्रयोगे हेतौ द्योत्ये तृतीया स्यात्षष्ठी च । केन हेतुना वसति । कस्य हेतोः । 'निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम्' (वा १४७३)। किं निमित्तं वसति, केन निमित्तेन, कस्मै निमित्ताय, इत्यादि । एवं 'किं कारणम्' 'को हेतुः' 'किं प्रयोजनम्' इत्यादि । 'प्रायग्रहणादसर्वनाम्नः प्रथमाद्वितीये न स्तः' । ज्ञानेन निमित्तेन हरिः सेव्यः । ज्ञानाय निमित्ताय, इत्यादि ।

६०९ । षष्ठ्यतसर्थप्रत्ययेन । (२-३-३०)

बोधः । एधश्शब्दस्सकारान्तोऽप्यस्ति नपुंसकलिङ्गः । 'काष्ठन्दार्विन्धनन्त्वेध इध्ममेधस्समित् स्त्रियाम्' इति कोशात् । 'यथैधांसि समिद्धोऽग्निः' इत्यादिदर्शनाच्च । तथा सति एधः दकस्येति छेदः । उदकशब्दसमावेशे एध उदकस्येत्यापत्तेः । उदकशब्दपर्यायो दकशब्दोऽप्यस्ति । "भुवनमभृतं जीवनं स्यात् दकञ्च" इति हलायुधकोशात् । तथाच एधः कर्तृ उदकं परिष्कुरुते इत्यर्थः । कर्मत्वस्य शेषत्वविवक्षायान्तु षष्ठी । निम्बकरञ्जादिकाष्ठविशेषप्रज्वलिताग्नितप्तोदकस्य गुणविशेषो वैद्यशास्त्रप्रसिद्धः । **भजे शम्भोश्चरणयोरिति** ॥ अत्र चरणयोः कर्मत्वस्य शेषत्वविवक्षायां षष्ठी । शम्भुचरणसम्बन्धि भजनमित्यर्थः । **फलानां तृप्तः इति** ॥ अत्रापि करणत्वस्य शेषत्वविवक्षायां षष्ठी । फलसम्बन्धिनी तृप्तिरिति बोधः । **षष्ठी हेतुप्रयोगे** ॥ हेतावित्यनुवर्तते । तदाह । **हेतौ द्योत्ये इति** ॥ हेतुत्वे द्योत्ये इत्यर्थः । हेतुवाचकात् षष्ठीति फलितम् । 'हेतौ' इति तृतीयां बाधित्वा षष्ठी । हेतुप्रयोगे किम् । अन्नेन वसति । हेतौ द्योत्ये इति किम् । अन्नस्य हेतोस्तुभ्यं नमः । अत्र युष्मच्छब्दान्न भवति । **सर्वनाम्नस्तृतीया च** ॥ सर्वनाम्नः इति षष्ठी । तदाह । **सर्वनाम्नो हेतुशब्दस्य चेति** ॥ कस्माद्भवतीत्यपेक्षायां सन्निहितत्वात् सर्वनामहेतुभ्यामिति गम्यते इत्यभिप्रेत्योदाहरति । **केन हेतुनेति** ॥ सर्वनाम्न इति यदि पञ्चमी स्यात्, तदा हेतुशब्दात् षष्ठी न स्यादिति बोध्यम् । **निमित्तपर्यायेति** ॥ निमित्तपर्यायाणां प्रयोगे तेभ्यस्तत्समानाधिकरणेभ्यश्च सर्वासां विभक्तीनां प्रायेण प्रयोगो भवतीत्यर्थः । **किन्निमित्तं वसतीति** ॥ प्रथमान्तं द्वितीयान्तञ्च ज्ञेयम् । **इत्यादीति** ॥ कस्मात् निमित्तात्, कस्य निमित्तस्य, कस्मिन्निमित्ते । पर्यायग्रहणस्य प्रयोजनमाह । **एवं किं कारणमित्यादि** ॥ प्रायग्रहणस्य प्रयोजनमाह । **प्रायग्रहणादिति** ॥ एवञ्च 'षष्ठी हेतुप्रयोगे' 'सर्वनाम्नस्तृतीया च' इति सूत्रद्वयं न कर्तव्यमेवेति भावः । **षष्ठ्यतसर्थ** ॥ **एतद्योगे इति** ॥ 'दिक्शब्देभ्यस्सप्तमीपञ्चमीप्रथमाभ्यो दिग्देश-

एतद्योगे षष्ठी स्यात्। '–दिक्छब्द–' (सू ५९५) इति पञ्चम्या अपवादः। ग्रामस्य दक्षिणतः, पुरः, पुरस्तात्, उपरि, उपरिष्टात्।

६१०। एनपा द्वितीया। (२-३-३१)

एनबन्तेन योगे द्वितीया स्यात्। 'एनपा' इति योगविभागात्षष्ठ्यपि। दक्षिणेन ग्रामं–ग्रामस्य वा।

६११। दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्। (२-३-३४)

एतैर्योगे षष्ठी स्यात्पञ्चमी च। दूरं, निकटं, ग्रामस्य–ग्रामाद्वा।

६१२। ज्ञोऽविदर्थस्य करणे। (२-३-५१)

कालेष्वस्तातिः' इत्यारभ्य 'आहि च दूरे' 'उत्तराच्च' इत्यन्तैस्सूत्रैर्दिग्देशकालवृत्तिभ्यश्शब्देभ्यः स्वार्थे प्रत्यया विहिताः। तत्र 'दक्षिणोत्तराभ्यामतसुच्' इति विहितः यः अतसुच्प्रत्ययः तस्यार्थः दिग्देशकालरूपः स एवार्थो यस्य सः अतसर्थप्रत्ययः तद्योगे इत्यर्थः। यद्यप्यतसर्थप्रत्ययेषु अस्तातिरेव प्रथमः। तथापि लाघवादतसर्थेत्युक्तम्, न त्वस्तात्यर्थेति। संयुक्ताक्षरघटितत्वेन गौरवात्। **दिक्शब्देतीति** ॥ 'अन्यारात्' इति सूत्रे दिक्शब्देत्यनेन या पञ्चमी विहिता तदपवाद इत्यर्थः। **दक्षिणतः इति** ॥ सप्तमीपञ्चमीप्रथमान्तात् स्वार्थे दिग्देशकालवृत्तेः दक्षिणशब्दात् अतसुच्। दक्षिणस्यां, दक्षिणस्याः, दक्षिणा, वा दिगित्यर्थः। एवं देशे काले च। **पुरः इति** ॥ पूर्वाशब्दादस्तात्यर्थे 'पूर्वाधरावराणामसिपुरधवश्चैषाम्' इत्यसिप्रत्ययः प्रकृतेः पुरादेशश्च। पूर्वस्यां, पूर्वस्याः, पूर्वा, वेत्यर्थः। **पुरस्तादिति** ॥ पूर्वशब्दादस्तातिप्रत्यये सति 'अस्ताति च' इति प्रकृतेः पुरादेशः। पुरश्शब्दसमानार्थकमिदम्। **उपरीति** ॥ 'उपर्युपरिष्टात्' इति सूत्रेण ऊर्ध्वशब्दात् रिल्प्रत्ययः रिष्टातिल्प्रत्ययश्च। प्रकृतेरुपादेशश्च निपातितः। ऊर्ध्वायान्दिशि, ऊर्ध्वाया दिशः, ऊर्ध्वा दिगिति वा, अर्थः। एवं देशे कालेऽपि। **एनपा द्वितीया** ॥ 'षष्ठ्यतसर्थं' इति षष्ठ्याः नित्यं बाधे प्राप्ते आह। **योगविभागादिति** ॥ एनपेति योगो विभज्यते। 'षष्ठ्यतसर्थं' इति पूर्वसूत्रात् षष्ठीत्यनुवर्तते। एनबन्तेन योगे षष्ठी स्यादित्यर्थः। द्वितीयेति योगान्तरम्। एनपेत्यनुवर्तते। एनबन्तेन योगे द्वितीया स्यादित्युक्तोऽर्थः। **दक्षिणेनेति** ॥ 'एनबन्यतरस्यामदूरेऽपञ्चम्याः' इत्येनप्। **एवमुत्तरेणेति** ॥ उत्तरेण ग्रामं, ग्रामस्य, वेत्युदाहरणमित्यर्थः। पूर्वेण ग्रामं ग्रामस्य वेत्याद्यपि बोध्यम्। दिक्शब्देभ्य एनब्विधेः। भाष्ये तु 'षष्ठ्यतसर्थं' इति सूत्रात् प्राक् 'एनपा द्वितीया' इत्यस्य पाठ इति 'पृथग्विना' इति सूत्रे उक्तम्। अतोऽत्र सत्यपि योगविभागे षष्ठीग्रहणानुवृत्तेरसम्भवादेनपा योगे षष्ठ्यसाधुरेवेति युक्तम्। **दूरान्तिकार्थैः** ॥ **एतैरिति** ॥ दुरार्थकैरन्तिकार्थकैश्च शब्दैर्योगे इत्यर्थः। **पञ्चमी चेति** ॥ षष्ठ्यभावे 'अपादाने पञ्चमी' इत्यतः अनुवृत्ता पञ्चमीति भावः। 'एनपा द्वितीया' इति, पृथग्विनानानाभिस्तृतीया' इति, द्वितीयातृतीये सन्निहिते अपि न समुच्चीयेते। व्याख्यानात्। **ज्ञोऽविदर्थस्य** ॥ ज्ञः

जानातेरज्ञानार्थस्य करणे शेषत्वेन विवक्षिते षष्ठी स्यात् । सर्पिषो ज्ञानम् ।

६१३ । अधीगर्थदयेशां कर्मणि । (२-३-५२)

एषां कर्मणि शेषे षष्ठी स्यात् । मातुः स्मरणम् । सर्पिषो दयनम्, ईशनं वा ।

६१४ । कृञः प्रतियत्ने । (२-३-५३)

प्रतियत्नो गुणाधानम् । कृञः कर्मणि शेषे षष्ठी स्याद्गुणाधाने । एधोदकस्योपस्करणम् ।

६१५ । रुजार्थानां भाववचनानामज्वरेः । (२-३-५४)

भावकर्तृकाणां ज्वरिवर्जितानां रुजार्थानां कर्मणि शेषे षष्ठी स्यात् ।

अविदर्थस्येति च्छेदः । ज्ञ इति ज्ञाधातोरनुकरणात् षष्ठ्येकवचनम् । वित् ज्ञानं अर्थः यस्य विदर्थः, स नभवतीति अविदर्थः । ज्ञानार्थकभिन्नस्येति यावत् । तदाह । **जानातेरज्ञानार्थस्येति** ॥ **शेषत्वेनेति** ॥ सम्बन्धत्वेनेत्यर्थः । शेष इत्यनुवृत्तेरिति भावः । **सर्पिषो ज्ञानमिति** ॥ वस्तुतः करणीभूतं यत्सर्पिः तत्सम्बन्धिनी प्रवृत्तिरित्यर्थः । अविदर्थस्येति लिङ्गादेव 'ज्ञा अवबोधने' इति धातोः प्रवृत्तौ वृत्तिः । 'षष्ठी शेषे' इति सिद्धेऽपि 'प्रतिपदविधाना षष्ठी न समस्यते' इत्येतदर्थं वचनम् । **अधीगर्थ**॥ **एषामिति** ॥ 'इक् स्मरणे' नित्यमधिपूर्वः, तस्यार्थ इवार्थो यस्य सः अधीगर्थः, स्मरणार्थक इति यावत् । **शेष इति** ॥ 'षष्ठी शेषे' इत्यतस्तदनुवृत्तेरिति भावः । **मातुः स्मरणमिति** ॥ वस्तुतः कर्मीभूतमातृसम्बन्धि स्मरणमित्यर्थः । **सर्पिषो दयनमिति** ॥ वस्तुतः कर्मीभूतसर्पिस्सम्बन्धि दयनमित्यर्थः । 'दय दानगतिरक्षण हिंसादानेषु,' दीनान् दयते इत्यत्र दुःखाद्वियोजयितुमिच्छतीत्यर्थः । परदुःखापहरणेच्छा दया । **ईशनं वेति** ॥ सर्पिषः इत्यनुषज्यते । वस्तुतः कर्मीभूतसर्पिस्सम्बन्धियथेष्टविनियोग इत्यर्थः । इदमपि समासनिषेधार्थमेव । लोकानीष्टे इत्यत्र तु यथास्वेच्छमाज्ञापयतीत्यर्थः । **कृञः प्रति**॥ कर्मणीति, शेष इति, चानुवर्तते । प्रतियत्नो गुणाधानम् । तदाह । **कृञः कर्मणीति** ॥ **एधोदकस्योपस्करणमिति** ॥ एधश्शब्दस्सकारान्तो नपुंसकलिङ्गः । दकशब्द उदकवाची । एधश्च दकञ्चेति द्वन्द्वः । यद्वा एधशब्दः अकारान्तः पुल्लिँङ्गः । एधश्च उदकञ्चेति द्वन्द्वः इत्यनुपदमेवोक्तम् । वस्तुतः कर्मीभूतैधोदकसम्बन्धि परिष्करणमित्यर्थः । **रुजार्थानाम्** ॥ रुजा पीडा रोगः इत्यर्थो येषामिति विग्रहः । भाववचनानामित्येतद्व्याचष्टे । **भावकर्तृकाणामिति** ॥ वक्तीति वचनः, कर्तरि ल्युट् । प्रकृत्यर्थो न विवक्षितः । भावः धात्वर्थः वचनः कर्ता येषामिति विग्रहः । भावकर्तृकाणामिति फलितमिति भाष्ये स्पष्टम् । शेष इति कर्मणीति चानुवर्तते । तदाह । **कर्मणि शेष इति** ॥ इदमपि समासाभावार्थमेव । **चौरस्य रोगस्य रुजेति** ॥ अत्र रुजेति व्याधिकृतसन्तापादिपीडोच्यते । रोगश्चौरं सन्तापादिना

चौरस्य रोगस्य रुजा। 'अज्वरिसन्ताप्योरिति वाच्यम्' (वा १५०७)। रोगस्य चौरज्वरः, चौरसन्तापो वा। रोगकर्तृकं चौरसम्बन्धि ज्वरादिकमित्यर्थः।

६१६। आशिषि नाथः। (२-३-५५)

आशीरर्थस्य नाथतेः शेषे कर्मणि षष्ठी स्यात्। सर्पिषो नाथनम्। 'आशिषि' इति किम्। माणवकनाथनम्'। तत्सम्बन्धिनी याच्ञेत्यर्थः।

६१७। जासिनिप्रहणनाटक्राथपिषां हिंसायाम्। (२-३-५६)

हिंसार्थानामेषां शेषे कर्मणि षष्ठी स्यात्। चौरस्योज्जासनम्। निप्रौ संहतौ विपर्यस्तौ व्यस्तौ वा। चौरस्य निप्रहणनम्—प्रणिहननम्—

पीडयतीति पर्यवसन्नोऽर्थः। रोगकर्तृका वस्तुतः कर्मीभूतचौरगतसन्तापादिपीडेत्यत्र भावघञन्तेन रोगशब्देन शारीरक्षयादिविकारविशेषो विवक्षितः। सच रुजायां कर्ता। तत्कर्मणश्चौरस्य शेषत्वविवक्षायां षष्ठी। रोगस्य चौररुजेति समासो न भवतीति योजना। **अज्वरिसन्ताप्योरिति**॥ रुजार्थानां भाववचनानां ज्वरिसन्तापिवर्जितानाम् इति सूत्रं वक्तव्यमित्यर्थः। **रोगस्य चौरज्वरः इति**॥ अत्र चौरज्वरशब्दे शेषषष्ठ्या समासो भवत्येव। शेषषष्ठ्याः पुनर्विध्यभावात्। एवं रोगस्य चौरसन्ताप इत्यत्रापि बोध्यम्। अत्राज्वरिसन्ताप्योरित्यनुक्तौ तु रुजार्थानां भाववचनानां कर्मणि शेषे चौरशब्दात् षष्ठी स्यादित्यतिव्याप्तिं दर्शयितुमाह। **रोगकर्तृकमिति**॥ रोगकर्तृकः वस्तुतः कर्मीभूतचौरसम्बन्धी ज्वरः सन्तापो वेति यावत्। एवञ्च ज्वरिसन्ताप्योः रुजार्थकत्वात् रोगात्मकभावकर्तृकत्वाच्च तत्कर्मणश्चौरस्य शेषत्वविवक्षायां नानेन षष्ठी, किन्तु कृद्योगे षष्ठी, षष्ठी शेषे इत्येव षष्ठी वा। अतः चौरज्वरः चौरसन्ताप इति समासो भवत्येवेति भावः। **आशिषि नाथः**॥ 'शेषे कर्मणि' इति चानुवर्तते। तदाह। **आशीरर्थस्येति**॥ इदमपि समासाभावार्थमेव। **सर्पिषो नाथनमिति**॥ इदम्मे भूयादितीच्छा आशासनम्। तदेवाशीः नाथतेरर्थः। वस्तुतः कर्मीभूतसर्पिस्सम्बन्धि आशासनमित्यर्थः। **जासिनिप्र**॥ 'कर्मणि शेषे' इत्यनुवर्तते। तदाह। **हिंसार्थानामित्यादिना**॥ इदमपि समासाभावार्थमेव। **चौरस्योज्जासनमिति**॥ 'जसु ताडने' 'जसु हिंसायाम्' इति चुरादौ। वस्तुतः कर्मीभूतचौरसम्बन्धिनी हिंसेत्यर्थः। 'जसु मोक्षणे' इति दैवादिकस्य तु न ग्रहणम्। हिंसार्थत्वाभावात् जासीति निर्देशाच्च। **निप्राविति**॥ निप्रहणेति निप्रपूर्वस्य हनधातोः निर्देशः। तत्र निप्र इत्येतौ समस्तौ गृह्येते, प्रनीत्येवं व्युत्क्रमेण च गृह्येते। प्रेति नीति च पृथगपि गृह्यते, व्याख्यानादित्यर्थः। समस्तावुदाहरति। **चौरस्य निप्रहणनमिति**॥ वस्तुतः कर्मीभूतचौरसम्बन्धि हननमित्यर्थः। 'हन्तेरत्पूर्वस्य' इति णत्वम्। विपर्यस्तावुदाहरति। **प्रणिहननमिति**॥ 'नर्गद' इति णत्वम्। हन्तेर्नकारस्य तु न णत्वम्। 'अट्कुप्वाङ्' इति नियमात्। नेर्नकारस्य तदनन्तर्भावात्। व्यस्तावुदाहरति।

निहननम्—प्रहणनं वा । 'नट अवस्कन्दने' चुरादिः । चौरस्योन्नाटनम् । चौरस्य क्राथनम् । वृषळस्य पेषणम् । 'हिंसायाम्' किम् । धानापेषणम् ।

६१८ । व्यवहृपणोः समर्थयोः । (२-३-५७)

शेषे कर्मणि षष्ठी स्यात् । द्यूते क्रयविक्रयव्यवहारे चानयोस्तुल्यार्थता । शतस्य व्यवहरणं, पणनं वा । 'समर्थयोः' किम् । शलाकाव्यवहारः । गणनेत्यर्थः । ब्राह्मणपणनं, स्तुतिरित्यर्थः ।

६१९ । दिवस्तदर्थस्य । (२-३-५८)

द्यूतार्थस्य क्रयविक्रयरूपव्यवहारार्थस्य च दिवः कर्मणि षष्ठी स्यात् । शतस्य दीव्यति । 'तदर्थस्य' किम् । ब्राह्मणं दीव्यति । स्तौतीत्यर्थः ।

निहननं प्रहणनं वेति ॥ निमित्ताभावान्निहननमित्यत्र 'हन्तेरत्पूर्वस्य' इति णत्वं न । **चुरादिरिति** ॥ 'नट नृत्तौ' इति तु न गृह्यते । नाटेति दीर्घोच्चारणादिति भावः । **चौरस्योन्नाटनमिति** ॥ उपसर्गवशान्नाटेर्हिंसायां वृत्तिरिति भावः । **चौरस्य क्राथनमिति** ॥ 'कथ हिंसायाम्' इति घटादौ । 'घटादयो मितः' इति तस्य मित्त्वेऽपि 'मितां ह्रस्वः' इति न भवति । इह दीर्घनिपातनात् । **वृषळस्य पेषणमिति** ॥ हिंसेत्यर्थः । **व्यवहृपणोः** ॥ शेषपूरणेन सूत्रं व्याचष्टे । **शेषे कर्मणि षष्ठी स्यादिति** ॥ समौ तुल्यौ अर्थौ ययोरिति विग्रहः । शकन्ध्वादित्वात् पररूपम् । एकार्थकस्य व्यवपूर्वकहृञ्धातोः पणधातोश्च कर्मणि शेषत्वेन विवक्षिते षष्ठी स्यादित्यर्थः । इदमपि समासनिवृत्त्यर्थमेव । ननु 'पण व्यवहारे स्तुतौ च' इति पणधातुः स्तुतावपि वर्तते, नतु व्यवहार एव, तत्कथमनयोरेकार्थकत्वमित्यत आह । **द्यूते इति** ॥ द्यूते अक्षैः क्रीडने क्रयविक्रयविषयकमूल्यसंवादे चानयोः व्यवहृपणोः एकार्थकत्वमित्यर्थः । तथाच एतादृशव्यवहारार्थकयोरिति फलतीति भावः । **शतस्य व्यवहरणं पणनं वेति** ॥ द्यूतव्यवहारेण क्रयविक्रयव्यवहारेण वा गृह्णातीत्यर्थः । केवलव्यवहारार्थकत्वे अकर्मकत्वापातात् । तथाच वस्तुतः कर्मीभूतशतसम्बन्धि अक्षक्रीडनेन ग्रहणं, क्रयविक्रयविषयकमूल्यविसंवादेन ग्रहणं वेत्यर्थः । **समर्थयोः किमिति** ॥ व्यवहारार्थकयोरिति किमर्थमित्यर्थः । **शलाकाव्यवहार इति** ॥ प्रत्युदाहरणे व्यवहरतेर्न व्यवहारार्थकत्वमित्याह । **गणनेत्यर्थः इति** ॥ वस्तुतः कर्मीभूतशलाकासम्बन्धिगणनेति फलितम् । अत्र षष्ठ्याः पुनर्विध्यभावादस्त्येव समास इति भावः । **ब्राह्मणपणनमिति** ॥ पणतेः प्रत्युदाहरणम् । अत्र पणिर्न व्यवहारार्थ इत्याह । **स्तुतिरित्यर्थः इति** ॥ वस्तुतः कर्मीभूतब्राह्मणसम्बन्धिनी स्तुतिरित्यर्थः । अत्रापि अस्त्येव समास इति भावः । **दिवस्तदर्थस्य** ॥ पूर्वसूत्रे निर्दिष्टव्यवहृपणौ तच्छब्देन परामृश्येते । तयोः व्यवहृपणोः अर्थ एवार्थो यस्येति विग्रहः । तदाह । **द्यूतार्थस्येति** ॥ द्यूतमक्षक्रीडनेन ग्रहणं अर्थो यस्य दिव इति विग्रहः । **क्रयेति** ॥ क्रयविक्रयविषयकमूल्यविसंवादोऽर्थः यस्य दिव इति बहुव्रीहिः । **कर्मणि षष्ठीति** ॥ इह शेष

६२०। विभाषोपसर्गे। (२-३-५९)

पूर्वयोगापवादः। शतस्य शतं वा प्रतिदीव्यति।

६२१। प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने। (२-३-६१)

देवतासम्प्रदानकेऽर्थे वर्तमानयोः प्रेष्यब्रुवोः कर्मणो हविषो वाचकाच्छब्दात्षष्ठी स्यात्। अग्नये छागस्य हविषो वपाया मेदसः प्रेष्य अनुब्रूहि वा।

६२२। कृत्वोऽर्थप्रयोगे कालेऽधिकरणे। २-३-६४)

इति नानुवर्तते, व्याख्यानादिति भावः। तथाच कर्मणश्शेषत्वविवक्षाभावात् 'षष्ठी शेषे' इत्यप्राप्तौ इदं वचनम्, नतु कृदन्तयोगे समासनिवृत्त्यर्थम्, तत् ध्वनयन्नुदाहरति। **शतस्य दीव्यतीति**॥ शतमक्षक्रीडनेन क्रयविक्रयविषयकमूल्यविसंवादेन वा गृह्णातीत्यर्थः। अत्र शेष इत्यनुवृत्तेः कर्मत्वप्रकार एव बोधः। अत एव 'द्वितीया ब्राह्मणे' इत्युत्तरसूत्रे 'ग्रामस्य तदहस्सभायां दीव्येयुः' इत्यत्र नित्यषष्ठीप्राप्तौ द्वितीयार्थमित्युक्तं भाष्यकैयटयोस्सङ्गच्छते इत्यन्यत्र विस्तरः। **विभाषोपसर्गे**॥ उपसर्गे सति व्यवहृपणार्थस्य दिवः कर्मणि षष्ठी वा स्यादित्यर्थः। **प्रेष्यब्रुवोः**॥ **देवतासम्प्रदानके इति**॥ देवता सम्प्रदानं यस्य तस्मिन्नित्यर्थः। **प्रेष्यब्रुवोरिति**॥ 'इष गतौ' दिवादिरिश्यन्नन्तः, उपसर्गवशात् प्रेरणे वर्तते। प्रेष्यश्च ब्रूश्च तयोरिति विग्रहः। **कर्मण इति**॥ 'अधीगर्थ' इत्यतः कर्मणीत्यनुवृत्तं षष्ठ्या विपरिणम्यते इति भावः। **हविषः इति**॥ हविश्शब्दः न स्वरूपपरः, किन्तु हविर्विशेषवाचकशब्दपरः, व्याख्यानात्। तथाच देवतासम्प्रदानक्रियावाचिनोः प्रेष्यब्रुवोः कर्मीभूतः यो हविर्विशेषः तद्वाचकाच्छब्दात् षष्ठीति फलितम्। अत्रापि शेष इति नानुवर्तते, व्याख्यानात्। तथाच द्वितीयापवादोऽयम्। **अग्नये छागस्येति**॥ मैत्रावरुणं प्रति अध्वर्युकर्तृकोऽयं सम्प्रैषः। हे मैत्रावरुण, अग्न्युद्देशेन प्रदास्यमानं छागसम्बन्धि यद्धविः वपाख्यं मेदोरूपं तत् प्रेष्य। 'होतायक्षदग्निं छागस्य वपाया मेदसो जुषतां हविर्होतर्यज' इति प्रैषेण प्रकाशयेत्यर्थः। अत्र यद्यपि 'अग्नये छागस्य वपाया मेदसः प्रेष्य' इत्येव कल्पसूत्रेषु दृश्यते, नतु हविष इत्यपि। तथापि तथाविधः प्रैषो भाष्योदाहरणात् क्वचिच्छाखायां ज्ञेयः। मेदश्शब्देन वस्त्रखण्डतुल्यो मांसविशेषः उच्यते। **अनुब्रूहि वेति**॥ अग्नये छागस्य हविषो वपाया मेदसोऽनुब्रूहीत्युदाहरणम्। हे मैत्रावरुण, अग्न्युद्देशेन प्रदास्यमानं छागसम्बन्धि यद्धविः वपाख्यं मेदोरूप तत्पुरोऽनुवाक्यया प्रकाशयेत्यर्थः। प्रेष्यब्रुवोः किम्, अग्नये छागस्य हविर्वपां मेदो जुहुधि। हविषः किम्। अग्नये गोमयानि प्रेष्य। देवतासम्प्रदाने किम्। माणवकाय पुरोडाशं प्रेष्य। 'हविषः प्रस्थितत्वविशेषणे प्रतिषेधो वक्तव्यः' इन्द्राग्निभ्यां छागस्य हविर्वपां मेदः प्रस्थितं प्रेष्य। प्रस्थितमिति अव्यक्तमित्यर्थः। **कृत्वोऽर्थ**॥ **कृत्वोऽर्थानामिति**॥ कृत्वसुच्प्रत्ययस्यार्थ एवार्थः

कृत्वोऽर्थानां प्रयोगे कालवाचिन्यधिकरणे शेषे षष्ठी स्यात्। पञ्चकृत्वोऽह्नो भोजनम्। द्विरह्नो भोजनम्। 'शेषे' किम्। द्विरहन्यध्ययनम्।

६२३। कर्तृकर्मणोः कृति। (२-३-६५)

कृद्योगे कर्तरि कर्मणि च षष्ठी स्यात्। कृष्णस्य कृतिः। जगतः कर्ता कृष्णः। 'गुणकर्मणि वेष्यते' (वा ५०४२)। नेता अश्वस्य स्रुघ्नस्य—स्रुघ्नं वा। 'कृति' किम्। तद्धिते मा भूत्। कृतपूर्वी कटम्।

येषां ते कृत्वोऽर्थाः, तेषां प्रयोग इत्यर्थः। **शेषे षष्ठीति** ॥ 'दिवस्तदर्थस्य' इत्यादिपूर्वसूत्रे विच्छिन्नमपि शेषग्रहणं मण्डूकप्लुत्या इहानुवर्तते, व्याख्यानात्। **पञ्चकृत्वोऽह्नो भोजनमिति** ॥ पञ्चवारं वस्तुतः अधिकरणीभूतं यदहः तत्सम्बन्धि भोजनमित्यर्थः। 'सङ्ख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' इह षष्ठ्याश्शेषे पुनर्विधानान्न समासः। **द्विरहन्यध्ययनमिति** ॥ 'द्वित्रिचतुर्भ्यस्सुच्' इति कृत्वोऽर्थे सुच्। अत्राधिकरणस्य विवक्षितत्वात्सप्तम्येव, नतु षष्ठी। **कर्तृकर्मणोः कृति** ॥ कृत्प्रत्यये प्रयुज्यमाने सतीत्यर्थः। फलितमाह। **कृद्योग इति** ॥ तत्र कर्तर्युदाहरति। **कृष्णस्य कृतिरिति** ॥ भावे स्त्रियां क्तिन्। कृष्णकर्तृका सृष्टिरित्यर्थः। कर्मण्युदाहरति। **जगत इति** ॥ जगत्कर्मकसृष्ट्यनुकूलव्यापारवानित्यर्थः। **गुणकर्मणीति** ॥ कृदन्तद्विकर्मकधातुयोगे अप्रधानकर्मणि षष्ठीविकल्प इष्यत इत्यर्थः। प्रधानकर्मणि तु नित्यैव षष्ठी। 'अकथितञ्च' इत्यत्र भाष्ये स्थितमेतत्। **नेता अश्वस्येति** ॥ 'अकथितञ्च' इत्यत्र 'ग्राममजान्नयति' इत्युदाहरणे अजा प्रधानं कर्म, ग्रामस्तु गुणकर्मेति प्रपञ्चितं प्राक्। तद्रीत्या अत्र अश्वः प्रधानकर्म, स्रुघ्नस्तु गुणकर्मेति ज्ञेयम्। स्यादेतत्। कृतीति व्यर्थम्। नच तिङ्व्यावृत्त्यर्थं तदिति वाच्यम्। ओदनं पचतीत्यादौ 'न लोक' इति लादेशयोगे षष्ठीनिषेधादेव षष्ठ्यभावसिद्धेः। शतेन क्रीतः शत्योऽश्वः, इत्यादौ तु तद्धितयत्प्रत्ययाभिहितत्वादेव अश्वादेः षष्ठी न भविष्यति। नच देवदत्तं हिरुगित्यादौ हिरुगाद्यवयवबोध्यवर्जनादिक्रियां प्रति कर्मत्वादनेन षष्ठी शङ्क्या। 'न लोकाव्यय' इति तन्निषेधात्। शेषत्वविवक्षायान्तु षष्ठ्यत्र इष्यत एव। एवञ्च परिशेषात् कृद्योग एवेयं षष्ठी पर्यवस्यतीति किं कृद्ग्रहणेनेति पृच्छति। **कृति किमिति** ॥ उत्तरमाह। **तद्धिते इति** ॥ तद्धितयोगे षष्ठीनिवृत्त्यर्थमिति यावत्। **कृतपूर्वी कटमिति** ॥ कटः पूर्वं कृतः अनेनेति लौकिकविग्रहः। तत्र पूर्वमिति क्रियाविशेषणम्। 'सुप्सुपा' इति समासः। अनेनेत्यनुवृत्तौ कृतपूर्वशब्दात् 'पूर्वादिनिः' 'सपूर्वाच्च' इति इनिप्रत्ययस्तद्धितः। तत्र करोतिक्रियापेक्षया कटस्य कर्मत्वादनेन षष्ठीप्राप्तौ तद्धितयो-

---

१. अत्र च 'अथेह कथं भवितव्यम्—नेता अश्वस्य स्रुघ्नम्—इति, आहोस्वित्—नेता अश्वस्य सुघ्नस्य—इति। 'उभयथा गोणिकापुत्रः' इति 'अकथित—' (१-४-५१) सूत्रभाष्यमूलिक 'प्रधाने नियता षष्ठी गुणकर्मणि वेष्यते' इति शिष्टोक्तिरेव मानम्।

गात्र भवति। ननु कृतः कटः पूर्वमनेनेति विग्रहे कृतशब्दस्य पूर्वशब्देन समासो न सम्भवति। कृतशब्दस्य कटशब्दापेक्षत्वेन सामर्थ्यविरहात्। अत एव तद्धितः इनिप्रत्ययोऽपि दुर्लभः। किञ्च कृत इति क्तप्रत्ययेन कटस्य कर्मणोऽभिहितत्वेन ततष्षष्ठ्याः प्राप्तिरेव नास्तीति किं तन्निवृत्त्यर्थेन कृद्ग्रहणेन। क्तप्रत्ययेन कृता अभिहितत्वादेव कटात् द्वितीया दुर्लभेति चेत्, कृत अम् पूर्व अम् इत्यलौकिकविग्रहवाक्ये कटस्यासन्निहिततया कर्मत्वेनान्वयासम्भवेन कृञ्-धातोस्तदानीमकर्मकतया कर्मणि क्तप्रत्ययस्यासम्भवे सति 'नपुंसके भावे क्तः' इति भावे क्तप्रत्यये कृते सति कृतशब्दस्य कटशब्दसापेक्षत्वाभावात् समासतद्धितौ निर्बाधौ। ततश्च कृतपूर्वीति तद्धितान्तस्य पूर्वं कृतवानित्यर्थः पर्यवस्यति। किं कृतवानिति कर्मजिज्ञासायां कटमित्यन्वेति। गुणभूतयापि क्रियया कारकसम्बन्धस्य कटं कृतवानित्यादौ दर्शनात्। तच्च कर्मत्वं न क्तप्रत्ययेनाभिहितम्, तस्य भावे विधानात्। नापीनिप्रत्ययेन। तस्य कर्तरि विधानात्। तथाच असति कृद्ग्रहणे षष्ठी स्यात्। तन्निवृत्त्यर्थं कृद्ग्रहणमिति भाष्ये स्पष्टम्। नच निष्ठायोगे निषेधादेवात्र षष्ठी न भविष्यतीति वाच्यम्। 'नपुंसके क्ते भावे षष्ठ्या उपसङ्ख्यानम्' इति 'क्तस्य च वर्तमाने' इति सूत्रस्थवार्तिकेन निष्ठायोगे षष्ठीनिषेधस्यात्राप्रसक्तेः। तथाच षष्ठ्यभावे उक्तरीत्या अनभिहितत्वात् द्वितीया सुलभैव। नच कृतेऽपि कृद्ग्रहणे षष्ठी दुर्वारा। कृतेति क्तप्रत्ययात्मककृद्योगस्य सत्त्वादिति वाच्यम्। कृद्ग्रहणसामर्थ्येन भाष्योदाहरणेन च वृत्त्यन्तर्भावानापन्नकृद्योगस्य विवक्षितत्वात्। प्रकृते च कृतेत्यस्य तद्धितवृत्त्यन्तर्भूतत्वान्न तद्योगष्षष्ठीनिमित्तम्। नचैवं सति ओदनस्य पाचकतमः, ओदनस्य पाचकग्रहणम्, इत्यादौ षष्ठी न स्यात्। वृत्त्यनन्तर्भूतकृद्योगाभावात्। तथाच ओदनं पाचकतमः, ओदनं पाचकग्रहणम्, इति द्वितीयैव स्यादिति वाच्यम्। इष्टापत्तेः। अत एव मतुबधिकारे 'प्रज्ञाश्रद्धार्चाभ्यो णः' इत्यत्र 'प्राज्ञो व्याकरणम्' इति उदाहरिष्यते मूलकृता। नचैवं घटः क्रियते इत्यत्रापि कर्मणो विवक्षाभावमाश्रित्य भावलकारे सति अनन्तरं घटस्य कर्मत्वेनान्वयसम्भवात् अनभिहितत्वात् द्वितीया दुर्वारेति वाच्यम्। वैषम्यात्। कृतपूर्वीत्यत्र हि अलौकिकविग्रहदशायां कटशब्दस्यासन्निधानात् कर्मणो विवक्षा न सम्भवतीति भावे क्तप्रत्यय इति युक्तमाश्रयितुम्। क्रियते इत्यत्र तु न सम्भवत्येवाविवक्षा। कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपवृत्तिपञ्चकानन्तर्भूतत्वेन वृत्तिशून्यतया विग्रहाभावात्। तथाच वृत्तिविषय एवायं व्युत्पत्तिप्रकार इति प्राचीनमतानुसारी पन्थाः। शब्देन्दुशेखरे तु ओदनं पाचकतमः इत्यादौ द्वितीया असाधुरेव, षष्ठ्येव साधुरिति प्रपञ्चितम्। विस्तरभयान्नेह तल्लिख्यते। ननु भट्टिकाव्ये "ददैर्दुःखस्य मादृग्भ्यो धायैरामोदमुत्तमम्। लिंपैरिव तनोर्वातैः श्वेतयस्स्यात् ज्वलो न कः॥" इति श्लोकोऽस्ति। श्रीरामस्य विरहार्तस्य वाक्यमेतत्। अत्र दुःखस्येति तनोरिति च कर्मणि षष्ठी। मादृग्भ्यो दुःखं ददैर्ददद्भिः पुष्पादीनाम् आमोदं परिमळं धायैः पोषकैः तनोः तनुं शरीरं लिंपैः लिंपद्भिः कः चेतयः प्राणी ज्वलः ज्वलन्निव न स्यादित्यर्थः। अत्रामोदस्योत्तमस्येति कर्मणि षष्ठ्या भाव्यम्। धायशब्दस्य पोषणार्थकधाञ्धातोः 'ददातिदधात्योः' इति णप्रत्ययात्मककृदन्तत्वादिति चेन्न। उत्तममामोदं पुष्पादीनां गृहीत्वा

६२४ । उभयप्राप्तौ कर्मणि । (२-३-६६)

उभयोः प्राप्तिर्यस्मिन्कृति तत्र कर्मण्येव षष्ठी स्यात् । आश्चर्यो गवां दोहोऽगोपेन । 'स्त्रीप्रत्यययोरकाकारयोर्नायं नियमः' (वा १५१३) । भेदिका बिभित्सा वा रुद्रस्य जगतः । 'शेषे विभाषा' (वा १५१३) । स्त्रीप्रत्यये इत्येके । विचित्रा जगतः कृतिर्हरेः—हरिणा वा । 'केचिदविशेषेण विभाषामिच्छन्ति' । शब्दानामनुशासनमाचार्येण—आचार्यस्य वा ।

६२५ । क्तस्य च वर्तमाने । (२-३-६७)

वर्तमानार्थस्य क्तस्य योगे षष्ठी स्यात् । 'नलोक—' (सू ६२७) इति निषेधस्यापवादः । राज्ञां मतो बुद्धः पूजितो वा ।

दुःखस्य पोषकैरित्येवं गृहीत्वेत्यध्याहृत्य तद्योगे द्वितीयाया उपपत्तेः । **उभयप्राप्तौ कर्मणि** ॥ पूर्वसूत्रात् कृतीत्यनुवर्तते । उभयप्राप्ताविति बहुव्रीहिः । अन्यपदार्थः कृत् । तदाह । **उभयोः प्राप्तिर्यस्मिन् कृतीति** ॥ एकस्मिन् कृति उभयोः कर्तृकर्मणोः षष्ठीप्रसक्तौ कर्मण्येव षष्ठी स्यात्, नतु कर्तरीति यावत् । **आश्चर्य इति** ॥ अगोपकर्तृकः गोकर्मकः यो दोहः सः अद्भुत इत्यर्थः । उभयोः प्राप्ताविति षष्ठीसमासाश्रयणे तु ओदनस्य पाको ब्राह्मणानाञ्च प्रादुर्भाव इत्यत्रापि कर्मण्येव षष्ठी स्यान्न तु कर्तरि । बहुव्रीह्याश्रयणे तु एकस्यैव कृतो निमित्तत्वलाभात् भिन्नक्रियानिरूपितकर्तृकर्मणोः षष्ठीप्राप्तौ नायं नियम इति फलति । **स्त्रीप्रत्यययोरिति** ॥ वार्तिकमेतत् । 'स्त्रियां क्तिन्' इत्यधिकारविहितयोः अकाकारप्रत्यययोः कृतोः प्रयोगे कर्मण्येवेत्युक्तनियमो नास्तीत्यर्थः । कर्तर्यपि षष्ठी भवतीति फलितम् । **भेदिकेति** ॥ धात्वर्थनिर्देशे ण्वुल् । अकादेशः, टाप्, 'प्रत्ययस्थात्' इतीत्त्वम् । **बिभित्सेति** ॥ भिदेस्सन्नन्तात् 'अ प्रत्ययात्' इत्यकारप्रत्ययः, टाप्। रुद्रकर्तृकं जगत्कर्मकं भेदनं, भेदनेच्छा वेत्यर्थः । **शेषे विभाषेति** ॥ इदमपि वार्तिकम् । अकाकारप्रत्ययव्यतिरिक्तप्रत्यययोगे 'उभयप्राप्तौ' इति नियमो विकल्प्यत इत्यर्थः । **स्त्रीप्रत्यये इत्येके इति** ॥ उक्तो विकल्पः स्त्रीप्रत्यययोगे सत्येव भवतीति केचिन्मन्यन्ते इत्यर्थः । **विचित्रेति** ॥ हरिकर्तृका जगत्कर्मिका कृतिरित्यर्थः । **केचिदविशेषेणेति** ॥ अकाकारभिन्नस्त्रीप्रत्यये अस्त्रीप्रत्यये च कृति प्रयुज्यमाने उक्तविकल्प इत्यर्थः । **शब्दानामिति** ॥ आचार्यकर्तृकं शब्दकर्मकमनुशासनमित्यर्थः । अनुशासनमसाधुभ्यो विवेचनम् । **क्तस्य च वर्तमाने** ॥ ननु 'कर्तृकर्मणोः कृति' इत्येव सिद्धे किमर्थमिदमित्यत आह । **न लोकेति** ॥ **राज्ञां मतो बुद्धः पूजितो वेति** ॥ मनुधातोः बुधधातोः पूजधातोश्च 'मतिबुद्धिपूजार्थेभ्यश्च' इति वर्तमाने क्तप्रत्ययः । तत्र मतिरिच्छा । बुद्धेः पृथक् ग्रहणात् । राजकर्तृकवर्तमानेच्छाविषयः राजकर्तृकवर्तमानज्ञानविषयः राजकर्तृकवर्तमानपूजाश्रय इति क्रमेणार्थः । 'पूजितो यस्सुरासुरैः, त्वया ज्ञातो घटः'

६२६। अधिकरणवाचिनश्च। (२-३-६८)

क्तस्य योगे षष्ठी स्यात्। इदमेषामासितं शयितं गतं भुक्तं वा।

६२७। न लोकाव्ययनिष्ठाखलर्थतृनाम्। (२-३-६९)

एषां प्रयोगे षष्ठी न स्यात्। लादेशः। कुर्वन्—कुर्वाणो वा सृष्टिं हरिः। उः। हरिं दिदृक्षुः—अलङ्करिष्णुर्वा। उकः। दैत्यान्घातुको हरिः। कमेरनिषेधः। (वा १५१९)। लक्ष्म्याः कामुको हरिः। अव्ययम्। जगत्स्रष्टेति। हरिरास्ते इति शेषः। 'समानकर्तृकयोः' इति क्त्वाप्रत्ययः। 'क्त्वा तोसुन्कसुनौ' इति अव्ययत्वम्। सुखं कर्तुमिति॥ भक्तस्य हरिः प्रभवतीति शेषः। 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इति तुमुन्। 'कृन्मेजन्तः' इत्यव्ययत्वम्। इह कृदव्ययमेव गृह्यते

इत्यत्र तु भूते क्तप्रत्ययो बोध्यः। नच 'मतिबुद्धि' इत्यनेन भूतक्तस्य बाधश्शङ्क्यः। 'तेन' इत्यधिकारे उपज्ञात इति लिङ्गात् तदबाधज्ञापनादित्याहुः। **अधिकरणवाचिनश्च**॥ शेषपूरणेन सूत्रं व्याचष्टे। **क्तस्य योगे षष्ठीति**॥ **शयितमिति**॥ शेतेऽस्मिन्निति शयितम्। 'शीङ् स्वप्ने' 'क्तोऽधिकरणे च ध्रौव्य' इति क्तप्रत्ययः। तत्र एषामिति कर्तरि षष्ठी। 'न लोक' इति निषेधापवादः। भुजेस्तु प्रत्यवसानार्थकत्वात् अधिकरणे क्तप्रत्ययः। इदमेषां भुक्तमोदनस्य, इत्यत्र तु कर्तृकर्मणोर्द्वयोरपि षष्ठी। 'उभयप्राप्तौ' इति नियमस्तु न प्रवर्तते। मध्येऽपवादन्यायेन 'कर्तृकर्मणोः कृति' इति षष्ठ्या एव तन्नियमाभ्युपगमात्। **न लोक**॥ **एषामिति**॥ ल, उ, उक, अव्यय, निष्ठा, खलर्थ, तृन्, एषामित्यर्थः। उ, उक, इत्यत्र सवर्णदीर्घे सति ऊकेति भवति। ततः ल, ऊकेत्यत्र आद्गुणे लोकेति भवति। **लादेश इति**॥ अविभक्तिकनिर्देशोऽयं लादेशोदाहरणसूचनार्थः। ल इति लडादीनां सामान्येन ग्रहणम्। तेषाञ्च साक्षात्प्रयोगाभावात् तदादेशग्रहणमिति भावः। **कुर्वन् कुर्वाणो वेति**॥ लटश्शतृशानचौ। इह कर्मणि षष्ठीनिषेधात् द्वितीया। उ इत्युदाहरणसूचनमिदम्। उ इत्यनेन कृतो विशेषणात्तदन्तविधिः। **हरिं दिदृक्षुरिति**॥ दृशेस्सन्नन्तात् 'सनाशंसभिक्ष उः' इति उप्रत्ययः कृत्। व्यपदेशिवत्त्वेन उकारान्तोऽयं कृत्। हरिकर्मकदर्शनेच्छावानित्यर्थः। **अलङ्करिष्णुर्वेति**॥ हरिमित्यनुषज्यते। 'अलं कृञ्' इत्यादिना ताच्छील्यादाविष्णुच्। उवर्णस्यैव ग्रहणे त्वत्र निषेधो न स्यात्। **उक इति**॥ इदमपि तदुदाहरणसूचनार्थम्। **दैत्यान् घातुको हरिरिति**॥ 'आ क्त्रेस्तच्छीलतद्धर्मतत्साधुकारिषु' इत्यधिकारे 'लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ्' इति तच्छीलादिषु हनधातोः कर्तरि उकञ्प्रत्ययः, उपधावृद्धिः। 'हो हन्तेः' इति हस्य घत्वम्। 'हनस्तोऽचिण्णलोः' इति नकारस्य तकारः। घातनशीलः घातनधर्मा घातनसाधुकारी वेत्यर्थः। **कमेरिति**॥ वार्तिकमिदम्। उकान्तकमेर्योगे षष्ठ्या निषेधो नास्तीत्यर्थः। **लक्ष्म्याः कामुक इति**॥ 'लषपत' इत्यादिना उकञ्। **अव्ययमिति**॥ उदाहरणसूचनमिदम्। **जगत्स्रष्टेति**॥ हरिरास्ते इति शेषः। 'समानकर्तृकयोः' इति क्त्वाप्रत्ययः। 'क्त्वा तोसुन्कसुनौ' इति अव्ययत्वम्। **सुखं कर्तुमिति**॥ भक्तस्य हरिः प्रभवतीति शेषः। 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इति तुमुन्। 'कृन्मेजन्तः' इत्यव्ययत्वम्। इह कृदव्ययमेव गृह्यते

त्सृष्ट्वा । सुखं कर्तुम् । निष्ठा । विष्णुना हता दैत्याः । दैत्यान्हतवान्विष्णुः । खलर्थाः । ईषत्करः प्रपच्चो हरिणा । 'तृन्' इति प्रत्याहारः । 'शतृशानचौ' इति तृशब्दादारभ्य तृनो नकारात् । शानन् । सोमं पवमानः । चानश् । आत्मानं मण्डयमानः । शतृ । वेदमधीयन् । तृन् । कर्ता लोकान् । 'द्विषः शतुर्वा' (वा १५२२) । मुरस्य—मुरं वा द्विषन् । 'सर्वोऽयं कारकषष्ठ्याः प्रतिषेधः' । शेषे षष्ठी तु स्यादेव । ब्राह्मणस्य कुर्वन् । नरकस्य जिष्णुः ।

इति केचित् । वस्तुतस्तु अविशेषात् अकृदन्तमपीति तत्त्वम् । देवदत्तं हिरुक् । तत्कर्मकं वर्जनमित्यर्थः । **निष्ठेति** ॥ उदाहरणसूचनमिदम् । 'क्तक्तवतू निष्ठा' । **विष्णुना हता इति** ॥ अत्र भूते इति कर्मणि क्तः । कर्तरि षष्ठीनिषेधात्तृतीया । **दैत्यान् हतवानिति** ॥ भूते कर्तरि क्तवतुः । कर्मणि षष्ठीनिषेधात् द्वितीया । **खलर्था इति** ॥ उदाहरणसूचनमिदम् । **ईषत्कर इति** ॥ 'ईषदुस्सुषु कृच्छ्राकृच्छ्रार्थेषु खल्' इति कर्मणि खल् । अर्थग्रहणात् 'आतो युच्' इति खलर्थको युजपि गृह्यते । ईषत्पानस्सोमो भवता । ननु तृन्नित्यनेन यदि तृनेव गृह्येत, तर्हि सोमं पवमान इत्यादौ निषेधो न स्यादित्यत आह । **तृन्निति प्रत्याहार इति** ॥ कुत आरभ्य किमन्तानामित्यत आह । **शतृशानचाविति तृशब्दादारभ्य तृनो नकारादिति** ॥ लटश्शतृशानचावित्यत्र शत्रादेशस्य एकदेशस्तृशब्दः, तत आरभ्य 'तृन्' इति सूत्रस्थनकारपर्यन्तानामित्यर्थः । 'लटश्शतृशानचावप्रथमासमानाधिकरणे, सम्बोधने च, तौ सत्, पूङ्यजोश्शानन्, ताच्छील्यवयोवचनशक्तिषु चानश्, इङ्धार्योश्शत्रकृच्छ्रिणि, द्विषोऽमित्रे, सुञो यज्ञसंयोगे, अर्हः प्रशंसायाम्, आ क्रोस्तच्छीलतद्धर्मतत्साधुकारिषु, तृन्' इति सूत्रक्रमः । अत्र शानन्नादितृन्नन्तानां ग्रहणम्, ननु 'लटश्शतृ' इति तृशब्दस्यापि शत्रादेशैकदेशस्य । तस्य क्वापि पृथक् प्रयोगानर्हत्वात् । नापि शानचः । लादेशत्वादेव सिद्धेः इति स्थितिः । **शानन्निति** ॥ उदाहरणसूचनमिदम् । **सोमं पवमान इति** ॥ 'पूङ्यजोश्शानन्' । **आत्मानं मण्डयमान इति** ॥ 'मडि भूषायाम्' 'ताच्छील्यवयोवचन' इति चानश् । **शतृ इति** ॥ उदाहरणसूचनमिदम् । **वेदमधीयन्निति** ॥ 'इङ्धार्योः' इति शतृप्रत्ययः । **तृन्निति** ॥ उदाहरणसूचनमिदम् । **कर्ता लोकानिति** ॥ तृन्निति सूत्रेण तच्छीलादिषु तृन्प्रत्ययः । शानन्नादितृन्नन्तानां लादेशत्वाभावात् प्रत्याहाराश्रयणमिति बोध्यम् । **द्विषश्शतुर्वेति** ॥ शत्रन्तद्विषधातुयोगे षष्ठीनिषेधो वा वक्तव्य इत्यर्थः । **मुरस्य मुरं वा द्विषन्निति** ॥ 'द्विषोऽमित्रे' इति शतृप्रत्ययः । तस्य तृन्प्रत्याहारप्रविष्टत्वान्नित्यनिषेधे प्राप्ते विकल्पोऽयम् । **सर्वोऽयमिति** ॥ 'अनन्तरस्य' इति न्यायादिति भावः । **शेषे षष्ठी त्विति** ॥ शाब्दबोधे प्रकारवैलक्षण्यं फलमिति भावः । **ब्राह्मणस्य कुर्वन्निति** ॥ हविरिति शेषः । लटश्शत्रादेशः । मुखतो ब्राह्मणसम्बन्धिसृष्ट्यनुकूलव्यापारवानित्यर्थः । कर्मत्वविवक्षायान्तु द्वितीयैव । **नरकस्य जिष्णुरिति** ॥ 'ग्लाजिस्थश्च ग्स्नुः' इति तच्छीलादिषु ग्स्नुप्रत्ययः । नरकसम्बन्धिजयवानित्यर्थः । कर्मत्वविवक्षायान्तु द्वितीयैव ।

६२८। अकेनोर्भविष्यदाधमर्ण्ययोः। (२-३-७०)

भविष्यत्यकस्य भविष्यदाधमर्ण्यार्थेनश्च योगे षष्ठी न स्यात्। सतः पालकोऽवतरंति। व्रजं गामी। शतं दायी।

६२९। कृत्यानां कर्तरि वा। (२-३-७१)

षष्ठी वा स्यात्। मया—मम वा सेव्यो हरिः। 'कर्तरि' इति किम्। गेयो माणवकः साम्नाम्। 'भव्यगेय—' (सू २८९४) इति कर्तरि यद्विधानादनभिहितं कर्म। अत्र योगो विभज्यते। 'कृत्यानाम्' 'उभयप्राप्तौ'

अकेनोर्भविष्य ॥ नेत्यनुवर्तते। अकश्च इन् च तयोरिति विग्रहः। भविष्यच्च आधमर्ण्यञ्च तयोरिति द्वन्द्वः। यथासङ्ख्यं नेष्यते, भाष्यात्। भविष्यति आधमर्ण्ये च वर्तमानयोः योगे षष्ठी नेति फलितम्। तत्र आधमर्ण्यांशः अकेन नान्वेति। 'आवश्यकाधमर्ण्ययोर्णिनिः' इत्युक्तेः। अतः भविष्यदंश एवाके अन्वेति। इनेस्तु भविष्यदाधमर्ण्ययोरुभयोरप्यन्वयः। सम्भवात्। तदाह। **भविष्यत्यकस्येति** ॥ **भविष्यदाधमर्ण्यार्थेनश्चेति** ॥ भविष्यदर्थकस्य आधमर्ण्यार्थकस्य चेन इत्यर्थः। **सतः पालकः इति** ॥ सज्जनान् पालयिष्यन् हरिः प्रादुर्भवतीत्यर्थः। 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इति भविष्यति ण्वुल्। तत्र 'भविष्यति गम्यादयः' इत्यतः भविष्यतीत्यनुवृत्तेः। ओदनस्य पाचकः इत्यत्र तु न षष्ठीनिषेधः। 'ण्वुल्तृचौ' इत्यस्य भविष्यति विधानाभावात्। **व्रजं गामीति** ॥ 'गमेरिनिः' इत्यौणादिक इनिः। स च भविष्यति विहितः। 'भविष्यति गम्यादयः' इत्युक्तेः। गोष्ठं गमिष्यन्नित्यर्थः। **शतं दायीति** ॥ ऋणत्वेन गृहीतं शतमृणं प्रत्यर्पयतीत्यर्थः। 'आवश्यकाधमर्ण्ययोर्णिनिः' इत्याधमर्ण्ये णिनिः। तस्य भविष्यति विधानाभावात् भविष्यदर्थकतया गतार्थत्वं न शङ्क्यम्। **कृत्यानाम्** ॥ शेषपूरणेन सूत्रं व्याचष्टे। **षष्ठी वा स्यादिति** ॥ कृत्या इत्यधिकृत्य विहिताः कतिपयकृत्प्रत्ययविशेषाः, तद्योगे कर्तरि षष्ठी वा स्यादित्यर्थः। 'कर्तृकर्मणोः' इति नित्यं प्राप्ते विकल्पोऽयम्। **मया मम वा सेव्यो हरिरिति** ॥ 'षेवृ सेवायाम्' 'ऋहलोर्ण्यत्' इति कर्मणि ण्यत्प्रत्ययः। अस्मच्छब्दार्थस्य कर्तुः अनभिहितत्वात् षष्ठीतृतीये। **गेय इति** ॥ नन्विह साम्नः कर्मत्वस्य 'अचो यत्' इति यत्प्रत्ययाभिहितत्वात् कथं षष्ठीप्रसक्तिरित्यत आह। **भव्येति** ॥ ननु 'नेतव्या व्रजं गावः कृष्णेन' इत्यत्र कृत्यसंज्ञकतव्यप्रत्ययप्राप्तौ 'उभयप्राप्तौ' इति बाधित्वा कृष्णात् षष्ठीविकल्पस्स्यात्, व्रजात्तु 'कर्तृकर्मणोः कृति' इति नित्यं षष्ठी स्यादित्यत आह। **अत्र योगो विभज्यते इति** ॥ विभागप्रकारं दर्शयति। **कृत्यानामिति** ॥ **अनुवर्तते इति** ॥ तथाच कृत्ययोगे कर्तृकर्मणोरुभयोः प्रसक्ता षष्ठी नेत्यर्थः फलति। **नेतव्या व्रजमिति** ॥ 'गुणकर्मणि वेष्यते' इति व्रजाद्विकल्पस्तु न भवति। नेता अश्वस्य स्रुघ्नस्य स्रुघ्नं वेति उभयप्राप्तिरहिते कृत्यव्यतिरिक्ते चरितार्थस्य 'दोग्धव्याः गाः पयः कृष्णेन' इत्यादौ गुणकर्मणः

इति 'न' इति चानुवर्तते। तेन नेतव्या व्रजं गावः कृष्णेन। ततः 'कर्तरि वा' उक्तोऽर्थः।

६३०। तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्। (२-३-७२)

तुल्यार्थैर्योगे तृतीया वा स्यात्पक्षे षष्ठी। तुल्यः सदृशः समो वा कृष्णस्य कृष्णेन वा। अतुलोपमाभ्यां किम्। तुला उपमा वा कृष्णस्य नास्ति।

६३१। चतुर्थी चाशिष्यायुष्यमद्रभद्र-कुशलसुखार्थहितैः। (२-३-७३)

एतदर्थैर्योगे चतुर्थी वा स्यात्पक्षे षष्ठी। आशिषि, आयुष्यं चिरञ्जीवितं कृष्णाय—कृष्णस्य वा भूयात्। एवं मद्रं भद्रं कुशलं निरामयं सुखं शम् अर्थः प्रयोजयं हितं पथ्यं वा भूयात्। 'आशिषि' किम्। देवदत्तस्यायुष्यमस्ति। व्याख्यानात्सर्वत्रार्थग्रहणम्। मद्रभद्रयोः पर्यायत्वादन्यतरो न पठनीयः॥

इति षष्ठी विभक्तिः।

उक्तत्वेन प्रधानकर्मणि चरितार्थेनानेन परत्वात् बाधात्। **ततः कर्तरि वेति**॥ 'कृत्यानाम्' इति सूत्रप्रणयनानन्तरं कर्तरि वेति पृथक् प्रणेतव्यमित्यर्थः। **उक्तोऽर्थः इति**॥ 'कृत्यानाम्' इत्यनुवर्त्य कृत्ययोगे कर्तरि षष्ठी वा स्यादिति व्याख्येयमित्यर्थः। अनुभयप्राप्तिविषये मया मम वा सेव्यो हरिरित्यादाविदमवतिष्ठते। अथोपपदविभक्तयः। **तुल्यार्थैः**॥ शेषषष्ठ्यां नित्यं प्राप्तायां तृतीयाविकल्पोऽयम्। तुल्यैरिति बहुवचनादेव पर्यायग्रहणे सिद्धे अर्थग्रहणं पदान्तरनिरपेक्षश्चेत्तुल्यार्थस्तेषां ग्रहणार्थम्। तेन गौरिव गवय इत्यादौ नेत्याहुः। अतुलोपमाभ्यामिति पर्युदासात् अनव्ययोग एवेदमित्यन्ये। **चतुर्थी च॥ एतदर्थैरिति**॥ आयुष्य, मद्र, भद्र, कुशल, सुख, अर्थ, हित, एतदर्थकैरित्यर्थः। **पक्षे षष्ठीति**॥ चकारेण तत्समुच्चयावगमादिति भावः। आयुष्यपर्यायश्चिरञ्जीवितामिति। कुशलं निरामयमिति मद्रभद्रपर्यायौ। शमिति सुखपर्यायः। प्रयोजनमित्यर्थपर्यायः। पथ्यमिति हितपर्यायः। 'हितयोगे च' इति नित्यचतुर्थी तु नाशिषि ज्ञेया। ननु 'स्वं रूपम्' इति परिभाषया आयुष्यादिशब्दानामेव ग्रहणमुचितमित्यत आह। **व्याख्यानादिति**॥ ननु मद्रभद्रयोः पृथग्ग्रहणादेतदर्थैरिति व्याख्यानमयुक्तमित्यत आह। **मद्रभद्रयोरिति**॥

इति षष्ठी विभक्तिः।

अथ सप्तमी विभक्तिः।

६३२। आधारोऽधिकरणम्। (१-४-४५)

कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणसंज्ञः स्यात्।

६३३। सप्तम्यधिकरणे च। (२-३-३६)

अधिकरणे सप्तमी स्यात्, चकाराद्दूरान्तिकार्थेभ्यः। औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा। कटे आस्ते। स्थाल्यां पचति। मोक्षे इच्छास्तिं। सर्वस्मिन्नात्मास्ति। वनस्य दूरे अन्तिके वा। 'दूरान्तिकार्थेभ्यः—' (सू ६०५) इति विभक्तित्रयेण सह चतस्रोऽत्र विभक्तयः

अथ सप्तमी विभक्तिः—**आधारोऽधिकरणम्** ॥ कारके इत्यधिकृतं प्रथमान्ततया विपरिणम्यते, तच्च आधारस्य विशेषणम्, आधारः कारकमधिकरणमिति लभ्यते। क्रियान्वयि कारकम्। एवञ्च कस्याधार इत्याकाङ्क्षायाम् उपस्थितत्वात् क्रियाया इति लभ्यते। क्रिया च कर्तृकर्मगता विवक्षिता। तदाधारत्वञ्च न साक्षात्, किन्तु कर्तृकर्मद्वारैव। व्याख्यानात्। तदाह। **कर्तृकर्मद्वारेति** ॥ **तन्निष्ठेति** ॥ कर्तृकर्मनिष्ठेत्यर्थः। **सप्तम्यधिकरणे च** ॥ **चकाराद्दूरेति** ॥ 'दूरान्तिकार्थेभ्यो द्वितीया च' इति पूर्वसूत्रात् दूरान्तिकार्थेभ्य इत्यस्य चकारेणानुकर्षणादिति भावः। **औपश्लेषिक इति** ॥ उपश्लेषस्संयोगादिसम्बन्धः। तत्प्रयोज्य आधारः प्रथम इत्यर्थः। **वैषयिक इति** ॥ विषयतासम्बन्धकृत आधारः द्वितीय इत्यर्थः। **अभिव्यापक इति** ॥ सकलावयवव्याप्तिकृत आधारस्तृतीय इत्यर्थः। तत्र औपश्लेषिकं कर्तृद्वारकमाधारमुदाहरति। **कटे आस्ते इति** ॥ देवदत्त इति शेषः। तत्र साक्षाद्देवदत्तात्मककर्तृगतामासनक्रियां प्रति कटस्य संयोगसम्बन्धं पुरस्कृत्य देवदत्तद्वारा तदाधारत्वादधिकरणत्वम्। अथ कर्मद्वारकमौपश्लेषिकमाधारमुदाहरति। **स्थाल्यां पचतीति** ॥ तण्डुलानिति शेषः। अत्र साक्षात्तण्डुलात्मककर्मगतां पाककियां प्रति स्थाल्यास्संयोगसम्बन्धं पुरस्कृत्य तण्डुलद्वारा आधारत्वादधिकरणत्वम्। रूपे रूपत्वमस्ति, शरीरे चेष्टास्तीत्यादौ समवायेन औपश्लेषिकमाधारत्वमित्यादि ज्ञेयम्। अथ वैषयिकमाधारमुदाहरति। **मोक्षे इच्छास्तीति** ॥ अत्र कर्तृभूतेच्छागतां सत्ताक्रियां प्रति मोक्षस्य विषयतासम्बन्धपुरस्कारेण इच्छाधारत्वादधिकरणत्वम्। अथाभिव्यापकमाधारमुदाहरति। **सर्वस्मिन्नात्मास्तीति** ॥ अत्र आत्मरूपकर्तृगतां सत्ताक्रियां प्रति कृत्स्नव्याप्तिं पुरस्कृत्य आत्मद्वारा सत्ताधारत्वात्सर्वस्याधिकरणत्वम्। अथ चकारानुकृष्टदूरान्तिकार्थेभ्यः उदाहरति। **वनस्य दूरे अन्तिके वेति** ॥ दूरमन्तिकमित्यर्थः। प्रातिपदिकार्थमात्रे विधिरयम्। **विभक्तित्रयेणेति** ॥ द्वितीयापञ्चमीतृतीयाभिरित्यर्थः। वस्तुतस्तु उप समीपे श्लेषः सम्बन्धः तत्कृतमौपश्लेषिकमिति व्युत्पत्त्या सामीपिकमेवाधारत्वमौपश्लेषिकम्। "अत एव अधिकरणन्नाम त्रिप्रकारम्। व्यापकमौपश्लेषिकं वैषयिकमिति,

फलिताः । 'क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्' (वा १४८५) । अधीती व्याकरणे । अधीतमनेनेति विग्रहे 'इष्टादिभ्यश्च' (सू १८८८) इति कर्तरीनिः । 'साध्वसाधुप्रयोगे च' (वा १४८६) । साधुः कृष्णो मातरि, असाधुर्मातुले । 'निमित्तात्कर्मयोगे' (वा १४९०) । निमित्तमिह फलम् । योगः संयोगसमवायात्मकः ।

शब्दस्य तु शब्देन कोऽन्योऽभिसम्बन्धो भवितुमर्हति अन्यदत उपश्लेषात् । 'इको यणचि' अच्युपश्लिष्टस्य" इति संहितायाम् इत्यत्र भाष्यं सङ्गच्छते । अच्युपश्लिष्टस्य अच्समीपोच्चारितस्येत्यर्थ इति कैयटः । अत एव मासेऽतिक्रान्ते दीयत इत्यत्र मास औपश्लेषिकमधिकरणमिति 'तत्र च दीयते कार्यं भववत्' इत्यत्र भाष्यं सङ्गच्छते । अत एव च 'तदस्मिन्नधिकम् इति दशान्ताड्डः' इत्यत्र एकादश माषा अधिका अस्मिन् कार्षापणशते इत्यत्राधिकानां एकादशानां कथं शतमधिकरण-मित्याक्षिप्य व्यापकवैषयिकाधिकरणासम्भवात् औपश्लेषिकमधिकरणं विज्ञायत इति भाष्यं सङ्ग-च्छते । एवञ्च 'कटे आस्ते' इत्यादौ औपश्लेषिकाधारोदाहरणम्मूलोक्तमनुपपन्नमेव । उक्तभाष्य-विरोधात् । एवञ्च 'कटे आस्ते' इत्यादौ एकदेशव्याप्तया गौणमभिव्यापकाधारत्वम् । सर्वा-वयवव्याप्तिकृताधिकरणत्वमेव मुख्यम्, वैषयिकमौपश्लेषिकञ्च गौणमित्यर्थस्य भाष्यसम्मतत्वात् । अत एव 'स्वरितेनाधिकारः' इति सूत्रे 'साधकतमं करणम्' इति सूत्रे च भाष्ये "अधिकरण-माचार्यः किं मन्यते? यत्र कृत्स्नमाधारात्माव्याप्तो भवति, तर्हि इहैव सप्तमी स्यात्, 'तिलेषु तैलं, दधि सर्पिः' इति 'गङ्गायां घोषः, कूपे गर्गकुलम्' इत्यत्र तु न स्यात्। मुख्य एव कार्यसम्प्रत्यया-दित्याशङ्क्य स्वरितेनाधिकं कार्यं भवतीति वचनात् तमब्ग्रहणाच्च न दोषः" इति समाहितम् । एवञ्च 'कटे आस्ते, गङ्गायां घोषः' इत्यादौ गौणमप्यधिकरणं सप्तम्यर्थ एव । यदि तु 'गङ्गायां घोषः' इत्यादौ सामीपिकं अधिकरणत्वन्न विवक्ष्यते तदा लक्षणेति बोध्यम् । विस्तरस्तु शब्देन्दुशेखरे द्रष्टव्यः । **क्तस्येन्विषयस्येति** ॥ न च 'कृतपूर्वी कटम्' इत्यत्रापि सप्तमी शङ्क्या । इन्प्रत्ययान्तः यः क्तप्रत्ययान्तः तस्य कर्मणीत्यर्थाभ्युपगमात् । **कर्तरीनिरिति** ॥ भावक्तान्तात् अधीतशब्दात् कर्तरीनिप्रत्यये कृते अधीतीत्यस्याधीतवा-नित्यर्थः पर्यवस्यति । किम् अधीतवानिति कर्मविशेषजिज्ञासायां व्याकरणम् अध्ययने कर्मत्वे-नान्वेति । तच्च व्याकरणकर्मत्वन्न केनाप्यभिहितमिति कृतपूर्वी कटम्, इतिवत् द्वितीयायां प्राप्ता-यामनेन सप्तमीति भावः । **साध्वसाधुप्रयोगे चेति** ॥ सप्तमी वक्तव्येति शेषः । **साधु-रिति** ॥ हितकारीत्यर्थः । **असाधुरिति** ॥ अहितकारीत्यर्थः । उभयत्र शेषषष्ठ्यपवादः । 'साधुनिपुणाभ्यामर्चायाम्' इत्येव सिद्धे इह साधुग्रहणमनर्चार्थम् । यथा साधुर्भृत्यो राजनि। इह तत्त्वकथने तात्पर्यम् । साधुनिपुणाभ्यामित्यत्र साधुग्रहणस्य प्रयोजनं वक्ष्यते । **निमि-त्तादिति** ॥ कर्मयोगे हेतुवाचकाच्छब्दात् सप्तमी वाच्येत्यर्थः । ननु 'जाड्येन बद्धः' इत्यत्रापि सप्तमी स्यादित्यत आह । **निमित्तमिह फलमिति** ॥ फलमेवेत्यर्थः । इष्टसाधनताज्ञानस्य प्रवर्तकतया फलस्यापि हेतुत्वं बोध्यम् । जन्यजनकत्वादिसम्बन्धं व्यावर्तयितुमाह । **योगः**

'चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम्।
केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः॥' [इति भाष्यम्।]

हेतौ तृतीयात्र प्राप्ता। सीमा अण्डकोशः। पुष्कलको गन्धमृगः। 'योगविशेषे' किम्। वेतनेन धान्यं लुनाति।

६३४। यस्य च भावेन भावलक्षणम्। (२-३-३७)

यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमी स्यात्। गोषु दुह्यमानासु गतः। 'अर्हाणां कर्तृत्वेऽनर्हाणामकर्तृत्वे तद्वैपरीत्ये च' (वा १४८७-१४८८)। सत्सु तरत्सु असन्त आसते। असत्सु तिष्ठत्सु सन्तस्तरन्ति। सत्सु तिष्ठत्सु असन्तस्तरन्ति। असत्सु तरत्सु सन्तस्तिष्ठन्ति।

संयोगसमवायात्मक इति ॥ अयुतसिद्धयोस्सम्बन्धस्समवायः। अन्ययोस्तु संयोगः। **चर्मणीति** ॥ चर्मार्थं व्याघ्रं हन्तीत्यर्थः। अत्र द्वीपिना कर्मणा चर्मणः समवाय एव। अवयवावयविनोरयुतसिद्धत्वात्। **दन्तयोरिति** ॥ दन्तार्थमित्यर्थः। अत्र कुञ्जरेण कर्मणा दन्तयोस्समवाय एव। **केशेष्विति** ॥ केशार्थमित्यर्थः। चमरी मृगविशेषः। **सीम्नीति** ॥ सीमार्थमित्यर्थः। **हेतुतृतीया प्राप्तेति** ॥ तादर्थ्यचतुर्थ्यपीति बोध्यम्। **सीमा अण्डकोशः इति** ॥ "सीमा घट्टस्थितिक्षेत्रेष्वण्डकोशेषु च स्त्रियाम्" इति मेदिनी। **पुष्कलको गन्धमृगः इति** ॥ "अथ पुष्कलको गन्धमृगे क्षेपणकीलयोः" इति मेदिनी। अत्रापि पुष्कलकेन कर्मणा सीम्नस्समवाय एव। हरदत्तस्तु सीमा ग्रामादिमर्यादा। तस्याः ज्ञानार्थं पुष्कलकश्शङ्कुर्हतः निखात इति व्याचष्ट। अत्र पुष्कलकेन कर्मणा सीम्नस्संयोगो बोध्यः। **वेतनेनेति** ॥ अत्र वेतनं भृतिर्द्रव्यम्, तदर्थमित्यर्थः। अत्र वेतनस्य लूयमानस्य धान्यस्य च तादर्थ्यमेव सम्बन्धः, नतु संयोगः, नापि समवायः, इति भावः। **यस्य च** ॥ भावशब्दौ क्रियापर्यायावित्यभिप्रेत्य व्याचष्टे। **यस्य क्रिययेति** ॥ क्रिया च कर्त्राश्रया कर्माश्रया च। तत्र कर्माश्रयमुदाहरति। **गोष्विति** ॥ देवदत्तः कदा गत इति प्रश्ने उत्तरमिदम्। अत्र लक्षकत्वसम्बन्धे सप्तमी। शेषषष्ठ्यपवादः। वर्तमानदोहनविशिष्टाभिर्गोभिर्ज्ञाप्यगमनवानित्यर्थः। अत्र दोहनक्रियायाः साक्षाल्लक्षकता। गवान्तु तदाश्रयतया। ततश्च गोदोहनदशायां गत इत्युत्तरं पर्यवस्यति। दुग्धासु गत इत्यत्र तु अतीतदोहनविशिष्टाभिः गोभिर्ज्ञाप्यमानगमनवानित्यर्थः। गोदोहोत्तरकाले गत इति फलितम्। कर्तृगतक्रियायास्तु ब्राह्मणेष्वधीयानेषु गत इत्युदाहार्यम्। अत्र यदवश्यं पुनः पुनर्लक्ष्यज्ञापकं तदेव न लक्षणम्। किन्तु सकृत् ज्ञापकमपि। यथा। यं कमण्डलुपाणिं भवानद्राक्षीत् स च्छात्र इति। यद्यपि सकृदसौ कमण्डलुपाणिर्दृष्टः। तथापि तस्य कमण्डलुर्लक्षणं भवत्येवेति प्रकृतसूत्रे भाष्ये स्पष्टम्। 'उदिते आदित्ये जुहोति' इत्यत्र तु सामीपिकमधिकरणत्वं सप्तम्यर्थः। उदितादित्यसमीपकाल इत्यर्थः। आदित्योदयोत्तरसमीपकाल इति पर्यवसन्नोऽर्थः। 'उपरागे स्नायात्' इत्यत्र तु उपरागपदेन उपरागाश्रय-

६३५ । षष्ठी चानादरे । (२-३-३८)

अनादराधिके भावलक्षणे षष्ठीसप्तम्यौ स्तः । रुदति रुदतो वा प्राव्राजीत् । रुदन्तं पुत्रादिकमनादृत्य संन्यस्तवानित्यर्थः ।

६३६ । स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च । (२-३-३९)

एतैः सप्तभिर्योगे षष्ठीसप्तम्यौ स्तः । षष्ठ्यामेव प्राप्तायां पाक्षिक-सप्तम्यर्थं वचनम् । गवां–गोषु वा स्वामी । गवां–गोषु वा प्रसूतः । गा एवानुभवितुं जात इत्यर्थः ।

६३७ । आयुक्तकुशलाभ्यां चासेवायाम् । (२-३-४०)

आभ्यां योगे षष्ठीसप्तम्यौ स्तस्तात्पर्येऽर्थे । आयुक्तो व्यापारितः । आयुक्तः–कुशलो वा हरिपूजने–हरिपूजनस्य वा । 'आसेवायाम्' किम् । आयुक्तो गौः शकटे । ईषद्युक्त इत्यर्थः ।

कालो लक्ष्यत इत्यधिकरणसप्तम्येवेत्यन्यत्र विस्तरः। **षष्ठी चानादरे** ॥ चात्सप्तमीत्यनुकृष्यते। अनादरे इति विषयसप्तमी। 'यस्य च' इति पूर्वसूत्रमनुवर्तते। अनादरे गम्यमाने सति यस्य क्रियया क्रियान्तरं लक्ष्यते ततः षष्ठी सप्तमी चेत्यर्थः। फलितमाह। **अनादराधिके इति** ॥ अनादरो अधिको यस्मादिति विग्रहः। **रुदति रुदत इति** ॥ कदा सन्नयस्तवानिति प्रश्ने उत्तरमिदम्। अत्र लक्षकत्वं षष्ठीसप्तम्योरर्थः। अनादरविशिष्टं प्रव्रजनं धात्वर्थः। षष्ठी-सप्तम्यौ तात्पर्यग्राहिके। अनादरश्च लक्षकक्रियाश्रयपुत्रादिविषयः। वर्तमानरोदनक्रियाविशिष्ट-पुत्रादिज्ञाप्यं प्रव्रजनमित्यर्थः। फलितमाह। **रुदन्तं पुत्रादिकमिति** ॥ **स्वामीश्वर** ॥ **षष्ठी सप्तम्याविति** ॥ चकारेण तदुभयानुकर्षणादिति भावः। ननु शेषषष्ठ्यैव सिद्धे किमर्थमिह षष्ठीविधानमित्यत आह। **षष्ठ्यामेवेति** ॥ **गवां गोषु वेति** ॥ गोसम्बन्धीत्यर्थः। गवां गोषु वा ईश्वरः। गवां गोषु वा अधिपतिः। गवां गोषु वा दायादः। पुत्रादिभिर्ग्रहीतुं योग्यः पित्राद्यार्जितधनांशो दायः। तमादत्ते इति दायादः। 'आतश्चोपसर्गे' इति अङ्विधौ उपसर्ग-ग्रहणे सत्यपि अत एव निपातनात् कः। गोसम्बन्धिदायाद इत्यर्थः। गवाञ्च दाये अन्वयः। नित्यसाकाङ्क्षत्वाद्वृत्तिः। गवात्मकस्यांशस्य आदातेति फलितोऽर्थः। 'यस्मादधिकम्' इति सूत्रभाष्ये तु दायादशब्दः स्वामिपर्याय इति स्थितम्। **गवां गोषु वा प्रसूत इति** ॥ गोसम्बन्धीत्यर्थः। सम्बन्धश्च भोक्तृत्वरूपः। तदाह। **गा एवेति** ॥ एवशब्दात् महिषादि-व्यावृत्तिः। **आयुक्त** ॥ आसेवापदं व्याचष्टे। **तात्पर्ये इति** ॥ औत्सुक्ये इत्यर्थः। 'तत्परे प्रसि-तासक्ताविष्टार्थोद्युक्त उत्सुकः' इत्यमरः। आयुक्तपदं व्याचष्टे। **व्यापारित इति** ॥ प्रवर्तित इत्यर्थः। **आयुक्तः कुशलो वेति** ॥ हरिपूजनविषये आयुक्तः प्रवर्तित इत्यर्थः। अत्र वैषयिकाधिकरणत्व-विवक्षायां सप्तम्यामेव प्राप्तायां सम्बन्धमात्रविवक्षायां तु षष्ठ्यामेव प्राप्तायां वचनम्। **आयुक्तो**

६३८। यतश्च निर्धारणम्। (२-३-४१)

जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणं यतस्ततः षष्ठीसप्तम्यौ स्तः। नृणां—नृषु वा ब्राह्मणः श्रेष्ठः। गवां—गोषु वा कृष्णा बहुक्षीरा। गच्छतां—गच्छत्सु वा धावञ्छीघ्रः। छात्राणां—छात्रेषु वा मैत्रः पटुः।

६३९। पञ्चमी विभक्ते। (२-३-४२)

विभागो विभक्तं निर्धार्यमाणस्य यत्र भेद एव तत्र पञ्चमी स्यात्। माधुराः पाटलिपुत्रकेभ्य आढ्यतराः।

६४०। साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः। (२-३-४३)

गौरिति ॥ आडीषदर्थे। 'युजिर्योगे'। तदाह। **ईषद्युक्त इत्यर्थ इति** ॥ **यतश्च निर्धारणम्** ॥ **जातिगुणेति** ॥ यत इति तत इति च पञ्चम्यर्थे तसिः। यस्मात्समुदायात् एकदेशस्य जातिगुणक्रियासंज्ञाभिः पृथक्करणं स्वेतरव्यावृत्तधर्मविशेषवत्त्वबोधनं निर्धारणशब्दवाच्यं गम्यते तस्मात् षष्ठीसप्तम्यावित्यर्थः। अत्र स्वशब्देन एकदेश उच्यते। तत्र जात्या पृथक्करणमुदाहरति। **नृणां नृषु वेति** ॥ नृशब्दो मनुष्यसमुदाये वर्तते। उद्भूतावयवभेदविवक्षायां बहुवचनम्। द्विज इति तु जात्यभिप्रायमेकवचनम्। षष्ठीसप्तम्योः अवयवावयविभावस्सम्बन्धोऽर्थः उदाहृतनिर्धारणविषयत्वरूपश्च। ततश्च मनुष्यसमुदायैकदेशभूतो द्विजः स्वेतरव्यावृत्तश्रैष्ठ्यरूपधर्मक इत्यर्थः। गुणेन पृथक्करणमुदाहरति। **गवां गोषु वेति** ॥ गोसमुदायैकदेशभूता कृष्णा गौः स्वेतरव्यावृत्तबहुक्षीरत्वरूपधर्मिकेत्यर्थः। क्रियया पृथक्करणमुदाहरति। **गच्छतां गच्छत्सु वेति** ॥ गच्छत्समुदायैकदेशभूतो धावन् स्वेतरव्यावृत्तशैघ्र्यधर्मक इत्यर्थः। संज्ञया पृथक्करणमुदाहरति। **छात्राणामिति** ॥ छात्रसमुदायैकदेशभूतो मैत्रनामा स्वेतरव्यावृत्तपटुत्वधर्मक इत्यर्थः। **पञ्चमी विभक्ते** ॥ **विभागो विभक्तमिति** ॥ भावे क्तप्रत्ययाश्रयणादिति भावः। 'यतश्च निर्धारणम्' इत्यनुवर्तते। निर्धारणावधिभूतानां मनुष्यादीनां निर्धार्यमाणानां द्विजातीनाञ्च सामान्यात्मना अभेदो विशेषात्मना भेदश्च स्थितः। एवञ्च निर्धारणे सर्वत्र कथञ्चिद्भेदस्य सत्त्वात् विभक्त इत्यनेन भेद एवेत्यर्थो विवक्षितः। ततश्च यत्र निर्धारणावधेर्निर्धार्यमाणस्य च भेद एव, नतु केनाप्युपात्तरूपेण अभेदः, तत्रैवास्य प्रवृत्तिरित्यभिप्रेत्य आह। **निर्धार्यमाणस्येति** ॥ निर्धारणावधेरिति शेषः। 'यतश्च निर्धारणम्' इत्यनुवृत्तेः। अत्रावधिव्यावृत्तधर्मवत्त्वबोधनमेव, नतु समुदायादेकदेशस्येत्यंशो विवक्षितः। असम्भवादित्यभिप्रेत्योदाहरति। **माधुरा इति** ॥ अवधित्वं पञ्चम्यर्थः। मधुरादेशीयाः पाटलीपुत्रकदेशीयापेक्षया अतिशयेनाढ्या इत्यर्थः। अत्र मधुरादेशीयत्वपाटलीपुत्रकदेशीयत्वयोः गोत्वाश्वत्ववद्विरोधात् कथञ्चिदपि तद्रूपेण नाभेद इति निर्धारणावधेः पञ्चमीति भावः। **साधुनिपुणाभ्याम्** ॥ शेषषष्ठ्यपवादः। **मातरि साधुरिति** ॥ हितकारीत्यर्थः।

आभ्यां योगे सप्तमी स्यादर्चायाम्, नतु प्रतेः प्रयोगे । मातरि साधुर्निपुणो वा । 'अर्चायाम्' किम् । निपुणो राज्ञो भृत्यः । इह तत्त्वकथने तात्पर्यम् । 'अप्रत्यादिभिरिति वक्तव्यम्' (वा १४९३) । साधुर्निपुणो वा मातरं प्रति परि अनु वा ।

६४१ । प्रसितोत्सुकाभ्यां तृतीया च । (२-३-४४)

आभ्यां योगे तृतीया स्याच्चात्सप्तमी । प्रसित उत्सुको हरिणा--हरौ वा ।

६४२ । नक्षत्रे च लुपि । (२-३-४५)

नक्षत्रे प्रकृत्यर्थे यो लुप्संज्ञया लुप्यमानस्य प्रत्ययस्यार्थस्तत्र वर्तमानात्तृतीयासप्तम्यौ स्तोऽधिकरणे । 'मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत्' । मूले श्रवणे इति वा । 'लुपि' किम् । पुष्ये शनिः ।

६४३ । सप्तमीपञ्चम्यौ कारकमध्ये । (२-३-७)

शक्तिद्वयमध्ये यौ कालाध्वानौ ताभ्यामेते स्तः । अद्य भुक्त्वायं ह्यहे-ह्यहाद्वा भोक्ता । कर्तृशक्त्योर्मध्येऽयं कालः । इहस्थोऽयं क्रोशे-क्रोशाद्वा

निपुणो वेति ॥ मातरि कुशल इत्यर्थः । शुश्रूषायामिति शेषः । **निपुणो राज्ञ इति** ॥ साधुशब्दप्रयोगे तु अर्चां विनापि सप्तमी भवत्येव । 'साध्वसाधुप्रयोगे च' इत्युक्तेः । इह साधुग्रहणन्तु अर्चायां प्रत्यादियोगे सप्तमीनिवृत्त्यर्थम् । **अप्रत्यादिभिरिति** ॥ प्रति, परि, अनु, एतैर्योगे सति साधुनिपुणाभ्यां योगेऽपि न सप्तमीति भावः । **प्रसितोत्सुकाभ्याम्** ॥ 'तत्परे प्रसितासक्ताविष्टार्थोद्युक्त उत्सुकः' इत्यमरः । वैषयिकाधिकरणत्वे सप्तम्यामेव प्राप्तायामिदं वचनम् । **नक्षत्रे च लुपि** ॥ नक्षत्र इत्यनन्तरं प्रकृत्यर्थे सतीति शेषः । लुप्शब्देन लुप्संज्ञया लुप्तप्रत्ययार्थो विवक्षितः । तदाह । **नक्षत्रे प्रकृत्यर्थे इति** ॥ **अधिकरण इति** ॥ 'सप्तम्यधिकरणे च' इत्यतः मण्डूकप्लुत्या तदनुवृत्तेरिति भावः । **मूलेनेति** ॥ मूलनक्षत्रयुक्ते काले इत्यर्थः । 'नक्षत्रेण युक्तः कालः' इत्यण् । 'लुबविशेषे' इति तस्य लुप् । अधिकरणे किम् । मूलं प्रतीक्षते । नक्षत्र इति किम् । पञ्चालेषु तिष्ठति । इह 'जनपदे' इति लुप् । **सप्तमीपञ्चम्यौ** ॥ कारकशब्दः कर्तृत्वादिशक्तिपरः, न तु कर्त्रादिपरः, व्याख्यानात् । मध्यस्थावधिद्वयसापेक्षत्वात् कारकयोर्मध्यमिति विग्रहः । तदाह । **शक्तिद्वयमध्ये इति** ॥ 'कालाध्वनोरत्यन्तसंयोगे' इत्यनुवृत्त्य पञ्चम्यन्ततया 'विपरिणम्यते इत्याह । **यौ कालाध्वानाविति** ॥ **अद्य भुक्त्वेति** ॥ सामीपिकाधिकरणत्वे सप्तम्यामेव प्राप्तायां वचनम् । अद्य भुक्त्वा ह्यहे अतीते तत्समीपे तृतीयेऽह्नि भोक्तेत्यर्थः । भविष्यति लुट् । **कर्तृशक्त्योरिति** ॥ अद्यतनभुजिक्रियानिरूपितकर्तृत्वस्य ह्यहोत्तरदिनगतभुजिक्रियानिरूपितकर्तृत्वस्य चेत्यर्थः । कारकशब्दस्य

लक्ष्यं विध्येत्। कर्तृकर्मशक्त्योर्मध्येऽयं देशः। अधिकशब्देन योगे सप्तमी-पञ्चम्यौविष्येते। 'तदस्मिन्नधिकम्–' (सू १८४६) इति 'यस्मादधिकम्–' (सू ६४५) इति च सूत्रनिर्देशात्। लोके–लोकाद्वा अधिको हरिः।

६४४। अधिरीश्वरे। (१-४-९७)

स्वस्वामिसम्बन्धे अधिः कर्मप्रवचनीयसंज्ञः स्यात्।

६४५। यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी। (२-३-९)

अत्र कर्मप्रवचनीययुक्ते सप्तमी स्यात्। उप परार्धे हरेर्गुणाः। परार्धादधिका इत्यर्थः। ऐश्वर्ये तु स्वस्वामिभ्यां पर्यायेण सप्तमी। अधि भुवि रामः। अधि रामे भूः। 'सप्तमी शौण्डैः' (सू ७१७) इति समासपक्षे तु रामाधीना। 'अषडक्ष–' (सू २०७९) इत्यादिना खः।

कर्त्रादिपरत्वे त्विह न स्यात्। क्त्राप्रत्ययस्य कर्त्रैकत्वे विधानात्। कर्तृशक्तिस्तु भुजिक्रियाभेदात् भिद्यत एव। कारकद्वयमध्येऽप्युदाहरति। **इहस्थोऽयमिति** ॥ इहापि देशतस्सामीपिकमधिकरणत्वं पञ्चमीसप्तम्योरर्थः। इह तिष्ठन्नयं इष्वासः इषुणा क्रोशोत्तरसमीपदेशे लक्ष्यं विध्येदित्यर्थः। **कर्तृकर्मशक्त्योरिति** ॥ कर्तृत्वकर्मत्वरूपशक्त्योर्मध्ये इत्यर्थः। कारकशब्दस्य कर्त्रादिपरत्वे त्विहैव स्यात्। अद्य भुक्तायामित्यत्र न स्यादिति सूचयितुमिदमप्युदाहृतम्। ननु लोके लोकाद्वा अधिको हरिरित्यत्र अवधित्वसम्बन्धे शेषषष्ठ्यैवोचितेत्याशङ्क्य आह। **अधिकशब्देनेति** ॥ **लोके लोकाद्वेति** ॥ अवधित्वसम्बन्धस्सप्तमीपञ्चम्योरर्थः। लोकापेक्षया श्रेष्ठ इत्यर्थः। अधेः कर्मप्रवचनीयकार्यं वक्ष्यन् कर्मप्रवचनीयमाह। **अधिरीश्वरे** ॥ ईश्वरशब्देन ईश्वरत्वं स्वस्वामिभावसम्बन्धात्मकं विवक्षितम्। 'कर्मप्रवचनीयाः' इत्यधिकृतम् एकवचनान्ततया विपरिणम्यते। तदाह। **स्वस्वामीति** ॥ **यस्मादधिकम्** ॥ कर्मप्रवचनीययुक्ते इत्यनुवर्तते। तदाह। **अत्र कर्मप्रवचनीयेति** ॥ शेषषष्ठ्यपवादः। **उपपरार्धे इति** ॥ अवधित्वं सप्तम्यर्थः। तदाह। **परार्धादधिका इत्यर्थः इति** ॥ यस्मादधिकं सङ्ख्यान्तरं न विद्यते तत्परार्धम्। तदपेक्षयेत्यर्थः। 'उपोऽधिके च' इति उपेत्यस्य कर्मप्रवचनीयत्वस्येदं फलम्। यस्येश्वरवचनमित्यस्य यत्सम्बन्धी ईश्वर उच्यते ततस्सप्तमीत्येकोऽर्थः। इह यच्छब्देन स्वमुच्यते। एवञ्च स्ववाचकात्सप्तमीति लभ्यते। ईश्वरशब्दो भावप्रधानः। यस्येश्वरत्वमुच्यते ततस्सप्तमी इत्यन्योऽर्थः। यन्निष्ठमीश्वरत्वमुच्यते ततस्सप्तमीति यावत्। एवञ्च स्वामिवाचकात्सप्तमीति लभ्यते। तदाह। **ऐश्वर्ये तु स्वस्वामिभ्यां पर्यायेण सप्तमीति** ॥ **अधिभुवि राम इति** ॥ अधिरीश्वरपर्यायः। सम्बन्धस्सप्तम्यर्थः। भुवः स्वामी राम इत्यर्थः। अत्र स्ववाचकात्सप्तमी। **अधिरामे भूरिति** ॥ अत्र अधिः स्वशब्दपर्यायः। सम्बन्धस्सप्तम्यर्थः। रामस्य स्वभूता भूरित्यर्थः। अत्र स्वामिवाचकात्सप्तमी। **समासपक्षे त्विति** ॥ शौण्डादिगणे अधिशब्दस्य पठितत्वेन तेनाधिशब्देन रामे इति

६४६ । विभाषा कृञि । (१-४-९८)

अधिः करोतौ प्राक्संज्ञो वा स्यादीश्वरेऽर्थे । यदत्र मामधिकरिष्यति । विनियोक्ष्यते इत्यर्थः । इह विनियोक्तुरीश्वरत्वं गम्यते । अगतित्वात् 'तिङि चोदात्तवति' (सू ३९७८) इति निघातो न ॥

इति सप्तमी विभक्तिः ।

इति कारकादिविभक्तिप्रकरणम् ।

सप्तम्यन्तस्य समासे सति 'सुपो धातु' इति सुब्लुकि रामाधिशब्दात् 'अषडक्षाशितङ्ग्वलङ्कर्मालम्पुरुषाध्युत्तरपदात् खः' इति खप्रत्यये 'आयनेयीनीयियः' इति तस्य ईनादेशे रामाधीना भूरिति सिद्ध्यति । रामस्वामिकेत्यर्थः । विभक्त्यर्थे अव्ययीभावे त्वधिरामं भूः । रामाधिकरणिका भूरित्यर्थः । खप्रत्ययस्तु न । अध्युत्तरपदत्वाभावात् । **विभाषा कृञि** ॥ 'अधिरीश्वरे' इत्यनुवर्तते । कर्मप्रवचनीया इत्यधिकृतम् । तदाह । **अधिः करोताविति** ॥ कृञ्धातौ परे अधिः कर्मप्रवचनीयो वा स्यादीश्वरत्वे इति यावत् । **यदत्र मामधिकरिष्यतीति** ॥ अस्मिन्विषये मामधिकरिष्यतीति यत्तद्युक्तमित्यर्थः । अत्र कर्मप्रवचनीययोगे मामिति द्वितीया। अधिकरिष्यतीत्येतत् व्याचष्टे । **विनियोक्ष्यत इत्यर्थः इति** ॥ तर्हि कर्मत्वादेव द्वितीयासिद्धेः किं कर्मप्रवचनीयत्वेनेत्यत आह । **अगतित्वादिति** ॥ **तिङि चेति** ॥ उदात्तवति तिङि परे गतिर्निहन्यत इति तदर्थः । अत्र करिष्यतीति तिङन्तमुदात्तवत् । 'तिङ्ङतिङः' इति निघातस्य 'निपातैर्यत्' इत्यादिना निषेधात् । ततश्च अधेरत्र गतित्वान्निघातः इह प्राप्तः । कर्मप्रवचनीयत्वे तु स न भवति । तेन गतित्वस्य बाधात् । अतः अधर्निघाताभावार्थमिदं सूत्रमिति सिद्धम् ॥

इति श्रीमद्वासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां
बालमनोरमाख्यायां विभक्त्यर्थनिरूपणं समाप्तम् ।

श्रीरस्तु ।

॥ अथाव्ययीभावसमास प्रकरणम् ॥

६४७ । समर्थः पदविधिः । (२-१-१)

पदसम्बन्धी यो विधिः स समर्थाश्रितो बोध्यः ।

तदेवं विभक्त्यर्थं निरूप्य तदाश्रितसमासान्निरूपयिष्यन् तदुपोद्घातत्वेनाह—**समर्थः पदविधिः** ॥ विधीयते इति विधिः कार्यम् । पदस्य विधिः पदविधिरिति शेषषष्ठ्या समासः । तदाह । **पदसम्बन्धी यो विधिरिति** ॥ **समर्थाश्रित इति** ॥ सूत्रे समर्थशब्दस्समर्थाश्रिते लाक्षणिक इति भावः । सामर्थ्यं द्विविधम् । 'व्यपेक्षालक्षणम्, एकार्थीभावलक्षणञ्च । तत्र स्वार्थपर्यवसायिनां पदानामाकाङ्क्षादिवशाद्यः परस्परान्वयः तत् व्यपेक्षाभिधं सामर्थ्यम् । विशिष्टा अपेक्षा व्यपेक्षेति व्युत्पत्तेः । सम्बन्धार्थस्समर्थ इति व्युत्पत्तेश्च । इदञ्च राज्ञः पुरुष इत्यादिवाक्य एव भवति । तत्र च एकैकस्य शब्दस्य यो यस्मिन्निहितो योग्यश्च तेन तेनान्वयो भवति । यथा राज्ञः पुरुषोऽश्वश्चेति, राज्ञो देवदत्तस्य च पुरुष इति, ऋद्धस्य राज्ञः पुरुषः, इति च । एकार्थीभावलक्षणसामर्थ्यन्तु प्रक्रियादशायां प्रत्येकमर्थवत्त्वेन पृथक् गृहीतानां पदानां समुदायशक्त्या विशिष्टैकार्थप्रतिपादकतारूपम् । सङ्गतार्थस्समर्थः, संसृष्टार्थस्समर्थ इति व्युत्पत्तेः । सङ्गतिस्संसर्गश्च एकीभाव एव । यथा सङ्गतं घृतं तैलेनेति, एकीभूतमिति गम्यते । यथा वा संसृष्टाऽग्निरिति, एकीभूत इति गम्यत इति भाष्याच्च । इदञ्च सामर्थ्यं राजपुरुष इत्यादिवृत्तावेव । अत एव ऋद्धस्य राजपुरुष इत्येवं राज्ञि पुरुषविशेषणे ऋद्धत्वविशेषणन्नान्वेति । विशिष्टस्य एकपदार्थतया राज्ञः पदार्थैकदेशत्वात् । देवदत्तस्य गुरुकुलमित्यत्र तु उपसर्जनस्य नित्यसापेक्षत्वात् समासः । यदा गुरुवद्देवदत्तोऽपि विशेष्ये प्रधाने कुल एवान्वेति, तत्र गुरुणा कुलस्य उत्पाद्यत्वसम्बन्धेनान्वयः । देवदत्तेन तु कुलस्य तदीयगुरूत्पाद्यतयाऽन्वयो गुरुगर्भः । उक्तञ्च हरिणा—"सम्बन्धिशब्दस्सापेक्षो नित्यं सवस्समस्यते । वाक्यवत् सा व्यपेक्षा हि वृत्तावपि न हीयते ॥" इति । "समुदायेन सम्बन्धो येषां गुरुकुलादिना । *संसृष्टावयवास्ते तु युज्यन्ते तद्वता सह ॥" इति च । एतेन 'अयश्शूल' इति सूत्रे भाष्ये 'शिवस्य भक्तः' इत्यर्थे शिवभागवतः इत्यादि व्याख्यातम् । एकार्थीभावश्चायम् अलौकिकविग्रहवाक्ये कल्प्यते । यथा लादेशभूतशतृशानचोः अप्रथमासामानाधिकरण्यं लकारेऽपि कल्प्यते तद्वत् । अत एव 'लस्य अप्रथमासमानाधिकरणेनार्थेनायोगादादेशेऽनुपपत्तिः, तस्य क्वापि प्रयोगाभावादित्याक्षिप्य

---

*"संसृष्टावयवास्ते तु युज्यन्ते तद्वता सह" इति पाठान्तरम् ।

६४८ । प्राक्कडारात्समासः । (२-१-३)

'कडाराः कर्मधारये' (सू ७५१) इत्यतः प्राक्समास इत्यधिक्रियते ।

६४९ । सह सुपा । (२-१-४)

'सह' इति योगो विभज्यते । सुबन्तं समर्थेन सह समस्यते । योगविभागस्येष्टसिद्ध्यर्थत्वात्कतिपयतिङन्तोत्तरपदोऽयं समासः । स च छन्दस्येव ।

आदेशे सामानाधिकरण्यन्दृष्ट्वा अनुमानात् गन्तव्यं प्रकृतेरपि तद्भवति' इति 'लटश्शतृशानचौ' इति सूत्रभाष्ये समाहितम् । 'सिद्धानां शब्दानामन्वाख्यानात् पचन्तन्दवदत्तं पश्येत्यादिप्रयोगदर्शनात् स्थानिनोऽपि लस्य प्राक्रियार्थं कल्पितस्य अप्रथमासामानाधिकरण्यमनुमीयते' इति कैयटः । अत्र प्रक्रियार्थं कल्पितस्येत्युक्त्या अन्यस्यापि प्राक्रियार्थं कल्पितस्य बोधकत्वकल्पना सूचिता । अलौकिकविग्रहवाक्ये श्रूयमाणानाञ्च शब्दानां क्लृप्तशक्तित्यागे मानाभावात् । प्रत्येकशक्तिसहकृतया समुदायशक्त्या विशिष्टोपस्थितिः । ततश्च अयमेकार्थीभावः अजहत्स्वार्था वृत्तिरिष्यते । वृत्तिविषये पदानां प्रत्येकमनर्थकत्वमाश्रित्य जहत्स्वार्था वृत्तिस्तु नाश्रयितुं युक्ता । महाबाहुः सुपन्थाः इत्यादौ आत्त्वाद्यनापत्तेः । वृत्तौ महदादिशब्दानामनर्थकत्वात् । अर्थवद्ग्रहणसम्भवे अनर्थकस्य 'आन्महतः' इत्यादौ ग्रहणायोगात् । तदुक्तम् । "जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनी" इति । अवयवार्थविरुद्धो यत्र समुदायार्थस्तत्रैव सेति तदर्थः । यथा अश्वकर्णपाण्डवादौ । विस्तरस्तु शब्देन्दुशेखरे मञ्जूषायाञ्चानुसन्धेयः । समर्थः किम् । पश्य कृष्णं श्रितो राममित्रम् । अत्र कृष्णश्रितयोः परस्परान्वयाभावाद्विशिष्टकार्थोपस्थित्यजनकत्वान्न सामर्थ्यम् । **प्राक्कडारात्** ॥ 'आकडारात्' इत्येव प्रागिति सिद्धे प्राग्ग्रहणमेकसञ्ज्ञाधिकारेऽपि अव्ययीभावादिसंज्ञासमुच्चयार्थमिति भाष्ये स्पष्टम् । सम्पूर्वकस्य अस्यतेरेकीकरणात्मकस्संश्लेषोऽर्थः । समस्यते अनेकं पदमिति समासः । 'अकर्तरि च कारके संज्ञायाम्' इति कर्मणि घञ् । अत एव मूले समस्यते इति वक्ष्यते । तथाच अन्वर्थेयं संज्ञा । **सह सुपा** ॥ 'सुबामन्त्रिते' इत्यतः सुबित्यनुवर्तते । सुबन्तं सुबन्तेन सहोच्चारितं समाससञ्ज्ञं भवतीति फलति । एवं सति पर्यभूषयदित्यादौ सुबन्तस्य तिङन्तेन समासो न स्यात् । तत्राह । **सहेति योगो विभज्यते इति** ॥ समाससंज्ञाया अन्वर्थत्वादेकस्याप्रसङ्गात् सुपेत्येतावतैव सहेति सिद्धे तद्ग्रहणं योगविभागार्थमिति भावः । सहेत्यत्र 'सुबामन्त्रिते' इत्यतस्सुबित्यनुवर्तते । प्रत्ययग्रहणपरिभाषया तदन्तग्रहणम् । 'समर्थः पदविधिः' इत्यतः समर्थग्रहणमनुवृत्तं तृतीयया विपरिणम्यते । तदाह । **सुबन्तमित्यादिना** ॥ **समस्यत इति** ॥ एकीक्रियते प्रयोक्तृभिरित्यर्थः । समाससंज्ञां लभते इति यावत् । केचित्तु सुबन्तं कर्तृ समर्थेन समस्यते एकीभवतीत्यर्थः । कर्तरि लट् । 'उपसर्गादस्यत्यूह्योः' इत्यात्मनेपदम् । समासशब्दोऽपि कर्तरि बाहुलकाद्घञन्त एव, कर्मणि घञन्तो वा । तथा सति समस्यत इति कर्तरि तिङन्तं फलितार्थकथनपरमित्याहुः । ननु घटो भवतीत्यत्र समासे घटभवतीत्यपि लोके प्रयोगस्स्यादित्यत आह । **योगविभागस्येति** ॥ **कतिपयेति** ॥ कतिपयानि तिङन्तानि उत्तरपदानि यस्येति

पर्यभूषयत्। अनुव्यचलत्। 'सुपा'। सुप्सुपा सह समस्यते। समासत्वात्प्रातिपदिकत्वम्।

६५०। सुपो धातुप्रातिपदिकयोः। (२-४-७१)

एतयोरवयवस्य सुपो लुक्स्यात्। 'भूतपूर्वे चरट्' (सू १९९९) इति निर्देशाद्भूतशब्दस्य पूर्वनिपातः। पूर्वं भूतो भूतपूर्वः। 'इवेन समासो विभक्त्यलोपश्च' (वा १२३६, १३४१)। जीमूतस्येव।

विग्रहः। **पर्यभूषयदिति** ॥ समासान्तोदात्तत्वे शेषनिघात इति 'कुगति' इति सूत्रे कैयटः। देवो देवान् क्रतुना पर्यभूषयदित्यत्र तु स्वरव्यत्ययो बोध्यः। **अनुव्यचलदिति** ॥ अचलदित्यनेन वेः पूर्वं समासे सति तेन अनोस्समासः। नत्वनुव्योर्युगपत्समासः। सुबित्येकत्वस्य विवक्षितत्वात्। अत एव महिष्या अजायाश्च क्षीरमित्यत्र क्षीरशब्देन सुबन्तयोर्न समास इति कैयटः। **सुपा** ॥ 'सुयामन्त्रिते' इत्यतस्सुबित्यनुवर्तते। समासे इत्यधिकृतम्। तदाह। **सुप्सुपेति** ॥ सुबन्तं सुबन्तेनेत्यर्थः। ततश्च पूर्वं भूत इति विग्रहे समाससंज्ञा स्थिता। **समासत्वात् प्रातिपदिकसंज्ञेति** ॥ 'कृत्तद्धितसमासाश्च' इत्यनेनेति शेषः। **सुपो धातु** ॥ धातुप्रातिपदिकयोरित्यवयवषष्ठ्यात्याह। **एतयोरवयवस्येति** ॥ **लुक स्यादिति** ॥ 'ण्यक्षत्रियार्षञितो यूनि लुक्' इत्यतस्तदनुवृत्तेरिति भावः। न च सुपः इत्यनेन सप्तम्यबहुवचनस्यैव ग्रहणं किन्न स्यादिति वाच्यम्। 'पञ्चम्याः स्तोकादिभ्यः' इत्यलुग्विधानात्। सुप्प्रत्याहारस्यैवात्र ग्रहणमिति ज्ञापनात्। नचैवमपि पूर्वं भूत इति लौकिकविग्रहवाक्ये परिनिष्ठितसन्धिकार्ययोस्सुबन्तयोस्समासे सति पूर्वमित्यत्र अमि पूर्वरूपस्य एकादेशस्य परादित्वमाश्रित्य अमो लुकि समासदशायां वकारादकारो न श्रूयेत। पूर्वान्तत्वे तु परिशिष्टस्य मकारस्य सुप्त्वाभावात् कथं लुगिति वाच्यम्। 'सुपो धातु' इति लुग्विषये 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते' इत्याश्रित्य सन्धिकार्यप्रवृत्तेः प्रागेवालौकिकविग्रहवाक्ये समासप्रवृत्तिरिति 'प्रत्ययोत्तरपदयोश्च' इति सूत्रभाष्ये स्थितम्। 'कृत्तद्धितसमासाश्च' इत्यत्र प्रौढमनोरमायामपि परिष्कृतमिदम्। 'भस्त्रैषा' इति सूत्रव्याख्यावसरे प्रपञ्चितञ्चास्माभिः। एवञ्च पूर्वं अम् भूत सु इत्यलौकिकविग्रहदशायामेव अमो लुक्प्रवृत्तेर्नोक्तदोषः। तथाच सुपो लुकि भूतपूर्वेति स्थितम्। ननु 'सुबन्तं सुबन्तेन समस्यते' इति समासशास्त्रे सुबन्तं प्रथमानिर्दिष्टम्। सुबन्तत्वञ्च द्वयोरप्यविशिष्टम्। ततश्च प्रथमानिर्दिष्टं समास उपसर्जनम्, इति वक्ष्यमाणोपसर्जनत्वस्य द्वयोरप्यविशिष्टत्वात् 'उपसर्जनं पूर्वम्' इत्यन्यतरस्य पूर्वनिपाते विनिगमनाविरह इत्यत आह। **भूतपूर्वं चरडिति** ॥ **पूर्वं भूत इति** ॥ लौकिकविग्रहोऽयम्। पूर्वमिति क्रियाविशेषणम्। **भूतपूर्व इति** ॥ समासत्वेन प्रातिपदिकत्वात् समुदायात् पुनर्यथायथं सुबुत्पत्तिरिति भावः। **इवेनेति** ॥ इवेत्यव्ययेन सुबन्तस्य समासः। 'सुपो धातु' इति लुगभावः। पूर्वपदस्य प्रकृतिसिद्धस्वरश्च भवति, नतु समासस्वर इति वक्तव्यमित्यर्थः। 'सह सुपा' इति सिद्धे समासविधानमिवशब्दस्य पूर्वनिपातनिवृत्त्यर्थम्।

६५१ । अव्ययीभावः । (२-१-५)

अधिकारोऽयम् ।

६५२ । अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्यया-सम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्य-सम्पत्तिसाकल्यान्तवचनेषु । (२-१-६)

'अव्ययम्' इति योगो विभज्यते । अव्ययं समर्थेन सह समस्यते । सोऽव्ययीभावः ।

६५३ । प्रथमानिर्दिष्टं समास उपसर्जनम् । (१-२-४३)

समासशास्त्रे प्रथमानिर्दिष्टमुपसर्जनसंज्ञं स्यात् ।

अन्यथा अत्र इवशब्दस्यापि सुबन्तत्वाविशेषात् समासशास्त्रे प्रथमानिर्दिष्टत्वेनोपसर्जनत्वात् पूर्वनिपातस्स्यात् । **जीमूतस्येवेति** ॥ अत्र जीमूतशब्दस्य पूर्वपदस्य फिट्स्वरेणान्तोदात्तत्वमेव, नतु समासस्येत्यन्तोदात्तत्वम् । अत्र यथार्थत्वप्रयुक्तोऽव्ययीभावस्तु न । 'तत्र तस्येव' इति निर्देशात् । क्वाचित्कश्चायं समासः । अत एव बह्वृचा एव पदपाठे अवगृह्णन्ति । याजुषास्तु भिन्ने एव पदे पठन्ति । 'उद्वाहुरिव वामनः' इत्यादिव्यस्तप्रयोगाश्च सङ्गच्छन्ते । 'हरीतकीं भुङ्क्ष्व राजन् मातेव हितकारिणीम्' इत्यत्र तु मातरमिवेति भवितव्यम् । 'तिङ्समानाधिकरणे प्रथमा' 'अभिहिते प्रथमा' इति वार्तिकस्वारस्येन प्रथमायाः कारकविभक्तित्वोक्तिपरभाष्येण च क्रियायोग एव प्रथमायाः प्रवृत्त्या मातेति प्रथमायाः मातृसदृशीमित्यर्थे असाधुत्वादित्यास्तान्तावत् । **अव्ययीभावः** ॥ **अधिकारोऽयमिति** ॥ एकसंज्ञाधिकारेऽपि अनया सञ्ज्ञया समाससंज्ञा न बाध्यते इति 'प्राक्कडारात्' इत्यत्रोक्तम् । **अव्ययं विभक्ति** ॥ विभक्त्यर्थाद्यभावेऽप्यपदिशमित्यादि साधयितुमाह । **अव्ययमिति** ॥ **योगो विभज्यत इति** ॥ अत्र 'समर्थः पदविधिः' इत्यत्तस्समर्थग्रहणमनुवृत्तं तृतीयान्ततया विपरिणम्यते । समास इति अव्ययीभाव इति चाधिकृतम् । तदाह । **अव्ययं समर्थेनेति** ॥ **सोऽव्ययीभाव इति** ॥ स समासः अव्ययीभावसंज्ञस्स्यादित्यर्थः । तथाच दिशयोर्मध्यमित्यस्वपदविग्रहे मध्यार्थकस्य अपेत्यव्ययस्य दिशयोरित्यनेन समाससंज्ञा । तस्य समासस्याव्ययीभावसंज्ञा च सिद्धा । तथाच समासत्वात् प्रातिपदिकत्वे 'सुपो धातु' इति सुब्लुकि सति दिशा अप इति स्थितम् । अत्र उपसर्जनकार्यं वक्ष्यन्नुपसर्जनसंज्ञामाह । **प्रथमानिर्दिष्टम्** ॥ ननु समासे प्रथमानिर्दिष्टमुपसर्जनम् इति व्याख्याने असम्भवः । समासे सति, 'सुपो धातु' इति प्रथमायाः लुप्तत्वात् । समासे चिकीर्षिते प्रथमानिर्दिष्टम् इति व्याख्याने तु 'कृष्णं श्रितः कृष्णश्रितः' इत्यत्र विग्रहे कृष्णशब्दस्य द्वितीयानिर्दिष्टत्वादुपसर्जनत्वन्न स्यात् । श्रितशब्दस्य प्रथमानिर्दिष्टत्वादुपसर्जनत्वं स्यात् । अतो व्याचष्टे । **समासशास्त्रे इति** ॥ समासपदं समासविधायकशास्त्र-

६५४। उपसर्जनं पूर्वम्। (२-२-३०)

समासे उपसर्जनं प्राक्प्रयोज्यम्।

६५५। एकविभक्ति चापूर्वनिपाते। (१-२-४४)

विग्रहे यन्नियतविभक्तिकं तदुपसर्जनसंज्ञं स्यात्, न तु तस्य पूर्वनिपातः।

६५६। गोस्त्रियोरुपसर्जनस्य। (१-२-४८)

उपसर्जनं यो गोशब्दः स्त्रीप्रत्ययान्तं च तदन्तस्य प्रातिपदिकस्य ह्रस्वः स्यात्। 'अव्ययीभावश्च' (सू ४५१) इत्यव्ययत्वम्।

परमिति भावः। एवञ्च 'द्वितीया श्रित' इति समासविधायकशास्त्रे द्वितीयान्तस्यैव कृष्णशब्दस्य द्वितीयेति प्रथमानिर्दिष्टत्वादुपसर्जनत्वम्। एवञ्च 'अव्ययम्' इति समासविधावपेत्यस्य प्रथमानिर्दिष्टत्वादुपसर्जनत्वं स्थितम्। **उपसर्जनं पूर्वम्** ॥ प्राक्डारात् समासः इत्यधिकृतम्। समास इति प्रथमान्तं योग्यतया सप्तम्यन्तं विपरिणम्यते। तदाह। **समासे उपसर्जनं प्राक् प्रयोज्यमिति** ॥ पूर्वमित्यस्य पूर्वं प्रयोज्यमित्यर्थ इति भावः। एवञ्च प्रकृते अपेत्यस्य पूर्वं प्रयोगनियमः सिद्धः। अपदिशा इति स्थितम्। अत्र दिशाशब्दस्यापि उपसर्जनत्वमाह। **एकविभक्ति** ॥ 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इत्यतस्समास इति उपसर्जनमिति चानुवर्तते। समास इत्यनेन विग्रहवाक्यं लक्ष्यते। एकैव विभक्तिर्यस्य तदेकविभक्ति। नियतविभक्तिकमिति यावत्। एवञ्च विग्रहे यन्नियतविभक्तिकं तत्पूर्वनिपातभिन्नकार्ये कर्तव्ये उपसर्जनं स्यादित्यर्थः। फलितमाह। **विग्रहे यन्नियतेति** ॥ निष्कौशाम्बिशब्द उदाहरणम्। तत्र कौशाम्ब्याः निष्क्रान्तः निष्क्रान्तं निष्क्रान्तेन निष्क्रान्ताय निष्क्रान्तात् निष्क्रान्तस्य निष्क्रान्ते इति विग्रहेषु 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' इति समासे निष्कौशाम्बिः निष्कौशाम्बि निष्कौशाम्बिना इत्यादि इति स्थितिः। अत्र कौशाम्बीशब्द एव विग्रहे नियतविभक्तिक इति तस्योपसर्जनत्वमनेन भवति। समासशास्त्रे कौशाम्बीशब्दस्य पञ्चमीनिर्दिष्टत्वमेव, न तु प्रथमानिर्दिष्टत्वमिति 'प्रथमानिर्दिष्टम्' इत्यप्राप्तौ वचनम्। तत्र कौशाम्बीशब्दस्य अनेन उपसर्जनत्वेऽपि न पूर्वनिपातः। तत्तद्विभक्तयन्तैरेव समास इत्यत्र इदमेव सूत्रं प्रमाणम्। 'तुल्यार्थैः' इति सूत्रे भाष्ये स्पष्टमिदम्। प्रथमान्तपदेनैव समास इति 'अनेकम्' इति सूत्रे भाष्ये स्थितम्। प्रकृते च दिशयोर्मध्यः मध्यं मध्येनेत्यादिविग्रहवाक्येषु दिशाशब्दस्य नियतविभक्तिकत्वात् समासविधौ प्रथमानिर्दिष्टत्वाभावेऽपि अनेनोपसर्जनत्वं भवति। पूर्वनिपातस्तु न भवतीति स्थितम्। **गोस्त्रियोः** ॥ 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इत्यतः ह्रस्व इति प्रातिपदिकस्येति चानुवर्तते। उपसर्जनस्येति गोस्त्रियोर्विशेषणम्। प्रत्येकाभिप्रायमेकवचनम्। स्त्रीशब्देन स्त्रीप्रत्ययो गृह्यते। प्रत्ययग्रहणपरिभाषया तदन्तविधिः। उपसर्जनभूतस्य गोशब्दस्य स्त्रीप्रत्ययान्तस्य चेति लभ्यते। तदुभयं प्रातिपदिकस्य विशेषणम्। तदन्तविधिः। तदाह। **उपसर्जनमित्यादिना** ॥ अत्र च स्त्रीयमेव उपसर्जनं गृह्यते, नत्वप्रधानमात्रम्। कुमारीमिच्छन् कुमारी-

६५७ । नाव्ययीभावादतोऽत्वपञ्चम्याः । (२-४-८३)

अदन्तादव्ययीभावात्सुपो न लुक्, तस्य तु पञ्चमीं विना अमादेशश्च स्यात् । दिशयोर्मध्येऽपदिशम् । 'क्लीबाव्ययं त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियाम्' इत्यमरः ।

६५८ । तृतीयासप्तम्योर्बहुळम् । (२-४-८४)

अदन्तादव्ययीभावात्तृतीयासप्तम्योर्बहुळमम्भावः स्यात् । अपदिशम्–अपदिशेन । अपदिशम्–अपदिशे । बहुळग्रहणात् 'सुमद्रम्' 'उन्मत्तगङ्गम्' इत्यादौ सप्तम्याः नित्यमम्भावः । 'विभक्ति–' इत्यादेरयमर्थः । विभक्त्यर्थी-

---

वाचरन्वा ब्राह्मणः कुमारीत्यत्रातिप्रसङ्गात् । **अव्ययीभावश्चेत्यव्ययत्वमिति** ॥ तथाच अव्ययीभावसमासादुत्पन्नानां सुपां 'अव्ययादाप्सुपः' इति लुक् स्यादिति शङ्कायामाह । **नाव्ययीभावात्** ॥ अम् तु अपञ्चम्या इति छेदः । नाव्ययीभावादतः, इत्येकं वाक्यम् । 'ष्यक्षत्रियार्षे' इत्यतो लुगित्यनुवर्तते । 'अव्ययादाप्सुपः' इत्यतस्सुप इति च । अता अव्ययीभावो विशेष्यते । तदन्तविधिः । तदाह । **अदन्तादव्ययीभावात् सुपो न लुगिति** ॥ अम् तु अपञ्चम्याः, इति वाक्यान्तरम् । पञ्चमीभिन्नस्य तु सुपः अमादेशस्स्यात् । पञ्चम्यास्तु अम् न भवतीति लभ्यते । तदाह । **तस्य पञ्चमीं विना अमादेश इति** ॥ अत्रापञ्चम्या इति प्रतिषेधोऽयम् अनन्तरत्वादम एव भवति, न तु लुङ्निषेधस्यापि । एवञ्चादन्तादव्ययीभावात् परस्य पञ्चमीभिन्नस्य सुपो न लुक्, किंत्वमादेशः । पञ्चम्यास्तु लुक् अमादेशश्च न भवतीति स्थितिः । सूत्रे एतत्सूत्रनार्थकेव तुशब्दः । 'अव्ययीभावादतोऽत्वपञ्चम्याः' इत्येवोक्तौ तु अदन्तादव्ययीभावात् परस्य पञ्चमीभिन्नस्य सुपः लुकोऽपवादः अमादेशस्स्यादित्येव लभ्येत । एवं सति पञ्चम्या अमोऽभावे 'अव्ययादाप्सुपः' इति लुक् स्यात् । अतो लुङ् निषिध्यत इत्यास्तान्तावत् । **अपदिशमिति** ॥ पञ्चमीभिन्नविभक्तीनामुदाहरणम् । पञ्चम्यास्तु अपदिशादित्युदाहार्यम् । यद्यपि नपुंसकह्रस्वत्वेनाप्येतत् सिध्यति । 'अव्ययीभावश्च' इति नपुसकत्वस्य वक्ष्यमाणत्वात् । तथापि चित्रगुः अतिखट्वः इत्यादयर्थमावश्यकामिति 'गोस्त्रियोः' इति सूत्रं इहापि न्याय्यत्वादुपन्यस्तम् । तदेवमव्ययमिति भाष्यादृष्टेनापि योगविभागेन अपदिशमिति रूपसाधनं वृद्धसम्मतमित्याह । **क्लीबाव्ययमिति** ॥ **तृतीया** ॥ 'नाव्ययीभावात्' इत्यस्मात् अत इत्यनुवर्तते । तदाह । **अदन्तादिति** ॥ अमादेशाभावे तु 'नाव्ययीभावात्' इत्यलुक् । ननु वेति सिद्धे किं बहुळग्रहणेनेत्यत आह । **बहुळग्रहणादिति** ॥ तदेवमव्ययमिति योगं विभज्य व्याख्याय तदुत्तरखण्डं व्याख्यातुमुपक्रमते । **विभक्तीत्यादेरयमर्थ इति** ॥ विभक्तीत्यनेन विभक्त्यर्थो विवक्षितः । उच्यन्त इति वचनाः । कर्मणि ल्युट् । विभक्ति, समीप, समृद्धि, व्यृद्धि, अर्थाभाव, अत्यय, असम्प्रति, शब्दप्रादुर्भाव, पश्चात्, यथा, आनुपूर्व्य, यौगपद्य, सादृश्य, सम्पत्ति, साकल्य, अन्त, एतेषां षोडशानां द्वन्द्वः।

दिषु वर्तमानमव्ययं सुबन्तेन सह समस्यते, सोऽव्ययीभावः। 'विभक्तौ तावत्'। हरौ इत्यधिहरि। सप्तम्यर्थस्यैवात्र द्योतकोऽधिः। हरि ङि अधि इत्यलौकिकं विग्रहवाक्यम्। अत्र निपातेनाभिहितेऽप्यधिकरणे वचनसामर्थ्यात्सप्तमी।

६५९। अव्ययीभावश्च। (२-४-१८)

अयं नपुंसकं स्यात्। 'ह्रस्वो नपुंसके प्रातिपदिकस्य' (सू ३१८)। गोपायतीति गाः पातीति वा गोपाः, तस्मिन्नित्यधिगोपम्। समीपे, कृष्णस्य

ते च ते वचनाश्च इति विग्रहः। विभक्त्यर्थादिषु वाच्येष्वित्यर्थः। अव्ययमित्यनुवर्तते। अव्ययीभावस्समास इति चाधिकृतम्। तदाह। **विभक्त्यर्थादिष्विति॥ विभक्तौ तावदिति॥** विभक्त्यर्थे प्रथममुदाह्रियत इत्यर्थः। **हरौ इत्यधिहरीति॥** हरौ इति लौकिकविग्रहः। तेन यावदवगम्यते तावदेवाधिहरीति समासेनाप्युच्यते इत्यर्थः। अधिशब्दस्य हरावित्यनेन अव्ययीभावसमासे सुब्लुकि समासविधावव्ययमिति प्रथमानिर्दिष्टत्वात् अधेः पूर्वनिपाते समासादुत्पन्नस्य सुपः 'अव्ययादाप्सुपः' इति लुगिति भावः। ननु लौकिकविग्रहे समस्यमानः अधिशब्दः कुतो नोपात्त इत्यत आह। **सप्तम्यर्थस्यैवात्र द्योतकोऽधिरिति॥** तथाचाधिद्योत्यार्थस्य अधिकरणत्वस्य सप्तम्यैव उक्तत्वात् अधिशब्दो न पृथगुपात्तः। नित्यसमासतया वक्ष्यमाणत्वेन स्वपदविग्रहानौचित्यादिति भावः। ननु हरौ इति परिनिष्ठितसन्धिकार्यस्य समासे सति औ इत्यस्य सुपो लुकि समासे रेफादिकारः कुतः न श्रूयेतेत्यत आह। **हरि ङि इति॥** सन्धिकार्यात् प्रागलौकिकविग्रहवाक्य एव समासप्रवृत्तेः। 'प्रत्ययोत्तरपदयोश्च' इति भाष्यसम्मतत्वादिति भावः। यथा चैतत् तथा भूतपूर्वः इत्यत्रानुपदमेवोक्तम्। नन्वधिना निपातेनाधिकरणत्वस्योक्तत्वात् कथं हराविति सप्तमीत्यत आह। **अत्र निपातेनेति॥ वचनेति॥** सुपेत्यनुवर्त्य सुबन्तेनात्र समासविधिसामर्थ्यात् सप्तमी स्यादेवेति भावः। वस्तुतस्तु अनभिहितसूत्रभाष्ये तिङ्कृत्तद्धितसमासैरित्येव परिगणनं दृष्टम्। अतो निपातेनाधिना अभिहितेऽप्यधिकरणत्वे सप्तमी निर्बाधा। "विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्" इत्यत्र तु प्रत्येतव्यमित्यध्याहार्यम्। कृताभिधानात् विषवृक्षात् द्वितीया न भवति। नच कृत्तद्धितसमासैरिति परिगणनं भाष्ये प्रत्याख्यातमिति वाच्यम्। 'कटं करोति, भीष्ममुदारं दर्शनीयम्' इत्यत्र परिगणनफलस्यान्यथासिद्धेरेव तत्रोक्तत्वादित्यास्तां तावत्। **अव्ययीभावश्च॥ अयं नपुंसकं स्यादिति॥** 'स नपुंसकम्' इत्यतः तदनुवृत्तेरिति भावः। नपुंसकत्वस्य फलमाह। **ह्रस्वो नपुंसके इति॥ गोपायतीति॥** रक्षतीत्यर्थः। 'गुपू रक्षणे' विच्। 'आयादय आर्धधातुके वा' इत्यायप्रत्ययः। 'लोपो व्योः' इति यलोपः। 'वेरपृक्तस्य' इति वकारलोपः। गोपाशब्दः आकारान्तः। **गाः पातीति॥** पातेर्विचि उपपदसमासे गोपाशब्द इति भावः। **अधिगोपमिति॥ विभक्त्यर्थेऽव्ययीभावसमासे सुब्लुकि नपुंसकत्वे ह्रस्वत्वे सति**

समीपमुपकृष्णम्। समया ग्रामम्, निकषा लङ्काम्, आराद्वनादित्यत्र तु नाव्ययीभावः 'अभितः परितः—' (वा १४४२) 'अन्यारात्—' (सू ५९५) इति द्वितीयापञ्चम्योर्विधानसामर्थ्यात्। मद्राणां समृद्धिः सम्मद्रम्। यवनानां व्यृद्धिर्दुर्यवनम्। विगता ऋद्धिर्व्यृद्धिः। मक्षिकाणामभावो निर्मक्षिकम्।

'नाव्ययीभावात्' इत्यमि पूर्वरूपमिति भावः। 'गोस्त्रियोः' इति तु नात्र प्रसज्यते। स्त्रीप्रत्ययान्तत्वाभावात्। **समीपे इति** ॥ समीपार्थकाव्ययस्य समासे उदाहरणं वक्ष्यत इत्यर्थः। **कृष्णस्य समीपमिति** ॥ लौकिकविग्रहवाक्यमेतत्। अत्र समस्यमानस्य उपशब्दस्य स्थाने समीपमिति प्रयुक्तम्। कृष्णस्य उप इति तु न विग्रहः। नित्यसमासत्वेनास्वपदविग्रहौचित्यात्। ननु 'समया ग्रामं, निकषा लङ्काम्, आराद्वनात्' इत्यत्रापि समयाद्यव्ययानां समीपार्थकत्वात् अव्ययीभावस्स्यात्। ततश्च 'ग्रामं समया, ग्रामं निकषा, वनादारात्' इति च प्रयोगो न स्यात्। अव्ययीभावसमासे अव्ययस्य पूर्वनिपातनियमादित्यत आह। **समयेति** ॥ **विधानसामर्थ्यादिति** ॥ 'समया ग्रामं, निकषा लङ्काम्, आराद्वनात्' इत्यत्र शेषषष्ठ्यां सत्यामपि अव्ययीभावसमासे सति प्रातिपदिकावयवत्वात् उपपदविभक्त्योः द्वितीयापञ्चम्योः षष्ठ्या वा लुकि समासात् प्रातिपदिकार्थादिविवक्षायां सर्वासु विभक्तिषु जातासु यथायथं अम्भावे तद्विकल्पे च 'समया ग्रामं, निकषा लङ्काम्, आराद्वनं, समया ग्रामेण, निकषा लङ्केन, आराद्वनेन, समया ग्रामे, निकषालङ्के, आराद्वने' इति स्यादेव। ततश्च द्वितीयापञ्चम्योर्विधिः व्यर्थस्स्यात्। षष्ठ्यैव गतार्थत्वात्। नच समासात् पुनरुपपदविभक्ती द्वितीयापञ्चम्यौ शङ्क्ये। सकृत्प्रवृत्तयोः पुनः प्रवृत्त्ययोगात्। वस्तुतस्तु मद्ध्यार्थकसमयाशब्दयोगे द्वितीयाविधानस्य दूरार्थकाराच्छब्दयोगे पञ्चमीविधानस्य चरितार्थत्वात् इदमयुक्तम्। नचैवं सति 'समया ग्रामम्' इत्यादौ अव्ययीभावश्शङ्क्यः। अभ्भक्ष इत्यादौ इव विभक्त्यर्थसमीपादिमात्राव्ययस्यैव ग्रहणात्। समयानिकषाराच्छब्दानाञ्चाधिकरणशक्तिप्रधानतया समीपमात्रवृत्तित्वाभावात्। ग्रामस्य समीपे इति हि तेषामर्थः। उपशब्दस्तु तन्मात्रवाची। उपकृष्णं भक्ता इत्यत्र कृष्णसामीप्यवन्त इति बोधात्। **मद्राणां समृद्धिरिति** ॥ समित्यव्ययपर्यायः समृद्धिशब्दो विग्रहवाक्ये ज्ञेयः। एतत्सूत्रविहितसमासस्य नित्यतया अस्वपदविग्रहः। एवमग्रेऽपि ज्ञेयम्। **सम्मद्रमिति** ॥ सर्वत्र सुब्लुगादि पूर्ववत् ज्ञेयम्। समृद्धा मद्राः सम्मद्रा इत्यादौ तु नाव्ययीभावः। वचनग्रहणसामर्थ्येनाव्ययार्थप्राधान्य एव तत्प्रवृत्तेरिति भाष्ये स्पष्टम्। **यवनानां व्यृद्धिः दुर्यवनमिति** ॥ दुर्शब्दार्थको व्यृद्धिशब्दो विग्रहे ज्ञेयः। **विगतेति** ॥ अभावप्रतियोगिनीत्यर्थः। ऋद्धेरभावो व्यृद्धिरिति यावत्। नचार्थाभावेऽयमिति भ्रमितव्यम्। समस्यमानपदार्थाभावस्यैव विवक्षितत्वात्। इह च यवनाभावस्याप्रतीतेः। यवनीयवृद्ध्यभावस्यैव प्रतीतेः। तत् ध्वनयन् अर्थाभावे उदाहरति। **मक्षिकाणामभावो निर्मक्षिकमिति** ॥ विग्रहे निर्शब्दसमानार्थकमभावपदमिति भावः। घटः पटो नेत्यत्र तु नाव्ययीभावः। अर्थग्रहणसामर्थ्येना-

हिमस्यात्ययोऽतिहिमम्। अत्ययो ध्वंसः। निद्रा सम्प्रति न युज्यते इत्यतिनिद्रम्। हरिशब्दस्य प्रकाशः इतिहरि। विष्णोः पश्चादनुविष्णु। पश्चाच्छब्दस्य तु नायं समासः। 'ततः पश्चात्स्रंस्यते' ध्वंस्यते इति (१-१-५७ सूत्रे) भाष्यप्रयोगात्। योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि यथार्थाः। अनुरूपम्, रूपस्य योग्यमित्यर्थः। अर्थमर्थं प्रति प्रत्यर्थम्। प्रतिशब्दस्य वीप्सायां कर्मप्रवचनीयसंज्ञाविधानसामर्थ्यात्तद्योगे द्वितीयागर्भं वाक्यमपि। शक्तिमनतिक्रम्य यथाशक्ति।

त्यन्ताभावस्यैव विवक्षितत्वात्। **हिमस्यात्ययोऽतिहिममिति** ॥ अतीत्यव्ययपर्यायः। अत्ययशब्दो विग्रहे ज्ञेयः। अर्थाभावेत्यनेन पौनरुक्त्यनिरस्यति। **अत्ययो ध्वंसः इति** ॥ अर्थाभावशब्देनात्यन्ताभाव एव विवक्षितः। तेन पटस्य प्रागभावः निष्पटमिति न भवतीति भावः। सूत्रे असम्प्रतीत्यस्य सम्प्रति न युज्यते इत्यर्थः। "एतर्हि सम्प्रतीदानीम्" इत्यमरः। युजिक्रियान्तर्भावेण एकार्थीभावान्नञ्समासः। तदाह। **निद्रासम्प्रति न युज्यते इति** ॥ **अतिनिद्रमिति** ॥ अतीत्यव्ययस्यासम्प्रत्यर्थकस्य स्थाने सम्प्रति न युज्यते इति विग्रहवाक्यं ज्ञेयम्। सूत्रे शब्दप्रादुर्भाव इत्यनेन शब्दस्य प्रकाशनं विवक्षितम्। तदाह। **हरिशब्दस्य प्रकाशः इतिहरि इति** ॥ इतीत्यव्ययं शब्दप्रकाशे वर्तते। तस्य हरिशब्देन स्वरूपपरेण षष्ठ्यन्तेन समास इति भावः। **विष्णोः पश्चादनुविष्णु इति** ॥ अनु इत्यव्ययं पश्चादर्थे वर्तते इत्यर्थः। **भाष्येति** ॥ 'अचः परस्मिन्' इति सूत्रभाष्ये इत्यर्थः। 'ततः पश्चात्' इत्यत्राव्ययीभावे तु पश्चाच्छब्दस्य पूर्वनिपातस्स्यादिति भावः। एतद्भाष्यप्रयोगादेव एतत्सूत्रे तत्तदर्थबोधकपदघटकतया गृहीताव्ययेन तत्तदर्थकेनायं समासो नेति विज्ञायते। अत एव 'यथाऽसादृश्ये' इति सूत्रे सादृश्यसम्पत्तीति प्राप्तोतीत्येव। उक्तं भाष्ये। यथाशब्देन तु भवत्येव समासः। उत्तरसूत्रारम्भात्। सूत्रे यथाशब्देन तदर्थो लक्ष्यते। यथार्थे विद्यमानमव्ययं समस्यते इति लभ्यते इत्यभिप्रेत्य आह। **योग्यतेति** ॥ **अनुरूपमिति** ॥ अत्रानु इत्यव्ययं योग्यतायाम्, अतो यथार्थे वर्तते इति भावः। **अर्थमर्थं प्रतीति** ॥ लौकिकविग्रहवाक्यम्। अत्र वीप्सायां द्विर्वचनम्। 'लक्षणेत्थम्भूताख्यान' इति वीप्सायां द्योत्यायां प्रतेः कर्मप्रवचनीयत्वात् तद्योगे द्वितीया। समासे तु द्विर्वचनं न। समासेन वीप्सायाः द्योतितत्वात् इति 'हयवरट्' इति सूत्रे कैयटः। प्रतिना तस्योक्तत्वादिति तु तत्त्वम्। नन्वर्थमर्थं प्रतीति लौकिकविग्रहप्रदर्शनं न सम्भवति। नित्यसमासत्वादित्यत आह। **प्रतिशब्दस्येति** ॥ **सामर्थ्यादिति** ॥ अव्ययीभावसमासस्य नित्यत्वे तु शेषषष्ठ्यामपि अव्ययीभावे सुब्लुकि समासात् सर्वविभक्तीनामभावे तद्विकल्पे च प्रत्यर्थं प्रत्यर्थेनेत्यादिसिद्धे द्वितीयाफलकं प्रतेः कर्मप्रवचनीयत्वविधानमनर्थकं स्यादिति भावः। वस्तुतस्तु प्रतिस्थानमित्यादौ 'उपसर्गात्सुनोति' इति षत्वाभावसम्पादनेन कर्मप्रवचनीयत्वं चरितार्थमेव। 'अर्थमर्थं प्रति प्रत्यर्थम्' इति 'स्वं रूपम्' इति सूत्रे भाष्ये प्रयोगदर्शनात् इह वैकल्पिकसमास इति तत्त्वम्। **शक्तिमनतिक्रम्य यथाशक्तीति** ॥ 'परावरयोगे च' इति क्त्राप्रत्ययः। परावरत्वञ्च बौद्धम्। अत्र यथेत्यव्ययं

हरेः सादृश्यं सहरि । वक्ष्यमाणेन सहस्य सः । ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठम् । चक्रेण युगपदिति विग्रहे ।

६६० । अव्ययीभावे चाकाले । (६-३-८१)

सहस्य सः स्यादव्ययीभावे न तु काले । सचक्रम् । काले तु सहपूर्वाह्णम् । सदृशः सख्या ससखि । यथार्थत्वेनैव सिद्धे पुनः सादृश्यग्रहणं गुणभूतेऽपि सादृश्ये यथा स्यादित्येवमर्थम् । क्षत्राणां सम्पत्तिः सक्षत्रम् । ऋद्धेराधिक्यं समृद्धिः । अनुरूप आत्मभावः सम्पत्तिरिति भेदः । तृणमप्यपरित्यज्य सतृणमत्ति । साकल्येनेत्यर्थः । न त्वत्र तृणभक्षणे तात्पर्यम् । अन्ते, अग्निग्रन्थपर्यन्तमधीते, साग्नि ।

पदार्थानतिक्रमे वर्तते इत्यर्थः , **हरेस्सादृश्यं सहरीति** ॥ अत्र सहेत्यव्ययं सादृश्ये वर्तत इति भावः । **वक्ष्यमाणेनेति** ॥ 'अव्ययीभावे चाकाले' इत्यनेन इत्यर्थः । **ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठमिति** ॥ कार्यं कृतमिति शेषः । तत्तद्विभक्त्या विग्रह इति पक्षाभिप्रायेणेदम् । पूर्वस्य क्रमेण इत्यनुपूर्वम्, ततस्स्वार्थे ष्यञ् । एतत्सूत्रगृहीताव्ययेन समासो नेत्यनुपदमेवोक्तम् । सूत्रगृहीतानुनाप्यनुज्येष्ठमिति समासः । अनुपूर्वेति निर्देशात् । सूत्रे युगपच्छब्दात् स्वार्थे ष्यञ्, यौगपद्यशब्दः । तत् ध्वनयन्नाह । **चक्रेण युगपदिति** ॥ युगपत्पर्यायस्य सहशब्दस्य चक्रेण इत्यनेन समासे कृते सतीत्यर्थः । युगपच्छब्देन तु न समासः । सूत्रे गृहीतत्वादिति भावः । **अव्ययीभावे सहस्य सस्स्यादिति** ॥ 'सहस्य सस्संज्ञायाम्' इत्यतः तदनुवृत्तेरिति भावः । **न तु काले इति** ॥ कालवाचके परे सहस्य सो नेत्यर्थः । चक्रेण युगपत्प्रयुक्तमित्यर्थः । **सहपूर्वाह्णमिति** ॥ समीपादौ अव्ययीभावः । सूत्रे सादृश्येति स्वार्थे ष्यञ् । तद्ध्वनयन्नाह । **सदृशस्सख्या ससखीति** ॥ सहेत्यव्ययं सदृशार्थकमिति भावः । **गुणभूतेऽपीति** ॥ वचनग्रहणसामर्थ्येनाव्ययार्थप्राधान्य एव समासप्रवृत्तेः । गुणीभूतसादृश्ये अप्राप्त्या तद्ग्रहणमिति भावः । **क्षत्राणां सम्पत्तिः सक्षत्रमिति** ॥ क्षत्रियाणामनुरूपं कर्मेत्यर्थः । सहेत्यव्ययमत्र सम्पत्तौ वर्तते इति भावः । सम्पत्तिसमृद्धिशब्दयोः पौनरुक्त्यं परिहरति । **ऋद्धेरिति** ॥ धनधान्यादेरित्यर्थः । **अनुरूप इति** ॥ अनुरूपं योग्यः आत्मभावः स्वभावः, स्वोचितं कर्मेति यावत् । **तृणमप्यपरित्यज्य सतृणमत्तीति** ॥ 'परावरयोगे च' इति क्त्वा । परावरत्वं बौद्धमेव । सहशब्दोऽत्रापरिवर्जने वर्तते । ननु तृणसहभावेऽपीति भावः । नन्वेवं सति साकल्ये कथमिदमुदाहरणं स्यादित्यत आह । **साकल्येनेत्यर्थ इति** ॥ पात्रे परिविष्टं सकलं भक्षयतीति यावत् । **नत्वत्रेति** ॥ तृणभक्षणस्याप्रसक्तेरिति भावः । **अन्ते इति** ॥ उदाहरणं वक्ष्यत इति शेषः । सूत्रे अन्तशब्देन अन्तावयवसाहित्यं विवक्षितमित्यभिप्रेत्योदाहरति । **अग्निग्रन्थपर्यन्तमधीते साग्नीति** ॥ अग्निशब्देन अग्निचयनप्रतिपादको ग्रन्थो विवक्षितः । तेनान्तावयवेन सहित-

६६१ । यथाऽसादृश्ये । (२-१-७)

असादृश्ये एव यथाशब्दः समस्यते । तेनेह न । यथा हरिस्तथा हरः । हरेरुपमानत्वं यथाशब्दो द्योतयति । तेन 'सादृश्य' इति वा 'यथार्थ' इति वा प्राप्तं निषिध्यते ।

६६२ । यावदवधारणे । (२-१-८)

यावन्तः श्लोकास्तावन्तोऽच्युतप्रणामाः यावच्छ्लोकम् ।

६६३ । सुप्प्रतिना मात्रार्थे । (२-१-९)

शाकस्य लेशः शाकप्रति । 'मात्रार्थे' किम् । वृक्षं प्रति विद्योतते विद्युत् ।

ङ्ग्रन्थमिति विग्रहः । अग्निग्रन्थपर्यन्तमिति फलितम् । ग्रन्थमिति अन्यपदार्थाध्याहारः । अधीत इति तु न समासप्रविष्टम् । अन्तावयवेन अग्निग्रन्थेन सहितं वेदकल्पसूत्रादिभागमधीते इत्यर्थः । अत्र कृत्स्नस्याध्येतव्यत्वात् अग्निग्रन्थपर्यन्ताध्ययने तत्कात्स्न्यावगमात् साकल्यात्पृथग्युक्तिः । **यथाऽसादृश्ये** ॥ असादृश्ये इति छेदः । व्याख्यानात् । असादृश्ये योग्यतावीप्सापदार्थानतिवृत्तिरूपे वर्तमानं यथेत्यव्ययं समस्यते इत्यर्थस्य यथार्थत्वादेव सिद्धे नियमार्थमिदमित्याह । **असादृश्ये एवेति** ॥ ननु 'प्रकारवचने थाल्' इति विहितथालप्रत्ययान्तस्य कथं सादृश्ये वृत्तिरित्यत आह । **हरेरिति** ॥ सामान्यस्य भेदको यो विशेषः स प्रकारः, तस्मिन् प्रकारे थालिति 'प्रकारवचने थाल्' इत्यस्यार्थः । ततश्च यद्विशेषधर्मवान् हरिः तद्विशेषधर्मवान् हर इति बोधे सति यत्तच्छब्दाभ्यां तयोः प्रकारयोः अभेदावगमात् उपमानत्वप्रतीतिरिति भावः । **तेनेति** ॥ प्राप्तमित्यत्रान्वयः । सादृश्यार्थकत्वेनेत्यर्थः । **सादृश्य इति वेति** ॥ 'अव्ययं विभक्ति' इति सूत्रगतेन सादृश्ये वर्तमानमव्ययं समस्यते इत्यंशेन वा यथार्थे विद्यमानमव्ययं समस्यते इत्यंशेन वा प्राप्तमव्ययीभावसमासकार्यनिषिध्यते इति भावः । भाष्ये तु प्रकारवचने यथाशब्दयोगे सादृश्यत्वनैव प्राप्तिरुक्ता, नतु यथार्थत्वेन प्राप्तिरुक्ता । यथाशब्दस्य सूत्रगृहीतत्वेन तद्योगे यथार्थेत्यप्रवृत्तेरिति तदाशय इति शब्देन्दुशेखरे विस्तरः । **यावदवधारणे** ॥ इयत्तापरिच्छेदे गम्ये यावदित्यव्ययं समस्यते । सोऽव्ययीभाव इत्यर्थः । **यावन्त इति** ॥ यत् परिमाणं येषामिति विग्रहे 'यत्तदेतेभ्यः परिमाणे वतुप्' इति वतुप्प्रत्ययः । यावदित्यव्ययमेव समस्यते, विग्रहस्तु तद्धितान्तेनैव । नित्यसमासत्वेन अखपदविग्रहौचित्यात् । अवधारणे किम् । यावद्दत्तन्तावद्भुक्तम् । इयत् भुक्तमिति नावधारयतीत्यर्थः । **सुप्प्रतिना मात्रार्थे** ॥ सुबिति छेदः । मात्रा लेशः तस्मिन्नर्थे विद्यमानेन प्रतिना सुबन्तं समस्यत इत्यर्थः । सुबित्यनुवर्तमाने पुनस्सुब्ग्रहणं सन्निहितस्याव्ययमित्यस्याननुवृत्त्यर्थम् । तत्प्रयोजनमनुदाहरति । **शाकस्य लेशः शाकप्रतीति** ॥ अत्र प्रतीत्यव्ययं मात्रार्थकम् ।

६६४ । अक्षशलाकासंख्याः परिणा । (२-१-१०)

द्यूतव्यवहारे पराजये एवायं समासः । अक्षेण विपरीतं वृत्तमक्षपरि । शलाकापरि । एकपरि ।

६६५ । विभाषा । (२-१-११)

अधिकारोऽयम् । एतत्सामर्थ्यादेव प्राचीनानां नित्यसमासत्वम् । 'सुप्सुपा' इति तु न नित्यसमासः । 'अव्ययम्' इत्यादिसमासविधानाज्ज्ञापकात् ।

अतस्तेन शाकस्येति सुबन्तस्य समासः । समासविधौ सुबन्तस्य प्रथमानिर्दिष्टत्वेन उपसर्जनत्वात्पूर्वनिपातः, नतु प्रतेः । तस्य समासविधौ तृतीयानिर्दिष्टत्वात् । **वृक्षं प्रतीति** ॥ अत्र प्रतेः मात्रार्थकत्वाभावात् न तेन समासः । नच 'लक्षणेत्थम्' इति कर्मप्रवचनीयत्वविधानसामर्थ्यादेवात्र समासो न भविष्यति । सति समासे द्वितीयायाष्षष्ठ्या वा लुकि समासात्तद्विभक्त्युत्पत्तेरिति वाच्यम् । 'वृक्षं प्रति सिञ्चति' इत्यादौ 'उपसर्गात् सुनोति' इति षत्वनिवृत्त्या कर्मप्रवचनीयस्य चरितार्थत्वादित्यन्यत्र विस्तरः । **अक्षशलाका** ॥ समस्यते सोऽव्ययीभाव इति शेषः । **द्यूतव्यवहारे इति** ॥ वार्तिकमिदम् । द्यूतं तावत् अक्षैश्शलाकाभिर्वा भवति । यदि अक्षाश्शलाका वा कृतस्नाः उत्ताना अवाञ्चो वा पतन्ति, तदा पातयिता जयति । अन्यथा पराजयतीति स्थितिः । **अक्षेणेति** ॥ कर्तरि तृतीया । विपरीतं वृत्तमित्यत्र वृतेर्भावे क्तः । विपरीतमिति क्रियाविशेषणम् । जये यथा परिवर्तितव्यं न तथा परिवृत्तमित्यर्थः । **शलाकापरीति** ॥ शलाकया विपरीतं वृत्तमिति भावः । **एकपरीति** ॥ एकेन विपरीतं वृत्तमित्यर्थः । एवं द्विपरि त्रिपरि इत्यादि । **विभाषा** ॥ **अधिकारोऽयमिति** ॥ ततश्च उत्तरत्र समासविधिषु एतदनुवर्तते इति लभ्यते । ननु 'प्राक्कडारात् समासः' इत्यत ऊर्ध्वं 'सह सुपा' इत्यतः प्रागेव कुतो विभाषाधिकारो न कृत इत्यत आह । **एतत्सामर्थ्यादिति** ॥ मध्ये विभाषाधिकारपाठसामर्थ्यादेवेतः प्राचीनानां नित्यसमासत्वं गम्यत इत्यर्थः । यद्यपीतः प्राचीनानां विकल्पे प्रमाणाभावादेव नित्यत्वं सिद्धम् । तथापि तस्यैव लिङ्गे दृढीकरणमिति बोध्यम् । नन्वेवं सति 'सुप्सुपा' इत्यपि नित्यसमासस्स्यात् । ततश्च पूर्वं भूतः इति लौकिकविग्रहवाक्यमनुपपन्नं स्यात् । 'सुप्सुपा' इति विषये विस्पष्टं पटुः विस्पष्टपटुरिति विग्रहप्रदर्शनपरम् 'आकडारात्' इति सूत्रस्थभाष्यमपि विरुध्येत इत्यत आह । **सुप्सुपेति तु न नित्यसमासः इति** ॥ कुत इत्यत आह । **अव्ययमित्यादीति** ॥ 'आकडारात्' इत्येव सिद्धे 'प्राक्कडारात्' इति प्राग्ग्रहणं समाससंज्ञायाः अव्ययीभावादिसंज्ञासमावेशार्थम् । अन्यथा एकसंज्ञाधिकारात् पर्यायस्स्यादिति 'आकडारात्' इति सूत्रे भाष्ये स्थितम् । तत्र 'अव्ययं विभक्ति' इत्याद्यव्ययीभावादिविधिषु 'सुप्सुपा' इति समासमनूद्य नाव्ययीभावादिसंज्ञा विधेयाः ।

---

१. अत्र १२४३ वार्तिकं मानम् ।

६६६। अपपरिबहिरञ्चवः पञ्चम्या। (२-१-१२)

अपविष्णु संसारः—अप विष्णोः। परिविष्णु—परि विष्णोः। बहिर्वनम्—बहिर्वनात्। प्राग्वनम्—प्राग्वनात्।

६६७। आङ्मर्यादाभिविध्योः। (२-१-१३)

एतयोराङ् पञ्चम्यन्तेन वा समस्यते सोऽव्ययीभावः। आमुक्ति संसारः—आ मुक्तेः। आबालं हरिभक्तिः—आ बालेभ्यः।

'उपपदमतिङ्' 'कर्तृकरणे कृता बहुलम्' 'आख्यातमाख्यातेन क्रियासातत्ये' इत्यादौ सुबन्तस्य सुबन्तेन समासस्य उद्देश्यस्याप्रसिद्धेः। अतस्तेषु समासविधानस्यावश्यकत्वात् अर्थाधिकारानुरोधात् सर्वत्र समास इत्यनुवृत्तं विधेयसमर्पकमित्यास्थेयम्। तत्र 'सुप्सुपा' इत्येव सिद्धे 'अव्ययं विभक्ति' इत्याद्यव्ययीभावादिविधिषु समाससंज्ञाविधानं व्यर्थं स्यात्। ततः प्राचीनविधेः वैकल्पिकत्वं ज्ञापयति। न चाव्ययीभावादिविधिषु समासविध्यभावे अव्ययादीनां समासशास्त्रे प्रथमानिर्दिष्टत्वाभावेन उपसर्जनत्वाभावात् पूर्वनिपातनियमो न स्यात्। तदर्थमव्ययीभावादिविधिषु समासविधानञ्चरितार्थमिति वाच्यम्। प्रथमानिर्दिष्टम्' इति सूत्रे समास इत्यस्य समासत्वव्याप्याव्ययीभावादिविधायके शास्त्रे इत्यर्थाभ्युपगमेन अव्ययादीनाम् उपसर्जनत्वसिद्धेः वक्तुं शक्यत्वात्। तस्मादव्ययीभावादिविधिषु समासविधानं 'सुप्सुपा' इति समासस्य वैकल्पिकत्वं ज्ञापयतीति स्थितम्। 'आकडारात्' इति सूत्रभाष्ये "'सुप्सुपा' इति समासविषये विस्पष्टं पटुः विस्पष्टपटुः" इति विग्रहप्रदर्शनपरभाष्यञ्चेह लिङ्गमित्यलं बहुना। एवञ्च 'इवेन समासः' इत्यादि वैकल्पिकमिति सिद्धम्। यद्यपि नित्यसमासाधिकारे 'कुगति' इत्यत्रापि इवेनेति वार्तिकं पठितम्। तथापि 'सुप्सुपा' इत्यत्र पठितमेव तत्रापि स्मार्यत इति कैयटः। **अपपरिबहिः**॥ समस्यन्ते सोऽव्ययीभाव इति शेषः। **अपविष्णवति**॥ अत्र अप इत्यव्ययं वर्जने। विष्णुं वर्जयित्वा संसरणमित्यर्थः। **अप विष्णोरिति**॥ लौकिकविग्रहवाक्यम्। समासस्य वैकल्पिकत्वेनास्वपदविग्रहनियमाभावात्। 'अपपरी वर्जने' इति अपेत्यव्ययस्य कर्मप्रवचनीयत्वात् तद्योगे 'पञ्चम्यपाङ्परिभिः' इति पञ्चमी। तदन्तेन अपेत्यस्याव्ययीभावसमासः, सुब्लुक्। अपेत्यव्ययस्य प्रथमानिर्दिष्टत्वात् पूर्वनिपातः। समासात् सुबुत्पत्तिः। 'अव्ययादाप्सुपः' इति लुक्। एवं यथायथमग्रेऽपि ज्ञेयम्। **परिविष्णवति**॥ अत्रापि परिर्वर्जने। पञ्चम्यादि पूर्ववत्। **बहिर्वनम्—बहिर्वनादिति**॥ अस्मादेव ज्ञापकात् बहिर्योगे पञ्चमी। इतरत् पूर्ववत्। अदन्तत्वादम्भावः। **प्राग्वनम्—प्राग्वनादिति**॥ अञ्चूत्तरपदयोगे पञ्चमी। **आङ्मर्यादाभिविध्योः**॥ **एतयोरिति**॥ मर्यादाभिविध्योः विद्यमानादित्यर्थः। मर्यादायामुदाहरति। **आमुक्तीति**॥ मुक्तेः प्रागित्यर्थः। अभिविधावुदाहरति। **आबालमिति**॥ बालानारभ्य इत्यर्थः। 'आङ्मर्यादावचने'

६६८ । लक्षणेनाभिप्रती आभिमुख्ये । (२-१-१४)

आभिमुख्यद्योतकावभिप्रती चिह्नवाचिना सह प्राग्वत् । अभ्यग्नि शलभाः पतन्ति, अग्निमभि । प्रत्यग्नि, अग्निं प्रति ।

६६९ । अनुर्यत्समया । (२-१-१५)

यं पदार्थं समया द्योत्यते तेन लक्षणभूतेनानुः समस्यते सोऽव्ययीभावः । अनुवनमशनिर्गतः । वनस्य समीपं गत इत्यर्थः ।

६७० । यस्य चायामः । (२-१-१६)

यस्य दैर्घ्यमनुना द्योत्यते तेन लक्षणभूतेनानुः समस्यते । अनुगङ्गं वाराणसी । गङ्गाया अनु । गङ्गादैर्घ्यसदृशदैर्घ्योपलक्षितेत्यर्थः ।

६७१ । तिष्ठद्गुप्रभृतीनि च । (२-१-१७)

इत्युभयत्रापि कर्मप्रवचनीयत्वात् 'पञ्चम्यपाङ्परिभिः' इति पञ्चमी । **लक्षणेनाभि ॥** लक्षणेत्येतद्व्याचष्टे । **चिह्नवाचिनेति ॥ प्राग्वदिति ॥** समस्यते सोऽव्ययीभाव इत्यर्थः । **अभ्यग्नि शलभाः पतन्तीति ॥** शलभाः क्षुद्रजन्तुविशेषाः स्थूलमक्षिकाः । **अग्निमभीति ॥** विग्रहोऽयम् । 'अभिरभागे' इति 'लक्षणेत्थम्' इति चाभिप्रत्योः कर्मप्रवचनीयत्वं अग्निज्ञाप्यं, तदभिमुखञ्च शलभपतनमित्यर्थः । **अनुर्यत्समया ॥** लक्षणेनेत्यनुवर्तते । यदिति समयायोगे 'अभितः परितः' इति द्वितीयान्तम्, सामान्ये नपुंसकम् । तदाह । **यं पदार्थमिति ॥ अनुवनमिति ॥** अत्र वनशब्दः वनसमीपदेशे लाक्षणिकः । वनसमीपस्य लक्षणत्वं वस्तुसदेव निमित्तम् । तदाह । **वनस्य समीपं गत इत्यर्थः इति ॥** वस्तुतो लक्षणीभूतस्य वनस्य समीपं गत इति यावत् । 'अव्ययं विभक्ति' इत्यादिना सिद्धे विभाषार्थमिदं सूत्रम् । ततश्च वनस्यानु इति लौकिकविग्रहवाक्यमुदाहार्यम् । नात्र कर्मप्रवचनीयसंज्ञा शङ्क्या । वस्तुतस्सैवात्र लक्षणत्वनिमित्तत्वाश्रयणात् । लक्षणत्वस्य ज्ञातस्य निमित्तत्वे तु वनमनु इत्येव वाक्यमुदाहार्यम् । **यस्य चायामः ॥** लक्षणेनेत्यनुवर्तते । अनुरित्यनुवृत्य आवृत्य आयाम इत्यत्र तृतीयया विपरिणम्यते । तत्र एकं लक्षणेनेत्यत्र सम्बध्यते । द्वितीयन्तु अनुनेत्येतत् 'यस्य चायामः' इत्यनन्तरं सम्बध्यते । द्योत्यत इति शेषः । आयामो दैर्घ्यम् । तदाह । **यस्य दैर्घ्यमिति ॥** यद्दैर्घ्यसदृशं दैर्घ्यमित्यर्थः । **समस्यते इति ॥** सोऽव्ययीभावः इत्यपि बोध्यम् । अनुगङ्गमिति समासः । लौकिकविग्रहं दर्शयति । **गङ्गायाः अन्विति ॥** इहापि लक्षणत्वं वस्तुसदेव निमित्तम्, नत्वनुद्योत्यम् । अतो न कर्मप्रवचनीयत्वम् । द्योत्यत्वेनान्वये तु गङ्गामन्विति युक्तम् । अनुगङ्गमित्यत्र गङ्गाशब्देन गङ्गादैर्घ्यसदृशं दैर्घ्यं लक्ष्यते । तदेवानुद्योत्यम् । तदाह । **गङ्गादैर्घ्येति ॥ तिष्ठद्गुप्रभृतीनि च ॥ एतानीति ॥**

एतानि निपात्यन्ते। तिष्ठन्ति गावो यस्मिन्काले स तिष्ठद्गु दोहनकालः। आयतीगवम्। इह शत्रादेशः पुंवद्भावविरहः समासान्तश्च निपात्यते। खलेयवम् इत्यादि।

६७२। पारे मध्ये षष्ठ्या वा। (२-१-१८)

पारमध्यशब्दौ षष्ठ्यन्तेन सह वा समस्येते। एदन्तत्वं चानयोर्निपात्यते। पक्षे षष्ठीतत्पुरुषः। पारेगङ्गादानय—गङ्गापारात्। मध्येगङ्गात्—गङ्गामध्यात्। महाविभाषया वाक्यमपि। गङ्गायाः पारात्। गङ्गाया मध्यात्।

शब्दरूपाणीत्यर्थः। **तिष्ठन्ति गाव इति** ॥ फलितार्थकथनम्। तिष्ठन्त्यो गावो यस्मिन् काले स तिष्ठद्गुः इत्येव वक्तव्यम्। 'सुप्सुपा' इत्यनुवृत्तेः। **दोहनकालः इति** ॥ तदा गवां शयनोपवेशनयोरभावादिति भावः। **आयतीगवमिति** ॥ आयत्यो गावो यस्मिन् काले इति विग्रहः। **इहेति** ॥ उदाहरणद्वये इत्यर्थः। **शत्रादेश इति** ॥ तिष्ठन्त्यो गाव इति आयत्यो गाव इति च प्रथमासमानाधिकरणत्वात् 'लटश्शतृशानचौ' इत्यप्राप्तौ तन्निपातन मिति भावः। **पुंवद्भावेति** ॥ तिष्ठन्तीशब्दस्येव आयतीशब्दस्यापि 'स्त्रियाः पुंवत्' इति पुंवत्त्वस्य प्राप्तौ तदभावः निपात्यते इति भावः। **समासान्तश्चेति** ॥ आयतीगोशब्दस्य टच् समासान्तो निपात्यते। तत्पुरुष एव गोशब्दस्य टज्विधेरिति भावः। समासान्तश्चेति चकारात् अव्ययीभावश्च निपात्यते इति ज्ञेयम्। तथाच तिष्ठद्गोशब्दस्य नपुंसकह्रस्वत्वम्। अव्ययत्वात् सुपो लुक्। आयतीगवशब्दात्तु 'नाव्ययीभावात्' इत्यम्भाव इत्यादि फलति। **इत्यादीति** ॥ खलेयवं खलेयुसम् इति समम्या अलुक् इत्यादि ग्राह्यम्। **पारे मध्ये षष्ठ्या वा** ॥ पारे मध्ये इति न सप्तम्यन्तयोर्ग्रहणम्। किन्तु पारमध्यशब्दयोरेव इत्याह। **पारमध्यशब्दाविति** ॥ **समस्येते इति** ॥ अव्ययीभावसंज्ञौ चेत्यपि बोध्यम्। ननु पारमध्यशब्दयोरकारान्तयोः ग्रहणे कथं एकारनिर्देश इत्यत आह। **एदन्तत्वञ्चेति** ॥ ननु विभाषा इत्यधिकारादेव सिद्धे वाग्रहणं किमर्थमित्यत आह। **पक्षे षष्ठीतत्पुरुष इति** ॥ वाग्रहणाभावेऽव्ययीभावसमासः विशेषविहितत्वात् षष्ठीसमासं बाधेत। तदबाधार्थं वाग्रहणमिति भावः। **पारेगङ्गादानयेति** ॥ गङ्गायाः पारात् इति विग्रहे अव्ययीभावसमासे सति सुब्लुकि पारशब्दस्य पूर्वनिपाते निपातनादेत्वे नपुंसकह्रस्वत्वे पारेगङ्गशब्दात् समासात् पुनः पञ्चम्युत्पत्तिः। 'अव्ययादाप्' इति न लुक्। अदन्ततया 'नाव्ययीभावात्' इति निषेधात्। अपञ्चम्याः इति पर्युदासादम्भावश्च नेति भावः। **गङ्गापारादिति** ॥ षष्ठीसमासपक्षे ज्ञेयम्। **मध्येगङ्गादिति** ॥ पारेगङ्गादितिवद्रूपम्। **गङ्गामध्यादिति** ॥ षष्ठीसमासे ज्ञेयम्। पारे मध्ये इति सप्तम्यन्ते षष्ठ्या समस्येते इति व्याख्यानेतु गङ्गायाः पारे मध्ये इति विग्रहे समासे सति 'तत्पुरुषे कृति बहुळम्' इति बहुळग्रहणात् सप्तम्योरलुकि नपुंसकह्रस्वत्वे समासात् पुनरुत्पन्नायाः सप्तम्याः अम्भावे 'पारेमध्यं, पारेगङ्गम्' इति सिद्धेः एकारनिर्देशो व्यर्थः स्यात्। अतः यत्र सप्तम्यर्थो न सम्भवति तदर्थमेकारनिपातनमिति भाष्ये स्पष्टम्। एतत्सूचनायैव पञ्चम्यन्तोदाहरणमिति बोध्यम्। ननु यदि वाग्रहणमिह पक्षे षष्ठीसमासप्राप्त्यर्थमेव स्यात्। तर्हि गङ्गायाः पारात्

६७३ । सङ्ख्या वंश्येन । (२-१-१९)

वंशो द्विधा, विद्यया जन्मना च । तत्र भवो वंश्यः । तद्वाचिना सह सङ्ख्या वा समस्यते । द्वौ मुनी वंश्यौ द्विमुनि व्याकरणस्य । त्रिमुनि । विद्यातद्वतामभेदविवक्षायां, त्रिमुनि व्याकरणम् । एकविंशतिभारद्वाजम् ।

६७४ । नदीभिश्च । (२-१-२०)

नदीभिः सङ्ख्या प्राग्वत् । 'समाहारे चायमिष्यते' (वा १२४६) । सप्तगङ्गम् । द्वियमुनम् ।

मध्यादिति वाक्यं न स्यादित्यत आह । **महाविभाषयेति** ॥ विभाषेत्यधिकृता महाविभाषा सर्वेषु समासविधिषु प्रायेण तस्यानुवृत्तेः महत्त्वं बोध्यम् । ननु अव्ययीभावसमासस्य षष्ठीसमासापवादत्वेऽपि तस्य महाविभाषया वैकल्पिकत्वात् तदभावपक्षे उत्सर्गतः षष्ठीतत्पुरुषः प्रवर्तत एव । तस्यापि षष्ठीसमासस्य विभाषाधिकारस्थत्वेन वैकल्पिकत्वात् । तदभावपक्षे वाक्यमपि सिद्ध्यत्येव । तस्मादिह सूत्रे वाग्रहणं व्यर्थमेवेति चेदुच्यते । "यत्र उत्सर्गापवादौ महाविभाषया विकल्पितौ तत्रापवादेन मुक्ते पुनरुत्सर्गो न प्रवर्तते" इति ज्ञापनार्थमिह वाग्रहणम् । तेन पूर्वं कायस्येत्यत्र एकदेशिसमासेन मुक्ते षष्ठीसमासो न भवति । दक्षस्यापत्यं दाक्षिरित्यत्र अत इञा मुक्ते 'तस्यापत्यम्' इत्यण् न भवति । किन्तु वाक्यमेवेति भाष्ये स्पष्टम् । **सङ्ख्या वंश्येन ॥ वंशो द्विधेति ॥** वंशस्सन्ततिः । 'सन्ततिर्गोत्रजननकुलान्यभिजनान्वयौ । वंशोऽन्ववायस्सन्तानः" इत्यमरः । **विद्यया जन्मनेति ॥** तत्र जन्मना वंशः पुत्रादिपरम्परेति प्रसिद्धमेव। विद्यया तु वंशः गुरुपरम्परा । "यस्माद्धर्मानाचिनोति स आचार्यः । तस्मै न द्रुह्येत् कदाचन । स हि विद्यातस्तं जनयति । तच्छ्रेष्ठं जन्म । शरीरमेव मातापितरौ जनयतः" इत्याद्यापस्तम्बस्मरणात् । **तत्र भवो वंश्य इति ॥** दिगादित्वात् यत् । **वा समस्यते इति ॥** सोऽव्ययीभावः इत्यपि बोध्यम् । **द्वौ मुनी वंश्याविति ॥** विग्रहोऽयम् । मुनिशब्दो विद्यावंशवाचीति सूचनाय वंश्यावित्युक्तम् । **द्विमुनि व्याकरणस्येति ॥** द्वौ च तौ मुनी चेति विग्रहे 'विशेषणं विशेष्येण बहुलम्' इति कर्मधारयं बाधित्वा अव्ययीभावः । अव्ययत्वात् सुब्लुक् । व्याकरणविद्यायाः प्रवर्तकौ द्वौ मुनी पाणिनिकात्यायनावित्यर्थः । **त्रिमुनीति ॥** त्रयो मुनयः पाणिनिकात्यायनपतञ्जलय इति विग्रहः । नन्वेवं त्रिमुनि व्याकरणमिति सामानाधिकरण्यानुपपत्तिरित्यत आह । **विद्यातद्वतामिति ॥** यद्यपि बहुव्रीहिणाप्येतत् सिद्धम् । तथापि विभक्त्यन्तरेषु रूपभेद इत्याहुः । अथ जन्मना वंश्यमुदाहरति । **एकविंशतिभारद्वाजमिति ॥** एकविंशतिभारद्वाजा इति कर्मधारयं बाधित्वा अव्ययीभावः । तत्र विग्रहवाक्ये भरद्वाजशब्दात् बिदादित्वादञ् । 'यञञोश्च' इति लुक् । समासे तु 'उपकादिभ्योऽन्यतरस्यामद्वन्द्वे' इति लुगभावः । 'तृतीयासप्तम्योर्बहुलम्' इति सूत्रे 'एकविंशतिभारद्वाजम्' इति प्रयोगदर्शनेन उपकादिषु भारद्वाजशब्दस्य पाठानुमानात् । **नदीभिश्च ॥ प्राग्वदिति ॥** नदीभिस्सङ्ख्या समस्यते सोऽव्ययीभाव इत्यर्थः । **समाहारे**

६७५। अन्यपदार्थे च संज्ञायाम्। (२-१-२१)

अन्यपदार्थे विद्यमानं सुवन्तं नदीभिः सह नित्यं समस्यते संज्ञायाम्। विभाषाधिकारेऽपि वाक्येन संज्ञानवगमादिह नित्यसमासः। उन्मत्तगङ्गं नाम देशः। लोहितगङ्गम्।

६७६। समासान्ताः। (५-४-६८)

इत्यधिकृत्य।

६७७। अव्ययीभावे शरत्प्रभृतिभ्यः। (५-४-१०७)

चेति ॥ वार्तिकम्। चकार एवार्थे। भाष्ये चकारविहीनस्यैव पाठात्। **सप्तगङ्गमिति** ॥ सप्तानां गङ्गानां समाहार इति विग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इति द्विगुसमासं बाधित्वा अव्ययीभावसमासः। **द्वियमुनमिति** ॥ द्वयोर्यमुनयोस्समाहार इति विग्रहः। "अत्र नदीशब्देन नदीशब्दविशेषस्य नदीवाचकानाञ्च ग्रहणम्" इति सङ्ख्यासंज्ञासूत्रे भाष्ये स्पष्टम्। तेन पञ्चनदं सप्तगोदावरमित्यादि सिध्यति। **अन्यपदार्थे च** ॥ सङ्ख्येति निवृत्तम्। नदीभिरित्यनुवर्तते। तदाह। **सुवन्तं नदीभिरिति** ॥ **समस्यत इति** ॥ सोऽव्ययीभावः इत्यपि बोध्यम्। **संज्ञानवगमादिति** ॥ सम्यक् ज्ञायत इति संज्ञा। 'आतश्चोपसर्गे' इति कर्मण्यङ्। उन्मत्ता गङ्गा यस्मिन्निति वाक्येन देशविशेषस्यानवगमादिह नित्यसमास इत्यर्थः। ततश्च नास्ति लौकिकविग्रहः अस्वपदविग्रहो वेति फलति। वस्तुतस्तु विभाषाधिकारादयमपि समासो वैकल्पिक एव। अत एव 'द्वितीयतृतीय' इति सूत्रे अन्यतरस्याङ्ग्रहणेन उत्सर्गापवादयोर्महाविभाषाविषयत्वात् अपवादाभावे उत्सर्गस्याप्रवृत्तिरिति ज्ञापितेऽर्थे उन्मत्तगङ्गमित्युदाहृतम्। "अव्ययीभावेन मुक्ते बहुव्रीहिर्न" इति चोक्तं भाष्ये। अस्य समासस्य नित्यत्वे तु तदसङ्गतिस्स्पष्टैव। कदाप्यव्ययीभावमुक्त्यसम्भवात्। **समासान्ताः** ॥ **इत्यधिकृत्येति** ॥ आपादपरिसमाप्तेरिति भावः। "अत्र समासपदम् अलौकिकविग्रहवाक्यपरमेव। अत एव बहुकुमारीत्यत्र ह्रस्वो न" इति 'गोस्त्रियोः' इति सूत्रे 'अन्तः' इति सूत्रे च भाष्ये स्पष्टम्। एवञ्चालौकिकविग्रहवाक्ये समाससंज्ञासमकालमेव समासान्त इति सिद्धान्तः। अन्तशब्दश्चरमावयववाची, अत एव उपशरदमित्यादौ 'नाव्ययीभावात्' इत्यम्। तत्र टचस्तदनवयवत्वे टजन्तस्याव्ययीभावसमासत्वाभावादम् न स्यात्। तथाच टचस्तदनवयवत्वे 'अव्ययानां भमात्रे टिलोपः' इति प्रसज्येत। टचस्तदवयवत्वे तु तदन्तस्यैवाव्ययीभावसमासतया अव्ययत्वादुपशरद् इत्यस्याव्ययत्वाभावान्न टिलोपः। समासान्तप्रत्ययाश्चालौकिकविग्रहवाक्ये सुपः पुरस्तादेव भवन्ति। अत एव 'प्रत्ययस्थात्' इति सूत्रभाष्ये 'बहुचर्मिका' इत्युदाहृतं सङ्गच्छते। विस्तरस्तु शब्देन्दुशेखरे ज्ञेयः। **अव्ययीभावे** ॥ 'राजाहस्सखिभ्यष्टच्' इत्यतः टजिति अनुवर्तते। तदाह। **शरदादिभ्यः इति** ॥ अव्ययीभावे

शरदादिभ्यष्टच्स्यात्समासान्तोऽव्ययीभावे । शरदः समीपमुपशरदम् । प्रतिविपाशम् । शरद् । विपाश् । अनस् । मनस् । उपानह् । दिव् । हिमवत् । अनडुह् । दिश् । दृश् । विश् । चेतस् । चतुर् । त्यद् । तद् । यद् । कियत् । 'जराया जरस् च' (ग १४७) । उपजरसम् । 'प्रतिपरसमनुभ्योऽक्ष्णः' (ग १४८) । 'यस्येति च' (सू ३११) । प्रत्यक्षम् । 'अक्ष्णः परम्' इति विग्रहे समासान्तविधानसामर्थ्यादव्ययीभावः । 'परोक्षे लिट्' (सू २१७१) इति निपातनात्परस्यौकारादेशः । परोक्षम् । 'परोक्षा क्रिया' इत्यादि तु अर्शआद्यच्चि । समक्षम् । अन्वक्षम् ।

उत्तरपदं यत् शरदादिप्रकृतिकं सुबन्तं तदन्तात् टच् स्यात् । स च अलौकिकविग्रहवाक्यान्तावयव इत्यर्थः । **उपशरदमिति** ॥ 'अव्ययं विभक्ति' इत्यादिना समीपार्थकस्य उपेत्यव्ययस्य शरद इति षष्ठ्यन्तेनाव्ययीभावः, टच् । टचस्समासावयवत्वेन तदन्तस्याव्ययीभावसमासत्वात् 'नाव्ययीभावात्' इत्यम् । उपशरद् इत्यस्य अव्ययीभावसमासत्वाभावात् 'अनव्ययत्वादव्ययानां भमात्रे टिलोपः' इति न भवति । विपाट्शब्दो नदीविशेषे वर्तते । "विपाशा तु विपाट् स्त्रियाम्" इत्यमरः । 'लक्षणेनाभिप्रती' इति अव्ययीभावसमासः । शरदादिगणं पठति । **शरदित्यादिना** ॥ अत्र झयन्तानां 'झयः' इति विकल्पे प्राप्ते नित्यार्थः पाठः । 'जराया जरश्च' इति शरदादिगणसूत्रम् । जराशब्दस्य जरसादेशश्चास्मिन् गणे वाच्यः इत्यर्थः । **उपजरसमिति** ॥ जरायास्समीपमित्यर्थः । सामीप्ये उपेत्यव्ययस्य जराया इति षष्ठ्यन्तेनाव्ययीभावसमासे कृते टच्, सुब्लुक्, उपेत्यस्य पूर्वनिपातः । टचो विभक्तित्वाभावात् तस्मिन् परेऽप्राप्ते जरसि अनेन जरस् । टजन्ताद्यथायथं सुपः अम्भाव इति भावः । 'प्रतिपरसम्' इत्यपि गणसूत्रम् । एतेभ्यः परस्याक्षिशब्दस्य इह गणे पाठ इत्यर्थः । 'यस्येति च' इति टचस्तद्धितत्वात्तस्मिन् परे इकारस्य लोप इति भावः । **प्रत्यक्षमिति** ॥ अक्षिणी प्रतीति विग्रहः । अक्ष्णोरभिमुखमित्यर्थः । 'लक्षणेत्थम्' इति कर्मप्रवचनीयत्वात् द्वितीया । 'लक्षणेनाभिप्रती' इत्यव्ययीभावः । टच्, सुब्लुक् । 'यस्येति च' इति इकारलोपः । प्रत्यक्षशब्दात् यथायथं सुबुत्पत्तिः । अम्भाव इति भावः । **परमिति** ॥ व्यवहितमित्यर्थः । अविषय इति यावत् । अक्ष्णः परमिति विग्रहे अव्ययीभाव इत्यन्वयः । ननु परशब्दस्यानव्ययत्वात् कथमिहाव्ययीभाव इत्यत आह । **समासान्तविधानसामर्थ्यादिति** ॥ प्रतिपरमिति परशब्दात् परस्याक्षिशब्दस्य टजर्थं शरदादिगणे पाठोऽवगतः । 'अव्ययीभावे शरत्प्रभृतिभ्यः' इत्यव्ययीभावे टज्विहितः । तत्सामर्थ्यादनव्ययस्यापि परशब्दस्याव्ययीभाव इत्यर्थः । **परोक्षमिति** ॥ अक्ष्णः परमिति विग्रहे परमित्यस्य अक्षि इत्यनेनाव्ययीभावसमासः । टच्, सुब्लुक् । परशब्दस्य ओकारोऽन्तादेशः पररूपम् । परोक्षाद्यथायथं सुप् अम्भाव इति भावः । **अर्शआद्यचीति** ॥ परोक्षमस्यास्तीत्यर्थे परोक्षशब्दात् धर्मप्रधानात् 'अर्शआदिभ्योऽच्' इति मत्वर्थीये अच्प्रत्यये कृते 'यस्येति च' इत्यकारलोपे टापि च कृते, परोक्षा क्रिया, इत्यादि ज्ञेयमित्यर्थः । अत्र गणसूत्रे

६७८। अनश्च। (५-४-१०८)

अन्नन्तादव्ययीभावाट्टच्स्यात्।

६७९। नस्तद्धिते। (६-४-१४४)

नान्तस्य भस्य टेर्लोपः स्यात्तद्धिते। उपराजम्। अध्यात्मम्।

६८०। नपुंसकादन्यतरस्याम्। (५-४-१०९)

अन्नन्तं यत्क्लीबं तदन्तादव्ययीभावाट्टज्वा स्यात्। उपचर्मम्—उपचर्म।

६८१। नदीपौर्णमास्याग्रहायणीभ्यः। (५-४-११०)

वा टच्स्यात्। उपनदम्—उपनदि। उपपौर्णमासम्—उपपौर्णमासि। उपाग्रहायणम्—उपाग्रहायणि।

परग्रहणं प्रक्षिप्तमिति युक्तम्। 'परोक्षे लिट्' इति सूत्रस्थभाष्यकैयटयोरत्र समासान्तस्यापि निपातनेनैव साधितत्वात्। **समक्षमिति** ॥ अक्ष्णोर्योग्यमित्यर्थः। यथार्थेऽव्ययीभावः। टच्, इकारलोप इति भावः। **अन्वक्षमिति** ॥ अक्ष्णोः पश्चादित्यर्थः। पश्चादर्थे अव्ययीभावः। शेषं समक्षवत्। **अनश्च** ॥ अव्ययीभावे इत्यनुवृत्तं पञ्चम्या विपरिणम्यते। अन इति तद्विशेषणम्। तदन्तविधिः। तदाह। **अन्नन्तादिति** ॥ **नस्तद्धिते** ॥ न इति षष्ठ्यन्तम्। तेन भस्येत्यधिकृतं विशेष्यते, तदन्तविधिः। टेरिति सूत्रमनुवर्तते। 'अल्लोपोऽनः' इत्यस्माल्लोप इति च। तदाह। **नान्तस्येति** ॥ **उपराजमिति** ॥ राज्ञस्समीपमित्यर्थः। सामीप्ये उपेत्यस्याव्ययीभावः। 'अनश्च' इति टच्, सुब्लुक्, टिलोपः। उपराजशब्दाद्यथायथं सुप् अम्भावः। टजन्तस्यैवाव्ययीभावसमासत्वाट्टचि परे अव्ययानां भमात्रे टिलोपाप्रवृत्तेः 'नस्तद्धिते' इत्यारम्भः। **अध्यात्ममिति** ॥ आत्मनीत्यर्थः। विभक्त्यर्थे अव्ययीभावः। शेषं पूर्ववत्। **नपुंसकादन्यतरस्याम्** ॥ अन इत्यनुवृत्तं नपुंसकस्य विशेषणम्। तदन्तविधिः। अन्नन्तात् क्लीबादिति लब्धम्। तेनाव्ययीभावे इत्यनुवृत्तं पञ्चम्या विपरिणतं विशेष्यते। तदन्तविधिः। तदाह। **अन्नन्तादिति** ॥ **उपचर्मम्—उपचर्मेति** ॥ चर्मणस्समीपमित्यर्थः। सामीप्ये उपेत्यव्ययस्याव्ययीभावः। टचि टिलोपः अम्भावः। टजभावे उपचर्मेति रूपम्। **नदीपौर्णमासी** ॥ शेषपूरणेन सूत्रं व्याचष्टे। **वा टजिति** ॥ अन्यतरस्यामिति टजिति चानुवर्तत इति भावः। नदी पौर्णमासी आग्रहायणी एतदन्तादव्ययीभावसमासाट्टज्वा स्यादिति यावत्। अत्र नदीसंज्ञकस्य न ग्रहणम्। पौर्णमास्याग्रहायणीग्रहणाल्लिङ्गात्। **उपनदमिति** ॥ नद्यास्समीपमित्यर्थः। सामीप्ये उपेत्यस्याव्ययीभावसमासः। टच्, 'यस्येति च' इतीकारलोपः। उपनदशब्दात् सुप् अम्भाव इति भावः। **उपनदीति** ॥ टजभावे रूपम्। नपुंसकहस्वः। 'अव्ययादाप्सुपः' इति लुक्। **उपपौर्णमासमिति** ॥ पौर्णमास्यास्समीपमित्यर्थः। टचि उपनदमितिवद्रूपम्। टजभावे उपपौर्णमासीति रूपम्।

६८२ । झयः । (५-४-१११)

झयन्तादव्ययीभावाट्टच्वा स्यात् । उपसमिधम्—उपसमित् ।

६८३ । गिरेश्च सेनकस्य । (५-४-११२)

गिर्यन्तादव्ययीभावाट्टच्वा स्यात् । सेनकग्रहणं पूजार्थम् । उपगिरम्—उपगिरि ॥

इत्यव्ययीभावसमासप्रकरणम् ।

एवम् उपाग्रहायणम् उपाग्रहायणीति ज्ञेयम् । अग्रे हायनमस्याः आग्रहायणी मार्गशीर्षपौर्णमासी, अत ऊर्ध्वं मकरायनप्रवृत्त्या उदगयनप्रवृत्तेः । उदगयनादिरेव हि संवत्सरस्यादिः । "अयने द्वे गतिरुदग्दक्षिणार्कस्य वत्सरः" इति सिद्धेः । **झयः** ॥ झया अव्ययीभावे इत्यनुवृत्तं पञ्चम्या विपरिणतं विशेष्यते । तदन्तविधिः । अन्यतरस्यामिति टजिति चानुवर्तते । तदाह । **झयन्तादिति** ॥ **गिरेश्च सेनकस्य** ॥ सेनको नाम आचार्यः । **पूजार्थमिति** ॥ अन्यतरस्याङ्ग्रहणानुवृत्त्यैव विकल्पसिद्धेरिति भावः । **उपगिरमिति** ॥ गिरेस्समीपमित्यर्थः । टचि 'यस्येति च' इति इकारलोपः अम्भावः । इह सेनकग्रहणात् 'नदी पौर्णमासी' इत्यत्र 'झयः' इत्यत्र चान्यतरस्याङ्ग्रहणन्नानुवर्तते इति केचित् ॥

इति श्रीमद्वासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायाम् अव्ययीभावसमासप्रकरणम् ।

श्रीरस्तु ।

॥ अथ तत्पुरुषसमासप्रकरणम् ॥

६८४ । तत्पुरुषः । (२-१-२२)

अधिकारोऽयम् । प्राग्बहुव्रीहेः ।

६८५ । द्विगुश्च । (२-१-२३)

द्विगुरपि तत्पुरुषसंज्ञः स्यात् । इदं सूत्रं त्यक्तुं शक्यम् । **'सङ्ख्यापूर्वो द्विगुश्च'** इति पठित्वा चकारबलेन संज्ञाद्वयसमावेशस्य सुवचत्वात् । **समासान्तः प्रयोजनम्** । पञ्चराजम् ।

६८६ । द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः । (२-१-२४)

अथ तत्पुरुषसमासनिरूपणम्—**तत्पुरुषः** ॥ **प्रागिति** ॥ 'शेषो बहुव्रीहिः' इत्यतः प्रागित्यर्थः । **द्विगुश्च** ॥ **द्विगुरपीति** ॥ 'तद्धितार्थोत्तरपदसमाहारे च' इति वक्ष्यमाणसमासस्य 'सङ्ख्यापूर्वो द्विगुः' इति द्विगुसंज्ञा विधास्यते । स द्विगुसमासोऽपि तत्पुरुषसंज्ञक इति यावत् । एतत्सूत्राभावे एकसंज्ञाधिकारात् द्विगुसंज्ञया तत्पुरुषसंज्ञा बाध्येतेति भावः । **इदमिति** ॥ 'द्विगुश्च' इत्येतदित्यर्थः । तर्हि द्विगुसंज्ञया तत्पुरुषसंज्ञा बाध्येतेत्यत आह । **सङ्ख्येति** ॥ 'सङ्ख्यापूर्वो द्विगुः' इति द्विगुसंज्ञाविधायकं सूत्रम् । तत्र चकारः पठनीयः । ततश्च सङ्ख्यापूर्वसमासः द्विगुसंज्ञकस्तत्पुरुषसंज्ञकश्च स्यादिति लभ्यते । एवञ्च चकारेण लघुना तत्पुरुषसंज्ञासमुच्चयलाभात् 'द्विगुश्च' इति गुरुभूतं सूत्रन्न कर्तव्यमित्यर्थः । ननु मास्तु द्विगोस्तत्पुरुषत्वमित्यत आह । **समासान्तः प्रयोजनमिति** ॥ तदुदाहृत्य दर्शयति । **पञ्चराजमिति** ॥ पञ्चानां राज्ञां समाहार इति विग्रहे 'तद्धितार्थ' इति द्विगुः । तस्य तत्पुरुषत्वात् 'राजाहस्सखिभ्यष्टच्' इति टच् । 'स नपुंसकम्' इति नपुंसकत्वम् । 'अकारान्तोत्तरपदो द्विगुस्स्त्रियाम्' इति तु न भवति । समासान्तस्य टचस्समुदायावयवत्वेन उत्तरपदावयवत्वाभावात् । नच 'सङ्ख्यापूर्वो द्विगुश्च' इति पाठे द्विगुतत्पुरुषसंज्ञयोः पर्यायेण प्रवृत्तिः स्यात् । अतस्समुच्चयार्थं 'द्विगुश्च' इति पृथक्सूत्रमास्त्विति वाच्यम् । सङ्ख्यापूर्व इति द्विगुरिति च योगे विभज्य पूर्वेण सङ्ख्यापूर्वस्य तत्पुरुषसंज्ञाविधिः, द्विगुरित्यनेन द्विगुसंज्ञाविधिरित्याश्रयणे सति, चकारमन्तरेणापि पर्यायेण प्रवृत्तिसिद्ध्या चकारस्य समुच्चयार्थत्वोपपत्तेः । **द्वितीया श्रित** ॥ **द्वितीयान्तमिति** ॥ प्रत्ययग्रहणपरिभाषालभ्यस्तदन्तविधिः । ननु सुपेत्यनुवृत्तं बहुवचनेनं

द्वितीयान्तं श्रितादिप्रकृतिकैः सुबन्तैः सह वा समस्यते स तत्पुरुषः । कृष्णं श्रितः कृष्णश्रितः । दुःखमतीतो दुःखातीतः इत्यादि । 'गम्यादीनामुपसङ्ख्यानम्' (वा १२४७) । ग्रामं गमी ग्रामगमी । अन्नं बुभुक्षुः अन्नबुभुक्षुः ।

६८७ । स्वयं क्तेन । (२-१-२५)

'द्वितीया—' (सू ६८६) इति न सम्बध्यते अयोग्यत्वात् । स्वयंकृतस्यापत्यं स्वायंकृतिः ।

विपरिणतं प्रत्ययग्रहणपरिभाषया सुबन्तपरम् । प्रत्ययग्रहणपरिभाषया च प्रत्ययग्रहणे प्रकृतिप्रत्ययसमुदायग्रहणं लभ्यते । तथाच सुबन्तैरित्यस्य, सुप्तत्प्रकृतिकसमुदायैरित्यर्थः पर्यवस्यति । श्रितादिशब्दास्तु क्तप्रत्ययान्ता एव, नतु सुबन्ताः । तेषां सुब्घटितसमुदायात्मकत्वाभावादित्यत आह । **श्रितादिप्रकृतिकैस्सुबन्तैरिति** ॥ श्रितादिशब्दाः श्रितादिप्रकृतिकेषु लाक्षणिका इति भावः । "गतिकारकोपपदानां कृद्भिस्सह समासवचनं प्राक्सुबुत्पत्तेः' इत्यस्य तु नायं विषयः । 'कर्तृकरणे कृता' 'साधनं कृता' इतिवत् कारकविशेषानुपादानात्" इति प्रौढमनोरमायां स्थितम् । नच श्रितादीनां समर्थविशेषणत्वात्तदन्तविधौ श्रितादिशब्दप्रकृतिकैरित्यर्थलाभात् परमः कृष्णश्रित इत्यत्रापि समासः स्यादिति वाच्यम् । समासप्रत्ययविधौ तदन्तविधिप्रतिषेधात् । **कृष्णं श्रितः इति** ॥ श्रयतेर्गतिविशेषार्थकत्वात् 'गत्यर्थाकर्मक' इति कर्तरि क्तः । 'न लोक' इति कृद्योगषष्ठीनिषेधात् कर्मणि द्वितीया । समासविधौ द्वितीयेति प्रथमानिर्दिष्टत्वात् कृष्णशब्दस्य पूर्वनिपातः । **दुःखातीत इति** ॥ दुःखमतीत इति विग्रहः । 'इण् गतौ' । अतिपूर्वात् कर्तरि क्तः । **इत्यादीति** ॥ गर्तं पतितो गर्तपतितः । 'पतॢ गतौ' कर्तरि क्तः । तनिपतिदरिद्रातिभ्यस्सनो वेट्कत्वेन 'यस्य विभाषा' इति इण्निषेधप्राप्तावपि अत एव निपातनादिट् । ग्रामं गतः ग्रामगतः ग्राममत्यस्तः अतिक्रान्तः ग्रामात्यस्तः ग्रामं प्राप्तः ग्रामप्राप्तः । संशयमापन्नः संशयापन्नः । **गम्यादीनामिति** ॥ गम्यादिप्रकृतिकैस्सुबन्तैरपि द्वितीयान्तं समस्यते स तत्पुरुष इति यावत् । **ग्रामं गमीति** ॥ 'गमेरिनिः' इति औणादिक इनिप्रत्ययः सच 'भविष्यति गम्यादयः' इति वचनात् भविष्यति काले भवति । 'अकेनोः' इति कृद्योगषष्ठीनिषेधात् कर्मणि द्वितीया । ग्रामं गमिष्यन्नित्यर्थः । **अन्नं बुभुक्षुरिति** ॥ भुजेस्सन् । 'सनाशंसभिक्ष उः' 'न लोक' इति कृद्योगषष्ठीनिषेधात् कर्मणि द्वितीया । बुभुक्षुशब्दो गम्यादौ पठित इति भावः । **स्वयं क्तेन** ॥ क्तप्रत्ययान्तप्रकृतिकसुबन्तेन स्वयमित्यव्ययं समस्यते स तत्पुरुष इत्यर्थः । **अयोग्यत्वादिति** ॥ स्वयमित्यव्ययस्य आत्मनेत्यर्थकस्य कर्तृशक्तिप्रधानतया तृतीयाया एवोचितत्वादिति भावः । स्वयमित्यव्ययस्य समासे असमासेऽपि को भेदः । असमासेऽपि 'अव्ययादाप्सुपः' इति लुकः प्रवृत्तेरित्यत आह । **स्वयंकृतस्यापत्यं स्वायंकृतिरिति** ॥ स्वयंकृतस्यापत्यमित्यर्थे 'अत इञ्' इति स्वयंकृतशब्दात् षष्ठ्यन्तादिञि तद्धितान्तप्रातिपदिकावयवत्वात् सुब्लुकि 'यस्येति च' इत्यकारलोपे आदिवृद्धौ स्वायंकृतिशब्दः । समासाभावे तु कृतशब्दस्यैव

६८८। खट्वा क्षेपे। (२-१-२६)

खट्वाप्रकृतिकं द्वितीयान्तं क्तान्तप्रकृतिकेन सुबन्तेन समस्यते, निन्दायाम्। खट्वारूढो जाल्मः। नित्यसमासोऽयम्। न हि वाक्येन निन्दाऽवगम्यते।

६८९। सामि। (२-१-२७)

सामिकृतम्।

६९०। कालाः। (२-१-२८)

'क्तेन' इत्येव। अनत्यन्तसंयोगार्थं वचनम्। मासप्रमितः प्रतिपच्चन्द्रः। मासं परिच्छेत्तुमारब्धवानित्यर्थः।

६९१। अत्यन्तसंयोगे च। (२-१-२९)

'कालाः' इत्येव। अक्तान्तार्थं वचनम्। मुहूर्तं सुखम् मुहूर्तसुखम्।

षष्ठ्यन्तत्वात्तत इञि ऋकारस्यादिवृद्धौ रपरत्वे स्वार्थिकार्तिः इत्येव स्यादिति भावः। वस्तुतस्तु असामर्थ्यादिह न तद्धितः। स्वयंकृतशब्दस्य समासस्वरः प्रयोजनम्। **खट्वा क्षेपे ॥** क्तेनेत्यनुवर्तते। प्रत्ययग्रहणात्तदन्तविधिः। क्षेपो निन्दा। द्वितीयेति सुपेति चानुवर्तते। तदुभयमपि प्रत्ययग्रहणपरिभाषया तदन्तपरं सत् प्रकृतिप्रत्ययसमुदायपरम्। खट्वाशब्दस्य आरूढशब्दस्य च सुब्घटितसमुदायात्मकत्वासम्भवात्। अतः खट्वाशब्दः क्तप्रत्ययान्तशब्दश्च तत्प्रकृतिके लाक्षणिक इत्याह। **खट्वाप्रकृतिकमिति ॥ खट्वारूढो जाल्मः इति ॥** "जाल्मोऽसमीक्ष्यकारी" इत्यमरः। खट्वा अम् आरूढ सु इत्यलौकिकविग्रहः। लौकिकविग्रहस्तु नास्तीत्याह। **नित्यसमासोऽयमिति ॥** तत् कुत इत्यत आह। **न हि वाक्येन निन्दाऽवगम्यत इति।** वृत्त्यर्थबोधकं वाक्यं लौकिकविग्रहः। तत्र खट्वामारूढ इति वाक्यं हि प्रहस्थाश्रमिणि निन्दां न गमयति। खट्वारूढ इति समासस्तु रूढ्या निन्दां गमयति। तथाच भाष्यम्। "अधीत्य स्नात्वा गुर्वनुज्ञातेन खट्वा आरोढव्या। यस्तावदन्यथा करोति, सः 'खट्वारूढोऽयं जाल्मः' इत्युच्यते। अत्र जाल्म इत्यनेन उद्वृत्ते अयं शब्दो रूढः। अवयवार्थे तु नाभिनिवेष्टव्यम्" इति सूचितम्। **सामि ॥** सामीत्यव्ययमर्धे वर्तते। तत् क्तान्तप्रकृतिकसुबन्तेन समस्यत इत्यर्थः। **सामिकृतमिति ॥** समासाभावे तु तद्धितवृत्तौ सामिकार्तिरिति स्यादिति भावः। **कालाः ॥ क्तेनेत्येवेति ॥** क्तेनेत्यनुवर्तत एवेत्यर्थः। कालवाचिप्रकृतिकद्वितीयान्ताः क्तप्रत्ययान्तप्रकृतिकसुबन्तेन वा समस्यन्त इत्यर्थः। ननु 'अत्यन्तसंयोगे च' इत्युत्तरसूत्रेणैव सिद्धे किमर्थमिदमित्यत आह। **अनत्यन्तेति ॥ मासप्रमित इति ॥** मासं प्रमित इति विग्रहः। प्रपूर्वकात् माधातोः 'आदिकर्मणि क्तः कर्तरि च' इति कर्तरि क्तः। तदाह। **मासं परिच्छेत्तुमिति ॥** इह प्रतिपच्चन्द्रेण मासस्य नात्यन्तसंयोग इति भावः। **अत्यन्तसंयोगे च ॥ काला इत्येवेति ॥** तेन अत्यन्तसंयोगे कालवाचिनो

६९२ । तृतीया तत्कृतार्थेन गुणवचनेन । (२-१-३०)

'तत्कृत–' इति लुप्ततृतीयाकम् । तृतीयान्तं तृतीयान्तार्थकृतगुणवचनेनार्थशब्देन च सह प्राग्वत् । शङ्कुलया खण्डः शङ्कुलाखण्डः । धान्येनार्थो धान्यार्थः । 'तत्कृत–' इति किम् । अक्ष्णा काणः ।

द्वितीयान्तास्सुपा वा समस्यन्त इति लभ्यत इत्यर्थः । ननु 'कालाः' इति पूर्वसूत्रेणैव सिद्धे किमर्थमिदमित्यत आह । **अक्तान्तार्थमिति** ॥ अक्त क्तेनेति निवृत्तमिति भावः । **मुहूर्तं सुखमिति** ॥ अत्यन्तसंयोगे द्वितीया । मुहूर्तव्यापि सुखमित्यर्थः । **तृतीया तत्कृत** ॥ तत्कृतेत्यस्याव्यवहितमप्यर्थेनेति परित्यज्य गुणवचनेनेत्यत्रान्वयं वक्तुमाह । **तत्कृतेति लुप्ततृतीयाकमिति** ॥ तत्र तृतीयेत्यनेन तृतीयान्तं विवक्षितम् । "तत्कृतेति लुप्ततृतीयाकं भिन्नं पदम् । तच्छब्देन तृतीयान्तपरामर्शिना तदर्थो लक्ष्यते । तत्कृतेनेत्येतच्च गुणद्वारा गुणवचनेऽन्वेति । ततश्च तृतीयान्तं तृतीयान्तार्थकृतो यो गुणः तद्वाचिना समस्यते, अर्थशब्देन च तृतीयान्तं समस्यत इति वाक्यद्वयं सम्पद्यते" इति भाष्ये स्थितम् । तदाह । **तृतीयान्तमित्यादिना** ॥ गुणेत्यस्य तत्कृतत्वसापेक्षत्वेऽपि सौत्रः समासः । "इदं सूत्रं कृतशब्दार्थद्वारक एव सामर्थ्ये प्रवर्तते । ननु साक्षात्परम्परान्वये" इति भाष्ये स्पष्टम् । नच घृतेन पाटवमित्यत्रातिप्रसङ्गशङ्क्यः । गुणेनेति सिद्धे वचनग्रहणात् गुणोपसर्जनद्रव्यवाचिशब्दो गृह्यते, व्याख्यानात् । **शंकुलया खण्डः शंकुलाखण्ड इति** ॥ देवदत्त इति शेषः । शङ्कुलाखण्डो देवदत्तः, इत्येव भाष्ये उदाहृतम् । 'खडि भेदने' भावे घञ् । खण्डनं खण्डः । मत्वर्थीयः अर्शआद्यच् । शङ्कुलयेति करणे तृतीया । शङ्कुलाकृतखण्डनक्रियावानित्यर्थः । यत्तु 'आकडारात्' इति सूत्रभाष्ये "समासकृदन्ततद्धितान्ताव्ययसर्वनामजातिसङ्ख्यासंज्ञाशब्दभिन्नमर्थवच्छब्दस्वरूपं गुणवचनसंज्ञं भवति" इत्युक्तम् । तदेतत् प्रकृते न प्रवर्तते । गुणमुक्तवता गुणवचनेनेति भाष्ये यौगिकत्वावगमात् । अतोऽत्र गुणशब्देन धर्ममात्रं विवक्षितम् । एवञ्च खण्डशब्दस्य क्रियावचनत्वेऽपि न क्षतिः । तत्त्वबोधिन्यान्तु 'वोतो गुणवचनात्' इत्यत्र "सत्त्वे निविशतेऽपैति" इत्यादिलक्षणलक्षितो गुणोऽत्र गृह्यत इत्युक्तम् । तद्व्याख्यावसरे क्रियाया गुणत्वं नास्तीत्यप्युक्तम् । इह तु खण्डशब्दस्य क्रियावाचिनोऽपि गुणवचनत्वमास्थितम् । तत्तु प्रकृतसूत्रस्थभाष्यविरुद्धत्वात् पूर्वोत्तरविरुद्धत्वाच्चोपेक्ष्यम् । अर्थशब्देन समासमुदाहरति । **धान्येनेति** ॥ अर्थशब्दो धनपरः । हेतौ तृतीया । धान्यहेतुकं धनमित्यर्थः । अत्र धनस्य धान्यहेतुकत्वेऽपि तत्करणकत्वाभावादप्राप्तौ पृथगुक्तिः । धान्येनेति प्रकृत्यादित्वात्तृतीया । धान्याभिन्नं धनमित्यर्थ इति केचित् । ननु शङ्कुलया खण्डः इत्यत्र 'कर्तृकरणे कृता बहुलम्' इत्येव सिद्धे तत्कृतेति व्यर्थमिति पृच्छति । **तत्कृत इति किमिति** ॥ गुणवचनेन चेत् तत्कृतेनैवेति नियमार्थन्तत्कृतग्रहणमित्यभिप्रेत्य प्रत्युदाहरति । **अक्ष्णा काणः इति** ॥ नह्यक्ष्णा काणत्वं कृतं, किन्तु रोगादिनेति भावः । गुणवचनेनेति किम् । गोभिर्वपावान् । गोसम्बन्धिधक्षीरादिभोजनेन देवदत्तस्य वपावत्त्वमस्तीति तत्कृतत्वम् । किन्तु न गुणवचनम् ।

६९३। पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः। (२-१-३१)

तृतीयान्तमेतैः प्राग्वत्। मासपूर्वः। मातृसदृशः। पितृसमः। ऊनार्थे, माषोनं कार्षापणम्। माषविकलम्। वाक्कलहः। आचारनिपुणः। गुडमिश्रः। आचारश्लक्ष्णः। 'मिश्रग्रहणे सोपसर्गस्यापि ग्रहणम्'। 'मिश्रं चानुपसर्गमसन्धौ' (सू ३८८८) इत्यत्रानुपसर्गग्रहणात्। गुडसम्मिश्रा धानाः। 'अवरस्योपसङ्ख्यानम्' (वा १२५६)। मासेनावरो मासावरः।

६९४। कर्तृकरणे कृता बहुलम्। (२-१-३२)

कर्तरि करणे च तृतीया कृदन्तेन बहुलं प्राग्वत्। हरिणा त्रातो हरित्रातः। नखैर्भिन्नो नखभिन्नः। 'कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्'

पूर्वसदृश ॥ **एतैरिति** ॥ पूर्व, सदृश, सम, ऊनार्थ, कलह, निपुण, मिश्र, श्लक्ष्ण, एतैरित्यर्थः। **मासपूर्व इति** ॥ मासेन पूर्व इति विग्रहः। मासात् प्रागुत्पन्न इत्यर्थः। यद्यप्यवधित्वसम्बन्धे 'अन्यारादितरर्ते' इति। दिक्शब्दयोगे पञ्चमी प्राप्ता। दिशि दृष्टश्शब्दो दिक्शब्द इत्यभ्युपगमात्। तथाप्यत एव ज्ञापकात् तृतीया। हेतौ तृतीयेत्यन्ये। **मातृसदृश इति** ॥ मात्रा सदृश इति विग्रहः। **पितृसम इति** ॥ पित्रा सम इति विग्रहः। 'तुल्यार्थैरतुलोपमाभ्याम्' इति तृतीया। 'तुल्यार्थैः' इति षष्ठ्याष्षष्ठीसमासेनैव सिद्धत्वमित्याहुः। **ऊनार्थेति** ॥ उदाहरणसूचनमिदम्। **माषोनमिति** ॥ माषाख्यपरिमाणविशेषेण ऊनं परिमाणमित्यर्थः। अत एव ज्ञापकादवधित्वे तृतीया हेतौ वा। अर्थग्रहणञ्च ऊनेनैव सम्बध्यते, न तु पूर्वादिभिरपि। समसदृशयोः पृथगुपादानात्। अर्थग्रहणस्य प्रयोजनमाह। **माषविकलमिति** ॥ माषेण विकलमिति विग्रहः। हीनमित्यर्थः। पूर्ववत् तृतीया। **वाक्कलह इति** ॥ वाचा कलह इति विग्रहः। **आचारनिपुण इति** ॥ आचारेण निपुण इति विग्रहः। आचारहेतुकनैपुण्यवानित्यर्थः। **गुडमिश्र इति** ॥ गुडेन मिश्र इति विग्रहः। **आचारश्लक्ष्ण इति** ॥ आचारेण श्लक्ष्ण इति विग्रहः। आचारहेतुककुशलत्ववानित्यर्थः। ननु गुडसम्मिश्रा इत्यत्र कथं समासः। सविशेषणत्वेऽपि समासप्रत्ययविधौ तदन्तविधिप्रतिषेधात्। तत्राह। **मिश्रग्रहणे सोपसर्गस्यापि ग्रहणमिति** ॥ कुत इत्यत आह। **मिश्रश्चेति** ॥ असन्धौ मिश्रेत्युत्तरपदमुपसर्गहीनं तृतीयान्तात् परमन्तोदात्तमिति तदर्थः। अत्रानुपसर्गग्रहणादितरत्र मिश्रग्रहणे सोपसर्गग्रहणं विज्ञायत इत्यर्थः। **मासेनावर इति** ॥ मासेन पूर्व इत्यर्थः। न्यून इत्यर्थे ऊनार्थकत्वादेव सिद्धम्। **कर्तृकरणे** ॥ कर्ता च करणञ्चेति समाहारद्वन्द्वात् सप्तमी। तृतीयेत्यनुवर्तते। प्रत्ययग्रहणपरिभाषया तदन्तग्रहणम्। कृतेत्यपि तथैव। तदाह। **कर्तरि करणे चेति** ॥ **प्राग्वदिति** ॥ समस्यते स तत्पुरुष इत्यर्थः। इह कृद्ग्रहणेन क्तप्रत्यय एव गृह्यते। बहुलग्रहणादिति भाष्यम्। अतः क्तान्तमेवोदाहरति। **हरिणा त्रात इति** ॥ पालित इत्यर्थः। ननु कृदन्तस्य

(प २९)। नखनिर्भिन्नः। 'कर्तृकरणे' इति किम्। भिक्षाभिरुषितः। हेतावेषा तृतीया। बहुळग्रहणं सर्वोपाधिव्यभिचारार्थम्। तेन 'दात्रेण लून-वान्' इत्यादौ न। 'कृता' किम्। काष्ठैः पचतितराम्।

६९५। कृत्यैरधिकार्थवचने। (२-१-३३)

स्तुतिनिन्दाफलकमर्थवादवचनमधिकार्थवचनम्। तत्र कर्तरि करणे च तृतीया कृत्यैः सह प्राग्वत्। वातच्छेद्यं तृणम्। काकपेया नदी।

६९६। अन्नेन व्यञ्जनम्। (२-१-३४)

संस्कारकद्रव्यवाचकं तृतीयान्तमन्नेन प्राग्वत्। दध्ना ओदनो दध्यो-दनः। इहान्तर्भूतोपसेकक्रियाद्वारा सामर्थ्यम्।

६९७। भक्ष्येण मिश्रीकरणम्। (२-१-३५)

गुडेन धानाः गुडधानाः। मिश्रणक्रियाद्वारा सामर्थ्यम्।

समर्थविशेषणत्वेऽपि समासप्रत्ययविधौ तदन्तविधिप्रतिषेधान्नखनिर्भिन्न इत्यत्र न स्यादित्यत आह। **कृद्ग्रहणे इति**॥ परिभाषेयं 'गतिरनन्तरः' इति सूत्रे भाष्ये स्थिता। **पचतितरा-मिति**॥ अतिशयेन पचतीत्यर्थः। अतिशायने 'तिङश्च' इत्यनुवृत्तौ 'द्विवचनविभज्य' इति तरप्। 'किमेत्तिङव्ययघादामद्रव्यप्रकर्षे' इत्याम्। अत्र तद्धितान्तेन समासनिवृत्त्यर्थं कृद्ग्रहण-मिति भावः। **कृत्यैरधिकार्थवचने**॥ **अर्थवादवचनमिति**॥ असदुक्तिरित्यर्थः। **वातच्छेद्यं तृणमिति**॥ वातेन च्छेद्यमिति विग्रहः। छेत्तुं योग्यमित्यर्थः। 'ऋहलोर्ण्यत्' इति कृत्यप्रत्ययः। कोमळत्वेन स्तुतिः। दुर्बलत्वेन निन्दा वा। **काकपेयेति**॥ 'अचो यत्' इति यत् 'ईद्यति' इति ईत्त्वं, गुणः। अत्र पूर्णाम्भस्त्वेन स्तुतिः। अल्पाम्भस्त्वेन निन्दा वा। **अन्नेन व्यञ्जनम्**॥ व्यञ्जनशब्दं व्याचष्टे। **संस्कारेति**॥ संस्क्रियते गुणविशेषवत्तया क्रियते अनेनेति संस्कारः, उपसेकादिसाधनं दध्यादि, तद्वाचकमित्यर्थः। **अन्नेनेति**॥ अन्नम् ओदनः। तद्वाचकशब्देनेत्यर्थः। 'भिस्सा स्त्री भक्तमन्धोऽन्नम्' इति कोशः। **दध्ना ओदनो दध्यो-दन इति**॥ नन्विह दध्नेति करणत्वस्य उपसिक्तपदापेक्षत्वात् असामर्थ्यात् कथमिह समास इत्यत आह। **अन्तर्भूतेति**॥ उपसेकक्रियां विना दध्नः अन्नसंस्कारत्वानुपपत्त्या दध्ना इत्यस्य दधिकरणकोपसेके प्रवृत्तेर्नासामर्थ्यमिति भावः। तदुक्तं भाष्ये—"युक्तार्थसम्प्रत्ययात् सामर्थ्यम्" इति। **भक्ष्येण मिश्रीकरणम्**॥ मिश्रीक्रियते खाद्यं द्रव्यमनेनेति मिश्रीकरणं, गुडादि। तद्वाचकं तृतीयान्तं भक्ष्यवाचकेन समस्यते इत्यर्थः। कठिनद्रव्यं खाद्यम्। पृथुकादि भक्ष्यं विवक्षितम्। **गुडेन धाना गुडधाना इति**॥ "धाना भ्रष्टयवेऽस्त्रियाम्" इत्यमरः। गुडेन मिश्रा धाना इत्यर्थः। ननु गुडकरणत्वस्य मिश्रपदापेक्षत्वान्न सामर्थ्यमित्यत आह।

६९८। चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः। (२-१-३६)

चतुर्थ्यन्तार्थाय यत्तद्वाचिनार्थादिभिश्च चतुर्थ्यन्तं वा प्राग्वत्। 'तदर्थेन प्रकृतिविकृतिभाव एव'। बलिरक्षितग्रहणाज्ज्ञापकात्। यूपाय दारु यूपदारु। नेह। रन्धनाय स्थाली। अश्वघासादयस्तु षष्ठीसमासाः। 'अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम्' (वा १२७३–१२७४)। द्विजायायं द्विजार्थः सूपः। द्विजार्था यवागूः। द्विजार्थं पयः। भूतबलिः। गोहितम्। गोसुखम्। गोरक्षितम्।

मिश्रेणेति ॥ गुडेनेत्यस्य गुडकरणकमिश्रणे वृत्तेर्नासामर्थ्यमिति भावः। **चतुर्थी** ॥ प्रत्ययग्रहणपरिभाषया चतुर्थीत्यनेन चतुर्थ्यन्तं गृह्यते। तदर्थ, अर्थ, बलि, हित, सुख, रक्षित, एषां द्वन्द्वः। चतुर्थ्यन्तं एतैष्वद्भिस्समस्यते, स तत्पुरुषः इति फलितम्। तदर्थेत्यत्र तच्छब्देन चतुर्थ्यन्तार्थो विवक्षितः। तस्मै चतुर्थ्यन्तार्थाय इदन्तदर्थम्। 'अर्थेन नित्यसमासः' इति वक्ष्यमाणस्समासः। चतुर्थ्यन्तवाच्यप्रयोजनकं यत् तत् तदर्थमिति पर्यवस्यति। तदाह। **चतुर्थ्यन्तार्थायेत्यादिना** ॥ **तदर्थेनेति** ॥ तदर्थेन समास इति यदुक्तं तत्प्रकृतिविकृतिभाव एव भवति, नत्वन्यत्रेत्यर्थः। कुत इत्यत आह। **बलिरक्षितेति** ॥ यदि तादर्थ्यमात्रे अयं समासः स्यात्, प्रकृतिविकृतिभाव एवेति नोच्येत, तर्हि बलिरक्षितग्रहणं व्यर्थं स्यात्। भूतेभ्यो बलिः, गोभ्यो रक्षितं तृणमित्यत्रापि बलेर्भूतार्थतया रक्षिततृणस्य गवार्थतया च तदर्थैत्वेव समाससिद्धेरिति भावः। **यूपायेति** ॥ अत्र चतुर्थ्यन्तवाच्ययूपार्थं दारु। अतो दारुशब्देन यूपायेत्यस्य समासः। यूपस्य दारुविकृतित्वाच्च। तक्षादिना अष्टाश्रीकृतवृक्षस्यैव यूपशब्दार्थत्वात्। अथ प्रकृतिविकृतिभावग्रहणस्य प्रयोजनमाह। **नेहेति** ॥ **रन्धनायेति** ॥ पाकायेत्यर्थः। 'रध हिंसायाम्'। इह पाको विवक्षितः। भावे ल्युट्, अनादेशः। 'रधिजभोरचि' इति नुम्। स्थाल्याश्चतुर्थ्यन्तवाच्यपाकार्थत्वेऽपि प्रकृतिविकृतिभावविरहान्न समासः। ननु अश्वेभ्यो घासः अश्वघासः, धर्माय नियमः धर्मनियमः इत्यादौ कथं तदर्थेन समासः। प्रकृतिविकृतिभावविरहादित्यत आह। **अश्वघासादयस्तु षष्ठीसमासः इति** ॥ नचैवं रन्धनाय स्थालीत्यत्रापि षष्ठीसमासः स्यादेवेति प्रकृतिविकृतिभावनियमो व्यर्थ इति वाच्यम्। शाब्दबोधे सम्बन्धत्वतादर्थ्यत्वकृतवैलक्षण्येन उक्तनियमसाफल्यात्। एवञ्च रन्धनाय स्थालीति सम्बन्धत्वेन भाने षष्ठीसमास इष्ट एव। तादर्थ्यत्वेन भाने चतुर्थीसमासवारणाय तु प्रकृतिविकृतिभावनियमाश्रयणमित्यास्तान्तावत्। तदेवन्तदर्थैत्यंशः प्रपञ्चितः। अथेदानीमर्थशब्देन चतुर्थ्यन्तस्य समासे विशेषमाह। **अर्थेनेति** ॥ अर्थशब्देन चतुर्थ्यन्तस्य नित्यसमास इति वक्तव्यम्। अन्यथा विभाषाधिकाराद्विकल्पस्स्यात्। विशेष्यस्य प्रधानस्य यल्लिङ्गं तल्लिङ्गमित्यपि वक्तव्यम्। अन्यथा अर्थशब्दस्य नित्यं पुल्लिङ्गत्वात् 'परवल्लिङ्गम्' इति सर्वत्र पुल्लिङ्गतैव स्यादित्यर्थः। अर्थशब्दोऽत्र वस्तुपरः। 'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु'

६९९ । पञ्चमी भयेन । (२-१-३७)

चोराद्भयं चोरभयम् । 'भयभीतभीतिभीभिरिति वाच्यम्' (वा १२७५) वृकभीतः ।

७०० । अपेतापोढमुक्तपतितापत्रस्तैरल्पशः । (२-१-३८)

एतैः सहाल्पं पञ्चम्यन्तं समस्यते स तत्पुरुषः । सुखापेतः । कल्पनापोढः । चक्रमुक्तः । स्वर्गपतितः । तुरङ्गापत्रस्तः । 'अल्पशः' किम् । प्रासादात्पतितः ।

७०१ । स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन । (२-१-३९)

इत्यमरः । इह उपकारकं वस्तु विवक्षितमित्यभिप्रेत्योदाहरति । **द्विजायायं द्विजार्थस्सूप इति** ॥ तत्र द्विजायायमित्यस्वपदविग्रहः । तत्र अर्थशब्दस्थाने अयमिति शब्दः । नित्यसमासत्वेनास्वपदविग्रहौचित्यात् । **द्विजायेति** ॥ तादर्थ्यचतुर्थी । तदन्तस्य अर्थशब्देन समासः । विशेष्यसूपशब्दस्य पुल्लिङ्गत्वात् समासस्य पुल्लिङ्गता च । द्विजस्य उपकारकस्सूप इत्यर्थः । **द्विजार्था यवागूरिति** ॥ द्विजस्येयमिति विग्रहः । अर्थशब्दस्य नित्यपुल्लिङ्गत्वेऽपि 'परवल्लिङ्गम्' इति पुल्लिङ्गं बाधित्वा अनेन विशेष्यलिङ्गानुसारेण स्त्रीलिङ्गता । **द्विजार्थं पयः इति** ॥ द्विजस्येदमिति विग्रहः । अत्र विशेष्यलिङ्गानुसारान्नपुंसकत्वम् । भाष्ये तु चतुर्थ्यैव तादर्थ्यस्योक्तत्वात् 'उक्तार्थानामप्रयोगः' इति न्यायेन अर्थशब्देन विग्रहाप्रसक्तेर्नित्यसमासत्वं न्यायसिद्धमेव । गुरोरिदं गुर्वर्थमित्यादाविव लिङ्गमपि लोकत एव सिद्धमिति वार्तिकमिदं प्रत्याख्यातम् । **भूतबलिरिति** ॥ भूतेभ्यो बलिरिति विग्रहः । तादर्थ्यचतुर्थ्यन्तस्य बलिशब्देन समासः । **गोहितमिति** ॥ गोभ्यो हितमिति विग्रहः । गवामनुकूलमित्यर्थः । 'हितयोगे च' इति शेषषष्ठ्यपवादश्चतुर्थी । तदन्तस्य हितशब्देन समासः । **गोरक्षितमिति** ॥ तृणादिकमिति शेषः । गोभ्यो रक्षितमिति विग्रहः । तादर्थ्यचतुर्थ्यन्तस्य रक्षितशब्देन समासः । इति चतुर्थीसमासः । **पञ्चमी भयेन** ॥ पञ्चम्यन्तं भयशब्देन सुबन्तेन समस्यत इत्यर्थः । **चोराद्भयं चोरभयमिति** ॥ 'भीत्रार्थानां भयहेतुः' इति अपादानत्वात् पञ्चमी । **भयभीतभीतिभीभिरिति** ॥ सूत्रे भयशब्दस्यैव ग्रहणात् भीतादेरप्राप्ते समासे वचनम् । **वृकभीत इति** ॥ वृकभीतः वृकभीरित्यप्युदाहार्यम् । अत्र भाष्ये "अपर आहेत्युक्त्वा भयनिर्गतजुगुप्सुभिरिति वक्तव्यम्" इत्युक्त्वा 'वृकभयं, ग्रामनिर्गतः, अधर्मजुगुप्सुः' इत्युदाहृतम् । चोरत्रस्तः, भोगोपरतः, इत्यादौ 'सुप्सुपा' इति वा मयूरव्यंसकादित्वाद्वा समासः । **अपेतापोढ** ॥ अल्पशः इति स्वार्थे शस् । अत एव निपातनात् । तदाह । **अल्पं पञ्चम्यन्तमिति** ॥ 'बह्वल्पार्थात्' इति शस् तु न भवति । 'बह्वल्पार्थान्मङ्गळामङ्गळवचनम्' इति वक्ष्यमाणत्वात् ॥ **स्तोकान्तिक** ॥ स्तोक, अन्तिक, दूर, एतदर्थकानि, कृच्छ्र एतानि पञ्चम्यन्तानि क्तप्रत्ययान्तेन समस्यन्ते इत्यर्थः । अर्थग्रहणं

स्तोकान्मुक्तः। अल्पान्मुक्तः। अन्तिकादागतः। अभ्याशादागतः। दूरादागतः। विप्रकृष्टादागतः। कृच्छ्रादागतः। 'पञ्चम्याः स्तोकादिभ्यः' (सू ९५९) इत्यलुक्।

७०२। षष्ठी। (२-२-८)

राज्ञः पुरुषो राजपुरुषः।

७०३। याजकादिभिश्च। (२-२-९)

एभिः षष्ठ्यन्तं समस्यते। 'तृजकाभ्यां कर्तरि' (सू ७०९) इत्यस्य प्रतिप्रसवोऽयम्। ब्राह्मणयाजकः। देवपूजकः। 'गुणान्तरेण तरलोपश्चेति वक्तव्यम्' (वा ३८४१)। तरबन्तं यद्गुणवाचि तेन सह समासस्तरलोपश्च। 'न निर्धारणे' (सू ७०४) इति 'पूरणगुण—' (सू ७०५) इति च निषेधस्य प्रतिप्रसवोऽयम्। सर्वेषां श्वेततरः सर्वश्वेतः। सर्वेषां महत्तरः सर्वमहान्।

स्तोकान्तिकदूरेषु सम्बध्यते। **अल्पान्मुक्तः इति** ॥ स्तोकपर्यायस्योदाहरणम्। **अभ्याशादागतः इति** ॥ अन्तिकपर्यायस्योदाहरणम्। **विप्रकृष्टादागतः इति** ॥ दूरशब्दपर्याय उदाहार्यः। 'करणे च स्तोक' इति पञ्चमी। दूरादागत इत्यत्र तु 'दूरान्तिकार्थैभ्यः' इति पञ्चमी। अत्र 'सुपो धातु' इति लुकमाशङ्क्य आह। **पञ्चम्यास्तोकादिभ्य इत्यलुगिति** ॥ इति पञ्चमीसमासः। **षष्ठी** ॥ षष्ठ्यन्तं सुबन्तेन समस्यते, स तत्पुरुष इत्यर्थः। **राजपुरुष इति** ॥ राजन् अस् पुरुष स् इत्यलौकिकविग्रहवाक्ये समासे सति सुब्लुकि अन्तर्वर्तिनी विभक्तिः प्रत्ययलक्षणेनाश्रित्य नलोपः। नच लुकां लुप्तत्वान्न प्रत्ययलक्षणमिति वाच्यम्। पदत्वस्य सुब्घटितसमुदायधर्मत्वेन तस्य अङ्गकार्यत्वाभावादिति भावः। **याजकादिभिश्च** ॥ ननु 'षष्ठी' इति पूर्वसूत्रेणैव सिद्धे किमर्थमिदमित्यत आह। **तृजकाभ्यामिति** ॥ **ब्राह्मणयाजकः इति** ॥ ब्राह्मणस्य याजकः इति विग्रहः। यजतेर्ण्यन्तात् कर्तरि ल्युट्। अकादेशः। 'कर्तृकर्मणोः कृति' इति कर्मणि षष्ठी। **देवपूजक इति** ॥ देवानां पूजक इति विग्रहः। पूजकशब्दो याजकादिरिति भावः। भूभर्तेति तृजन्तस्योदाहार्यम्। भर्तृशब्दस्य याजकादित्वात्। **गुणान्तरेणेति** ॥ वार्तिकमिदम्। 'सर्वं गुण' इति सूत्रे भाष्ये स्थितम्। गुणवाचकात् विहितो यस्तरप् तदन्तेन षष्ठी वा समस्यते, तरपो लोपश्चेत्यर्थः। फलितमाह। **तरबन्तं यदिति** ॥ ननु 'षष्ठी' इति सूत्रेणैव सिद्धे किमर्थमिदमित्यत आह। **ननिर्धारणे इति** ॥ 'सर्वं गुण' इति सूत्रे भाष्ये तु 'पूरणगुण' इत्यस्यापवाद इत्येवोक्तम्। सर्वशब्दानुवृत्तेस्सर्वशब्द एवेदं वार्तिकमित्यभिप्रेत्योदाहरति। **सर्वेषां श्वेततरस्सर्वश्वेतः इति** ॥ बकानां गुण इति शेषः। द्रव्यान्तरवृत्तिश्वेतरूपापेक्षया सर्वेषां बकानां श्वेतगुणोऽयमधिक

'कृद्योगा च षष्ठी समस्यत इति वाच्यम्' (वा १३१७)। इध्मस्य प्रव्रश्चनः इध्मप्रव्रश्चनः।

७०४। न निर्धारणे। (२-२-१०)

निर्धारणे या षष्ठी सा न समस्यते। नृणां द्विजः श्रेष्ठः। 'प्रतिपद-विधाना षष्ठी न समस्यत इति वाच्यम्' (वा १३२०)। सर्पिषो ज्ञानम्।

७०५। पूरणगुणसुहितार्थसदव्ययतव्य-समानाधिकरणेन। (२-२-११)

पूरणाद्यर्थैः सदादिभिश्च षष्ठी न समस्यते। पूरणे, सतां षष्ठः। गुणे, काकस्य काष्ण्यम्। ब्राह्मणस्य शुक्लाः। यदा प्रकरणादिना दन्ता इति विशेष्यं

इत्यर्थः। 'द्विवचनविभज्य' इति विभक्तव्योपपदे तरप्। अत्र सर्वेषामिति षष्ठ्यन्तस्य श्वेत-तरशब्देन समासे तरपो लोपे सर्वश्वेत इति रूपम्। **सर्वमहानिति** ॥ ईश्वर इति शेषः। पूर्ववत्तरप्। सर्वेषां महत्तरः इति विग्रहः। इतरसम्बन्धिमहत्त्वापेक्षया ईश्वरस्य महत्त्वमधिक-मित्यर्थः। **कृद्योगेति** ॥ कृता योगो यस्या इति विग्रहः। 'कर्तृकर्मणोः कृति' इति विहिता इति भाष्यम्। **इध्मप्रव्रश्चन इति** ॥ कुठार इति शेषः। प्रवृश्चयतेऽनेनेति प्रव्रश्चनः। करणे ल्युट्। इध्मानां प्रव्रश्चन इति विग्रहः। कर्मणि षष्ठी। 'प्रतिपदविधाना' इति वक्ष्य-माणनिषेधस्यापवादोऽयम्। **न निर्धारणे ॥ नृणां द्विजश्रेष्ठः इति** ॥ अत्र नृणामिति षष्ठ्यन्तस्य द्विजशब्देन समासो न भवति। पुरुषाणामुत्तमः पुरुषोत्तमः इत्यत्र तु शेषषष्ठ्येव, न तु निर्धारणषष्ठी। यतो निर्धारणम्, यच्च निर्धार्यते, यश्च निर्धारणहेतुः, एतत्त्रितयसन्निधान-एव तस्याः प्रवृत्तेरिति कैयटः। गुणेन निषेधस्त्वनित्य इति तरप्सूत्रे कैयटः। केचित्तु "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः" इति गीतावाक्यात् कर्मधारय एव। उत्तमशब्दस्य विशेषणत्वे-ऽपि राजदन्तादित्वात् परनिपातः। **प्रतिपदविधानेति** ॥ पदं पदं प्रतीति वीप्सायामव्ययी-भावः। प्रतिपदं विधानं यस्यास्सा प्रतिपदविधाना 'षष्ठी शेषे' इति शेषलक्षणां षष्ठीं वर्जयित्वा सर्वा षष्ठी प्रतिपदविधानेति भाष्यम्। **सर्पिषो ज्ञानमिति** ॥ अत्र 'ज्ञोऽविदर्थस्य करणे' इति विहितषष्ठ्यास्समासो न भवति। 'न निर्धारणे' इति प्रत्याख्येयमेवेति भाष्ये स्पष्टमि-त्यलम्। **पूरणगुण** ॥ पूरणगुणसुहितानि अर्था येषान्ते पूरणगुणसुहितार्थाः, ते च सच्च अव्ययञ्च तव्यश्च समानाधिकरणञ्चेति समाहारद्वन्द्वात् तृतीया। तदाह। **पूरणाद्यर्थैरिति** ॥ **पूरणे इति** ॥ उदाहरणं वक्ष्यत इति शेषः। **सतां षष्ठ इति** ॥ षण्णां पूरणः इत्यर्थे 'तस्य पूरणे डट्, षट्कतिकतिपयचतुरां थुक्' नच कुम्भपूरणमित्यत्रापि स निषेधस्स्यादिति वाच्यम्। 'सोऽचि लोपे चेत् पादपूरणम्' इति निर्देशेन पूरणार्थकप्रत्ययस्यैव ग्रहणात्। 'उच्छषष्ठाङ्कित-सैकतानि' इत्यत्र तु उच्छात्मकषष्ठ इति व्याख्येयम्। **गुण इति** ॥ उदाहरणं वक्ष्यते

ज्ञातं तदेदमुदाहरणम्। 'अनित्योऽयं गुणेन निषेधः'। 'तदशिष्यं संज्ञाप्रमाणत्वात्' (सू १२९५) इत्यादिनिर्देशात्। तेन 'अर्थगौरवम्' 'बुद्धिमान्द्यम्' इत्यादि सिद्धम्। सुहितार्थास्तृप्त्यर्थाः। फलानां सुहितः। तृतीयासमासस्तु स्यादेव। स्वरे विशेषः। सत्, द्विजस्य कुर्वन्—कुर्वाणो वा। किङ्कर

इत्यर्थः। प्रधानत्वेन वा उपसर्जनत्वेन वा गुणवाची गुणशब्दः। व्याख्यानात्। तदाह। **काकस्य काष्ण्यम्, ब्राह्मणस्य शुक्ला इति** ॥ कृष्णशब्दात् 'गुणवचनब्राह्मणादिभ्यः' इति भावे ष्यञ्। शुक्लशब्दात्तु 'गुणवचनेभ्यो मतुपो लुक्' इति लुक्। ननु दन्ता इति शेषपूरणेन ब्राह्मणस्य दन्ताश्शुक्लाः इत्यर्थे ब्राह्मणशब्दस्य दन्तशब्देनैवान्वयात् शुक्लशब्देनान्वयाभावादसामर्थ्यात् कथमिह समासप्रवृत्तिरित्यत आह। **यदा प्रकरणादिनेति** ॥ प्रकरणादर्थाद्वेत्यर्थः। दन्तास्संयुक्ताश्शुभावहाः, न तु विरळा इत्यादिदन्तवर्णने प्रकृते यदा ब्राह्मणस्य शुक्लाः इत्युच्यते, तदा प्रकरणात् दन्ता इति विशेष्योपस्थितिः। यदा वा कृष्णवर्णेषु कृष्णवस्त्रभूषणेषु प्रकृतेषु ब्राह्मणस्य शुक्ला इत्युच्यते, तदा अर्थात् दन्ता इति विशेष्योपस्थितिः, तत्र सामर्थ्यसत्त्वात् समासे प्राप्ते निषेधः इत्यर्थः। अत्र 'आकडारात्' इति सूत्रोक्तगुणवचनसंज्ञकानां 'तृतीया तत्कृत' इति सूत्रे प्रपञ्चितानां गुणानां न ग्रहणम्। अत्र गुणवचनशब्दाभावात्। किन्तु 'वोतो गुणवचनात्' इत्यत्र सूत्रभाष्ये प्रपञ्चितानां 'सत्त्वे निविशतेऽपैति' इत्यादिलक्षणलक्षितगुणानामेव ग्रहणमिति बोध्यम्। एतेन 'आकडारात्' इति सूत्रभाष्ये तद्धितान्तस्य गुणवचनत्वपर्युदासात् कथं काष्ण्यादिशब्दानां गुणवाचित्वमिति निरस्तम्। अथ अर्थगौरवमित्यादौ षष्ठीसमासं साधयितुमाह। **अनित्योऽयमिति** ॥ **संज्ञाप्रमाणत्वादिति** ॥ सज्ञायाः प्रमाणत्वं संज्ञाप्रमाणत्वं तस्मादिति विग्रहः। अत्र प्रमाणत्वस्य गुणत्वात् तेन षष्ठीसमासनिषेधात्समासनिर्देशोऽनुपपन्नस्स्यात्। अतो गुणेन समासनिषेधः अनित्य इति विज्ञायत इत्यर्थः। **इत्यादीति** ॥ आदिना गुणकात्स्न्यमित्यादिसङ्ग्रहः। वस्तुतस्तु अनित्यो गुणेन निषेध इत्ययमर्थो भाष्ये न दृश्यते। नच कृष्णैकत्वमित्यादौ समासानुपपत्तिरिति वाच्यम्। 'पङ्क्तिविंशति' इति सूत्रे विंशत्यादिशब्दा भाववचना भवन्तीत्युक्ता गुणवाचित्वमास्थाय गवां विंशतिर्गवां सहस्रमित्यर्थे गोविंशतिर्गोसहस्रमित्यादिप्रयोगात्। अर्थगौरवमित्यादौ तु अर्थगतं गौरवमिति मध्यमपदलोपिसमासो बोध्य इति शब्देन्दुशेखरे प्रपञ्चितम्। सुहितपदं व्याचष्टे। **सुहितार्थास्तृप्त्यर्था इति** ॥ **फलानां सुहित इति** ॥ करणत्वस्याविवक्षायां सम्बन्धविवक्षायां षष्ठी। अर्थग्रहणात् फलानां तृप्तिरित्यादावपि न समासः। नपुंसकत्वे सति फलसुहितमिति कथं समास इत्यत आह। **तृतीयासमासस्तु स्यादेवेति** ॥ करणत्वविवक्षायां तृतीया। 'कर्तृकरणे कृता बहुळम्' इति समास इति भावः। तर्हि सुहितयोगे षष्ठीसमासनिषेधो व्यर्थ इत्यत आह। **स्वरे विशेष इति** ॥ तृतीयासमासे 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरः। षष्ठीसमासे तु समासस्येत्यन्तोदात्तत्वमिति फलभेद इति भावः। **सदिति** ॥ सद्योगे षष्ठीसमासनिषेधः उदाहियत इत्यर्थः। 'तौसत्' इति शतृशानचोस्सदिति संज्ञा वक्ष्यते। ननु

इत्यर्थः । अव्ययम्, ब्राह्मणस्य कृत्वा । पूर्वोत्तरसाहचर्यात्कृदव्ययमेव गृह्यते । तेन 'तदुपरि' इत्यादि सिद्धमिति रक्षितः । तव्यः, ब्राह्मणस्य कर्तव्यम् । तव्यता तु भवत्येव । स्वकर्तव्यम् । स्वरे भेदः । समानाधिकरणे । तक्षकस्य सर्पस्य । विशेषणसमासस्त्विह बहुळग्रहणान्न । 'गोर्धेनोः' इत्यादिषु 'पोटा-

---

द्विजस्य कुर्वन्निति न कर्मणि षष्ठी । 'नलोक' इति निषेधात् । नापि द्विजस्य घटं कुर्वन्निति घटाद्यपेक्षया शेषषष्ठी । तर्हि सापेक्षत्वेनासामर्थ्यात् कुर्वन्नित्यनेन समासाप्रवृत्तेरित्यत आह । **किङ्कर इत्यर्थ इति** ॥ द्विजं परिचरन्नित्यर्थ इति यावत् । कृञ्धातुरिह परिचरणे वर्तत इति फलितम् । **अव्ययमिति** ॥ उदाहरणं वक्ष्यत इति शेषः । **पूर्वोत्तरेति** ॥ सत्तव्याभ्यां कृञ्भ्यामित्यर्थः । 'अनेकमन्यपदार्थे' इति सूत्रभाष्ये सर्वपश्चादिति प्रयोगश्चेह लिङ्गम् । **तव्य इति** ॥ उदाहरणं वक्ष्यत इत्यर्थः । **ब्राह्मणस्य कर्तव्यमिति** ॥ 'अर्हे कृत्यतृचश्च' 'तव्यत्तव्यानीयरः' इति कृत्यस्तव्यः । 'कृत्यानां कर्तरि वा' इति षष्ठी । **तव्यता तु भवत्येवेति** ॥ षष्ठीसमास इति शेषः । तकारानुबन्धरहितस्यैव तव्यस्य सूत्रे ग्रहणात्तव्यतो न ग्रहणमिति भावः । **स्वकर्तव्यमिति** ॥ स्वस्य कर्तव्यमिति विग्रहः । 'कृत्यानां कर्तरि वा' इति षष्ठी । अत्र तव्यता योगात् समासनिषेधो नेति भावः । ननु तव्यत्प्रत्ययमाश्रित्य ब्राह्मणकर्तव्यमिति समाससम्भवात् किं तव्ययोगे तन्निषेधेनेत्यत आह । **स्वरे भेद इति** ॥ तव्यति कृते कृदुत्तरपदप्रकृतिस्वरेण प्रकृतिस्वरः, तव्ये तु नेति फलभेद इति भावः । **समानाधिकरण इति** ॥ 'समानाधिकरणेन षष्ठ्यन्तं न समस्यते' इत्यत्रोदाहरणं वक्ष्यत इत्यर्थः । **तक्षकस्य सर्पस्येति** ॥ अत्र समासे सति पुनस्समासात् षष्ठ्युत्पत्तौ तक्षकसर्पस्येति न भवतीत्यर्थः । ननु षष्ठीसमासस्य निषेधेऽपि 'विशेषणं विशेष्येण बहुळम्' इति कर्मधारयसमासो दुर्वारः । अतः किं षष्ठीसमासनिषेधेनेत्यत आह । **विशेषणसमासस्त्विति** ॥ ननु षष्ठीसमासनिषेधसामर्थ्यादेवात्र कर्मधारयो न भविष्यति । तत् किमगतिकगत्या बहुळग्रहणाश्रयणेन । नच कर्मधारयस्वर एव यथा स्यात्, न तु षष्ठीसमासस्वर इत्येतदर्थषष्ठीसमासनिषेध इति वाच्यम् । उभयथापि 'समासस्य' इत्यन्तोदात्तत्वस्याविशिष्टत्वादिति चेन्मैवम् । कर्मधारये हि सति गमनस्य श्रेयस इत्यादौ 'श्रज्यावमकन् पापवत्सु भावे' इति पूर्वपदप्रकृतिस्वरः । षष्ठीसमासे त्वन्तोदात्तत्वं स्यात् । तन्मा भूदित्येतदर्थं षष्ठीसमासनिषेध आवश्यक इति समासनिषेधस्य चरितार्थत्वान्न तस्य विशेषणसमासनिवृत्तिसामर्थ्यमिति बहुळग्रहणमाश्रितम् । नचैवमपि तक्षकसर्प इति प्रथमान्तविग्रहे कर्मधारये सति तक्षकसर्पस्येति दुर्निवारमिति वाच्यम् । निषेधसामर्थ्यादेव प्रथमान्तकर्मधारयमाश्रित्य तक्षकसर्पस्येत्येवज्जातीयकप्रयोगाभावोन्नयनात् । अथ समानाधिकरणेन निषेधे उदाहरणान्तरमाह । **गोर्धेनोरिति** ॥ गोर्धेनोरित्यादिषु षष्ठीसमासः प्राप्तः, सोऽप्यनेन वार्यत इत्यन्वयः । आदिना यूनः खलतेरित्यादिसङ्ग्रहः । ननु षष्ठीसमास एवात्र न प्रसज्यते 'पोटायुवति, युवा खलति' इत्यादिविशेषविहितकर्मधारयेणात्र परस्यापि षष्ठीसमासस्य बाधितत्वादित्यत आह । **पोटायुवतीत्यादीनां**

युवति–' (सू ७४४) इत्यादीनां विभक्त्यन्तरे चरितार्थानां परत्वाद्बाधकः षष्ठीसमासः प्राप्तः । सोऽप्यनेन वार्यते ।

७०६ । क्तेन च पूजायाम् । (२-२-१२)

'मतिबुद्धि–' (सू ३०८९) इति सूत्रेण विहितो यः क्तस्तदन्तेन षष्ठी न समस्यते । 'राज्ञां मतो बुद्धः पूजितो वा । 'राजपूजितः' इत्यादौ तु भूते क्तान्तेन सह तृतीयान्तस्य समासः ।

७०७ । अधिकरणवाचिना च । (२-२-१३)

क्तेन षष्ठी न समस्यते । इदमेषामासितं गतं भुक्तं वा ।

७०८ । कर्मणि च । (२-२-१४)

'उभयप्राप्तौ कर्मणि' (सू ६२४) इति या षष्ठी सा न समस्यते । आश्चर्यो गवां दोहोऽगोपेन ।

विभक्त्यन्तरे चरितार्थानां परत्वाद्बाधक इति ॥ पोटायुवति, युवा खलति, इत्यादिविषयः गौर्धेनुः, युवाखलतिरित्यादिषु प्रथमाविभक्त्यन्तेषु सावकाशाः । षष्ठीसमासस्य राज्ञः पुरुषः इत्यादावसमानाधिकरणे सावकाशः । गोर्धेनो', यूनः खलतेरित्यादिषु उभयं प्राप्तम् । तत्र पोटायुवति, युवा खलति, इत्यादिविधीन् बाधित्वा षष्ठीसमासः प्राप्तः । सोऽप्यनेन समानाधिकरणेनेति निषेधेन वार्यत इत्यर्थः । नच निषेधसामर्थ्यादेव पोटायुवतीत्यादिसमासो बाध्यतामिति वाच्यम् । षष्ठीसमासे गोर्धेनोरित्यादौ अन्यतरस्य पूर्वनिपातः । 'पोटायुवति' इत्यादिसमासेतु गोयुवादिशब्दस्यैव फलभेदस्य स्पष्टत्वात् । समानाधिकरणेन निषेधश्चायं क्वाचित्क एव । अन्यस्य पदस्यार्थ इत्यर्थे अन्यपदार्थ इति निर्देशात् । तेन नीलोत्पलस्य गन्ध इत्यादिसिद्धः । **क्तेन च पूजायाम्** ॥ अत्र पूजाग्रहणं 'मतिबुद्धिपूजार्थेभ्यश्च' इति सूत्रोपलक्षणम् । तदाह । **मतिबुद्धीति सूत्रेणेति** ॥ **राज्ञां मतो बुद्धः पूजितो वेति** ॥ राज्ञा इष्यमाणः ज्ञायमानः पूज्यमान इति क्रमेणार्थः । 'मतिबुद्धिपूजार्थेभ्यश्च' इति वर्तमाने क्तः । 'क्तस्य च वर्तमाने' इति षष्ठी । नन्वेवं सति राजपूजितः राजमतः राजबुद्धः इति कथं समास इत्यत आह । **राजपूजित इत्यादाविति** ॥ **अधिकरणवाचिना च** ॥ शेषपूरणेन सूत्रं व्याचष्टे । **क्तेनेति** ॥ **इदमेषामासितं शयितं गतं भुक्तं वेति** ॥ 'क्तोऽधिकरणे च' इति अधिकरणे क्तः । 'अधिकरणवाचिनश्च' इति षष्ठी । **कर्मणि च** ॥ क्तेनेति निवृत्तम् । 'कर्मणि या षष्ठी सा न समस्यते' इत्यर्थे अपां स्रष्टेत्यादावपि निषेधसिद्धेः 'तृजकाभ्यां कर्तरि' इति व्यर्थं स्यात् । किन्तु चकार इतिपर्यायः । कर्मणीति सप्तम्येकवचनमुच्चार्य या षष्ठी विहिता तया न समस्यत इत्यर्थः । फलितमाह । **उभयेत्यादिना** ॥ **आश्चर्य इति** ॥

७०९ । तृजकाभ्यां कर्तरि । (२-२-१५)

कर्त्रर्थतृजकाभ्यां षष्ठ्या न समासः । अपां स्रष्टा । व्रजस्य भर्ता । ओदनस्य पाचकः । 'कर्तरि' किम् । इक्षूणां भक्षणमिक्षुभक्षिका । पत्यर्थ-भर्तृशब्दस्य याजकादित्वात्समासः । भूभर्ता । कथं तर्हि 'घटानां निर्मातु-स्त्रिभुवनविधातुश्च कलहः' इति । 'शेषषष्ठ्या समासः' इति कैयटः ।

७१० । कर्तरि च । (२-२-१६)

कर्तरि षष्ठ्या अकेन न समासः । भवतः शायिका । नेह तृजनुवर्तते । तद्योगे कर्तुरभिहितत्वेन कर्तृषष्ठ्या अभावात् ।

यद्यप्यत्र 'कर्तृकर्मणोः कृति' इत्येव कर्मणि षष्ठी, न तु 'उभयप्राप्तौ कर्मणि' इति सूत्रेण । तस्य सूत्रस्य कर्मण्येव षष्ठी, नतु कर्तरीति नियमपरत्वात् । तथापि नियमसूत्राणां विधिरूपेण निषेध-रूपेण च द्वेधा प्रवृत्तेः स्वीकारान्न दोषः । शब्दानुशासनमित्यत्र तु वस्तुतः आचार्यस्य कर्तृत्वे-ऽपि तस्यानुपादानादुभयप्राप्तावित्यस्याप्रवृत्तेर्नायन्निषेधः । 'कृत्वोऽर्थप्रयोगे' इत्यतः प्रयोगे इत्यनुवृत्त्या कर्तृकर्मणोरुभयोः प्रयोग एव तस्य प्रवृत्तेः । 'शेषे विभाषा' विशेषेण विभाषे-त्याश्रित्य उभयप्राप्तावित्यभावपक्षे 'कर्तृकर्मणोः कृति' इत्येव षष्ठ्याः प्राप्तेर्नायन्निषेध इत्यलम् । **तृजकाभ्यां कर्तरि** ॥ कर्तरीति तृजकयोरेव विशेषणम्, श्रुतत्वात् । नतु षष्ठ्याः । तदाह । **कर्त्रर्थतृजकाभ्यामिति** ॥ **अपां स्रष्टा, व्रजस्य भर्तेति** ॥ 'ण्वुल्तृचौ' इति कर्तरि तृच् । 'कर्तृकर्मणोः' इति कर्मणि षष्ठी । एवमोदनस्य पाचक इति पचेः कर्तरि ण्वुल् । अकादेश इति विशेषः । **इक्षुभक्षिकेति** ॥ 'स्त्रियां क्तिन्' इत्यधिकारे धात्वर्थनिर्देशे ण्वुल् । कर्मणि षष्ठ्या समासः । 'कर्मणि च' इति निषेधस्तु न । कर्तुः प्रयोग एव तत्प्रवृत्तेः । ननु भुवो भर्ता भूभर्तेत्यत्रापि निषेधस्स्यात् । नच भर्तृशब्दस्य याजकादौ पाठात् भवत्येव षष्ठीसमासः । 'याजकादिभिश्च' इत्यस्य प्रतिप्रसवार्थत्वादिति वाच्यम् । एवन्तर्हि व्रजस्य भर्तेत्यत्रापि समासप्रसङ्गादित्यत आह । **पत्यर्थेति** ॥ याजकादौ पत्यर्थक-स्यैव भर्तृशब्दस्य ग्रहणं, व्याख्यानात् । ततश्च व्रजस्य भर्तेत्यत्र 'याजकादिभिश्च' इति समासो नेति भावः । **कथं तर्हीति** ॥ त्रयाणां भुवनानां समाहारस्त्रिभुवनं 'तद्धितार्थ' इति द्विगुः । 'अकारान्तोत्तरपदो द्विगुः स्त्रियाम्' इति तु न भवति । पात्राद्यन्तस्य नेत्युक्तेः । त्रिभुवनस्य विधातेति तृचा योगे कथं कर्मणि षष्ठ्यास्समास इत्याक्षेपः । परिहरति । **शेषषष्ठ्येति** ॥ प्रत्यासत्त्या कारकषष्ठ्या एवायन्निषेध इति बहुष्विति सूत्रे कैयट आहेत्यर्थः । **कर्तरि च** ॥ कर्तरीत्येतत् षष्ठीत्यनुवृत्ते अन्वेति । तदाह । **कर्तरि षष्ठ्या इति** ॥ **अकेनेति** ॥ 'तृजकाभ्यां कर्तरि' इत्यतस्तदनुवृत्तेरिति भावः । **भवतः शायिकेति** ॥ 'स्त्रियां क्तिन्' इत्यधिकारे धात्वर्थनिर्देशे ण्वुल् । अकादेशः, टाप् । 'कर्तृकर्मणोः' इति कर्तरि षष्ठी । अत्र अकस्य कर्त्रर्थ-कत्वाभावात् 'तृजकाभ्याम्' इति न प्राप्तिः । ननु पूर्वसूत्रे 'तृजकाभ्याम्' इति समस्तपदो-

७११। नित्यं क्रीडाजीविकयोः। (२-२-१७)

एतयोरर्थयोरकेन नित्यं षष्ठी समस्यते। उद्दालकपुष्पभञ्जिका। क्रीडाविशेषस्य संज्ञा। 'संज्ञायाम्' (सू ३२८६) इति भावे ण्वुल्। जीविकायां दन्तलेखकः। तत्र क्रीडायां विकल्पे जीविकायां 'तृजकाभ्यां कर्तरि' (सू ७०९) इति निषेधे प्राप्ते वचनम्।

७१२। पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे। (२-२-१)

अवयविना सह पूर्वादयः समस्यन्ते। एकत्वसङ्ख्याविशिष्टश्चेदवयवी। षष्ठीसमासापवादः। पूर्वं कायस्य पूर्वकायः। अपरकायः। 'एकदेशिना'

पात्तत्वात् कथमिहाकस्यैवानुवृत्तिः, न तु तृच इत्यत आह। **नेहेति॥ तद्योगे इति॥** तृचः कर्तरि विहितत्वेन स्रष्टा कृष्ण इत्यादौ कर्तुः कृताभिहिततया तत्र कर्तरि षष्ठ्या एवाप्रसक्तया तत्समासनिषेधस्य शशः शृङ्गेण कण्डूयनं न कर्तव्यमितिवदसम्भवपराहतत्वादित्यर्थः। **नित्यं क्रीडाजीविकयोः॥ उद्दालकपुष्पभञ्जिकेति॥** उद्दालकः श्लेष्मातकः तस्य पुष्पाणि तेषां भञ्जनमित्यस्वपदविग्रहः। **संज्ञायामिति॥** 'स्त्रियां क्तिन्' इत्यधिकारे 'संज्ञायाम्' इति भावे ण्वुल् इत्यर्थः। अत्र कर्मणि षष्ठ्याः समासः। वस्तुतस्तु 'स्त्रियां क्तिन्' इत्यधिकारे 'धात्वर्थनिर्देशे ण्वुल्' इति भावे ण्वुलित्येव युक्तम्। 'संज्ञायाम्' इति तु अधिकरणार्थमिति कृदन्ते वक्ष्यते। तथासति उद्दालकपुष्पाणि भज्यन्ते यस्यां क्रीडायामिति विग्रहः। **जीविकायामिति॥** उदाहरणं वक्ष्यत इत्यर्थः। **दन्तलेखक इति॥** दन्तानां लेखनेन जीवतीत्यस्वपदविग्रहः। लिखेः कर्तरि ल्युट्। अनादेशः। जीविका समासगम्या। ननु 'षष्ठी' इति सूत्रेणैव अत्र षष्ठीसमाससिद्धेः किमर्थमिदमित्यत आह। **तत्रेति॥** तत्र तस्मिन् उदाहरणद्वये क्रीडाबोधके उद्दालकपुष्पभञ्जिकेत्यत्र विभाषाधिकारात् षष्ठीसमासविकल्पे प्राप्ते जीविकाबोधके तु दन्तलेखक इत्यत्र 'तृजकाभ्याम्' इति षष्ठीसमासनिषेधे प्राप्ते इदं सूत्रमारब्धमित्यर्थः। **पूर्वापर॥** 'पूर्वापराधरोत्तरम्' इति समाहारद्वन्द्वात् प्रथमैकवचनम्। एकदेशशब्दः अवयवे रूढः। एकदेशः अस्यास्तीत्येकदेशी अवयवी, तेनेति लभ्यते। अधिकरणं द्रव्यम्। एकमधिकरणम्, एकाधिकरणम्, एकत्वविशिष्टद्रव्ये वर्तमानेन अवयविवाचकसुबन्तेन पूर्वापराधरोत्तरशब्दास्सुबन्तास्समस्यन्ते, स तत्पुरुषः इत्यर्थः। फलितमाह। **अवयविना सहेत्यादिना॥** ननु पूर्वश्चासौ कायश्चेत्येव कर्मधारयेणैव पूर्वकाय इत्यादि सिद्धम्। भक्त्या कायशब्दस्य कायावयववाचित्वेन सामानाधिकरण्योपपत्तेरित्यत आह। **षष्ठीसमासापवाद इति॥** पूर्वं कायस्येति विग्रहे 'षष्ठी' इति सूत्रेण समासे सति षष्ठ्यन्तस्य समासविधौ प्रथमानिर्दिष्टत्वात् पूर्वनिपातस्स्यात्। तन्निवृत्त्यर्थमिदं वचनमित्यर्थः। **पूर्वं कायस्य इति॥** अत्र पूर्वं कायस्येति विग्रहवाक्यम्। अर्धमिति गम्यम्। विशेष्याभिप्रायान्नपुंसकत्वम्। 'तस्य परमाम्रेडितम्' इति निर्देशादवयववृत्तिदिक्शब्दयोगे पञ्चम्यभावात् षष्ठी। **पूर्वकाय इति॥**

किम् । पूर्वं नाभेः कायस्य । 'एकाधिकरणे' किम् । पूर्वश्छात्राणाम् । 'सर्वोऽप्येकदेशोऽह्ना समस्यते । 'सङ्ख्याविसाय–' (सू २३८) इति ज्ञापकात् । मध्याह्नः । सायाह्नः । केचित्तु 'सर्वं एकदेशः कालेन समस्यते न त्वह्नैव । ज्ञापकस्य सामान्यापेक्षत्वात् । तेन 'मध्यरात्रः', 'उपारताः पश्चिमरात्रगोचरात्' इत्यादि सिद्धमित्याहुः ।

पूर्वशब्दस्य समासविधौ प्रथमानिर्दिष्टत्वात् पूर्वनिपातः । 'परवल्लिङ्गम्' इति पुंस्त्वमिति भावः । "यत्र उत्सर्गापवादौ महाविभाषया विकल्प्येते तत्रापवादेन मुक्ते पुनरुत्सर्गो न प्रवर्तते" इति 'पारे मध्ये षष्ठ्या वा' इत्यत्रोक्तम् । ततश्च एकदेशिसमासाभावे षष्ठीसमासो न भवति । **अपरकाय इति** ॥ अपरं कायस्येति विग्रहः । अधरकायः । उत्तरकायः । **एकदेशिना किमिति** ॥ एकद्रव्यवाचिना पूर्वादयस्समस्यन्ते इत्येवास्त्वित्यर्थः । **पूर्वन्नाभेः कायस्येति** ॥ अत्र नाभेरिति पूर्वशब्देऽन्वेति । दिग्योगे पञ्चमी । नाभ्यपेक्षया यत् पूर्वमर्धं तत् कायावयवभूतमित्यर्थः । अत्र नाभिशब्दस्य नाभ्यपेक्षया पूर्वांशेऽन्वयः । अत्र पूर्वस्यांशस्य नाभिरवधिरेव । नत्ववयविनि । अतो नाभिशब्देन पूर्वशब्दस्य समासो न भवतीत्यर्थः । **पूर्वश्छात्राणामिति** ॥ अत्र छात्रशब्दः छात्रसमुदायपरः । उद्भूतावयवसमुदायापेक्षं बहुवचनम् । अवयवावयविभावसम्बन्धे षष्ठी । छात्रसमुदायस्य पूर्वमर्धमित्यर्थः । अत्र छात्रसमुदायस्य एकत्वेऽपि उद्भूतावयवकतया बहुत्वादेकत्वसंख्यावैशिष्ट्याभावान्न समास इति भावः । ननु अह्नो मध्यं मध्याह्नमित्यत्र कथमेकदेशिसमासः । मध्यशब्दस्य पूर्वादिष्वनन्तर्भावादित्यत आह । **सर्वोऽप्येकदेश इति** ॥ पूर्वादिभिन्नोऽपीत्यर्थः । **ज्ञापकादिति** ॥'तत्पुरुषस्य' इति 'अहःसर्वैकदेशसंख्यातपुण्याच्च' इति च प्रकृते 'अह्नोऽह्न एतेभ्यः' इत्येकदेशवाचकात् परस्य अह्नशब्दस्य अह्नादेशो विधीयते। ततश्चाह्नः साय इति विग्रहे अवयवितृतिना अहन्शब्देन षष्ठ्यन्तेन अवयववृत्तिसायशब्दस्य तत्पुरुषसमासे सति प्रथमानिर्दिष्टत्वात् सायशब्दस्य पूर्वनिपाते सति एकदेशवृत्तिसायशब्दात् परस्य अहन्शब्दस्य अह्नादेशे 'रात्राह्नाहाः पुंसि' इति पुंस्त्वे सायाह्न इति भवति । तस्मात् सप्तम्येकवचने परे 'सङ्ख्याविसाय' इति सायशब्दपूर्वकस्याह्नशब्दस्य अहन्नादेशविकल्प उक्तः । सायाह्नि–सायाहनि सायाह्ने, इत्युदाहरणम् । तत्र अह्नस्साय इति विग्रहे यदि सायशब्दस्य पूर्वाशप्रविष्टत्वादहन्शब्देन समासो न स्यात्। तदा 'षष्ठी' इति सूत्रेण अहन्शब्दस्य षष्ठ्यन्तस्य सायशब्देन समासे सति षष्ठ्यन्तस्यैव समासशास्त्रे प्रथमानिर्दिष्टत्वात् पूर्वनिपाते सति सायशब्दात् परस्याह्नशब्दस्य अहन्नादेशविधानन्निर्विषयं स्यात् । अतः 'सर्वोऽप्येकदेशोऽह्ना समस्यते' इति विज्ञायत इत्यर्थः । **मध्याह्नः इति** ॥ अह्नो मध्यमिति विग्रहे अयं समासः । 'राजाहस्सखिभ्यष्टच्' इति टच् । 'अह्नोऽह्न एतेभ्यः' इत्यह्नादेशः । **सायाह्नः इति** ॥ अह्नस्साय इति विग्रहः । मध्याह्नवत् । ननु 'सर्वोऽप्येकदेशः कालेन समस्यते' इत्ययुक्तम् । 'संङ्ख्याविसाय' इति सूत्रे अहन्शब्दस्यैवोपात्ततया तदितरकालवाचिना सर्वस्यैकदेशस्य समासज्ञापनानुपपत्तेरित्यत आह। **ज्ञापकस्येति** ॥ अहन्शब्देन सह सायशब्दस्य तत्पुरुषसमासं सिद्धवत्कृत्य सायशब्दादह्न-

७१३। अर्धं नपुंसकम्। (२-२-२)

समांशवाच्यर्धशब्दो नित्यं क्लीबे, स प्राग्वत्। एकविभक्तावषष्ठ्यन्त-वचनम् (वा ६७३) **एकदेशिसमासविषयकोऽयमुपसर्जनसंज्ञानिषेधः। तेन 'पञ्चखट्वी' इत्यादि सिद्ध्यति। अर्धं पिप्पल्या अर्धपिप्पली। 'क्लीबे' किम्। ग्रामार्धः। द्रव्यैक्य एव। अर्धं पिप्पलीनाम्।**

शब्दानुपादानात् सर्वेणापि अवयववृत्तिकालवाचिना सर्वस्यैकदेशस्य समासो ज्ञाप्यते। ज्ञापकस्य सामान्यापेक्षत्वात्। अहन्शब्दे सायशब्दस्यैव पूर्वाह्णप्रविष्टत्वं ज्ञाप्यत इति भावः। **मध्यरात्रः इति**॥ रात्रेर्मध्य इत्यर्थः। **पश्चिमरात्रेति**॥ रात्रेः पश्चिममिति विग्रहः। 'अहस्सर्वैकदेश' इत्यच्समासान्तः। **अर्धं नपुंसकम्**॥ अर्धमिति नपुंसकलिङ्गनिर्देशादेव नपुंसकत्वे लब्धे पुनर्नपुंसकग्रहणं नित्यनपुंसकलिङ्गस्य ग्रहणार्थमित्यभिप्रेत्य आह। **समांशवाच्यर्धशब्दो नित्यं क्लीबे इति**॥ वर्तते इति शेषः। "वा पुंस्यर्धोऽर्धं समेऽशके" इति कोशादिति भावः। अंशसामान्यवाची अर्धशब्दः पुंसि वा नपुंसके वा भवति। समे त्वंशे अर्धशब्दो नपुंसकलिङ्ग एवेत्यर्थः। भाष्ये तु समप्रविभागे नपुंसकलिङ्गोऽर्धशब्दः। अंशसामान्यवाची तु पुल्लिङ्ग इत्युक्तम्। **स प्राग्वदिति**॥ सः नित्यनपुंसकलिङ्गः अर्धशब्दः अवयववाचिना समस्यत इत्यर्थः। अर्धशब्दस्य पूर्वाह्णनन्तर्भावात् पूर्वेण न प्राप्तिः। ननु अर्धं पिप्पल्याः अर्धपिप्पलीत्युदाहरणं वक्ष्यति। तत्र अर्धं पिप्पल्याः अर्धपिप्पली, अर्धेन पिप्पल्याः अर्धपिप्पल्या, अर्धाय पिप्पल्याः अर्धपिप्पल्यै, अर्धात् पिप्पल्याः अर्धपिप्पल्याः, अर्धस्य पिप्पल्याः अर्धपिप्पल्याः, अर्धे पिप्पल्याः अर्धपिप्पल्याम्, इति विग्रहेषु पिप्पलीशब्दस्य नियतविभक्तिकतया 'एकविभक्तिचापूर्वनिपाते' इति उपसर्जनत्वात् 'गोस्त्रियोः' इति ह्रस्वस्यादित्यत आह। **एकविभक्ताविति**॥ 'एकविभक्ति चापूर्वनिपाते' इति सूत्रे 'अषष्ठ्यन्तम्' इति वक्तव्यमित्यर्थः। ततश्च पिप्पलीशब्दस्य षष्ठ्यन्तत्वान्नोपसर्जनत्वमिति न ह्रस्व इत्यर्थः। नन्वेवं सति पञ्चानां खट्वानां समाहारः समाहारं समाहारेणेत्यादिविग्रहेषु खट्वाशब्दस्य नियतविभक्तिकत्वेऽपि षष्ठ्यन्तत्वात् अनुपसर्जनत्वात् 'गोस्त्रियोः' इति ह्रस्वाभावे अदन्तत्वाभावेन 'द्विगोः' इति ङीबभावे पञ्चखट्वेति स्यात्, पञ्चखट्वीति न स्यादित्यत आह। **एकदेशिसमासविषयकोऽयमिति**॥ 'अपथन्नपुंसकम्' इति सूत्रभाष्ये पञ्चखट्वीत्युदाहरणमत्र लिङ्गमिति भावः। अर्धपिप्पलीति प्रथमानिर्दिष्टमित्यर्धशब्दस्योपसर्जनत्वात् पूर्वनिपातः। पिप्पलीशब्दस्य तु विग्रहे नियतविभक्तिकत्वेऽपि 'एकविभक्तौ' इति निषेधादुपसर्जनत्वाभावान्न ह्रस्व इति भावः। **ग्रामार्ध इति**॥ ग्रामस्यार्ध इति विग्रहः। ग्रामस्यांश इत्यर्थः। अर्धशब्दस्य समांशवाचित्वाभावेन नित्यनपुंसकत्वाभावान्नायं समासः। किन्तु 'षष्ठी' इत्येव समास इति षष्ठ्यन्तस्य पूर्वनिपातः। **द्रव्यैक्य एवेति**॥ एकाधिकरण इत्यनुवर्तत एवेत्यर्थः। **अर्धं पिप्पलीनामिति**॥ अत्र द्रव्यैक्याभावान्न समासः। सति समासे अर्धपिप्पलीत्येव स्यात् विशेष्यैक्यात्। **इदं सूत्रं 'परवल्लिङ्गम्' इति सूत्रभाष्ये प्रत्याख्यातम्।**

७१४ । द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् । (२-२-३)

एतान्येकदेशिना सह प्राग्वद्वा । द्वितीयं भिक्षाया द्वितीयभिक्षा । 'एकदेशिना' किम् । द्वितीय भिक्षाया भिक्षुकस्य । अन्यतरस्याङ्ग्रहणसामर्थ्यात् । 'पूरणगुण–' (सू ७०५) इति निषेधं बाधित्वा पक्षे षष्ठीसमासः । भिक्षाद्वितीयम् ।

७१५ । प्राप्तापन्ने च द्वितीयया । (२-२-४)

पक्षे 'द्वितीया श्रित–' (सू ६८६) इति समासः । प्राप्तो जीविकां प्राप्तजीविकः–जीविकाप्राप्तः । आपन्नजीविकः–जीविकापन्नः । इह सूत्रे 'द्वितीयया अ' इति छित्त्वा अकारोऽपि विधीयते । तेन जीविकां प्राप्ता स्त्री प्राप्तजीविका । आपन्नजीविका ।

द्वितीयतृतीय ॥ द्वितीयं भिक्षाया इति विग्रहोऽयम् । भिक्षाया द्वितीयमर्धमित्यर्थः । **द्वितीयभिक्षेति** ॥ द्वितीयशब्दस्य प्रथमानिर्दिष्टत्वात् पूर्वनिपातः । 'परवल्लिङ्गम्' इति स्त्रीत्वम् । **द्वितीयं भिक्षाया भिक्षुकस्येति** ॥ भिक्षायाः द्वितीयं भागं भिक्षुकस्येत्यन्वयः । भिक्षाया इत्यवयवषष्ठी द्वितीयमित्यत्रान्वेति । द्वितीयमित्यतत्तु भिक्षुकस्येत्यत्र कर्मत्वेनान्वेति । 'न लोक' इति निषेधान्न षष्ठी । अत्र द्वितीयमित्यस्य भिक्षुकस्येत्यनेन समासो न भवति । द्वितीयं प्रति भिक्षुकस्य एकदेशित्वाभावादित्यर्थः । ननु विभाषाधिकारेण विकल्पे सिद्धे अन्यतरस्याङ्ग्रहणं व्यर्थमित्यत आह । **अन्यतरस्यामिति** ॥ अन्यतरस्याङ्ग्रहणसामर्थ्यात् पक्षे षष्ठीसमास इत्यन्वयः । अन्यथा षष्ठ्यपवादभूतेनानेन समासेन मुक्ते उत्सर्गो न प्रवर्तते । महाविभाषाधिकारे "अपवादेन मुक्ते उत्सर्गो न प्रवर्तते" इति 'पारेमध्ये षष्ठ्या वा' इतिवाग्रहणेन ज्ञापितत्वादिति भावः । ननु 'पूरणगुण' इति निषेधात् कथमिह षष्ठीसमास इत्यत आह । **पूरणगुणेति निषेधम्बाधित्वेति** ॥ अन्यथा अन्यतरस्याङ्ग्रहणवैयर्थ्यादिति भावः । इत्येकदेशिसमासनिरूपणम् । **प्राप्तापन्ने च द्वितीयया** ॥ प्राप्त, आपन्न एतौ शब्दौ द्वितीयान्तेन समस्येते इत्यर्थः । चकारो द्वितीयासमाससमुच्चयार्थः । तदाह । **पक्ष इति** ॥ वस्तुतस्तु 'द्वितीया श्रित' इति सूत्रे "प्राप्तापन्नशब्दाभ्यां द्वितीयायास्समासविधानमपि निरवकाशमेव इति तत्समुच्चयस्य सिद्धत्वात् चकारो न तत्समुच्चयार्थः" इति भाष्ये स्थितम् । तत्र प्रकृतसूत्रेण समासे प्राप्तापन्नयोः पूर्वनिपातः । 'द्वितीया श्रित' इति समासे तु द्वितीयान्तस्य पूर्वनिपातः । तदाह । **प्राप्तजीविक इत्यादि** ॥ अथ जीविकां प्राप्ता स्त्री जीविकामापन्ना स्त्रीति विग्रहे प्रकृतसूत्रेण समासे सति पूर्वपरयोरकारमन्तादेशं साधयितुमाह । **इह सूत्रे इति** ॥ **अकारोऽपीति** ॥ प्राप्तापन्ने द्वितीयया समस्येते । तयोरकारोऽन्तादेशश्चेत्यर्थलाभादिति भावः । **तेनेति** ॥

७१६। कालाः परिमाणिना। (२-२-५)

परिच्छेद्यवाचिना सुबन्तेन सह कालाः समस्यन्ते। मासो जातस्य मासजातः। ह्यहजातः। द्वयोः अरह्नोः समाहारो ह्यहः। ह्यहो जातस्य इति विग्रहे 'उत्तरपदेन परिमाणिना द्विगोः सिद्धये बहूनां तत्पुरुषस्योपसङ्ख्यानम्' (वा १२८८)। द्वे अहनी जातस्य यस्य स ह्यहजातः। 'अह्नोऽह्नः—' (७९०) इति वक्ष्यमाणोऽह्नादेशः। पूर्वत्र तु 'न सङ्ख्यादेः समाहारे' (सू ७९३) इति निषेधः।

प्राप्तापन्नयोराकारस्यान्तस्य स्थाने अकारविधाननेत्यर्थः। **कालाः परिमाणिना** ॥ परिमाणिपदं व्याचष्टे। **परिच्छेद्यवाचिनेति** ॥ 'कालाः' इति बहुवचनात् कालविशेषवाचकाः इत्यर्थः। **मासो जातस्य मासजात इति** ॥ अत्र विग्रहे मासः प्रधानम्। समासे तु जातः प्रधानम्। मासजातो दृश्यतामित्यादौ जातस्यैव दर्शनकर्मत्वादिप्रतीतेः। विशेषणविशेष्यभावस्तु एकार्थीभावसम्बन्धसाध्यः। एतदेवाभिप्रेत्य मूले क्वचित् पुस्तके मासो जातस्य यस्य सः इति पठितम्। तत्र विग्रहे जातस्येति परिच्छेद्यपरिच्छेदकभावे षष्ठी। जातपरिच्छेदको मास इति विग्रहवाक्ये बोधः। मासपरिच्छेद्यो जात इति समासाद्बोधः। तत्र मासस्तावत् जननं साक्षात् परिच्छिनत्ति। जननाश्रयन्तु देवदत्तं जननद्वारा परिच्छिनत्ति। तथाच मासपरिच्छेद्यजनन्याश्रयो देवदत्त इति समासाद्बोधः फलति। षष्ठीसमासापवादोऽयम्। षष्ठीसमासे तु जातमास इति स्यात्। नच मासो जातस्य यस्य सः मासजात इति बहुव्रीहिणैव एतत्सिद्धमिति वाच्यम्। समानाधिकरणानामेव बहुव्रीहिविधानात्। 'निष्ठा' इति जातशब्दस्य पूर्वनिपातापनेत्थ। 'जातिकालसुखादिभ्यः परा निष्ठा वाच्या' इति जातशब्दस्य परनिपातस्तु न। सुखादावस्य पाठकल्पनायां प्रमाणाभावादित्यलम्। **ह्यहो जातस्येति** ॥ 'तद्धितार्थ' इति समाहारे द्विगुः। 'राजाहस्सखिभ्यः' इति टच्। 'रात्राह्नाहाः पुंसि' इति पुंस्त्वम्। **उत्तरपदेनेति** ॥ 'तद्धितार्थ' इति सूत्रभाष्ये इदं वार्तिकं पठितम्। तेन हि सूत्रेण उत्तरपदे परे दिक्सङ्ख्ययोस्सुबन्तेन द्विगुसमासो विहितः। उत्तरशब्दश्च समासस्य चरमावयवे रूढः। ततश्च द्वे अहनी जातस्य यस्येति विग्रहे त्रयाणां समासे सति जातशब्दे उत्तरपदे सम्पन्ने पूर्वयोस्सुबन्तयोर्द्विगुसमासप्रवृत्तिर्वक्तव्या। सच समासस्त्रयाणां 'कालाः परिमाणिना' इति पूर्वसूत्रेण न सम्भवति। 'सुप्सुपा' इत्येकत्वस्य विवक्षितत्वात्। अतः उत्तरपदेन परिमाणिना परिच्छेद्यवाचिना परनिमित्तभूतेन हेतुना द्विगोस्सिद्धये बहूनां तत्पुरुषस्योपसंख्यानं वक्तव्यमित्यर्थः। उत्तरपदभूतपरनिमित्तकद्विगुसिद्धये त्रिपदतत्पुरुषो वाच्य इति यावत्। 'सुप्सुपा' इत्येकत्वं विवक्षितमित्यत्र इदमेव लिङ्गम्। **द्वे अहनी इति** ॥ द्वे अहनी जातस्येति विग्रहे त्रयाणां समासे सुब्लुकि ह्यहन् जात इति जातशब्दे उत्तरपदे परे द्वि अहन् इत्यनयोः 'तद्धितार्थ' इति द्विगुसमासे 'राजाहस्सखिभ्यः' इति टचि 'अह्नोऽह्न एतेभ्यः' इत्यह्नादेशे ह्यहजात इति रूपमित्यर्थः। अत्र पूर्वयोर्द्विगुतत्पुरुषत्वाभावे टच्

७१७ । सप्तमी शौण्डैः । (२-१-४०)

सप्तम्यन्तं शौण्डादिभिः प्राग्वद्वा । अक्षेषु शौण्डोऽक्षशौण्डः । अधि-शब्दोऽत्र पठ्यते । '—अध्युत्तरपदात्—' (सू २०७९) इति खः । ईश्वराधीनः ।

७१८ । सिद्धशुष्कपक्वबन्धैश्च । (२-१-४१)

एतैः सप्तम्यन्तं प्राग्वत् । साङ्काश्यसिद्धः । आतपशुष्कः । स्थालीपक्वः । चक्रबन्धः ।

७१९ । ध्वाङ्क्षेण क्षेपे । (२-१-४२)

ध्वाङ्क्षवाचिना सह सप्तम्यन्तं समस्यते निन्दायाम् । तीर्थे ध्वाङ्क्ष इव तीर्थध्वाङ्क्षः । तीर्थकाक इत्यर्थः ।

७२० । कृत्यैर्ऋणे । (२-१-४३)

सप्तम्यन्तं कृत्यप्रत्ययान्तैः सह प्राग्वदावश्यके । मासेदेयम् ऋणम् । ऋणग्रहणं नियोगोपलक्षणार्थम् । पूर्वोह्णेगेयं साम ।

अह्नादेशश्च न स्यातामिति भावः । ननु द्वयोरह्नोस्समाहारो द्यह इति कथं पूर्वमुक्तम् । तत्राप्यह्नादेशप्रसङ्गादित्यत आह । **पूर्वत्र त्विति** ॥ **निषेध इति** ॥ अह्नादेशनिषेध इत्यर्थः । इति षष्ठीसमासनिरूपणम् । **सप्तमी शौण्डैः** ॥ शौण्डादिभिरिति बहुवचननिर्देशात् गणपाठाच्च शौण्डशब्दस्तदादिपरः । **अक्षेषु शौण्ड इति** ॥ शौण्डः क्रियाकुशलः । वैषयिकाधिकरणत्वे सप्तमी । अक्षविषयकक्रीडाकुशल इत्यर्थः । **अत्रेति** ॥ शौण्डादावित्यर्थः । **ईश्वराधीन इति** ॥ प्रपञ्च इति शेषः । ईश्वरे अधि इति विग्रहः 'अधिरीश्वरे' इत्यधेः कर्मप्रवचनीयत्वम् । 'यस्मादधिकम्' इति सप्तमी । तदन्तस्य अधिना समासः । सुब्लुक् 'अषडक्ष' इति अद्ध्युत्तरपदत्वात् खः । ईनादेशः । ईश्वराधीन इति रूपम् । **सिद्धशुष्क** ॥ सप्तमीत्यनुवर्तते । तदाह । **एतैस्सप्तम्यन्तं प्राग्वदिति** ॥ **साङ्काश्यसिद्ध इति** ॥ सङ्काशेन निर्वृत्तं नगरं साङ्काश्यम् । तत्र सिद्धः उत्पन्नो ज्ञातो वेत्यर्थः । **आतपशुष्क इति** ॥ आतपे शुष्क इति विग्रहः । **स्थालीपक्व इति** ॥ स्थाल्यां पक्व इति विग्रहः । **चक्रबन्ध इति** ॥ चक्रे बन्ध इति विग्रहः । शौण्डादिगणे एतेषां पाठाभावात् पृथगुक्तिः । **ध्वाङ्क्षेण क्षेपे** ॥ ध्वाङ्क्षेत्यर्थग्रहणम् । व्याख्यानात् । तदाह । **ध्वाङ्क्षवाचिना सह सप्तम्यन्तं समस्यते इति** ॥ क्षेपपदं व्याचष्टे । **निन्दायामिति** ॥ **तीर्थे ध्वाङ्क्ष इव तीर्थध्वाङ्क्ष इति** ॥ ध्वाङ्क्षः काकः स इव यो गुरुकुले चिरन्न तिष्ठति स इत्यर्थः । एवं हि निन्दा भवति । अर्थग्रहणस्य प्रयोजनमाह । **तीर्थकाक इति** ॥ **कृत्यैर्ऋणे** ॥ सप्तमीत्यनुवर्तते । कृत्यग्रहणेन प्रत्ययग्रहणपरिभाषया कृत्यसंज्ञकप्रत्ययान्तग्रहणम् । "ऋणपदमावश्यकोपलक्षणम्" इति भाष्यम् । तदाह । **सप्तम्यन्तं कृत्यप्रत्ययान्तैः सह प्राग्वदावश्यक इति** ॥

७२१। संज्ञायाम्। (२-१-४४)

सप्तम्यन्तं सुपा प्राग्वत्संज्ञायाम्। वाक्येन संज्ञानवगमान्नित्यसमासोऽयम्। अरण्येतिलकाः। वनेकशेरुकाः। 'हलदन्तात्सप्तम्याः—' (सू. ९६६) इत्यलुक्।

७२२। क्तेनाहोरात्रावयवाः। (२-१-४५)

अह्नो रात्रेश्चावयवाः सप्तम्यन्ताः क्तान्तेन सह प्राग्वत्। पूर्वाह्णकृतम् अपररात्रकृतम्। 'अवयव' ग्रहणं किम्। अह्नि दृष्टम्।

७२३। तत्र। (२-१-४६)

'तत्र' इत्येतत्सप्तम्यन्तं क्तान्तेन सह प्राग्वत्। तत्रभुक्तम्।

७२४। क्षेपे। (२-१-४७)

सप्तम्यन्तं क्तान्तेन प्राग्वन्निन्दायाम्। 'अवतप्तेनकुलस्थितं ते एतत्'।

७२५। पात्रेसमितादयश्च। (२-१-४८)

मासे इति ॥ सामीप्याधिकरणत्वे सप्तमी। मासाव्यवहितोत्तरकाले प्रत्यर्पणीयमृणमित्यर्थः। ऋणपदस्यावश्यकोपलक्षणतायाः प्रयोजनमाह। **पूर्वाह्णेगेयं सामेति** ॥ 'तत्पुरुषे कृति' इत्यलुक्। यत्प्रत्यय एव कृत्योऽत्र विवक्षित इति भाष्यम्। तेनेह न। पूर्वाह्णे दातव्या भिक्षेति। **संज्ञायाम्** ॥ सप्तमीत्यनुवर्तते। तदाह। **सप्तम्यन्तं सुपा प्राग्वत् संज्ञायामिति** ॥ अरण्येतिलका इति वनेकशेरुका इति च संज्ञाशब्दौ। 'हलदन्तात् सप्तम्याः' इत्यलुक्। **क्तेनाहोरात्रावयवाः** ॥ अहोरात्रयोः अवयवाः इति विग्रहः। सप्तमीत्यनुवर्तते। क्तेनेति तदन्तग्रहणम्। तदाह। **अह्नो रात्रेश्चावयवा इति** ॥ अहरवयवस्योदाहरति। **पूर्वाह्णकृतमिति** ॥ रात्र्यवयवस्योदाहरति। **अपररात्रकृतमिति** ॥ **तत्र** ॥ तत्रेति शब्दस्वरूपग्रहणम्। सप्तमीति क्तेनेति चानुवर्तते। तदाह। **तत्रेत्येतत् सप्तम्यन्तं क्तेन सह प्राग्वदिति** ॥ **तत्रभुक्तमिति** ॥ समासस्वरः प्रयोजनम्। तत्रभुक्तस्येदं तात्रभुक्तम् इति च। **क्षेपे** ॥ सप्तमीति क्तेनेति चानुवर्तते। तदाह। **सप्तम्यन्तं क्तान्तेन प्राग्वन्निन्दायामिति। अवतप्तेनकुलस्थितन्त एतदिति** ॥ स्थितमिति भावे क्तः। नकुलेन स्थितम्। 'कर्तृकरणे कृता बहुलम्' इति समासः। 'कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' इति परिभाषया नकुलस्थितशब्दोऽपि क्तान्तः। तेन सह्यावतप्ते इति सप्तम्यन्तस्य अनेन समासे कृते 'तत्पुरुषे कृति' इत्यलुक्। हे देवदत्त, ते, तव, एतत्, अवस्थानम्, अवतप्ते नकुलस्थितमित्यन्वयः। यथा अवतप्तप्रदेशे नकुलाः न चिरन्तिष्ठन्ति तथा कार्याण्युपक्रम्य तान्यनिर्वर्त्य इतस्ततो धावनमित्यर्थः। अव्यवस्थितोऽसीति निन्दा ज्ञेया। **पात्रे समितादयश्च** ॥ **निपात्यन्त इति** ॥

एते निपात्यन्ते क्षेपे । पात्रेसमिताः । भोजनसमय एव सङ्गता न तु कार्ये । गेहेशूरः । गेहेनर्दी । आकृतिगणोऽयम् । चकारोऽवधारणार्थः । तेनैषां समासान्तरे घटकतया प्रवेशो न । परमाः पात्रेसमिताः ।

७२६ । पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन । (२-१-४९)

'विशेषणं विशेष्येण–' (सू ७३६) इति सिद्धे पूर्वनिपातनियमार्थं सूत्रम् । एकशब्दस्य 'दिक्सङ्ख्ये संज्ञायाम्' (सू ७२७) इति नियमबाधनार्थश्च । पूर्वं स्नातः पश्चादनुलिप्तः स्नातानुलिप्तः । एकनाथः । सर्वयाज्ञिकाः । जरन्नैयायिकाः । पुराणमीमांसकाः । नवपाठकाः । केवलवैयाकरणाः ।

कृतसमासादिकार्या एते शब्दा निर्दिश्यन्त इत्यर्थः । **पात्रेसमिता इति** ॥ 'इण्, गतौ' सम्पूर्वात् 'गत्यर्थाकर्मक' इति कर्तरि क्तः । निपातनात् सप्तम्या अलुक् । भोजनपात्रे निहिते सति सङ्गता इत्यर्थः । फलितमाह । **भोजनेति** ॥ **गेहेशूर इति** ॥ गेहे एव प्रकटितयशाः नतु युद्ध इत्यर्थः । **गेहेनर्दीति** ॥ 'नर्द शब्दे' 'सुप्यजातौ' इति णिनिः । समासे सति निपातनादलुक् । गेह एव गर्जति, युद्धादौ तु न प्रवर्तत इत्यर्थः । **चकारोऽवधारणार्थ इति** ॥ ततश्च एते गणे पठितास्तथैव भवन्तीत्यर्थः । ततः किमित्यत आह । **तेनेति** ॥ ततश्च परमाश्च ते पात्रेसमिताश्चेत्यादौ समासो न भवति । **पूर्वकालैक** ॥ सुबित्यनुवृत्तं बहुवचनेन विपरिणम्यते । सुपेति चानुवर्तते । पूर्वः कालो यस्य सः पूर्वकालः । पूर्वकालवृत्तिरित्यर्थः । ततश्च पूर्वकालेत्यनेन पूर्वकालार्थकशब्दस्य ग्रहणम् । एकादिशब्दास्तु षट् स्वरूपपरा एव । तथाच पूर्वकालादयस्सप्त सुबन्ताः समानाधिकरणेन सुबन्तेन समस्यन्ते, स तत्पुरुष इत्यर्थः । समानम् एकम् अधिकरणं वाच्यं यस्येति विग्रहः । एकार्थवृत्तित्वं सामानाधिकरण्यमिति फलितम् । **पूर्वनिपातेति** ॥ पश्चादनुलिप्तः पूर्वं स्नातत्वेन, पूर्वं स्नातो वा पश्चादनुलिप्तत्वेन विशेष्टुं शक्यते । अतो विशेषणं विशेष्येण समासे सति अन्यतरस्य पूर्वनिपाते प्राप्ते पूर्वकालवृत्तिशब्दस्यैव पूर्वनिपातार्थमिदं वचनम् । एवमेकादीनामपीत्यर्थः । एकशब्दविषये प्रयोजनान्तरमप्याह । **एकशब्दस्येति** ॥ 'दिक्सङ्ख्ये संज्ञायां समस्येते' इति नियमस्य वक्ष्यमाणतया एकनाथ इत्यत्र विशेषणसमासस्य बाधे प्राप्ते तत्प्रतिप्रसवार्थमप्येकग्रहणमित्यर्थः । **स्नातानुलिप्त इति** ॥ विग्रहवाक्यवदिह पूर्वपश्चाच्छब्दाभावेऽपि स्नानानुलेपनयोः पौर्वापर्यं समासगम्यमेव । पूर्वकालः समस्यते इत्युक्तेन परकाले नेत्यर्थात्प्रतीतेः । **एकनाथ इति** ॥ एकश्चासौ नाथश्चेति विग्रहः । यज्ञमधीयते विदन्ति वा याज्ञिकाः । 'क्रतूक्थादिसूत्रान्ताट्ठक्' सर्वे च ते याज्ञिकाश्चेति विग्रहः । **जरन्नैयायिका इति** ॥ जरन्तश्च ते नैयायिकाश्चेति विग्रहः । न्यायमधीयते विदन्ति वा नैयायिकाः । पूर्ववत् ठक् । 'न य्वाभ्याम्' इत्यैजागमो वृद्धिनिषेधश्च । 'जीर्यतेरतृन्' इति भूते अतृन् । जीर्णनैयायिका इत्यर्थः । **पुराणमीमांसकाः**

७२७। दिक्संख्ये संज्ञायाम्। (२-१-५०)

'समानाधिकरणेन' इत्यापादपरिसमाप्तेरधिकारः। 'संज्ञायामेव' इति नियमार्थं सूत्रम्। पूर्वेषुकामशमी। सप्तर्षयः। नेह, उत्तरा वृक्षाः। पञ्च ब्राह्मणाः।

७२८। तद्धितार्थोत्तरपदसमाहारे च। (२-१-५१)

तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये दिक्संख्ये प्राग्वद्वा। पूर्वस्यां शालायां भवः पौर्वशालः। समासे कृते हिक्पूर्वपदादसं-

---

इति ॥ मीमांसामधीयते मीमांसकाः। 'क्रमादिभ्यो वुन्' पुराणाश्च ते मीमांसकाश्चेति विग्रहः। **नवपाठका इति** ॥ नवाश्च ते पाठकाश्चेति विग्रहः। अत्र पुराणसाहचर्यान्नवशब्दो नूतनवाच्येव गृह्यते। ननु सङ्ख्याविशेषवाची। **केवलवैयाकरणा इति** ॥ व्याकरणमधीयते विदन्ति वा वैयाकरणाः इति। 'तदधीते तद्वेद' इत्यण्। 'न य्वाभ्याम्' इति वृद्धिनिषेध ऐजागमश्च। केवलाश्च ते वैयाकरणाश्चेति विग्रहः। **दिक्संख्ये संज्ञायाम्** ॥ **अधिकार इति** ॥ 'पूर्वकालैक' इतिसूत्रस्थं समानाधिकरणेनेत्यतत् आपादसमाप्तेरनुवर्तते इत्यर्थः। ततश्च दिक्संख्ये समानाधिकरणेन सुबन्तेन समस्येते स तत्पुरुष इत्यर्थः। ननु 'विशेषणं विशेष्येण' इत्येव सिद्धे किमर्थमिदं वचनमित्यत आह। **संज्ञायामेवेति** ॥ नचैवं सति पञ्च गावो यस्य सः पञ्चगुरिति बहुव्रीहिर्न स्यात्। पञ्चानां गवां समाहारः पञ्चगवमित्यत्र 'तद्धितार्थ' इति समासश्च न स्यादिति वाच्यम्। 'विशेषणं विशेष्येण' इति यदि दिक्संख्ययोस्समासः स्यात् तर्हि संज्ञायामेवेति स्त्रियमशरीराभ्युपगमात्। पूर्वसूत्रं, 'पूर्वमासः, पूर्वसमुद्रः' इत्यादौ तु संज्ञात्वाभावेऽपि कालदेशवाचकत्वात् समासो भवत्येव। ननु 'त्रिलोकनाथः पितृसद्मगोचरः' इति कथं कालिदासप्रयोगः। त्रिलोकशब्दस्य असंज्ञात्वात्। त्रयाणां लोकानां समाहार इति विग्रहे 'तद्धितार्थ' इति द्विगुसमासे तु 'द्विगोः' इति ङीप्प्रसङ्गः। 'अकारान्तोत्तरपदो द्विगुस्स्त्रियामिष्टः' इति स्त्रीलिङ्गत्वात्। पात्रादित्वात् न स्त्रीत्वमित्यभ्युपगमे 'यदि त्रिलोकी गणनापरा स्यात्' इत्यादिप्रयोगाः न युज्येरन्। इति चेत्सत्यम्। लोकशब्दोऽत्र लोकसमुदायपरः। त्रयवयवो लोकस्त्रिलोक इति मध्यमपदलोपी समासः। 'द्विगोर्लुगनपत्ये' इति सूत्रे भाष्ये स्पष्टम्। षोडशपदार्थानामित्यत्र तु षोडशत्वसङ्ख्याकाः पदार्था इति मध्यमपदलोपी समास इत्यलम्। **पूर्वेषुकामशमीति** ॥ पूर्वशब्दस्य इषुकामशमीशब्देन समासः। देशविशेषस्य संज्ञेयम्। **सप्तर्षय इति** ॥ मरीच्यत्रिप्रभृतीनां सप्तानामृषीणां संज्ञेयम्। **नेहेति** ॥ असंज्ञात्वादिति भावः। **तद्धितार्थ** ॥ एकापि सप्तमी विषयभेदात् भिद्यते। तत्र तद्धितार्थेऽंशे वैषयिकाधारत्वे वर्तते। उत्तरपदेऽंशे सामीपिकमाधारत्वमादाय परसप्तमी पर्यवस्यति। समाहारांशे तु वाच्यतया आधारत्वे सप्तमी। पूर्वसूत्रात् दिक्सङ्ख्ये इत्यनुवर्तते। तदाह। **तद्धितार्थे विषये इति** ॥ तद्धितार्थे भविष्यत्तद्धितजन्यज्ञानविषये सतीत्यर्थः। तद्धिते भविष्यतीति यावत्। **प्राग्वदिति** ॥ समानाधिकरणेन समस्यते स तत्पुरुषः इत्यर्थः। तद्धितार्थे दिक्समासमुदाहरति।

ज्ञायां अः' (सू १३२८) इति अः । 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' (वा १३७६) । आपरशालः । पूर्वा शाला प्रिया यस्येति त्रिपदे बहुव्रीहौ कृते प्रियाशब्दे उत्तरपदे पूर्वयोस्तत्पुरुषः । तेन शालाशब्दे आकार उदात्तः । पूर्वशालाप्रियः । दिक्षु समाहारो नास्त्यनभिधानात् । संख्यायास्तद्धितार्थे । षण्णां मातृणामपत्यं षाण्मातुरः । पञ्च गावो धनं यस्येति त्रिपदे बहुव्रीहावन्तरतत्पुरुषस्य विकल्पे प्राप्ते 'द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्' (वा १२८७) ।

७२९ । गोरतद्धितलुकि । (५-४-९२)

पूर्वस्यामिति ॥ समासे कृते इति ॥ पूर्वस्यां शालायां भव इति विग्रहे 'तद्धितार्थे' इति समासे कृते 'दिक्पूर्वपदात्' इति अप्रत्यये कृते 'यस्येति च' इत्यकारलोपे आदिवृद्धिरिति भावः । **सर्वनाम्न इति** ॥ मात्रशब्दः कात्स्न्र्ये । समासतद्धितादिवृत्तिगतसर्वनाम्नां पुंवत्त्वमिति तदर्थः । यदि तु तद्धिते परे दिक्सङ्ख्ये समस्येते इत्युच्यते, तर्हि उत्पन्ने तद्धिते समासः । समासे कृते दिक्पूर्वपदत्वात्तद्धित इत्यन्योन्याश्रयप्रसङ्गः । तद्धितार्थे वाच्ये दिक्सङ्ख्ये समस्येते इति तु न व्याख्यातम् । तद्धितार्थस्य तद्धितवाच्यतया समासार्थत्वाभावात् । अतस्तद्धिते भविष्यतीत्येव व्याख्यातुमुचितम् । **आपरशाल इति** ॥ अपरस्यां शालायां भव इति विग्रहः । समासादि पौर्वशालवत् । उत्तरपदे परतो दिक्समासमुदाहरति । **पूर्वा शाला प्रिया यस्येत्यादिना** ॥ ननु बहुव्रीहिसमासे कृते सुपां लुप्तत्वात् उत्तरपदे परतः पूर्वयोः किमनेन समासेनेत्यत आह । **तेन शालाशब्दे आकार उदात्त इति** ॥ अवान्तरतत्पुरुषे सति समासान्तोदात्तत्वेन लकारादाकार उदात्त इत्यर्थः । असति त्ववान्तरतत्पुरुषे पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वं स्यादिति भावः । ननु पूर्वेषां पुरुषाणां समाहार इत्यत्रापि समासस्यादित्यत आह । **दिक्षिति** ॥ दिक्षु समाहारो द्विगुविषयो न भवतीत्यर्थः । समाहारे दिक्पूर्वपदसमासो नास्तीति यावत् । **सङ्ख्यायास्तद्धितार्थे इति** ॥ समासः उदाहियत इत्यर्थः । तत्र तद्धितार्थे उदाहरति । **षाण्मातुर इति** ॥ 'मातुरुत्सङ्ख्यासम्भद्रपूर्वायाः' इत्यण् । प्रकृतेरुकारश्चादेशः आदिवृद्धिश्च । अथ उत्तरपदे परत उदाहरति । **पञ्च गाव इति** ॥ **अवान्तरतत्पुरुषस्येति** ॥ उत्तरपदे परतो विहितस्येत्यर्थः । **विकल्पे प्राप्ते इति** ॥ महाविभाषाधिकारादिति शेषः । ततश्च पञ्चगोशब्दयोस्तत्पुरुषाभावपक्षे 'गोरतद्धितलुकि' इति तत्पुरुषप्रयुक्तटजभावे पञ्चगोधन इत्यपि स्यादिति भावः । **द्वन्द्वतत्पुरुषयोरिति** ॥ उत्तरपदे परतः यौ द्वन्द्वतत्पुरुषौ तयोर्नित्यत्वं वक्तव्यमित्यर्थः । समासग्रहणन्तु सम्पातायातम् । अनन्वयात्, उत्तरपदे परतस्समाससंज्ञाया अव्याभेचाराच्च । उत्तरपदशब्दस्य समासोत्तरखण्डे रूढत्वात् । **गोरतद्धितलुकि** ॥ 'तत्पुरुषस्याङ्गुलेः' इत्यतस्तत्पुरुषस्येत्यनुवृत्तं पञ्चम्या विपरिणतं गोरित्यनेन विशेष्यते । तदन्तविधिः । 'राजाहःसखिभ्यः'

गोऽन्तात्तत्पुरुषाट्टच्स्यात्समासान्तो न तद्धितलुकि। पञ्चगवधनः। पञ्चानां गवां समाहारः।

७३०। संख्यापूर्वो द्विगुः। (२-१-५२)

'तद्धितार्थ—' (सू ७२८) इत्यत्रोक्तस्त्रिविधः संख्यापूर्वो द्विगुः स्यात्।

७३१। द्विगुरेकवचनम्। (२-४-१)

द्विग्वर्थः समाहार एकवत्स्यात्। 'स नपुंसकम्' (सू ८२१) इति नपुंसकत्वम्। पञ्चगवम्।

इत्यतष्टजित्यनुवर्तते। समासान्त इत्यधिकृतम्। तदाह। **गोऽन्तादित्यादिना** ॥ अतद्धितलुकीति किम्। पञ्चभिर्गोभिः क्रीतो पञ्चगुः। अत्र तद्धितस्य 'अध्यर्ध' इति लुक्। **पञ्चगवधन इति** ॥ त्रिपदबहुव्रीहौ कृते सति धनशब्दे उत्तरपदे परे पूर्वयोस्तत्पुरुषे टचि अवादेश इति भावः। अत्र 'द्वन्द्वतत्पुरुषयोः' इति वार्तिके द्वन्द्वस्योदाहरणन्तु वाक् च त्वक् च प्रिया यस्य सः वाक्त्वचप्रिय इति बोध्यम्। इह त्रिपदबहुव्रीहौ कृते पूर्वयोर्नित्यद्वन्द्वः। तेन 'द्वन्द्वाच्चुदषहान्तात् समाहारे' इति टजपि नित्य एव। नच वाक्त्वक्छब्दयोः परस्परसामानाधिकरण्याभावात् कथमिह त्रिपदबहुव्रीहिरिति वाच्यम्। द्वयोः प्रियाशब्दसामानाधिकरण्यमादाय तदुपपत्तेः। 'सप्तमी विशेषणे बहुव्रीहौ' इति ज्ञापकेन कण्ठेकाळ इत्यादाविव व्यधिकरणबहुव्रीहिसम्भवाच्च। "वाक्त्वचप्रियः" इति भाष्ये उदाहरणमेवात्र लिङ्गमित्यलम्। अथ समाहारे उदाहर्तुं विग्रहन्दर्शयति। **पञ्चानां गवां समाहार इति** ॥ अत्र समासे सति 'गोरतद्धितलुकि' इति टचि अवादेशे पञ्चगवशब्दस्य द्विगुकार्यं विधास्यन् द्विगुसंज्ञामाह। **सङ्ख्यापूर्वो द्विगुः** ॥ सङ्ख्या पूर्वोऽवयवः यस्येति बहुव्रीहिः। 'तद्धितार्थ' इति पूर्वसूत्रविहितसमासः अन्यपदार्थः, प्रत्यासत्तेः। तदाह। **तद्धितार्थेत्यत्रोक्तस्त्रिविध इति** ॥ तद्धितार्थे विषये उत्तरपदे च परतस्समाहारे च वाच्ये इत्येवं त्रिप्रकारो यः सङ्ख्यापूर्वस्समासः उक्तः स द्विगुरिति यावत्। तथाच पञ्चगवशब्दस्य समाहारे वाच्ये विहितसमासत्वात् द्विगुसंज्ञा स्थिता। तद्धितार्थे तु पञ्चसु कपालेषु संस्कृतः पुरोडाशः पञ्चकपालः। 'संस्कृतम् भक्षाः' इत्यण्। 'द्विगोर्लुगनपत्ये' इति लुक्। उत्तरपदे यथा, पञ्चनावप्रियः। 'नावो द्विगोः' इति समासान्तष्टच्। **द्विगुरेकवचनम्** ॥ अत्र 'समाहारग्रहणं कर्तव्यम्' इति वार्तिकात् समाहार इति लभ्यते। वक्तीति वचनम्। बाहुलकः कर्तरि ल्युट्। सामान्ये नपुंसकम्। समाहारे द्विगुः। एकार्थप्रतिपादकस्यादिति लभ्यते। तत्र यदि समाहियत इति कर्मणि घञि समाहारशब्दस्समाहृतप्रधानः। तदा समाहृतगतद्वित्वबहुत्वयोः एकत्वानुपपत्तेरतिदेशस्सम्पद्यते। तदाह। **द्विग्वर्थस्समाहार एकवद्भवति** ॥ यदा समाहरणं समाहारः समूहः, तदा तस्यैकत्वादेव सिद्धमिति नेदं सूत्रमारम्भणीयमिति भाष्ये स्पष्टम्। केचित्तु समूहस्य वस्तुत एकत्वेऽपि उद्भूतावयवभेदविवक्षया द्विबहुवचनव्यावृत्त्यर्थमिदम्। एवञ्चात्र उद्भूतावयवभेदविवक्षा न कर्तव्येति फलती-

७३२ । कुत्सितानि कुत्सनैः । (२-१-५३)

कुत्स्यमानानि कुत्सनैः सह प्राग्वत् । वैयाकरणखसूचिः । मीमांसक-दुर्दुरूटः ।

७३३ । पापाणके कुत्सितैः । (२-१-५४)

पूर्वसूत्रापवादः । पापनापितः । अणककुलालः ।

७३४ । उपमानानि सामान्यवचनैः । (२-१-५५)

घन इव श्यामो घनश्यामः । इह 'पूर्वपदं तत्सदृशे लाक्षणिकम्' इति सूचयितुं लौकिकविग्रहे इवशब्दः प्रयुज्यते । पूर्वनिपातनियमार्थं सूत्रम् ।

ख्याहुः । **स नपुंसकमिति** ॥ समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं स्यादिति तदर्थो मूले वक्ष्यते । इति द्विगुसमासः । **कुत्सितानि कुत्सनैः** ॥ वर्तमाने क्तः व्याख्यानात् । तदाह । **कुत्स्यमानानीति** ॥ कुत्सनैरिति करणे ल्युट् । **प्राग्वदिति** ॥ समानाधिकरणेन समस्यते स तत्पुरुष इत्यर्थः । **वैयाकरणखसूचिरिति** ॥ वैयाकरणश्चासौ खसूचिश्चेति विग्रहः । यः प्रक्रियां पृष्टस्सन् प्रश्नं विस्मारयतुमाकाशन्दर्शयति पश्यति वा स एवमुच्यते । अत्र वैयाकरणः प्रक्रियाविस्मरणान्निन्द्यः । खसूचनं निन्दाहेतुः । **मीमांसकदुर्दुरूट इति** ॥ 'दुल उत्क्षेपे' चुरादिः । दुःपूर्वादौणादिकः कूटप्रत्ययः । 'बहुलमन्यत्रापि' इति णेर्लुक् । रलयोरभेदात् रः । यो मीमांसामधीत्यान्यथा जानानो दुराक्षेपं करोति स एवमुच्यते । विशेष्यस्य पूर्वनिपातार्थं सूत्रम् । विशेषणसमासे तु विशेषणस्य पूर्वनिपातस्स्यात् । **पापाणके कुत्सितैः** ॥ पापशब्दः अणकशब्दश्च कुत्सितवाचकैस्समस्यते स तत्पुरुष इत्यर्थः । ननु विशेषणसमासेनैव सिद्धे किमर्थमिदमेत्यत आह । **पूर्वसूत्रेति** ॥ पापमस्यास्तीति मत्वर्थीयो अर्शआद्यच् । पापशब्दः पापवति वर्तते । अणकशब्दः कुरूपिणि वर्तते । 'कुरूपकुत्सितावद्यखेटगर्ह्याणकास्समाः' इत्यमरः । ततश्च पापाणकशब्दौ निन्दाहेतुभूतपापकुरूपात्मकप्रवृत्तिनिमित्तौ कुत्सनाभिधायिनौ । ततश्चानयोः पूर्वसूत्रेण समासे परनिपातस्स्यात् । अतः पूर्वनिपातनियमार्थमिदं सूत्रमित्यर्थः । **पापनापित इति** ॥ पापश्चासौ नापितश्चेति विग्रहः । **अणककुलाल इति** ॥ अणकश्चासौ कुलालश्चेति विग्रहः । **उपमानानि सामान्यवचनैः** ॥ उपमीयन्ते सदृशतया परिच्छिद्यन्ते यैस्तान्युपमानानि सादृश्यनिरूपकाणीत्यर्थः । सामान्यः उपमानोपमेयसाधारणधर्मः तमुक्तवन्तः शब्दाः सामान्यवचनाः । बाहुळकः कर्तरि ल्युट् । पूर्वं सामान्यमुक्त्वा तद्वति द्रव्ये ये पर्यवस्यन्ति ते सामान्यवचना इति यावत् । तथाच सादृश्यनिरूपकशब्दापरपर्याया उपमानशब्दाः उपमानोपमेयसाधारणधर्मविशिष्टवाचिभिस्समानाधिकरणैस्समस्यन्ते स तत्पुरुष इत्यर्थः । **घन इव श्यामो घनश्यामः इति** ॥ नन्विह घन इव श्याम इति विग्रहे घनशब्दस्य श्यामशब्दस्य चैकार्थवृत्तित्वलक्षणसामानाधिकरण्याभावात् कथमिह समासः इवशब्दापेक्षत्वेनासामर्थ्यान्नेत्यत आह । **इह पूर्वपदमिति** ॥

७३५। उपमितं व्याघ्रादिभिः सामान्याप्रयोगे। (२-१-५६)

उपमेयं व्याघ्रादिभिः सह प्राग्वत्साधारणधर्मस्याप्रयोगे सति। विशेष्यस्य पूर्वनिपातार्थं सूत्रम्। पुरुषव्याघ्रः। नृसोमः। व्याघ्रादिराकृतिगणः। 'सामान्याप्रयोगे' किम्। पुरुषो व्याघ्र इव शूरः।

७३६। विशेषणं विशेष्येण बहुलम्। (२-१-५७)

भेदकं समानाधिकरणेन भेद्येन बहुलं प्राग्वत्। नीलमुत्पलं नीलोत्पलम्। बहुलग्रहणात् 'क्वचिन्नित्यम्'। कृष्णसर्पः। 'क्वचिन्न'। रामो जामदग्न्यः।

एवञ्च घनशब्दो लक्षणया घनसदृशे श्यामे वर्तते, श्यामशब्दोऽपि घने वर्तते, इति सामानाधिकरण्यम्। अत एव मृगीव चपला मृगचपला इत्यत्र 'पुंवत्कर्मधारय' इति पुंवत्त्वं सिद्ध्यति। घनशब्दस्य भूतपूर्वगत्योपमानपरत्वन्निर्वाह्यम्। तथाच 'घनसदृशश्यामः' इति बोधः। सादृश्यं तद्भिन्नत्वे सति तद्गतधर्मवत्त्वम्। एवञ्च सादृश्यप्रतियोग्यनुयोगिनोस्साधारणधर्मवत्त्वं लब्धम्। स चेह साधारणधर्मः उत्तरपदोपस्थाप्य एव गृह्यते। सन्निहितत्वात्। तथाच घनगतश्यामत्वसदृशश्यामत्ववान्' इति बोधपर्यवसानम्। ननु विशेषणसमासेन सिद्धे किमर्थमिदं सूत्रमित्यत आह। **पूर्वनिपातेति॥** अन्यथा उभयोरपि गुणवचनतया विशेषणविशेष्यभावे कामचारात् खञ्जकुब्जः कुब्जखञ्जः इतिवदनियमस्स्यादिति भावः। **उपमितम्॥ प्राग्वदिति॥** समानाधिकरणैस्समस्यते स तत्पुरुष इत्यर्थः। अत्रोपमितस्य नित्यमुपमानाकाङ्क्षत्वादुपमानभूतव्याघ्रादिभिरित्यर्थसिद्धम्। ननु विशेषणसमासेनैव सिद्धे किमर्थमिदं सूत्रमित्यत आह। **विशेष्यस्येति॥** उपमानोपमेयसमभिव्याहारे उपमानस्यैव विशेषणत्वात्पूर्वनिपाते प्राप्ते विशेषस्य पूर्वनिपातनार्थमिदमित्यर्थः। **पुरुषव्याघ्रः इति॥** पुरुषो व्याघ्र इवेति विग्रहः। अत्र सादृश्योपपादकश्शौर्यात्मकस्साधारणधर्मः। स इह नोपात्त इति भवति समासः। **पुरुषो व्याघ्र इव शूर इति॥** शौर्येण व्याघ्रसदृश इति यावत्। अत्र शौर्यस्योपमानोपमेयसाधारणधर्मस्य प्रयोगान्न समास इति भावः। 'भाष्याब्धिः क्रातिगम्भीरः' इति कैयटप्रयोगस्तु मयूरव्यंसकादित्वात्समाधेयः। भाष्यमेवाब्धिरिति रूपकं वा। नच पुरुषशब्दस्य शूरशब्दसापेक्षत्वादसामर्थ्यादेवात्र समासस्य न प्रवृत्तिः। अतः 'सामान्याप्रयोगे' इति व्यर्थमिति वाच्यम्। समस्यमानेष्वप्रधानस्यैव हि सापेक्षत्वं सामर्थ्यविघातकं, नतु प्रधानस्य। तथाचात्र पुरुषस्य प्रधानतया तस्य शूरापेक्षत्वेऽपि अस्त्येव सामर्थ्यमिति समासप्रवृत्तेस्तन्निवृत्त्यर्थं सामान्याप्रयोग इति वचनम्। इदमेव प्रधानस्य सापेक्षत्वेऽपि न सामर्थ्यविघातकत्वमिति ज्ञापयति। तेन राजपुरुषसुन्दर इत्यादौ समासस्सिद्धो भवतीति भाष्ये स्पष्टम्। **विशेषणं विशेष्येण बहुलम्॥** विशिष्यते अनेनेति विशेषणम्, इतरस्माद्व्यावर्तकम्। व्यावृत्त्यन्तु विशेष्ये भिन्नत्वेन ज्ञायमानम्। समानाधिकरणेनेत्यधिकृतम्। तदाह। **भेदक-**

७३७ । पूर्वापरप्रथमचरमजघन्यसमानमध्य-मध्यमवीराश्च । (२-१-५८)

पूर्वनिपातनियमार्थमिदम् । पूर्ववैयाकरणः । अपराध्यापकः । 'अपरस्यार्धे पश्चभावो वक्तव्यः' (वा ३२५३) । अपरश्चासावर्धश्च पश्चार्धः । कथम् 'एकवीरः' इति । 'पूर्वकालैक–' (सू ७२६) इति बाधित्वा परत्वादनेन समासे 'वीरैकः' इति हि स्यात् । बहुळग्रहणाद्भविष्यति ।

७३८ । श्रेण्यादयः कृतादिभिः । (२-१-५९)

'श्रेण्यादिषु कृव्यर्थवचनं कर्तव्यम्' (वा १२९६) । अश्रेणयः श्रेणयः कृताः श्रेणीकृताः ।

मिति ॥ प्राग्वदिति ॥ समस्यते स तत्पुरुष इत्यर्थः । **नीलमुत्पलं नीलोत्पलमिति ॥** नीलपदन्तावदुत्पलमनीलादुत्पलाद्व्यावर्तयतीति विशेषणसमर्पकम् । तस्य उत्पलपदेन विशेष्यसमर्पकेण समासः । प्रथमानिर्दिष्टत्वाद्विशेषणस्य पूर्वनिपात इति भावः । नच उत्पलपदम् अनुत्पलान्नीलं व्यावर्तयतीत्युत्पलपदस्यापि विशेषणत्वं स्यादिति वाच्यम् । जातिशब्दो गुणक्रियाशब्दसमभिव्याहारे विशेष्यसमर्पक एव, न तु विशेषणसमर्पकः। स्वभावात् । यथा 'नीलोत्पलं, पाचकब्राह्मणः' इति गुणशब्दयोस्समभिव्याहारे विशेषणविशेष्यभावस्य न नियमः । यथा 'खञ्जकुब्जः कुब्जखञ्जः' इति । क्रियाशब्दयोरप्यनियमः । यथा पाचकपाठकः पाठकपाचकः, इति, तथा गुणक्रियाशब्दयोरप्यनियमः । यथा 'खञ्जपाचकः पाचकखञ्जः' इति भाष्ये स्पष्टम् । तथा 'कैलासाद्रिः, मन्दराद्रिः, अयोध्यानगरी' इत्यादौ संज्ञाशब्दा अपि विशेषणसमर्पका एव, स्वभावात् । सामान्यजातिविशेषजातिशब्दयोस्समभिव्याहारे तु विशेषजातिरेव विशेषणम् । 'शिंशपावृक्षः' इत्यादि ज्ञेयम् । ननु वाग्रहणेन सिद्धे बहुळग्रहणं किमर्थमित्यत आह । **बहुळग्रहणादिति ॥ पूर्वापर ॥** पूर्वादयस्समानाधिकरणेन समस्यन्ते इत्यर्थः । विशेषणसमासेनैव सिद्धे किमर्थमिदमित्यत आह । **पूर्वनिपातेति ॥ अपराध्यापक इति ॥** बहुळग्रहणानुवृत्त्या पाचकादिक्रियाशब्दैः पूर्वादीनामेषान्न समास इति समर्थसूत्रे भाष्ये स्थितम् । ततश्च 'अपराध्यापकः' इत्युदाहरणमुपेक्ष्यम् । 'अपरमीमांसकः' इत्युदाहरणमुचितम् । **अपरस्यार्धे इति ॥** 'पश्चात्' इति सूत्रभाष्ये इदं वार्तिकं स्थितम् । प्रथमवैयाकरणः, चरमवैयाकरणः, 'मध्यान्मः' मध्यमवैयाकरणः, वीरवैयाकरणः । आक्षिपति । **कथमेकवीरः इति ॥** हि यतः अनेन प्रकृतसूत्रेण वीरशब्दस्यैकशब्देन समासे सति वीरशब्दस्य पूर्वनिपाते सति वीरैकः इति स्यात् । अतः 'एकवीरः' इति कथमित्यन्वयः । ननु 'पूर्वकालैक' इति सूत्रेणैकशब्दस्य वीरशब्देन समासे सति 'एकवीरः' इति निर्बाधमित्यत आह । **पूर्वकालैकेति बाधित्वा परत्वादिति ॥** परिहरति । **बाहुळकादिति ॥** बहुळग्रहणानुवृत्तेरस्य सूत्रस्याप्रवृत्तौ पूर्वकालेत्येव समासो भवतीत्यर्थः । **श्रेण्यादयः ॥** श्रेण्यादयः कृतादिभिस्समानाधिकरणैस्समस्यन्ते स तत्पुरुष इत्यर्थः । **श्रेण्यादिष्विति ॥** श्रेण्यादिषु समासविधौ

७३९। क्तेन नञ्विशिष्टेनानञ्। (२-१-६०)

नञ्विशिष्टेन क्तान्तेनानञ्क्तान्तं समस्यते। कृतं च तदकृतं च कृताकृतम्। 'शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम्' (वा १३१०) शाकप्रियः पार्थिवः शाकपार्थिवः। देवत्राह्मणः।

७४०। सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः। (२-१-६१)

सद्वैद्यः। वक्ष्यमाणेन महत आकारः। महावैयाकरणः। 'पूज्यमानैः' किम्। उत्कृष्टो गौः। पङ्क्तादुद्धृत इत्यर्थः।

च्व्यर्थवचनं च्विप्रत्ययार्थेऽभूततद्भावे गम्ये श्रेण्यादीनां समासो वक्तव्य इत्यर्थः। **अश्रेणयः इति** ॥ शिल्पेन पण्येन वा जीविनां समूहाः श्रेणयः। पूर्वं शिल्पेन पण्येन वा जीवितुमसमर्थाः इदानीं तेन जीवितुं समर्थाः कृता इत्यर्थे समासे सति 'श्रेणीकृताः' इति भवतीत्यर्थः। श्रेणिशब्दो ह्रस्वान्तः। भाष्ये तथैवोदाहरणात्। यदा तु सिद्धा एव श्रेणयः परिष्कृतास्तदा तु न समासः। च्व्यर्थाभावात्। च्विप्रत्ययान्तस्य तु परत्वात् 'कुगति' इति नित्यसमासः। ततः 'च्वौ च' इति श्रेणिशब्दस्य दीर्घः। **क्तेन नञ्विशिष्टेनानञ्** ॥ नञ्विशिष्टेन क्तान्तेन समानाधिकरणेन सह नञ्रहितं क्तान्तं समस्यते, स तत्पुरुष इत्यर्थः। **कृतञ्च तदिति** ॥ एकदेशस्य करणात्कृतम् एकदेशान्तरस्याकरणात्तदेवाकृतम्, पूर्वनिपातनियमार्थम्। सिद्धञ्च तदभुक्तञ्चेत्यत्र तु न त्वयं समासः। विशिष्टशब्दो ह्यत्राधिकवाची। यथा देवदत्तायज्ञदत्तः स्वाध्यायेन विशिष्ट इत्युक्ते अधिक इति गम्यते। नञैव विशिष्टं नञ्मात्राधिकेन क्तान्तेनेति लभ्यते। एवञ्च समानप्रकृतिकत्वं क्तान्तयोः पर्यवसन्नमिति बोध्यम्। **शाकपार्थिवादीनामिति** ॥ 'वर्णो वर्णेन' इति सूत्रभाष्ये इदं वार्तिकं पठितम्। **शाकप्रियः पार्थिवः शाकपार्थिवः इति** ॥ शाकः प्रियः यस्य सः शाकप्रियः 'वा प्रियस्य' इति प्रियशब्दस्य परनिपातः शाकप्रियश्चासौ पार्थिवश्च इति विग्रहे बहुव्रीहिगर्भो विशेषणसमासः। तत्र पूर्वखण्डे बहुव्रीहौ उत्तरपदस्य प्रियशब्दस्य लोपः। **देवब्राह्मणः इति** ॥ देवाः प्रियाः यस्य स देवप्रियः, स चासौ ब्राह्मणश्चेति विग्रहः। पूर्ववदुत्तरपदलोपः। देवपूजको ब्राह्मण इति वा विग्रहः। **सन्महत्परम** ॥ समानाधिकरणैस्समस्यन्ते स तत्पुरुष इति शेषः। **सद्वैद्य इति** ॥ सन् वैद्य इति विग्रहः। चिकित्साशास्त्रकुलंकषज्ञानत्वं सत्त्वम्। तेन वैद्यस्य पूजा गम्यते। पूर्वनिपातनियमार्थं सूत्रम्। **वक्ष्यमाणेनेति** ॥ महांश्चासौ वैयाकरणश्चेति विग्रहे अनेन समासे सति महच्छब्दस्य 'आन्महतः' इति वक्ष्यमाणेन आकारे अन्तादेशे सवर्णदीर्घे महावैयाकरणः इति भवतीत्यर्थः। ननु उत्कृष्टो गौरित्यत्रोत्कृष्टशब्दस्य अतिशयितवाचितया तेन गोः पूजावगमात् कथमिह समासो न भवतीत्यत आह। **पङ्क्तादुद्धृत इत्यर्थ इति** ॥ उत्पूर्वकः कृषधातुरिहोद्धरणार्थक इति भावः। परमवैद्यः, उत्तमवैद्यः, उत्कृष्टवैद्यः।

७४१ । बृन्दारकनागकुञ्जरैः पूज्यमानम् । (२-१-६२)

गोबृन्दारकः । 'व्याघ्रादेः' आकृतिगणत्वादेव सिद्धे सामान्यप्रयोगार्थं वचनम् ।

७४२ । कतरकतमौ जातिपरिप्रश्ने । (२-१-६३)

कतरकठः । कतमकलापः । 'गोत्रं च चरणैः सह' इति जातित्वम् ।

७४३ । किं क्षेपे । (२-१-६४)

कुत्सितो राजा किंराजा, यो न रक्षति ।

गुणक्रियाशब्दैस्समासे सदादीनां पूर्वनिपातनियमार्थमिदं सूत्रम् । **बृन्दारकनागकुञ्जरैः** ॥ समानाधिकरणैस्समस्यते इति शेषः । विशेषणसमासेनैव सिद्धे विशेष्यस्य पूर्वनिपातनियमार्थं सूत्रम् । **गोबृन्दारक इति** ॥ बृन्दारकशब्दो देवतावाची "अमरा निर्जरा देवाः", इत्युपक्रम्य, "बृन्दारका दैवतानि" इत्यमरः । गौः बृन्दारक इवेति विग्रहः । गौः नाग इव गोनागः । गौः कुञ्जर इव गोकुञ्जरः । नागशब्दः कुञ्जरशब्दश्च गजवाची । अत्र गोबृन्दारकादितुल्यत्वात् श्रैष्ठ्यं गम्यते इति पूज्यमानता । ननु व्याघ्रादेराकृतिगणत्वात् 'उपमितं व्याघ्रादिभिः' इत्येव सिद्धे किमर्थमिदमित्यत आह । **व्याघ्रादेरिति** ॥ **सामान्येति** ॥ गोकुञ्जरः श्रेष्ठ इत्यादाविति भावः । **कतरकतमौ** ॥ जातिपरिप्रश्ने गम्ये कतरकतमौ समानाधिकरणेन समस्येते इत्यर्थः । **कतरकठ इति** ॥ अनयोः कः कठः इत्यर्थः । 'किंयत्तदोर्निर्धारणे द्वयोरेकस्य डतरच्' कठेन प्रोक्तमधीते कठः । वैशम्पायनान्तेवासित्वात् प्रोक्ते णिनिः । 'कठचरकाल्लुक्' इति तस्य लुक् । ततस्तदधीते इत्यणः 'प्रोक्ताल्लुक्' इति लुक् । **कतमकलाप इति** ॥ एषां कः कलाप इति विग्रहः । कलापिना प्रोक्तमधीते कलापः । 'कलापिनोऽण्' 'सब्रह्मचारि' इति टिलोपः । 'वा बहूनाञ्जातिपरिप्रश्ने डतमच्' ननु घटत्वादिवत् कठशाखाध्येतृत्वात्मकत्वं न जातिः । "आकृतिग्रहणा जातिः" इति लक्षणस्य "लिङ्गानाञ्च न सर्वभाक्, सकृदाख्यानिर्ग्राह्या" इति लक्षणस्य च तत्राप्रवृत्तेरित्यत आह । **गोत्रञ्चेति** ॥ अत्र कतमशब्दस्य जातिपरिप्रश्न एव व्युत्पादनात्कतरार्थमेव जातिपरिप्रश्नग्रहणम् । एवञ्च अनयोः कतरो देवदत्तः इत्यत्र न भवति समासः । एषां कतमो देवदत्त इति तु नास्त्येव । जातिपरिप्रश्न एव डतमचो विधानात् । वस्तुतस्तु "डतरडतमविधौ द्वयोरिति बहूनामिति जातिपरिप्रश्न" इति प्रत्याख्यातं भाष्ये । एवञ्च कतम एषान्देवदत्त इत्यप्यस्ति । "तत्र समासाभावाय जातिपरिप्रश्नग्रहणम्" इति शब्देन्दुशेखरे स्थितम् । **किं क्षेपे** ॥ क्षेपो निन्दा । तत्र गम्ये किमित्यव्ययं समानाधिकरणेन समस्यते स तत्पुरुषः इत्यर्थः । **कुत्सतो राजेति** ॥ अस्वपदविग्रहोऽयम् । किम्पदस्थाने कुत्सितपदमिति ज्ञेयम् । वाक्येन निन्दानवगमेन स्वपदलौकिकविग्रहासम्भवात् । **किंराजेति** ॥ 'राजाहस्सखिभ्यः' इति टच् तु न । 'किमः क्षेपे' इति निषेधात् । ननु राज्ञो बहुसम्पत्तिशालिनः कथं कुत्सितत्वमित्यत आह । **यो न रक्षतीति** ॥

७४४। पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्भष्कयणी-प्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः (२-१-६५)

इति तत्पुरुषः।

श्रीरस्तु।

॥ अथ कर्मधारयसमासप्रकरणम् ॥

७४५। तत्पुरुषः समानाधिकरणः कर्मधारयः। (१-२-४२)

७४६। पुंवत्कर्मधारयजातीयदेशीयेषु। (६-३-४२)

कर्मधारये जातीयदेशीययोश्च परतो भाषितपुंस्कात्पर ऊङभावो यस्मिन्स्तथाभूतं पूर्वं पुंवत्। पूरणीप्रियादिष्वप्राप्तः पुंवद्भावो विधीयते। महानवमी।

स कुराजेत्यन्वयः। **पोटायुवति** ॥ पोटादिभिस्समानाधिकरणैर्जातिवाचकं समस्यते स तत्पुरुष इत्यर्थः॥

इति तत्पुरुषः।

अथ कर्मधारयकार्यं वक्ष्यन् कर्मधारयसंज्ञामाह—**तत्पुरुषः समान** ॥ समानम् एकमधिकरणं वाच्यं ययोः पदयोः, ते समानाधिकरणे पदे, ते अस्य स्त इति समानाधिकरणः मत्वर्थीयः अर्शआद्यच्। समानाधिकरणानेकपदावयवकस्तत्पुरुषः कर्मधारयसंज्ञको भवतीत्यर्थः। तत्पुरुषाधिकारे इयं संज्ञा न कृता। तथा सत्येकसंज्ञाधिकारात् कर्मधारयसंज्ञया तत्पुरुषसंज्ञा बाध्येतेत्याहुः। **पुंवत्कर्मधारय** ॥ स्त्रियाः पुंवद्भाषितपुस्कादनूङिति वर्तते। एकापि सप्तमी विषयभेदाद्भिद्यते। कर्मधारयांशे अधिकरणसप्तमी। जातीयदेशीयविषये परसप्तमी। तदाह। **कर्मधारये इति** ॥ तथाभूतमित्यनन्तरं स्त्रीवाचकमिति शेषः। भाषितपुंस्कादनूङित्येतत् 'स्त्रियाः पुवत्' इति सूत्रे स्फुटीकरिष्यते। ननु कर्मधारये 'स्त्रियाः पुंवत्' इत्यनेन सिद्धं पुंवत्त्वम्, जातीयदेशीययोस्तु 'तसिलादिष्वाकृत्वसुचः' इत्यनेन सिद्धमित्यत आह। **पूरणीप्रियादिष्वप्राप्तः इति** ॥ अपूरणीप्रियादिष्विति पर्युदासादिति भावः। **महानवमीति** ॥ महती चासौ नवमी चेति विग्रहः। 'सन्महत्' इत्यादिना समासः। नवानां पूरणी नवमी। 'तस्य पूरणे डट्' 'नान्तादसङ्ख्यादेर्मट्' टित्त्वात् ङीप्। अत्र नवमीशब्दस्य पूरणप्रत्ययान्तत्वात्तस्मिन् परे 'स्त्रियाः पुंवत्' इति पुंवत्त्वमप्राप्तमनेन

कृष्णचतुर्दशी । महाप्रिया । तथा कोपधादेः प्रतिषिद्धः पुंवद्भावः कर्मधारयादौ प्रतिप्रसूयते । पाचकस्त्री । दत्तभार्या, पञ्चमभार्या । स्रौघ्नभार्या । सुकेशभार्या । ब्राह्मणभार्या । एवं 'पाचकजातीया' 'पाचकदेशीया' इत्यादि । इभपोटा । 'पोटा स्त्रीपुंसलक्षणा' । इभयुवतिः । अग्निस्तोकः । उदश्वित्कतिपयम् । गृष्टिः सकृत्प्रसूता, गोगृष्टिः । धेनुर्नवप्रसूतिका, गोधेनुः । वशा वन्ध्या, गोवशा ।

विधीयते । कृते पुंवत्त्वे 'आन्महतः' इत्यात्त्वमिति भावः । **कृष्णचतुर्दशीति** ॥ चतुर्दशानां पूरणी चतुर्दशी । ङट् । 'नस्तद्धिते' इति टिलोपः । टित्त्वान्ङीप् । कृष्णा चासौ चतुर्दशी चेति विग्रहः । **महाप्रियेति** ॥ महती चासौ प्रिया चेति कर्मधारयः । अत्रापि प्रियादिपर्युदासादप्राप्तमनेन विधीयते इति भावः । 'पुंवत्कर्मधारय' इत्यस्य प्रयोजनान्तरमाह । **तथा कोपधादेरिति** ॥ 'न कोपधायाः' 'सङ्ज्ञापूरण्याश्च' 'वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे' 'स्वाङ्गाच्चेतः' 'जातेश्च' इति पञ्चसूत्र्या प्रतिषिद्ध इत्यर्थः । **कर्मधारयादाविति** ॥ कर्मधारये जातीयदेशीययोश्च परयोरित्यर्थः । **पाचकस्त्रीति** ॥ पाचिका चासौ स्त्री चेति कर्मधारयः । अत्र 'न कोपधायाः' इति पुंवत्त्वस्य प्रतिषधः प्राप्तः । **दत्तभार्या, पञ्चमभार्येति** ॥ दत्ता चासौ भार्या चेति, पञ्चमी चासौ भार्या चेति च कर्मधारयः । अत्र 'संज्ञापूरण्याश्च' इति प्रतिषेधः प्राप्तः । **स्रौघ्नभार्येति** ॥ स्रौघ्नी चासौ भार्या चेति कर्मधारयः । अत्र 'वृद्धिनिमित्तस्य च' इति प्रतिषधः प्राप्तः । **सुकेशभार्येति** ॥ सुकेशी चासौ भार्या चेति कर्मधारयः । अत्र 'स्वाङ्गाच्च' इति निषेधः प्राप्तः । **ब्राह्मणभार्येति** ॥ ब्राह्मणी चासौ भार्या चेति कर्मधारयः । अत्र 'जातेश्च' इति निषेधः प्राप्तः । अथ जातीयदेशीययोः प्रतिप्रसवमुदाहरति । **एवं पाचकजातीया, पाचकदेशीयेति** ॥ 'प्रकारवचने' इति जातीयर्, 'ईषदसमाप्तौ' इति देशीयर् । उभयत्रापि 'तसिलादिषु' इति पुंवत्त्वस्य 'न कोपधायाः' इति निषेध प्राप्तः । **इत्यादीति** ॥ दत्तजातीया, दत्तदेशीया, पञ्चमजातीया, पञ्चमदेशीया, स्रौघ्नजातीया, स्रौघ्नदेशीया, सुकेशजातीया, सुकेशदेशीया, ब्राह्मणजातीया, ब्राह्मणदेशीया तदेवं 'पुंवत्कर्मधारय' इति सूत्रं निरूप्य 'पोटायुवति' इति सूत्रस्य क्रमेणोदाहरणान्याह । **इभपोटेति** ॥ पोटा चासौ इभी चेति कर्मधारयः । इभीशब्दस्य पुंवत्त्वम् । जातेः पूर्वनिपातार्थमिदं सूत्रम् । **पोटा स्त्रीपुंसलक्षणा इति** ॥ कोशवाक्यमिदम् । स्त्रीपुंसयोर्लक्षणानि चिह्नानि यस्या इति बहुव्रीहिः । **इभयुवतिरिति** ॥ युवतिश्चासौ इभी चेति विग्रहः । कर्मधारये पुंवत्त्वम् । **अग्निस्तोक इति** ॥ स्तोकः अल्पः स चासौ अग्निश्चेति विग्रहः । **उदश्वित्कतिपयमिति** ॥ "तकं ह्युदश्वित्" इत्यमरः । कतिपयश्च तदुदश्विच्चेति कर्मधारयः । **गृष्टिस्सकृत्प्रसूतेति** ॥ कोशवाक्यमिदम् । **गोगृष्टिरिति** ॥ गृष्टिश्चासौ गौश्चेति कर्मधारयः । **धेनुर्नवप्रसूतिकेति** ॥ कोशवाक्यमिदम् । **गोधेनुरिति** ॥ धेनुश्चासौ गौश्चेति विग्रहः । **वशा वन्ध्या इति** ॥ कोशवाक्यमिदम् । **गोवशेति** ॥ वशा चासौ गौश्चेति विग्रहः । **वेहद्गर्भघाति-**

वेहद्गर्भघातिनी। गोवेहत्। बष्कयण्यतरुणवत्सा। गोबष्कयणी। कठप्रवक्ता। कठश्रोत्रियः। कठाध्यापकः। कठधूर्तः।

७४७। प्रशंसावचनैश्च। (२-१-६६)

एतैः सह जातिः प्राग्वत्। गोमतल्लिका। गोमचर्चिका। गोप्रकाण्डम्। गवोद्धः। गोतल्लजः। प्रशस्ता गौरित्यर्थः। मतल्लिकादयो नियतलिङ्गा न तु विशेष्यनिघ्नाः। जातिः किम्। कुमारी मतल्लिका।

७४८। युवा खलतिपलितवलिनजरतीभिः। (२-१-६७)

पूर्वनिपातनियमार्थं सूत्रम्। लिङ्गविशिष्टपरिभाषया युवतिशब्दोऽपि

नीति॥ कोशवाक्यमिदम्। **गोवेहदिति**॥ वेहच्चासौ गौश्चेति विग्रहः। **बष्कयण्यतरुणवत्सेति**॥ "चिरसूता बष्कयणी" इत्यमरः। तरुणवत्सेत्यपपाठः। **गोबष्कयणीति**॥ बष्कयणी चासौ गौश्चेति विग्रहः। **कठप्रवक्तेति**॥ प्रवक्ता अध्यापकः स चासौ कठश्चेति विग्रहः। **कठाध्यापक इति**॥ अध्यापकश्चासौ कठश्चेति विग्रहः। **कठधूर्त इति**॥ धूर्तश्चासौ कठश्चेति विग्रहः। "धूर्तोऽक्षदेवी" इत्यमरः। विट इत्यन्ये। नच 'कुत्सितानि कुत्सनैः' इत्यनेन सिद्धिरशङ्क्या। प्रवृत्तिनिमित्तकुत्सायामेव तत्प्रवृत्तेः। नहि कठत्वं कुत्सितम्। **प्रशंसावचनैश्च**॥ **एतैरिति**॥ रूढ्या प्रशंसावाचकैरित्यर्थः। **जातिरिति**॥ 'पोटायुवति' इत्यतस्तदनुवृत्तेरिति भावः। **प्राग्वदिति**॥ समानाधिकरणैस्समस्यते स तत्पुरुष इत्यर्थः। जातेः पूर्वनिपातनियमार्थं सूत्रम्। **गोमतल्लिकेति**॥ मतल्लिका चासौ गौश्चेति विग्रहः। **गोमचर्चिकेति**॥ मचर्चिका चासौ गौश्चेति विग्रहः। **गोप्रकाण्डमिति**॥ प्रकाण्डश्चासौ गौश्चेति विग्रहः। **गवोद्ध इति**॥ उद्धश्चासौ गौश्चेति विग्रहः। 'अवङ् स्फोटायनस्य' 'आद्गुणः'। **गोतल्लज इति**॥ तल्लजश्चासौ गौश्चेति विग्रहः। सर्वत्र परवल्लिङ्गता। मतल्लिकादिशब्दानां अप्रसिद्धत्वाद्व्याचष्टे। **प्रशस्ता गौरित्यर्थ इति**॥ गोशब्दस्य स्त्रीलिङ्गत्वाभिप्रायात् प्रशस्तेति स्त्रीलिङ्गनिर्देशः। गोशब्दस्य पुल्लिङ्गत्वे तु प्रशस्त इति पाठ्यम्। ननु गोशब्दस्य पुल्लिङ्गत्वे मतल्लिकामचर्चिकाप्रकाण्डशब्दानामपि विशेष्यनिघ्नत्वात् पुल्लिङ्गतापत्तिः। गोशब्दस्य स्त्रीलिङ्गत्वे तु प्रकाण्डोद्धतल्लजानामपि स्त्रीलिङ्गतापत्तिश्चेत्यत आह। **मतल्लिकादय इति**॥ 'मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ। प्रशस्तवाचकान्यमूनि' इत्यमरः। **कुमारी मतल्लिकेति**॥ अवस्थाविशेषात्मकवयोविशेषवाचित्वान्न जातिवाची कुमारीशब्द इति न समासः। समासे तु 'पुंवत्कर्मधारय' इति पुंवत्त्वं स्यादिति भावः। **युवाखलति**॥ युवन्शब्दः खलत्यादिभिस्समानाधिकरणैस्समस्यते स तत्पुरुष इत्यर्थः। विशेषणसमासेन सिद्धे किमर्थमिदमित्यत आह। **पूर्वेति**॥ युवन्शब्दस्य खलत्यादिशब्दानाञ्च गुणवाचित्वाद्विशेषणत्वे कामचारात्पूर्वनिपातस्यानियमे प्राप्ते तन्नियमार्थमिदं सूत्रमित्यर्थः। खलतिरकेशहीनशिराः।

समस्यते । युवा खलतिर्युवखलतिः । युवतिः खलती युवखलती । युवजरती । युवत्यामेव जरतीधर्मोपलम्भेन तद्रूपारोपात्सामानाधिकरण्यम् ।

७४९ । कृत्यतुल्याख्या अजात्या । (२-१-६८)

भोज्योष्णम् । तुल्यश्वेतः । सदृशश्वेतः । 'अजात्या' किम् । भोज्य ओदनः । प्रतिषेधसामर्थ्याद्विशेषणसमासोऽपि न ।

७५० । वर्णो वर्णेन । (२-१-६९)

समानाधिकरणेन सह प्राग्वत् । कृष्णसारङ्गः ।

७५१ । कडाराः कर्मधारये । (२-२-३८)

कडारादयः शब्दाः कर्मधारये वा पूर्वं प्रयोज्याः । कडारजैमिनिः । जैमिनिकडारः ।

"पलितजरसा शौक्ल्यम्" "वलिनो वलिभस्समौ" इत्यमरः । **युवा खलतिः युवखलतिरिति** ॥ अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वान्नलोपः । ननु युवतिं पुंल्लिङ्गनिर्देशात् कथं युवतिशब्दस्य समास इत्यत आह । **लिङ्गविशिष्टेति** ॥ **युवतिः खलतिः युवखलतिरिति** ॥ 'पुंवत्कर्मधारय' इति पुंवत्त्वम् । **युवजरतीति** ॥ जरती वृद्धा । युवतिश्चासौ' जरती चेति विग्रहः । 'पुंवत्कर्मधारय' इति पुंवत्त्वम् । ननु युवतिरकथं जरती स्यादित्यत आह । **युवत्यामेवेति** ॥ **कृत्यतुल्याख्या** ॥ कृत्यप्रत्ययान्तास्तुल्यवाचकाश्च जातिभिन्नवाचकेन समानाधिकरणेन समस्यन्ते स तत्पुरुष इत्यर्थः । **भोज्योष्णमिति** ॥ भोज्यञ्च तदुष्णश्चेति विग्रहः । 'ऋहलोर्ण्यत्' इति ण्यत् । अर्हे कृत्यप्रत्ययः । भोज्योष्णशब्दयोरक्रियागुणशब्दत्वात् विशेषणत्वे कामचारादनियतपूर्वनिपाते प्राप्ते नियमार्थमिदम् । **तुल्यश्वेत इति** ॥ तुल्यश्चासौ श्वेतश्चेति विग्रहः । उभयोर्गुणवचनतया विशेषणत्वानियमेऽपि तुल्यशब्दस्यैव पूर्वनिपातः । आख्याग्रहणस्य प्रयोजनमाह । **सदृश्वेत इति** ॥ सदृशशब्दस्य तुल्यपर्यायत्वादिति भावः । **भोज्य ओदन इति** ॥ अत्र ओदनशब्दस्य जातिवाचित्वात्तेनायं समासो न भवतीत्यर्थः । नन्वेतत्समासाभावेऽपि विशेषणसमासो दुर्वार इत्यत आह । **प्रतिषेधेति** ॥ भोज्यशब्दपूर्वनिपातस्योभयथाप्यविशिष्टतया 'अजात्या' इति पर्युदासवैयर्थ्यादिति भावः । **वर्णो** ॥ शेषपूरणेन सूत्रं व्याचष्टे । **समानाधिकरणेनेति** ॥ वर्णवाचिना समानाधिकरणेन वर्णवाची समस्यते स तत्पुरुष इत्यर्थः । **कृष्णसारङ्ग इति** ॥ सारङ्गश्चित्रवर्णवान् । कृष्णशब्दः कृष्णावयवके लाक्षणिकः इति सामानाधिकरण्यम् । कृष्णश्चासौ सारङ्गश्चेति विग्रहः । विशेषणसमासेन सिद्धे इदं प्रपञ्चार्थमेव । यत्तु 'वर्णो वर्णेष्वनेते' इति स्वरविधौ प्रतिपदोक्तत्वादस्यैव ग्रहणार्थमिदम् । तेन सारङ्गस्यावयवः कृष्णस्सारङ्गकृष्णः इत्यत्र 'वर्णो वर्णेषु' इति स्वरो नेति तच्चिन्त्यम् । कमधारयस्वरप्रकरणे 'वर्णो वर्णेष्वनेते' इति सूत्रस्य पाठेनैव सिद्धेरिति दिक् । **कडाराः कर्मधारये** ॥ 'उपसर्जनं पूर्वम्' इत्यतः पूर्वमित्यनुवर्तते । कडाराः इति बहुवचननिर्देशात्तदादिग्रहणम् । तदाह । **कडारादय इति** ॥ 'उपसर्जनम्पूर्वम्' इति नित्यत्वे प्राप्ते विकल्पोऽयम् । **कडारजैमि-**

७५२। कुमार श्रमणादिभिः। (२-१-७०)

कुमारी श्रमणा कुमारश्रमणा। इह गणे श्रमणा प्रव्रजिता गर्भिणीत्यादयः स्त्रीलिङ्गाः पठ्यन्ते। लिङ्गविशिष्टपरिभाषाया एतदेव ज्ञापकं बोध्यम्।

७५३। चतुष्पादो गर्भिण्या। (२-१-७१)

चतुष्पाज्जातिवाचिनो गर्भिणीशब्देन सह प्राग्वत्। गोगर्भिणी। 'चतुष्पाज्जातिरिति वक्तव्यम्' (वा १३११)। नेह। स्वस्तिमती गर्भिणी।

७५४। मयूरव्यंसकादयश्च। (२-१-७२)

एते निपात्यन्ते। मयूरो व्यंसकः मयूरव्यंसकः। व्यंसको धूर्तः। उदक्चावाक्चोच्चावचम्। निश्चितं च प्रचितं च निश्चप्रचम्। नास्ति किञ्चन यस्य सोऽकिञ्चनः। नास्ति कुतो भयं यस्य सोऽकुतोभयः। अन्यो राजा राजा-

---

निरिति॥ कडारश्चासौ जैमिनिश्चेति विग्रहः। **कुमार श्रमणादिभिः**॥ कुमारशब्दः श्रमणादिभिस्समानाधिकरणैस्समस्यते स तत्पुरुषः इत्यर्थः। **कुमारी श्रमणा कुमारश्रमणेति**॥ 'पुंवत्कर्मधारय' इति पुंवत्वम्। श्रमणाः परित्यक्तसर्वसङ्गाः। ननु सूत्रे कुमारशब्दस्य पुल्लिङ्गस्यैव पाठात् कथमिह स्त्रीलिङ्गस्योदाहरणमित्यत आह। **इहेति**॥ ननु गणे स्त्रीलिङ्गानामेव पाठे सूत्रस्य कथन्तेषु प्रवृत्तिः। नच लिङ्गविशिष्टपरिभाषयेति वाच्यम्। तत्सद्भावे प्रमाणाभावादित्यत आह। **लिङ्गेति**॥ **एतदेवेति**॥ एतदपीत्यर्थः। 'युवाखलति' इति सूत्रे जरतीग्रहणस्यापि तदज्ञापकत्वात्। नहि युवन्शब्दस्य जरतीसामानाधिकरण्यमस्ति। **चतुष्पादो गर्भिण्या**॥ 'जातिग्रहणं कर्तव्यम्' इति वार्तिकमभिप्रेत्य आह। **चतुष्पाज्जातीति**॥ **गोगर्भिणीति**॥ गर्भिणी चासौ गौश्चेति विग्रहः। विशेष्यस्य पूर्वनिपातार्थमिदं सूत्रम्। जातिरिति किम्। कालाक्षी गर्भिणी। **मयूरव्यंसकादयश्च**॥ **एते निपात्यन्ते इति**॥ कृतसमासकार्या निर्दिश्यन्त इत्यर्थः। **मयूरव्यंसक इति**॥ व्यंसकश्चासौ मयूरश्चेति विग्रहः। **व्यंसको धूर्त इति**॥ अत्र कोशो मृग्यः। गुणवचनत्वात् व्यंसकशब्दस्य पूर्वनिपाते प्राप्ते इदं वचनम्। **उच्चावचमिति**॥ उदक्शब्दस्य उच्चेत्यादेशः। अवाक्शब्दस्य अवचादेशश्च "उच्चावचन्नैकभेदम्" इत्यमरः। **निश्चप्रचमिति**॥ निश्चितशब्दस्य निश्चादेशः। प्रचितशब्दस्य प्रचादेशः। **नास्ति किञ्चनेति**॥ चनेत्यव्ययमप्यर्थे। नास्ति किमपि यस्येत्यर्थे बहुव्रीह्यपवादस्त्रिपदस्तत्पुरुषः। नञोऽकारस्य लोपश्च निपात्यते। 'नलोपो नञः' इति तु नात्र प्रवर्तते। किंशब्दस्य उत्तरपदत्वाभावात्। समासचरमखण्ड एव उत्तरपदशब्दस्य रूढत्वात्। **नास्ति कुत इति**॥ कुतो भयमस्यास्तीति विग्रहस्यार्थः। **अकुतोभय इति**॥ बहुव्रीह्यपवादस्तत्पुरुषः। **अन्यो राजा राजान्तरमिति**॥ अत्र अन्तरशब्दः अन्यपर्यायः। तस्य स्थाने अन्यशब्दो विग्रहवाक्ये ज्ञेयः। नित्यसमासत्वेन

न्तरम् । चिदेव चिन्मात्रम् । 'आख्यातमाख्यातेन क्रियासातत्ये' (ग २०)। अभीत पिबतेत्येवं सततं यत्राभिधीयते सा अभीतपिबता । पचतभृज्जता। खादतमोदता । 'एहीडादयोऽन्यपदार्थे' (ग १८)। एहीड इति यस्मिन्कर्मणि तदेहीडम् । एहियवम् । उद्धर कोष्ठादुत्सृज देहीति यस्यां क्रियायां सोद्धरोत्सृजा । उद्धमविधमा । असातत्यार्थमिह पाठः । 'जहिकर्मणा बहुलमाभीक्ष्ण्ये कर्तरभिदधाति' (ग २९) । जहीत्येतत्कर्मणा बहुलं समस्यते आभीक्ष्ण्ये गम्ये समासेन चेत्कर्ताभिधीयत इत्यर्थः । जहिजोडः । जहिस्तम्बः ।

७५५ । ईषदकृता । (२-२-७)

'ईषत्पिङ्गलः । 'ईषद्गुणवचनेनेति वाच्यम्' (वा १३१६) । ईषद्रक्तम् ।

७५६ । नञ् । (२-२-६)

नञ्सुपा सह समस्यते ।

७५७ । नलोपो नञः । (६-३-७३)

अस्वपदविग्रहौचित्यात् । नित्यसमासत्वञ्च राजान्तरमित्यस्य व्याख्यानादेव ज्ञेयम् । अत्र अन्तरशब्दस्य परनिपातः । **त्रिदेव चिन्मात्रमिति** ॥ 'मात्रं कार्त्स्न्येऽवधारणे' इत्यमरः । नित्यसमासत्वसूचनाय अस्वपदविग्रहः । निपातनादनुनासिकनित्यतेत्याहुः । **आख्यातमिति** ॥ गणसूत्रम् । क्रियासातत्ये गम्ये तिङन्तं तिङन्तेन समस्यते, स तत्पुरुषः इत्यर्थः । **अभीतपिबतेति** ॥ इहासुबन्तत्वेऽपि समासः । क्रियारूपस्यान्यपदार्थस्य प्राधान्यात् । स्त्रीत्वाट्टाप् । एवं पचतभृज्जतेत्यादावपि । **एहीडादय इति** ॥ इदमपि गणसूत्रम् । अन्यपदार्थे एहीडादयो निपात्यन्ते इत्यर्थः । एहि ईडे इति विग्रहः । ईडे इति लङुत्तमपुरुषैकवचनम् । डकारादेकारस्य अकारादेशः । **एहियवमिति** ॥ यौमीत्यस्य यवादेशः । उत्सृजेत्यस्य विवरणम् । **देहीति** ॥ **इह पाठ इति** ॥ एहीडादिष्वित्यर्थः । 'जहि कर्मणा बहुलम्' इत्यपि गणसूत्रम् । **कर्ता अभिधीयते इति** ॥ उक्तेऽर्थे कर्तेत्यर्थः । **जहिजोड इति** ॥ जोड इति कस्यचित् संज्ञा । जहि जोडं जहि जोडमित्याभीक्ष्ण्येन य आह स जहिजोडः । **जहिस्तम्ब इति** ॥ जहि स्तम्बम्, जहि स्तम्बमिति य आहेति विग्रहः । इति समानाधिकरणाधिकारः । **ईषदकृता** ॥ ईषच्छब्दः अकृदन्तप्रकृतिकसुबन्तेन समस्यते स तत्पुरुष इत्यर्थः । **ईषत्पिङ्गळ इति** ॥ पिङ्गळशब्दः अव्युत्पन्नप्रातिपदिकमिति भावः । **ईषद्गुणवचनेनेति** ॥ अकृतेत्यपहायेति शेषः । **नञ्** ॥ **इदं समानाधिकरणाधिकारस्थत्रेत्याभिप्रेत्य आह । सुपा समस्यते इति** ॥ **नलोपो नञः** ॥

नञो नस्य लोपः स्यादुत्तरपदे। न ब्राह्मणोऽब्राह्मणः।

७५८। तस्मान्नुडचि। (६-३-७४)

लुप्तनकारान्नञ उत्तरपदस्याजादेर्नुडागमः स्यात्। अनश्वः। अर्थाभावेऽव्ययीभावेन सहायं विकल्प्यते। 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्' इति

नेति लुप्तषष्ठीकं पदम्। तदाह। **नञो नस्येति। उत्तरपदे इति**॥ 'अलुगुत्तरपदे' इत्यतस्तदनुवृत्तेरिति भावः। नञोऽशिति सिद्धे लोपवचनम् अकब्राह्मण इति राकच्कार्थमित्याहुः। **अब्राह्मण इति**॥ अत्रारोऽपितत्वं नञर्थः। आरोपितत्वञ्च ब्राह्मणत्वद्वारा ब्राह्मणे अन्वेति। आरोपितब्राह्मणत्ववानिति बोधः। अर्थात् ब्राह्मणाभिन्न इति पर्यवस्यति। केचित्तु नञ् भिन्नवाची, ब्राह्मणाद्भिन्न इत्यर्थ इत्याहुः। तदयुक्तम्। ब्राह्मणाद्भिन्नः इत्यर्थे पूर्वपदार्थप्राधान्यापत्तेः। तथाच 'उत्तरपदार्थप्रधानस्तत्पुरुषः' इति भाष्यादाशा विरुध्येत। किञ्च, अते, अतस्मै, अतस्मादित्यादौ सर्वनामकार्यं शीभावस्यायादेशं न स्यात्। तच्छब्दार्थस्य नञर्थे प्रति विशेषणत्वे अप्रधानत्वात्। 'संज्ञोपसर्जनीभूतास्तु न सर्वादयः' इत्युक्तेः। तथा अस इत्यादौ 'तदोस्सम्सावनन्त्ययोः' इति सर्वाद्यन्तर्गतत्यदादिकार्यं सत्वञ्च न स्यात्। अनेकमित्यत्र एकवचनानुपपत्तिश्च। एकभिन्नस्य एकत्वासम्भवेन द्वित्वबहुत्वनियमेन च द्विबहुवचनापत्तेः। तथा सति 'अनेकमन्यपदार्थे' इति नापपद्येत। 'एतत्तदोस्सुलोपः' इत्यत्र अनञ्समासग्रहणञ्चात्र लिङ्गम्। तद्धि असाश्वः, अनश्वः, इत्यादौ सुलोपाभावार्थम्। तद्भिन्नः, एतद्भिन्नः, इत्यर्थे तु तच्छब्दाद्यवयस्य उपसर्जनतया त्यदाद्यत्वानापत्तौ 'हल्ङ्यादिलोपस्य दुर्वारत्वात्तद्वैयर्थ्यं स्पष्टमेव। तस्मादुत्तरपदार्थप्राधान्यं भाष्योक्तमनुसृत्य आरोपितत्वमेव नञर्थ इति युक्तम्। विस्तरस्तु प्रौढमनोरमायां शब्दरत्ने मञ्जूषायाञ्च ज्ञेयः। प्राचीनास्तु "तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाष्पट् प्रकीर्तिता" इति पठित्वा अब्राह्मणः, अपापम्, अनश्वः, अनुदरा कन्या, अपशवो वा अन्ये गोअश्वेभ्यः, अधर्मः, इत्युदाजहुः। तत्र सादृश्यादिकं प्रकरणादिगम्यमित्याहुः। **तस्मान्नुडचि**॥ तच्छब्देन पूर्वसूत्रावगतो लुप्तनकारो नञ् परामृश्यते उत्तरपद इत्यनुवृत्तं अचीत्यनेन विशेष्यते। तदादिविधिः। 'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' परत्वात्, इति परिभाषया सप्तमी षष्ठीं प्रकल्पयति। तदाह। **लुप्तनकारादिति**॥ **अनश्व इति**॥ समासे सति नञो नकारस्य लोपे तत्परिशिष्टाकारस्य नुट्। टकार इत्। उकार उच्चारणार्थः। टित्त्वादाद्यवयव इति भावः। नुक् तु न कृतः। डमुट्प्रसङ्गात्। ननु 'उत्तरे कर्मण्यविघ्नमस्तु' इत्यादौ विघ्नानामभाव इत्यर्थे नञ्तत्पुरुषे सति परवल्लिङ्गत्वे अविघ्न इति स्यात्। नच अर्थाभावे अव्ययीभावेन तत्सिद्धिरिति वाच्यम्। अव्ययीभावस्य निर्मक्षिकमित्यादौ सावकाशतया परत्वात्तत्पुरुषस्यैव प्रसङ्गादित्यत आह। **अर्थाभावे इति**॥ **रक्षेति**॥ पस्पशाह्निकभाष्ये इदं वाक्यम्। रक्षा च ऊहश्च आगमश्च लघु च असन्देहश्च इति द्वन्द्वः। 'परवल्लिङ्गम्' इति पुंस्त्वम्। अत्र सन्देहाभाव इत्यर्थे असन्देहशब्दस्य असन्देहा इति प्रयोगात् तत्पुरुषो

'अद्रुतायामसंहितम्' (वा ११६७) इति च भाष्यवार्तिकप्रयोगात्। तेन 'अनुपलब्धिः, अविवादः, अविघ्नम्', इत्यादि सिद्धम्। 'नञो नलोपस्तिङि क्षेपे' (वा ३९८४)। अपचसि त्वं जाल्म। 'नैकधा' इत्यादौ तु नशब्देन 'सह सुपा' (सू ६४९) इति समासः।

७५९। नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसक-नक्षत्रनक्रनाकेषु प्रकृत्या। (६-३-७५)

'पाद्' इति शत्रन्तः। 'वेदाः' इत्यसुन्नन्तः। न सत्या असत्याः। न असत्या नासत्याः। न मुञ्चतीति नमुचिः। न कुलमस्य। न खमस्य। न स्त्री पुमान्। स्त्रीपुंसयोः पुंसकभावो निपातनात्। न क्षरतीति नक्षत्रम्। क्षीयतेः क्षरतेर्वा क्षत्रमिति निपात्यते। न क्रामतीति नक्रः। 'क्रमेर्डः' न अकमस्मिन्निति नाकः।

७६०। नगोऽप्राणिष्वन्यतरस्याम्। (६-३-७७)

नग इत्यत्र नञ्प्रकृत्या वा। नगाः—अगाः पर्वताः। 'अप्राणिषु' इति किम्। अगो वृषलः शीतेन। 'नित्यं क्रीडा—' (सू ७११) इत्यतः 'नित्यम्' इत्यनुवर्तमाने।

विज्ञायते। अव्ययीभावे रक्षोहागमलघ्वसन्देहमिति स्यात्। **अद्रुतायामसंहितमिति**॥ 'परस्सन्निकर्षस्संहिता' इति सूत्रे पठितमिदं वार्तिकम्। अद्रुतायां वृत्तौ संहिताभाव इत्यर्थः। अत्र अव्ययीभावे सति असहितमिति प्रयोगात् अव्ययीभावेऽपि अर्थाभावो नञा गम्यो भवतीति विज्ञायते। अन्यथा तत्पुरुषे सति परवल्लिङ्गत्वादसंहितेति स्यात्। ततश्च नञा गम्ये अभावे तत्पुरुषाव्ययीभावयोर्विकल्प इति स्थितम्। **तेनेति**॥ अनुपलब्धिरित्यत्र अविवाद इत्यत्र च तत्पुरुषः। अविघ्नम् इत्यत्र अव्ययीभावश्च सिद्ध्यतीत्यर्थः। शब्देन्दुशेखरे तु अन्यथा प्रपञ्चितम्। **नञो नलोपस्तिङि क्षेपे इति**॥ 'नलोपो नञः' इति सूत्रस्थवार्तिकमिदम्। नञो नकारस्य लोपस्स्यात् तिङि परे निन्दायामिति वक्तव्यमित्यर्थः। **अ पचसि त्वं जाल्मेति**॥ कुत्सित पचसीत्यर्थः। अत्र अ इति भिन्नं पदं तिङन्तेन समासाभावाद्वार्तिकमिदं प्रसङ्गादुपन्यस्तम्। नञ्समानार्थकेन अ इत्यव्ययेनापि सिद्धमिदमिति वार्तिकं विफलमेव। केचित्तु अस्मादेव वार्तिकादव्ययेषु अ इत्यस्य पाठः अप्रामाणिक इत्याहुः। ननु नैकधेत्यत्रापि नञ्समासे 'नलोपो नञः' इति नकारस्य लोपे 'तस्मान्नुडचि' इति नुटि अनेकधेत्येव स्यादित्यत आह। **नैकधेत्यादौ त्विति**॥ एतदर्थमेव 'नञ्' इति सूत्रे 'नलोपो नञः' इति सूत्रे च अकारानुबन्धग्रहणमिति भावः। **नभ्राण्नपात्**॥ सुगमम्। **अनुवर्तमाने इति**॥

७६१। कुगतिप्रादयः। (२-२-१८)

एते समर्थेन नित्यं समस्यन्ते। कुत्सितः पुरुषः कुपुरुषः। 'गतिश्च' (सू २३) इत्यनुवर्तमाने।

७६२। ऊर्यादिच्विडाचश्च। (१-४-६१)

एते क्रियायोगे गतिसंज्ञाः स्युः। ऊरीकृत्य। शुक्लीकृत्य। पटपटाकृत्य। 'कारिकाशब्दस्योपसंख्यानम्' (वा ११३२)। कारिका क्रिया। कारिकाकृत्य।

७६३। अनुकरणं चानितिपरम्। (१-४-६२)

खाट्कृत्य। 'अनितिपरम्' किम्। खाडिति कृत्वा निरष्ठीवत्।

७६४। आदरानादरयोः सदसती। (१-४-६३)

सत्कृत्य। असत्कृत्य।

समासविधयो वक्ष्यन्त इति शेषः। **कुगतिप्रादयः**॥ **समस्यन्त इति**॥ स तत्पुरुष इत्यपि ज्ञेयम्। **कुत्सितः पुरुष इति**॥ नित्यसमासत्वादस्वपदविग्रहः। कुत्सितार्थकस्य कु इत्यव्ययस्यैवात्र ग्रहणम्, नतु पृथ्वीपर्यायस्य, गत्यादिसाहचर्यात्। **गतिश्चेत्यनुवर्तमाने इति**॥ क्रियायोग इति चेति वाच्यम्। **ऊर्यादिच्विडाचश्च**॥ च्विडाचौ प्रत्ययौ। **ऊरीकृत्येति**॥ ऊरीत्यव्ययम् अङ्गीकारे, तस्य कृत्वेत्यनेन गतिसमासः। समासेऽनञ्पूर्वे क्त्वो ल्यप्। **शुक्लीकृत्येति**॥ अशुक्ल शुक्ल कृन्वित्यर्थः। 'कृञ्चानुप्रयुज' इत्यभूततद्भावे च्विः। गतिसमासे सति क्त्वो ल्यप्, वेरपृक्तस्य, इति वलोपः। 'अस्य च्वौ' इति ईत्त्वम्। **पटपटाकृत्येति**॥ पटपटा इति शब्द कृत्वेत्यर्थः। अव्यक्तानुकरणात् द्व्यजवरार्धादनितौ डाच्' इति पटच्छब्दाड्डाचि टिलोपः। 'नित्यमाम्रेडिते डाचि' इति तकारपकारयोः पकार एकादेशः। गतिसमासे क्त्वो ल्यप्। **कारिकाशब्दस्योपसंख्यानमिति**॥ गतिसंज्ञाया इति शेषः। कारिकाशब्दं व्याचष्टे। **कारिका क्रियेति**॥ 'स्त्रियां क्तिन्' इत्यधिकारे धात्वर्थनिर्देशे ण्वुल्। **कारिकाकृत्येति**॥ क्रियां कृत्वेत्यर्थः। द्वितीयान्तस्य गतिसमासे क्त्वो ल्यप्, सुब्लुक्, कारिकाशब्दोऽत्र न कर्त्रीवाची, न श्लोकवाची च, व्याख्यानात्। **अनुकरणञ्चानितिपरम्**॥ अनुकरणं गतिसंज्ञं स्यात्, इतिपरं वर्जयित्वेत्यर्थः। **खाट्कृत्येति**॥ खाडिति शब्दं कृत्वेत्यर्थः। गतिसमासे क्त्वो ल्यप्। **खाडिति कृत्वेति**॥ न चात्र इतिशब्देन व्यवहितत्वे क्रियायोगाभावादेव गतिसंज्ञा न भविष्यति। तत्किमनितिपरग्रहणेनेति वाच्यम्। यथाकथञ्चित्क्रियायोगसत्त्वात्। 'ते प्राग्धातोः' इति सूत्रन्तु ते गत्युपसर्गाः धातोः प्रागेव प्रयोज्याः, न तु परत इति प्रयोगनियमपरमेवेति भावः। **आदरानादरयोस्सदसती**॥ सदिति असदिति च अव्ययेे आदरानादरयोः क्रमेण विद्यमाने गतिसंज्ञके स्त इत्यर्थः। **सत्कृत्येति**॥ आदरं कृत्वेत्यर्थः। **असत्कृत्येति**॥ अनादरं कृत्वे-

७६५ । भूषणेऽलम् । (१-४-६४)

अलंकृत्य । 'भूषणे' किम् । अलं कृत्वौदनं गतः । पर्याप्तमित्यर्थः । 'अनुकरणम्—' (सू ७६३) इत्यादित्रिसूत्री स्वभावात्कृञ्विषया ।

७६६ । अन्तरपरिग्रहे । (१-४-६५)

अन्तर्हत्य । मध्ये हृत्वेत्यर्थः । अपरिग्रहे किम् । अन्तर्हृत्वा गतः । हृतं परिगृह्य गत इत्यर्थः ।

७६७ । कणेमनसी श्रद्धाप्रतीघाते । (१-४-६६)

कणेहत्य पयः पिबति । मनोहत्य । 'कणे' शब्दः सप्तमीप्रतिरूपको निपातोऽभिलाषातिशये वर्तते । 'मनः' शब्दोऽप्यत्रैव ।

७६८ । पुरोऽव्ययम् । (१-४-६७)

पुरस्कृत्य ।

७६९ । अस्तं च । (१-४-६८)

ल्यर्थः । गतिसमासे क्त्वो ल्यप् । **भूषणेऽलम्** ॥ भूषणे विद्यमानं अलमित्यव्ययं गतिसंज्ञकं स्यादित्यर्थः । **अलंकृत्येति** ॥ कटकादिधारणेन परिष्कारं कृत्वेत्यर्थः । **कृञ्विषयेति** ॥ कृञ्योग एव भवतीत्यर्थः । वस्तुतस्तु सङ्कोचे प्रमाणाभावात्, धात्वन्तरयोगेऽपि त्रिसूत्री-प्रवृत्तिर्युक्ता। अत एव अलं भुक्त्वा ओदनं गत इति वृत्तिकृता प्रत्युदाहृतम् । **अन्तरपरिग्रहे** ॥ अपरिग्रहे वर्तमानं अन्तरित्यव्ययं गतिसंज्ञकं स्यादित्यर्थः । **हृतं परिगृह्येति** ॥ हृत्वा गमनम्, हृतं परिगृह्येति अपरिगृह्य वा भवति । तत्र आद्यमुदाहरणं द्वितीयं प्रत्युदाहरण-मित्यर्थः । अपरिग्रह इति प्रयोगोपाधिरेव, न तु वाच्यकोटिप्रविष्टम् । **कणेमनसी श्रद्धा-प्रतीघाते** ॥ कणेशब्दो मनश्शब्दश्च श्रद्धाप्रतीघाते गतिसंज्ञकौ स्तः । अत्यन्ताभिलाष श्रद्धा, तस्याः निवृत्तिः प्रतीघातः । **कणेहत्येति** ॥ गतिसमासे क्त्वा ल्यप् । **मनोहत्येति** ॥ पय× पिबतीत्यनुषज्यते । ननु समासे कृते कण इति सप्तम्याः कथं न लुगित्यत आह । **कणेशब्द इति** ॥ ननु श्रद्धाप्रतीघातस्य कथमिहागतिः । श्रद्धावाचकशब्दाभावात् । मनसो घाते सति कथं वा पयःपानम् इत्यत आह । **अभिलाषातिशये इति** ॥ कणेशब्द इत्यनुषज्यते । 'परावरयोगे च' इति सूत्रेण क्त्वा । अभिलषनिवृत्तिपर्यन्तं पय× पिबतीत्यर्थः । श्रद्धाप्रती-घाते किम्, कणेहत्वा गतः । सूक्ष्मस्तण्डुलावयवः कणः, तद्विषये हृत्वा गत इत्यर्थः । मनो-हृत्य गतः, विषपानादौ मन×प्रवृत्तिं प्रतिबध्य गत इत्यर्थः । **पुरोऽव्ययम्** ॥ पुर इत्यव्ययं गतिसंज्ञकं स्यात् । **पुरस्कृत्येति** ॥ गतिसमासे क्त्वो ल्यप् । अव्ययं किम्, पुरम्, पुरौ, पुर× कृत्वा गतः । **अस्तञ्च** ॥ पूर्वसूत्रादव्ययमित्यनुवर्तते इत्याह । **मान्तमव्ययमिति** ।

अस्तमिति मान्तमव्ययं गतिसंज्ञं स्यात्। अस्तंगत्य।

७७०। अच्छ गत्यर्थवदेषु। (१-४-६९)

'अव्ययम्' इत्येव। अच्छगत्य। अच्छोद्य। अभिमुखं गत्वा उक्त्वा चेत्यर्थः। 'अव्ययम्' किम्। जलमच्छं गच्छति।

७७१। अदोऽनुपदेशे। (१-४-७०)

अदःकृत्य, अदः कृतम्। परं प्रत्युपदेशे प्रत्युदाहरणम्। अदः कृत्वा, अदः कुरु।

७७२। तिरोऽन्तर्धौ। (१-४-७१)

तिरोभूय।

७७३। विभाषा कृञि। (१-४-७२)

तिरस्कृत्य—तिरःकृत्य—तिरः कृत्वा।

७७४। उपाजेऽन्वाजे। (१-४-७३)

एतौ कृञि वा गतिसंज्ञौ स्तः। उपाजेकृत्य—उपाजे कृत्वा। अन्वाजेकृत्य—अन्वाजे कृत्वा। दुर्बलस्य बलमाधायेत्यर्थः।

अस्तङ्गत्येति ॥ तिरोधानं प्राप्येत्यर्थः। अव्ययं किं, काण्डम् अस्तं कृत्वा। प्रक्षिप्तं कृत्वेत्यर्थः। **अच्छ गत्यर्थवदेषु** ॥ गत्यर्थधातुषु वदधातौ च प्रयुज्यमानेषु अच्छेत्यव्ययं गतिसंज्ञं स्यात्। **अच्छगत्येति** ॥ गतिसमासे क्त्वो ल्यप्। **अच्छोद्येति** ॥ वदधातोः क्त्वा। गतिसमासे क्त्वो ल्यप्। अच्छेत्यव्ययमाभिमुख्ये। तद्यथा। बर्हिरच्छैतीति। तदाह। **अभिमुखमिति** ॥ **जलमच्छं गच्छतीति** ॥ अत्राच्छशब्दस्य नाव्ययत्वम्, न गतिसंज्ञा, नापि प्रादीश्वरान्निपाताः इत्यधिकृतनिपातसंज्ञा। निपातत्वे सति हि अव्ययत्वात् विभक्तिलुक् स्यादिति भावः। **अदोऽनुपदेशे** ॥ अदश्शब्दः अनुपदेशे गतिसंज्ञस्स्यात्। **अदःकृत्येति** ॥ गतिसमासे क्त्वो ल्यप्। अमुं यज्ञं कृत्वेत्यर्थे तु सुब्लुक् च। **अदः कृतमिति** ॥ 'गतिरनन्तरः' इति खरः फलम्। यदा स्वयमेव पर्यालोचयति तदेदमुदाहरणम्। **परं प्रतीति** ॥ अदः कुर्विस्यादावित्यर्थः। **तिरोऽन्तर्धौ** ॥ अन्तर्धिः व्यवधानम्, तत्र तिरस् इत्यव्ययं गतिसंज्ञकं स्यादित्यर्थः। **तिरोभूयेति** ॥ गतिसमासे क्त्वो ल्यप्। व्यवहितो भूत्वेत्यर्थः। **विभाषा कृञि** ॥ कृञि प्रयुज्यमाने तिरस् इत्यव्ययं गतिसंज्ञं वा स्यादित्यर्थः। **तिरःकृत्य तिरःकृत्येति** ॥ गतिसंज्ञापक्षे गतिसमासे क्त्वो ल्यप्। 'तिरसोऽन्यतरस्याम्' इति सत्वविकल्पः। **तिरःकृत्वेति** ॥ गतित्वाभावपक्षे सत्वमपि न भवति। तद्विधौ गतिग्रहणानुवृत्तेरित्याहुः। केचित्तु तिरस्कार इति परिभवे प्रयोगदर्शनात् सत्वविधौ गतिग्रहणं नानुवर्तयन्ति। **उपाजेऽन्वाजे** ॥ **उपाजेकृत्येति** ॥ गतिसंज्ञापक्षे गतिसमासे क्त्वो ल्यप्। अन्वाजेकृत्येत्यपि तथैव। उपाजे, अन्वाजे,

७७५ । साक्षात्प्रभृतीनि च । (१-४-७३)

कृञि वा गतिसंज्ञानि स्युः । 'च्व्यर्थ इति वाच्यम्' (वा ११४२)। साक्षात्कृत्य—साक्षात् कृत्वा । लवणंकृत्य—लवणं कृत्वा । मान्तत्वं निपातनात् ।

७७६ । अनत्याधान उरसिमनसी । (१-४-७५)

उरसिकृत्य—उरसि कृत्वा । अभ्युपगम्येत्यर्थः । मनसिकृत्य—मनसि कृत्वा । निश्चित्येत्यर्थः । अत्याधानमुपश्लेषणं तत्र न। उरसि कृत्वा पाणिं शेते ।

७७७ । मध्येपदेनिवचने च । (१-४-७६)

एते कृञि वा गतिसंज्ञाः स्युरनत्याधाने । मध्येकृत्य—मध्ये कृत्वा । पदेकृत्य—पदे कृत्वा । निवचनेकृत्य—निवचने कृत्वा । वाचं नियम्येत्यर्थः ।

७७८ । नित्यं हस्तेपाणावुपयमने । (१-४-७७)

कृञि । उपयमनं विवाहः । 'स्वीकारमात्रम्' इत्यन्ये । हस्तेकृत्य । पाणौकृत्य ।

इत्यव्यये दुर्बलस्य बलाधाने वर्तते । तदाह । **दुर्बलस्येति** ॥ **साक्षात्प्रभृतीनि च** ॥ शेषपूरणेन सूत्रं व्याचष्टे । **कृञि वेति** ॥ साक्षादित्यव्ययम् । **च्व्यर्थ इति** ॥ अभूततद्भावे गम्ये सति वक्तव्यमित्यर्थः । **साक्षात्कृत्येति** ॥ अप्रत्यक्षं प्रत्यक्षं कृत्वेत्यर्थः । गतित्वपक्षे ल्यो ल्यप् । तत्र सुब्लुकमाशङ्क्य आह । **मान्तत्वमिति** ॥ लवणम्, उष्णम्, शीतम्, उदकम्, आद्यम्, इति पञ्चानां साक्षात्प्रभृतिगणे मान्तत्वं निपात्यते इत्यर्थः । **अनत्याधाने** ॥ उरसि मनसि इति विभक्तिप्रतिरूपके अव्यये गतिसंज्ञे वा स्तः अनत्याधाने । **उरसिकृत्येति** ॥ गतित्वपक्षे ल्यो ल्यप् । इह अत्याधानं न गम्यत इत्याह । **अभ्युपगम्येत्यर्थ इति** ॥ **मनसिकृत्येति** ॥ गतित्वपक्षे ल्यो ल्यप् । इहापि नात्याधानं गम्यत इत्याह। **निश्चित्येत्यर्थ इति** ॥ अत्याधानशब्दं विवृण्वन् तस्य प्रयोजनमाह। **अत्याधानमुपश्लेषणमिति** ॥ संयोग इत्यर्थः। **उरसि कृत्वेति** ॥ उरसि पाणिं निधाय शेत इत्यर्थः । अत्र पाणिसंश्लेषणावगमान्न गतिसंज्ञेति भावः । **मध्येपदे** ॥ गतित्वे तदभावे च त्रयाणामेदन्तत्वनिपात्यते । **मध्येकृत्येति** ॥ गतिसमासे ल्यो ल्यप् । मध्यं कृत्वेत्यर्थः । **पदेकृत्येति** ॥ गतिसमासे ल्यो ल्यप् । पदं कृत्वेत्यर्थः । **निवचनेकृत्येति** ॥ वचनाभावं कृत्वेत्यर्थः । तदाह । **वाचं नियम्येत्यर्थ इति** ॥ वचनस्य अभावः निवचनम्। अर्थाभावे अव्ययीभाव इति भावः । **नित्यं हस्ते** ॥ शेषपूरणेन सूत्रं व्याचष्टे । **कृञीति** ॥ हस्ते इति पाणाविति च शब्दौ कृञि नित्यं गतिसंज्ञौ भवतः । उपयमन इति यावत् । **हस्तेकृत्य, पाणौकृत्येति** ॥ कन्यां स्वीकर्तुं पाणिं गृहीत्वेत्यर्थः । एदन्तत्वमौदन्तत्वञ्च अनयोर्निपात्यते । उपयमने किं, हस्ते कृत्वा सुवर्णं गतः ।

७७९ । प्राध्वं बन्धने । (१-४-७८)

'प्राध्वम्' इत्यव्ययम् । प्राध्वंकृत्य । बन्धनेनानुकूल्यं कृत्वेत्यर्थः । प्रार्थनादिना त्वानुकूल्यकरणे । प्राध्वं कृत्वा ।

७८० । जीविकोपनिषदावौपम्ये । (१-४-७९)

जीविकामिव कृत्वा—जीविकाकृत्य । उपनिषदमिव कृत्वा—उपनिषत्कृत्य । 'औपम्ये' किम् । जीविकां कृत्वा । प्रादिग्रहणमगत्यर्थम् । सुपुरुषः । अत्र वार्तिकानि । 'प्रादयो गताद्यर्थे प्रथमया' (वा १३३५) । प्र गत आचार्यः प्राचार्यः । 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' (वा १३३६) । अतिक्रान्तो

अन्यदीयमिति बुद्ध्या दातुं परावृत्त इत्यर्थः । **प्राध्वं बन्धने** ॥ प्राध्वमिति न द्वितीयान्तमित्याह । **प्राध्वमित्यव्ययमिति** ॥ बन्धने गम्ये प्राध्वमित्यव्ययं गतिसंज्ञकं स्यादित्यर्थः । **प्राध्वंकृत्येति** ॥ गतिसमासे क्त्वो ल्यप् । अत्र प्राध्वमिति मान्तमव्ययं बन्धनेन आनुकूल्ये वर्तते । तदाह । **बन्धनेनेति** ॥ बन्धनग्रहणस्य प्रयोजनमाह । **प्रार्थनादिनेति** ॥ **जीविकोपनिष** ॥ उपमैव औपम्यं, तस्मिन्विषये जीविकाशब्दः उपनिषच्छब्दश्च कृञा योगे गतिसंज्ञौ स्तः । **जीविकामिवेति** ॥ अशनपानादिजीवनोपायो जीविका । तामिव अवश्यं कृत्वेत्यर्थः । **जीविकाकृत्येति** ॥ गतिसमासे क्त्वो ल्यप् । **उपनिषदमिव कृत्वेति** ॥ उपनिषत् वेदान्तभागः, तामिव रहसि ग्राह्यत्वेन कृत्वेत्यर्थः । **उपनिषत्कृत्येति** ॥ गतिसमासे क्त्वो ल्यप् । उभयत्रापि सुब्लुक् । तदेवं 'कुगतिप्रादयः' इत्यत्रत्यगतिसमासाः प्रपञ्चिताः । ननु गतिग्रहणेनैव सिद्धे प्रादिग्रहणं व्यर्थमित्यत आह । **प्रादिग्रहणमगत्यर्थमिति** ॥ **सुपुरुष इति** ॥ अत्र क्रियायोगाभावादगतित्वेऽपि समासः । सोः प्रज्ञार्थकत्वेऽपि धातुवाच्यक्रियायोगाभावान्न गतित्वम् । भाष्ये तु 'कुगतिप्रादयः' इति सूत्रमपनीय तत्स्थाने 'क्राङ्स्वतिदुर्गतयस्समस्यन्त इति वक्तव्यम्' इत्युक्त्वा "कुब्राह्मणः, आकडारः, सुब्राह्मणः, अतिब्राह्मणः, दुर्ब्राह्मणः, दूरीकृत्य" इत्युदाहृतम् । "स्वती पूजायाम्, दुर्निन्दायाम्, आङीषदर्थे, कुः पापार्थे, इति सौनागव्याकरणवचनम्" इति भाष्ये स्पष्टम् । **अत्र वार्तिकानीति** ॥ 'प्रादयः गताद्यर्थे समस्यन्ते इति वक्तव्यम्' इति वार्तिकं पठित्वा तत्र व्यवस्थापकानि पञ्च वार्तिकानि सौनागव्याकरणसिद्धानि भाष्ये यानि पठितानि तानि प्रदर्श्यन्त इत्यर्थः । **प्रादय इति** ॥ गताद्यर्थे विद्यमानाः प्रादयस्समस्यन्त इत्यर्थः । **प्र गत आचार्य इति** ॥ प्रेत्यस्य विवरणं गत इति, गत आचार्य इत्येव अस्वपदविग्रहः । नित्यसमासत्वात् । अभिगतो मुखं अभिमुखः, प्रतिगतोऽक्षं प्रत्यक्ष इत्यादि । **अत्यादय इति** ॥ क्रान्ताद्यर्थे अत्यादयस्समस्यन्त इत्यर्थः । **अतिक्रान्तो मालामिति** ॥ अतिशब्दः क्रान्ते वर्तते । क्रान्तो मालामित्यस्वपदविग्रहः । तत्र क्रमुधातोरतिक्रमणमर्थः । **अतिमाल इति** ॥ 'एकविभक्ति च' इति

मालामतिमालः । अवादयः कुष्टाद्यर्थे तृतीयया' (वा १३३७) । अवकुष्टः कोकिलया अवकोकिलः । 'पर्यादयो ग्लानाद्यर्थे चतुर्थ्या' (वा १३३८) । परिग्लानोऽध्ययनाय पर्यध्ययनः । 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' (वा १३३९) निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः । 'कर्मप्रवचनीयानां प्रतिषेधः' (वा १३३९) । वृक्षं प्रति ।

७८१ । तत्रोपपदं सप्तमीस्थम् । (३-१-९२)

सप्तम्यन्ते पदे 'कर्मणि—' (सू २९१३) इत्यादौ वाच्यत्वेन स्थितं कुम्भादि तद्वाचकं पदमुपपदसंज्ञं स्यात्, तस्मिंश्च सत्येव वक्ष्यमाणः प्रत्ययः स्यात् ।

मालाशब्दस्य उपसर्जनत्वात् 'गोस्त्रियोः' इति ह्रस्वः । **अवादय इति** ॥ कुष्टाद्यर्थे अवादयस्समस्यन्त इत्यर्थः । **अवकोकिल इति** ॥ कोकिलया आहूत इत्यर्थः । **पर्यादय इति** ॥ ग्लानाद्यर्थे पर्यादयस्समस्यन्त इत्यर्थः । अध्ययनाय अध्ययनार्थे तेन श्रान्त इत्यर्थः । परिरत्र ग्लाने वर्तते । **निरादय इति** ॥ क्रान्ताद्यर्थे निरादयस्समस्यन्त इत्यर्थः । **निष्कौशाम्बिरिति** ॥ अतिमालवत् ह्रस्वः । निरित्यव्ययं निर्गमने वर्तते । **कर्मप्रवचनीयानां प्रतिषेध इति** ॥ वार्तिकमेतत् । **वृक्षं प्रतीति** ॥ 'लक्षणेत्थम्' इति कर्मप्रवचनीयत्वान्न प्रादिसमासः । इदन्तु वार्तिकं भाष्ये प्रत्याख्यातम् । अथोपपदसमासं वक्ष्यन्नुपपदसंज्ञामाह । **तत्रोपपदं सप्तमीस्थम्** ॥ अधिकारोऽयम् । सप्तमीति तदन्तग्रहणम् । सप्तम्यन्ते पदे वाच्यवाचकभावसम्बन्धेन तिष्ठतीति सप्तमीस्थम् । सप्तम्यन्तवाच्यमिति यावत् । धातोरित्यधिकारसूत्रादुत्तरसूत्रमिदम् । ततश्च तदधिकारान्तर्गतेषु 'कर्मण्यण्' इत्यादिसूत्रेषु यत्सप्तम्यन्तमुच्चारितन्तदेव इह विवक्षितम् । एवञ्च तदुदाहरणे कुम्भं करोति कुम्भकार इत्यत्र सप्तम्यन्तवाच्यं कुम्भादीति पर्यवसन्नं, कुम्भादेश्च उपपदसंज्ञायां प्रयोजनाभावात्तद्वाचकपदेषु विश्राम्यति । तथाच धातोरित्यधिकारान्तर्गते कर्मणीत्यादिसूत्रे यत्सप्तम्यन्तं कर्मणीत्यादि तद्वाच्यं यत् कुम्भादि तद्वाचकं पदम् उपपदसंज्ञं स्यादित्यधिकृतं वेदितव्यमित्यर्थः फलति । तदाह । **सप्तम्यन्ते पद इत्यादिना** ॥ तत्र 'धातोः कर्मणस्समानकर्तृकात्' इति धातोः 'एकाचो हलादेः' इति 'धातोः' इति चक्रमेण त्रयो धात्वधिकाराः । तत्र प्रत्यासत्त्या तृतीयधात्वधिकारस्थसप्तम्यन्तस्यैव ग्रहणात् 'धातोरेकाचः' इत्यधिकारे 'च्लि लुङि' इत्यत्र सप्तम्यन्तन्न गृह्यते । अन्यथा कर्मणीत्यादाविव लुङन्ते अभूदित्यादावुपपदे धातोश्च्लिरित्यर्थस्स्यात् । ननु तत्रेति व्यर्थम् । तृतीयधात्वधिकारस्य प्रकृतत्वादेव ग्रहणसम्भवादित्याशङ्क्य आह । **तस्मिंश्च सत्येव वक्ष्यमाणः प्रत्ययः स्यादिति** ॥ तत्रेत्यस्य अर्थः फलति । तथाच 'कर्मण्यण्' इत्यत्र इदं सूत्रमुपस्थितम् । कर्मणीति सप्तम्यन्तं प्रथमान्तत्वेन विपरिणम्यते । सप्तमीनिर्देशस्तु उपपदसंज्ञाप्रवृत्त्यर्थः । धातोरण्त्यात् कर्तर्यर्थे, कर्मवाचकन्तु कुम्भादिपदम् उपपदसंज्ञं प्रत्येतव्यम्, तस्मिन्नुपपदे सत्येव अण्स्यादिति फलति ।

७८२। उपपदमतिङ्। (२-२-१९)

उपपदं सुबन्तं समर्थेन नित्यं समस्यते। अतिङन्तश्चायं समासः। कुम्भं करोतीति **कुम्भकारः**। इह 'कुम्भ अस् कार' इत्यलौकिकं प्रक्रियावाक्यम्। 'अतिङ्' किम्। मा भवान्भूत्। 'माङि लुङ्' (सू २२१९) इति सप्तमीनिर्देशान्माङुपपदम्। 'अतिङ्' ग्रहणं ज्ञापयति। 'सुपा' इत्येतन्नेहानुवर्तत इति। पूर्वसूत्रेऽपि गतिग्रहणं पृथक्कृत्यातिङ्ग्रहणं तत्रापकृष्यते।

तस्मिन् सत्येवाण् स्यादित्यभावे तु कार इत्येवं केवलादपि धातोः कर्तर्यर्थे अण्प्रत्ययस्स्यात्। कर्मणीति सप्तम्यन्तनिर्देशस्तु कुम्भकार इत्यादौ उपपदसंज्ञां प्रापय्य 'उपपदमतिङ्' इति नित्यसमाससम्पादनेन कुम्भ इत्यस्य कार इत्यस्य च साधुत्वप्रापणार्थतया चरितार्थः। तस्मिन्नुपपदे सत्येवाण् स्यादित्युक्ते तु कुम्भाद्युपपदस्य अण्प्रत्ययोत्पत्तौ निमित्तत्वावगमान्न केवलादण्प्रत्ययः। उपपदसंज्ञायाः प्रत्ययविधिसन्नियोगशिष्टत्वलाभात् 'धः कर्मणि ष्ट्रन्, भुवो भावे' इत्यादौ सप्तम्यन्तमर्थनिर्देशपरमेव व्याख्यानादिति भाष्यकैयटादिषु स्पष्टम्। **उपपदमतिङ्॥ सुबन्तमिति॥** 'सुबामन्त्रित' इत्यतस्तदनुवृत्तेरिति भावः। **समर्थेनेति॥** प्रथमान्तं समर्थग्रहणं तृतीयान्ततया विपरिणम्यत इति भावः। **अतिङन्तश्चायं समास इति॥** सूत्रे तिङिति तदन्तग्रहणमिति भावः। समासः तिङन्तघटितो न भवतीत्यर्थः। अतिङ् किम्। कारको व्रजति। 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इति व्रजतावुपपदे कृञो ण्वुल्, अकादेशः। उपपदं समर्थेनेत्येतावत्युक्ते इहाप्युपपदसमासस्स्यात्। अतः अतिङ्ग्रहणम्। नचैवं सुबित्यनुवृत्तेः प्रयोजनाभाव इति वाच्यम्। चर्मकार इत्यत्र नलोपार्थकत्वात्। उपपदमतिङन्तं समर्थेन समस्यत इति व्याख्याने तु सुबिति नानुवर्तेत। ततश्च चर्मकार इत्यत्र नलोपो न स्यादिति भावः। **कुम्भमिति॥** कुम्भं करोतीत्यर्थे 'कर्मण्यण्' इति कर्मीभूतकुम्भवाचकपदे उपपदे कृञ्धातोः कर्तरि अण्प्रत्यये 'अचो ञ्णिति' इति वृद्धौ रपरत्वे कारशब्दः। तेन कुम्भशब्दस्य समासे कुम्भकारशब्द इत्यर्थः। ननु कुम्भं करोतीति कथं विग्रहप्रदर्शनम्, अतिङन्तस्समास इत्युक्तत्वादित्यत आह। **कुम्भ अस्, कार इत्यलौकिकं विग्रहवाक्यमिति॥** लोके प्रयोगानर्हत्वमलौकिकत्वम्। 'प्रत्ययोत्तरपदयोश्च' इति सूत्रभाष्यरीत्या अलौकिकविग्रहवाक्य एव समासप्रवृत्तिः। कुम्भं करोतीति कृञर्थप्रदर्शनमात्रमिति भावः। कुम्भ अम् कार इत्यपपाठः। कृद्योगे षष्ठीविधानात्। **मा भवान् भूदिति॥** अत्र भूदिति तिङन्तेन माङस्समासनिवृत्त्यर्थमतिङ्ग्रहणमिति भावः। भवानिति पदन्तु समासाभावसूचनाय मध्ये प्रयुक्तम्। ननु माङः तृतीयधात्वधिकारे सप्तमीनिर्दिष्टत्वन्तु अदृष्टं, येन तस्य उपपदत्वात् समासः प्रसज्यत इत्यत आह। **माङिति॥** ननु अतिङ्ग्रहणं व्यर्थं, मा भवान् भूदित्यत्र सुपेत्यनुवृत्त्यैव समासनिवृत्तिसम्भवादित्यत आह। **अतिङ्ग्रहणमिति॥** एवञ्च उपपदम् असुबन्तेन समस्यत इति फलितम्। गतिसमासोऽप्यसुबन्तेनेत्याह। **पूर्वसूत्र इति॥** उत्तरसूत्रात्पूर्वसूत्रे अनुवृत्तिरपकर्षः। 'कुप्रादयः' इति 'गतिः' इति च योगो

'सुपा' इति च निवृत्तम्। तथा च 'गतिकारकोपपदानां कृद्भिः सह समास-वचनं प्राक्सुबुत्पत्तेः' (प ७६) इति सिद्धम्। व्याघ्री। अश्वक्रीती। कच्छपी।

७८३। अमैवाव्ययेन। (२-२-२०)

अमैव तुल्यविधानं यदुपपदं तदेवाव्ययेन सह समस्यते। स्वादुङ्कारम्। नेह। 'कालसमयवेलासु तुमुन्' (सू ३१७९)। कालः समयो वेला वा

विभज्यते। कुप्रादयस्सुबन्तेन समस्यन्ते। गतिस्तु न समस्यते। अतिङन्तश्च समास इति व्याख्येयमिति यावत्। ततः किमित्यत आह। **तथा चेति** ॥ गतिकारकोपपदानां कृदन्तैस्सह सुबुत्पत्तेः प्राक् समासो वक्तव्य इति प्राचीनव्याकरणोक्तं सिद्ध भवतीत्यर्थः। यद्यप्युक्तरीत्या गत्युपपदयोरेव लाभः। तथापि एकदेशानुमतिद्वारा प्राचीनपरिभाषेयं सिध्यति। अथ परिभाषायाः फलं दर्शयितुं गतिसमासमुदाहरति। **व्याघ्रीति** ॥ व्याजिघ्रतीति व्याघ्रः। व्याङ्पूर्वात् घ्राधातोः 'आतश्चोपसर्गे' इति कः, 'आतो लोप इटि च' इत्याल्लोपः। 'घ्राधेट्दृशशः' इति तु न भवति। 'जिघ्रतेस्संज्ञायान्नेति वाच्यम्' इति निषेधात्। आङो घ्राशब्देन गतिसमासः। आघ्राशब्देन वेः गतिसमासः। तत्र यदि घ्राशब्दस्य सुबन्तत्वमपेक्ष्येत, तर्हि स्त्रीप्रत्यये उत्पन्ने सुबुत्पत्तिस्स्यात्। स्वार्थद्रव्यलिङ्गसङ्ख्याकारकप्रयुक्तकार्याणां क्रमिकत्वस्य 'कुत्सिते' इतिसूत्रस्थभाष्यदर्शितस्य 'ङ्याप्प्रातिपदिकात्' इत्यत्र अस्माभिः प्रपञ्चितत्वात्। ततश्च सुबुत्पत्तये लिङ्गसङ्ख्याकारकं क्रमेण अपेक्ष्यमिति प्रथमं लिङ्गसंयोगे सति अदन्तत्वात् टाप् स्यात्। नतु जातिलक्षणङीष्, घ्राशब्दमात्रस्य जातिवाचित्वाभावात्। ततश्च घ्राशब्देन सुबन्तेन समासे सति व्याघ्राशब्दस्य अदन्तत्वाभावात् जातिलक्षणो ङीष् न स्यादिति भावः। यद्यप्युपपदत्वेनाप्यतत्सिद्धम्, तथापि गतित्वसम्भवमात्रेण इदमित्याहुः। वस्तुतस्तु आङो घ्राशब्देन उपपदसमासः। 'आतश्चोपसर्गे' इति सप्तमीनिर्देशात्। वेस्तु आघ्राशब्देन गतिसमास इति तदंशे गतिसमासोदाहरणमित्याहुः। अथ कारकसमासमुदाहरति। **अश्वक्रीतीति** ॥ अश्वेन क्रीतेति विग्रहे 'कर्तृकरणे कृता' इति समासः। 'क्रीतात्करणपूर्वात्' इति ङीष्। सुबन्तेन समासे तु उक्तरीत्या पूर्वं टापि अदन्तत्वाभावात् ङीष् न स्यादिति भावः। उपपदसमासमुदाहरति। **कच्छपीति** ॥ कच्छः तीरं, तेन तस्मिन् वा पिबतीति कच्छपी 'सुपि स्थः' इत्यत्र 'सुपि' इति योगविभागात्कः, उपपदसमासः। तस्य सुबन्तापेक्षायाम् उक्तरीत्या टाबेव स्यात्, नतु जातिलक्षणङीषिति भावः। **अमैवाव्ययेन** ॥ अमैवेत्यनन्तरन्तुल्यविधानमित्यध्याहार्यम्। 'तुल्यार्थैरतुलोपमाभ्याम्' इति तृतीया। **अमैव तुल्येति** ॥ अम्प्रत्ययमात्रविधायकशास्त्रेण अमैव सह यस्य उपपदसंज्ञा विधीयते तदुपपदमव्ययेन समस्यत इति यावत्। पूर्वसूत्रेणैव सिद्धे नियमार्थमिदमित्याह। **तदेवेति** ॥ विवरणवाक्ये द्वितीय एवकारो नियमलभ्यः, नतु सूत्रस्थः। तस्य, अप्राप्ते अमा तुल्यविधानत्वे अवधारणार्थत्वात्। **स्वादुङ्कारमिति** ॥ स्वादुं कृत्वेत्यर्थः। ओदनं भुङ्क्ष इति शेषः। 'स्वादुमि णमुल्' इति णमुल्। स्वादुशब्दस्य मान्तत्वम्, निपातनात्। 'कृन्मेजन्तः' इत्यव्ययत्वम्।

भोक्तुम्। 'अमैव' इति किम्। अग्रे भोजम्—अग्रे भुक्त्वा। 'विभाषाग्रे-प्रथमपूर्वेषु' (सू ३३४५) इति क्त्वाणमुलौ। अमा चान्येन च तुल्य-विधानमेतत्।

७८४। तृतीयाप्रभृतीन्यन्यतरस्याम्। (२-२-२१)

'उपदंशस्तृतीयायाम्' (सू ३३६८) इत्यादीन्युपपदान्यमन्तेनाव्ययेन सह वा समस्यन्ते। मूलकेनोपदंशं भुङ्क्ते—मूलकोपदंशम्। उच्चैःकारम्।

७८५। क्त्वा च। (२-२-२२)

तृतीयाप्रभृतीन्युपपदानि क्त्वान्तेन सह वा समस्यन्ते। उच्चैःकृत्य—उच्चैः कृत्वा। 'अव्ययेऽयथाभिप्रेत—' (सू ३३८१) इति क्त्वा। 'तृतीया-प्रभृतीनि' इति किम्। अलं कृत्वा। खलु कृत्वा।

तदेवेति नियमस्य प्रयोजनमाह। **नेहेति** ॥ उपपदसमास इति शेषः। **भोक्तुमिति** ॥ यद्यपि 'कालसमयवेलासु' इति सप्तमीनिर्देशात् कालसमयवेलानामुपपदत्वम्। तथापि कालादीनामुपपदसंज्ञा तुमुना तुल्यविधानैव, नत्वमा। अतः कालादीनामुपपदत्वेऽपि न समास इत्यर्थः। **अमैवेति किमिति** ॥ अमैवेत्येवकारः किमर्थ इति प्रश्नः। **अमा चान्येन चेति** ॥ अम्प्रत्ययेन क्त्वाप्रत्ययेन च सह उपपदसंज्ञा अग्रेप्रथमपूर्वशब्दानां विहिता। ततश्च उपपदत्वस्य अमैव तुल्यविधानाभावात् न उपपदसमास इति भावः। **तृतीयाप्रभृतीन्यन्यतरस्याम्** ॥ तृतीयाशब्देन 'उपदंशस्तृतीयायाम्' इत्यारभ्य 'अन्वच्यानुलोम्ये' इत्यन्तसूत्रोपात्तान्युपपदानि विवक्षितानि। अमेति, अव्ययेनेति च अनुवर्तते, एवकारस्तु नानुवर्तते, अस्वरितत्वात्। अमेत्ये-तदव्ययविशेषणम्। तदाह। **उपदंशस्तृतीयायामित्यादिना** ॥ **मूलकेन उपदंशं भुङ्क्ते मूलकोपदंशमिति** ॥ 'उपदंशस्तृतीयायाम्' इति णमुल्। अमैव तुल्यविधानत्वात्। पूर्व-सूत्रेण नित्ये प्राप्ते विकल्पोऽयम्। ननु मूलकेनेत्यस्य भुङ्क्ते इत्यत्रैवान्वयात् उपदंश इत्यत्रा-नन्वयादसामर्थ्यात् कथमिह समास इति चेन्मैवम्। उपदंशनक्रियां प्रति हि मूलकस्य आर्थिकं कर्मत्वमादाय सामर्थ्यमुपपाद्यम्। तृतीया तु प्रधानक्रियानुरोधात् परत्वाच्च उपपाद्येत्यन्यत्र विस्तरः। **उच्चैः कारमिति** ॥ उच्चैः कृत्वेत्यत्र तु 'अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वा णमुलौ' तत्र उच्चैःकारमित्यत्र उपपदत्वस्य अमैव तुल्यविधानत्वाभावात् 'अमैवाव्ययेन' इत्यप्राप्ते अनेन विकल्पः। समासपक्षे 'आदिर्णमुलन्यतरस्याम्' इति कृदुत्तरपदप्रकृतिस्वरः आद्युदात्त-त्वम्। असमासपक्षे तु उच्चैरिति फिट्सूत्रेण अन्तोदात्तत्वमिति फले भेदः। अमन्तेनेति किम्। पर्याप्तो भोक्तुम्। 'पर्याप्तिवचनेषु' इति तुमुन्। **क्त्वा च** ॥ तृतीयाप्रभृतीनीति पूर्वसूत्र-मनुवर्तते। क्त्वेति तृतीयार्थे प्रथमा। टायां 'सुपां सुलुक् पूर्वसवर्ण' इति पूर्वसवर्णदीर्घ इत्यपरे। तदाह। **तृतीयेति** ॥ ननु 'उपदंशस्तृतीयायाम्' इत्यतः प्रागेव समानकर्तृकयोरिति क्त्वाविधेः पाठात् कथमुच्चैः कृत्वेत्युदाहरणमित्यत आह। **अव्ययेऽयथेति** ॥ 'अव्ययेऽयथाभिप्रेताख्याने-

७८६ । तत्पुरुषस्याङ्गुलेः सङ्ख्याव्ययादेः । (५-४-८६)

संख्याव्ययादेरङ्गुल्यन्तस्य तत्पुरुषस्य समासान्तोऽच् स्यात्। द्वे अङ्गुली प्रमाणमस्य द्व्यङ्गुलं दारु । निर्गतमङ्गुलिभ्यो निरङ्गुलम् ।

७८७ । अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः । (५-४-८७)

एभ्यो रात्रेरच्स्याच्चात्संख्याव्ययादेः। 'अहर्ग्रहणं द्वन्द्वार्थम्' (वा ३३५३) अहश्च रात्रिश्चाहोरात्रः । सर्वा रात्रिः सर्वरात्रः । पूर्वं रात्रेः पूर्वरात्रः । संख्यातरात्रः । पुण्यरात्रः । द्वयो रात्र्योः समाहारो द्विरात्रम् । अतिक्रान्तो रात्रिमतिरात्रः ।

कृञः क्त्वाणमुलौ' इति सूत्रेणेत्यर्थः । **अलं कृत्वेति** ॥ 'अलङ्खल्वोः प्रतिषेधयोः प्राचां क्त्वा' इत्येतत् 'उपदंशस्तृतीयायाम्' इत्यतः पूर्वमेव पठितम् । अतः तद्धितक्त्वः मान्तेन सह समासाभावात् न त्यबिति भावः । इत्युपपदसमासाः । अथ तत्पुरुषेषु असाधारणसमासान्तान्वक्तुमुपक्रमते । **तत्पुरुषस्यांगुलेः सङ्ख्याव्ययादेः** ॥ 'अच्प्रत्यन्ववपूर्वात्' इत्यतः अजित्यनुवर्तते, समासान्त इत्यधिकृतम् । तेन समांसस्य अन्तावयव इति लभ्यते । 'प्रत्ययः, परश्च' इत्यधिकारात् अच्प्रत्ययस्य तत्पुरुषात् परत्वेऽपि तस्य तदवयवत्वात् अङ्गुलेरिति अवयवषष्ठी अङ्गुलेरिति तत्पुरुषविशेषणं, तदन्तविधिः । तदाह । **सङ्ख्याव्ययादेरिति** ॥ सङ्ख्या च अव्ययञ्च सङ्ख्याव्यये ते आदी यस्येति विग्रहः । **द्व्यङ्गुलमिति** ॥ 'तद्धितार्थ' इति द्विगुः । 'प्रमाणे द्वयसञ्दघ्नञ्मात्रचः' प्रमाणे लः, द्विगोर्नित्यम्' इति लुक् । द्व्यङ्गुलीशब्दादाच तस्य तद्धितत्वात्तस्मिन् परे 'यस्येति च' इति ईकारलोपः । **निरङ्गुलमिति** ॥ 'निरादयः क्रान्ताद्यर्थे' इति समासः, अच् 'यस्येति' लोपः । **अहस्सर्वैकदेशसङ्ख्यातपुण्याच्च ॥ एभ्यो रात्रेरिति** ॥ अहन्, सर्व, एकदेश, सङ्ख्यात, पुण्य, एभ्यः परस्य रात्रिशब्दस्येत्यर्थः । अहन्नादिपूर्वपदकस्य रात्र्यन्तस्य तत्पुरुषस्येति यावत् । ननु अहरादिः रात्र्यन्तस्तत्पुरुषो नास्त्येव । अह्नो रात्रिरिति वा, अहश्चासौ रात्रिश्चेति वा, असम्भवात् इत्यत आह । **अहर्ग्रहणं द्वन्द्वार्थमिति** ॥ नच ब्रह्मणो यदहः तस्यावयवभूता या मानुषी रात्रिरिति षष्ठीतत्पुरुषः सम्भवतीति वाच्यम् । अहर्ग्रहणं द्वन्द्वार्थमिति भाष्यप्रामाण्येन एवज्जातीयकतत्पुरुषस्य प्रयोगाभावोन्नयनात्। **अहोरात्र इति** ॥ द्वन्द्वादच् 'इलोपः, 'जातिरप्राणिनाम्' इत्येकवत्त्वम् । 'स नपुंसकम्' इति बाधित्वा 'रात्राह्नाहाः पुंसि' इति पुंस्त्वम्। **सर्वा रात्रिस्सर्वरात्र इति** ॥ सर्वा रात्रिरिति विग्रहे 'पूर्वकालैक' इति कर्मधारयः । अच्, इकारलोपः, 'रात्राह्न' इति पुंस्त्वम् । 'सर्वनाम्नो वृत्तिमात्रे' इति पुंवत्त्वम् । एकदेशेत्यर्थग्रहणमित्यभिप्रेत्योदाहरति । **पूर्वमिति** ॥ पूर्वं रात्रेरिति विग्रहे 'पूर्वापराधरोत्तरम्' इत्येकदेशिसमासः । अच्, इलोपः, 'रात्राह्न' इति पुंस्त्वम् । **सङ्ख्यातरात्र इति** ॥ सङ्ख्याता रात्रिरिति विग्रहे कर्मधारयः। 'पुंवत्कर्मधारय' इति पुंवत्त्वम् । **पुण्यरात्र इति** ॥ पुण्या रात्रिरिति विग्रहे कर्मधारयः। 'पुंवत्कर्मधारय' इति पुंवत्त्वम्। अच्, इलोपः । 'रात्राह्न'

७८८। राजाहःसखिभ्यष्टच्। (५-४-९१)

एतदन्तात्तत्पुरुषाट्टच्स्यात्। परमराजः। अतिराजी। कृष्णसखः।

७८९। अह्नष्टखोरेव। (६-४-१४५)

एतयोरेव परतोऽह्नष्टिलोपः स्यान्नान्यत्र। उत्तमाहः। द्वे अहनी भृतो व्यहीनः क्रतुः। तद्धितार्थे द्विगुः। 'तमधीष्टः—' (सू १७४४) इत्यधिकारे 'द्विगोर्वा' इत्यनुवृत्तौ 'रात्र्यहःसंवत्सराच्च' (सू १७५१) इति खः। लिङ्ग-विशिष्टपरिभाषाया अनित्यत्वान्नेह। मद्राणां राज्ञी मद्रराज्ञी।

इति पुंस्त्वम्। **द्विरात्रमिति** ॥ 'तद्धितार्थ' इति द्विगुः। सङ्ख्यादित्वात् अच्, इलोपः। सङ्ख्या-पूर्वे रात्रं क्लीबम्' इति नपुंसकत्वम्। **अतिरात्र इति** ॥ 'अत्यादयः क्रान्ताद्यर्थे' इति समासः। अव्ययादित्वादच्, इलोपः, 'रात्राह्न' इति पुंस्त्वम्। **राजाहस्सखिभ्य-ष्टच्** ॥ 'तत्पुरुषस्याङ्गुलेः' इत्यतः तत्पुरुषस्येत्यनुवृत्तं पञ्चमीबहुवचनत्वेन विपरिणतम् राजाहस्सखिभ्यः इत्यनेन विशेष्यते। तदन्तविधिः। तदाह। **एतदन्तादिति** ॥ **परमराज इति** ॥ परमश्चासौ राजा चेति विग्रहः। समासान्तष्टच्। 'नस्तद्धिते' इति टिलोपः। **अतिराज इति** ॥ अतिक्रान्तो राजानमिति विग्रहः। 'अत्यादयः' इति समासः। टचि, टिलोपः। **कृष्णसख इति** ॥ कृष्णस्य सखेति विग्रहः। समासान्तष्टच्। 'यस्येति च' इति इकारलोपः। **अह्नष्टखोः** ॥ शेषपूरणेन सूत्रं व्याचष्टे। **टिलोपस्स्यादिति** ॥ टेरित्यनुवर्तते। 'अल्लोपोऽनः' इत्यस्मात् लोप इति चेति भावः। 'नस्तद्धिते' इत्येव सिद्धे नियमार्थमित्याह। **नान्यत्रेति** ॥ एवकारस्तु अह्न एव टखोरिति विपरीतनियमव्यावृत्त्यर्थः। टखोरेवेति किम्। अह्ना निर्वृत्तम् आह्निकम् 'कालाट्ठञ्' इत्यधिकारे 'तेन निर्वृत्तम्' इति ठञ्। टिलोपा-भावादल्लोपः। टप्रत्यये उदाहरति। **उत्तमाह इति** ॥ उत्तमञ्च तदहश्चेति विशेषणसमासः। 'राजाहस्सखिभ्यष्टच्' इति टच्। 'अह्नष्टखोरेव' इति प्रकृतसूत्रेण टिलोपः। 'रात्राह्नाहाः पुंसि' इति पुंस्त्वम्। खे उदाहरति। **द्वे अहनी भृत इति** ॥ 'अत्यन्तसयोगे द्वितीया' भृतः परिक्रीत इत्यर्थः। व्यहीन इत्यत्र प्रक्रियां दर्शयति। **तद्धितार्थे द्विगुरिति** ॥ कोऽत्र तद्धित इत्यत आह। **तमधीष्ट इत्यादि** ॥ तथाच व्यहन्शब्दात् खस्य ईनादेशे 'अह्नष्टखो-रेव' इति टिलोपे व्यहीन इति रूपमित्यर्थः। नन्वत्र 'अह्नोऽह्न एतेभ्यः' इत्यह्नादेशः कुतो न स्यात्। नच खे टिलोपविधिसामर्थ्यान्नाह्नादेश इति वाच्यम्। 'अहीन' इत्यत्र खे टिलोपविधेः चरितार्थत्वात् इति चेन्न। समासान्ते परे एवाह्नादेशविधानात्। प्रकृते तु समासान्तविधेरनित्यत्वात् 'राजाहस्सखिभ्यः' इति न टच्। यद्यपि उत्तमाहः इत्यत्र व्यहीन इत्यत्र च 'नस्तद्धिते' इत्येव टिलोपस्सिद्धः। तथापि आह्निकमित्यादावावश्यकस्य नियमविधेर्विधिमुखेनापि प्रवृत्त्यभ्युपगमादिह तदुपन्यासः। ननु मद्राणां राज्ञी मद्रराज्ञीत्यत्रापि लिङ्गविशिष्टपरिभाषया 'राजाहस्सखिभ्यः' इति टच् स्यादित्याशङ्क्य आह। **लिङ्गेति** ॥ **अनित्यत्वादिति** ॥ समासान्तप्रकरणे लिङ्गविशिष्टपरिभाषा नेति 'ङ्याप्प्रातिपदिकात्' इत्यत्र

७९० । अह्नोऽह्न एतेभ्यः । (५-४-८८)

सर्वादिभ्यः परस्याहन्शब्दस्याह्नादेशः स्यात्समासान्ते परे ।

७९१ । अह्नोऽदन्तात् । (८-४-७)

अदन्तपूर्वपदस्थाद्रेफात्परस्याह्नोऽह्नादेशस्य नस्य णः स्यात् । सर्वाह्णः । पूर्वाह्णः । संख्याताह्णः । द्वयोरह्नोर्भवः । 'कालाट्ठञ्' (सू १३८१) 'द्विगोर्लुगनपत्ये' (सू १०८०) इति ठञो लुक् । द्व्यह्नः । स्त्रियामदन्तत्वाट्टाप् । द्व्यह्ना । द्व्यह्नप्रियः । अत्यह्नः ।

७९२ । क्षुभ्नादिषु च । (८-४-३९)

भाष्ये उक्तत्वादिति भावः । **मद्ररात्रीति** ॥ नच टचि सत्यपि 'यस्येति च' इतीकारलोपे मद्रराज्ञशब्दात् टित्त्वात् ङीपि मद्रराज्ञीति निर्बाधमिति वाच्यम् । टचि हि सति 'भस्याढे तद्धिते' इति पुंवत्त्वे टिलोपे मद्रराजी इति स्यादिति भावः । **अह्नोऽह्न एतेभ्यः** ॥ पूर्वसूत्रे अहस्सर्वैकदेशसङ्ख्यातपुण्यशब्दा निर्दिष्टाः । तत्र चकारेण सङ्ख्याव्यये अनुकृष्टे । अहश्शब्दवर्जं ते सर्वे एतच्छब्देन परामृश्यन्ते । नत्वहश्शब्दः । अहश्शब्दात् परस्य अहन्शब्दस्य तत्पुरुषे असम्भवादित्यभिप्रेत्य व्याचष्टे । **सर्वादिभ्य इति** ॥ **समासान्ते पर इति** ॥ एतत्तु प्रकरणाल्लब्धम् । **अह्नोऽदन्तात्** ॥ 'पूर्वपदात्संज्ञायाम्' इयतः पूर्वपदादित्यनुवृत्तम् अदन्तादित्यत्र अन्वेति । 'रषाभ्यां नो णः' इति सूत्रं षकारवर्जमनुवर्तते । पूर्वपदादित्यनेन पूर्वपदस्थादिति विवक्षितम् । तदाह । **अदन्तपूर्वेति** ॥ तदन्तविधिनैव सिद्धे अन्तग्रहणं स्पष्टार्थम् । लक्षेषु अहस्सु भवो लक्षाह्न इत्यत्र णत्वार्थं षादित्यपि बोध्यम् । समासान्ते पर इति किम् । द्वे अहनी भृतो व्यहीनः । अत्र समासान्तविधेरनित्यत्वात् टजभावे अह्नादेशो न । **सर्वाह्न इति** ॥ सर्वमहरिति विग्रहे 'पूर्वकाल' इति समासे 'राजाहस्सखिभ्यः' इति टच्, अह्नादेशः, णत्वं, 'रात्राह्नाहाः' इति पुंस्त्वम् । **पूर्वाह्न इति** ॥ समासादि सर्वाह्नवत् । **सङ्ख्याताह्न इति** ॥ सङ्ख्यातमहरिति विग्रहः । विशेषणसमासः टच् अह्नादेशः । निमित्ताभावान्न णत्वम् । पुण्यपूर्वस्य त्वग्रे वक्ष्यते । सङ्ख्यापूर्वस्य उदाहरति । **द्वयोरह्नोरित्यादि** ॥ **द्व्यह्न इति** ॥ तद्धितार्थे द्विगुः । टच् । ततो भवार्थे ठञ्, तस्य लुक् अह्नादेशः । प्रसङ्गादाह । **स्त्रियामिति** ॥ **द्व्यह्नेति** ॥ द्वयोरह्नोर्भवेत्यर्थः । ठञ् लुक् च पूर्ववत् । 'अपरिमाणबिस्त' इति न ङीप् । ठञ्निमित्तस्तु ङीप् नेत्यपरिमाणबिस्तेत्यत्र उक्तम् । टचष्टित्वेऽप्युपसर्जनत्वात् 'टिड्ढ' इति न ङीप् । वस्तुतस्तु स्त्रीत्वमेवात्र नास्ति । रात्राह्नाहाः पुंसीत्युक्तेरिति शब्देन्दुशेखरे प्रपञ्चितम् । सङ्ख्यापूर्वस्य उदाहरणान्तरमाह । **द्व्यह्नप्रिय इति** ॥ द्वे अहनी प्रिये यस्येति विग्रहः । तद्धितार्थेत्युत्तरपदे द्विगुः । टच् अह्नादेश इति भावः । अव्ययपूर्वस्य उदाहरति । **अत्यह्न इति** ॥ अहरतिक्रान्त इति विग्रहः । अत्यादय इति समासः । टच् अह्नादेश इति भावः । **क्षुभ्नादिषु च** ॥ रषाभ्यामित्यतो ण इति 'न भाभूपूकमि' इत्यतो नेति चानुवर्तते । तदाह ।

ष्वु णत्वं न स्यात्। दीर्घाह्नी प्रावृट्। एवं चैतदर्थमह्न इत्यदन्तानुकरणे क्लेशो न कर्तव्यः। 'प्रातिपदिकान्त—' (सू १०५५) इति णत्ववारणाय क्षुभ्नादिषु पाठस्यावश्यकत्वात्। 'अदन्तात्' इति तपरकरणान्नेह। परागतमहः। पराह्नः।

७९३। न संख्यादेः समाहारे। (५-४-८९)

समाहारे वर्तमानस्य संख्यादेरह्नादेशो न स्यात्। 'संख्यादेः' इति स्पष्टार्थम्। द्वयोरह्नोः समाहारो द्व्यह्नः। त्र्यह्नः।

७९४। उत्तमैकाभ्यां च। (५-४-९०)

आभ्यामह्नादेशो न। उत्तमशब्दोऽन्त्यार्थः पुण्यशब्दमाह। 'पुण्यैकाभ्याम्' इत्येव सूत्रयितुमुचितम्। पुण्याह्नम्। सुदिनाह्नम्। सुदिनशब्दः

ष्विति॥ **दीर्घाह्नी प्रावृडिति**॥ वर्षर्तौ प्रावृट्शब्दः स्त्रीलिङ्गः। "स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षाः" इत्यमरः। दीर्घाण्यहानि यस्मिन्निति बहुव्रीहिः। 'अन उपधालोपिनोऽन्यतरस्याम्' इति ङीप् 'अह्नोपोऽनः' इत्युपधालोपः। 'अह्नोऽदन्तात्' इति णत्वन्तु क्षुभ्नादित्वान्नेति भावः। ननु क्षुभ्नादिषु दीर्घाह्नीत्यस्य पाठो व्यर्थः। 'अह्नोऽदन्तात्' इत्यत्र हि अह्न इत्यदन्तात् षष्ठ्यर्थे प्रथमा। अदन्तपूर्वपदस्थान्निमित्तात् परस्य अह्नशब्दस्य नस्य णत्वं स्यादिति तदर्थः। दीर्घाह्नीत्यत्र च अह्नादेशस्य अप्रसक्त्या अदन्तत्वाभावादेव णत्वस्य अप्राप्तौ किन्तान्निवृत्त्यर्थेन क्षुभ्नादिपाठेनेत्यत आह। **एवञ्चेति**॥ एवं सति दीर्घाह्नीशब्दस्य क्षुभ्नादिपाठे सति एतदर्थम् 'अह्नोऽदन्तात्' इति णत्वनिवृत्त्यर्थम् अह्न इत्यस्य अदन्तत्वानुसरणं षष्ठ्यर्थे व्यत्ययेन प्रथमानुसरणक्लेशावहन्न कर्तव्यमित्यर्थः। क्षुभ्नादिपाठादेव णत्वनिवृत्तिसिद्धेरिति भावः। ननु दीर्घाह्नीत्यस्य किं क्षुभ्नादिपाठोऽभ्युपगम्यताम् उत अह्न इत्यस्य अदन्तत्वमित्यत्र विनिगमनाविरह इत्यत आह। **प्रातिपदिकान्तेति**॥ अथ 'अह्नोऽदन्तात्' इत्यत्र पूर्वपदविशेषणे अदन्तादिति तपरत्वस्य प्रयोजनमाह। **अदन्तादिति**॥ **पराह्न इति**॥ 'प्रादयो गताद्यर्थे' इति समासः, टच्, अव्ययात्परत्वादह्नादेशः। परेति पूर्वपदस्यादन्तत्वाभावात् न णत्वमिति भावः। **न सङ्ख्यादेस्समाहारे**॥ **अह्नादेश इति**॥ 'अह्नोऽह्नः' इत्यतस्तदनुवृत्तेरिति भावः। ननु सङ्ख्यादिभिन्नस्य तत्पुरुषस्य समाहारे अभावादेव सिद्धे सङ्ख्यादेरिति व्यर्थमित्यत आह। **स्पष्टार्थमिति**॥ **द्व्यह्न इति**॥ समाहारे द्विगुः। टच्, 'रात्राह्न' इति पुंस्त्वम्, सङ्ख्यादित्वात्प्राप्तस्य अह्नादेशस्य निषेधः। **त्र्यह्न इति**॥ त्रयाणामह्नां समाहार इति विग्रहः। समासादि द्व्यहवत्। **उत्तमैकाभ्याञ्च**॥ ननु उत्तमशब्दात् परस्याह्नशब्दस्य अह्नादेशाप्रसक्तेरुत्तमग्रहणं व्यर्थमित्यत आह। **उत्तमशब्द इति**॥ उत्तमशब्दः अन्त्ये वर्तते। यथा "द्वादशाहे उदयनी यातिरात्र उत्तममहः" इति अन्त्यमिति गम्यते। अहस्सर्वैकदेशसङ्ख्यात-

प्रशस्तवाची । एकाहः । 'उत्तमग्रहणमुपान्त्यस्यापि सङ्ग्रहार्थम्' इत्येके । सङ्घ्यातात्राहः ।

७९५ । अग्राख्यायामुरसः । (५-४-९३)

टच्स्यात् । अश्वानामुर इव अश्वोरसम् । मुख्योऽश्व इत्यर्थः ।

७९६ । अनोऽश्मायःसरसां जातिसंज्ञयोः । (५-४-९४)

टच्स्याज्जातौ संज्ञायां च । उपानसम् । अमृताश्मः । कालायसम् । 'मण्डूकसरसम्' इति जातिः । महानसम् । पिण्डाश्मः । लोहितायसम् । 'जलसरसम्' इति संज्ञा ।

७९७ । ग्रामकौटाभ्यां च तक्ष्णः । (५-४-९५)

ग्रामस्य तक्षा ग्रामतक्षः । साधारण इत्यर्थः । कुट्यां भवः कौटः । स्वतन्त्रः । स चासौ तक्षा च कौटतक्षः ।

पुण्यादित्युपात्तेषु अन्त्यः पुण्यशब्दो विवक्षित इत्यर्थः । तर्हि पुण्यैकाभ्याम् इत्येव कुतो न सूत्रितम् इत्याशङ्क्य स्वतन्त्रेच्छत्वान्महर्षेरित्याह । **पुण्यैकाभ्यामित्येवेति ॥ पुण्याह-मिति ॥** पुण्यमहरिति विग्रहे विशेषणसमासः, टच्, टिलोपः, 'पुण्यसुदिनाभ्याञ्च' इति नपुंसकत्वम् । **एकाह इति ॥** एकमहरिति विग्रहे 'पूर्वकाल' इति समासः । टच्, टिलोपः । **उपान्त्यस्यापीति ॥** लक्षणयेति शेषः । पुण्येत्यनुक्त्वा उत्तमग्रहणमेव लक्षणाबीजम्, उत्तमञ्च एकश्चेति द्वन्द्वः, सौत्रं द्विवचनमिति भावः । **सङ्घ्यातात्राह इति ॥** सङ्घ्यातमहरिति विग्रहे विशेषणसमासः, टच्, टिलोपः । 'रात्राह्न' इति पुंस्त्वम् । उपान्त्यसङ्घ्यातशब्दपूर्व-कत्वात् नाह्नादेशः । **अग्राख्यायामुरसः ॥** शेषपूरणेन सूत्रं व्याचष्टे । **टच् स्यादिति ॥** पञ्चम्यर्थे सप्तमी । अग्रं प्रधानं तद्वाची य उरश्शब्दः तदन्तात्तत्पुरुषाट्टच् स्यादित्यर्थः । 'अग्र्या-ख्यायाम्' इति पाठान्तरम् । अग्रे भवमग्र्यं, मुख्यमिति यावत् । **अश्वानामुर इवेति ॥** उरो यथा प्रधानं तथेत्यर्थः । उरश्शब्दस्य मुख्ये वृत्तौ लक्षणाबीजमिदम् । **अश्वोरसमिति ॥** उरश्शब्देन मुख्यवाचिना षष्ठीसमासः, टच् 'परवल्लिङ्गम्' इति नपुंसकत्वम् । अग्राख्यायामिति किम् । देवदत्तस्योरः देवदत्तोरः । **अनोऽश्मायस् ॥ उपानसमिति ॥** उपगतमन इति प्रादि-समासः । **अमृताश्म इति ॥** अमृतः अश्मेति विग्रहः । टचि, टिलोपः । **काळायसमिति ॥** काळम् अय इति विग्रहः, टच् 'परवल्लिङ्गम्' इति नपुंसकत्वम् । **मण्डूकसरसमिति ॥** षष्ठी-समासः । टच् । जातिविशेषा एते, महानसं, पिण्डाश्मः, लोहितायसं, जलसरसमिति संज्ञाविशेषाः । **ग्रामकौटाभ्याञ्च तक्ष्णः ॥ आभ्यां टजिति ॥** ग्रामकौटाभ्यां परो यस्तक्ष्नशब्दः तदन्ता-त्तत्पुरुषाट्टच् स्यादित्यर्थः । **ग्रामतक्ष इति ॥** टचि टिलोपः । **साधारण इति ॥** ग्रामे यावन्तो जनास्सन्ति तावतां विधेय इत्यर्थः । **कुट्यां भव इति ॥** कुटीमेकां क्रयादिना सम्पाद्य तत्र

७९८। अतेः शुनः। (५-४-९६)

अतिश्वो वराहः। अतिश्वी सेवा।

७९९। उपमानादप्राणिषु। (५-४-९७)

अप्राणिविषयकोपमानवाचिनः शुनष्टच्स्यात्। आकर्षः श्वेवाकर्षश्वः। 'अप्राणिषु' किम्। वानरः श्वेव वानरश्वा।

८००। उत्तरमृगपूर्वाच्च सक्थ्नः। (५-४-९८)

चादुपमानात्। उत्तरसक्थम्। मृगसक्थम्। पूर्वसक्थम्। फलकमिव सक्थि फलकसक्थम्।

८०१। नावो द्विगोः। (५-४-९९)

नौशब्दान्ताद्विगोष्टच्स्यात्, न[1] तु तद्धितलुकि। द्वाभ्यां नौभ्यामागतो द्विनावरूप्यः। 'द्विगोर्लुगनपत्ये' (सू १०८०) इत्यत्र 'अचि' इत्यस्यापकर्षणाद्धलादेर्न लुक्। पञ्चनावप्रियः। द्विनावम्। त्रिनावम्। 'अतद्धितलुकि' इति किम्। पञ्चभिर्नौभिः क्रीतः पञ्चनौः।

यो वसति, नतु परकीयभूमिप्रदेशे, सः कौट इत्यर्थः। फलितमाह। **स्वतन्त्र इति ॥ कौटतक्ष इति ॥** टचि टिलोपः। **अतेश्शुनः ॥** अतीत्यव्ययात् परो यः श्वन्शब्दः तदन्तात्तत्पुरुषाट्टजित्यर्थः। **अतिश्व इति ॥** श्वानमतिक्रान्त इति विग्रहः। अत्यादय इति समासः। टचि, टिलोपः श्वापेक्षयाधिकवेगवान् वराह इत्यर्थः। **अतिश्वी सेवेति ॥** श्वानमतिक्रान्तेत्यर्थः, श्वापेक्षया नीचा सेवेति यावत्, टच्, टिलोपः। टित्त्वात् ङीप्, यस्येति च इत्यकारलोपः। **उपमानादप्राणिषु ॥ आकर्षः श्वेवेति ॥** आकृष्यते कुमूलादिगतधान्यमनेनेत्याकर्षः। पञ्चाङ्गुलो दारुविशेषः। 'उपमितं व्याघ्रादिभिः' इति समासः। टच्, टिलोपः, आकर्षश्वः इति रूपम्। उपमानात् किम्। शुनो निष्क्रान्तः निश्वा। **उत्तरमृग ॥** उत्तर मृग पूर्व एभ्यः उपमानाच्च परो यः सक्थिशब्दः तदन्तात्तत्पुरुषाट्टच् स्यादित्यर्थः। **उत्तरसक्थमिति ॥** उत्तरं सक्थीति विग्रहः। पूर्वं सक्थीति विग्रहे 'पूर्वकाल' इति समासः। **फलकसक्थमिति ॥** फलकमिव सक्थीति विग्रहे मयूरव्यंसकादित्वात् समासः। सर्वत्र टच् टिलोपः। **नावो द्विगोः ॥ नतु तद्धितलुकीति ॥** 'गोरतद्धितलुकि' इत्यतो मण्डूकप्लुत्या तदनुवृत्तेरिति भावः। **द्विनावरूप्य इति ॥** तद्धितार्थे समासः, टच्, आवादेशः। हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः, तस्य 'द्विगोर्लुगनपत्ये' इति लुकमाशङ्क्य आह **द्विगोर्लुगनपत्ये इत्यत्रेति ॥ अपकर्षणादिति ॥** 'गोत्रे लुगचि' इत्युत्तरसूत्रादित्यर्थः। **पञ्चनावप्रिय इति ॥** पञ्च नावः प्रियाः यस्येति विग्रहे उत्तरपदे द्विगुः, टच्, आवादेशः। **द्विनावमिति ॥** द्वयोः नावोः समाहार

---

१. मण्डूकप्लुत्या 'अतद्धितलुकि' इत्यनुवर्तते। इति शेखरकृत्।

८०२ । अर्धाच्च । (५-४-१००)

अर्धान्नावष्टच्स्यात् । नावोऽर्धम्–अर्धनावम् । क्लीबत्वं लोकात् ।

८०३ । खार्याः प्राचाम् । (५-४-१०१)

द्विगोरर्धाच्च खार्यांष्टज्वा स्यात् । द्विखारम्–द्विखारि । अर्धखारम्–अर्धखारी ।

८०४ । द्वित्रिभ्यामञ्जलेः (५-४-१०२)

टज्वा स्याद्विगौ । द्व्यञ्जलम् । द्व्यञ्जलि । 'अतद्धितलुकि' इत्येव । द्वाभ्यामञ्जलिभ्यां क्रीतो द्व्यञ्जलिः ।

८०५ । ब्रह्मणो जानपदाख्यायाम् । (५-४-१०४)

ब्रह्मान्तात्तत्पुरुषाट्टच्स्यात्समासेन जानपदत्वमाख्यायते चेत् । सुराष्ट्रे ब्रह्मा सुराष्ट्रब्रह्मः ।

इति विग्रहे द्विगुः, टच्, आवादेशः, 'स नपुंसकम्' इति नपुंसकत्वम् । **त्रिनावमिति** ॥ तिसृणां नावां समाहार इति विग्रहः । द्विनाववत् । **पञ्चनौरिति** ॥ तद्धितार्थे समासः । आर्हीयष्टक् 'अध्यर्ध' लुक् । **अर्द्धाच्च** ॥ अर्द्धशब्दात् परो यो नौशब्दः तदन्तात् तत्पुरुषाट्टजित्यर्थः । **अर्द्धनावमिति** ॥ 'अर्द्धन्नपुंसकम्' इति समासः, टच्, आवादेशः । अत्र 'परवल्लिङ्गम्' इति स्त्रीत्वमाशङ्क्य आह । **क्लीबत्वं लोकादिति** ॥ **खार्याः प्राचाम्** ॥ खारीशब्दान्तात् द्विगोः, अर्द्धपूर्वकात् खारीशब्दान्तात्तत्पुरुषाच्चेत्यर्थः । **द्विखारमिति** ॥ द्वयोः खार्योः समाहर इति विग्रहे द्विगुः । टच् 'यस्येति च' 'स नपुंसकम्' इति नपुंसकत्वम् । टजभावपक्षे 'स नपुंसकम्' इति नपुंसकत्वान्नपुंसकहस्वः । **अर्द्धखारमिति** ॥ खार्या अर्द्धमिति विग्रहः । 'अर्द्धन्नपुंसकम्' इति समासः, टच्, यस्येति च । क्लीबत्वं लोकात् । **अर्द्धखारीति** ॥ पूर्ववत् समासः । टजभावपक्षे 'परवल्लिङ्गम्' इति स्त्रीत्वम् । एकविभक्तावषष्ठ्यन्तवचनादुपसर्जनत्वाभावान्न ह्रस्वः । अर्धखारीति क्वचिद्ध्रस्वान्तपाठः । तदा क्लीबत्वं लोकात्, ततो नपुंसकहस्वः । **द्वित्रिभ्यामञ्जलेः** ॥ शेषपूरणेन सूत्रं व्याचष्टे । **टज्वा स्यादिति** ॥ **द्विगाविति** ॥ **द्व्यञ्जलमिति** ॥ द्वयोरञ्जल्योस्समाहार इति विग्रहे द्विगुः, टच्, 'यस्येति च' 'स नपुंसकम्' । **द्व्यञ्जलीति** ॥ समाहारे द्विगुः । टजभावे सति नपुंसकहस्वत्वम् । **तद्धितलुकीत्येवेति** ॥ अनुवर्तते एवेत्यर्थः । **अञ्जलिभ्यां क्रीत इति** ॥ अञ्जलिशब्दः अञ्जलि, परिमितधान्यादौ वर्तते । केवलस्याञ्जलेः मूल्यत्वासम्भवात् परिमाणत्वात् ठञ् । 'अध्यर्ध' इति तस्य लुक् । **ब्रह्मणो जानपदाख्यायाम्** ॥ जनपदे भवो जानपदः भावप्रधानो निर्देशः । तस्य कोनाख्येत्याकांक्षायाम् प्रकृतत्वात् समासेनेति लभ्यते । तदाह । **समासेन जानपदत्वमाख्यायते चेदिति** ॥ जानपदत्वमित्यनन्तरं ब्रह्मण इति शेषः । **सुराष्ट्रे**

८०६। कुमहद्भ्यामन्यतरस्याम्। (५-४-१०५)

आभ्यां ब्रह्मणो वा टच्स्यात्तत्पुरुषे। कुत्सितो ब्रह्मा कुब्रह्मः—कुब्रह्मा।

८०७। आन्महतः समानाधिकरणजातीययोः। (६-३-४६)

महतः आकारोऽन्तादेशः स्यात्समानाधिकरणे उत्तरपदे जातीये च परे। महाब्रह्मः—महाब्रह्मा। महादेवः। महाजातीयः। 'समानाधिकरणे' किम्। महतः सेवा—महत्सेवा। लाक्षणिकं विहाय प्रतिपदोक्तः 'सन्महत्—' (सू ७४०) इति समासो ग्रहीष्यत इति चेत् 'महाबाहुः' न स्यात्। तस्मात्

ब्रह्मेति॥ ब्रह्मशब्दोऽत्र पुल्लिङ्गः। ब्रह्मा विप्रः। 'वेदस्तत्वन्तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः' इत्यमरः। सप्तमीति योगविभागात् समासः। टच्, टिलोपः 'परवल्लिङ्गम्' इति पुंस्त्वम्, जनपदेति किम्। देवब्रह्मा नारदः। **कुमहद्भ्यामन्यतरस्याम्॥ कुब्रह्मेति॥** टजभावे रूपम्, 'कुगतिप्रादयः' इति समासः। **कुब्रह्मः इति॥** टचि रूपं, टिलोपः। अथ महत्पूर्वस्य टज्विकल्पमुदाहरिष्यन् विशेषमाह। **आन्महतः॥** 'अलुगुत्तरपदे' इत्युत्तरपदाधिकारस्थमिदं सूत्रम्। उत्तरपदे इत्यनुवृत्तं समानाधिकरणपदे अन्वेति, नतु जातीय इति। तस्य प्रत्ययत्वात्। तदाह। **महत आत्त्वमित्यादिना॥ महाब्रह्म इति॥** महांश्चासौ ब्रह्मा चेति विग्रहः। 'सन्महत्' इत्यादिना समासः। आत्त्वम्। सवर्णदीर्घः। 'कुमहद्भ्याम्' इति टच्। टिलोपः, 'परवल्लिङ्गम्' इति पुंस्त्वम्। **महाब्रह्मेति॥** टजभावे आत्वे रूपम्। अथ प्रसङ्गादुक्तमात्त्वविधिं प्रपञ्चयिष्यन् समानाधिकरणे पुनरुदाहरति। **महादेव इति॥** जातीये उदाहरति। **महाजातीय इति॥** महत्सदृश इत्यर्थः। प्रकारवचने जातीयर्, आत्त्वम्, सवर्णदीर्घः। **समानाधिकरणे किमिति॥** आन्महतो जातीये चेत्येवास्तु। चकारादुत्तरपदसमुच्चये सति महत आत्त्वम् स्यात्, उत्तरपदे जातीये च परत इत्यर्थलाभादेव महादेव इत्यादिसिद्धेः किं समानाधिकरणेनेति प्रश्नः। **महतः सेवा महत्सेवेति॥** अत्र षष्ठीसमासे आत्त्वनिवृत्त्यर्थं समानाधिकरणग्रहणमिति भावः। ननु षष्ठीसमासो लाक्षणिकः, समस्यमानपदं विशिष्य अनुच्चार्य सामान्यशास्त्रत एव निर्वर्तितत्वात्। 'सन्महत्' इत्ययं समासस्तु सन्महदादिशब्दं समस्यमानं विशिष्योच्चार्य विहितत्वात् प्रतिपदोक्तः। ततश्च लक्षणप्रतिपदोक्तपरिभाषया आन्महतो जातीये चेत्यत्र 'सन्महत्' इति प्रतिपदोक्तसमासोत्तरपदग्रहणे सति तत एव षष्ठीसमासोत्तरपदनिराससम्भवाद्व्यर्थमेव समानाधिकरणग्रहणमिति शङ्कते। **लाक्षणिकमित्यादिना॥** परिहरति। **महाबाहुर्न स्यादिति॥** महान्तौ बाहू यस्येति विग्रहः। अस्य समासस्य 'अनेकमन्यपदार्थे' इति सामान्यविहितत्वात् प्रतिपदोक्तत्वाभावात्तदुत्तरपदे परे आत्त्वन्न स्यात्, अतस्समानाधिकरणग्रहणमित्यर्थः। ननु कृतेऽपि समानाधिकरणग्रहणे लक्षणप्रतिपदोक्तपरिभाषाप्रवृत्तेर्दुर्वारत्वात् महाबाहुरित्यत्रात्त्वं न स्यादेवेत्यत आह। **तस्मादिति॥** तच्छब्दार्थमाह। **समानाधिकरणग्रहणसामर्थ्या-**

'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्य' (प १११४) इति परिभाषा नेह प्रवर्तते। समानाधिकरणग्रहणसामर्थ्यात्। 'आत्' इति योगविभागादात्त्वं 'प्रागेकादशभ्यः—' (सू १।१।५५) इति निर्देशाद्वा। एकादश। महतीशब्दस्य 'पुंवत्कर्मधारय—' (सू ७।३।४६) इति पुंवद्भावे कृते आत्त्वम्। महाजातीया। 'महतः आत्त्वे घासकरविशिष्टेषूपसङ्ख्यानं पुंवद्भावश्च' (वा ३।१।५०)। असामानाधिकरण्यार्थमिदम्। महतो महत्या वा घासो महाघासः। महाकरः। महाविशिष्टः। 'अष्टनः कपाले हविषि' (वा ३।१।५१)। अष्टाकपालः। 'गवि च युक्ते' (वा ३।१।५२)। गोशब्दे परे युक्त इत्यर्थे गम्येऽष्टन आत्त्वं स्यात्। अष्टागवं शकटम्। 'अच्प्रत्यन्नव—' (सू ५।४।३) इत्यत्र 'अच्' इति योग-

---

दिति ॥ एवं च लक्षणप्रतिपदोक्तपरिभाषां बाधित्वा लाक्षणिकस्यापि ग्रहणार्थं समानाधिकरणग्रहणमिति भावः। नच सुमहान्तौ बाहू यस्य सः सुमहाबाहुरित्यत्र कथमात्त्वम्। आत्त्वविधेः पदाङ्गाधिकारस्थत्वाभावेन तदन्तविध्यभावादिति वाच्यम्। उत्तरपदाक्षिप्तपूर्वपदस्य महता विशेषणे सति तदन्तविधिलाभात्। परममहत्परिमाणवानित्यत्र तु महतः परिमाणं महत्परिमाणं परमं महत्परिमाणमिति षष्ठीसमासगर्भः कर्मधारय इति दिक्। ननु 'आन्महतः' इत्यत्र महत एव ग्रहणात् 'द्व्यष्टनः' इत्युत्तरसूत्रे द्व्यष्टनोरेव ग्रहणात् एकादशेत्यत्र कथमात्त्वमित्यत आह। **आदिति योगविभागादात्त्वमिति** ॥ योगविभागस्य भाष्यादृष्टत्वादाह। **प्रागेकादशभ्य इति निर्देशाद्वेति** ॥ **एकादशेति** ॥ एकश्च दश चेति द्वन्द्वः। एकाधिका दशेति वा। आन्महत इत्यत्र लिङ्गविशिष्टपरिभाषया महतीशब्दस्यापि जातीयर्प्रत्यये परे महतीजातीयेति स्यादित्यत आह। **महतीशब्दस्येति** ॥ नच परत्वात्पुंवत्त्वं बाधित्वा आत्त्वं स्यादिति वाच्यम्। 'आन्महतः' इत्यत्र लिङ्गविशिष्टपरिभाषा न प्रवर्तत इति ङ्याप्प्रातिपदिकात्सूत्रे भाष्ये उक्तत्वादिति भावः। **महतः आत्त्वेति** ॥ घास, कर, विशिष्ट, एषु परतः महत आत्त्वं पुंवत्त्वञ्च वक्तव्यमित्यर्थः। ननु 'आन्महतः' इत्यात्त्वे 'पुंवत्कर्मधारय' इति पुंवत्त्वे च सिद्धे किमर्थमिदमित्यत आह। **असामानाधिकरण्यार्थमिदमिति** ॥ **महाकर इति** ॥ महतो महत्या वा कर इत्यर्थः। **महाविशिष्ट इति** । महतो महत्या वा विशिष्टः। अधिक इत्यर्थः। **अष्टन इति** ॥ कपाले उत्तरपदे हविषि वाच्ये अष्टन आत्त्वं वक्तव्यमित्यर्थः। **अष्टाकपाल इति** ॥ अष्टसु कपालेषु संस्कृतः पुरोडाश इत्यर्थे तद्धितार्थे द्विगुः। 'संस्कृतं भक्षाः' इत्यण्। 'द्विगोर्लुगनपत्ये' इति लुक्। आत्त्वं, सवर्णदीर्घः। **गवि च युक्ते इति** ॥ वार्तिकमिदम्। तत्सूचयितुमाह। **वक्तव्यमित्यर्थ इति** ॥ **अष्टागवं शकटमिति** ॥ अष्टौ गावो यस्येति बहुव्रीहिः। आत्त्वं, सवर्णदीर्घः। अष्टभिर्गोभिर्युक्तमित्यर्थः। ननु 'गोरतद्धितलुकि' इति टच्विधेस्तत्पुरुषमात्रविषयत्वात् अष्टागवमिति कथमित्यत आह। **अच्प्रत्यन्नवेत्यत्रेति** ॥ तत्पुरुषत्वे अष्टागवशब्दश्चजन्त एवेत्याह। **अष्टा-**

विभागाद्बहुव्रीहावप्यच्। 'अष्टानां गवां समाहारोऽष्टगवम्' तद्युक्तत्वाच्छकट-मष्टागवमिति वा।

८०८। द्व्यष्टनः सङ्ख्यायामबहुव्रीह्यशीत्योः। (६-३-४७)

आत्स्यात्। द्वौ च दश च द्वादश। द्व्यधिका दशेति वा। द्वाविंशतिः। अष्टादश। अष्टाविंशतिः। 'अबहुव्रीह्यशीत्योः' किम्। द्वित्राः। द्व्यशीतिः। 'प्राक्शताद्वक्तव्यम्' (वा ३९५३)। नेह। द्विशतम्। द्विसहस्रम्।

८०९। त्रेस्त्रयः। (६-३-४८)

त्रिशब्दस्य 'त्रयस्' स्यात्पूर्वविषये। त्रयोदश। त्रयोविंशतिः। बहुव्रीहौ तु। त्रिर्दश येषां ते त्रिदशाः। सुजर्थे बहुव्रीहिः। अशीतौ तु त्र्यशीतिः। 'प्राक्छतात्' इत्येव। त्रिशतम्। त्रिसहस्रम्।

नामिति ॥ तथाच समाहारद्विगोस्तत्पुरुषत्वात् 'गोरतद्धितलुकि' इति टच् सुलभ इत्यर्थः। नन्वष्टानां गवां समाहार इत्यर्थे शकटे कथमन्वयः, युक्तार्थवृत्तित्वाभावात्कथं वा आत्त्वमित्यत आह। **तद्युक्तत्वादिति** ॥ समाहारद्विगुरूपतत्पुरुषाट्टचि उत्पन्नस्य अष्टगवशब्दस्य लक्षणया अष्टभिर्गोभिर्युक्ते वर्तमानस्य आत्त्वमित्यर्थः। **द्व्यष्टनः** ॥ शेषपूरणेन सूत्रं व्याचष्टे। **आत्स्यादिति** ॥ द्विशब्दस्य अष्टन्शब्दस्य च सङ्ख्यावाचके उत्तरपदे परे आत्स्यात्, न तु बहुव्रीह्यशीत्योरित्यर्थः। द्विशब्दस्योदाहरति। **द्वादशेति** ॥ द्वौ च एकश्च द्वेकाः, द्व्यधिकः एकः द्वेका इत्यादौ तु नास्ति। "एकादिनवान्तानां परस्परं द्वन्द्वतत्पुरुषौ न स्तः" इति 'चार्थे' इति सूत्रे भाष्ये ध्वनितत्वादिति शब्देन्दुशेखरे स्थितम्। **द्वाविंशतिरिति** ॥ द्वौ च विंशतिश्चेति समाहारद्वन्द्वः। 'स नपुंसकम्' इति क्लीबत्वन्तु न। किन्तु लोकात् स्त्रीत्वम्। इतरेतरयोगस्तु न। अनभिधानात्। द्व्यधिका विंशतिरिति तत्पुरुषो वा। अथाष्टन्शब्दस्योदाहरति। **अष्टादशेति** ॥ अष्टौ च दश चेति द्वन्द्वः। अष्टाधिका दशेति वा। **अष्टाविंशतिरिति** ॥ अष्टौ च विंशतिश्चेति समाहारद्वन्द्वः। स्त्रीत्वं लोकात्। अष्टाधिका विंशतिरिति वा। **द्वित्रा इति** ॥ द्वौ वा त्रयो वेति विग्रहः। 'संख्याव्यय'इति बहुव्रीहिः। 'बहुव्रीहौ संख्येये डच्' इति डच्। बहुव्रीहित्वादत्र द्विशब्दस्य आत्त्वन्न। **द्व्यशीतिरिति** ॥ द्वौ चाशीतिश्चेति समाहारद्वन्द्वः। स्त्रीत्वं लोकात्। द्व्यधिका अशीतिरिति वा। अत्राशीतिपरकत्वात् द्विशब्दस्यात्त्वन्न। **प्राक्शतादिति** ॥ 'अष्टनस्सङ्ख्यायाम्' इत्येतत् शतप्रभृतिसङ्ख्याशब्दे परे न भवतीति वक्तव्यमित्यर्थः। **द्विशतमिति** ॥ द्वौ च शतञ्चेति समाहारद्वन्द्वः। द्व्यधिकं शतमिति वा। एवं द्विसहस्रमित्यत्रापि। **त्रेस्त्रयः** ॥ सन्धिवेलादिषु त्रयोदशेति पाठात् सकारान्तोऽयमादेश इत्याह। **त्रयस्स्यादिति** ॥ **पूर्वविषये इति** ॥ प्राक्शतात्। सङ्ख्याशब्दे उत्तरपदे परतः, नतु बहुव्रीह्यशीत्योरित्यर्थः। **त्रयोदशेति** ॥ त्रयश्च दश चेति, त्र्यधिका दशेति

८१०। विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम्। (६-३-४९)

द्व्यष्टनोस्त्रेश्च प्रागुक्तं वा स्याच्चत्वारिंशदादौ परे। द्विचत्वारिंशत्—द्वाचत्वारिंशत्। अष्टचत्वारिंशत्—अष्टाचत्वारिंशत्—त्रिचत्वारिंशत्—त्रयश्चत्वारिंशत्। एवं पञ्चाशत्षष्टिसप्ततिनवतिषु।

८११। एकादिश्चैकस्य चादुक्। (६-३-७६)

एकादिर्नञ्प्रकृत्या स्यादेकस्य चादुगागमश्च। नञो विंशत्या समासे कृते एकशब्देन सह 'तृतीया' इति योगविभागात्समासः। अनुनासिकविकल्पः। एकेन न विंशतिः एकान्नविंशतिः—एकाद्रविंशतिः। एकोनविंशतिरित्यर्थः। 'षष उत्त्वं दतृदशधासूत्तरपदादेः ष्टुत्वं च धासु वेति वाच्यम्' (वा ४००१—४००२)। षोडन्—षोडश—षोढा—षड्धा।

वा विग्रहः। सुब्लुकि त्रिशब्दस्य त्रयस्, रुत्वम्, उत्त्वम्, आदुगः। एवं त्रयोविंशतिरित्यपि। **त्रिदशा इति** ॥ त्रिरावृत्ता दशेत्यर्थः। 'बहुव्रीहौ सङ्ख्येये डच्' इति डच्। नन्वत्र त्रिरित्यस्य 'सङ्ख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' 'द्वित्रिचतुर्भ्यस्सुच्' इति सुजन्तत्वात् समासेऽपि सुचः श्रवणापत्तिरित्यत आह। **सुजर्थे बहुव्रीहिरिति** ॥ सुजर्थे क्रियाभ्यावृत्तौ लक्षणया विद्यमानस्य त्रिशब्दस्यैवात्र 'सङ्ख्याव्ययेति' इति बहुव्रीहिः। न तु सुजन्तस्येत्यर्थः। **त्र्यशीतिरिति** ॥ त्रयश्चाशीतिश्चेति समाहारद्वन्द्वः। स्त्रीत्वं लोकात्। त्रधिकाशीतिरिति वा। **त्रिशतमिति** ॥ त्रयश्च शतञ्चेति समाहारद्वन्द्वः, त्रधिकं शतमिति वा। एवं त्रिसहस्रमित्यपि। **विभाषा चत्वारिंशत्** ॥ व्यवहितस्यापि द्व्यष्टनोरित्यस्य सम्बन्धाय सर्वेषामिति। द्व्यष्टनोस्त्रेश्चेत्यर्थः। तदाह। **द्व्यष्टनोस्त्रेश्चेति॥ एकादिश्च** ॥ 'नलोपो नञः' इत्यतः नञ इति षष्ठ्यन्तमनुवर्तते। तच्च प्रथमया विपरिणम्यते। 'न भ्राण्नपात्' इत्यतः प्रकृत्येत्यनुवर्तते। तदाह। **एकादिर्नञ् प्रकृत्येति** ॥ एकः आदिर्यस्येति विग्रहः। **एकस्य चादुगागमश्चेति** ॥ आदुगिति अदुगिति वा छेदः। **नञो विंशत्येति** ॥ न विंशतिरिति विग्रहे नञ्समासे सति नविंशतिशब्दस्य एकशब्देन तृतीयान्तेन सह एकेन नविंशतिरिति विग्रहे समास इत्यन्वयः। ननु प्रकृतिविकृतिभावाद्यभावात् कथमिह तृतीयासमास इत्यत आह। **तृतीयेति योगविभागादिति** ॥ **अनुनासिकविकल्प इति** ॥ तृतीयासमासे कृते सुब्लुकि एक न विंशति इति स्थिते 'नलोपो नञः' इति प्राप्तस्य नकारलोपस्य प्रकृतिभावान्निवृत्तौ एकशब्दस्यादुगागमः, तत्र अकार इत् उकार उच्चारणार्थः। कित्त्वादन्तावयवः, सवर्णदीर्घः, एकाद्रविंशतिरिति स्थिते 'यरोऽनुनासिके' इति दकारस्य पक्षे अनुनासिकनकार इत्यर्थः। अदुगागमपक्षेऽपि पररूपन्तु अकारोच्चारणसामर्थ्यान्न भवति। एकेन न विंशतिरिति विग्रहवाक्यम्। एकेन हेतुना विंशतिर्न भवतीत्यर्थः। **एकान्न विंशतिः, एकाद्रविंशतिरिति** ॥

८१२। परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः। (२-४-२६)

एतयोः परपदस्येव लिङ्गं स्यात्। कुक्कुटमयूर्यावमे। मयूरीकुक्कुटावमौ। अर्धपिप्पली। 'द्विगुप्राप्तापन्नालम्पूर्वगतिसमासेषु प्रतिषेधो वाच्यः' (वा १५४५)। पञ्चसु कपालेषु संस्कृतः पञ्चकपालः पुरोडाशः। प्राप्तो

अनुनासिकत्वे तदभावे च रूपम्। **एकोनविंशतिरित्यर्थ इति** ॥ पर्यवस्यतीति शेषः। एकेन ऊनेति विग्रहः। 'पूर्वसदृश'इति समासः। **षष उत्त्वमिति** ॥ दतृशब्दे दशन्शब्दे च उत्तरपदे परे धाप्रत्यये च परे षष्शब्दस्य उत्वं उत्तरखण्डस्य दतृशब्दस्य दशन्शब्दस्य धाप्रत्ययस्य च आदेर्दकारस्य धकारस्य च टुत्वञ्च वक्तव्यमित्यर्थः। टुत्वमित्येव छेदः। न तु ष्टुत्वमिति, प्रयोजनाभावात्। 'धासु वा' इति बहुवचनाद्विधार्थधाप्रत्ययस्यैव ग्रहणमिति भाष्यम्। धाप्रत्यये परे षष उत्त्वं वा स्यात्। टुत्वन्तु उत्त्वपक्षे तदभावपक्षे च पूर्ववाक्यान्नित्यमेवेति कैयटः। उत्त्वपक्ष एव नित्य टुत्वमिति हरदत्तः। **षोडन्निति** ॥ षट् दन्ता यस्येति बहुव्रीहौ 'वयसि दन्तस्य दतृ' इति दत्रादेशः, ऋकारस्य इत्त्वम्। अन्त्यषकारस्य उत्त्वम्। आद्गुणः, दकारस्य टुत्वेन डकारः, सुप्रत्यये उगित्त्वान्नुम्, सुलोपः, संयोगान्तलोपः। तस्यासिद्धत्वान्न दीर्घः। षोडन् इति रूपम्। **षोडशेति** ॥ षट् च दश चेति, षडधिका दशेति वा विग्रहः। अन्त्यस्य षकारस्य उत्त्वम्, आद्गुणः, दकारस्य टुत्वेन डकारः। हरदत्तमतमनुसृत्य उत्त्वाभावपक्षे धासु वेत्यस्योदाहरति। **षड्धेति** ॥ 'सङ्ख्याया विधार्थे धा' अन्त्यस्य षकारस्य उत्त्वाभावपक्षे तु टुत्वमपि न भवति। 'झलाञ्जशोऽन्ते' इति जश्त्वेन षकारस्य ड इति भावः। उत्त्वपक्षे उदाहरति। **षोढेति** ॥ धाप्रत्ययः, अन्त्यस्य षकारस्य उत्त्वम्, आद्गुणः, टुत्वेन धस्य ढ इति भावः। कैयटमते तु उत्त्वाभावपक्षेऽपि टुत्वन्नित्यमेव। षड्ढा। कैयटमतमेव युक्तम्। षोढा, षड्ढा, इत्येव भाष्ये उदाहृतत्वादिति शब्देन्दुशेखरे स्थितम्। **परवल्लिङ्गम्** ॥ परवदिति षष्ठ्यन्ताद्वतिः। तदाह। **एतयोः परपदस्येवेति** ॥ द्वन्द्वपदमत्र इतरेतरयोगद्वन्द्वपरम्। समाहारद्वन्द्वे 'स नपुंसकम्' इत्यस्य तदपवादत्वात्। **कुक्कुटमयूर्यावमे इति** ॥ अत्र द्वन्द्वे अवयवलिङ्गेनानियमे प्राप्ते नियमार्थमिदम्। **अर्धपिप्पलीति** ॥ 'अर्धन्नपुंसकम्' इति तत्पुरुषः। अस्य एकदेशिसमासस्य पूर्वपदार्थप्रधानतया पूर्वपदलिङ्गे प्राप्ते उत्तरपदलिङ्गार्थं विधिः। अत्र 'द्वन्द्वतत्पुरुषयोः' इति षष्ठ्यन्तमर्थपरम्। द्वन्द्वतत्पुरुषार्थयोरिति अर्थः। एवञ्च कुक्कुटमयूर्यावमे इत्यनुप्रयोगेऽपि तदेव लिङ्गम्। **द्विगुप्राप्तेति** ॥ प्राप्त, आपन्न, अलम्पूर्व, गतिसमास एतेषु परवल्लिङ्गस्य प्रतिषेधो वक्तव्य इत्यर्थः। **पञ्चस्विति** ॥ उत्तरपदस्य नपुंसकत्वात् समासस्य नपुंसकत्वं प्राप्तन्न भवति, किन्तु विशेष्यलिङ्गमेव। **प्राप्तजीविक इति** ॥ अत्र उत्तरपदस्य जीविकाशब्दस्य यल्लिङ्गं तत्समासस्य न भवति। अलंपूर्वस्योदाहरति। **अलं कुमार्यै, अलंकुमारिरिति** ॥ अत्र उत्तरपदकुमारीलिङ्गं समासस्य न भवति। नन्वत्र तदर्थादियोगाभावान्न चतुर्थीसमासः। 'पर्यादयो ग्लानाद्यर्थे' इत्यपि न भवति। तस्य समासस्य नित्यत्वेन अलं कुमार्यै इति भाष्ये विग्रहप्रदर्शनानुपपत्तेरित्यत

जीविकां प्राप्तजीविकः । आपन्नजीविकः । अलं कुमार्यै अलंकुमारिः । अत एव ज्ञापकात्समासः । निष्कौशाम्बिः ।

८१३ । पूर्ववदश्वबडबौ । (२-४-२७)

द्विवचनमतन्त्रम् । अश्वबडबौ । अश्वबडबान् । अश्वबडबैः ।

८१४ । रात्राह्नाहाः पुंसि । (२-४-२९)

एतदन्तौ द्वन्द्वतत्पुरुषौ पुंस्येव । अनन्तरत्वात्परवल्लिङ्गतापवादोऽप्ययं परत्वात्समाहारनपुंसकतां बाधते । अहोरात्रः । रात्रेः पूर्वभागः पूर्वरात्रः । पूर्वाह्णः । व्यहः । 'सङ्ख्यापूर्वो रात्रं क्लीबम्' (लि १३१) । द्विरात्रम् । त्रिरात्रम् । गणरात्रम् ।

आह । **अत एवेति** ॥ 'एकविभक्ति च' इति कुमारीशब्दस्योपसर्जनत्वाद्ह्रस्वः । गतिसमासमुदाहरति । **निष्कौशाम्बिरिति** ॥ अत्र कौशाम्बीशब्दलिङ्गं समासस्य न भवति । यद्यपि निरादिसमास एवायम्, न तु गतिसमासः, प्रादिग्रहणमगत्यर्थमित्युक्तेः । तथापि गतिसमासग्रहणं प्रादिसमासोपलक्षणमित्याशयः । **पूर्ववदश्वबडबौ** ॥ अश्वश्च बडबा च इति द्वन्द्वे परवल्लिङ्गम्बाधित्वा पूर्ववल्लिङ्गार्थमिदम् । अश्वबडबाविति द्वन्द्वः । पूर्वपदस्य लिङ्गं लभते इत्यर्थे बहुवचने विभक्त्यन्तरे च न स्यादित्यत आह । **द्विवचनमतन्त्रमिति** ॥ उपलक्षणमिदम् । द्विवचनं, विभक्तिश्चेति, द्वयमपि अविवक्षितमित्यर्थः । पूर्ववद्ग्रहणमत्र लिङ्गम् । अन्यथा निपातनादेव सिद्धे किन्तेनेति भावः । **रात्राह्नाहाः** ॥ द्वन्द्वतत्पुरुषयोरित्यनुवृत्तं प्रथमाबहुवचनेन विपरिणतं रात्रादिभिर्विशेष्यते, तदन्तविधिः । रात्राह्नाहान्तद्वन्द्वतत्पुरुषाः पुंसीत्यर्थः । फलितमाह । **एतदन्तावि ति** ॥ परवल्लिङ्गतापवादः । ननु अहोरात्र इति समाहारद्वन्द्वे 'स नपुंसकम्' इति नपुंसकत्वप्रसङ्गः । नच नपुंसकत्वस्याप्ययं पुंस्त्वविधिरपवाद इति वाच्यम् । "पुरस्तादपवादाः अनन्तरान्विधीन् बाधन्ते नोत्तरान्" इति न्यायेन अस्य पुंस्त्वविधेः परवल्लिङ्गतामात्रापवादत्वात् । तस्मादहोरात्राविति इतरेतरद्वन्द्व एव इहोदाहर्तुमुचित इत्यत आह । **अनन्तरत्वादिति** ॥ **अयमिति** ॥ पुंस्त्वविधिरिति शेषः । **अहोरात्र इति** ॥ अहश्च रात्रिश्च तयोस्समाहार इति द्वन्द्वे परत्वान्नपुंसकत्वम्, अपवादत्वात् परवल्लिङ्गमपि बाधित्वा अनेन पुंस्त्वम् । 'अहस्सर्वैकदेश' इत्यच् । **पूर्वाह्ण इति** ॥ अहः पूर्वमित्येकदेशिसमासः । 'राजाहःसखिभ्यः' इति टच् । 'अहोऽह्नः' इत्यह्नादेशः । परवल्लिङ्गं नपुंसकञ्च बाधित्वा पुंस्त्वम् । **द्व्यह इति** ॥ द्वयोरह्नोस्समाहारः इति विग्रहे द्विगुः, टच्, 'न सङ्ख्यादेस्समाहारे' इत्यह्नादेशनिषेधः । परवल्लिङ्गं बाधित्वा पुंस्त्वम् । उत्तरपदस्याह्नशब्दस्य अकारान्तत्वाभावान्न ङीत्वम् । समासान्तस्य समासभक्तत्वात् । **सङ्ख्यापूर्व** ॥ लिङ्गानुशासनसूत्रमिदम् । नत्वष्टाध्यायीस्थं सूत्रम्, नापि वार्तिकम्' भाष्ये अदर्शनात् । 'रात्राह्नाहाः पुंसि' इत्यस्यायमपवादः । **द्विरात्रमिति** ॥ समाहारद्विगुः । 'अहस्सर्वैकदेश' इत्यच् ।

८१५। अपथं नपुंसकम्। (२-४-३०)

'तत्पुरुषः' इत्येव। अन्यत्र तु, अपथो देशः। कृतसमासान्तनिर्देशान्नेह। अपन्थाः।

८१६। अर्धर्चाः पुंसि च। (२-४-३१)

अर्धर्चादयः शब्दाः पुंसि क्लीबे च स्युः। अर्धर्चः—अर्धर्चम्। ध्वजः—ध्वजम्। एवं तीर्थशरीरमण्डपीयूषदेहाङ्कुशकलशेत्यादि।

८१७। जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम्। (१-२-५८)

एकोऽप्यर्थो वा बहुवद्भवति। ब्राह्मणाः पूज्याः—ब्राह्मणः पूज्यः।

८१८। अस्मदो द्वयोश्च। (१-२-५९)

एकत्वे द्वित्वे च विवक्षितेऽस्मदो बहुवचनं वा स्यात्। वयं ब्रूमः। पक्षेऽहं ब्रवीमि। 'आवां ब्रूवः' इति वा। 'सविशेषणस्य प्रतिषेधः' (वा ७२१)। पटुरहं ब्रवीमि।

८१९। फल्गुनीप्रोष्ठपदानां च नक्षत्रे। (१-२-३०)

गणरात्रमिति ॥ गणशब्दो बहुपर्यायः, 'बहुगणवतु' इति सङ्ख्यात्वम्। गणानां रात्रीणां समाहार इति द्विगुः, अच्। **अपथन्नपुंसकम्** ॥ न पन्थाः इति विग्रहे नञ्समासे नञो नस्य लोपे 'ऋक्पूः' इत्यप्रत्यये टिलोपे अपथशब्दः, स नपुंसकमित्यर्थः। परवल्लिङ्गतापवादः। **तत्पुरुष इत्येवेति** ॥ 'परवल्लिङ्गम्' इत्यतदस्तनुवृत्तेरिति भावः। द्वन्द्वग्रहणन्तु नानुवर्तते। अयोग्यत्वात्। **अन्यत्र त्विति** ॥ बहुव्रीहावित्यर्थः। **अपन्थाः इति** ॥ 'पथो विभाषा' इति समासान्तविकल्पः। 'पथस्सङ्ख्याव्ययादेः' इति वक्ष्यमाणवार्तिकेन गतार्थमेवेदं सूत्रम्। **अर्धर्चाः** ॥ बहुवचनात्तदादीनां ग्रहणमित्याह। **अर्धर्चादय इति** ॥ **अर्धर्चमिति** ॥ ऋचोऽर्धमिति विग्रहे 'अर्धनपुंसकम्' इति समासः। 'ऋक्पूः' इति अच्। परवल्लिङ्गं स्त्रीत्वं बाधित्वा पुन्नपुंसकत्वविकल्पः। **जात्याख्यायां** ॥ आकृत्यधिकरणन्यायेन घटादिशब्दानां जातिवाचकत्वाज्जातेश्चैकत्वादेकवचनमेव स्यादित्यारम्भः। जातिशब्दे एकत्वे बहुवचनं वा स्यादित्यक्षरार्थः। तथा सति ब्राह्मणाः भोज्याः इत्यादौ विशेषणान्न स्यादित्याशङ्क्य एकस्मिन्नर्थे विद्यमानश्शब्दः बहूनर्थान् वक्ति। एकार्थो बहुवद्भवतीति लभ्यते इत्यभिप्रेत्य आह। **एकोऽप्यर्थ इति** ॥ बहुत्वप्रयुक्तं कार्यं लभते इत्यर्थः। **अस्मदो द्वयोश्च** ॥ **सविशेषणस्येति** ॥ "त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः" इत्यत्र तु अवयवगतबहुत्वाभिप्रायं बहुवचनम्। **फल्गुनी** ॥ नक्षत्रे इति प्रथमाद्विवचनम्। नक्षत्रे यद्यभिधीयेते इत्यर्थः। चेन द्वयोरित्यनुकर्षः। तदाह।

द्वित्वे बहुत्वप्रयुक्तं कार्यं वा स्यात् । पूर्वे फल्गुन्यै—पूर्वाः फल्गुन्यः । पूर्वे प्रोष्ठपदे—पूर्वाः प्रोष्ठपदाः । 'नक्षत्रे' किम् । पूर्वफल्गुन्यौ माणविके ।

८२० । तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् । (१-२-६३)

बहुत्वं द्वित्ववद्भवति । तिष्यश्च पुनर्वसू च तिष्यपुनर्वसू । 'तिष्य—' इति किम् । विशाखानूराधाः 'नक्षत्र' इति किम् । तिष्यपुनर्वसवो माणवकाः ।

८२१ । स नपुंसकम् । (२-४-१७)

समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं स्यात् । परवल्लिङ्गापवादः । पञ्चगवम् । दन्तोष्ठम् । 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः' (वा १५५६) । पञ्चपूली । 'आबन्तो वा' (वा १५५७) । पञ्चखट्वम्—पञ्चखट्वी । 'अनो नलोपश्च वा च द्विगुः स्त्रियाम्' (वा १५५८) । पञ्चतक्षी—पञ्चतक्षम् ।

द्वित्वे इति ॥ पूर्वे प्रोष्ठपदे इति ॥ स्त्रीत्वादौङश्शीभावः । "प्रोष्ठपदा भाद्रपदा स्त्रियाम्" इत्यमरः । **पूर्वफल्गुन्यौ माणविके इति ॥** फल्गुनीनक्षत्रयुक्तकाले जाते इत्यर्थः । 'नक्षत्रेण युक्तः' इत्यण् । 'लुबविशेषे' इति लुप् । ततो जातार्थे 'फल्गुन्यषाढाभ्यां टानौ' इति टः । टित्त्वात् ङीप् । **तिष्यपुनर्वस्वोः ॥ विशाखानूराधा इति ॥** विशाखे च अनूराधाश्चेति विग्रहः । **तिष्यपुनर्वसव इति ॥** तिष्यश्च पुनर्वसू चेति विग्रहः । तिष्यशब्दात् पुनर्वसूशब्दाच्च 'नक्षत्रेण युक्तः' इत्यण् । 'लुबविशेषे' इति लुप् । ततो जातार्थे सन्धिवेलाद्यण् । 'श्रविष्ठाफल्गुनी' इत्यादिना लुक् । जात्याख्यायामित्यादिचतुस्सूत्र्या अत्र सङ्गतिश्चिन्त्या । **स नपुंसकम् ॥** 'द्विगुरेकवचनम्' इति द्विगुः, 'द्वन्द्वश्च प्राणि' इति द्वन्द्वश्च तच्छब्देन परामृश्यते । तौ च समाहारार्थावेव विवक्षितौ, व्याख्यानात् । तदाह । **समाहारे इति ॥ पञ्चगवमिति ॥** पञ्चानां गवां समाहार इति द्विगुः । **दन्तोष्ठमिति ॥** दन्ताश्च ओष्ठौ चेति विग्रहः । 'द्वन्द्वश्च प्राणि' इति समाहारद्वन्द्वः । **अकारान्तेति ॥** अकारान्तम् उत्तरपदं यस्येति विग्रहः । 'स नपुंसकम्' इत्यस्यापवादः । **पञ्चपूलीति ॥** समाहारद्विगुः, स्त्रीत्वं, 'द्विगोः' इति ङीप् । **आबन्तो वेति ॥** स्त्रियां वेति वक्तव्यमित्यर्थः । **पञ्चखट्वमिति ॥** समाहारद्विगुः । नपुंसकत्वे ह्रस्वः । **पञ्चखट्वीति ॥** उपसर्जनह्रस्वत्वे अदन्तत्वात्, 'द्विगोः' इति ङीप् । **अनो नलोपश्चेति ॥** अन इत्यावर्तते । एकं प्रथमया विपरिणतं द्विगुरित्यत्रान्वेति । तदन्तविधिः । अन्नन्तो द्विगुः स्त्रियां वा स्यात्, अनो नस्य लोपस्स्यादित्यर्थः । वाग्रहणं स्त्रियामित्यत्रैव सम्बध्यते, नतु, नलोपेऽपि । तेन स्त्रीत्वाभावेऽपि नलोपः । **पञ्चतक्षीति ॥** पञ्चानां तक्ष्णां समाहार इति द्विगुः, स्त्रीत्वं, नलोपः, 'द्विगोः' इति ङीबिति भावः । **पञ्चतक्षमिति ॥** समाहारद्विगुः । स्त्रीत्वाभावपक्षे 'स नपुंसकम्' इति

'पात्राद्यन्तस्य न' (वा १५५९)। **पञ्चपात्रम्**। **त्रिभुवनम्**। **चतुर्युगम्**। 'पुण्यसुदिनाभ्यामहः क्लीबतेष्टा' (वा १५५६)। **पुण्याहम्**। **सुदिनाहम्**। 'पथः सङ्ख्याव्ययादेः (वा १५५४)। **सङ्ख्याव्ययादेः परः कृतसमासान्तः पथशब्दः क्लीबमित्यर्थः**। त्रयाणां पन्थास्त्रिपथम्। विरूपः पन्थाः विपथम्। कृतसमासान्तनिर्देशान्नेह। सुपन्थाः। अतिपन्थाः। 'सामान्ये नपुंसकम्' (वा ५०४३)। मृदु पचति। प्रातः कमनीयम्।

नपुंसकत्वं, नलोप इति भावः। न चान्तर्वर्तिनीं विभक्तिमाश्रित्य तक्षन्शब्दस्य सुबन्तत्वेन पदत्वात् 'नलोपः प्रातिपदिक' इत्यनेन नलोपो भविष्यतीति वाच्यम्। 'उत्तरपदत्वे च' इति, प्रत्ययलक्षणनिषेधात्। **पात्राद्यन्तस्य नेति** ॥ पात्रादिर्गणः। तदन्तस्य समाहारद्विगोः न स्त्रीत्वमिति वक्तव्यमित्यर्थः। **पञ्चपात्रम्, त्रिभुवनम्, चतुर्युगमिति** ॥ स्त्रीत्वाभावे 'स नपुसकम्' इति नपुंसकत्वमिति भावः। **पुण्येति** ॥ पुण्यसुदिनाभ्यां परः यः अहन्शब्दः तदन्तस्य तत्पुरुषस्य नपुंसकत्वं वक्तव्यमित्यर्थः। 'रात्राह्न' इत्यस्यापवादः। **पुण्याहमिति**॥ पुण्यम् अहरिति कर्मधारयः, 'राजाहः' इति टच्, टिलोपः। 'उत्तमैकाभ्याञ्च' इति अह्नादेशनिषेधः। **सुदिनाहमिति** ॥ सुदिनम् अहरिति कर्मधारयः, टच्, टिलोपः, प्रशस्तपर्यायस्सुदिनशब्द इति न पौनरुक्त्यम्। **पथस्सङ्ख्याव्ययादेरिति** ॥ नपुंसकत्वं वक्तव्यमिति शेषः। सङ्ख्याव्ययेति समाहारद्वन्द्वः। सङ्ख्याव्ययमादिरिति कर्मधारयः, दिग्योगे पञ्चमी, पर इति शेषः, पथ इति कृतसमासान्तादकारान्तात् प्रथमा। तदाह। **सङ्ख्याव्ययादेरिति** ॥ परवल्लिङ्गतापवादः। **त्रिपथमिति** ॥ 'ऋक्पूः' इति अप्रत्ययः, टिलोपः। एवं विपथमित्यपि। 'प्रादयो गताद्यर्थे' इति समासः। **सुपन्थाः, अतिपन्थाः इति** ॥ 'स्वती पूजायाम्' इति समासः। 'न पूजनात्' इति समासान्तनिषेधः। आवश्यकत्वादनेन सिद्धे 'अपथन्नपुंसकम्' इति न कार्यम्। **सामान्ये नपुंसकमिति** ॥ न्यायसिद्धमेतत्। विशेष्यविशेषणासन्निधाने सति स्त्रीत्वपुंस्त्वयोरनभिव्यक्तौ "उभयोरन्तरं यच्च तदभावे नपुंसकम्" इति लक्षणलक्षितनपुंसकत्वस्यैव न्याय्यत्वात्। अत एव 'दाण्डिनायन' इति सूत्रभाष्ये एकश्रुतिस्स्वरसर्वनाम, नपुंसकं लिङ्गसर्वनामेत्युक्तम्। **मृदु पचतीति** ॥ क्रियाविशेषणमिदं द्वितीयान्तम्। पचेर्हि विक्लित्त्यनुकूलव्यापारोऽर्थः। तत्र विक्लित्त्यंशे मृदुत्वमन्वेति। विक्लित्तिश्च व्यापारे साध्यत्वेनान्वेति। तथाच मृदु पाकं करोतीत्यर्थः। तथाच धात्वर्थव्यापारं प्रति कर्मीभूतेन विक्लित्त्यंशेन सामानाधिकरण्यात् मृद्विति द्वितीया। यत्र तु धात्वर्थः, करणत्वेनान्वेति "यजेत स्वर्गकामः" इत्यादौ तत्र यागेन स्वर्गं कुर्यादित्यर्थः। तत्र क्रियाविशेषणस्य तृतीयान्तत्वमेव, "ज्योतिष्टोमेन यजेत स्वर्गकामः" इत्यादाविति अन्यत्र विस्तरः। **प्रातः कमनीयमिति** ॥ रमणीयमित्यर्थः। अत्रापि प्रातरित्यव्ययस्य विशेष्यस्यालिङ्गत्वात्

---

१. इदञ्च युक्तिसिद्धम्। नियतलिङ्गत्वाभावे विशेष्यविशेषासन्निधाने च सर्वलिङ्गवाचकस्य 'नपुंसकं लिङ्गसर्वनाम' इति 'दाण्डिनायन–' (६–४–१७४) सूत्रभाष्ये न्याय्यत्वेन दर्शितत्वात्।

८२२ । तत्पुरुषोऽनञ्कर्मधारयः । (२-४-१९)

अधिकारोऽयम् ।

८२३ । संज्ञायां कन्थोशीनरेषु । (२-४-२०)

कन्थान्तस्तत्पुरुषः क्लीबं स्यात्साचेदुशीनरदेशोत्पन्नायाः कन्थायाः संज्ञा। सुशमस्यापत्यानि सौशमयः । तेषां कन्था सौशमिकन्थम् । 'संज्ञायाम्' किम् । वीरणकन्था । 'उशीनरेषु' किम् । दाक्षिकन्था ।

८२४ । उपज्ञोपक्रमं तदाद्याचिख्यासायाम् । (२-४-२१)

उपाज्ञान्तः उपक्रमान्तश्च तत्पुरुषो नपुंसकं स्यात्, तयोरुपज्ञायमानोपक्रम्यमाणयोरादिः प्राथम्यं चेदाख्यातुमिष्यते । पाणिनेरुपज्ञा पाणिन्युपज्ञं, ग्रन्थः । नन्दोपक्रमं, द्रोणः ।

८२५ । छाया बाहुल्ये । (२-४-२२)

छायान्तस्तत्पुरुषो नपुंसकं स्यात्पूर्वपदार्थबाहुल्ये । इक्षूणां छाया इक्षुच्छायम् । 'विभाषा सेना—' (सू ८२८) इति विकल्पस्यायमपवादः । 'इक्षुच्छायानिषादिन्यः' इति तु 'आ समन्तान्निषादिन्यः' इत्याङ्श्लेषो बोध्यः ।

तद्विशेषणस्य कमनीयशब्दस्यानव्ययस्य लिङ्गविशेषावगमकत्वाभावात् नपुंसकत्वमेवेति भावः । इदञ्चानियतलिङ्गविषयम् । तेन आदिं पचति प्रातरादिरित्यत्र न भवति । आदिशब्दस्य नियतलिङ्गत्वात् । **तत्पुरुषोऽनञ्** ॥ नञ्समासकर्मधारयाभ्यां भिन्नस्तत्पुरुषो वक्ष्यमाणकार्यभागित्यर्थः । तदाह । **अधिकारोऽयमिति** ॥ 'परवल्लिङ्गम्' इत्यतः प्रागिति शेषः । **संज्ञायां कन्था** ॥ सुगममेव । **उपज्ञा** ॥ उपज्ञायते प्रथमं ज्ञायत इत्युपज्ञा। 'स्त्रियां क्तिन्' इत्यधिकारे 'आतश्चोपसर्गे' इति कर्मण्यङ् । उपक्रम्यते आरभ्यते इत्युपक्रमः । कर्मणि घञ् । 'नोदात्तोपदेशस्य' इति वृद्धिनिषेधः । उपज्ञाचोपक्रमश्चेति समाहारद्वन्द्वः । तत्पुरुषः इत्यस्य विशेषणमिदम्, तदन्तविधिः, 'स नपुंसकम्' इत्यतो नपुंसकमित्यर्थः । तदाह । **उपज्ञान्तः उपक्रमान्तश्चेति** ॥ तच्छब्देन उपज्ञोपक्रमौ विवक्षितौ । आदिशब्दो भावप्रधानः प्राथम्ये वर्तते । तयोरादिः प्राथम्यं तदादिः । तस्य आचिख्यासा आख्यातुमिच्छा, विवक्षायामिति यावत् । तदाह । **तयोरादिरित्यादि** ॥ **पाणिनेरुपज्ञेति** ॥ कर्तरि षष्ठी । **पाणिन्युपज्ञं ग्रन्थ इति** ॥ पाणिनिना प्रथमं ज्ञायमान इत्यर्थः । इदं प्रकरणं परवल्लिङ्गत्वस्य विशेष्यनिघ्नत्वस्य चापवादः । **नन्दोपक्रमं द्रोण इति** ॥ नन्देनारभ्यमाण इत्यर्थः । कर्तरि षष्ठ्या समासः । **छाया बाहुळ्ये** ॥ छायया तत्पुरुषस्य विशेषणात् तदन्तविधिमभिप्रेत्य आह । **छायान्त इति** ॥ **पूर्वपदार्थेति** ॥ कस्य बाहुळ्ये इत्याकाङ्क्षायाम् आपादकद्रव्यनिमित्तकत्वात् छायायाः तद्बाहुळ्ये इति गम्यते । तच्चापादकद्रव्यमर्थात् पूर्वपदार्थभूतमिति भावः ।

८२३। सभा राजाऽमनुष्यपूर्वा। (२-४-२३)

राजपर्यायपूर्वोऽमनुष्यपूर्वश्च सभान्तस्तत्पुरुषो नपुंसकं स्यात्। इनसभम्। ईश्वरसभम्। 'पर्यायस्यैवेष्यते' (वा ५१९)। नेह। राजसभा। चन्द्रगुप्तसभा। अमनुष्यशब्दो रूढ्या रक्षःपिशाचादीनाह। रक्षःसभम्। पिशाचसभम्।

८२७। अशाला च। (२-४-२४)

सङ्घातार्था या सभा तदन्तस्तत्पुरुषः क्लीबं स्यात्। स्त्रीसभम्। स्त्रीसङ्घात इत्यर्थः। 'अशाला' किम्। धर्मसभा। धर्मशालेत्यर्थः।

८२८। विभाषा सेनासुराच्छायाशालानिशानाम्। (२-४-२५)

एतदन्तस्तत्पुरुषः क्लीबं वा स्यात्। ब्राह्मणसेनम्—ब्राह्मणसेना। यवसुरम्—यवसुरा। कुड्यच्छायम्—कुड्यच्छाया। गोशालम्—गोशाला। श्वनिशम्—श्वनिशा। 'तत्पुरुषोऽनञ्कर्मधारयः' (सू ८२२) इत्यनुवृत्तेर्नेह। दृढसेनो राजा। असेना। परमसेना।

बाहुल्ये किम्। कुड्यस्य छाया कुड्यच्छाया। **सभा** ॥ राजा च अमनुष्यश्च राजामनुष्यौ, तौ पूर्वौ यस्यास्सा राजाऽमनुष्यपूर्वा इति विग्रहः। सभया तत्पुरुषविशेषणात्तदन्तविधिः। राजशब्दो राजपर्याय एव विवक्षितः, न तु राजन्शब्दः। तदाह। **राजपर्यायपूर्व इति** ॥ **इनसभमीश्वरसभमिति** ॥ इनस्य ईश्वरस्य वा सभेति विग्रहः। इनेश्वरशब्दौ राजपर्यायाविति भावः। पर्यायमात्रग्रहणे प्रमाणन्दर्शयति। **पर्यायस्यैवेष्यत इति** ॥ भाष्यकृतेति शेषः। 'स्वं रूपम्' इति सूत्रे 'क्वचित्पर्यायवचनस्यैव राजाद्यर्थः' इति वार्तिकं भाष्ये पठितमिति भावः। **राजसभेति** ॥ राजन्शब्दपूर्वकत्वेऽप्यत्र राजपर्यायपूर्वकत्वं नास्तीति भावः। **चन्द्रगुप्तसभेति** ॥ चन्द्रगुप्त इति राजविशेषस्य नाम। न तु तत्पर्याय इति भावः। नन्वमनुष्यपूर्वकत्वात् देवसभेत्यादावपि स्यादित्यत आह। **अमनुष्यशब्दो रूढ्येति** ॥ असुरशब्दो दैत्यानिवेति भावः। **अशाला च** ॥ अशालार्थकेत्यर्थः। सभाशब्दः शालायां सङ्घातार्थे च वर्तते। तत्र राजाऽमनुष्यपूर्वकस्य शालावाचिनस्सभाशब्दस्य पूर्वसूत्रे क्लीबत्वमुक्तम्। सम्प्रति सङ्घातवाचिनस्सभाशब्दस्य क्लीबत्वमुच्यत इत्याह। **सङ्घातार्था या सभेति** ॥ सभाशब्द इत्यर्थः। **विभाषा सेना** ॥ प्रथमार्थे षष्ठीतत्पुरुष इत्यनुवृत्तं सेनादिभिर्विशेष्यते। तदन्तविधिः। तदाह। **एतदन्त इति** ॥ प्रत्येकाभिप्रायमेकवचनम्। **श्वनिशमिति** ॥ शुनो निशेति विग्रहः। कृष्णचतुर्दशीत्याहुः। "शुनश्चतुर्दश्यामुपवसतः पश्यामः" इति तिर्यगधिकरणे शाबरभाष्ये स्थितम्। **दृढसेन इति** ॥ दृढा सेना यस्येति बहुव्रीहिः। तत्पुरुषत्वाभावात् न क्लीबत्वविकल्पः। **असेनेति** ॥ तत्पुरुषत्वेऽपि नञ्समासत्वान्न क्लीबत्वविकल्पः। **परमसेनेति** ॥ कर्मधारयत्वात् न क्लीबत्वम्। 'तत्पुरुषोऽनञ्कर्मधारयः' इत्यधिकारस्य अत्रैव प्रयोजनमिति कैयटे प्रपञ्चितम् ॥

इति श्रीमद्वासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां
बालमनोरमायां तत्पुरुषसमासनिरूपणं समाप्तम्।

श्रीरस्तु ।

अथ बहुव्रीहिसमासप्रकरणम् ।

८२९ । शेषो बहुव्रीहिः । (२-२-२३)

अधिकारोऽयम् । 'द्वितीया श्रित–' (सू ६८६) इत्यादिना यस्य त्रिकस्य विशिष्य समासो नोक्तः स शेषः प्रथमान्त इत्यर्थः ।

८३० । अनेकमन्यपदार्थे । (२-२-२४)

अनेकं प्रथमान्तमन्यपदार्थे वर्तमानं वा समस्यते स बहुव्रीहिः । अप्रथमाविभक्त्यर्थे बहुव्रीहिरिति समानाधिकरणानामिति च फलितम् । प्राप्तमुदकं यं सः प्राप्तोदको ग्रामः । ऊढरथोऽनड्वान् । उपहृतपशू रुद्रः । उद्धृतौदना

शेषो बहुव्रीहिः ॥ त्रिकस्येति ॥ विभक्तेरित्यर्थः । ननु 'द्वितीया श्रित' इति 'तृतीया तत्कृत' इति 'चतुर्थी तदर्थ' इति 'पञ्चमी भयेन' इति 'सप्तमी शौण्डैः' इति 'षष्ठी च' इति द्वितीयादिविभक्तीनां षण्णां समासो विहितः । विशेषणं विशेष्येणेत्यादिना तु प्रथमाया अपि समासो विहितः, अतश्शेषविभक्तिर्दुर्लभेत्यत आह । **विशिष्येति ॥** विशेषणसमासस्य वस्तुतः प्रथमाविभक्तौ प्रवृत्तावपि प्रथमाविभक्तिं विशिष्य उच्चार्य विधानाभावात् समासविधिषु विशिष्टनिर्दिष्टद्वितीयादिविभक्तिपदकापेक्षया शेषः प्रथमाविभक्तिरिति भावः । तदाह । **प्रथमान्त इत्यर्थ इति ॥** एतच्च भाष्ये स्पष्टम् । **अनेकमन्यपदार्थे ॥ प्रथमान्तमिति ॥** शेषग्रहणानुवृत्तिलभ्यमिदम् । एवञ्च सुप्सुपेति नानुवर्तते । प्रयोजनाभावात् । अनेकं सुबन्तमिति पाठेऽपि प्रथमान्तमित्यर्थः । **अन्येति ॥** उपस्थितप्रथमातिरिक्तेत्यर्थः । एवञ्च पञ्चभिर्भुक्तमन्नं यस्य सः पञ्चभुक्तः इति बहुव्रीहिनिवृत्त्यर्थं 'बहुव्रीहिस्समानाधिकरणानामिति वक्तव्यम्' इति वार्तिकं यद्भाष्ये स्थितं, यच्च वृष्टे देवे यो गतः सः वृष्टदेव इति बहुव्रीहिनिवृत्त्यर्थं 'अप्रथमाविभक्त्यर्थे बहुव्रीहिर्वक्तव्यः' इति वार्तिकन्तदुभयमपि न कर्तव्यमित्याह । **अप्रथमाविभक्त्यर्थे बहुव्रीहिरिति समानाधिकरणानामिति च फलितमिति ॥** शेषग्रहणादिति शेषः । शेषग्रहणात् प्रथमान्त इति लभ्यत इति हि भाष्यम् । पञ्चभिर्भुक्तमस्य इत्यत्र च समस्यमानपदयोरेकस्मिन्प्रथमान्तत्वान्न बहुव्रीहिरिति फलितम् । प्रथमान्तातिरिक्तस्य पदस्यार्थे वर्तमानं समस्यते इत्यर्थाश्रयणाद्वृष्टे देवे गतः इत्यत्रापि न बहुव्रीहिरिति फलितमिति

स्थाली। पीताम्बरो हरिः। वीरपुरुषको ग्रामः। प्रथमार्थे तु न। वृष्टे देवे गतः। व्यधिकरणानामपि न। पञ्चभिर्भुक्तमस्य। 'प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः' (वा १३६०)। प्रपतितः पर्णः प्रपर्णः। 'नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः। (वा १३६१)। अविद्यमानः पुत्रोऽपुत्रः। 'अव्ययानाञ्च' उच्चैर्मुखः। सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च, सप्तम्यन्तं उपमानञ्च यस्य तस्य पदान्तरेण समासः उत्तरपदलोपश्च भवतीत्यर्थः। कण्ठेस्थः काळः यस्य

भावः। तत्र द्वितीयार्थबहुव्रीहिमुदाहरति। **प्राप्तमिति** ॥ 'गत्यर्थाकर्मक' इति कर्तरि क्तः। अत्र विग्रहवाक्ये ग्रामकर्मकप्राप्तिकर्तृ उदकमित्येव ग्रामस्य विशेषणतया, विशेष्यत्वेन तु प्राप्तस्य उदकस्य बोधः। समासे तु एकार्थीभावमहिम्ना उदककर्तृकप्राप्तिकर्मीभूतः ग्राम इत्येवं ग्रामस्य विशेष्यतया, तद्विशेषणतया तु प्राप्तस्य उदकस्य बोधः। एवमुत्तरत्रापि विशेषणविशेष्यभावव्यत्यासो ज्ञेयः। अथ तृतीयार्थबहुव्रीहिमुदाहरति। **ऊढरथोऽनड्वानिति** ॥ ऊढो रथो येनेति विग्रहः। अथ चतुर्थ्यर्थबहुव्रीहिमुदाहरति। **उपहृतपशू रुद्रः इति** ॥ उपहृतः पशुः यस्मै इति विग्रहः। अथ पञ्चम्यर्थबहुव्रीहिमुदाहरति। **उद्धृतौदना स्थालीति** ॥ उद्धृतः ओदनः यस्या इति बहुव्रीहिः। अथ षष्ठ्यर्थबहुव्रीहिमुदाहरति। **पीताम्बरो हरिरिति** ॥ पीतमम्बरं यस्येति विग्रहः। अथ सप्तम्यर्थबहुव्रीहिमुदाहरति। **वीरपुरुषको ग्राम इति** ॥ वीराः पुरुषाः यस्मिन्निति विग्रहः। 'शेषाद्विभाषा' इति कप्। अत्र कर्मादीनां समासेनाभिहितत्वात् प्रथमैव। **प्रथमार्थे तु नेति** ॥ अन्यपदार्थशब्देन प्रथमान्तातिरिक्तद्वितीयाद्यन्तार्थस्यैव विवक्षितत्वादिति भावः। **व्यधिकरणानामपि नेति** ॥ अनेकं प्रथमान्तमित्युक्तेरिति भावः। **प्रादिभ्यः** ॥ प्रादिभ्यः परं यद्धातुजप्रकृतिकप्रथमान्तं तस्य अन्येन प्रथमान्तेन बहुव्रीहिर्वाच्यः। तत्र बहुव्रीहौ प्रादिभ्यः परस्य उत्तरपदस्य धातुजस्य लोपश्च विकल्पेन वाच्यः इत्यर्थः। अत्र बहुव्रीहिरित्यनुवादः, लोपस्यैव विधिः। **प्रपतितः पर्ण इति** ॥ प्रकृष्टं पतितं प्रपतितम्। 'प्रादयो गताद्यर्थे' इति समासः। प्रपतितं पर्णं यस्मादिति विग्रहः। **प्रपर्ण इति** ॥ प्रपतितेति पूर्वपदे धातुजस्य उत्तरपदस्य लोपे रूपम्। **नञोऽस्त्यर्थानां** ॥ नञः परेषामस्त्यर्थवाचिनां सुबन्तानां बहुव्रीहिर्वाच्यः। तत्रास्त्यर्थवाचिनामुत्तरपदभूतानां लोपश्च वा वक्तव्य इत्यर्थः। **अविद्यमानः पुत्र इति** ॥ न विद्यमान इति नञ्समासः। नञो नलोपः। अविद्यमानः पुत्रो यस्येति विग्रहः। **अपुत्र इति** ॥ अस्त्यर्थकविद्यमानशब्दस्य लोपे रूपम्। अत्रापि बहुव्रीहिरित्यनुवादः। **अव्ययानाञ्चेति** ॥ बहुव्रीहिर्वाच्य इति शेषः। **उच्चैर्मुख इति** ॥ उच्चैरित्यस्याधिकरणशक्तिप्रधानतया सप्तम्यन्तत्वेन प्रथमान्तत्वाभावादप्राप्ते बहुव्रीहौ वचनम्। **सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्चेति** ॥ सप्तम्यन्तोपमानसहिते पूर्वपदे यस्य तत् सप्तम्युपमानपूर्वपदम्, तस्य समस्तपदस्य पदान्तरेण बहुव्रीहिर्वाच्यः। समस्तपदात्मके पूर्वपदे यदुत्तरपदन्तस्य लोपश्च वक्तव्य इत्यर्थः। तत्र सप्तम्यन्तसहितसमस्तपूर्वपदकं बहुव्रीहिमुदाहरति। **कण्ठेस्थः काळो यस्य स**

सः कण्ठेकाळः । उष्ट्रमुखमिव मुखं यस्य सः उष्ट्रमुखः । 'सङ्घातविकारषष्ठ्याश्चोत्तरपदलोपश्च' । केशानां सङ्घातश्चूडा यस्य सः केशचूडः । सुवर्णस्य विकारः अलङ्कारो यस्य सः सुवर्णालङ्कारः । अस्तिक्षीरादयश्च । 'अस्ति' इति विभक्तिप्रतिरूपकमव्ययम् । अस्तिक्षीरा गौः ।

८३१ । स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु । (६-३-३४)

भाषितपुंस्कादनूङ् ऊङोऽभावोऽस्यामिति बहुव्रीहिः निपातनात्पञ्चम्या अलुक्, षष्ठ्याश्च लुक् । तुल्ये प्रवृत्तिनिमित्ते यदुक्तपुंस्कं तस्मात्पर ऊङो-

कण्ठेकाळ इति ॥ 'सुपि स्थः' इति कः । कण्ठे तिष्ठतीति कण्ठेस्थः । उपपदसमासः । 'अमूर्धमस्तकात्' इति सप्तम्या अलुक् । कण्ठेस्थ इति समस्तपदम् । तस्य काळशब्देन बहुव्रीहिरित्यनुवादः । सुपो लुक् । तत्र कण्ठेस्थेत्येतद्बहुव्रीहेः पूर्वपदं सप्तम्यन्तपदसहितं तस्मिन् यदुत्तरपदं स्थेत्येतत् तस्य लोपो वाचनिकः । कण्ठेकाळ इति सप्तम्यन्तपदघटितसमासगर्भो बहुव्रीहिः । तदवयवभूतसप्तम्याः 'अमूर्धमस्तकात्' इत्यलुक् । अथ उपमानसहितसमस्तपूर्वपदकं बहुव्रीहिमुदाहरति । **उष्ट्रमुखमिव मुखं यस्य सः उष्ट्रमुख इति** ॥ उष्ट्रस्य मुखमिव इति विग्रहे षष्ठीतत्पुरुषः । मुखशब्दो मुखसदृशे लाक्षणिक इति सूचयितुमिवशब्दः । उष्ट्रमुखमिव मुखं यस्येति विग्रहे बहुव्रीहिरित्यनुवादः । तत्र उष्ट्रमुखेत्येतद्बहुव्रीहेः पूर्वपदं तस्मिन् उत्तरपदस्य मुखशब्दस्य लोपो वाचनिकः । **सङ्घातविकारषष्ठ्याश्चोत्तरपदलोपश्चेति** ॥ षष्ठ्यन्तात्परस्य उत्तरपदस्य पदान्तरेण बहुव्रीहिर्वाच्यः । षष्ठ्यन्तादुत्तरपदस्य लोपश्च । **केशानां सङ्घातश्चूडा यस्य सः केशचूड इति** ॥ सङ्घातशब्दस्य लोपे रूपम् । **सुवर्णस्य विकारोऽलङ्कारः यस्य सः सुवर्णालङ्कार इति** ॥ अत्र विकारशब्दस्य उत्तरपदस्य लोपे रूपम् । **अस्तिक्षीरादयश्चेति** ॥ अस्तिक्षीरादयो बहुव्रीहौ उपसङ्ख्येया इत्यर्थः । अस्तिक्षीरा गौरित्यत्र अस्तीत्यस्य तिङन्ततया प्रथमाविभक्त्यन्तत्वाभावादप्राप्ते बहुव्रीहाविदं वचनम् । वस्तुतस्तु वचनमिदं नारब्धव्यमित्याह । **अस्तीति विभक्तिप्रतिरूपकमव्ययमिति** ॥ विभक्तिप्रतिरूपकत्वेन निपातितत्वादस्तीति स्वरादिनिपातमव्ययमित्यव्ययसमानार्थकम् । ततस्सोः 'अव्ययादाप्सुपः' इति लुकि प्रत्ययलक्षणेन प्रथमान्तत्वादेव सिद्धेरिदं वचनं न कर्तव्यमिति भावः । तदुक्तं भाष्ये । "अस्तिक्षीरादिवचनं नवाव्ययत्वात्" इति । **स्त्रियाः पुंवत्** ॥ भाषितपुंस्कादनूङिति समस्तमेकपदं स्त्रिया इति षष्ठ्यन्तस्य विशेषणमित्यभिप्रेत्य व्याचष्टे । **भाषितपुंस्कादिति** ॥ भाषितपुंस्कादनूङित्यस्य व्याख्यानम् । ऊङोऽभाव इति अर्थाभावेऽव्ययीभावः, नञ्तत्पुरुषो वा । भाषितपुंस्कात् इति दिग्योगे पञ्चमी । पर इति प्रथमान्तमध्याहार्यम् । तथाच भाषितपुंस्कात् परः अनूङ् यस्येति विग्रहे बहुव्रीहिरिति फलति । ननु समासे सति पञ्चम्या लुक्प्रसङ्ग इत्यत आह । **निपातनात् पञ्चम्या अलुगिति** ॥

ऽभावो यत्र तथाभूतस्य स्त्रीवाचकस्य शब्दस्य पुंवाचकस्येव रूपं स्यात्समानाधिकरणे स्त्रीलिङ्गे उत्तरपदे, न तु पूरण्यां प्रियादौ च परतः। 'गोस्त्रियोः—' (सू ६५६) इति ह्रस्वः। चित्रा गावो यस्येति लौकिकविग्रहे 'चित्रा अस्' 'गौ अस्' इत्यलौकिकविग्रहे, चित्रगुः। रूपवद्भार्यः। चित्रा जरती गौर्यस्येति विग्रहे अनेकोक्तेर्बहूनामपि बहुव्रीहिः। अत्र केचित्। चित्राजरतीगुः—

इदमुपलक्षणम्। निपातनात् अप्रथमान्तस्यापि बहुव्रीहिः परशब्दलोपश्चेत्यपि बोध्यम्। यद्वा अत एव निपातनादप्रयुज्यमानेऽपि परशब्दे तदर्थे गम्ये पञ्चमी। नन्वेवमपि स्त्रिया इति षष्ठ्यन्तस्य 'भाषितपुंस्कादनूङ्' इति विशेषणं स्यात्, नहि भाषितपुंस्कादनूङ् इति षष्ठी श्रूयेतेत्यत आह। **षष्ठ्याश्च लुगिति** ॥ निपातनादित्यनुषज्यते। भाषितः पुमान् येन तद्भाषितपुंस्कम् तदस्यास्ति इति अर्शआद्यच्। पुंस्त्वे स्त्रीत्वे च एकप्रवृत्तिनिमित्तकमिति यावत्। 'तृतीयादिषु भाषितपुंस्कम्' इत्यत्र व्याख्यातमेतत्। तदाह। **तुल्ये प्रवृत्तिनिमित्ते इति** ॥ **स्त्रीवाचकस्य शब्दस्येति** ॥ स्त्रीलिङ्गस्येत्यर्थः। स्त्रिया इति षष्ठ्यन्तम्, न स्त्रीप्रत्ययपरमिति भावः। पुंवदिति रूपातिदेशः, पुंस इव पुंवदिति षष्ठ्यन्ताद्वतिः। तदाह। **पुंवाचकस्येव रूपमिति** ॥ स्त्रियामिति सप्तम्यन्तमपि न स्त्रीप्रत्ययपरं, किन्तु स्त्रीलिङ्गपरं 'तच्चालुगुत्तरपदे' इत्यधिकृते उत्तरपदेऽन्वेति। तदाह। **स्त्रीलिङ्गे उत्तरपदे इति** ॥ अपूरणीप्रियादिष्वित्येतद्व्याचष्टे। **नतु पूरण्यां प्रियादौ च परत इति** ॥ पूरणीति स्त्रीलिङ्गनिर्देशात् स्त्रीलिङ्गः पूरणप्रत्ययान्तो विवक्षित इति ज्ञेयः। तुल्ये प्रवृत्तिनिमित्ते इति किम्। कुटीभार्यः। अत्र पुंवत्त्वं न भवति। कुटीशब्देन घटे पुल्लिङ्गः, गेहे तु स्त्रीलिङ्ग इति प्रवृत्तिनिमित्तभेदात्। स्त्रीप्रत्ययः पुंवत्स्यादित्युक्ते तु स्त्रीप्रत्ययस्य लोपः पर्यवस्येत्। ततश्च पट्वी भार्या यस्य सः पटुभार्यः इत्यत्र उत्तरपदे परनिमित्तमाश्रित्य ङीषो लोपे तस्य 'अचः परस्मिन्' इति स्थानिवत्त्वादुकारस्य यण् स्यात्। **ह्रस्व इति** ॥ चित्रा गावो यस्येति विग्रहे बहुव्रीहिसमासे सुब्लुकि सति अनेकमिति प्रथमान्तनिर्दिष्टतया विग्रहे नियतविभक्तिकतया वा उपसर्जनत्वे सति चित्रगोशब्दे ओकारस्य 'गोस्त्रियोः' इति उकारो ह्रस्व इत्यर्थः। ननु चित्र अस् इति अलौकिकविग्रहे समासाभ्युपगमे सुब्लुकः प्राक् पूर्वसवर्णदीर्घे एकादेशे कृते तस्य परादित्वे असोर्लुकि चित्रगुरित्यकारो न श्रूयेत। पूर्वान्तत्वे तु परिशिष्टस्य सकारमात्रस्य सुप्त्वाभावाल्लुक् न स्यादित्यत आह। **चित्रा अस् इति** ॥ गोशब्दस्य स्त्रीलिङ्गत्वात् तद्विशेषणत्वाच्चित्रेति स्त्रीलिङ्गनिर्देशः। 'प्रत्ययोत्तरपदयोश्च' इति सूत्रभाष्यरीत्या 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते' इति न्यायात् प्रागेव पूर्वसवर्णदीर्घात् सुब्लुगिति भावः। चित्रगुरिति बहुव्रीहौ चित्राशब्दस्य पुंवत्त्वमिति भावः। **रूपवद्भार्य इति** ॥ रूपवती भार्या यस्येति विग्रहः। अत्र उपसर्जनह्रस्वः। रूपवतीशब्दस्य पुंवत्त्वम्। ननु चित्रा जरती गौर्यस्येति विग्रहे कथं त्रिपदबहुव्रीहिः। 'सुप् सुपा' इत्येकवत्त्वस्य विवक्षितत्वादित्यत आह। **अनेकोक्तेरिति** ॥ शेषग्रहणात् प्रथमान्तमिति लब्धम्। एकस्य प्रथमान्तस्य

जरतीचित्रागुर्वी । एवं दीर्घातन्वीजङ्घः—तन्वीदीर्घाजङ्घः । त्रिपदे बहुव्रीहौ प्रथमं न पुंवत् । उत्तरपदस्य मध्यमेन व्यवधानात् । द्वितीयमपि न पुंवत् । पूर्वपदत्वाभावात् । 'उत्तरपदशब्दो हि समासस्य चरमावयवे रूढः । पूर्वपदशब्दस्तु प्रथमावयवे' इति वदन्ति । वस्तुतस्तु नेह पूर्वपदमाक्षिप्यते । 'आनङ् ऋतः—' (सू ९२१) इत्यत्र यथा । तेनोपान्त्यस्य पुंवदेव । 'चित्राजरद्गुः' इत्यादि । अत एव 'चित्राजरत्यौ गावौ यस्येति द्वन्द्वगर्भेऽपि चित्राजरद्गुः'

समासो नोपपद्यते । समास इत्यन्वर्थसंज्ञाविज्ञानात् । ततश्चार्थादनेकं प्रथमान्तमिति सिद्धे पुनरनेकग्रहणात् द्विबहूनां प्रथमान्तानां बहुव्रीहिरिति भाष्ये स्पष्टमिति भावः । **अत्रेति** ॥ त्रिपदबहुव्रीहावित्यर्थः । **चित्राजरतीगुः, जरतीचित्रागुर्वेति** ॥ गां प्रति चित्रात्वस्य जरतीत्वस्य च विशेषणत्वाविशेषात् अन्यतरस्य 'सप्तमीविशेषणे बहुव्रीहौ' इति पूर्वनिपात इति भावः । **एवं दीर्घेति** ॥ दीर्घे तन्व्यौ जङ्घे यस्येति विग्रहः । उभयत्रापि पूर्वमध्यपदयोः पुंवत्त्वमाशङ्क्य आह । **त्रिपदे इति** ॥ **उत्तरपदस्येति** ॥ समासचरमावयवपदस्य उत्तरपदत्वात् तृतीयमेव पदमत्रोत्तरपदं वाच्यम् । तत्परकत्वञ्च मध्यमपदस्यैव, नतु प्रथमपदस्यापि, तस्य मध्यमेन पदेन व्यवधानादित्यर्थः । ननु तर्हि मध्यमपदस्य पुम्वत्त्वन्दुर्वारम् । उत्तरपदपरकत्वसत्त्वादित्यत आह । **द्वितीयमपि न पुंवदिति** ॥ **पूर्वपदत्वाभावादिति** ॥ उत्तरपदेन पूर्वपदमाक्षेपाल्लभ्यते । समासप्रथमावयवपदमेव पूर्वपदम । नतु मध्यमावयवपदमपीति भावः । ननु मध्यमपदापेक्षया प्रथमपदस्य पूर्वपदत्वमस्ति । मध्यमपदस्य च प्रथमपदापेक्षया उत्तरपदत्वमस्तीत्यत आह । **उत्तरपदशब्दो हीति** ॥ **रूढ इति** ॥ वैयाकरणसमयासिद्ध इत्यर्थः । **इति वदन्तीति** ॥ एवंप्रकारेण केचिद्वदन्तीत्यन्वयः । तत्र प्रथमपदस्य त्रिपदबहुव्रीहौ नास्तिपुंवत्त्वमिति युज्यते । उत्तरपदपरकत्वाभावात् । मध्यमपदस्य तु पूर्वपदत्वाभावेऽप्यस्त्येव पुंवत्त्वम् । 'स्त्रियाः पुंवत्' इत्यत्र तु पूर्वपदस्याश्रवणात् अनुवृत्त्यभावाच्च, किन्तु उत्तरपदे इत्यनेन पूर्वपदस्य पुंवत्त्वमित्यर्थात् गम्यत इति वक्तव्यन्तदपि न संभवतीत्यत आह । **नेह पूर्वपदमाक्षिप्यत इति** ॥ इह 'स्त्रियाः पुंवत्' इत्यत्र उत्तरपदे इत्यनुवृत्तेन पूर्वपदन्नाक्षिप्यते, नार्थाद्गम्यत इत्यर्थः । कुत इत्यत आह । **आनङृत इत्यत्र यथेति** ॥ ऋदन्तानां द्वन्द्वे आनङ् स्यात् उत्तरपदे इति तदर्थः । तत्र चतुर्णां द्वन्द्वे 'होतृपोतृनेष्टोद्गातारः' इत्युपान्तस्य नेष्टुरानङुदाहृतः 'समर्थः पदविधिः' इत्यत्र भाष्ये । तत्रोत्तरपदेन पूर्वपदाक्षेपनियमे नेष्टुरुपान्त्यस्य पूर्वपदत्वाभावात् आनङ् नोपपद्येत । तस्मान्नावश्यं उत्तरपदे विहितं कार्यं पूर्वपदस्यैवेति नियम इत्यर्थः । **तेनेति** ॥ पूर्वपदानाक्षेपेणेत्यर्थः । **उपान्त्यस्येति** ॥ अन्त्यस्य समीपमुपान्त्यं, चरमावयवसमीपवर्तिनः मध्यमस्येत्यर्थः । **पुंवदेवेति** ॥ रूपमिति शेषः । तदेव दर्शयति । **चित्राजरद्गुरिति** ॥ अत्र चित्राशब्दस्य न पुंवत्त्वम् । मध्यमेन व्यवधानात् । उत्तरपदपरकत्वाभावाच्चेति भावः । **इत्यादीति** ॥ जरतीचित्रगुः, तन्वीदीर्घजङ्घः, दीर्घातनुजङ्घः । ननु 'आनङृतः' इत्यत्र 'होतृपोतृनेष्टोद्गातारः'

इति भाष्यम्। कर्मधारयपूर्वपदे तु द्वयोरपि पुंवत्। जरच्चित्रगुः। कर्मधारयोत्तरपदे तु चित्रजरद्गवीकः। 'स्त्रियाः' किम्। ग्रामणि कुलं दृष्टिरस्य ग्रामणिदृष्टिः। 'भाषितपुंस्कात्' किम्। गङ्गाभार्यः। 'अनूङ्' किम्। वामोरूभार्यः।

इति भाष्योदाहरणान्मास्तु पूर्वपदाक्षेपः। 'स्त्रियाः पुंवत्' इति सूत्रे तदनाक्षेपे किं प्रमाणमित्यत आह। **अत एवेति** ॥ 'स्त्रियाः पुंवत्' इत्यत्रापि पूर्वपदानाक्षेपादित्यर्थः। द्वन्द्वगर्भेऽपीत्यनन्तरं बहुव्रीहाविति शेषः। **भाष्यमिति** ॥ यद्यपि कृत्स्नभाष्यपरिशोधनायां चित्राजरद्गुरित्युदाहरणं भाष्ये क्वापि न दृश्यते। तथापि चित्राजरद्गुरित्यनन्तरं प्रयोगमिति शेषः। भाष्यमित्यस्य पट्वीमृदुभार्यः इति प्रकृतसूत्रस्थभाष्यमित्यर्थः। सूचयतीति शेषः। 'स्त्रियाः पुंवत्' इति प्रकृतसूत्रभाष्ये हि "पट्वी मृद्वी भार्ये यस्येति द्वन्द्वगर्भबहुव्रीहौ पट्वीमृदुभार्यः" इत्युदाहृतम्। तत्र पट्वीमृदुशब्दात्मकः द्वन्द्वः पूर्वपदं, न तस्य भाषितपुंस्कत्वमस्तीति न पुंवत्त्वम्। द्वन्द्वस्य परवल्लिङ्गतानियमात्। तत्र द्वन्द्वे पूर्वपदस्य पट्वीशब्दस्य तु न पुंवत्त्वम्। मध्यमपदेन व्यवधानादुत्तरपदपरकत्वाभावात्। मध्यमपदस्यानुत्तरपदत्वादसमानाधिकरणत्वाच्च न तस्मिन्परे पुंवत्त्वसम्भवः। मृद्वीशब्दस्य तु केवलस्य भाषितपुंस्कत्वात् उत्तरपदपरकत्वाच्च पुंवत्त्वमिति तदाशयः। 'स्त्रियाः पुंवत्' इत्यत्र पूर्वपदाक्षेपे तु मृदुशब्दस्य पूर्वपदत्वाभावेन पुंवत्त्वाप्रवृत्तेः तदसङ्गतिस्स्पष्टैव। ततश्च पट्वीमृदुभार्य इति भाष्यं चित्राजरद्गुरिति प्रयोगं गमयतीत्यर्थः। **कर्मधारयेति** ॥ जरती चासौ चित्रा चेति कर्मधारयः। 'पुंवत्कर्मधारय' इति जरतीशब्दस्य पुंवत्त्वात् ङीपो निवृत्तिः। ततश्च जरच्चित्रा गौर्यस्येति कर्मधारयपूर्वपदत्वे बहुव्रीहौ पूर्वपदस्य जरच्चित्राशब्दस्य 'स्त्रियाः पुंवत्' इति पुंवत्त्वात् टापो निवृत्तिरिति भावः। **कर्मधारयोत्तरेति** ॥ जरती चासौ गौश्चेति कर्मधारये 'गोरतद्धितलुकि' इति टचि अवादेशे 'पुवत्कर्मधारय' इति जरतीशब्दस्य पुंवत्त्वे ङीपो निवृत्तौ टित्त्वात् ङीपि जरद्गवीशब्दः। ततश्चित्रा जरद्गवी यस्येति कर्मधारयोत्तरपदके बहुव्रीहौ 'नद्यृतश्च' इति कपि चित्राशब्दस्य 'स्त्रियाः पुंवत्' इति पुंवत्त्वे चित्रजरद्गवीकः इति रूपमित्यर्थः। **स्त्रियाः किमिति** ॥ षष्ठ्यन्तस्य प्रश्नः। **ग्रामणि कुलं दृष्टिरस्य ग्रामणिदृष्टिरिति** ॥ ग्रामणीशब्दस्य नपुंसकत्वे 'ह्रस्वो नपुंसके' इति ह्रस्वे ग्रामणिशब्द इदन्तः। कुलशब्दो नपुंसकस्फोरणार्थः। दृष्टिशब्देन नेत्रस्थानापन्नं विवक्षितम्। ग्रामणि दृष्टिरस्येत्येव विग्रहः। 'स्त्रियाः' इत्यभावे ग्रामणीशब्दस्य पुंवत्त्वे नपुंसकह्रस्वनिवृत्तौ ग्रामणीकुलमिति स्यादिति भावः। **गङ्गाभार्य इति** ॥ अत्र गङ्गाशब्दस्य नित्यस्त्रीलिङ्गतया भाषितपुंस्कत्वाभावात् न पुंवत्त्वमिति भावः। **वामोरूभार्य इति** ॥ वामौ सुन्दरौ ऊरू यस्येति बहुव्रीहिः। 'संहितशफलक्षणवामादेश्च' इत्यूङ्। तदन्तस्य पुंवत्त्वे ऊङो निवृत्तौ वामोरुभार्य इति पूर्वपदमुदन्तमेव स्यादिति भावः।

---

१. भाष्ये तु प्रकृतसूत्रे 'पट्वीमृदुभार्यः' इत्युपलभ्यते। तथा च 'इति' इत्यस्याग्रे 'प्रयोगं सूचयति' इति शेषः पूरणीयः।

'समानाधिकरणे' किम् । कल्याण्याः माता कल्याणीमाता । 'स्त्रियाम्' किम् । कल्याणी प्रधानं यस्य सः कल्याणीप्रधानः । पूरण्यां तु ।

८३२ । अप्पूरणीप्रमाण्योः । (५-४-११६)

पूरणार्थप्रत्ययान्तं यत्स्त्रीलिङ्गं तदन्तात्प्रमाण्यन्ताच्च बहुव्रीहेरप्स्यात् । कल्याणी पञ्चमी यासां रात्रीणां ताः कल्याणीपञ्चमा रात्रयः । स्त्री प्रमाणी यस्य सः स्त्रीप्रमाणः । 'पुंवद्भावप्रतिषेधोऽप्रत्ययश्च प्रधानपूरण्यामेव' (वा ३३५९-३९१०) । रात्रिः पूरणीवाच्या चेत्युक्तोदाहरणे मुख्या । अन्यत्र तु ।

स्त्रियां किमिति ॥ सप्तम्यन्तस्य प्रश्नः । **कल्याणी प्रधानं यस्य स कल्याणीप्रधान इति** ॥ अत्र प्रधानशब्दस्य नित्यनपुंसकत्वात् कल्याणीशब्देन सामानाधिकरण्येऽपि स्त्रीलिङ्गत्वाभावात्तस्मिन्परे पुंवत्त्वमेति भावः । **पूरण्यां त्विति** ॥ पुंवत्त्वनिषेधोदाहरणविशेषो वक्ष्यत इति शेषः । **अप्पूरणी** ॥ अबिति छेदः । 'बहुव्रीहौ सक्थ्यक्ष्णोः' इत्यतो बहुव्रीहावित्यनुवृत्तं पूरणीप्रमाणीभ्यां विशेष्यते, तदन्तविधिः, स्त्रीलिङ्गनिर्देशात् पूरणप्रत्ययान्तं स्त्रीलिङ्गमिह गृह्यते । तदाह । **पूरणार्थेत्यादिना** ॥ **अप् स्यादिति** ॥ समासान्तस्तद्धित इत्यपि बोध्यम् । **पञ्चमीति** ॥ पञ्चानां पूरणीत्यर्थः । 'तस्य पूरणे डट्' 'नान्तादसङ्ख्यादेः' इति तस्य मडागमः । टित्त्वात् ङीप् । **कल्याणीपञ्चमा रात्रय इति** ॥ इह बहुव्रीहौ कृते पञ्चमीशब्दे पूरणार्थप्रत्ययान्ते परे कल्याणीशब्दस्य पुंवत्त्वनिषेधः, अप् समासान्तस्तद्धितः, टाप्, 'यस्येति च' इतीकारलोपः । ननु पञ्चमी रात्रिरन्यपदार्थप्रविष्टा वा नवा । नाद्यः । तस्यास्समस्यमानपदार्थत्वेन तदन्यत्वानुपपत्तेः । नान्त्यः । पञ्चम्या रात्रेरन्यपदार्थप्रवेशाभावे कल्याणीपञ्चमा इति समासात्पञ्चमीं रात्रिं विना चतुर्णामिव बोधनापत्तौ पञ्चमपदस्यासङ्गत्यापादनादिति चेत् । सत्यम् । पञ्चानां रात्रीणां उद्भूतवयवभेदस्समुदाय एवान्यपदार्थः । तत्र पञ्चम्या रात्रेः प्रवेशेऽपि तद्घटितसमुदायस्यान्यपदार्थत्वं न विरुध्यते । समुदायस्यावयवापेक्षया अन्यत्वात् । रात्रय इति बहुवचनन्तु अवयवबहुत्वापेक्षम् । यथाचैतत्तथा सर्वनामसंज्ञासूत्रे प्रपञ्चितम् । अथ प्रमाण्यन्तादब्विधेरुदाहरणमाह । **स्त्री प्रमाणी यस्यस स्त्रीप्रमाण इति** ॥ प्रमाणशब्दोऽत्र करणल्युडन्तः, विशेष्यनिघ्नः, टित्त्वात् ङीप् । बहुव्रीहौ सति अप्रत्यये 'यस्येति च' इति ईकारलोपे स्त्रीप्रमाण इति रूपम् । पूर्वपदस्य तु नित्यस्त्रीलिङ्गत्वादभाषितपुंस्कत्वान्न पुंवत्त्वप्रसक्तिः । **प्रधानपूरण्यामेवेति** ॥ 'स्त्रियाः पुंवत्' इति सूत्रे 'अप्पूरणी' इति सूत्रे च प्रधानपूरणीग्रहणं कर्तव्यमिति भावः । ननु कल्याणीपञ्चमाः रात्रय इत्यत्र पञ्चम्या रात्रेः समस्यमानपदार्थत्वात् कथं प्राधान्यं, बहुव्रीहेरन्यपदार्थप्रधानत्वादित्यत आह । **रात्रिः पूरणीवाच्या चेत्युक्तोदाहरणे मुख्येति** ॥ कल्याणीपञ्चमाः रात्रय इत्युक्तोदाहरणे पञ्चानां पूरणी रात्रिः समस्यमानपञ्चमीपदार्थत्वेऽपि अन्यपदार्थसमुदायघटकतया बहुव्रीहिसमासवाच्यापि भवतीति कृत्वा

८३३। नद्यृतश्च। (५-४-१५३)

नद्युत्तरपदादृदन्तोत्तरपदाच्च बहुव्रीहेः कप्स्यात्। पुंवद्भावः।

८३४। केऽणः। (७-४-१३)

के परेऽणो ह्रस्वः स्यात्। इति प्राप्ते।

८३५। न कपि। (७-४-१४)

कपि परे अणो ह्रस्वो न स्यात्। कल्याणपञ्चमीकः पक्षः। अत्र तिरोहितावयवभेदस्य पक्षस्यान्यपदार्थतया रात्रिरप्रधानम्। बहुकर्तृकः। 'अप्रियादिषु' किम्। कल्याणीप्रियः। प्रिया। मनोज्ञा। कल्याणी। सुभगा। दुर्भगा। भक्तिः। सचिवा। स्वसा। कान्ता। क्षान्ता। समा। चपला। दुहिता।

मुख्या भवतीत्यर्थः। उद्भूतावयवस्य रात्रिसमुदायस्य प्रधानत्वेऽपि तद्घटकतया यथा प्रथमाद्याश्चतस्रो रात्रयः समासाभिधेयाः, एवं पञ्चम्यपि रात्रिस्समासाभिधेया भवतीति समस्यमानपञ्चमीपदार्थस्य अन्यपदार्थानुप्रवेशात् प्राधान्यमिति भावः। **अन्यत्रत्विति** ॥ कल्याणपञ्चमीकः पक्ष इत्यत्र पूरण्या रात्रेरन्यपदार्थप्रवेशाभावात् अप्राधान्यादप्प्रत्ययाभावे सति विशेषो वक्ष्यत इत्यर्थः। **नद्यृतश्च** ॥ नदी च ऋच्चेति समाहारद्वन्द्वात्पञ्चमी। 'बहुव्रीहौ सक्थ्यक्ष्णोः' इत्यतो बहुव्रीहावित्यनुवृत्तं पञ्चम्या विपरिणम्यते। तदाक्षिप्तमुत्तरपदं नद्यृभ्यां विशेष्यते। तदन्तविधिः। 'उरः प्रभृतिभ्यः' इत्यतः कबित्यनुवर्तते। तदाह। **नद्युत्तरपदादिति** ॥ नद्यन्तोत्तरपदादित्यर्थः। **कप् स्यादिति** ॥ तद्धितस्समासान्तश्चेत्यपि बोध्यम्। तथाच कल्याणी पञ्चमी यस्य पक्षस्येति विग्रहे बहुव्रीहौ सति व्यपदेशिवत्त्वेन पञ्चम्युत्तरपदस्य नद्यन्तत्वात्तदुत्तरपदकबहुव्रीहेः कबिति भावः। नद्यन्तात् बहुव्रीहेरिति न व्याख्यातम्। बहुधीवरीति बहुव्रीहेः नद्यन्तत्वात् कबापत्तेः। नद्यन्तोत्तरपदादिति व्याख्याने तु न दोषः। धीवन्शब्दस्योत्तरपदस्य नकारान्तत्वेन नदीत्वाभावादिति शब्देन्दुशेखरे विस्तरः। **पुंवद्भाव इति** ॥ पूरण्याः रात्रेः समासवाच्यत्वाभावेन निषेधाभावादिति भावः। **केऽणः** ॥ **ह्रस्वस्स्यादिति** ॥ 'शृदृप्राम्' इत्यतस्तदनुवृत्तेरिति भावः। **न कपि** ॥ **अणो ह्रस्व इति** ॥ 'केऽणः' इत्यतः 'शृदृप्राम्' इत्यतश्च तदनुवृत्तेरिति भावः। ननु कल्याणपञ्चमीकः पक्ष इत्यत्र पञ्चदशाहोरात्रात्मके पक्षे अन्यपदार्थे पञ्चम्या रात्रेः प्रवेशात् प्राधान्यन्दुर्वारमित्यत आह। **अत्र तिरोहितेति** ॥ रात्रेः तत्प्रवेशाभावात् अप्राधान्यमिति भावः। भाष्ये एवमुदाहरणमेवात्र लिङ्गम्। ऋदन्तोत्तरपदात्कपमुदाहरति। **बहुकर्तृक इति** ॥ बहवः कर्तारो यस्येति विग्रहः। तदेवमपूरणीप्रियादिष्वित्यत्र पूरणीविषयं प्रपञ्च्य प्रियादिषु परेषु पुंवद्भावनिषेधस्य प्रयोजनं पृच्छति। **अप्रियादिषु किमिति** ॥ **कल्याणीप्रिय इति** ॥ कल्याणी प्रिया यस्येति विग्रहः। प्रियादिगणं पठति। **प्रिया, मनोज्ञेत्यादि** ॥ ननु

वामा। अबला। तनया। 'सामान्ये नपुंसकम्' दृढं भक्तिर्यस्य सः दृढभक्तिः। स्त्रीत्वविवक्षायां तु दृढाभक्तिः।

७३६। तसिलादिष्वा कृत्वसुचः। (६-३-३५)

तसिलादिष्वाकृत्वसुजन्तेषु परेषु स्त्रियाः पुंवत्स्यात्। परिगणनं कर्तव्यम्। अव्याप्त्यतिव्याप्तिपरिहाराय। 'व्रतसौ' (वा ३९१८)। 'तरप्तमपौ' (वा ३९१९)। 'चरट्जातीयरौ' (वा ३९२०)। 'कल्पब्देशीयरौ' (वा ३९२१)। 'रूपप्पाशपौ' (वा ३९२२)। 'थाल्' (वा ३९२३)। 'तिल्थ्यनौ' (वा ३९२५)। बह्वीषु बहुत्र—बहुतः। दर्शनीयतरा। दर्शनीयतमा।

भक्तिशब्दस्य प्रियादिषु पाठे दृढा भक्तिर्यस्य सः दृढभक्तिरित्यत्र कथं पुंवत्त्वमित्यत आह। **सामान्ये नपुंसकमिति** ॥ आश्रित्येति शेषः। **दृढमिति** ॥ पदसंस्कारपक्षे सामान्यपरत्वमाश्रित्य दृढशब्दो नपुंसकलिङ्गो व्युत्पाद्यः। ततश्चास्य भक्तिशब्देनान्वये पूर्वप्रवृत्तं नपुंसकत्वन्नापैति। लिङ्गविशेषस्याविवक्षितत्वात्, वेदाः प्रमाणमितिवत्। अत्र चार्थे पस्पशाह्निकभाष्ये 'शक्यश्च अनेन श्वमांसादिभिरपि क्षुत् प्रतिहन्तुम्' इति प्रयोगो लिङ्गम्। नन्वेवं सति प्रियादिषु भक्तिशब्दपाठो व्यर्थ इत्यत आह। **स्त्रीत्वविवक्षायां त्विति** ॥ वाक्यसंस्कारपक्षे विशेष्यानुसारेण स्त्रीत्वप्रतीतेर्नियमादिति भावः। **तसिलादिष्वा कृत्वसुचः** ॥ 'स्त्रियाः पुंवत्' इत्यनुवर्तते। आकृत्वसुच इत्याङ् अभिविध्यर्थकः। तमभिव्याप्येत्यर्थः। तदाह। **तसिलादिष्वाकृत्वसुजन्तेष्विति** ॥ 'पञ्चम्यास्तसिल्' इत्यारभ्य 'सङ्ख्याया क्रियाभ्यावृत्तिगणने कृत्वसुच्' इत्येतत्पर्यन्तसूत्रविहितेष्वित्यर्थः। उत्तरपदपरकत्वाभावात् स्त्रियाऽपुंवदित्यप्राप्तौ वचनमिदम्। ननु तिल्थ्यन्शसां कृत्वसुचः परत्वेव पाठात् तसिलादिष्वनन्तर्भावात्तेषु परेषु वृक्तिः अजथ्या बहुशः इत्यत्र पुंवत्त्वन्न स्यादित्यव्याप्तिः। 'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः' इति देश्यस्य 'षष्ठ्या रूप्य च' इति रूप्यस्य च तसिलादिष्वन्तर्भावात् तयोऽ परतः पट्वीदेश्येत्यत्र शुभ्रारूप्येत्यत्र च पुंवत्त्वं स्यादिति अतिव्याप्तिः इत्यत आह। **परिगणनमिति** ॥ **अव्याप्त्यतिव्याप्तीति** ॥ इष्टस्थले अप्रवृत्तिरव्याप्तिः। अनिष्टस्थले प्रवृत्तिरतिव्याप्तिः। परिगणनप्रकारमाह। **व्रतसावित्यादिना** ॥ **बह्वीषु, बहुत्रेति** ॥ बह्वीष्वित्यर्थे बह्वीशब्दात् 'सप्तम्यास्त्रल्' इति त्रालि पुंवत्त्वे ङीषो निवृत्तौ बहुत्रेति रूपमित्यर्थः। **बहुत इति** ॥ 'पञ्चम्यास्तसिल्' इति बह्वीशब्दात् तसिल्, पुंवत्त्वात् ङीषो निवृत्तिरिति भावः। **दर्शनीयतरेति** ॥ अनयोरियमतिशयेन दर्शनीयेत्यर्थे दर्शनीयाशब्दात् 'द्विवचनविभज्योपपदे तरप्' इति तरप्। पुंवत्त्वे टापो निवृत्तिरिति भावः। **दर्शनीयतमेति** ॥ आसामियमतिशयेन दर्शनीयेत्यर्थे दर्शनीयशब्दात् 'अतिशायने तमबिष्ठनौ' इति तमप्। पुंवत्त्वे टापो निवृत्तिरिति भावः। ननु पट्वीशब्दात्तरपि तमपि च 'पट्वीतरा, पट्वीतमा' इत्यत्रापि

'घरूप–' (सू ९८५) इति वक्ष्यमाणो ह्रस्वः परत्वात्पुंवद्भावं बाधते। पट्वितरा। पट्वितमा। पटुचरी। पटुजातीया। दर्शनीयकल्पा। दर्शनीयदेशीया। दर्शनीयरूपा। दर्शनीयपाशा। बहुथा। प्रशस्ता वृकी वृकतिः। अजाभ्यो हिता अजथ्या। 'शसि बह्वल्पार्थस्य पुंवद्भावो वक्तव्यः' (वा ३९२६)। बह्वीभ्यो देहि बहुशः। अल्पाभ्यो देहि अल्पशः। 'त्वतलोर्गुणवचनस्य' (वा ३९२७)। शुक्लाया भावः शुक्लत्वम्। 'गुणवचनस्य' किम्। कर्त्र्या भावः कर्त्रीत्वम्। 'शरदः कृतार्थता' इत्यादौ तु सामान्ये नपुंसकम्। 'भस्याढे

पुंवत्त्वे ङीषो निवृत्तौ पटुतरा पटुतमेति स्यादित्यत आह। **घरूपेति** ॥ तथाच ह्रस्वेन पुंवत्त्वे बाधिते सति ङीषो निवृत्त्यभावे तस्य ह्रस्वे सति पट्वितरा पट्वितमेति रूपमित्यर्थः। **पटुचरीति** ॥ पट्वीशब्दात् 'भूतपूर्वे चरट्' इति पुंवत्त्वे ङीषो निवृत्तिरिति भावः। पूर्वं पट्वीत्यर्थः। **पटुजातीयेति** ॥ पट्वीशब्दात् 'प्रकारवचने जातीयर्' इति पुंवत्त्वे ङीषो निवृत्तिरिति भावः। पटुसदृशीत्यर्थः। **दर्शनीयकल्पेति** ॥ 'ईषदसमाप्तौ' इति दर्शनीयाशब्दात् कल्पप्। पुंवत्त्वे टापो निवृत्तिरिति भावः। प्रायेण दर्शनीयेत्यर्थः॥ **दर्शनीयदेशीयेति** ॥ 'ईषदसमाप्तौ' इति दर्शनीयाशब्दात् देशीयर्। पुंवत्त्वे टापो निवृत्तिरिति भावः। प्रायेण दर्शनीयेत्यर्थः। **दर्शनीयरूपेति** ॥ दर्शनीयाशब्दात् 'प्रशसायां रूपप्' पुंवत्त्वे, टापो निवृत्तिरिति भावः। प्रशस्तत्वेन द्रष्टुं योग्येत्यर्थः। **दर्शनीयपाशेति** ॥ दर्शनीयाशब्दात् याप्ये पाशप्। पुंवत्त्वे टापो निवृत्तिरिति भावः। कुत्सितत्वेन द्रष्टुं योग्येत्यर्थः। **बहुथेति** ॥ बह्वीशब्दात् प्रकारवचने थाल्। पुंवत्त्वे ङीषो निवृत्तिरिति भावः। बहुप्रकारेत्यर्थः। **वृकतिरिति** ॥ प्रशंसायामित्यनुवृत्तौ 'वृकज्येष्ठाभ्यां तिल्तातिलौ च छन्दसि' इति वृकीशब्दात् जातिलक्षणङीषन्तात् तिल्। पुंवत्त्वे ङीषो निवृत्तिरिति भावः। **अजथ्येति** ॥ 'तस्मै हितम्' इत्यधिकारे 'अजाविभ्यां थ्यन्' इति अजाशब्दात् थ्यन्। पुंवत्त्वे टापो निवृत्तिरिति भावः। 'वृकतिरजथ्या' इत्यत्र 'जातेश्च' इति पुंवत्त्वनिषेधो न। परिगणनसामर्थ्यात्। **शसीति** ॥ शसि परे बह्वर्थकस्य अल्पार्थकस्य पुंवत्त्वं वक्तव्यमित्यर्थः। त्रतसाविल्यादिपरिगणितेष्वनन्तर्भावाद्वचनमिदम्। **बह्वीभ्य इति** ॥ बह्वीभ्यो देहीत्यर्थे 'बह्वल्पार्थाच्छस् कारकादन्यतरस्याम्' इति बह्वीशब्दात् शस्। पुंवत्त्वे ङीषो निवृत्तिरिति भावः। सम्प्रदानकारकस्फोरणाय देहीति शब्दः। **अल्पश इति** ॥ अल्पाभ्यो देहीत्यर्थः। पुंवत्त्वे टापो निवृत्तिरिति भावः। **त्वतलोरिति** ॥ त्वप्रत्यये तल्प्रत्यये च परे गुणोपसर्जनद्रव्यवाचिनः पुंवत्त्वं वक्तव्यमित्यर्थः। **कर्त्रीत्वमिति** ॥ कर्त्रीशब्दस्य क्रियानिमित्तत्वान्न गुणवचनत्वमिति भावः। 'आकडारात्' इति सूत्रभाष्ये समासकृदन्ततद्धितान्ताव्ययसर्वनामजातिसङ्ख्यासंज्ञाशब्दभिन्नमर्थवच्छब्दरूपं गुणवचनसंज्ञकं भवतीति स्थितम्। प्रकृते च गुणवचनशब्देन एतदेव विवक्षितम्। 'वोतो गुणवचनात्' इति सूत्रभाष्यस्थं "सत्त्वे निवशतेऽपैति" इत्यादिगुणलक्षणन्तु नात्र प्रवर्तते। अत एव 'एकतद्धिते च' इति सूत्रभाष्ये एकस्याः

तद्धिते' (वा ३९२८)। हस्तिनीनां समूहो हास्तिकम्। 'अढे' किम्। रौहिणेयः। 'स्त्रीभ्यो ढक्' (सू ११२३) इति ढोऽत्र गृह्यते। 'अग्नेर्ढक्' (सू १२३६)। इति ढकि तु पुंवदेव। अग्नायी देवता अस्य स्थालीपाकस्य आग्नेयः। सपत्नीशब्दस्त्रिधा। शत्रुपर्यायात्सपत्नशब्दाच्छार्ङ्गरवादित्वान्ङीन्येकः। समानः पतिर्यस्या इति विग्रहे विवाहनिबन्धनं पतिशब्दमाश्रित्य नित्यस्त्रीलिङ्गो द्वितीयः।

भावः एकत्वमित्यत्र एकशब्दस्य गुणवचनत्वाभावात् 'त्वतलोर्गुणवचनस्य' इत्यप्राप्तं पुंवत्त्वमत्र विधीयते इत्युक्तं सङ्गच्छते। सखीत्वमित्यादि तु असाध्वेवेति शब्देन्दुशेखरे विस्तरः। ननु कृतः अर्थः कृत्यं यया सा कृतार्था, तस्याः भावः कृतार्थतेत्यत्र कथं पुंवत्त्वम्। कृतार्थशब्दस्य समासत्वेन उक्तगुणवचनत्वाभावादित्यत आह। **शारदः इति** ॥ दृढभक्तिरित्यत्रानुपदोक्तरीत्या कृतः अर्थः येन तत् कृतार्थमिति सामान्याभिप्रायं कृतार्थशब्दं प्रथमतो व्युत्पाद्य तस्मादविवक्षितलिङ्गात् तल्प्रत्ययो व्युत्पाद्य इति भावः। **भस्याढे इति** ॥ ढभिन्ने तद्धिते परे स्त्रियाः पुंवत्त्वं वक्तव्यमित्यर्थः। परिगणितेष्वनन्तर्भावाद्वचनम्। **हास्तिकमिति** ॥ 'तस्य समूहः' इत्यधिकारे 'अचित्तहस्तिधेनोः' इति ठक्। ठस्येकः पुंवत्त्वे सति नान्तलक्षणङीपो निवृत्तिः। 'नस्तद्धिते' इति टिलोप इति भावः। नच पुंवत्त्वाभावेऽपि 'यस्येति च' इति ईकारलोपे टिलोपे च हास्तिकमिति सिद्धमिति वाच्यम्। लोपस्याभीयत्वेनासिद्धतया स्थानिवत्त्वेन च तद्धितपरकत्वाभावेन टिलोपानापत्तेः। 'ठक्छसोश्च' इति पुंवत्त्वादेव सिद्धिस्त्वनाशङ्क्या। 'भवतष्ठक्छसौ' इति ठक एव तत्र ग्रहणात्। **रौहिणेय इति** ॥ 'वर्णादनुदात्तात्' इति रोहितशब्दात् ङीप्। रोहिण्याः अपत्यमित्यर्थे 'स्त्रीभ्यो ढक्' एयादेशः, नकारश्च। 'भस्य' इति पुंवत्त्वे ङीप्रकारयोः निवृत्तिस्स्यादिति भावः। **गृह्यते इति** ॥ व्याख्यानादिति भावः। **अग्नायीति** ॥ अग्नेः स्त्री अग्नायी। 'वृषाकप्यग्नि' इति ङीप्। अग्नेरिकारस्य ऐकारादेशः। अग्नायी देवता अस्येत्यर्थे 'अग्नेर्ढक्' इति ढक्। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणात् ततो ढस्य एयादेशः। पुंवत्त्वे सति ङीबैत्वनिवृत्तौ अग्नि एय इति स्थिते 'यस्येति च' इति इकारलोपे आदिवृद्धौ आग्नेय इति रूपम्। पुंवत्त्वनिषेधे तु आग्नायेय इति स्यादिति भावः। वस्तुतस्तु अग्नित्वं पुंसि प्रवृत्तिनिमित्तं, स्त्रियान्तु अग्निसम्बन्ध इति प्रवृत्तिनिमित्तभेदादेवात्र न पुंवत्त्वमिति बोध्यम्। **सपत्नीशब्दस्त्रिधेति** ॥ व्युत्पादनभेदादिति शेषः। **शत्रुपर्यायादिति** ॥ "रिपौ वैरिसपत्नारिद्विषद्वेषणदुर्हृदः" इति कोशादिति भावः। अयं भाषितपुंस्कः। **विवाहनिबन्धनमिति** ॥ विवाहजनितसस्कारविशेषनिमित्तकमित्यर्थः। "पतित्वं सप्तमे पदे" इत्यादिस्मरणादिति भावः। आश्लिष्येत्यनन्तरं प्रवृत्त इति शेषः। समानः पतिः यस्या इति बहुव्रीहिः। 'नित्यं सपत्न्यादिषु' इति निपातनात् सभावः, ङीप्, नत्वञ्च। **नित्यस्त्रीलिङ्ग इति** ॥ अन्यपदार्थस्य स्त्रीत्वे सत्येव विवाहनिबन्धनपतिशब्दस्य सभावादिविधानादिति भावः।

स्वामिपर्यायपतिशब्देन भाषितपुंस्कस्तृतीयः। आद्ययोः शिवाद्यण्। सपत्न्या अपत्यं सापत्नः। तृतीयात्तु लिङ्गविशिष्टपरिभाषया पत्युत्तरपदलक्षणो ण्य एव, न त्वण्। शिवादौ रूढयोरेव ग्रहणात् सापत्यः। 'ठक्छसोश्च' (वा ३९२९)। भवत्याश्छात्राः भावत्काः, भवदीयाः। एतद्वार्तिकम् 'एकतद्धिते च' (सू

"पतिर्नाम धवः" इति कोशादिति भावः। **आद्ययोरिति** ॥ शत्रुपर्यायं विवाहनिबन्धनञ्च पतिशब्दमाश्रित्य प्रवृत्तयोस्सपत्नीशब्दयोरित्यर्थः। **सापत्न इति** ॥ सपत्न्याः अपत्यमित्यर्थे 'तस्यापत्यम्' इत्यणं बाधित्वा 'स्त्रीभ्यो ढक्' इति ढकि प्राप्ते 'शिवादिभ्योऽण्' इत्यणि आद्यस्य सपत्नीशब्दस्य भाषितपुंस्कतया पुंवत्त्वे ङीपो निवृत्तौ सापत्न इति रूपम्। ननु नकारस्यापि निवृत्तिः। शत्रुपर्यायसपत्नशब्दस्य अव्युत्पन्नप्रातिपदिकतया तत्र नकारस्य स्त्रीत्वनिमित्तकत्वाभावात्, द्वितीयस्य तु सपत्नीशब्दस्य ङीन्नत्वाभ्याम् उत्पन्नस्य शिवाद्यणि कृते भाषितपुंस्कत्वाभावात् न पुंवत्त्वम्, किन्तु ङीपो 'यस्येति च' इति लोपे सापत्न इति रूपम्। सति तु पुंवत्त्वे ङीन्नकारयोः निवृत्तौ सापत इति स्यात्। **तृतीयात्त्विति** ॥ स्वामिपर्यायं पतिशब्दमाश्रित्य प्रवृत्तात् सपत्नीशब्दात् पत्युत्तरपदलक्षणो ण्य एवेत्यन्वयः। सपत्न्याः अपत्यमित्यर्थे 'तस्यापत्यम्' इत्यणं बाधित्वा 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः' इति ण्य एवेत्यन्वयः। ननु सपत्नीशब्दो न पत्युत्तरपद इत्यत आह। **लिङ्गविशिष्ट-परिभाषयेति** ॥ एवशब्दस्य व्यावर्त्यमाह। **न त्वणिति** ॥ ननु ण्यप्रत्ययस्यापि शिवाद्यण् अपवाद इत्यत आह। **शिवादौ रूढयोरेवेति** ॥ शत्रुपर्यायं पतिशब्दमाश्रित्य प्रवृत्तः सपत्नशब्दः शत्रौ केवलरूढः। विवाहनिबन्धनं पतिशब्दमाश्रित्य प्रवृत्तस्तु विवाहकर्तरि योगरूढः। पाति रक्षतीति योगस्यापि सत्त्वात्। स्वामिपर्यायन्तु पतिशब्दमाश्रित्य प्रवृत्तः केवलयौगिकः। शिवादौ रूढयोरेव ग्रहणम्, ननु केवलयौगिकस्य। योगाद्रूढेर्बलवत्त्वादिति भावः। ततः किमित्यत आह। **सापत्य इति** ॥ स्वामिपर्यायपतिशब्दघटितसपत्नीशब्दस्य भाषितपुंस्कत्वात् पुंवत्त्वे सति ङीन्नत्वयोर्निवृत्तौ 'यस्येति च' इतीकारलोपः। सापत्य इति रूपमित्यर्थः। **ठक्छसोश्चेति** ॥ वार्तिकमेतत्। एतयोः परतः पुंवत्त्वं वक्तव्यमिति शेषः। अभत्वादप्राप्तौ वचनम्। **भावत्काः, भवदीयाः इति** ॥ 'तस्येदम्' इत्यधिकारे 'भवतष्ठक्छसौ' इति भवतीशब्दात् ठक्छसौ। लिङ्गविशिष्टस्यापि ग्रहणात् तत्र ठकि इकादेशात्प्राक् ठावस्थायामेव पुंवत्त्वे इकादेशं बाधित्वा 'इसुसुक्तान्तात् कः' इति कादेशः। नच इकादेशे सति भत्वात् 'भस्याढे तद्धिते' इति पुंवत्त्वे कृते इकस्य स्थानिवत्त्वेन ठक्कात् 'इसुसुक्तान्तात्' इति कादेशे भावत्क इति रूपसिद्धौ किं ठग्रहणेनेति वाच्यम्। इकादेशे कृते हि मथितं पण्यमस्य माथितिकः इत्यत्रेव अल्विधितया स्थानिवत्त्वाभावेन सन्निपात-परिभाषया इकादेशानापत्तेः। अतष्ठग्रहणम्। भवतीशब्दाच्छसि तु 'सिति च' इति पदत्वेन भत्वस्य बाधात् 'भस्याढे' इत्यप्राप्ते पुंवत्त्वे अनेन पुंवत्त्वम्। **एतदिति** ॥ 'ठक्छसोश्च' इति वार्तिकमित्यर्थः। **एकतद्धिते चेति** ॥ एकशब्दस्य तद्धिते उत्तरपदे च परे

१०००) इति सूत्रञ्च न कर्तव्यम् । 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' इति भाष्यकारेष्ट्या गतार्थत्वात् । सर्वमयः । सर्वकाम्यति । सर्विका भार्या यस्य सर्वकभार्यः । सर्वकप्रियः इत्यादि । पूर्वस्यैवेदम् । 'भस्त्रैषाजाज्ञाद्वा—' (सू ४६६) इति लिङ्गात् । तेनाकच्येकशेषवृत्तौ च न । सर्विका । सर्वाः । 'कुक्कुट्यादीनामण्डादिषु' (वा ३९३४) । कुक्कुट्या अण्डं कुक्कुटाण्डम् । मृग्याः पदं मृगपदम् । मृगाक्षीरम् । काकशावः ।

ह्रस्वस्स्यादिति तदर्थः । एकस्याः भावः एकत्वं, एकता, एकस्याश्शाटी एकशाटी । **वृत्तिमात्रे इति** ॥ कृत्तद्धितादयो वृत्तयः । मात्रशब्दः कास्न्र्ये । 'स्त्रियाः पुंवत्' इत्यादिसूत्रगतनिमित्ताभावेऽपि भवति । **भाष्यकारेष्ट्येति** ॥ भाष्यकारवचनेनेति यावत् । इदञ्च 'दक्षिणोत्ताराभ्याम्' इति सूत्रे भाष्ये स्पष्टम् । **गतार्थत्वादिति** ॥ निवृत्तप्रयोजनकत्वात् इति भावः । एतत्प्रयोजनस्य 'सर्वनाम्नः' इति वचनेनैव सिद्धत्वादिति यावत् । 'सर्वनाम्नो वृत्तिमात्रे' इत्यस्य तद्धितवृत्तौ उदाहरति । **सर्वमय इति** ॥ सर्वस्यागत इत्यर्थः । 'तत आगतः' इत्यधिकारे 'मयट् च' इति मयट्, 'सर्वनाम्नः' इति पुंवत्त्वम् । चिन्मयमित्यादिवदत्यन्तस्वार्थिको वा मयट् । अथ सनाद्यन्तधातुवृत्तावुदाहरति । **सर्वकाम्यतीति** ॥ सर्वामात्मन इच्छतीत्यर्थे 'काम्यच्च' इति सर्वाशब्दात् काम्यच् । 'सर्वनाम्नः' इति पुंवत्त्वम् । 'सनाद्यन्ताः' इति धातुत्वाल्लडादि । मयट्काम्यचोस्त्रतसावित्यादिपरिगणितेष्वनन्तर्भावात्तेनात्र पुंवत्त्वन्न सिध्यतीति भावः । तद्धितवृत्तौ उदाहरणान्तरमाह । **सर्वकभार्य इति** ॥ समासवृत्तिरेषा । **सर्वकप्रिय इति** ॥ सर्वा प्रिया यस्येति विग्रहः । समासवृत्तिरियम् । प्रियादिपर्युदासो रूपवतीत्यादौ उपयुज्यत इति भावः । वस्तुतस्तु एकशब्दे अकच्प्रत्यये 'प्रत्ययस्थात्' इति इत्त्वे एकिका, तस्याः भावः एकिकत्वम् । अत्र पुंवत्त्वे टाप इत्त्वस्य च निवृत्तौ एककत्वमिति स्यात् । इकारो न श्रूयेत । इत्त्वनिमित्तस्य टापो निवृत्तत्वात् । पाचिकाशब्दात् जातीयरि पाचकजातीयेतिवत् ह्रस्वे सति स्थानिवत्त्वेन टापस्सत्त्वात् प्राप्तजीविकवदित्त्वश्रवणमिति फलभेदसत्त्वात् 'एकतद्धिते च' इति न गतार्थमित्याहुः । ननु तादितरा तदन्येत्यादावुत्तरपदस्य सर्वनामत्वात् पुंवत्त्वं स्यादित्यत आह । **पूर्वस्यैवेदमिति** ॥ वृत्तिप्रविष्टानेकभागानाम्मध्ये किञ्चिदपेक्षया पूर्वस्यैवेदं सर्वनाम्नः पुंवत्त्वविधानमित्यर्थः । **भस्त्रैषाजाज्ञाद्वेति लिङ्गादिति** ॥ 'भस्त्रैषा' इति सूत्रेण एषा द्वा इत्येतयोस्साकच्कयोरपि कात्पूर्वस्य इत्त्वविधानम्, अन्यथा निर्विषयं स्यात् । तद्धितवृत्तौ तयोः सर्वनामतया पुंवत्त्वनियमादिति भावः । अकचि तद्धितवृत्तौ उदाहरति । **सर्विकेति** ॥ सर्वाशब्दात् साकच्काट्टापि 'प्रत्ययस्थात्' इति इत्त्वे पुंवत्त्वे टाबित्त्वयोः निवृत्तिस्स्यादिति भावः । एकशेषवृत्तावुदाहरति । **सर्वा इति** ॥ टाबन्तस्य प्रथमाबहुवचनमिदम् । पुंवत्त्वे टापो निवृत्तिस्स्यादिति भावः । 'कुक्कुट्यादीनामण्डादिषु' इति पुंवत्त्वं वक्तव्यमिति शेषः । असमानाधिकरणार्थमिति सूचयन् षष्ठीसमासमुदाहरति । **कुक्कुट्या**

१. अत्राष्टाध्याय्याम् अन्यवार्तिकानामिवात्र प्रकरणे पाठाभावादिति भावः ।

८३७। क्यङ्मानिनोश्च। (६-३-३६)

एतयोः परतः पुंवत्। एनीवाचरति एतायते। श्येनीवाचरति श्येतायते। स्वभिन्नां काञ्चिद्दर्शनीयां मन्यते दर्शनीयमानिनी। दर्शनीयां स्त्रियं मन्यते दर्शनीयमानी चैत्रः।

८३८। न कोपधायाः। (६-३-३७)

कोपधायाः स्त्रियाः न पुंवत्। पाचिकाभार्यः। रसिकाभार्यः। मद्रिकायते। मद्रिकामानिनी। 'कोपधप्रतिषेधे तद्धितवुग्रहणम्' (वा ३९३१)। नेह। पाका भार्या यस्य स पाकभार्यः।

अण्डं कुक्कुटाण्डमिति ॥ पुंवत्त्वेन जातिलक्षणङीषो निवृत्तिरिति भावः। एवमग्रेऽपि। **मृगक्षीरमिति** ॥ मृग्याः क्षीरमिति विग्रहः। **काकशाब इति** ॥ काकायाश्शाब इति विग्रहः। "पोतः पाकोऽर्भको डिम्भः पृथुकश्शाबकश्शिशुः" इत्यमरः। **क्यङ्मानिनोश्च** ॥ **एतयोरिति** ॥ क्यङि मानिनि उत्तरपदे च परत इत्यर्थः। **एनीवेति** ॥ एता चित्रवर्णा। 'चित्रकिर्म्मीरकल्माषशबलैताश्च कर्बुरे" इत्यमरः। एतशब्दः श्वेतपर्याय इति याज्ञिकाः। "वर्णादनुदात्तात्" इति ङीप् नकारश्च। 'उपमानादाचारे' इत्यनुवर्तमाने 'कर्तुः क्यङ् सलोपश्च' इति एनीशब्दात् क्यङि पुंवत्त्वे ङीन्नत्वयोर्निवृत्तौ, 'अकृत्सार्वधातुकयोः' इति दीर्घे एतायते इति रूपमिति भावः। **श्येनीवेति** ॥ श्येतशब्दः श्वेतपर्यायः। "शुक्लशुभ्रशुचिश्वेतविशदश्येतपाण्डुराः" इति अमरः। क्यङादि पूर्ववत्। ननु 'स्त्रियाः पुंवत्' इत्येव मानिनीत्युत्तरपदे परतः पुंवत्त्वसिद्धेः मानिन्ग्रहणं किमर्थमित्याशङ्क्य मानिन्ग्रहणमसमानाधिकरणार्थं अस्त्रीलिङ्गार्थत्वमभिप्रेत्य असमानाधिकरणे परे तावदुदाहरति। **स्वभिन्नामिति** ॥ **दर्शनीयमानिनीति** ॥ दर्शनीयामिति द्वितीयान्ते उपपदे सुप्यजातौ णिनिरित्यनुवृत्तौ मन इति णिनिप्रत्ययः, उपपदसमासः, सुब्लुक्, असमानाधिकरणेऽपि मानिन्शब्दे उत्तरपदे परे अनेन पुंवत्त्वे टापो निवृत्तौ 'ऋन्नेभ्यः' इति ङीपि दर्शनीयमानिनीति रूपम्। यात्वात्मानमेव दर्शनीयाम्मन्यते तस्या दर्शनीयायाः 'स्त्रियाः पुंवत्' इत्येव पुंवत्त्वं सिद्धमिति ध्वनयितुं स्वभिन्नामित्युक्तम्। एकस्या एव दर्शनीयायाः मनधात्वर्थं प्रति कर्मत्वकर्तृत्वसम्भवेऽपि वास्तवाभेदेन मानिनीशब्दसामानाधिकरण्यसत्त्वादिति भावः। अथ स्त्रीलिङ्गे उत्तरपदे उदाहरति। **दर्शनीयामिति** ॥ स्त्रियमित्यनन्तरमात्मानमिति शेषः। आत्मानं यः दर्शनीयां स्त्रियम्मन्यते सः दर्शनीयमानी चैत्रः इत्यन्वयः। अत्र उत्तरपदवाच्यस्य मानिनः वस्तुतो दर्शनीयस्त्रीभेदेऽपि आरोपिततदभेदमादाय सामानाधिकरण्यं यद्यप्यस्ति, तथापि मानिन्शब्दस्य उत्तरपदस्य पुल्लिङ्गत्वात् तस्मिन् परे पुंवत्त्वन्न प्राप्तमित्यनेन तद्विधिरिति भावः। **न कोपधायाः ॥ पाचिकाभार्य इति** ॥ पाचिका भार्या यस्येति विग्रहः। पचो ण्वुल्। अकादेशटाबित्त्वानि, पुंवत्त्वनिषेधश्च। पुवत्त्वे टाबित्त्वयोर्निवृत्तिस्स्यात्।

८३९ । संज्ञापूरण्योश्च । (६-३-३८)

अनयोर्न पुंवत् । दत्ताभार्यः । दत्तामानिनी । दानक्रियानिमित्तः स्त्रियां पुंसि च संज्ञाभूतोऽयमिति भाषितपुंस्कत्वमस्ति । पञ्चमीभार्यः । पञ्चमीपाशा ।

८४० । वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे । (६-३-३९)

वृद्धिशब्देन विहिता या वृद्धिस्तद्धेतुर्यस्तद्धितोऽरक्तविकारार्थस्तदन्ता स्त्री न पुंवत् । स्रौघ्नीभार्यः । माधुरीयते । माधुरीमानिनी । 'वृद्धिनिमित्तस्य'

रसिकेति ॥ रसोऽस्या अस्तीति रसिका, 'अत इनिठनौ' इति ठन् । ठस्येकः, टाप्, पुंवत्त्वनिषेधः । पुंवत्त्वे तु टापो निवृत्तिस्स्यात् । **मद्रिकायते इति ॥** मद्राख्ये देशविशेषे भवा मद्रिका 'मद्रवृज्योश्च कन्' टाप्, इत्त्वम् । मद्रिकेवाचरतीत्यर्थः । 'क्यङ्मानिनोश्च' इति पुंवत्त्वं प्राप्तमिह निषिध्यते । **मद्रिकामानिनीति ॥** मद्रिकाम्मन्यत इत्यर्थे 'मनश्च' इति णिनिः । उपपदसमासः । इहापि 'क्यङ्मानिनोः' इति पुंवत्त्वं प्राप्तन्निषिध्यते । उभयत्रापि पुंवत्त्वे टाबित्वयोर्निवृत्तिस्स्यात् । **तद्धितवुग्रहणमिति ॥** 'न तद्धितवुकोपधायाः' इति सूत्रं पठनीयमिति यावत् । तद्धितसम्बन्धी वुसम्बन्धी च यः ककारः तदुपधायास्स्त्रियाः न पुंवत्त्वमिति फलति । मद्रिकायते इति तद्धितकोपधोदाहरणम् । पाचिकाभार्य इति तु वुसम्बन्धिकोपधोदाहरणम् । तद्धितवुग्रहणस्य प्रयोजनमाह । **नेहेति ॥ पाकेति ॥** 'अर्भकपृथुकपाका वयसि' इत्युणादिषु कप्रत्ययान्तो निपातितः । अयं तद्धितस्य वुको वा न ककार इति नात्र पुंवत्त्वनिषेध इति भावः । ननु दत्ताशब्दस्य संज्ञात्वेन एकद्रव्यनिवेशितया भाषितपुंस्कत्वाभावात् 'स्त्रियाः पुंवत्' इत्यस्य प्रसक्तेरेवाभावात् किन्तन्निषेधेनेत्यत आह । **दानक्रियानिमित्त इति ॥** दत्तशब्दोऽयं डित्थादिशब्दवन्न, किन्तु दानक्रियां पुरस्कृत्यैव स्त्रियां पुंसि च संज्ञाभूतः प्रवृत्तः, अतस्तस्य भाषितपुंस्कत्वात् पुंवत्त्वे प्राप्ते निषेधोऽयमित्यर्थः । पूरण्याः पुंवत्त्वनिषेधमुदाहरति । **पञ्चमीभार्य इति ॥** पञ्चमी भार्या यस्येति विग्रहः । अतः 'स्त्रियाः पुंवत्' इति प्राप्तं निषिध्यते । **पञ्चमीपाशेति ॥** निन्दिता पञ्चमीत्यर्थः । पाश्ये पाशप् । अत्र 'तसिलादिषु' इति प्राप्तं पुंवत्त्वन्निषिध्यते । **वृद्धिनिमित्तस्य च ॥** वृद्धेर्निमित्तं हेतुरिति विग्रहः । रक्तश्च विकारश्चेति समाहारद्वन्द्वः । ततो नञ्तत्पुरुषः । रक्तविकारभिन्नेऽर्थे विद्यमानस्येत्यर्थः । वृद्धिशब्देन विहितैव वृद्धिरिह विवक्षिता । व्याख्यानात् । तदाह । **वृद्धिशब्देनेत्यादिना ॥ तदन्तेति ॥** प्रत्ययग्रहणपरिभाषालभ्यम् । **स्रौघ्नीति ॥** स्रुघ्नो देश इत्यर्थः । तत्र भव इत्यण् । 'यस्येति च' इति अकारलोपः । णित्त्वादादिवृद्धिः, 'टिड्ढाणञ्' इति ङीप् । स्रौघ्नी भार्या यस्येति विग्रहः । 'स्त्रियाः पुंवत्' इति प्राप्तमिह निषिध्यते । **माधुरीयते, माधुरीमानिनीति ॥** मधुरायां भवा माधुरी, तत्र भवः इत्यण्, 'यस्येति च' इत्याकारलोपः, आदिवृद्धिः, 'टिड्ढ' इति ङीप् । माधुरीवाचरतीत्यर्थे 'कर्तुः क्यङ्' इति क्यङ् । 'सनाद्यन्ताः' इति धातुत्वाल्लडादि, माधुरीयते इति । माधुरीं

किम्। मध्यमभार्यः। 'तद्धितस्य' किम्। काण्डलावभार्यः। 'वृद्धि' शब्देन किम्। तावद्भार्यः। रक्ते तु, काषायी कन्था यस्य स काषायकन्थः। विकारे तु, हैमी मुद्रिका यस्येति हैममुद्रिकः। वृद्धिशब्देन वृद्धिं प्रति फलोपधानाभावादिह पुंवत्। वैयाकरणभार्यः। सौवश्वभार्यः।

मन्यते माधुरीमानिनी, 'मनः' इति णिनिः, उपधावृद्धिः। उपपदसमासः, सुब्लुक्, नान्तत्वात् ङीप्। इहोभयत्रापि 'क्यङ्मानिनोश्च' इति प्राप्तं पुंवत्त्वन्निषिध्यते। **मध्यमभार्य इति॥** मध्ये भवा मध्यमा, 'मध्यान्मः' इति मः। मध्यमा भार्या यस्येति विग्रहः। 'स्त्रियाः पुंवत्' इति पुंवत्त्वम्। अत्र मप्रत्ययस्य तद्धितस्य वृद्धिनिमित्तत्वाभावान्नपुंवत्त्वनिषेधः। **काण्डलावभार्य इति॥** काण्डं लुनातीति काण्डलावी, 'कर्मण्यण्' इत्यण्प्रत्ययः, कृत्, 'अचो ञ्णिति' इति वृद्धिः, आवादेशः, उपपदसमासः, 'टिड्ढाणञ्' इति ङीप्, काण्डलावी भार्या यस्येति विग्रहः, पुंवत्त्वात् ङीपो निवृत्तिः। अत्राणः कृत्वात्तद्धितत्वाभावात् न पुंवत्त्वनिषेधः। **तावद्भार्य इति॥** तत् परिमाणस्यास्तावती, 'यत्तदेतेभ्यः परिमाणे वतुप्' इति तच्छब्दाद्वतुप् तद्धितः, 'आ सर्वनाम्नः' इत्याकारः, उगित्वात् ङीप्, तावती भार्या यस्येति विग्रहः। पुंवत्त्वात् ङीपो निवृत्तिः, 'आ सर्वनाम्नः' इत्याकारात्मिकां वृद्धिं प्रति वतुपो निमित्तत्वेऽपि आकारस्य वृद्धिशब्देन विधानाभावात्तन्निमित्तवतुबन्तस्य न पुंवत्त्वनिषेधः। **रक्ते त्विति॥** रक्तेऽर्थे विद्यमानस्य तद्धितस्य न पुंवत्त्वमित्यर्थः। **काषायीति॥** कषायो गिरिजो धातुविशेषः, तेन रक्ता काषायी 'तेन रक्तं रागात्' इत्यण् 'यस्येति च' इति लोपः। आदिवृद्धिः, 'टिड्ढाणञ्' इति ङीप्। **काषायकन्थ इति॥** पुंवत्त्वे ङीपो निवृत्तिः, अत्राणः तद्धितस्य रक्तार्थकत्वात् न पुंवत्त्वनिषेधः। **विकारे त्विति॥** विकारार्थे विद्यमानस्य तद्धितस्य न पुंवत्त्वमित्यर्थः। **हैमीति॥** हेम्नो विकारभूतेत्यर्थः। 'अनुदात्तादेश्च' इत्यञ्, टिलोपः, आदिवृद्धिः, 'टिड्ढ' इति ङीप्, हैमीति रूपम्। हैमी मुद्रिका यस्येति विग्रहः। पुंवत्त्वे ङीपो निवृत्तिः। अत्राञस्तद्धितस्य विकारार्थकत्वान्न पुंवत्त्वनिषेधः। स्यादेतत्। व्याकरणमधीते वेत्ति वा स्त्री वैयाकरणी, 'तदधीते तद्वेद' इत्यण् तद्धितः। 'यस्येति च' इत्यकारलोपः। अणो णित्त्वात् तन्निमित्तकयकाराकारस्य पर्जन्यवल्लक्षणप्रवृत्त्या प्राप्तायाः वृद्धेः 'नय्वाभ्याम्' इति निषेधः। यकारात् प्रागैकारागमश्च 'टिड्ढाणञ्' इति ङीप्। वैयाकरणी भार्या यस्येति बहुव्रीहौ पुंवत्त्वे ङीपो निवृत्तौ वैयाकरणभार्य इति रूपम्। तथा स्वश्वस्यापत्यं स्त्री 'अत इञ्' इति इञोऽपवादः शिवाद्यण् 'यस्येति च' इति लोपः। प्रथमवकारात् परस्य अकारस्यादिवृद्धेर्नय्वाभ्यामिति निषेधः। प्रथमवकारात् प्रागौकारागमश्च, 'टिड्ढ' इति ङीप्। सौवश्वी भार्या यस्येति बहुव्रीहौ पुंवत्त्वे ङीपो निवृत्तौ सौवश्वभार्य इति रूपमिति स्थितिः। अत्रोभयत्रापि आदिवृद्धेः 'नय्वाभ्याम्' इति निषेधेऽपि अणः तद्धितस्य णित्त्वेन स्वरूपयोग्यवृद्धिनिमित्तत्वानपायात् पुंवत्त्वनिषेधो दुर्वार इत्यत आह। **वृद्धिं प्रति फलोपधानाभावादिह पुंवदिति॥** प्रतीत्यनन्तरं निमित्ततद्धितस्येति शेषः। अणः वृद्धिनिमित्तस्य यत् फलं वृद्धिस्तेन उपधानं तात्कालिक-

८४१ । स्वाङ्गाच्चेतः । (६-३-४०)

स्वाङ्गाद्यः ईकारस्तदन्ता स्त्री न पुंवत् । सुकेशीभार्यः । 'स्वाङ्गात्' किम् । पटुभार्यः । 'ईतः' किम् । अकेशभार्यः । 'अमानिनीति वक्तव्यम्' (वा ३९३२) । सुकेशमानिनी ।

८४२ । जातेश्च । (६-३-४१)

जातेः परो यः स्त्रीप्रत्ययस्तदन्तं न पुंवत् । शूद्राभार्यः । ब्राह्मणीभार्यः । सौत्रस्यैवायं निषेधः । तेन हस्तिनीनां समूहो हास्तिकमित्यत्र 'भस्याढे–' (वा ३९२८) इति तु भवत्येव ।

साहित्यं तदभावादित्यर्थः । 'वृद्धिस्तद्धितस्य' इत्येतावत्युक्तेऽपि निमित्तसम्बन्धे वृद्धेरिति षष्ठीमाश्रित्य 'वृद्धिनिमित्ततद्धितस्य' इत्यर्थलाभे सति निमित्तग्रहणात् फलोपहितनिमित्तत्वं विवक्षितमिति विज्ञायत इति भावः । यद्यप्यैजागमसिद्धवृद्धिं प्रति अण्प्रत्ययः, फलोपहितमेव निमित्तम् । तथापि वृद्धिशब्देन विहितां वृद्धिं प्रति फलोपहितनिमित्त न भवत्येवेति न दोषः । वृद्धिशब्देन विहितैव वृद्धिरिह गृह्यत इत्यत्रापि इदमेव निमित्तग्रहणं लिङ्गम् । अन्यथा ऐजागमादत्र फलोपहितनिमित्तत्वस्यापि सत्त्वात् तन्निमित्तग्रहणनिष्फलं स्यात् । विस्तरस्तु शब्देन्दुशेखरे द्रष्टव्यः । **स्वाङ्गाच्चेतः** ॥ ईत इति च्छेदः । तदाह । **स्वाङ्गाद्य ईकारः इति** ॥ **सुकेशीभार्य इति** ॥ सु शोभनाः केशाः यस्याः सा सुकेशी 'स्वाङ्गाच्चोपसर्जनात्' इति ङीष् । 'स्त्रियाः पुंवत्' इति प्राप्तस्य निषेधः । **पटुभार्य इति** ॥ पटुर्भार्या यस्येति विग्रहः । पटुत्वस्य अस्वाङ्गत्वान्न पुवत्त्वनिषेधः । किन्तु पुंवत्त्वे 'वोतो गुणवचनात्' इति ङीषो निवृत्तिरिति भावः । **अकेशभार्य इति** ॥ अविद्यमानाः केशाः यस्यास्सा अकेशा 'नञोऽस्त्यर्थानाम्' इति बहुव्रीहिः, विद्यमानशब्दस्य लोपश्च । स्वाङ्गत्वेऽपि न ङीष् । 'सहनञ्विद्यमान' इति निषेधात् । अतष्टावेव । अकेशा भार्या यस्येति विग्रहः । स्वाङ्गत्वेऽपि ईकाराभावान्नपुंवत्त्वनिषेधः । किन्तु पुंवत्त्वे टापो निवृत्तिरिति भावः । **अमानिनीति** ॥ स्वाङ्गाच्चेति निषेधः । मानिन्शब्दे परतः न भवतीति वक्तव्यमित्यर्थः । **सुकेशमानिनीति** ॥ सुकेशीं मन्यत इति अर्थे 'मनश्च' इति णिनिः, उपधावृद्धिः, उपपदसमासः । सुब्लुक्, पुंवत्त्वे ङीषो निवृत्तिरिति भावः । **जातेश्च** ॥ ईत इति अस्वरितत्वान्नानुवर्तत इत्यभिप्रेत्य आह । **जातेः परो यः स्त्रीप्रत्यय इति** ॥ **शूद्राभार्य इति** ॥ 'शूद्रा चामहत्पूर्वा' इति जातिलक्षणङीषोऽपवादष्टाप् । पुंवत्त्वनिषेधान्न टापो निवृत्तिः । **ब्राह्मणीभार्य इति** ॥ पुंवत्त्वनिषेधात् न शाङ्गरवादिङीनो निवृत्तिः । ननु हस्तिनीनां समूहो हास्तिकमित्यत्र 'अचित्तहस्ति' इति ठकि हस्तिनीशब्दस्य 'भस्याढे' इति कथं पुंवत्त्वं 'जातेश्च' इति निषेधात् इत्यत आह । **सौत्रस्यैवायंनिषेध इति** ॥ सूत्रविहितस्येत्यर्थः । 'भस्याढे'

८४३ । सङ्ख्ययाव्ययासन्नादूराधिकसङ्ख्याः सङ्ख्येये । (२-२-२५)

सङ्ख्येयार्थया सङ्ख्यया अव्ययादयः समस्यन्ते स बहुव्रीहिः । दशानां समीपे ये सन्ति ते उपदशाः । नव एकादश वेत्यर्थः । 'बहुव्रीहौ सङ्ख्येये–' (सू ८५१) इति वक्ष्यमाणो डच् ।

८४४ । ति विंशतेर्डिति । (६-४-१४२)

विंशतेर्भस्य तिशब्दस्य लोपः स्याड्डिति । आसन्नविंशाः । विंशतेरासन्ना

इति तु वार्तिकमिति भावः । एतच्च 'न कोपधायाः' इति सूत्रे भाष्ये स्पष्टम् । **सङ्ख्यया ॥** शेषग्रहणम् 'अनेकमन्यपदार्थे' इति च निवृत्तौ बहुव्रीहिरित्यनुवर्तते । 'सुप्सुपा' इति च । सङ्ख्येये इत्येतत्सङ्ख्ययेत्यत्रान्वेति । सङ्ख्यया परिच्छेद्यं सङ्ख्येयम्, तत्रार्थे विद्यमानया सङ्ख्ययेति लभ्यते । सङ्ख्याशब्दश्चायं नतु स्वरूपपरः, किन्तु एकादिशतान्तशब्दपरः । तदाह । **सङ्ख्येयार्थया सङ्ख्ययेति ॥** एकादिशब्देन सुबन्तेनेत्यर्थः । **अव्ययादय इति ॥** अव्यय आसन्न अदूर अधिक सङ्ख्या एते सुबन्ता इत्यर्थः । अत्रापि सङ्ख्याशब्दो न स्वरूपपरः, किन्तु एकादिशब्दपर एव । अत्र इदमवधेयम् । विंशतेः प्रागेकादिशब्दाः सङ्ख्येयेषु वर्तन्ते । दशादयो नित्यबहुवचनान्ता विशेष्यलिङ्गाश्च । विंशत्यादिशब्दास्तु नित्यमेकवचनान्ताः सङ्ख्यायां सङ्ख्येये च वर्तन्ते नवतिपर्यन्ताः नित्यस्त्रीलिङ्गाश्च । यथा विंशतिर्ब्राह्मणाः, ब्राह्मणानां विंशतिरिति । विंशत्यादिस्सङ्ख्या । ततः द्वित्वबहुवचने स्तः । यथा गवां द्वे विंशती इति, चत्वारिंशदिति गम्यते । गवां तिस्रः विंशतय इति, षष्टिरिति गम्यते । "विंशत्याद्यास्सदैकत्वे सङ्ख्यास्सङ्ख्येयसङ्ख्ययोः । सङ्ख्यार्थे द्विबहुत्वे स्तस्तासु चानवतेस्स्त्रियः" इत्यमरः । अत्राव्ययस्य उदाहरति । **दशानां समीपे ये सन्ति ते उपदशा इति ॥** उपशब्दस्य समीपार्थकस्याव्ययीभाव उक्तः । इह तु समीपवर्तिनि उपशब्दो वर्तते । दशसमीपवर्तिनः इत्यर्थः । ततश्च अन्यपदार्थवृत्तित्वाभावादप्रथमान्तत्वाच्च 'अनेकमन्यपदार्थे' इत्यप्राप्ते वचनमिदम् । तस्य दशानां वृक्षादीनां समीपवर्तिनो गवादय इत्यर्थभ्रमं वारयति । **नवैकादश वेत्यर्थ इति ॥** सामीप्यमिह दशन्शब्दार्थगतदशत्वापेक्षम् । एकार्थीभावबलात् । तथाच दशत्वसमीपवर्तिसङ्ख्यावत्सु उपशब्द इति फलति । ततश्च दशत्वसमीपवर्तिसङ्ख्यावन्त इति बोधपर्यवसानं भवति । **डजिति ॥** उपदशन्शब्दात् डचि 'नस्तद्धिते' इति टिलोप इति भावः । आसन्नशब्दस्य विंशतिशब्देन षष्ठ्यन्तेन समासे डचि कृते 'टेः' इति इकारमात्रस्य लोपे प्राप्ते आह । **ति विंशतेर्डिति ॥** तीति लुप्तषष्ठीकम् । 'भस्य' इत्यधिकृतम् । 'अल्लोपोऽनः' इत्यस्माल्लोपः इत्यनुवर्तते । तदाह । **विंशतेर्भस्येति ॥** 'अलोऽन्त्यस्य' इति न भवति । 'नानर्थकेऽलोऽन्त्यविधिः' इत्युक्तेः । **आसन्नविंशा इति ॥** विंशतिसङ्ख्यासन्नसङ्ख्यावन्त इत्यर्थः । डचि कृते आसन्नविंशति–अ–इति स्थिते, तिलोपे सवर्णदीर्घे बाधित्वा 'अतो गुणे' इति पररूपे,

इत्यर्थः । अदूरत्रिंशाः । अधिकचत्वारिंशाः । द्वौ वा त्रयो वा द्वित्राः । द्विरावृत्ताः दश द्विदशाः । विंशतिरित्यर्थः ।

८४५ । दिङ्नामान्यन्तराले । (२-२-२६)

दिशो नामान्यन्तराले वाच्ये प्राग्वत् । दक्षिणस्याश्च पूर्वस्याश्च दिशोऽन्तरालं दक्षिणपूर्वा । नामग्रहणाद्यौगिकानां न । ऐन्द्र्याश्च कौबेर्याश्चान्तरालं दिक् ।

८४६ । तत्र तेनेदमिति सरूपे । (२-२-२७)

आसन्नविंशशब्दः अदन्तः । 'उत्तरपदत्वेचापदादिविधौ प्रतिषेधः' इति प्रत्ययलक्षणाभावेनापदत्वात् । अथादूरशब्दस्योदाहरति । **अदूरत्रिंशा इति** ॥ त्रिंशतः अदूराः इति विग्रहः । त्रिंशत्सङ्ख्यायाः अदूरसङ्ख्यावन्तः इत्यर्थः । ङचि टिलोपः । अधिकस्योदाहरति । **अधिकचत्वारिंशाः इति** ॥ चत्वारिंशतोऽधिकाः इति विग्रहः । चत्वारिंशत्सङ्ख्याया अधिकसङ्ख्यावन्तः इत्यर्थः । ङचि टिलोपः । सङ्ख्यावाचकशब्दस्य सङ्ख्यावाचकशब्देन समासमुदाहरति । **द्वौ वा त्रयो वा द्वित्राः इति** ॥ वार्थे बहुव्रीहिः । द्वित्र्यन्यतरा इत्यर्थः । ङचि टिलोपः । ननु द्वित्रा आनीयन्तामित्युक्ते कदाचित् द्वावानयति, तदा कथं बहुवचनमिति चेत्, अत्र भाष्ये "अनिश्चये बहुवचनं प्रयोक्तव्यम्" इति वचनात् समाहितम् । तथा कार्यान्वये विकल्पः, शब्दात्तु नियमेन कोटिद्वयोपस्थितिः। तदुपस्थित्यनन्तरमन्यतरानयनमिच्छया। अतः शब्दान्नियमेन पञ्चानामुपस्थितिरित्यपि समाहितम् । नच वार्थप्राधान्यात् 'अनेकमन्यपदार्थे' इत्येवात्र सिद्धमिति वाच्यम्, 'शेषाद्विभाषा' इति कबभावार्थकत्वात् । स हि कप् 'अनेकमन्यपदार्थे' इति विहितबहुव्रीहावेव प्रवर्तते इति भाष्ये स्पष्टम् । अथ सङ्ख्यायास्सङ्ख्यया समासे उदाहरणान्तरमाह । **द्विरावृत्ता दश द्विदशाः इति** ॥ शब्दशक्तिस्वाभाव्यात्सुजर्थान्तर्भावेन पूर्वपदस्य वृत्त्याश्रयणात् समासे सुपो न श्रवणमिति भाष्ये स्पष्टम् । द्वित्वसङ्ख्याकदशत्ववन्तः इत्यर्थः । फलितमाह । **विंशतिरित्यर्थः इति** ॥ **दिङ्नामानि** ॥ नामानीत्यनन्तरं सुबन्तानि परस्परमिति शेषः । **प्राग्वत् इति** ॥ समस्येते स च बहुव्रीहिरित्यर्थः । नामानीति बहुत्वमविवक्षितमित्यभिप्रेत्योदाहरति । **दक्षिणस्याश्चेति** ॥ **दक्षिणपूर्वेति** ॥ स्त्रीत्वं लोकात् । यद्वा अन्तराळमिह दिगेव गृह्यते । "सर्वनाम्नो वृत्तिमात्रे पुंवत्त्वम्" इति भाष्यम् । यद्यप्युपसर्जनत्वान्न सर्वनामत्वम् । तथापि भूतपूर्वगत्या सर्वनामत्वमादाय पुंवत्त्वं भवति । अत एव भाष्यात् । ननु दिशोरन्तराळे इत्येव सिद्धे नामग्रहणं किमर्थमित्यत आह । **नामग्रहणादिति** ॥ दिक्षु रूढाश्शब्दाः दिङ्नामानीत्यनेन विवक्षिताः । ऐन्द्र्यादिशब्दः इन्द्रशब्दात् कुबेरशब्दाच्चेन्द्रसम्बन्धात् कुबेरसम्बन्धाच्च प्रवृत्तो यौगिक एव न रूढ इति भावः । **तत्र तेन** ॥ समासः इति, बहुव्रीहिः इति चाधिकृतम् । तत्र इत्यनेन सप्तम्यन्ते पदे विवक्षिते ग्रहणविषये इति प्रथमाद्विवचनान्तं तद्विशेषणमध्याहार्यम् । तेन इत्यनेन तु

सप्तम्यन्ते ग्रहणविषये सरूपे पदे तृतीयान्ते च प्रहरणविषये इदं युद्धं प्रवृत्तमित्यर्थे समस्येते कर्मव्यतिहारे द्योत्ये स बहुव्रीहिः। इतिशब्दादयं विषयविशेषो लभ्यते। अन्येषामपि दृश्यते (सू ३५३९)। दीर्घ इत्यनुवर्तते। इचि कर्मव्यतिहारे बहुव्रीहौ पूर्वपदान्तस्य दीर्घः। इच्समासान्तो वक्ष्यते। तिष्ठद्गुप्रभृतिष्विच्प्रत्ययस्य पाठादव्ययीभावत्वमव्ययत्वं च। केशेषु केशेषु गृहीत्वेदं युद्धं प्रवृत्तं केशाकेशि। दण्डैश्च दण्डैश्च प्रहृत्येदं युद्धं प्रवृत्तं दण्डादण्डि। मुष्टीमुष्टि।

तृतीयान्ते पदे विवक्षिते। प्रहरणविषये इति प्रथमाद्विवचनान्तं तद्विशेषणमध्याहार्यम्। सरूपे इति प्रथमाद्विवचनान्तपदे विवक्षिते। प्रहरणविषये इति प्रथमाद्विवचनान्तन्तु, सप्तम्यन्तयोस्तृतीयान्तयोश्च प्रत्येकमन्वेति। इदम् इत्यर्थनिर्देशः। युद्धं प्रवृत्तमिति तद्विशेष्यमध्याहार्यम्। कर्मव्यतिहारे द्योत्ये इत्यप्यध्याहार्यम्। तदाह। **सप्तम्यन्ते इति** ॥ प्रथमाद्विवचनमिदम्। **ग्रहणविषये इति** ॥ गृह्यते अस्मिन्निति ग्रहणम्, केशादि, अधिकरणे ल्युट्, तद्विषयः वाच्यः ययोस्ते ग्रहरणविषये, ग्रहरणवाचके इति यावत्। अत्रापि सरूपे पदे इत्यन्वेति। **इदं युद्धं प्रवृत्तमित्यर्थे इति** ॥ इदमिति समासार्थनिर्देशः। युद्धमिति विशेष्यनिर्देशः। अतः केशाकेशि युद्धमिति न पुनरुक्तिः। परस्परग्रहणं परस्परप्रहरणं च कर्मव्यतिहारः। ननु 'ग्रहणविषये' इत्यध्याहारे किं प्रमाणमित्यत आह। **इतिशब्दादिति** ॥ इतिशब्दो लौकिकप्रसिद्धप्रकारवचनः। केशाकेशीत्यादिलौकिकप्रयोगे यावानर्थः प्रसिद्धस्तावत्यर्थेऽयं बहुव्रीहिर्भवतीत्यर्थः। **अन्येषामपि दृश्यते ॥ अनुवर्तत इति** ॥ 'ढ्रलोपे' इत्यत इति शेषः। 'नहिवृतिवृषि' इत्यादिपूर्वसूत्रोक्तादन्येषामपि दीर्घो दृश्यते इत्यर्थः। अतिप्रसङ्गमाशङ्क्य आह। **कर्मव्यतिहारे बहुव्रीहौ पूर्वपदान्तस्य दीर्घः इति** ॥ बहुव्रीहौ चेत् कर्मव्यतिहारे एव पूर्वपदान्तस्यैव दीर्घ इत्यर्थः। तेन तुराषाडित्यादौ दीर्घो निर्बाधः। दृशिग्रहणादयमर्थो लभ्यते। **वक्ष्यत इति** ॥ 'इच्कर्मव्यतिहारे' इति सूत्रेणेति शेषः। 'तिष्ठद्गुप्रभृतिषु' इति वृत्तिग्रन्थ एवात्र प्रमाणम्। **अव्ययीभावत्वमिति** ॥ तत्र 'अव्ययीभावः' इत्यनुवृत्तेरिति भावः। **अव्ययत्वमिति** ॥ 'अव्ययीभावश्च' इत्यनेनेति शेषः। 'अव्ययादाप्सुपः' इति सुब्लुक् तत्फलमिति भावः। **गृहीत्वेति** ॥ परस्परमिति शेषः। नच केशग्रहणस्य पुरुषकर्तृकत्वात् प्रवृत्तेश्च युद्धकर्तृकत्वात् समानकर्तृकत्वाभावात् कथमिह क्त्वाप्रत्यय इति वाच्यम्। गृहीत्वेत्यनन्तरं स्थितयोरित्यध्याहारात्। ततश्च अस्य केशेषु सः, तस्य केशेष्वयमित्येवं परस्परं गृहीत्वा स्थितयोरिदं युद्धं प्रवृत्तमिति विग्रहवाक्यं फलितम्। **केशाकेशीति** ॥ केशेषु केशेष्वित्यनयोर्ग्रहणान्तर्भावेन वृत्तिघटकयोस्समासे सति सुब्लुक् पूर्वपदस्य दीर्घः, इच्समासान्तः। 'यस्येति च' इति लोपः। अव्ययत्वात्सुब्लुगिति भावः। अन्यपदार्थवृत्तित्वेऽपि एकशेषापवादोऽयं बहुव्रीहिसमासः अप्रथमान्तार्थश्च। **दण्डैश्चेति** ॥ अस्य दण्डैस्सः तस्य दण्डैरयमित्येवं परस्परं

८४७ । ओर्गुणः । (६-४-१४६)

उवर्णान्तस्य भस्य गुणः स्यात्तद्धिते । अवादेशः । बाहूबाहवि । 'ओरोत्' इति वक्तव्ये गुणोक्तिः 'संज्ञापूर्वको विधिरनित्यः' (प ९४) । इति ज्ञापयितुम् । तेन 'स्वायम्भुवम्' इत्यादि सिद्धम् । 'सरूपे' इति किम् । हलेन मुसलेन ।

८४८ । तेन सहेति तुल्ययोगे । (२-२-२८)

तुल्ययोगे वर्तमानं 'सह' इत्येतत्तृतीयान्तेन प्राग्वत् ।

८४९ । वोपसर्जनस्य । (६-३-८२)

प्रहृत्य स्थितयोरिदं युद्धं प्रवृत्तमिति विग्रहार्थः । **दण्डादण्डीति** ॥ दण्डैर्दण्डैरित्यनयोः प्रहरणाद्यन्तर्भावेन समासघटकयोस्समासे सति सुब्लुक्, पूर्वपदस्य दीर्घः, इच्, 'यस्येति च' इति लोपः । अव्ययत्वात् सुब्लुक् । **मुष्टीमुष्टीति** ॥ अस्य मुष्टिभिस्तः तस्य मुष्टिभिश्चायमित्येवं परस्परं प्रहृत्य स्थितयोरिदं युद्धं प्रवृत्तमिति विग्रहः । मुष्ट्या मुष्ट्या इत्यनयोः समासे सति सुब्लुगादि पूर्ववत् । मुष्टामुष्टीति पूर्वपदान्तस्य आत्वमपाणिनीयमेव । **ओर्गुणः** ॥ ओः इत्युकारात् षष्ठ्येकवचनम् । तेन भस्येत्यधिकृतं विशेष्यते । तदन्तविधिः । 'नस्तद्धिते' इत्यतस्तद्धिते इत्यनुवर्तते । तदाह । **उवर्णान्तस्येति** ॥ **बाहूबाहवीति** ॥ बाहौ बाहौ च परस्परं गृहीत्वा स्थितयोरिदं युद्धं प्रवृत्तमिति विग्रहः । समासः, सुब्लुक्, पूर्वपदस्य दीर्घः, इच् । 'यस्येति च' इति बाधित्वा ओर्गुणः, अवादेशः । अव्ययत्वात् सुपो लुक् । ननु गुणः उकारस्थाने भवन् स्थानसाम्यादोकार एव भवति । ततश्च लाघवात् 'ओरोत्' इत्येव सिद्धे गुण इति गुरुनिर्देशो व्यर्थ इत्यत आह । **ओरोत् इति** ॥ नचैवमपीह तद्धितसंज्ञापूर्वकत्वं दुर्वारमिति वाच्यम् । विधेयसमर्पकं पदं यत्र संज्ञारूपं स एव संज्ञापूर्वकविधिरित्यभ्युपगमात् । नच 'ओत्' इति तपरः तत्कालस्य संज्ञेति वाच्यम् । विधीयमानत्वादेव तत्कालत्वसिद्धा तकारस्य उच्चारणार्थत्वात् । **स्वायम्भुवमिति** ॥ स्वयम्भुवोऽपत्यमित्यर्थे अण्, संज्ञापूर्वकत्वेनानित्यत्वादोर्गुणाभावे उवङ्, आदिवृद्धिरिति भावः । स्वायम्भवमिति पाठे तस्येदमित्यण् । **हलेन मुसलेनेति** ॥ अत्र असरूपत्वात् हलामुसलीति न भवतीति भावः । **तेन सहेति तुल्ययोगे** ॥ **तुल्ययोगे इति** ॥ युगपत्कालिकक्रियायोगे इत्यर्थः । **तृतीयान्तेनेति** ॥ तेनेत्यनेन तल्लाभादिति भावः । **प्राग्वदिति** ॥ समस्यते स बहुव्रीहिरित्यर्थः । असामानाधिकरण्यार्थं कबभावार्थं चेदम् । **वोपसर्जनस्य** ॥ उत्तरपदे इत्यधिकृतम् । 'सहस्य सस्संज्ञायाम्' इत्यतस्सहस्य स इत्यनुवर्तते । उपसर्जनम् अस्यास्तीत्युपसर्जनः, मत्वर्थे 'अर्श आद्यच्' । उत्तरपदाक्षिप्तसमासो विशेष्यम् । उपसर्जनवतस्समासस्येत्यर्थः । यद्यपि सर्वेषामपि समासानां कश्चिदवयवः उपसर्जनमेव । तथापि सामर्थ्यादुपसर्जनसर्वावयवकस्येति लभ्यते । तथाच स बहुव्री-

बहुव्रीहेरवयवस्य सहस्य सः स्याद्वा। पुत्रेण सह सपुत्रः, सहपुत्रो वा आगतः। 'तुल्ययोगवचनं प्रायिकम्'। सकर्मकः। सलोमकः।

८५०। प्रकृत्याशिषि। (६-३-८३)

सहशब्दः प्रकृत्या स्यादाशिषि। स्वस्ति राज्ञे सहपुत्राय, सहामात्याय। 'अगोवत्सहलेष्विति वाच्यम्' (वा ३९९०)। सगवे। सवत्साय। सहलाय।

८५१। बहुव्रीहौ संख्येये डजबहुगणात्। (५-४-७३)

संख्येये यो बहुव्रीहिस्तस्माड्डच्स्यात्। उपदशाः। 'अबहुगणात्' किम्। उपबहवः। उपगणाः। अत्र स्वरे विशेषः। सङ्ख्यायास्तत्पुरुषस्य वाच्यः। (वा ३३४८) निर्गतानि त्रिंशतो निस्त्रिंशानि वर्षाणि चैत्रस्य। निर्गतास्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः खड्गः।

हिरेव। तथाच उपसर्जनस्येत्यनेन बहुव्रीहिरिति लब्धम्। अवयवषष्ठ्येषा। तदाह। **बहुव्रीहेरवयवस्येत्यादिना** ॥ बहुव्रीहेरिति किम्। सहयुद्धा। 'राजनियुधिकृञः, सहे च' इति क्विनिप्। उपपदसमासः। अबहुव्रीह्यवयवस्य सहस्य सत्वन्न। **सपुत्र इति** ॥ सभावे रूपम्। पुत्रेण युगपदागत इत्यर्थः। **प्रायिकमिति** ॥ इतिशब्दादिदं लभ्यते। 'विभाषा सपूर्वस्य' इत्यादिनिर्देशाच्चेति भावः। **सकर्मक इति** ॥ विद्यमानकर्मक इत्यर्थः। अत्र तुल्ययोगाभावेऽपि सहस्य सः। **प्रकृत्याशिषि** ॥ 'सहस्य सस्संज्ञायाम्' इत्यतस्सहस्येत्यनुवृत्तं प्रथमया विपरिणम्यते। तदाह। **सहशब्द इति** ॥ **प्रकृत्येति** ॥ स्वभावेन स्थितस्स्यादित्यर्थः। सभावो नेति यावत्। **स्वस्तीति** ॥ भूयादिति शेषः। **सहपुत्रायेति** ॥ तेन सहेति समासे कृते, आशीर्योगान्न सभावः। **सहामात्यायेति** ॥ **अगोवत्सेति** ॥ गोवत्सहलेषु परतस्सहस्य प्रकृतिभावो नेत्यर्थः। **सगवे इति** ॥ राज्ञे स्वस्तीति शेषः। अथ बहुव्रीहावसाधारणसमासान्तानाह। **बहुव्रीहौ** ॥ **सङ्ख्येये यो बहुव्रीहिरिति** ॥ 'सङ्ख्ययाव्यय' इति विहित इति शेषः। **तस्मादिति** ॥ बहुव्रीहाविति पञ्चम्यर्थे सप्तमीति भावः। **डच्स्यात् इति** ॥ समासान्तस्तद्धितश्चेति ज्ञेयम्। **उपदशा इति** ॥ दशानां समीपे ये सन्तीति विग्रहः। 'सङ्ख्ययाव्यय' इति बहुव्रीहिः। सुब्लुक्। उपदशन्शब्दाड्डचि 'नस्तद्धिते' इति टिलोपः। **उपबहवः, उपगणा इति** ॥ बहूनां समीपे ये सन्तीति, गणस्य समीपे ये सन्तीति च विग्रहः। 'बहुगणवतुडति सङ्ख्या' इति सङ्ख्यात्वात् 'सङ्ख्ययाव्यय' इति समासः। अबहुगणात्, इति निषेधान्न डच्। ननु उपगणाः इत्यत्र डचि सति असति च रूपसाम्यात् किं तन्निषेधेनेत्यत आह। **अत्र स्वरे विशेष इति** ॥ डचि सति चित इति अन्तोदात्तत्वं स्यादित्यर्थः। **सङ्ख्याया इति** ॥ सङ्ख्यान्ततत्पुरुषस्य समासान्तो डच् वक्तव्यमित्यर्थः। **निस्त्रिंशानीति** ॥ 'निरादयऽ क्रान्त' इति तत्पुरुषः, डच्, 'टेः' इति टिलोपः। त्रिंशतोऽधिका-

८५२ । बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् । (५-४-११३)

व्यत्ययेन षष्ठी । स्वाङ्गवाचिसक्थ्यक्ष्यन्ताद्बहुव्रीहेः षच्स्यात् । दीर्घे सक्थिनी यस्य सः दीर्घसक्थः । जलजाक्षी । 'स्वाङ्गात्' किम् । दीर्घसक्थि शकटम् । स्थूलाक्षा वेणुयष्टिः । 'अक्ष्णोऽदर्शनात्' (सू ९४४) इत्यच् ।

८५३ । अङ्गुलेर्दारुणि । (५-४-११४)

अङ्गुल्यन्ताद्बहुव्रीहेः षच्स्याद्दारुण्यर्थे । पञ्च अङ्गुलयो यस्य तत्पञ्चाङ्गुलं दारु । अङ्गुलिसदृशावयवं धान्यादिविक्षेपणकाष्ठमुच्यते । 'बहुव्रीहेः' किम् । द्वे अङ्गुली प्रमाणमस्याः द्व्यङ्गुला यष्टिः । तद्धितार्थे तत्पुरुषे 'तत्पुरुषस्याङ्गुलेः—' (सू ७८६) इत्यच् । 'दारुणि' किम् । पञ्चाङ्गुलिर्हस्तः ।

नीति यावत् । **निस्त्रिंश इति** ॥ समासादि पूर्ववत् । त्रिंशदधिकाङ्गुल इत्यर्थः । "न च गवां विंशतिर्गोविंशतिरित्यत्रातिप्रसङ्गश्शङ्क्यः । 'अव्ययादेः' इति विशेषणात् ।" इति भाष्ये स्पष्टम् । नचैकाधिका विंशतिरेकविंशतिरित्यत्र 'सङ्ख्ययाव्यय' इति समासे सति 'बहुव्रीहौ सङ्ख्येये' इति डच् शङ्क्यः । अन्यत्राधिकशब्दादिति वार्तिकादित्यास्तां तावत् । **बहुव्रीहौ** ॥ सक्थ्यक्ष्णोरिति षष्ठी पञ्चम्यर्थे । 'व्यत्ययो बहुलम्' इति छन्दसि वचनादित्यर्थः । "छन्दोवत्सूत्राणि भवन्ति" इति भाष्यम् । बहुव्रीहाविति सप्तमी व्यत्ययेन पञ्चम्यर्थे । तदाह । **स्वाङ्गवाचीति** ॥ **सक्थ्यक्ष्यन्तादिति** ॥ बहुव्रीहिविशेषणत्वात् तदन्तविधिरिति भावः । **षच् स्यादिति** ॥ समासान्तस्तद्धितश्चेति ज्ञेयम् । **दीर्घसक्थ इति** ॥ षच 'यस्येति च' इति लोपः । **जलजाक्षीति** ॥ जलजे इव अक्षिणी यस्या इति विग्रहः । समासे षचि 'नस्तद्धिते' इति टिलोपः । षित्त्वात् ङीष् । षित्त्वं ङीषर्थमिति भावः । **दीर्घसक्थि शकटमिति** ॥ दीर्घे सक्थिनी सक्थिसदृशावीषादण्डौ यस्येति विग्रहः । अत्र सक्थिशब्दार्थयोरीषादण्डयोः 'अद्रवन्मूर्तिमन्स्वाङ्गम्' इत्यादिस्वाङ्गलक्षणाभावान्न षजिति भावः । अत्र 'स्वाङ्गात्' इत्यस्य प्रत्युदाहरणान्तरमाह । **स्थूलाक्षेति** ॥ स्थूलानि अक्षाणि पर्वग्रन्थयो यस्या इति बहुव्रीहिः । अस्वाङ्गत्वादिह न षजिति भावः । ननु षजभावेऽपि नान्तलक्षणङीपि स्थूलाक्षिणीति स्यादित्यत आह । **अक्ष्णोऽदर्शनादित्यजिति** ॥ षचि तु षित्त्वलक्षणङीष् स्यादिति भावः । **अंगुलेर्दारुणि** ॥ बहुव्रीहावित्यनुवृत्तस्य पञ्चम्यर्थे सप्तम्यन्तस्य अङ्गुल्या विशेषणात् तदन्तविधिरित्यभिप्रेत्य आह । **अंगुल्यन्तादिति** ॥ **पञ्चांगुलं दार्विति** ॥ षचि 'यस्येति च' इति इकारलोपः । ननु दारुणः कथं अङ्गुल्यः इत्यत आह । **अंगुलिसदृशावयवमिति** ॥ अङ्गुलिसदृशाः अवयवाः यस्येति विग्रहः । **धान्येति** ॥ कुसूलादिस्थितधान्याद्याकर्षकामिति यावत् । **उच्यत इति** ॥ लक्षणयेति शेषः । **द्व्यंगुलेति** ॥ 'प्रमाणे द्वयसच्' इति विहितस्य मात्रचः 'द्विगोर्नित्यम्' इति लुक् । अबहुव्रीहित्वादत्र न षजिति भावः । तर्हि द्व्यङ्गुलिः इति स्यादित्यत आह । **तद्धितार्थ**

८५४। द्वित्रिभ्यां ष मूर्ध्नः। (५-४-११५)

आभ्यां मूर्ध्नः षः स्याद्बहुव्रीहौ। द्विमूर्धः। त्रिमूर्धः। 'नेतुर्नक्षत्रे अव्वक्तव्यः' (वा ३३६०)। 'मृगो नेता यासां ताः मृगनेत्राः रात्रयः' पुष्यनेत्राः।

८५५। अन्तर्बहिर्भ्यां च लोम्नः। (५-४-११७)

आभ्यां लोम्नोऽप्स्याद्बहुव्रीहौ। अन्तर्लोमः। बहिर्लोमः।

८५६। अञ्नासिकायाः संज्ञायां नसं चास्थूलात्। (५-४-११८)

नासिकान्ताद्बहुव्रीहेरच्स्यान्नासिकाशब्दश्च नसं प्राप्नोति न तु स्थूलपूर्वात्।

८५७। पूर्वपदात्संज्ञायामगः। (८-४-३)

पूर्वपदस्थान्निमित्तात्परस्य नस्य णः स्यात्संज्ञायां न तु गकारव्यवधाने। द्रुरिव नासिका यस्य द्रुणसः। खरणसः। 'अगः' किम्। ऋचामयनम् ऋगय-

---

इति॥ षचि तु ङीष् स्यादिति भावः। **द्वित्रिभ्याम्**॥ षेति लुप्तप्रथमाकं पदम्। **द्विमूर्ध इति**॥ द्वौ मूर्धानौ यस्येति विग्रहः। **त्रिमूर्ध इति**॥ त्रयो मूर्धानो यस्येति विग्रहः। समासान्तः। 'नस्तद्धिते' इति टिलोपः। षचि अनुवर्तमाने षग्रहणं चित्स्वरनिवृत्त्यर्थम्। **नेतुरिति**॥ नक्षत्रे विद्यमानो यो नेतृशब्दः तदन्ताद्बहुव्रीहेरप् वक्तव्य इत्यर्थः। नेता नायकः। **मृगो नेतेति**॥ मृगः मृगशीर्षम्। रात्रिनेता चन्द्रः। तद्योगान्नक्षत्रस्यापि नेतृत्वं बोध्यम्। **मृगनेत्रा इति**॥ मृगनेतृशब्दादप्, ऋकारस्य यण्, रेफः, टाप्। **पुष्यनेत्रा इति**॥ पुष्यो नेता यासामिति विग्रहः। **अन्तर्बहिर्भ्याञ्च लोम्नः**॥ **अन्तर्लोमः इति**॥ अन्तः लोमानि यस्येति विग्रहः, अप्, टिलोपः। एवं बहिर्लोमः। **अञ् नासिकायाः**॥ अच् इति च्छेदः। नासिकाया इत्यस्य बहुव्रीहेर्विशेषणत्वात् तदन्तविधिमभिप्रेत्य आह। **नासिकान्तादिति**॥ नसमित्यनन्तरं प्राप्नोतीत्यध्याहार्यम्। उपस्थितत्वान्नासिकाशब्द इति लभ्यते। तदाह। **नासिकाशब्दश्च नसं प्राप्नोतीति**॥ **पूर्वपदात्**॥ रषाभ्याम् इत्यनुवृत्तम्। पूर्वपदशब्देन पूर्वपदस्थं लक्ष्यते। 'रषाभ्याम्' इत्यनेन लब्धो रेफषश्च प्रत्येकमन्वेति। तदाह। **पूर्वपदस्थान्निमित्तादिति**॥ रेफषकारात्मकादित्यर्थः। अग इति पञ्चम्यन्तम्। गकारभिन्नात्परस्येत्यर्थः। गकारात्परस्य नेति यावत्। तदाह। **नतु गकारव्यवधाने इति**॥ अनेन 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इत्यनुवृत्तिस्सूचिता। अन्यथा अग इत्यस्य वैयर्थ्यं स्यात्। खण्डपदत्वादप्राप्तौ वचनमिदम्। **द्रुरिवेति**॥ वृक्ष इवेत्यर्थः। **द्रुणस इति**॥ बहुव्रीहेरच्। नासिकाशब्दस्य नसादेशः। णत्वम्। **ऋगयनादिति**॥ 'ऋवर्णात्' इति वार्तिकस्याप्यत्रानुवृत्त्या णत्वं प्राप्तं, गकारेण व्यवधानान्न भवतीति भावः। अत्र ऋचामयनमिति

नम्। 'अणृगयनादिभ्यः' (सू १४५२) इति निपातनाण्णत्वाभावमाश्रित्य 'अगः' इति प्रत्याख्यातं भाष्ये। 'अस्थूलात्' किम्। स्थूलनासिकः। 'खुरखराभ्यां वा नस्' (वा ३३६३)। खुरणाः। खरणाः। 'पक्षेऽजपीष्यते'। खुरणसः। खरणसः।

८५८। उपसर्गाच्च। (५-४-११९)

प्रादेर्यो नासिकाशब्दस्तदन्ताद्बहुव्रीहेरच् नासिकाया नसादेशश्च। असंज्ञार्थमिदं वचनम्। उन्नता नासिका यस्य सः उन्नसः। 'उपसर्गादनोत्परः'। इति सूत्रम्। तद्भङ्क्त्वा भाष्यकार आह।

८५९। उपसर्गाद्बहुलम्। (८-४-२८)

उपसर्गस्थान्निमित्तात्परस्य नसो नस्य णः स्याद्बहुलम्। प्रणसः। 'वेर्नो वक्तव्यः' (वा ३३६५)। विगता नासिका यस्य विग्रः। 'ख्यश्च'

विग्रहप्रदर्शनं चिन्त्यम्। नच रघुनाथ इत्यादौ संज्ञायां णत्वं शङ्क्यम्। णत्वेन चेत्संज्ञा गम्यत इत्यर्थात्। इह तु कृते णत्वे संज्ञात्वभङ्गापत्तेर्न णत्वम्। अत एव 'भृञोऽसंज्ञायाम्' इति सूत्रभाष्ये य एते संज्ञायामिति विधीयते, तेषु नैवं विज्ञायते, संज्ञायामभिधेयायामिति। किं तर्हि प्रत्ययान्तेन चेत्संज्ञा गम्यत इत्युक्तम्। **खुरेति** ॥ खुरखराभ्यां परस्य नासिकाशब्दस्य बहुव्रीहौ संज्ञायां नसादेशो वेति वक्तव्यमित्यर्थः। प्रकृतत्वादेव सिद्धे नसादेशवचनम् अच्प्रत्ययानुवृत्तिनिवृत्त्यर्थम्। **खुरणा इति** ॥ खुराविव नासिके यस्येति विग्रहः। नसादेशः। 'पूर्वपदात्संज्ञायाम्' इति णत्वम्। 'अत्वसन्तस्य' इति दीर्घः। **खरणा इति** ॥ खररूपा नासिका यस्येति विग्रहः। पक्षे खुरनासिक इति खरनासिक इति च न भवतीत्याह। **पक्षे अजपीष्यते इति** ॥ अच्प्रत्ययसहितः नसादेश इत्यर्थः। भाष्ये त्विदं न दृश्यते। **उपसर्गाच्च** ॥ नन्वत्र नासिकाया इत्येव सिद्धे किमर्थमिदमित्यत आह। **असंज्ञार्थमिदमिति** ॥ **उपसर्गादनोत्परः इति सूत्रमिति** ॥ तत्र हि 'नश्च धातुस्था' इति सूत्रान्नसिति लुप्तषष्ठीकमनुवर्तते। 'रषाभ्यां नो णः' इत्यनुवर्तते। उपसर्गस्थाद्रेफषकारात्परस्य नसो नस्य णस्स्यात् ओत्परस्तु नकारो णत्वं न प्राप्नोतीत्यर्थः। खण्डपदस्थत्वादप्राप्तविदं सूत्रम्। "प्र ण आयूँषि तारिषत्" इत्याद्युदाहरणम्। 'अनोत्परः' किम्? "प्रनो मुञ्चतम्"। अत्र ओत्परकत्वान्न णत्वमिति स्थितिः। **तद्भङ्क्त्वेति** ॥ 'अनोत्परः' इत्यपनीय तत्स्थाने बहुलमिति च कृत्वा भाष्यकारः आहेत्यर्थः। तथाच फलितं सूत्रमाह। **उपसर्गाद्बहुलम्** ॥ **निमित्तादिति** ॥ रेफषकारात्मकादित्यर्थः। 'उपसर्गादनोत्परः'

---

१. वार्तिके वाग्रहणं 'पक्षेऽजपि' 'खुरणसः' इत्युदाहरणं निर्मूलम्। मुनित्रयानुक्तत्वात् इति रत्नाकरः।

(वा ३३६६)। विख्यः। कथं तर्हि 'विनसा हतबान्धवा' इति भट्टिः। विगतया नासिकयोपलक्षितेति व्याख्येयम्।

८६०। सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणी-पदाजपदप्रोष्ठपदाः। (५-४-१२०)

एते बहुव्रीहयोऽच्प्रत्ययान्ता निपात्यन्ते। शोभनं प्रातरस्य सुप्रातः। शोभनं श्वोऽस्य सुश्वः। शोभनं दिवा अस्य सुदिवः। शारेरिव कुक्षिरस्य शारिकुक्षः। चतस्रोऽश्रयोऽस्य चतुरश्रः। एण्या इव पादावस्यैणीपदः। अजपदः। प्रोष्ठो गौस्तस्येव पादावस्य प्रोष्ठपदः।

८६१। नञ् दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम्। (५-४-१२१)

अच्स्यात्। अहलः—अहलिः। असक्थः—असक्थिः। एवं दुःसुभ्याम्। 'शक्त्थोः' इति पाठान्तरम्। अशक्तः—अशक्तिः।

इति यथाश्रुते तु "प्रणो नय" इत्यादावव्याप्तिः, "प्रनर्पूषा" इत्यादावतिव्याप्तिश्चेति भावः। **प्रणस इति**॥ प्रगता नासिका यस्येति विग्रहः। 'उपसर्गाच्च' इत्यच्। नासिकाया नसि 'उपसर्गादहुळम्' इति णत्वमिति भावः। **वेरिति**॥ वेर्न परो यो नासिकाशब्दः सः प्रादेशं प्राप्नोतीति भावः। **विग्र इति**॥ विगता नासिका यस्येति विग्रहः। प्रकृतवार्तिकेन नासिकाशब्दस्य प्रादेश इति भावः। विगता नासिका यस्येति विग्रहे अचि नसादेशे टापि च विनसेति भट्टिप्रयोगः न युज्यते। प्रादेशस्यास्य नसादेशं प्रति अपवादत्वादित्याक्षिपति। **कथन्तर्हीति**॥ समाधत्ते। **विगतयेति**॥ विगता नासिका विनासिका। प्रादिसमासः। अबहुव्रीहित्वात् न प्रादेशः। किन्तु टायां 'पदन्' इति नसादेशे विनसेति तृतीयान्तं रूपम्। उपलक्षितेत्यध्याहार्यमिति भावः। **सुप्रात॥ सुप्रात इति**॥ अच्प्रत्ययः। 'अव्ययानां भमात्रे टिलोपः'। **सुश्व इति**॥ अच्, पूर्ववट्टिलोपः। **सुदिवः इति**॥ शोभनं दिवा यस्येति। दिवेत्याकारान्तमव्ययम्। 'अव्ययानां भमात्रे टिलोपः' इति टिलोपः। **शारिकुक्ष इति**॥ शारिः पक्षिविशेषः। अचि, 'यस्येति च' इति इकारलोपः। **चतस्रोऽश्रयः इति**॥ कोणा इत्यर्थः। अचि, 'यस्येति च' इति इकारलोपः। **एण्या इवेति**॥ एणी मृगी। **अजपद इति**॥ अजः छागः तस्येव पादावस्येति विग्रहः। एणीपदादिषु अच्। निपातनात् पादः पत्। **नञ्दुस्सुभ्यः**॥ शेषपूरणेन सूत्रं व्याचष्टे। **अच् स्यादिति॥ अहलः, अहलिरिति**॥ अविद्यमानः हलिः यस्येति विग्रहः। हलिशब्द इदन्तः हलपर्यायः। तदन्तादचि 'यस्येति च' इति इकारलोपः। तदभावे च रूपम्। यद्यपि हलशब्देन हलिशब्देन च रूपद्वयं सिद्धम्। तथापि अनुक्तसमासान्ततया शैषिकस्य कपः प्राप्तौ तन्निवृत्त्यर्थं इदं वचनम्। अस्य वैकल्पिकत्वेऽपि अनुक्तसमासान्तत्वाभावादत्र न कप्। **असक्थः, असक्थिरिति**॥ अविद्यमानं सक्थि

८६२ । नित्यमसिच्प्रजामेधयोः । (५-४-१२२)

'नञ्दुःसुभ्यः' इत्येव । अप्रजाः । दुष्प्रजाः । सुप्रजाः । अमेधाः । दुर्मेधाः । सुमेधाः ।

८६३ । धर्मादनिच्केवलात् । (५-४-१२४)

केवलात्पूर्वपदात्परो धर्मशब्दस्तदन्ताद्बहुव्रीहेरनिच्स्यात् । कल्याणधर्मा । 'केवलात्' किम् । परमः स्वो धर्मो यस्येति त्रिपदे बहुव्रीहौ मा भूत् । स्वशब्दो हीह न केवलं पूर्वपदम्, किन्तु मध्यमत्वादापेक्षिकम् । 'सन्दिग्धसाध्यधर्मा'

यस्येति विग्रहः । **एवं दुस्सुभ्यामिति** ॥ दुर्हलः, दुर्हलिः । दुस्सक्थः, दुस्सक्थिः । **शक्त्योरिति** ॥ 'हलिशक्त्योः' इति केचित् पाणिनीयाः पठन्तीत्यर्थः । केचिच्छिष्याः पाणिनिना तथा पाठिता इति वदन्तीति भावः । **नित्यमसिच्** ॥ **नञ्दुस्सुभ्य इत्येवेति** ॥ पूर्वसूत्रादनुवर्तत इति भावः । एतेभ्यः पराभ्यां प्रजामेधाशब्दाभ्यां नित्यमसिच् समासान्तस्स्यात् स तद्धित इत्यर्थः । असिचः चकार इत् । इकार उच्चारणार्थः । अन्यतरस्यामित्यनुवृत्तिनिवृत्त्यर्थं नित्यग्रहणम् । अस्वरितत्वादेव तदनुवृत्त्यभावे सिद्धे स्पष्टार्थमिति तत्त्वम् । **अप्रजा इति** ॥ अविद्यमाना प्रजा यस्येति विग्रहः । 'नञोऽस्त्यर्थानाम्' इति समासः । असिचि 'यस्येति च' इत्याकारलोपादप्रजश्शब्दात् सुबुत्पत्तिः । सौ तु 'अत्वसन्तस्य' इति दीर्घः । 'हल्ङ्याप्' इति सुलोपः । यद्यप्यकारं विना सिचि विहितेऽपि सिद्धमिदम् । तथापि सिच्यभत्वेन आकारलोपाभावादप्रजाशब्दात् सुबुत्पत्तौ, प्रथमैकवचने अप्रजाः इति रूपसिद्धावपि अप्रजसाविति न स्यात् । किन्तु अप्रजासाविति स्यात् । तस्मादकारोच्चारणं भत्वसम्पादनार्थमावश्यकम् । **दुष्प्रजा इति** ॥ दुर्गता प्रजा यस्येति विग्रहः । 'प्रादिभ्यो धातुजस्य' इति समासः । असिजादि पूर्ववत् । 'इदुदुपधस्य' इति षत्वम् । **सुप्रजा इति** ॥ शोभना प्रजा यस्येति विग्रहः । असिजादि पूर्ववत् । **अमेधाः इत्यादि** ॥ अविद्यमाना मेधा यस्येति विग्रहः । असिजादि पूर्ववत् । केचित्तु नित्यग्रहणमन्यतो विधानार्थम् । तेनाल्पमेधसः इत्यादि सिद्ध्यतीत्याहुः । **धर्मादनिच्केवलात्** ॥ पूर्वपदादित्यध्याहृत्य केवलादित्यस्य तद्विशेषणत्वमाह । **केवलात्पूर्वपदादिति** ॥ अनिचि चकार इत् । इकार उच्चारणार्थः । मध्यमपदत्वानाक्रान्तत्वं केवलपूर्वपदत्वम् । **कल्याणधर्मेति** ॥ कल्याणो धर्मो यस्येति विग्रहः । अनिचि 'यस्येति च' इत्याकारलोपः । **परम इति** ॥ परमः स्वः धर्मो यस्येति बहुव्रीहौ परमस्वधर्मशब्दे स्वशब्दस्य धर्मशब्दापेक्षया पूर्वपदत्वात् ततश्च परमस्वधर्मशब्दादप्यचश्च प्राप्तौ तन्निवृत्त्यर्थं केवलग्रहणमिति भावः । केवलग्रहणे कृते तु न दोष इत्याह । **स्वशब्दो हीह न केवलं पूर्वपदमिति** ॥ **किंत्विति** ॥ किन्तु स्वशब्दः धर्मपदापेक्षया पूर्वत्वात्पूर्वपदं, न तु केवलं, मध्यमत्वात् । केवलशब्देन च पदान्तरराहित्यवाचिना मध्यमपदत्वानाक्रान्तत्वलाभादित्यर्थः । इदञ्च 'इजादेः' इति सूत्रभाष्ये स्पष्टम् । एवञ्च त्रिपदबहुव्रीहौ परमस्वधर्म इत्येव भवति । न

इत्यादौ तु कर्मधारयपूर्वपदो बहुव्रीहिः। एवं च 'परमस्वधर्मा' इत्यपि साध्वेव। 'निवृत्तिधर्मा' 'अनुच्छित्तिधर्मा' इत्यादिवत्। पूर्वपदन्तु बहूव्रीहिणा आक्षिप्यते।

८६४। जम्भा सुहरिततृणसोमेभ्यः। (५-४-१२५)

'जम्भा' इति कृतसमासान्तं निपात्यते। 'जम्भो भक्ष्ये दन्ते च।' शोभनो जम्भोऽस्य सुजम्भा। हरितजम्भा। तृणं भक्ष्यं यस्य, तृणमिव दन्ता यस्येति वा तृणजम्भा। सोमजम्भा। 'स्वादिभ्यः' किम्। पतितजम्भः।

८६५। दक्षिणेर्मा लुब्धयोगे। (५-४-१२६)

दक्षिणे ईर्मे व्रणं यस्य दक्षिणेर्मा मृगः। व्याधेन कृतव्रण इत्यर्थः।

त्वनिच्। 'सर्वनामसङ्ख्ययोरुपसङ्ख्यानम्' इति स्वशब्दस्य पूर्वनिपातस्तु 'बाहिताग्न्यादिषु' इति पाक्षिकत्वान्न भवति। नन्वेवं सति सन्दिग्धस्साध्यः धर्मो यस्य स सन्दिग्धसाध्यधर्मा इत्यत्र कथमनिच्। अत्र हि सन्दिग्धेति केवल पूर्वपदं, धर्मशब्दस्तस्मात् परो न भवति। यस्मात् साध्यशब्दात् परो धर्मशब्दस्तस्य तु न पूर्वपदत्वम्, मध्यमपदत्वादित्यत आह। **सन्दिग्धे-ति**॥ सन्दिग्धश्चासौ साध्यश्चेति कर्मधारयः। सन्दिग्धसाध्यः धर्मो यस्येति कर्मधारयगर्भो बहुव्रीहिः। एवञ्च सन्दिग्धसाध्यशब्दस्य केवलपूर्वपदत्वात् तत्रानिच् निर्बाध इति भावः। **एवं चेति**॥ उक्तरीत्या परमश्चासौ स्वश्च परमस्वः, परमस्वः धर्मो यस्येति कर्मधारयाश्रयणे तु केवलपूर्वपदत्वादनिच्। परमस्वधर्मेत्यपि साध्वेवेत्यर्थः। **निवृत्तीति**॥ निवृत्तिः धर्मो यस्येति, अनुच्छित्तिः धर्मो यस्येति च विग्रहः। अत्र समासे निवृत्तिशब्दस्य अनुच्छित्तिशब्दस्य च केवलपूर्वपदत्वात् यथायोग्यमनिजिति भावः। नन्विह सूत्रे पूर्वपदशब्दस्याश्रवणादनुवृत्त्यभावाच्च कथं पूर्वपदादिति लभ्यत इत्यत आह। **पूर्वपदं त्विति**॥ **जम्भा सुहरित**॥ जम्भेति नकारान्तं पदम्। तदाह। **जम्भेति कृतसमासान्तमिति**॥ अनिजन्तमित्यर्थः। सु, हरित, तृण, सोम इत्येतेभ्यः परो यो जम्भशब्दः तदन्तात् बहुव्रीहेः अनिच्प्रत्ययो निपातित इति भावः। **जम्भो भक्ष्ये दन्ते चेति**॥ अत्र कोशो मृग्यः। **सुजम्भेति**॥ सुजम्भशब्दादनिचि 'यस्येति च' इत्यकारलोपः। **हरितजम्भेति**॥ हरितो जम्भो यस्येति विग्रहः। **तृणमिवेति**॥ तृणशब्दस्य दन्तवाचिना जम्भशब्देन सामानाधिकरण्यलाभाय तृणशब्दस्य तत्सदृशे लक्षणेति भावः। **सोमजम्भेति**॥ सोमः चन्द्रः स इव शुभ्राः जम्भाः दन्ताः यस्येति विग्रहः। सोमः सोमलता वा, सैव जम्भः भक्ष्यं यस्येति विग्रहः। **पतितजम्भ इति**॥ पतिताः जम्भाः दन्ताः यस्येति विग्रहः। **दक्षिणेर्मा**॥ लुब्धो व्याधः। तद्योगे 'दक्षिणेर्मा' इत्यनिच्प्रत्ययः, बहुव्रीहिश्च निपात्यते। दक्षिणे ईर्मे यस्येति विग्रहः। ईर्ममित्यस्य व्याख्यानं व्रणमिति। व्यधिकरणत्वेऽपि बहुव्रीहिर्निपातनात्। अनिचि 'यस्येति च' इत्यकारलोपे दक्षिणेर्मेति रूपम्। लुब्धशब्दं विवृण्वन्नाह। **व्याधेनेति**॥

८६६ । इच्कर्मव्यतिहारे । (५-४-१२७)

कर्मव्यतिहारे यो बहुव्रीहिस्तस्मादिच्स्यात्समासान्तः । केशाकेशि । मुसलामुसलि ।

८६७ । द्विदण्ड्यादिभ्यश्च । (५-४-१२८)

तादर्थ्ये चतुर्थ्येषा । एषां सिद्ध्यर्थमिच्प्रत्ययः स्यात् । द्वौ दण्डौ यस्मिन्प्रहरणे तद्द्विदण्डि प्रहरणम् । द्विमुसलि । उभाहस्ति । उभयाहस्ति ।

८६८ । प्रसम्भ्यां जानुनोर्ज्ञुः । (५-४-१२९)

आभ्यां परयोर्जानुशब्दयोर्ज्ञुरादेशः स्याद्बहुव्रीहौ । प्रगते जानुनी यस्य प्रज्ञुः । संज्ञुः ।

८६९ । ऊर्ध्वाद्विभाषा । (५-४-१३०)

ऊर्ध्वज्ञुः । ऊर्ध्वजानुः ।

८७० । धनुषश्च । (५-४-१३२)

धनुरन्तस्य बहुव्रीहेरनङादेशः स्यात् । द्विधन्वा । शार्ङ्गधन्वा ।

रोगादिना व्रणे तु दक्षिणेर्मः इत्येवेति भावः । **इच्कर्मव्यतिहारे ॥ समासान्त इति ॥** तद्धित इत्यपि ज्ञेयम् । **केशाकेशीति ॥** अत्र प्रक्रिया प्रागेव प्रदर्शिता । **द्विदण्ड्यादिभ्यश्च ॥** द्विदण्ड्यादिषु इदन्तानामेव निपातनात् तेभ्यः परत्वेन इच्प्रत्ययविधिरनर्थक इत्याशङ्क्य नेयं पञ्चमीत्याह । **तादर्थ्ये चतुर्थ्येषेति ॥ द्वौ दण्डाविति ॥** कर्मव्यतिहाराभावेऽपि वैरूप्येऽपि बहुव्रीहिः इच्प्रत्ययश्च निपात्यते । **द्विदण्डीति ॥** दण्डादण्डीतिवत् प्रक्रिया । कर्मव्यतिहाराभावात् पूर्वपदस्य न दीर्घ इति विशेषः । **द्विमुसलीति ॥** द्वे मुसले यस्मिन् प्रहरणे इति विग्रहः । **उभाहस्ति, उभयाहस्तीति ॥** उभौ हस्तौ यस्मिन् प्रहरण इति विग्रहः । उभयोऽन्यत्रेति नित्यमयचि प्राप्ते निपातनेन विकल्प्यते । कर्मव्यतिहाराभावेऽपि दीर्घश्च । **प्रसम्भ्यां ॥ जानुशब्दयोरिति ॥** प्रसम् इति पूर्वपदद्वित्वात् तद्घटितोत्तरपदभूतजानुशब्दस्यापि द्वित्वं बोध्यम् । जानुन इत्युक्ते तु 'प्रत्ययः, परश्च' इत्यधिकारात् पञ्चम्यन्तत्वसम्भवात् ज्ञोः प्रत्ययत्वञ्च सम्भाव्येत । तस्यादेशत्वसिद्धये षष्ठीद्विवचननिर्देशः । तदाह । **ज्ञुरादेश इति ॥ प्रज्ञुरिति ॥** 'प्रादिभ्यो धातुजस्य' इति समासः । **संज्ञुरिति ॥** सङ्गते जानुनी यस्येति विग्रहः । **ऊर्ध्वाद्विभाषा ॥** ऊर्ध्वशब्दात् परो यो जानुशब्दः तस्य ज्ञुरादेशो वा स्यात् बहुव्रीहावित्यर्थः । **ऊर्ध्वज्ञुरिति ॥** ऊर्ध्वे जानुनी यस्येति विग्रहः । **धनुषश्च ॥** 'ऊधसोऽनङ्' इति पूर्वसूत्रं स्त्रीप्रत्ययाधिकारे व्याख्यातम् । तस्मादनङित्यनुवर्तते । तदाह । **अनङादेश इति ॥** ङित्त्वादन्तादेशः । 'प्रत्ययः,

८७१। वा संज्ञायाम्। (५-४-१३३)

शतधन्वा—शतधनुः।

८७२। जायाया निङ्। (५-४-१३४)

जायान्तस्य बहुव्रीहेर्निङादेशः स्यात्।

८७३। लोपो व्योर्वलि। (६-१-६६)

वकारयकारयोर्लोपः स्याद्वलि। पुंवद्भावः। युवतिर्जाया अस्य युवजानिः।

८७४। गन्धस्येदुत्पूतिसुसुरभिभ्यः। (५-४-१३५)

एभ्यो गन्धस्येकारोऽन्तादेशः स्यात्। उद्गन्धिः। पूतिगन्धिः। सुगन्धिः। सुरभिगन्धिः। 'गन्धस्येत्त्वे तदेकान्तग्रहणम्' (वा ३३६८)।

परश्च' इत्यधिकारस्थत्वेऽपि ङित्त्वादन्तादेश इति भावः। **द्विधन्वेति** ॥ द्वे धनुषी यस्येति विग्रहः। समासे द्विधनुश्शब्दे सकारस्य अनङादेशः। ङकार इत्। अकार उच्चारणार्थः। उकारस्य यणिति भावः। **शार्ङ्गधन्वेति** ॥ शृङ्गस्येदं शार्ङ्गं 'तस्येदम्' इत्यण्, तत् धनुर्यस्येति विग्रहः। समासे शार्ङ्गधनुश्शब्दे सकारस्यानङ्, ङकार इत्, अकार उच्चारणार्थः, उकारस्य यणिति भावः। महिम्नस्तवे 'स्वलावण्याशंसा धृतधनुषम्' इति प्रयोगस्त्वार्षः। **वा संज्ञायाम्** ॥ 'धनुषश्च' इत्युक्तः अनङ् संज्ञायां वा स्यादित्यर्थः। **शतधन्वेति** ॥ शतधन्वा नाम राजविशेषः स्यमन्तकोपाख्याने प्रसिद्धः। **जायाया निङ्। आदेश इति** ॥ 'प्रत्ययः, परश्च' इत्यधिकारस्थत्वेऽपि ङित्त्वादन्तादेशोऽयमिति भावः। **लोपो व्योर्वलि** ॥ व् य् अनयोर्द्वन्द्वात् षष्ठीद्विवचनम्। तदाह। **वकारयकारयोरिति** ॥ **पुंवद्भाव इति** ॥ 'स्त्रियाः पुंवत्' इत्यनेनेति शेषः। **युवजानिरिति** ॥ जायाशब्दे यकारादाकारस्य निङ्। ङकार इत्, 'लोपो व्योः' इति यकारलोपः। युवतिशब्दस्य पुंवत्त्वात् तिप्रत्ययस्य निवृत्तिः। नलोप इति भावः। **गन्धस्येदुत्** ॥ गन्धस्य इत् इति च्छेदः। **एभ्य इति** ॥ उत्, पूति, सु, सुरभि एतेभ्यः इत्यर्थः। **इकारोऽन्तादेश इति** ॥ पूर्वोत्तरसाहचर्यादिकार आदेश एवेति भावः। समासान्ताधिकारात् 'आदेः परस्य' इति न भवति। **उद्गन्धिरिति** ॥ उद्गतो गन्धो यस्येति विग्रहः। **पूतिगन्धिरिति** ॥ पूतिशब्दः असुरभौ। पूतिः गन्धो यस्येति विग्रहः। **सुगन्धिरिति** ॥ शोभनो गन्धो यस्येति विग्रहः। **सुरभिगन्धिरिति** ॥ सुरभिः गन्धो यस्येति विग्रहः। सर्वत्र 'वायुः' इति विशेष्यम्। **तदेकान्तेति** ॥ तस्य विशेष्यभूतद्रव्यस्य एकान्तः एकदेश इव प्रतीयमान इत्यर्थः। अत्र गन्धस्य गुणस्य द्रव्यैकदेशत्वं न युज्यत इत्याशङ्क्य एकान्तशब्दः एकदेशशब्दविभक्तेर्लाक्षणिक इत्याह। **एकान्तः एकदेश इवेति** ॥ **सुगन्धि पुष्पं सलिलं चेति** ॥ अत्र गन्धस्य पुष्पात्

एकान्तः एकदेश इवाविभागेन लक्ष्यमाण इत्यर्थः । सुगन्धि पुष्पं सलिलञ्च । सुगन्धिर्वायुः । नेह । सु शोभनाः गन्धाः द्रव्याण्यस्य सुगन्ध आपणिकः ।

८७५ । अल्पाख्यायाम् । (५-४-१३६)

सूपस्य गन्धो लेशो यस्मिंस्तत्सूपगन्धि भोजनम् । घृतगन्धि । 'गन्धो गन्धक आमोदे लेशे सम्बन्धगर्वयोः' इति विश्वः ।

८७६ । उपमानाच्च । (५-४-१३७)

पद्मस्येव गन्धोऽस्य पद्मगन्धिः ।

८७७ । पादस्य लोपोऽहस्त्यादिभ्यः । (५-४-१३८)

हस्त्यादिवर्जितादुपमानात्परस्य पादशब्दस्य लोपः स्यात् समासान्तो बहुव्रीहौ । स्थानिद्वारेणायं समासान्तः । व्याघ्रस्येव पादावस्य व्याघ्रपात् । 'अहस्त्यादिभ्यः' किम् । हस्तिपादः । कुसूलपादः ।

सलिलाच्च द्रव्यात् पृथगलक्ष्यमाणत्वादिति भावः । **सु शोभना इति** ॥ सु इत्यस्य व्याख्यानं शोभना इति । **गन्धा इति** ॥ गन्धवन्त इत्यर्थः । 'गुणवचनेभ्यो मतुपो लुगिष्टः' इति लुक् । **द्रव्याणीति** ॥ चन्दनादीनीत्यर्थः । गन्धा इत्यस्य विशेष्यमेतत् । गन्धशब्दस्य नपुंसकद्रव्यविशेषणत्वेऽपि नियतलिङ्गत्वात् पुस्त्वं युज्यते । "गन्धस्तु सौरभे नृत्ये गन्धके गर्वलेशयोः । स एव द्रव्यवचनो बहुत्वे पुंसि च स्मृतः ॥" इति कोशात् । **सुगन्धः आपणिक इति** ॥ अत्र गन्धशब्दवाच्यानां चन्दनादिद्रव्याणां विशेष्यभूतासंज्ञापेक्षया पृथक् लक्ष्यमाणत्वादित्वे नेति भावः । **अल्पाख्यायाम्** ॥ अल्पवचने सति गन्धशब्दस्य इकारोऽन्तादेशस्स्यात् बहुव्रीहावित्यर्थः । लेश इति गन्धशब्दस्य विवरणम् । सूपस्य गन्धः यस्मिन्नित्येव विग्रहः । **सूपगन्धि भोजनमिति** ॥ उत्पूतिसुसुरभिपूर्वकत्वाभावादेकान्तत्वाभावाच्चाप्राप्ते वचनमिदम् । व्यधिकरणपदानामपि क्वचिदस्ति बहुव्रीहिरिति मूल एवानुपदं वक्ष्यते । **घृतगन्धीति** ॥ घृतस्य गन्धः लेशः यस्मिन्निति विग्रहः । गन्धशब्दस्याल्पवाचित्वे प्रमाणमाह । **गन्धो गन्धक इति** ॥ **उपमानाच्च** ॥ उपमानवाचिपूर्वपदात् परस्यापि गन्धशब्दस्य इकारोऽन्तादेशस्स्यात् बहुव्रीहावित्यर्थः । **पद्मस्येवेति** ॥ फलितार्थकथनमिदम् । पद्मगन्ध इव गन्धो यस्येति विग्रहः । पद्मगन्धपदं पद्मसम्बन्धिगन्धसदृशे लाक्षणिकम् । 'सप्तम्युपमानपूर्वपदस्य' इति समासः । **पादस्य लोपः** ॥ अहस्त्यादिभ्य इति च्छेदः । उपमानादित्यनुवर्तते । तदाह । **हस्त्यादिवर्जितादिति** ॥ 'आदेः परस्य' इत्यप्रवृत्तये आह । **समासान्तो बहुव्रीहाविति** ॥ शैषिकस्य कपो निवृत्त्यर्थमपि लोपस्य समासान्तत्वम् । अन्यथा अनुक्तसमासान्तत्वात् कप् प्रसज्येत । नन्वभावात्मकस्य लोपस्य कथं समासान्तावयवत्वमित्यत आह । **स्थानीति** ॥

८७८। कुम्भपदीषु च। (५-४-१३९)

कुम्भपद्यादिषु पादस्य लोपो ङीप् च निपात्यते स्त्रियाम्। 'पादः पत्' (सू ४१४)। कुम्भपदी। 'स्त्रियाम्' किम्। कुम्भपादः।

८७९। सङ्ख्यासुपूर्वस्य। (५-४-१४०)

पादस्य लोपः स्यात्समासान्तो बहुव्रीहौ। द्विपात्। सुपात्।

८८०। वयसि दन्तस्य दत्। (५-४-१४१)

सङ्ख्यासुपूर्वस्य दन्तस्य 'दत्' इत्यादेशः स्याद्वयसि। द्विदन्। चतुर्दन्। षट् दन्ता अस्य षोडन्। सुदन्—सुदती। 'वयसि' किम्। द्विदन्तः करी। सुदन्तो नटः।

८८१। स्त्रियां संज्ञायाम्। (५-४-१४३)

दन्तस्य 'दत्' स्यात्समासान्तो बहुव्रीहौ। अयोदती। फालदती। 'संज्ञायाम्' किम्। समदन्ती।

व्याघ्रस्येवेति ॥ फलितार्थकथनमिदम्। व्याघ्रपादाविव पादावस्येति विग्रहः। 'सप्तम्युपमानपूर्वपदस्य' इति समासः। **कुम्भपदीषु च** ॥ कुम्भपदीष्विति बहुवचननिर्देशात् गणपाठाच्च कुम्भपद्यादिग्रहणमिति भावः। **ङीप् चेति** ॥ 'पादोऽन्यतरस्याम्' इति विकल्पापवाद इति भावः। **स्त्रियामिति** ॥ कुम्भपद्यादीनां स्त्रीलिङ्गानामेव गणे पाठादिति भावः। **कुम्भपदीति** ॥ कुम्भस्येव पादावस्येति विग्रहः। 'पादस्य लोपोऽहस्त्यादिभ्यः' इति लोपे सिद्धे तदनुवादेन नित्यं ङीबर्थं वचनम्। **सङ्ख्यासुपूवस्य** ॥ शेषपूरणेन सूत्रं व्याचष्टे। **पादस्येति** ॥ उपमानात् परत्वाभावादप्राप्तौ वचनम्। **द्विपादिति** ॥ द्वौ पादावस्येति विग्रहः। **सुपादिति** ॥ शोभनौ पादावस्येति विग्रहः। **वयसि दन्तस्य दत्** ॥ **द्विदन्निति** ॥ द्वौ दन्तौ यस्येति विग्रहः। शिशुत्वं गम्यते। दन्तस्य दत्रादेशः। ऋकार इत्। उगित्त्वान्नुम्। सुलोपः। संयोगान्तलोपः। तस्यासिद्धत्वादुपधादीर्घो न। **चतुर्दन्निति** ॥ चत्वारो दन्ता यस्येति विग्रहः। दत्रादि पूर्ववत्। **षोडन्निति** ॥ षट् दन्ता यस्येति विग्रहः। दत्रादि पूर्ववत्। षष उत्त्वमिति ष्टुत्वोत्त्वे। **सुदन्निति** ॥ सु शोभना दन्ताः समस्ता जाता यस्येति विग्रहः। वयोविशेषावगतये समस्तस्य निवेशः। **सुदतीति** ॥ शोभना दन्ताः समस्ता यस्या इति विग्रहः। दत्रादेशः। 'उगितश्च' इति ङीप्। **द्विदन्तः करीति** ॥ हस्तिनस्सर्वदा द्विदन्तत्वेन वयोविशेषानवगतिरिति भावः। **स्त्रियां संज्ञायाम्** ॥ शेषपूरणेन सूत्रं व्याचष्टे। **दन्तस्येति** ॥ वयोविशेषानवगमेऽपि प्राप्त्यर्थमिदम्। **अयोदतीति** ॥ **फालदतीति** ॥ संज्ञाविशेषाविमौ। **समदन्तीति** ॥

८८२ । विभाषा श्यावारोकाभ्याम् । (५-४-१४४)

दन्तस्य 'दत्' स्याद्बहुव्रीहौ । श्यावदन्–श्यावदन्तः । अरोकदन्–अरोकदन्तः ।

८८३ । अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च । (५-४-१४५)

एभ्यो दन्तस्य दत् वा । कुड्मलाग्रदन्–कुड्मलाग्रदन्तः ।

८८४ । ककुदस्यावस्थायां लोपः । (५-४-१४६)

अजातककुत् । पूर्णककुत् ।

८८५ । त्रिककुत्पर्वते । (५-४-१४७)

त्रीणि ककुदान्यस्य त्रिककुत् । संज्ञैषा पर्वतविशेषस्य । त्रिककुदोऽन्यः ।

८८६ । उद्भ्यां काकुदस्य । (५-४-१४८)

लोपः स्यात् । उत्काकुत् । विकाकुत् । काकुदं तालु ।

८८७ । पूर्णाद्विभाषा । (५-४-१४९)

पूर्णकाकुत्–पूर्णकाकुदः ।

समा दन्ता यस्या इति विग्रहः । 'नासिकोदर' इति ङीष् । **विभाषा श्यावारोकाभ्याम्** ॥ शेषपूरणेन सूत्रं व्याचष्टे । **दन्तस्येति** ॥ **श्यावदन्निति** ॥ श्यावा धूम्रा दन्ताः यस्येति विग्रहः । "श्यावस्स्यात् कपिशो धूम्र" इत्यमरः । **अरोकदन्निति** ॥ अरोका अदीप्ताः अच्छिद्रा वा दन्ता यस्येति विग्रहः । **अग्रान्त** ॥ अग्रः अग्रशब्दोऽन्तेऽवसाने यस्य सः अग्रान्तः इत्यभिप्रेत्योदाहरति । **कुड्मलाग्रदन्निति** ॥ कुट्मलानां मुकुळानां अग्राणि तानीव दन्ता यस्येति विग्रहः । शुद्धदन्–शुद्धदन्तः । शुभ्रदन्–शुभ्रदन्तः । वृषदन्–वृषदन्तः । वराहदन्–वराहदन्तः । **ककुदस्य** ॥ अवस्थायां गम्यमानायां ककुदस्य लोपस्स्यात् बहुव्रीहावित्यर्थः । आहारकालादिकृतोवयवानामुपचयोऽपचयश्चावस्थेत्युच्यते । बलीवर्ददोर्मूलगतो बाल्ये उद्भूतोऽवयवः ककुदम् । **अजातककुदिति** ॥ अजातं ककुदमस्येति विग्रहः । बाल इत्यर्थः । **पूर्णककुदिति** ॥ पूर्णं ककुदमस्येति विग्रहः । युवेत्यर्थः । **त्रिककुत् पर्वते** ॥ पर्वतविशेषे गम्ये इत्यर्थः । त्रिककुदिति कृताकारलोपो निपात्यते । त्रीणि ककुदानि शृङ्गाणीत्यर्थः । **उद्भ्यां काकुदस्य** ॥ **लोप इति** ॥ उद्भ्यां परस्य काकुदस्य लोपस्स्यात् बहुव्रीहावित्यर्थः । **उत्काकुदिति** ॥ उन्नतं काकुदं यस्येति विग्रहः । काकुदशब्दं व्याचष्टे । **काकुदं तालविति** ॥ **पूर्णाद्विभाषा** ॥ पूर्णात् परस्य काकुदस्य लोपो वा स्यादित्यर्थः । पूर्णं काकुदं यस्येति विग्रहः ।

८८८। सुहृद्दुर्हृदौ मित्रामित्रयोः। (५-४-१५०)

सुदुर्भ्यां हृदयस्य हृद्भावो निपात्यते। सुहृन्मित्रम्। दुर्हृदमित्रः। अन्यत्र सुहृदयः, दुर्हृदयः।

८८९। उरःप्रभृतिभ्यः कप्। (५-४-१५१)

व्यूढोरस्कः। प्रियसर्पिष्कः। इह 'पुमान्' 'अनड्वान्' 'पयः' 'नौः' 'लक्ष्मीः' इत्येकवचनान्तानि पठ्यन्ते। द्विवचनबहुवचनान्तेभ्यस्तु 'शेषाद्विभाषा' (सू ८९१) इति विकल्पेन कप्। द्विपुमान्—द्विपुंस्कः। 'अर्थान्नञः' (ग १४९)। अनर्थकम्। 'नञः' किम्। अपार्थम्—अपार्थकम्।

८९०। इनः स्त्रियाम्। (५-४-१५२)

बहुदण्डिका नगरी। 'अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति' (प १७)। बहुवाग्मिका। 'स्त्रियाम्' किम्। बहुदण्डी। बहुदण्डिको ग्रामः।

सुहृद्दुर्हृदौ ॥ यथासङ्ख्यमभिप्रेत्योदाहरति। **सुहृन्मित्रमिति** ॥ सु शोभनं हृदयं यस्येति विग्रहः। **उरःप्रभृतिभ्यः कप्** ॥ बहुव्रीहौ समासान्तः तद्धित इति विशेषः। तद्धितत्वात् ककारस्य नेत्संज्ञा। **व्यूढोरस्क इति** ॥ व्यूढं विशालम् उरः वक्षः यस्येति विग्रहः। कप्। 'सोऽपदादौ' इति सत्वम्। **प्रियसर्पिष्कः इति** ॥ प्रियं सर्पिः यस्येति विग्रहः। कप्। 'इणषः' इति षत्वम्। ननु द्वौ पुमांसौ यस्य सः द्विपुमानित्यनुपपन्नम्। उरःप्रभृतिषु पुमानिति पुंस्शब्दस्य पाठादित्यत आह। **इहेति** ॥ गणे अविभक्तिकानामेव पाठः। इह तु केषां चिदेकवचनान्तानामेव पाठस्तद्विवक्षार्थ इति भावः। **द्विपुंस्क इति** ॥ 'सम्पुङ्कानाम्' इति सः। **अर्थान्नञ इति** ॥ गणसूत्रम्। नञ्× परो योऽर्थशब्दस्तदन्तात् बहुव्रीहेः कप् स्यादिति तदर्थः। **अनर्थकमिति** ॥ अविद्यमानोऽर्थो यस्येति विग्रहः। **अपार्थम्, अपार्थकमिति** ॥ अपगतोऽर्थो यस्मादिति विग्रहः। अत्र नञ्पूर्वकत्वाभावात् न नित्यः कबिति भावः। **इनः स्त्रियाम्** ॥ इन्नन्तात् कप् स्यात् बहुव्रीहावित्यर्थः। **बहुदण्डिका नगरीति** ॥ दण्डः अस्यास्तीति दण्डी, 'अत इनिठनौ' इति इनिः। बहवः दण्डिनः यस्याम् इति विग्रहः। **बहुवाग्मिकेति** ॥ वाग्मस्यास्तीति वाग्मी। 'वाचो ग्मिनिः' इति ग्मिनिप्रत्ययः। नकारादिकार उच्चारणार्थः। तद्धितत्वात् गकारस्य नेत्संज्ञा, चकारस्य कुत्वम्, जश्त्वम्, वाग्मीति रूपम्। बहवो वाग्मिनो यस्यामिति विग्रहः। अत्रेनः अनर्थकत्वेऽपि 'अनिनस्मन्' इति वचनात्तदन्तस्याप्यत्र ग्रहणमिति भावः। **बहुदण्डी, बहुदण्डिको ग्राम इति** ॥ बहवः दण्डिनः

८९१ । शेषाद्विभाषा । (५-४-१५४)

अनुक्तसमासान्ताच्छेषाधिकारस्थाद्बहुव्रीहेः कब्वा स्यात् । महायशस्कः—महायशाः । 'अनुक्त—' इत्यादि किम् । व्याघ्रपात् । सुगन्धिः । प्रियपथः । 'शेषाधिकारस्थात्' किम् । उपबहवः । उत्तरपूर्वा । सपुत्रः । तन्त्रादिना शेषशब्दोऽर्थद्वयपरः ।

८९२ । आपोऽन्यतरस्याम् । (७-४-१५)

कप्यावन्तस्य ह्रस्वो वा स्यात् । बहुमालाकः—बहुमालकः । कबभावे बहुमालः ।

८९३ । न संज्ञायाम् । (५-४-१५५)

'शेषात्—' (सू ८९१) इति प्राप्तः कन्न स्यात्संज्ञायाम् । विश्वे देवा अस्य विश्वेदेवः ।

यस्मिन्निति विग्रहः । अत्र समासस्यास्त्रीलिङ्गत्वान्न नित्यः कबिति भावः । **शेषाद्विभाषा** ॥ इतः पूर्वं येभ्यः समासान्ता विहितास्तेभ्योऽन्यश्शेषः । तदाह । **अनुक्तसमासान्तादिति** ॥ **शेषाधिकारस्थादिति** ॥ शेषादित्यनेन शेषाधिकारस्थादित्यपि विवक्षितमिति भावः । **महायशस्क इति** ॥ महत् यशः यस्येति विग्रहः । 'आन्महतः' इत्यात्त्वे, कपि, 'सौऽपदादौ' इति सत्वम् । **महायशा इति** ॥ कबभावे 'अत्वसन्तस्य' इति दीर्घः । **व्याघ्रपादिति** ॥ 'पादस्य लोपोऽहस्त्यादिभ्यः' इत्युक्तसमासान्तोऽयम् । स्थानिद्वारा लोपस्यापि समासान्तत्वात् । **सुगन्धिरिति** ॥ 'गन्धस्येदुत्पूति' इति कृतसमासान्तोऽयम् । **प्रियपथ इति** ॥ 'ऋक्पूः' इति कृतसमासान्तोऽयम् । **उपबहव इति** ॥ 'सङ्ख्याव्यय' इति बहुव्रीहिरयम्, न शेषाधिकारस्थः । **उत्तरपूर्वेति** ॥ अयमपि 'दिङ्नामान्यन्तराळे' इति कृतबहुव्रीहिः, न शेषाधिकारस्थः । **सपुत्र इति** ॥ 'तेन सह' इत्ययमपि बहुव्रीहिः, न शेषाधिकारस्थः । ननु सकृदुच्चरिताच्छेषशब्दात् कथमर्थद्वयलाभ इत्यत आह । **तन्त्रादिनेति** ॥ आदिना आवृत्तिसङ्ग्रहः । एकमनेकोपयोगि तन्त्रम् । उच्चारयित्रा तन्त्रेणोच्चरितात् शब्दात् आवृत्त्या बोध इति बोध्यम् । 'श्वेतो धावति' इत्यादौ सकृदुच्चारणेऽपि श्वा इतः धावति श्वेतगुणको धावतीत्येवमनेकार्थबोधदर्शनादिति भावः । **आपोऽन्यतरस्याम्** ॥ **कपीति** ॥ 'न कपि' इत्यतस्तदनुवृत्तेः इति भावः । **आबन्तस्येति** ॥ प्रत्ययग्रहणपरिभाषया लब्धमिदम् । **ह्रस्वो वेति** ॥ 'शृदृप्रां ह्रस्वो वा' इत्यतः तदनुवृत्तेरिति भावः । 'न कपि' इति नित्यं निषेधे प्राप्ते विकल्पार्थमिदं वचनम् । **बहुमालाक इति** ॥ बह्वयः मालाः यस्येति विग्रहः । ह्रस्वपक्षे बहुमालकः इति भवति । कपो वैकल्पिकत्वात् पक्षे बहुमालः । सर्वत्र 'स्त्रियाः पुंवत्' इति पुंवत्त्वम् । **न संज्ञायाम्** ॥ **शेषादिति प्राप्त इति** ॥ 'अनन्तरस्य' इति न्यायात् 'शेषाद्विभाषा' इति विहितस्य कप एवायं निषेधः, ननु व्यवहितस्य । 'नद्यृतश्च' इत्यादिकप

८९४। ईयसश्च। (५-४-१५६)

ईयसन्तोत्तरपदान्न कप्। बह्वः श्रेयांसोऽस्य बहुश्रेयान्। 'गोस्त्रियोः—' (सू ६५६) इति ह्रस्वत्वे प्राप्ते। 'ईयसो बहुव्रीहेर्नेति वाच्यम्' (वा ६९६)। बह्व्यः श्रेयस्योऽस्य बहुश्रेयसी। 'बहुव्रीहेः' किम्। अतिश्रेयसिः।

८९५। वन्दिते भ्रातुः। (५-४-१५७)

पूजितेऽर्थे यो भ्रातृशब्दस्तदन्तान्न कप्स्यात्। प्रशस्तो भ्राता यस्य प्रशस्तभ्राता, सुभ्राता। 'न पूजनात्' (सू ९५४) इति निषेधस्तु 'बहुव्रीहौ सक्थ्यक्ष्णोः—' (सू ८५२) इत्यतः प्रागेवेति वक्ष्यते। 'वन्दिते' किम्। मूर्खभ्रातृकः।

८९६। नाडीतन्त्र्योः स्वाङ्गे। (५-४-१५९)

स्वाङ्गे यौ नाडीतन्त्रीशब्दौ तदन्तात्कन्न स्यात्। बहुनाडिः कायः।

इति भावः। **विश्वे देवाः अस्येति** ॥ अत्र संज्ञायां समासस्य नित्यत्वात् लौकिकविग्रहप्रदर्शनं चिन्त्यमेव। **ईयसश्च** ॥ बहुश्रेयसीशब्दे श्रेयसीशब्दस्यैव प्रत्ययग्रहणपरिभाषया ईयसन्तत्वादाह। **ईयसन्तोत्तरपदादिति** ॥ बहुव्रीहिणा उत्तरपदादित्याक्षिप्यते इति भावः। **न कबिति** ॥ 'न संज्ञेयसोः' इति वक्तव्ये प्रथग्योगकरणात् नित्यस्य वैकल्पिकस्य च कपोऽयनिषेध इति भावः। **श्रेयांस इति** ॥ अतिशयेन प्रशस्ता इत्यर्थः। 'द्विवचनविभज्य' इति ईयसुन्। 'प्रशस्यस्य श्रः' इति श्रः, 'आद्गुणः' इति गुणः। **बहुश्रेयानिति** ॥ शैषिकः कब्निषिध्यते। **ह्रस्वत्वे प्राप्ते इति** ॥ बह्व्यः श्रेयस्यः यस्येति बहुव्रीहिः। तत्र श्रेयसीशब्दस्योपसर्जनस्त्रीप्रत्ययान्तत्वात् 'गोस्त्रियोः' इति ह्रस्वत्वे प्राप्ते इत्यर्थः। **ईयसो बहुव्रीहेरिति** ॥ ईयसन्तात् बहुव्रीहेः परस्य स्त्रीप्रत्ययस्य ह्रस्वो नेति वाच्यमित्यर्थः। **बहुश्रेयसीति** ॥ 'नद्यृतश्च' इति नित्यः कबिह निषिध्यते। लिङ्गविशिष्टपरिभाषया ईयस्ग्रहणेन स्त्रीप्रत्ययान्तश्रेयसीशब्दस्यापि ग्रहणादिति भावः। **बहुव्रीहेः किमिति** ॥ 'ईयसो बहुव्रीहेः' इत्यत्रेति शेषः। **अतिश्रेयसिरिति** ॥ श्रेयसीमतिक्रान्तः इति तत्पुरुषोऽयमिति भावः। **वन्दिते भ्रातुः ॥ पूजितेऽर्थे इति** ॥ 'वदि अभिवादनस्तुत्योः' इत्युभयार्थकवदिधातोरिह उभयसाधारणपूजार्थकत्वमाश्रीयते इति भावः। **प्रशस्तभ्रातेति** ॥ 'नद्यृतश्च' इति प्राप्तः कबिह निषिध्यते। **सुभ्रातेति** ॥ सु शोभनो भ्राता यस्य स इति विग्रहः। अत्रापि 'नद्यृतश्च' इति प्राप्तस्य कपो निषेधः। ननु 'न पूजनात्' इत्येव निषेधे सिद्धे किमर्थमिदमित्यत आह। **न पूजनादिति ॥ प्रागेवेति** ॥ एवञ्च 'नद्यृतश्च' इत्यादिकपः तेन निषेधाप्राप्तौ इदं वचनमिति भावः। **नाडीतन्त्र्योस्स्वाङ्गे** ॥ **बहुनाडिः कायः इति** ॥ प्राणिस्थत्वात् स्वाङ्गत्वसूचनाय काय इति विशेष्यम्, उपसर्जनह्रस्वः। 'नद्यृतश्च' इति प्राप्तः कप् न भवति। **बहुतन्त्रीग्रीवेति** ॥ बह्व्यः तन्त्र्यः यस्या

बहुतन्त्रीग्रीवा । बहुतन्त्रीधमनी । स्त्रीप्रत्ययान्तत्वाभावाद्ध्रस्वो न । 'स्वाङ्गे' किम् । बहुनाडीकः स्तम्भः । बहुतन्त्रीका वीणा ।

८९७ । निष्प्रवाणिश्च । (५-४-१६०)

कबभावोऽत्र निपात्यते । प्रपूर्वाद्वयतेर्ल्युट् । प्रवाणी तन्तुवायशलाका । निर्गता प्रवाण्यस्य निष्प्रवाणिः पटः । समाप्तवानः । नव इत्यर्थः ।

८९८ । सप्तमीविशेषणे बहुव्रीहौ । (२-२-३५)

सप्तम्यन्तं विशेषणं च बहुव्रीहौ पूर्वं प्रयोज्यम् । कण्ठेकालः । अत एव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः । चित्रगुः । 'सर्वनामसङ्ख्ययोरुपसङ्ख्यानम्' (वा १४१९) । सर्वश्वेतः । त्रिशुक्लः । 'मिथोऽनयोः समासे संख्या पूर्वम्,

---

इति विग्रहः । वीणातन्तुषु तन्त्रीशब्दस्य प्रसिद्धत्वादाह । **बहुतन्त्रीधमनीति** ॥ बहुतन्त्रीशब्दे 'गोस्त्रियोः' इति ह्रस्वमाशङ्क्य आह । **स्त्रीप्रत्ययान्तत्वाभावादिति** ॥ 'अवितृस्तृतन्त्री-भ्य ईः' इत्यौणादिकस्य 'स्त्रियाम्' इत्यधिकारेऽविहितत्वादिति भावः । **निष्प्रवाणिश्च** ॥ **प्रपूर्वादिति** ॥ 'वेञ् तन्तुसन्ताने' इत्यस्मात् प्रपूर्वात् 'करणाधिकरणयोश्च' इत्यधिकरणे ल्युट् । प्रोयते अस्यामिति प्रवाणी । 'पूर्वपदात् संज्ञायाम्' इति णत्वम् । **समाप्तवान इति** ॥ समाप्तं वानं वानक्रिया यस्येति विग्रहः । अत्र शौषिककबभावो निपात्यते । **सप्तमीविशेषणे** ॥ 'उपसर्जनं पूर्वम्' इत्यतः उपसर्जनमित्यनुवर्तते । प्रत्ययग्रहणपरि-भाषया सप्तमीति तदन्तग्रहणम् । तदाह । **सप्तम्यन्तमिति** ॥ **कण्ठेकाल इति** ॥ कण्ठे तिष्ठतीति कण्ठेस्थः । स कालो यस्येति विग्रहः । सुपीति योगविभागात् कः । 'सप्तम्यु-पमानपूर्वपदस्य' इति बहुव्रीहिसमासः, स्थशब्दलोपश्च, इति 'अनेकमन्यपदार्थे' इति सूत्रभाष्ये स्पष्टम् । 'अमूर्धमस्तकात्' इति सप्तम्या अलुक् । **अत एवेति** ॥ यद्यपि कण्ठेस्थशब्दः प्रथमान्तएवात्र बहुव्रीहौ पूर्वपदम्, तस्य कालशब्देन सामानाधिकरण्यमस्त्येवेति, कथं सप्तमीग्रहणं व्यधिकरणपदबहुव्रीहिज्ञापकम् । किं च विशेषणत्वादेव सिद्धे किं वा सप्तमीग्रहणेन । तथापि यदा स्थपदमनादृत्य कण्ठे इत्यस्याधिकरणत्वं तस्य च कालरूपे उत्तरपदार्थे उपसंक्रमः, तदा कण्ठे इत्यस्या-प्रथमान्तत्वात् बहुव्रीहेरप्रसक्तेः तत्र सप्तम्यन्तस्य पूर्वनिपातविधिरभित्तिचित्रायितस्स्यात् । ततश्च सप्तमीग्रहणात् अप्रथमान्तोऽपि बहुव्रीहिः क्वचिदस्तीति विज्ञायते इति योज्यम् । तेन "सच्छा-स्त्रजन्मा हि विवेकलाभः" इत्यादि सिद्धम् । **चित्रगुरिति** ॥ उभयोरपि प्रथमानिर्दिष्टत्वेन विग्रहे नियतविभक्तिकत्वेन चान्यतरस्य पूर्वनिपाते प्राप्ते उत्तरपदविशेषणस्यैव पूर्वनिपातार्थं विशेषणग्रहणमिति भावः । **सर्वनामसङ्ख्ययोरिति** ॥ बहुव्रीहौ पूर्वनिपातस्येति शेषः । **सर्वश्वेत इति** ॥ सर्वः श्वेतः यस्येति विग्रहः । उभयोरपि गुणवचनत्वेन विशेषणविशेष्य-

---

१. अत्र च 'अथ यत्र संख्यासर्वनाम्नोरेव बहुव्रीहिः । कस्य तत्र पूर्वनिपातेन भवितव्यम् । 'परत्वात्सङ्ख्यायाः' इति भाष्यं मानम् ।

शब्दपरविप्रतिषेधात्' (वा ५०४४)। द्व्यन्यः। 'संख्याया अल्पीयस्याः' (वा १४१७)। द्वित्राः। द्वन्द्वेऽपि। द्वादश। 'वा प्रियस्य' (वा १४२०)। गुडप्रियः' प्रियगुडः। 'गड्वादेः परा सप्तमी' (वा १४२१)। गडुकण्ठः। क्वचिन्न। वहेगडुः।

८९९। निष्ठा। (२-२-३६)

निष्ठान्तं बहुव्रीहौ पूर्वं स्यात्। कृतकृत्यः। 'जातिकालसुखादिभ्यः परा निष्ठा वाच्या' (वा १४२२)। सारङ्गजग्धी। मासजाता। सुखजाता। 'प्रायिकं चेदम्' कृतकटः। पीतोदकः।

भावे कामचारात् अन्यतरस्य पूर्वनिपाते प्राप्ते सर्वनामत्वात् सर्वशब्दस्यैव पूर्वनिपातः। उपसर्जनत्वेऽपि भूतपूर्वगत्या सर्वनामत्वम्। **त्रिशुक्ल इति** ॥ त्रयः शुक्ला यस्येति विग्रहः। उभयोरपि सङ्ख्येयत्वात् त्रिशब्दस्यैव पूर्वनिपातः। द्विशुक्लः इत्यत्र तु सर्वनामत्वादेव सिद्धम्। ननु द्वौ अन्यौ यस्य द्व्यन्यः इति बहुव्रीहौ सर्वनामसङ्ख्ययोरन्यतरस्य पूर्वनिपातः स्यादित्यत आह। **मिथोऽनयोरिति** ॥ सर्वनामसङ्ख्ययोरित्यर्थः। **सङ्ख्यापूर्वमिति** ॥ प्रयोज्येति शेषः। **शब्दपरेति** ॥ एकस्मिन्नेव सूत्रे सर्वनामसङ्ख्ययोस्समासोपात्तत्वेऽपि सर्वनामसङ्ख्याशब्दयोस्सङ्ख्याशब्दस्य पाठतः परत्वमादाय विप्रतिषेधसूत्रप्रवृत्तेरित्यर्थः। **सङ्ख्याया अल्पीयस्याः इति** ॥ न्यूनाधिकसङ्ख्यावाचकशब्दानां समासे न्यूनसङ्ख्यायाः पूर्वं प्रयोगः इति वक्तव्यमित्यर्थः। **द्वित्रा इति** ॥ द्वौ वा त्रयो वेति विग्रहे 'सङ्ख्ययाव्यय' इति बहुव्रीहिः। ननु 'द्वन्द्वे घि' इत्यतः द्वन्द्वे इत्यनुवृत्तौ 'अल्पाच्तरम्' इति सूत्रभाष्येऽस्य वार्तिकस्य पाठात् बहुव्रीहौ कथमस्य प्रवृत्तिरित्यत आह। **द्वन्द्वेऽपीति** ॥ इदञ्च वार्तिकं द्वन्द्वेऽद्वन्द्वेऽपि प्रवर्तते इत्यर्थः। **द्वादशेति** ॥ द्वौ च दश च इति द्वन्द्वः। तत्पुरुषे तु शतानां विंशतिः विंशतिशतमित्युदाहार्यम्। 'तदस्मिन्नधिकमिति 'दशान्ताड्डः' इति सूत्रभाष्ये सहस्राणां शतम् इत्यर्थे शतसहस्रमिति भाष्यकैयटयोः प्रयोगोऽत्र मानमिति शब्देन्दुशेखरे स्थितम्। **वा प्रियस्येति** ॥ बहुव्रीहौ पूर्वं प्रयोगो वक्तव्य इत्यर्थः। **गड्वादेः परा सप्तमीति** ॥ बहुव्रीहौ पूर्वं योज्येति वक्तव्यमिति शेषः। **गडुकण्ठ इति** ॥ गडुः कण्ठे यस्येति विग्रहः। गडुर्नाम ग्रीवादिगतो दुर्मांसगोळः। असंज्ञात्वात् 'हलदन्तात्' इत्यलुक् न। **क्वचिन्नेति** ॥ व्याख्यानमेवात्र शरणम्। **वहेगडुरिति** ॥ वहः स्कन्धः तस्मिन् गडुर्यस्येति विग्रहः। **निष्ठा॥ निष्ठान्तमिति** ॥ 'क्तक्तवतू निष्ठा' इति वक्ष्यति। तदन्तमित्यर्थः। **कृतकृत्य इति** ॥ कृतं कृत्यं येनेति विग्रहः। उभयोरपि क्रियाशब्दत्वात् विशेषणत्वे कामचारात् अन्यतरस्य पूर्वनिपाते प्राप्ते निष्ठान्तस्य पूर्वनिपातः। **जातिकालेति** ॥ 'जातिकालसुखादिभ्योऽनाच्छादनात् क्तः' इति स्वरविधिना ज्ञापितमिदमिति भाष्ये स्पष्टम्। जातिपूर्वस्योदाहरणमाह। **सारङ्गजग्धीति** ॥ सारङ्गः जग्धः भक्षितः यया इति विग्रहः। 'अस्वाङ्गपूर्वपदाद्वा' इति ङीष्। कालपूर्वस्योदाहरति। **मासजातेति** ॥ मासः जातः यस्या इति विग्रहः। टाप्। सुखपूर्वस्योदाहरति। **सुखजातेति** ॥ सुखं जातं यस्या इति विग्रहः। **प्रायिकमिति** ॥

९०० । वाऽऽहिताग्न्यादिषु । (२-२-३७)

आहिताग्निः । **अग्न्याहितः** । आकृतिगणोऽयम् । **'प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ'** (वा १४२५) । **अस्युद्यतः** । **दण्डपाणिः** । **क्वचिन्न** । **विवृतासिः**।

इति बहुव्रीहिसमासप्रकरणम् ।

व्याख्यानमेवात्र शरणम् । **कृतकट इति** ॥ कृतः कटः येनेति विग्रहः । अत्र कटत्वस्य जातित्वेऽपि न कृतशब्दस्य परनिपातः । **पीतोदक इति** ॥ पीतम् उदकं येनेति विग्रहः । उदकत्वस्य जातित्वेऽपि न पीतशब्दस्य परनिपातः । **वाऽऽहिताग्न्यादिषु** ॥ निष्ठायाः पूर्वं प्रयोग इति शेषः । **आहिताग्निरिति** ॥ आहिताः आधानेन संस्कृताः अग्नयः येनेति विग्रहः । **प्रहरणार्थेभ्य इति** ॥ आयुधार्थेभ्य इत्यर्थः । निष्ठायामुदाहरति । **अस्युद्यत इति** ॥ असिः उद्यतः येनेति विग्रहः । सप्तम्या उदाहरति । **दण्डपाणिरिति** ॥ दण्डः पाणौ यस्येति विग्रहः । 'निष्ठा' इत्यस्य 'सप्तम्यांविशेषणे' इत्यस्य चायमपवादः । **क्वचिन्नेति** ॥ व्याख्यानमेवात्र शरणम् । **विवृतासिरिति** ॥ विवृतः कोशान्निष्कासितः असिर्येनेति विग्रहः । एवंजातीयान्याहिताग्नयादित्वकल्पनया समाधेयानीत्याहुः ॥

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां
बालमनोरमायां बहुव्रीहिसमासनिरूपणम् ।

श्रीरस्तु ।

॥ अथ द्वन्द्वसमासप्रकरणम् ॥

९०१ । चार्थे द्वन्द्वः । (२-२-२९)

अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते, स द्वन्द्वः । समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः । 'परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः समुच्चयः' । 'अन्यतरस्याऽऽनुषङ्गिकत्वेऽन्वाचयः' । 'मिलितानामन्वये इतरेतरयोगः' । 'समूहः समाहारः' । 'तत्रेश्वरं गुरुं च भजस्व' इति समुच्चये 'भिक्षामट

अथ द्वन्द्वसमासनिरूपणम्—**चार्थे द्वन्द्वः** ॥ 'सुबामन्त्रिते' इत्यतस्सुबिति, 'अनेकमन्यपदार्थे' इत्यतः अनेकमिति चानुवर्तते । समास इति विभाषा इति चाधिकृतम् । तदाह । **अनेकमित्यादिना** ॥ कश्चार्थ इत्यत आह । **समुच्चयेति** ॥ "चान्वाचयसमाहारेतरेतरसमुच्चये" इत्यमरः । तत्र समुच्चयं निर्वक्ति । **परस्परेति** ॥ **एकस्मिन्निति** ॥ एकस्मिन् क्रियापदे आवृत्ते एकस्य असमस्यमानपदस्य प्रथममन्वयः । तदनन्तरमन्यस्यान्वयो यत्र तत्र समुच्चयः चार्थ इत्यर्थः । यथा 'ईश्वरं गुरुं च भजस्व' इति । तत्र हि चशब्दयोगात् गुरोः ईश्वरसापेक्षत्वम्, तस्य चकारयोगाभावात् । अत एवात्र एक एव चशब्दः प्रयुज्यते । एवञ्च ईश्वरञ्च भजस्व, गुरुञ्च भजस्व, इति वाक्यद्वयं पर्यवस्यति । अथान्वाचयं लक्षयति । **अन्यतरस्येति** ॥ यत्रान्यतरस्य पदस्यैकस्मिन् क्रियापदे आनुषङ्गिकत्वेन परार्थप्रवृत्तिविषयत्वेनान्वयः, इतरस्य तु पदस्यान्यस्मिन् क्रियापदे उद्देश्यत्वेनान्वयश्च, तत्रान्वाचयश्चार्थ इत्यर्थः । यथा भिक्षामट, गां चानय, इति । 'अट गतौ' । भिक्षामटनेन प्राप्नुहीत्यर्थः । भिक्षामट, तदा गौस्सङ्गता चेत् तामप्यानय, नतु गवानयने ऐदम्पर्येण प्रयतितव्यमिति तात्पर्यार्थः । इतरेतरयोगं लक्षयति । **मिलितानामिति** ॥ परस्परापेक्षितानां समुदितानामेकस्मिन् क्रियापदेऽन्वयो यत्र तत्रेतरेतरयोगः । परस्परसाहचर्यं चार्थः प्रत्येतव्य इत्यर्थः । यथा धवश्च खदिरश्च धवखदिराविति । अत्र परस्परसाहित्यसूचनाय चकारद्वयप्रयोगः । अथ समाहारं लक्षयति । **समूहस्समाहार इति** ॥ परस्परसाहित्यमित्यर्थः । यथा संज्ञापरिभाषयोस्समूहः संज्ञापरिभाषमिति, तत्रेतरेतरयोगद्वन्द्वे साहित्यं द्रव्यविशेषणम् । यथा धवखदिरौ छिन्धीति । समुदिताविति गम्यते । समाहारद्वन्द्वे तु समूहो विशेष्यम् । यथा संज्ञापरिभाषमिति । तयोस्समूह इति गम्यते । संज्ञापरिभाषमधीते इत्यादौ समूहस्य क्रियान्वयस्तु समूहिद्वारा बोध्य इत्यलम् । **तत्रेति** ॥ तेषु चार्थेषु समुच्चयेऽन्वाचये च न द्वन्द्वसमास इत्यन्वयः । **ईश्वरं गुरुं च भजस्वेति** ॥ समुच्चयोदाहरणमिदम् । भिक्षामट

गां चानय' इत्यन्वाचये' च न समासोऽसामर्थ्यात्। धवखदिरौ। संज्ञा-परिभाषम्। अनेकोक्तेर्होतृपोतृनेष्टोद्गातारः। द्वयोर्द्वयोर्द्वन्द्वं कृत्वा पुनर्द्वन्द्वे तु होतापोतानेष्टोद्गातारः।

९०२। राजदन्तादिषु परम्। (२-२-३१)

एषु पूर्वप्रयोगार्हं परं स्यात्। दन्तानां राजा राजदन्तः। 'धर्मादिष्वनियमः' (वा १४१८)। अर्थधर्मौ—धर्मार्थौ। दम्पती—जम्पती—जायापती। जायाशब्दस्य जम्भावो दम्भावश्च वा निपात्यते। आकृतिगणोऽयम्।

गां चानयेत्युदाहरणं चानुपदमेव व्याख्यातम्। **असामर्थ्यादिति** ॥ ईश्वरं गुरुं च इत्यत्रोक्तरीत्या ईश्वरगुरुशब्दयोः परस्परनिरपेक्षयोरावृत्ते भजस्वेति पदे क्रमेणान्वयात् परस्पर-मन्वयाभावादसामर्थ्यम्। भिक्षामट, गां चानय, इत्यत्र तु भिक्षागवोरटने आनयने च क्रमेण परस्परवार्तानभिज्ञयोरेवान्वयात् परस्परान्वयाभावादसामर्थ्यं स्पष्टमेव। ततश्च इतरे-तरयोगसमाहारयोरेव चार्थयोः परस्परसाहित्यसत्त्वात् समर्थत्वेन द्वन्द्वसमासः। विस्तरस्तु मञ्जूषायां द्रष्टव्यः। इतरेतरयोगमुदाहरति। **धवखदिराविति** ॥ धवश्च खदिरश्चेति द्वन्द्वः। धवो वृक्षविशेषः, खदिरः प्रसिद्धः, तौ समुदिताविति बोधः। समाहारे तूदाहरति। **संज्ञेति** ॥ संज्ञा च परिभाषा च तयोस्समाहारः इति विग्रहः। समाहारस्यैकत्वादेकवचनम्। 'स नपुंसकम्' इति नपुंसकत्वम्। ननु 'चार्थे द्वन्द्वः' इत्यत्र 'सुप्सुपा' इत्यनुवृत्त्यैव धवखदिरा-वित्यादिसिद्धेरनेकग्रहणानुवृत्तिर्व्यर्थेत्यत आह। **अनेकोक्तेरिति** ॥ **होतृपोत्रिति** ॥ होता च पोता च नेष्टा च उद्गाता च इति विग्रहे बहूनामपि द्वन्द्वार्थमनेकग्रहणमिति भावः। 'आनङृतो द्वन्द्वे' इति नेष्टृशब्दस्यैव उत्तरपदपरकत्वात् आनङ्, ननु होतृपोतृशब्दयोरपि। उत्तरपदस्य मध्यमपदव्यवहितत्वेन होतृपोतृशब्दयोरुत्तरपदपरकत्वाभावात्। ननु तर्हि होता-पोतानेष्टोद्गातारः इति कथमित्यत आह। **द्वयोरिति** ॥ होता च पोता चेति द्वयोर्द्वन्द्वः। होतृशब्दस्य आनङ्। ततश्च नेष्टा च उद्गता चेति द्वयोर्द्वन्द्वः। नेष्टृशब्दस्यानङ्। ततः होतापोतारौ च नेष्टोद्गातारौ चेति द्वन्द्वद्वयगर्भो द्वन्द्वः। तत्र नेष्टोद्गातृशब्दे उत्तरपदे होतापोतृ-शब्दस्य आनङित्यर्थः। आनङि ङकार इत्। ङित्त्वादन्तादेशः। अकार उच्चारणार्थः। अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वान्नस्य लोपः। नेष्टोद्गातृशब्दे आद्गुणश्च। **राजदन्तादिषु परम्** ॥ 'उपसर्जनं पूर्वम्' इत्यनुवर्तते। तदाह। **एष्विति** ॥ राजदन्तादिष्वित्यर्थः। पूर्वप्रयोगार्हमित्यतः प्राक् उपसर्जनमिति शेषः। **राजदन्त इति** ॥ दन्तशब्दस्य षष्ठीतत्पुरुषेऽप्रधानतयोप-सर्जनत्वेऽपि परनिपातः। इह गणे राजदन्ताग्रेवणादिशब्दास्तत्पुरुषाः, विष्वक्सेनार्जुनादयः द्वन्द्वाश्च पठिताः। अतो द्वन्द्वप्रकरणे तदुपन्यासः। विष्वक्सेनार्जुनावित्यत्राजाद्यदन्तमित्यर्जुन-शब्दस्य पूर्वनिपाते प्राप्ते परनिपातः। **धर्मादिष्वनियम इति** ॥ गणसूत्रमिदम्। अन्य-तरस्य पूर्वनिपात इत्यर्थः। **अर्थधर्माविति** ॥ अजाद्यदन्तशब्दस्य पूर्वनिपातनियमे प्राप्ते

९०३। द्वन्द्वे घि। (२-२-३२)

द्वन्द्वे घिसंज्ञं पूर्वं स्यात्। हरिश्च हरश्च हरिहरौ। 'अनेकप्राप्तावेकस्य नियमोऽनियमः शेषे' (वा १४१०)। हरिगुरुहराः—हरिहरगुरवः।

९०४। अजाद्यदन्तम्। (२-२-३३)

इदं द्वन्द्वे पूर्वं स्यात्। ईशकृष्णौ। 'बहुष्वनियमः'। अश्वरथेन्द्राः। इन्द्राश्वरथाः। 'घ्यन्तादजाद्यदन्तं विप्रतिषेधेन' (वा १४२६)। इन्द्राग्नी।

९०५। अल्पाच्तरम्। (२-२-३४)

शिवकेशवौ। 'ऋतुनक्षत्राणां समाक्षराणामानुपूर्व्येण' (वा १४२१)। हेमन्तशिशिरवसन्ताः। कृत्तिकारोहिण्यौ। 'समाक्षराणाम्' किम्।

तदनियमः निपात्यते। पाक्षिके राजदन्तादिगणे इत्यर्थः। पत्युरभ्यर्हितत्वेऽपि परनिपातश्च। **आकृतिगणोऽयमिति** ॥ वृत्तौ तु कृत्स्नोऽयं गणपठितः। **द्वन्द्वे घि** ॥ पूर्वमित्यनुवर्तते। तदाह। **पूर्वं स्यादिति** ॥ **हरिहराविति** ॥ हरिशब्दस्य घित्वात् पूर्वनिपातः। ननु हरिहरगुरवः इत्यत्र गुरुशब्दस्यापि घित्वात् पूर्वनिपातस्स्यादित्यत आह। **अनेकेति** ॥ अनेकस्य घिसंज्ञकपदस्य द्वन्द्वप्राप्तौ सत्यामेकस्य घिसंज्ञकस्य पूर्वनिपातानियमः। शेषेऽन्यस्मिन् घिसंज्ञकपदविषये पूर्वनिपातस्य विकल्प इत्यर्थः। इदं 'अल्पाच्तरम्' इति सूत्रे भाष्ये स्पष्टम्। जातिपक्षे तावत् आकृतिं पुरस्कृत्य सर्वासु व्यक्तिषु तत्तच्छास्त्राणि सकृदेव प्रवर्तन्ते। सकृच्छ्रुतत्वात्। न तु प्रतिव्यक्ति। तथाच अप्रतिव्यक्त्या वृत्तिप्रसङ्गात्। ततश्च अनेकघिसंज्ञकसमवाये एकस्य घिसंज्ञकस्य पूर्वनिपाते सति पुनश्शास्त्रं न प्रवर्तते। सकृत् पृवृत्त्यैव शास्त्रस्य शान्ताकाङ्क्षत्वात्। व्यक्तिपक्षस्तु नेहाश्रीयते। लक्ष्यानुरोधादित्याहुः। **हरिहरगुरव इति** ॥ हरिगुरुशब्दयोर्न नियम इति भावः। **अजाद्यदन्तम्** ॥ **इदमिति** ॥ अजादित्वे सत्यदन्तमित्यर्थः। **ईशकृष्णाविति** ॥ अत्र कृष्णस्यादन्तत्वेऽप्यजादित्वाभावान्न पूर्वनिपातः। **बहुष्वनियम इति** ॥ वक्तव्य इति शेषः। ननु इन्द्राग्नी इत्यत्र घित्वादग्निशब्दस्य पूर्वनिपातः किं न स्यादित्यत आह। **घ्यन्तादिति** ॥ घ्यन्तशब्देन द्वन्द्वेऽघि इति सूत्रं विवक्षितम्। ल्यब्लोपे पञ्चमी। विप्रतिषेधसूत्रेण 'द्वन्द्वे घि' इत्येतत् बाधित्वा 'अजाद्यदन्तम्' इति प्रवर्तते इत्यर्थः। **अल्पाच्तरम्** ॥ अल्पः अल्पसङ्ख्यः अच् यस्य तदल्पाच्, तदेवाल्पाच्तरम्। अत एव निपातनात् स्वार्थे तरप्, कुत्वाभावश्च। अल्पसङ्ख्याच्चकपदं द्वन्द्वे पूर्वं प्रयोज्यमित्यर्थः। **शिवकेशवाविति** ॥ हरिहरयोरन्यतरोत्कर्षवादस्य पाषण्डवादत्वादिति भावः। यदि तु 'द्विवचनविभज्य' इत्यतिशयार्थे तरप्स्यात्, तदा धवखदिरपलाशाः इत्यत्र बहुषु न स्यादिति प्राञ्चः। शब्देन्दुशेखरे तु प्रकर्षार्थक एवायं तरप् इति स्थितम्। **ऋतुनक्षत्राणामिति** ॥ समानसङ्ख्याच्चानां ऋतूनां च द्वन्द्वे नक्षत्राणां च द्वन्द्वे आनुपूर्व्येण क्रमेण पूर्वनिपातो वक्तव्य इत्यर्थः। **हेमन्तशिशिरवसन्ता इति** ॥ त्रयाणामृतूनामानुपूर्व्यं लोकप्रसिद्धम्। एवं

ग्रीष्मवसन्तौ । 'लघ्वक्षरं पूर्वम्' (वा १४१३) । कुशकाशम् । 'अभ्यर्हितं च' (वा १४१२) । तापसपर्वतौ । 'वर्णानामानुपूर्व्येण' (वा १४१५) । ब्राह्मणक्षत्रियविट्शूद्राः । 'भ्रातुर्ज्यायसः' (वा १४१६) । युधिष्ठिरार्जुनौ ।

९०६ । द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् । (२-४-२)

एषां द्वन्द्वः एकवत्स्यात् । पाणिपादम् । मार्दङ्गिकपाणविकम् । रथिकाश्वारोहम् । समाहारस्यैकत्वादेकत्वे सिद्धे नियमार्थं प्रकरणम् । प्राण्यङ्गादीनां समाहार एव यथा स्यात् ।

कृत्तिकादिनक्षत्राणामपि । **ग्रीष्मवसन्ताविति** ॥ विषमाक्षरत्वान्न वसन्तस्य पूर्वनिपातः । किन्तु अल्पाच्त्वात् ग्रीष्मस्य पूर्वनिपातः । **लघ्वक्षरं पूर्वम्** ॥ लघु अक्षरमच् यस्य, तत् द्वन्द्वे पूर्वं प्रयोज्यमिति वक्तव्यमित्यर्थः । **कुशकाशमिति** ॥ समाहारद्वन्द्वोऽयम् । **अभ्यर्हितं चेति** ॥ श्रेष्ठः पूर्वः प्रयोज्य इति वक्तव्यमित्यर्थः । **तापसपर्वताविति** ॥ पर्वतस्य स्थावरजन्मतया तापसस्य तदपेक्षया अभ्यर्हितत्वं बोध्यम् । भाष्ये तु मातापितरावित्युदाहृतम् । 'गर्भधारणपोषाभ्यां पितुर्माता गरीयसी' इत्यादिस्मृतेरिति तदाशयः । **वर्णानामानुपूर्व्येणेति** ॥ एषां क्रमेण पूर्वनिपातः । "ब्रह्मक्षत्रियविट्शूद्रा वर्णाः" इत्यमरः । तेषामानुपूर्व्यन्तु "प्रजापतिरकामयत प्रजायेयेति, समुखतस्तृचृतं निरमिमीत" इत्यादितैत्तिरीयब्राह्मणादिसिद्धम् । **भ्रातुर्ज्यायसः इति** ॥ ज्येष्ठभ्रातुः पूर्वनिपातः इत्यर्थः । अत्र 'द्वन्द्वे घि' 'अजाद्यदन्तम्' इति विधिद्वयम् 'अल्पाच्तरम्, लघ्वक्षरं पूर्वम्, ऋतुनक्षत्राणाम्, अभ्यर्हितं च, भ्रातुर्ज्यायसः' इति विधिभिः परत्वात् बाध्यते । भाष्ये तु सर्वत एवाभ्यर्हितं पूर्वनिपातमिति मतान्तरं स्थितम् । **द्वन्द्वश्च प्राणि** ॥ प्राणितूर्यसेनाङ्गानीति द्वन्द्वगर्भषष्ठीसमासः । द्वन्द्वान्ते श्रूयमाणः अङ्गशब्दः प्रत्येकं सम्बध्यते इत्यभिप्रेत्य आह । **एषामिति** ॥ प्राण्यङ्गानां तूर्याङ्गानां सेनाङ्गानां चेत्यर्थः । **द्वन्द्वः इति** ॥ समाहारद्वन्द्वः इत्यर्थः । 'द्विगुरेकवचनम्' इति पूर्वसूत्रे 'समाहारग्रहणं कर्तव्यम्' इति वार्तिकस्यात्राप्यनुवृत्तेः । **एकवदिति** ॥ एकवचनमित्यनुवर्तते । एकं वक्तीत्येकवचनम् । कर्तरि ल्युट् । सामान्याभिप्रायं नपुंसकम् । **पाणिपादमिति** ॥ पाण्योः पादयोश्च समाहार इति विग्रहः । अत्र समाहारे एकवत्त्वं 'स नपुंसकम्' इति नपुंसकत्वं च । पाण्योः पादयोश्च प्राण्यवयवत्वात् प्राण्यङ्गोदाहरणमिदम् । अथ तूर्याङ्गद्वन्द्वे उदाहरति । **मार्दङ्गिकपाणविकमिति** ॥ मृदङ्गपणवशब्दौ वाद्यविशेषपरौ । इह तु तद्वादनेऽपि वर्तते । मृदङ्गवादनं शिल्पमस्येत्यर्थे 'शिल्पम्' इति ठक् । मार्दङ्गिकपाणविकयोस्समाहार इति विग्रहः । तूर्याङ्गत्वादेकवचनम् । तूर्याङ्गत्वं च तद्वादकतया बोध्यम् । 'स नपुंसकम्' इति नपुंसकत्वम् । सेनाङ्गद्वन्द्वे उदाहरति । **रथिकाश्वारोहमिति** ॥ रथेन चरन्तीति रथिकाः । पर्पादिभ्यः ष्ठन् । रथिकानामश्वारोहाणां च समाहार इति विग्रहः । सेनावयवत्वादेकवत्त्वम् । पूर्ववन्नपुंसकत्वम् । ननु समाहारद्वन्द्वे समाहारस्य विशेष्यत्वात् तस्य चैकत्वादिदं सूत्रं व्यर्थमित्यत आह । **समाहारस्यैकत्वादिति** ॥ **समाहार एवेति** ॥ न

९०७। अनुवादे चरणानाम्। (२-४-३)

चरणानां द्वन्द्वः एकवत्स्यात्सिद्धस्योपन्यासे। 'स्थेणोर्लुङीति वक्तव्यम्' (वा १५३५–१५३६)। उदगात्कठकालापम्, प्रत्यष्ठात्कठकौथुमम्।

९०८। अध्वर्युक्रतुरनपुंसकम्। (२-४-४)

यजुर्वेदे विहितो यः क्रतुस्तद्वाचिनामनपुंसकलिङ्गानां द्वन्द्वः एकवत्स्यात्। अर्काश्वमेधम्। 'अध्वर्युक्रतुः' किम्। इषुवज्रौ, सामवेदे विहितौ। 'अनपुंसकम्' किम्। राजसूयवाजपेये। अर्धर्चादी।

त्वितरेतरयोगः। एषां द्वन्द्वनियमार्थं सूत्रमित्यर्थः। एवमुत्तरसूत्राण्यपि समाहार एवेति नियमार्थानि। नचेतरेतरयोगद्वन्द्वे एषामेकवत्त्वविधानार्थमिदं सूत्रमस्तु। तथाच पाणिपादः इति पुल्लिङ्गमेकवचनान्तं रूपं फलमिति वाच्यम्। 'समाहारग्रहणं कर्तव्यम्' इति पूर्वसूत्रस्थवार्तिकस्यानुवृत्तेः, एकवद्भावप्रकरणेऽस्मिन् सर्वत्र समाहारद्वन्द्वानामेव भाष्ये उदाहृतत्वाच्च। नच रथिकमार्दङ्गिकावित्यादावतिप्रसङ्गइशङ्क्यः। "प्राण्यङ्गानां परस्परद्वन्द्व एकवत् तूर्याङ्गानां परस्परद्वन्द्व एकवत्, सेनाङ्गानां परस्परद्वन्द्व एकवदित्यभ्युपगमात्" इति भाष्ये स्पष्टम्। **अनुवादे चरणानाम्॥ चरणानां द्वन्द्व एकवदिति॥** शाखाध्येतृविशेषाश्चरणाः। तद्वाचिनां परस्परद्वन्द्वः एकवदित्यर्थः। अनुवाद इत्येतद्व्याचष्टे। **सिद्धस्योपन्यासे इति॥** अवगतार्थस्य प्रतिपादने इत्यर्थः। **स्थेणोरिति॥** लुङीति प्रत्येकमन्वयाभिप्रायमेकवचनम्। लुङन्ते स्थाधातौ लुङन्ते इण्धातौ च प्रयुज्यमान एव अनुवादे चरणानां द्वन्द्वः एकवदिति वक्तव्यमित्यर्थः। **उदगादिति॥** प्रादुरभूदित्यर्थः। इण्धातोर्लुङि रूपम्। **कठकालापमिति॥** कठेन प्रोक्तमधीयते इति कठाः। वैशम्पायनान्तेवासित्वाण्णिनिः। तस्य 'कठचरकात्' इति लुक्। ततोऽध्येतृप्रत्ययस्य 'प्रोक्ताल्लुक्' इति लुक्। कलापिना प्रोक्तमधीयते इति कलापाः। प्रोक्तार्थे 'कलापिनोऽण्' 'सब्रह्मचारिपीठसर्पि' इत्यादिना टिलोपः। ततोऽध्येतृणः 'प्रोक्ताल्लुक्' इति लुक्। कठानां कलापानाञ्च समाहार इति विग्रहः। **प्रत्यष्ठादिति॥** प्रतिपूर्वात् स्थधातोर्लुङि रूपम्। **कठकौथुममिति॥** कठेन प्रोक्तमधीयत इति कठाः। कौथुमिना प्रोक्तमधीयते इति कौथुमाः। प्रोक्तेऽर्थे 'तेन प्रोक्तम्' इत्यण्। 'सब्रह्मचारि' इत्यनेन टिलोपः। ततोऽध्येत्रणो लुक्। कठानां कौथुमानाञ्च समाहार इति विग्रहः। यदा कठाः कलापाश्च उदिताः, यदा कठाः कौथुमाश्च प्रतिष्ठिताः, तदा किञ्चिदिदं वक्तव्यमिति कृतसङ्केतयोरिदं वाक्यद्वयम्। अत्रोदयप्रतिष्ठयोः पूर्वसिद्धयोरनुवादादेकत्वम्। स्थेणोः किम्। अभूवन् कठकलापाः। लुङि किम्, अतिष्ठन् कठकलापाः। **अध्वर्युक्रतुः॥** अध्वर्युशब्दोऽत्राध्वर्युकर्मविधायकयजुर्वेदपरः। तदाह। **यजुर्वेदे इति॥ अर्काश्वमेधमिति॥** अर्को महाक्रतुः। अश्वमेधो नाम प्रसिद्धः। उभौ यजुर्वेदविहितक्रतू। अर्कस्य चाश्वमेधस्य च समाहार इति विग्रहः। **इषुवज्राविति॥** क्रतुविशेषावेतौ न यजुर्वेदविहिताविति भावः। तर्हि कस्मिन् वेदे विहितावित्यत आह।

९०९ । अध्ययनतोऽविप्रकृष्टाख्यानाम् । (२-४-५)

अध्ययनेन प्रत्यासन्ना आख्या येषां तेषां द्वन्द्वः एकवत् । पदकक्रमकम् ।

९१० । जातिरप्राणिनाम् । (२-४-६)

प्राणिवर्जजातिवाचिनां द्वन्द्वः एकवत् । धानाशष्कुलि । प्राणिनां तु, विट्छूद्राः । द्रव्यजातीयानामेव । नेह । रूपरसौ । गमनाकुञ्चने, जाति-प्राधान्य एवायमेकवद्भावः । द्रव्यविशेषविवक्षायां तु, बदरामलकानि ।

सामेति ॥ राजसूयवाजपेये इति ॥ एतयोर्यजुर्वेदविहितत्वेऽपि नपुंसकत्वान्नैकवत्त्वमिति भावः । राजसूयवाजपेययोः पुष्टिङ्गतया प्रसिद्धेराह । **अर्धर्चादी इति ॥ अध्ययनतः ॥** अविप्रकृष्टाख्यानामिति च्छेदः । अध्ययनत इति तृतीयार्थे तसिः । तदाह । **अध्ययनेन प्रत्यासन्नेति ॥** सन्निकृष्टेत्यर्थः । **पदकक्रमकमिति ॥** पदान्यधीयते पदकाः । क्रमाण्य-धीयते क्रमकाः । 'क्रमादिभ्यो वुन्' । पदकानां क्रमकाणाञ्च समाहार इति विग्रहः । पदा-ध्ययनानन्तरं क्रमाध्ययनमित्यध्ययनगता प्रत्यासत्तिरध्येतर्यारोप्यत इति भावः । पदक्रममिति नोदाहृतम् । 'जातिरप्राणिनाम्' इत्येव सिद्धेः । तदध्येतृत्वे तु न जातिरिति भावः । **जातिरप्राणिनाम् ॥** जातिरिति षष्ठीबहुवचनस्थाने व्यत्ययेन प्रथमा । जातिवचनमित्यर्थः । **धानाशष्कुलीति ॥** धानाश्च शष्कुल्यश्च तासां समाहार इति विग्रहः । जातिवाचित्वादेकत्वम् । नपुंसकत्वाद्ह्रस्व इति भावः । **विट्छूद्रा इति ॥** विशश्च शूद्राश्चेति विग्रहः । **द्रव्यजातीया नामेवेति ॥** अप्राणिनामिति पर्युदासे सति नञिवयुक्तन्यायादिदं लभ्यत इति भावः । **रूप-रसाविति ॥** गुणजातिवचनावेतौ । **गमनाकुञ्चने इति ॥** क्रियागतजातिविशेषावेतौ । ननु बदर्याः फलानि बदराणि, आमलक्याः फलान्यामलकानि 'फले लुक्' इति विकारप्रत्ययस्य लुकि 'लुक्तद्धितलुकि' इति स्त्रीप्रत्ययस्य लुक् । फलत्वव्याप्यजातिविशेषवाचिनावेतौ । ततश्च बदराणि चामलकानि च बदरामलकं बदरामलकानीति कथं रूपद्वयम् । 'जातिरप्राणिनाम्' इत्येकत्वस्य नित्यत्वादित्यत आह । **जातिप्राधान्ये इति ॥** व्यक्तिविशेषानादरेण सकल-तत्तद्व्यक्त्यनुस्यूतजातिविवक्षायामित्यर्थः । घटमानयेत्यादौ हि घटादिशब्दानामाकृत्यधिकरण-न्यायेन घटत्वादिजातिरर्थः । जातेश्च निराश्रयाया उपस्थित्यसम्भवात् आश्रयभूतव्यक्त्यर्थाकाङ्क्षा-यामविशेषात् कृत्स्नमप्युपस्थितार्थकम्, तत्र घटमानयेत्यादिप्रयोगेषु जातेरतीतानागतवर्तमाने कृत्स्नव्यक्तीनां च क्रियान्वयासम्भवात् व्यक्तिविशेषमेव किञ्चिदादाय क्रिया विश्राम्यति । इदमेव च जातेः प्राधान्यं तत्तज्जात्याश्रयसकलतत्तद्व्यक्तिबोधकत्वात्मकम् । घटाश्शुक्लाः इत्यादिप्रयोगेषु पदान्तरसमभिव्याहारादिवशाद्व्यक्तिविशेषानेव जातिरुपस्थापयतीति जातेरप्राधा-न्यम् । जात्याश्रयसकलव्यक्त्यनुपस्थापकत्वादिति 'तस्यादितः' इति सूत्रे कैयटे स्पष्टम् । ततश्च फलत्वव्याप्यबदरत्वजात्या आमलकत्वजात्या चाविशेषात्तदाश्रयव्यक्त्युपस्थितौ बदरा-मलकमित्येकवद्भावः । **द्रव्यविशेषेति ॥** आरण्यानि बदरामलकानीत्यादौ फलत्वव्याप्यबदरत्वा-

९११। विशिष्टलिङ्गो नदीदेशोऽग्रामाः। (२-४-७)

ग्रामवर्जनदीदेशवाचिनां भिन्नलिङ्गानां समाहारे द्वन्द्वः एकवत्स्यात्। उद्ध्यश्च इरावती च। उद्ध्येरावति। गङ्गा च शोणश्च गङ्गाशोणम्। कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रम्। 'भिन्नलिङ्गानाम्' किम्। गङ्गायमुने। मद्रकेकयाः। 'अग्रामाः' किम्। जाम्बवं नगरम्। शालूकिनी ग्रामः। जाम्बवशालूकिन्यौ।

९१२। क्षुद्रजन्तवः। (२-४-८)

एषां समाहारे एव द्वन्द्वः एकवत्स्यात्। यूकालिक्षम्। आनकुलात्क्षुद्रजन्तवः।

९१३। येषां च विरोधः शाश्वतिकः। (२-४-९)

एषां प्राग्वत्। 'अहिनकुलम्' 'गोव्याघ्रम्' काकोलूकम्' इत्यादौ परत्वात्। 'विभाषा वृक्षमृग—' (सू ९१६) इति प्राप्तं चकारेण बाध्यते।

मलकत्वादिजातिभ्याम् आरण्यत्वादिविशेषितकतिपयव्यक्तीनामेवोपस्थितिः। ग्राम्यानां व्यक्तीनामनुपस्थितेः तयोर्जात्योरप्राधान्यात् नायमेकवद्भाव इत्यर्थः। क्षीरोदके सम्पृक्ते इत्यन्तादिवत्सूत्रभाष्यप्रयोगोऽत्र लिङ्गमित्याहुः। **विशिष्टलिङ्गो नदीदेशोऽग्रामाः॥** अग्रामा इति च्छेदः। व्यत्ययेन बहुत्वे एकवचनम्। विपूर्वकशिषधातुः भेदे वर्तते। विशेषणं विशेष्येणेत्यादौ यथा। विशिष्टं लिङ्गं येषामिति विग्रहः। तथाच ग्रामवाचकभिन्नाः भिन्नलिङ्गकाः ये नदीवाचिनः ये देशवाचिनश्च तेषां द्वन्द्वे एकवत् स्यादिति लभ्यते। तदाह। **ग्रामवर्जेति॥** समाहार एव द्वन्द्वस्स्यादित्येकवत्त्वविधेः फलाभिप्रायमेतत्। अस्यैकवद्भावप्रकरणस्य समाहार एव द्वन्द्वनियमार्थतयानुपदमेवोक्तत्वात्। **उद्ध्यश्चेति॥** उद्ध्यो नाम नदविशेषः, इरावती नाम काचिन्नदी, तयोर्नदीविशेषवाचकत्वादेकवत्त्वम्। नदीशब्देन नदस्यापि ग्रहणात्। अन्यथा भिन्नलिङ्गत्वासम्भवादिति भावः। **जाम्बवशालूकिन्याविति॥** 'अग्रामाः' इत्यनेन ग्रामावयवकद्वन्द्वपर्युदासो विवक्षितः। अयं च द्वन्द्वः नगरग्रामोभयावयवकोऽपि ग्रामावयवक इति तस्य पर्युदास इति भावः। **क्षुद्रजन्तवः॥** एतेषां द्वन्द्वः एकवदित्यर्थः। फलितमाह। **एषां समाहारे एव द्वन्द्व इति॥ यूकालिक्षमिति॥** यूकाश्च लिक्षाश्चेति विग्रहः। केशबहुले शिरःप्रदेशे स्वेदजाः जन्तुविशेषाः यूकाः लिक्षाश्च प्रसिद्धाः। एकवत्त्वं नपुंसकह्रस्वत्वं च। **आ नकुलादिति॥** "नकुलपर्यन्ताः क्षुद्रजन्तवः" इति भाष्यादिति भावः। **येषां च॥** शेषपूरणेन सूत्रं व्याचष्टे। **एषां प्राग्वदिति॥** समाहारद्वन्द्वः एकवदित्यर्थः। शश्वदित्यव्ययं सदेत्यर्थे वर्तते। ततो भवार्थे निपातनाट्ठक्। अव्ययानां भमात्रे टिलोपः, 'इसुसुक्तान्तात्कः' इति कादेशश्च न भवति। स्वाभाविक इत्यर्थः। **अहिनकुलमिति॥** अहयो नकुलाश्चेति विग्रहः। अनयोः स्वाभाविको विरोधः प्रसिद्धः। विरोधो वैरम्, नतु सहानवस्थितिः। तेन च छायातपावित्यत्र न भवति।

९१४ । शूद्राणामनिरवसितानाम् । (२-४-१०)

अबहिष्कृतानां शूद्राणां प्राग्वत् । तक्षायस्कारम् । पात्राद्बहिष्कृतानां तु चाण्डाळमृतपाः ।

९१५ । गवाश्वप्रभृतीनि च । (२-४-११)

यथोच्चारितानि साधूनि स्युः । गवाश्वम् । दासीदासमित्यादि ।

९१६ । विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्वबडब-पूर्वापराधरोत्तराणाम् । (२-४-१२)

वृक्षादीनां सप्तानां द्वन्द्वः, अश्वबडबेत्यादि द्वन्द्वत्रयं च प्राग्वद्वा । 'वृक्षादौ विशेषाणामेव ग्रहणम्' (वा ५१८) । प्लक्षन्यग्रोधम्–प्लक्षन्यग्रोधाः ।

देवासुराः इत्यत्र तु नायमेकवद्भावः । तद्विरोधस्य कादाचित्कत्वात् । अमृतादिप्रयुक्तः खलु कादाचित्क एव हि तेषां विरोधः । अमृतमथनादिकाले तेषां विरोधाभावात् । ननु 'विभाषा वृक्षमृग' इति सूत्रे पशुशकुनिद्वन्द्वयोरेकवद्भावविकल्पो वक्ष्यते । तस्य तावत् गोमहिषं–गोमहिषाः, हंसचक्रवाकम्–हंसचक्रवाकाः, इत्यत्रावकाशः । येषां चेत्यस्य अहिनकुलमित्यवकाशः । गोव्याघ्रं काकोलूकमित्यादौ तदुभयं प्रसक्तम् । तत्र परत्वाद्वक्ष्यमाणविभाषा प्राप्नोतीत्याशङ्क्य आह । **गोव्याघ्रमिति** ॥ **चक्रारेणेति** ॥ येषाञ्चेति चकारेणेत्यर्थः । तच्च भाष्ये स्पष्टम् । **शूद्राणाम्** ॥ अनिरवसितशब्दं व्याचष्टे । **अबहिष्कृतानामिति** ॥ "यैर्भुक्तं पात्रं क्षारोदकप्रक्षाळनेन संस्कारेणापि न शुध्यति ते निरवसिताः चाण्डाळादयः । यैस्तु भुक्तं पात्रं संस्कारेण शुध्यति तेऽनिरवसिताः" इति भाष्ये स्पष्टम् । **शूद्राणामिति** ॥ त्रैवर्णिकेतरः शूद्रशब्देन विवक्षितः । अनिरवसितानामिति लिङ्गात् । **प्राग्वदिति** ॥ समाहारद्वन्द्व एकवदित्यर्थः । **तक्षायस्कारमिति** ॥ तक्षाणश्च अयस्काराश्चेति विग्रहः । अनिरवसितानामित्यस्य प्रयोजनमाह । **पात्रादिति** ॥ **चाण्डाळमृतपा इति** ॥ एतद्भुक्तपात्रस्य संस्कारेणापि नास्ति शुद्धिरिति अत एव भाष्याद्विज्ञेयम् । धर्मशास्त्रेषु च प्रसिद्धमेतत् । **गवाश्वप्रभृतीनि च** ॥ यथा गणे पठितानि तथैव साधूनीत्यर्थः । **गवाश्वमिति** ॥ गावश्चाश्वाश्चेति विग्रहः । अत्र 'विभाषा वृक्ष' इति पशुद्वन्द्वत्वात् विकल्पे प्राप्ते नित्योऽयं विधिः । अत्र 'सर्वत्र विभाषा' इति प्रकृतिभावे पूर्वरूपे च गो अश्व गोऽश्वमिति नैकवत्त्वनियमः । यथोच्चारितानीत्युक्तेः । गणे च गवाश्वमित्येव निर्देशात् । गवाश्वादिषु 'यथोच्चारितद्वन्द्ववृत्तम्' इति वार्तिकमत्र मानम् । **दासीदासमिति** ॥ अत्रैकवत्त्वनियमः । 'पुमां स्त्रिया' इत्येकशेषस्तु निपातनान्न । **इत्यादीति** ॥ गवैळकमित्यादि वृत्तौ स्पष्टम् । **विभाषा वृक्ष** ॥ द्वन्द्व इत्यनुवृत्तम् । एकापि षष्ठी विषयभेदात् भिद्यते । वृक्षादिसप्तानामवयवत्वेनान्वयः वृक्षादीनां द्वन्द्व इति । तथाच वृक्षाद्यवयवको द्वन्द्व इति लभ्यते । अश्वबडबादियुगळत्रयस्यत्वभेदेनान्वयः । अश्वबडब, पूर्वापर, अधरोत्तर, इत्यात्मको द्वन्द्व इति । तदाह । **वृक्षादीनामिति** ॥ **प्राग्वदिति** ॥ विकल्पेन

रुरुपृषतम्—रुरुपृषताः। कुशकाशम्—कुशकाशाः। व्रीहियवम्—व्रीहियवाः। दधिघृतम्—दधिघृते। गोमहिषम्—गोमहिषाः। शुकबकम्—शुकबकाः। अश्वबडबम्—अश्वबडबौ। पूर्वापरम्—पूर्वापरे। अधरोत्तरम्—अधरोत्तरे। 'फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानां बहुप्रकृतिरेव द्वन्द्वः एकवदिति वाच्यम्' (वा १५४०)। बदराणि चामलकानि च बदरामलकम्। 'जातिरप्राणिनाम्' (सू ९१०) इत्येकवद्भावः। नेह, बदरामलके। रथिकाश्वारोहौ, प्लक्षन्यग्रोधावित्यादि। 'विभाषा वृक्ष—' (सू ९१६) इति सूत्रे येऽप्राणिनस्तेषां ग्रहणं 'जातिरप्राणिनाम्' (सू ९१०) इति नित्ये प्राप्ते विकल्पार्थम्। पशुग्रहणं

एकवदित्यर्थः। **वृक्षादाविति** ॥ वृक्षविशेषवाचिनां, तृणविशेषवाचिनां, धान्यविशेषवाचिनां, पशुविशेषवाचिनां चेत्यर्थः। 'स्वं रूपम्' इति सूत्रे भाष्यवार्तिकयोस्तथोक्तत्वादिति भावः। तथाच वृक्षाश्च धवाश्चेत्यादौ नायं विधिरिति फलितम्। किन्तु 'जातिरप्राणिनाम्' इति नित्यमेवैकवत्त्वम्। तत्र वृक्षाद्यवयवकद्वन्द्वेषु सप्तसु वृक्षद्वन्द्वमुदाहरति। **प्लक्षेति** ॥ प्लक्षाश्च न्यग्रोधाश्चेति विग्रहः। मृगद्वन्द्वमुदाहरति। **रुरुपृषतमिति** ॥ रुरवश्च पृषताश्चेति विग्रहः। तृणद्वन्द्वमुदाहरति। **कुशेति** ॥ कुशाश्च काशाश्चेति विग्रहः। धान्यद्वन्द्वमुदाहरति। **व्रीहीति** ॥ व्रीहयश्च यवाश्चेति विग्रहः। व्यञ्जनद्वन्द्वमुदाहरति। **दधीति** ॥ दधि च घृतं चेति विग्रहः। पशुद्वन्द्वमुदाहरति। **गोमहिषमिति** ॥ गावश्च महिषाश्चेति विग्रहः। शकुनिद्वन्द्वमुदाहरति। **शुकेति** ॥ शुकाश्च बकाश्चेति विग्रहः। अश्वबडबादिद्वन्द्वमुदाहरति। **अश्वबडबमिति** ॥ अश्वाश्च बडबाश्चेति विग्रहः। 'पूर्ववदश्वबडबौ' इति अश्वबडबावित्यत्र पूर्वपदवत् पुंल्लिङ्गता। **फलसेनेति** ॥ एकवद्भावप्रकरणशेषभूतमिदं वार्तिकम्। 'द्वन्द्वश्च प्राणि' इत्यादिसूत्रैः फलसेनादीनां द्वन्द्वे एकवद्भावात् बहुवचनान्तावयवक एव द्वन्द्वः एकवत् भवति। नत्वेकद्विवचनान्तावयवक इत्यर्थः। तत्र फलद्वन्द्वमुदाहरति। **बदराणि चेति** ॥ बदरीफलानि आमलकीफलानि चेत्यर्थः। विकारतद्धितस्य फले लुक्। 'लुक्तद्धितलुकि' इति स्त्रीप्रत्ययस्य लुक्। **जातिरिति** ॥ बहुवचनान्तावयवकद्वन्द्वात् 'जातिरप्राणिनाम्' इत्येकवत्त्वमित्यर्थः। बहुप्रकृतिरेवेत्यस्य प्रयोजनमाह। **नेहेति। बदरामलके इति** ॥ बदरं चामलकं चेति विग्रहः। बहुवचनान्तावयवकद्वन्द्वत्वाभावान्न 'जातिरप्राणिनाम्' इत्येकवत्त्वम्। **रथिकाश्वारोहाविति** ॥ अत्र सेनाङ्गत्वेऽपि नैकवत्त्वम्। **प्लक्षन्यग्रोधाविति** ॥ इह वृक्षद्वन्द्वत्वेऽपि 'विभाषा वृक्ष' इत्येकवत्त्व न। **इत्यादीति** ॥ रुरुपृषतौ। अत्र मृगद्वन्द्वत्वेऽपि नैकवत्त्वम्। हंसचक्रवाकौ। अत्र शकुनिद्वन्द्वत्वेऽपि नैकवत्त्वम्। यूकालिक्षे, अत्र क्षुद्रजन्तुत्वेऽपि नैकवत्त्वम्। व्रीहियवौ। अत्र धान्यद्वन्द्वत्वेऽपि नैकवत्त्वम्। कुशकाशौ। अत्र तृणद्वन्द्वत्वेऽपि नैकवत्त्वम्। ननु चार्थे द्वन्द्वे इतरेतरयोगसमाहारद्वन्द्वाभ्यामेव एकवत्त्वविकल्पस्य सिद्धत्वात् 'विभाषा वृक्ष' इति सूत्रं व्यर्थमित्याशङ्क्य आह। **विभाषेत्यादि विकल्पार्थमित्यन्तम्** ॥ वृक्षमृगतृणधान्यव्यञ्जनद्वन्द्वेषु प्लक्षन्यग्रोधं, रुरुपृषतं, कुशकाशं, व्रीहियवं, दधिघृतम्, इत्येतेषु 'जातिरप्राणिनाम्'

हस्त्यश्वादिषु सेनाङ्गत्वान्नित्ये प्राप्ते 'मृगाणां मृगैरेव शकुनीनां तैरेवोभयत्र द्वन्द्वः, अन्यैस्तु सहेतरेतरयोग एव' इति नियमार्थं मृगशकुनिग्रहणम्। एवं 'पूर्वापरम्' 'अधरोत्तरम्' इत्यपि। अश्वबडबग्रहणं तु पक्षे नपुंसकत्वार्थम्। अन्यथा परत्वात् 'पूर्ववदश्वबडबौ' (सू ८१३) इति स्यात्।

९१७। विप्रतिषिद्धं चानधिकरणवाचि। (२-४-१३)

इति नित्यविहितैकवत्त्वानित्यत्वार्थमप्राणिवृक्षादिग्रहणमित्यर्थः। नन्वेवमपि पशुग्रहणं व्यर्थम्। तदुदाहरणे गोमहिषमित्यत्र 'जातिरप्राणिनाम्' इति नित्यैकवत्त्वनियमस्याप्राप्त्या तन्निवृत्त्यर्थत्वायोगात् इत्यत आह। **पशुग्रहणं हस्त्यश्वादिषु सेनाङ्गत्वात् नित्ये प्राप्ते इति॥** विकल्पार्थमित्यनुषज्यते। नन्वेवमपि मृगशकुनिग्रहणं व्यर्थम्। तदुदाहरणे रुरुपृषतं, शुकबकमित्यादौ 'जातिरप्राणिनाम्' इति एकवत्त्वस्य सेनाङ्गनिबन्धनैकवत्त्वस्य च अप्राप्तया तन्निवृत्त्यर्थत्वाभावेन 'चार्थे द्वन्द्वः' इत्येव इतरेतरयोगसमाहारद्वन्द्वाभ्यामेकवत्त्वविकल्पसिद्धेरित्यत आह। **मृगाणां मृगैरेवेत्यादि मृगशकुनिग्रहणमित्यन्तम्।** मृगाणां मृगैरेव सह, उभयत्र इतरेतरयोगे समाहारे च चार्थे इति द्वन्द्वः। यथा रुरुपृषतं, रुरुपृषताविल्यादि। तथा शकुनीनां शकुनिभिरेव उभयत्र इतरेतरयोगे समाहारे च 'चार्थे' इति द्वन्द्वः। यथा शुकबकम्, शुकवकाविति। मृगाणान्तदितरैः शकुनीनान्तदन्यैश्च सह इतरेतरयोगद्वन्द्व एव भवति, न समाहारद्वन्द्वः। यथा रुरुशुका इति। एतादृशनियमार्थं मृगशकुनिग्रहणमित्यर्थः। ननु पूर्वापरग्रहणम् अधरोत्तरग्रहणञ्च व्यर्थम्। 'चार्थे' इत्येव सिद्धेः। 'जातिरप्राणिनाम्' इत्यादिनित्यैकवत्त्वस्य तत्र अप्रवृत्त्या तन्निवृत्त्यर्थत्वासम्भवात् इत्यत आह। **एवं पूर्वापरम्, अधरोत्तरम् इत्यपीति॥** यथा मृगशकुनिग्रहणं मृगैरेव मृगाणां शकुनीनां तैरेव उभयत्र द्वन्द्वः, एवं पूर्वशब्दस्य अपरशब्देनैव अधरशब्दस्य उत्तरशब्देनैव उभयत्र इतरेतरयोगे समाहारे च द्वन्द्वः। अन्येन तु सह पूर्वोत्तरेत्यादौ इतरेतरयोग एवेति नियमार्थं पूर्वापरग्रहणम् अधरोत्तरग्रहणं चेत्यर्थः। ननु अश्वबडबग्रहणं व्यर्थम्। सेनाङ्गत्वेऽपि पशुद्वन्द्वत्वादेव एकवद्भावविकल्पसिद्धेरित्यत आह। **अश्वबडबेति॥** नपुंसकत्वविकल्पार्थमित्यर्थः। ननु समाहारस्य एकत्वादेव एकवत्त्वसिद्धेः इदम् एकवत्त्वप्रकरणं समाहार एव द्वन्द्व इति नियमार्थमित्युक्तम्। तथाच पशुद्वन्द्वत्वात् एकवत्त्वविकल्पे सति समाहारे वा इतरेतरयोगे वा द्वन्द्व इत्यनियमः पर्यवस्यति। एवञ्च समाहारद्वन्द्वपक्षेऽपि 'स नपुंसकम्' इति नपुंसकत्वं इतरेतरयोगे तु नेति नपुंसकत्वविकल्पस्य सिद्धत्वात् अश्वबडबग्रहणं व्यर्थमेवेत्यत आह। **अन्यथेति॥** इह नपुंसकत्वसिद्ध्यभावे समाहारद्वन्द्वपक्षेऽपि 'स नपुंसकम्' इति नपुंसकत्वं बाधित्वा परत्वात् 'पूर्ववदश्वबडबौ' इति पुंस्त्वं स्यात्। नपुंसकविधौ तु तत्सामर्थ्यात् समाहारद्वन्द्वपक्षे 'पूर्ववदश्वबडबौ' इत्येतत् बाधित्वा नपुंसकत्वं भवत्येव। अधिकारप्राप्तपूर्ववदश्वेत्येतत्तु इतरेतरयोगद्वन्द्वे सावकाशामिति भावः। **विप्रतिषिद्धं च॥** 'विभाषा' इत्यनुवर्तते। विप्रतिषेधो विरोधः सहानवस्थानलक्षणः। अधिकरणं द्रव्यम्। अद्रव्यवाचि विरुद्धार्थकं च

विरुद्धार्थानामद्रव्यवाचिनां द्वन्द्व एकवद्वा स्यात्। शीतोष्णम्—शीतोष्णे। वैकल्पिकः समाहारद्वन्द्वः 'चार्थे—' (सू ९०१) इति सूत्रेण प्राप्तः, सः विरुद्धार्थानां यदि भवति तर्ह्यद्रव्यवाचिनामेवेति नियमार्थमिदम्। तेन द्रव्यवाचिनामितरेतरयोग एव। शीतोष्णे उदके स्तः। 'विप्रतिषिद्धम्' किम्। नन्दकपाञ्चजन्यौ। इह पाक्षिकः समाहारद्वन्द्वो भवत्येव।

९१८। न दधिपयआदीनि। (२-४-१४)

एतानि नैकवत्स्युः। दधिपयसी। इध्माबर्हिषी। निपातनाद्दीर्घः। ऋक्सामे। वाङ्मनसे।

यदनेकं सुबन्तं तदवयवको द्वन्द्वः विभाषैकवद्भावक इत्यर्थः। फलितमाह। **विरुद्धार्थानामिति** ॥ गोत्वाश्वत्वं, गोत्वाश्वत्वे। सुखदुःखं, सुखदुःखे इत्याद्युदाहरणम्। ननु 'चार्थे' इति इतरेतरयोगसमाहाराभ्यामेवात्र एकवत्त्वविकल्पसिद्धेः इदं व्यर्थम्। नच 'जातिरप्राणिनाम्' इति नित्ये प्राप्ते विकल्पार्थमिति वाच्यम्। जातिप्रवृत्तिनिमित्तकद्रव्यवाचिनां द्वन्द्व एव तत्प्रवृत्तेः इत्यत आह। **वैकल्पिक इत्यादि नियमार्थमिदमित्यन्तम्** ॥ **तेनेति** ॥ उक्तनियमेनेत्यर्थः। **शीतोष्णे उदके स्तः इति** ॥ अत्र विरुद्धार्थकत्वेऽपि द्रव्यवाचित्वात् न समाहारद्वन्द्व इति भावः। **नन्दकपाञ्चजन्याविति** ॥ विष्णोः खड्गः नन्दकः, शङ्खस्तु पाञ्चजन्यः, तयोरेकत्र विष्णौ सहावस्थानात् न विरुद्धत्वमिति स्थितिः। इह विप्रतिषिद्धग्रहणाभावे 'चार्थे' इति समाहारद्वन्द्वः अद्रव्यवाचिनामेवेति नियमो लभ्येत। एवं सति नन्दकपाञ्चजन्यमिति पाक्षिकसमाहारद्वन्द्वो न स्यात्। समाहारद्वन्द्वस्य सर्वस्यापि अद्रव्यवाचिष्वेव नियमितत्वात्। विप्रतिषिद्धमित्युक्तौ तु विरुद्धार्थानां समाहारद्वन्द्वश्चेत् तर्हि अद्रव्यवाचिनामेवेति नियमो लभ्यते। नन्दकपाञ्चजन्ययोश्चाविरुद्धत्वादयं नियमो न प्रवर्तते। ततश्च द्रव्यवाचित्वेऽपि 'चार्थे' इति कदाचित् समाहारद्वन्द्वः, कदाचित् इतरेतरयोगद्वन्द्वश्च भवत्येव। तदाह। **इह पाक्षिकस्समाहारद्वन्द्वो भवत्येवेति** ॥ **न दधिपयआदीनि** ॥ **एतानि नैकवत् स्युरिति** ॥ एषां समाहारद्वन्द्वो नास्तीत्यर्थः। **दधिपयसी इति** ॥ दधि च पयश्चेति विग्रहः। 'जातिरप्राणिनाम्' इति नित्यमेकवत्त्व प्राप्तं बाधित्वा व्यञ्जनद्वन्द्वत्वाद्विकल्पः प्राप्तः, सोऽपि न भवति। **इध्माबर्हिषी इति** ॥ इध्मश्च बर्हिश्चेति विग्रहः। **दीर्घ इति** ॥ इध्मशब्दस्येति शेषः। **ऋक्सामे इति** ॥ ऋक् च साम चेति विग्रहः। 'अचतुर' इत्यादिनाऽच्समासान्तः। **वाङ्मनसे इति** ॥ वाक् च मनश्चेति विग्रहः। पूर्ववत्समासान्तः। अत्र गणे ब्रह्मप्रजापती इत्यादि पठितम्। समाहारद्वन्द्वे इति नियमप्रक्रमेऽपि नानेन नियमस्यैव निषेधः, ब्रह्मप्रजापती इत्यादौ नियमस्याप्राप्तेः।

९१९ । अधिकरणैतावत्त्वे च । (२-४-१५)

द्रव्यसङ्ख्यावगमे एकवदेवेति नियमो न स्यात् । दश दन्तोष्ठाः ।

९२० । विभाषा समीपे । (२-४-१६)

अधिकरणैतावत्त्वस्य सामीप्येन परिच्छेदे 'समाहार एव' इत्येवंरूपो नियमो वा स्यात् । उपदशम्, दन्तोष्ठम् । उपदशाः, दन्तोष्ठाः ।

९२१ । आनङृतो द्वन्द्वे । (६-३-२५)

किन्त्वेकवत्त्वस्यैव । तथाच 'चार्थे' इति समाहारद्वन्द्वस्य निषेधः फलति । **अधिकरणैतावत्त्वे च** ॥ अधिकरणं द्रव्यं, तस्य एतावत्त्वमियत्ताविशेषः । तदाह । **द्रव्यसङ्ख्यावगमे इति** ॥ समस्यमानपदार्थेयत्ताविशेषे पदान्तरसमभिव्याहारगम्ये इत्यर्थः । **नियमो नेति** ॥ 'ब्रह्मप्रजापती' इत्यादौ समाहार एव द्वन्द्व इति नियमस्य प्रकृतस्याप्रवृत्तेरेकवत्त्वनिषेधः पूर्वसूत्रे आश्रितः । इह तु बाधकाभावात् प्रकृतस्य नियमस्यैव निषेधः आश्रित इति भावः । **दश दन्तोष्ठा इति** ॥ दन्ताश्च ओष्ठाश्चेति विग्रहः । इतरेतरयोगद्वन्द्वोऽयम्, न तु समाहारद्वन्द्वः । समासार्थसमाहारविशेषणीभूतसमस्यमानपदार्थानां पदान्तरलभ्यदशत्वसापेक्षत्वेनासामर्थ्यात् । इतरेतरयोगद्वन्द्वस्तु भवत्येव । तत्र समस्यमानपदार्थानामेव प्रधानत्वात् । 'उपमितं व्याघ्रादिभिः' इति सूत्रभाष्ये प्रधानस्य सापेक्षत्वेऽपि समासाभ्युपगमात् । ततश्चाप्येकवदेवेति नियमाभावे सति असामर्थ्यात्समाहारत्वे निवृत्ते परिशेषादितरेतरयोगत्वमेवावतिष्ठते । यदि त्वेकवन्न स्यादित्येव व्याख्यायेत, तर्हि समाहारद्वन्द्वो नेत्यर्थः पर्यवस्येत् । तथा सति दश दन्तोष्ठाः इतीतरेतरयोगद्वन्द्वो न स्यात् । 'द्वन्द्वश्च प्राणितूर्य' इति तन्निषेधात् । तथाच वाक्यमेव स्यात् । किञ्च समाहारद्वन्द्वनिषेधोऽयं व्यर्थ एव । उक्तरीत्या सापेक्षत्वेनासामर्थ्यादेवाप्राप्तेः । अतः एकवदिति नियमो न स्यादित्येव व्याख्येयम् । एवञ्च प्राण्यङ्गनिबन्धनस्य एकवदेव स्यादिति नियमस्य इतरेतरयोगद्वन्द्वनिवृत्तिफलकस्यानेन निषेधे सति इतरेतरयोगद्वन्द्वस्यावस्थितिः फलतीति पदमञ्जर्यां स्पष्टम् । **विभाषा समीपे** ॥ अधिकरणैतावत्त्वे इत्यनुवर्तते । समीपे इत्यस्य सामीप्येन परिच्छिन्ने सतीत्यर्थः । फलितमाह । **अधिकरणेति** ॥ **उपदशम्, दन्तोष्ठमिति** ॥ दशानां समीपे इत्यर्थेऽव्ययीभावः । "उक्तरीत्याऽसामर्थ्ये वचनसामर्थ्यात्समाहारद्वन्द्वः । समानलिङ्गवचनत्वादव्ययीभावस्यैवानुप्रयोगः" इति भाष्यम् । अत एवोपदशं दन्तोष्ठेनेत्यादि सिद्धम् । समीपसमीपिनोरभेदविवक्षायां सामानाधिकरण्यम् । नवत्वसङ्ख्यदन्तोष्ठसमूहः एकादशत्वसङ्ख्यदन्तोष्ठसमूह इति वा बोधः । **उपदशाः, दन्तोष्ठाः इति** ॥ इतरेतरयोगद्वन्द्वोऽयम् । दशानां समीपे ये सन्ति ते उपदशा इति बहुव्रीहिः । नव एकादश वेत्यर्थः । "बहुव्रीहिरेवात्रानुप्रयोगः, समानलिङ्गवचनत्वात्" इति भाष्यम् । **आनङृतो द्वन्द्वे** ॥ **विद्यायोनिसम्बन्धवाचि-**

विद्यायोनिसम्बन्धवाचिनामृदन्तानां द्वन्द्वे आनङ् स्यादुत्तरपदे परे। होतापोतारौ। होतृपोतृनेष्टोद्गातारः। मातापितरौ। 'पुत्रेऽन्यतरस्याम्' (सू ९८०) इत्यतो मण्डूकप्लुत्या 'पुत्रे' इत्यनुवृत्तेः पितापुत्रौ।

९२२। देवताद्वन्द्वे च। (६-३-२६)

इहोत्तरपदे परे आनङ्। मित्रावरुणौ 'वायुशब्दप्रयोगे प्रतिषेधः' (वा ३९०७)। अग्निवायू—वाय्वग्नी। पुनर्द्वन्द्वग्रहणं प्रसिद्धसाहचर्यस्य परिग्रहार्थम्। तेन 'ब्रह्मप्रजापती' इत्यादौ' नानङ्। एतद्धि नैकहविर्भागित्वेन श्रुतम्, नापि लोके प्रसिद्धं साहचर्यम्।

९२३। ईदग्नेः सोमवरुणयोः। (६-३-२७)

देवताद्वन्द्वे इत्येव।

नामिति ॥ विद्यासम्बन्धवाचिनां योनिसम्बन्धवाचिनां चेत्यर्थः। 'ऋतो विद्यायोनिसम्बन्धेभ्यः' इत्यतस्तदनुवृत्तेरिति भावः। **ऋदन्तानामिति** ॥ बहुत्वे व्यत्ययेन 'ऋतः' इत्येकवचनम्। ऋदन्तसर्वावयवकानामित्यर्थः। ऋत इत्यनुवर्तमाने पुनः ऋत इत्युक्तिः एतदर्थेति भावः। **उत्तरपदे परे इति** ॥ 'अलुगुत्तरपदे' इत्यधिकारादिति भावः। **होतापोताराविति** ॥ होता च पोता चेति विग्रहः। विद्याद्वारकैकयज्ञर्त्विक्कृतस्सम्बन्धः। आनङि ङकार इत्, अकार उच्चारणार्थः, 'ङिच्च' इत्यन्तादेशः, नलोपः। "नकारस्तु रपरत्वनिवृत्त्यर्थः" इति भाष्ये स्पष्टम्। **होतृपोत्रिति** ॥ अत्र होतृशब्दस्य पोतृशब्दस्य च नानङ्। नेष्टृशब्देन व्यवधानात्। उत्तरपदपरकत्वाभावात्। तथाच नेष्टृशब्दस्यैवानङ्। उत्तरपदेन तु न पूर्वपदमाक्षिप्यते, समर्थसूत्रे नेष्टृशब्दस्याऽऽनङ्दर्शनात्। अथ योनिसम्बन्धमुदाहरति। **मातापितराविति** ॥ पितृपितामहाः इत्यादौ तु न आनङ्। ऋदन्तसर्वावयवकत्वाभावादिति भावः। तर्हि पितापुत्राविति कथमित्यत आह। **पुत्रेऽन्यतरस्यामिति** ॥ 'ऋतो विद्यायोनिसम्बन्धेभ्यः' इत्यत्र 'विभाषा स्वसृपत्योः' इत्यत्र च मध्येऽसम्बन्धादाह। **मण्डूकेति** ॥ **अनुवृत्तेरिति** ॥ नच तातपुत्रावित्यत्रापि स्यादिति वाच्यम्। ऋदन्तस्य पुत्रे परे आनङ् स्यादिति वाक्यभेदेन व्याख्यानात्। **देवताद्वन्द्वे च** ॥ **मित्रावरुणाविति** ॥ इह ऋदन्तत्वाभावात् पूर्वेणाप्राप्ते विधिरयम्। **वायुशब्देति** ॥ वायुशब्दस्य पूर्वपदत्वेनोत्तरपदत्वेन वा प्रयोगे सत्यानङः प्रतिषेधो वक्तव्य इत्यर्थः। ननु पूर्वसूत्रात् द्वन्द्वग्रहणे अनुवर्तमाने पुनः द्वन्द्वग्रहणं व्यर्थमित्यत आह। **पुनरिति** ॥ निर्वापादौ प्रसिद्धसाहित्यकदेवतावाचकशब्दग्रहणार्थमित्यर्थः। **तेनेति** ॥ प्रसिद्धसाहचर्यग्रहणेनेत्यर्थः। **एतदिति** ॥ एतत् ब्रह्मप्रजापतियुगळं हविर्भागित्वेन न वेदे प्रसिद्धमित्यर्थः। **नापि लोके इति** ॥ प्रौढिवादमात्रमेवेदम्। "वेद एव सहनिर्वापनिर्दिष्टाः" इत्येव भाष्ये दर्शनात्। लोकप्रसिद्धसाहचर्यग्रहणे तु पार्वतीपरमेश्वराविति यावतिप्रसङ्गाच्च। **ईदग्नेः** ॥ **इत्येवेति** ॥

९२४ । अग्नेः स्तुत्स्तोमसोमाः । (८-३-८२)

अग्नेः परेषामेषां सस्य षः स्यात्समासे । अग्निष्टुत् । अग्निष्टोमः । अग्नीषोमौ । अग्नीवरुणौ ।

९२५ । इद्वृद्धौ । (६-३-२८)

वृद्धिमत्युत्तरपदे अग्नेरिदादेशः स्याद्देवताद्वन्द्वे । **अग्नामरुतौ देवते अस्य आग्निमारुतं कर्म** । अग्नीवरुणौ देवते अस्य आग्निवारुणम् । 'देवताद्वन्द्वे च' (सू १२३९) उत्युभयपदवृद्धिः । अलौकिके विग्रहवाक्ये आनङ्मीत्त्वञ्च

देवताद्वन्द्वे इत्यनुवर्तत एवेत्यर्थः । सोमशब्दे वरुणशब्दे च उत्तरपदे परे अग्नेरीदादेशस्स्यात् । देवताद्वन्द्वे इत्यर्थः । आनङोऽपवादः । **अग्नेः स्तुत्** ॥ स्तुत्, स्तोम, सोम इति द्वन्द्वात् षष्ठ्यर्थे प्रथमा । 'सहेस्साडस्सः' इत्यतः स इति षष्ठ्येकवचनान्तमनुवर्तते । अग्नेरिति पञ्चमी । 'समासेऽङ्कुलेः' इत्यतस्समासः इत्यनुवर्तते । तदाह । **अग्नेः परेषामिति** ॥ **षः स्यादिति** ॥ 'अपदान्तस्य मूर्धन्यः' इत्यनुवृत्तेरिति भावः । 'सात्पदाद्योः' इति षत्वनिषेधापवादोऽयम् । **अग्निष्टुदिति** ॥ क्रतुविशेषोऽयम् । **अग्निष्टोम इति** ॥ स्तोत्रविशेषस्य संस्थाविशेषस्य च नाम । **अग्नीषोमाविति** ॥ अग्निश्च सोमश्चेति विग्रहः । ईत्त्वषत्वे । **अग्नीवरुणाविति** ॥ अग्निश्च वरुणश्चेति विग्रहः । ईत्त्वम् । देवताद्वन्द्वे किम् । अग्निर्नाम कश्चित्, सोमो नाम कश्चित् । अग्निसोमौ । अदेवताद्वन्द्वत्वादीत्त्वं न । अत एव च न षत्वम् । 'अग्नेर्दीर्घात् सोमस्य इष्यते' इति वार्तिकम् । **इद्वृद्धौ** ॥ अग्नेरिति देवताद्वन्द्वे इति चानुवर्तते । वृद्धिशब्देन वृद्धिमल्लक्ष्यते । देवताद्वन्द्वे केवलवृद्धिरूपोत्तरपदासम्भवात् । तदाह । **वृद्धिमतीति** ॥ इदिति तकार उच्चारणार्थः । प्रयोजनाभावान्नेत्संज्ञा । नापि तपरकरणम् । विधीयमानत्वादेव सवर्णाग्राहकत्वात् । **अग्नामरुताविति** ॥ अग्निश्च मरुच्चेति विग्रहः । 'देवताद्वन्द्वे च' इत्यानङ् । **आग्निमारुतं कर्मेति** ॥ 'साऽस्य देवता' इत्यण् । तद्धितान्तप्रातिपदिकावयवत्वात् सुपो लुक् । **अग्नीवरुणाविति** ॥ 'ईदग्नेः' इतीत्त्वम् । **आग्निवारुणमिति** ॥ 'साऽस्य देवता' इत्यण् । ननु 'तद्धितेष्वचामादेः' इत्यादेरचो वृद्धिविधानात् कथमुत्तरपदस्यादिवृद्धिरित्यत आह । **देवताद्वन्द्वे चेत्युभयपदवृद्धिरिति** ॥ नन्वग्नेरिकारस्य इकारविधिर्व्यर्थ इत्यत आह । **आनङ्मीत्त्वं च बाधित्वेति** ॥ आग्निमारुतमित्यत्रानङः आग्निवारुणमित्यत्र ईत्त्वस्य च बाधनार्थमग्नेरिकारस्य पुनरिकारविधानमित्यर्थः । ननु 'समर्थानां प्रथमाद्वा' इत्यत्र परिनिष्ठितात् तद्धितोत्पत्तिरिति वक्ष्यते । तथाच अग्नामरुतौ देवते अस्येति, अग्नीवरुणौ देवते अस्येति विग्रहे च, अग्नामरुच्छब्दात् अग्नीवरुणशब्दाच्च आनङीत्त्वाभ्यां परिनिष्ठितात् देवताद्वन्द्वात् 'साऽस्य देवता' इत्यण् तद्धितः उत्पद्यते । ततस्तन्निमित्तकोभयपदवृद्धिः । ततः 'इद्वृद्धौ' इत्यस्य प्रवृत्तिरिति क्रमः । ततश्च तद्धितोत्पत्तेः प्रागेव प्रवृत्तयोरानङीत्त्वयोः कथम् 'इद्वृद्धौ' इत्यनेन बाधः । युगपत्प्रवृत्तावेव बाध्यबाधकभावाभ्युपगमात् । उक्तं च भाष्ये ।

बाधित्वा इत्। 'वृद्धौ' किम्। आग्नेन्द्रः। 'नेन्द्रस्य परस्य' (सू १२४०) इत्युत्तरपदवृद्धिप्रतिषेधः। 'विष्णौ न' (वा ३९०९)। आग्नावैष्णवम्।

९२६। दिवो द्यावा। (६-३-२९)

देवताद्वन्द्वे उत्तरपदे। द्यावाभूमी। द्यावाक्षामे।

९२७। दिवसश्च पृथिव्याम्। (६-३-३०)

दिवः इत्येव चाद्द्यावा। आदेशेऽकारोच्चारणं सकारस्य रुत्वं माभूदित्येतदर्थम्। द्यौश्च पृथिवी च दिवस्पृथिव्यौ—द्यावापृथिव्यौ। 'छन्दसि दृष्टानुविधिः'। 'द्यावा चिदस्मै पृथिवी' 'दिवस्पृथिव्योररतिः' इत्यत्र पदकाराः विसर्गं पठन्ति।

"भुक्तवन्तं प्रति मा भुङ्क्थाः इति, किं तेन कृतं स्यात्" इति, अत आह। **अलौकिके विग्रहवाक्ये इति**॥ अग्नि, मरुत्, औ, देवते, अस्येति, अग्नि, वरुण, औ, देवते अस्येति च तद्धितालौकिकविग्रहवाक्ये आनङीत्त्वे प्रवर्तमाने बाधित्वा इद्विधिः प्रवर्तत इत्यर्थः। यद्यपि तदानीम् उत्तरपदस्य वृद्धिमत्त्वं नास्ति। तद्धिताभावात्। तथाप्युत्तरपदस्य भाव्येव वृद्धिमत्त्वमिह विवक्षितमिति भावः। **आग्नेन्द्र इति**॥ अग्निश्च इन्द्रश्च अग्नेन्द्रौ। 'देवताद्वन्द्वे च' इत्यानङ्। आद्गुणः। अग्नेन्द्रौ देवते अस्येत्याग्नेन्द्रः। 'साऽस्य देवता' इत्यण्। आदिवृद्धिः। अग्नेन्द्रशब्दस्योत्तरपदस्य वृद्धिमत्त्वाभावात् 'इद्वृद्धौ' इति नेति भावः। 'देवताद्वन्द्वे च' इत्युभयपदवृद्धिमाशङ्क्य आह। **नेन्द्रस्येति**॥ **विष्णौ नेति**॥ विष्णुशब्दे परे अग्नेरिकारो नेति वक्तव्यमित्यर्थः। **आग्नावैष्णवमिति**॥ अग्निश्च विष्णुश्च अग्नाविष्णू। 'देवताद्वन्द्वे च' इत्यानङ्। अग्नाविष्णू देवते अस्येत्यर्थे 'साऽस्य देवता' इत्यण्। आग्नावैष्णवं हविः। 'देवताद्वन्द्वे च' इत्युभयपदवृद्धिः। इत्त्वाभावादानडेव। **दिवो द्यावा**॥ शेषपूरणेन सूत्रं व्याचष्टे। **देवताद्वन्द्वे इति**॥ **द्यावाभूमी इति**॥ द्यौश्च भूमिश्चेति विग्रहः। **द्यावाक्षामे इति**॥ "द्यावाक्षामारुक्मो अन्तर्विभाति देवाः" इति ऋचि पठितमिदम्। द्यावापृथिव्यौरित्यर्थः। द्यौश्च क्षामा चेति विग्रहः। क्षामाशब्दो भूमिपर्यायः वेदे। तत्र द्वन्द्वे दिवो द्यावादेशः। षष्ठ्यास्तु 'सुपां सुलुक्' इति ङादेशः 'देवताद्वन्द्वे च' इति पूर्वोत्तरपदयोः प्रकृतिस्वर इति वेदभाष्ये स्पष्टम्। **दिवसश्च पृथिव्याम्**॥ **दिवः इत्येवेति**॥ दिव इत्यनुवर्तत एवेत्यर्थः। स्वरितत्वादिति भावः। तर्हि चकारः व्यर्थ इत्यत आह। **चादिति**॥ तथाच दिव्शब्दस्य दिवसादेशः द्यावादेशश्च स्यात्। पृथिवीशब्दे उत्तरपदे परे देवताद्वन्द्वे इत्यर्थः। दिवस्पृथिव्याः इत्यत्र सकारादकारस्याश्रवणाद्दिवसादेशस्य सकारान्तत्वावश्यम्भावात् आदेशे सकारादकारोच्चारणस्य किं प्रयोजनमित्यत आह। **आदेशेऽकारोच्चारणमिति**॥ सामर्थ्यात् 'ससजुषो रुः' इति रुत्वं नेति भावः। ननु "द्यावाचिदस्मै पृथिवी सन्तमेते" इत्यत्र दिव्शब्दपृथिवीशब्दयोः कथं द्वन्द्वः? कथं वा दिवो द्यावादेशः? उत्तरपदस्य चिदस्मै इत्यनेन व्यवहितत्वादित्यत आह।

९२८ । उषासोषसः । (६-३-३१)

'उषस्'शब्दस्योषासादेशो देवताद्वन्द्वे । उषासासूर्यम् ।

९२९ । मातरपितरावुदीचाम् । (६-३-३२)

मातरपितरौ । 'उदीचाम्' किम् । मातापितरौ ।

९३० । द्वन्द्वाच्चुदषहान्तात्समाहारे । (५-४-१०६)

चवर्गान्तादषहान्ताच्च द्वन्द्वाट्टच्स्यात्समाहारे । वाक्च त्वक्च वाक्त्वचम् । त्वक्स्रजम् । शमीदषदम् । वाक्त्विषम् । छत्रोपानहम् । 'समाहारे' किम् । प्रावृट्छरदौ ।

इति द्वन्द्वसमासप्रकरणम् ।

छन्दसि दृष्टानुविधिरिति ॥ भाष्यवाक्यमेतत् । वेदे दृष्टानुसरणमित्यर्थः । यथा दृष्टं तथा प्रक्रिया कल्पनीयेति भावः । **पदकारा इति** ॥ "दिवस्पृथिव्योः" इत्यवग्रहे विसर्गं पठन्तीत्यर्थः । पदकारा इत्यनेन पदपाठस्याधुनिकत्वं सूचितम् । तथाच विसर्गपाठः प्रामादिक इति सूचितः । अकारोच्चारणेन रुत्वनिवृत्तेरुक्तत्वात् । **उषासोषसः** ॥ **उषासासूर्यमिति** ॥ उषाश्च सूर्यश्चेति समाहारद्वन्द्वः । **मातरपितरावुदीचाम्** ॥ उदीचाम्मते मातरपितराविति भवतीत्यर्थः । अत्र मातृशब्दस्यारङादेशो निपात्यते । **मातापितराविति** ॥ अरङभावे 'आनङृतः' इत्यानङ् । **द्वन्द्वाच्चुदष** ॥ समासान्ताधिकारस्थं तद्धिताधिकारस्थं चेदं सूत्रम् । **टच्स्यादिति** ॥ 'राजाहस्सखिभ्यः' इत्यतस्तदनुवृत्तेरिति भावः । **वाक्त्वचमिति** ॥ वाक्च त्वक्च इति समाहारद्वन्द्वः । कुत्वस्यासिद्धत्वाच्चवर्गान्तत्वाट्टच् । एव त्वक्स्रजमित्यत्रापि । त्वक्च स्रक्चेति विग्रहः । **शमीदषदमिति** ॥ शमी च दषच्चेति विग्रहः । दकारान्तत्वाट्टच् । **वाक्त्विषमिति** ॥ वाक्च त्विट् चेति विग्रहः । षान्तत्वाट्टच् । जश्त्वस्यासिद्धत्वादिति भावः । **छत्रोपानहमिति** ॥ छत्रञ्च उपानच्चेति विग्रहः । हान्तत्वाट्टच् । **प्रावृट्छरदाविति** ॥ प्रावृट् च शरच्चेति विग्रहः । इतरेतरयोगद्वन्द्वत्वान्न टजिति भावः ॥

इति श्रीमद्वासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायां द्वन्द्वसमासप्रकरणं समाप्तम् ।

श्रीरस्तु ।

॥ अथैकशेषप्रकरणम् ॥

अथैकशेषः । 'सरूपाणाम्-' (सू १८८) । रामौ । रामाः । 'विरूपाणामपि समानार्थानाम्' (वा ७४७) । वक्रदण्डश्च कुटिलदण्डश्च वक्रदण्डौ-कुटिलदण्डौ ।

९३१ । वृद्धो यूना तल्लक्षणश्चेदेव विशेषः । (१-२-६५)

यूना सहोक्तौ गोत्रं शिष्यते, तल्लक्षणश्चेत्, गोत्रयुवप्रत्ययमात्रकृतं चेत्तयोः कृत्स्नं वैरूप्यं स्यात् । गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ । 'वृद्धः' किम् ।

अथैकशेषो निरूप्यते—तदेवं द्वन्द्वे निरूपिते तदपवादमेकशेषप्रकरणमारभते । **अथैकशेष इति ॥** निरूप्यत इति शेषः । तत्रैकशेषसूत्राणि व्याचिख्यासुः पूर्वं व्याख्यातमपि सूत्रं सन्दर्भशुद्धये आह । **सरूपाणामिति ॥** तदुदाहरणमपि स्मारयति । **रामौ, रामाः इति ॥ विरूपाणामिति ॥** 'सरूपाणाम्' इत्यनेन सूत्रेणार्थभेदे शब्दैकरूप्ये एकशेषः उक्तः । एकार्थकत्वेऽपि विरूपाणामप्येकशेषः वक्तव्य इत्यर्थः । **वक्रदण्डश्चेति ॥** अत्र शब्दवैरूप्येऽप्यर्थैक्यात् अन्यतरश्शिष्यत इति भावः । **वृद्धो यूना ॥** स्वरूपतोऽर्थतश्च भेदेऽपि प्राप्तयर्थमिदम् । **यूनेति ॥** 'जीवति तु वंश्ये युवा' इति वक्ष्यमाणयुवप्रत्ययान्तेनेत्यर्थः । **सहोक्ताविति ॥** अध्याहारलब्धमेतत् । **गोत्रमिति ॥** वृद्धशब्देन 'अपत्यं पौत्रप्रभृति गोत्रम्' इति सूत्रोक्तं गोत्रं विवक्षितम् । अपत्यमन्तरितं वृद्धमिति पूर्वाचार्यपरिभाषितत्वादिति भावः । गोत्रप्रत्ययान्तमिति यावत् । न च 'गोत्रं यूना' इत्येव कुतो न सूत्रितमिति वाच्यम् । अपत्याधिकारादन्यत्र गोत्रग्रहणेन लौकिकं गोत्रं विवक्षितमिति सिद्धान्तज्ञापनार्थत्वात् । **शिष्यत इति ॥** शेष इति कर्मणि घञन्तमनुवर्तते इति भावः । **तल्लक्षण इति ॥** सः गोत्रप्रत्ययः युवप्रत्ययश्च लक्षणं निमित्तं यस्येति विग्रहः । विशेषः वैलक्षण्यम् । तथाच गोत्रयुवप्रत्ययान्तयोर्विशेषः वैरूप्यम्, तल्लक्षणश्चेत् गोत्रयुवप्रत्ययनिमित्तकश्चेदित्यर्थः । अन्यनिमित्तको न चेदित्यर्थस्सिद्धः । तदाह । **गोत्रयुवेति ॥ कृत्स्नमिति ॥** एवकारलभ्यमिदम् । **गार्ग्यश्चेति ॥** गर्गस्य गोत्रापत्यं गार्ग्यः । गर्गादिभ्यो यञ् । **गार्ग्यायण इति ॥** गर्गस्य गोत्रापत्यं गार्ग्यः । तस्यापत्यं युवा गार्ग्यायणः । 'यञिञोश्च' इति फक् । **गार्ग्याविति ॥** अत्र गार्ग्यशब्दस्य गार्ग्यायणशब्दस्य च गोत्रयुवप्रत्ययकृतमेव वैरूप्यमिति गोत्रप्रत्ययान्तो गार्ग्यशब्दश्शिष्यते इति भावः । **गर्गगार्ग्यायणाविति ॥** गर्गश्च गार्ग्यायणश्चेति विग्रहः । अत्र

गर्गगार्ग्यायणौ । 'यूना' किम् । गर्गगार्ग्यौ । 'तल्लक्षणः' किम् । भागवित्तिभागवित्तिकौ । 'कृत्स्नम्' किम् । गार्ग्यवात्स्यायनौ ।

९३२ । स्त्री पुंवच्च । (१-२-६६)

यूना सहोक्तौ वृद्धा स्त्री शिष्यते तदर्थश्च पुंवत् । गार्गी च गार्ग्यायणौ च गर्गाः । 'अस्त्रियाम्' इत्यनुवर्तमाने 'यञञोश्च' (सू ११०८) इति लुक् । गार्गी च गार्ग्यायणश्च गार्ग्यौ । दाक्षी च दाक्षायणश्च दाक्षी ।

गर्गशब्दस्य गार्ग्यायणशब्दस्य च युवप्रत्ययमात्रकृतवैरूप्येऽपि गोत्रप्रत्ययान्तत्वाभावान्नैकशेषः इति भावः । **गर्गगार्ग्याविति** ॥ अत्र गर्गशब्दस्य गार्ग्यशब्दस्य च गोत्रप्रत्ययमात्रकृतवैरूप्येऽपि गोत्रप्रत्ययान्तो गार्ग्यशब्दः न शिष्यते । यूना सहोक्तयभावादिति भावः । **भागवित्तिभागवित्तिकाविति** ॥ भगवित्तस्य गोत्रापत्यं भागवित्तिः । अतः इञ्, भागवित्तेः सौवीरस्यापत्यं युवा कुत्सितो भागवित्तिकः । 'वृद्धाट्ठक् सौवीरेषु' इति ठक् । अत्र भागवित्तिशब्दस्य भागवित्तिकशब्दस्य च न युवप्रत्ययमात्रकृतं वैरूप्यम्, कुत्सासौवीरत्वकृतस्यापि वैरूप्यस्य सत्त्वात् । अतो गोत्रप्रत्ययान्तो भागवित्तिशब्दो न शिष्यते इति भावः । **गार्ग्यवात्स्यायनाविति** ॥ गर्गस्य गोत्रापत्यं गार्ग्यः, वत्सस्य गोत्रापत्यं वात्स्यः गर्गादित्वाद्यञ् । वत्सस्यापत्यं युवा वात्स्यायनः । 'यञिञोश्च' इति फक् । गार्ग्यश्च वात्स्यायनश्चेति विग्रहः । अत्र गार्ग्यशब्दस्य वात्स्यायनशब्दस्य च न गोत्रयुवप्रत्ययमात्रकृतं वैरूप्यम् । प्रकृतिवैरूप्यस्य गोत्रयुवप्रत्ययमात्रकृतत्वाभावात् । अतो गोत्रप्रत्ययान्तो गार्ग्यशब्दः न शिष्यत इति भावः । **स्त्री पुंवच्च** ॥ वृद्धो यूनेत्यनुवर्तते । वृद्धेति स्त्रीलिङ्गेन विपरिणम्यते । तदाह । **यूना सहोक्तौ वृद्धा स्त्री शिष्यत इति** ॥ गोत्रप्रत्ययान्तः स्त्रीवाचकश्शब्दश्शिष्यत इति भावः । स्त्रीत्वस्य वैरूप्यकारणस्याधिकस्य सत्त्वात् पूर्वेणाप्राप्ते वचनमिदम् । **तदर्थ इति** ॥ तस्य शिष्यमाणस्य स्त्रीवाचकगोत्रप्रत्ययान्तस्यार्थः पुमानिव स्यादित्यर्थः । **गार्गी चेति** ॥ गर्गस्यापत्यं स्त्रीत्यर्थः । गर्गादियञन्तात् 'यञश्च' इति ङीप् । **गार्ग्यायणौ चेति** ॥ गर्गाद्यञन्तात् यून्यपत्ये 'यञिञोश्च' इति फक् । **गर्गा इति** ॥ अत्र स्त्रीत्वकृतवैरूप्याधिक्येऽपि गोत्रप्रत्ययान्तः स्त्रीवाचको गार्गीशब्दश्शिष्यते । सः पुंवत् । तर्हि यञ कुतो न श्रूयत इत्यत आह । **अस्त्रियामितीति** ॥ उपलक्षणमिदम् । 'तद्राजस्य बहुषु तेनैवास्त्रियाम्' इत्यतः अस्त्रियामिति, तेनैवेति, बहुष्विति चानुवर्तमाने सतीत्यर्थः । एतेन पुंवदित्यस्य प्रयोजनमुक्तम् । गार्गी च गार्ग्यायणश्चेति विग्रहस्तु न दर्शितः । तथा सति अबहुत्वात् यञो लुगभावे सति पुंस्त्वे स्त्रीत्वे च रूपं तुल्यम् । **गार्ग्याविति** ॥ तत्र पुंवत्त्वं निरर्थकं स्यात् । उदाहरणान्तरमाह । **दाक्षी चेति** ॥ दक्षस्य गोत्रापत्यं स्त्री दाक्षी । 'अत इञ्' इतीञन्तात् 'इतो मनुष्यजातेः' इति ङीष् । **दाक्षायणश्चेति** ॥ दक्षस्यापत्यं पुमान् दाक्षिः, तस्यापत्यं युवा दाक्षायणः । 'यञिञोश्च' इति फक् । दाक्षी च दाक्षायणश्चेति विग्रहे दाक्षीशब्दश्शिष्यते ।

९३३। पुमान् स्त्रिया। (१-२-६७)

स्त्रिया सहोक्तौ पुमाञ्छिष्यते, तल्लक्षण एव विशेषश्चेत्। हंसी च हंसश्च हंसौ।

९३४। भ्रातृपुत्रौ स्वसृदुहितृभ्याम्। (१-२-६८)

भ्राता च स्वसा च भ्रातरौ। पुत्रश्च दुहिता च पुत्रौ।

९३५। नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्। (१-२-६९)

अक्लीबेन सहोक्तौ क्लीबं शिष्यते, तच्च वा एकवत्स्यात्तल्लक्षण एव विशेषश्चेत्। शुक्लः पटः। शुक्ला शाटी। शुक्लं वस्त्रम्। तदिदं शुक्लम्। तानीमानि शुक्लानि।

तस्य पुंवत्त्वे सति ङीषो निवृत्तौ दाक्षिशब्दात् प्रथमाद्विवचने दाक्षी इति भवति। अत्र तल्लक्षणश्चेदेव विशेष इत्यप्यनुवर्तते। ततश्च भागवित्तिकश्च गार्गी च वात्स्यायनश्चेत्यत्र न भवति। **पुमान्स्त्रिया॥ तल्लक्षण एवेति॥** 'वृद्धो यूना' इत्यतस्तदनुवृत्तेरिति भावः। **हंसी चेति॥** अत्र पुंस्त्वस्त्रीत्वमात्रकृतवैरूप्यात् पुल्लिङ्गो हंसशब्दश्शिष्यते। स्त्रीपुंस्त्वकृतवैरूप्यादेव 'सरूपाणाम्' इत्यस्याप्राप्तिः। मातृमातराविति त्र जननीवाचकपरिच्छेत्तृवाचकमातृशब्दयोस्तु नायमेकशेषः। एकविभक्तौ सरूपाणामित्यनुवृत्य एकविभक्तौ स्त्रीपुंवत्त्वेतरकृतवैरूप्यविरहश्चेदित्याश्रयणात्। इह च मातृमातराविति त्र 'अप्तृन्' इति दीर्घतदभावाभ्यामपि वैरूप्यात्। अत एव हंसश्च वरटा चेत्यत्रापि नेत्यलम्। **भ्रातृपुत्रौ॥** स्वसृदुहितृभ्यां सहोक्तौ क्रमात् भ्रातृपुत्रौ शिष्येते। स्वरूपतोऽपि वैरूप्यादप्राप्तौ वचनम्। **नपुंसकम्॥** अन्यतरस्याङ्ग्रहणम् एकवदित्यनेनैवान्वेति, आनन्तर्यात्, नत्वेकशेषेणेत्यत आह। **तच्चेति॥ तल्लक्षण एवेति॥** नपुंसकत्वानपुंसकत्वमात्रकृतवैरूप्य चेदित्यर्थः। **शुक्लः पटः, शुक्ला शाटी, शुक्लं वस्त्रमिति॥** पटशब्दसमभिव्याहारात् शुक्लशब्दः पुल्लिङ्गः। शाटीशब्दसमभिव्याहारात् स्त्रीलिङ्गः। वस्त्रशब्दसमभिव्याहारे तु नपुंसकलिङ्गः। "गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति" इत्यमरोक्तेरिति भावः। तच्च, सा च, इदं च, तत्। अयं च, इयं च, इदं च, इदम्। शुक्लश्च, शुक्ला च, शुक्लं च शुक्लम्। अत्र नपुंसकान्येव शिष्यन्ते. एकवच्च भवन्ति। **तानीमानि शुक्लानीति॥** नपुंसकत्वे एकशेषे सति एकवत्त्वाभावे रूपाणि। न चेतरेतरयोगविवक्षायां द्विबहुवचनान्तयोः समाहारद्वन्द्वविवक्षायामेकवचनस्य च सिद्धत्वात् एकवदिति व्यर्थमिति वाच्यम्। अत एवैकशेषप्रकरणस्य समाहारेऽप्रवृत्तिज्ञापनात्। तेन ओदनश्च ओदनश्च तयोस्समाहारे ओदनमिति न भवति। ओदनशब्दो ह्यर्धचादिः। ओदनश्च ओदनश्चेति इतरेतरयोगद्वन्द्वेऽपि ओदनमिति अनभिधानात्। एवञ्च क्वचिदनभिधानस्यावश्याश्रयणीयतया द्वन्द्वमात्रस्यैकशेषविषयेऽनभिधानमाश्रित्य एकस्य शब्दस्यानेकार्थं चाश्रित्य

९३६ । पिता मात्रा । (१-२-७०)

मात्रा सहोक्तौ पिता वा शिष्यते । माता च पिता च पितरौ—माता-पितरौ वा ।

९३७ । श्वशुरः श्वश्रूा । (१-२-७१)

श्वश्रूा सहोक्तौ श्वशुरो वा शिष्यते, तल्लक्षण एव विशेषश्चेत् । श्वश्रूश्च श्वशुरश्च श्वशुरौ—श्वश्रूश्वशुरौ वा ।

९३८ । त्यदादीनि सर्वैर्नित्यम् १-२-७२)

सर्वैः सहोक्तौ त्यदादीनि नित्यं शिष्यन्ते । स च देवदत्तश्च तौ । 'त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते' (वा ८०१) । स च यश्च यौ । सा च या च ये 'पूर्वशेषोऽपि दृश्यते' इति भाष्यम् । स च यश्च तौ । 'त्यदादितः शेषे पुन्नपुंसकतो लिङ्गवचनानि' (वा ७९९) । सा च देवदत्तश्च तौ । तच्च देवदत्तश्च यज्ञदत्ता च तानि । पुन्नपुंसकयोस्तु परत्वान्नपुंसकं शिष्यते ।

एकशेषप्रकरणं भाष्ये प्रत्याख्यातम् । **पिता मात्रा** ॥ 'पुमान् स्त्रिया' इत्यत्र सरूपाणामित्यनुवृत्तेरप्राप्ताविदं वचनं विकल्पार्थं च । **मातापितराविति** ॥ "पितुर्दशगुणं माता गौरवेणातिरिच्यते" इति स्मृत्या मातुरभ्यर्हितत्वात्पूर्वनिपातः । 'आनङृतः' इत्यानङ् । **श्वशुरश्श्वश्रूा** ॥ **श्वश्रूश्वशुराविति** ॥ श्वश्रूा अपि मातृतुल्यत्वोक्तेरभ्यर्हितत्वम् । "श्वश्रूः पूर्वजपत्नी च मातृतुल्या प्रकीर्तिता" इति स्मृतेः । इह तल्लक्षणग्रहणानुवृत्तिस्स्पष्टार्था । 'श्वशुरः श्वश्रूा' इति शब्दग्रहणात् । **त्यदादीनि** ॥ **सर्वैरिति** ॥ त्यदादिभिरितरैश्चेत्यर्थः । **ताविति** ॥ अत्र देवदत्तशब्दो निवर्तते । तच्छब्दस्तु शिष्यते । तद्देवदत्ताविति न भवति । सर्वैः किम्? प्रत्यासत्त्या त्यदादिरेव सहोक्तावित्यर्थो माभूदित्येतदर्थम् । **त्यदादीनामिमथ इति** ॥ भाष्ये स्थितमेतत् । **यत् परमिति** ॥ त्यदादिगणे यत् परं पठितं तच्छिष्यत इत्यर्थः । शब्दपरविप्रतिषेधाश्रयणादिति भावः । **स च यश्च यौ, सा च या च ये इति** ॥ त्यदादिगणे यच्छब्दस्य तच्छब्दादूर्ध्वं पाठात् परत्वात् स एव शिष्यते इति भावः । **पूर्वशेषोऽपीति** ॥ परशब्दस्येष्टवाचित्वात् क्वचित्पूर्वमपि शिष्यत इति भावः । अत्र 'द्विपर्यन्तानाम्' इति न भवति । अहञ्च भवांश्चावामिति भाष्योक्तेः । **त्यदादित इति** ॥ आद्यादित्वात् षष्ठ्यर्थे तसिः । त्यदादीनां स्त्रीशेषे सति सहविवक्षितेषु यः पुमान् यच्च नपुंसकं तद्वशेन लिङ्गप्रतिपादकानि भवन्तीत्यर्थः । कानीत्याकाङ्क्षायामर्थात्त्यदादीन्येव सम्बध्यन्ते । **सा च देवदत्तश्च ताविति** ॥ अत्र तच्छब्दशिष्यते । समभिव्याहृतदेवदत्तशब्दलिङ्गश्च । देवदत्तशब्दस्तु निवर्तत एव । **पुन्नपुंसकयोरिति** ॥ तथोक्ताविति शेषः । **परत्वादिति** ॥ पुन्नपुंसकतो लिङ्ग-

तच्च देवदत्तश्च ते। 'अद्वन्द्वतत्पुरुषविशेषणानामिति वक्तव्यम्' (वा ८००)। कुक्कुटमयूर्याविमे। (मयुरीकुक्कुटाविमौ)। तच्च सा च अर्धपिप्पल्यौ ते।

९३९। ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री। (१-२-७३)

एषु सहविवक्षायां स्त्री शिष्यते। 'पुमान् स्त्रिया' (सू ९३३) इत्यस्यापवादः। गाव इमाः। 'ग्राम्य—' इति किम्। रुरव इमे। 'पशु' ग्रहणं

वचनानीत्यत्र पुमपेक्षया नपुंसकस्य पाठतः परत्वावगमादित्यर्थः। **अद्वन्द्वेति** ॥ द्वन्द्वतत्पुरुषविशेषणानां त्यदादीनां स्त्रीशेषे 'त्यदादितश्शेषे पुन्नपुंसकतो लिङ्गवचनानि' इत्येतन्न भवतीत्यर्थः। द्वन्द्वे उदाहरति। **कुक्कुटमयूर्याविमे इति** ॥ अयञ्च इयञ्च इमे इत्यत्र 'त्यदादितश्शेषे' इति पुल्लिङ्गत्वं न भवति, किन्तु विशेष्यनिघ्नतैव। यद्यपि द्वन्द्वे उभयपदार्थप्रधानत्वात् उभयमपि विशेष्यम्। तथापि 'परवल्लिङ्गम्' इति परपदलिङ्गत्वात्तदधीनतैव विशेषणस्येति बोध्यम्। न च अयञ्च इयञ्च इत्यत्र स्त्रीशेष एव न भवति। 'पुमान् स्त्रिया' इत्युक्तत्वात्। अतः पुन्नपुंसकतः लिङ्गविधेः प्रसक्तिः कथमिति वाच्यम्। 'परवल्लिङ्गम्' इति हि द्वन्द्वतत्पुरुषार्थयोः परवल्लिङ्गविधिः। अतः द्वन्द्वविशेषणस्य तत्पुरुषविशेषणस्य चानुप्रयोगे यल्लिङ्गं तदेव लिङ्गमिति भाष्यकैयटयोस्स्थितम्। ततश्च 'कुक्कुटमयूर्याविमे' इति उदाहरणे अयमियञ्च इति विग्रहे 'पुमान् स्त्रिया' इति पुंशेषऽपि 'परवल्लिङ्गम्' इति विशेषणत्वात् स्त्रीलिङ्गत्वे सति तस्य 'त्यदादितः' इति पुंवत्त्वं प्राप्तमनेन निषिध्यत इति नानुपपत्तिः। क्वचिन्मूलपुस्तकेषु तु मयूरीकुक्कुटाविमावित्यपि दृश्यते। तत्तु प्रकृतानुपयुक्तम्। अत्र मयूरीकुक्कुटाविति द्वन्द्वार्थस्य पुल्लिङ्गतया इयञ्चायञ्च इमाविति तद्विशेषणस्यानुप्रयुज्यमानस्यापि 'पुमान् स्त्रिया' इति परिशिष्टस्य पुल्लिङ्गस्य इदमशब्दस्य स्त्रीत्वाप्रसक्त्या तत्र 'त्यदादितश्शेषे' इति पुंस्त्वविधेरप्रवृत्तत्वेन 'अद्वन्द्वतत्पुरुषविशेषणानाम्' इति निषेधस्यानुपयोगात्। तत्पुरुषे उदाहरति। **तच्चेति** ॥ पिप्पल्या अर्धम् अर्धपिप्पली। 'अर्धं नपुंसकम्' इति तत्पुरुषः। अर्धपिप्पली च पिप्पल्यर्धञ्च अर्धपिप्पल्यौ। तच्च सा च ते। तत्र पिप्पल्यर्धशब्दविशेष्याभिप्रायं तदिति नपुंसकत्वम्। सेति स्त्रीत्वन्तु अर्धपिप्पलीति विशेष्याभिप्रायम्। अत्र 'पुमान् स्त्रिया' इत्यस्य नैव प्रसक्तिः। किन्तु 'नपुंसकमनपुंसकेनैकवत्' इति नपुंसकं शिष्टम्। तस्य स्त्रीलिङ्गतया विशेषणात् 'परवल्लिङ्गम्' इति स्त्रीत्वम्। तस्य 'त्यदादितश्शेषे' इति नपुंसकत्वं प्राप्तं निषिध्यते। एवञ्च ते इति स्त्रीलिङ्गमेव सिध्यति। यद्यपि स्त्रीत्वे नपुंसकत्वे वा ते इति द्विवचनस्य न कोऽपि विशेषः। तथाप्यर्धपिप्पल्यस्ताः इत्युदाहार्यम्। तच्च सा चेति विग्रहः। **ग्राम्यपशु** ॥ **एष्विति** ॥ तरुणभिन्नेषु ग्राम्याणां पशूनां सङ्घेष्वित्यर्थः। इह अनपुंसकेनेत्यनुवर्तनादाह। **पुमान् स्त्रियेत्यस्यापवाद इति** ॥ गौश्च गौश्च गौश्च इति पुल्लिङ्गस्त्रीलिङ्गेषु गोशब्देषु सहविवक्षितेषु 'पुमान् स्त्रिया' इत्येतद्बाधित्वा स्त्री शिष्यत इति भावः। ननु स्त्रीशेषे पुंशेषे वा न कोऽपि रूपभेद इत्यत आह। **इमा इति** ॥ अनुप्रयोगे रूपभेदः फलमिति भावः। 'त्यदादितश्शेषे' इति न भवति। 'गाव इमाः' इति भाष्यप्रयोगादित्याहुः। **रुरव इमे इति** ॥ रुरुः कृष्णाख्यो मृगः। अग्राम्यपशुत्वान्न स्त्री

किम् । ब्राह्मणा इमे । 'सङ्ख्येषु' किम् । एतौ गावौ । 'अतरुणेषु' किम् । वत्सा इमे । 'अनेकशफेष्विति वाच्यम्' (वा ८०५) । अश्वा इमे । इह सर्वत्रैकशेषे कृतेऽनेकसुबन्ताभावाद्वन्द्वो न । तेन 'शिरसी' 'शिरांसि' इत्यादौ समासस्येत्यन्तोदात्तः प्राण्यङ्गत्वादेकवद्भावश्च न । 'पन्थानौ' 'पन्थानः' इत्यादौ समासान्तो न ।

इत्येकशेषप्रकरणम् ।

शिष्यते । किन्तु 'पुमान् स्त्रिया' इत्येकशेषः । ततश्चानुप्रयोगे इमे इति पुल्लिङ्गत्वमेव । **ब्राह्मणा इमे इति** ॥ ब्राह्मणी च ब्राह्मणश्चेति विग्रहः । अपशुत्वान्न स्त्री शिष्यते । किन्तु 'पुमान् स्त्रिया' इत्येकशेषः । अन्यथा ब्राह्मण्यः इमा इति स्यात् । **एतौ गावाविति** ॥ स्त्रीलिङ्गपुल्लिङ्गयोस्सहोक्तौ असङ्गत्वान्न स्त्री शिष्यते । सङ्गशब्दोऽपि बहूनां समुदाये वर्तते । अन्यथा एकशेषस्यानेकविषयत्वादेवानेकपरिग्रहे सिद्धे किं तेनेति भावः । स्त्रीशेषे तु एते इति अनुप्रयोगे रूपं स्यात् । **वत्सा इमे इति** ॥ वत्साश्च वत्साश्च इति विग्रहः । तरुणत्वान्न स्त्री शिष्यते । अन्यथा वत्सा इमा इत्यनुप्रयोगस्स्यात् । **अनेकशफेष्विति वाच्यमिति** ॥ वार्तिकम् । एकशफा अश्वादयः, तेषां सहोक्तौ ग्राम्यपशविति न भवति । **अश्वा इमे इति** ॥ एकशफत्वान्न स्त्री शिष्यते । ततश्चानुप्रयोगे पुल्लिङ्गत्वमिति भावः । ननु 'सरूपाणाम्' इति सूत्रे 'तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे' इत्यतः द्वन्द्वग्रहणानुवृत्त्या द्वन्द्वे एकशेष इति भाष्यात् कृते द्वन्द्वे एकशेषस्स्यादित्यत आह । **इहेति** ॥ इहोदाहृतेषु एकशेषविषयेषु सर्वत्र प्रसक्तद्वन्द्वमनवकाशत्वादेकशेषो बाधते । कृतेत्वेकशेषेऽनेकाभावात् द्वन्द्वो नेत्यर्थः । द्वन्द्वसमासे एकशेष इति भाष्यस्य द्वन्द्वे प्रसक्ते सहविवक्षायामेकशेष इति व्याख्येयम् । ननु कृत एव द्वन्द्वे एकशेषो भवतु, का हानिरित्यत आह । **तेनेति** ॥ द्वन्द्वात् प्रागेवैकशेषाश्रयणेनेत्यर्थः । कृते द्वन्द्वे एकशेषाभ्युपगमे शिरसी इति द्विवचने शिरांसीति बहुवचने च समासस्येत्यन्तोदात्तस्स्यात् । प्राण्यङ्गत्वात् 'द्वन्द्वश्च प्राणि' इत्यादिना एकवद्भावश्च स्यादित्यर्थः । आदिना शिरोभ्यां शिरोभिरित्यादिसङ्ग्रहः । **पन्थानाविति** ॥ द्वन्द्वे कृते एकशेषाभ्युपगमे पन्थानौ–पन्थानः । पथिभ्याम्–पथिभिः, इत्यादौ 'ऋक्पूः' इत्यप्रत्ययस्समासान्तस्स्यादिति भावः । नचाल 'इतोऽत्सर्वनाम' इति सर्वनामस्थाने परेऽकारविधानाल्लिङ्गात् समासान्तस्सुपरिहरः । 'इतोऽत्' इत्युक्तेऽपि सावित्यनुवृत्त्य पन्था इति सिद्धिरिति वाच्यम् । 'पथो विभाषा' इति समासान्ताभावे अपन्थानाविति यादौ । 'इतोऽत्' इति सूत्रस्य सावकाशत्वात् ॥

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायाम् एकशेषप्रकरणं समाप्तम् ।

श्रीरस्तु ।

॥ अथ सर्वसमासशेषप्रकरणम् ॥

कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः । 'परार्थाभिधानं वृत्तिः' । 'वृत्त्यर्थावबोधकं वाक्यं विग्रहः' स द्विधा । लौकिकोऽलौकिकश्च । परिनिष्ठितत्वात्साधुर्लौकिकः । प्रयोगानर्होऽसाधुरलौकिकः । यथा राज्ञः पुरुषः । राजन् अस् पुरुष सु इति । अविग्रहो नित्यसमासः, अस्वपदविग्रहो वा ।

अथ प्रसङ्गात् सर्वसमासोपयुक्तं प्रकीर्णकं प्रकरणमारभते—**कृत्तद्धितेति** ॥ कृदन्ताः तद्धिताः समासाः एकशेषाः सनादिप्रत्ययान्तधातवश्चेति वृत्तयः पञ्चविधा इत्यर्थः । वृत्तिसामान्यलक्षणमाह । **परार्थाभिधानं वृत्तिरिति** ॥ 'समर्थः पदविधिः' इति सूत्रे भाष्ये स्थितमेतत् । अभिधानमिति करणे ल्युट् । सामान्ये नपुंसकम् । विग्रहवाक्यावयवपदार्थेभ्यः परः अन्यः योऽयं विशिष्टैकार्थः तत्प्रतिपादिका वृत्तिरित्यर्थः । प्रक्रियादशायां प्रत्येकमर्थवत्त्वेन प्रथमविगृहीतानां पदानां समुदायशक्त्या विशिष्टैकार्थप्रतिपादिका वृत्तिरिति यावत् । समुदायशक्तिश्च 'समर्थः पदविधिः' इति परिभाषया लभ्या । तत्र समासतद्धितयोः पदविधित्वं स्पष्टमेव । 'सुप्सुपा' इत्यनुवर्त्य समासविधानात् । सुबन्तात्तद्धितोत्पत्तेः वक्ष्यमाणत्वात् । कृतामपि केषां चित् 'कर्मण्यण्' इति उपपदनिमित्तकानां पदविधित्वमस्त्येव । 'सुप आत्मनः क्यच्' इत्यादीनामपि पदविधित्वमस्त्येव । एकशेषविधावपि द्वन्द्वे इत्यनुवृत्तेः, द्वन्द्वविषये तद्विधानात् 'एकार्थीभावोऽप्यस्त्येव' इति मञ्जूषादौ विस्तरः । **वृत्त्यर्थावबोधकमिति** ॥ "यद्यपि वृत्तावेव समुदायशक्त्या विशिष्टैकार्थप्रतिपादकता, नतु वाक्ये" इति समर्थसूत्रे भाष्ये प्रपञ्चितम् । तथापि समासवृत्तियोग्यविभक्त्यन्तपदानां पृथक्प्रयुज्यमानानां समूहो विग्रहवाक्यमिति बोध्यम् । **परिनिष्ठितत्वादिति** ॥ व्याकरणसंस्कृतत्वादित्यर्थः । **प्रयोगानर्ह इति** ॥ व्याकरणसंस्कृतत्वाभावादित्यर्थः । यथेत्युदाहरणप्रदर्शने । **राज्ञः पुरुष इति** ॥ लौकिकविग्रहवाक्यमिति शेषः । राजन् अस् पुरुष सु इत्यलौकिकविग्रहवाक्यमिति शेषः । **अविग्रहो नित्यसमास इति** ॥ अलौकिकविग्रहवाक्यरहित इत्यर्थः । समासस्य नित्यत्वादिति भावः । **अस्वपदेति** ॥ समस्यमानपदसमानार्थकपदान्तरकृतविग्रहो वा नित्यससमास इत्यर्थः । संज्ञाविषयसमासे तु वाक्येन संज्ञानवगमेऽपि वृत्तिघटकपदज्ञानाय समस्यमानपदार्थबोधकवाक्यप्रयोगो भवत्येव । तत्र समासनित्यवादस्तु

समासश्चतुर्धेति प्रायोवादः । अव्ययीभावतत्पुरुषबहुव्रीहिद्वन्द्वाधिकारबहिर्भूतानामपि 'सह सुपा' (सू ६४९) इति विधानात् । पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदार्थप्रधानस्तत्पुरुषः, अन्यपदार्थप्रधानो बहुव्रीहिः, उभयपदार्थप्रधानो द्वन्द्वः, इत्यपि प्राचां प्रवादः प्रायोऽभिप्रायः । 'सूपप्रति' 'उन्मत्तगङ्गम्' इत्याद्यव्ययीभावे 'अतिमालादौ' तत्पुरुषे, 'द्वित्राः' इत्यादिबहुव्रीहौ, 'दन्तोष्ठम्' इत्यादिद्वन्द्वे चाभावात् । तत्पुरुषविशेषः कर्मधारयः । तद्विशेषो द्विगुः । अनेकपदत्वं द्वन्द्वबहुव्रीह्योरेव । तत्पुरुषस्य क्वचिदेवेत्युक्तम् । किं च ।

सुपां सुपा तिङा नाम्ना धातुनाथ तिङां तिङा ।
सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः ॥

सुपां सुपा, राजपुरुषः । तिङा, पर्यभूषयत् । नाम्ना, कुम्भकारः ।

वाक्यसदृशवृत्तिसमानार्थकत्वाभावात् गौण इत्याहुः । **चतुर्धेति** ॥ अव्ययीभावः, तत्पुरुषः, बहुव्रीहिः, द्वन्द्वश्चेति, चतुर्विध इत्यर्थः । **प्रायो वाद इति** ॥ प्रायस् इत्यव्ययं बाहुल्ये । बाहुल्याभिप्रायकचातुर्विध्यप्रवाद इत्यर्थः । कुत इत्यत आह । **अव्ययीभावेति** ॥ **बहिर्भूतानामपीति** ॥ समासानामिति शेषः । **प्रायोऽभिप्राय इति** ॥ बाहुल्यतात्पर्यक इत्यर्थः । **सूपप्रतीति** ॥ इह 'द्वन्द्वे च' इत्यनन्तरं श्रुतमभावादिति पदम् अव्ययीभावे इत्यनन्तरं तत्पुरुषे इत्यनन्तरं बहुव्रीहावित्यनन्तरं चान्वेति । सूपप्रतीत्यव्ययीभावे उत्तरपदार्थप्रधानतया, उन्मत्तगङ्गं देशः लोहितगङ्गं देशः इत्यव्ययीभावेऽन्यपदार्थप्रधानतया पूर्वपदार्थप्राधान्याभावादित्यर्थः । अतिमालादौ तत्पुरुषे पूर्वपदार्थप्रधानतया उत्तरपदार्थप्राधान्याभावादित्यर्थः । द्वित्रा इति बहुव्रीहौ उभयपदार्थप्रधानतयाऽन्यपदार्थप्राधान्याभावादित्यर्थः । दन्तोष्ठमित्यादिद्वन्द्वे समाहारस्यैव प्रधानतया उभयपदार्थप्राधान्याभावादित्यर्थः । **तत्पुरुषविशेषः कर्मधारय इति** ॥ 'तत्पुरुषस्समानाधिकरणः कर्मधारयः' इत्युक्तेरिति भावः । **तद्विशेषो द्विगुरिति** ॥ कर्मधारयविशेष इत्यर्थः । 'सङ्ख्यापूर्वो द्विगुः' इत्यादिरिति भावः । **अनेकपदत्वमिति** ॥ द्वित्रिचतुरादिपदकत्वमित्यर्थः । 'अनेकमन्यपदार्थे' इति बहुव्रीहिगतस्यानेकग्रहणस्य द्वन्द्वविधावप्यनुवृत्तेरिति भावः । **क्वचिदेवेति** ॥ ब्रह्मजातावित्यादावित्यर्थः । **इत्युक्तमिति** ॥ भाष्यादाविति शेषः । **किंचेति** ॥ अव्ययमिदं विशेषान्तरप्रदर्शने । **सुपां सुपेति** ॥ सुबन्तानां सुबन्तेन तिङा प्रातिपदिकेन धातुना च समासः । अथेति पूर्ववाक्यव्यवच्छेदे । **तिङामिति** ॥ तिङन्तानां तिङन्तेन सुबन्तेन च समास इत्येवं षड्विधस्समासो ज्ञेय इत्यर्थः । **सुपेति** ॥ सुपेत्यस्योदाहरणं वक्ष्यत इति शेषः । **राजपुरुष इति** ॥ राज्ञ इत्यस्य षष्ठ्यन्तस्य पुरुष इति सुबन्तेन समासः । **तिङेति** ॥ सुपां

धातुना, कटप्रूः। अजस्रम्। तिङां तिङा, पिबतखादता। खादतमोदता। तिङां सुपा। कृन्त विचक्षणेति यस्यां क्रियायां सा कृन्तविचक्षणा। 'एहीडादयोऽन्यपदार्थे च' इति मयूरव्यंसकादौ पाठात्समासः।

इति सर्वसमासशेषप्रकरणम्।

तिङेत्यस्योदाहरणं वक्ष्यत इत्यर्थः। **पर्यभूषयदिति** ॥ 'सह सुपा' इत्यत्र सहेति योगविभागात् परीति सुबन्तस्य तिङन्तेन समासः। **नाम्नेति** ॥ सुपां प्रातिपदिकेन समासे उदाहरणं वक्ष्यत इत्यर्थः। **कुम्भकार इति** ॥ 'उपपदमतिङ्' इति कुम्भस्येति षष्ठ्यन्तस्य कारेति प्रातिपदिकेन समासः। 'गतिकारकोपपदानां कृद्भिस्सह समासवचनं प्राक् सुबुत्पत्तेः' इत्युक्तेरिति भावः। **धातुनेति** ॥ सुपां धातुना समासे उदाहरणं वक्ष्यत इत्यर्थः। **कटप्रूरिति** ॥ 'क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजिश्रीणां दीर्घोऽसम्प्रसारणञ्च' इति वार्तिकेन 'प्रु गतौ' इति धातुना समासो निपातितः, नतु तिङन्तेनोपपदसमास इति भ्रमितव्यम्। क्विब्विधाविह सप्तमीनिर्देशाभावेन उपपदत्वाभावात्। अथ सुपां धातुनोदाहरणान्तरमाह। **अजस्रमिति** ॥ 'नमिकम्पिस्म्यजसकमिहिंसदीपो रः' इति सूत्रे रप्रत्ययविधौ जसधातुना सह नञ्समासो निपातितः। **तिङां तिङेति** ॥ समासे उदाहरणं वक्ष्यत इत्यर्थः। **पिबतखादतेति** ॥ मयूरव्यंसकादित्वात् तिङन्तस्य तिङन्तेन समासः। **तिङां सुपेति** ॥ समासे उदाहरणं वक्ष्यत इति शेषः। **कृन्तविचक्षणेति** ॥ हे विचक्षण कृन्त छिन्धीत्यर्थः। इह तिङन्तस्य सुबन्तेन समासः कथमित्यत आह। **एहीडादय इति** ॥ अत्र सुपां तिङेत्यनेनैव तिङां सुबन्तेनेत्यस्यापि ग्रहणात् समासस्य षड्विधत्वं चिन्त्यम्। पञ्चविधत्वमेव युक्तम्। उभयत्रापि सुप्तिङ्घटितत्वाविशेषादित्याहुः। अन्ये तु सुपां तिङेत्यनेन सुबन्तपूर्वपदकतिङन्तसमासस्य ग्रहणम्। तिङां सुबन्तेनेत्यनेन तु तिङन्तपूर्वपदकसुबन्तसमासस्य ग्रहणमित्याहुः ॥

इति श्रीमद्वासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां सर्वसमासशेषप्रकरणं समाप्तम्।

श्रीरस्तु ।

॥ अथ सर्वसमासान्तप्रकरणम् ॥

९४० । ऋक्पूरब्धूःपथामानक्षे । (५-४-७४)

अ अनक्षे इति च्छेदः । ऋगाद्यन्तस्य समासस्य अप्रत्ययोऽन्तावयवः स्यात्, अक्षे या धूस्तदन्तस्य तु न । अर्धर्चः । अनृचबह्वृचावध्येतर्येव । नेह, अनृक्साम । बह्वृक्सूक्तम् । विष्णोः पूर्विष्णुपुरम् । क्लीबत्वं लोकात् । विमलापं सरः ।

९४१ । ह्यन्तरुपसर्गेभ्योऽप ईत् । (६-३-९७)

अप इति कृतसमासान्तस्यानुकरणम् । षष्ठ्यर्थे प्रथमा । एभ्योऽपस्य ईत्स्यात् । द्विर्गता आपो यस्मिन्निति द्वीपम् । अन्तरीपम् । प्रतीपम् । समीपम् ।

अथ सर्वसमाससाधारणसमासान्ताः निरूप्यन्ते—**ऋक्पूरब्धूः ॥ छेद इति ॥** सूत्रे अ इति लुप्तप्रथमान्तनिर्देश इति भावः । समासान्त इत्यधिकृतम् । ऋगादिभिस्समासो विशेष्यते । तदन्तविधिः । तदाह । **ऋगाद्यन्तस्येति ॥** ऋक्, पूर्, अप्, धूर्, पथिन् एतदन्तस्येत्यर्थः । **अप्रत्यय इति ॥** अकारात्मकप्रत्यय इत्यर्थः । **अक्षे या धूरिति ॥** अक्षसम्बन्धिनी या धूरित्यर्थः । सूत्रे सम्बन्धिनोऽधिकरणत्वविवक्षया अनक्षे इति सप्तमी । अनक्षे इति च धूर्शब्देनैव सम्बध्यते । अन्यैरसम्भवादिति भावः । **अर्धर्च इति ॥** ऋचोऽर्धमिति विग्रहः । अर्धं नपुंसकम् इति समासः । अकारस्समासान्तः । 'अर्धर्चाः पुंसि च' इति पुंस्त्वम् । **अनृचबह्वृचावध्येतर्येवेति ॥** अविद्यमानाः ऋचः यस्येति विग्रहः । अनृचः केवलयजुरध्येता । बहवः ऋचः यस्येति बह्वृचः ऋक्छाखी । इत्युदाहरणम् । अध्येतर्येवेति नियमस्य प्रयोजनमाह । **नेहेति ॥ अनृक्सामेति ॥** अविद्यमानाः ऋचः यस्येति विग्रहः । ऋच्यध्यूढं प्रजापतेर्हृदयं सामेति । **बह्वृक्सूक्तमिति ॥** बहवो ऋचः यस्मिन्निति विग्रहः । अथ पूर्शब्दान्तस्योदाहरति । **विष्णोरिति ॥** ननु पूर्शब्दस्य स्त्रीत्वात् 'परवल्लिँङ्गम्' इति विष्णुपुरशब्दस्य स्त्रीत्वं युक्तमित्यत आह । **क्लीबत्वं लोकादिति ॥** अथाप्शब्दान्तस्योदाहरति । **विमलापं सर इति ॥** विमलाः आपः यस्मिन्निति विग्रहः । **ह्यन्तरुप ॥ कृतसमासान्तस्येति ॥** अकारप्रत्ययान्तस्येत्यर्थः । **एभ्य इति ॥** द्वि अन्तर् उपसर्गः एतेभ्य इत्यर्थः ।

समापो देवयजनमिति तु समा आपो यस्मिन्निति बोध्यम् । कृतसमासान्त-ग्रहणान्नेह, स्वप् । स्वपी । 'अवर्णान्ताद्वा' (वा ५०४५) । प्रेपम् । प्रापम् । परेपम् । परापम् ।

९४२ । ऊदनोर्देशे । (६-३-९८)

अनोः परस्यापस्य ऊत्स्यादेशे । अनूपो देशः । राजधुरा । अक्षे तु, अक्षधूः । दृढधूरक्षः । सखिपथौ, रम्यपथो देशः ।

अपस्येति ॥ अकारप्रत्ययान्तस्याप्शब्दस्येत्यर्थः । **ईत्स्यादिति** ॥ 'आदेः परस्य' इति परिभाषया आदेरकारस्येत्यर्थः । **द्वयोर्गतावितिं** ॥ द्वयोः पार्श्वयोर्गताः आपः यस्मिन्निति विग्रहः । व्यधिकरणपदो बहुव्रीहिः । अकारप्रत्ययः, ईत्त्वं सवर्णदीर्घश्च । **अन्तरीपमिति** ॥ अन्तर्गता आपो यस्मिन्निति विग्रहः । **प्रतीपमिति** ॥ प्रतिकूलाः आपो यस्मिन्निति विग्रहः । उपसर्गात् परत्वात् ईत्त्वम् । **समीपमिति** ॥ सङ्गताः आपो यस्मिन्निति विग्रहः । उपसर्गात् परस्योदाहरणान्तरमिदम् । **समापो देवयजनमिति** ॥ श्रुतिरेषा । अत्र उपसर्गात् परत्वाभावात् ईत्त्वं नेति भावः । देवा इज्यन्ते अस्मिन्निति देवयजनं, यज्ञभूमिः । समाप इति पुंस्त्वं छान्दसम् । भाष्ये तु समाप ईत्त्वं नेत्युक्त्वा समापं नाम देवयजनमित्युदाहृतम् । तत्र समापशब्दो देवयजनविशेषवाच्येव विवक्षितः । समीपसमृद्धि, इति निर्देशात्, समीपमिति भाष्ये उदाहरणाच्च । **स्वबिति** ॥ शोभना आपो यस्येति विग्रहः । 'न पूजनात्' इति समासान्तनिषेधः । अकृतसमासान्तत्वादीत्त्वन्न । **स्वपी इति** ॥ प्रथमाद्विवचनमिदम् । **अवर्णान्ताद्वेति** ॥ अवर्णान्तादुपसर्गात् परस्यापस्य ईत्त्वं वा वक्तव्यमित्यर्थः । **प्रेपम्, प्रापमिति** ॥ प्रगता आपो यस्येति विग्रहः । **परेपम्, परापमिति** ॥ परागता आपो यस्येति विग्रहः । **ऊदनोर्देशे** ॥ ईत्त्वस्यापवादः । **ऊत् स्यादिति** ॥ 'आदेः परस्य' इति ज्ञेयम् । **अनूपो देश इति** ॥ अनुकूला आपः यस्मिन्निति विग्रहः । अप्रत्ययः, ऊत्त्वं, सवर्णदीर्घश्च । अनूपः इत्यत्र ऊपो अवग्रहार्थं दीर्घोच्चारणमिति भाष्यम् । बह्वृचास्तु अनूपो गोमान् गोभिरित्यत्र नावगृह्णन्ति । तदेवं 'ऋक्पूः' इति सूत्रगतः अप्शब्दः प्रपञ्चितः । अथ धूर्शब्दान्तस्योदाहरति । **राजधुरेति** ॥ राज्ञो धूरिति विग्रहः । धूर्शब्दोऽत्र राज्यलक्षणे लाक्षणिकः । अकारप्रत्ययः । 'परवल्लिङ्गम्' इति स्त्रीत्वम् । टाप् । **अक्षे त्विति** ॥ अक्षसम्बन्धिनी या धूस्तदन्तात् अकारप्रत्ययो न । **अक्षधूरिति** ॥ अक्षो नाम रथावयवदण्डविशेषः । यदग्रयोश्चक्रे आसज्येते, तस्याक्षस्याग्रं धूः । अनेन 'अक्षे समासार्थे धुरो नाकारप्रत्ययः' इति व्याख्यानेऽत्र निषेधो न स्यादिति सूचितम् । **दृढधूरक्ष इति** ॥ दृढा धूर्यस्येति विग्रहः । एतेनाक्षे पूर्वपदे धुरो नाकारप्रत्यय इति व्याख्याने अत्र निषेधो न स्यादिति सूचितम् । तदेवं 'ऋक्पूः' इति सूत्रे

---

१. इदं च प्रकृतसूत्रे 'प्रापं परापम्' इति 'गतिश्च' इति सूत्रे 'प्रेपं परेपम्' इति भाष्योदाहरणलब्धमपि प्रपरविषयकमेवेति भाति ।

९४३ । अच्प्रत्यन्ववपूर्वात्सामलोम्नः । (५-४-७५)

एतत्पूर्वात्सामलोमान्तात्समासादच्स्यात् । प्रतिसामम् । अनुसामम् । अवसामम् । प्रतिलोमम् । अनुलोमम् । अवलोमम् । 'कृष्णोदक्पाण्डुसंख्यापूर्वाया भूमेरजिष्यते' (वा ५०४६) । कृष्णभूमः । उदग्भूमः । पाण्डुभूमः । द्विभूमः प्रासादः । 'संख्याया नदीगोदावरीभ्यां च' (वा ५०४७) । पञ्चनदम् । सप्तगोदावरम् । 'अच्' इति योगविभागादन्यत्रापि । पद्मनाभः ।

९४४ । अक्ष्णोऽदर्शनात् । (५-४-७६)

अचक्षुःपर्यायादक्ष्णोऽच्स्यात्समासान्तः । गवामक्षीव गवाक्षः ।

धूर्शब्दः प्रपञ्चितः । अथ पथिन्शब्दस्योदाहरति । **सखिपथाविति** ॥ सखा च पन्थाश्चेति द्वन्द्वः । अकारप्रत्ययः । 'नस्तद्धिते इति टिलोपः । **रम्यपथ इति** ॥ रम्यः पन्था यस्येति विग्रहः । **अच्प्रत्यन्वव** ॥ **एतत्पूर्वादिति** ॥ प्रति, अनु, अव, एतत्पूर्वकादित्यर्थः । **प्रतिसाममिति** ॥ प्रतिगतं सामेति विग्रहः । अच्, 'नस्तद्धिते' इति टिलोपः । **अनुसाममिति** ॥ अनुगतं सामेति विग्रहः । अच्, टिलोपः । **अवसाममिति** ॥ अवकृष्टं सामेति विग्रहः । अच्, टिलोपः । **प्रतिलोममिति** ॥ प्रतिगतं लोमेति विग्रहः । **अनुलोममिति** ॥ अनुगतं लोमेति विग्रहः । **अवलोममिति** ॥ अवगतं लोमेति विग्रहः । सर्वत्राच्, टिलोपः । **कृष्णोदगिति** ॥ नेदं वार्तिकम् । किं त्वच्प्रत्ययेत्यत्र अजिति योगविभागमूलाभियुक्तोक्तिरेषा । **कृष्णेति** ॥ कृष्णा भूमिः यस्य, उदीची भूमिः यस्य, पाण्डुः भूमिः यस्य, द्वे भूमी यस्य, तिस्रो भूमयः यस्येति च विग्रहः । प्रासादस्सर्वत्र विशेष्यः । **सङ्ख्याया इति** ॥ इदमप्यजिति योगविभागमूलकमेव । सङ्ख्यायाः परो यो नदीशब्दः गोदावरीशब्दश्च ताभ्यामजिष्यते इत्यर्थः । **पञ्चनदमिति** ॥ पञ्चानां नदीनां समाहार इति विग्रहः । **सप्तगोदावरमिति** ॥ सप्तानां गोदावरीणां समाहार इति विग्रहः । 'नदीभिश्च' इत्यव्ययीभावः । अचि 'यस्येति च' इति लोपः । 'नाव्ययीभावात्' इत्यम् । **अन्यत्रापीति** ॥ अजिति शेषः । **पद्मनाभ इति** ॥ पद्मं नाभौ यस्येति विग्रहः । वस्तुतस्तु, योगविभागस्य भाष्येऽदर्शनात् पृषोदरादित्वमेवोचितम् । **अक्ष्णोऽदर्शनात्** ॥ अदर्शनादिति च्छेदः । दृश्यतेऽनेनेति दर्शनं, चक्षुः । करणे ल्युट् । अचक्षुर्वाचिन इति फलितम् । तदाह । **अचक्षुःपर्यायादिति** ॥ **गवामक्षीवेति** ॥ अक्षिशब्दस्तत्सदृशे लाक्षणिक इति सूचयितुमिवशब्दः प्रयुज्यते । मुख्यवृत्त्या चक्षुर्वाचकत्वा-

---

१. इदम् 'अच्' इति योगविभागलब्धम्–इति काशिका ।

२. इदम् 'अच्' इति योगविभागलब्धम्–इति काशिका ।

९४५। अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनड्डुहक्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तन्दिवरात्रिन्दिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः। (५-४-७७)

एते पञ्चविंशतिरजन्ता निपात्यन्ते। आद्यास्त्रयो बहुव्रीहयः। अविद्यमानानि चत्वारि यस्य, अचतुरः। विचतुरः। सुचतुरः। 'त्र्युपाभ्यां चतुरोऽजिष्यते' (वा ३३५१)। त्रिचतुराः। चतुर्णां समीपे उपचतुराः। तत एकादश द्वन्द्वाः। स्त्रीपुंसौ। धेन्वनड्डुहौ। ऋक्सामे। वाङ्मनसे। अक्षिणी च भ्रुवौ च अक्षिभ्रुवम्। दाराश्च गावश्च दारगवम्। ऊरू च अष्ठीवन्तौ च ऊर्वष्ठीवम्। निपातनाट्टिलोपः। पदष्ठीवम्। निपातनात्पादशब्दस्य पद्भावः।

भावादच्। पुंस्त्वं लोकात्। **अचतुर ॥ आद्यास्त्रयो बहुव्रीहय इति ॥** बहुव्रीहय एवेत्यर्थः। भाष्यवाक्यमिदम्। **अचतुर इति ॥** 'नञोऽस्त्यर्थानाम्' इति विद्यमानपदलोपः। **विचतुर इति ॥** विगतानि चत्वारि यस्येति विग्रहः। **सुचतुर इति ॥** सु शोभनानि चत्वारि यस्येति विग्रहः। 'न पूजनात्' इति निषेधो बाध्यते। **त्र्युपाभ्यामिति ॥** वार्तिकमिदम्। त्रि उप आभ्यां परो यश्चतुर्शब्दस्तस्मादजिष्यते। **त्रिचतुरा इति ॥** त्रयो वा चतुरो वेति विग्रहः। 'सङ्ख्ययाव्ययासन्न' इति बहुव्रीहिः। 'बहुव्रीहौ सङ्ख्येये डच्' इति डचं बाधित्वाऽच्। डचि तु टिलोपस्स्यात्। **उपचतुरा इति ॥** त्रयः पञ्च वेत्यर्थः। 'सङ्ख्ययाव्यय' इति बहुव्रीहिः। अच्। **तत एकादश द्वन्द्वा इति ॥** द्वन्द्वा एवेत्यर्थः। इदमपि भाष्यवाक्यम्। **स्त्रीपुंसाविति ॥** स्त्री च पुमांश्चेति विग्रहः। अच्। स्त्रीपुमांसाविति न भवति। **धेन्वनड्डुहाविति ॥** धेनुश्च अनड्वांश्चेति विग्रहः। अच्। धेन्वनड्डुहाविति न भवति। समाहारद्वन्द्वे तु 'द्वन्द्वाच्चुदषहान्तात्' इत्येव सिद्धम्। **ऋक्सामे इति ॥** ऋक्च साम चेति विग्रहः। अच्, टिलोपः। ऋक्सामनी इति न भवति। **वाङ्मनसे इति ॥** वाक् च मनश्चेति विग्रहः। अच्, वाङ्मनसी इति न भवति। **अक्षिभ्रुवमिति ॥** अच्, प्राण्यङ्गत्वादेकवत्त्वम्। अक्षिभ्रु इति न भवति। **दारगवमिति ॥** समाहारद्वन्द्वादच्। दारगु इति न भवति। इतरेतरयोगद्वन्द्वे तु दारगवः। **ऊर्वष्ठीवमिति ॥** प्राण्यङ्गत्वादेकवत्त्वम्। ऊरू सक्थिनी। अष्ठीवन्तौ जानुनी। "सक्थि क्लीबे पुमानूरुः" इति। "जानूरुपर्वाष्ठीवदस्त्रियाम्" इति चामरः। नन्वडित्त्वादनान्तत्वाच्च कथं टिलोप इत्यत आह। **निपातनाट्टिलोपः इति ॥ पदष्ठीवमिति ॥** पादौ चाष्ठीवन्तौ चेति द्वन्द्वादच्।

नक्तं च दिवा च नक्तन्दिवम् । रात्रौ च दिवा च रात्रिन्दिवम् । रात्रेर्मान्तत्वं निपात्यते । अहनि च दिवा चाहर्दिवम् । वीप्सायां द्वन्द्वो निपात्यते । अहन्यहनीत्यर्थः । सरजसमिति साकल्येऽव्ययीभावः । बहुव्रीहौ तु सरजः पङ्कजम् । निश्चितं श्रेयो निःश्रेयसम् । तत्पुरुष एव । नेह । निःश्रेयान्पुरुषः । पुरुषस्यायुः पुरुषायुषम् । ततो द्विगुः । द्यायुषम् । त्र्यायुषम् । ततो द्वन्द्वः । ऋग्यजुषम् । ततस्त्रयः कर्मधारयाः । जातोक्षः । महोक्षः । वृद्धोक्षः । शुनः समीपमुपशुनम् । टिलोपाभावः सम्प्रसारणं च निपात्यते । गोष्ठे श्वा गोष्ठश्वः ।

प्राण्यङ्गत्वादेकवत्त्वम् । नन्वभत्वात् कथमिह पादशब्दस्य पद्भावः इत्यत आह । **निपातनादिति** ॥ नक्तमिति मान्तमव्ययम् । दिवेत्याकारान्तमव्ययम् । नक्तंदिवेति द्वन्द्वादच् । 'यस्येति च' इत्याकारलोपः, 'अव्ययीभावश्च' इत्यव्ययत्वम्, नपुंसकत्वं च । 'नाव्ययीभावात्' इत्यम्भावः । **मान्तत्वमिति** ॥ रात्रौ च दिवा चेति द्वन्द्वे कृते सुब्लुकि कृते रात्रेर्मान्तत्वं निपात्यत इत्यर्थः । 'यस्येति च' इति लोपः । अम्भावश्च । **अहर्दिवमिति** ॥ द्वन्द्वे कृते सुब्लुकि "लुका लुप्ते प्रत्ययलक्षणं न" इत्यनेन प्रत्ययलक्षणाभावात् 'रोऽसुपि' इति रत्वम्, अच्, 'यस्येति च' इत्याकारलोपः, अम्भावश्च । नन्वहन्शब्दार्थस्य दिवाशब्दार्थस्य च एकत्वात् साहित्याभावात् कथमिह द्वन्द्वः । अहर्व्यक्तिभेदमादाय द्वन्द्वप्रसक्तावपि 'विरूपाणामपि समानार्थकानाम्' इत्येकशेषो दुर्वार इत्यत आह । **वीप्सायां द्वन्द्वो निपात्यत इति** ॥ 'नित्यवीप्सयोः' इति वीप्सायां द्विर्वचने कृते एकशेषं बाधित्वा द्वन्द्वो निपात्यते इत्यर्थः । 'अव्ययीभावे' इति भाष्ये तथावचनात् अव्ययीभावस्य ग्रहणमिति भावः । **सरजसमिति** ॥ रजोऽप्यपरित्यज्य इत्यस्वपदविग्रहः । रजः धूलिः साकल्ये सहशब्दस्य रजश्शब्देनाव्ययीभावः । 'अव्ययीभावे चाकाले' इति सहशब्दस्य सभावः । अच् । **सरजः पङ्कजमिति** ॥ रजोभिः परागैस्सहेति विग्रहे 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः । 'वोपसर्जनस्य' इति सहस्य सः । बहुव्रीहित्वात् नाच् । **निःश्रेयसमिति** ॥ कर्मधारयादच् । **तत्पुरुष एवेति** ॥ तथा भाष्यादिति भावः । **निःश्रेयानिति** ॥ निश्चितं श्रेयो यस्येति बहुव्रीहित्वान्नाच् इति भावः । 'ईयसश्च' इति निषेधान्न कप् । **पुरुषायुषमिति** ॥ षष्ठीसमासात् अजिति भाष्यम् । **ततो द्विगुरिति** ॥ भाष्यवाक्यमिदम् । **द्यायुषम्, त्र्यायुषमिति** ॥ द्वयोरायुषोस्समाहार इति त्रयाणामायुषां समाहार इति च विग्रहः । 'तद्धितार्थे' इति द्विगोरच् । **ततो द्वन्द्व इति** ॥ भाष्यवाक्यमिदम् । **ऋग्यजुषमिति** ॥ ऋचश्च यजूंषि चेति समाहारद्वन्द्वः । **ततस्त्रयः कर्मधारया इति** ॥ तथा भाष्यादिति भावः । **जातोक्ष इति** ॥ जातश्चासावुक्षा चेति विग्रहः । अचि सत्युक्षन्शब्दे टिलोपः । **महोक्ष इति** ॥ महांश्चासावुक्षा चेति विग्रहः । 'आन्महतः' इत्यात्त्वम् । अचि टिलोपः । **वृद्धोक्ष इति** ॥ वृद्धश्चासावुक्षा चेति विग्रहः । अचि टिलोपः । **उपशुनमिति** ॥ 'अव्ययीभावादच्' इति

९४६। ब्रह्महस्तिभ्यां वर्चसः। (५-४-७८)

अच्स्यात्। ब्रह्मवर्चसम्। हस्तिवर्चसम्। 'पल्यराजभ्यां चेति वक्तव्यम्' (वा ३३५२)। पल्यवर्चसम्। राजवर्चसम्।

९४७। अवसमन्धेभ्यस्तमसः। (५-४-७९)

अवतमसम्। सन्तमसम्। अन्धयतीत्यन्धम्। पचाद्यच्। अन्धं तमोऽन्धतमसम्।

९४८। श्वसो वसीयःश्रेयसः। (५-४-८०)

वसुशब्दः प्रशस्तवाची। तत ईयसुनि वसीयः। श्वस्शब्दः उत्तरपदार्थप्रशंसामाशीर्विषयमाह। मयूरव्यंसकादित्वात्समासः। श्वोवसीयसम्। श्वःश्रेयसं ते भूयात्।

भाष्यात्। नन्वत्र 'नस्तद्धिते' इति टिलोपः कुतो न स्यात्। 'अतद्धिते' इति पर्युदासात्। 'श्वयुवमघोनामतद्धिते' इति कथं वा सम्प्रसारणं स्यादित्यत आह। **टिलोपाभावस्सम्प्रसारणञ्च निपात्यत इति ॥ गोष्ठश्व इति ॥** सप्तमीसमासादजिति भाष्यम्। अतएव भाष्यात् सप्तमीसमासः। टिलोपः। 'अतद्धिते' इति निषेधान्न सम्प्रसारणम्, षष्ठीतत्पुरुषे तु गोष्ठश्वा। **ब्रह्म ॥** शेषपूरणेन सूत्रं व्याचष्टे। **अच्स्यादिति ॥ ब्रह्मवर्चसमिति ॥** ब्रह्मणो वर्चः इति विग्रहः। **हस्तिवर्चसमिति ॥** हस्तिनो वर्च इति विग्रहः। **पल्यराजभ्यामिति ॥** आभ्यां परो यो वर्चश्शब्दः तस्मादपि अजिति वक्तव्यमित्यर्थः। **पल्यवर्चसमिति ॥** पलं मांसं तदर्हति पल्यः, मांसभोजीत्यर्थः। तस्य वर्च इति विग्रहः। **राजवर्चसमिति ॥** राज्ञो वर्च इति विग्रहः। **अवसमन्धेभ्यस्तमसः ॥** अव सम् अन्ध एभ्यः परो यस्तमश्शब्दस्तस्मादच्स्यादित्यर्थः। **अवतमसमिति ॥** अवहीनन्तम इति विग्रहः। प्रादिसमासः। **सन्तमसमिति ॥** सन्ततं तमः इति विग्रहः। प्रादिसमासः। **अन्धयतीत्यन्धमिति ॥** 'अन्ध दृष्टयुपघाते' चुरादिः, दृष्टिं प्रतिबध्नातीत्यर्थः। **पचाद्यजिति ॥** 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इति पचादित्वप्रयुक्तोऽच्प्रत्यय इत्यर्थः। अचि णिलोपेऽन्धमिति रूपमित्यर्थः फलति। गाढस्यैव तमसः दर्शनप्रतिबन्धकत्वात्। **अन्धतमसमिति ॥** कर्मधारयादच्। **श्वसः ॥** श्वस् इत्यव्ययात् परो यो वसीयश्शब्दः श्रेयश्शब्दश्च तस्मादच् स्यादित्यर्थः। **वसुशब्दः प्रशस्तवाचीति ॥** "यं कामयेत वसीयान् स्यात्" इत्यादौ तथा दर्शनादिति भावः। **तत इति ॥** अतिशयेन वसुरिति विग्रहे 'द्विवचनविभज्योपपदे' इतीयसुनि, 'तुरिष्ठेमेयस्सु' इत्यनुवृत्तौ टेरिति टिलोपे वसीयश्शब्द इत्यर्थः। **श्वस्शब्द इति ॥** यद्यपि श्वस्शब्दः कालविशेषवाची। तथापि प्रकृते शब्दशक्तिस्वभावादुत्तरपदार्थभूतां प्रशंसाम् आशीर्विषयं द्योतयतीत्यर्थः। आशिषो विषयः, आशीर्विषयः। तमिति

९४९ । अन्ववतप्ताद्रहसः । (५-४-८१)

अनुरहसम् । अवरहसम् । तप्तरहसम् ।

९५० । प्रतेरुरसः सप्तमीस्थात् । (५-४-८२)

उरसि प्रति प्रत्युरसम् । विभक्त्यर्थेऽव्ययीभावः ।

९५१ । अनुगवमायामे । (५-४-८३)

एतन्निपात्यते दीर्घत्वे । अनुगवं यानम् । 'यस्य चायामः' (सू ६७०) इति समासः ।

९५२ । द्विस्तावा त्रिस्तावा वेदिः । (५-४-८४)

अच्प्रत्ययष्टिलोपः समासश्च निपात्यते । यावती प्रकृतौ वेदिस्ततो

षष्ठीसमासः । प्रशंसाविशेषणम् । विषयशब्दस्य नित्यपुल्लिङ्गत्वात् न स्त्रीलिङ्गता । एवञ्च श्वस्-शब्दः उत्तरपदार्थभूतप्राशस्त्यस्य द्योतकः इति फलितोऽर्थः । ननु तर्हि श्वस्शब्दस्योत्तरपदार्थ-गतप्राशस्त्यद्योतकत्वेऽप्युत्तरपदसामानाधिकरण्याभावात् कथं विशेषणसमास इत्यत आह । **मयूरेति** ॥ तथाचाशीर्लिङादिप्रयोगे एव अस्य साधुत्वमित्यभिप्रेत्योदाहरति । **श्वोवसीयसमिति** ॥ अतिशयेन प्रशस्तमित्यर्थः । **श्वश्रेयसमिति** ॥ अतिशयेन प्रशस्तमिति विग्रहे प्रशस्तशब्दादीयसुन् । प्रशस्यस्य श्रः । 'प्रकृत्यैकाच्' इति प्रकृतिभावान्न टिलोपः । आद्गुणः । श्रेयस् इति रूपम् । श्वस्शब्दस्तु उत्तरपदार्थगतप्रशंसाद्योतकः । "श्वश्रेयसं शिवं भद्रम्" इत्यमरः । ते भूयादिति तु उभयत्रापि सम्बध्यते । श्वोवसीयसं ते भूयात् । श्वश्रेयसं ते भूयादिति । **अन्ववतप्ताद्रहसः** ॥ अनु अव तप्त एतेषां समाहारद्वन्द्वः । एभ्यः परो यो रहश्शब्दः तस्मादच्स्यादित्यर्थः । रहः अप्रकाशप्रदेशः । **अनुरहसमिति** ॥ अनुगतं रह इति विग्रहः । **अवरहसमिति** ॥ अवहीनं रह इति विग्रहः । उभयत्र प्रादिसमासः । **तप्तरहसमिति** ॥ तप्तं रह इति विग्रहः । **प्रतेरुरसः** ॥ सप्तम्यर्थे द्योतकतया वर्तत इति सप्तमीस्थम् । सप्तम्यर्थद्योतकात् प्रतेः परो यः उरश्शब्दः तस्मादच् स्यादित्यर्थः । उरसि इत्यनेन यदुच्यते तदेव प्रत्युरसमित्यनेनोच्यते इत्यर्थः । सप्तम्यर्थद्योतकः प्रतिः । तस्य विभक्त्यर्थे विद्यमानस्य 'अव्ययं विभक्ति' इत्यादिनाऽव्ययीभाव इत्यर्थः । **अनुगवमायामे**॥ **एतदिति** ॥ अनुगवमित्येतदित्यर्थः । अनुना दीर्घत्वे द्योत्येऽच्प्रत्ययान्तो निपात्यते इत्यर्थः । आयामशब्दो दीर्घपर इति भावः । **अनुगवं यानमिति** ॥ अनुगोशब्दादचि अवादेश इति भावः । **यस्य चेति** ॥ 'यस्य चायामः' इत्यव्ययीभावसमासः । तथा च गोदैर्घ्य-सदृशदैर्घ्यकं यानमित्यर्थः फलतीति भावः । **द्विस्तावा** ॥ **यावती प्रकृताविति** ॥ यतः अङ्गकलापस्यातिदेशः सा प्रकृतिः । अश्वमेधस्य प्रकृतिरग्निष्टोमः । तत्राग्नाताङ्गकलापा-नामश्वमेधेऽतिदेशात् । तदुक्तं कल्पसूत्रेषु "सर्वसोमक्रतूनामग्निष्टोमः प्रकृतिः" इति । तस्मिन्

द्विगुणा त्रिगुणा वा अश्वमेधादौ तत्रेदं निपातनम्। 'वेदिः' इति किम्। द्विस्तावती त्रिस्तावती रज्जुः।

९५३। उपसर्गादध्वनः। (५-४-८५)

प्रगतोऽध्वानं प्राध्वो रथः।

९५४। न पूजनात्। (५-४-६९)

पूजनार्थात्परेभ्यः समासान्ता न स्युः। सुराजा। अतिराजा। 'स्वतिभ्यामेव' (वा ३३४६)। नेह। परमराजः। 'पूजनात्' किम्। गामतिक्रान्तोऽतिगवः। 'बहुव्रीहौ सक्थ्यक्ष्णोः—' (सू ८५२) इत्यतः प्रागेवायं निषेधः। नेह। सुसक्थः। स्वक्षः।

अग्निष्टोमे वेदिपरिमाणं श्रुतम्। तत्र च "त्रिंशत्पदानि प्रक्रमा वा पञ्चात्तिरश्ची षट्त्रिंशत् प्राची चतुर्विंशतिः पुरस्तात्तिरश्ची" इति प्रकृतौ वेदिपरिमाणमुक्तम्। अस्यां तु वेद्यां ततो द्विगुणितं त्रिगुणितं च क्षेत्रपरिमाणमुक्तम्। तच्च कल्पसूत्रेषु "अष्टाविंशत्यूनं पदसहस्रं महावेदिः" इति। पदग्रहणमत्र प्रक्रमस्याप्युपलक्षणम्। तथाच प्रकृतौ अग्निष्टोमे यावती वेदिः तदपेक्षया द्विगुणा त्रिगुणा वा अश्वमेधादौ वेदिरस्ति। तत्र आश्वमेधिकवेद्यामभिधेयायां द्विस्तावेति त्रिस्तावेति च भवतीत्यर्थः। 'सङ्ख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' इति 'द्वित्रिचतुर्भ्यस्सुच्' इति द्विशब्दात् क्रियाभ्यावृत्तौ सुचि कृते द्विरिति त्रिरिति च रूपम्। तत् प्राकृतं परिमाणम् अस्या अस्तीति तावती। प्राकृतपरिमाणेति यावत्। द्विरिति तच्छब्दार्थे प्रकृतिपरिमाणेऽन्वेति। द्विः तावतीति विग्रहः। द्विरावृत्तं प्राकृतं यत् परिमाणं तद्वत्याश्वमेधिकी वेदिरित्यर्थः। अत एव निपातनात् समासः, अच्प्रत्ययः। तावतीशब्दस्य 'भस्याढे' इति पुंवत्त्वे ङीपो निवृत्तौ प्रत्ययस्याडित्त्वेऽपि प्रकृतेर्नान्तत्वाभावेऽपि टिलोपः। **द्विस्तावती त्रिस्तावती रज्जुरिति** ॥ अत्र वेद्यामप्रवृत्तेः अच्प्रत्ययटिलोपसमासा न भवन्तीत्यर्थः। तथाच प्रत्युदाहरणे द्विरिति भिन्नं पदम्। **उपसर्गादध्वनः** ॥ उपसर्गात् परो योऽध्वन्शब्दः तस्मादच् स्यादित्यर्थः। **प्राध्वो रथ इति** ॥ 'निरादयः' इति समासादच्। 'नस्तद्धिते' इति टिलोपः। **न पूजनात्** ॥ परेभ्य इत्यध्याहार्यम्। समासान्ता इति पूर्वसूत्रमनुवर्तते। तदाह। **पूजनार्थादिति** ॥ 'पूजनायां स्वतिग्रहणं कर्तव्यम्' इति वार्तिकमभिप्रेत्योदाहरति। **सुराजेति** ॥ सु शोभनो राजेति प्रादिसमासः। **अतिराजेति** ॥ पूज्यो राजेत्यर्थः। उभयत्रापि 'राजाहस्सखिभ्यः' इति टच् न भवति। **स्वतिभ्यामेवेति** ॥ स्वतिभ्यां परो यो राजन्शब्दः तस्मादेवेत्यर्थः। तथा वार्तिकादिति भावः। **नेहेति** ॥ निषेध इति शेषः। **परमराज इति** ॥ परमश्चासौ राजा चेति विग्रहः। **अतिगव इति** ॥ 'अत्यादयः' इति समासः। अतेः पूजनार्थकत्वाभावात् ततः परस्माद्राजन्शब्दात् न टचो निषेधः। **इत्यतः प्रागिति** ॥ 'प्राग्बहुव्रीहिग्रहणं

९५५ । किमः क्षेपे । (५-४-७०)

क्षेपे यः किंशब्दस्ततः परं यत्तदन्तात्समासान्ता न स्युः । कुत्सितो राजा किंराजा । किंसखा । किंगौः । 'क्षेपे' किम् । किंराजः, किंसखः । किंगवः ।

९५६ । नञस्तत्पुरुषात् । (५-४-७१)

समासान्तो न । अराजा । असखा । 'तत्पुरुषात्' किम् । अधुरं शकटम् ।

९५७ । पथो विभाषा । (५-४-७२)

नञ्पूर्वात्पथो वा समासान्तः । अपथम्—अपन्थाः । 'तत्पुरुषात्' इत्येव । अपथो देशः । अपथं वर्तते ।

इति सर्वसमासान्तप्रकरणम् ।

कर्तव्यम्' इति वार्तिकार्थसङ्ग्रहोऽयम् । **सुसक्थः, स्वक्ष इति** ॥ सु शोभने सक्थिनी यस्य, शोभने अक्षिणी यस्येति च विग्रहः । 'बहुव्रीहौ सक्थ्यक्ष्णोः' इति षच् । **किमः क्षेपे** ॥ **किंराजा । किंसखेति** ॥ इह 'राजाहस्सखिभ्यः' इति टच् न भवति । किमः क्षेपे' इति समासः । **किंराजः । किंसखः इति** ॥ किंशब्दोऽत्र प्रश्ने । कस्य राजा किं राजेति वा विग्रहः । निन्दानवगमात् न टचो निषेधः । **नञस्तत्पुरुषात्** ॥ शेषपूरणेन सूत्रं व्याचष्टे । **समासान्तो नेति** ॥ नञ्पूर्वपदात्तत्पुरुषात् समासान्तो नेति फलितम् । **अधुरं शकटमिति** ॥ अविद्यमाना धूर्यस्येति विग्रहः । नञ्पूर्वपदत्वेऽप्यतत्पुरुषत्वात् 'ऋक्पूः' इति समासान्तस्य न निषेधः । **पथो विभाषा** ॥ **पथ इति** ॥ पथिन्शब्दादित्यर्थः । **अपथमिति** ॥ न पन्था इति विग्रहे नञ्तत्पुरुषः । 'ऋक्पूः' इत्यप्रत्यये सति 'नस्तद्धिते' इति टिलोपः । 'पथस्सङ्ख्याव्ययादेः' इति नपुंसकत्वम् । **अपन्था इति** ॥ अप्रत्ययाभावे रूपम् । **तत्पुरुषादित्येवेति** ॥ अनुवर्तत एवेत्यर्थः । **अपथो देश इति** ॥ अविद्यमानः पन्था यस्येति विग्रहः । बहुव्रीहित्वात् 'ऋक्पूः' इत्यप्रत्ययस्य पाक्षिको न निषेधः । **अपथं वर्तते इति** ॥ अर्थाभावेऽव्ययीभावः । अतत्पुरुषत्वात् 'ऋक्पूः' इत्यप्रत्ययस्य न पाक्षिको निषेधः ॥

इति श्रीमद्वासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायां सर्वसमासान्तप्रकरणं समाप्तम् ।

श्रीरस्तु ।

॥ अथालुक्समासप्रकरणम् ॥

९५८ । अलुगुत्तरपदे । (६-३-१)

अलुगधिकारः प्रागानङः, उत्तरपदाधिकारस्त्वापादसमाप्तेः ।

९५९ । पञ्चम्याः स्तोकादिभ्यः । (६-३-२)

एभ्यः पञ्चम्या अलुक्स्यादुत्तरपदे । स्तोकान्मुक्तः । एवमन्तिकार्थदूरार्थकृच्छ्रेभ्यः । 'उत्तरपदे' किम् । निष्क्रान्तः स्तोकान्निस्स्तोकः । 'ब्राह्मणाच्छंसिन उपसंख्यानम्' (वा ३८७८) । ब्राह्मणे विहितानि शस्त्राण्युपचारा-

---

अथालुक्समासो निरूप्यते—**अलुगुत्तरपदे** ॥ नायं विधिः । राजपुरुषः इत्यादावतिप्रसङ्गात्, 'पञ्चम्याः स्तोकादिभ्यः' इत्याद्यारम्भाच्च । किन्तु पदद्वयमधिक्रियते । अस्य कियत्पर्यन्तमित्यनुवृत्तिः इत्यत आह । **अलुगधिकारः प्रागानङ इति** ॥ 'आनङृतः' इत्यतः प्रागित्यर्थः । **उत्तरपदेति** ॥ षष्ठस्य तृतीये पादे आद्यमिदं सूत्रम् । इत उत्तरमेतत्पादपरिसमाप्तिपर्यन्तमुत्तरपदाधिकार इत्यर्थः । अत्रोत्तरपदाधिकारनियमे भाष्यमेव प्रमाणम् । **पञ्चम्याः स्तोकादिभ्य॰ ॥ एभ्य इति** ॥ स्तोकादिभ्यः परा या पञ्चमी तस्याः 'सुपो धातु' इति लुङ् न स्यादित्यर्थः । **उत्तरपदे इति** ॥ उत्तरपदशब्दः समासचरमावयवे रूढः । पदे इत्येव सिद्धे उत्तरग्रहणात् । **स्तोकान्मुक्त इति** ॥ एवमल्पान्मुक्तः । 'स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन' इति समासः । अत्र पञ्चम्या अलुक् । **एवमिति** ॥ आदिपदेन समासविधौ गृहीतानामन्तिकादीनां ग्रहणादिति भावः । अन्तिकादागतः, अभ्याशादागतः, दूरादागतः, विप्रकृष्टादागतः, कृच्छ्रादागतः । **निस्स्तोक इति** ॥ 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' इति समासः । अत्र स्तोकशब्दस्य उत्तरपदपरकत्वाभावात् पञ्चम्या अलुक् न स्यात् । स्तोकान्मुक्तः इत्यादौ समासप्रयोजनन्तु समासस्वरः, सर्वस्मात् स्तोकान्मुक्त इति विशेषणयोगाभावश्च । किञ्च स्तोकान्मुक्तस्यापत्यं स्तौकान्मुक्तिरित्यादौ समुदायात्तद्धितोत्पत्तिश्च । स्तोकान्मुक्तौ, स्तोकान्मुक्ताः इति द्विबहुवचनान्तैः न समासः । अनभिधानात्, इति भाष्ये स्पष्टम् । **ब्राह्मणाच्छंसिन उपसङ्ख्यानमिति** ॥ पञ्चम्या अलुगिति शेषः । ननु ब्राह्मणानि शंसतीत्यर्थे कथं पञ्चमी । विधायकवाक्यानि ब्राह्मणशब्देनोच्यन्ते । "कर्मचोदना ब्राह्मणानि" इति कल्पसूत्रात् । "शेषे ब्राह्मणशब्दः" इति मन्त्रभिन्नवेदभागे ब्राह्मणशब्दस्य जैमिनिना सङ्केतितत्वाच्च । एतादृशब्राह्मणभागस्य न क्वापि शंसनं विहितम् । "ऋचश्शंसति निविदश्शंसति" इति श्रुतिष्विव्यत आह । **ब्राह्मणे इति** ॥ **शस्त्राणीति** ॥ ऋचां निविदाञ्च

ब्राह्मणानि, तानि शंसतीति ब्राह्मणाच्छंसी ऋत्विग्विशेषः। द्वितीयार्थे पञ्चम्युपसंख्यानादेव।

९६०। ओजःसहोऽम्भस्तमसस्तृतीयायाः। (६-३-३)

ओजसाकृतमित्यादि। 'अञ्जस उपसंख्यानम्' (वा ३८८०)। अञ्जसाकृतम्। आर्जवेन कृतमित्यर्थः। 'पुंसानुजो जनुषान्ध इति च' (वा ३८८१)। यस्याग्रजः पुमान्स पुंसानुजः। जनुषान्धो जात्यन्धः।

९६१। मनसः संज्ञायाम्। (६-३-४)

मनसागुप्ता।

९६२। आज्ञायिनि च। (६-३-५)

'मनसः' इत्येव। मनसा ज्ञातुं शीलमस्य मनसाज्ञायी।

९६३। आत्मनश्च। (६-३-६)

सङ्ग्रहश्लोकम्। **उपचारादिति** ॥ लक्षणयेत्यर्थः। **द्वितीयार्थे इति** ॥ पञ्चम्या अलुक्। उपसङ्ख्यानबलादेव द्वितीयार्थे पञ्चमीत्यर्थः। **ओजस्** ॥ ओजस्, सहस्, अम्भस्, तमस्, एषां समाहारद्वन्द्वः। एभ्यः परस्यास्तृतीयाया अलुक् स्यादुत्तरपदे इत्यर्थः। **ओजसाकृतमिति** ॥ 'कर्तृकरणे कृता बहुलम्' इति समासः। "ओजो दीप्तौ बले" इत्यमरः। **इत्यादीति** ॥ सहसाकृतम्, अम्भसाकृतम्। तमसा विकृतं तमोविकृतमिति तु असाध्वेव। शेषषष्ठ्या वा समासः। **अञ्जस उपसङ्ख्यानमिति** ॥ अञ्जशब्दात् तृतीयाया अलुगुपसङ्ख्यानमित्यर्थः। **अञ्जसाकृतमिति** ॥ अञ्जशब्दः आर्जवे वर्तते। यथा क्षेत्रज्ञोऽञ्जसा नयतीत्यादौ तथा दर्शनात्। तदाह। **आर्जवेनेति** ॥ **पुंसानुजः** ॥ तृतीयाया अलुकि साधुरिति शेषः। **यस्येति** ॥ यस्य पुमान् पूर्वजः स पुंसा हेतुना अनुजः कनीयान् इत्यर्थः। **जनुषेति** ॥ "जनुर्जननजन्मानि" इत्यमरः। जनुषा जन्मना हेतुना अन्ध इत्यर्थः। फलितमाह। **जात्यन्ध इति** ॥ ब्राह्मण्यादिजातितुल्यान्ध्यवानित्यर्थः। उत्पत्तिप्रभृत्यन्ध इति यावत्। **मनसस्संज्ञायाम्** ॥ मनसस्तृतीयाया अलुक् स्यादुत्तरपदे इत्यर्थः। **मनसागुप्तेति** ॥ कस्याश्चित् संज्ञेयम्। असंज्ञायान्तु मनोगुप्ता। **आज्ञायिनि च** ॥ **मनसः इत्येवेति** ॥ अनुवर्तत एवेत्यर्थः। मनसस्तृतीयाया अलुक् स्यात् आज्ञायिनि परे इत्यर्थः। असंज्ञार्थमिदम्। **ज्ञातुमिति** ॥ प्रेरयितुमित्यर्थः। **मनसाज्ञायीति** ॥ 'सुप्यजातौ' इति णिनिः। 'आतो युक्चिण्कृतोः' इति युक्। अत्र सूत्रभाष्ये 'आत्मनश्च पूरणे उपसङ्ख्यानम्' इति वार्तिकं पठितम्। तत्रात्मनश्चेत्यंशं व्याख्यातुं पृथगुपादत्ते। **आत्मनश्चेति** ॥ चकारात्तृतीयाया

आत्मनस्तृतीयाया अलुक्स्यात्। 'पूरण इति वक्तव्यम्' (वा ३८८२)। पूरणप्रत्ययान्ते उत्तरपदे इत्यर्थः। आत्मनापञ्चमः। 'जनार्दनस्त्वात्मचतुर्थ एव' इति बहुव्रीहिर्बोध्यः। 'पूरणे' किम्। आत्मकृतम्।

९६४। वैयाकरणाख्यायां चतुर्थ्याः। (६-३-७)

'आत्मनः' इत्येव। आत्मनेपदम्। आत्मनेभाषा। तादर्थ्ये चतुर्थी। 'चतुर्थी' इति योगविभागात्समासः।

९६५। परस्य च (६-३-८)

परस्मैपदम्। परस्मैभाषा।

अलुगिति चानुकृष्यते इत्याह। **आत्मनस्तृतीयाया अलुगिति॥** उत्तरपदे परे इति शेषः। **पूरण इति वक्तव्यमिति॥** नात्र पूरणशब्दो गृह्यते। किन्तु स्वरितत्वबलेन पूरणाधिकारविहितप्रत्ययग्रहणात् 'प्रत्ययग्रहणे' इति तदन्तविधिरित्यभिप्रेत्य आह। **पूरणप्रत्ययान्ते इति॥ आत्मनापञ्चम इति॥** आत्मा पञ्चम इत्यर्थः। प्रकृत्यादित्वात् प्रथमार्थे तृतीया। यद्वा आत्मकृतपञ्चमत्ववानित्यर्थः। करणे तृतीया। करोतिक्रियान्तर्भावेन तस्याः 'तृतीया तत्कृता' इति समासः। पक्षद्वयमपीदं भाष्ये स्थितम्। ननु सङ्कर्षणप्रद्युम्ननिरुद्धास्त्रयो विष्णुव्यूहाः। जनार्दनस्तु एषां नियन्तेति विष्णुपुराणादौ स्थितम्। तत्रेदमाहुः पौराणिकाः। **जनार्दनस्त्वात्मचतुर्थ एवेति॥** तत्र तृतीयाया अलुकि आत्मनाचतुर्थ इति भवितव्यमित्यत आह। **जनार्दनस्त्विति॥ बहुव्रीहिरिति॥** आत्मा चतुर्थो यस्येति विग्रहे बहुव्रीहिरित्यर्थः। एकस्याप्यौपाधिकभेदं परिकल्प्य वृत्तिपदार्थत्वमन्यपदार्थत्वञ्च विवक्षणीयमिति भावः। तदिदं भाष्ये स्पष्टम्। **वैयाकरणाख्यायाम्॥ आत्मन इत्येवेति॥** अनुवर्तत एवेत्यर्थः। न च 'आत्मनश्च' इत्यस्य वार्तिकत्वे कथमिह सूत्रे एतदनुवृत्तिरिति वाच्यम्। 'सोपदादौ' इति सूत्रे पठितस्य 'काम्ये रोरेवेति वाच्यम्' इति वार्तिकस्य 'इणषः' इतिसूत्रेऽनुवृत्तिवदुपपत्तेः। व्याकरणे भवा वैयाकरणी सा चासावाख्या च वैयाकरणाख्या तस्यां या चतुर्थी तस्या अलुगित्यर्थः। **आत्मनेभाषेति॥** पूर्वाचार्यकृतमिदमात्मनेपदस्य संज्ञान्तरमिदं धातुपाठे प्रसिद्धम्। **तादर्थ्ये चतुर्थीति॥** तथाचात्मने इत्यस्यात्मार्थमित्यर्थः। आत्मगामिनि फले प्रायेण तद्विधानादिति भावः। ननु प्रकृतिविकाराभावात् कथमिह तादर्थ्ये चतुर्थीसमास इत्यत आह। **चतुर्थीति योगविभागादिति॥** पस्पशाह्निकभाष्ये धर्माय नियमो धर्मनियम इति भाष्यमिह लिङ्गम्। **परस्य च॥** वैयाकरणाख्यायां परशब्दस्यापि चतुर्थ्या

---

१. दीक्षितेन 'आत्मनश्च पूरणे' (वा ३८८२) इति वार्तिकतः 'आत्मनश्च' इत्यंश पृथक्कृत्य 'वैयाकरणाख्यायाम्—' इति सूत्रेऽनुवृत्त्यर्थं सूत्रत्वमङ्गीकृतम्। परं तु 'काम्ये रोरेव' इति वार्तिकस्य 'सोऽपदादौ' इति सूत्रस्थस्येव 'इणः षः' इति सूत्रेऽप्यनुवृत्तिवदत्राप्यनुवृत्तौ दोषाभावेन वार्तिकत्वत्यागे सूत्रत्वाङ्गीकारे बीजाभावः।

९६६ । हलदन्तात्सप्तम्याः संज्ञायाम् । (६-३-९)

हलन्तादुदन्ताच्च सप्तम्या अलुक्संज्ञायाम् । त्वचिसारः ।

९६७ । गवियुधिभ्यां स्थिरः । (८-३-९५)

आभ्यां स्थिरस्य सस्य षः स्यात् । गविष्ठिरः । अत्र गवीति वचनादेवालुक् । युधिष्ठिरः । अरण्येतिलकः । अत्र 'संज्ञायाम्' (सू ७२१) इति सप्तमीसमासः । 'हृद्युभ्यां च' (वा ३८८५) । हृदिस्पृक् । दिविस्पृक् ।

९६८ । कारनाम्नि च प्राचां हलादौ । (६-३-१०)

प्राचां देशे यत्कारनाम तत्र हलादावुत्तरपदे हलदन्तात्सप्तम्या अलुक् । मुकुटेकार्षापणम् । द्रुषदिमाषकः । पूर्वेण सिद्धे नियमार्थम् । कारनाम्न्येव प्राचामेव हलादावेवेति । 'कारनाम्नि' किम् । अभ्याहितपशुः । कारादन्यस्यैतद्देशस्य नाम । 'प्राचाम्' किम् । यूथपशुः । 'हलादौ' किम् । अविकटोरणः । 'हलदन्तात्' किम् । नद्यां दोहो नदीदोहः ।

अलुगित्यर्थः । **हलदन्तात्** ॥ **त्वचिसार इति** ॥ अत एव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः । "वंशे त्वक्सारकर्मारत्वचिसारतृणध्वजाः" इत्यमरः । अथ हलन्तस्योदाहरणान्तरं वक्ष्यति । युधिष्ठिर इत्यत्र 'अजिरशिशिरस्थिर' इत्युणादिसूत्रेण स्थाधातोः किरचि स्थिरशब्दो व्युत्पादितः । तत्र 'आदेशप्रत्यययोः' इति षत्वस्य 'सात्पदाद्योः' इति निषेधे प्राप्ते इदमारभ्यते । **गवियुधिभ्यां स्थिरः** ॥ गवीति युधीति च सप्तम्या अनुकरणम् । स्थिर इति प्रथमा षष्ठ्यर्थे । 'सहेस्साडस्सः' इत्यस्मात् स इति षष्ठ्यन्तमनुवर्तते । 'अपदान्तस्य मूर्धन्यः' इत्यधिकृतम् । तदाह । **आभ्यामिति** ॥ ननु "अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते" इति परिभाषया अवादेशात् पूर्वमेव ङेर्लुकि प्रवृत्ते हलन्तत्वाभावात् कथमिहालुगित्यत आह । **अत्र गवीति ॥ युधिष्ठिर इति** ॥ युध्धातोर्भावे क्विपि युध्शब्दात् सप्तम्येकवचनम् । हलन्तत्वादलुक्, षत्वं च । पाण्डवस्य धर्मपुत्रस्य नामेदम् । तदेवं हलन्तादलुकं प्रपञ्च्य अदन्तादलुकमुदाहरति । **अरण्येतिलक इति** ॥ ननु तिलकशब्दस्य शौण्डादिगणेऽभावात् कथं तेन सप्तमीसमास इत्यत आह । **अत्र संज्ञायामिति ॥ हृद्युभ्यां चेति** ॥ हृच्छब्दात् दिव्शब्दाच्च सप्तम्या अलुग्वक्तव्यमित्यर्थः । असंज्ञार्थमिदम् । **हृदिस्पृगिति** ॥ 'पद्दन्' इति ङौ हृदयस्य हृदादेशः । हृदयं स्पृशतीत्यर्थः । **दिविस्पृगिति** ॥ दिवं स्पृशतीत्यर्थः । इहोभयत्रापि सप्तम्या अलुग्विधानबलादेव कर्मणि सप्तमीति भाष्यम् । 'अमूर्धमस्तकात्' इत्यनेन त्वलुक् न सिध्यति । तत्र संज्ञायामित्यनुवृत्तेः । **कारनाम्नि** ॥ **यत् कारनामेति** ॥ राजग्राह्यो भागः करः, स एव कारः, तद्विशेषवाचक इत्यर्थः । प्राचां देशनाम्नि चेत् कारनाम्न्येवेति नियमार्थमित्यर्थः । **अविकटोरण इति** ॥ अविशब्दात् सङ्घाते कटच् ।

९६९। मध्याद्गुरौ। (६-३-११)

मध्येगुरुः। 'अन्ताच्च' (वा ३८९४)। अन्तेगुरुः।

९७०। अमूर्धमस्तकात्स्वाङ्गादकामे। (६-३-१२)

कण्ठेकालः। उरसिलोमा। 'अमूर्धमस्तकात्' किम्। मूर्धशिखः। मस्तकशिखः। 'अकामे' किम्। मुखे कामोऽस्य मुखकामः।

९७१। बन्धे च विभाषा। (६-३-१३)

हलदन्तात्सप्तम्या अलुक्। हस्तेबन्धः—हस्तबन्धः। 'हलदन्त—' इति किम्। गुप्तिबन्धः।

९७२। तत्पुरुषे कृति बहुळम्। (६-३-१४)

स्तम्बेरमः—स्तम्बरमः। कर्णेजपः—कर्णजपः। 'कचिन्न'। कुरुचरः।

९७३। प्रावृट्छरत्कालदिवां जे। (६-३-१५)

प्रावृषिजः। शरदिजः। कालेजः। दिविजः। पूर्वस्यायं प्रपञ्चः।

उरणो मेष इति। **नद्यामिति**॥ नद्युत्तारणे तात्कालिकदोहः करः। **मध्याद्गुरौ**॥ गुरुशब्दे परे मध्यशब्दात् सप्तम्या अलुक् स्यादित्यर्थः। असंज्ञार्थमिदम्। **अन्ताच्चेति**॥ सप्तम्या अलुक् स्यात् गुरौ परे इत्यर्थः। **अमूर्धमस्तकात्**॥ मूर्धमस्तकशब्दवर्जितात् स्वाङ्गवाचकात् सप्तम्या अलुक् स्यात्, नतु कामशब्दे उत्तरपदे इत्यर्थः। अत्र संज्ञायामित्यनुवर्तते। अत एव 'हृद्द्युभ्यां च' इत्यत्र हृद्ग्रहणमर्थवत्। **कण्ठेकाल इति**॥ शिवस्य नाम। **उरसिलोमेति**॥ कस्य चिन्नाम। अतएव ज्ञापकात् व्यधिकरणपदो बहुव्रीहिः। **बन्धे च विभाषा**॥ शेषपूरणेन सूत्रं व्याचष्टे। **हलदन्तादिति**॥ **हस्तेबन्ध इति**॥ संज्ञायामिति सप्तमीतत्पुरुषोऽयम्। इह तत्पुरुष इति सम्बध्यते। बन्ध इति घञन्तम्। अन्यत्र तु 'नेन्सिद्ध' इति निषेध इति स्पष्टं भाष्ये। **तत्पुरुषे कृति**॥ तत्पुरुषे सप्तम्या बहुळमलुक् स्यात् कृदन्ते उत्तरपदे संज्ञायामित्यर्थः। **स्तम्बेरम इति**॥ तृणसमूहः स्तम्बः, तस्मिन् रमत इति स्तम्बेरमः हस्ती। **कर्णेजप इति**॥ कर्णे जपति परदोषमुपांश्वाविष्करोतीति कर्णेजपः पिशुनः। 'स्तम्बकर्णयो रमिजपोः' इत्यच। उपपदसमासः। **कचिन्नेति**॥ बहुळग्रहणादिति भावः। **कुरुचर इति**॥ 'चरेष्टः' इत्यधिकरणे उपपदे चरेष्टः। उपपदसमासः। यद्यपि हलदन्तादित्यनुवृत्त्यैव सिद्धमिदम्। तथापि बहुळग्रहणादेव सिद्धे 'हलदन्तात्' इति नानुवर्तनीयमिति भावः। **प्रावृट्छरत्**॥ प्रावृट्, शरत्, काल, दिव्, एषां सप्तम्या अलुक् स्यात् जशब्दे परे संज्ञायामित्यर्थः। नतु 'हलदन्तात्' इत्येव सिद्धे किमर्थमिदमित्यत आह। **पूर्वस्यैवायं प्रपञ्च इति**॥ विस्तार

९७४ । विभाषा वर्षक्षरशरवरात् । (६-३-१६)

एभ्यः सप्तम्या अलुग्जे । वर्षेजः—वर्षजः । क्षरेजः—क्षरजः । शरेजः—शरजः । वरेजः—वरजः ।

९७५ । घकालतनेषु कालनाम्नः । (६-३-१७)

सप्तम्याः विभाषया लुक्स्यात् । घ । पूर्वाह्णेतरे—पूर्वाह्णतरे । पूर्वाह्णेतमे—पूर्वाह्णतमे । काल । पूर्वाह्णेकाले—पूर्वाह्णकाले । तन । पूर्वाह्णेतने—पूर्वाह्णतने ।

९७६ । शयवासवासिष्वकालात् । (६-३-१८)

खेशयः—खशयः । ग्रामेवासः—ग्रामवासः । ग्रामेवासी—ग्रामवासी । 'हलदन्तात्' इत्येव । भूमिशयः । 'अपो योनियन्मतुषु' (वा ३८७६)[1]। अप्सु योनिरुत्पत्तिर्यस्य सोऽप्सुयोनिः । अप्सु भवोऽप्सव्यः । अप्सुमन्तावाज्यभागौ ।

९७७ । नेन्सिद्धबन्धादिषु च । (६-३-१९)

इन्नन्तादिषु सप्तम्या अलुग्न । स्थण्डिलशायी । सांकाश्यसिद्धः । चक्रबन्धः ।

इत्यर्थः । **विभाषा वर्ष** ॥ शेषपूरणेन सूत्रं व्याचष्टे । **एभ्यस्सप्तम्या इति** ॥ **घकालतनेषु** ॥ शेषपूरणेन सूत्रं व्याचष्टे । **सप्तम्या इति** ॥ **घेति** ॥ घे परे उदाहरणसूचनमिदम् । तरप्तमपौ घः । **पूर्वाह्णेतरे इति** ॥ अतिशायने सप्तम्यन्तात् तरप्तमपौ । अतएव तत्तद्विभक्त्यन्तात् तरप्तमपाविति विज्ञायते । **कालेति** ॥ उदाहरणसूचनमिदम् । **पूर्वाह्णेकाले इति** ॥ अत एव विशेषणादिसमासोऽपि तत्तद्विभक्त्यन्तानामेव । **तेनेति** ॥ उदाहरणसूचनमिदम् । **पूर्वाह्णेतने इति** ॥ 'विभाषा पूर्वाह्णापराह्णाभ्याम्' इति ट्युटयुलौ तुट् च । **शयवास** ॥ शय वास वासिन् एतेषु परेषु कालभिन्नात् सप्तम्या अलुक् स्यादित्यर्थः । **अपो योनि** ॥ योनिशब्दे यत्प्रत्यये मतुबि च परेऽप्शब्दात् सप्तम्या अलुक् स्यादित्यर्थः । **अप्सव्य इति** ॥ दिगादित्वाद्यत् । 'ओर्गुणः' 'वान्तो यि' इत्यवादेशः । **अप्सुमन्ताविति** ॥ अप्सु इति पदं यदीयमन्तयोरस्ति तावप्सुमन्तौ । आज्यभागाविति कर्मविशेषौ । **नेन्सिद्धबन्धादिषु च** ॥ **चक्रबन्ध इति** ॥ साधनं कृता इति क्तान्तेन सप्तम्यन्तस्य समासः । **स्थे**

---

१. अयं पाठो हरदत्तानुसारेण । 'मतिषु' इति युक्तः पाठः । 'एकवच्च' इत्यस्यातिप्रसङ्गव्याजेनाप्सुजाप्सुचरादिवदस्य (अप्सुमतिः) भाष्ये उपन्यासात् । नहि 'अप्सुमन्तौ' इत्यत्र तस्य प्रसङ्गोऽस्ति । शब्दपरतया तस्यैकत्वमात्रार्थत्वात् । किञ्च 'मतुषु' इति पाठे फलं चिन्त्यम् । 'अस्यवामीयम्' इत्यादाविव लुकोऽप्राप्तेः । इति—शेखरः ।

९७८। स्थे च भाषायाम्। (६-३-२०)

सप्तम्या अलुप्त। समस्थः। 'भाषायाम्' किम्। कृष्णोऽस्या खरेष्ठः।

९७९। षष्ठ्या आक्रोशे। (६-३-२१)

चौरस्यकुलम्। 'आक्रोशे' किम्। ब्राह्मणकुलम्। 'वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु' (वा ३८९७)। वाचोयुक्तिः। दिशोदण्डः। पश्यतोहरः। 'आमुष्यायणामुष्यपुत्रिकामुष्यकुलिकेति च' (वा ३८९८–३८९९)। अमुष्यापत्यमामुष्यायणः। नडादित्वात्फक्। अमुष्यपुत्रस्य भावः आमुष्यपुत्रिका। मनोज्ञादित्वाद्वुञ्। एवमामुष्यकुलिका। 'देवानांप्रिय इति च मूर्खे' (वा ३९००)। अन्यत्र देवप्रियः। 'शेफपुच्छलाङ्गूलेषु शुनः' (वा ३९०१)। शुनःशेफः। शुनःपुच्छः। शुनोलाङ्गूलः। 'दिवश्च दासे' (वा ३९०२)। दिवोदासः।

च भाषायाम् ॥ 'अनन्तरस्य' इति न्यायात् 'तत्पुरुषे कृति' इत्यस्यैवायं निषेधः। अत एव 'अनेकमन्यपदार्थे' इति सूत्रभाष्ये 'सप्तम्युपमानपूर्वपदस्य' इति वार्तिकव्याख्यावसरे कण्ठेस्थः कालो यस्येति विग्रहे कण्ठेस्थशब्दस्य समासत्वमभ्युपगम्य उत्तरपदलोप उपन्यस्तस्सङ्गच्छते। यदा तु 'अमूर्धमस्तकात्' इत्यस्याप्ययं निषेधस्स्यात्तर्हि तदसङ्गतिस्स्यात्। लुक्प्रसङ्गात्। **षष्ठ्या आक्रोशे** ॥ 'अलुगुत्तरपदे' इति शेषः। आक्रोशो निन्दा। **वाग्दिक्** ॥ वाक्, दिक्, पश्यत् एतेभ्यः परस्याः षष्ठ्या अलुक् स्यात्। युक्ति, दण्ड, हर एतेषु क्रमादुत्तरपदेषु परेष्वित्यर्थः। **वाचोयुक्तिरिति** ॥ शब्दप्रयोग इत्यर्थः। **दिशोदण्ड इति** ॥ अधिकरणस्य शेषत्वविवक्षायां षष्ठी। **पश्यतोहर इति** ॥ पश्यन्तमनादृत्य हरतीत्यर्थः। 'षष्ठी चानादरे' इति षष्ठी। **आमुष्यायणेति** ॥ वार्तिकमिदम्। एते निपात्यन्ते। **अमुष्येति** ॥ अमुष्यापत्यमित्यर्थे 'नडादिभ्यः फक्' इति फकि आयन्नादेशे आदिवृद्धौ तद्धितान्तत्वात् प्रातिपदिकतया तदवयवत्वात् प्राप्तस्य सुब्लुको निषेधे नस्य णत्वे आमुष्यायण इति रूपमित्यर्थः। अमुष्य पुत्रः इति विग्रहे षष्ठीसमासे षष्ठ्या अलुकि अमुष्यपुत्रशब्दः। अमुष्यपुत्रस्य भाव इत्यर्थे 'द्वन्द्वमनोज्ञादिभ्यश्च' इति वुञि अकादेशे पुत्रशब्दात् सुपो लुकि आदिवृद्धौ स्त्रीत्वाट्टापि 'प्रत्ययस्थात्' इतीत्त्वे आमुष्यपुत्रिकाशब्द इत्यर्थः। **एवमिति** ॥ अमुष्यकुलमिति षष्ठीसमासे षष्ठ्या अलुकि अमुष्यशब्दादुञादिः पूर्ववदित्यर्थः। **देवानामिति** ॥ वार्तिकमिदम्। मूर्खः अज्ञः। 'दिवु क्रीडायाम्' देवाः क्रीडासक्ताः मूर्खाः। तेषां प्रियोऽपि मूर्ख एव। मूर्खप्रियस्यावश्यं मूर्खत्वादिति 'अजेर्वी' इत्यत्र कैयटः। **शेफपुच्छेति** ॥ वार्तिकमिदम्। षष्ठ्या अलुगिति शेषः। संज्ञायामिति भाष्यम्। **शुनश्शेफ इति** ॥ शुनः शेफ इव शेफः यस्येति विग्रहः। "मेढ्रो मेहनशेफसी" इत्यमरः। शेपशब्दोऽप्यस्ति। 'शेपाय स्वाहा' इति दर्शनात्। **शुनःपुच्छ इति** ॥ शुनः पुच्छमिव पुच्छं यस्येति विग्रहः। एवं शुनोलाङ्गूल इत्यपि।

९८०। पुत्रेऽन्यतरस्याम्। (६-३-२२)

षष्ठ्याः पुत्रे परेऽलुग्वा निन्दायाम्। दास्याःपुत्रः—दासीपुत्रः। 'निन्दायाम्' किम्। ब्राह्मणीपुत्रः।

९८१। ऋतो विद्यायोनिसम्बन्धेभ्यः। (६-३-२३)

विद्यासम्बन्धयोनिसम्बन्धवाचिनः ऋदन्तात्षष्ठ्या अलुक्। होतुरन्तेवासी। होतुःपुत्रः। पितुरन्तेवासी। पितुःपुत्रः। 'विद्यायोनिसम्बन्धेभ्यस्तत्पूर्वोत्तरपदग्रहणम्' (वा ३९०३)। नेह, होतृधनम्।

९८२। विभाषा स्वसृपत्योः। (६-३-२४)

ऋदन्तात्षष्ठ्या अलुग्वा स्वसृपत्योः परयोः।

९८३। मातुःपितुर्भ्यामन्यतरस्याम्। (८-३-८५)

आभ्यां स्वसुः सस्य षो वा स्यात्समासे। मातुःष्वसा—मातुःस्वसा। पितुःष्वसा—पितुःस्वसा। लुक्पक्षे तु।

ऋषिविशेषाणां संज्ञा एताः। **दिवश्च दास इति** ॥ वार्तिकम्। षष्ठ्या अलुगिति शेषः। **दिवो दास इति** ॥ कश्चिद्राजर्षिरयम्। **पुत्रेऽन्यतरस्याम्** ॥ **निन्दायामिति** ॥ आक्रोश इत्यनुवृत्तिलभ्यमिदम्। स्पष्टं चेदम् 'आनङृतः' इत्यत्र भाष्ये। **ऋतो विद्या** ॥ एकत्वे बहुवचनम्। तदाह। **विद्यासम्बन्धयोनिसम्बन्धवाचिनः ऋदन्तादिति** ॥ **अलुक् स्यादिति** ॥ उत्तरपदे परत इति शेषः। विद्यासम्बन्धवाचिनमुदाहरति। **होतुरन्तेवासीति** ॥ ऋग्वेदविहितकर्मविशेषकर्ता होता। अतो होतृशब्दः विद्यासम्बन्धप्रवृत्तिनिमित्तक इति भावः। **होतुः पुत्र इति** ॥ विद्यासम्बन्धवाचिनः उदाहरणान्तरमिदम्। अथ योनिसम्बन्धवाचिनमुदाहरति। **पितुरन्तेवासीति। पितुःपुत्र इति च** ॥ ननु होतृधनं पितृधनमित्यत्राप्यलुक् स्यादित्यत आह। **विद्यायोनिसम्बन्धेभ्यः तत्पूर्वोत्तरपदग्रहणमिति** ॥ विद्यायोनिसम्बन्धेभ्यः इत्यत्र विद्यासम्बन्धयोनिसम्बन्धवाचिनोः पूर्वोत्तरपदयोः ग्रहणमित्यर्थः। पूर्वोत्तरपदयोरुभयोरपि विद्यासम्बन्धयोनिसम्बन्धान्यतरवाचित्वं विवक्षितमिति भावः। होतृधनं पितृधनमित्यत्र उत्तरपदस्य विद्यायोनिसम्बन्धान्यतरवाचित्वाभावात् न षष्ठ्या अलुगिति भावः। अन्यतरसम्बन्धवाचित्वस्य विवक्षितत्वादेव होतुःपुत्र इत्यादि सिद्धम्। **विभाषा स्वसृपत्योः** ॥ **ऋदन्तादिति** ॥ विद्यायोनिसम्बन्धान्यतरवाचिन इति शेषः। ततश्च भोक्तृस्वसेत्यत्र नातिव्याप्तिः। पूर्वेण नित्ये प्राप्ते विकल्पोऽयम्। अलुक्पक्षे विशेषमाह। **मातुःपितुर्भ्यामन्यतरस्याम्** ॥ 'मातृपितृभ्यां स्वसा' इति पूर्वसूत्रात् स्वसेत्यनुवर्तते। **षष्ठ्यर्थे** प्रथमा। 'सहेस्साडस्सः' इति सूत्रात्स इति षष्ठ्यन्तं पदमनुवर्तते। 'अपदान्तस्य मूर्धन्यः' इत्यधिकृतम्। तदाह। **आभ्यामिति** ॥ मातुःपितुरिति षष्ठ्यन्ताभ्यामिति

९८४। मातृपितृभ्यां स्वसा। (८-३-८४)

आभ्यां परस्य स्वसुः सस्य षः स्यात्समासे। मातृष्वसा। पितृष्वसा। असमासे तु। मातुः स्वसा। पितुः स्वसा।

इत्यलुक्ससासप्रकरणम्।

शेषः। **समासे इति** ॥ 'समासेऽङ्गुलेस्सङ्गः' इत्यतस्तदनुवृत्तेरिति भावः। मातुष्वसा, पितुःष्वसेति अलुकि षत्वे रूपम्। मातुःस्वसा पितुःस्वसेत्यलुकि षत्वाभावे रूपम्। **लुक्पक्षे त्विति** ॥ विशेषो वक्ष्यत इति शेषः। **मातृपितृभ्यां स्वसा** ॥ **स्वसुरिति** ॥ सूत्रे षष्ठ्यर्थे प्रथमेति भावः। **मातृष्वसा। पितृष्वसेति** ॥ लुक्पक्षे नित्यमेव षत्वम्। आदेशप्रत्यय-सकारत्वाभावादप्राप्ते षत्वविधिरयम्। षत्वविधौ समासग्रहणानुवृत्तेः फलं दर्शयति। **अ-समासे त्विति** ॥ वाक्ये वैकल्पिकं षत्वमपि नास्तीत्यर्थः ॥

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायां अलुक्समासप्रकरणं समाप्तम्।



श्रीरस्तु ।

॥ अथ समासाश्रयविधिप्रकरणम् ॥

९८५ । घरूपकल्पप्चेलड्ब्रुवगोत्रमतहतेषु ङ्यो-ऽनेकाचो ह्रस्वः । (६-३-४३)

भाषितपुंस्काद्यो ङी तदन्तस्यानेकाचो ह्रस्वः स्याद्घरूपकल्पप्प्रत्ययेषु परेषु, चेलडादिषु चोत्तरपदेषु । ब्राह्मणितरा । ब्राह्मणितमा । ब्राह्मणिरूपा । ब्राह्मणिकल्पा । ब्राह्मणिचेली । ब्राह्मणिब्रुवा । ब्राह्मणिगोत्रा इत्यादि । ब्रूञः पचाद्यचि वच्यादेशगुणयोरभावोऽपि निपात्यते । चेलडादीनि वृत्तिविषये कुत्सनवाचीनि । तैः 'कुत्सितानि कुत्सनैः' (सू ७३२) इति समासः । 'ङ्यः' किम् । दत्तातरा । 'भाषितपुंस्कात्' किम् । आमलकीतरा । कुवलीतरा ।

अथ समासाश्रयविधिः निरूप्यते—**घरूप** ॥ उत्तरपदे इत्यधिकृतं चेलडादिष्वन्वेति, नतु घरूपकल्पेषु । घशब्दवाच्यतरप्तमपोः रूपप्कल्पपोश्च प्रत्ययत्वात् । नच तदन्तग्रहणे सति तेषूत्तरपदत्वं सम्भवतीति वाच्यम् । 'हृदयस्य हृल्लेख' इत्यत्र उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तग्रहणाभाव इति भाष्ये उक्तत्वात् । 'स्त्रियाः पुंवत्' इत्यतो भाषितपुंस्कादित्यनुवृत्तम् । ङ्य इति तदन्तग्रहणं, केवलस्यानेकाच्त्वाभावात् । तदाह । **भाषितपुंस्काद्यो ङी इति** ॥ एतदर्थमेव 'स्त्रियाः पुंवत्' इत्यत्र भाषितपुंस्कादिति पञ्चम्यन्तमुपात्तम् । तत्र भाषितपुंस्काया इति षष्ठ्यन्तोपादाने तु इह तदनुवृत्तिर्न स्यात् । असम्भवात् । नहि ङीप्प्रत्ययस्य तदन्तस्य वा भाषितपुंस्कत्वमस्ति । नच तत्रापि नार्थवत्स्यात् । अनूङिति पर्युदासात् स्त्रीप्रत्ययलाभेन तदन्तस्य भाषितपुंस्कत्वाभाव इति वाच्यम् । तत्र स्त्रिया इत्यस्वरितत्वात् स्त्रीप्रत्ययग्रहणं नेत्युक्तत्वात् । **ब्राह्मणितरा । ब्राह्मणितमेति** ॥ अतिशायने तरप्तमपौ । नच 'तसिलादिषु' इति पुंवत्त्वेन ङीपो निवृत्तिशङ्क्या । 'जातेश्च' इति निषेधात् । **ब्राह्मणिरूपेति** ॥ प्रशंसायां रूपप् । **ब्राह्मणिकल्पेति** ॥ 'ईषदसमाप्तौ' इति कल्पप् । **ब्राह्मणिचेलीति** ॥ 'चिल वसने' तस्मादचि चेलडिति पचाद्यौ पठितम् । टित्त्वात् ङीप् । **इत्यादीति** ॥ ब्राह्मणिमता । ब्राह्मणिहता । **ब्रूञ इति** ॥ ब्रूञ्धातोरचि कृते 'ब्रुवो वचिः' इति वच्यादेशस्य लघूपधगुणस्य च अभावो निपात्यते इत्यर्थः । **चेलडादीनीति** ॥ समासवृत्तिविषये चेलड्ब्रुवगोत्रमतहता इत्युत्तरपदानि कुत्सनवाचीनीति कृत्वा 'कुत्सितानि कुत्सनैः' इति कर्मधारय इत्यर्थः । **आमलकीतरेति** ॥ आमलकीशब्दस्य वृक्षवाचित्वे नित्यस्त्रीलिङ्गत्वात् भाषितपुंस्कत्वाभावेन न ह्रस्व

९८६ । नद्याः शेषस्यान्यतरस्याम् । (६-३-४४)

अङ्यन्तनद्याः ङ्यन्तस्यैकाचश्च घादिषु ह्रस्वो वा स्यात् । ब्रह्मबन्धूतरा—ब्रह्मबन्धुतरा । स्त्रितरा—स्त्रीतरा । 'कृन्नद्या न' (वा ३९३८) । लक्ष्मीतरा ।

९८७ । उगितश्च । (६-३-४५)

उगितः परा या नदी तदन्तस्य घादिषु ह्रस्वो वा स्यात् । विदुषितरा । ह्रस्वाभावपक्षे तु 'तसिलादिषु–' (सू ८३६) इति पुंवत् । विद्वत्तरा । वृत्त्यादिषु 'विदुषीतरा' इत्यप्युदाहृतम् । तन्निर्मूलम् ।

९८८ । हृदयस्य हृल्लेखयदण्लासेषु । (६-३-५०)

हृदयं लिखतीति हृल्लेखः । हृदयस्य प्रियं हृद्यम् । हृदयस्येदं हार्दम् । हृल्लासः । 'लेख–' इत्यणन्तस्य ग्रहणम् । घञि तु हृदयलेखः । लेखग्रहणं ज्ञापकम् 'उत्तरपदाधिकारे तदन्तविधिर्नास्ति' (प २६) इति ।

इति भावः । ननु 'न पदान्त' इति सूत्रे भाष्ये बिम्बबदर्यामलकशब्दानां भाषितपुंस्कत्वावगमात् कथमामलकीशब्दस्य वृक्षविशेषे नित्यस्त्रीलिङ्गत्वमित्यरुचेराह । **कुवलीतरेति** ॥ वृक्षविशेषे नित्यस्त्रीलिङ्गोऽयमिति भावः । अमरस्तु "कर्कन्धूर्बदरी कोली घोण्टा कुवलफेनिले" इति नपुंसकत्वमाह । **नद्याश्शेषस्यान्यतरस्याम्** ॥ उक्तादन्यश्शेषः । ङ्यन्तस्यानेकाच इति पूर्वसूत्रे स्थितम् । तदन्यत्वं च अनेकाचो ङ्यन्तत्वाभावे ङ्यन्तस्यानेकाच्त्वाभावेऽपि सम्भवति । तदाह । **अङ्यन्तनद्याः ङ्यन्तस्यैकाचश्चेति** ॥ 'ऊङुतः' इति ब्रह्मबन्धुशब्दः ऊङन्तः, भाषितपुंस्कस्येति तु नेहानुवर्तते इत्यभिप्रेत्योदाहरति । **स्त्रितरेति** ॥ **कृन्नद्या नेति** ॥ कृदन्ता या नदी तस्या ह्रस्वो नेति वाच्यमित्यर्थः । **लक्ष्मीतरेति** ॥ 'लक्षेर्मुट् च' इति औणादिके ईप्रत्यये मुडागमे च लक्ष्मीशब्दः कृदन्त इति भावः । **उगितश्च** ॥ **विदुषितरेति** ॥ 'विदेश्शतुर्वसुः' इति वसुप्रत्ययः । उगिदन्तमिदम् । अनेकाच्त्वात् नद्याश्शेषस्येत्यस्याप्राप्तेरिति भावः । पुंवत्त्वे ईपो निवृत्तौ विद्वत्तेरति रूपमित्यर्थः । **तन्निर्मूलमिति** ॥ पुंवत्त्वस्य दुर्वारत्वादित्यर्थः । 'विद्वच्छ्रेयसोः पुंवत्त्वं न वक्तव्यम्' इति वृत्तिः । परन्तु वचनं भाष्यादृष्टत्वादुपेक्ष्यमिति भावः । अत्रोगितः परा या नदीति मूलं वर्णयोरेव नदीसंज्ञेति मताभिप्रायकम् । **हृदयस्य** ॥ लेख, यत्, अण्, लास, एषु परेषु हृदयस्य हृदादेश इत्यर्थः । हृदयं लिखतीति हृल्लेखः । कर्मण्यण् । **हृदयस्य प्रियं हृद्यमिति** ॥ 'हृदयस्य प्रियः' इति यत्प्रत्ययः । **हार्दमिति** ॥ 'तस्येदम्' इत्यण्, हृदादेशः । **हृल्लास इति** ॥ घञन्तोऽयमिति भावः । **लेखेत्यणन्तस्य ग्रहणमिति** ॥ **उत्तपदाधिकारे तदन्तविधिर्नास्ति इति** ॥

९८९ । वा शोकष्यञ्रोगेषु । (६-३-५०)

हृच्छोकः—हृदयशोकः । सौहार्द्यम्—सौहृदय्यम् । हृद्रोगः—हृदयरोगः । हृदयशब्दपर्यायो हृच्छब्दोऽप्यस्ति । तेन सिद्धे प्रपञ्चार्थमिदम् ।

९९० । पादस्य पदाज्यातिगोपहतेषु । (६-३-५२)

एषूत्तरपदेषु पादस्य 'पद' इत्यदन्त आदेशः स्यात् । पादाभ्यामजतीति पदाजिः । पदातिः । 'अज्यतिभ्यां पादे च' (उ ५७०—५७१) इतीण्प्रत्ययः । अजेर्व्यभावो निपातनात् । पदगः । पदोपहतः ।

९९१ । पद्यत्यतदर्थे । (६-३-५३)

पादस्य पत्स्यादतदर्थे यति परे । पादौ विध्यन्ति पद्याः शर्कराः । 'अतदर्थे' किम् । पादार्थमुदकं पाद्यम् । 'पादार्घाभ्यां च' (सू २०९३) इति यत् । 'इके चरतावुपसङ्ख्यानम्' (वा ३९५८) । पादाभ्यां चरति पदिकः । पर्पादित्वात्ठन् ।

९९२ । हिमकाषिहतिषु च । (६-३-५४)

पद्धिमम् । पत्काषी । पद्धतिः ।

तत्फलन्तु घरूपकल्पब्ग्रहणे तदन्तविध्यभावः । **वा शोक ॥ सौहार्द्यमिति ॥** ब्राह्मणादित्वात् भावे ष्यञि 'हृद्भगसिन्ध्वन्ते' इत्युभयपदवृद्धिः । **सौहृदय्यमिति ॥** भावे ष्यञि हृच्छब्दत्वाभावात् आदिवृद्धौ 'यस्येति च' इति लोपे रूपमिति भावः । **पादस्य पद ॥** पद इति लुप्तप्रथमाकं पृथक्पदम् । **एष्विति ॥** आजि, आति, ग, उपहत इत्येतेष्वित्यर्थः । **अदन्त इति ॥** उत्तरसूत्रे पदिति हलन्तस्य ग्रहणादिति भावः । **अजतीति ॥** 'अज गतिक्षेपणयोः' । **पदातिरिति ॥** पादाभ्यामततीति विग्रहः । 'अत गतौ' । **अज्यतिभ्याम् इति ॥** पादे उपपदे अजधातोरतधातोश्च इण् स्यादिति तदर्थः । अजीत्यस्य 'अजेर्व्यघञपोः' इति वीभावमाशङ्क्य आह । **अजेर्व्यभावो निपातनादिति ॥** आजीति निर्देशादित्यर्थः । **पदग इति ॥** पादाभ्यां गच्छतीत्यर्थः । 'गमश्च, अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः' इति सूत्रस्थ 'अन्येभ्योऽपि दृश्यते' इति वार्तिकेन गमधातोः डः । तदन्ते गशब्दे परे पादस्यादन्तः पदादेशः । दकारान्तादेशे तु पद्ग इति स्यात् । **पदोपहत इति ॥** पादाभ्यामुपहत इति विग्रहः । अत्रापि दकारान्तादेशे पदुपहत इति स्यात् । **पद्यत्यतदर्थे ॥** पद् यति अतदर्थे इति च्छेदः । **पद्या इति ॥** 'विध्यत्यधनुषा' इति यत्प्रत्ययः । **पाद्यमिति ॥** 'पादार्घाभ्याञ्च' इति तादर्थ्ये यत्प्रत्ययः । **इके चरताविति ॥** चरत्यर्थे विहितस्य ठनो य इकादेशः तस्मिन् परे पादस्य पत्स्यादित्युपसङ्ख्यानमित्यर्थः । **हिमकाषि ॥** एषु परेषु पादस्य पत्स्यादित्यर्थः । **पद्धिममिति ॥** पादस्य

९९३। ऋचः शे। (६-३-५५)

ऋचः पादस्य पत्स्याच्छे परे। गायत्रीं पच्छः शंसति। पादंपादमित्यर्थः। 'ऋचः' किम्। पादशः कार्षापणं ददाति।

९९४। वा घोषमिश्रशब्देषु। (६-३-५६)

पादस्य पत्। पद्घोषः—पादघोषः। पन्मिश्रः—पादमिश्रः। पच्छब्दः—पादशब्दः। 'निष्के चेति वाच्यम्' (वा ३९५९)। पन्निष्कः—पादनिष्कः।

९९५। उदकस्योदः संज्ञायाम्। (६-३-२७)

उदमेघः। 'उत्तरपदस्य चेति वक्तव्यम्' (वा ३९६१)। क्षीरोदः।

९९६। पेषंवासवाहनधिषु च। (६-३-५८)

उदपेषं पिनष्टि। उदवासः। उदवाहनः। उदधिर्घटः। समुद्रे तु पूर्वेण सिद्धम्।

हिममिति विग्रहः। **पत्कार्षीति**॥ पादौ पादाभ्यां वा कषतीत्यर्थः। 'सुप्यजातौ' इति णिनिः। **पद्धतिरिति**॥ हन्यते इति हतिः। कर्मणि क्तिन्। पादाभ्यां हतिरिति विग्रहः। 'कर्तृकरणे कृता' इति समासः। **ऋचः शे**॥ शस्य शस्प्रत्ययैकदेशस्यानुकरणात् सप्तमीत्यभिप्रेत्य उदाहरति। **पच्छः इति**॥ 'सङ्ख्यैकवचनाच्च वीप्सायाम्' इति पादशब्दात् शस्। 'तद्धितश्चासर्वविभक्तिः' इत्यव्ययत्वम्, नत्विह लोमादिशब्दस्य ग्रहणम्। लोमादौ पादशब्दस्य पाठाभावात्। **पादशः कार्षापणन्ददातीति**॥ कार्षापणाख्यपरिमाणविशेषं सुवर्णादिकं पादम्पादन्ददातीत्यर्थः। **वा घोष**॥ पादपूरणेन सूत्रं व्याचष्टे। **पादस्य पदिति**॥ **निष्के चेति**॥ पादस्य पदिति शेषः। **उदकस्योदः**॥ उदकशब्दस्य उद इत्यादेशः स्यात् उत्तरपदे संज्ञायामित्यर्थः। **उदमेघ इति**॥ उदकपूर्णमेघसादृश्यात् कस्य चिदियं संज्ञा। **उत्तरपदस्य चेति**॥ उत्तरपदस्य उदकशब्दस्य उद इत्यादेशः स्यात् संज्ञायामित्यर्थः। **क्षीरोद इति**॥ क्षीर उदकस्थानीयं यस्येति विग्रहः। क्षीरोदं सरः इतित्वसाध्वेव। असंज्ञात्वात्। **पेषंवास**॥ पेषमिति णमुलन्तमव्ययम्। तस्मिन्वासवाहनधिषु च परतः उदकशब्दस्य उदः स्यादित्यर्थः। असंज्ञार्थं वचनम्। **उदपेषंपिनष्टीति**॥ उदकेन पिनष्टीत्यर्थः। 'स्नेहने पिषः' इति णमुल्। कषादिषु यथाविध्यनुप्रयोगः। **उदवास इति**॥ उदकस्य वास इति विग्रहः। **उदवाहन इति**॥ करणे ल्युट्। उदकस्य वाहक इत्यर्थः। **उदधिर्घट इति**॥ उदकन्धीयतेऽस्मिन्निति विग्रहः। 'कर्मण्यधिकरणे च' इति किप्रत्ययः। असंज्ञात्वस्फोरणाय घटः इति विशेष्यम्। **समुद्रे त्विति**॥ तदा उदधिशब्दस्य संज्ञात्वेन 'उदकस्योदः' इति पूर्वसूत्रेण

९९७ । एकहलादौ पूरयितव्येऽन्यतरस्याम् । (६-३-५९)

उदकुम्भः—उदककुम्भः । 'एक—' इति किम् । उदकस्थाली । 'पूरयितव्ये' इति किम् । उदकपर्वतः ।

९९८ । मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च । (६-३-६०)

उदमन्थः—उदकमन्थः । उदौदनः—उदकौदनः । इत्यादि ।

९९९ । इको ह्रस्वोऽङ्यो गालवस्य । (६-३-६१)

इगन्तस्याङ्यन्तस्य ह्रस्वो वा स्यादुत्तरपदे । ग्रामणिपुत्रः—ग्रामणीपुत्रः । 'इकः' किम् । रमापतिः । 'अङ्यः' इति किम् । गौरीपतिः 'गालव' ग्रहणं पूजार्थम् । 'अन्यतरस्याम्' इत्यनुवृत्तेः । 'इयङुवङ्भाविनामव्ययानां च नेति वाच्यम्' (वा ३९६३) । श्रीमदः । भ्रूभङ्गः । शुक्लीभावः । 'अभ्रूकुंसादीनामिति वक्तव्यम्' (वा ३९६४) । भ्रुकुंसः—भ्रूकुंसः । भ्रुकुटिः—भ्रूकुटिः । 'अकारोऽनेन विधीयते' इति व्याख्यान्तरम् । भ्रकुंसः । भ्रकुटिः । भ्रुवा कुंसो भाषणं शोभा वा यस्य सः स्त्रीवेषधारी नर्तकः । भ्रुवः कुटिः कौटिल्यम् ।

सिद्धमित्यर्थः । **एकहलादौ** ॥ हल्त्वस्य एकैकवर्णधर्मत्वादेव सिद्धे एकग्रहणादसंयुक्तत्वं लभ्यते । पूरयितव्यं पूरणार्हं करम्भादि । असंयुक्तहलादौ पूरयितव्यवाचके उत्तरपदे परे उदकस्य उद इत्यादेशः स्यादित्यर्थः । **मन्थौदन** ॥ उदकस्य उदादेशो वेति शेषः । अपूरयितव्यार्थं वचनम् । **उदमन्थः—उदकमन्थ इति** ॥ उदकमिश्रो मन्थ इति विग्रहः । द्रवद्रव्यसम्पृक्ताः सक्तवो मन्थाः । भर्जितयवपिष्टानि सक्तवः । **उदौदनः—उदकौदन इति** ॥ उदकमिश्र इत्यर्थः । **इत्यादीति** ॥ उदसक्थवः—उदकसक्थवः । उदबिन्दवः—उदकबिन्दवः । उदवज्रः—उदकवज्रः । उदभारः—उदकभारः । उदहारः—उदकहारः । उदवीवधः—उदकवीवधः । उदगाहः—उदकगाहः । वीवधस्तु जलाद्याहरणयोग्यः उभयतश्शिक्यः स्कन्धवाह्यः काष्ठविशेषः । **इको ह्रस्वः** ॥ अङ्य इति च्छेदः । **ग्रामणीपुत्र इति** ॥ कर्मधारयषष्ठीसमासौ वा । नीधातोरीकारोऽयं, नतु ङीप्प्रत्यय इति भावः । ननु गालवग्रहणस्य विकल्पार्थकत्वं किन्न स्यादित्यत आह । **अन्यतरस्यामित्यनुवृत्तेरिति** ॥ **इयङुवङ्भाविनामिति** ॥ तदर्हाणामित्यर्थः । **श्रीमदः । भ्रूभङ्ग इति** ॥ श्रीभ्रूशब्दौ अजादिप्रत्यये परे इयङुवङर्हाविति भावः । **शुक्लीभाव इति** ॥ अभूततद्भावे च्विप्रत्यये 'अस्य च्वौ' इति ईत्त्वम् । 'च्वौ' इति दीर्घः । 'ऊर्यादिच्विडाचश्च' इति निपातनात् अव्ययत्वमिति भावः । **अभ्रूकुंसादीनामिति** ॥ भ्रूशब्दस्य उवङ्भावितया ह्रस्वनिषेधो यः प्राप्तः स नेत्यर्थः । **अकारोऽनेनेति** ॥ 'अ भ्रूकुंसादीनाम्' इति वार्तिके अ इति लुप्तप्रथमाकं पृथक्पदम् । तथा च भ्रूकुंसादीनामवयवः यो भ्रूशब्दः तस्य

१००० । एक तद्धिते च । (६-३-६२)

एकशब्दस्य ह्रस्वः स्यात्तद्धिते उत्तरपदे । एकस्या आगतमेकरूप्यम् । एकक्षीरम् ।

१००१ । ङ्यापोः संज्ञाछन्दसोर्बहुलम् । (६-३-६३)

रेवतिपुत्रः । अजक्षीरम् ।

१००२ । त्वे च । (६-३-६४)

त्वप्रत्यये ङ्यापोर्वा ह्रस्वः । अजत्वम्—अजात्वम् । रोहिणित्वम्—रोहिणीत्वम् ।

१००३ । ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे । (६-१-१३)

ष्यङन्तस्य पूर्वपदस्य सम्प्रसारणं स्यात्पुत्रपत्योरुत्तरपदयोस्तत्पुरुषे ।

१००४ । सम्प्रसारणस्य । (६-३-१३९)

सम्प्रसारणस्य दीर्घः स्यादुत्तरपदे । कौमुदगन्ध्यायाः पुत्रः कौमुदगन्धीपुत्रः । कौमुदगन्धीपतिः । व्यवस्थितविभाषया ह्रस्वो न । 'स्त्रीप्रत्यये

अकारो अन्तादशः स्यात् इति व्याख्यानान्तरमित्यर्थः । **भ्रुवा कुंसो भाषणमिति** ॥ तत्तदर्थज्ञापनमित्यर्थः । 'भ्रुकुंसश्च भ्रकुंसश्च भ्रूकुंसश्चेति नर्तकः' इत्यमरः । 'भ्रकुटिर्भ्रुकुटिर्भ्रूकुटिः स्त्रियाम्' इति च । **एक तद्धिते च** ॥ एकेति लुप्तषष्ठीकम् । तदाह । **एकशब्दस्येति** ॥ स्त्रीप्रत्ययान्तस्येति शेषः । अन्यथा ह्रस्वविधिवैयर्थ्यात् । उत्तरपदे च, इति चकारात्तदनुकर्ष इति भावः । **एकस्याः आगतम् एकरूप्यमिति** ॥ हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः । **एकक्षीरमिति** ॥ एकस्याः क्षीरमिति विग्रहः । **ङ्यापोः** ॥ उत्तरपदे ह्रस्वः स्यादिति शेषः । **रेवतिपुत्र इति** ॥ कस्य चित्संज्ञेयम् । अथ छन्दस्युदाहरति । **अजक्षीरमिति** ॥ अजायाः क्षीरमिति विग्रहः । "परमं वा एतत्पयो यदजक्षीरम्" इति तैत्तिरीये । **त्वे च** ॥ शेषपूरणेन सूत्रं व्याचष्टे । **त्वप्रत्यये ङ्यापोर्वा ह्रस्व इति** ॥ **अजत्वं, रोहिणीत्वम् इति** ॥ संज्ञात्वाभावात् छन्दस्येवायमिति वृत्तिः । अनुत्तरपदार्थं वचनम् । **ष्यङस्सम्प्रसारणम्** ॥ प्रत्ययग्रहणपरिभाषया ष्यङ इति तदन्तग्रहणम् । तदाह । **ष्यङन्तस्य पूर्वपदस्येति** ॥ तस्य सूत्रस्य उत्तरपदाधिकारस्थत्वेऽपि तत्पुरुषग्रहणेन पूर्वपदलाभ इति भावः । **उत्तरपदयोरिति** ॥ इदमपि तत्पुरुषपदलभ्यम् । यद्वा उत्तरपदाधिकारेण पूर्वपदमाक्षिप्यते । **सम्प्रसारणस्य** ॥ **दीर्घ इति** ॥ 'ढ्रलोपे' इत्यतस्तदनुवृत्तेरिति भावः । **उत्तरपदे इति** ॥ 'अलुगुत्तरपदे' इति तदधिकारादिति भावः । **कौमुदगन्ध्यायाः पुत्र इति** ॥ विग्रहवाक्यमिदम् । कुमुदगन्ध इव गन्धो यस्य सः कुमुदगन्धिः । 'सप्तम्युपमानपूर्वपदस्य बहुव्रीहिर्वाच्यो वाचोत्तरपदलोपः' इति बहुव्रीहौ कुमुदगन्धशब्दे पूर्वखण्डे उत्तरस्य

चानुपसर्जने न' (प २७) इति तदादिनियमप्रतिषेधात्। परमकारीषगन्धी-पुत्रः। उपसर्जने तु तदादिनियमान्नेह। अतिकारिषगन्ध्यापुत्रः।

१००५। बन्धुनि बहुव्रीहौ। (६-१-१४)

बन्धुशब्दे उत्तरपदे ष्यङः सम्प्रसारणं स्याद्बहुव्रीहौ। कारीषगन्ध्या बन्धुरस्येति कारीषगन्धीबन्धुः। 'बहुव्रीहौ' इति किम्। कारीषगन्ध्याया बन्धुः कारीषगन्ध्याबन्धुः। क्लीबनिर्देशस्तु शब्दस्वरूपापेक्षया। 'मातञ्मातृ-कमातृषु वा' (वा ३४४९)। कारीषगन्धीमातः—कारीषगन्ध्यामातः।

गन्धशब्दस्य लोपश्च। 'उपमानाच्च' इति इत्त्वम्। कुमुदगन्धेरपत्यं स्त्री इत्यर्थे तस्यापत्य-मित्यण्। 'अणिञोरनार्षयोः' इति तस्य ष्यङादेशः। 'यस्येति च' इति इकारलोपः। आदि-वृद्धिः। यङश्चाप्। कौमुदगन्ध्याशब्द इति भावः। कौमुदगन्ध्यायाः पुत्रोऽयमिति षष्ठीसमासः। सुब्लुकि कौमुदगन्ध्या पुत्र इति स्थिते ष्यङस्सम्प्रसारणेन यकारस्य इकारः। तस्य तदुत्तरा-कारस्य च 'सम्प्रसारणाच्च' इति पूर्वरूपेण इकारे 'सम्प्रसारणस्य' इति दीर्घे कौमुदगन्धीपुत्र इति रूपमिति भावः। 'हलः' इति दीर्घस्य तु नात्र प्रसक्तिः। अत्र प्रत्ययस्य लुका लुप्तत्वात् इत्याहुः। **कौमुदगन्धीपतिरिति** ॥ कौमुदगन्ध्यायाः पतिरिति विग्रहः। पूर्ववत्प्रक्रिया। 'इको ह्रस्वो-ऽङ्यो गालवस्य' इति पाक्षिकं ह्रस्वमाशङ्क्य आह। **व्यवस्थितविभाषया ह्रस्वो नेति** ॥ अत्र तु व्याख्यानमेव शरणम्। स्यादेतत्। करीषङ्गोमहिषादिपुरीषम्, करीषगन्ध इव गन्धो यस्य सः करीषगन्धिः, तस्यापत्यं स्त्री कारीषगन्ध्या, परमा च सा कारीषगन्ध्या च परमकारीषगन्ध्या, तस्याः पुत्रः परमकारीषगन्ध्यापुत्रः इत्यत्रापि ष्यङस्संप्रसारणं तस्य दीर्घश्चेति स्थितिः। अत्र सम्प्रसारणं दुर्लभम्। ष्यङः कारीषगन्ध्याशब्दादेव विहितत्वेन परमकारीषगन्ध्या-शब्दस्य सपूर्वपदस्य ष्यङन्तत्वाभावात्प्रत्ययग्रहणे यस्मात्स विहितस्तदादेवस्तदन्तस्य च ग्रहणा-दित्यत आह। **स्त्रीप्रत्यये चेति** ॥ ष्यङः स्त्रियां विहितत्वात् स्त्रीप्रत्ययः। ततश्च 'स्त्रीप्रत्यये चानुपसर्जने न' इति परिभाषया तदादिनियमाभावात्परमकारीषगन्ध्याशब्दोऽपि ष्यङन्त एवेति तत्र सम्प्रसारणे दीर्घे च परमकारीषगन्धीपुत्रः इति रूपमिति भावः। इयम्परिभाषा 'ष्यङस्सम्प्र-सारणम्' इति प्रकृतसूत्रे भाष्ये पठिता। तत्रानुपसर्जनग्रहणस्य प्रयोजनमाह। **उप-सर्जने त्विति** ॥ कारीषगन्ध्यामतिक्रान्तः अतिकारीषगन्ध्यः, 'अल्पादयः' इति समासे, उपसर्जनह्रस्वः। तस्य पुत्रः अतिकारीषगन्ध्यापुत्रः। अत्र 'स्त्रीप्रत्यये तदादिनियमो न' इति निषेधो न भवति। अनुपसर्जन एव स्त्रीप्रत्यये तस्य निषेधस्य प्रवृत्तेः। ष्यङ्त्वयं स्त्रीप्रत्ययोऽत्र उपसर्जन एव। अतस्तत्र तदादिनियमसत्त्वात् अतिकारीषगन्ध्याशब्दो नैव ष्यङन्त इति न सम्प्रसारणमिति भावः। **बन्धुनि बहुव्रीहौ ॥ कारीषगन्धीबन्धुरिति** ॥ अत्र पत्युत्तरपदत्वाभावात् तत्पुरुषत्वाभावाच्च पूर्वेण न प्राप्तिः। **मातञ्मातृकमातृषु वेति** ॥ वार्तिकमिदम्। मातच्, मातृक, मातृ, एषु परेषु ष्यङस्सम्प्रसारणं वा वक्तव्यमित्यर्थः। मातचि उदाहरति। **कारीषगन्धीमातः। कारीषगन्ध्यामातः इति** ॥ मातृशब्दस्य

कारीषगन्धीमातृकः—कारीषगन्ध्यामातृकः। कारीषगन्धीमाता—कारीषगन्ध्यामाता। अत एव निपातनान्मातृशब्दस्य मातजादेशः। 'नद्यृतश्च' (सू ८३३) इति कप्विकल्पश्च। बहुव्रीहावेवेदम्। नेह। कारीषगन्ध्याया माता कारीषगन्ध्यामाता। चित्त्वसामर्थ्याच्चित्स्वरो बहुव्रीहिस्वरं बाधते।

१००६। इष्टकेषीकामालानां चिततूलभारिषु। (६-३-६५)

इष्टकादीनां तदन्तानां च पूर्वपदानां चितादिषु क्रमादुत्तरपदेषु ह्रस्वः स्यात्। इष्टकचितम्। पक्वेष्टकचितम्, इषीकतूलम्। मुञ्जेषीकतूलम्। मालभारी। उत्पलमालभारी।

१००७। कारे सत्यागदस्य। (६-३-७०)

मुम्स्यात्। सत्यङ्कारः। अगदङ्कारः। 'अस्तोश्चेति वक्तव्यम्' (वा ३९७३)। अस्तुङ्कारः। 'धेनोर्भव्यायाम्' (३९७५)। धेनुम्भव्या।

मातजादेशः, अदन्तमेतत्। मातृके उदाहरति। **कारीषगन्ध्यामातृकः। कारीषगन्ध्यामातृक इति** ॥ 'नद्यृतश्च' इति कप्। मातृशब्दे उदाहरति। **कारीषगन्ध्यामाता। कारीषगन्ध्यामातेति** ॥ शैषिककबभावे रूपम्। ननु मातृशब्दस्य मातजादेशे किं प्रमाणं, 'नद्यृतश्च' इति निञ्प्रविधानात् पाक्षिककप् च दुर्लभ इत्याह। **अत एवेति** ॥ **बहुव्रीहावेवेदमिति** ॥ 'बन्धुनि बहुव्रीहौ' इति सूत्रे अस्य वार्तिकस्य पठितत्वादिति भावः। मातजिति चित्करणं स्वरार्थमित्याह। **चित्त्वसामर्थ्यादितीति** ॥ **इष्टकेषीका** ॥ उत्तरपदे इत्यधिकृतम्। तल्लब्धं पूर्वपदमिति इष्टकादिभिर्विशेष्यते। तदन्तविधिः। व्यपदेशिवद्भावात् तेषामपि ग्रहणम्। उत्तरपदाधिकारस्यापि पदाधिकाराभ्युपगमात् 'पदाङ्गाधिकारे तस्य तदन्तस्य च' इति वचनेन वा तेषां ग्रहणमिति भावः। 'इको ह्रस्वः' इत्यतः ह्रस्वः इत्यनुवर्तते। तदाह। **इष्टकादीनां तदन्तानाञ्चेति** ॥ **इष्टकचितमिति** ॥ इष्टकादिभिश्चितमिति विग्रहः। 'कर्तृकरणे कृता' इति समासः। तदन्तविधिः। प्रयोजनमाह। **पक्वेष्टकचितमिति** ॥ **इषीकतूलमिति** ॥ इषीकायास्तूलमिति विग्रहः। तूलमग्रं शष्पमित्यन्ये। **मुञ्जेषीकतूलमिति** ॥ मुञ्जेषीकायास्तूलमिति विग्रहः। **मालभारीति** ॥ 'मुप्यजातौ' इति णिनिः। हारिभिति पाठान्तरम्। **कारे सत्यागदस्य** ॥ शेषपूरणेन सूत्रं व्याचष्टे। **मुम् स्यादिति** ॥ 'अरुर्द्विषत्' इत्यतस्तदनुवृत्तेरिति भावः। सत्यस्य अगदस्य च कारे परे मुम् स्यादिति फलितम्। मुमि मकार इत्। उकार उच्चारणार्थः। मित्त्वादन्त्यादचः परः। **सत्यङ्कार इति** ॥ भावे घञ्। सत्यस्य कार इति विग्रहः। शपथकरणमित्यर्थः। **अगदङ्कार इति** ॥ गदो रोगः तस्याभावः अगदः। अर्थाभावे अव्ययीभावेन सह तत्पुरुषस्य विकल्पोक्तेः। अगदस्य कार इत्यर्थः। **अस्तोश्चेति** ॥ कारे मुमिति शेषः। **अस्तुङ्कार**

'लोकस्य पृणे' (वा ३९७६) । लोकंपृणः । 'पृणः' इति मूलविभुजादित्वात्कः । इत्येऽनभ्याशस्य' (वा ३९७७) । अनभ्याशमित्यः । दूरतः परिहर्तव्य इत्यर्थः । 'भ्राष्ट्राग्न्योरिन्धे' (वा ३९७८) । भ्राष्ट्रमिन्धः । अग्निमिन्धः । 'गिलेऽगिलस्य' (वा ३९७९) । तिमिङ्गिलः । 'अगिलस्य' किम् । गिलगिलः । 'गिलगिले च' (वा ३९८०) । तिमिङ्गिलगिलः । 'उष्णभद्रयोः करणे' (वा ३९८१) । उष्णङ्करणम् । भद्रङ्करणम् ।

१००८ । रात्रेः कृति विभाषा । (६-३-७२)

रात्रिञ्चरः—रात्रिचरः । रात्रिमटः—राट्यटः । अखिदर्थमिदं सूत्रम् ।

इति ॥ अस्त्विति तिङन्तप्रतिरूपकमव्ययमभ्युपगम्यते । सुम् वक्तव्य इति शेषः । **धेनुष्मव्येति ॥** नवप्रसवात्प्रागियमुक्तिः । भविष्यन्ती धेनुरित्यर्थः । 'भव्यगेय' इति कर्तरि निपातनात् कृत्यप्रत्ययः । धेनुश्चासौ भव्या चेति विग्रहः । मयूरव्यंसकादित्वात् भव्याशब्दस्य परनिपातः । **लोकस्य पृणे इति ॥** सुम्वक्तव्य इति शेषः । ननु लोकम्पृणातीति विग्रहे कर्मण्यपि लघूपधगुणे रपरत्वे पर्ण इति स्यादित्यत आह । **पृण इति मूलविभुजादित्वात् क इति ॥ इत्येऽनभ्याशस्येति ॥** सुम् वक्तव्य इति शेषः । **अनभ्याशमित्य इति ॥** अभ्याशस्समीपम्, अनभ्याशं दूरं, द्वितीयान्तमिदम् । इणधातोः प्रापणार्थकात् 'एतिस्तुशास्' इत्यादिना क्यप् 'गम्यादीनामुपसङ्ख्यानम्' इति द्वितीयासमासः । सुब्लुकि सुम् । दूरं प्रापयितव्यः, ननु समीपमित्यर्थे मनसि निधायाह । **दूरतः परिहर्तव्य इति ॥ भ्राष्ट्राग्न्योरिन्धे इति ॥** सुम् वक्तव्य इति शेषः । **भ्राष्ट्रमिन्ध इति ॥** भ्राष्ट्रन्धानादिभर्जनार्हं पात्रम्, तत् इन्धे तापयतीति भ्राष्ट्रमिन्धः, कर्मण्यपि उपपदसमासः । सुब्लुकि, सुम् । **अग्निमिन्ध इति ॥** अग्निं प्रज्वलयतीत्यर्थः । **गिलेऽगिलस्येति ॥** अगिलस्येति च्छेदः । गिले परे गिलभिन्नस्य सुम् वाच्य इत्यर्थः । **तिमिङ्गिल इति ॥** 'गॄ निगरणे' । तिमिर्मत्स्यविशेषः । ताङ्गिलतीति मूलविभुजादित्वात् कः । 'ऋत इद्धातोः' इति इत्त्वे रपरत्वे 'अचि विभाषा' इति लत्वम्, उपपदसमासः । सुब्लुकि सुम् । **गिलगिल इति ॥** अयमपि मत्स्यविशेषः । **गिलगिले चेति ॥** अगिलस्य सुम् वाच्य इत्यर्थः । **तिमिङ्गिलगिल इति ॥** गिलं गिलतीति गिलगिलः, तिमीनाङ्गिलगिल इति विग्रहः । सम्बन्धसामान्ये षष्ठी । तिमिषु गिलगिल इति निर्धारणसप्तमी । 'वा संज्ञायाम्' इति सप्तमीसमासः । **उष्णभद्रयोः करणे इति ॥** सुम् वाच्य इत्यर्थः । उष्णङ्करणम्, भद्रङ्करणमिति षष्ठीसमासः । **रात्रेः कृति विभाषा ॥** अस्य उत्तरपदाधिकारस्थत्वेन 'प्रत्ययग्रहणे तदन्तग्रहणम्' इति तु इह न भवति । कृतः धातुप्रकृतिकत्वेन रात्रेः कृतः असम्भवात् तदन्तविधिरित्यभिप्रेत्य आह । **कृदन्ते परे इति ॥** रात्रेर्सुम् वा स्यादित्यर्थः । **रात्रिञ्चरः—रात्रिचर इति ॥** सुप्युपपदे 'चरेष्टः' उपपदसमासः, सुब्लुकि पक्षे सुम् । **रात्रिमटः—राट्यट इति ॥** सुप्युपपदे मूलविभुजादित्वात् कः ।

खिति तु 'अरुर्द्विषत्—' (सू २९४२) इति नित्यमेव वक्ष्यते। रात्रिम्मन्यः।

१००९। सहस्य सः संज्ञायाम्। (६-३-७८)

उत्तरपदे। सपलाशम्। 'संज्ञायाम्' किम्। सहयुध्वा।

१०१०। ग्रन्थान्ताधिके च। (६-३-७९)

अनयोः परयोः सहस्य सः स्यादुत्तरपदे। समुहूर्तं ज्योतिषमधीते। सद्रोणा खारी।

१०११। द्वितीये चानुपाख्ये। (६-३-८०)

अनुमेये द्वितीये सहस्य सः स्यात्। सराक्षसीका निशा। राक्षसी साक्षादनुपलभ्यमाना निशयानुमीयते।

१०१२। समानस्य च्छन्दस्यमूर्धप्रभृत्युदर्केषु। (६-३-८४)

समानस्य सः स्यादुत्तरपदे न तु मूर्धादिषु। "अनु भ्राता सगर्भ्यः। अनु सखा सयूथ्यः। यो नः सनुत्यः।" 'तत्र भवः' इत्यर्थे 'सगर्भसयूथ-

---

उपपदसमासः। सुब्लुक् पक्षे मुम्। ननु रात्रिम्मन्यः इत्यत्रापि मुम्विकल्पः स्यादित्यत आह। **अखिदर्थमिदं सूत्रमिति॥ खिति त्विति॥** खिति तु इमं मुम्विकल्पम्बाधित्वा पूर्वविप्रतिषेधेन 'अरुर्द्विषदजन्तस्य' इति नित्यमेव मुमो विधानं कृदधिकारे वक्ष्यते इत्यर्थः। **रात्रिम्मन्य इति॥** 'आत्ममाने खश्च' इति खश्। खशश्शित्त्वेन सार्वधातुकत्वात् तस्मिन् परे 'दिवादिभ्यश्श्यन्' इति श्यनि खित्वान्नित्यं मुमिति भावः। **सहस्य सः॥ उत्तरपदे इति॥** शेषपूरणेनोक्तमिदम्। सह इत्यस्य स इत्यादेशः स्यादुत्तरपदे इत्यर्थः। 'वोपसर्जनस्य' इत्यस्यापवादः। **सपलाशमिति॥** 'तेन सह' इति बहुव्रीहिः। वनविशेषस्य संज्ञेयम्। **सहयुध्वेति॥** 'सहे च' इति क्विप्। असंज्ञात्वान्न सभावः। **ग्रन्थान्ताधिके च॥** ग्रन्थान्तश्च अधिकश्च इति समाहारद्वन्द्वः। **अनयोरर्थयोरिति॥** विद्यमानस्येति शेषः। **समुहूर्तमिति॥** मुहूर्तविधिपरग्रन्थपर्यन्तं ज्योतिःशास्त्रमधीते इत्यर्थः। अन्तवचने अव्ययीभावः। 'अव्ययीभावे चाकाले' इत्यत्र कालपर्युदासादप्राप्ते सभावे ग्रन्थान्तग्रहणम्। **सद्रोणा खारीति॥** द्रोणपरिमाणादधिकेत्यर्थः। मयूरव्यंसकादित्वात् सहशब्दस्याधिकवाचिनस्समासः सभावश्च। **द्वितीये चानुपाख्ये॥** अप्रधानेऽसहाये द्वितीयशब्दो लाक्षणिकः। उपाख्यायते प्रतीयते उपलभ्यते इत्युपाख्यम्, तदन्यदनुपाख्यम्। अनुमेयमिति यावत्। तदाह। **अनुमेय इति॥** सहायवाचिन्युत्तरपदे परत इत्यर्थः। **सराक्षसीका निशेति॥** 'तेन सह' इति बहुव्रीहिः। 'नद्यृतश्च' इति कप्। अनुमेय राक्षसीसहिता निशेत्यर्थः। तदाह। **राक्षसी साक्षादिति॥ समानस्य॥ नतु मूर्धादिष्विति॥** मूर्धन्, प्रभृति, उदर्क, एषु परेषु नेत्यर्थः। **सगर्भ्य इति॥** समाने गर्भे भव

सनुताद्यत्' (सू ३४६०)। 'अमूर्धादिषु' किम्। समानमूर्धा। समानप्रभृतयः। समानोदर्काः। 'समानस्य' इति योगो विभज्यते। तेन सपक्षः साधर्म्यं सजातीयमित्यादि सिद्धमिति काशिका। अथवा सहशब्दः सदृशवचनोऽस्ति। सदृशः सख्या ससखीति यथा। तेनायमस्वपदविग्रहो बहुव्रीहिः। समानः पक्षोऽस्येत्यादि।

१०१३। ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु। (६-३-८५)

एषु द्वादशसूत्तरपदेषु समानस्य सः स्यात्। सज्योतिः। सजनपदः,इत्यादि।

१०१४। चरणे ब्रह्मचारिणि। (६-३-८६)

इत्यर्थः। **सयूथ्य इति** ॥ समाने यूथे भव इत्यर्थः। **सनुत्य इति** ॥ समाने तु ते भवः इत्यर्थः। सर्वत्र 'तद्धितार्थ' इति समासे समानस्य सभावः। **समानमूर्धेति** ॥ समानो मूर्धा यस्येति विग्रहः। **समानप्रभृतय इति** ॥ समानः प्रभृतिरादयवयवो येषामिति विग्रहः। **समानोदर्का इति** ॥ समानः उदर्कः येषामिति विग्रहः। तैत्तिरीये "सजूर्ऋतुभिः, सजूर्विधाभिः, सजूर्वसुभिः, सजूरुद्रैः, सजूरादित्यैः, सजूर्विश्वैर्देवैः, सजूर्देवैः, सजूर्देवैर्वयोनाथैरग्ने त्वा वैश्वानरायाश्विनाध्वर्यु सादयतामिह त्वा" इति मन्त्रास्संसृष्टाः पञ्च पठिताः। पञ्चस्वपि मन्त्रेषु सजूर्ऋतुभिः, सजूर्विधाभिरित्ययम् आद्यवयवः सजूर्देवैर्वयोनाथैरित्यन्तावयवश्च समानः, सजूर् इत्यादिपञ्चानां एकैकस्य क्रमेण एकैकस्मिन् मन्त्रे मध्ये निवेश इति याज्ञिकमर्यादा। ननु लोके सपक्षादिशब्देषु कथं समानस्य सभाव इत्यत आह। **समानस्येति योगो विभज्यते इति** ॥ तथाच समानस्य सः स्यादिति वाक्यान्तरं सम्पद्यते। तत्र छन्दसीत्यभावाल्लोकेऽपि क्वचिद्भवतीति लभ्यते इति भावः। **सपक्ष इति** ॥ समानः पक्षो यस्येति विग्रहः। **साधर्म्यमिति** ॥ समानो धर्मो यस्य सः सधर्मा, समानस्य सभावः। तस्य भावस्साधर्म्यम्। ब्राह्मणादित्वात् ष्यञ्। **सजातीयमिति** ॥ समाना जातिर्यस्य इति विग्रहः। समानस्य "जात्यन्ताच्छ बन्धुनि" इति छः। **इत्यादीति** ॥ सग्राम इत्यादिसङ्ग्रहः। योगविभागस्य भाष्यादृष्टत्वात् युक्तयन्तरम् आह। **अथवेति** ॥ **तेनेति** ॥ तेन सदृशवचनेन सहशब्देन बहुव्रीहिरित्यन्वयः। तथाच 'वोपसर्जनस्य' इति सहस्य सभावः इति भावः। ननु तर्हि समानः पक्षः यस्य इति कथं विग्रहः। सहशब्दस्यैव विग्रहे प्रवेशौचित्यादित्यत आह। **अस्वपद इति** ॥ वृत्तावेव सहशब्दस्सदृशवचन इति भावः। **ज्योतिर्जनपद** ॥ अच्छन्दोऽर्थं वचनमिदम्। **सज्योतिरिति** ॥ समानं ज्योतिर्यस्येति विग्रहः। **एवं सजनपद इत्यादीति** ॥ सरात्रिः, सनाभिः, सनामा, सगोत्रः, सरूपः, सस्थानः, सवर्णः, सवयाः, सवचनः, सबन्धुः। **चरणे ब्रह्मचारिणि** ॥

ब्रह्मचारिण्युत्तरपदे समानस्य सः स्याच्चरणे समानत्वेन गम्यमाने। चरणः शाखा। ब्रह्म वेदः। तदध्ययनार्थं व्रतमपि ब्रह्म, तच्चरतीति ब्रह्मचारी। समानस्य सः सब्रह्मचारी।

१०१५। तीर्थे ये। (६-३-८७)

तीर्थे उत्तरपदे यादौ प्रत्यये विवक्षिते समानस्य सः स्यात्। सतीर्थ्यः। एकगुरुकः। 'समानतीर्थे वासी' (सू १६५८) इति यत्प्रत्ययः।

१०१६। विभाषोदरे। (६-३-८८)

यादौ प्रत्यये विवक्षिते इत्येव। सोदर्यः—समानोदर्यः।

१०१७। दृग्दृशवतुषु। (६-३-८९)

समानस्येति स इति चानुवर्तते। उत्तरपदे इत्यधिकृतम्। तदाह। **ब्रह्मचारिण्युत्तरपदे समानस्य सः स्यादिति** ॥ चरणे इति सप्तमी समानस्येत्यत्रान्वेति। चरणे विद्यमानस्येत्यर्थः। फलितमाह। **चरणे समानत्वेन गम्यमाने इति** ॥ तत्र चरणपदं व्याचष्टे। **चरणश्शाखेति** ॥ वैदिकप्रसिद्धिरेवात्र मूलम्। ब्रह्मचारिपदनिर्वृत्तिमाह। **ब्रह्म वेद इति** ॥ "वेदस्तत्वं तपो ब्रह्म" इत्यमरः। **तच्चरणार्थमिति** ॥ तस्य वेदस्य चरणम् अध्ययनं तच्चरणं व्रतमपि ब्रह्मशब्देन विवक्षितमित्यर्थः। गौण्या वृत्त्येति शेषः। **तच्चरतीति** ॥ तत् व्रतं चरति अनुतिष्ठतीत्यर्थे ब्रह्मचारिशब्द इत्यर्थः। 'सुप्यजातौ' इति णिनिः। **समानस्य स इति** ॥ समानो ब्रह्मचारीति कर्मधारये सति प्रकृतसूत्रेण समानस्य सभावे सति सब्रह्मचारीति रूपमित्यर्थः। समानत्वञ्च वेदद्वारा बोध्यम्। तथाच समानवेदाध्ययनार्थं व्रतचारीति फलितोऽर्थः। भाष्ये तु समाने ब्रह्मणि व्रतं चरतीत्यर्थे चरेर्णिनिः व्रतशब्दस्य लोपश्च अत्र निपात्यते इत्युक्तम्। **तीर्थे ये** ॥ यशब्दात् अकारान्तात्सप्तम्येकवचनम्, अकारो न विवक्षितः, प्रत्यय इति विशेष्यमध्याहार्यम्। 'यस्मिन् विधिः' इति तदादिविधिः। तदाह। **यादौ प्रत्यये इति** ॥ नात्र यप्रत्ययान्ते तीर्थशब्दे परे इति व्याख्यातुं शक्यते। 'समानतीर्थे वासी' इति समानतीर्थशब्दात् 'तद्धितार्थ' इति कृतसमासादेव यप्रत्ययविधानात्। स च यप्रत्ययः अन्तरङ्गे सभावे कृते एव भवति। 'समर्थानाम्प्रथमाद्वा' इति सूत्रेण परिनिष्ठितादेव तद्धितोत्पत्तेर्वक्ष्यमाणत्वात् कृतेऽपि सभावे एकदेशविकृतन्यायेन भूतपूर्वगत्या वा समानतीर्थशब्दसत्त्वात्। अतः यप्रत्ययपरकत्वं समानशब्दस्य कथमित्यत आह। **सतीर्थ्य इति** ॥ समाने तीर्थे वासीत्यर्थः। अत्र सामीप्ये सप्तमी। समानशब्दस्त्वेकपर्यायः। तीर्थशब्दो गुरौ। तदाह। **एकगुरुक इति** ॥ तद्धितार्थे समासप्रवृत्तये तद्धितन्दर्शयति। **समानेति** ॥ "निपानागमयोस्तीर्थमृषिजुष्टजले गुरौ" इत्यमरः। **विभाषोदरे** ॥ उदरशब्दे परे समानस्य सभावो वा स्यादित्यर्थः। **इत्येवेति** ॥ अनुवर्तत एवेत्यर्थः। **दृग्दृशवतुषु** ॥

सदृक्–सदृशः । 'दृक्षे चेति वक्तव्यम्' (वा ३९९२) । सदृक्षः । वतुरुत्तरार्थः ।

१०१८ । इदंकिमोरीश्की । (६-३-९०)

दृग्दृशवतुषु इदम ईश् किमः की स्यात् । ईदृक्-ईदृशः । कीदृक्-कीदृशः । वतूदाहरणं वक्ष्यते । 'दृक्षे चेति वक्तव्यम्' (वा ३९९२) ईदृक्षः । कीदृक्षः । 'आ सर्वनाम्नः' (सू ४३०) । 'दृक्षे च' (वा ३९९२) । तादृक्–तादृशः । तावान्–तादृक्षः । दीर्घः, मत्वोत्वे । अमूदृशः–अमूदृक्–अमूदृक्षः ।

१०१९ । समासेऽङ्गुलेः सङ्गः । (८-३-८०)

अङ्गुलिशब्दात्सङ्गस्य सस्य मूर्धन्यः स्यात्समासे । अङ्गुलिषङ्गः । 'समासे' किम् । अङ्गुलेः सङ्गः ।

१०२० । भीरोः स्थानम् । (८-३-८१)

भीरुशब्दात्स्थानस्य सस्य मूर्धन्यः स्यात्समासे । भीरुष्ठानम् । असमासे तु भीरोः स्थानम् ।

१०२१ । ज्योतिरायुषः स्तोमः । (८-३-८३)

समानस्य स इति शेषः । **सदृक्-सदृश इति** ॥ समानो दृश्यते इत्यर्थे 'समानान्ययोश्च' इति दृशेः क्विन् कञ् च । 'दृक्षे च' इति समानस्य सत्त्वमिति शेषः । **सदृक्ष इति** ॥ 'क्सो सुपि वाच्यः' इति दृशेः क्सः । **वतुरुत्तरार्थ इति** ॥ यत्तदेतेभ्यः परिमाणे वतुपः समानशब्दादसम्भवात् इति भावः । **इदङ्किमोरीश्की** ॥ ईश की इति द्वे पदे । **ईदृक्-ईदृश इति** ॥ इदमिव दृश्यते इत्यर्थे त्यदादिषु दृशेः क्विन्कञौ । ईशादिशत्त्वं सर्वादेशत्वाय वक्ष्यते इति तद्धितप्रकरणे इयान् इत्युदाहरणं वक्ष्यते इत्यर्थः । **दृक्षे चेति** ॥ इदङ्किमोः ईश्की वक्तव्यौ इति शेषः । **आ सर्वनाम्नः इति** ॥ आ इति लुप्तप्रथमाकम् । **तादृक् तादृश इति** ॥ तदिव दृश्यते इत्यर्थे 'त्यदादिषु दृशः' इति क्विन्कञौ । तदो दकारस्य आत्वे सवर्णदीर्घः । **तावानिति** ॥ तत् परिमाणमस्येति विग्रहे यत्तदेतेभ्यः इति वतुप् । **तादृक्ष इति** ॥ तदिव दृश्यते इति विग्रहः । अमूदृगित्यत्र प्रक्रियान्दर्शयति । **दीर्घ इति** ॥ अदसः आत्त्वे कृते सवर्णदीर्घः । ततः ऊत्त्वमत्वे कृते इत्यर्थः । असेरिति व्याख्यानेऽपि अकारेण आकारस्यापि ग्रहणात् ऊत्त्वमत्वे । **समासेऽङ्गुले. सङ्गः** ॥ **भीरोः स्थानम्** ॥ **ज्योतिरायुषस्तोमः** ॥ अत्र त्रिसूत्र्याम् "अङ्गुलेस्सङ्गः, भीरोः स्थानम्, ज्योतिरायुषः स्तोमः' इत्यादर्थे प्रत्यासक्त्या तयोः पदयोः समासे सति उत्तरपदस्थस्य सस्य

आभ्यां स्तोमस्य सस्य मूर्धन्यः समासे। ज्योतिष्टोमः। आयुष्टोमः। 'समासे' किम्। ज्योतिषः स्तोमः।

१०२२। सुषामादिषु च। (८-३-९८)

सस्य मूर्धन्यः। शोभनं साम यस्य सुषामा। सुषन्धिः।

१०२३। एति संज्ञायामगात्। (८-३-९९)

(ग १८२)। सस्य मूर्धन्यः। हरिषेणः। 'एति' किम्। हरिसक्थम्। 'संज्ञायाम्' किम्। पृथुसेनः। 'अगकारात्' किम्। विष्वक्सेनः 'इण्कोः' इत्येव। सर्वसेनः।

१०२४। नक्षत्राद्वा। (८-३-१००)

(ग १८३)। एति सस्य संज्ञायामगकारान्मूर्धन्यो वा। रोहिणीषेणः—रोहिणीसेनः। 'अगकारात्' किम्। शतभिषक्सेनः। आकृतिगणोऽयम्।

१०२५। अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु। (६-३-९९)

अन्यशब्दस्य दुगागमः स्यादाशीरादिषु परेषु। अन्यदाशीः। अन्यदाशा। अन्यदास्था। अन्यदास्थितः। अन्यदुत्सुकः। अन्यदूतिः। अन्यद्रागः। अन्यदीयः। 'अषष्ठी—' इत्यादि किम्। अन्यस्यान्येन वाशीरन्याशीः। 'कारके छे च नायं निषेधः' (वा ५०४८)। अन्यस्य कारकोऽन्यत्कारः। अन्यस्यायमन्यदीयः। गहादेराकृतिगणत्वाच्छः।

षः इत्यर्थः। तङ्ग्रहनयन् प्रत्युदाहरति। **अङ्गुलेः सङ्गः इत्यादि**॥ नेह 'इण्कोः' इत्यनुवर्तते। व्याख्यानात्। **सुषामादिषु च**॥ स्पष्टम्। **एति संज्ञायामगात्**॥ एकारे परे सस्य षः स्यादित्यर्थः। **नक्षत्राद्वा**॥ स्पष्टम्। **अषष्ठ्यतृतीयास्थस्य**॥ अषष्ठ्याम् अतृतीयायाञ्च परतस्तिष्ठतीति अषष्ठ्यतृतीयास्थः तस्य अषष्ठीतृतीयान्तस्येत्यर्थः। अषष्ठीतृतीयास्थस्येत्येव सिद्धे नञ्द्वयोपादानं स्पष्टार्थम्। **आशीरादिष्विति**॥ आशीः, आशा, आस्था, आस्थित, उत्सुक, ऊति, कारक, राग, छ, इत्येतेषु इत्यर्थः। दुकि ककार इत्। उकार उच्चारणार्थः। कित्त्वादन्तावयवः। अन्यदाशीरित्यादयः कर्मधारयाः। **नायं निषेध इति**॥ 'अषष्ठ्यतृतीयास्थस्य' इति निषेधः कारकच्छयोर्नास्तीत्यर्थः। भाष्योक्तमिदम्।

१-२. सुषामाद्यन्तर्गणसूत्रे एते इति तत्त्वबोधिनी।

३. अत्र च "अषष्ठ्यस्तृतीयास्थस्येत्युच्यते। तत्रेदं न सिध्यति—अन्यस्येदमन्यदीयम्। अन्यस्य कारकोऽन्यत्कारकः इति। एवं तर्हि—अविशेषेण 'अन्यस्य दुक् छकारकयोः' ततो वक्ष्यामि 'अषष्ठ्यतृतीयास्थस्याशीराशास्थास्थितोत्सुकोऽतिरागेषु' इति" इति भाष्यमेव मानम्।

१०२६ । अर्थे विभाषा । (६-३-१००)

अन्यदर्थः । अन्यार्थः ।

१०२७ । कोः कत्तत्पुरुषेऽचि । (६-३-१०१)

अजादावुत्तरपदे । कुत्सितोऽश्वः । कदश्वः । कदन्नम् । 'तत्पुरुषे' । किम् । कूष्ट्रो राजा । 'त्रौ च' (वा ३९९८) । कुत्सितास्त्रयः कत्रयः ।

१०२८ । रथवदयोश्च । (६-३-१०२)

कद्रथः । कद्वदः ।

१०२९ । तृणे च जातौ । (६-३-१०३)

कत्तृणम् ।

१०३० । का पथ्यक्षयोः । (६-३-१०४)

कापथम् । काक्षः । अक्षशब्देन तत्पुरुषः, अक्षिशब्देन बहुव्रीहिर्वा ।

१०३१ । ईषदर्थे । (६-३-१०५)

ईषज्जलं काजलम् । अजादावपि परत्वात्कादेशः । काम्लः ।

अर्थे विभाषा ॥ अन्यस्य दुगिति शेषः । **कोः कत्तत्पुरुषेऽचि** ॥ कत् इति च्छेदः । 'शेषपूरणेन' सूत्रं व्याचष्टे । **अजादावुत्तरपदे इति** ॥ **कदश्वः-कदन्नमिति** ॥ 'कुगति' इति समासः । **कूष्ट्रो राजेति** ॥ कुत्सितः उष्ट्रो यस्येति बहुव्रीहित्वात् न कदादेशः । **त्रौ चेति** ॥ त्रिशब्दे परे कदादेशो वक्तव्य इत्यर्थः । उत्तरपदस्याजादित्वाभावात् वचनम् । **रथवदयोश्च** ॥ 'कोः कत्तत्पुरुषे' इति शेषः । **कद्रथ इति** ॥ 'कुगति' इति समासः । वदतीति वदः कद्वदः । **तृणे च जातौ** ॥ तृणशब्दे कोः कत्स्यात् जातौ वाच्यायाम् । **कत्तृणमिति** ॥ तृणजातिविशेषोऽयम् । "अस्त्री कुशं कुथो दर्भः पवित्रमथ कत्तृणम्" इत्यमरः । **का पथ्यक्षयोः** ॥ पथिन्, अक्ष, अनयोः परतः कोः का इत्यादेशः स्यादित्यर्थः । **कापथमिति** ॥ कुत्सितः पन्था इति विग्रहः । 'कुगति' इति समासः । 'ऋक्पूः' इत्यप्रत्ययः । 'पथस्सङ्ख्याव्ययादेः' इति नपुंसकत्वम् । कापथ इति पाठे तु बहुव्रीहिः । काक्षशब्दे समासनन्दर्शयति । **अक्षशब्देन तत्पुरुष इति** ॥ कुत्सितमक्षमिन्द्रियमिति विग्रहे 'कुगति' इति समास इत्यर्थः । **अक्षिशब्देनेति** ॥ कुत्सिते अक्षिणी यस्येति विग्रहे 'बहुव्रीहौ सक्थ्यक्ष्णोः' इत्यजित्यर्थः । **ईषदर्थे** ॥ ईषदर्थे विद्यमानस्य कोः का इत्यादेशः स्यादित्यर्थः । **ईषज्जलं काजलमिति** ॥ ईषत् जलमिति विग्रहे 'कुगति' इति समासः । नित्यसमासत्वात् अस्वपदविग्रहप्रदर्शनम् । कुत्सितः आम्लः काम्लः इत्यत्र 'कोः कत्तत्पुरुषेऽचि' इति

१०३२। विभाषा पुरुषे। (६-३-१०६)

कापुरुषः—कुपुरुषः। अप्राप्तविभाषेयम्। ईषदर्थे हि पूर्वविप्रतिषेधान्नित्यमेव। ईषत्पुरुषः कापुरुषः।

१०३३। कवं चोष्णे। (६-३-१०७)

उष्णशब्दे उत्तरपदे कवं का च वा स्यात्। कवोष्णम्—कोष्णम्—कदुष्णम्।

१०३४। पृषोदरादीनि यथोपदिष्टम्। (६-३-१०९)

पृषोदरप्रकाराणि शिष्टैर्यथोच्चारितानि तथैव साधूनि स्युः। पृषदुदरं पृषोदरम्। तलोपः। वारिवाहको वलाहकः। पूर्वपदस्य वः। उत्तरपदादेश्च लत्वम्।

"भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात्।
गूढोऽत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरम्॥"

कदादेशमाशङ्क्य आह। **अजादावपीति॥ विभाषा पुरुषे॥** कोः का इत्यादेश इति शेषः। **अप्राप्तविभाषेति॥** ननु कोः ईषदर्थकत्वे सति 'ईषदर्थे' इति नित्ये कादेशे प्राप्ते विकल्पसम्भवात् इत्यत आह। **ईषदर्थे हीति॥** वृत्त्यनुसारेणेदमुक्तम्। पूर्वविप्रतिषेधस्य भाष्यानुक्तत्वात्। **कवञ्चोष्णे॥ कवं का च वेति॥** विभाषेत्यनुवृत्तेरिति भावः। उभयाभावे कदादेशः। तथाच रूपत्रयम्। तदाह। **कोष्णम्-कवोष्णम्-कदुष्णमिति॥ पृषोदरादीनि यथोपदिष्टम्॥** आदिशब्दो न प्रभृतिवाची। गणपाठे पृषोदरादिपाठस्यादर्शनात् यथोपदिष्टपदस्य वैयर्थ्याच्च। किन्तु प्रकारवाची। तदाह। **पृषोदरप्रकाराणीति॥** प्रकारः सादृश्यं, तच्च शास्त्रोक्तलोपागमादेशादिरहितत्वेन बोध्यम्। व्याकरणशास्त्रगृहीतानीति यावत्। उपपूर्वको दिशिरुच्चारणार्थः। भावे क्तः। उपदिष्टमुपदेशः उच्चारणं, तदनतिक्रम्य यथोपदिष्टम्। यथार्थपदार्थानतिवृत्तावव्ययीभावः। शिष्टैरित्यध्याहार्यम्। तथाच फलितमाह। **शिष्टैर्यथोच्चारितानि तथैव साधूनीति॥** 'शिष्टास्तु शब्दतत्त्वसाक्षात्कारवन्तः योगिनः, इति भाष्यकैयटयोः स्पष्टम्। **तलोप इति॥** षष्ठीसमासे सुब्लुकि तलोपे 'आद्गुणः' इति भावः। **पूर्वपदस्येति॥** वारिवाहकशब्दे वारिशब्दस्य पूर्वपदस्य वकारस्सर्वादेशः। वाहकशब्दः उत्तरपदं तदादेर्वकारस्य लकारादेश इत्यर्थः। **भवेद्वर्णागमाद्धंस इति॥** हनधातोः पचाद्यचि अनुस्वारागमे हंस इति रूपमित्यर्थः। हनधातोरचि सगागमे 'नश्चापदान्तस्य' इति अनुस्वार इत्यन्ये। **सिंहो वर्णविपर्ययादिति॥** 'हिसि हिंसायाम्' इत्यतः पचाद्यचि इदित्त्वान्नुम्। 'नश्च' इत्यनुस्वारः। हकारस्य सकारः सकारस्य हकारश्च। सिंह इति रूपमित्यर्थः। यद्यपि हंससिंहयोरुणादौ व्युत्पत्तिरुक्ता। तथाप्युणादिसूत्राणां शाकटायनप्रणीतत्वेन शास्त्रान्तरत्वादिह व्युत्पादनं न दोष इत्याहुः। **गूढोत्मा वर्णविकृतेरिति॥** गूढः आत्मा यस्येति बहुव्रीहौ उत्तरपदादेराकारस्य उकारे आद्गुणे रूपम् इति

'दिक्छब्देभ्यस्तीरस्य तारभावो वा' (वा ३९९९) । दक्षिणतारम्—दक्षिणतीरम् । उत्तरतारम्—उत्तरतीरम् । 'दुरो दाशनाशदभध्येषूत्वमुत्तरपदादेः ष्टुत्वं च' (वा ४००१) । दुःखेन दाश्यते दूडाशः । दुःखेन नाश्यते दूणाशः । दुःखेन दभ्यते दूडभः । खल् त्रिभ्यः । दम्भेर्नलोपो निपात्यते । दुःखेन ध्यायतीति दूढ्यः । 'आतश्च—' (सू २८९८) इति कः । ब्रुवन्तोऽस्यां सीदन्तीति बृसी । ब्रुवच्छब्दस्य 'बृ' आदेशः । सदेरधिकरणे ङट् । आकृतिगणोऽयम् ।

१०३५ । संहितायाम् । (६-३-११४)

अधिकारोऽयम् ।

१०३६ । कर्णे लक्षणस्याविष्टाष्टपञ्चमणिभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य । (६-३-११५)

भावः । **वर्णनाशात्पृषोदरमिति** ॥ पृषत् उदरमित्यत्र तकारलोपे सति आद्गुणे पृषोदरमिति भवतीत्यर्थः । **दिक्छब्देभ्यः तीरस्येति** ॥ वार्तिकम् । **दुरो दाशेति** ॥ इदमपि वार्तिकम् । दुर् इत्यस्य दाश, नाश, दभ, ध्य, इत्येतेषु परेषु उत्वम् उत्तरपदादेः ष्टुत्वञ्च वक्तव्यमित्यर्थः । **दूडाश इति** ॥ दुर दाश इति स्थिते रेफस्य उत्वे सवर्णदीर्घः । दाशेः दकारस्य ष्टुत्वेन डकारः । **दूणाश इति** ॥ दुर् नाश इति स्थिते रेफस्य उत्वं सवर्णदीर्घः । नाशेर्नकारस्य ष्टुत्वेन णत्वम् । **दूडभ इति** ॥ दुर् दभ इति स्थिते रेफस्य उत्वं, सवर्णदीर्घः । दभेर्दकारस्य ष्टुत्वेन डकारः । **खल् त्रिभ्य इति** ॥ 'दाश्ट दाने' 'णश अदर्शने' ण्यन्तः । 'दभ हिंसायाम्' इति त्रिभ्यः धातुभ्यः 'ईषदुस्सुषु' इति खलप्रत्यय इत्यर्थः । ननु किङित्परकर्त्वाभावात् कथमिह 'अनिदिताम्' इति नलोपः इत्यत आह । **दम्भेर्नलोपो निपात्यते इति** ॥ **दूढ्य इति** ॥ दुर् ध्यः इति स्थिते रेफस्य उत्वं सवर्णदीर्घः, धस्य ष्टुत्वेन ढत्वम् । **आतश्चेति** ॥ 'ध्यै चिन्तायाम्' 'आतश्चोपसर्गे' इति कप्रत्यये 'आदेच उपदेशे' इति आत्वे 'आतो लोप इटि च' इत्याल्लोपे ध्यशब्द इत्यर्थः । **सदेरिति** ॥ सद्धातोः अधिकरणेऽर्थे ङटि ङित्त्वसामर्थ्यादभस्यापि टेर्लोपे स इति रूपम् । ब्रुवत् स इति स्थिते उपपदसमासे सुब्लुकि ब्रुवच्छब्दस्य बृ इत्यादेशे बृसशब्दात् 'टिड्ढ' इति ङीपि बृसीति रूपमिति भावः । दिक्छब्देभ्यः इत्यारभ्य एतदन्तस्सन्दर्भः पृषोदरादीत्यस्यैव प्रपञ्चः । **आकृतिगणोऽयमिति** ॥ पृषोदरादिरित्यर्थः । तेन कर्तुकामः, कर्तुमनाः, इत्यादिसङ्ग्रहः । **संहितायाम्** ॥ सुगमम् । **कर्णे लक्षणस्य** ॥ दीर्घविधिः । 'ढ्रलोपे' इत्यतस्तदनुवृत्तेः । लक्षणशब्देन यत्पशूनां स्वामिविशेषसम्बन्धज्ञानार्थं दात्रशूलचक्राद्याकारचिह्नं क्रियते तल्लक्षणशब्देन विवक्षितम् । तेन लम्बकर्णः इत्यादौ नातिप्रसङ्गः । **द्विगुणाकर्ण इति** ॥ द्विगुणरेखौ

कर्णशब्दे परे लक्षणवाचकस्य दीर्घः। द्विगुणाकर्णः। 'लक्षणस्य' किम्। शोभनकर्णः। 'अविष्टादीनाम्' किम्। विष्टकर्णः। अष्टकर्णः। पञ्चकर्णः। मणिकर्णः। भिन्नकर्णः। छिन्नकर्णः। छिद्रकर्णः। स्रुवकर्णः। स्वस्तिककर्णः।

१०३७। नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ। (६-३-११६)

क्विबन्तेषु परेषु पूर्वपदस्य दीर्घः। उपानत्। नीवृत्। प्रावृट्। मर्माविध्। नीरुक्। अभीरुक्। ऋतीषट्। परीतत्। 'क्वौ' इति किम्। परिनहनम्। 'विभाषा पुरुषे' (सू १०३२) इत्यतो मण्डूकप्लुत्या 'विभाषा' अनुवर्तते। सा च व्यवस्थिता। तेन गतिकारकयोरेव। नेह। पटुरुक्। तिग्मरुक्।

१०३८। वनगिर्योः संज्ञायां कोटरकिंशुलुकादीनाम्। (६-३-११७)

कोटरादीनां वने परे, किंशुलुकादीनां गिरौ परे च दीर्घः स्यात्संज्ञायाम्।

१०३९। वनं पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः। (८-४-४)

कर्णौ यस्येति विग्रहः। अष्टकर्ण इत्यादेरष्टसङ्ख्यालिपिचिह्नकर्ण इत्यादिरर्थः। अष्टसङ्ख्याकरेखाचिह्नकर्ण इति वा। **नहिवृति ॥ उपानदिति ॥** 'णह बन्धने' 'णो नः' सम्पदादित्वात्कर्मणि क्विप्। उपनह्यते इत्युपानत्। पूर्वपदस्य दीर्घः। 'नहो धः' निवर्तत इति नीवृत्। 'वृतु वर्तने' कर्तरि क्विप्, दीर्घः। प्रवर्षतीति प्रावृट्। 'वृष सेचने' क्विप्, दीर्घः। मर्माणि विध्यतीति मर्माविध्। क्विप्, 'ग्रहिज्या' इति सम्प्रसारणम्। उपपदसमासः, सुब्लुक्, नलोपः, दीर्घः। निरोचते इति नीरुक्, 'रुच दीप्तौ' क्विप्, दीर्घः। ऋतिं सहते इति ऋतीषट्। 'षह मर्षणे' क्विप्, दीर्घः, 'हो ढः' 'सात्पदाद्योः' इति षत्वनिषेधे प्राप्ते 'पूर्वपदात्' (वैदिक.) इति षत्वाभिति हरदत्तः। सुषामादित्वादित्यपरे। परितनोतीति परीतत्। 'तनु विस्तारे' क्विप्, 'गमः क्वौ' इत्यत्र गमादीनामित्युपसङ्ख्यानात् अनुनासिकलोपः। तुक्, दीर्घः, अथ पटुरुक्, तिग्मरुगित्यादौ दीर्घमाशङ्क्य आह। **विभाषेति ॥ पटुरुगिति ॥** पटु रोचते इति विग्रहः। उभयत्र कर्तरि क्विप्। पूर्वपदयोर्गतिकारकान्यतरत्वाभावान्न दीर्घः। व्यवस्थितविभाषाश्रयणे व्याख्यानमेव शरणम्। **वनगिर्योः ॥** वनगिर्योरिति सप्तमी। कोटरश्च किंशुलुकश्च कोटरकिंशुलुकौ, तावादी येषामिति विग्रहः। कोटरादीनां किंशुलुकादीनाञ्चेति लभ्यते। यथासङ्ख्यमन्वयः। तदाह। **कोटरादीनामित्यादिना ॥** पुरगावणमित्युदाहरणानि वक्ष्यन्ते। तत्र णत्वविधिं दर्शयति। **वनं पुरगा ॥** वनमिति षष्ठ्यर्थे प्रथमा इत्यभिप्रेत्य आह। **वनशब्दस्येति ॥ एभ्य इति ॥** पुरगा, मिश्रका, सिध्रका, शारिका, कोटर, अग्र, इत्येतेभ्य एव परस्य उत्तरपदस्य वनशब्दस्य यो नकारस्तस्य णत्वमित्यन्वयः। 'रषाभ्याम्' इत्यतो णो नः इत्यनुवृत्तेः। सूत्रे अग्रे इति सप्तम्यन्तस्यानुकरणम्। नन्विह

वनशब्दस्योत्तरपदस्य एभ्य एव णत्वं नान्येभ्यः । इह कोटरान्ताः पञ्च दीर्घविधौ कोटरादयो बोध्याः । तेषां कृतदीर्घाणां णत्वविधौ निर्देशो नियमार्थः । अग्रेशब्दस्य तु विध्यर्थः । पुरगावणम् । मिश्रकावणम् । सिध्रकावणम् । शारिकावणम् । कोटरावणम् । 'एभ्य एव' इति किम् । असिपत्रवनम् । वनस्याग्रे अग्रेवणम् । राजदन्तादिषु निपातनात्सप्तम्या अलुक् । प्रातिपदिकार्थमात्रे प्रथमा । किंशुलुकागिरिः ।

१०४० । वले । (६-३-११८)

वलप्रत्यये परे दीर्घः स्यात्संज्ञायाम् । कृषीवलः ।

भिन्नपदत्वात् 'अट्कुप्वाङ्' इति णत्वस्याप्राप्तेः अपूर्वविध्यर्थकत्वावश्यकत्वात् एभ्य एवेति कथं नियमलाभ इत्यत आह । **इह कोटरान्ता इति** ॥ इह णत्वविधौ उपात्ताः पुरगा मिश्रका सिध्रका शारिका कोटर इत्येवं पञ्च शब्दाः । त एव वनगिर्योरिति दीर्घविधौ कोटरादिशब्देन विवक्षिताः इत्यर्थः । ततः किमित्यत आह । **तेषामिति** ॥ णत्वविधौ तावत्पुरगादिशब्दाः पञ्च दीर्घान्ता एव निर्दिष्टाः । दीर्घस्तु तेषां संज्ञायामेव वनगिर्योरिति विहितः । एवञ्च एतेषामसंज्ञायां दीर्घाभावात् संज्ञायामेव 'वनं पुरगा' इति णत्वविधिरिति पर्यवस्यति । ततश्च तेषु वनशब्दनकारस्य 'पूर्वपदात्संज्ञायामगः' इत्येव णत्वे सिद्धे पुनरपि कृतदीर्घस्य पुरगादिपञ्चकस्य णत्वविधौ निर्देशो नियमार्थस्सम्पद्यते इत्यर्थः । पुरगावणमित्यत्र 'अगः' इति निषेधस्तु न । अगकारान्तादिति व्याख्यानात् । अतः तस्य विध्यर्थत्वमिति न शङ्क्यम् । पुरगाशब्दस्य आकारान्तत्वात् गकारान्तत्वाभावात् । **अग्रेशब्दस्य त्विति** ॥ णत्वविधौ अग्रेशब्दस्य निर्देशस्तु अग्रेवणशब्दे अपूर्वणत्वविध्यर्थ एव, न तु नियमार्थः । अग्रेवणशब्दस्यासंज्ञात्वादिति भावः । न च पुरगावणशब्दे गकारव्यवधानात् 'पूर्वपदात्संज्ञायाम्' इत्यस्य प्राप्तयसम्भवात् अत्र अपूर्वणत्वविध्यर्थमेव पुरगाग्रहणमिति वाच्यम् । अग इति हि पञ्चमी । गकारान्तात्पूर्वपदात्परस्य णत्वं नेति लभ्यते । पुरगाशब्दस्त्वयम् आकारान्त एव, न तु गकारान्त इति, तत्र अग इति निषेधाप्राप्तया 'पूर्वपदात्संज्ञायाम्' इत्येव सिद्धे पुरगाग्रहणमपि नियमार्थमेवेति भावः । पुरगावणमित्यादयः नरकविशेषाणां संज्ञाः । **असिपत्रवनमिति** ॥ नरकविशेषोऽयम् । अत्र संज्ञात्वेऽपि 'पूर्वपदात्संज्ञायाम्' इति णत्वं न भवति । एभ्य एवेति नियमादिति भावः । **अग्रेवणमिति** ॥ वनशब्दस्य षष्ठ्यन्तस्य अग्रेशब्देन सह षष्ठीसमास इति भावः । ननु तर्हि 'सुपो धातु' इति सप्तम्या अपि लुक् स्यादित्यत आह । **राजदन्तादिष्विति** ॥ अनेन वनशब्दस्य परनिपातोऽपि सूचितः । ननु सप्तम्यर्थप्राधान्यात्सप्तमी स्यादित्यत आह । **प्रातिपदिकेति** ॥ सप्तम्यर्थस्य प्रातिपदिकेऽन्तर्भावादिति भावः । किंशुलुकादीनामुदाहरणमाह । **किंशुलुकागिरिरिति** ॥ अञ्जनागिरिरित्यप्युदाहार्यम् । **वले ॥ कृषीवल इति** ॥ कृषिरस्यास्तीति विग्रहे 'रजःकृष्यासुती' इत्यादिना वलच् ।

१०४१। मतौ बह्वचोऽनजिरादीनाम्। (६-३-११९)

अमरावती। 'अनजिरादीनाम्' किम्। अजिरवती। 'बह्वचः' किम्। व्रीहिमती। 'संज्ञायाम्' इत्येव। नेह। वलयवती।

१०४२। शरादीनां च। (६-३-१२०)

शरावती।

१०४३। इको वहेऽपीलोः। (६-३-१२१)

इगन्तस्य दीर्घः स्याद्वहे। ऋषीवहम्। कपीवहम्। 'इकः' किम्। पिण्डवहम्। 'अपीलोः' किम्। पीलुवहम्। 'अपील्वादीनामिति वाच्यम्' (वा ४००५)। दारुवहम्।

१०४४। उपसर्गस्य घञ्यमनुष्ये बहुलम्। (६-३-१२२)

उपसर्गस्य बहुलं दीर्घः स्याद्घञन्ते परे न, तु मनुष्ये। परीपाकः—परिपाकः। 'अमनुष्ये' किम्। निषादः।

१०४५। इकः काशे। (६-३-१२३)

इगन्तस्योपसर्गस्य दीर्घः स्यात्काशे। वीकाशः। नीकाशः। 'इकः' किम्। प्रकाशः।

१०४६। अष्टनः संज्ञायाम्। (६-३-१२५)

उत्तरपदे दीर्घः। अष्टापदम्। 'संज्ञायाम्' किम्। अष्टपुत्रः।

मतौ॥ मतुप्प्रत्यये परे बह्वचो दीर्घः स्यात्संज्ञायां, न त्वजिरादीनामित्यर्थः। **अमरावतीति**॥ इन्द्रनगर्यास्संज्ञेयम्। अमराः अस्यां सन्तीति विग्रहः। 'मादुपधायाश्च' इति संज्ञायामिति वा मस्य वः। **अजिरवतीति**॥ नदीविशेषस्य संज्ञेयम्। **वलयवतीति**॥ अनजिरादित्वेऽप्य-संज्ञात्वान्न दीर्घ इति भावः। **शरादीनाञ्च**॥ मतौ दीर्घस्संज्ञायामिति शेषः। अबह्वच्कत्वा-त्पूर्वेण न प्राप्तिः। **शरावतीति**॥ शराः अस्यां सन्तीति विग्रहः। नदीविशेषस्य नाम। **इको वहेऽपीलोः**॥ अपीलोरिति च्छेदः। **इगन्तस्येति**॥ पूर्वपदस्येति शेषः। **उपसर्गस्य**॥ **परीपाक इति**॥ पचेर्भावे घञ्, उपधावृद्धिः। 'चजोः कुघिण्ण्यतोः' इति कुत्वम्। **निषाद इति**॥ पुलिन्दो नाम मनुष्यजातिविशेषः। निषीदत्यस्मिन् पापमिति निषादः। 'हलश्च' इत्यधिकरणे घञ्, दौवारिके प्रतीहारशब्दे दीर्घस्त्वप्रामाणिकः। यद्वा प्रतीहारः द्वारम्, तत्स्थत्वात् मनुष्ये गौणः। **इकः काशे**॥ **नीकाश इति**॥ पचाद्यजन्तत्वात् पूर्वेण न प्राप्तिः। **अष्टनः संज्ञायाम्**॥ शेषपूरणेन सूत्रं व्याचष्टे। **उत्तरपदे दीर्घ इति**॥

१०४७ । चितेः कपि । (६-३-१२७)

एकचितीकः । द्विचितीकः ।

१०४८ । नरे संज्ञायाम् । (६-३-१२९)

विश्वानरः ।

१०४९ । मित्रे चर्षौ । (६-३-१३०)

विश्वामित्रः । 'ऋषौ' किम् । विश्वमित्रो माणवकः । 'शुनो दन्त-दंष्ट्राकर्णकुन्दवराहपुच्छपदेषु दीर्घो वाच्यः' (वा ५०४९) । श्वादन्त इत्यादि ।

१०५० । प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्यो-ऽसंज्ञायामपि । (८-४-५)

एभ्यो वनस्य णत्वं स्यात् । प्रवणम । कार्ष्यवणम् । इह षात्परत्वा-णणत्वम् ।

१०५१ । विभाषौषधिवनस्पतिभ्यः । (८-४-६)

अष्टापदमिति ॥ संज्ञात्वमन्वेषणीयम् । **चितेः कपि** ॥ दीर्घ इति विशेषः । **एकचितीक इति** ॥ अग्न्याधेयस्थण्डिलविशेष इति शेषः । एका चितिर्यस्येति विग्रहः । शैषिकः कप् । **द्विचितीक इति** ॥ द्वे चिती यस्येति विग्रहः । **नरे संज्ञायाम्** ॥ विश्वस्य दीर्घ इति शेषः । 'विश्वस्य वसुराटोः' इति पूर्वसूत्रात् विश्वस्येत्यनुवर्तते । **मित्रे चर्षौ** ॥ मित्रशब्दे परे विश्वस्य दीर्घः स्यात् ऋषौ वाच्ये इत्यर्थः । **शुनो दन्तेति** ॥ श्वनशब्दस्य दन्तादिषु परतः दीर्घ इत्यर्थः । **श्वादन्त इति** ॥ शुनो दन्त इति विग्रहः । श्वादंष्ट्रा, षष्ठीसमासः । दीर्घान्त एव दंष्ट्राशब्दो वार्तिके पठ्यत इति केचित् । ह्रस्वान्त इत्यन्ये । श्वादंष्ट्रः । बहुव्रीहिरयम् । श्वाकर्णः, श्वाकुन्दः, श्वावराहः, श्वापुच्छम्, श्वापदः, श्वपुच्छमवनामितमित्यसाध्वेव । **प्रनिरन्तः** ॥ **एभ्य इति** ॥ प्र, निर्, अन्तर्, शर, इक्षु, प्लक्ष, आम्र, कार्ष्य, खदिर, पीयूक्षा, इत्येतेभ्यः इत्यर्थः । **वनस्येति** ॥ 'वनं पुरगा' इत्यतः तदनुवृत्तेरिति भावः । **प्रवणमिति** ॥ प्रकृष्टं वनमिति विग्रहः । प्रादिसमासः । **इहेति** ॥ कार्ष्यवण-मित्यत्र षकारात्परत्वेन णत्वम्, ननु रेफात् परत्वमादाय, अडादिभिन्नषकारेण व्यवधानादिति भावः । एतेन कार्ष्यैतेति तालव्यशकारमध्यपाठः अप्रामाणिक इति सूचितम् । तथा सति निमित्ताभावात् णत्वासम्भवात् अट्कुप्वाङ्भिन्नेन शकारेण व्यवहिततया रेफस्य तन्निमित्तत्वा-सम्भवात् निर्वणं, अन्तर्वणं, शरवणम्, इक्षुवणम्, प्लक्षवणं, आम्रवणं, खदिरवणं, पीयूक्षावणम् । **विभाषौषधि** ॥ **वनस्य णत्वमिति** ॥ ओषधिवनस्पतिभ्यः परस्य वनस्य यो नकारस्तस्य

१. इदं च 'अन्येषामपि-' (६-३-१३७) इति सूत्रप्रपञ्चभूतम् ।

एभ्यो वनस्य णत्वं वा स्यात्। दूर्वावणम्—दूर्वावनम्। शिरीषवणम्—शिरीषवनम्। 'द्यच्त्र्यज्भ्यामेव' (वा ४९८४)। नेह। देवदारुवनम्। 'इरिकादिभ्यः प्रतिषेधो वक्तव्यः' (वा ४९८५)। इरिकावनम्। मिरिकावनम्।

१०५२। वाहनमाहितात्। (८-४-८)

आरोप्य यदुह्यते तद्वाचिस्थान्निमित्तात्परस्य वाहननकारस्य णत्वं स्यात्। इक्षुवाहणम्। 'आहितात्' किम्। इन्द्रवाहनम्। इन्द्रस्वामिकं वाहनमित्यर्थः। वहतेर्ल्युटि वृद्धिरिहैव सूत्रे निपातनात्।

१०५३। पानं देशे। (८-४-९)

पूर्वपदस्थान्निमित्तात्परस्य पानस्य नस्य णत्वं स्यादेशे गम्ये। क्षीरं पानं येषां ते क्षीरपाणा उशीनराः। सुरापाणाः प्राच्याः। पीयत इति पानम्। कर्मणि ल्युट्।

णत्वं वेत्यर्थः। ओषधिभ्यः उदाहरति। **दूर्वावणमिति**॥ "ओषध्यः फलपाकान्ताः" इत्यमरः। अथ वनस्पतिभ्यः उदाहरति। **शिरीषवणमिति**॥ यद्यपि यः पुष्पैर्विना फलति, स एव उदुम्बरादिर्वनस्पतिः। "वानस्पत्यः फलैः पुष्पात्तैरपुष्पाद्वनस्पतिः" इत्युक्तेः। शिरीषवृक्षश्चायं पुष्पफलवानेव न वनस्पतिः। तथापि वनस्पतिशब्देनात्र वृक्षसामान्यं विवक्षितम्। अत एव 'लुपि युक्तवद्व्यक्तिवचने' इति सूत्रे भाष्ये शिरीषवणमित्यत्र शिरीषे वनस्पतित्वं व्यवहृतमिति दिक्। **द्यच्त्र्यज्भ्यामेवेति**॥ परस्य वनस्य णत्वं वाच्यमिति शेषः। **देवदारुवनमिति**॥ प्रत्युदाहरणम्। **इरिकादिभ्य इति**॥ एभ्यः परस्य वनस्य णत्वप्रतिषेध इत्यर्थः। **वाहनमाहितात्**॥ वाहने आधीयते वहनाय यत्, नतु स्वयमेवारोढुं शक्नोति तदाहितम्। तदाह। **आरोप्येति**॥ **निमित्तादिति**॥ रेफषकारान्यतरस्मादित्यर्थः। **वाहननकारस्येति**॥ वाहनस्य यो नकारस्तस्येत्यर्थः। अनेन सूत्रे वाहनमिति षष्ठ्यर्थे प्रथमेति सूचितम्। **इक्षुवाहणमिति**॥ इक्षवो हि वाहनाय परैरारोप्यन्ते, नतु स्वयमेवारोढुं शक्नुवन्ति इति तेषामाहितत्वम्बोध्यम्। आरोपितेक्षुयुक्तं शकटादि वाहनमिति यावत्। **इन्द्रवाहनमिति**॥ ऐरावतादाविन्द्रस्य स्वयमेवारोहणान्नाहितत्वमिति भावः। यदि कदाचित् अन्येन वाहने आरोप्यते तदा आहितत्वमिन्द्रस्याप्यस्त्येव। यदा इन्द्रः स्वयमेवारोहति वाहनं, तदा प्रत्युदाहरणमिति मनसि निधाय आह। **इन्द्रस्वामिकमिति**॥ ननु वहेः करणे ल्युटि कथमुपधादीर्घः। ञ्णित्प्रत्ययपरकत्वाभावादित्यत आह। **वहेर्ल्युडिति**॥ **पानन्देशे**॥ पानमिति षष्ठ्यर्थे प्रथमेत्यभिप्रेत्य आह। **पानस्येति**॥ **उशीनरा इति**॥ देशविशेषे बहुवचनान्तोऽयम्। **ननु पानशब्दस्य भावल्युङन्तत्वे क्षीरम्पानमिति**

१०५४ । वा भावकरणयोः । (८-४-१०)

'पानस्य' इत्येव । क्षीरपानम्—क्षीरपाणम् । 'गिरिनद्यादीनां वा' (वा ४९८९) । गिरिनदी—गिरिणदी । चक्रनितम्बा—चक्रणितम्बा ।

१०५५ । प्रातिपदिकान्तनुम्विभक्तिषु च । (८-४-११)

पूर्वपदस्थान्निमित्तात्परस्य एपु स्थितस्य नस्य णो वा स्यात् । प्रातिपदिकान्ते । माषवापिणौ । नुमि व्रीहिवापाणि । विभक्तौ माषवापेण । पक्षे माषवापिनावित्यादि । 'उत्तरपदं यत्प्रातिपदिकं तदन्तस्यैव णत्वम्' (वा ४९९०) । नेह । गर्गाणां भगिनी गर्गभगिनी । अत एव नुम्ग्रहणं

कथं सामानाधिकरण्यमित्यत आह । **पीयते इति** ॥ **वा भावकरणयोः** ॥ **इत्येवेति** ॥ अनुवर्तत एवेत्यर्थः । भावे करणे च यः पानशब्दः तस्य उक्तविषये णो वा स्यादित्यर्थः । आदेशार्थं वचनम् । **क्षीरपानम्–क्षीरपाणमिति** ॥ क्षीरस्य पानमिति विग्रहः । भावे करणे वा ल्युट् । पानक्रिया पानमात्रं वेत्यर्थः । **गिरिनद्यादीनामिति** ॥ पूर्वपदस्थान्निमित्तात्परस्य उत्तरपदस्थस्य नस्य णो वेत्युपसङ्ख्यानमित्यर्थः । गिरेर्नदीति विग्रहः । **चक्रनितम्बेति** ॥ चक्रमिव नितम्बो यस्यास्सा इति विग्रहः । **प्रातिपदिकान्त** ॥ **पूर्वपदस्थादिति** ॥ 'पूर्वपदात्संज्ञायाम्' इत्यतस्तदनुवृत्तेरिति भावः । **एपु स्थितस्येति** ॥ प्रातिपदिकान्ते नुमि विभक्तौ च विद्यमानस्येत्यर्थः । **वा स्यादिति** ॥ 'वा भावकरणयोः' इत्यतस्तदनुवृत्तेरिति भावः । **प्रातिपदिकान्ते इति** ॥ उदाहरणं वक्ष्यते इति शेषः । **माषवापिणाविति** ॥ माषान् वपते इति विग्रहः । 'बहुलमाभीक्ष्ण्ये' इति जातावपि सुप्युपपदे णिनिः । उपपदसमासः । वापिन्शब्दस्य कृदन्तत्वेन प्रातिपदिकत्वात् तदन्तनस्य णत्वमिति भावः । **नुमीति** ॥ उदाहियते इति शेषः । **व्रीहिवापाणीति** ॥ कृषावलकुलानीति शेषः । व्रीहीन्वपन्ति इति विग्रहः । कर्मण्यण् । व्रीहिवापशब्दान्नपुंसकात् 'जश्शसोरिशः, नपुंसकस्य झलचः' इति नुमि 'सर्वनामस्थाने च' इति दीर्घः । नुमो नस्य णत्वमिति भावः । **विभक्ताविति** ॥ उदाहियते इति शेषः । **माषवापेणेति** ॥ तृतीयाविभक्तिस्थत्वान्नस्य णत्वम् । **इत्यादीति** ॥ णत्वाभावपक्षे माषवापिनौ, माषवापीनि, माषवापेन, इत्युदाहार्यमिति भावः । ननु गर्गाणां भगिनी गर्गभगिनीत्यत्र ङीप्प्रत्ययप्रकृतिभूतभगिन्शब्दात्मकप्रातिपदिकान्तत्वात् नकारस्य णत्वविकल्पः कुतो न स्यादित्यत आह । **उत्तरपदं यत्प्रातिपदिकन्तदन्तस्यैव णत्वमिति** ॥ पूर्वपदेन उत्तरपदमाक्षिप्तम् । तच्च प्रातिपदिकस्यैव विशेषणम्, नतु तदन्तस्य, नापि नुम्विभक्त्योः । असम्भवादिति भावः । **नेहेति** ॥ गर्गाणाम्भगिनी गर्गभगिनीति षष्ठीसमासे भगिनीशब्द उत्तरपदं, नतु तत्प्रातिपदिकं, प्रत्ययान्तत्वात् । लिङ्गविशिष्टपरिभाषया प्रातिपदिकग्रहणेन भगिनीशब्दस्य ग्रहणेऽपि तदन्तम् ईकार एव, नतु नकारः, अतो न तस्येदं पाक्षिकं णत्वमिति भावः । प्रातिपदिकस्योत्तरपदत्वविशेषणं सूत्रकारस्य सम्मतमित्याह ।

कृतम्। अङ्गस्य नुम्विधानात्तद्भक्तो हि नुम्। न तूत्तरपदस्य। किं च। 'प्रहिण्वन्' इत्यादौ हिवेर्नुमो णत्वार्थमपि नुम्ग्रहणम्। 'प्रेन्वनम्' इत्यादौ तु क्षुभ्नादित्वान्न। युवादेर्न। (वा ४९९९) रम्ययूना। परिपक्वानि। 'एकाजुत्तरपदे णः' (सू ३०७)। 'नित्यम्' इत्युक्तम्। वृत्रहणौ। हरिं मानयतीति क्विपि हरिमाणी। नुमि, क्षीरपाणि। विभक्तौ, क्षीरपेण। रम्यविणा।

अत एवेति ॥ प्रातिपदिकस्य उत्तरपदत्वविशेषणादेव सूत्रकारेण कृतं नुम्ग्रहणमर्थवत्। अन्यथा तदनर्थकमित्यर्थः। कुत इत्यत आह। **अङ्गस्येति** ॥ 'नपुंसकस्य झलचः' इति नुम्विधौ अङ्गस्येत्यनुवृत्तम्। तथाच झलन्तस्याजन्तस्य चाङ्गस्य क्लीबस्य नुम् स्यात् सर्वनामस्थाने इत्यर्थो लभ्यते। माषवापाणीत्यत्र तु सर्वनामस्थानं प्रति माषवापशब्दोऽङ्गम्। तस्य माषवापशब्दस्य विहितो नुमागमस्तदवयव एव भवति, नतु उत्तरपदभूतवापशब्दस्यैवावयवः। तथाच उत्तरपदभूतप्रातिपदिकान्तत्वाभावात् 'प्रातिपदिकान्त' इत्यनेन णत्वविकल्पस्याप्राप्तौ नुम्ग्रहणम्। प्रातिपदिकस्य उत्तरपदत्वविशेषणाभावे तु माषवापशब्दान्तावयवस्यापि नुमः वापेति प्रातिपदिकान्तावयवत्वस्य सत्त्वात् 'प्रातिपदिकान्त' इत्येव सिद्धे नुम्ग्रहणं व्यर्थं स्यादित्यर्थः। तदेवं प्रातिपदिकस्य उत्तरपदत्वविशेषणे नुम्ग्रहणं लिङ्गमिति स्थितम्। वस्तुतस्तु नेदं लिङ्गमित्याह। **किञ्च, प्रहिण्वन्नित्यादौ हिवेर्नुमो णत्वार्थमपि नुम्ग्रहणमिति** ॥ किञ्चेति विशेषप्रदर्शने। 'हिवि प्रीणने' भ्वादिः, इदित्त्वात् नुम्, लटः शत्रादेशः। माषवापाणीत्यत्र नुमो नस्य प्रातिपदिकान्तत्वेऽपि प्रहिण्वन्शब्दे नुमो नस्य प्रातिपदिकान्तत्वाभावात् 'प्रातिपदिकान्त' इत्यनेन णत्वविकल्पस्याप्राप्तेस्तदर्थं नुम्ग्रहणमावश्यकम्। अतः उत्तरपदत्वस्य प्रातिपदिकविशेषणत्वे कथं नुम्ग्रहणं लिङ्गं स्यात्। तस्मादुत्तरपदविशेषणे भाष्यमेव शरणमिति भावः। ननु माषवापिणावित्यत्र वापिन् इति प्रातिपदिकस्य कथमुत्तरपदत्वम्। 'गतिकारकोपपदानां कृद्भिस्सह समासवचनम्' इति सुबुत्पत्तेः प्रागेव समासप्रवृत्तेरिति चेन्न। उत्तरपदशब्दस्य समासचरमावयवे रूढत्वादित्यलम्। ननु 'इवि प्राप्तौ' इदित्त्वान्नुम्। ल्युटि अनादेशः। प्रकृष्टमिन्वनमिति प्रादिसमासे नुमो नकारस्य णत्वविकल्पः स्यादित्यत आह। **प्रेन्वनमिति** ॥ **युवादेर्नेति** ॥ उक्तणत्वविकल्प इति शेषः। वार्तिकमिदम्। **रम्ययूनेति** ॥ रम्यश्चासौ युवा च तेनेति विग्रहः। प्रातिपदिकान्तनकारत्वात्प्राप्तिः। **परिपक्वानीति** ॥ इह नुमो नकारस्य 'प्रातिपदिकान्त' इति विकल्पं बाधित्वा 'कुमति च' इति नित्यं णत्वं प्राप्तम्। तदिह युवादित्वान्निषिध्यते। **एकाजुत्तरपदे णः** ॥ अजन्तस्त्रीलिङ्गे पुनर्भूशब्दनिरूपणे व्याख्यातमपि प्रकरणानुरोधात् स्मर्यते। **नित्यमित्युक्तमिति** ॥ आरम्भसामर्थ्यान्नित्यमिदं णत्वमिति तत्रैवोक्तमित्यर्थः। **हरिमाणीति** ॥ मनेर्ण्यन्तात् 'क्विप् च' इति क्विपि 'गतिकारकोपपदानाम्' इति सुबुत्पत्तेः प्राक् समासः। नान्तत्वात् ङीप्। अत्र मान् इति प्रातिपदिकमुत्तरपदं तदन्तत्वात् नकारस्य णत्वविकल्पे प्राप्ते नित्यं णत्वम्। **नुमीति** ॥ उदाह्रियते इति शेषः। **क्षीरपाणीति** ॥ कर्मण्युपपदे पाधातोः

१०५६ । कुमति च । (८-४-१३)

कवर्गवत्युत्तरपदे प्राग्वत् । हरिकामिणौ । हरिकामाणि । हरिकामेण ।

१०५७ । पदव्यवायेऽपि । (८-४-३८)

पदेन व्यवधानेऽपि णत्वं न स्यात् । माषकुम्भवापेन । चतुरङ्गयोगेन । 'अतद्धित इति वाच्यम्' (वा ५०१५) । आर्द्रगोमयेण । शुष्कगोमयेण ।

'आतोऽनुपसर्गे कः' इति कः, 'आतो लोप इटि च' इत्याकारलोपः । क्षीरपशब्दाज्जश्शसोरिशः । अजन्तलक्षणो नुम्, दीर्घः । तस्य नित्यं णत्वम् । **विभक्ताविति** ॥ उदाह्रियते इति शेषः । **क्षीरपेणेति** ॥ विभक्तिस्थत्वान्नस्य नित्यं णत्वम् । विभक्ताबुदाहरणान्तरमाह । **रम्यविणेति** ॥ विः पक्षी, रम्यश्चासौ विश्च तेनेति विग्रहः । नचात्र 'पदव्यवायेऽपि' इति निषेधशङ्क्यः । किमिह प्रत्ययलक्षणेन अन्तर्वर्तिनीं विभक्तिमाश्रित्य 'सुप्तिङन्तम्' इति पदत्वमभिमतम्, उत तृतीयाविभक्तौ परतः 'स्वादिषु' इति पदत्वम् । नाद्यः । 'उत्तरपदत्वे चापदादिविधौ' इति प्रत्ययलक्षणप्रतिषेधात् । न द्वितीयः । 'स्वादिषु' इत्यनेन हि रम्यविशब्दस्यैव पदत्वं लभ्यते, नतु विशब्दस्य । तृतीयाविभक्तेस्समुदायादेव विधानात् । अत एव पुनर्भूणामित्यत्र नामि भूतशब्दमात्रस्य पदत्वाभावात् 'पदव्यवायेऽपि' इति निषेधाभावाण्णत्वमिति प्राञ्चः । अत्र यद्वक्तव्यं तत् 'पदव्यवायेऽपि' इत्यत्रानुपदमेव वक्ष्यते । **कुमति च** ॥ **प्राग्वदिति** ॥ प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्य नित्यं णत्वं स्यादित्यर्थः । अनेकाजुत्तरपदार्थमिदम् । **हरिकामिणाविति** ॥ 'बहुलमाभीक्ष्ण्ये' इति णिनिः । प्रातिपदिकान्तत्वाण्णत्वम् । **हरिकामाणीति** ॥ अजन्तलक्षणनुमो नित्यं णत्वम् । **हरिकामेणेति** ॥ विभक्तिस्थस्योदाहरणम् । **पदव्यवायेऽपि** ॥ **पदेन व्यवधाने इति** ॥ पदेनेत्यनन्तरं निमित्तकार्यिणोरिति शेषः । **न स्यादिति** ॥ 'न भाभूपूकमिगमि' इत्यतस्तदनुवृत्तेरिति भावः । **माषकुम्भवापेनेति** ॥ माषाणाङ्कुम्भो माषकुम्भः, तस्य वाप इति षष्ठीसमासः । अत्र निमित्तकार्यिणोष्षकारनकारयोः कुम्भपदेन व्यवधानात् न णत्वम् । **चतुरङ्गयोगेनेति** ॥ चत्वारि अङ्गानि रथगजतुरगपदातिरूपाणि यस्य तत् चतुरङ्गं सैन्यम्, तेन योग इति विग्रहः । अत्र निमित्तकार्यिणोरङ्गपदेन व्यवधानान्न णत्वम् । उभयत्राऽपि कुम्भशब्दस्य अङ्गशब्दस्य च प्रत्ययलक्षणेन अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वम्बोध्यम् । 'उत्तरपदे चापदादिविधौ प्रतिषेधः' इति निषेधस्तु नात्र प्रवर्तते । उत्तरखण्डस्य कार्यभाक्के सत्येव तत्प्रवृत्तेः । अत एव 'न लुमताङ्गस्य' इत्यत्र परमवाचेत्येव तस्याः परिभाषाया उदाहरणमुक्तम्भाष्ये । अत्र हि वाक्छब्दस्य उत्तरपदस्य कुत्वकार्यभाक्कमस्तीति तस्य अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वाभावात् कुत्वं न भवति । अत एव च 'कुमति च' इति सूत्रे भाष्ये माषाणाङ्कुम्भः माषकुम्भः माषकुम्भस्य वापो माषकुम्भवापः माषकुम्भवापेनेत्यत्र 'पदव्यवायेऽपि' इति निषेधप्रवृत्तये 'प्रातिपदिकान्त' इति णत्वप्रवृत्तिरुपन्यस्ता सङ्गच्छते । नचैवं सति रम्यविणा इत्यत्र

१०५८। कुस्तुम्बुरूणि जातिः। (६-१-१४३)

अत्र सुण्निपात्यते। कुस्तुम्बुरुर्धान्याकम्। क्लीबत्वमतन्त्रम्। 'जातिः' किम्। कुतुम्बुरूणि। कुत्सितानि तिन्दुकीफलानीत्यर्थः।

१०५९। अपरस्पराः क्रियासातत्ये। (६-१-१४४)

सुण्निपात्यते। अपरस्पराः सार्था गच्छन्ति। सततमविच्छेदेन गच्छन्तीत्यर्थः। 'क्रिया–' इति किम्। अपरपरा गच्छन्ति। अपरे च परे च सकृदेव गच्छन्तीत्यर्थः।

१०६०। गोष्पदं सेवितासेवितप्रमाणेषु। (६-१-१४५)

सुट् सस्य षत्वञ्च निपात्यते। गावः पद्यन्तेऽस्मिन्देशे स गोभिः सेवितो गोष्पदः। असेविते। अगोष्पदान्यरण्यानि। प्रमाणे। गोष्पदमात्रं क्षेत्रम्। 'सेवित–' इत्यादि किम्। गोः पदं गोपदम्।

विभक्त्युत्तरखण्डस्य कार्यभाक्त्वाभावात् 'उत्तरपदत्वे चापदादिविधौ' इति प्रत्ययलक्षणनिषेधस्याप्रवृत्तौ अन्तर्वर्तिविभक्त्याश्रयणेन पदत्वात् 'पदव्यवायेऽपि' इति णत्वनिषेधस्यादिति वाच्यम्। पदे परे यत्पदं तेन व्यवाये णत्वं नेत्यर्थस्यैव भाष्यसम्मतत्वात्। तच्च अनुपदमेव स्पष्टीभविष्यति। रम्यविणेत्यत्र च विशब्दस्यान्तर्वर्तिविभक्त्या पदत्वेऽपि तस्य पदपरकत्वाभावान्न णत्वनिषेधः। एतेन पुनर्भूणामित्यत्रापि णत्वं निर्बाधम्। **अतद्धिते इति** ॥ अतद्धिते परे यत्पदं तेन व्यवधाने अयं निषेधः, नतु तद्धितपरकपदेनेत्यर्थः। **आर्द्रगोमयेणेति** ॥ गोः पुरीषं गोमयं 'गोश्च पुरीषे' इति गोशब्दात् षष्ठ्यन्तात् मयट्, तद्धितः, तद्धितान्तप्रातिपदिकावयवत्वात् सुपो लुक्। आर्द्रगोमयमिति कर्मधारयः। यद्यपि प्रत्ययलक्षणेन अन्तर्वर्तिनीं विभक्तिमाश्रित्य गोशब्दः मयटि पदम्। तथापि तस्य तद्धितपरकतया तेन व्यवधानेऽपि रेफात्परस्य णत्वं भवत्येव। अस्मिन् प्रकरणे अट्कुप्वाङ्नुम्व्यवायस्य अबाधकत्वात्। **शुष्कगोमयेणेति** ॥ षात्परस्योदाहरणम्। भाष्ये तु 'पदान्तस्य' इति पूर्वसूत्रात्पदग्रहणानुवृत्तिमभिप्रेत्य पदे परतः पदेन व्यवाये णत्वं नेत्याश्रित्य वार्तिकमिदं प्रत्याख्यातम्। अथ 'सुट् कात्पूर्वः' इत्यतः सुडित्यनुवृत्तौ कतिचित्सूत्राणि व्याख्यातुमुपक्रमते। **कुस्तुम्बुरूणि** ॥ **अत्रेति** ॥ जातिविशेषे वाच्ये कुस्तुम्बुरुशब्दः ससुट्को निपात्यते इत्यर्थः। **कुस्तुम्बुरुर्धान्याकमिति** ॥ गुल्माविशेषे प्रसिद्धः। **क्लीबत्वमतन्त्रमिति** ॥ अविवक्षितमित्यर्थः। वचनमप्यतन्त्रमिति बोध्यम्। **कुतुम्बुरूणीति** ॥ धान्याकजातिवाचकत्वाभावात् न सुडिति भावः। तदाह। **कुत्सितानि तिन्दुकीफलानीत्यर्थः इति** ॥ तुम्बुरुशब्दस्य तिन्दुकवाचकत्वे कोशो मृग्यः। **अपरस्पराः क्रियासातत्ये** ॥ स्पष्टम्। **गोष्पदम्** ॥ असेविते गोष्पदशब्दस्य वृत्त्यसम्भवात् नञ्पूर्वकमुदाहरति। **अगोष्पदानीति** ॥ गवां सञ्चरो यत्र नैव सम्भवति तत्रापि सुडिति भावः। **गोष्पदमात्रं क्षेत्रमिति** ॥

१०६१ । आस्पदं प्रतिष्ठायाम् । (६-१-१४६)

आत्मयापनाय स्थाने सुट् निपात्यते । आस्पदम् । 'प्रतिष्ठायाम्' इति किम् । आ पदात् आपदम् । (आपदापदम्) ।

१०६२ । आश्चर्यमनित्ये । (६-१-१४७)

अद्भुते सुट् । आश्चर्यं यदि स भुञ्जीत । 'अनित्ये' किम् । आचर्यं कर्म शोभनम् ।

१०६३ । वर्चस्केऽवस्करः (६-१-१४८)

कुत्सितं वर्चो वर्चस्कमन्नमलम् । तस्मिन् सुट् । अवकीर्यत इत्यवस्करः । 'वर्चस्के' किम् । अवकरः ।

१०६४ । अपस्करो रथाङ्गम् । (६-१-१४९)

अपकरोऽन्यः ।

१०६५ । विष्किरः शकुनौ वा । (६-१-१५०)

पक्षे विकिरः । 'वावचनेनैव सुड्विकल्पे सिद्धे विकिरग्रहणं तस्यापि शकुनेरन्यत्र प्रयोगो मा भूत्' इति वृत्तिः । तन्न । भाष्यविरोधात् ।

क्षेत्रस्याल्पप्रमाणत्वमनेन ज्ञाप्यते । अतः गोष्पदात् क्षेत्रस्याधिक्येऽपि न क्षतिः । **आस्पदं प्रतिष्ठायाम्** ॥ **आत्मेति** ॥ आत्मयापनं शरीरसंरक्षणं, तदर्थं यत् स्थानं तस्मिन् गम्ये सुडित्यर्थः । **आपदादापदमिति** ॥ आ पदादिति विग्रहे अव्ययीभावे आपदमिति भवतीत्यर्थः । आपदापदमिति पाठे तु आपदमित्यस्य आपादमित्यर्थः । **आश्चर्यमनित्ये** ॥ अद्भुते गम्ये आङ्पूर्वकस्य चरेस्सुट् । 'चरेराङि चाश्चर्ये' इति यत् । अनित्यग्रहणमपनीय अद्भुते इति वक्तव्यमिति वार्तिकमभिप्रेत्य आह । **अद्भुते सुडिति** ॥ तेन आश्चर्यं नीला द्यौः आश्चर्यमन्तरिक्षं यदवन्धानि नक्षत्राणि न पतन्तीत्यादिसङ्ग्रहः । अनित्ये इत्यनेन कादाचित्कतया अद्भुतं लक्ष्यते इत्युक्ते तु एतन्न सिध्येत् । **वर्चस्केऽवस्करः** ॥ "मूत्रं प्रस्राव उच्चारावस्करौ शमलं शकृत् । गूथं पुरीषं वर्चस्कमस्त्री विष्ठाविषौ स्त्रियाम्" इत्यमरः । **अपस्करो** ॥ "स्याद्रथाङ्गमपस्करः" इत्यमरः । "चक्रं रथाङ्गम्" इति च । **विष्किरः** ॥ विकिरतीति विकिरः । 'कॄ विक्षेपे' 'इगुपधज्ञा' इति कः । शकुनौ गम्ये सुट्टा, 'परिनिविभ्यः' इति षत्वम् । "नगौकोवाजिविकिरविविष्किरपतत्रयः" इत्यमरः । **वावचनेनैवेति** ॥ वृत्तिग्रन्थे 'विष्किरः शकुनौ विकिरो वा'इति सूत्रपाठः । तत्र वाग्रहणादेव सुड्विकल्पे सिद्धे विकिरग्रहणं विष्किरः विकिर इति शकुनावेवेति नियमार्थम् । अतश्शकुनेरन्यत्र उभयोरपि शब्दयोः प्रयोगो नास्तीति लभ्यते इत्यर्थः । भाष्ये हि 'विष्किरश्शकुनौ वा' इति सूत्रमपठित्वा वाग्रहणेन सुड्विकल्पः, नतु शकुनेरन्यत्र

१०६६। प्रतिष्कशश्च कशेः। (६-१-१५२)

'कश गतिशासनयोः' इत्यस्य प्रतिपूर्वस्य पचाद्यचि सुट् निपात्यते षत्वञ्च। सहायः पुरोयायी वा प्रतिष्कश इत्युच्यते। 'कशेः' किम्। प्रतिगतः कशां प्रतिकशोऽश्वः। यद्यपि कशेरेव कशा, तथापि कशेरिति धातोर्ग्रहणमुपसर्गस्य प्रतेर्ग्रहणार्थम्। तेन धात्वन्तरोपसर्गान्न।

१०६७। प्रस्कण्वहरिश्चन्द्रावृषी। (६-१-१५३)

हरिश्चन्द्रग्रहणममन्त्रार्थम्। 'ऋषी' इति किम्। प्रकण्वो देशः। हरिचन्द्रो माणवकः।

१०६८। मस्करमस्करिणौ वेणुपरिव्राजकयोः। (६-१-१५४)

मकरशब्दोऽव्युत्पन्नः, तस्य सुडिनिश्च निपात्यते। 'वेणु–' इति किम्। मकरो ग्राहः। मकरी समुद्रः।

१०६९। कास्तीराजस्तुन्दे नगरे। (६-१-१५५)

ईषत्तीरमस्यास्तीति कास्तीरं नाम नगरम्। अजस्येव तुन्दमस्येति अजस्तुन्दं नाम नगरम्। 'नगरे' किम्। कातीरम्। अजतुन्दम्।

१०७०। कारस्करो वृक्षः। (६-१-१५६)

(ग १५३)। कारं करोतीति कारस्करो वृक्षः। अन्यत्र कारकरः। केचित्तु[1] कस्कादिष्विदं पठन्ति, न सूत्रेषु।

विकिरशब्दस्य प्रयोगो नेति स्थितम्। अन्यत्रापि "विकिरं वैश्वदेविकम्" इत्यत्र दर्शनादिति भावः। **प्रतिष्कशश्च कशेः**॥ कशेरिति कश इत्यत्रान्वेति। तथाच कशधातोः निष्पन्नस्य कशशब्दस्य प्रतेः परस्य सुट् स्यादित्यर्थः। **कशेरेवेति**॥ कशधातोरेव कशशब्दो निष्पन्न इत्यर्थः। **धात्वन्तरेति**॥ प्रतिगतः कशाः प्रतिकश इत्यत्र गतिं प्रत्येव प्रतिरुपसर्गः, नतु कशिम्प्रति। 'यत्क्रियायुक्ताः प्रादयः' इति नियमादित्यर्थः। **प्रस्कण्वहरिश्चन्द्रावृषी॥ अमन्त्रार्थमिति**॥ मन्त्रेतु 'ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे' इति पूर्वसूत्रेणैव सिद्धमिति भावः। तत्सूत्रं वैदिकप्रक्रियायां व्याख्यास्यते। **मस्करमस्करिणौ**॥ यथासङ्ख्यमन्वयः। मस्करिग्रहणात्परिव्राजक एव मस्करिशब्दः। अन्यत्र तु मकरीत्येवेत्याहुः। **कास्तीराजस्तुन्दे**॥ कास्तीरशब्दः अजस्तुन्दशब्दश्च नगरे निपात्येते इत्यर्थः। **कारस्करो वृक्षः**॥ कारङ्करोतीति

---

१. केचित्त्विति। अत्रारुचिबीजं पारस्करादिषु प्रत्यक्षतो दर्शनम्, प्रकरणाद्विसर्गस्थान एव तेन सत्वविधानञ्च। न सूत्रेष्विति। न गणसूत्रेषु इत्यर्थः। एवञ्च पारस्कराद्यन्तर्गणसूत्रमिति बोध्यम् इति शेखरः। अयञ्च 'कस्कादिषु' इति क्वाचित्कं पाठमाश्रित्य। वस्तुतस्तु 'पारस्करादिषु' इति पाठः। मूलसन्दर्भस्त्वारस्यात्, काशिकासंवादाच्च।

१०७१ । पारस्करप्रभृतीनि च संज्ञायाम् । (६-१-१५७)

एतानि ससुट्कानि निपात्यन्ते नाम्नि । पारस्करः । किष्किन्धा । 'तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च' (वा ३७१३) । तात्पूर्वं चर्त्वेन दकारो बोध्यः । तद्बृहतोर्दकारतकारौ लुप्येते । करपत्योस्तु सुट् । 'चोरदेवतयोः' इति समुदायोपाधिः । तस्करः । बृहस्पतिः । 'प्रायस्य चित्तिचित्तयोः' (वा ३७१४) । प्रायश्चित्तिः । प्रायश्चित्तम् । वनस्पतिरित्यादि । आकृतिगणोऽयम् ।

इति समासाश्रयविधिप्रकरणम् ।

विग्रहः । 'कृञो हेतुताच्छील्ये' इति टः । **पारस्करप्रभृतीनि च ॥ पारस्कर इति ॥** पारङ्करोतीति विग्रहः । पूर्ववट्टः । **किष्किन्धेति ॥** किमपि वानरसैन्यन्धत्ते इति किष्किन्धा । 'आतोऽनुपसर्गे कः' । टाप्, निपातनात् किमो द्वित्वम् । मलोपः, सुट्, षत्वञ्च । रूढशब्दा एते कथञ्चिद्व्युत्पाद्यन्ते । एषामवयवार्थो न विचारणीयः । **तद्बृहतोरिति ॥** पारस्करादिगणसूत्रमेतत् । तत्शब्दे तकारस्यान्त्यस्याभावात् आह । **तात्पूर्वमिति ॥** तलोपश्चेत्यत्र तकारात्पूर्वमित्यर्थः । तत् चौर्यङ्करोतीति विग्रहः । 'कृञो हेतुताच्छील्ये' इति टः । **बृहस्पतिरिति ॥** बृहती वाक् तस्याः पतिः इति विग्रहः । पुंवत्त्वम्, तलोपः, सुट्, "वाघ्नि बृहती तस्या एषः पतिः" इति च्छन्दोगब्राह्मणम् । **प्रायस्य चित्तिचित्तयोः इति ॥** गणसूत्रमिदम् । प्रायस्य चित्तिः चित्तं वेति विग्रहः । "प्रायम्पापं विजानीयाच्चित्तन्तस्य विशोधनम्" इति स्मृतिः । **वनस्पतिरिति ॥** वनस्य पतिरिति विग्रहः । **आकृतिगणोऽयमिति ॥** तेन शतात्पराणि परश्शतानीत्यादि सिद्धम् ।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायां समासाश्रयविधिप्रकरणं समाप्तम् ।



श्रीरस्तु ।

॥ अथ तद्धिताधिकारप्रकरणम् ॥

अथापत्यादिविकारान्तार्थसाधारणप्रत्ययाः ।

१०७२ । समर्थानां प्रथमाद्वा । (४-१-८२)

इदं पदत्रयमधिक्रियते । 'प्राग्दिशः—' (सू १९४७) इति यावत् । सामर्थ्यं परिनिष्ठितत्वम् । कृतसन्धिकार्यत्वमिति यावत् ।

१०७३ । प्राग्दीव्यतोऽण् । (४-१-८३)

'तेन दीव्यति—' (सू १५५०) इत्यतः प्रागणधिक्रियते ।

अथ तद्धितापत्यादिविकारान्तार्थसाधारणप्रत्ययाः—**समर्थानां प्रथमाद्वा** ॥ विधेयस्यादर्शनान्नायं स्वतन्त्रविधिरिति मत्वा आह । **इदं पदत्रयमधिक्रियते इति** ॥ स्वरितत्वप्रतिज्ञाबलादिति भावः । अधिकारस्योत्तरावधिमाह । **प्राग्दिश इति यावदिति** ॥ 'प्राग्दिशो विभक्तिः' इति सूत्रम् उत्तरावधिरित्यर्थः । 'समर्थानाम्' इति निर्धारणषष्ठी । प्राथम्यञ्च 'तस्यापत्यम्' इत्यादितत्तत्सूत्रेषु प्रथमोच्चारितत्वम् । समर्थानां मध्ये प्रथमोच्चारितादित्यर्थः । 'समर्थात्प्रथमाद्वा' इति सुवचम् । केचित्तु बहुवचनबलादनेकसमर्थसमवाय एवास्य प्रवृत्तिः । एवञ्च 'प्राग्दिशः' इत्यादिषु स्वार्थिकप्रत्ययविधिषु नास्य प्रवृत्तिरिति लभ्यते इत्याहुः। ननु सुबन्तात्तद्धितोत्पत्तेर्वक्ष्यमाणत्वेन तद्धितविधीनां पदविधितया 'समर्थः पदविधिः' इति परिभाषयैव एकार्थीभावरूपसामर्थ्यलाभादिह समर्थग्रहणं व्यर्थमित्यत आह । **सामर्थ्यं परिनिष्ठितत्वमिति** ॥ समर्थः पटुः शक्त इति पर्यायाः । शक्तत्वञ्च कार्योत्पादनयोग्यत्वम् । शब्दस्य च कार्यमर्थप्रतिपादनमेव । तच्छक्तत्वञ्च कृतेष्वेव सन्धिकार्येषु सम्भवति । तथाच कृतसन्धिकार्यत्वमेव सामर्थ्यमिह पर्यवस्यति । तदाह । **कृतसन्धिकार्यत्वमिति यावदिति** ॥ **प्राग्दीव्यतोऽण्** ॥ 'तेन दीव्यति खनति जयति जितम्' इति सूत्रस्थदीव्यतिशब्दैकदेशस्यानुकरणमिह दीव्यच्छब्दः । तेन च तद्घटितं तत्सूत्रं लक्ष्यते । तदाह । **तेन दीव्यतीत्यतः प्रागणधिक्रियते इति** ॥ तथाच तस्यापत्यमित्याद्युत्तरसूत्रेषु केवलमर्थनिर्देशपरेषु विधेयप्रत्ययविशेषासंयुक्तेषु किम्भवतीत्याकाङ्क्षायामणित्युपतिष्ठते इति लभ्यते । कस्माद्भवतीत्याकाङ्क्षायां 'समर्थात्प्रथमात्' इति प्रकृतिविशेषो लभ्यते । यत्र तु विधेयः प्रत्ययविशेषः श्रूयते तत्राणिति नोपतिष्ठते । अणित्यस्यौत्सर्गिकतया वैशेषिकेण इञादिना बाधात् ।

१०७४ । अश्वपत्यादिभ्यश्च । (४-१-८४)

एभ्योऽण्स्यात्प्राग्दीव्यतीयेष्वर्थेषु । वक्ष्यमाणस्य ण्यस्यापवादः ।

१०७५ । तद्धितेष्वचामादेः । (७-२-११७)

ञिति णिति च तद्धिते परेऽचामादेरचो वृद्धिः स्यात् ।

१०७६ । किति च । (७-२-११८)

किति तद्धिते च तथा । अश्वपतेरपत्याद्याश्वपतम् । गाणपतम् । 'गाणपत्यो मन्त्रः' इति तु प्रामादिकमेव ।

१०७७ । दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः । (४-१-८५)

दित्यादिभ्यः पत्युत्तरपदाच्च प्राग्दीव्यतीयेष्वर्थेषु ण्यः स्यादणोऽपवादः । दैत्यः । अदितेरादित्यस्य वा आदित्यः । प्राजापत्यः । 'यमाच्च' इति काशिकायाम् ।

अश्वपत्यादिभ्यश्च ॥ चकारात् 'प्राग्दीव्यतोऽण्' इत्यनुकृष्यते । तदाह । **एभ्योऽण् स्यात् प्राग्दीव्यतीयेष्वर्थेष्विति** ॥ दीव्यतः प्राक् प्राग्दीव्यत् 'अपपरिबहिरञ्चवः पञ्चम्या' इत्यव्ययीभावः । 'ञ्नयः' इति टच् तु न । तस्य पाक्षिकत्वात् । प्राग्दीव्यतः भवाः प्राग्दीव्यतीयाः । वृद्धाच्छः । 'अव्ययात्त्यप्' इति तु न । अव्ययीभावस्याव्ययत्वे 'लुङ्मुखस्वरोपचाराः प्रयोजनम्' इति परिगणनात् । अत एव 'अव्ययानाम्भमात्रे टिलोपः' इत्यपि न भवति । ननु 'प्राग्दीव्यतोऽण्' इत्येव सिद्धे किमर्थमिदं सूत्रमित्यत आह । **वक्ष्यमाणस्येति** ॥ 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः' इति वक्ष्यमाणस्य पत्युत्तरपदत्वप्रयुक्तण्यप्रत्ययस्य बाधनार्थमित्यर्थः । **तद्धितेष्वचामादेः** ॥ 'अचो ञ्णिति' इत्यनुवर्तते । 'मृजेर्वृद्धिः' इत्यतो वृद्धिरिति च । अचामिति निर्धारणषष्ठी । तदाह । **ञितीति** ॥ **किति च** ॥ **तथेति** ॥ अचामादेरचो वृद्धिरित्यर्थः । इदं सूत्रम्प्रकृतानुपयुक्तमपि व्याख्यासौकर्याय इहोपन्यस्तम् । **अपत्यादीति** ॥ आदिना समूहाद्यर्थसङ्ग्रहः । **आश्वपतमिति** ॥ अश्वपतेरणि आदिवृद्धौ 'यस्येति च' इति इकारलोपः । **गाणपतमिति** ॥ अश्वपत्यादिषु गणपतिशब्दः पठित इति भावः । **गाणपत्य इति** ॥ गणपतिर्देवता अस्य मन्त्रस्येति विग्रहः । **प्रामादिकमेवेति** ॥ प्रमादादायातमित्यर्थः । गणपतिक्षेत्रपत्यादीनामश्वपत्यादिगणे पाठस्य वृत्तौ दर्शनादिति भावः । **दित्यदित्यादित्य** ॥ **दित्यादिभ्य इति** ॥ दिति, अदिति, आदित्य एतेभ्यः इत्यर्थः । **पत्युत्तरपदादिति** ॥ पतिः उत्तरपदं यस्य तस्मादिति विग्रहः । **प्राग्दीव्यतीयेष्वर्थेष्विति** ॥ प्राग्दीव्यत इत्यनुवृत्तेरिति भावः । **अणोऽपवाद इति** ॥ विशेषविहितत्वादिति भावः । **दैत्य इति** ॥ दितेरपत्यमिति विग्रहः । दितेर्ण्यप्रत्ययः । 'चुटू' इति णकार इत्, आदिवृद्धिः, 'यस्येति च' इति इकारलोपः । **अदितेः आदित्यस्य वेति** ॥ अपत्यादीति शेषः । **आदित्य इति** ॥ जातार्थे आदिवृद्धौ **'यस्येति च' इति लोपे आदित्य इति रूपम्** । **आदित्यशब्दात्** ण्ये आदिवृद्धौ 'यस्येति च'

याम्यः । 'पृथिव्या ञाञौ' (वा २५५४) । पार्थिवा—पार्थिवी । 'देवाद्यञञौ' (वा २५५५) । दैव्यम्—दैवम् । 'बहिषष्टिलोपो यञ्च' (वा २५५६) । बाह्यः । 'ईकक्च' (वा २५५७) । बाहीकः । 'स्थाम्नोऽकारः' (वा २५५९) । अश्वत्थामः । पृषोदरादित्वात्सस्य तः । 'भवार्थे तु लुग्वाच्यः' (वा २८८२) । अश्वत्थामा । 'लोम्नोऽपत्येषु बहुष्वकारः' (वा २५६०) । बाह्वादीञोऽपवादः ।

इति लोपे 'यणो मयः' इति पूर्वयकारस्य द्वित्वे सति 'हलो यमाम्' इत्याद्ययकारस्य लोपे द्वियकारं रूपम् । द्वित्वाभावे लोपे चासति द्वियकारमेव । असति द्वित्वे यकारलोपे च सत्येकयकारं रूपम् । अनपत्यत्वात् 'आपत्यस्य च' इति यलोपो न । अदितेरपत्ये ण्ये आदित्यशब्दात्पुनरपत्ये ण्ये 'आपत्यस्य च' इति यलोपः । **प्राजापत्यः इति** ॥ पत्युत्तरपदात् प्रजापतिशब्दात् ण्ये आदिवृद्धौ 'यस्येति च' इति लोपः । दैतेया इति त्वसाध्वेव । साधुत्वश्रद्धाजाड्ये तु पृषोदरादित्वात् समाधेयम् । **काशिकायामिति** ॥ भाष्ये त्विदं न दृश्यत इति भावः । **याम्य इति** ॥ यमस्यापत्यादीति विग्रहः । **पृथिव्या ञाञाविति** ॥ ञश्च, अञ् च वक्तव्यावित्यर्थः । **पार्थिवेति** ॥ पृथिव्या अपत्यादीति विग्रहः । ञप्रत्यये 'चुटू' इति ञकार इत्, आदिवृद्धिः, 'यस्येति च' इति लोपः । स्त्रियामदन्तत्वाट्टाप् । **पार्थिवीति** ॥ अञि 'टिड्ढाणञ्' इति ङीप्, ञप्रत्ययस्यैव विधौ ङीप् न स्यात् । अञ एव विधौ टाप् न स्यात् । तस्मादुभयविधिः । एतत्सूचनाय स्त्रीलिङ्गोदाहरणमिति बोध्यम् । **देवादिति** ॥ देवशब्दात् यञ् अञ् च प्रत्ययौ प्राग्दीव्यतीयेष्वर्थेषु वक्तव्यावित्यर्थः । **दैव्यम्-दैवमिति** ॥ देवस्यापत्यादीति विग्रहः । यञि अञि च आदिवृद्धौ 'यस्येति च' इति लोपः । **बहिष इति** ॥ बहिस् इति सकारान्तमव्ययम् । तस्मात् प्राग्दीव्यतीयेष्वर्थेषु यञि प्रकृतेः टिलोपश्चेति वक्तव्य इत्यर्थः । **बाह्य इति** ॥ बहिर्भवः इत्यादिविग्रहः । यञि टिलोपे आदिवृद्धिः । अव्ययानां भमात्रे टिलोप इत्यस्यानित्यत्वज्ञापनार्थमिह टिलोपविधानम् । तेन आराद्भवः आरातीयः इत्यादि सिध्यति । **ईकक् चेति** ॥ बहिष ईकक् च स्यात् प्रकृतेष्टिलोपश्चेति वक्तव्यमित्यर्थः । **बाहीक इति** ॥ बहिष ईककि टिलोपे 'किति च' इत्यादिवृद्धिः । **स्थाम्न इति** ॥ स्थामन्शब्दात् अकारप्रत्ययः प्राग्दीव्यतीयेष्वर्थेषु वाच्य इत्यर्थः । अणोऽपवादः । **अश्वत्थाम इति** ॥ अश्वस्येव स्थामा स्थितिर्यस्येति विग्रहः । अश्वत्थाम्नोऽपत्यं जात इत्यादि विग्रहः । प्रत्ययविधित्वेऽपि भाष्ये उदाहरणात् तदन्तविधिः । अश्वत्थामन्शब्दादकारप्रत्यये 'नस्तद्धिते' इति टिलोपः । अणि तु आदिवृद्धिः स्यात् । ननु उदः परत्वाभावात्कथमिह सकारस्य थकार इत्यत आह । **पृषोदरादित्वादिति** ॥ **भवार्थे तु लुग्वाच्य इति** ॥ अकारप्रत्ययस्येति शेषः । **लोम्न इति** ॥ लोमन्शब्दाद्बहुषु अपत्येषु वाच्येषु अकारप्रत्ययो वक्तव्य इत्यर्थः । **बाह्वादीञ इति** ॥ बाह्वादित्वप्रयुक्तस्य इञोऽपवाद इत्यर्थः । **उडुलोमा इति** ॥ उडूनि नक्षत्राणीव लोमानि यस्य सः उडुलोमा, तस्यापत्यमिति विग्रहः । केवलस्य लोम्नः अपत्ययोगासम्भवात्प्रत्ययविधित्वेऽपि तदन्तविधिः । अकारप्रत्यये

उडुलोमाः। उडुलोमान्। 'बहुषु' किम्। औडुलोमिः। 'सर्वत्र गोरजादिप्रसङ्गे यत्' (वा २५६१)। गव्यम्। 'अजादिप्रसङ्गे' किम्। गोभ्यो हेतुभ्यः आगतं गोरूप्यम्। गोमयम्।

९०७८। उत्सादिभ्योऽञ्। (४-१-८६)

औत्सः। 'अग्निकलिभ्यां ढग्वक्तव्यः' (वा २६८९)। अग्नेरपत्यादि आग्नेयम्। कालेयम्।

इत्यपत्यादिविकारान्तार्थसाधारणाः प्रत्ययाः।

अथापत्याधिकारप्रकरणम्।

१०७९। स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्। (४-१-८७)

'धान्यानां भवने–' (सू १८०२) इत्यतः प्रागर्थेषु स्त्रीपुंसाभ्यां क्रमान्नञ्स्नञौ स्तः। स्त्रैणः। पौंस्नः। 'वत्यर्थे न'। 'स्त्री पुंवच्च' (सू ९३२) इति ज्ञापकात्। स्त्रीवत्। पुंवत्।

सति 'नस्तद्धिते' इति टिलोपः। **औडुलोमिरिति** ॥ उडुलोम्नोऽपत्यमिति विग्रहः। अत्रापत्यबहुत्वाभावादकारप्रत्ययो न। किन्तु वाह्वादित्वादिञि टिलोप इति भावः। **सर्वत्र गोरिति** ॥ लोम्नोऽपत्येष्विति पूर्ववार्तिकादपत्यग्रहणानुवृत्तिनिवृत्त्यर्थं सर्वत्रग्रहणम्। अपत्ये तदन्येषु च प्राग्दीव्यतीयेष्वर्थेषु गोशब्दादजादिप्रत्ययप्रसङ्गे सति यत्प्रत्ययो वाच्य इत्यर्थः। **गव्यमिति** ॥ गवि भवङ्गोरागतमित्यादि विग्रहः। अणपवादो यत्। **गोरूप्यम्-गोमयमिति** ॥ 'हेतुमनुष्येभ्योऽन्यतरस्याम्' इति रूप्य इत्यर्थः। 'मयड्वैतयोः' इति रूप्यमयटौ। हलादित्वान्नैतयोर्यत्प्रत्ययो बाधक इति। **उत्सादिभ्योऽञ्** ॥ प्राग्दीव्यतीयेष्वर्थेष्विति शेषः। अणिञोरपवादः। 'दृष्टं साम' इति सूत्रभाष्ये 'सर्वत्राग्निकलिभ्याण्ढग्वक्तव्यः' इति वार्तिकं पठितम्। दृष्टं सामेत्यर्थे ततोऽन्येष्वप्यर्थेषु ढग्वक्तव्य इत्यर्थः। तत्र सर्वत्रेति लक्ष्यानुरोधात्प्राग्दीव्यतीयेष्वेवेदं वार्तिकमपठन्ति। **अग्निकलिभ्यामिति** ॥ **अपत्यादीति** ॥ अग्निर्देवता अस्य इत्यादिसङ्ग्रहः। **आग्नेयम्। कालेयमिति** ॥ ढकि एयादेशे किति वादादिवृद्धौ 'यस्येति च' इति लोपः ॥—इत्यपत्यादिविकारान्तार्थसाधारणप्रत्ययाः।

अथापत्याधिकारो निरूप्यते—**स्त्रीपुंसाभ्याम्** ॥ भवनशब्देनैकदेशेन 'धान्यानाम्भवने क्षेत्रे खञ्' इति सूत्रं विवक्षितम्। प्राग्दीव्यत इत्यतः प्रागित्यनुवृत्तम्। तदाह। **धान्यानामिति** ॥ **स्त्रीपुंसाभ्यामिति** ॥ 'अचतुर' इत्यच्। स्त्रीशब्दात् पुंस्शब्दाच्चेत्यर्थः। **स्त्रैण इति** ॥ स्त्रिया अपत्यम्, स्त्रीषु, भवः, स्त्रीणां समूहः, इत्यादिविग्रहः। नञ्, वृद्धिः, णत्वम्। **पौंस्न इति** ॥ पुंसोऽपत्यम्, पुंसि भवः, पुंसां समूहः इत्यादि विग्रहः। पुंस्शब्दात् स्नञि 'स्नादिषु' इति

१०८०। द्विगोर्लुगनपत्ये। (४-१-८८)

द्विगोर्निमित्तं यस्तद्धितोऽजादिरनपत्यार्थः प्राग्दीव्यतीयस्तस्य लुक्स्यात्। पञ्चसु कपालेषु संस्कृतः पुरोडाशः पञ्चकपालः। 'द्विगोर्निमित्तम्' इति किम्। पञ्चकपालस्येदं खण्डं पाञ्चकपालम्। 'अजादिः' किम्। पञ्चगर्ग-रूप्यम्। 'अनपत्ये' किम्। द्वयोर्मित्रयोरपत्यं द्वैमित्रिः।

१०८१। गोत्रेऽलुगचि। (४-१-८९)

पदत्वात्संयोगान्तलोपः, आदिवृद्धिः। प्रत्ययसकारस्तु श्रूयते, उभाभ्यामपि नञ्प्रत्ययस्यैव विधौ तु पुंसस्सकारस्य संयोगान्तलोपे पुनः इति स्यादिति भावः। **वत्यर्थेनेति** ॥ 'तेन तुल्यङ्क्रि-यावेद्वतिः' इति वतिप्रत्ययो वक्ष्यते। तस्यार्थे स्त्रीपुंसाभ्यान्नञ्स्नञौ न भवत इत्यर्थः। कुत इत्यत आह। **स्त्री पुंवच्चेति ज्ञापकादिति** ॥ अन्यथा पुंवदिति निर्देशोऽनुपपन्नः स्यादिति भावः। न च पुंवदिति निर्देशः पुंस्शब्दाद्वत्यर्थे स्नञभावं ज्ञापयेत्, नतु स्त्रीशब्दान्न-ञभावमपीति वाच्यम्। नञ्स्नञोरेकसूत्रोपात्ततया वत्यर्थे स्नञभावे ज्ञापिते सति स्त्रीशब्दान्न-ञभावस्यापि लाभात्। ज्ञापकस्य सामान्यापेक्षत्वात्। तदुक्तम्भाष्ये "योगापेक्षं ज्ञापकम्" इति। **द्विगोर्लुगनपत्ये** ॥ द्विगोरिति हेतुत्वसम्बन्धे षष्ठी, लुक्श्रवणात् प्रत्ययस्येत्युपस्थितम्। प्रत्य-यादर्शनस्यैव लुक्त्वात्। तथाच द्विगुनिमित्तस्य प्रत्ययस्य लुगिति लभ्यते। द्विगुनिमित्तश्च प्रत्ययः तद्धित एव भवति। तद्धितार्थे विषये तद्विधानात्। ततश्च द्विगुनिमित्तस्य तद्धितस्येति लभ्यते। प्राग्दीव्यत इत्यनुवृत्तेः प्राग्दीव्यतीयत्वन्तद्धितविशेषणम्। 'गोत्रेऽलुगचि' इत्युत्तरसूत्रे सप्तम्य-न्तस्य गोत्रविशेषणतया तदादिविधिः। अजादावित्यर्थकमचीति पदमिहापकृष्यते। तच्च षष्ठ्या विपरिणतन्तद्धितविशेषणम्। तदाह। **द्विगोर्निमित्तमित्यादिना** ॥ **पञ्चकपाल इति** ॥ 'संस्कृतं भक्षाः' इत्यणि तद्धितार्थे द्विगुः अणो लुक् प्रत्ययलक्षणाभावान्नादिवृद्धिः॥ **पञ्चकपालस्येद-मिति** ॥ पञ्चसु कपालेषु संस्कृतः पुरोडाश इत्यर्थे अणि विवक्षिते द्विगुसमासे अणो लुकि निष्पन्नात् पञ्चकपालशब्दात् 'तस्येदम्' इत्यणि आदिवृद्धौ पाञ्चकपालमित्यत्राणो लुप्त भवति। निमित्तत्वा-भावादिति भावः। **पञ्चगर्गरूप्यमिति** ॥ पञ्चभ्यो गर्गेभ्यः आगतमित्यर्थे 'हेतुमनुष्येभ्यः' इति रूप्यप्रत्ययः। 'तद्धितार्थ' इति द्विगुसमासनिमित्तत्वेऽपि अजादित्वाभावात् न लुगिति भावः। **द्वैमित्त्रिरिति** ॥ अत्र 'अत इञ्' इति इञोऽपत्यार्थकत्वान्न लुगिति भावः। न च तिस्रो विद्या अधीयानः त्रैविद्य इत्यत्राप्यणो लुक् स्यादिति वाच्यम्। त्र्यवयवा विद्या त्रिविद्या। शाकपार्थिवादिः। त्रिविद्यामधीते त्रैविद्य इति विग्रहे त्रिविद्याशब्दादणो द्विगुनिमित्तत्वाभावात्। प्राग्दीव्यतीयस्येति किम्। पञ्चभ्यः कपालेभ्यो हितं पञ्चकपालीयम्। **गोत्रेऽलुगचि** ॥ अलुगिति च्छेदः। प्राग्दीव्यत इत्यनुवृत्तेः प्रत्ययाधिकाराच्च प्राग्दीव्यतीये प्रत्यये इति लब्धम्, अचीति तद्विशेषणं, तदादिविधिः, विषयसप्तम्येषा, नतु परसप्तमी। तदाह।

अजादौ प्राग्दीव्यतीये विवक्षिते गोत्रप्रत्ययस्यालुक्स्यात् । गर्गाणां छात्राः । 'वृद्धाच्छः' (सू १३३७) ।

१०८२ । आपत्यस्य च तद्धितेऽनाति । (६-४-१५१)

हलः परस्यापत्ययकारस्य लोपः स्यात्तद्धिते परे न त्वाकारे । गार्गीयाः । 'प्राग्दीव्यतीये' किम् । गर्गेभ्यो हितं गर्गीयम् । 'अचि' किम् । गर्गेभ्यः आगतं गर्गरूप्यम् ।

१०८३ । यूनि लुक् । (४-१-९०)

अजादावित्यादिना ॥ **गोत्रप्रत्ययस्येति** ॥ गोत्रार्थकप्रत्ययस्येत्यर्थः । लुकः प्रत्ययादर्शनत्वात् प्रत्ययस्येति लब्धम् । **गर्गाणां छात्रा इति** ॥ वक्ष्यमाणोदाहरणविग्रहप्रत्ययदर्शनमिदम् । गर्गस्य गोत्रापत्यं गार्ग्यः । 'गर्गादिभ्यो यञ्' । गर्गस्य गोत्रापत्यानीति बहुत्वविवक्षायां यञि कृते तस्य 'यञञोश्च' इति लुकि गर्गा इति भवति । तथाच गर्गस्य गोत्रापत्यानि गार्ग्याः इति विग्रहवाक्यार्थः । **वृद्धाच्छ इति** ॥ गार्ग्यशब्दादुक्तेऽर्थे छप्रत्यय इत्यर्थः । छस्य ईयादेशः, तस्मिन्भविष्यति अजादौ परे 'यञञोश्च' इति प्राप्तो लुङ् न भवति । तथाच गार्ग्य ईय इति स्थिते 'यस्येति च' इति यञोऽकारस्य लोपे गार्ग्य् ई इति स्थिते परिशिष्टस्य यञो यकारस्य लोपमाह । **आपत्यस्य च** ॥ अनातीति च्छेदः । 'ढेलोपोऽकद्र्वाः' इत्यतो लोप इत्यनुवर्तते । 'सूर्यतिष्य' इत्यतो य इति षष्ठ्यन्तमनुवर्तते । 'हलस्तद्धितस्य' इत्यतो हल इति पञ्चम्यन्तमनुवर्तते । तदाह । **हलः परस्यापत्ययकारस्येति** ॥ अपत्यार्थकयकारस्येत्यर्थः । यञो लुकि तु आदिवृद्धिर्न स्यादिति भावः । अल्लोपस्याभीयत्वेऽपि नासिद्धत्वम्, आरम्भसामर्थ्यात् । 'हलस्तद्धितस्य' इति यलोपस्यात्र प्रसक्तावपि न्याय्यत्वादिदमेव भवति । **गर्गीयमिति** ॥ 'तस्मै हितम्' इति गार्ग्यशब्दाच्छः । तस्य प्राग्दीव्यतीयत्वाभावात् तस्मिन्परे 'यञञोश्च' इति यञो लुग्भवत्येवेति नादिवृद्धिरिति भावः । **गर्गरूप्यमिति** ॥ 'हेतुमनुष्येभ्यः' इति रूप्यप्रत्ययः । तस्य प्राग्दीव्यतीयत्वेऽप्यजादित्वाभावात्तस्मिन्परे यञः लुङ् न । यदि तु अजादौ प्राग्दीव्यतीये प्रत्यये परे इति व्याख्यायेत, तर्हि गार्ग्यशब्दाच्छे तस्य ईयादेशे कृते अलुग्विधिः प्रवर्तेत, नतु ततः प्राक् । एवञ्च छप्रवृत्तेः प्राक् 'यञञोश्च' इति यञो लुकि कृते आदिवृद्धेर्निवृत्तौ गर्गशब्दस्य वृद्धित्वाभावात् ततः छो न स्यात् । अणि सति गार्गाः छात्राः इत्येव स्यात् । अजादौ प्रत्यये विवक्षिते इति व्याख्याने तु छप्रत्यये विवक्षिते तत्प्रवृत्तेः प्रागेव यञि अलुग्विधेः प्रवृत्तौ यञन्तस्य वृद्धत्वात् छो निर्बाधः । यलोपविधौ आपत्यस्येति किम् । सङ्काशेन निर्वृत्तं नगरं साङ्काश्यं 'सङ्काशादिभ्यो ण्यः' ततो भवार्थे 'धन्वयोपधात्' इति वुञ् । तद्धिते किम्, गार्ग्ये-गार्ग्ययोः । अनातीति किम्, गार्ग्यायणः । **यूनि लुक्** ॥ प्राग्दीव्यत इत्यनुवृत्तेः प्रत्ययाधिकाराच्च प्राग्दीव्यतीये प्रत्यये इति लभ्यते । अचीति प्रत्ययविशेषणं, तदादिविधिः, विषयसप्तम्येषा, नतु परसप्तमी । तदाह । **अजादौ प्राग्दीव्यतीये विवक्षिते इति** ॥

अजादौ प्राग्दीव्यतीये प्रत्यये विवक्षिते युवप्रत्ययस्य लुक्स्यात्। ग्लुचुकस्य गोत्रापत्यं ग्लुचुकायनिः। वक्ष्यमाणः फिन्। ततो यून्यण्। ग्लौचुकायनः। तस्य च्छात्रोऽपि ग्लौचुकायनः। अणो लुकि वृद्धत्वाभावाच्छो न।

१०८४। पैलादिभ्यश्च। (२-४-५९)

एभ्यो युवप्रत्ययस्य लुक्। 'पीलाया वा' (सू ११२१) इत्यण्। तस्मात् 'अणो द्यचः' (सू ११८०) इति फिञ्। तस्य लुक्। पैलः पिता पुत्रश्च। 'तद्राजाच्चाणः' (ग २१)। 'द्यञ्मगध' इत्यण्णन्तादाङ्गशब्दात् 'अणो द्यचः' (सू ११८०) इति फिञो लुक्। आङ्गः पिता पुत्रश्च।

१०८५। इञः प्राचाम्। (२-४-६०)

युवप्रत्ययस्येति ॥ युवार्थकप्रत्ययस्येत्यर्थः। लुकः प्रत्ययादर्शनत्वात् प्रत्ययस्येति लभ्यत इति भावः। ननु ग्लुचुकस्य गोत्रापत्यं ग्लौचुकायनिरिति कथम्। 'अत इञ्' इति इञः अप्राप्तेरित्यत आह। **वक्ष्यमाण इति** ॥ 'प्राचामवृद्धात् फिन् बहुलम्' इत्यनेनेति शेषः। आयन्नादेशे ग्लुचुकायनिरिति रूपमिति भावः। **तत इति** ॥ ग्लुचुकायनेरपत्यार्थे 'तस्यापत्यम्' इत्यणि आदिवृद्धौ 'यस्येति च' इति लोपे ग्लौचुकायन इति रूपमित्यर्थः। ननु युवापत्यस्याणः 'यस्येति च' इति लोपेनैव छात्रार्थे ग्लौचुकायन इति रूपसिद्धेस्तस्य लुग्विधिरनर्थक इत्यत आह। **अणो लुकीति** ॥ छात्रार्थकछप्रवृत्तेः प्रागेव युवप्रत्ययस्याणो लुकि आदिवृद्धेर्निवृत्तौ ग्लुचुकायनिशब्दस्य वृद्धत्वाभावात् छो न भवति। युवप्रत्ययस्य लुगभावे तु वृद्धत्वात् छः स्यात्। एतदर्थमेव युवप्रत्ययस्य लुग्विधानमित्यर्थः। स्थितश्चातुरर्थिको युवप्रत्ययलुक्। तत्प्रसङ्गाद्वैतीयीको युवप्रत्ययलुगनुक्रम्यते। **पैलादिभ्यश्च** ॥ 'ण्यक्षत्रियार्ष' इत्यतो यूनि लुक् इत्यनुवर्तते। तदाह। **एभ्यो युवप्रत्ययस्य लुगिति** ॥ अजादिप्रत्यये अविवक्षितेऽपि प्राप्त्यर्थमिदम्। **पीलाया इति** ॥ पीलाया गोत्रापत्यमित्यर्थे 'स्त्रीभ्यो ढक्' इति ढकम्बाधित्वा 'पीलाया वा' इत्यणित्यर्थः। **तस्मादिति** ॥ पैलस्यापत्यं युवेत्यर्थे 'पैलादिभ्यश्च' इति लुक्। 'अणो द्यचः' इति फिञः इत्यर्थः। पीलाया गोत्रापत्यस्यापत्यं पीलाया युवापत्यमिति पर्यवस्यति। **तस्येति** ॥ तस्य युवार्थकफिञ्प्रत्ययस्य अनेन लुगित्यर्थः। पीलाया गोत्रापत्ये युवापत्ये च पैलशब्द इत्याह। **पैलः पिता पुत्रश्चेति** ॥ यूनः पिता युवा चेत्यर्थः। 'तद्राजाच्चाणः' इति पैलादिगणसूत्रम्। तद्राजप्रत्ययात्परस्य युवप्रत्ययस्याणो लुगित्यर्थः। **द्यञ्मगधेति** ॥ अङ्गशब्दो देशविशेषे। तस्य राजा आङ्गः। तस्य गोत्रापत्यमप्याङ्गः। 'द्यञ्मगध' इत्यण्। तस्यापत्यं युवाप्याङ्ग एव। 'अणो द्यचः' इति फिञ्। तस्यानेन लुक्। **इञः प्राचाम्** ॥ इञः इति पञ्चमी। प्रत्ययत्वात्तदन्तग्रहणम्। 'ण्यक्षत्रिय' इत्यतो यूनि लुगित्यनुवर्तते। इञन्तात्परस्य युवप्रत्ययस्य लुगित्यर्थः। अर्थादिञो गोत्रार्थकत्वं लभ्यते। तदाह। **गोत्रे**

गोत्रे य इञ् तदन्ताद्युवप्रत्ययस्य लुक्स्यात् । तच्चेद्गोत्रं प्राचां भवति। पन्नागारस्य अपत्यम् । 'अत इञ्' (सू १०९५) 'यञिञोश्च' (सू ११०३) इति फक् । पान्नागारिः पिता पुत्रश्च । 'प्राचाम्' किम् । दाक्षिः पिता। दाक्षायणः पुत्रः ।

१०८६ । न तौल्वलिभ्यः । (२-४-६१)

तौल्वल्यादिभ्यः परस्य युवप्रत्ययस्य लुङ्नस्यात् । पूर्वेण प्राप्तः। तुल्वलः। तत इञि फक् । तौल्वलिः पिता । तौल्वलायनः पुत्रः ।

१०८७ । फक्फिञोरन्यतरस्याम् । (४-१-९१)

'यूनि' (सू १०८३) इत्येव पूर्वेण नित्ये लुकि प्राप्ते विकल्पार्थं सूत्रम्। कात्यायनस्य छात्राः कातीयाः—कात्यायनीयाः । यस्कस्यापत्यं यास्कः ।

य इञ तदन्ताद्युवप्रत्ययस्य लुगिति ॥ प्राचाम् इति गोत्रादिविशेषणम्, न तु विकल्पार्थम्। व्याख्यानात् । तदाह । **तच्चेद्गोत्रं प्राचां भवतीति** ॥ प्राग्देशीयमित्यर्थः । **पन्नागारस्येति** ॥ प्राग्देशे पन्नागारो नाम कश्चित्, तस्य गोत्रापत्यमित्यर्थे 'अत इञ्' इति इञि पान्नागारेरपत्यं युवेत्यर्थे पान्नागारिशब्दात् 'यञिञोश्च' इति फक्। तस्यानेन लुक् । एवञ्च पन्नागारस्य गोत्रापत्ये युवापत्ये च पान्नागारिरित्येव रूपमित्यर्थः । **प्राचां किमिति** ॥ गोत्रविशेषणङ्किमर्थमित्यर्थः । **दाक्षिः पिता, दाक्षायणः पुत्र इति** ॥ दक्षस्य गोत्रापत्यं दाक्षिः, अत इञ् । तस्यापत्यं युवा दाक्षायणः । 'यञिञोश्च' इति फक्। तस्य लुङ् न भवति । दाक्षिशब्दस्य प्राग्देशीयगोत्रप्रत्ययान्तत्वाभावेन न युवप्रत्ययस्य फकः प्राग्देशीयगोत्रार्थकादिञः परत्वम् । **न तौल्वलिभ्यः** ॥ बहुवचनात्तौल्वल्यादीनाङ्ग्रहणमित्याह । **तौल्वल्यादिभ्यः परस्येति** ॥ **पूर्वेणेति** ॥ 'इञः प्राचाम्' इत्यनेन प्राप्तो लुगनेन प्रतिषिध्यते इत्यर्थः । **तुल्वल इति** ॥ तुल्वलो नाम प्राच्यः कश्चित् । तस्य गोत्रापत्यं तौल्वलिः । अत इञ् । तस्यापत्यं युवा तौल्वलायनः । 'यञिञोश्च' इति फक् । तस्य 'इञः प्राचाम्' इति लुङ् नेत्यर्थः । अथ प्रकृतञ्चातुरर्थिकं लुग्विधिमनुसरति । **फक्फिञोरन्यतरस्याम्** ॥ **यूनीत्येवेति** ॥ 'यूनि लुक्' इति पूर्वसूत्रमनुवर्तते इत्यर्थः । 'यूनि लुक्' इत्युक्तो लुक् फक्फिञोर्वा स्यादित्यर्थः । तदाह । **पूर्वेणेति** ॥ **कात्यायनस्येति** ॥ कतस्य गोत्रापत्यङ्कात्यः । गर्गादित्वाद्यञ् । तस्यापत्यं युवा कात्यायनः । 'यञिञोश्च' इति फक् । कात्यायनस्य छात्राः इत्यर्थे 'तस्येदम्' इत्यनुवृत्तौ 'वृद्धाच्छः' इति छः । ईयादेशः । अत्र छात्रार्थकछप्रत्यये विवक्षिते युवार्थकफको लुकि सति, कात्य ईय इति स्थिते 'यस्येति च' इत्यकारलोपे 'आपत्यस्य च' इति यलोपे कातीया इति रूपम् । फको लुगभावे तु कात्यायनीया इति रूपमित्यर्थः । **यस्कस्येति** ॥ यस्कस्य गोत्रापत्यमित्यर्थे 'अत इञ्'

शिवाद्यण्। तस्यापत्यं युवा यास्कायनिः। 'अणो द्यचः' (सू ११८०) इति फिञ्। तस्य छात्राः यास्कीयाः—यास्कायनीयाः।

१०८८। तस्यापत्यम्। (४-१-९२)

षष्ठ्यन्तात्कृतसन्धेः समर्थादपत्येऽर्थे उक्ता वक्ष्यमाणाश्च प्रत्यया वा स्युः। उपगोरपत्यमौपगवः। आदिवृद्धिरन्त्योपधावृद्धी बाधते।

इति इञपवादः शिवाद्यणित्यर्थः। **तस्येति** ॥ यस्कस्यापत्यं युवेत्यर्थे 'अणो द्यचः' इति फिञि आयन्नादेशे यास्कायनिरिति रूपमित्यर्थः। **तस्य छात्रा इति** ॥ यास्कायनेः छात्राः इत्यर्थे 'तस्येदम्' इत्यनुवृत्तौ 'वृद्धाच्छः' इति छः। तस्य ईयादेशः। यास्कायनीया इति रूपम्। अत्र छात्रार्थकछप्रत्यये विवक्षिते युवार्थकफिञो लुकि 'यस्येति च' इति इकारलोपे यास्कीया इति रूपमित्यर्थः। **तस्यापत्यम्** ॥ तद्धिता इति, प्रत्ययः, परश्च, इति चाधिकृतम्। तच्छब्दः सर्वनामतया बुद्धिस्थपरामर्शित्वादुपगवादिसर्वविशेषबोधकः। तस्य उपगवादेरपत्यमित्यर्थे तद्धिताः प्रत्ययाः परे भवन्तीति लभ्यते। कस्मात्परे प्रत्यया भवन्तीत्याकाङ्क्षायां 'समर्थानाम्प्रथमाद्वा' इत्यधिकारात् प्रथमोच्चारितात्समर्थात्तच्छब्दलब्धोपगवादेरिति लभ्यते। प्रातिपदिकादित्यधिकृतम्। 'घकालतनेषु कालनाम्नः' इति तरप्तमप्तनेषु तद्धितेषु परतः सप्तम्या अलुग्विधानात्सुपस्तद्धितोत्पत्तेर्ज्ञापितत्वात् सुप्शिरस्कात्प्रातिपदिकादिति लभ्यते। सुप् चेह तस्येति प्रथमोच्चारिते पदे उपस्थितत्वात् षष्ठ्येव गृह्यते। ततश्च षष्ठ्यन्तादिति फलति। सामर्थ्यङ्कृतसन्धिकार्यत्वमित्युक्तमेव। तदाह। **षष्ठ्यन्तात्कृतसन्धेरिति** ॥ 'समर्थः पदविधिः' इति परिभाषया लब्धमाह। **समर्थादिति** ॥ विशिष्टैकार्थप्रतिपादकादित्यर्थः। सुबन्तात्तद्धितोत्पत्त्या तद्धितविधीनाम्पदविधित्वादिति भावः। **उक्ता इति** ॥ 'प्राग्दीव्यतोऽण्' इत्याद्या औत्सर्गिका इत्यर्थः। **वक्ष्यमाणाश्चेति** ॥ 'अत इञ्' इत्याद्या वैशेषिका इत्यर्थः। **वा स्युरिति** ॥ 'समर्थानाम्प्रथमाद्वा' इत्यधिकृतत्वादिति भावः। 'अपत्यं पौत्रप्रभृति गोत्रम्' इति उत्तरसूत्रव्याख्यावसरे अपत्यशब्दो व्याख्यास्यते। **औपगवः इति** ॥ उपगोरणि आदिवृद्धिः। ओर्गुणः। अवादेशः। अत्र प्रकृत्यैव उपगोर्लाभात् अपत्यमेव प्रत्ययार्थ इति स्थितिः। ननु उपगु अ इति स्थिते ओर्गुणात्परत्वात् 'अचो ञ्णिति' इति वृद्धिः स्यात्। ओर्गुणस्य पशव्यः इत्यादौ चरितार्थत्वात्। कृते च गुणे अवादेशे सति 'अत उपधायाः' इति वृद्धिर्दुर्निवारा। त्वष्टुरपत्यन्त्वाष्ट्रः, मघवतोऽपत्यं माघवतः, इत्यादौ गुणाप्रसक्त्या अन्त्योपधावृद्ध्योर्निर्बाधत्वाच्च। नच परत्वादादिवृद्धौ अन्त्योपधावृद्धी बाध्येते इति वाच्यम्। विप्रतिषेधे हि परस्य पूर्वबाधकता। नचेह विप्रतिषेधोऽस्ति, देशभेदेनोभयसम्भवात्। नाप्यन्त्योपधावृद्ध्योरपवादः आदिवृद्धिरिति वक्तुं शक्यम्। सुश्रुतोऽपत्यं सौश्रुतः इत्यादौ अन्त्योपधावृद्ध्योरप्राप्तयोरप्यादिवृद्धेः प्रवृत्तेः। तस्मादादिवृद्धिस्थले अन्त्योपधावृद्धी स्यातामित्यत आह। **आदिवृद्धिरिति** ॥ 'अचो ञ्णिति' इत्यन्त्यवृद्धिम् 'अत उपधायाः' इत्युपधावृद्धिं च आदिवृद्धिर्बाधते इत्यर्थः। पुष्करसदोऽपत्यमित्यर्थे बाह्वादित्वादिञ्, 'अनुशतिकादीनाञ्च' इत्युभयोः पदयोरादिवृद्धिः।

'तस्येदमित्यपत्येऽपि बाधनार्थं कृतं भवेत् ।
उत्सर्गः शेष एवासौ वृद्धान्यस्य प्रयोजनम् ॥' (वा २५८१–२५८४)

पुष्करसद्शब्दस्य अनुशतिकादौ पाठात् । तत्र यद्यादिवृद्धिरन्त्योपधावृद्धी न बाधेत, तदा आदिवृद्ध्या उपधावृद्ध्या च पौष्करसादेः सिद्धत्वात् अनुशतिकादौ पुष्करसच्छब्दपाठोऽनर्थकः स्यात् । अतस्तक्रकौण्डिन्यन्यायात् "सत्यपि सम्भवे बाधनं भवति, इति विज्ञायते" इति भाष्ये स्पष्टम् । **तस्येदमित्यपत्येऽपीत्यादि** ॥ श्लोकवार्तिकमिदम् । तत्र प्रथमचरणस्यायमर्थः। तस्येदमिति विहितः अण् अपत्येऽर्थेऽपि भवति, इदमर्थे तस्याप्यन्तर्भावात् । अतस्तस्यापत्यमित्यणविधानं व्यर्थमित्याक्षेपः । नच 'अत इञ्' इत्यावुत्तरसूत्रार्थं 'तस्यापत्यम्' इत्यावश्यकमिति वाच्यम् । एवं हि सति 'तस्यापत्यमत इञ्' इत्येकमेव सूत्रमस्तु । तथा च 'तस्यापत्यम्' इति पृथक्सूत्रकरणं व्यर्थमित्याक्षेपः पर्यवस्यति । अत्र समाधत्ते । **बाधनार्थं कृतम्भवेदिति** ॥ 'तस्येदम्' इत्यणमधिकृत्य 'वृद्धाच्छः' इति छः अपत्ये प्राप्तः, तद्बाधनार्थं 'तस्यापत्यम्' इति पृथक्सूत्रङ्कृतमित्यर्थः । ननु 'वृद्धाच्छः' इति सूत्रं शेषाधिकारस्थम्, अपत्याधिकारतुरर्थान्तेभ्योऽन्यः शेषः । तथाच अपत्यार्थस्य शेषाधिकारस्थत्वाभावात् तस्मात्तत्र छप्रत्ययस्याप्रसक्तेस्तद्बाधनार्थत्वं 'तस्यापत्यम्' इत्यस्य कथमित्यत आह । **उत्सर्गः शेष एवासाविति** ॥ उत्सृज्यते अदन्तबाह्वादिप्रकृतिभ्यो वियुज्यते इत्युत्सर्गः। कर्मणि घञ्। अदन्तबाह्वादिभिन्नप्रकृतिसम्बद्धः अपत्यार्थोऽसौ शेषो भवत्येवेत्यर्थः । आक्षेप्तुर्हि 'तस्यापत्यमत इञ्' इत्येकसूत्रमभिमतम् । विनियुक्तादन्यः शेषः, अदन्तबाह्वादिप्रकृतिसंयुक्तापत्यार्थ एव विनियुक्तः। न तु तद्भिन्नप्रकृतिसंयुक्तापत्यार्थोऽपि। ततश्च तस्य शेषत्वात्तस्मिन्नपत्ये छस्य प्रसक्तत्वात् तद्बाधनार्थं 'तस्यापत्यम्' इति पृथक्सूत्रम् । सति चास्मिन् पृथक्सूत्रे अदन्तबाह्वादिरूपप्रकृतिसामान्यसंयुक्तापत्यार्थस्योपयुक्तत्वादशेषत्वाच्छस्य न प्राप्तिरित्यप्राप्तिसम्पादनद्वारा छबाधकत्वं 'तस्यापत्यम्' इति पृथक्सूत्रस्य सिद्धम् । अयमप्राप्तबाध इत्युच्यते । नन्वेवमपि उपगोरपत्यमित्यत्र उपगोरवृद्धत्वात् छस्य नैव प्रसक्तिरिति किम्पृथक्सूत्रेणेत्यत आह । **वृद्धान्यस्य प्रयोजनमिति** ॥ भानोरपत्यम्भानवः इत्यादौ यानि भान्वादिप्रातिपदिकानि वृद्धानि, यानि उपगवादिप्रातिपदिकानि नामधेयत्वाद्वृद्धानि, तेभ्यः छप्रत्ययबाधनार्थं 'तस्यापत्यम्' इति पृथक्सूत्रमित्यर्थः । ननु 'तस्येदम्' इत्यणि इदन्त्वेन बोधः । 'तस्यापत्यम्' इत्यणि तु अपत्यत्वेन बोध इति शाब्दबोधे वैलक्षण्यसत्त्वात्, 'तस्येदमित्यपत्येऽपि' इत्याक्षेप एवायमनुपपन्न इति चेन्न । एतद्वार्तिकभाष्यप्रामाण्येन 'तस्येदम्' इति इदंशब्देन अपत्यस्य इदन्त्वेन ग्रहणाभावविज्ञानात् । "प्रदीयतान्दाशरथाय मैथिली" इति त्वार्षत्वान्न दुष्यतीत्यास्तां तावत् । **कृतसन्धेः किमिति** ॥ 'समर्थानाम्प्रथमाद्वा' इत्यधिकारसूत्रस्थसमर्थग्रहणलब्धं कृतसन्धेरित्येतत् किमर्थमिति प्रश्नः । **सौत्थितिरिति** ॥ सु शोभनः उत्थितः सूत्थितः । प्रादिसमासे सवर्णदीर्घः । सूत्थितस्यापत्यं सौत्थितिः, अत इञ्, सुब्लुक्, आदिवृद्धिः, 'यस्येति च' इत्यकारलोपः । कृतसन्धेरित्यभावेतु सु उत्थित इत्यस्यामेव दशायां सवर्णदीर्घोत्परत्वादादिवृद्धौ कृतायामावादेशे सावुत्थितिरिति स्यादिति भावः । नन्वन्तरङ्गत्वात्सवर्णदीर्घे

योगविभागस्तु । भानोरपत्यं भानवः । 'कृतसन्धेः' किम् । सौत्थितिः । अकृतव्यूहपरिभाषया सावुत्थितिर्मा भूत् । समर्थपरिभाषया नेह । वस्त्रमुपगोरपत्यं चैत्रस्य । 'प्रथमात्' किम् । अपत्यवाचकात्षष्ठ्यर्थे मा भूत् । वाग्रहणाद्वाक्यमपि । 'दैवयज्ञि—' (सू १२०१) इति सूत्रादन्यतरस्याङ्ग्रहणानुवृत्तेः समासोऽपि । उपगवपत्यम् । जातित्वान्ङीष् । औपगवी । आश्वपतः । दैत्यः । औत्सः । स्त्रैणः । पौंस्नः ।

कृते तदुत्तरमेव इञ्प्रत्यय उचितः । परादन्तरङ्गस्य बलवत्त्वात् । ततश्च सन्धेः प्राक् तद्धितोत्पत्तेरप्रसक्तेः कृतसन्धेरिति व्यर्थमेवेत्यत आह । **अकृतेति** ॥ अन्तरङ्गपरिभाषाया अप्यपवादभूतया अकृतव्यूहपरिभाषया सन्धेः प्रागेव प्रत्ययः स्यात् । ततश्च आदिवृद्ध्यपेक्षया अन्तरङ्गोऽपि सवर्णदीर्घः अकृतव्यूहपरिभाषया आदिवृद्धेः प्राक् न प्रवर्तते । एवञ्च सवर्णदीर्घात्प्रागेवादिवृद्धौ आवादेशे सावुत्थितिरिति स्यादित्यर्थः । नच इञि सति कृते सवर्णदीर्घे ऊकारस्य जायमानया वृद्ध्या सवर्णदीर्घनिमित्तस्य कस्य चिद्विनाशाभावादकृतव्यूहपरिभाषायाः कथमिह प्रवृत्तिरिति वाच्यम् । यदि सवर्णदीर्घो न स्यात्तदा सु उत्थित इत्यवस्थायां सकारादुकारस्य वृद्ध्या औकारे सति सवर्णदीर्घनिमित्तस्य अको विनाशः स्यादिति सम्भावनया अकृतव्यूहपरिभाषायाः प्रवृत्तेरिति कथञ्चिद्योज्यम् । वस्तुतस्तु अकृतव्यूहपरिभाषा नास्त्येव । भाष्ये क्वाप्यव्यवहृतत्वात् । प्रत्युत, भाष्यविरुद्धत्वाच्च । 'विप्रतिषेधे परङ्कार्यम्' इति सूत्रभाष्ये हि परादन्तरङ्गं बलीयः इत्युक्त्वा सौत्थितिरित्यत्र परामप्यादिवृद्धिम्बाधित्वा अन्तरङ्ग एकादेश इत्युक्तम् । पदस्य विभज्यान्वाख्याने सु उत्थित इति स्थिते परत्वाद्वृद्धिः प्राप्ता । अन्तरङ्गत्वादेकादेश इति कैयटः । अकृतव्यूहपरिभाषासत्त्वे तदसङ्गतिः स्यष्टैव । सेदुप इत्यादौ अकृतव्यूहपरिभाषाफलस्यान्यथासिद्धिस्तु तत्र तत्र प्रपञ्चितैवेत्यास्तान्तावत् । विस्तरस्तु शब्देन्दुशेखरे ज्ञेयः । **वस्त्रमुपगोरपत्यञ्चैत्रस्येति** ॥ अत्र उपगुशब्दादपत्ये अण् न भवति । उपगोर्वस्त्रैणैवान्वयात् । यद्यपि तत्सम्बन्ध्यपत्ये प्रत्ययविधानात् इह च अपत्यस्य तच्छब्दवाच्योपगुसम्बन्धाभावादेव अत्र प्रत्ययस्य न प्रसक्तिः । तथापि ऋद्धस्य औपगव.मित्यादिवारणाय सामर्थ्यमेकार्थीभावलक्षणमाश्रयणीयामिति भावः । **अपत्यवाचकादिति** ॥ उपगुरपत्यमस्य देवदत्तस्येत्यर्थे औपगवो देवदत्तः इति माभूदित्यर्थः । प्रथमादित्युक्तौ तु 'तस्यापत्यम्' इति सूत्रे षष्ठ्यन्तस्यैव प्रथमोच्चारितत्वादुपगुरिति प्रथमान्तात् न भवतीत्यर्थः । **वाग्रहणाद्वाक्यमपीति** ॥ वाग्रहणाभावे हि तद्धितस्य नित्यत्वादुपगोरपत्यमिति वाक्यं स्यादिति भावः । ननु उपगवपत्यमिति कथं षष्ठीसमासः । तद्धितानां समासापवादत्वात् । नच तद्धितानाम्पाक्षिकत्वात्तदभावपक्षे षष्ठीसमासो निर्बाध इति वाच्यम् । 'अपवादेन मुक्ते उत्सर्गो न प्रवर्तते' इति 'पारेमध्ये षष्ठ्या वा' इति वाग्रहणेन ज्ञापितत्वादित्यत आह । **दैवयज्ञीति सूत्रादिति** ॥ **जातित्वादिति** ॥ अपत्यार्थकाणन्तस्य औपगवशब्दस्य "गोत्रञ्च चरणैः सह" इति जातित्वात् ङीषित्यर्थः । **आश्वपत इति** ॥ अश्वपतेरपत्यमिति विग्रहः । पत्युत्तरपदलक्षणं ण्यं बाधित्वा

१०८९ । अपत्यं पौत्रप्रभृति गोत्रम् । (४-१-१६२)

अपत्यत्वेन विवक्षितं पौत्रादि गोत्रसंज्ञं स्यात् ।

१०९० । जीवति तु वंश्ये युवा । (४-१-१६३)

वंश्ये पित्त्रादौ जीवति पौत्त्रादेर्यदपत्यं चतुर्थादि तद्युवसंज्ञमेव, न तु गोत्रसंज्ञम् ।

'अश्वपत्यादिभ्यश्च' इत्यणिति भावः । **दैत्य इति** ॥ दितेरपत्यमिति विग्रहः । 'दित्यदिति' इति ण्यः अणपवादः । **औत्स इति** ॥ उत्सः कश्चित्, तस्यापत्यमिति विग्रहः । 'उत्सादिभ्योऽञ्' इत्यञ् । इञाद्यपवादः । स्वरे विशेषः । **स्त्रैणः । पौंस्न इति** ॥ स्त्रिया अपत्यं, पुंसोऽपत्यमिति विग्रहः । 'स्त्रीपुंसाभ्याम्' इति नञ्स्नञौ । अणोऽपवादः । **अपत्यम्** ॥ अपत्याधिकारात् सिद्धे पुनरपत्यग्रहणं व्यर्थमित्यत आह । **अपत्यत्वेन विवक्षितमिति** ॥ एवञ्च पौत्त्रत्वेन विवक्षितानां पौत्त्रादीनां न गोत्रसंज्ञेति भावः । "सन्ततिर्गोत्रजननकुलान्यभिजनान्वयौ" इति कोशतः गोत्रशब्दस्य सन्ततिवाचकत्वात् पुत्त्रस्यापि गोत्रत्वे प्राप्ते पौत्त्रादिग्रहणादिह शास्त्रे पुत्त्रस्य न गोत्रत्वम् । ननु "आत्मजस्तनयः सूनुः सुतः पुत्त्रस्त्रियान्त्वमी । आहुर्दुहितरं सर्वेऽपत्यन्तोकन्तयोः समे" इत्यादिकोशात् अपत्यशब्दस्य पुत्त्र एव रूढत्वात् कथम् 'अपत्यं पौत्त्रप्रभृति' इति सामानाधिकरण्यमिति चेन्मैवम् । अपत्यशब्दो हि नात्मजपर्यायः, किन्तु पुत्त्रपौत्त्रादिसन्ततिपर्यायः । न पतन्ति नरके पितरो येन तदपत्यमिति 'पङ्क्तिविंशति' इति सूत्रे भाष्ये व्युत्पादितत्वात् । तथा च पौत्त्रादयोऽपि पितामहादीनान्नरकादुद्धर्तार इति तेषामप्यपत्यत्वमस्त्येवेति 'एको गोत्रे' इति सूत्रभाष्ये स्पष्टम् । एतच्च महाभारतादौ च जरत्कार्वाद्युपाख्यानेषु प्रसिद्धमेव । कोशस्तु सूत्रभाष्यादिविरुद्धत्वात् उपेक्ष्य एव । न चैवमपि गर्गस्य पुत्त्रोऽपि अङ्गिरसः पौत्त्रत्वाद्गोत्रं स्यादिति वाच्यम् । यस्य यः पौत्त्रादिः तस्य तद्गोत्रमिति व्याख्यानादित्यलम् । **जीवति** ॥ वंशः उत्पादकपित्त्रादिपरम्परा । तत्र भवो वंश्यः । दिगादित्वाद्यत् । तदाह । **वंश्ये पित्त्रादौ जीवतीति** ॥ जीवतीति सप्तम्यन्तम् । **पौत्त्रादेरिति** ॥ पूर्वसूत्रात्पौत्त्रादीत्यनुवृत्तं षष्ठ्या विपरिणम्यते इति भावः । **यदपत्यमिति** ॥ 'तस्यापत्यम्' इत्यतस्तदनुवृत्तेरिति भावः । तुरवधारणे । युवेत्यनन्तरं द्रष्टव्यः । तदाह । **युवसंज्ञमेवेति** ॥ तेन एकसंज्ञाधिकारबहिर्भावेऽपि गोत्रसंज्ञाया अपि अस्मिन् न समावेश इति भावः । युवसंज्ञया सह गोत्रसंज्ञायाः समावेशे तु शालङ्का इति पैलीया इति च न स्यात् । शलङ्कुः कश्चित्, तस्य गोत्रापत्यं शालङ्किः इञ् । पैलादिगणे शालङ्कीति पाठात् प्रकृतेः शालङ्कादेशश्च । शालङ्किरपत्यं युवापि शालङ्किरेव । 'यञञोश्च' इति फक् । 'पैलादिभ्यश्च' इति तस्य लुक् । शालङ्किर्यूनः छात्रा इत्यर्थे 'इञश्च' इत्यणि शालङ्का इति रूपम् । तथा पीलाया गोत्रापत्यं पैलः । 'पीलाया वा' इत्यण् । पैलस्यापत्यं युवापि पैल एव । 'अणो द्यचः' इति फिञ् । 'पैलादिभ्यश्च' इति तस्य लुक् । पैलस्य यूनः छात्राः इत्यर्थे वृद्धाच्छः । पैलीया इति रूपम् । युवगोत्रसंज्ञयोः समावेशे तु 'गोत्रेऽलुगचि' इति

१०९१। भ्रातरि च ज्यायसि। (४-१-१६४)

ज्येष्ठे भ्रातरि जीवति कनीयांश्चतुर्थादिर्युवसंज्ञश्च स्यात्।

१०९२। वान्यस्मिन्सपिण्डे स्थविरतरे जीवति। (४-१-१६५)

भ्रातुरन्यस्मिन्सपिण्डे स्थविरतरे जीवति पौत्रप्रभृतेरपत्यं जीवदेव युवसंज्ञं वा स्यात्। एकं जीवतिग्रहणमपत्यस्य विशेषणम्। द्वितीयं सपिण्डस्य। तत्रिर्देश उभयोरुत्कर्षार्थः। स्थानेन वयसा चोत्कृष्टे पितृव्ये मातामहभ्रातरि वा जीवति। गार्ग्यस्यापत्यं गार्ग्यायणः—गार्ग्यो वा। 'स्थविर—' इति किम्। स्थानवयोन्यूने गार्ग्य एव। 'जीवति' इति किम्। मृते मृतो वा गार्ग्य एव। 'वृद्धस्य च पूजायामिति वाच्यम्' (वा २६५४)। गोत्रस्यैव वृद्धसंज्ञा प्राचाम्। गोत्रस्य युवसंज्ञा पूजायां गम्यमानायाम्। तत्र भवान्गार्ग्यायणः। 'पूजा—' इति किम्। गार्ग्यः। 'यूनश्च कुत्सायां गोत्रसंज्ञेति वाच्यम्' (वा २६५१)। गार्ग्यो जाल्मः। 'कुत्सा—' इति किम्। गार्ग्यायणः।

फक्फिञोः अछुक् प्रसज्येतेत्यलम्। **भ्रातरि च ज्यायसि** ॥ जीवतीत्यनुवर्तते। तदाह। **ज्येष्ठे भ्रातरि जीवति कनीयानिति** ॥ अनुज इत्यर्थः। पौत्रप्रभृतीत्यनुवृत्तं षष्ठ्या विपरिणम्यते। अपत्यमित्यधिकृतम्। पौत्रादेरपत्यमित्यर्थः। फलितमाह। **चतुर्थादिरिति** ॥ मृतेष्वपि पित्रादिषु ज्येष्ठे भ्रातरि जीवति युवसंज्ञार्थमिदम्। **वाऽन्यस्मिन्** ॥ शेषपूरणेन सूत्रं व्याचष्टे। **पौत्रप्रभृतेरपत्यञ्जीवदेव युवसंज्ञं स्यादिति** ॥ सपिण्डास्तु स्वयम्, पिता, पितामहः, प्रपितामहः, तस्य पितृपितामहप्रपितामहाश्चेति सप्त पुरुषाः। एवम्मातृवंशेऽपीत्यादि धर्मशास्त्रेषु प्रसिद्धम्। स्थविरतरः अतिवृद्धः। जीवतीति सप्तम्यन्तमनुवृत्तं सपिण्डे इति सप्तम्यन्तेऽन्वेति। अत्रत्यन्तु जीवतिपदं तिङन्तम् अपत्येऽन्वेति, यदपत्यं जीवति तद्युवसंज्ञकमिति। ततश्च भ्रातुरन्यस्मिन्वृद्धतमे सपिण्डे जीवति सति पौत्रप्रभृतेरपत्यञ्जीवदेव युवसंज्ञं वा स्यादिति फलितम्। **एकमिति** ॥ अत्रत्यमित्यर्थः। **द्वितीयमिति** ॥ अनुवर्तमानमित्यर्थः। उभयोरिति हेतुत्वसम्बन्धे षष्ठी। उभयहेतुकोत्कर्षवाचकस्तरबित्यर्थः। तदेव विवृणोति। **स्थानेन वयसा चेति** ॥ स्थानतः उत्कृष्टः पितृव्यः, तस्य पितृस्थानीयत्वात्। वयसा उत्कृष्टो मातामहः। भ्रातरीति सन्निहितत्वान्मातामहभ्रातरीत्यर्थ इति केचित्, पितृव्यपुत्र इत्यन्ये। **जीवतीति किमिति** ॥ जीवतिद्वयस्य किम्प्रयोजनमिति प्रश्नः। **मृते मृतो वा गार्ग्य एवेति** ॥ मृते सपिण्डे चतुर्थो गार्ग्य एव। मृतश्च चतुर्थो गार्ग्य एवेत्यर्थः। **वृद्धस्य चेति** ॥ वार्तिकमिदम्। तत्र वृद्धपदं विवृणोति। **गोत्रस्यैव वृद्धसंज्ञा प्राचामिति** ॥ गोत्रमेव वृद्धमिति प्राचीनाचार्या व्यवहरन्तीत्यर्थः। तथाच वार्तिकस्य फलितमर्थमाह। **गोत्रस्य युवसंज्ञा पूजायाङ्गम्यमानायामिति** ॥ उदाहरति।

१०९३ । एको गोत्रे । (४-१-९३)

गोत्रे एक एवापत्यप्रत्ययः स्यात् । उपगोर्गोत्रापत्यमौपगवः । गार्ग्यः । नाडायनः ।

तत्रभवान् गार्ग्यायण इति ॥ तत्रभवानिति पूज्यवाची, युवसंज्ञकानामल्पवयस्कत्वेन वृद्धाधीनत्वेन सुखितया च पूजा । ताङ्गोत्रप्रभृतिस्तृतीयोऽपि मन्यते । अत्र युवसंज्ञाविधिसामर्थ्यात्स्वार्थे युवप्रत्ययो बोध्यः । **गार्ग्यो जाल्म इति ॥** यो वृद्धाननादृत्य स्वातन्त्र्यमभजते तद्विषयमिदम् । **एको गोत्रे ॥** सङ्ख्याविशेषोपादाने तदितरसङ्ख्याव्यवच्छेदस्य स्वभावसिद्धत्वात् एक एवेति गम्यते । अपत्याधिकारात्प्रत्ययाधिकाराच्च अपत्यप्रत्यय इति तद्विशेष्यलाभः । तदाह । **गोत्रे एक एवापत्यप्रत्ययः स्यादिति ॥ औपगव इति ॥** उपगोर्गोत्रापत्ये 'तस्यापत्यम्' इत्यण् । **गार्ग्य इति ॥** गर्गस्य गोत्रापत्ये गर्गादिभ्य इति यञ् । **नाडायन इति ॥** नडस्य गोत्रापत्ये 'नडादिभ्यः' इति फक् । गोत्रे एक एव प्रत्ययः स्यादित्येवोक्तौ तु अनन्तरापत्यप्रत्ययान्तादौपगवशब्दादिञ्प्रत्ययो न निवार्येत । नियमस्य सजातीयविषयतया गोत्रप्रत्ययान्तादेव गोत्रप्रत्ययो वार्येत । अतोऽपत्यग्रहणमित्याहुः । नन्वेकस्मिन्गोत्रे युगपदनेकप्रत्ययाप्रसक्तेर्व्यर्थमिदं सूत्रमिति चेन्मैवम् । अपत्यशब्दो हि पुत्र एव रूढ इत्येकः पक्षः । पुत्त्रादिसाधारण इत्यन्यः पक्ष इति प्रकृतसूत्रभाष्ये स्थितम् । तदेतत् 'अपत्यं पौत्त्रप्रभृति' इति सूत्रव्याख्यावसरे प्रपञ्चितञ्चास्माभिः । तत्र प्रथमपक्षे उपगोः पौत्त्रे अपत्यप्रत्ययेन बुबोधयिषिते सति तस्य उपगुपुत्त्रापत्यस्य उपगुम्प्रत्ययपत्यत्वाभावात् 'तस्यापत्यम्' इत्यण् न सम्भवति । ततश्च उपगुपुत्त्रे वाच्ये 'तस्यापत्यम्' इत्यणा औपगवशब्दे व्युत्पादिते सति औपगवस्यापत्ये वस्तुतः उपगोः तृतीये गोत्रे विवक्षिते औपगवशब्दात् 'अत इञ्' इति इञि औपगविरित्यनेनैव उपगोस्तृतीयो बोधनीयः स्यात् । एवञ्च उपगोस्तृतीये विवक्षिते उपगोरण् औपगवादिञिति प्रकृतिद्वयात्प्रत्ययद्वयमनिष्टं स्यात् । तत्र यद्यपि उपगोरणिष्टः, तथापि उपगोस्तृतीये विवक्षिते अनिष्टमिञ्प्रत्ययमण्प्रत्ययो घटयतीति सोऽप्यनिष्ट एव । तथाच तत्रानिष्टप्रत्ययद्वयनिवृत्तये एको गोत्रे अपत्यप्रत्ययः स्यादित्यनपत्येऽपि उपगोस्तृतीये अपत्यप्रत्ययो विधीयते । सच वस्तुतः अणेव, न त्विञ्, अदन्तत्वाभावात् । विहिते च तस्मिन् औपगवादिञपि निवर्तते । गोत्रे बुबोधयिषिते एकस्यैवापत्यप्रत्ययस्य विधेः । अतः प्रत्ययद्वयमाला निवर्तते । एवमुपगोश्चतुर्थे विवक्षिते तस्य उपगुन्तत्पुत्त्रश्च प्रत्यपत्यत्वाभावात् पौत्त्रम्प्रत्येवापत्यत्वादौपगविशब्दात् 'यञिञोश्च' इति फकि प्रकृतित्रयादनिष्टा औपगवायन इति प्रत्ययत्रयमाला स्यात् । उपगोः पञ्चमे विवक्षिते तु औपगवायनशब्दादिञि औपगवायनिः इत्येवं प्रकृतिचतुष्टयात् प्रत्ययचतुष्टयमाला स्यात् । षष्ठे तु औपगवायनिशब्दात्फकि औपगवायनायन इत्येवं प्रकृतिपञ्चकात् पञ्च प्रत्ययाः स्युः । तदेवं फगिञोः परम्परायां मूलप्रकृतेरुपगोः शततमे गोत्रे विवक्षिते एकोनशतात्प्रकृतिभ्यः एकोनशतमनिष्टप्रत्ययाः स्युः । अत्र तृतीयप्रभृति कस्मिंश्चिद्गोत्रे विवक्षिते उपगुम्प्रत्यनपत्येऽपि तस्मिन् 'एको गोत्रे' इत्यणेव

"गोत्रे स्वैकोनसङ्ख्यानां प्रत्ययानां परम्परा।
यद्वा स्वद्व्यूनसङ्ख्येभ्योऽनिष्टोत्पत्तिः प्रसज्यते॥
अपत्यं पितुरेव स्यात्ततः प्राचामपीति च।
मतभेदेन तद्धान्यै सूत्रमेतत्तथोत्तरम्॥"

पितुरेवापत्यमिति पक्षे ह्युपगोस्तृतीये वाच्ये औपगवादिञ्स्यात्। चतुर्थे त्वजीवज्ज्येष्ठे मृतवंश्ये औपगवेः फक्। इत्थं फगिञोः परम्परायां मूलाच्छततमे

भवति। नतु इत्यादि। यदा त्वपत्यशब्दः पुत्रपौत्रादिसाधारणः तदा यद्यपि उपगोरनन्तरापत्ये पुत्र इव पौत्रादिष्वपि विवक्षितेषु 'तस्यापत्यम्' इत्यणि औपगव इतीष्टं सिद्ध्यति। तथापि उपगोरनन्तरापत्ये अणि सति औपगवस्यानन्तरापत्ये उपगोस्तृतीये विवक्षिते द्वितीयस्मादेकः प्रत्ययः अनिष्टः इति पर्यवस्यति। एवमुपगोश्चतुर्थे विवक्षिते उपगोरणा इष्टे उपगोरणि औपगवः, तस्मादिञि औपगविः, तस्मात्फकि औपगवायनः, इत्येवं प्रत्ययत्रयमपि कदाचित्प्रसज्येत। तत्रापि उपगोर्मूलप्रकृतेरणिष्ट एव। इञ्फकौ तु प्रत्ययावनिष्टौ। तथाच उपगोश्चतुर्थे तु विवक्षिते द्वितीयस्मादेकः अनिष्टप्रत्ययः तृतीयस्मादन्य इत्येवं प्रकृतिद्वयादनिष्टौ द्वौ प्रत्ययाविति पर्यवस्यति। एवम्पञ्चमे प्रकृतित्रयात् त्रयः प्रत्ययाः। षष्ठे प्रकृतिचतुष्टयात् चत्वारः प्रत्ययाः इत्येवम्मूलाच्छततमे गोत्रे अष्टनवतेरष्टनवतिरनिष्टप्रत्ययाः स्युः। तत्र 'एको गोत्रे' इति नियमविधिः। गोत्रे एक एव प्रत्ययः स्यादिति। तत्रापि प्रथमातिक्रमे कारणाभावान्मूलप्रकृतेर्यः प्रत्ययः प्राप्तुं योग्यः स एवेति फलति। सूत्रे एकशब्दः प्रथमपर्यायः "एके मुख्यान्यकेवलाः" इत्यमरः। मुखे भवो मुख्यः प्रथमः। "एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा" इति कोशान्तरम्। तथाच प्रथमः मूलप्रकृतेरिव गोत्रे विवक्षिते स्वयोग्यप्रत्ययलम्भ इति व्याख्यान्तरम्। तदेतत्सर्वं श्लोकद्वयेन सङ्गृह्णाति। **गोत्रे स्वैकोनेति**॥ अत्र प्रथमश्लोकान्ते श्रुतं प्रसज्यते इत्येतत्पदं पूर्वार्धे परम्परेत्यनन्तरमपि सम्बध्यते। तत्र स्वं गोत्रं मूलपुरुषोपज्ञवपेक्षया यत्सङ्ख्याकं तदपेक्षया एकोनसङ्ख्याकानां अनिष्टप्रत्ययानां परम्परैवोक्तरीत्या प्रसज्येत। नतु कदाचिदपि गोत्रे औपगव इत्यणन्तमिष्टं सिद्ध्यतीत्यर्थः। **यद्वेति**॥ स्वं गोत्रं तत् मूलपुरुषोपज्ञवपेक्षया यत्सङ्ख्याकं तदपेक्षया द्व्यूनसङ्ख्याकप्रकृतिभ्यः तावतां प्रत्ययानामनिष्टानामुत्पत्तिरुक्तरीत्या प्रसज्य इत्यर्थः। ननु कथमिदम्पक्षद्वयमित्यत आह। **अपत्यमित्यादि मतभेदेनेत्यन्तम्**॥ पुत्र एवापत्यमिति पक्षे प्रथमः पक्ष उन्मिषति। पुत्रपौत्रादिसाधारणोऽपत्यशब्द इति पक्षे तु द्वितीयः पक्ष उन्मिषतीति भावः। **तद्धान्यै इति**॥ तस्य उक्तप्रकाराभ्याम् अनिष्टोत्पादनस्य हानिः निवृत्तिः तदर्थमिदमित्यर्थः। **तथोत्तरमिति**॥ 'गोत्रावयवाच्छियाम्' इत्युत्तरसूत्रमपि तथा योज्यमित्यर्थः। तत्रापत्यशब्दः पुत्र एव रूढ इति पक्षे अनिष्टम्प्रपञ्चयति। **पितुरेवेत्यादिना॥ औपगवादिञ् स्यादिति**॥ 'अत इञ्' इत्यनेनेति शेषः। औपगवादेव इञ् स्यात् नतु उपगोरणित्यर्थः। तृतीयस्य उपगुम्प्रत्यपत्यत्वाभावादिति भावः। चतुर्थे त्वित्यतः पूर्वमुपगोरिति शेषः। **अजीवज्ज्येष्ठे इति**॥ जीवन्

गोत्रे एकोनशतं प्रत्ययाः स्युः । पितामहादीनामपीति मुख्यपक्षे तु तृतीये वाच्ये उपगोरणा इष्टे सिद्धेऽप्यण्णन्तादिञपि स्यात्। ततश्चतुर्थे फगिति फगिञोः परम्परायां शततमे गोत्रेऽष्टनवतेरनिष्टप्रत्ययाः स्युः । अतो नियमार्थमिदं सूत्रम् । एवमुत्तरसूत्रेऽप्यूह्यम् ।

१०९४ । गोत्राद्यून्यस्त्रियाम् । (४-१-९४)

यून्यपत्ये गोत्रप्रत्ययान्तादेवापत्यप्रत्ययः स्यात्, स्त्रियां तु न युवसंज्ञा। गर्गस्य युवापत्यं गार्ग्यायणः । स्त्रियां गोत्रत्वादेक एव प्रत्ययः ।

ज्येष्ठो यस्येति विग्रहः। जीवति तु ज्येष्ठे चतुर्थस्य 'भ्रातरि च ज्यायसि' इति युवसंज्ञया गोत्रत्वम्बाध्येतेति भावः। **मृतवंश्ये इति** ॥ मृतः वंश्यो यस्येति विग्रहः। वंश्ये 'जीवति तु वंश्ये युवा' इति युवसंज्ञया गोत्रत्वम्बाध्येतेति भावः। **औपगवेः फगिति** ॥ 'यञिञोश्च' इत्यनेनेति शेषः । **एकोनेति** ॥ एकोनशतात्प्रकृतिभ्यः एकोनशतम्प्रत्यया अनिष्टाः स्युरित्यर्थः । अथापत्यशब्दः पुत्रपौत्त्रादिसाधारण इति पक्षे अनिष्टम्प्रपञ्चयति। **पितामहादीनामपीति** ॥ मुख्यपक्षत्वं त्वस्य भाष्ये पूर्वपक्षस्य निराकरणात् 'अपत्यं पौत्रप्रभृति' इति सूत्रस्वरसाच्च बोध्यम् । **इष्टे सिद्धेऽपीति** ॥ तृतीयादीनामप्यपत्यत्वेन तत्र 'तस्यापत्यम्' इत्यणो निर्बाधत्वादिति भावः । **तत इति** ॥ इञन्तादित्यर्थः । **अष्टनवतेरिति** ॥ प्रकृतिभ्यः इति शेषः । **अनिष्टप्रत्ययाः स्युरिति** ॥ अष्टनवतिरिति शेषः । **नियमार्थमिति** ॥ यद्यप्युपगोस्तृतीयादिषु अपत्यप्रत्ययविध्यर्थत्वमेव प्रथमपक्षे । तथाऽपि गर्गात्तृतीयादिषु विवक्षितेषु गोत्रविहितगर्गादियञा गार्ग्यायणशब्देनेष्टस्य सिद्धावपि गर्गादिञि ततः फिञित्येवम्प्रत्ययपरम्पराप्यनिष्टा प्राप्नोतीति नियमार्थत्वमपि प्रथमपक्षेऽप्यस्य सूत्रस्येति भावः। **एवमुत्तरसूत्रेऽप्यूह्यमिति** ॥ तत्प्रकारस्तु उत्तरसूत्रे एव वक्ष्यते । **गोत्राद्यून्यस्त्रियाम्** ॥ गर्गस्य गोत्रं गार्ग्यः, गर्गस्य तृतीयः 'गर्गादिभ्यः' इति गोत्रे यञ् । गार्ग्यस्य तृतीयः स गर्गस्य पञ्चमो युवापत्यं, तस्मिन्नुबोधयिषिते गार्ग्यशब्दात् गोत्रप्रत्ययान्तात् 'यञञोश्च' इति फकि गार्ग्यायण इति रूपमिष्यते । तथा षष्ठादिष्वपि युवापत्येषु गार्ग्यायण इत्येवेष्यते। तदिदमपत्यशब्दः पुत्रपौत्त्रादिसाधारणपक्षे यद्यपि सुलभमेव । गर्गात्तृतीयङ्गार्ग्यम्प्रति पञ्चमादीनामप्यपत्यत्वात् । तथापि गर्गस्य पञ्चमाद्यपत्ये यूनि विवक्षिते गर्गान्मूलप्रकृतेरपि इञ् स्यात् । तथाच गर्गस्य अनन्तरापत्ये इञि गार्गिः । तदपत्यत्वेन विवक्षिते गर्गस्य पञ्चमादौ यूनि गार्गेः फकि गार्ग्यायण इत्यपि स्यात् । तथा गर्गस्य चतुर्थे यूनि गोत्रत्वाभावात् यञभावे इञि गार्गिः। तदपत्यत्वेन विवक्षिते गर्गस्य पञ्चमादौ यूनि गार्गेः फकि गार्ग्यायण इति स्यात्। गोत्रप्रत्ययान्तादेव गार्ग्यशब्दात् गर्गस्य पञ्चमाद्यपत्ये यूनि फकि गार्ग्यायण इत्येवेष्यते । तदर्थञ्चोत्रप्रत्ययान्तादेव यूनि प्रत्यय इति नियमः क्रियते गोत्राद्यूनीति । तदाह । **यून्यपत्ये गोत्रप्रत्ययान्तादेवेति** ॥ ननु मूलप्रकृतेस्तदनन्तरापत्यात् 'यूनश्च' इति शेषः । नचापत्यशब्दः पुत्र एव रूढ इति पक्षे पञ्चमादौ यूनि चतुर्थाद्यपत्यप्रत्ययान्तादेव प्रत्ययः स्यात् । ननु

१०९५। अत इञ्। (४-१-९५)

अदन्तं यत्प्रातिपदिकं तत्प्रकृतिकात्षष्ठ्यन्तादिञ्स्यादपत्येऽर्थे। दाक्षिः।

१०९६। बाह्वादिभ्यश्च। (४-१-९६)

बाहविः। औडुलोमिः। आकृतिगणोऽयम्।

१०९७। सुधातुरकङ् च। (४-१-९७)

चतुर्थतृतीयवाचिगोत्रप्रत्ययान्तादिति। तत्र विध्यर्थमेवेदं स्यात्, नतु नियमार्थमिति वाच्यम्। पुत्रपौत्रादिसाधारणोऽपत्यशब्द इत्येव भाष्ये सिद्धान्तितत्वादिति भावः। **स्त्रियान्तु न युवसंज्ञेति॥** इह अस्त्रियामिति योगो विभज्यते। यूनीत्यनुवर्तते। उभयमपि प्रथमया विपरिणम्यते। तथाच स्त्री उक्तयुवसंज्ञका नेति फलितमिति भावः। नच स्त्रीभिन्ने यूनि गोत्रादेवेत्यर्थः कुतो नाश्रीयते। एवं सत्येकवाक्यत्वलाभादिति वाच्यम्। पञ्चमादिषु युवतिषु प्रत्ययमालाप्रसङ्गात्। नच 'एको गोत्रे' इति नियमात्तन्निवृत्तिः सम्भवतीति वाच्यम्। युवसंज्ञया गोत्रसंज्ञाया बाधात्। नच सत्यपि योगविभागे स्त्रियान्न युवप्रत्यय इति व्याख्यायतामिति वाच्यम्। गोत्रप्रत्ययेन युवत्यभिधानानापत्तेरित्यलम्। **गर्गस्येति॥** गर्गस्य पञ्चमादौ यूनि गार्ग्यशब्दात् गोत्रे यञन्तात्फकि गार्ग्यायण इति रूपमित्यर्थः। स्त्रियो युवसंज्ञानिषेधस्य प्रयोजनं दर्शयति। **स्त्रियामिति॥** पञ्चमादियुवतीनां युवसंज्ञाविरहेण गोत्रत्वात् 'एको गोत्रे' इति नियमाद्गार्गीत्येव भवति, नतु गार्ग्यायणीति रूपमित्यर्थः। स्त्रीभिन्ने यूनि गोत्रादेवेत्यर्थाश्रयणे तु युवसंज्ञया गोत्रसंज्ञाया बाधात् 'एको गोत्रे' इत्यस्याप्रवृत्तेः प्रत्ययमाला स्यादिति भावः। **अत इञ्॥** प्रातिपदिकादित्यधिकृतमता विशेष्यते, तदन्तविधिः। तदाह। **अदन्तं यत्प्रातिपदिकमिति॥** 'तस्यापत्यम्' इत्यनुवृत्तं 'समर्थानां प्रथमाद्वा' इति च। ततश्च प्रथमोच्चारिततच्छब्दबोधितात्प्रातिपदिकादिति लब्धम्। सुबन्तात्तद्धितोत्पत्तिरिति सिद्धान्तात् सुबन्तादिति लभ्यते। सुप्चेहोपस्थितत्वात् षष्ठ्येव विवक्षिता। तथाच षष्ठ्यन्तात्प्रातिपदिकादिति लभ्यते। यद्यपि प्रातिपदिकन्न षष्ठ्यन्तम्। प्रत्ययग्रहणपरिभाषया प्रकृतिप्रत्ययसमुदायस्यैव लाभात्। तथापि प्रातिपदिकप्रकृतिकषष्ठ्यन्तादित्यर्थो विवक्षितः। तदाह। **तत्प्रकृतिकात्षष्ठ्यन्तादिति॥ दाक्षिरिति॥** दक्षस्यापत्यमिति विग्रहः। इञ्, आदिवृद्धिः, 'यस्येति च' इत्यकारलोपः। "प्रदीयतान्दाशरथाय मैथिली" इति त्वार्षमिति 'तस्यापत्यम्' इत्यत्र निरूपितम्। प्रातिपदिकग्रहणाननुवृत्तौ तु अदन्तात्षष्ठ्यन्तादिति लभ्येत। तथाच दक्षयोपरत्यं दाक्षिरिति न सिध्येदिति भावः। **बाह्वादिभ्यश्च॥** अपत्ये इञिति शेषः। **बाहविरिति॥** बाहुर्नाम कश्चिदृषिः, अथ ऋषय इत्यधिकृत्य "बाहविः गार्ग्यगौतम" इत्याश्वलायनसूत्रे दर्शनात्। बाहोरपत्यमिति विग्रहः। इञि ओर्गुणः। **औडुलोमिरिति॥** उडुलोम्नोऽपत्यमिति विग्रहः। इञि 'नस्तद्धिते' इति टिलोपः। आदिवृद्धिः, अदन्तत्वाभावादप्राप्तिः। **सुधातुरकङ्च॥ चादिञिति॥** सुधातृशब्दात्षष्ठ्यन्तादपत्येऽर्थे इञ्प्रत्ययः।

चादिञ्। सुधातुरपत्यं सौधातकिः। व्यासवरुडनिषादचाण्डालबिम्बानां चेति वक्तव्यम्' (वा २६११)।

१०९८। न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्। (७-३-३)

पदान्ताभ्यां यकारवकाराभ्यां परस्य न वृद्धिः। किं तु ताभ्यां पूर्वौ क्रमादैचावागमौ स्तः। वैयासकिः। वारुडकिः इत्यादि।

१०९९। गोत्रे कुञ्जादिभ्यः च्फञ्। (४-१-९८)

११००। व्रातच्फञोरस्त्रियाम्। (५-३-११३)

व्रातवाचिभ्यश्च्फञन्तेभ्यश्च स्वार्थे ञ्यः स्यान्न तु स्त्रियाम्। कौञ्जायन्यः। बहुत्वे तद्राजत्वाल्लुग्वक्ष्यते। ब्राह्मायन्यः। स्त्रियां कौञ्जायनी। गोत्रत्वेन जातित्वान्ङीप्। अनन्तरापत्ये कौञ्जिः।

प्रकृतेरकङादेशश्चेत्यर्थः। अकङो ककार इत्, अकार उच्चारणार्थः। ञ्चेत्यन्तादेशः। तदाह। **सौधातकिरिति** ॥ **व्यासेति** ॥ व्यास, वरुड, निषाद, चण्डाल, बिम्ब, एभ्यश्च इञि प्रकृतेरकङादेश इत्यर्थः। **न य्वाभ्याम्** ॥ यू च वश्च य्वाविति विग्रहः। वकारादकार उच्चारणार्थः। तदाह। **यकारवकाराभ्यामिति** ॥ परस्येत्यध्याहारलभ्यम्। **न वृद्धिरिति** ॥ मृजेर्वृद्धिरित्यतस्तदनुवृत्तेरिति भावः। तुशब्दो विशेषप्रदर्शनार्थः इत्याह। **किन्त्विति**। **ताभ्यामिति** ॥ यकारवकाराभ्यामित्यर्थः। **पूर्वाविति** ॥ पूर्वावयवाविति यावत्। तेन आगमत्वं लभ्यते। तदाह। **ऐचावागमाविति** ॥ ऐच् प्रत्याहारः। यथासङ्ख्यं यकारात्पूर्वं ऐकारः, वकारात्पूर्वं औकारः। **वैयासकिरिति** ॥ वेदान्व्यस्यति विविधमस्यति शाखाभेदेन विभजतीति वेदव्यासः, कर्मण्यण। नामैकदेशग्रहणम्। व्यासस्यापत्यमिति विग्रहः। इञ्प्रत्ययः। प्रकृतेरङादेशः। अत्र यकारः पदान्तः। तस्मात्परस्य आकारस्य पर्जन्यवल्लक्षणप्रवृत्त्या आदिवृद्धिः प्राप्ता न भवति। किन्तु यकारात्पूर्वः ऐकार आगमः। वैयासकिरिति रूपम्। स्वश्वस्याः पत्यं सौवश्विरित्यत्र वकारात्परस्य न वृद्धिः, ततः पूर्वं औकारः। नच ऐचोर्वृध्यपवादत्वादेव वृद्ध्यभावसिद्धेस्तन्निषेधो व्यर्थ इति वाच्यम्। यत्र य्वाभ्यामपरस्य प्रसक्ताया वृद्धेः निषेधः तत्रैव ऐजागमाविति विषयनिर्देशार्थत्वात्। तेन दाध्यश्विरित्यादौ न वृद्धिनिषेधोऽयं येन नाप्राप्तिन्यायेन आदिवृद्धेरेव। तेन द्वे अशीतिभूतो ब्यशीतिक इत्यत्र 'सङ्ख्यायाः संवत्सरसङ्ख्यस्य च' इत्युत्तरपदवृद्धिर्भवत्येव। वरुडादयो जातिविशेषाः। वारुडकिः, नैषादकिः, चाण्डालकिः, बैम्बकिः। **गोत्रे कुञ्ज** ॥ स्पष्टम्। इञोऽपवादः। च्फञि चञाविती। **व्रातच्फञोः** ॥ व्रातश्च च्फञ्च इति द्वन्द्वाद्यत्वयेन पञ्चम्यर्थे षष्ठी। तदाह। **व्रातवाचिभ्य इति** ॥ **स्वार्थे ञ्यः स्यादिति** ॥ 'पूगाञ्ञ्यो ग्रामणीपूर्वात्' इत्यतः ञ्य इत्यनुवर्तते। स च स्वार्थिकः। 'ञ्यादयः प्राग्वुनः' इति स्वार्थिकेषु परिगणनादिति भावः। **कौञ्जायन्य इति** ॥ कुञ्जस्य गोत्रापत्यमिति विग्रहः। च्फञि चञाविती आयन्नादेशः, आदिवृद्धिः, ततो ञ्यः ञकार इत् 'यस्येति च' इत्यकारलोपः। **तद्राजत्वादिति** ॥ 'ञ्यादयस्तद्राजाः' इति वचनादिति भावः। **लुग्वक्ष्यते**

११०१। नडादिभ्यः फक्। (४-१-९९)

'गोत्रे' इत्येव। नाडायनः। चारायणः। अनन्तरो नाडिः।

११०२। हरितादिभ्योऽञः। (४-१-१००)

एभ्योऽञन्तेभ्यो यूनि फक्। हारितायनः। इह गोत्राधिकारेऽपि सामर्थ्याद्यून्ययम्। न हि गोत्रादपरो गोत्रप्रत्ययः। बिदाद्यन्तर्गणो हरितादिः।

११०३। यञिञोश्च। (४-१-१०१)

गोत्रे यौ यञिञौ तदन्तात्फक्स्यात्। 'अनाति' इत्युक्तेः 'आपत्यस्य–' (सू १०८२) इति यलोपो न। गार्ग्यायणः। दाक्षायणः।

११०४। शरद्वच्छुनकदर्भाभृगुवत्साग्रायणेषु। (४-१-१०२)

गोत्रे फक्। अञिञोरपवादः। आद्यौ बिदादी। शारद्वतायनो भार्गवश्चेत्, शारद्वतोऽन्यः। शौनकायनो वात्स्यश्चेत्, शौनकोऽन्यः। दार्भायणः आग्रायणश्चेत्, दार्भिरन्यः।

इति ॥ 'तद्राजस्य बहुषु' इत्यनेनेति शेषः। **ब्राह्मायन्य इति** ॥ ब्रह्मस्य गोत्रापत्यमिति विग्रहः। च्फञादि पूर्ववत्। ञ्यविधावस्त्रियामित्यस्य प्रयोजनमाह। **स्त्रियाङ्कौञायनीति** ॥ कुञ्चस्यापत्यं स्त्री इति विग्रहः। स्त्रीत्वादिह नञ्प्रत्यय इति भावः। अदन्तत्वादिह टापमाशङ्क्य आह। **गोत्रत्वेनेति** ॥ कृते तु ञ्यप्रत्यये योपधत्वाज्जातिलक्षणङीषभावे टाप् स्यादिति भावः। च्फञ्विधौ गोत्रग्रहणस्य प्रयोजनमाह। **अनन्तरापत्ये कौञिरिति** ॥ **नडादिभ्यः फक्** ॥ इञोऽपवादः। **अनन्तरो नाडिरिति** ॥ अनन्तरापत्यस्य गोत्रत्वाभावात् फगभावे इञेवेत्यर्थः। **हरितादिभ्योऽञः** ॥ इत्यादि स्पष्टम्। **यञिञोश्च** ॥ गोत्रे इत्यधिकृतं यञिञोर्विशेषणम्, नतु विधेयस्य फकः, व्याख्यानात्। तदाह। **गोत्रे यौ यञिञाविति** ॥ सामर्थ्याद्यून्ययम्। न हि गोत्रापत्ययात् गोत्रप्रत्ययोऽस्ति। 'एको गोत्रे' इति नियमात्। **अनातीति** ॥ गर्गस्य गोत्रङ्गार्ग्यः। गर्गादित्वाद्यञ्। गार्ग्यस्यापत्यं युवेत्यर्थे यञन्तात् फकि आयन्नादेशे अनातीति पर्युदासात् 'आपत्यस्य च' इति यलोपाभावे णत्वे गार्ग्यायण इति रूपमित्यर्थः। **दाक्षायण इति** ॥ दक्षस्य गोत्रापत्यं दाक्षिः, अत इञ्, दाक्षेरपत्यं युवा दाक्षायणः, इञन्तात्फक्। गोत्रे किम्। सुतङ्गमस्यादूरभवः इत्यर्थे 'सुतङ्गमादिभ्य इञ्' इति इञि सौतङ्गमेरपत्ये न फक्। **शरद्वच्छुनक** ॥ शेषपूरणेन सूत्रं व्याचष्टे। **गोत्रे फगिति** ॥ **आद्यौ बिदादी इति** ॥ शरद्वच्छुनकशब्दौ बिदादी। अतः तदुभयविषये अञपवाद इत्यर्थः। दर्भविषये त्विञोऽपवाद इति स्पष्टमेव। **दर्भः** कश्चिदृषिः। ऋष्यणं बाधित्वा बाह्वादित्वादिञ्। आग्रायणश्चेति कश्चिदृषिः,

११०५ । द्रोणपर्वतजीवन्तादन्यतरस्याम् । (४-१-१०३)

एभ्यो गोत्रे फग्वा । द्रौणायणः—द्रौणिः । पार्वतायनः—पार्वतिः । जैवन्तायनः—जैवन्तिः । अनादिरिह द्रोणः । अश्वत्थाम्न्यनन्तरे तूपचारात् ।

११०६ । अनृष्यानन्तर्ये बिदादिभ्योऽञ् । (४-१-१०४)

एभ्योऽञ् गोत्रे, ये त्वत्रानृषयः पुत्त्रादयस्तेभ्य आनन्तर्ये । सूत्रे स्वार्थे ष्यञ् । बिदस्य गोत्रापत्यं बैदः । अनन्तरो वैदिः । बाह्वादेराकृतिगणत्वादिञ् । पुत्त्रस्यापत्यं पौत्त्रः । दौहित्रः ।

११०७ । गर्गादिभ्यो यञ् । (४-१-१०५)

'गोत्रे' इत्येव । गार्ग्यः । वात्स्यः ।

११०८ । यञञोश्च । (२-४-६४)

नडादिफगन्तोऽयम् । **द्रोणपर्वत** ॥ **अनादिरिति** ॥ अश्वत्थाम्नः पिता यो महाभारते कल्पादौ प्रसिद्धः तदपेक्षया अन्य एवायं अनादिर्द्रोण इत्यर्थः । **अश्वत्थाम्नीति** ॥ द्रोणाचार्यस्यानन्तरापत्ये अश्वत्थाम्नि द्रौणायन इति प्रयोग इत्यर्थः । तदिदं 'बाह्वादिभ्यश्च' इति सूत्रे भाष्ये स्पष्टम् । **अनृष्यानन्तर्ये** ॥ अनृषीति लुप्तपञ्चम्यंकम् । बिदादिभ्योऽञ् इति द्विरावर्तते । तथाच 'अनृष्यानन्तर्ये बिदादिभ्योऽञ्' इति कृत्स्नमेकं वाक्यम् । बिदादिभ्योऽञ् इति वाक्यान्तरम् । तत्र द्वितीयं वाक्यं व्याचष्टे । **एभ्योऽञ् गोत्रे इति** ॥ गोत्रे विवक्षिते बिदादिभ्यः अञ् स्यादित्यर्थः । अथ प्रथमं वाक्यं कृत्स्नसूत्रं व्याचष्टे । **ये त्विति** ॥ अनृषिभ्यो बिदादिभ्यः अनन्तरापत्ये अञ् स्यादित्यन्वयार्थः । बिदादौ हि ऋषयः अनृषयश्च पठिताः । तत्र ये अनृषयः तेभ्योऽनन्तरापत्ये अञिति फलितमिति भावः । ननु आनन्तर्ये इति श्रवणादनन्तर इति कथमित्यत आह । **सूत्रे स्वार्थे ष्यञिति** ॥ अनन्तरशब्दादिति शेषः । चतुर्वर्णादित्वादिति भावः । **विदस्य गोत्रापत्यं वैद इति** ॥ बिदस्य ऋषित्वात्ततो गोत्र एवाञिति भावः । ऋष्यणोऽपवादः । स्वरे विशेषः । ननु अनन्तरापत्ये अञभावे इञपवादः ऋष्यणेवोचित इति कथमनन्तरो वैदिरित्यत आह । **बाह्वादेरिति** ॥ बिदादिगणस्थादनृषेरनन्तरापत्ये अञमुदाहरति । **पौत्त्रः । दौहित्र इति** ॥ पुत्त्रस्यानन्तरापत्यमिति दुहितुरनन्तरापत्यमिति च विग्रहः । यथायथमणिञोरपवादः अञ् । **गर्गादिभ्यो यञ् ॥ गार्ग्यः । वात्स्य इति** ॥ गर्गस्य गोत्रापत्यमिति वत्सस्य गोत्रापत्यमिति च विग्रहः । रामो जामदग्न्यः, पाराशर्यो व्यासः इत्यादौ तु अनन्तरापत्ये गोत्रत्वारोपाद्यञित्याहुः । **यञञोश्च** ॥ द्वितीयचतुर्थपादे इदं सूत्रम् । नत्विदञ्चातुरर्थिकमपत्याधिकारस्थम् । तत्र प्रत्ययग्रहणपरिभाषया तदन्तग्रहणम् । 'तद्राजस्य बहुषु तेनैवास्त्रियाम्' इति सूत्रं तद्राजस्येति वर्जमनुवर्तते । **'ष्यङक्षत्रिय' इत्यतो लुगिति 'यस्कादिभ्यो गोत्रे' इत्यतो गोत्रे इति च । तदाह । गोत्रे**

गोत्रे यद्यञन्तमञन्तं च तदवयवयोरेतयोर्लुक्स्यात्तत्कृते बहुत्वे, न तु स्त्रियाम्। गर्गाः। वत्साः। बिदाः। उर्वाः। 'तत्कृते' इति किम्। प्रियगार्ग्याः। स्त्रियां तु गार्ग्यः स्त्रियः। 'गोत्रे' किम्। द्वैप्याः। औत्साः। प्रवराध्यायप्रसिद्धमिह गोत्रम्। तेनेह न। पौत्राः। दौहित्राः।

११०९। मधुबभ्रोर्ब्राह्मणकौशिकयोः। (४-१-१०६)

गोत्रे यञ्। माधव्यो ब्राह्मणः। माधवोऽन्यः। बाभ्रव्यः कौशिकर्षिः। बाभ्रवोऽन्यः। बभ्रुशब्दस्य गर्गादिपाठात्सिद्धेऽपि नियमार्थमिदम्। गर्गादिपाठफलं तु लोहितादिकार्यम्। बाभ्रव्यायणी।

१११०। कपिबोधादाङ्गिरसे। (४-१-१०७)

गोत्रे यञ्स्यात्। काप्यः। बौध्यः। 'आङ्गिरसे' किम्। कापेयः। बौधिः।

यदिति॥ एतयोरिति॥ यञञोरित्यर्थः। प्रत्ययादर्शनस्यैव लुक्त्वादिति भावः। **तत्कृते इति॥** यञञ्प्रत्ययार्थगतबहुत्वे इति यावत्। **गर्गा इति॥** गर्गस्यापत्यानीत्यादि विग्रहः। **प्रियगार्ग्या इति॥** प्रियो गार्ग्यो येषामिति विग्रहः। अत्र यञर्थगतबहुत्वाभावान्न लुगिति भावः। **द्वैप्या इति॥** द्वीपे भवा इत्यर्थः। 'द्वीपादनुसमुद्रम्' इति यञ्। **औत्सा इति॥** उत्से भवा इत्यर्थः। 'उत्सादिभ्योऽञ्' इहोभयत्रापि यञञोर्गोत्रवाचित्वाभावान्न लुगिति भावः। ननु पौत्त्राः दौहित्राः इत्यत्राप्यनृषिबिदादिलक्षणाञो लुक् स्यात्। नच तस्यानन्तरापत्यवाचित्वाद्गोत्रवाचित्वाभावान्न लुगिति वाच्यम्। 'यूनि लुक्' इति सूत्रभाष्ये अपत्याधिकारादन्यत्र लौकिकमेव गोत्रं गृह्यते इति सिद्धान्ततत्वादित्यत आह। **प्रवरेति॥** "कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः। जमदग्निर्वसिष्ठश्च सप्तैते ऋषयः स्मृताः॥" 'तेषां यदपत्यं तद्गोत्रमित्याचक्षते' इति बोधायनीयादिप्रवराध्यायप्रसिद्धाः भृग्वादय एवेह गोत्रत्वेन विवक्षिता इत्यर्थः। कैयटेन लौकिकस्य गोत्रस्य ग्रहणमिति भाष्यमुपादाय तथैव व्याख्यातत्वादिति भावः। एवञ्च पौत्त्राः दौहित्राः इत्यादौ पौत्त्रदौहित्रयोः तथाविधगोत्रवाचित्वाभावान्न लुगिति स्थितम्। विस्तरस्तु शब्देन्दुशेखरे ज्ञेयः। **मधुबभ्रोः ब्राह्मणकौशिकयोः॥** शेषपूरणेन सूत्रं व्याचष्टे। **गोत्रे यञिति॥** मधुशब्दाद्बभ्रुशब्दाच्च गोत्रापत्ये यञ् स्यात्। ब्राह्मणे कौशिके च यथासङ्ख्यं वाच्ये इत्यर्थः। **लोहितादिकार्यमिति॥** ष्फ इत्यर्थः। लोहितादिर्गर्गाद्यन्तर्गण इति भावः। **बाभ्रव्यायणीति॥** बभ्रोर्गोत्रापत्यं स्त्रीति विग्रहः। गर्गादियञि बाभ्रव्यशब्दात् 'सर्वत्र लोहितादिकतन्तेभ्यः' इति ष्फः। आयनादेशः, षित्त्वात् ङीषिति भावः। **कपिबोधादाङ्गिरसे॥ गोत्रे यञ् स्यादिति॥** शेषपूरणमिदम्। कपिशब्दाद्बोधशब्दाच्च आङ्गिरसात्मके गोत्रे गम्ये यञ् स्यादित्यर्थः। **कापेय इति॥** अत्र गोत्रस्य

१११। वतण्डाच्च । (४-१-१०८)

'आङ्गिरसे' इत्येव । वातण्ड्यः । अनाङ्गिरसे तु गर्गादौ शिवादौ च पाठाद्यञणौ । वातण्ड्यः—वातण्डः ।

१११२ । लुक्स्त्रियाम् । (४-१-१०९)

'वतण्डाच्च' (सू १११) इति विहितस्य लुक्स्यात्स्त्रियाम् । शार्ङ्गरवादित्वान्ङीन् । वतण्डी । अनाङ्गिरसे तु वातण्ड्यायनी । लोहितादित्वात्फक् । अणि तु वातण्डी । ऋषित्वाद्वक्ष्यमाणः ष्यङ् न ।

१११३ । अश्वादिभ्यः फञ् । (४-१-११०)

गोत्रे । आश्वायनः । 'पुंसि जाते' (ग सू ६९) । पुंसीति तु प्रकृतिविशेषणम् । जातस्य गोत्रापत्यं जातायनः । 'पुंसि' इति किम् । जाताया अपत्यं जातेयः ।

१११४ । भर्गात्त्रैगर्ते । (४-१-१११)

गोत्रे फञ् । भार्गायणस्त्रैगर्तः । भार्गिरन्यः ।

अनाङ्गिरसत्वात् यञभावे 'इतश्चानिञः' इति ढक्। **बाँधिरिति** ॥ अत्राप्यनाङ्गिरसत्वात् यञभावे ऋष्यणञ्बाधित्वा बाह्वादित्वादिञिति भावः । कपेर्गर्गादौ पाठेऽपि अङ्गिरस एवेति नियमार्थङ्ग्रहणम् । तस्य गर्गादौ पाठस्तु लोहितादिकार्यार्थः । काप्यायनी । बोधशब्दात्तु प्राप्ते विधिः । **वतण्डाच्च** ॥ वतण्डस्य गर्गादौ शिवादौ च पाठात् यञणोः प्राप्तयोराङ्गिरसे यञेवेति नियमार्थमिदम् । **लुक् स्त्रियाम्** ॥ **वतण्डाच्चेति विहितस्येति** ॥ यञ इति शेषः । **वतण्डीति**॥ वतण्डस्य गोत्रापत्यं स्त्री आङ्गिरसीति विग्रहः । यञो लुकि आदिवृद्धिनिवृत्तौ ङीनिति भावः। **वातण्ड्यायनीति** ॥ यञि आदिवृद्धौ लोहितादिलक्षणः फक् षित्त्वात् ङीषिति भावः। 'वतण्डाच्च' इति विहितस्येत्यस्य प्रयोजनमाह । **अणि तु वातण्डीति** ॥ शिवादित्वादणि गोत्रत्वेन जातित्वाज्जातिलक्षणे ङीषि तस्याणो वतण्डाद्विहितत्वेऽपि 'वतण्डाच्च' इति विहितत्वाभावान्न लुगिति भावः । ननु वतण्डादणि तस्य 'अणिञोरनार्षयोः' इति वक्ष्यमाणः ष्यङ् स्यादित्यत आह । **ऋषित्वादिति** ॥ **अश्वादिभ्यः** ॥ **गोत्रे इति** ॥ शेषपूरणमिदम्। आङ्गिरसे इति निवृत्तम् । **आश्वायन इति** ॥ अश्वस्य गोत्रापत्यमिति विग्रहः । इञपवादः फञ् । **पुंसि जाते इति** ॥ गणसूत्रम् । **प्रकृतिविशेषणमिति** ॥ पुंसि विद्यमानो यो जातशब्दः तस्माद्गोत्रे फञित्यर्थः । **जातेय इति** ॥ **'स्त्रीभ्यो ढक्'** । **भर्गात्त्रैगर्ते** ॥ इदमपि गणसूत्रम् । त्रिगर्तो नाम भर्गस्य पुत्रः । तस्यापत्यं त्रैगर्तः । ऋष्यण् । तस्मिन्गोत्रे भर्गात् फञ्।

१११५। शिवादिभ्योऽण्। (४-१-११२)

'गोत्रे' इति निवृत्तम्। शिवस्यापत्यं शैवः। गाङ्गः। पक्षे तिकादित्वात्फिञ्। गाङ्गायनिः। शुभ्रादित्वाद्ढक्। गाङ्गेयः।

१११६। अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः। (४-१-११३)

अवृद्धेभ्यो नदीमानुषीनामभ्योऽण्स्यात्। ढकोऽपवादः। यामुनः। नार्मदः। चिन्तिताया अपत्यं चैन्तितः। 'अवृद्धाभ्यः' किम्। वासवदत्तेयः। 'नदी–' इत्यादि किम्। वैनतेयः। 'तन्नामिकाभ्यः' किम्। शोभनाया अपत्यं शौभनेयः।

१११७। ऋष्यन्धकवृष्णिकुरुभ्यश्च। (४-१-११४)

ऋषयो मन्त्रद्रष्टारः। वासिष्ठः। वैश्वामित्रः। अन्धकेभ्यः। श्वाफल्कः। वृष्णिभ्यः। वासुदेवः। आनिरुद्धः। 'शौरिः' इति तु बाह्वादित्वादिञ्।

शिवादिभ्योऽण्॥ निवृत्तमिति॥ वृत्तिकैयटयोः तथोक्तत्वादिति भावः। 'यूनि लुक्' इति सूत्रस्य भाष्यकैयटयोस्तु गोत्रसंज्ञासूत्रपर्यन्तङ्गोत्राधिकार इति लभ्यन्ते। तत्तु मतान्तरमित्येके। 'तदेव युक्तम्' इति शब्देन्दुशेखरे प्रपञ्चितम्। **अवृद्धाभ्यो नदी॥** नदीमानुषीशब्दापेक्षमवृद्धाभ्य इति स्त्रीत्वम्। वस्तुतस्तु 'अवृद्धेभ्यो नदीमानुषीनामभ्यः' इत्येव सूत्रयितुमुचितमिति व्याचष्टे। **अवृद्धेभ्य इत्यादि॥** ननु 'तस्यापत्यम्' इत्येव सिद्धे किमर्थमिदमित्यत आह। **ढकोऽपवाद इति॥** चिन्तिता नाम काचिन्मानुषी। **वासवदत्तेय इति॥** वासवदत्ता नाम काचिन्मनुष्यस्त्री। तस्या अपत्यमिति विग्रहः। वृद्धसंज्ञकत्वादणभावे ढगिति भावः। **वैनतेय इति॥** विनताया अपत्यमिति विग्रहः। विनता नाम गरुडमाता, सा न मानुषी नापि नदीति भावः। **शौभनेय इति॥** शोभनाशब्दोऽयन्तु न नदीमानुषीनामेति भावः। **ऋष्यन्धक॥** प्रलीनाः वेदाः तपोबलवशात् यान् आर्षन्ति प्राप्नुवन्ति ते ऋषयः। तथाच तैत्तिरीये श्रुतम्। "अजानहवै पृश्नीस्तपस्यमानान्ब्रह्म स्वयम्भ्वभ्यानर्षत्, त ऋषयोऽभवन्, तदृषीणामृषित्वम्" इति। अजाः नित्याः, पृश्नयः शुक्लाः शुद्धाः इति यावत्। तान् तपस्यमानान् तपश्चरतः स्वयम्भु अनादि ब्रह्म वेदः अभ्यानर्षत् 'ऋष गतौ' आभिमुख्येन प्राप्नोत्। ते वेदस्य अर्षणात् ऋषिशब्दवाच्याः अभवन्निति वेदभाष्यम्। "सर्गादिसमये वेदान्सेतिहासान्महर्षयः। लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवा॥" इति पुराणेषु प्रसिद्धम्। कात्यायनप्रणीतसर्वानुक्रमणिकाख्यग्रन्थे स्पष्टमेतत्। तदाह। **ऋषयो मन्त्रद्रष्टार इति॥** अन्धकशब्देन वृष्णिशब्देन कुरुशब्देन च अन्धकादिवंश्या विवक्षिताः। ऋषिविशेषवाचिभ्यः अन्धकादिवंश्यवाचिभ्यश्चापत्ये अण् स्यादित्यर्थः। इञोऽपवादः। ऋषिभ्यः उदाहरति। **वासिष्ठः। वैश्वामित्र इति॥ अन्धकेभ्य इति॥** अन्धकवंश्यवाचिभ्यः उदाहियते इत्यर्थः। **श्वाफल्क इति॥** श्वफल्कस्यापत्यमिति विग्रहः। **वृष्णिभ्य इति॥** वृष्णिवंश्यवाचिभ्य उदाहियते इत्यर्थः। **वासुदेव इति॥** वासुदेवस्यापत्यमिति विग्रहः। **आनिरुद्ध**

कुरुभ्यः । नाकुलः । साहदेवः । इञ एवायमपवादः, मध्येऽपवादन्यायात् । अत्रिशब्दात्तु परत्वाड्ढक् । आत्रेयः ।

१११८ । मातुरुत्सङ्ख्यासम्भद्रपूर्वायाः । (४-१-११५)

सङ्ख्यादिपूर्वस्य मातृशब्दस्योदादेशः स्यादण्प्रत्ययश्च । द्वैमातुरः । षाण्मातुरः । साम्मातुरः । भाद्रमातुरः । आदेशार्थं वचनम् । प्रत्ययस्तूत्सर्गेण सिद्धः । स्त्रीलिङ्गनिर्देशोऽर्थापेक्षः । तेन धान्यमातुर्न । 'सङ्ख्या–' इति किम् । सौमात्रः । शुभ्रादित्वाद्वैमात्रेयः ।

१११९ । कन्यायाः कनीन च । (४-१-११६)

ढकोऽपवादोऽण् । तत्सन्नियोगेन कनीनादेशश्च । कानीनो व्यासः कर्णश्च । अनूढाया एवापत्यमित्यर्थः ।

इति ॥ अनिरुद्धस्यापत्यमिति विग्रहः । ननु शूरो नाम कश्चित् वृष्णिवंश्यः । तस्यापत्यं शौरिः कथम् । अण्प्रसङ्गादित्यत आह । **शौरिरिति त्विति** ॥ बाह्वादित्वादित्यनन्तरम् इञा समाधेयमिति शेषः । **कुरुभ्य इति** ॥ कुरुवंश्यवाचिभ्यः उदाहियते इत्यर्थः । नकुलसहदेवौ प्रसिद्धौ । ननु अत्रेरपत्यमित्यर्थे 'इतश्चानित्रः' इति ढकि आत्रेय इति कथम् । ऋष्यणा इञ इव ढकोऽपि बाधौचित्यादित्यत आह । **इञ एवेति** ॥ ननु ढकः इत्यर्थः । **मातुरुत्सङ्ख्यासम्भद्रपूर्वायाः** ॥ **द्वैमातुर इति** ॥ द्वयोर्मात्रोरपत्यमिति विग्रहः । 'तद्धितार्थ' इति समासः । अण् ऋकारस्य उकारः, रपरत्वम् । **एवं षाण्मातुरः । साम्मातुर इति** ॥ समीचीना माता सम्माता, सम्मातुरपत्यं साम्मातुरः । अण्, उत्, रपरत्वम् । **भाद्रमातुर इति** ॥ भद्रा चासौ माता चेति विग्रहः । अणादि पूर्ववत् । ननु 'तस्यापत्यम्' इत्येव सिद्धे अण्विधिर्व्यर्थ एवेत्यत आह । **आदेशार्थं वचनमिति** ॥ उदादेशस्य अण्सन्नियोगेन विध्यर्थमित्यर्थः । ननु धान्यमातुरपत्यं धान्यमातुरः इति स्यादित्यत आह । **स्त्रीलिङ्गनिर्देशोऽर्थापेक्ष इति** ॥ मातृगतं स्त्रीत्वं शब्दे आरोप्य सङ्ख्यासम्भद्रपूर्वाया इति निर्दिश्यते । अतः स्त्रीलिङ्गस्य मातृशब्दस्य जननीवाचकस्य ग्रहणमित्यर्थः । **तेन धान्यमातुर्नेति** ॥ अत्र मातृशब्दस्य परिच्छेत्तृवाचिनः पुल्लिङ्गत्वादिति भावः । **सौमात्र इति** ॥ सुमातुरपत्यमित्यर्थे 'तस्यापत्यम्' इत्यण् । सङ्ख्यासम्भद्रपूर्वत्वाभावात् नायमण् । उत्त्वमपि तत्सन्नियोगशिष्टत्वान्नेति भावः । ननु द्वैमात्रेयः इति कथम् । सङ्ख्यापूर्वकतया अणः उत्त्वस्य च दुर्वारत्वादित्यत आह । **शुभ्रादित्वादिति** ॥ 'शुभ्रादिभ्यश्च' इति ढकि रूपमित्यर्थः । **कन्यायाः कनीन च** ॥ कनीनेति लुप्तप्रथमाकम् । **ढक इति** ॥ 'स्त्रीभ्यो ढक्' इति विहितस्येत्यर्थः । **कनीनादेशश्चेति** ॥ प्रकृतेरिति शेषः । भारते व्यासः कर्णश्च कन्यायाः पुत्त्रौ इति प्रसिद्धम् । ननु कन्याया अप्रादुर्भूतयौवनत्वात् पुंसंयोगाभावात् कथमपत्यसम्बन्ध इत्यत आह । **अनूढाया इति** ॥ अलब्धविवाहाया

११२०। विकर्णशुङ्गच्छगलाद्वत्सभरद्वाजात्रिषु। (४-१-११७)

अपत्येऽण्, वैकर्णो वात्स्यः। वैकर्णिरन्यः। शौङ्गो भारद्वाजः। शौङ्गिरन्यः। छागल आत्रेयः। छागलिरन्यः। केचित्तु 'शुङ्गाः' इत्याबन्तं पठन्ति। तेषां ढक्प्रत्युदाहरणम्। शौङ्गेयः।

११२१। पीलाया वा। (४-१-११८)

तन्नामिकाणं बाधित्वा 'ब्रुचः' (सू ११२४) इति ढकि प्राप्ते पक्षेऽण्विधीयते। पीलाया अपत्यं पैलः—पैलेयः।

११२२। ढक्च मण्डूकात्। (४-१-११९)

चादण्। पक्षे इञ्। माण्डूकेयः—माण्डूकः—माण्डूकिः।

११२३। स्त्रीभ्यो ढक्। (४-१-१२०)

स्त्रीप्रत्ययान्तेभ्यो ढक्स्यात्। वैनतेयः। बाह्वादित्वात्सौमित्रिः। शिवादित्वात्सापत्नः।

११२४। ब्रुचः। (४-१-१२१)

इत्यर्थः। एतच्च भाष्ये स्पष्टम्। **विकर्ण** ॥ वत्सादिशब्दैस्तद्वंश्या विवक्षिताः। विकर्ण, शुङ्ग, छगल, एभ्योऽण् स्यात्। वत्सवंश्ये भरद्वाजवंश्ये अत्रिवंश्ये चापत्ये इत्यर्थः। एतेन वत्सादीनाम्मूलपुरुषत्वात् विकर्णादीन्प्रत्यपत्यत्वासम्भव इति निरस्तम्। विकर्णादिभ्यो वात्स्यादिष्वेव 'ऋष्यण्' इति नियमार्थं सूत्रम्। **पीलाया वा** ॥ अपत्येऽणिति शेषः। पीला नाम काचिन्मानुषी। **तन्नामिकाणमिति** ॥ बाह्वादिग्रहणाभावे तु अनेनाणा नित्यमेव ढको बाधः स्यात्। नच महाविभाषया अणः पाक्षिकत्वात्तदभावे ढक् भवत्येवेति वाच्यम्। महाविभाषया अपवादे निषिद्धे उत्सर्गो न प्रवर्तते इति ज्ञापनात्। अन्यथा शैबः शैबिरित्यादि स्यात्। **ढक् च मण्डूकात्** ॥ मण्डूको नाम ऋषिः। **पक्षे इञिति** ॥ पूर्वसूत्राद्वाग्रहणानुवृत्तेरिति भावः। **स्त्रीभ्यो ढक्** ॥ स्त्रीशब्देन टाबादयः स्त्रीप्रत्ययाश्चातुर्थिका गृह्यन्ते। न त्वन्येऽपि स्त्रीवाचकाः। व्याख्यानादित्याह। **स्त्रीप्रत्ययान्तेभ्य इति** ॥ विनता नाम गरुडमाता, तस्याः अपत्यामिति विग्रहः। प्रत्ययग्रहणङ्किम्। दरत्कश्चित्क्षत्रियः, तस्यापत्यं स्त्री दरत्। 'ब्रुञ्मगध' इत्यण्। 'अतश्च' इति तस्य लुक्। तस्यापत्यं दारदः। अत्र दरच्छब्दस्य स्त्रीलिङ्गत्वेऽपि स्त्रीप्रत्ययान्तत्वाभावान्न ढक्। ननु सुमित्राया अपत्यं सौमित्रिः, सपत्नाया अपत्यं सापत्न इति कथं, ढक्प्रसङ्गादित्यत आह। **बाह्वादित्वादित्यादि** ॥ सापत्नशब्दे पुंवत्त्वनेति प्रागेवोक्तम्। **ब्रुचः** ॥ ननु 'स्त्रीभ्यो ढक्' इत्येव सिद्धे किमर्थमिदमित्यत

द्व्यचः स्त्रीप्रत्ययान्तादपत्ये ढक् । **तन्नामिकाणोऽपवादः** । **दात्तेयः**। **पार्थ इत्यत्र तु 'तस्येदम्' (सू १५००) इत्यण्** ।

११२५ । इतश्चानिञः । (४-१-१२२)

इकारान्ताद्द्व्यचोऽपत्ये ढक्स्यात् । न त्विञन्तात् । दौलेयः । नैधेयः।

११२६ । शुभ्रादिभ्यश्च । (४-१-१२३)

ढक्स्यात् । शुभ्रस्यापत्यं शौभ्रेयः ।

११२७ । विकर्णकुषीतकात्काश्यपे । (४-१-१२४)

अपत्ये ढक् । वैकर्णेयः । कौषीतकेयः । अन्यो वैकर्णिः । कौषीतकिः।

११२८ । भ्रुवो वुक्च । (४-१-१२५)

चाड्ढक् । भ्रौवेयः ।

११२९ । प्रवाहणस्य ढे । (७-३-२८)

प्रवाहणशब्दस्योत्तरपदस्याचामादेरचो वृद्धिः पूर्वपदस्य तु वा ढे परे। **प्रवाहणस्यापत्यं प्रावाहणेयः—प्रवाहणेयः** ।

११३० । तत्प्रत्ययस्य च । (७-३-२९)

आह । **तन्नामिकेति** ॥ **दात्रेय इति** ॥ दत्ता नाम काचिन्मानुषी, तस्या अपत्यमिति विग्रहः । ननु पृथाया अपत्यं पार्थ इति कथम् । तन्नामिकाणम्बाधित्वा 'द्व्यचः' इति ढक्प्रसङ्गादित्यत आह । **पार्थ इत्यत्रेति** ॥ शिवादित्वादपत्य एवाणित्यन्ये । **इतश्चानिञः**॥ अस्त्रीप्रत्ययान्तार्थमिदम् । दुलिः निधिश्च कश्चित् । **आत्रेय इति** ॥ अत्रिः प्रसिद्धः । परत्वादयमृष्यणमपि बाधते इति भावः । **शुभ्रादिभ्यश्च** ॥ **ढक् स्यादिति** ॥ शेषपूरणम् । इञाद्यपवादः । **शुभ्रस्यापत्यमिति** ॥ अस्त्रीत्वादप्राप्तौ ढगिति भावः । **विकर्णकुषीतकात्काश्यपे** ॥ **अपत्ये ढगिति** ॥ शेषपूरणम् । काश्यप एवेति नियमार्थं शुभ्रादिभ्यः पृथक् पाठः। **भ्रुवो वुक् च** ॥ **चाड्ढगिति** ॥ भ्रूशब्दादपत्ये ढक् स्यात् प्रकृतेर्वुगागमश्च । वुकि ककार इत् । उकार उच्चारणार्थः । कित्त्वादन्तावयवः । **भ्रौवेय इति** ॥ भ्रूर्नाम काचित् तस्या अपत्यमिति विग्रहः । ढकि एयादेशे प्रकृतेर्वुकि आदिवृद्धिः । वुगभावे तु ऊकारस्य वृद्धौ आवादेशे भ्रावेय इति स्यात् । **प्रवाहणस्य ढे** ॥ उत्तरपदस्येत्यधिकृतम् । 'तद्धितेष्वचामादेः' इत्यतः अचामादेरित्यनुवर्तते । 'मृजेर्वृद्धिः' इत्यतो वृद्धिरिति 'अर्धात्परिमाणस्य पूर्वस्य तु वा' इत्यतः पूर्वस्य वेति। तदाह । **प्रवाहणशब्दस्येति** ॥ **प्रावाहणेयः—प्रवाहणेय इति** ॥ शुभ्रादित्वाड्ढकि पूर्वपदस्य पाक्षिकी आदिवृद्धिः । उत्तरपदस्य नित्यम् । उत्तरपदे आकारस्य वृद्धेः फलन्तु प्रावाहणेयीभार्य इत्यत्र 'वृद्धिनिमित्तस्य च' इति पुंवत्त्वप्रतिषेध एव । **तत्प्रत्ययस्य च** ॥

ढप्रत्ययान्तस्य प्रवाहणस्योत्तरपदस्यादेरचो वृद्धिः पूर्वपदस्य तु वा। प्रवाहणेयस्यापत्यम्, प्रावाहणेयिः—प्रवाहणेयिः। बाह्यतद्धितनिमित्ता वृद्धिर्ढाश्रयेण विकल्पेन बाधितुं न शक्यते इति सूत्रारम्भः।

११३१। कल्याण्यादीनामिनङ् च। (४-१-१२६)

एषामिनङादेशः स्यात्, ढक्च। काल्याणिनेयः। बान्धकिनेयः।

११३२। कुलटाया वा। (४-१-१२७)

इनङ्मात्रं विकल्प्यते। ढक्तु नित्यः पूर्वेणैव। कौलटिनेयः—कौलटेयः। सती भिक्षुक्यत्र कुलटा। या तु व्यभिचारार्थं कुलान्यटति तस्याः अत्र 'क्षुद्राभ्यो वा' (सू ११३७) इति पक्षे ढ्रक्। कौलटेरः।

११३३। हृद्भगसिन्ध्वन्ते पूर्वपदस्य च। (७-३-१९)

हृदाद्यन्ते पूर्वोत्तरपदयोरचामादेरचो वृद्धिर्ञिति णिति किति च। सुहृदोऽपत्यं सौहार्दः। सुभगाया अपत्यं सौभागिनेयः। सक्तुप्रधानाः सिन्धवः सक्तुसिन्धवः। तेषु भवः साक्तुसैन्धवः।

पूर्वसूत्रे यदनुवृत्तं तत्सर्वमिहाप्यनुवर्तते। तच्छब्देन ढप्रत्ययः परामृश्यते। तदाह। **ढप्रत्ययान्तस्येति॥ प्रावाहणेयिः—प्रवाहणेयिरिति॥** शुभ्रादिढगन्तादिञ्। ननु पूर्वसूत्रेणैव सिद्धत्वादिदं व्यर्थमित्यत आह। **बाह्येति॥** ढक्प्रत्ययान्तात् बहिर्भूतो यइञ् तन्निमित्ता 'तद्धितेष्वचामादेः' इति नित्या आदिवृद्धिः। **ढाश्रयेणेति॥** ढप्रत्यये परे विहितेनेति यावत्। तथाविधेन वृद्धिविकल्पेन पूर्वसूत्रविहितेन बाधितुन्न शक्यते। भिन्ननिमित्तकत्वादित्यर्थः। पूर्वसूत्रं हि केवलढप्रत्ययान्ते ढप्रत्ययम्परनिमित्तत्वेनाश्रित्य प्रवृत्तं, ढन्निमित्तामादिवृद्धिम्बाधते इति युक्तं, नत्विञ्प्रत्ययनिमित्तामपि नित्यामादिवृद्धिम्, अतस्तस्या अपि बाधनार्थमिदं सूत्रमित्यर्थः। इदं वृद्धिविधिद्वयमपि 'शुभ्रादिभ्यश्च' इत्यत्रैव वक्तुं युक्तम्। **कल्याण्यादीनामिनङ् च॥** इनङि ङकार इत्। **काल्याणिनेय इति॥** कल्याण्या अपत्यमिति विग्रहः। **बान्धकिनेय इति॥** बन्धक्या अपत्यमिति विग्रहः। अत्र गणे स्त्रीप्रत्ययान्ता एव पठ्यन्ते। तेभ्यो ढक् सिद्ध एव। इनङेव तु विधीयते। **कुलटाया वा॥ इनङ्मात्रमिति॥** व्याख्यानादिति भावः। **पूर्वेणैवेति॥** 'स्त्रीभ्यो ढक्' इत्यनेनेत्यर्थः। कुलानि गृहाणि अटतीति कुलटा। शकन्ध्वादित्वात्पररूपम्। **अत्रेति॥** 'कुलटाया वा' इति सूत्रे इत्यर्थः। **पक्षे ढ्रगिति॥** ढ्रगपि कदाचिद्भवतीत्यर्थः। **कौलटेर इति॥** कुलटाया ढ्रकि ढकारस्य एयादेशे 'लोपो व्योः' इति यकारलोप इति भावः। **हृद्भग॥ हृदाद्यन्ते इति॥** हृत्, भग, सिन्धु, एतदन्तेषु समासेष्वित्यर्थः। चकारादुत्तरपदस्येत्यनुकृष्यते। तदाह। **पूर्वोत्तरपदयोरिति॥ सौहार्द इति॥** अणि उभयपदादिवृद्धिः। ऋकारस्य तु आकारो रपरः। **सौभागिनेय इति॥**

११३४ । चटकाया ऐरक् । (४-१-१२८)

'चटकादिति वाच्यम्' (वा २६२४) । लिङ्गविशिष्टपरिभाषया स्त्रिया अपि । चटकस्य चटकाया वा अपत्यं चाटकैरः । 'स्त्रियामपत्ये लुग्वक्तव्यः' (वा २६२५) । तयोरेव स्त्र्यपत्यं चटका । अजादित्वाट्टाप् ।

११३५ । गोधाया ढ्रक् । (४-१-१२९)

गौधेरः । शुभ्रादित्वात्पक्षे ढक् । गौधेयः ।

११३६ । आरगुदीचाम् । (४-१-१३०)

गौधारः । रका सिद्धे आकारोच्चारणमन्यतो विधानार्थम् । जडस्यापत्यं जाडारः । पण्डस्यापत्यं पाण्डारः ।

११३७ । क्षुद्राभ्यो वा । (४-१-१३१)

अङ्गहीनाः शीलहीनाश्च क्षुद्राः ताभ्यो वा ढ्रक् । पक्षे ढक् । काणेरः—काणेयः । दासेरः—दासेयः ।

११३८ । पितृष्वसुश्छण् । (४-१-१३२)

अणोऽपवादः । पैतृष्वस्रीयः ।

कल्याण्यादित्वात् ढकि इनडि उभयपदादिवृद्धिरिति भावः । एतत्प्रसङ्गादेव इदं सूत्रमत्रोपन्यस्तम् । 'महते सौभगाय' इत्यत्र तु उद्गात्रादित्वाद्भावे अत्र । उत्तरपदादिवृद्ध्यभावश्छान्दसः । **सिन्धव इति** ॥ अश्वा इत्यर्थः । **चटकाया ऐरक्** ॥ चटकाशब्दादपत्ये ऐरक्प्रत्ययः स्यादित्यर्थः । ननु स्त्रीलिङ्गनिर्देशात् पुल्लिङ्गान्न स्यात् इत्यत आह । **चटकादिति** ॥ सूत्रे चटकाया इत्यपनीय चटकादिति वाच्यमित्यर्थः । तर्हि स्त्रीलिङ्गान्न स्यादत आह । **लिङ्गेति** ॥ **स्त्रिया अपीति** ॥ स्त्रीलिङ्गादप्यैरगित्यर्थः । **तयोरिति** ॥ चटकस्य चटकायाश्चेत्यर्थः । ननु चटकेति कथं, जातित्वात् ङीष्प्रसङ्गादित्यत आह । **अजादित्वादिति** ॥ **गोधाया ढ्रक्** ॥ **गौधेर इति** ॥ गोधाया अपत्यमिति विग्रहः । ढ्रकि ढकारस्य एयादेशे 'लोपो व्योः' इति यलोपः, कित्त्वादादिवृद्धिरिति भावः । **आरगुदीचाम्** ॥ गोधाया आरग्वा स्यादित्यर्थः । **अन्यत इति** ॥ आकारान्तादन्यत् अदन्तं, तस्मादपि क्वचिद्विधानार्थमित्यर्थः । **जाडार इति** ॥ रग्विधौ आकारो न श्रूयेतेति भावः । पण्डो नपुंसकः, तस्यापत्यं क्षेत्रजातत्वादिना । **क्षुद्राभ्यो वा** ॥ **अङ्गहीना इति** ॥ चक्षुरादिकतिपयावयवविकला इत्यर्थः । **शीलहीना इति** ॥ सद्वृत्तहीनाः इत्यर्थः । यथेष्टपुरुषसञ्चारिण्य इति यावत् । 'अनियतपुंस्का अङ्गहीना वा क्षुद्राः' इति भाष्यम् । **पितृष्वसुश्छण्** ॥ **पैतृष्वस्रीय इति** ॥ पितृष्वसुरपत्यमिति विग्रहः । छस्य ईयादेशे

११३९। ढकि लोपः। (४-१-१३३)

पितृष्वसुरन्त्यस्य लोपः स्याड्ढकि। अत एव ज्ञापकाड्ढक्। **पैतृष्वसेयः**।

११४०। मातृष्वसुश्च। (४-१-१३४)

पितृष्वसुर्यदुक्तं तदस्यापि स्यात्। मातृष्वस्रीयः—मातृष्वसेयः।

११४१। चतुष्पाद्भ्यो ढञ्। (४-१-१३५)

११४२। ढे लोपोऽकद्र्वाः। (६-४-१४७)

कद्रूभिन्नस्योवर्णान्तस्य भस्य लोपः स्याड्ढे परे। **कामण्डलेयः**। **कमण्डलुशब्दश्चतुष्पाज्जातिविशेषे**।

११४३। गृष्ट्यादिभ्यश्च। (४-१-१३६)

एभ्यो ढञ् स्यात्। अण्ढकोरपवादः। गार्ष्टेयः। मित्रयोरपत्यम्, ऋष्यणि प्राप्ते ढञ्।

आदिवृद्धिः। सकाराद्टकारस्य यण्। **ढकि लोपः** ॥ पितृष्वसुरित्यनुवर्तते। अलोऽन्त्यपरिभाषया अन्त्यस्य लोपः। तदाह। **पितृष्वसुरन्त्यस्य लोप इति** ॥ ननु पितृष्वसुरपत्ये ढक एव दुर्लभत्वात्कथं तस्मिन् परे लोपविधिरित्यत आह। **अत एवेति** ॥ शुभ्रादित्वात् ढगित्यन्ये। **पैतृष्वसेय इति** ॥ ढकि अन्त्यस्य ऋकारस्य लोपे आदिवृद्धिः। 'मातृपितृभ्यां स्वसा' इति षत्वम्। **मातृष्वसुश्च** ॥ चकाराच्छण् ढकि लोपश्चानुकृष्यते। तदाह। **पितृष्वसुर्यदुक्तमिति** ॥ **चतुष्पाद्भ्यो ढञ्** ॥ चतुष्पादः पशवः। तद्विशेषवाचिभ्यः अपत्ये ढञित्यर्थः। **ढे लोपोऽकद्र्वाः** ॥ भस्येत्यधिकृतम् 'ओर्गुणः' इत्यतः ओरिति षष्ठ्यन्तेनानुवृत्तेन विशेष्यते। तदन्तविधिः। तदाह। **कद्रूभिन्नस्येति** ॥ अलोऽन्त्यस्य' इत्यन्त्यलोपः। ओर्गुणापवादः। **कामण्डलेय इति** ॥ कमण्डलोरपत्यमिति विग्रहः। ढकि एयादेशे आदिवृद्धौ उकारलोपः। ननु कमण्डलुशब्दवाच्यस्य जलपात्रस्याचेतनस्य कथमपत्ययोगः। तत्राह। **कमण्डलुशब्दश्चतुष्पाज्जातिविशेषे इति** ॥ अत एव कमण्डलुपदे आदधीत' इति बहुवृचब्राह्मणं सङ्गच्छते इति भावः। **गृष्ट्यादिभ्यश्च** ॥ **अण्ढकोरिति** ॥ गृष्टि, हलि, बलि, कुठि, अगस्ति, मित्रयु एते गृष्ट्यादयः। अत्र अन्त्ययोः ऋषित्वादण् प्राप्तः। अन्येभ्यस्तु 'इतश्चानिञः' इति ढक् प्राप्त इति विवेकः। सकृत्प्रसूता मानुष्यादिरपि गृष्टिः, नतु गौरेव। ततश्च 'चतुष्पाद्भ्यः' इत्यनेन न प्राप्तिः। **केकयमित्रयु** ॥ 'तद्धितेष्वचामादेः' इत्यतस्तद्धितग्रहणमित्यनुवर्तते। 'अचो ञ्णिति, किति च' इत्यतः ञ्णितीति, कितीति च। तदाह। **एषामिति** ॥ आदेशे यकारादकार उच्चारणार्थः। केकयस्यापत्यं स्त्री कैकेयी। 'जनपदशब्दात्' इत्यञ्। मैत्रेयिकया श्लाघते, मित्रयोर्भाव इत्यर्थे 'गोत्रचरणात्' इति वुञ्। प्रलयादागतम्प्रालेयम्। अण्। अत्र सर्वत्र यादेरियादेशः। इत्युदाहरणानि।

११४४ । केकयमित्रयुप्रलयानां यादेरियः । (७-३-२)

एषां यकारादेरियादेशः स्यात् ञिति णिति किति च तद्धिते परे। इति इयादेशे प्राप्ते ।

११४५ । दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवाशिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि । (६-४-१७४)

एतानि निपात्यन्ते । इति युलोपः । मैत्रेयः । मैत्रेयौ ।

११४६ । यस्कादिभ्यो गोत्रे । (२-४-६३)

एभ्योऽपत्यप्रत्ययस्य लुक्स्यात्तत्कृते बहुत्वे, न तु स्त्रियाम् । मित्रयवः ।

प्राप्ते इति ॥ मित्रयोरपत्ये ढञि एयादेशे मित्रयु एय इति स्थिते ओर्गुणम्बाधित्वा यु इत्यस्य इयादेशे सति आद्गुणे मैत्रेयेय इति प्राप्ते सतीत्यर्थः । **दाण्डिनायन ॥ एतानि निपात्यन्ते इति ॥** दण्डिनो हास्तिनश्चापत्यं दाण्डिनायनः, हास्तिनायनः । नडादित्वात्फक् । निपातनाट्टिलोपो न । अथर्वणा प्रोक्तो ग्रन्थः उपचारादथर्वा । तमधीते आथर्वणिकः । वसन्तादित्वात् ठक् । निपातनान्न टिलोपः । जिह्माशिनोऽपत्यंजैह्माशिनेयः । शुभ्रादित्वाड्ढक् । निपातनान्न टिलोपः । वाशिनोऽपत्यं वाशिनायनिः । 'उदीचां वृद्धात्' इति फिञ् । निपातनान्न टिलोपः । भ्रूणहन् धीवन्, एतयोर्भावे ष्यञ् । नकारस्य तकारश्च निपात्यते । नच 'हनस्तोऽचिण्णलोः' इत्यनेनैव तकारसिद्ध इति शङ्क्यम् । 'धातोः कार्यमुच्यमानन्तत्प्रत्यये विज्ञानम्' इति परिभाषया 'हनस्तः' इति तत्वस्य धातुविहितप्रत्यये पर एव प्रवृत्तेः । इदमेव तकारनिपातनमस्याम्परिभाषायां ज्ञापकमिति 'मृजेर्वृद्धिः' इत्यत्र भाष्ये स्पष्टम् । तेन वार्त्रघ्नमित्यत्र तत्वं न । सरय्वां भवं सारवम् उदकम् । अणि यू इत्यस्य व इत्यादेशो निपात्यते । इक्ष्वाकोरपत्यमैक्ष्वाकः । जनपदशब्दात्क्षत्त्रियादञ् । उकारलोपो निपात्यते । बहुत्वे तु तद्राजत्वाल्लुक् । इक्ष्वाकवः । इक्ष्वाकुषु जनपदेषु भवोऽप्यैक्ष्वाकः । कोपधादण् । उकारलोपश्च । सूत्रे ऐक्ष्वाकेत्यत्र अञणन्तयोर्ग्रहणम् । बहुत्वे तद्राजत्वादञो लुक् । अणस्तु नेति विशेषः । हिरण्यस्य विकारो हिरण्मयः । मयटि णकाराद्यकाराकारयोर्लोपः । **इति युलोप इति ॥** मित्रयु एय इति स्थिते यु इत्यस्य लोपो निपातनादिति भावः । मैत्रेयीति 'टिड्ढाणञ्' इति ङीप् । **यस्कादिभ्यो गोत्रे ॥** नेदं सूत्रमपत्याधिकारस्थम्, किन्तु द्वैतीयीकम् । अतो गोत्रशब्देन प्रवराध्यायप्रसिद्धमेव गोत्रमिह विवक्षितम् । "अपत्याधिकारादन्यत्र लौकिकमेव गोत्रं गृह्यते" इति 'यूनि लुक्, स्त्रीपुंसाभ्याम्' इत्यादिसूत्रभाष्ये सिद्धान्ततत्वात् । 'ण्यक्षत्रियार्ष' इत्यतो लुगित्यनुवर्तते । 'तद्राजस्य बहुषु तेनैवास्त्रियाम्' इति सूत्रन्तद्राजवर्जमनुवर्तते । तदाह । **एभ्योऽपत्यप्रत्ययस्येति ॥ मित्रयव इति ॥** मित्रयोरपत्यानि पुमांस इत्यर्थः । गृष्ट्यादिढको लुकि

११४७। अत्रिभृगुकुत्सवसिष्ठगौतमाङ्गिरोभ्यश्च। (२-४-६५)

एभ्यो गोत्रप्रत्ययस्य लुक्स्यात्तत्कृते बहुत्वे, न तु स्त्रियाम्। अत्रयः। भृगवः। कुत्साः। वसिष्ठाः। गोतमाः। अङ्गिरसः।

११४८। बह्वच इञः प्राच्यभरतेषु। (२-४-६६)

बह्वचः परो य इञ् प्राच्यगोत्रे भरतगोत्रे च वर्तमानस्तस्य लुक्स्यात्। पन्नागाराः। युधिष्ठिराः।

११४९। न गोपवनादिभ्यः। (२-४-६७)

एभ्यो गोत्रप्रत्ययस्य लुप्न स्यात्। बिदाद्यन्तर्गणोऽयम्। गौपवनाः। शैग्रवाः।

११५०। तिककितवादिभ्यो द्वन्द्वे। (२-४-६८)

एभ्यो गोत्रप्रत्ययस्य बहुत्वे लुक्स्याद्वन्द्वे। तैकायनयश्च कैतवायनयश्च 'तिकादिभ्यः फिञ्' (सू ११७८)। तस्य लुक्। तिककितवाः।

११५१। उपकादिभ्योऽन्यतरस्यामद्वन्द्वे। (२-४-६९)

एभ्यो गोत्रप्रत्ययस्य बहुत्वे लुग्वा स्याद्वन्द्वे चाद्वन्द्वे च। औपकायनाश्च लामकायनाश्च। 'नडादिभ्यः फक्' (सू ११०१)। तस्य लुक्। उपकलमकाः—औपकायनलामकायनाः। भ्राष्ट्रककपिष्ठलाः—भ्राष्ट्रकिकापिष्ठलयः। उपकाः—औपकायनाः। लमकाः—लामकायनाः।

आदिवृद्धिनिवृत्तिः। **अत्रिभृगु** ॥ पूर्वसूत्राद्गोत्र इति तत्र यदनुवृत्तं तच्च सर्वमिहानुवर्तते। तदाह। **एभ्यो गोत्रेति** ॥ अत्रेः, भृगोः, कुत्सस्य, वसिष्ठस्य, गौतमस्य, अङ्गिरसश्च अपत्यानि पुमांस इति विग्रहाः। तत्र अत्रेः 'इतश्चानिञः' इति ढकोऽनेन लुक्। इतरेभ्यस्तु ऋष्यण इति बोध्यम्। लुकि आदिवृद्धेर्निवृत्तिः। **बह्वच इञः** ॥ प्राच्ये उदाहरति। **पन्नागारा इति** ॥ पन्नागारस्यापत्यानीति विग्रहः। अत इञो लुक्। भरतगोत्रे उदाहरति। **युधिष्ठिरा इति** ॥ युधिष्ठिरस्यापत्यानीति विग्रहः। कुरुलक्षणं ष्यञ्बाधित्वा बाह्वादित्वात् इञ्। तस्य लुक्। अबहुत्वे तु यौधिष्ठिरिः। **न गोपवनादिभ्यः** ॥ **बिदाद्यन्तर्गणोऽयमिति** ॥ ततश्च अत्रः 'यञञोश्च' इति प्राप्तस्य लुङ् नेति भावः। **तिककितव** ॥ **तैकायनयश्च कैतवायनयश्चेति** ॥ द्वन्द्वविग्रहप्रदर्शनम्। **तिककितवा इति** ॥ द्वन्द्वे इति सप्तमीनिर्देशात् पदद्वयादपि फिञो लुक्। **उपकादिभ्यो** ॥ चकारमध्याहृत्य आह। **द्वन्द्वे चेति** ॥ एवञ्च अस्वरितत्वादेव पूर्वसूत्रात् द्वन्द्वग्रहणाननुवृत्त्यैव सिद्धे अद्वन्द्वग्रहणं स्पष्टार्थमेव। नच द्वन्द्वे नेति निषेध एव किन्न स्यादिति वाच्यम्। द्वन्द्वानामपि गणे पाठात्। तदेतत्सूचयन् द्वन्द्वमुदाहरति। **भ्राष्ट्रककपिष्ठला इति** ॥ इञो वा लुक्। अद्वन्द्वे उदाहरति। **लमकाः**

११५२ । आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् । (२-४-७०)

एतयोरवयवस्य गोत्रप्रत्ययस्याणो यञश्च बहुषु लुक्स्यात् । अवशिष्टस्य प्रकृतिभागस्य यथासङ्ख्यम् 'अगस्ति' 'कुण्डिनच्' एतावादेशौ स्तः । अगस्तयः । कुण्डिनाः ।

११५३ । राजश्वशुराद्यत् । (४-१-१३७)

'राज्ञो जातावेवेति वाच्यम्' (वा २६२७) ।

११५४ । ये चाभावकर्मणोः । (६-४-१६८)

यादौ तद्धिते परेऽन्प्रकृत्या स्यान्न तु भावकर्मणोः । राजन्यः । श्वशुर्यः । जातिग्रहणाच्छूद्रादावुत्पन्नो राजनः ।

११५५ । अन् । (६-४-१६७)

अणि अन् प्रकृत्या स्यादिति टिलोपो न । 'अभावकर्मणोः' किम् । राज्ञः कर्म भावो वा राज्यम् ।

११५६ । संयोगादिश्च । (६-४-१६६)

इन् प्रकृत्या स्यादणि परे । चक्रिणोऽपत्यं चाक्रिणः ।

लामकायना इति ॥ अश्वादिफको लुग्विकल्पः । उपकाः औपकायनाः इत्याद्युदाहार्यम् । **आगस्त्य** ॥ **अगस्तयः । कुण्डिना इति** ॥ अगस्त्यशब्दादण्यणो लुक् । प्रकृतेरगस्त्यादेशः । कौण्डिन्यशब्दो गर्गादियञन्तः । बहुत्वे यञो लुक् । प्रकृतेः कुण्डिनादेशश्च 'यस्कादिभ्यो गोत्रे' इत्यारभ्य 'आगस्त्यकौण्डिन्ययोः' इत्यन्तन्द्वैर्तीयाकम् । अथ प्रकृतञ्चातुरर्थिकम् । **राजश्वशुराद्यत्** ॥ राजन्शब्दात् श्वशुरशब्दाच्चापत्ये यत्प्रत्ययः स्यादित्यर्थः । क्रमेण अणिञोरपवादः । **राज्ञो जातावेवेति** ॥ जातिः समुदायवाच्या चेदित्यर्थः । **ये चाभावकर्मणोः** ॥ अनिति पूर्वसूत्रमनुवर्तते । 'प्रकृत्यैकाच्' इत्यतः प्रकृत्येति । अङ्गाधिकारलब्धप्रत्ययो यकारेण विशिष्यते । तदादिविधिः । तदाह । **यादाविति** ॥ **राजन्य इति** ॥ क्षत्त्रियात् क्षत्त्रियायां स्वभार्यायामुत्पन्नो राजन्य इति धर्मशास्त्रेषु प्रसिद्धम् । यत्प्रत्यये प्रकृतिभावान्न टिलोपः । **शूद्रादाविति** ॥ क्षत्त्रियात् शूद्रायां वा तदन्यस्यां वा अनूढायाम् उत्पन्न इत्यर्थः । **राजन इति** ॥ अणि रूपम् । तत्र 'नस्तद्धिते' इति टिलोपे प्राप्ते । **अन्** ॥ 'इनण्यनपत्ये' इत्यतः अणित्यनुवर्तते । 'प्रकृत्यैकाच्' इत्यतः प्रकृत्येति च । तदाह । **अणीति** ॥ **राज्यमिति** ॥ 'गुणवचनब्राह्मणादिभ्यः' इति ष्यञ् । टिलोपः । **संयोगादिश्च** ॥ **इन् प्रकृत्येति** ॥ 'इनण्यनपत्ये' इत्यतः 'प्रकृत्यैकाच्' इत्यतश्च तदनुवृत्तेरिति भावः । **चक्रिणोऽपत्यञ्चाक्रिण इति** ॥ 'इनण्यनपत्ये' इत्यत्रानपत्ये इति

११५७। न मपूर्वोऽपत्येऽवर्मणः। (६-४-१७०)

मपूर्वोऽन् प्रकृत्या न स्यादपत्येऽणि। भाद्रसामः। 'मपूर्वः' किम्। सौत्वनः। 'अपत्ये' किम्। चर्मणा परिवृतश्चार्मणो रथः। 'अवर्मणः' किम्। चक्रवर्मणोऽपत्यं चाक्रवर्मणः। 'वा हितनाम्न इति वाच्यम्' (वा ४२१५)। हितनाम्नोऽपत्यं हैतनामः—हैतनामनः।

११५८। ब्राह्मो जातौ। (६-४-१७१)

योगविभागोऽत्र कर्तव्यः। 'ब्राह्मः' इति निपात्यतेऽनपत्येऽणि। ब्राह्मं हविः। ततो जातौ। अपत्ये जातावणि ब्रह्मणष्टिलोपो न स्यात्। ब्रह्मणोऽपत्यं ब्राह्मणः। 'अपत्ये' किम्। ब्राह्मी ओषधिः।

११५९। औक्षमनपत्ये। (६-४-१७३)

अणि टिलोपो निपात्यते। औक्षम् पदम्। 'अनपत्ये' किम्। उक्ष्णोऽपत्यमौक्ष्णः।

पर्युदासादप्राप्तिः। **न मपूर्वोऽपत्येऽवर्मणः॥ भाद्रसाम इति॥** भद्रसाम्नोऽपत्यमिति विग्रहः। अणि टिलोपः। अनो मपूर्वत्वान्न प्रकृतिभावः। **सौत्वन इति॥** सुत्वनोऽपत्यमिति विग्रहः। मपूर्वत्वाभावात्प्रकृतिभावः। **चार्मण इति॥** 'परिवृतो रथः' इत्यणि टिलोपः। अणः आपत्यत्वाभावात्प्रकृतिभावः। **वा हितनाम्न इति॥** 'न मपूर्वः' इति प्रतिषेध इति शेषः। **ब्राह्मोऽजातौ॥** ब्रह्मन्शब्दादपत्ये अणि 'न मपूर्वोऽपत्ये' इति प्रकृतिभावनिषेधो जातावेवेत्यर्थः फलति। तथा सति ब्रह्मणोऽपत्यं ब्राह्मण इति जातिविशेषे न सिद्ध्येत्। 'न मपूर्वः' इति प्रकृतिभावनिषेधे सति 'नस्तद्धिते' इति टिलोपस्य दुर्वारत्वात्। किञ्च ब्रह्मा देवता अस्य ब्राह्मं हविरिति न सिद्ध्येत्। न मपूर्व इति प्रकृतिभावनिषेधस्य जातावेवेति नियमितत्वेन अनिति प्रकृतिभावाट्टिलोपासम्भवात्। अत आह। **योगविभाग इति॥** ब्राह्मः इत्येकं सूत्रम्। तत्र 'इनण्यनपत्ये' इत्यतः अनपत्येऽणीत्यनुवर्तते। तदाह। **ब्राह्म इति॥ निपात्यते अनपत्येऽणीति॥** तथाच ब्रह्मन्शब्दादनपत्येऽणि अनिति प्रकृतिभावनिवृत्तेष्टिलोपः फलित इति मत्वोदाहरति। **ब्राह्मं हविरिति॥** ब्रह्म देवता अस्येति विग्रहः। 'सास्य देवता' इत्यण्। **ततो जातावितिः॥** ततः ब्राह्म इति सूत्रात्पृथगेव जातावितिः सूत्रङ्कर्तव्यमित्यर्थः। इह 'न मपूर्वोऽपत्येऽवर्मणः' इति सूत्रादपत्ये इति नेति चानुवर्तते। 'प्रकृत्यैकाच्' इत्यतः प्रकृत्येति च। तदाह। **अपत्ये जातावितिः॥ ब्राह्मण इति॥** ब्रह्मणः सकाशात्सजातीयायाम्भार्यायामुत्पन्न इत्यर्थः। योगविभागस्त्वयम्भाष्ये स्पष्टः। **औक्षम्॥** शेषपूरणेन सूत्रं व्याचष्टे। **अणि टिलोपो निपात्यते इति॥** 'अन्' इति प्रकृतिभावापवाद इति भावः। **औक्षमिति॥** अपत्येऽणि टिलोपाभावे अल्लोप इति भावः। ननु प्रकृतिभावादल्लोपो

११६०। षपूर्वहन्धृतराज्ञामणि। (६-४-१३५)

षपूर्वो योऽन् तस्य हनादेश्च भस्यातो लोपोऽणि। औक्ष्णः। ताक्ष्णः। भ्रौणघ्नः। धृतराज्ञोऽपत्यं धार्तराज्ञः। 'षपूर्व–' इति किम्। साम्नोऽपत्यं सामनः। 'अणि' किम्। ताक्षण्यः।

११६१। क्षत्राद्घः। (४-१-१३८)

क्षत्रियः 'जातौ' इत्येव। क्षात्त्रिरन्यः।

११६२। कुलात्खः। (४-१-१३९)

कुलीनः। तदन्तादपि। उत्तरसूत्रे 'अपूर्वपदात्' इति लिङ्गात्। आढ्यकुलीनः।

११६३। अपूर्वपदादन्यतरस्यां यड्ढकञौ। (४-१-१४०)

'कुलात्' इत्येव। पक्षे खः। कुल्यः–कौलेयकः–कुलीनः। 'पद' ग्रहणं किम्। बहुकुल्यः–बाहुकुलेयकः–बहुकुलीनः।

११६४। महाकुलादञ्खञौ। (४-१-१४१)

'अन्यतरस्याम्' इत्यनुवर्तते। पक्षे खः। माहाकुलः–माहाकुलीनः–महाकुलीनः।

न स्यादत आह। **षपूर्वहन्**॥ 'अङ्गोपोऽनः' इत्यनुवर्तते। भस्येत्यधिकृतम्। तदाह। **षपूर्व इति**॥ **ताक्ष्ण इति**॥ 'तक्ष्णोऽण उपसङ्ख्यानम्' इति कारिलक्षणस्यापवादोऽण्। **ताक्षण्य इति**॥ 'सेनान्तलक्षणकारिभ्यश्च' इति ण्यः। **क्षत्राद्घः**॥ अपत्ये इति शेषः। **क्षत्रिय इति**॥ घस्य इयादेशे 'यस्येति च' इत्यकारलोपः। **क्षात्त्रिरन्य इति**॥ क्षत्त्राच्छ्रद्रादावुत्पन्न इत्यर्थः। **कुलात्खः**॥ अपत्ये इति शेषः। **कुलीन इति**॥ खस्य ईनादेजः। ननु 'समासप्रत्ययविधौ' इति तदन्तविधिनिषेधात् महाकुलीन इति कथमित्यत आह। **तदन्तादपीति**॥ **आढ्यकुलीन इति**॥ अढ्यकुलशब्दात्कर्मधारयात्खः कुले आढ्यत्वप्रतीतिरत्र फलम्। कुलीनशब्देन कर्मधारये तु तदप्रतीतिरिति भेदः। **अपूर्वपदादन्यतरस्याम्**॥ **कुलादित्येवेति**॥ पूर्वपदरहितात् कुलादपत्ये यड्ढकञौ वा स्त इत्यर्थः। **पक्षे ख इति**॥ यड्ढकञोरभावपक्षे इत्यर्थः। **बहुकुल्य इति**॥ 'विभाषा सुपः' इति बहुच्प्रत्ययो न पदम्। अतः पूर्वपदरहितत्वात् यड्ढकञ्खा भवन्त्येवेत्यर्थः। **महाकुलादञ्खञौ**॥ **अनुवर्तते इति**॥ अन्यथा महाविभाषाधिकारे अपवादेन मुक्ते उत्सर्गस्याप्रवृत्तेः 'पीलाया वा' इत्रोक्तत्वात्पूर्वसूत्रोक्तः खो न स्यादिति भावः। तदाह। **पक्षे खः इति**॥ तथा सति

११६५। दुष्कुलाड्ढक्। (४-१-१४२)

पूर्ववत्पक्षे खः। दौष्कुलेयः—दुष्कुलीनः।

११६६। स्वसुश्छः। (४-१-१४३)

स्वस्रीयः।

११६७। भ्रातुर्व्यच्च। (४-१-१४४)

चाच्छः। अणोऽपवादः। भ्रातृव्यः—भ्रात्रीयः।

११६८। व्यन्सपत्ने। (४-१-१४५)

भ्रातुर्व्यन् स्यादपत्ये, प्रकृतिप्रत्ययसमुदायेन शत्रौ वाच्ये। भ्रातृव्यः शत्रुः। 'पाप्मना भ्रातृव्येण' इति तूपचारात्।

११६९। रेवत्यादिभ्यष्ठक्। (४-१-१४६)

११७०। ठस्येकः। (७-३-५०)

अङ्गात्परस्य ठस्येकादेशः स्यात्। रैवतिकः।

११७१। गोत्रस्त्रियाः कुत्सने ण च। (४-१-१४७)

आदिवृद्धिर्नेति भावः। **दुष्कुलाड्ढक्** ॥ **पूर्ववदिति** ॥ अन्यतरस्याङ्ग्रहणानुवृत्तेरिति भावः। **स्वसुश्छः** ॥ अपत्ये इति शेषः। **स्वस्रीय इति** ॥ छस्य ईयादेशः, ऋकारस्य यण्। **भ्रातुर्व्यच्च** ॥ तकारः 'तित्स्वरितम्' इति स्वरार्थ इति बोध्यम्। **व्यन् सपत्ने** ॥ **अपत्ये इति** ॥ प्रत्ययेनापत्यमुच्यते। भ्रातृशब्दार्थस्तु न विवक्षितः। तथाच "भ्रातृशब्दोत्तरत्वे व्यन्-प्रत्ययार्थः शत्रुः" इति भाष्ये स्पष्टम्। ननु 'पाप्मना भ्रातृव्येण' इति कथम्। पाप्मनोऽपत्यत्वाभावादित्यत आह। **'पाप्मना भ्रातृव्येण' इति तूपचारादिति** ॥ हिंसकत्वगुणयोगाल्लाक्षणिक इत्यर्थः। **रेवत्यादिभ्यष्ठक्** ॥ अपत्ये इति शेषः। ढगाद्यपवादः। **ठस्येकः** ॥ अङ्गस्येत्यधिकृतम्पञ्चम्या विपरिणम्यते। तदाह। **अङ्गात्परस्य ठस्येति** ॥ ठकारस्येत्यर्थः। **रैवतिक इति** ॥ रेवत्याः अपत्यमिति विग्रहः। ठकि ककार इत्, अकार उच्चारणार्थः। ठकारस्य इकः अदन्त आदेशः। अङ्गात्किम्। कर्मठः इत्यत्र ठकारस्य न भवति। अत्र भाष्ये अङ्गसम्बन्धिठस्येति व्याख्याने कर्मठः इत्यत्र सुपं प्रति कर्मठशब्दस्याङ्गत्वात्तदीयठस्य इयादेशमाशङ्क्य अङ्गसंज्ञानिमित्तं यष्ठकारस्तस्येको भवति, तादृशश्च ठकारः प्रत्यय एव भवति, नचेह ठकारः प्रत्यय इति समाहितम्। ततश्च ठकि अकार उच्चारणार्थः, ठकार एव प्रत्ययः इति विज्ञायते। "ठस्येति सङ्घातग्रहणम्" इत्यपि भाष्ये स्थितम्। अस्मिन्पक्षे ठकि अकार उच्चारणार्थो न भवति, सङ्घात एव प्रत्ययः, इकादेशे अकार उच्चारणार्थ एवेत्यलम्। **गोत्रस्त्रियाः** ॥

गोत्रं या स्त्री तद्वाचकाच्छब्दाण्णठकौ स्तः कुत्सायाम्। सामर्थ्यादूनि। गार्ग्यो अपत्यं गार्गः—गार्गिको वा जाल्मः। 'भस्याढे तद्धिते' इति पुंवद्भावाद्गार्ग्यशब्दाण्णठकौ। 'यस्य—' (सू ३११) इति लोपः। 'आपत्यस्य—' (सू १०८२) इति यलोपः।

११७२। वृद्धाट्ठक्सौवीरेषु बहुलम्। (४-१-१४८)

सुवीरदेशोद्भवाः सौवीराः। वृद्धात्सौवीरगोत्राद्यूनि बहुलं ठक्स्यात्कुत्सायाम्। भागवित्तेः—भागवित्तिकः। पक्षे फक्। भागवित्तायनः।

११७३। फेरछ च। (४-१-१४९)

फिञन्तात्सौवीरगोत्रादपत्ये छः ठक्च कुत्सने गम्ये। यमुन्दस्यापत्यं यामुन्दायनिः। तिकादित्वात्फिञ्। तस्यापत्यं यामुन्दायनीयः—यामुन्दायनिकः। 'कुत्सने' किम्। यामुन्दायनिः। औत्सर्गिकस्याणो 'ण्यक्षत्रिय—' (सू १२७६) इति लुक्। 'सौवीर—' इति किम्। तैकायनिः।

ण इति लुप्तप्रथमाकम्। चात् ठगनुकृष्यते। तदाह। **गोत्रं या स्त्री इत्यादिना** ॥ **सामर्थ्यादिति** ॥ 'एको गोत्रे' इति नियमादिति भावः। **गार्ग्यो अपत्यमिति** ॥ गर्गस्य गोत्रापत्यं स्त्री गार्गी। 'गर्गादिभ्यः' इति यञ्। 'यञश्च' इति ङीप्। 'यस्येति च' इत्यकारलोपः। 'हलस्तद्धितस्य' इति यकारलोपः। गार्ग्याः अपत्यं युवेति विग्रहः। पितुरविज्ञाने मात्रा व्यपदेशः कुत्सनम्। यद्यपि णप्रत्यये ठक इकादेशे च 'यस्येति च' इति लोपे गार्गः गार्गिकः इति सिद्ध्यति। तथापि वस्तुस्थितिमाह। **पुंवद्भावादिति** ॥ 'भस्याढे' इति पुंवत्वे सति ङीपो निवृत्तौ भूतपूर्वगत्या स्त्रीवाचकत्वमादाय गार्ग्यशब्दाण्णठकावित्यर्थः। 'नच वृद्धिनिमित्तस्य च' इति पुंवत्वनिषेधशङ्क्यः। सौत्रस्यैवायनिषेधः नतु 'भस्याढे' इति वार्तिकस्येत्युक्तत्वात्। 'भस्याढे' इत्यस्य तद्धिते विवक्षिते प्रवृत्तिमभ्युपगम्य गार्ग्यशब्दादि युक्तम्। तच्च समूहाधिकारे 'भिक्षादिभ्योऽण्' इत्यत्र स्फुटीभविष्यति। स्त्रियाः किम्। औपगवस्यापत्यं युवा औपगविः। प्रकरणादिगम्या कुत्सा। गोत्रेति किं, कारिकेयः। णस्य णित्त्वन्तु ग्लुचुकायन्या अपत्यं युवा ग्लौचुकायन इत्यत्र वृद्ध्यर्थः। **वृद्धाट्ठक्सौवीरेषु** ॥ पूर्वसूत्राद्गोत्रेत्येकदेशोऽनुवर्तते। सौवीरेष्विति प्रकृतिविशेषणम्। तदाह। **वृद्धादिति** ॥ 'वृद्धिर्यस्याचामादिः' इति वृद्धिसंज्ञकादित्यर्थः। ठग्ग्रहणं णस्य अनुवृत्तिनिवृत्त्यर्थम्। **भागवित्तेरिति** ॥ भगवित्तस्य सौवीरगोत्रापत्यम्भागवित्तिः, तस्यापत्यं युवेत्यर्थे ठकि इकादेशे भागवित्तिक इति रूपमित्यर्थः। **पक्षे फगिति** ॥ 'यञिञोश्च' इत्यनेनेति शेषः। **फेरछ च** ॥ छेति लुप्तप्रथमाकम्। **यमुन्दस्येति** ॥ यमुन्दो नाम सुवीरदेशे कश्चित्। **यामुन्दायनिरिति** ॥ यामुन्दायनेरपत्यं युवेत्यर्थे कुत्सनाभावात् छठगभावे 'तस्यापत्यम्' इत्यण्। 'ण्यक्षत्रियार्ष' इति तस्य लुगित्यर्थः। **सौवीरेषु किम्। तैकायनिरिति** ॥ तैकायनेरपत्यं युवेत्यर्थे असौवीरत्वात् छठगभावे

११७४। फाण्टाहृतिमिमताभ्यां णफिञौ। (४-१-१५०)

सौवीरेषु। 'नेह यथासङ्ख्यम्' 'अल्पाच्तरस्य परनिपातालिङ्गात्' इति वृत्तिकारः। भाष्ये तु 'यथासङ्ख्यमेव' इति स्थितम्। फाण्टाहृतः—फाण्टाहृतायनिः। मैमतः—मैमतायनिः।

११७५। कुर्वादिभ्यो ण्यः। (४-१-१५१)

अपत्ये। कौरव्या ब्राह्मणाः। वावदूक्याः। 'सम्राजः क्षत्त्रिये' (ग सू ७५)। साम्राज्यः—साम्राजोऽन्यः।

११७६। सेनान्तलक्षणकारिभ्यश्च। (४-१-१५२)

एभ्यो ण्यः। 'एति संज्ञायाम्—' (सू १०२३) इति सस्य षः। हारिषेण्यः। लाक्षण्यः। कारिः शिल्पी, तस्मात् तान्तुवाय्यः। कौम्भकार्यः। नापित्यः।

११७७। उदीचामिञ्। (४-१-१५३)

'तस्यापत्यम्' इत्यण्। 'ण्यक्षत्त्रिय' इति तस्य लुगिति भावः। **फाण्टाहृति॥ सौवीरेष्विति॥** शेषपूरणमिदम्। सौवीरगोत्रादित्यर्थः। फाण्टाहृतस्य गोत्रापत्यं फाण्टाहृतिः, अत इञ्। तस्यापत्यं युवेति विग्रहः। **मैमत इति॥** मिमतस्यापत्यमिति विग्रहः। मिमतशब्दे सौवीरगोत्रादिति न सम्बध्यते। व्याख्यानाद्गोत्रत्वाभावाच्चेति भावः। **कुर्वादिभ्यो ण्यः॥ अपत्ये इति॥** शेषपूरणमिदम्। सौवीरेष्विति निवृत्तम्। **कौरव्याः ब्राह्मणा इति॥** कुरुर्नाम कश्चिद्ब्राह्मणः। तस्यापत्यानीति विग्रहः। ण्यप्रत्यये ओर्गुणे अवादेशः, आदिवृद्धिः। यस्तु 'कुरुनादिभ्यो ण्यः' इति ण्यो वक्ष्यते, तस्य तद्राजत्वात् बहुषु लुकि कुरवः, क्षत्त्रियाः इति भवति। एतत्सूचनार्थमेव बहुवचनं, ब्राह्मणा इति विशेष्यञ्चोदाहृतम्। **वावदूक्याः इति॥** वावदूकस्यापत्यानीति विग्रहः। **सम्राजः क्षत्त्रिये इति॥** कुर्वादिगणसूत्रम्। अपत्ये इति शेषः। क्षत्त्रिय एवेति नियमार्थमिदम्। **साम्राजोऽन्य इति॥** सम्राजः शूद्रादौ उत्पन्न इत्यर्थः। **सेनान्त॥ एभ्य इति॥** सेनान्तलक्षणकारिभ्य इत्यर्थः। अकुर्वादित्वाद्बहुवचनम्। **हारिषेण्य इति॥** हरिषेणो नाम कश्चित्। 'एति संज्ञायाम्' इति षत्वम्। तस्यासिद्धत्वात्सेनान्तत्वाण्ण्यः। **लाक्षण्य इति॥** लक्षणमस्यास्तीति लक्षणः, अर्शआद्यच्, तस्यापत्यमिति विग्रहः। कारिपदं व्याचष्टे। **कारिः शिल्पीति॥ तस्मादिति॥** कारिविशेषवाचिनो ण्ये सतीत्यर्थः। **तान्तुवाय्य इति॥** तन्तुवायस्यापत्यमिति विग्रहः। **कौम्भकार्य इति॥** कुम्भकारस्यापत्यमिति विग्रहः। **नापित्य इति॥** नापितस्यापत्यमिति विग्रहः। **उदीचामिञ्॥** सेनान्तलक्षणकारिभ्यः इञ्

हारिषेणिः । लाक्षणिः । तान्तुवायिः । कौम्भकारिः । नापितात्तु परत्वात्फिञ्येव । नापितायनिः । 'तक्ष्णोऽण उपसङ्ख्यानम्' (वा २५४०)। 'षपूर्व–' (सू ११६०) इत्यनोऽकारलोपः । ताक्ष्णः । पक्षे ताक्षण्यः ।

११७८ । तिकादिभ्यः फिञ् । (४-१-१५४)

तैकायनिः ।

११७९ । कौसल्यकार्मार्याभ्यां च । (४-१-१५५)

अपत्ये फिञ् । इञोऽपवादः । परमप्रकृतेरेवायमिष्यते । प्रत्ययसन्नियोगेन प्रकृतिरूपं निपात्यते । कोसलस्यापत्यं कौसल्यायनिः । कर्मारस्यापत्यं कार्मार्यायणिः । 'छागवृषयोरपि' (वा २६४३) । छाग्यायनिः । वार्ष्यायणिः ।

११८० । अणो द्यचः । (४-१-१५६)

अपत्ये फिञ् । इञोऽपवादः । कार्त्रायणिः । 'अणः' इति किम् । दाक्षायणः । 'द्यचः' किम् । औपगविः । 'त्यदादीनां फिञ्वा' (वा ५०५०)। त्यादायनिः–(त्यादः) ।

स्यादुदीचाम्मते इत्यर्थः । **नापितात्तु परत्वात् फिञेवेति** ॥ उदीचां वृद्धादित्यनेनेति शेषः। **तक्ष्णोऽण उपसङ्ख्यानमिति** ॥ उदीचां मते इति शेषः । **ताक्ष्ण इति** ॥ अनि प्रकृतिभावान्न टिलोपः । अङ्गेपस्तु 'षपूर्वहन्' इति वचनाद्भवति । **पक्षे ताक्षण्य इति** ॥ प्राचामिति कारित्वलक्षणो ण्य इत्यर्थः । 'ये चाभावकर्मणोः' इति प्रकृतिभावान्न टिलोपः । **तिकादिभ्यः फिञ्** ॥ इञोऽपवादः । **तैकायनिरिति** ॥ फिञि आयन्नादेशः। **कौसल्य** ॥ **परमप्रकृतेरेवेति** ॥ कोसलकर्माराभ्यामिञ्, तस्य युट् चेत्यर्थः । भाष्ये स्पष्टमेतत् । **छागवृषयोरपीति** ॥ फिञ्, तस्य युटचेति वक्तव्यमित्यर्थः । **अणो द्यचः** ॥ **अपत्ये फिञिति** ॥ शेषपूरणमिदम् । द्यचः अण्प्रत्ययान्तादपत्ये फिञित्यर्थः । **कार्त्रायणिरिति** ॥ कर्तुः छात्रः कार्त्रः, 'तस्येदम्' इत्यण् । कार्त्रस्यापत्यङ्कार्त्रायणिः । फिञि आयन्नादेशे णत्वम् । **दाक्षायण इति** ॥ दक्षस्यापत्यन्दाक्षिः । अत इञ् । दाक्षेरपत्यन्दाक्षायणः । 'यञिञोश्च' इति फक् । अदन्तत्वाभावान्न फिञिति भावः । **औपगविरिति** ॥ उपगोर्गोत्रापत्यमौपगवः । तस्यापत्यमौपगविः युवा । द्यच्त्वाभावान्न फिञिति भावः । कर्तुरपत्ये तु कुर्वादिगणे पाठात् ण्य एवेति बोध्यम् । **त्यदादीनां फिञ्वेति** ॥ वाच्य इति शेषः । **त्यादायनिरिति** ॥ 'त्यादः' इति क्वचित्पुस्तके दृश्यते । तत्तु प्रामादिकम् । 'त्यदादीनि च' इति त्यदादीनां वृद्धत्वात् 'उदीचां वृद्धात्'

---

१. काशिकानुरोध्यप्ययं पाठो व्यर्थ एव । त्यदादीनां वृद्धत्वे 'उदीचाम्–' इत्युत्तरसूत्रेण रूपद्वयसिद्धेः । भाष्यानुक्तत्वाच्च ॥

११८१। उदीचां वृद्धादगोत्रात्। (४-१-१५७)

आम्रगुप्तायनिः। प्राचां तु आम्रगुप्तिः। 'वृद्धात्' किम्। दाक्षिः। 'अगोत्रात्' किम्। औपगविः।

११८२। वाकिनादीनां कुक्च। (४-१-१५८)

अपत्ये फिञ्वा। वाकिनस्यापत्यं वाकिनकायनिः—वाकिनिः।

११८३। पुत्रान्तादन्यतरस्याम्। (४-१-१५९)

अस्माद्वा फिञ्सिद्धस्तस्मिन्परे पुत्रान्तस्य वा कुग्विधीयते। गार्गीपुत्रकायणिः—गार्गीपुत्रायणिः—गार्गीपुत्रिः।

११८४। प्राचामवृद्धात्फिन्बहुळम्। (४-१-१६०)

ग्लुचुकायनिः।

११८५। मनोर्जातावञ्यतौ षुक्च। (४-१-१६१)

समुदायार्थो जातिः। मानुषः—मनुष्यः।

११८६। जनपदशब्दात्क्षत्त्रियादञ्। (४-१-१६८)

इत्येव सिद्धेः, भाष्ये अस्य वार्तिकस्य अदर्शनाच्च। **उदीचां वृद्धादगोत्रात्** ॥ वृद्धसंज्ञकात् अगोत्रप्रत्ययान्तात्फिञ् स्यात् उदीचाम्मते इत्यर्थः। **आम्रगुप्तायनिरिति** ॥ आम्रगुप्तस्यापत्यमिति विग्रहः। **प्राचां त्विति** ॥ मते इति शेषः। आम्रगुप्तिः। अत इञ्। **औपगविरिति** ॥ उपगोर्गोत्रापत्यम् औपगवः, तस्यापत्यं युवा औपगविः। औपगवस्य गोत्रत्वात्ततो यूनि फिञभावे इञेवेति भावः। **वाकिनादीनाम्** ॥ शेषपूरणेन सूत्रं व्याचष्टे। **अपत्ये फिञ्वेति** ॥ चकारादुदीचामिति फिञिति चानुवर्तते इति भावः। तथाच वाकिनादिभ्यः फिञ् वा स्यात्, प्रकृतीनाङ्कुगागमश्चेति फलितम्। **पुत्रान्तादन्यतरस्याम्** ॥ स्पष्टम्। **प्राचामवृद्धात्** ॥ अवृद्धसंज्ञकात् अपत्ये बहुळम्फिञ् स्यादित्यर्थः। प्राचाङ्ग्रहणम्प्रपूजार्थम्। **ग्लुचुकायनिरिति** ॥ ग्लुचुकस्यापत्यमिति विग्रहः। अवृद्धात्किम्। राजदन्तिः। बहुळग्रहणान्नेह। दाक्षिः। **मनोर्जातौ** ॥ मनुशब्दात् अञ् यत् एतौ प्रत्ययौ स्तः, तयोष्षुगागमश्चेत्यर्थः। प्रकृतिप्रत्ययसमुदायेन जातौ गम्यायामित्यर्थः। तदाह। **समुदायार्थो जातिरिति** ॥ नात्रापत्यग्रहणं सम्बध्यते इति भावः। अन्यथा मानुषा इत्यत्र 'यञञोश्च' इति लुक् स्यादिति बोध्यम्। **जनपदशब्दात्** ॥ जनपदो देशः, तद्वाचकशब्दो जनपदशब्दः, तथाभूतो यः क्षत्त्रियवाचकशब्दः, तस्मादित्यर्थः। फलितमाह। **जनपदक्षत्त्रिययोरिति** ॥ **ऐक्ष्वाक इति** ॥ इक्ष्वाकुर्नाम देशः, राजा च। तस्य राज्ञोऽपत्यमिति विग्रहे अञ्, अणोऽपवादः

जनपदक्षत्रिययोर्वाचकादञ् स्यादपत्ये । 'दाण्डिनायन–' (सू ११४५) इति सूत्रे निपातनाट्टिलोपः । ऐक्ष्वाकः । ऐक्ष्वाकौ । 'क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत्' (वा २६६९) । तद्राजमाचक्षाणस्तद्राज इत्यन्वर्थसंज्ञासामर्थ्यात् । पञ्चालानां राजा पाञ्चालः । 'पूरोरण्वक्तव्यः' (वा २६७०) । पौरवः । 'पाण्डोर्ड्यण्' (वा २६७१) । पाण्ड्यः ।

११८७ । साल्वेयगान्धारिभ्यां च । (४-१-१६९)

आभ्यामपत्येऽञ् । 'वृद्धेत्–' (सू ११८९) इति ञ्यङोऽपवादः । साल्वेयः । गान्धारः । तस्य राजन्यप्येवम् ।

११८८ । द्व्यञ्मगधकलिङ्गसूरमसादण् । (४-१-१७०)

अञोऽपवादः । द्व्यच् । आङ्गः । वाङ्गः । सौह्यः । मागधः । कालिङ्गः । सौरमसः । तस्य राजन्यप्येवम् ।

स्वरे विशेषः । ओर्गुणम्बाधित्वा 'दाण्डिनायन' इति सूत्रे निपातनादुकारस्य टेर्लोपः । **ऐक्ष्वाकाविति** ॥ बहुवचने तु लुग्वक्ष्यते इति भावः । **क्षत्रियसमानेति** ॥ क्षत्रियवाचकशब्देन समानशब्दो जनपदवाचकः, तस्मात् षष्ठ्यन्तात् राजन्यर्थे अपत्यवत्प्रत्यया भवन्तीत्यर्थः । वार्तिकमेतत्सूत्रसिद्धार्थकथनपरमित्याह । **तद्राजमिति** ॥ जनपदशब्दादित्यादिविहितानामञादीनान्तद्राजसंज्ञा विहिता 'ते तद्राजाः' इति । प्रत्ययानान्तद्राजत्वन्तद्वाचकत्वाद्गौणम् । एवञ्च तद्राजवाचकास्तद्राजाः इत्यन्वर्थसञ्ज्ञेपा, ननु टिघुभादिवदवयवार्थरहिता । तथाच अञादिप्रत्ययानान्तद्राजसंज्ञकानां राजवाचकत्वमपि विज्ञायते इति राजन्यपि वाच्ये ते भवन्तीति विज्ञायत इत्यर्थः । **पञ्चालानामिति** ॥ बहुवचनान्तमिदं देशविशेषनाम । भाष्ये तथैव प्रयोगदर्शनात् । 'द्व्यञ्मगध' इत्यत्र भाष्ये 'नेषो नाम जनपदः' इति दर्शनाद्देशवाचिनोऽप्येकवचनमिति ज्ञेयम् । जनपदशब्दादिति किम् । द्युद्योरपत्यं द्यौह्यवः । अणेव, तद्राजत्वाभावाद्बहुत्वे न लुक् । द्यौह्यवाः । क्षत्रियादिति किम् । पञ्चालो नाम कश्चिद्ब्राह्मणः । तस्यापत्यम्पाञ्चालिः । वैदेहिः । **पूरोरणिति** ॥ पूरुशब्दस्य जनपदवाचित्वाभावात्प्राग्दीव्यतीये अणि सिद्धे तद्राजसंज्ञार्थं वचनम् । देशवाचित्वे तु 'द्व्यञ्मगध' इत्येव सिद्धम् । **पाण्डोर्ड्यणिति** ॥ वाच्य इति शेषः । इह श्वेतगुणवाचिनो युधिष्ठिरपितृवाचिनश्च पाण्डोर्न ग्रहणम् । जनपदादित्युक्तेः । तस्य च पाण्डुदेशाधिपतिराजत्वाभावात् । **पाण्ड्य इति** ॥ पाण्डोरपत्यं पाण्डुदेशस्य राजा वेत्यर्थः । **साल्वेय** ॥ ननु साल्वेयगान्धारिशब्दौ अव्युत्पन्नौ देशक्षत्रियोभयवाचिनौ, ताभ्यां जनपदशब्दादिञि सिद्धे किमर्थमित्यत आह । **वृद्धेदिति ञ्यङोऽपवाद इति** ॥ **द्व्यञ्मगध** ॥ **अञोऽपवाद इति** ॥ जनपदशब्दादिति विहितस्याञोऽपवाद इत्यर्थः ।

११८९। वृद्धेत्कोसलाजादाञ्ञ्यङ्। (४-१-१७१)

वृद्धात्। आम्बष्ठ्यः। सौवीर्यः। इत्। आवन्त्यः। कौन्त्यः। कौसल्यः। अजादस्यापत्यमाजाद्यः।

११९०। कुरुनादिभ्यो ण्यः। (४-१-१७२)

कौरव्यः। नैषध्यः। 'स नैषधस्यार्थपतेः' इत्यादौ तु शैषिकोऽण्।

११९१। साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ्। (४-१-१७३)

साल्वो जनपदस्तदवयवा उदुम्बरादयस्तेभ्यः प्रत्यग्रथादिभ्यस्त्रिभ्यश्च इञ्। अञोऽपवादः। औदुम्बरिः। प्रात्यग्रथिः। कालकूटिः। आश्मकिः। राजन्यप्येवम्।

११९२। ते तद्राजाः। (४-१-१७४)

अजादय एतत्संज्ञाः स्युः।

११९३। तद्राजस्य बहुषु तेनैवास्त्रियाम्। (२-४-६२)

'द्यचः' इति उदाहियते इति शेषः। अङ्ग, वङ्ग, सुह्म इत्येते द्यचः देशक्षत्त्रियवाचिनः। अङ्गस्यापत्यमिति विग्रहः। **तस्य राजन्यप्येवमिति** ॥ अङ्गादिदेशस्य राजेति विग्रहः। **वृद्धेत्कोसलाजादाञ्ञ्यङ्** ॥ जनपदक्षत्त्रियोभयवाचकाद्वृद्धसंज्ञकात् इदन्तात् कोसलात् अजादाच्चापत्ये ञ्यङित्यर्थः। **वृद्धादिति** ॥ उदाहियते इत्यर्थः। **आम्बष्ठ्यः। सौवीर्य इति** ॥ आम्बष्ठसौवीरशब्दौ जनपदक्षत्त्रियोभयवाचकौ। **इदिति** ॥ इदन्तोदाहरणसूचनमिदम्। **आवन्त्य इति** ॥ अवन्तिशब्दो देशे राजनि च। **कौसल्य इति** ॥ कोसलशब्दो देशे राजनि च। **अजादस्यापत्यमिति** ॥ राजवाचकत्वे विग्रहोऽयम्। देशवाचकत्वे तु अजादानां राजेति विग्रहः। **कुरुनादिभ्यो ण्यः** ॥ कुरुशब्दात् नकारादिभ्यश्च जनपदक्षत्त्रियवाचकेभ्योऽपत्ये राजनि च ण्यः स्यादित्यर्थः। **कौरव्य इति** ॥ कुरोरपत्यङ्कुरूणां राजेति वा विग्रहः। **नैषध्य इति** ॥ निषधशब्दो देशे राजनि च। **शैषिक इति** ॥ तस्येदमित्यनेनेति शेषः। **साल्वावयव** ॥ **उदुम्बरादय इति** ॥ "उदुम्बरास्तिलखला मद्रकारा युगन्धाराः। भूलिङ्गाः शरदण्डाश्च साल्वावयवसंज्ञिताः ॥" इति प्रसिद्धिः। 'द्यच् मगध' इति भाष्ये तु बुध आजमीड अजक्रन्दा अपि गृहीताः। **ते तद्राजाः** ॥ ते इत्यनेन जनपदशब्दादित्याद्यारभ्य विहिता अजादयः परामृश्यन्ते। तदाह। **अजादय इति** ॥ **तद्राजस्य** ॥ 'ण्यक्षत्त्रियार्ष' इत्यतो लुगित्यनुवर्तते। तेनेत्यनन्तरं कृते बहुत्वे

बहुष्वर्थेषु तद्राजस्य लुक्स्यात्तदर्थकृतबहुत्वे न तु स्त्रियाम्। इक्ष्वाकवः। पञ्चालाः इत्यादि। कथं तर्हि 'कौरव्याः पशवः,' 'तस्यामेव रघोः पाण्ड्याः' इति च। कौरव्ये पाण्ड्ये च साधवः इति समाधेयम्। 'रघूणामन्वयं वक्ष्ये,' 'निरुध्यमाना यदुभिः कथञ्चित्' इति तु रघुयदुशब्दयोस्तदपत्ये लक्षणया।

११९४। कम्बोजाल्लुक्। (४-१-१७५)

अस्मात्तद्राजस्य लुक्। कम्बोजः। कम्बोजौ। 'कम्बोजादिभ्य इति वक्तव्यम्' (वा २६७४)। चोलः। शकः। ञ्यङ्लक्षणस्याणो लुक्। केरलः। यवनः। अञो लुक्। 'कम्बोजाः समरे' इति पाठः सुगमः। दीर्घपाठे तु कम्बोजोऽभिजनो येषामित्यर्थः। 'सिन्धुतक्षशिलादिभ्योऽणञौ' (सू १४७३) इत्यण्।

११९५। स्त्रियामवन्तिकुन्तिकुरुभ्यश्च। (४-१-१७६)

इत्यध्याहार्यः। तदाह। **बहुष्विति॥ तदर्थकृतबहुत्वे इति॥** अञादिप्रत्ययान्तमात्रार्थगतबहुत्वे सतीत्यर्थः। तेनेति किम्। प्रियो वाङ्गो येषान्ते प्रियवाङ्गाः इत्यत्र बहुत्वस्यान्यपदार्थगतत्वात्। वाङ्गशब्दात्परस्य न लुक्। यद्यपि वर्तिपदार्थविशिष्टान्यपदार्थगतं बहुत्वं वर्तिपदार्थगतमपि भवति। तथापि अञ्प्रत्ययान्तार्थ वाङ्गमात्रावगतन्न भवतीति न लुक्। एतदर्थमेवकारग्रहणम्। **इक्ष्वाकवः। पञ्चाला इति॥** 'जनपदशब्दात्' इति विहितस्य अञो लुकि आदिवृद्धिनिवृत्तिः। **इत्यादीति॥** अङ्गाः वङ्गाः इत्यादि बोध्यम्। **कथं तर्हीति॥** कौरव्या इत्यत्र ण्यप्रत्ययस्य पाण्ड्य इत्यत्र ञ्यप्रत्ययस्य च तद्राजतया बहुषु लुक्प्रसङ्गादित्यर्थः। **साधव इतीति॥** कौरव्यशब्दात् पाण्ड्यशब्दाच्च 'तत्र साधुः' इति यत्प्रत्यये 'यस्येति च' इत्यकारलोपे यत्प्रत्ययस्य तद्राजत्वाभावान्न लुगित्यर्थः। ननु रघुयदुशब्दयोर्जनपदवाचित्वाभावात् प्राग्दीव्यतीयेऽपि तस्य तद्राजत्वाभावात् कथं बहुषु तस्य लुगित्याशङ्क्य परिहरति। **रघूणामिति॥ लक्षणयेति॥** प्रयोग इति शेषः। ततश्च नेदमपत्यप्रत्ययान्तमिति भावः। लक्षणावाजन्तु रघुयदुसमानवृत्तिकत्वं बोध्यम्। **कम्बोजाल्लुक्॥** तद्राज इत्यनुवृत्तं षष्ठ्या विपरिणम्यते। कम्बोजात्परस्य तद्राजस्य लुक् स्यादित्यर्थः। अबहुत्वार्थं सूत्रम्। तदाह। **कम्बोजः। कम्बोजाविति॥** जनपदशब्दादिति विहितस्य अञो लुक्। **चोलशक इति॥** चोलशकौ देशविशेषौ राजविशेषौ च। **ञ्यङ्लक्षणस्येति॥** 'ञ्यङ्मगध' इति विहितस्येत्यर्थः। **केरळ इति॥** केरळयवनशब्दौ देशराजोभयवाचिनौ। **अञो लुगिति॥** जनपदशब्दादिति विहितस्येति शेषः। ननु काम्बोज इति कथं, लुक्प्रसङ्गादित्यत आह। **कम्बोजाः समरे इति॥ दीर्घपाठे त्विति॥** अचाम्मध्ये आदेरचो दीर्घभूतस्य पाठे त्वित्यर्थः। **अभिजन इति॥** यत्र पूर्वमुषितं सोऽभिजनः इत्यग्रे वक्ष्यति। **सिन्धुतक्षेति॥** सिन्ध्वादौ कम्बोजशब्दस्य पाठादिति भावः। **स्त्रियामवन्ति॥**

तद्राजस्य लुक्स्यात्। अवन्ती। कुन्ती। कुरूः।

११९६। अतश्च। (४-१-१७७)

तद्राजस्याकारस्य स्त्रियां लुक्स्यात्। शूरसेनी। मद्री। कथं 'माद्री-सुतौ' इति। 'ह्रस्व एव पाठः' इति हरदत्तः। भर्गादित्वं वा कल्प्यम्।

११९७। न प्राच्यभर्गादियौधेयादिभ्यः। (४-१-१७८)

एभ्यस्तद्राजस्य न लुक्। पाञ्चाली। वैदर्भी। आङ्गी। वाङ्गी। मागधी। एते प्राच्याः। भार्गी। कारूशी। कैकेयी। केकयीत्यत्र तु जन्यजनकभावलक्षणे पुंयोगे ङीष्। 'युधा' 'शुक्रा' आभ्यां 'व्यचः' (सू ११२४) इति ढक्। ततः स्वार्थे 'पर्श्वादियौधेयादिभ्योऽणञौ' (सू २०७०) इत्यञ्। 'शार्ङ्गरवाद्यञः—' (सू ५२७) इति ङीन्। 'अतश्च' (सू ११९६) इति लुकि तु ढगन्तत्वान्ङीप्युदात्तनिवृत्तिस्वरः स्यात्। यौधेयी। शौक्रेयी।

११९८। अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे। (४-१-७८)

अवन्ती। कुन्तीति॥ अवन्तेः कुन्तेश्चापत्यं स्त्री राज्ञी वेति विग्रहः। 'वृद्धेत्कोसल' इति ञ्यङोऽनेन लुकि 'इतो मनुष्यजातेः' इति ङीष्। **कुरूरिति॥** 'कुरुनादिभ्यः' इति ण्यस्य लुक्। **अतश्च॥ तद्राजस्याकारस्येति॥** अत इति तद्राजविशेषणम्। तद्राजात्मकस्य अकारस्येत्यर्थः। **शूरसेनीति॥** अञो लुकि प्रत्ययलक्षणमाश्रित्य अपत्यप्रत्ययान्तत्वेन जातित्वात् ङीष्। 'न लुमता' इति निषेधस्तु न। ङीष्विधेरङ्गकार्यत्वाभावात्। एवं मद्री। **न प्राच्य॥ एभ्य इति॥** प्राच्येभ्यः भर्गादिभ्यः यौधेयादिभ्यश्चेत्यर्थः। **एते प्राच्या इति॥** क्षत्रिया इति शेषः। यथायथं अञः अणश्च लुक्। भर्गादीनुदाहरति। **भार्गी, कारूशी, कैकेयीति॥ जन्यजनकभावेति॥** अत्र यद्वक्तव्यं तत् 'पुंयोगादाख्यायाम्' इत्यत्रोक्तम्। अथ यौधेयादिभ्यो लुक्प्रतिषेधं दर्शयितुमाह। **युधा, शुक्रा इत्यादिना॥ ढगिति॥** युधाया अपत्यं शुक्राया अपत्यमिति विग्रहे तन्नामिकाणं बाधित्वा 'व्यचः' इति ढकि एयादेशे 'यस्येति च' इत्यकारलोपे आदिवृद्धिः। यौधेयशब्दात् शौक्रेयशब्दाच्च 'पर्श्वादियौधेयादिभ्योऽणञौ' इति स्वार्थे तद्राजसंज्ञके पाञ्चमिके अञि 'यस्येति च' इत्यकारलोपे 'अतश्च' इति लुकि सत्यपि 'टिड्ढ' इति ङीपि यौधेयी शौक्रेयीति सिद्धेरिह यौधेयादिग्रहणमनर्थकमित्यत आह। **अतश्चेति लुकि त्विति॥ उदात्तनिवृत्तीति॥** 'अनुदात्तस्य च यत्रोदात्तलोपः' इत्यनेन ङीबुदात्तः स्यात्। सिद्धान्ते त्वञन्तत्वात् ङीनि आद्युदात्तत्वमिति भावः। **अणिञोः॥ ञ्यादीनामन्त्यमुत्तममिति॥** तथा भाष्यादिति भावः। **तस्य समीपमुपोत्तममिति॥** सामीप्येऽव्ययीभाव इति भावः। गुरु उपोत्तमम् उत्तमसमीपवर्ति ययोरिति विग्रहः। प्रातिपदिकादित्यधिकृतं षष्ठीद्विवचनेन विपरिणम्यते। उपोत्तमगुरुवर्णकयोः प्रातिपदिकयोरिति

त्र्यादीनामन्त्यमुत्तमं, तस्य समीपमुपोत्तमम्। गोत्रे यावणिञौ विहितावनार्षौ तदन्तयोर्गुरूपोत्तमयोः प्रातिपदिकयोः स्त्रियां ष्यङादेशः स्यात्। 'निर्दिश्यमानस्यादेशा भवन्ति' (प १३) इत्यणिञोरेव। षङावितौ। 'यङश्चाप्' (सू ५२८)। कुमुदगन्धेरपत्यं स्त्री कौमुदगन्ध्या। वाराह्या। 'अनार्षयोः' किम्। वासिष्ठी। वैश्वामित्री। 'गुरूपोत्तमयोः' किम्। औपगवी। जातिलक्षणो ङीप्। 'गोत्रे' किम्। अहिच्छत्त्रे जाता आहिच्छत्त्री।

११९९। गोत्रावयवात्। (४-१-७९)

गोत्रावयवा गोत्राभिमताः कुलाख्यास्ततो गोत्रे विहितयोरणिञोः स्त्रियां ष्यङादेशः स्यात्। अगुरूपोत्तमार्थ आरम्भः। पौणिक्या। भौणिक्या।

लभ्यते। 'अणिञोः' इत्यनेन प्रत्ययग्रहणपरिभाषया अणिञन्तयोर्ग्रहणम्। गोत्रे इत्येतत् अणिञोरन्वेति। ऋषेरविहितौ अनार्षौ। इदमपि अणिञोर्विशेषणम्। स्त्रियामित्यधिकृतम्। तदाह। **गोत्रे यावणिञावित्यादिना॥ आदेशः स्यादिति॥** स्थानषष्ठीनिर्देशादादेशत्वलाभः। ननु अणिञन्तयोः ष्यङादेशोऽयमनेकाल्त्वात् सर्वादेशः स्यादित्यत आह। **निर्दिश्यमानस्येति॥** तथा च अणिञोरेवायमादेश इति भावः। 'ङिच्च' इत्यन्तादेश इति न युक्तम्। ङित्त्वस्य ष्यङः सम्प्रसारणमित्यादौ चरितार्थत्वात्। **कुमुदगन्धेरिति॥** कुमुदगन्ध इव गन्धो यस्येति विग्रहः। 'सप्तम्युपमानपूर्वपदस्य बहुव्रीहिर्वाच्यः उत्तरपदलोपश्च' इति बहुव्रीहिः। पूर्वखण्डे उत्तरपदस्य गन्धशब्दस्य लोपश्च। 'उपमानाच्च' इति इत्त्वम्। कुमुदगन्धेरपत्यं स्त्रीति विग्रहे अण्। 'यस्येति च' इति इकारलोपः, आदिवृद्धिः, कौमुदगन्धशब्दः, तत्र यकारादणोऽकार उत्तमः, तत्समीपवर्ती गुरुः गकारादकारः। 'संयोगे गुरु' इत्युक्तेः। नचानुस्वारधकारव्यवहितत्वात्कथमुत्तमसमीपवर्तित्वङ्गकारादकारस्येति वाच्यम्। 'येन नाव्यवधानेन व्यवहितेऽपि' इति न्यायेन हला व्यवधानस्यादोषत्वात्। नह्यणि परे अव्यवहितो गुरुः क्वचिदस्ति। एवञ्च गुरूपोत्तमं प्रातिपदिकङ्कौमुदगन्धेत्यणन्तं, तदवयवस्य अणः ष्यङादेशे 'यङश्चाप्' इति चापि कौमुदगन्ध्याशब्द इत्यर्थः। इञन्तस्योदाहरति। **वाराह्येति॥** वराहस्यापत्यं स्त्रीति विग्रहः। अत इञ्, अकारलोपः, वाराहिशब्दः। तत्र इकार उत्तमः। रेफादाकार उत्तमसमीपवर्ती गुरुः। इञ्, इकारस्य ष्यङादेशः, चाबिति भावः। **वासिष्ठी। वैश्वामित्रीति॥** ऋष्यणन्तावेतौ। **औपगवीति॥** अणन्तत्वेऽपि गुरूपोत्तमत्वाभावान्न ष्यङ्। **जातिलक्षण इति॥** "गोत्रञ्च चरणैः सह" इति जातित्वम्। **आहिच्छत्त्रीति॥** जातार्थे अणयं, नतु गोत्र इति न ष्यङ्। नच ष्यङ्प्रत्यय एव कुतो न विधीयते इति वाच्यम्। तथा सति उदमेयस्यापत्यं स्त्री इति विग्रहे अत इञि ष्यङि चापि औदमेय्या, तस्याः अपत्यं औदमेयेयः इति न सिद्ध्येम्। अस्यापत्यप्रत्ययत्वाभावेन यलोपाप्राप्तेरिति स्पष्टं भाष्ये। **गोत्रावयवात्॥** गोत्रावयवशब्दं व्याचष्टे। **गोत्रावयवा गोत्राभिमता इति॥** गोत्रङ्कुलम् अभिमतं प्रख्यातं याभिरिति विग्रहः। कुलप्रख्यातिकृत

१२०० । क्रौड्यादिभ्यश्च । (४-१-८०)

स्त्रियां ष्यङ्प्रत्ययः स्यात्। अगुरूपोत्तमार्थोऽनणिञन्तार्थश्चारम्भः। क्रौड्या। व्याड्या। 'सूत युवत्याम्' (ग सू ५५) सूत्या। 'भोज क्षत्रिये' (ग सू ५६)। भोज्या।

१२०१ । दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्डेविद्धिभ्यो-ऽन्यतरस्याम्। (४-१-८१)

एभ्यश्चतुर्भ्यः ष्यङ्वा। अगोत्रार्थमिदम्, गोत्रेऽपि परत्वात्प्रवर्तते। पक्षे 'इतो मनुष्य—' (सू ५२०) इति ङीष्। दैवयज्ञ्या—दैवयज्ञी। इत्यादि।

इति अपत्याधिकारप्रकरणम्।

इत्यर्थः। कुलव्यपदेशकृतः इति यावत्। तदाह। **कुलाख्या इति** ॥ कुलम् आख्यायते व्यपदिश्यते आभिरिति कुलाख्या। कुलनामानीत्यर्थः। पुणिकादिशब्दैर्हि कुलं व्यपदिश्यते। पुणिकाः वयं, भुणिकाः वयमित्यादि। अवपूर्वकात् 'यु मिश्रणे' इति धातोरुपसर्गवशेन प्रख्यात्यर्थकात् पचाद्यचि अवयवशब्दः। कुलस्यावयवः प्रख्यापकशब्दः कुलावयव इति लभ्यत इति भावः। ननु पूर्वेणैव सिद्धे किमर्थमिदमित्यत आह। **अगुरूपोत्तमार्थः इति** ॥ गोत्रादवयुतं मिश्रितम् अनन्तरापत्यन्तदर्थमित्यपि भाष्ये स्पष्टम्। एवञ्च पूर्वसूत्रे अपत्याधिकारबहिर्भूतेऽपि पारिभाषिकमेव 'गोत्रञ्चृह्यते' इति भाष्यस्वरसः। **पौणिक्येति** ॥ पुणिकस्यापत्यं स्त्रीति विग्रहे अत इञन्तात् ष्यङि चाप्। एवम्भौणिक्या मनुष्यनामत्वे तन्नामिकाणः ष्यङ्। **क्रौड्यादिभ्यश्च** ॥ "प्रत्ययविधिः" इति भाष्योक्तम्पक्षान्तरमाश्रित्य आह। **ष्यङ्प्रत्यय इति** ॥ पूर्वेण सिद्धे किमर्थमिदमित्यत आह। **अगुरूपोत्तमार्थोऽनणिञन्तार्थश्चेति** ॥ **क्रौड्येति** ॥ क्रोडस्यापत्यं स्त्रीति विग्रहे अत इञन्तात्ष्यङ्, चाप्। इह 'व्यादीनामन्त्यमुत्तमम्' इत्युक्तेनागुरूपोत्तमत्व, मनुष्यनामत्वेत्वण्। भौकक्ष्यशब्दो गर्गादियञन्तः। तस्य अनणिञन्तत्वेऽपि ष्यङ्। **सूत युवत्यामिति** ॥ गणसूत्रमिदम्। सूतशब्दो युवत्यां ष्यङं लभत इत्यर्थः। **सूत्येति** ॥ प्राप्तयौवनेत्यर्थः। जातौ तु सूतीत्येव। **भोज क्षत्रिये** ॥ इदमपि गणसूत्रम्। **दैवयज्ञि** ॥ **अगोत्रार्थमिति** ॥ अनन्तरापत्यार्थमित्यर्थः। **प्रवर्तते इति** ॥ विकल्प इति शेषः। **पक्षे इति** ॥ ष्यङभावपक्षे इत्यर्थः। **दैवयज्ञीति** ॥ देवयज्ञस्यापत्यं स्त्रीति विग्रहे अत इञन्तात्ष्यङ्विकल्पः। **इत्यादीति** ॥ शुचिवृक्षस्यापत्यं स्त्री शौचिवृक्ष्या—शौचिवृक्षी। सत्यमुग्रः निपतनान्मुम्। सत्यमुग्रस्यापत्यं स्त्री सात्यमुग्र्या—सात्यमुग्री। काण्डेन विद्धः काण्डेविद्धः। निपातनादेत्त्वम्। काण्डेविद्धस्यापत्यं स्त्री काण्डेविध्या—काण्डेविद्धी। कर्णेविद्धीति पाठान्तरम्।

इत्यपत्याधिकारप्रकरणम्।

अथ तद्धिते चातुरर्थिकप्रकरणम्।

१२०२। तेन रक्तं रागात्। (४-२-१)

रज्यतेऽनेनेति रागः, कषायेण रक्तं वस्त्रं काषायम्। माञ्जिष्ठम्। 'रागात्' किम्। देवदत्तेन रक्तं वस्त्रम्।

१२०३। लाक्षारोचनाट्ठक्। (४-२-१)

लाक्षिकः। रौचनिकः। 'शकलकर्दमाभ्यामुपसंख्यानम्' (वा २६७९)। शाकलिकः। कार्दमिकः। 'आभ्यामणपि' इति वृत्तिः। शाकलः। कार्दमः। 'नील्या अन्' (वा २६८०)। नील्या रक्तं नीलम्। 'पीतात्कन्' (वा २६८१)। पीतकम्। 'हरिद्रामहारजनाभ्यामञ्' (वा २६८२)। हारिद्रम्। माहारजनम्।*

१२०४। नक्षत्रेण युक्तः कालः। (४-२-३)

पुष्येण युक्तं पौषमहः। पौषी रात्रिः।

अथ तद्धितचातुरर्थिकप्रकरणं निरूप्यन्ते—**तेन रक्तं रागात्॥ रज्यते इति॥** रज्यते वर्णान्तरं प्राप्यते अनेनेत्यर्थे रञ्जेः करणे घञि कृते 'घञि च भावकरणयोः' इति यलोपे 'चजोः कुघिण्ण्यतोः' इति कुत्वे रागशब्द इत्यर्थः। तथाच रागशब्देन रञ्जनसाधनं द्रव्यमुक्तम्भवति। तेनेति सामान्यनिर्देशः। तथाच तेन रक्तं वर्णान्तरम्प्राप्तमित्यर्थे रागात् रञ्जनद्रव्यवाचकात् तृतीयान्तादण् स्यादित्यर्थः। 'प्राग्दीव्यतोऽण्' इत्यधिकारात्। **कषायेणेति॥** कषायो धातुविशेषः रञ्जनद्रव्यं, तेन रक्तं वर्णान्तरं प्राप्तङ्कषायमित्यर्थः। **माञ्जिष्ठमिति॥** मञ्जिष्ठं नाम रञ्जनद्रव्यविशेषः। **लाक्षारोचनाट्ठक्॥** अणोऽपवादः। **लाक्षिक इति॥** पट इति शेषः। लाक्षया रक्त इति विग्रहः। **रौचनिक इति॥** रोचनया रक्त इति विग्रहः। **शाकलिकः इति॥** शकल रागद्रव्यविशेषः। **वृत्तिरिति॥** भाष्ये तु नैतदृष्टम्। **नील्या अनिति॥** वक्तव्य इति शेषः। अणोऽपवादः। नीली ओषधिविशेषः। 'पीतात्कन्' अणोऽपवादः। पीतं हरितालकादि द्रव्यम्। **हरिद्रामहेति॥** अणोऽपवादः। स्वरे विशेषः। हरिद्रा प्रसिद्धा। महारजनन्नाम रागद्रव्यविशेषः। इति रक्ताधिकारः।* **नक्षत्रेण॥** अस्मिन्नर्थे प्रथमोच्चारितात् नक्षत्रवाचकाच्छब्दात् प्राग्दीव्यतीयाः प्रत्यया यथायथं स्युरित्यर्थः। नक्षत्रयुक्तश्चन्द्रमाः नक्षत्रशब्देन विवक्षितः। **पुष्येण युक्तमिति॥** पुष्ययुक्तचन्द्रमसा युक्तमित्यर्थः। **पौषम् अहरिति॥** पुष्यशब्दादणि 'तिष्यपुष्ययोर्नक्षत्राणि यलोपः' इति यलोपः। **पौषी रात्रिरिति॥** पुष्ययुक्तचन्द्रमसा युक्तेत्यर्थः। अणि यलोपे 'टिड्ढ' इति ङीप्। नक्षत्रेणेति किम्। चन्द्रेण युक्ता

१२०५। लुबविशेषे। (४-२-४)

पूर्वेण विहितस्य लुप्स्यात् षष्टिदण्डात्मककालस्यावान्तरविशेषश्चेन्न गम्यते। अद्य पुष्यः। कथं तर्हि 'पुष्ययुक्ता पौर्णमासी पौषी' इति। 'विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः' (सू १२२५) इति निर्देशेन पौर्णमास्यामयं लुब्नेति ज्ञापितत्वात्। श्रवणशब्दात्तु अत एव लुप् युक्तवद्भावाभावश्च। 'अबाधकान्यपि निपातनानि'। श्रावणी।

१२०६। संज्ञायां श्रवणाश्वत्थाभ्याम्। (४-२-५)

विशेषार्थोऽयमारम्भः। श्रवणा रात्रिः। अश्वत्थो मुहूर्तः। 'संज्ञायाम्' किम्। श्रावणी। आश्वत्थी।

रात्रिः। कालः किम्। पुष्येण युक्तश्चन्द्रमाः। **लुबविशेषे॥ षष्टिदण्डेति॥** षष्टिघटिकापरिच्छिन्ने काले एकैकस्मिन् एकैकेन नक्षत्रेण चन्द्रमा युज्यते इति स्थितिः। तस्य षष्टिदण्डस्य कालस्य अवान्तरविशेषः अहर्वा रात्रिर्वेति न गम्यते चेदित्यर्थः। **अद्य पुष्य इति॥** अद्येत्यव्ययम् अहोरात्रवाचि अधिकरणशक्तिप्रधानम्। इह तु अधिकरणशक्तिविनिर्मुक्तः। अहोरात्रकालो विवक्षितः। तथाच अयमहोरात्रः पुष्ययुक्तचन्द्रमसा युक्त इत्यर्थः। **अहर्वा रात्रिर्वेति** विशेषानवगमादणो लुप्। **कथं तर्हीति॥** पौर्णमास्याः षष्टिदण्डात्मिकाया **अवान्तरविशेषानवगमादिह** लुप् स्यादित्याक्षेपः। समाधत्ते। **विभाषेति॥** फाल्गुनीकार्तिकीशब्दानां नक्षत्रान्विशिष्टानाम्पौर्णमास्यां प्रयोगदर्शनेन पौर्णमास्यान्नक्षत्रयुक्तायां 'लुबविशेषे' इत्ययं लुप् नेति ज्ञापितत्वात्। पौषी पौर्णमासीत्यत्र न लुबित्यर्थः। ननु तर्हि श्रवणयुक्तपौर्णमास्यां लुबभावात् कथं श्रवणेति निर्देश इत्यत आह। **श्रवणशब्दात्त्वत एव लुबिति॥** श्रवणेति निपातनादेव पौर्णमास्यां लुबित्यर्थः। ननु 'कृत्तिका श्रवणः पुष्यः चित्रास्वात्योर्यदन्तरम्' इत्यादौ श्रवणशब्दस्य पुल्लिङ्गत्वदर्शनेन तस्मादणो लुपि कृते 'लुपि युक्तवद्व्यक्तिवचने' इति पुल्लिङ्गत्वावश्यंभावाच्छ्रवणेति कथं स्त्रीलिङ्गतेत्यत आह। **युक्तवद्भावाभावश्चेति॥** निपातनादिति शेषः। ननु तर्हि श्रावणीति नैव स्यादित्यत आह। **अबाधकान्यपि निपातनानीति॥** इयं परिभाषा वृत्तौ स्थिता। सर्वादिसूत्रभाष्ये तु 'बाधकान्येव निपातनानि' इत्युक्तम्। **संज्ञायाम्॥** श्रवणाश्वत्थाभ्याम्परस्य नक्षत्रप्रत्ययस्य लुप् स्यात्संज्ञायामित्यर्थः। ननु 'लुबविशेषे' इत्येव सिद्धे किमर्थमिदमित्यत आह। **विशेषार्थोऽयमारम्भ इति॥ श्रवणा रात्रिरिति॥** श्रवणयुक्तचन्द्रमसा युक्ता रात्रिरित्यर्थः। 'विभाषा फाल्गुनीश्रवणा' इति सूत्रे श्रवणेति निर्देशस्य सामान्यापेक्षत्वात् अपौर्णमास्यामपि युक्तवद्भावो नेति विज्ञायते। अतः श्रवणा रात्रिरिति सिद्धमिति प्रकृतसूत्रे भाष्ये स्पष्टम्। **अश्वत्थो मुहूर्त इति॥** अश्वत्थो नाम अश्विनीनक्षत्रम्। तेन युक्तः अश्वत्थः, मुहूर्तविशेषो ज्योतिषे प्रसिद्धः।

१२०७ । द्वन्द्वाच्छः । (४-२-६)

नक्षत्रद्वन्द्वाद्युक्ते काले छः स्याद्विशेषे सत्यसति च । तिष्यपुनर्वसवीयमहः । राधानूराधीया रात्रिः ।

१२०८ । दृष्टं साम । (४-२-७)

तेनेत्येव । वसिष्ठेन दृष्टं वासिष्ठं साम । 'अस्मिन्नर्थेऽण् डिद्वा वक्तव्यः' (वा २६९०) । उशनसा दृष्टमौशनम्--औशनसम् ।

१२०९ । कलेर्ढक् । (४-२-८)

(वा २६८९) । कलिना दृष्टं कालेयं साम ।

१२१० । वामदेवाड्ड्यड्ड्यौ । (४-२-९)

वामदेवेन दृष्टं साम वामदेव्यम् ।

'सिद्धे यस्येति लोपेन किमर्थं ययतौ डितौ ।
ग्रहणं माऽतदर्थेऽभूद्वामदेव्यस्य नञ्स्वरे ।।' [इति भाष्यम् ।]

१२११ । परिवृतो रथः । (४-२-१०)

द्वन्द्वाच्छः ॥ **तिष्यपुनर्वसवीयमहरिति** ॥ तिष्यश्च पुनर्वसू च तिष्यपुनर्वसू, ताभ्यां युक्तमहरिति विग्रहः । छस्य ईयादेशे ओर्गुणः । **राधानूराधीया रात्रिरिति** ॥ राधेति विशाखानक्षत्रमुच्यते । राधा च अनूराधाश्च राधानूराधाः । तद्युक्ता रात्रिरित्यर्थः । **दृष्टं साम** ॥ **तेनेत्येवेति** ॥ अनुवर्तते एवेत्यर्थः । तेन दृष्टं सामेत्यर्थे तृतीयान्तादणादयः स्युरित्यर्थः । **अस्मिन्नर्थे इति** ॥ 'दृष्टं साम' इत्यर्थे यः अण् सः डिद्वेत्यर्थः । **औशनमिति** ॥ अणि टिलोपपक्षे रूपम् । **कलेर्ढक** ॥ **वामदेवाड्ड्यड्ड्यौ** ॥ **वामदेव्यमिति** ॥ डित्त्वाट्टिलोपः । तित्त्वं स्वरार्थम् । ननु 'यस्येति च' इति लोपेन सिद्धे किमर्थमिह डित्करणमिति चेत्सत्यम् । ययतोरेव विधौ 'ययतोश्चातदर्थे' इति नञः परस्य यदन्तस्यान्तोदात्तस्वरविधौ अनयोर्ग्रहणाभावार्थं डित्करणम् । तथाच वामदेव्यमित्यत्रायं स्वरो न भवति । डित्करणे सति तु स्वरविधावनयोर्न ग्रहणम् । 'निरनुबन्धकग्रहणे सति न सानुबन्धकस्य ग्रहणम्' इति परिभाषया वा 'तदनुबन्धकग्रहणे सति नातदनुबन्धकस्य' इति परिभाषया वा तन्निवृत्तिर्भवति । एते तु परिभाषे इहैव ज्ञाप्येते । एतत्सङ्ग्राहकम्भाष्यस्थं श्लोकम्पठति । **सिद्धे यस्येत्यादि** ॥ अत्र पूर्वार्धमाक्षेपपरम् । 'यस्य' इति लोपेन सिद्धे ययतौ किमर्थण्डितौ कृतावित्यर्थः । **ग्रहणमिति** ॥ वामदेव्यशब्दस्य नञ्स्वरे नञाश्रयस्वरविधौ अतदर्थे 'ययतोश्चातदर्थे' इति सूत्रे अनयोर्ड्यड्ड्ययोर्ग्रहणं माभूदित्येतदर्थण्डित्करणमित्यर्थः । **परिवृतो रथः** ॥ तेनेत्यनुवर्तते ।

---

१. कलेर्ढगिति वार्तिकम्-इति शेखरकृत् ।

वस्त्रैः परिवृतो वास्त्रो रथः। 'रथः' किम्। वस्त्रेण परिवृतः कायः। समन्ताद्वेष्टितः परिवृत उच्यते। तेनेह न। छात्रैः परिवृतो रथः।

१२१२। पाण्डुकम्बलादिनिः। (४-२-११)

पाण्डुकम्बलेन परिवृतः पाण्डुकम्बली। पाण्डुकम्बलशब्दो राजास्तरणवर्णकम्बलस्य वाचकः। मत्वर्थीयेनैव सिद्धे वचनमणो निवृत्त्यर्थम्।

१२१३। द्वैपवैयाघ्रादञ्। (४-२-१२)

द्वीपिनो विकारो द्वैपम्। तेन परिवृतो द्वैपो रथः। एवं वैयाघ्रः।

१२१४। कौमारापूर्ववचने। (४-२-१३)

'कौमार' इत्यविभक्तिको निर्देशः। अपूर्वत्वे निपातनमिदम्। अपूर्वपतिं कुमारीं पतिरुपपन्नः कौमारः। यद्वा। अपूर्वपतिः कुमारी पतिमुपपन्ना कौमारी भार्या।

१२१५। तत्रोद्धृतममत्रेभ्यः। (४-२-१४)

तेन परिवृतो रथः इत्यर्थे तृतीयान्तादणादयः स्युरित्यर्थः। ननु छात्रैः परिवृतो रथः इत्यत्रापि स्यादित्यत आह। **समन्ताद्वेष्टितः परिवृत इत्युच्यते इति** ॥ रथस्य समन्तादाच्छादनार्थं यद्वस्त्रादिकं रथावयवभूतं तद्वाचकादेवेत्याशयः। एकान्तग्रहणमिति वार्तिकात्। **पाण्डुकंबलादिनिः** ॥ तेनेति परिवृतो रथ इति चानुवर्तते। इनिप्रत्यये नकारादिकार उच्चारणार्थः। ननु 'अत इनिठनौ' इति मत्वर्थीयेन इनैव सिद्धे किमर्थमिदमित्यत आह। **अणो निवृत्त्यर्थमिति** ॥ **द्वैपवैयाघ्रादञ्** ॥ तेनेति परिवृतो रथ इति चानुवर्तते। तृतीयान्तात् द्वैपशब्दाद्वैयाघ्रशब्दाच्च परिवृतो रथ इत्यर्थे अञ् स्यादित्यर्थः। अणोऽपवादः। स्वरे विशेषः। **द्वीपिन इति** ॥ द्वीपी व्याघ्रः, तस्य विकारः चर्मेत्यर्थे 'प्राणिरजतादिभ्यः' इत्यञि टिलोपे द्वैपशब्द इत्यर्थः। **एवं वैयाघ्र इति** ॥ व्याघ्रस्य चर्म, वैयाघ्रम्। अञि 'न य्वाभ्याम्' इत्यैच्। तेन परिवृतो वैयाघ्र इति भावः। **कौमारापूर्ववचने** ॥ तेनेति परिवृतो रथ इति च निवृत्तम्। **अविभक्तिक इति** ॥ लुप्तप्रथमाक इति भावः। अपूर्वशब्दो भावप्रधान इत्याह। **अपूर्वत्वे निपातनमिदमिति** ॥ न पूर्वः पतिर्यस्याः सा अपूर्वपतिः, ताङ्कुमारीमुपयतवान् पतिरित्यर्थे द्वितीयान्तात् कुमारीशब्दादण् स्यादित्येकोऽर्थः। कुमारी अपूर्वम्पतिमुपपन्नेत्यर्थे प्रथमान्तात्कुमारीशब्दादण् स्यादित्यन्योऽर्थः। आद्ये उदाहरति। **अपूर्वपतिमिति** ॥ द्वितीये उदाहरति। **यद्वेत्यादि** ॥ आद्ये उपयन्तरि प्रत्ययः। द्वितीये उपयतायां स्वार्थे प्रत्यय इति विवेकः। **तत्रोद्धृतम्** ॥ तत्रोद्धृतमित्यर्थे अमत्रवाचकशब्दात् सप्तम्यन्तात् प्रत्ययः स्यादित्यर्थः। अमत्रं भाजनं शरावादि। ननु उद्धरणे पृथक्करणे

शरावे उद्धृतः, शाराव ओदनः । उद्धरतिरिहोद्धरणपूर्वके निधाने वर्तते । तेन सप्तमी । उद्धृत्य निहित इत्यर्थः ।

१२१६ । स्थण्डिलाच्छयितरि व्रते । (४-२-१५)

'तत्र' इत्येव । समुदायेन चेद्व्रतं गम्यते । स्थण्डिले शेते स्थाण्डिलो भिक्षुः ।

१२१७ । संस्कृतं भक्षाः । (४-२-१६)

सप्तम्यन्तादण्स्यात्संस्कृतेऽर्थे यत्संस्कृतं भक्षाश्चेत्ते स्युः । भ्राष्ट्रे संस्कृताः भ्राष्ट्रा यवाः । अष्टसु कपालेषु संस्कृतोऽष्टाकपालः पुरोडाशः ।

१२१८ । शूलोखाद्यत् । (४-२-१७)

अणोऽपवादः । शूले संस्कृतं शूल्यं मांसम् । उखा पात्रविशेषः । तस्यां संस्कृतमुख्यम् ।

१२१९ । दध्नष्ठक् । (४-२१८)

दध्नि संस्कृतं दाधिकम् ।

१२२० । उदश्वितोऽन्यतरस्याम् । (४-२-१९)

ठक्स्यात् । पक्षेऽण् ।

१२२१ । इसुसुक्तान्तात्कः । (७-३-५१)

शरावस्यापादानत्वात् कथं सप्तमीत्यत आह । **उद्धरतिरिहेति** ॥ 'सास्मिन्पौर्णमासी' इत्यतः प्राक् तत्रेत्यनुवर्तते । **स्थण्डिलाच्छयितरि** ॥ स्थण्डिलशब्दात्सप्तम्यन्तात् व्रतनिमित्तक-शयनकर्तरि वाच्ये प्रत्ययः स्यादित्यर्थः । **संस्कृतं भक्षाः** ॥ भक्ष्यन्त इति भक्षाः, कर्मणि घञ् । तत्रेत्यनुवर्तते । तदाह । **सप्तम्यन्तादिति** ॥ एकवचनं बहुवचनञ्च सामान्याभि-प्रायम् । 'जात्याख्यायामेकस्मिन्बहुवचनम्' इत्याद्युक्तेरित्यभिप्रेत्य आह । **यत्संस्कृतं भक्षाश्चेत्ते स्युरिति** ॥ संस्कारो नाम पाकादिना गुणविशेषाधानम् । **अष्टाकपाल इति** ॥ 'तद्धितार्थ' इति समासः । भक्षा इति किम् । पुष्पपुटे सस्कृतं वस्त्रम् । **शूलोखाद्यत्** ॥ समाहारद्वन्द्वात्पञ्चमी । तत्रेति संस्कृतम्भक्षा इति चानुवर्तते । सप्तम्यन्ताच्छूलशब्दादुखाशब्दाच्च 'संस्कृतं भक्षाः' इत्यर्थे यत् स्यादित्यर्थः । **उखा पात्रविशेष इति** ॥ "पिठरं स्थाल्युखा कुण्डम्" इत्यमरः । **दध्नष्ठक्** ॥ सप्तम्ताद्दधिशब्दात् संस्कृतम्भक्षा इत्यर्थे ठक् स्यादित्यर्थः । **अणोऽपवादः** । **दाधिकमिति** ॥ ठकि इकादेशे 'यस्येति च' इति इकारलोपः । इह दधि अधिकरणे संस्कारो लवणादिना भवति । प्राग्वहतेरित्यत्र तु 'संस्कृतम्' इति तृतीयान्तात् ठग्वक्ष्यते । **उदश्वितोऽन्यतरस्याम्** ॥ **ठक् स्यादिति** ॥ शेषपूरणम् । उक्तविषये उदश्वि-च्छब्दाट्ठग्वा स्यादित्यर्थः । **इसुसुक्तान्तात्कः** ॥ **इसुसुक्ताः** अन्ता यस्येति विग्रहः ।

'इस्' 'उस्' 'उक्' 'त' एतदन्तात्परस्य ठस्य कः स्यात्। उदकेन श्वयति वर्धते इत्युदश्वित्। तत्र संस्कृतः औदश्वित्कः—औदश्वितः। इसुसोः प्रतिपदोक्तयोर्ग्रहणान्नेह। आशिषा चरत्याशिषिकः। उषा चरति औषिकः। 'दोषं उपसंख्यानम्' (वा ५०५१)। दोर्भ्यां चरति दौष्कः।

१२२२। क्षीराड्ढञ्। (४-२-२०)

अत्र 'संस्कृतम्' इत्येव सम्बध्यते, न तु भक्षा इति। तेन यवाग्वामपि भवति। क्षैरेयी।

१२२३। सास्मिन्पौर्णमासीति। (४-२-२१)

'इति' शब्दात् 'संज्ञायाम्' इति लभ्यते। पौषी पौर्णमास्यस्मिन्पौषो मासः।

१२२४। आग्रहायण्यश्वत्थाट्ठक्। (४-२-२२)

तकारादकारः उच्चारणार्थः। **ठस्य कः स्यादिति**॥ ठकि ककार इत्, अकार उच्चारणार्थः, ठकारस्य शिष्टस्य ककारः अन्तादेश इति 'ठस्येकः' इत्यत्रोक्तम्। श्वयतीत्यस्य विवरणं वर्धते इति। 'टु ओ श्वि गतिवृद्ध्योः' इति धातुरिह वृद्ध्यर्थक इति भावः। **उदश्विदिति**॥ क्विपि तुक्। 'उदकस्योदः संज्ञायाम्' इत्युदादेशः। "तक्रं ह्युदश्विन्मथितं पादाम्बर्धाम्बु-निर्जलम्" इत्यमरः। **प्रतिपदोक्तयोरिति**॥ इस्प्रत्ययस्य उस्प्रत्ययस्य च उणादौ प्रतिपदोक्तयोरिह ग्रहणमित्यर्थः। यथा सार्पिष्कः, धानुष्कः इति। **आशिषिक इति**॥ चरतीति ठक्। शासुधातोः क्विपि 'आशासः क्वौ' इत्युपधाया इत्त्वम्। **उषा चरति औषिक इति**॥ वसधातोः क्विपि सम्प्रसारणे उषेति तृतीयान्तम्। 'शासिवसिघसीनाञ्च' इति उभयत्र षत्वम्। **दोष इति**॥ दोष्शब्दात् ठस्य कः स्यादित्यर्थः। **दौष्क इति**॥ तरतीति ठक्। **क्षीराड्ढञ्**॥ **क्षैरेयीति**॥ क्षीरे संस्कृता यवागूरित्यर्थः। भक्षग्रहणानुवृत्तौ त्विह न स्यात्। यवाग्वाः पेयत्वेन खाद्यत्वाभावात्। **सास्मिन्पौर्णमासीति**॥ 'तत्र' इति 'संस्कृतं भक्षाः' इति च निवृत्तम्। सा पौर्णमासी अस्मिन्नित्यर्थे प्रथमान्तात्प्रत्ययः स्यादित्यर्थः। **इतिशब्दादिति**॥ एतच्च भाष्ये स्थितम्। **पौषीति**॥ पुष्येण युक्ता पौषी पौर्णमासी, सा यस्मिन्मासे स पौषो मासः। पौषी-शब्दादणि 'यस्येति च' इति ईकारलोपः। एवं मघाभिर्युक्ता पौर्णमासी माघी, सा यस्मिन्सः माघो मासः। तथा फाल्गुन इत्यादि। संज्ञायां किम्। पौषी पौर्णमासी अस्मिन्पञ्चदशरात्रे। **आग्रहायण्यश्वत्थाट्ठक्**॥ पूर्वसूत्रविषये आग्रहायणीशब्दादश्वत्थशब्दाच्च ठक् स्यादित्यर्थः।

---

१. अत्र च 'अथेह कथं भावितव्यम्—दोर्भ्यां तराति दौष्क इति भवितव्यम्' इति भाष्यं मानम्।

अग्रे हायनमस्या इत्याग्रहायणी । प्रज्ञादेराकृतिगणत्वादण् । 'पूर्वपदात्संज्ञायाम्—' । (सू ८५७) इति णत्वम् । आग्रहायणी पौर्णमास्यस्मिन्नाग्रहायणिको मासः । अश्वत्थेन युक्ता पौर्णमास्यश्वत्थः । निपातनात्पौर्णमास्यामपि लुप् । आश्वत्थिकः ।

१२२५ । विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः । (४-२-२३)

एभ्यष्ठग्वा । पक्षेऽण् । फाल्गुनिकः—फाल्गुनो वा मासः । श्रावणिकः—श्रावणः । कार्त्तिकिकः—कार्त्तिकः । चैत्रिकः—चैत्रः ।*

१२२६ । साऽस्य देवता । (४-२-२४)

इन्द्रो देवता अस्येति ऐन्द्रं हविः । पाशुपतम् । बार्हस्पत्यम् । त्यज्यमानद्रव्ये उद्देश्यविशेषो देवता, मन्त्रस्तुत्या च । ऐन्द्रो मन्त्रः । 'आग्नेयो वै ब्राह्मणो देवतया' इति तु शैषिकेऽर्थे 'सर्वत्राग्नि—' (वा २६८९) इति ढक् ।

अणोऽपवादः । **हायनमिति** ॥ संवत्सर इत्यर्थः । "संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री" इत्यमरः । यस्या ऊर्ध्वं संवत्सरस्यारम्भः सा पौर्णमासी आग्रहायणीत्यर्थः । तर्हि आग्रहायणेति स्यादित्यत आह । **प्रज्ञादेरिति** ॥ 'प्रज्ञादिभ्यश्च' इति स्वार्थे अणि 'टिड्ढ' इति ङीबित्यर्थः । **अश्वत्थेनेति** ॥ अश्वत्थनक्षत्रेणेत्यर्थः । **अश्वत्थ इति** ॥ नक्षत्राणः 'लुबविशेष' इति लुबिति भावः । ननु 'विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः' इति निर्देशेन पौर्णमास्यां 'लुबविशेषे' इत्यस्याप्रवृत्तेरुक्तत्वात् कथमिह लुबित्यत आह । **निपातनात्पौर्णमास्यामपि लुबिति** ॥ तथाच पौर्णमास्यां लुब् नेति ज्ञापनमेतद्व्यतिरिक्तविषयमिति भावः । **विभाषा फाल्गुनी** ॥ **एभ्यष्ठग्वेति** ॥ 'तास्मिन्' इत्युक्तविषये इति शेषः । **फाल्गुनिकः-फाल्गुनो वा मास इति** ॥ फाल्गुनी पौर्णमास्यस्मिन्निति विग्रहः । एवं श्रावणिक इत्यादि । इति युक्तार्थकः ।* **साऽस्य देवता** ॥ अस्मिन्नर्थे प्रथमान्तादणादयः स्युरित्यर्थः । **ऐन्द्रं हविरिति** ॥ इन्द्रात्मकदेवतासम्बन्धीत्यर्थः । **पाशुपतमिति** ॥ पशुपतिर्देवता अस्येति विग्रहः । ननु देवताशब्दस्य लोकप्रसिद्धजातिविशेषवाचकत्वे पितरो देवता अस्य पित्र्यमित्यादयुपपन्नमित्यत आह । **त्यज्यमानद्रव्ये उद्देश्यविशेषो देवतेति** ॥ हविःशेषभृत्विग्भ्यो ददाति । विप्राय गां ददाति इत्यादौ ऋत्विग्विप्रादेर्देवतात्वव्यावृत्तये विशेषग्रहणम् । त्यज्यमानहविस्साध्यः अस्मदाद्यप्रत्यक्षः यस्तृप्त्याद्युपकारः तदाश्रयो देवतेति यावत् । **मन्त्रस्तुत्या चेति** ॥ "अग्निमीडे पुरोहितम्" इत्यादिमन्त्रेषु यज्ञपुरोहितत्वादिगुणविशिष्टत्वेन या प्रतिपाद्यते सापि देवतेत्यर्थः । **ऐन्द्रो मन्त्र इति** ॥ इन्द्रार्थस्तुत्यको मन्त्र इत्यर्थः । ननु 'आग्नेयो वै ब्राह्मणो देवतया' इत्यत्र कथन्देवतातद्धितः । अत्र अग्नेर्हविरुद्देश्यत्वस्य मन्त्रस्तुत्यत्वस्य वाऽभावादित्यत आह । **"आग्नेयो वै" इति** ॥ **शैषिकेऽर्थे इति** ॥ शेषे इति सूत्रलभ्ये

१२२७। कस्येत्। (४-२-२५)

कशब्दस्येदादेशः स्यात्प्रत्ययसन्नियोगेन। 'यस्य—' (सू ३११) इति लोपात्परत्वादादिवृद्धिः। को ब्रह्मा देवता अस्य कायं हविः। श्रीर्देवता अस्य श्रायम्।

१२२८। शुक्राद्धन्। (४-२-२६)

शुक्रियम्।

१२२९। अपोनप्त्रपान्नप्त्रभ्यां घः। (४-२-२७)

अपोनप्त्रियम्—अपान्नप्त्रियम्। अपोनपात्—अपान्नपाच्च देवता। प्रत्ययसन्नियोगेन तूक्तं रूपं निपात्यते। अत एवापोनपाते—अपान्नपातेऽनुब्रूहीति प्रैषः।

१२३०। छ च। (४-२-२८)

तदभिमानिकत्वे गम्ये इत्यर्थः। अग्निर्नाम यो देवताजातिविशेषो लोकवेदसिद्धः तदभिमानिको ब्राह्मण इति बोधः। **कस्येत्॥ प्रत्ययसन्नियोगेनेति॥** 'साऽस्य देवता' इति विहिते कशब्दादण्प्रत्यये परे तत्सन्नियोगेन प्रकृतेरिकारोऽन्तादेश इत्यर्थः। तथाच कशब्दादाणि प्रकृतेरिकारे अन्तादेशे वृद्धौ आयादेशे कायमिति सिद्धम्। तत्र किं अ इति स्थिते 'यस्येति च' इति इकारलोपमाशङ्क्य आह। **यस्येति लोपात्परत्वादादिवृद्धिरिति॥** कशब्दस्य विवरणं ब्रह्मेति। यद्यप्यत्र इत्वविधिबलादेव लोपो न भवतीति भाष्यम्। तथापि वस्तुस्थितिकथनमिदम्। तस्य प्रयोजनमाह। **श्रीर्देवता अस्य श्रायं हविरिति॥** अत्रेदमवधेयम्। 'कस्येत्' इत्यत्र कशब्दस्य अकारान्तस्य षष्ठ्येकवचनमित्येकः पक्षः। सर्वादिगणपठितस्य किंशब्दस्य षष्ठ्येकवचनमिति पक्षान्तरम्। तत्राद्यपक्षे हविःप्रचारे "कायानुब्रूहि" इति प्रैष इति निर्विवादम्। सर्वादिगणबहिर्भूतत्वेन स्मैभावासम्भवात्। द्वितीयपक्षे तु किंशब्दस्य प्रजापतिनामत्वेन असर्वनामत्वान्न स्मैभावः। अन्वर्थसंज्ञाबलेन एकार्थवृत्तेः संज्ञाशब्दस्य सर्वनामत्वाभावात्। तथाच कायानुब्रूहीत्येव प्रैषः। यद्वा प्रजापतेः सर्वात्मकत्वेन तन्नाम्नः किंशब्दस्य सर्वनामत्वात् "कस्मा अनुब्रूहि" इत्येव सम्प्रैष इति भाष्ये प्रपञ्चितम्। एवञ्च विष्णुसहस्रनामसु "विश्वं विष्णुः" इति, "एको नैकः सवः कः किं यत्तत्पदमनुत्तमम्" इति च पठितविश्वादिशब्देष्वप्ययं न्यायस्तुल्यः। तथाच विश्वस्मै नमः, विश्वाय नमः, इत्यादि प्रयोज्यमिति प्रासङ्गिकम्। **शुक्राद्धन्॥** 'साऽस्य देवता' इत्यर्थे इति शेषः। **शुक्रियमिति॥** शुक्रो देवता अस्येति विग्रहः। **अपोनप्त्रपान्नप्त्रभ्याङ्घः॥ प्रत्ययसन्नियोगेनेति॥** घप्रत्ययसन्नियोगेन अपोनपाच्छब्दस्य अपोनप्त्रभावः, अपान्नपाच्छब्दस्य अपान्नप्त्रभावश्च निपात्यते इत्यर्थः। **अत एवेति॥** घप्रत्ययसन्नियोगेनैव उक्तादेशविधेरित्यर्थः। अत्र घप्रत्ययाभावान्नोक्तादेशाविति भावः। **छ च॥** उक्तविषये छोऽपीत्यर्थः। ननु अपोनप्त्रपान्नप्त्रभ्याङ्घच्छौ इत्येवास्तु। तत्राह। **योगविभाग**

योगविभागो यथासङ्ख्यनिवृत्त्यर्थः । अपोनप्त्रीयम्—अपान्नप्त्रीयम् । पैङ्गाक्षिपुत्रीयम् । तारणबिन्दवीयम् । 'शतरुद्राद्धश्च' (वा २७०२) । चाच्छः । शतं रुद्राः देवता अस्य शतरुद्रियम्—शतरुद्रीयम् । घछयोर्विधानसामर्थ्यात् 'द्विगोर्लुगनपत्ये' (सू १०८०) इति न लुक् ।

१२३१ । महेन्द्राद्धाणौ च । (४-२-२९)

चाच्छः । महेन्द्रियम् हविः—माहेन्द्रम्—महेन्द्रीयम् ।

१२३२ । सोमाट्ष्यण् । (४-२-३०)

सौम्यम् । टित्त्वान्ङीप् । सौमी ऋक् ।

१२३३ । वाय्वृतुपित्रुषसो यत् । (४-२-३१)

वायव्यम् । एवम् ऋतव्यम् ।

१२३४ । रीङृतः । (७-४-२७)

अकृद्यकारेऽसार्वधातुके यकारे च्वौ च परे ऋदन्ताङ्गस्य रीङादेशः स्यात् । 'यस्येति च' (सू ३११) । पित्र्यम् । उपस्यम् ।

इति ॥ पैङ्गाक्षिपुत्रीयमिति ॥ पिङ्गाक्षिपुत्रो देवता अस्येति विग्रहः । **तारणबिन्दवीयमिति ॥** तारणबिन्दुः देवता अस्येति विग्रहः । **शतरुद्राद्धश्चेति ॥** वार्तिकमिदम् । **शतरुद्रियमिति ॥** घस्य इयादेशः । **शतरुद्रीयमिति ॥** छस्य ईयादेशः । उभयत्र 'तद्धितार्थ' इति द्विगुसमासः । 'द्विगोर्लुगनपत्ये' इति लुकमाशङ्क्य आह । **घच्छयोरिति ॥ महेन्द्राद्धाणौ च ॥ महेन्द्रियमिति ॥** महेन्द्रो देवता अस्येति विग्रहः । घस्य इयादेशः । **माहेन्द्रमिति ॥** अणि रूपम् । **महेन्द्रीयमिति ॥** छस्य ईयादेशः । **सोमाट्ष्यण् ॥ सौम्यमिति ॥** सोमो देवता अस्येति विग्रहः । टित्त्वस्य प्रयोजनमाह । **टित्त्वान्ङीबिति ॥ सौमीति ॥** सोमो देवता अस्या ऋच इति विग्रहः । ङीपि 'हलस्तद्धितस्य' इति यलोपः । **वाय्वृतुपित्रुषसो यत् ॥** वायु, ऋतु, पितृ, उषस्, एभ्यः यदित्यर्थः । **वायव्यमिति ॥** वायुर्देवता अस्येति विग्रहः । यति ओर्गुणः । 'वान्तो यि' इत्यवादेशः । **एवम् ऋतव्यमिति ॥** ऋतुः देवता अस्येति विग्रहः । **रीङृतः ॥** अङ्गस्येत्यधिकृतम् ऋता विशेष्यते । तदन्तविधिः । 'अयङ् यि क्ङिति' इत्यतः यि इत्यनुवर्तते । 'अकृत्सार्वधातुकयोः' इत्यतः अकृत्सार्वधातुकयोरिति 'च्वौ च' इति सूत्रञ्च । तदाह । **अकृदित्यादिना ॥ पित्र्यमिति ॥** पितरः देवता अस्येति विग्रहः । यति पितृशब्दस्य रीङ् । 'ङिच्च' इव्यन्तादेशः । 'यस्येति च' इति ईकारलोपः । क्यचि पित्रीयतीत्यादौ 'अङ्गकार्ये कृते पुनर्नाङ्गकार्यम्' इति वचनात् 'अकृत्सार्वधातुकयोः' इति दीर्घे अप्राप्ते ईकारोच्चारणम् ।

१२३५। द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पति-गृहमेधाच्छ च। (४-२-३२)

चाद्यत्। द्यावापृथिवीयम्—द्यावापृथिव्यम्। शुनासीरीयम्—शुनासीर्यम्।

१२३६। अग्नेर्ढक्। (४-२-३३)

आग्नेयम्।

१२३७। कालेभ्यो भववत्। (४-२-३४)

मासिकम्। प्रावृषेण्यम्।

१२३८। महाराजप्रोष्ठपदाट्ठञ्। (४-२-३५)

माहाराजिकम्। प्रौष्ठपदिकम्।

१२३९। देवताद्वन्द्वे च। (७-३-२१)

उषस्यमिति ॥ उषः देवता अस्येति विग्रहः। भत्वेन पदत्वाभावात् सकारस्य न रुत्वादि। **द्यावापृथिवी** ॥ द्यावापृथिवी, शुनासीर, मरुत्वत्, अग्नीषोम, वास्तोष्पति, गृहमेध, एतेभ्यः षड्भ्यः छो यच्च स्यादित्यर्थः। अणः पत्युत्तरपदण्यस्य चापवादः। **द्यावापृथिवीयम्—द्यावापृथिव्यमिति** ॥ द्यावापृथिवी देवता अस्येति विग्रहः। छस्य ईयादेशः। उभयत्र 'यस्येति च' इति लोपः। **शुनासीरीयमिति** ॥ शुनो वायुः, सीरः आदित्यः, शुनश्च सीरश्च शुनासीरौ। 'देवताद्वन्द्वे च' इत्यानङ्। शुनासीरावस्य स्त इति शुनासीरः। "वाय्वादित्यवानिन्द्रो विवक्षितः" इति वेदभाष्ये भट्टभास्करः। शुनासीरौ देवता अस्येति विग्रहः। मरुत्वान् देवता अस्य मरुत्वतीयम्—मरुत्वत्यम्। अग्नीषोमौ देवता अस्य अग्नीषोमीयम्। वास्तुनः पतिः वास्तोष्पतिः रुद्रः। निपातनादलुक्। षत्वञ्च "रुद्रः खलु वै वास्तोष्पतिः" इति ब्राह्मणम्। अमरस्तु इन्द्रपर्यायेषु "वास्तोष्पतिः सुरपतिः" इत्याह। वास्तोष्पतिर्देवता अस्य वास्तोष्पतीयं—वास्तोष्पत्यम्। गृहमेधो देवता अस्य गृहमेधीयम्—गृहमेध्यम्। **अग्नेर्ढक्** ॥ **आग्नेयमिति** ॥ प्राग्दीव्यतीयेष्वर्थेष्वयम्। 'सर्वत्राग्निकलिभ्याम्' इति वचनात्। **कालेभ्यो भववत्** ॥ कालवाचिभ्यो भवेऽर्थे येन विशेषणेन ये प्रत्यया वक्ष्यन्ते, ते 'साऽस्य देवता' इत्यर्थे कालवाचिभ्यस्तेनैव विशेषणेन भवन्तीत्यर्थः। **मासिकमिति** ॥ मासो देवता अस्येति विग्रहः। कालाट्ठञ्। **प्रावृषेण्यमिति** ॥ प्रावृट् देवता अस्येति विग्रहः। प्रावृष एण्यः। **महाराजप्रोष्ठपदाट्ठञ्** ॥ **माहाराजिकमिति** ॥ महाराजो वैश्रवणः, सः देवता अस्येति विग्रहः। **प्रौष्ठपदिकमिति** ॥ प्रोष्ठपदो देवता अस्येति विग्रहः। वृत्तः 'साऽस्य देवता' इत्यधिकारः। अथ प्रासङ्गिकम्। **देवताद्वन्द्वे च** ॥ 'मृजेर्वृद्धिः' इत्यतो वृद्धिरित्यनुवर्तते। 'अचो ञ्णिति' इत्यतः ञ्णितीति, 'किति च' इति सूत्रञ्चानुवर्तते। 'तद्धितेष्वचामादेः' इत्यतः अचामादेरिति, 'हृद्भगसिन्ध्वन्ते पूर्वपदस्य

अत्र पूर्वोत्तरपदयोराद्यचो वृद्धिः स्यात् ञिति णिति किति च परे। आग्निमारुतम्।

१२४० । नेन्द्रस्य परस्य । (७-३-२२)

परस्येन्द्रस्य वृद्धिर्न स्यात्। सौमेन्द्रः। 'परस्य' किम्। ऐन्द्राग्नः।

१२४१ । दीर्घाच्च वरुणस्य । (७-३-२३)

दीर्घात्परस्य वरुणस्य न वृद्धिः। ऐन्द्रावरुणम्। 'दीर्घात्' किम्। आग्निवारुणम्। 'आग्निवारुणीमनड्वाहीमालभेत'। 'तदस्मिन्वर्तत इति नवयज्ञादिभ्य उपसंख्यानम्' (वा २७०६)। नावयज्ञिकः कालः। पाकयज्ञिकः। 'पूर्णमासादण्वक्तव्यः' (वा २७०७)। पूर्णो मासोऽस्यां वर्तत इति पौर्णमासी तिथिः।

१२४२ । पितृव्यमातुलमातामहपितामहाः । (४-२-३६)

च' इत्यतः पूर्वपदस्येति, 'उत्तरपदस्य च' इति सूत्रञ्चानुवर्तते। तदाह। **अत्रेत्यादिना**॥ **आग्निमारुतमिति**॥ अग्निश्च मरुच्च अग्नामरुतौ 'देवताद्वन्द्वे च' इत्यानङ्। अग्नामरुतौ देवता अस्य अग्निमारुतम्। अणि अनेन उभयपदादिवृद्धिः। अलौकिके विग्रहवाक्ये एव आनङं बाधित्वा 'इद्वृद्धौ' इति इत्त्वम्। **नेन्द्रस्य परस्य**॥ 'देवताद्वन्द्वे च' इत्युक्ता उभयपदवृद्धिः उत्तरपदस्य इन्द्रशब्दस्य नेत्यर्थः। **सौमेन्द्र इति**॥ चरुरिति शेषः। तैत्तिरीये "सोमेन्द्रं श्यामाकं चरुम्" इति छान्दसम्। **दीर्घाच्च वरुणस्य**॥ **ऐन्द्रावरुणमिति**॥ इन्द्रावरुणौ देवता अस्येति विग्रहे द्वन्द्वः। आनङ्। इन्द्रावरुणशब्दादणि दीर्घाकारात्परत्वात् वरुणस्य नादिवृद्धिः। **आग्निवारुणमिति**॥ 'इद्वृद्धौ' इत्यग्नेरित्त्वम्बाधित्वा इत्त्वे कृते दीर्घात्परत्वाभावान्निषेधाभावे सति 'देवताद्वन्द्वे च' इत्युभयपदवृद्धिरिति भावः। इति प्रासङ्गिकम्। अथ प्रकृतम्। **तदस्मिन्निति**॥ 'महाराजप्रोष्ठपदाट्ठञ्' इति सूत्रे वार्तिकमिदम्। 'तदस्मिन्वर्तते' इत्यर्थे नवयज्ञादिभ्यः प्रथमान्तेभ्यः ठञः उपसङ्ख्यानमित्यर्थः। **नावयज्ञिकः काल इति**॥ नवयज्ञः नूतनधान्यद्रव्यको यज्ञः आग्रयणाख्यः सः यस्मिन्काले वर्तते सः नावयज्ञिकः। आग्रयणकालः इति यावत्। **पाकयज्ञिक इति**॥ पाकयज्ञः औपासनाग्निसाध्यः पार्वणस्थालीपाकादिः सः यस्मिन्काले वर्तते सः पाकयज्ञिकः। **पूर्णमासादिति**॥ तदस्मिन्वर्तते इत्यर्थे पूर्णमासशब्दात्प्रथमान्तादण् वक्तव्य इत्यर्थः। **पूर्णो मासोऽस्यामिति**॥ मासश्चन्द्रमाः पूर्णश्चासौ मासश्च पूर्णमासः पूर्णचन्द्रः, सः यस्यान्तिथौ वर्तते सा पौर्णमासी तिथिरित्यर्थः। अणि 'टिड्ढाणञ्' इति ङीप्। यद्यपि पूर्णो मासः चन्द्रः पूर्णमासः। तस्येयमित्यर्थे 'तस्येदम्' इत्यणि पौर्णमासीति सिद्धम्। तथापि ईदृश एवार्थे अयं साधुरिति भावः। **पितृव्यमातुल**॥ कस्मिन् शब्दे किन्निपात्यते इत्यत आह। **पितुर्भ्रातरि**

एते निपात्यन्ते। 'पितुर्भ्रातरि व्यत्' (वा २७०८)। पितुर्भ्राता प्रितृव्यः। 'मातुर्डुलच्' (वा १७०८)। मातुर्भ्राता मातुलः। 'मातृपितृभ्यां पितरि डामहच्' (वा २७०९)। मातुः पिता मातामहः। पितुः पिता पितामहः। 'मातरि षिच्च' (वा २७१०)। मातामही। पितामही। 'अवेर्दुग्धे सोढदूसमरीसचो वक्तव्याः' (वा २७१२)। सकारपाठसामर्थ्यान्न षः। अविसोढम्। अविदूसम्। अविमरीसम्। 'तिलान्निष्फलात्पिञ्जपेजौ' (वा २७१३)। तिलपिञ्जः। तिलपेजः। वन्ध्यस्तिल इत्यर्थः। 'पिञ्जश्छन्दसि डिच्च' (वा २७१४)। तिल्पिञ्जः ॥*

१२४३। तस्य समूहः। (४-२-३७)

काकानां समूहः काकम्। बाकम्।

१२४४। भिक्षादिभ्योऽण्। (४-२-३८)

भिक्षाणां समूहो भैक्षम्। गर्भिणीनां समूहो गार्भिणम्। इह 'भस्याऽढे–' इति पुंवद्भावे कृते।

व्यदित्यादिना ॥ **मातुल इति** ॥ मातृशब्दात् डुलचि 'टेः' इति टिलोपः। **मातामह इति** ॥ मातृशब्दात् डामहचि टिलोपः। एवं पितामहः। **मातरि षिच्चेति** ॥ मातृपितृभ्यां मातरि डामहच्, स च षिद्भवतीत्यर्थः। षित्त्वस्य फलं ङीषित्याह। **मातामही। पितामहीति** ॥ **अवेरिति** ॥ अवेर्दुग्धमित्यर्थे अविशब्दात् सोढः, दूस, मरीसच्, एते प्रत्यया वक्तव्याः इत्यर्थः। सोढसकारस्य प्रत्ययावयवत्वात् षत्वमाशङ्क्य आह। **सकारपाठसामर्थ्यान्न ष इति** ॥ अन्यथा षोड इत्येवोपदिशेदिति भावः। **तिलादिति** ॥ तिलशब्दः ओषधिविशेषे मुख्यः। तत्फले तु गौणः। तत्र यदा तिलशब्दः निष्फले ओषधिविशेषे वर्तते, तदा तस्मात्स्वार्थे पेज, पिञ्ज, इति प्रत्ययौ स्त इत्यर्थः। इति देवतार्थकः ॥* **तस्य समूहः** ॥ 'इनित्रकट्यचश्च' इति यावदिदमनुवर्तते। अस्मिन्नर्थे प्रथमोच्चारितात् षष्ठ्यन्तात्प्राग्दीव्यतीयाः अणादयो यथासम्भवं स्युरित्यर्थः। 'अचित्तहस्तिधेनोष्ठक्' इत्याद्यपवादविषयम्परिहृत्योदाहरति। **काकम्। बाकमिति** ॥ समूहप्रत्ययान्तानां नपुंसकत्वं लोकात्। **भिक्षादिभ्योऽण्** ॥ तस्य समूह इत्येव। **भैक्षमिति** ॥ अत्र 'अचित्तहस्ति' इति वक्ष्यमाणठगपवादोऽण्। **गार्भिणमिति** ॥ गर्भशब्दान्मत्वर्थीये इन्प्रत्यये कृते प्रत्ययः, परश्च, आद्युदात्तश्च, इति इकारस्य उदात्तत्वे 'अनुदात्तम्पदमेकवर्जम्' इति शिष्टस्यानुदात्तत्वे गार्भिन्शब्दः अनुदात्तादिः। ततो नान्तलक्षणङीपा तस्य 'अनुदात्तौ सुप्पितौ' इत्यनुदात्तत्वे गार्भिणीशब्दोऽप्यनुदात्तादिरेव। ततः समूहेऽर्थे 'अनुदात्तादेरञ्' इति वक्ष्यमाणे अञि प्राप्ते भिक्षादित्वादणिति भावः। अणि प्रत्ययस्वरेणान्तोदात्तत्वम्। अञि तु 'ञ्नित्यादिर्नित्यम्'

१२४५ । इनण्यनपत्ये । (६-४-१६४)

अनपत्यार्थेऽणि परे इन्प्रकृत्या स्यात् । तेन 'नस्तद्धिते' (सू ६७१) इति टिलोपो न । युवतीनां समूहो यौवनम् । शत्रन्तादनुदात्तादेरञि यौवतम् ।

१२४६ । गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्र-वत्समनुष्याजाद्युञ् । (४-२-३९)

एभ्यः समूहे युञ् स्यात् । लौकिकमिह गोत्रं, तच्चापत्यमात्रम् ।

१२४७ । युवोरनाकौ । (७-१-१)

'यु' 'वु' एतयोरनुनासिकयोः क्रमात् 'अन' 'अक' एतावादेशौ स्तः । ग्लुचुकायनीनां समूहो ग्लौचुकायनकम् । औक्षकमित्यादि । 'आपत्यस्य

इत्याद्युदात्तत्वमिति स्वरे विशेषः । अणि टिलोपाभावोऽपि प्रयोजनमिति दर्शयति । **इह भस्येति** ॥ गर्भिणीशब्दादणि सति 'भस्याऽढे' इति पुंवत्त्वेन ङीपो निवृत्तौ गर्भिन् अ इति स्थिते 'नस्तद्धिते' इति टिलोपे प्राप्ते सतीत्यर्थः । **इनण्यनपत्ये** ॥ इन् अणीति च्छेदः । **प्रकृत्येति** ॥ 'प्रकृत्यैकाच्' इत्यतः तदनुवृत्तेरिति भावः । **टिलोपो नेति** ॥ अञि तु प्रकृतिभावाप्रवृत्तेष्टिलोपः स्यादिति भावः । **यौवनमिति** ॥ 'कनिन्युवृषितक्षि' इत्यौणादिककनिन्प्रत्ययान्तो नित्स्वरेणाद्युदात्तः । ततः स्त्रियां 'यूनस्तिः' इति तिप्रत्ययस्य प्रत्ययस्वरेणोदात्तत्वे सति शिष्टस्वरेण युवतिशब्दस्यानुदात्तादित्त्वादञि प्राप्ते भिक्षादित्वादणि कृते सति 'भस्याऽढे' इति पुंवत्त्वे तिप्रत्ययस्य निवृत्तौ 'अन्' इति प्रकृतिभावाट्टिलोपाभावे यौवनमिति रूपम् । अञि तु प्रकृतिभावस्य प्रवृत्तेष्टिलोपः स्यादिति भावः । वस्तुतस्तु 'भस्याऽढे तद्धिते' इत्यस्य अढे तद्धिते विवक्षिते सति ततः प्रागेव पुंवदित्यर्थः । ततश्च तद्धितोत्पत्तेः प्रागेव युवतिशब्दस्य पुंवत्त्वे तिप्रत्ययस्य निवृत्तौ युवन्शब्दस्य कनिन्प्रत्ययान्तस्य नित्स्वरेणाद्युदात्तत्वादनुदात्तत्वाभावादञभावे 'तस्य समूहः' इत्यणि प्रकृतिभावाट्टिलोपाभावे यौवनमिति सिद्धमेवेति युवतिशब्दो भिक्षादिगणे प्रत्याख्यातो भाष्यकैयटयोरित्यलम् । **शत्रन्तादिति** ॥ प्रत्ययस्वरेण मध्योदात्तत्वादनुदात्तादिरयं युवच्छब्दः । ततः उगिल्लक्षणङीपः पुंवत्त्वेन निवृत्तौ युवच्छब्दादनुदात्तादेरञि यौवतमिति रूपमिति भावः । **गोत्रोक्षोष्ट्र** ॥ **एभ्य इति** ॥ गोत्र, उक्षन्, उष्ट्र, उरभ्र, राजन्, राजन्य, राजपुत्र, वत्स, मनुष्य, अज, एतेभ्य इत्यर्थः । **लौकिकमिह गोत्रमिति** ॥ ननु पारिभाषिकमित्यर्थः । अत्र लौकिकग्रहणं किमित्यत आह । **तच्चापत्यमात्रमिति** ॥ प्रवराध्याये परिगणितं पुत्रपौत्रादिकृत्स्नापत्यमित्यर्थः । "अपत्याधिकारादन्यत्र लौकिकमेव गोत्रं गृह्यते, ननु पारिभाषिकग्रहणं गोत्रमिष्यते" इति 'स्त्रीपुंसाभ्याम्' इत्यादिसूत्रभाष्ये सिद्धान्ततत्वादिति भावः । **युवोरनाकौ** ॥ युश्च वुश्च युवुः । समाहारद्वन्द्वे सौत्रं पुंस्त्वम् । तदाह । **यु, वु एतयोरिति** ॥ 'अनुनासिकयोरिष्यते' इति वार्तिकलब्धमेतत् । अनुनासिकयोः किम् । **ग्लुचुकायनीनामिति** ॥ 'प्राचामवृद्धात्' इति

च–' (सू १०८२) इति यलोपे प्राप्ते । 'प्रकृत्या अके राजन्यमनुष्य-युवानः' (वा ४२१४) । राजन्यकम् । मानुष्यकम् । 'वृद्धाच्चेति वक्तव्यम्' (वा २७१६) । वार्द्धकम् ।

१२४८ । केदाराद्यञ्च । (४-२-४०)

चाद्वुञ् । कैदार्यम्–कैदारकम् । 'गणिकाया यञ्चिति वक्तव्यम्' (वा २७१९) । गाणिक्यम् ।

१२४९ । ठञ्कवचिनश्च । (४-२-४१)

चात्केदारादपि । कवचिनां समूहः कावचिकम् । कैदारिकम् ।

१२५० । ब्राह्मणमाणवबाडबाद्यन् । (४-२-४२)

ब्राह्मण्यम् । माणव्यम् । बाडव्यम् । 'पृष्ठादुपसङ्ख्यानम्' (वा २७२०) । पृष्ठ्यम् ।

ग्लुंचुकशब्दादपत्ये फिन्, 'इतो मनुष्यजातेः' इति ङीष्, समूहे वुञ् । अकादेशः, आदिवृद्धिः, 'यस्येति च' इतीकारलोपः । **औक्षकमिति** ॥ उक्ष्णां समूहः इति विग्रहः । वुञ्, अकादेशः, टिलोपः, आदिवृद्धिः । उष्ट्राणां समूहः इति विग्रहः, औष्ट्रकम् । उरभ्राः मेषाः तेषां समूहः, औरभ्रकम् । राजकम्–राजन्यकम् । वात्सकम् । मानुष्यकम् । आजकम् । **यलोपे प्राप्ते इति** ॥ राजन्शब्दाद्वुञि अकादेशे 'आपत्यस्य च' इति यकारस्य लोपे प्राप्ते सतीत्यर्थः । **प्रकृत्याऽके राजन्यमनुष्ययुवान इति** ॥ अके परे राजन्य, मनुष्य, युवन् एते प्रकृत्या स्युरिति वक्तव्यमित्यर्थः । यूनो भावो यौवनकम् । मनोज्ञादित्वाद्वुञ् । प्रकृति-भावान्न टिलोपः । 'वृद्धाच्च' इति वृद्धशब्दस्वरूपमेव गृह्यते । नतु 'वृद्धिर्यस्याचामादिः' इति वृद्धिसंज्ञकम् । भाष्ये वृद्धशब्दस्यैवोदाहरणात् । तदाह । **वार्धकमिति** ॥ वृद्धानां समूहः इति विग्रहः । **केदाराद्यञ्च** ॥ **कैदारकम्–कैदार्यमिति** ॥ केदाराणां समूहः इति विग्रहः । **'गणिकाया यञ्** ॥ यञ्ग्रहणात् वुञो निवृत्तिः । **गाणिक्यमिति** ॥ गणिकानां समूहः इति विग्रहः । **ठञ् कवचिनश्च** ॥ **केदारादपीति** ॥ कवचिन्शब्दात् केदार-शब्दाच्च समूहे ठञ् स्यादित्यर्थः । **कावचिकमिति** ॥ ठञ्, इकादेशे टिलोपः । **ब्राह्मण-माणवबाडबाद्यञ्** ॥ **ब्राह्मण्यमित्यादि** ॥ ब्राह्मणानां माणवानां बाडबानां च समूह इति विग्रहः । मनोरपत्यं माणवः । अणि नस्य णत्वम् । "अपत्ये कुत्सिते मूढे मनोरौत्स-र्गिकः स्मृतः । नकारस्य च मूर्धन्यः तेन सिध्यति माणवः ॥" इति 'मनोर्जातावञ्यतौ षुक्च' इति सूत्रे भाष्यम् । **पृष्ठादिति** ॥ यनः इति शेषः । **पृष्ठ्यः । षडह इति** ॥ षण्णां अह्नां समाहारः षडहः, समाहारे द्विगुः । 'राजाहस्सखिभ्यः' इति टचि टिलोपः । रथन्तर, बृहद्रूप, वैराज, शाक्कर, रैवताख्यानि षट् पृष्ठाख्यस्तोत्राणि । तद्युक्तान्यहानि लक्षणया

१२५१ । ग्रामजनबन्धुभ्यस्तल् । (४-२-४२)

ग्रामता । जनता । बन्धुता । 'गजसहायाभ्यां चेति वक्तव्यम्' (वा २७२१) । गजता । सहायता । 'अह्नः खः क्रतौ' (वा २७२२ २७२३)। अहीनः । अहर्गणसाध्यसुत्याकः क्रतुरित्यर्थः । 'क्रतौ' किम् । आह्नः । इह खण्डिकादित्वादञ् । 'अह्नष्टखोरेव' (सू ७८९) इति नियमाट्टिलोपो न। 'पर्श्वा णस् वक्तव्यः' (वा २७२४) ।

१२५२ । सिति च । (१-४-१६)

सिति परे पूर्वं पदसंज्ञं स्यात् । अभत्वादोर्गुणो न । पर्शूनां समूहः पार्श्वम् ।

१२५३ । अनुदात्तादेरञ् । (४-२-४४)

कापोतम् । मायूरम् ।

पृष्ठानि तेषां समूहः इति विग्रहः । **ग्रामजन** ॥ समूह इत्येव । **ग्रामतेत्यादि** ॥ ग्रामाणां जनानां बन्धूनां च समूह इति विग्रहः । तलन्तानां स्त्रीत्वं लोकात् । 'तलन्तं स्त्रियाम्' इति लिङ्गानुशासनसूत्राच्च । **गजसहायाभ्याञ्चेति** ॥ आभ्यामपि समूहे तलिति वक्तव्यमित्यर्थः। **अह्नः खः क्रतौ इति** ॥ वार्तिकमिदम् । क्रतौ वर्तमानात् अहन्शब्दात् समूहेऽर्थे खप्रत्ययो वाच्य इत्यर्थः । **अहीन इति** ॥ अहरशब्देन सौत्यान्यहानि विवक्षितानि । तेषां समूहः इति विग्रहः । अहन्शब्दात् खः ईनादेशः । 'अह्नष्टखोरेव' इति टिलोप इति भावः। फलितमाह । **अहर्गणेति** ॥ **आह्नः इति** ॥ अह्नां समूह इति विग्रहः । इह क्रत्वप्रतीतेर्न ख इति भावः । 'अचित्तहस्तिधेनोः' इति ठक्माशङ्क्य आह । **इहेति** ॥ 'खण्डिकादिभ्यश्च' इत्यञित्यर्थः । नन्वेवं सति 'अन्' इति प्रकृतिभावस्याणि विहितस्यात्र सम्भवाट्टिलोपः स्यादित्यत आह । **अह्नष्टखोरेवेतीति** ॥ टिलोपाभावे सति 'अल्लोपोऽनः' इत्यकारलोपे आह्नः इति रूपमिति भावः । **पर्श्वा णसिति** ॥ अणोऽपवादः । पर्शुशब्दः उकारान्तस्त्रीलिङ्गः पार्श्वगतास्थिवाची । तस्मात् णसि ओर्गुणे प्राप्ते । **सिति च** ॥ 'सुप्तिङन्तम्पदम्' इत्यतः पदमित्यनुवर्तते । तदाह । **सिति परे पूर्वं पदसंज्ञमिति** ॥ सकारः इत् यस्य सः सित् । 'स्वादिष्वसर्वनामस्थाने' इत्येव सिद्धे भसंज्ञापवादोऽयम् । **अभत्वादिति** ॥ पदत्वेनानेन भत्वस्य बाधादिति भावः । **पर्शूनां समूहः पार्श्वमिति** ॥ पर्शु अ इति स्थिते 'इकोऽसवर्णे' इति शाकल्यह्रस्वप्रकृतिभावयोः 'सिति च' इति तत्रत्यवचनान्तरेण तन्निषेधे यणादेशे पार्श्वमिति रूपमिति भावः । **अनुदात्तादेरञ्** ॥ समूह इत्येव । **कापोतम् । मायूरमिति** ॥ 'लघावन्ते द्वयोश्च बह्वषो गुरुः' इति कपोतमयूरशब्दौ

१२५४। खण्डिकादिभ्यश्च। (४-२-४५)

अञ्स्यात्। खण्डिकानां समूहः खाण्डिकम्।

१२५५। चरणेभ्यो धर्मवत्। (४-२-४६)

काठकम्। छान्दोग्यम्।

१२५६। अचित्तहस्तिधेनोष्ठक्। (४-२-४७)

साक्तुकम्। हास्तिकम्। धैनुकम्।

१२५७। केशाश्वाभ्यां यञ्छावन्यतरस्याम्। (४-२-४८)

पक्षे ठगणौ। कैश्यम्—कैशिकम्। अश्वीयम्—आश्वम्।

१२५८। पाशादिभ्यो यः। (४-२-४९)

पाश्या। तृण्या। धूम्या। वन्या। वात्या।

१२५९। खलगोरथात्। (४-२-५०)

खल्या। गव्या। रथ्या।

मध्योदात्तावितिभावः। **खण्डिकादिभ्यश्च** ॥ शेषपूरणेन सूत्रं व्याचष्टे। **अञ् स्यादिति** ॥ समूहे इति शेषः। आद्युदात्तार्थमिदम्। **चरणेभ्यो धर्मवत्** ॥ चरणाः शाखाध्येतारः। धर्मेऽर्थे याभ्यः प्रकृतिभ्यो ये प्रत्यया वक्ष्यन्ते ते ताभ्यः प्रकृतिभ्यः समूहे स्युरित्यर्थः। **काठकमिति** ॥ कठानां समूह इति विग्रहः। 'गोत्रचरणाद्वुञ्' इति धर्मे वक्ष्यमाणो वुञ् समूहेऽपि भवति। **छान्दोग्यमिति** ॥ छन्दोगाः सामशाखिनः, तेषां समूह इति विग्रहः। 'छन्दोगौक्थिकयाज्ञिकबह्वृचनटात् ञ्यः' इति धर्मे वक्ष्यमाणो ञ्यः समूहेऽपि भवति। **अचित्तहस्ति** ॥ अचित्ताः अप्राणिनः तद्वाचिभ्यः हस्तिशब्दात् धेनुशब्दाच्च समूहे ठक् स्यादित्यर्थः। **साक्तुकमिति** ॥ सक्तूनां समूह इति विग्रहः। 'इसुसुक्तान्तात्कः' इत्युकः परत्वाट्ठस्य कः। आदिवृद्धिः। **हास्तिकमिति** ॥ हस्तिनां समूह इति विग्रहः। ठक्, इकः टिलोपः, आदिवृद्धिः। **धैनुकमिति** ॥ धेनूनां समूह इति विग्रहः। उकः परत्वात् ठस्य कः। आदिवृद्धिः। **केशाश्वाभ्याम्** ॥ समूह इत्येव। केशाद्यञ् वा, अश्वाच्छो वेत्यर्थः। **पक्षे इति** ॥ केशाद्यञभावे 'अचित' इति ठक्। अश्वात् छाभावे अणित्यर्थः। **कैश्यम्-कैशिकमिति** ॥ केशानां समूह इति विग्रहः। क्रमेण यञ्ठकौ। **अश्वीयम्-आश्वमिति** ॥ क्रमेण छाणौ। **पाशादिभ्यो यः** ॥ समूह इत्येव। **पाश्येत्यादि** ॥ पाशानां तृणानां धूमानां वनानां वातानां च समूह इति विग्रहः। स्त्रीत्वं लोकात्। **खलगोरथात्** ॥ समूह इत्येव। खल, गो, रथ—एभ्यो यः स्यादित्यर्थः। **खल्या। गव्या। रथ्येति** ॥ खलानां गवां रथानां च समूह इति विग्रहः। यद्यपि खलादिष्वेव एषां पाठो युक्तः। तथापि

१२६० । इनित्रकट्यचश्च । (४-२-५१)

खलादिभ्यः क्रमात्स्युः । खलिनी । गोत्रा । रथकट्या । 'खलादिभ्य इनिर्वक्तव्यः' (वा २७३५) । डाकिनी । कुटुम्बिनी । आकृतिगणोऽयम् ।

१२६१ । विषयो देशे । (४-२-५२)

षष्ठ्यन्तादणादयः स्युरत्यन्तपरिशीलितेऽर्थे स चेद्देशः । शिबीनां विषयो देशः शैबः । 'देशे' किम् । देवदत्तस्य विषयोऽनुवाकः ।

१२६२ । राजन्यादिभ्यो वुञ् । (४-२-५३)

राजन्यकः ।

उत्तरसूत्रे एषामेवानुवृत्त्यर्थं पृथक् पाठः । **इनित्रकट्यचश्च** ॥ **स्युरिति** ॥ इनि त्र कट्यच् एते स्युरित्यर्थः । **खलिनीति** ॥ खलानां समूह इति विग्रहः । इनिप्रत्यये नकारादिकार उच्चारणार्थः । स्त्रीत्वं लोकात् । नान्तत्वान्ङीप् । **गोत्रेति** ॥ गवां समूह इति विग्रहः । गोशब्दात् त्रः । स्त्रीत्वं लोकात्, टाप् । **रथकट्येति** ॥ रथानां समूह इति विग्रहः । कट्यचि ककारस्य नेत्त्वम्, अतश्चिति इत्युक्तेः । स्त्रीत्वाट्टाप् । **खलादिभ्य इनिर्वक्तव्यः इति** ॥ 'इनित्रकट्यचश्च' इति सूत्रे इनिग्रहणमकृत्वा 'गोरथात्त्रकट्यचौ' इत्येवं सूत्रं कृत्वा 'खलादिभ्य इनिः' इति पृथक्कर्तव्यमित्यर्थः । **विषयो देशे** ॥ समूह इति निवृत्तम् । तस्येत्यनुवर्तते । तस्य विषय इत्यर्थे प्रथमोच्चारितात् षष्ठ्यन्तात्प्रत्ययाः स्युरिति लभ्यते । तदाह । **षष्ठ्यन्तादिति** ॥ विषयशब्दं व्याचष्टे । **अत्यन्तपरिशीलितेऽर्थे इति** ॥ देवदत्तविषयोऽनुवाक इत्यत्र तथा दर्शनादिति भावः । तर्हि तत्रातिव्याप्तिः स्यादित्यत आह । **स चेदिति** ॥ सः अत्यन्तपरिशीलितोऽर्थो देशश्चेदित्यर्थः । एवञ्च अत्यन्तपरिशीलिते देशे गम्ये प्रत्ययाः स्युरिति फलितम् । विषयशब्दो ह्ययं क्वचित् ग्रामसमूहात्मके जनपदे वर्तते । तद्यथा, सामन्तस्य राज्ञो विषयोऽनेन लब्ध इति क्वचिदिन्द्रियग्राह्ये वर्तते । तद्यथा, चक्षुर्विषयो रूपमेति क्वचिदन्यत्रावृत्तौ वर्तते । यथा मत्स्यानां विषयो जलमिति । अन्यत्र नास्तीति गम्यते । प्रकृते तु देवदत्तविषयोऽनुवाक इतिवदत्यन्तपरिशीलिते वर्तते । तत्र विषयशब्देन अत्यन्तपरिशीलितेऽर्थे अवगते सति अनुवाकादिव्यावृत्त्यर्थमन्देशग्रहणम् । **शिबीनां विषयो देश इति** ॥ अत्यन्तपरिचितो देश इत्यर्थः । **देवदत्तस्य विषय इति** ॥ अत्यन्तपरिचितोऽनुवाक इत्यर्थः । अत्र देशस्यानवगमात् न प्रत्यय इति भावः । विषय इति किम् । देवदत्तस्य कदाचिद्गन्तव्यो मार्गः । न च देवदत्तस्य ग्राममित्यत्र अत्यन्तपरिचितदेशत्वात् प्रत्ययः स्यादिति वाच्यम् । जनपदसमूहात्मकात्यन्तपरिशीलितदेशस्यैवात्र विवक्षितत्वात् । **राजन्यादिभ्यो वुञ् ॥** तस्य विषयो देश इत्यर्थे राजन्यादिभ्यः षष्ठ्यन्तेभ्यो वुञ् स्यादित्यर्थः । अणोऽपवादः ।

१२६३। भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ। (४-२-५४)

भौरिकीणां विषयो देशः भौरिकिविधम्। भौलिकिविधम्। ऐषुकारिभक्तम्। सारसायनभक्तम्।

१२६४। सोऽस्यादिरिति च्छन्दसः प्रगाथेषु। (४-२-५५)

अण्। पङ्क्तिरादिरस्येति पाङ्क्तः प्रगाथः। 'स्वार्थे उपसङ्ख्यानम्' (वा २७४४)। त्रिष्टुबेव त्रैष्टुभम्।

१२६५। संग्रामे प्रयोजनयोद्भ्यः। (४-२-५६)

'सोऽस्य' इत्यनुवर्तते। सुभद्रा प्रयोजनमस्य सङ्ग्रामस्येति सौभद्रः। भरता योद्धारोऽस्य संग्रामस्य भारतः।

१२६६। तदस्यां प्रहरणमिति क्रीडायां णः। (४-२-५७)

दण्डः प्रहरणमस्यां क्रीडायां दाण्डा। मौष्टा।

१२६७। घञः सास्यां क्रियेति ञः। (४-२-५८)

राजन्यक इत्यत्र राजन्यानां विषयो देश इत्यर्थः। **भौरिक्याद्यैषु**॥ भौरिक्यादिभ्यः ऐषुकार्यादिभ्यश्च षष्ठ्यन्तेभ्यः यथाक्रमं विधल्, भक्तल्, एतौ प्रत्ययौ स्तो विषयो देश इत्यर्थे। **भौरिकिविधमिति**॥ भौरिकीणां विषयो देश इत्यर्थः। **भौलिकिविधमिति**॥ भौलुकीनां विषयो देश इत्यर्थः। **ऐषुकारिभक्तमिति**॥ ऐषुकारीणां विषयो देश इत्यर्थः। **सारसायनभक्तमिति**॥ सारसायनानां विषयो देश इत्यर्थः। इह नपुंसकत्वं लोकात्। **सोऽस्यादिरिति**॥ ऋग्द्वयमाम्नातम्पादावृत्त्या ऋक्त्रयं सम्पद्यते। 'स च संप्रगाथे' इति छन्दोगसूत्रे बह्वृचसूत्रे च प्रसिद्धम्। षष्ठ्येकवचनस्थाने सप्तमीबहुवचनमार्षम्। सोऽस्यप्रगाथस्य आदिरित्यर्थे प्रथमान्तात् छन्दोविशेषवाचकात् अणादिप्रत्ययाः स्युरित्यर्थः। अक्षरेयत्ताविशेषो गायत्र्यादिछब्दः। **पङ्क्तिरादिति**॥ पङ्क्तिच्छन्दस्का ऋक् आदिर्यस्य प्रगाथस्य सः पाङ्क्तः प्रगाथः इत्युच्यते इत्यर्थः। **स्वार्थ इति**॥ छन्दोवाचिभ्यः स्वार्थे अणादिप्रत्ययस्योपसङ्ख्यानमित्यर्थः। **त्रैष्टुभमिति**॥ क्लीवत्वं लोकात्। **सङ्ग्रामे**॥ **अनुवर्तते इति**॥ तथाच सङ्ग्राम इति सप्तम्यन्तं षष्ठ्या विपरिणतम् अस्येत्यनेनान्वेति। तदस्य सङ्ग्रामस्य प्रेयाजनं, तेऽस्य सङ्ग्रामस्य योद्धार इत्यर्थे प्रयोजनयोद्भृवाचिभ्यः प्रथमान्तेभ्यः अणादयः स्युरित्यर्थः। **तदस्याम्**॥ तत् अस्यां क्रीडायाम्प्रहरणमित्यर्थे प्रथमान्तात् प्रहरणवाचकात् णप्रत्ययः स्यादित्यर्थः। प्रहियते अनेनेति प्रहरणम् आयुधम्। **दाण्डेति**॥ अणि तु दीर्घः स्यादिति भावः। **मौष्टेति**॥ मुष्टिः प्रहरणमस्यां क्रीडायामिति विग्रहः। **घञः सास्याम्**॥ अस्यामित्यनन्तरं मृगयायामित्यादिस्त्रीलिङ्गविशेष्यमध्याहार्यम्। सा क्रिया अस्यां

घञन्तात्क्रियावाचिनः प्रथमान्तादस्यामिति सप्तम्यर्थे स्त्रीलिङ्गे अप्रत्ययः स्यात्। 'घञः' इति कृद्ग्रहणाद्वृतिकारकपूर्वस्यापि ग्रहणम्।

१२६८। श्येनतिलस्य पाते ञे। (६-३-७१)

श्येन तिल एतयोर्मुमागमः स्यात्। ञप्रत्यये परे पातशब्दे उत्तरपदे। श्येनपातोऽस्यां वर्तते श्यैनम्पाता मृगया। तिलपातोऽस्यां वर्तते तैलम्पाता स्वधा। 'श्येनतिलस्य' किम्। दण्डपातोऽस्यां तिथौ वर्तते दाण्डपाता तिथिः।

१२६९। तदधीते तद्वेद। (४-२-५९)

व्याकरणमधीते वेद वा वैयाकरणः।

१२७०। क्रतूक्थादिसूत्रान्ताट्ठक्। (४-२-६०)

क्रतुविशेषवाचिनामेवेह ग्रहणम्। तेभ्यो मुख्यार्थेभ्यो वेदितरि, तत्प्रतिपादकग्रन्थपरेभ्यस्त्वध्येतरि। आग्निष्टोमिकः। वाजपेयिकः। उक्थं साम-

---

मृगयादिक्रियायामित्यर्थे घञन्तप्रकृतिकप्रथमान्तात्क्रियावाचिनः ञः स्यादित्यर्थः। फलितमाह। **घञन्तादित्यादिना**॥ **कृद्ग्रहणादिति**॥ तत्प्रयोजनमनुपदमेव वक्ष्यते। **श्येनतिलस्य पाते ञे॥ मुमागमः इति**॥ 'अर्तिह्रीधृ' इत्यतः तदनुवृत्तेरिति भावः। **ञप्रत्यये इति**॥ ञप्रत्यये परे यः पातशब्दः तस्मिन्नित्यर्थः। **उत्तरपदे इति**॥ 'अलुगुत्तरपदे' इति तदधिकारादिति भावः। **श्येनपात इति**॥ पतनम्पातः। भावे घञ्। **श्यैनम्पातेति**॥ श्येनपातशब्दात् घञन्तात् ञः। यद्यपि पातशब्द एव घञन्तः। तथापि कृद्ग्रहणपरिभाषया श्येनपातशब्दस्यापि ग्रहणम्बोध्यम्। श्येनस्य पात इति कृत्योगषष्ठ्या समासः। तथाच श्येनपातशब्दस्यादिवृद्धिः। **तैलम्पाता स्वधेति**॥ स्वधाशब्दः स्त्रीलिङ्गः पित्र्यक्रियायां वर्तते। 'नमः स्वधायै' इत्यादिदर्शनात्। स्वधेत्यनेन क्रियायामिति नानुवर्तते इति सूचितम्। तदस्यामिति प्रकृते पुनरस्यामिति ग्रहणात्। **तदधीते**॥ तदधीते इत्यर्थे तद्वेत्तीत्यर्थे च द्वितीयान्तादणादयः स्युरित्यर्थः। गुरुमुखादक्षरानुपूर्वीग्रहणमध्ययनम्। शब्दार्थज्ञानं वेदनम्। एतेन अध्ययनविधिरर्थज्ञानपर्यन्त इति कतिपयमीमांसोक्तिः परास्ता। पृथग्ग्रहणवैयर्थ्यात्। यथाचैतत्तथा अध्वरमीमांसाकुतूहलवृत्तौ प्रपञ्चितमस्माभिः। **वैयाकरण इति**॥ अणि 'न य्वाभ्याम्' इत्यैजागमः। **क्रतूक्थादि**॥ 'तदधीते तद्वेद' इत्यर्थयोः क्रतु, उक्थादि, सूत्रान्ताः एभ्यः ठक् स्यादित्यर्थः। **क्रतुविशेषवाचिनामेवेति**॥ न तु क्रतुशब्दस्यैवेत्यर्थः। अन्यथा उक्थादिगण एव क्रतुशब्दमपि पठेदिति यावत्। ननु क्रतुविशेषाणां कथमध्ययनम्। अक्षरग्रहणात्मकत्वभावादित्यत आह। **तेभ्य इति**॥ अग्निष्टोमादिशब्दाः क्रतुविशेषेषु मुख्याः। तत्प्रतिपादकग्रन्थेषु तु गौणाः। तत्र क्रतुविशेषात्मकमुख्यार्थकेभ्यः अग्निष्टोमादिशब्देभ्यः वेदितरि प्रत्ययाः। अग्निष्टोमादिक्रतुप्रतिपादकग्रन्थेषु लक्षणया विद्यमानेभ्यस्तु तेभ्यः अध्येतरीत्यर्थः।

विशेषः। तल्लक्षणपरो ग्रन्थविशेषो लक्षणयोक्थम्। तदधीते वेद वा औक्थिकः। 'मुख्यार्थात्तूक्थशब्दाट्ठगणौ नेष्येते'। न्यायम्—नैयायिकः। वृत्तिम्—वार्तिकः। लोकायतम्—लोकायतिकः इत्यादि। 'सूत्रान्तात्त्वकल्पादेरेवेष्यते' (२७४४)। सांग्रहसूत्रिकः। 'अकल्पादेः' किम्। काल्पसूत्रः। 'विद्यालक्षणकल्पान्ताच्चेति वक्तव्यम्' (वा २७४४)। वायसविद्यिकः। गौलक्षणिकः। आश्वलक्षणिकः। पाराशरकल्पिकः। 'अङ्गक्षत्रधर्मत्रिपूर्वाद्विद्यान्तान्नेति वक्तव्यम्' (वा २७४५)। आङ्गविद्यः। क्षात्रविद्यः। धार्मविद्यः। त्रिविधा विद्या त्रिविद्या। तामधीते वेद मा त्रैविद्यः। 'आख्यानाख्यायिकेतिहासपुराणेभ्यश्च' (वा २७४६)। यवक्रीतमधिकृत्य कृतमाख्यानमुपचारायवक्रीतम्, तदधीते वेत्ति वा यावक्रीतिकः। वासवदत्तामधिकृत्य कृता

आग्निष्टोमिक इति ॥ अग्निष्टोमं क्रतुं वेत्ति तत्प्रतिपादकग्रन्थमधीते इति वार्थः। उक्थशब्दः सामसु मुख्यः। सामलक्षणग्रन्थे प्रातिशाख्ये तु गौणः। तत्र गौणार्थकादेव उक्थशब्दाड्ठगित्याह। **उक्थं सामविशेष इति** ॥ अग्निष्टोमस्तोत्रात्परं यत्साम गीयते इति वृत्तिकृदुक्तेरिति भावः। भाष्ये तु सामशब्दपर्याय उक्थशब्द इति लभ्यते। **मुख्यार्थादिति** ॥ सामवाचिनः उक्थशब्दात्तु न ठक्, तस्मिन्निषिद्धे तदधीते इत्यण् च न भवतीत्यर्थः। भाष्ये तु मुख्यार्थकादुक्थशब्दात् ठक् नेत्येव लक्ष्यते। उक्थादिगणपाठितात् न्यायादिशब्दात् ठकमुदाहरति। **न्यायमिति** ॥ अधीते वेत्ति वेति शेषः। **नैयायिक इति** ॥ ठकि ऐजागमः। **वृत्तिमिति** ॥ अधीते वेद वेति शेषः। **वार्तिक इति** ॥ ठकि आदिवृद्धौ रपरत्वम्। **साङ्ग्रहसूत्रिक इति** ॥ सङ्ग्रहाख्यं सूत्रमधीते वेत्ति वेत्यर्थः। **विद्यालक्षणेति** ॥ विद्या, लक्षण, कल्प एतदन्तादपि उक्तेऽर्थे ठगित्यर्थः। अङ्ग, क्षत्र, धर्म, त्रि, एतत्पूर्वकाद्विद्यान्तात् समासान्तात् ठक् नेत्यर्थः। ततश्च अणेव। **त्रिविधा विद्या त्रिविद्या इति** ॥ शाकपार्थिवादित्वाद्विधाशब्दस्य लोप इति भावः। तिस्रो विद्यास्त्रिविद्या इति न विग्रहः। 'दिक्सङ्ख्ये संज्ञायाम्' इति नियमात्। नापि तिस्रो विद्या अधीते वेद वेति तद्धितार्थे द्विगुः। तथा सति तद्धितस्य द्विगुनिमित्ततया 'द्विगोर्लुगनपत्ये' इति लुगापत्तेः। तिसृणां विद्यानां समाहार इति द्विगुरप्यत्र निर्बाध एव। **आख्यानेति** ॥ आख्यान, आख्यायिका, इतिहास, पुराण एभ्यश्च उक्थे ठग्वक्तव्य इत्यर्थः। तत्र आख्यानशब्देन आख्यायिकाशब्देन च आख्यानविशेषवाचिनः आख्यायिकाविशेषवाचिनश्च ग्रहणम्। इतिहासपुराणशब्दयोस्तु स्वरूपयोरेव ग्रहणम्। आख्यानं नाम कथाप्रबन्धः। "आख्यायिकोपलब्धार्था पुराणं पञ्चलक्षणम्" इत्यमरः। "इतिहासः पुरावृत्तम्" इति च। "सर्गश्च प्रतिसर्गश्च वंशमन्वन्तराणि च। वंशानुचरितञ्चेति पुराणं पञ्च लक्षणम्॥" तत्र आख्यानादुदाहरति। **यावक्रीतमिति** ॥ आख्यायिकाया उदाहरति। **वासवदत्तामिति** ॥ **लुग्वक्तव्य**

आख्यायिका वासवदत्ता । 'अधिकृत्य कृते ग्रन्थे' (सू १४६७) इत्यर्थे 'वृद्धाच्छः' (सू १३३७) तस्य 'लुबाख्यायिकाभ्यो बहुलम्' इति लुप् । ततोऽनेन ठक् । वासवदत्तिकः । ऐतिहासिकः । पौराणिकः । 'सर्वादेः सादेश्च लुग्वक्तव्यः' (वा २७४८) । सर्ववेदानधाते सर्ववेदः । सर्वतन्त्रः । सवार्तिकः । 'द्विगोर्लुक्—' (सू १०८०) इति लुक् । द्वितन्त्रः । 'इकन्पदोत्तरपदाच्छतषष्टेः टिकन्पथः' (वा २७४९–२७५०) । पूर्वपदिकः । उत्तरपदिकः । शतपथिकः--शतपथिकी । षष्टिपथिकः--षष्टिपथिकी ।

१२७१ । क्रमादिभ्यो वुन् । (४-२-६१)

क्रमकः । क्रम पद शिक्षा मीमांसा क्रमादिः ।

१२७२ । अनुब्राह्मणादिनिः । (४-२-६२)

'तदधीते तद्वेद' (सू १२६९) इत्यर्थे । ब्राह्मणसदृशो ग्रन्थोऽनुब्राह्मणी । मत्वर्थीयेनैव सिद्धेऽण्बाधनार्थमिदम् ।

१२७३ । वसन्तादिभ्यष्ठक् । (४-२-६३)

इति ॥ उक्तप्रत्ययस्येति शेषः । **सर्ववेद इति** ॥ अणो लुकि आदिवृद्ध्यभावः । **सर्वतन्त्र इति** ॥ सर्वतन्त्राण्यधीते वेद वेत्यर्थः । **सवार्तिक इति** ॥ वार्तिकेन सह सवार्तिकम् । 'तेन सह' इति बहुव्रीहिः । 'वोपसर्जनस्य' इति सभावः । सवार्तिकं सूत्रमधीते इत्यर्थः । **द्विगुरिति** ॥ द्वे तन्त्रे अधीते वेत्ति वेत्यर्थे तद्धितार्थे द्विगुनिमित्तत्वादणो लुकि आदिवृद्ध्यभावे द्वितन्त्र इति रूपमित्यर्थः । **इकन्पदोत्तरपदादिति** ॥ पदशब्दः उत्तरपदं यस्य सः पदोत्तरपदः । तस्मादुक्तेऽर्थे इकन्प्रत्ययो वक्तव्यः । **शतषष्टेष्टिकन्पथ इति** ॥ शतशब्दात् षष्टिशब्दाच्च परो यः पथिन्शब्दः तस्मात् उक्तेऽर्थे टिकन्प्रत्ययो वक्तव्य इत्यर्थः । **पूर्वपदिक इति** ॥ पूर्वपदमधीते वेत्ति वेत्यर्थः । एवमुत्तरपदिकः । **शतपथिक इति** ॥ शतपथं नाम वाजसनेयिब्राह्मणम् । तदधीते वेत्ति वेत्यर्थः । **शतपथिकीति** ॥ टित्त्वात् ङीबिति भावः । एवं षष्टिपथिकः । षष्टिपथिकीति । **क्रमादिभ्यो वुन्** ॥ 'तदधीते तद्वेद' इत्यर्थे इति शेषः । **क्रमक इति** ॥ क्रममधीते वेत्ति वेत्यर्थः । क्रमादिगणमुपठति । **क्रमेत्यादि । क्रमादिरिति** ॥ अयं क्रमादिगण इत्यर्थः । पदकः शिक्षकः मीमांसकः इत्युदाहरणानि । **अनुब्राह्मणादिनिः** ॥ शेषपूरणेन सूत्रं व्याचष्टे । **तदधीते तद्वेदेत्यर्थे इति** ॥ इनिप्रत्यये नकारादिकार उच्चारणार्थः । तथाच नकारस्योपदेशेत्त्वाभावान्नेत्संज्ञा । ननु 'अत इनिठनौ' इति मत्वर्थे इनिनैव सिद्धत्वादिदं व्यर्थमित्यत आह । **अण्बाधनार्थमिति** ॥ भाष्ये तु प्रत्याख्यातमेवेदम् । **वसन्तादिभ्यष्ठक्** ॥

वासन्तिकः। अथर्वाणमधीते आथर्वणिकः। 'दाण्डिनायन—' (सू ११४५) इति सूत्रे निपातनाट्टिलोपो न।

१२७४। प्रोक्ताल्लुक्। (४-२-६४)

प्रोक्तार्थकप्रत्ययात्परस्याध्येतृवेदितृप्रत्ययस्य लुक्स्यात्। पणनं पणः। 'घञर्थे कविधानम्' इति कः। सोऽस्यास्तीति पणी। तस्य गोत्रापत्यं पाणिनः।

१२७५। गाथिविदथिकेशिगणिपणिनश्च। (६-४-१६५)

एतेऽणि प्रकृत्या स्युः। इति टिलोपो न। ततो यून्यपत्ये इञ्। पाणिनिः।

१२७६। ण्यक्षत्रियार्षञितो यूनि लुगणिञोः। (२-४-५८)

ण्यप्रत्ययान्तात्क्षत्रियगोत्रप्रत्ययान्ताद्दृष्यभिधायिनो गोत्रप्रत्ययान्तात् ञितश्च परयोर्युवाभिधायिनोरणिञोर्लुक्स्यात्। कौरव्यः पिता। कौरव्यः

'तदधीते तद्वेद' इत्येव। **वासन्तिक इति** ॥ वसन्तवर्णनपरग्रन्थो वसन्तः। तमधीते वेत्ति वेत्यर्थः। **अथर्वाणमिति** ॥ अथर्वणा प्रोक्तो वेदः लक्षणया अथर्वा, तमित्यर्थः। वस्तुतस्तु 'प्रोक्तप्रत्ययस्य ऋषिभ्यो लुग्वक्तव्यः' इति वचनाल्लुक्। आथर्वणिकः इत्यत्र 'नस्तद्धिते' इति टिलोपमाशङ्क्य आह। **दाण्डिनायनेति** ॥ वान्तसंयोगपूर्वकत्वात्तु नाल्लोपः। अथ पाणिनिशब्दं व्युत्पादयितुमुपक्रमते। **प्रोक्ताल्लुक्** ॥ प्रोक्तशब्देन प्रोक्तार्थकप्रत्ययो विवक्षितः। अध्येतृवेदितृप्रत्ययस्येति प्रकृतत्वाल्लभ्यते। तदाह। **प्रोक्तार्थकेति** ॥ **पणनं पण इति** ॥ स्तुतिरित्यर्थः। ननु 'हलश्च' इति घञि उपधावृद्धिः स्यादित्यत आह। **घञर्थे इति** ॥ **पणीति** ॥ 'अत इनिठनौ' इति मत्वर्थे इनिः। **तस्येति** ॥ पणिनो गोत्रापत्ये तस्यापत्यमित्यणि पाणिन इति रूपमित्यर्थः। अत्र अणः अपत्यत्वात्तस्मिन् परे 'इनण्यनपत्ये' इति प्रकृतिभावाभावाट्टिलोपे प्राप्ते। **गाथिविदथि** ॥ 'इनण्यनपत्ये' इत्यतः अणीत्यनुवर्तते। 'प्रकृत्यैकाच्' इत्यतः प्रकृत्येति च। तदाह। **एतेऽणि प्रकृत्या स्युरिति** ॥ गाथिन्, विदथिन्, केशिन्, गणिन्, पणिन्, एते इत्यर्थः। अपत्येऽप्यणि प्रकृतिभावार्थमिदम्। **ततो यून्यपत्ये इति** ॥ मूलप्रकृतिः पणी। तदपेक्षया चतुर्थेऽपत्ये यूनि विवक्षिते पाणिनशब्दात् गोत्राणन्तात् अत इञि पाणिनिरिति रूपमित्यर्थः। पाणिनशब्दस्य अनन्तरापत्यप्रत्ययान्तत्वे तु ततोऽनन्तरापत्ये मूलप्रकृतिपण्यपेक्षया तृतीयो गोत्रापत्ये इञ् न सम्भवति। 'एको गोत्रे' इति नियमात्। नापि मूलप्रकृत्यपेक्षया चतुर्थापत्ये यूनि पाणिनशब्दादनन्तरापत्यप्रत्ययान्तादिञ् सम्भवति। 'गोत्राद्यून्यस्त्रियाम्' इति यून्यपत्ये गोत्रप्रत्ययान्तादेवापत्यप्रत्ययनियमात्। अतः गोत्राण्प्रत्ययान्तात् पाणिनिशब्दाद्यूनि इञ्प्रत्यय इत्युक्तमिति बोद्धव्यम्। अत्र इञो लुकमाशङ्क्तुमाह। **ण्यक्षत्रियार्ष** ॥ ण्यादयः सर्वे गोत्रप्रत्यया एव गृह्यन्ते। 'गोत्राद्यूनि' इत्युक्तेः। तदाह। **गोत्रप्रत्ययान्तादित्यादि** ॥ ण्यप्रत्ययस्योदाहरति। **कौरव्य इति** ॥

पुत्रः। श्वाफल्कः पिता। श्वाफल्कः पुत्रः। वासिष्ठः पिता। वासिष्ठः पुत्रः। तैकायनिः पिता। तैकायनिः पुत्रः। 'एभ्यः' किम्। शिवाद्यण्। कौहडः पिता। ततः इञ्। कौहडिः पुत्रः। 'यूनि' किम्। वामरथ्यस्य च्छात्राः वामरथाः। इत्यणो लुक्तु न भवति। आर्षग्रहणेन प्रतिपदोक्तस्य ऋष्यण एव ग्रहणात्। पाणिनिना प्रोक्तं पाणिनीयम्। 'वृद्धाच्छः' (सू १३३७)। 'इञश्च' (सू १३३३) इत्यण् तु न। गोत्रे य इञ् तदन्तादिति वक्ष्यमाणत्वात्। ततोऽध्येतृवेदित्रणो लुक्। स्वरे स्त्रियां च विशेषः। पाणिनीयः। पाणिनीयाः।

कुरोः गोत्रापत्यङ्कौरव्यः। कुर्वादिभ्यो ण्यः। कौरव्यस्यापत्यं युवेत्यर्थे अत इञ्। तस्यानेन लुक्। क्षत्रियप्रत्ययस्योदाहरति। **श्वाफल्क इति** ॥ श्वफल्कस्य गोत्रापत्यं श्वाफल्कः। 'ऋष्यन्धक' इत्यण्। श्वाफल्कस्यापत्यं युवेत्यर्थे अत इञ्। तस्यानेन लुक्। आर्षप्रत्ययस्योदाहरति। **वासिष्ठ इति** ॥ वसिष्ठस्य गोत्रापत्यं वासिष्ठः। ऋष्यण्, वासिष्ठस्यापत्यं युवेत्यर्थे इञ्। तस्यानेन लुक्। त्रित उदाहरति। **तैकायनिरिति** ॥ तिकस्य गोत्रं तैकायनिः तिकादिभ्यः फिञ्। तैकायनेरपत्यं युवेत्यर्थे तस्यापत्यमित्यण्। तस्यानेन लुक्। **वामरथ्यस्येति** ॥ वामरथस्य गोत्रापत्यं वामरथ्यः। कुर्वादिभ्यो ण्यः। वामरथ्यस्य छात्रा इत्यर्थे 'कण्वादिभ्यो गोत्रे' इति छापवादः अण्, तस्यानेन लुङ् न भवति। तस्य युवार्थकत्वाभावादिति भावः। **इत्यणो लुक्तु न भवतीति** ॥ 'ण्यक्षत्रिय' इति सूत्रेण पाणिनिरित्यत्र इञो लुङ् न भवतीत्यर्थः। कुत इत्यत आह। **आर्षग्रहणेनेति** ॥ पाणिनिशब्दे पणिन्शब्दादण्प्रत्ययस्य औत्सर्गिकस्य वस्तुगत्या ऋषिवाचित्वेऽपि ऋषौ प्रतिपदोक्तत्वाभावान्न ततः परस्य इञो लुगिति भावः। न च पणिन्शब्दाद्गोत्रापत्ये 'ऋष्यन्धक' इत्यणेव कुतो न स्यादिति वाच्यम्। यत्र औत्सर्गिकस्य अणः इञादिना बाधः प्रसक्तः, तत्रैव तद्बाधनार्थम् ऋष्यणः प्रवृत्तेः। "वस्तुतस्तु 'वान्यास्मन्सपिण्डे' इति सूत्रभाष्ये अत्रिशब्दात् 'इतश्चानित्रः' इति ढकि आत्रेयशब्दादिञो 'ण्यक्षत्रियार्ष' इति लुगित्युक्तत्वादिदमुपेक्ष्यम्। 'ण्यक्षत्रिय' इत्यत्र तु ऋषिवाचकस्य रूढस्यैव ग्रहणम्। पाणिनशब्दः तदपत्ये पाणिनिशब्दश्च न ऋषिवाचकौ। अतः औत्सर्गिकाणन्त एव पाणिनशब्दः" इति शब्देन्दुशेखरे प्रपञ्चितम्। **पाणिनिनेति** ॥ पाणिनिना प्रोक्तमित्यर्थे 'तेन प्रोक्तम्' इत्यणम्बाधित्वा 'वृद्धाच्छः' इति छप्रत्यये ईयादेशे पाणिनीयशब्द इत्यर्थः। ननु पाणिनिशब्दात्तद्धिते विवक्षिते 'यूनि लुक्' इति इञो लुकि सत्यपि प्रत्ययलक्षणेन इञन्तत्वमाश्रित्य छापवादः अण् स्यादित्यत आह। **इञश्चेत्यण् तु नेति** ॥ पाणिनिशब्दे इञ् युवापत्यार्थक एव, न तु गोत्रार्थकः। युवसंज्ञया गोत्रसंज्ञाया बाधादिति भावः। यद्यपि अपत्याधिकारादन्यत्र न पारिभाषिकङ्गोत्रमित्युक्तम्। तथाप्यत्र पारिभाषिकमेव गोत्रङ्गृह्यते इति उपरिष्टात् 'इञश्च' इति सूत्रे वक्ष्यते। **तत इति** ॥ पाणिनीयशब्दादित्यर्थः। पाणिनीयमधीते वेत्ति वेत्यर्थे पाणिनीयशब्दादाणि 'प्रोक्ताल्लुक्' इति तस्य लुगिति भावः। ननु असत्यपि अध्येतृवेदितृप्रत्ययस्याणो लुकि पाणिनीयशब्दः सिद्ध्यत्येवेत्यत आह। **स्वरे स्त्रियाञ्च विशेष इति** ॥ अध्येतृवेदितृप्रत्ययस्याणो लुगभावे

१२७७। सूत्राच्च कोपधात्। (४-२-६५)

सूत्रवाचिनः ककारोपधादध्येतृवेदितृप्रत्ययस्य लुक्स्यात्। अप्रोक्तार्थ आरम्भः। अष्टावध्यायाः परिमाणमस्य अष्टकं पाणिनेः सूत्रम्। तदधीयते विदन्ति वा अष्टकाः। 'सङ्ख्याप्रकृतिकादिति वाच्यम्' नेह। कलापकमधीते कालापकः।

१२७८। छन्दोब्राह्मणानि च तद्विषयाणि। (४-२-६६)

छन्दांसि ब्राह्मणानि च प्रोक्तप्रत्ययान्तानि तद्विषयाणि स्युः। अध्येतृवेदितृप्रत्ययं विना न प्रयोज्यानीत्यर्थः। कठेन प्रोक्तमधीयते कठाः। वैशम्पायनान्तेवासित्वाण्णिनिः। तस्य 'कठचरकात्—' (सू १४८७) इति लुक्। ततोऽण्। तस्य 'प्रोक्ताल्लुक्' (सू १२७४)।

प्रत्ययस्वरेणान्तोदात्तत्वं स्त्रियाञ्च ङीप् स्यात्। लुकि तु सति छादेशस्य ईयादेशस्य ईकारः प्रत्ययस्वरेणोदात्तष्टाप् च सिध्यति। तदाह। **पाणिनीयः। पाणिनीया इति॥ सूत्राच्च कोपधात्॥** ककारोपधादित्यनन्तरम्परस्येति शेषः। ननु 'प्रोक्ताल्लुक्' इत्येव सिद्धे किमर्थमिदमित्यत आह। **अप्रोक्तार्थ आरम्भ इति॥** अप्रोक्तार्थादपि प्रत्ययात्परस्य लुगर्थमित्यर्थः। **अष्टकमिति॥** तदस्य परिमाणमित्यधिकारे 'सङ्ख्यायाः संज्ञासङ्घसूत्राध्ययनेषु' इति 'सङ्ख्याया अतिशदन्तायाः कन्' इति च सूत्ररूपेऽर्थे कन्। **अष्टका इति॥** अष्टकशब्दादध्येतृवेदितृप्रत्ययस्य अनेन लुक्। कोपधादित्यपेक्षया सूत्रवाचिनः इत्यस्य परत्वादिति भावः। **सङ्ख्याप्रकृतिकादिति॥** 'सूत्राच्च कोपधात्' इति लुक् सङ्ख्याप्रकृतिकप्रत्ययान्तादेव परस्य भवतीत्यर्थः। महावार्तिकन्नाम सूत्रम्। तदधीते वेत्ति वा महावार्तिकः। अत्र अणो लुक्। **छन्दोब्राह्मणानि॥** छन्दांसि मन्त्राः, ब्राह्मणानि विधिवाक्यानि। तेषान्द्वन्द्वः। वेद इति यावत्। मन्त्रब्राह्मणयोर्वेदनामधेयमिति स्मरणात्। 'प्रोक्ताल्लुक्' इत्यतः प्रोक्तादित्यनुवर्तते। प्रथमाबहुवचनेन विपरिणम्यते। प्रोक्तप्रत्ययान्तानीति लभ्यते। तदाह। **छन्दांसीत्यादिना॥** तद्विषयाणीत्यत्र तच्छब्देन अध्येतृवेदितृप्रत्यया विवक्षिताः। तैर्विषयः अविनाभावः येषान्तानि तद्विषयाणि 'षिञ् बन्धने'। विशिष्य बन्धः विषयः, अविनाभाव इति यावत्। अध्येतृवेदितृप्रत्ययसंयुक्तान्येव स्युरित्यर्थः। फलितमाह। **अध्येतृवेदितृप्रत्ययं विना न प्रयोज्यानीत्यर्थ इति॥** पाणिनीयं व्याकरणम्। पाणिनीयास्तदध्येतारो वेदितारो वेतिवत् अध्येतृप्रत्ययं विनाऽपि प्रयोगे प्राप्ते नियमार्थमिदम्। **कठेनेति॥** कठेन प्रोक्तमधीयते इत्यर्थे कठा इत्युदाहरणमिति भावः। तदुपपादयति। **वैशम्पायनेति॥** कठेन प्रोक्तमित्यर्थे तेन प्रोक्तमित्यपवादो 'वैशम्पायनान्तेवासिभ्यश्च' इति णिनिरित्यर्थः। **तस्येति॥** णिनेः 'कठचरकाल्लुक्' इत्यनेन लुगित्यर्थः। एवञ्च कठेन प्रोक्तो वेदभागः कठ इति स्थितम्। **ततोऽणिति॥** तस्मात् लुप्तप्रोक्तप्रत्ययकात् कठशब्दात् तदधीते इति अणित्यर्थः। **तस्य प्रोक्ताल्लुगिति॥** तस्याध्येत्रणः 'प्रोक्ताल्लुक्' इति लुगित्यर्थः। तथाच कठेन प्रोक्तमधीयते कठा इत्येवं कठशब्दस्य लुप्तप्रोक्तप्रत्ययान्तस्य अध्येत्रणा सहैव प्रयोगार्हता। ननु तेन विना केवलप्रोक्तप्रत्ययान्तस्येति भावः। अथ चातुरर्थिकान्

१२७९ । तदस्मिन्नस्तीति देशे तन्नाम्नि । (४-२-६७)

उदुम्बराः सन्त्यस्मिन्देशे औदुम्बरः ।

१२८० । तेन निर्वृत्तम् । (४-२-६८)

कुशाम्बेन निर्वृत्ता कौशाम्बी नगरी ।

१२८१ । तस्य निवासः । (४-२-६९)

शिबीनां निवासो देशः शैबः ।

१२८२ । अदूरभवश्च । (४-२-७०)

विदिशाया अदूरभवं नगरं वैदिशम् । चकारेण प्रागुक्तान्वयोऽर्थाः सन्निधाप्यन्ते, तेन वक्ष्यमाणप्रत्ययानां चातुरर्थिकत्वं सिद्ध्यति ।

१२८३ । ओरञ् । (४-२-७१)

अणोऽपवादः । कक्षतु—काक्षतवम् । नद्यास्तु परत्वान्मतुप् । इक्षुमती ।

१२८४ । मतोश्च बह्वजङ्गात् । (४-२-७२)

बह्वच् अङ्गं यस्य मतुपस्तदन्तादञ् । नाण् । सैध्रकावतम् । 'बह्वच्—' इति किम् । आहिमतम् । 'अङ्ग' ग्रहणं 'बह्वच्' इति तद्विशेषणं यथा स्यान्मत्वन्तविशेषणं मा भूत् ।

प्रत्ययान् वक्तुमुपक्रमते । **तदस्मिन्नस्तीति** ॥ तदस्मिन्नस्तीत्यर्थे प्रथमोच्चारितादणादयः स्युः । प्रत्ययान्तेन प्रकृतिनामके देशे गम्ये इत्यर्थः । प्रसिद्धदेशग्रहणार्थ इतिशब्दः । मतुपोऽपवादः । **तेन निर्वृत्तम्** ॥ देशे तन्नाम्नीत्यनुवर्तते । तेन निर्वृत्तमित्यर्थे तृतीयान्तादणादयः स्युः तन्नाम्नि देशे इत्यर्थः । **तस्य निवासः** ॥ तन्नाम्नि देशे इत्येव । तस्य निवासः इत्यर्थे षष्ठ्यन्तादणादयः स्युः तन्नाम्नि देशे इत्यर्थः । स्वत्ववान् विषयः । निवासस्तु वसतिमात्रं स्वत्वास्वत्वसाधारणमित्याहुः । **अदूरभवश्च** ॥ तस्येति तन्नाम्नि देशे इति चानुवर्तते । तस्य अदूरभव इत्यर्थे षष्ठ्यन्तादणादयः स्युः तन्नाम्नि देशे इत्यर्थः । नन्वत्र चकारः किमर्थ इत्यत आह । **चकारेणेति** ॥ अदूरभवः इति विध्यनन्तरम्प्रागुक्तान्वयोऽर्थाः पुनरुपस्थाप्यन्ते इत्यर्थः । किमर्थमित्यत आह । **तेनेति** ॥ अन्यथा सन्निहितत्वात् अदूरभव इत्येव उत्तरविधिष्वनुवर्तते इति भावः । **चातुरर्थिकत्वमिति** ॥ चतुरर्थ्याम्भव इत्यर्थे द्विगोरञ्यात्मादित्वाट्टक् । तद्धितार्थद्विगौ तु 'द्विगोर्लुगनपत्ये' इति लुक् स्यात् । केचित्तु चतुर्णां सूत्राणामर्थाश्चतुरर्थाः, तत्रभवाश्चातुरर्थिका इत्याहुः । **ओरञ्** ॥ 'तदस्मिन्नास्ति' इत्यादि चतुर्ष्वर्थेषु प्रथमोच्चारितात्तत्तद्विभक्त्यन्तादञ् स्यात्, अणोऽपवादः । अत्राधिकारः 'सुवास्त्वादिभ्योऽण्' इति यावत् । **काक्षतवमिति** ॥ कक्षतुरस्मिन्नस्तीत्यादि विग्रहः । **मतोश्च** ॥ **सैध्रकावतमिति** ॥ सिध्रकावानस्मिन्नस्तीत्यादयश्चत्वारोऽर्थाः यथायोगम्बोध्याः । **आहिमतमिति** ॥ अहिमानस्मिन्नस्तीत्यादयोऽर्थाः ।

१२८५। बह्वचः कूपेषु। (४-२-७३)

अणोऽपवादः। दीर्घवरत्रेण निर्वृत्तो दैर्घवरत्रः कूपः।

१२८६। उदक्च विपाशः। (४-२-७४)

विपाशः उत्तरे कूले ये कूपास्तेष्वञ्। अबह्वर्थं आरम्भः। दन्तेन निर्वृत्तो दान्तः कूपः। 'उदक्' किम्। दक्षिणतः कूपेष्वणेव।

१२८७। सङ्कलादिभ्यश्च। (४-२-७५)

'कूपेषु' इति निवृत्तम्। सङ्कलेन निर्वृत्तं साङ्कलम्। पौष्कलम्।

१२८८। स्त्रीषु सौवीरसाल्वप्राक्षु। (४-२-७३)

स्त्रीलिङ्गेष्वेषु देशेषु वाच्येष्वञ्। सौवीरे दत्तामित्रेण निर्वृत्ता दात्तामित्री नगरी। साल्वे वैधूमाग्नी। प्राचि माकन्दी।

१२८९। सुवास्त्वादिभ्योऽण्। (४-२-७७)

अञोऽपवादः। सुवास्तोरदूरभवं सौवास्तवम्। वर्णु—वार्णवम्। अण्ग्रहणं नद्यां मतुपो बाधनार्थम्। सौवास्तवी।

१२९०। रोणी। (४-२-७८)

रोणीशब्दात्तदन्ताच्चाण्। कूपाञोऽपवादः। रौणः। आजकरौणः।

अहिशब्दस्य ब्यच्कत्वादञ् नेति भावः। **बह्वचः कूपेषु** ॥ बह्वचः प्रातिपदिकात् अञ् चतुर्थ्यर्थेषु, अणोऽपवादः। दीर्घवरत्रेण निर्वृत्तः कूपः दैर्घवरत्रः। **उदक्च विपाशः॥ विपाश उत्तरे कूले इति** ॥ विपाश्शब्दः शकारान्तो नदीविशेषवाची। **सङ्कलादिभ्यश्च ॥ निवृत्तमिति** ॥ व्याख्यानादिति भावः। यथा दाराः इत्यादौ शास्त्रीयपुंस्त्वविशिष्टस्यैव स्त्रीरूपार्थस्य भानम्। तथा लुपि सति शास्त्रीयप्रकृत्यर्थगतालिङ्गसङ्ख्याविशिष्टस्यैव स्वार्थस्य लोकव्यवहारादेव भानं सम्भवति, नतु तदंशे शास्त्रव्यापारापेक्षेति भावः। अणोऽपवादः। **पौष्कलमिति** ॥ पुष्कलेन निर्वृत्तमिति विग्रहः। **स्त्रीषु सौवीर** ॥ **सौवीरे इति** ॥ उदाहरणं वक्ष्यते इति शेषः। **दात्तामित्री नगरीति** ॥ 'टिड्ढ' इति ङीप्। **साल्वे इति** ॥ उदाहियते इति शेषः। **वैधूमाग्नीति** ॥ विधूमाग्निना निर्वृत्तेत्यर्थः। अञि ङीप्। **प्राचीति** ॥ प्राचि देशे उदाहियते इत्यर्थः। **माकन्दीति** ॥ माकन्देन निर्वृत्तेत्यर्थः। **सुवास्त्वादिभ्योऽण् ॥ अञ इति** ॥ ओरञित्यस्यापवाद इत्यर्थः। **सौवास्तवमिति** ॥ अणि ओर्गुणः। **वार्णवमिति** ॥ वर्णोरदूरभवमित्यर्थः। **नतु** 'ओरञ्' इत्येव सिद्धे पुनर्विधिसामर्थ्यादेव तदननुवृत्तौ अणि सिद्धे पुनरण्ग्रहणं व्यर्थमित्यत आह। **अण्ग्रहणमिति** ॥ **रोणी** ॥ लुप्तपञ्चमीकमिदम्। **तदन्तादिति** ॥ 'येन विधिः' इति सूत्रस्थभाष्यादिह प्रत्ययविधावपि तदन्तविधिरिति भावः। **रौण**

१२९१ । कोपधाच्च । (४-२-७९)

अण् । अत्रोऽपवादः । कार्णच्छिद्रकः कूपः । कार्कवाकवम् । त्रैशङ्कवम् ।

१२९२ । वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठको-ऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसङ्काशबल-पक्षकर्णसुतङ्गमप्रगदिन्वराहकुमुदादिभ्यः । (४-२-८०)

सप्तदशभ्यः गणेभ्यः सप्तदश क्रमात्स्युश्चतुरर्थ्याम् । अरीहणादिभ्यो वुञ्' । अरीहणेन निर्वृत्तमारीहणकम् । 'कृशाश्वादिभ्यश्छण्' । काशीश्वीयत् । 'ऋश्यादिभ्यः कः' । ऋश्यकम । 'कुमुदादिभ्यष्ठच्' । कुमुदिकम् । 'काशादिभ्य इलः' । काशिलः । 'तृणादिभ्यः सः' । तृणसम । 'प्रेक्षादिभ्य इनिः' प्रेक्षी । 'अश्मादिभ्यो रः' । अश्मरः । 'सख्यादिभ्यो ढञ्' । साखेयम् । 'सङ्काशादिभ्यो ण्यः' । साङ्काश्यम । 'बलादिभ्यो यः' । बल्यम् । 'पक्षादिभ्यः फक्' पाक्षायणः । 'पथः पन्थ च' (ग सू ७९) । पान्थायनः ।

इति ॥ रोण्या निर्वृत्तः कूप इत्यर्थः । आजकरौण इति ॥ अजकरोण्या निर्वृत्त इत्यर्थः । अणि 'यस्य' इति इकारलोपः । कोपधाच्च ॥ कार्णच्छिद्रक इति ॥ कर्णच्छिद्रकेण निर्वृत्तः कूप इत्यर्थः । कार्कवाकवमिति ॥ कृकवाकुना निर्वृत्तः कूप इत्यर्थः । ओर्गुणः, आदिवृद्धौ रपरत्वम् । त्रैशङ्कवमिति ॥ त्रिशङ्कुना निर्वृत्तः कूप इत्यर्थः । वुञ्छण ॥ वुञ्, छण्, क, ठच्, इल, स, इनि, र, ढञ्, ण्य, य, फक्, फिञ्, इञ्, ञ्य, कक्, ठक् एतेषां सप्तदशानान्द्वन्द्वात्प्रथमाबहुवचनम् । अरीहण, कृशाश्व, ऋश्य, कुमुद, काश, तृण, प्रेक्ष, अश्मन्, सखि, सङ्काश, बल, पक्ष, कर्ण, सुतङ्गम, प्रगदिन्, वराह, कुमुद एतेषां सप्तदशानान्द्वन्द्वः । एते आदयः येषामिति बहुव्रीहेः पञ्चमीबहुवचनम् । यथासङ्ख्यावगमाय कुमुदशब्दयोरेकशेषो न कृतः । प्रगदिन्शब्दे नलोपाभावस्तु इकारान्तत्वभ्रमनिरासाय । द्वन्द्वान्ते श्रूयमाणस्य आदिशब्दस्य अरीहणादिषु प्रत्येकमन्वयः । तथाच अरीहणादिभ्यो वुञ्, कृशाश्वादिभ्यः छण् इत्येव सप्तदश वाक्यानि सम्पन्नानि । तदाह । सप्तदशभ्य इति ॥ अरीहणाद्यादिसप्तदशभ्यो गणेभ्यः वुञादयः प्रत्ययाः क्रमात्स्युरित्यर्थः । चतुरर्थ्यामिति ॥ तदस्मिन्नस्तीति देशे तन्नाम्नि । 'तेन निर्वृत्तम्, तस्य निवासः, अदूरभवश्च' इति चतुर्ष्वर्थेषु प्रथमोच्चारितात्तत्तद्विभक्त्यन्तात् यथायोगम्प्रत्ययाः इति फलितम् । एतेषु गणेषु चेतनवाचका अचेतनवाचकाश्च सन्ति । तत्र यथायोगञ्चतुरर्थ्याः अन्वयः । प्रेक्षीति ॥ प्रेक्षते इति प्रेक्षः, तेन निर्वृत्तमित्यर्थः । प्रेक्षया निर्वृत्तमिति वा । पथः पन्थ च इति ॥ प्रेक्षादिगणसूत्रमिदम् । पान्थायन इति ॥ पथः अदूरभव इत्यर्थः ।

'कर्णादिभ्यः फिञ्' कार्णायनिः। 'सुतङ्गमादिभ्य इञ्'। सौतङ्गमिः। 'प्रग-द्यादिभ्यो ञ्यः' प्रागग्यः। 'वराहादिभ्यः कक्' वाराहकः। कुमुदादिभ्य-ष्ठक्' कौमुदिकः।

१२९३। जनपदे लुप्। (४-२-८१)

जनपदे वाच्ये चातुरर्थिकस्य लुप्स्यात्।

१२९४। लुपि युक्तवद्व्यक्तिवचने। (१-२-५१)

लुपि सति प्रकृतिवल्लिङ्गवचने स्तः। पञ्चालानां निवासो जनपदः पञ्चालाः। कुरवः। अङ्गाः। वङ्गाः। कलिङ्गाः।

१२९५। तदशिष्यं संज्ञाप्रमाणत्वात्। (१-२-५३)

युक्तवद्वचनं न कर्तव्यम्। संज्ञानां प्रमाणत्वात्।

१२९६। लुब्योगाप्रख्यानात्। (१-२-५४)

लुबपि न कर्तव्योऽवयवार्थस्येहाप्रतीतेः।

१२९७। योगप्रमाणे च तदभावेऽदर्शनं स्यात्। (१-२-५५)

जनपदे लुप् ॥ **चातुर्थिकस्येति** ॥ प्रकरणलभ्यमिदम्। **लुपि युक्तवत्** ॥ प्रकृतिभूतः शब्दः युक्तः, व्यक्तिः लिङ्गं, वचनं सङ्ख्येति पूर्वाचार्यसङ्केतः। तदाह। **लुपि सति प्रकृतिवल्लिङ्गवचने स्त इति** ॥ लुबिति प्रत्ययादर्शनमुच्यते। लुपः प्रवृत्तेः प्राक् प्रत्ययप्रकृतेर्यल्लिङ्गं वचनन्ते एव लुपि सति भवतः, न तु प्रत्ययार्थविशेष्यमनुसृत्येत्यर्थः। **पञ्चालानामिति** ॥ पञ्चालसंज्ञकानां राज्ञामित्यर्थः। **पञ्चाला इति** ॥ तस्य निवास इति विहितस्याणः 'जनपदे लुप्' इति लुपि प्रकृतिवत् बहुवचनमिति भावः। **कुरव इत्यादि** ॥ कुरूणाम् अङ्गानां वङ्गानां कलिङ्गानाञ्च निवासो जनपद इति विग्रहः। लिङ्गातिदेशे तु कटुबदर्या अदूरभवो जनपदः कटुबदरीत्युदाहार्यम्। तदेतत्पूर्वाचार्यसूत्रम्पाणिनिः प्रत्याचष्टे। **तदशिष्यम्** ॥ यथा दाराः इत्यादौ शास्त्रीयपुंस्त्वविशिष्टस्यैव स्त्रीरूपार्थस्य भानम्, तथा लुपि सति शास्त्रीयप्रकृत्यर्थगतलिङ्ग-सङ्ख्याविशिष्टस्यैव स्वार्थस्य लोकव्यवहारादेव भानं सम्भवति, न तु तदंशे शास्त्रव्यापारा-पेक्षेति भावः। **संज्ञानामिति** ॥ लोकव्यवहाराणामित्यर्थः। एवञ्च लुगपि न विधेय इत्याह। **लुब्योगाप्रख्यानात्** ॥ अशिष्यमित्यनुवृत्तं पुल्लिङ्गेन विपरिणतं लुबित्यनन्तरं सम्बध्यते। तदाह। **लुबपि न कर्तव्य इति** ॥ योगः अवयवार्थः, तस्य अप्रख्यानात् अप्रतीतेरित्यर्थः। तदाह। **अवयवेति** ॥ नहि पञ्चालाङ्गवङ्गादिसम्बन्धित्वेन पञ्चाला अङ्गाः वङ्गाः इत्यादितो बोधः, अतः प्रत्यय एव तत्रास्तीति भावः। प्रत्ययस्वीकारे बाधकमाह। **योगप्रमाणे च** ॥ पञ्चालाङ्ग-वङ्गादिशब्देषु योगस्य अवयवार्थस्य प्रमापके सति तदभावे पञ्चालाङ्गादिक्षत्रियसम्बन्धाभाव

यदि हि योगस्यावयवार्थस्येदं बोधकं स्यात्तदा तदभावे न दृश्येत।

१२९८। प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्। (१-२-५६)

'प्रत्ययार्थः प्रधानम्' इत्येवं रूपं वचनमप्यशिष्यम्। कुतः। अर्थस्य लोकत एव सिद्धेः।

१२९९। कालोपसर्जने च तुल्यम्। (१-२-५७)

'अतीतायाः रात्रेः पश्चार्धेनागामिन्याः पूर्वार्धेन च सहितो दिवसोऽद्यतनः,' 'विशेषणमुपसर्जनम्' इत्यादि पूर्वाचार्यैः परिभाषितम्। तत्राप्यशिष्यत्वं समानम्। लोकप्रसिद्धेः।

१३००। विशेषणानां चाजातेः। (१-२-५२)

लुबर्थस्य विशेषणानामपि तद्वल्लिङ्गवचने स्तो जातिं वर्जयित्वा। पञ्चाला रमणीयाः। गोदौ रमणीयौ। 'अजातेः' किम्। पञ्चाला जनपदः। गोदौ ग्रामः। 'हरीतक्यादिषु व्यक्तिः' (वा ७१५)। हरीतक्याः फलानि

सम्प्रति शूद्रादिराजके जनपदे पञ्चालादिशब्दो न प्रयुज्येत, प्रयुज्यते च, अतः पञ्चालादिशब्दाः जनपदविशेषेषु केवलरूढा इति युक्तमित्यर्थः। तदाह। **यदि हि योगस्येति॥** अथ प्रसङ्गादन्यदपि पूर्वाचार्यपरिभाषितं निराचष्टे। **प्रधानप्रत्ययार्थ॥ प्रत्ययार्थ इति॥** प्रकृत्यर्थम्प्रति प्रत्ययार्थः प्रधानं विशेष्यम्, प्रकृत्यर्थस्तु तद्विशेषणमित्येवं यत्पूर्वाचार्यवचनन्तदपीत्यर्थः। **कालोपसर्जने च॥** कालश्च उपसर्जनञ्चेति समाहारद्वन्द्वात् विषयसप्तमी। अशिष्यमित्यनुवृत्तम्भावप्रधानमाश्रीयते। कालविषये उपसर्जनविषये च यत्पूर्वाचार्याणां विशेषवचनन्तत्राप्यशिष्यत्वं समानमित्यर्थः। तद्विशेषवचनं विशदयन् व्याचष्टे। **अतीतायेत्यादिना॥ विशेषणानाञ्चाजातेः॥** कस्य विशेषणानामित्याकाङ्क्षायां लुबित्यनुवृत्तं षष्ठ्या विपरिणतं सम्बध्यते लुप्तप्रत्ययार्थस्येति लभ्यते। तदाह। **लुबर्थस्येति॥ तद्वदिति॥** प्रकृतिवदित्यर्थः। 'लुपि युक्तवद्व्यक्तिवचने' इत्यस्मादुत्तरं पठितमिदं सूत्रम्। तत्रैव व्याख्यातुमुचितम्। **पञ्चाला रमणीया इति॥** पञ्चालानां निवासो जनपद इत्यर्थः। अत्र प्रत्ययार्थजनपदं प्रति विशेषणस्यापि रमणीयशब्दस्य प्रकृतिवद्बहुवचनम्। **गोदौ रमणीयाविति॥** गोदयोर्निवासो जनपद इत्यर्थः। अत्र प्रत्ययार्थजनपदस्य तद्विशेषणस्यापि प्रकृतिवत् द्विवचनम्। **पञ्चाला जनपद इति॥** जनपदशब्दस्य जातिवाचित्वान्न प्रकृतिवद्बहुवचनम्। **गोदौ ग्राम इति॥** अत्र ग्रामशब्दस्य जातिवाचित्वान्न प्रकृतिवत् द्विवचनम्। **हरीतक्यादिषु व्यक्तिरिति॥** वार्तिकमिदम्। लुपि लिङ्गं प्रकृतिवद्भवति। न तु वचनमिति शेषः। **हरीतक्याः फलानि हरीतक्य इति॥** 'हरीतक्यादिभ्यश्च' इति विकारप्रत्ययस्य

हरीतक्यः। 'खलतिकादिषु वचनम्' (वा ७१६)। खलतिकस्य पर्वतस्यादूरभवानि खलतिकं वनानि। 'मनुष्यलुपि प्रतिषेधः' (वा ७१७)। मनुष्यलक्षणे लुबर्थे विशेषणानां न। लुबन्तस्य तु भवतीत्यर्थः। चञ्चा अभिरूपः।

१३०१। वरणादिभ्यश्च। (४-२-८२)

अजनपदार्थ आरम्भः। वरणानामदूरभवं नगरं वरणा।

१३०२। शर्कराया वा। (४-२-८३)

अस्माच्चातुरर्थिकस्य वा लुप्स्यात्।

१३०३। ठक्छौ च। (४-२-८४)

शर्करायाः एतौ स्तः। कुमुदादौ वराहादौ च पाठसामर्थ्यात्पक्षे ठक्कक्वौ। वाग्रहणसामर्थ्यात्पक्षे औत्सर्गिकोऽण्। तस्य लुब्विकल्पः। षड् रूपाणि। शर्करा—शार्करम्—शार्करिकम्—शर्करीयम्—शर्करिकम्—शार्करकम्।

लुप्। अत्र प्रत्ययार्थेषु फलेषु प्रकृतिवत्स्त्रीलिङ्गमेव भवति, न त्वेकवचनमिति भावः। **खलतिकादिषु वचनम्** ॥ वार्तिकमिदम्। एषु लुपि प्रकृतिवद्वचनमेव भवति, नतु लिङ्गमित्यर्थः। **खलतिकं वनानीति** ॥ 'वरणादिभ्यश्च' इति लुप्। अत्र खलतिकशब्दस्य लुप्रत्ययान्तस्य प्रकृतिवत्पुंल्लिङ्गत्वं न भवति। किन्तु एकवचनमेवेति भावः। **मनुष्यलुपि प्रतिषेध इति** ॥ वार्तिकमिदम्। **मनुष्यलक्षणे इति** ॥ मनुष्यात्मके लुप्रत्ययार्थे यानि विशेषणानि तेषां प्रकृतिवल्लिङ्गवचनप्रतिषेध इत्यर्थः। **चञ्चा अभिरूप इति** ॥ चञ्चा तृणमयी प्रतिमा, तत्सदृशो मनुष्यः चञ्चा। 'इवे प्रतिकृतौ' इत्यधिकारे 'संज्ञायाम्' इति कनः 'लुम्मनुष्ये' इति लुप्। अत्र लुप्रत्ययान्तस्य चञ्चाशब्दस्य मनुष्ये वाच्ये प्रकृतिलिङ्गत्वम्। नतु तद्विशेषणस्य अभिरूपशब्दस्येति भावः ॥ **इति युक्तवद्भावप्रकरणम्** ॥ अथ प्रकृतमारभते—**वरणादिभ्यश्च** ॥ 'जनपदे लुप्' इत्युत्तरमिदं सूत्रम्। वरणादिभ्यः परस्य चातुरर्थिकप्रत्ययस्य लुप् स्यादित्यर्थः। पूर्वेणैव सिद्धे किमर्थमिदमित्यत आह। **अजनपदार्थ आरम्भ इति** ॥ **वरणानामिति** ॥ वरणा नाम नदी काश्या उत्तरतः प्रसिद्धा। अवयवाभिप्रायेणैव बहुवचनम्। वरणानामदूरभवन्नगरं वरणाः। अत्र लुप्रत्ययान्तस्य वरणाशब्दस्य नगरे वाच्ये प्रकृतिवत्स्त्रीलिङ्गं बहुवचनञ्च। **शर्करायाः वा** ॥ लुबित्यनुवर्तते। प्रत्यासत्त्या चातुरर्थिकस्येति लभ्यते। तदाह। **अस्मादिति** ॥ **ठक्छौ च** ॥ शर्करायाः इत्यनुवर्तते। तदाह। **शर्करायाः एतौ स्त इति** ॥ **ठक्कक्वाविति** ॥ कुमुदादिभ्यः ठच्, वराहादित्वात् कक्, इति विवेकः। **वाग्रहणेति** ॥ अन्यथा तत्र पाठसामर्थ्यादेव ठचः ककश्च लोपविकल्पसिद्धेस्तद्वैयर्थ्यादिति भावः। **शार्करेति** ॥ अणो लुपि युक्तवद्भावे रूपम्। **शार्करमिति** ॥ अणि रूपम्। **शार्करिकमिति** ॥

१३०४ । नद्यां मतुप् । (४-२-८५)

चातुरर्थिकः । इक्षुमती ।

१३०५ । मध्वादिभ्यश्च । (४-२-८६)

मतुप्स्याच्चातुरर्थिकः । मधुमान् । अनद्यर्थ आरम्भः ।

१३०६ । कुमुदनडवेतसेभ्यो ड्मतुप् । (४-२-८७)

कुमुद्वान् । नड्वान् । वेतस्वान् । आद्ययोः 'झयः' (सू १८९८) इति, अन्त्ये 'मादुपधायाः–' (सू १८९७) इति वक्ष्यमाणेन वः । 'महिषाच्चेति वक्तव्यम्' (वा २७६१) । महिष्मान्नाम देशः ।

१३०७ । नडशादाड्ड्वलच् । (४-२-८८)

ठकि रूपम् । **शर्करीर्यामिति** ॥ छे रूपम् । **शार्करिकमिति** ॥ ठचि रूपम् । **शार्करक मिति** ॥ ककि रूपम् । शर्कराणां निवासः इत्यर्थः । शर्कराभिः निवृत्तमिति वा । **नद्यां मतुप्** ॥ **चातुरर्थिक इति** ॥ शेषपूरणम् । **इक्षुमतीति** ॥ मतुपि उपाविती । इक्षूणां निवास इत्यर्थः । **मध्वादिभ्यश्च** ॥ शेषपूरणेन सूत्रं व्याचष्टे । **मतुप् स्याच्चातुरर्थिक इति** ॥ **मधुमानिति** ॥ मधूनां निवास इत्यर्थः । पूर्वेण सिद्धे किमर्थमिदमित्यत आह । **अनद्यर्थमिति** ॥ **कुमुदनड** ॥ कुमुद नड वेतस एतेभ्यः ड्मतुप् स्यादित्यर्थः । डकारः उपौ च इतः । अयं मत्वर्थ एवेति 'न पदान्त' इति सूत्रभाष्यकैयटयोः स्थितम् । **कुमुद्वानिति** ॥ कुमुदाः अस्मिन् सन्तीति विग्रहः । ड्मतुपि डित्त्वात् टिलोपः । **नड्वानिति** ॥ नडाः अस्मिन् सन्तीति विग्रहः । "कुमुद्वान्कुमुदप्राये नड्वान्नड्वल इत्यपि" इत्यमरः । **वेतस्वानिति** ॥ वेतसाः अस्य सन्तीति विग्रहः । **आद्ययोरिति** ॥ कुमुद्वच्छब्दे नड्वच्छब्दे च 'झयः' इति मतुपो मस्य वकारः । वेतस्वच्छब्दे तु 'मादुपधायाः' इति मस्य वकार इत्यर्थः । वस्तुतस्तु नड्वच्छब्देऽपि 'झयः' इत्यस्यासिद्धत्वात् 'मादुपधायाः' इत्येव न्याय्यम् । "प्रकरणे प्रकरणमसिद्धम्, ननु एकस्मिन्नेव प्रकरणे पूर्वयोगम्प्रति परस्यासिद्धत्वम्" इत्यस्य 'उपसर्गादसमासे' इति सूत्रभाष्ये दूषितत्वात् । वेतस्वानित्यत्र रुत्वन्तु न, अल्लोपस्य स्थानिवत्त्वात् 'न पदान्त' इति निषेधस्तु न । पदे अन्त इति विगृह्य पदे परतश्चरमावयवे कर्तव्ये परपदस्थाजादेशस्यैव तन्निषेधप्रवृत्तेर्भाष्याभ्युपगतत्वात् । 'पूर्वत्रासिद्धे न स्थानिवत्' इति निषेधोऽपि न । पदे अन्त इति विगृह्य तत्र स्थानिवत्त्वनिषेधव्यावृत्तिसाधनपरभाष्यप्रामाण्येन पदचरमावयवकार्यविधायकातिरिक्तस्यैव त्रैपादिकस्य ग्रहणात्' इति शब्देन्दुशेखरे विस्तरः । महिषाच्चेत्यनन्तरं तु ड्मतुबिति शेषः । **महिष्मानिति** ॥ महिषाः अस्मिन् सन्तीति विग्रहः । डित्त्वाट्टिलोपः । अल्लोपस्य स्थानिवत्त्वान्न जश्त्वम् । 'प्रत्यये भाषायां नित्यम्' इति तु न । तस्य सवर्णे परतो विधेः । न हि षकारसवर्णोऽनुनासिकोऽस्ति । **नडशादाड्ड्वलच्** ॥ **नड्वल**

नड्वलः। "शादो जम्बालघासयोः" इत्यमरः। शाद्वलः।

१३०८। शिखाया वलच्। (४-२-८९)

शिखावलम्।

१३०९। उत्करादिभ्यश्छः। ४-२-९०)

उत्करीयः।

१३१०। नडादीनां कुक्च। (४-२-९१)

नडकीयम्। 'कुच्वा ह्रस्वत्वं च' (ग सू ८०)। कुच्चकीयः। 'तक्षन्नलोपश्च' (ग सू ८१)। तक्षकीयः।

१३११। बिल्वकादिभ्यश्छस्य लुक्। (६-४-१५३)

नडाद्यन्तर्गता बिल्वकादयः, तेभ्यश्छस्य लुक्तद्धिते परे। बिल्वा यस्यां सन्ति सा बिल्वकीयाः। तस्यां भवा बैल्वकाः। वेत्रकीयाः—वैत्रकाः। 'छस्य' किम्। छमात्रस्य लुग्यथा स्यात्कुको निवृत्तिर्मा भूत्। अन्यथा 'सन्नियोग-

---

इति॥ डित्त्वाट्टिलोपः। **शाद्वल इति**॥ शादाः अस्मिन् सन्तीति विग्रहः। शादो दन्त्योपधः। डोपध इत्यन्ये। "नडप्राये नड्वान्नड्वल इत्यपि" इत्यमरः। "शाद्वलः शादहरिते" इति च। **शिखाया वलच्**॥ निवृत्ताद्यर्थं सूत्रं देशे तन्नाम्नि अणो बाधनार्थञ्च। 'दन्ताशिखात्संज्ञायाम्' इति पञ्चमे वक्ष्यमाणन्तु अदेशेऽपि शिखावलः, इति रूपार्थम्। **उत्कारादिभ्यश्छः**॥ चातुरर्थिक इति शेषः। **उत्करीय इति**॥ देशविशेषोऽयम्। उत्करेण निर्वृत्तमिति वा, तस्य निवासः, तस्य अदूरभव इति वा। **नडादीनाङ्कुक्च**॥ नडादिभ्यः छः स्यात् चातुरर्थिकः प्रकृतेः कुक् च। **कुच्वा ह्रस्वत्वञ्चेति**॥ नडादिगणसूत्रं कुच्वाशब्दाच्छः। प्रकृतेः कुक्, आकारस्य ह्रस्वश्च। **कुच्चकीय इति**॥ कुच्वा अस्मिन् सन्तीत्यादि विग्रहः। **तक्षन्नलोपश्च**॥ इदमपि गणसूत्रम्। तक्षन्शब्दात् छः, कुक्, नकारस्य लोपश्च। **बिल्वकादिभ्यश्छस्य लुक्**॥ षाष्ठमिदं सूत्रम्। **बिल्वकेति**॥ नडाद्यन्तर्गतबिल्वादीनां कृतकुगागमानां निर्देशः। ककारादुकार उच्चारणार्थः। **तद्धिते इति**॥ 'आपत्यस्य च तद्धिते' इत्यतस्तदनुवृत्तेरिति भावः। **बिल्वकीयेति**॥ 'नडादीनाङ्कुक् च' इति छः। प्रकृतेः कुक् च। **तस्यां भवाः बैल्वका इति**॥ बिल्वकीयाशब्दाद्भवार्थे अण्। तस्मिन्परे छस्य लुगिति भावः। **वेत्रकीयाः इति**॥ वेत्राः अस्यां सन्तीत्यर्थे नडादित्वाच्छः, प्रकृतेः कुक् च, इति भावः। **वैत्रका इति**॥ वेत्रकीयायां भवा इत्यर्थः। वेत्रकीयाशब्दात् अणि छस्य लुगिति भावः। **छस्य किमिति**॥ एभ्यः परस्यैव सम्भव इति प्रश्नः। **सन्नियोगेति**॥ 'सन्नियोगशिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः' इति न्यायेनेत्यर्थः। ननु 'ढे लोपोऽकद्वाः' इत्यतो लोप इत्यनुवृत्त्यैव सिद्धे लुग्ग्रहणङ्किमर्थमित्यत आह। **लुग्ग्रहणं सर्वलोपार्थमिति**॥ प्रत्ययादर्शनस्यैव लुक्शब्दार्थत्वात्

शिष्टानाम्' (प ८७) इति कुगपि निवर्तेत। लुग्ग्रहणं सर्वलोपार्थम्। लोपो हि यमात्रस्य स्यात्।

इति तद्धिते चातुरर्थिकप्रकरणम्।

अथ तद्धिते शैषिकप्रकरणम्।

१३१२। शेषे। (४-२-९२)

अपत्यादिचतुरर्थ्यन्तादन्योऽर्थः शेषः, तत्राणादयः स्युः। चक्षुषा गृह्यते चाक्षुषं रूपम्। श्रावणः शब्दः। औपनिषदः पुरुषः। दृषदि पिष्टा दार्षदाः सक्तवः। उलूखले क्षुण्णः औलूखलो यावकः। अश्वैरुह्यते आश्वो रथः। चतुर्भिरुह्यते चातुरं शकटम्। चतुर्दश्यां दृश्यते चातुर्दशं रक्षः। 'शेषे' (सू १३१२) इति लक्षणं चाधिकारश्च। 'तस्य विकारः' इत्यतः' प्राक्छेषाधिकारः।

कृत्स्नस्य ईयस्य लोपो लभ्यते इति भावः। लोपविधौ तु नैवं लभ्यते इत्याह। **लोपो हीति॥** लोपविधौ 'सूर्यतिष्य' इत्यतः य उपधायाः इत्यनुवृत्तौ बिल्वकादिभ्यः परस्य छादेशभूतस्य ईयस्य उपधाभूतो यो यकारः तस्य लोप इत्यर्थलाभाद्यकारमात्रस्य लोपः स्यात्। य उपधायाः इत्यननुवृत्तौ तु 'आदेः परस्य' इति इकारस्यैव लोपः स्यादिति भावः॥

इति तद्धिते चातुरर्थिकप्रकरणम्।

अथ शैषिकप्रकरण निरूप्यते—**शेषे॥ अणादय इति॥** 'प्राग्दीव्यतोऽण्' इत्यादिसाधारणाः प्रत्यया इत्यर्थः। **चतुर्भिरिति॥** अश्वादिभिरिति शेषः। **चतुर्दश्यामिति॥** कृष्णचतुर्दश्यां रात्रौ रक्षांसि दृश्यन्त इत्यागमः। **लक्षणमिति॥** प्रदर्शितेषु ग्रहणाद्यर्थेषु उत्तरसूत्रैरनुपात्तेषु अणादिविधायकमित्यर्थः। अधिकारत्वे तु उत्तरसूत्रेष्वेवानुवृत्तिलाभादिदन्न सिध्येदिति भावः। **अधिकारश्चेति॥** उत्तरसूत्रेष्वनुवृत्त्यर्थश्चेत्यर्थः। स्वरितत्वादिति भावः। अधिकारस्योत्तरावधिमाह। **तस्य विकार इत्यतः प्रागिति॥** नच उत्तरसूत्रेषु निर्दिष्टानामर्थविशेषाणाम् अपत्यादिचतुरर्थ्यन्तादन्यत्वस्य सिद्धत्वात् शेषाधिकारो व्यर्थ इति वाच्यम्। 'तस्येदम्' इत्यादावपत्यादिचतुरर्थ्यन्तार्थानाङ्ग्रहणाभावाय तदावश्यकत्वात्। न च प्रदर्शितेषु ग्रहणाद्यर्थेषु 'तस्येदम्' इत्येव अणादिसिद्धेः शेष इत्यस्य विधित्वन्नाश्रयणीयमिति वाच्यम्। "शैषिकान्मतुबर्थीयात्" इत्यादौ प्रदर्शितग्रहणाद्यर्थकानामपि ग्रहणलाभाय तदावश्यकत्वात्। इदन्त्वेन भासमानमपत्याद्यपि न शेषः। "इदं विशेषा ह्येते अपत्यं समूहो विकारो निवासः" इति

१३१३। राष्ट्रावारपाराद्घखौ। ४-२-९३)

आभ्यां क्रमाद्घखौ स्तः शेषे। राष्ट्रियः, अवारपारीणः। 'अवारपाराद्विगृहीतादपि विपरीताच्चेति वक्तव्यम्' (वा २७७१–२७७२)। अवारीणः। पारीणः। पारावारीणः। इह प्रकृतिविशेषाद्भादयष्टयुटयुलन्ताः प्रत्यया उच्यन्ते। तेषां जातादयोऽर्थविशेषाः समर्थविभक्तयश्च वक्ष्यन्ते।

१३१४। ग्रामाद्यखञौ। (४-२-९४

ग्राम्यः–ग्रामीणः।

१३१५। कत्र्यादिभ्यो ढकञ्। (४-२-९५)

कुत्सितास्त्रयः कत्रयः। तत्र जातादिः कात्रेयकः। नागरेयकः। 'ग्रामात्' इत्यनुवृत्तेर्ग्रामेयकः।

भाष्यात्। प्रपञ्चितञ्चैतत् 'तस्यापत्यम्' इत्यत्र 'तस्येदमित्यपत्येऽपि' इत्यादिश्लोकवार्तिकव्याख्यावसरे। **राष्ट्रावारपाराद्घखौ ॥ आभ्यामिति ॥** राष्ट्रशब्दादवारपारशब्दाच्चेत्यर्थः। **राष्ट्रिय इति ॥** राष्ट्रे जातः भवः इत्यादिरर्थो यथायोगम्बोध्यः। घस्य इयः। **अवारपारीण इति ॥** खस्य ईनादेशः, णत्वम्। **अवारपाराद्विगृहीतादपीति ॥** अवारशब्दात्पारशब्दाच्च पृथग्भूतादपि खो वक्तव्य इत्यर्थः। **विपरीताच्चेति ॥** पारावारशब्दादपीत्यर्थः। ननु राष्ट्रावारपारेत्यारभ्य 'विभाषा पूर्वाह्णापराह्णाभ्याम्' इत्यन्तैः सूत्रैः राष्ट्रादिशब्देभ्यः प्रकृतिभ्यः शेषेऽर्थे प्रत्यया विहिताः। तस्यापत्यमित्यादिवदर्थविशेषास्तु न निर्दिश्यन्ते। यत्किञ्चिद्विभक्त्यन्तेभ्यः राष्ट्रादिप्रकृतिविशेषेभ्यः घादयः टयुटयुलन्ताः प्रत्ययाः स्युः। 'समर्थानाम्प्रथमाद्वा' इत्यस्यानुपस्थित्या प्रथमोच्चारितविभक्तिविशेषानुपस्थितेः। किञ्च 'तत्र जातः' इत्यादिसूत्रेषूत्तरेषु अर्थविशेषा एव निर्दिष्टाः। तत्र प्रथमोच्चारितसमभ्यन्तादितत्तद्विभक्त्यन्तेभ्यः सर्वेभ्यः साधारणा अणादय एव स्युः। तत्राह। इह प्रकृतीत्यादिना राष्ट्रावारेत्यादिसूत्राणां प्रकृतिविशेषेभ्यः केवलप्रत्ययविधीनां अर्थविशेषप्रकृतिविशेषविभक्तिविशेषाकांक्षायां 'तत्र जातः' इत्यादिसूत्राणान्तु केवलमर्थविशेषनिर्देशपराणां 'समर्थानाम्' इति सूत्रलब्धतत्तद्विभक्तिकप्रकृतिविशेषाणां विधेयप्रत्ययविशेषाकाङ्क्षायां परस्परमेकवाक्यत्वे सति तत्र जातः इत्यादयर्थेषु प्रथमोच्चारिततत्तद्विभक्त्यन्तेभ्यः राष्ट्रादिशब्देभ्यो घादयः टयुटयुलन्ताः प्रत्ययाः स्युरिति लभ्यत इति भावः। राष्ट्रादन्याभ्यस्तु प्रकृतिभ्यो जातादयर्थेषु अणादयः साधारणा भवन्त्येव। **ग्रामाद्यखञौ ॥ ग्राम्य इति ॥** यप्रत्यये 'यस्येति च' इति लोपः। **ग्रामीण इति ॥** खञ ईनादेशः, णत्वम्। **कत्र्यादिभ्यो ढकञ्। कत्रय इति ॥** 'कुगतिप्रादयः' इति कुशब्दस्य समासः। 'यौ च' इति कोः कदादेशः। **कात्रेयक इति ॥** ढकञ्, ढकारस्य एयादेशः 'लोपो व्योः' इति यलोपः। **अनुवृत्तेरिति ॥** स्वरितत्वादिति भावः। तथाच ग्रामशब्दात् ढकञपि

१३१६ । कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु । (४-२-९६)

कौलेयकः श्वा—कौलोऽन्यः । कौक्षेयकोऽसिः—कौक्षोऽन्यः । ग्रैवेयकोऽलङ्कारः—ग्रैवोऽन्यः ।

१३१७ । नद्यादिभ्यो ढक् । (४-२-९७)

नादेयम् । माहेयम् । वाराणसेयम् ।

१३१८ । दक्षिणापश्चात्पुरसस्त्यक् । (४-२-९८)

'दक्षिणा' इत्याजन्तमव्ययम् । दाक्षिणात्यः । पाश्चात्यः । पौरस्त्यः ।

१३१९ । कापिश्या ष्फक् । (४-२-९९)

कापिश्यां जातादि कापिशायनं मधु । कापिशायनी द्राक्षा ।

१३२० । रङ्कोरमनुष्येऽण् च । (४-२-१००)

चात्ष्फक् । राङ्कवो गौः राङ्कवायणः । 'अमनुष्ये' इति किम् । राङ्कवको मनुष्यः ।

१३२१ । द्युप्रागपागुदक्प्रतीच्यो यत् । (४-२-१०१)

दिव्यम् । प्राच्यम् । अपाच्यम । उदीच्यम् । प्रतीच्यम् ।

लभ्यते इत्यर्थः । **कुलकुक्षि** ॥ कुलाच्छुनि, कुक्षेः असौ, ग्रीवायाः अलङ्कारे, ढकञित्यर्थः । **कौलेयकः श्वेति** ॥ कुले जातादिरिति विग्रहः । **कौक्षेयकोऽसिरिति** ॥ कुक्षौ कोशे भवः खड्ग इत्यर्थः । **ग्रैवेयक इति** ॥ ग्रीवासु भव इति विग्रहः । **नद्यादिभ्यो ढक्** ॥ **माहेयमिति** ॥ महीं भूमिः, तस्याञ्जातादीत्यर्थः । **वाराणसेयमिति** ॥ वाराणस्याञ्जातादीत्यर्थः । **दक्षिणापश्चात्** ॥ **आजन्तमव्ययमिति** ॥ अव्ययसाहचर्यादाजन्तमिति भावः । दक्षिणा, पश्चात्, पुरस्, एभ्योऽव्ययेभ्यो जातार्थेषु त्यक्प्रत्ययः स्यादित्यर्थः । **कापिश्या ष्फक्** ॥ कापिश्याः ष्फक् इति छेदः । कापिशीशब्दात् ष्फक् स्यादित्यर्थः । कापिशी नाम देशविशेषः । **कापिशायनी द्राक्षेति** ॥ षित्त्वात् ङीष् । **रङ्कोरमनुष्येऽण् च** ॥ रङ्कोरण् स्यात् चात् ष्फक् । **राङ्कवो गौरिति** ॥ रङ्कुर्नाम देशविशेषः । तत्र जातादिरित्यर्थः । **राङ्कवको मनुष्य इति** ॥ अत्र मनुष्यत्वान्न ष्फगणौ । किन्तु 'मनुष्यतत्स्थयोः' इति वक्ष्यमाणो वुच् । अकादेशः । राङ्कवो मनुष्यः इति त्वपपाठः । **द्युप्रागपाक्** ॥ दिव्, प्राञ्च्, अपाञ्च्, उदञ्च्, प्रत्यञ्च्, एभ्यो यत्स्यादित्यर्थः । सूत्रे 'दिव उत्' इत्युत्त्वेन निर्देशः । **दिव्यमिति** ॥ दिवि जातादीत्यर्थः । **प्राच्यमिति** ॥ प्राचि प्रदेशे जातादीत्यर्थः । तद्धितोत्पत्तौ सुब्लुकि प्राञ्च् य इति स्थिते 'अनिदिताम्'

१३२२। कन्थायाष्ठक्। (४-२-१०२)

कान्थिकः।

१३२३। वर्णौ वुक्। (४-२-१०३)

वर्णुसमीपदेशो वर्णुस्तद्विषयार्थवाचिकन्थाशब्दाद्वुक्स्यात्। 'यथा हि जातं हिमवत्सु कान्थकम्'।

१३२४। अव्ययात्त्यप्। (४-२-१०४)

'अमेहकतसित्रेभ्य एव' (वा २७७९)। 'अमान्तिकसहार्थयोः'। अमात्यः। इहत्यः। कत्यः। ततस्त्यः। तत्रत्यः। 'परिगणनम्' किम्। उपरिष्टाद्भवः औपरिष्टः। 'अव्ययानां भमात्रे टिलोपः' (वा ४१८७)। अनित्योऽयं बहिषष्टिलोपविधानात्। तेनेह न। आरातीयः। शाश्वतीयः। 'त्यब्नेर्ध्रुव इति वक्तव्यम्' (वा २७८०)। नित्यः। 'निसो गते' (वा २७८१)।

१३२५। ह्रस्वात्तादौ तद्धिते। (८-३-१०१)

इति नलोपे 'अचः' इत्यकारलोपे 'चौ' इति दीर्घे प्राच्यमिति रूपम्। **अपाच्यमिति** ॥ इदमपि पूर्ववत्। **उदीच्यमिति** ॥ अत्र 'उद ईत्' इति ईत्त्वं विशेषः। **प्रतीच्यमिति** ॥ प्राच्यवद्रूपम्। **कन्थायाष्ठक्** ॥ तिर्यक्स्यूतबहुवस्त्रखण्डसमूहः कन्था। देशविशेष इत्यन्ये। **वर्णौ वुक्** ॥ **वर्णुसमीपेति** ॥ वर्णुर्नाम सिन्धुनदः, तस्मादूरभव इत्यर्थे सुवास्त्वादित्वादणो 'जनपदे लुप्' इति लुप्। तथाच वर्णुसमीपदेशो वर्णुः, तस्मिन् या कन्था तद्वाचकात् वुक्प्रत्यय इति यावत्। **अव्ययात्त्यप्** ॥ **अमेहेति** ॥ अमा, इह, क, त्र, तसि, एभ्यश्च वा अव्ययेभ्यः त्यप्प्रत्यय इति परगणवार्तिकमिदम्। **अमात्य इति** ॥ समीपे सह वा जात इत्यर्थः। **औपरिष्ट इति** ॥ उपरिष्टादित्यव्ययस्य परिगणितेष्वनन्तर्भावात् न त्यप्। अणि औपरिष्ट इति रूपमित्यर्थः। कथमिह टिलोप इत्यत आह। **अव्ययानामिति** ॥ वार्तिकमिदम्। **भमात्रे इति** ॥ कात्स्न्र्ये मात्रशब्दः। कृत्स्नस्य भस्याव्ययस्य टेर्लोपः। 'नस्तद्धिते' इत्याद्युपाधिर्नापेक्षित इत्यर्थः। नन्वेवं सति आरादित्यव्ययात् छस्य ईयादेशे टिलोपे आरीय इति स्यादित्यत आह। **अनित्योऽयमिति** ॥ **त्यब्नेरिति** ॥ नि इत्यव्ययात् त्यप् स्याद्ध्रुवे गम्ये इत्यर्थः। 'नियतम्भवन्नित्यम्' इति भाष्यम्। **निसो गते इति** ॥ निस् इत्यव्ययात् त्यप् वक्तव्यो गते गम्ये इत्यर्थः। निस् त्य इति स्थिते सकारस्य पदान्तत्वादादेशप्रत्यायावयवत्वाभावाच्च षत्वे अप्राप्ते। **ह्रस्वात्तादौ** ॥ 'इण्कोरित्यतः इण्ग्रहणमनुवर्तते। 'सहेः साडः सः' इत्यतः सः इति षष्ठ्यन्तमनुवर्तते। 'अपदान्तस्य मूर्धन्यः' इत्यतः मूर्धन्यः इति च। तदाह। **ह्रस्वादिण इति** ॥ **निष्ठ्य**

ह्रस्वादिणः परस्य सस्य षः स्यात्तादौ तद्धिते । निर्गतो वर्णाश्रमेभ्यो निष्ट्यश्चण्डालादिः । 'अरण्याण्णः' (वा २७८२) । आरण्याः सुमनसः । 'दूरादेत्यः' (वा २७८३) । दूरेत्यः । 'उत्तरादाहञ्' (वा २७४४) । औत्तराहः ।

१३२६ । ऐषमोह्यःश्वसोऽन्यतरस्याम् । (४-२-१०५)

एभ्यस्त्यब्वा । पक्षे वक्ष्यमाणौ टयुटयुलौ । ऐषमस्त्यम्—ऐषमस्तनम् । ह्यस्त्यम्—ह्यस्तनम् । श्वस्त्यम्—श्वस्तनम् । पक्षे शौवास्तिकं वक्ष्यते ।

१३२७ । तीररूपोत्तरपदादञ्ञ्यौ । (४-२-१०६)

यथासङ्ख्येन । काकतीरम् । पाल्वलतीरम् । शैवरूप्यम् । 'तीररूपान्तात्' इति नोक्तम् । बहुञ्पूर्वान्मा भूत् । बहुरूपम् ।

१३२८ । दिक्पूर्वपदादसंज्ञायां ञः । (४-२-१०७)

इति ॥ ल्यपि सस्य षत्वे तकारस्य ष्टुत्वेन टः । **अरण्याण्ण इति** ॥ वक्तव्य इति शेषः । **आरण्याः सुमनस इति** ॥ "स्त्रियः सुमनसः पुष्पम्" इत्यमरः । अरण्ये भवा इत्यर्थे णप्रत्यये टापि आरण्या इतिरूपम् । अणि तु ङीप स्यादिति भावः । **दूरादेत्य इति** ॥ वक्तव्य इति शेषः । **दूरेत्य इति** ॥ दूरादागतः, दूरे भव इति वार्थः । दूरादित्यव्ययात् एत्यप्रत्यये अव्ययानाम्भमात्र इति टिलोपः । **उत्तरादाहञिति** ॥ वाच्य इति शेषः । **औत्तराह इति** ॥ उत्तरस्मादागतः उत्तरस्मिन् भव इति वार्थः । औत्तरं इति त्वसाधु । **ऐषमोह्यः** ॥ **एभ्य इति** ॥ ऐषमस्, ह्यस्, श्वस्, एतेभ्य इत्यर्थः । **वक्ष्यमाणाविति** ॥ 'सायञ्चिरम्प्रगेप्राह्णेऽव्ययेभ्यष्ट्युटयुलौ तुट्च' इत्यनेनेति शेषः । **ऐषमस्त्यमिति** ॥ ऐषमस् इत्यव्ययः । वर्तमाने संवत्सरे वर्तते । तत्र भवमित्यर्थः । 'परुत्परार्यैषमोऽब्दे पूर्वे पूर्वतरे यति' इत्यमरः । **ऐषमस्तनमिति** ॥ ट्युटयुलौ वा । टावितौ, ष्वोरनादेशः, तस्य तुट्, ट इत्, उकार उच्चारणार्थः, टित्त्वादाद्यवयवः । **ह्यस्त्यं-ह्यस्तनमिति** ॥ ह्यस् इत्यव्ययं गतेऽह्नि । तत्र भवमित्यर्थः । **श्वस्त्यम्-श्वस्तनमिति** ॥ श्वस् इत्यव्ययमनागतेऽह्नि । तत्र भवमित्यर्थः । "ह्यो गतेनागतेऽह्नि श्वः" इत्यमरः । **पक्षे इति** ॥ 'श्वसस्तुट् च' इति टञि तस्य इकादेशे तुडागमे 'द्वारादीनाञ्च' इत्यैजागमे शौवस्तिकमित्यपि वक्ष्यमाणं रूपमित्यर्थः । **तीररूप** ॥ तीरोत्तरपदात् रूपोत्तरपदाच्च क्रमादञ्ञ्यश्चेत्यर्थः । **काकतीरमिति** ॥ काकतीरे भवमित्यर्थः । **पाल्वलतीरमिति** ॥ पल्वलतीरे भवमित्यर्थः । **शैवरूप्यमिति** ॥ शिवरूपे भवमित्यर्थः । रूप्योत्तरपदेति क्वचित्पाठः । तथा सति ञ्यप्रत्यये 'यस्येति च' इत्यकारलोपे द्वियकारं रूपम् । **बहुरूपमिति** ॥ 'निभाषा सुपो बहुच् पुरस्तात्तु' इति बहुपूर्वस्य रूपान्तत्वेऽपि तदुत्तरपदकत्वाभावान्न ञ्य इति भावः । **दिक्पूर्वपदात्** ॥ पञ्चम्यर्थे सप्तमी । असंज्ञाभूतात्

अणोऽपवादः। पौर्वशालः। 'असंज्ञायाम्' किम्। संज्ञाभूतायाः प्रकृतेर्मा भूत्। पूर्वेषुकामशम्यां भवः पूर्वेषुकामशमः। 'प्राचां ग्रामनगराणाम्। (सू १४००) इत्युत्तरपदवृद्धिः।

१३२९। मद्रेभ्योऽञ्। (४-२-१०८)

'दिक्पूर्वपदात्' इत्येव। 'दिशोऽमद्राणाम्' (सू १३९९) इति मद्रपर्युदासादादिवृद्धिः। पौर्वमद्रः। आपरमद्रः।

१३३०। उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात्। (४-२-१०९)

अञ् स्यात्। शैवपुरम्।

१३३१। प्रस्थोत्तरपदपलद्यादिकोपधादण्। (४-२-११०)

माहिकिप्रस्थः। पालदः। नैलीनकः।

१३३२। कण्वादिभ्यो गोत्रे। (४-२-१११)

एभ्यो गोत्रप्रत्ययान्तेभ्योऽण्स्यात्। कण्वो गर्गादिः। काण्वस्य छात्राः काण्वाः।

१३३३। इञश्च। (४-२-११२)

गोत्रे य इञ् तदन्तादण्स्यात्। दाक्षाः। 'गोत्रे' किम्। सौतङ्गमेरिदं सौतङ्गमीयम्। गोत्रमिह शास्त्रीयं, न तु लौकिकम्। 'तेनेह न' पाणिनीयम्।

दिक्पूर्वपदकात् अः स्यादित्यर्थः। **पौर्वशाल इति**॥ पूर्वस्यां शालायाम्भव इत्यर्थे 'तद्धितार्थे' इति समासान्तः अः। **मद्रेभ्योऽञ्। इत्येवेति**॥ दिक्पूर्वात् मद्रशब्दादञित्यर्थः। **पर्युदासादिति**॥ उत्तरपदवृद्धेः पर्युदासे सति आदिवृद्धिरित्यर्थः। बहुवचनाञ्जनपदवाचिन एव ग्रहणम्। **पौर्वमद्र इति**॥ पूर्वेषु मद्रेषु भव इत्यर्थः। **उदीच्यग्रामाच्च॥ शैवपुरमिति**॥ उत्तरदेशे शिवपुरनाम ग्रामविशेषः। तत्र भवमित्यर्थः। समासस्येत्यन्तोदात्तः शिवपुरशब्दः। बह्वचः किम्। ध्वजी नाम उत्तरदेशे ग्रामविशेषः। तत्र भवः ध्वाजः। अन्तोदात्तात्किम्। शार्कराधानम्। कृदुत्तरपदप्रकृतिस्वरेण लित्स्वरस्यैवावस्थानात् मध्योदात्तोऽयम्। **प्रस्थोत्तरपद**॥ प्रस्थोत्तरपदात् पलद्यादिभ्यः कोपधाच्च अणित्यर्थः। पलदिः आदिर्येषामिति विग्रहः। उदीच्यग्रामलक्षणस्य अञोऽपवादः। **माहिकिप्रस्थ इति**॥ महिकिप्रस्थनाम्नि ग्रामे भव इत्यर्थः। **पालद इति**॥ पलदीनाम्नि ग्रामे भव इत्यर्थः। **नैलीनक इति**॥ निलीनकनाम्नि ग्रामे भव इत्यर्थः। **कण्वादिभ्यो गोत्रे। काण्व्यस्येति**॥ कण्वस्य गोत्रापत्यङ्काण्व्यः। गर्गादियञ्। काण्व्यस्य छात्रा इत्यर्थे अनेन छापवादः अण्। 'यस्येति च' इत्यकारलोपः। 'आपत्यस्य च' इति यकारलोपः। काण्वा इति रूपम्। **इञश्च**॥ **दाक्षा इति**॥ दक्षस्य गोत्रापत्यं दाक्षिः। अत इञ्। दाक्षेः छात्रा इति विग्रहः। **सौतङ्गमेरिदमिति**॥ सुतङ्गमस्य निवासः सौतङ्गमिः। 'सुतङ्गमादिभ्य इञ्' सौतङ्गमेरिदमित्यर्थे वृद्धात् छः, न त्वण्, इञो गोत्रार्थकत्वाभावात्। **गोत्रमिह शास्त्रीयमिति**॥ अपत्याधिकारादन्यत्र यद्यपि

१३३४ । न द्यचः प्राच्यभरतेषु । (४-२-११३)

'इञश्च' (सू १३३३) इत्यणोऽपवादः । प्रौष्ठीयाः । काशीयाः । भरतानां प्राच्यत्वेऽपि पृथगुपादानम् अन्यत्र प्राच्यग्रहणे भरतानामग्रहणस्य लिङ्गम् ।

१३३५ । वृद्धिर्यस्याचामादिस्तद्वृद्धम् । (१-१-७३)

यस्य समुदायस्याचां मध्ये आदिर्वृद्धिस्तद्वृद्धसंज्ञं स्यात् ।

१३३६ । त्यदादीनि च । (१-१-७४)

वृद्धसंज्ञानि स्युः ।

१३३७ । वृद्धाच्छः । (४-२-११४)

शालीयः । मालीयः । तदीयः ।

१३३८ । एङ् प्राचां देशे । (१-१-७५)

एङ् यस्याचामादिस्तद्वृद्धसंज्ञं वा स्याद्देशाभिधाने । एणीपचनीयः । गोनर्दीयः । भोजकटीयः । पक्षेऽणि । ऐणीपचनः । गौनर्दः । भौजकटः । 'एङ्' किम् । आहिच्छत्रः । कान्यकुब्जः । 'वा नामधेयस्य वृद्धसंज्ञा वक्तव्या' (वा ५७६) । दैवदत्तः—दैवदत्तीयः ।

लौकिकमेव गोत्रमिति सिद्धान्तः । तथापि इह सूत्रद्वयेऽपि शास्त्रीयमेव गोत्रङ्गृह्यते । 'यूनि लुक्' इति सूत्रभाष्ये तथोक्तत्वादिति भावः । **पाणिनीयमिति** ॥ पणिनो गोत्रापत्यं पाणिनः । तस्यापत्यं युवा पाणिनिः । तस्येदम्पाणिनीयम् । वृद्धात् छः । पूर्वसूत्रद्वयेन अण् तु न । पाणिनिशब्दस्य युवप्रत्ययान्ततया उक्तत्वादिति भावः । **न द्यचः** ॥ प्राच्येषु परेषु भरतेषु च गोत्रेषु विद्यमानादिञन्तात् द्यचः अण् न भवतीत्यर्थः । **इञश्चेत्यणोऽपवाद इति** ॥ प्रतिषेध इत्यर्थः । **प्रौष्ठीया इति** ॥ प्रोष्ठस्य गोत्रापत्यम्प्रौष्ठिः, तस्य छात्रा इत्यर्थः । **काशीया इति** ॥ काशस्य गोत्रापत्यङ्काशिः, तस्य छात्रा इत्यर्थः । अणो निषेधे वृद्धात् छः । **लिङ्गमिति** ॥ तेन औद्दालकिः पिता, औद्दालकायनः पुत्रः इत्यत्र 'इञः प्राचाम्' इति भरतेभ्यो लुङ् न भवति । **वृद्धिर्यस्य** ॥ अचामिति बहुत्वमनेकत्वोपलक्षणम् । तेन शालाशब्दस्यापि वृद्धत्वं सिद्ध्यति । व्यपदेशिवत्त्वेन ज्ञाशब्दस्यापि वृद्धत्वम् । **त्यदादीनि च** ॥ शेषपूरणेन सूत्रं व्याचष्टे । **वृद्धसंज्ञानि स्युरिति** ॥ आदेरचो वृद्धिसंज्ञकत्वाभावादारम्भः । **वृद्धाच्छः** ॥ वृद्धसंज्ञकात् छः स्यात् जातादिष्वर्थेषु । अणोऽपवादः । **शालीय इति** ॥ शालायाञ्जात इत्यादीत्यर्थः । एवन्तदीयाः । **एङ् प्राचां देशे** ॥ देशविशेषनाम्नश्चेदेङादिरेव वृद्धसंज्ञक इति नियमार्थमिदम् । **वा नामधेयस्येति** ॥ रूढशब्दत्वमिह नामत्वम् । न त्वाधुनिकसङ्केतित्वमेव । तेन

१३३९। भवतष्ठक्छसौ। (४-२-११५)

वृद्धाद्भवत एतौ स्तः। भावत्कः। जश्त्वम्। भवदीयः। 'वृद्धात्' इत्यनुवृत्तेः शत्रन्तादणेव। भावतः।

१३४०। काश्यादिभ्यष्ठञ्ञिठौ। (४-२-११६)

इकार उच्चारणार्थः। काशिकी—काशिका। वैदिकी—वैदिका। 'आपदादि-पूर्वपदात् कालान्तात्' (ग सू ७४)। आपदादिराकृतिगणः। आपत्कालिकी—आपत्कालिका।

१३४१। बाहीकग्रामेभ्यश्च। (४-२-११७)

बाहीकग्रामवाचिभ्यो वृद्धेभ्यष्ठञ्ञिठौ स्तः। छस्यापवादः। कास्तीरं नाम बाहीकग्रामः। कास्तीरिकी—कास्तीरिका।

१३४२। विभाषोशीनरेषु। (४-२-११८)

एषु ये ग्रामास्तद्वाचिभ्यो वृद्धेभ्यष्ठञ्ञिठौ वा स्तः। सौदर्शनिकी—सौदर्शनिका—सौदर्शनीया।

घटीयमित्यादि सिद्धम्। **भवतष्ठक्छसौ** ॥ **भावत्क इति** ॥ 'इसुसुक्तान्तात्कः'। ननु भवच्छब्दाच्छस्य ईयादेशे सति भत्वेन पदत्वस्य बाधात्कथञ्चश्त्वमित्यत आह। **जश्त्वमिति** ॥ 'सिति च' इति पदत्वेन भत्वस्य बाधादिति भावः। ननु भावत इति कथमण्प्रत्ययः। 'त्यदादीनि च' इति भवच्छब्दस्य वृद्धतया छस्यैव युक्तत्वादित्यत आह। **वृद्धादित्यनुवृत्तेश्शत्रन्तादणेवेति** ॥ त्यदादिषु 'भातेर्डवतुः' इति डवत्वन्तस्यैव पाठादिति भावः। **काश्यादिभ्यष्ठञ्ञिठौ** ॥ ठञ् ञिठ इति प्रत्ययौ स्तः। ञिठप्रत्यये ञि इति समुदायस्य 'आदिर्ञिटुडवः' इति इत्संज्ञायाम्प्रयोगाभावात् ञकार एव इत् तस्य ञित्स्वरः प्रयोजनम्। ठञ एव विधौ तु ङीप् स्यात्, टाप् न स्यात्। नन्वेवं सति इठप्रत्यये ठस्य इकादेशो न स्यात्। अङ्गात्परत्वाभावादित्यत आह। **इकार उच्चारणार्थ इति** ॥ **काशिकीति** ॥ काश्याज्ञाता-दिरित्यर्थः। ठञन्तात् ङीप्। **काशिकेति**॥ ञिठप्रत्यये इकादेशे टाप्। **वैदिकी-वैदिकेति** ॥ चेदिर्देशविशेषः। **आपदादिपूर्वपदात्कालान्तादिति** ॥ गणसूत्रम्। ठञ्ञिठा-वित्येव। **आपदादिरिति** ॥ आपत आदिर्यस्येति विग्रहः। **आपत्कालिकी-आपत्कालिकेति** ॥ ठञि ङीप्, ञिठे टाप्। **बाहीकग्रामेभ्यश्च** ॥ बाहीकाख्याः केचिद्ग्रामाः तद्विशेषवाचिभ्य इत्यर्थः। तदाह। **बाहीकग्रामवाचिभ्य इति** ॥ **विभाषोशीनरेषु**॥ पूर्वसूत्रे समस्तानिर्देशेऽपि ग्रामेभ्य इत्यनुवर्तते। एकदेशे स्वरितत्वप्रतिज्ञानात्। तदाह। **एषु ये ग्रामा इति** ॥ उशीनरेषु ये ग्रामास्तद्विशेषवाचिभ्यः इत्यर्थः। सौदर्शनो नाम

१३४३ । ओर्देशे ठञ् । (४-२-११९)

उवर्णान्तादेशवाचिनष्ठञ् । निषादकर्पूः । नैषादकर्पुकः । 'केऽणः' (सू ८३४) इति ह्रस्वः । 'देशे' किम् । पटोरिच्छात्राः । पाटवाः । बिठं व्यावर्तयितुं ठञ्ग्रहणम् । वृद्धाच्छं परत्वादयं बाधते । दाक्षिकर्षुकः ।

१३४४ । वृद्धात्प्राचाम् । (४-२-१२०)

प्राग्देशवाचिनो वृद्धादेवेति नियमार्थं सूत्रम् । आढकजम्बुकः । शाकजम्बुकः । नेह । मल्लवास्तु माल्लवान्तवः ।

१३४५ । धन्वयोपधाद्वुञ् । (४-२-१२१)

धन्वविशेषवाचिनो यकारोपधाच्च देशवाचिनो वृद्धाद्वुञ् स्यात् । ऐरावतं धन्व, ऐरावतकः । साङ्काश्यकाम्पिल्यशब्दौ 'वुञ्छण्—' (सू १२९२) आदिसूत्रेण ण्यान्तौ । साङ्काश्यकः । काम्पिल्यकः ।

१३४६ । प्रस्थपुरवहान्ताच्च । (४-२-१२२)

एतदन्ताद्वृद्धादेशवाचिनो वुञ्स्यात् । छस्यापवादः । मालाप्रस्थकः । नान्दीपुरकः । पैलुवहकः । पुरान्तग्रहणमप्रागर्थम् । प्राग्देशेनूत्तरेण सिद्धम् ।

१३४७ । रोपधेतोः प्राचाम् । (४-२-१२३)

उशीनरदेशे कश्चिद्ग्रामः । **सौदर्शनीया** इति ॥ ठञ्निवृत्त्यभावे वृद्धाच्छः । **ओर्देशे ठञ् ॥ निषादकर्पूरिति ॥** कश्चिद्ग्राम इति शेषः । **नैषादकर्पुक इति ॥** उगन्तात्परत्वात् कादेशः । **वृद्धात्प्राचाम् ॥** 'ओर्देशे ठञ्' इत्यनुवर्तते । प्राचामिति देशविशेषणम् । नतु विकल्पार्थं व्याख्यानात् । पूर्वेण सिद्धे नियमार्थमिदम् । तदाह । **प्राग्देशेत्यादिना ॥ आढकजम्बुक इति ॥** आढकजम्बुर्नाम कश्चिद्ग्रामः । तत्र भव इत्यर्थः । उगन्तात्परत्वात् ठस्य कः । 'केऽणः' इति ह्रस्वः । एवं शाकजम्बुकः । **मल्लवास्त्विति ॥** कश्चित् प्राच्यो ग्राम इति शेषः । **धन्वयोपधाद्वुञ् ॥ ऐरावतं धन्वेति ॥** ऐरावताख्यन्धन्वेत्यर्थः । धन्व मरुप्रदेशः । "समानौ मरुधन्वानौ" इत्यमरः । आष्टकन्नाम धन्व इति भाष्यान्नपुंसकत्वमपि । **ऐराधतक इति ॥** ऐरावताख्ये मरुप्रदेशे भव इत्यर्थः । वुञ्, अकादेशः । **साङ्काश्यकः । काम्पिल्यक इति ॥** साङ्काश्ये काम्पिल्ये च भव इत्यर्थः । **प्रस्थपुरवहान्ताच्च ॥ एतदन्तादिति ॥** प्रस्थ, पुर, वह, एतदन्तादित्यर्थः । ननु पुरान्तग्रहणं व्यर्थम् । नान्दीपुरक इत्यत्र 'रोपधेतोः प्राचाम्' इत्युत्तरसूत्रेण सिद्धत्वादित्यत आह । **पुरान्तेति ॥ रोपधेतोः प्राचाम् ॥** रोपधश्च, ईच्च, तयोरिति द्वन्द्वः । षष्ठी पञ्चम्यर्थे । प्राचामिति देशविशेषणम् । तदाह ।

रोपधादीकारान्ताच्च प्राग्देशवचिनश्च वृद्धाद्वुञ्स्यात्। पाटलिपुत्रकः। ईतः काकन्दकः।

१३४८। जनपदतदवध्योश्च। (४-२-१२४)

जनपदवाचिनस्तदवधिवाचिनश्च वृद्धाद्वुञ्स्यात्। आदर्शकः। त्रैगर्तकः।

१३४९। अवृद्धादपि बहुवचनविषयात्। (४-२-१२५)

अवृद्धाद्वृद्धाच्च जनपदतदवधिवाचिनो बहुवचनविषयात्प्रातिपदिकाद्वुञ्स्यात्। अवृद्धादणो वृद्धाच्छस्यापवादः। अवृद्धाज्जनपदात्, आञ्जकः। अवृद्धाज्जनपदावधेः, आजमीढकः। वृद्धाज्जनपदात्, दार्वकः। वृद्धाज्जनपदावधेः, कालञ्जरकः। 'विषयग्रहणं' किम्। एकशेषेण बहुत्वे मा भूत्। वर्तनी च वर्तनी च वर्तनी च वर्तन्यः। तासु भवो वार्तनः।

१३५०। कच्छाग्निवक्त्रवर्तोत्तरपदात्। (४-२-१२६)

देशवाचिनो वृद्धादवृद्धाच्च वुञ्स्यात्। दारुकच्छकः। काण्डाग्नकः। सैन्धुवक्त्रकः। बाहुवर्तकः।

१३५१। धूमादिभ्यश्च। (४-२-१२७)

देशवाचिभ्यो वुञ्। धौमकः। तैर्थकः।

१३५२। नगरात्कुत्सनप्रावीण्ययोः। (४-२-१२८)

रोपधादित्यादिना ॥ **ईत इति** ॥ उदाहियते इति शेषः। **काकन्दक इति** ॥ काकन्दीनाम देशः, तत्र भव इत्यर्थः। **जनपदतदवध्योश्च** ॥ **आदर्शक इति** ॥ आदर्शो नाम जनपदः। तत्र भव इत्यर्थः। त्रिगर्तो नाम जनपदविशेषस्यावधिः। जनपदत्वेन सिद्धावपि त्रिगर्तशब्दे परमपि गर्तोत्तपदाच्छं बाधितुमिह तदवधिग्रहणम्। तदाह। **त्रैगर्तक इति** ॥ **अवृद्धादपि बहुवचनविषयात्** ॥ **अवृद्धाज्जनपदादिति** ॥ उदाहियते इति शेषः। **आजमीढक इति** ॥ अजमीढेषु भव इत्यर्थः। अजमीढाख्यः जनपदः कस्यचिज्जनपदस्य.वधिः। **वृद्धाज्जनपदादिति** ॥ उदाहियत इति शेषः। **दार्वक इति** ॥ बहुवचनान्तो जनपदविशेषे वर्तते। तत्र भव इत्यर्थः। **कालञ्जरक इति** ॥ कलञ्जरेषु भव इत्यर्थः। **कच्छाग्नि** ॥ कच्छ, अग्नि, वक्त्र, वर्त, एतदुत्तरपदादित्यर्थः। शेषपूरणेन सूत्रं व्याचष्टे। **देशवाचिन इति** ॥ छाणोरपवादः। **दारुकच्छक इति** ॥ दारुकच्छे भव इत्यर्थः। **काण्डाग्निक इति** ॥ काण्डाग्नौ भव इत्यर्थः। अकादेशे 'यस्येति च' इति इकारलोपः। **सैन्धुवक्रक इति** ॥ सिन्धुवक्रे भव इत्यर्थः। **बाहुवर्तक इति** ॥ बहुवर्ते भव इत्यर्थः। **धूमादिभ्यश्च** ॥ देशवाचिनो वुञिति शेषपूरणम्। **नगरात्कुत्सन** ॥ **नागराः**

नगरशब्दाद्वुञ्स्यात्कुत्सने प्रावीण्ये च गम्ये । नागरकश्चौरः शिल्पी वा । 'कुत्सने–' इति किम् । नागराः ब्राह्मणाः ।

१३५३ । अरण्यान्मनुष्ये । (४-२-१२९)

वुञ् । 'अरण्याण्णः' (वा २७८२) इत्यस्यापवादः । 'पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वाच्यम्' (वा २८१९) । आरण्यकः पन्थाः अध्यायो न्यायो विहारो मनुष्यो हस्ती वा । 'वा गोमयेषु' (वा २८२०) । आरण्यकाः–आरण्याः वा गोमयाः ।

१३५४ । विभाषा कुरुयुगन्धराभ्याम् । (४-२-१३०)

वुञ् । कौरवकः–कौरवः । यौगन्धरकः–यौगन्धरः ।

१३५५ । मद्रवृज्योः कन् । (४-२-१३१)

जनपदवुञोऽपवादः । मद्रेषु जातो मद्रकः । वृजिकः ।

१३५६ । कोपधादण् । (४-२-१३२)

माहिषिकः ।

१३५७ । कच्छादिभ्यश्च । (४-२-१३३)

देशवाचिभ्योऽण् । वुञादेरपवादः । काच्छः । सैन्धवः ।

१३५८ । मनुष्यतत्स्थयोर्वुञ् । (४-२-१३४)

कच्छाद्यणोऽपवादः । कच्छे जातादिः काच्छको मनुष्यः । काच्छकं हसितम् । 'मनुष्य–' इति किम् । काच्छो गौः ।

ब्राह्मणा इति ॥ कन्यादिषु माहिष्मतीसाहचर्येण संज्ञाभूतस्यैव नगरशब्दस्य ग्रहणम् । अतो न ढकञ् । 'प्राचां ग्रामनगराणाम्' इति सूत्रभाष्ये नागर इत्युदाहरणात् । **अरण्यान्मनुष्ये** ॥ **आरण्यक इति** ॥ पन्थाः अध्यायः विहारः मनुष्यः हस्ती वा । **वा गोमयेष्विति** ॥ वार्तिकमिदम् । **विभाषा कुरु** ॥ कुरुयुगन्धरौ जनपदौ । अवृद्धावपि ताभ्याम् 'अवृद्धादपि' इति नित्यप्राप्ते विकल्पः । **मद्रवृज्योः कन्** ॥ मद्रो वृजिश्च जनपदविशेषः । जनपदवुञोऽपवादः । **कोपधादण्** ॥ **माहिषिक इति** ॥ महिषको नाम जनपदः, तत्र भव इत्यर्थः । 'प्रस्थोत्तरपद' इत्यादिना सिद्धे जनपदवुञ्बाधनार्थमिदम् । **कच्छादिभ्यश्च** ॥ **काच्छा इति** ॥ अत्र वुञोऽपवादोऽण् । **सैन्धव इति** ॥ ओर्देशे ठञोऽपवादः । **मनुष्यतत्स्थयोर्वुञ्** ॥ कच्छादिभ्यः इत्यनुवर्तते । तदाह । **कच्छादीति** ॥ **अपदातौ**

१३५९। अपदातौ साल्वात्। (४-२-१३५)

साल्वशब्दस्य कच्छादित्वाद्बुञि सिद्धे नियमार्थमिदम्। अपदातावेवेति। साल्वको ब्राह्मणः। 'अपदातौ' किम्। साल्वः पदातिर्व्रजति।

१३६०। गोयवाग्वोश्च। (४-२-१३६)

साल्वाद्बुञ्। कच्छाद्यणोऽपवादः। साल्वको गौः—साल्विका यवागूः—साल्वमन्यत्।

१३६१। गर्तोत्तरपदाच्छः। (४-२-१३७)

देशे। अणोऽपवादः। वृकगर्तीयम्। उत्तरपदग्रहणं बहुच्पूर्वनिरासार्थम्।

१३६२। गहादिभ्यश्च। (४-२-१३८)

छः स्यात्। गहीयः। 'मुखपार्श्वतसोर्लोपश्च' (ग सू ७८)। मुखतीयम्। पार्श्वतीयम्। अव्ययानां भमात्रे टिलोपस्यानित्यतां ज्ञापयितुमिदम्। 'कुग्जनस्य परस्य च' (ग सू ८९)। जनकीयम्। परकीयम्। 'देवस्य च' (ग सू ९०)। देवकीयम्। स्वस्य च *स्वकीयम्। 'वेणुकादिभ्यश्छण्वाच्यः' (ग सू ९१)। वैणुकीयम्। वैत्रकीयम्। औत्तरपदकीयम्।

१३६३। प्राचां कटादेः। (४-२-१३९)

प्राग्देशवाचिनः कटादेश्छः स्यात्। अणोऽपवादः कटनगरीयम्। कटघोषीयम्। कटपल्वलीयम्।

साल्वात् ॥ **नियमार्थमिति** ॥ साल्वाच्चेदपदातावेवेति नियमार्थमित्यर्थः। **गोयवाग्वोश्च** ॥ जातत्वादिना विवक्षितयोरित्यर्थः। **गर्तोत्तरपदाच्छः** ॥ **देशे इति** ॥ शेषपूरणम्। देशवाचिन इति यावत्। **वृकगर्तीयमिति** ॥ वृकगर्तो नाम देशः। तत्र भव इत्यर्थः। ननु गर्ताच्छः, इत्येतावतैव केवलगर्तशब्दस्य देशवाचित्वाभावात् 'गर्तोत्तरपदात्' इति सिद्धे उत्तरपदग्रहणं व्यर्थमित्यत आह। **उत्तरपदग्रहणमिति** ॥ **गहादिभ्यश्च** ॥ **गहीय इति** ॥ गहो देशविशेषः। **मुखपार्श्वेति** ॥ गहादिगणसूत्रम्। मुखपार्श्वेति लुप्तषष्ठीकम्पदम्। तसन्तयोरेतयोरन्त्यस्य लोपश्च। चाच्छः। असम्भवादत्र जनपदस्येति न सम्बध्यते। **कुग्जनस्येति** ॥ गणसूत्रमिदम्। जनशब्दस्य परशब्दस्य च कुगागमः स्यात्। चाच्छः। अत्रापि देश इति न सम्बध्यते। **देवस्यच** ॥ इदमपि गणसूत्रम्। चात्कुक् छश्च 'देवाद्यञञौ' इत्यस्यापवादः। दैवानुग्रह इति भाष्यप्रयोगाद्दैवमित्यपि साधु। **स्वकीयमिति** ॥ गहादित्वाच्छः कुक्च। स्वशब्दोऽपि गहादिः, आगमशास्त्रस्यानित्यत्वात् स्वीयम्। **प्राचाङ्कटादेः** ॥ **कटनगरीयमिति** ॥

---

* स्वार्थिककन्नन्तात्स्वशब्दाद्गहादेराकृतिगणत्वाच्छः—इति मनोरमातत्त्वबोधिन्यौ।

१३६४ । राज्ञः क च । (४-२-१४०)

वृद्धत्वाच्छे सिद्धे तत्सन्नियोगेन कादेशमात्रं विधीयते । राजकीयम् ।

१३६५ । वृद्धादकेकान्तखोपधात् । (४-२-१४१)

'अक' 'इक' एतदन्तात्खोपधाच्च वृद्धादेशवाचिनः छः स्यात् । ब्राह्मणको नाम जनपदः यत्र ब्राह्मणा आयुधजीविनस्तत्र जातो ब्राह्मणकीयः । शाल्मलिकीयः । अयोमुखीयः ।

१३६६ । कन्थापलदनगरग्रामह्रदोत्तरपदात् । (४-२-१४२)

कन्थादिपञ्चकोत्तरपदादेशवाचिनो वृद्धाच्छः स्यात् । ठञ्ञिठादेरपवादः । दाक्षिकन्थीयम् । दाक्षिपलदीयम् । दाक्षिनगरीयम् । दाक्षिग्रामीयम् । दाक्षिह्रदीयम् ।

१३६७ । पर्वताच्च । (४-२-१४३)

पर्वतीयः ।

१३६८ । विभाषा मनुष्ये । (४-२-१४४)

मनुष्यभिन्नेऽर्थे पर्वताच्छो वा स्यात् । पक्षेऽण् । पर्वतीयानि—पार्वतानि वा फलानि । 'अमनुष्ये' किम् । पर्वतीयो मनुष्यः ।

१३६९ । कृकणपर्णाद्भारद्वाजे । (४-२-१४५)

भारद्वाजदेशवाचिभ्यामाभ्यां छः । कृकर्णीयम् । पर्णीयम् । 'भारद्वाजे' किम् । कार्कणम् । पार्णम् ।

इति चतुर्थस्य द्वितीयः पादः ।

कटनगरो नाम प्राच्यो देशः । **राज्ञः क च** ॥ राजन्शब्दात् छः स्यात्, ककारश्चान्तादेशः । **वृद्धादकेकान्तखोपधात् । ब्राह्मणकीय इति** ॥ कोपधाणोऽपवादः छः । **शाल्मलिकीय इति** ॥ शाल्मलकिर्नाम देशः । तत्र भव इत्यर्थः । इकान्तोदाहरणमिदम् । कोपधाणपवादः । **अयोमुखीय इति** ॥ 'बाह्लीकग्रामेभ्यश्च' इति ठञ्ञिठोरपवादः छण् । **कन्थापलद** ॥ **ठञ्ञिठादेरपवाद इति** ॥ नगरान्ते 'रोपधेतोः' इति वुञोऽपवादः । इतरत्र 'बाह्लीकग्रामेभ्यश्च' इति ठञ्ञिठोरपवाद इति विवेकः । **पर्वताच्च** ॥ इत्यादि स्पष्टम् ॥

इति चतुर्थस्य द्वितीयः पादः ।

अथ चतुर्थस्य तृतीयः पादः।

१३७०। युष्मदस्मदोरन्यतरस्यां खञ्च। (४-३-१)

चाच्छः। पक्षेऽण्। युवयोः युष्माकं वा अयं युष्मदीयः। अस्मदीयः।

१३७१। तस्मिन्नणि च युष्माकास्माकौ। (४-३-२)

युष्मदस्मदोरेतावादेशौ स्तः खञ्यणि च। यौष्माकीणः। आस्माकीनः। यौष्माकः। आस्माकः।

१३७२। तवकममकावेकवचने। (४-३-३)

एकार्थवाचिनोर्युष्मदस्मदोस्तवकममकौ स्तः खञ्यणि च। तावकीनः—तावकः। मामकीनः—मामकः। छे तु।

१३७३। प्रत्ययोत्तरपदयोश्च। (७-२-९८)

मपर्यन्तयोरेकार्थयोस्त्वमौ स्तः प्रत्यये उत्तरपदे च। त्वदीयः। मदीयः। उत्तरपदे तु, त्वत्पुत्रः। मत्पुत्रः।

अथ चतुर्थस्य तृतीयः पादः प्रारभ्यते॥ **युष्मदस्मदोरन्यतरस्याञ्ञस् च**॥ युष्मदस्मच्छब्दयोरिह शब्दस्वरूपपरत्वात् 'त्यदादीनि सर्वैर्नित्यम्' इत्येकशेषो न भवति। पञ्चम्यर्थे षष्ठी। युष्मच्छब्दादस्मच्छब्दाच्च जाताद्यर्थेषु खञ् स्यादित्यर्थः। चाच्छः। गतोत्तरपदादित्यधिकृतः छः चकारेण समुच्चीयते इत्यर्थः। **पक्षेऽणिति**॥ अन्यतरस्याञ्ग्रहणादिति भावः। अत्र युष्मदस्मदोः, इति योगो विभज्यते। आभ्याञ्छो भवतीत्यर्थः। खञ्च, इति योगान्तरम्। आभ्यां खञ् च भवतीत्यर्थः। अन्यतरस्यामिति योगान्तरम्। आभ्याञ्छखौ वा स्तः पक्षेऽणिति। अतो न यथासङ्ख्यमिति भाष्ये स्पष्टम्। **युष्मदीय इति**॥ द्विवचनान्ताद्बहुवचनान्ताच्च इयादेशः। सुब्लुकि युवादेशस्य निवृत्तिः। तस्य विभक्तौ परे विधानात्। प्रकृत्यर्थैकत्वे विभक्तेर्लुप्तत्वेऽपि त्वादेशो वक्ष्यते। **अस्मदीय इति**॥ आवयोरस्माकं वा अयमित्यर्थः। अथ खञि अणि च विशेषमाह। **तस्मिन्नणि च**॥ पूर्वसूत्रे निर्दिष्टः खञ् तच्छब्देन परामृश्यते। तदाह। **खञि अणि चेति**॥ अत्र स्थानिनोरादेशयोश्च यथासङ्ख्यम्, न तु परनिमित्तयोः। तस्मिन्नणि, इति व्यस्तनिर्देशात्। **यौष्माकीण इति**॥ युवयोर्युष्माकं वा अयमिति विग्रहः। खञ्, ईनादेशः, युष्माकादेशः, आदिवृद्धिः, णत्वं, सुब्लुकि युवादेशनिवृत्तिः। **आस्माकीन इति**॥ आवयोरस्माकं वा अयमिति विग्रहः। अणि उदाहरति। **यौष्माकः, आस्माकः इति**॥ **तवकममकौ**॥ एकवचने इति युष्मदस्मदोः प्रकृत्योर्विशेषणम्। एकस्य वचनम्—उक्तिः एकवचनम्। एकस्योक्तौ व्याप्रियमाणयोरिति लभ्यते। तदाह। **एकार्थवाचिनोरिति**॥ **छे त्विति**॥ एकार्थवृत्तयोर्विशेषो वक्ष्यते इति शेषः। **प्रत्ययोत्तरपदयोश्च**॥ सामान्यमिदम्। त्वमावेकवचने इत्यनुवर्तते। 'युष्मदस्मदोरनादेशे' इत्यतो युष्मदस्मदोरित्यनुवर्तते। मपर्यन्तस्येत्यधिकृतम्। तदाह। **मपर्यन्तयोरित्यादि**॥ **त्वदीयः। मदीयः इति**॥

१३७४ । अर्धाद्यत् । (४-३-४)

अर्ध्यः ।

१३७५ । परावराधमोत्तमपूर्वाच्च । (४-३-५)

परार्ध्यम् । अवरार्ध्यम् । अधमार्ध्यम् । उत्तमार्ध्यम् ।

१३७६ । दिक्पूर्वपदाट्ठञ्च । (४-३-६)

चाद्यत् । पौर्वार्धिकम्—पूर्वार्ध्यम् ।

१३७७ । ग्रामजनपदैकदेशादञ्ठञौ । (४-३-७)

ग्रामैकदेशवाचिनो जनपदैकदेशवाचिनश्च दिक्पूर्वपदादर्धान्तादञ्ठञौ स्तः । इमे अस्माकं ग्रामस्य जनपदस्य वा पौर्वार्धाः—पौर्वार्धिकाः । ग्रामस्य पूर्वस्मिन्नर्धे भवाः इति तद्धितार्थे समासः । ठञ्ग्रहणं स्पष्टार्थम् । अञ्चेत्युक्तेर्यतोऽप्यनुकर्षः सम्भाव्येत ।

१३७८ । मध्यान्मः । (४-३-८)

मध्यमः ।

१३७९ । अ सांप्रतिके । (४-३-९)

मध्यशब्दादकारप्रत्ययः स्यात्साम्प्रतिकेऽर्थे । उत्कर्षापकर्षहीनो मध्यो वैयाकरणः । मध्यं दारु । नातिह्रस्वं नातिदीर्घमित्यर्थः ।

छे सुब्लुकि तवममयोर्निवृत्तौ मपर्यन्तयोः त्वदिति मदिति च आदेशौ । विभक्तिपरकत्वाभावान्न शेषे लोपः । उत्तरपदे तु परे त्वत्पुत्रो मत्पुत्रः इत्युदाहरणम् । **अर्धाद्यत्** ॥ **अर्ध्य इति** ॥ अर्धे जातादिरित्यर्थः । 'सपूर्वपदाट्ठञ् वाच्यः' इति वार्तिकं भाष्ये स्थितम् । बालेयार्धिकः । **परावर** ॥ अर्धाद्यदिति शेषः । अवरशब्दो दन्तोष्ठ्यवकारमध्यः । **दिक्पूर्वपदाट्ठञ् च** ॥ अर्धादित्येव । परावरपूर्वार्धशब्दात्पूर्वसूत्रेण यदेव विशिष्य विहितत्वात् । **ग्रामजनपद** ॥ ननु अञि चेत्येतावतैव चकारात् ठञोऽनुकर्षसिद्धेः ठञ्ग्रहणं व्यर्थमित्यत आह । **ठञ्ग्रहणमिति** ॥ ननु अञि चेत्युक्तेऽपि चकाराट्ठञोऽनुकर्षः स्पष्ट एवेत्यत आह । **अञ् चेत्युक्तेरित्यादि** ॥ **मध्यान्मः** ॥ स्पष्टम् । **अ साम्प्रतिके** ॥ अ इति लुप्तप्रथमाकम् । मध्यादित्यनुवर्तते । तदाह । **मध्यशब्दादित्यादि** ॥ सम्प्रतीत्यव्ययम् । उत्कर्षापकर्षहीनत्वात्मकसाम्ये वर्तते । तैत्तिरीये "अनाप्तश्चतूरात्रोऽतिरिक्तः षड्रात्रोऽथवा एष सम्प्रति यज्ञो यत्पञ्चरात्रः" इत्यत्र तथा दर्शनात् । पञ्चरात्रः न न्यूनः नाप्यतिरिक्तः, सम इत्यर्थः । सम्प्रतिशब्दात् स्वार्थे विनयादित्वाट्ठञि साम्प्रतिकम् । प्रज्ञादित्वात् स्वार्थे अणि तु साम्प्रतमित्यपि भवति । 'एतर्हि सम्प्रतीति' इति कोशादिदानीमित्यर्थेऽपि । प्रकृते तु साम्यं विवक्षितम् ।

१३८०। द्वीपादनुसमुद्रं यञ्। (४-३-१०)

समुद्रस्य समीपे यो द्वीपस्तद्विषयाद्द्वीपशब्दाद्यञ्स्यात्। द्वैप्यम्—द्वैप्या।

१३८१। कालाट्ठञ्। (४-३-११)

कालवाचिभ्यष्ठञ् स्यात्। मासिकम्। सांवत्सरिकम्। सायम्प्रातिकः। पौनःपुनिकः। कथं तर्हि 'शार्वरस्य तमसो निषिद्धये' इति कालिदासः। 'अनुदितौषसरागा' इति भारविः। समानकालीनं, प्राक्कालीनमित्यादि च। 'अपभ्रंशा एवैते' इति प्रामाणिकाः। 'तत्र जातः' (सू १३९३) इति यावत्कालाधिकारः।

१३८२। श्राद्धे शरदः। (४-३-१२)

ठञ् स्यात्। ऋत्वणोऽपवादः। शारदिकं श्राद्धम्।

१३८३। विभाषा रोगातपयोः। (४-३-१३)

शारदिकः—शारदो वा रोगः आतपो वा। 'एतयोः' किम्। शारदं दधि।

१३८४। निशाप्रदोषाभ्यां च। (४-३-१४)

वा ठञ्स्यात्। नैशिकम्—नैशम्। प्रादोषिकम्—प्रादोषम्।

द्वीपादनु॥ अनुसमुद्रमिति सामीप्ये अव्ययीभावः। अनुसमुद्रमिति सप्तम्यन्तम्, विद्यमानादित्यध्याहार्यम्। तदाह। **समुद्रस्य समीपे इति॥ द्वैप्येति॥** 'यञश्च' इति ङीप् तु न। अनपत्याधिकारस्थात् नेति तन्निषेधात्। **कालाट्ठञ्॥** "कालशब्दस्यैव न ग्रहणम्। किन्तु कालशब्दस्य कालविशेषवाचकानाञ्च ग्रहणम्" इति 'तदस्य परिमाणम्, सङ्ख्यायाः' इति सूत्रभाष्ये स्पष्टम्। तदाह। **कालवाचिभ्य इति॥ सायम्प्रातिकः, पौनःपुनिक इति॥** 'अव्ययानाम्भमात्रे' इति टिलोपः। 'सायञ्चिरम्' इति ट्युटयुलौ तु न भवतः। 'नस्तद्धिते' इति सूत्रभाष्ये तथाप्रयोगदर्शनात्। **शार्वरस्येति॥** शार्वरिकस्येति भाव्यमिति भावः। **अनुदितौषसेति॥** औषसिकेति भाव्यमिति भावः। **समानेति॥** समानकालिकं प्राक्कालिकमिति भाव्यमित्यर्थः। **प्रामाणिकाः इति॥** केचित्तु अमुकः पुरतः परेद्युरित्यादिवत् एतेऽपि शब्दाः अव्युत्पन्नाः, पृषोदरादयो वा साधवः इत्याहुः। **इति यावदिति॥** व्याख्यानादिति भावः। **श्राद्धे शरदः॥ ठञ् स्यादिति॥** शेषपूरणमिदम्। ननु 'कालाट्ठञ्' इत्येव सिद्धे किमर्थमिदमित्यत आह। **ऋत्वण इति॥** 'सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्' इति वक्ष्यमाणस्येत्यर्थः। **शारदिकमिति॥** शरदि ऋतौ भवमित्यर्थः। शरच्छब्दस्य संवत्सरवाचित्वे तु पूर्वेणैव सिद्धम्। **विभाषा रोगातपयोः॥** ठञिति शरद इति चानुवर्तते। **शारदं दधीति॥** ऋत्वणिति भावः। **निशाप्रदोषाभ्याञ्च॥ वा ठञ् स्यादिति॥** शेषपूरणम्। 'कालाट्ठञ्' इति नित्यं

१३८५ । श्वसस्तुट् च । (४-३-१५)

श्वस्शब्दाट्ठञ्वा स्यात् । तस्य तुडागमश्च ।

१३८६ । द्वारादीनां च । (७-३-४)

द्वार, स्वर, स्वाध्याय, व्यल्कश, स्वस्ति, स्वर्, स्फ्यकृत्, स्वादु, मृदु, श्वस्, श्वन्, स्व, एषां न वृद्धिरैजागमश्च । शौवस्तिकम् ।

१३८७ । सन्धिवेलाद्यृतुनक्षत्रेऽभ्योऽण् । (४-३-१६)

सन्धिवेलादिभ्यः ऋतुभ्यो नक्षत्रेभ्यश्च कालवृत्तिभ्योऽण्स्यात् । सन्धिवेलायां भवं सान्धिवेलम् । ग्रैष्मम् । तैषम । सन्धिवेला, सन्ध्या, अमावस्या, त्रयोदशी, चतुर्दशी, पौर्णमासी, प्रतिपत् । 'संवत्सरात्फलपर्वणोः' (ग सू ९२) । सांवत्सरं फलं, पर्व वा । सांवत्सरिकमन्यत् ।

१३८८ । प्रावृष एण्यः । (४-३-१७)

प्रावृषेण्यः ।

१३८९ । वर्षाभ्यष्ठक् । (४-३-१८)

वर्षासु साधु वार्षिकं वासः । 'कालात्साधुपुष्यत्पच्यमानेषु' (सू १४१८) इति साध्वर्थे ।

प्राप्ते विकल्पोऽयम् । **श्वसस्तुट् च** ॥ **तस्येति** ॥ प्रत्ययस्येत्यर्थः । तुटि टकार इत् । उकार उच्चारणार्थः । **द्वारादीनाञ्च** ॥ 'न य्वाभ्याम्' इति सूत्रम्पदान्ताभ्यामिति वर्जम् अनुवर्तते, 'मृजेर्वृद्धिः' इत्यतो वृद्धिरिति च । तदाह । **एषान्न वृद्धिरैजागमश्चेति** ॥ द्वारादीनान्नादिवृद्धिः, किन्तु यकारवकाराभ्याम्पूर्वौ ऐजागमौ स्त इत्यर्थः । अत्र यकारवकारयोरपदान्तत्वात् 'नय्वाभ्याम्पदान्ताभ्याम्' इत्यप्राप्ते वचनमिदम् । **शौवस्तिकमिति** ॥ श्वसः इत्यव्ययात् जाताद्यर्थे ठञि इकादेशे तुडागमे वकारात्पूर्वमैजागमेन औकारः । अकारस्य न वृद्धिः । **सन्धिवेला** ॥ **कालवृत्तिभ्य इति** ॥ 'कालाट्ठञ्' इत्यतस्तदनुवृत्तेरिति भावः । ठञोऽपवादः । **तैषमिति** ॥ तिष्ये भवादित्यर्थः । 'तिष्यपुष्ययोर्नक्षत्राणि' इति यलोपः । तिष्ये जातः इत्यर्थे 'श्रविष्ठाफल्गुनी' इति लुग्वक्ष्यते । सन्धिवेलादिगणम्पठति । **सन्धिवेलेत्यादि** ॥ **संवत्सरात्फलपर्वणोरिति** ॥ गणसूत्रमिदम् । **प्रावृष एण्यः** ॥ ऋत्वणोऽपवादः । **प्रावृषेण्य इति** ॥ प्रावृट् वर्षर्तुः । तत्र भवादिरित्यर्थः । जाते तु ठप् वक्ष्यते । प्रक्रियालाघवार्थं णकारोच्चारणम् । **वर्षाभ्यष्ठक्** ॥ तृतीयतौ वर्षाशब्दौ नित्यम्बहुवचनान्तः । 'अप्सुमनःसमासिकतावर्षाणाम्बहुत्वम्' इति लिङ्गानुशासनसूत्रात् । "स्त्रियाम्प्रावृट् स्त्रियाम्भूम्नि वर्षाः" इत्यमरः । वर्षाशब्दाज्जाताद्यर्थे ठगित्यर्थः । **वर्षासु साध्विति** ॥ हितकारीत्यर्थः । ननु 'तत्र साधुः' इति

१३९०। सर्वत्राण्च तलोपश्च। (४-३-२२)

हेमन्तादण्स्यात्तलोपश्च वेदलोकयोः, चकारात्पक्षे ऋत्वण्। हैमनम्—हैमन्तम्।

१३९१। सायञ्चिरम्प्राह्णेप्रगेऽव्ययेभ्यष्टयुटयुलौ तुट् च। (४-३-२३)

सायमित्यादिभ्यश्चतुर्भ्योऽव्ययेभ्यश्च कालवाचिभ्यष्टयुटयुलौ स्तः तयोस्तुट् च। तुटः प्रागनादेशः 'अनद्यतने—' (सू २१८५) इत्यादिनिर्देशात्। सायन्तनम्। चिरन्तनम्। प्राह्णप्रगयोरेदन्तत्वं निपात्यते। प्राह्णेतनम्। प्रगेतनम्। दोषातनम्। दिवातनम्। 'चिरपरुत्परारिभ्यः ल्यो वक्तव्यः'

साध्वधिकारस्य शेषाधिकारबहिर्भूतत्वात्कथं साध्वर्थेऽयम्प्रत्यय इत्यत आह। **कालादिति**॥ **साध्वर्थे इति**॥ साध्वर्थेऽपि ठगित्यर्थः। अस्य जाताद्यर्थेषु शैषिकेष्वन्तर्भावादिति भावः। **सर्वत्राण्च**॥ छन्दसीत्यनुवृत्तिनिवृत्त्यर्थं सर्वत्रग्रहणम्। लोके वेदेचेत्यर्थः। 'हेमन्ताच्च' इति पूर्वसूत्रात् हेमन्तादित्यनुवर्तते। तदाह। **हेमन्तादित्यादिना**॥ ननु 'सर्वत्राण्लोपश्च' इत्येव सिद्धे प्रथमचकारो व्यर्थ इत्यत आह। **चकारादिति**॥ **हैमनमिति**॥ हेमन्तेत्यत्र तकारात्प्राक् नकारस्यानुस्वारपरसवर्णौ स्थितौ। तत्र तकाराकारसमुदायस्य लोप इति पक्षे अनिति प्रकृतिभावान्न टिलोपः। तकारस्यैव लोप इति पक्षे तु, अकारस्य 'यस्येति च' इति लोपे तस्य आभीयत्वेनासिद्धत्वात् स्थानिवत्त्वाद्वा न टिलोपः। **हैमन्तमिति**॥ ऋत्वाणि रूपम्। अत्र न तलोपः। तस्य एतत्सूत्रप्रतिपदोक्ताणा सन्नियोगशिष्टत्वादिति भावः। **सायञ्चिरम्**॥ **चतुर्भ्य इति**॥ सायं चिरं प्राह्णे प्रगे इत्येभ्य इत्यर्थः। **कालवाचिभ्य इति**॥ 'कालाट्ठञ्' इत्यतस्तदनुवृत्तेरिति भावः। **तयोरिति**॥ टयुटयुलोरित्यर्थः। ननु सायन्तनमित्यादौ कथं योरनादेशः। 'युवोरनाकौ' इति ल्युङ्गाधिकारस्थम्। अङ्गात्परयोः यु वु इत्येतयोरनाकौ विधीयेते। प्रकृते च अन्तरङ्गत्वात्तुटि यु इत्यस्य अङ्गात्परत्वाभावादनादेशो न सम्भवति। नच 'तदागमास्तद्ग्रहणेन गृह्यन्ते' इति न्यायेन टयु इत्यस्यापि युग्रहणेन ग्रहणात्तस्याङ्गात् परत्वं निर्बाधमिति वाच्यम्। 'निर्दिश्यमानस्यादेशा भवन्ति' इति परिभाषया योरेवानादेशप्राप्तेः तस्य च तुटा व्यवहितत्वादङ्गात्परत्वाभावात् कथमनादेश इत्यत आह। **तुटः प्रागनादेश इति**॥ कुत इत्यत आह। **अनद्यतने इत्यादिनिर्देशादिति**॥ आदिना 'घकालतनेषु' इत्यत्र तनेति ग्राह्यम्। **सायन्तनमिति**॥ 'षो अन्तकर्मणि' इति धातोर्घञि सायशब्दो दिवसावसाने रूढः। तस्माट्टयुटयुलौ, तयोरनादेशे तुट्, प्रकृतेर्मान्तत्वन्निपात्यते। यत्तु सायमिति स्वरादिपठितमव्ययं तस्याव्ययत्वादेव टयुटयुलौ सिद्धौ। **चिरन्तनमिति**॥ अत्रापि प्रकृतेर्मान्तत्वन्निपात्यते। अस्मादेव लिङ्गाच्चिरमित्यस्याव्ययेषु पाठः अप्रामाणिक इति गम्यते। **प्राह्णेतनमिति**॥ प्राह्णः सोढोऽस्येति विग्रहः। 'तदस्य सोढम्' इत्यर्थस्य निर्देक्ष्यमाणत्वात्। प्राह्णे जातः इत्याद्यर्थे तु 'घकालतनेषु' इति लुकैव एदन्तत्वं सिद्धम्। **प्रगेतनमिति**॥

(वा २८४२) । चिरत्नम् । परुत्नम् । परारित्नम् । 'अग्रादिपश्चाड्डिमच्' (वा २८४४) । अग्रिमम् । आदिमम् । पश्चिमम् । 'अन्ताच्च' (वा २८४५) । अन्तिमम् ।

१३९२ । विभाषा पूर्वाह्णापराह्णाभ्याम् । (४-३-२४)

आभ्यां टयुटयुलौ वा स्तः, तयोस्तुट् च । पक्षे ठञ् । पूर्वाह्णेतनम् । अपराह्णेतनम् । 'घकालतनेषु—' (सू ९७५) इत्यलुक् । पूर्वाह्णः सोढोऽस्येति विग्रहे तु पूर्वाह्णतनम् । अपराह्णतनम् । पौर्वाह्णिकम् । आपराह्णिकम् ।

१३९३ । तत्र जातः । (४-३-२५)

सप्तमीसमर्थाज्जात इत्यर्थेऽणादयो घादयश्च स्युः । स्रुघ्ने जातः स्रौघ्नः । औत्सः । राष्ट्रियः । अवारपारीणः इत्यादि ।

१३९४ । प्रावृषष्ठप् । (४-३-२६)

एण्यस्यापवादः । प्रावृषि जातः प्रावृषिकः ।

१३९५ । संज्ञायां शरदो वुञ् । (४-३-२७)

ऋत्वणोऽपवादः । शारदकाः दर्भविशेषाः मुद्गविशेषाश्च ।

प्रगच्छतीति प्रगः, तस्मिन् जातादिरित्यर्थः । यत्तु प्रगे इत्यव्ययमेदन्तम्प्रातरित्यर्थे, तस्य त्वव्ययत्वादेव सिद्धम् । अव्ययेभ्यः उदाहरति । **दोषातनमिति** ॥ दोषेत्याकारान्तमव्ययं रात्रौ । **दिवातनमिति** ॥ दिवेत्याकारान्तमव्ययमह्नि । **चिरपरुदिति** ॥ चिर, परुत, परारि एभ्यः त्नप्रत्यय इत्यर्थः । **चिरत्नामिति** ॥ टयुटयुलोरेव प्राप्तयोर्वचनम् । त्नप्रत्ययपक्षे मान्तत्वन्न भवति । टयुटयुल्भ्यान्तस्य सन्नियोगशिष्टत्वात् । परुदिति परारीति चाव्ययं पूर्वस्मिन् पूर्वतरे च वत्सरे क्रमाद्वर्तते । **अग्रादीति** ॥ वार्तिकमिदम् । अग्र, आदि, पश्चात्, एभ्यः डिमच् स्यादित्यर्थः । **पश्चिममिति** ॥ 'अव्ययानाम्भमात्रे' इति टिलोपः । **अन्ताच्च** ॥ इदमपि वार्तिकम् । **विभाषा पूर्वाह्ण** ॥ **पक्षे ठञिति** ॥ तथा सति न तुट् । तस्य टयुटयुल्भ्यां सन्नियोगशिष्टत्वादिति भावः । तदेवं 'राष्ट्रावार' इत्यारभ्य एतदन्तैः सूत्रैः राष्ट्रादिप्रकृतिविशेषेभ्यः घादयः प्रत्ययविशेषाः अनुक्रान्ताः । अथ तेषाम्प्रत्ययानामर्थविशेषान् प्रकृतीनाञ्च विभक्तिविशेषान् दर्शयितुमुपक्रमते । **तत्र जातः** ॥ **सप्तमीसमर्थादिति** ॥ सप्तम्यन्तात्कृतसन्धेरित्यर्थः । तत्रेत्यनेन सप्तम्यन्तस्यैव प्रथमानिर्दिष्टत्वादिति भावः । **अणादय इति** ॥ अपत्यादिविकारान्तार्थसाधारणा इत्यर्थः । **घादय इति** ॥ 'राष्ट्रावारपार' इत्यादिभिः विशेषविहिता इत्यर्थः । **प्रावृषष्ठप्** ॥ ठपः पित्त्वम् 'अनुदात्तौ सुप्पितौ' इति स्वरार्थम् । **एण्यस्येति** ॥ 'प्रावृष एण्यः' इति विहितस्येत्यर्थः । एवञ्च 'प्रावृष एण्यः' इति सूत्रजातादन्यार्थमिति पर्यवस्यति । **संज्ञायां शरदो वुञ्** ॥ संज्ञायामित्येतत् 'कृतलब्धक्रीत'

१३९६। उत्तरपदस्य। (७-३-१०)

अधिकारोऽयम्। 'हनस्तः—' (सू २५७४) इत्यस्मात्प्राक्।

१३९७। अवयवाद्दतोः। (७-३-११)

अवयववाचिनः पूर्वपदाद्दतुवाचिनोऽचामादेरचो वृद्धिः स्यात्। ञिति णिति किति च तद्धिते परे। पूर्ववार्षिकः। अपरहैमनः। 'अवयवात्' किम्। पूर्वासु वर्षासु भवः पौर्ववर्षिकः। 'ऋतोर्वृद्धिमद्विधाववयवानाम्' (वा ५६०) इति तदन्तविधिः पूर्वत्र। इह तु न, अवयवत्वाभावात्।

१३९८। सुसर्वार्धाज्जनपदस्य। (७-३-१२)

उत्तरपदस्य वृद्धिः। सुपाञ्चालकः। सर्वपाञ्चालकः। अर्धपाञ्चालकः। 'जनपदतदवध्योः—' (सू १३४८) इति वुञ्। 'सुसर्वार्धदिक्छब्देभ्यो जनपदस्य' (वा ५५९) इति तदन्तविधिः।

इत्येतत्पर्यन्तमनुवर्तत इति केचिदिति वृत्तिकृतः। **उत्तरपदस्य ॥ अधिकारोऽयमिति ॥** सप्तमे आदिवृद्धिप्रकरणे एतदादिसूत्राणि। **अवयवाद्दतोः ॥ पूर्वपदादिति ॥** परस्येति शेषः। **ऋतुवाचिन इति ॥** उत्तरपदस्येति शेषः। **पूर्ववार्षिक इति ॥** ऋतुविशिष्टे वर्षाशब्दो नित्यस्त्रीलिङ्गो बहुवचनान्तः। वर्षाणाम्पूर्वे पूर्ववर्षाः, तत्र जाता इत्यर्थः। 'पूर्वापराधरोत्तरम्' इत्येकदेशिसमासः। **अपरहैमन इति ॥** हेमन्तस्यापरम् अपरहेमन्तः। तत्र जातादिरित्यर्थः। एकदेशिसमासः। 'सर्वत्राण्च तलोपश्च' इत्यण्, तलोपश्च, उत्तरपदादिवृद्धिः। **पूर्वासु वर्षास्विति ॥** 'तद्धितार्थे' इति समासः। आदिवृद्धिरेव। न तु उत्तरपदादिवृद्धिः। पूर्वपदस्य अवयववृत्तित्वाभावात्। ननु कथमिह 'वर्षाभ्यष्ठक्' इति ठक्। प्रत्ययविधौ तदन्तविधिप्रतिषेधात्। तत्राह। **ऋतोरिति ॥** अवयववाचकानां शब्दानामुपरि स्थितात् ऋतुवाचकात् वृद्धिनिमित्तकप्रत्ययविधाने कर्तव्ये तदन्तविधिर्वाच्य इत्यर्थकेन 'येन विधिः' इति सूत्रभाष्यस्थितवचनेन पूर्वत्र पूर्वमुदाहृते उदाहरणे तदन्तविधिरित्यर्थः। तथाच पूर्ववार्षिकः इत्यत्र पूर्वहैमन इत्यत्र चोदाहरणे 'वर्षाभ्यष्ठक्' इति ठक्, 'सर्वत्राण् च तलोपश्च' इत्यण्तलोपौ च सिद्ध्यन्ति। **इह तु नेति ॥** प्रत्युदाहरणे तु तदन्तविधिर्नास्ति। पूर्वासु वर्षास्विति सामानाधिकरण्येन पूर्वशब्दस्य अवयववृत्तित्वाभावादित्यर्थः। ततश्च प्रत्युदाहरणे पौर्ववार्षिक इत्यत्र 'कालाट्ठञ्' इति ठञेव, नतु ठक्, स्वरे विशेषः। पौर्वहैमन्तिक इत्यत्रापि ठञेवेति भावः। **सुसर्वार्धाज्जनपदस्य ॥** सु, सर्व, अर्ध, इत्येतत्पूर्वस्य जनपदवाचिन इत्यर्थः। **उत्तरपदस्य वृद्धिरिति ॥** शेषपूरणम्। **सुपाञ्चालक इति ॥** सुपञ्चालेषु जात इत्यर्थः। **जनपदेति ॥** 'जनपदतदवध्योः' इत्यनुवृत्तौ अवृद्धादपि बहुवचनविषयादिति वुञित्यर्थः। ननु 'अवृद्धादपि' इति प्रत्ययविधौ कथं तदन्तविधिरित्यत आह। **सुसर्वेति ॥** सु, सर्व, अर्ध, दिक्शब्दः,

१३९९ । दिशोऽमद्राणाम् । (७-३-१३)

दिग्वाचकाञ्जनपदवाचिनो वृद्धिः । पूर्वपाञ्चालकः । 'दिशः' किम् । पूर्वपञ्चालानामयं पौर्वपञ्चालः । 'अमद्राणाम्' किम् । पौर्वमद्रः । योगविभाग उत्तरार्थः ।

१४०० । प्राचां ग्रामनगराणाम् । (७-३-१४)

दिशः परेषां ग्रामवाचिनां नगरवाचिनां चाङ्गानामवयवस्य च वृद्धिः । पूर्वेषुकामशम्यां भवः पूर्वैषुकामशमः । नगरे पूर्वपाटलिपुत्रकः ।

१४०१ । पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कर ढुन् । (४-३-२८)

पूर्वाह्णकः । अपराह्णकः । आर्द्रकः । मूलकः । प्रदोषकः । अवस्करकः ।

१४०२ । पथः पन्थ च । (४-३-२९)

पथि जातः पन्थकः ।

एभ्यः परस्य जनपदवाचिनः उपरि प्रत्ययविधौ तदन्तविधिरित्यर्थकेन 'येन विधिः' इति सूत्रभाष्यपठितवचनेन तदन्तविधिरित्यर्थः । **दिशोऽमद्राणाम्** ॥ अमद्राणामिति च्छेदः । **दिग्वाचकादिति** ॥ परस्येति शेषः । **जनपदवाचिन इति** ॥ मद्रवाचिभिन्नस्येत्यपि बोध्यम् । **वृद्धिरिति** ॥ आदेरिति शेषः । **पौर्वपञ्चाल इति** ॥ अत्र पूर्वशब्दः कालवाचीति भावः । **पौर्वमद्रः इति** ॥ 'मद्रेभ्योऽञ्' इत्यञ् । ननु 'सुसर्वार्धदिशो जनपदस्यामद्राणाम्' इत्येकसूत्रमेवास्त्वित्यत आह । **योगविभाग उत्तरार्थ इति** ॥ 'प्राचां ग्रामनगराणाम्' इत्युत्तरसूत्रे दिश एव सम्बन्धो यथा स्यादित्येवमर्थमित्यर्थः । एकसूत्रत्वे तु सुसर्वादिभ्यः परस्यापि मद्रशब्दस्य पर्युदासः प्रसज्येतेति भावः । **प्राचां ग्रामनगराणाम्** ॥ **दिश इति** ॥ दिशः परे ये प्राच्यग्रामवाचिनः प्राच्यनगरवाचिनश्च तेषामवयवस्यादेर्वृद्धिः स्यादित्यर्थः । **पूर्वेषुकामशम्यामिति** ॥ 'दिक्सङ्ख्ये संज्ञायाम्' इति समासः । अण् संज्ञात्वादिति 'दिक्पूर्वपदात्' इति ञो न । समुदायस्य ग्रामनामत्वेऽपि उत्तरपदस्यापि तन्नामत्वमस्तीति उत्तरपदादिवृद्धिः । नगरेति उदाहरणसूचनम् । **पूर्वपाटलिपुत्रक इति** ॥ 'पूर्वापरप्रथम' इति समासः । 'अवृद्धादपि' इति वुञ् । यद्यपि पाटलीपुत्रशब्दे उत्तरपदे आदिवृद्धिरेव । तथापि पूर्वपदस्यापि वृद्धिनिवृत्तिः फलम् । **पूर्वाह्णापराह्ण** ॥ **पूर्वाह्णकः, अपराह्णकः इति** ॥ पूर्वाह्णे अपराह्णे च जातः इत्यर्थः । 'विभाषा पूर्वाह्णापराह्णाभ्याम्' इत्यस्यापवादः । टयुटयुलोः ठञश्च विकल्पस्तु जातादन्यार्थे सावकाश इति भावः । **आर्द्रकः मूलक इति** ॥ आर्द्रायां मूले च जात इत्यर्थः । ऋत्वणोऽपवादः । **प्रदोषक इति** ॥ 'निशाप्रदोषाभ्याम्' इत्यस्यापवादः । **अवस्करक इति** ॥ औत्सर्गिकस्याणोऽपवादः । **पथः पन्थ च** ॥ पथिन्शब्दात् वुन् स्यात् प्रकृतेः पन्थादेशश्च ।

१४०३। अमावास्याया वा। (४-३-३०)

अमावास्यक:—आमावास्य:।

१४०४। अ च। (४-३-३१)

अमावास्य:।

१४०५। सिन्ध्वपकराभ्यां कन्। (४-३-३२)

सिन्धुक:। कच्छादिणि मनुष्यवुञि च प्राप्ते, अपकरक:। औत्सर्गिकेऽणि प्राप्ते।

१४०६। अणञौ च। (४-३-३३)

क्रमात्स्त:। सैन्धव:। आपकर:।

१४०७। श्रविष्ठाफल्गुन्यनूराधास्वातितिष्यपुनर्वसुहस्त-विशाखाषाढाबहुळाल्लुक्। (४-३-३४)

एभ्यो नक्षत्रवाचिभ्य: परस्य जातार्थप्रत्ययस्य लुक् स्यात्।

१४०८। लुक्तद्धितलुकि। (१-२-४९)

तद्धितलुकि सत्युपसर्जनस्त्रीप्रत्ययस्य लुक् स्यात्। श्रविष्ठासु जात: श्रविष्ठ:। फल्गुन: इत्यादि। 'चित्रारेवतीरोहिणीभ्य: स्त्रियामुपसङ्ख्यानम्'

अमावास्याया वा॥ वुनिति शेष:। पक्षे सन्धिवेलादित्वादण्। एकदेशविकृतन्यायादमावास्याशब्दादप्ययं विधि:। **अ च**॥ अ इति लुप्तप्रथमाकम्। अमावास्यादकार: प्रत्ययोऽपीत्यर्थ:। आदिवृद्ध्यभाव: प्रयोजनम्। **सिन्ध्वपकराभ्याङ्कन्**॥ **सिन्धुक इति**॥ सिन्धौ जात इत्यर्थ:। **कच्छादीति**॥ 'कच्छादिभ्यश्च' इत्यणि 'मनुष्यतत्स्थयोश्च' इति वुञि च प्राप्ते अयङ्कन्विधिरित्यर्थ:। **अपकरक इति**॥ अपकरे जात इत्यर्थ:। **अणि प्राप्ते इति**॥ कन्विधिरिति शेष:। **अणञौ च**॥ **क्रमात् स्त इति**॥ सिन्ध्वपकराभ्यामिति शेष:। **श्रविष्ठा**॥ **एभ्य इति**॥ श्रविष्ठा, फल्गुनी, अनूराधा, स्वाति, तिष्य, पुनर्वसु, हस्त, विशाखा, अषाढा, बहुला एतेभ्य इत्यर्थ:। **जातार्थेति**॥ प्रकरणलभ्यमिदम्। स्वातिशब्द: ह्रस्वान्त इति कैयटहरदत्तौ। दीर्घान्त इति 'अत सातत्यगमने' इति धातौ माधव:। कृत्तिकावाचिबहुळाशब्दश्चान्त:। समाहारद्वन्द्वे ह्रस्वनिर्देश:। **लुक् तद्धितलुकि**॥ प्रथमस्य द्वितीये इदं सूत्रम्। **उपसर्जनस्त्रीप्रत्ययस्येति**॥ 'गोस्त्रियोरुपसर्जनस्य' इत्यतस्तदनुवृत्तेरिति भाव:। **श्रविष्ठ इति**॥ कृत्वणो लुकि स्त्रीप्रत्ययस्य निवृत्ति:। 'लुक् तद्धितलुकि' इत्यत्र अप्रधानमेवोपसर्जनम्, नतु शास्त्रीयम्। **असम्भवादिति** भाव:। **फल्गुन इति**॥ फल्गुन्यो: जात इत्यर्थ:। अणो

(वा २८५७)। चित्रायां जाता चित्रा। रेवती रोहिणी आभ्यां 'लुक्तद्धित-लुकि' (१४०८) इति लुकि कृते पिप्पल्यादेराकृतिगणत्वात्पुनर्ङीप्। 'फल्गु-न्यषाढाभ्यां टानौ वक्तव्यौ' (वा २८५८)। स्त्रियामित्येव। फल्गुनी। अषाढा। 'श्रविष्ठाषाढाभ्यां छण्वक्तव्यः' (वा २८५९)। अस्त्रियामपि। श्राविष्ठीयः। आषाढीयः।

१४०९। जे प्रोष्ठपदानाम्। (७-३-१८)

प्रोष्ठपदानामुत्तरपदस्याचामादेरचो वृद्धिः स्याज्जातार्थे त्रिति णिति किति च। प्रोष्ठपदासु जातः प्रौष्ठपदो माणवकः। 'जे' इति किम्। प्रोष्ठ-पदासु भवः प्रौष्ठपदः। बहुवचननिर्देशात्पक्षेऽपि गृह्यते। भद्रपादः।

१४१०। स्थानान्तगोशालखरजात्याञ्च। (४-३-३५)

लुकि स्त्रीप्रत्ययनिवृत्तिः। **इत्यादीनि** ॥ [illegible] नक्षत्राणो लुकि स्त्री-प्रत्ययनिवृत्तिः। एवमग्रेऽपि। "अनुराधेन [illegible]" इत्यादौ छान्दसम्पुंस्त्वम्। स्वात्याञ्जातः स्वानिः। तिष्ये जातः [illegible]। पुनर्वसोर्जातः पुनर्वसुः। हस्ते जातो हस्तः। विशाखयोर्जातः विशाखः। अषाढासु जातः अषाढः। बहुषु जातः बहुषः। **चित्रेति** ॥ चित्रादिभ्यः परस्य स्त्रीत्वप्रजातार्थकप्रत्ययस्य लुगित्यर्थः। **रेवती रोहिणीति** ॥ जातायां नक्षत्राणो लुकि सति प्रकृतेर्गौरादिस्त्रीप्रत्ययानवृत्तेः जातार्थस्त्रीत्व पुनर्ङीप्। ननु रेवतीनक्षत्रे रोहिणीनक्षत्रे इति गौरादौ पाठादेव जातार्थस्य तस्य [illegible]थ ङीप्यत आह। **आभ्यामिति** ॥ रेवतीरोहणीशब्दाभ्यामित्यर्थः। परस्य स्त्रीत्वविशिष्टजातार्थप्रत्ययस्येति शेषः। **आकृति-गणत्वादिति** ॥ स्त्रीत्वविशिष्टजातार्थप्रत्ययोत्पत्तये पिप्पल्यादौ निवेशे भाष्योदाहरणमेव प्रमाणम्। **स्त्रियामित्येवेति** ॥ तथा भाष्यादिति भावः। फल्गुनी, अषाढा, इत्याभ्यां क्रमात् टः अन् च स्त्रीत्वविशिष्टजातार्थे वक्तव्यावित्यर्थः। **फल्गुनीति** ॥ फल्गुन्योर्जातेत्यर्थः। नक्ष-त्राणोऽपवादः। टप्रत्ययः। 'यस्येति च' इति ईकारलोपः। जातार्थस्त्रीत्वे टित्त्वात् ङीप्। **अषाढेति** ॥ अषाढासु जातेत्यर्थः। नक्षत्राणोऽपवादः। अन्, 'यस्येति च' इत्यकारलोपः। जातार्थे स्त्रीत्वे टाप्। 'श्रविष्ठाफल्गुनी' इत्यादिना टानोर्लुक तु न। विधानसामर्थ्यात्। **छण् वक्तव्य इति** ॥ नक्षत्राणोऽपवादः। विधिसामर्थ्यादस्यापि न लुक्। **अस्त्रियामपीति** ॥ अत्र स्त्रियामिति न सम्बध्यते। भाष्ये तथोदाहरणादिति भावः। **श्राविष्ठीय इति** ॥ श्रवि-ष्ठासु जात इत्यर्थः। छण्, ईयः, 'यस्येति च' इत्यकारलोपः। णित्त्वादादिवृद्धिः। **आषाढीय इति** ॥ अषाढासु जात इत्यर्थः। **जे प्रोष्ठपदानाम** ॥ आदिवृद्धिप्रकरणे उत्तरपदस्येत्यधिकारे इदं सूत्रम्। तदाह। **प्रोष्ठपदानामिति** ॥ जशब्देन जातार्थप्रत्ययो विवक्षितः। तदाह। **जातार्थे इति** ॥ प्रोष्ठपदानामिति बहुवचनस्य प्रयोजनमाह। **बहुवचनेति** ॥ **भद्रपाद इति** ॥ भद्रपदासु जात इत्यर्थः। **स्थानान्तगोशाल** ॥ **एभ्य इति** ॥ स्थानान्त,

एभ्यो जातार्थप्रत्ययस्य लुक् स्यात्। गोस्थाने जातो गोस्थानः। गोशालः। खरशालः। 'विभाषा सेनाः—' (सू ८२८) इति नपुंसकत्वे ह्रस्वत्वम्।

१४११। वत्सशालाभिजिदश्वयुक्छतभिषजो वा। (४-३-३६)

एभ्यो जातार्थस्य लुग्वा स्यात्। वत्सशाले जातो वत्सशालः—वात्सशालः इत्यादि। 'जातार्थे प्रतिप्रसूतेऽण्वा डिद्वक्तव्यः' (वा २६९०)। शातभिषजः—शातभिषः—शतभिषक्।

१४१२। नक्षत्रेभ्यो बहुलम्। (४-३-३७)

जातार्थप्रत्ययस्य बहुलं लुक् स्यात्। रोहिणः—रौहिणः।

१४१३। कृतलब्धक्रीतकुशलाः। (४-३-३८)

'तत्र' इत्येव। सुघ्ने कृतो लब्धः क्रीतः कुशलो वा सौघ्नः।

१४१४। प्रायभवः। (४-३-३९)

गोशाल, खरशाल, एतेभ्य इत्यर्थः। **गोस्थान इति** ॥ गोस्थाने जात इत्यर्थः। **गोशाल इति** ॥ गोशाले जात इत्यर्थः। एवं खरशालः। सर्वत्र अणो लुकि नादिवृद्धिः। ननु शालाशब्दस्य स्त्रीलिङ्गत्वात् तस्यानिर्देशोऽनुपपन्न इत्यत आह। **विभाषा सेनेति** ॥ लिङ्गविशिष्टपरिभाषया स्त्रीलिङ्गस्यापि लुक्। **वत्सशालाभिजित्** ॥ **एभ्य इति** ॥ वत्सशाला, अभिजित्, अश्वयुज, शतभिषज, इत्येभ्य इत्यर्थः। परस्यात शेषः। **इत्यादीति** ॥ अभिजिति जातः आभिजितः—आभिजित। अश्वयुक्शब्दात्तेः आश्वयुजः अश्वयुक्। शतभिषजि जातः शातभिषजः—शतभिषक्। **जातार्थे इति** ॥ 'कालाट्ठञ्' इति ठञा निवर्तितः औत्सर्गिकोऽण् सन्धिवेलादिसूत्रेण पुनर्विधीयते। डिद्वा वक्तव्य इत्यर्थः। 'दृष्टं साम' इति सूत्रभाष्ये इदं वार्तिकं दृष्टम्। **शातभिष इति** ॥ अणि डित्त्वपक्षे टिलोपः। **नक्षत्रेभ्यो बहुलम्** ॥ **रोहिण इति** ॥ रोहिण्याञ्जात इत्यर्थः। नक्षत्राणो लुकि आदिवृद्धिनिवृत्तौ 'लुक् तद्धितलुकि' इति स्त्रीप्रत्ययनिवृत्तिः। नन्वं तथा सति तकारस्य नकारोऽपि निवर्तेतेति वाच्यम्। न हि रोहितशब्दोऽयं वर्णविशेषवाचकः। येन 'वर्णादनुदात्तात्' इति ङीषो निवृत्तौ तकारोऽपि निवर्तते। किन्तु रोहिणीशब्दोऽयमव्युत्पन्नो नक्षत्रविशेषे रूढः। रोहिणीनक्षत्रे इति गौरादिपाठात् ङीष्। अत एव 'रोहिणीनक्षत्रमप्रजापतिर्देवता' इत्यादौ अन्तोदात्तत्वं श्रूयमाणन्न विरुध्यते। अन्यथा 'वर्णानान्तणतिनितान्तानाम्' इति आद्युदात्तत्वं स्यादित्यलम्। **कृतलब्ध** ॥ **तत्रेत्येवेति** ॥ 'तत्र जातः' इत्यतस्तत्रेत्येवानुवर्तते। जात इति तु निवृत्तमित्यर्थः। तथा च कृतो लब्धः क्रीतः कुशलो वेत्यर्थे सप्तम्यन्तादणादयो घादयश्च यथायथं स्युरित्यर्थः। **सौघ्न इति** ॥ औत्सर्गिकोऽण्। राष्ट्रे कृतो राष्ट्रिय इत्याद्युदाहार्यम्। **प्रायभवः** ॥ **तत्रेत्येवेति** ॥ प्रायभव इत्यर्थे सप्तम्यन्तादणादयो घादयश्च यथायथं स्युरित्यर्थः। प्रायशब्दस्य व्याख्यानम्बाहुल्येनेति। तत्र भव

'तत्र' इत्येव । स्रुघ्ने प्रायेण बाहुल्येन भवति सौघ्नः ।

१४१५ । उपजानूपकर्णोपनीवेष्ठक् । (४-३-४०)

औपजानुकः । औपकर्णिकः । औपनीविकः ।

१४१६ । सम्भूते । (४-३-४१)

स्रुघ्ने सम्भवति सौघ्नः ।

१४१७ । कोशाड्ढञ् । (४-३-४२)

कौशेयं वस्त्रम् ।

१४१८ । कालात्साधुपुष्यत्पच्यमानेषु । (४-३-४३)

हेमन्ते साधुर्हैमनः प्रावारः । वसन्ते पुष्यन्ति वासन्त्यः कुन्दलताः । शरदि पच्यन्ते शारदाः शालयः ।

१४१९ । उप्ते च । (४-३-४४)

हेमन्ते उप्यन्ते हैमन्ता यवाः ।

१४२० । आश्वयुज्या वुञ् । (४-३-४५)

ठञोऽपवादः । आश्वयुज्यामुप्राः आश्वयुजकाः माषाः ।

इत्येव सिद्धत्वात् प्रत्याख्यातमिदमाभाष्ये । **उपजानूपकर्ण** ॥ प्रायभव इत्यर्थे उपजानु उपकर्ण उपनीवि इत्येभ्यः ठगित्यर्थः । उपजान्वादिषु सामीप्येऽव्ययीभावः । **औपजानुक इति** ॥ जानुनः समीपमुपजानु । तत्र प्रायभव इत्यर्थः । उगन्तात्परत्वात् ठस्य कः । **औपकर्णिक इति** ॥ कर्णस्य समीपमुपकर्णं, तत्र प्रायभव इत्यर्थः । **औपनीविक इति** ॥ नीवेः समीपमुपनीवि, तत्र प्रायभवः इत्यर्थः । **सम्भूते** ॥ तत्रेत्येव । सप्तम्यन्तात्सम्भूतेऽर्थे अणादयो घादयश्च यथायथं स्युरित्यर्थः । सम्भवः सम्भावना । **कोशाड्ढञ्** ॥ **कौशेयं वस्त्रमिति** ॥ कृमिविशेषकोशस्य विकार इत्यर्थः । विकारे 'कोशाड्ढञ्' इति वार्तिकात् । **कालात्साधुपुष्यत्** ॥ तत्रेत्येव । साधुः, पुष्यत्, पच्यमानम्, इत्यर्थेषु सप्तम्यन्ताद्यथाविहितं प्रत्ययाः स्युरित्यर्थः । 'पुष्प विकसने' इति दैवादिकात् लटः शतरि पुष्यदिति भवति । **हैमनः प्रावार इति** ॥ 'सर्वत्राण् तलोपश्च' इत्यण् तलोपः । **वासन्त्य इति** ॥ 'टिड्ढ' इति ङीप् । शारदा इत्यत्र ऋत्वाणि 'तत्र भवः' इति यावत् कालादित्यनुवर्तते । **उप्ते च** ॥ तत्रेत्येव । कालवाचिनः सप्तम्यन्तादुप्तेऽर्थे यथाविहितम्प्रत्ययाः स्युः । **उप्यन्त इति** ॥ 'डु वप् बीजसन्ताने' भूतकालस्त्वविवक्षित इति भावः । **आश्वयुज्या वुञ्** ॥ तत्रोप्त इत्येव । सप्तम्यन्तादश्वयुजीशब्दात् उप्तेऽर्थे वुञ् स्यादित्यर्थः । **ठञोऽपवाद इति** ॥ 'कालाट्ठञ्' इति विहितस्येत्यर्थः । **आश्वयुजका माषा इति** ॥ अश्वयुग्भ्यां युक्ता पौर्णमासी आश्वयुजी, तत्रोप्ता इत्यर्थः ।

१४२१। ग्रीष्मवसन्तादन्यतरस्याम्। (४-३-४६)

पक्षे ऋत्वण्। ग्रैष्मकम्—ग्रैष्मम्। वासन्तकम्—वासन्तम्।

१४२२। देयमृणे। (४-३-४७)

'कालात्' इत्येव। मासे देयमृणं मासिकम्।

१४२३। कलाप्यश्वत्थयवबुसाद्ठञ्। (४-३-४८)

यस्मिन्काले मयूराः कलापिनो भवन्ति स उपचारात्कलापी। तत्र देयमृणं कलापकम्। अश्वत्थस्य फलमश्वत्थः। तद्युक्तः कालोऽप्यश्वत्थः। यस्मिन्काले अश्वत्थाः फलन्ति तत्र देयमृणमश्वत्थकम्। यस्मिन्यववुसमुत्पद्यते तत्र देयमृणं यववुसकम्।

१४२४। ग्रीष्मावरसमाद्ठञ्। (४-३-४९)

ग्रीष्मे देयमृणं ग्रैष्मकम्। आवरसमकम्।

१४२५। संवत्सराग्रहायणीभ्यां ठञ्च। (४-३-५०)

चाद्ठञ्। सांवत्सरिकम्—सांवत्सरकम्। आग्रहायणिकम्-आग्रहायणकम्।

१४२६। व्याहरति मृगः। (४-३-५१)

कालवाचिनः सप्तम्यन्ताच्छब्दायते इत्यर्थे अणादयः स्युः, यो व्याहरति स मृगश्चेत्। निशायां व्याहरति नैशो मृगः—नैशिकः।

ग्रीष्मवसन्तात् ॥ ग्रीष्मात् वसन्ताच्च सप्तम्यन्तादुभे वुञ् वेत्यर्थः। **देयमृणे** ॥ **कालादित्येवेति** ॥ तत्रेत्यप्यनुवर्तते। वृत्तिरिति निवृत्तम्। सप्तम्यन्तात्कालवाचिनः देयमित्यर्थे यथाविहितप्रत्ययाः स्युः। तस्मिन् देयद्रव्ये ऋणे सतीत्यर्थः। **मासिकमिति** ॥ 'कालाद्ठञ्'। **कलाप्यश्वत्थ** ॥ कलापिन्, अश्वत्थ, यव, वुस, एभ्यः कालवाचिभ्यः सप्तम्यन्तेभ्यो देयमृणमित्यर्थे वुन् स्यादित्यर्थः। **कलापकमिति** ॥ वुन् अकादेशः 'नस्तद्धिते' इति टिलोपः। **अश्वत्थस्य फलमश्वत्थ इति** ॥ विकारप्रत्ययस्य फले लुगिति भावः। अश्वत्थशब्दस्य प्लक्षादित्वे तु ततः 'प्लक्षादिभ्योऽण्' इति फले अणो विधानसामर्थ्यात् लुगभावे अश्वत्थशब्द फले लाक्षणिक इति भावः। **ग्रीष्मावरसमाद्ठञ्** ॥ समाशब्दो वत्सरे नित्यस्त्रीलिङ्गबहुवचनः। ग्रीष्म अवरसमा अनयोः समाहारद्वन्द्वात्पञ्चमी। तत्र देयमृणमित्यर्थे आभ्यां वुञित्यर्थः। **आवरसमकमिति** ॥ अवरासु समासु देयमृणमित्यर्थः। 'तद्धितार्थ' इति समासः। **संवत्सराग्रहायणीभ्यां ठञ् च** ॥ देयमृणमित्यर्थे सप्तम्यन्तादिति शेषः। सन्धिवेलादिगणे 'सवत्सरात् फलपर्वणोः' इति पठितम्। तत्र फले देयर्णत्वेन विवक्षिते प्राप्तः अण् अनेन ठञा बाध्यते। **व्याहरति मृगः** ॥ तत्र कालादित्येव। देयमृणे इति निवृत्तम्।

१४२७ । तदस्य सोढम् । (४-३-५२)

'कालात्' इत्येव । निशा, सहचरितमध्ययनं निशा, तत्सोढमस्य नैशिकः—नैशः ।

१४२८ । तत्र भवः । (४-३-५३)

स्रुघ्ने भवः स्रौघ्नः । राष्ट्रियः ।

१४२९ । दिगादिभ्यो यत् । (४-३-५४)

दिश्यम् । वर्ग्यम् ।

१४३० । शरीरावयवाच्च । (४-३-५५)

दन्त्यम् । कण्ठ्यम् ।

१४३१ । प्राचां नगरान्ते । (७-३-२४)

प्राचां देशे नगरान्तेऽङ्गे पूर्वपदस्योत्तरपदस्य चाचामादेरचो वृद्धिर्ञिति णिति किति च । सुह्मनगरे भवः सौह्मनागरः । पौर्वनागरः । 'प्राचाम्' किम् । मद्रनगरम् उदक्षु, तत्र भवो माद्रनगरः ।

१४३२ । जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम् । (७-३-२५)

जङ्गलाद्यन्तस्याङ्गस्य पूर्वपदस्याचामादेरचो वृद्धिरुत्तरपदस्य वा ञिति णिति किति च । कुरुजङ्गले कौरुजङ्गलम्—कौरुजाङ्गलम् । वैश्वधेनवम्—वैश्वधैनवम् । सौवर्णवलजम्—सौवर्णवालजम् ।

तदस्य सोढम् ॥ आत्मनर्थे प्रथमान्ताद्यथाविहितप्रत्ययाः स्युः सोढमित्यस्य अभ्यस्तमित्यर्थः । **नैशिकः—नैशः इति** ॥ 'निशाप्रदोषाभ्याञ्च' इत्यण्ठञौ । **तत्र भवः** ॥ कालादिति निवृत्तम् । अस्मिन्नर्थे सप्तम्यन्ताद्यथाविहितं स्युरित्यर्थः । भवन सत्ता, जननमुत्पत्तिरिति भेदः । **स्रौघ्न इति** ॥ औत्सर्गिकोऽण् । **राष्ट्रिय इति** ॥ 'राष्ट्रावार' इति घः । **दिगादिभ्यो यत्** ॥ भवः इत्यर्थे सप्तम्यन्तेभ्य इति शेषः । **दिश्यमिति** ॥ दिशि भवमित्यर्थः । **शरीरावयवाच्च** ॥ भव इत्यर्थे सप्तम्यन्तेभ्य इति शेषः । **दन्त्यमिति** ॥ दन्ते भवमित्यर्थः । 'यस्येति च' इत्यकारलोपः । एवङ्कण्ठ्यम् । **प्राचान्नगरान्ते** ॥ अङ्गेत्यधिकृतं नगरान्ते इति सप्तम्यनुरोधेन सप्तम्या विपरिणम्यते । 'उत्तरपदस्य' इत्यधिकृतम् । 'हृद्भगसिन्ध्वन्ते' इति सूत्रात्पूर्वपदस्येत्यनुवर्तते । तदयमर्थः । प्राचां यन्नगरं तदन्ते अङ्गेपूर्वपदस्योत्तरपदस्य च अचामादेरचो वृद्धिः स्यात् ञिति णिति किति च तद्धिते इति । सुह्मनगरमिति पुण्ड्रनगरमिति च प्राग्देशस्य पूर्वान्तावयवः । **मद्रनगरम् उदक्ष्विति** ॥ उदग्देशे मद्रनगरनाम किञ्चिन्नगरमस्तीत्यर्थः । **जङ्गलधेनु** ॥ **जङ्गलाद्यन्तस्याङ्गस्येति** ॥ जङ्गल, धेनु, वलज, इत्यन्तस्येत्यर्थः । **कुरुजङ्गले इति** ॥ भवमिति शेषः । कुरुजङ्गलादिशब्दाः

१४३३। दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ्। (४-३-५६)

दार्तेऽयम्। कौक्षेयम्। कलशिर्घटः तत्र भवं कालशेयम्।

१४३४। ग्रीवाभ्योऽण् च। (४-३-५७)

चाड्ढञ्। ग्रैवेयम्—ग्रैवम्।

१४३५। गम्भीराञ्ञ्यः। (४-३-५८)

गम्भीरे भवं गाम्भीर्यम्। 'पञ्चजनादुपसङ्ख्यानम्' (वा २८६८)। पाञ्चजन्यः।

१४३६। अव्ययीभावाच्च। (४-३-५९)

परिमुखं भवं परिमुख्यम्। 'परिमुखादिभ्य एवेष्यते' (वा २८६६)। नेह, औपकूलः।

१४३७। अन्तःपूर्वपदाट्ठञ्। (४-३-६०)

'अव्ययीभावात्' इत्येव। वेश्मन्यन्तोऽन्तर्वेश्मम्। तत्र भवमान्तर्वेश्मिकम्। आन्तर्गणिकम्। 'अध्यात्मादेष्ठञिष्यते' (वा २८६९)। अध्यात्मं भवम् आध्यात्मिकम्।

देशविशेषेषु। **दृतिकुक्षि** ॥ भव इत्यर्थे दृति, कुक्षि, कलशि, वस्ति, अस्ति, अहि, इत्येभ्यः सप्तम्यन्तेभ्यः इति शेषः। **दार्तेयमिति** ॥ दृतौ भवमित्यर्थः। ढञ्, एयः, आदिवृद्धिः, रपरत्वम्। दृतिश्चर्ममस्त्रिका। **कौक्षेयमिति** ॥ धूमादित्वादुञि प्राप्ते ढञ्। **कलशिर्घट इति** ॥ "कलशिर्मथनपात्रम्" इत्यमरव्याख्यातारः। "वस्तिर्नाभेरधो द्वयोः" इत्यमरः। तत्र भवो वास्तेयः। अस्तीति विभक्तिप्रतिरूपकमव्ययम्। सत्तायान्धने चेति न्यासकारो हरदत्तश्च। तत्र भवः आस्तेयः। अहिः सर्पः, तत्र भवः आहेयः। **ग्रीवाभ्योऽण् च** ॥ 'शरीरावयवाच्च' इति यतोऽपवादः। ग्रीवाशब्दोऽयं धमनीसङ्घे वर्तते। तत्र उद्भूतावयवभेदसङ्घविवक्षायाम्बहुवचनान्तात्प्रत्यय इति सूचयितुम्बहुवचनम्। तिरोहितावयवभेदविवक्षायान्तु एकवचनान्तादप्यणञौ स्त एव। **गम्भीराञ्ञ्यः** ॥ **गाम्भीर्यमिति** ॥ यञ्विधौ तु स्त्रियां 'प्राचां ष्फस्तद्धितः' इति ष्फः स्यात्। **अव्ययीभावाच्च** ॥ ञ्य इति शेषः। **परिमुखादिभ्य इति** ॥ यद्यपीदं वार्तिकं भाष्ये न दृष्टं, तथापि दिगादिगणपाठानन्तरं परिमुखादिगणपाठसामर्थ्यादिहाव्ययीभावपदं परिमुखादिपरमिति गम्यते। नह्यष्टाध्याय्यामपरिमुखादिगणस्य कार्यान्तरमस्ति। **औपकूल इति** ॥ उपकूलम्भव इत्यर्थः। अव्ययीभावत्वेऽपि परिमुखाद्यनन्तर्भावात् न ञ्यः। **अन्तःपूर्वपदाट्ठञ्** ॥ वेश्मनि अन्तर्वेश्मामिति विभक्त्यर्थे अव्ययीभावः। 'अनश्च' इति टच्। **आन्तर्वेश्मिकमिति** ॥ ठञ्, इकः, सुब्लुक्, टिलोपः, आदिवृद्धिः। **आन्तर्गणिकमिति** ॥ गणे इत्यन्तर्गणम्। तत्र भवमित्यर्थः। **आध्यात्मिकमिति** ॥ आत्मनीत्यध्यात्मम्। तत्र

१४३८ । अनुशतिकादीनां च । (७-३-२०)

एषामुभयपदवृद्धिः स्यात् ञिति णिति किति च । आधिदैविकम् । आधिभौतिकम् । ऐहलौकिकम् । पारलौकिकम् । अध्यात्मादिराकृतिगणः ।

१४३९ । देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् । (७-३-१)

एषां पञ्चानां वृद्धिप्राप्तावादेरचः आत् ञिति णिति किति च । दाविकम् । देविकाकूले भवाः दाविकाकूलाः शालयः । शिंशपाया विकारः शांशपश्चमसः । 'पलाशादिभ्यो वा' (सू १५२१) इत्यत्र् । दित्यौहः इदं दात्यौहम् । दीर्घसत्रे भवं दार्घसत्रम् । श्रेयसि भवं श्रायसम् ।

१४४० । ग्रामात्पर्यनुपूर्वात् । (४-३-६१)

ठञ् स्यात् । 'अव्ययीभावात्' इत्येव । पारिग्रामिकः । आनुग्रामिकः ।

१४४१ । जिह्वामूलाङ्गुलेश्छः । (४-३-६२)

जिह्वामूलीयम् । अङ्गुलीयम् ।

१४४२ । वर्गान्ताच्च । (४-३-६३)

कवर्गीयम् ।

भवमित्यर्थः । **अनुशतिकादीनाञ्च** ॥ आदिवृद्धिप्रकरणे उत्तरपदस्य, पूर्वपदस्य चेत्यधिकारे इदं सूत्रम् । तदाह । **एषामिति** ॥ **आधिदैविकमिति** ॥ देवेष्वित्यधिदेवम्, तत्र भवमित्यर्थः । ठञि उभयपदवृद्धिः । **आधिभौतिकमिति** । भूतेष्वित्यधिभूतम् । तत्र भवमित्यर्थः । **ऐहलौकिकमिति** ॥ इह लोके भवमित्यर्थः । **पारलौकिकमिति** ॥ परलोके भवमित्यर्थः । सर्वत्र ठञि उभयपदवृद्धिः । **देविका** ॥ आदिवृद्धिप्रकरणे इदं सूत्रम् । **एषामिति** ॥ देविका, शिंशपा, दित्यवाह्, दीर्घसत्र, श्रेयस् इत्येषामित्यर्थः । **वृद्धिप्राप्ताविति** ॥ आदिवृद्धिप्राप्तौ तदपवादत्वेन आदेरचः आकारः स्यादित्यर्थः । **दाविकमिति** ॥ देविका नाम नदी, तस्यामभवमित्यर्थः । **दाविकाकूला इति** ॥ उत्तरपदवृद्धिभ्रमनिरासाय इदमुदाहरणम् । अस्य सूत्रस्य तदधिकारबहिर्भूतत्वादिति भावः । **शांशप इति** ॥ इकारस्य आकारः, अञि वृद्धिः, शिंशपाशब्दस्य पलाशादौ पाठात् पाक्षिकोऽञ् । तदभावेऽणित्यर्थः । **दात्यौहमिति** ॥ दित्यवाह्शब्दात् 'तस्येदम्' इत्यणि 'वाह ऊठ्' इति सम्प्रसारणं, पूर्वरूपम् । 'एत्येधत्यूठ्सु' इति वृद्धिः । इकारस्य आदिवृध्यपवादः आकारः । **दार्घसत्रमिति** ॥ 'तस्येदम्' इत्यण् आदेरीकारस्य आकारः । **श्रायसमिति** ॥ तत्र भवः इत्यणि एकारस्य आकारः । **ग्रामात्पर्यनुपूर्वात्** ॥ **ठञ् स्यादिति** ॥ 'अन्तःपूर्वपदात्' इत्यतः तदनुवृत्तेरिति भावः । **जिह्वामूलांगुलेश्छः** ॥ 'शरीरावयवाच्च' इति यतोऽपवादः । **वर्गान्ताच्च** ॥ **कवर्गीयमिति** ॥

१४४३। अशब्दे यत्खावन्यतरस्याम्। (४-३-६४)

पक्षे पूर्वेण छः। मद्वर्ग्यः—मद्वर्गीणः—मद्वर्गीयः। 'अशब्दे' किम्। कवर्गीयो वर्णः।

१४४४। कर्णललाटात्कन्नलङ्कारे। (४-३-६५)

कर्णिका। ललाटिका।

१४४५। तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः। (४-३-६६)

सुपां व्याख्यानः सौपो ग्रन्थः। तैङः। कार्तः। सुप्सु भवं सौपम्।

१४४६। बह्वचोऽन्तोदात्तात्ठञ्। (४-३-६७)

षत्वणत्वयोर्विधायकं शास्त्रं षत्वणत्वम्। तस्य व्याख्यानस्तत्र भवो वा षात्वणत्विकः।

१४४७। क्रतुयज्ञेभ्यश्च। (४-३-६८)

सोमसाध्येषु यागेष्वेतौ प्रसिद्धौ। तत्रान्यतरोपादानेन सिद्धे उभयोरुपादानसामर्थ्यादसोमका अपीह गृह्यन्ते। अग्निष्टोमस्य व्याख्यानस्तत्र भवः

कादिवर्गे भवमित्यर्थः। **अशब्दे** ॥ वर्गान्तात् छः इति शेषः। **मद्वर्ग्यः-मद्वर्गीण इति** ॥ मत्पक्षे भव इत्यर्थः। **कर्णललाटात्** ॥ 'शरीरावयवाच्च' इति यतोऽपवादः। **कर्णिका। ललाटिकेति** ॥ कर्णे ललाटे वा भवोऽलङ्कारः इत्यर्थः। स्त्रीत्वं लोकात्। टापि 'प्रत्ययस्थात्' इति इत्त्वम्। **तस्य व्याख्यान इति च** ॥ व्याख्यायते अनेनेति व्याख्यानो ग्रन्थः। करणे ल्युट्। तस्य व्याख्यान इति विग्रहे व्याख्यातव्यग्रन्थप्रतिपादकात् षष्ठ्यन्ताद्भव इत्यर्थे च सप्तम्यन्ताद्यथाविहितं प्रत्ययाः स्युरित्यर्थः। चकारः 'तत्र भवः' इत्यस्य समुच्चयार्थः। **सौप इति** ॥ औत्सर्गिकोऽण्। **तैङ इति** ॥ तिङां व्याख्यानो ग्रन्थ इत्यर्थः। **कार्त इति** ॥ कृतां व्याख्यान इत्यर्थः। अणि आदिवृद्धौ रपरत्वम्। भवार्थे उदाहरति। **सुप्सु भवं सौपमिति** ॥ नच 'तस्येदम्, तत्रभवः' इत्याभ्यामेव सिद्धत्वादिदं सूत्रं व्यर्थमिति वाच्यम्। अर्थद्वयनिर्देशस्य अपवादभूतवक्ष्यमाणठञादिविधानाय तदावश्यकत्वात्" इति भाष्ये स्पष्टम्। **बह्वचोऽन्तोदात्तात्ठञ्** ॥ अन्तोदात्ताद्बह्वचः उक्तविषये ठञ् स्यात्। अणोऽपवादः। **क्रतुयज्ञेभ्यश्च** ॥ **सोमेति** ॥ सोमलताद्रव्यकयागेषु क्रतुशब्दो यज्ञशब्दश्च प्रसिद्ध इत्यर्थः। तर्ह्यन्यतरग्रहणं व्यर्थम्। बहुवचनेन स्वरूपग्रहणनिवृत्तेरित्यत आह। **तत्रेति** ॥ **गृह्यन्ते इति** ॥ ततश्च इह क्रतुशब्देन सोमयागाः, यज्ञशब्देन तदितरयागाः विवक्षिता इति भावः। एवञ्च सोमयागविशेषवाचिभ्यः तदितरयागविशेषवाचिभ्यश्च उक्तविषये

आग्निष्टोमिकः । वाजपेयिकः । राजसूयिकः । पाकयज्ञिकः । नावयज्ञिकः । बहुवचनं स्वरूपविधिनिरासार्थम् । अनन्तोदात्तार्थ आरम्भः ।

१४४८ । अध्यायेष्वेवर्षेः । (४-३-६९)

ऋषिशब्देभ्यो लक्षणया व्याख्येयग्रन्थवृत्तिभ्यो भवे व्याख्याने चाध्याये ठञ् स्यात् । वसिष्ठेन दृष्टो मन्त्रो वसिष्ठः, तस्य व्याख्यानस्तत्र भवो वा वासिष्ठिकोऽध्यायः । 'अध्यायेषु' किम् वासिष्ठी ऋक् ।

१४४९ । पौरोडाशपुरोडाशात्ष्ठन् । (४-३-७०)

पुरोडाशसहचरितो मन्त्रः पुरोडाशः । स एव पौरोडाशः । ततः ष्ठन् । पौरोडाशिकः । पुरोडाशिकः ।

१४५० । छन्दसो यदणौ । (४-३-७१)

छन्दस्यः—छान्दसः ।

१४५१ । द्यजृद्ब्राह्मणकर्प्रथमाध्वरपुरश्चरणनामाख्यातात्ठक् । (४-३-७२)

ठञित्यर्थः । **पाकयज्ञिक इति** ॥ औपासनाग्निसाध्याः पार्वणस्थालीपाकादयः पाकयज्ञाः, तेषां व्याख्यानो ग्रन्थः, तत्र भव इति वार्थः । **नावयज्ञिक इति** ॥ नूतनद्रव्यकः आग्रयणाख्यः यज्ञः नवयज्ञः । ननु पूर्वसूत्रेण सिद्धे किमर्थमिदमित्यत आह । **अनन्तोदात्तार्थ इति** ॥ वाजपेयशब्दो मध्योदात्तः तैत्तिरीयादौ प्रसिद्धः । यद्यपि अग्निष्टोमशब्दः अन्तोदात्त एव तैत्तिरीये दृष्टः । नवयज्ञशब्दोऽपि षष्ठीसमासः, समासस्वरेणान्तोदात्त एव । तथापि अन्यार्थमिदमन्तोदात्तेष्वपि परत्वात् प्रवर्तते इति न दोषः । **अध्यायेष्वेवर्षेः** ॥ **वसिष्ठेन दृष्टो मन्त्रो वसिष्ठ इति** ॥ लक्षणयेति भावः । **वासिष्ठिकोऽध्याय इति** ॥ कश्चित् ग्रन्थविशेषोऽयम् । **वासिष्ठी ऋगिति** ॥ ऋचः अध्यायसमाख्याभावात् न ठञिति भावः । **पौरोडाश** ॥ उक्तविषये इति शेषः । **पुरोडाशेति** ॥ पुरोडाशशब्दसहितो मन्त्रः लक्षणया पुरोडाश इत्युच्यते इत्यर्थः । **स एव पौरोडाश इति** ॥ प्रज्ञादित्वात्स्वार्थेऽणिति भावः । **पौरोडाशिक इति** ॥ पौरोडाशात् ष्ठनि रूपम् । **पुरोडाशिक इति** ॥ पुरोडाशशब्दात् ष्ठनि रूपम्, षित्त्वात् ङीष् । पुरोडाशिकी—पौरोडाशिकी । **छन्दसो यदणौ** ॥ तस्य व्याख्याने तत्र भवे चेति शेषः । **छन्दस्यः—छान्दस इति** ॥ छन्दसां व्याख्यानः, तत्र भवो वेत्यर्थः । द्यजृलक्षणस्य वक्ष्यमाणस्य ठकोऽपवादः । **द्यजृद्ब्राह्मण** ॥ द्यच्, ऋत्, ब्राह्मण, ऋक्, प्रथम, अध्वर, पुरश्चरण, नामन्, आख्यात, एभ्यः ठक् स्यात् । तस्य

ब्यचः। शैषिकः। पाशुकः। ऋतः चातुर्होतृकः। ब्राह्मणिकः। आर्चिकः, इत्यादि।

१४५२। अणृगयनादिभ्यः। (४-३-७३)

ठञादेरपवादः। आर्गयनः। औपनिषदः। वैयाकरणः।

१४५३। तत आगतः। (४-३-७४)

स्रुघ्नादागतः स्रौघ्नः।

१४५४। ठगायस्थानेभ्यः। (४-३-७५)

शुल्कशालायाः आगतः शौल्कशालिकः।

१४५५। शुण्डिकादिभ्योऽण्। (४-३-७६)

आयस्थानठकरछादीनां चापवादः। शुण्डिकादागतः शौण्डिकः। कार्कणः। तैर्थः। औदपानः।

व्याख्याने तत्र भवे च। **शैषिक इति** ॥ शेषस्य व्याख्यानः तद्भवो वेत्यर्थः। **पाशुक इति** ॥ पशुयागप्रतिपादकग्रन्थः पशुः, तस्य व्याख्यानः तत्र भवो वेत्यर्थः। उकः परत्वात् ठस्य कः। **ऋत इति** ॥ उदाहियते इत्यर्थः। **चातुर्होतृक इति** ॥ 'चित्तिस्रुक्' इत्यादयो मन्त्राश्चतुर्होतारस्तैत्तिरीये प्रसिद्धाः। तेषां व्याख्यानः तत्र भवो वेत्यर्थः। **ब्राह्मणिकः। आर्चिक इति** ॥ ब्राह्मणानि मन्त्रव्यतिरिक्तवेदभागाः। तेषामृचां वा व्याख्यानः तत्र भवो वेत्यर्थः। **इत्यादीति** ॥ प्राथमिकः, आध्वरिकः, पौरश्चरणिकः, नामिकः, आख्यातिकः। **अणृगयनादिभ्यः** ॥ तस्य व्याख्याने तत्र भवे चेति शेषः। **आर्गयन इति** ॥ ऋग्यनम् ऋक्संहिता, तस्य व्याख्यानः तत्र भवो वेत्यर्थः। 'बह्वचोऽन्तोदात्तात्' इति ठञि प्राप्ते अण्। **औपनिषद इति** ॥ उपनिषदो व्याख्यानस्तत्र भवो वेत्यर्थः। एवं वैयाकरणः। 'न य्वाभ्याम्' इत्यैच्। अण्ग्रहणन्तु छबाधनार्थम्। अन्यथा अणा युक्ते छो दुर्वारः स्यादित्याहुः। **तत आगतः** ॥ अस्मिन्नर्थे पञ्चम्यन्तायथाविहितं प्रत्ययाः स्युरित्यर्थः। **स्रौघ्न इति** ॥ औत्सर्गिकोऽण्। **ठगायस्थानेभ्यः** ॥ तत आगतः इत्यर्थे इति शेषः। हट्टादिषु स्वामिग्राह्यो भागः आयः। स यस्मिन् गृह्यते तदायस्थानम्, तद्वाचिभ्य इत्यर्थः। **शुण्डिकादिभ्योऽण्** ॥ तत आगत इत्येव। शुण्डिकमायस्थानविशेषः। पूर्वसूत्रविहितठगपवादः। **कार्कण इति** ॥ कृकणादागत इति शेषः। 'कृकणपर्णाद्भारद्वाजे' इति छस्यापवादः। **तैर्थ इति** ॥ धूमादिवुञोऽपवादः। **औदपानः इति** ॥ अत्र उत्सादित्वादञ् प्राप्तो न भवति, पुनरण्ग्रहणात्। अन्यथा यथाप्राप्तविधाने आयस्थानठकं बाधित्वा अणेव

१४५६ । विद्यायोनिसम्बन्धेभ्यो वुञ् । (४-३-७७)

औपाध्यायकः । पैतामहकः ।

१४५७ । ऋतष्ठञ् । (४-३-७८)

वुञोऽपवादः । हौतृकम् । भ्रातृकम ।

१४५८ । पितुर्यच्च । (४-३-७९)

चाट्ठञ् । 'रीङृतः' (सू १२३४) । 'यस्येति च' (सू ३११) इति लोपः । पित्र्यम्—पैतृकम् ।

१४५९ । गोत्रादङ्कवत् । (४-३-८०)

बिदेभ्यः आगतं बैदम् । गार्गम । दाक्षम । औपगवकम् ।

१४६० । नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् । (७-३-३०)

नञः परेषां शुच्यादिपञ्चानामादेरचो वृद्धिः, पूर्वपदस्य तु वा, ञिदादौ परे । आशौचम्–अशौचम् । आनैश्वर्यम्–अनैश्वर्यम् । आक्षैत्रज्ञम्–अक्षैत्रज्ञम् । आकौशलम्–अकौशलम् । आनैपुणम्–अनैपुणम् ।

स्यात् । **विद्यायोनि** ॥ तत आगत इत्येव । **औपाध्यायकः । पैतामहक इति** ॥ उपाध्यायात्पितामहाच्च आगत इत्यर्थः । **ऋतष्ठञ्** ॥ ऋदन्ताद्विद्यायोनिसम्बन्धवाचिन इत्यर्थः । तत आगत इत्येव । **हौतृकम्** ॥ **भ्रातृकमिति** ॥ उकः परत्वात् ठस्य कः । **पितुर्यच्च** ॥ यति प्रक्रियान्दर्शयति । **रीङृत इति** ॥ **गोत्रादङ्कवत्** ॥ अङ्के ये प्रत्ययाः ते तत आगत इत्यर्थेऽपि भवन्तीत्यर्थः । **बिदेभ्यः आगतमिति** ॥ विग्रहप्रदर्शनम् । अत्र 'यञञोश्च' इति बहुत्वे अञो लुकि बिदेभ्य इति निर्देशः । **बैदमिति** ॥ 'सङ्काङ्कलक्षणेष्वञ्ञिञामण्' इत्युक्तेरञन्तादिहाप्यर्थे अणि विवक्षिते 'गोत्रे लुगचि' इत्यञो लुङ्निवृत्तौ बैदशब्दादण् । 'ब्यजृद्ब्राह्मण' इति ब्यज्लक्षणस्य ठकोऽपवादः । **गार्गमिति** ॥ यञन्तादण् । **दाक्षमिति** ॥ इञन्तादण् । **औपगवकमिति** ॥ उपगोरपत्यमौपगवः, तस्मादागतमित्यर्थः । 'गोत्रचरणाद्वुञ्' इति वुञ् । यद्यपि तस्येदमित्यर्थे अयं वुञ् विहितः, तथाप्यञ्ञिञन्तादङ्केऽपि स दृष्ट इति तस्याप्यत्रार्थे अतिदेशो भवति । न हि 'सङ्काङ्क' इति प्रतिपदोक्तस्याण एवात्रातिदेशः । किन्तु अङ्के दृष्टस्य सर्वस्यापि, व्याख्यानादिति भावः । **नञः शुचीश्वर** ॥ आदिवृद्धिप्रकरणे उत्तरपदस्य पूर्वस्य तु वेत्यनुवृत्ताविदं सूत्रम् । **आशौचम्–अशौचम् इति** ॥ अशुचेरागतमित्यर्थः । तत आगत इत्यणि पूर्वपदस्यादिवृद्धिविकल्पः । उत्तरपदस्य तु नित्या आदिवृद्धिः । एवमग्रेऽपि । **आनैश्वर्यमित्यादि** ॥ अनीश्वरात् अक्षेत्रज्ञात् अकुशलात् अनिपुणाच्च आगतमित्यर्थः ।

१४६१। हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः। (४-३-८१)

समादागतं समरूप्यम्। विषमरूप्यम्। पक्षे गहादित्वाच्छः। समीयम्। विषमीयम्। देवदत्तरूप्यम्–देवदत्तम्–देवदत्तीयम्।

१४६२। मयट् च। (४-३-८२)

सममयम्। विषममयम्। देवदत्तमयम्।

१४६३। प्रभवति। (४-३-८३)

'ततः' इत्येव। हिमवतः प्रभवति हैमवती गङ्गा।

१४६४। विदूराञ्ञ्यः। (४-३-८४)

विदूरात्प्रभवति वैदूर्यो मणिः।

१४६५। तद्गच्छति पथिदूतयोः। (४-३-८५)

स्रुघ्नं गच्छति स्रौघ्नः पन्थाः दूतो वा।

१४६६। अभिनिष्क्रामति द्वारम्। (४-३-८६)

'तत्' इत्येव। स्रुघ्नमभिनिष्क्रामति स्रौघ्नं कान्यकुब्जद्वारम्।

१४६७। अधिकृत्य कृते ग्रन्थे। (४-३-८७)

'तत्' इत्येव। शारीरकमधिकृत्य कृतो ग्रन्थः शारीरकीयः। 'शारीरकं भाष्यम्' इति त्वभेदोपचारात्।

१४६८। शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः। (४-३-८८)

हेतुमनुष्येभ्यः ॥ तत आगत इत्येव। हेतुभ्यः उदाहरति। **समादागतमित्यादि** ॥ मनुष्यवाचिन उदाहरति। **देवदत्तरूप्यमिति** ॥ **मयट् च** ॥ उक्तविषये इति शेषः। **प्रभवति** ॥ **तत इत्येवेति** ॥ आगत इति तु निवृत्तम्। प्रभवतीत्यर्थे पञ्चम्यन्ताद्यथाविहितं प्रत्ययाः स्युरित्यर्थः। प्रभवः प्रथमं प्रकाशः। **हिमवतः प्रभवतीति** ॥ हिमवति प्रथमं प्रकाशते इत्यर्थः। 'भुवः प्रभवः' इत्यपादानत्वम्। **विदूराञ्ञ्यः** ॥ ततः प्रभवतीत्येव। विदूरशब्दो दन्त्यमध्यः। वालवायाख्यदेशपर्यायो विदूरशब्दश्च इति भाष्ये स्पष्टम्। **तद्गच्छति पथिदूतयोः** ॥ गच्छतीत्यर्थे द्वितीयान्तात्प्रत्ययाः स्युः स चेद्गन्ता पन्थाः दूतो वेत्यर्थः। **अभिनिष्क्रामति द्वारम्** ॥ **कान्येति** ॥ कन्याकुब्जाख्यजनपदस्य द्वारमित्यर्थः। **अधिकृत्य** ॥ **तदित्येवेति** ॥ अधिकृतो ग्रन्थ इत्यर्थे द्वितीयान्तात्प्रत्ययाः स्युरित्यर्थः। **शारीरकमिति** ॥ शरीरस्यायं शारीरः जीवात्मा, तमित्यर्थः। तस्येदमित्यणन्तात् स्वार्थे कः। **शारीरकीय इति** ॥ वृद्धत्वाच्छः। **शिशुक्रन्द** ॥ शिशुक्रन्द, यमसभ, द्वन्द्व, इन्द्रजननादि,

शिशूनां क्रन्दनं शिशुक्रन्दः, तमधिकृत्य कृतो ग्रन्थः शिशुक्रन्दीयः। यमस्य सभा यमसभम्। क्लीबत्वं निपातनात्। यमसभीयः। किरातार्जुनीयम्। इन्द्रजननादिराकृतिगणः। इन्द्रजननीयम्। विरुद्धभोजनीयम्।

१४६९। सोऽस्य निवासः। (४-३-८९)

स्रुघ्नो निवासोऽस्य स्रौघ्नः।

१४७०। अभिजनश्च। (४-३-९०)

स्रुघ्नोऽभिजनोऽस्य स्रौघ्नः। 'यत्र स्वयं वसति स निवासः'। 'यत्र पूर्वैरुषितं सोऽभिजनः' इति विवेकः।

१४७१। आयुधजीविभ्यश्छः पर्वते। (४-३-९१)

पर्वतवाचिनः प्रथमान्तादभिजनशब्दादस्येत्यर्थे छः स्यात्। द्रङ्गोलः पर्वतोऽभिजनो येषामायुधजीविनां ते द्रङ्गोलीयाः। 'आयुध–' इति किम्। ऋक्षोदः पर्वतोऽभिजनो येषां ते आर्क्षोदा द्विजाः।

१४७२। शण्डिकादिभ्यो ञ्यः। (४-३-९२)

शण्डिकोऽभिजनोऽस्य शाण्डिक्यः।

१४७३। सिन्धुतक्षशिलादिभ्योऽणञौ। (४-३-९३)

सिन्ध्वादिभ्योऽण् तक्षशिलादिभ्योऽञ् स्यादुक्तेऽर्थे। सैन्धवः। तक्षशिला नगरी अभिजनोऽस्य ताक्षशिलः।

१४७४। तुदीसलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः। (४-४-९४)

एभ्यः छः स्यादधिकृत्यकृते ग्रन्थे इत्यर्थः। **निपातनादिति** ॥ 'सभा राजा' इति तु नपुंसकत्वन्न भवति। तत्र 'अमनुष्यशब्दो रूढ्या रक्षःपिशाचादीनाह' इत्युक्तेरिति भावः। **सोऽस्य निवासः** ॥ अस्मिन्नर्थे प्रथमान्तात्प्रत्ययाः स्युरित्यर्थः। यत्र सम्प्रत्युष्यते स निवासः इति भाष्यम्। **अभिजनश्च** ॥ स इत्यनुवर्तते। पूर्ववद्व्याख्येयम्। यत्र पूर्वैरुषितं सोऽभिजन इति भाष्यम्। **यत्र स्वयमिति** ॥ उदाहृतभाष्यस्यायमर्थ इति भावः। **आयुधजीविभ्यः** ॥ पर्वतादिति पाठान्तरम्। **अभिजनशब्दादिति** ॥ अभिजनदेशवाचिन इत्यर्थः। आयुधजीविनोऽभिधातुमप्रवृत्तेभ्यः इति शेषः। सूत्रे 'क्रियार्थोपपदस्य' इति चतुर्थी। **द्रङ्गोल इति** ॥ पर्वतविशेषोऽयम्। **ऋक्षोद इति** ॥ अयमपि पर्वतविशेषः। **शण्डिकादिभ्यो ञ्यः** ॥ सोऽभिजन इत्यर्थे प्रथमान्तेभ्यः इति शेषः। **सिन्धुतक्ष** ॥ **सैन्धव इति** ॥ सिन्धुर्देशविशेषः अभिजनोऽस्येति विग्रहः। **तुदीसलातुर** ॥ तुदी सलातुर वर्मती कूचवार

तुदी अभिजनोऽस्य तौदेयः। सालातुरीयः। वार्मतेयः। कौचवार्यः।

१४७५। भक्तिः। (४-३-९५)

'सोऽस्य' इत्यनुवर्तते। भज्यते सेव्यत इति भक्तिः, स्रुघ्नो भक्तिरस्य स्रौघ्नः।

१४७६। अचित्तादेशकालाट्ठक्। (४-३-९६)

अपूपा भक्तिरस्य आपूपिकः। पायसिकः। 'अचित्तात्' किम्। दैवदत्तः। 'अदेशात्' किम्। स्रौघ्नः। 'अकालात्' किम्। ग्रैष्मः।

१४७७। महाराजाट्ठञ्। (४-३-९७)

माहाराजिकः।

१४७८। वासुदेवार्जुनाभ्यां वुन्। (४-३-९८)

वासुदेवकः। अर्जुनकः।

१४७९। गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ्। (४-३-९९)

अणोऽपवादः। परत्वाद्वृद्धाच्छं बाधते। ग्लुचुकायनिर्भक्तिरस्य ग्लौचुकायनकः। नाकुलकः। बहुलग्रहणान्नेह। पाणिन भक्तिरस्य पाणिनीयः।

एभ्यः प्रथमान्तेभ्यः ढक्, छण्, ढञ्, यक्, एते स्युः अस्याभिजन इत्यर्थे। **भक्तिः** ॥ **अनुवर्तते इति** ॥ सोऽस्य भक्तिरित्यर्थे प्रथमान्तात्प्रत्ययाः स्युरित्यर्थः। **अचित्तादेश** ॥ देशकालव्यतिरिक्ताप्राणिवाचिनः ठक् स्यादुक्तविषये। **अपूपाः भक्तिरिति** ॥ सामान्याभिप्रायं भक्तिरित्येकवचनम्। वेदाः प्रमाणमितिवत्। **पायसिक इति** ॥ पयो भक्तिरस्येति विग्रहः। **महाराजाट्ठञ्** ॥ सोऽस्य भक्तिरित्यर्थे इति शेषः। **माहाराजिक इति** ॥ महाराजः भक्तिरस्येति विग्रहः। **वासुदेव** ॥ सोऽस्य भक्तिरित्येव। **वासुदेवक इति** ॥ वासुदेवो भक्तिरस्येति विग्रहः। एवमर्जुनकः। ननु वसुदेवस्यापत्यमित्यर्थे 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' इति वार्ष्णेयत्वादणि वासुदेवशब्दात् 'गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ्' इति वुञैव सिद्धत्वाद्वासुदेवग्रहणं व्यर्थमिति चेत्, सत्यम्। अणन्तो वासुदेवशब्दोऽत्र न गृह्यते। किन्तु यस्मिन् समस्तं वसति यो वा समस्ते वसति स वासुः, स चासौ देवश्चेति व्युत्पत्त्या वासुदेवशब्दोऽयं भगवति योगरूढ एवेति न दोषः। उक्तञ्च भाष्ये "नैषा क्षत्रियाख्या संज्ञैषा तत्रभवतः" इति। **गोत्रक्षत्रिय** ॥ गोत्रप्रत्ययान्तेभ्यः क्षत्रियवाचिभ्यश्च उक्तविषये बहुलं वुञ् स्यादित्यर्थः। इह न पारिभाषिकगोत्रम्। **छं बाधते इति** ॥ औपगव इत्यादाविति शेषः। **ग्लुचुकायनिरिति** ॥ 'प्राचामवृद्धात्' इति फिनि ग्लुचुकायनिशब्दः। **नाकुलक इति** ॥ क्षत्रियाख्योदाहरणम्।

१४८०। जनपदिनां जनपदवत्सर्वं जनपदेन समान-शब्दानां बहुवचने। (४-३-१००)

जनपदस्वामिवाचिनां बहुवचने जनपदवाचिना समानश्रुतीनां जनपदवत्सर्वं स्यात्प्रत्ययः प्रकृतिश्च। 'जनपदतदवध्योश्च' (सू १३४८) इति प्रकरणे ये प्रत्यया उक्तास्तेऽत्रातिदिश्यन्ते। अङ्गाः जनपदो भक्तिरस्य आङ्गकः। अङ्गाः क्षत्रियाः भक्तिरस्य आङ्गकः। 'जनपदिनाम्' किम्। पञ्चालाः ब्राह्मणाः भक्तिरस्य पाञ्चालाः। 'जनपदेन' इति किम्। पौरवो राजा भक्तिरस्य पौरवीयः।

१४८१। तेन प्रोक्तम्। (४-३-१०१)

पाणिनिना प्रोक्तं पाणिनीयम्।

१४८२। तित्तिरिवरतन्तुखण्डिकोखाच्छण्। (४-३-१०२)

'छन्दोब्राह्मणानि—' (सू १२७८) इति तद्विषयता। तित्तिरिणा प्रोक्तमधीयते तैत्तिरीयाः।

जनपदिनाम् ॥ बहुवचने परे ये जनपदसमानशब्दाः जनपदवाचिशब्देन समानः शब्दः श्रवणं येषां तथाविधाः तेषां जनपदिनाञ्जनपदस्वामिवाचिनां जनपदवत् जनपदे इव सर्वं स्यादित्यर्थः। 'जनपदतदवध्योश्च' इति प्रकरणे ये प्रत्यया विहिताः ते भवन्ति, प्रकृतयोऽपि तथैव भवन्तीति तु सर्वशब्दाल्लभ्यते। तदाह। **जनपदस्वामिवाचिनामित्यादिना॥ अङ्गा जनपद इति** ॥ दृष्टान्तार्थमिदम्। अङ्गनाम्नां राज्ञां निवासो जनपदः अङ्गाः, 'जनपदे लुप्' इति चातुरर्थिकस्य लुप्। सः जनपदः भक्तिरस्येत्यर्थे 'जनपदतदवध्योश्च' इति वुञ्प्रत्यये आङ्गकः इति यथा तथा अङ्गदेशस्वामिनः क्षत्रियाः अङ्गाः भक्तिरस्येत्यर्थे क्षत्रियवाचकादङ्गशब्दाद्वुञि आङ्गका इति रूपमित्यर्थः। **पञ्चाला ब्राह्मणा इति** ॥ अभेदोपचारादिह ब्राह्मणेषु पञ्चालशब्दः। तत्रातिदेशाभावादणेव भवति। **पौरव इति** ॥ पौरवशब्दो न जनपदवृत्तिरिति भावः। बहुवचने किम्। जनपदादिवचनयोः सत्यपि शब्दभेदे अतिदेशो भवति। यथा आङ्गो वा आङ्गौ वा भक्तिरस्य आङ्गक इति। प्रकृतिश्चेति किम्। मद्राणां राजा माद्रः। 'ब्रह्मगध' इत्यण्। माद्रो भक्तिरस्येत्यर्थे अतिदेशान्माद्रस्य मद्रत्वे सति 'मद्रवृज्योः' इति कनि माद्रक इति सिद्ध्यति। **तेन प्रोक्तम्** ॥ अस्मिन्नर्थे तृतीयान्तात् यथाविहितं प्रत्ययाः स्युरित्यर्थः। **पाणिनीयमिति** ॥ व्याकरणमिति शेषः। वृद्धाच्छः। प्रथमम्प्रकाशितम्प्रोक्तम्। नेह देवदत्तेनाध्यापितम्। **तित्तिरिवरतन्तु** ॥ तेन प्रोक्तमित्येव। तित्तिरि, वरतन्तु, खण्डिक, उखा, एभ्यः उक्तविषये छण् स्यादित्यर्थः। इत आरभ्य 'तेनैकदिक्' इतिपर्यन्तम्प्रोक्ते वेदे भवन्ति 'शौनकादिभ्यः छन्दसि' इति छन्दोग्रहणस्य ततः पूर्वन्ततः उत्तरञ्चापकर्षानुवृत्त्योरभ्युपगमात्। अत छणादिप्रत्ययान्तानामेषाङ्गेवलानात्र प्रयोगः। किन्त्वध्येतृवेदितृ-

१४८३। काश्यपकौशिकाभ्यामृषिभ्यां णिनिः। (४-३-१०३)

काश्यपेन प्रोक्तमधीयते काश्यपिनः।

१४८४। कलापिवैशम्पायनान्तेवासिभ्यश्च। (४-३-१०४)

कलाप्यन्तेवासिभ्यः— हरिद्रुणा प्रोक्तमधीयते हारिद्रविणः। वैशम्पायनान्तेवासिभ्यः—आलम्बिनः।

१४८५। पुराणप्रोक्तेषु ब्राह्मणकल्पेषु। (४-३-१०५)

तृतीयान्तात्प्रोक्तार्थे णिनिः स्यात्। यत्प्रोक्तं पुराणप्रोक्ताश्चेद्ब्राह्मणकल्पास्ते भवन्ति। पुराणेन चिरन्तनेन मुनिना प्रोक्ताः। भल्लु, भाल्लविनः। शाट्यायन,

---

प्रत्ययशिरस्काणामेवेत्याह। **छन्दोब्राह्मणानीति॥ तद्विषयतेति॥** अध्येतृवेदितृप्रत्ययशिरस्कत्वन्त्वानियम इत्यर्थः। **तैत्तिरीया इति॥** प्रोक्ते वेदे छण् ईयः। तैत्तिरीयः शाखाभेदः, तमधीयते विन्दन्ति वेत्यर्थे अण्। 'प्रोक्ताल्लुक्' इति तस्य लुगिति भावः। वारतन्तवीयाः खाण्डिकीयाः औखीयाः। तित्तिरिणा प्रोक्तः श्लोकः इत्यत्र तु न। छन्दसीत्यनुवृत्तेः। छन्दःशब्देन च कल्पसूत्राणामपि ग्रहणम्। तेषां सर्वशाखागतविधिवाक्यसङ्ग्रहात्मकत्वात्। **काश्यप॥** तेन प्रोक्तमित्येव। छस्यापवादः। **काश्यपिन इति॥** काश्यपशब्दात् णिनिः। णकार इत्, नकारादिकार उच्चारणार्थः। काश्यपिन्शब्दात् 'प्रोक्ताल्लुक्' इत्यध्येतृप्रत्ययस्याणो लुगिति भावः। एवं कौशिकिनः। ऋषिभ्याङ्गिम्। इदानीन्तनेन काश्यपेन प्रोक्तं काश्यपीयम्। **कलापि॥** तेन प्रोक्तमित्येव। कलापिशिष्यवाचिभ्यः वैशम्पायनशिष्यवाचिभ्यश्च णिनिः स्यादित्यर्थः। **कलाप्यन्तेवासिभ्यः इति॥** उदाह्रियते इति शेषः। **हारिद्रविण इति॥** हरिद्रुर्नाम कलापिनः शिष्यः। ततः प्रोक्ते णिनिः, ओर्गुणः, आदिवृद्धिः। हारिद्रविन्शब्दादध्येत्रणः 'प्रोक्ताल्लुक्' इति लुगिति भावः। हरिद्रुः, छगली, तुम्बुरुः, उलपः इति चत्वारः कलापिशिष्याः। तुम्बुरुणा प्रोक्तमधीयते तौम्बुरविणः। छगलिनस्तु ढिनुग्वक्ष्यते। औलपिनः। **वैशम्पायनान्तेवासिभ्यः इति॥** उदाह्रियते इति शेषः। **आलम्बिन इति॥** आलम्बिः, कलिङ्गः, कमलः, ऋचाभः, आरुणिः, ताण्ड्यः, श्यामायनः, कठ, कलापी इति नव वैशम्पायनशिष्याः। तत्र आलम्बशब्दात् अध्येत्रणः प्रोक्ते णिनिः। आलम्बिन्शब्दादध्येत्रणः 'प्रोक्ताल्लुक्' इति लुक्। आलम्बिनः, कालिङ्गिनः, कामलिनः, आर्चाभिनः, आरुणिनः, ताण्डिनः, अत्र 'आपत्यस्य' इति यलोपः। श्यामायनिनः। कठात्तु लुग्वक्ष्यते। कलापिनस्त्वण् वक्ष्यते। वैशम्पायनशिष्यः कलापी। तथाच कलाप्यन्तेवासिनां वैशम्पायनशिष्यत्वादेव सिद्धे पृथग्ग्रहणात् तच्छिष्यशिष्याणां न ग्रहणमिति भाष्ये स्पष्टम्। **पुराणप्रोक्तेषु॥** 'तेन प्रोक्तम्' इति णिनिः इति चानुवर्तते। मन्त्रव्यतिरिक्तवेदभागाः ब्राह्मणानि। बोधायनादिकल्पसूत्राणि कल्पाः। तथाभूतेषु पुरातनमुनिप्रोक्तेषु ग्रन्थेषु वाच्येषु तृतीयान्ताण्णिनिः स्यादित्यर्थः। तदाह। **तृतीयान्तादिति॥ यत्प्रोक्तमिति॥** सामान्याभिप्रायमेकवचनम्। प्रत्ययाभिधेयं यत्प्रोक्तं तत्पुरातनमुनिप्रोक्तब्राह्मणकल्पात्मकञ्चेति यावत्। पुराणप्रोक्तमित्येतद्व्याचष्टे। **पुराणेनेति॥** ब्राह्मणे उदाहरति।

शाट्यायनिनः । कल्पे, पिङ्ग पैङ्गी कल्पः । 'पुराण–' इति किम् । याज्ञवल्कानि ब्राह्मणानि । आश्मरथः कल्पः । अणि । 'आपत्यस्य–' (सू १०८२) इति यलोपः ।

१४८६ । शौनकादिभ्यश्छन्दसि । (४-३-१०६)

छन्दस्यभिधेये एभ्यो णिनिः । शौनकेन प्रोक्तमधीयते शौनकिनः ।

१४८७ । कठचरकाल्लुक् । (४-३-१०७)

आभ्यां प्रोक्तप्रत्ययस्य लुक्स्यात् । कठेन प्रोक्तमधीयते कठाः । चरकाः ।

१४८८ । कलापिनोऽण् । (४-३-१०८)

कलापिना प्रोक्तमधीयते । कालापाः । 'नान्तस्य टिलोपे सब्रह्मचारि-पीठसर्पिकलापिकौथुमितैतिलिजाजलिलाङ्गलिशिलालिशिखण्डिसूकरसद्मसुपर्व-णामुपसङ्ख्यानम्' (वा ४१८३) इत्युपसङ्ख्यानाट्टिलोपः ।

१४८९ । छगलिनो ढिनुक् । (४-३-१०९)

भल्लु, भाल्लविनः इति ॥ भल्लु इति प्रकृतिनिर्देशः । भल्लुना पुरातनमुनिना प्रोक्तान् ब्राह्मणभागानधीयते इत्यर्थे प्रोक्तार्थणिनिः । भाल्लविन्शब्दादध्येत्रर्थो लुकि भाल्लविन इति रूपमिति भावः । ब्राह्मणे उदाहरणान्तरमाह । **शाट्यायन, शाट्यायनिन इति** ॥ शाट्या-यनेति प्रकृतिनिर्देशः । शाट्यायनेन पुरातनमुनिना प्रोक्तान् ब्राह्मणभागान् अधीयते इत्यर्थे प्रोक्तार्थणिनिप्रत्यये शाट्यायनिन्शब्दादध्येत्रर्थो लुकि शाट्यायनिन इति रूपमित्यर्थः । **कल्पे इति** ॥ उदाहियते इति शेषः । **पिङ्ग पैङ्गी कल्प इति** ॥ पिङ्गेति प्रकृतिनिर्देशः पिङ्गेन पुरातन-मुनिना प्रोक्त इत्यर्थे णिनि रूपम् । 'छन्दोब्राह्मणानि च तद्विषयाणि' इत्यध्येतृप्रत्ययान्तत्वनियमस्तु कल्पेषु न सर्वत्र प्रवर्तत इति 'छन्दो ब्राह्मणानि' इति सूत्रे भाष्ये स्पष्टम् । **याज्ञवल्कानि ब्राह्मणानीति** ॥ याज्ञवल्क्येन प्रोक्तानीत्यर्थः । **आश्मरथः कल्प इति** ॥ आश्मरथ्येन प्रोक्त इत्यर्थः । **यलोप इति** ॥ यज्ञवल्काश्वरथशब्दौ कण्वादौ । ताभ्यां यञन्ताभ्याम् अणि 'आपत्यस्य च' इति यलोप इत्यर्थः । याज्ञवल्क्याश्मरथ्यावाधुनिकाविति त्वभिमानः । भाष्ये तु शाट्याय-नादितुल्यकालत्वात् याज्ञवल्क्यादिभ्यो णिनिप्रतिषेध इति तद्विषयता च नेति वचनद्वयमारब्ध-मित्यास्तान्तावत् । **कठचरकाल्लुक्** ॥ **प्रोक्तप्रत्ययस्येति** ॥ प्रकरणलभ्यम् । **कठाः इति** ॥ वैशम्पायनान्तेवासित्वलक्षणणिनो लुक् । अध्येत्रणस्तु 'प्रोक्ताल्लुक्' इति लुक् । **चरकाः इति** ॥ चरकेण प्रोक्तमधीयते इत्यर्थः । प्रोक्ताणोऽनेन लुकि अध्येत्रणः प्रोक्ताल्लुक् । **कलापिनोऽण्** ॥ 'तेन प्रोक्तम्' इत्येव । वैशम्पायनशिष्यत्वात् प्राप्तस्य णिनेरपवादः । **कालापा इति** ॥ कलापिन्शब्दादणि टिलोपे कालापशब्दादध्येतृप्रत्ययस्य छस्य लुगिति भावः । 'इनण्यनपत्ये' इति प्रकृतिभावमाशङ्क्य आह । **नान्तस्येति । छगलिनो ढिनुक्** ॥

छगलिना प्रोक्तमधीयते छागलेयिनः।

१४९०। पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः। (४-३-११०)

णिनिः स्यात्। पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीयते पाराशरिणो भिक्षवः। शैलालिनो नटाः।

१४९१। कर्मन्दकृशाश्वादिनिः। (४-३-१११)

'भिक्षुनटसूत्रयोः' इत्येव। कर्मन्देन प्रोक्तमधीयते कर्मन्दिनो भिक्षवः। कृशाश्विनो नटाः।

१४९२। तेनैकदिक्। (४-३-११२)

सुदाम्ना अद्रिणा एकदिक् सौदामनी।

१४९३। तसिश्च। (४-३-११३)

स्वरादिपाठादव्ययत्वम्। पीलुमूलेन एकदिक् पीलुमूलतः।

१४९४। उरसो यच्च। (४-३-११४)

चात्तसिः। अणोऽपवादः। उरसा एकदिक् उरस्यः—उरस्तः।

छगलिन्शब्दादुक्तविषये ढिनुक्प्रत्ययः स्यादित्यर्थः। कलाप्यन्तेवासित्वात् प्राप्तस्य णिनेरपवादः। **छागलेयिन इति** ॥ ककार इत्, उकार उच्चारणार्थः। ढिन् शिष्यते। ढस्य एय्, टिलोपः। ततोऽध्येतृप्रत्ययस्य लुगिति भावः। **पाराशर्य** ॥ **णिनिः स्यादिति** ॥ उक्तविषये इति शेषः। मण्डूकप्लुत्या णिनिरेवानुवर्तते इति भावः। पाराशर्येण प्रोक्तं भिक्षुसूत्रमित्यर्थे, शलालिना प्रोक्तनटसूत्रमित्यर्थे च तृतीयान्ताण्णिनिः स्यादिति यावत्। भिक्षवः सन्यासिनः, तदधिकारिकं सूत्रं भिक्षुसूत्रं व्यासप्रणीतं प्रसिद्धम्। **पाराशर्येणेति** ॥ पराशरशब्दाद्गर्गादित्वात् गोत्रे यञि पाराशर्यः व्यासः। इह त्वनन्तरापत्ये गोत्रत्वारोपाद्यञ्। तेन प्रोक्ते भिक्षुसूत्रे णिनिः, ततोऽध्येतृप्रत्ययस्य छस्य लुक्। **पाराशरिण इति** ॥ जसि रूपम्। **शैलालिन इति** ॥ शिलालिन्शब्दात् नटसूत्रे प्रोक्ते णिनौ टिलोपे शिलालिन्शब्दादध्येतृप्रत्ययस्याणो लुकि शैलालिन इति जसि रूपमिति भावः। **कर्मन्द** ॥ कर्मन्देन प्रोक्तं भिक्षुसूत्रमित्यर्थे कृशाश्वेन प्रोक्तनटसूत्रमित्यर्थे च तृतीयान्तादिनिः स्यादिति यावत्। प्रत्यये अन्त्य इकार उच्चारणार्थः। कर्मन्दशब्दादिनिः। ततोऽध्येत्रणो लुक्। एवं कृशाश्विनः। **तेनैकदिक्** ॥ सहार्थे तृतीया। एका दिक् अधिकरणात्मिका यस्य तदेकदिक्। तेन सह एकस्यान्दिशि विद्यमानमित्यर्थे तृतीयान्ताद्यथाविहितम्प्रत्ययाः स्युरित्यर्थः। **सौदामनीति** ॥ अणि 'अन्' इति प्रकृतिभावान्न टिलोपः। **तसिश्च** ॥ 'तेनैकदिक्' इत्यर्थे तृतीयान्तात्तसिश्च स्यादित्यर्थः। इकार उच्चारणार्थः। **स्वरादिपाठादिति** ॥ 'स्वरादिनिपातमव्ययम्' इति प्रकरणे 'तद्धितश्चासर्वविभक्तिः' इत्यत्र 'तसिलादयः' इति परिगणने तसेः पाठादित्यर्थः। **उरसो**

१४९५ । उपज्ञाते । (४-३-११५)

'तेन' इत्येव । पाणिनिनोपज्ञातं पाणिनीयम् ।

१४९६ । कृते ग्रन्थे । (४-३-११६)

वररुचिना कृतो वाररुचो ग्रन्थः ।

१४९७ । संज्ञायाम् । (४-३-११७)

'तेन' इत्येव । अग्रन्थार्थमिदम् । मक्षिकाभिः कृतं माक्षिकं मधु ।

१४९८ । कुलालादिभ्यो वुञ् । (४-३-११८)

तेन कृते संज्ञायाम् । कुलालेन कृतं कौलालकम् । वारुडकम् ।

१४९९ । क्षुद्राभ्रमरवटरपादपादञ् । (४-३-११९)

तेन कृते संज्ञायाम् । क्षुद्राभिः कृतं क्षौद्रम् । भ्रामरम् । वाटरम् । पादपम् ।

१५०० । तस्येदम् । (४-३-१२०)

उपगोरिदमौपगवम् । 'वहेस्तुरणिट् च' (वा १९१०) । संवोढुः स्वं सांवहित्रम् । 'अग्नीधः शरणे रण् भत्वं च' (वा २९११) । अग्निमिन्धे अग्नीत् ।

यच्च ॥ उरसा एकदिगित्यर्थे तृतीयान्तादित्यर्थः । **उपज्ञाते** ॥ तेनोपज्ञातमित्यर्थे तृतीयान्तात् यथाविहितं प्रत्ययाः स्युरित्यर्थः । उपज्ञातं प्रथमज्ञातम् । **कृते ग्रन्थे** ॥ तेन कृतो ग्रन्थः इत्यर्थे तृतीयान्ताद्यथाविहितं प्रत्ययाः स्युरित्यर्थः । **संज्ञायाम्** ॥ **तेनेत्येवेति** ॥ तेन कृतमित्यर्थे संज्ञायां तृतीयान्ताद्यथाविहितं प्रत्ययाः स्युरित्यर्थः । ग्रन्थे इति नानुवर्तते । तदाह । **अग्रन्थार्थमिति** ॥ **कुलालादिभ्यो वुञ्** ॥ तेन कृते संज्ञायामिति शेषपूरणम् । **वारुडकमिति** ॥ वरुडो जातिविशेषः । **क्षुद्राभ्रमर** ॥ तेन कृते संज्ञायामिति शेषपूरणम् । क्षुद्रा मधुमक्षिकाः । **तस्येदम्** ॥ इदमित्यर्थे षष्ठ्यन्तादणादयः साधारणप्रत्ययाः राष्ट्रावारेत्यादिविशिष्यविहिताः घादयश्च प्रत्ययाः यथाविहितं स्युरित्यर्थः । अत्र शेषे इत्यनुवृत्तम् । ततश्च अपत्यादिचतुरर्थ्यन्तार्थेभ्योऽन्येषां शेषभूतसर्वविशेषाणां सामान्यविशेषरूपेण प्रत्ययार्थत्वं लभ्यते । अपत्यादीनान्तु न केनापि रूपेण इदंशब्दार्थत्वमिति 'तस्यापत्यम्' इत्यत्रोक्तम् । **वहेस्तुरणिट् चेति** ॥ वार्तिकमिदम् । तुरिति तृन्तृचोः सामान्येन ग्रहणम् । वहधातोर्विहितः यः तृप्रत्ययः तस्मादण् स्यात् तृप्रत्ययस्य इडागमश्च । तत्र अण् पूर्वेण सिद्धः इड्विध्यर्थमनूद्यते । **संवोढुः स्वमिति** ॥ विग्रहप्रदर्शनम् । वहेस्तृच्, तृन् वा । वहेरनुदात्तत्वात् 'एकाच उपदेशे' इति नेट् । 'सहिवहोरोदवर्णस्य' इत्योत्त्वम् । ढत्वधत्वष्टुत्वढलोपाः । **सांवहित्रमिति** ॥ ढत्वादीनामसिद्धत्वादलौकिक एव विग्रहवाक्ये पूर्वमिट् । ततो निमित्ताभावान्न ढत्वादि । **अग्नीधश्शरणे रण् भत्वञ्चेति** ॥ वार्तिकमिदम् ।

तस्य स्थानमाग्नीध्रम्। तात्स्थ्यात्सोऽप्याग्नीध्रः। 'समिधामाधाने षेण्यण्' (वा २९१२)। सामिधेन्यो मन्त्रः—सामिधेनी ऋक्।

१५०१। रथाद्यत्। (४-३-१२१)

रथ्यं चक्रम्।

१५०२। पत्रपूर्वादञ्। (४-३-१२२)

पत्रं वाहनम्। अश्वरथस्येदमाश्वरथम्।

१५०३। पत्राध्वर्युपरिषदश्च। (४-३-१२३)

अञ्। 'पत्राद्वाह्ये' (वा २९०८)। अश्वस्येदं वहनीयमाश्वम्। आध्वर्यवम्। पारिषदम्।

१५०४। हलसीराट्ठक्। (४-३-१२४)

हालिकम्। सैरिकम्।

१५०५। द्वन्द्वादुन्वैरमैथुनिकयोः। (४-३-१२५)

शरणमित्यर्थे अग्नीच्छब्दात् षष्ठ्यन्तादण्, तस्मिन्परे भत्वञ्च वक्तव्यमित्यर्थः। शरणं गृहम्। **अग्निमिन्धे अग्नीदिति** ॥ ऋत्विग्विशेषोऽयम्। इन्धेः क्विप्। 'अनिदिताम्' इति नलोपः। **आग्नीध्रमिति** ॥ सोमे महावेदेरुत्तरार्धे पञ्चारत्निचतुरश्रस्थानविशेषसंज्ञेयम्। भत्वान्न जश्त्वम्। प्रत्ययस्वरेणान्तोदात्तोऽयं शब्दः। तैत्तिरीये 'एतद्वै यज्ञस्यापराजितं यदाग्नीध्रमित्यादावाद्युदात्तत्वन्तु 'आग्नीध्रसाधारणादञ् वक्तव्यः' इति स्वार्थिके अञि बोध्यम्। नन्वेवम् "आग्नीध्रः प्रत्याश्रावयेत्" इत्यादौ कथमृत्विग्विशेषे आग्नीध्रशब्दः। तत्राह। **तात्स्थ्यादिति** ॥ आग्नीध्राख्यदेशस्थत्वात् ऋत्विग्विशेषे आग्नीध्रशब्दो गौण इति भावः। **समिधामिति** ॥ आधीयते अनेनेत्याधानः मन्त्रः। आधानो मन्त्र इत्यर्थे षष्ठ्यन्तात् समिच्छब्दात् षेण्यण्प्रत्ययो वाच्य इत्यर्थः। षत्वं ङीषर्थमित्याह। **सामिधेनी ऋगिति** ॥ सामिधेन्यशब्दात् ङीष् 'हलस्तद्धितस्य' इति यलोपः। **रथाद्यत्** ॥ 'तस्येदम्' इत्येव। **रथ्यं चक्रमिति** ॥ 'रथाद्रथाङ्गः' इति वचनाच्चक्रमिति विशेष्यम्। **पत्रपूर्वादञ्** ॥ रथादित्येव। **पत्रं वाहनमिति** ॥ "पत्रं वाहनपक्षयोः' इति कोशः। **पत्राध्वर्युपरिषदश्च** ॥ **अञिति** ॥ शेषपूरणम्। **पत्रादिति** ॥ पत्राद्वाह्य एवेति वक्तव्यमित्यर्थः। **आश्वमिति** ॥ पत्रेत्यर्थग्रहणमिति भावः। **आध्वर्यवम्। पारिषदमिति** ॥ अध्वर्योरिदं परिषद इदमिति विग्रहः। **हलसीराट्ठक्** ॥ तस्येदमित्येव। **हालिकम्। सैरिकमिति** ॥ हलस्येदं सीरस्येदमिति विग्रहः। **द्वन्द्वादुन्** ॥ वैरे मैथुनिकायाञ्च इदन्त्वेन विवक्षिते द्वन्द्वात् षष्ठ्यन्तात् वुन् स्यादित्यर्थः। **काकोलूकिकेति** ॥ काकोलूकस्य वैरमित्यर्थः। वुनि स्त्रीत्वं लोकात्।

काकोलूकिका । कुत्सकुशिकिका । 'वैरे देवासुरादिभ्यः प्रतिषेधः' (वा २९१४) । दैवासुरम् ।

१५०६ । गोत्रचरणाद्वुञ् । (४-३-१२६)

औपगवकम् । 'चरणाद्धर्मान्नाययोरिति' वक्तव्यम्' (वा २७१३) । काठकम् ।

१५०७ । सङ्घाङ्कलक्षणेष्वञ्ञिञामण् । (४-३-१२७)

'घोषग्रहणमपि कर्तव्यम्' (वा २९१५) । अञ् । बैदः सङ्घोऽङ्को घोषो वा बैदं लक्षणम् । यञ्, गार्गः—गार्गम् । इञ्, दाक्षः—दाक्षम् । परम्परासम्बन्धोऽङ्कः । साक्षात्तु लक्षणम् ।

१५०८ । शाकलाद्वा । (४-३-१२८)

अण्वोक्तेऽर्थे । पक्षे चरणत्वाद्वुञ् । शकलेन प्रोक्तमधीयते शाकलाः, तेषां सङ्घोऽङ्को घोषो वा शाकलः—शाकलकः । लक्षणे क्लीबता ।

कुत्सकुशिकिकेति ॥ कुत्सकुशिकयोर्विवाह इत्यर्थः । वुनि स्त्रीत्वं लोकात् । मिथुनं दम्पती । तस्य कर्म मैथुनिका । मनोज्ञादित्वाद्वुञ् । स्त्रीत्वं लोकात् । **वैरे देवासुरेति** ॥ वार्तिकमिदम् । **दैवासुरमिति** ॥ देवासुरयोर्वैरमित्यर्थः । वुञ्भावे अण् । मैथुनिकायान्तु देवासुरिकेत्येव । 'द्वन्द्वे देवासुर' इति त्वपपाठः । अत्र भाष्ये वैर इत्येव वार्तिकपाठात् । 'शिशुक्रन्द' इति सूत्रभाष्ये तु 'द्वन्द्वे देवासुरादिभ्यः प्रतिषेधः' इति पठितम् । देवासुरम्, रक्षोसुरमित्युदाहृतञ्च । देवासुराद्यधिकृत्य कृतमाख्यानमित्यर्थः । **गोत्रचरणाद्वुञ्** ॥ गोत्रप्रत्ययान्तात् शाखाध्येतृवाचिनश्च षष्ठ्यन्तादिदमित्यर्थे वुञित्यर्थः । प्रवराध्यायप्रसिद्धमिह गोत्रमित्यभिप्रेत्योदाहरति । **औपगवकमिति** ॥ औपगवस्येदमित्यर्थः । वस्तुतस्तु औपगवः प्रवरसूत्रेषु न दृष्टः । ग्लौचुकायनकमिति वृत्त्यादौ उदाहृतम् । **चरणादिति** ॥ चरणाद्यो वुञ् विहितः सः धर्मे आम्नाये च वाच्ये भवति नान्यत्रेत्यर्थः । **काठकमिति** ॥ कठेन प्रोक्तमधीयते कठाः, तेषां धर्मः आम्नायो वेत्यर्थः । आम्नायो वेदाभ्यासः । **सङ्घाङ्क** ॥ अञन्तात्, यञन्तात्, इञन्ताच्च सङ्घे अङ्के लक्षणे च इदन्त्वेन विवक्षिते अणित्यर्थः । छस्यापवादः । **घोषेति** ॥ 'सङ्घाङ्कलक्षणघोषेषु' इति सूत्रङ्कर्तव्यमित्यर्थः । तथाच तिस्रः प्रकृतयः प्रत्ययार्थाश्चत्वार इति न यथासङ्ख्यम् । **गार्ग इति** ॥ सङ्घः अङ्को घोषो वेति शेषः । **गार्गमिति** ॥ लक्षणमिति शेषः । एवं दाक्षो, दाक्षमित्यत्रापि । नन्वङ्कलक्षणशब्दयोः पर्यायत्वात् पृथग्ग्रहणं व्यर्थमित्यत आह । **परम्परेति** ॥ यथा गवादिनिष्ठस्तप्तमुद्राविशेषः अङ्कः । तस्य हि गोद्वारा स्वामिसम्बन्धः । **साक्षादिति** ॥ विद्याविशेषस्तु देवदत्ते साक्षाद्विद्यमानत्वात्तस्य लक्षणमित्यर्थः । बैदी विद्या । "घोष आभीरपल्ली स्यात्" इत्यमरः । **शाकलाद्वा** ॥ **शकलेनेति** ॥

१५०९। छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः। (४-३-१२९)

छन्दोगानां धर्मः आम्नायो वा छान्दोग्यम्। औक्थिक्यम्। याज्ञिक्यम्। बाह्वृच्यम्। नाट्यम्। 'चरणाद्धर्माम्नाययोः' (वा २९१३) इत्युक्तम्। तत्साहचर्यान्नटशब्दादपि तयोरेव।

१५१०। न दण्डमाणवान्तेवासिषु। (४-३-१३०)

दण्डप्रधाना माणवा दण्डमाणवाः तेषु शिष्येषु च वुञ्न स्यात्। दाक्षाः दण्डमाणवाः शिष्या वा।

१५११। रैवतिकादिभ्यश्छः। (४-३-१३१)

तस्येदमित्यर्थे। वुञोऽपवादः। रैवतिकीयम्। बैजावापीयम्।

*१५१२। कौपिञ्जलहास्तिपदादण्। (४-३-१३२)

(वा १९१८)। कुपिञ्जलस्यापत्यम्। इहैव निपातनादण्। तदन्तात्पुनरण्। कौपिञ्जलः। गोत्रवुञोऽपवादः। हस्तिपदस्यापत्यं हास्तिपदः, तस्यायं हास्तिपदः।

शकलशब्दात्प्रोक्ताणन्तादध्येतृप्रत्ययस्य लुकि शाकलशब्दात् 'गोत्रचरणात्' इति धर्माम्नाययोर्वुञोऽपवादः अण्। तदभावे वुञ्। **छन्दोगौक्थिक** ॥ सङ्घादयो निवृत्ताः। छन्दोगादीनाञ्चरणत्वात्। धर्माम्नाययोरिति सम्बध्यते। छन्दोग, औक्थिक, याज्ञिक, बह्वृच, नट, एभ्यो धर्मे आम्नाये च इदन्त्वेन विवक्षिते ञ्यः स्यादित्यर्थः। ननु नटस्य अचरणत्वात्तत्र धर्माम्नाययोः कथमन्वय इत्याशङ्क्ते। **चरणाद्धर्माम्नाययोरित्युक्तमिति** ॥ यद्यपीति शेषः। परिहरति। **तत्साहचर्यादिति** ॥ तथापि छन्दोगादिसाहचर्यान्नटशब्दादपि धर्माम्नाययोरेव प्रत्यय इत्यर्थः। **न दण्ड** ॥ दण्ड माणवाश्च अन्तेवासिनश्च तेष्विति द्वन्द्वः। **दाक्षा इति** ॥ दक्षस्यापत्यं दाक्षिः, तस्येमे दण्डमाणवाः शिष्या वेत्यर्थे गोत्रत्वलक्षणो वुञ् न भवति। किन्त्वौत्सर्गिकः अणेव। **रैवतिकादिभ्यश्छः** ॥ **तस्येदमित्यर्थे इति** ॥ शेषपूरणम्। **वुञ इति** ॥ गोत्रत्वलक्षणवुञोऽपवाद इत्यर्थः। **रैवतिकीयमिति** ॥ रेवत्या अपत्यं रैवतिकः। रेवत्यादिभ्यष्ठक्। रैवतिकस्येदमिति विग्रहः। **बैजावापीयमिति** ॥ बीजावापस्यापत्यं बीजावापिः, तस्येदमिति विग्रहः। **कौपिञ्जलहास्तिपदादण्** ॥ **कुपिञ्जलेति** ॥ कुपिञ्जलस्यापत्यमित्यनन्तरं 'इत्यर्थे' इति शेषः। **इहेति** ॥ अस्मिन् सूत्रे कौपिञ्जलेति निर्देशात् अत इञम्बाधित्वा अणित्यर्थः। **तदन्तादिति** ॥ अणन्तात् 'तस्येदम्' इत्यर्थे अनेन वार्तिकेन पुनरणित्यर्थः। **हस्तिपादस्येति** ॥ हस्तिन इव पादौ अस्येति विग्रहः। पादस्य लोप इति

---

*'अपाणिनीयः सूत्रेषु पाठः' इति कैयटः।

*१५१३ । आथर्वणिकस्येकलोपश्च । (४-३-१३३)

अण्स्यात् । आथर्वणिकस्यायमाथर्वणो धर्म आम्नायो वा । चरणाद्युञोऽपवादः ।

इति तद्धिते शैषिकप्रकरणम् ।

अथ तद्धिते प्राग्दीव्यतीयप्रकरणम् ।

१५१४ । तस्य विकारः । (४-३-१३४)

'अश्मनो विकारे टिलोपो वक्तव्यः' (वा ४१८५) । **अश्मनो विकारः आश्मः । भास्मनः । मार्त्तिकः ।**

न भवति । हस्तिपादस्यापत्यं हास्तिपादः । अत इञम्बाधित्वा अत एव निपातनादण् । हस्तिपादस्यायमित्यर्थे अनेन आणिति भावः । गोत्रयुञोऽपवादः । **आथर्वणिकस्येकलोपश्च ॥** इदं सूत्रमिति कैयटः । वार्तिकमित्यन्ये । **अण् स्यादिति ॥** आथर्वणिकशब्दात्तस्येदमित्यर्थे अण् स्यात् । प्रकृतेरिकस्य लोपश्चेत्यर्थः । **आथर्वणिकस्येति ॥** अथर्वणा प्रोक्तो वेदः अथर्वेत्युपचर्यते, तमधीते आथर्वणिकः । वसन्तादित्वाट्ठक् । आथर्वणिकस्यायमित्यर्थे अनेन आणि इको लोपे 'दाण्डिनायन' इति टिलोपाभावे आथर्वण इति रूपमित्यर्थः । **धर्म आम्नायो वेति ॥** "चरणाद्धर्मान्नाययोरित्युक्तेः" इति भावः । ननु तस्येदमित्येव सिद्धे अण्विधिर्व्यर्थ इत्यत आह । **चरणाद्युञोऽपवाद इति ॥** आथर्वणिकशब्दस्य अथर्वणवेदाध्येतृवाचित्वादिति भावः ।

इति तद्धिते शैषिकप्रकरणम् ।

अथ विकारार्थप्रत्यया निरूप्यन्ते—**तस्य विकारः ॥** विक्रियते इति विकारः, कर्मणि घञ् । प्रकृतेरवस्थान्तरात्मिकां विक्रियां प्राप्त इत्यर्थः । विकार इत्यर्थे षष्ठ्यन्तादणादयः साधारणा वक्ष्यमाणाश्च वैशेषिका यथाविहितं स्युरित्यर्थः । **अश्मनो विकार इति ॥** विकारार्थकप्रत्यये परे अश्मन्शब्दस्य टिलोपो वक्तव्य इत्यर्थः । अनिति प्रकृतिभावापवादः । **आश्म इति ॥** अणि टिलोपे रूपम् । एवञ्चर्मणो विकारः चार्मः कोशः । 'चर्मणः कोशे' इत्युपसङ्ख्यानाट्टिलोपः **भास्मन इति ॥** भस्मनो विकार इत्यर्थः । अणि अनिति प्रकृतिभावान्न टिलोपः । **मार्त्तिक इति ॥** मृत्तिकाया विकार इत्यर्थः । अत्र 'प्राणिरजतादिभ्योऽञ्, ओरञ्, अनुदात्तादेश्च' इत्यादिवक्ष्यमाणापवादविषयभिन्नमुदाहरणम् । तत्र अश्मन्, भस्मन्, चर्मन्, इति त्रयं

---

*इदं सूत्रमिति कैयटः । 'इदमपि वार्तिकमेवेति हरदत्तः' इति विवरणे नागेशः । युक्तं च वार्तिकत्वमेव । सूत्रत्वे चकारेण वार्तिकस्थस्याणः सङ्ग्रहस्य क्लिष्टत्वात् ।

१५१५। अवयवे च प्राण्यौषधिवृक्षेभ्यः। (४-३-१३५)

चाद्विकारे। मयूरस्यावयवो विकारो वा मायूरः। मौर्वं काण्डं भस्म वा। पैप्पलम्।

१५१६। बिल्वादिभ्योऽण्। (४-३-१३६)

बैल्वम्।

१५१७। कोपधाच्च। (४-३-१३७)

अण्। अञोऽपवादः। तर्कु, तार्कवम्। तैत्तिडीकम्।

१५१८। त्रपुजतुनोः षुक्। (४-३-१३८)

आभ्यामण् स्याद्विकारे, एतयोः षुगागमश्च। त्रापुषम्। जातुषम्।

१५१९। ओरञ्। (४-३-१३९)

दैवदारवम्। भाद्रदारवम्।

मनिन्प्रत्ययान्तं नित्स्वरेणाद्युदात्तम्। मृत्तिकाशब्दोऽपि 'मृदस्तिकन्' इति तिकन्नन्तः। नित्स्वरेणाद्युदात्तः। **अवयवे च प्राण्यौषधि** ॥ प्राणिवाचिनः औषधिवाचिनो वृक्षवाचिनश्च षष्ठ्यन्तेभ्यः अवयवे विकारे च अणादयः साधारणा उक्ताः वक्ष्यमाणाश्च प्रत्ययाः यथाविहितं स्युः। अन्येभ्यस्तु विकारमात्र इत्यर्थः। प्राणिन उदाहरति। **मायूर इति** ॥ 'लघावन्ते' इति मयूरशब्दो मध्योदात्तः। ततः 'प्राणिरजतादिभ्यः' इत्यञ्। औषधेरुदाहरति। **मौर्वमिति** ॥ मूर्वा औषधिविशेषः। तस्या अवयवो विकारो वेत्यर्थः। औत्सर्गिकोऽण्। 'अनुदात्तादेश्च' इत्यञ् तु वक्ष्यमाणो न भवति। तृणधान्यानाञ्च 'द्व्यषाम्' इत्याद्युदात्तत्वात्। वृक्षस्योदाहरति। **पैप्पलमिति** ॥ पिप्पलः अश्वत्थः, तस्यावयवो विकारो वेत्यर्थः। 'लघावन्ते' इति मध्योदात्तः पिप्पलशब्दः। 'अनुदात्तादेश्च' इति वक्ष्यमाणाञोऽभावे औत्सर्गिकोऽण्। **बिल्वादिभ्योऽण्** ॥ एषु प्राण्यौषधिवृक्षेभ्यः अवयवे विकारे च, इतरेभ्यस्तु विकारे अण् स्यादित्यर्थः। **बैल्वमिति** ॥ बिल्वस्यावयवो विकारो वेत्यर्थः। बिल्व, व्रीहि, काण्ड, मुद्ग, मसूर, गोधूम, इक्षु, वेणु, गवेधुक, कार्पासी, पाटली, कर्कन्धू, कटीर, इति बिल्वादयः। तत्र गवेधुकस्य 'कोपधाच्च' इत्यणि सिद्धे मयटो बाधनार्थमिह पाठः। इतरेषान्तु 'अनुदात्तादेश्च' इत्यञो बाधनार्थमिति कौस्तुभे विस्तरः। **कोपधाच्च** ॥ अणिति शेषः। तत्र प्राण्यौषधिवृक्षेभ्योऽवयवे विकारे च, इतरेभ्यस्तु विकारे एव। **तर्कु, तार्कवमिति** ॥ तर्कु इति प्रकृतिनिर्देशः। तर्कुर्नाम वृक्षविशेषः। तस्यावयवो विकारो वेत्यर्थः। 'ओरञ्' इत्यस्यापवादः अण्। तित्तिडीकशब्दो 'लघावन्ते' इति मध्योदात्तः। 'अनुदात्तादेश्च' इत्यञोऽपवादः अण्। **त्रपुजतुनोः षुक्** ॥ **त्रापुषम्। जातुषमिति** ॥ त्रपुणो जतुनश्च विकार इत्यर्थः। **ओरञ्** ॥ उवर्णादञ् स्यादित्यर्थः। प्राण्यौषधिवृक्षेभ्यः अवयवे विकारे च, इतरेभ्यस्तु विकारे। **दैवदारवम्** ॥ **भाद्रदारवमिति** ॥ देवदारोर्भद्रदारोश्चावयवो विकारो वेत्यर्थः। 'पीतद्रवार्थानाम्'

१५२०। अनुदात्तादेश्च। (४-३-१४०)

दाधित्थम्। कापित्थम्।

१५२१। पलाशादिभ्यो वा। (४-३-१४१)

पालाशम्। खादिरम्। कारीरम्।

१५२२। शम्याः ष्लञ्। (४-३-१४२)

शामीलं भस्म। षित्त्वान्ङीष्। शामीली स्रुक्।

१५२३। मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः। (४-३-१४३)

प्रकृतिमात्रान्मयड्वा स्याद्विकारावयवयोः। अश्ममयम्—आश्मनम्। 'अभक्ष्य—' इत्यादि किम्। मौद्गः सूपः। कार्पासमाच्छादनम्।

१५२४। नित्यं वृद्धशरादिभ्यः। (४-३-१४४)

आम्रमयम्। शरमयम्। 'एकाचो नित्यम्'[1] (वा ५०५२)। त्वङ्मयम्। वाङ्मयम्। कथं तर्हि 'आप्यम्' 'अम्मयम्' इति, 'तस्येदम्' (सू १५००) इत्यण्णन्तात्स्वार्थे ष्यञ्।

इत्यादुदात्तावेतौ। ततश्च 'अनुदात्तादेश्च' इत्यनेन गतार्थता न। **अनुदात्तादेश्च**॥ विकारे अवयवे चेति शेषः। 'अवयवे च' इति सूत्रमप्यत्र सम्बध्यते। **दाधित्थमिति**॥ दधित्थस्यावयवो विकारो वेत्यर्थः। एवङ्कापित्थम्। "कपित्थे तु दधित्थग्राहिमन्मथाः" इत्यमरः। अव्युत्पन्नप्रातिपदिकत्वात् फिट्स्वरेणान्तोदात्तावेतौ। **पलाशादिभ्यो वा**॥ अवयवे चेत्येव। पलाशखदिरशिंशपास्यन्दनानामनुदात्तादित्वात् नित्यप्राप्ते इतरेषाम् अप्राप्ते विकल्पोऽयम्। **शम्याः ष्लञ्**॥ शमीशब्दो गौरादिङीषन्तः। तस्मात्षष्ठ्यन्तादवयवे विकारे च ष्लञ् स्यादित्यर्थः। षकारलकारावितौ। 'अनुदात्तादेश्च' इत्यञोऽपवादः। **शामीलं भस्मेति**॥ शम्या विकारः इत्यर्थः। **शामीली स्रुगिति**॥ शम्या विकार इत्यर्थः। वरुणप्रघासेषु शमीमय्यः स्रुचः प्रसिद्धाः। अवयवे तु शामीली शाखा। **मयड्वैतयोः**॥ "अधिकारादेव विकारावयवयोरिति सिद्धेरेतयोरिति वचनम् उक्तवक्ष्यमाणापवादविषयेष्वपि पक्षे मयडर्थम्" इति भाष्ये स्पष्टम्। तेन बिल्वमयं बैल्वमित्यादि सिद्ध्यतीत्यभिप्रेत्य आह। **प्रकृतिमात्रादिति**॥ सर्वस्याः प्रकृतेरित्यर्थः। **अश्ममयमिति**॥ मयटि अन्तर्वर्तिनी विभक्तिमाश्रित्य पदत्वम्, नलोपः। **आश्मनमिति**॥ कल्माषांघ्रिर्नाम कश्चिद्राजा तत्पत्न्यां वसिष्ठेनोत्पादितः अश्मकः इति। अश्मन्शब्दात् स्वार्थे कप्रत्ययः, तदभावे अश्मेत्यपि नाम, तस्य विकारो अवयवो वेत्यर्थः। 'अन्' इति प्रकृतिभावान्न टिलोपः। नच विकारार्थकत्वे अश्मनो विकारः इति टिलोपः शङ्क्यः। तत्र पाषाणवाचकत्वेन प्रसिद्धस्याश्मन्शब्दस्यैव ग्रहणादिति भावः। **नित्यं वृद्धशर**॥ मयडिति शेषः। उक्तविकल्पस्यापवादः।

---

१. आरम्भसामर्थ्यादेव नित्यत्वे सिद्धे नित्यग्रहणेनान्यार्थकेनेदं सिद्धम्।

१५२५। गोश्च पुरीषे। (४-३-१४५)

गोः पुरीषं गोमयम्।

१५२६। पिष्टाच्च। (४-३-१४६)

मयट् स्याद्विकारे। पिष्टमयम् भस्म। कथं पैष्टी सुरेति। सामान्यविवक्षायां 'तस्येदम्' (सू १५००) इत्यण्।

१५२७। संज्ञायां कन्। (४-३-१४७)

'पिष्टात्' इत्येव। पिष्टस्य विकारविशेषः पिष्टकः। 'पूपोऽपूपः पिष्टकः स्यात्' इत्यमरः।

१५२८। व्रीहेः पुरोडाशे। (४-३-१४८)

मयट् स्यात्। बिल्वाद्यणोऽपवादः। व्रीहिमयः पुरोडाशः। व्रैहमन्यत्।

१५२९। असंज्ञायां तिलयवाभ्याम्। (४-३-१४९)

तिलमयम्। यवमयम्। संज्ञायां तु तैलम्। यावकः।

१५३०। तालादिभ्योऽण्। (४-३-१५२)

अञ्मयटोरपवादः। 'तालाद्धनुषि' (ग सू १९४)। तालं धनुः। अन्यत्तालमयम्। ऐन्द्रायुधम्।

१५३१। जातरूपेभ्यः परिमाणे। (४-३-५६)

एकाचो नित्यमिति ॥ नित्यमिति योगविभागलब्धमिदम्। **अण्णन्तादिति** ॥ अपामिदमापम् 'तस्येदम्' इत्यण्। ततः स्वार्थे चतुर्वर्णादित्वात् ष्यञि आप्यमिति रूपमित्यर्थः। **गोश्च पुरीषे** ॥ नित्यं मयडित्यनुवर्तते। **गोमयमिति** ॥ यद्यपि पुरीषं न गोर्विकारो नाप्यवयवः। तथापि तस्येदमित्यर्थेऽयं प्रत्ययः। **पिष्टाच्च** ॥ शेषपूरणेन सूत्रं व्याचष्टे। **मयट् स्याद्विकारे इति** ॥ **संज्ञायां कन्** ॥ **विकारविशेष इति** ॥ अपूप इत्यर्थः। तदाह। **पूपोऽपूपः पिष्टकः स्यादिति** ॥ अमरकोशोऽयम्। पुरोडाशस्तु न पिष्टकः, तस्यानपूपत्वात्। 'अतुङ्गमनपूपाकृतिमत्शफमात्रम्पुरोडाशङ्करोति' इति श्रुतेः। **व्रीहेः पुरोडाशे** ॥ पुरोडाशात्मके विकारे नित्यं मयट् स्यादित्यर्थः। तर्हि बिल्वादिगणे पाठः किमर्थमित्यत आह। **व्रैहमन्यदिति** ॥ **असंज्ञायां तिलयवाभ्याम्** ॥ नित्यं मयडिति शेषः। **यावक इति** ॥ यवशब्दाद्विकारे अण्। ततः यावादिभ्य इति स्वार्थे कन्। **तालादिभ्योऽण्** ॥ **तालाद्धनुषीति** ॥ णसूत्रमिदम्। **तालं धनुरिति** ॥ 'नित्यं वृद्ध' इति मयटोऽपवादः। **ऐन्द्रायुधमिति** ॥ 'अनुदात्तादेश्च' इत्यञोऽपवादः। समासस्वरेणान्तोदात्तत्वात्। **जातरूपेभ्यः** ॥

अण् । बहुवचनात्पर्यायग्रहणम् । हाटकः तापनीयः सौवर्णो वा निष्कः । 'परिमाणे' किम् । हाटकमयी यष्टिः ।

१५३२ । प्राणिरजतादिभ्योऽञ् । (४-३-१५४)

शौकम् । बाकम् । राजतम् ।

१५३३ । ञितश्च तत्प्रत्ययात् । (४-३-१५५)

ञिद्यो विकारावयवप्रत्ययः तदन्तादञ्स्यात्तयोरेवार्थयोः । मयटोऽपवादः । शामीलस्य शामीलम् । दाधित्थस्य दाधित्थम् । कापित्थम् । 'ञितः' किम् । बैल्वमयम् ।

१५३४ । क्रीतवत्परिमाणात् । (४-३-१५६)

'प्राग्वहतेष्ठक्' (सू १५४८) इत्यारभ्य क्रीतार्थे ये प्रत्यया येनोपाधिना परिमाणाद्विहितास्ते तथैव विकारेऽतिदिश्यन्ते । अणादीनामपवादः । निष्केण क्रीतं नैष्किकम् । एवं निष्कस्य विकारोऽपि नैष्किकः । शतस्य विकारः शत्यः—शतिकः ।

अणिति ॥ शेषपूरणम् । जातरूपं सुवर्णं, तद्वाचिभ्योऽण् स्यात्परिमाणे विकारे गम्ये इत्यर्थः । ननु जातरूपशब्दस्यैव कुतो न ग्रहणमित्यत आह । **बहुवचनादिति** ॥ **हाटक इत्यादि** ॥ हाटकस्य तपनीयस्य सुवर्णस्य वा निष्कपरिमाणको विकार इत्यर्थः । **तापनीय इति** ॥ 'नित्यं वृद्धशरादिभ्यः' इति मयटोऽपवादः । इतरत्र तु 'अनुदात्तादेश्च' इत्यञोऽपवादः । "गुञ्जाः पञ्चाद्यमाषकः । ते षोडशाक्षः" इत्यमरः । "सुवर्णबिस्तौ हेम्नोऽक्षे" इति च । **प्राणिरजतादिभ्योऽञ्** ॥ **शौकम् । बाकमिति** ॥ शुकस्य बकस्य वा अवयवो विकारो वेत्यर्थः । 'प्राणिनाङ्गपूर्वाणाम्' इत्युदात्तत्वात् । 'अनुदात्तादेश्च' इत्यञो न प्राप्तिः । **राजतमिति** ॥ अनुदात्तादित्वादञि सिद्धे मयड्बाधनार्थमञ्विधिः । **ञितश्च तत्प्रत्ययात्** ॥ तयोः विकारावयवयोः प्रत्ययः तत्प्रत्ययः । तदाह । **ञिद्य इति** ॥ विकारावयवयोरेवेत्यर्थः । **शामीलस्येति** ॥ शम्या विकारः अवयवो वा शामीलम् । 'शम्याः ष्लञ्' । शामीलस्य विकारः अवयवो वेत्यर्थे अञि शामीलमिति भवतीत्यर्थः । 'नित्यं वृद्ध' इति मयटोऽपवादः । **दाधित्थमिति** ॥ दधित्थस्य विकारोऽवयवो वा दाधित्थम् । अनुदात्तादित्वादञ् । दाधित्थस्य विकारो दाधित्थम्, मयडपवादोऽञ् । **बैल्वमयमिति** ॥ 'बिल्वादिभ्योऽण्' इति बिल्वशब्दादणि बैल्वः, तस्य विकार इत्यर्थे मयडेव, न त्वञ् । अणो ञित्त्वाभावादिति भावः । भाष्ये तु "विकारावयवप्रत्ययान्तात् पुनस्तत्प्रत्यया अनभिधानात् न" इत्याश्रित्य सूत्रमिदं प्रत्याख्यातम् । **क्रीतवत्परिमाणात्** ॥ **उपाधिनेति** ॥ प्रकृत्यादिविशेषणेनेत्यर्थः । **नैष्किक इति** ॥ 'अस्मायामेधास्रजो विनिष्कादिभ्यः' इति क्रीते ठक् । **शत्यः—शतिक इति** ॥ 'शतात्

१५३५। उष्ट्राद्वुञ्। (४-३-१५७)

प्राण्यङ्गोऽपवादः। औष्ट्रकः।

१५३६। उमोर्णयोर्वा। (४-३-१५८)

औमम्—औमकम्। और्णम्—और्णकम्। वुञ्भावे यथाक्रममणञौ।

१५६७। एण्या ढञ्। (४-३-१५९)

ऐणेयम्। एणस्य तु ऐणम्।

१५३८। गोपयसोर्यत्। (४-३-१६०)

गव्यम्। पयस्यम्।

१५३९। द्रोश्च। (४-३-१६१)

द्रुर्वृक्षः, तस्य विकारोऽवयवो वा द्रव्यम्।

१५४०। माने वयः। (४-३-१६२)

'द्रोः' इत्येव। द्रुवयम्। 'पौतवं द्रुवयं पाय्यमिति मानार्थकं त्रयम्' इत्यमरः।

१५४१। फले लुक्। (४-३-१६३)

विकारावयवप्रत्ययस्य लुक्स्यात्फले। आमलक्याः फलमामलकम्।

ठन्यतौ' इति क्रीते ठन्यतौ। **उष्ट्राद्वुञ्**॥ **प्राण्यङ्ग इति**॥ 'प्राणिरजतादिभ्योऽञ्' इत्यस्यापवाद इत्यर्थः। **उमोर्णयोर्वा**॥ वुञ्इति शेषः। **औममिति**॥ उमा सस्यविशेषः। "उमा स्यादतसी क्षुमा" इत्यमरः। उमाया विकारोऽवयवो वेत्यर्थः। **और्णकमिति**॥ 'तृणधान्यानाञ्च' इत्युभशब्द आद्युदात्तः। 'अनुदात्तादेश्च' इति ततो वुञ्भावे अण्। ऊर्णाशब्दस्तु फिट्स्वरेणान्तोदात्तः। ततो वुञ्भावे अनुदात्तादित्वादञित्यर्थः। "ऊर्णा मेषादिलोम्नि स्यात्" इत्यमरः। 'स्थूणोर्णे नपुंसके च' इति लिङ्गानुशासनसूत्रम्। **एण्या ढञ्**॥ एण्या अवयवो विकारो वा ऐणेयम्। ढस्य एयादेशः। 'यस्येति च' इति ईकारलोपः। स्त्रीलिङ्गनिर्देशस्य प्रयोजनमाह। **एणस्य त्विति**॥ **गोपयसोर्यत्**॥ **गव्यमिति**॥ गोर्विकारोऽवयवो वेत्यर्थः। 'वान्तो यि' इत्यवादेशः। **पयस्यमिति**॥ पयसो विकार इत्यर्थः। सर्वत्र 'गोरजादिप्रसङ्गे यत्' इत्येव सिद्धे यद्विधानं 'मयड्वैतयोः' इति पाक्षिकमयटो बाधनार्थम्। **द्रोश्च**॥ यदिति शेषः। 'एकाचो नित्यम्' इति मयटः 'ओरञ्' इत्यस्य चापवादः। **माने वयः**॥ **द्रोरित्येवेति**॥ माने विकारे गम्ये द्रुशब्दाद्वयप्रत्ययः स्यादित्यर्थः। **फले लुक्**॥ **आमलकमिति**॥ फलितस्य वृक्षस्य फलमवयवो विकारश्च। तस्मिन्मयटो लुकि 'लुक्ङितल्लुकि'

१५४२ । प्लक्षादिभ्योऽण् । (४-३-१६४)

विधानसामर्थ्यान्न लुक् । प्लाक्षम् ।

१५४३ । न्यग्रोधस्य च केवलस्य । (७-३-५)

अस्य न वृद्धिरैजागमश्च । नैयग्रोधम् ।

१५४४ । जम्ब्वा वा । (४-३-१६५)

जम्बूशब्दात्फलेऽण्वा स्यात् । जाम्बवम् । पक्षे ओरञ्, तस्य लुक्, जम्बु ।

१५४५ । लुप्च । (४-३-१६६)

जम्ब्वाः फलप्रत्ययस्य लुब्वा स्यात् । 'लुपि युक्तवत्–' (सू १२९४) जम्ब्वाः फलं जम्बूः । 'फलपाकशुषामुपसङ्ख्यानम्' (वा २९४९) । व्रीह्यः । मुद्गाः । 'पुष्पमूलेषु बहुळम्' (वा २९५०) । मल्लिकायाः पुष्पं मल्लिका । जात्याः पुष्पं जाती । विदार्या मूलं विदारी । बहुळग्रहणान्नेह । पाटलानि पुष्पाणि । साल्वानि मूलानि । बाहुळकात्क्वचिल्लुक् । अशोकम् । करवीरम् ।

इति ङीषो लुक् । **प्लक्षादिभ्योऽण्** ॥ विकारे अवयवे चेति शेषः । तत्र शिग्रुकर्कन्धू-शब्दयोरुवर्णान्तत्वादञि प्राप्ते प्लक्षन्यग्रोधादीनाम् अनुदात्तादित्वादञि प्राप्ते अण्विधिः । नन्वस्य फले अणो लुक् कुतो नेत्यत आह । **न्यग्रोधस्य च केवलस्य** ॥ 'न य्वाभ्याम्' इत्युत्तरसूत्रमिदम् । **अस्येति** ॥ केवलस्य न्यग्रोधस्येत्यर्थः । केवलत्वं पदान्तरविहीनत्वम् । न्यक् रोहतीति न्यग्रोध इति व्युत्पत्तिपक्षे यद्यपि 'न य्वाभ्याम्' इत्येव सिद्धम् । यकारस्य पदान्तत्वात् । तथापि केवलस्यैव इति नियमार्थं सूत्रम् । अव्युत्पत्तिपक्षे तु यकारस्य अपदा-न्तत्वात् विध्यर्थमेव । केवलस्य किम् । न्यग्रोधमूलाः शालयः । **जम्ब्वा वा** ॥ **जम्ब्विति** ॥ जम्ब्वाः फलमित्यर्थः । अजो लुकि विशेष्यानुसारेण नपुंसकत्वात् ह्रस्व इति भावः । **लुप् च** ॥ लुकैव सिद्धे लुब्विधेः फलमाह । **लुपि युक्तवदिति** ॥ **जम्बूरिति** ॥ जम्ब्वाः फलमित्यर्थः । फलप्रत्ययस्य लुपि युक्तवत्त्वेन विशेष्यलिङ्गवचनं बाधित्वा स्त्रीत्वमेकवचनं चेत्यर्थः । तथाच जम्ब्वाः फलान्यपि जम्बूरेव । **फलपाकेति** ॥ फलपाकेन शुष्यन्तीति फलपाकशुषः ओषधयः, तद्वा-चिभ्यः परस्य फलप्रत्ययस्य लुप उपसङ्ख्यानमित्यर्थः । 'फले लुक्' इत्यस्यापवादः । **व्रीहय इति** ॥ व्रीह्याख्यानामोषधीनामफलानीत्यर्थः । एवं मुद्गाः । बिल्वादयो लुप् । युक्तवद्भावात्पुंस्त्वम्, नतु विशेष्यनिघ्नत्वम् । **पुष्पमूलेषु बहुळमिति** ॥ वार्तिकमिदम् । विकारावयवप्रत्ययस्य लुप् स्यादिति शेषः । **पुष्पं मल्लिकेति** ॥ अषाद्वितीयमुदात्तमित्यनुवृत्तौ 'मल्लिकादीनाञ्च' इति फिट्सूत्रेण मध्योदात्तो मल्लिकाशब्दः । ततः 'अनुदात्तादेश्च' इत्यञो लुप् । युक्तवत्त्वात्स्त्रीत्वम् । **जातीति** ॥ 'लघावन्ते' इत्यन्तोदात्तो जातिशब्दः । ततः 'अनुदात्तादेश्च' इत्यञोऽनेन लुप् ।

१५४६। हरीतक्यादिभ्यश्च। (४-३-१६७)

एभ्यः फलप्रत्ययस्य लुप्स्यात्। हरीतक्यादीनां लिङ्गमेव प्रकृतिवत्। हरीतक्याः फलानि हरीतक्यः।

१५४७। कंसीयपरशव्ययोर्यञञौ लुक्च। (४-३-१६८)

कंसीयपरशव्यशब्दाभ्यां यञञौ स्तश्छयतोश्च लुक्। कंसाय हितं कंसीयम्। तस्य विकारः कांस्यम्। परशवे हितं परशव्यम्। तस्य विकारः पारशवः।

इति तद्धिते चतुर्थस्य तृतीयपादे प्राग्दीव्यतीयप्रकरणम्।

युक्तवत्त्वात्स्त्रीत्वम्। **विदारीति** ॥ जातिङीषन्तामिदम्प्रत्ययस्वरेणान्तोदात्तम्। अनुदात्तादित्वादञि तस्य लुप्। युक्तवत्त्वात्स्त्रीत्वम्। **पाटलानीति** ॥ बिल्वादित्वादण्। एवं साल्वानि। ननु अशोकस्य पुष्पं, अशोकं करवीरस्य पुष्पङ्करवीरं इत्यत्रापि 'पुष्पमूलेषु बहुळम्' इति लुपि युक्तवत्त्वात् पुंस्त्वे अशोकः पुष्पं करवीरः पुष्पमिति स्यादित्यत आह। **बहुळग्रहणात् क्वचिल्लुगिति** ॥ तथाच युक्तवत्त्वस्याप्रवृत्तेः विशेष्यनिघ्नत्वमेवेति भावः। **हरीतक्यादिभ्यश्च** ॥ **हरीतक्यादीनामिति** ॥ वार्तिकमिदम्। एषाम्प्रकृतिलिङ्गमेव लुप्तप्रत्ययार्थे अतिदिश्यते, नतु प्रकृतिवचनमपीत्यर्थः। **हरीतक्य इति** ॥ जातिङीषन्तः। प्रत्ययस्वरेणान्तोदात्तो हरीतकीशब्दः। ततोऽनुदात्तादित्वादिञि तस्य 'फले लुक्' इति लुकि प्राप्ते लुपि युक्तवत्त्वाद्बहुवचनम्। **कंसीयपरशव्य** ॥ अत्र यञञोर्न लुक्। विधिवैयर्थ्यात्। नापि प्रकृत्योः, प्रत्ययादर्शनस्यैव लुक्त्वात्। अतः पारिशेषात् प्रकृत्येकदेशयोः छयतोरिति लभ्यते। तदाह। **छयतोरिति** ॥ **कंसीयमिति** ॥ धातुर्लोहविशेषः। तस्मै हितमिति छः। **कांस्यमिति** ॥ कंसीयशब्दादञि छस्य लुकि आदिवृद्धौ 'यस्येति च' इत्यकारलोपः। **परशव्यमिति** ॥ 'तस्मै हितम्' इति अधिकारे 'उगवादिभ्यो यत्' इति ओर्गुणे 'वान्तो यि' इत्यवादेशः। **पारशव इति** ॥ परशव्यशब्दादञि यतो लुकि ओर्गुणे पारशवः 'हलस्तद्धितस्य' इति तु न, ईतीत्यनुवृत्तेः। अनापत्यत्वात् 'आपत्यस्य च' इत्यपि लोपो न प्रसज्यत इति भावः॥

इति तद्धिते चतुर्थस्य तृतीयपादे प्राग्दीव्यतीयप्रकरणम्।

अथ तद्धिते चतुर्थस्य चतुर्थपादे प्राग्वहतीयप्रकरणम् ।

१५४८ । प्राग्वहतेष्ठक् । (४-४-१)

तद्वहतीत्यतः प्राक् ठगधिक्रियते । 'तदाहेति माशब्दादिभ्य उपसङ्ख्यानम्' (वा २९५१) । मा शब्दं कार्षीः इति य आह स माशब्दिकः ।

१५४९ । स्वागतादीनां च । (७-३-७)

ऐज्न स्यात् । स्वागतमित्याह स्वागतिकः । स्वाध्वरिकः । स्वङ्गस्यापत्यं स्वाङ्गिः । व्यङ्गस्यापत्यं व्याङ्गिः । व्यडस्यापत्यं व्याडिः । व्यवहारेण चरति व्यावहारिकः । स्वपतौ साधु स्वापतेयम् । 'आहौ प्रभूतादिभ्यः' (वा २९५२) ।

अथ चतुर्थस्य चतुर्थः पादः प्रारभ्यते—**प्राग्वहतेष्ठक्** ॥ वहतीत्येकदेशेन 'तद्वहति रथयुगप्रासङ्गम्' इति सूत्रं परामृश्यते इत्यभिप्रेत्य आह । **तद्वहतीत्यत इति** ॥ **तदाहेति** ॥ इतिशब्दो व्युत्क्रमेण तच्छब्दानन्तरं द्रष्टव्यः । तदित्याहेत्यर्थे माशब्द-स्वागत इत्यादिशब्देभ्यः ठक उपसङ्ख्यानमित्यन्वयः । तदित्यनेन वाक्यार्थो विवक्षितः । इतिशब्दस्तस्य वाक्यार्थस्य कर्मत्वङ्गमयति 'मा शब्दङ्कार्षीः' इत्याहेत्यार्थे तद्वाक्यावयवात् माशब्दः इत्यादिशब्दात् ठगिति यावत् । **मा शब्दङ्कार्षीः इति य आह स माशब्दिक इति** ॥ शब्दं माकार्षीरित्यन्वयः । 'माङि लुङ्' इति लोडर्थे लुङ् । 'न माङ्योगे' इत्यडा-गमनिषेधः । शब्दन्न कुरु इत्यर्थः । अत्र आहेति ब्रूञ्धात्वर्थवक्तव्यवचनक्रियां प्रति मा शब्दङ्कार्षीरिति वाक्यार्थः कर्म । तद्वाक्यैकदेशः माशब्देति समुदायः । तस्मान्निर्विभक्तिका-दयं प्रत्ययः । न हि माशब्देति समुदायाद्विभक्तिरस्ति । एवञ्च माशब्देति समुदायाद्वाकि माशब्दिक इति रूपम् । 'मा शब्दः कारि' इति पाठे तु कारीति कर्मणि लुङ् । शब्दो न कार्य इत्यर्थः । नन्च तदाहेत्यर्थे माशब्दादिभ्यः ठगिति यथाश्रुतम् अभ्युपगम्य माशब्दमाहेत्यार्थे माशब्देत्यादिशब्देभ्यो द्वितीयान्तेभ्यः ठगित्येव कुतो न व्याख्यायत इति वाच्यम् । एवं सति 'आहौ प्रभूतादिभ्यः' इत्युत्तरवार्तिकारम्भवैयर्थापत्तेरिति भावः । स्वागतादिगणे स्वागत, स्वध्वर, इति पठितम् । तत्र विशेषमाह । **स्वागतादीनाञ्च** ॥ 'न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्' इति प्रकरणे 'कर्मव्यतिहारे' इत्यस्मादुत्तरं सूत्रमिदम् । **ऐज्न स्यादिति** ॥ शेषपूरणमिदम् । 'न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्' इति प्राप्तः ऐज् न स्यादि-त्यर्थः । **स्वाध्वरिक इति** ॥ स्वध्वर इत्याहेत्यर्थः । अथ स्वागतादिगणशेषमुदाहरति । **स्वङ्गस्येति** ॥ **व्याङ्गिरिति** ॥ व्यङ्गस्यापत्यमिति विग्रहः । **व्यडस्येति** ॥ न विद्यते डो यस्य सः अडः विगतः अडः व्यडः । **स्वापतेयमिति** ॥ 'पथ्यतिथिवसतिस्वपतेर्ढञ्' द्वारादित्वादैच् प्राप्तो निषिध्यते । **आहाविति** ॥ आहेति पदैकदेशादिकारस्य उच्चारणार्थो निर्देशः । तदिति पूर्ववार्तिकादनुवर्तते । आहेत्यर्थे द्वितीयान्तेभ्यः प्रभूतादिभ्यष्ठग्वाच्य इत्यर्थः ।

प्रभूतमाह। प्राभूतिकः। पार्याप्तिकः। 'पृच्छतौ सुस्नातादिभ्यः' (वा २९५३)। सुस्नातं पृच्छति सौस्नातिकः। सौखशायनिकः। अनुशतिकादिः। 'गच्छतौ परदारादिभ्यः' (वा २९५४)। पारदारिकः। गौरुतल्पिकः।

१५५०। तेन दीव्यति खनति जयति जितम्। (४-४-२)

अक्षैर्दीव्यति आक्षिकः। अभ्रेण खनति आभ्रिकः। अक्षैर्जयति आक्षिकः। अक्षैर्जितमाक्षिकम्।

१५५१। संस्कृतम्। (४-४-३)

दध्ना संस्कृतं दाधिकम्। मारीचिकम्।

१५५२। कुळुत्थकोपधादण्। (४-४-४)

ठकोऽपवादः। कुळुत्थैः संस्कृतं कौळुत्थम्। तैन्त्रिणीकम्।

१५५३। तरति। (४-४-५)

उडुपेन तरति औडुपिकः।

१५५४। गोपुच्छाट्ठञ्। (४-४-६)

गौपुच्छिकः।

१५५५। नौद्यचष्ठन्। (४-४-७)

नाविकः। घाटिकः। बाहुभ्यां तरति बाहुका स्त्री।

पार्याप्तिक इति॥ पर्याप्तमाहेत्यर्थः। **पृच्छताविति**॥ तदित्यनुवर्तते। पृच्छतीत्यर्थे द्वितीयान्तेभ्यः सुस्नातादिभ्यः ठग्वाच्य इत्यर्थः। **सौखशायनिक इति**॥ सुखशयनं पृच्छतीत्यर्थः। **अनुशतिकादिरिति**॥ सुखशयनशब्द इति शेषः। ततश्च 'अनुशतिकादीनाञ्च' इति पूर्वोत्तरपदयोरादिवृद्धिरिति भावः। **गच्छताविति**॥ तदित्यनुवर्तते। गच्छतीत्यर्थे परदारादिभ्यो द्वितीयान्तेभ्यः ठगित्यर्थः। **पारदारिक इति**॥ परदारान्गच्छतीत्यर्थः। **गौरुतल्पिक इति**॥ गुरुतल्पङ्गच्छतीत्यर्थः। गुरुतल्पो गुरुस्त्री। **तेन दीव्यति खनति जयति जितम्**॥ तेन दीव्यति, तेन खनति, तेन जयति, तेन जितम्, इति विग्रहेषु तृतीयान्ताट्ठगित्यर्थः। अभ्रिः कुद्दालः। देवदत्तेन जितमित्यत्र तु न ठक्। करणतृतीयान्तादेव तद्विधेः। **संस्कृतम्**॥ तेनेत्येव संस्कृतमित्यर्थे तृतीयान्ताट्ठगित्यर्थः। 'संस्कृतम्भक्षाः' इत्यत्र तु सप्तम्यन्तादणादिविधिः। **मारीचकमिति**॥ मरीचिभिः संस्कृतमित्यर्थः। **कुळुत्थकोपधादण्**॥ संस्कृतमित्यर्थे तृतीयान्तादिति शेषः। **तैन्त्रिणीकमिति**॥ तिन्त्रिणीकेन संस्कृतमित्यर्थः। **तरति**॥ तरतीत्यर्थे तृतीयान्ताट्ठगित्यर्थः। **गोपुच्छाट्ठञ्**॥ तरतीत्यर्थे तृतीयान्तादिति शेषः। **नौद्यचष्ठन्**॥ ठनिति च्छेदः। ष्टुत्वकृतः सस्य षकारः। तरतीत्यर्थे

१५५६ । चरति । (४-४-८)

तृतीयान्ताद्गच्छति भक्षयतीत्यर्थयोष्ठक्स्यात्। हस्तिना चरति हास्तिकः। शाकटिकः। दघ्ना भक्षयति दाधिकः।

१५५७ । आकर्षात्ष्ठल् । (४-४-९)

आकर्षो निकषोपलः। 'आकषात्' इति पाठान्तरम्। तेन चरति आकर्षिकः। षित्त्वान्ङीप्। आकर्षिकी।

१५५८ । पर्पादिभ्यः ष्ठन् । (४-४-१०)

पर्पेण चरति पर्पिकः—पर्पिकी। येन पीठेन पङ्गवश्चरन्ति स पर्पः। अश्विकः। रथिकः।

१५५९ । श्वगणाट्ठञ् च । (४-४-११)

चात्ष्ठन्।

१५६० । श्वादेरिञि । (७-३-८)

ऐञ्च। श्वभस्त्रस्यापत्यं श्वाभस्त्रिः। श्वादंष्ट्रिः। तदादिविधौ चेदमेव ज्ञापकम्। 'इकारादाविति वाच्यम्' (वा ४५१२)। श्वगणेन चरति श्वागणिकः—श्वागणिकी—श्वगणिकः—श्वगणिकी।

नौशब्दात् 'ब्यचश्च' इति तृतीयान्तात् ठनित्यर्थः। **नाविक इति** ॥ नावा तरतीत्यर्थः। **घटिक इति** ॥ घटेन तरतीत्यर्थः। **बाहुका स्त्रीति** ॥ उकः परत्वात् ठस्य कः। अदन्तत्वाट्टाप्। **चरति ॥ गच्छति, भक्षयतीति** ॥ 'चर गतिभक्षणयोः' इति चरधातोरर्थद्वये वृत्तेरिति भावः। **हास्तिक इति** ॥ ठनि इके 'नस्तद्धिते' इति टिलोपः। **आकर्षात्ष्ठल्** ॥ तेन चरतीत्यर्थे तृतीयान्तादाकर्षशब्दात् ष्ठलित्यर्थः। **पर्पादिभ्यः ष्ठन्** ॥ ष्ठन् इति च्छेदः। चरतीत्यर्थे तृतीयान्तेभ्य इति शेषः। षित्त्वं ङीपर्थमित्याह। **पर्पिकीति ॥ अश्विक इति** ॥ अश्वेन चरतीत्यर्थः। **श्वगणाट्ठञ् च** ॥ उक्तविषये इति शेषः। श्वगणशब्दात्तृतीयान्ताच्चरतीत्यर्थे ठञ् ष्ठन् च स्यादित्यर्थः। श्वागणिक इत्युदाहरणं वक्ष्यति। तत्र श्वन्शब्दस्य द्वारादित्वादैजागमे प्राप्ते। **श्वादेरिञि** ॥ 'न कर्मव्यतिहारे' इत्यतो नेत्यनुवर्तते। अङ्गस्येत्यधिकृतम्। श्वन्शब्दः आदिर्यस्येति विग्रहः। श्वन्शब्दपूर्वपदस्याङ्गस्य इञि परे नैजागम इत्यर्थः। **श्वाभस्त्रिरिति** ॥ अत इञ्। **श्वादंष्ट्रिरिति** ॥ श्वदंष्ट्रस्यापत्यमित्यर्थः। ननु श्वन्शब्द एव द्वारादौ पठ्यते नतु श्वभस्त्रशब्दः। ततश्च तस्य द्वारादित्वाभावादैजागमप्रसक्तिरेव नेत्यत आह। **तदादिविधाविति** ॥ द्वारादिगणे श्वन्शब्दस्य पाठेऽपि अस्मादेव प्रतिषेधात् श्वन्शब्दपूर्वकस्याङ्गस्य द्वारादिगणे ग्रहणं विज्ञायते इत्यर्थः। तत्फलन्तु श्ववहनस्येदं शौवहनं नाम नगरम्।

१५६१। पदान्तस्यान्यतरस्याम्। (७-३-९)

श्वादेरङ्गस्य पदशब्दान्तस्यैज् वा। श्वापदस्येदं श्वापदम्—शौवापदम्।

१५६२। वेतनादिभ्यो जीवति। (४-४-१२)

वेतनेन जीवति वैतनिकः। धानुष्कः।

१५६३। वल्कयविक्रयाट्ठन्। (४-४-१३)

वल्केन मूल्येन जीवति वाल्किकः। क्रयविक्रयग्रहणं सङ्गातविगृहीतार्थम्। क्रयविक्रयिकः—क्रयिकः—विक्रयिकः।

१५६४। आयुधाच्छ च। (४-४-१४)

चाट्ठन्। आयुधेन जीवति आयुधीयः—आयुधिकः।

१५६५। हरत्युत्सङ्गादिभ्यः। (४-४-१५)

उत्सङ्गेन हरत्यौत्सङ्गिकः।

१५६६। भस्त्रादिभ्यः ष्ठन्। (४-४-१६)

भस्त्रया हरति भस्त्रिकः। षित्त्वात्, भस्त्रिकी।

ननु प्रकृते श्वागणिके इञभावात्कथमयं निषेध इत्यत आह। **इकारादाविति वाच्यमिति**॥ ञिति परित्यज्य इकारादाविति वाच्यमित्यर्थः। इञि तु व्यपदेशिवत्त्वेन इकारादित्वम्। **श्वागणिक इति**॥ ठञन्तात् 'टिड्ढाणञ्द्वयसज्दघ्नञमात्रच्तयप्ठक्ठञ्कञक्रपः' इति ङीप्। **श्वगणिक इति**॥ ष्ठनि रूपम्। **श्वागणिकीति**॥ षित्त्वात् ङीष्प्रसङ्गादाह। **पदान्तस्यान्यतरस्याम्**॥ 'श्वादेरिञि' इत्यस्मादुत्तरं सूत्रमिदम्। पदं पदशब्दः, अन्तो यस्येति विग्रहः। तदाह। **पदशब्दान्तस्येति। ऐज्वेति**॥ निषेधविकल्पे सति विधिविकल्पः फलित इति भावः। **श्वापदस्येति**॥ शुनः पदमिव पदं यस्येति विग्रहः। 'शुनो दन्तदंष्ट्रा' इत्यादिना दीर्घः। **शौवापदमिति**॥ 'तस्येदम्' इत्यण्। 'वृद्धाच्छः' इति तु न। अनभिधानादित्याहुः। अन्ये तु श्वपुच्छवद्दीर्घाभावे अणमाहुः। **वेतनादिभ्यो जीवति**॥ जीवतीत्यर्थे तृतीयान्तेभ्यः ठगिति शेषः। **वैतनिक इति**॥ वेतनेन जीवतीत्यर्थः। **धानुष्क इति**॥ धनुषा जीवतीत्यर्थः। उसन्तात्परत्वाट्ठस्य कः। 'इणः षः' इति षत्वम्। **वल्कयविक्रयाट्ठन्**॥ जीवतीत्यर्थे तृतीयान्तेभ्यो वल्कादिभ्यः ठन् स्यादित्यर्थः। **सङ्गातविगृहीतार्थमिति**॥ व्याख्यानादिति भावः। **आयुधाच्छ च**॥ जीवतीत्यर्थे तृतीयान्तात् आयुधशब्दात् छः स्यात् ठन् चेत्यर्थः। **हरत्युत्सङ्गादिभ्यः**॥ हरतीत्यर्थे तृतीयान्तेभ्यः उत्सङ्गादिभ्यः ठक् स्यादित्यर्थः। **भस्त्रादिभ्यः ष्ठन्**॥ ष्ठनिति छेदः। हरतीत्यर्थे तृतीयान्तेभ्यो

१५६७ । विभाषा विवधात् । (४-४-१७)

विवधेन हरति विवधिकः । पक्षे ठक् । वैवधिकः । एकदेशविकृतस्यानन्यत्वाद्वीवधादपि ष्ठन् । वीवधिकः, वीवधिकी । विवधवीवधशब्दौ उभयतो बद्धशिक्ये स्कन्धवाह्ये काष्ठे वर्तेते ।

१५६८ । अण् कुटिलिकायाः । (४-४-१८)

कुटिलिका व्याधानां गतिविशेषः, कर्मारोपकरणभूतं लोहं च । कुटिलिकया हरति मृगानङ्गारान्वा कौटिलिको व्याधः कर्मारश्च ।

१५६९ । निर्वृत्तेऽक्षद्यूतादिभ्यः । (४-४-१९)

अक्षद्यूतेन निर्वृत्तमाक्षद्यूतिकं वैरम् ।

१५७० । त्रेर्मन्नित्यम् । (४-४-२०)

त्रिप्रत्ययान्तप्रकृतिकात्तृतीयान्तान्निर्वृत्तेऽर्थे मप्त्रयान्नित्यम् । कृत्या निर्वृत्तं कृत्रिमम् । पक्त्रिमम् । 'भावप्रत्ययान्तादिमव्वक्तव्यः' (वा २५५९) पाकेन निर्वृत्तं पाकिमम् । त्यागिमम् ।

१५७१ । अपमित्ययाचिताभ्यां कक्कनौ । (४-४-२१)

अपमित्येति ल्यबन्तम् । अपमित्य निर्वृत्तमापमित्यकम् । याचितेन निर्वृत्तं याचितकम् ।

भस्त्रादिभ्यः ष्ठन् स्यादित्यर्थः । **पित्त्वादिति** ॥ ङीप् इति शेषः । **विभाषा विवधात्** ॥ हरतीत्यर्थे तृतीयान्तात् ष्ठनिति शेषः । **अण् कुटिलिकायाः** ॥ हरतीत्यर्थे तृतीयान्तात् कुटिलिकाशब्दादण् स्यादित्यर्थः । कर्मारो लोहकारः तस्य यत् अङ्गारतप्तलोहादिग्रहणसाधनं लोहविकारभूतं सन्दंशापरनामधेयं, तदपि कुटिलिकेत्यर्थः । **निर्वृत्तेऽक्षद्यूतादिभ्यः** ॥ निर्वृत्तमित्यर्थे तृतीयान्तेभ्योऽक्षद्यूतादिभ्यः ठगित्यर्थः । **त्रेर्मन्नित्यम्** ॥ तेन निर्वृत्तमित्यर्थे 'ङितः क्रिः' इति क्रिप्रत्ययान्तान्नित्यं मप्प्रत्ययः स्यादित्यर्थः । 'समर्थानाम्प्रथमाद्वा' इति महाविकल्पनिवृत्त्यर्थं नित्यग्रहणम् । "ततश्च अस्मिन्नर्थे मप्प्रत्ययं विना क्रिप्रत्ययान्तस्य प्रयोगो न" इति भाष्ये स्पष्टम् । एवञ्चात्र अस्वपदविग्रहं दर्शयति । **कृत्या निर्वृत्तमिति** ॥ अत्र विग्रहवाक्ये 'स्त्रियां क्तिन्' इति क्तिन्नन्तोऽयं कृतिशब्दः । **कृत्रिममिति** ॥ 'डुकृञ् करणे' इति धातोः 'ङितः क्रिः' इति क्रिप्रत्ययान्तान्मप् । **पक्त्रिममिति** ॥ पक्त्या निर्वृत्तमित्यस्वपदविग्रहः । 'डुपचष् पाके' अस्मात्क्तिप्रत्ययान्तान्मप् । **इमव्वक्तव्य इति** ॥ निर्वृत्तमित्यर्थे तृतीयान्तादिति शेषः । अत्र नित्यमिति न सम्बध्यते इत्यभिप्रेत्य लौकिकस्वपदविग्रहं दर्शयति । **पाकेन निर्वृत्तमिति** ॥ **अपमित्ययाचिताभ्याम्** ॥ **ल्यबन्तमिति** ॥ 'मेङ् प्रणिदाने'

१५७२। संसृष्टे। (४-४-२२)

दध्ना संसृष्टं दाधिकम्।

१५७३। चूर्णादिनिः। (४-४-२३)

चूर्णैः संसृष्टाश्चूर्णिनोऽपूपाः।

१५७४। लवणाल्लुक्। (४-४-२४)

लवणेन संसृष्टो लवणः सूपः। लवणं शाकम्।

१५७५। मुद्गादण्। (४-४-२५)

मौद्ग ओदनः।

१५७६। व्यञ्जनैरुपसिक्ते। (४-४-२६)

ठक्। दध्ना उपसिक्तं दाधिकम्।

१५७७। ओजःसहोऽम्भसा वर्तते। (४-४-२७)

ओजसा वर्तते औजसिकः शूरः। साहसिकश्चौरः। आम्भसिको मत्स्यः।

१५७८। तत्प्रत्यनुपूर्वमीपलोमकूलम्। (४-४-२८)

इत्यस्मात् विनिमयार्थकात् 'उदीचां माङो व्यतिहारे' इति क्त्वाप्रत्यये गतिसमासे ल्यपि 'मयतेरिदन्यतरस्याम्' इति इत्त्वे 'ह्रस्वस्य पिति' इति तुगागमे अपमित्येत्यव्ययम्। 'क्त्वातोसुन्कसुनः' इत्युक्तेरित्यर्थः। निर्वृत्तमित्यर्थे अपमित्येत्यव्ययात्प्रथमान्ताद्याचितशब्दाच्च तृतीयान्तात् कक कन् च यथासङ्ख्यं स्यातामित्यर्थः। अपमित्येत्यंशे तृतीयान्तत्वासम्भवात् प्रथमादिति लभ्यते। **संसृष्टे॥** संसृष्टमित्यर्थे तृतीयान्तात् ठक् इत्यर्थः। **चूर्णादिनिः॥** संसृष्टमित्यर्थे तृतीयान्तादिति शेषः। **लवणाल्लुक्॥** पूर्वसूत्रविहितस्येति शेषः। **मुद्गादण्॥** तेन संसृष्टमित्यर्थे तृतीयान्तादिति शेषः। **मौद्ग ओदन इति॥** मुद्गैः संसृष्ट इत्यर्थः। **व्यञ्जनैरुपसिक्ते॥** उपसिक्तमित्यर्थे तृतीयान्तेभ्यो व्यञ्जनवाचिभ्यः ठगित्यर्थः। सेचनेन मृद्विकरणमुपसेकः। संसृष्ट इत्येव सिद्धे नियमार्थं सूत्रम्। व्यञ्जनवाचिभ्यः उपसिक्त एवेति। तेनेह न। सूपेन संसृष्टा स्थाली। **ओजःसहो॥** वर्तते व्याप्रियते इत्यर्थे ओजस्, सहस्, अम्भस् एभ्यः तृतीयान्तेभ्यः ठक् स्यादित्यर्थः। **औजसिक इति॥** ओजसा बलेन वर्तते, युद्धे व्याप्रियते इत्यर्थः। **साहसिक इति॥** सहसा प्राणवियोगाभ्युपगमेन स्तेये व्याप्रियते इत्यर्थः। **आम्भसिक इति॥** अम्भसा हेतुना सञ्चारे व्याप्रियते इत्यर्थः। **तत्प्रत्यनुपूर्व॥** तदिति द्वितीयान्तानुकरणम्। प्रत्यनुपूर्वेभ्यो द्वितीयान्तेभ्यः ईपलोमकूलशब्देभ्यः वर्तते इत्यर्थे ठक् स्यादित्यर्थः। ननु प्रतीपं वर्तते इत्यादिवक्ष्यमाणविग्रहेषु वर्ततेरकर्मकत्वात् कथं

द्वितीयान्तादस्माद्वर्तत इत्यस्मिन्नर्थे ठक्स्यात्। क्रियाविशेषणत्वाद्वितीया। प्रतीपं वर्तते प्रातीपिकः। आन्वीपिकः। प्रातिलोमिकः। आनुलोमिकः। प्रातिकूलिकः। आनुकूलिकः।

१५७९। परिमुखं च। (४-४-२९)

परिमुखं वर्तते पारिमुखिकः। चात्पारिपार्श्विकः।

१५८०। प्रयच्छति गर्ह्यम्। (४-४-३०)

द्विगुणार्थं द्रव्यं द्विगुणं, तत्प्रयच्छति द्वैगुणिकः। त्रैगुणिकः। 'वृद्धेर्वृधुषिभावो वक्तव्यः' (वा २९६५)। वार्धुषिकः।

१५८१। कुसीददशैकादशात्ठन्ठचौ। (४-४-३१)

गर्ह्यार्थाभ्यामाभ्यामेतौ स्तः प्रयच्छतीत्यर्थे। कुसीदं वृद्धिः, तदर्थं द्रव्यं कुसीदं, तत्प्रयच्छतीति कुसीदिकः—कुसीदिकी। एकादशार्थत्वादेकादश ते च

द्वितीयेत्यत आह। **क्रियाविशेषणत्वादिति**॥ इदञ्च कारकनिरूपणे निरूपितम्। "क्रियाविशेषणानां प्रथमान्तत्वमेव" इति तु शब्देन्दुशेखरे। **प्रतीपमिति**॥ प्रतिगताः आपो यस्मिन्निति बहुव्रीहिः। 'ऋक्पूः' इत्यकारः समासान्तः। 'ब्रन्तरुपसर्गेभ्योऽप ईत्' इति ईत्त्वम्। अनुगताः आपो यस्मिन् तदन्वीपम्। 'ऊदनोर्देशे' इत्यूत्त्वन्तु न, अदेशत्वात्। प्रतीपान्वीपशब्दौ हि प्रतिकूलानुकूलशब्दपर्यायौ रूढौ। अवयवार्थेषु तु नाभिनिवेष्टव्यम्। **परिमुखञ्च**॥ अस्माद्द्वितीयान्तात् वर्तते इत्यर्थे ठगित्यर्थः। **चादिति**॥ चकारादनुक्तसमुच्चयार्थात् परिपार्श्वमित्यस्मादपि ठकि पारिपार्श्विक इति भवतीत्यर्थः। पारिमुखिक इत्यस्य यतो यतः स्वामिनो मुखं तत्र वर्तते इत्यर्थः। एवं पारिपार्श्विकः। **प्रयच्छति गर्ह्यम्**॥ तदिति द्वितीयान्तमनुवर्तते। गर्ह्यं प्रयच्छतीत्यर्थे द्वितीयान्तादिगित्यर्थः। **द्विगुणार्थं द्रव्यं द्विगुणमिति**॥ **द्वैगुणिक इति**॥ वक्ष्यमाणोदाहरणे द्विगुणशब्देन द्विगुणार्थं द्रव्यं विवक्षितमित्यर्थः। **तत्प्रयच्छति द्वैगुणिक इति**॥ द्विगुणीभवितुं स्वद्रव्यमृणं प्रयच्छतीत्यर्थः। "अशीतिभागो वृद्धिः स्यान्मासि मासि सबन्धक" इत्यादिधर्मशास्त्रविरुद्धत्वादिद गर्ह्यमिति भावः। **वृद्धेरिति**॥ वृद्धिशब्दात् युक्तार्थे ठकि प्रकृतेर्वृधुषि इत्यादेशो वाच्य इत्यर्थः। इकारान्त आदेशः। **वार्धुषिक इति**॥ वृध्यर्थं द्रव्यं वृद्धिः, तत्प्रयच्छतीत्यर्थे वृद्धिशब्दात् ठकः इकादेशे प्रकृतेर्वृधुष्यादेश इति भावः। "वृध्याजीवस्तु वार्धुषिः" इति तु प्रमाद एव। **कुसीद॥ गर्ह्यार्थाभ्यामिति**॥ कुसीद, दशैकादश, आभ्यां द्वितीयान्ताभ्यां गर्ह्यार्थकाभ्यां प्रयच्छतीत्यर्थे क्रमात् ष्ठन्ष्ठचौ स्तः इत्यर्थः। षित्त्वम् ङीषर्थमित्याह। **कुसीदिकीति**॥ नित्त्वचित्त्वयोस्तु स्वरे विशेषः। अथ ठन्प्रकृतिं दशैकादशशब्दं व्युत्पादयति॥ **एकादशार्थत्वादित्यादिना**॥ यत्र एकादश निष्कान् अधिकान् प्रत्यर्पयेति समयं कृत्वा दश निष्काः

ते वस्तुतो दश चेति विग्रहेऽकारः समासान्त इहैव सूत्रे निपात्यते। दशैकादशिकः—दशैकादशिकी। दशैकादशान्प्रायच्छतीत्युत्तमर्ण एवेहापि तद्धितार्थः।

१५८२। उञ्छति। (४-४-३२)

बदराण्युञ्छति बादरिकः।

१५८३। रक्षति। (४-४-३३)

समाजं रक्षति सामाजिकः।

१५८४। शब्ददर्दुरं करोति। (४-४-३४)

शब्दं करोति शाब्दिकः। दार्दुरिकः।

१५८५। पक्षिमत्स्यमृगान्हन्ति। (४-४-३५)

'स्वरूपस्य (पर्यायाणां) विशेषाणां ग्रहणम्' (वा ५२३)। 'मत्स्यपर्यायेषु मीनस्यैव' (भाष्येष्टिः)। पक्षिणो हन्ति पाक्षिकः। शाकुनिकः। मायूरिकः। मात्स्यिकः। मैनिकः। शाकुलिकः। मार्गिकः। हारिणिकः। सारङ्गिकः।

ऋणत्वेन दीयन्ते, तत्र ऋणत्वेन गृहीता दश निष्काः एकादशार्थत्वात् एकादशशब्देन उपचर्यन्ते। ततश्च एकादश च ते दश चेति कर्मधारये 'सङ्ख्याया अल्पीयस्याः' इति दशन्शब्दस्य पूर्वनिपातः। इहैव निपातनादकारः समासान्तः, टिलोपः, दशैकादशाः इति रूपमित्यर्थः। **दशैकादशिक इति** ॥ एकादश निष्काः नाधिकान् ग्रहीतुं दश निष्कान् अधमर्णाय प्रयच्छतीति यावत्। अथ लौकिकविग्रहवाक्यं दर्शयति। **दशैकादशान् प्रयच्छतीति** ॥ **इहापीति** ॥ विग्रहवाक्ये यथा उत्तमर्णः प्रधानत्वेन निर्देश्यते, तथा समासेऽपि उत्तमर्ण एव ऋणादातैव तद्धितार्थः प्रधानभूत इत्यर्थः। **उञ्छति** ॥ तदिति द्वितीयान्तमनुवर्तते। उञ्छतीत्यर्थे द्वितीयान्ताद्गमित्यर्थः। भूम्यान्निपतितस्य व्रीह्यादेः कणशः आदानमुञ्छः। **रक्षति** ॥ अस्मिन्नर्थे द्वितीयान्ताद्गमित्यर्थः। **शब्ददर्दुरङ्करोति** ॥ शब्दङ्करोति दुर्दरं करोतीति विग्रहे द्वितीयान्ताद्गमित्यर्थः। इह शब्दविषये प्रकृतिप्रत्ययविभागपूर्वकज्ञाने करोतिर्वर्तते। व्याख्यानात्। तेनेह न। शब्दङ्करोति खरः। **दार्दुरिक इति** ॥ "दर्दुरस्तोयदे भेके वाद्यभाण्डाद्रिभेदयोः। दर्दुरा चण्डिकायां स्यात्पामजाले तु दर्दुरम्॥" इति विश्वः। इह यथायोग्यमन्वयः। **पक्षिमत्स्यमृगान्हन्ति** ॥ अस्मिन्नर्थे पक्ष्यादिशब्देभ्यो द्वितीयान्तेभ्यः ठगित्यर्थः। **स्वरूपस्येति** ॥ पक्षिमत्स्यमृगशब्दैः तत्तत्स्वरूपाणान्तत्तत्पर्यायाणान्तद्विशेषवाचिनाञ्च ग्रहणमित्यर्थः। 'स्वं रूपम्' इति सूत्रभाष्ये तथोक्तेरिति भावः। **मीनस्यैवेति** ॥ मत्स्यपर्यायेषु मीनस्यैव ग्रहणम्। नत्वनिमिषादिशब्दानामित्यर्थः। इदमपि 'स्वं रूपम्' इत्यत्र भाष्ये स्थितम्। **पाक्षिक इति** ॥ स्वरूपस्योदाहरणम्। शाकुनिक इति तु पक्षिपर्यायस्य।

१५८६ । परिपन्थं च तिष्ठति । (४-४-३६)

अस्माद्द्वितीयान्तात्तिष्ठति हन्ति चेत्यर्थे ठक्स्यात् । पन्थानं वर्जयित्वा व्याप्य वा तिष्ठति पारिपन्थिकश्चौरः । निपातनात् पन्थादेशः । परिपन्थं हन्ति पारिपन्थिकः ।

१५८७ । माथोत्तरपदपदव्यनुपदं धावति । (४-४-३७)

दण्डाकारो माथः पन्थाः दण्डमाथः । दण्डमाथं धावति दाण्डमाथिकः । पादविकः । आनुपदिकः ।

१५८८ । आक्रन्दाट्ठञ् च । (४-४-३८)

अस्माट्ठञ्स्यात्, चाट्ठक् धावतीत्यर्थे । आक्रन्दं दुःखिनां रोदनस्थानं धावति आक्रन्दिकः ।

१५८९ । पदोत्तरपदं गृह्णाति । (४-४-३९)

पूर्वपदं गृह्णाति पौर्वपदिकः । औत्तरपदिकः ।

मायूरिक इति ॥ पक्षिविशेषस्य । तथा मात्स्यिकः मैनिकः, शाकुलिक इति क्रमेण स्वरूपपर्यायविशेषाणामुदाहरणम् । तथा मार्गिकः, हारिणिकः, सारङ्गिकः इति क्रमेण स्वरूपपर्यायविशेषाणामुदाहरणम् । **परिपन्थञ्च तिष्ठति** ॥ **अस्मादिति** ॥ परिपन्थशब्दादित्यर्थः । चकारात् हन्तीत्यनुकृष्यते । तदाह । **तिष्ठति हन्ति चेति** ॥ **पन्थानं वर्जयित्वेति** ॥ एतेन 'अपपरी वर्जने' इति परेः कर्मप्रवचनीयत्वे 'पञ्चम्यपाङ्परिभिः' इति पञ्चम्याम् 'अपपरिबहिरञ्चवः पञ्चम्या' इति अव्ययीभावसमासः सूचितः । **व्याप्य वेति** ॥ एतेन सर्वतः शब्दपर्यायस्य परेः परिगतः पन्था इति प्रादिसमासे परिपन्थशब्द इति सूचितम् । अव्ययीभावः प्रादिसमासो वेत्यपि बोध्यम् । उभयथापि क्रियाविशेषणत्वात् द्वितीयान्तत्वम् । **निपातनात् पन्थादेश इति** ॥ नेदम्प्रत्ययसंनियोगेन निपातनम् । किन्तु ततोऽन्यत्रापि परिपन्थशब्दोऽस्ति । इदमेव सूचयितुं प्रकृतेरपि द्वितीयोच्चारणमिति वृत्तिकृतः । इदमेवाभिप्रेत्य विग्रहन्दर्शयति । **परिपन्थन्तिष्ठतीति** ॥ **माथोत्तर** ॥ माथोत्तरपद, पदवी, अनुपद, एभ्यो द्वितीयान्तेभ्यो धावतीत्यर्थे ठगित्यर्थः । माथपदं व्याचष्टे । **माथः पन्था इति** ॥ मथ्यते गन्तृभिराहन्यते इति व्युत्पत्तेरिति भावः । **दण्डमाथ इति** ॥ शाकपार्थिवादिः । पन्थानन्धावतीति धावतेर्गत्यर्थत्वात् सकर्मकत्वम् । **पादविक इति** ॥ पदवीन्धावतीति विग्रहः । **आनुपदिक इति** ॥ अनुपदं धावतीति विग्रहः । **आक्रन्दाट्ठञ् च** ॥ **अस्मादिति** ॥ आक्रन्दशब्दाद्वितीयान्तादित्यर्थः । आक्रन्दन्ति अस्मिन्नित्याक्रन्दः । तदाह । **आक्रन्दो दुःखिनां रोदनस्थानमिति** ॥ **पदोत्तरपदम्** ॥ पदशब्दः उत्तरपदं यस्य

१५९०। प्रतिकण्ठार्थललामं च। (४-४-४०)

एभ्यो गृह्णात्यर्थे ठक्स्यात्। प्रतिकण्ठं गृह्णाति प्रातिकण्ठिकः। आर्थिकः लालामिकः।

१५९१। धर्मं चरति। (४-४-४१)

धार्मिकः। 'अधर्माच्चेति वक्तव्यम्' (वा २९६६)। आधर्मिकः।

१५९२। प्रतिपथमेति ठंश्च। (४-४-४२)

प्रतिपथमेति प्रतिपथिकः। प्रातिपथिकः।

१५९३। समवायान्समवैति। (४-४-४३)

सामवायिकः। सामूहिकः।

१५९४। परिषदो ण्यः। (४-४-४४)

परिषदं समवैति पारिषद्यः।

१५९५। सेनाया वा। (४-४-४५)

ण्यः स्यात्। पक्षे ठक्। सैन्याः—सैनिकाः।

१५९६। संज्ञायां ललाटकुक्कुट्यौ पश्यति। (४-४-४६)

ललाटं पश्यति लालाटिकः सेवकः। कुक्कुटीशब्देन तत्पातार्हः स्वल्पदेशो लक्ष्यते। कौक्कुटिको भिक्षुः।

तस्मात् द्वितीयान्तात् गृह्णातीत्यर्थे ठक् स्यादित्यर्थः। **प्रतिकण्ठार्थ** ॥ **एभ्य इति** ॥ प्रतिकण्ठ, अर्थ, ललाम, इत्येभ्यः इत्यर्थः। **आर्थिक इति** ॥ अर्थङ्गृह्णातीत्यर्थः। **लालामिक इति** ॥ ललामं चिह्नं तद्गृह्णातीत्यर्थः "लिङ्गं ललामञ्च ललाम च" इत्यमरः। **धर्मञ्चरति** ॥ चरतीत्यर्थे द्वितीयान्तात् धर्मशब्दाट्ठगित्यर्थः। **अधर्माच्चेतीति** ॥ 'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति' इति तदन्ताग्रहणादप्राप्ते आरम्भः। **प्रतिपथमेति ठंश्च** ॥ प्रतिपथमिलव्ययीभावात् एतीत्यर्थे ठन् ठक् च स्यादित्यर्थः। प्रतिपथमिति 'लक्षणेनाभिप्रती आभिमुख्ये' इत्यव्ययीभावः। 'ऋक्पूः' इति समासान्तः। **समवायान् समवैति** ॥ द्वितीयान्तेभ्यः समवायवाचिशब्देभ्यः समवैतीत्यर्थे ठगित्यर्थः। बहुवचनात्तदर्थवाचिशब्दग्रहणम्। समवैति मेलयतीत्यर्थः। **परिषदो ण्यः** ॥ तृतीयान्तात्परिषच्छब्दात्समवैतीत्यर्थे ठगपवादो ण्य इत्यर्थः। **सेनाया वा** ॥ **ण्यः स्यादिति** ॥ शेषपूरणमिदम्। द्वितीयान्तात्सेनाशब्दात् समवैतीत्यर्थे ण्यो वा स्यादित्यर्थः। **सैन्याः—सैनिका इति** ॥ सेनां मेलयन्तीत्यर्थः। **संज्ञायाम्** ॥ ललाटकुक्कुटीशब्दाभ्यान्द्वितीयान्ताभ्यां पश्यतीत्यर्थे ठक् स्यात्संज्ञायामित्यर्थः। संज्ञा रूढिः, न त्वाधुनिकः सङ्केतः। **लालाटिकः सेवक इति** ॥ दूरे स्थित्वा प्रभोर्ललाटं

१५९७ । तस्य धर्म्यम् । (४-४-४७)

आपणस्य धर्म्यमापणिकम् ।

१५९८ । अण् महिष्यादिभ्यः । (४-४-४८)

महिष्या धर्म्यं माहिषम् । याजमानम् ।

१५९९ । ऋतोऽञ् । (४-४-४९)

यातुर्धर्म्यं यात्रम् । 'नराच्चेति वक्तव्यम्' (वा २९६७) । नरस्य धर्म्या नारी । 'विशसितुरिड्लोपश्चाच्च वक्तव्यः' (वा २९६८) । विशसितुर्धर्म्यं वैशस्त्रम् । 'विभाजयितुर्णिलोपश्चाच्च वाच्यः' (वा २९६९) । विभाजयितुर्धर्म्यं वैभाजित्रम् ।

१६०० । अवक्रयः । (४-४-५०)

षष्ठ्यन्ताट्ठक्स्यादवक्रयेऽर्थे । आपणस्यावक्रयः आपणिकः । राजग्राह्यं द्रव्यमवक्रयः ।

१६०१ । तदस्य पण्यम् । (४-४-५१)

अपूपाः पण्यमस्य आपूपिकः ।

१६०२ । लवणाट्ठञ् । (४-४-५२)

लावणिकः ।

१६०३ । किसरादिभ्यः ष्ठन् । (४-४-५३)

किसरं पण्यमस्य किसरिकः । पित्त्वान्ङीष् । किसरिकी । किसर, उशीर, नलद, इत्यादिकिसरादयः सर्वे सुगन्धिद्रव्यविशेषवाचिनः ।

पश्यति, नतु कार्ये प्रवर्तते इत्यर्थः । "लालाटिकः प्रभोर्भावदर्शी कार्याक्षमश्च यः" इत्यमरः । **कौक्कुटिक इति** ॥ कुक्कुटपतनार्हदेशम्पश्यतीत्यर्थः । **तस्य धर्म्यम्** ॥ धर्मादनपेतं धर्म्यम् । आचरितुं योग्यमित्यर्थः । धर्म्यमित्यर्थे षष्ठ्यन्ताट्ठगित्यर्थः । **अण् महिष्यादिभ्यः** ॥ षष्ठ्यन्तेभ्यो धर्म्यमित्यर्थे इति शेषः । **ऋतोऽञ्** ॥ ऋदन्तात्षष्ठ्यन्तात् धर्म्यमित्यर्थे अञित्यर्थः । **नारीति** ॥ अजन्तत्वात् ङीबिति भावः । **इड्लोप इति** ॥ इटो लोप इत्यर्थः । **वैशस्त्रमिति** ॥ विशसितृशब्दादञि इटो लोपे ऋकारस्य यणि आदिवृद्धिः । **वैभाजित्रमिति** ॥ विभाजयितृशब्दादञि णिलोपः । **अवक्रयः** ॥ तस्येत्यनुवर्तते । तदाह । **षष्ठ्यन्तादिति** ॥ **तदस्य पण्यम्** ॥ अस्मिन्नर्थे प्रथमान्तात् ठगित्यर्थः । क्रेतव्यं द्रव्यं पण्यम् । **लवणाट्ठञ्** ॥ तदस्य पण्यमित्येव । **लावणिक इति** ॥ लवणमस्य पण्यमित्यर्थः । **किसरादिभ्यः ष्ठन्** ॥

१६०४। शलालुनोऽन्यतरस्याम्। (४-४-५४)

घ्नन् स्यात्, पक्षे ठक्। शलालुकः—शलालुकी। शालालुकः—शालालुकी। शलालुः सुगन्धिद्रव्यविशेषः।

१६०५। शिल्पम्। (४-४-५५)

मृदङ्गवादनं शिल्पमस्य मार्दङ्गिकः।

१६०६। मड्डुकझर्झराद्णन्यतरस्याम्। (४-४-५६)

मड्डुकवादनं शिल्पमस्य माड्डुकः—माड्डुकिकः। झार्झरः—झार्झरिकः।

१६०७। प्रहरणम्। (४-४-५७)

'तदस्य' इत्येव। असिः प्रहरणमस्य आसिकः। धानुष्कः।

१६०८। परश्वथाट्ठञ्च। (४-४-५८)

पारश्वथिकः।

१६०९। शक्तियष्ट्योरीकक्। (४-४-५९)

शाक्तीकः। याष्टीकः।

१६१०। अस्ति नास्ति दिष्टं मतिः। (४-४-६०)

'तदस्य' इत्येव। अस्ति परलोकः इत्येवं मतिर्यस्य सः आस्तिकः। नास्तीति मतिर्यस्य स नास्तिकः। दिष्टमिति मतिर्यस्य स दैष्टिकः।

तदस्य पण्यमित्येव। घ्नन्निति च्छेदः। तदाह। **षित्त्वान्ङीषिति॥ शलालुनोऽन्यतरस्याम्॥** घ्नन्निति शेषः। तदस्य पण्यमित्येव। **शलालुक इति॥** शलालु पण्यमस्येति विग्रहः। उकः परत्वाद्वस्य कः। षित्त्वस्य फलमाह। **शलालुकीति॥ शिल्पम्॥** तदस्य शिल्पमित्यर्थे प्रथमान्तात् ठगित्यर्थः। क्रियासु कौशलं शिल्पम्। ननु मार्दङ्गिकः इत्युदाहरणं वक्ष्यति। तत्र मृदङ्गं शिल्पमिति कथं विग्रहः। मृदङ्गस्य शिल्पत्वासम्भवात्। तत्राह। **मृदङ्गवादनमिति॥** मृदङ्गवादनविषयकमित्यर्थः। मृदङ्गशब्दो लक्षणया मृदङ्गवादनविषयक इति भावः। **मड्डुकझर्झरात्॥** तदस्य शिल्पमित्येव। पक्षे ठक्। मड्डुकझर्झरौ वाद्यविशेषौ। **प्रहरणम्॥** अस्येत्येव। प्रहरणवाचिनः प्रथमान्तादस्येत्यर्थे ठगित्यर्थः। प्रहियतेऽनेनेति प्रहरणम्, आयुधम्। **धानुष्क इति॥** धनुः प्रहरणमस्येति विग्रहः। उसन्तात्परत्वाद्वस्य कः। 'इणः षः' इति षः। **परश्वथाट्ठञ् च॥** तदस्य प्रहरणमित्येव। चात् ठक्। "परशुश्च परश्वथः" इत्यमरः। **शक्तियष्ट्योरीकक्॥** शक्तियष्टिशब्दाभ्याम्प्रथमान्ताभ्याम्प्रहरणवाचिभ्यामस्येत्यर्थे ईकक् स्यादित्यर्थः। **अस्ति नास्ति॥ तदस्येत्येवेति॥** अस्तीति मतिरस्यास्ति, नास्तीति मतिरस्यास्तीति, दिष्टमिति मतिरस्यास्तीत्यर्थेषु क्रमेण अस्तीत्यस्मात् नास्तीत्यस्मात् दिष्टमित्यस्माच्च प्रथमान्ताद्ठगित्यर्थः। अस्तिनास्तिशब्दौ निपातौ। यद्वा वचनादेव आख्यातात्प्रत्ययः।

१६११ । शीलम् । (४-४-६१)

अपूपभक्षणं शीलमस्य आपूपिकः ।

१६१२ । छत्रादिभ्यो णः । (४-४-६२)

गुरोर्दोषाणामावरणं छत्रम्, तच्छीलमस्य छात्रः ।

१६१३ । कार्मस्ताच्छील्ये । (६-४-१७२)

कार्मः इति ताच्छील्ये णे टिलोपो निपात्यते । कर्मशीलः कार्मः । 'नस्तद्धिते' (सू ६७९) इत्येव सिद्धे 'अण्कार्य ताच्छीलिके णेऽपि' । तेन चौरी तापसी इत्यादि सिद्धम् । 'ताच्छील्ये' किम् । कार्मणः ।

१६१४ । कर्माध्ययने वृत्तम् । (४-४-६३)

प्रथमान्तात्षष्ठ्यर्थे ठक्स्यादध्ययने वृत्ता या क्रिया सा चेत्प्रथमान्तस्यार्थः । एकमन्यद्वृत्तमस्य ऐकान्यिकः । यस्याध्ययने प्रवृत्तस्य परीक्षाकाले विपरीतोच्चारणरूपं स्खलितमेकं जातं, सः ।

"दैवन्दिष्टम्" इत्यमरः । **शीलम्** ॥ अस्येत्यर्थे शीलवाचिनः प्रथमान्ताद्गिल्यर्थः । शीलं स्वभावः । **अपूपभक्षणमिति** ॥ अपूपशब्दस्तद्भक्षणे लाक्षणिक इति भावः । **छत्त्रादिभ्यो णः** ॥ एभ्यः प्रथमान्तेभ्यः अस्य शीलमित्यर्थे णप्रत्ययः स्यादित्यर्थः । छत्त्रं शीलमस्य छात्त्रः, इत्युदाहरणं वक्ष्यति । तत्र छत्त्रस्य शीलत्वानुपपत्तेः छत्त्रपदं गुरुदोषावरणे गौणमित्याह । **गुरोरिति** ॥ शीलमित्यर्थे छत्रादित्वात् णप्रत्यये कृते । **कार्मस्ताच्छील्ये** ॥ तत् शीलं यस्य सः तच्छीलः, तस्य भावः ताच्छील्यम् । तस्मिन्वाच्ये कार्म इति भवतीत्यर्थः । णप्रत्यये परे टिलोपः स्यादिति यावत् । तदाह । **टिलोपो निपात्यते इति** ॥ णेऽपीत्यनन्तरम् इति ज्ञापनार्थमिदमिति शेषः । अत्र टिलोपविधिर्हि 'अन्' इति प्रकृतिभावनिवृत्त्यर्थः । ततश्च अणि विहितस्य प्रकृतिभावस्य णप्रत्यये परतः प्रतिषेधादणि कार्यकारित्वं णप्रत्ययस्य ज्ञाप्यते इति भावः । **तेनेति** ॥ चुरा शीलमस्य, तपः शीलमस्येत्यर्थे चुरातपःशब्दाभ्याञ्छत्रादित्वाण्णप्रत्यये सति तदन्ताभ्यामणन्तकार्ये ङीपि चौरी तापसीति सिद्धमित्यर्थः। **कार्मण इति** ॥ 'तस्येदम्' इत्यणि 'कार्मस्ताच्छील्ये' इत्यस्याप्रवृत्त्या 'अन्' इति प्रकृतिभावान्न टिलोप इति भावः । **कर्माध्ययने वृत्तम्** ॥ 'तदस्य पण्यम्' इत्यतः तदस्येत्यनुवर्तते । 'तदस्य कर्माध्ययने वृत्तम्' इत्यर्थनिर्देशः । तत्र तदित्यनेन विशेष्येण कर्मवृत्तमित्यन्वेति । कर्मशब्दः क्रियापरः । वृत्तमित्यस्य जातमित्यर्थः । वृत्तं कर्मविशेष्यसमर्पकम् । तदिति प्रथमोच्चारितम् । ततश्च अस्य अध्ययनविषये तत्कर्म वृत्तमित्यर्थे तच्छब्दगम्यविशेष्यवाचकात् प्रथमान्ताट्ठक् स्यादित्यर्थः । तदाह । **प्रथमान्तादिति** ॥ वृत्तं कर्म प्रति विशेष्यसमर्पकादिति शेषः । **अध्ययने वृत्तेति** ॥ विषयसप्तम्येषा । **या क्रियेति** ॥

१६१५। बह्वच्पूर्वपदाट्ठच्। (४-४-६४)

प्राग्विषये। द्वादशान्यानि कर्माण्यध्ययने वृत्तान्यस्य द्वादशान्यिकः। द्वादशापपाठाः अस्य जाता इत्यर्थः।

१६१६। हितं भक्षाः। (४-४-६५)

अपूपभक्षणं हितमस्मै आपूपिकः।

१६१७। तदस्मै दीयते नियतम्। (४-४-६६)

अग्रभोजनं नियतं दीयते अस्मै आग्रभोजनिकः।

१६१८। श्राणामांसौदनाट्ठिठन्। (४-४-६७)

श्राणा नियतं दीयतेऽस्मै श्राणिकः—श्राणिकी। मांसौदनग्रहणं सङ्गात-विगृहीतार्थम्। मांसौदनिकः—मांसिकः। औदनिकः।

१६१९। भक्तादणन्यतरस्याम्। (४-४-६८)

पक्षे ठक्। भक्तमस्मै नियतं दीयते भाक्तः—भाक्तिकः।

१६२०। तत्र नियुक्तः। (४-४-६९)

आकरे नियुक्तः आकरिकः।

अनेन कर्मशब्दः क्रियापर इति सूचितम्। **प्रथमान्तस्यार्थ इति** ॥ अनेन कर्म वृत्त-मित्येतत् तदित्यस्य प्रथमान्तस्य विशेषणमिति सूचितम्। तदित्यनुवृत्तौ कर्मशब्दस्यैव सूत्रे प्रथमानिर्दिष्टत्वात्, अत एव प्रत्ययः स्यात्, नतु तद्विशेष्यवाचकात्, तस्य प्रथमा-निर्दिष्टत्वाभावादित्यभिप्रेत्योदाहरति। **एकमन्यद्वृत्तमस्य ऐकान्यिक इति**॥ 'तद्धितार्थ' इति समासे एकान्यशब्दाट्ठगिति भावः। द्वैयन्यिकः, त्रैयन्यिकः। ऐजागमो विशेषः। **बह्वच्-पूर्वपदाट्ठच्**॥ 'तदस्य कर्माध्ययने वृत्तम्' इत्यनुवर्तते। तदाह। **प्राग्विषये इति** ॥ **द्वादशान्यिक इति** ॥ 'तद्धितार्थ' इति समासः। एवं त्रयोदशान्यिकः। चित्त्वान्नादिवृद्धिः। **हितम्भक्षाः** ॥ तदस्येत्यनुवृत्तम्। तत्र षष्ठी चतुर्थ्या विपरिणम्यते। हितयोगात् तत् अस्मै हितमित्यर्थे प्रथमान्ताट्ठक स्यात् यत् हितम्भक्षाश्चेत् ते स्युरित्यर्थः। संस्कृतं भक्षाः इतिवद्व्याख्येयम्। **अपूपभक्षणमिति** ॥ अनेन अपूपशब्दः अपूपभक्षणे लाक्षणिक इति सूचितम्। अपूपो हितमित्यर्थे तु न ठक्। अभिधानस्वाभाव्यादिति भावः। **तदस्मै दीयते नियतम्** ॥ अस्मिन्नर्थे प्रथमान्ताट्ठगित्यर्थः। नियुक्तमिति पक्षान्तरम्। नियतमित्यर्थः। **श्राणामांस** ॥ तदस्मै दीयते नियतमित्येव। श्राणा यवागूः। "यवागूरुष्णिका श्राणा विलेपी तरला च सा" इत्यमरः। टित्त्वं ङीबर्थम्। तदाह। **श्राणिकीति** ॥ **सङ्गात-विगृहीतार्थमिति** ॥ ठकैव सिद्धे ओदनिक इत्यत्र आदिवृध्यभावार्थं प्रत्ययान्तरविधानमिति भावः। **भक्तादणन्यतरस्याम्** ॥ तदस्मै दीयते नियतमित्येव। **तत्र नियुक्तः** ॥

१६२१ । अगारान्ताट्ठन् । (४-४-७०)

देवागारे नियुक्तो देवागारिकः ।

१६२२ । अध्यायिन्यदेशकालात् । (४-४-७१)

निषिद्धदेशकालवाचकाट्ठक्स्यादध्येतरि । श्मशानेऽधीते श्माशानिकः । चतुर्दश्यामधीते चातुर्दशिकः ।

१६२३ । कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति । (४-४-७२)

'तत्र' इत्येव । वंशकठिने व्यवहरति वांशकठिनिकः । वंशाः वेणवः कठिनाः यस्मिन्देशे स वंशकठिनः । तस्मिन्देशे या क्रिया यथा अनुष्ठेया तां तथैवानुतिष्ठतीत्यर्थः । प्रास्तारिकः । सांस्थानिकः ।

१६२४ । निकटे वसति । (४-४-७३)

नैकटिको भिक्षुः ।

१६२५ । आवसथात् ष्ठल् । (४-४-७४)

आवसथे वसति आवसथिकः । षित्त्वान्ङीप् । आवसथिकी ।

अस्मिन्नर्थे सप्तम्यन्ताट्ठक् स्यादित्यर्थः । नियुक्तः अधिकृतः । संरक्षणादौ प्रेरित इति यावत् । **आकरिक इति** ॥ आकरः रत्नाद्युद्भवस्थानम् । **अगारान्ताट्ठन्** ॥ तत्र नियुक्त इत्येव । नित्त्वान्नादिवृद्धिः । तदाह । **देवागारिक इति** ॥ **अध्यायिन्यदेशकालात्** ॥ **निषिद्धेति** ॥ अदेशकालेत्यत्र नञ् निषिद्धे वर्तते इति भावः । **श्माशानिकः । चातुर्दशिक इति** ॥ देशकालभिन्नादिति व्याख्याने तु इह न स्यादिति भावः । **कठिनान्तप्रस्तार** ॥ अस्मिन्नर्थे कठिनान्त, प्रस्तार, संस्थान, एभ्यः सप्तम्यन्तेभ्यः ठगित्यर्थः । वंशकठिनशब्दं विवृणोति । **वंशा इति** ॥ व्यवहरणम् उचितक्रिया । तदाह । **यस्मिन्देशे इति** ॥ प्रस्तारसंस्थानशब्दौ अवयवसन्निवेशपर्यायौ । **निकटे वसति** ॥ अस्मिन्नर्थे सप्तम्यन्तान्निकटशब्दाट्ठगित्यर्थः । **नैकटिको भिक्षुरिति** ॥ ग्रामात्क्रोशे भिक्षुणा वस्तव्यमिति शास्त्रमुल्लङ्घ्य निकटे यो भिक्षुर्वसति तत्रैवायं ठगिति भावः । अत्र व्याख्यानमेव शरणम् । **आवसथात्ष्ठल्** ॥ तत्र वसतीत्यर्थे आवसथात् सप्तम्यन्तात् ष्ठलित्यर्थः । आवसथं गृहम् । षित्त्वं ङीषर्थम् । तदाह । **आवसथिकीति** ॥ आकर्षादित्यादि श्लोकवार्तिकं 'प्राग्वहतेष्ठक्' इत्यादौ ठगिति वा ष्ठगिति वा छेद इति संशयनिवृत्त्यर्थम् 'आकर्षात्ष्ठल्' इति सूत्रभाष्ये पठितम् । तत्र आकर्षादित्यनेन 'आकर्षात्ष्ठल्' इति सूत्रं विवक्षितम् । पर्पादिभ्यः इत्यनेन 'पर्पादिभ्यः छन्' इति सूत्रं विवक्षितम् । भस्त्रादिभ्यः इत्यनेन 'भस्त्रादिभ्यः छन्' इति सूत्रं विवक्षितम् । कुसीददशैकादशात् छन्ष्ठचौ' इत्यनेन 'कुसीददशैकादशात् ष्ठन्ष्ठचौ'

"आकर्षात्पर्णादेर्भस्त्रादिभ्यः कुसीदसूत्राच्च।
आवसथात्किसरादेः षितः षडेते ठगधिकारे॥" (वा २९५५)

षडिति सूत्रषट्केन विहिता इत्यर्थः। प्रत्ययास्तु सप्त।

इति तद्धिते ठगधिकारप्रकरणम्।

अथ तद्धिते प्राग्घितीयप्रकरणम्।

१६२६। प्राग्घिताद्यत्। (४-४-७५)

'तस्मै हितम्' (सू १६६५) इत्यतः प्राग्यदधिक्रियते।

१६२७। तद्वहति रथयुगप्रासङ्गम्। (४-४-७६)

रथं वहति रथ्यः। युग्यः। वत्सानां दमनकाले स्कन्धे यत्काष्ठमासज्यते स प्रासङ्गः। तं वहति प्रासङ्ग्यः।

१६२८। धुरो यड्ढौ। (४-४-७७)

'हलि च' (सू ३५४) इति दीर्घे प्राप्ते।

इति सूत्रं विवक्षितम्। आवसथादित्यनेन 'आवसथात् ष्ठल्' इति सूत्रं विवक्षितम्। किसरादेरित्यनेन 'किसरादिभ्यः ष्ठन्' इति सूत्रं विवक्षितम्। 'प्राग्वहतेष्ठक्' इत्यधिकारे एतैः सूत्रैर्विहिताः षट् प्रत्ययाः षित इत्यर्थः। ननु 'कुसीद' इति सूत्रे प्रत्ययद्वयविधानात् एतत्सूत्रषट्कविहिताः सप्त प्रत्ययाः लभ्यन्ते इति षट् षित इति कथमित्यत आह। **षडितीति**॥ षडित्यनेन सूत्राभिप्रायं षट्त्वं विवक्षितमिति भावः॥

इति तद्धिते प्राग्वहतीयप्रकरणम्।

अथ प्राग्घितीयप्रकरणं निरूप्यन्ते—**प्राग्घिताद्यत्**॥ हितशब्दः तद्धटितसूत्रपरः। तदाह। **तस्मै हितमिति**॥ **तद्वहति रथ**॥ रथादि वहतीत्यर्थे द्वितीयान्तात् रथ युग प्रासङ्ग इति त्रयात् यत्स्यादित्यर्थः। **युग्य इति**॥ रथादिवहनकाले अश्वादिस्कन्धेषु तिर्यक् यत् काष्ठमीषाप्रोतमासज्ज्यते तद्युगम्। तद्वहतीत्यर्थः। **दमनकाले इति**॥ रथादिवहने सुशिक्षितावश्वौ नियुज्य तत्स्कन्धवाह्ययुगे यद्युगान्तरमासज्य तस्मिन्नशिक्षिता अश्वादयो वहनशिक्षार्थंनियुज्यन्ते स प्रासङ्ग इत्यर्थः। "प्रासङ्गयो ना युगाद्युगः" इत्यमरः। **धुरो यड्ढौ**॥ धुरशब्दाद्द्वितीयान्तात् वहतीत्यर्थे यड्ढश्च स्यादित्यर्थः। यड्ढाविति पाठान्तरम्। **हलि चेतीति**॥ 'धुर्वी हिंसायाम्' 'भ्राजभास' इति क्विप्। 'राल्लोपः' इति लोपः। अश्वादिस्कन्धवाह्यप्रदेशो

१६२९ । न भकुर्छुराम् । (८-२-७९)

भस्य कुर्छुरोश्चोपधायाः दीर्घो न स्यात् । धुर्यः—धौरेयः ।

१६३० । खः सर्वधुरात् । (४-४-७८)

सर्वधुरं वहतीति सर्वधुरीणः ।

१६३१ । एकधुराल्लुक्च । (४-४-७९)

एकधुरं वहति एकधुरीणः—एकधुरः ।

१६३२ । शकटादण् । (४-४-८०)

शकटं वहति शाकटो गौः ।

१६३३ । हलसीराट्ठक् । (४-४-८१)

हलं वहति हालिकः । सैरिकः ।

१६३४ । संज्ञायां जन्या । (४-४-८२)

जनी वधूः । तां वहति प्रापयति जन्या ।

१६३५ । विध्यत्यधनुषा । (४-४-८३)

युगावयवो धूः । धुर्शब्दात् यति 'हलि च' इति दीर्घे प्राप्ते सतीत्यर्थः । **न भकुर्छुराम्** ॥ 'वोरुपधायाः' इत्यतः उपधाया इति दीर्घ इति चानुवर्तते । तदाह । **भस्येत्यादिना** ॥ 'धूर्वहे धुर्यधौरेयधुरीणाः' इत्यमरः । **खः सर्वधुरात्** ॥ सर्वा धूः सर्वधुरा 'पूर्वकाल' इति तत्पुरुषः । 'ऋक्पूः' इति समासान्तः । 'परवल्लिङ्गम्' इति स्त्रीत्वाट्टाप् । इह तु शब्दस्वरूपापेक्षया नपुंसकनिर्देशः द्वितीयान्तात्सर्वधुराशब्दात् वहतीत्यर्थे खः स्यादित्यर्थः । **सर्वधुरीण इति** ॥ सर्वधुरां वहतीत्यर्थः । "स तु सर्वधुरीणो यो भवेत् सर्वधुरावहः" इत्यमरः । **एकधुराल्लुक् च** ॥ एकधुराशब्दात् द्वितीयान्ताद्वहतीत्यर्थे खः स्यात् । तस्य पक्षे लुगित्यर्थः । **एकधुरीणः-एकधुर इति** ॥ एकधुरां वहतीत्यर्थः । **शकटादण्** ॥ द्वितीयान्ताच्छकटशब्दात् वहतीत्यर्थे अण् स्यादित्यर्थः । यतोऽपवादः । **हलसीराट्ठक्** ॥ आभ्यान्द्वितीयान्ताभ्यां वहतीत्यर्थे ठगित्यर्थः । **संज्ञायाञ्जन्या** ॥ जनीशब्दात् द्वितीयान्तात् वहतीत्यर्थे यत्स्यात्संज्ञायामित्यर्थः । **जनी वधूरिति** ॥ जायतेऽस्यां गर्भ इत्यर्थे जनिघसिभ्यामिति जनधातोः इणि 'जनिवध्योश्च' इति वृद्धिप्रतिषेधे 'कृदिकारात्' इति ङीषि । जनीशब्दस्य निष्पत्तेरिति भावः । 'समास्नुषाजनीवध्वः' इत्यमरः । वहन्तीत्यस्य विवरणम्प्रापयन्तीति । वरगृहमिति शेषः । **जन्या इति** ॥ जामातुर्वयस्या इति शेषः । "जन्या स्त्रिग्धा वरस्य ये" इत्यमरः । **विध्यत्यधनुषा** ॥ तदिति द्वितीयान्तमनुवर्तते । अधनुषेति सप्तम्यर्थे तृतीया । **धनुषः अभावः अधनुः तस्मिन्सतीत्यर्थः** । **अर्थाभावे** नञ्तत्पुरुषः । **अर्थाभावे** अव्ययीभावेन

द्वितीयान्ताद्विध्यतीत्यर्थे यत्स्यात्, न चेत्तत्र धनुः करणम्। पादौ विध्यन्ति पद्याः शर्कराः।

१६३६। धनगणं लब्धा। (४-४-८४)

तृन्नन्तमेतत्। धनं लब्धा धन्यः। गणं लब्धा गण्यः।

१६३७। अन्नाण्णः। (४-४-८५)

अन्नं लब्धा आन्नः।

१६३८। वशं गतः। (४-४-८६)

वश्यः परेच्छानुसारी।

१६३९। पदमस्मिन्दृश्यम्। (४-४-८७)

पद्यः कर्दमः। नातिशुष्क इत्यर्थः।

१६४०। मूलमस्यार्बर्हि। (४-४-८८)

आवर्हणमार्बर्हिः उत्पाटनं, तदस्यास्तीत्यार्बर्हि। मूलमार्बर्हि येषां ते मूल्या मुद्गाः।

अयं विकल्पते, इत्युक्तत्वात् द्वितीयान्ताद्विध्यतीत्यर्थे यत्स्याद्धनुषः करणस्याभावे सतीत्यर्थः। **नचेत्तत्रेति**॥ तत्र वेधने धनुः करणं नचेदित्यर्थः। **पद्या इति**॥ पादशब्दाद्यति 'पद्यत्यतदर्थे' इति पद्भावः। अधनुषेति किम्। धनुषा चोरं विध्यति देवदत्तः। अत्र चोराद्यत् न भवति। न चासामर्थ्यादेवात्र यत्नेति वाच्यम्। विध्यतीत्यस्य प्रत्ययार्थत्वेन प्रधानतया तस्य सापेक्षत्वेऽपि सामर्थ्याविघातात्। अन्यथा औपगवो देवदत्तः उपगुनप्तृत्वात् इत्यादौ न स्यात्। प्रत्ययार्थैकदेशस्य व्यधनस्य करणविशेषनित्यसापेक्षत्वाच्च इति *शब्देन्दुशेखरे विस्तरः। **धनगणं लब्धा**॥ धनशब्दात् गणशब्दाच्च द्वितीयान्ताल्लब्धेत्यर्थे यत्स्यादित्यर्थः। ननु लब्धृशब्दस्य तृजन्तस्य कृदन्तत्वात्तद्योगे कर्मणि षष्ठी स्यादित्यत आह। **तृन्नन्तमेतदिति**॥ तथाच 'न लोक' इति निषेधान्न षष्ठीति भावः। **अन्नाण्णः**॥ लब्धेत्यर्थे द्वितीयान्तादिति शेषः। **वशङ्गतः**॥ वशशब्दात् द्वितीयान्ताद्गत इत्यर्थे यदित्यर्थः। **वश्य इति**॥ वशङ्गत इति विग्रहः। 'वश कान्तौ'। कान्तिरिच्छा। वशनं वशः। 'वशिरण्योरुपसङ्ख्यानम्' इत्यप्। वशं इच्छाङ्गतः प्राप्तः, इच्छाधीन इत्यर्थः। वशधातुः 'छान्दसः' इति लुग्विकरणे वक्ष्यते। तत्प्रायिकमिति भावः। सर्वस्यापि स्वेच्छानुसारित्वादाह। **परेच्छानुसारीति**॥ **पदमस्मिन्दृश्यम्**॥ प्रथमान्तात्पदशब्दात् दृश्यत इत्यर्थे यदित्यर्थः। अत्र तदिति द्वितीयान्तमनुवृत्तम्प्रथमया विपरिणम्यते। **मूलमस्यार्बर्हि**॥ **आवर्हणमिति**॥ उत्पाटनमित्यर्थः। उपसर्गवशात् 'बृहू उद्यमने' इति धातोरुत्पाटने वृत्तिः। **मूल्या मुद्गा इति**॥ मूलतः उत्पाटनीया इत्यर्थः।

---

*"करणमात्रोपलक्षणं धनुरिति, तेन चोरं विध्यति खड्गेनेत्यादावपि न। न च तत्रासामर्थ्यम्। प्रधानस्य सापेक्षत्वेनादोषात्। प्रत्ययार्थैकदेशव्यधनस्य तदंश नित्यसापेक्षत्वाच्च। चोरं विध्यतीत्यादौ त्वनभिधानाद्वारणीयः सत्यनिष्टत्वे।" इति शब्देन्दुशेखरे।

१६४१ । संज्ञायां धेनुष्या । (४-४-८९)

धेनुशब्दस्य पुगागमो यप्रत्ययश्च स्वार्थे निपात्यते, संज्ञायाम् । धेनुष्या बन्धके स्थिता ।

१६४२ । गृहपतिना संयुक्ते ञ्यः । (४-४-९०)

गृहपतिर्यजमानः, तेन संयुक्तो गार्हपत्योऽग्निः ।

१६४३ । नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्य-प्राप्यवध्यानाम्यसमसमितसंमितेषु । (४-४-९१)

नावा तार्यं नाव्यम् । वयसा तुल्यो वयस्यः । धर्मेण प्राप्यं धर्म्यम् । विषेण वध्यो विष्यः । मूलेनानाम्यं मूल्यम् । मूलेन समो मूल्यः । सीतया समितं सीत्यं क्षेत्रम् । तुलया सम्मितं तुल्यम् ।

१६४४ । धर्मपथ्यर्थन्यायादनपेते । (४-४-९२)

धर्मादनपेतं धर्म्यम् । पथ्यम् । अर्थ्यम् । न्याय्यम् ।

संज्ञायां धेनुष्या ॥ **यप्रत्ययश्चेति** ॥ यति तु तित्स्वरः स्यादिति भावः । **धेनुष्येति** ॥ या धेनुर्दोहनार्थमुत्तमर्णाय अधमर्णेन दीयते तस्या इयं संज्ञा । तदाह । **बन्धके स्थितेति** ॥ अमरवाक्यमिदम् । संज्ञायामित्यापादपरिसमाप्तेरधिकारः । सज्ञा हि रूढिर्विवक्षिता । **गृहपतिना** ॥ अस्मिन्नर्थे गृहपतिशब्दात् तृतीयान्तात् ञ्यः स्यादित्यर्थः । **गार्हपत्योऽग्निरिति** ॥ अग्निविशेष इत्यर्थः । तत्र पत्नीसंयाजेषु अग्नीध्रीये च गृहपतिदेवताकहोमस्य क्रियमाणत्वात् गृहपतियोगः । यद्यपि देवसूहविःषु "अग्नये गृहपतये पुरोडाशमष्टाकपालं निर्वपति" इति हविर्होम आहवनीये क्रियते । तथापि संज्ञाधिकारादाहवनीये नास्य प्रयोगः । **नौवयोधर्म** ॥ नौ, वयस्, धर्म, विष, मूल, मूल, सीता, तुला, एभ्योऽष्टभ्यः क्रमात् तार्ये, तुल्ये, प्राप्ये, वध्ये, आनाम्ये, समे, समिते, संमिते, चार्थे यत्स्यादित्यर्थः । तृतीयान्तेभ्यः इत्यर्थात् गम्यते । तार्यादियोगे करणे कर्तरि हेतौ तुल्यादियोगे च तस्या एव सम्भवात् । अत्र मूलशब्दयोर्यथासङ्ख्यप्रवृत्तये नैकशेषः । अन्यथा समानाम्प्रकृतीनाम् एकैकस्याष्टस्वप्यर्थेषु प्रत्यय इति भ्रमः स्यात् । **तार्यमिति** ॥ तरीतुं शक्यमित्यर्थः । 'ऋहलोर्ण्यत्' । **वयसा तुल्य इति** ॥ मित्रे एवायम्प्रत्ययो नतु शत्रौ । संज्ञाधिकारात् । **मूलेनानाम्यमिति** ॥ पटादेरुत्पन्नार्थे वणिग्भिर्विनियुक्तं द्रव्यं मूलम् । तेन सह यदधिकन्द्रव्यम् आनम्यते विक्रेतुः सम्मतीकरणेन लभ्यते तन्मूल्यमित्यर्थः । लोकास्तु विक्रेतुर्लब्धं सर्वन्द्रव्यं मूल्यमिति व्यवहरन्ति । तत्र लक्षणा बोध्या । सा च साम्प्रतिकी निरूढा वा । **सीतयेति** ॥ सीता लाङ्गलपद्धतिः । तया समितं सङ्गतमित्यर्थः । कृष्टमिति यावत् । **तुलयेति** ॥ तुला घटा, तया उन्मितमित्यर्थः । **धर्मपथ्यर्थ** ॥ धर्म, पथिन्, अर्थ, न्याय, एभ्यः अनपेतमित्यर्थे यदित्यर्थः । औचित्यात्पञ्चम्यन्तेभ्यः इति

१६४५। छन्दसो निर्मिते। (४-४-९३)

छन्दसा निर्मितं छन्दस्यम्। इच्छया कृतमित्यर्थः।

१६४६। उरसोऽण् च। (४-४-९४)

चाद्यत्। उरसा निर्मितः पुत्रः औरसः—उरस्यः।

१६४७। हृदयस्य प्रियः। (४-४-९५)

हृद्यो देशः। 'हृदयस्य हृल्लेख—' (सू ९८८) इति हृदादेशः।

१६४८। बन्धने चर्षौ। (४-४-९६)

हृदयशब्दात्षष्ठ्यन्ताद्बन्धने यत्स्याद्वेदेऽभिधेये। हृदयस्य बन्धनं हृद्यो वशीकरणमन्त्रः।

१६४९। मतजनहलात्करणजल्पकर्षेषु। (४-४-९७)

मतं ज्ञानं, तस्य करणं भावः साधनं वा मत्यम्। जनस्य जल्पो जन्यः। हलस्य कर्षो हल्यः।

१६५०। तत्र साधुः। (४-४-९८)

अग्रे साधुः अग्र्यः। सामसु साधुः सामन्यः। 'ये चाभावकर्मणोः' (सू ११५४) इति प्रकृतिभावः। कर्मण्यः। शरण्यः।

१६५१। प्रतिजनादिभ्यः खञ्। (४-४-९९)

लभ्यते। **धर्मादनपेतमिति** ॥ अप्रच्युतमित्यर्थः। **पथ्यमिति** ॥ पथः अनपेतमित्यर्थः। **न्याय्यमिति** ॥ न्यायादनपेतमित्यर्थः। **छन्दसो निर्मिते** ॥ छन्दश्शब्दात्तृतीयान्तात् निर्मितेऽर्थे यदित्यर्थः। **इच्छयेति** ॥ छन्दःशब्दः इच्छावाचीति भावः। "छन्दः पद्येऽभिलाषे च" इत्यमरः। **उरसोऽण् च** ॥ तृतीयान्तान्निर्मित इत्यर्थे इति शेषः। **उरस्यः इति** ॥ "अङ्गादङ्गात्सम्भवसि हृदयादधिजायसे" इति श्रुतेरिति भावः। पुत्र इति संज्ञाधिकाराल्लब्धम्। **हृदयस्य प्रियः** ॥ षष्ठ्यन्तात् हृदयशब्दात् प्रिय इत्यर्थे यत्स्यादित्यर्थः। **बन्धने चर्षौ** ॥ **मतजनहलात्** ॥ यथासङ्ख्यम् एभ्यः एष्वर्थेषु यदिति शेषः। **मतं ज्ञानमिति** ॥ मनधातोः भावे क्त इति भावः। **करणं भावः साधनं वेति** ॥ कृञ्धातोर्भावे करणे वा ल्युटि करणशब्दः। तेन जननक्रिया वा जननसाधनं वा विवक्षितमित्यर्थः। **मत्यमिति** ॥ ज्ञानस्य जननक्रिया जननसाधनं वेत्यर्थः। **तत्र साधुः** ॥ सप्तम्यन्तात्साधुरित्यर्थे यत्स्यादित्यर्थः। **अग्र्य इति** ॥ अग्रे साधुरित्यर्थः। साधुरत्र प्रवीणो गृह्यते, नतु हितः। तत्र 'तस्मै हितम्' इति वक्ष्यमाणत्वात्। **प्रतिजनादिभ्यः खञ्** ॥ तत्र साधुरित्येव।

प्रतिजनं साधुः प्रातिजनीनः। सांयुगीनः। सार्वजनीनः। वैश्वजनीनः।

१६५२। भक्ताण्णः। (४-४-१००)

भक्ते साधवो भाक्ताः शालयः।

१६५३। परिषदो ण्यः (४-४-१०१)

पारिषद्यः। 'परिषदः' इति योगविभागाण्णोऽपि। पारिषदः। ['पर्षदः' इति पाठान्तरम्। पार्षदः।]

१६५४। कथादिभ्यष्ठक्। (४-४-१०२)

कथायां साधुः काथिकः।

१६५५। गुडादिभ्यष्ठञ्। (४-४-१०३)

गुडे साधुर्गौडिक इक्षुः। साक्तुको यवः।

१६५६। पथ्यतिथिवसतिस्वपतेर्ढञ्। (४-४-१०४)

पथि साधु पाथेयम्। आतिथेयम्। वसनं वसतिः, तत्र साधुर्वासतेयी रात्रिः। स्वापतेयं धनम्।

१६५७। सभाया यः। (४-४-१०५)

सभ्यः।

१६५८। समानतीर्थे वासी। (४-४-१०७)

'साधुः' इति निवृत्तम्। वसतीति वासी। समाने तीर्थे गुरौ वसतीति सतीर्थ्यः।

सप्तम्यन्तेभ्यः एभ्यः साधुरित्यर्थे खञ् स्यादित्यर्थः। **प्रातिजनीन इति** ॥ प्रतिजनमिति वीप्सायामव्ययीभावः। तत्र साधुरित्यर्थः। एवं वैश्वजनीनः। **भक्ताण्णः** ॥ सप्तम्यन्तादस्मात् साधुरित्यर्थे इति शेषः। **परिषदो ण्यः** ॥ सप्तम्यन्तात्साधुरित्यर्थे इति शेषः। **योगेति** ॥ परिषद इति प्रथमो योगः। परिषदः णः स्यादित्यर्थः। ततः 'ण्यः' इति द्वितीयो योगः। परिषदो ण्यः स्यादित्यर्थः। **कथादिभ्यष्ठक्** ॥ इत्यादि स्पष्टम्। **गुडादिभ्यष्ठञ्** ॥ **साक्तुको यव इति** ॥ सक्तुषु साधुरित्यर्थः। कथादित्वाद्ठक्। उगन्तत्वाद्ठस्य कः। **पथ्यतिथि** ॥ इत्यादि स्पष्टम्। **समानतीर्थे वासी** ॥ समानतीर्थशब्दात्सप्तम्यन्तात् वसतीत्यर्थे यत्स्यादित्यर्थः। **वसतीति वासीति** ॥ ग्रहादेराकृतिगणत्वाण्णिनिः। तीर्थशब्दस्य विवरणं गुराविति। **सतीर्थ्य इति** ॥ समानतीर्थशब्दाद्यति 'तीर्थे ये' इति समानस्य सभावः।

---

१. 'स पार्षदैरम्बरमापुपूरे' इति जाम्बवतीजये पाणिनिः—इति मुकुटः।

१६५९। समानोदरे शयित ओ चोदात्तः। (४-४-१०८)

समाने उदरे शयितः स्थितः समानोदर्यो भ्राता।

१६६०। सोदराद्यः। (४-४-१०९)

सोदर्यः। अर्थः प्राग्वत्।

इति तद्धिते चतुर्थस्य चतुर्थपादे प्राग्घितीयप्रकरणम्।

अथ तद्धिते पञ्चमस्य प्रथमपादे आर्हीये छयद्विधिप्रकरणम्।

१६६१। प्राक् क्रीताच्छः। (५-१-१)

'तेन क्रीतम्' (सू १७०२) इत्यतः प्राक्छोऽधिक्रियते।

१६६२। उगवादिभ्यो यत्। (५-१-२)

प्राक् क्रीतादित्येव। उवर्णान्ताद्गवादिभ्यश्च यत्स्याच्छस्यापवादः। 'नाभि नभं च' (ग सू ९५)। नभ्योऽक्षः। नभ्यमञ्जनम्। रथनाभावेवेदम्।

समानोदरे शयितः ॥ समानोदरशब्दात् सप्तम्यन्तात् शयितः इत्यर्थे यत्स्यात् ओकारश्च उदात्त इत्यर्थः। शयित इत्यस्य विवरणं स्थित इति। कुशेशयं जलेशयं इत्यादौ तथा दर्शनादिति भावः। **समानोदर्य इति** ॥ समानमुदरमिति विग्रहे 'पूर्वापरप्रथम' इत्यादिना समासाद्यति कृते तित्स्वरापवादः ओकारस्योदात्तः। 'विभाषोदरे' इति सभावे असति रूपम्। **सोदराद्यः** ॥ सप्तम्यन्तात् शयित इत्यर्थे इति शेषः। तित्त्वाभावात्प्रत्ययस्वरेणान्तोदात्तोऽयम्। विभाषोदरे' इति सभावः। "अपन्थानन्तु गच्छन्तं सोदरोऽपि विमुञ्चति" इत्यत्र तु समानपर्यायसहशब्दस्य बहुव्रीहौ 'वोपसर्जनस्य' इति सभावो बोध्यः। एवं 'यत्र भ्राता सहोदरः' इत्याद्यपि सिद्धम् ॥

इति तद्धिते चतुर्थस्य चतुर्थः पादः।

अथ पञ्चमाध्यायः—**प्राक्क्रीताच्छः** ॥ क्रीतशब्दस्तद्धटितसूत्रपरः। तदाह। **तेन क्रीतमिति** ॥ 'तेन क्रीतम्' इत्यतः प्राक् येषु सूत्रेषु अर्था एव निर्देक्ष्यन्ते नतु प्रत्ययाः तेषु छ इत्युपस्थितं भवतीति यावत्। **उगवादिभ्यो यत्** ॥ उश्च गवादयश्च इति द्वन्द्वात् पञ्चमी। **उवर्णान्तादिति** ॥ प्रातिपदिकविशेषणत्वात् तदन्तविधिः। 'उगिद्वर्णग्रहणवर्जम्' इत्युक्तेः प्रत्ययविधावपि तदन्तविधिरिति भावः। इदमपि सूत्रं प्राक्क्रीताद्वक्ष्यमाणसूत्रेषु प्रत्ययविशेषानुपादाने उपतिष्ठते। **नाभि नभञ्चेति** ॥ गवादिगणसूत्रम्। नाभिशब्दः नभादेशं यत्प्रत्ययञ्च प्राप्नोतीत्यर्थः। **नभ्योऽक्ष इति** ॥ यत्र अक्षदण्डः प्रवेश्यते तच्चक्रमध्यगतच्छिद्रं

'शुनः सम्प्रसारणं वा च दीर्घत्वम्' (ग सू ९६)। शून्यम्–शुन्यम्। 'ऊधसोऽनङ् च' (ग सू ९७)। ऊधन्यः।

१६६३। कम्बळाच्च संज्ञायाम्। (५-१-३)

यत्स्यात्। कम्बल्यमूर्णापलशतम्। 'संज्ञायाम्' किम्। कम्बळीया ऊर्णा।

१६६४। विभाषा हविरपूपादिभ्यः। (५-४-४)

आमिक्ष्यं दधि, आमिक्षीयम्। पुरोडाश्यास्तण्डुलाः, पुरोडाशीयाः। अपूप्यम्–अपूपीयम्।

१६६५। तस्मै हितम्। (५-१-५)

वत्सेभ्यो हितो वत्सीयो गोधुक्। शङ्कवे हितं शङ्कव्यं दारु। गव्यम्। हविष्यम्।

१६६६। शरीरावयवाद्यत्। (५-४-४)

नाभिरित्युच्यते। तस्मै हितः अक्षदण्डः, स हि अनुगुणत्वात् नाभये हितः। **नभ्यमञ्जनमिति॥** अञ्जनं तैलसेकः। नाभेरञ्जने कृते तत्र प्रोतचक्र सुपरिवर्तनं भवतीति नाभेः परिवर्तनात्मककार्यक्षमताधायकत्वादञ्जनं नाभये हितम्। अत्र शरीरावयवविशेषवाचिनाभिशब्दो न गृह्यते। भाष्ये रथनाभेरेव ग्रहणादित्यभिप्रेत्य आह। **रथनाभावेवेदमिति॥** शरीरावयवविशेषवाचिनाभिशब्दात्तु 'शरीरावयवाद्यत्' इति वक्ष्यमाणः केवलो यत्, नतु नभादेश इति भावः। **शुनः सम्प्रसारणमिति॥** गवादिगणसूत्रम्। श्वन्शब्दाद्यत्स्यात् प्रकृतेः सम्प्रसारणम्, तस्य सम्प्रसारणस्य पाक्षिक दीर्घत्वमित्यर्थः। **शून्यम्–शुन्यमिति॥** शुने हितमित्यर्थः। **ऊधसोऽनङ्चेति॥** इदमपि गणसूत्रम्। ऊधस्शब्दात् यत्स्यात् प्रकृतेरनङादेशश्चेत्यर्थः। आदेशे ङकार इत्, नकारादकार उच्चारणार्थः, ङित्त्वादन्तादेशः। **कम्बळाच्च॥** कम्बळ शब्दात् यत्स्यात् प्राक्क्रीतीयेष्वर्थेषु संज्ञायामित्यर्थः। **कम्बल्यम् ऊर्णापलशतमिति॥** कम्बळाय हितमित्यर्थः। **विभाषा हविः॥** हविर्विशेषवाचिभ्यः अपूपादिभ्यश्च प्राक्क्रीतीयेष्वर्थेषु यद्वा स्यादित्यर्थः। पक्षे छः। **आमिक्ष्यं दधीति॥** आमिक्षायै हितमित्यर्थः। तप्ते पयसि दध्नि निक्षिप्ते सति यत् घनीभूतं निष्पद्यते सा आमिक्षेत्युच्यते। **तस्मै हितम्॥** अस्मिन्नर्थे चतुर्थ्यन्ताद्यथाविहितं प्रत्ययाः स्युः। **वत्सीय इति॥** छे रूपम्। यो गोधुक् वत्सेभ्यः पयः शिष्ट्वा दोग्धि स एवमुच्यते। **शङ्कव्यमिति॥** शङ्कवे हितमित्यर्थः। उवर्णान्तत्वाद्यत्। **गव्यमिति॥** गोभ्यो हितं तृणादिकमित्यर्थः। गवादिलक्षणो यत्। **हविष्यमिति॥** हविषे हितमित्यर्थः। हविःशब्दो गवादिः। 'विभाषा हविः' इत्यत्र तु हविर्विशेषवाचिनामेव ग्रहणं, व्याख्यानात्। **शरीरावयवाद्यत्॥** शरीरावयवविशेषवाचकात्

दन्त्यम्। कण्ठ्यम्। 'नस्नासिकायाः' (वा ३४९७)। नस्यम्। नाभ्यम्।

१६६७। ये च तद्धिते। (६-१-६१)

यादौ तद्धिते परे शिरःशब्दस्य शीर्षन्नादेशः स्यात्। शीर्षण्यः। 'तद्धिते' किम्। शिर इच्छति शिरस्यति। 'वा केशेषु' (वा ३४९३)। शीर्षण्याः—शिरस्या वा केशाः। 'अचि शीर्ष इति वाच्यम्' (वा ३४९४)। अजादौ तद्धिते शिरसः शीर्षादेशः। स्थूलशिरस इदं स्थौलशीर्षम्।

१६६८। खलयवमाषतिलवृषब्रह्मणश्च। (५-१-७)

खलाय हितं खल्यम्। यव्यम्। माष्यम्। तिल्यम्। वृष्यम्। ब्रह्मण्यम्। चाद्रभ्या।

१६६९। अजाविभ्यां ष्यन्। (५-१-८)

अजभ्या यूथिः। अविभ्या।

१६७०। आत्मन्विश्वजनभोगोत्तरपदात्खः। (५-१-९)

चतुर्थ्यन्तात् हितमित्यर्थे यत्स्यादित्यर्थः। छस्यापवादः। **नस्यमिति**॥ नासिकायै हितमित्यर्थः। 'पदन्' इति नस्, प्रभृतिग्रहणस्य प्रकारार्थत्वात्। भाष्ये तु 'नासिकाया यत् तस् क्षुद्रेषु नस्' इति पठितम्। **नाभ्यमिति**॥ नाभये हितमित्यर्थः। नाभिरत्र शरीरावयवः। रथावयवत्वे तु नभादेश उक्तः। **ये च तद्धिते**॥ **शीर्षन्नादेश इति**॥ 'शीर्षन् छन्दसि' इत्यतः तदनुवृत्तेरिति भावः। **शीर्षण्य इति**॥ शिरसे हित इत्यर्थः। शरीरावयवत्वाद्यति शीर्षन्नादेशे 'ये चाभावकर्मणोः' इति प्रकृतिभावान्न टिलोपः। **शिरस्यतीति**॥ शिरः आत्मनः इच्छतीत्यर्थे 'सुप आत्मनः' इति क्यचि 'नः क्ये' इति नियमात् पदत्वाभावान्न रुत्वम्। **वा केशेषु**॥ केशेषु वाच्येषु यो यकारादिस्तद्धितः तस्मिन्परे शिरसः शीर्षन्नादेशो वा स्यादित्यर्थः। प्रसङ्गादाह। **अजादाविति**॥ **खलयव**॥ खलादिभ्यश्चतुर्थ्यन्तेभ्यः हितमित्यर्थे यत्स्यादित्यर्थः। वृषशब्दोऽत्र अकारान्त एव गृह्यते, नतु नकारान्तः। तेन वृष्णे हितमिति वाक्यमेव। ब्रह्मन्शब्दो ब्राह्मणवाच्येव गृह्यते, नतु वेदादिवाची। तेन ब्रह्मणो वेदाय हितमिति वाक्यमेवेति भाष्ये स्पष्टम्। ब्रह्मण्यमित्यत्र 'ये चाभावकर्मणोः' इति प्रकृतिभावान्न टिलोपः। **चाद्रभ्येति**॥ चकारस्यानुक्तसमुच्चयार्थत्वादिति भावः। **अजाविभ्यां ष्यन्**॥ अजश्च अविश्चेति द्वन्द्वः। अविशब्दस्य घित्वेऽपि 'अजाद्यदन्तम्' इत्यजशब्दस्य पूर्वनिपातः। **अजभ्या यूथिरिति**॥ अजेभ्यः अजाभ्यो वा हितेत्यर्थः। लिङ्गविशिष्टपरिभाषया अजाशब्दादपि ष्यन्। तसिलादिष्वपि पुंवत्त्वम्। **अविभ्येति**॥ अविभ्यो हितेत्यर्थः। स्त्रीत्वं लोकात्। **आत्मन्विश्वजन**॥ आत्मन्, विश्वजन, भोगोत्तरपद, एभ्यः हितमित्यर्थे

१६७१ । आत्माध्वानौ खे । (६-४-१६९)

एतौ खे प्रकृत्या स्तः । आत्मने हितमात्मनीनम् । विश्वजनीनम् । 'कर्मधारयादेवेष्यते' । षष्ठीतत्पुरुषाद्बहुव्रीहेश्च छ एव । विश्वजनीयम् । 'पञ्चजनादुपसङ्ख्यानम्' (वा २९९६) । पञ्चजनीनम् । 'सर्वजनाट्ठञ् खश्च' (वा २९९७) । सार्वजनिकः—सर्वजनीनः । 'महाजनाट्ठञ्' (वा २९९८) । माहाजनिकः । मातृभोगीणः । पितृभोगीणः । राजभोगीनः । 'आचार्यादणत्वं च' (ग सू १८४) । आचार्यभोगीनः ।

१६७२ । सर्वपुरुषाभ्यां णढञौ । (५-१-१०)

'सर्वाण्णो वेति वक्तव्यम्' (वा २९९९) । सर्वस्मै हितं सार्वम्—सर्वीयम् । 'पुरुषाद्धधविकारसमूहतेनकृतेषु' (वा ३०००) । भाष्यकारप्रयोगात्तेनेत्यस्य द्वन्द्वमध्ये निवेशः । पुरुषस्य वधः पौरुषेयः । 'तस्येदम्' (सू १५००) इत्यणि प्राप्ते । पुरुषस्य विकारः पौरुषेयः । 'प्राणिरजतादिभ्योऽञ्' (सू १५३२) इत्यञि प्राप्ते, समूहेऽप्यणि प्राप्ते, 'एकाकिनोऽपि

खः स्यादित्यर्थः । आत्मनीनमित्युदाहरणं वक्ष्यति । तत्र ढिलोपे प्राप्ते । **आत्माध्वानौ खे** ॥ **प्रकृत्या स्त इति** ॥ 'प्रकृत्यैकाच्' इत्यतस्तदनुवृत्तेरिति भावः । **कर्मधारयादेवेति** ॥ विश्वजनशब्दादिति शेषः । अत्र व्याख्यानमेव शरणम् । **विश्वजनीयमिति** ॥ विश्वस्य जनो विश्वजनः साधारणो वैद्यादिः । विश्वो जनो यस्येति बहुव्रीहिर्वा । तस्मै हितमिति विग्रहः । **पञ्चजनीनमिति** ॥ ब्राह्मणक्षत्रियवैश्यशूद्राश्चत्वारो वर्णाः रथकारजातिश्चेत्येते पञ्च जनाः । तेभ्यो हितमिति विग्रहः । **सर्वजनाट्ठञ् खश्चेति** ॥ वक्तव्य इति शेषः । समानाधिकरणादिति वक्तव्यम्, इति वार्तिकं भाष्ये स्थितम् । **महाजनाट्ठञिति** ॥ वक्तव्य इति शेषः । विश्वजनप्रसङ्गादिदं वार्तिकद्वयमुपन्यस्तम् । अथ भोगोत्तरपदस्योदाहरति । **मातृभोगीण इति** ॥ मातृभोगाय हित इत्यर्थः । **आचार्यादिति** ॥ आचार्यशब्दात्परस्य भोगीनशब्दस्य नस्य णत्वाभावो वाच्य इत्यर्थः । नच असमानपदस्थत्वादेवात्र णत्वस्याप्रसक्तेस्तन्निषेधो व्यर्थ इति वाच्यम् । मातृभोगीणादौ णत्वज्ञापनार्थत्वात् । **सर्वपुरुषाभ्यां णढञौ** ॥ सर्व, पुरुष, आभ्याञ्चतुर्थ्यन्ताभ्यां क्रमात् णढञौ स्तः, हितमित्यर्थे इत्यर्थः । **सर्वाण्ण इति** ॥ अत्र सर्वशब्दस्य स्वरूपपरत्वान्न सर्वनामकार्यम् । **पुरुषाद्धधेति** ॥ वार्तिकमिदम् । पुरुषशब्दाद्धधादिष्वेवार्थेषु ढञ् स्यात्, न हितार्थे इत्यर्थः । ननु तेन कृतमिति समुदायस्य असुबन्तत्वात् कथं समासे निवेश इत्यत आह । **भाष्येति** ॥ **अणि प्राप्ते इति** ॥ अनेन ढञिति शेषः । **प्राणीति** ॥ रजतादित्वादञि प्राप्ते अनेन ढञित्यर्थः । **समूहेऽप्यणि प्राप्ते इति** ॥ पुरुषाणां समूहः इत्यर्थे 'तस्य समूहः' इत्यणि प्राप्ते अनेन ढञित्यर्थः । **पौरुषेयवृता इवेति** ॥ पुरुषसमूहवृता इवेत्यर्थः । परितः

परितः पौरुषेयवृता इव' इति माघः। तेन कृते ग्रन्थेऽणि प्राप्ते, अग्रन्थे तु प्रासादादावप्राप्त एवेति विवेकः।

१६७३। माणवचरकाभ्यां खञ्। (५-१-११)

माणवाय हितं माणवीनम्। चारकीणम्।

१६७४। तदर्थे विकृतेः प्रकृतौ। (५-१-१२)

विकृतिवाचकाच्चतुर्थ्यन्तात्तदर्थायां प्रकृतौ वाच्यायां छप्रत्ययः स्यात्। अङ्गारेभ्यः एतानि अङ्गारीयाणि काष्ठानि। प्राकारीया इष्टकाः। शङ्कव्यं दारु।

१६७५। छदिरुपधिबलेर्ढञ्। (५-१-१३)

छादिषेयाणि तृणानि। बालेयास्तण्डुलाः। 'उपधिशब्दात्स्वार्थे इष्यते' (वा ३००३)। उपधीयते इत्युपधिः रथाङ्गं, तदेव औपधेयम्।

आदर्शप्रतिफलनादिति भावः। **तेन कृते इति**॥ पुरुषेण कृतो ग्रन्थ इत्यर्थे कृते ग्रन्थे इत्यणि प्राप्ते पुरुषेण कृतः प्रासाद इत्यर्थे तु कस्मिन्नपि प्रत्यये अप्राप्ते अनेन ढञित्यर्थः। **माणव**॥ आभ्याञ्चतुर्थ्यन्ताभ्यां हितमित्यर्थे खञ् स्यादित्यर्थः। **माणवीनमिति**॥ मनोः कुत्सितमपत्यं माणवः। "अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकोऽण् स्मृतः। नकारस्य च मूर्धन्यस्तेन सिध्यति माणवः॥" इत्यपत्याधिकारवार्तिकात् माणवाय हितमिति विग्रहः। **चारकीणमिति**॥ चरतीति चरः पचाद्यच्। ततः स्वार्थिकः कः, चरकाय हितमिति विग्रहः। **तदर्थे विकृतेः प्रकृतौ**॥ तदर्थमिति सामान्ये नपुंसकम्। तस्मै इदं तदर्थम्। तच्छब्देन विकृतिः परामृश्यते। सप्तम्यर्थे प्रथमा। विकृत्यर्थायां प्रकृताविति लभ्यते। एवञ्च तच्छब्देन चतुर्थ्यन्तेन विकृतिरेव प्रथमं निर्दिश्यते। तथाच चतुर्थ्यन्तात् विकृतिवाचकादिति लभ्यते। तदाह। **विकृतिवाचकादित्यादिना**॥ **प्रत्ययः स्यादिति**॥ यथाविहितमिति शेषः। **अङ्गारेभ्य एतानीति**॥ अङ्गारार्थानीत्यर्थः। अर्थेन नित्यसमासविधानादस्वपदविग्रहः। अत्र काष्ठानि प्रकृतिद्रव्याणि। अङ्गाराः विकृतयः। तद्वाचकादङ्गारशब्दाच्छप्रत्यये अङ्गारीयाणीति रूपम्। **प्राकारीया इष्टका इति**॥ प्राकारेभ्य इमा इति विग्रहः। प्राकारार्था इत्यर्थः। **शङ्कव्यमिति**॥ शङ्कवे इदमिति विग्रहः। शङ्कर्थमित्यर्थः। 'उगवादिभ्यः' इति यत्। **छदिरुपधिबलेर्ढञ्**॥ छदिष्, उपधि, बलि, एषां समाहारद्वन्द्वे सौत्रं पुंस्त्वम्। एभ्यः तादर्थ्यचतुर्थ्यन्तेभ्यः प्रकृतौ वाच्यायां ढञित्यर्थः। **छादिषेयाणीति**॥ छदिः तृणपटलः। तस्मै इमानीति विग्रहः। छदिरर्थानीत्यर्थः। ढञि एयादेशे षात्परत्वाण्णत्वम्। **बालेयास्तण्डुला इति**॥ बलये इमे इत्यर्थः। बल्यर्था इत्यर्थः। "करोपहारयोः पुंसि बलिः" इत्यमरः। "भागधेयः करो बलिः" इति च। **उपधिशब्दादिति**॥ वार्तिकमिदम्। **उपधीयते इति**॥ अक्षदण्डाग्रे उपधीयते प्रोतं क्रियते इत्युपधिः। 'उपसर्गे घोः किः' इति धात्वः

१६७६ । ऋषभोपानहोर्ञ्यः । (५-१-१४)

छस्यापवादः । आर्षभ्यो वत्सः । औपानह्यो मुञ्जः । चर्मण्यप्ययमेव पूर्वविप्रतिषेधेन । औपानह्यं चर्म ।

१६७७ । चर्मणोऽञ् । (५-१-१५)

चर्मणो या विकृतिस्तद्वाचकादञ्स्यात् । वध्रयै इदं वार्ध्रं चर्म । वारत्रं चर्म ।

१६७८ । तदस्य तदस्मिन्स्यादिति । (५-१-१६)

प्राकारः आसामिष्टकानां स्यात्प्राकारीयाः इष्टकाः । प्रासादीयं दारु । प्राकारोऽस्मिन्स्यात्प्राकारीयो देशः । इतिशब्दो लौकिकीं विवक्षामनुसारयति । तेनेह न । प्रासादो देवदत्तस्य स्यादिति ।

किप्रत्ययः । 'आतो लोप इटि च' इत्याल्लोपः । **उपधिः रथाङ्गमिति** ॥ तथा भाष्यादिति भावः । **ऋषभोपानहोर्ञ्यः** ॥ ऋषभ, उपानह्, अनयोः समाहारद्वन्द्वात्पञ्चमी । ऋषभशब्दादुपानहशब्दाच्च तादर्थ्यचतुर्थ्यन्तात् प्रकृतौ वाच्यायां ञ्यप्रत्ययः स्यादित्यर्थः । **आर्षभ्य इति** ॥ ऋषभाय अयमिति विग्रहः । ऋषभार्थ इत्यर्थः । यो वत्सः ऋषभावस्थाप्राप्त्यर्थं पोष्यते सः एवमुच्यते । **औपानह्यो मुञ्ज इति** ॥ उपानहे अयमिति विग्रहः । उपानदर्थो मुञ्ज इत्यर्थः । क्वचिद्देशे मुञ्जतृणैरुपानत् क्रियते । **चर्मण्यपीति** ॥ चर्मणि प्रकृतित्वेन वाच्येऽपि अयं ञ्य एव 'चर्मणोऽञ्' इत्यत्र परमपि पूर्वविप्रतिषेधेन बाधित्वा भवतीत्यर्थः । एतच्च 'उगवादिभ्यः' इति सूत्रभाष्ये स्थितम् । **औपानह्यमिति** ॥ उपानदर्थञ्चमेत्यर्थः । **चर्मणोऽञ्** ॥ चर्मणः इति षष्ठ्यन्तं विकृतावन्वेति । तदाह । **चर्मणो या विकृतिः तद्वाचकादिति** ॥ तादर्थ्यचतुर्थ्यन्तादिति शेषः । **अञ् स्यादिति** ॥ प्रकृतौ वाच्यायामिति शेषः । **वध्रयै इदमिति** ॥ वृधेरौणादिके ष्ट्रनि वध्रशब्दः । टित्त्वात् ङीप् वध्री चर्मरज्जुः । "नध्री वध्री वरत्रा स्यात्" इत्यमरः । वार्ध्रयै इदमिति पाठान्तरम् । 'वृधिवपिभ्यां रन्' इति वृधेः रनि लघूपधगुणे रपरत्वे वर्ध्रशब्दश्चर्मवाचकः, तस्माद्विकारे अणि ङीपि वार्ध्री रज्जुः । **तदस्य तदस्मिन् स्यादिति** ॥ "तदर्थं विकृतेः प्रकृतौ" इति निवृत्तम्, इति कैयटः । तदस्य स्यादिति, तदस्मिन् स्यादिति चार्थे प्रथमान्ताद्यथाविहितं प्रत्ययः स्यादित्यर्थः । स्यादित्यत्र 'सम्भावनेऽलमिति' इति सम्भावने लिङ् । **प्राकार आसामिति** ॥ करणत्वस्य सम्बन्धसामान्यविवक्षायां षष्ठी । आभिरिष्टकाभिः प्राकारः कर्तुं शक्यत इति विग्रहवाक्यस्य फलितोऽर्थः । **प्राकारीया इति** ॥ प्राकारशब्दात्प्रथमान्तात् छः । इष्टकाः प्रत्ययार्थः । प्राकारपर्याप्ता इष्टका इति यावत् । **प्रासादीयं दार्विति** ॥ प्रासादोऽस्य स्यादिति विग्रहः । प्रासादपर्याप्तमिति यावत् । **प्राकारीयो देश इति** ॥ प्रायेण प्राकारोऽस्मिन्देशे सम्भाव्यते इत्यर्थः । देशस्य

१६७९। परिखाया ढञ्। (५-१-१७)

पारिखेयी भूमिः।

इति तद्धिते छयतोः पूर्णोऽवधिः।

अथ तद्धितार्हीयप्रकरणम्।

१६८०। प्राग्वतेष्ठञ्। (५-१-१८)

'तेन तुल्यम्—' (सू १७७८) इति वतिं वक्ष्यति। ततः प्राक्ठञ्धिक्रियते।

१६८१। आर्हादगोपुच्छसङ्ख्यापरिमाणाट्ठक्। (५-१-१९)

'तदर्हति' (१७२८) इत्येतदभिव्याप्य ठञ्धिकारमध्ये ठञोऽपवादष्ठगधिक्रियते गोपुच्छादीन्वर्जयित्वा।

तद्योग्यपाषाणेष्टकादिबहुळत्वादिति भावः। अनेन 'तदर्थं विकृतेः' इत्यनुवृत्ताविह न स्यादिति सूचितम्। ननु प्रासादो देवदत्तस्य स्यादित्यत्रातिप्रसङ्गादित्यत आह। **इतिशब्दो लौकिकीं विवक्षामिति**॥ शिष्टव्यवहारमित्यर्थः। **परिखाया ढञ्**॥ पूर्वसूत्रविषये इति शेषः। **पारिखेयी भूमिरिति**॥ परिखा अस्या अस्ति अस्यामस्तीति वा विग्रहः। परिखायोग्येत्यर्थः। **छयतोः पूर्णोऽवधिरिति**॥ 'प्राग्वतेष्ठञ्' इत्यारभ्य 'द्वित्रिपूर्वादण् च' इत्यन्तैस्सूत्रैः प्रत्ययविशेषेष्वनुक्रान्तेषु 'तेन क्रीतम्' इति पठितम्। ततश्च 'प्राक्क्रीतात्' इत्युक्तेस्तेष्वपि सूत्रेषु छयतोरनुवृत्तिः कुतो नेति न शङ्क्यम्। प्रत्ययविशेषाणां श्रवणे तयोरनुवृत्त्यसम्भवादिति भावः॥

इति तद्धिते छयतोरवधिः।

अथ आर्हीयाः—**प्राग्वतेः**॥ वतिशब्दस्तद्घटितसूत्रपरः। तदाह। **तेन तुल्यमिति**॥ 'तेन तुल्यम्' इत्यतः प्राक् येषु सूत्रेषु अर्था एव निर्दिश्यन्ते नतु प्रत्ययाः तत्र ठञित्युपतिष्ठते इति यावत्। **आर्हादगोपुच्छसङ्ख्यापरिमाणाट्ठक्**॥ तदर्हतीति सूत्रगते अर्हतिशब्दे एकदेशानुकरणमर्हेति, तच्च तद्घटितसूत्रपरम्, आङभिव्याप्तौ, व्याख्यानात्। तदाह। **तदर्हतीति। इत्येतदभिव्याप्येति**॥ इदमपि सूत्रम्प्रत्ययविशेषाश्रवणे उपतिष्ठते। अत्र सङ्ख्यापरिमाणयोः पृथग्ग्रहणात्सङ्ख्या न परिमाणम्। तथाच वार्तिकम्। "ऊर्ध्वमानङ्किलोन्मानम्परिमाणन्तु सर्वतः। आयामस्तु प्रमाणं स्यात् सङ्ख्या बाह्या तु सर्वतः॥" इति। तुलायामारोप्य द्रव्यगुरुत्वं येन परिच्छिद्यते तदुन्मानं गुञ्जामाषनिष्कसुवर्णपलादि।

१६८२ । असमासे निष्कादिभ्यः । (५-१-२०)

'आर्हात्' इत्येतत् 'तेन क्रीतम्' (सू १७०२) इति यावत्सम्प्रदशसूत्र्यामनुवर्तते । निष्कादिभ्योऽसमासे ठक्स्यादार्हीयेष्वर्थेषु नैष्किकम् । समासे तु ठञ् ।

१६८३ । परिमाणान्तस्यासंज्ञाशाणयोः । (७-३-१७)

उत्तरपदवृद्धिः स्यान ञिदादौ । परमनैष्किकः । 'असंज्ञा' इति किम् । पञ्च कलापाः परिमाणमस्य पाञ्चकलापिकम् । 'तदस्य परिमाणम्' (सू १७२३) इति ठञ् । असमासग्रहणं ज्ञापकं भवति 'इतः प्राक्तदन्तविधिः' इति । तेन सुगव्यम्—यवापूप्यमित्यादि । इत ऊर्ध्वं तु 'सङ्ख्यापूर्वपदानां तदन्तग्रहणं प्राग्वतेरिष्यते, तच्चालुकि—' (वा ३०१८) । पारायणिकः ।

येन काष्ठादिनिर्मितेन आयतविस्तृतोच्छ्रितेन पात्रविशेषेण व्रीह्यादि परिच्छिद्यते पात्रगतायामविस्तारोच्छ्रायैः तत्परिमाणं प्रस्थादि । आयामः दैर्घ्यं येन परिच्छिद्यते तत्प्रमाणम् । अरत्नि प्रादेशादि । सङ्ख्या तु उक्तत्रितयापेक्षया बाह्या भिन्ना एकत्वद्वित्वादीत्यर्थः । **असमासे** ॥ **इति यावदिति** ॥ 'तेन क्रीतम्' इत्येतत्पर्यन्तमित्यर्थः । **ठगिति** ॥ पूर्वसूत्रात्तदनुवृत्तेरिति भावः । **आर्हीयेष्विति** ॥ 'तदर्हति' इत्येतत्पर्यन्तमनुक्रान्तेषु 'तेन क्रीतम्' इत्याद्यर्थेष्वित्यर्थः । **नैष्किकमिति** ॥ निष्केण क्रीतमित्यर्थः । यथायोगं क्रीताद्यर्थान्वयः । **समासे तु ठञेवेति** ॥ परमनिष्कादिशब्दादित्यर्थः । **परिमाणान्तस्यासंज्ञाशाणयोः** ॥ आदिवृद्धिप्रकरणे उत्तरपदस्येत्यधिकारे इदं सूत्रम् । शेषपूरणेन तत्राचष्टे । **उत्तरपदवृद्धिः स्यादिति** ॥ उत्तरपदस्य आदेरचो वृद्धिः स्यादित्यर्थः । **ञिदादाविति** ॥ ञिति णिति किति चेत्यर्थः । **परमनैष्किक इति** ॥ परमनिष्केण क्रीत इत्यर्थः । समासत्वाद्दगभावे औत्सर्गिकष्ठञ् । स्वरे विशेषः । ननु निष्कादिभ्य एव ठको विधानात्तदन्तात् समासाद्ठकोऽप्रसक्तेरसमासग्रहणं व्यर्थम् । नच पूर्वसूत्रे प्रातिपदिकग्रहणस्यापवर्गमाश्रित्यायसमासेरधिकृतत्वात्प्रातिपदिकविशेषणतया तदन्तविधौ समासादपि ठकः प्रसक्तिरस्तीति वाच्यम् । 'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति' इति निषेधात् । निष्कादीनाञ्च विशिष्य गृहीतत्वेन ग्रहणवत्त्वादित्यत आह । **असमासग्रहणमिति** ॥ **सुगव्यमिति** ॥ सु शोभना गौः सुगौः 'न पूजनात्' इति निषेधात् 'गोरतद्धितलुकि' इति न टच् । 'उगवादिभ्यः' इति गोशब्दान्ताद्यत् । **यवापूप्यमिति** ॥ 'विभाषा हविरपूपादिभ्यः' इत्यपूपान्तत्वाद्यत् । नन्वसमासग्रहणात् ज्ञापकात् इत ऊर्ध्वमपि तदन्तविधिः किं न स्यात् । ततश्च परमपारायणं वर्तयतीत्यत्रापि 'पारायणतुरायणचान्द्रायणं वर्तयति' इति ठञ् स्यादित्यत आह । **इत ऊर्ध्वन्विति** ॥ वार्तिकमिदम् । नन्वेवमपि द्विशूर्पेण क्रीतमित्यर्थे शूर्पशब्दान्तादपि 'शूर्पादञन्यतरस्याम्' इति अञ् स्यादित्यत आह । **तच्चालुकीति** ॥ इत ऊर्ध्वं सङ्ख्यापूर्वपदान्तानां तदन्तग्रहणमिति

द्वैपारायणिकः। 'अलुकि' इति किम्। द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पम्। द्विशूर्पेण क्रीते 'शूर्पादञ्—' (सू १६९१) मा भूत्। किं तु ठञ्। द्विशौर्पिकम्।

१६८४। अर्धात्परिमाणस्य पूर्वस्य तु वा। (७-३-२६)

अर्धात्परिमाणवाचकस्योत्तरपदस्यादेरचो वृद्धिः, पूर्वपदस्य तु वा ञिति णिति किति च। अर्धद्रोणेन क्रीतम् अर्धद्रौणिकम्—आर्धद्रौणिकम्।

१६८५। नातः परस्य। (७-३-२७)

अर्धात्परस्य परिमाणाकारस्य वृद्धिर्न, पूर्वपदस्य तु वा ञिदादौ। अर्धप्रस्थिकम्—आर्धप्रस्थिकम्। 'अतः' किम्। आर्धकौडविकम्। तपरः किम्। अर्धखार्यां भवा अर्धखारी। अर्धखारीभार्य इत्यत्र 'वृद्धिनिमित्तस्य—' (सू ८४०) इति पुंवद्भावनिषेधो न स्यात्।

१६८६। शताच्च ठन्यतावशते। (५-१-२१)

यदुक्तम्, तत्तद्धितलुकि सति न भवतीत्यर्थः। इदमपि वार्तिकमेव। **द्विशूर्पमिति** ॥ 'तद्धितार्थ' इति द्विगुरयम्। तद्धितप्रकृतिभूतः शब्दो न लुगन्तः। अतः सङ्ख्यापूर्वपदात् शूर्पान्तादस्मात् 'शूर्पादञन्यतरस्याम्' इति प्राप्तस्य अञष्ठञो वा 'द्विगोर्लुगनपत्ये' इति 'अध्यर्ध' इति वा लुक्। द्विशूर्पशब्दो लुगन्तः। ततश्च तस्मात् क्रीतेऽर्थे 'शूर्पादञ्' इति न भवति। लुकि सति तदन्तग्रहणाभावादित्यर्थः। **द्विशौर्पिकमिति** ॥ 'तेन क्रीतम्' इति ठञि 'परिमाणान्तस्यासंज्ञाशाणयोः' इत्युत्तरपदवृद्धिः। अस्य ठञो लुक् तु न भवति। तस्य द्विगुनिमित्तत्वाभावात्। **अर्धात्परिमाणस्य** ॥ 'परिमाणान्तस्य' इत्यस्मात् उत्तरमिदं सूत्रम्। **अर्धद्रौणिकम्-आर्धद्रौणिकमिति** ॥ द्रोणशब्दस्य निष्कादित्वेऽपि असमासग्रहणान्न ठक्। किन्तु ठञेव। **नातः परस्य** ॥ **परिमाणाकारस्येति** ॥ परिमाणवाचकावयवस्य अकारस्येत्यर्थः। **पूर्वपदस्य तु वेति** ॥ पूर्वपदस्यादेरचस्तु वृद्धिर्वेत्यर्थः। **आर्धकौडविकमिति** ॥ अर्धकुडवेन क्रीतमित्यर्थः। 'तेन क्रीतम्' इति ठञ्। अत्र कुडवशब्दस्य परिमाणविशेषवाचिनः आदेरचः अकारत्वाभावान्न वृद्धिनिषेधः। किन्तु 'अर्धात्परिमाणस्य' इत्युत्तरपदवृद्धिरिति भावः। **तपरः किमिति** ॥ दीर्घस्याकारस्य वृद्धिनिषेधे फलाभावाद्ह्रस्वस्येति सिद्धमिति प्रश्नः। **अर्धखार्यां भवा अर्धखारीति** ॥ लक्षणयेति शेषः। **निषेधो न स्यादिति** ॥ पूर्वपदस्य वृध्यभावपक्षे वृद्धिं प्रति फलोपहितनिमित्तत्वाभावादिति भावः। पूर्वपदस्य वृद्धिपक्षे तु वृद्धिं प्रति फलोपहितनिमित्तत्वसत्त्वात् स्यादेव। उत्तरपदाकारस्य वृद्धिनिषेधेऽपि पुंवत्त्वम्। परिमाणान्तस्येत्यारभ्य एतदन्तं साप्तमिकम्। अथ प्रकृतं पाञ्चमिकम्। **शताच्च ठन्यतावशते** ॥ आर्हीयेष्वर्थेषु शताट्ठन्यतौ स्तः, ननु शतेऽर्थे इत्यर्थः। उत्तरसूत्रप्राप्तकनोऽपवादः। **शतकः सङ्घ इति** ॥ उत्तरसूत्रेण कन्निति भावः। नन्विह सङ्घस्यैव

शतेन क्रीतं शतिकम्—शत्यम्। 'अशते' किम्। शतं परिमाणमस्य शतकः सङ्घः। इह प्रत्ययार्थो वस्तुतः प्रकृत्यर्थान्न भिद्यते, तेन ठन्यतौ न। किं तु कनेव। 'असमासे' इत्येव। द्विशतेन क्रीतं द्विशतकम्।

१६८७। संख्याया अतिशदन्तायाः कन्। (५-१-२२)

सङ्ख्यायाः कन्स्यादार्हीयेऽर्थे, न तु त्यन्तशदन्तायाः। पञ्चभिः क्रीतः पञ्चकः। बहुकः। त्यन्तायास्तु साप्तिकः। शदन्तायाः चात्वारिंशत्कः।

१६८८। वतोरिड्वा। (५-१-२३)

वत्वन्तात्कन इड्वा स्यात्। तावतिकः—तावत्कः।

१६८९। विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम्। (५-१-२४)

योगविभागः कर्तव्यः। आभ्यां कन्स्यात्। असंज्ञायां ड्वुन् स्यात्। कनोऽपवादः। विंशकः। त्रिंशकः। संज्ञायां तु विंशतिकः। त्रिंशत्कः।

प्रत्ययार्थत्वात् कथमशते इति निषेध इत्यत आह। **इहेति**॥ प्रत्ययार्थः सङ्घः प्रकृत्यर्थात् शतात्परिमाणात् न भिद्यते। गुणगुणिनोरभेद एव हि पारमार्थिकः। भेदस्तु काल्पनिक एवेति भावः। यत्र तु शतं प्रत्ययार्थः प्रकृत्यर्थाद्भिद्यते तत्र नायं निषेधः। शतेन क्रीतं शत्यं शाटकशतम्। अत्र हि निष्कशतं प्रकृत्यर्थः। शाटकशतन्तु प्रत्ययार्थः। एतत्सर्वं भाष्ये स्पष्टम्। **असमास इत्येवेति**॥ चकारस्य तदनुकर्षणार्थत्वात् इति भावः। **द्विशतेनेति**॥ द्विगुणशतेनेत्यर्थः। द्विगुसमासे तु द्विशतकशब्दस्य लुगन्ततया अलुकि तदन्तविधिनिषेधात् प्राप्तिरेव नेति बोध्यम्। **सङ्ख्यायाः**॥ तिश्च शच्च तिशतौ, तौ अन्ते यस्याः सा तिशदन्ता, न तिशदन्ता अतिशदन्ता, द्वन्द्वगर्भबहुव्रीहिगर्भो नञ्तत्पुरुषः। **साप्तिक इति**॥ सप्तत्या क्रीत इत्यर्थः। 'तेन क्रीतम्' इति ठञ्। **चात्वारिंशत्क इति**॥ चत्वारिंशता क्रीतमित्यर्थः। 'तेन क्रीतम्' इति ठञष्टस्य तकारात्परत्वात्कः। **वतोरिड्वा**॥ वतोरित्यनेन प्रत्ययग्रहणपरिभाषया तदन्तं गृह्यते। कन्निति प्रथमान्तमनुवृत्तम्। 'वतोः' इति पञ्चमी 'तस्मादित्युत्तरस्य' इति परिभाषया षष्ठ्यन्तं प्रकल्पयति। तदाह। **वत्वन्तादिति**॥ **तावतिक इति**॥ तावता क्रीत इत्यर्थः। 'यत्तदेतेभ्यः' इति वतुप्। 'बहुगणवतु' इति सङ्ख्यासंज्ञायां 'सङ्ख्याया अतिशदन्तायाः' इति कन्, तस्य इट्, टित्त्वादाद्यवयवः। **विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम्**॥ नन्वेकसूत्रत्वे विंशतित्रिंशद्भ्यां ड्वुनेव स्यात्, कन् तु न स्यात्। अतिशदन्तायाः इति निषेधादित्यत आह। **योगेति**॥ 'विंशतित्रिंशद्भ्याम्' इत्येकं सूत्रम्। 'ड्वुन्नसंज्ञायाम्' इत्यपरमित्यर्थः। आद्यं व्याचष्टे। **आभ्याङ्कन् स्यादिति**॥ **'सङ्ख्याया अतिशदन्तायाः'** इत्यतः कन् इत्यनुवर्तत इति भावः। द्वितीयसूत्रे [illegible]द्भ्याम् इत्यनुवृत्तिमभिप्रेत्य आह। **असंज्ञायामिति**॥ आभ्यामिति शेषः।

१६९०। कंसाट्टिठन्। (५-१-२५)

टो ङीबर्थः। इकार उच्चारणार्थः। कंसिकः—कंसिकी। 'अर्धाच्चेति वक्तव्यम्' (वा ३०१८)। अर्धिकः—अर्धिकी। 'कार्षापणाट्टिठन्वक्तव्यः प्रतिरादेशश्च वा' (वा ३०१९)। कार्षापणिकः—कार्षापणिकी। प्रतिकः—प्रतिकी।

१६९१। शूर्पादञन्यतरस्याम्। (५-१-२६)

शौर्पम्—शौर्पिकम्।

१६९२। शतमानविंशतिकसहस्रवसनादण्। (५-१-२७)

एभ्योऽण्स्यात्। ठञ्ठकनामपवादः। शतमानेन क्रीतं शातमानम्। वैंशतिकम्। साहस्रम्। वासनम्।

१६९३। अध्यर्धपूर्वाद्विगोर्लुगसंज्ञायाम्। (५-१-२८)

अध्यर्धपूर्वाद्विगोश्च परस्यार्हीयस्य लुक्स्यात्। अध्यर्धकंसम्। द्विकंसम्। संज्ञायां तु पाञ्चकलापिकम्।

विंशक इति ॥ विंशत्या क्रीत इत्यर्थः। ड्वुन् अकादेशः। 'तिविंशेर्डिति' इति तिशब्दस्य लोपः। **त्रिंशक इति** ॥ ड्वुन् अकादेशः 'टेः' इति टिलोपः। आद्यसूत्रं परिशेषात् संज्ञायामित्यभिप्रेत्य आह। **संज्ञायां त्विति** ॥ **कंसात्** ॥ इत्यादि स्पष्टम्। **शूर्पादञ्** ॥ आर्हीयेष्वर्थेष्विति शेषः। शूर्पशब्दस्य परिमाणवाचित्वात् ठञि प्राप्ते तदपवादोऽञ् पक्षे विधीयते। पक्षे ठञ्। **शतमान** ॥ **शातमानमिति** ॥ अत्र ठञ् प्राप्तः। **वैंशतिकमिति** ॥ विंशत्या क्रीतं विंशतिकम्। संज्ञाशब्दोऽयम्। 'विंशतित्रिंशद्भ्याम्' इति योगविभागात् कन्। विंशतिकेन क्रीतमिति विग्रहः। तत्र परिमाणविशेषस्य संज्ञा चेद्वञ् प्राप्तः। अन्यस्य संज्ञा चेद्ठक् प्राप्तः। **साहस्रमिति** ॥ सहस्रेण क्रीतमिति विग्रहः। 'सङ्ख्याया अतिशदन्तायाः' इति कन् प्राप्तः। **वासनमिति** ॥ वसनेन क्रीतमिति विग्रहः। अत्र ठक् प्राप्तः। **अध्यर्धपूर्व** ॥ अध्यर्धशब्दः पूर्वो यस्य सः अध्यर्धपूर्वः, सच द्विगुश्चेति समाहारद्वन्द्वात्पञ्चमी। सौत्रं पुंस्त्वम्। तदाह। **अध्यर्धपूर्वात् द्विगोश्चेति** ॥ **आर्हीयस्येति** ॥ प्रत्यासत्तिलभ्यम्। **अध्यर्धकंसमिति** ॥ अध्यारूढमर्धम् अध्यर्धम्। 'प्रादिभ्यो धातुजस्य' इति बहुव्रीहौ पूर्वखण्डे उत्तरपदलोपः। सार्धमित्यर्थः। अध्यर्धेन कंसेन क्रीतमिति विग्रहः। तद्धितार्थे द्विगुः। 'सङ्ख्याया अतिशदन्तायाः' इति कन्। तस्यानेन लुगिति भावः। **द्विकंसमिति** ॥ द्वाभ्यां कंसाभ्यां क्रीतमिति विग्रहः। ठको लुक्। नच अध्यर्धकंसमित्यत्रापि द्विगुत्वादेव सिद्धमिति वाच्यम्। किञ्चित्सङ्ख्याकार्यङ्कृत्वसुजादिकमध्यर्धशब्दस्य नेति ज्ञापनार्थत्वात्। **पाञ्चकलापिकमिति** ॥ पञ्च कलापाः

१६९४ । विभाषा कार्षापणसहस्राभ्याम् । (५-१-२९)

लुग्वा स्यात् । अध्यर्धकार्षापणम्—अध्यर्धकार्षापणिकम् । द्विकार्षापणम्—द्विकार्षापणिकम् । औपसङ्ख्यानिकस्य ठिठनो लुक् । पक्षे अध्यर्धप्रतिकम् । द्विप्रतिकम् । अध्यर्धसहस्रम्—अध्यर्धसाहस्रम् । द्विसहस्रम्—द्विसाहस्रम् ।

१६९५ । द्वित्रिपूर्वान्निष्कात् । (५-१-३०)

लुग्वा स्यात् । द्विनिष्कम्—द्विनैष्किकम् । त्रिनिष्कम्—त्रिनैष्किकम् । 'बहुपूर्वाच्चेति वक्तव्यम्' (वा ३०२४) । बहुनिष्कम्—बहुनैष्किकम् ।

१६९६ । विस्ताच्च । (५-१-३१)

द्वित्रिबहुपूर्वाद्विस्तादार्हीयस्य लुग्वा स्यात् । द्विविस्तम्—द्विवैस्तिकम्, इत्यादि ।

१६९७ । विंशतिकात्खः । (५-१-३२)

अध्यर्धपूर्वाद्विगोरित्येव । अध्यर्धविंशतिकीनम । द्विविंशतिकीनम् ।

१६९८ । खार्या ईकन् । (५-१-३३)

परिमाणमस्येति विग्रहे 'तद्धितार्थ' इति द्विगुः । 'तदस्य' इति ठञ् । सङ्ख्यासंज्ञासूत्रभाष्ये तु 'अध्यर्धपूर्वात्' इति पाठो दृश्यते । नच द्वाभ्यां शूर्पाभ्यां, क्रीतं द्विशूर्पं, तेन क्रीतन्द्विशौर्पिकमिति पूर्वोक्तोदाहरणे ठञो लुक् स्यादिति वाच्यम्। द्विगुर्निमित्तस्याहीयस्य लुगिति व्याख्यानादित्यलम् । **विभाषा ॥ लुग्वेति ॥** आर्हीयस्येति शेषः । **औपसङ्ख्यानिकस्येति ॥** 'कार्षापणाट्ठिठन् वक्तव्यः' इत्युक्तस्येत्यर्थः । **अध्यर्धप्रतिकमिति ॥** प्रत्यादेशस्य ठिठन्सन्नियोगशिष्टत्वात् प्रत्यादेशपक्षे ठिठनो न लुगिति भावः । **अध्यर्धसहस्रमिति ॥** 'शतमान' इति विहितस्याणो लुक् । लुगभावे तु 'सङ्ख्यायाः संवत्सरसङ्ख्यस्य च' इत्युत्तरपदवृद्धिः । **द्वित्रिपूर्वान्निष्कात् ॥ लुग्वा स्यादिति ॥** आर्हीयस्येति शेषः । **द्विनैष्किकमिति ॥** ठञो लुक्, समासाट्ठकोऽसम्भवात् । **विस्ताच्च ॥** आर्हीयस्य लुग्वेति शेषः । **द्विविस्तम्—द्विवैस्तिकमिति ॥** द्वाभ्यां क्रीतमिति विग्रहः । ठञः पाक्षिको लुक् । **इत्यादीति ॥** बहुविस्तम्-बहुवैस्तिकमित्युदाहार्यम् । 'बहुपूर्वाच्च' इति वार्तिकस्य अत्राप्यनुवृत्तेः भाष्ये उक्तत्वात्। **विंशतिकात्खः ॥ अध्यर्धपूर्वाद्विगोरित्येवेति ॥** पूर्वसूत्रयोरध्यर्धपूर्वादित्यस्यासम्भवात् द्विगोरित्यस्य प्रयोजनाभावादननुवृत्तावपि इह तदनुवर्तत इति भावः । **अध्यर्धविंशतिकीनमिति ॥** अध्यर्धविंशत्या क्रीतमध्यर्धविंशतिकम् । 'विंशतित्रिंशद्भ्याम्' इति योगविभागात् कन् । अध्यर्धविंशतिकेन क्रीतमिति विग्रहः । **द्विविंशतिकीनमिति ॥** द्वाभ्यां विंशतिकाभ्यां क्रीतमिति विग्रहः । **खार्या ईकम् ॥** अध्यर्धपूर्वादिति द्विगोरिति चानुवर्तते

अध्यर्धखारीकम्। द्विखारीकम्। 'केवलायाश्चेति वक्तव्यम्' (वा ३०२५)। खारीकम्।

१६९९। पणपादमाषशताद्यत्। (५-१-३४)

अध्यर्धपण्यम्। द्विपण्यम्। अध्यर्धपाद्यम्। द्विपाद्यम्। इह 'पादः पत्' (सू ४१४) इति न। 'यस्य—' (सू ३११) इति लोपस्य स्थानिवद्भावात्। 'पद्यत्यतदर्थे' (सू ९९१) इत्यपि न, प्राण्यङ्गार्थस्यैव तत्र ग्रहणात्।

१७००। शाणाद्वा। (५-१-३५)

यत्स्यात्। पक्षे ठञ्। तस्य लुक्। अध्यर्धशाण्यम्—अध्यर्धशाणम्।

१७०१। द्वित्रिपूर्वादण्च। (५-१-३६)

'शाणात्' इत्येव। चाद्यत्। तेन त्रैरूप्यम्। 'परिमाणान्तस्यासंज्ञाशाणयोः' (सू १६८३) इति पर्युदासादादिवृद्धिरेव। द्वैशाणम्—द्विशाण्यम्—द्विशाणम्। इह ठञादयस्त्रयोदश प्रत्ययाः प्रकृतास्तेषां समर्थविभक्तयोऽर्थाश्चाकाङ्क्षितास्त इदानीमुच्यन्ते।

इत्यभिप्रेत्योदाहरति। **अध्यर्धखारीकम्-द्विखारीकमिति** ॥ 'तदस्य परिमाणम्' इति ठञि तस्य च लुकि प्राप्ते ईकन्। **केवलायाश्चेति** ॥ खार्या इति शेषः। **पणपाद** ॥ अध्यर्धपूर्वादिति द्विगोरिति चानुवर्तत इत्यभिप्रेत्योदाहरति। **अध्यर्धपण्यम्। द्विपण्यमिति** ॥ अध्यर्धपणेन क्रीतमित्यर्थः। **द्विपाद्यमिति** ॥ द्वाभ्यां पादाभ्याञ्चतुर्थांशाभ्यां क्रीतमिति विग्रहः। यति 'यस्येति च' इत्यकारलोपः। **स्थानिवद्भावादिति** ॥ 'अचः परस्मिन्' इत्यनेनेति भावः। **प्राण्यङ्गार्थस्येति** ॥ व्याख्यानादिति भावः। इह सूत्रे पणमाषसाहचर्यात् पादशब्दोऽपि परिमाणविशेषवाची गृह्यते। **शाणाद्वा** ॥ **पक्षे ठञिति** ॥ आर्हादिति ठञ्विधौ परिमाणपर्युदासाद्ठञिति भावः। **तस्य लुगिति** ॥ ठञः इति भावः। अत्र अध्यर्धपूर्वादिति द्विगोरिति चानुवर्तते इत्यभिप्रेत्य अध्यर्धपूर्वादुदाहरति। **अध्यर्धशाण्यम्-अध्यर्धशाणमिति** ॥ यति ठञो लुकि च रूपम्। अथ शाणान्तद्विगोरुदाहरणं वक्ष्यन् विशेषमाह। **द्वित्रिपूर्वादण् च** ॥ वार्तिकमिदम्। **चाद्यदिति** ॥ पाक्षिको यत् चकारेण समुच्चीयते इत्यर्थः। ततश्च यतोऽभावे ठञपि लभ्यते। तदाह। **तेन त्रैरूप्यमिति** ॥ अणा यता ठञा चेत्यर्थः। अणि परिमाणान्तस्येत्युत्तरपदवृद्धिमाशङ्क्य आह। **परिमाणान्तस्येति** ॥ **ठञादयस्त्रयोदशेति** ॥ 'प्राग्वतेः' इति ठञ्, 'आर्हात्' इति ठक्, 'शताच्च' इति ठन्यतौ, 'संज्ञायाः' इति कन्, 'विंशतित्रिंशद्भ्याम्' इति ड्वुन्, 'कंसात्' इति टिठन्, 'शूर्पात्' इत्यञ्, 'शतमान' इत्यण्, 'विंशतिकात्खः' इति खः,

१७०२ । तेन क्रीतम् । (५-१-३७)

ठञ् । गोपुच्छेन क्रीतं गौपुच्छिकम् । साप्ततिकम् । प्रास्थिकम् । ठक् । नैष्किकम् ।

१७०३ । इद्गोण्याः । (१-२-५०)

गोण्या इत्स्यात्तद्धितलुकि । लुकोऽपवादः । पञ्चभिर्गोणीभिः क्रीतः पटः पञ्चगोणिः ।

१७०४ । तस्य निमित्तं संयोगोत्पातौ । (५-१-३८)

संयोगः सम्बन्धः । उत्पातः शुभाशुभसूचकः । शतिकः—शत्यो वा धनपतिसंयोगः । शत्यं—शतिकं दक्षिणाक्षिस्पन्दनं शतस्य निमित्तमित्यर्थः । 'वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसङ्ख्यानम्' (वा ३०३३) । वातस्य

'खार्याः' इति ईकन्, 'पणपाद' इति यत्, 'द्विवि' इति वार्तिकोक्ताण्, इत्येवं त्रयोदशेत्यर्थः । **प्रकृता इति** ॥ प्रकृतान्ता इत्यर्थः । **समर्थविभक्तय इति** ॥ 'समर्थानां प्रथमाद्वा' इति सूत्रलभ्यसमर्थविशेषणीभूतप्रथमोच्चारितततत्तद्विभक्तय इत्यर्थः । **तेन क्रीतम्** ॥ अस्मिन्नर्थे तृतीयान्ताद्यथाविहितं ठञादयः स्युरित्यर्थः । **ठञिति** ॥ उदाह्रियते इति शेषः । **गोपुच्छेन क्रीतं गौपुच्छिकमिति** ॥ 'अगोपुच्छ' इति पर्युदासाद्गमभावे औत्सर्गिकष्ठञिति भावः । **साप्ततिकमिति** ॥ सप्तत्या क्रीतमित्यर्थः । अगोपुच्छसङ्ख्या, इति पर्युदासाद्गमभावे ठञिति भावः । **प्रास्थिकमिति** ॥ प्रस्थेन क्रीतमित्यर्थः । 'अगोपुच्छसङ्ख्यापरिमाणात् इति पर्युदासाद्गमभावे ठञिति भावः । **ठगिति** ॥ उदाह्रियते इति शेषः । **नैष्किकमिति** ॥ निष्केण क्रीतमित्यर्थः । 'असमासे निष्कादिभ्यः' इति ठगिति भावः । **इद्गोण्याः** ॥ **लुकोऽपवाद इति** ॥ 'लुक्तद्धितलुकि' इति प्राप्तस्येत्यर्थः । **पञ्चगोणिरिति** ॥ आर्हीयस्य ठको लुकि स्त्रीप्रत्ययस्य इकारः । नच उपसर्जनह्रस्वत्वेनैव इदं सिद्धमिति वाच्यम् । इत्त्वविध्यभावे 'लुक्तद्धितलुकि' इति ङीपो निवृत्तावदन्तत्वात् टापि पञ्चगोणेत्यापत्तेः । मूलद्रव्यवाचिन एव तृतीयान्तादेव क्रीतार्थे प्रत्यया भवन्ति, नतु देवदत्तेन क्रीतमित्यर्थे । अनभिधानादिति भाष्ये स्पष्टम् । **तस्य निमित्तम्** ॥ तस्य निमित्तं संयोग उत्पातो वेत्यर्थे यथाविहितं षष्ठ्यन्तात् ठञादयः स्युरित्यर्थः । **शत्यः शतिको वेति** ॥ शतस्य निमित्तमित्यर्थः । 'शताच्च' इति यञनौ । **धनपतिसंयोग इति** ॥ याजनशुश्रूषादिसम्पर्क इत्यर्थः । उत्पाते उदाहरति । **शत्यं शतिकं वा दक्षिणाक्षिस्पन्दनमिति** ॥ शतस्य निमित्तमित्यर्थः । सूचकत्वमेवात्र निमित्तत्वमिति भावः । **उपसङ्ख्यानमिति** ॥ आर्हीयस्य ठक इति शेषः । **कोपनं वृद्धिः । सन्निपाताश्चेति** ॥ 'तस्य निमित्तं संयोगोत्पातौ' इत्यर्थे ठगिति

शमनं कोपनं वा वातिकम्। पैत्तिकम्। श्लैष्मिकम्। 'सन्निपाताच्चेति वक्तव्यम्' (वा ३०३७)। सान्निपातिकम्।

१७०५। गोद्यच्चोऽसङ्ख्यापरिमाणाश्वादेर्यत्। (५-१-३९)

गोर्निमित्तं संयोग उत्पातो वा गव्यः। द्यचः। धन्यः। यशस्यः। स्वर्ग्यः। 'गोद्यचः—' किम्। विजयस्य वैजयिकः। 'असङ्ख्या—' इत्यादि किम्। पञ्चानां पञ्चकम्। सप्तकम्। प्रास्थिकम्। खारीकम्। अश्वादि—आश्विकम्। आश्मिकम्। 'ब्रह्मवर्चसादुपसङ्ख्यानम्—' (वा ३०३५)। ब्रह्मवर्चस्यम्।

१७०६। पुत्राच्छ च। (५-१-४०)

चाद्यत्। पुत्रीयः—पुत्र्यः।

१७०७। सर्वभूमिपृथिवीभ्यामणञौ। (५-१-४१)

सर्वभूमेर्निमित्तं संयोग उत्पातो वा सार्वभौमः। पार्थिवः। सर्वभूमिशब्दोऽनुशतिकादिषु पठ्यते।

शेषः। **सान्निपातिकमिति** ॥ सन्निपातः वातपित्तश्लेष्माणां सङ्करः दोषाणाम्, इति वैद्यके प्रसिद्धः। तस्य निमित्तं सान्निपातिकम्। ज्वरप्रकोपादौ अपथ्यभक्षणादिसंयोगः, सन्निपातसूचकं जिह्वाकार्ष्ण्यादि च। **गोद्यच्चः** ॥ तस्य निमित्त संयोग उत्पातो वेत्यर्थे गोशब्दात् द्यचश्च षष्ठ्यन्तात् यत्प्रत्ययः स्यात्, ननु सङ्ख्यायाः परिमाणात् अश्वादेश्चेत्यर्थः। ठकोऽपवादः। **द्यच इति** ॥ उदाहियते इति शेषः। **धन्य इत्यादि** ॥ धनस्य यशसः स्वर्गस्य च निमित्तमित्यर्थः। **विजयस्येति** ॥ निमित्तमिति शेषः। **वैजयिक इति** ॥ आर्हीयष्ठक्। **पञ्चानामिति** ॥ निमित्तमिति शेषः। **पञ्चकमिति** ॥ 'सङ्ख्यायाः' इति कन्। **सप्तकमिति** ॥ सप्तानान्निमित्तमित्यर्थः। **प्रास्थिकमिति** ॥ प्रस्थस्य निमित्तमित्यर्थः। आर्हादिति ठञ्विधौ परिमाणपर्युदासात् प्राग्वर्तीयष्ठञ्। **खारीकमिति** ॥ खार्या निमित्तमित्यर्थः। खार्या ईकन्। **अश्वादीति** ॥ प्रत्युदाहरणसूचनमिदम्। **आश्विकमिति** ॥ अश्वस्य निमित्तमित्यर्थः। आर्हीयष्ठक्। **आश्मिकमिति** ॥ अश्मनो निमित्तमित्यर्थः। आर्हीयष्ठक्। 'नस्तद्धिते' इति टिलोपः। **ब्रह्मवर्चसादिति** ॥ 'गोद्यचः' इति सूत्रे 'ब्रह्मवर्चसाच्च' इति वक्तव्यमित्यर्थः। **ब्रह्मवर्चस्यमिति** ॥ ब्रह्मवर्चसस्य निमित्तमित्यर्थः। **पुत्राच्छ च** ॥ तस्य निमित्तमित्येव। कथन्तर्हि "आरेभिरे यतात्मानः पुत्रियामिष्टिमृत्विजः" इति नहीष्टिः संयोगः उत्पातो वा उच्यते। संयुज्यतेऽनेनेति संयोगः। इष्ट्या हि पुत्रेण फलेन युज्यते यष्टा। **सर्वभूमि** ॥ तस्य निमित्तमित्येव। सर्वभूमि, पृथिवी, आभ्यां यथासङ्ख्यमणञौ स्तः। **सार्वभौम इति** ॥

१७०८ । तस्येश्वरः । (५-१-४२)

१७०९ । तत्र विदित इति च । (५-१-४३)

सर्वभूमेरीश्वरः सर्वभूमौ विदितो वा सार्वभौमः । पार्थिवः ।

१७१० । लोकसर्वलोकाट्ठञ् । (५-१-४४)

'तत्र विदितः' इत्यर्थे । लौकिकः । अनुशतिकादित्वादुभयपदवृद्धिः । सार्वलौकिकः ।

१७११ । तस्य वापः । (५-१-४५)

उप्यतेऽस्मिन्निति वापः क्षेत्रम् । प्रस्थस्य वापः प्रास्थिकम् । द्रौणिकम् । खारीकम् ।

१७१२ । पात्राट्ठन् । (५-१-४६)

पात्रस्य वापः क्षेत्रं पात्रिकम्—पात्रिकी क्षेत्रभक्तिः ।

१७१३ । तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते । (५-१-४७)

वृद्धिर्दीयते इत्यादि क्रमेण प्रत्येकं सम्बन्धादेकवचनम् । पञ्च अस्मिन्

ठञोऽपवादः अण् । **पार्थिव इति** ॥ पृथिव्याः निमित्त संयोगः उत्पातो वेत्यर्थः । स्त्रियाम्पार्थिवी । सार्वभौमिकशब्दे कथमुभयपदवृद्धिरित्यत आह । **सर्वभूमिशब्दोऽनुशतिकादिषु पठ्यते इति** ॥ तथाच 'अनुशतिकादीनाञ्च' इत्युभयपदवृद्धिरिति भावः । **तस्येश्वरः** ॥ **तत्र विदित इति च** ॥ सूत्रद्वयमिदम् । सर्वभूमिपृथिवीभ्यामित्यनुवर्तते । तस्य निमित्तं संयोगोत्पाताविति तु निवृत्तम् । पुनस्तस्येत्युक्तेः । तस्येश्वर इत्यर्थे षष्ठ्यन्तात्तत्र विदित इत्यर्थे तु सप्तम्यन्तात् अणञौ स्त इत्यर्थः । योगविभागो यथासंख्यनिवृत्त्यर्थः । उत्तरसूत्रे तत्र विदितः इत्यस्यैवानुवृत्त्यर्थश्च । **लोकसर्व** ॥ **तत्र विदित इत्यर्थे इति** ॥ योगविभागसामर्थ्यात् तस्येश्वर इति नानुवर्तत इति भावः । **लौकिकः इति** ॥ लोकेषु विदित इत्यर्थः । सर्वभूमिशब्दे विशेषमाह । **अनुशतिकादित्वादिति** ॥ **तस्य वापः** ॥ अस्मिन्नर्थे षष्ठ्यन्ता यथाविहितं ठञादयः स्युरित्यर्थः । **प्रास्थिकमिति** ॥ प्रस्थपरिमितबीजवापयोग्यं क्षेत्रमित्यर्थः । 'आर्हात्' इति ठञ्विधौ परिमाणपर्युदासात् प्राग्वतीयष्ठञ् । **द्रौणिकमिति** ॥ निष्कादित्वाट्ठक् । **खारीकमिति** ॥ खार्याम् ईकन् । द्रोणस्य खार्याश्च वाप इत्यर्थः । **पात्राट्ठन्** ॥ तस्य वाप इत्येव । **पात्रिकमिति** ॥ पात्रस्य वाप इत्यर्थः । षित्त्वं ङीषर्थमित्याह । **पात्रिकीति** ॥ **तदस्मिन्** ॥ वृद्धि, आय, शुल्क, उपदा, एषां द्वन्द्वात्प्रथमाबहुवचनम् । **ननु तर्हि दीयत इति कथमेकवचनमित्यत आह । वृद्धिर्दीयते इत्यादि** ॥ **क्रमेणेति** ॥ एवञ्च तदस्मिन्वृद्धिर्दीयते, तदस्मिन् आयो दीयते, तदस्मिन् शुल्को दीयते, तदस्मिन्नुपदा

वृद्धिः आयः लाभः शुल्कम् उपदा वा दीयते पञ्चकः। शतिकः—शत्यः। साहस्रः। उत्तमर्णेन मूलातिरिक्तं ग्राह्यं वृद्धिः। ग्रामादिषु स्वामिग्राह्यो भाग आयः। विक्रेत्रा मूल्यादधिकग्राह्यं लाभः। रक्षानिर्वेशो राजभागः शुल्कः। उत्कोच उपदा। 'चतुर्थ्यर्थे उपसङ्ख्यानम्' (वा ३०३६)। पञ्च अस्मै वृद्ध्यादिर्दीयते पञ्चको देवदत्तः। 'सममब्राह्मणे दानम्' इतिवदधिकरणत्वविवक्षा वा।

१७१४। पूरणार्धाट्ठन्। (५-१-४८)

यथाक्रमं ठक्टिठनोरपवादः। द्वितीयो वृद्ध्यादिरस्मिन्दीयते द्वितीयिकः। तृतीयिकः। अर्धिकः। अर्धशब्दो रूपकस्यार्धे रूढः।

१७१५। भागाद्यच्च। (५-१-४९)

चाट्ठन्। भागशब्दोऽपि रूपकस्यार्धे रूढः। भागो वृद्ध्यादिरस्मिन्दीयते भाग्यं—भागिकं शतम्। भाग्या—भागिका विंशतिः।

१७१६। तद्धरति वहत्यावहति भाराद्वंशादिभ्यः। (५-१-५०)

दीयते, इत्यर्थेषु प्रथमान्ताद्यथाविहितं ठञादयः स्युरित्यर्थः। **पञ्चक इति** ॥ 'सङ्ख्यायाः' इति कन्। **शतिकः-शत्य इति** ॥ शतमस्मिन्वृद्धिः, आयः, लाभः, शुल्कः, उपदा वा, दीयते इति विग्रहः। 'शताच्च' इति ठन्यतौ। **साहस्र इति** ॥ सहस्रमस्मिन्दीयते इत्यादि विग्रहः। 'शतमानसहस्र' इत्यण्। **रक्षानिर्वेश इति** ॥ रक्षा प्रजापरिपालनम्। तदर्थो निर्वेशः भृतिः रक्षानिर्वेशः। **उत्कोच इति** ॥ मह्यङ्किञ्चिद्दत्तश्चेत् तव राजद्वारेऽनुकूलो भवामीत्यादि समयं कृत्वा यद्गृह्यते तदुत्कोच इत्युच्यते इत्यर्थः। **चतुर्थ्यर्थ इति** ॥ तदस्मै वृद्ध्यादि दीयते इत्युपसङ्ख्यातव्यमित्यर्थः। **सममब्राह्मणे इति** ॥ एवञ्च सम्प्रदानस्यैवाधिकरणत्वविवक्षया इष्टसिद्धेरुपसङ्ख्यानमिदन्नादर्तव्यमिति भावः। **पूरणार्धाट्ठन्** ॥ तदस्मिन् वृद्ध्यादि दीयते इत्यर्थे पूरणप्रत्ययान्तादर्धशब्दाच्च प्रथमान्ताट्ठन् स्यादित्यर्थः। **द्वितीयिकः। तृतीयिक इति** ॥ आर्हादिति ठकोऽपवादष्ठन्। **अर्धिक इति** ॥ अर्धमस्मिन्वृद्ध्यादि दीयते इत्यर्थः। 'अर्धाच्चेति वक्तव्यम्' इति ठिठनोऽपवादष्ठन्। ठिठनि सति तु स्त्रियां ङीप् स्यात्। अर्धिकेति तु टाबेवेति वक्ष्यते। **रूपकस्येति** ॥ रूप्यस्य कार्षापणस्येत्यर्थः। **रूढ इति** ॥ अन्यथा अर्धशब्दस्य रूप्यकसापेक्षत्वादसामर्थ्यं स्यादिति भावः। रूप्यकस्यार्धे रूढ इत्यत्र प्रमाणं मृग्यम्। असामर्थ्यन्तु नित्यसापेक्षत्वाद्वारयितुं शक्यमित्याहुः। **भागाद्यच्च** ॥ तदस्मिन्वृद्ध्यादि दीयते इत्यर्थे भागशब्दात्प्रथमान्ताद्यत्प्रत्ययश्च स्यादित्यर्थः। **चाट्ठनिति** ॥ पूर्वसूत्रादनुकृष्यते इति शेषः। भागशब्दोऽपि रूप्यकस्यार्ध इति वर्तते इति शेषः। **तद्धरति वहति** ॥ वंशाद्वारादिभ्य इत्येकवचनबहुवचनान्तयोः सामानाधिकरण्यासम्भवात्

वंशादिभ्यः परो यो भारशब्दस्तदन्तं यत्प्रातिपदिकं तत्प्रकृतिकाद्वितीयान्तादित्यर्थः । वंशभारं हरति वहत्यावहति वा वांशभारिकः । ऐक्षुभारिकः । 'भाराद्वंशादिभ्यः' इत्यस्य व्याख्यान्तरं 'भारभूतेभ्यो वंशादिभ्यः' इति । भारभूतान्वंशान्हरति वांशिकः । ऐक्षुकः ।

१७१७ । वस्नद्रव्याभ्यां ठन्कनौ । (५-१-५१)

यथासङ्ख्यं स्तः । वस्नं हरति वहत्यावहति वा वस्निकः । द्रव्यकः ।

१७१८ । सम्भवत्यवहरति पचति । (५-१-५२)

प्रस्थं सम्भवति प्रास्थिकः कटाहः । प्रस्थं स्वस्मिन्समावेशयतीत्यर्थः । प्रास्थिकी ब्राह्मणी । प्रस्थमवहरति (उपसंहरति) पचति वेत्यर्थः । 'तत्पचतीति द्रोणादण्च' (वा ३०३८) । चाढुञ् । द्रोणं पचतीति द्रौणी—द्रौणिकी ।

१७१९ । आढकाचितपात्रात्खोऽन्यतरस्याम् । (५-१-५३)

वैयधिकरण्येनान्वयः । स च व्युत्क्रमः । व्याख्यानात । तदाह । **वंशादिभ्यः पर इति** ॥ द्वितीयान्तादित्यनन्तरं हरति वहति आवहतीत्यर्थे यथाविहितं प्रत्ययः स्यादिति शेषः । हरणं कथञ्चिद्देशान्तरप्रापणं चौर्यं वा । शकटादिना प्रापण वहनम् । स्वसमीपं प्रापणमावहनं उत्पादनं वा । **वांशभारिक इति** ॥ 'आर्हात' इति ठक । अत्र पञ्चम्यन्तयोर्व्युत्क्रमेण वैयधिकरण्येन चान्वये प्रमाणाभावादाह । **भाराद्वंशादिभ्य इत्यस्य व्याख्यान्तरमिति**॥ भारात्परेभ्यो वंशादिभ्य इत्यर्थभ्रमव्यावृत्तये व्याख्यान्तरं विशदयति । **भारभूतेभ्यो वंशादिभ्य इतीति** ॥ वंशादिशब्दानाम्भारभूतत्वन्तु भारभूतवंशादिवृत्तेर्बोध्यम् । अस्मिन्व्याख्याने भारादित्येकवचनमार्षम । यद्वा प्रत्येकान्वयाभिप्रायम् । वस्तुतो भारभूता ये वंशादयः तद्वाचिभ्य इति यावत् । **वस्नद्रव्याभ्याम** ॥ तद्धरति वहत्यावहतीत्यनुवर्तते इत्यभिप्रेत्य आह । **वस्नं हरतीत्यादि** ॥ **सम्भवत्यवहरति** ॥ तदिति द्वितीयान्तमनुवर्तते । द्वितीयान्तात्सम्भवतीत्यायर्थेषु यथाविहितं प्रत्ययः स्यादित्यर्थः । **प्रास्थिक इति**॥ 'आर्हात' इत्यत्र परिमाणपर्युदासाट्ठगभावे प्राग्वतीयष्ठञ् । ननु सम्भवतीत्यस्य उपपद्यते इत्यर्थकत्वादकर्मकत्वात्प्रस्थं सम्भवतीति कथं द्वितीयेत्यत आह । **समावेशयतीत्यर्थ इति** ॥ उपसर्गवशादिति भावः । **प्रास्थिकी ब्राह्मणीति** ॥ ठञन्तत्वात् ङीबिति भावः । अपहरतीत्येतद्व्याचष्टे । **उपसंहरतीति** ॥ किञ्चिदूनमपि यथा प्रस्थपरिमितं भवति तथा मिमीते इत्यर्थः । **तत् पचतीति द्रोणादण् चेति** ॥ वार्तिकमिदम् । द्वितीयान्ताद्द्रोणशब्दात् पचतीत्यर्थे अण् च स्यादित्यर्थः । पचतिग्रहणं सम्भवत्यवहरतीनिवृत्त्यर्थम् । **चाढुञिति** ॥ 'आर्हात' इति ठञ्विधौ परिमाणपर्युदासात् ठगभावे प्राग्वतेष्ठञेव चकारादनुकृष्यते इति भावः । **द्रौणीति** ॥ अणन्तत्वात् ङीप् । **द्रौणिकीति** ॥ ठञन्तत्वात् ङीप् । **आढकाचित** ॥ आढक, आचित, पात्र, एभ्यो द्वितीयान्तेभ्यः सम्भवत्यवहरतिपचतीत्यर्थेषु खो वा स्यादित्यर्थः ।

पक्षे ठञ्। आढकं सम्भवति अवहरति पचति वा आढकीना—आढकिकी। अचितीना—आचितिकी। पात्रीणा—पात्रिकी।

१७२०। द्विगोः ष्ठंश्च। (५-१-५४)

'आढकाचितपात्रात्' इत्येव। आढकाद्यन्ताद्विगोः सम्भवत्यादिष्वर्थेषु ष्ठन्खौ वा स्तः। पक्षे ठञ्। तस्य 'अध्यर्ध—' (सू १६९३) इति लुक्। षित्त्वान्ङीष्। द्व्याढकिकी—द्व्याढकीना। 'द्विगोः' (सू ४७९) इति ङीप्। द्व्याढकी। द्व्याचितिकी—द्व्याचितीना। 'अपरिमाण—' (सू ४८०) इति ङीन्निषेधात् द्व्याचिता। द्विपात्रिकी—द्विपात्रीणा—द्विपात्री।

१७२१। कुलिजाल्लुक्खौ च। (५-१-५५)

कुलिजान्ताद्विगोः सम्भवत्यादिष्वर्थेषु लुक्खौ वा स्तः। चात्ष्ठंश्च। लुगभावे ठञः श्रवणम्। द्विकुलिजी—द्विकुलिजीना। द्विकुलिजिकी—द्वैकुलिजिकी।

१७२२। सोऽस्यांशवस्नभृतयः। (५-१-५६)

पक्षे ठञिति ॥ 'आर्हात्' इत्यतः परिमाणपर्युदासान्न ठगिति भावः। **द्विगोष्ठंश्च** ॥ **ष्ठन्खाविति** ॥ चकारेण स्वस्यानुकर्षादिति भावः। **वा स्त इति** ॥ अन्यतरस्यामित्यनुवृत्तेरिति भावः। **पक्षे ठञिति** ॥ 'आर्हात्' इत्यत्र परिमाणपर्युदासान्न ठगिति भावः। षित्त्वात् ङीप्। **द्व्याढकिकीति** ॥ द्वे आढके सम्भवत्यवहरति पचति वेत्यर्थे 'तद्धितार्थ' इति द्विगुः, ष्ठन्, षित्त्वात् ङीषित्यर्थः। अत्र 'न य्वाभ्याम्' इत्यैज् न। वृद्धिनिषेधसन्नियोगशिष्टत्वात् ञ्णित्किदभावेन वृद्धेरप्रसक्तेः। **द्व्याढकीनेति** ॥ खे रूपम्। 'द्विगोः' इति ङीप्। **द्व्याढकीति** ॥ ठञि 'अध्यर्ध' इति तस्य लुक्। 'द्विगोः' इति ङीबित्यर्थः। प्रत्ययलक्षणमाश्रित्य ष्ठन्तलक्षणङीप् तु नेति 'अपरिमाणबिस्त' इत्यत्रोक्तम्। 'अध्यर्ध' इति लुक् ठञ एव, नतु ठन्खयोरपि विधिसामर्थ्यात्। **द्व्याचितिकी** ॥ **द्व्याचितिकीनेति** ॥ ष्ठनि खे च रूपम्। अथ द्व्याचितशब्दात् ठञो लुकि 'द्विगोः' इति ङीपमाशङ्क्य आह। **अपरिमाणेति ङीन्निषेधादिति** ॥ **द्विपात्रिकीत्यादि** ॥ **कुलिजाल्लुक्खौ च** ॥ अन्यतरस्यामित्यनुवृत्तिमभिप्रेत्य आह। **लुक्खौ वा स्त इति** ॥ 'आर्हात्' इत्यत्र परिमाणपर्युदासाद्गभावे प्राग्वहतीयस्य ठञः 'अध्यर्ध' इति नित्यं लुकि प्राप्ते लुको विकल्पविधिः। **चात् ष्ठंश्चेति** ॥ तथाच ठञो लुक् खश्च ष्ठंश्चेति त्रितयं विकल्पते। तत्र ष्ठनः खस्य ठञः लुकश्चाभावे ठञः श्रवणम्पर्यवस्यति। तदाह। **लुगभावे ठञः श्रवणमिति** ॥ **द्विकुलिजीति** ॥ ठञो लुकि रूपम्। 'द्विगोः' इति ङीप्। **द्विकुलिजीनेति** ॥ खे रूपम्। **द्विकुलिजिकीति** ॥ ष्ठनि रूपम्। **द्वैकुलिजिकीति** ॥ ठञो लुगभावे रूपम्। परिमाणान्तस्येत्यत्र असंज्ञाशाणकुलिजानामित्युक्तेर्नोत्तरपदवृद्धिः। **सोऽस्यांश** ॥ स इति प्रत्येकमंशादिष्वन्वेति। सोऽस्यांशः, तदस्य वसनम्, सास्या भृतिः,

अंशो भागः । वस्नं मूल्यम् । भृतिर्वेतनम् । पञ्च अंशो वस्नो भृतिर्वास्य पञ्चकः ।

१७२३ । तदस्य परिमाणम् । (५-१-५७)

प्रस्थं परिमाणमस्य । प्रास्थिको राशिः ।

१७२४ । सङ्ख्यायाः संज्ञासङ्घसूत्राध्ययनेषु । (५-१-५८)

पूर्वसूत्रमनुवर्तते । तत्र 'संज्ञायां स्वार्थे प्रत्ययो वाच्यः' (वा ३०३९) यद्वा द्वेकयोरितिवत्सङ्ख्यामात्रवृत्तेः परिमाणिनि प्रत्ययः । पञ्चैव पञ्चकाः । शकुनयः । पञ्च परिमाणमेषामिति वा । सङ्घे पञ्चकः । सूत्रे अष्टकं पाणिनीयम् । सङ्घशब्दस्य प्राणिसमूहे रूढत्वात्सूत्रं पृथगुपात्तम् । पञ्चकमध्ययनम् । 'स्तोमे डविधिः' (वा ३०४५) । पञ्चदश मन्त्राः परिमाणमस्य पञ्चदशस्तोमः ।

इत्यर्थेषु प्रथमान्ताद्यथाविहितम्प्रत्ययाः स्युरित्यर्थः । **पञ्चक इति ॥** 'सङ्ख्यायाः' इति कन् । **तदस्य परिमाणम् ॥** अस्मिन्नर्थे प्रथमान्ताद्यथाविहितम्प्रत्ययाः स्युरित्यर्थः । **प्रास्थिक इति ॥** 'आर्हात्' इत्यत्र परिमाणपर्युदासात् प्राग्वर्तीयष्ठञ् । अत्र सङ्ख्यापि परिमाणम् । यद्यपि अगोपुच्छसङ्ख्यापरिमाणादिति पृथग्ग्रहणात् सङ्ख्या न परिमाणम् । तथाप्यत्र परिच्छेदकत्वात् सङ्ख्यापि परिमाणम् । उत्तरसूत्रे सङ्ख्यायाः परिमाणेन विशेषणाच्चिह्नात् । तेन षष्टिः परिमाणमस्य षाष्टिकमिति सिद्धम् । द्विषष्ट्यादिभ्यस्त्वनभिधानान्नेति भाष्ये स्पष्टम् । **सङ्ख्यायाः ॥ अनुवर्तत इति ॥** तथाच तदस्य परिमाणमित्यर्थे प्रथमान्तात् सङ्ख्यात्मकपरिमाणवाचिनो यथाविहितम्प्रत्ययाः स्युरित्यर्थः । **संज्ञायां स्वार्थे प्रत्ययो वाच्य इति ॥** पञ्चकाः शकुनय इत्यत्र पञ्च परिमाणमेषामित्यर्थो न सम्भवति । आदशतः सङ्ख्यायाः सङ्ख्येये इति पञ्चन्शब्दस्य सङ्ख्येयवृत्तित्वेन पञ्च परिमाणमिति सामानाधिकरण्यानुपपत्तेः । अतः संज्ञायां स्वार्थे एव सङ्ख्यायाः प्रत्यय इति पर्यवस्यतीति भावः । **यद्वेति ॥** द्विशब्दस्य एकशब्दस्य च सङ्ख्येयवृत्तित्वेऽपि 'द्वेकयोः' इति समासवृत्तावेकत्वद्वित्वपरत्वमभ्युपगम्यते । अन्यथा 'द्वयेकयोः' इति द्विवचनानुपपत्तेः । तद्वत्पञ्चकाः शकुनय इति तद्धितवृत्तावपि पञ्चन्शब्दस्य पञ्चत्वसङ्ख्यापरतया पञ्चत्वं परिमाणमस्येति सामानाधिकरण्यं स्वीकृत्य पञ्चत्ववाचिनः पञ्चन्शब्दात् पञ्चत्वरूपपरिमाणवति प्रत्ययः उपपद्यते इत्यर्थः । तत्र संज्ञायां स्वार्थे उदाहरति । **पञ्चैवेति ॥** परिमाणिनि प्रत्ययमुदाहरति । **पञ्च परिमाणमिति ॥** पञ्चत्वमित्यर्थः । **सङ्घे इति ॥** उदाहरणं वक्ष्यते इत्यर्थः । **पञ्चक इति ॥** पञ्चत्वमस्य सङ्घस्य परिमाणमित्यर्थः । सङ्घस्य पञ्चत्वन्तु अवयवद्वारा बोध्यम् । **सूत्र इति ॥** उदाहियत इति शेषः । **अष्टकं पाणिनीयमिति ॥** सूत्रमिति शेषः । अष्टावध्यायाः परिमाणमस्येति विग्रहः । अत्राष्टत्वं अध्यायद्वारा सूत्रेऽन्वेति । सूत्रशब्दश्च सूत्रसङ्घपरः । एकस्मिन् सूत्रे अष्टकत्वस्यासम्भवात् । नन्वेवं सति सङ्घग्रहणेनैव सिद्धे सूत्रग्रहणं व्यर्थमित्यत आह । **सङ्घशब्दस्येति ॥ पञ्चकमध्ययनमिति ॥**

सप्तदशः। एकविंशः। डप्रत्यये तिलोपः। सोमयागेषु छन्दोगैः क्रियमाणा पृष्ठ्यादिसंज्ञिका स्तुतिः स्तोमः।

१७२५। पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीति-नवतिशतम्। (५-१-५९)

एते रूढिशब्दा निपात्यन्ते।

१७२६। पञ्चद्दशतौ वर्गे वा। (५-१-६०)

पञ्चावृत्तयः परिमाणमस्येति विग्रहः। **स्तोमे डविधिरिति** ॥ तदस्य परिमाणमित्यर्थे सङ्ख्यावाचिन उपसङ्ख्यातव्य इति शेषः। सामाधारमन्त्रसमूहे स्तोमशब्दः शक्त इति कैयटः। मनुष्यादिसमूहे तु स्तोमशब्दो लाक्षणिक इति तदाशयः। तदाह। **पञ्चदश मन्त्रा इति ॥ पञ्चदशस्तोम इति** ॥ पञ्चदशत् शब्दात् डप्रत्यये 'टेः' इति टिलोपः। सामाधार-भूतपञ्चदशमन्त्रसमूह इत्यर्थः। ननु डित्त्वाभावेऽपि 'नस्तद्धिते' इत्येव टिलोपसिद्धेर्डित्त्वं व्यर्थमित्यत आह। **एकविंश इति** ॥ एकविंशतिर्मन्त्राः परिमाणमस्य समूहस्येति विग्रहः। **डप्रत्यये इति** ॥ 'तिविंशतेर्डिति' इति टिलोपः। मीमांसकास्तु पृष्ठरथन्तरादिशब्दवाच्या प्रगीतमन्त्रसाध्या गुणवत्त्वेन वर्णनात्मिका स्तुतिरेव स्तोमः, स एव डप्रत्ययार्थः। प्रगीतपञ्च-दशमन्त्रपरिमाणकः स्तोम इत्यर्थः। पञ्चदशत्वसङ्ख्यात्मकपरिमाणं स्तुतौ मन्त्रद्वारा बोध्यम्। एवञ्च पञ्चदशेन स्तुवते इत्यादौ धात्वर्थभूतस्तुतिसामानाधिकरण्यम्पञ्चदशादिशब्दानामुपपद्यते इत्याहुः। तन्मतमवलम्ब्य आह। **सोमयागेष्वित्यादि ॥ पङ्क्तिविंशति ॥ रूढिशब्दा निपात्यन्ते इति** ॥ तदस्य परिमाणमित्यर्थे इति शेषः। पञ्च पादाः परिमाणमस्येत्यर्थे पञ्चन्शब्दात् तिप्रत्ययः प्रकृतेष्टिलोपः, चकारस्य कुत्वम्, अनुस्वारपरसवर्णौ, पङ्क्तिरिति रूपम्। "पञ्चाक्षरा पञ्चपदा पङ्क्तिः" इति छन्दःशास्त्रे। दशानां वर्गः दशन्। 'पञ्चद्दशतौ वर्गे च' इति वक्ष्यते। द्वौ दशतौ परिमाणमस्य सङ्घस्य विंशतिः। शतिच्प्रत्ययः प्रकृतेर्विन्भावः, अनुस्वारश्च। अत्र सङ्घग्रहणमनुवर्तते। तथाच गवां विंशतिरिति भवति। सङ्घसङ्ख्यानोस्ता-दात्म्यविवक्षायां तु विंशतिर्गाव इति भवति। स्वभावादेकवचनं स्त्रीत्वञ्च। एवं त्रिंशदादावपि। "विंशत्याद्यास्सदैकत्वे सङ्ख्यास्सङ्ख्येयसङ्ख्ययोः", "तासु चानवतेः स्त्रियः" इति चामरः। त्रयः दशतः परिमाणमस्य सङ्घस्य त्रिंशत्। शत्प्रत्ययः, प्रकृतेः त्रिन्भावश्च। चत्वारो दशतः परिमाणमस्य सङ्घस्य चत्वारिंशत्, शत्प्रत्ययः। प्रकृतेः चत्वारिम्भावश्च। पञ्च दशतः परिमाणमस्य सङ्घस्य पञ्चाशत्। शत्प्रत्ययः प्रकृतेः पञ्चादेशः। षड् दशतः परिमाणमस्य सङ्घस्य षष्टिः। तिप्रत्ययः, प्रकृतेः षष्, जश्त्वाभावश्च। सप्त दशतः परिमाणमस्य सङ्घस्य सप्ततिः तिप्रत्ययः। 'न लोपः' इति नकारलोपः। अष्टौ दशतः परिमाणमस्य सङ्घस्य अशीतिः। तिप्रत्ययः प्रकृतेः अशी इत्यादेशः। नव दशतः परिमाणमस्य सङ्घस्य नवतिः, तिप्रत्ययः, नलोपः। दश दशतः परिमाणमस्य सङ्घस्य शतम्, तप्रत्ययः प्रकृतेः शादेशश्च। एतत्सर्वं भाष्ये स्पष्टम्। "एतान्यव्युत्पन्न-प्रातिपदिकानि" इति भाष्ये निष्कर्षः। **पञ्चद्दशतौ** ॥ पञ्च दश वा परिमाणमस्य वर्गस्येत्यर्थे

पञ्च परिमाणमस्य पञ्चद्वर्गः । दशत् । पक्षे पञ्चकः । दशकः ।

१७२७ । त्रिंशच्चत्वारिंशतो ब्राह्मणे संज्ञायां डण् । (५-१-६२)

त्रिंशदध्यायाः परिमाणमेषां ब्राह्मणानां त्रैंशानि । चात्वारिंशानि ।

१७२८ । तदर्हति । (५-१-६३)

लब्धुं योग्यो भवतीत्यर्थे द्वितीयान्तात्ठञादयः स्युः । श्वेतच्छत्त्रमर्हति श्वैतच्छत्त्रिकः ।

१७२९ । छेदादिभ्यो नित्यम् । (५-१-६४)

नित्यमाभीक्ष्ण्यम् । छेदं नित्यमर्हति छैदिको वेतसः । छिन्नप्ररूढत्वात् । 'विराग विरङ्गं च' (ग सू ९९) । विरागं नित्यमर्हति । वैरागिकः—वैरङ्गिकः ।

१७३० । शीर्षच्छेदाद्यच्च । (५-१-६५)

शिरश्छेदं नित्यमर्हति शीर्षच्छेद्यः—शैर्षच्छेदिकः । यट्ठकोः सन्नियोगेन शिरसः शीर्षभावो निपात्यते ।

एतौ निपात्येते इत्यर्थः । **पञ्चद्वर्ग इति** ॥ पञ्च परिमाणमस्येत्यर्थे पञ्चनशब्दात् डतिप्रत्ययः । तत्र इकार उच्चारणार्थः । 'टेः' इति टिलोपः । **दशादिति** ॥ दश परिमाणमस्य वर्गस्येति विग्रहः । डति डित्त्वाट्टिलोपः । एतदर्थमेव डित्त्वम् । **पक्षे इति** ॥ डत्यभावपक्षे 'सङ्ख्यायाः' इति कन्नित्यर्थः । **त्रिंशच्चत्वारिंशतोः** ॥ तदस्य परिमाणमित्यर्थे परिमाणिनि ब्राह्मणे वाच्ये त्रिंशच्चत्वारिंशद्भ्यां डण् स्यादित्यर्थः । ब्राह्मणं वेदेषु मन्त्रव्यतिरिक्तो भागः । **त्रैंशानीति** ॥ डित्त्वात् 'टेः' इति टिलोपः । **तदर्हति** ॥ अर्हतीत्यस्य योग्यो भवतीत्यर्थे अकर्मकत्वात्तदिति द्वितीया न स्यात् । इष्यते तु द्वितीयान्तादेव प्रत्ययः । तत्राह । **लब्धुमिति । श्वैतच्छत्त्रिक इति** ॥ आर्हीयषट्कं । **छेदादिभ्यो नित्यम्** ॥ **आभीक्ष्ण्यमिति** ॥ पौनःपुन्यमित्यर्थः । तन्नित्यमर्हतीत्यर्थे द्वितीयान्तेभ्यः छेदादिभ्यो यथाविहितम्प्रत्ययः स्यादित्यर्थः । **छैदिको वेतस इति** ॥ 'आर्हात्' इति ठक् । 'तदर्हति' इत्येव सिद्धे आभीक्ष्ण्य एवेति नियमार्थमिदं सूत्रम् । वस्तुतस्तु नित्यमिति नाभीक्ष्ण्यार्थकम्प्रत्ययार्थकोटिप्रविष्टम्, किन्तु अपाक्षिकत्वार्थकम् । 'समर्थानाम्प्रथमाद्वा' इति वाग्रहणानुवृत्तिनिवृत्त्यर्थमभिप्रेत्य विग्रहवाक्यस्यापि लोके दर्शनान्नित्यग्रहणन्न कर्तव्यमित्युक्तम् । एवञ्च छेदादिभ्यः पाक्षिकप्रत्ययस्य 'तदर्हति' इत्येव सिद्धत्वात् सूत्रमेवेदं नारब्धव्यमिति फलति । **विराग विरङ्गश्चेति** ॥ गणसूत्रमिदम् । उक्तेऽर्थे विरागशब्दो विरङ्गादेशं लभते इत्यर्थः । चादार्हीयषट्कं । **शीर्षच्छेदाद्यच्च** ॥ चादार्हीयषट्कं । **ननु 'शीर्षच्छन्दसि' इति छन्दस्येव शिरसः शीर्षादेशविधानात् कथमिह**

१७३१। दण्डादिभ्यो यत्। (५-१-६६)

एभ्यो यत्स्यात्। दण्डमर्हति दण्ड्यः। अर्घ्यः। वध्यः।

१७३२। पात्राद्घंश्च। (५-१-६८)

चाद्यत् तदर्हतीत्यर्थे। पात्रियः—पात्र्यः।

१७३३। कडङ्करदक्षिणाच्छ च। (५-१-६९)

चाद्यत्। कडं करोतीति विग्रहेऽत एव निपातनात्खच्। कडङ्करं माषमुद्गादिकाष्ठमर्हतीति कडङ्करीयो गौः। कडङ्कर्यः। दक्षिणामर्हतीति दक्षिणीयः—दक्षिण्यः।

१७३४। स्थालीबिलात्। (५-१-७०)

स्थालीबिलमर्हन्ति स्थालीबिलीयास्तण्डुलाः—स्थालीबिल्याः। पाकयोग्या इत्यर्थः।

१७३५। यज्ञर्त्विग्भ्यां घखञौ। (५-१-७१)

यथासङ्ख्यं स्तः। यज्ञमृत्विजं वार्हति यज्ञियः, आर्त्विजीनो यजमानः। 'यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसङ्ख्यानम्' (वा ३०५२)। यज्ञियो देशः। आर्त्विजीनः ऋत्विक्॥ इति आर्हीयाणां ठगादीनां द्वादशानां पूर्णोऽवधिः॥

शीर्षादेश इत्यत आह। **यट्टकोरिति॥ दण्डादिभ्यः॥** यदित्यनुवर्तते। तदाह। **यत्स्यादिति॥** 'दण्डादिभ्यो यः' इति त्वपपाठः। 'अचो यत्' इति सूत्रभाष्ये तथैव दर्शनात्। **अर्घ्यः इति॥** मूल्यं पूजाविधिं वार्हतीत्यर्थः। "मूल्ये पूजाविधावर्घः" इत्यमरः। **वध्य इति॥** वधमर्हतीत्यर्थः। **पात्राद्घंश्च॥ पात्रियः—पात्र्य इति॥** पात्रमर्हतीत्यर्थः। **कडङ्करदक्षिणाच्छ च॥** 'कड मदे' कडनं कडः मदः 'घञर्थे कविधानम्' इति कः। **खजिति॥** तथाच 'खित्यनव्ययस्य' इति मुमिति भावः। कडङ्करश्च दक्षिणा चेति समाहारद्वन्द्वात्पञ्चमी। **स्थालीबिलात्॥** छयतावनुवर्तेते, तदर्हतीति च। **यज्ञर्त्विग्भ्यां घखञौ॥** तदर्हतीत्येव। **यज्ञम् ऋत्विजं वेति॥** यज्ञमर्हतीति यज्ञियः। ऋत्विजमर्हतीत्यार्त्विजीन इत्यन्वयः। **तत्कर्मेति॥** यज्ञकर्मार्हतीत्यर्थे यज्ञशब्दात् ऋत्विक्कर्मार्हतीत्यर्थे ऋत्विक्छब्दाच्च यथासङ्ख्यं घखञोरुपसङ्ख्यानमित्यर्थः। **यज्ञियो देश इति॥** यज्ञानुष्ठानमर्हतीत्यर्थः। **आर्त्विजीनो ऋत्विगिति॥** ऋत्विक्कर्तव्यकर्मार्हतीत्यर्थः। यद्यपि यज्ञर्त्विक्छब्दयोस्तत्कर्मणि लक्षणया सिद्ध्यति। तथाप्यत्र प्रकरणे मुख्यार्थेभ्य एव प्रत्यय इति ज्ञापनार्थमिदम्। **ठगादीनां द्वादशानामिति॥** 'प्राग्वतेः' इत्यारभ्य 'तेन क्रीतम्' इत्यतः प्राक् त्रयोदश प्रत्ययाः अनुक्रान्ताः। तत्र 'प्राग्वतेः' इति ठञं विना आर्हादित्यादिविहितानाष्ठगादीनान्द्वादशानां विधिः पूर्णः इत्यर्थः॥

इति तद्धिते प्राग्वतीये आर्हीयाणां ठगादीनां द्वादशानां पूर्णोऽवधिः।

अथ तद्धिते प्राग्वतीये ठञधिकारे कालाधिकारप्रकरणम्।

अतः परं ठञेव।

१७३६। पारायणतुरायणचान्द्रायणं वर्तयति। (५-१-७२)

पारायणं वर्तयति पारायणिकश्छात्रः। तुरायणं यज्ञविशेषः। तं वर्तयति तौरायणिको यजमानः। चान्द्रायणिकः।

१७३७। संशयमापन्नः। (५-१-७३)

संशयविषयीभूतोऽर्थः सांशयिकः।

१७३८। योजनं गच्छति। (५-१-७४)

यौजनिकः। 'क्रोशशतयोजनशतयोरुपसङ्ख्यानम्' (वा ३०५५)। क्रोशशतं गच्छति क्रौशशतिकः। यौजनशतिकः। 'ततोऽभिगमनमर्हतीति च वक्तव्यम्' (वा ३०५६)। क्रोशशतादभिगमनमर्हतीति क्रौशशतिको भिक्षुः। यौजनशतिक आचार्यः।

१७३९। पथः ष्कन्। (५-१-७५)

षो ङीपर्थः। पन्थानं गच्छति पथिकः। पथिकी।

अथ तद्धिते प्राग्वतीये ठञधिकारे कालाधिकारः निरूप्यते—**अतः परं ठञेवेति** ॥ आर्हीयेष्वर्थेषु प्राग्वतीयठञपवादा आर्हीयाष्ठगादयः आर्हीयार्थेषु निरूपितेषु ततः ऊर्ध्वं ठगादिप्रत्ययानाम् अनुवृत्तेरसम्भवात् प्राग्वतीये ठञेवानुवर्तते इत्यर्थः। **पारायण** ॥ द्वितीयान्तेभ्यः पारायणादिशब्देभ्यः वर्तयतीत्यर्थे ठञ् स्यादित्यर्थः। **पारायणं वर्तयतीति** ॥ पारायणं वेदाध्ययनम्। तद्वर्तयति आवर्तयतीत्यर्थः। **पारायणिकः छात्र इति** ॥ गुरौ त्वध्येतरि नायम्प्रत्ययः। अनभिधानादिति भावः। **तौरायणिको यजमान इति** ॥ ऋत्विजि नायम्प्रत्ययः। अनभिधानादिति भावः। **चान्द्रायणिक इति** ॥ चान्द्रायणं वर्तयतीत्यर्थः। चान्द्रायणङ्कृच्छ्रविशेषः। **संशयमापन्नः** ॥ अस्मिन्नर्थे संशयशब्दात् द्वितीयान्ताट्ठक् स्यादित्यर्थः। अत्र आपन्न इति कर्तरि क्तः। विषयतया प्राप्त इत्यर्थः। उपसर्गवशात् संशयविषयीभूतोऽर्थ इति। तेन समवायेन संशयाधारे सन्देग्धरि नायम्प्रत्यय इति भावः। अमरस्तु "सांशयिकः संशयापन्नमानसः" इत्याह। **योजनङ्गच्छति** ॥ द्वितीयान्ताद्योजनशब्दात् गच्छतीत्यर्थे ठञ् स्यादित्यर्थः। **क्रोशशतेति** ॥ आभ्यामपि द्वितीयान्ताभ्यां गच्छतीत्यर्थे ठञ उपसङ्ख्यानमित्यर्थः। **क्रोशशतादिति** ॥ ल्यब्लोपे पञ्चमी। क्रोशशतमर्तीत्येत्यर्थः। **पथः ष्कन्** ॥ पथः ष्कन् इति छेदः। द्वितीयान्तात् पथिन्शब्दात् गच्छतीत्यर्थे ष्कन् स्यादित्यर्थः। **पन्थो ण**

१८४०। पन्थो ण नित्यम्। (५-१-७६)

पन्थानं नित्यं गच्छति। पान्थः—पान्था।

१७४१। उत्तरपथेनाहृतं च। (५-१-७७)

उत्तरपथेनाहृतमौत्तरपथिकम्। उत्तरपथेन गच्छति औत्तरपथिकः। 'आहृतप्रकरणे वारिजङ्गलस्थलकान्तारपूर्वादुपसङ्ख्यानम्' (वा ३०५७)। वारिपथिकम्।

१७४२। कालात्। (५-१-७८)

'व्युष्टादिभ्योऽण्' (सू १७६१) इत्यतः प्रागधिकारोऽयम्।

१७४३। तेन निर्वृत्तम्। (५-१-७९)

अह्ना निर्वृत्तम् आह्निकम्।

१७४४। तमधीष्टो भृतो भूतो भावी। (५-१-८०)

अधीष्टः सत्कृत्य व्यापारितः। भृतो वेतनेन क्रीतः। भूतः स्वसत्तया व्याप्तकालः। भावी तादृश एवानागतकालः। मासमधीष्टो मासिकोऽध्यापकः। मासं भृतः मासिकः कर्मकरः। मासं भूतो मासिको व्याधिः। मासं भावी मासिक उत्सवः।

१७४५। मासाद्वयसि यत्खञौ। (५-१-८१)

मासं भूतो मास्यः—मासीनः।

नित्यम् ॥ पथ इत्यनुवर्तते गच्छतीति च। नित्यमिति गच्छतीत्यत्रान्वितं प्रत्ययार्थप्रविष्टमेव। नतु विधानान्वितं सत् महाविभाषानिवृत्त्यर्थम्। द्वितीयान्तात् पथिन्शब्दात् नित्यङ्गच्छतीत्यर्थे णप्रत्ययः स्यात्प्रकृतेः पन्थादेशश्चेत्यर्थः। भाष्ये तु नित्यग्रहणम्प्रत्याख्यातम्। **उत्तरपथेनाहृतञ्च** ॥ उत्तरपथशब्दात् तृतीयान्तात् आहृतमित्यर्थे गच्छतीत्यर्थे च ठञ् स्यादित्यर्थः। **वारिजङ्गलेति** ॥ वारि, जङ्गल, स्थल, कान्तार, एतत्पूर्वात् पथिन्शब्दात् तृतीयान्तात् आहृतमिति गच्छतीति चार्थे ठञित्यर्थः। वारिपथेन गच्छति आहृतं वेत्यर्थः। जाङ्गलपथिकः, स्थालपथिकः, कान्तारपथिकः। **कालात्** ॥ **इत्यतः प्रागिति** ॥ व्याख्यानादिति भावः। **तेन निर्वृत्तम्** ॥ तृतीयान्तान्निर्वृत्तमित्यर्थे ठञ् स्यादित्यर्थः। **आह्निकमिति** ॥ 'अह्नष्टखोरेव' इति नियमान्न टिलोपः। **तमधीष्टो** ॥ द्वितीयान्तात् अधीष्टादिष्वर्थेषु ठञ् स्यादित्यर्थः। **व्यापारित इति** ॥ प्रेरित इत्यर्थः। **तादृश एवेति** ॥ स्वसत्तया व्याप्यमान इत्यर्थः। मासमधीष्ट इत्यादौ 'कालाध्वनोः' इति द्वितीया। **मासाद्वयसि** ॥ अत्र भूत इत्येवानुवर्तते।

१७४६ । द्विगोर्यप् । (५-१-८२)

मासाद्वयसीत्यनुवर्तते । द्वौ मासौ भूतो द्विमास्यः ।

१७४७ । षण्मासाण्ण्यच्च । (५-१-८३)

'वयसि' इत्येव । यबप्यनुवर्तते, चाट्टञ् । षण्मास्यः—षाण्मास्यः—षाण्मासिकः ।

१७४८ । अवयसि ठंश्च । (५-१-८४)

चाण्ण्यत् । षण्मासिको व्याधिः—षाण्मास्यः ।

१७४९ । समायाः खः । (५-१-८५)

समामधीष्टो भृतो भूतो भावी वा समीनः ।

१७५० । द्विगोर्वा । (५-१-८६)

'समायाः खः' इत्येव । 'तेन परिजय्य—' (सू १७५७) इत्यतः प्राङ्निर्वृत्तादिषु पञ्चस्वर्थेषु प्रत्ययाः । द्विसमीनः—द्वैसमिकः ।

१७५१ । रात्र्यहःसंवत्सराच्च । (५-१-८७)

'द्विगोः' इत्येव । द्विरात्रीणः—द्वैरात्रिकः । व्यहीनः—द्वैयह्निकः समासान्तविधेरनित्यत्वान्न टच् । द्विसंवत्सरीणः ।

व्याख्यानात् । मासशब्दात् द्वितीयान्तात् भृत इत्यर्थे यप्यञौ स्तः । वयसि गम्ये इत्यर्थः । **द्विगोर्यप्** ॥ **अनुवर्तते इति** ॥ मासान्ताद्विगोर्भृत इत्यर्थे यप् स्याद्वयसि गम्ये इत्यर्थः । **षण्मासाण्ण्यच्च** ॥ **वयसीत्येवेति** ॥ षण्मासशब्दात् भृत इत्यर्थे ण्यच्च स्याद्वयसि गम्ये इत्यर्थः । अत्र चकारात्सन्निहितस्य यपोऽनुकर्षणे ण्यद्यपावेव स्याताम्, ननु ठञपि । इष्यते तु ठञपि । तत्राह । **यबप्यनुवर्तते इति** ॥ स्वरितत्वादिति भावः । तर्हि चकारः किमर्थ इत्यत आह । **चाट्टञिति** ॥ तथाच ण्यत् यप् ठञिति त्रयः प्रत्ययाः फलिताः । **अवयसि ठंश्च** ॥ षण्मासशब्दात् द्वितीयान्तात् भृते अवयसि ठन् च स्यादित्यर्थः । **समायाः खः** ॥ मण्डूकप्लुत्या 'तमधीष्टो भृतो भूतो भावी' इति कृत्स्नमेव सूत्रमनुवर्तते । समाशब्दाद्वितीयान्तात् अधीष्टादिष्वर्थेषु खः स्यादित्यर्थः । **द्विगोर्वा** ॥ **समायाः ख इत्येवेति** ॥ तथाच समान्तात् द्विगोर्द्वितीयान्तात् खो वा स्यात् । पक्षे ठञिति फलितम् । "अप्सुमनःसमासिकतावर्षाणाम्बहुत्वञ्च" इति लिङ्गानुशासनसूत्रम् । "हायनोऽब्राशरत्समाः" इत्यमरः । समां समां विजायते' इति सूत्रादेकवचनमप्यस्ति । **पञ्चस्विति** ॥ तेन निर्वृत्तम् । तमधीष्टो भृतो भूतो भावीति पञ्चस्वित्यर्थः ॥ एषां यथायोगमन्वयः । **द्वैसमिक इति** ॥ खाभावे प्राग्वतीयष्ठञ् । **रात्र्यहः** ॥ **द्विगोरित्येवेति** ॥ रात्रि, अहन्, संवत्सर, एतदन्तात् द्विगोर्निर्वृत्तादिष्वर्थेषु

१७५२। सङ्ख्यायाः संवत्सरसङ्ख्यस्य च। (७-३-१५)

सङ्ख्याया उत्तरपदस्य वृद्धिः स्यात् ञिदादौ। द्विसांवत्सरिकः। द्वे षष्टी भृतो द्विषाष्टिकः। 'सङ्ख्यायाः परिमाणान्तस्य' इत्येव सिद्धे संवत्सरग्रहणं परिमाणग्रहणे कालपरिमाणस्याग्रहणार्थम्। तेन द्वैसमिक इत्युत्तरपदवृद्धिर्न।

१७५३। वर्षाल्लुक्च। (५-१-८८)

वर्षशब्दान्ताद्विगोर्वा खः। पक्षे ठञ्वा च लुक्। त्रीणि रूपाणि। द्विवर्षीणो व्याधिः। द्विवार्षिकः—द्विवर्षः।

१७५४। वर्षस्याभविष्यति। (७-३-१६)

उत्तरपदस्य वृद्धिः स्यात्। द्विवार्षिकः। भविष्यति तु द्वैवर्षिकः। अधीष्टभृतयोरभविष्यतीति प्रतिषेधो न। गम्यते हि तत्र भविष्यत्ता, न तु तद्धितार्थः।

खो वा स्यादित्यर्थः। पक्षे ठञ्। **द्विरात्रीण इति** ॥ द्वाभ्यां रात्रिभ्यामिर्वृत्तः द्वे रात्री अधीष्टो भृतो भूतो भावी वेत्यर्थः। एवमग्रेऽपि यथायोगं ज्ञेयम्। **द्व्यहीन इति** ॥ द्वाभ्यां अहोभ्यां निर्वृत्तः द्वे अहनी अधीष्टे इत्यादिष्वर्थेषु 'तद्धितार्थ' इति द्विगोः खः, 'अह्नष्टखोः' इति टिलोपः। समाहारद्विगोस्तु न खः। टचि कृते अहन्शब्दाभावात्। **द्वैयह्निक इति** ॥ 'अह्नष्टखोरेव' इति नियमात् न टिलोपः। किन्त्वल्लोपः अह्नादेशो वा। 'न य्वाभ्याम्' इत्यैच्। ननु द्व्यहीन इत्यत्र 'तद्धितार्थ' इति तु द्विगुसमासे कृते 'राज्यहःसंवत्सराच्च' इति खम्बाधित्वा परत्वात् 'राजाहःसखिभ्यः' इति टचि 'अह्नोऽह्न एतेभ्यः' इत्यह्नादेशे तस्य स्थानिवत्त्वेनाहन्शब्दत्वे टजन्तस्य तदभावात् 'राज्यहःसंवत्सराच्च' इति खप्रत्ययो न स्यात्। कृतेऽपि खप्रत्यये द्व्यहीन इति स्यादित्यत आह। **समासान्तविधेरनित्यत्वान्न टजिति** ॥ एवञ्च टजभावे सति नाह्नादेशः। समासान्ते पर एव तद्विधानादिति भावः। 'समासान्तविधिरनित्यः' इति षष्ठाध्यायस्य द्वितीये पादे 'द्वित्रिभ्यामह्नोदन्मूर्धसु बहुव्रीहौ' इति सूत्रभाष्ये स्पष्टम्। अथ संवत्सरान्तस्य खे उदाहरति। **द्विसंवत्सरीण इति** ॥ ठञि त्वादिवृद्धौ प्राप्तायाम्। **सङ्ख्यायाः संवत्सर** ॥ आदिवृद्धिप्रकरणे उत्तरपदस्येत्यधिकारे इदं सूत्रम्। संवत्सरश्च सङ्ख्या चेति समाहारद्वन्द्वात् षष्ठी। **सङ्ख्याया उत्तरपदस्येति** ॥ सङ्ख्यायाः परस्य संवत्सरसङ्ख्यस्योत्तरपदस्येत्यर्थः। नन्वत्र संवत्सरग्रहणं व्यर्थम्। संवत्सरस्य द्वादशमासपरिमाणतया 'परिमाणान्तस्यासंज्ञाशाणयोः' इत्येव सिद्धेरित्यत आह। **परिमाणान्तस्येत्येवेति** ॥ **वर्षाल्लुक् च** ॥ **वा च लुगिति** ॥ खठञोरिति शेषः। **द्विवर्षीण इति** ॥ खे रूपम्। **द्विवर्ष इति** ॥ खठञोर्लुकि रूपम्। ठञि आदिवृद्धौ प्राप्तायाम्। **वर्षस्याभविष्यति** ॥ आदिवृद्धिप्रकरणे उत्तरपदस्येत्यधिकारे इदं सूत्रम्। शेषपूरणेन तद्व्याचष्टे। **उत्तरपदस्य वृद्धिः स्यादिति** ॥ अभविष्यति यो ञिदादिः तस्मिन्परे

द्वे वर्षे अधीष्टो भृतो वा कर्म करिष्यतीति द्विवार्षिको मनुष्यः। 'परिमाणान्तस्यासंज्ञाशाणयोः' (सू १६८३)। द्वौ कुडवौ प्रयोजनमस्य द्विकौडविकः। द्वाभ्यां सुवर्णाभ्यां क्रीतं द्विसौवर्णिकम्। द्विनैष्किकम्। 'असंज्ञा–' इति किम्। पञ्च कपालाः परिमाणमस्य पाञ्चकपालिकम्। तद्धितान्तः संज्ञा। द्वैशाणम्। कुलिजशब्दमपि केचित्पठन्ति। द्वैकुलिजिकः।

१७५५। चित्तवति नित्यम्। (५-१-८९)

वर्षशब्दान्ताद्विगोः प्रत्ययस्य नित्यं लुक्स्याच्चेतने प्रत्ययार्थे। द्विवर्षो दारकः।

१७५६। षष्टिकाः षष्टिरात्रेण पच्यन्ते। (५-१-९०)

बहुवचनमतन्त्रम्। षष्टिको धान्यविशेषः। तृतीयान्तात्कन् रात्रशब्दलोपश्च निपात्यते।

१७५७। तेन परिजय्यलभ्यकार्यसुकरम्। (५-१-९३)

मासेन परिजय्यो जेतुं शक्यो मासिको व्याधिः। मासेन लभ्यं कार्यं सुकरं वा मासिकम्।

इत्यर्थः। निर्वृत्तादिहु पञ्चस्वर्थेषु भविष्यदर्थं वर्जयित्वा तदितरेषु चतुर्ष्वर्थेषु यस्तद्धितः तस्मिन् परे इति यावत्। **द्विवार्षिक इति**॥ द्वाभ्यां वर्षाभ्यां निर्वृत्तः द्वे वर्षे अधीष्टः भृतः भूतो वेत्यर्थः। अत्यन्तसंयोगे द्वितीया। **द्वैवर्षिक इति**॥ व्याधिरिति शेषः। चित्तवति नित्यलुको वक्ष्यमाणत्वात्। नन्वेवं सति द्वे वर्षे अधीष्टो भृतो वा कर्म करिष्यति द्विवार्षिक इत्यत्र कथमुत्तरपदवृद्धिः। भविष्यत्त्वस्य प्रतीतिरित्याशङ्क्य आह। **अधीष्टभृतयोरभविष्यतीति प्रतिषेधो नेति**॥ कुत इत्यत आह। **गम्यते हि तत्र भविष्यत्तेति**॥ अध्येषणभरणयोः क्तप्रत्ययेन भूतत्वमेव शब्दशक्त्या गम्यते। तद्धितप्रत्ययेन च तथाविधाध्येषणभरणकर्मीभूतौ प्रतीयेते। एवंविधाध्येषणभरणशिष्टयोस्तु भविष्यता कर्माचरणेन सम्बन्धः कर्म करिष्यतीत्यनेनावगत इति न स तद्धितार्थः। एवञ्च तत्रापि भविष्यदर्थकतद्धितपरकत्वाभावात् स्यादेवोत्तरपदवृद्धिरित्यर्थः। **द्विवार्षिको मनुष्य इति**॥ 'चित्तवति नित्यम्' इति वक्ष्यमाणस्तु नित्यलुक् न भवति। चित्तवतीत्येवारम्भसामर्थ्यात् नित्यत्वे सिद्धे पुनर्नित्यग्रहणेन भूत एवार्थे नित्यं लुगित्यभ्युपगमादिति हरदत्तः। केचित्तु द्विवार्षिकः अमनुष्य इति छिन्दन्ति। **चित्तवति नित्यम्॥ प्रत्ययस्येति**॥ खस्य ठस्येत्यर्थः। दारकः बालकः। **षष्टिकाः॥ तृतीयान्तादिति**॥ षष्टिरात्रशब्दादिति शेषः। **तेन परिजय्य॥** निर्वृत्तादयः पञ्चार्थाः **निर्वृत्ताः। तेन परिजय्यम्, तेन लभ्यम्, तेन कार्यम्, तेन सुकरम्, इत्यर्थेषु** तृतीयान्ताद्ठञिलर्थः

१७५८। तदस्य ब्रह्मचर्यम्। (५-१-९४)

द्वितीयान्तात्कालवाचिनोऽस्येत्यर्थे प्रत्ययः स्यात्। अत्यन्तसंयोगे द्वितीया। मासं ब्रह्मचर्यमस्य स मासिको ब्रह्मचारी। आर्धमासिकः। यद्वा प्रथमान्तादस्येत्यर्थे प्रत्ययः। मासोऽस्येति मासिकं ब्रह्मचर्यम्। 'महानाम्न्यादिभ्यः षष्ठ्यन्तेभ्य उपसङ्ख्यानम्' (वा ३०६४)। महानाम्न्यो नाम 'विदा मघवन्—' इत्याद्या ऋचः। तासां ब्रह्मचर्यमस्य माहानाम्निकः। हरदत्तस्तु 'भस्याढे—' इति पुंवद्भावान्माहानामिक इत्याह। 'चतुर्मासाण्ण्यो यज्ञे' तत्र भव इत्यर्थे (वा ३०६९)। चतुर्षु मासेषु भवन्ति चातुर्मास्यानि, यज्ञकर्माणि। अण् संज्ञायाम् (वा ३०७०)। चातुर्मासी, पौर्णमासी। अण्णन्तत्वान्ङीप्।

१७५९। तस्य च दक्षिणा यज्ञाख्येभ्यः। (५-१-९५)

परिजय्य इत्यस्य विवरणज्ञेतुं शक्य इति। **तदस्य ब्रह्मचर्यम्** ॥ ननु द्वितीयान्तादिति कथम्। सूत्रे ब्रह्मचर्यविशेषणस्य तच्छब्दस्य प्रथमान्तत्वादित्यत आह। **अत्यन्तेति** ॥ तथाच कालविशेषणमभिव्याप्तब्रह्मचर्यवानित्यर्थे कालात्प्रत्ययः। इदमर्थं प्रति ब्रह्मचर्यं विशेषणम्। **मासिको ब्रह्मचारीति** ॥ मासाभिव्याप्तब्रह्मचर्यवानित्यर्थः। **आर्धमासिक इति** ॥ 'अर्धात्परिमाणस्य' इत्युभयपदवृद्धिः। अत्र इदंशब्दार्थस्य ब्रह्मचारिणः प्राधान्यम्। मासाभिव्याप्तब्रह्मचर्यन्तु तद्विशेषणमिति स्थितिः। **यद्वेति** ॥ सूत्रे तदिति प्रथमान्तम्। ब्रह्मचर्यमिति षष्ठ्यर्थे प्रथमा। तथाच प्रथमान्तात्कालवाचिनः अस्य ब्रह्मचर्यस्येत्यर्थे ठञित्यर्थः फलति। तदाह। **प्रथमान्तादिति** ॥ कालवाचिन इति शेषः। **अस्येत्यर्थे इति** ॥ अस्य ब्रह्मचर्यस्येत्यर्थे इत्यर्थः। मासोऽस्येत्यनन्तरं ब्रह्मचर्यस्येति शेषः। अस्मिन्पक्षे ब्रह्मचर्यमेव प्रत्ययार्थेत्वात्प्रधानम्। इदमर्थस्तु तद्विशेषणमिति बोध्यम्। **उपसङ्ख्यानमिति** ॥ अस्य ब्रह्मचर्यमित्यर्थे ठञ इति शेषः। **माहानाम्निक इति** ॥ महानाम्नीशब्दस्य ऋग्विशेषेषु रूढस्य नित्यस्त्रीलिङ्गत्वात् भाषितपुंस्कत्वाभावात् 'भस्याढे' इति पुंवत्त्वं नेति भावः। **हरदत्तस्त्विति** ॥ महानाम्निकमित्येव भाष्ये उदाहृतत्वादिदमुपेक्ष्यमिति भावः। **चतुर्मासाण्ण्यो यज्ञे, तत्र भवः इति** ॥ वार्तिकमिदम्। तत्र भवो यज्ञः इत्यर्थे चतुर्मासशब्दात्सप्तम्यन्ताण्ण्यो वाच्य इत्यर्थः। **चतुर्ष्विति** ॥ चतुर्षु मासेषु अतीतेष्वित्यर्थः। **अण् संज्ञायामिति** ॥ वार्तिकमिदम्। चतुर्मासशब्दात् भवार्थे अण् वाच्यः संज्ञायामित्यर्थः। **चतुर्ष्विति** ॥ फाल्गुनीं पौर्णमासीमारभ्य चतुर्षु मासेष्वतीतेष्वित्यर्थः। **आषाढीति** ॥ आषाढ्याः पौर्णमास्याः चातुर्मासीति संज्ञेति भावः। नच 'तत्र भवः' इत्यणैव सिद्धमिति वाच्यम्। 'द्विगोर्लुगनपत्ये' इति लुङ्निवृत्त्यर्थत्वात्। **तस्य च दक्षिणा** ॥ तस्य दक्षिणेत्यर्थे यज्ञकालनिवृत्तिभ्यः

द्वादशाहस्य दक्षिणा द्वादशाहिकी । आख्याग्रहणादकालादपि । आग्निष्टोमिकी । वाजपेयिकी ।

१७६० । तत्र च दीयते कार्यं भववत् । (५-१-९६)

प्रावृषि दीयते कार्यं वा प्रावृषेण्यम् । शारदम् ।

इति तद्धिते प्राग्वतीये ठञधिकारे कालात् इत्यधिकारस्समाप्तः ।

अथ ठञ्विधिप्रकरणम् ।

१७६१ । व्युष्टादिभ्योऽण् । (५-१-९७)

व्युष्टे दीयते कार्यं वा वैयुष्टम् । व्युष्ट तीर्थ सङ्गम प्रवास इत्यादि । ['अग्निपदादिभ्य उपसङ्ख्यानम्' (वा ३०७२) । अग्निपदे दीयते कार्यं वा आग्निपदम् । पैलुमूलम् ।]

ठञ् स्यादित्यर्थः । **द्वादशाहस्येति** ॥ द्वादशदिनसाध्यमुत्साकः क्रतुर्द्वादशाहः । तस्येत्यर्थः । कालोपसर्जनक्रतुवाचित्वादयमपि कालवृत्तिरिति भावः । 'कालात्' इत्यधिकारसूत्रे हि यथाकथञ्चित्कालबोधकस्य ग्रहणमिति 'तदस्य परिमाणम्' इति सूत्रे भाष्ये स्पष्टम् । नन्वेवं सति अग्निष्टोमस्य दक्षिणा आग्निष्टोमिकीत्यत्र ठञ् न स्यात् । अग्निष्टोमशब्दस्य कथञ्चिदपि कालवाचित्वाभावादित्यत आह । **आख्याग्रहणादकालादपीति** ॥ अन्यथा यज्ञेभ्य इत्येव सिद्धे आख्याग्रहणवैयर्थ्यादिति भावः । वस्तुतस्तु यज्ञेभ्यः इत्येवोक्तौ कालादित्यधिकारात् द्वादशाहादिशब्देभ्य एव स्यात्, नतु अग्निष्टोमादिशब्देभ्यः । आख्याग्रहणे तु अग्निष्टोमादिभ्यो द्वादशाहादिशब्देभ्यश्च सर्वेभ्यो यज्ञवाचिभ्य इति भाष्ये स्पष्टम् । **तत्र च दीयते** ॥ तत्र दीयते तत्र कार्यमित्यर्थयोः सप्तम्यन्तात्कालवाचिनः भववत्प्रत्ययाः स्युरित्यर्थः । **प्रावृषेण्यमिति** ॥ 'प्रावृष एण्यः' इति भवार्थे विहितः इहापि भवति । **शारदमिति** ॥ शरदि दीयते कार्यं वेत्यर्थः । सन्धिवेलाद्यण् । भवे विहित इहापि भवति । इदं कृत्यनुरोधेन । वस्तुतस्तु तत्र कार्यन्दीयत इत्यर्थे यज्ञाख्येभ्यः भववत्प्रत्ययाः स्युरित्यर्थः । अग्निष्टोमे दीयते भक्तम् आग्निष्टोमिकम् । कार्यग्रहणादग्निष्टोमे दीयते हिरण्यमित्यत्र न भवति । "नह्यग्निष्टोमे हिरण्यङ्क्रीयत" इति भाष्ये स्पष्टम् ॥

इति तद्धिते प्राग्वतीये ठञधिकारे कालात् इत्यधिकारस्समाप्तः ।

अथ ठञ्विधिर्निरूप्यते—**व्युष्टादिभ्योऽण्** ॥ तत्र च दीयते कार्यमित्यनुवर्तते । दीयते कार्यं वेत्यर्थे सप्तम्यन्तेभ्यो व्युष्टादिभ्यः अण् स्यात् । ठञोऽपवादः । व्युष्टं प्रभातम् ।

१७६२। तेन यथाकथाचहस्ताभ्यां णयतौ। (५-१-९८)

यथाकथाचेत्यव्ययसङ्घातात्तृतीयान्ताद्धस्तशब्दाच्च यथासङ्ख्यं णयतौ स्तः। 'अर्थाभ्यां तु यथासङ्ख्यं नेष्यते' यथाकथाच दीयते कार्यं वा याथाकथाचम्। अनादरेण देयं कार्यं वेत्यर्थः। हस्तेन दीयते कार्यं वा हस्त्यम्।

१७६३। सम्पादिनि। (५-१-९९)

'तेन' इत्येव। कर्णवेष्टकाभ्यां सम्पादि कार्णवेष्टकिकं मुखम्। कर्णालङ्काराभ्यामवश्यं शोभते इत्यर्थः।

१७६४। कर्मवेषाद्यत्। (५-१-१००)

कर्मणा सम्पादि कर्मण्यं शौर्यम्। वेषेण सम्पादि वेष्यो नटः। वेषः कृत्रिम आकारः।

१७६५। तस्मै प्रभवति सन्तापादिभ्यः। (५-१-१०१)

सन्तापाय प्रभवति सान्तापिकः। साङ्ग्रामिकः।

१७६६। योगाद्यच्च। (५-१-१०२)

चाट्ठञ्। योगाय प्रभवति योग्यः—यौगिकः।

१७६७। कर्मण उकञ्। ५-१-१०३)

कर्मणे प्रभवति कार्मुकम्।

१७६८। समयस्तदस्य प्राप्तम्। (५-१-१०४)

समयः प्राप्तोऽस्य सामयिकम्।

वैयुष्टमिति ॥ अणि 'न य्वाभ्याम्' इत्यैच्। **तेन यथा** ॥ **अर्थाभ्यामिति** ॥ प्रकृत्योः प्रत्ययस्य च यथासङ्ख्यम्, नतु दीयते कार्यमित्यर्थयोरित्यर्थः। व्याख्यानादिति भावः। **सम्पादिनि** ॥ **तेनेत्येवेति** ॥ सम्पादः सम्पत्तिः शोभा अस्यास्तीति सम्पादी। तस्मिन्नर्थे तृतीयान्ताद्धगित्यर्थः। **कर्मवेषाद्यत्** ॥ तृतीयान्तात्कर्मन्शब्दात् वेषशब्दाच्च सम्पादिन्यर्थे यत्स्यादित्यर्थः। **तस्मै प्रभवति** ॥ चतुर्थ्यन्तेभ्यः सन्तापादिभ्यः प्रभवतीत्यर्थे ठञ् स्यादित्यर्थः। **सन्तापाय प्रभवतीति** ॥ शत्रूणाम्पीडायै शक्नोतीत्यर्थः। **योगाद्यच्च** ॥ चतुर्थ्यन्तात्प्रभवतीत्यर्थे इति शेषः। **कर्मण उकञ्** ॥ चतुर्थ्यन्तात्प्रभवतीत्यर्थे इति शेषः। **कार्मुकमिति** ॥ उकञि टिलोपः। **समयस्तदस्य** ॥ तदिति प्राप्तमिति च सामान्ये नपुंसकम्। समयः प्राप्तोऽस्येत्यर्थे प्रथमान्तात्समयशब्दात् ठञित्यर्थः। तदित्युत्तरार्थम्।

१७६९ । ऋतोरण् । (५-१-१०५)

ऋतुः प्राप्तोऽस्य आर्तवम् । ['उपवस्त्रादिभ्य उपसङ्ख्यानम्' । उपवस्ता प्राप्तोऽस्य औपवस्त्रम् । प्राशिता प्राप्तोऽस्य प्राशित्रम् ।]

१७७० । कालाद्यत् । (५-१-१०७)

कालः प्राप्तोऽस्य काल्यं शीतम् ।

१७७१ । प्रकृष्टे ठञ् । (५-१-१०८)

'कालात्' इत्येव । तदस्येति च । प्रकृष्टो दीर्घः कालोऽस्येति कालिकं वैरम् ।

१७७२ । प्रयोजनम् । (५-१-१०९)

'तदस्य' इत्येव । इन्द्रमहः प्रयोजनमस्य ऐन्द्रमहिकम् । प्रयोजनं फलं कारणं च ।

१७७३ । विशाखाषाढादण्मन्थदण्डयोः । (५-१-११०)

आभ्यामण्स्यात्प्रयोजनमित्यर्थे क्रमान्मन्थदण्डयोरर्थयोः । विशाखा प्रयोजनमस्य वैशाखो मन्थः । आषाढो दण्डः । 'चूडादिभ्य उपसङ्ख्यानम्' । चूडा—चौडम् । श्रद्धा—श्राद्धम् ।

ऋतोरण् ॥ प्राप्तमित्येव । प्राप्तोऽस्येत्यर्थे प्रथमान्तात् ऋतोरणित्यर्थः । **आर्तवमिति** ॥ अणि ओर्गुण', आदिवृद्धि', रपरत्वम् । **कालाद्यत्** ॥ तदस्य प्राप्तमित्येव । प्रथमान्तात्कालशब्दात् अस्य प्राप्त इत्यर्थे यादित्यर्थः । प्रातःकाले काल्यशब्दस्तु कल्यवदव्युत्पन्नप्रातिपदिकम् । कल्यमेव काल्यं वा । **प्रकृष्टे ठञ्** ॥ अस्य प्राप्त इत्यर्थे प्रकृष्टवृत्तेः कालशब्दात् ठञित्यर्थः । यतोऽपवादः । प्रकृष्टशब्दस्य विवरणं दीर्घ इति । **प्रयोजनम्** ॥ **तदस्येत्येवेति** ॥ अस्य प्रयोजनमित्यर्थे प्रथमान्ताट्ठञित्यर्थः । **इन्द्रमह इति** ॥ इन्द्रात्मव इत्यर्थः । "मह उद्धव उत्सवः" इत्यमरः । **प्रयोजनं फलं कारणञ्चेति** ॥ प्रयुज्यते प्रवृत्त्या निष्पाद्यते इति कर्मणि ल्युटि प्रयोजनशब्दः फलवाची प्रयुज्यते । प्रयुज्यते प्रवर्तते पुरुषोऽनेनेति करणे ल्युटि प्रयोजनशब्दः प्रवर्तकवाचीत्यर्थः । **विशाखाषाढात्** ॥ विशाखाशब्दात् आषाढशब्दाच्च प्रथमान्तात् अस्य प्रयोजनमित्यर्थे अण् स्यात् । समुदायेन मन्थे दण्डे च क्रमात् गम्ये सर्तात्यर्थः । तदाह । **आभ्यामिति** ॥ स्थूणामेकान्निखाय तस्यां रज्जुद्वयमधरोत्तरमासज्य तयोः रज्वोर्मन्थनदण्डम् ऊर्ध्वमासज्यते । न रज्वा भ्रामितेन दधि विलोड्यते इति स्थितिः । तत्र स्थूणा मन्थ इत्युच्यते । मन्थानाख्यदण्डो दण्ड उच्यते । अनयोः वैशाखशब्दः आषाढशब्दश्च रूढौ तत्रावयवार्थाभिनिवेशो न कर्तव्यः । **चूडादिभ्य इति** ॥ चूडादिभ्यः प्रथमान्तेभ्यः अस्य प्रयोजनमित्यर्थे अणित्यर्थः ।

१७७४। अनुप्रवचनादिभ्यश्छः। (५-१-१११)

अनुप्रवचनं प्रयोजनमस्य अनुप्रवचनीयम्।

१७७५। समापनात्सपूर्वपदात्। (५-१-११२)

व्याकरणसमापनं प्रयोजनमस्य व्याकरणसमापनीयः।

१७७६। ऐकागारिकट् चौरे। (५-१-११३)

एकमसहायमगारं प्रयोजनमस्य मुमुषिषोः स ऐकागारिकश्चौरः।

१७७७। आकालिकडाद्यन्तवचने। (५-१-११४)

समानकालावाद्यन्तौ यस्येत्याकालिकः। समानकालस्याकाल आदेशः। आशु विनाशीत्यर्थः। पूर्वदिने मध्याह्नादावुत्पद्य दिनान्तरे तत्रैव नश्वर इति वा। 'आकालाट्टंश्च' (वा ३०७८)। आकालिका विद्युत्।

इति तद्धिते प्राग्वतीयस्य ठञः पूर्णोऽवधिः।

चौडमिति ॥ चूडा प्रयोजनमस्येति विग्रहः। डलयोरभेदाच्चौळमित्यपि। **श्रद्धा, श्राद्धमिति** ॥ श्रद्धा प्रयोजनमस्येति विग्रहः। श्रद्धाशब्दादपि श्राद्धमित्यर्थः। अत्र प्रयोजनशब्दः कारणवाची। श्राद्धहेतुकमिति यावत्। **अनुप्रवचनादिभ्यश्छः** ॥ प्रथमान्तादनुप्रवचनशब्दादस्य प्रयोजनमित्यर्थे छः स्यादित्यर्थः। अनुप्रवचनं नाम उपनयनाङ्गं किञ्चित्कर्म आश्वलायनसूत्रे प्रसिद्धम्। **समापनात्सपूर्वपदात्** ॥ सपूर्वपदात्समापनशब्दात् अस्य प्रयोजनमित्यर्थे छः स्यादित्यर्थः। **व्याकरणसमापनीय इति** ॥ मङ्गळाचार इति शेषः। **ऐकागारिकट् चौरे** ॥ एकमगारं प्रयोजनं प्रयोजकमस्य चोरस्येति विग्रहे एकागारशब्दादिकट्प्रत्यये ऐकागारिकट् इति निपात्यते। टित्त्वं ङीबर्थं प्रयोजनमित्येव सिद्धे चोर एवेति नियमार्थम् सूत्रम्। एकमित्यस्य विवरणम्। असहायमिति "एकं मुख्यान्यकेवलाः" इत्यमरः। **मुमुषिषोरिति** ॥ चौर्यङ्कर्तुमिच्छोरित्यर्थः। चोरस्य हि असहायमगारमिष्टं गेहान्तरसत्त्वे चौर्यप्रकटनप्रसङ्गादिति भावः। चोरे किम्। एकागारं प्रयोजनमस्य भिक्षोरिति वाक्यमेव। भाष्ये तु 'एकागाराच्चोरे' इत्येव सूत्रम्। प्रकृतत्वाट्टञ् सिद्ध इत्युक्तम्। **आकालिकट्** ॥ समानकालाविति बहुव्रीहिः। **आद्यन्ताविति** ॥ उत्पत्तिविनाशावित्यर्थः। **समानकालस्येति** ॥ समानकालशब्दस्य इकप्रत्यये परे आकालादेशो निपात्यते इत्यर्थः। ननु उत्पत्तिविनाशयोरेककालिकत्वमसम्भवपराहतमित्यत आह। **आशु विनाशीति** ॥ लक्षणां विनैव आह। **पूर्वदिने इति** ॥ **आकालाट्टंश्चेति** ॥ आकालशब्दादाद्यन्तवचनाट्टन्प्रत्ययश्च वक्तव्य इत्यर्थः। चात् ठञ्। **आकालिका विद्युदिति** ॥ ठनि टाप्। ठञि तु ङीप्। आकालिकी। अर्थः प्राग्वत् ॥

इति तद्धिते प्राग्वतीयस्य ठञः पूर्णोऽवधिः।

अथ तद्धितनञ्स्नञधिकारप्रकरणम् ।

१७७८ । तेन तुल्यं क्रिया चेद्वतिः । (५-१-११५)

ब्राह्मणेन तुल्यं ब्राह्मणवदधीते । 'क्रिया चेत्' इति किम् । गुणतुल्ये मा भूत् । पुत्रेण तुल्यः स्थूलः ।

१७७९ । तत्र तस्येव । (५-१-११६)

मधुरायामिव मधुरावत्सुघ्ने प्राकारः । चैत्रस्येव चैत्रवन्मैत्रस्य भावः ।

१७८० । तदर्हम् । (५-१-११७)

विधिमर्हति विधिवत्पूज्यते । क्रियाग्रहणं मण्डूकप्लुत्या अनुवर्तते । तेनेह न । राजानमर्हति छत्रम् ।

१७८१ । तस्य भावस्त्वतलौ । (५-१-११९)

अथ नञ्स्नञधिकारो निरूप्यते—**तेन तुल्यं क्रिया चेद्वतिः** ॥ तुल्यमिति क्रियेत्यस्य विशेषणम् । सामान्याभिप्रायन्नपुंसकम् । तृतीयान्तात्तुल्यमित्यर्थे वतिप्रत्ययः स्यात् । यत्तुल्यं सा चेत् क्रियेत्यर्थः । तुल्या क्रियेत्यर्थे वतिः स्यादिति यावत् । **ब्राह्मणेन तुल्यं ब्राह्मणवदधीते इति** ॥ अत्र ब्राह्मणवदित्युदाहरणम् । ब्राह्मणेन तुल्यमधीते इति विग्रहवाक्यम् । अत्र ब्राह्मणशब्देन ब्राह्मणकर्तृकाध्ययनं लक्ष्यते । ब्राह्मणकर्तृकाध्ययनतुल्यं क्षत्रियकर्तृकाध्ययनमिति बोधः । **गुणतुल्ये इति** ॥ द्रव्यतुल्येऽपीति बोध्यम् । तेन चैत्रेण तुल्यो धनी देवदत्तः इत्यादौ न भवति । 'अयमेव न तद्वत्' इत्यादौ वतेस्साधुत्वार्थम् आहेति क्रियापदं प्रयुञ्जते वृद्धाः । **तत्र तस्येव** ॥ तत्रेति तस्येति चार्थे सप्तम्यन्तात् षष्ठ्यन्ताच्च वतिः स्यादित्यर्थः । अत्र तृतीयान्तार्थ आरम्भः । अस्मादेव निर्देशादिवशब्दयोगे षष्ठ्यर्थे सप्तम्यपीति भाष्यम् । अत्र क्रिया चेति नानुवर्तते इत्यभिप्रेत्योदाहरति । **मधुरायामिव मधुरावत्सुघ्ने प्राकार इति** ॥ अत्र मधुरायामिवेति नाधिकरणसप्तमी । तथासति विद्यमानेति क्रियापदसापेक्षतया असामर्थ्यात् । अत एव अस्मादेव सूत्रानिर्देशादिवशब्दयोगे षष्ठ्यर्थे सप्तमीभाष्य सङ्गच्छते । मधुरासम्बन्धिप्राकारनिर्देशः सुघ्नस्य प्राकार इति बोधः । **मैत्रस्य भाव इति** ॥ वृतमित्यर्थः । **तदर्हम्** ॥ अर्हतीत्यर्हम् । पचाद्यच् । तदिति कर्मणि द्वितीयान्तम् । लब्धुं योग्यं भवतीत्यर्थात् कृत्यैगलक्षणषष्ठ्यभावस्त्वार्षः । वतिरित्यनुवर्तते । द्वितीयान्तादर्हतीत्यर्थे वतिः स्यादित्यर्थः । **विधिमर्हतीति** ॥ विधिं लब्धुं योग्यं भवतीत्यर्थः । **विधिवत्पूज्यते इति** ॥ हरिरिति शेषः । विधिं लब्धुं योग्यं हरिपूजनमित्यर्थः । विहितं प्रकारमनतिक्रान्तमिति यावत् । **मण्डूकप्लुत्येति** ॥ पूर्वसूत्रे अननुवृत्तेरिति भावः । **तस्य भावः** ॥ षष्ठ्यन्ताद्भाव इत्यर्थे त्वतलौ स्त इत्यर्थः । भावशब्दस्य

प्रकृतिजन्यबोधे प्रकारो भावः। गोर्भावो गोत्वम्। गोता। 'त्वान्तं क्लीबम्' (लि १२०)। 'तलन्तं स्त्रियाम्' (लि १७)।

१७८२। आ च त्वात्। (५-१-१२०)

ब्रह्मणस्त्व इत्यतः प्राक्त्वतलावधिक्रियेते। अपवादैः सह समावेशार्थं, गुणवचनादिभ्यः कर्मणि विधानार्थं चेदम्। चकारो नञ्स्नञ्भ्यामपि समावेशार्थः। स्त्रिया भावः स्त्रैणम्—स्त्रीत्वम्—स्त्रीता। पौंस्नम्—पुंस्त्वम्—पुंस्ता।

१७८३। न नञ्पूर्वात्तत्पुरुषादचतुरसङ्गतलवण-वट्युधकतरसलसेभ्यः। (५-१-१२१)

अभिप्रायादावपि वृत्तेराह। **प्रकृतिजन्यबोधे प्रकारो भाव इति** ॥ त्वतल्प्रत्ययौ यत उत्पत्स्येते तस्मात्प्रकृतिभूतशब्दात् व्यक्तिबोधे जायमाने यत् जात्यादिकं विशेषणतया भासते तद्व्यक्तिविशेषणम्भावशब्देन विवक्षितमित्यर्थः। यथा गोशब्दाद्धि व्यक्तिबोधे जायमाने गोत्वं विशेषणत्वेन भासते। गोशब्दस्य गोत्ववतीषु व्यक्तिषु गोत्वे वा शक्तिग्रहणात्। न हि गोत्वं विहाय गोव्यक्तिषु गोशब्दस्य शक्तिग्रहः सम्भवति। अतीतानागतानां वर्तमानानाञ्चानन्तत्वेन युगपदुपस्थित्यसम्भवात्। गोशब्दात् प्राणित्वपशुत्वादिरूपेणापि गोव्यक्तिप्रतीत्यापत्तेश्च। ततश्च सर्वासु गोव्यक्तिष्वनुगतं तदितरव्यक्तिभ्यो व्यावृत्तङ्किञ्चिद्धर्मविशेषं शक्यतावच्छेदकं पुरस्कृत्य गोशब्दः प्रवर्तत इति सिद्धान्तः। एवङ्गटादिशब्दा अपि घटत्वादितत्तद्धर्मं पुरस्कृत्य प्रवर्तन्ते। तदिदं शब्दप्रवृत्तिनिमित्तं भावशब्देन विवक्षितमिति भाष्यकैयटयोः स्थितम्। **गोर्भाव इति** ॥ गोशब्दस्य प्रवृत्तिनिमित्तमिति बोधः। 'त्वान्तं क्लीबं तलन्तं स्त्रियाम्' इति लिङ्गानुशासनसूत्रसिद्धम्। **आ च त्वात्** ॥ त्वतलावित्यनुवर्तते। आङ्मर्यादायाम्। तदाह। **ब्रह्मणस्त्व इत्यतः प्रागिति** ॥ ननु 'तस्य भावस्त्वतलौ' इत्यतः त्वतलोरुत्तरसूत्रेष्वनुवृत्त्यैव सिद्धेरधिकारोऽयं व्यर्थ इत्यत आह। **अपवादैरिति** ॥ 'पृथ्वादिभ्य इमनिज्वा' इत्यादिविहितैरिमनिजादिभिरपवादैः समुच्चयार्थमित्यर्थः। असति त्वतस्मिन्नधिकारसूत्रे उत्तरत्र इमनिजादिविधिषु त्वतलोरनुपस्थितिः स्यात्। प्रत्यक्षनिर्दिष्टैरिमनिजादिविशेषैः शान्ताकाङ्क्षत्वात्। अन्यथा 'प्राग्दीव्यतोऽण्' इत्यधिकृतस्य अणः 'अत इञ्' इत्यादावपि प्रवृत्तिः स्यादिति भावः। प्रयोजनान्तरमाह। **गुणवचनादिभ्य इति** ॥ अन्यथा भावेऽर्थे सावकाशयोस्त्वतलोः कर्मण्यर्थे गुणवचनादिभ्यो विशेषविहितेन ष्यञा बाधप्रसङ्ग इति भावः। नन्वेवमपि आत्वादित्येवास्तु, स्वरितत्वादेव पूर्वसूत्रादिह त्वतलोरनुवृत्तिसिद्धेस्तदनुकर्षार्थश्चकारो व्यर्थ इत्यत आह। **चकार इति** ॥ अन्यथा त्वतलौ स्त्रीपुंसाभ्यां न स्याताम्। अन्यत्र तयोः सावकाशत्वादिति भावः। **पौंस्नमिति** ॥ संयोगान्तलोपे 'पुमः खय्यम्परे' इति रुत्वम्। पाक्षिकानुनासिकानुस्वारौ, विसर्गे कृते सत्वम्। एवं पुंस्त्वम्। तत्र 'हस्वात्तादौ' इति षत्वन्तु न भवति। सवनादिषु पाठात्। **न नञ्पूर्वात्** ॥ **इतः परमिति** ॥ त्वतल्विधेरूर्ध्वमित्यर्थः। नञ्पूर्वात्

इतः परं ये भावप्रत्ययास्ते नञ्तत्पुरुषान्न स्युश्चतुरादीन्वर्जयित्वा । अपतित्वम् । अपटुत्वम् । 'नञ्पूर्वात्' किम् । बार्हस्पत्यम् । 'तत्पुरुषात्' किम् । नास्य पटवः सन्तीत्यपटुः तस्य भावः आपटवम् । 'अचतुर–' इति किम् । आचतुर्यम् । आसङ्गत्यम् । आलवण्यम् । आवट्यम् । आयुध्यम् । आकत्यम् । आरस्यम् । आलस्यम् ।

१७८४ । पृथ्वादिभ्य इमनिज्वा । (५-१-१२२)

वावचनमणादिसमावेशार्थम् ।

१७८५ । र ऋतो हलादेर्लघोः । (६-४-१६१)

हलादेर्लघोर्ऋकारस्य रः स्यात् इष्ठेमेयस्सु ।

१७८६ । टेः । (६-४-१५५)

इत्युत्तरस्य प्रतिषेध इति भाष्यादिति भावः । **चतुरादीनिति** ॥ चतुर, सङ्गत, लवण, वट, बुध, कत, रस, लस, एतान् वर्जयित्वेत्यर्थः । **अपतित्वमिति** ॥ इह 'पत्यन्तपुरोहितादिभ्यः' इति यक् न भवति । **अपटुत्वमिति** ॥ इह 'इगन्ताच्च लघुपूर्वात्' इत्यण् न भवति । **बार्हस्पत्यमिति** ॥ 'पत्यन्तपुरोहितादिभ्यः' इति यक् । **आपटवमिति** ॥ 'इगन्ताच्च लघुपूर्वात्' इत्यण् । अपटुशब्दस्य बहुव्रीहित्वात्तत्पुरुषत्वाभावान्नास्याणो निषेध इति भावः । **आचतुर्यमिति** ॥ अचतुरस्य भावः ब्राह्मणादित्वात्ष्यञ् । **आसङ्गत्यमिति** ॥ असङ्गतशब्दात् ष्यञ् । **आलवण्यमिति** ॥ अलवणशब्दात् ष्यञ् । **आवट्यमिति** ॥ न वटः अवटः तस्मात् ष्यञ् । **आयुध्यमिति** ॥ अयुधशब्दात् ष्यञ् । **आकत्यमिति** ॥ अकतशब्दात् ष्यञ् । **आरस्यमिति** ॥ अरसशब्दात् ष्यञ् । **आलस्यमिति** ॥ लसतिः लसः न लसः अलसः तस्मात् ष्यञ् । **पृथ्वादिभ्य इमनिज्वा** ॥ तस्य भावः इत्यनुवर्तते । पृथ्वादिभ्यः षष्ठ्यन्तेभ्यः भावे इमनिज् वा स्यादित्यर्थः । ननु वाग्रहणं व्यर्थम् । 'समर्थानाम्प्रथमाद्वा' इति महाविभाषयैव वाक्यस्य सिद्धत्वात् । नच इमनिजभावे त्वतलप्रत्ययार्थं वाग्रहणमिति वाच्यम् । आचत्वादित्येव तत्समावेशसिद्धेरित्यत आह । **वावचनमणादिसमावेशार्थमिति** ॥ पृथुमृदुप्रभृतिषु 'इगन्ताच्च लघुपूर्वात्' इत्यण् । चण्डखण्डादिषु गुणवचनलक्षणष्यञः बालवत्सादिषु वयोवचनलक्षणस्य अञश्च औत्सर्गिकस्य समावेशार्थमित्यर्थः । अन्यथा महाविभाषावशादपवादेन मुक्ते पुनरुत्सर्गो न प्रवर्तते' इति 'पारे मध्ये षष्ठ्या वा' इति सूत्रभाष्ये सिद्धान्ततत्वादिमनिच् त्वतलाभावे तेषां प्रवृत्तिर्न स्यादिति भावः । **र ऋतो हलादेः** ॥ र इति प्रथमान्तम् इष्ठेमेयस्सिवति शेषपूरणम् । 'तुरिष्ठेमेयस्सु' इत्यतः तदनुवृत्तेरिति भावः । अङ्गस्येत्यधिकृतं हलादेरङ्गस्य लघोः ऋकारस्य र इति रेफाकारसङ्घात आदेशः स्यात् । इष्ठनि इमनि ईयसि च परे इत्यर्थः । **टेः** ॥ इष्ठेमेयस्सु

भस्य टेर्लोपः स्यादिष्ठेमेयस्सु। पृथोर्भावः प्रथिमा—पार्थवम्। म्रदिमा—मार्दवम्।

१७८७। वर्णदृढादिभ्यः ष्यञ्च। (५-१-१२३)

चादिमनिच्। शौक्ल्यम्—शुक्लिमा। दार्ढ्यम्। 'पृथुमृदुभृशकृशदृढपरिबृढानामेव रत्वम्' (वा ४२११)। द्रढिमा। षो ङीषर्थः। औचिती। यथाकामी।

१७८८। गुणवचनब्राह्मणादिभ्यः कर्मणि च। (५-१-१२४)

चाद्भावे। जडस्य कर्म भावो वा जाड्यम्। मूढस्य भावः कर्म वा मौढ्यम्। ब्राह्मण्यम्। 'अर्हतो नुम्च—' (वा ३०९२)। अर्हतो भावः कर्म वा आर्हन्त्यम्। आर्हन्ती। ब्राह्मणादिराकृतिगणः।

इत्यनुवर्तते। 'अल्लोपोऽनः' इत्यतः लोप इति च। तदाह। **टेर्लोपः स्यादिष्ठेमेयस्स्विति** ॥ **प्रथिमेति** ॥ पृथुशब्दादिमनिच्, चकार इत्, नकारादिकार उच्चारणार्थः। ऋकारस्य रः, उकारस्य गुणम्वाधित्वा टेर्लोपः। **पार्थवमिति** ॥ इमनिजभावे 'इगन्ताच्च लघुपूर्वात्' इत्यण्। **म्रदिमेति** ॥ मृदुशब्दादिमनिचि ऋकारस्य रः, 'टेः' इति टिलोपश्च। **मार्दवमिति** ॥ 'इगन्ताच्च' इत्यण्। **वर्णदृढादिभ्यः ष्यञ्च** ॥ षष्ठ्यन्तेभ्यो वर्णवाचिभ्यो दृढादिभ्यश्च भावे ष्यञ् च स्यादित्यर्थः। गुणवचनत्वादेव ष्यञि सिद्धे इमनिच्समुच्चायार्थं वचनम्। "पृथुं मृदुं भृशञ्चैव कृशञ्च दृढमेव च। परिपूर्वम्बृढञ्चैव षडेतान् रविधौ स्मरेत्" इति वार्तिकमर्थतः सङ्गृह्णाति। **पृथुमृदुभृशेत्यादि** ॥ तेन कृतयतीत्यादाविष्ठवत्त्वेऽपि रभावो न। **द्रढिमेति** ॥ दृढशब्दादिमनिचि ऋकारस्य रः। भ्रशिमा क्रशिमा द्रढिमा परिव्रढिमा। ननु वर्णदृढादीनां लोकतो नपुंसकत्वात् ष्यञष्णित्त्वस्य किम्प्रयोजनमित्यत आह। **षो ङीषर्थ इति** ॥ **औचितीति** ॥ उचितशब्दात्ब्राह्मणादित्वात् ष्यञि लोकात् स्त्रीत्वम्। षित्त्वात् ङीषि 'हलस्तद्धितस्य' इति यलोपः। उचितस्तु न दृढादिः। तद्गणे अदर्शनात् इमनिच्प्रसङ्गाच्च। अस्यैव ष्यञ्। उत्तरसूत्रे अनुवृत्तेरिहैव तस्य षित्त्वप्रयोजनकथनमिति बोध्यम्। **याथाकामीति** ॥ काममनतिक्रम्य यथाकामम्। ततः स्वार्थे चतुर्वर्णादित्वात् ष्यञि लोकात् स्त्रीत्वे षित्त्वात् ङीष्। **गुणवचन** ॥ गुणोपसर्जनद्रव्यवाचिभ्यो ब्राह्मणादिभ्यश्च षष्ठ्यन्तेभ्यो भावे कर्मणि च अर्थे ष्यञित्यर्थः। **अर्हतो नुम्चेति** ॥ वार्तिकमिदम्। 'अर्हः प्रशंसायाम्' इति सूत्रेण शतरि अर्हच्छब्दः पूज्यवाचीति कैयटः। अर्हच्छब्दात् ष्यञ् स्यात्प्रकृतेर्नुं चेत्यर्थः। मित्त्वादन्त्यादचः परः। अनुस्वारपरसवर्णौ। लोकात् पुंस्त्वं स्त्रीत्वञ्च। तदाह। **आर्हन्त्यमार्हन्तीति** ॥ आर्हन्त्यशब्दात् ङीषि 'हलस्तद्धितस्य' इति यलोपः। यथातथेति निपातसमुदायः। यथापुरमिति पुराशब्देन पदार्थानतिवृत्तावव्ययीभावः। इमौ शब्दौ नञ्पूर्वपदौ ब्राह्मणादी

१७८९ । यथातथायथापुरयोः पर्यायेण । (७-३-३१)

नञः परयोरेतयोः पूर्वोत्तरपदयोः पर्यायेणादेरचो वृद्धिर्ष्यिदादौ । अयथातथाभावः आयथातथ्यम्—अयाथातथ्यम् । आयथापुर्यम्—अयाथापुर्यम् । आपादसमाप्तेर्भावकर्माधिकारः । 'चतुर्वर्णादीनां स्वार्थे उपसङ्ख्यानम्' (वा ३०९१) । चत्वारो वर्णाश्चातुर्वर्ण्यम् । चातुराश्रम्यम् । त्रैस्वर्यम् । षाङ्गुण्यम् सैन्यम् । सान्निध्यम् । सामीप्यम् । औपम्यम् । त्रैलोक्यम् इत्यादि । सर्वे वेदाः सर्ववेदास्तानधीते सर्ववेदः । 'सर्वादेः—' (वा २७४८) इति लुक् । स एव सार्ववैद्यः । 'चतुर्वेदस्योभयपदवृद्धिश्च' (ग सू ९३) । चतुरो वेदानधीते चतुर्वेदः । स एव चातुर्वैद्यः । 'चतुर्विद्यस्य' इति पाठान्तरम् । चतुर्विद्य एव चातुर्वैद्यः ।

१७९० । स्तेनाद्यन्नलोपश्च । (५-१-१२५)

'न' इति सङ्घातग्रहणम् । 'स्तेन चौर्ये' पचाद्यच् । स्तेनस्य भावः कर्म वा स्तेयम् । 'स्तेनात्' इति योगं विभज्य स्तैन्यमिति ष्यञन्तमपि केचिदिच्छन्ति ।

तयोः ष्यञि आदिवृद्धौ विशेषमाह । **यथातथायथापुरयोः पर्यायेण** ॥ आदिवृद्धि-प्रकरणे उत्तरपदस्य पूर्वस्य चेत्यधिकारे इदं सूत्रम् । 'नञः शुचि' इत्यतो नञ इत्यनुवर्तते । तदाह । **नञः परयोरेतयोरिति** ॥ यथातथा यथापुरः इत्यनयोरित्यर्थः । **पर्यायेणेति** ॥ कदाचित्पूर्वपदस्य कदाचिदुत्तरपदस्येत्यर्थः । **आयथातथ्यमिति** ॥ यथातथेति निपातनात् ष्यञि पूर्वपदस्यादिवृद्धिः । **अयाथातथ्यमिति** ॥ उत्तरपदस्यादिवृद्धिः । **आयथापुर्यमिति** ॥ यथापुरशब्दात् ष्यञि पूर्वपदस्यादिवृद्धिः । **अयाथापुर्यमिति** ॥ उत्तरपदस्यादिवृद्धिः । **आपादसमाप्तेरिति** ॥ अत्र व्याख्यानमेव शरणम् । **चतुर्वर्णादीनामिति** ॥ चतुर्वर्णादिभ्यः स्वार्थे ष्यञ उपसङ्ख्यानमित्यर्थः । **सर्ववेदा इति** ॥ 'पूर्वकाल' इति समासः । **लुगिति** ॥ अध्यतृप्रत्ययस्येति शेषः । **स एव सार्ववैद्य इति** ॥ सर्ववेदशब्दात् स्वार्थे ष्यञिति भावः । **चतुर्वेदस्येति** ॥ वार्तिकमिदम् । ष्यञिति शेषः । **चतुर्वेद इति** ॥ 'तद्धितार्थ' इति द्विगुः । ततोऽध्येतृप्रत्ययस्याणो 'द्विगोर्लुगनपत्ये' इति लुक् । **चतुर्विद्यस्येतीति** ॥ 'चतुर्वेदस्योभयपदवृद्धिश्च' इति वार्तिके चतुर्वेदस्येत्यस्य स्थाने चतुर्विद्यस्येति केचित्पठन्तीत्यर्थः । चतस्रो विद्याः अधीते इत्यर्थे 'तद्धितार्थ' इति द्विगौ 'विद्यालक्षण-कल्पान्ताच्च' इति इकणि 'द्विगोर्लुगनपत्ये' इति तस्य लुकि चतुर्विद्यशब्दात् स्वार्थे ष्यञि उभय पदवृद्धौ चातुर्वैद्यः इति रूपमिति भावः । **स्तेनाद्यन्नलोपश्च** ॥ यदिति च्छेदः । स्तेनशब्दात् षष्ठ्यन्तात् भावे कर्मणि चार्थे यत्स्यादित्यर्थः । **नेति सङ्घातग्रहणमिति** ॥ नलोपश्चेत्यत्र नेत्यकार उच्चारणार्थो न भवति । किन्तु नकाराकारसङ्घातग्रहणमित्यर्थः । **स्तेयमिति** ॥ स्तेनशब्दात् यत्प्रत्यये सति नेति सङ्घातस्य लोप इति भावः । नच नकारमात्रलोपेऽपि

१७९१। सख्युर्यः। (५-१-१२६)

सख्युर्भावः कर्म वा सख्यम् 'दूतवणिग्भ्यां च'। दूतस्य भावः कर्म वा दूत्यम्। 'वणिज्यम्—' इति काशिका। माधवस्तु 'वणिज्याशब्दः स्वभावात्स्त्रीलिङ्गः। भाव एव चात्र प्रत्ययो न तु कर्मणि' इत्याह। भाष्ये तु 'दूतवणिग्भ्यां च' इति नास्त्येव। ब्राह्मणादित्वाद्वाणिज्यमपि।

१७९२। कपिज्ञात्योर्ढक्। (५-१-१२७)

कापेयम्। ज्ञातेयम्।

१७९३। पत्यन्तपुरोहितादिभ्यो यक्। (५-१-१२८)

सैनापत्यम्। पौरोहित्यम्। 'राजासे' (ग सू १०६)। राजन्शब्दोऽसमासे यकं लभते इत्यर्थः। राज्ञो भावः कर्म वा राज्यम्। समासे तु ब्राह्मणादित्वात्ष्यञ्। आधिराज्यम्।

'यस्येति च' इत्यकारलोपात् स्तेयमिति सिध्यतीति वाच्यम्। 'अचःपरस्मिन्' इत्यकारलोपस्य स्थानिवत्त्वेन तमाश्रित्य एकारस्य अयादेशप्रसङ्गात्। नच सङ्घातग्रहणेऽपि 'अलोऽन्त्यस्य' इत्यकारस्यैव लोपः स्यादिति शङ्क्यम्। 'यस्येति च' इत्येव अकारस्यैव लोपसिद्धाविह नलोपविधिर्वैयर्थ्यात्, 'नानर्थकेऽलोऽन्त्यविधिः' इति निषेधाच्च। **योगं विभज्येति** ॥ स्तेनादिति पृथक् सूत्रम्। ष्यञित्यनुवर्तते। स्तेनशब्दाद्भावे कर्मणि च ष्यञित्यर्थः। समासकृदन्ततद्धितान्ताव्ययसर्वनामजातिसङ्ख्यासंज्ञाशब्दभिन्नमर्थवच्छब्दरूपं गुणवचनसंज्ञकं भवतीति आकडारसूत्रभाष्यरीत्या स्तेनशब्दस्य पचाद्यजन्तस्य कृदन्तस्य गुणवचनत्वाभावादप्राप्ताविदं वचनम्। अव्युत्पन्नप्रातिपदिकतया गुणवचनत्वेऽपि यत्प्रत्ययेनापवादेन पक्षे समावेशार्थं वचनम्। ततो 'यञलोपश्च' इति योगान्तरम्। स्तेनात् इत्यनुवृत्तावुक्तोऽर्थः। **केचिदिति** ॥ भाष्यदृष्टत्वात् योगविभागोऽयमप्रामाणिकः इति भावः। **सख्युर्यः** ॥ सखिशब्दात् षष्ठ्यन्तात् भावकर्मणोः यः स्यादित्यर्थः। **दूतवणिग्भ्याञ्चेति** ॥ वार्तिकमिदम्। आभ्यामपि षष्ठ्यन्ताभ्यामभावकर्मणोः यत्स्यादिति वक्तव्यमित्यर्थः। **नास्त्येवेति** ॥ वार्तिकत्वे तस्य भाष्ये पाठावश्यकत्वात् पाठस्य चाभावादप्रामाणिकमेवेदं वृत्तिपठितं वार्तिकमिति भावः। तर्हि दूतवणिग्भ्यामभावकर्मणोः कथं यत्प्रत्यय इत्याशङ्क्य नास्त्येव यत्प्रत्ययः, किन्तु ष्यञेवेत्याह। **ब्राह्मणादित्वाद्वाणिज्यमपीति** ॥ अपिना दौत्यसङ्ग्रहः। **कपिज्ञात्योर्ढक्** ॥ पञ्चम्यर्थे षष्ठी। आभ्यां षष्ठ्यन्ताभ्यामभावकर्मणोः ढगित्यर्थः। अत्र कपिज्ञात्योः भावकर्मणोश्च न यथासङ्ख्यं, व्याख्यानात्। **पत्यन्त** ॥ पत्यन्तेभ्यः पुरोहितादिभ्यश्च षष्ठ्यन्तेभ्यो भावकर्मणोर्यक् स्यादित्यर्थः। **राजासे इति** ॥ पुरोहितादिगणसूत्रमिदम्। राजा असे इति च्छेदः। स इति समासस्य प्राचां संज्ञा। तदाह। **राजन्शब्द इति** ॥ **राज्यमिति** ॥ यकि टिलोपः। 'ये चाभावकर्मणोः' इति

१७९४ । प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् । (५-१-१२९)

प्राणभृज्जाति आश्वम् । औष्ट्रम् । वयोवचनं कौमारम् । कैशोरम् । औद्गात्रम् । औन्नेत्रम् । सौष्ठवम् । दौष्ठवम् ।

१७९५ । हायनान्तयुवादिभ्योऽण् । (५-१-१३०)

द्वैहायनम् । त्रैहायनम् । यौवनम् । स्थाविरम् । 'श्रोत्रियस्य यलोपश्च' (वा ३०९३) । श्रौत्रम् । कुशलचपलनिपुणपिशुनकुतूहलक्षेत्रज्ञाः युवादिषु ब्राह्मणादिषु च पठ्यन्ते । कौशल्यम—कौशलमित्यादि ।

१७९६ । इगन्ताच्च लघुपूर्वात् । (५-१-१३१)

शुचेर्भावः कर्म वा शौचम । मौनम । कथं काव्यम् । कविशब्दस्य ब्राह्मणादित्वात्ष्यञ् ।

१७९७ । योपधाद्गुरूपोत्तमाद्वुञ् । (५-१-१३२)

प्रकृतिभावस्तु न । अभावकर्मणोरिति पर्युदासात् । **समासे त्विति** ॥ अधिको राजा अधिराजः प्रादिसमासः । असे इति पर्युदासाद्यगभावे ब्राह्मणादित्वात् ष्यञि आधिराज्यमिति रूपमित्यर्थः । यकृच्यञोः स्वरे विशेषः । **प्राणभृज्जाति** ॥ प्राणभृतः—प्राणिनः, तज्जातिवाचिभ्यो वयोविशेषवाचिभ्य उद्गात्रादिभ्यश्च षष्ठ्यन्तेभ्यः भावकर्मणोः अञित्यर्थः । **प्राणभृज्जातीति** ॥ उदाहरणसूचनम् । एवं वयोवचनेति । **हायनान्त** ॥ हायनान्तेभ्यः षष्ठ्यन्तेभ्यः भावकर्मणोः अण् स्यादित्यर्थः । **द्वैहायनमिति** ॥ द्विहायनस्य भावः कर्म वेति विग्रहः । वयोवचनलक्षणस्य अञोऽपवादः । एवं त्रैहायनमपि । **यौवनमिति** ॥ अनिति प्रकृतिभावान्न टिलोपः । **श्रोत्रियस्येति** ॥ वार्तिकमिदम् । श्रोत्रियशब्दात् षष्ठ्यन्तात् भावकर्मणोः अण्, प्रकृतेर्यलोपश्चेत्यर्थः । येति सङ्घातग्रहणम् । **श्रौत्रमिति** ॥ छन्दोऽधीते इत्यर्थे छन्दश्शब्दात् घप्रत्यये तस्य इयादेशे प्रकृतेश्रौत्र इत्यादेशे 'यस्येति च' इत्यत्रोपे श्रोत्रियशब्दः । श्रोत्रियस्य भावः कर्म वेत्यर्थे श्रोत्रियशब्दादणि यकाराकारसङ्घातस्य लोपे रेफादिकारस्य 'यस्येति च' इति लोपे श्रौत्रमिति रूपम् । यकारादकारस्य 'यस्येति च' इति लोपे सति यकारमात्रस्यानेन लोपे तु रेफादिकारस्य यण् स्यात् । नच तस्य 'यस्येति च' इति लोपः शङ्क्यः । लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिरिति न्यायात् । अकारलोपस्य स्थानिवत्त्वेन इकारान्तस्य भत्वाभावाच्च, 'श्रोत्रियस्य यलोपश्च' इत्येके पठन्ति । **इगन्ताच्च** ॥ लघुः पूर्वोऽवयवो यस्येति विग्रहः । पूर्वत्वञ्च इगवधिकमेव गृह्यते, व्याख्यानात् । तथा च लघुपूर्वो य इक् तदन्तात्प्रातिपदिकात् षष्ठ्यन्ताद्भावकर्मणोरण् स्यादित्यर्थः । गुणवचनेत्यादेरपवादः । **कथङ्काव्यमिति** ॥ कविशब्दस्य लघुपूर्वेगन्तत्वात् 'गुणवचन' इति ष्यञ्बाधित्वा अण्प्रसङ्गात् काव्यमिति कथमित्याक्षेपः । समाधत्ते । **कविशब्दस्येति** ॥ ब्राह्मणादित्वादित्यनन्तरं ष्यञि उपपाद्यमिति शेषः । **योपधात्** ॥ योपधात् गुरूपोत्तमात्

रामणीयकम्। आभिधानीयकम्। 'सहायाद्वा' (वा ३०९४)। साहाय्यम्-साहायकम्।

१७९८। द्वन्द्वमनोज्ञादिभ्यश्च। (५-१-१३३)

शैष्योपाध्यायिका। मानोज्ञकम्।

१७९९। गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु। (५-१-१३४)

अत्याकारोऽधिक्षेपः। तदवेतः ते गोत्रचरणयोर्भावकर्मणी प्राप्तः। अवगतवान्वा। गार्गिकया श्लाघते। गार्ग्यत्वेन विकत्थते इत्यर्थः। गार्गिकया अत्याकुरुते। गार्गिकामवेतः।

१८००। होत्राभ्यश्छः। (५-१-१३५)

होत्राशब्दो ऋत्विग्वाची स्त्रीलिङ्गः। बहुवचनाद्विशेषग्रहणम्। अच्छावाकस्य भावः कर्म वा अच्छावाकीयम्। मैत्रावरुणीयम्।

१८०१। ब्रह्मणस्त्वः। (५-१-१३६)

प्रातिपदिकात् षष्ठ्यन्ताद्भावकर्मणोर्वुञित्यर्थः। **रामणीयकमिति** ॥ रमणीयशब्दाद्वुञ्। **आभिधानीयकमिति** ॥ अभिधानीयशब्दाद्वुञ्। **सहायाद्वेति** ॥ वुञिति शेषः। पक्षे ब्राह्मणादित्वात् ष्यञ्। इदन्तु वार्तिकं भाष्ये क्वचिन्मृग्यम्। **द्वन्द्वमनोज्ञादिभ्यश्च** ॥ द्वन्द्वात् मनोज्ञादिभ्यश्च षष्ठ्यन्तेभ्यः वुञित्यर्थः। **शैष्योपाध्यायिकेति** ॥ शिष्यश्च उपाध्यायश्चेति द्वन्द्वाद्वुञ्। स्त्रीत्वं लोकात्। यद्यपि 'योपधात्' इत्येवं सिध्यति। तथापि गोपालपशुपालिकेत्युदाहरणं बोध्यम्। **गोत्रचरणात्** ॥ गोत्रप्रत्ययान्तात् शाखाध्येतृवाचिनश्च षष्ठ्यन्ताद्भावकर्मणोर्वुञ् स्यात् श्लाघादिषु विषयेष्वित्यर्थः। अपत्याधिकारादन्यत्र प्रवराध्यायप्रसिद्धङ्गोत्रमित्युक्तम्। अत्याकार इत्यस्य विवरणम्। **अधिक्षेप इति** ॥ तदवेत इत्येतद्विवृणोति। **ते गोत्रेति** ॥ तच्छब्देन गोत्रचरणयोः भावकर्मणी विवक्षिते। अवपूर्वादिणः प्राप्त्यर्थात् ज्ञानार्थाद्वा कर्तरि क्तः। ते अवेतस्तदवेत इति विग्रहः। 'द्वितीया' इति योगविभागात् समासः। **अवगतवान्वेति** ॥ ज्ञातवानित्यर्थः। **गार्गिकयेति** ॥ गार्ग्यशब्दाद्वुञि 'आपत्यस्य' इति यलोपे 'यस्येति च' इत्यकारलोपे लोकात् स्त्रीत्वे टापि 'प्रत्ययस्थात्' इति इत्त्वे गार्गिकाशब्दः। काठिकया श्लाघते इति चरणादुदाहार्यम्। अत्र श्लाघादयः पदान्तरोपात्ता एव प्रत्ययार्थान्वयिनः नतु प्रत्ययवाच्या इति बोध्यम्। **होत्राभ्यश्छः** ॥ **ऋत्विग्वाचीति** ॥ याज्ञिकप्रसिद्धेरिति भावः। ऋत्विग्विशेषवाचिभ्यः षष्ठ्यन्तेभ्यः छः स्याद्भावकर्मणोरित्यर्थः। **अच्छावाकीयमिति** ॥ 'आ च त्वात्' इति त्वतलोरपि सर्वत्र संभावेशो बोध्यः। **ब्रह्मणस्त्वः** ॥ होत्राभ्यः

होत्रावाचिनो ब्रह्मन्शब्दात्त्वः स्यात् । छस्यापवादः । ब्रह्मत्वम् । नेति वाच्ये त्ववचनं तलो बाधनार्थम् । ब्राह्मणपर्यायाद्ब्रह्मन्शब्दात्तु त्वतलौ । ब्रह्मत्वम्—ब्रह्मता ।

इति तद्धितेनञ्स्नञधिकारप्रकरणम् ।

अथ तद्धिते पाञ्चमिकप्रकरणम् ।

१८०२ । धान्यानां भवने क्षेत्रे खञ् । (५-२-१)

भवन्त्यस्मिन्निति भवनम् । मुद्गानां भवनं क्षेत्रं मौद्गीनम् ।

१८०३ । व्रीहिशाल्योर्ढक् । (५-२-२)

व्रैहेयम् । शालेयम् ।

१८०४ । यवयवकषष्टिकाद्यत् । (५-२-३)

इत्यनुवृत्तमेकवचनेन विपरिणम्यते । तदाह । **होत्रावाचिन इति** ॥ ऋत्विग्वाचिन इत्यर्थः । ननु ब्रह्मणो नेत्येवास्तु । ब्रह्मणश्छो न इत्यर्थलाभे सति छे निषिद्धे 'आ च त्वात्' इत्यधिकारात् 'होत्राभ्यः छः' इत्येव भावकर्मणोस्त्वप्रत्ययः सिध्यतीत्यत आह । **नेति वाच्ये इति** ॥ **तलो बाधनार्थमिति** ॥ अधिकारवशाद्धोत्राभ्य इति भावकर्मणोः प्राप्तस्य तलो निवृत्त्यर्थमित्यर्थः । एतेन 'तस्य भावस्त्वतलौ' इत्यनेन ब्रह्मणः कर्मणि त्वस्याप्राप्तेस्तदर्थं त्वप्रत्ययविधानमिति न शङ्क्यम् । नापि ब्रह्मणो नेत्युक्ते पूर्वसूत्रविहितानां त्वतल्छानां निषेधः स्यादित्यपि शङ्क्यम् । शब्दोपात्तस्य छस्यैव निषेधात् । अत्र होत्राग्रहणानुवृत्तेः प्रयोजनमाह । **ब्राह्मणपर्यायादिति** ॥

इति तद्धिते नञ्स्नञोरधिकारः ।

अथ पाञ्चमिका निरूप्यन्ते—**धान्यानां भवने** ॥ धान्यवाचिभ्यः षष्ठ्यन्तेभ्यः भवने क्षेत्रेऽर्थे खञित्यर्थः । भवनशब्दस्य भावल्युडन्तत्वे क्षेत्रशब्दसामानाधिकरण्यानुपपत्तेराह । **भवन्त्यस्मिन्निति भवनमिति** ॥ भूधातुरुत्पत्तिवाची । उत्पत्तिस्थानं भवनमिति लभ्यते । धान्योत्पत्तिस्थानं क्षेत्रम् । 'केदारः क्षेत्रम्' इत्यमरः । क्षेत्रशब्दाभावे भूधातोः सत्तावाचित्वमाश्रित्य यत्र विद्यते तद्भवनमिति व्युत्पत्त्या आधारसामान्यं गृहकुसूलादि लभ्येत । अतः क्षेत्रपदम् । भवनपदाभावे तु क्षेत्रशब्देन सेतुगन्धकाद्यादिपुण्यप्रदेशोऽपि लभ्येत । अतो भवनपदम् । उभयोपादाने तु धान्योत्पत्तिप्रदेश एव लभ्यते इति न पौनरुक्त्यम् । **व्रीहिशाल्योर्ढक्** ॥ व्रीहिशब्दात् शालिशब्दाच्च षष्ठ्यन्ताद्भवने क्षेत्रेऽर्थे ढगित्यर्थः । खञोऽपवादः । **यवयवक** ॥ यव, यवक, षष्टिक, एभ्यः षष्ठ्यन्तेभ्यो भवने क्षेत्रे

यवानां भवनं क्षेत्रं यव्यम्। यवक्यम्। षष्टिक्यम्।

१८०५। विभाषा तिलमाषोमाभङ्गाणुभ्यः। (५-२-४)

यद्वा स्यात्। पक्षे खञ्। तिल्यम्—तैलीनम्। माष्यम्—माषीणम्। उम्यम्—औमीनम्। भङ्ग्यम्—भाङ्गीनम्। अणव्यम्—आणवीनम्।

१८०६। सर्वचर्मणः कृतः खखञौ। (५-२-५)

असामर्थ्येऽपि निपातनात्समासः। सर्वश्चर्मणा कृतः सर्वचर्मीणः—सार्वचर्मीणः।

१८०७। यथामुखसम्मुखस्य दर्शनः खः। (५-२-६)

मुखस्य सदृशं यथामुखं प्रतिबिम्बम। निपातनात्सादृश्येऽव्ययीभावः। समं सर्वं मुखं सम्मुखम्। समशब्दस्यान्तलोपो निपात्यते। यथामुखं दर्शनो यथामुखीनः। सर्वस्य मुखस्य दर्शनः सम्मुखीनः।

१८०८। तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति। (५-२-७)

यत्स्यादित्यर्थः। खञोऽपवादः। धान्यानामित्यनुवृत्तेरिहापि षष्ठ्येव समर्थविभक्तिः। **विभाषा-तिल**॥ तिल, माष, उमा, भङ्ग, अणु, एभ्यो धान्यविशेषवाचिभ्यः षष्ठ्यन्तेभ्यो यद्वा स्यादित्यर्थः। "उमाभङ्गौ धान्यविशेषौ" इति भाष्यम्। "उमा स्यादतसी क्षुमा" इत्यमरः। **अणव्यमिति**॥ अणुर्धान्यविशेषः। यति 'ओर्गुणः' 'वान्तो यि' इत्यवादेशः। **सर्वचर्मणः**॥ सर्वचर्मन्शब्दात्तृतीयान्तात् चर्मणा सर्वकृत इत्यर्थे खखञौ स्त इत्यर्थः। औचित्यादिह तृतीया समर्थविभक्तिः। नन्विह सर्वशब्दस्य कृते अन्वयात् चर्मण्यन्वयाभावादसामर्थ्याच्चर्मणा-समासासम्भवात् कथं सर्वचर्मन्शब्दात्प्रत्यय इत्यत आह। **असामर्थ्येऽपीति**॥ सर्वश्चर्मणा कृत्न इति विग्रहवाक्यम्। चर्मणा कृत्स्नः कृत इत्यर्थः। **सर्वचर्मीण इति**॥ 'नस्तद्धिते' इति टिलोपः। सर्वेण चर्मणा कृत इत्यर्थे तु न खखञौ। व्याख्यानात्। **यथामुख**॥ यथामुख सम्मुख आभ्यां पञ्चम्यन्ताभ्यां दर्शनः इत्यर्थे खः स्यादित्यर्थः। दृश्यन्तेऽस्मिन्निति दर्शनः आदर्शादिः। ननु मुखस्य सदृशं यथामुखमिति कथमव्ययीभावः। 'यथाऽसादृश्ये' इति सादृश्ये तन्निषेधादित्यत आह। **निपातनादिति**॥ सम्मुखशब्दे आभिमुख्यार्थकस्य समित्युपसर्गस्य न प्रवेशः, किन्तु समशब्दस्य, सर्वपर्यायस्येत्याह। **समं सर्वं मुखं सम्मुखमिति**॥ समभित्यस्य विवरणं सर्वमिति। समं च तन्मुखञ्चेति कर्मधारये सम्मुखशब्द इत्यर्थः। **निपात्यत इति**॥ इदञ्च भाष्ये स्पष्टम्। एवञ्च समित्युपसर्गपूर्वादयम्प्रत्ययो नेष्यते इति भावः। **तत्सर्वादेः**॥ पथिन्, अङ्ग, कर्मन्, पत्र, पात्र, एषां समाहारद्वन्द्वात् पञ्चम्यर्थे द्वितीया। प्रातिपदिकविशेषणत्वात्तदन्तविधिः। ग्रहणवता प्रातिपदिकेन तदन्तविधि-र्नास्तीति निषेधस्तु न। केवलानामेषां सर्वादित्वस्यासम्भवात्। तदिति तु द्वितीयान्तं

सर्वादेः पथ्याद्यन्ताद्द्वितीयान्तात्खः स्यात् । सर्वपथान्व्याप्नोति सर्वपथीनः । सर्वाङ्गीणः । सर्वकर्मीणः । सर्वपत्त्रीणः । सर्वपात्रीणः ।

१८०९ । आप्रपदं प्राप्नोति । (५-२-८)

पादस्याग्रं प्रपदं, तन्मर्यादीकृत्य आप्रपदम्, आप्रपदीनः पटः ।

१८१० । अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु । (५-२-९)

अनुरायामे सादृश्ये वा । अनुपदं बद्धा अनुपदीना उपानत् । सर्वान्नानि भक्षयति सर्वान्नीनो भिक्षुः । अयानयः स्थलविशेषः । तं नेयः अयानयीनः शारः ।

१८११ । परोवरपरम्परपुत्रपौत्रमनुभवति । (५-२-१०)

परांश्चावरांश्चानुभवतीति परोवरीणः । अवरस्योत्त्वं निपात्यते । परांश्च परतरांश्चानुभवति परम्परीणः । प्रकृतेः परंपरभावो निपात्यते । पुत्रपौत्रान्

व्याप्नोतीत्यत्रान्वेति । ततश्च तद्व्याप्नोतीत्यर्थे सर्वशब्दपूर्वपदकेभ्यः पथ्यङ्गकर्मपत्रपात्रान्तेभ्यः प्रातिपदिकेभ्यो द्वितीयान्तेभ्यः खः स्यादित्यर्थः फलति । तदाह । **सर्वादेरित्यादिना** ॥ **सर्वपथानिति** ॥ 'ऋक्पूः' इति समासान्तः । **आप्रपदम्** ॥ आप्रपदमित्यव्ययीभावात् द्वितीयान्तात्प्राप्नोतीत्यर्थे खः स्यादित्यर्थः । **पदस्याग्रं प्रपदमिति** ॥ "पादाग्रं प्रपदम्" इत्यमरः । **आप्रपदमिति** ॥ 'आङ्मर्यादाभिविध्योः' इत्यव्ययीभावः । **अनुपद** ॥ अनुपद, सर्वान्न, अयानय एषां समाहारद्वन्द्वात् द्वितीया । बद्धा भक्षयति नेय एषां द्वन्द्वात् सप्तमी । तिङन्तस्य द्वन्द्वानुप्रवेश आर्षः । अनुपदादिभ्यो द्वितीयान्तेभ्यः क्रमाद्बद्धादिष्वर्थेषु खः स्यादित्यर्थः । **अनुरायामे सादृश्ये वेति** ॥ आद्ये 'यस्य चायामः' इत्यव्ययीभावः । द्वितीये सादृश्ये अव्ययीभावः । **अनुपदं बद्धेति** ॥ क्रियाविशेषणत्वाद्द्वितीया । **अनुपदीना उपानदिति** ॥ पदसम्बन्धि दैर्घ्यसदृशदैर्घ्योपलक्षितेत्यर्थः । पदेन सदृशीति वा । तत्तुल्यपरिमाणेति यावत् । **अयानयः इति** ॥ द्यूते शाराणां प्रदक्षिणपरिवर्तनं अयः । प्रसव्यपरिवर्तनं अनयः । अयसहितः अनयः अयानयः । प्रदक्षिणप्रसव्यगामिनां यस्मिन् युग्मादिपदे स्थितानां परकीयैः शारैरनाक्रमणं तत्स्थानमिह अयानयशब्देन लक्षणयोच्यते इत्यर्थः । एतत्सर्वं भाष्ये स्पष्टम् । 'ससहायस्य शारस्य परैर्नाक्रम्यते पदम् । असहायस्तु शारेण परकीयेण बाध्यते ॥' इति द्यूतशास्त्रमर्यादा । विस्तरस्तु कैयटमनोरमादावनुसन्धेयः । **तन्नेय इति** ॥ तं स्थानविशेषमयानयाख्यं प्रापणीय इत्यर्थः । णीञ् द्विकर्मकः प्रधाने कर्मणि यत् । 'अप्रधाने द्वितीया' इति भावकर्मलकारप्रक्रियायां वक्ष्यते । **परोवर** ॥ परोवर, परम्पर, पुत्रपौत्र, एभ्यो द्वितीयान्तेभ्यः अनुभवतीत्यर्थे खः स्यादित्यर्थः । **परोवरीण इति** ॥ परे च अवरे च परावरे । तानुभवतीत्यर्थः । **अवरस्योत्त्वमिति** ॥ अवरशब्दस्य आदेरकारस्य खप्रत्ययसान्निध्येन उत्त्वं निपात्यते

अनुभवति पुत्रपौत्रीणः। परम्पराशब्दस्तु अव्युत्पन्नं शब्दान्तरं स्त्रीलिङ्गम्। तस्मादेव स्वार्थे ष्यञि पारम्पर्यम्। कथं पारोवर्यवदिति। असाधुरेव। खप्रत्ययसंनियोगेनैव परोवरेति निपातनात्।

१८१२। अवारपारात्यन्तानुकामं गामी। (५-२-११)

अवारपारं गामी अवारपारीणः—अवारीणः—पारीणः—पारावारीणः। अत्यन्तं गामी अत्यन्तीनः। भृशं गन्तेत्यर्थः। अनुकामं गामी अनुकामीनः। यथेष्टं गन्ता।

१८१३। समां समां विजायते। (५-२-१२)

यलोपोऽवशिष्टविभक्तेरलुक्च पूर्वपदे निपात्यते। समांसमीना गौः।

इत्यर्थः। एवञ्च विग्रहवाक्ये इदमुत्तरं न भवति। **प्रकृतेरिति**॥ परपरतरशब्दात् द्वन्द्वात्खे सति तत्सन्नियोगेन प्रकृतेः परम्परभावो निपात्यत इत्यर्थः। नन्वेवं सति कल्याणपरम्परेत्यादौ कथं परम्पराशब्दः। परम्पराभावस्य खप्रत्ययसन्नियोगशिष्टत्वादित्यत आह। **परम्परा-शब्दस्त्विति**॥ **तस्मादेवेति**॥ परम्परेत्यव्युत्पन्नप्रातिपदिकादेवेत्यर्थः। **कथमिति**॥ परावरशब्दात् भावे वा स्वार्थे वा ष्यञि अवरस्यादेरुत्त्वे परोवर्यशब्दात् मतुपि परोवर्यवदिति कथमित्याक्षेपः। उत्त्वस्य खप्रत्ययसन्नियोगशिष्टत्वादिति भावः। उत्त्वन्दुरुपादमेवेत्याह। **असाधुरेवेति**॥ नन्वत्र परोवरेति निर्देशात् खादन्यत्राव्युत्पन्नत्वं किन्न स्यादित्यत आह। **खप्रत्ययसन्नियोगेनैवेति**॥ अत एव भाष्ये "परांश्चावरांश्चानुभवति" इत्येव विग्रहो दर्शित इति भावः। **अवारपार**॥ अवारपार, अत्यन्त, अनुकाम, एभ्यः गामीत्यर्थे खः स्यादित्यर्थः। गामीत्यस्य अवश्यं गमिष्यन्नित्यर्थः। 'आवश्यकाधमर्ण्ययोर्णिनिः' इति णिनिः। 'भविष्यति गम्यादयः' इति भविष्यत्कालता। 'बहुलमाभीक्ष्ण्ये' इति वा णिनिः। **अवारपारीण इति**॥ अवारपारङ्गामीति विग्रहः। अवारपारशब्दाद्विगृहीतादपि। व्याख्यानात्। तदाह। **अवारीणः, पारीणः इति**॥ **अत्यन्तीन इति**॥ अत्यन्तशब्दोऽत्र भृशवाची। तदाह। **भृशङ्गन्तेति**॥ **अनुकाममिति**॥ कामः इच्छा। तामनतिक्रम्येत्यर्थः। पदार्थानतिवृत्तावव्ययीभावः। **समां समाम्**॥ विपूर्वो जनिर्गर्भविमोचने वर्तते। विजायते गर्भम्। विमुञ्चतीत्यर्थः। धात्वर्थेनोपसङ्ग्रहादकर्मकः। अतो न कर्मणि द्वितीया। गर्भविमोचनेन कृत्स्नायाः समाया अव्यापनादत्यन्तसंयोगलक्षणा द्वितीयापि न भवति। किन्तु सप्तम्येव। तत्र सप्तम्यन्तस्य समायामित्यस्य 'नित्यवीप्सयोः' इति द्विर्वचने समायां समायामिति भवितव्यम्। तत्र पदद्वयमपि यकारलोपसहितं निर्दिश्यते समां समामिति। समायां समायामित्यर्थः। एवञ्च समायां समायां विजायते इत्यर्थे सप्तम्यन्तद्वयसमुदायात् विजायते इत्यर्थे खः स्यादिति फलितम्। ननु सप्तम्यन्तद्वयसमुदायात् खप्रत्ययोत्पत्तौ तदन्तस्य समुदायस्य प्रातिपदिकत्वात् तदवयवयोः सप्तम्योर्लुकि समासमीनः इति स्यात्। इष्यते तु समांसमीनेति। तत्राह। **यलोप इति**॥ पूर्वपदे

'समांसमीना सा यैव प्रतिवर्षं प्रसूयते' इत्यमरः। 'खप्रत्ययानुत्पत्तौ यलोपो वा वक्तव्यः' (वा ३१००)। समां समां विजायते। समायां समायां वा।

१८१४। अद्यश्वीनावष्टब्धे। (५-२-१३)

अद्य श्वो वा विजायते अद्यश्वीना बडवा। आसन्नप्रसवेत्यर्थः। केचित्तु विजायते इति नानुवर्तयन्ति। अद्यश्वीनं मरणम्। आसन्नमित्यर्थः।

१८१५। आगवीनः। (५-२-१४)

आङ्पूर्वाद्गोः कर्मकरे खप्रत्ययो निपात्यते। गोः प्रत्यर्पणपर्यन्तं यः कर्म करोति स आगवीनः।

१८१६। अनुग्वलङ्गामी। (५-२-१५)

अनुगु गोः पश्चात्पर्याप्तं गच्छति अनुगवीनो गोपालः।

१८१७। अध्वनो यत्खौ। (५-२-१६)

विभक्तेरवयवस्य यकारस्य लोपः। अवशिष्टस्य विभक्त्यंशस्य अलुक्च निपात्यते इत्यर्थः। भाष्ये तु "यलोपनिपातनादवशिष्टविभक्त्यंशस्य न लुक्" इत्युक्तम्। ननु समां समामिति निर्देशात् उत्तरपदेऽपि यकारलोपः अवशिष्टविभक्त्यंशस्य अलुक् च स्यादित्यत आह। **पूर्वपदे इति** ॥ 'पूर्वपदस्य यलोपवचनम्' इति वार्तिकादिति भावः। **खप्रत्ययानुत्पत्ताविति** ॥ पदद्वयेऽपीति शेषः। इह विभाषया कदाचित् खप्रत्ययाभावे सति समायां समायां विजायते इति वाक्यदशायां सप्तम्यन्तद्वये यकारलोपो वा वक्तव्य इत्यर्थः। तत्र पदद्वयेऽपि निपातनादेव यकारलोपः सिद्धः। सूत्रे उभयत्रापि तथोच्चारणात्। विकल्प एव तु यलोपस्य वाक्यदशायां वाचनिक इति बोध्यम्। एतत्सर्वं भाष्ये स्पष्टम्। **अद्यश्वीनावष्टब्धे** ॥ अद्यश्वीनेत्यविभक्तिको निर्देशः। अवष्टब्धम्, आसन्नम् 'अवाच्चालम्बनाविदूर्ययोः' इत्याविदूर्ये स्तम्भेः षत्वविधानात् अद्य श्वो वा विजायते इत्यर्थे अद्यश्वस् इति समुदायात्खः स्यादासन्नत्वे गम्ये इत्यर्थः। **अद्यश्वीना बडवेति** ॥ अद्य वा श्वो वेति वार्थे निपातनात्समासः। खे सति 'अव्ययानाम्भमात्रे' इति टिलोपः। सूत्रे अद्यश्वीनेति टाबन्तनिर्देशे तु अद्यश्वीनो गोसमूहः, अद्यश्वीनङ्गोमण्डलमिति न स्यात्। **आगवीनः** ॥ **कर्मकरे इति** ॥ वार्त्तिकलभ्यमिदम्। भृतिङ्गृहीत्वा यः कर्म करोति स कर्मकरः। अत्र गोपालो विवक्षितः। स हि प्रातर्गोङ्गृहीत्वा आसायञ्चारयित्वा स्वामिनो गृहं नीत्वा प्रत्यर्पयति। तदाह। **गोः प्रत्यर्पणेति। आगवीन इति** ॥ गोशब्दो गोप्रत्यर्पणे लाक्षणिकः। 'आङ्मर्यादाभिविध्योः' इत्यव्ययीभावे 'गोस्त्रियोः' इति ह्रस्वत्वे आगुशब्दात् खे 'ओर्गुणः' इति भावः। **अनुग्वलङ्गामी** ॥ अनुगु इत्यविभक्तिको निर्देशः। गोः पश्चादिति विग्रहे पश्चादर्थे अनोरव्ययीभावे ह्रस्वत्वे अनुशब्दः। तस्मात् अलङ्गामीत्यर्थे खः स्यादित्यर्थः। अत्र अनुगु इत्यस्य क्रियाविशेषणत्वात् द्वितीयैव

अध्वानमलं गच्छति अध्वन्यः—अध्वनीनः। 'ये चाभावकर्मणोः' (सू ११५४) 'आत्माध्वानौ खे' (सू १६७१) इति सूत्राभ्यां प्रकृतिभावः।

१८१८। अभ्यमित्राच्छ च। (५-२-१७)

चाद्यत्खौ। अभ्यमित्रीयः—अभ्यमित्र्यः—अभ्यमित्रीणः। अमित्राभिमुखं सुष्ठु गच्छतीत्यर्थः।

१८१९। गोष्ठात्खञ्भूतपूर्वे। (५-२-१८)

गोष्ठो भूतपूर्वः गौष्ठीनो देशः।

१८२०। अश्वस्यैकाहगमः। (५-२-१९)

एकाहेन गम्यते इत्यैकाहगमः आश्वीनोऽध्वा।

१८२१। शालीनकौपीने अधृष्टाकार्ययोः। (५-२-२०)

शालाप्रवेशमर्हति शालीनोऽधृष्टः। कूपपतनमर्हति कौपीनं पापम्। तत्साधनत्वात्तद्वद्गोप्यत्वात्पुरुषलिङ्गामपि, तत्सम्बन्धात्तदाच्छादनमपि।

समर्थविभक्तिरिति हरदत्तः। कृत्योगपष्ठ्यन्ये। अलङ्गामीत्यत्र अलंशब्दस्य विवरणं पर्याप्तमिति क्रियाविशेषणम्। **अध्वनो यत्खौ**॥ अध्वन्शब्दात् अलङ्गामीत्यर्थे यत्खौ स्त इत्यर्थः। **अध्वानमलङ्गच्छतीति**॥ अलङ्गामीत्यनेन विग्रहे तु अध्वनोऽलङ्गामीत्येव विग्रहः। **अभ्यमित्राच्छ च**॥ अमित्रः शत्रुः। तमभिमुखो भूत्वेत्यर्थे 'लक्षणेनाभिप्रती आभिमुख्ये' इत्यव्ययीभावे अभ्यमित्रशब्दः। तस्मात् अलङ्गामीत्यर्थे छप्रत्ययः स्यादित्यर्थः। **गोष्ठात्खञ्**॥ भूतपूर्व इति प्रकृतिविशेषणम्। भूतपूर्ववृत्तेर्गोष्ठशब्दात्स्वार्थे खः स्यादिति वृत्तिकृतः। **अश्वस्यैकाहगमः**॥ अश्वशब्दात् षष्ठ्यन्तात् एकाहगम इत्यर्थे खञ् स्यादित्यर्थः। एकाहगमशब्दं व्युत्पादयति। **एकाहेनेति**॥ अस्मादेव निपातनात्कर्मणि गमेरबिति भावः। 'कर्तृकरणे कृता' इति समासः। अश्वस्येति कर्त्तरि षष्ठी। **आश्वीनोऽध्वेति**॥ अश्वेन कर्त्रा एकाहेन गन्तुं शक्य इत्यर्थः। **शालीन**॥ "शालाप्रवेशमर्हत्यधृष्ट इति कूपावतरणमर्हत्यकार्यमिति चार्थे शालाप्रवेशशब्दात्कूपावतरणशब्दाच्च खञ्। प्रवेशशब्दस्य अवतरणशब्दस्य चोत्तरपदस्य लोपे शालीनकौपीनशब्दौ निपात्येते" इति भाष्यम्। **अधृष्ट इति**॥ अप्रगल्भ इत्यर्थः। अप्रागल्भ्यादन्यत्र गन्तुमशक्तः शालाप्रवेशमेवार्हति यः सः शालीन इति यावत्। **कूपपतनमिति**॥ कूपावतरणशब्दस्य विवरणमिदम्। कूपशब्दो नरकाभिधायी। **कौपीनं पापमिति**॥ नरकपतनसाधनमकार्यम्पापमित्यर्थः। अनयोरर्थयोरेतौ रूढौ। ननु पुरुषलिङ्गे कथङ्कौपीनशब्दः इत्यत आह। **तत्साधनत्वादिति**॥ पापसाधनत्वाद्वा, पापवदाच्छादनीयत्वाद्वा, पुरुषलिङ्गे कौपीनशब्दो लाक्षणिक इत्यर्थः। **तत्सम्बन्धादिति**॥ कौपीनशब्दस्य लक्ष्यपुरुषलिङ्गसम्बन्धात्

१८२२ । व्रातेन जीवति । (५-२-२१)

व्रातेन शरीरायासेन जीवति न तु बुद्धिवैभवेन स व्रातीनः ।

१८२३ । साप्तपदीनं सख्यम । (५-२-२२)

सप्तभिः पदैरवाप्यते साप्तपदीनम ।

१८२४ । हैयङ्गवीनं संज्ञायाम् । (५-२-२३)

ह्यो गोदोहस्य हियङ्गुरादेशो विकारार्थे खश्च निपात्यते । दुह्यत इति दोहः क्षीरम् । ह्यो गोदोहस्य विकारो हैयङ्गवीनम । नवनीतम ।

१८२५ । तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ । (५-२-२४)

पीलूनां पाकः पीलुकुणः । कर्णस्य मूलं कर्णजाहम ।

१८२६ । पक्षात्तिः (५-२-२५)

मूलग्रहणमात्रमनुवर्तते । पक्षस्य मूलं पक्षतिः ।

तदाच्छादनवस्त्रखण्डे कौपीनशब्दो लक्षितलक्षणया प्रयुज्यते इत्यर्थः । **व्रातेन जीवति ॥** व्रातशब्दात्तृतीयान्तात् जीवतीत्यर्थे खञ् स्यादित्यर्थः । "पीनाजालायानाम् अलब्धजीवनद्रव्याणाम्भारवहनादिकष्टकर्मजीवानां सङ्घो व्रातः । तस्य स्वजीवनार्थं यत् कर्म तदिह व्रातम्" इति भाष्यम् । तादृशसङ्घवाचिनो व्रातशब्दात् 'तस्येदम्' इत्यणि व्रातशब्दोऽत्र तदीयकर्मणि विवक्षित इति तदाशयः । तदाह । **शरीरायासेनेति ॥ साप्तपदीनम ॥** सप्तपदशब्दात् तृतीयान्तादवाप्यं सख्यमित्यर्थे खञि साप्तपदीनमिति भवतीत्यर्थः । **सप्तभिः पदैरिति ॥** पदविक्षेपैरित्यर्थः । **हैयङ्गवीनम् ॥** "ह्यस् इत्यव्ययम्पूर्वेद्युरित्यर्थे तत्रोत्पन्नो गोदोहः गोपयः ह्यो गोदोहः । तस्मात् षष्ठ्यन्तात् विकारार्थे खञि इनादेशे प्रकृतेः हियङ् इत्यादेशे ओर्गुणे अवादेशे आदिवृद्धौ हैयङ्गवीनमिति भवति संज्ञायाम्" इति भाष्यम । तदाह । **ह्यो गोदोहस्येत्यादिना ॥ नवनीतमिति ॥** भाष्ये तु "हैयङ्गवीनं घृतम्" इति दृश्यते । "तत्तु हैयङ्गवीनं स्यात् ह्यो गोदोहोद्भवं घृतम्" इत्यमरः । **तस्य पाकमूले ॥** पाकमूले इति समाहारद्वन्द्वात्सप्तमी । पाकः परिणामः । षष्ठ्यन्तेभ्यः पील्वादिभ्यः पाकेऽर्थे कुणप् । कर्णादिभ्यस्तु मूलेऽर्थे जाहजित्यर्थः । कुणपस्तद्धितत्वात् ककारस्य नेत्संज्ञा । जाहचस्तु जकारस्य प्रयोजनाभावात् नेत्संज्ञा । **पक्षात्तिः ॥ मूलग्रहणमात्रमिति ॥** पूर्वसूत्रे पाकमूल इति समासनिर्दिष्टत्वेऽप्येकदेशे स्वरितत्वप्रतिज्ञानादिति भावः । तस्येत्यप्यनुवर्तते । पक्षशब्दात् षष्ठ्यन्तात् मूलेऽर्थे तिप्रत्ययः

*१८२७। तेन वित्तश्चुञ्चुप्चणपौ। (५-२-२६)

यकारः प्रत्ययोरादौ लुप्तनिर्दिष्टः,तेन चस्य नेत्संज्ञा। विद्यया वित्तो विद्याचुञ्चुः। विद्याचणः।

१८२८। विनञ्भ्यां नानाञौ न सह। (५-२-२७)

असहार्थे पृथग्भावे वर्तमानाभ्यां स्वार्थे प्रत्ययौ। विना, नाना।

१८२९। वेः शालच्छङ्कटचौ। (५-२-२८)

क्रियाविशिष्टसाधनवाचकात्स्वार्थे। विस्तृतम्। विशालम्। विशङ्कटम्।

१८३०। संप्रोदश्च कटच्। (५-२-२९)

सङ्कटम्। प्रकटम्। उत्कटम्। 'अलाबूतिलोमाभङ्गाभ्यो रजस्युपसङ्ख्यानम्' (वा ३१०७)। अलाबूनां रजः अलाबूकटम्। 'गोष्ठजादयः स्थानादिषु पशुनामभ्यः' (वा ३१०९)। गवां स्थानं गोगोष्ठम्। 'सङ्घाते कटच्' (वा ३११०)। अवीनां सङ्घातः अविकटः। 'विस्तारे पटच्' (वा

स्यादित्यर्थः। **तेन वित्तः** ॥ तृतीयान्तात् वित्त इत्यर्थे चुञ्चुप्चणपौ भवत इत्यर्थः। वित्तः प्रसिद्धः। **चस्य नेत्संज्ञेति** ॥ उपदेशे आदित्वाभावादिति भावः। **विनञ्भ्याम्** ॥ नसहेति सङ्घातः पृथक्के वर्तने। प्रकृतिविशेषणमिदम्। तदाह। **असहार्थे इति** ॥ तस्य विवरणं **पृथग्भावे इति** ॥ वर्तमानाभ्यामित्यनन्तरं विनञ्भ्यामिति शेषः। **स्वार्थ इति** ॥ प्रत्ययार्थस्य अनिर्देश्यादिति भावः। **प्रत्ययाविति** ॥ यथासङ्ख्यं नानाञाविति शेषः। **विनेति** ॥ वेर्नाप्रत्यये रूपम्। पृथगित्यर्थः। **नानेति** ॥ नञो नाञि आदिवृद्धौ रूपम्। पृथगित्यर्थः। नसहेत्यस्य प्रत्ययार्थत्वे तु नानेत्यनेन न सहेति गम्येत। एवं सति ननसह, किन्तु सहैवेत्यर्थः स्यात्। "द्वौ नञौ प्रकृतमर्थङ्गमयतः" इति न्यायात् इति भाष्ये स्पष्टम्। **वेः शालच्छङ्कटचौ** ॥ **क्रियाविशिष्टेति** ॥ क्रियाविशिष्टकारकवाचकात्स्वार्थे शालच्कटच्प्रत्ययौ स्त इति यावत्। इदञ्च भाष्ये स्पष्टम्। **सम्प्रोदश्च कटच्** ॥ सं, प्र, उत्, एभ्यश्च क्रियाविशिष्टसाधनवाचिभ्यः स्वार्थे कटच् स्यादित्यर्थः। चाद्वेरपि ॥ सङ्कटं संहतमित्यर्थः। निबिडीकृतमिति यावत्। **प्रकटमिति** ॥ प्रज्ञातमित्यर्थः। प्रकाशमिति यावत्। **उत्कटमिति** ॥ उन्नतमित्यर्थः। अधिकमिति यावत्। रूढशब्दा एते कथञ्चिद्व्युत्पाद्याः। **अलाबूतिलेति** ॥ अलाबू, तिल, उमा, भङ्गा, इत्येभ्यः षष्ठ्यन्तेभ्यो रजसि अभिधेये कटचः उपसङ्ख्यानमित्यर्थः। विकारप्रत्ययानामपवादोऽयम्। रजः चूर्णरेणुः। **गोष्ठजादय इति** ॥ पशुनामभ्यः स्थानादिष्वर्थेषु गोष्ठजादयः प्रत्यया

---

* उकारद्वयवान्—इति मनोरमा।

३११५)। अविपटः। 'द्वित्वे गोयुगच्'। (वा ३११६)। द्वौ वृषौ वृषगो-युगम्। 'षड्त्वे षड्गवच्' (वा ३११७) अश्वषड्गवम्। 'स्नेहे तैलच्' (वा ३११८)। तिलतैलम्। सर्षपतैलम्। 'भवने क्षेत्रे शाकटशाकिनौ' (वा ३११९)। इक्षुशाकटम्। इक्षुशाकिनम्।

१८३१। अवात्कुटारच्च। (५-२-३०)

चात्कटच्। अवाचीनोऽवकुटारः। अवकटः।

१८३२। नते नासिकायाः संज्ञायां टीटञ्नाटञ्भ्रटचः। (५-२-३१)

'अवात्' इत्येव। नतं नमनम्। नासिकाया नतं अवटीटम्। अवनाटम्। अवभ्रटम्। तद्योगान्नासिका अवटीटा। पुरुषोऽप्यवटीटः।

१८३३। नेर्बिडञ्बिरीसचौ। (५-२-३२)

निबिडम्। निबिरीसम्।

१८३४। इनच्पिटच्किकचि च। (५-२-३३)

'नेः' इत्येव। नासिकाया नतेऽभिधेये इनच्पिटचौ प्रत्ययौ प्रकृतेश्चिक चि इत्यादेशौ च। 'कप्रत्ययचिकादेशौ च वक्तव्यौ' (वा ३१२१)।

वक्तव्या इत्यर्थः। गोष्ठजादीनां प्रत्ययानां स्थानादीनामर्थानां प्रपञ्चपराणि 'सङ्घाते कटच्' इत्यादीनि शाकटशाकिनावित्यन्तानि षड्वार्तिकानि। तेषु पशुनामभ्य इत्यनुवर्तते। अप्रसृतावयवः सङ्घातः। प्रसृतावयवस्तु विस्तारः। **द्वित्व इति**॥ प्रकृत्यर्थगत-द्वित्व इत्यर्थः। **द्वौ वृषौ वृषगोयुगमिति**॥ अवयवैकसङ्घातार्थाभिप्रायमेकवचनम्। द्वयं युग्ममित्यादिवत्। केचित्तु द्वौ वृषावित्यर्थे वृषगोयुगमिति स्वभावादेकवचनं विंशतिरित्यादि-वदित्याहुः। एवमुष्ट्रगोयुगम्। अश्वषड्गवम्। **अवात्कुटारच्च**॥ क्रियाविशिष्टसाधनवाचकाद-वात्स्वार्थे कुटारच्च स्यादित्यर्थः। **अवाचीन इति**॥ अवाचीने विद्यमानादवात् कुटारचि अवकुटारमित्यर्थः। **नते नासिकायाः**॥ **अवादित्येवेति**॥ अवशब्दात् नासिकाया अवनतेऽर्थे टीटच्, नाटच्, भ्रटच्, एते प्रत्ययाः स्युरित्यर्थः। 'णमु प्रह्वत्वे' इति धातोर्भावे क्तप्रत्यये नतशब्द इत्यभिप्रेत्य आह। **नतं नमनमिति**॥ प्रह्वत्वमित्यर्थः। ननु यदि नासिकायाः नमनमवटीटं तर्हि अवटीटा नासिकेति कथमित्यत आह। **तद्योगादिति**॥ नमनयोगात्तत्र लाक्षणिकमिति भावः। **पुरुषोऽप्यवटीट इति**॥ तादृशनासिकायोगादिति भावः। **नेर्बिडञ्बिरीसचौ**॥ 'नते नासिकायाः संज्ञायाम्' इत्यनुवर्तते। नेः नासिकाया नतेऽर्थे बिडच्, बिरीसच्, द्वौ प्रत्ययौ स्त इत्यर्थः। निबिडा वृक्षा इति तु उपमानादित्याहुः। **इनच्पिटच्**॥ इनच्, पिटच् इति समाहारद्वन्द्वात्प्रथमैकवचनम्। चिकचि इत्यपि चिक चि इत्यनयोः समाहारद्वन्द्वात्प्रथमैकवचनम्। **प्रकृतेरिति**॥ नेरित्यर्थः। तत्र इनचि परे चिक

चिकिनम्। चिपिटम्। चिक्कम्। 'क्लिन्नस्य चिल्पिल्लश्चास्य चक्षुषी' (वा ३१२२)। क्लिन्ने चक्षुषी अस्य चिल्लः। पिल्लः। 'चुल् च' (वा ३१२३)। चुल्लः।

१८३५। उपाधिभ्यां त्यकन्नासन्नारूढयोः। (५-२-३४)

'संज्ञायाम्' इत्यनुवर्तते। पर्वतस्यासन्नं स्थलमुपत्यका। आरूढं स्थलमधित्यका।

१८३६। कर्मणि घटोऽठच्। (५-२-३५)

घटत इति घटः। पचाद्यच्। कर्मणि घटते कर्मठः पुरुषः।

१८३७। तदस्य सञ्जातं तारकादिभ्य इतच्। (५-२-३६)

तारकाः सञ्जाता अस्य तारकितं नभः। आकृतिगणोऽयम्।

१८३८। प्रमाणे द्वयसज्दघ्नञ्मात्रचः। (५-२-३७)

इत्यादेशः। तत्र अकारः उच्चारणार्थः। पिटचि तु परे चि इत्यादेशः। **कप्रत्ययेति**॥ उक्तेनः कप्रत्ययः। प्रकृतेः चिकादेशश्चेत्यर्थः। अयमपि ककारान्त एवादेशः। **चिकिनमिति**॥ इनचि प्रत्यये कृते नेः चिकादेशे रूपम्। **चिपिटमिति**॥ पिटचि कृते नेः चि इत्यादेशे रूपम्। **चिक्कमिति**॥ कप्रत्यये नेः चिकादेशे रूपम्। **क्लिन्नस्य चिल्पिल्लश्चास्य चक्षुषी इति**॥ वार्तिकमिदम्। चिल पिल् इति समाहारद्वन्द्वात्प्रथमैकवचनम्। क्लिन्ने अस्य चक्षुषी इति विग्रहे क्लिन्नशब्दात् अस्य चक्षुषी इत्यर्थे लप्रत्ययः प्रकृतेः चिल्पिल् एतावादेशौ स्त इत्यर्थः। **किन्ने इति**॥ नेत्रामयप्रयुक्तजलनिष्पन्दवती इत्यर्थः। **चिल्लः पिल्ल इति**॥ किन्नचक्षुष्क इत्यर्थः। **चल् चेति**॥ उक्तविषये क्लिन्नस्य चुल् आदेशश्च, लप्रत्ययसन्नियोगेन वक्तव्य इत्यर्थः। **उपाधिभ्याम्**॥ उप, अधि, आभ्यां यथासङ्ख्यमासन्नारूढयोर्वर्तमानाभ्यां स्वार्थे त्यकन्प्रत्ययः स्यादित्यर्थः। आसन्नं समीपम्। आरूढम् उच्चम्। **अनुवर्तते इति**॥ 'नते नासिकायाः' इत्यस्मादिति भावः। कस्य समीपं कस्योच्चम् इत्याकाङ्क्षायां संज्ञाधिकारात् पर्वतस्येति लभ्यते इत्यभिप्रेत्य आह। **पर्वतस्येति। उपत्यका, अधित्यकेति**॥ स्त्रीत्वं लोकात्। अत्र 'प्रत्ययस्थात्' इति इत्त्वं तु न। 'त्यकनश्च' इत्युक्तेः। **कर्मणि घटोऽठच्**॥ सप्तम्यन्तात्कर्मनशब्दात् घट इत्यर्थे अठच्स्यादित्यर्थः। घटशब्दस्य कलशपर्यायत्वभ्रमं वारयति। **कर्मणि घटते इति**॥ व्याप्रियते इत्यर्थः। तथाचात्र घटशब्दो यौगिकः घटमाने वर्तते इति भावः। **कर्मठ इति**॥ अठचि 'नस्तद्धिते' इति टिलोपः। अठचि ठस्य अज्ञात्परत्वाभावादिकादेशाभाव इति भावः। **तदस्य**॥ प्रथमान्तेभ्यस्तारकादिभ्यः अस्य तत्सञ्जातमित्यर्थे इतच् स्यादित्यर्थः। **तारकितनभ इति**॥ सञ्जातनक्षत्रमित्यर्थः। **आकृतिगणोऽयमिति**॥ तेन पुष्पितो वृक्षः फलित इत्यादि सङ्ग्रहः। **प्रमाणे**॥ **अनुवर्तते इति**॥ ततश्च अस्य प्रमेयस्य

'तदस्य' इत्यनुवर्तते । ऊरू प्रमाणमस्य ऊरुद्वयसम् । ऊरुदघ्नम् । ऊरुमात्रम् । 'प्रमाणे लः' (वा ३१२८) । शमः । दिष्टिः । वितस्तिः । 'द्विगोर्नित्यम्' (वा ३१२९) । द्वौ शमौ प्रमाणमस्य द्विशमम् । 'प्रमाण-परिमाणाभ्यां सङ्ख्यायाश्चापि संशये मात्रज्वक्तव्यः' (वा ३१३३) । शम-मात्रम् । प्रस्थमात्रम् । पञ्चमात्रम् । 'वत्वन्तात्स्वार्थे द्वयसज्मात्रचौ बहुलम्' (वा ३१३४) । तावदेव तावद्वयसम् । तावन्मात्रम् ।

१८३९ । पुरुषहस्तिभ्यामण्च । (५-२-३८)

पुरुषः प्रमाणमस्य पौरुषम—पुरुषद्वयसम । हास्तिनम्—हस्तिद्वयसम् ।

१८४० । यत्तदेतेभ्यः परिमाणे वतुप् । ५-२-३९)

यत्परिमाणमस्य यावान । तावान । एतावान ।

तत्प्रमाणमित्यर्थे प्रमाणे विद्यमानात्प्रथमान्तात् द्वयसच्, दघ्नच्, मात्रच्, एते प्रत्ययाः स्युः । "प्रमाणवानिदमर्थोऽत्रप्रत्ययार्थः" इति भाष्ये स्पष्टम् । तत्र "प्रथमश्च द्वितीयश्च ऊर्ध्वमाने मतौ मम" इति भाष्ये स्पष्टम् । प्रमाणमिह परिच्छेदकमात्रम् । तत्र मात्रच् प्रस्थमात्रमूरुमात्रमित्यादि इति कैयटः । वस्तुतस्तु "यत्तदेतेभ्यः" इति सूत्रभाष्यस्वरसादायामपरिच्छेदकमेवात्र प्रमाणम्" इति शब्देन्दुशेखरे विस्तरः । **प्रमाणे ल इति** ॥ लुको ल इति पूर्वाचार्यशास्त्रसिद्धा संज्ञा । प्रमाणे वर्तमानाद्विहितस्य द्वयसजादेर्लुग्वक्तव्य इत्यर्थः । **शमो दिष्टिर्वितस्तिरिति** ॥ शमः प्रमाणमस्येत्यादि विग्रहः । शमादयः अनूर्ध्वमानविशेषाः । तेभ्यो मात्रचो लुक् । इतरयो-रसम्भवात् । अत्र 'आयामस्तु प्रमाण स्यात्' इत्येव गृह्यते । एवञ्च ऊरुद्वयसमित्यादौ न लुक् । **द्विगोर्नित्यमिति** ॥ प्रमाणान्ताद्विगोः परस्य द्वयसजादेर्नित्यं लुक् स्यादित्यर्थः । प्रमाणान्तस्य द्विगोः प्रमाणवृत्तित्वात् सामर्थ्यादिह तदन्तविधिः । पूर्ववार्तिकेन तु नात्र प्राप्तिरस्ति । द्विगोः प्रमाणत्वाभावात् । **द्विशममिति** ॥ तद्धितार्थे द्विगुः । ततो मात्रचः अनेन लुक् । "विकल्पस्याप्रकृतत्वादेव सिद्धे नित्यग्रहणं संशये वक्ष्यमाणस्य मात्रचः लुगर्थः । अन्यथा शममात्रमित्यत्रैव द्विशमशब्दादपि सः मात्रच् न लुप्येत" इति भाष्ये स्पष्टम् । **प्रमाणेति** ॥ प्रमाणवाचिनः परिमाणवाचिनः सङ्ख्यावाचिनश्च संशये मात्रज्वक्तव्य इत्यर्थः । अत्र प्रमाणमायाम एव गृह्यते । "आयामस्तु प्रमाणं स्यात्" इति वचनात् । अत एव परिमाणग्रहणमर्थवत् । **शममात्रमित्यादि** ॥ शमस्यात्र वेत्यादि विग्रहः । **वत्वन्तादिति** ॥ वार्तिकमिदम् । **पुरुषहस्तिभ्यामण् च** ॥ उक्तविषये इति शेषः । चात् द्वयसजादयस्त्रयः । **यत्तदेतेभ्यः** ॥ तदस्येत्यनुवर्तते । अस्य तत्परिमाणमित्यर्थे परिमाणवाचिनः प्रथमान्तेभ्यः किम्, यद्, तद्, एतद्, एभ्यः वतुप् स्यादित्यर्थः । **यावानिति** ॥ यच्छब्दाद्वतुप् । उपावितौ । 'आ सर्वनाम्नः' इत्यात्त्वम्, सुः, 'उगिदचाम्'

१८४१। किमिदम्भ्यां वो घः। (५-२-४०)

आभ्यां वतुप् स्याद्वस्य च घः। कियान्। इयान्।

१८४२। किमः सङ्ख्यापरिमाणे डति च। (५-२-४१)

चाद्वतुप्। तस्य च वस्य घः स्यात्। का सङ्ख्या एषां ते कति—कियन्तः। क्षेपेतु न। का सङ्ख्या एषां दशानाम्।

१८४३। सङ्ख्याया अवयवे तयप्। (५-२-४२)

पञ्च अवयवाः अस्य पञ्चतयं दारु।

१८४४। द्वित्रिभ्यां तयस्यायज्वा। (५-२-४३)

इति नुम्, 'अत्वसन्तस्य' इति दीर्घः, हल्ङ्यादिसंयोगान्तलोपौ। एवं तावान्, एतावान्। **किमिदंभ्यां वो घः** ॥ तदस्य इति, परिमाणे वतुविति चानुवर्तते। तदाह। **आभ्यां वतुप् स्यादिति** ॥ आभ्यां प्रथमान्ताभ्याम् अस्य तत्परिमाणमित्यर्थे वतुप् स्यादित्यर्थः। **वस्य च घ इति** ॥ वकारस्य घकार इत्यर्थः। **कियानिति** ॥ किं परिमाणमस्येति विग्रहः। किंशब्दात् वतुप्। उपाधिर्ना। वकारस्य घकारः इयादेशः, किम् इयत् इति स्थिते 'इदङ्किमोरीश्की' इति इदमः र्क भावे 'यस्येति च' इति ईकारलोपे कियत्शब्दात्सौ 'उगिदचाम्' इति नुमि 'अत्वसन्तस्य' इति दीर्घे, हल्ङ्यादिसंयोगान्तलोपाविति भावः। **इयानिति** ॥ इदंशब्दात् वतुपि वकारस्य घकारे इयादेशे इदम् इयत् इति स्थिते 'इदङ्किमोरीश्की' इति शित्त्वादिदमः ईकारे सर्वादेशे 'यस्येति च' इति ईकारस्य लोपे इत् इति प्रत्ययमात्रं शिष्यते। ततः सौ नुमादि पूर्ववत्। **किमः सङ्ख्या** ॥ तदस्येत्यनुवर्तते। सङ्ख्यायाः परिमाणं परिच्छेदः। किंशब्दः प्रश्ने वर्तते। का अस्य सङ्ख्येत्येवं सङ्ख्यापरिच्छेदविषयकप्रश्ने विद्यमानात् किंशब्दात्प्रथमान्तात् अस्य इत्यर्थे डतिप्रत्ययश्च स्यादित्यर्थः। **का सङ्ख्या एषां ते कतीति** ॥ का सङ्ख्या अस्येति, का सङ्ख्या अनयोरिति च प्रश्नो न सम्भवति। अस्येत्यनेन एकत्वस्य अनयोरित्यनेन द्वित्वस्य च ज्ञातत्वात्। ज्ञाते च प्रश्नासम्भवात्। का सङ्ख्या एषामिति तु प्रश्नः सम्भवति। तत्र एषामित्यनेन बहुत्वस्य ज्ञातत्वेऽपि तद्व्याप्यत्रित्वचतुष्ट्वादिसङ्ख्यानामज्ञातत्वात्। उक्तञ्च भाष्ये 'न द्व्येकयोः प्रश्नोऽस्ति' इति। ततश्च नित्यबहुवचनान्तोऽयं कतिशब्दः 'डति च' इति षट्संज्ञकत्वात् 'षड्भ्यो लुक्' इति जश्शसोर्लुक्। **कियन्त इति** ॥ कियानितिवत्प्रक्रिया। बहुवचनं विशेषः। सङ्ख्यापरिमाणे इत्युक्तेः किमः क्षेपार्थकत्वे डतिर्न भवति। **का सङ्ख्या एषां दशानामिति** ॥ दशावरा परिषदित्यत्र ब्राह्मणब्रुवाणां मेळने इदं वाक्यं प्रवृत्तम्। सङ्ख्येयद्वारा सङ्ख्यायाः कुत्सात्र गम्यते। अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम्। सहस्रशः समेतानामपरिषत्त्वं न विद्यते" इति स्मरणात्। **सङ्ख्यायाः** ॥ तदस्येत्यनुवर्तते। द्वित्र्यादिसङ्ख्याका अवयवाः अस्यावयविनः इति विग्रहे अवयवीभूतसङ्ख्यावाचिनः प्रथमान्तात् अस्यावयविनः इत्यर्थे तयबित्यर्थः। **पञ्चतयमिति** ॥

द्वयम्—द्वितयम् । त्रयम्—त्रितयम् ।

१८४५ । उभादुदात्तो नित्यम् । (५-२-४४)

उभशब्दात्तयप आदेशोऽयच् स्यात्, स चोदात्तः । उभयम् ।

इति पाञ्चमिकाः ।

अथ तद्धिते मत्वर्थीयप्रकरणम् ।

१८४६ । तदस्मिन्नधिकमिति दशान्ताड्डः । (५-२-४५)

एकादश अधिकाः अस्मिन्नेकादशम् । 'शतसहस्रयोरेवेष्यते' (वा ३१४१)। नेह । एकादश अधिकाः अस्यां विंशतौ । 'प्रकृतिप्रत्ययार्थयोः समानजातीयत्वमेवेष्यते' (वा ३१४०) । नेह । एकादश माषाः अधिकाः अस्मिन्सुवर्णशते ।

१८४७ । शदन्तविंशतेश्च । (५-२-४६)

डः स्यादुक्तेऽर्थे । त्रिंशदधिका अस्मिन त्रिंशं शतम् । विंशम् ।

पञ्चावयवकः समुदाय इत्यर्थः । **द्वित्रिभ्याम्** ॥ द्वित्रिभ्याम्परस्य तयपः अयज्वा स्यादित्यर्थः। **द्वयमिति** ॥ द्विशब्दात्तयपः अयचि 'यस्येति च' इति इकारलोपः । द्वयवयवकसमुदाय इत्यर्थः । एवं त्रयम् । **उभादुदात्तो नित्यम्** ॥ **स चोदात्त इति** ॥ आद्युदात्त इत्यर्थः । "अन्तोदात्तत्वस्य चित्त्वेनैव सिद्धेः" इति भाष्ये स्पष्टम् । "अत्र अयच् प्रत्यय एव विधीयते, नतु तयप आदेशः" इति स्थानिवत्सूत्रभाष्ये स्पष्टम् । तयप आदेश इति मूलन्तु वार्तिकानुरोधेन ॥

इति पाञ्चमिकाः ।

अथ मत्वर्थीयाः—**तदस्मिन्नधिकम्** ॥ तदधिकमस्मिन् इति विग्रहे प्रथमान्तात् दशन्शब्दान्तात् समासात् अस्मिन्नित्यर्थे डप्रत्ययः स्यादित्यर्थः । प्रत्ययविधौ तदन्तविधिप्रतिषेधादन्तग्रहणम् । अत एव निर्देशात् पञ्चम्यर्थे सप्तमीत्याहुः । "औपश्लेषिकेऽधिकरणे सप्तमी" इति भाष्यम् । "सामीपिकमधिकरणम्" इति कैयटः । **एकादश माषाः अधिकाः अस्मिन्निति** ॥ अस्मादित्यर्थः । अस्मिन् उपश्लिष्टा इति वा । नच व्यपदेशिवत्त्वेन केवलदशन्शब्दादपि स्यादिति शङ्क्यम् । 'व्यपदेशिवद्भावोऽप्रातिपदिकेन' इत्युक्तेः । **शदन्तविंशतेश्च** ॥ शेषपूरणेन सूत्रं व्याचष्टे । **डः स्यादुक्तेऽर्थे इति** ॥ दशान्तत्वाभावात्पूर्वेण प्राप्तिः । **त्रिंशं शतमिति** ॥ डे सति 'टेः' इति टिलोपः । **विंशमिति** ॥ विंशतिः अस्मिन्नधिकमिति विग्रहः । 'ति विंशतेः' इति तिशब्दस्य लोपः । अन्तग्रहणादेकत्रिंशं शतमिति सिद्धम् । अन्यथा प्रत्ययग्रहणपरिभाषया तदादिनियमः स्यात् । 'विंशतावप्यन्तग्रहणम्' इति वार्तिकात् एकविंशं

१८४८। सङ्ख्याया गुणस्य निमाने मयट्। (५-२-४७)

भागस्य मूल्ये वर्तमानात्प्रथमान्तात्सङ्ख्यावाचिनः षष्ठ्यर्थे मयट् स्यात्। यवानां द्वौ भागौ निमानमस्योदश्विद्भागस्य द्विमयमुदश्विद्यवानाम्। 'गुणस्य' इति किम्। द्वौ व्रीहियवौ निमानमस्योदश्वित:। 'निमाने' किम्। द्वौ गुणौ क्षीरस्य एकस्तैलस्य द्विगुणं क्षीरं पच्यते तैलेन।

१८४९। तस्य पूरणे डट्। (५-२-४८)

एकादशानां पूरण: एकादश:।

१८५०। नान्तादसङ्ख्यादेर्मट्। (५-२-४९)

डटो मडागम: स्यात्। पञ्चानां पूरण: पञ्चम:। 'नान्तात्' किम्। विंश:। 'असङ्ख्यादे:' किम। एकादश:।

१८५१। षट्कतिकतिपयचतुरां थुक्। (५-२-५१)

एषां थुगागम: स्याड्डटि। षण्णां पूरण: षष्ठ:। कतिथ:। कतिपयशब्द-

---

शतमित्यादि सिद्धम्। **सङ्ख्याया गुणस्य** ॥ तदस्येत्यनुवर्तते। गुण: भाग: अंश: निमीयते विक्रीयतेऽनेनेति निमानं मूल्यद्रव्यम्। 'मेङ् प्रणिदाने' करणे ल्युट्। तदाह। भागस्य मूल्य इत्यादि। **षष्ठ्यर्थे इति** ॥ अस्येत्यर्थे इत्यर्थ:। यवानान्द्वौ भागौ निमानमस्योदश्विद्भागस्येति विग्रहवाक्यम्। द्वाभ्यां यवप्रस्थाभ्याम् एक उदश्विन्प्रस्थो विक्रीयते यत्र तत्रेदं वाक्यमप्रयुज्यते। द्विमयमुदश्विद्यवानामित्युदाहरणम्। यवानामिति सम्बन्धसामान्ये षष्ठी। यवप्रस्थद्वयेन विक्रेतव्यमुदश्विदित्यर्थ:। द्विशब्दस्य भागवृत्तेर्नित्यसापेक्षत्वाद्यवानामित्येतत्सापेक्षत्वेऽपि प्रत्यय:। **द्वौ व्रीहियवौ निमानमस्योदश्वित इति** ॥ द्वित्वसङ्ख्याविशिष्टौ व्रीहियवराशी यौ तौ अस्य उदश्वितो निमानमित्यर्थ:। तत्र उदश्विद्यावत् तदपेक्षया व्रीहियवराश्योर्द्विगुणत्वन्न विवक्षितम्। किन्तु राशिद्वित्वमेव विवक्षितमिति द्विशब्दस्य भागवृत्तित्वाभावान्न प्रत्यय:। **तस्य पूरणे डट्** ॥ सङ्ख्याया इत्यनुवर्तते। सङ्ख्येयार्थकसङ्ख्यावाचिन: षष्ठ्यन्तात्प्रत्ययनिर्मितसङ्ख्यायाः पूरणे वाच्ये डट्प्रत्यय: स्यादित्यर्थ:। पूर्यते अनेनेति पूरण: अवयव: स: प्रत्ययार्थ:। **एकादशः इति** ॥ एकादशत्वसङ्ख्यायाः पूरकोऽवयव इत्यर्थ:। यस्मिन् अनुपात्ते एकादशत्वसङ्ख्या न सम्पद्यते, यस्मिन्नुपात्ते सा पूर्यते सोऽवयव: एकदेश इति यावत्। प्रवृत्तिनिमित्तेति किम्। पञ्चानाङ्घटानां पूरणं जलादि। **नान्तादसङ्ख्यादेर्मट्** ॥ **डटो मडागमः स्यादिति** ॥ शेषपूरणमिदम्। डटि टकार इत्। अकार उच्चारणार्थ:। **पञ्चम इति** ॥ पञ्चन्शब्दात् डटि तस्य मडागमे सति नलोप:। "यद्यपि मेट: प्रत्ययत्वेऽपि न रूपभेद:। तथापि स्वरविशेषार्थम्मडागमाश्रयणम्" इति भाष्ये स्पष्टम्। **षट्कति** ॥ थुकि ककार इत्। उकार उच्चारणार्थ:। कित्त्वादन्त्यादचः पर:। **षष्ठ इति** ॥ अपदान्तत्वात् षस्य न जश्त्वम्।

स्यासङ्ख्यात्वेऽप्यत एव ज्ञापकाड्डट्। कतिपयथः। चतुर्थः। 'चतुरश्छयताद्याद्यक्षरस्य लोपश्च' (वा ३११८)। तुरीयः—तुर्यः।

१८५२। बहुपूगगणसङ्घस्य तिथुक्। (५-२-५२)

'डटि' इत्येव। पूगसङ्घयोरसङ्ख्यात्वेऽप्यत एव डट्। बहुतिथः इत्यादि।

१८५३। वतोरिथुक्। (५-२-५३)

'डटि' इत्येव। यावतिथः।

१८५४। द्वेस्तीयः। (५-२-५४)

डटोऽपवादः। द्वयोः पूरणः द्वितीयः।

१८५५। त्रेः सम्प्रसारणं च। (५-२-५५)

तृतीयः।

१८५६। विंशत्यादिभ्यस्तमडन्यतरस्याम्। (५-२-५६)

एभ्यो डटस्तमडागमो वा स्यात्। विंशतितमः—विंशः। एकविंशतितमः—एकविंशः।

१८५७। नित्यं शतादिमासार्धमाससंवत्सराच्च। (५-२-५७)

चतुर्थः इति॥ अपदान्तत्वान्न रेफस्य विसर्गः। **चतुरः इति॥** वार्तिकमिदम्। चतुरशब्दात् षष्ठ्यन्तात्पूरणे छयतौ स्तः। **आद्यक्षरस्य लोपश्चेति॥** सङ्घातस्य लोपश्चेत्यर्थः। **बहुपूगगण॥** बहु, पूग, गण, सङ्घ, एषाण्डटि तिथुगागमः स्यादित्यर्थः। ककार इत्। उकार उच्चारणार्थः। कित्त्वादन्त्यादचः परः। **इत्यादीति॥** पूगतिथः, गणतिथः, सङ्घतिथः। **वतोरिथुक्॥ डटीत्येवेति॥** वतुबन्तस्य इथुगागमः स्यात् डटीत्यर्थः। **यावतिथ इति॥** यावतां पूरण इति विग्रहः। बहुगणेति सङ्ख्यात्वात् 'तस्य पूरणे' इति डटि प्रकृतेरिथुक्। **द्वेस्तीयः॥** द्विशब्दात् षष्ठ्यन्तात् पूरणे तीयप्रत्ययः स्यादित्यर्थः। **त्रेः सम्प्रसारणञ्च॥** त्रेस्तीयः स्यात्प्रकृतेः सम्प्रसारणञ्चेत्यर्थः। **तृतीयः इति॥** त्रयाणां पूरण इति विग्रहः। तीयप्रत्यये सति रेफस्य सम्प्रसारणम् ऋकारः। 'सम्प्रसारणाच्च' इति पूर्वरूपम्। 'हलः' इति दीर्घस्तु न भवति। 'ह्रलोपे' इत्यतः अण इत्यनुवृत्तेः। **विंशत्यादिभ्यः॥** तमटि टकार इत्, मकारादकार उच्चारणार्थः। अत्र 'पङ्क्तिविंशति' इति सूत्रानुक्रान्ता एव विंशत्यादयो गृह्यन्ते। नतु लोकप्रसिद्धा एकविंशत्यादयोऽपि। विप्रकर्षात्" इति कैयटः। एकविंशतितमः इत्यत्र तु तदन्तविधिना तमडित्यग्रे वक्ष्यते। **नित्यं शतादिमासार्धमाससंवत्सराच्च॥** शतादिभ्यः

शतस्य पूरणः शततमः। एकशततमः। मासादेरत एव डट्। मासतमः। अर्धमासतमः। संवत्सरतमः।

१८५८। षष्ट्यादेश्चासङ्ख्यादेः। (५-२-५८)

षष्टितमः। संख्यादेस्तु विंशत्यादिभ्यः (सू १८५६) इति विकल्प एव। एकषष्टः—एकषष्टितमः।

१८५९। मतौ छः सूक्तसाम्नोः। (५-२-५९)

मत्वर्थे छः स्यात्। अच्छावाकशब्दोऽस्मिन्नस्ति अच्छावाकीयं सूक्तम्। वारवन्तीयं साम।

१८६०। अध्यायानुवाकयोर्लुक्। (५-२-६०)

मासात् अर्धमासात् संवत्सराच्च परस्य डटो नित्यं तमडागमः स्यादित्यर्थः। ननु षष्ट्यादेश्चेत्युत्तरसूत्रेण शततमः सिध्यतीत्यत आह। **एकशततमः इति॥** 'असङ्ख्यादेः' इति पर्युदासादुत्तरसूत्रस्य नात्र प्रवृत्तिरिति भावः। ननु मासार्धमाससंवत्सरशब्दानां सङ्ख्यावाचित्वाभावात् तेभ्यो डट एवाप्रसक्तेः तस्य कथन्तमड्विधिरित्यत आह। **मासादेरिति॥ मासतम इति॥** मासस्य पूरणः अर्धमासादिरवयवः। **अर्धमासतम इति॥** अर्धमासस्य पूरणः तिथ्यादिरवयवः। **संवत्सरतम इति॥** संवत्सरस्य पूरणः मासादिरवयवः। **षष्ट्यादेश्चासङ्ख्यादेः॥** असङ्ख्यापूर्वपदात् षष्ट्यादेः परस्य डटो नित्यं तमडागमः स्यादित्यर्थः। 'विंशत्यादिभ्यः' इति विकल्पस्यापवादः। **एकषष्टः—एकषष्टितमः इति॥** सङ्ख्यादित्वान्नित्यस्य तमटोऽभावे विंशत्यादिभ्य इति डटस्तमड्विकल्पः। तमडभावे डटि 'यस्येति च' इति इकारलोपे एकषष्ट इति रूपम्। ननु केवलात् षष्ट्यादेर्विहितस्य नित्यतमटः सङ्ख्यादेः कथं प्रसक्तिः। तमडागमविधेरप्रत्ययविधित्वेऽपि 'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति' इति निषेधादिति चेन्मैवम्। सङ्ख्यादेरिति हि इह प्रकरणे ग्रहणवता प्रातिपदिकेन तदन्तविधिं ज्ञापयति। तेन 'विंशत्यादिभ्यः' इति पूर्वसूत्रम् एकविंशतितमः इत्यादावपि प्रवर्तते इति भाष्ये स्पष्टम्। एवञ्च एकान्नविंशतितमः इत्यपि सिद्धम्। **मतौ छः सूक्तसाम्नोः॥** मनुशब्दो मत्वर्थे लाक्षणिक इत्याह। **मत्वर्थे इति॥ अच्छावाकीयं सूक्तमिति॥** अच्छावाकशब्दः अस्यास्ति अस्मिन्नस्तीति वा विग्रहः। अच्छावाकशब्दयुक्तमित्यर्थः। अच्छावाकशब्दात् शब्दस्वरूपपरात् प्रथमान्ताच्छः। **वारवन्तीयं सामेति॥** अश्वं नत्वा वारवन्तमित्यस्यामृच्यद्धृढमित्यर्थः। एवमस्य वामीयमित्यपि। अस्य वामस्येत्यस्य एकदेशानुकरणमस्य वामेति। तस्माच्छः। अस्यवामशब्दसंयुक्तमित्यर्थः। प्रकृतिवदनुकरणमित्यस्यानित्यत्वात्सुपो लुक्। **अध्यायानुवाकयोर्लुक्॥** नन्वध्यायानुवाकयोरभिधेये छस्य कथं प्राप्तिः। सूक्तसाम्नोरिति नियमादित्यत आह। **अत एवेति॥ विधानेति॥** "मतुप्प्रकरण

मत्वर्थस्य छस्य । अत एव ज्ञापकात्तत्र छः । विधानसामर्थ्याच्च विकल्पेन लुक् । गर्दभाण्डः—गर्दभाण्डीयः ।

१८६१ । विमुक्तादिभ्योऽण् । (५-२-६१)

मत्वर्थेऽण् स्यादध्यायानुवाकयोः । विमुक्तशब्दोऽस्मिन्नस्ति वैमुक्तः । दैवासुरः ।

१८६२ । गोपदादिभ्यो वुन् । (५-२-६२)

मत्वर्थेऽध्यायानुवाकयोः । गोपदकः । इषेत्वकः ।

१८६३ । तत्र कुशलः पथः । (५-२-६३)

वुन् स्यात् । पथि कुशलः पथिकः ।

१८६४ । आकर्षादिभ्यः कन् । (५-२-६४)

आकर्षे कुशलः आकर्षकः । 'आकर्षादिभ्यः' इति रेफरहितो मुख्यः पाठः । आकर्षो निकषः ।

१८६५ । धनहिरण्यात्कामे । (५-२-६५)

कामः इच्छा । धने कामो धनको देवदत्तस्य । हिरण्यकः ।

१८६६ । स्वाङ्गेभ्यः प्रसिते । (५-२-६६)

केशेषु प्रसितः केशकः । तद्रचनायां तत्पर इत्यर्थः ।

एवास्मिन्सूत्रे कर्तव्ये अत्र प्रकरणे छस्य लुग्विधानमामर्थ्यात्" इति केयटः । ज्ञापकसिद्धः, विधानसामर्थ्यादित्यन्ये । भाष्ये तु "अध्यायानुवाकयोर्वा लुगवक्तव्यः" इति वचनमेवारब्धम् । **गर्दभाण्डः-गर्दभाण्डीय इति** ॥ गर्दभाण्डशब्दसंयुक्तोऽध्यायोऽनुवाको वेत्यर्थः । भाष्योदाहरणादेव क्वचिदेतन्नामकोऽध्यायोऽनुवाको वा अन्वेष्यः । **विमुक्तादिभ्योऽण्** ॥ **वैमुक्त इति** ॥ विमुक्तशब्दयुक्तोऽध्यायोऽनुवाको वेत्यर्थः । **गोपदादिभ्यो वुन्** ॥ **गोपदक इति** ॥ गोपदशब्दसंयुक्तोऽध्यायोऽनुवाको वेत्यर्थः । **इषेत्वक इति** ॥ इषेत्वा इति शब्दयुक्त इत्यर्थः । अस्य वार्णीयमित्यत्रोक्तरीत्या सुपो न लुक् । **तत्र कुशलः पथः** ॥ **वुन् स्यादिति** ॥ सप्तम्यन्तात्पथिन्शब्दात्कुशल इत्यर्थे वुनित्यर्थः । **पथिक इति** ॥ अकादेशे 'नस्तद्धिते' इति टिलोपः । **आकर्षादिभ्यः कन्** ॥ **आकर्षक इति** ॥ यद्यपि वुनैवानुवृत्तेनेदं सिध्यति । तथापि शकुनिक इत्यादयर्थं इन्ग्रहणम् । **धनहिरण्यात्कामे** ॥ तत्रेत्यनुवर्तते । धनशब्दात् हिरण्यशब्दाच्च सप्तम्यन्तात्कामे वाच्ये कन् स्यादित्यर्थः । **काम इच्छेति** ॥ नतु कामयिता । व्याख्यानादिति भावः । **स्वाङ्गेभ्यः प्रसिते** ॥ तत्रेत्यनुवर्तते । स्वाङ्गेभ्यः

१८६७। उदराट्ठगाद्यूने। (५-२-६७)

अविजिगीषौ ठक् स्यात्कनोऽपवादः। बुभुक्षयात्यन्तपीडितः उदरे प्रसितः औदरिकः। 'आद्यूने' किम्। उदरकः। उदरपरिमार्जनादौ प्रसक्त इत्यर्थः।

१८६८। सस्येन परिजातः। (५-२-६८)

कन् स्वर्यते न तु ठक्। सस्यशब्दो गुणवाची न तु धान्यवाची। 'शस्येन' इति पाठान्तरम्। सस्येन गुणेन परिजातः सम्बद्धः सस्यकः साधुः।

१८६९। अंशं हारी। (५-२-६९)

'हारी' इत्यावश्यके णिनिः। अत एव तद्योगे षष्ठी न। अंशको दायादः।

१८७०। तन्त्रादचिरापहृते। (५-२-७०)

तन्त्रकः पटः। प्रत्यग्र इत्यर्थः।

१८७१। ब्राह्मणकोष्णिके संज्ञायाम्। (५-२-७१)

सप्तम्यन्तेभ्यः प्रसितेऽर्थे कन् स्यादित्यर्थः। प्रसितः उत्सुकः। **तद्रचनायामिति** ॥ वेष्यादिग्रथने इत्यर्थः। अत्रैवार्थे अस्य साधुत्वम्। व्याख्यानादिति भावः। **उदराट्ठगाद्यूने** ॥ तत्र प्रसित इत्यनुवर्तते। सप्तम्यन्तादुदरशब्दात् आद्यूने प्रसितेऽर्थे ठगित्यर्थः इत्यभिप्रेत्य आद्यूनशब्दं विवृण्वन्नाह। **अविजिगीषाविति** ॥ 'दिवोऽविजिगीषायाम्' इत्यविजिगीषायामेव दिवो निष्ठानत्वविधानादिति भावः। **बुभुक्षयेति** ॥ क्षुधा पीडित एव सन् उदरपरिमार्जने प्रसितः, ननु मल्लयुद्धे विजिगीषयेत्यर्थः। **उदरक इति** ॥ मल्ल इति शेषः। स हि युद्धे विजिगीषया उदरपरिमार्जनादौ उत्सुको भवति। तदाह। **उदरपरिमार्जनादौ प्रसक्त इति** ॥ विजिगीषयेति शेषः। **सस्येन परिजातः**॥ तृतीयान्तात् सस्यशब्दात्परिजात इत्यर्थे कन् स्यादित्यर्थः। सन्निहितष्ठगेव कुतो नानुवर्तत इत्यत आह। **कन् स्वर्यते नतु ठगिति** ॥ स्वरितत्वप्रतिज्ञायान्तु पाणिनीयपरम्परैव प्रमाणम्। **सस्यशब्दो गुणवाचीति** ॥ व्याख्यानमेवात्र शरणम्। **शस्येनेतीति** ॥ 'शंसु स्तुतौ' इति धातौ कर्मणि यति शस्यशब्दः स्तुत्यपर्यायः। स्तुत्यश्च गुण एवेति भावः। परिजात इत्यस्य विवरणं सम्बद्ध इति। **अंशं हारी** ॥ द्वितीयान्तात् अंशशब्दात् हारीत्यर्थे कन् स्यादित्यर्थः। ननु कृद्योगषष्ठीप्रसङ्गादंशमिति कथं द्वितीयेत्यत आह। **आवश्यके णिनिरिति** ॥ 'आवश्यकाधमर्ण्ययोः' इत्यनेनेति शेषः। **षष्ठी नेति** ॥ 'अकेनोः' इति तन्निषेधादिति भावः। **तन्त्रादचिरापहृते** ॥ तन्त्रशब्दात् पञ्चम्यन्तात् अचिरापहृतेऽर्थे कनित्यर्थः। तन्त्रं तन्तुवायशलाका। अचिरेण कालेन अपहृतः अचिरापहृतः। 'कालाः परिमाणिना' इति समासः। **प्रत्यग्र इति** ॥ नूतन इत्यर्थः। **ब्राह्मणकोष्णिके** ॥ आयुधजीविविषयब्राह्मणशब्दात् प्रथमान्तात् अस्मिन्नित्यर्थे

आयुधजीविनो ब्राह्मणाः यस्मिन्देशे सः ब्राह्मणकः । अल्पमन्नं यस्यां सा उष्णिका यवागूः । अल्पान्नशब्दस्योष्णादेशो निपात्यते ।

१८७२ । शीतोष्णाभ्यां कारिणि । (५-२-७२)

शीतं करोतीति शीतकोऽलसः । उष्णं करोतीत्युष्णकः शीघ्रकारी ।

१८७३ । अधिकम् । (५-२-७३)

अध्यारूढशब्दात्कनुत्तरपदलोपश्च ।

१८७४ । अनुकाभिकाभीकः कमिता । (५-२-७४)

अन्वभिभ्यां कन्नभेः पाक्षिको दीर्घश्च । अनुकामयते अनुकः । अभिकामयते अभिकः—अभीकः ।

१८७५ । पार्श्वेनान्विच्छति । (५-२-७५)

अनृजुरुपायः पार्श्वम्, तेनान्विच्छति पार्श्वकः ।

१८७६ । अयःशूलदण्डाजिनाभ्यां ठक्ठञौ । (५-२-७६)

तीक्ष्णः उपायोऽयःशूलं, तेनान्विच्छति आयःशूलिकः । साहसिकः । दण्डाजिनं दम्भः । तेनान्विच्छति दाण्डाजिनिकः ।

कन् निपात्यते इत्यर्थः । **अल्पान्नशब्दस्येति** ॥ अल्पान्नशब्दात् प्रथमान्तात् अस्मिन्नित्यर्थे कन्प्रत्ययः प्रकृतेरुष्णादेशश्च निपात्यते इत्यर्थः **शीतोष्णाभ्याङ्कारिणि** ॥ शीतमिव शीतं मन्दमित्यर्थः । उष्णमिव उष्णं शीघ्रमित्यर्थः । अभूततद्भावेऽर्थे शीतोष्णाभ्यां द्वितीयान्ताभ्याङ्कृञ् स्यादित्यर्थः । "य आशु कर्तव्यानर्थान् क्षिप्रं करोति सः शीतक उच्यते, यस्तु अनाशु कर्तव्यान् आशुवत् करोति सः उष्णक उच्यते" इति भाष्ये । संज्ञायां मन्यनुब्रूयेरयमर्थो लभ्यते" इति कैयटः । तदाह । **शीतकोऽलस इति** ॥ **उष्णकः शीघ्रकारीति च** ॥ **अधिकम्** ॥ **अध्यारूढशब्दादिति** ॥ व्युत्पादनमात्रमिदम् । शुद्धरूढ एवायमिति बोध्यम् । **अनुकाभिक** ॥ अनुक, अभिक, अभीक, एषां समाहारद्वन्द्वः । नौत्रमुन्मत्वम् । **पार्श्वेनान्विच्छति** ॥ तृतीयान्तात्पार्श्वशब्दात् अन्विच्छतीत्यर्थे संज्ञायां कन् स्यादित्यर्थः । अन्वेषणं मार्गणम् । पार्श्वमिव पार्श्वम् । अनृजुरुपायः । ऋजूपायेन अन्वेष्टव्यान् अर्थान् यः अनृजुना उपायेनान्विच्छति सः पार्श्वक इति भाष्यम् । तदाह । **अनृजुरित्यादि** ॥ **अयःशूलदण्डाजिनाभ्यां ठक्ठञौ** ॥ अयःशूल, दण्डाजिन आभ्यां तृतीयान्ताभ्यां अन्विच्छतीत्यर्थे संज्ञायां ठक्ठञौ स्त इत्यर्थः । अयःशूलमिव अयःशूलम् । साहसमित्यर्थः । "यो मृदुनोपायेन अन्वेष्टव्यानर्थान् तीक्ष्णोपायेनान्विच्छति सः आयःशूलिकः" इति भाष्यम् । तदाह । **तीक्ष्णोपाय इत्यादि** ॥ **दण्डाजिनं दम्भ इति** ॥ दम्भार्थत्वाद्दण्डाजिनशब्दो दम्भे

१८७७। तावतिथं ग्रहणमिति लुग्वा। (५-२-७७)

कन् स्यात्पूरणप्रत्ययस्य च लुग्वा। द्वितीयकं—द्विकं वा ग्रहणं देवदत्तस्य। द्वितीयेन रूपेण ग्रहणमित्यर्थः। 'तावतिथेन गृह्णातीति कन्वक्तव्यो नित्यं च लुक्' (वा ३१७२)। षष्ठेन रूपेण गृह्णाति षट्को देवदत्तः। पञ्चकः।

१८७८। स एषां ग्रामणीः। (५-२-७८)

देवदत्तो मुख्यो एषां देवदत्तकाः। त्वत्काः। मत्काः।

१८७९। शृङ्खलमस्य बन्धनं करभे। (५-२-७९)

शृङ्खलकः करभः।

१८८०। उत्क उन्मनाः। (५-२-८०)

उद्गतमनस्कवृत्तेरुच्छब्दात्स्वार्थे कन्। उत्कः उत्कण्ठितः।

१८८१। कालप्रयोजनाद्रोगे। (५-२-८१)

लाक्षणिक इति भावः। **तावतिथम्** ॥ तावताम्पूरणन्तावतिथमिति पूरणप्रत्ययान्तानां सामान्यनिर्देशः। तृतीयार्थे प्रथमा। ग्रहणमिति भावे ल्युडन्तम्। तथाच तृतीयान्तात्पूरणप्रत्ययान्तात् ग्रहणमित्यर्थे कन् स्यात्पूरणप्रत्ययस्य च लुग्वेत्यर्थः इत्यभिप्रेत्य आह। **कन् स्यादित्यादि** ॥ पूरणप्रत्ययान्तस्य तु प्रकृतिभूतस्य न लुक्। किन्तु पूरणप्रत्ययमात्रस्य "षष्ठेन गृह्णाति षट्कः" इति भाष्योदाहरणात्। **द्वितीयेन रूपेणेति** ॥ अनेन द्वितीयैव समर्थविभक्तिरिति सूचितम्। इतिना लोकानुसारित्वङ्गम्यते। एवञ्च ग्रन्थविषये एवमेव ग्रहणमिह फलति तेन द्वितीयङ्गृह्णन्देवदत्तेन दण्डस्येत्यादौ न भवति। **तावतिथेनेति** ॥ ग्रहणेऽर्थे विहितङ्गृहीतरि न प्राप्नोतीत्यारम्भः। **षट्को देवदत्त इति** ॥ भाष्ये एवमेवोदाहृतत्वात् पूरणप्रत्ययस्यैव लुगिति गम्यते। नतु तदन्तस्य। **स एषाङ्ग्रामणीः** ॥ ग्रामणीविशेषवाचकात् शब्दात्प्रथमान्तात् अस्येत्यर्थे कन् स्यादित्यर्थः। **देवदत्तो मुख्यो एषामिति** ॥ एतेन ग्रामणीशब्दो मुख्यपर्याय इति सूचितम्। "ग्रामणीर्नापिते पुंसि श्रेष्ठे ग्रामाधिपे त्रिषु" इत्यमरः। **त्वत्काः, मत्काः इति** ॥ त्वमहं वा मुख्यो एषामिति विग्रहः। प्रत्ययोत्तरपदयोश्चेति त्वमौ। **शृङ्खलमस्य** ॥ षष्ठ्यर्थे प्रथमा। बन्धनमिति करणे ल्युट्। अस्य करभस्य शृङ्खलं बन्धनमिति विग्रहे बन्धनविशेषणकात् प्रथमान्तात् अस्य करभस्येत्यर्थे कन् स्यादित्यर्थः। **शृङ्खलकः करभ इति** ॥ शृङ्खलेन बद्ध इति यावत्। करभः उष्ट्रः। **उत्क उन्मनाः** ॥ **उद्गतमनस्कवृत्तेरिति** ॥ उत्कण्ठितवृत्तेरित्यर्थः। **कालप्रयोजनाद्रोगे** ॥ काल, प्रयोजन, अनयोः समाहारद्वन्द्वः। तदाह। **कालवचनात्**

कालवचनात्प्रयोजनवचनाच्च कन् स्याद्रोगे । द्वितीयेऽहनि भवो द्वितीयको ज्वरः । प्रयोजनं कारणं रोगस्य फलं वा । विषपुष्पैर्जनितो विषपुष्पकः । उष्णं कार्यमस्य उष्णकः । 'रोगे' किम् । द्वितीयो दिवसोऽस्य ।

१८८२ । तदस्मिन्नन्नं प्रायेण संज्ञायाम् । (५-२-८२)

प्रथमान्तात्सप्तम्यर्थे कन्स्याद्यत्प्रथमान्तमन्नं चेत्प्रायविषयं तत् । गुडापूपाः प्रायेणान्नमस्यां गुडापूपिका पौर्णमासी । 'वटकेभ्य इनिर्वाच्यः' (वा ३१७५) । वटकिनी ।

१८८३ । कुल्माषादञ् । (५-२-८३)

कुल्माषाः प्रायेणान्नमस्यां कौल्माषी ।

१८८४ । श्रोत्रियंरछन्दोऽधीते । (५-२-८४)

श्रोत्रियः । 'वा' इत्यनुवृत्तेश्छान्दसः ।

१८८५ । श्राद्धमनेन भुक्तमिनिठनौ । (५-२-८५)

श्राद्धी—श्राद्धिकः ।

१८८६ । पूर्वादिनिः । (५-२-८६)

पूर्वं कृतमनेन पूर्वी ।

प्रयोजनवचनाच्चेति ॥ यथोक्तविभक्त्यन्तादिति शेषः । कालशब्देनात्र कालवृत्तिपूरणप्रत्ययान्तो द्वितीयादिशब्द एव गृह्यते, न तु मासादिशब्दः । व्याख्यानात् । **तदाह** । **द्वितीयेऽहनीति** ॥ प्रयुज्यतेऽनेनेति करणे ल्युटि प्रयोजनं साधनम् । कर्मणि ल्युटि तु फलम् । तदाह । **प्रयोजनङ्करणं रोगस्य फलं वेति** ॥ **तदस्मिन्नन्नम्** ॥ प्रथमान्तादन्नवाचकात् अस्मिन्नित्यर्थे कन् स्यात् अन्नस्य बाहुल्ये गम्ये संज्ञायामित्यर्थः । **वटकेभ्यः इति** ॥ संज्ञायामित्येव । **वटकिनीति** ॥ वटकाः प्रायेण अन्नमस्याम्पौर्णमास्यामिति विग्रहः । **कुल्माषादञ्** ॥ कनोऽपवादः । "स्याद्यावकस्तु कुल्माषः चणको हरिमन्थकः" इत्यमरः । **श्रोत्रियंरछन्दोऽधीते** ॥ द्वितीयान्तान्छन्दश्शब्दात् अधीते इत्यर्थे घन्, प्रकृतेः श्रोत्र देशश्च निपात्यते । अध्येतृणोऽपवादः । **वेत्यनुवृत्तेरिति** ॥ 'तावतिथम्' इति सूत्रान्मण्डूकप्लुतेति शेषः । ततश्च घनभावे पूर्वसूत्रादनुवृत्तोऽणिति भावः । वाग्रहणाननुवृत्तौ तु घना अध्येतृणो बाधः स्यादिति बोध्यम् । **श्राद्धमनेन** ॥ प्रथमान्तात् श्राद्धशब्दात् भुक्तमनेनेत्यर्थे इनिठनौ एतौ स्त इत्यर्थः । श्राद्धसाधनद्रव्ये श्राद्धशब्दो लाक्षणिकः । इनिप्रत्यये नकारादिकार उच्चारणार्थः । **पूर्वादिनिः** ॥ अनेनेति कर्तृतृतीयान्तमनुवर्तते । काङ्क्षियाम्प्राप्ति कर्तेत्याकाङ्क्षायाम्भुक्तं पीतमित्यादि यत्किञ्चित्क्रियापदमध्याहार्यम् । उपस्थितत्वात् कृत्यर्थभूताङ्क्रियासामान्यमेव प्रतीयते ।

१८८७। सपूर्वाच्च। (५-२-८७)

कृतपूर्वी कटम्।

१८८८। इष्टादिभ्यश्च। (५-२-८८)

इष्टमनेन इष्टी। अधीती।

१८८९। छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि। (५-२-८९)

लोके तु परिपन्थिशब्दो न न्याय्यः।

१८९०। अनुपद्यन्वेष्टा। (५-२-९०)

अनुपदमन्वेष्टा गवामनुपदी।

१८९१। साक्षाद्द्रष्टरि संज्ञायाम्। (५-२-९१)

साक्षाद्द्रष्टा साक्षी।

१८९२। क्षेत्रियच् परक्षेत्रे चिकित्स्यः। (५-२-९२)

क्षेत्रियो व्याधिः। शरीरान्तरे चिकित्स्यः। अप्रतिकार्य इत्यर्थः।

ततश्च पूर्वङ्कृतमनेनेति विग्रहे कृतमित्यादिक्रियाविशेषणात्पूर्वशब्दात् अनेनेत्यर्थे इनिः स्यादित्यर्थः। **सपूर्वाच्च** ॥ विद्यमानपूर्वादपि पूर्वशब्दादुक्तविषये इनिः स्यादित्यर्थः। पूर्वान्तादिति यावत्। प्रातिपदिकविशेषणत्वेऽपि प्रत्ययविधौ तदन्तविधिप्रतिषेधादन्तग्रहणम्। **कृतपूर्वी कटमिति** ॥ अत्र यद्वृत्तव्यन्तत्कर्तृकर्मणोः कृतीत्यत्रोक्तम्। **इष्टादिभ्यश्च** ॥ इष्टादिभ्यः तृतीयान्तेभ्यः अनेनेत्यर्थे इनिः स्यादित्यर्थः। **छन्दसि परिपन्थि** ॥ परिपन्थिन् परिपरिन् एतौ शब्दौ छन्दसि निपात्येते पर्यवस्थातरि वाच्ये। पर्यवस्थातृशब्दादिनिप्रत्यये अवस्थातृशब्दस्य पन्थादेशे परिपन्थिनशब्दः। पर्यवस्थातृशब्दादिनिप्रत्यये अवस्थातृशब्दस्य पर इत्यादेशे परिपरिन्शब्दः। "माविदन्परिपन्थिनः, मात्वा परिपरीविदत्" इति श्रुतौ उदाहरणम्। इदं सूत्रं वैदिकप्रक्रियायामेव व्याख्यानमुचितम्। **अनुपद्यन्वेष्टा** ॥ पदस्य पश्चादनुपदम्। पश्चादर्थे अव्ययीभावः। सप्तम्या अम्भावः। अनुपदमित्यस्मात् अन्वेष्टरि अर्थे इनिप्रत्ययो निपात्यते। **साक्षाद्द्रष्टरि संज्ञायाम्** ॥ साक्षादित्यव्ययम्, इह शब्दस्वरूपपरं लुप्तपञ्चमीकम्। साक्षादित्यव्ययात् द्रष्टर्यर्थे इनिः स्यादित्यर्थः। **साक्षीति** ॥ यः कर्मणि स्वयं न व्याप्रियते, किन्तु कर्म क्रियमाणम्पश्यति सोऽयं साक्षीत्युच्यते। साक्षादित्यव्ययादिनिप्रत्ययः 'अव्ययानाम्भमात्रे' इति टिलोपः। **क्षेत्रियच्** ॥ परम् अन्यत् क्षेत्रं शरीरं परक्षेत्रम्। चिकित्स्यः प्रतीकार्यः 'कितेर्व्याधिप्रतीकारे' इत्युक्तेः। परक्षेत्रशब्दात् सप्तम्यन्तात् चिकित्स्य इत्यर्थे घच्, परशब्दस्य लोपश्च निपात्यते। **शरीरान्तरे इति** ॥ भाविनि शरीरे चिकित्स्यः, नतु वर्तमाने शरीरे

१८९३ । इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्ट-मिन्द्रदत्तमिति वा । (५-२-९३)

इन्द्र आत्मा, तस्य लिङ्गं करणेन कर्तुरनुमानात् । इतिकरणं प्रकारार्थम् । इन्द्रेण दुर्जयमिन्द्रियम् ।

१८९४ । तदस्यास्त्यस्मिन्निति मतुप् । (५-२-९४)

गावोऽस्यास्मिन्वा सन्ति गोमान ।

'भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
संसर्गेऽस्तिविवक्षायां भवन्ति मतुवादयः ॥' (वा ३१८३)

१८९५ । रसादिभ्यश्च । (५-२-९५)

मतुप् । रसवान् । रूपवान् । अन्यमत्वर्थीयनिवृत्त्यर्थं वचनम् । रस, रूप, वर्ण, गन्ध, स्पर्श, शब्द, स्नेह, भाव, 'गुणात्' (ग. सू. ११२) 'एकाचः' (ग. सू. ११३) । स्ववान । गुणग्रहणं रसादीनां विशेषणम् ।

इत्यर्थः । फलितमाह । **अप्रतिकार्यः इति** ॥ **इन्द्रियम्** ॥ इन्द्रलिङ्गमित्यादयेषु इन्द्रियमिति भवति । इन्द्रशब्दात् यथायोगं षष्ठ्या । तृतीयान्तात् लिङ्गमित्यादयेषु घच् निपात्यते इति यावत् । **"इन्द्र आत्मेति** ॥ स एतमेव पुरुषं ब्रह्मततममपश्यदिदमदर्शमिति । तस्मादिदन्द्रो नामेदंद्रोहवै नाम तमिदंद्रं सन्तमिन्द्रमित्याचक्षते" इति श्रुतेरिति भावः । **तस्य लिङ्गमिति** ॥ आत्मनोऽनुमापकमित्यर्थः । लिङ्गत्वमुपपादयति । **करणेनेति** ॥ चक्षुरादीन्द्रियाणि, लिङ्गकर्त्राधिष्ठितस्वभावितुमर्हति, करणत्वात्, घटकरणदण्डादिवदित्यनुमानादित्यर्थः । मम चक्षुरित्येवमिन्द्रेण दृष्टं ज्ञातमिन्द्रियम् । इन्द्रेण सृष्टमिन्द्रियम् । इन्द्रेण जुष्टं सेवितमर्थाणितं वा इन्द्रियम । रुडशब्दोऽयं श्रथिद्रुस्रुत्पादितः । इन्द्रेण दुर्जयमिन्द्रियमिति साधयितुमाह । **इति करणमिति** ॥ इतिशब्द इत्यर्थः । **तदस्यास्त्यस्मिन्निति मतुप्** ॥ तदस्यास्तीति तदस्मिन्नस्तीति विग्रहे अस्तिसमानाधिकरणात्प्रथमान्तात् अस्य अस्मिन्निति चार्थे मतुप् स्यादित्यर्थः । उपावर्तौ । इतिशब्दो विषयविशेषलाभार्थः । तदाह । **भूमनिन्देति** ॥ श्लोकवार्तिकमिदम् । भूमा बहुत्वम् । यथा गोमान्, यवमान् । निन्दायां कक्षुदावर्तिनी कन्या । प्रशंसायां रूपवान् । नित्ययोगे क्षीरिणो वृक्षाः । अतिशायने उदरिणी कन्या । संसर्गे दण्डी छत्री । वृत्तिनियामकः संसर्गविशेषो विवक्षितः । तेन पुरुषो दण्ड इति नास्ति । **रसादिभ्यश्च** ॥ **मतुविति** ॥ शेषपूरणमिदम् । उक्तविषये इति शेषः । पूर्वेणैव सिद्धे किमर्थमिदमित्यत आह । **अन्यमत्वर्थीयेति** ॥ 'अत इनिठनौ' इत्यादि निवृत्त्यर्थमित्यर्थः । रसादीन् पठति । रस रूपेत्यादि भावेत्यन्तम् । **गुणादिति** ॥ **एकाच इति** ॥ गणसूत्रम् । उदाहरति । **स्ववानिति** ॥ **गुणग्रहणमिति** ॥ गुणादिस्त्वेतत् रसादीनां

१८९६। तसौ मत्वर्थे। (१-४-१९)

तान्तसान्तौ भसंज्ञौ स्तो मत्वर्थे प्रत्यये परे। 'वसोः सम्प्रसारणम्' (सू ४३५)। विदुष्मान्। 'गुणवचनेभ्यो मतुपो लुगिष्टः' (वा ३१८५)। शुक्लो गुणोऽस्यास्तीति शुक्लः पटः। कृष्णः।

१८९७। मादुपधायाश्च मतोर्वोऽयवादिभ्यः। (८-२-९)

मवर्णावर्णान्तान्मवर्णावर्णोपधाच्च यवादिवर्जात्परस्य मतोर्मस्य वः स्यात्। किंवान्। ज्ञानवान्। विद्यावान्। लक्ष्मीवान्। यशस्वान्। भास्वान्। यवादेस्तु यवमान्। भूमिमान्।

१८९८। झयः। (८-२-१०)

झयन्तान्मतोर्मस्य वः स्यात्। अपदान्तत्वान्न जश्त्वम्। विद्युत्वान्।

१८९९। संज्ञायाम्। (८-२-११)

षण्णां विशेषणमित्यर्थः। तेन गुणवाचकानामेव एषाङ्ग्रहणात् जलादिवाचकानां रसादिशब्दानां द्रव्यवाचिनाञ्च ग्रन्थादिशब्दानाम् इह न ग्रहणमिति भावः। 'रसिको नटः, स्पर्शिकं वारि' इत्यादि प्रयोगदर्शनात् इद सूत्रं भाष्ये प्रत्याख्यातम्। ननु विद्वच्छब्दान्मतुपि यजादिस्वादिपरकत्वाभावेन भत्वाभावात् 'वसोः सम्प्रसारणम्' इति कथं सम्प्रसारणमित्यत आह। **तसौ मत्वर्थे** ॥ मत्वर्थः प्रत्ययाक्षिप्तप्रातिपदिकविशेषणत्वात्तदन्तविधिमभिप्रेत्य आह। **तान्तसान्ताविति** ॥ तकारसकारान्तावित्यर्थः। **गुणवचनेभ्य इति** ॥ वार्तिकमिदम्। गुणे गुणवति च ये प्रसिद्धाः शुक्लादिशब्दाः त एव गृह्यन्ते। ननु रूपादिशब्दा अपि। तेन रूपं वस्त्रमित्यादि न भवति। अत्र यद्वक्तव्यं तदध्वरमीमांसाकौतूहले अरुणाधिकरणे प्रपञ्चितमस्माभिः। **मादुपधायाश्च** ॥ मात् उपधायाश्चेति च्छेदः। मादित्यावर्तते। म् च अश्चेति समाहारद्वन्द्वात्पञ्चम्येकवचनम्। मतुप्रत्ययाक्षिप्तप्रातिपदिकविशेषणत्वात्तदन्तविधिः। मवर्णान्तादवर्णान्ताप्रातिपदिकात्परस्य मतोः मस्य वः स्यादित्येकोऽर्थः। मादित्युपधाविशेषणम्। मकारात्मिका अकारात्मिका च या उपधा ततः परस्य मतोर्मस्य वः स्यादित्यन्योऽर्थः। फलितमाह। **मवर्णेत्यादिना** ॥ मान्तादुदाहरति। **किंवानिति** ॥ किमस्यास्मिन्वास्तीति विग्रहः। एवमग्रेऽपि। अकारान्तादुदाहरति। **ज्ञानवानिति** ॥ अत्र तपरकरणाभावादाकारस्यापि ग्रहणमिति मत्वा आह। **विद्यावानिति** ॥ मोपधादुदाहरति। **लक्ष्मीवानिति** ॥ अदुपधादुदाहरति। **यशस्वानिति** ॥ 'तसौ मत्वर्थे' इति भत्वान्न रुत्वम्। आकारोपधादुदाहरति। **भास्वानिति** ॥ अथ विद्युत्वान्। मकारान्तत्वाभावान्मकाराकारोपधत्वाभावाच्च मादुपधाया इति वत्वाप्राप्तावाह। **झयः** ॥ **अपदान्तत्वादिति** ॥ 'तसौ मत्वर्थे' इति भत्वेन पदत्वबाधादिति भावः। **संज्ञायाम्** ॥ अहीवतीत्यादिनदीविशेषस्य

मतोर्मस्य वः स्यात् । अहीवती । मुनीवती । 'शरादित्वात्' दीर्घः ।

१९०० । आसन्दीवदष्ठीवच्चक्रीवत्कक्षी-
वद्रुमण्वच्चर्मण्वती । (८-२-१२)

एते षट् संज्ञायां निपात्यन्ते । आसनशब्दस्यासन्दीभावः । आसन्दीवान्ग्रामः । अन्यत्रासनवान् । अस्थिशब्दस्याष्ठीभावः । अष्ठीवान् । अस्थिमान्यत्र । चक्रशब्दस्य चक्रीभावः । चक्रीवान्नाम राजा । चक्रवानन्यत्र । कक्ष्यायाः सम्प्रसारणम् । कक्षीवान्नामर्षिः । कक्ष्यावानन्यत्र । लवणशब्दस्य रुमण्भावः । रुमण्वान्नाम पर्वतः । लवणवानन्यत्र । चर्मणो नलोपाभावो णत्वं च । चर्मण्वती नाम नदी । चर्मवत्यन्यत्र ।

१९०१ । उदन्वानुदधौ च । (८-२-१३)

उदकस्योदन्भावो मतावुदधौ संज्ञायां च । उदन्वान्समुद्रः ऋषिश्च ।

१९०२ । राजन्वान्सौराज्ये । (८-२-११४)

राजन्वती भूः । राजवानन्यत्र ।

१९०३ । प्राणिस्थादातो लजन्यतरस्याम् । (५-२-९६)

चूडालः—चूडावान् । 'प्राणिस्थात्' किम् । शिखावान्दीपः । 'आतः' किम् । हस्तवान् । 'प्राण्यङ्गादेव' (वा ३१८९) । नेह । मेधावान् । प्रत्यय-

---

नगरीविशेषस्य वा संज्ञा । **शरादित्वादिति** ॥ 'शरादीनाम्' इति दीर्घ इत्यर्थः । **आसन्दीवत्** ॥ समाहारद्वन्द्वे ह्रस्वत्वं निपात्यन्ते इति कक्षीभावादिकमेवात्र निपात्यते । वत्वन्तु संज्ञायामिति सिद्धम् । कक्ष्यायाः सम्प्रसारणमिति निपात्यत इति शेषः । 'न सम्प्रसारणे' इति सूत्रभाष्ये तु 'कक्ष्यायाः संज्ञायां मतौ सम्प्रसारणं वक्तव्यम्' इत्यारब्धम् । अतोऽत्र सूत्रे कक्षीवच्छब्दपाठः अनार्ष इत्याहुः । **उदन्वानुदधौ च** ॥ **उदधौ संज्ञायाञ्चेति** ॥ वस्तुतस्तु उदन्वांश्चेत्येव सूत्रयितुमुचितम् । संज्ञायामित्यनुवृत्त्यैव समुद्रेऽपि उदन्वच्छब्दस्य सिद्धत्वात् । **राजन्वान् सौराज्ये** ॥ सु शोभनो राजा यस्य देशस्य सः सुराजा, तस्य भावः सौराज्यम् । तस्मिन्नर्थे राजन्शब्दात् मतुपि 'मादुपधायाः' इति वत्वं सिद्धम् । नलोपाभावो निपात्यते । **प्राणिस्थात्** ॥ आदन्तात्प्राणिस्थवाचिनः शब्दात् मत्वर्थे लच् वा स्यादित्यर्थः । **शिखावान् दीप इति** ॥ अत्र शिखाशब्दस्य दीपाग्रवाचिनः प्राणिस्थवाचित्वाभावात् न लजिति भावः । **प्राण्यङ्गादेवेति** ॥ भाष्ये तथा वचनादिति भावः । ननु लचश्चित्करणं व्यर्थम् । चित इत्यन्तोदात्तत्वस्य प्रत्ययस्वरेणैव सिद्धेरित्यत आह । **प्रत्ययस्वरेणेति** ॥

स्वरेणैव सिद्धे अन्तोदात्तत्वे चूडालोऽसीत्यादौ 'स्वरितो वानुदात्ते पदादौ' (सू ३६५९) इति स्वरितबाधनार्थश्चकारः।

१९०४। सिध्मादिभ्यश्च। (५-२-९७)

लज्वा स्यात्। सिध्मलः—सिध्मवान्। अन्यतरस्यांग्रहणं मतुप्समुच्चयार्थं, न तु प्रत्ययविकल्पार्थम्। तेन आकारान्तेभ्य इनिठनौ न। 'वातदन्तबल ललाटानामूङ् च' (ग सू ११५)। वातूलः।

१९०५। वत्सांसाभ्यां कामबले। (५-२-९८)

आभ्यां लज्वा स्याद्यथासङ्ख्यं कामवति बलवति चार्थे। वत्सलः। अंसलः।

१९०६। फेनादिलच्च। (५-२-९९)

चाल्लच्। अन्यतरस्यांग्रहणं मतुप्समुच्चयार्थमनुवर्तते। फेनिलः—फेनलः—फेनवान्।

चूडालोऽसीति॥ तत्र असीत्येतत् 'तिङ्ङतिङः' इति निहतम्। चूडालात्सो रुत्वे उत्वे तस्य सुप्त्वेनानुदात्तस्याद्गुणस्य 'एकादेश उदात्तेन' इत्युदात्तत्वे तस्य परेण पूर्वरूपैकादेशे तस्य पदाद्यनुदात्तेन सहैकादेशत्वात् 'स्वरितो वाऽनुदात्ते' इत्यस्य प्राप्तौ तन्निवृत्त्यर्थं चित्करणमित्यर्थः। **सिध्मादिभ्यश्च**॥ **लज्वा स्यादिति**॥ मत्वर्थे इति शेषः। **अन्यतरस्यामिति**॥ पूर्वसूत्रादन्यतरस्यामित्यनुवृत्तं न लच्प्रत्ययविकल्पार्थकम्। किन्तु मतुप्प्रत्ययसमुच्चयार्थकमेव। अन्यतरस्यामित्यस्याव्ययत्वेनानेकार्थकत्वात्। ततश्च 'सिध्मादिभ्यः' इति लच् मतुप् च स्यादिति लभ्यते। नन्वन्यतरस्यामित्यस्यात्र लच्प्रत्ययविकल्पार्थकत्वेऽपि तदभावे मतुप् सिद्ध इति वाच्यम्। लजभावे मतुवेव भवति, नतु 'अत इनिठनौ' इत्येतदर्थं समुच्चयविधानात्। तदाह। **तेनेति**॥ सिध्मादिषु ये अकारान्ताः तेभ्य इनिठनौ नेत्यर्थः। एतत्सर्वं भाष्ये स्पष्टम्। सिध्म, मणि, विजय, पांसु, हनु, पार्ष्णि, इत्यादयः सिध्मादिषु पठिताः। एवञ्च लज्वा स्यादिति विवरणवाक्ये वाशब्दश्चार्थे। इदमन्यतरस्याङ्ग्रहणमुत्तरसूत्रेषु सर्वत्र मत्वर्थीयविधिष्वनुवर्तते, नतु रूढशब्देषु। अतो न तेषु मतुप्समुच्चयः इत्यास्तां तावत्। **वातदन्तबललललाटानामूङ् चेति**॥ सिध्मादिगणसूत्रमिदम्। एभ्यो लच् प्रकृतेरूङ्चादेशः। ङकारस्तु आदेशत्वसूचनार्थः। अन्यथा प्रत्ययत्वशङ्का स्यात्। वातूलः, एवं दन्तूलः, बलूलः, ललाटूलः। **वत्सांसाभ्यां कामबले**॥ **लज्वा स्यादिति**॥ मत्वर्थे इति शेषः। कामबलशब्दौ तद्वति लाक्षणिकाविति अभिप्रेत्य आह। **कामवति बलवति चेति**॥ **फेनादिलच्च**॥ मत्वर्थे इति शेषः। **चाल्लजिति**॥ सन्निहितत्वादिति भावः। नन्वेवं सति मतुप् नैव स्यादित्यत आह। **अन्यतरस्याङ्ग्रहणमिति**॥ सिध्मादिसूत्रे व्याख्यातमिदम्।

१९०७ । लोमादिपामादिपिच्छादिभ्यः शनेलचः । (५-२-१००)

लोमादिभ्यः शः । लोमशः—लोमवान् । रोमशः—रोमवान् । 'पामादिभ्यो नः' । पामनः । 'अङ्गात्कल्याणे' (ग सू ११८) । अङ्गना । 'लक्ष्म्या अच' (ग सू १२१) । लक्ष्मणः । 'विष्वगित्युत्तरपदलोपश्चाकृतसन्धेः' (वा ३१९४) । विषुणः । 'पिच्छादिभ्य इलच् । पिच्छिलः—पिच्छवान् । उरसिलः—उरस्वान् ।

१९०८ । प्रज्ञाश्रद्धार्चाभ्यो णः । (५-२-१०१)

प्राज्ञो व्याकरणम् । प्राज्ञा । श्राद्धः । आर्चः । 'वृत्तेश्च' (वा ३१९५) वार्तः ।

१९०९ । तपःसहस्राभ्यां विनीनी । (५-२-१०२)

लोमादि ॥ श न इलच् एते त्रिभ्यो गणेभ्यो यथासङ्ख्यं स्युर्मत्वर्थे । **अङ्गात्कल्याणे इति** ॥ पामादिगणसूत्रम् । कल्याणं सुन्दरं तद्विशेषकादङ्गशब्दात् मत्वर्थे नप्रत्यय इत्यर्थः । **अङ्गनेति** ॥ कल्याणानि अङ्गानि अस्याः इति विग्रहः । 'लक्ष्म्या अच' इत्यपि पामादिगणसूत्रम् । लक्ष्मीशब्दात् मत्वर्थे नप्रत्ययः स्यात् प्रकृतेरकारोऽन्तादेशश्च । **लक्ष्मण इति** ॥ लक्ष्मीरस्यास्तीति विग्रहः । नप्रत्यये प्रकृतेरकारे अन्तादेशे णत्वम् । **विष्वगिति** ॥ इदमपि पामादिगणसूत्रमिति केचित् । भाष्ये तु नप्रकरणे इदं वार्तिकं पठितम् । विषु इत्यव्यय सर्वतः इत्यर्थे । विषु अञ्चतीति विष्यङ् । सर्वतो गामीत्यर्थः इति धूर्तस्वामी । विषु इति तिर्यगर्थे इति भवस्वामी । पराङ्मुख इति भट्टभास्करः । विषु अञ्च् इत्यस्मात् अकृतसन्धेर्मत्वर्थे नप्रत्ययः स्यात्, उत्तरपदलोपश्चेत्यर्थः । **विषुण इति** ॥ विष्वङ् अस्यास्तीति लौकिक विग्रहः । विषु, अञ्च्, इत्यलौकिकविग्रहवाक्यम् । कृतसन्धेर्नप्रत्यये तु विष्वङ्शब्दे उत्तरपदस्य लोपे 'लोपो व्योः' इति यलोपे विषुण इति स्यादिति भावः । समर्थानामित्यस्यापवादोऽयम् । **प्रज्ञाश्रद्धार्चाभ्यो णः** ॥ प्रज्ञा, श्रद्धा, अर्चा, एभ्यो मत्वर्थे णप्रत्ययः स्यादित्यर्थः । **प्राज्ञो व्याकरणमिति** ॥ प्रज्ञानं प्रज्ञा । स्त्रियामित्यधिकारे प्रपूर्वकात् ज्ञाधातोः 'आतश्चोपसर्गे' इति भावे अङ् । प्रज्ञा अस्यास्तीति विग्रहः । उपसर्जनभूतामपि प्रज्ञानक्रियां प्रति व्याकरणस्य कर्मत्वाद्द्वितीया । कृद्योगषष्ठी नात्र प्रवर्तते । 'कर्तृकर्मणोः कृति' इत्यत्र कृद्ग्रहणेन तद्धितयोगे तान्निषेधात् । अत्र यदुक्तव्यं तत्कर्तृकर्मणोः कृतीत्यत्र प्रपञ्चितम् । नच प्रजानातीति प्रज्ञः 'इगुपध' इति कः । प्रज्ञशब्दात् स्वार्थे अणि प्राज्ञ इति सिध्यतीति शङ्क्यम् । तथासति स्त्रियां ङीप्प्रसङ्गात् । तदाह । **प्राज्ञेति** । **श्राद्ध इति** ॥ श्रद्धा अस्यास्तीति विग्रहः । **आर्च इति** ॥ अर्चा अस्यास्तीति विग्रहः । **वृत्तेश्चेति** ॥ वार्तिकम् । मत्वर्थे णप्रत्यय इति शेषः । **वार्त्त इति** ॥ वृत्तिरस्यास्तीति विग्रहः । **तपःसहस्राभ्याम्** ॥ विनिश्च इनिश्चेति द्वन्द्वः । मत्वर्थे इति शेषः । यथासङ्ख्यमन्वयः । विनिप्रत्यये इनिप्रत्यये च नकारादिकारौ उच्चारणार्थौ ननु नकारयोः इत्संज्ञा कृतो

विनीन्योरिकारो नकारपरित्राणार्थः। तपस्वी। सहस्री। असन्तत्वाद्-दन्तत्वाच्च सिद्धे पुनर्वचनमणा बाधा मा भूदिति। सहस्रात्तु ठनोऽपि बाधनार्थम्।

१९१० । अण् च । (५-२-१०३)

योगविभाग उत्तरार्थः। तापसः। साहस्रः। 'ज्योत्स्नादिभ्य उपसङ्ख्यानम्' (वा ३१९७)। ज्यौत्स्नः। तामिस्रः।

१९११ । सिकताशर्कराभ्यां च । (५-२-१०४)

सैकतो घटः। शार्करः।

१९१२ । देशे लुबिलचौ च । (५-२-१०५)

चादण्मतुप् च। सिकताः सन्त्यस्मिन्देशे सिकताः—सिकतिलः—सैकतः—सिकतावान्। एवं शर्करेत्यादि।

न स्यात्। नच प्रयोजनाभावः, नित्स्वरस्यैव फलत्वादित्यत आह। **विनीन्योरिकारो नकारपरित्राणार्थ इति** ॥ तथा च उपदेशे अन्त्यत्वाभावान्नेत्संज्ञेति भावः। यद्यपि 'अस्मायामेधा' इत्यसन्तत्वादेव तपःशब्दाद्विन्सिद्धः। सहस्रशब्दात्तु 'अत इनिठनौ' इत्येवेन्सिद्धः। तथापि विशिष्य उत्तरसूत्रविहितेन अणा असन्तादन्तलक्षणयोः विनीन्योः सामान्यविहितयोः बाधो माभूदिति विशिष्येह तपस्सहस्रशब्दान्तयोः विधानम्। सहस्रशब्दात्तु अदन्तलक्षणठनोऽपि बाधनार्थमिह अन्विधानम्। एतत्समाधानं क्वचिन्मूलपुस्तकेषु दृश्यते। **अण् च** ॥ तपस्सहस्राभ्यां मत्वर्थे इति शेषः। ननु तपःसहस्राभ्यां विनीन्यणः इत्येकमेव सूत्रमस्तु। नच तपःसहस्राभ्यां विनीन्योर्यथासङ्ख्यार्थं पृथक्सूत्रकरणम्। अन्यथा त्रयोऽपि प्रत्यया द्वाभ्यां स्युरिति वाच्यम्। 'तपःसहस्राभ्यामण्विनीनी' इति सूत्रकरणे भिन्नविभक्त्युच्चारणादेव अणः उभयसम्बन्धस्य विनीन्योर्यथासङ्ख्यत्वस्य च सिद्धेरित्यत आह। **योगविभाग उत्तरार्थ इति** ॥ उत्तरसूत्रे अण एवानुवृत्त्यर्थ इत्यर्थः। **ज्यौत्स्न इति** ॥ शुक्लपक्ष इति शेषः। ज्योत्स्ना चन्द्रिका। सा अस्यास्तीति विग्रहः। **तामिस्र इति** ॥ कृष्णपक्ष इति शेषः। तमिस्राः तमोयुक्ता रात्रयः। ता अस्य सन्तीति विग्रहः। ज्योत्स्नादित्वादण्। **सिकताशर्कराभ्याञ्च** ॥ मत्वर्थे अणिति शेषः। **सैकतो घट इति** ॥ सिकता अस्य सन्तीति विग्रहः। देशे लुपो वक्ष्यमाणत्वात् घट इति विशेष्यम्। "अप्सुमनःसमासिकतावर्षाणाम्बहुत्वञ्च" इति लिङ्गानुशासनसूत्रात् सिकताशब्दो नित्यम्बहुवचनान्तः। **देशे लुबिलचौ च** ॥ पूर्वसूत्रविहितस्याणो लुप् इलच् स्यादित्यर्थः। **चादणिति** ॥ सन्निहितत्वादिति भावः। तर्हि अपवादेन मुक्ते उत्सर्गस्याप्रवृत्तेर्मतुप् नैव स्यादित्यत आह। **मतुप् चेति** ॥ समुच्चयार्थकान्यतरस्याङ्ग्रहणानुवृत्तेरिति भावः। **सिकता इति** ॥ सिकताशब्दात् नित्यम्बहुवचनान्तादणो लुपि प्रातिपदिकावयवत्वात् सुपो लुकि युक्तवद्भावाद्विशेष्यस्य देशस्य एकत्वेऽपि बहुवचनमिति भावः।

१९१३ । दन्त उन्नत उरच् । (५-२-१०६)

उन्नता दन्ताः सन्त्यस्य दन्तुरः ।

१९१४ । ऊषसुषिमुष्कमधो रः । (५-२-१०७)

ऊषरः । सुषिरः । मुष्कोऽण्डः मुष्करः । मधु माधुर्यम्—मधुरः । रप्रकरणे 'खमुखकुञ्जेभ्य उपसङ्ख्यानम्' (वा ३१९८) । खरः । मुखरः । कुञ्जो हस्तिहनुः । कुञ्जरः । 'नगपांसुपाण्डुभ्यश्च' (वा ३१९९) । नगरम् । पांसुरः । पाण्डुरः । पाण्डरशब्दस्त्वव्युत्पन्न एव । 'कच्छ्वा ह्रस्वत्वं च' (वा ३२००) । कच्छुरः ।

१९१५ । द्युद्रुभ्यां मः । (५-२-१०८)

द्युमः । द्रुमः ।

१९१६ । केशाद्वोऽन्यतरस्याम् । (५-२-१०९)

'हयवरट्' इति सूत्रे 'एका च सिकता तैलादाने असमर्था' इति भाष्ये प्रयोगात् सिकताशब्दः एकवचनान्तोऽप्यस्तीति लिङ्गानुशासने मूलकारो वक्ष्यति । **दन्त उन्नत उरच्** ॥ उन्नतविशेषणकाद्दन्तशब्दात् मत्वर्थे उरच् स्यादित्यर्थः । उन्नत इति प्रकृतिविशेषणम् । दन्त इति सप्तमी पञ्चम्यर्थे । **ऊषसुषि** ॥ ऊष, सुषि, मुष्क, मधु, एषां समाहारद्वन्द्वात्पञ्चम्येकवचनम् । सौत्रं पुंस्त्वम् । एभ्यो मत्वर्थे रप्रत्ययः स्यादित्यर्थः । **ऊषर इति** ॥ ऊषः क्षारमृत्तिकाविशेषोऽस्यास्तीति विग्रहः । **सुषिर इति** ॥ सुषिः बिलं अस्यास्तीति विग्रहः । मधुशब्दः क्षौद्रे द्रव्ये, माधुर्यात्मकरसविशेषे च गुणे वर्तते । तत्र रसविशेषवाचिन एवात्र ग्रहणमित्याह । **मधु माधुर्यमिति** ॥ तथा भाष्यादिति भावः । अन्यथा मधुद्रव्यवति घटेऽपि मधुरपदप्रयोगः स्यात् । खरो गर्दभः, धिष्ण्यो वा । मुखरः शब्दं कुर्वन् । कुञ्जरो हस्ती । रूढशब्दा एते । **नगपांस्विति** ॥ वार्तिकमिदम् । नगरमिति जातिविशेषवाची । अत एव नगरीति ङीप् । **पांसुर इति** ॥ पांसुः अस्यास्तीति विग्रहः । **पाण्डुर इति** ॥ पाण्डुः शुक्लवर्णः, सः अस्यास्तीति विग्रहः । कथं पाण्डरशब्द इत्यत आह । **पाण्डरशब्दस्त्विति** ॥ "हरिणः पाण्डरः पाण्डु." इत्यमरः । **कच्छ्वा इति** ॥ वार्तिकमिदम् । कच्छूशब्दाद्रप्रत्ययः, प्रकृतेर्ह्रस्वश्च अन्तादेश इत्यर्थः । कच्छुरः शुनां रोगविशेषः । **द्युद्रुभ्यां मः** ॥ 'दिव उत्' इति कृतोत्वस्य दिवशब्दस्य द्यु इति निर्देशः । दिवशब्दात् द्रुशब्दाच्च मप्रत्ययः स्यादित्यर्थः । **द्युमः द्रुम इति** ॥ रूढशब्दावेतौ । **केशाद्वोऽन्यतरस्याम्** ॥ मत्वर्थे इति शेषः । नन्विहान्यतरस्याङ्ग्रहणं व्यर्थम् । समर्थानामिति वाग्रहणेनैव वाक्यस्य सिद्धत्वात् । नच महाविभाषायाः अपवादेन मुक्ते औत्सर्गिकस्याप्रवृत्तेः 'पारेमध्ये षष्ठ्या वा' इत्युक्त्वादिह मतुपोऽप्रवृत्त्यापत्तौ तत्प्रवृत्त्यर्थमन्यतरस्याङ्ग्रहणमिति वाच्यम् । प्राणिस्थादिति

प्रकृतेनान्यतरस्यांग्रहणेन मतुपि सिद्धे पुनर्ग्रहणमिनिठनोः समावेशार्थम्। केशवः—केशी—केशिकः—केशवान्। 'अन्येभ्योऽपि दृश्यते' (वा ३२१०)। मणिवो नागविशेषः। हिरण्यवो निधिविशेषः। 'अर्णसो लोपश्च' (वा ५०५३)। अर्णवः।

१९१७। गाण्ड्यजगात्संज्ञायाम्। (५-२-११०)

ह्रस्वदीर्घयोर्यणा तन्त्रेण निर्देशः। गाण्डिवम्। गाण्डीवमर्जुनस्य धनुः। अजगवं पिनाकः।

१९१८। काण्डाण्डादीरन्नीरचौ। (५-२-१११)

काण्डीरः। आण्डीरः।

१९१९। रजःकृष्यासुतिपरिषदो वलच्। (५-२-११२)

रजस्वला स्त्री। कृषीवलः। 'वले' (सू १०४०) इति दीर्घः। आसुतीवलः। शौण्डिकः। परिषद्वलः। 'पर्षत्' इति पाठान्तरम्। पर्षद्वलम्। 'अन्येभ्योऽपि दृश्यते' (वा ३२१०)। भ्रातृवलः। पुत्रवलः। शत्रुवलः। 'वले' (सू १०४०) इत्यत्र 'संज्ञायाम्' इत्यनुवृत्तेर्नेह दीर्घः।

सूत्रादन्यतरस्याङ्ग्रहणस्य समुच्चयार्थकस्यानुवृत्त्यैव तत्सिद्धेरित्यत आह। **प्रकृतेनेति॥ इनिठनोरिति॥** इनिठनोरर्थात्यर्थः। अन्यथा सिध्मादिभ्यश्चेत्यत्रैव मतुबेव समुच्चीयेत नत्विनिठनाविति भावः। तथाच वप्रत्यये इनिठनोर्मतुपि च चत्वारि रूपाणीत्याह। **केशव इत्यादि। अन्येभ्योऽपीति॥** वार्तिकमिदम्। केशादन्येभ्योऽपि मत्वर्थे वो दृश्यते इत्यर्थः। **अर्णस इति॥** वार्तिकमिदम्। अर्णसो वप्रत्ययः प्रकृतेः सकारश्चान्तादेश इत्यर्थः। **अर्णव इति॥** अर्णः जलम्। तत्प्रभूतमस्तीति विग्रहः। इदन्तु वार्तिकम्भाष्ये न दृश्यते। **गाण्ड्यजगात्संज्ञायाम्॥ ह्रस्वदीर्घयोरिति॥** गाण्डिशब्दस्य गाण्डीशब्दस्य च कृतयणोः गाण्ड्य इति युगपन्निर्देशः। 'ख्यत्यात्परस्य' इत्यत्र खितिशब्दयोः खीतीशब्दयोश्च यथेत्यर्थः। ततश्च गाण्डिशब्दात् गाण्डीशब्दात् अजगशब्दाच्च मत्वर्थे यथासङ्ख्यं ईरन् ईरच्प्रत्ययश्च स्यादित्यर्थः। रूढशब्दत्वादिह न मतुप्समुच्चयः। **काण्डाण्डादीरन्नीरचौ॥** काण्ड, आण्ड, अभ्यां ईरन्, ईरच् इति प्रत्ययौ मत्वर्थे स्त इत्यर्थः। **रजःकृषि॥** रजस्, कृषि, आसुति, परिषद् एभ्यो मत्वर्थे वलच् स्यादित्यर्थः। **आसुतीवल इति॥** 'षुञ् अभिषवे'। आङ्पूर्वात् स्त्रियां क्तिन्। 'वले' इति दीर्घः। **अन्येभ्योऽपीति॥** वार्तिकमिदम्। 'रजःकृषि' इत्यादिसूत्रोपात्तादन्येभ्योऽपि वलच् दृश्यते इत्यर्थः। भ्रातृवलः 'ढ्रलोपे' इत्यतः अण इत्यनुवृत्तेः 'वले' इति न दीर्घः। पुत्रवल

---

१. भाष्ये न दृश्यते—इति शेखरकृत्। रूपसिद्धिस्तु पृषोदरादित्वात्।

१९२० । दन्तशिखात्संज्ञायाम् । (५-२-११३)

दन्तावलो हस्ती । शिखावलः केकी ।

१९२१ । ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिन-मलीमसाः । (५-२-११४)

मत्वर्थे निपात्यन्ते । ज्योतिष उपधालोपो नश्च प्रत्ययः । ज्योत्स्ना । तमस उपधाया इत्वं रश्च । तमिस्रा । स्त्रीत्वमतन्त्रम् । तमिस्रम् । शृङ्गादिनच् । शृङ्गिणः । ऊर्जसो वलच् । तेन बाधा मा भूदिति विनिरपि । ऊर्जस्वी । ऊर्जस्वलः । 'ऊर्जोऽसुगागमः' इति वृत्तिस्तु चिन्त्या । 'ऊर्जस्वतीः' इतिवदसुन्नन्तत्वेनैवोपपत्तेः । गोशब्दान्मिनिः । गोमी । मलशब्दादिनच् । मलिनः । ईमसच्च । मलीमसः ।

१९२२ । अत इनिठनौ । (५-२-११५)

दण्डी—दण्डिकः ।

इत्यादौ 'वले' इति दीर्घमाशङ्क्य आह । **वले इत्यत्रेति** ॥ **दन्तशिखात्संज्ञायाम्** ॥ समाहारद्वन्द्वात्पञ्चमी । दन्तशब्दात् शिखाशब्दाच्च मत्वर्थे वलच् स्यात्संज्ञायामित्यर्थः । **ज्योत्स्ना** ॥ **ज्योतिष इति** ॥ ज्योतिरवयवाः ज्योतींषि, तान्यस्यां सन्तीति विग्रहे ज्योतिष्शब्दात् नप्रत्ययः उपधाभूतस्य इकारस्य लोपश्च निपात्यते । सति च इकारस्य लोपे इणः परत्वाभावात् षत्वनिवृत्तौ ज्योत्स्नेति रूपम् । "चन्द्रिका कौमुदी ज्योत्स्ना" इत्यमरः । **तमस इति** ॥ तमः अस्यास्तीति विग्रहे तमस्शब्दात् रक्प्रत्ययः । उपधाभूतस्य सकारादकारस्य इत्वञ्च निपात्यते इत्यर्थः । "तमिस्रा तामसी रात्रिः" इत्यमरः । ननु 'तमिस्रा' इति स्त्रीलिङ्गनिर्देशात् तमिस्रकृहमिति कथमित्यत आह । **स्त्रीत्वमतन्त्रमिति** ॥ निपात्यते इति शेषः । **शृङ्गिण इति** ॥ शृङ्गमस्यास्तीति विग्रहः । इनीच णत्वम् । **ऊर्जसो वलजिति** ॥ निपात्यते इति शेषः । ऊर्जस इत्यव्युत्पन्नं प्रातिपदिकम् । ननु 'अस्मायामेधा' इति विनिना सिद्धेरूर्जस्विनिति निपातनं व्यर्थमित्यत आह । **तेनेति** ॥ विशेषविहितेन वलचा अस्मायेति सामान्यविहितस्य विनो निवृत्तिर्मा भूदित्येतदर्थं विनो निपातनमित्यर्थः । **ऊर्जस्वल इति** ॥ ऊर्जशब्दाद्वलचि प्रकृतेरसुगागम इति वृत्तिग्रन्थः अनुपपन्न इत्यर्थः । कुत इत्यत आह । **ऊर्जस्वतीरितिवदिति** ॥ ऊर्जस्वतीरित्यत्र वलभावेन तत्सन्नियोगशिष्टस्य असुगागमस्याप्रसक्तेः तत्र ऊर्जस् इत्यव्युत्पन्नं प्रातिपदिकमवश्यमभ्युपेयम् । तेनैव ऊर्जस्विन्नूर्जस्वलयोः वलञ्मात्रनिपातनोपपत्तेरित्यर्थः । **ईमसच्चेति** ॥ मलशब्दात् निपात्यते इति शेषः । **अत इनिठनौ** ॥ अदन्तान्मत्वर्थे इनिठन् एतौ स्त इत्यर्थः । समुच्चयार्थकान्यतरस्याङ्ग्रहणानुवृत्तेर्मतुबपि भवति । "एकाक्षरात्कृतो जातेः सप्तम्याश्च न तौ स्मृतौ" इति भाष्यम् । एकाक्षरात् स्ववान्, कृतः कारकवान्, जातेः

१९२३। व्रीह्यादिभ्यश्च। (५-२-११६)

व्रीही—व्रीहिकः। न च सर्वेभ्यो व्रीह्यादिभ्य इनिठनाविष्येते। किं तर्हि। 'शिखामालासंज्ञादिभ्य इनिः, यवखलादिभ्य इकः' (वा ३२०९)। अन्येभ्य उभयम्।

१९२४। तुन्दादिभ्य इलच्च। ५-२-११७)

चादिनिठनौ मतुप्च। तुन्दिलः—तुन्दी—तुन्दिकः—तुन्दवान्। उदर, पिचण्ड, यव, व्रीहि, 'स्वाङ्गाद्विवृद्धौ' (ग. सू. १२४) 'विवृद्ध्युपाधिकात्स्वाङ्गवाचिन इलजादयः स्युः। विवृद्धौ कर्णौ यस्य स कर्णिलः—कर्णी—कर्णिकः—कर्णवान्।

१९२५। एकगोपूर्वाट्ठञ्नित्यम्। (५-२-११८)

एकशतमस्यास्तीति ऐकशतिकः। ऐकसहस्रिकः। गौशतिकः। गौसहस्रिकः।

१९२६। शतसहस्रान्ताच्च निष्कात्। (५-२-११९)

निष्कात्परौ यौ शतसहस्रशब्दौ तदन्तात्प्रातिपदिकाट्ठञ्स्यान्मत्वर्थे। नैष्कशतिकः। नैष्कसहस्रिकः।

वृक्षवान्, सप्तम्यां दण्डाः अस्यां शालायां सन्ति दण्डवती, इदं प्रायिकम्। तेन "कार्षी—कार्षिकः, तण्डुली—तण्डुलिकः इत्यादि सिद्धम्" इति भाष्ये स्पष्टम्। **व्रीह्यादिभ्यश्च** ॥ मत्वर्थे इनिठनौ इति शेषः। **शिखामालेत्यादि** ॥ वार्तिकमिदम्। शिखा, माला, संज्ञा, वीणा, बडबा, बालका, पताका, वर्मन्, शर्मन् एभ्यः इनिरेव नतु ठनित्यर्थः। **यवखलेति** ॥ यवखल नौ कुमारी एभ्यः ठनेव, नत्विनिरित्यर्थः। परिशिष्टेभ्यस्तु व्रीह्यादिगणपठितेभ्यः उभावित्यर्थसिद्धम्। इदं वृत्तौ स्पष्टम्। **तुन्दादिभ्य इलच्च** ॥ **मतुप्चेति** ॥ समुच्चयार्थकान्यतरस्याङ्ग्रहणानुवृत्तेरिति भावः। उदरादयश्चत्वारस्तुन्दादिगणपठिताः। **स्वाङ्गाद्विवृद्धाविति** ॥ गणसूत्रमिदम्। वृद्धविषयात् स्वाङ्गादिलच् इनिठनौ मतुपचेत्यर्थः। **कर्णील इति** ॥ वृद्धौ कर्णौ अस्येति विग्रहः। **एकगोपूर्वाट्ठञ्नित्यम्** ॥ एकपूर्वात् गोपूर्वाच्च नित्यष्ठञ् स्यादित्यर्थः। यद्यपि नित्यग्रहणाभावेऽपि ठञा इनिठनोर्निवृत्तिः सिद्ध्यति। तथापि समुच्चयार्थकान्यतरस्याङ्ग्रहणानुवृत्त्या मतुप् समुच्चीयेत। तन्निवृत्त्यर्थं नित्यग्रहणम्। **ऐकशतिक इति** ॥ 'पूर्वकाल' इति समासः। 'सङ्ख्यायाः संवत्सर' इत्युत्तरपदवृद्धिस्तु न। तत्र प्रतिपदोक्तताद्धितार्थसमासस्यैव ग्रहणात्। **शतसहस्र ॥ निष्कात् परावि ति** ॥ असामर्थ्येऽपि सौत्रत्वात् समास इति भावः।

१९२७ । रूपादाहतप्रशंसयोर्यप् । (५-२-१२०)

आहतं रूपमस्यास्तीति रूप्यः कार्षापणः । प्रशस्तं रूपमस्यास्तीति रूप्यो गौः । 'आहत—' इति किम् । रूपवान् । 'अन्येभ्योऽपि दृश्यते' (वा ३२१०) । हिम्याः पर्वताः । गुण्याः ब्राह्मणाः ।

१९२८ । अस्मायामेधास्रजो विनिः । (५-२-१२१)

यशस्वी—यशस्वान् । मायावी । व्रीह्यादिपाठादिनिठनौ । मायी—मायिकः । किन्नन्तत्वात्कुः । स्रग्वी । 'आमयस्योपसङ्ख्यानं दीर्घश्च' (वा ३२१३) । आमयावी । 'शृङ्गबृन्दाभ्यामारकन्' (वा ३२१४) । शृङ्गारकः । बृन्दारकः । 'फलवर्हाभ्यामिनच्' (वा ३२१५) । फलिनः । बर्हिणः । 'हृदयाच्चालुरन्यतरस्याम्' (वा ३२१६) । इनठनौ मतुप्च । हृदयालुः—हृदयी—हृदयिकः—हृदयवान् । 'शीतोष्णतृप्रेभ्यस्तदसहने—' (वा ३२१७) । शीतं न सहते शीतालुः । उष्णालुः । 'स्फायितञ्चि' इति रक् । तृप्रः पुरोडाशः, तं न सहते

रूपादाहत ॥ आहतेति भावे क्तः । आहतविशेषणकात् प्रशंसाविशेषणकाच्च रूपशब्दात् मत्वर्थे यप् स्यादित्यर्थः । **आहतं रूपमिति** ॥ आहतेन निष्पन्नं स्वरूपं यस्येति विग्रहे रूपशब्दाद्यपि रूप्यशब्द इत्यर्थः । **रूप्यः कार्षापण इति** ॥ परिमाणविशिष्टः रजतसुवर्णादिमुद्रिकाविशेषयुक्तः कार्षापण इत्युच्यते । तत्स्वरूपञ्च स्वर्णकारकृताहननिष्पाद्यमिति बोध्यम् । **रूप्यो गौरिति** ॥ प्रशस्तरूपसम्पन्न इत्यर्थः । **अन्येभ्योऽपीति** ॥ वार्तिकमिदम् । रूपशब्दादन्येभ्योऽपि यप् दृश्यत इत्यर्थः । **हिम्याः पर्वता इति** ॥ भूम्नि यप् बहुलं हिममेष्वस्तीति विग्रहः । **गुण्या ब्राह्मणा इति** ॥ प्रशंसायां यप् । प्रशस्तगुणसम्पन्ना इत्यर्थः । **अस्मायामेधास्रजो विनिः** ॥ अस्मिन्नेन अस्मन्त विवक्षितम् । असन्त, माया, मेधा, स्रज्, एभ्यः विनिप्रत्ययः स्यादित्यर्थः । प्रत्यये नकारादिकार उच्चारणार्थः । **यशस्वीति** ॥ 'तसौ मत्वर्थे' इति भत्वान्न रुत्वमिति भावः । **यशस्वानिति** ॥ 'एकगोपूर्वात्' इति सूत्रे नित्यग्रहणेन निवृत्तमपि समुच्चयार्थमन्यतरस्यांग्रहणमिह मण्डूकप्लुत्या अनुवर्तते । 'तसौ मत्वर्थे' इति सूत्रे यशस्वानिति भाष्योदाहरणादिति भावः । स्रग्वीत्यत्र 'ग्रश्च' इति षत्वमाशङ्क्य आह । **किन्नन्तत्वादिति । आमयस्येति** ॥ आमयशब्दात् मत्वर्थे विनिः, प्रकृतेर्दीर्घश्चेत्यर्थः । **शृङ्गबृन्दाभ्यामिति, फलवर्हाभ्यामिति, हृदयाच्चालुरन्यतरस्यामिति** ॥ वार्तिकमिदं त्रयम् । **मतुप्चेति** ॥ वक्तव्यः इति शेषः । भाष्ये तथोक्तत्वात् । चुटू इति चकारस्येत्संज्ञा । अन्यतरस्याङ्ग्रहणाच्चालोरभावे इनिठनौ । समुच्चयार्थकान्यतरस्याङ्ग्रहणानुवृत्तेर्मतुबपि । तथाचात्र चत्वारः प्रत्ययाः । तदाह । **हृदयालुरित्यादि** ॥ शीतोष्णतृप्रेभ्यः तदसहने चालुर्वक्तव्य इति वाचनिकमर्थतः सङ्गृह्णाति । **शीतेति** ॥ शीत, उष्ण, तृप्र, एभ्यः द्वितीयान्तेभ्यः न सहते इत्यर्थे चालुर्वक्तव्य इत्यर्थः । **तृप्रः पुरोडाश इति** ॥ मन्त्रभाष्ये 'स्फायिताञ्चि' इति सूत्रे तथोक्त-

तृप्रालुः। 'तृप्रं दुःखम्' इति माधवः। 'हिमाच्चेलुः' (वा ३२१८)। हिमं न सहते हिमेलुः। 'बलादूलः' (वा ३२१९)। बलं न सहते बलूलः। 'वातात्समूहे च' (वा ३२२०)। वातं न सहते वातस्य समूहो वा वातूलः। 'तप्पर्वमरुद्भ्याम्' (वा ३२२१)। पर्वतः। मरुत्तः।

१९२९। ऊर्णाया युस्। (५-२-१२३)

सित्त्वात्पदत्वम्। ऊर्णायुः। अत्र 'छन्दसि' इति केचिदनुवर्तयन्ति। युक्तं चैतत्। अन्यथा हि 'अहंशुभमोः—' (सू १९४६) इत्यत्रैवोर्णाग्रहणं कुर्यात्।

१९३०। वाचो ग्मिनिः। (५-२-१२४)

वाग्मी।

१९३१। आलजाटचौ बहुभाषिणि। (५-२-१२५)

'कुत्सित इति वक्तव्यम्' (वा ३२२३)। कुत्सितं बहु भाषते वाचालः। वाचाटः। यस्तु सम्यग्बहु भाषते स वाग्मीत्येव।

१९३२। स्वामिन्नैश्वर्ये। (५-२-१२६)

त्वादिति भावः। **हिमाच्चेलुरिति**॥ वार्तिकमिदम्। हिमशब्दात् द्वितीयान्तात् न सहते इत्यर्थे चेलुः स्यादित्यर्थः। चकार इत्। **बलादूल इति**॥ तन्न सहते इत्यर्थे वक्तव्य इति शेषः। **वातात्समूहे चेति**॥ षष्ठ्यन्ताद्वातशब्दात् समूहेऽर्थे, द्वितीयान्तात् न सहते इत्यर्थे च, ऊलप्रत्ययो वाच्य इत्यर्थः। **तप्पर्वमरुद्भ्यामिति**॥ वार्तिकमिदम्। पर्वमरुद्भ्यान्तप् वक्तव्य इत्यर्थः। तन्वक्तव्य इति वृत्तिकृत्, हरदत्तश्च। प्रौढमनोरमायान्तु नित्त्वं निराकृतम्। शब्देन्दुशेखरे तु हरदत्तसम्मतं नित्त्वमेव स्थापितम्। रूढत्वादवयवार्थाभावान्न मतुप्। **ऊर्णाया युस्**॥ ऊर्णायुशब्दे 'यस्येति च' इति लोपमाशङ्क्य आह। **सित्त्वादिति। अनुवर्तयन्तीति**॥ 'बहुलं छन्दसि' इत्यस्मादिति शेषः। **वाचो ग्मिनिः**॥ वाच्शब्दात् मत्वर्थे ग्मिनिप्रत्ययः स्यादित्यर्थः। नकारादिकार उच्चारणार्थः। अतद्धित इति पर्युदासात् गकारस्य नेत्संज्ञा। **वाग्मीति**॥ वाच्शब्दात् ग्मिनिप्रत्यये कुत्वं, जश्त्वम्। प्रत्यये गकारोच्चारणन्तु 'प्रत्यये भाषायाम्, इत्यनुनासिकाभावार्थम्। **आलजाटचौ**॥ वाच्शब्दात् आलच्, आटच्, एतौ मत्वर्थे बहुभाषिणीत्यर्थः। ग्मिनोऽपवादः। **यस्तु सम्यगिति**॥ नच अबहु, अकुत्सितञ्च यो वदति तत्रापि वाग्मीति कुतो न भवतीति वाच्यम्। यो हि सम्यक् बहु भाषते वाग्मीत्येव स भवतीति भाष्यबलेन पूर्वसूत्रस्य सम्यक् बहुभाषिण्येव प्रवृत्तेरभ्युपगमात् इति भावः। **स्वामिन्नैश्वर्ये**॥ ऐश्वर्ये इति प्रकृतिविशेषणमित्यभिप्रेत्य आह। **ऐश्वर्यवाचकादिति**॥

ऐश्वर्यवाचकात्स्वशब्दान्मत्वर्थे आमिनच् । स्वामी ।

१९३३ । अर्शआदिभ्योऽच् । (५-२-१२७)

अर्शोस्यास्य विद्यन्ते अर्शसः । आकृतिगणोऽयम् ।

१९३४ । द्वन्द्वोपतापगर्ह्यात्प्राणिस्थादिनिः । (५-२-१२८)

द्वन्द्वः । कटकवलयिनी । शङ्कनूपुरिणी । उपतापो रोगः । कुष्ठी । किलासी । गर्ह्यं निन्द्यम् । ककुदावर्ती । काकतालुकी । 'प्राणिस्थात्' किम् । पुष्पफलवान्घटः । 'प्राण्यङ्गान्न' । पाणिपादवती । 'अतः' इत्येव । चित्रकललाटिकावती । सिद्धे प्रत्यये पुनर्वचनं ठनादिबाधनार्थम् ।

१९३५ । वातातीसाराभ्यां कुकच । (५-२-१२९)

चादिनिः । वातकी । अतीसारकी । 'रोगे चायमिष्यते' । नेह । वातवती गुहा । 'पिशाचाच्च' (वा ३२२४) । पिशाचकी ।

आमिनजिति ॥ निपात्यते इति शेषः । **स्वामीति** ॥ स्वं ऐश्वर्यं, तद्वानित्यर्थः । नियन्तेति यावत् । ऐश्वर्येत्युक्तेर्धनवानित्यर्थे स्वामीति न भवति । **अर्श आदिभ्योऽच्** ॥ अर्शस्शब्दः आदिः एषामिति विग्रहः । **अर्शस इति** ॥ अर्शः गुदरोगविशेषः । **द्वन्द्वोपताप** ॥ द्वन्द्वसमासात् उपतापवाचकात् गर्ह्यवाचकाच्च प्राणिस्थविषयेभ्यो मत्वर्थे इनिः स्यादित्यर्थः । द्वन्द्वेति उदाहरणसूचनम् । **कटकवलयिनीति** ॥ कटकवलययोः कांचिदाकृतिभेदमपरिकल्प्य द्वन्द्वः उपपाद्यः । उपताप इत्यस्य विवरणं रोग इति । किलासः कुष्ठभेदः । गर्ह्यमित्यस्य विवरणं निन्द्यमिति । **ककुदावर्तीति** ॥ ककुदङ्गोवाया अधस्तात्पृष्ठभागः । तत्र आवृतः ककुदावर्तः, सः अस्यास्तीति विग्रहः । **काकतालुकिनीति** ॥ काकस्येव तालुके काकतालुके, ते अस्याः स्त इति विग्रहः । **प्राण्यङ्गान्नेति** ॥ व्याख्यानमेवात्र शरणम् । एवंविधवार्तिकस्य भाष्ये अदर्शनात् । **अत इत्येवेति** ॥ समासान्त इति सूत्रभाष्यस्थात्या मण्डूकप्लुत्या तदनुवृत्तेरिति भावः । **चित्रकललाटिकावतीति** ॥ चित्रकम ललाटिका चेति द्वन्द्वः । अदन्तत्वाभावादिनिर्नेति भावः । ननु 'अत इनिठनौ' इत्यतोऽनुवृत्त्यैव सिद्धे पुनरिह इनिग्रहणङ्किमर्थमित्यत आह । **सिद्धे प्रत्यये इति** ॥ **ठनादीति** ॥ आदिना मनुषः सङ्ग्रहः । **वातातीसाराभ्यां कुकच** ॥ **चादिनिरिति** ॥ वात, अतीसार, आभ्यां मत्वर्थे इनिः स्यात् प्रकृतेः कुक् चेत्यर्थः । कुकि ककार इत् । उकार उच्चारणार्थः । **कित्त्वादन्तावयवः** । **वातकीति** ॥ वातरोगवानित्यर्थः । **अतीसारकीति** ॥ अतीसाररोगवानित्यर्थः । **रोगे चायमिति** ॥ व्याख्यानादिति भावः । रोग एवेत्यर्थः । **वातवती गुहेति** ॥ अत्र रोगस्याप्रतीतेरिनि कुकौ नेति भावः । **पिशाचाच्चेति** ॥ वार्तिकमिदम् । पिशाचादिनिः प्रकृतेः कुक्चेत्यर्थः ।

१९३६। वयसि पूरणात्। (५-२-१३०)

पूरणप्रत्ययान्तान्मत्वर्थे इनिः स्याद्वयसि द्योत्ये। मासः संवत्सरो वा पञ्चमोऽस्यास्तीति पञ्चम्युष्ट्रः। ठनादिबाधनार्थमिदम्। 'वयसि' किम्। पञ्चमवान् ग्रामः।

१९३७। सुखादिभ्यश्च। (५-२-१३१)

इनिर्मत्वर्थे। सुखी। दुःखी। 'माला क्षेपे' (ग. सू ११६)। माली।

१९३८। धर्मशीलवर्णान्ताच्च। (५-२-१३२)

धर्माद्यन्तादिनिर्मत्वर्थे। ब्राह्मणधर्मी। ब्राह्मणशीली। ब्राह्मणवर्णी।

१९३९। हस्ताज्जातौ। (५-२-१३३)

हस्ती। 'जातौ' किम्। हस्तवान्पुरुषः।

१९४०। वर्णाद्ब्रह्मचारिणि। (५-२-१३४)

वर्णी।

१९४१। पुष्करादिभ्यो देशे। (५-२-१३५)

पुष्करिणी। पद्मिनी। 'देशे' किम्। पुष्करवान्करी। 'बाहूरुपूर्वपदाद्बलात्' (वा ३२२५)। बाहुबली। ऊरुबली। 'सर्वादेश्च' (वा ३२२६)। सर्वधनी। सर्ववीजी। 'अर्थाच्चासन्निहिते' (वा ३२२७)। अर्थी। सन्निहिते तु अर्थवान्। 'तदन्ताच्च' (वा ३२२८)। धान्यार्थी। हिरण्यार्थी।

वयसि पूरणात् ॥ अत इनिठनाविल्येव इनिसिद्धेः किमर्थमिदमित्यत आह। **ठनादिबाधनार्थमिति** ॥ **सुखादिभ्यश्च** ॥ **इनिर्मत्वर्थे इति** ॥ इनिरेव नतु ठनित्यर्थः। **माला क्षेपे इति** ॥ सुखादिगणसूत्रमिदम्। **धर्मशील** ॥ **धर्माद्यन्तादिति** ॥ धर्म, शील, वर्ण, एतदन्तादिनिरेवेत्यर्थः। **हस्ताज्जातौ** ॥ हस्तान्मत्वर्थे इनिरेव, समुदायेन जातिविशेषे गम्ये इत्यर्थः। **वर्णाद्ब्रह्मचारिणि** ॥ वर्णशब्दान्मत्वर्थे इनिरेव। समुदायेन ब्रह्मचारिणि गम्ये इत्यर्थः। **वर्णीति** ॥ वर्णः ब्राह्मणादितत्तद्वर्णोचितवसन्तादिकालमुपनयनम्, सोऽस्यास्तीति विग्रहः। **पुष्करादिभ्यो देशे** ॥ पुष्करशब्दान्मत्वर्थे इनिरेव स्यात् देशे गम्ये। **बाहूरुपूर्वपदात् बलादिति** ॥ वार्तिकमिदम्। बाहु, ऊरु, एतत्पूर्वपदकात् बलशब्दान्तान्मत्वर्थे इनिरेवेत्यर्थः। **सर्वादेश्चेति** ॥ वार्तिकमिदम्। इनिरेवेति शेषः। **अर्थाच्चासन्निहिते इति** ॥ वार्तिकमिदम्। असन्निहितविषयकादर्थशब्दात् इनिरेवेत्यर्थः। **अर्थीति** ॥ असन्निहितः

१९४२ । बलादिभ्यो मतुबन्यतरस्याम् । (५-२-१३६)

बलवान्—बली । उत्साहवान्—उत्साही ।

१९४३ । संज्ञायां मन्माभ्याम् । (५-२-१३७)

मन्नन्तान्मान्ताच्चेनिर्मत्वर्थे । प्रथिमिनी । दामिनी । मा । होमिनी । सोमिनी । 'संज्ञायाम्' किम् । सोमवान् ।

१९४४ । कंशम्भ्यां वभयुस्ितुतयसः । (५-२-१३८)

'कम्' 'शम्' इति मान्तौ । 'कम्' इत्युदकसुखयोः । 'शम्' इति सुखे । आभ्यां सप्त प्रत्यया: स्यु: । युस्यसो: सकार: पदत्वार्थ: । कंव: । कंभ: । कंयु: । कंति: । कंतु: । कंत: । कंय: । शंव: । शंभ: । शंयु: । शंति: । शंतु: । शंय: । अनुस्वारस्य वैकल्पिक: परसवर्ण: । वकारयकार-परस्यानुनासिकौ वयौ ।

१९४५ । तुन्दिवलिवटेर्भः । (५-२-१३९)

वृद्धा नाभिस्तुन्दि: । 'मूर्धन्योपधोऽयम्' इति माधव: । तुन्दिभ: । वलिभ: । वटिभ: । पामादित्वाद्वलिनोऽपि ।

अर्थः अस्येति विग्रहः । अर्थो नास्तीति यावत् । अत्र विरोधादस्तीति न सम्बध्यते । अर्थोऽसन्निहितोऽस्येत्यर्थे अप्राप्त एव इनिर्विधीयते इति कैयटः । प्रत्ययविधौ तदन्तविधिनिषेधादाह। **तदन्ताच्चेति** ॥ अर्थशब्दान्तादपि इनिर्वक्तव्य इत्यर्थः । **बलादिभ्यो** ॥ मतुबभावपक्षे सन्निहितः इनिरित्यभिप्रेत्योदाहरति । **बलवान् बलीति** ॥ **संज्ञायां मन्माभ्याम्** ॥ **प्रथिमिनीति** ॥ 'पृथ्वादिभ्य इमनिज्वा' इति इमनिजन्तः प्रथिमनशब्दः । अत्र मनोऽनर्थकत्वेऽपि 'अनिनस्मन्' इति तदन्तविधिना इमनिजन्तोऽपि गृह्यते । प्रथिमनशब्दादिनिप्रत्यये टिलोपे नान्तलक्षणङीपि प्रथिमिनीशब्दः । **दामिनीति** ॥ दामनशब्दादिनौ टिलोपे ङीबिति भावः । **मेति** ॥ मान्तोदाहरणसूचनमिदम् । **होमिनी । सोमिनीति** ॥ होमशब्दात्सोमशब्दाच्च इनौ ङीबिति भावः । **कंशंभ्याम्** ॥ व, भ, युस्, ति, तु, त, यस्, एषां सप्तानां द्वन्द्वात् प्रथमाबहुवचनम् । **सप्त प्रत्ययाः स्युरिति** ॥ मत्वर्थे इति शेषः । **पदत्वार्थ इति** ॥ अन्यथा कम् इत्यस्मात् युप्रत्यये यप्रत्यये च कृते भत्वात् पदत्वाभावादनुस्वारो न स्यादिति भावः । **वकारयकारपरस्येति** ॥ बहुव्रीहिः । वकारपरकस्य यकारपरकस्य चानुस्वारस्येत्यर्थः । **तुन्दिवलि** ॥ तुन्दि, वलि, वटि, एभ्यो मत्वर्थे भप्रत्ययः स्यादित्यर्थः । समाहारद्वन्द्वात्पञ्चम्येकवचनम् । पुंस्त्वमार्षम् । **वटिभ इति** ॥ 'वट वेष्टने' । वटनं वटिः अस्या-

१९४६। अहंशुभमोर्युस्। (५-२-१४०)

'अहम्' इति मान्तमव्ययमहङ्कारे। शुभमिति शुभे। **अहंयुः**—अहङ्कारवान्। शुभंयुः, शुभान्वितः।

इति तद्धिते पञ्चमाध्यायस्य द्वितीयपादे मत्वर्थीयप्रकरणम्।

अथ तद्धिते तृतीयपादे प्राग्दिशीयप्रकरणम्॥

१९४७। प्राग्दिशो विभक्तिः। (५-३-१)

दिक्छब्देभ्यः इत्यतः प्राग्वक्ष्यमाणाः प्रत्ययाः **विभक्तिसंज्ञाः स्युः**। अथ स्वार्थिकाः प्रत्ययाः। 'समर्थानाम्' इति 'प्रथमात्' इति च निवृत्तम्। 'वा' इति त्वनुवर्तत एव।

१९४८। किंसर्वनामबहुभ्योऽद्यादिभ्यः। (५-३-२)

किमः सर्वनाम्नो बहुशब्दाच्चेति प्राग्दिशोऽधिक्रियते।

स्तीति विग्रहः। **अहंशुभमोर्युस्**॥ अहंयुश्शुभंयुरित्यत्र सुब्लुकमाशङ्क्य आह। **अहमित्यादीति**॥ सित्त्वं पदत्वार्थम्। तेन पदत्वादनुस्वारे परसवर्णः सिध्यति॥

इति तद्धिते पञ्चमाध्यायस्य द्वितीयपादे मत्वर्थीयप्रकरणम्।

अथ पञ्चमाध्यायस्य तृतीयपादे प्राग्दिशीयप्रकरणं निरूप्यते—**प्राग्दिशो विभक्तिः**॥ दिक्छब्देन तद्घटितं सूत्रं विवक्षितमित्यभिप्रेत्य आह। **दिक्छब्देभ्य इत्यत इति**॥ **विभक्तिसंज्ञका इति**॥ तत्फलन्तु 'न विभक्तौ तुस्माः' इति निषेधः। त्यदाद्यत्वम्। 'इदमस्तृतीयादिर्विभक्तिः' इति स्वरश्च। **स्वार्थिका इति**॥ स्वीयप्रकृत्यर्थे भवाः इत्यर्थः। तसिलादिष्वर्थनिर्देशाभावात् अतिशायने इल्यादीनां प्रकृत्यर्थविशेषणत्वाच्चेति भावः। **निवृत्तमिति**॥ अत्रोपपत्तिः 'समर्थानाम्' इत्यत्रोक्ता। **अनुवर्तते एवेति**॥ व्याख्यानमेवात्र शरणम्। **किंसर्वनाम**॥ अद्यादिभ्य इति च्छेदः। प्राग्दिश इत्यनुवर्तते। तदाह। **प्राग्दिशोऽधिक्रियते इति**॥ विधेयानिर्देशादधिकारोऽयमिति भावः। किमः सर्वनामत्वेऽपि द्यादिपर्युदासात् पृथग्ग्रहणम्। द्यादिषु किंशब्दपाठस्तु त्वश्च कश्च कौ, अहश्च कश्च कौ, इत्यत्र 'त्यदादीनां मिथः सहोक्तौ' इति किमः शेषत्वार्थः। अथ वक्ष्यमाणतसिलादिप्रत्यये परे

१९४९ । इदम इश् । (५-३-३)

प्राग्दिशीये परे ।

१९५० । एतेतौ रथोः । (५-३-४)

इदंशब्दस्य 'एत' 'इत्' इत्यादेशौ स्तो रेफादौ थकारादौ च प्राग्दिशीये परे । इशोऽपवादः ।

१९५१ । एतदोऽन् । (५-३-५)

योगविभागः कर्तव्यः । 'एतदः' एतेतौ स्तो रथोः । 'अन्' 'एतदः' इत्येव । अनेकाल्त्वात्सर्वादेशः । 'नलोपः प्रातिपदिकान्तस्य' (सू २३६)।

१९५२ । सर्वस्य सोऽन्यतरस्यां दि । (५-३-६)

प्राग्दिशीये दकारादौ प्रत्यये परे सर्वस्य सो वा स्यात् ।

१९५३ । पञ्चम्यास्तसिल् । (५-३-७)

पञ्चम्यन्तेभ्यः किमादिभ्यस्तसिल्वा स्यात् ।

कार्यविशेषानाह । इदम इश् इत्यादिना । **इदम इश्॥ प्राग्दिशीये परे इति ॥** शेषपूरणम् । प्रकरणलभ्यमिदम् । शित्त्वात् सर्वादेशः । इत इत्युदाहरणम् । **एतेतौ रथोः ॥** इदम इत्यनुवर्तते । एतश्च इच्चेति द्वन्द्वान्प्रथमाद्विवचनम् । रथ थ च तयोरिति द्वन्द्वः । रेफादकार उच्चारणार्थः । रेफथकाराभ्यां प्राग्दिशीयं प्रकरणलभ्यं विशेष्यते । 'यस्मिन्विधिः' इति तदादिविधिः । तदाह । **इदंशब्दस्येत्यादिना ॥** तत्र रेफादौ परे एतः, थादौ तु इदिति, यथासङ्ख्यं बोध्यम् । एतर्हि, इत्थम् । **एतदोऽन् ॥** प्राग्दिशीये प्रत्यये परे एतदशब्दस्य अन् स्यादित्यर्थः प्रतीयते । एवं सति एतच्छब्दस्य अनेव स्यात् । नन्वेतौ । तत्राह । **योगविभाग इति ॥ एतद इति ॥** प्रथममूत्रमिदम् । तस्य शेषपूरणम् 'एतेतौ रथोः' इति । एतच्छब्दस्य एतेतौ स्तो रेफथकारादौ प्रत्यये परे इत्यर्थः । एतर्हि, इत्थम, इत्युदाहरणम् । **अञ्निति ॥** द्वितीयं सूत्रम् । **एतद इत्येवेति ॥** रथोः इति तु नानुवर्तत इति भावः । तथाच एतद इत्यस्य अन् स्यात्प्राग्दिशीये परे इति फलति । अतः, अत्र, इत्युदाहरणम् । ननु अनादेशे नकारस्य इत्संज्ञायां अकारोऽन्तादेशः स्यादित्यत आह । **अनेकाल्त्वादिति ॥** नकारस्य प्रयोजनाभावात् नेत्संज्ञा । नित्स्वरस्य प्रत्ययविषयत्वादिति भावः । तर्हि अत इत्यादौ नकारस्य श्रवणं स्यादित्यत आह । **नलोप इति ॥ सर्वस्य सोऽन्यतरस्यादि॥** दि इति सप्तम्येकवचनं प्राग्दिशीयविशेषणम् 'यस्मिन्विधि.' इति तदादिविधिः । तदाह । **प्राग्दिशीये दकारादाविति ॥** सदा इत्युदाहरणम् । तदेवन्तसिलादिप्रत्ययेषु प्राग्दिशीयेषु परेषु कतिपयान् आदेशान् विधाय तसिलादिप्रत्ययान्वक्तुमुपक्रमते । **पञ्चम्यास्तसिल् ॥ किमादिभ्य इति ॥** किंसर्वनामबहुभ्य इत्यर्थः । **वा स्यादिति ॥** 'समर्थानाम्' इत्तो

१९५४। कु तिहोः। (७-२-१०४)

किमः कुः स्यात्तादौ हादौ च विभक्तौ परतः। कुतः। कस्मात्। यतः। ततः। अतः। इतः। अमुतः। बहुतः। द्व्यादेस्तु द्वाभ्याम्।

१९५५। तसेश्च। (५-३-८)

किंसर्वनामबहुभ्यः परस्य तसेस्तसिलादेशः स्यात्। स्वरार्थम् विभक्त्यर्थं च वचनम्।

१९५६। पर्यभिभ्यां च। (५-३-९)

आभ्यां तसिल्स्यात्। 'सर्वोभयार्थाभ्यामेव' (वा ३२४०)। परितः सर्वत इत्यर्थः। अभितः उभयत इत्यर्थः।

१९५७। सप्तम्यास्त्रल्। (५-३-१०)

कुत्र। यत्र। तत्र। बहुत्र।

वाग्रहणस्यानुवृत्तेरिति भावः। **कु तिहोः**॥ कु इति लुप्तप्रथमाकम्। 'किमः कः' इत्यस्मात् किमः इत्यनुवर्तते। 'अष्टन आ' इत्यतो विभक्ताविति। तिश्च ह् च तयोरिति द्वन्द्वः। इकार उच्चारणार्थः। ताभ्यां विभक्तिर्विशेष्यते। तदादिविधिः। तदाह। **किमः कुः स्यादित्यादिना**॥ **कुत इति**॥ किंशब्दात् पञ्चम्यन्तात्तसिल्। सुब्लुक्। किमः कुभावः। 'तसिलादयः प्राक् पाशपः' इत्युक्तेरव्ययत्वम्। वेत्यनुवृत्तेः फलमाह। **कस्मादिति**॥ तिहोरित्युक्तेरत्र न कुभावः सर्वनाम्न उदाहरति। **यत इति**॥ यद्शब्दात् पञ्चम्यन्तात् सुब्लुक्, तसिलो विभक्तित्वात् तस्मिन्परे त्यदाद्यत्वं पररूपम्। एवन्तच्छब्दात्तत इति रूपम्। पक्षे तस्मादिति भवति। **अत इति**॥ एतद्शब्दात् पञ्चम्यन्तात् तसिल्, सुब्लुक्, एतदोऽन्, सर्वादेशः, नलोपः। पक्षे एतस्मादिति भवति। **इत इति**॥ इदंशब्दात्पञ्चम्यन्तात् तसिल्, सुब्लुक्, इदम इश्। पक्षे अस्मादिति भवति। **अमुत इति**॥ अदस्शब्दात् पञ्चम्यन्तात् तसिल्, उत्वमत्वे च। पक्षे अमुष्मादिति भवति। **बहुत इति**॥ पक्षे बहुभ्य इति भवति। **द्व्यादेस्त्विति**॥ सर्वनामत्वात् प्राप्तस्तासल् द्व्यादिपर्युदासान्नेत्यर्थः। **तसेश्च॥ परस्य तसेरिति**॥ 'प्रतियोगे पञ्चम्यास्तसिः' 'अपादाने चाहीयरुहोः' इति वक्ष्यमाणस्य तसेरित्यर्थः। ननु तसेस्तसिल् किमर्थमित्यत आह। **स्वरार्थमिति**॥ लित्स्वरार्थमित्यर्थः। **विभक्त्यर्थमिति**॥ विभक्तिनिमित्तकत्यदाद्यत्वार्थमित्यर्थः। अन्यथा परत्वात्तसौ कृते तस्य अप्राग्दिशीयत्वात् विभक्तित्वाभावात् त्यदाद्यत्वादिकन स्यादित्यर्थः। **पर्यभिभ्याञ्च॥ सर्वोभयार्थाभ्यामेवेति**॥ वार्तिकमिदम्। परिषिञ्चति, अभिषिञ्चति, इत्यादौ वाग्रहणात् पक्षे न तसिल्। **सप्तम्यास्त्रल्**॥ किमादिभ्यः

१९५८ । इदमो हः । (५-३-११)

त्रलोऽपवादः । इशादेशः । इह ।

१९५९ । किमोऽत् । (५-३-१२)

वाग्रहणमपकृष्यते । सप्तम्यन्तात्किमोऽद्वा स्यात् । पक्षे त्रल् ।

१९६० । क्वाति । (७-२-१०५)

किमः क्वादेशः स्यादति । क्व । कुत्र ।

१९६१ । वा ह च च्छन्दसि । (५-३-१३)

'कुह स्थः' । 'कुह जग्मथुः' ।

१९६२ । एतदस्त्रतसोस्त्रतसौ चानुदात्तौ । (२-४-३३)

अन्वादेशविषये एतदोऽश् स्यात्स चानुदात्तस्त्रतसोः परतः, तौ चानुदात्तौ स्तः । एतस्मिन्ग्रामे सुखं वसामः । अतोऽत्राधीमहे । अतो न गन्तारः स्मः ।

१९६३ । इतराभ्योऽपि दृश्यन्ते । (५-३-१४)

सप्तम्यन्तेभ्यः अद्यादिभ्यस्त्रलित्यर्थः । कुत्र इत्यादिरूपाणि, कुत इत्यादिवत् । **इदमो हः** ॥ इदंशब्दात् सप्तम्यन्तात् हप्रत्ययः स्यादित्यर्थः । **किमोऽत्** ॥ **अपकृष्यते इति** ॥ 'वा ह च छन्दसि' इत्युत्तरसूत्रादिति शेषः । अपकर्षे व्याख्यानमेव शरणम् । अत्प्रत्यये तकार इत् । न विभक्ताविति निषेधस्तु न भवति । 'तवर्गस्येत्वप्रतिषेधोऽतद्धिते' इति वार्तिकात् । **क्वाति** ॥ क्व अतीति छेदः । क्वेति लुप्तप्रथमाकं 'किमः कः' इत्यतः किम इत्यनुवर्तते । तदाह । **किमः क्वेति** ॥ किंशब्दात् सप्तम्यन्तात् अत्प्रत्ययः, तकार इत्, किमः क्वादेश इति भावः । **कुत्रेति** ॥ अत्प्रत्ययाभावपक्षे त्रलि 'कुतिहोः' इति कुभावे रूपम् । केचित्तु 'किमोऽत्' इत्यत्र उत्तरसूत्राद्वाग्रहणापकर्षे प्रमाणाभावात्तूलम्बाधित्वा नित्य एव अत्प्रत्ययः कुत्रेति त्वपशब्द एवेत्याहुः । **वा ह च छन्दसि** ॥ हेति लुप्तप्रथमाकम् । किमः सप्तम्यन्तात् हप्रत्ययः स्यादित्यर्थः । चादत् त्रल् च । यद्यपि वैदिकप्रक्रियायामिदमुपन्यसनीयम् । तथापि वाग्रहणस्य पूर्वसूत्रे अपकर्षज्ञानायात्र तदुपन्यासः । **एतदस्त्रतसोः** ॥ 'इदमोऽन्वादेशे' इत्यस्मात् अन्वादेशे अशनुदात्त इत्यनुवर्तते । तदाह । **अन्वादेशेत्यादिना** ॥ **अतोऽत्रेति** ॥ एतद्शब्दात् त्रलि प्रकृतेरशादेशे अत्रेति रूपम् । **अतो न गन्तारः स्म इति** ॥ एतस्माद्ग्रामादित्यर्थः । एतद्शब्दात्तसिल् प्रकृतेरशादेशः । 'एतदोऽन्' इत्येव सिद्धे अनुदात्तार्थं वचनम् । नच लित्स्वरे सति शेषनिघातेन तसेरुदात्तत्वं सिद्धमिति शङ्क्यम् । लित्स्वरापवादे अशोऽनुदात्तत्वे कृते लित्स्वरप्राप्त्या प्रत्ययस्वरेणात्र तसेरुदात्तत्वे प्राप्ते तद्विधानार्थत्वात् । **इतराभ्योऽपि दृश्यन्ते** ॥

पञ्चमीसप्तमीतरविभक्त्यन्तादपि तसिलादयो दृश्यन्ते। 'दृशिग्रहणाद्भवदादियोग एव' (वा ३२४४)। स भवान्। ततो भवान्। तत्र भवान्। तं भवन्तम्। ततो भवन्तम्। तत्र भवन्तम्। एवं दीर्घायुः। देवानाम्प्रियः। आयुष्मान्।

१९६४। सर्वैकान्यकिंयत्तदः काले दा। (५-३-१५)

सप्तम्यन्तेभ्यः कालार्थेभ्यः स्वार्थे दा स्यात्। सर्वस्मिन्काले। सदा। सर्वदा। एकदा। अन्यदा। यदा। कदा। तदा। 'काले' किम्। सर्वत्र देशे।

१९६५। इदमो र्हिल्। (५-३-१६)

सप्तम्यन्तात्काले इत्येव। हस्यापवादः। अस्मिन्काले एतर्हि। 'काले' किम्। इह देशे।

१९६६। अधुना। (५-३-१७)

इदमः सप्तम्यन्तात्कालवाचिनः स्वार्थे अधुनाप्रत्ययः स्यात्। इश्। 'यस्य—' (सू ३११) इति लोपः। अधुना।

१९६७। दानीं च। (५-३-१८)

इदानीम्।

१९६८। तदो दा च। (५-३-१९)

पञ्चमीसप्तमीतरविभक्तिभ्योऽपीत्यर्थः। फलितमाह। **पञ्चमीसप्तमीतरविभक्त्यन्तादपीति**॥ किमादेरिति शेषः। **एवमिति**॥ स दीर्घायुः, ततो दीर्घायुः, तत्र दीर्घायुरित्यादूह्यमित्यर्थः। **सर्वैकान्य**॥ **सप्तम्यन्तेभ्य इति**॥ किमादिभ्य इति शेषः। सप्तम्या इत्येवानुवर्तते। व्याख्यानादिति भावः। **सदा-सर्वदेति**॥ 'सर्वस्य सोऽन्यतरस्यान्दि' इति सभावविकल्पः। **कदेति**॥ किंशब्दात् दाप्रत्यये सति तस्य 'किमः कः' इति कादेशः। **इदमो र्हिल्**॥ इदमः र्हिल् इति छेदः। **एतर्हीति**॥ इदमशब्दात् र्हिल्, 'एतेतौ रथोः' इत्येतादेशः। **अधुना**॥ इदम इति सप्तम्या इति काले इति चानुवर्तते। तदाह। **इदम इति**॥ **इशिति**॥ 'इदम इश्' इत्यनेनेति शेषः। **अधुनेति**॥ इयदितिवत् प्रत्ययमात्रं शिष्यते। पठन्ति चाभियुक्ताः "उदितवति परस्मिन्प्रत्यये शास्त्रयोनौ गतवति विलयञ्च प्राकृतेऽपि प्रपञ्चे। सपदि पदमुदीतङ्केवलः प्रत्ययो यत् तदियादिति मिमीते कोऽधुना पण्डितोऽपि" इति वैयाकरणीमौपनिषदीञ्च प्रक्रियामाश्रित्य प्रवृत्तो ह्यर्थोऽयं श्लोकः। **दानीञ्च**॥ इदमः सप्तम्यन्तात् कालवाचिनः स्वार्थे दानीमिति च प्रत्ययः स्यादित्यर्थः। **इदानीमिति**॥ इदंशब्दात् दानीम्प्रत्ययः, इश्। **तदो दा च**॥

तदा—तदानीम् । 'तदो दावचनमनर्थकं, विहितत्वात्' (वा ३२४३)।

१९६९ । अनद्यतने र्हिलन्यतरस्याम् । (५-३-२१)

कर्हि—कदा । यर्हि—यदा । तर्हि—तदा । एतस्मिन्काले एतर्हि ।

१९७० । सद्यःपरुत्परार्यैषमःपरेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरे-द्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः । (५-३-२२)

एते निपात्यन्ते । 'समानस्य सभावो दस् चाहनि' (वा ३२४५) । समानेऽहनि सद्यः । 'पूर्वपूर्वतरयोः परभाव उदारी च संवत्सरे' (वा ३२४६)। पूर्वस्मिन्वत्सरे परुत् । पूर्वतरे वत्सरे परारि । 'इदम (इश्) समसण्' (वा ३२४७) । अस्मिन्संवत्सरे ऐषमः । 'परस्मादेद्यव्यहनि' (वा ३२४८) परस्मिन्नहनि परेद्यवि । 'इदमोऽशभावो दश्च' (वा ३२४९) अस्मिन्नहनि अद्य । 'पूर्वान्यान्यतरेतरापराधरोभयोत्तरेभ्य एद्युस् च' (वा ३२५०) । पूर्वस्मिन्नहनि पूर्वेद्युः । अन्यस्मिन्नहनि अन्येद्युः । उभयोरह्नोरुभयेद्युः । 'द्युश्चोभया-दुक्तव्यः' (वा ३२५१) । उभयद्युः ।

१९७१ । प्रकारवचने थाल् । (५-३-२३)

प्रकारवृत्तिभ्यः किमादिभ्यस्थाल्स्यात्स्वार्थे । तेन प्रकारेण तथा । यथा ।

सप्तम्यन्तात्कालवृत्तेः तदशब्दात् दाप्रत्ययः, दानीम्प्रत्ययश्च स्यादित्यर्थः । **तदो दावचन-मिति** ॥ वार्तिकमिदम् । **विहितत्वादिति** ॥ 'सर्वैकान्य' इत्यनेनेति शेषः । **अनद्यतने र्हिल्** ॥ अनद्यतनकालवृत्तिभ्यः किमादिभ्यः सप्तम्यन्तेभ्यः र्हिलप्रत्ययो वा स्यादित्यर्थः । पक्षे दाप्रत्ययः । **एतस्मिन्काले एतर्हीति** ॥ एतच्छब्दात् र्हिल् । एतद इति योगविभागात् रेफादौ एतादेशः । **सद्यः परुत्** ॥ "समानस्य सभावो दस् चाहनि" इति भाष्यवाक्यमिदम् । अहर्वृत्तेः समानशब्दात् सप्तम्यन्तात् दस्प्रत्ययः । समानस्य सभावश्च निपात्यते इत्यर्थः । समानेऽहनीत्यर्थः । "पूर्वपूर्वतरयोः परभाव उदारी च संवत्सरे" इत्यपि भाष्यवाक्यम् । उच्च आरिश्चेति द्वन्द्वः । सप्तम्यन्तादिमौ प्रत्ययौ संवत्सरे अभिधेये । "इदम (इश्) समसण्" इत्यपि भाष्यवाक्यम् । **ऐषम इति** ॥ समसणि णकार इत्, सकारादकार उच्चारणार्थः । णित्त्वादादिवृद्धिः । "परस्मादेद्यव्यहनि" इत्यपि भाष्यवाक्यम् । सप्तम्यन्तात् एद्यविरिकारान्तः प्रत्ययः । "इदमोऽशभावो दश्च" इत्यपि भाष्यवाक्यम् । सप्तम्यन्तात् अकारान्तो दस्प्रत्ययः "पूर्वान्यान्यतरेतरापराधरोभयोत्तरेभ्य" इत्यपि भाष्यवाक्यम्। **प्रकारवचने थाल्** ॥ पञ्चम्यर्थे सप्तमीत्याह । **प्रकारवृत्तिभ्य इति** ॥ सामान्यस्य भेदको विशेषः प्रकारः । यथा बहुभिः प्रकारैर्भुङ्क्ते इति विशेषैरिति गम्यते । सादृश्यं त्विह न

१९७२। इदमस्थमुः। (५-३-२४)

थालोऽपवादः। 'एतदो वाच्यः' (वा ३२३५)। अनेन एतेन वा प्रकारेण इत्थम्।

१९७३। किमश्च। (५-३-२५)

केन प्रकारेण कथम्।

इति तद्धिते प्राग्दिशीयप्रकरणम्।

अथ तद्धिते प्रागिवीयप्रकरणम्।

१९७४। दिक्छब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देश-कालेष्वस्तातिः। (५-३-२७)

सप्तम्याद्यन्तेभ्यो दिशि रूढेभ्यो दिग्देशकालवृत्तिभ्यः स्वार्थेऽस्तातिप्रत्ययः स्यात्।

१९७५। पूर्वाधरावराणामसिपुरधवश्चैषाम्। (५-३-३९)

गृह्यते सर्वथेत्यादौ तदप्रतीतेः। तेन प्रकारेणेत्यनन्तरं विशिष्ट इति शेषः। 'यथा हरिः तथा हरः' इत्यादौ यत्प्रकारवान् हरिः तत्प्रकारवान् हरः इति बोधे सति हरिसदृशो हर इति फलति। तदभिप्रायेण यथाशब्दस्य सादृश्यार्थकत्वोक्तिः। **इदमस्थमुः**॥ इदंशब्दात्प्रकारवृत्तेः थमुप्रत्ययः स्यादित्यर्थः। प्रत्यये उकार उच्चारणार्थः। मकारस्य उपदेशे अन्त्यत्वाभावान्नेत्त्वम्। यद्यपि 'न विभक्तौ' इति निषेधादेव मस्येत्त्वं न भवति। तथापि तदनित्यत्वज्ञापनार्थं मकारोच्चारणमित्याहुः। **इत्थमिति**॥ 'एतेतौ रथोः' इति प्रकृतेरिदमः इदादेशः। एतच्छब्दात् थमुप्रत्यये तु एतद इति योगविभागात् इदादेशः। **किमश्च**॥ प्रकारवृत्तेस्थमुरिति शेषः। **कथमिति**॥ 'किमः कः' इति कादेशः॥

इति तद्धिते प्राग्दिशीयानां विभक्तिसंज्ञकानां पूर्णोऽवधिः।

अथ प्रागिवीयप्रकरणमारभ्यते—**दिक्छब्देभ्यः**॥ **सप्तम्याद्यन्तेभ्य इति**॥ सप्तमीपञ्चमीप्रथमान्तेभ्य इत्यर्थः। **रूढेभ्य इति**॥ शब्दग्रहणलभ्यमिदम्। अस्तातिप्रत्यये इकार उच्चारणार्थः। तकारान्तः प्रत्ययः। 'सङ्ख्याया विधार्थे धा' इतिसूत्रपर्यन्तमिदं सूत्रमस्तातिवर्जमनुवर्तते। अत्र विभक्तीनां दिगादीनाञ्च न यथासङ्ख्यं, व्याख्यानात्। **पूर्वाधरावराणाम्**॥

एभ्योऽस्तात्यर्थेऽसिप्रत्ययः स्यात्, तद्योगे चैषां क्रमात् 'पुर्' 'अध्' 'अव्' इत्यादेशाः स्युः ।

१९७६ । अस्तात्ति च । (५-३-४०)

अस्तातौ परे पूर्वादीनां पुरादयः स्युः । पूर्वस्याम्—पूर्वस्याः—पूर्वा वा दिक् । पुरः—पुरस्तात् । अधः—अधस्तात् । अवः—अवस्तात् ।

१९७७ । विभाषाऽवरस्य । (५-३-४१)

अवरस्यास्तातौ परेऽव् स्याद्वा । अवस्तात्—अवरस्तात् । एवं देशे काले च । 'दिशि रूढेभ्यः' किम् । ऐन्द्र्यां वसति । 'सप्तम्याद्यन्तेभ्यः' किम् । पूर्वं ग्रामं गतः । 'दिगादिवृत्तिभ्यः' किम् । पूर्वस्मिन्गुरौ वसति । 'अस्तात्ति च' (सू १९७६) इति ज्ञापकादसिरस्तातिं न बाधते ।

१९७८ । दक्षिणोत्तराभ्यामतसुच् । (५-३-२८)

अस्तातेरपवादः । दक्षिणतः, उत्तरतः ।

असीति लुप्तप्रथमाकम् । पुर्, अध्, अव्, एषां द्वन्द्वात्प्रथमाबहुवचनम् । **अस्तात्यर्थे इति** ॥ दिक्देशकालवृत्तिभ्य इत्यर्थः । **अस्तात्ति च** ॥ अस्तातीति लुप्तसप्तमीकम् । अस्तातीति तकारान्तात् सप्तम्येकवचनं वा । पूर्वाधरावराणामिति पुरध्व इति चानुवर्तते । तदाह । **अस्तातावि**ति ॥ यद्यपि सूत्रक्रमे 'पूर्वाधर' इति 'अस्तात्ति च' इति 'सङ्ख्याया विधार्थे' इत्यतः प्राक् पठितम् । तत्र अस्तातौ पुरायादेशविधानाय 'अस्तात्ति च' इति सूत्रमुपन्यसनीयम् । तत्रानुवृत्तिप्रदर्शनाय 'पूर्वाधर' इत्यपि सूत्रमिहोपन्यस्तम् । **पुर इति** ॥ पूर्वशब्दात् असिप्रत्ययः प्रकृतेः पुर् आदेशः । **पुरस्तादिति** ॥ पूर्वशब्दात् अस्तातिप्रत्ययः प्रकृतेः पुर् आदेशः । **अधः, अधस्तादिति** ॥ अधरशब्दात् असिप्रत्यये अस्तातिप्रत्यये च प्रकृतेः अध् आदेशे रूपम् । **अव इति** ॥ अवरशब्दात् असिप्रत्यये प्रकृतेः अव् आदेशे रूपम् । **विभाषाऽवरस्य** ॥ 'अस्तात्ति च' इति पूर्वसूत्रादस्तातीत्यनुवर्तते । तदाह । **अवरस्येति** ॥ **एवमिति** ॥ पूर्वस्मिन् पूर्वस्मात् पूर्वो वा देशः, कालो वा पुरस्तादित्यादि । **पूर्वस्मिन्गुरा**विति ॥ पूर्वकालिकाध्यापनकर्तरीत्यर्थः । ननु 'दिक्छब्देभ्यः' इति सामान्यविहितस्य परादिशब्देषु सावकाशस्य पूर्वाधरावरशब्देषु असिना विशेषविहितेन बाधः स्यादित्यत आह । **आस्तात्ति चेतीत्यादि** ॥ **दक्षिणोत्तराभ्याम्** ॥ दिग्देशकालवृत्तिभ्यामिति शेषः । **दक्षिणतः, उत्तरत इति** ॥ नच तसुंजेव प्रत्ययोऽस्तु । दिग्वर्तित्व तु 'सर्वनाम्नो वृत्तिमात्रे' इति पुंवत्त्वेनैव दक्षिणतः इत्यादि सिद्धमिति वाच्यम् । स्पष्टार्थत्वात् । अत एव भाष्ये अकारः प्रत्याख्यातः । केचित्तु अकारोच्चारणमन्यतो विधानार्थम् । तेन पुरत इति सिद्धमित्याहुः ।

१९७९। विभाषा परावराभ्याम्। (५-३-२९)

परतः। अवरतः। परस्तात्। अवरस्तात्।

१९८०। अञ्चेर्लुक्। (५-३-३०)

अञ्चत्यन्तादिक्छब्दादस्तातेर्लुक्स्यात्। 'लुक्तद्धितलुकि' (सू १४०८)। प्राच्यां प्राच्याः प्राची वा दिक् प्राक्। उदक्। एवं देशे काले च।

१९८१। उपर्युपरिष्टात्। (५-३-३१)

अस्तातेर्विषये ऊर्ध्वशब्दस्योपादेशः स्याद्रिल्रिष्टातिलौ च प्रत्ययौ। उपरि—उपरिष्टाद्वा वसति, आगतो, रमणीयं वा।

१९८२। पश्चात्। (५-३-३२)

अपरस्य पश्चभाव आतिश्च प्रत्ययोऽस्तातेर्विषये।

१९८३। उत्तराधरदक्षिणादातिः। (५-३-३४)

उत्तरात्। अधरात्। दक्षिणात्।

१९८४। एनबन्यतरस्यामदूरेऽपञ्चम्याः। (५-३-३५)

उत्तरादिभ्य एनब्वा स्यादवध्यवधिमतोः सामीप्ये पञ्चमीं विना। उत्तरेण। अधरेण। दक्षिणेन। पक्षे यथास्वं प्रत्ययाः। इह केचिदुत्तरादीननुवर्त्य दिक्छब्दमात्रादेनपमाहुः। पूर्वेण ग्रामम्। अपरेण ग्रामम्।

समानकालीनमित्यादिवत् पुरत इति ग्रामादिकमेवेति बहवः। **विभाषा** ॥ अतसुजिति शेषः। पक्षे अस्तातिः। **अञ्चेर्लुक्** ॥ **प्राच्यामिति** ॥ लिङ्गविशिष्टपरिभाषया अस्तातेर्लुक्। **उपर्युपरिष्टात्** ॥ "ऊर्ध्वस्य उपभावः रिल्प्रत्ययो रिष्टातिल्प्रत्ययश्च" इति भाष्यम्। तदाह। **अस्तातेर्विषये इत्यादिना** ॥ **वसति, आगतो, रमणीयं वेति** ॥ विभक्तित्रयस्य यथासङ्ख्यमन्वयः। **पश्चात्** ॥ "अपरस्य पश्चभावः, आतिश्च प्रत्ययः" इति भाष्यवाक्यमिदम्। प्रत्यये इकार उच्चारणार्थः। **उत्तराधर** ॥ आतिप्रत्यये इकार उच्चारणार्थः। अस्तातेरपवादः। **एनबन्यतरस्याम्** ॥ "अपञ्चम्या इति प्रागस्य" इति भाष्यम्। सूत्रक्रमे 'पूर्वाधर' इत्यसिं वक्ष्यति। ततः प्रागित्यर्थः। **उत्तरादिभ्य इति** ॥ उत्तराधरदक्षिणादित्यनुवर्तत इति भावः। अदूरे इत्येतद्व्याचष्टे। **अवध्यवधिमतोः सामीप्ये इति** ॥ **पञ्चमीं विनेति** ॥ पञ्चम्यन्तान्न भवतीत्यर्थः। **यथास्वमिति** ॥ एनबभावे पक्षे अस्तातिः असिः आतिश्चेत्यर्थः। **दिक्छब्दमात्रादिति** ॥ अञ्चत्यन्तात्तु नेदम्। व्यवस्थितविभाषाश्रयणात्।

---

१. यथाक्रमः सप्तमीपञ्चमीप्रथमाविभक्त्यन्तानामुदाहरणम्।

१९८५ । दक्षिणादाच् । (५-३-३६)

अस्तातेर्विषये । दक्षिणा वसति । 'अपञ्चम्याः' इत्येव । दक्षिणादागतः ।

१९८६ । आहि च दूरे । (५-३-३७)

दक्षिणादूरे आहि स्यात् । चादाच् । दक्षिणाहि—दक्षिणा ।

१९८७ । उत्तराच्च । (५-३-३८)

उत्तराहि—उत्तरा ।

१९८८ । सङ्ख्याया विधार्थे धा । ५-३-४२)

क्रियाप्रकारार्थे वर्तमानात्सङ्ख्याशब्दात्स्वार्थे धा स्यात् । चतुर्धा । पञ्चधा ।

१९८९ । अधिकरणविचाले च । (५-३-४३)

द्रव्यस्य सङ्ख्यान्तरापादने सङ्ख्याया धा स्यात् । एकं राशिं पञ्चधा कुरु ।

१९९० । एकाद्धो ध्यमुञन्यतरस्याम् । (५-३-४४)

ऐकध्यम्—एकधा ।

तेन प्राक् ग्रामेणेत्यादि न भवतीत्याहुः । **दणिणादाच्** ॥ **अस्तातेर्विषये इति** ॥ एतेन अदूरे इति नानुवर्तते इति सूचितम् । एवम् आच्प्रत्यये, उत्तराधरदक्षिणादित्यातिप्रत्यये, दक्षिणोत्तराभ्यां इत्यतसुचि च त्रीणि रूपाणि । **आहि च दूरे** ॥ दक्षिणाशब्दादिति शेषः । **चादाजिति** ॥ तथा दूरे उक्तरूपत्रयेण सह चत्वारि रूपाणीति भावः । **उत्तराच्च** ॥ आच् आहि चेति शेषः । अतसुचा आतिना च चत्वारि रूपाणि । **सङ्ख्याया विधार्थे धा** ॥ विधाशब्दस्यार्थः प्रकारः विधार्थः "विधा विधौ प्रकारे च" इत्यमरः । सामान्यस्य भेदको विशेषः प्रकारः । स चाभिधानस्वभावात् क्रियाविषयक एव गृह्यते । तदाह । **क्रियाप्रकारेति** ॥ **चतुर्धा । पञ्चधेति** ॥ गच्छतीत्यादिक्रियापदमध्याहार्यम् । चतुष्प्रकारा गमनादिक्रियेति बोधः । नवधा द्रव्यमित्यादावपि भवतीत्यादिक्रियापदमध्याहार्यम् । **अधिकरणविचाले च** ॥ अधिकरणं द्रव्यं, तस्य विचालः विचालनं सङ्ख्यान्तरापादनम् । तदाह । **द्रव्यस्येति** ॥ सङ्ख्यान्तरापादनञ्च न्यूनसङ्ख्यस्य अधिकसङ्ख्याकरणम् अधिकसङ्ख्यस्य न्यूनसङ्ख्याकरणञ्च । आद्यं उदाहरति । **एकं राशिं पञ्चधा कुर्विति** ॥ द्वितीये तु अनेकमेकधा कुर्वित्युदाहार्यम् । इह राशिविषयक एव प्रकारो गम्यते नतु क्रियाप्रकार इति सूत्रारम्भः । **एकाद्धो ध्यमुञन्यतरस्याम्** ॥ एकात् धः इति छेदः । धाशब्दस्य ध इति पञ्चम्येकवचनम् । एकशब्दात्परस्य धाप्रत्ययस्य ध्यमुञादेशः स्यादित्यर्थः । **ऐकध्यमिति** ॥ नच एकशब्दात् ध्यमुञ्प्रत्ययः स्वतन्त्रो विधीयताम्,

१९९१। द्वित्र्योश्च धमुञ्। (५-३-४५)

आभ्यां 'धा' इत्यस्य धमुञ्स्याद्वा। द्वैधम्–द्विधा। त्रैधम्–त्रिधा। 'धमुञन्तान्स्वार्थे डदर्शनम्' (वा ३२६०)। पथि द्वैधानि।

१९९२। एधाच्च। (५-३-४६)

द्वेधा। त्रेधा।

१९९३। याप्ये पाशप्। (५-३-४७)

कुत्सितो भिषक् भिषक्पाशः।

१९९४। पूरणाद्भागे तीयादन्। (५-३-४८)

द्वितीयो भागो द्वितीयः। तृतीयः। स्वरे विशेषः। 'तीयादीकक्स्वार्थे वा वाच्यः' (वा २६९१)। द्वैतीयीकः–द्वितीयः। तार्तीयीकः–तृतीयः। 'न विद्यायाः' (वा २६९२)। द्वितीया, तृतीया, विद्येत्येव।

१९९५। प्रागेकादशभ्योऽछन्दसि। (५-३-४९)

पूरणप्रत्ययान्ताद्भागेऽन्। चतुर्थः। पञ्चमः।

नतु धाप्रत्ययस्यादेश इति वाच्यम्। तथा सति अधिकरणविचाल एव सन्निहितत्वादापत्तेः। **द्वित्र्योश्च धमुञ्**॥ षष्ठी पञ्चम्यर्थे। ध इति अन्यतरस्यामिति चानुवर्तते। तदाह। **आभ्यामिति**॥ परस्येति शेषः। **धमुञन्तादिति**॥ वार्तिकमिदम्। दृशिग्रहणात् क्वचिदेवायम्। **पथि द्वैधानीति**॥ तृणानीति शेषः। द्वैधमित्यस्मात् डप्रत्यये टिलोपे रूपम्। नच 'तसिलादयः प्राक् पाशपः' इति डप्रत्ययान्तस्याप्यव्ययत्वं शङ्क्यम्। स्वभावतः सत्ववचनत्वेनाव्ययत्वासम्भवात् "द्वैधानि" इति भाष्यप्रयोगाच्च। **एधाच्च**॥ द्वित्रिभ्याम्परस्य धाप्रत्ययस्य एधाजित्यादेशः स्यादित्यर्थः। 'पञ्चम्यास्तसिल्' इत्यारभ्य 'एधाच्च' इत्यन्तैर्विहितप्रत्ययान्तानामव्ययत्वम्। **याप्ये पाशप्**॥ याप्यः कुत्सितः। "निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः" इत्यमरः। कुत्सिते विद्यमानात् स्वार्थे पाशप् स्यादित्यर्थः "प्रवृत्तिनिमित्तकुत्सायामिदम्। अप्रवृत्तिनिमित्तकुत्सायामपि कुत्सित इति वक्ष्यमाणं भवति" इति भाष्ये स्पष्टम्। **पूरणाद्भागे**॥ पूरणार्थकतीयप्रत्ययान्तात् भागे विद्यमानात्स्वार्थे अन् स्यादित्यर्थः। अन्विधेः प्रयोजनमाह। **स्वरे विशेष इति**॥ 'ञ्नित्यादिः नित्यम्' इति स्वरे इत्यर्थः। **तीयादीकगिति**॥ वार्तिकमिदम्। 'दृष्टं साम' इति सूत्रभाष्ये स्थितम्। **न विद्यायाः इति**॥ वार्तिकमिदमपि तत्रैव स्थितम्। विद्यावृत्तेः तीयप्रत्ययान्तादीकक् नेत्यर्थः। **प्रागेकादशभ्यः**॥ शेषपूरणेन सूत्रं व्याचष्टे। **पूरणप्रत्ययान्तात् भागे अनिति**॥ द्वितीयतृतीयशब्दाभ्यामपूर्वसूत्रेण सिद्धत्वाच्चतुर्थादिदशशब्दपर्यन्तविषयमभिप्रेत्योदाहरति। **चतुर्थ इति**॥ नचानेनैव सिद्धत्वात्पूर्वसूत्रङ्किमर्थ-

१९९६ । षष्ठाष्टमाभ्यां ञ च । (५-३-५०)

चादन् । षष्ठो भागः षाष्ठः—षष्ठः । आष्टमः—अष्टमः ।

१९९७ । मानपश्वङ्गयोः कन्लुकौ च । (५-३-५१)

षष्ठाष्टमशब्दाभ्यां क्रमेण कन्लुकौ स्तो माने पश्वङ्गे च वाच्ये । षष्ठको भागः मानं चेत् । अष्टमो भागः पश्वङ्गं चेत् । अस्यानो वा लुक् । चकाराद्यथाप्राप्तम् । षष्ठः—षाष्ठः । अष्टमः—आष्टमः । महाविभाषया सिद्धे लुग्वचनं पूर्वत्र आनौ नित्याविति ज्ञापयति ।

१९९८ । एकादाकिनच्चासहाये । (५-३-५२)

चात्कन्लुकौ । एकः—एकाकी—एककः ।

१९९९ । भूतपूर्वे चरट् । (५-३-५३)

आढ्यो भूतपूर्व आढ्यचरः ।

२००० । षष्ठ्या रूप्य च । (५-३-५४)

षष्ठ्यन्ताद्भूतपूर्वेऽर्थे रूप्यः स्याच्चरट् च । कृष्णस्य भूतपूर्वो गौः कृष्णरूप्यः—कृष्णचरः । तसिलादिषु रूप्यस्यापरिगणितत्वान्न पुंवत् । शुभ्राया भूतपूर्वः शुभ्रारूप्यः ।

मिति शङ्क्यम् । तस्य छन्दस्यपि प्रवृत्त्यर्थत्वात् । **षष्ठाष्टमाभ्यां ञ च** ॥ पूर्वसूत्रविषय इति शेषः । ञेति लुप्तप्रथमाकम् । ञे आदिर्वृद्धिः । **चादनिति** ॥ इह न यथासङ्ख्यम् । व्याख्यानात् । **मानपश्वङ्गयोः** ॥ **अस्य अनो वेति** ॥ अष्टमशब्दात्पूर्वसूत्रविहितस्य अप्रत्ययस्य अनप्रत्ययस्य च अनेन लुगित्यर्थः । **चकाराद्यथाप्राप्तमिति** ॥ अप्रत्ययः अनप्रत्ययश्चेत्यर्थः । ननु 'समर्थानाम्' इत्यतो वाग्रहणानुवृत्त्यैव आनोरभावे सति पश्वङ्गे अष्टमो भाग इत्यस्य सिद्धेरिह लुग्विधानं व्यर्थमित्याशङ्क्य आह । **महाविभाषयेति** ॥ **पूर्वत्रेति** ॥ 'षष्ठाष्टमाभ्यां ञ च' इति सूत्रे इत्यर्थः । एवं षष्ठाष्टमाभ्यां शब्दाभ्यां आनोरिह नित्यप्राप्तयोः कदाचिल्लुग्विधिरर्थवानित्यर्थः । **एकादाकिनच्चासहाये** ॥ असहायवाचकादेकशब्दात्स्वार्थे आकिनच्प्रत्ययः स्यादित्यर्थः । **भूतपूर्वे चरट्** ॥ भूतपूर्वे वर्तमानात्प्रातिपदिकात् स्वार्थे चरट् स्यादित्यर्थः । **षष्ठ्या रूप्य च** ॥ रूप्येति लुप्तप्रथमाकम् । भूतपूर्वे इत्यनुवर्तते । **षष्ठ्यन्तात् भूतपूर्वेऽर्थे इति** ॥ भूतपूर्वेऽर्थे विद्यमानात् षष्ठ्यन्तादित्यन्वयः । भूतपूर्वे इत्यनुवृत्तं हि श्रुतत्वात् षष्ठ्या विशेषणम् । भूतपूर्वे सम्बन्धे या षष्ठी तदन्तात्स्वार्थे रूप्यः स्यादिति फलति । यथाश्रुते तु स्वार्थिकप्रकरणविरोधः । **कृष्णरूप्य इति** ॥ भूतपूर्वगत्या कृष्णसम्बन्धी गौरित्यर्थः । **शुभ्रारूप्यशब्दे 'तसिलादिषु' इति पुवत्त्वमाशङ्क्य 'तसिलादयः प्राक् पाशपः' इत्यादिवार्तिकपरिगणितेषु रूप्यस्यानन्तर्भावात्तस्मिन्परे पुंवत्त्वं नेत्याह । तसिलादिष्वित्यादि** ॥

२००१। अतिशायने तमबिष्ठनौ। (५-३-५५)

अतिशयविशिष्टार्थवृत्तेः स्वार्थे एतौ स्तः। अयमेषामतिशयेनाढ्यः आढ्यतमः। लघुतमो लघिष्ठः।

२००२। तिङश्च। (५-३-५६)

तिङन्तादतिशये द्योत्ये तमप्स्यात्।

२००३। तरप्तमपौ घः। (१-१-२२)

एतौ घसंज्ञौ स्तः।

शुभ्राया भूतपूर्व इति ॥ गौरिति शेषः। **शुभ्रारूप्य इति** ॥ भूतपूर्वगत्या शुभ्रासम्बन्धी गौरित्यर्थः। **अतिशायने** ॥ अतिपूर्वकः शीङ्धातुरुपसर्गवशादुत्कर्षे वर्तते। उत्कर्षश्चाधिक्यफलको न्यक्कारः, नत्वाधिक्यमात्रम्। तथा सति अकर्मकत्वापातात्। नचेष्टापत्तिः। तथा सति "शुक्लमतिशेते शुक्लतरः, कृष्णमतिशेते कृष्णतरः" इत्यादि भाष्यविरोधात्। "अतिशयिता अतिशायनः, बाहुलकः कर्तरि ल्युट्" इति भाष्यम्। अत एव निपातनाद्दीर्घः। अतिशायने इति प्रकृत्यर्थविशेषणम्। अतिशयितरि विद्यमानात् प्रातिपदिकात् स्वार्थे तमप् स्यादित्यर्थः। फलितमाह। **अतिशयविशिष्टार्थवृत्तेरिति** ॥ यदि तु अतिशायनशब्दस्य भावल्युडन्तत्वं तर्हि प्रत्ययार्थस्य प्राधान्यापत्तौ शुक्लतरादिशब्दात् शुक्लादिगतमतिशयनमिति बोधः स्यात्। नत्वतिशयितशुक्ल इति। तथाच शुक्लतरः शुक्लतरेति पुंस्त्वञ्च स्त्रीत्वञ्च न स्यात्। अतिशायने वर्तमानादित्यर्थे तु अतिशयप्रकर्षादिशब्देभ्य एव स्यात् नतु पट्वादिभ्यः। अतिशयविशिष्टे लक्षणया विद्यमानादित्यर्थे अतिशय्यमानादपि प्रत्ययापत्तिः। अतिशयनकर्तरि लक्षणायान्तु भाष्योक्तमेव साधु इत्यास्तां तावत्। **अयमेषामिति** ॥ द्वयोरेकस्य निर्धारणे तरबीयसुनावपवादौ वक्ष्येते। अतः परिशेषाद्बहूनामेकस्य निर्धारणे अस्य तमपः प्रवृत्तिरिति भावः। **अतिशयेनाढ्य इति** ॥ द्रव्यस्य जातेर्वा स्वतः प्रकर्षयोगो नास्ति। अन्यथा घटतम इत्याद्यापत्तेः। किन्तु गुणद्वारैव द्रव्यजात्योः प्रकर्षयोगः। तथा च आढ्यतम इत्यत्र उत्कर्षविशिष्टः आढ्यः प्रकृत्यर्थः। तमप्तु तद्द्योतकः। तमपि सति 'सुपो धातु' इति सुपो लुक्। 'घकालतनेषु' इति योगेन सुबन्तादेव तद्धितोत्पत्तेरुक्तत्वात्। अत्र आतिशायनिकप्रत्ययान्तादातिशायनिकप्रत्ययोऽनभिधानान्न भवति। "श्रेष्ठतमाय कर्मणे" इति तु छान्दसमिति भाष्ये स्पष्टम्। **लघिष्ठ इति** ॥ लघुशब्दादिष्ठनि ओर्गुणे प्राप्ते 'इष्ठेमेयस्सु' इत्यनुवृत्तौ 'टेः' इति टिलोपः। **तिङश्च** ॥ अत्राप्रातिपदिकादप्राप्ते वचनम्। **तमप् स्यादिति** ॥ 'अजादी गुणवचनादेव' इति नियमादिष्ठन्नानुवर्तते इति भावः। **तरप्तमपौ घः** ॥ प्रथमस्य प्रथमपादे सूत्रमिदम्। आतिशायनिकप्रत्ययप्रकरणान्ते पितौ घः, तादी घः, इति वा वक्तव्ये प्रकरणान्तरे पृथग्गुरुसूत्रकरणमत्यन्तस्वार्थिकमपि तरपं ज्ञापयति। तस्य आतिशायनिकप्रकरणबहिर्भूतस्य सत्त्वे तत्सङ्ग्रहणार्थं प्रकरणान्तरे सूत्रकरणस्यावश्यकत्वादित्याहुः। तेन 'अल्पान्तरं' 'लोपश्च बलवत्तरः'

२००४ । किमेत्तिङव्ययघादाम्द्रव्यप्रकर्षे । (५-४-११)

किम एदन्तात्तिङोऽव्ययाच्च यो घस्तदन्तादामुः स्यान्न तु द्रव्यप्रकर्षे । किन्तमाम् । प्राह्णेतमाम् । पचतितमाम् । उच्चैस्तमाम् । द्रव्यप्रकर्षे तु उच्चैस्तमस्तरुः ।

२००५ । द्विवचनविभज्योपपदे तरबीयसुनौ । (५-३-५७)

द्वयोरेकस्यातिशये विभक्तव्ये चोपपदे सुप्तिङन्तादेतौ स्तः । पूर्वयोरपवादः । अयमनयोरतिशयेन लघुः लघुतरः—लघीयान् । उदीच्याः प्राच्येभ्यः पटुतराः—पटीयांसः ।

इत्यादि सिद्धम् । **किमेत्तिङव्यय** ॥ आमु इति छेदः । उकार उच्चारणार्थः । किम्, एत्, तिङ्, अव्यय, एषाञ्चतुर्णां द्वन्द्वः । 'किमेत्तिङव्ययप्रकृतिको घः' इति मध्यपदलोपी समासः । फलितमाह । **किम एदन्तादित्यादिना** ॥ एभ्य इत्यर्थः । **किन्तमामिति** ॥ अत्यन्तस्वार्थिकोऽयं तमप् नत्वतिशायने । एषामतिशयनाश्रय इतिवदेषामतिशयेन क इति विग्रहस्यासम्भवात् । जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं हि निर्धारणम् । किंशब्दश्च न जात्याद्यन्यतमप्रवृत्तिनिमित्तकः । एवञ्चात्रातिशयस्याप्रतीतेर्द्रव्यप्रकर्षो दूरापास्त इति भावः । **प्राह्णेतमामिति** ॥ प्राह्णः पूर्वाह्णः । "प्राह्णापराह्णमध्याह्नाः त्रिसन्ध्यम्" इत्यमरः । अतिशयिते पूर्वाह्णे इत्यर्थः । पूर्वावयवगतप्रकर्षादेः प्रकर्षो बोध्यः । अत्र अहर्न द्रव्यम् । सूर्योदयादारभ्य सूर्यास्तमयावधिकस्यैव कालस्य अहनशब्दार्थत्वात् । तस्य च उदयादिक्रियाघटितत्वान्न द्रव्यत्वमिति भावः । **पचतितमामिति** ॥ अतिशयेन पाककर्तेत्यर्थः । तिङन्तेषु क्रियाविशेष्यकबोधस्यैव "प्रशंसायां रूपप्" इति सूत्रभाष्ये प्रपञ्चितत्वात् । अतोऽत्र क्रियाया एव प्रकर्षो नतु द्रव्यस्येति भावः । **उच्चैस्तमामिति** ॥ आशंसतीत्यध्याहार्यम् । अतिशयेन उच्चैराशंसनादिक्रियेत्यर्थः । अत्रापि क्रियाया एव प्रकर्षो नतु द्रव्यस्य । **उच्चैस्तमस्तरुरिति** ॥ अतिशयेन उच्चैस्तरुरित्यर्थः । अत्र उच्चैस्त्वप्रकर्षस्य तरौ द्रव्ये भानादाश्रयेत्यर्थः । किन्तमामित्यादौ 'यस्येति च' इति लोपं परत्वात् बाधित्वा ह्रस्वान्तलक्षणनुटो निवृत्त्यर्थमामु इत्युच्चारणम् । सति तु तस्मिन् 'निरनुबन्धकग्रहणे न सानुबन्धकस्य' इति परिभाषया नुड्द्वितावस्य न ग्रहणमित्यादि 'आमि सर्वनाम्नः' इति सूत्रभाष्ये प्रपञ्चितम् । **द्विवचन** ॥ उच्यतेऽनेनेति वचनम् । द्वयोरर्थयोर्वचनं द्विवचनम् । द्व्यर्थप्रतिपादकमिति यावत् । न द्विवचनसंज्ञकमिह गृह्यते व्याख्यानात् । विभक्तव्यं विभज्यम् । 'ऋहलोः' इति ण्यतम्बाधित्वा निपातनाद्यत् । द्विवचनं च विभज्यञ्चेति समाहारद्वन्द्वः । द्विवचनविभज्यम् तदुपपदमेति कर्मधारयः । द्व्यर्थप्रतिपादके विभक्तव्यविषयके च उपपदे सतीति फलितम् । प्रातिपदिकादिति तिङ इति चानुवर्तते । सुबन्तात्तिङन्तात्पतिरिति सिद्धान्तात्सुबन्तत्वम्प्रातिपदिकविशेषणं लभ्यते । फलितमाह । **द्वयोरेकस्येत्यादिना** ॥ द्वयोर्मध्ये अन्यतरापेक्षया अतिशयविशिष्टस्वार्थवृत्तेः विभागप्रयोजकीभूतधर्मबोध-

२००६। अजादी गुणवचनादेव। (५-३-५८)

इष्ठन्नीयसुनौ गुणवचनादेव स्तः। प्रथिष्ठः—प्रथीयान्। नेह। पाचकतरः—पाचकतमः।

२००७। तुरिष्ठेमेयःसु। (६-४-१५४)

तृन्तृजन्तादिष्ठन्नीयसुनौ स्तः।

२००८। तुरिष्ठेमेयःसु। (६-४-१५४)

तृशब्दस्य लोपः स्यात् एषु परेषु। अतिशयेन कर्ता करिष्ठः। दोहीयसी धेनुः।

काच्च शब्दात्स्वार्थे तरबीयसुनौ स्त इति यावत्। यद्यप्यत्र द्वे सुबन्ततिङन्ते प्रकृती, द्वौ च प्रत्ययौ, तथापि न यथासङ्ख्यम्। व्याख्यानात्। अथ द्विवचनोपपदे उदाहरति। **अयमनयोरिति** ॥ अत्र उपोच्चारितमिदं उपपदम्, नतु कृत्रिमम्। तद्धितविधौ तदसम्भवात्। धात्वधिकार एव तत्प्रवृत्तेरुक्तत्वात्। तच्चोपपदं विग्रहवाक्येऽवश्यं प्रयुज्यते। तद्धितवृत्तौ तु गतार्थत्वान्नावश्यकम्। **लघीयानिति** ॥ ईयसुनि नकार इत्, उकार उच्चारणार्थः, उगित्त्वान्नुम्, 'सान्त' इति दीर्घः, हलन्ताद्यादिसयोगान्तलोपौ। अथ विभज्योपपदे उदाहरति। **उदीच्याः प्राच्येभ्य इति** ॥ 'पञ्चमी विभक्ते' इति पञ्चमी। द्विवचनसंज्ञकग्रहणे तु दन्ताः स्निग्धतराः इति न सिध्येत्। "बहुषु पुत्रेषु एतदुपपन्नं भवति। अयम्मे ज्येष्ठः, अयम्मे मध्यमः, अयम्मे कनीयान्" इति 'आद्यन्तवत्' सूत्रस्थभाष्यप्रयोगात्। नैदैशिकानां बार्ततरका इति 'तस्मिन्' इति सूत्रभाष्यप्रयोगाच्च। अद्वयर्थोपपदेऽपि तरबीयसुनाविच्छाहुः। **अजादी** ॥ तरप्तमपौ इष्ठन्नीयसुनौ चेति चत्वारः प्रत्ययाः अनुक्रान्ताः। तेषाम्मध्ये यौ अजादी इष्ठन्नीयसुनौ तावित्यर्थः। तदाह। **इष्ठन्नीयसुनाविति। पाचकतरः—पाचकतम इति** ॥ क्रियाशब्दत्वादाभ्यामिष्ठन्नीयसुनौ नेति भावः। गुणवचनादजादी एवेति विपरीतनियमव्यावृत्त्यर्थः एवकारः। तेन पटुतरः पटुतमः इत्यादि सिद्धम्। **तुरिष्ठेमेयस्सु** ॥ तृ इत्यस्य तुरिति पञ्चम्येकवचनम्, तृ इत्यनेन तृन्तृचोः सामान्येन ग्रहणम्, प्रत्ययत्वात्तदन्तग्रहणम्। अजादी इत्यनुवर्तते। तदाह। **तृन्तृजन्तादिति** ॥ अगुणवचनादपि तृप्रत्ययान्तात् प्राप्त्यर्थमारम्भः। एवञ्च पूर्वेण नियमेन व्यावर्तितयोः प्रतिप्रसवोऽयं नत्वपूर्वो विधिरिति सूचयितुं छान्दसमप्यत्रोपन्यस्तम्। तथाच अगुणवचनादपि कर्तृशब्दादिष्ठन्प्रत्यये कर्तृ इष्ठ इति स्थिते 'इष्ठेमेयस्सु' इति विहिते टिलोपे प्राप्ते। **तुरिष्ठेमेयःसु** ॥ तृ इत्यस्य तुरिति षष्ठ्येकवचनम्। **एष्विति** ॥ इष्ठन्, इमन्, ईयस्, इत्येतेष्वित्यर्थः। अयं लोपसामर्थ्यादन्तादेशः। अन्यत्र ऋकारस्य 'टेः' इत्येव सिद्धेः। **करिष्ठ इति** ॥ अयमनयोरतिशयेन कर्तेत्यर्थः। **दोहीयसी धेनुरिति** ॥ इयमनयोरतिशयेन दोग्ध्रीत्यर्थः। इष्ठनि 'भस्याढे' इति पुंवत्त्वे ङीपो निवृत्तौ तृप्रत्ययस्य लोपे परनिमित्ताभावात् 'दादेः' इति घत्वस्य निवृत्तौ उगित्त्वात् ङीपि दोहीयसीति रूपम्। 'पुगन्त' इति गुणस्तु न निवर्तते।

२००९ । प्रशस्यस्य श्रः । (५-३-६०)

अस्य श्रादेशः स्यादजाद्योः ।

२०१० । प्रकृत्यैकाच् । (६-४-१६३)

इष्ठादिष्वेकाच्प्रकृत्या स्यात् । श्रेष्ठः—श्रेयान् ।

२०११ । ज्य च । (५-३-६१)

प्रशस्यस्य ज्यादेशः स्यादिष्ठेयसोः । ज्येष्ठः ।

२०१२ । ज्यादादीयसः । (६-४-१६०)

'आदेः परस्य' (सू ४४) । ज्यायान् ।

२०१३ । वृद्धस्य च । (५-३-६२)

ज्यादेशः स्याद जाद्योः । ज्येष्ठः—ज्यायान् ।

२०१४ । अन्तिकबाढयोर्नेदसाधौ । (५-३-६३)

अजाद्योः । नेदिष्ठः—नेदीयान् । साधिष्ठः—साधीयान् ।

२०१५ । स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः। (६-४-१५६)

लुमेऽपि तृचि प्रत्ययलक्षणेन तत्सत्त्वात् । **प्रशस्यस्य श्रः** ॥ **अजाद्योरिति** ॥ इष्ठनीयसुनोरित्यर्थः । अजादी इत्यनुवृत्तं सप्तम्या विपरिणम्यते इति भावः । प्रशस्यशब्दस्य क्रियाशब्दतया गुणवचनत्वाभावेऽपि अत एव ज्ञापकादिष्ठनीयसुनौ । श्र दृष्ट, श्र ईयस्, इति स्थिते इष्ठेमेयस्सु विहितटिलोपे प्राप्ते । **प्रकृत्यैकाच्** ॥ एकः अच् यस्येति बहुव्रीहिः । **इष्ठादिष्विति** ॥ 'तुरिष्ठेमेयस्सु' इत्यतः तदनुवृत्तेरिति भावः । 'अलोपोऽनः, नस्तद्धिते, यस्येति च, टेः' इत्यादेरेतत्प्रकरणस्थलोपस्यायं प्रकृतिभावः" इति भाष्ये स्पष्टम् । **श्रेष्ठः-श्रेयानिति** ॥ अयमनयोरतिशयेन प्रशस्य इत्यर्थः । **ज्य च** ॥ 'ज्य' इति लुप्तप्रथमाकं प्रशस्येति अजादी इति चानुवर्तते । तदाह । **प्रशस्यस्येति** ॥ **ज्येष्ठ इति** ॥ 'प्रकृत्यैकाच्' इति प्रकृतिभावान्न टिलोपः । ईयसुनि ज्यादेशे ज्येयानिति प्राप्ते । **ज्यादादीयसः** ॥ ज्यात्, आत्, इति छेदः । ज्यात् परस्य ईयसः आकारः स्यादित्यर्थः । अन्तादेशत्वे प्राप्ते आह । **आदेः परस्येति** ॥ **वृद्धस्य च** ॥ शेषपूरणेन सूत्रं व्याचष्टे । **ज्यादेशः स्याद्जाद्योरिति** ॥ इष्ठनीयसुनोरित्यर्थः । **ज्येष्ठ इति** ॥ अयमनयोरतिशयेन वृद्ध इत्यर्थः । **अन्तिकबाढयोः** ॥ **अजाद्योरिति** ॥ शेषपूरणमिदम् । अन्तिक, बाढ, अनयोः इष्ठेयसुनोः परतः नेद, साध, एतावादेशौ स्त इत्यर्थः । **नेदिष्ठः—नेदीयानिति** ॥ अयमनयोरतिशयेनान्तिक इत्यर्थः । **साधिष्ठः-साधीयानिति** ॥ अयमनयोरतिशयेन बाढ इत्यर्थः । बाढो भृशः । "भृशप्रतिज्ञयोर्बाढम्" इत्यमरः । "अतिबेलबाढार्थनिर्भरेषु" इति च । **स्थूलदूर** ॥ **एषामिति** ॥

एषां यणादिपरं लुप्यते, पूर्वस्य च गुण इष्ठादिषु। स्थविष्ठः। दविष्ठः। यविष्ठः। ह्रसिष्ठः। क्षेपिष्ठः। क्षोदिष्ठः। एवम् ईयस्। ह्रस्वक्षिप्रक्षुद्राणां पृथ्वादित्वात् ह्रसिमा। क्षेपिमा। क्षोदिमा।

२०१६। प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घबृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिबृन्दाः। (६-४-१५७)

प्रियादीनां क्रमात्प्रादयः स्युरिष्ठादिषु। प्रेष्ठः। स्थेष्ठः। स्फेष्ठः। वरिष्ठः। बंहिष्ठः। गरिष्ठः। वर्षिष्ठः। त्रपिष्ठः। द्राघिष्ठः। बृन्दिष्ठः। एवमीयसुन्। प्रियोरुबहुळगुरुदीर्घादीनां पृथ्वादित्वात् प्रेमा, इत्यादि।

स्थूल, दूर, युवन्, ह्रस्व, क्षिप्र, क्षुद्र, इत्येतेषामित्यर्थः। **यणादीति** ॥ यण् आदिर्यस्येति विग्रहः। परमिति यणादीत्यस्य विशेषणम्, परभूतं यणादीत्यर्थः। **लुप्यते इति** ॥ 'अल्लोपोऽनः' इत्यतोऽनुवृत्तं लोपपदमिह कर्मणि घञन्तमाश्रीयते इत्यर्थः। भावसाधनत्वे परमित्यनेन सामानाधिकरण्यासम्भवात्। **पूर्वस्येति** ॥ पूर्वत्वं यणपेक्षया बोध्यम्। **इष्ठादिष्विति** ॥ 'तुरिष्ठेमेयस्सु' इत्यतस्तदनुवृत्तेरिति भावः। **स्थविष्ठ इति** ॥ स्थूलशब्दादिष्ठनि ल इत्यस्य लोपे ऊकारस्य गुण ओकारः, अवादेश इति भावः। आर्गुणस्तु न प्रवर्तते। यणादिलोपस्याभीयत्वेनासिद्धत्वात्। एवमग्रेऽपि। **दविष्ठ इति** ॥ दूरशब्दादिष्ठनि र इत्यस्य लोपे ऊकारस्य गुणे अवादेशः। **यविष्ठ इति** ॥ युवन्शब्दादिष्ठनि वन्नित्यस्य लोपे उकारस्य गुणे अवादेशः। परमित्यनुक्तौ यु इत्यस्यापि यणादेर्लोपः स्यात्। **ह्रसिष्ठ इति** ॥ ह्रस्वशब्दादिष्ठनि व इत्यस्य लोपः। परमित्यनुक्तौ अल्त रादेर्लोपः स्यात्। **क्षेपिष्ठ इति** ॥ क्षिप्रशब्दादिष्ठनि र इत्यस्य लोपे इकारस्य गुणः। 'इको गुणवृद्धी' इत्युक्तेः न पकारस्य गुणः। **क्षोदिष्ठ इति** ॥ क्षुद्रशब्दादिष्ठनि र इत्यस्य लोपः, उकारस्य गुणः। **एवमीयस् इति** ॥ स्थवीयान्, दवीयान्, यवीयान्, ह्रसीयान्, क्षेपीयान्, क्षोदीयान्। इमनिजनुवृत्तेः प्रयोजनमाह। **ह्रस्वक्षिप्रेति** ॥ **प्रियस्थिर** ॥ **प्रियादीनामिति** ॥ प्रिय, स्थिर, स्फिर, उरु, बहुळ, गुरु, वृद्ध, तृप्र, दीर्घ, बृन्दारक, एषान्दशानामित्यर्थः। **प्रादय इति** ॥ प्र, स्थ, स्फ, वर्, बंहि, गर्, वर्षि, त्रप्, द्राघि, बृन्द, एते दशेत्यर्थः। इष्ठेमेयस्विवत्यर्थः। 'तुरिष्ठेमेयस्सु' इत्यतः तदनुवृत्तेरिति भावः। **प्रेष्ठ इति** ॥ प्रियशब्दादिष्ठनि प्रकृतेः प्रादेशः। यणादिलोपस्याभीयत्वेनासिद्धत्वादकारोच्चारणसामर्थ्याच्च न टिलोपः। आद्गुणः। **स्थेष्ठ इति** ॥ स्थिरशब्दादिष्ठनि प्रकृतेः स्थादेशः। प्रकृतिभावान्न टिलोपः। **स्फेष्ठः इति** ॥ स्फिरशब्दस्य इष्ठनि स्फादेशः। **वरिष्ठ इति** ॥ उरुशब्दात् इष्ठनि वर् आदेशः। **बंहिष्ठ इति** ॥ बहुळशब्दस्य बंहि इत्यादेशः। इकार उच्चारणार्थः। अन्यथा यणादिलोपस्याभीयत्वेनासिद्धत्वात् उच्चारणसामर्थ्याद्वा इकारस्य लोपो न स्यात्। **गरिष्ठ इति** ॥ गुरुशब्दस्य इष्ठनि गर् आदेशः। **वर्षिष्ठ इति** ॥ वृद्धशब्दस्य इष्ठनि वर्षिरादेशः। वंहिवदिकार उच्चारणार्थः। **त्रपिष्ठ इति** ॥ तृप्रशब्दस्य

२०१७ । बहोर्लोपो भू च बहोः । (६-४-१५८)

बहोः परयोरिमेयसोर्लोपः स्याद्बहोश्च भूरादेशः । भूमा--भूयान् ।

२०१८ । इष्ठस्य यिट् च । (६-४-१५९)

बहोः परस्य इष्ठस्य लोपः स्यात् यिडागमश्च । भूयिष्ठः ।

२०१९ । युवाल्पयोः कनन्यतरस्याम् । (५-३-६४)

एतयोः कनादेशो वा स्यादिष्ठेयसोः । कनिष्ठः । कनीयान् । पक्षे यविष्ठः । अल्पिष्ठः इत्यादि ।

२०२० । विन्मतोर्लुक् । (५-३-६५)

विनो मतुपश्च लुक्स्यादिष्ठेयसोः । अतिशयेन स्रग्वी । स्रजिष्ठः—स्रजीयान् । अतिशयेन त्वग्वान्—त्वचिष्ठः—त्वचीयान् ।

इष्ठनि त्रप् आदेशः । अदुपधः । तृपध्वातोस्तृप्त्यर्थकादीणादिके रक्ति तृप्रशब्दः । **द्राघिष्ठ इति** ॥ दीर्घशब्दस्य इष्ठनि द्राघिरादेशः । बंहिवदिकार उच्चारणार्थः । **वृन्दिष्ठ इति** ॥ वृन्दारकशब्दस्य इष्ठनि वृन्द आदेशः । अकार उच्चारणार्थः । **एवमीयसुन्निति** ॥ प्रेयान्, स्थेयान्, स्फेयान्, वर्षीयान्, बर्हीयान्, गरीयान्, वर्षीयान्, त्रपीयान्, द्राघीयान्, वृन्दीयान् । अत्र इमनिजननुवृत्तेः प्रयोजनमाह । **प्रियोरुबहुळेति** ॥ **इत्यादीति** ॥ वरिमा, बंहिमा, गरिमा, द्राघिमा, स्थेमा, स्फेमा, वर्षिमा, त्रपिमा, वृन्दिमा । **बहोर्लोपः** ॥ भू इति लुप्तप्रथमाकम् । इष्टेमेयस्सित्वत्यनुवृत्तम् । तत्र इष्ठन उत्तरसूत्रे कार्यान्तरविधानादिह तस्य न सम्बन्धः । तदाह । **बहोः परयोरिति** ॥ 'आदेः परस्य' इति प्रत्यययोरादिलोपः । **भूमेति** ॥ बहुत्वमित्यर्थः । बहुशब्दात् पृथ्वादित्वादिमनिचि प्रकृतेर्भूभावः, प्रत्ययादेरिकारस्य लोपश्च । **भूयानिति** ॥ अयमनयोरतिशयेन बहुरित्यर्थः । वैपुल्यवाचकात् बहुशब्दादीयसुनि प्रकृतेर्भूभावः, प्रत्ययादेरिकारस्य लोपश्च । भूभावस्याभीयत्वेनासिद्धत्वादोर्गुणो न भवति । **इष्ठस्य यिट् च** ॥ **लोपः स्यादिति** ॥ 'आदेः परस्य' इति बोध्यम् । यिटि टकार इत् । इष्ठस्यादिलोपे कृते यिडागमः । ट इत् । टित्त्वात् प्रत्ययस्यात्ययवयवः । बहोर्भूभावस्तु पूर्वसूत्रेण सिद्ध एव । 'यदि तु लोप इति निवृत्तं तदा यकार आगमः' इति भाष्यम् । **युवाल्पयोः** ॥ **इष्ठेयसोरिति** ॥ अजादी इत्यनुवृत्तस्य सप्तम्या विपरिणामादिति भावः । **कनिष्ठः-कनीयानिति** ॥ अयमनयोरतिशयेन युवा अल्पो वेत्यर्थः । **पक्षे यविष्ठ इति** ॥ युवन्शब्दादिष्ठनि 'स्थूलदूर' इति वनो लोपे उकारस्य गुणे अवादेशे रूपम् । **अल्पिष्ठ इति** ॥ अल्पशब्दादिष्ठनि टिलोपः । **इत्यादीति** ॥ यवीयान्, अल्पीयानिति रूपद्वयमादिपदग्राह्यम् । **विन्मतोर्लुक् ॥ इष्ठेयसोरिति** ॥ अजादी इत्यनुवृत्तस्य सप्तम्या विपरिणामादिति भावः । **स्रजिष्ठ इति** ॥ स्रग्विन्शब्दादिष्ठनि विनो लुकि तन्निमित्तपदत्वभङ्गात् कुत्वनिवृत्तिरिति

२०२१। प्रशंसायां रूपप्। (५-३-६६)

सुबन्तात्तिङन्ताच्च। प्रशस्तः पटुः पटुरूपः। प्रशस्तं पचति पचतिरूपम्।

२०२२। ईषदसमाप्तौ कल्पब्देश्यदेशीयरः। (५-३-६७)

ईषदूनो विद्वान्विद्वत्कल्पः। यशस्कल्पम्। यजुष्कल्पम्। विद्वद्देश्यः। विद्वद्देशीयः। पचतिकल्पम्।

२०२३। विभाषा सुपो बहुच्पुरस्तात्तु। (५-३-६८)

ईषदसमाप्तिविशिष्टेऽर्थे सुबन्ताद्बहुच्वा स्यात्स च प्रागेव, न तु परतः। ईषदूनः पटुः बहुपटुः। पटुकल्पः। 'सुपः' किम्। यजतिकल्पम्।

भावः। **एवं स्रजीयानिति ॥ त्वचिष्ठ इति ॥** त्वग्वच्छब्दादिष्ठनि मतुपो लुकि तन्निमित्तपदत्वभङ्गात् कुत्वनिवृत्तिरिति भावः। एवं त्वचीयान्। अत एव ज्ञापकादाभ्यामिष्ठन्नीयसुनौ। **प्रशंसायां रूपप् ॥ सुबन्तात्तिङन्ताच्चेति ॥** शेषपूरणमिदम्। 'तिङश्च' इत्यनुवृत्तम्, प्रातिपदिकादिति च। 'घकाल' इत्यादिलिङ्गात् सुबन्तादिति लभ्यते इति भावः। प्रशंसाविशिष्टे स्वार्थे वर्तमानात् तिङन्तात्सुबन्ताच्च रूपबिति फलितम्। **पचतिरूपमिति ॥** प्रशस्ता पाकक्रियेत्यर्थः। अत्र भाष्ये "क्रियाप्रधानमाख्यातं द्रव्यप्रधानन्नाम" इति सिद्धान्तितम्। "पचतोरूपं पचन्तिरूपमित्यत्र च न द्विवचनबहुवचने। तिङैव द्वित्वबहुत्वयोरुक्तत्वात्। एकवचनन्तु उत्सर्गतः करिष्यते, नपुंसकत्वन्तु लोकात्" इत्यपि भाष्ये स्पष्टम्। **ईषदसमाप्तौ ॥** ईषदसमाप्तिविशिष्टेऽर्थे विद्यमानात् सुबन्तात् स्वार्थे कल्पप्, देश्य, देशीयर्, एते प्रत्ययाः स्युरित्यर्थः। **विद्वत्कल्प इति ॥** ईषन्न्यूनवैदुष्यवानित्यर्थः। **यशस्कल्पमिति ॥** असम्पूर्णं यश इत्यर्थः। 'सोऽपदादौ' इति सत्वम्। **यजुष्कल्पमिति ॥** असम्पूर्णं यजुरित्यर्थः। 'इणष्षः' इति षत्वम्। **विद्वद्देश्य इति ॥** असम्पूर्णवैदुष्यवानित्यर्थः। एवं विद्वद्देशीयः। अत्र सर्वत्र 'स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यनुवर्तन्ते' इति वचनात् प्रकृतिलिङ्गत्वं बोध्यम्। **पचतिकल्पमिति ॥** असम्पूर्णा पाकक्रियेत्यर्थः। पचतिरूपमितिवल्लिङ्गवचननिर्वाहः। एवं वृषभकल्पः इयङ्गौरित्यादावपि प्रकृतिलिङ्गत्वं बोध्यम्। क्वचित् 'स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते' इति वचनात् गुडकल्पा द्राक्षेत्यादौ प्रकृतिलिङ्गातिक्रमः। एतत्सर्वमलैव भाष्ये स्पष्टम्। **विभाषा ॥** ईषदसमाप्तावित्यनुवर्तते। तदाह। **ईषदसमाप्तिविशिष्ट इति ॥ प्रागेवेति ॥** सूत्रे तुशब्दो अवधारणे इति भावः। **बहुपटुरिति ॥** पटुशब्दात् सुबन्तात् प्राक् बहुचि कृते प्रातिपदिकावयवत्वात् सुपो लुकि समुदायात् पुनः सुबुत्पत्तिः। नच तद्धितान्तत्वाभावात् समासत्वभावाच्च पूर्वोत्पन्नसुब्विशिष्टस्य प्रातिपदिकत्वाभावात् कथमिह लुगिति वाच्यम्। 'अर्थवत्' इत्यनेन तस्य प्रातिपदिकत्वसत्त्वात्। पटुरित्यस्य पूर्वोत्पन्नसुप्प्रत्ययान्तत्वेऽपि बहुपटुरिति समुदायस्य प्रत्ययान्तत्वाभावात्। प्रत्ययग्रहणे यस्मात् स विहितस्तदादेरेव ग्रहणात्। नचैवं सति 'कृत्तद्धित' इत्यत्र समासग्रहणं व्यर्थमिति वाच्यम्। पदघटितसङ्घातस्य चेत्

२०२४ । प्रकारवचने जातीयर् । (५-३-६९)

प्रकारवति चायम्, थाल्तु प्रकारमात्रे । पटुप्रकारः । पटुजातीयः ।

२०२५ । प्रागिवात्कः । (५-३-७०)

'इवे प्रतिकृतौ' (सू २०५१) इत्यतः प्राक्काधिकारः ।

२०२६ । अव्ययसर्वनाम्नामकच्प्राक्टेः । (५-३-७१)

'तिङश्च' (सू २००२) इत्यनुवर्तते ।

२०२७ । कस्य च दः । (५-३-७२)

प्रातिपदिकसंज्ञा तर्हि समासस्यैवेति नियमार्थत्वात् । नचैवं सति प्रकृते बहुपटुरिति समुदायस्य पूर्वोत्पन्नसुब्विशिष्टस्य कथम्प्रातिपदिकत्वम्, असमासत्वादिति वाच्यम् । यत्र सङ्घाते पूर्वो भागः पदन्तस्य चेत् प्रातिपदिकसंज्ञा तर्हि समासस्यैवेति नियमशरीराभ्युपगमात्, इति प्रगुक्तं न विस्मर्तव्यम् । न च समर्थानामिति वाग्रहणादेव सिद्धे विभाषाग्रहणं व्यर्थमिति वाच्यम् । बहुजभावपक्षे पूर्वसूत्रविहितकल्पबाद्यर्थत्वात् । अन्यथा महाविभाषया अपवादेन मुक्ते उत्सर्गस्य न प्रवृत्तिः, इति सिद्धान्तात् बहुजभावे वाक्यमेव स्यात् । नच कल्पबादीनाम्बहुचा समानविषयकत्वाभिरवकाशत्वं शङ्क्यम् । तेषामिष्टत्वात् सावकाशत्वात् इति भाष्ये स्पष्टम् । एतदभिप्रेत्य आह । **पटुकल्प इति** ॥ ननु सुबन्तात्तद्धितोत्पत्तिरिति सिद्धान्तादिह सुब्ग्रहणं व्यर्थमिति पृच्छति । **सुपः किमिति** ॥ तिङश्चेत्यनुवृत्तिनिवृत्त्यर्थं सुब्ग्रहणम् । नच अस्वरितत्वादेव तदनुवृत्तिर्न भविष्यति इति वाच्यम् । "अव्ययसर्वनाम्नाम्' इत्यादुत्तरसूत्रे तिङश्चेत्यनुवृत्तेरावश्यकतया तस्य स्वरितत्वावश्यकत्वात्" इति भाष्ये स्पष्टम् । एतदभिप्रेत्य आह । **यजतिकल्पमिति** ॥ "तुग्रहणन्तु 'स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यनुवर्तन्ते, क्वचिदतिवर्तन्ते' इति ज्ञापनार्थम्" इति भाष्ये प्रपञ्चितम् । **प्रकारवचने** ॥ 'प्रकारवचने थाल्' इत्यतोऽस्य वैलक्षण्यमाह । **प्रकारवति चायमिति** ॥ प्रकारवत्यर्थे वेत्यर्थः । **थाल् तु प्रकारमात्रे इति** ॥ वस्तुतस्तु उभयमपि प्रकारवतीति न्याय्यम् । अविशेषात् । अन्यथा तथेत्यत्र सः प्रकारः इत्येवार्थः स्यात् । नच किमादिभ्यो विशिष्य विहितेन थाला तज्जातीय इत्यर्थसिद्धिरिति वाच्यम् । 'जात्यन्ताच्छ बन्धुनि' इति तज्जात्यादिशब्दात् छप्रत्ययेनैव तज्जातीत्यादिसिद्धेः । अत एव यथाजातीयक इत्यादि भाष्यप्रयोगाः सङ्गच्छन्ते । जयादित्यस्तु अत्र प्रकारभेदः, थाल्विधौ सामान्यस्य भेदको विशेषः प्रकार इत्याह । वामनस्तु सादृश्य भेदश्चेत्युभयमपि प्रकार इत्याह । **प्रागिवात्कः** ॥ इवशब्दस्तद्धितसूत्रपर इति मत्वा आह । **इवे प्रतीति** ॥ **अव्ययसर्वनाम्नाम्** ॥ **अनुवर्तते इति** ॥ मण्डूकप्लुत्येति शेषः । अव्ययसर्वनाम्नां तिङन्तानाञ्च टेः प्राक् अकच्प्रत्ययः स्यादित्यर्थः । अकचि ककारादकार उच्चारणार्थः । चकार इत् । ककारान्तः प्रत्ययः । अयमपि प्रागिवादधिकारः । **कस्य च दः** ॥ पूर्वसूत्रे 'अव्ययसर्वनाम्नाम्' इति समासनिर्देशेऽपि एकदेशे स्वरितत्वप्रतिज्ञाबलात् अव्ययग्रहणमेवानुवर्तते । कस्य इत्यत्र ककारादकार उच्चारणार्थः । ककारस्येति विवक्षितम् ।

कान्ताव्ययस्य दकारोऽन्तादेशः स्यादकच्च।

२०२८। अज्ञाते। (५-३-७३)

कस्यायमश्वोऽश्वकः। उच्चकैः। नीचकैः। सर्वके। विश्वके। 'ओकारसकारभकारादौ सुपि सर्वनाम्नष्टेः प्रागकच्, अन्यत्र तु 'सुबन्तस्य टेः प्रागकच्' (वा ३२८४)। युवकयोः। आवकयोः। युष्मकासु। अस्मकासु। युष्मकाभिः। अस्मकाभिः। 'ओकार–' इत्यादि किम्। त्वयका मयका। 'अकच्प्रकरणे तूष्णीमः काम्वक्तव्यः' (वा ३२८५)। मित्त्वादन्त्यादचः परः। तूष्णीकामास्ते। 'शीले को मलोपश्च' (वा ३२८६)। तूष्णींशीलः तूष्णीकः। पचतकि। जल्पतकि। धकित्। हिरकुत्।

तेनाव्ययस्य विशेषणात् तदन्तविधिः। तदाह। **कान्ताव्ययस्येति** ॥ **अकच्चेति** ॥ चकारेण तदनुकर्षादिति भावः। एतेन अकचसन्नियोगशिष्ट एवायं दकारः इत्युक्तम्भवति। अयमपि प्रागिवाधिकारः। **अज्ञाते** ॥ अज्ञातेऽर्थे विद्यमानात् सुबन्तात्स्वार्थे कप्रत्ययः स्यात्। अव्ययसर्वनाम्नां तिङन्तानाञ्च टेः प्राक् अकच् स्यात्। तत्रापि ककारान्ताव्ययानान्दकारोऽन्तादेशः स्यादित्यर्थः। **कस्यायमिति** ॥ अज्ञाततत्वाभिनयोऽयम्। अज्ञातोऽश्व इति विग्रहः स्यादित्यर्थः। **उच्चकैरिति** ॥ उच्चैरित्यव्ययस्य टेः प्रागकच्। **सर्वके। विश्वके इति** ॥ ननु 'अव्ययसर्वनाम्नाम्' इति सूत्रे सुपः इत्यनुवृत्तेः सुबन्तानां सर्वनाम्नां टेः प्रागकजिति फलितम्। तथा सति युवयोः आवयोः, युष्मासु अस्मासु, युष्माभिः अस्माभिः, इत्यत्र सुबन्तानां टेः प्रागकचि युवकयोः आवकयोः, युष्मकासु अस्मकासु, युष्मकाभिः अस्मकाभिः, इति न स्युः। युवयकोः आवयकोः, युष्मासकु अस्मासकु, युष्माभकिः अस्माभकिः, इति स्युः। यदि तु सुप इत्यननुवर्त्य प्रातिपदिकादित्येवानुवर्त्य प्रातिपदिकादेव सर्वनाम्नां टेः प्रागकजित्यर्थः स्यात्, तर्हि त्वयका, मयकेति न स्यात्। त्वकया, मकया इति स्यादित्यत आह। **ओकारेति** ॥ वार्तिकमिदम्। ओकारादौ सकारादौ भकारादौ च सुपि सर्वनाम्नष्टेः प्रागकच्, अन्यत्र तु सुबन्तस्यैव सर्वनाम्नष्टेः प्रागकजित्यर्थः। इदन्तु वार्तिकं युष्मदस्मन्मात्रविषयकमेव। भाष्ये तथैवोदाहृतत्वात्। अन्येषान्तु सर्वनाम्नाम्प्रातिपदिकस्यैव टेः प्रागकच्, नतु सुबन्तानाम्। तेन सर्वकेणेत्यादि सिद्धम्। अत एव "विभक्तौ परतो विहितः किमः कादेशः साकच्कार्थः। कः–कौ–के" इति भाष्यं सङ्गच्छन्ते। **त्वयका, मयकेति** ॥ इह त्वया मयेति सुबन्तयोष्टेः प्रागकच्। प्रातिपदिकस्य टेः प्रागकचि तु त्वकया मकयेति स्यादिति भावः। **काम्वक्तव्य इति** ॥ काम्प्रत्यय इति वृत्तिस्तु चिन्त्या। भाष्ये प्रत्ययशब्दस्यादर्शनात्। किन्तु मित्त्वादागम एवायम्। तदाह। **मित्त्वादिति** ॥ अकचोऽपवादः। **तूष्णीकामिति** ॥ तूष्णीमित्यव्ययस्य ईकारादुपरि का इत्याकारान्त आगमः। **शीले इति** ॥ इदमपि वार्तिकम्। तूष्णीम् इत्यव्ययात् कप्रत्ययः स्यात् मकारस्य लोपश्च शीले गम्ये इत्यर्थः। शीलं

२०२९ । कुत्सिते । (५-३-७४)

कुत्सितोऽर्थोऽर्थकः ।

२०३० । संज्ञायां कन् । (५-३-७५)

कुत्सिते कन्स्यात्तदन्तेन चेत्संज्ञा गम्यते । शूद्रकः । राधकः । स्वरार्थं वचनम् ।

२०३१ । अनुकम्पायाम् । (५-३-७६)

पुत्रकः । अनुकम्पितः पुत्र इत्यर्थः ।

२०३२ । नीतौ च तद्युक्तात् । (५-३-७७)

सामदानादिरूपा नीतिः । तस्यां गम्यमानायामनुकम्पायुक्तात्कप्रत्ययः स्यात् । हन्त ते धानकाः । गुडकाः । एहकि । अद्धकि । पूर्वेणानुकम्प्यमानात्प्रत्ययः । अनेन तु परम्परासंबन्धेऽपीति विशेषः ।

स्वभावः । **तूष्णीक इति** ॥ मौनस्वभाव इत्यर्थः । भाष्ये दीर्घस्यैव प्रयोगदर्शनात् । 'केऽणः' इति ह्रस्वो न भवति । 'अव्ययसर्वनाम्नाम्' इत्यत्र तिङश्चेत्यनुवृत्तेः प्रयोजनमाह । **पचतकीति** ॥ पचतीत्यत्र इकारात् प्रागकच् । ककारादकार उच्चारणार्थः । अन्यथा इकारात्प्राक् अकच्प्रत्यये आद्गुणे पचतके इति स्यादिति भावः । **जल्पतकीति** ॥ जल्पतीत्यस्य टेः प्रागकच् । **धकिदिति** ॥ धिक् इत्यव्ययस्य टेः प्रागकच्, कस्य दश्च । **हिरकुदिति** ॥ हिरुगित्यव्ययस्य टेः प्रागकच्, कस्य दश्च । **कुत्सिते** ॥ येन धर्मेण कुत्स्यते वस्तु तद्धर्मयुक्तार्थाभिधायिनः प्रातिपदिकात्स्वार्थे प्रत्ययः स्यादित्यर्थः । अव्ययसर्वनाम्नस्तु टेः प्रागकच, कान्तस्याव्ययस्य दकारश्चान्तादेश इति बोध्यम् । तिङश्चेत्यप्यनुवर्तते । **अश्वक इति** ॥ धावनस्य असम्यक्त्वदश्वस्य कुत्सा बोध्या । सर्वनाम्नाव्ययतिङन्तानि पूर्ववदुदाहार्याणि । "याप्ये पाशप्' इति प्रवृत्तिनिमित्तकुत्सायामेव भवति । इदन्तु सूत्रमप्रवृत्तिनिमित्तकुत्सायामपि" इति भाष्ये स्पष्टम् । **संज्ञायाङ्कन्** ॥ कुत्सिते इत्यनुवर्तते । तदाह । **कुत्सित इति** ॥ **तदन्तेन चेदिति** ॥ कुत्साहेतुकसंज्ञाविषये कनिति यावत् । **अनुकम्पायाम्** ॥ अनुकम्पायुक्तार्थाभिधायिनः स्वार्थे कन् स्यादित्यर्थः । अनुकम्पा दया । **नीतौ च तद्युक्तात्** ॥ **सामदानादीति** ॥ आदिना भेददण्डयोर्ग्रहणम् । तद्युक्तादित्येतद्व्याचष्टे । **अनुकम्पायुक्तादिति** ॥ अव्ययसर्वनाम्नां टेः प्रागिति चानुवर्तते 'कस्य च दः' इति च । **हन्त ते धानका इति** ॥ दास्यन्ते इति शेषः । हन्तेत्यव्ययमनुकम्पाद्योतकम् । 'हन्त हर्षेऽनुकम्पायाम्' इत्यमरः । हन्तेत्यदन्तम् । हे पुत्रेति शेषः । अनुकम्पायुक्ता धाना इत्यर्थः । धानाशब्दात् कप्रत्यये 'केऽणः' इति ह्रस्वे कान्तात् टापि 'अभाषितपुंस्काच्च' इति विकल्पात् पक्षे इत्त्वाभावः । **एहकीति** ॥ एहीति तिङन्तस्य टेः प्रागकच् । 'अव्ययसर्वनाम्नाम्' इत्यत्र तिङश्चेत्यनुवृत्तेरिति भावः । **अद्धकीति** ॥ अद्धीति तिङन्तस्य टेः प्रागकच् । **पूर्वेणेति** ॥ अनुकम्पायास्तद्विषयत्वादिति भावः । **परम्परासम्बन्धेऽपीति** ॥ पुत्रस्साक्षादनुकम्प्यः । तद्द्वारा धाना

२०३३। बह्वचो मनुष्यनाम्नष्ठञ्वा। (५-४-७८)

पूर्वसूत्रद्वयविषये।

२०३४। घनिलचौ च। (५-३-७९)

तत्रैव।

२०३५। ठाजादावूर्ध्वं द्वितीयादचः। (५-३-८३)

अस्मिन्प्रकरणे यष्ठोऽजादिप्रत्ययश्च तस्मिन्प्रत्यये परे प्रकृतेर्द्वितीयादच ऊर्ध्वं सर्वं लुप्यते। अनुकम्पितो देवदत्तो देविकः—देवियः—देविलः—देवदत्तकः। अनुकम्पितो वायुदत्तः—वायुकः। ठग्रहणमुको द्वितीयत्वे कविधानार्थम्। वायुकः—पितृकः। 'चतुर्थादच ऊर्ध्वस्य लोपो वाच्यः' (वा ३२९६)।

अनुकम्पायुक्ता इति भावः। **बह्वचो मनुष्य** ॥ ठजिति च्छेदः। पूर्वसूत्रद्वयविषये इति शेषपूरणम्। 'अनुकम्पायाम्' इति 'नीतौ च तद्युक्तात्' इति च सूत्रद्वयविषये बह्वचो मनुष्यनाम्नः प्रातिपदिकात् ठञ्वा स्यादित्यर्थः। पक्षे कः। **घनिलचौ च** ॥ **तत्रैवेति** ॥ शेषपूरणमिदम्। बह्वच इति पूर्वसूत्रविषये इत्यर्थः। 'अनुकम्पायाम्' इति 'नीतौ च तद्युक्तात्' इति च सूत्रद्वयविषये बह्वचो मनुष्यनाम्नः घन् इलच् एतौ च प्रत्ययावित्यर्थः। **ठाजादौ** ॥ **अस्मिन्प्रकरणे इति** ॥ अनुकम्पायां, नीतौ च इत्यस्मिन्प्रकरणे इत्यर्थः। सन्निधानलभ्यमिदम्। **सर्वमिति** ॥ ऊर्ध्वग्रहणादिदं लभ्यते। अन्यथा 'आदेः परस्य' इति परिभाषया द्वितीयाचः यः परः तस्यादेरेव स्यादिति भावः। 'अजिनान्तस्योत्तरपदलोपश्च' इत्यतो लोप इत्यनुवृत्तमिह कर्मसाधनमाश्रीयते इति मत्वा आह। **लुप्यते इति। देविक इति** ॥ देवदत्तशब्दात् ठचि द्वितीयादचः परस्य दत्तशब्दस्य लोपे इकादेशे रूपम्। **देविय इति** ॥ देवदत्तशब्दात् घनि दत्तशब्दस्य लोपे इयादेशे रूपम्। **देविल इति** ॥ इलचि दत्तशब्दस्य लोपः। **देवदत्तकः इति** ॥ कप्रत्यये सति ठाजाद्यभावान्न दत्तपदलोपः। **वायुक इति** ॥ वायुदत्तशब्दात् दत्तशब्दस्य लोपः। उकः परत्वात् ठस्य कः। नन्विकादेशे सति देविक इत्यत्र अजादित्वादेव सिद्धे ठग्रहणं व्यर्थमित्यत आह। **ठग्रहणमिति** ॥ कृत एव ठग्रहणे वायुशब्दात्परस्य दत्तशब्दस्य ठावस्थायामेव नित्यत्वात् लोपे कृते ठस्य उकः परत्वात्कादेशः सिध्यति। अन्यथा इकादेशे कृते अजादित्वं पुरस्कृत्य दत्तशब्दस्य लोपे सति वायु इक इति स्थिते ठस्याभावात् कादेशो न स्यात्। नच स्थानिवत्त्वादिकस्य ठत्वं शङ्क्यम्। 'ठस्येकः' इत्यत्र स्थान्यादेशयोरकार उच्चारणार्थ इति पक्षे अल्विधित्वात् सन्निपातविरोधाच्चेति भाष्ये स्पष्टम्। **पितृक इति** ॥ पितृदत्तशब्दात् ठचि दत्तशब्दस्य लोपे उकः परत्वात् ठस्य कः। अथ "चतुर्थादनजादौ च लोपः पूर्वपदस्य च। अप्रत्यये तथैवेष्टः उवर्णाल्ल इलस्य च" इति वक्ष्यमाणश्लोकवार्तिकं भङ्क्त्वा **चतुर्थादच इत्येतद्व्याचष्टे। चतुर्थादच ऊर्ध्वस्य लोपो वाच्य इति** ॥ **बृहस्पतिक इति** ॥ बृहस्पतिदत्तशब्दात् ठचि दत्तशब्दस्य लोपे ठस्य इकादेशः। द्वितीयादूर्ध्वत्वाभावादप्राप्ते वचनम्।

अनुकम्पितो बृहस्पतिदत्तो बृहस्पतिकः। 'अनजादौ च विभाषा लोपो वक्तव्यः' (वा ३२९७)। देवदत्तकः—देवकः। 'लोपः पूर्वपदस्य च' (वा ३२९८)। दत्तिकः—दत्तियः—दत्तिलः—दत्तकः। 'विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वक्तव्यः' (वा ३२९९) देवदत्तः—दत्तः, देवः। सत्यभामा—भामा सत्या। 'उवर्णाल्ल इलस्य च' (वा ३३०३)। भानुदत्तः—भानुलः। 'ऋवर्णादपि' (वा ५०५४)। सवित्रियः। सवितृलः।

'चतुर्थादनजादौ च लोपः पूर्वपदस्य च।
अप्रत्यये तथैवेष्ट उवर्णाल्ल इलस्य च॥' (वा ३२९६—३३००)

२०३६। प्राचामुपादेरडज्वुचौ च (५-३-८०)

उपशब्दपूर्वात्प्रातिपदिकात्पूर्वविषये अडच् वुच् एतौ स्तः। चाद्यथाप्राप्तम्। प्राचां ग्रहणं पूजार्थम्। अनुकम्पितः उपेन्द्रदत्तः उपडः—उपकः—उपियः उपिलः—उपिकः—उपेन्द्रदत्तकः। षड्रूपाणि।

अनजादौ चेति वार्तिकभाग व्याचष्टे। **अनजादौ च विभाषा लोपो वक्तव्य इति॥** अनजादौ चेति पाठे विभाषेति भाष्यलभ्यम्। तत्र देवदत्तको देवक इति कप्रत्यये दत्तलोपविकल्पोदाहरणात्। **लोपः पूर्वपदस्य चेति॥** विभाषेति शेषः। अनजादाविति तु नात्र सम्बध्यते। तदाह। **दत्तिक इत्यादि॥** ठचि घनि इलचि केच रूपम्। अप्रत्यये तथैवेष्ट इति वार्तिकभागं व्याचष्टे। **विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वक्तव्य इति॥ दत्तः, देवः इति॥** देवदत्तशब्दात् ठाजादिप्रत्ययस्याप्यभावे पूर्वोत्तरपदयोः क्रमेण लोपे रूपम्। **उवर्णादिति॥** ल इति लोपस्य पूर्वाचार्यसंज्ञा। उवर्णान्परस्य इलचो लोपः स्यादित्यर्थः। 'आदेः परस्य' इति इकारस्य लोपः। चकारेण ठाजादौ द्वितीयादच ऊर्ध्वं लोपः सूत्रसिद्धः अनूद्यते। **ऋवर्णादपीति॥** ऋवर्णादपि परस्य इलच आदेर्लोपः स्यादित्यर्थः। **सवित्रियः—सवितृलः इति॥** घनि इलचि च रूपम्। वस्तुतस्तु ऋवर्णादपीति भाष्यादृष्टत्वादुपेक्ष्यम्। तदेवं व्याख्यातं वार्तिकं समस्तं पठति। **चतुर्थादित्यादि॥ प्राचामुपादेरडज्वुचौ च॥ पूर्वविषये इति॥** 'बह्वो मनुष्यनाम्नः' इति सूत्रविषये इत्यर्थः। **चाद्यथाप्राप्तमिति॥** ठच्, घन्, इलच्चेत्यर्थः। इमनिज्वेन्यतो वेत्यनुवृत्त्यैव सिद्धेः प्राचाङ्ग्रहण व्यर्थमित्यत आह। **प्राचाङ्ग्रहणमिति॥ उपडः इति॥** उपेन्द्रदत्तशब्दात् अडचि द्वितीयं सन्ध्यक्षरमिति वक्ष्यमाणेन एकारादेशलोप इति केचित्। 'नेन्द्रस्य परस्य' इति ज्ञापकेन पूर्वोत्तरपदनिमित्तकार्यापेक्षया अन्तरङ्गस्याप्येकादेशस्य पूर्वमप्रवृत्तेरेकारादिलोप इति

---

१. भाष्ये न दृष्टम्—इति शेखरकृत्।

२०३७। जातिनाम्नः कन्। (५-३-८१)

'मनुष्यनाम्नः' इत्येव। जातिशब्दो यो मनुष्यनामधेयस्तस्मात्कन्स्यादनुकम्पायां नीतौ च। सिंहकः। शरभकः। रासभकः। 'द्वितीयं सन्ध्यक्षरं चेत्तदादेर्लोपो वक्तव्यः' (वा ३३०३)। कहोडः। कहिकः। 'एकाक्षरपूर्वपदानामुत्तरपदलोपो वक्तव्यः' (वा ३३०६)। वागाशीर्दत्तः। वाचिकः। कथं षडङ्गुलिदत्तः षडिक इति। 'षषष्ठाजादिवचनात्सिद्धम्' (वा ३३०७)।

शब्देन्दुशेखरे। **उपक इति** ॥ वुचि अकादेशे एकारादिलोपे रूपम्। **उपिय इति** ॥ घनि रूपम्। **उपिल इति** ॥ इलचि रूपम्। **उपिक इति** ॥ ठचि रूपम्। **उपेन्द्रदत्तक इति** ॥ कप्रत्यये रूपम। ठाजाद्यभावाल्लोपो न। **जातिनाम्नः कन्** ॥ **जातिशब्दो य इति** ॥ यः जातिप्रवृत्तिनिमित्तकः प्रसिद्धः सन् मनुष्यनामधेयभूतस्स इत्यर्थः। 'अनुकम्पायाम्' इति 'नीतौ' इति च सूत्रद्वयविहितस्यापवादः। **द्वितीयं सन्ध्यक्षरं चेदिति** ॥ 'एचस्सन्ध्यक्षराः' इति प्राचामाचार्याणां प्रवादः। **कहोड इति** ॥ ऋषिविशेषस्य नामेदम्। अत्र द्वितीयोऽच् सन्ध्यक्षरं, तदादेर्लोपः। नतु तदूर्ध्वस्यैव। **एकाक्षरेति** ॥ व्यञ्जनसहितं एकोऽच् एकाक्षरं एकाक्कमिति यावत्। तथाविधं पूर्वपदं येषां पदानां तानि एकाक्षरपूर्वपदानि, तेषां मध्ये उत्तरभूतानि पदानि यावन्ति तेषां लोपः स्यादित्यर्थः। इह उत्तरपदशब्दो यौगिकः। नतु समासस्य चरमावयवे रूढः। व्याख्यानात्। द्वितीयादच ऊर्ध्वमित्यनेन द्वितीयाज्जिशिष्टस्य लोपे अप्राप्ते वचनमिदम्। **वागाशीर्दत्त इति** ॥ वाचि आशीः यस्य नतु मनस्येव सः वागाशीः। तेन दत्त इति विग्रहः। यद्वा आशासनमाशीः, वाचा आशीः वागाशीः। 'कर्तृकरणे कृता' इति समासः। तया वागाशिषा दत्त इति विग्रहः। वाक्करणकाशासनेन दत्त इत्यर्थः। **वाचिक इति** ॥ वागाशीर्दत्तशब्दात् ठचि वागित्येकाक्षरपूर्वपदात्परयोराशीर्दत्तशब्दयोर्लोपे सति अन्तर्वर्तिविभक्तया पदत्वमाश्रित्य प्रवृत्तकुत्वजश्त्वयोरिकाश्रयभत्वेन बाधान्निवृत्तौ वाचिक इति रूपमिति केचित्। वस्तुतस्तु ठचि इकादेशात् प्राक् ठावस्थायामेव उत्तरपदलोपे कर्तव्ये असिद्धत्वान्न पूर्वे कुत्वादिप्रवृत्तिरित्याहुः। यद्यपि द्वितीयादच ऊर्ध्वस्य शीर्दत्तशब्दस्य लोपे वागा इक इति स्थिते 'यस्येति च' इत्याकारलोपे उक्तरीत्या कुत्वजश्त्वयोर्निवृत्तौ वाचिक इति सिध्यति। तथापि आकारलोपस्य स्थानिवत्त्वेन आकारान्तस्य इकमाश्रित्य भत्वे सति आकारान्तनिष्ठभत्वेन चकारान्तनिष्ठपदत्वस्य अव्याघातात् कुत्वजश्त्वयोः वागिक इति स्यात्। उत्तरपदलोपे तु अज्झलादेशत्वेन स्थानिवत्त्वाभावात्तुल्यावाधिकया भसंज्ञया 'सुप्तिङन्तम्' इति पदसंज्ञा बाध्यते। एकसंज्ञाधिकारे परत्वादिति भावः। **कथमिति** ॥ अत्रापि अङ्गुलिदत्तशब्दस्य लोपे सति इकप्रत्ययाश्रितभत्वेन पदत्वाभावात् जश्त्वं दुर्लभमिति प्रश्नः। **षष इति** ॥ षषशब्दस्य पूर्वपदत्वे 'ठाजादौ' इति सूत्रसिद्धो द्वितीयादच ऊर्ध्वस्यैव लोपः। नत्वयमुत्तरपदलोप इति वचनात् षडिक इति सिद्धमित्यर्थः। एवञ्च षडङ्गुलिदत्तः इत्यत्र डकाराकारादूर्ध्वस्य लोपे सति डकाराकारस्य 'यस्येति च' इति लोपे सति तस्य स्थानिवत्त्वेन

२०३८। शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात्। (५-३-८४)

एषां मनुष्यनाम्नां ठाजादौ परे तृतीयादचः ऊर्ध्वं लोपः स्यात्। पूर्वस्यापवादः। अनुकम्पितः शेवलदत्तः—शेवलिकः—शेवलियः—शेवलिलः। सुपरिकः। विशालिकः। वरुणिकः। अर्यमिकः।

२०३९। अजिनान्तस्योत्तरपदलोपश्च। (५-३-८२)

अजिनान्तान्मनुष्यनाम्नोऽनुकम्पायां कन्। तस्य चोत्तरपदलोपः। अनुकम्पितो व्याघ्राजिनो व्याघ्रकः। सिंहकः।

२०४०। अल्पे। (५-३-८५)

अल्पं तैलं तैलकम्।

२०४१। ह्रस्वे। (५-३-८६)

ह्रस्वो वृक्षो वृक्षकः।

२०४२। संज्ञायां कन्। (५-३-८७)

ह्रस्वहेतुका या संज्ञा तस्यां गम्यमानायां कन। पूर्वस्यापवादः। वंशकः। वेणुकः।

२०४३। कुटीशमीशुण्डाभ्यो रः। (५-३-८८)

अकारान्तस्य इकमाश्रित्य भत्वे सति तेन अकारान्तनिष्ठेन षकारान्तस्य पदत्वाव्याघातात्रत्वं निर्बाधमिति भावः। स्पष्टमेवं 'स्वादिषु' इति सूत्रे भाष्ये। **शेवल** ॥ **एषामिति** ॥ शेवल, सुपरि, विशाल, वरुण, अर्यमन्, एतत्पूर्वपदकानामित्यर्थः। **पूर्वस्येति** ॥ 'ठाजादौ' इत्यस्येत्यर्थः। **शेवलिकः इति** ॥ शेवलदत्तशब्दात् ठचि तृतीयादचः परस्य दत्तशब्दस्य लोपः। **शेवलिल इति** ॥ इलचि रूपम्। **सुपरिक इति** ॥ सुपरिदत्तशब्दात् ठचि दत्तशब्दलोपः। **विशालिक इति** ॥ विशालदत्तशब्दात् ठचि रूपम्। **वरुणिकः इति** ॥ वरुणदत्तात् वरुणिकः। **अर्यमिकः इति** ॥ अर्यमदत्तात् अर्यमिकः। "अकृतसन्धीनामेषाम्" इति वार्तिकं भाष्ये स्थितम्। तेन सुपर्याशीर्दत्तः, सुपरिकः, इत्यादि सिद्ध्यति। **अजिनान्तस्य** ॥ **व्याघ्रकः इति** ॥ व्याघ्राजिन इति कस्य चिन्मनुष्यस्य नाम। तस्मात् कनि अजिनस्य लोपः। **सिंहक इति** ॥ सिंहाजिनशब्दात् कनि अजिनस्य लोपः। **अल्पे** ॥ अल्पत्वविशिष्टे वर्तमानात् यथाविहितं प्रत्ययाः स्युः। **तैलकमिति** ॥ सर्वकम् उच्चकैः पचतकीत्याद्यप्युदाहार्यम्। **ह्रस्वे** ॥ ह्रस्वत्वविशिष्टे वर्तमानाद्यथाविहितं प्रत्ययाः इत्यर्थः। अल्पत्वं महत्त्वप्रतिद्वन्द्वि, ह्रस्वत्वन्तु दीर्घत्वप्रतिद्वन्द्वीति भेदः। **संज्ञायाङ्कन्** ॥ **वंशक इति** ॥ ह्रस्वस्य वेणुजातिविशेषस्य नाम। **कुटीशमी** ॥ ह्रस्व इलेव। **कुटीर**

ह्रस्वा कुटी कुटीरः। शमीरः। शुण्डारः।

२०४४। कुत्वा डुपच्। (५-३-८९)

ह्रस्वा कुतूः कुतुपः। 'कुतूः कृत्तिस्नेहपात्रं ह्रस्वा सा कुतुपः पुमान्' इत्यमरः।

२०४५। कासूगोणीभ्यां ष्टरच्। (५-३-९०)

आयुधविशेषः कासूः। ह्रस्वा सा कासूतरी। गोणीतरी।

२०४६। वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे। (५-३-९१)

वत्सतरः। द्वितीयं वयः प्राप्तः। उक्षतरः। अश्वतरः। ऋषभतरः। प्रवृत्तिनिमित्ततनुत्व एवायम्।

२०४७। किंयत्तदो निर्धारणे द्वयोरेकस्य डतरच्। (५-३-९२)

अनयोः कतरो वैष्णवः। यतरः। ततरः। महाविभाषया कः। यः। सः।

इति॥ 'स्वार्थिकाः क्वचित्प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते' इति पुंस्त्वम्। एवं शमीरः शुण्डीरः इत्यपि। ह्रस्वा शमी शुण्डा चेत्यर्थः। **कुत्वा डुपच्**॥ **कुतुप इति**॥ कुतूशब्दात् डुपचि डित्त्वाट्टिलोपः। तत्रापि कुटीरादिवत् स्त्रीत्वमपहाय पुंस्त्वमेव। तल्लामरकोशमपि प्रमाणयति। **कुतूः कृत्तीति**॥ **कासूगोणीभ्यां ष्टरच्**॥ ह्रस्व इत्येव। **कासूतरीति**॥ षित्त्वात् ङीषिति भावः। "कासुबुद्धे कुवाच्येऽस्त्रे" इति नानार्थरत्नमालायाम्। एवङ्गोणीतरीति। **वत्सोक्ष**॥ ह्रस्वस्य इति निवृत्तम्। वत्स, उक्षन्, अश्व, ऋषभ, एभ्यस्तनुत्वविशिष्टवृत्तिभ्यः ष्टरच्प्रत्ययः स्यादित्यर्थः। तनुत्वं न्यूनत्वम्। वत्सः प्रथमवयाः। वयसश्च प्रथमस्य तनुत्वम् उत्तरवयःप्राप्त्या ज्ञेयम्। तदाह। **द्वितीयं वयः प्राप्त इति**॥ **उक्षतर इति**॥ उक्षा तरुणो बलीवर्दः। तारुण्यस्य तनुत्वं तृतीयवयःप्राप्त्या ज्ञेयम्। **अश्वतर इति**॥ गर्दभेन अश्वायामुत्पादितः अश्वतरः। अश्वतरत्वञ्च अश्वत्वापेक्षया न्यूनमेव। **ऋषभतर इति**॥ ऋषभः भारस्य वोढा। तस्य तनुत्वं भारोद्वहने मन्दशक्तिता, तद्वानित्यर्थः। ननु कृशो वत्सो वत्सतर इति कुतो नेत्यत आह। **प्रवृत्तिनिमित्ततनुत्वे एवायमिति**॥ एतच्च भाष्ये स्पष्टम्। **किंयत्तदो निर्धारणे**॥ किम्, यत्, तत्, एषां समाहारद्वन्द्वात्पञ्चमी। द्वयोरेकस्य निर्धारणे गम्ये निर्धार्यमाणवाचिभ्यः किमादिभ्यः डतरच् स्यादित्यर्थः। **अनयोः कतरो वैष्णव इति**॥ को वैष्णव इत्यर्थः। अत्र वैष्णवत्वगुणेन किंशब्दार्थः इदमर्थाभ्यां निर्धार्यते। अतः किंशब्दात् डतरचि डित्त्वाट्टिलोपे कतरः इति भवति। एवं यद्शब्दात् तद्शब्दाच्च डतरचि टिलोपे यतरः ततरःइति भवति। निर्धार्यमाणवाचिभ्य इति किम्। कयोरन्यतरो देवदत्तः, ययोरन्यतरः, तयोरन्यतरः, इत्यत्रापि किमादिभ्यो न भवति।

२०४८ । वा बहूनां जातिपरिप्रश्ने डतमच् । (५-३-९३)

बहूनां मध्ये एकस्य निर्धारणे डतमज्वा स्यात् । 'जातिपरिप्रश्ने' इति प्रत्याख्यातमाकरे । कतमो भवतां कठः । यतमः । ततमः । वाग्रहणमकजर्थम् । यकः । सकः । महाविभाषया यः, सः । किमोऽस्मिन्विषये डतरजपि । कतरः ।

२०४९ । एकाच्च प्राचाम् । (५-३-९४)

डतरच् डतमच्च स्यात् । अनयोरेकतरो मैत्रः । एषामेकतमः ।

२०५० । अवक्षेपणे कन् । (५-३-९५)

वा बहूनाम् ॥ कियत्तदो इति, निर्धारणे इति, एकस्येति चानुवर्तते । बहूनामिति निर्धारणे षष्ठी । तदाह । **बहूनाम्मध्ये एकस्य निर्धारणे डतमज्वा स्यादिति ॥** मध्ये इत्यनन्तरमेकस्येति शेषः । जातिपरिप्रश्ने गम्ये इत्यपि बोध्यम् । जातिश्च परिप्रश्नश्चेति समाहारद्वन्द्वः । जातौ परिप्रश्ने च गम्ये इत्यर्थः । तत्र जातावित्यादि कियत्तदां सर्वेषामेव विशेषणम् । परिप्रश्नग्रहणन्तु किम एव विशेषणम् । तत्र क्षेपार्थकस्य किमो निवृत्त्यर्थम् । यत्तदोस्तु परिप्रश्नग्रहणं न विशेषणम् । असम्भवादिति वृत्तौ स्पष्टम् । अत्र वार्तिकम् । 'किमादीनान्द्विवह्वर्थे प्रत्ययविधावुपाध्यानर्थक्यम्' इति । 'पूर्वसूत्रे द्वयोरिति, अत्र सूत्रे जातिपरिप्रश्ने इति च न कर्तव्य इति भावः' इति कैयटः । तदाह । **जातिपरिप्रश्ने इति प्रत्याख्यातमाकरे इति ॥** क्षेपार्थस्य त्वनभिधानान्न ग्रहणमिति तदाशयः । पूर्वसूत्रे द्वयोरिति चेति बोध्यम् । तथाच 'कतमः एषाम्पाचकशूरो देवदत्तः' इत्यत्र क्रियागुणसंज्ञाभिरपि निर्धारणे डतमच् भवति । 'एषाङ्कतमो देवदत्तः' इत्यत्र तु बहूनामेकस्य निर्धारणे डतमच भवति । अत एव 'प्रत्ययः' इति सूत्रभाष्ये "बहुष्वासीनेषु कश्चित्किञ्चिन्पृच्छति कतरो देवदत्तः" इति प्रयोगः सङ्गच्छते । **कतमो भवताङ्कठ इति ॥** "गोत्रञ्च चरणैः सह" इति कठस्य जातित्वम् । **वाग्रहणमकजर्थमिति ॥** अन्यथा महाविभाषया अपवादेन मुक्ते उत्सर्गस्य प्रवृत्तेरुक्तत्वादकच् न स्यादिति भावः । नच 'अव्ययसर्वनाम्नाम्' इत्यस्याधिकारत्वात् तदनुवृत्त्यैव सिद्धे वाग्रहणं व्यर्थमेवेति वाच्यम् । इहैव सूत्रे तदनुवृत्तिः ननु पूर्वसूत्रे इति ज्ञापनार्थत्वात् । अतो डतरज्विषये नाकच् । **महाविभाषयेति ॥** अत एव 'अवक्षेपणे' इति सूत्रे भाष्ये क एतयोरर्थयोः विशेषः इति प्रयोगः सङ्गच्छते । **तमबादयः प्रागवक्षेपणकनोर्नित्याः प्रत्ययाः इति तु प्रायिकमिति** भावः । **किमोऽस्मिन्निति ॥** 'वा बहूनाम्' इति प्रकृतसूत्रविषयेऽपीत्यर्थः । बहुष्वासीनेष्वित्यादुदाहृतभाष्यप्रयोगादिति भावः । **एकाच्च प्राचाम् ॥** शेषपूरणेन सूत्रं व्याचष्टे । **डतरच् डतमच्च स्यादिति ॥** पूर्वसूत्रद्वये इति शेषः । "महाविभाषयैव सिद्धे प्राचाङ्ग्रहणं न कर्तव्यम्" इति भाष्यम् । अत एव नाकजर्थन्तत् । **अवक्षेपणे कन् ॥** व्याकरणेन

व्याकरणेन गर्वितः व्याकरणकः। येनेतरः कुत्स्यते तदिहोदाहरणम्। स्वतः कुत्सितं तु 'कुत्सिते' (सू २०२९) इत्यस्य।

इति तद्धिते प्रागिवीयप्रकरणम्।

अथ तद्धिते स्वार्थिकप्रकरणम्।

२०५१। इवे प्रतिकृतौ। (५-३-९६)

कन्स्यात्। अश्व इव प्रतिकृतिः अश्वकः। 'प्रतिकृतौ' किम्। गौरिव गवयः।

२०५२। संज्ञायां च। (५-३-९७)

इवार्थे कन् स्यात्समुदायश्चेत्संज्ञा। अप्रतिकृत्यर्थमारम्भः। अश्वसदृशस्य संज्ञा अश्वकः। उष्ट्रकः।

२०५३। लुम्मनुष्ये। (५-३-९८)

संज्ञायां चेति विहितस्य कनो लुप्स्यान्मनुष्ये वाच्ये। 'चञ्चा तृणमयः पुमान्'। चञ्चेव मनुष्यश्चञ्चा। वर्धिका।

गर्वित इति॥ व्याकरणं हि स्वतो न कुत्सितं पठितम्। अधीतं विस्मृतं सदध्येतृकुत्साहेतुभूतगर्वमावहदवक्षेपणम्। नावक्षेपणङ्कुत्सा। तत्कथं व्याकरणमवक्षेपणं स्यात्। 'कुत्सिते' इत्यनेन गतार्थश्चेदमित्यत आह। **येनेतर इति**॥ अवक्षेपणशब्दः करणे ल्युडन्त इति भावः॥

इति तद्धिते प्रागिवीयप्रकरणम्।

अथ तद्धिते स्वार्थिकप्रकरणं निरूप्यते। **इवे प्रतिकृतौ**॥ **कन् स्यादिति**॥ 'अवक्षेपणे कन्' इत्यतः तदनुवृत्तेरिति भावः। इवार्थः उपमानत्वम्। तद्वति वर्तमानात्प्रातिपदिकात्कन् स्यात्प्रतिकृतिभूते उपमेये इति फलितम्। मृदादिनिर्मिता प्रतिमा प्रतिकृतिः। **अश्वक इति**॥ प्रतिकृतेः स्त्रीत्वेऽपि 'स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यनुवर्तन्ते' इति पुल्लिङ्गत्वम्। **संज्ञायाञ्च**॥ कनिति शेषः। **समुदायश्चेदिति**॥ प्रकृतिप्रत्ययसमुदायश्चेत्प्रकृत्यर्थस्य संज्ञेत्यर्थः। पूर्वसूत्रेणैव सिद्धे किमर्थमिदमित्यत आह। **अप्रतिकृत्यर्थमारम्भ इति**॥ तथाच प्रतिकृताविति निवृत्तम्। इव इति त्वनुवर्तत एव। तदाह। **अश्वसदृशस्येति**॥ अश्वसदृशस्य अमनुष्यस्य कस्य चित्संज्ञैषा। अश्वसदृशोऽयमश्वकसंज्ञक इति बोधः। **लुम्मनुष्ये**॥ **संज्ञायां चेति विहितस्येति**॥ नतु 'इवे प्रतिकृतौ' इति विहितस्य

२०५४ । जीविकार्थे चापण्ये । (५-३-९९)

जीविकार्थं यदविक्रीयमाणं तस्मिन्वाच्ये कनो लुप्स्यात् । वासुदेवः । शिवः । स्कन्दः । देवलकानां जीविकार्थासु देवप्रतिकृतिष्विदम् । 'अपण्ये' किम् । हस्तिकान्विक्रीणीते ।

२०५५ । देवपथादिभ्यश्च । (५-६-१००)

कनो लुप्स्यात् । देवपथः । हंसपथः । आकृतिगणोऽयम् ।

२०५६ । वस्तेर्ढञ् । (५-३-१०१)

इवेत्यनुवर्तत एव । 'प्रतिकृतौ' इति निवृत्तम् । वस्तिरिव वास्तेयम्—वास्तेयी ।

मनुष्यस्य । प्रतिकृतित्वासम्भवादिति भावः । चक्रेव मनुष्यः चक्रा इत्युदाहरणं वक्ष्यन् चक्राशब्दं व्याचष्टे । **चक्रा तृणमयः पुमानिति ॥ चक्रेति ॥** चक्रातुल्यो मनुष्योऽयमक्रासंज्ञक इत्यर्थः । **वर्ध्रिकेति ॥** वर्ध्रिका चर्ममयी प्रतिकृतिः । तत्तुल्यो मनुष्योऽयं वर्ध्रिकसंज्ञक इत्यर्थः । लुपि युक्तवत्त्वात् स्त्रीत्वम् । वचनं तु विशेष्यवदेव । 'हरीतक्यादिषु व्यक्तिः' इत्युक्तेः । तेन चक्रेव मनुष्यो चक्र इति न भवति । **जीविकार्थे चापण्ये ॥** पण्यं विक्रीयमाणम् । तदाह । **अविक्रीयमाणमिति ॥ वासुदेव इति ॥** वासुदेवतुल्या जीविकार्था अविक्रेया प्रतिकृतिरित्यर्थः । एवं शिवः इत्यादि । कथं प्रतिकृतेरविक्रेयायाः जीविकार्थत्वमित्यत आह । **देवलकानामिति ॥** प्रतिमाः हृत्वा भिक्षार्थं प्रतिगृहमटतामित्यर्थः । तत्तदायतनेषु प्रतिष्ठितासु पूजार्थप्रतिमासु उत्तरसूत्रेण लुब्वक्ष्यते । **हस्तिकान्विक्रीणीते इति ॥** जीविकार्थं हस्तितुल्यप्रतिकृतिं विक्रीणीति इत्यर्थः । अत्र पण्यत्वप्रतीतेः कनो न लुक् । 'संज्ञायाञ्च' इति विहितस्य नायं लुप् । किन्तु 'इवे प्रतिकृतौ' इति विहितस्यैव । भाष्ये प्रतिकृताविव एतदुदाहरणात् । पठन्ति चाभियुक्ताः "रामं सीतां लक्ष्मणं जीविकार्थं विक्रीणीते यो नरस्तञ्च धिक् धिक् । अस्मिन्पण्ये योऽपशब्दं न वेत्ति व्यर्थप्रज्ञं पण्डितं तञ्च धिक् धिक् ॥" इति । अत्र रामादिशब्दाः प्रतिकृतिषु वर्तन्ते । तासाम्त्रात्र पण्यतया कनो लुप् दुर्लभ इति रामसीतालक्ष्मणशब्दानामपशब्दत्वमित्याशयः । **देवपथादिभ्यश्च ॥ कनो लुप् स्यादिति ॥** शेषपूरणमिदम् । 'इवे प्रतिकृतौ' इति विहितस्य देवपथादिभ्यः परस्य कनो लुप् स्यादिति यावत् । **देवपथ इति ॥** देवानां पन्थाः देवपथः । तत्प्रतिकृतिरित्यर्थः । 'इवे प्रतिकृतौ' इति कनो लुप् । एवं हंसपथः । अत्र वृत्तौ पठितम् "अर्चासु पूजनार्थासु चित्रकर्मध्वजेषु च । इवे प्रतिकृतौ लोपः कनो देवपथादिषु" अर्चाः प्रतिमाः । पूजार्थासु तासु चित्रकर्मसु ध्वजेषु देवपथादिगणपठितेषु 'इवे प्रतिकृतौ' इति विहितस्य कनो लुबित्यर्थः । 'तद्राजस्य' इति सूत्रे कैयटोऽप्येतं श्लोकं पपाठ । अर्चासु यथा—शिवो विष्णुर्गणपतिरित्यादि । चित्रकर्मसु यथा—रावणः कुम्भकर्णः इन्द्रजिदित्यादि । ध्वजेषु यथा—कपिः गरुडः वृषभः इत्यादि । **वस्तेर्ढञ् ॥ निवृत्तमिति ॥**

२०५७। शिलाया ढः। (५-३-१०२)

शिलेव शिलेयम्। योगविभागात् ढञपीत्येके। शैलेयम्।

२०५८। शाखादिभ्यो यः। (५-३-१०३)

शाखेव शाख्यः। मुख्यः। जघनमिव जघन्यः। अभ्यः। शरण्यः।

२०५९। द्रव्यं च भव्ये। (५-३-१०४)

द्रव्यम् अयं ब्राह्मणः।

२०६०। कुशाग्राच्छः। (५-३-१०५)

कुशाग्रमिव कुशाग्रीया बुद्धिः।

२०६१। समासाच्च तद्विषयात्। (५-३-१०६)

इवार्थविषयात्समासाच्छः स्यात्। काकताळीयो देवदत्तस्य वधः।

अस्वरितत्वादिति भावः। 'संज्ञायाञ्च' इत्यादिपूर्वसूत्रेषु क्वापि प्रतिकृताविल्यस्यानिवृत्तेः न लुब्विधिषु तेषु तदनुवृत्तिरपेक्षिता। **वस्तिरिवेति** ॥ "वस्तिर्नाभेरधो द्वयोः" इत्यमरः। **शिलाया ढः** ॥ इवेत्येव। **शिलेव शिलेयमिति** ॥ दध्यादीति शेषः। **योगेति** ॥ शिलाया इत्येको योगः। ढञित्यनुवर्तते, इवेति च। **शैलेयमिति** ॥ ञित्वादादिवृद्धिः। स्त्रियां ङीप् च फलम्। ढः इति द्वितीयो योगः। शिलाया इत्यनुवर्तते। उक्तोऽर्थः। **शाखादिभ्यो यः** ॥ यत् इति त्वपपाठः। तैत्तिरीये 'मुख्यो भवति' इत्यादौ मुख्यशब्दस्य आद्युदात्तत्वदर्शनात्, उगवादिसूत्रभाष्यविरुद्धत्वाच्च। **द्रव्यञ्च भव्ये** ॥ द्रुशब्दादिवार्थवृत्तेः यप्रत्ययो निपात्यते भव्ये उपमेये गम्ये। भव्यः आत्मवान्। अभिप्रेतानान्धनानाम्पात्रभूत इति वृत्तिः। **द्रव्यम् अयमिति** ॥ द्रुः वृक्षः, सः यथा पुष्पफलादिभाक् एवमभिमतफलपात्रभूत इत्यर्थः। यद्वा द्रुः कल्पवृक्षोऽत्र विवक्षितः। स इव अभिमतार्थभागित्यर्थः। यप्रत्यये ओर्गुणः अवादेशः। **कुशाग्राच्छः** ॥ इवेत्येव। **कुशाग्रमिवेति** ॥ सूक्ष्मत्वे सादृश्यम्। कुशाग्रवत् सूक्ष्मेत्यर्थः। **समासाच्च** ॥ तच्छब्देन प्रकृतः इवार्थः परामृश्यते। तदाह। **इवार्थविषयादिति** ॥ इवार्थः सादृश्यमुपमानोपमेयभावात्मकम्, तद्विषयकादित्यर्थः। सादृश्यवदर्थबोधकात् समासादिति यावत्। यद्यपि घनश्याम इति समासोऽपि सादृश्यवदर्थबोधकः, तथापि सादृश्यवदर्थबोधकसमस्यमानयावत्पदावयवकात् समासादिति विवक्षितमिति न दोषः। **छः स्यादिति** ॥ चकारेण पूर्वसूत्रोपात्तच्छस्यानुकर्षादिति भावः। इवार्थे इति शेषः। पूगाञ्ञ्यः इत्यतः प्रागिवाधिकारात्। ततश्च इवार्थकसमस्यमानयावत्पदकात्समासादिवार्थे छः स्यादिति लभ्यते। **काकताळीयो देवदत्तस्य वध इति** ॥ काकः कश्चिदकस्मात् ताळवृक्षस्य मूलङ्गतस्ताळफलपतनान्मृतः। तथैव कश्चिद्देवदत्तः अकस्मान्निर्जनप्रदेशे क्वचिद्गतः चोरेण हतः, तत्रेदं वाक्यं प्रवृत्तम्। अत्र समासार्थगतं सादृश्यमेकं, प्रत्ययार्थगतम् अन्यत्सादृश्यञ्च भासते।

इह काकताळसमागमसदृशश्चोरसमागम इति समासार्थः । तत्प्रयुक्तः काकमरणसदृशस्तु प्रत्ययार्थः । अजाकृपाणीयः । अतर्कितोपनत इति फलितोऽर्थः ।

२०६२ । शर्करादिभ्योऽण् । (५-३-१०७)

शर्करेव शार्करम् ।

२०६३ । अङ्गुल्यादिभ्यष्ठक् । (५-३-१०८)

आङ्गुलीव अङ्गुलिकः । भरूजेव । भारूजिकः ।

२०६४ । एकशालायाष्ठजन्यतरस्याम् । (५-३-१०९)

तथाहि काकागमनमिव ताळपतनमिव काकताळमिति समासस्य विग्रहः । अत्र काकशब्दः काकागमनसदृशे देवदत्तागमने लाक्षणिकः । ताळशब्दस्तु ताळपतनसदृशे चोरागमने लाक्षणिकः । काकागमनसदृशन्देवदत्तागमनन्ताळपतनसदृशश्चोरागमनमिति च काकताळमिति समासाद्बोधः । यद्यप्यत्र काकताळशब्दयोः मिळितयोरेकत्रान्वयाभावात् द्वन्द्वसमासो न संभवति । परस्परान्वयाभावेन असामर्थ्याच्च । तथापि अस्मादेव विधिबलात् 'सुप्सुपा' इति समासः । तथाच काकतालसमागमसदृशो देवदत्तचोरसमागम इति समासार्थः । तदाह । **इह काकताळसमागमसदृशश्चोरसमागम इति समासार्थ इति** ॥ अत्र चोरसमागम इत्यस्य चोरेण देवदत्तस्य समागम इत्यर्थः । तदेवंविधात्समासात् काकताळशब्दादिवान्तार्थे सादृश्यान्तरे छप्रत्ययः । तत्र समासात्मककाकताळशब्दभूतप्रकृत्यर्थरूपकाकताळसमागमसदृशदेवदत्तचोरसमागमे उपस्थिते सति ताळपतनकृतकाकमरणे उपस्थिते उपमानत्वं देवदत्तवधे चोरागमनकृते उपमेयत्वञ्च छप्रत्ययेन गम्यते । ततश्च तादृशचोरसमागमे सति ताळपतनकृतकाकमरणसदृशो देवदत्तस्य चोरकृतो वध इति छप्रत्ययेन लभ्यते । तदाह । **तत्प्रयुक्तः इति** ॥ तादृशताळपतनप्रयुक्तेत्यर्थः । सदृश इत्यनन्तरन्देवदत्तवध इति शेषः । तथा च काकताळसमागमसदृशो देवदत्तचोरसमागमः, तद्धेतुकस्ताळपतनकृतकाकमरणसदृशश्चोरकृतो देवदत्तवध इत्येव काकताळीयो देवदत्तवध इति समासाद्बोधः । एतदेवाभिप्रेत्योक्तं भाष्ये "काकागमनमिव ताळपतनमिव काकताळम् । काकताळमिव काकताळीयम्" इति । अत्र काकताळमिति इवार्थगर्भितकेवलद्वन्द्वात् न भवति इवान्तरार्थस्य सादृश्यान्तरार्थस्याप्रतीतेरित्यलम् । **अजाकृपाणीयः इति** ॥ अजागमनमिव कृपाणपतनमिव अजाकृपाणम्, तदिव अजाकृपाणीयः । अजाकृपाणसमागमसदृशो देवदत्तचोरसमागमः समासार्थः । कृपाणपतनप्रयुक्ताजामरणसदृशो देवदत्तवधश्चोरकृतः प्रत्ययार्थः । अत्र सर्वत्र अतर्कितोपनतत्वं साधारणो धर्म इत्याह । **अतर्कितेति** ॥ **शर्करादिभ्योऽण्** ॥ इव इत्येव । **शार्करमिति** ॥ 'स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते' इति विशेष्यनिघ्नतेति भावः । **अंगुल्यादिभ्यष्ठक्** ॥ इवेत्येव । **अंगुळीवेति** ॥ अङ्गुलिशब्दात् 'कृदिकारादक्तिनः' इति ङीष् । **आंगुळिक इति** ॥ पूर्ववद्विशेष्यनिघ्नता । **भरूजेवेति । भारूजिक इति** ॥ पूर्ववद्विशेष्यनिघ्नता । **एकशालायाः** ॥ **पक्षे ठगिति** ॥ अन्यतरस्याङ्ग्रहणम् अनन्तरठकः समुच्चयार्थमिति

एकशालाशब्दादिवार्थे ठञ्वा। पक्षे ठक्। एकशालेव एकशालिकः—ऐकशालिकः।

२०६५। कर्कलोहितादीकक्। ५-३-११०)

कर्कः शुक्लोऽश्वः। स इव कार्कीकः। लौहितीकः स्फटिकः।

२०६६। पूगाञ्ञ्योऽग्रामणीपूर्वात्। (५-३-११२)

इवार्थो निवृत्तः। नानाजातीयाः अनियतवृत्तयोऽर्थकामप्रधानाः सङ्घाः पूगाः। तद्वाचकात्स्वार्थे ञ्यः स्यात्। लौहितध्वज्यः। 'व्रातच्फञोरस्त्रियाम्' (सू ११००)। व्रातः। कापोतपाक्यः। च्फञ्। कौञ्जायन्यः। ब्राध्नायन्यः।

२०६७। आयुधजीविसङ्घाञ्ञ्यङ् बाहीकेष्वब्राह्मण-राजन्यात्। (५-३-११४)

बाहीकेषु य आयुधजीविसङ्घस्तद्वाचिनः स्वार्थे ञ्यट्। क्षौद्रक्यः। मालव्यः। टित्त्वान्ङीप्। क्षौद्रकी। 'आयुध—' इति किम्। मल्लाः। 'सङ्घ—' इति किम्। सम्राट्। 'बाहीकेषु' किम्। शबराः। 'अब्राह्मण—' इति किम्। गोपालवाः। सालङ्कायनाः। ब्राह्मणे तद्विशेषग्रहणम्। राजन्ये स्वरूपग्रहणम्।

भावः। ठञ्वेत्येव सुवचम्। **कर्कलोहितादीकक्॥ कर्कः शुक्लोऽश्वः इति॥** अश्वपर्यायेषु "सितः कर्कः" इत्यमरः। **लौहितीकः स्फटिक इति॥** जपापुष्पादिसम्पर्कवशाल्लोहित इत्येवेत्यर्थः। **पूगाञ्ञ्यः॥ इवार्थो निवृत्त इति॥** व्याख्यानादिति भावः। **अनियत-वृत्तय इति॥** उद्वृत्ता इत्यर्थः। **तद्वाचकादिति॥** पूगेति न स्वरूपग्रहणम्। व्याख्यानात्। ग्रामणीवाचकपूर्वावयवकभिन्नात् पूगवाचकादित्यर्थः। **लौहितध्वज्यः इति॥** लोहिताः ध्वजाः यस्य पूगस्य स एव लौहितध्वज्यः। **व्रातच्फञोरस्त्रियामिति॥** इदं सूत्रं 'गोत्रे कुञ्जादिभ्यः' इत्यत्र प्रसङ्गादुपादाय व्याख्यातम्। **व्रातः इति॥** उदाहरणसूचनमिदम्। भारोद्वहनादिशरीरायासजीवनात् नानाजातीयानामनियतवृत्तीनां सङ्घो व्रातः। **कापोतपाक्य इति॥** कपोतान् पक्षिविशेषान् भक्षणाय पचतीति कपोतपाकः। स एव कापोतपाक्यः। पचेः कर्मणि घञ्, 'चजोः कुघिण्ण्यतोः' इति कुत्वम्। **च्फञ्रिति॥** उदाहरणसूचनमिदम्। **कौञ्जायन्य इति॥** 'गोत्रे कुञ्जादिभ्यः' इति च्फञ्। आयन्नादेशः। ततः स्वार्थे अनेन ञ्यः। एवं ब्राध्नायन्यः। **आयुधजीवि॥ बाहीकेष्विति॥** बाहीकाख्यग्रामविशेषेष्वित्यर्थः। **क्षौद्रक्य इति॥** क्षुद्रको नाम कश्चिदायुधजीविनाम्बाहीकदेशवासिनां सङ्घः। स एव क्षौद्रक्यः। **मालव्य इति॥** मालवो नाम कश्चिद्बाहीकेषु आयुधजीविनां सङ्घः। स एव मालव्यः। **टित्त्वात् ङीबिति॥** एवम् अस्त्रियामिति नात्र सम्बध्यते इति भावः। **तद्विशेषेति॥**

२०६८ । वृकाट्टेण्यण् । (५-३-११५)

आयुधजीविसङ्घवाचकात्स्वार्थे । वार्केण्यः । 'आयुध—' इति किम् । जातिशब्दान्मा भूत् ।

२०६९ । दामन्यादित्रिगर्तषष्ठाच्छः । (५-३-११६)

दामन्यादिभ्यस्त्रिगर्तषष्ठेभ्यश्चायुधजीविसङ्घवाचिभ्यः स्वार्थे छः स्यात् । त्रिगर्तः षष्ठो वर्गो येषां ते त्रिगर्तषष्ठाः ।

'आहुस्त्रिगर्तषष्ठांस्तु कौण्डोपरथदाण्डकी ।
क्रौष्टुकिर्जालमानिश्च ब्राह्मगुप्तोऽथ जालकिः ॥'

दामनीयः । दामनीयौ । दामनयः । औलपि, औलपीयः । त्रिगर्त, कौण्डोपरथीयः । दाण्डकीयः ।

२०७० । पर्श्वादियौधेयादिभ्योऽणञौ । (५-३-११७)

आयुधजीविसङ्घवाचिभ्यः एभ्यः क्रमादणञौ स्तः स्वार्थे । पार्शवः । पार्शवौ । पर्शवः । यौधेयः । यौधेयौ । यौधेयाः ।

व्याख्यानादिति भावः । **वृकाट्टेण्यण्** ॥ वृको नाम कश्चिदायुधजीविसङ्घः । स एव वार्केण्यः । आदिवृद्धिः । रपरत्वम् । **जातिविशेषादिति** ॥ वृको नाम कश्चिन्मनुष्यखादी चतुष्पाज्जातिविशेषः प्रसिद्धः । तस्मान्नेत्यर्थः । **दामन्यादि** ॥ दामनिः आदिर्यस्य दामन्यादिः । त्रिगर्तः षष्ठो यस्य वर्गस्य सः त्रिगर्तषष्ठः । दामन्यादिश्च त्रिगर्तषष्ठश्चेति समाहारद्वन्द्वात्पञ्चमी । फलितमाह । **दामन्यादिभ्यस्त्रिगर्तषष्ठेभ्यश्चेति** ॥ आयुधजीविनां हि षड्वर्गाः, तत्र षष्ठस्त्रिगर्तः वर्गः, तेभ्यः षड्वर्गेभ्यः इति यावत् । के ते त्रिगर्तषष्ठा इत्यत आह । **आहुरिति** ॥ कौण्डोपरथः, दाण्डकिः, क्रौष्टुकिः, जालमानिः, ब्राह्मगुप्तः, जालकिः, इत्येतान् त्रिगर्तषष्ठान् आहुरित्यर्थः । जालकिरिति त्रिगर्तस्य नामान्तरम् । एतेषु षट्सु कौण्डोपरथब्राह्मगुप्तशब्दौ शिवाद्यणन्तौ । शेषः इञन्तः । दामादिगणम् उदाहरति । **दामनीय इति** ॥ दामनिरेव दामनीयः । **औलपीति** ॥ प्रकृतिप्रदर्शना । **औलपीय इति** ॥ औलपिशब्दात् स्वार्थे छः । **त्रिगर्तेति** ॥ त्रिगर्तषष्ठानामुदाहरणसूचनमिदम् । **कौण्डोपरथीय इति** ॥ कौण्डोपरथशब्दात्स्वार्थे छः । **दाण्डकीय इति** ॥ दाण्डकिशब्दात् स्वार्थे छः । क्रौष्टुकीयः, जालमानीयः, ब्राह्मगुप्तीयः, जालकीयः, इत्यप्युदाहार्यम् । **पर्श्वादियौधेयादि** ॥ **एभ्य इति** ॥ पर्श्वादिभ्यो यौधेयादिभ्यश्चेत्यर्थः । **पार्शव इति** ॥ पर्शुशब्दाज्जनपदक्षत्रियविशेषयोर्वाचकादपत्येष्वर्थेषु 'द्व्यञ्मगध' इत्यण् । ततोऽपत्यसंङ्घविवक्षायामनेन अण्णिति भावः । **पार्शवौ । पर्शव इति** ॥ अपत्यसङ्घबहुत्वविवक्षायां प्रकृतस्याणोऽपि तद्राजत्वाल्लुक् । 'ञ्यादयस्तद्राजाः' इति वक्ष्यमाणत्वादिति भावः । **यौधेय इति** ॥ युधाशब्दादपत्येऽर्थे 'द्व्यचः' इति ढक् । तदन्तादपत्यसङ्घविवक्षायामनेन

२०७१। अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छुमदणो यञ्। (५-३-११८)

अभिजिदादिभ्योऽण्णन्तेभ्यः स्वार्थे यञ्स्यात्। अभिजितोऽपत्यमाभिजित्यः। वैदभृत्यः। शालावत्यः। शैखावत्यः। शामीवत्यः। और्णावत्यः। श्रौमत्यः।

२०७२। ञ्यादयस्तद्राजाः। (५-३-११९)

'पूगाञ्ञ्यः—' (सू २०६६) इत्यारभ्य उक्ता एतत्संज्ञाः स्युः। तेनास्त्रियां बहुषु लुक्। लोहितध्वजाः। कपोतपाकाः। कौञ्जायनाः। ब्रध्नायनाः, इत्यादि।

अञ्। ञित्स्वरः आद्युदात्तत्वफलः। **यौधेया इति** ॥ अपत्यसङ्घबहुत्वविवक्षायाम् 'तद्राजस्य' इत्यञो लुक्। 'कितः, तद्धितस्य' इत्यन्तोदात्तं फलम्। **अभिजिद्विदभृत्** ॥ अभिजित्, विदभृत्, शालावत्, शिखावत्, शमीवत्, ऊर्णावत्, श्रुमत्, एषां समाहारद्वन्द्वात् पञ्चम्याः लुक्। अण इति प्रत्ययत्वात् तदन्तग्रहणम्। तदाह। **अभिजिदादिभ्य इति** ॥ अत्र 'आयुधजीविसङ्घादिति निमित्तम्' इति वृत्तिः। **आभिजित्य इति** ॥ अभिजितोऽपत्यं आभिजितः। अपत्येऽण्। आभिजित एव आभिजित्यः। **वैदभृत्य इति** ॥ विदभृतोऽपत्यं वैदभृतः। स एव वैदभृत्यः। **शालावत्य इति** ॥ शालावतोऽपत्यं शालावतः, स एव शालावत्यः। **शैखावत्य इति** ॥ शिखावतोऽपत्यं शैखावतः, स एव शैखावत्यः। **शामीवत्य इति** ॥ शमीवतोऽपत्यं शामीवतः, स एव शामीवत्यः। **और्णावत्य इति** ॥ ऊर्णावतोऽपत्यमौर्णावतः, स एव और्णावत्यः। **श्रौमत्य इति** ॥ श्रुमतोऽपत्यं श्रौमतः, स एव श्रौमत्यः। अत्र अभिजिदित्यादिशब्देषु यञः स्वार्थिकतया गोत्रार्थकत्वादाभिजितस्यायामिति विग्रहे 'गोत्रचरणात्' इति वुञि 'आपत्यस्य च' इति यलोपे आभिजितक इति भवति। "अपत्याणन्तेभ्य एवायं यञ्। तेन आभिजितो मुहूर्त इत्यादौ न यञ्" इति भाष्ये स्पष्टम्। **ञ्यादयस्तद्राजाः** ॥ **लोहितध्वजा इति** ॥ 'पूगात्' इति विहितस्य ञ्यस्य तद्राजत्वात् बहुत्वे लुक्। **कपोतपाकाः, कौञ्जायनाः, ब्रध्नायनाः इति** ॥ 'व्रातच्फञोः' इति विहितस्य ञ्यस्य लुक्। **इत्यादीति** ॥ क्षौद्रक्यः, क्षौद्रक्यौ, क्षुद्रकाः। आयुधजीवीति ञ्यटो लुक्। वार्केण्यः, वार्केण्यौ, वृकाः। वृकाट्टेण्यणो लुक्। दामनीयः, दामनीयौ, दामनयः। कौण्डोपरथाः इत्यादौ 'दामन्यादित्रिगर्तषष्ठात्' इति छस्य लुक्। पार्शवः, पार्शवौ, पर्शवः। यौधेयाः इत्यत्र पर्श्वादियौधेयाद्यणञोर्लुक्। आभिजित्यः, आभिजित्यौ, अभिजितः। विदभृतः इत्यादौ अभिजिद्विदभृदित्यादिविहितस्य यञो लुगिति भावः ॥

इति तद्धिते पञ्चमाध्यायस्य तृतीयपादः समाप्तः।

२०७३ । पादशतस्य सङ्ख्यादेर्वीप्सायां वुन्लोपश्च । (५-४-१)

लोपवचनमनैमित्तिकत्वार्थम् । अतो न स्थानिवत् । 'पादः पत्' (सू ४१४) । 'तद्धितार्थ—' (सू ७२८) इति समासे कृते प्रत्ययः । वुन्नयं स्त्रियामेव । द्वौ द्वौ पादौ ददाति द्विपदिकाम् । द्विशतिकाम् । 'पादशतग्रहणमनर्थकम्, अन्यत्रापि दर्शनात्' (वा ३३१४) । द्विमोदकिकाम् ।

२०७४ । दण्डव्यवसर्गयोश्च । (५-४-२)

वुन्स्यात् । अवीप्सार्थमिदम् । द्वौ पादौ दण्डितः, द्विपदिकां, द्विशतिकां व्यवसृजति । ददातीत्यर्थः ।

२०७५ । स्थूलादिभ्यः प्रकारवचने कन् । (५-४-३)

जातीयरोऽपवादः । स्थूलकः । अणुकः । 'चञ्चद्बृहतोरुपसङ्ख्यानम्' (वा ३३१५) । चञ्चत्कः । बृहत्कः । 'सुराया अहौ (ग सू १३०) । सुरावर्णोऽहिः सुरकः ।

अथ पञ्चमाध्यायस्य चतुर्थपादप्रारम्भः—**पादशतस्य सङ्ख्यादेर्वीप्सायां वुन् लोपश्च** ॥ पादश्च शतञ्चेति समाहारद्वन्द्वात् लोपापेक्षया षष्ठी । वुनप्रत्ययापेक्षया तु सा पञ्चम्यर्थे । सङ्ख्यावाचकशब्दपूर्वकात् पादशब्दात् शतशब्दाच्च वीप्साविशिष्टार्थवृत्तेः स्वार्थे वुन्प्रत्ययः स्यात्, प्रकृतेरन्त्यस्य लोपश्चेत्यर्थः । ननु वुनः अकादेशे सति 'यस्येति च' इत्येव लोपसिद्धेरिह लोपविधिर्व्यर्थः इत्यत आह । **लोपवचनमनैमित्तिकत्वार्थमिति** ॥ 'यस्येति च' इति लोपस्य परनिमित्तकतया तस्य 'अचः परस्मिन्' इति स्थानिवत्त्वात् 'पादः पत्' इति पदादेशो न स्यात् । अस्य तु लोपस्य परनिमित्तकत्वाभावेन स्थानिवत्त्वात्प्रसक्तेः पद्भावो निर्बाध इति भावः । **तद्धितार्थ इति** ॥ नच वीप्सायाः प्रकृत्यर्थविशेषणतया वुनोऽर्थाभावात्कथमिह तद्धितार्थ इति समास इति वाच्यम् । वुनो द्योतकतया द्योत्यार्थेनैवार्थवत्त्वात् । **वुन्नयं स्त्रियामेवेति** ॥ स्वभावादिति भावः । **द्विशतिकामिति** ॥ द्वे द्वे शते ददातीति विग्रहः । **पादशतेत्यादि** ॥ वार्तिकमिदम् । अनर्थकमिति कथम् । पादशतभिन्नव्यावृत्त्यर्थत्वादित्यत आह । **अन्यत्रापि दर्शनादिति** ॥ तदुदाहृत्य दर्शयति । **द्विमोदकिकामिति** ॥ द्वौ द्वौ मोदकौ ददातीति विग्रहः । **दण्डव्यवसर्गयोश्च** ॥ **वुन् स्यादिति** ॥ सङ्ख्यादेः पादशतात् दण्डव्यवसर्गयोर्गम्ययोर्वुन् स्यात्प्रकृतेरन्तलोपश्चेत्यर्थः । दण्डनं दण्डः । बलात्कृत्य द्रव्यग्रहणम् । व्यवसर्गो दानम् । ननु पूर्वेण सिद्धे किमर्थमिदमित्यत आह । **अवीप्सार्थमिति** ॥ **द्वौ पादौ दण्डित इति** ॥ बलात्कृत्य ग्राहित इत्यर्थः । **स्थूलादिभ्यः** ॥ प्रकारो भेदः सादृश्यञ्च । व्याख्यानात् । तद्वति वर्तमानाद्यथायोगं कन्नित्यर्थः । **जातीयरोऽपवाद इति** ॥ एतेन अयमपि तद्वदेव प्रकारवति भवति । नतु प्रकारमात्रे इति सूचितम् । **चञ्चत्क इति** ॥ चञ्चधातुश्चलने

२०७६। अनत्यन्तगतौ क्तात्। (५-४-४)

छिन्नकम्। भिन्नकम्। अभिन्नकम्।

२०७७। न सामिवचने। (५-४-५)

सामिपर्याये उपपदे क्तान्तान्न कन्। सामिकृतम्। अर्धकृतम्। अनत्यन्तगतेरिह प्रकृत्यैवाभिधानात्पूर्वेण कन्न प्राप्तः। इदमेव निषेधसूत्रमत्यन्तस्वार्थिकमपि कनं ज्ञापयति। बहुतरकम्।

२०७८। बृहत्या आच्छादने। (५-४-६)

कन्स्यात्। 'द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथा' इत्यमरः। 'आच्छादने' किम्। बृहती छन्दः।

२०७९। अषडक्षाशितङ्ग्वलङ्कर्मालम्पुरुषाध्युत्तरपदात्खः। (५-४-७)

स्वार्थे। अषडक्षीणो मन्त्रः। द्वाभ्यामेव कृत इत्यर्थः। आशिता गावोऽस्मिन्निति आशितङ्गवीनमरण्यम्। निपातनात्पूर्वस्य मुम्। अलं कर्मणे

अचच्चन्नपि यश्चच्चन्निव दृश्यते स चच्चत्कः। यथा स्पन्दमानस्वच्छजलमध्यवर्ती मणिः। **बृहत्क इति** ॥ अबृहन्नपि बृहन्निव दृश्यते स बृहत्कः। बृहदाख्यसामविशेषो वा। **सुराया अहाविति** ॥ गणसूत्रमिदम्। प्रकारवचने कन्निति शेषः। सर्पः अहावेवेति नियमार्थमिदम्। **सुरक इति** ॥ 'केऽणः' इति ह्रस्वः। **अनत्यन्तगतौ क्तात्** ॥ अत्यन्तगतिः अशेषावयवसम्बन्धः, तदभावः अनत्यन्तगतिः, तस्याङ्गम्यमानायां क्तान्तात्कन्नित्यर्थः। **छिन्नकमिति** ॥ किञ्चिदवयवावच्छेदेन छिन्नमित्यर्थः। **न सामिवचने** ॥ वचनग्रहणं पर्यायलाभार्थमिति मत्वा आह। **सामिपर्याये उपपदे इति** ॥ **सामिकृतमिति** ॥ सामीत्यव्ययमर्धे। 'सामि' इति समासः। **अर्धकृतमिति** ॥ अर्धङ्कृतमिति कर्मधारयः। सामीत्यस्य क्रियाविशेषणत्वेन कारकत्वात् समुदायस्य क्तान्तत्वम्। कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणात्। नन्विह अनत्यन्तगतेः प्रकृत्यैवाभिहितत्वात् 'उक्तार्थानामप्रयोगः' इति न्यायेन पूर्वसूत्रविहितस्य कनः अप्रसक्तेरिह तन्निषेधो व्यर्थ इति शङ्कते। **अनत्यन्तगतेरिति** ॥ परिहरति। **इदमेवेति** ॥ तथापीति पूर्वमध्याहार्यम्। **ज्ञापयतीति** ॥ न ह्ययमनत्यन्तगताविति कनः प्रतिषेधः। किन्तर्हि, अत्यन्तस्वार्थिकस्य कनः। तत्र च इदमेव ज्ञापकम्। अन्यथा तद्वैयर्थ्यादिति भावः। **बहुतरकमिति** ॥ बहुतरमेव बहुतरकम्। भाष्ये तु इदं सूत्रं प्रत्याख्यातम्। 'तमबाद्यन्तात् स्वार्थे कन् वक्तव्यः' इति वचनेन यावादित्वाद्वा स्वार्थे कना बहुतरकं सुतरकमित्यादि सिद्धमिति तदाशयः। **बृहत्या आच्छादने** ॥ कन् इति शेषः। बृहत्येव बृहतिका। उत्तरीयं वासः। तदाह। **द्वौ प्रावारोति** ॥ अमरवाक्यमिदम्। **अषडक्ष** ॥ **स्वार्थे इति** ॥ शेषपूरणमिदम्। अषडक्ष,

अलङ्कर्मीणः । **अलम्पुरुषीणः** । **ईश्वराधीनः** । **नित्योऽयं खः** । **उत्तरसूत्रे विभाषाग्रहणात्** । **'अन्येऽपि केचित्स्वार्थिकाः प्रत्यया: नित्यमिष्यन्ते'** । **'तमबादयः प्राक्तनः** । **क्यादयः प्राग्वुनः** । **आमादयः प्राङ्मयटः** । **बृहतीजात्यन्ताः समासान्ताश्च'** इति भाष्यम् ।

२०८० । विभाषाञ्चेरदिक्स्त्रियाम् । (५-४-८)

आशितङ्, अलङ्कर्मन्, अलम्पुरुष एभ्यः अध्युत्तरपदाच्च स्वार्थे खः स्यादित्यर्थः । **अषड-क्षीणो मन्त्र इति** ॥ मन्त्रणं मन्त्रः । रहसि राजतदमात्यादिभिः युक्तिभिः क्रियमाणं निर्धारणम् । अविद्यमानानि षट् अक्षीणि श्रोत्रेन्द्रियाणि यस्मिन्निति बहुव्रीहिः । 'बहुव्रीहौ सक्थ्यक्ष्णोः' इति पच् । तदन्तादनेन स्वार्थे खः । **द्वाभ्यामेवेति** ॥ पुरुषाभ्यामिति शेषः । **आशिताः इति** ॥ 'अश भोजने' इत्यस्मादाशितः कर्तेति ज्ञापकात्कर्तरि क्तः । **पूर्वस्य मुमिति** ॥ आशितशब्दस्येत्यर्थः । **अलङ्कर्मीण इति** ॥ 'पर्यादयो ग्लानाद्यर्थे' इति चतुर्थी-समासात्खः, टिलोपः । **अलम्पुरुषीण इति** ॥ अलम्पुरुषायेति विग्रहः । मातृभोगीण इत्यादाविव अषडक्षीणादौ णत्वम् । 'पदव्यवायेऽपि' इति निषेधस्तु न । पदव्यवाये इत्याश्रय-णात् । **ईश्वराधीन इति** ॥ 'यस्मादधिकम्' इति ईश्वरशब्दान्समग्रमी । शौण्डादित्वादधिशब्देन समासः । ततः स्वार्थे खः । 'समर्थानाम्' इत्यतो वाग्रहणानुवृत्त्या अस्य खस्य वैकल्पिकत्वभ्रमं वारयति । **नित्योऽयङ्** इति ॥ **उत्तरेति** ॥ 'विभाषाञ्चेः' इत्युत्तरसूत्रे 'समर्थानाम्' इत्यतो वाग्रहणानुवृत्त्यैव सिद्धे विभाषाग्रहणादिह पूर्वसूत्रे वाग्रहणानुवृत्त्यभावो ज्ञाप्यत इत्यर्थः । नचैवं सति आशिताः गावोऽस्मिन्निति अलङ्कर्मीणः इति च विग्रहप्रदर्शनमनुपपन्नमिति वाच्यम् । तस्य खप्रत्ययप्रकृतिकथनार्थत्वेन अलौकिकविग्रहवाक्यप्रायत्वात् । प्रसङ्गादाह । **अन्येऽपीति** ॥ **इष्यन्ते इति** ॥ भाष्यकृतेति शेषः । **तमबादयः प्राक्तन इति** ॥ 'अतिशायने तमप्' इत्यारभ्य 'अवक्षेपणे कन्' इत्यतः प्राग्विहिताः प्रत्यया इत्यर्थः । **क्यादयः प्राग्वुन इति** ॥ 'पूगाञ्ञ्योऽग्रामणीपूर्वात्' इत्यारभ्य 'पादशतस्य संख्यादेर्वीप्सायां वुन्' इत्यतः प्राग्विहिताः प्रत्यया इत्यर्थः । **आमादयः प्राङ्मयट इति** ॥ 'किमेत्तिङव्ययघादाम्' इत्यारभ्य 'तत्प्रकृतवचने मयट्' इत्यतः प्राग्विहिता इत्यर्थः । **बृहतीजात्यन्ता इति** ॥ बृहतीशब्देन 'बृहत्या आच्छादने' इति कन् लक्ष्यते । जात्यन्तशब्देन तु 'जात्यन्ताच्छ बन्धुनि' इति छो लक्ष्यते । बहुवचननिर्देशात् पाशबादयोऽपि 'षष्ठ्या रूप्य च' इत्यन्ताः गृह्यन्ते इति कैयटः । वस्तुतस्तु परिगणिता एव नित्याः, ननु पाशबादयोऽपि । बृहतीजात्यन्ताः इति बहु-वचनन्तु 'बृहत्या आच्छादने' इति 'जात्यन्ताच्छ बन्धुनि' इति च सूत्रयोर्मध्यगतेन 'अषडक्ष' इति सूत्रेण विहितङप्रत्ययमभिप्रेत्येति न दोषः । 'विभाषाञ्चेः' इति उत्तरसूत्रे खविधौ विभाषाग्रहणन्तु तस्यापि बृहतीजात्यन्तरालवर्तित्वाविशेषात् नित्यत्वे प्राप्ते विकल्पार्थम् । अनित्योऽयङ्ः । उत्तरसूत्रेषु विभाषाग्रहणादिति मूलन्तु अभ्युच्चययुक्तिः इति शब्देन्दुशेखरे स्थितम् । **विभाषाञ्चेरदिक्स्त्रियाम्** ॥ अदिक्स्त्रियामिति कर्मधारयगर्भो नञ्तत्पुरुषः ।

अदिक्स्त्रीवृत्तेरञ्चत्यन्तात्प्रातिपदिकात्खः स्याद्वा स्वार्थे। प्राक्—प्राचीनम्। प्रत्यक्—प्रतीचीनम्। अवाक्—अवाचीनम्। 'निकृष्टप्रतिकृष्टावरेफयाप्यावमाधमाः' इत्यमरः। अर्वन्तमञ्चतीति अर्वाक्—अर्वाचीनम्। 'अदिक्स्त्रियाम्' किम्। प्राची दिक्। उदीची दिक्। 'दिग्ग्रहणम्' किम्। प्राचीना ब्राह्मणी। 'स्त्रीग्रहणम्' किम्। प्राचीनं ग्रामादाम्राः।

२०८१। जात्यन्ताच्छ बन्धुनि। (५-४-९)

ब्राह्मणजातीयः। 'बन्धुनि' किम्। ब्राह्मणजातिः शोभना। जातेर्व्यञ्जकं द्रव्यं बन्धु।

२०८२। स्थानान्ताद्विभाषा सस्थानेनेति चेत्। (५-४-१०)

सस्थानेन तुल्येन चेत्स्थानान्तमर्थवदित्यर्थः। पित्रा तुल्यः पितृस्थानीयः—पितृस्थानः। 'सस्थानेन' किम्। गोः स्थानम्।

तदाह। **अदिक्स्त्रीवृत्तेरिति** ॥ **प्रागिति** ॥ अञ्चेर्लुकि लुप्तास्तात्यन्तमिदम्। प्राचि देशे इत्यर्थे प्राचीनमिति खान्तमिदं स्वभावादाधेयपरम्। स्वभावादेव सामान्ये नपुंसकमेकवचनान्तञ्च। इदन्तु पदसंस्कारपक्षे। वाक्यसंस्कारपक्षे तु प्रागादिशब्देभ्यः समभिव्याहृतदेशकालस्थवृक्षादिबोधकेभ्यः खः। तत्र उपस्थितविशेष्यलिङ्गत्यागे मानाभावात् प्राचीना आम्राः, प्राचीना वाटी, प्राचीनं वनमिति भवतीत्याहुः। अर्वन्तमञ्चतीति वक्ष्यन् अर्वच्छब्दं विवृणोति। **निकृष्टेति** ॥ अमरवाक्यमिदम्। **प्राची दिगिति** ॥ लिङ्गविशिष्टपरिभाषया प्राप्तिः। **दिग्ग्रहणङ्किमिति** ॥ अस्त्रियामित्येतावतैव प्राची दिगित्यत्रातिप्रसङ्गनिरासात्किन्तेनेति प्रश्नः। अव्याप्तिपरिहारार्थमित्याह। **प्राचीना ब्राह्मणीति** ॥ नेयं दिग्रूपा स्त्री। किन्तु तद्विन्ना स्त्रीति खो भवत्येवेति भावः। **स्त्रीग्रहणङ्किमिति** ॥ अदिशीत्येतावतैव प्राचीना ब्राह्मणीत्यत्राव्याप्तिनिरासात्प्रश्नः। इदमप्यव्याप्तिपरिहारार्थमित्याह। **प्राचीनं ग्रामादाम्राः इति** ॥ स्थानिवत्सूत्रभाष्ये अयं प्रयोगः स्थितः। अत्र प्राच्यान्दिशीत्यर्थे लुप्तास्तात्यन्ता प्रागिति प्रकृतिः। स च अव्ययत्वात् अस्त्रीति खो भवत्येवेति भावः। **जात्यन्ताच्छ बन्धुनि** ॥ छेति लुप्तप्रथमाकम्। जातिशब्दान्तात् प्रातिपदिकाद्बन्धुनि वर्तमानात् स्वार्थे छप्रत्ययः स्यादित्यर्थः। बन्धुशब्दो द्रव्यवाचीति वक्ष्यति। तथाच बन्धुनि वर्तमानादित्यनेन जात्याश्रयद्रव्यलक्षकादिति फलितम्। **ब्राह्मणजातीय इति** ॥ ब्राह्मणत्वजात्याश्रयोव्यक्तिविशेष इत्यर्थः। **ब्राह्मणजातिः शोभनेति** ॥ ब्राह्मणत्वजातिरित्यर्थः। बध्यते ब्राह्मणत्वादिजातिर्व्यज्यतेऽस्मिन्निति बन्धु द्रव्यम्। 'शृस्वृस्निहि' इत्यादिना अधिकरणे उप्रत्ययः। तदाह। **जातेर्व्यञ्जकं द्रव्यं बन्धिवति** ॥ आप्तपर्यायस्तु बन्धुशब्दो नेह गृह्यते। बन्धुनीति नपुंसकनिर्देशादिति भावः। **स्थानान्तात्** ॥ सस्थानेनेत्यस्य विवरणं तुल्येनेति। इतिशब्दादर्थवदिति लभ्यते। तुल्यरूपेणार्थेन यदि स्थानान्तं शब्दस्वरूपमर्थवद्भवति, तदा स्थानान्तात् छो वा स्यादित्यर्थः। तुल्यरूपार्थे वर्तमानात् स्थानान्तात् छो वा स्यादिति यावत्। **पितृस्थानीय**

२०८३ । अनुगादिनष्ठक् । (५-४-१३)

अनुगदतीत्यनुगादी । स एव आनुगादिकः ।

२०८४ । विसारिणो मत्स्ये । (५-४-१६)

अण्स्यात् । वैसारिणः । 'मत्स्ये' इति किम् । विसारी देवदत्तः ।

२०८५ । सङ्ख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् । (५-४-१७)

अभ्यावृत्तिर्जन्म । क्रियाजन्मगणनवृत्तेः सङ्ख्याशब्दात्स्वार्थे कृत्वसुच्स्यात् । पञ्चकृत्वो भुङ्क्ते । 'सङ्ख्यायाः' किम् । भूरिवारान्भुङ्क्ते ।

२०८६ । द्वित्रिचतुर्भ्यः सुच् । (५-४-१८)

कृत्वसुचोऽपवादः । द्विर्भुङ्क्ते । त्रिः 'रात्सस्य' (सू २८०) । चतुः ।

इति ॥ स्थानं पूज्यत्वादिपदम् । पितृस्थानमिव स्थानं यस्येति बहुव्रीहिः । पितृनिष्ठपूज्यत्वादितुल्यपूज्यत्वादिमानित्यर्थः । **गोः स्थानमिति** ॥ गवां निवास इत्यर्थः । अत्र तुल्यत्वाप्रतीतेर्न च्छः । 'किमेत्तिङव्यय' इत्युत्तरसूत्रम्प्रसङ्गात्पूर्वमेव व्याख्यानम् । 'अमु च च्छन्दसि' इति तु वैदिकप्रक्रियायां व्याख्यास्यते । **अनुगादिनष्ठक्** ॥ स्वार्थे इति शेषः 'आमादयः प्राङ्ख्यटः' इत्युक्तेः ठगादयो नित्या एव प्रत्ययाः । **अनुगादीति** ॥ 'सुप्यजातौ' इति णिनिः । प्रकृतिदर्शनमिदम् । ठकोनित्यत्वान्स एवात्यम्वपदविग्रहपददर्शनम् । **अनुगादिक इति** ॥ 'नस्तद्धिते' इति टिलोपः । इह क्रमेण च 'स्त्रियाम्' इति 'अणिनुणः' इति च सूत्रद्वयम्पठितं कृदधिकारे व्याख्यास्यते । **विसारिणो मत्स्ये** ॥ 'अणिनुणः' इति पूर्वसूत्रात् अण्णिन्यनुवर्तते । तदाह । **अण् स्यादिति** ॥ मत्स्ये विद्यमानात् विसारिनशब्दात् स्वार्थे अण् स्यादित्यर्थः । **वैसारिणः इति** ॥ 'इनण्यनपत्ये' इति प्रकृतिभावाट्टिलोपो न । **सङ्ख्यायाः** ॥ अभ्यावृत्तिशब्देन यदि द्वितीयादिप्रवृत्तिर्गृह्येत, तदा चतुर्वारम्पाकप्रवृत्तौ द्विः पचतीति स्यादित्यत आह । **अभ्यावृत्तिर्जन्मेति** ॥ उपसर्गवशात् 'वृतु वर्तने' इति धातोरुत्पन्नो वृत्तिरिति भावः । कृत्वसुचि चकार इत् । उकार उच्चारणार्थः । 'तद्धितश्चासर्वविभक्तिः' इत्यत्र तसिलादिषु परिग्रहणात् कृत्वोऽर्थानामव्ययत्वम् । **पञ्चकृत्वो भुङ्क्ते इति** ॥ पञ्चत्वसङ्ख्याकोत्पत्तिविशिष्टा भोजनक्रियेत्यर्थः । **सङ्ख्यायाः किमिति** ॥ गणने वृत्तिः सङ्ख्याशब्दानामेवेति प्रश्नः । **भूरिवारान् भुङ्क्ते इति** ॥ भूरिशब्दो बहुशब्दपर्यायः । वारशब्दस्तु वस्तुतः समभिव्याहृतक्रियापर्याप्ते काले वर्तते । 'कालाध्वनोरत्यन्तसंयोगे द्वितीया' इति द्वितीया । बहुकालेषु कात्स्न्र्येन व्याप्ता भोजनक्रियेत्यर्थः । भोजनबहुत्वं त्वर्थाद्गम्यते । तथा च वारशब्दोऽयं न गणनवाची । भूरिशब्दोऽपि न सङ्ख्याशब्देन गृह्यते । 'बहुगणवतुडति सङ्ख्या' इत्यत्र बहुग्रहणे तत्पर्यायस्य असङ्ख्यात्वबोधनात् । अतोऽत्र न कृत्वसुच् । **द्वित्रिचतुर्भ्यः** ॥ क्रियाभ्यावृत्तिगणने इत्येव । सुचि चकार इत् । उकार उच्चारणार्थः । पूर्ववदव्ययत्वम् । **त्रिरिति** ॥ भुङ्क्ते इत्यनुषज्यते । **रादिति** ॥ चतुरशब्दात् सुचि चतुरस् इति स्थिते 'रात्सस्य'

२०८७। एकस्य सकृच्च। (५-४-१९)

सकृदित्यादेशः स्यात्, चात्सुच्। सकृद्भुङ्क्ते। 'संयोगान्तस्य—' (सू ५४) इति सुचो लोपः। न तु 'हल्ङ्याप्—' (सू २५२) इति। अभैत्सीदित्यत्र सिच इव सुचोऽपि तदयोगात्।

२०८८। विभाषा बहोर्धाऽविप्रकृष्टकाले। (५-४-२०)

अविप्रकृष्ट आसन्नः। बहुधा बहुकृत्वो वा दिवसस्य भुङ्क्ते। 'आसन्नकाले' किम्। बहुकृत्वो मासस्य भुङ्क्ते।

२०८९। तत्प्रकृतवचने मयट्। (५-४-२१)

प्राचुर्येण प्रस्तुतं प्रकृतं, तस्य वचनं प्रतिपादनम्। भावेऽधिकरणे वा ल्युट्। आद्ये प्रकृतमन्नमन्नमयम्। अपूपमयम्। यवागूमयी। द्वितीयेऽन्नमयो यज्ञः। अपूपमयं पर्व।

इति सकारस्य लोपे चतुरिति रूपमित्यर्थः। अत्र भुङ्क्ते इत्यनुषज्यते। **एकस्य सकृच्च** ॥ शेषपूरणेन सूत्रं व्याचष्टे। **सकृदित्यादेशः स्यादिति। सकृद्भुङ्क्ते इति** ॥ एकशब्दात् सुच्, प्रकृतेः सकृदित्यादेशश्च। अत्र एकशब्दः क्रियाविशेषणम्। एकत्वविशिष्टा भुजिक्रियेत्यर्थः। स्वादु पचति इत्यादिवदेकम्भुङ्क्ते इति प्रयोगे प्राप्ते इदं सूत्रमिति कैयटः। एको भुङ्क्ते इत्यत्र तु नायं विधिः प्रवर्तते। क्रियाग्रहणमनुवर्त्य क्रियाविशेषणस्यैव एकशब्दस्य ग्रहणादित्यास्तां तावत्। ननु 'संयोगान्तस्य' इति सुचो लोप इत्यनुपपन्नम्। 'हल्ङ्याब्भ्यः' इत्येव हि सुलोपोऽत्र युक्तः। तस्मिन् कर्तव्ये संयोगान्तलोपस्य त्रैपादिकस्यासिद्धत्वादित्यत आह। **ननु हल्ङ्याबितीति** ॥ **सिच इवेति** ॥ अभैत्सीदित्यत्र सिचो लोपनिवृत्तये हल्ङ्याबित्यत्र सिग्रहणेन सिचो ग्रहणं, तत्साहचर्यात् सुग्रहणेनाऽपि सुजयन्नगृह्यत इति भावः। **विभाषा बहोर्धाऽविप्रकृष्टकाले** ॥ अविप्रकृष्टकालिकक्रियाजन्मगणनवृत्तेर्बहुशब्दात् धाप्रत्ययो वा स्यात्। पक्षे कृत्वसुच्। **बहुधा बहुकृत्वो वा दिवसस्य भुङ्क्ते इति** ॥ दिवसे प्रातः सञ्जवाद्यव्यवहितकालिकोत्पत्तिविशिष्टा भोजनक्रियेत्यर्थः। 'कृत्वोऽर्थप्रयोगे कालेऽधिकरणे' इति दिवसात्षष्ठीति हरदत्तः। शेषत्वविवक्षायां षष्ठी इति तु नवीनाः। **तत्प्रकृतवचने** ॥ तदिति प्रथमान्तनिर्देशः। **प्राचुर्येणेति** ॥ बहुलतया उपस्थितं प्रकृतशब्देन विवक्षितमित्यर्थः। उपसर्गबलादिति भावः। **प्रतिपादनमिति** ॥ बोधनमित्यर्थः। **भावे इति** ॥ तथाच प्रकृतस्य बोधने सतीत्यर्थः। प्राचुर्यविशेषणकवस्तुप्रवृत्तेः प्रथमान्तात्स्वार्थे मयडिति फलति। अत्र प्राचुर्यविशिष्टं वस्तु प्रकृतेरर्थः। प्रत्ययस्तु तद्द्योतकः। **अधिकरणे वेति** ॥ तथाच प्राचुर्यविशेषणकं यद्वस्तु यस्मिन्नुच्यते तदधिकरणे वाच्ये तादृशवस्तुवृत्तेः शब्दात् मयडिति फलितम्। अत्र पक्षे प्राचुर्यविशिष्टमुच्यमानं वस्तु प्रकृत्यर्थः। तदधिकरणं प्रत्ययार्थः। तन्त्रेणार्थद्वये सूत्रतात्पर्यं, व्याख्यानात्। यद्यप्याद्यपक्षे स्वार्थिकप्रकरणपाठः समञ्जसः, ननु द्वितीयपक्षे। तथापि 'अथ स्वार्थिकाः' इति मूलम्प्रायिकाभिप्रायमिति न दोषः। **आद्ये इति** ॥ भावल्युट्पक्षे इत्यर्थः। **प्रकृतमन्नमन्नमयमिति** ॥

२०९०। समूहवच्च बहुषु। (५-४-२२)

सामूहिकाः प्रत्ययाः अतिदिश्यन्ते, चान्मयट्। मोदकाः प्रकृताः, मौदकिकम्—मोदकमयम्। शाष्कुलिकम्—शष्कुलीमयम्। द्वितीयेऽर्थे मौदकिको यज्ञः—मोदकमयः।

२०९१। अनन्तावसथेतिहभेषजाञ्ञ्यः। (५-४-२३)

अनन्त एव आनन्त्यम्। आवसथः एव आवसथ्यम्। 'इतिह' इति निपातसमुदायः। ऐतिह्यम्। भेषजमेव भैषज्यम्।

२०९२। देवतान्तात्तादर्थ्ये यत्। (५-४-२४)

तदर्थ एव तादर्थ्यम्। स्वार्थे ष्यञ्। अग्निदेवतायै इदमग्निदेवत्यम्। पितृदेवत्यम्।

प्रचुरमन्नमित्यर्थः। स्वार्थिकत्वात्प्रकृतिलिङ्गता। **अपूपमयमिति** ॥ पचुरोऽपूप इत्यर्थः। **यवागूमयीति** ॥ प्रचुरा यवागूरित्यर्थः। ङित्त्वात् ङीषिति भावः। **द्वितीये इति** ॥ अधिकरणल्युट्पक्ष इत्यर्थः। **अन्नमयो यज्ञ इति** ॥ ब्राह्मणे 'दर्शादनाः पशौ ते सोमसहस्रम्' इत्यादिवाक्यैरुच्यमानानि प्राचुर्यविशिष्टान्नानीत्यर्थः। स्वार्थिकत्वेन प्रकृतिलिङ्गत्वाभावाद्विशेष्यनिघ्नता। **अपूपमयं पर्वेति** ॥ पर्वणि अपूपाः कार्या इत्यापूप्यमानापूपाधिकरणं पर्वेत्यर्थः। अस्वार्थिकत्वाद्विशेष्यनिघ्नता। केचित्तु द्वितीयपक्षे वचनशब्दोऽधिकरणल्युडन्तः, प्रकृत्यर्थो न विवक्षित इत्याहुः। तथा सति प्राचुर्यविशिष्टान्नाद्यधिकरणं यज्ञ इत्येव बोधः, ननु उच्यमानत्वस्य बोधः। **समूहवच्च बहुषु** ॥ तत्प्रकृतवचने इत्येव। **सामूहिका इति** ॥ 'तस्य समूहः' इत्यधिकारविहिताः प्रत्यया इत्यर्थः। बहुषु प्राचुर्यविशिष्टेषु वर्तमानाच्छब्दात् स्वार्थे समूहवत्प्रत्ययाः स्युरित्यर्थः। यद्वा बहुत्वविशिष्टानि प्राचुर्यविशिष्टानि वस्तून्यस्मिन्नधिकरणे उच्यन्ते। तदधिकरणे वाच्ये तद्वस्तुवाचिनश्छब्दात् समूहवत्प्रत्ययाः स्युरित्यर्थः। आद्ये उदाहरति। **मोदकाः प्रकृताः मौदकिकमिति** ॥ 'अचित्तहस्तिधेनोः' इति सामूहिकष्ठक्। स्वार्थिकत्वेऽपि प्रकृतिलिङ्गातिक्रमः कुटीरवत्। **शाष्कुलिकमिति** ॥ शष्कुल्यः प्रचुरा इत्यर्थः। पूर्ववदण्। प्रकृतिलिङ्गातिक्रमश्च। **द्वितीयेऽर्थे मौदकिको यज्ञ इति** ॥ मोदका अस्मिन्यज्ञे उच्यन्ते इति विग्रहः। **अनन्तावसथेतिह** ॥ अनन्त, आवसथ, इतिह, भेषज, एभ्यः स्वार्थे ञ्यप्रत्ययः स्यादित्यर्थः। **अनन्त एवेति** ॥ अन्तो नाशः। तस्याभावः अनन्तः। अर्थाभावे नञ्तत्पुरुषः अर्थाभावे अव्ययीभावेन तद्विकल्पस्योक्तत्वात्। **आनन्त्यमिति** ॥ स्वार्थिकत्वात्प्रकृतिलिङ्गव्यतिक्रमः। आवसथो गृहम्। **निपातसमुदायः इति** ॥ स च उपदेशपारम्पर्ये वर्तते। तस्मात्स्वार्थे ञ्यः। "पारंपर्योपदेशः स्यादितिह्यमितिहाव्ययम्" इत्यमरः। **भैषज्यमिति** ॥ भेषजम् औषधम्, तदेव भैषज्यम्। "भेषजौषधभैषज्यानि" इत्यमरः। **देवतान्तात्तादर्थ्ये यत्** ॥ **तदर्थ एवेति** ॥ तच्छब्देन देवतान्तस्यार्थ उच्यते। तस्मै इदन्तदर्थम्। ततः स्वार्थे वर्णादित्वात् ष्यञित्यर्थः। देवतान्तात्प्रातिपदिकात् यत्स्यात्प्रकृत्यर्थार्थे वस्तुनि वाच्ये इत्यर्थः। त्यज्यमानद्रव्ये उद्देश्यविशेषो देवता मन्त्रस्तुत्या चेत्युक्तं 'सास्य देवता' इत्यत्र। अतः पितृदेवत्यं

२०९३। पादार्घाभ्यां च। (५-४-२५)

पादार्थमुदकं पाद्यम्। अर्घ्यम्। नवस्य 'नू' आदेशो ल्यप्तनप्खाश्च प्रत्यया वक्तव्याः। नूल्यम्–नूतनम्–नवीनम्। 'नश्च पुराणे प्रात्' (वा ३३२८)। पुराणार्थे वर्तमानात्प्रशब्दान्नो वक्तव्यः। चात्पूर्वोक्ताः। प्रण्यम्–प्रत्न्यम्–प्रतनम्–प्रीणम्। 'भागरूपनामभ्यो धेयः' (वा ३३३०)। भागधेयम्। रूपधेयम्। नामधेयम्। 'आग्नीध्रसाधारणादञ्' (वा ३३३४)। आग्नीध्रम्। साधारणम्। स्त्रियां ङीप्। आग्नीध्री। साधारणी।

२०९४। अतिथेर्ण्यः। (५-४-२६)

'तादर्थ्ये' इत्येव। अतिथये इदमातिथ्यम्।

२०९५। देवात्तल्। (५-४-२७)

देव एव देवता।

२०९६। अवेः कः। (५-४-२८)

अविरेवाविकः।

रक्षोदेवत्यमित्यादौ नाव्याप्तिः। तदाह। **पितृदेवत्यमिति**॥ देवताशब्दस्य देवाः मनुष्याः पितरः असुरा रक्षांसि पिशाचाः इत्यादि श्रुतिपुराणादिसिद्धजातिविशेषपरत्वे तु अत्राव्याप्तिः स्यादिति भावः। भाष्ये तु पितृदेवत्यमिति न सिध्यतीत्याक्षिप्य दिवेरैश्वर्यकर्मणो देवः। तस्मात्स्वार्थे तलिति समाहितम्। हविः प्रति पित्रादीनामीश्वरत्वं स्वामित्वम्। हविस्तु यजमानस्य स्वम्। तच्च यजमाने अग्नयादुद्देशेन त्यक्तत्वेदेवाग्न्यादिस्वामिकं भवितुमर्हति। अतः देवतात्वं त्यज्यमानद्रव्योद्देश्यत्वविशेषात्मकमेव भाष्यरीत्यापि पर्यवस्यतीत्यलम्। **पादार्घाभ्याञ्च**॥ तादर्थ्ये यदिति शेषः। **अर्घ्यमिति**॥ अर्घार्थमुदकमिति विग्रहः। अर्घः पूजा। "मूल्ये पूजाविधावर्घः" इत्यमरः। **नवस्येति**॥ वार्तिकमिदम्। एते प्रत्यया अत्यन्तस्वार्थिकाः। **नवीनमिति**॥ नवशब्दात् स्वप्रत्यये, तस्य ईनादेशे, प्रकृतेर्नूभावे, ओर्गुणः, अवादेशः। **नश्च पुराणे प्रादिति**॥ वार्तिकमिदम्। **चात्पूर्वोक्ता इति**॥ ल्यप्, तनप्, ख, इत्यर्थः। **प्रीणमिति**॥ खे रूपम्। **भागरूपेति**॥ वार्तिकमिदम्। **आग्नीध्रेति**॥ वार्तिकमिदम्। **आग्नीध्रमिति**॥ अग्नीधः शरणम् आग्नीध्रम्। ततः स्वार्थे अञि आग्नीध्रमेव। अनेकं प्रत्ययविशिष्टं सम्बन्धसाधारणमुच्यते। ततः स्वार्थे अञि साधारणमित्येव। अञ्विधेः प्रयोजनमाह। **स्त्रियां ङीबिति**॥ **अतिथेर्ण्यः**॥ **तादर्थ्ये इत्येवेति**॥ अतिथये इदमित्यर्थे अतिथिशब्दाच्चतुर्थ्यन्तात् ण्यः स्यादित्यर्थः। **देवात्तल्**॥ तादर्थ्ये इति निवृत्तम्। अत्यन्तस्वार्थिकोऽयं तल्। **देवतेति**॥ स्वार्थिकत्वेन प्रकृतिलिङ्गातिक्रमात् स्त्रीत्वम्। **अवेः कः**॥ अयमपि केवलस्वार्थिकः। "अवयः

२०९७ । यावादिभ्यः कन् । (५-४-२९)

याव एव यावकः । मणिकः ।

२०९८ । लोहितान्मणौ । (५-४-३०)

लोहित एव लोहितकः मणिः ।

२०९९ । वर्णे चानित्ये । (५-४-३१)

लोहितकः कोपेन । 'लोहितादिङ्गबाधनं वा' (वा ३३२२) । लोहितिका—लोहिनिका कोपेन ।

शैलमेषार्काः" इत्यमरः । **यावादिभ्यः कन** ॥ **यावक इति** ॥ यवानामयं यावः । ओदनादिः, स एव यावकः । अलक्तकवृक्षो वा यावः, स एव यावकः "यावोऽलक्तो द्रुमालयः" इत्यमरः । **लोहितान्मणौ** ॥ मणौ वर्तमानात् लोहितशब्दात्स्वार्थे कन् स्यादित्यर्थः । माणिक्यमयो मणिरेवेह मणिर्विवक्षितः । यस्तु जपाकुसुमादिनामनलौहित्यवान् स्फटिकमणिस्तस्य तु 'रक्ते' इत्युत्तरसूत्रेण सिद्धम् । **वर्णे चानित्ये** ॥ अनित्ये वर्णे विद्यमानात् लोहितशब्दात्स्वार्थे कन् स्यादित्यर्थः । अमण्यर्थमिदम् । **लोहितकः कोपेनेति** ॥ देवदत्तादिरिति शेषः । कोपनिमित्तक देवदत्तादेर्लौहित्यमनित्यमेव । कोपाभावे तदभावात् । यद्यपि माणिक्यमणिलौहित्यमपि अनित्यमेव । माणिक्ये नष्टे तन्नाशात् । तथापि आश्रयद्रव्यस्य उत्पत्तिप्रभृति नाशपर्यन्तं यो वर्णो वर्तते, स वर्णः नित्य इत्यभिमतमिति न दोषः । स्यादेतत् । लोहिनिका लोहितिका वा कोपेनेति स्त्रियां रूपद्वयमिष्यते । तत्र लोहितशब्दात् 'वर्णादनुदात्तात्' इति नत्वसन्नियोगशिष्टं ङीपं परत्वात् स्वार्थिकतया अन्तरङ्गत्वाच्च बाधित्वा कनि कृते सति नत्वसन्नियोगशिष्टङीपो न प्रसक्तिः । कोपधत्वेन तोपधत्वाभावात् । ततश्च लोहितकशब्दात् 'अजाद्यतः' इति टापि 'प्रत्ययस्थात्' इति इत्वे लोहितिकेत्येव स्यात्, ननु तत्र लोहिनिकेति । **लोहितादिङ्गबाधनं वेति** ॥ वार्तिकमिदम् । लोहितशब्दात्परस्य स्त्रीलिङ्गबोधकप्रत्ययस्य कना बाधो वा स्यादित्यर्थः । असति तु कना ङीपो बाधे लोहिनीशब्दात् कनि 'केऽणः' इति ह्रस्वे कन्नन्ताट्टापि लोहिनिकेति सिध्यति । सति तु कना ङीपो बाधे लोहिताशब्दात् कनि 'केऽणः' इति ह्रस्वे टापि लोहितिकेति भवति । ननु 'ङ्याप् प्रातिपदिकात्' इत्यत्र लिङ्गविशिष्टपरिभाषयैव सिद्धे ङ्याब्ग्रहणं ङ्याबन्तादेव तद्धिताः भवन्ति, ननु ङ्याब्भ्यां प्रागित्येवमर्थमित्युक्तम् । एवञ्च ङीपः प्राक् कनः प्रसक्तेरेवाभावादिदं वार्तिकं व्यर्थमिति चेत्, अत एव वार्तिकाल्लिङ्गात्स्वार्थिकतद्धितेषु ङ्याब्ग्रहणं न सम्बध्यते । न च सुबन्तात्तद्धितोत्पत्तिरिति सिद्धान्तात् 'कुत्सिते' इति सूत्रस्थभाष्यरीत्या स्वार्थद्रव्यलिङ्गसङ्ख्याकारककृत्सादिप्रयुक्तकार्याणाङ्गमिकतया ङ्याबन्तादेव सुपि ततः कनि रूपसिद्धेर्वचनमिदं व्यर्थमिति वाच्यम् । अत एव स्वार्थिकतद्धितानां प्रातिपदिकादेव

२१०० । रक्ते । (५-४-३२)

लाक्षादिना रक्ते यो लोहितशब्दस्तस्मात्कन्स्यात् । 'लिङ्गबाधनं वा' (वा ३३२२) इत्येव । लोहितिका—लोहिनिका शाटी ।

२१०१ । कालाच्च । (५-४-३३)

'वर्णे चानित्ये' (सू २०९९), 'रक्ते' (सू २१००) इति सूत्रद्वयमनुवर्तते । कालकं मुखं वैलक्ष्येण । कालकः पटः । कालिका शाटी ।

२१०२ । विनयादिभ्यष्ठक् । (५-४-३४)

विनय एव वैनयिकः । सामयिकः । उपायाद्ध्रस्वत्वं च' (ग सू १४४) । औपयिकः ।

२१०३ । वाचो व्याहृतार्थायाम् । (५-४-३५)

सन्दिष्टार्थायां वाचि विद्यमानाद्वाक्छब्दात्स्वार्थे ठक्च स्यात् । 'सन्देशवाग्वाचिकं स्यात्' इत्यमरः ।

२१०४ । तद्युक्तात्कर्मणोऽण् । (५-४-३६)

कर्मैव कार्मणम् । वाचिकं श्रुत्वा क्रियमाणं कर्मेत्यर्थः ।

२१०५ । ओषधेरजातौ । (५-४-३७)

स्वार्थेऽण् । औषधं पिबति । 'अजातौ' किम् । ओषधयः क्षेत्रे रूढाः ।

प्रवृत्तिविज्ञानादित्यन्यत्र विस्तरः । **रक्ते** ॥ लाक्षादिना रक्ते पटादौ लौहित्यस्य यावद्द्रव्यमवस्थानेन नित्यतया पूर्वेणाप्राप्ता वचनम् । **कालाच्च** ॥ **द्वयमनुवर्तते इति** ॥ अनित्ये वर्णे रक्ते च वर्तमानात्स्वार्थे कन्निति फलितम् । अनित्ये वर्णे उदाहरति । **कालकं मुखं वैलक्ष्येणेति** ॥ लज्जासूयादिनेत्यर्थः । रक्ते उदाहरति । **कालकः पट इति** ॥ नील्यादिनेति शेषः । **विनयादिभ्यः** ॥ **उपायाद्ध्रस्वत्वञ्चेति** ॥ गणसूत्रमिदम् । उपायशब्दात्स्वार्थे ठक् । प्रकृतेर्दीर्घस्य ह्रस्वत्वञ्चेत्यर्थः । ह्रस्वस्य ह्रस्वविधौ वैयर्थ्याद्दीर्घस्येति गम्यते । **वाचो व्याहृतार्थायाम्** ॥ इदम् अस्य वक्तव्यमिति दूतं प्रति योऽर्थ उच्यते स व्याहृतः । न व्याहृतः अव्याहृतः अर्थः यस्या इति विग्रहः । तदाह । **सन्दिष्टार्थायामिति** ॥ **तद्युक्तात्** ॥ सन्दिष्टार्थया दूतवाचा यत्प्रयुक्तं कर्म तदभिधायिनः कर्मन्शब्दात्स्वार्थे अण्णित्यर्थः । **कर्मैव कार्मणमिति** ॥ अत्रिति प्रकृतिभावान्न टिलोपः । दूतवाक्यं श्रुत्वा तथैव यत्क्रियते कर्म तत्कार्मणमुच्यते । तदाह । **वाचिकं श्रुत्वेति** ॥ **ओषधेरजातौ** ॥ **औषधम्पिबतीति** ॥ शुण्ठीमरीचादिचूर्णमबादिद्रव्यसंसृष्टं विवक्षितम् । तस्य न जातिवचनत्वामिति भावः । **क्षेत्रे**

२१०६ । प्रज्ञादिभ्यश्च । (५-४-३८)

प्रज्ञ एव प्राज्ञः । प्राज्ञी स्त्री । दैवतः । बान्धवः ।

२१०७ । मृदस्तिकन् । (५-४-३९)

मृदेव मृत्तिका ।

२१०८ । मस्नौ प्रशंसायाम । (५-४-४०)

रूपपोऽपवादः । प्रशस्ता मृत् मृत्सा मृत्स्ना । उत्तरसूत्रे अन्यतरस्यां ग्रहणान्नित्योऽयम ।

२१०९ । बह्वल्पार्थाच्छस्कारकादन्यतरस्याम । (५-४-४२)

बहूनि ददाति बहुशः । अल्पानि अल्पशः । 'बह्वल्पार्थान्मङ्गलामङ्गलवचनम' (वा ३३३८) । नेह । बहूनि ददात्यनिष्टेषु, अल्पं ददात्याभ्युदयिकेषु।

२११० । सङ्ख्यैकवचनाच्च वीप्सायाम । (५-४-४३)

रूढा इति ॥ ... प्रज्ञादिभ्यश्च ॥ स्वार्थे ... प्राज्ञ इति ॥ ... प्राज्ञ्यां स्त्री ॥ ... प्राज्ञीति ॥ ... मृदस्तिकन् ॥ ... मस्नौ ॥ प्रशस्तायां मृदि ... रूपपः इति ॥ 'प्रशंसायां रूपप्' ... नित्योऽयमिति ॥ ... बह्वल्पार्थाच्छस्कारकादन्यतरस्याम ॥ ... शस्प्रत्ययो वा स्यादित्यर्थः । बह्वल्पार्थादिति ॥ ... बह्वल्पार्थान्मङ्गल्ये सम्ये एवायं शसित्यर्थः । बहूनि ददात्यनिष्टेष्विति ॥ ... अल्पं ददात्याभ्युदयिकेष्विति ॥ ... अल्पदानं मङ्गल्यम् । तद्विपरीतदानन्तु अमङ्गल्यम् इति भावः । अथप्रहणाद्बहुशो ददाति, स्तोकशो ददाति इत्यादयप्युदाहार्यम् । सङ्ख्यैकवचनाच्च ॥ सङ्ख्या च एकवचनञ्चेति समाहारद्वन्द्वात्पञ्चमी । एकत्वविशिष्टोऽर्थः उच्यतेऽनेनेत्येकवचनः । एकत्वविशिष्टसंख्यायास्य वचन इति विग्रहः । सङ्ख्यावाचकादन्यस्मादेकत्वविशिष्टवाचकात्कारकादभिधायिनः प्रातिपदिकात् वीप्सायां शस् स्यादित्यर्थः । सङ्ख्यावाचिनः उदाहरति । द्वौ द्वौ ददातीति ॥ 'नित्यवीप्सयोः' इति द्विर्वचनम् । द्विशः इत्यत्र तु न । शसैव वीप्सायां उक्तत्वात् । 'तद्धितश्चासर्वविभक्तिः'

द्वौ द्वौ ददाति द्विशः। माषं माषं माषशः। प्रस्थशः। परिमाणशब्दाः वृत्तावेकार्था एव। 'सङ्ख्यैकवचनात्' किम्। घटं घटं ददाति। 'वीप्सायाम्' किम्। द्वौ ददाति। 'कारकात्' इत्येव। द्वयोर्द्वयोः स्वामी।

२१११। प्रतियोगे पञ्चम्यास्तसिः। (५-४-४४)

प्रतिना कर्मप्रवचनीयेन योगे या पञ्चमी विहिता तदन्तात्तसिः स्यात्। प्रद्युम्नः कृष्णतः प्रति। 'आद्यादिभ्य उपसङ्ख्यानम्' (वा ३३३९)। आदौ आदितः। मध्यतः। अन्ततः। पृष्ठतः। पार्श्वतः। आकृतिगणोऽयम्। स्वरेण स्वरतः। वर्णतः।

२११२। अपादाने चाहीयरुहोः। (५-४-४५)

अपादाने या पञ्चमी तदन्तात्तसिः स्यात्। ग्रामादागच्छति। ग्रामतः। 'अहीयरुहोः' किम्। स्वर्गाद्धीयते। पर्वतादवरोहति।

इत्यत्र 'शस्प्रभृतयः प्राक् समासान्तेभ्यः' इति परिगणनात् शसादीनां डाच्पर्यन्तानामव्ययत्वम्। एकत्वविशिष्टवाचिन उदाहरति। **माषं माषं माषशः इति**॥ माषं माषमित्यनन्तरन्ददातीति शेषः। माषशब्दः परिमाणविशेषवाची। **प्रस्थशः इति**॥ प्रस्थं प्रस्थं ददातीति विग्रहः। ननु घटं घटं ददातीत्यत्रापि घटशः इति स्यात्। घटशब्दस्याप्येकत्वविशिष्टार्थवाचकत्वात्। नच एकत्वविशिष्टस्यैवार्थस्य वाचकः एकवचनशब्देन विवक्षितः। घटशब्दस्तु नैवम्। घटौ घटाः इत्यादौ द्वित्वबहुत्वविशिष्टवाचकत्वादिति वाच्यम्। एवं सति माषशः प्रस्थशः इत्यत्रापि शसभावप्रसङ्गादित्यत आह। **परिमाणशब्दाः वृत्तावेकार्था एवेति**॥ अयमाशयः। समासादिवृत्तौ एकत्वविशिष्टस्यैवार्थस्य वाचका एकवचनशब्देन विवक्षिताः। तथाविधाश्च परिमाणशब्दा एव, नतु घटादिजातिशब्दा अपि। माषदातेत्युक्ते हि माषपरिमितस्य हिरण्यादेर्दातेति प्रतीयते, नतु माषाणामिति। अतो माषशब्दोऽयम्भवति वृत्तावेकत्वविशिष्टार्थनियतः। एवं प्रस्थादिशब्दोऽपि। घटशब्दस्तु नैवम्। घटदातेत्युक्ते घटानान्दातेत्यपि प्रतीतेः। एतदेवाभिप्रेत्य प्रत्युदाहरति। **घटं घटमिति**॥ एतत्सर्वज्ञयादित्यमतम्। वामनस्तु उक्तनियमे प्रमाणाभावात् जातिशब्देभ्योऽपि शस् भवत्येव। एकवचनग्रहणन्तु 'सङ्ख्यायाश्च वीप्सायाम्' इत्युक्तेः घटौ घटौ ददातीत्यादौ शसभावार्थमित्याह। एकैकशः पितृसंयुक्तानीत्यत्र तु शसैव वीप्साया उक्तत्वात् द्विर्वचनमार्षमिति हरदत्तः। प्रत्याहाराह्निकभाष्ये 'एकैकशः सहस्रकृत्वः' इति भाष्यप्रयोगात् स्वार्थिकशसा समाधेयमित्यन्ये। **प्रतियोगे**॥ **विहितेति**॥ 'प्रतिः प्रतिनिधिप्रतिदानयोः' इति प्रतेः कर्मप्रवचनीयत्वे तद्योगे 'प्रतिनिधिप्रतिदाने च यस्मात्' इति पञ्चमी विहितेत्यर्थः। **प्रद्युम्नः कृष्णतः प्रतीति**॥ कृष्णस्य प्रतिनिधिरित्यर्थः। **आद्यादिभ्य इति**॥ अयं सार्वविभक्तिकस्तसिः। **अपादाने चाहीयरुहोः**॥ अहीयरुहोरिति

२११३ । अतिग्रहाव्यथनक्षेपेष्वकर्तरि तृतीयायाः । (५-४-४६)

अकर्तरि तृतीयान्ताद्वा तसिः स्यात् । अतिक्रम्य ग्रहोऽतिग्रहः । चारित्रेणाऽतिगृह्यते । चारित्रतोऽतिगृह्यते । चारित्रेणान्यानतिक्रम्य वर्तत इत्यर्थः । अव्यथनमचलनम् । वृत्तेन न व्यथते । वृत्ततो न व्यथते । वृत्तेन न चलतीत्यर्थः । क्षेपे वृत्तेन क्षिप्तः । वृत्ततः क्षिप्तः । वृत्तेन निन्दित इत्यर्थः । 'अकर्तरि' इति किम् । देवदत्तेन क्षिप्तः ।

२११४ । हीयमानपापयोगाच्च । (५-४-४७)

हीयमानपापयुक्तादकर्तरि तृतीयान्ताद्वा तसिः । वृत्तेन हीयते । वृत्तेन पापः । वृत्ततः । क्षेपस्याविवक्षायामिदम् । क्षेपे तु पूर्वेण सिद्धम् । 'अकर्तरि' इति किम् । देवदत्तेन हीयते ।

२११५ । षष्ठ्या व्याश्रये । (५-४-४८)

षष्ठ्यन्ताद्वा तसिः स्यान्नानापक्षसमाश्रये । देवाः अर्जुनतोऽभवन् । दैत्याः कर्णतोऽभवन् । अर्जुनस्य कर्णस्य पक्षे इत्यर्थः । 'व्याश्रये' किम् । वृक्षस्य शाखा ।

२११६ । रोगाच्चापनयने । (५-४-४९)

रोगवाचिनः षष्ठ्यन्ताद्वा तसिश्चिकित्सायाम् । प्रवाहिकातः कुरु । प्रतीकारमस्याः कुर्वित्यर्थः । 'अपनयने' किम् । प्रवाहिकायाः प्रकोपनं करोति ।

छेदः । हीयते इत्यादौ कर्मणि लकारे यगन्तस्य एकदेशस्य हीयेत्यनुकरणम् । हीयरुहोः सम्बन्धि यन्न भवति तस्मिन्नपादाने इत्यर्थः । **अतिग्रहाव्यथन** ॥ **अतिक्रम्य ग्रह इति** ॥ लोकवृत्तमतिक्रम्य तद्विलक्षणतया प्रतीयमानत्वमित्यर्थः । **चारित्रेणेति** ॥ चरित्रमेव चारित्रम्, तेन हेतुना इतरविलक्षणत्वेन दृश्यते इत्यर्थः । फलितमाह । **अन्यानतिक्रम्य वर्तते इति** ॥ 'व्यथ भयसञ्चलनयोः' इति चलनार्थात् ल्युटि व्यथनशब्दः । तदाह । **अव्यथनमचलनमिति** ॥ **क्षेपे इति** ॥ उदाहियते इति शेषः । क्षेपो निन्दा । **हीयमानपापयोगाच्च** ॥ **हीयमानेति** ॥ हीयमानयुक्तात् पापयुक्ताच्चेत्यर्थः । ननु पूर्वसूत्रे क्षेपग्रहणादेव सिद्धे किमर्थमिदमित्यत आह । **क्षेपस्याविवक्षायामिति** ॥ तत्त्वकथने इत्यर्थः । **षष्ठ्या व्याश्रये** ॥ **नानापक्षसमाश्रयणे इति** ॥ सर्वसाधारण्यं विहाय एकपक्षाश्रय इति यावत् । पक्षः स्वीयत्वेन परिग्रहः । **देवा अर्जुनतोऽभवन्निति** ॥ अर्जुनस्य पक्षे देवा आसन्नित्यर्थः । **दैत्याः कर्णतोऽभवन्निति** ॥ असुरा कर्णस्य पक्षे आसन्नित्यर्थः । **रोगाच्च** ॥ रोगस्य प्रतीकारः चिकित्सा । **प्रवाहिकात इति** ॥ विषूचिकाप्रतीकारमित्यर्थः ।

२११७। कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः। (५-४-५०)

'अभूततद्भाव इति वक्तव्यम्' (वा ३३४०)। विकारात्मतां प्राप्नुवत्यां प्रकृतौ वर्तमानाद्विकारशब्दात्स्वार्थे च्विर्वा स्यात्करोत्यादिभिर्योगे।

२११८। अस्य च्वौ। (७-४-३२)

अवर्णस्य ईत्स्यात् च्वौ। वेर्लोपः। च्व्यन्तत्वादव्ययत्वम्। अकृष्णः कृष्णः सम्पद्यते, तं करोति कृष्णी करोति। ब्रह्मी भवति। गङ्गी स्यात्।

कृभ्वस्तियोगे ॥ अभूतेति ॥ येन रूपेण प्रागभूतं यद्वस्तु तस्य तद्रूपप्राप्तावित्यर्थः। एवञ्च यत्र प्रकृतिस्वरूपमेव विकाररूपमापद्यमानं विकारभेदेन विवक्ष्यते। तत्रैवायम्प्रत्यय इति लभ्यते। सम्पद्यकर्तरीत्येकम्पदम्। सम्पदनं सम्पद्यः। सम्पूर्वकात्पदधातोरत एव निपातनात् भावे कृत्संज्ञः शः, दिवादित्वात् श्यन्। सम्पद्यस्य कर्तेति षष्ठीसमासः। सम्पद्यमाने वर्तमानादिति यावत्। केन रूपेण कस्य सम्पत्तिरित्याकाङ्क्षायाम्, 'अभूततद्भावे' इति वार्तिकात् प्रकृतेर्विकाररूपेण सम्पत्तिरिति लभ्यते। तत्र विकारवाचकादेव प्रत्ययः। नतु प्रकृतिवाचकात्। व्याख्यानात्। तथा च फलितमाह। **विकारात्मतामित्यादिना। वर्तमानादिति ॥** विकारवाचकशब्दस्य प्रकृतौ गौण्या वृत्त्या विद्यमानत्वं बोध्यम्। **करोत्यादिभिरिति ॥** 'डु कृञ् करणे, भू सत्तायाम्, अस भुवि' इति धातुभिर्योगे सतीत्यर्थः। च्विप्रत्यये चकार इत्, इकार उच्चारणार्थः। **अस्य च्वौ ॥ ईत्स्यादिति ॥** 'ई घ्राध्मोः' इत्यतः तदनुवृत्तेरिति भावः। **वेर्लोप इति ॥** 'वेरपृक्तस्य' इत्यनेनेति शेषः। **च्व्यन्तत्वादव्ययत्वमिति ॥** 'ऊर्यादिच्विडाचश्च' इति निपातत्वात् स्वरादिनिपातमित्यव्ययत्वमित्यर्थः। 'तद्धितश्चासर्वविभक्तिः' इत्यत्र 'शस्प्रभृतयः प्राक् समासान्तेभ्यः' इति परिगणितेष्वन्तर्भावादव्ययत्वमिति केचित्। कृञ्योगे उदाहरति। **कृष्ण इति ॥** वस्तुतः अकृष्णः सन् वेषादिना कृष्णभावं प्राप्नोतीत्यर्थः। **तं करोतीति ॥** अकृष्णं कृष्णरूपेण सम्पद्यमानङ्करोतीत्यर्थः। **कृष्णीकरोतीति ॥** अत्र वस्तुतः अकृष्णो नटः प्रकृतिभूतः। स तावत्कृष्णभावं विकारम्प्राप्नुवन् अभूततद्भावात्मकं विकारं सम्पद्यमानत्वात् सम्पद्यकर्ता भव इति तत्राभेदारोपमवलम्ब्य वर्तमानः विकारभूतकृष्णवाचकः शब्दः। तस्मात् च्विप्रत्ययः, चकार इत्, इकार उच्चारणार्थः। तस्मिन्परे अकारस्य ईत्त्वम्। 'वेरपृक्तस्य' इति वकारलोपः। कृष्णीति ईकारान्तमव्ययम्। **ब्रह्मी भवतीति ॥** अब्रह्म ब्रह्म सम्पद्यमानं भवतीत्यर्थः। ब्रह्मन्शब्दात् च्विः। अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वान्नलोपः। ईत्त्वमिति भावः। अत्यन्तस्वार्थिकानामेव प्रातिपदिकादुत्पत्तिः। नतु सुबन्तादिति नियमः। अतो न च्वेः प्रातिपदिकादुत्पत्तिः। किन्तु सुबन्तादेवेति बोध्यम्। अत एव अगौर्गौः समपद्यत गोऽभवदित्यत्र च्व्यन्तस्य गोशब्दस्य 'एङः पदान्तात्' इति पररूपमुदाहृतं सङ्गच्छते इत्यलम्। **गङ्गी स्यादिति ॥** अगङ्गा गङ्गात्वेन सम्पद्यमाना स्यादित्यर्थः। 'अस्य च्वौ' इति ईत्त्वम्। **दोषाभूतम् अहरिति ॥** दोषेत्याकारान्तमव्ययं रात्रावित्यर्थे। इह तु रात्रिरित्यर्थे

'अव्ययस्य च्वावीत्वं नेति वाच्यम्' (वा ५०५२)। दोषाभूतम् अहः। दिवा-भूता रात्रिः'। एतच्च 'अव्ययीभावश्च' (सू ४५१) इति सूत्रे भाष्ये उक्तम्।

२११९। क्यच्व्योश्च। (६-४-१५२)

हलः परस्यापत्ययकारस्य लोपः स्यात्क्ये च्वौ च परतः। गार्गी भवति।

२१२०। च्वौ च। (७-४-२६)

च्वौ परे पूर्वस्य दीर्घः स्यात्। शुची भवति। पटू स्यात्। 'अव्ययस्य दीर्घत्वं न' इति केचित्। तन्निर्मूलम्। 'स्वस्ति स्यात्' इति तु महाविभाषया च्वेरभावात्सिद्धम्। 'स्वस्ती स्यात्' इत्यपि पक्षे स्यादिति चेदस्तु। यदि नेष्यते तर्ह्यनभिधानात् च्विरेव नोत्पद्यत इत्यस्तु। 'रीङृतः' (सू १२३४)। मात्री करोति।

२१२१। अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च। (५-४-५१)

वर्तते। अदोषाभूतमहः। बहुलमेघावरणान्धकारात् दोषाभूतमित्यर्थः। **दिवाभूता रात्रिरिति**॥ दिवेत्याकारान्तमव्ययम् अहनीत्यर्थे। इह तु अहरित्यर्थे वर्तते। चन्द्रिकातिशयवशात् अहर्भूतेत्यर्थः। ननु 'अव्ययस्य च्वावीत्वं न' इति वार्तिकम् 'अस्य च्वौ' इति सूत्रभाष्ये न दृश्यते इत्यत आह। **एतच्चेति**॥ गार्गी भवतीति वक्ष्यन्नाह। **क्यच्व्योश्च**॥ 'अल्लोपोऽनः' इत्यस्मात् लोप इति, 'हलस्तद्धितस्य' इत्यस्मात् हल इति, 'आपत्यस्य च' इत्यस्मात् आपत्यस्येति चानुवर्तते। तदाह। **लः परस्येति**॥ **गार्गी भवतीति**॥ अगार्ग्यो गार्ग्यः सम्पद्यमानो भवतीत्यर्थः। यञन्तात् च्वौ यकारस्य लोपः। वेर्लोपः। यकारस्य तु 'आपत्यस्य च' इति लोपो न सम्भवति। ईकारेण व्यवधानात्। 'हलस्तद्धितस्य' इत्यपि न सम्भवति। तस्य ईति अर्थवत्येव विधानात्। अतो वचनमिति भावः। अथ शुची भवतीति वक्ष्यन्नाह। **च्वौ च**॥ **दीर्घः स्यादिति**॥ 'अकृत्सार्वधातुकयोः' इत्यतस्तदनुवृत्तेरिति भावः। **अव्ययस्येति**॥ अव्ययस्य 'च्वौ च' इति दीर्घो नेत्यर्थः। तेन स्वस्ति स्यादित्यत्र च्वौ न दीर्घ इति भावः। **तन्निर्मूलमिति**॥ भाष्यादावदृष्टत्वादिति भावः। तर्हि स्वस्ति स्यादिति न स्यात् दीर्घप्रसङ्गात् इत्यत आह। **स्वस्ति स्यादिति त्विति**॥ ननु महा-विभाषया दीर्घाभावे स्वस्ति स्यादिति सिद्धावपि कदाचित् स्वस्ती स्यादिति दीर्घो दुर्वार इति शङ्कते। **स्वस्ती स्यादित्यपि पक्षे स्यादिति**॥ इष्टापत्तिरित्याह। **अस्त्विति**॥ दीर्घतदभावाभ्यां रूपद्वयमिति शेषः। प्रामाणिकत्वादुभयमप्यादर्तव्यमिति भावः। ननु शिष्टानङ्गीकारात् कथं दीर्घपाठादर इत्यत आह। **यदि नेष्यते इत्यादि**॥ मातृशब्दात् च्विप्रत्यये विशेषमाह। **रीङृतः इति**॥ **अरुर्मनश्चक्षुः**॥ **एषामिति**॥ अरुस्,

१. भाष्येष्टिभूतम्।

एषां लोपः स्यात् च्विश्च। अरू करोति। उन्मनी स्यात्। उच्चक्षू करोति। उच्चेती करोति। विरही करोति। विरजी करोति।

२१२२। विभाषा साति कात्स्न्र्ये। (५-४-५२)

च्विविषये सातिर्वा स्यात्साकल्ये।

२१२३। सात्पदाद्योः। (८-३-१११)

सस्य षत्वं न स्यात्। दधि सिञ्चति। कृत्स्नं शस्त्रमग्निः सम्पद्यतेऽग्निसाद्भवति। अग्नी भवति। महाविभाषया वाक्यमपि। 'कात्स्न्र्ये' किम्। एकदेशेन शुक्ली भवति पटः।

२१२४। अभिविधौ सम्पदा च। (५-४-५३)

सम्पदा कृभ्वस्तिभिश्च योगे सातिर्वा स्याद्व्याप्तौ। पक्षे कृभ्वस्तियोगे च्विः। सम्पदा तु वाक्यमेव। अग्निसात्सम्पद्यते अग्निसाद्भवति शस्त्रम्।

मनस्, चक्षुस्, चेतस्, रहस्, रजस्, इत्येतेषामित्यर्थः। पूर्वेणैव प्रत्ययसिद्धेस्तत्सान्नियोगेन अन्त्यलोप इह विधीयते। **अरू करोतीति**॥ अनरुः अरुः सम्पद्यते तङ्करोतीत्यर्थः। प्रकृतेरन्त्यलोपे उकारस्य 'च्वौ च' इति दीर्घः। **उन्मनी करोतीति**॥ अनुन्मनाः उन्मनाः सम्पद्यते तङ्करोतीत्यर्थः। च्वौ अन्त्यलोपः, ईत्वञ्च। **उच्चक्षू करोतीति**॥ अनुच्चक्षुः उच्चक्षुः सम्पद्यते तङ्करोतीत्यर्थः। च्वौ अन्त्यलोपः, दीर्घश्च। **उच्चेती करोतीति**॥ अनुच्चेताः उच्चेताः सम्पद्यते तङ्करोतीत्यर्थः। च्वौ अन्त्यलोपः, ईत्वञ्च। **विरही करोतीति**॥ रहः विजनप्रदेशः, विशिष्टं रहः विरहः। अविरहः विरहः सम्पद्यते तङ्करोतीत्यर्थः। च्वौ अन्त्यलोपः, ईत्वञ्च। **विरजी करोतीति**॥ अविरजाः विरजाः सम्पद्यते तङ्करोतीत्यर्थः। अन्त्यलोपे अस्य च्वौ ईत्वञ्च। **विभाषा साति**॥ सातीति लुप्तप्रथमाकम्। **च्विविषये इति**॥ अभूततद्भावे सम्पद्यकर्तरि कृभ्वस्तियोगे इत्यर्थः। **सात्पदाद्योः**॥ शेषपूरणेन सूत्रं व्याचष्टे। **सस्य षत्वं न स्यादिति**॥ सातेरवयवस्य पदादेश्च सस्य षत्वं न स्यादित्यर्थः। 'नरपरसृपि' इत्यतो नेति 'अपदान्तस्य' इत्यतो मूर्धन्य इति चानुवर्तते इति भावः। पदादेरुदाहरति। **दधि सिञ्चतीति**॥ षिञ्चिधातोः 'धात्वादेष्षस्सः' इति षस्य सः। तस्य 'आदेशप्रत्यययोः' इति षत्वे प्राप्ते अनेन निषेधः। **कृत्स्नमिति**॥ सर्वावयवोपेतमित्यर्थः। अग्निसादित्यत्र प्रत्ययावयवसकारत्वात् षत्वे प्राप्ते अनेन निषेधः। **अग्नी भवतीति**॥ च्विप्रत्यये 'च्वौ च' इति दीर्घः। **महाविभाषयेति**॥ 'समर्थानाम्' इत्यतः वाग्रहणानुवृत्तेरित्यर्थः। महाविभाषया सिद्धे इह विभाषाग्रहणन्तु अपवादेन मुक्ते औत्सर्गिकच्वेः समावेशार्थः। **अभिविधौ सम्पदा च**॥ चकारः कृभ्वस्तिसमुच्चयार्थः। तदाह। **सम्पदा कृभ्वस्तिभिश्चेति**॥ अभिविधावित्यस्य विवरणम्। **व्याप्ताविति**॥ **पक्षे इति**॥ सातिप्रत्ययाभावपक्षे कृभ्वस्तियोगे पूर्वेण च्विः, सम्पदा योगे तु सातेरभावे वाक्यमेव, नतु च्विः। कृभ्वस्तियोग एव तद्विधानादित्यर्थः।

अग्नी भवति । जलसात्सम्पद्यते जली भवति लवणम् । 'एकस्या व्यक्तेः सर्वावयवावच्छेदेनान्यथाभावः कात्स्न्यम्' । 'बहूनां व्यक्तीनां किञ्चिदवयवावच्छेदेनान्यथात्वं त्वभिविधिः' ।

२१२५ । तदधीनवचने । (५-४-५४)

सातिः स्यात्कृभ्वस्तिभिः सम्पदा च योगे । राजसात्करोति । राजसात्सम्पद्यते । राजाधीनमित्यर्थः ।

२१२६ । देये त्रा च । (५-४-५५)

तदधीने देये त्रा स्यात्सातिश्च कृभ्वादियोगे । विप्राधीनं देयं करोति । विप्रत्रा करोति । विप्रत्रा सम्पद्यते । पक्षे विप्रसात्करोति । 'देये किम् । राजसाद्भवति राष्ट्रम् ।

२१२७ । देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् । (५-४-५६)

एभ्यो द्वितीयान्तेभ्यः सप्तम्यन्तेभ्यश्च त्रा स्यात् । देवत्रा वन्दे रमे वा । बहुलोक्तेरन्यत्रापि । बहुत्रा जीवतो मनः ।

२१२८ । अव्यक्तानुकरणाद्व्यजवरार्धादनितौ डाच् । (५-४-५७)

'द्व्यच्' अवरं न्यूनम्, न तु ततो न्यूनम् 'अनेकाच्' इति यावत्तादृशमर्धं

सम्पदा योगे उदाहरति । **अग्निसात्सम्पद्यते इति** ॥ कृभ्वस्तियोगे उदाहरति । **अग्निसाद्भवति शस्त्रमिति** ॥ अग्निसात्करोति अग्निसात्स्यादित्यप्युदाहार्यम् । कात्स्न्यभिविध्योर्विशेषमाह । **एकस्याः व्यक्तेरित्यादिना** ॥ **तदधीनवचने** ॥ शेषपूरणेन सूत्रं व्याचष्टे । **सातिः स्यादित्यादिना** ॥ 'अभूततद्भावे' इति निवृत्तमिति भावः । **देये त्रा च** ॥ तदधीनवचनं इत्येवानुवर्तते । **कृभ्वादियोगे इति** ॥ कृभ्वस्तिभिः सम्पदा च योगे इत्यर्थः । **देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्** ॥ **एभ्य इति** ॥ देव, मनुष्य, पुरुष, पुरु, मर्त्य, इत्येतेभ्यः इत्यर्थः । अत्यन्तस्वार्थिकोऽयम् । सार्तीति कृभ्वस्तियोगे इत्यपि निवृत्तम् । **देवत्रा वन्दे रमे वेति** ॥ देवान् वन्दे, देवेषु रमे वेत्यर्थः । मनुष्यत्रा, पुरुषत्रा । पुरुशब्दो बहुलपर्यायः । पुरुत्रा, मर्त्यत्रा । **अन्यत्रापीति** ॥ देवादिभ्यो अन्यत्रापीत्यर्थः । **बहुत्रा जीवतो मनः इति** ॥ जीवतो जन्तोर्मनः बहुषु विषयेषु गच्छति बहून् व्याप्नोतीत्यर्थः । **अव्यक्तानुकरणात्** ॥ यत्र ध्वनौ अकारादयो वर्णविशेषाः न व्यज्यन्ते सः अव्यक्तः ध्वनिः । तस्यानुकरणम् अव्यक्तानुकरणम् । द्व्यजवरार्धशब्दं व्याचष्टे । **द्व्यजिति** ॥ द्वावचौ यस्येति विग्रहः । **अवरशब्दं व्याचष्टे । न्यूनमिति** ॥ द्व्यजेव अवरं न्यूनसङ्ख्याकाच्कमिति सामानाधिकरण्येनान्वयः । **न तु ततो न्यूनमिति** ॥ एकाच्कमित्यर्थः ।

यस्य तस्माड्डाच्स्यात्कृभ्वस्तिभियोंगे। 'डाचि विवक्षिते द्वे बहुळम्' (वा ४६९७)। 'नित्यमाम्रेडिते डाचीति वक्तव्यम्' (वा ३६३८)। डाच्परं यदाम्रेडितं तस्मिन्परे पूर्वपरयोर्वर्णयोः पररूपं स्यात्। इति तकारपकारयोः पकारः। पटपटा करोति। 'अव्यक्तानुकरणात्' किम्। ईषत्करोति। 'ध्रुवजवरार्धात्' किम्। श्रत्करोति। 'अवर–' इति किम्। घरटघरटा करोति। त्रपटत्रपटा करोति। 'अनेकाचः' इत्येव सूत्रयितुमुचितम्। एवं हि डाचीति परसप्तम्येव द्वित्वे सुवचेत्यवधेयम्। 'अनितौ' किम्। पटिति करोति।

२१२९। कृञो द्वितीयतृतीयशम्बबीजात्कृषौ। (५-४-५८)

द्वितीयादिभ्यो डाच्स्यात्कृञ एव योगे कर्षणेऽर्थे। बहुलोक्तेरव्यक्तानुकरणादन्यस्य डाचि न द्वित्वम्। द्वितीयं तृतीयं कर्षणं करोति। द्वितीया

फलितमाह। **अनेकाजिति यावदिति॥ तादृशमर्धमिति॥** अनेकाच्कम् अर्धं भागः यस्य तत् ध्रुवजवरार्धम्। तस्मादित्यर्थः। **कृभ्वस्तिभिः योगे इति॥** मण्डूकप्लुत्या तदनुवृत्तेरिति भावः। तथा च अनेकाच्कभागयुक्तादव्यक्तानुकरणात् शब्दात् कृभ्वस्तियोगे डाच् स्यादिति फलितम्। अथ पटच्छब्दादव्यक्तानुकरणात् डाचमुदाहरिष्यन् पटच्छब्दस्य द्विर्वचनमाह। **डाचि विवक्षिते द्वे बहुळमिति॥** यद्यपि 'सर्वस्य द्वे' इति प्रकरणे "डाचि द्वे भवतः इति वक्तव्यम्" इत्येव भाष्ये वार्तिकं पठितम्। तत्र डाचि परतः इति नार्थः। तथा सति, डाचि सति पटच्छब्दस्य द्विर्वचनम्। सति च द्विर्वचने अर्धस्यानेकाच्त्वात् डाजित्यन्योन्याश्रयापत्तेः। अतः डाचि विवक्षिते इत्याश्रितम्। एवञ्च डाचि विवक्षिते पटच्छब्दस्य द्विर्वचने सति पटत् पटत् इत्यस्यानेकाच्कार्धभागयुक्तत्वात् डाच् सूपपादः। पटत् पटत् आ करोतीति स्थिते प्रक्रियां दर्शयति। **नित्यमाम्रेडिते डाचीति॥** 'एकः पूर्वपरयोः' इत्यधिकारे पररूपप्रकरणे 'नाम्रेडितस्यान्त्यस्य तु वा' इति सूत्रभाष्ये इदं वार्तिकं पठितम्। **डाच्परमिति॥** डाच् परं यस्मादिति विग्रहः। **पकार इति॥** तथा च पटपटत् आ करोति इति स्थिते डित्त्वाट्टिलोपे पटपटाकरोतीति रूपमित्यर्थः। **अवरेति किमिति॥** ध्रुवजवरार्धादित्येवास्त्वित्यर्थः। **घरटघरटाकरोतीति॥** घरटत् इत्यव्यक्तानुकरणात् डाचि द्विर्वचने पररूपे टिलोपे रूपम्। ध्रुवजवरार्धादित्युक्ते तु अर्धभागस्य घरटत् इत्यस्य बह्वच्कत्वाड्डाच् न स्यादित्यर्थः। **अनेकाच इत्येवेति॥** ध्रुवजवरार्धादित्यपनीय 'अव्यक्तानुकरणादनेकाचोऽनितौ डाच्' इत्येव सूत्रयितुमुचितमित्यर्थः। **एवं हीति॥** 'अनेकाचोऽनितौ' इति पाठे सति पटच्छब्दस्य द्वित्वात्प्रागेव अनेकाच्कत्वात् डाच् सम्भवतीति 'डाचि परतो द्वित्वम्' इति वक्तुं शक्यमिति भावः। **पटितीति॥** 'अव्यक्तानुकरणस्य' इति पररूपम्। **कृञो द्वितीय॥ द्वितीयादिभ्य इति॥** द्वितीय, तृतीय, शम्ब, बीज, इत्येतेभ्य इत्यर्थः। **कृञ एव योगे इति॥** कृञ्ग्रहणात् कृभ्वस्तिर्नानुवर्तते इति भावः। 'मद्रात्परिवापणे' इति यावत्कृञ इत्यनुवर्तते। **बहुळोक्तेरिति॥**

करोति । तृतीया करोति । शम्बशब्दः प्रतिलोमे । अनुलोमं कृष्टं क्षेत्रं पुनः प्रतिलोमं कर्षति, शम्बा करोति । बीजेन सह कर्षति, बीजा करोति ।

२१३० । सङ्ख्यायाश्च गुणान्तायाः । (५-४-५९)

कृञो योगे कृषौ डाच्स्यात् । द्विगुणा करोति क्षेत्रम् । क्षेत्रकर्मकं द्विगुणं कर्षणं करोतीत्यर्थः ।

२१३१ । समयाच्च यापनायाम् । (५-४-६०)

'कृषौ' इति निवृत्तम् । कृञो योगे डाच्स्यात् । समया करोति । कालं यापयतीत्यर्थः ।

२१३२ । सपत्रनिष्पत्रादतिव्यथने । (५-४-६१)

सपत्रा करोति मृगम् । सपुङ्खशरप्रवेशेन सपत्रं करोतीत्यर्थः । निष्पत्रा करोति । सपुङ्खस्य शरस्यापरपार्श्वे निर्गमनान्निष्पत्रं करोतीत्यर्थः । 'अतिव्यथने' किम् । सपत्रं निष्पत्रं वा करोति भूतलम् ।

२१३३ । निष्कुलान्निष्कोषणे । (५-४-६२)

निष्कुला करोति दाडिमम् । निर्गतं कुलमन्तरवयवानां समूहो यस्मादिति बहुव्रीहेर्डाच् ।

'डाचि बहुलं द्वे भवतः' इति बहुलग्रहणात् अव्यक्तानुकरणस्यैव डाचि द्वित्वम् । ननु तदन्यस्येत्यर्थः । **शम्बशब्दः प्रतिलोमे इति** ॥ वर्तते इति शेषः । **बीजेन सह कर्षतीति** ॥ आदौ कृष्टक्षेत्रे कुळुत्थादिबीजानां वापे कृते पुनः बीजैः सह कर्षणं प्रसिद्धम् । 'कर्षात्वतः' इति सूत्रभाष्यप्रामाण्यात् कृषधातुः शब्विकरणोऽस्ति । तेन शविकरणत्वात् कृषतीत्येव युक्तमिति न शङ्कयम् । **सङ्ख्यायाश्च** ॥ शेषपूरणेन सूत्रं व्याचष्टे । **कृञो योगे इति** ॥ **समयाच्च** ॥ कृषाविति निवृत्तम् । समयशब्दात् यापनायाङ्गम्यमानायां डाजित्यर्थः । **समया करोतीति** ॥ करोतिरिह यापनायामित्याह । **यापयतीति** ॥ अतिक्रान्तङ्करोतीत्यर्थः । अथेदङ्कर्तव्यमित्युक्ते विघ्नङ्किदापाद्य कालक्षेपङ्करोतीति यावत् । **सपत्र** ॥ सपत्रशब्दात् निष्पत्रशब्दाच्च अतिव्यथने डाजित्यर्थः । 'व्यध ताडने' चतुर्थान्तः । अतिक्रम्य वेधः अतिव्यधनम् । लक्ष्ये शराः पतन्त्यनेनेति पत्रं, शराणाम्पुङ्खगतो बर्हः । **भूतलमिति** ॥ पुङ्खपर्यन्तं पुङ्खवर्जं वा शरप्रवेशनेन सपत्रं निष्पत्रं वा भूतलङ्करोतीत्यर्थः । **निष्कुलान्निष्कोषणे** ॥ डाजिति शेषः । निष्कोषणं अन्तर्गतावयवानाम्बहिः करणम् । **निष्कुलाकरोति दाडिममिति** ॥ निर्गतङ्कुलं यस्मादिति

२१३४। सुखप्रियादानुलोम्ये। (५-४-६३)

सुखा करोति, प्रिया करोति गुरुम्। अनुकूलाचरणेनानन्दयतीत्यर्थः।

२१३५। दुःखात्प्रातिलोम्ये। (५-४-६४)

दुःखा करोति। स्वामिनं पीडयतीत्यर्थः।

२१३६। शूलात्पाके। (५-४-६५)

शूला करोति मांसम्। शूलेन पचतीत्यर्थः।

२१३७। सत्यादशपथे। (५-४-६६)

सत्या करोति भाण्डं वणिक्। क्रेतव्यमिति तथ्यं करोतीत्यर्थः। शपथे तु सत्यं करोति विप्रः।

२१३८। मद्रात्परिवापणे। (५-४-६७)

मद्रशब्दो मङ्गलार्थः। परिवापणं मुण्डनम्। मद्रा करोति। माङ्गल्यमुण्डनेन संस्करोतीत्यर्थः। 'भद्राच्चेति वक्तव्यम्' (वा ३३४४)। भद्रा करोति। अर्थः प्राग्वत्। 'परिवापणे' किम्। मद्रं करोति। भद्रं करोति।

इति स्वार्थिकप्रकरणम्।

॥ इति तद्धिताः ॥

बहुव्रीहिः। कुलशब्दश्च अन्तरवयवसमूहे वर्तते। तदाह। **निर्गतमित्यादि॥ सुखप्रियादानुलोम्ये॥** सुखशब्दात्प्रियशब्दाच्च आनुलोम्ये गम्ये डाच् स्यादित्यर्थः। आराध्यगुर्वादिचित्तानुवर्तनमानुलोम्यम्। **सुखाकरोति, प्रियाकरोति गुरुमिति॥** चित्तानुवर्तनेन गुरुं सुखसम्पन्नं प्रियसम्पन्नञ्च करोतीत्यर्थः। तदाह। **अनुकूलेति॥ दुःखात्॥** डाजिति शेषः। आराध्यप्रतिकूलाचरणम्प्रातिलोम्यम्। अन्यत्पूर्ववत्। **शूलात्पाके॥** डाजिति शेषः। **शूला करोतीति॥** अत्र करोतिः पाके वर्तते। तदाह। **शूलेन पचतीत्यर्थ इति॥ सत्यादशपथे॥** डाजिति शेषः। **सत्या करोति भाण्डमिति॥** रत्नादिद्रव्यजातमित्यर्थः। सत्यशब्दोऽत्र तथ्ये वर्तते। 'सत्यन्तथ्यमृतं सम्यक्' इत्यमरः। **क्रेतव्यमितीति॥** एतावतैव मूल्येन इदं क्रयणार्हं नातोऽधिकमूल्येनेत्येवं यथाभूतार्थं वदतीत्यर्थः। **सत्यङ्करोति विप्रः इति॥** शपथङ्करोतीत्यर्थः। **मद्रात्परिवापणे॥** डाजिति शेषः। **मद्रशब्दो मङ्गलार्थ इति॥** मङ्गलपर्यायः इत्यर्थः। **परिवापणं मुण्डनमिति॥** केशान्वपते इत्यादौ तथा दर्शनादिति भावः। **माङ्गल्यमुण्डनेनेति॥** चौळेनेत्यर्थः। **मद्रङ्करोति। भद्रङ्करोतीति॥** क्षेमङ्करोतीत्यर्थः। अत्र परिवापणस्याप्रतीतेर्न डाजिति भावः॥

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायां तद्धितप्रकरणं समाप्तम्।

॥ श्रीरस्तु ॥

॥ अथ द्विरुक्तप्रकरणम् ॥

२१३९ । सर्वस्य द्वे । (८-१-१)

इत्यधिकृत्य ।

२१४० । नित्यवीप्सयोः । (८-१-४)

आभीक्ष्ण्ये वीप्सायां च द्योत्ये पदस्य द्विर्वचनं स्यात् । आभीक्ष्ण्यं

अथ द्विरुक्तप्रकरणम्—**सर्वस्य द्वे** ॥ **इत्यधिकृत्येति** ॥ द्विर्वचनविधयोऽनुक्रमिष्यन्ते इति शेषः । **नित्यवीप्सयोः** ॥ नित्यशब्देन नित्यत्वं विवक्षितम् । तच्च आभीक्ष्ण्यमिति भाष्यम् । व्याप्तुमिच्छा वीप्सा । व्याप्तिप्रतिपादनेच्छा, सा च प्रयोक्तृधर्मः । व्याप्तिरेव तु शाब्दबोधविषयः इति भाष्यस्वरसः । तथा च नित्यव्याप्त्योरित्येव सुवचम् । व्याप्तिश्च कात्स्न्र्येन सम्बन्धः । उपसर्गबलात् पदस्येत्यधिकरिष्यमाणमिहापकृष्यते । सर्वस्येति स्थानषष्ठी । द्वे इति त्वादेशसमर्पकम् । तस्य च शब्दरूपे इति विशेष्यमर्थाल्लभ्यते । शब्दानुशासनप्रस्तावात् । ते च शब्दरूपे स्वरूपतः अर्थतश्चान्तरतमे पदे इति स्थानेऽन्तरतमपरिभाषया लभ्यते । ततश्च पौनःपुन्ये कात्स्न्र्ये च गम्ये कृत्स्नावयववर्विशिष्टस्य पदस्यार्थतश्च शब्दतश्चान्तरतमे द्वे पदे भवतः इति फलितम् । तदभिप्रेत्य आह । **आभीक्ष्ण्ये वीप्सायाञ्च द्योत्ये इति** ॥ द्योत्यञ्च द्योत्या च द्योत्यम् । तस्मिन्नित्यर्थः । 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्' इति नपुंसकैकशेषः । एकत्वं च नित्यवीप्से च प्रकृतिगम्ये । द्विर्वचनन्तु द्योतकम् । सत्यपि प्रकृतेर्द्वित्वे द्विरुक्तयोः प्रकृत्यनतिरेकादिति बोध्यम् । **द्विर्वचनं स्यादिति** ॥ द्वे पदे आदेशौ स्त इत्यर्थः । तत्रावयवयोः पदत्वं स्वतः सिद्धम् । समुदायस्य तु पदद्वयात्मकस्य स्थानिवत्त्वात् सुबन्तत्वम् । तेन अपचन्नपचन्नित्यत्र ङमुट् वृक्षान्वृक्षानित्यत्र 'पदान्तस्य' इति णत्वनिषेधः अग्रेऽग्रे इत्यत्र 'एङः पदान्तात्' इति पूर्वरूपमित्यादीन्यवयवानां पदकार्याणि सिध्यन्ति । पुनःपुनरिति समुदायस्य स्थानिवत्त्वेन सुबन्तत्वात् भावे ष्यञि भावे ठञि च पौनःपुन्यम्, पौनःपुनिक इति च सिध्यति । द्वे उच्चारणे स्त इत्याश्रयणे तु सर्वम्पदं द्विरुच्चारयेदित्यर्थः फलितः स्यात् । ततश्च पुनरित्येकस्यैव द्विरुच्चार्यमाणस्य पुनःपुनरित्यादेशत्वाभावेन स्थानिवत्त्वाप्रसक्त्या सुबन्तत्वविरहात् तद्धितोत्पत्तिर्न स्यात् । तस्मादादेशपक्षे एव श्रेयानित्यास्तां तावत् । **आभीक्ष्ण्यन्तिङन्तेष्विति** ॥ आभीक्ष्ण्यं पौनःपुन्यम् । तच्चेह प्रधानभूतक्रिया एव । क्रियाप्राधान्यं चाख्यातेष्वस्तीति 'प्रशंसायां रूपप्' इति सूत्रे भाष्ये स्पष्टम् । अव्ययकृत्स्वपि क्त्वातुमुन्नादिषु क्रियाप्राधान्यम् । 'अव्ययकृतो भावे' इत्युक्तेः । तथा च तिङन्तेषु

तिङन्तेष्वव्ययसंज्ञककृदन्तेषु च । पचति पचति । भुक्त्वा भुक्त्वा । वीप्सायाम् । वृक्षं वृक्षं सिञ्चति । ग्रामो ग्रामो रमणीयः ।

२१४१ । परेर्वर्जने । (८-१-५)

परि परि वङ्गेभ्यो वृष्टो देवः । वङ्गान्परिहृत्येत्यर्थः । 'परेर्वर्जने वावचनम्' । (वा ४६८३) । परि वङ्गेभ्यः ।

२१४२ । उपर्यध्यधसः सामीप्ये । (८-१-७)

उपर्युपरि ग्रामम् । ग्रामस्योपरिष्टात्समीपे देशे इत्यर्थः । अध्यधि सुखम् । सुखस्योपरिष्टात्समीपकाले दुःखमित्यर्थः । अधोऽधो लोकम् । लोकस्याधस्तात्समीपे देशे इत्यर्थः ।

२१४३ । वाक्यादेरामन्त्रितस्यासूयासम्मतिकोपकुत्सनभर्त्सनेषु । (८-१-८)

असूयायाम् । सुन्दर सुन्दर वृथा ते सौन्दर्यम् । सम्मतौ, देव देव वन्द्योऽसि । कोपे, दुर्विनीत दुर्विनीत इदानीं ज्ञास्यसि । कुत्सने, धानुष्क धानुष्क वृथा ते धनुः, भर्त्सने चोर चोर घातयिष्यामि त्वाम् ।

अव्ययसंज्ञककृदन्तेषु च पौनःपुन्यनिमित्तकद्विर्वचनं नान्यत्रेत्यर्थः । तथैवोदाहरति । **पचति पचति । भुक्त्वा भुक्त्वेति** ॥ **वीप्सायामिति** ॥ उदाह्रियते इति शेषः । **वृक्षं वृक्षमिति** ॥ कृत्स्नं वृक्षमित्यर्थः । अत्र प्रकृततद्घाटिकागतवृक्षकात्स्न्यं गम्यते । जगतीतलस्थितकृत्स्नस्य वृक्षसेचनस्य अशक्तत्वात् सर्वशब्दस्य कात्स्न्यवाचित्वेऽपि न द्वित्वमित्यनुपदमेव यथास्वे इत्यत्र वक्ष्यते । वृक्षं वृक्षमित्यत्र कात्स्न्यावगमेऽपि प्रत्येकनिष्ठमेकत्वमेव भासते, नतु बहुत्वम् । अतो न द्विबहुवचनम् । एकैकस्य प्राचामिति लिङ्गाच्च । सर्वस्येत्यभावे वृक्षाभ्यामित्यादौ 'स्वादिषु' इति पदत्वमवलम्ब्य प्रकृतिभागमात्रस्य द्विर्वचनं स्यात् । कृते तु सर्वग्रहणे पदावयवत्वानाक्रान्तस्यैव कृत्स्नावयवोपेतस्य पदस्य द्वित्वमित्यर्थलाभान्न दोषः । पदस्येति किम् । वाक्यस्य मा भूत् । **परेर्वर्जने** ॥ वर्जने वर्तमानस्य परीत्यस्य द्वे स्तः इत्यर्थः । **परि परि वङ्गेभ्यो वृष्ट इति** ॥ पर्जन्य इति शेषः । 'अपपरी वर्जने' इति परिः कर्मप्रवचनीयः । 'पञ्चम्यपाङ्परिभिः' इति पञ्चमी । परिहरेः संसारः इत्यत्र तु 'परेरसमासे' इति वक्तव्यमिति वार्तिकात् न द्विर्वचनम् । **उपर्यध्यधसः** ॥ उपरि, अधि, अधः, एतेषां द्वे स्तः सामीप्ये गम्ये इत्यर्थः । सामीप्यञ्च उपर्युपरि ग्राम इत्यत्र अधोऽधो लोकमित्यत्र च देशतः, अध्यधि सुखमित्यत्र तु कालत इति ज्ञेयम् । **वाक्यादेः** ॥ द्वे स्त इति शेषः । यद्यपि कोपाद्भर्त्सनम्, असूयया कुत्सनं, तथापि विनापि कोपासूये भर्त्सनकुत्सनयोः शिष्यादौ सम्भवात्पृथक् ग्रहणम् इति भाष्ये स्पष्टम् । **सुन्दरेति** ॥ सौन्दर्यमसहमानस्येदं वाक्यम् ।

२१४४ । एकं बहुव्रीहिवत् । (८-१-९)

द्विरुक्तः एकशब्दो बहुव्रीहिवत्स्यात् । तेन सुब्लोपपुंवद्भावौ । एकैकमक्षरम् । इह द्वयोरपि सुपोर्लुकि कृते बहुव्रीहिवद्भावादेव प्रातिपदिकत्वात्समुदायात्सुप् । एकैकया आहुत्या । इह पूर्वभागे पुंवद्भावादवग्रहे विशेषः । 'न बहुव्रीहौ' (सू २२२) इत्यत्र पुनर्बहुव्रीहिग्रहणं मुख्यबहुव्रीहिलाभार्थम् । तेनातिदिष्टबहुव्रीहौ सर्वनामतास्त्येवेति प्राञ्चः । वस्तुतस्तु भाष्यमते प्रत्या-

---

देवेति ॥ तव वन्दनं सम्मतमित्यर्थः । **दुर्विनीतेति** ॥ क्रोधाविष्टस्य वाक्यम् । **ज्ञास्यसीति** ॥ दुर्विनयस्य फलमिति शेषः । **धानुष्केति** ॥ युद्धाऽसमर्थं प्रति निन्देयम् । **चोरेति** ॥ चोरं प्रति अवाच्यवादोऽयम् । **एकं बहुव्रीहिवत्** ॥ **द्विरुक्त इति** ॥ द्विर्वचनं प्राप्त इत्यर्थः । एतच्च प्रकरणाल्लभ्यते । "वीप्सामात्रविषयमिदम्" इति भाष्याच्च । **तेनेति** ॥ बहुव्रीहिवत्त्वेन सुब्लोपपुंवद्भावौ सिध्यत इत्यर्थः । तत्र सुब्लोपमुदाहरति । **एकैकमिति** ॥ **इहेति** ॥ एकैकमित्यत्र एकमित्यस्य द्विर्वचने सति, एकमेकमिति स्थिते सुपो लुकि, समुदायात् सुबित्यन्वयः । ननु 'यत्र सङ्घाते पूर्वो भागः पदं तस्य चेद्भवति तर्हि समासस्यैव' इति नियमेन समुदायस्य प्रातिपदिकत्वाभावात् कथमिह सुपो लुक्, कथं वा समुदायात् सुबित्यत आह । **बहुव्रीहिवद्भावादेव प्रातिपदिकत्वादिति** ॥ एतच्च सुपोर्लुकीत्यत्र समुदायात्सुबित्यत्र च मध्यमणिन्यायेनान्वेति । अथ पुंवत्त्वेऽप्युदाहरति । **एकैकया आहुत्येति** ॥ एकयेत्यस्य द्विर्वचने सति एकया एकयेति स्थिते, बहुव्रीहिवत्त्वेन समुदायस्य प्रातिपदिकत्वात्सुपोर्लुकि, पूर्वखण्डस्य पुंवत्त्वे कृते, समुदायात्पुनस्तृतीयोत्पत्तौ, एकैकयेति रूपम् । बहुव्रीहिवत्त्वाभावे तु इह समुदायस्य प्रातिपदिकत्वाभावात् सुपोर्लुक् पूर्वखण्डस्य पुंवत्त्वञ्च न स्यात् । उत्तरपदपरकत्वाभावात् । समासचरमावयस्यैव उत्तरपदत्वादिति भावः । एकैकामित्यत्र उत्तरखण्डस्य 'सर्वनाम्नो वृत्तिमात्रे' इति पुंवत्त्वमपि बहुव्रीहिवत्त्वाभावे सति न प्रवृत्तिमर्हति । पूर्वस्यैवेदं 'भस्त्रैषाट्टा' इति लिङ्गादित्युक्तत्वादिति बोध्यम् । ननु सुपोर्लुकि पूर्वखण्डस्य एकाशब्दस्य पुंवत्त्वे सत्यसति वा वृद्धौ एकैकयेति सिद्ध्यत्येवेत्यत आह । **इह पूर्वभागे इति** ॥ **अवग्रहे इति** ॥ समस्तपदस्य द्विधा करणे पूर्वखण्डः अवग्रहः । "तस्य पूर्वोऽवग्रहः" इति प्रातिशाख्यम् । एकैकयेत्येक एकया इतीष्यते पूर्वखण्डस्य पुंवत्त्वम् । बहुव्रीहिवत्त्वाभावे तु एकैकयेत्येका एकयेति स्यादिति भावः । तैत्तिरीयास्तु एकैकयेत्येकया एकया इत्येवावगृह्णन्ति । एकं समासवदित्येव सिद्धे बहुव्रीहिग्रहणं बहुव्रीहौ प्रकृत्या पूर्वपदमिति स्वरार्थम् । ननु बहुव्रीहिवत्त्वे सति 'न बहुव्रीहौ' इति सर्वनामत्वनिषेधादेकैकस्मै देहीत्यादौ कथं सर्वनामकार्यमित्यत आह । **न बहुव्रीहावित्यत्रेति** ॥ 'विभाषा दिक्समासे बहुव्रीहौ' इत्यतो बहुव्रीहिग्रहणानुवृत्त्यैव सिद्धे 'न बहुव्रीहौ' इत्यत्र पुनर्बहुव्रीहिग्रहणम्मुख्यबहुव्रीहिलाभार्थम् । अतः बहुव्रीहिवदित्यतिदिष्टबहुव्रीहौ सर्वनामत्वनिषेधो नेत्यर्थः । तदाह । **तेनेति** ॥ तदेवं प्राचीनोक्तं परिहारमुक्त्वा सिद्धान्तिमतेनाह । **वस्तुतस्त्विति । एतदिति** ॥ 'न

ख्यातमेतत्। सूत्रमतेऽपि बहुव्रीह्यर्थेऽलौकिके विग्रहे निषेधकं न तु बहुव्रीहावितीहातिदेशशङ्कैव नास्ति। एकैकस्मै देहि।

२१४५। आबाधे च। (८-१-१०)

पीडायां द्योत्यायां द्वे स्तो बहुव्रीहिवच्च। गतगतः। विरहात्पीड्यमानस्येयमुक्तिः। बहुव्रीहिवद्भावात्सुब्लुक्। गतगता। इह पुंवद्भावः।

२१४६। कर्मधारयवदुत्तरेषु। (८-१-११)

इह उत्तरेषु द्विर्वचनेषु कर्मधारयवत्कार्यम्। प्रयोजनं सुब्लोपपुंवद्भावान्तोदात्तत्वानि (वा ४६८९)।

२१४७। प्रकारे गुणवचनस्य। (८-१-१२)

सादृश्ये द्योत्ये गुणवचनस्य द्वे स्तस्तच्च कर्मधारयवत्। 'कर्मधारयवदुत्तरेषु—' (सू २१४६) इत्यधिकारात्। तेन पूर्वभागस्य पुंवद्भावः

बहुव्रीहौ' इति सूत्रमित्यर्थः। एवञ्च बहुव्रीहावपि सर्वनामत्वस्य भाष्यसम्मततया बहुव्रीहिवत्त्वातिदेशे सति सर्वनामत्वन्निर्बाधमिति भावः। **सूत्रमतेऽपीति**॥ उपसर्जनत्वादेव बहुव्रीहौ सर्वनामत्वनिषेधसिद्धेः 'न बहुव्रीहौ' इति बहुव्रीह्यर्थके अलौकिकविग्रहवाक्ये एव समासात् प्राक् सर्वनामत्वं निषिध्यत इति प्रागेवोक्तम्। तस्मादिह बहुव्रीह्यतिदेशप्रयुक्तसर्वनामकार्याभावशङ्कैव नास्तीत्यर्थः। **एकैकस्मैदेहीति**॥ इह द्वयोरपि सुपोर्लुकि पुनः सर्वादिपठितैकशब्दान्ततया सर्वनामत्वात् स्मैभाव इति भावः। **आबाधे च**॥ आबाधः पीडा। तदाह। **पीडायामिति**। **गतगतः इति**॥ प्रियां विना काल इति शेषः। आबाधं दर्शयितुमाह। **विरहादिति**॥ स्त्रीवियोगादित्यर्थः। **बहुव्रीहिवद्भावादिति**॥ गतः इत्यस्य द्विर्वचने सति बहुव्रीहिवत्त्वात् समुदायस्य प्रातिपदिकत्वेन सुपोर्लुकि समुदायात् सुबुत्पत्तिरित्यर्थः। **गतगतेति**॥ प्रियेति शेषः। इयमपि स्त्रीविरहात् पीड्यमानस्योक्तिः। एकस्या एव गमनकर्त्र्याः द्विः कथनात् समानाधिकरणं स्त्रीलिङ्गमुत्तरपदमिति 'स्त्रियाः पुंवत्' इति पुंवत्त्वम्। बहुव्रीहिवत्त्वादुत्तरपदत्वस्यापि सत्वात्। तदाह। **इह पुंवद्भाव इति**॥ **कर्मधारयवदुत्तरेषु**॥ कार्यं स्यादिति शेषः। कर्मधारयवत्त्वस्य फलमाह। **प्रयोजनमिति**॥ सुब्लोपादीनां प्रत्येकान्वयाभिप्रायमेकवचनम्। **अन्तोदात्तत्वानीति**॥ अनुदात्तङेत्यधिकृतमपि भाष्यप्रामाण्यान्नात्र सम्बध्यते इति भावः। **प्रकारे गुणवचनस्य**॥ प्रकारशब्दः सादृश्ये वर्तते' व्याख्यानादित्यभिप्रेत्य आह। **सादृश्ये द्योत्ये इति**॥ गुणवचनशब्देन 'आ कडारात्' इति सूत्रस्थभाष्यपरिगणिताः शब्दा गृह्यन्ते इति 'वोतो गुणवचनात्' इत्यादौ प्रपञ्चितमिदम्। **तेनेति**॥ कर्मधारयवत्त्वेनेत्यर्थः। **पुंवद्भाव इति**॥ 'पुंवत्कर्मधारय' इत्यनेनेति शेषः। **पटुपटूइति**॥ पटुशब्दस्य द्विर्वचने कर्मधारयवत्त्वात् 'पुंवत्कर्मधारय' इति

'समासस्य' (सू ३७३४) इत्यन्तोदात्तत्वं च । पटुपटू । पटुपटुः । पटुसदृशः । ईषत्पटुरिति यावत् । गुणोपसर्जनद्रव्यवाचिनः केवलगुणवाचिनश्चेह गृह्यन्ते । शुक्लशुक्लं रूपम् । शुक्लशुक्लः पटः । 'आनुपूर्व्ये द्वे वाच्ये' (वा ४६९२) । मूले मूले स्थूलः । 'सम्भ्रमेण प्रवृत्तौ यथेष्टमनेकधा प्रयोगो न्यायसिद्धः' (वा ५०५६) । सर्प सर्प, बुध्यस्व बुध्यस्व । सर्प सर्प सर्प बुध्यस्व बुध्यस्व बुध्यस्व । 'क्रियासमभिहारे च' (वा ४६९५) लुनीहि लुनीहीत्येवायं लुनाति । 'नित्यवीप्सयोः' (सू २१४०) इति सिद्धे भृशार्थे

पूर्वखण्डस्य पुंवत्त्वे रूपमिति भावः । यद्यपि बहुव्रीहिवत्त्वेऽपि 'स्त्रियाः पुंवत्' इति पुवत्त्वादिदं सिद्धम्, तथापि कारिकेत्यादिकोपधादिष्वपि पुंवत्त्वार्थं कर्मधारयवदिति वचनमिति भावः । **पटुपटुरिति** ॥ 'वोतो गुणवचनात्' इति ङीषभावे पुंसि च द्विर्वचने रूपम् । **पटुसदृश इति** ॥ इत्यर्थ इति शेषः । फलितमाह । **ईषत्पटुरिति** ॥ इह गुणवचनशब्दस्य गुणोपसर्जनद्रव्यवाचित्वमेवेति भ्रमं निरस्यति । **गुणोपसर्जनेति** ॥ **शुक्लशुक्लं रूपमिति** ॥ शुक्लसदृशमित्यर्थः । ईषच्छुक्लमिति यावत् । एवं शुक्लशुक्लः पट इति बोध्यम् । **आनुपूर्व्ये इति** ॥ अत्र वार्तिके कर्मधारयवदिति न सम्बध्यते । तदुदाहरणे तु भाष्ये सुब्लोपदर्शनादित्यभिप्रेत्योदाहरति । **मूलेमूले इति** ॥ पूर्वपूर्वो मूलभागः उत्तरोत्तरमूलभागापेक्षया स्थूल इति यावत् । **सम्भ्रमेणेति** ॥ वार्तिकमिदम् । सम्भ्रमः भयादिकृता त्वरा, तेन प्रवृत्तौ गम्यमानायां यथेष्टम् इच्छानुसारेण अनेकधा शब्दः प्रयोक्तव्य इति वक्तव्यमित्यर्थः । अनेकधेत्युक्तेर्द्वे इति निवर्तते । यथेष्टमित्युक्तेरसकृत्त्वेऽप्येकस्य प्रयोगः स्यादिति शङ्का निरस्यति । **न्यायसिद्ध इति** ॥ यावद्वारम्प्रयोगे सति बोद्धा अर्थम्प्रत्येति तावद्वारमेव प्रयोगः । बोधात्मकफलपर्यवसायित्वाच्छब्दप्रयोगस्येत्यर्थः । एतच्च भाष्ये स्पष्टम् । तत्रापि कर्मधारयवत्त्वातिदेशान्न सुब्लुक् । भाष्ये तथैवोदाहरणात् । **क्रियासमभिहारे चेति** ॥ वार्तिकमिदम् । द्वे स्त इति शेषः । पौनःपुन्यं भृशत्वञ्च क्रियासमभिहारः । लोडन्तविषयमेवेदम् । "क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः" इति सूत्रभाष्ये क्रियासमभिहारे लोण्मध्यमपुरुषैकवचनस्य द्वे भवत इति वक्तव्यमिति पाठमभिप्रेत्योदाहरति । **लुनीहि लुनीहीत्येवायं लुनातीति** ॥ 'लूञ् छेदने' अस्मात् 'क्रियासमभिहारे लोट् लोटो हिस्वौ' इति लोट् । तस्य हि इत्यादेशः श्नाविकरणः । लुनीहीत्यस्य अनेन द्विर्वचनम् । 'यथाविध्यनुप्रयोगः पूर्वस्मिन् इत्यनुप्रयोगः' । तस्माल्लडादयः । अतिशयेन पुनर्वा लवनं लुनीहीति द्विरुक्तस्यार्थः । एककर्तृकं लवनमनुप्रयोगस्यार्थः । इतिशब्दस्त्वभेदान्वये तात्पर्यङ्ग्राहयतीत्यादि मूल एव लकारार्थप्रक्रियायां स्फुटीभविष्यति । तथा च अतिशयितमेककर्तृकं लवनमिति फलितोऽर्थः । **नित्येति** ॥ 'नित्यवीप्सयोः' इति पौनःपुन्ये द्विर्वचने सिद्धेऽपि भृशार्थे

१. अत्र च 'चापले च' (वा ४६९४) इति वार्तिके, 'नचावश्यं द्वे एव । यावद्भिः सोऽर्थो गम्यते तावन्तः प्रयोक्तव्याः' इति भाष्यं च मानम् ।

द्वित्वार्थमिदम्। पौनःपुन्येऽपि लोटा सह समुच्चित्य द्योतकतां लब्धुं वा। 'कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये। समासवच्च बहुलम्' (वा ४७००)। बहुलग्रहणादन्यपरयोर्न समासवत्। इतरशब्दस्य तु नित्यम्। 'असमासवद्भावे पूर्वपदस्थस्य सुपः सुर्वक्तव्यः' (वा ४७००)। अन्योऽन्यं विप्रा नमन्ति। अन्योऽन्यौ। अन्योऽन्यान। अन्योऽन्येन कृतम्। अन्योऽन्यस्मै दत्तमित्यादि। 'अन्योऽन्येषां पुष्करैरामृशन्तः' इति माघः। एवं परस्परम्। अत्र कस्कादित्वाद्विसर्गस्य सः। इतरेतरम्। इतरेतरेणेत्यादि। 'स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेराम्भावो वा वक्तव्यः (वा ४७०१)। अन्योन्याम्—

द्विर्वचनार्थं इदं वार्तिकमित्यर्थः। नन्वस्य भृशार्थ एव द्विर्वचनफलकत्वे 'भृशे च' इत्येव सिद्धे 'क्रियासमभिहारे' इति व्यर्थमित्यत आह। **पौनःपुन्येऽपीति**॥ लुनीहि लुनीहीत्यत्र पौनःपुन्ये लोटो द्विर्वचनस्य च समुच्चयार्थमिति यावत्। अन्यथा लोटैव पौनःपुन्यस्य द्योतितत्वात्तत्र नित्यवीप्सयोर्द्विर्वचनस्य प्रवृत्तिर्न स्यादित्यर्थः। एवञ्च 'धातोरेकाचः' इति पौनःपुन्ये यङन्ते पापच्यते इत्यादौ द्विर्वचनमित्यन्यत्र विस्तरः। **कर्मव्यतिहारे इति**॥ क्रियाविनिमयः कर्मव्यतिहारः, तस्मिन् गम्ये सर्वनाम्नो द्वे स्तः। ते च द्विरुक्ते पदे बहुलं समासवदित्यर्थः। अत्र 'बहुलम्' इति समासवदित्यत्रैवान्वेति। द्विर्वचनन्तु नित्यमेव। **अन्यपरयोरिति**॥ अन्यशब्दपरशब्दयोरेव बहुलं समासवत्त्वम्। इतरशब्दस्य तु नित्यमेवेत्यर्थः। अत एव अन्यशब्दस्य समासवत्त्वरहितमेव इतरशब्दस्य तत्सहितमेवोदाहरणं भाष्ये दृश्यते। तथा 'परस्परोपपदाच्च' इति वार्तिकप्रयोगात् परशब्दस्यापि समासवत्त्वाभावो गम्यते इति भावः। एवञ्च क्रियासमभिहारे अन्यशब्दस्य परशब्दस्य च नित्यं द्विर्वचनम्। द्विरुक्तयोस्तु समासवत्त्वं बहुलम्। इतरशब्दस्य तु तदुभयमपि नित्यम्। एतत्त्रयव्यतिरिक्तसर्वनामशब्दस्य तु नेदं द्वित्वम्। बहुलग्रहणादिति स्थितिः। **असमासवद्भावे इति**॥ इदमन्यपरशब्दयोरेव। इतरशब्दस्य समासवत्त्वस्यैवोक्तत्वात्। **सुपस्सुरिति**॥ सुबिति प्रत्याहारः। सप्तानामपि विभक्तीनां पूर्वपदस्थानां प्रथमैकवचनं सु इत्यादेशो वाच्य इत्यर्थः। इदं द्वित्वादिविधानं प्रथमैकवचनमात्रविषयमिति केचित्। तदेतद्भाष्यविरुद्धम्। भाष्ये द्वितीयादिविभक्तेरुदाहृतत्वादित्यभिप्रेत्य द्वितीयादिविभक्तीरुदाहरति। **अन्योऽन्यं विप्राः नमन्तीत्यादि**॥ इह अन्यम् अन्यौ इत्यादीनां द्वित्वे पूर्ववत्सुपः सुः। प्रथमैकवचनस्यैवेदं द्वित्वादीत्येतत् न कविसम्मतमित्याह। **अन्योऽन्येषामित्यादि माघः इत्यन्तम्**॥ परस्परमित्यत्र विसर्गस्य सत्त्वापवादमुपध्मानीयमाशङ्क्य आह। **कस्कादित्वादित्यादि। इतरेतरमिति**॥ इतरः इतरावित्यादीनां द्वित्वे समासवत्त्वात् सुपोर्लुकि समुदायात् पुनः सुबुत्पत्तिरिति भावः। **स्त्रीनपुंसकयोरिति**॥ स्त्रीनपुंसकयोर्विवक्ष्यमाणानाम् अन्यपरेतरपदानां कर्मव्यतिहारे द्वित्वे उत्तरपदस्थविभक्तेः आम् इत्यादेशो बहुलं वक्तव्यमित्यर्थः। **अन्योऽन्यामित्यादि**॥ अन्योऽन्यां, अन्योऽन्यं

अन्योन्यम्। परस्पराम्—परस्परम्। इतरेतराम्—इतरेतरं वा। इमे ब्राह्मण्यौ कुले वा भोजयतः। अत्र केचित्। आमादेशो द्वितीयाया एव। भाष्यादौ तथैवोदाहृतत्वात्। तेन स्त्रीनपुंसकयोरपि तृतीयादिषु पुंवदेव रूपमित्याहुः। अन्ये तूदाहरणस्य दिङ्मात्रत्वात्सर्वविभक्तीनामादेशमाहुः।

दलद्वये टाबभावः क्लीबे चादड्द्विरहः स्वमोः।
समासे सोरलुक्चेति सिद्धं बाहुलकाश्रयम्॥

वा इमे ब्राह्मण्यौ कुले वा भोजयतः, परस्परां परस्परं वा इमे ब्राह्मण्यौ कुले वा भोजयतः, इतरेतरां इतरेतरं वा इमे ब्राह्मण्यौ कुले वा भोजयतः इत्यन्वयः। तत्र अन्यामित्यस्य द्वित्वे दलद्वये टाबभाव इति वक्ष्यमाणतया पुंवत्त्वात् टापो निवृत्तौ समासत्वाभावात्सुपोऽलुकि पूर्वपदस्थविभक्तेः सुभावे रुत्वे 'अतो रोरप्लुतात्' इत्युत्त्वे आद्गुणे उत्तरपदस्थविभक्तेरनेन आम्भावे अन्योऽन्यामिति रूपम्। आम्भावविरहे तु पुंवत्त्वाट्टापो निवृत्तौ पूर्वपदस्थविभक्तेः सुभावे पुल्लिङ्गवदेव अन्योऽन्यमिति रूपम्। इयं ब्राह्मणी, अन्यां ब्राह्मणीं भोजयति। अन्या त्विमामित्येवं विनिमयेन ब्राह्मण्यौ भोजयत इत्यर्थः। इदं कुलङ्करोति अन्यत्कुलं भोजयति, अन्यत्कुलङ्करोति इदं कुलं इत्येवं विनिमयेन कुले भोजयत इत्यर्थः। अत्रान्यच्छब्दस्य नपुंसकलिङ्गस्य द्वित्वे पूर्वपदस्थायाः विभक्तेः सुभावे उत्तरपदस्थविभक्तेः आम्भावे अन्योऽन्यामिति रूपम्। आम्भावविरहे तु 'क्लीबे चादड्द्विरहः स्वमोः' इति वक्ष्यमाणतया पुंवत्त्वात् अदडादेशाभावे अन्योऽन्यमिति पुंवदेव रूपमिति बोध्यम्। एवं स्त्रीत्वे परामिति पदस्य द्वित्वे दलद्वयेऽपि पुंवत्त्वात् टापो निवृत्तौ पूर्वोत्तरपदस्थविभक्त्योः क्रमेण सुभावे आम्भावे च परस्परामिति रूपम्। आम्भावविरहे तु द्वित्वे पुंवत्त्वाट्टापो निवृत्तौ पूर्वपदस्थविभक्तेः सुभावे परस्परमिति रूपम्। नपुंसकत्वे तु परमित्यस्य द्वित्वे पूर्वपदस्थविभक्तेः सुभावे उत्तरपदस्थविभक्तेराम्भावे परस्परामिति रूपम्। आमभावे तु द्वित्वे पूर्वपदस्थविभक्तेः सुभावे परस्परम् इति रूपम्। इतरामित्यस्य द्वित्वे पुंवत्त्वाट्टापो निवृत्तौ उत्तरपदस्थविभक्तेराम्भावे समासवत्त्वात् पूर्वपदस्थविभक्तेर्लुकि इतरेतरामिति रूपम्। आम्भावविरहे तु इतरेतरमिति रूपम्। नपुंसकस्य तु इतरच्छब्दस्य द्वित्वे पुंवत्त्वाददडादेशविरहे पूर्वपदस्थविभक्तेः सुभावे उत्तरपदस्थविभक्तेराम्भावतदभावाभ्यां रूपद्वयम्। अत्र भाष्यादौ द्वितीयाविभक्त्यन्तस्योदाहरणादितरविभक्तिषु आम्भावो न भवतीति प्राचीनमतमाह। **अत्र केचिदिति॥** द्वितीयेतरविभक्तिषु आम्भावविरहेणेत्यर्थः। **पुंवदेवेति॥** आम्भावविरहे सति बहुळग्रहणात् पुंवत्त्वे टाबभावे प्रथमतृतीयादिविभक्तिषु पुंवदेव रूपम्। नपुंसकत्वे प्रथमतृतीयादिविभक्तिषु आम्भावविरहात् प्रथमैकवचनस्य इदं पुंवदेव रूपमित्यर्थः। सिद्धान्तमाह। **अन्ये त्विति॥ दिङ्मात्रत्वादिति॥** दिक्प्रदर्शनमात्रत्वादित्यर्थः। उपलक्षणत्वादिति यावत्। अथात्र बहुळग्रहणानुवृत्तेः प्रयोजनसिद्धान्तप्राचीनश्लोकमाह। **दलद्वये इति॥** स्त्रीलिङ्गेष्वन्यपरेतरशब्देषु कर्मव्यतिहारे द्वित्वे सति पूर्वोत्तरखण्डयोः पुंवत्त्वाट्टाब्निवृत्तिरित्यर्थः। यद्यपि इतरेतरमित्यत्र समासवत्त्वात्सर्वनाम्नो वृत्तिमात्रे इति पुंवत्त्वादेव पूर्वखण्डे टाबभावः सिद्धः, तथाप्युत्तरखण्डे टाबभावार्थम्बाहुळकाश्रयणमिति भावः। **क्लीबे**

तथाहि। अन्योऽन्यं परस्परमित्यत्र दलद्वयेऽपि टाप्प्राप्तः। न च 'सर्वनाम्नो वृत्तिमात्रे—' (वा) इति पुंवद्भावः। अन्यपरयोरसमासवद्भावात्। न च द्विर्वचनमेव वृत्तिः। 'यां यां प्रियः प्रैक्षत कातराक्षी सा सा' इत्यादावतिप्रसङ्गात्। 'अन्योऽन्यमितरेतरम्' इत्यत्र च 'अद्ड्डतरादिभ्यः—' (सू ३१५) इत्यद्ड् प्राप्तः। 'अन्योऽन्यसंसक्तमहस्त्रियामम्' 'अन्योऽन्याश्रयः,' 'परस्पराक्षिसादृश्यम्' 'अपरस्परैः' इत्यादौ सोर्लुक्च प्राप्तः। सर्वं बाहुलकबलेन समाधेयम्। प्रकृतवार्तिकभाष्योदाहरणम् 'स्त्रियाम्' (सू ४५३) इति सूत्रे 'अन्योऽन्यसंश्रयं त्वेतद्' इति भाष्यं चात्र प्रमाणमिति।

इति॥ अन्योऽन्यमित्यादौ अद्ड्डादेशविरहे इत्यर्थः। **समासे सोरिति**॥ कृतद्वित्वस्य अन्येन समासे पूर्वखण्डस्थस्येत्यर्थः। **तथाहीति**॥ यथेदं स्पष्टम्भवति तथा उदाहृत्य प्रदर्श्यते इत्यर्थः। ननु पूर्वदळे 'सर्वनाम्नो वृत्तिमात्रे' इति पुंवत्त्वेनैव टाव्निवृत्तेः सिद्धत्वात् तद्विषये बहुळग्रहणं नादर्तव्यमित्याशङ्क्य निराकरोति। **न चेति**॥ 'सर्वनाम्नो वृत्तिमात्रे' इति पुंवत्त्वस्यात्र न प्रसक्तिरित्यर्थः। कुत इत्यत आह। **अन्यपरयोरिति**॥ 'समासवच्च बहुळम्' इति समासवत्त्वम् इतरशब्दमात्रविषयं, न त्वन्यपरशब्दविषयमिति प्रागुक्तमित्यर्थः। ननु मास्तु समासवत्त्वं, तथापि 'सर्वनाम्नो वृत्तिमात्रे' इति पुंवत्त्वं दुर्वारम्। द्विर्वचनस्य वृत्तित्वादित्याशङ्क्य निराकरोति। **नच द्विर्वचनमेव वृत्तिरिति**॥ 'कृत्तद्धितसमासैकशेषसनाद्यन्ता धातुरूपाः पञ्च वृत्तयः' इति परिगणनादिति भावः। द्विर्वचनस्य वृत्त्यन्तर्भावे बाधकमाह। **यां यामिति**॥ द्विर्वचनस्य वृत्त्यन्तर्भावे "यांयां प्रियः प्रैक्षत कातराक्षी सासा ह्रिया नम्रमुखी बभूव" इत्यत्र श्लोके यांयामित्यत्र सासेत्यत्र च 'सर्वनाम्नो वृत्तिमात्रे' इति पूर्वखण्डस्य पुंवत्त्वं स्यादित्यर्थः। क्लीबे चाद्ड्डिरहः इत्यस्योदाहरति। **अन्योऽन्यमिति**॥ ननु समासे सोरलुक् चेति कथम्। अन्यपरशब्दयोः समासवत्त्वाभावादित्याशङ्क्य कृतद्वित्वस्यान्येन समासे पूर्वखण्डस्थस्य सोरलुगिति तदर्थमाश्रित्य तथैवोदाहरति। **अन्योऽन्यसंसक्तमिति**॥ अन्योऽन्येन संसक्तमिति तृतीयासमासः। अहश्च त्रियामा चेति समाहारद्वन्द्वः। अहश्च रात्रिश्च अन्योऽन्येन संयुक्तमित्यर्थः। **अन्योऽन्याश्रय इति**॥ अन्योऽन्यस्य आश्रय इति षष्ठीसमासः। **परस्पराक्षिसादृश्यमिति**॥ अक्ष्णा सादृश्यमक्षिसादृश्यम्। परस्परस्याक्षिसादृश्यमिति विग्रहः। **अपरस्परैरिति**॥ न परस्परे अपरस्परे तैरिति विग्रहे एषु कृतद्वित्वेषु समासावयवेषु पूर्वखण्डस्थस्य सुबादेशस्य सोर्लुक् प्राप्तः इत्यर्थः। सुभावविधानन्तु अन्योऽन्यमित्यादावसमासे चरितार्थमिति भावः। ननु बहुळग्रहणादेतत् समाधेयमित्यत्र किं प्रमाणमित्यत आह। **प्रकृतवार्तिकेति**॥ स्त्रीनपुंसकयोरिति प्रकृतवार्तिके अन्योऽन्यमिमे ब्राह्मण्याविति, इतरेतरमिमे कुले इति चोदाहरणात् "दळद्वये टाबभावः क्लीबे चाद्ड्डिरहः स्वमोः" इति विज्ञायते। 'स्त्रियाम्' इति सूत्रे अन्योऽन्यसंश्रयं त्वेतदिति भाष्यप्रयोगात्

२१४८। अकृच्छ्रे प्रियसुखयोरन्यतरस्याम्। (८-१-१३)

प्रियप्रियेण ददाति। प्रियेण वा। सुखसुखेन ददाति। सुखेन वा। द्विर्वचने कर्मधारयवद्भावात्सुपि लुकि तदेव वचनम्। अतिप्रियमपि वस्त्वनायासेन ददातीत्यर्थः।

२१४९। यथास्वे यथायथम्। (८-१-१४)

'यथास्वम्' इति वीप्सायामव्ययीभावः। योऽयमात्मा यच्चात्मीयं तद्यथास्वम्। तस्मिन्यथाशब्दस्य द्वे क्लीवत्वं च निपात्यते। यथायथं ज्ञाता। यथास्वभावमित्यर्थः। यथात्मीयमिति वा।

२१५०। द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु। (८-१-१५)

द्विशब्दस्य द्विर्वचनं पूर्वपदस्य अम्भावोऽत्वं चोत्तरपदस्य नपुंसकत्वं च निपात्यते एष्वर्थेषु। तत्र रहस्यं द्वन्द्वशब्दस्य वाच्यम्। इतरे विषयभूताः।

समासे सोरलुगिति विज्ञायते इत्यर्थः। **अकृच्छ्रे** ॥ कृच्छ्रं कष्टम्। अकृच्छ्रम् अनायासः। तस्मिन्वर्तमानयोः प्रिय, सुख, इत्यनयोः द्वे वा स्तः। **कर्मधारयवद्भावादिति** ॥ 'कर्मधारयवदुत्तरेषु' इत्यधिकारादिति भावः। 'समासवच्च बहुलम्' इत्यतः समासवदित्यनुवृत्तिस्तु न शङ्क्या। तस्य वार्तिकस्थत्वात्। एवञ्च प्रियेणेत्यस्य सुप्तेनेत्यस्य च द्वित्वे सति कर्मधारयवत्त्वात् सुपोस्तृतीयैकवचनयोर्लुकि पुनः समुदायात् तृतीयैकवचनमिति फलितम्। **यथास्वे यथायथम्** ॥ **वीप्सायामिति** ॥ कात्स्न्र्येन सम्बन्धो वीप्सेत्युक्तम्। स्वशब्दार्थगतकात्स्न्र्यं द्योत्ये यथाशब्दस्य स्वशब्देनाव्ययीभाव इत्यर्थः। कृत्स्नश्चासौ स्वश्चेत्यस्वपदविग्रहः। नित्यसमासत्वात्। स्वशब्दस्तु आत्मात्मीयज्ञातिधनवाची। इह तु आत्मात्मीयवाच्येव गृह्यते। नतु ज्ञातिधनवाची। व्याख्यानादित्यभिप्रेत्य विग्रहवाक्यस्य फलितमर्थमाह। **द्वे इति** ॥ स्त इति शेषः। निपातनादिति भावः। न च 'नित्यवीप्सयोः' इत्येव वीप्सया द्वित्वमिह सिद्धमिति शङ्क्यम्। द्वित्वविषयस्य शब्दस्य लक्षणया कात्स्न्र्यविशिष्टे वृत्तावेव वीप्सायाः द्विवचनविधानात्। अन्यथा सर्वो घटः इत्यादौ सर्वशब्दस्यापि द्वित्वापत्तेरिति भावः। **क्लीबत्वमिति** ॥ यथायथा इति समुदायस्येति शेषः। अन्यथा अव्ययत्वादलिङ्गत्वं स्यादिति भावः। एवञ्च कृतद्वित्वस्य नपुंसकह्रस्वत्वञ्च फलितम्। **यथायथं ज्ञातेति** ॥ अत्र ज्ञातेति तृन्नन्तम्। तद्योगे 'न लोक' इति षष्ठीनिषेधात्कर्मणि द्वितीया। तृजन्तत्वे तु यथायथस्य ज्ञातेत्येव। **द्वन्द्वं रहस्य** ॥ **पूर्वपदस्येति** ॥ द्वौ द्वाविति द्विर्वे कर्मधारयवत्त्वात् सुब्लुकि समुदायात् पुनः सुपि पूर्वपदावयवस्य इकारस्य अम् इति मकारान्तादेश इत्यर्थः। **अत्वमिति** ॥ उत्तरपदस्य अकारोऽन्तादेश इत्यर्थः। न च त्यदाद्यत्वमुत्तरपदान्तस्य

द्वन्द्वं मन्त्रयते । रहस्यमित्यर्थः । मर्यादा स्थित्यनतिक्रमः । आचतुरं ह्रीमे पशवो द्वन्द्वं मिथुनीयन्ति । माता पुत्रेण मिथुनं गच्छति । पौत्रेण प्रपौत्रेणापि मर्यादीकृत्य । व्युत्क्रमणं पृथगवस्थानम् । द्वन्द्वं व्युत्क्रान्ताः द्विवर्गसम्बन्धेन पृथगवस्थिताः । द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति । द्वन्द्वं सङ्कर्षणवासुदेवौ । अभिव्यक्तौ साहचर्येणेत्यर्थः । योगविभागादन्यत्रापि द्वन्द्वम् इष्यते ॥

इति द्विरुक्तप्रकरणम् ।

॥ इति श्रीभट्टोजिदीक्षितविरचितायां सिद्धान्तकौमुद्यां पूर्वार्धे समाप्तम् ॥

सिद्धमिति वाच्यम् । संज्ञात्वात्तदप्राप्तेरित्याहुः । **नपुंसकत्वं चेति** ॥ चकारः अनुक्तसमुच्चये। कृतद्वित्वस्य नपुंसकत्वं द्विवचनाभावश्चेत्यर्थः। **आचतुरं ह्रीति** ॥ आङभिविधौ। 'आङ्मर्यादा' इत्यव्ययीभावः । शरत्प्रभृतित्वात् टच् । चतुर्थान्तामिति फलितोऽर्थः । पशवः स्वप्रभृति चतुर्थपर्यन्तं द्वन्द्वं मिथुनीयन्ति इत्यन्वयः । मिथुनशब्देन मैथुनं विवक्षितम् । मिथुनस्य कर्म मैथुनम् । तदिच्छतीत्यर्थे 'सुप आत्मनः' इति क्यच् । फलितमर्थमाह । **मिथुनङ्गच्छतीति** ॥ मिथुनत्वं प्राप्नोतीत्यर्थः । मिथुनायन्ते इति क्यङ्पाठस्तु प्रामादिकः । **मर्यादीकृत्येति** ॥ स्वप्रभृति चतुरोऽभिव्याप्येत्यर्थः । अत्यन्तसहचरितत्वेन लोकविज्ञानाभिव्यक्तिरिति भाष्याङ्गभ्यते । तदाह । **साहचर्येणेत्यर्थः इति** ॥ अत्र द्वन्द्वं न्यञ्चीत्यत्र वीप्सायां द्वित्वम् । अन्यत्र स्वार्थे इति बोध्यम् । **अन्यत्रापीति** ॥ द्वन्द्वानि सहते इत्यादावित्यर्थः । शीतमुष्णञ्च एकद्वन्द्वम् । सुखं दुःखञ्चापरम् । क्षुत्तृष्णा चान्यत् । इह स्वार्थे द्वन्द्वः । अम्भावादि पूर्ववत् । 'चार्थे द्वन्द्वः' इति निपातनादन्यत्रापीति सिद्धम् ॥—**इति द्विरुक्तप्रकरणम्** ॥

इति श्रीमत्सन्ततसन्तन्यमानश्येनकूर्मपोडशाररथचक्राकारादिबहुगुणविराजमानप्रौढापरिमित महाध्वरस्य श्रीशाहजी शरभजी तुक्कोजी भोसलचोळमहीमहेन्द्रामात्यधुरन्धरस्य श्रीमत आनन्दरायविद्वत्सार्वभौमस्याध्वर्युणा पञ्चपुरुषीपोष्येण बाल्य एव तद्दयानिर्वर्तितापरिमिताग्निविजृम्भितवाजपेयसर्वपृष्ठाप्तोर्यामप्रमुखमखसन्तर्पितशतमखप्रमुखबर्हिर्मुखेन पदवाक्यप्रमाणपारावारपारीणाग्रजन्मविश्वेश्वरवाजपेययाजितो लब्धविद्यावैशद्येन अध्वरमीमांसाकुतूहलवृत्तिनिर्माणप्रकटितसर्वतन्त्रस्वातन्त्र्येण बोधायनापस्तम्बसत्याषाढभारद्वाजकात्यायनाश्वलायनद्राह्यायणादिकल्पसूत्रतद्भाष्यपारीणमहादेववाजपेययाजिसुतेन अन्नपूर्णाम्बागर्भजातेन वासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायां पूर्वार्धम् ॥ सम्पूर्णम् ॥

॥ श्रीरस्तु ॥

॥ [illegible] क्रमेण कौमुद्यूर्ध्वगतसूत्रसूचिकाः ॥

सूत्रम्		पार्श्वम्
	अ	
११	अ अ (८-४-६८)	१२
१८६९	अंशं हारी (५-२-६९)	८७१
८५	अकः सवर्णे दीर्घः (६-१-१०१)	६१
५३९	अकथितं च (१-४-५१)	४०३
६०१	अकर्तर्यृणे पञ्चमी (२-३-२४)	४४२
२१४८	अकृच्छ्रे प्रियसु० (८-१-१३)	९५४
६२८	अकेनोर्भविष्य० (२-३-७०)	४५७
६६४	अक्षशलाकासं० (२-१-१०)	४७८
९४४	अक्ष्णोऽदर्शनात् (५-४-७६)	६१८
१६२१	अगारान्ताट्टन् (४-४-७०)	८०६
९२४	अग्नेः स्तुत्स्तोम० (८-३-८२)	६०४
१२३६	अग्नेर्ढक (४-२-३३)	७१७
७९५	अग्राख्यायामुरसः (५-४-९३)	५३८
८८३	अग्रान्तशुद्धशु० (५-४-१४५)	५८४
२००	अङ्गस्य (६-४-१)	१२१
८५३	अङ्गुलेर्दारुणि (५-४-११४)	५७४
२०६३	अङ्गुल्यादिभ्यष्ठक् (५-३-१०८)	९२२
१४०४	अ च (४-३-३१)	७६१
४१६	अचः (६-४-१३८)	२८०
५०	अचः परस्मिन्पू० (१-१-५७)	३७
९४५	अचतुरविचतुरसु० (५-४-७७)	६१९
३५	अचश्च (१-२-२८)	२६
१२५६	अचित्तहस्तिधे० (४-२-४७)	७२३
१४७६	अचित्तादेशका० (४-३-९६)	७७५
२९९	अचि र ऋतः (७-२-१००)	१९५
२७१	अचि श्नुधातुभ्रु० (६-४-७७)	१६७
२५४	अचो ञ्णिति (७-२-११५)	१५६
७९	अचोऽन्त्यादि टि (१-१-६४)	५८
५९	अचो रहाभ्यां द्वे (८-४-४६)	४३
२४७	अच्च घेः (७-३-११९)	१५३
७७०	अच्छ गत्यर्थवदेषु (१-४-६९)	५२७
९४३	अच्प्रत्यन्ववपूर्वा० (५-४-७५)	६१८
२००६	अजादी गुणवच० (५-३-५८)	९०५
४५४	अजाद्यतष्टाप् (४-१-४)	३३६
९०४	अजाद्यदन्तम् (२-२-३३)	५९३
१६६९	अजाविभ्यां ष्यन् (५-१-८)	८१५
२०३९	अजिनान्तस्योत्त० (५-३-८२)	९१६
२०२८	अज्ञाते (५-३-७३)	९११
१९८०	अञ्चेर्लुक् (५-३-३०)	८९९
८५६	अञ्नासिकायाः० (५-४-११८)	५७५
१९७	अट्कुप्वाङ्नुम्व्य० (८-४-२)	११९
१४०६	अणञौ च (४-३-३३)	७६१
११८०	अणो द्व्यचः (४-१-१५६)	७००
११०	अणोऽप्रगृह्यस्या० (८-४-५७)	७५
१५६८	अण्कुटिलिकायाः (४-४-१८)	७९६
१९१०	अण्च (५-२-१०३)	८८१
११९८	अणिञोरनार्षयो० (४-१-७८)	७०५
१४	अणुदित्सवर्णस्य० (१-१-६९)	१७
१४५२	अणृगयनादिभ्यः (४-३-७३)	७७१
१५९८	अण्महिष्यादिभ्यः (४-४-४८)	८०२
१०९५	अत इञ् (४-१-९५)	६७९
१९२२	अत इनिठनौ (५-२-११५)	८८४
१६०	अतः कृकमिकंस० (८-३-४६)	९८
११९६	अतश्च (४-१-१७७)	७०५
२११३	अतिग्रहाव्यथन० (५-४-४६)	९३८

सूत्रम्		पार्श्वम्
२०९४	अतिथेर्ञ्यः (५-४-२६)	९३३
५५६	अतिरतिक्रमणे च (१-४-९५)	४१८
२००१	अतिशायने तम० (५-३-५५)	९०३
७९८	अतेः शुनः (५-४-९६)	५३९
१९१	अतो गुणे (६ १-९७)	११६
२०३	अतो भिस ऐस् (७-१ ९)	१२२
३०९	अतोऽम् (७-१-२४)	२०७
१६३	अतो रोरप्लुता० (६-१-११३)	९९
६९१	अत्यन्तसंयोगे च (२-१-२९)	४८९
१३६	अत्रानुनासिकः पू० (८-३-२)	८६
११४७	अत्रिभृगुकुत्सव० (२-४-६५)	६९३
४२५	अत्वसन्तस्य चा० (६-४-१४)	२८७
५३	अदर्शनं लोपः (१-१-६०)	४०
४३७	अदस औ सु० (७-२-१०७)	३००
१०१	अदसो मात् (१-१-१२)	७१
४१९	अदसोऽसेर्दादु० (८-२-८०)	२८२
१२८२	अदूरभवश्च (४-२-७०)	७३२
१७	अदेङ्गुणः (१-१-२)	२०
७७१	अदोऽनुपदेशे (१-४-७०)	५२७
३१५	अद्धृतरादिभ्यः० (७-१-२५)	२०९
१८१४	अद्यश्वीनावष्टब्धे (५-२-१३)	८५८
१६१	अधःशिरसी पदे (८-३-४७)	९८
१८७३	अधिकम् (५-२-७३)	८७२
६२६	अधिकरणवाचिनश्च (२-३-६८)	४५५
७०७	अधिकरणवाचिना० (२-२-१३)	४९९
१९८९	अधिकरणविचाले० (५-३-४३)	९००
९१९	अधिकरणैतावत्त्वे० (२-४-१५)	६०२
१४६७	अधिकृत्य कृते० (४-३-८७)	७७३
५५४	अधिपरी अनर्थकौ (१-४-९३)	४१७
६४४	अधिरीश्वरे (१-४-९७)	४६५
५४२	अधिशीङ्स्थासां० (१-४-४६)	४१२
६१३	अधीगर्थदयेशां० (२-३-५२)	४४८
१९६६	अधुना (५-३-१७)	८९५
९०९	अध्ययनतो० (२-४-५)	५९६
१६९३	अध्यर्धपूर्वद्विगो० (५-१-२८)	८२३

सूत्रम्		पार्श्वम्
१८६०	अध्यायानुवाकयोः०(५-२-६०)	८६९
१६२२	अध्यायिन्यदेशका०(४-४-७१)	८०६
१४४८	अध्यायेष्वेवर्षेः (४-३-६९)	७७०
१८१७	अध्वनो यत्खौ (५-२-१६)	८५८
९०८	अध्वर्युक्रतुरनपुंसकम् (२-४-४)	५९५
११५५	अन् (६-४-१६७)	६९४
४६२	अन उपधालोपिनो०(४-१-२८)	३४४
२४८	अनङ् सौ (७-१-९३)	१५३
४८	अनचि च (८-४-४७)	३५
२०७६	अनत्यन्तगतौ क्तात् (५-४-४)	९२७
७७६	अनत्याधान उरसि०(१-४-७५)	५२८
१९६९	अनद्यतनेर्हिल० (५-३-२१)	८९६
२०९१	अनन्तावसथेतिह० (५-४-२३)	९३२
५३६	अनभिहिते (२-३-१)	४०१
६७८	अनश्च (५-४-१०८)	४८५
३४६	अनाप्यकः (७-२-११२)	२३३
४१५	अनिदितां हल उप०(६-४-२४)	२८०
२०३१	अनुकम्पायाम् (५-३-७६)	९१२
७६३	अनुकरणं चा० (१-४-६२)	५२५
१८७४	अनुकाभिकाभीकः०(५-२-७४)	८७२
९५१	अनुगवमायामे (५-४-८३)	६२२
२०८३	अनुगादिनष्ठक् (५-४-१२)	९३०
१८१६	अनुग्वलङ्गामी (५-२-१५)	८५८
४०३	अनुदात्तं सर्व० (८-१-१८)	२७३
१२५३	अनुदात्तादेरञ् (४-२-४४)	७२२
१५२०	अनुदात्तादेश्च (४-३-१४०)	७८६
१३७	अनुनासिकात्परोऽनु०(८-३-४)	८६
१८१०	अनुपदसर्वान्ना० (५-२-९)	८५६
१८९०	अनुपद्यन्वेष्टा (५-२-९०)	८७५
४६९	अनुपसर्जनात् (४-१-१४)	३५३
५७९	अनुप्रतिगृणश्च (१-४-४१)	४३०
१७७४	अनुप्रवचनादि० (५-१-१११)	८४५
१२७२	अनुब्राह्मणादिनिः (४-२-६२)	७२८
६६९	अनुर्यत्समया (२-१-१५)	४८०
५४७	अनुर्लक्षणे (१-४-८४)	४१४

सूत्रम्		पार्श्वम्
९०७	अनुवादे चरणानाम् (२-४-३)	५९५
१४३८	अनुशतिकादीनाञ्च (७-३-२०)	७६८
१२४	अनुस्वारस्य ययि० (८-४-५८)	८१
११०६	अनृष्यानन्तर्ये० (४-१-१०४)	६८२
८३०	अनेकमन्यपदार्थे (२-२-२४)	५५२
४५	अनेकाल्शित्सर्वस्य (१-१-५५)	३२
४६०	अनो बहुव्रीहेः (४-१-१२)	३४३
७९६	अनोश्मायस्सरसां०(५-४-९४)	५३८
१४३७	अन्तःपूर्वपदाट्टच् (४-३-६०)	७६७
२२०	अन्तरं बहिर्योगोप०(१-१-३६)	१३५
७६६	अन्तरपरिग्रहे (१-४-६५)	५२६
५४५	अन्तरान्तरेणयुक्ते (२-३-४)	४१४
५९१	अन्तर्धौ येनादर्शन०(१-४-२८)	४३७
८५५	अन्तर्बहिर्भ्याञ्च०(५-४-११७)	५७५
४८९	अन्तर्वत्पतिवतो० (४-१-३२)	३६६
७५	अन्तादिवच्च (६-१-८५)	५५
२०१४	अन्तिकबाढयोर्नेद०(५-३-६३)	९०६
१६३७	अन्नाण्णः (४-४-८५)	८०९
६९६	अन्नेन व्यञ्जनम् (२-१-३४)	४९२
४९७	अन्यतो ङीष् (४-१-४०)	३७१
६७५	अन्यपदार्थे च० (२-१-२१)	४८३
५९५	अन्यारादितरर्ते० (२-३-२९)	४३९
९४९	अन्ववतप्ताद्रहसः (५-४-८१)	६२२
१०८९	अपत्यं पौत्र० (४-१-१६२)	६७४
८१५	अपथं नपुंसकम् (२-४-३०)	५४७
१३५९	अपदातौ साल्वात्(४-२-१३५)	७५१
२१०	अपदान्तस्य मूर्धन्यः(८-३-५५)	१२६
६६६	अपपरिबहिरञ्चवः०(२-१-१२)	४७९
५९६	अपपरी वर्जने (१-४-८८)	४४१
१५७१	अपमित्ययाचि० (४-४-२१)	७९६
१०५९	अपरस्पराः० (६-१-१४४)	६५९
४८०	अपरिमाणबि० (४-१-२२)	३६१
५६३	अपवर्गे तृतीया (२-३-६)	४२२
१०६४	अपस्करो रथाङ्गं (६-१-१४९)	६६०
२११२	अपादाने चाही० (५-४-४५)	९३७

सूत्रम्		पार्श्वम्
५८७	अपादाने पञ्चमी (२-३-२८)	४३५
५५७	अपिः पदार्थसं० (१-४-९६)	४१८
११६३	अपूर्वपदादन्यत०(४-१-१४०)	६९६
२५१	अपृक्त एकाल्प्र० (१-२-४१)	१५४
७००	अपेतापोढमुक्त० (२-१-३८)	४९४
१२२९	अपोनप्त्रपात्नप्तृ० (४-२-२७)	७१५
४४२	अपो भि (७-४-४८)	३०८
२७७	अप्तृन्तृच्स्वसृ० (६-४-११)	१७३
८३२	अप्पूरणीप्रमाण्योः (५-४-११६)	५५८
९८	अप्लुतवदुपस्थिते (६-१-१२९)	६९
४६७	अभाषितपुंस्काच्च (७-३-४८)	३५३
१४७०	अभिजनश्च (४-३-९०)	७७४
२०७१	अभिजिद्विदभृ० (५-३-११८)	९२५
५४३	अभिनिविशश्च (१-४-४७)	४१२
१४६६	अभिनिष्क्रामति० (४-३-८६)	७७३
५५३	अभिरभागे (१-४-९१)	४१७
२१२४	अभिविधौ संपदा०(५-४-५३)	९४१
१८१८	अभ्यमित्राच्छ च (५-२-१७)	८५९
१४०३	अमावास्याया वा (४-३-३०)	७६१
१९४	अमि पूर्वः (६-१-१०७)	११८
९७०	अमूर्धमस्तकात्० (६-३-१२)	६२९
७८३	अमैवाव्ययेन (२-२-२०)	५३२
२६७	अम्बार्थनद्योर्ह्रस्वः (७-३-१०७)	१६५
३३३	अम् सम्बुद्धौ (७-१-९९)	२२७
१८७६	अयःशूलदण्डा० (५-२-७६)	८७२
१३५३	अरण्यान्मनुष्ये (४-२-१२९)	७५०
२१२१	अरुर्मनश्चक्षुश्चेतो० (५-४-५१)	९४०
१७८	अर्थवदधातुरप्र० (१-२-४५)	११०
१०२६	अर्थे विभाषा (६-३-१००)	६४८
७१३	अर्धं नपुंसकम् (२-२-२)	५०३
८१३	अर्धर्चाः पुंसि च (२-४-३१)	५४७
८०२	अर्धाच्च (५-४-१००)	५४०
१६८४	अर्धात्परिमाणस्य०(७-३-२६)	८२१
१३७४	अर्धाद्यत् (४-३-४)	७५४
३६४	अर्वणस्त्रसावनञः (६-४-१२७)	२४८

सूत्रम्		पार्श्वम्
१९३३	अर्शआदिभ्योऽच्(५-२-१२७)	८८८
९५८	अलुगुत्तरपदे (६-३-१)	६२५
४२	अलोऽन्त्यस्य (१-१-५२)	३१
२४९	अलोऽन्त्यात्पूर्व० (१-१-६५)	१५४
८७५	अल्पाख्यायाम् (५-४-१३६)	५८२
९०५	अल्पाच्तरम् (२-२-३४)	५९३
२०४०	अल्प (५-३-८५)	९१६
२३४	अल्लोपोऽनः (६-४-१३४)	१४५
१६००	अवकयः (४-४-५०)	८०२
२०५०	अवक्षेपणे कन् (५-३-९५)	९१८
८८	अवङ् स्फोटायन०(६-१-१२३)	६४
१३९७	अवयवाद्तोः (७-३-११)	७५९
१५१५	अवयवे च प्रा० (४-३-१३५)	७८५
१७४८	अवयसि ठंश्च (५-१-८४)	८३८
९४७	अवसमन्धेभ्यस्त०(५-४-७९)	६२१
१८३१	अवात्कुटारच्च (५-२-३०)	८६२
१८१२	अवारपारात्यन्ता० (५-२-११)	८५७
१३४९	अवृद्धादपि बहु० (४-२-१२५)	७४९
१११६	अवृद्धाभ्यो नदी०(४-१-१११)	६८५
२०९६	अवे कः (५-४-२८)	९३३
८१	अव्यक्तानुकरणस्या०(६-१९८)	६०
२१२८	अव्यक्तानुकरणा० (५-४-५७)	९४२
६५२	अव्ययं विभक्ति० (२-१-६)	४७०
२०२६	अव्ययसर्वनाम्ना० (५-३-७१)	९१०
१३२४	अव्ययात्त्यप् (४-२-१०४)	७४३
४५२	अव्ययादाप्सुपः (२-४-८२)	३३२
६५१	अव्ययीभावः (२-१-५)	४७०
४५१	अव्ययीभावश्च (१-१-४१)	३३२
६५९	अव्ययीभावश्च (२-४-१८)	४७३
१४३६	अव्ययीभावाच्च (४-३-५९)	७६७
६६०	अव्ययीभावे चा० (६-३-८१)	४७६
६७७	अव्ययीभावे श०(५-४-१०७)	४८३
१४४३	अशब्दे यत्खावः (४-३-६४)	७६९
८२७	अशाला च (२-४-२४)	५५१
१०७४	अश्वपत्यादिभ्यश्च (४-१-८४)	६६४
१८२०	अश्वस्यैकाहगमः (५-२-१९)	८५९
१११३	अश्वादिभ्यः फञ् (४-१-११०)	६८४
२०७९	अषडक्षाशितंग्वलं० (५-४-७)	९२७
१०२५	अषष्ठ्यतृतीयास्थ० (६-३-९९)	६४७
३७१	अष्टन आ विभक्तौ (७-२-८४)	२५२
१०४६	अष्टनः संज्ञायां० (६-३-१२५)	६५३
३७२	अष्टाभ्य औश् (७-१-२१)	२५२
१५२९	असंज्ञायां तिल० (४-३-१४९)	७८७
१६८२	असमासे निष्का० (५-१-२०)	८२०
१३७९	असांप्रतिके (४-३-९)	७५४
७६९	अस्तं च (१-४-६८)	५२६
१९७६	अस्तातिं च (५-३-४०)	८९८
१६१०	अस्तिनास्तिदिष्टं० (४-४-६०)	८०३
३२२	अस्थिदधिसक्थ्य०(७-१-७५)	२१६
८१८	अस्मदो द्वयोश्च (१-२-५९)	५४७
१९२८	अस्मायामेधास्र० (५-२-१२१)	८८६
२११८	अस्य च्वौ (७-४-३२)	९३९
५०९	अस्वाङ्गपूर्वपदाद्वा (४-१-५३)	३८२
७८७	अहःसर्वैकदेशसं० (५-४-८७)	५३४
१९४६	अहंशुभमोर्युस् (५-२-१४०)	८९१
४४३	अहन् (८-२-६८)	३१४
७८९	अह्नष्टखोरेव (६-४-१४५)	५३५
७९१	अह्नोऽदन्तात् (८-४-७)	५३६
७९०	अह्नोऽह्न एतेभ्यः (५-४-८८)	५३६

आ

२३२	आ कडारादेका संज्ञा (१-४-१)	१४४
१५५७	आकर्षात्फल् (४-४-९)	७९४
१८६४	आकर्षादिभ्यः कन् (५-२-६४)	८७०
१७७७	आकालिकडाद्य०(५-१-११४)	८४५
१५८८	आक्रन्दाद्दश्च (४-४-३८)	८००
५९२	आख्यातोपयोगे (१-४-२९)	४३७
१८१५	आगवीनः (५-२-१४)	८५८
११५२	आगस्त्यकौण्डि० (२-४-७०)	६९४
१२२४	आग्रहायण्यश्च० (४-२-२२)	७१३
२८९	आङि चापः (७-३-१०५)	१८६

सूत्रम्		पार्श्वम्
२४४	आङो नास्त्रियाम् (७-३-१२०)	१५२
६६७	आङ्मर्यादाभि० (२-१-१३)	४७९
५९७	आङ्मर्यादाव० (१-४-८९)	४४१
१४७	आङाङोश्च (६-१-७४)	९२
१७८२	आ च त्वात् (५-१-१२०)	८४७
४४५	आच्छीनद्योर्नुम् (७-१-८०)	३२४
९६२	आज्ञायिनि च (६-३-५)	६२६
२६९	आटश्च (६-१-९०)	१६५
१७१९	आढकाचितपात्रा०(५-१-५३)	८३०
२६८	आण्नद्याः (७-३-११२)	१६५
२४०	आतो धातोः (६-४-१४०)	१४९
९६३	आत्मनश्च (६-३-६)	६२६
१६७०	आत्मन्विश्वजनभोगो०(५-१-९)	८१५
१६७१	आत्माध्वानौ खे (६-४-१६९)	८१६
१५१३	आथर्वणिकस्येक०(४-३-१३३)	७८४
७६४	आदरानादरयोः० (१-४-६३)	५२५
४६८	आदाचार्याणाम् (७-३-४९)	३५३
२	आदिरन्त्येन सहेता (१-१-७१)	४
४४	आदेः परस्य (१-१-५४)	३१
२१२	आदेशप्रत्यययोः (८-३-५९)	१२६
६९	आद्गुणः (६-१-८७)	४९
३४८	आद्यन्तवदेकस्मिन् (१-१-२१)	२३४
३६	आद्यन्तौ टकितौ (१-१-४६)	२७
६३२	आधारोऽधिकरणम् (१-४-४५)	४५९
९२१	आनङृतो द्वन्द्वे (६-३-२५)	६०२
८०७	आन्महतः समा० (६-३-४६)	५४१
१०८२	आपत्यस्य च त० (६-४-१५१)	६६८
८९२	आपोऽन्यतरस्याम् (७-४-१५)	५८६
१८०९	आप्रपदं प्राप्नोति (५-२-८)	८५६
२१४५	आबाधे च (८-१-१०)	९४९
४१२	आमन्त्रितं पूर्व० (८-१-७२)	२७७
२१७	आमि सर्वनाम्नः० (७-१-५२)	१२९
४७५	आयनेयीनीयियः फ०(७-१-२)	३५९
६३७	आयुक्तकुशला० (२-३-४०)	४६२
१४७१	आयुधजीविभ्य० (४-३-९१)	७७४

सूत्रम्		पार्श्वम्
२०६७	आयुधजीविसङ्घा०(५-३-११४)	९२३
१५६४	आयुधाच्छ च (४-४-१४)	७९५
११३६	आरगुदीचाम् (४-१-१३०)	६९०
१६८१	आर्हादगोपुच्छ० (५-१-१९)	८१९
१९३१	आलजाटचौ बहु०(५-२-१२५)	८८७
५२९	आवट्याच्च (४-१-७५)	३९६
१६२५	आवसथात्ष्ठल् (४-४-७४)	८०६
६१६	आशिषि नाथः (२-३-५५)	४४९
१०६२	आश्वर्यमनित्ये (६-१-१४७)	६६०
१४२०	आश्वयुज्या वुञ् (४-३-४५)	७६४
१९००	आसन्दीवदष्ठीवच्च०(८-२-१२)	८७८
४३०	आ सर्वनाम्नः (६-३-९१)	२९०
१०६१	आस्पदं प्रतिष्ठा० (६-१-१४६)	६६०
१९८६	आहि च दूरे (५-३-३७)	९००

इ

१०४५	इकः काशे (६-३-१२३)	६५३
३४	इको गुणवृद्धी (१-१-३)	२६
३२०	इकोऽचि विभक्तौ (७-१-७३)	२१४
४७	इको यणचि (६-१-७७)	३४
१०४३	इको वहेऽपीलोः (६-३-१२१)	६५३
९१	इकोऽसवर्णे शाक०(६-१-१२७)	६५
९९९	इको ह्रस्वोऽङ्यो० (६-३-६१)	६३८
१७९६	इगन्ताच्च लघुपू० (५-१-१३१)	८५२
३२८	इग्यणः संप्रसार० (१-१-४५)	२२४
८६६	इच्कर्मव्यतिहारे (५-४-१२७)	५८०
१०८५	इञः प्राचाम् (२-४-६०)	६६९
१३३३	इञश्च (४-२-११२)	७४५
१५३	इणः षः (८-३-३९)	९४
२११	इण्कोः (८-३-५७)	१२६
१९६३	इतराभ्योऽपि दृ० (५-३-१४)	८९४
११२५	इतश्चानिञः (४-१-१२२)	६८८
३६६	इतोऽत्सर्वनामस्थाने(७-१-८६)	२४९
५२०	इतो मनुष्यजातेः (४-१-६५)	३९१
५६६	इत्थंभूतलक्षणे (२-३-२१)	४२३
१०१८	इदङ्किमोरीश्की (६-३ ९०)	६४६

सूत्रम्		पार्श्वम्
१९४९	इदम इश् (५-३-३)	८९२
१९७२	इदमस्थमुः (५-३-२४)	८९७
३५०	इदमोऽन्वादेशे० (२-४-३२)	२३५
३४३	इदमो मः (७-२-१०८)	२३२
१९६५	इदमो हिल् (५-३-१६)	८९५
१९५८	इदमो हः (५-३-११)	८९४
१५५	इदुदुपधस्य चाप्र० (८-३-४१)	९५
२९७	इदुद्भ्याम् (७-३-११७)	१९४
३४४	इदोऽय् पुंसि (७-२-१११)	२३३
१७०३	इद्गोण्याः (१-२-५०)	८२६
९२५	इद्धौ (६-३-२८)	६०४
८९०	इनः स्त्रियाम् (५-४-१५२)	५८५
१८३४	इनच्पिटच्किटच् च (५-२-३३)	८६२
१२४५	इनण्यनपत्ये (६-४-१६४)	७२०
१२६०	इनित्रकट्यचश्च (४-२-५१)	७२४
५०५	इन्द्रवरुणभवशर्व० (४-१-४९)	३७९
१८९३	इन्द्रियमिन्द्रलिङ्ग० (५-२-९३)	८७६
८९	इन्द्रे च (६-१-१२४)	६४
३५६	इन्हन्पूषार्यम्णां शौ (६-४-१२)	२४१
२०५१	इवे प्रतिकृतौ (५-३-९६)	९१९
१००६	इष्टकेषीकामालानां० (६-३-६५)	६४१
१८८८	इष्टादिभ्यश्च (५-२-८८)	८७५
२०१८	इष्टस्य यिट् च (६-४-१५९)	९०८
१२२१	इसुसुक्तान्तात्कः (७-३-५१)	७१२
१५८	इसुसोः सामर्थ्ये (८-३-४४)	९७

ई

९२३	ईदग्नेः सोमवरुणयोः (६-३-२७)	६०३
१०९	ईदूतौ च सप्तम्यर्थे (१-१-१९)	७४
१००	ईदूदेद्द्विवचनं प्रगृह्यं (१-१-११)	७०
८९४	ईयसश्च (५-४-१५६)	५८७
७५५	ईषदकृता (२-२-७)	५२२
१०३१	ईषदर्थे (६-३-१०५)	६४८
२०२२	ईषदसमाप्तौ कल्प०(५-३-६७)	९०९
९०९	ईषे चाक्रवर्मणस्य (६-१-१३०)	७०

सूत्रम्		पार्श्वम्
	उ	
१६६२	उगवादिभ्यो यत् (५-१-२)	८१३
४५५	उगितश्च (४-१-६)	३३९
९८७	उगितश्च (६-३-४५)	६३५
३६१	उगिदचां सर्वनाम० (७-१-७०)	२४४
५	उच्चैरुदात्तः (१-२-२९)	७
१०६	उच्चः (१-१-१७)	७३
१७०	उञि च पदे (८-३-२१)	१०३
१५८२	उञ्छति (४-४-३२)	७९९
१८८०	उत्क उन्मनाः (५-२-८०)	८७३
१३०९	उत्करादिभ्यश्छः (४-२-९०)	७३९
७९४	उत्तमैकाभ्यां च (५-४-९०)	५३७
१७४१	उत्तरपथेनाहृतं च (५-१-७७)	८३७
१३९६	उत्तरपदस्य (७-३-१०)	७५९
८००	उत्तरमृगपूर्वाच्च (५-४-९८)	५३९
१९८७	उत्तराच्च (५-३-३८)	९००
१९८३	उत्तराधरदक्षिणा० (५-३-३४)	८९९
१०७८	उत्सादिभ्योऽञ् (४-१-८६)	६६६
४२०	उद ईत् (६-४-१३९)	२८४
११८	उदः स्थास्तम्भोः (८-४-६१)	७८
९९५	उदकस्योदः० (६-३-५७)	६३७
१२८६	उदक्च विपाशः (४-२-७४)	७३३
१९०१	उदन्वानुदधौ च (८-२-१३)	८७८
१८६७	उदराट्टगाद्यूने (५-२-६७)	८७१
१२२०	उदश्वितोऽन्य० (४-२-१९)	७१२
११८१	उदीचां वृद्धादगो० (४-१-१५७)	७०१
४६५	उदीचामातः स्थाने (७-३-४६)	३४८
११७७	उदीचामिञ् (४-१-१५३)	६९९
१३३०	उदीच्यग्रामाच्च० (४-२-१०९)	७४५
८८६	उद्विभ्यां काकुदस्य(५-४-१४८)	५८४
११५१	उपकादिभ्योऽन्य० (२-४-६९)	६९३
१४१५	उपजानूपकर्णो० (४-३-४०)	७६४
१४९५	उपज्ञाते (४-३-११५)	७८०
८२४	उपज्ञोपक्रमं तदा० (२-४-२१)	५५०
३	उपदेशेऽजनुनासिक० (१-३-२)	५

सूत्रम्		पार्श्वम्
७८२	उपपदमतिङ् (२-२ १९)	५३१
८७६	उपमानाच्च (५ ४-१३७)	५८२
७९९	उपमानादप्राणिषु (५-४-९७)	५३९
७३४	उपमानानि० (२ १ ५५)	५१२
७३५	उपमितं व्याघ्रादि० (२-१ ५६)	५१३
२१४२	उपर्यध्यधसः० (८-१-७)	९४७
१९८१	उपर्युपरिष्टात् (५-३ ३१)	८९९
१०४४	उपसर्गस्य घञ्य०(६-३-१२२)	६५३
२२	उपसर्गाः क्रियायोगे (१-४-५९)	८५८
८५८	उपसर्गाच्च (५-४-११९)	५७६
९५३	उपसर्गादध्वनः (५-४-८५)	६२३
७४	उपसर्गादृति धातौ (६-१-९१)	५५
८५९	उपसर्गाद्बहुळम् (८-४-२८)	५७६
६५४	उपसर्जनं पूर्वम् (२-२-३०)	४७१
७७४	उपाजेऽन्वाजे (१-४-७३)	५२७
१८३५	उपाधिभ्यां त्यकन्ना०(५-२-३४)	८६३
५४४	उपान्वध्याङ्वसः (१-४-४८)	४१२
५५१	उपोऽधिके च (१-४ ८७)	४१६
१४१९	उभे च (४-३-४४)	७६४
६२४	उभयप्राप्तौ कर्मणि (२-३ ६६)	४५४
१८४५	उभादुदात्तो नित्यम् (५-२-४४)	८६६
४२६	उभे अभ्यस्तम् (६-१-५)	२८८
१५३६	उमोर्णयोर्वा (४-३-१५८)	७८९
८८९	उरः प्रभृतिभ्यः० (५-४ १५१)	५८५
७०	उरण्परः (१-१-५१)	५०
१६४६	उरसोऽण्च (४ ४-९४)	८११
१४९४	उरसो यच्च (४-३-११४)	७७९
९२८	उषासोषसः (६ ३-३१)	६०६
१५३५	उष्ट्राद्रुञ् (४-३-१५७)	७८९

ऊ

१०७	ऊँ (१ १-१८)	७३
४	ऊकालोऽज्झ्रस्व० (१-२-२७)	७
५२१	ऊडुतः (४-१-६६)	३९१
९४२	ऊदनोर्देशे (६-३-९८)	६१७
४८३	ऊधसोऽनङ् (५-४-१३१)	३६४

सूत्रम्		पार्श्वम्
५२४	ऊरूत्तरपदादौपम्ये (४-१-६९)	३९३
१९२९	ऊर्णाया युस् (५-२-१२३)	८८७
८६९	ऊर्ध्वाद्विभाषा (५-४-१३०)	५८०
७६२	ऊर्यादिच्विडाचश्च (१-४-६१)	५२५
१९१४	ऊषसुषिमुष्क० (५-२-१०७)	८८२

ऋ

९४०	ऋक्पूरब्धूः पथा०(५-४-७४)	६१६
९९३	ऋचः शे (६-३-५५)	६३७
२७९	ऋत उत् (६-१-१११)	१७४
१४५७	ऋतष्ठञ् (४-३-७८)	७७२
२७५	ऋतो ङिसर्वनाम०(७-३-११०)	१७३
१५९९	ऋतोऽञ् (४-४-४९)	८०२
१७६९	ऋतोरण् (५-१-१०५)	८४४
९८१	ऋतो विद्यायोनि० (६-३-२३)	६३२
९२	ऋत्यकः (६-१-१२८)	६६
३७३	ऋत्विग्दधृक्स्रग्दि०(३-२-५९)	२५५
२७६	ऋदुशनस्पुरुदंसो० (७-१-९४)	१७३
३०६	ऋन्नेभ्यो ङीप् (४-१-५)	२०३
१६७६	ऋषभोपानहोर्ञ्यः (५-१-१४)	८१८
१११७	ऋष्यन्धकवृष्णि०(४-१-११४)	६८५

ए

६८	एकः पूर्वपरयोः (६-१-८४)	४९
१९२५	एकगोपूर्वाट्ठञ् (५-२-११८)	८८५
१०००	एक तद्धिते च (६-३-६२)	६३९
१६३१	एकधुराल्लुक्च (४-४-७९)	८०८
२१४४	एकं बहुव्रीहिवत् (८-१-९)	९४८
१९२	एकवचनं संबुद्धिः (२-३-४९)	११७
३९६	एकवचनस्य च (७-१-३१)	२६८
६५५	एकविभक्ति चापूर्व०(१-२-४४)	४७१
२०६४	एकशालायाष्ठज०(५-३-१०९)	९२२
२०८७	एकस्य सकृच्च (५-४-१९)	९३१
९९७	एकहलादौ पूरयि०(६-३-५९)	६३८
३२६	एकाचो बशो भष्०(८-२-३७)	२२२
२०४९	एकाच्च प्राचाम् (५-३-९४)	९१८
३०७	एकाजुत्तरपदे णः (८-४-१२)	२०४

सूत्रम्		पार्श्वम्
१९९८	एकादाकिनिच्चास०(५-३-५२)	९०२
८११	एकादिश्चैकस्य० (६-३-७६)	५४४
१९९०	एकाद्धो ध्यमुञन्य०(५-३-४४)	९००
१०९३	एको गोत्रे (४-१-९३)	६७६
८६	एङः पदान्तादति (६-१-१०९)	६३
७८	एङि पररूपम् (६-१-९४)	५८
१३३८	एङ् प्राचां देशे (१-१-७५)	७४६
१९३	एङ्ह्रस्वात्सम्बुद्धेः (६-१-६९)	११७
३२३	एच इग्घ्रस्वादेशे (१-१-४८)	२१९
६१	एचोऽयवायावः (६-१-७८)	४४
१५३७	एण्या ढञ् (४-३-१५९)	७८९
४३८	एत ईद्बहुवचने (८-२-८१)	३०१
१७६	एतत्तदोः सुलोपो०(६-१-१३२)१०८	
१९६२	एतदस्त्रतसोस्त्रतसौ०(२-४-३३)८९४	
१९५१	एतदोऽन् (५-३-५)	८९२
१०२३	एति संज्ञायामगात् (८-३ ९९)	६७७
१९५०	एतेतौ रथोः (५-३ ४)	८९२
७३	एत्येधत्यूठ्सु (६-१-८९)	५१
१९९२	एधाच्च (५-३-४६)	९०१
६१०	एनपा द्वितीया (२-३-३१)	४४७
१९८४	एनबन्यतरस्यां० (५-३-३५)	८९९
२७२	एरनेकाचोऽसंयोग०(६ ४-८२)	१६७

ऐ

१७७६	ऐकागारिकट् चौरे (५-१-११३)	८४५
१३२६	ऐषमोह्यःश्वसो० (४-२-१०५)	७४४

ओ

२८१	ओः सुपि (६-४-८३)	१७६
१५७७	ओजःसहोऽम्भसा०(४-४ २७)	७९७
९६०	ओजःसहोऽम्भः० (६ ३-३)	६२६
१०४	ओत् (१-१ १५)	७३
१६९	ओतो गार्ग्यस्य (८-३-२०)	१०३
८०	ओमाङोश्च (६-१-९५)	६०
१२८३	ओरञ् (४-२-७१)	७३२
१५१९	ओरञ् (४-३-१३९)	७८५

सूत्रम्		पार्श्वम्
८४७	ओर्गुणः (६-४-१४६)	५७२
१३४३	ओर्देशे ठञ् (४-२-११९)	७४८
२१०५	ओषधेरजातौ (५-४-३७)	९३५
२०७	ओसि च (७-३-१०४)	१२४

औ

११५९	औक्षमनपत्ये (६-४ १७३)	६९५
२८७	औङ आपः (७-१-१८)	१८५
२५६	औत् (७-३-११८)	१५७
२८५	औतोऽम्शसोः (६-१-९३)	१८२

क

१९४४	कंशंभ्यां बभयु०(५-२-१३८)	८९०
१६९०	कंसाट्टिठन् (५ १-२५)	८२३
१५४७	कंसीयपरशव्ययो०(४-३-१६८)७९१	
८८४	ककुदस्यावस्थायां०(५-४-१४६)५८४	
१३५०	कच्छाग्निवक्क० (४-२-१२६)	७४९
१३५७	कच्छादिभ्यश्च (४-२ १३३)	७५०
१४८७	कठचरकाल्लुक् (४-३-१०७)	७७८
१६२३	कठिनान्तप्रस्तारसं०(४-४-७२)	८०६
१७३३	कडकरदक्षिणाच्छ०(५-१-६९)	८३५
७५१	कडाराः कर्मधारये (२ २-३८)	५२०
७६७	कर्णमनमां श्रद्धा० (१-४-६६)	५२६
१३३२	कण्वादिभ्यो गोत्रे (४ २-१११)	७४५
७४२	कतरकतमौ जाति०(२-१-६३)	५१६
१३१५	कत्र्यादिभ्यो ढकञ् (४-२-९५)	७४१
१६५४	कथादिभ्यष्ठक् (४-४-१०२)	८१२
१३६६	कन्थापलदनगर०(४-२-१४२)	७५२
१३२२	कन्थायाष्ठक् (४-२-१०२)	७४३
१११९	कन्यायाः कनीन०(४-१-११६)	६८६
१७९२	कपिञ्जलाद्वा ढक् (५ १-१२७)	८५१
१११०	कपिबोधादाङ्गिरसे (४-१-१०७)६८३	
१६६३	कम्बलाच्च संज्ञायाम् (५-१-३)	८१४
११९४	कम्बोजाल्लुक् (४-१-१७५)	७०४
६०४	करणे च स्तोकाल्प०(२-३-३३)	४४४
२०६५	कर्कलोहितादी०(५ ३-११०)	९२३
१४४४	कर्णललाटात्कनलं०(४-३-६५)	७६९

सूत्रम्		पार्श्वम्
१०३६	कर्णे लक्षणस्थावि०(६-३-११५)	६५०
७१०	कर्तरि च (२-२-१६)	५००
५३५	कर्तुरीप्सिततमं० (१-४-४९)	४००
५६१	कर्तृकरणयोस्तृतीया(२-३-१८)	४२१
६९४	कर्तृकरणे कृता० (२-१-३२)	४९१
६२३	कर्तृकर्मणोः कृति (२-३-६५)	४५२
१७६७	कर्मण उकञ् (५-१-१०३)	८४३
५६९	कर्मणा यमभिप्रैति०(१-४-३२)	४२६
१८३६	कर्मणि घटोऽठच् (५-२-३५)	८६३
७०८	कर्मणि च (२-३-१४)	४९९
५३७	कर्मणि द्वितीया (२-३-२)	४०१
२१४६	कर्मधारयवदुत्तरेषु (८-१-११)	९४९
१४९१	कर्मन्दकृशाश्वा० (४-३-१११)	७७९
५४८	कर्मप्रवचनीययुक्ते (२-३-८)	४१४
५४६	कर्मप्रवचनीयाः (१-४-८३)	४१४
१७६४	कर्मवेषाद्यत् (५-१-१००)	८४३
१६१४	कर्माध्ययने वृत्तम् (४-४-६३)	८०४
१४८८	कलापिनोऽण् (४-३-१०८)	७७८
१४८४	कलापिवैशम्पाय०(४-३-१०४)	७७७
१४२३	कलाप्यश्वत्थयव० (४-३-४८)	७६५
१२०९	कलेर्ढक् (४-२-८)	७१०
११३१	कल्याण्यादीना०(४-१-१२६)	६८९
१०३३	कवं चोष्णे (६-३-१०७)	६४९
१४४	कस्कादिषु च (८-३-४८)	९१
२०२७	कस्य च दः (५-३-७२)	९१०
१२२७	कस्येत् (४-२-२५)	७१५
१९१८	काण्डाण्डादीर० (५-२-१११)	८८३
४८१	काण्डान्तात्क्षेत्रे (४-१-२३)	३६२
१४३	कानाम्रेडिते (८-३-१२)	९०
१०३०	का पथ्यक्षयोः (६-३-१०४)	६४८
१३१९	कापिश्याः ष्फक् (४-२-९९)	७४२
५३४	कारके (१-४-२३)	४००
९६८	कारनाम्नि च प्राचां०(६-३-१०)६२८	
१०७०	कारस्करो वृक्षः (६-१-१५६)	६६१
१००७	कारे सत्यागदस्य (६-३-७०)	६४१

सूत्रम्		पार्श्वम्
१६१३	कार्मस्ताच्छील्ये (६-४-१७२)	८०४
१८८१	कालप्रयोजनाद्रोगे (५-२-८१)	८७३
६९०	कालाः (२-१-२८)	४८९
७१६	कालाः परिमाणिना (२-२-५)	५०५
२१०१	कालाच्च (५-४-३३)	९३५
१३८१	कालाट्ठञ् (४-३-११)	७५५
१७४२	कालात् (५-१-७८)	८३७
१४१८	कालात्साधुपुष्प्य० (४-३-४३)	७६४
१७७०	कालाद्यत् (५-१-१०७)	८४४
५५८	कालाध्वनोरत्यन्त० (२-३-५)	४२०
१२३७	कालेभ्यो भववत् (४-२-३४)	७१७
१२९९	कालोपसर्जने च० (१-२-५७)	७३६
१४८३	काश्यपकौशिका०(४-३-१०३)	७७७
१३४०	काश्यादिभ्य० (४-२-११६)	७४७
२०४५	कासूगोणीभ्यां ष्ठरच्(५-३-९०)	९१७
१०६९	कास्तीराजस्तु० (६-१-१५५)	६६१
२०४७	किंयत्तदो निर्धार० (५-३-९२)	९१७
१९४८	किंसर्वनामबहुभ्यो० (५-३-२)	८९१
७४३	किं क्षेपे (२-१-६४)	५१६
१०७६	किति च (७-२-११८)	६६४
३४२	किमः कः (७-२-१०३)	२३२
९५५	किमः क्षेपे (५-४-७०)	६२४
१८४२	किमः सङ्ख्यापरि०(५-२-४१)	८६५
१९७३	किमश्च (५-३-२५)	८९७
१८४१	किमिदंभ्यां वो घः (५-२-४०)	८६५
२००४	किमेत्तिङव्ययघा०(५-४-११)	९०४
१९५९	किमोऽत् (५-३-१२)	८९४
१६०३	किसरादिभ्यः छन् (४-४-५३)	८०२
७६१	कुगतिप्रादयः (२-२-१८)	५२५
२०४३	कुटीशमीशुण्डा० (५-३-८८)	९१६
१९५४	कु तिहोः (७-२-१०४)	८९३
२०४४	कुत्वा डुपच् (५-३-८९)	९१७
७३२	कुत्सितानि कुत्सनैः (२-१-५३)	५१२
२०२९	कुत्सिते (५-३-७४)	९१२
१४२	कुत्वोःकःपौ च (८-३-३७)	९०

सूत्रम्		पार्श्वम्
१०५६	कुमति च (८-४-१३)	६५८
८०६	कुमहद्भ्यामन्य० (५-४-१०५)	५४१
७५२	कुमार श्रमणादिभिः(२-१-७०)	५२१
१३०६	कुमुदनडवेतसे० (४-२-८७)	७३८
८७८	कुम्भपदीषु च (५-४-१३९)	५८३
११९०	कुरुनादिभ्यो ण्यः (४-१-१७२)	७०३
११७५	कुर्वादिभ्यो ण्यः (४-१-१५१)	६९९
१३१६	कुलकुक्षिग्रीवाभ्यः०(४-२-९६)	७४२
११३२	कुलटाया वा (४-१-१२७)	६८९
११६२	कुलात्खः (४-१-१३९)	६९६
१४९८	कुलालादिभ्यो० (४-३-११८)	७८०
१७२१	कुलिजाल्लुक्खौ च (५-१-५५)	८३१
१५५२	कुलुत्थकोपधादण् (४-४-४)	७९३
१७८३	कुल्मापादञ् (५-२-८३)	८७४
२०६०	कुशाग्राच्छः (५-३-१०५)	९२१
१५८१	कुसीददशकादशा०(४-४-३१)	७९८
१०५८	कुस्तुम्बुरुणि० (६-१-१४३)	६५९
१३६९	कृकणपर्णाद्भारद्वाजे(४-२-१४५)	७५२
६१४	कृञः प्रतियत्ने (२-३-५३)	४४८
२१२९	कृञो द्वितीयतृतीय०(५-४-५८)	९४३
१४१३	कृतलब्धक्रीत० (४-३-३८)	७६३
१४९६	कृते ग्रन्थे (४-३-११६)	७८०
१७९	कृत्तद्धितसमासाश्च (१-२-४६)	१११
७४९	कृत्यतुल्याख्या० (२-१-६८)	५२०
६२९	कृत्यानां कर्तरि वा (२-३-७१)	४५७
६९५	कृत्यैरधिकार्थवचने (२-१-३३)	४९२
७२०	कृत्यैर्ऋणे (२-१-४३)	५०६
६२२	कृत्वोर्थप्रयोगे का० (२-३-६४)	४५१
३७४	कृदतिङ् (३-१-९३)	२५६
४४९	कृन्मेजन्तः (१-१-३९)	३३२
२११७	कृभ्वस्तियोगे० (५-४-५०)	९३९
११४४	केकयमित्रयुप्रलयानां०(७-३-२)६९२	
८३४	केऽणः (७-४-१३)	५५९
१२४८	केदाराद्यञ्च (४-२-४०)	७२१
४८८	केवलमामकभागधे०(४-१-३०)३६५	

सूत्रम्		पार्श्वम्
१९१६	केशाद्वोऽन्यतर० (५-२-१०९)	८८२
१२५७	केशाश्वाभ्यां य० (४-२-४८)	७२३
१०२७	कोः कत्तत्पुरुषेऽचि(६-३-१०१)	६४८
१२९१	कोपधाच्च (४-२-७९)	७३४
१५१७	कोपधाच्च (४-३-१३७)	७८५
१३५६	कोपधादण् (४-२-१३२)	७५०
१४१७	कोशाड्ढञ् (४-३-४२)	७६४
१५१२	कौपिञ्ज० (४-३-१३२)	७८३
१२१४	कौमारापूर्ववचने (४-२-१३)	७११
४७७	कौरव्यमाण्डूकाभ्यां०(४-१-१९)३६०	
११७९	कौसल्यकार्मार्याभ्यां०(४-१-१५५)	७००
६२५	क्तस्य च वर्तमाने (२-३-६७)	४५४
५०७	क्तादल्पाख्यायाम् (४-१-५१)	३८१
७०६	क्तेन च पूजायाम् (२-२-१२)	४९९
७३९	क्तेन नञ्विशिष्ट० (२-१-६०)	५१५
७२२	क्तेनाहोरात्रावयवाः(२-१-४५)	५०७
७८५	क्त्वा च (२-२-२२)	५३३
४५०	क्त्वातोसुन्कसुनः (१-१-४०)	३३२
८३७	क्यङमानिनोश्च (६-३-३६)	५६५
२११९	क्यच्व्योश्च (६-४-१५२)	९४०
१४४७	क्रतुयज्ञेभ्यश्च (४-३-६८)	७६९
१२७०	क्रतूक्थादिसूत्रांता०(४-२-६०)	७२६
१२७१	क्रमादिभ्यो वुन् (४-२-६१)	७२८
६६	क्रय्यस्तदर्थे (६-१-८२)	४८
५८१	क्रियार्थोपपदस्य० (२-३-१४)	४३१
१५३४	क्रीतवत्परिमाणात् (४-३-१५६)	७८८
५०६	क्रीतात्करणपूर्वात् (४-१-५०)	३८०
५७५	क्रुधद्रुहेर्ष्यासूयार्था०(१-४-३७)	४२८
५७६	क्रुधद्रुहोरुपसृष्टयोः०(१-४-३८)	४२९
१२००	क्रौञ्चादिभ्यश्च (४-१-८०)	७०७
१९६०	क्राति (७-२-१०५)	८९४
३७७	क्विन्प्रत्ययस्य कुः (८-२-६२)	२५६
११६१	क्षत्राद्घः (४-१-१३८)	६९६
६५	क्षय्यजय्यौ शक्यार्थे(६-१-८१)	४७
१२२२	क्षीराड्ढञ् (४-२-२०)	७१३

सूत्रम्		पार्श्वम्
९१२	क्षुद्रजन्तवः (२-४-८)	५९७
११३७	क्षुद्राभ्यो वा (४-१-१३१)	६९०
१४९९	क्षुद्राभ्रमरवटरपा०(४-३-११९)	७८०
७९२	क्षुभ्नादिषु च (८-४-३९)	५३६
१८९२	क्षेत्रियच्परक्षेत्रे चि०(५-२-९२)	८७५
७२४	क्षेपे (२-१-४७)	५०७
	ख	
१६३०	खः सर्वधुरात् (४-४-७८)	८०८
६८८	खट्वा क्षेपे (२-१-२६)	४८९
१२५४	खण्डिकादिभ्यश्च (४-२-४५)	७२३
७६	खरवसानयोर्विसर्ज०(८-३-१५)	५६
१२१	खरि च (८-४-५५)	८०
१२५९	खलगोरथात् (४-२-५०)	७२३
१६६८	खलयवमाषतिलवृष०(५-१-७)	८१५
१६९८	खार्या ईकन् (५-१-३३)	८२४
८०३	खार्याः प्राचाम् (५-४-१०१)	५४०
२५५	ख्यत्यात्परस्य (६-१-११२)	१५६
	ग	
५४०	गतिबुद्धिप्रत्यवसा०(१-४-५२)	४०८
२३	गतिश्च (१-४ ६०)	२१
५८५	गत्यर्थकर्मणि द्वि० (२-३-१२)	४३४
८७४	गन्धस्येदुत्पूति० (५-४-१३५)	५८१
१४३५	गम्भीराञ्ञयः (४-३-५८)	७६७
११०७	गर्गादिभ्यो यञ् (४-१-१०५)	६८२
१३६१	गर्त्तोत्तरपदाच्छः (४-२-१३७)	७५१
९१५	गवाश्वप्रभृतीनि च (२-४-११)	५९८
९६७	गवियुधिभ्यां स्थिरः (८-३-९५)	६२८
१३६२	गहादिभ्यश्च (४-२-१३८)	७५१
१९१७	गाण्ड्यजगात्संज्ञा०(५-२-११०)	८८३
१२७५	गाथिविदथिकेशि०(६-४-१६५)	७२९
६८३	गिरेश्च सेनकस्य (५-४-११२)	४८६
१६५५	गुडादिभ्यश्छन् (४-४-१०३)	८१२
१७८८	गुणवचनब्राह्मणा०(५-१-१२४)	८४९
९७	गुरोरनृतोऽनन्त्य० (८-२-८६)	६९
११४३	गृष्ट्यादिभ्यश्च (४-१-१३६)	६९१
१६४२	गृहपतिना संयुक्ते० (४-४-९०)	८१०
२८४	गोतो णित् (७-१-९०)	१८२
१४७९	गोत्रक्षत्रियाख्ये० (४-३-९९)	७७५
१७९९	गोत्रचरणाच्छला०(५ १-१३४)	८५३
१५०६	गोत्रचरणाद्वुञ् (४-३-१२६)	७८२
११७१	गोत्रस्त्रियाः कुत्स०(४-१ १४७)	६९७
१४५९	गोत्रादङ्कवत् (४-३-८०)	७७२
१०९४	गोत्राद्यून्यस्त्रियाम् (४-१ ९४)	६७८
११९९	गोत्रावयवात् (४-१-७९)	७०६
१०९९	गोत्रे कुञ्जादिभ्य० (४-१-९८)	६८०
१०८१	गोत्रेऽलुगचि (४-१-८९)	६६७
१२४६	गोत्रोक्षोष्ट्रोरभ्रराज०(४-२-३९)	७२०
१७०५	गोद्यचोऽसङ्ख्या० (५-१-३९)	८२७
११३५	गोधाया ढ्रक् (४ १-१२९)	६९०
१५३८	गोपयसोर्यत् (४-३-१६०)	७८९
१५५४	गोपुच्छाट्ठञ् (४-४ ६)	७९३
१३६०	गोयवाग्वोश्च (४-२-१३६)	७५१
७२९	गोरतद्धितलुकि (५-४-९२)	५१०
१५२५	गोश्च पुरीषे (४-३-१४५)	७८७
१८६२	गोषदादिभ्यो वुन् (५-२-६२)	८७०
१८१९	गोष्टात्खञ्भूतपूर्वे (५-२-१८)	८५९
१०६०	गोष्पदं सेवितासे०(६-१-१४५)	६५९
६५६	गोस्त्रियोरुपसर्जनस्य (१-२-४८)	४७१
१०१०	ग्रन्थान्ताधिके च (६-३-७९)	६४३
७९७	ग्रामकौटाभ्यां च त०(५-४ ९५)	५३८
१३७७	ग्रामजनपदैकदेशा० (४-३-७)	७५४
१२५१	ग्रामजनबन्धुभ्यस्तल्(४-२-४३)	७२२
१४४०	ग्रामात्पर्यनुपूर्वात् (४-३ ६१)	७६८
१३१४	ग्रामाद्यखञौ (४-२-९४)	७४१
९३९	ग्राम्यपशुसङ्घेष्वतरु०(१-२ ७३)	६११
१४३४	ग्रीवाभ्योऽण्च (४-३ ५७)	७६७
१४२१	ग्रीष्मवसन्तादन्य० (४-३-४६)	७६५
१४२४	ग्रीष्मावरसमाद्वुञ् (४-३-४९)	७६५
	घ	
९७५	घकालतनेषु काल०(६-३-१७)	६३०

सूत्रम्		पार्श्वम्
१२६७	घञः सास्यां क्रि०	(४-२-५८) ७२५
२०३४	घनिलचौ च	(५-३-७९) ९१३
९८५	घरूपकल्पप् चेलड्०	(६-३-४३) ६३४
२४५	घर्ङिति	(७-३-१११) १५२
	ङ	
१३४	ङमो ह्रस्वादचि०	(८-३-३२) ८५
२४६	ङसिङसोश्च	(६-१-११०) १५३
२१६	ङसिङ्योः स्मा०	(७-१-१५) १२९
४३	ङिच्च	(१-१-५३) ३१
२९६	ङिति ह्रस्वश्च	(१-४-६) १९३
३८२	ङेप्रथमयोरम्	(७-१-२८) २६१
२७०	ङेराम्याम्भ्यः	(७-३-११६) १६६
२०४	ङेर्यः	(७-१-१३) १२२
१३०	ङ्णोः कुक्टुक्शरि	(८-३-२८) ८३
१००१	ङ्यापोः संज्ञाछन्द०	(६-३-६३) ६३९
१८२	ङ्याप्प्रातिपदिकात्	(४-१-१) ११२
	च	
११३४	चटकाया ऐरक्	(४-१-१२८) ६९०
३३१	चतुरनडुहोरामुदात्तः	(७-१-९८) २२५
६३१	चतुर्थी चाशिष्यायु०	(२-३-७३) ४५८
६९८	चतुर्थी तदर्थार्थब०	(२-१-३६) ४९३
५७०	चतुर्थी सम्प्रदाने	(२-३-१३) ४२६
७५३	चतुष्पादो गर्भिण्या	(२-१-७१) ५२१
११४१	चतुष्पाद्भ्यो ढञ्	(४-१-१३५) ६९१
१०१४	चरणे ब्रह्मचारिणि	(६-३-८६) ६४४
१२५५	चरणेभ्यो धर्मवत्	(४-२-४६) ७२३
१५५६	चरति	(४-४-८) ७९४
१६७७	चर्मणोऽञ्	(५-१-१५) ८१८
२०	चादयोऽसत्त्वे	(१-४-५७) २१
९०१	चार्थे द्वन्द्वः	(२-२-२९) ५९१
१०४७	चितेः कपि	(६-३-१२७) ६५४
१७५५	चित्तवति नित्यम्	(५-१-८९) ८४०
१८९	चुटू	(१-३-७) ११६
१५७३	चूर्णादिनिः	(४-४-२३) ७९७
३७८	चोः कुः	(८-२-३०) २५७

सूत्रम्		पार्श्वम्
४१७	चौ	(६-३-१३८) २८०
२१२०	च्वौ च	(७-४-२६) ९४०
	छ	
१४८९	छगलिनो ढिनुक्	(४-३-१०९) ७७८
१२३०	छ च	(४-२-२८) ७१५
१६१२	छत्रादिभ्यो णः	(४-४-६२) ८०४
१६७५	छदिरुपधिबलेर्ढञ्	(५-१-१३) ८१७
१८८९	छन्दसि परिपन्थि०	(५-२-८९) ८७५
१६४५	छन्दसो निर्मिते	(४-४-९३) ८११
१४५०	छन्दसो यदणौ	(४-३-७१) ७७०
१५०९	छन्दोगौक्थिक०	(४-३-१२९) ७८३
१२७८	छन्दोब्राह्मणानि च०	(४-२-६६) ७३१
८२५	छाया बाहुल्ये	(२-४-२२) ५५०
१४६	छे च	(६-१-७३) ९१
१७२९	छेदादिभ्यो नित्यम्	(५-१-६४) ८३४
	ज	
३१२	जश्शसोः शिः	(७-१-२०) २०८
४२८	जक्षित्यादयः षट्	(६-१-६) २८९
१४३२	जङ्गलधेनुवलजा०	(७-३-२५) ७६३
१३४८	जनपदतदवध्योश्च	(४-२-१२४) ७४९
११८६	जनपदशब्दा०	(४-१-१६८) ७०१
१४८०	जनपदिनां जन०	(४-३-१००) ७७६
१२९३	जनपदे लुप्	(४-२-८१) ७३५
५९३	जनिकर्तुः प्रकृतिः	(१-४-३०) ४३८
१५४४	जम्ब्वा वा	(४-३-१६५) ७९०
८६४	जम्भा सुहरित०	(५-४-१२५) ५७९
२२७	जराया जरसन्य०	(७-२-१०१) १४१
२१४	जसः शी	(७-१-१७) १२८
२४१	जसि च	(७-३-१०९) १५१
१५३१	जातरूपेभ्यः प०	(४-३-३५३) ७८७
२०३७	जातिनाम्नः कन्	(५-३-८१) ९१५
९१०	जातिरप्राणिनाम्	(२-४-६) ५९६
५१८	जातेरस्त्रीविषयाद०	(४-१-६३) ३८८
८४२	जातेश्च	(६-३-४१) ५६८
२०८१	जात्यन्ताच्छ बन्धुनि	(५-४-९) ९२९

सूत्रम्		पार्श्वम्
८१७	जात्याख्यायामे० (१-२-५८)	५४७
५००	जानपदकुण्ड० (४-१-४२)	३७३
८७२	जायाया निङ् (५-४-१३४)	५८१
६१७	जासिनिप्रहण० (२-३-५६)	४४९
१४४१	जिह्वामूलाङ्गुलेश्छः (४-३-६२)	७६८
१०९०	जीवति तु वंश्ये० (४-१-१६३)	६७४
२०५४	जीविकार्थे चापण्ये (५-३-९९)	९२०
७८०	जीविकोपनिषदा० (१-४-७९)	५२९
१४०९	ज्ञः प्रोष्ठपदानाम् (७-३-१८)	७६२
६१२	ज्ञोऽविदर्थस्य करणे (२-३-५१)	४४७
२०११	ज्य च (५-३-६१)	९०६
२०१२	ज्यादादीयसः (६-४-१६०)	९०६
१०२१	ज्योतिरायुषः स्तो० (८-३-८३)	६४६
१०१३	ज्योतिर्जनपद० (६-३-८५)	६४४
१९२१	ज्योत्स्नातमिस्रा० (५-२-११४)	८८४
	झ	
६८२	झयः (५-४-१११)	४८६
१८९८	झयः (८-२-१०)	८७७
११९	झयो होऽन्यतरस्याम्(८-४-६२)	७९
७१	झरो झरि सवर्णे (८-४-६५)	५०
८४	झलां जशोऽन्ते (८-२-३९)	६१
५२	झलां जश्झशि (८-४-५३)	४०
	ञ	
१५३३	ञितश्च तत्प्र० (४-३-१५५)	७८८
२०७२	ञ्यादयस्तद्राजाः (५-३-११९)	९२५
	ट	
२०१	टाङसिङसामिना० (७-१-१२)	१२१
४५८	टाबृचि (४-१-९)	३४२
४७०	टिड्ढाणञ्द्वयस०(४-१-१५)	३५४
३१६	टेः (६-४-१४३)	२०९
१७८६	टेः (६-४-१५५)	८४८
	ठ	
१३०३	ठक्छौ च (४-२-८४)	७३७
१४५४	ठगायस्थानेभ्यः (४-३-७५)	७७१
१२४९	ठञ्कवचिनश्च (४-२-४१)	७२१

सूत्रम्		पार्श्वम्
११७०	ठस्येकः (७-३-५०)	६९७
२०३५	ठाजादावूर्ध्वं द्वितीo (५-३-८३)	९१३
	ड	
१३१	डः सि धुट् (८-३-२९)	८४
२५९	डति च (१-१-२५)	१५९
४६१	डाबुभाभ्यामन्य० (४-१-१३)	३४३
	ढ	
११३९	ढकि लोपः (४-१-१३३)	६९१
११२२	ढक्च मण्डूकात् (४-१-११९)	६८७
११४२	ढे लोपोऽकद्वाः (६-४-१४७)	६९१
१७४	ढ्रलोपे पूर्वस्य० (६-३-१११)	१०६
	ण	
१२७६	ण्यक्षत्रियार्षञितो०(२-४-५८)	७२९
	त	
१४५३	तत आगतः (४-३-७४)	७७१
६८४	तत्पुरुषः (२-१-२२)	४८७
७४५	तत्पुरुषः समाना० (१-२-४२)	५१७
७८६	तत्पुरुषस्याङ्गुलेः० (५-४-८६)	५३४
९७२	तत्पुरुषे कृति० (६-३-१४)	६२९
८२२	तत्पुरुषोऽनञ्कर्म०(२-४-१९)	५५०
२०८९	तत्प्रकृतवचने मयट् (५-४-२१)	९३१
१५७८	तत्प्रत्ययानुपूर्व० (४-४-२८)	७९७
११३०	तत्प्रत्ययस्य च (७-३-२९)	६८८
७२३	तत्र (२-१-४६)	५०७
१८६३	तत्र कुशलः पथः(५-२-६३)	८७०
१७६०	तत्र च दीयते० (५-१-९६)	८४२
१३९३	तत्र जातः (४-३-२५)	७५८
१७७९	तत्र तस्येव (५-१-११६)	८४६
८४६	तत्र तेनेदमिति स०(२-२-२७)	५७०
१६२०	तत्र नियुक्तः (४-४-६९)	८०५
१४२८	तत्र भवः (४-३-५३)	७६६
१७०९	तत्र विदित इति च (५-१-४३)	८२८
१६५०	तत्र साधुः (४-४-९८)	८११
१२१५	तत्रोद्धृतममत्रेभ्यः(४-२-१४)	७११
७८१	तत्रोपपदं सप्तमी० (३-१-९२)	५३०

सूत्रम्		पार्श्वम्
११५०	तिककितवादिभ्यो०(२-४-६८)	६९३
११७८	तिकादिभ्यः फिञ् (४-१-१५४)	७००
२००२	तिङश्च (५-३-५६)	९०३
१४८२	तित्तिरिवरतन्तु०(४-३-१०२)	७७६
४२३	तिरसस्तिर्यलोपे (६-३-९४)	२८४
१५६	तिरसोऽन्यतरस्यां (८-३-४२)	९६
७७२	तिरोऽन्तर्धौ (१-४-७१)	५२७
८४४	ति विंशतेर्डिति (६-४-१४२)	५६९
६७१	तिष्ठद्गुप्रभृतीनि च (२-१-१७)	४८०
८२०	तिष्यपुनर्वस्वोर्नं० (१-२-६३)	५४८
१३२७	तीरपोत्तरपदा०(४-२-१०६)	७४४
१०१५	तीर्थे ये (६-३-८७)	६४५
१९२४	तुन्दादिभ्य इलच्च (५-२-११७)	८८५
१९४५	तुन्दिवलिवटेर्भः (५-२-१३९)	८९०
३९४	तुभ्यमह्यौ ङयि (७-२-९५)	२६७
५८२	तुमर्थाच्च भाव० (२-३-१५)	४३२
२००८	तुरिष्टेमेय सु (६-४-१५४)	९०५
६३०	तुल्यार्थैरतुलोप० (२-३-७२)	४५८
१०	तुल्यास्यप्रयत्नं स० (१-१-९)	१०
२००७	तुश्छन्दसि (५-३-५९)	९०५
१४७४	तुदीसलातुरवर्मती०(४-३-९४)	७७४
७०९	तृजकाभ्यां कर्तरि (२-२ १५)	५००
२७४	तृज्वत्क्रोष्टुः (७ १ ९५)	१७२
१०२९	तृणे च जातौ (६-३-१०३)	६४८
६९२	तृतीया तत्कृतार्थेन०(२-१-३०)	४९०
३२१	तृतीयादिषु भाषित०(७ १-७४)	२१५
७८४	तृतीयाप्रभृतीन्यन्य०(२-२ २१)	५३३
५४९	तृतीयार्थे (१-४ ८५)	४१५
६५८	तृतीयासप्तम्योर्बहुलं(२-४-८४)	४७२
२२३	तृतीयासमासे (१ १-३०)	१३८
११९२	ते तद्राजाः (४-१-१७४)	७०३
१७०२	तेन क्रीतम् (५ १ ३७)	८२६
१७७८	तेन तुल्यं क्रिया०(५-१-११५)	८४६
१५५०	तेन दीव्यति खनति (४-४-२)	७९३
१२८०	तेन निर्वृत्तम् (४-२-६८)	७३२
१७४३	तेन निर्वृत्तम् (५-१-७९)	८३७
१७५७	तेन परिजय्यलभ्य०(५-१-९३)	८४०
१४८१	तेन प्रोक्तम् (४-३-१०१)	७७६
१७६२	तेन यथाकथाच०(५-१-९८)	८४३
१२०२	तेन रक्तं रागात् (४-२-१)	७०८
१८२७	तेन वित्तश्चुञ्चुप्च०(५-२-२६)	८६१
८४८	तेन सहेति तुल्ययोगे(२-२-२८)	५७२
१४९२	तेनैकदिक् (४-३-११२)	७७९
४०६	तेमयावेकवचनस्य (८-१-२२)	२७३
११५	तोः षि (८-४-४३)	७७
११७	तोर्लि (८-४-६०)	७८
४२९	त्यदादिषु दृशोऽना०(३-२-६०)	२९०
२६५	त्यदादीनामः (७-२-१०२)	१६१
१३३६	त्यदादीनि च (१-१-७४)	७४६
९३८	त्यदादीनि सर्वैर्नि० (१-२-७२)	६१०
१५१८	त्रपुजतुनोः षुक् (४-३-१३८)	७८५
१७२७	त्रिंशच्चत्वारिंशतो०(५-१-६२)	८३४
८८५	त्रिककुत्पर्वते (५-४-१४७)	५८४
२९८	त्रिचतुरोः स्त्रियां०(७-२-९९)	१९४
५६	त्रिप्रभृतिषु शाकटा०(८-४-५०)	४२
१८५५	त्रेः सम्प्रसारणञ्च (५-२-५५)	८६८
१५७०	त्रेर्मन्नित्यम् (४-४-२०)	७९६
८०९	त्रेस्त्रयः (६-३ ४८)	५४३
२६४	त्रेस्त्रयः (७ १-५३)	१६१
३८९	त्वमावेकवचने (७-२-९७)	२६६
४०७	त्वामौ द्वितीयायाः (८-१-२३)	२७३
३८४	त्वाहौ सौ (७-२-९४)	२६२
१००२	त्वे च (६-३-६४)	६३९
	थ	
३६७	थो न्थः (७-१-८७)	२४९
	द	
१९८५	दक्षिणादाच् (५-३-३६)	९००
१३१८	दक्षिणापश्चात्पुरस०(४-२-९८)	७४२
८३५	दक्षिणेर्मा लुब्ध०(५-४-१२६)	५७९
१९७८	दक्षिणोत्तराभ्या० (५-३-२८)	८९८

सूत्रम्		पार्श्वम्
२०७४	दण्डव्यवसर्गयोश्च (५-४-२)	९२६
१७३१	दण्डादिभ्यः (५-१-६६)	८३५
१२१९	दध्नष्टक् (४-२-१८)	७१२
१९१३	दन्त उन्नत उरच् (५-२-१०६)	८८२
१९२०	दन्तशिखात्संज्ञा० (५-२-११३)	८८४
३४५	दश्च (७-२-१०९)	२३३
११४५	दाण्डिनायनहा० (६-४-१७४)	६९२
३२५	दादेर्धातोर्घः (८-२-३२)	२२१
१९६७	दानीं च (५-३-१८)	८९५
२०६९	दामन्यादित्रि० (५-३-११६)	९२४
४८६	दामहायनान्ताच्च (४-१-२७)	३६५
१९७४	दिक्छब्देभ्यः सप्त० (५-३-२७)	८९७
१३७६	दिक्पूर्वपदाट्ठञ् (४-३-६)	७५४
१३२८	दिक्पूर्वपदादसं० (४-२-१०७)	७४४
५१५	दिक्पूर्वपदान्ङीप् (४-१-४०)	३८७
७२७	दिक्सङ्ख्ये संज्ञायाम् (२-१-५०)	५०९
१४२९	दिगादिभ्यो यत् (४-३-५४)	७६६
८४५	दिङ्नामान्यन्तराले (२-२-२६)	५७०
१०७७	दित्यदित्यादित्य० (४-१-८५)	६६४
३३७	दिव उत् (६-१-१३१)	२२९
३३६	दिव औत् (७-१-८४)	२२८
५६२	दिवः कर्म च (१-४-४३)	४२२
९२७	दिवसश्च पृथिव्याम् (६-३-३०)	६०५
६१९	दिवस्तदर्थस्य (२-३-५८)	४५०
९२६	दिवो द्यावा (६-३-२९)	६०५
१३९९	दिशोऽमद्राणाम् (७-३-१३)	७६०
३३	दीर्घं च (१-४-१२)	२६
१२४१	दीर्घाच्च वरुणस्य (७-३-२३)	७१८
२३९	दीर्घाज्जसि च (६-१-१०५)	१४९
१४८	दीर्घात् (६-१-७५)	९२
५८	दीर्घादाचार्याणाम् (८-४-५२)	४३
२१३५	दुःखात्प्रातिलोम्ये (५-४-६४)	९४५
११६५	दुष्कुलाड्ढक् (४-१-१४२)	६९७
९५	दूराद्धूते च (८-२-८४)	६८
६०५	दूरान्तिकार्थैर्यो० (२-३-३५)	४४४
६११	दूरान्तिकार्थैः षष्ठ्य० (२-३-३४)	४४७
१०१७	दृग्दृशवतुषु (६-३-८९)	६४५
१४३३	दृतिकुक्षिकलशिव० (४-३-५६)	७६७
१२०८	दृष्टं साम (४-२-७)	७१०
१४२२	देयमृणे (४-३-४७)	७६५
२१२६	देये त्रा च (५-४-५५)	९४२
९२२	देवताद्वन्द्वे च (६-३-२६)	६०३
१२३९	देवताद्वन्द्वे च (७-३-२१)	७१७
२०९२	देवतान्तात्तादर्थ्ये० (५-४-२४)	९३२
२०५५	देवपथादिभ्यश्च (५-३-१००)	९२०
२१२७	देवमनुष्यपुरुषपुरु० (५-४-५६)	९४२
२०९५	देवात्तल् (५-४-२७)	९३३
१४३९	देविकाशिंशपादित्य० (७-३-१)	७६८
१९१२	देशे लुबिलचौ च (५-२-१०५)	८८१
१२०१	दैवयज्ञिशौचिवृक्षि० (४-१-८१)	७०७
१२३५	द्यावापृथिवीशुना० (४-२-३२)	७१७
१९१५	द्युद्भ्यां मः (५-२-१०८)	८८२
१३२१	द्युप्रागपागुदक्प्र० (४-२-१०१)	७४२
२०५९	द्रव्यं च भव्ये (५-३-१०४)	९२१
११०५	द्रोणपर्वतजीव० (४-१-१०३)	६८२
१५३९	द्रोश्च (४-३-१६१)	७८९
२१५०	द्वन्द्वं रहस्यमर्या० (८-१-१५)	९५४
१७९८	द्वन्द्वमनोज्ञादिभ्यश्च (५-१-१३३)	८५३
९०६	द्वन्द्वश्च प्राणितूर्यसे० (२-४-२)	५९४
९३०	द्वन्द्वाच्चुदषहा० (५-४-१०६)	६०६
१२०७	द्वन्द्वाच्छः (४-२-६)	७१०
१५०५	द्वन्द्वाद्वुन्वैरमैथु० (४-३-१२५)	७८१
९०३	द्वन्द्वे धि (२-२-३२)	५९३
२२४	द्वन्द्वे च (१-१-३१)	१३८
१९७४	द्वन्द्वोपतापगर्ह्यात्० (५-२-१२८)	८८८
१३८६	द्वारादीनां च (७-३-४)	७५६
७३१	द्विगुरेकवचनम् (२-४-१)	५११
६८५	द्विगुश्च (२-१-२३)	४८७
४७९	द्विगोः (४-१-२१)	३६१
१७२०	द्विगोः छंश्च (५-१-५४)	८३१

सूत्रम्		पार्श्वम्
१७४६	द्विगोर्यप् (५-१-८२)	८३८
१०८०	द्विगोर्लुगनपत्ये (४-१-८८)	६६७
१७५०	द्विगोर्वा (५-१-८६)	८३८
७१४	द्वितीयतृतीयचतुर्थ० (२-२-३)	५०४
३५१	द्वितीयाटौस्स्वेनः (२-४-३४)	२३६
३९०	द्वितीयायां च (७-२-८७)	२६६
६८६	द्वितीया श्रितातीत०(२-१-२४)	४८७
१०११	द्वितीये चानुपाख्ये (६ ३-८०)	६४३
२०८६	द्वित्रिचतुर्भ्यः सुच् (५ ४-१८)	९३०
१७०१	द्वित्रिपूर्वादण्च (५-१ ३६)	८२५
१६९५	द्वित्रिपूर्वान्निष्कात् (५-१-३०)	८२४
८५४	द्वित्रिभ्यां ष मूर्ध्नः (५-४ ११५)	५७५
१८४४	द्वित्रिभ्यां तयस्याय०(५ २-४३)८६५	
८०४	द्वित्रिभ्यामञ्जलेः (५-४-१०२)	५४०
१९९१	द्वित्र्योश्च धमुञ् (५ ३ ४५)	९०१
८६७	द्विदण्ड्यादिभ्यश्च (५ ४-१२८)	५८०
२००५	द्विवचनविभज्यो० (५-३-५७)	९०४
९५२	द्विस्तावा त्रिस्तावा०(५-४ ८४)	६२२
१५७	द्वित्रिश्चतुरिति कृ०(८-३ ४३)	९६
१३८०	द्वीपादनुसमुद्रं यञ् (४ ३-१०)	७५५
१८५४	द्वेस्तीयः (५-२-५४)	८६८
१२१३	द्वैपवैयाघ्रादञ् (४-२-१२)	७११
११२४	द्व्यचः (४-१-१२१)	६८७
१४५१	द्व्यजूद्ब्राह्मणकर्प्रथमा०(४-३-७२)७७०	
११८८	द्व्यञ्मगधकलिङ्ग०(४-१-१७०)	७०२
९४१	द्व्यन्तरुपसर्गेभ्योऽप०(६-३-९७)६१६	
८०८	द्व्यष्टनः सङ्ख्यायाम०(६-३-४७)	५४३
१८६	द्व्येकयोर्द्विवचनैक० (१-४-२२)	११४
	ध	
१६३६	धनगणं लब्धा (४-४ ८४)	८०९
१८६५	धनहिरण्यात्कामे (५-२ ६५)	८७०
८७०	धनुषश्च (५-४-१३२)	५८०
१३४५	धन्वयोपधाद्वुञ् (४-२-१२१)	७४८
१५९१	धर्मं चरति (४-४-४१)	८०१
१६४४	धर्मपथ्यर्थन्यायाः० (४-४-९२)	८१०

सूत्रम्		पार्श्वम्
१९३८	धर्मशीलवर्णान्ताच्च(५-२-१३२)८८९	
८६३	धर्मादनिच्केवलात्(५-४-१२४)५७८	
६४	धातोस्तन्निमित्तस्यैव(६-१-८०)	४६
१८०२	धान्यानां भवने क्षे० (५ २-१)	८५४
५७३	धारेरुत्तमर्णः (१-४ ३५)	४२७
१६२८	धुरो यड्ढञौ (४-४-७७)	८०७
१३५१	धूमादिभ्यश्च (४-२-१२७)	७४९
५८६	ध्रुवमपायेऽपादानम्(१-४-२४)	४३५
७१९	ध्वाङ्क्षेण क्षेपे (२-१-४२)	५०६
	न	
८३५	न कपि (७-४-१४)	५५९
८३८	न कोपधायाः (६-३-३७)	५६५
५१२	न क्रोडादिबह्वचः (४-१-५६)	३८६
१०२४	नक्षत्राद्वा (८-३-१००)	६४७
६४२	नक्षत्रे च लुपि (२-३-४५)	४६४
१२०४	नक्षत्रेण युक्तः कालः(४-२-३)	७०८
१४१२	नक्षत्रेभ्यो बहुलम् (४-३-३७)	७६३
५१४	नखमुखात्संज्ञायाम् (४-१-५८)	३८६
१३५२	नगरात्कुत्सनप्रा०(४-२-१२८)	७४९
११४९	न गोपवनादिभ्यः (२-४ ६७)	६९३
७६०	नगोऽप्राणिष्वन्य० (६-३-७७)	५२४
३५२	न ङिसम्बुद्ध्योः (८-२-८)	२३७
४०८	न चवाहाहैवयुक्ते (८-१-२४)	२७५
७५६	नञ् (२-२ ६)	५२२
१४६०	नञः शुचीश्वरक्षेत्र० (७-३ ३०)७७२	
९५६	नञस्तत्पुरुषात् (५-४-७१)	६२४
८६१	नञ्दुःसुभ्यो हलि०(५-४-१२१)५७७	
१३०७	नडशादाड्ढलच् (४-२ ८८)	७३८
११०१	नडादिभ्यः फक् (४-१-९९)	६८१
१३१०	नडादीनां कुक्च (४-२-९१)	७३९
३००	न तिसृचतसृ (६-४-४)	१९५
१८३२	नते नासिकायाः संज्ञं० (५-२-३१)८६२	
१०८६	न तौल्वलिभ्यः (२-४-६१)	६७०
१५१०	न दण्डमाणवान्ते०(४-३-१३०)७८३	
९१८	न दधिपयआदीनि(२-४-१४)	६०१

सूत्रम्		पार्श्वम्
६८१	नदीपौर्णमास्याग्र०(५-४-११०)	४८५
६७४	नदीभिश्च (२-१-२०)	४८२
९८६	नद्याः शेषस्यान्य० (६-३-४४)	६३५
१३१७	नद्यादिभ्यो ढक् (४-२-९७)	७४२
१३०४	नद्यां मतुप् (४-२-८५)	७३८
८३३	नद्यृतश्च (५-४-१५३)	५५१
१३३४	न द्यचः प्राच्य० (४-२-११३)	७४६
१७८३	न नञ्पूर्वात्तत्पु० (५-१-१२१)	८४७
७०४	न निर्धारणे (२-२-१०)	४९६
५१	न पदान्तद्विर्वचन०(१-१-५८)	३८
११४	न पदान्ताट्टोरनाम् (८-४-४२)	७६
१२९	नपरे नः (८-३-२७)	८३
९३५	नपुंसकमनपुंसकेने०(१-२-६९)	६०९
३१४	नपुंसकस्य झलचः (७-१-७२)	२०८
३१०	नपुंसकाच्च (७-१-१९)	२०८
६८०	नपुंसकादन्यतर०(५-४-१०९)	४८५
९५४	न पूजनात् (५-४-६९)	६२३
११९७	न प्राच्यभर्गादि०(४-१-१७८)	७०५
२२२	न बहुव्रीहौ (१-१-२९)	१३६
१६२९	न भकुर्छुराम् (८-२ ७९)	८०८
२७३	न भूसुधियोः (६-४-८५)	१७०
७५९	नभ्राण्नपान्नवेदा० (६-३-७५)	५२४
५८३	नमःस्वस्तिस्वाहा०(२-३ १६)	४३२
११५७	न मपूर्वोऽपत्येऽव०(६ ४-१७०)	६९५
१५४	नमस्पुरसोर्गत्योः (८-३-४०)	९४
४३९	न मु ने (८-२-३)	३०२
४६४	न यासयोः (७-३-४५)	३४६
१०९८	न य्वाभ्यां पदान्ता०(७-३-३)	६८०
१०४८	नरे संज्ञायाम् (६-३-१२९)	६५४
२६३	न लुमताङ्गस्य (१-१-६३)	१६०
६२७	न लोकाव्ययनिष्ठा०(२-३-६९)	४५५
२३६	नलोपः प्रातिपदिका०(८-२-७)	१४६
३५३	नलोपः सुप्स्वरसंज्ञा०(८-२-२)	२३९
७५७	नलोपो नञः (६-३-७३)	५२२
१९०	न विभक्तौ तुस्माः (१-३-४)	११६

सूत्रम्		पार्श्वम्
२४	न वेति विभाषा (१-१-४४)	२२
४३१	नशेर्वा (८-२-६३)	२९१
१३२	नश्च (८-३-३०)	८४
१२३	नश्चापदान्तस्य झलि (८-३-२४)	८१
१४०	नश्छव्यप्रशान् (८-३-७)	८९
३०८	न षट्स्वस्रादिभ्यः (४-१-१०)	२०५
३५५	न संयोगाद्वमन्तात् (६-४-१३७)	२४१
७९३	न सङ्ख्यादेः समा०(५-४-८९)	५३७
८९३	न संज्ञायाम् (५-४-१५५)	५८६
३६३	न सम्प्रसारणे० (६-१-३७)	२४७
२०७७	न सामिवचने (५-४-५)	९२७
६७९	नस्तद्धिते (६-४-१४४)	४८५
१०३७	नहिवृतिवृषिव्य० (६-३-११६)	६५१
४४०	नहो धः (८-२-३४)	३०४
१३	नाज्झलौ (१-१-१०)	१६
४२४	नाञ्चेः पूजायाम् (६-४-३०)	२८५
८९६	नाडीतन्त्र्योः स्वाङ्गे(५-४-१५९)	५८७
१६८५	नातः परस्य (७-३-२७)	८२१
१६५	नादिचि (६-१-१०४)	१००
५५	नादिन्याक्रोशे पुत्र०(८-४-४८)	४२
१८५०	नान्तादसङ्ख्यादेर्मट्(५-२-४९)	८६७
४२७	नाभ्यस्ताच्छतुः (७-१-७८)	२८९
४१३	नामन्त्रिते समाना०(८-१-७३)	२७८
२०९	नामि (६-४-३)	१२५
८२	नाम्रेडितस्यान्त्य० (६-१-९९)	६०
८०१	नावो द्विगोः (५-४-९९)	५३९
६५७	नाव्ययीभावादतो० (२-४-८३)	४७२
५११	नासिकोदरोष्ठज० (४-१-५५)	३८४
१६२४	निकटे वसति (४-४-७३)	८०६
१५२४	नित्यं वृद्धशरादि०(४-३-१४४)	७८६
१८५७	नित्यं शतादिमासा०(५-२-५७)	८६८
४८७	नित्यं संज्ञाछन्दसोः(४-१-२९)	३६५
४९२	नित्यं सपत्न्यादिषु (४-१-३५)	३६८
१५९	नित्यं समासेऽनु० (८-३-४५)	९८
७७८	नित्यं हस्ते पाणावु०(१-४-७७)	५२८

सूत्रम्		पार्श्वम्
७११	नित्यं क्रीडाजीविक०(२-२-१७)	५०१
८६२	नित्यमसिच्प्रजा० (५-४-१२२)	५७८
२१४०	नित्यवीप्सयोः (८-१-४)	९४६
१०३	निपात एकाजनाङ् (१-१-१४)	७२
१५६९	निर्वृत्तेऽक्षद्यूतादिभ्यः(४-४-१९)	७९६
१३८४	निशाप्रदोषाभ्यां च (४-३-१४)	७५५
२१३३	निष्कुलान्निष्कोषणे (५-४-६२)	९४४
८९९	निष्ठा (२-२-३६)	५८९
८९७	निष्प्रवाणिश्च (५-४-१६०)	५८८
६	नीचैरनुदात्तः (१-२-३०)	८
२०३२	नीतौ च तद्युक्तात् (५-३-७७)	९१२
४३४	नुम्विसर्जनीयश० (८-३-५८)	२९४
२८३	नृ च (६-४-६)	१७९
१४१	नृन्पे (८-३-१०)	८९
३४९	नेदमदसोरकोः (७-१-११)	२३४
१२४०	नेन्द्रस्य परस्य (७-३-२२)	७१८
९७७	नेन्सिद्धबन्धादिषु च(६-३-१९)	६३०
३०३	नेयङुवङ्स्थानावस्त्री (१-४-४)	२०१
१८३३	नेर्बिडज्बिरीसचौ (५-२-३२)	८६२
३७०	नोपधायाः (६-४-७)	२५१
१५५५	नौ ह्यचष्टन् (४-४-७)	७९३
१६४३	नौवयोधर्मविषमूल०(४-४-९१)	८१०
१५४३	न्यग्रोधस्य च केवल०(७-३-५)	७९०

प

१८२६	पक्षात्तिः (५-२-२५)	८६०
१५८५	पक्षिमत्स्यमृगान्ह०(४-४-३५)	७९९
१७२५	पङ्क्तिविंशतित्रिंशच्च०(५-१-५९)	८३३
५२३	पङ्क्तेश्च (४-१-६८)	३९२
१७२६	पञ्चद्दशतौ वर्गे वा (५-१-६०)	८३३
६९९	पञ्चमी भयेन (२-१-३७)	४९४
६३९	पञ्चमी विभक्ते (२-३-४२)	४६३
५९८	पञ्चम्यपाङ्परिभिः (२-३-१०)	४४१
३९७	पञ्चम्या अत् (७-१-३२)	२६८
९५९	पञ्चम्याः स्तोकादिभ्यः(६-३-२)	६२५
१९५३	पञ्चम्यास्तसिल् (५-३-७)	८९२

सूत्रम्		पार्श्वम्
१६९९	पणपादमाषशताद्यत्(५-१-३४)	८२५
२५७	पतिः समास एव (१-४-८)	१५८
१७९३	पत्यन्तपुरोहिता०(५-१-१२८)	८५१
४९०	पत्युर्नो यज्ञसंयोगे (४-१-३३)	३६७
१५०२	पत्रपूर्वादञ् (४-३-१२२)	७८१
१५०३	पत्राध्वर्युपरिषदश्च (४-३-१२३)	७८१
१४०२	पथः पन्थ च (४-३-२९)	७६०
१७३९	पथः ष्कन् (५-१-७५)	८३६
३६५	पथिमथ्यृभुक्षामात् (७-१-८५)	२४८
९५७	पथो विभाषा (५-४-७२)	६२४
१६५६	पथ्यतिथिवसति०(४-४-१०४)	८१२
१६३९	पदमस्मिन्दृश्यम् (४-४-८७)	८०९
१०५७	पदव्यवायेऽपि (८-४-३८)	६५८
४०१	पदस्य (८-१-१६)	२७३
४०२	पदात् (८-१-१७)	२७३
१९८	पदान्तस्य (८-४-३७)	१२०
१५६१	पदान्तस्यान्यतरस्याम्(७-३-९)	७९५
१४९	पदान्ताद्वा (६-१-७६)	९२
१५८९	पदोत्तरपदं गृह्णाति (४-४-३९)	८००
२२८	पद्दन्नोमास्हृन्निशस०(६-१-६३)	१४३
९९१	पद्यत्यतदर्थे (६-३-५३)	६३६
१७४०	पन्थो ण नित्यम् (५-१-७६)	८३७
२८	परः संनिकर्षः सं०(१-४-१०९)	२५
८१२	परवल्लिङ्गं द्वन्द्वत० (२-४-२६)	५४५
१८१	परश्च (३-१-२)	११२
१६०८	परश्वधाद्रञ्च (४-४-५८)	८०३
९६५	परस्य च (६-३-८)	६२७
५८९	पराजेरसोढः (१-४-२६)	४३५
१३७५	परावराधमोत्तमपूर्वाच्च(४-३-५)	७५४
५८०	परिक्रयणे सम्प्रदा०(१-४-४४)	४३०
१६७९	परिखाया ढञ् (५-१-१७)	८१९
१५८६	परिपन्थं च तिष्ठति(४-४-३६)	८००
१६८३	परिमाणान्तस्या० (७-३-१७)	८२०
१५७९	परिमुखं च (४-४-२९)	७९८
१२११	परिवृतो रथः (४-२-१०)	७१०

सूत्रम्	पार्श्वम्
१५९४ परिषदो ण्यः (४-४-४४)	८०१
१६५३ परिषदो ण्यः (४-४-१०१)	८१२
११४१ परेर्वर्जने (८-१-५)	९४७
१८११ परोवरपरम्परपुत्र०(५-२-१०)	८५६
१५५८ पर्षादिभ्यः ष्ठन् (४-४-१०)	७९४
१९५६ पर्यभिभ्यां च (५-३-९)	८९३
१३६७ पर्वताच्च (४-२-१४३)	७५२
२०७० पर्श्वादियौधेयादि०(५-३-११७)९२४	
१५२१ पलाशादिभ्यो वा (४-३-१४१)	७८६
१९८२ पश्चात् (५-३-३२)	८९९
४०९ पश्यार्थैश्चानालोचने (८-१-२५)	२७६
५१९ पाककर्णपर्णपुष्प० (४-१-६४)	३९१
१२१२ पाण्डुकम्बलादिनिः (४-२-११)	७११
१७१२ पात्रात्ष्ठन् (५-१-४६)	८२८
१७३२ पात्राद्घश्च (५-१-६८)	८३५
७२५ पालेसमितादयश्च (२-१-४८)	५०७
४१४ पादः पत् (६-४-१३०)	२७९
२०७३ पादशतस्य सङ्ख्या०(५-४-१)	९२६
९९० पादस्य पदाज्याति०(६-३-५२)६३६	
८७७ पादस्य लोपोऽहः०(५-४-१३८)	५८२
२०९३ पादार्घाभ्यां च (५-४-२५)	९३३
४५७ पादोऽन्यतरस्याम् (४-१-८)	३४१
१०५३ पानं देशे (८-४-९)	६५५
७३३ पापाणके कुत्सितैः (२-१-५४)	५१२
१०७१ पारस्करप्रभृतीनि०(६-१-१५७)६६२	
१७३६ पारायणतुरायण० (५-१-७२)	८३६
१४९० पाराशर्यशिलालि०(४-३-११०)७७९	
६७२ पारे मध्ये षष्ठ्या वा (२-१-१८)	४८१
१८७५ पार्श्वेनान्विच्छति (५-२-७५)	८७२
१२५८ पाशादिभ्यो यः (४-२-४९)	७२३
९३६ पिता मात्रा (१-२-७०)	६१०
१४५८ पितुर्यच्च (४-३-७९)	७७२
१२४२ पितृव्यमातुलमाता०(४-२-३६)७१८	
११३८ पितृष्वसुश्छण् (४-१-१३२)	६९०
१५२६ पिष्टाच्च (४-३-१४६)	७८७

सूत्रम्	पार्श्वम्
११२१ पीलाया वा (४-१-११८)	६८७
५०४ पुंयोगादाख्यायाम् (४-१-४८)	३७७
७४६ पुंवत्कर्मधारय० (६-३-४२)	५१७
४३६ पुंसोऽसुङ् (७-१-८९)	२९८
१७०६ पुत्राच्छ च (५-१-४०)	८२७
११८३ पुत्रान्तादन्यतर०(४-१-१५९)	७०१
९८० पुत्रेऽन्यतर० (६-३-२२)	६३२
१३९ पुमःखय्यम्परे (८-३-६)	८८
९३३ पुमान्स्त्रिया (१-२-६७)	६०९
१४८५ पुराणप्रोक्तेषु (४-३-१०५)	७७७
१८३९ पुरुषहस्तिभ्यामण्च (५-२-३८)८६४	
४८२ पुरुषात्प्रमाणेऽन्य०(४-१-२४)	३६३
७६८ पुरोऽव्ययम् (१-४-६७)	५२६
१९४१ पुष्करादिभ्यो देशे (५-२-१३५)८८९	
२०६६ पूगाञ्ञ्योऽग्रा० (५-३-११२)	९२३
४९३ पूतक्रतोरै च (४-१-३६)	३६९
७०५ पूरणगुणसुहितार्थ०(२-२-११)	४९६
१९९४ पूरणाद्भागे तीयादन्(५-३-४८)९०१	
१७१४ पूरणार्धाट्ठन् (५-१-४८)	८२९
८८७ पूर्णाद्विभाषा (५-४-१४९)	५८४
७२६ पूर्वकालैकसर्व० (२-१-४९)	५०८
१२ पूर्वत्रासिद्धम् (८-२-१)	१२
८५७ पूर्वपदात्संज्ञायामगः (८-४-३)	५७५
२१८ पूर्वपरावरदक्षिणो०(१-१-३४)	१३४
८१३ पूर्ववदश्वबडवौ (२-४-२७)	५४६
६९३ पूर्वसदृशसमोनार्थ०(२-१-३१)	४९१
१८८६ पूर्वादिनिः (५-२-८६)	८७४
२२१ पूर्वादिभ्यो नवभ्यो०(७-१-१६)	१३५
१९७५ पूर्वाधरावराणा० (५ ३-३९)	८९७
७३७ पूर्वापरप्रथमचरम०(२-१-५८)	५१४
७१२ पूर्वापराधरोत्तरमेक० (२-२-१)	५०१
१४०१ पूर्वाह्णापराह्णार्द्रामू० (४-३-२८)	७६०
६०३ पृथग्विनानानाभि० (२-३-३२)	४४३
१७८४ पृथ्वादिभ्य इम० (५ १ १२२)	८४८
१०३४ पृषोदरादीनि० (६-३-१०९)	६४९

सूत्रम्		पार्श्वम्
९९६	षेषंवासवाहनधिषु च(६-३-५८)	६३७
१०८४	षैलादिभ्यश्च (२-४-५९)	६६९
७४४	षोटायुवतिस्तोक० (२-१ ६५)	५१७
१४४९	षौरोडाशपुरोडाशा०(४ ३-७०)	७७०
२०२४	प्रकारवचने जा० (५-३-६९)	९१०
१९७१	प्रकारवचने थाल् (५-३-२३)	८९६
२१४७	प्रकारे गुणवचनस्य (८-१-१२)	९४९
८५०	प्रकृत्याशिषि (६-३-८३)	५७३
२०१०	प्रकृत्यैकाच् (६-४-१६३)	९०६
१७७१	प्रकृष्टे ठञ् (५-१-१०८)	८४४
२१०६	प्रज्ञादिभ्यश्च (५-४-३८)	९३६
१९०८	प्रज्ञाश्रद्धार्चाभ्यो०(५ २ १०१)	८८०
५९९	प्रतिः प्रतिनिधि० (१ ४ ९२)	४४२
१५९०	प्रतिकण्ठार्थललामं०(४ ४-४०)	८०१
१६५१	प्रतिजनादिभ्यः० (४ ४-९९)	८११
६००	प्रतिनिधिप्रतिदाने०(२-३-११)	४४२
१५९२	प्रतिपथमेति ठंश्च (४-४ ४२)	८०१
२१११	प्रतियोगे पञ्चम्या०(५-४-४४)	९३७
१०६६	प्रतिष्कशश्च कशेः (६-१-१५२)	६६१
९५०	प्रतेरुरसः सप्तमी० (५-४ ८२)	६२२
९४	प्रत्यभिवादेऽशूद्रे (८ २-८३)	६७
१८०	प्रत्ययः (३-१-१)	११२
२६२	प्रत्ययलोपे प्रत्यय० (१-१-६२)	१६०
४६३	प्रत्ययस्थात्कात्०(७-३-४४)	३४४
२६०	प्रत्ययस्य लुक्श्लुलुपः(१ १-६१)	१५९
१३७३	प्रत्ययोत्तरपदयोश्च (७-२ ९८)	७५३
५७८	प्रत्याङ्भ्यां श्रुवः (१ ४-४०)	४२९
२२६	प्रथमचरमतया० (१-१ ३३)	१४०
१६४	प्रथमयोः पूर्वसवर्णः(६ १-१०२)	१००
६५३	प्रथमानिर्दिष्टं स० (१-२-४३)	४७०
३८७	प्रथमायाश्च द्विवचने०(७-२-८८)	२६४
१२९८	प्रधानप्रत्ययार्थ० (१-२ ५६)	७३६
१०५०	प्रनिरन्तःशरेक्षु० (८-४-५)	६५४
१४६३	प्रभवति (४ ३-८३)	७७३
१८३८	प्रमाणे द्वयसज्दघ्न०(५-२-३७)	८६३
१५८०	प्रयच्छति गर्ह्यम् (४-४-३०)	७९८
१७७२	प्रयोजनम् (५-१-१०९)	८४४
११२९	प्रवाहणस्य ढे (७-३-२८)	६८८
२०२१	प्रशंसायां रूपप् (५-३-६६)	९०९
७४७	प्रशंसावचनैश्च (२-१-६६)	५१९
२००९	प्रशस्यस्य श्रः (५-३-६०)	९०६
८६८	प्रसंभ्यां जानुनोर्ज्ञुः(५-४-१२९)	५८०
६४१	प्रसितोत्सुकाभ्यां० (२-३-४४)	४६४
१०६७	प्रस्कण्वहरिश्चन्द्रा०(६-१-१५३)	६६१
१३४६	प्रस्थपुरवहान्ताच्च (४-२-१२२)	७४८
१३३१	प्रस्थोत्तरपद० (४-२-११०)	७४५
१६०७	प्रहरणम् (४-४-५७)	८०३
६४८	प्राक्डारात्समासः (२-१-३)	४६८
१६६१	प्राक् क्रीताच्छः (५-१-१)	८१३
२०२५	प्रागिवात्कः (५-३-७०)	९१०
१९९५	प्रागेकादशभ्यो० (५-३-४९)	९०१
१६२६	प्राग्घिताद्यत् (४-४-७५)	८०७
१९४७	प्राग्दिशो विभक्तिः (५-३-१)	८९१
१०७३	प्राग्दीव्यतोऽण् (४-१-८३)	६६३
१९	प्राग्रीश्वरान्निपाताः (१-४-५६)	२१
१६८०	प्राग्वतेष्ठञ् (५-१-१८)	८१९
१५४८	प्राग्वहतेष्ठक् (४-४-१)	७९२
४७३	प्राचां ष्फ तद्धितः (४-१-१७)	३५८
१३६३	प्राचां कटादेः (४-२-१३९)	७५१
१४००	प्राचां ग्रामनगराणाम्(७-३-१४)	७६०
१४३१	प्राचां नगरान्ते (७-३-२४)	७६६
११८४	प्राचामवृद्धात्फि०(४-१-१६०)	७०१
२०३६	प्राचामुपादेरडज्वु०(५-३-८०)	९१४
१७९४	प्राणभृज्जातिवयो०(५-१-१२९)	८५२
१५३२	प्राणिरजतादि० (४ ३-१५४)	७८८
१९०३	प्राणिस्थादातो० (५-२-९६)	८७८
१०५५	प्रातिपदिकान्तनु० (८-४-११)	६५६
५३२	प्रातिपदिकार्थलिङ्ग०(२-३-४६)	३९७
२१	प्रादयः (१ ४-५८)	२१
७७९	प्राध्वं बन्धने (१-४-७८)	५२९

सूत्रम्		पार्श्वम्
७१५	प्राप्तापन्ने च० (२-२-४)	५०४
१४१४	प्रायभवः (४-३-३९)	७६३
९७३	प्रावृट्शरत्काल० (६-३ १५)	६२९
१३८८	प्रावृष एण्यः (४-३-१७)	७५६
१३९४	प्रावृषष्ठप् (४-३-२६)	७५८
२०१६	प्रियस्थिरस्फिर० (६ ४-१५७)	९०७
६२१	प्रेष्यब्रुवोर्हविषो० (२-३-६१)	४५१
१२७४	प्रोक्ताल्लुक् (४-२-६४)	७२९
१५४२	प्लक्षादिभ्योऽण् (४-३-१६४)	७९०
९०	प्लुतप्रगृह्या अचि०(६-१-१२५)	६४

फ

१०८७	फक्फिञोरन्य० (४-१-९१)	६७०
१५४१	फले लुक् (४-३-१६३)	७८९
८१९	फल्गुनीप्रोष्ठपदा०(१-२-६०)	५४७
११७४	फाण्टाहृतिमि० (४-१-१५०)	६९९
१९०६	फेनादिलच्च (५-२-९९)	८७९
११७३	फेरछ च (४-१-१४९)	६९८

ब

१६४८	बन्धने चर्षौ (४-४-९६)	८११
१००५	बन्धुनि बहुव्रीहौ (६-१-१४)	६४०
९७१	बन्धे च विभाषा (६-३-१३)	६२९
१९४२	बलादिभ्यो मतु०(५-२-१३६)	८९०
२५८	बहुगणवतुडति० (१-१-२३)	१५९
१८५२	बहुपूगगणसङ्घस्य० (५-२-५२)	८६८
४०५	बहुवचनस्य वस्नसौ (८-१-२१)	२७३
२०५	बहुवचने झल्येत् (७-३-१०३)	१२३
४८४	बहुव्रीहेरूधसो० (४-१-२५)	३६४
५०८	बहुव्रीहेश्चान्तो० (४-१-५२)	३८१
८५२	बहुव्रीहौ सक्थ्य०(५-४-११३)	५७४
८५१	बहुव्रीहौ संख्येये० (५-४-७३)	५७३
१८७	बहुषु बहुवचनम् (१-४-२१)	११४
२०१७	बहोर्लोपो भू च०(६-४-१५४)	९०८
११४८	बह्वच इनः प्राच्य०(२-४-६६)	६९३
२८५	बह्वचः कूपेषु (४-२-७३)	७३३
४४६	बह्वचोऽन्तोदात्ता० (४-३-६७)	७६९

सूत्रम्		पार्श्वम्
२०३३	बह्वचो मनुष्यनाम्न०(५-३-७८)	९१३
१६१५	बह्वच्पूर्वपदाट्ठच् (४-४-६४)	८०५
२१०९	बह्वल्पार्थाच्छस्कार०(५ ४-४२)	९३६
५०३	बह्वादिभ्यश्च (४-१-४५)	३७६
५२२	बाह्वन्तात्संज्ञायाम् (४-१ ६७)	३९२
१०९६	बाह्वादिभ्यश्च (४ १-९६)	६७९
१३४१	बाह्वीकग्रामेभ्यश्च (४-२-११७)	७४७
१३११	बिल्वकादिभ्यश्छ०(६-४-१५३)	७३९
१५१६	बिल्वादिभ्योऽण् (४-३-१३६)	७८५
१६९६	बिस्ताच्च (५ १-३१)	८२४
७४१	बृन्दारकनागकुञ्ज०(२-१-६२)	५७६
२०७८	बृहत्या आच्छादने (५ ४-६)	९२७
१८०१	ब्रह्मणस्त्वः (५ १-१३६)	८५३
८०५	ब्रह्मणो जानपदा०(५ ४ १०४)	५४०
९४६	ब्रह्महस्तिभ्यां० (५-४-७८)	६२१
१८७१	ब्राह्मणकोष्णिके सं०(५-२-७१)	८७१
१२५०	ब्राह्मणमाणव० (४-२-४२)	७२१
११५८	ब्राह्मोऽजातौ (६-४-१७१)	६९५

भ

१६५२	भक्ताण्णः (४-४-१००)	८१२
१६१९	भक्तादण्यतरस्याम्(४-४-६८)	८०५
१४७५	भक्तिः (४-३ ९५)	७७५
६९७	भक्ष्येण मिश्रीकरणम् (२ १ ३५)	४९२
१११४	भर्गात्त्रैगर्ते (४ १-१११)	६८४
१३३९	भवतष्ठक्छसौ (४ २-११५)	७४७
१५६६	भस्त्रादिभ्यः ष्ठन् (४ ४-१६)	७९५
४६६	भस्त्रैषाजाज्ञाद्वास्रा०(७-३-४७)	३४९
२३३	भस्य (६-४-१२९)	१४५
३६८	भस्य टेर्लोपः (७-१-८८)	२४९
१७१५	भागाद्यच्च (५-१-४९)	८२९
१२४४	भिक्षादिभ्योऽण् (४-२-३८)	७१९
५८८	भीत्रार्थानां भयहेतुः (१-४-२५)	४३५
१०२०	भीरोः स्थानम् (८-३-८१)	६४६
५९४	भुवः प्रभवः (१-४-३१)	४३८
१९९९	भूतपूर्वे चरट् (५-३-५३)	९०२

सूत्रम्		पार्श्वम्
१८	भूवादयो धातवः (१-३-१)	२०
७६५	भूषणेऽलम् (१-४-६४)	५२६
१६७	भोभगोअघोअपूर्वं०(८-३-१७)	१०२
१२६३	भौरिक्यादैषुका० (४-२-५४)	७२५
३९५	भ्यसो भ्यम् (७-१-३०)	२६८
१०९१	भ्रातरि च ज्यायसि(४ १-१६४)	६७५
११६७	भ्रातुर्व्यच्च (४-१-१४४)	६९७
९३४	भ्रातृपुत्रौ स्वसृदु०(१-२-६८)	६०९
११२८	भ्रुवो वुक्च (४-१-१२५)	६८८
	म	
३६०	मघवा बहुलम् (६-४-१२८)	२४४
१६०६	मड्डुकझर्झराद्दण०(४-४-५६)	८०३
१६४९	मतजनहलात्करण०(४-४-९७)	८११
१२८४	मतोश्च बह्वजङ्गात् (४-२-७२)	७३२
१८५९	मतौ छः सूक्तसाम्नोः(५-२-५९)	८६९
१०४१	मतौ बह्वचोऽन०(६-३-११९)	६५३
१३५५	मद्रवृज्योः कन् (४-२-१३१)	७५०
२१३८	मद्रात्परिवापणे (५-४-६७)	९४५
१३२९	मद्रेभ्योऽञ् (४-२-१०८)	७४५
११०९	मधुबभ्रोर्ब्राह्मण० (४-१ १०६)	६८३
९६९	मध्याद्गुरौ (६-३-११)	६२९
१३७८	मध्यान्मः (४-३-८)	७५४
७७७	मध्येपदेनिवचने च (१-४ ७६)	५२८
१३०५	मध्वादिभ्यश्च (४-२-८६)	७३८
४५९	मनः (४-१-११)	३४२
९६१	मनसः संज्ञायाम् (६-३-४)	६२६
१३५८	मनुष्यतत्स्थयो० (४-२-१३४)	७५०
४९५	मनोरौ वा (४-१-३८)	३६९
११८५	मनोर्जातावञ्यतौ०(४-१ १६१)	७०१
९९८	मन्थौदनसक्तुबि० (६-३-६०)	६३८
५८४	मन्यकर्मण्यनादरे० (२-३-१७)	४३३
३८३	मपर्यन्तस्य (७-२-९१)	२६२
१०८	मय उञो वो वा (८-३-३३)	७४
१४६२	मयट् च (४-३-८२)	७७३
१५२३	मयड्वैतयोर्भाषा० (४-३-१४३)	७८६

सूत्रम्		पार्श्वम्
७५४	मयूरव्यंसकादयश्च (२-१-७२)	५२१
१०६८	मस्करमस्करिणौ०(६-१-१५४)	६६१
११६४	महाकुलादञ्खञौ(४-१-१४१)	६९६
१२३८	महाराजप्रोष्ठपदा० (४-२-३५)	७१७
१४७७	महाराजाट्टञ् (४-३-९७)	७७५
१२३१	महेन्द्राद्धाणौ च (४-२-२९)	७१६
१६७३	माणवचरकाभ्यां० (५-१-११)	८१७
९२९	मातरपितरावुदीचां (६-३-३२)	६०६
९८३	मातुःपितुर्भ्यामन्य०(८-३-८५)	६३२
१११८	मातुरुत्सङ्ख्यासं०(४-१-११५)	६८६
९८४	मातृपितृभ्यां स्वसा (८-३-८४)	६३३
११४०	मातृष्वसुश्च (४-१-१३४)	६९१
१५८७	माथोत्तरपदपदव्य०(४-४-३७)	८००
१८९७	मादुपधायाश्च मतो०(८-२-९)	८७७
१९९७	मानपश्वङ्गयोः क०(५-३-५१)	९०२
१५४०	माने वयः (४-३-१६२)	७८९
१७४५	मासाद्वयसि यत्ख०(५-१-८१)	८३७
१०४९	मित्रे चर्षौ (६-३-१३०)	६५४
३७	मिदचोऽन्त्यात्परः (१-१-४७)	२७
९	मुखनासिकावचनो० (१-१-८)	९
१५७५	मुद्गादण् (४-४-२५)	७९७
१६४०	मूलमस्याबर्हिं (४-४-८८)	८०९
२१०७	मृदस्तिकन् (५-४-३९)	९३६
१२२	मोऽनुस्वारः (८-३-२३)	८१
३४१	मो नो धातोः (८-२-६४)	२३१
१२६	मो राजि समः क्वौ (८-३-२५)	८२
	य	
४४१	यः सौ (७-२-११०)	३०६
५२८	यङश्चाप् (४-१-७४)	३९५
२३१	यचि भम् (१-४-१८)	१४४
१७३५	यज्ञर्त्विग्भ्यां घखञौ(५-१-७१)	८३५
११०८	यञञोश्च (२-४-६४)	६८२
४७१	यञश्च (४-१-१६)	३५७
११०३	यञिञोश्च (४-१-१०१)	६८१
६३८	यतश्च निर्धारणम् (२-३-४१)	४६३

सूत्रम्		पार्श्वम्
१८४०	यत्तदेतेभ्यः परिमा०(५-२-३९)	८६४
१७८९	यथातथायथापुर० (७-३-३१)	८५०
१८०७	यथामुखसंमुखस्य० (५-२-६)	८५५
१२८	यथासङ्ख्यमनुदे० (१-३-१०)	८३
६६१	यथाऽसादृश्ये (२-१-७)	४७७
२१४९	यथास्वे यथायथम् (८-१-१४)	९५४
११६	यरोऽनुनासिकेऽनु०(८-४-४५)	७७
१८०४	यवयवकषष्टिकाद्यत् (५-२-३)	८५४
११४६	यस्कादिभ्यो गोत्रे (२-४-६३)	६९२
१९९	यस्मात्प्रत्ययविधि०(१-४-१३)	१२०
६४५	यस्मादधिकं यस्य० (२-३-९)	४६५
६३४	यस्य च भावेन भा०(२-३-३७)	४६१
६७०	यस्य चायामः (२-१-१६)	४८०
३११	यस्येति च (६-४-१४८)	२०८
७०३	याजकादिभिश्च (२-२-९)	४९५
२९०	याडापः (७-३-११३)	१८६
१९९३	याप्ये पाशप् (५-३-४७)	९०१
६६२	यावदवधारणे (२-१-८)	४७७
२०९७	यावादिभ्यः कन् (५-४-२९)	९३४
३७६	युजेरसमासे (७-१-७१)	२५६
७४८	युवा खलतिपलित०(२-१-६७)	५१९
२०१९	युवाल्पयोः कनन्य०(५-३-६४)	९०८
३८६	युवावौ द्विवचने (७-२-९२)	२६३
१२४७	युवोरनाकौ (७-१-१)	७२०
४०४	युष्मदस्मदोः षष्ठी०(८-१-२०)	२७३
३९३	युष्मदस्मदोरनादेशे(७-२-८६)	२६७
१३७०	युष्मदस्मदोरन्यतर०(४-३-१)	७५३
३९९	युष्मदस्मद्भ्यां ङसो०(७-१-२७)	२६९
५३१	यूनस्तिः (४-१-७७)	३९६
१०८३	यूनि लुक् (४-१-९०)	६६८
३८८	यूयवयौ जसि (७-२-९३)	२६५
२६६	यू स्त्याख्यौ नदी (१-४-३)	१६४
१६६७	ये च तद्धिते (६-१-६१)	८१५
११५४	ये चाभावकर्मणोः (६-४-१६४)	६९४
२६	येन विधिस्तदन्तस्य (१-१-७२)	२४
५६५	येनाङ्गविकारः (२-३-२०)	४२३
९१३	येषां च विरोधः शा०(२-४-९)	५९७
१२९७	योगप्रमाणे च तद०(१-२-५५)	७३५
१७६६	योगाद्यच् (५-१-१०२)	८४३
३९२	योऽचि (७-२-८९)	२६७
१७३८	योजनं गच्छति (५-१)७४)	८३६
१७९७	योपधाद्गुरूपोत्त०(५-१-१३२)	८५२

र

१७८५	रक्तो हलादेर्लघोः(६-३-१६१)	८४८
२१००	रक्ते (५-४-३२)	९३५
१५८३	रक्षति (४-४-३३)	७९९
१३२०	रक्षोरमनुष्येऽण्च (४-२-१००)	७४२
१९१९	रज:कृष्यासुतिप०(५-२-११२)	८८३
१०२८	रथवदयोश्च (६-३-१०२)	६४८
१५०१	रथाद्यत् (४-३-१२१)	७८१
२३५	रषाभ्यां नो णः स०(८-४-१)	१४५
१८९५	रसादिभ्यश्च (५-२-९५)	८७६
९०२	राजदन्तादिषु परम् (२-२-३१)	५९२
१२६२	राजन्यादिभ्यो वुञ् (८-२-५३)	७२४
१९०२	राजन्वान्सौराज्ये (८-२-१४)	८७८
११५३	राजश्वशुराद्यत् (४-१-१३७)	६९४
७८८	राजाहःसखिभ्यष्टच् (५-४-९१)	५३५
१३६४	राज्ञः क च (४-२-१४०)	७५२
८१४	रात्राह्नाहाः पुंसि (२-४-२९)	५४६
१००८	रात्रेः कृति विभाषा (६-३-७२)	६४२
१७५१	राज्यहःसंवत्सराच्च (५-१-८७)	८३८
२८०	रात्सस्य (८-२-२४)	१७५
५७७	राधीक्ष्योर्यस्य वि० (१-४-३९)	४२९
२८६	रायो हलि (७-२-८५)	१८४
१३१३	राष्ट्रावारपाराद्घखौ (४-२-९३	७४१
१२३४	रीङृतः (७-४-२७)	७१६
५७१	रुच्यर्थानां प्रीयमाणः(१-४-३३)	४२६
६१५	रुजार्थानां भाववः (२-३-५४)	४४८
१९२७	रूपादाहतप्रशंस०(५-२-१२०)	८८६
११६९	रेवत्यादिभ्यष्ठक् (४-१-१४६)	६९७

सूत्रम्		पार्श्वम्
१५११	रैवतिकादिभ्यश्छः(४-३-१३१)	७८३
३३९	रोः सुपि (८ ३-१६)	२३०
२११६	रोगाच्चापनयने (५-४-४९)	९३८
१२९०	रोणी (४-२-७८)	७७३
१३४७	रोपधेतोः प्राचाम् (४-२-१२३)	७४८
१७३	रो रि (८-३-१४)	१०५
१७२	रोऽसुपि (८-२-६९)	१०५
४३३	र्वोरुपधाया दीर्घ इकः(८-२-७६)	२९३
	ल	
५५२	लक्षणेत्थंभूताख्यान०(१-४-९०)	४१६
६६८	लक्षणेनाभिप्रती आ०(२-१-१४)	४८०
१६०२	लवणाट्ठञ् (४-४-५२)	८०२
१५७४	लवणाल्लुक् (४-४-२४)	७९७
१९५	लशक्वतद्धिते (१-३-८)	११८
१२०३	लाक्षारोचनाट्ठक् (४-२-२)	७०८
१४०८	लुक्तद्धितलुकि (१-२ ४९)	७६१
१११२	लुक्स्त्रियाम् (४ १-१०९)	६८४
१२९४	लुपि युक्तवद्व्यक्तिव०(१-२-५१)	७३५
१५४५	लुप्च (४-३-१६६)	७९०
१२०५	लुबविशेषे (४-२-४)	७०९
१२९६	लुब्योगाप्रख्यानात् (१-२-५४)	७३५
२०५३	लुम्मनुष्ये (५-३-९८)	९१९
१७१०	लोकसर्वलोकाट्ठञ् (५-१-४४)	८२८
६७	लोपः शाकल्यस्य (८-३-१९)	४८
८७३	लोपो व्योर्वलि (६-१-६६)	५८१
१९०७	लोमादिपामादि०(५-२-१००)	८८०
२०९८	लोहितान्मणौ (५-४-३०)	९३४
	व	
१११९	वतन्डाच्च (४-१-१०८)	६८४
१६८८	वतोरिड्वा (५-१-२३)	८२२
१८५३	वतोरिथुक् (५-२-५३)	८६८
१४११	वत्सशालाभिजि० (४-३-३६)	७६३
१९०५	वत्सांसाभ्यां काम०(५-२-९८)	८७९
२०४६	वत्सोक्षाश्वर्षभेभ्य० (५-३-९१)	९१७
१०३८	वनगिर्योः संज्ञायां०(६-३-११७)	६५१
१०३९	वनं पुरगामिश्रका० (८-४-४)	६५१
४५६	वनो र च (४-१-७)	३४०
८९५	वन्दिते भ्रातुः (५-४-१५७)	५८७
८८०	वयसि दन्तस्य०(५-४-१४१)	५८३
१९३६	वयसि पूरणात् (५-२-१३०)	८८९
४७८	वयसि प्रथमे (४-१-२०)	३६०
१३०१	वरणादिभ्यश्च (४-२-८२)	७३७
१४४२	वर्गान्ताच्च (४-३-६३)	७६८
१०६३	वर्चस्केऽवस्करः (६-१-१४८)	६६०
१७८७	वर्णदृढादिभ्यः ष्यञ्च(५ १-१२३)	८४९
४९६	वर्णादनुदात्तात्तोप०(४-१ ३९)	३७०
१९४०	वर्णाद्ब्रह्मचारिणि (५ २-१३४)	८८९
२०९९	वर्णे चानित्ये (५-४-३१)	९३४
७५०	वर्णो वर्णेन (२-१-६९)	५२०
१३२३	वर्णौ वुक् (४-२-१०३)	७४३
१७५४	वर्षस्याभविष्यति (७-३-१६)	८३९
१३८९	वर्षाभ्वष्टक् (४-३-१८)	७५६
२८२	वर्षाभ्वश्च (६-४-८४)	१७६
१७५३	वर्षाल्लुक् च (५-१-८८)	८३९
१०४०	वले (६-३-११८)	६५२
१६३८	वशं गतः (४-४-८६)	८०९
१२७३	वसन्तादिभ्यष्ठक् (४-२-६३)	७२८
३३४	वसुस्रंसुध्वंस्वनडुः (८-२-७२)	२२७
४३५	वसोः सम्प्रसारणम्(६-४-१३१)	२९७
२०५६	वस्तेर्ढञ् (५-३-१०१)	९२०
१५६३	वस्नक्रयविक्रयाट्ठञ् (४-४-१३)	७९५
१७१७	वस्नद्रव्याभ्यां ठन्कनौ(५-१-५१)	८३०
११८२	वाकिनादीनां कुक्च(४-१-१५८)	७०१
९३	वाक्यस्य टेः प्लुत०(८-२-८२)	६६
२१४३	वाक्यादेरामन्त्रित०(८-१-८)	९४७
९९४	वा घोषमिश्रशब्देषु(६-३-५६)	६३७
१९३०	वाचो ग्मिनिः (५ २-१२४)	८८७
२१०३	वाचो व्याहृतार्थायाम्(५ ४-३५)	९३५
१९३५	वातातीसाराभ्यां०(५-२-१२९)	८८८
३२७	वा द्रुहमुहष्णुहष्णि०(८-२-३३)	२२३

सूत्रम्		पार्श्वम्
४४४	वा नपुंसकस्य (७-१-७९)	३२४
६३	वान्तो यि प्रत्यये (६-१-७९)	४५
१०९२	वान्यस्मिन्सपिण्डे०(४-१-१६५)	६७५
१२५	वा पदान्तस्य (८-४-५९)	८२
२०४८	वा बहूनां जाति० (५-३-९३)	९१८
१०५४	वा भावकरणयोः (८-४-१०)	६५६
१२१०	वामदेवाड्ड्यड्ड्यौ (४-२-९)	७१०
३०४	वामि (१-४-५)	२०१
३०२	वाम्शसोः (६-४-८०)	१९८
१२३३	वाय्वृतुपित्रुषसो०(४-२-३१)	७१६
५९०	वारणार्थानामी० (१-४-२७)	४३६
२०६	वावसाने (८-४-५६)	१२४
१५१	वा शरि (८-३-३६)	९३
९८९	वा शोकष्यञ्रोगेषु (६-३-५१)	६३६
८७१	वा संज्ञायाम् (५-४-१३३)	५८१
१४७८	वासुदेवार्जुनाभ्यां०(४-३-९८)	७७५
७७	वा सुप्यापिशलेः (६-१-९२)	५७
३२९	वाह ऊठ (६-४-१३२)	२२४
५१६	वाहः (४-१-६१)	३८७
१९६१	वा ह च छन्दसि (५-३-१३)	८९४
१०५२	वाहनमाहितात् (८-४-८)	६५५
९००	वाहिताग्न्यादिषु (२-२-३७)	५९०
१६९७	विंशतिकात्खः (५-१-३२)	८२४
१६८९	विंशतित्रिंशद्भ्यां० (५-१-२४)	८२२
१८५६	विंशत्यादिभ्यस्तम०(५-२-५६)	८६८
११२७	विकर्णकुषीतका०(४-१-१२४)	६८८
११२०	विकर्णशुङ्गच्छग०(४-१-११७)	६८७
१४६४	विदूराञ्ञ्यः (४-३-८४)	७७३
१४५६	विद्यायोनिसम्बन्धे०(४-३-७७)	७७२
१६३५	विध्यत्यधनुषा (४-४-८३)	८०८
१८२८	विनञ्भ्यां नानाञौ०(५-२-२७)	८६१
२१०२	विनयादिभ्यष्ठक् (५-४-३४)	९३५
२०२०	विन्मतोर्लुक् (५-३-६५)	९०८
९१७	विप्रतिषिद्धं चान०(२-४-१३)	६००
१७५	विप्रतिषेधे परं०(१-४-२)	१०७
१८४	विभक्तिश्च (१-४-१०४)	११४
६६५	विभाषा (२-१-११)	४७८
१६९४	विभाषा कार्षापणस०(५-१-२९)	८२४
१३५४	विभाषा कुरुयुगं०(४-२-१३०)	७५०
७७३	विभाषा कृञि (१-४-७२)	५२७
६४६	विभाषा कृञि (१-४-९८)	४६६
६०२	विभाषा गुणेऽस्त्रि०(२-३-२५)	४४३
२३७	विभाषा ङिश्योः (६-४-१३६)	१४७
८१०	विभाषा चत्वारिंश०(६-३-४९)	५४४
२२५	विभाषा जसि (१-१-३२)	१३९
२०८०	विभाषाञ्चेरदिक्स्त्रि० (५-४-८)	९२८
१८०५	विभाषा तिलमाषोमा०(५-२-४)	८५५
२७८	विभाषा तृतीया० (७-१-९७)	१७४
२९२	विभाषा दिक्समासे०(१-१-२८)	१८७
२९३	विभाषा द्वितीया०(७-३-११५)	१८८
१९७९	विभाषा परावराभ्यां (५-३-२९)	८९९
१०३२	विभाषा पुरुषे (६-३-१०६)	६४९
१३९२	विभाषा पूर्वाह्णापरा०(४-३-२४)	७५८
१२२५	विभाषा फाल्गुनी०(४-२-२३)	७१४
२०८८	विभाषा बहोर्धावि०(५-४-२०)	९३१
१३६८	विभाषा मनुष्ये (४-२-१४४)	७५२
१३८३	विभाषा रोगातप०(४-३-१३)	७५५
१९७७	विभाषाऽवरस्य (५-३-४१)	८९८
९७४	विभाषा वर्षक्षरशर०(६-३-१६)	६३०
१५६७	विभाषा विवधात् (४-४-१७)	७९६
९१६	विभाषा वृक्षमृगतृ०(२-४-१२)	५९८
८८२	विभाषा श्यावारो०(५-४-१४४)	५८४
४९१	विभाषा सपूर्वस्य (४-१-३४)	३६७
९२०	विभाषा समीपे (२-४-१६)	६०२
२१२२	विभाषा साति का०(५-४-५२)	९४१
२०२३	विभाषा सुपो बहु०(५-३-६८)	९०९
८२८	विभाषा सेनासुरा०(२-४-२५)	५५१
९८२	विभाषा स्वसृपत्योः (६-३-२४)	६३२
१६६४	विभाषा हविरपूपा० (५-१-४)	८१४
१०१६	विभाषोदरे (६-३-८८)	६४५

सूत्रम्		पार्श्वम्
६२०	विभाषोपसर्गे (२-३-५९)	४५१
१३४२	विभाषोशीनरेषु (४-२-११८)	७४७
१०५१	विभाषौषधिवनस्प० (८-४-६)	६५४
१८६१	विमुक्तादिभ्योऽण् (५-२-६१)	८७०
२७	विरामोऽवसानम् (१-४-११०)	२४
१७७३	विशाखाषाढाद० (५-१-११०)	८४४
९११	विशिष्टलिङ्गो नदीदे०(२-४-७)	५९७
७३६	विशेषणं विशेष्ये० (२-१-५७)	५१३
१३००	विशेषणानां चाजातेः(१-२-५२)	७३६
३७९	विश्वस्य वसुराटोः (६-३-१२८)	२५९
१२६१	विषयो देशे (४-२-५२)	७२४
१०६५	विष्किरः शकुनौ० (६-१-१५०)	६६०
४१८	विष्वग्देवयोश्च टेर०(६-३ ९२)	२८१
१३८	विसर्जनीयस्य सः (८-३-३४)	८६
२०८४	विसारिणो मत्स्ये (५-४-१६)	९३०
१२९२	वुञ्छण्कठजिलसे०(४-२-८०)	७३४
२०६८	वृकाट्टेण्यण् (५-३-११५)	९२४
२०१३	वृद्धस्य च (५-३-६२)	९०६
१३३७	वृद्धाच्छः (४-२-११४)	७४६
११७२	वृद्धाट्टक्सौवीरेषु०(४-१-१४८)	६९८
१३४४	वृद्धात्प्राचाम् (४-२-१२०)	७४८
१३६५	वृद्धादकेकान्तखो०(४-२-१४१)	७५२
८४०	वृद्धिनिमित्तस्य च०(६-३-३९)	५६६
१६	वृद्धिरादैच् (१-१-१)	२०
७२	वृद्धिरेचि (६-१-८८)	५१
१२३५	वृद्धिर्यस्याचामादि०(१-१-७३)	७४६
११८९	वृद्धेत्कोसलाजा०(४ १-१७१)	७०३
९३१	वृद्धो यूना तल्लक्षण०(१-२-६५)	६०७
४९४	वृषाकप्यग्निकुसि०(४-१-३७)	३६९
१८२९	वेः शालच्छङ्कटचौ (५-२-२८)	८६१
१५६२	वेतनादिभ्यो जीवति(४ ४-१२)	७९५
३७५	वेरपृक्तस्य (६-१-६७)	२५६
९६४	वैयाकरणाख्यायां च०(६-३-७)	६२७
५०२	वोतो गुणवचनात् (४-१ ४४)	३७५
८४९	वोपसर्जनस्य (६-३-८२)	५७२
१५७६	व्यञ्जनैरुपसिक्ते (४-४-२६)	७९७
११६८	व्यन्सपत्ने (४-१-१४५)	६९७
६१८	व्यवहृपणोः समर्थयोः(२-३ ५७)	४५०
१४२६	व्याहरति मृगः (४-३-५१)	७६५
१७६१	व्युष्टादिभ्योऽण् (५-१-९७)	८४२
१६८	व्योर्लघुप्रयत्नतरः०(८-३-१८)	१०३
२९४	व्रश्चभ्रस्जसृजमृज०(८-२-३६)	१९२
११००	व्रातच्फञोरस्त्रियां(५ ३-११३)	६८०
१८२२	व्रातेन जीवति (५-२-२१)	८६०
१८०३	व्रीहिशाल्योर्ढक् (५-२-२)	८५४
१५२८	व्रीहेः पुरोडाशे (४-३-१४८)	७८७
१९२३	व्रीह्यादिभ्यश्च (५-२-११६)	८८५
	श	
१६३२	शकटादण् (४-४-८०)	८०८
१६०९	शक्तियष्ट्योरीकक् (४-४-५९)	८०३
१४७२	शण्डिकादिभ्यो ञ्यः (४-३-९२)	७७४
१६९२	शतमानविंशतिक०(५-१-२७)	८२३
१९२६	शतसहस्रान्ताच्च०(५-२-११९)	८८५
१६८६	शताच्च ठन्यतावशते(५-१-२१)	८२१
१८४७	शदन्तविंशतेश्च (५-२-४६)	८६६
४४६	शप्श्यनोर्नित्यम् (७-१-८१)	३२४
१५८४	शब्ददर्दुरं करोति (४-४-३४)	७९९
१५२२	शम्याः ष्लञ् (४-३-१४२)	७८६
९७६	शयवासवासि० (६-३-१८)	६३०
११०४	शरद्वच्छुनक० (४-१-१०२)	६८१
१०४२	शरादीनां च (६-३-१२०)	६५३
१४३०	शरीरावयवाच्च (४-३-५५)	७६६
१६६६	शरीरावयवाद्यत् (५-१-६)	८१४
३४०	शरोऽचि (८-४-४९)	२३०
२०६२	शर्करादिभ्योऽण् (५-३-१०७)	९२२
१३०२	शर्कराया वा (४-२-८३)	७३७
१५०	शर्परे विसर्जनीयः (८-३-३५)	९३
१६०४	शलालुनोऽन्य० (४-४-५४)	८०३
१२०	शश्छोऽटि (८-४-६३)	८०
३९१	शसो न (७-१-२९)	२६६

सूत्रम्		पार्श्वम्
१५०८	शाकलाद्वा (४-३-१२८)	७८२
२०५८	शाखादिभ्यो यः (५-३-१०३)	९२१
१७००	शाणाद्वा (५-१-३५)	८२५
११२	शात् (८-४-४४)	७६
५२७	शार्ङ्गरवाद्यञो ङीन् (४-१-७३)	३९४
१८२१	शालीनकौपीने अ०(५-२-२०)	८५९
१३०८	शिखाया वलच् (४-२-८९)	७३९
१३३	शि तुक् (८-३-३१)	८४
२०५७	शिलाया ढः (५-३-१०२)	९२१
१६०५	शिल्पम् (४-४-५५)	८०३
१११५	शिवादिभ्योऽण् (४-१-११२)	६८५
१४६८	शिशुक्रन्दयमसभ०(४-३-८८)	७७३
३१३	शि सर्वनामस्थानम् (१-१-४२)	२०८
१८७२	शीतोष्णाभ्यां का० (५-२-७२)	८७२
१७३०	शीर्षच्छेदाद्यच्च (५-१-६५)	८३४
१६११	शीलम् (४-४-६१)	८०४
१२२८	शुक्राद्घन् (४-२-२६)	७१५
१४५५	शुण्डिकादिभ्योऽण् (४-३-७६)	७७१
११२६	शुभ्रादिभ्यश्च (४-१-१२३)	६८८
९१४	शूद्राणामनिरवसि०(२-४-१०)	५९८
१६९१	शूर्पादञन्यतरस्याम् (५-१-२६)	८२३
२१३६	शूलात्पाके (५-४-६५)	९४५
१२१८	शूलोखाद्यत् (४-२-१७)	७१२
१८७९	शृङ्खलमस्य बन्ध०(५-२-७९)	८७३
१०२	शे (१-१-१३)	७२
२०३८	शेवलसुपरिविशाल०(५-३-८४)	९१६
८९१	शेषाद्विभाषा (५-४-१५४)	५८६
१३१२	शेषे (४-२-९२)	७४०
३८५	शेषे लोपः (७-२-९०)	२६२
२४३	शेषो घ्यसखि (१-४-७)	१५१
८२९	शेषो बहुव्रीहिः (२-२-२३)	५५२
५०१	शोणात्प्राचाम् (४-१-४३)	३७५
१४८६	शौनकादिभ्यश्छ०(४-३-१०६)	७७८
१२६८	श्येनतिलस्य पाते०(६-३-७१)	७२६
१४०७	श्रविष्ठाफल्गुन्यनू०(४-३-३४)	७६१

सूत्रम्		पार्श्वम्
१६१८	श्राणामांसौदना० (४-४-६७)	८०५
१८८५	श्राद्धमनेन भुक्त० (५-२-८५)	८७४
१३८२	श्राद्धे शरदः (४-३-१२)	७५५
७३८	श्रेण्यादयः कृता० (२-१-५९)	५१४
१८८४	श्रोत्रियंश्छन्दोऽ० (५-२-८४)	८७४
५७२	श्राघह्रुस्थाशपां०(१-४-३४)	४२७
१५५९	श्वगणाट्ठञ् (४-४-११)	७९४
३६२	श्वयुवमघोनाम० (६-४-१३३)	२४६
९३७	श्वशुरः श्वश्वा (१-२-७१)	६१०
१३८५	श्वसस्तुट् च (४-३-१५)	७५६
९४८	श्वसोवसीयःश्रेयसः(५-४-८०)	६२१
१५६०	श्वादेरिञि (७-३-८)	७९४

ष

४७४	षः प्रत्ययस्य (१-३-६)	३५८
१८५१	षट्कतिकतिपय० (५-२-५१)	८६७
३३८	षट्चतुर्भ्यश्च (७-१-५५)	२२९
२६१	षड्भ्यो लुक् (७-१-२२)	१६०
२९५	षडोः कः सि (८-२-४१)	१९२
१७४७	षण्मासाण्ण्यच् (५-१-८३)	८३८
११६०	षपूर्वहन्धृत० (६-४-१३५)	६९६
१७५६	षष्टिकाः षष्टिरात्रेण०(५-१-९०)	८४०
१८५८	षष्ठ्यादेश्चासंख्यादेः(५-२-५८)	८६९
१९९६	षष्ठ्याष्टमाभ्यां च (५-३-५०)	९०२
७०२	षष्ठी (२-३-८)	४९५
६३५	षष्ठी चानादरे (२-३-३८)	४६२
६०६	षष्ठी शेषे (२-३-५०)	४४५
३८	षष्ठी स्थानेयोगा (१-१-४९)	२८
६०७	षष्ठी हेतुप्रयोगे (२-३-२६)	४४६
६०९	षष्ठ्यतसर्थप्रत्ययेन (२-३-३०)	४४६
९७९	षष्ठ्या आक्रोशे (६-३-२१)	६३१
२०००	षष्ठ्या रूप्य च (५-३-५४)	९०२
२११५	षष्ठ्या व्याश्रये (५-४-४८)	९३८
४९८	षिद्भौरादिभ्यश्च (४-१-४१)	३७२
११३	ष्टुना ष्टुः (८-४-४१)	७६
३६९	ष्णान्ता षट् (१-१-२४)	२५०

सूत्रम्		पार्श्वम्
१००३	ष्यङः सम्प्रसारणम् (६-१-१३)	६३९
	स	
१८७८	स एषां ग्रामणीः (५-२-७८)	८७३
११५६	संयोगादिश्च (६-४-१६६)	६९४
५४	संयोगान्तस्य लोपः (८-२-२३)	४०
३२	संयोगे गुरु (१-४-११)	२५
१४२५	संवत्सराग्रहायणी०(४-३-५०)	७६५
१७३७	संशयमापन्नः (५ १-७३)	८३६
१५७२	संसृष्टे (४-४-२२)	७९७
१५५१	संस्कृतम् (५-४-३)	७९३
१२१७	संस्कृतं भक्षाः (४-२-१६)	७१२
५२५	संहितशफलक्षणवा०(४-१-७०)	३९३
१४५	संहितायाम् (६-१-७२)	९१
१०३५	संहितायाम् (६-३-११४)	६५०
५१७	सख्यशिश्वीति भा०(४ १-६२)	३८७
२५३	सख्युरसंबुद्धौ (७-१-९२)	१५६
१७९१	सख्युर्यः (५-१-१२६)	८५१
१२८७	सङ्कलादिभ्यश्च (४-२-७५)	७३३
८४३	सङ्घयाव्ययासन्ना०(२-२-२५)	५६९
७३०	सङ्घयापूर्वो द्विगुः (२-१-५२)	५११
१६८७	सङ्घयाया अतिश०(५-१-२२)	८२२
१८४३	सङ्घयाया अवयवे०(५-२-४२)	८६५
२०८५	सङ्घयायाः क्रिया० (५-४-१७)	९३०
१७५२	सङ्घयायाः संवत्सर०(७-३-१५)	८३९
१७२४	सङ्घयायाः संज्ञासं० (५-१-५८)	८३२
१८४८	सङ्घयाया गुणस्य०(५-२-४७)	८६७
१९८८	सङ्घयाया विधार्थे धा(५-३ ४२)	९००
२१३०	सङ्घयायाश्च गुणा०(५-४-५९)	९४४
६७३	सङ्घया वंश्येन (२-१-१९)	४८२
२३८	सङ्घयाविसायपूर्व०(६-३-११०)	१४८
४८५	सङ्घयाव्ययादेर्ङीप् (४-१-२६)	३६४
८७९	सङ्घयासुपूर्वस्य (५-४-१४०)	५८३
२११०	सङ्घयैकवचनाच्च० (५-४-४३)	९३६
१२६५	सङ्ग्रामे प्रयोजन० (४-२-५६)	७२५
१५०७	सङ्घाङ्कलक्षणेष्व० (४-३-१२७)	७८२

सूत्रम्		पार्श्वम्
८३९	संज्ञापूरण्योश्च (६-३-३८)	५६६
७२१	संज्ञायाम् (२-१-४४)	५०७
५२६	संज्ञायाम् (४-१-७२)	३९४
१४९७	संज्ञायाम् (४-३-११७)	७८०
१८९९	संज्ञायाम् (८-२-११)	८७७
१५९६	संज्ञायां ललाटकु०(४-४-४६)	८०१
१३९५	संज्ञायां शरदो वुञ् (४-३-२७)	७५८
१२०६	संज्ञायां श्रवणाश्वत्था०(४-२-५)	७०९
१५२७	संज्ञायां कन् (४-३-१४७)	७८७
२०३०	संज्ञायां कन् (५-३-७५)	९१२
२०४२	संज्ञायां कन् (५-३-८७)	९१६
८२३	संज्ञायां कन्थोशीनरेषु(२-४-२०)	५५०
२०५२	संज्ञायां च (५-३-९७)	९१९
१६३४	संज्ञायां जन्या (४-४ ८२)	८०८
१६४१	संज्ञायां धेनुष्या (४-४-८९)	८१०
१९४३	संज्ञायां मन्माभ्याम्(५ २-१३७)	८९०
५६७	संज्ञोऽन्यतरस्यां क०(२-३-२२)	४२४
२१३७	सत्यादशपथे (५-४-६६)	९४५
१९७०	सद्यः परुत्परार्यैषमः०(५-३-२२)	८९६
८२१	स नपुंसकम् (२-४-१७)	५४८
१३८७	संधिवेलाद्यृतुनक्ष० (४-३-१६)	७५६
७४०	सन्महत्परमोत्तमो०(२-१-६१)	५१५
२१३२	सपत्रनिष्पत्रादति० (५-४-६१)	९४४
१८८७	सपूर्वाच्च (५-२-८७)	८७५
४१०	सपूर्वायाः प्रथमाया०(८ १-२६)	२७६
६४३	सप्तमीपञ्चम्यौ कार०(२-३-७)	४६४
८९८	सप्तमीविशेषणे बहु०(२-२-३५)	५८८
७१७	सप्तमी शौण्डैः (२-१-४०)	५०६
६३३	सप्तम्यधिकरणे च (२-३-३६)	४५९
१९५७	सप्तम्याख्रल् (५-३-१०)	८९३
१६५७	सभाया यः (४-४-१०५)	८१२
८२६	सभा राजाऽमनुष्य०(२ ४-२३)	५५१
४२१	समः समि (६-३-९३)	२८४
१३५	समः सुटि (८-३-५)	८६
१७६८	समयस्तदस्य प्रा०(५-१-१०४)	८४३

सूत्रम्		पार्श्वम्
२१३१	समयाच्च यापना० (५-४-६०)	९४४
६४७	समर्थः पदविधिः (२-१-१)	४६७
१०७२	समर्थानां प्रथमाद्वा (४-१-८२)	६६३
१५९३	समवायान्समवैति (४-४-४३)	८०१
१८१३	समांसमां विजायते (५-२-१२)	८५७
१६५८	समानतीर्थे वासी (४-४-१०७)	८१२
१०१२	समानस्य च्छन्द० (६-३-८४)	६४३
१६५९	समानोदरे शयि०(४-४-१०८)	८१३
१७७५	समापनात्सपूर्वप०(५-१-११२)	८४५
१७४९	समायाः खः (५-१-८५)	८३८
२०६१	समासाच्च तद्वि० (५-३-१०६)	९२१
६७६	समासान्ताः (५-४-६८)	४८३
१०१९	समासेऽङ्गुलेः सङ्गः(८-३-८०)	६४६
७	समाहारः स्वरितः(१-२-३१)	८
२०९०	समूहवच्च बहुषु (५-४-२२)	९३२
१७६३	सम्पादिनि (५-१-९९)	८४३
१००४	सम्प्रसारणस्य (६-३-१३९)	६३९
३३०	सम्प्रसारणाच्च (६-१-१०८)	२२४
१८३०	सम्प्रोदश्च कटच् (५-२-२९)	८६१
२८८	सम्बुद्धौ च (७-३-१०६)	१८५
१०५	सम्बुद्धौ शाकल्य०(१-१-१६)	७३
५३३	सम्बोधने च (२-३-४७)	३९९
१७१८	सम्भवत्यवहरति०(५-१-५२)	८३०
१४१६	सम्भूते (४-३-४१)	७६४
१८८	सरूपाणामेकशेष० (१-२-६४)	११५
१८०६	सर्वचर्मणः कृतः० (५-२-५)	८५५
४७६	सर्वत्र लोहितादि०(४-१-१८)	३५९
८७	सर्वत्र विभाषा० (६-१-१२२)	६३
५७	सर्वत्र शाकल्यस्य (८-४-५१)	४३
१३९०	सर्वत्राण्च तलोपश्च(४-३-२२)	७५७
२५०	सर्वनामस्थाने चा० (६-४-८)	१५४
२१५	सर्वनाम्नः स्मै (७-१-१४)	१२९
२९१	सर्वनाम्नः स्याड्ढ्र०(७-३-११४)	१८६
६०८	सर्वनाम्नस्तृतीया च(२-३ २७)	४४६
१६७२	सर्वपुरुषाभ्यां णढञौ(५-१-१०)	८१६

सूत्रम्		पार्श्वम्
१७०७	सर्वभूमिपृथिवीभ्या०(५-१-४१)	८२७
२१३९	सर्वस्य द्वे (८-१-१)	९४६
१९५२	सर्वस्य सोऽन्यतर० (५-३-६)	८९२
२१३	सर्वादीनि सर्व० (१-१-२७)	१२७
१९६४	सर्वैकान्यकिंयत्तदः०(५-३ १५)	८९५
१६२	ससजुषो रुः (८ २-६६)	९९
२१०८	सञ्ज्ञौ प्रशंसायाम् (५-४-४०)	९३६
१८६८	सस्येन परिजातः (५-२-६८)	८७१
५१३	सहनञ्विद्यमान० (४-१-५७)	३८६
५६४	सहयुक्तेऽप्रधाने(२-३-१९)	४२३
६४९	सह सुपा (२-१-४)	४६८
१००९	सहस्य सः सं० (६-३-७८)	६४३
४२२	सहस्य सध्रिः (६-३-९५)	२८४
३३५	सहेः साडः सः (८ ३ ५६)	२२७
७७५	साक्षात्प्रभृतीनि च (१-४ ७४)	५२८
१८९१	साक्षाद्द्रष्टरि सं० (५-२-९१)	८७५
२१२३	सात्पदाद्योः (८ ३-१११)	९४१
५६०	साधकतमं करणम् (१-४-४२)	४२१
६४०	साधुनिपुणाभ्या० (२-३-४३)	४६३
३१७	सान्तमहतः संयो०(६-४-१०)	२१०
१८२३	सामपदादीनां सर्व्यम् (५-२ २२)	८६०
४००	साम आकम् (७ १ ३३)	२६९
४११	सामन्त्रितम् (२-३-४८)	२७७
६८९	सामि (२-१ २७)	४८९
१३९१	सायञ्चिरम्प्राह्ण० (४-३-२३)	७५७
११९१	साल्वावयव० (४-१-१७३)	७०३
११८७	साल्वेयगान्धारि०(४-१-१६९)	७०२
३३२	सावनडुहः (७-१-८२)	२२५
१२२३	सास्मिन्पौर्णमासीति(४ २-२१)	७१३
१२२६	सास्य देवता (४-२-२४)	७१४
१९११	सिकताशर्क० (५-२-१०४)	८८१
१२५२	सिति च (१ ४-१६)	७२२
७१८	सिद्धशुष्कपक्व० (२-१-४१)	५०६
१९०४	सिध्मादिभ्यश्च (५-२-९७)	८७९
१४७३	सिन्धुतक्षशिलादि०(४-३-९३)	७७४

सूत्रम्		पार्श्वम्
१४०५	सिन्ध्वपकराभ्यां० (४-३-३२)	७६१
५५५	सुः पूजायाम् (१-४-९४)	४१८
२१३४	सुखप्रियादानुलोम्ये(५-४-६३)	९४५
१९३७	सुखादिभ्यश्च (५ २ १३१)	८८९
२२९	सुडनपुंसकस्य (१-१ ४३)	१४३
१०९७	सुधातुरकञ्च (४-१-९७)	६७९
१८५	सुपः (१-४-१०३)	११४
२०२	सुपि च (७-३-१०२)	१२२
६५०	सुपो धातुप्राति० (२-४-७१)	४६९
२९	सुप्तिङन्तं पदम् (१-४-१४)	२५
६६३	सुप्प्रतिना मात्रार्थे (२-१-९)	४७७
८६०	सुप्रातसुश्वसुदिव०(५-४ १२०)	५७७
१२८९	सुबास्त्वादिभ्योऽ० (४-२ ७७)	७३३
१०२२	सुषामादिषु च (८ ३-९८)	६४७
१३९८	सुसर्वार्धाज्जनपदस्य (७-३-१२)	७५९
८८८	सुहृद्दुर्हृदौ मित्रा० (५-४ १५०)	५८५
१२७७	सूत्राच्च कोपधात् (४-२-६५)	७३१
४९९	सूर्यतिष्यागस्त्यम०(६ ४-१४९)	३७२
११७६	सेनान्तलक्षण० (४ १-१५२)	६९९
१५९५	सेनाया वा (४ ४ ४५)	८०१
१७७	सोऽचि लोपे० (६-१-१३४)	१०९
१६६०	सोदराद्यः (४-४-१०९)	८१३
१५२	सोऽपदादौ (८-३-३८)	९४
१२३२	सोमाट्ट्यण् (४ २-३०)	७१६
१४६९	सोऽस्य निवासः (४-३ ८९)	७७४
१७२२	सोऽस्यांशवस्नभृतयः(५-१-५६)	८३१
१२६४	सोऽस्यादिरिति च्छ०(४-२-५५)	७२५
३५७	सौ च (६-४-१३)	२४२
३८०	स्कोः संयोगाद्योरन्ते (८-२-२९)	२५९
१७९०	स्तेनाद्यन्नलोपश्च (५ १-१२५)	८५०
१११	स्तो श्चुना श्चुः (८-४-४०)	७५
७०१	स्तोकान्तिकदूरार्थ०(२-१-३९)	४९४
३०१	स्त्रियाः (६-४-७९)	१९८
८३१	स्त्रियाः पुंवद्भाषित०(६-३-३४)	५५४
४५३	स्त्रियाम् (४-१-३)	३३५
८८१	स्त्रियां संज्ञायाम् (५-४-१४३)	५८३
३०५	स्त्रियाञ्च (७ १-९६)	२०३
११९५	स्त्रियामवन्तिकु०(४-१-१७६)	७०४
९३२	स्त्री पुंवच्च (१-२-६६)	६०८
१०७९	स्त्रीपुंसाभ्यां नञ्स्न०(४-१-८७)	६६६
११२३	स्त्रीभ्यो ढक् (४-१-१२०)	६८७
१२८८	स्त्रीषु सौवीरसाल्व०(४-२-७६)	७३३
१२१६	स्थण्डिलाच्छयि० (४ २-१५)	७१२
१४१०	स्थानान्तगोशाल० (४-३-३५)	७६२
२०८२	स्थानान्ताद्विभाषा०(५-४-१०)	९२९
४९	स्थानिवदादेशोऽन०(१-१-५६)	३५
३९	स्थानेऽन्तरतमः (१-१-५०)	२८
१७३४	स्थालीबिलात् (५-१-७०)	८३५
२०१५	स्थूलदूरयुवह्रस्व०(६-४-१५६)	९०६
२०७५	स्थूलादिभ्यः प्रकार० (५-४-३)	९२६
९७८	स्थे च भाषायाम् (६ ३-२०)	६३१
४३२	स्पृशोऽनुदके क्विन् (३-२-५८)	२९२
५७४	स्पृहेरीप्सितः (१-४-३६)	४२८
२५	स्वं रूपं शब्दस्याश०(१-१-६८)	२३
५५९	स्वतन्त्रः कर्ता (१-४-५४)	४२१
२१९	स्वमज्ञातिधनाख्या०(१-१-३५)	१३४
३१९	स्वमोर्नपुंसकात् (७ १-२३)	२१३
६८७	स्वयं क्तेन (२-१-२५)	४८८
४४७	स्वरादिनिपातमव्ययं(१-१-३७)	३२७
४६	स्वरितेनाधिकारः (१-३-११)	३२
११६६	स्वसुश्छः (४-१-१४३)	६९७
१५४९	स्वागतादीनाञ्च (७-३-७)	७९२
८४१	स्वाङ्गाच्चेतः (६-३-४०)	५६८
५१०	स्वाङ्गाच्चोपसर्जना० (४-१-५४)	३८२
१८६६	स्वाङ्गेभ्यः प्रसिते (५-२-६६)	८७०
२३०	स्वादिष्वसर्वनाम० (१-४-१७)	१४३
१९३२	स्वामिन्नैश्वर्ये (५-२-१२६)	८८७
६३६	स्वामीश्वराधिपाते० (२-३-३९)	४६२
१८३	स्वौजसमौट्छष्टाभ्यां०(४-१-२)११३

सूत्रम्		पार्श्वम्
	ह	
३५९	हन्तेरत्पूर्वस्य (८-४-२२)	२४२
१५६५	हरत्युत्सङ्गादिभ्यः (४-४-१५)	७९५
११०२	हरितादिभ्योऽञः (४-१-१००)	६८१
१५४६	हरीतक्यादिभ्यश्च (४-३-१६७)	७९१
९६६	हलदन्तात्सप्तम्याः सं० (६-३-९)	६२८
१	हलन्त्यम् (१-३-३)	४
१५०४	हलसीराद्वक् (४-३ १२४)	७८१
१६३३	हलसीराद्वक् (४ ४-८१)	८०८
४७२	हलस्तद्धितस्य (६-४-१५०)	३५८
३५४	हलि च (८-२ ७७)	२४०
३४७	हलि लोपः (७-२ ११३)	२३३
१७१	हलि सर्वेषाम् (८-३-२२)	१०४
३०	हलोऽनन्तराः संयोग (१-१ ७)	२५
६०	हलो यमां यमि लो० (८-४ ६४)	४३
२५२	हल्ङ्याब्भ्यो दीर्घा० (६ १-६८)	१५४
१६६	हशि च (६-१-११४)	१०१
१९३९	हस्ताज्जातौ (५ २-१३३)	८८९
१७९५	हायनान्तयुवा० (५-१-१३०)	८५२
१६१६	हितं भक्षाः (४ ४-६५)	८०५
९९२	हिमकाषिहतिषु च (६-३-५४)	६३६
५५०	हीने (१-४-८६)	४१५
२११४	हीयमानपापयोगाच्च (५-४ ४७)	९३८
५४१	हृक्रोरन्यतरस्याम् (१ ४ ५३)	४११
१६४७	हृदयस्य प्रियः (४-४-९५)	८११
९८८	हृदयस्य हृल्लेखयद० (६-३-५०)	६३५
११२३	हृद्भगसिन्ध्वन्ते पूर्व० (७-३ १९)	६८९
१४६१	हेतुमनुष्येभ्योऽन्य० (४-३-८१)	७७३
५६८	हेतौ (२-३-२३)	४२४
१२७	हे मपरे वा (८-३-२६)	८२
१८२४	हैयङ्गवीनं संज्ञायाम् (५-२-२३)	८६०
९६	हैहेप्रयोगे हैहयोः (८-२-८५)	६९
३२४	हो ढः (८-२-३१)	२२१
१८००	होत्राभ्यश्छः (५-१-१३५)	८५३
३५८	हो हन्तेर्ञ्णिन्नेषु (७-३-५४)	२४२
३१	ह्रस्वं लघु (१-४-१०)	२५
२०८	ह्रस्वनद्यापो नुट् (७-१-५४)	१२५
२४२	ह्रस्वस्य गुणः (७ ३ १०८)	१५१
१३२५	ह्रस्वात्तादौ तद्धिते (८-३-१०१)	७४३
२०४१	ह्रस्वे (५ ३ ८६)	९१६
३१८	ह्रस्वो नपुंसके प्रा० (१-२-४७)	२१२

॥ श्रीरस्तु ॥

॥ अकाराद्यनुक्रमेण कौमुदीपूर्वार्धगतवार्तिकसूचिकाः ॥

वार्तिकम्		सूत्रम्
	अ	
११०३ ११०४	अकर्मकधातुभि०	५३९
३२८५	अकच्प्रकरणे तूष्णी०	२०२८
३६०४	अक्षादूहिन्यामुप०	७३
३९९०	अगोवत्सहले०	८५०
२९११	अभीधः शरणे०	१५००
३०७२	अग्निपदादिभ्य उप०	१७६१
२७४५	अङ्गक्षत्रधर्मत्रि०	१२७०
३४९४	अचि शीर्ष इति वा०	१६६७
१५०७	अज्वरिसन्ताप्यो०	६१५
३८८०	अञ्जस उपसङ्ख्या०	९६०
३०७०	अण् संज्ञायाम्	१७५८
५०१५	अतद्धित इति वा०	१०५७
११६७	अद्रुतायामसंहि०	७५८
८००	अद्वन्द्वतत्पुरुष	९३८
२९६६	अधर्माच्चेति वक्त०	१५९१
२८६९	अध्यात्मादेष्ठञि०	१४३७
३५४४	अध्वपरिमाणे च	६३
४९०१	अनव्ययस्येति०	१५२
२४२६	अनपत्याधिकार०	४७२
१५५६	अकारान्तोत्तरपदो०	८२१
२६८९	अग्निकलिभ्यां ढग्०	१०७८
२८४४	अग्रादिपश्याड्डिमच्	१३९१
१३३६	अल्पादयः क्रान्ताद्यर्थे०	७८०
३२९७	अनजादौ च०	२०३५
४३७८	अनड्वहः स्त्रियामां वा	४९८
५०१६	अनाम्नवतिनग०	११४
१४१०	अनेकप्राग्भावेकत्र०	९०३
८०५	अनेकशफेभ्वि०	९३९
२८४५	अन्ताच्च	१३९१
३८९४	अन्ताच्च	९६९
१५५८	अनो नलोपश्च वा०	८२१
४३३२	अन्त्यात्पूर्वो वा नुम्	४४२
३२१०	अन्येभ्योऽपि दृश्यते	१९१६, १९१९ १९२७
१५६९	अन्वादेशे नपुं०	४४२
३२५६	अपरस्यार्धे पश्चभावो०	७३७
४००५	अपील्वादीनामिति०	१०४३
२४०	अपुरि इति०	२१७
३८७६	अपो योनियन्म०	९७६
१४९३	अप्रत्ययादिभि०	६४०
१४६४	अप्राणिष्विल्पनीय०	५८४
१४४२ १४४३	अभितः परितः०	५४४
१४४२	अभितः परितः०	६५९
१११४	अभिवादिदृशोरात्मनेपदे०	५४१
१०८७	अभुक्त्यर्थस्य न	५४४
३३४०	अभूततद्भाव इ०	२११७
१४१२	अभ्यर्हितश्च	९०५
३९६४	अभ्रूकुंसादीना०	९९९
३९३२	अमानिनीति व०	८४१
२७७९	अमेहक्कत०	१३२४
२७८२	अरण्याण्णः	१३५३, १३२५

वार्तिकम्		सूत्रम्
५०५३	अर्णसो लोपश्च	१९१६
३३२७	अर्धाच्चासन्नि०	१९४१
१२७३ / १२७४	अर्धेन नित्यसमासो०	६९८
३०१८	अर्धाच्चेति०	१६९०
२४७८	अर्यक्षत्रियाभ्यां वा	५०५
३०९२	अर्हतो नुम्च०	१७८८
१४८७ / १४८८	अर्हाणां कर्तृत्वे०	६३४
३१०७	अलाबूतिलोमा०	१८३०
१२५६	अवरस्योपसङ्ख्यानम्	६९३
५०४५	अवर्णान्ताद्वा	९४१
१३३७	अवादयः क्रुष्टाद्यर्थे०	७८०
२७७१ / २७७२	अवारपारार्द्विगृहीता०	१३१३
२७१२	अवेर्दुग्धे०	१२४२
५०५२	अव्ययस्य च्वा०	२११८
४१८७	अव्ययानाम्०	१३२४
५०४०	अशिष्टव्यवहारे०	५६८
४१८५	अश्मनो विकारे०	१५१४
४५३४	अष्टका पितृदै०	४६४
३९५१	अष्टनः कपाले०	८०७
४५९२	असंयुक्ता ये डल०	२९३
४७००	असमासवद्भावे०	२१४७
२४५३	असितपलितयो०	४९६
३९७३	अस्तोश्चेति व०	१००७
२६९०	अस्मिन्नर्थेऽण् डिद्वा०	१२०८
५०३७	अस्य सम्बुद्धौ वा०	४३६
४८५१	अहरादीनां प०	१७२
३३५३	अहर्ग्रहणं द्वन्द्वार्थम्	७८७
२७२२ / २७२३	अह्नः खः क्रतौ	१२५१
	आ	
२९५५	आकर्षात्पर्पा०	१६२५
३०७८	आकालाट्टंश्च	१७७७
२७४६	आख्यानाख्यायिके०	१२७०
३३३४	आग्नीध्रसाधा०	२०९३
२४७७	आचार्यादणत्वञ्च	५०५
११०९	आदिखाद्योर्न	५४०
३३३९	आद्यादिभ्य उ०	२१११
१६३३	आद्ग्रहणं व्यर्थम०	४५२
१५५७	आबन्तो वा	८२१
३२१३	आमयस्योप०	१९२८
३८९८ / ३८९९	आमुष्यायणामुष्य०	९७९
४५२८	आशिषि चुन०	४६४
२४३३	आसुरेरुपसं०	४७७
३०५७	आहतप्रकरणे०	१७४१
५९५२	आहो प्रभृतादिभ्यः	१५४९
	इ	
२७४९ / २७५०	इकन्पदोत्तरपदा०	१२७०
४५१२	इकारादाविति०	१५६०
३९५८	इके चरतावुप०	९९१
३९७७	इत्येऽनभ्याशस्य	१००७
३२४७	इदम इश सम०	१९७०
३२४९	इदमोऽश्भावो०	१९७०
२४४९	इयं त्रिमूर्ची पु०	४९३
३९६३	इयङुवङभावि०	९९९
४९८५	इरिकादिभ्यः प्र०	१०५१
१२३६ / १२४१	इवेन सामासो०	६५०
	ई	
२५५७	ईकक्च	१०७७
६९६	ईयसो बहुव्रीहे०	८९४
१३१६	ईषदुणवचनेनेति०	७५५
	उ	
५४६	उगिद्वर्णग्रह०	२६
४९९०	उत्तरपदं यत्प्रा०	१०५५
४५२९	उत्तरपदलोपे०	४६४
३९६१	उत्तरपदस्य चेति०	९९५
१२८८	उत्तरपदेन परिमाणिना०	७१६

वार्तिकम्	सूत्रम्
१४६० उत्पातेन ज्ञापिते च	५८०
३००३ उपधिशब्दात् खा०	१६७५
२४९१ उपमानात्पक्षाच्चपुच्छाच्च	५११
२३२ उभयोऽन्यत्र	२१७
१४४४ उभसर्वतसोः कार्या०	५४४
३३०३ उवर्णाल्ल इलस्य०	२०३५
३९८१ उष्णभद्रयोः करणे	१००७
ऋ	
३६४० ऋति सवर्णे ऋ वा	८५
१४२१ ऋतुनक्षत्राणां समाक्ष०	९०५
३६०७ ऋते च तृतीया०	७३
५६० ऋतोर्वृद्धिमद्विधा०	१३९७
१५० ऋलृवर्णयोर्मिथः०	१२
४९६९ ऋवर्णान्नस्य णत्वं०	२८२
५०५४ ऋवर्णादपि	२०३५
ऌ	
३६४१ ऌतिसवर्णे ऌ वा	८५
ए	
४२८७ एकतरात्प्रतिषे०	३१६
११९९ एकतिङ् वाक्यम्	४०७
६७३ एकविभक्तावषष्ठ्य०	७१३
३३०६ एकाक्षरपू०	२०३७
३६३७ एकाचो न	८१
५०५२ एकाचो नित्यम्	१५२४
४९१५ एकादेशशास्त्रनि०	१५५
३२३५ एतदो वाच्यः	१९७२
४७१७ एते वान्नावादय०	४०७
३६३१ एवे चानियोगे	७८
ओ	
३२८४ ओकारसकारभकारादौ सुपि०	२०२८
५०३५ ओतो णिदिति वाच्यम्	२८५
३६३४ ओत्वोष्ठ्ययोः स०	७९
औ	
४१८९ औङः श्यां प्रति०	३११
४४८२ औत्वप्रतिषेधः सा०	४३७

वार्तिकम्	सूत्रम्
क	
३२०० कन्छ्रा ह्रस्वत्वं च	१९१४
३१२१ कप्रत्ययाचिका०	१८३४
२४९० कबरमणिविषशरेभ्यो०	५११
१५१९ कमेरनिषेधः	६२७
२६७४ कम्बोजादिभ्य इति०	१९९४
१०८६ कर्मणः करणसंज्ञा०	५७०
१३३९ कर्मप्रवचनीयानां०	७८०
४७०० कर्मव्यतिहारे०	२१४७
३९२१ कल्पब्देशीयरौ	८३६
४९०२ काम्येरारेवे०	१५२
५०४८ कारके ल च ना०	१०२५
३०१९ कार्षापणाष्ठि०	१६९०
१४७८ कालान्समर्मा०	५९४
३९३४ कुक्कुट्यादीनाम०	८३६
१३१७ कृद्योगा च षष्ठी०	७०३
३९३८ कृन्नद्या न	९८६
५०४६ कृष्णोदक्पाण्डुमं०	९४३
३०२५ केवलायाश्चेति०	१६९८
३९३१ कोपधप्रतिषेधे त०	८३८
२९१८ कौपिञ्जल०	१५१२
१४८५ क्तस्येन्विषयस्य०	२३३
१०८५ क्रियया यमभिप्रेति०	५७०
३०५५ क्रोशशतयोजन०	१७३८
३१२२ क्लिन्नस्य चिल्लिपल्ल०	१८३४
१४५९ क्लृपि सम्पद्यमाने च	५८०
४३१ क्वौ लुप्तं न स्थानि०	२७३
२६६९ क्षत्रियसमानशब्दा०	११८६
४५३० क्षिपकादीनां च न	४३४
ख	
३१०० खप्रत्ययानुत्पत्तौ०	१८१३
२४६० खरुसंयोगोपधात्र	५०२
४९०६ खर्परे शरि वा०	१५१
७१६ खलतिकादिषु	१३००
२७३५ खलादिभ्य इनि०	१२६०

वार्तिकम्		सूत्रम्
३३६३	खुरखराभ्यां वा०	८५७
३३६६	ख्यश्च	८५९
१५९१	ख्याञादेशे न	१३९
	ग	
२७२१	गजसहायाभ्यां०	१२५१
२७१९	गणिकाया यञिति०	१२४८
५०३४	गतिकारकेतरपू०	२७२
३३६८	गन्धस्येत्वे तदेका०	८७४
५०४१	गम्यमानापि०	५९४
३९५२	गवि च युक्ते	८०७
४९८९	गिरिनद्यादीनां वा	१०५४
३९८०	गिलांगलं च	१००७
३९७९	गिलेऽगिलस्य	१००७
१४२१	गुङ्वादेः परा सप्तमी	८९८
५०४२	गुणकर्मणि वेष्यते	६२३
३१८५	गुणवचनेभ्यो म०	१८९६
३८४१	गुणान्तरेण तरलोप०	७०३
२५६१	गोरजादिप्र०	१०७७
३५४३	गोर्यूतौ छ०	६३
३१०९	गोष्ठजादयः०	१८३०
	घ	
२९१५	घोषग्रहणमपि०	१५०७
१४२६	घ्यन्तादजाद्यदन्तम्०	९०४
	ङ	
४७८५	ङावुत्तरपदे प्रति०	३५२
	च	
३३१५	चञ्चद्बृहतोरुप०	२५७५
२६२४	चटकादिति वाच्यम्	११३४
३०३६	चतुर्थ्यर्थ०	१७१३
३०६९	चतुर्मासाण्ण्यो०	१७५८
१३११	चतुष्पाज्जातिरिति०	७५३
३९२०	चरट्जातीयरौ	८३६
३०९१	चतुर्वर्णादीनां०	१७८९
३१५८	चतुरश्छयता०	१८५१
३२९६	चतुर्थीदच०	२०३५

वार्तिकम्		सूत्रम्
३२९६ ३३००	चतुर्थीदन०	२०३५
५०२३	चयो द्वितीयाः श०	१३०, २९४, ४४३
२७१३	चरणाद्धर्मान्नाय०	१५०६
२८५७	चित्रारेवती०	१४०८
२८४२	चिरपरुत्परारिभ्य०	१३९१
३१२३	चुल् च	१८३४
११४२	च्व्यर्थ इति वाच्यम्	७७५
	छ	
५०२५	छत्वममीति वा०	१२१
२४५४	छन्दसि क्रमेके	४९६
२६४३	छागवृषयोरपि	११७९
	ज	
११०७	जल्पतिप्रभृतीनामुपसङ्ख्यानम्	५४०
२६९०	जातार्थे प्रति०	१४११
२४७९	जातान्ताच्च	५०८
१४२२	जातिकालसुखादि०	८९९
२४८४	जातिपूर्वादिति वक्तव्यम्	५०८
१०७९	जुगुप्साविराम०	५८७
३१९७	ज्यान्ल्वादिभ्य उ०	१९१०
	ठ	
३९२९	ठक्छसोश्च	८३६
	ड	
४६९७	डाचि बहुलं ट्वे०	८२
४६९७	डाचि विवक्षिते०	२१२८
	त	
३०५६	ततोऽभिगमन०	१७३८
३०३८	तत्पचतीति०	१७१८
५०२१	तत्परे च	५५
३२२८	तदन्ताच्च	१९४१
२७०६	तदस्मिन्वर्तते०	१२४१
२९५१	तदार्हति०	१५४८
३२४३	तदो दावचनमन०	१९६८
३७१३	तद्बृहतोः करप०	१०७१

वार्तिकम्		सूत्रम्
१४७९	तदुक्तादध्वनः	५९४
३२२१	तप्परमरुद्भ्याम्	१९२८
३९१९	तरप्तमपौ	८३६
४४०	तस्य दोषः संयो०	२३५, ४३४
२५८१। २५८४।	तस्येदमित्यप०	१०८८
१४५८	तादर्थ्ये चतुर्थी०	५८०
४५३१	तारका ज्योतिषि	४६४
३१७२	तावतिथेन गृ०	१८७७
२७१३	तिलान्निष्फला०	१२४२
३९२५	तिल्यन्नौ	८३६
४२००	तिष्यपुष्ययोर्नक्षत्राणि०	४९९
२६९१	तीयादीकक् स्वार्थे०	१९९४
४५२६	त्यकनश्च नि०	४६४
४५२५	त्यक्त्यपोश्च	४६३
७९९	त्यदादितः शेषे पुं०	९३८
५०५०	त्यदादीनां फिञ्वा०	११८०
८०१	त्यदादीनां मिथः०	९३८
२७८०	त्यप्नेर्ध्रुव इति०	१३२४
३९१८	त्रतसौ	८३६
५०३८	त्रिचतुर्भ्यो हायन०	४८६
३३५१	त्र्युपाभ्यां चतुरो०	९४५
३९९८	त्रौ च	१०२७
३९२७	त्वतलोर्गुणव०	८३६
	थ	
३७२३	थाल्	८३६
	द	
३९९९	दिक्छब्देभ्यस्तीरस्य०	१०३४
३९०२	दिवश्च दासे	९७९
४००१	दुरो दाशनाशदभ०	१०३४
२७८३	दूरादेत्यः	१३२५
३९९२	दक्षे चेति वक्तव्यम्	१०१७, १०१८
४११८	दन्करपुनः पू०	२८२, ३०६
३२४४	दशिग्रहणाद्भव०	१९६३
११०८	दशेश्च	५४०

वार्तिकम्		सूत्रम्
२५५५	देवाद्यञजौ	१०७७
३९००	देवानां प्रिय इ०	९७९
५०५१	दोष उपसङ्ख्यानम्	१२२१
३२५१	द्युश्वोभयाद्वक्तव्यः	१९७०
१२८७	द्वन्द्वतत्पुरुषयोरुत्तरपदे०	७२८
१५४५	द्विगुप्राप्तापन्नालम्पूर्वगति०	८१२
३१२९	द्विगोर्नित्यम्	१८३८
३३०३	द्वितीयं सन्ध्यक्ष०	२०३७
३११६	द्वित्वे गोयुगच्	१८३०
४४६८	द्विपर्यन्तानामे०	२६५
१५२२	द्विषः शतुर्वा	६२७
४९८४	द्व्यञ्यञ्भ्यामेव	१०५१
	ध	
३२६०	धमुञन्तात्स्वार्थे०	१९९१
१४१८	धर्मादिष्वनियमः	९०२
४५३६	धात्वन्तयकोस्तु०	४६५
३९७५	धेनोर्भव्यायाम्	१००७
	न	
३१९९	नगपांसुपाण्डु०	१५१४
३९८४	नञो नलोपस्तादि०	७५८
१३६१	नञोऽस्त्यर्थानां वा०	८३०
२४२५	नञ्नभ्रीकक्ख्युंस्न०	४७०
२९६७	नराच्चेति०	१५९५
३३२७	नवस्य नू आदेश०	२०९३
२६९२	न विद्यायाः	१५९४
३३२८	नश्च पुराणे प्रात्	२०९३
३६८४	न समासे	९१
३४९३	नस्नासिकायाः	१३६६
४९०	नानर्थकेऽलोऽन्त्य०	३४७
४१८३	नान्तस्य टिलोपे०	१४८८
३६३८	नित्यमाम्रेडिते डाचि०	२१२८
१४७४	निमित्तपर्यायप्रयोगे०	६०८
१४९०	निमित्तात्कर्मयोगे	६३१
१११०	नियन्तृकर्तृकस्य०	५४०
१३३९	निरादयः क्रान्ताद्यर्थे०	७८०

वार्तिकम्		सूत्रम्
३९५९	निष्के चेति वा०	९९४
२७८१	निसो गते	१३२४
२४५६	नीलादोषधौ	५००
२६८०	नील्या अन्वक्तव्य:	५००, १२०३
११०९	नीवह्योर्न	५४०
४३७४	नुमचिर०	२८०, २९९, ३२०, ३२२, ३२३
३३६०	नेतुर्नक्षत्रे अव्व०	८५४

प

२८६८	पञ्चजनादुपसं०	१४३५
२९९६	पञ्चजनादुप०	१६७१
२९०८	पत्तूद्राह्ये	१५०३
१५५४	पथ: सङ्ख्याव्ययादे:	८२१
२८१९	पथ्यध्यायन्याय०	१३५३
३२४८	परस्मादेयव्य०	१९७०
२८६६	परिमुखादिभ्य०	१४३६
४६८३	परेर्वर्जने वावच०	२१४१
५१९	पर्यायस्यैवेष्यते	८२६
१३३८	पर्यादयो ग्लानाद्यर्थे०	७८०
२७२४	पर्श्वा णस् वक्तव्य:	१२५१
३३५२	पल्यराजभ्यां चे०	९४६
२४८०	पाणिगृहीती भार्यायाम्	५०८
२६७१	पाण्डोर्ज्यण्	११८६
१५५९	पात्राद्यन्तस्य न	८२१
३३१४	पादशतप्रहण०	२०७३
२४६१	पालकान्तान्न	५०४
५०३३	पाशकल्पकका०	१५२
२७१४	पिञ्जश्छन्दसि ञिञ्च	१२४२
२७०८	पितुर्भ्रातरि व्यत्	१२४२
२४५५	पिशङ्गादुपसं०	४९६
३२२४	पिशाचाच्च	१९३५
२६८१	पीतात्कन्	१२०३
१५५३	पुण्यसुदिनाभ्यामह्न:०	८२१
२४८९	पुच्छाच्च	५११
३०००	पुरुषाद्धविकार०	१६७२
३३५९ ३९१०	पुंवद्भावप्रतिषेधोऽप्र०	८३२
२९५०	पुष्पमूलेषु०	१५४५
३८८१	पुंसानुजो जनुषा०	९६०
३८८२	पूरण इति वक्तव्यम्	९६३
२६७०	पूरोरण्वक्तव्य:	११८६
२७०७	पूर्णमासादण्वक्तव्य:	१२४१
४३३	पूर्वत्रासिद्धे न०	२३५, ४३४
३२४६	पूर्वपूर्वतरयो:०	१९७०
३२५०	पूर्वान्न्यान्यतर०	१९७०
२९५३	पृच्छतौ सुस्नाता०	१५४९
२५५४	पृथिव्याञ्चौ	१०७७
४२११	पृथुमृदुभृश०	१७८७
२७२०	पृष्ठादुपसङ्ख्यानम्	१२५०
४२१४	प्रकृत्या अके०	१२४७
१४६६	प्रकृत्यादिभ्य उपसङ्ख्यानम्	५६१
३१४०	प्रकृतिप्रत्ययार्थ०	१८४६
१३२०	प्रतिपदविधाना०	७०४
५०१७	प्रत्यये भाषायां०	११६
१०३६	प्रथमलिङ्गप्र०	२६६
३१३३	प्रमाणपरिमाणा०	१८३८
३१२८	प्रमाणे ल:	१८३८
४६८१	प्रयोजनं सुब्लोप०	२१४६
३६०८ ३६०९	प्रवत्सतरकम्बल०	७३
१४२५	प्रहरणार्थेभ्य: प०	९००
३९५३	प्राक्शताद्वक्तव्यम्	८०८
२४५७	प्राणिनि च	५००
३१८९	प्राण्यङ्गादेव	१९०३
१३३५	प्रादयो गताद्यर्थे०	७८०
१३६०	प्रादिभ्यो धातुजस्य०	८३०
३६०५	प्रादूहोढोढ्येषै०	७३
३७१४	प्रायस्य चित्तिचि०	१०७१

फ

२९४९	फलपाकशुषा०	१५४५

वार्तिकम्		सूत्रम्
३२१५	फलबर्हाभ्या०	१९२८
१५४०	फलसेनावनस्प०	९१६
२८५८	फल्गुन्यषाढाभ्यां०	१४०८
	ब	
३२१९	बलादृलः	१९२८
२५५६	बहिषष्टिलोपो यञ	१०७७
३०२४	बहुपूर्वाह्वेति०	१६९५
२४०७	बहुर्व्रीहौ वा	४५६
४३३१	बहूर्जि नुम्प्रतिषेधः	४४३
३३३८	बह्वल्पार्थान्म०	२१०९
३२२५	बाहृहपूर्वप०	१९४१
३०३५	ब्रह्मवर्चसादुप०	१७०५
३८७८	ब्राह्मणाच्छंसिन०	९५९
	भ	
१११९	भक्षेरदिसार्थस्य न	५४०
३३४४	भद्राभेति व०	२१३८
१२७५	भयभीतभीतिभी०	६९९
३११९	भवने क्षेत्रेशा०	१८३०
२८८२	भवार्थे तु लुग्वाच्यः	१०७७
३९२८	भस्यादे तद्धिते	८३६, ८४२
३३३०	भागरूपनाम०	२०९३
२९५९	भावप्रत्ययान्ता०	१५७०
३१८३	भूमनिन्दाप्र०	१८९४
४८६५	भो राजन्यवि०	९४
१४१६	भ्रातुर्व्यायसः	९०५
३९७८	भ्राष्ट्राग्न्योरिन्धे	१००७
	म	
४१९८	मत्स्यस्य ह्रस्वाम्	४९९, ५१८
७१७	मनुष्यर्लुप०	१३००
३९५०	महतः आत्त्वे घासकर०	८०७
२९९८	महाजनाद्गः	१६७१
३०६४	महानाम्न्यादिभ्यः०	१७५८
२७६१	महिषाभेति०	१३०६
२७१०	मातरि पिच	४९९, १२४२
३४४९	मातर्मातृकमा०	१००५

वार्तिकम्		सूत्रम्
२७०८	मातुर्डुलच्	१२४२
२७०९	मातृपितृभ्यां पितरि०	१२४२
४५२४	मामकनरकयोः	४६३
३४९६	मांसपूतनासानू०	२९५
४६३४	मासश्छन्दसि	३१७
५०४४	मिथोऽनयोः समासे०	८९८
४९११	मुहुसः प्रतिषेधः	१५५
२५००	मूलान्नञः	४५४
	य	
३०५२	यज्ञार्त्विग्भ्यां०	१७३५
५०१८	यणो मयो द्वे वा०	५४
४८०६	यणः प्रतिषेधो०	५४
१४७७	यतश्चाध्वकाल०	५९४
४९०२	यवलपरे यव०	१२७
२४७३	यवाद्दोषे	५०५
२४७४	यवनाड्यिाम्	५०५
४९९१	युवादेर्न	१०५५
२६५१	यूनश्च कुत्सायां०	१०९२
	र	
२५०२	रज्ज्वादिपर्युदासादु०	५२१
५०३६	रत्वान्पूर्वविप्रतिषेधेन नुम्	३००
३१९८	रप्रकरणे खमु०	१९१४
२६२७	राज्ञो जातावेवेति०	११५३
३९२२	रूपप्पाशपौ	८३६
४८४७	रूपरात्रिरथन्त०	१७२
	ल	
१४१३	लघ्वक्षरं पूर्वम्	९०५
३३२२	लिङ्गबाधनं वा	२१००
३९७६	लोकस्य पृणे	१००७
३२९८	लोपः पूर्वपदस्य०	२०३५
२५६०	लोम्नोऽपत्येषु बहु०	२६५, १०७७
१४७४ १४७५	ल्यब्लोपे कर्मण्य०	५९४
	व	
३१७५	वटकेभ्य इ०	१८८२

वार्तिकम्		सूत्रम्
३१३४	वत्वन्तात्स्वार्थे०	१८३८
२४०५	वनो न हश इति०	४५६
२४३५	वयस्य चरम इ०	४७८
२४४१	वयोवाचकस्यैव हा०	४८६
३३६५	वेर्ग्रो वक्तव्य:	८५९
४५३२	वर्णका तान्तवे	४६४
१४१५	वर्णानामानुपूर्व्ये०	९०५
१५३३	वर्तका शकुनौ०	४६४
२९१०	वहेम्तुरणिट् च	१५००
२८२०	वा गोमयेषु	१३५३
३८९७	वाग्दिक्पश्यद्भ्यो०	९७९
३०३३	वातपित्तश्लेष्मभ्य:०	१७०४
३२२०	वातात्समूहे०	१९२८
५७६	वा नामधेयस्य०	१३३८
१४२०	वा प्रियस्य	८९८
३९०७	वायुशब्दप्रयोगे०	९२२
५०२२	वाहतजग्धयो:	५५
४२१५	वा हितनाम्न इति०	११५७
३९०३	विद्यायोनिसम्बन्धे०	९८१
२७४४	विद्यालक्षण०	१२७०
३२९९	विनापि प्रत्ययं०	२०३५
४२३८	विभक्तौ लिङ्गवि०	३००
२९५	विभाजयितु०	१५९९
२४२	विभाषाप्रकरणे	२२६
२९६८	विशसितु०	१५९९
३९०९	विष्णौ न	९२५
३१९४	विष्वगित्युत्तर०	१९०७
३११५	विस्तारे पटच्	१८३०
५१८	वृक्षादौ विशेषाणा०	९१६
३१९५	वृत्तेश्च	१९०८
२६५४	वृद्धस्य च पूजायां०	१०९२
२७१६	वृद्धाच्चेति वक्तव्यम्	१२४७
४३७३	वृञ्यौत्त्वतृज्वद्भाव०	३२०
२९६५	वृद्धेर्वृधुषिभावो०	१५८०
२९१४	वैरे देवासुरादिभ्य:	१५०५

वार्तिकम्		सूत्रम्
२६११	व्यासवरुडनिषाद०	१०९७
	श	
२६७९	शकलकर्दमाभ्या०	१२०३
३६३४	शकन्ध्वादिषु प०	७९
२७०२	शतरुद्राद्धश्च०	१२३०
५०४९	शुनो दन्तदंष्ट्राकर्ण०	१०४९
११०५	शब्दायतेर्न०	५४०
५०१९	शर: खय:	१३८
३९२६	शसि बहल्पार्थस्य०	८३६
१३१०	शाकपार्थिवादीनां०	७३९
३२०९	शिखामालादि०	१९२३
३२८६	शीले को मलोपश्च	२०२८
३२१७	शीतोष्णतृप्रेभ्य०	१९२८
२४०० २४०१	शुद्रा चामहत्पू०	४५४
३२१४	शृङ्गवृन्दाभ्या०	१९२८
३९०१	शेफपुच्छलाङ्गूले०	९७९
१५१३	शेषे विभाषा	६२४
२८५९	श्रविष्ठाषाढाभ्यां०	१४०८
१२९६	श्रेण्यादिषु च्व्यर्थवचनं०	७३८
३०९३	श्रोत्रियस्य य०	१७९५
५०३९	श्वशुरस्योकाराकारलोपश्च	५२३
	ष	
३११७	षड्त्वे षड्वच्	१८३०
४००१ ४००२	षष उत्त्वं दतृदशधा०	८११
३३०७	षषष्ठाजादिव०	२०३७
२५०५	षाद्यञश्चाब्वाच्य:	५२८
	स	
३०१८	सङ्ख्यापूर्वपदानां०	१६८३
१४१७	सङ्ख्याया अल्पीयस्या:	८९८
५०४७	सङ्ख्याया नदीगो०	९४३
३३४८	सङ्ख्यायास्तत्पुरु०	८५१
३११०	सङ्घाते कटच्	१८३०
२४५८	संज्ञायां च	५००

वार्तिकम्	सूत्रम्
३०३९ संज्ञायां स्वार्थे०	१७२४
२२५ संज्ञोपसर्जनीभूता०	२२२
४८९२ सम्पुङ्कानां सो०	१३८, १३९
४७८६ सम्बुद्धौ नपुंसका०	३६८
२४९७ सम्भस्त्राजिनशण०	४५४
५०५६ सम्भ्रमेण प्रवृत्तौ०	२१४७
२४९६ सदन्तान्डप्रान्तश०	४५४
४७३४ समानवाक्ये निघा०	४०७
३२४५ समानस्य०	१९७०
५४५ समासप्रत्यय०	२६
१२४६ समाहारे चायमिष्यते	६७४
२९१२ समिधामाधाने०	१५००
२९९७ सर्वजनाट्ठञ्	१६७१
२६८९ सर्वत्राग्नि	१२२६
४१९ सर्वनामसङ्ख्ययो०	८९८
१३७६ सर्वनाम्नो वृत्तिमात्रे०	७२८, २१४७
२९९९ सर्वाण्णो वेति०	१६७२
३२२६ सर्वादेश्च	१९४१
२७४८ सर्वादेः सादेश्च०	१२५०, १७८९
३२४० सर्वोभयार्था०	१९५६
७२९ सार्वशेषणस्य प्रतिषेधः	८१८
३०९४ सहायाद्वा०	१७९७
२५०३ सहितसहाभ्यां चेति०	५२५
१४८६ साध्वसाधुप्रयोगे च	६३३
५०४३ सामान्ये नपुंसकम्	८२१
३६८४ सिति च	९१
३६३३ सीमन्तः केश०	७९
५५९ सुसर्वार्धदिक्छब्देभ्यो०	१३९८
४५३५ सूतकापुत्रिका०	४६४
२७४४ सूत्रान्ताट्ठक०	१२७०
४१९९ सूर्यागस्त्ययोश्छे०	४९९
२४७१ सूर्याद्देवतायां चाण्वाक्यः	११००
३०४५ स्तोमे डविधिः	१०५०
४७०१ स्त्रीनपुंसकयो०	२१४०
१५१३ स्त्रीप्रत्ययोरकाकार०	६६४
४८६४ स्त्रियां न	४४
३३६७ स्त्रियाम्	४८४
२६२५ स्त्रियामपत्ये०	११३०
२५५९ स्थाम्नोऽकार०	१०७७
१५३५ १५३६ स्थेणोर्लुडीति व०	९०७
३११८ स्नेहे तैलस्य	१८३०
३३४६ स्वतिभ्यामेव	४५४
५२३ स्वरूपस्य०	१४८५
३६०६ स्वार्दारेरिणोः	८३
२७४४ स्वार्थ उपसङ्ख्यानम्	१२६४

ह

२४९५ हयगवयमुकयमनुष्य०	१०१४
२६८२ हरिद्रामहार०	१३०३
७१५ हरीतक्यादिषु०	१३००
१४६१ हितयोगे च	७०
३२१८ हिमाच्चेलुः	१९३०
२४७२ हिमारण्ययोर्महत्त्वे	१०१०
३८८५ हृदयुभ्याञ	९३०
३२१६ हृदयाच्चालुरन्य०	१९३८

॥ श्रीरस्तु ॥

॥ कौमुदीपूर्वार्धगतपरिभाषासूचिकाः ॥

५७	अकृतव्यूहाः पा०	४६,४१७,४३५	३०	पदाङ्गाधिकारे०	२२७
९३	अङ्गकार्ये कृते०	३८८	३९	परनित्यान्तर०	४६
६२	अनन्तरस्य वि०	३७९	६०	पुरस्तादपवादा०	१९१
१७	अनिनस्मन्ग्रह०	३७९, ८९०	३७	प्रकृतिवदनु०	२८३
१०४	अन्त्यबाधेऽन्त्य०	४१९	२४	प्रत्ययग्रहणे०	२१७, ४५६
१५	अर्थवद्ग्रहणे०	७३	७२	प्रातिपदिकस्य०	१८२
५१	असिद्धं बहि०	४३	१४	यत्रानेकविध०	३९
२६	उत्तरपदाधिका०	९८८	११४	लक्षणप्रतिपदो०	८०७
१०३	उपपदविभक्तेः०	५८३	७०	लाश्रयमनुबन्ध०	४७८
२९	कृद्ग्रहणे गतिकार०	३९४	२८	संज्ञाविधौ प्र०	२१७
७६	गतिकारकोपप०	७८२	९४	संज्ञापूर्वको वि०	८४७
६८	ताच्छीलिके णेऽपि	४७०	८६	सन्निपातलक्षणो०	२०४
१०५	नानर्थकेऽलोन्त्य०	३४७	८७	[illegible]	१३११
६	नानुबन्धकृत०	२१४	[illegible]	[illegible]	१०००
१३	निर्दिश्यमानस्या०				